के समान । जो आलम्बन के साथ हो वह सालम्ब होता है अर्थात् साकार ज्ञान—

'इच्छा अथवा ज्ञान के उत्पन्न होने पर चित्त को वहाँ लगाये । बुद्धि के द्वारा एकाग्रचित होने पर आत्मदर्शन हो जाता है ॥' (वि०भै० ९८)

के समान । न इन्द्रियाँ हैं न भूत हैं अर्थात् तत्तद् धारणापटल में कथित नीति के अनुसार सब कुछ छोड़ कर समाधिस्थ = किसी का चिन्तन किये बिना केवल अपने स्वरूप का विमर्श करने वाला, आनन्दपद में संलीन समरस ज्ञानमय हो जाता है ॥ ४४ ॥

इस प्रकार की जो दशा है—

वह परमात्मा की परम अवस्था कही गयी है । वही निराभास पद है । उसको प्राप्त कर (योगी) विनिवृत्त हो जाता है ॥ ४५ ॥

अतश्च यः—

भावयेदेवमात्मानमात्मनो भावनाबलात् ।
स गच्छेत् परमं शान्तं शिवमत्यन्तनिर्मलम् ॥ ४६ ॥

आत्मनो निर्विकल्पसंवेदनस्य या भावना विकल्पहानेन संपादना, तस्या यद्बलं विमर्शदाढर्यं तेन भावयेत् ॥ ४६ ॥

किं च—

तत्तत्त्वमेकं सर्वत्र भवति(ते) मृत्युजिच्छिवम् ।
तच्चामृतेशं परमं तृतीयं पदमुत्तमम् ॥ ४७ ॥
आख्यातं तव देवेशि किमन्यत् कथयामि ते ।

सर्वत्र क्षित्याद्यनाश्रितान्ते, तदेवैकमद्वितीयम्, तत्त्वं पारमार्थिकं स्वरूपम्, शिवं श्रेयोरूपम्, मृत्युजिद्भवति । तृतीयमिति प्रोक्तस्थूलसूक्ष्मज्ञानद्वयापेक्षया, तवेत्यनुग्रहैकपरायाः, किमन्यत् कथयामीति नातोऽन्यद्रहस्यं कथनीयं किञ्चिदस्तीत्यर्थः ॥

एतदुपसंहरति—

(विनिवृत्त हो जाता है =) सांसारिक स्थिति को छोड़ देता है ॥ ४५ ॥

इसलिये जो (साधक)—

अपने भावना के बल से आत्मा की इस प्रकार भावना करता है । वह अत्यन्त निर्मल परम शान्त शिवभाव को प्राप्त हो जाता है ॥ ४६ ॥

अपने निर्विकल्पक संवेदन की जो भावना = विकल्प के परित्याग से सम्पादना, उसका जो बल = विमर्श की दृढ़ता, उसके द्वारा भावना करनी चाहिये ॥ ४६ ॥

और भी—

वही एक तत्त्व जो कि सर्वव्यापी और शिव है, मृत्युञ्जय (के नाम से ज्ञात) होता है । वही परम अमृतेश और उत्तम तृतीय पद है । हे देवेशि ! (मैंने उसको) तुम्हें बतलाया, तुमको और क्या बतलाऊँ ॥ ४७-४८- ॥

सर्वत्र = पृथिवी से लेकर अनाश्रित शिवपर्यन्त; वही एक = अद्वितीय; तत्त्व = पारमार्थिक स्वरूप; शिव = कल्याणकारी, मृत्युजित् होता है । तीसरा = उपर्युक्त स्थूल सूक्ष्म दो ज्ञानों की अपेक्षा । तुमको जो कि अनुग्रहपरायणा हो; दूसरा क्या कहूँ—इसके अतिरिक्त कोई और रहस्य कथनीय नहीं है ॥

इसका उपसंहार करते हैं—

एवं मृत्युजिता सर्वं ध्यात्वा व्याप्तं विमुच्यते ॥ ४८ ॥

योगी ॥ ४८ ॥

एतच्च—

सर्वकालं तु कालस्य वञ्चनं कथितं प्रिये ।

अकालकलितचिद्धामसमावेशोपदेशात् ॥

प्रकृतमुपसंहृत्य पूर्वप्रस्तुतमुपसंहरति—

एवं तु त्रिविधं देवि मया ते प्रकटीकृतम् ॥ ४९ ॥
कालस्य वञ्चनं नाम..........

एष च—

................योगः परमदुर्लभः ।

किं च—

अनेनाभ्यासयोगेन मृत्युजिद् भवति(ते) नरः ॥ ५० ॥

न केवलमात्मनः, यावत्—

इस प्रकार योगी सब कुछ को मृत्युञ्जय से व्याप्त हुआ ध्यान कर मुक्त हो जाता है ॥ ४८ ॥

योगी (मुक्त हो जाता है) ॥ ४८ ॥

और यह—

हे प्रिये ! काल का अपसारक सर्वकाल तुमको बतलाया गया ॥४९-॥

अकालकलित चिद्धाम के समावेश के उपदेश के कारण (यह कहा गया) ॥

प्रस्तुत का उपसंहार कर पूर्वप्रस्तुत को उपसंहृत करते हैं—

हे देवि ! इस प्रकार मैंने तुम्हें काल का तीन प्रकार का वञ्चन (= त्याग) बतलाया ॥ -४९-५०- ॥

यह—

योग परम दुर्लभ है ॥ -५०- ॥

और भी—

इसके अभ्यासयोग से मनुष्य मृत्युजित् हो जाता है ॥ -५० ॥

न केवल अपनी मृत्यु बल्कि—

अनेनैव तु योगेन लोकानुग्रहकाम्यया।
भवते मृत्युजिद्योगी सर्वप्राणिषु सर्वदा ॥ ५१ ॥

एतज्ज्ञाननिष्ठो विश्वानुग्रहकरणक्षम इत्यर्थः ।

यत्त्वत्राधिकारे परं ज्ञानमुक्तम्—

एष मृत्युञ्जयः ख्यातः शाश्वतः परमो ध्रुवः ।
अस्मात् परतरो नास्ति सत्यमेतद्वदाम्यहम् ॥ ५२ ॥

शिष्याणामत्रार्थे दृढ आश्वासो जायतामित्याशयेनादरादुक्तमर्थमत्युपादेयत्वात् पुनः पुनरादिशति—

यत्परामृतरूपं तु त्रिविधं चोदितं मया ।
तदभ्यासाद् भवेज्जन्तुरात्मनोऽथ परस्य वा ॥ ५३ ॥
अमृतेशसमो देवि मृत्युजिन्नात्र संशयः ।

किञ्चेमं मृत्युजिन्नाथम्—

येन येन प्रकारेण यत्र यत्रैव संस्मरेत् ॥ ५४ ॥
तेन तेनैव भावेन स योगी कालजिद् भवेत् ।

संसारी लोगों के ऊपर कृपा करने की इच्छा से इस योग के द्वारा योगी सभी प्राणियों के विषय में सर्वदा मृत्युजित् होता है । (अर्थात् अन्य प्राणियों को भी मृत्यु से छुटकारा दिला सकता है) ॥ ५१ ॥

इस ज्ञान में परिनिष्ठित योगी विश्व के ऊपर अनुग्रह करने में सक्षम होता है ॥

इस अधिकार जो पर ज्ञान कहा गया—

वह शाश्वत परम ध्रुव मृत्युञ्जय कहा गया है । इससे बढ़कर कुछ नहीं है । यह मैं सत्य कह रहा हूँ ॥ ५२ ॥

इस विषय में शिष्यों को दृढ़ विश्वास उत्पन्न हो इस आशय से आदरपूर्वक कहे गये अर्थ को, अत्यन्त ग्राह्य होने के कारण, बार-बार कह रहे हैं—

जो तीन प्रकार का पर अमृत मैंने (तुमको) बतलाया उसके अभ्यास से मनुष्य अपने और दूसरे के लिये अमृतेशतुल्य होकर मृत्युजित् हो जाता है । हे देवि ! इसमें संशय नहीं है ॥ ५३-५४- ॥

इस मृत्युञ्जयभट्टारक का—

योगी जिस-जिस प्रकार से जहाँ-जहाँ (उसका) स्मरण करता है उसी-उसी भाव से वह कालजयी हो जाता है ॥ -५४-५५- ॥

येन येनेत्याणवेन शाक्तेन शाम्भवेन वा । यत्र यत्रेति नात्र देशकालावस्थादि-नियम इत्यर्थः ॥

अयं च योगी—

यत्र यत्र स्थितो वापि येन येन व्रतेन वा॥ ५५ ॥
येन येन च योगेन भावभेदेन सिद्ध्यति ।

येन येन योगेन तत्तत्संहितासु योगपादोक्तेन, भावभेदेनेत्येतत्तत्त्वनिष्ठभावना-विशेषेण ॥

यच्चेदममृतेशनाथाख्यं परं तत्त्वम्—

तदेकं बहुधा देवि ध्यातं वै सिद्धिदं भवेत्॥ ५६ ॥
द्वैताद्वैतविमिश्रे वा एकवीरेऽथ यामले ।
सर्वशास्त्रप्रकारेण सर्वदा सिद्धिदं भवेत् ॥ ५७ ॥

एकमिति पराद्वयस्वतन्त्रचित्सतत्त्वम्, अत एव बहुधेत्येतत्स्वातन्त्र्यावभासित-भाविपटलवक्ष्यमाणश्रीसदाशिवतुम्बुरुभैरवकुलेश्वरादिरूपतया ध्यातं सिद्धिं ददात्येवे-त्यर्थः । परमाद्वैतरूपत्वाच्चास्य नाथस्य द्वैताद्वैतादिसर्वप्रकारक्रोडीकारित्वं न विरुध्यते । वक्ष्यति चैकविंशाधिकारे—

जिस-जिस = आणव, शाक्त अथवा शाम्भव उपाय से । जहाँ-जहाँ = इस विषय में देश काल अवस्था का नियम (= प्रतिबन्ध) नहीं है—यह तात्पर्य है ॥

और यह योगी—

जहाँ-जहाँ, जिस-जिस व्रत से तथा जिस-जिस योग से स्थित होता है, भावना के भेद से (वहाँ-वहाँ) उसे (वह) सिद्धि मिलती है ॥ ५५-५६- ॥

जिस-जिस योग से = भिन्न-भिन्न संहिताओं में योगपाद में कथित (योग) से । भाव के भेद से = इस तत्त्व में स्थित भावनाविशेष के द्वारा ॥

जो यह अमृतेशनाथ नामक पर तत्त्व है—

एक होने पर भी अनेक प्रकार से ध्यात होने पर यह सिद्धिदाता हो जाता है । द्वैत, अद्वैत, विमिश्र (= द्वैताद्वैत), एकवीर, यामल, सब में सब शास्त्रों के प्रकार में यह सिद्धि प्रदान करता है ॥ -५६-५७ ॥

एक = पर अद्वय स्वतन्त्र चित्तत्त्व । इसीलिये बहुधा = स्वातन्त्र्य के कारण अवभासित भावी पटल में वक्ष्यमाण सदाशिव तुम्बुरु भैरव कुलेश्वर आदि के रूप में ध्यात होने पर सिद्धि को देता ही है । यतो हि यह अमृतेशनाथ परम अद्वैत रूप है इसलिये इनके यहाँ द्वैत अद्वैत आदि सभी भेदों का क्रोडीकारित्व (= सङ्क्रम)

'अद्वैतं कल्पनाहीनं चिद्घनम् ।' (२१।२३) इति ॥ ५७ ॥

किं च—

चिन्तारत्नं यथा लोके चिन्तितार्थफलप्रदम् ।
तथैव मन्त्रराजस्तु चिन्तितार्थफलप्रदः ॥ ५८ ॥

अत्रत्य इत्यर्थः ॥ ५८ ॥

किं च—

मन्त्राणां सप्तकोटीनामालयः परमो बली ।

तेषामपि पराद्वयैकवीर्यत्वात् ॥

अपि च—

भावहीनास्तु ये मन्त्राः शक्तिहीनास्तु कीलिताः ॥ ५९ ॥
वर्णमात्राविहीनास्तु गुर्वागमविवर्जिताः ।
भ्रष्टाम्नायविहीना ये आगमोज्झितविघ्निताः ॥ ६० ॥
न सिद्ध्यन्ति यदा देवि जप्ता इष्टाः सहस्रशः ।
असिद्धा रिपवो ये च सर्वांशकविवर्जिताः ॥ ६१ ॥
आद्यन्तसंपुटेनैव साद्यर्णेन तु रोधिताः ।
मन्त्रेणानेन देवेशि अमृतेशेन जीविताः ॥ ६२ ॥

परस्पर विरुद्ध नहीं होता । इक्कीसवें अधिकार में कहेंगे भी—

'वह तत्त्व अद्वैत कल्पनाहीन और चिद्घन है' ॥ ५७ ॥

और भी—

संसार में जिस प्रकार चिन्तामणिरत्न चिन्तितविषयक फल देता है उसी प्रकार यह मन्त्रराज चिन्तित अर्थरूपी फल को देने वाला है ॥ ५८ ॥

और भी—

यह सात करोड़ मन्त्रों का आलय है अत एव परम बली है ॥ ५९-॥

क्योंकि वे (सात करोड़ मन्त्र) भी परमवीर्य वाले हैं ॥

और भी—

जो मन्त्र भावहीन, शक्तिहीन, कीलित, वर्णमात्राविहीन, गुरु की परम्परा से रहित, भ्रष्ट आम्नाय के कारण नष्ट, आगम से त्यक्त, विघ्नित हैं तथा इष्टरूप में हजारों बार जप किये जाने पर भी सिद्ध नहीं होते, उसी प्रकार जो असिद्ध शत्रु हैं सर्वांश से रहित है आदि वर्ण के सहित आद्यन्त सम्पुट

सिद्ध्यन्ति ह्यप्रयत्नेन जप्ता इष्टा न संशयः ।
ध्याताः सर्वप्रदा देवि भवन्ति न वचोऽनृतम् ॥ ६३ ॥

भावहीना अज्ञातवीर्याः, शक्तिहीनाः साञ्जनाः । यथोक्तम्—

'साञ्जनास्तेऽण्डमध्यस्थाः सात्त्वराजसतामसाः ।' इति ।

कीलिता व्यत्यस्तवर्णपदाः, गुर्वाम्नायविवर्जिताः शिष्यैः स्वयमेव पुस्तकाद् गृहीताः, भ्रष्टाम्नाया अज्ञातसंहितोत्थानाः, तत एव विनष्टाः, आगमोज्झितैर्विघ्निता नित्यं क्षुद्रसिद्धिविनियोगेन विघ्नाभिभूताः कृताः । असिद्धा रिपवो ये इति नामाक्षरान्मन्त्राक्षरं मातृकाक्रमेणाङ्गुलिपर्वचतुष्टये पुनःपुनरावर्तनया गण्यमानं यदि (प्रथमं पर्व स्पृशति तदा सिद्धं भवति यदि) द्वितीयं पर्व स्पृशति, तदा सिद्धं साध्यं तदुच्यते । यदि तृतीयं पर्व स्पृशति, तदा सुसिद्धं भवति । अथ चतुर्थं पर्व स्पृशति, तदास्य विरुध्यते । सर्वे अंशका भावस्वभावपुष्पपाताद्याख्याः । एवमादि च श्रीस्वच्छन्दादेर्ज्ञेयम् । एवमीदृशा अपि मन्त्रा नेत्रनाथसंपुटीकारेण इष्टा ध्याता जप्ताश्च सर्वसिद्धिप्रदा भवन्ति । न संशय इति, न वचोऽनृतमिति

होने से रोधित हैं, हे देवेशि ! वे सब इस अमृतेशमन्त्र से जीवित होने पर यथेष्ट जाप किये जाने पर बिना प्रयत्न के सिद्ध हो जाते हैं—इससे सन्देह नहीं । हे देवि ! ध्यान किये जाने पर ये सर्वप्रद होते हैं यह वचन झूठा नहीं है ॥ -५९-६३ ॥

भावहीन = जिनकी शक्ति ज्ञात नहीं है अर्थात् शक्तिरहित, मलिन । जैसा कि कहा गया—

'वे (जीव) साञ्जन है जो अण्ड (= ब्रह्माण्ड) के मध्य में स्थित हैं और सत्त्व रजस् तमस् से युक्त है ।'

कीलित = अक्षरों को या पदों को उलट-पलट कर बनाये गये । गुरु आम्नाय से रहित = शिष्यों के द्वारा स्वयं पुस्तक से गृहीत । भ्रष्टाम्नाय = अज्ञात संहिता से प्राप्त, इसी कारण विनष्ट । आगम के उज्झित होने से विघ्नित = सदा छोटी सिद्धियों में प्रयुक्त होने के कारण विघ्नाभिभूत । असिद्ध रिपु = असिद्ध मन्त्र एवं रिपुमन्त्र । साधक का नाम और मन्त्रों के अक्षरों को मातृका के क्रम से स्वर एवं व्यञ्जन को अलग-अलग कर चारो अंगुलियो के पर्वों से आवर्त्तन के साथ गणना करने पर यदि (पहले पर्व का स्पर्श करता है तो सिद्ध होता है); दूसरे पर्व को छूता है तो सिद्धसाध्य कहा जाता है । यदि तृतीय पर्व का स्पर्श करता है तो सुसिद्ध होता है । चतुर्थ को छूता है तो इसका विरोधी होता है । सर्वांश = भावस्वभाव = मन्त्रों के छह प्रकार के भाव स्वभाव पुष्पपात आदि सभी अंशक मन्त्रनाथ के जप से दूर हो जाते हैं । इस सबको स्वच्छन्द[1] आदि से जानलेना

---

१. द्रष्टव्य—स्व०तं० अष्टमपटल

चोक्त्यानाश्वस्तानामप्याश्वासं रोहयति ॥ ६३ ॥

उपसंहरति—

इति सर्वं समाख्यातं रहस्यं परमं प्रिये ॥ ६४ ॥

प्रथमाधिकारे यत् परमं रहस्यं प्रश्नितम्, तदित्युक्तदृशा सर्वं समाख्यातमिति शिवम् ॥ ६४ ॥

चिदानन्दघनं धाम शाङ्करं परमामृतम् ।
मृत्युजिज्जयति श्रीमत् स्वावेशेनोद्धरज्जगत् ॥

॥ इति श्रीनेत्रतन्त्रे श्रीमहामाहेश्वराचार्यवर्यश्रीक्षेमराजविरचित-नेत्रोद्योते अष्टमोऽधिकारः ॥ ८ ॥

चाहिये । ऐसे भी मन्त्र नेत्रनाथ से सम्पुटित कर इष्ट ध्यात और जप्त होने पर सर्व सिद्धिप्रद होते हैं । 'संशय नहीं हैं' 'वचन झूठा नहीं है' इन वचनों से अविश्वासी लोगों के मन में भी विश्वास उत्पन्न करते हैं ॥

उपसंहार करते हैं—

हे प्रिये ! इस प्रकार समस्त परम रहस्य कहा गया ॥ ६४ ॥

इस प्रकार मृत्युञ्जयभट्टारकापराभिधेय श्रीनेत्रतन्त्र के अष्टम अधिकार की आचार्य राधेश्यामचतुर्वेदी कृत ज्ञानवती नामक हिन्दी टीका सम्पूर्ण हुई ॥ ८ ॥

प्रथम अधिकार में जो परम रहस्य पूछा गया था वह उक्त रीति से सब का सब कह दिया गया ॥ ६४ ॥

चिदानन्दघन, परमअमृत, श्रीमान् तथा अपने आवेश से जगत् का उद्धार करने वाला शाङ्कर तेज सबसे बढ़कर है ।

॥ इस प्रकार श्रीमदमृत्युञ्जयभट्टारकापराभिधेय श्रीनेत्रतन्त्र के अष्टम अधिकार की आचार्यवर्य श्रीक्षेमराजविरचित 'नेत्रोद्योत' नामक व्याख्या की आचार्य राधेश्यामचतुर्वेदीकृत 'ज्ञानवती' हिन्दी टीका सम्पूर्ण हुई ॥ ८ ॥

नवमोऽधिकारः

* नेत्रोद्योतः *

स्वच्छस्वच्छन्दचिन्नेत्रं चित्रानुग्रहहेतुतः।
सदाशिवादिभी रूपैः प्रस्फुरज्जयति प्रभुः ॥

अथाधिकारसङ्गतिं कुर्वती श्रीदेव्युवाच—

श्रुतं देव मया सर्वं माहात्म्यं मन्त्रनायके[1] ।
अधुना श्रोतुमिच्छामि यदुक्तं विभुना मम ॥ १ ॥
सर्वागमविधानेन भावभेदेन सिद्धिदम् ।
वामदक्षिणसिद्धान्तसौरवैष्णववैदिके ॥ २ ॥
यथेष्टसिद्धिदं देवं यथेष्टाचारयोगतः ।
तदाख्याहि सुरेशान चिन्तारत्नफलोदयम् ॥ ३ ॥

---

* ज्ञानवती *

अधिकार इहाङ्गके प्रभोर्वामाद्यं ह्यनुसृत्य पूजनम् ।
सुशिवस्य समर्चनं ब्रुवन् जयतात् कोऽपि मणेः फलप्रदः ॥

प्रभु (= समर्थ) एवं स्वच्छ-स्वच्छन्द चित् नेत्र विचित्र अनुग्रह के कारण सदाशिव आदि रूपों से स्फुरित होते हुए सर्वोत्कृष्ट हैं ।

अब अधिकार की सङ्गति बैठाती हुयी देवी ने कहा—

हे देव ! मैंने मन्त्रनायक (= अमृतेश मन्त्र) का सम्पूर्ण माहात्म्य सुना । अब मैं, जैसा कि विभु आपने मुझसे कहा—समस्त आगमों के विधान से भावभेद के अनुसार सिद्धि देने वाले देव, वाम, दक्षिण, सिद्धान्त, सौर, वैष्णव एवं वैदिक प्रक्रियाओं में यथेष्ट आचारद्वारा यथेष्ट सिद्धि देने वाले हैं, हे सुरेशान ! उस चिन्तामणिरत्न के समान फल देने वाले को बतलाइये ॥ १-३ ॥

---

१. यहाँ षष्ठी अर्थ में सप्तमी का प्रयोग आर्ष है ।

अथ योगदीक्षाचिन्तामणौ पातञ्जलयोगः ।

एवं सांख्यं वेदान्तानुकूलतया प्रतिपाद्येदानीं मलिनान्तःकरणानां जिज्ञासूनां सांख्योक्ते जीवात्मैक्यासंगलक्षणपुरुषे चित्तस्थितिर्न स्यादिति तदन्तःकरणमलनिरासकनिरोधाख्ययोगेन चित्तशुद्धौ विवेकाविर्भावेन तत्रैव चित्तस्थैर्यं स्यादिति तदर्थं योगं निरूपयितुं योगदीक्षाचिन्तामण्याख्यमेकोत्तरशतश्लोकं प्रकरणमारभते, तत्र चावांतरप्रकरणे द्वे पातञ्जलाख्यं शैवाख्यं चेति; तत्रापि पातञ्जलस्यैकविध्यादाद्यमेव षड्विंशतिश्लोकं भवति, इतरस्य च चातुर्विध्यात्तत्र चत्वारि प्रकरणानि मन्त्रयोग हठयोग शिवशक्तिपराक्रम लययोगाख्यानि क्रमेण चतुःश्लोकैकोनविंशतिश्लोक षोडशश्लोक षट्त्रिंशच्छ्लोकानि सन्ति, तान्यनुक्रमतो व्याख्यास्यामः । तत्रादौ पातञ्जलं योगं निरूपयति, तत्र तावद्योगप्रतिपादकस्यास्य प्रकरणस्य योगदीक्षाचिन्तामणिनाम्नोर्थे तत्र प्रवृत्तिं जनयितुं सफलं दर्शयति ।

अथातो योगदीक्षायाश्चिन्तामणिरुदीर्यते ।
तत्प्राप्त्याऽबोधदारिद्र्यं सर्वमेव विनश्यति ॥ १ ॥

अथेति । अथ सांख्यप्रतिपादनानन्तरं सांख्योक्ते तत्त्वे मलिनान्तःकरणानां मुमुक्षूणां केन चित्प्रतिबिन्धेन चित्तस्थैर्यं न भवति यतोऽत इति हेतोरित्यर्थः, योगदीक्षाया योगस्य निरोधाख्यस्य दीक्षा संस्कारस्तस्याश्चिन्तामणिः कल्पितफलप्रदत्वाच्चिन्तामणिरिव कल्पितधारणाजन्यफलप्रदत्वाच्चिन्तामणिरिति नाम प्रकरणस्य स उदीर्यते निरूप्यते तत्त्वं शृणु, ननु चिन्तामणिप्राप्त्या दारिद्र्यं नश्यत्यनेन किं स्यादित्यत आह तदिति, तत्प्राप्त्या तस्य

योगदीक्षाचिन्तामणेः प्राप्त्या लाभेनाऽबोधदारिद्र्यमबोधोऽज्ञानं तदेव सर्वदारिद्र्यमूलत्वाद्दारिद्र्यं दरिद्रत्वं तत्सर्वमेव समस्तमपि विनश्यति निवर्ततेऽतोऽस्य योगदीक्षाचिन्तामणिरिति नामेति भावः ॥ १ ॥

अस्य च संप्रदायतः प्रामाण्यं वक्तुं योगप्रवर्त्तकान्द्वाभ्यामाह ।

महायोगेश्वरः शम्भुः महायोगेश्वरो हरिः ।
महायोगेश्वरो ब्रह्मा भवानी सिद्धयोगिनी ॥ २ ॥

महायोगेश्वर इति । शम्भुः शं सुखं भवत्यस्माल्लोकानामिति स शम्भुः शङ्कर इत्यर्थः, महायोगेश्वरो महाञ्छ्रेष्ठो योगानां मन्त्रादियोगानामीश्वरः प्रवर्त्तक आचार्य इत्यर्थः, तथा हरिर्हरति सर्वं दुःखं भक्तानां स हरिर्विष्णुर्महायोगेश्वरो महान्सर्वमान्यो योगेश्वरो योगप्रवर्त्तकोऽस्ति तथा ब्रह्मा परमेष्ठी महायोगेश्वरो महाञ्जगत्पूज्यो योगेश्वरो योगप्रवर्त्तकोऽस्ति तथा भवानी सर्वजगज्जीवयित्री चिच्छक्तिः सिद्धयोगिनी स्वतःसिद्धयोगवत्यस्ति, एतेषां सर्वजगच्छ्रेष्ठत्वं योगफलमेव योगानां प्रवृत्तिरपि तेभ्य एवेति भावः ॥ २ ॥

तदितरेषामपि योगेन सिद्धिप्राप्तिमपि तदितरेषां तत्र रुचिं जनयितुं प्रदर्शयति ।

सनकाद्याः वसिष्ठाद्याः कचदत्तशुकादयः ।
अरुन्धतीप्रभृतयो योगात्सिद्धिमुपागताः ॥ ३ ॥

सनकेति । सनकाद्याः सनक आद्यो मुख्यो येषु ते नैष्ठिका, वसिष्ठाद्या वसिष्ठ आद्यो मुख्यो येषां पुलस्त्यादीनां ते सर्वे गृहिणः, तथा कचदत्तशुकादयः कचो बृहस्पतेः पुत्रो

दत्तो ह्यत्रेः पुत्रः शुको व्यासपुत्र एत आद्यो मुख्या येषामार्षभादीनां ते सर्वेपि परमहंसाः, तथाऽरुन्धतीप्रभृतयोऽरुन्धती वसिष्ठपत्नी प्रभृतिरादिर्यासां देवहूत्यादीनां ताः स्त्रियः, एते सर्वे योगाच्चित्तवृत्तिनिरोधलक्षणयोगात्सिद्धिमणिमादिरूपां मुक्तिमपि उपागता प्राप्ता अतो मुमुक्षुभिर्योगः साध्य एवेति भावः ॥ ३ ॥

ननु योगशब्दवाच्यार्थानां मतभेदेन बहुत्वप्रतीतेर्मुख्यो योगशब्दार्थः को विवक्षित इत्याशङ्कायामाह ।

आत्मज्ञानेन यो योगो जीवात्मपरात्मनोः ।
स योगस्तस्य हेतुत्वाद्योगा बहुविधा मताः ॥४॥

आत्मज्ञानेनेति । यो वेदान्तेषु प्रसिद्ध आत्मज्ञानेन आत्मस्वरूपयथार्थज्ञानेन तत्त्वमसीत्यादिवाक्यजन्याहंब्रह्मेत्याकारेण जीवात्मपरमात्मनोर्जीवस्य प्राणोपाधिकस्य साधिष्ठानबुद्धिस्थचिदाभासस्यात्मा शोधितस्त्वंपदार्थः कूटस्थः, परमश्चासावात्मा च परमात्मा शोधितस्तत्पदार्थो जगदारोपाधिष्ठानं ब्रह्मेत्यर्थः, तयोरुभयोर्योग एकत्वं यत्पारमार्थिकं स स एवेत्यर्थः, योगो योगशब्दवाच्यो मुख्यो भवति, तत्र तर्हि कुतो बहुत्वं दृश्यते तत्र तत्र शास्त्रेषु तत्राह तस्य, योगस्य हेतुत्वात्साधनत्वात्तेपि योगा योगशब्दवाच्यार्था भवन्ति, अतस्ते बहुविधा अनेकप्रकारा मता मुनिभिस्तत्तच्छास्त्रेषु निर्णीताः, याथार्थ्यात्मज्ञानस्यैव योगशब्दमुख्यार्थत्वमितरेषां तु तत्साधनभूतत्वाद्गौणं योगशब्दार्थत्वमिति भावः ॥ ४ ॥

एवं मुख्यं योगशब्दार्थं प्रतिपाद्येदानीं भगवत्प्रतिपादितं योगशब्दार्थं दर्शयति ।

विरोधिलक्षणान्यायादभद्रा भद्रिका यथा ।
सर्वदुःखवियोगस्तु योग इत्याह केशवः ॥ ५ ॥

विरोधीति । केशवः सर्वान्तर्यामी श्रीकृष्णः सर्वदुःखवियोगस्तु सर्वेषामाध्यात्मिकादीनां दुःखानां वियोगो विश्लेषः स्वस्मिन्दुःखासत्त्वप्रतीतिः स एव योगो योगशब्दवाच्योर्थोऽस्तीति एवं प्राहोक्तवान् 'तं विद्यादुःखसंयोगवियोगं योगसंज्ञितमि'त्यादिष्विति ज्ञेयं, ननु आत्मनस्तत्त्वतो योगवियोगयोरसम्भवात्तस्मिन्योगशब्दवाच्यार्थो माऽस्तु दुःखवियोगे तु तदभाववति कथं योगत्वमुच्यत इत्याशङ्क्य योगत्वं तत्र सम्भावयितुं न्यायमाह विरोधीति, विरोधिलक्षणान्यायाद्यत्र यद्विरोधोस्ति तत्र तद्वाचकशब्दप्रयोगो विरोधिलक्षणान्यायो तदभाववति तद्भाववचन इत्युक्तलक्षण इत्यर्थः, तत्रोदाहरणमभद्रेति, यथा यद्वदभद्रा स्वरूपतोऽकल्याणरूपापि भद्रिका भद्रिकेति कल्याणवाचकशब्देनोच्यते लोके तथा वियोगोपि योगशब्देनोक्त इति भावः ॥ ५ ॥

ननूक्तलक्षणस्य योगस्य किं फलं तत्सदृष्टान्तमाह ।

अत्यन्तचपलस्यापि मनसो योगशक्तितः ।
निश्चलत्वं प्रजायेत विन्ध्यस्येव महागिरेः ॥ ६ ॥

अत्यन्तेति । अत्यन्तचपलस्यापि निरन्तरचञ्चलस्वभावस्यापि मनसश्चित्तस्य योगशक्तितो योगाभ्यासजन्यसामर्थ्येन निश्चलत्वं स्थिरत्वं प्रजायेत स्यात्तत्र दृष्टान्तो महागिरेरतीवऋद्धस्य विन्ध्यस्येव विन्ध्यनाम्नः पर्वतस्येव यथा विन्ध्यप-

र्वेतस्याचलत्वं त्यक्त्वा वृद्धिरूपं चाञ्चल्यं वृद्धं तदगस्त्यमुनिकृतयोगेन चाञ्चल्यं परित्याज्य स्थावरत्वं स्थापितं स्वकृतयोगेन वागस्त्याज्ञानुल्लङ्घनाय स्थिरत्वं सम्पादितं तद्वद्योगेन योगी स्वत आत्मरूपत्वादचञ्चलस्यापि मनसोऽचाञ्चल्यं त्यक्त्वा चञ्चलत्वं गृहीतं तत्परित्याज्य स्थिरत्वमात्मस्वरूपभूतं सम्पादयतीत्याशयः ॥ ६ ॥

योगस्य मनश्चाञ्चल्यनिवर्त्तकत्वे भुशुण्डसम्मतिरस्तीत्याह ।

तथा च भुशुण्डः ।

तथेति । भुशुण्डश्च भुशुण्डोपीत्यर्थः, तथाच तमेवार्थमाह । केन वाक्येनेत्याशङ्क्य तद्वाक्यं पठति ।

नाभसीं धारणां बद्ध्वा तिष्ठामि विगतज्वरः ।
यावत्पुनः कमलजः सृष्टिकर्मणि तिष्ठति ॥ ७ ॥

नाभसीमिति । अहं भुशुण्डनामा काको वायोरपि लय आसन्ने नाभसीं सर्ववाय्वादिभूतभौतिकरहितं नभ एवाहमित्येवं नभसम्बन्धिनीं धारणां भावनां बद्ध्वा सन्धार्य तया च विगतज्वरो वाय्वादिनाशेन स्वनाशभीतिरहितः सन्नाकाशमात्ररूपस्तिष्ठामि स्थिरो भवामि, कियत्पर्यन्तमित्यत आह यावदिति, कमलजो ब्रह्मा कमलेन सह सम्भूय वर्त्तमानो यावद्यावता कालेन पुनर्भूयः सृष्टिकर्मणि सृज्यतेनया सा सृष्टिस्तद्रूपे कर्मणि क्रियायां तिष्ठति संस्थितो भवति तावत्कालपर्यन्तमित्यर्थः ॥ ७ ॥

एवं योगफलं प्रदर्श्येदानीं पातञ्जलं योगं वक्तुं मुख्यं पातञ्जलयोगलक्षणमाह ।

चित्तवृत्तिनिरोधस्तु मुख्यः पातञ्जलो मतः ।

प्राणवृत्तिनिरोधस्तु गौणस्तत्साधनत्वतः ॥ ८ ॥

चित्तेति। पातञ्जलः पतञ्जलिना प्रोक्तः पातञ्जलः 'तेन प्रोक्तमि'ति तद्धितोऽण्,मुख्यः प्रधानो योगस्तु हठादिभ्यो विलक्षणश्चित्तवृत्तिनिरोधश्चित्तस्यान्तःकरणस्य वृत्तीनां बाह्यादिविषयाकाराणां निरोधोऽवरोध एव मत इष्टः, तत्र भगवतः पतञ्जलेः सूत्रं 'योगश्चित्तवृत्तिनिरोध' इति, प्राणवृत्तिनिरोधस्तु प्राणस्य शरीरावच्छिन्नस्य वायोर्वृत्तयः प्राणापानादयस्तासां निरोधोऽवरोधः प्राणायामादिना स्थैर्यसम्पादनं हठिनां प्रधानभूतोपि पातञ्जलानां तत्साधनत्वतस्तस्य चित्तवृत्तिनिरोधनाम्नोः योगस्य साधनरूपत्वाद्गौणो न प्रधानत्वेन संमत इत्यर्थः ॥ ८ ॥

एवं पातञ्जलयोगस्वरूपं प्रदर्श्येदानीं तत्साधनानि दर्शयितुं तत्प्रतिपादकं सूत्रं प्रमाणयति।

तत्र सूत्रं 'यमनियमासनप्राणायाम—
प्रत्याहारधारणाध्यानसमाधयोष्टावङ्गानि' ॥ ९ ॥

तत्रेति। तत्र योगाङ्गेषु सूत्रं पतञ्जलेः सूत्रमस्तीत्यर्थः, तदेवोदाहरति यमेति, यमाः पञ्च, नियमाः पञ्च, आसनानि सुखासनप्रभृतीनि, प्राणायाम आभ्यन्तरबाह्यभेदेन द्विविधोपि, प्रत्याहार इन्द्रियाणां स्वस्वविषयेभ्यो व्यावृत्तिरूपो, धारणा देशविशेषसम्बन्धश्चित्तस्य, ध्यानं विजातीयप्रत्ययानन्तरितध्येयसजातीयप्रत्ययवृत्तिप्रवाहः, समाधिः सविकल्पकापरपर्यायः संप्रज्ञातः; एतान्यष्टौ योगस्याङ्गानि सन्ति ॥ ९ ॥

एवं योगाष्टाङ्गप्रतिपादकं पातञ्जलसूत्रमुपन्यस्येदानीं यमादीन्यङ्गानि दर्शयितुमुपक्रमते चतुर्भिः।

यमोऽस्तेयऋताहिंसाब्रह्मचर्यापरिग्रहाः ।
नियमः शौचसन्तोषतपःपाठेश्वरार्पणम् ॥ ९ ॥

यम इति । अस्तेयं चौर्याभाव ऋतं सत्यवक्तृत्वादि अहिंसा हिंसातः सदा निवृत्तिर्ब्रह्मचर्यमष्टाङ्गमैथुननिवृत्त्युपलक्षितं नैष्ठिकादि ।

'स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
एकान्तवासो रमणं स्पर्शोऽष्टविधमैथुनमि'ति ।

एतन्निवृत्तिर्ब्रह्मचर्यं, अपरिग्रहो योगाननुकूलविषयासंग्रहः, एते पञ्च यमो जातित्वादेकवचनं यमा ज्ञेया, यमयन्ति निवर्त्तयन्ति हिंसादिभ्यः पुरुषविशेषं ते यमा इत्यर्थः; तत्र पतञ्जलेः सूत्रम्, 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा' इति । यमानुक्त्वा नियमानाह नियम इति, शौचसन्तोषौ शौचं बाह्यं स्नानादि आन्तरं रागत्यागादीत्येवं द्विविधं, सन्तोषो यथालब्धे विषयेऽलंबुद्धिस्तपः स्वस्ववर्णाश्रमधर्मनिष्ठापूर्वकक्लेशसहिष्णुत्वं, पाठेश्वरार्पणं पाठश्च स्वाध्याय ईश्वरार्पणं च यद्यत्क्रियते स्वयं तत्तदीश्वरेणैव कृतमिति निश्चय, एते पञ्च नियमाः; अत्रापि जातित्वादेकवचनं, जन्मप्रदकर्मभ्यो व्यावर्त्य मोक्षकारणे निष्कामकर्मणि नियमयन्तीति नियमनाम्नोक्ता ज्ञातव्याः, अत्रापि पातञ्जलं सूत्रं 'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा' इति । यमनियमफलान्यपि कानि चित्सूत्रितानि तान्यपि प्रदर्शयामः, यमेषु तावदहिंसाफलप्रतिपादकं सूत्रम्, 'अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः' । सत्यफले सूत्रं, 'सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वं' । अस्तेयफले सूत्रं, 'अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानं' ब्रह्मचर्यफले सूत्रं, ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः,। अपरिग्रहफले सूत्रं

'अपरिग्रहस्थैर्ये जन्मकथन्तासंबोध' इति क्रमेणज्ञेयानि । नियमफलान्यपि सूत्रैर्दर्शितानि, तत्र शौचफलप्रतिपादके सूत्रे 'शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः, सत्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च' । सन्तोषफलमाह 'सन्तोषादनुत्तमसुखलाभ' इति । तपः फलमाह 'कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपस' इति । स्वाध्यायफलमाह 'स्वाध्यायादिष्टदेवतासंप्रयोग' इति । ईश्वरप्रणिधानफलमाह 'समाधिसिद्धिरीश्वरप्रणिधानादि'ति ॥ ९ ॥

आसनप्राणायामावाह ।

आसनं सुखरूपेण शरीरस्थिरता मता ।
प्राणायामः प्राणदण्डः कुम्भपूरकरेचकैः ॥ १० ॥

आसनमिति । सुखरूपेण पद्मकस्वस्तिकादीनि आसनानि प्रोक्तानि, तत्र यादृशेन देहस्थापनरूपेणासनेन यस्य पुरुषस्यावयवेषु व्यथानुत्पत्तिस्तदेव सुखरूपमासनं तेन शरीरस्थिरता देहेऽचाञ्चल्यं स्यादित्यध्याहार्यं, तदेवासनमास्यतेस्मिन्नित्यासनं मतमिष्टं ज्ञेयम्; अत्रापि पतञ्जलेः सूत्रं 'स्थिरसुखमासनमि'ति । अस्योपायप्रतिपादकं पतञ्जलेः सूत्रमपि 'प्रयत्नशैथिल्यानन्तसमापत्तिभ्यामि'ति । अस्यार्थः, प्रयत्नशैथिल्यं प्रयत्नस्य लौकिकवैदिकस्य गमनागममैथुनगृहकृत्यव्यापारादिरूपस्य तीर्थयात्रास्नानयागहोमादिरूपस्यच मानसोत्साहरूपस्य शैथिल्यं कर्त्तव्यं तेन, तदभावे च मानस उत्साहो बलाद्देहमुत्थाप्यान्यत्र चालयेदेवेत्यर्थः; अनन्तसमापत्तिश्च फणासहस्रेण पृथिवीं धृत्वा स्थिरः स्थितोनन्त एवाहमस्मीति दृढधारणाऽनन्तसमापत्तिः स्वस्मिन्ननन्तत्वापादनं स्थिरत्वहेतुस्तेन चोपायेनासनसिद्धिर्जायत इत्यर्थः । आसनसिद्धिफलमपि सूत्रांशेनाह भगवान्पतञ्जलिः, 'ततो द्वन्द्वानभिघात' इति । अस्यार्थ आसने

सिद्धे ततोऽनन्तरं द्वन्द्वैः सुखदुःखादिलक्षणैरनभिघातो न पराभवो जायते योगिन इत्यर्थः । प्राणायाममाह प्राणायाम इति, कुम्भपूरकरेचकैः कुम्भकेन द्विविधेनान्तरेण बाह्येन चेति, कुम्भकस्य द्वैविध्यं वसिष्ठ आह ।

'अपानेऽस्तङ्गते प्राणो यावन्नाभ्युदितो हृदि ।
तावत्सा कुम्भकावस्था योगिभिर्याऽनुभूयते ॥
बहिरस्तं गते प्राणे यावन्नापान उद्गतः ।
तावत्पूर्णां समावस्था बहिष्ठं कुम्भकं विदुरि'ति ॥
तेनोक्तलक्षणेन कुम्भकेन, पूरकेण=
'वक्रेणोत्पलनालेन तोयमाकर्षयेन्नरः ।
एवं वायुर्गृहीतव्यः पूरकस्येति लक्षणम्' ॥
इत्युक्तलक्षणेन पूरकेण, रेचकेन च=
'उत्क्षिप्य वायुमाकाशं शून्यं कृत्वा निरात्मकम् ।
शून्यभावेन युञ्जीत रेचकस्येति लक्षणम् ॥

इत्युक्तलक्षणेन रेचकेन यः प्राणदण्डः प्राणस्य शारीरावच्छिन्नवायोर्दण्डो नियमनं स प्राणायामः प्राणायामनाम्नोक्तो मुनिभिरिति शेषः । आसनानन्तरमेव प्राणायामप्रतिपादकं पतञ्जलेः सूत्रं, 'तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायाम' इति । तस्यैतस्याभ्यासप्रतिपादकमपि पतञ्जलेः सूत्रं, 'बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्म' इति। अस्यार्थः, बाह्यवृत्ती रेचक, आभ्यन्तरवृत्तिः पूरकः, स्तम्भवृत्तिः कुम्भकः, तत्रैकैको देशकालसङ्ख्याभिः परीक्ष्यः । तथाहि, स्वाभाविकरेचके हृदयदेशान्निर्गतस्य वायोः नासाग्रसमदेशाद्बहिर्द्वादशाङ्गुलपर्यन्तं श्वासस्य समाप्तिर्भवति अभ्यासे च तस्य क्रमेण नाभेर्वा मूलाधाराद्वायुनिर्गमे च-

तुर्विंशत्यङ्गुलिपर्यन्ते समाप्तिर्भवति अस्मिंश्च प्रयत्नाधिक्ये जाते नाभेर्वा मूलाधारस्य क्षोभेणान्तर्निश्चयो भवति, बहिरपि सूक्ष्मं सूत्रादि धृत्वा तच्चाञ्चल्येन परीक्ष्यो भवति, इयमेव देशपरीक्षा। कालतोपि परीक्षा यथा, रेचककाले प्रणवस्यावृत्तयो दश वा विंशतिर्वा त्रिंशद्वेत्येवं कालतः परीक्षा। अस्मिन्मासे दश नित्यमग्रिममासे विंशतिर्विंशतिः, तदुत्तरे मासे च त्रिंशत्त्रिंशदित्येवं सङ्ख्या परीक्षा। एवं त्रिविधपरीक्षा पूरकेपि ज्ञेया। कुम्भके तु कालसङ्ख्याभ्यां द्विविधा परीक्षा स्पष्टा, परन्तु यथा तूलपिण्डः प्रसार्यमाणो विरलः सूक्ष्मश्च भवति तद्वत्प्राणो देशकालसङ्ख्याधिक्येनाभ्यस्यमानो, दीर्घो दुर्लक्ष्यत्वात्सूक्ष्मश्च भवति। एवं पूर्वोक्तरेचककुम्भकपूरकेभ्योन्यं प्राणायाममपि पतञ्जलिः सूत्रयामास 'बाह्याभ्यन्तरपूर्वत्रयापेक्षोपि चतुर्थ' इति। अस्यार्थः, यथाशक्ति सर्वं विरिच्य ततः कृतः कुम्भको बाह्यः, तथान्तर्वायुमापूर्य ततः कृतः कुम्भकः आन्तरः, एवं च रेचकपूरकापेक्षया कुम्भकस्तृतीयः, एतत्त्रयापेक्षया रेचकपूरकौ त्यक्त्वा केवलकुम्भकश्चतुर्थो भवति। निद्रालस्यादिबलवद्दोषवतां पूर्वत्रिकं निर्दोषाणां चतुर्थ इति ज्ञेयम्। प्राणायामफलमप्याह पतञ्जलिः सूत्राभ्यां 'ततः क्षीयते प्रकाशावरणमि'ति। 'धारणासु च योग्यता मनस' इति च। अनयोरर्थः, प्रकाशस्य सत्त्वस्यावरणं तमो निद्रालस्यादिकारणं तस्य नाशो भवति, प्राणायामान्मनसस्तमोनाशे धारणासु योग्यताधिकारित्वं जायत इत्यर्थः॥१०॥

प्रत्याहारधारणे प्राह।

प्रत्याहारस्त्विन्द्रियाणां चलानां प्रतिरोधनम्।
क्वचित्प्रदेशे चित्तस्य स्थापनं धारणा मता॥११॥

प्रत्याहार इति। चलानां चञ्चलानामिन्द्रियाणां श्रोत्रादीनां प्रतिरोधनं स्वस्वविषयाच्छब्दादेर्निवर्त्तनं प्रत्याहारस्तु स प्रत्याहारोपि ज्ञेयः, अत्रापि पतञ्जलेः सूत्रं 'स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहार' इति। अस्यार्थः, शब्दस्पर्शादिविषयेभ्यो निवर्त्तिताः श्रोत्रादयश्चित्तस्वरूपमनुकुर्वन्तीवावतिष्ठन्ते स प्रत्याहार इत्यर्थः,। श्रुतिश्च;

'शब्दादिविषयान्पञ्च मनश्चैवातिचञ्चलम्।
चिन्तयेदात्मनो रश्मीन्प्रत्याहारः स उच्यते' इति॥

प्रत्याहारफलमप्याह पतञ्जलिः 'ततः परमावश्यतेन्द्रियाणामि'ति। धारणामाह क्वचिदिति, क्वचित्कुत्रचित्प्रदेशे आधारस्वाधिष्ठानादिचक्रे क्वचिद्बाह्ये प्रतिमादौ सौन्दर्यवत्स्त्रीपुरुषयोर्वा चित्तस्य मनसः स्थापनं स्थैर्यसंपादनं धारणा धारणापदवाच्या प्रतेष्टत्वेन गृहीता योगिभिरिति शेषः, तथा चात्र पतञ्जलेः सूत्रं 'देशबन्धश्चित्तस्य धारणे'ति॥ ११॥

ध्यानसमाधी आह।

निरन्तरश्चित्प्रवाहो ध्येयस्य ध्यानमीरितम्।
समाधिरष्टमो ज्ञेयस्तदात्मकतया स्थितिः॥ १२॥

निरन्तर इति। ध्येयस्य ध्यानगोचरस्य ध्येयस्य विषयत्वात्तत्सम्बन्धवानित्यर्थः, निरन्तरो ध्येयविजातीयविषयप्रत्ययैरनन्तरितश्चित्प्रवाहश्चितां वृत्तीनां प्रवाहो जलप्रवाह इव सातत्यं तद्ध्यानं ध्याननाम्नेरितमुक्तम्, अत्र च पतञ्जलेः सूत्रं 'तत्र प्रत्ययैकतानता ध्यानमि'ति। समाधिमाह समाधिरिति, चित्तस्येत्यपकर्षः पूर्वश्लोकात्, चित्तस्य मनसस्तदात्मकतया तद्ध्येयमेवात्मा स्वरूपं यस्य तस्य भावस्तत्ता तया ध्येयाकार प-

रिणामेनेत्यर्थः, स्थितिः स्थानं समाधिः समाधिनामको ज्ञेयः, स चोक्तेषु योगाङ्गेषु अष्टमः, अयं च सविकल्पक एव सम्प्रज्ञातापरपर्यायो ज्ञेयः। अत्रैव पतञ्जलेः सूत्रं 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरि'ति, अयं च ध्यानपरिणामरूपत्वाद्ध्यानभेद एव ॥ १२ ॥

इदानीं योगाङ्गभूतं योगाख्यं च समाधिं विवेक्तुं समाधिभेदमाह ।

संप्रज्ञातस्तदन्यश्च समाधिर्द्विविधो हि सः ।
यमादिपञ्चबहिरङ्गमन्तरङ्गमथापरम् ॥१३॥

संप्रज्ञात इति । स उक्तलक्षणः समाधिर्ध्येयाकारपरिणामरूपो द्विविधो द्वे विधे प्रकारौ यस्य स तथोक्तः। हि तौ द्वौ प्रकारौ प्रसिद्धौ पातञ्जल इत्यर्थः । तावेव प्रकारौ दर्शयति संप्रज्ञात इति, संप्रज्ञातः संप्रज्ञातनामकः, तदन्यश्च तस्मात्संप्रज्ञातादन्य इतरश्चासंप्रज्ञात इत्यर्थः । एतत्समाधिद्वयप्रतिपादके पतञ्जलेः सूत्रे, 'शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणाम' इति 'सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः' इति च । एतयोरर्थः, शान्तो ह्यतीत उदित उत्पन्नो वर्तमान इत्यर्थः, प्रत्ययः प्रतीतिरनुभव इत्यर्थः, तावुभौ तुल्यप्रत्ययावेकविषयौ प्रत्ययौ चित्तस्य मनसो यदि स्तस्तदैकाग्रता परिणाम एकाग्रतयैकविषयतयापरिणामः समाधिः संप्रज्ञातनामा जायत इत्यर्थः । सर्वार्थतैकाग्रतयोः क्षयोदयौ स्वाभाविकी या रजोगुणेन जायमाना चित्तस्य सर्वार्थता तस्या रजोगुणरोधकप्रयत्नेन योगिकृतेन क्षयो भवति, ततश्च चित्तस्यैकाग्रताया ऐकाग्र्यलक्षणस्य स्थैर्यस्यो-

दयो भवति, तदा चित्तैकाग्र्यस्य परिणामोऽतिस्थैर्यं समाधिरित्यभिधीयते, सोऽसंप्रज्ञात इत्यर्थः । अस्य समाधेर्यमादीनि पञ्च बहिरङ्गसाधनानि पराण्यन्तरङ्गानि ज्ञेयानि ॥ १३ ॥

एवं द्विविधं समाधिं प्रतिपाद्येदानीं तयोराद्यस्य सहेतुकान्भेदानाह ।

वितर्केण विचारेणानन्देनास्मितया तथा ।
अनुस्यूतः समाधिस्तु संप्रज्ञातश्चतुर्विधः ॥ १४ ॥

वितर्केणेति । संप्रज्ञातस्तु संप्रज्ञातनामा समाधिरपि ध्येयाकारपरिणामरूपो वितर्केण परोक्षतया विशिष्टतर्केण ध्येयं गोचरीकृत्य तदाकारपरिणाम एकः, विचारेण विवेकेन ध्येयं गोचरीकृत्य तदाकारपरिणामः समाधिर्द्वितीयः, आनन्देन स्वानन्दप्रतीत्याविर्भावे तदाकारपरिणामस्तृतीयः, अस्मितयाऽऽत्मसत्त्वप्रतीत्या तदाकारपरीणामरूपः समाधिश्चतुर्थः । तदेव स्पष्टमाह अनुस्यूत इति । एतैश्चतुर्भिरनुस्यूतोऽन्वित इति हेतुगर्भं विशेषणमत एव स समाधिश्चतुर्विधश्चतुःप्रकारोऽस्तीति शेषः ॥ १४ ॥

इदानीमसंप्रज्ञातभेदं वक्तुमसंप्रज्ञातलक्षणमाह ।

यत्र न ज्ञायते किञ्चित्सोऽसंप्रज्ञात उच्यते ।
द्विधा भवप्रत्ययवानुपायप्रत्ययश्च सः ॥ १५ ॥

यत्रेति । यत्र समाधौ किञ्चिद्ध्यातृ ध्यानं वा ध्येयं वा किमपीत्यर्थः, न ज्ञायते न प्रतीयते सोऽसंप्रज्ञातोऽसंप्रज्ञातनामा समाधिरुच्यते कथ्यत इत्यर्थः, तस्यापि भेदमाह द्विधेति, सोऽसंप्रज्ञातनामा समाधिर्भवप्रत्ययवान्भवत्यस्मादिति भवः प्रकृतिर्वा महत्तत्त्वं वा तस्य प्रत्ययोऽनुभवः स प्रत्ययो वि-

ध्यते यत्र सूक्ष्मरूपेण स तथोक्त एकः, उपायप्रत्ययस्तूपैति अनेनेत्युपायः स्वप्रापकः स च प्रत्ययोऽनुभवो यत्र स तथोक्त आत्मस्वरूपप्रापकानुभववानित्यर्थः, सोपि एवं द्विधा द्विप्रकारो ज्ञेय इति शेषः ॥ १५ ॥

तयोराद्यमुदाहृत्य स्पष्टं दर्शयति।

मूढानामपि जायेत तपोदार्ढ्यान्मनोलयः।
प्रकृतौ वा महत्तत्त्वे भवप्रत्यय एव सः ॥१६॥

मूढानामिति। मूढानामपि अज्ञानिनामपि तपोदार्ढ्यात्तपसो दार्ढ्यं निरन्तराचरणेन दृढता ततः प्रकृतौ गुणसाम्यावस्थारूपायां महत्तत्वे वा सत्वगुणवति प्रकृतिविकारे वा मनोलयो मनसोन्तःकरणस्य लयो नाशो जायेतोत्पद्येत स भवप्रत्यय एव भवप्रत्यनामा समाधिरसम्प्रज्ञात एव ज्ञेयः ॥ १६ ॥

नन्वयं समाधिः कस्य जात इत्याशङ्क्यात्रोदाहरणं दर्शयति।

त्रैलोक्यराज्यकामस्य हिरण्यकशिपोर्यथा।
शरीरं क्रिमिभिर्भुक्तं वल्मीकेनापि संवृतम् ॥१७॥

त्रैलोक्येति। त्रैलोक्यराज्यकामस्य त्रैलोक्यस्य यद्राज्यं तस्मिन्काम इच्छा यस्य तस्य हिरण्यकशिपोर्दैत्यस्य यथा येन समाधिप्रकारेण शरीरं देहः क्रिमिभिः कीटकैः भुक्तं भक्षितं वल्मीकेन संवृतमपि अवरुद्धं च तत्तेन न ज्ञातं स तस्य समाधिर्भवप्रत्ययनामाऽसंप्राज्ञात इति भावः ॥ १७ ॥

एवं भवप्रत्ययनामानमसंप्रज्ञातसमाधिं प्रदर्श्येदानीमुपायप्रत्ययमसंप्रज्ञातं दर्शयति।

श्रद्धावीर्यस्मृतिप्रज्ञाकामवर्जनपूर्वकम्।

मनोलयो मुनीन्द्राणामुपायप्रत्ययस्तु सः ॥१८॥

श्रद्धेति । श्रद्धावीर्यस्मृतिप्रज्ञाकामवर्जनपूर्वकं श्रद्धा च गुरुवेदान्तवाक्येषु विश्वासः, वीर्यमिन्द्रियदमन उत्साहः प्रापञ्चिकसुखमतीतावपि अनुद्वेगश्च शीतादि सहिष्णुत्वमपि, स्मृतिर्गुरुमुखाच्छ्रुतस्य श्रुतिस्मृत्युदितार्थस्याविस्मरणं, प्रज्ञा वैराग्यादि संस्कारपूर्विका शुद्धा महावाक्यार्थनिष्ठा बुद्धिः, कामवर्जनं चात्मज्ञानं वा समाधाने कामनापूर्वकामितरकामनिवृत्तिरित्यादि पूर्वं साधनभूतं यस्य स मनोलयो मुनीन्द्राणां श्रेष्ठमुनीनां मनसोन्तःकरणस्य लयो नाशो यो भवति स तूपायप्रत्यय उपायप्रत्ययनामा समाधिर्ज्ञेयः ॥ १८ ॥

एवं षड्विधं समाधिं प्रदर्श्येदानीं समाध्युत्थितानां पुनः समाधिं प्रविविक्षतां तत्सिद्ध्यर्थमुपायमाह ।

उक्तं व्युत्थितचित्तानां समाधानमभीप्सताम् ।
तपश्च वेदपाठश्च सर्वकर्मार्पणं हरौ ॥ १९ ॥

उक्तमिति । व्युत्थितचित्तानां वासनोद्बोधेन समाधितो व्युत्थितमागतं संसारे चित्तं मनो येषां तेषां समाधानं निरोधापरपर्यायमसंप्रज्ञातसमाधिमीप्सतामिच्छितवतां तपश्च विचारोपि एकः 'तप आलोचन' इत्यनुशासनादुपायोस्तीति भावः, तथा वेदपाठश्चोपनिषदादीनामर्थविचारपूर्वकं पठनमपि द्वितीय उपायः, तथा हरौ सर्वद्वैतहरणस्वभावे ब्रह्मणि सर्वकर्मार्पणं सर्वेषां समर्पणसहितानां समर्पणं 'नान्योतोस्ति द्रष्टा नान्योतोस्ति श्रोते'त्यादिश्रुतिदर्शितदृशा कर्तृत्वादित्रिपुटीबाधरूपं तृतीय उपायः, एतैरुपायैः पुनश्चित्तस्थैर्यं स्यादिति भावः॥१९॥

एवं पुनः समाधिप्रवेशोपायं प्रदर्श्येदानीं पुरुषस्य ध्येयं द-र्शयितुं पुरुषादीश्वरे वैलक्षण्यमाह सपादेन ।

क्लेशकर्मविपाकैश्च चित्ररूपैस्तदाशयैः ।

अपरामृष्ट एवैकः कश्चित्पुरुष ईश्वरः ॥ २० ॥

क्लेशेति । क्लेशकर्मविपाकैः क्लेशाः पञ्चाविद्यास्मितारागद्वे-षाभिनिवेशाः । कर्माणि सञ्चितप्रारब्धक्रियमाणाख्यानि अशुक्ल-कृष्णानि योगिनामितरेषां शुक्लकृष्णलोहितानि वा; अस्मिन्नर्थे-पतञ्जलेः सूत्रं, 'कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषा'मिति । विपाका आयुर्जातिभोगाख्याः कर्मफलरूपास्तैः सर्वैः । चित्ररूपै-स्तदाशयैर्विषयवैचित्र्येण चित्राणि परस्परं विलक्षणानि रू-पाणि येषां तैस्तदाशयैस्तेषां क्लेशकर्मविपाकानामाशया वासनास्तैरपि अपरामृष्टोऽस्पृष्टः कश्चित्कोपि वस्तुतःपुरुषा-द्भिन्नत्वेनाभिन्नत्वेन वा भिन्नाभिन्नत्वेन वा वैलक्षण्याभावान्नि-र्देशानर्हः पुरुष एव विशेषः पुरुष एवेत्यर्थः । ननु पुरुषत्वावै-शिष्ट्ये कुतो विशेषत्वं तदभावे च कुतो ध्येयत्वं सामान्यपु-रुषे च ध्यातृत्वं चेत्याशङ्क्य तमेव विशेषं दर्शयति एक इत्या-दिविशेषणैः, एकः पुरुषस्तु व्यवहारेऽनेकोऽयं ध्येयो विशिष्ट-पुरुषो एक भेदरहितः । ननु ध्यातृरूपः पुरुषस्तत्तो भिन्न ए-वेत्याशङ्क्याह स ईश्वरो नियन्ता सर्वेषां पुरुषाणामीशनादिश-क्तिमानित्यर्थः, अयं पुरुषस्तस्य नियम्य इति भावः ॥ २० ॥ नन्वेतस्यापि नियम्यत्वं न वास्तवमित्याशङ्क्य विशेषान्तरमाह ।

स सर्वज्ञः स्वभावेन प्रणवस्तस्य वाचकः ।

तदयं भावनापूर्वं तज्जपो मोक्षसाधनम् ॥ २१ ॥

स इति । स विशिष्टः पुरुषः स्वभावेन स्वत एव सर्वज्ञः

सर्वं सामान्यतो विशेषतश्च जानातीति सर्वज्ञः, तस्य स्वतः सर्वज्ञत्वमेतस्य तु साधनसाध्यमित्ययं भेदोस्तीति स एवात्र योगेषु ध्येयो विषय इति भावः, एवं ध्येयस्वरूपं निर्णीय तदर्थप्रतिपादकं मन्त्रं जपायाह।

प्रणव इति, तस्य ध्येयतया विशिष्टपुरुषस्येश्वरस्य वाचको नाम प्रणव ओङ्कारस्तदयं प्रणवो मन्त्रो ज्ञेयः, तज्जपस्तस्य प्रणवस्य जप उपांश्वावृत्तिरूपो भावनापूर्वं तदर्थविचारपूर्वं प्रेम्णा यथा तथा कार्य इति शेषः, स च मोक्षसाधनं मोक्षस्य प्रपञ्चनिवृत्तिरूपाया मुक्तेः साधनमुपायोस्ति, ततो मोक्षः स्यादिति भावः ॥ २१ ॥

इदानीं योगोपदेशकशास्त्रस्य चातुर्विध्यं दर्शयितुं दृष्टान्तमाह।

यथा रोगस्तन्निदानं भेषजं चाप्यरोगता।
विवेचनीयभेदेन चिकित्सास्ति चतुर्विधा ॥ २२ ॥

यथेति। यथा यादृग्रोगो रोगस्वरूपनिर्णायकप्रकरणविभागः, तन्निदानं तस्य रोगस्य निदानं मूलकारणं तत्प्रतिपादको ग्रन्थविभागो, भेषजं च तन्निवर्त्तकमौषधं तत्प्रतिपादकमपि, अरोगता फलं तत्प्रतिपादकं प्रकरणम्। एवं विवेचनीयभेदेन विवेक्तुं पृथक्कृत्य दर्शयितुं योग्यस्य विषयस्य भेदेन भिन्नत्वेन चिकित्सा चिकित्साशास्त्रं चतुर्विधा चतुःप्रकाराऽस्ति वर्त्तते॥२२॥

दार्ष्टान्तिकमाह।

जन्मदुःखं तथा मोहो विज्ञानं च विमुक्तता।
विवेचनीयभेदेन योगशास्त्रं चतुर्विधम् ॥ २ ॥

जन्मेति। तथा तद्वज्जन्मदुःखं जन्मनो दुःखरूपत्वप्रतिपादकं

योगप्रकरणं, मोहो मूलाज्ञानं तत्स्वरूपप्रतिपादकं प्रकरणं च, विज्ञानं च विज्ञानप्रतिपादकं तत्साधनप्रतिपादकं च प्रकरणजातं, विमुक्तिता विमुक्तिः स्वस्वरूपेणावस्थानं तस्य प्रतिपादकं शास्त्रम्, एवं विवेचनीयभेदेन चतुर्विधत्वेन योगशास्त्रं चतुर्विधं योगप्रतिपादकं शास्त्रं चतुःप्रकारं ज्ञेयमिति शेषः ॥ २३ ॥

इदानीं मोहस्वरूपं तस्य दुःखफलत्वं च तन्निवर्त्तकज्ञान स्वरूपं तत्फलभूतां दुःखनिवृत्तिं च क्रमेण दर्शयति ।

अविवेकः पुंप्रकृत्योः स मोहो दुःखकारणम् ।
समत्वपुरुषान्यत्वख्यातिबोधेन नश्यति ॥ २४ ॥

अविवेक इति । यः पुंप्रकृत्योः पुरुषस्य प्रकृतेश्चाविवेकः पृथगज्ञानं स स एव मोहयति स्वाधीनं पुरुषमिति मोहोऽज्ञानं स एव दुःखकारणं जन्ममरणस्वरूपभूतस्य दुःखस्य कारणं हेतुरस्ति, स च मोहः समत्वपुरुषान्यत्वख्यातिबोधेन समत्वं गुणसाम्यरूपत्वं प्रकृतेस्तस्य, पुरुषोऽसङ्गाद्वयनित्यानन्दस्वरूपस्तस्य चान्यत्वं वैलक्षण्येन पृथक्त्वं तस्य ख्यातिः ख्यायते प्रकथ्यते ऽनया सा ख्यातिरुभयोर्भिन्नत्वप्रतिपादिका सांख्ययोगस्मृतिवाग्वेदान्ताविरोधिनी तस्या बोधेन ज्ञानेन नश्यति नष्टा भवति, ततो दुःखमपि नश्यति छत्रापाये छायापायन्यायेनेति भावः ॥ २४ ॥

एवं ससाधनं योगं सफलं प्रतिपाद्येदानीं तदभ्यासिनां विघ्नरूपासु सिद्धिषु नादरः कार्य इत्याह ।

योगाभ्यासप्रसक्तस्य सिद्धयो भोगदायिकाः ।
आयान्ति नादरः कार्यो ह्यन्तराया मता यतः॥२५॥

---

१ तन्निवर्तकविज्ञानप्रतिपादकं तत्साधन प्रतिपादकञ्च ।

योगेति । योगाभ्यासप्रसक्तस्य मुक्तीच्छयोक्तलक्षणस्य योगस्याभ्यासः पुनः पुनरावृत्तिस्तस्मिन्प्रसक्तः सस्नेहस्तस्य पुरुषस्य भोगदायिका भोगं दत्वा तल्लोभेन योगभ्रंशहेतुभूताः सिद्धयः दूरश्रवणदूरदर्शनाकाशगमनादय आयान्ति प्राप्नुवन्ति, तासु योगिनाऽऽदरः प्रीतिर्न कार्यो न कर्त्तव्यः, कुत इत्यत आह हीति, यतो हेतोरन्तराया योगस्य विघ्नरूपा मता ज्ञाता योगिभिरिति शेषः । अत्र पतञ्जले सूत्रं 'ते समाधावुपसर्गा व्युत्थाने सिद्धय' इति ॥ २५ ॥

ननु ताः सिद्धयो लक्षणतः कारणतः कार्यतश्च निरूपितव्या इत्याशङ्क्यानुपयोगान्न निरूपणं तासामत्र क्रियते इत्याह ।

धारणाध्यानवैचित्र्यात्सिद्धिभेदो य ईरितः ।
अत्यन्तानुपयोगित्वात्स तु नात्र निरूपितः ॥२६॥

इतिपातञ्जलो योगः ॥

इति श्रीनरहरिकृतौ बोधसारे योगदीक्षाचिन्तामणौ पातञ्जलयोगः ॥

धारणेति । यः पातञ्जले धारणाध्यानवैचित्र्याद्धारणानां ध्यानानां च यद्वैचित्र्यं वैलक्षण्यं तस्मात्सिद्धिभेदः सिद्धीनामाकाशगमनादीनां भेदः पार्थक्यमीरित उक्तः, स तु स चात्यन्तानुपयोगित्वादत्यन्तं निरन्तरमनुपयोगित्वादुपयोगाभाववत्वेनात्रास्मिन्ग्रन्थे न निरूपितो न प्रोक्तः ॥ २६ ॥

इतीति पातञ्जलः पतञ्जलिना प्रोक्तो योग इति संपूर्ण इत्यर्थः ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ योगदीक्षाचिन्तामण्यर्थप्रकाशे पातञ्जलयोगार्थप्रकाशः प्रथमः ॥ १ ॥

एवं पातञ्जलं योगं निरूप्येदानीं शैवयोगनिरूपणं प्रति जानीते।

अथ शैवयोगः।

योगः शैवो निरूप्यते
मन्त्रो लयो हठो राजयोगो योगश्चतुर्विधः ॥ १ ॥

अथ मन्त्रयोगः।

योग इति। हे शिष्य शैवः शिवेन प्रोक्तः 'तेन प्रोक्तमि'ति तद्धितोऽण्, योगो योगसाधनप्रतिपादकं शास्त्रं निरूप्यते कथ्यते त्वं शृणु, एतस्य भेदानाह मन्त्रो मन्त्रयोगः, लयो लययोगः, हठो हठयोगः, राजयोगः। एवं योगो योगसाधनं चतुर्विधश्चतुःप्रकारमित्यर्थः ॥ १ ॥

एवं शैवयोगान्नामभेदेन चतुरः प्रदर्श्य तत्र तावत्प्रथमं प्रधानमन्त्रोदाहरणेन दर्शयति त्रिभिः।

नारायणाष्टाक्षरवासुदेवद्वादशाक्षरौ।
नृसिंहरामगोपालमन्त्रास्ते तापिनीस्तुताः ॥ २ ॥

नारायणेति। नारायणाष्टाक्षरवासुदेवद्वादशाक्षरौ नारायणस्य जलशायिनो जीवान्तर्यामिणो वा सर्वजगत्साक्षिणो वाऽष्टाक्षरोऽष्टावक्षराणि वर्णा यस्मिन्स नारायणाष्टाक्षर ॐनमो नारायणायेत्येवं रूप एको मन्त्रः, तथा वासुदेवस्य वसुदेवपुत्रस्य सर्वभूतनिवासस्य यद्वा वा विकल्पेनासून्प्राणाद्युपाधीन्दीव्यति प्रकाशयतीति वासुदेवो जगतोऽसत्वादप्रकाशकस्तत्सत्वेन प्रकाशकश्चेत्यर्थः, तस्य जगत्प्रकाशकत्वाप्रकाशकत्वाभ्यां लक्षितस्य परमात्मनो वा द्वादशाक्षरो द्वादशाऽक्ष-

राणि वर्णा यत्रेति स तथोक्त ॐनमो भगवते वासुदेवायेति मन्त्रो द्वितीयः, तथा नृसिंहरामगोपालमन्त्रा नृसिंहस्य रामस्य गोपालस्य च मन्त्रा ये सन्ति ते तापिनीस्तुतास्तापिनीषु स्तुताः प्रोक्तास्तापनीयोपनिषत्सु प्रतिपादिता इत्यर्थः ॥ २ ॥

शैवानपि प्रधानान्मन्त्रानाह ।

शिवपञ्चाक्षरी श्रेष्ठा दक्षिणामूर्त्तिरुत्तमा ।
यतीनां तु महावाक्यं केवलः प्रणवस्तथा ॥ ३ ॥

शिवेति । शिवस्य परमानन्दरूपस्य पञ्चाक्षरी पञ्चानामक्षराणां वर्णानां समाहारः पञ्चाक्षरी नमः शिवायेति विद्या मन्त्ररूपा श्रेष्ठोत्तमा शैवमन्त्रेष्वित्यर्थः, तथा तेष्वेव दक्षिणामूर्त्तिर्दक्षिणामूर्त्तेरुपासना मन्त्रावृत्तिरूपोत्तमा श्रेष्ठेत्यर्थः, उक्तेषु मन्त्रेषु सर्वाधिकारः, नियमितानाह यतीनां तु संन्यासिनामेव केवलं महावाक्यं तत्त्वमसीत्यादिरूपं मन्त्रः, तथा केवल एकः प्रणव ॐकार एव मन्त्रः ॥ ३ ॥

एवं मन्त्रान्प्रदर्श्येदानीं तदुपसंहारपूर्वकं तत्फलं चाह ।

इत्यादयो महामन्त्राः पुरश्चर्यादिभिः क्रमैः ।
सिद्धा देवप्रसादेन सद्यो मुक्तिप्रदा मताः ॥ ४ ॥

इति श्रीनरहरिविरचिते बोधसारे योगदीक्षाचिन्तामणौ मन्त्रयोगः ।

इत्यादय इति । इत्यादय इति एवं निरूपिता मन्त्रा आदयः प्रमुखा येषां ते सर्वे सात्विका अतो महामन्त्राः श्रेष्ठामन्त्रास्ते पुरश्चर्यादिभिः क्रमैः पुरश्चर्याः पुरश्चरणानि आदीनि येषां ध्यानादीनां तैश्च क्रमैरनुष्ठानैः सिद्धाः स्वाधीनीभूताः सन्तः देवप्रसादेन देवस्याराध्यस्य कृपया सद्यस्तत्क्षणं मुक्ति-

प्रदा मोक्षदा भवन्तीति मता अङ्गीकृता मुनिभिरिति शेषः ॥ ४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ योगदीक्षाचिन्तामण्यर्थप्रकाशे मन्त्रयोगार्थप्रकाशो द्वितीयः ॥ २ ॥

अथ हठयोगः ।

एवं मन्त्रयोगं प्रतिपाद्येदानीं हठयोगाख्यमेकोनविंशति-श्लोकं प्रकरणमारभते, तत्र तावद्धठयोगमुख्यक्रियां तत्फलं चाह ।

गङ्गायमुनयोर्मध्ये बालरण्डां तपस्विनीम् ।
बलात्कारेण गृह्णीयात्तद्विष्णोः परमं पदम् ॥ १ ॥

गङ्गेति । गङ्गायमुनयोर्गङ्गात्रेडानाम्नी नाडी वामनासा-पुटवर्त्तिनी वायुसञ्चरणाय सूक्ष्मा धमनीव स्थिता, यमुना च पिङ्गलानाम्नी नाडी दक्षिणनासापुटवर्त्तिनी वायुप्रचाराय सूक्ष्मा धमनीव स्थिता, तयोर्मध्ये मध्यदेशवर्त्तिनीं तपस्विनीं-प्रकाशबहुलां बालरण्डां बालः केशः स इव सूक्ष्मां रण्डां वा-युसञ्चारवतीं सुषुम्णां नाडीमित्यर्थः, बलात्कारेण प्राणाया-माद्यभ्यासेन गृह्णीयाद्वशीकुर्यात्तत्तस्या वशीकरणमेव वि-ष्णोर्व्यापनलक्षणस्य परमात्मनः परमं केवलं मायातत्कार्याभ्या-मस्पृष्टं पदं स्वरूपं ज्ञेयं, सुषुम्णावशीकार एव फलं हठयोग-स्येति भावः ॥ १ ॥

तदेतस्मिन्योगे गोरक्षसंमतिमाह ।

तत्रगोरक्षः ।

तत्रेति । तत्रोक्ते हठयोगे गोरक्षो गोरक्षोप्याहेत्यर्थः, त-च्छ्लोकं पठति ।

एतद्विमुक्तिसोपानमेतत्कालस्य वञ्चनम् ।
यद्व्यावृत्तं मनो भोगादासक्तं परमात्मनि ॥ २ ॥

एतदिति । यन्मनोऽन्तःकरणं भोगाद्विषयजन्यसुखाद्व्यावृत्तं निवृत्तं सत्परमात्मनि कार्यकारणाभ्यामतीत आत्मनि-आसक्तं स्थिरं जातं तदित्यध्याहार्यं, तदेतदिदं, विमुक्तिसोपानं विमुक्तेर्मोक्षस्य सोपानमारोहणमार्गः, तथैतदिदं कालस्य मृत्योर्वञ्चनं जयसाधनमेतेनोपायेन मृत्युरपि निवृत्तः स्यादिति भावः ॥ २ ॥

इदानीं साधनान्याह ।

परमं यदि वैराग्यमाहारस्तु यथोदितः ।
नित्यमेकान्तवासश्चेद्धठयोगो न दुर्लभः ॥ ३ ॥

परममिति । परमं ब्रह्मपदान्ते वैषयिकसुखे काकविष्ठायामिव वैतृष्ण्यं वैराग्यमरुचिर्यदि स्यात्तर्हि, किञ्चाहारश्च यथोदित आहारो भोजनमपि यथोदितो यादृगुक्तः शास्त्रेष्विति शेषः, तच्चोक्तं 'द्वौ भागौ पूरयेदन्नैर्जलेनैकं प्रपूरयेत । शेषं वायोः प्रचारार्थं भागं शिष्येत वै बुध' इति, तथा नित्यं निरन्तरमेकान्तवासो जनसम्बाधरहितस्थाने वासः स्थितिर्यदि स्यात्तर्हि हठयोगो दुर्लभो लब्धुमशक्यो न न भवति ॥ ३ ॥

मुख्यं साधनमाह ।

परन्तु गुरुदीक्षाभिर्लभ्यते नान्यथा स्वयम् ।
व्यतिक्रमे महान्दोषः क्रमलाभे महान्गुणः ॥४॥

परं त्विति । परन्तु वैराग्यादिसाधनेषु सत्स्वपि अयं हठ-

योगो गुरुदीक्षाभिर्गुरुभिः कृता दत्ता दीक्षा गुरुदीक्षा म-ध्यमपदलोपी समासः, ताभिः कृत्वा लभ्यते प्राप्यतेऽन्यथा तु गुरुदीक्षां विना न न प्राप्यते इत्यर्थः, व्यतिक्रम उक्ताहारा-दिवैपरीत्ये सति महान्दोषो मरणान्तोनर्थः स्यात्,क्रमलाभ उक्तसाधनक्रमेण लाभे हठस्य प्राप्तौ सत्यामित्यर्थः, महान्गुणः सर्वदुःखनिवृत्तिरूपः श्रेष्ठो गुणः स्यात् ॥ ४ ॥

अस्य प्रामाण्यसिद्धये संप्रदायज्ञानाय चाचार्यमाह ।

अनन्तविस्तारमयो हठः प्रोक्तः पुरारिणा ।
सारं तु बन्धत्रितयं तावता सिद्धिराप्यते ॥ ५ ॥

अनन्तेति । पुरारिणा त्रिपुरशत्रुणा त्रिपुटीलक्षणत्रिपुर-नाशकेन वा स्थूलसूक्ष्मकारणाख्यत्रिपुरसंहर्त्रा वोक्तलक्ष-णत्रिपुरनाशायैवानन्तविस्तारमयो न विद्यतेन्तः पारो यस्य स विस्तारस्तेन प्रचुरो हठो हठयोगः प्रोक्तो वर्णितः, तत्र तु सारं मुख्यं बन्धत्रितयं बध्यन्ते रोध्यन्ते प्राणा एभिस्ते ब-न्धास्तेषां त्रितयं त्रयं प्रोक्तं तावता तु तावन्मात्रेणैव सिद्धि-र्मुक्तिरथवा यस्य येप्सिताऽऽकाशगमनादिका सापि आ-प्यते प्राप्ता भवति ॥ ५ ॥

तदेव बन्धत्रितयं स्थानतो नामतश्च दर्शयति ।

मूले तु मूलबन्धः स्यान्मध्ये स्यादुडियानकः ।
कण्ठे जालन्धरस्तेन सिद्धो भवति मारुतः ॥६॥

मूलेत्विति । मूलबन्धस्तु मूलं मूलाधारं बध्यते रोध्यते-नेनेति मूलबन्धः स च मूले मूलाधारे स्याद्भवेद्, उडियानक एतन्नामको बन्धो मध्ये स्वाधिष्ठानादौ स्याद्भवेत्, कण्ठे वि-

शुद्धिचक्रादिस्थाने जालन्धरो जालं मुखनासानेत्रकर्णच्छिद्राणां जालमिव प्राणवायोः सञ्चारद्वारं धरति अवरोधयतीति जालन्धर एतन्नामा बन्धः स्याद्भवेद्, एतेषां फलमाह तेन बन्धत्रयेण मारुतो वायुः सिद्धः स्वाधीनो भवति जायते ॥ ६ ॥

इदानीं स्वाधीनीभूतवायोर्ब्रह्मरन्ध्रं नीतस्य फलंदर्शयति ।

कुण्डलिन्याः सुषुम्णायां प्रविष्टो ब्रह्मरन्ध्रतः ।
मूलस्थाने स्थिता शक्तिर्ब्रह्मस्थाने सदाशिवः ॥७॥

कुण्डलिन्या इति । स एव मारुतो कुण्डलिन्याः कुडलिनीं प्रविश्यानन्तरं सुषुम्णायां सुषुम्णाख्यनाड्यां प्रविष्टः प्रवेशं कृत्वा ब्रह्मरन्ध्रतः ब्रह्मरन्ध्राख्ये सप्तमे चक्रे प्रविष्टो भवति; तस्मिंश्च तत्र स्थिरे सति किं फलं तत्राह मूलेति, शक्तिः कुण्डलिनी मूलस्थाने मूलाधारे स्थिता तिष्ठति, ब्रह्मस्थाने ब्रह्मरन्ध्रस्थाने सदाशिवः सर्वदा सुखरूपः कूटस्थः परमात्माऽस्ति, तयोः समायोगो वायोः स्थैर्यफलमिति भावः ॥ ७ ॥

शिवशक्तिसमायोगहेतुत्वेनाजपाजपं विधत्ते ।

अजपा नाम गायत्री योगिनां मोक्षदायिनी ।
तस्याः सङ्कल्पमात्रेण सर्वपापैः प्रमुच्यते ॥ ८ ॥

अजपेति । अजपा नाम स्वयमेवोच्छ्वासनिश्वासरूपेण प्रयत्नं विना प्रवर्त्तमानत्वादजपेति प्रसिद्धा गायत्री हंसः सोहमित्येवं सकारेण शक्तिवाचकेन हकारेण शिववाचकेन चोभयोः सामानाधिकरण्येन शिवशक्त्यैक्यमनुसन्धाय गायन्तमुच्चरन्तं त्रायते रक्षतीत्यतो गायत्री, यद्वा गायत्री प्रकृतित्वादपि गायत्रीव जपार्हा सा जप्ता चेद्योगिनां योगाभ्यासवतां योगसिद्धिं दत्वा मोक्षदायिनी संसारान्मुक्तिदायिनी मुक्तिदात्री

स्यादतस्तस्या अजपाया सङ्कल्पमात्रेण केवलं सङ्कल्पेनैव सर्वपापैः समस्तपातकै रागद्वेषादिरूपैः कर्तृभिः सङ्कल्पकर्त्ता मुच्यतेऽत्यन्तं त्यज्यते किं पुनस्तस्या अनुसन्धानपूर्वकजपेन मुच्यत इति वक्तव्यमिति भावः ॥ ८ ॥

इदानीं प्राणस्थैर्यार्थं द्वारभूतानि चक्राण्याह द्वाभ्याम् ।

आधारं प्रथमं चक्रं स्वाधिष्ठानं तथैव च ।
मणिपूरं तृतीयं स्याच्चतुर्थकमनाहतम् ॥ ९ ॥

आधारमिति । आधारमेतन्नामकं चक्रं स्थानं प्रथममाद्यं भवति, स्वाधिष्ठाननामकं स्थानं च तथैव द्वितीयमित्यर्थः, तथा मणिपूरमेतन्नामकं स्थानं तृतीयं स्याद्भवेद्, अनाहतमनाहतसंज्ञं चक्रं चतुर्थकं तुरीयं भवति ॥ ९ ॥

विशुद्धिः पञ्चमं चक्रमाज्ञाचक्रं तु षष्ठकम् ।
सप्तमं ब्रह्मरन्ध्रं स्याद्भ्रमरस्य गुहा हि सा ॥१०॥

विशुद्धिरिति । विशुद्धिनामकं चक्रं स्थानं पञ्चमं भवति, आज्ञाचक्रं तु आज्ञाचक्रनामकं स्थानं च षष्ठकं षष्ठं भवति, ब्रह्मरन्ध्रं ब्रह्मरन्ध्रनामकं स्थानं सप्तमं स्याद्भवेत्, तस्यैव ग्रन्थभेदे नामान्तरमाह भ्रमरस्येति, सा हि भ्रमरस्य सैव भ्रमं राति मोहमादत्ते जीवभावेनेति भ्रमरः परमात्मा तस्य गुहा गुहत आवृणुते परमात्मा शुद्धजीवस्त्वंपदलक्ष्यो यस्यां सा गुहा स्थानं तदित्यर्थः ॥ १० ॥

इदानीं सत्स्वन्येष्वासनेषु मुख्यत्वेन सिद्धासनं लक्षयति ।

योनिस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं विन्यसे-
न्मेढ्रे पादमथैकमेव नियतं कृत्वा समं विग्रहम् ।

स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्यन्भ्रुवोरन्तरं
ह्येतन्मोक्षकपाटभेदनकरं सिद्धासनं प्रोच्यते॥ ११॥

योनीति । अङ्घ्रिमूलघटितं पादमूलेनामर्दितं योनिस्थानकं शिश्नस्थानं कृत्वाऽऽवध्य, अथानन्तरं मेढ्रे वृषणमूल एकं द्वितीयं पादं चरणं नियतमेव नित्यमेव दृढं गाढं यथा भवति तथा विन्यसेत्संस्थापयेत्, ततश्च विग्रहं शरीरं समं समानग्रीवाद्यवयवं कृत्वा संयमितेन्द्रियो नियमितबाह्येन्द्रियः स्थाणुः स्थाणुश्छिन्नवृक्षमूलं तद्वत्स्थिरश्च भूत्वा, अचलदृशा स्थिरतारया दृष्ट्या भ्रुवोर्भ्रूकुट्योरन्तरं मध्यं पश्यन्सन्, एतदित्यादिलक्षणैर्लक्षितं हि प्रसिद्धमेतद्धठयोग इत्यर्थः, मोक्षकपाटभेदनकरं मोक्षस्य मुक्तेः कपाटमिवावरकमज्ञानं यद्वा मोक्षस्य शिवशक्तिसमायोगाख्यस्य साम्यस्थितिरूपस्य च कपाटानि मूलाधारादि ब्रह्मरन्ध्रान्तानि चक्राणि तेषां पूर्वोक्तकपाटसहितानां भेदनं भेद उद्घाटनं तस्य करं कर्तृ सिद्धासनं सिद्धासननामकं प्रोच्यते कथ्यते योगिभिरिति शेषः ॥ ११ ॥

एवमासनं प्रदर्श्येदानीं शक्तिप्रबोधनप्रकारं निरूपयति द्वाभ्यां।

कृत्वा सम्पुटितौ करौ दृढतरं बध्वा तु सिद्धासनं
गाढं वक्षसि सन्निधाय चुबुकं ध्यानं ततश्चेतसि ।
वारं वारमपानमूर्ध्वमनिलं प्रोत्सार्य सन्धारय-
न्प्राणं मुञ्चति बोधयंश्च शनकैः शक्तिप्रबोधो भवेत्॥ १२॥

कृत्वेति । पूर्वमुक्तलक्षणमेव सिद्धासनं दृढतरमतिगाढं बध्वा प्रसाध्य करौ हस्तौ ततोनन्तरं सम्पुटितौ सम्पुटाकारौ कृत्वा चुबुकं तु मुखाधोगलादूर्ध्वमवयवश्चुबुकस्तमपि वक्षसि

कण्ठादधोभागे वक्षोमध्ये गाढं दृढं सन्निधाय संस्थाप्य ततस्तदनन्तरं चेतसि चित्ते ध्यानं ध्येयानुसन्धानं सन्निधाय कृत्वाऽपानमनिलधोवर्त्तिनमपाननामानं वायुमुपरितने देशे वारं वारं पुनः पुनः प्रोत्सार्य प्रचार्य प्राणं प्राणवायुं सन्धारयन्नवरुन्धन्सञ्छनकैश्चिरेण शक्तिं कुण्डलिनीं प्रबोधयन्व्युत्थापयन्सन्, एवं शक्तिप्रबोधः शक्तेः कुण्डलिन्याः प्रबोधो व्युत्थानं भवेत्स्यात्, एवं कृते सा मुञ्चति स्थानं मूलाधारमित्यर्थः ॥१२॥

पुच्छे प्रगृह्य भुजगीं सुप्तां प्रबोधयेत्सुधीः ।
निद्रां विहाय सा शक्तिरूर्ध्वमुत्तिष्ठते बलात् ॥ १३ ॥

पुच्छ इति । सुधीर्गुरुशिक्षया स्वतश्च कुशलमतिः सुप्तां निद्रितां संसारस्वप्नवतीमविद्यानिद्रावतीं वा पुच्छे मूलाधारस्थितपुच्छे प्रगृह्य सन्धार्य प्रबोधयेत्संसारविमुखत्वं सम्पाद्य शिवसंमुखत्वं सम्पादयेत्, ततः सा शक्तिः कुण्डलिनी निद्रां प्रपञ्चसंमुखतां स्वरूपाज्ञानतां वा विहाय त्यक्त्वा बलाद्वेगेनोर्ध्वं ब्रह्मरन्ध्रप्रदेशमुत्तिष्ठत ऊर्ध्वमुखी भूत्वा चलति ॥ १३ ॥

ननु वायुलयस्य किंफलं तत्राह ।

ऊर्ध्वं निलीनप्राणस्य त्यक्तनिःशेषकर्मणः ।
योगेन सहजावस्था स्वयमेव प्रजायते ॥ १४ ॥

ऊर्ध्वमिति । ऊर्ध्वं ब्रह्मरन्ध्रे निलीनप्राणस्य निःशेषं लीनो नष्टः प्राणो यस्य तस्याऽत एव त्यक्तनिःशेषकर्मणस्त्यक्तानि निःशेषाणि समस्तानि कर्माणि येन स तथोक्तस्तस्य योगेन शिवशक्तिसमायोगेन सहजावस्था सहजास्थितिर्जीवन्मुक्तिरित्यर्थः, स्वयमेव स्वत एवेत्यर्थः, प्रजायत उत्पद्यते प्राप्ता भवेदित्यर्थः ॥ १४ ॥

ननु 'ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते' इत्यादिश्रुत्या मोक्षस्य ज्ञानसाध्यत्वमुक्तं किं शिवशक्तिसमायोगेन तत्साधनभूतहठयोगेन वेत्याशङ्क्य मनोनाशस्य हठयोगजत्वात्तेन विना तन्नाशाभावे ज्ञानाभावान्मोक्षो न स्यादित्याशयेन शिवपार्वतीसम्वादश्लोकमुदाहरति ।

ज्ञानं कुतो मनसि जीवति देवि याव-
त्प्राणो न नश्यति मनो म्रियते न तावत् ।
प्राणो मनो द्वयमिदं प्रलयं प्रयाति
मोक्षं स गच्छति नरो न कदाचिदन्यः ॥ १५ ॥

ज्ञानमिति । हे देवि हे पार्वति मनसि अन्तःकरणे जीवति विद्यमाने सति ज्ञानं जीवब्रह्मैक्यज्ञानं कुतो न कुतोपि स्यादित्यर्थः, तर्हि मनो नाशः कदा स्यात्तत्राह प्राणा इति, यावत्प्राणो जीवोपाधिभूतो मनसश्चाञ्चल्यहेतुवायुर्न नश्यति नष्टो न भवति तावत्तावत्कालं मनोन्तःकरणं न म्रियते नैव नश्यतीत्यर्थः, अतः प्राणो मनश्चाञ्चल्यहेतुः पवन मनश्च प्राणजीवनहेतुभूतमधिष्ठानसहितमन्तःकरणप्रतिबिम्बितं चैतन्यं सङ्कल्पधर्मीदं द्वयमेतद्युग्मं यस्य योगाभ्यासवतो हठेन प्रलयं प्रयाति नाशं प्राप्नोति स नरः स पुरुषो मोक्षं मुक्तिसाधनभूतं ज्ञानं गच्छति प्राप्नोति अन्य उभयलयरहितः पुरुषः कदाचित्कस्मिन्नपि काले न ज्ञानं न प्राप्नोतीत्यर्थः ॥ १५ ॥

समस्तमुद्रासु शाम्भव्याः श्रैष्ठ्यात्तामेव सलक्षणामाह ।

अन्तर्लक्ष्यविलीनचित्तपवनो योगी यदा वर्त्तते
दृष्ट्यानिश्चलतारया बहिरिदं पश्यन्नपश्यन्नपि ।

मुद्रेयं किल शाम्भवी भगवती या स्यात्प्रसादाद्गुरोः
शून्याशून्यविलक्षणं मृगयते तत्त्वं पदं शांभवम्॥ १६॥

अन्तरिति । योगी योगाभ्यासी यदा यस्मिन्कालेऽन्तर्लक्ष्यविलीनचित्तपवनोन्तरभ्यन्तरे यल्लक्ष्यं शिवशक्तिसमायोगरूपं जीवब्रह्मैक्यं च तस्मिँल्लीनौ चित्तपवनौ चित्तं मनः पवनः प्राणश्च यस्य तथोक्तः स सन्निश्चलतारया स्थिरकनीनिकया दृष्ट्या दृशा बहिर्बाह्यमिदं दृश्यं जगत्पश्यन्नालोकयन्नपि स न पश्यन्नालोकयन्सन्वर्त्तते वर्त्तमानो भवति, सेयं प्रत्यक्षा भगवती भगमणिमाद्यैश्वर्यमस्यामस्तीति भगवती शांभवी शम्भुना पार्वत्यै प्रोक्ता तस्येदमित्याणि च शम्भुसम्बन्धिनी वा साधकानां शम्भवत्यस्याः सा शाम्भवी वा सर्वसाधकानां सुखदात्रीत्यर्थः, मुद्राऽवस्थारूपा या गुरोर्देशिकस्य प्रसादाद्गुरुकृपातः स्याद्भवेत्, किं फलं तस्या इत्यत आह शून्येति, ययेत्यध्याहार्यं, यया मुद्रया शून्याशून्यविलक्षणं जगतोऽसत्वं शून्यं तत्सत्त्वंचाशून्यं ताभ्यामसतः सत्ताप्रदत्वाच्छून्याज्जगतोऽशून्यरूपादपि विलक्षणमुभयलक्षणहीनं शाम्भवं शम्भुः शिवस्तत्सम्बन्धि तत्स्वरूपभूतमित्यर्थः, भेदव्यपदेशस्तुराहोः शिरोवत्, तत्त्वमनारोपितं पदं स्वरूपं मृगयते शोध्यत इदमेव फलमेतस्या इत्यर्थः ॥ १६ ॥

उक्तं सफलं हठमुपसंहरति ।

प्राणवृत्तौ विलीनायां मनोवृत्तिर्विलीयते ।
शिवशक्तिसमायोगो हठयोगेन जायते ॥ १७ ॥

प्राणवृत्ताविति । हठयोगेन हठाख्ययुक्त्या प्राणवृत्तौ प्रा-

णाख्यवायोर्वृत्तिः श्वासोच्छ्वासरूपा तस्यां विलीनायां लयं प्राप्तायां सत्यां मनोवृत्तिर्मनसोन्तःकरणस्य वृत्तिः संकल्पविकल्परूपा विलीयते नष्टा भवति, ततश्च शिवशक्तिसमायोगो ब्रह्मरन्ध्रस्थितस्य शिवस्य मूलाधारस्थितायाः शक्तेश्च समायोगः संयोग ऐक्यमित्यर्थः, जायते भवति ॥ १७ ॥

उक्तहठप्ररोचनायावान्तरफलप्रदर्शनपूर्विकामाचार्यपरिपाटीमाह ।

गोरक्षचर्पटिप्राया हठयोगप्रसादतः ।
वञ्चयित्वा कालदण्डं ब्रह्माण्डं विचरन्ति हि॥१८॥

गोरक्षेति । गोरक्षचर्पटिप्रायाः प्रायःशब्दोत्र प्रभृतिवाचको गोरक्षश्च चर्पटी चैतौ द्वौ प्रायावादी येषां ते तथोक्तास्ते हठयोगप्रसादत उक्तहठयोगस्य हठाख्ययुक्तेः प्रसादतस्तत्साधनेनैव सार्वविभक्तिकस्तासिरत्र, कालदण्डं कालस्य जगत्कलयितुरीश्वररूपस्य दण्डो मृत्युरूपस्तं वञ्चयित्वाऽनादृत्य ब्रह्माण्डं मृत्युक्रीडास्थानं ब्रह्माण्ड इत्यर्थः, विचरन्ति प्रारब्धभोगान्भुञ्जते गच्छन्ति च हि प्रसिद्धमेतदित्यर्थः ॥ १८ ॥

एवं सफलां हठक्रियां निरूप्य तस्याः वेदान्तानुकूल्याय मनसो गुणसाम्ये गुणसाम्यस्य च स्फुरणविषयत्वसम्पादने च तयोर्लयलक्षणं शिवशक्तिसमायोगं कुर्यादित्याशयेनाह ।

शक्तिमध्ये मनः कृत्वा शक्तिं मानसमध्यगाम् ।
शिवशक्तिसमायोगं कुर्वन्ति हठयोगिनः ॥ १९ ॥

इति श्रीनरहरिविरचिते बोधसारे योगदीक्षाचिन्तामणौ हठयोगः॥३॥

शक्तीति। मनः साम्यस्फुरणरूपं तत्संकल्पविकल्परूपावृत्तिः

शक्तिमध्ये साम्यकारणभूतायां चिच्छक्तौ कृत्वा शक्त्यभिन्नमनुभूय शक्तिं साम्यस्फूर्त्तिकारणरूपां चिच्छक्तिं मानसमध्यगां साम्यसंकल्पविकल्परूपमनःकल्पितत्त्वात्तन्मध्ये विद्यमानां तदभिन्नामित्यर्थः, कृत्वाऽनुभूय हठयोगिनो हठाख्यक्रियाभ्यासिन एवं शिवशक्तिसमायोगं शिवस्यात्मनः शक्तेर्गुणसाम्यरूपप्रकृतेश्च समायोगमैक्यानुभवरूपं कुर्वन्ति विदधतीत्यर्थः ॥१९॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ योगदीक्षाचिन्तामण्यर्थप्रकाशे हठयोगार्थप्रकाशस्तृतीयः ॥ ३ ॥

अथ शिवशक्तिपराक्रमः ।

एवं सफलं हठं प्रतिपाद्यानन्तरं लये क्रमानुरोधेन निरूपितव्ये तं त्यक्त्वा व्युत्क्रमेण शैवमतं राजयोगं निरूपयितुं शिवशक्तिसमायोगप्रसङ्गेन शिवशक्तिपराक्रमाख्यं चतुर्दशश्लोकं प्रकरणमारभते, तत्र तावच्छिवशक्तिपराक्रमनिरूपणं प्रतिजानीते।

अथ वक्ष्ये स्तुतिव्याजाच्छिवशक्तिपराक्रमम् ।
शोधिते सूक्ष्मया दृष्ट्या यस्मिन्निर्विस्मयो भवेत्॥ १ ॥

अथेति । अथ हठयोगनिरूपणानन्तरं तत्प्रसङ्गेनैव स्तुतिव्याजात्स्तवनमिषेणैव शिवशक्तिपराक्रमं शिवस्य परमानन्दरूपस्य परमात्मनो या शक्तिर्जगज्जननसामर्थ्यं तस्याः पराक्रमं प्रतापं चरित्रमित्यर्थः, वक्ष्ये कथयिष्यामि त्वं शृण्विति शेषः, नन्वेतच्छ्रवणस्य किंफलं तत्राह शोधित इति, सूक्ष्मया विचारसंस्कारेण सूक्ष्मीभूतया दृष्ट्या बुद्ध्या यस्मिञ्छिवशक्तिपराक्रमे शोधिते विचारिते सति विचारको निर्विस्मयः शक्तेरघटितघटनापटीयस्त्वज्ञानादाश्चर्यभूतबुद्धिरहितो गर्वर-

अनुसंधानं स्फुरणं स्वात्मस्फुरणमित्यर्थः, न खण्डितं न भग्नं यदि तर्हि सा स्वात्मानुसंधानरूपा संध्येति प्रपञ्चसाक्षिणः प्रपञ्चोद्भवस्य च सन्धिभवत्वात्स्वात्मानुसन्धानवृत्तेः सन्ध्यात्वमित्येवं बुधैर्विवेकिभिरुच्यते कथ्यते ॥ ४ ॥

इति श्रीन० मुनी० मुनीन्द्रप्रात सन्ध्यानिर्णयार्थप्रकाशो नवमः ॥ ९ ॥

अथ प्राणायामनिर्णयः ।

एवं मुनीन्द्राणां सन्ध्यां निर्णीयेदानीं तेषामेव प्राणायामं निर्णेतुं प्राणायामनिर्णयाख्यं षोडशश्लोकं प्रकरणमारभमाण माह

अथ प्राणायामनिर्णयः ।

अथेति । अथ प्रातःसन्ध्यानिरूपणानन्तरं प्राणायामो मुनीन्द्राणां प्राणायामो निर्णीयत इति शेषः । तमेव निर्णयमाह ।

शरीराभ्यन्तरो वायुः प्राणापान इतीरितः ।
स एव गतिभेदेन संज्ञादशकमागतः ॥ १ ॥

शरीरेति । शरीराभ्यन्तरः शरीरस्य वपुषोऽभ्यन्तरः शरीरावच्छिन्नो वायुर्मारुतः प्राणापानः प्रकर्षेणानिति जीवयति देहेन्द्रियादिसंघातं स प्राणोऽपानिति निःसृत्य बहिः पारयति[1] देहेन्द्रियादिसंघात सोऽपान इत्येवं नाम्नेरितः कथितः, ननु शारीरस्य वायोर्दशविधत्वं तत्र तत्र शास्त्रेषु दृष्टं तत्कथमत्र द्वैविध्यमेवोच्यते तत्राह स एवेति, स एव प्राणापानाख्यः शारीरो वायुरेव गतिभेदेन गतिर्गमनं तस्या भेदेनोर्ध्वाध इत्यादिस्थानैश्चलनभिन्नत्वेन संज्ञादशकं संज्ञानां नाम्नां दशकं दशत्वमागतः प्राप्तः प्राणापानव्यानोदानसमाननागकू-

---

१ मारयतीति वा पाठः ।

मेकृकरदेवदत्तधनंजयाख्यां प्राप्त इत्यर्थः ॥ १ ॥

ननु तर्ह्यत्र द्वैविध्यमेव कुत उक्तं तत्राह ।

ऊर्ध्वाधोगतिमुख्यं द्विरूपं तस्य गतिद्वयम् ।

ऊर्ध्वं गच्छन्भवेत्प्राणस्त्वपानः स्यादधश्चलन्॥ २॥

ऊर्ध्वाध इति । तस्य शारीरस्य वायोरूर्ध्वं चाधश्चोर्ध्वाध ऊर्ध्वाधश्च ते गती च गमने ते मुख्ये प्रधाने यस्य तत्तथोक्तं गतिद्वयं गत्योर्गमनयोर्द्वयं युग्मं द्विरूपं द्वयो रूपयोः समाहारो द्विरूपमस्तीति शेषः, ननु कया गत्या किं नाम तस्येत्यत आहोर्ध्वमिति, ऊर्ध्वमुपरि गच्छश्चलन् सन् स शारीरो वायुः प्राणः प्राणनामा भवेदुपरितनभागे नासाग्रसमवर्तिषोडशान्तस्थाने चलन्प्राणो भवेदित्यर्थः, तथा स एव शारीरो वायुरधः षोडशान्तादधो हृदयकमलान्तं चलन्गच्छन्सन्नपानोऽपाननामा स्याद्भवेत ॥ २ ॥

ननु प्राणरूपेणापानरूपेण वा शरीर एव कुतस्तिष्ठति बहिः कुतो न गच्छति तत्राह ।

अपानः कर्षति प्राणं प्राणोऽपानं च कर्षति ।

अनयोः शृङ्खला देहे तेन जीवो न निश्चलः॥ ३॥

अपान इति । अपानोऽधोगत्युपलक्षितः शारीरो वायुविशेषः प्राणमूर्ध्वगमनशीलं शारीरं वायुं कर्षति आकर्षति ततः प्राणः प्राणनामा वायुरपानमपाननामानं वायुं चापि कर्षति आकर्षति, नन्वधऊर्ध्वगतिमतोर्वाय्वोः परस्परमाकर्षणं परस्परकृतं कथं सम्भवतीत्याशङ्क्याहानयोरिति, अनयो प्राणापानयोर्देहे शरीरे शृङ्खला शृङ्खलेव परस्परं बन्धनं ग्रन्थिरि-

त्यर्थः, अस्तीति शेषः; तयोः परस्परं शृङ्खलासत्त्वे चिन्हमाह तेनेति, तेन प्राणापानशृङ्खलासत्त्वेन जीवो जीवोपाधिश्चित्तं न-निश्चलो न स्थिरो भवति अतः प्राणापानयोर्बन्धनमस्तीति निश्चेतव्यमिति भावः, अतः प्राणापानावरोधं विना चित्तस्थैर्यं न स्यादिति भावः ॥ ३ ॥

तत्रापि मतभेदमाह ।

चले वाते चलं चित्तं निश्चले निश्चलं भवेत् ।
चित्ते चले चलः प्राणो निश्चले निश्चलो भवेत्॥४॥

चल इति । वाते प्राणवायौ चले चञ्चले सति चित्तमन्तःकरणं जीवोपाधिभूतं चलं चञ्चलं भवेत्स्यात्तस्मिन्नेव प्राणवायौ निश्चले स्थिरे सति चित्तमन्तःकरणं निश्चलं स्थिरं भवेत्स्यादिति केषांचिन्मतं । तथा केषांचिन्मते चल इति, चित्ते जीवोपाधिभूतेऽन्तःकरणे चले संकल्पविकल्परूपेण चलायमाने सति प्राणः शरीरावच्छिन्नो वायुश्चलश्चञ्चलो भवेत्स्यात्तस्मिन्नेव जीवोपाधिभूतेऽन्तःकरणे निश्चले संकल्पविकल्पत्यागेन स्थिरीभूते सति स एव शारीरो वायुर्निश्चलः स्थिरो भवेत्स्यादित्येवं केषांचिन्मतं ज्ञेयम् ॥ ४ ॥

मतभेदमेव किंचित्स्पष्टीकुर्वन्नाह ।

कश्चित्प्राणजयेनैव मनोनिश्चलतां भजेत् ।
कश्चिन्मनोजयेनैव प्राणनिश्चलतां भजेत् ॥ ५ ॥

कश्चिदिति । कश्चित्कोपि हठयोगीत्यर्थः, प्राणजयेनैव प्राणः शरीराभ्यन्तरो वायुस्तस्य जयः स्थैर्येण स्वाधीनीकरणं तेनैव केवलं मनोनिश्चलतां मनसोन्तःकरणस्य निश्चलतां स्थैर्यं भजेत्प्राप्नुयात्तथाऽन्यः सांख्यः पातञ्जलश्चेत्यर्थः, मनोजयेनैव मनसो

ऽन्तःकरणस्य जयः स्थैर्यसम्पादनं तेनैव केवलं प्राणनिश्चलतां प्राणस्य शरीरावच्छिन्नस्य वायोर्निश्चलतां स्थिरत्वं भजेत्प्राप्नुयात् ॥ ५ ॥

अन्यदपि मतमाह ।

कश्चिद्द्वयजयेनैव मनोनिश्चलतां भजेत् ।
इति योगगतिज्ञानां त्रिविधा योगिनां गतिः ॥६॥

कश्चिदिति । कश्चित्कोपि मुनिर्मननवान्वेदान्तीत्यर्थः, द्वयजयेनैव द्वयं मनःप्राणयोर्द्वयं युग्मं तस्य जयः स्वाधीनीकरणं स्थैर्यसम्पादनमित्यर्थः, तनैव निश्चलतां स्वात्मनि स्थैर्यं भजेत्प्राप्नुयाद्, उक्तं मतभेदमुपसंहृत्य निगमयतीतीति, इत्येवं प्रकारा योगगतिज्ञानां योगस्य जीवब्रह्मैक्यज्ञानस्य गतिः प्राप्तिस्तां जानन्ति विदन्ति ते तथोक्तास्तेषां योगिनां योगवतां गतिर्गमनं योगप्रापकं साधनमित्यर्थः, त्रिविधा त्रिप्रकाराऽस्तीति शेषः, अन्तःकरणशुद्धिद्वारा जीवब्रह्मैक्यकारणं त्रिप्रकारं ज्ञेयमिति भावः ॥ ६ ॥

नन्वेतानि केषां मतानीति ज्ञानापेक्षायामाह ।

प्राणद्वारा मनः साध्यं मतं हि हठयोगिनाम् ।
मनसैव मनः साध्यमिति विज्ञानयोगिनाम् ॥७॥

प्राणद्वारेति । प्राणद्वारा प्राणावरोधनद्वारभूतेन प्राणायामादिरूपेण हठेन मन स्वान्तं साध्यं स्थिरत्वेन स्वाधीनं कार्यं हि एतद् हठयोगिनां हठयोगवतां मतं निश्चितमस्तीति शेषः, तथा मनसैव विवेकरूपेण मनोंशेनैव केवलं मनः संकल्पविकल्परूपो मनोंशः साध्यं संकल्पविकल्पलयेन स्थिरं कार्यमिति एवं रूपं मतं निश्चितं विज्ञानयोगिनां पातञ्जलसांख्यादीनामस्ति । तत्र

केवलविवेकेनैव मनःस्थैर्यं न भवति किन्तु प्राणावरोधेनैव योगिष्वेत्र तत्स्थैर्यस्य दृश्यमानत्वादिति हठमतं, केवलप्राणायामादिना कृतेपि प्राणावरोधे मनोमौढ्यात्वशेषाद्बीजरूपेण मनोवशिष्टमिति सुप्तिमूर्छादिष्विव न मनोलयरूपः पुरुषार्थः सिद्ध्यतीति विवेकेनैव केवलं मन्तव्यमिथ्यात्वप्रतीतौ दृढतरायां सत्यां मनसः शैथिल्येन क्रमाल्लयरूप पुरुषार्थः सिद्ध्येदिति ज्ञानिनां मतमिति विवेक. ॥ ७ ॥

वेदान्तमतमाह ।

मनःप्राणद्वययुजस्ते तु श्रेष्ठतराः स्मृताः ।
चेच्छुष्कहठिनो मूढास्ते भण्डा न तु योगिनः॥८॥

मन·प्राणेति । ये तूक्तोभयविलक्षणा इति तुपदार्थ, तदेव वैलक्षण्यमाह मन इति, मनश्चान्तःकरणं प्राणश्च शारीरो वायुस्तयोर्द्वयं युग्मं तद्युञ्जन्ति लीनं स्वात्मनि कुर्वन्तीति ते तथोक्तास्ते श्रेष्ठतरा अतिश्रेष्ठा इत्यर्थः, स्मृता उक्ता मुनिभिरिति शेष·, विनैव गुरुदीक्षां स्वबुद्ध्या हठे प्रवृत्तान्निन्दति चेदिति, मूढा हठक्रियाज्ञानशून्या गुरुशिक्षारहिता इत्यर्थ·, अत एव शुष्कहठिनो निष्फलहठाभ्यासरताश्चेद्यदि भवन्ति तर्हि ते शुष्कहठाभ्यासिनो भण्डा हठक्रियाविनोदिन एव ज्ञेया, तु पुनस्ते योगिनो हठयोगाभ्यासिनो न न भवन्ति हठमिषेण ते लोकवञ्चका ज्ञेया इति भाव· ॥ ८ ॥

इदानीं सिद्ध्यनादरेण मुक्तावादरं विधातुं सिद्धिकामेन हठेप्रवृत्तानां क्षुद्रत्वं दर्शयति ।

ते त्वर्धयोगिनः प्रोक्ताः क्षुद्रसिद्ध्यर्थयोगिनः ।
पिङ्गलेडा सुषुम्णा च मुख्यास्तिस्रस्तु नाडिषु॥९॥

ते त्विति । ये तु तुपदेन गुरुशिक्षया हठाभ्यासिषु पूर्वेभ्यः श्रैष्ठ्यं सूचितं, क्षुद्रसिद्ध्यर्थयोगिनः क्षुद्रास्तुच्छाः परकायप्रवेशाकाशगमनादिका मोक्षविघ्नभूता याः सिद्धयस्ता एवार्थः प्रयोजनं तस्मै तत्प्राप्तुं योगिनो योगाभ्यासिनो भवन्ति तेऽन्ययोगिनोऽलौकिकसिद्धिकारणयोगवत्त्वाद्योगिनोऽपि प्रधानफलभूतमोक्षाभावात्तेषां क्षुद्रत्वाच्चाधियोगिनः प्रोक्ताः कथिता मुमुक्षुभिस्तत्रादरो न कर्तव्य इति भावः, अत्र पतञ्जलिरप्याह 'ते समाधावुपसर्गा व्युत्थाने सिद्धय' इति । अस्यार्थः, याः सिद्धयोऽन्तर्धानादयस्ते समाधौ मुक्तावुपसर्गा विघ्नभूता भवन्ति, ननु समाधावन्तःकरणलये सति कथं सिद्ध्यनुभवस्तत्राह व्युत्थान इति, समाधिनो व्युत्थानेन प्रपंचोद्भवे सति य एव सिद्धयः सिद्धिशब्दवाच्योऽर्थ इत्यर्थः, स एव विघ्नभूतो ज्ञेय इति, अतः सिद्ध्यादरं परित्यज्य मुक्तिहेतुक योगमभ्यसितुं योगाङ्गभूतं प्राणायामं निरूपयिष्यन्तदुपोद्घातत्वेन नाडीभेदमाह पिंगलेति, नाडिषु द्वासप्ततिसहस्रसंख्यासु देहान्तर्वर्तिनीषु नाडिषु मध्ये मुख्याः प्रधानास्तिस्रस्तु त्रिसंख्याका नाड्यो भवन्ति तदधीनत्वात्सर्वासामिति भाव, तुपदेन द्वासप्ततिसहस्रनाडीभ्यस्तिस्रोऽतिविलक्षणा इति सूचितं, ता एव नामतो निर्दिशति पिङ्गलेति, पिङ्गला पिङ्गलानाम्न्येकेडेडानाम्नी द्वितीया सुषुम्णा-च सुषुम्णानाम्न्यपि तृतीया भवति ॥ ९ ॥

स्थानतोपि ता निर्दिशति ।

इडा वामा पिङ्गलान्या सुषुम्णा मध्यवर्तिनी ।
वामदक्षिणमार्गेण सदा वहति मारुतः ॥ १० ॥

इडेति । वामा वामभागे प्रवर्तमानेडेडानाम्नी ज्ञेया, अन्या दक्षिणा दक्षिणभागे प्रवर्तमाना नाडी पिङ्गला पिङ्गला-

नाम्नी भवति, तथा मध्यवर्तिनी मध्ये प्रवर्तमाना नाडी सुषुम्णा सुषुम्णानाम्नी ज्ञेया, यदर्थं नाडीभेद उक्तस्तमाह वामेति, मारुतः शारीरो वायुर्वामदक्षिणमार्गेण वाम सव्यो दक्षिणोऽपसव्यो मार्गो नाडीच्छिद्रं तेनेडापिङ्गलानाडीभ्यामित्यर्थं, सदा नित्य वहति चलति ॥ १० ॥

तर्हि सुषुम्णायां कदा चलतीत्यत आह ।

यदा द्वावपि रुध्येते प्राणमार्गौ सुयोगिना ।

तदान्यत्सर्पवत्प्राणो रन्ध्रमाविशति स्वयम् ॥ ११ ॥

यदेति । सुयोगिना सम्यग्योगाभ्यासवता पुरुषेण द्वावपीडापिङ्गलानामानावुभावपि प्राणमार्गौ प्राणस्य शारीरावच्छिन्नस्य वायोर्मार्गौ पन्थानौ रुध्येते रुद्धौ भवतो यदा यस्मिन्काले तदा तस्मिन्काले प्राणः शारीरो वायुः सर्पवद्यथा सर्पः सर्वेषु च्छिद्रेषु रुद्धेषु सत्सु तदन्यत्सूक्ष्ममपि च्छिद्रं प्रविशति तद्वदन्यदिडापिङ्गलाभ्यां भिन्नं रन्ध्रं छिद्रं तृतीयं सुषुम्णाख्यं स्वयं स्वत एवाविशति प्रविशति, इडापिङ्गलारोधनमेवापेक्षितं न तु ततोन्यः सुषुम्णायां वायोः प्रवेशने प्रयत्नोऽपेक्षित इति भावः ॥ ११ ॥

सुषुम्णाप्रवेशनक्रममेवाह ।

स्थिता कुण्डलिनी मूले जीवशक्तिरनुत्तमा ।

तामुत्थाप्य तया सार्धं सुषुम्णां प्राण आविशेत् ॥ १२ ॥

स्थितेति । मूले मूलाधाराख्यचक्रे गुदस्थान इत्यर्थः, अनुत्तमा न विद्यत उत्तमा श्रेष्ठा यस्याः सा तथाभूताऽतिश्रेष्ठेत्यर्थः, जीवशक्तिर्जीवस्य साधिष्ठानबुद्धिस्थचिदाभासस्येत्यर्थः, शक्तिः सामर्थ्यरूपा कुण्डलिनी कुण्डलिनीनाम्नी

जाग्रदादिमोक्षपर्यन्तजीवसंसारजनयित्रीत्यर्थः, स्थिता वर्तमाना-ऽस्तीति शेषः, अस्तु किं तत इत्यत आह तामिति, प्राणः शारीरो वायुः प्राणायामाभ्यासेनावरुद्धस्तां कुण्डलिनी-मुत्थाप्यान्तर्मुखीं कृत्वा जीवस्य यत्पारमार्थिकं शिवस्वरूपं तदभिमुखीं कृत्वेत्यर्थः, तया जीवशक्त्या सार्धं सह सुषु-म्णां ब्रह्मनाडीमाविशेत्प्रवेशं कुर्यादेवं प्राणस्य सुषुम्णा-प्रवेशक्रमो ज्ञेयः ॥ १२ ॥

ततः किमित्यत आह ।

सुषुम्णावाहिनि प्राणे ब्रह्मरन्ध्रं गते सति ।
तत्र निश्चलतां याते मनो निश्चलतां व्रजेत् ॥१३॥

सुषुम्णेति । प्राणे प्राणवायौ सुषुम्णावाहिनि सुषुम्णा ब्रह्मनाडी तस्यां वाहिनि प्रवेशवति सति ततस्तया नाड्या ब्र-ह्मरन्ध्रं भ्रमरगुहानामकं स्थानं प्रति गते प्राप्ते सति ततश्च तत्र ब्रह्मरन्ध्रे निश्चलतां स्थिरतां याते प्राप्ते सति ततो मनः सङ्क-ल्पविकल्पात्मकं जीवोपाधिभूतमन्तःकरणं निश्चलतां स्थैर्यं व्रजेत्प्राप्नुयात् ॥ १३ ॥

एवं हठक्रमेण मनोलयप्रकारमुक्त्वेदानीं ज्ञानक्रमेणापि तमाह ।

मनो यदि निरुध्येत केवलं ज्ञानयोगिना ।
प्राणापानौ नश्यतस्तु मनोनाशेन तत्क्षणात् ॥ १४ ॥

मन इति । ज्ञानयोगिना ज्ञानयोगाभ्यासवता केवलं प्रा-णोपाधितो विविक्तं सद्यदि यर्हि विवेकेन मनः सङ्कल्पवि-कल्पात्मकमन्तःकरणं सङ्कल्पविकल्परूपांशं संत्याज्य निरुध्येता-वरुध्यात्तर्हि तदा मनोनाशेन सङ्कल्पविकल्पांशमनसो नाशेन क्षयेन तत्क्षणात्सद्य एव प्राणापानौ प्राणापाननामानौ वायू

नश्यतो नष्टौ भवतो निद्रामूर्च्छादौ मनोलये सति प्राणापान-प्रवाहस्य विद्यमानत्वेपि बाधादर्शनादिति मनोलयेनैव तयोर्नाश इति भावः ॥ १४ ॥

एवमुभयमतं निरूप्येदानीं मुमुक्षुग्राह्यं वेदान्तमतमाह ।

तस्मात्सिद्धान्त एवैको हठविज्ञानयोगिनोः ।
शास्त्रोक्तमिति विज्ञाय निर्णयं प्राणचेतसोः ॥ १५ ॥

तस्मादिति । हठविज्ञानयोगिनोर्हठयोगज्ञानयोगाभ्यासवतोस्तस्मान्मनोलयस्यैवोभयत्र साध्यत्वाद्धेतोः सिद्धान्तो निश्चय एक एव सम एव भवतीत्येवं शास्त्रोक्तं वेदान्तशास्त्रोक्तं प्राणचेतसोः शरीरावच्छिन्नस्य वायोर्मनसश्च निर्णयं सिद्धान्तं विज्ञाय ज्ञात्वा ॥ १५ ॥

प्राणायामं मुनिः कुर्यान्मनोलयसमन्वितम् ॥ १६ ॥

इतिश्रीन० बो० मुनीन्द्र० प्राणायामनिर्णयो दशमः ॥ १० ॥

मुनिर्मननवान् सन् विवेकपूर्वकमित्यर्थः, प्राणायामं प्राणानां शारीरवायूनामायाममवरोधनं मनोलयसमन्वितं मनसः सङ्कल्पविकल्पात्मकवृत्तेर्लयो नाशस्तेन समन्वितं सहितं यथा भवति तथा कुर्यात्क्रियतामित्यर्थः, केवलप्राणायामेन प्राणस्थैर्येपि विवेकाभावेन बीजनाशाभावान्मनोनाशाभावः केवलविवेकेन मनोनिरोधे प्राणायामाभावात्पुनः पुनस्तदुदयान्मनोनाशाभाव इति मनोमलनिवृत्त्यै प्राणायामोपेक्षितस्ततो विवेकेनोत्पन्नेन मनोलयो भवतीति निश्चयोयं मुमुक्षुभिर्ग्राह्य इति भावः ॥ १६ ॥

इति श्रीनरहरिशिष्यदिवाक० बो० मुनीन्द्रदिनचर्यार्थप्रकाशे प्राणायामनिर्णयार्थप्रकाशो दशमः ॥ १० ॥

किञ्च तेषां मते कल्पनालाघवं साध्यते तदपि तेषां कल्पनागौरवमेव सिध्यति, वेदान्ते तु मायाङ्गीकारे कल्पनालाघवं सिध्यत्यतस्तेषामपि मायातत्त्वाङ्गीकार इष्टएवेति वेदान्ताङ्गीकारः कर्त्तव्य इत्याशयेनाह ।

कल्पनागौरवं दोषः कल्पनालाघवं गुणः ।
इति यत्तार्किकैरुक्तं तदेव मम रोचते ॥ ७ ॥

इति० बो० मु० अष्टा० वैशेषिकनिर्णय ॥ ३ ॥

कल्पनेति । कल्पनागौरवं कल्पनानां गौरवमाधिक्यं दोषोऽचातुरी कल्पनालाघवं कल्पनानां लाघवं न्यूनत्वं गुणश्चातुर्यमित्येवं यत्प्रसिद्धं तार्किकैरुक्तं न्यायशास्त्रविद्भिः कथितमेव केवलं न तु अङ्गीकृतं मायाङ्गीकारं विना तत्र न सिध्यतीति भावः, मम तु मायातत्त्वाङ्गीकर्तुस्तदेव कल्पनालाघमेव रोचत [illegible] भवति अतस्तर्कवैशेषिकमतादरं परित्यज्य वेदान्त एवादरो विधेय इति भावः ॥ ७ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ
मुनीन्द्रदिनचर्यार्थप्रकाशेऽष्टादशविद्यास्थाननिर्णयार्थ-
प्रकाशान्तर्गतो वैशेषिकनिर्णयार्थप्रकाश
स्तृतीय. ॥ ३ ॥

अथ सांख्यनिर्णय ।

एवं वैशेषिकनिर्णयमभिधायेदानीं प्रसङ्गप्राप्तं सांख्यनिर्णयाख्यं चतुःश्लोकं प्रकरणमभिदधान आह ।

अथ सांख्यनिर्णयः ।

अथेति । अथ वैशेषिकनिर्णयानन्तरं सांख्यनिर्णयः सांख्यस्य सांख्याभिधशास्त्रस्य निर्णयो विचारः क्रियत इति शेषः, तत्र

तावत्प्रथमं संख्यातीतस्य ब्रह्मणः केवलतत्त्वसंख्यामात्रनिर्णायकसांख्यविषयत्वाभावात्सांख्यस्य निष्फलश्रमत्वं दर्शयति ।

असंख्याः सांख्य तत्त्वानां संख्याः संख्यातवानसि ।
किं सांख्य सख्यया ब्रह्म संख्यातीतं विचिन्तय ॥१॥

असंख्या इति। हे सांख्य सम्यक्ख्यायन्ते प्रकथ्यन्ते तत्त्वान्यस्मिन्तत्सांख्यं तद्वेत्ति अधीते वा सांख्यस्तस्य सम्बोधने हे सांख्य त्वं तत्त्वानां प्रकृतिपुरुषादीनामसङ्ख्या नविद्यन्ते सङ्ख्या गणना यासां तास्तथोक्ताः सङ्ख्या गणनाः पञ्चविंशतिषड्विंशत्यादिरूपाः सङ्ख्यातवान्निरूपितवानसि विद्यसे तर्हि साङ्ख्यसङ्ख्यया साङ्ख्यशास्त्रनिरूपितया सङ्ख्यया गणनया किमस्माकं मुमुक्षूणां किं फलं न किमपि फलमित्यर्थः, अतः साङ्ख्यस्यापि निष्फलश्रमत्वात्साङ्ख्यादरं परित्यज्य ब्रह्मचिन्तने प्रवर्तितव्यमिति साङ्ख्यं प्रेरयति ब्रह्मेति, त्वं ब्रह्म देशकालवस्तुकृतपरिच्छेदरहितमात्मवस्तु विचिन्तय स्मर, ननु साङ्ख्यविचारेणापि ब्रह्मैव चिन्त्यत इति चेन्नेत्याह सङ्ख्यातीतमिति, सङ्ख्यातीतं साङ्ख्योक्तसङ्ख्यया विषयीकृतं न भवति ब्रह्माऽतः साङ्ख्यस्य निष्प्रयोजनश्रममात्रत्वात्तत्त्यक्त्वा परं ब्रह्मैव चिन्तनीयमिति भावः ॥ १ ॥

ननु तत्त्वज्ञानं मोक्षसाधनत्वेन भवतामपीष्टं साङ्ख्यं च तत्त्वज्ञानप्रतिपादकं तत्कुतः साङ्ख्यं नाङ्गीक्रियते भवद्भिरित्याशङ्क्याह ।

तत्त्वज्ञानं त्वया प्रोक्तं तत्त्वज्ञानं मतं मम ।
तत्त्वातीतस्य विज्ञानं तत्त्वज्ञानं हि मुक्तये ॥२॥

तत्त्वज्ञानमिति । हे साङ्ख्य त्वया भवता तत्त्वज्ञानं तत्त्वानां

प्रकृतिपुरुषादीनां ज्ञानं बोधनं प्रोक्तं कथितं मम मे मुमुक्षो-
स्तत्त्वज्ञानं तत्त्वबोधनमेव मतमिष्टं तथापि त्वत्प्रतिपादितं त-
त्त्वज्ञानं न मोक्षसाधनं तर्हि तत्कीदृशं मोक्षसाधनं तत्त्वज्ञानं
तत्राह तत्त्वातीतस्येति, तत्त्वातीतस्य तत्त्वेभ्यो भवदुक्तप्रकृतिपु-
रुषादितत्त्वेभ्योऽतीतस्य भिन्नस्य तत्त्वास्पृष्टस्येत्यर्थः, विज्ञा-
नमनुभवस्तत्त्वज्ञानं तत्त्वस्यानारोपितस्वरूपस्य जीवब्रह्मैक्यल-
क्षणस्य ज्ञान बोधनमस्माकमिष्टं तदेव मुक्तये मुक्त्यर्थं भवति
न त्वत्प्रोक्तं मुक्तये तत्त्वज्ञानं भवतीत्यर्थः, अतस्तन्नाङ्गीक्रियते-
ऽस्माभिरिति भाव· ॥ २ ॥

ननु तत्त्वविवेचन पुरुषज्ञानार्थमस्माभिः कृतमित्याशङ्क्या-
ङ्गीकरोति ।

पुरुषस्य परीक्षार्थं मया संख्या निरूपिता ।
सांख्य एवं यदि प्राह तर्हीदं मम संमतम् ॥ ३ ॥

पुरुषस्येति । पुरुषस्य प्रकृतिविकृतिविलक्षणस्यासङ्गस्या-
त्मनः, तदुक्तं ।

'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः' इति ॥

परीक्षार्थं ज्ञानार्थं मया साङ्ख्यशास्त्रप्रणेत्रा सङ्ख्या तत्त्वानां
प्रकृत्यादीनां पञ्चविंशतिषड्विंशत्याद्या निरूपिता प्रतिपादिते-
वमनेन प्रकारेण यदि यर्हि साङ्ख्यः साङ्ख्यशास्त्रप्रणेता
कपिलस्तदध्ययनवान्तज्ज्ञो वाऽन्यः कोपि प्राह वक्ति तर्हि
तदेदं वचनं साङ्ख्यापसिद्धान्तापातेन त्वंपदार्थशोधनमात्रो-
पयोगितया च मम मुमुक्षोः संमतमिष्टं भवति भवान्साङ्ख्यासि-
द्धान्त परित्यज्य वेदान्त आगत इति भावः ॥ ३ ॥

तर्हि तत्त्वसङ्ख्यायाः पुरुषपरीक्षामात्रोपयोगित्वाङ्गीकारे

तत्रैवाभिनिवेशो न कर्त्तव्य इत्याह ।

पुरुषान्नपरं किञ्चित्सा काष्ठा सा परा गतिः ।
पुरुषं पश्य रे सांख्य संख्यया किं प्रयोजनम् ॥ ४ ॥

इ० बो० मु० अष्टा० सांख्यनिर्णयश्चतुर्थे ॥ ४ ॥

पुरुषादिति । पुरुषादसङ्गसच्चिदानन्दपरिपूर्णरूपादात्मनः परं श्रेष्ठं किञ्चित्किमपि न न विद्यते सैव काष्ठा सर्वसुखावधिरूपा सोक्तलक्षणा परोत्कृष्टा गतिः स्थितिर्ज्ञेया, अरे साङ्ख्य सङ्ख्यायामभिनिवेशित्वान्नीचसम्बोधनं त्वं पुरुषं परिपूर्णरूपमात्मानं पश्यावलोकय तं त्यक्त्वा सङ्ख्यया तत्त्वानां गणनया किं प्रयोजनं किं फलं न किमपीत्यर्थः, अतः सङ्ख्याभिनिवेशेन व्यर्थश्रमो न कर्त्तव्य इति भावः ॥ ४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपौ मुनीन्द्रदिनचर्यार्थप्रकाशेऽष्टादशविद्यास्थाननिर्णयार्थप्रकाशान्तर्गत साङ्ख्यनिर्णयार्थप्रकाशश्चतुर्थः ॥४॥

अथ पातञ्जलनिर्णयः ।

एवं साङ्ख्यनिर्णयमभिधायेदानीं पातञ्जलयोगं निर्णेतुं पातञ्जलनिर्णयाख्य नवश्लोक प्रकरणमभिदधान आह ।

अथ पातञ्जलनिर्णयः ।

अथेति । अथ साङ्ख्यनिर्णयानन्तरं पातञ्जलनिर्णयः पतञ्जलिना प्रोक्त पातञ्जल शास्त्रं तस्य निर्णयो विचारः क्रियत इति शेषः, पातञ्जलमित्यत्र 'तेन प्रोक्तमि'तिसूत्रेणाण्, तत्रादौ योगसिद्धिप्रसक्त्या श्रमहेतुत्वे मुमुक्षूणामादरं आजयितुं पातञ्जलस्य दर्शयति ।

योगसिद्धिप्रसक्तोयं पातञ्जलपरिश्रमः ।
कलाकौशलमेवेदं न स्वरूपस्थितिर्हि सा ॥ १ ॥

योगसिद्धीति । अयं पतञ्जलिप्रोक्तो योगाख्यः परिश्रमः सर्वकालं श्रम एव यतो योगसिद्धिप्रसक्तो योगानां धारणाविशेषाणां सिद्धय आकाशगमनाद्यास्तासु प्रसक्तोऽत्यासक्तोऽतः पातञ्जलपरिश्रमः पातञ्जले पतञ्जलिप्रोक्ते शास्त्रे परिश्रम एव केवलं ज्ञेयो न तत्रोक्तसाधनैर्मोक्ष इति भावः, तर्हि किं तत्रत्यसाधनैर्भवतीत्याशङ्क्याह कलेति, इदं पातञ्जलं कलाकौशलमेव कलासु योगसिद्धिषु कौशलं कुशलत्वं चातुर्यमात्रं केवलमित्यर्थः, सा कुशलता न स्वरूपस्थितिः स्वस्यात्मनो रूपे तस्य स्थितिस्तदाकारा स्थितिरित्यर्थः, न न भवति हि एतद्विवेकिनां प्रसिद्धम् ॥ १ ॥

कायव्यूहसिद्धिप्रसक्त्या योगाभ्यासप्रसक्तं प्रत्याह ।

रे योगसिद्ध जीवानां कायव्यूहो न दुर्लभः ।
विदेहमुक्तता सिद्धिः कायव्यूहो न सिद्धये ॥२॥

रे योगसिद्धेति । रे योगसिद्ध रे इति नीचसम्बोधनं योगसिद्धिप्रसक्तत्वान्नीचत्वं हे योगसिद्ध्यासक्त जीवानां जीवत्वं प्राप्तानां कायव्यूहः कायानां देहानां व्यूहः समूहो न दुर्लभो न दुःप्रापः किन्तु सुलभ एवेत्यर्थः, ननु योगाभ्यासेन विना जीवानां कायव्यूहो दुर्लभ एवेति चेन्न भ्रमजन्यस्वाप्नमानोरथिकप्रपञ्चादावुक्तदेहानां तदीयत्वेन दर्शनाज्जाग्रत्प्रपञ्चस्यापि विचारदृष्ट्या हिरण्यगर्भस्वप्नत्वात्तैजसहिरण्यगर्भयोरभिन्नत्वस्य पारमार्थिकत्वात्स्वप्नत्वस्य तुल्यत्वे कायव्यूहत्वसिद्धेः सुलभत्वं कायव्यूहस्य जीवानामिति भावः,

ननु तर्हि तत्र तत्र वेदान्ते तत्त्वज्ञानात्सिद्धिरवाप्यत इत्युच्यते तत्कथं सिद्धिर्निन्द्यते भवद्भिरिति चेत्तत्राह त्रिदेहेति, विदेहमुक्तता देहराहित्येन ब्रह्मरूपतया स्थितिरेव सिद्धिः सिद्धिशब्देनाभिहिता वेदान्ते कायव्यूहः शरीरसमूहधारणेनानेकभोगभोगो न सिद्धये मुक्तये न भवतीति तत्र तत्र वेदान्ते निश्चितमिति भावः ॥ २ ॥

एवं कायव्यूहसिद्धिं विदूष्येदानीं परकायप्रवेशरूपां सिद्धिं दूषयन्परकायप्रवेशसिद्धीच्छया योगाभ्यासासक्तं प्रत्याह ।

हे योगसिद्ध जानासि परकायप्रवेशनम् ।
परं तु नैव जानासि परकायप्रवेशनम् ॥ ३ ॥

हे योगसिद्धेति । हे योगसिद्ध हे योगधारणया सिद्धंमन्य त्वं परकायप्रवेशनं परेषामन्यप्राणिनां कायेषु देहेषु प्रवेशनं प्रवेशयुक्तिं जानासि वेत्सि तथाप्ययमभिमान एव तव परकायप्रवेशनं नैव वेत्सि कुत इत्यत आह परं त्विति, परन्तु तथापि त्वं परकायप्रवेशनं परं परमात्मानं कायति वक्ति भागलक्षणयोपदिशतीत्यर्थः, तत्परकायं महावाक्यजातं तत्त्वमस्यादिरूपं तस्मिन्दृढमोक्षेच्छया प्रवेशनं तदर्थावगाहनं, यद्वा परकायेन महावाक्योपदेशेन प्रवेशनं प्रवेशोऽर्थादात्मनीत्यवगन्तव्यं तन्नैव जानासि नैव वेत्सीति मन्येहम् ॥ २ ॥

ननु मास्तु महावाक्यद्वारात्मनि प्रवेशनमन्यशरीरप्रवेशरूपा सिद्धिस्तु वर्त्तत एव ममेत्याशङ्क्याह ।

भूतादयोपि जानंति परकायप्रवेशनम् ।
सा सिद्धिर्नैव बन्धः सा यद्धि कायप्रवेशनम् ॥२॥

भूतादय इति । भूतादयो भूताः पिशाचा आदयो मुख्या येषां ते रोगज्वरादयोऽप्यादिशब्देन ग्राह्यास्ते परकायप्रवेशनं परेषामन्यप्राणिनां कायेषु प्रवेशनं प्रवेशयुक्तिं जानन्ति विन्दन्ति तद्योनिप्रापकेन क्षुद्रकर्मणापि तादृशयोनिप्राप्त्या सा स्यादेवाऽतस्तदर्थं महांश्चित्तावरोधयोगरूपः प्रयासो नैवापेक्षितोऽतस्तयैव न कृतार्थतेति भावः, ननु परकायप्रवेशरूपा सिद्धिर्योगफलमेवातः कुतो भवद्भिर्निन्द्यत इति चेत्तत्राह सेति, यत्प्रसिद्धं कायप्रवेशन काये शरीरे प्रवेशनं प्रवेश इति सा कायप्रवेशरूपा नैव सिद्धिर्नैव मुक्तिर्भवति किन्तु सा परकायप्रवेशरूपा बन्धो बन्धनमेव भवति हि प्रसिद्धमिदं सर्वशास्त्रेषु विवेकिषु चातः परकायप्रवेशसिद्धिसाधनभूतयोगधारणासक्तिं परित्यज्य मोक्षसाधनभूते वेदान्तश्रवणादावेव प्रवर्त्तितव्यमिति भावः ॥ ३ ॥

एव परकायप्रवेशादरं परित्याज्य चिरजीवितसिद्धिकारणभूतयोगधारणासक्तं प्रत्याह ।

अवश्य मरणं तर्हि कीदृशी चिरजीविता ।
जन्ममृत्युजराध्वंसि त्वं विज्ञानामृतं पिब ॥ ५ ॥

अवश्यमिति । हे योगसिद्ध यत्र चिरजीवनेऽवश्यं निश्चयेन मरणं मृत्युर्भवति तर्हि तदा सा चिरजीविता बहुकालं जीवनता कीदृशी कथं सिद्धा न कथमपीत्यर्थः, यथा जन्मतो मरणान्त रुग्णस्य समाशतं जीवनमपि न तज्जीवनत्वेन गृह्यते विवेकिभिरैहिकपारलौकिकभोगसाधनकर्माचरणाशक्त्या मरणतुल्यत्वात्तथा मरणभीत्या योगधारणायां स्थितः सन् चिरजीवित्वं साधितं तत्राप्यन्तेऽवश्यं मरणे सिद्धे निरन्तरं

तत्प्रतीत्या तद्भयेन निरन्तरं धारणायामेव स्थितस्यैहिकभोगसाधनव्यवहारे प्रवृत्त्ययोगेन भोगाभावाद्योगधारणायाश्च चिरजीवित्वसिद्धिफलकत्वे चरितार्थत्वात्तस्या अन्यलोकभोगफलकत्वाभावाच्च तदन्यधर्मादिसाधनाचरणासिद्धेश्च पारलौकिकभोगाभाववत्त्वं तस्या मोक्षसाधनश्रवणाद्यनुष्ठानासिद्धेश्चैतादृशचिरजीवित्वस्य चिररुग्णत्वसाम्याच्चिरमरणमेव तदिति ज्ञात्वा तस्मिंस्तद्धारणायां चानादरो मुमुक्षुभिः कर्त्तव्य इति भावः, ननु तर्हि मरणनिवृत्तेरेव मोक्षत्वान्मोक्षस्य च भवतामपीष्टत्वाच्चिरजीवित्वं भवतामपीष्टमतः कुतो निन्द्यते तत्राह जन्मेति । त्वं भवाञ्जन्ममृत्युजराध्वंसि जन्म सदद्वैतानृतद्वैतयोरन्योन्यस्मिन्नन्योन्याारोपरूपमन्योन्यधर्मारोपरूपं चेति लक्षितं जन्म तथा मृत्युरपि विवेकेन सदद्वैतानृतद्वैतयोर्विवेचनेन पृथक्त्वावलोकनरूपं मरणमिति लक्षितो मृत्युर्लोकप्रसक्षे जन्ममरणे वा जरा वार्धक्य तेषां विध्वंसि नाशकं विज्ञानामृत विज्ञानं जीवब्रह्मैक्यसाक्षात्काररूपं तदेवोभयलक्षणमरणनिवर्त्तकत्वादमृतमिवामृतं मोक्षरूपं तदेवास्माकमिष्टं तत्त्वं पिब माशयाङ्गीकुर्वित्यर्थः, मुमुक्षूणामिष्टो मरणनिवृत्तिरूपो मोक्षो ज्ञानेनैव साध्यः स एवात्यन्तमरणनिवृत्तिरूपः परमपुरुषार्थरूपः, ननु एकदेशिकया कयाचिद्योगधारणया चिरजीविताऽतस्तदादरं परित्यज्य मुमुक्षुभिर्वेदान्तश्रवणादिष्वेवादरः कर्तव्य इति भावः ॥ ५ ॥

एवं चिरजीवनसाधनभूतयोगधारणां विदूष्येदानीं परचितस्थितवस्तुज्ञतारूपसिद्धिसाधनधारणारतं प्रत्याह ।

परचित्तस्थितं वस्तु त्वया ज्ञातं ततश्च किम् ।

स्वचित्तसंस्थितं वस्तु परं ब्रह्म विलोकय ॥ ६ ॥

परेति । त्वया हे योगिन्भवता धारणावता परचित्तस्थित परेषामन्यप्राणिनां चित्तान्यतःकरणानि तेषु स्थितं चिन्त्यतया वर्त्तमानं वस्तु पदार्थजात ज्ञातमवबुद्ध तनश्च ततो ज्ञानादपि तत्र किं किं फलं न किमपीत्यर्थः, परमात्मनोऽन्यत्कल्पितं चित्तं तत्रस्थं वस्त्वपि कल्पितमतस्तत्सर्वेषामप्यस्ति अतस्तावन्मात्रेण कृतार्थता नैवं मंतव्या तदर्थं महान्योगरूपः प्रयासश्च नैव कर्त्तव्य इति भावः, तर्हि किंकर्त्तव्यमित्यत आह स्वेति, स्वचित्तसस्थितं स्वस्य चित्तमन्तःकरणं तत्र संस्थित वस्तु सत्यरूप परं ब्रह्म कार्यकारणत्वरहितं देशकालवस्तुकृतपरिच्छेदशून्यमात्मस्वरूपं विलोकय साक्षात्पश्य स्वतः पृथक्तया भ्रान्तिसिद्धं समष्टिव्यष्ट्यन्तःकरणं तत्र स्थितभ्रमरूपजगद्विषयकज्ञानस्यापि भ्रमरूपत्वादस्माकं तेनापि प्रयोजन नास्ति तर्हि तदेकदेशव्यष्ट्यन्तःकरणस्थपरचित्तस्थितवस्तुज्ञानरूपसिद्ध्या प्रयोजनं नास्तीति किं वक्तव्यमतस्तत्रादरं परित्यज्य स्वचित्तबोधेन स्वचित्तस्थितब्रह्मसाक्षात्कारसाधनेषु वेदान्तश्रवणादिष्वेवादरो मुमुक्षुभिः कर्त्तव्य इति भावः ॥ ६ ॥

इदानीं दूरश्रवणदर्शनाख्यसिद्धिसाधनभूतधारणाभ्यासरतं प्रत्याह ।

निकटस्थस्यात्मनश्चेन्न स्याच्छ्रवणदर्शनम् ।
का सिद्धिः सा तु या सिद्धिर्दूरश्रवणदर्शनम् ॥७॥

निकटेति । अत्यन्ताव्यवहितत्वान्निकटस्थस्यातिसमीपवर्तिन आत्मनः स्वात्मनः स्वात्मवस्तुनः श्रवणदर्शनं श्रवणमित्युपलक्षण मननिदिध्यासनयोः, तद्द्वारा दर्शनं च साक्षा-

त्कारस्तयोः समाहार एकवद्भावः, न स्याच्चेन्न भवेद्यदि तर्हि या तु योगशास्त्रे प्रसिद्धा दूरश्रवणदर्शनं दूरस्थपुरुषाद्युच्चारितशब्दानां श्रवणं तथा दूरस्थितपदार्थानां दर्शनमवलोकनं चेति सिद्धिर्विभूतिरस्ति सा का न सा सिद्धिर्गणनार्हेत्यर्थः, दूरश्रवणदर्शनरूपसिद्ध्योरनात्मविषयत्वेन मिथ्यात्वात्तदभ्यासस्य च व्यर्थश्रमत्वात्तदादरं परित्यज्यात्मविषयकवेदान्तश्रवणमनननिदिध्यासनेष्वेव प्रयत्नः कर्त्तव्यो नान्यत्रेति भावः ॥ ७ ॥

एवं दूरश्रवणदर्शनाख्ये सिद्धी प्रत्याख्यायेदानीमाकाशगमनाख्यसिद्धीच्छया तत्साधनभूतयोगधारणाभ्यासासक्तं प्रत्याह ।

भवन्ति वायसादीनामपि खेचरतादयः ।
सिद्धिभिर्नैव सिध्येत सिद्धिभिः किं प्रयोजनम् ॥८॥

भवन्तीति । खेचरतादयः खेचरताऽऽकाशगतित्वमादिर्येषामन्तर्धानप्रभृतीनां तास्तथोक्तास्ताः सिद्धयो वायसादीनामपि वायसः काक आदिर्येषां श्येनभासगरुडादीनां तेषामपि विना योगधारणां भवन्ति प्राप्नुवन्ति काकादीनामपि विना योगधारणमाकाशगमनसिद्धेरपिशब्दाद्भूतादीनामपि विना योगधारणामन्तर्द्धानादिसिद्धेः प्रत्युत तेषां योनिप्राप्तेरविहितकर्मफलत्वेन तुच्छत्वान्न तत्रादरो मुमुक्षुभिर्विधेय इति भावः एवमेव सर्वसिद्धीनामपि निष्प्रयोजनत्वं दर्शयति सिद्धिभिरिति, सिद्धिभिः पातञ्जलोक्ताभिराकाशगमनादिरूपसिद्धिभिर्नैव सिद्ध्येत नैव निश्चयेन मुच्येत तर्हि मुमुक्षूणामस्माकं सिद्धिभिः परकायप्रवेशादिरूपाभिः सिद्धिभिः किं प्रयोजनं किं फलं न किमपीत्यर्थः ॥ ८ ॥

ननु योगसिद्धिरेव मुक्तिः सा तु भवतामपीष्टातः कुतः सा निन्द्यत इत्याशङ्क्याह ।

न सिद्धिर्योगसिद्धिर्हि बलवीर्यादिसिद्धिकृत् ।

एतेन योगः प्रत्युक्त इति वेदान्तभाषितम् ॥९॥

नेति । हि यस्मात्कारणाद्योगसिद्धिर्योगधारणाभिर्या सिद्धिर्जायते सा न सिद्धिर्न मुक्तिर्वेदान्ते मुक्तिरेव सिद्धिपदेनोक्ता नाकाशगमनादिरूपोक्ता सिद्धिशब्देनेत्यर्थः, सा योगसिद्धिस्तु योगधारणया या सिद्धिर्जाता सा बलवीर्यादिसिद्धिकृद्बलं च शरीरदार्ढ्यं वीर्यं च शुक्रभूयस्त्वं मतापभूयस्त्वं च ते आदिनी येषामन्तर्धानोर्ध्वरेतस्त्वादीनां तेषां सिद्धिः प्राप्तिस्तस्याः कृत्कर्त्री भवति नतु मुक्तिकृदित्यर्थः, अतो मुमुक्षुभिस्तत्रासक्तिर्नैव कार्येति भावः, ननु योगमत्याख्यानं स्वकपोलकल्पितत्वादप्रमाणमित्याशङ्क्य तत्र श्रीबादरायणसूत्रं प्रमाणयति एतेनेति, 'एतेन योगः प्रत्युक्तः' एतेन साङ्ख्यप्रत्याख्यानेन योगो योगसिद्धान्तः प्रत्युक्तः प्रत्याख्यातो न पृथक्प्रयासः कर्त्तव्य इति भावः, इति एवं वेदान्तभाषितं वेदान्त उपनिषदर्थसंग्राहके शारीरकसूत्रेषु मध्ये भाषितं कथितमस्तीति शेषः, अतो योगमतखण्डनमिदं मुमुक्षुभिः प्रमाणपूर्वमस्तीति ज्ञेयमिति भावः ॥९॥

नन्वात्मज्ञानमेव सिद्धिपदवाच्यं योगशास्त्रे प्रतिपादितमन्यसिद्धयस्तत्साधनभूतधारणाविशेषाश्च तत्तज्ज्ञानपूर्वकं तत्त्यागायैवेत्याशङ्क्यैतच्च मतं वेदान्तानुकूल्यादस्माकमिष्टमेवेति योगसिद्धान्तापहतिरित्याशयेनाह ।

सिद्धिरात्मपरिज्ञानमन्तरायास्तु सिद्धयः ।

इति चेद्योगवित्प्राह मतमस्माकमेव तत् ॥ १० ॥

इ० बो० मु० पु० अष्टा० पातञ्जलनिर्णय पञ्चमः ॥ ५ ॥

सिद्धिरिति । आत्मपरिज्ञानमात्मनो ब्रह्माभिन्नस्य प्रत्यगात्मनः परिज्ञानं बोधः स एव सिद्धिः सिद्धिशब्देनोक्तः सिद्धयस्तु तदन्याऽऽकाशगमनादिरूपाः सिद्धयोऽन्तराया आत्मज्ञानस्य विघ्नरूपाः सन्ति अतस्तास्तत्र तज्ज्ञानपूर्वं तत्त्यागायैवाभिहिता इति भावः, इत्येवं योगवियोगतात्पर्यवेत्ता कश्चित्प्राह वक्ति चेद्यदि तर्हीदं तदिदं मतं मम वेदान्तिनः संमतमिष्टं न तु योगसिद्धान्तः स इति भावः ॥ १० ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयेऽष्टादशविद्यास्थाननिर्णयप्रकाशान्तर्गतः पातञ्जलनिर्णयार्थप्रकाशः पञ्चम ॥ ५ ॥

अथ मीमांसानिर्णयः ।

एवं पातञ्जलनिर्णयमभिधायेदानीं मीमांसानिर्णयमभिधातुं मीमांसानिर्णयाख्यं सप्तश्लोकं प्रकरणमभिधास्यन्नाह ।

अथ मीमांसानिर्णयः ।

अथेति । अथ पातञ्जलनिर्णयानन्तरं मीमांसानिर्णयो मीमांसाया निर्णयो विचारः क्रियत इति शेषः, तत्र तावत्प्रथमं तन्मताग्राह्यत्वज्ञापनाय तन्मौढ्यं दर्शयति ।

कष्टं कर्मेत्ययं न्यायो मतो मीमांसकस्य चेत् ।
आत्मनः क्लेशभागित्वं तेनैवांगीकृतं तदा ॥ १ ॥

कष्टमिति । कष्टं कर्मेत्यय कर्म क्रिया कष्टं दुःखरूपमस्तीति शेषः, अयमुक्तः प्रत्यक्षो न्यायः सिद्धान्तो मीमांसकस्य मीमांसाशास्त्रज्ञस्य जैमिनेर्मत इष्टश्चेद्यदि भवेत्तदा तर्हि आत्मनः स्वस्य कर्मकर्तृत्वाभिनिवेशेन क्लेशभागित्वं दुःखभोक्तृत्वं तेनैव मीमांसकेनैव कोशकारकृमिन्यायादिनेवाङ्गीकृतं भवेदिति भो

बुद्धिरहङ्कारश्चितं चेत्यन्तः करणानि चत्वारि । तेरैव व्यवहारः "स्वप्नः" । तज्जनकः प्रकाश स्तृतीय हृल्लेखास्थकामकलया बोध्यः ॥'

द्वितीय कूट के लकार को भी वैसा ही समझना चाहिए । 'स्वप्नावस्था' की केन्द्रीय शक्ति है 'ह्रीं' में स्थित ईकार स्वरूप 'कामकला' ॥ ३८ ॥

आन्तरवृत्तेर्लयतो लीनप्रायस्य जीवस्य ।
वेदनमेव सुषुप्तिश्चिन्त्या तार्तीयबिन्दौ सा ॥ ३९ ॥

(सुषुप्ति का स्वरूप)

तृतीयकूट के बिन्दु में उस सुषुप्ति की भावना करनी चाहिए जो कि सुषुप्ति का कारण है और जिसमें समस्त अन्तःकरण एवं जीव निद्रामग्न हैं ॥ ३९ ॥

*** प्रकाश ***

विवरणमत आत्मसुखाज्ञानविषयिकास्तिस्रोऽविद्यावृत्तयः स्वीकृता इत्यत आह— आन्तरवृत्तेरिति । अन्तःकरणपरिणामरूपवृत्तेरित्यर्थः । वार्त्तिकमते वृत्तिसामान्याभाव एव सुषुप्तिः । तार्तीयबिन्दौ ललाटस्थाने ॥ ३९ ॥

*** सरोजिनी ***

'सुषुप्ति'—जिस समय अपने व्यापार-सहित बुद्धि अपने कारण अज्ञान में विलीन हो जाती है उसी को विज्ञ पुरुषों ने 'निद्रा' कहा है ।[1] सुषुप्ति-काल में घोर निद्रा में सकल इन्द्रियाँ एवं मन, बुद्धि इत्यादि तथा इनकी वृत्तियाँ अपने उपादान कारण अविद्या में विलीन हो जाती हैं और उस समय आत्मा की जाग्रत-स्वप्न अवस्थाओं के अभाव होने के कारण विश्व तैजस आदि संज्ञा नहीं रहती, उस समय तो वह तमावृत अपने स्वरूप सुख का बिना किसी साधन की सहायता के ही स्वयं भोग करता है ।[2]

वृत्तियाँ एवं सुषुप्ति—

(१) विवरणकार का मत—आत्मसुख के अज्ञानविषयिक तीन अविद्या वृत्तियाँ हैं । अन्तःकरण का परिणाम रूप ही वृत्तियाँ हुआ करती हैं ।
(२) वार्तिककार का मत—वृत्ति सामान्य का अभाव ही सुषुप्ति है ।

तुर्यावस्था चिदभिव्यञ्जकनादस्य वेदनं प्रोक्तम् ।
तद्भावनार्धचन्द्रादिकं त्रयं व्याप्त कर्तव्यः ॥ ४० ॥

(तुरीयावस्था का स्वरूप)

चैतन्य को अभिव्यक्त करने वाली जो नादावस्था है (वह अवस्था जिसमें 'नाद' पूर्ण चैतन्य को अभिव्यक्त करता है) 'तुरीयावस्था' कहलाती है । उसकी

१. वराहोपनिषद

भावना अर्द्धचन्द्र एवं (उसके आगे के) वर्णत्रय तक की जानी चाहिए ॥ ४० ॥

*** प्रकाश ***

अर्धचन्द्ररोधिनीनादेषु व्याप्तस्तुर्यावस्थाप्रकाशो भाव्यः ॥ ४० ॥

*** सरोजिनी ***

ज्ञान की सात भूमिकायें

शुभेच्छा | विचारणा | तनुमानसा | सत्वापत्ति | असंसक्ति | पदार्थ भावना | तुरीयगा

ज्ञान की सात भूमिकायें हैं। उनमें अन्तिम भूमिका है 'तुरीयगा'। 'शुभेच्छा प्रथमा भूमिका भवति। विचारणा द्वितीया तनुमानसी तृतीया। सत्वापत्तिस्तुरीया। असंसक्तिः पञ्चमी। पदार्थ भावना षष्ठी। तुरीयगा सप्तमी ॥'

(१) अकार, उकार, मकार एवं अर्धमात्रा वाली प्रणवात्मिका भूमिका होती है।

(२) उन अकार, उकारादि चार मात्राओं के प्रत्येक के स्थूल, सूक्ष्म कारण एवं साक्षी भेद से चार-चार प्रकार के होते हैं। उसमें भी अकारादि के जो स्थूलादि चार भेद हैं उनके प्रत्येक के जाग्रत, स्वप्न, सुषुप्ति एवं तुरीय—ये चार भेद से अवस्थायें होती हैं। आत्मा के भी चार भेद हैं—विश्व, तैजस, प्राज्ञ, तुरीय। 'तदवस्था जाग्रत्स्वप्नसुषुप्ति तुरीयाः।'

अकार का स्थूल अंश में—जाग्रत-विश्व, उनके सूक्ष्म अंश में जाग्रत तैजस, उसके बीज अंश में जागृत-प्राज्ञ एवं उसके साक्षी अंश में जागृत-तुरीय है।

उकार के स्थूल अंश में स्वप्न-विश्व, उसके सूक्ष्म अंश में स्वप्न-तैजस, उसके बीजांश में स्वप्न-प्राज्ञ एवं उसके साक्षी अंश में स्वप्न-तुरीय है। प्रणव की तृतीय मात्रा मकार के स्थूल अंश में सुषुप्ति-विश्व, उसके सूक्ष्म अंश में सुषुप्ति-तैजस उसके बीजांश में सुषुप्ति-प्राज्ञ एवं उसके साक्षी अंश में सुषुप्ति-प्राज्ञ और उसके साक्षी अंश में सुषुप्ति-तुरीय हैं। प्रणव की चौथी अर्धमात्रा के स्थूल अंश में तुरीय-विश्व उसके सूक्ष्म अंश में तुरीय तैजस, उसके बीज अंश में तुरीय-प्राज्ञ एवं उसके साक्षी अंश में तुरीय-तुरीय है।

(३) अकार के स्थूलांश से तुरीयांश तक जो चार अवस्थायें हैं, उनमें तीन भूमिकायें हैं—प्रथमा—'शुभेच्छा', द्वितीय—'विचारणा', तृतीय—'तनुमानसा'।

उकार के स्थूलांश से लेकर तुरीय तक—चौथी 'सत्त्वापत्ति' भूमिका होती है। मकार के स्थूलांश से लेकर तुरीयांश तक पाँचवी अंससक्ति नामक भूमिका होती है। अर्धमात्रा के स्थूलांश से लेकर उसके तुरीयांश तक छठवीं 'पदार्थभावना' नामक 'भूमिका' होती है। इन समस्त भूमिकाओं के अनन्तर जो अवस्था होती है। वही सप्तमी 'तुरीयगा' भूमिका है।

'ज्ञानभूमिः शुभेच्छास्यात्प्रथमा समुदीरिता ।
विचारणा द्वितीया तु, तृतीया तनुमानसा ।
सत्वापत्तिश्चतुर्थी स्यात्ततोऽसंसाक्तिनामिका ।
पदार्थभावना षष्ठी सप्तमी तुर्यगास्मृता ॥'

'तुरीयगा' का स्वरूप क्या है?

यत्र नासन्त सद्रूपो, नाहं नाप्य न हंकृतिः ।
केवलं क्षीणमनन आस्तेऽद्वैतेडित निर्भयः ॥

अन्तः शून्यो बहिः शून्यः शून्य कुंभइवाम्बरे ।
अन्तः पूर्णो बहिः पूर्णः पूर्ण कुंभ इवार्णवे ॥ १८ ॥

मा भव ग्राह्यभावात्मा ग्राहकात्मा च मा भव ।
भावना मखिलां त्यक्त्वा यच्छिष्टं तन्मयो भव ॥

द्रष्टृदर्शनदृश्यानि त्यक्त्वा वासनया सह ।
दर्शन प्रथमाभासमात्मानं केवल भज ॥[1]

अवस्था		बिन्दु		
तुर्यातीतावस्था	महाबिन्दु	ई रं ह	स्वप्न जागर	
	उन्मनी			
	समना	ल क स	भूमि विष्णु भारती	
	व्यापिका			
	शक्ति	ह्रीं		
	नादान्त	ल ह	ब्रह्मा भूमि	स्वप्न
तुर्यावस्था	नाद	क स ह	विष्णु भारती ब्रह्मा	
	रोधिनी			
	अर्धचन्द्र			
सुषुप्ति	बिन्दु	ह्रीं	मिथुनम् रुद्राणी रुद्र	
		ल ई	विष्णु भूमि	
		ए क	भारती ब्रह्मा	

कुण्डलिनी

वह्नि कुण्डलिनी | सूर्य कुण्डलिनी | सोम कुण्डलिनी

अवस्था	
तुर्यातीतावस्था	महाबिन्दु → उन्मनी → समना → व्यापिका → शक्ति → नादान्त
तुर्यावस्था	→ नाद → रोधिनी → अर्धचन्द्र
सुषुप्ति	→ बिन्दु

१. वराहोपनिषद

चक्र

'वाग्भवकूट'	'कामराजकूट'	'शक्तिकूट'
१) त्रैलोक्यमोहन	१) सर्वसौभाग्यदायक	१) सर्वरोगहर
२) सर्वाशापरिपूरकम्	२) सर्वार्थसाधक	२) सर्वसिद्धिप्रद
३) सर्वसंक्षोभण भूपुर षोडशदल, अष्टदल	३) सर्वारक्षाकर	३) सर्वानन्दमय सर्वानन्दमय
	४) चतुर्दशार, बहिर्दशार, अन्तर्दशार	४) अष्टार, त्र्यश्र, बिन्दु

वाक्चतुष्टय (मातृका)

'परा'	'पश्यन्ती'	'मध्यमा'	'वैखरी'
(मूला)	(नाभि)	(हृदय)	(कण्ठ)
(धार चक्र)	(मणिपूरक चक्र)	(अनाहत चक्र)	(विशुद्ध चक्र)

आनन्दैकघनत्वं यद्वाचामपि न गोचरो नृणाम् ।
तुर्यातीतावस्था सा नादान्तादिपञ्चके भाव्या ॥ ४१ ॥

(तुर्यातीतावस्था का स्वरूप)

(वह) आनन्दैकघन अवस्था जो मनुष्यों की वाणी से परे है 'तुर्यातीतावस्था' (कहलाती) है । उसकी 'नादान्त' आदि पञ्चवर्णों में भावना करनी चाहिए ॥ ४१ ॥

*** सरोजिनी ***

इस श्लोक में 'तुर्यातीतावस्था' के स्वरूप पर प्रकाश डाला गया है ।

(१) 'तुर्यातीतावस्था' आनन्दैकघन, अवांमनसगोचर अवस्था है ।

(२) 'तुर्यातीतावस्था' नादान्त आदि पाँच वर्णों में स्थित है ।

अवस्थापञ्चकं निरूप्य शून्यषट्कं निरूपयति—

तार्तीयीके रेफस्थाने बिन्दो च रोधिन्याम् ।
नादान्तव्यापिकयोश्चन्द्रकतुल्यानि पञ्च शून्यानि ॥ ४२ ॥
उन्मन्यां नीरूपं षष्ठं चिन्त्यं महाशून्यम् ।

क्रमात् प्राप्तानि सप्त विषुवन्त्याह—

प्राणात्ममानसानां संयोगः प्राणविषुवाख्यः ॥ ४३ ॥

(बिन्दु एवं पञ्चशून्य-अन्तर्संबंध)

तृतीयकूट के रेफ, बिन्दु, रोधिनी, नादान्त एवं व्यापिका स्थानों में पञ्च शून्यों की, मयूर के पङ्ख में स्थित चन्द्र के रूप में, भावना करनी चाहिए ॥ ४२ ॥

(महाशून्य की भावना एवं 'प्राणविषुव' का स्वरूप)

'उन्मनी' में रूप शून्य छठे (शून्य) महाशून्य की भावना करनी चाहिए । प्राण, आत्मा एवं मन के संयोग का नाम 'प्राणविषुव' है ॥ ४३ ॥

*** प्रकाश ***

चन्द्रको मयूरपिच्छाग्रगतं चन्द्राकारं शून्यम् । तदुक्तं स्वच्छन्दसंग्रहे—

'शिखिपक्षचित्ररूपैर्मण्डलैः शून्यपञ्चकम् ।
ध्यायतो ऽनुत्तरे शून्यं परं व्योम तनुर्भवेत् ॥'

इति । यद्यपि

'अग्न्यादिद्वादशान्तेषु त्रींस्त्रींस्त्यक्त्वा वरानने ।

शून्यत्रयं विजानीयादेकैकान्तरितं प्रिये ।
शून्यत्रयात् परे स्थाने महाशून्यं विभावयेत् ॥'

इति पूजासङ्केते रेफादिमहाबिन्द्वन्तेषु द्वादशसु स्थानेषु मध्ये त्रयं त्रयं त्यक्त्वा, एकैकमन्तरितं मध्यस्थितं शून्यत्रयं विजानीयादित्यर्थादर्धचन्द्रशक्तिमहाबिन्दुषु शून्यत्रयं तदूर्ध्वं चतुर्थमित्यर्थः; अथ वा, आदावन्ते च त्रयं त्रयं त्यक्त्वा मध्यस्थे ऽर्धचन्द्रादि-व्यापिकान्तषट्क एकैकव्यवधानेन शून्यत्रयं तत्परे चतुर्थमित्यर्धचन्द्रनादशक्तिषु त्रीणि शून्यानि व्यापिकायां महाशून्यमिति वार्थः स्पष्टं प्रतीयते; तथापि

'शून्यषट्कं सुरेशानि अवस्थापञ्चकं पुनः ।
विषुवत्सप्तरूपं च भावयन्मनसा जपेत् ॥'

इत्युपक्रमविरोधादन्यथार्थः । तथा हि—अग्न्यादीति भिन्नं पदं शून्यत्रये ऽन्वेति । अन्तशब्दश्चरमावयववाची । अर्थाच्चरमहल्लेखासंबन्धिषु द्वादशस्ववयवेषु हकारा-द्युन्मनान्तेषु, अग्न्यादि रेफमारभ्य शून्ययोस्त्रयं शून्यषट्कं विजानीयात् । तच्च न रेफादिसांतत्येन, किं त्वेकैकव्यवधानेनेति । अत आह—एकैकान्तरितमिति । प्रथम-शून्यस्य रेफस्थानीयत्वे कथिते व्यवधानमर्थाद्धकारेकारार्धचन्द्रनादशक्तिसमनाभिः षड्भिरिति सिध्यति । तदेवाह—त्रींस्त्रीनिति । द्विगुणतांस्त्रींस्त्यक्त्वेत्यर्थः । शून्यत्रयात् शून्ययोस्त्रयस्य, तत्षट्कस्येत्यर्थः । 'सुपां सु—' इति सुपो ङस आदादेशः । निर्धारणे षष्ठी । तेषां मध्ये परे चरम उन्मन्यां महाशून्यमिति । एतद्विभावनस्य परमरहस्यत्वादित्थं क्लेशेनोक्ति- रित्यन्वयितव्यम् ॥ ४२ ॥

क्रमात् प्राप्तानि सप्त विषुवन्त्याह—

ककारात्मकवायुः प्राणः । आत्मा प्राणा मनश्चेत्येतेषामैक्यं प्राणविषुवसंज्ञमिति केचित् । यथाश्रुतमन्ये ॥ ४३ ॥

* सरोजिनी *

पञ्चदशाक्षरी मन्त्र के तृतीय कूट—'स क ल ह्रीं' के रेफ, बिन्दु, रोधिनी, नादान्त एवं व्यापिका में पाँच शून्य अवस्थित हैं । ये उसी प्रकार स्थित हैं जैसे कि मोर के पङ्खों में चन्द्राकार आकृति ॥

'स क ल ह्रीं' के 'रेफ', 'बिन्दु', 'रोधिनी', 'नादान्त' एवं 'व्यापिका' में ५ शून्यों की अवस्थिति ।

महानाद या नादान्त—ये ब्रह्म का प्रथम क्रियात्मक विकास कहा जा सकता है। 'नाद' वह स्वरूप है जो सारे विश्व को नादान्त से भरे हुए हैं । यह नादान्त की पूर्णावस्था है । निरोधिनी नाद की वह अवस्था है जिसमें बिन्दु को विकसित करने की क्षमता रहती है । नाद की सूक्ष्मावस्थायें भी हैं—इनमें निष्कल उन्मनी अन्तिम है—

नाद की अवस्थायें

प्रथमावस्था	द्वितीयावस्था	तृतीयावस्था	चतुर्थ अवस्था	पञ्चम अवस्था	छठवीं अवस्था	सातवीं अवस्था	आठवीं अवस्था	नवीं अवस्था
'बिन्दु'	'अर्धचन्द्र'	'रोधिनी'	'नाद'	'नादान्त'	'शक्ति'	'व्यापिका'	'समना'	'उन्मना'

बिन्दु के बाद शक्तियाँ सूक्ष्मातिसूक्ष्म रूप धारण करती चली जाती हैं और अन्त में उन्मनी अवस्था (अनुत्पन्न निस्पंद वाक्) आ जाती है । 'उन्मनी' = कारणरूपा शक्ति की अवस्था है । इस अवस्था में—काल, कला, देवता आदि किसी का भी आभास नहीं रह जाता । यह 'स्वनिर्वाणपदं' है—निर्विकल्प निरञ्जन शिवशक्ति है ।[१] "Unmani is Nirākār and Nirucchār soundless and without ulterance defined by any adjective, being beyond mind and speech and universe"[2] यह अवाङ्मनसगोचरा, निराकार, निरुच्चार, निरूप अवस्था है ।

कुछ तांत्रिकों ने बिन्दु से भी ३ नादों की उत्पत्ति बतायी है—ये निम्न है—(१) 'सूक्ष्मवाद' (२) 'अक्षरनाद' (३) 'वर्णनाद' । (क) 'सूक्ष्मनाद' = अचिन्त्य, अभिधेय बुद्धिका कारण एवं बिन्दु का प्रथम प्रसार है । (ख) 'अक्षरनाद' = यह सूक्ष्मनाद का कार्य है और परामर्श ज्ञान समन्वित है । (ग) 'वर्णनाद' = इसकी उत्पत्ति आकाश एवं वायु से होती है । कुण्डलिनी भी नादरूपा है । नाद-बिन्दु । बिन्दु = वेदान्त का ईश्वर । 'नाद' शक्ति का एक रूप है । बिन्दु भी शक्ति का एक रूप है । नाद-बिन्दु में क्रिया शक्ति है ।

१-२. गारलैण्ड ऑफ लेटर्स (आर्थर एवेलॉन)

नाद-बिन्दु—जगत् की सृष्टि ।[1]

नाद, बिन्दु और कला—'बिन्दु' शिवात्मक है और 'बीज' शक्त्यात्मक है तथा 'नाद' दोनों (बिन्दु एवं बीज) के समवाय से उत्पन्न होने के कारण उभयात्मक हैं। नादोत्पत्ति—बिन्दु + बीज—'नाद'

'सच्चिदानन्द विभवात् सकलात् परमेश्वरात'—(१) आसीच्छक्तिः (२) ततो नादो (३) नादाद् बिन्दुसमुद्भवः ।। सच्चिदानन्द सकल परमेश्वर—शक्ति—नाद—बिन्दु ।।

'शक्ति' क्या है? परमेश्वर का 'स्पन्द' ही 'शक्ति' है । इसी 'बिन्दु' से (१) बिन्दु (२) बीज (३) नाद उत्पन्न होते हैं । 'बिन्दु' का फटना—बिन्दु, बीज एवं नाद ।। 'बिन्दु'—रौद्री । 'नाद'—ज्येष्ठा । 'बीज'—वामा ।। 'बिन्दु नाद कला ब्रह्मन् विष्णु महेश देवताः ।।'' (योगशिखोपनिषद ६-७०) । विष्णु = 'बिन्दु' । ब्रह्मा = 'नाद' । रुद्र (ईश) = 'कला' ।।

'श्रीचक्र' = भगवती का स्थूल शरीर । पञ्चदशाक्षरी मन्त्र' = भगवती का सूक्ष्मशरीर 'बीज' = शक्त्यात्मिका कला ।।

शिव (पर बिन्दु)—शक्ति—सदाख्यशिव (नाद)—ईश्वर (बिन्दु)—शुद्धविद्या (बिन्दु) ।।

शुद्धविद्या	नाद-ज्येष्ठा ।।	ब्रह्मा-इच्छा ।।	ब्राह्मी-क्रिया ।।	सूर्य-प्राण ।।
	बीज-वामा ।।	विष्णु-क्रिया ।।	वैष्णवी-ज्ञान ।।	अग्नि-चिति ।।
	बिन्दु-रौद्री ।।	रुद्र-ज्ञान ।।	गौरी-इच्छा ।।	चन्द्र-मन ।।

बिन्दु—रौद्री । नाद—ज्येष्ठा । बीज—वामा । बिन्दु—ज्ञान । बीज—क्रिया । नाद—इच्छा ।। नाद = सूर्य । बीज = अग्नि ।। बिन्दु = चन्द्रमा ।। इच्छा, क्रिया एवं ज्ञान = गौरी, ब्राह्मी वैष्णवी ।। बीज = शक्त्यात्मिका कला ।।

हल्लेखा के उच्चारण होने पर अनुनासिक ध्वनि उक्त ९ स्तरों से होती हुई उन्मनी में समाप्त हो जाती है । नौ स्तर निम्न हैं—

शिव (पर बिन्दु)
↓
शक्ति
↓
सदाख्यशिव (नाद)
↓

---

१. गारलैण्ड ऑफ लेटर्स (राघव भट्ट : 'शारदातिलक')—नाद-बिन्दु शक्ति की वे अवस्थाएँ हैं जो सृष्टि को जन्म देने के लिए उत्सुक रहती हैं । 'बिन्दु' एक घनावस्था है । बिन्दु में शून्यता + गुण दोनों की प्रतिष्ठा है । (कालीचरण : ष.च.नि. की टीका)

ईश्वर (बिन्दु)
↓
शुद्ध विद्या (बिन्दु)

नाद्र-ज्येष्ठा	बीज-वामा	बिन्दु-रौद्री
↓	↓	↓
ब्रह्मा-इच्छा	विष्णु-क्रिया	रुद्र-ज्ञान
↓	↓	↓
ब्राह्मी-क्रिया	वैष्णवी-ज्ञान	गौरी-इच्छा
↓	↓	↓
सूर्य-प्राण	अग्नि-चिति	चन्द्र-मन

(१) ब्रह्म को बिन्दु, शक्ति को कला एवं जीव को नाद समझकर ५ प्रकार का ऐक्य भी स्थापित किया जाता है।

(क) जीव—ब्रह्मैक्य भाव ।
(ख) ब्रह्म—सृष्टि-प्रभव ।
(ग) तृतीय—देहाध्यास ।
(घ) चतुर्थ—प्रलय ।
(ङ) पञ्चम—जीवोत्पत्ति ।

बिन्दु से नाद का सम्बंध न बताने का अभिप्राय यह है कि ब्रह्म कभी जीव नहीं बनता, आत्मा सदा ब्रह्मस्वरूप है, जीवभाव एक मिथ्या प्रतीति मात्र है ।

(१) हल्लेखा के उच्चारण होने पर जो अनुनासिक ध्वनि उक्त ९ स्तरों से होती हुई उन्मनी में समाप्त हो जाती है । उसके उच्चारण काल की मात्रा उत्तरोत्तर आधी होती जाती है ।

(२) सभी के योग का काल १/२ मात्रा होता है जो बिन्दु की आधी मात्रा सहित पूरी एक मात्रा बनती है अर्थात्—

$$\frac{१}{२} + \frac{१}{४} + \frac{१}{४} + \frac{१}{१६} + \frac{१}{३२} + \frac{१}{६४} + \frac{१}{१२८} + \frac{१}{२५६} + \frac{१}{२५६} = १ \text{ मात्रा}$$

(३) पञ्चदशी के ३ अनुस्वार ३ बिन्दु हैं ।

(४) हल्लेखा, नाद एवं १५ अक्षर १५ कलायें हैं ।

(५) नाद, बिन्दु, कला = 'त्रिबिन्दु'

(६) श्रीचक्र त्रिधा विभक्त—नाद । बिन्दु । कला ।

(७) बिन्दु को शिवशक्ति भेद से दो प्रकार का माना जाय तो शक्त्यात्म बिन्दु ही 'बीजि' है । दोनों से शब्दब्रह्म, नादोत्पत्ति एवं शब्द से कला (अर्थात्मक सृष्टि) की उत्पत्ति होती है ।। ४२ ।।

'प्राणविषुवाख्य:'—प्राणविषुव नामक ।। 'प्राणविषुव' क्या है?

प्राण, आत्मा एवं मन के पारस्परिक योग को 'प्राणविषुव' कहते हैं । 'योग: प्राणात्ममनसां विषुव प्राणसंज्ञितम् ।।'[१]

अमृतानन्दनाथ इसकी व्याख्या करते हुए कहते हैं—'प्राणस्य हकारात्मनो वाटवात्मनो यष्टुर्मनसश्च संयोग: प्राणविषुवमित्युच्यते ।।[२] 'शैवतन्त्र' में कहा गया है—'शिष्यात्म प्राणमनसां संयोगं प्राणकं बिन्दु: ।।' आचार्य भास्कर इसकी व्याख्या करते हुए कहते हैं—'वस्तुतस्तुमूलाधारे ब्रह्मेति प्रसिद्धस्य खस्य वायु कुण्डली संयोगात्तदव्युत्पत्ति: स एव खो नाभिपर्यन्तमागत्य पवनेन मनसा च युज्यते । स एव हृदयमागत: पवनेन बुद्धया च संयुज्यते । अत: स एव स्थानत्रये परा-पश्यन्ती-मध्यमेति नामत्रयं क्रमेण मजत इति सौभाग्यभास्करे कर्णितमस्माभि: । इदमेव प्राण-विषुवपद वाच्यमिति स्थानत्रये मिलित्वैका भावनेति ज्ञेयम ।।'

'उन्मन्यां नीरूपं षष्ठं चिन्त्यं महाशून्यम्'[३]—उन्मनी षष्ठ शून्य है । यह 'महाशून्य' कही जाती है ।

स्वच्छान्दागम के मतानुसार शून्यों की स्थिति इस प्रकार है—(१) 'ऊर्ध्व शून्य'—शक्तिप्रद जहाँ नादान्त तक नि:शेष पाश प्रशान्त हो गए हैं । (२) 'अध: शून्य' = हृदयक्षेत्र; जहाँ अभी तक प्रपञ्चोल्लास नहीं हुआ है । (३) 'मध्यशून्य' = कण्ठ, तालु, भ्रूमध्य, ललाट एवं ब्रह्मरंध्र ही शक्तिस्थान है । व्यापिनी चतुर्थ शून्य है । तीन शून्य चल एवं हेय है । 'समना' में पञ्चम शून्य एवं 'उन्मना' में षष्ठ् शून्य है । ये भी चल एवं हेय हैं । उन्मना में भी यत्किंचित चलत्व है । परमशिवाधिष्ठित होने से सभी शून्य सिद्धिप्रद है । स्वच्छन्द शास्त्र के अनुसार ६ शून्यों का त्याग करके सातवें में प्रवेश आवश्यक है । वही वास्तविक परमपद है । ६ शून्य अवस्थायें हैं—सातवाँ ही योगियों का लक्ष्य है—'अशून्यं शून्यमित्युक्तं शून्यं चाभाव उच्यते । अभाव: स समुद्दिष्ट: यत्र भावा: परं गता: ।।' यह सप्तम शून्य ही अखण्ड महासत्ता महाशून्य है ।

मन्त्रविषुवमाह—

प्राथमिककूटनादे त्वनाहताद् ब्रह्मरन्ध्रान्ते ।
व्यष्टिसमष्टिविभेदाद् बीजचतुष्कस्य च स्वस्य ।। ४४ ।।
ऐक्येन नादमयताविभावनं मन्त्रविषुवाख्यम् ।

('मन्त्रविषुव' का स्वरूप)

प्रथम कूट के नाद एवं व्यष्टि-समष्टि के भेद से अनाहत से आरंभ करके ब्रह्मरंध्र तक उत्पन्न होने वाला नाद एवं चारों बीज तथा आत्मा के नादमय विभावना की 'मन्त्रविषुव' संज्ञा है ।। ४४, ४४- ।।

---

१. योगिनीहृदय (१८२) २. दीपिका

३. सेतुबन्ध (श्लो० १८५)

*** प्रकाश ***

प्राथमिककूटनादे बीजचतुष्कस्यैक्यम्, स्वस्यात्मनस्त्वाधारोत्थितनादेन सहैक्यं न प्राथमिकेनानाहतादारब्धेन सह,

'आधारोत्थितनादे तु लीनं बुद्ध्वात्मरूपकम् ।
संयोगेन वियोगेन मन्त्रार्णानां महेश्वरि ॥
अनाहताद्याधारान्तं नादात्मत्वविचिन्तनम् ।
विषुवम् .... ॥'

इति कादिमतीयवचनात् । संयोगेन समष्ट्या । वियोगेन व्यष्ट्या । चतुर्विधानामिति शेषः । आधाराणामन्तो ब्रह्मरन्ध्रम् । आधारान्तान्तमिति तन्त्रेणान्तपदद्वयसत्त्वाद्-ब्रह्मरन्ध्रान्तमित्यर्थकत्वेन व्याचक्षते । आ आधारान्तादित्यर्थक आङ्प्रश्लेषे तु सर्वं सुस्थम् ॥ ४४, ४४- ॥

*** सरोजिनी ***

मन्त्र सङ्केत एवं मन्त्र के विविध अर्थ—'योगिनीहृदय' के 'मन्त्र-सङ्केत' नामक द्वितीय पटल में 'मन्त्रसङ्केत' के नाम से मत्रार्थों का निरूपण किया गया है। 'मन्त्रसङ्केत' के ६ प्रकार हैं—

(१) मन्त्रसङ्केतस्तस्या नानाकारो व्यवस्थितः ।

(२) षड्विधस्तं तु देवेशि कथयामि तवानघे ।

(३) (क) भावार्थ (ख) सम्प्रदायार्थ (ग) निगर्मार्थ (घ) कौलिकार्थ (ङ) सर्वरहस्यार्थ (च) महातत्त्वार्थ ॥ योगिनीहृदय (मन्त्रसङ्केत निरूपणम्)

मन्त्रविषुव का तात्पर्य है अभिव्यज्यमान नाद को जापक की अपनी आत्मा मानकर भावना करना ॥

'योगिनीहृदय दीपिकाकार' कहते हैं—मूलाधारस्थित वाग्भव शिखरवर्तिनं नादं हृदयपर्यन्तमुच्चार्य तत्र स्वयं लीनो भूत्वा स्वात्मनस्तन्मयतानुनुसंधानं मन्त्रविषुव-मित्यर्थः ॥'[1] मूलाधारस्थित वाग्भवशिखरवर्ती नाद को हृदयपर्यन्त उच्चारित करके वहीं स्वयं लीन होकर अपनी आत्मा की उसके साथ की गई तन्मयता का अनुसन्धान करना 'मन्त्रविषुव' है ।[2] 'शैवतन्त्र' में कहा भी गया है—

आत्मना नादमध्ये तु लयं सञ्चार्य तत्त्वतः ।
अकारोकार वर्णादिसंयोगेन वियोगतः ।
हृदयादि बिलान्तं च विषुवमन्त्र संशकम् ॥[3]

हृदय से ब्रह्मरंध्रपर्यन्त इसकी व्याप्ति है—"हृदयाद ब्रह्मरंध्रान्तं विषुवमन्त्र संज्ञकम् ॥" भास्कराचार्य कहते हैं—'नादं वाग्भवान्त्यस्थानमारभ्य हृदयस्थं कामराज-

---

१-२. अमृतानन्द योगी—'दीपिका' ३. शैवतन्त्र

कूटान्त्याक्षरपर्यन्त मुद्गतं विभाव्य तस्मिन् स्वजीवात्मनो लयं विचिन्त्य ततः कवलित जीवात्मानं नादमूर्ध्वमुदगमय्य ब्रह्मरंध्रान्तं प्राप्तं विचिन्तयेत् । तदिदं मन्त्र विषुव-मुच्यते ॥'[1]

नाडीविषुवमाह—

आधारोत्थितनादस्योच्चाराद् ब्रह्मरन्ध्रान्तम् ॥ ४५ ॥
षट्चक्राणां ग्रन्थीन् द्वादश भिन्दन् सुषुम्णयैव पथा ।
नाडीनादार्णानां संयोगो नाडिकाविषुवम् ॥ ४६ ॥

(नाडिकाविषुव' का स्वस्वरूप)

मूलाधार चक्र से उठने वाले नाद के उच्चारण से ब्रह्मरंध्रपर्यन्त षट्चक्रों की द्वादश ग्रन्थियों को सुषुम्णा के पथ से ही ग्रन्थि उद्भेदन करता हुआ नाड़ी नाद एवं वर्णों के संयोग की 'नाड़िका विषुव' कहते हैं ॥ -४५, ४६ ॥

*** प्रकाश ***

मूलाधारादिचक्रषट्कस्याप्यध ऊर्ध्वं चैकैको ग्रन्थिरिति द्वादश ग्रन्थयः । तद्-भेदनमार्गेणैव सुषुम्णानाडी मूलाधाराद् ब्रह्मरन्ध्रं व्याप्नोति । तेनैव मार्गेण नादस्य वर्णपङ्क्तेश्च नाडीसंयुक्तत्वेन भावनयोच्चारणं नाडीविषुवमित्यर्थः ॥ -४५, ४६ ॥

*** सरोजिनी ***

'नाड़ीविषुव' किसे कहते है? 'मूलाधारोत्पन्न' नाद का सुषुम्णा नाड़ी में प्रवेश करके द्वादशग्रन्थियों का भेदन करते हुए मन्त्र के वर्णों के साथ संयोग होना ही 'नाड़ी-विषुव' कहलाता है । मूलाधार से ब्रह्मरंध्र तक बीज शिखरवर्ती नाद के उच्चारित होने से नाड़ीविषुव स्पर्श उद्भूत होता है । 'योगिनीहृदय' में इसका स्वरूप इस प्रकार प्रस्तुत किया गया है—'आधारोत्थित नादे तु लीनं बुद्ध्यात्मरूपकम् । संयोगेन वियोगेन मन्त्रार्णानां महेश्वरि ॥ १८३ ॥ अनहताद्या-धारान्त नादात्मत्वविचिनम् । नादसंस्पर्शना-तस्यनाड़ी विषुवमुच्यते । द्वादशग्रन्थिभेदने वर्णानामन्तरे प्रिये ॥[2]

शैवतन्त्र में कहा गया है—'मूल मन्त्रत्रिशूलेन भित्वा ग्रन्थीननुक्रमात् । नादनाड़ीसमायोगान्नाड़ीविषुव भावनम् ॥ (१८३-८५) अमृतानन्दयोगी इसकी व्याख्या करते हुए कहते हैं—'वर्णाद बीजत्रयशिखरवर्तिनो नादस्य कामकलाक्षराद् द्वादशग्रन्थि भेदेन मूलादिषट्चक्र द्वादश ग्रन्थीन् भित्वा तेन नाड्यन्तरे सुषुम्ना मध्यमार्गे नाद संस्पर्शात् त्रिबीजशिखरवर्तिनो नादस्य मूलादि ब्रह्मरंध्रान्तमुच्चारतः 'संस्पर्शोम्नाडी-विषुवमुच्यते ॥'

श्रीभास्कराचार्य कहते हैं कि इस प्रकार के नाद का द्वादशग्रन्थिभेदन पूर्वक जो

१. सेतुबन्ध (श्लो० १८५) २. योगिनीहृदयदीपिका (श्लो० १८४)

यह सुषुम्णा नाड़ी में प्रवेश हैं वही नाड़ी विषुव है—'अथेदृशस्य नादस्य द्वादशग्रन्थिभेदनपूर्वकं योऽयं सुषुम्णानाड़ी-प्रवेशः स एव नाड़ी विषुवमुच्यते ।।[१]

'आधारोत्थित' = आधार चक्र से ऊपर उठने वाले ।। 'आधार' क्या है—आधार पद्मं सुषुणास्य लग्नं, ध्वजाधोगुदोर्द्ध्वं चतुःशोणपत्रम् । अधोवक्त्रमुद्यत्सुवर्णा-भवर्णैर्वकारादि सान्तैर्युतं वेदवर्णैः ।। अमुष्मिन धरायाश्चतुष्कोण चक्रं समुदभासित शूलाष्टकैरावृतं वत् । लसत्पीतवर्णां तडित्कोमलागे तदङ्के समास्ते धरायाः स्वबीजम् ।।[२]

'नाद'—समस्त प्राणियों के मूल चक्र में विद्यमान कुण्डलिनी शब्द ब्रह्म के रूप में अवतरित होकर वर्णों के रूप में प्रकट होती है और अव्यक्त ओङ्कार ध्वनि करती है वही नाद है—

तत्प्राप्य कुण्डलीरूपं प्राणिनां मूलचक्रगम् ।
वर्णात्मनाविर्भवति गद्यपद्यादिभेदतः ।। २७ ।।[३]

'नाद'—नाडयाधास्तु नादो वै भित्वा सर्वमिदं जगत् ।
अधः शक्त्या विनिर्गत्य ऊर्ध्वशक्त्यवसानकः ।।[४]

'नाडीनादवर्णानां संयोगो'—नाड़ी में उद्भूत अनाहत नाद एवं पञ्चदशी मन्त्र के वर्णों का संम्मिलन ।

उपरोक्त नादतत्त्व को आगे पृष्ठ १९४ पर चित्रित किया गया है ।

'षट्चक्राणां'—मूलाधार, स्वाधिष्ठान, मणिपुर, अनाहत विशुद्धाख्य एवं आज्ञाचक्र नामक ६ चक्रों की । पिण्डस्थ ६ चक्र एवं उनकी स्थिति पृ० १९५ पर चित्रित है ।

'षट्चक्राणां ग्रन्थीन्'—६ चक्रों के ग्रन्थियों को ।

(१) **'अनाहत चक्र'**—'ब्रह्मग्रन्थि'—ब्रह्मग्रन्थि का भेदन—हृदयाकाशरूप शून्य में भूषणों के कणन की अनाहत ध्वनि का प्रवण—दिव्यदेह, दिव्यगंध, आरोग्य ।।

(२) **'विशुद्धाख्य चक्र'**—'विष्णु गंन्थिः'—परमानन्द (ब्रह्मानन्द)—कण्ठाकाश में भेरी का नादोत्थान ।

(३) **'आज्ञाचक्र'**—'रुद्रग्रन्थि'—वेणु के शब्द के तुल्य ध्वनि ('हठयोग प्रदीपिका'—स्वात्माराम मुनीन्द्र)

प्रथम—प्राण का ब्रह्मरंध्र में प्रवेश—समुद्र, मेघ, भेरी, झर्झरी

मध्य में—प्राण का सुषुम्णा में प्रवेश—मर्दल, शङ्ख, घण्टा, काहल

अन्त में—प्राण का सुषुम्णा में प्रवेश—किंकिणी, वंशी, वीणा, भ्रमट के समान नादोत्थान ।

---

१. सेतुबन्ध (पृ० ३२२, श्लो० १८५) २. श्रीतत्त्वचिन्तामणि (६।७)
३. चक्रकौमुदी ४. स्वच्छन्दतन्त्र

नाद तत्व
सामरस्य → शिव (प्रकाश)

प्रकाश + विमर्श

प्रकाशांश
अम्बिका वामा ज्येष्ठा रौद्री

विमर्शांश
शान्ता इच्छा ज्ञान क्रिया

प्रकाशांश और विमर्शांश का सामरस्य → वाणी

प्रकाशांश / विमर्शांश — अम्बिका शान्ता → परावाक्

प्रकाशांश / विमर्शांश — वामा इच्छाशक्ति → पश्यतीवाक्

प्रकाशांश / विमर्शांश — ज्येष्ठा ज्ञानशक्ति → मधयमावाक्

प्रकाशांश / विमर्शांश — रौद्री क्रियाशक्ति → वैखरीवाक्

परब्रह्म
शब्दब्रह्म ॐ
परावाक्
पश्यन्ती
मध्यमा
वैखरी
जगत

निःशब्द परब्रह्म
→ वैखरी
→ मधयमा
→ पश्यती
→ परा
→ शब्दब्रह्म

निःशब्द→परा→पश्यन्ती→मध्यमा→वैखरी

शिव
प्रकाशांश विमर्शांश

(१) अम्बिका और (१) शान्ता का सामरस्य → 'परावाक्'
(२) वामा और (२) इच्छाशक्ति का सामरस्य → 'पश्यन्तीवाक्'
(३) ज्येष्ठा और (३) ज्ञानशक्ति का सामरस्य → 'मध्यमावाक्'
(४) रौद्री और (४) क्रियाशक्ति का सामरस्य → 'बैखरीवाक्'

षट्चक्रमूर्त्तिः
(THE NATURE OF THE SIX PLEXUS)

१२ **ग्रन्थियाँ : 'ग्रन्थीन् द्वादश'**—माया, पाशव, ब्रह्म, विष्णु रुद्र, ईश्वर, सदाशिव, इन्धिका, दीपिका, **बैन्दव**, नाद, शक्ति—(ये पाश भी हैं।)—(नेत्रतन्त्र)

"मूलाधारादिचक्रषट्कस्याप्यध ऊर्ध्व चैकैको ग्रन्थिरिति द्वादश ग्रन्थयः । तद्भेदनमार्गेणैव सुषुम्णानाड़ी मूलाधाराद् ब्रह्मरन्ध्र व्यापनोति । तेनैव मार्गेण नादस्यवर्ण पंक्तेश्च नाडीसंयुक्तत्वेन भावनयोच्चारणं नाड़ी विषुवमित्यर्थः ।।" (भास्कराचार्य—'प्रकाश') ।।

'ब्रह्मरंध्र'—सुषुम्ण के मध्य-वज्रा, वज्रा के मध्य चित्रिणी, चित्रिणी के मध्य ब्रह्मनाड़ी, ब्रह्मनाड़ी का मुख द्वार 'ब्रह्मद्वार' । सहस्रार में ब्रह्मरंध्र है—महावायुं ततो ध्यायेत ब्रह्मरंधन्ततः परम् ।।

* पिण्डस्थ चक्र श्री चक्र एवं अधिष्ठात्री देवी *

चक्र	स्थान	दल	श्रीचक्र	अधिष्ठात्रीशक्ति
अकुल (अरुण सहस्रदल कमल)	सुषम्नामूल	१००० दल	त्रैलोक्यमोहन चक्र	त्रिपुरा
मूलाधार चक्र	वह्निआधार	चतुर्दल ४ दल	सर्वाशा परिपूरक चक्र	त्रिपुरेशी
स्वाधिष्ठान चक्र	शक्ति	छ दल	सर्वसंक्षोभण चक्र	त्रिपुरसुन्दरी
मणिपूरक चक्र	नाभि	१० दल	सर्वसौभाग्य दायक	त्रिपुर वासिनी
अनाहत चक्र	हृदय	१२ दल	सर्वार्थसाधकचक्र	त्रिपुराश्री
विशुद्ध चक्र	—	१६ दल	सर्वरसाकरचक्र	त्रिपुरमालिनी
—	लम्बिकाग्र	८ दल	सर्वरोगहरचक्र	त्रिपुरासिद्धि
आज्ञा चक्र	भ्रूमध्य	२ दल	सर्वसिद्धिप्रदचक्र	त्रिपुराम्बिका
(इन्दु में ललाट के बिन्दु में स्थित चक्र		—	सर्वानन्दमय चक्र	महात्रिपुरसुन्दरी

"अकुलादिषु पूर्वोक्त स्थानेषु परिचिन्तयेत् । चक्रेश्वरी समायुक्तं नवचक्रं पुरोदितम् ॥"[१]

'सौभाग्यलक्ष्म्युपनिषद' के तृतीयखण्ड में (१) आधारचक्र (२) स्वाधिष्ठानचक्र (३) नाभिचक्र (४) हृदयचक्र (५) कण्ठचक्र (६) तालुचक्र (७) भ्रूचक्र (८) ब्रह्मरंध्रचक्र (९) आकाशचक्र—९ चक्र बताए गए हैं ।

आधार-स्वाधिष्ठान-मणिपूर-अनाहत-विशुद्धि-आज्ञाचक्र से 'श्रीचक्र' युक्त है—'आधार स्वाधिष्ठान मणिपूरानाहतविशुद्ध्याज्ञाचक्रात्मकं श्रीचक्रं त्रिखण्डं सामसूर्य नलात्मकम् ॥' 'श्रीचक्र' त्रिखण्डात्मक है—(क) 'सोमखण्ड' (ख) 'सूर्यखण्ड' (ग) 'अनलखण्ड'

(१) प्रथमखण्ड — मूलाधार-स्वाधिष्ठान : २ चक्र ।
(२) द्वितीयखण्ड — मणिपुर-अनाहत : २ चक्र ।
(३) तृतीयखण्ड — विशुद्धि-आज्ञा : २ चक्र ।

१. योगीअमृतानन्द—योगिनीहृदयदीपिका

प्रथमखण्ड के ऊपर — अग्निस्थान : 'रुद्रग्रन्थि'
द्वितीयखण्ड के ऊपर — सूर्यस्थान : 'विष्णुग्रन्थि'
तृतीयखण्ड के ऊपर — चन्द्रस्थान : 'ब्रह्मग्रन्थि'

प्रथम खण्ड के ऊपर—वह्नि अपनी ज्वालाओं से प्रथम खण्ड को ढके हुए हैं ।

द्वितीय खण्ड के ऊपर—स्थित सूर्य—अपनी किरणों से द्वितीय खण्ड को ढके हुए है ।[1]

तृतीय खण्ड के ऊपर—स्थित चन्द्रमा अपनी कलाओं से तृतीय खण्ड को ढके हुए है ।

परा वाक या शब्द ब्रह्म की विभिन्न रूपा— म— अभिव्यक्ति

अव्यक्त नाद

घोष, राव, स्वन, शब्द, स्फोट, ध्वनि, झणर, ध्वंकृति

चिणि नाद, चिणि चिणि, घण्टा नाद, शंख नाद, तन्त्री नाद, ताल नाद, वेणु नाद, भेरी नाद, मृदंग नाद

स्वात्माराम मुनीन्द्र के मतानुसार नादों के अनेक स्तर हैं और उनमें स्तरानुकूल सूक्ष्मता की कोटि बढ़ती जाती है । इसीलिए स्वात्माराम कहते हैं—'तत्र सूक्ष्मात्सूक्ष्मतरं नादमेव परामृशेत् ।।' (हठयोग प्रदीपिका) ।।

प्राथमिक अवस्था में श्रूयमाण नाद—जलधि-जीमूत-भेरी-झर्झर । मध्यमावस्था में श्रूयमाण नाद—मर्दल, शङ्ख, घण्टा काहल । अन्तिमावस्था में श्रूयमाण नाद—किंकिणी, वंश, वीणा, भ्रमरनिःस्वनः

"आदौ जलधि भीमूत भेरी झर्झर संभवाः । मध्ये मर्दल शङ्खोत्था घण्टाकाहलास्तथा । अन्ते तु किंकिणीवंशवीणा भ्रमरनिःस्वनाः । इति नानाविधा नादाः श्रूयन्ते देहमध्यगाः ।।"

योग की आरंभावस्था—ब्रह्मग्रन्थि का भेदन—हृदयाकाशरूप शून्य में 'क्वणक' (आभूषणों की ध्वनि) की अनाहत ध्वनि ।।

योग की घटावस्था—विष्णु ग्रन्थि का भेदन—अतिशून्य रूप कण्ठाकाश में विमर्द एवं भेरी की ध्वनि ।।

---

१. स्वच्छन्दतन्त्र

योग की निष्पत्ति अवस्था—वेणु के समान ध्वनि ॥[१]

"झिञ्झी नाद-वंशीनाद-मेघ, झर्झर, भ्रमरी, घण्टा, कांस्य नाद—तुरी, भेरी, मृदङ्ग, आनक, दुंदुभी नाद[२]

'प्रथमं झिञ्झीनादं च वंशीनादं ततः परम् । मेघझर्झरभ्रमरीघंटाकांस्यं ततः परम् । तुरीभेरीमृदङ्गादिनिनादानकदुंदुभिः ॥" एवं नानाविधं नादं जायते नित्यमभ्यसात् ॥"

'आधारोत्थित नादस्य'—मूलाधार चक्र से निःसृत नाद का ॥ यहाँ 'नाद' का क्या अर्थ है? भास्कराचार्य का कथन है कि 'नाद' ९ हैं और उनका स्वरूप निम्नांकित है—

बिन्दु	अर्द्धचन्द्र	रोधिनी	नाद	नादान्त	शक्ति	व्यापिका	समना	उन्मना

"बिन्द्वादीनां नवानां तु समष्टिर्नाद उच्यते"[१]

नादबिन्दु—तन्त्रशास्त्र में 'नाद-बिन्दु' शब्द अहं + इदं के अर्थों में भी गृहीत है ।[३] कुछ तन्त्रों में 'नाद'—सृष्टि-विधायिनी विराट शक्ति कहा गया है ।[४] कुछ तांत्रिकों के अनुसार—सच्चिदानन्द विभव सकल परमेश्वर से 'शक्ति' एवं उससे नाद—बिन्दु का आविर्भाव हुआ । कुछ तांत्रिकों (भेदवादी तांत्रिकों) के मतानुसार—दो तत्त्व हैं (क) शिव (ख) शक्ति । 'शिव' विमर्श शक्ति में प्रवेश करता है और बाद में बिन्दु का रूप धारण कर लेता है । बिन्दु का प्रथम विकास ही 'नाद' है ।[५] कुछ भेदवादी तांत्रिक शिवशक्ति को समवाय रूप से परिव्याप्त एक तत्त्व मानते हैं एवं बिन्दु को दूसरा तत्त्व मानते हैं ।[६] बौद्ध तन्त्रों में = 'बिन्दु' = अपरिवर्तनीय ज्ञान का प्रतीक है ।[७] उनसे 'बिन्दु' = हठयौगिक ज्योति के अर्थ में भी प्रयुक्त किया गया है ।[८] शैवतन्त्रों में 'नाद-बिन्दु' = शिव-शक्ति के प्रतीक भी माने गए हैं ।[९] बौद्धतन्त्रों में नाद-बिन्दु = प्रज्ञा + उपाय के प्रतीक माने गए हैं ।

---

१. हठयोगप्रदीपिका (प्राण के ब्रह्मरन्ध्र में पहुँचने पर वेणु की ध्वनि श्रुतिगोचर होती है ।)

२. घेरण्ड संहिता

३. सर्पेण्ट पावर—जान वुॅडरफ

४. तन्त्राज़—देयर फिलासफी एण्ड आकल्ट सीक्रेट्स

५. कलेक्टेड वर्क्स आफ आर०जी०भण्डारकर

६. गोपीनाथ कविराज—'तान्त्रिक दृष्टि' : 'साधनांक'

७-८. इन्ट्रोडक्शन टू तान्त्रिक बुद्धिज़्म

९. प्रिंसिपल्स आफ तन्त्र—आर्थर ऍवेलान

तन्त्रों एवं हठयौगिक ग्रन्थों में—'बिन्दु' शब्द के अर्थ में—रसना, सूर्य, रवि, प्राण, शमन, काली, यमुना, रज, पुरुष, नाद, व्यञ्जन शब्दों का, 'नाद' शब्द के अर्थ में—ललना, चन्द्रा, शशि, अपानु, धमन, अली, गङ्गा, शुक्रा, तमस्, अभाव, प्रकृति, ग्राहक एवं स्वर शब्दों का प्रयोग मिलता है ।[१]

'ध्यानबिन्दूपनिषद' आदि में—'हठयोग प्रदीपिका' में नाद बिन्दु का प्रयोग—'नाद' = परब्रह्म + अनाहत नाद ॥ 'बिन्दु' = जीवात्मा + वीर्य ॥ (४।७२;४।१०५)

तन्त्र मन्त्र के अनुसार शिव-शक्ति का प्रथम विकास 'नाद' के रूप में मिलता है ।[२] शिव-शक्ति का संयोग एवं उन दोनों का पारस्परिक संबंध नाद है ।[३] 'नाद' क्रिया रूप है । तात्विक क्षेत्र का सदाख्य तत्त्व ही मन्त्र क्षेत्र में—'नाद' है ।[४] अतंरात्मा 'नाद' के रूप में प्रस्फुटित होती है वही जीवों में प्राणवायु से पैंरित होकर अक्षरों का रूप धारण कर लेती है ।[५]

प्रशान्तविषुवमाह—

रेफे कामकलार्णे हार्दकलायां च बिन्द्वादौ ।
नादान्तावधि नादः सूक्ष्मतरो जायते तत्र ॥ ४७ ॥
शक्तेर्मध्ये तल्लयचिन्तनमुदितं प्रशान्तविषुवाख्यम् ।

(प्रशान्तविषुव' का स्वरूप)

रेफ में कामकला (ई) एवं बिन्द्वारब्ध तथा ह्रीं के नादान्त में समाप्त (अवयवों में) एक सूक्ष्मतर 'नाद' उत्पन्न होता है । वहाँ इस सूक्ष्मनाद की शक्ति में लय होने के चिन्तन का नाम 'प्रशान्तविषुव' है ॥ ४७, ४७- ॥

*** प्रकाश ***

तृतीयकूटस्थरेफादिषु सप्तसु स्थानेष्वाधारादारब्धस्य नादस्य तत्र सूक्ष्मतरतादशा, अभिघातादुत्तरोत्तरक्षणेषु कांस्यतालध्वनिवत् । तस्य शक्तौ लयो भाव्य इत्यर्थः ॥ ४७, ४७- ॥

*** सरोजिनी ***

'प्रशान्त विषुव'—नादान्त पर्यन्त मन्त्रावयवों की शक्ति से लय भावना 'प्रशान्तविषुव' है ।[६]

---

१. इन्ट्रोडक्शन टू तान्त्रिक बुद्धिज्म़
२. तन्त्राज़—देयर फिलासफी एण्ड आकल्ट सीक्रेट्स
३. भास्कराचार्य—'वरिवस्यारहस्यम्'
४. गारलैण्ड्स आफ लेटर्स—आर्थर एवेलॉन
५. प्रयोगसार
६. योगिनीहृदय

तृतीयकूट में स्थित रेफ आदि वर्णों में, सात स्थानों में, मूलाधार चक्र से प्रारंभ होने वाले नाद की सूक्ष्मतर दशा है । रेफ एवं कामकला (ई) एवं बिन्दु से आरंभ करके ह्रीं के नादान्त तक एक सूक्ष्मतर नाद उत्पन्न होता है । इस सूक्ष्मनाद का शक्ति के साथ विलय 'प्रशान्तविषुव' कहा जाता है ।

रेफ (र), कामकला (ई) एवं बिन्द्वारब्ध एवं हार्धकला के नादान्त में पर्यवसित बिन्दु के उच्चारण से एक अत्यन्त सूक्ष्म नाद उत्पन्न होता है ।

'योगिनीहृदय' में 'प्रशान्तविषुव' का स्वरूप इस प्रकार निरूपित किया गया है—'नादयोग: प्रशान्तं तु प्रशान्तेन्द्रियगो चरम् । वह्निं मायां कलां चैव चेतनामर्धचन्द्रकम् । रोधिनी नादनादान्तान् शक्तौ लीनान् विभावयेत् ॥'[१]

'शैवतन्त्र' में भी इसकी परिभाषा इसी प्रकार दी गई है—

अकारोकारवर्णौ च मकारो बिन्दुरेव च ।
नादनादान्त संज्ञे तु त्यक्त्वा ब्रह्मादिभि: क्रमात् ।
सप्तमे शक्तिमध्ये तु शिष्यात्मानं विचिन्तयेत् ॥
प्रशान्तं तद्विजानीयात् प्रशान्तेन्द्रियगोचरम् ॥[२]

'शक्ति' के मध्य सञ्चरित नाद 'समना' तक सञ्चार करता है—'शक्तिमध्यगतो नाद: समनान्तं प्रसर्पति ।'

भास्कराचार्य प्रशान्तविषुव की परिभाषा देते हुए कहते हैं—'नादयोगो नाड़ी सम्बद्धो नादो यस्मात् कारणाच्छक्तौ प्रशान्तो लीनो भवति तत्तस्मात् करणादिदं—'प्रशान्तविषुवमित्युचते ॥[३] अमृतानन्दनाथ कहते हैं—अर्धचन्द्र-निरोधिनी-नाद-नादान्तांश्चा पूर्वोक्तलक्षणायांशक्तौ लीनान् विभावयेत् । यतोऽयं नादो यष्टुस्तदीतशक्ति-लयलक्षण:, अत: प्रशान्तेन्द्रियगोचरं सकलेन्द्रियातीत विषये, तत्प्रशान्ते विषुव-मित्यनुषङ्ग: ॥'[४] 'प्रशान्तविषुवं प्रशान्तेद्रियाणां नियमितेन्द्रियाणां गोचरो विषय:' ॥

अन्य सम्प्रदायों से तुलनीय नाद-प्रपञ्चीकरण आगे पृ० २०१ पर चित्रित है ।

शक्तिविषुवमाह—

शक्त्यन्तर्गतनादं समनायां भावयेल्लीनम् ॥ ४८ ॥
समनागतमुन्मन्यामेत द्वे शक्तिकालविषुवाख्ये ।

('शक्तिविषुव' एवं 'कालविषुव' का स्वस्वरूप)

शक्ति के अन्तर्गत स्थित नाद की समना में लय होने की भावना करनी चाहिए । समना एवं उन्मनी में लयीभूत नाद की इन दोनों अवस्थाओं की क्रमश: 'शक्तिविषुव' एवं 'कालविषुव' संज्ञा है ॥ ४८, ४८- ॥

---

१. शैवतन्त्र २. सेतुबन्ध (श्लो० १८५)
३. अमृतानन्दनाथ—'योगिनीहृदयदीपिका' ४. सेतुबन्ध

विस्तार और व्यापकता की दृष्टि से शब्द-स्तर (नाद-स्तर)

जीव और मन का शब्द
वैराट पुरुष का शब्द
माया और ब्रह्म शब्द
ब्रह्म शब्द
पारब्रह्म का शब्द
सोहं पुरुष का शब्द
सत्त पुरुष का शब्द
अननुमेय, अत्यन्त गुप्तशब्द

सृष्ट्युन्मुखीशब्द धारा—

(केन्द्र से बाहर की ओर प्रवाहित)

बन्धन क्रम

भीतर से बाहर की ओर प्रवाहित
→ → → → →

सूक्ष्मता और अन्तर्मुखता की दृष्टि से शब्द-स्तर (नाद-स्तर)

जीव और मन का शब्द
वैराट पुरुष का शब्द
माया और ब्रह्म शब्द
ब्रह्म शब्द
पारब्रह्म का शब्द
सोहं पुरुष का शब्द
सत्त पुरुष का शब्द
अननुमेय, अत्यन्त गुप्तशब्द

प्रलयोन्मुखीशब्द धारा—

(केन्द्र की ओर प्रवाहित)

मुक्ति-क्रम

बाहर से भीतर की ओर प्रवाहित
← ← ← ← ←

*** प्रकाश ***

शक्तिस्थानादूर्ध्वं पुनरुज्जीवितस्य नादस्य सूक्ष्मतमस्य व्यापिकामुल्लङ्घ्य समनायां लयः शक्तिविषुवमित्यर्थः ॥ ४८ ॥

*** सरोजिनी ***

शक्तिविषुव काल विषुव—प्राण, आत्मा एवं मन के परस्पर योग को 'प्राणविषुव' एवं नाद को अपनी निजी आत्मा समझकर भावना करना 'मन्त्रविषुव' कहलाता है । शक्तिमध्यागत नाद के समना पर्यन्त चिन्तन को 'शक्तिविषुव' कहते हैं । शक्ति में नादान्त पर्यन्त मन्त्रावयवों की लय भावना 'प्रशान्तविषुव' है । कालातीत उन्मनापर्यन्त नाद के चिन्तन को 'कालविषुव' कहते हैं ।

'शैवतन्त्र' में 'शक्तिविषुव' एवं 'कालविषुव' की व्याख्या करते हुए कहा गया है—'शक्तिमध्यगतो नादः समनान्तं प्रसर्पति । तच्छक्तिविषुवं प्रोक्तमुन्मन्यां काल-संज्ञितम् ॥'[1]

आचार्य भास्कर 'शक्तिविषुव' एवं 'कालविषुव' को इस प्रकार परिभाषित करते हैं—'अथ लीयमानस्य दीपादेः सूक्ष्मीभूय पुनः स्थूलीभावदर्शनान्तदनुसारेण शक्तौ लीनस्य नादस्य पुनरुज्जीवनेन व्यापिकामुत्क्रम्य समनायां लय चिन्तनं शक्तिविषुवम् । ततः पुनरुज्जीव्योन्मन्यांलयः 'कालविषुवः' ।[2]

आचार्य अमृतानन्दनाथ 'शक्तिविषुव' एवं 'कालविषुव' को परिभाषित करते हुए कहते हैं—तदूर्ध्वं शक्तेरुर्ध्वं समनान्तं नादस्य विचिन्तनं 'शक्तिविषुवं । तदूर्ध्वं समनाया अप्यूर्ध्वम् । 'नात्र काल कलाभानम्' इति स्वच्छन्दसंग्रहोक्तरीत्या कालातीतो-न्मनान्तं नादस्य विचिन्तनं कालविषुवं ॥[3]

'योगिनीहृदय' में 'शक्तिविषुव'—'कालविषुव' की इस प्रकार परिभाषा दी गई है—

> 'विषुवंशक्तिसंज्ञं तुदूर्ध्वं नाद चिन्तनम् ।
> तदूर्ध्वं कालविषुवमुन्मनान्तं महेश्वरि ॥'[4]

शक्ति के मध्यगत नाद से समनापर्यन्त चिन्तन को 'शक्ति विषुव' कहते हैं । यहाँ तक काल की क्रीड़ा है क्योंकि समना तक ही काल की सीमा है उसके आगे 'उन्मना' में नहीं ।

कालविषुव के बाद 'तत्त्वविषुव' अङ्गीकृत होता है । नाद ही तत्त्व का अभिव्यञ्जक है । लेकिन जब तक नाद का वास्तविक अन्त नहीं होता तब तक तत्त्व बोध नहीं होता । नादान्त तो दूर की बात शक्ति में या समना में भी नाद का अन्त नहीं होता । शाक्त योगी उन्मना को भी नाद का अन्त स्वीकार नहीं

---

१. शैवतन्त्र
२. भास्कराचार्य—सेतुबन्ध श्लो० १८७
३. अमृतानन्दनाथ—'योगिनीहृदयदीपिका'
४. योगिनीहृदय

करते । उन्मना के ऊपर—उन्मना को भेद करने के साथ-साथ नाद लीन होता है। उस स्थिति में तत्त्वबोध या आत्मसाक्षात्कार स्वभावत: होता है । अत: 'तत्त्वविषुव' को ही चैतन्य का अभिव्यक्ति स्थान कहना सङ्गत है । ६ शून्यों, ५ अवस्थाओं एवं ६ विषुवों से परे है—विश्व की परम विश्रान्ति या परम शिव की अवस्था । उन्मना तक सभी मन्त्रावयव १०८१७ बार उच्चरित होने से नाद का अन्त एवं तत्त्वज्ञान का उदय होकर परमपद की प्राप्ति होती है ।

समनोर्ध्वं पुनरुज्जीवितसयात्यन्तं सूक्ष्मतमस्य नादस्योन्मन्यां लयः कालत्रिषुवमित्याह—

समनागतमुन्मन्यामेते द्वे शक्तिकालविषुवाख्ये ।
श्रीविद्याकूटावयवेषु ककारादिषून्मनान्तेषु ॥ ४९ ॥

अकुलादिकोन्मनान्तप्रदेशसंस्थेषु सकलेषु ।
अध्युष्टनिमेषोत्तरसप्तदशाधिकशतत्रयत्रुटिभिः ॥ ५० ॥

उच्चरिते नादे सति तस्यान्ते तत्त्ववेदनं भवति ।
तदिदं चैतन्याभिव्यक्तिनिदानं तु तत्त्वविषुवाख्यम् ॥ ५१ ॥

('तत्त्वविषुव' का स्वरूप)

समना एवं उन्मनी में लयीभूत नाद की इन दोनों अवस्थाओं की आख्या क्रमशः 'शक्तिविषुव' एवं 'कालविषुव' है । ककार से लेकर उन्मना तक एवं अकुल से लेकर उन्मना तक प्रदेशों में विद्यमान श्रीविद्याकूटों के भागों (अङ्गों) को व्याप्त करके समस्त ३१७ त्रुटियों एवं साढ़े तीन निमेषों को व्याप्त करता हुआ नाद तत्त्वज्ञान का कारण होता है । वह यह शुद्ध चैतन्य की अभिव्यक्ति का मूल हेतु 'तत्त्वविषुव' नाम वाला है ॥ ४९-५१ ॥

*** प्रकाश ***

उक्तेषु द्वात्रिंशत्पद्मष्वधस्तनद्वयं चरमं चाकुलपद्मानि । शेषाणि कुलपद्मानि । तेषु यद्यपि मूलाधाराख्यात् कुलपद्मादेव विद्याक्षराणामारम्भः, तथापि चक्रराजस्य सकलाख्यभावनाया अधस्तनसहस्रदलकमलमारभ्यैव 'अकुले विषुसंज्ञे च' इत्यादिना चतुःशत्यामुक्तत्वात् कुलाकुलविद्ययोरभेदेन श्रीविद्याया अपि तत आरम्भोक्तिस्तन्त्रेषु । अध्युष्टं सार्धत्रयम् । निमेषो लोचनस्पन्दकालः । तस्य त्रिसहस्रतमो ऽशस्त्रुटिः,

'स्वस्थे नरे समासीने यावत् स्पन्दति लोचनम् ।
तस्य त्रिंशत्तमो भागस्तत्परः परिकीर्तितः ।
तत्परस्य शतांशस्तु त्रुटिरित्यभिधीयते ॥'

इति वचनात् । एवं च (१०८१७) अयुतोत्तराष्टशतोत्तरसप्तदशत्रुटिपर्यन्तं विद्यावयवस्थानसंलग्नतापूर्वकं नादोच्चारणे कृते सति, तत्त्वस्य स्वसंविदभेदस्य बोधो भवति । तदिदमुच्चारणं तत्त्वविषुवम् ॥ -४९-५१ ॥

* सरोजिनी *

'योगिनीहृदय' में 'तत्त्वविषुव' इस प्रकार व्याख्या है—'मुनिचन्द्राष्टदशभिस्त्रुटितभिर्नादवेदनम् । चैतन्यव्यक्तिहेतुश्च विषुवं तत्त्वसंज्ञितम् ॥ १८८ ॥ परं स्थानं महादेवि निसर्गानन्दसुन्दरम् ॥'[१]

आचार्य अमृतानन्द 'तत्त्वविषुव' की व्याख्या करते हुए कहते हैं—अनन्तरोक्तरीत्या चैतन्यस्य स्वात्मतत्त्वस्य व्यक्तेः प्रकाशस्य हेतुस्तत्त्वविषुवम् ।[२] कोऽर्थः । उन्मनोर्ध्वेऽनन्तरोक्तसंख्यावत्त्रुटिभिर्नादलयात् स्वात्मामनुसन्धानं तत्त्वविषुवम् ॥[३]

'शैवतन्त्र' में कहा गया है—'स्वाधिकारे परे धाम्निविषुवं तत्त्वसंज्ञकम् ॥'[४]

आचार्य भास्कर की व्याख्यानुसार 'तत्त्वविषुव' का स्वरूप इस प्रकार है—'अथायमेव नादो यद्यविच्छिन्नतया सार्धनिमेषत्रयोत्तरं सप्तदशाधिक शत त्रय त्रुटि परिमित काल पर्यन्तश्चेत्तदन्ते चैतन्याभिव्यक्तिर्भवति । तदिदं तत्त्वविषुवं तत्त्वव्याप्तिकारित्वात् ॥'[५]

कालविषुव के बाद 'तत्त्वविषुव' अङ्गीकृत होता है । नाद ही तत्त्व का अभिव्यञ्जक है । लेकिन जब तक नाद का वास्तविक अन्त नहीं होता तब तक तत्त्व बोध नहीं होता । नादान्त तो दूर की बात शक्ति में या समना में भी नाद का अन्त नहीं होता । शाक्त योगी उन्मना को भी नाद का अन्त स्वीकार नहीं करते । उन्मना के ऊपर—उन्मना को भेद करने के साथ-साथ नाद लीन होता है । उस स्थिति में तत्त्वबोध या आत्मसाक्षात्कार स्वभावतः होता है । अतः 'तत्त्वविषुव' को ही चैतन्य का अभिव्यक्ति स्थान कहना सङ्गत है । ६ शून्यों, ५ अवस्थाओं एवं ७ विषुवों से परे है—विश्व की परम् विश्रान्ति या परम् शिव की अवस्था । उन्मना तक सभी मन्त्रावयव १०८१७ बार उच्चरित होने से नाद का अन्त एवं तत्त्वज्ञान का उदय होकर परम्पद की प्राप्ति होती है ।

उपसंहारपूर्वकं जपं लक्षयति—

एवमवस्थाशून्यविषुवन्ति चक्राणि पञ्च षट् सप्त ।
नव च मनोरर्थांश्च स्मरतोऽर्णोच्चारणं तु जपः ॥ ५२ ॥

(जप का लक्षण)

(मन्त्रगत) वर्णों की अवस्थाओं (अर्थात् ५), शून्यों (अर्थात् ६) विषुवों (अर्थात् ७) एवं चक्रों (अर्थात् ९) का स्मरण रखते हुए, (जो कि संख्या में क्रमशः) पाँच, छः, सात एवं नौ हैं—एवं मन्त्र के अर्थ का चिन्तन करते हुए (मन्त्रगत) वर्णों का उच्चारण करना 'जप' (कहलाता) है ॥ ५२ ॥

---

१. योगिनीहृदय
२-३. अमृतानन्द—'दीपिका'
४. शैवतन्त्र
५. भास्कराचार्य—'सेतुबन्ध'

*** प्रकाश ***

अवस्थादिचतुष्टये संख्याचतुष्टयस्य क्रमादन्वयः । नादत्रयस्य चक्रत्रयात्मकत्व-भावनं प्रागुक्तम् । चक्रसङ्केते त्वन्यदपि त्रयमुक्तम्—चक्रभावनं त्रिविधं सकलं निष्कलं सकलनिष्कलं चेति । अकुलसहस्रारं मूलाधारादिपञ्चकं सूक्ष्मजिह्वा भ्रूमध्यं बिन्दुस्थानं चेति नवसु स्थानेषु त्रैलोक्यमोहनादिचक्रनवकभावनं सकलम्, बिन्द्वाद्युन्मन्यन्तं तद्भावनं द्वितीयम्, महाबिन्दावेव तद्भावनं तृतीयमिति । मनोर्मन्त्रस्यार्थाननुसंदधानस्य विद्याया अर्णानामक्षराणामष्टपञ्चाशतो मध्य आद्यकूटद्वितयबिन्द्वादिनवकद्वयप्रहाणेना-वशिष्टानां चत्वारिंशतोऽक्षराणामुच्चारणं जपो जपपदवाच्यमित्यर्थः ॥ ५२ ॥

*** सरोजिनी ***

'अवस्था'—अवस्थायें पाँच हैं—(१) जाग्रत (२) स्वप्न (३) सुषुप्ति (४) तुरीय, (५) तुरीयातीत । **'शून्य'**—प्रणव रूप मन्त्र के बारह अङ्गों में प्रति द्वितीय अङ्ग शून्य कहलाता है । **'विषुवन्ति'**—सात विषुव हैं । यथा—'प्राणविषुव', 'मन्त्रविषुव', 'नाड़ीविषुव', 'प्रशान्तविषुव', 'शक्तिविषुव', 'कालविषुव' एवं 'तत्त्व-विषुव' । 'चक्र' नौ हैं—(१) त्रैलोक्यमोहन (२) सर्वाशापरिपूर्ण (३) सर्वसंक्षोभण (४) सौभाग्यदायक (५) सर्वार्थसाधक (६) सर्वरक्षाकर (७) सर्वरोगहर (८) सर्वसिद्धिप्रद (९) सर्वानन्दमय चक्र ॥

'चक्राणि' = १. 'सकल' २. 'निष्कल' ३. 'सकलनिष्कल' ॥ अकुल सहस्रार, मूलाधारादिपञ्चक, सूक्ष्मजिह्वा, भ्रूमध्य बिन्दु स्थान—नौ स्थानों में—त्रैलोक्यमोहनादि चक्र नवक भावन तो 'सकल' हैं । बिन्द्वादि उन्मन्यन्त चक्रों में उनका भावन 'निष्कल' है । महाबिन्दु में उनका भावन 'सकलनिष्कल' है । मन्त्रार्थानुसंधानपूर्वक 'वर्णों' (अक्षरों), का उच्चारण 'जप' कहलाता है किन्तु उसके साथ अवस्था, शून्य, विषुव एवं चक्रों का भी ध्यान रखना, आवश्यक होता है ।

'अर्थांश्च'—मन्त्रार्थ के प्रकार पन्द्रह हैं—(१) प्रतिपाद्यार्थ (२) भावार्थ (३) संप्रदायार्थ (४) निगर्भार्थ (५) कौलिकार्थ (६) रहस्यार्थ (७) महातत्वार्थ (८) नामार्थ (९) शब्दरूपार्थ (१०) नामैकदेशार्थ (११) शाक्तार्थ (१२) सामरस्यार्थ (१३) समस्तार्थ (१४) सगुणार्थ (१५) महावाक्यार्थ ॥

'जप'—'योगिनीहृदय' में भी जप-विधान है—'पुष्पाञ्जलिं ततः कृत्वा जपं कुर्यात् समाहितः ॥[१] इस 'जप' का लक्षण क्या है? 'समाहितो नियतेन्द्रियो नादरूपमन्त्रोच्चारणलक्षणं जपं कुर्यात् ॥' 'मन्त्र' नादरूपात्मक है । अतः नादोत्थानपूर्वक मन्त्राक्षरों का उच्चारण ही 'जप' है ।[२]

'योगिनीहृदय' में जप-विधान में भी शून्यषट्क, अवस्थापञ्चक एवं विषुव सप्तक के योग को महत्व दिया गया है—

---

१. योगिनीहृदय   २. अमृतानन्द—'दीपिका'

॥ श्रीः ॥

अथ श्रीक्रमः

ब्राह्ममुहूर्तकृत्यम्

मन्त्रमहार्णवश्रीविद्यार्णवनित्योत्सवादिषु प्रतिपादितम् ।

ब्राह्मे मुहूर्ते चोत्थाय निद्रास्थानाद्बहिर्निर्गत्य हस्तौ पादौ मुखं च प्रक्षाल्याचम्य रात्रिवस्त्रं परित्यज्य शुद्धवस्त्रं परिधाय शुद्धासन उपविश्याज्ञाचक्रे कोटीन्दुप्रकाशे स्वगुरुं ध्यायेत्—

ओं आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजबोधरूपम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं भजामि ॥

'ऐं ह्रीं श्रीं ह्स्ख्फ्रें हसक्षमलवरयूं स ह क्ष म ल व र यीं ह्सौः स्हौ स्वरूपनिरूपणहेत्वमुकाम्बासहितश्रीगुरुपादुकां पूजयामि'

'स्वच्छप्रकाशविमर्शहेत्वमुकाम्बासहितश्रीपरमगुरुपादुकां पूजयामि'

'स्वात्मारामपञ्जरविलीनचेतस्कामुकाम्बासहित श्रीपरमेष्ठिगुरुपादुकां पूजयामि' इति गुरुपरमगुरुपरमेष्ठिगुरुपादुकां पूजयेत् ।

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

प्राणानायम्य तच्चरणयुगलविगलदमृतरस-विसरपरिप्लुताखिलाङ्गमात्मानं भावयेत् ।

ततश्च सर्वचैतन्यात्मिकां जाग्रदाद्यवस्थात्रयावभासिकां सर्वाधिष्ठानरूपां प्रत्यक्चैतन्याभिन्नब्रह्मात्मिकां सर्वचैत्यविवर्जितामखण्डां चितिं भावयेत् ।

आमूलाधारादा ब्रह्मबिलं विलसन्तीं तडिल्लतासदृशाकृतिं तरुणारुणपिञ्जरां तैजसीं ज्वलन्तीं कुण्डलिरूपां सर्वाधिष्ठानभूतां परां संविदं भावयेत् ।

नियमितपवनस्पन्दो मूलाधारे चतुर्दलपद्मे त्रिकोणात्मकं पीठस्थितज्योतिर्लिङ्गमावेष्ट्यावस्थितां सार्धत्रिवलयां ओं हूं बीजेनोत्थिताम् 'ऐं ह्रीं श्रीं' इति मन्त्रं च जपन् कुण्डलिनीं ध्यायेत् ।

कुण्डलिनीमन्त्रः

वाग्भवं भुवनेशी च श्री बीजन्तु तथैव च ।
त्र्यक्षरो मन्त्र आख्यातः कुण्डलिन्यास्सुसिद्धिदः ।।१।।

ऋषिश्शक्तिस्समाख्यातो गायत्रीच्छन्द ईरितम् ।
चेतना कुण्डली शक्तिर्देवतात्र समीरिता ।।२।।

वाग्भवं बीजमाम्नातं शक्तिः श्रीबीजमुच्यते ।
हृल्लेखाकीलकं प्रोक्तं कुण्डलिन्यास्तु चिन्तने ।।३।।

विनियोगस्समाख्यातः सर्वागमविशारदैः ।
बीजत्रयद्विरावृत्या षडङ्गन्यास ईरितः ।।४।।

ध्यानं वक्ष्यामि कुण्डल्यास्सावधानतया शृणु ।
मूलाधारे त्रिकोणे तु सूर्यकोटिसमत्विषि ।।५।।

प्रसुप्तभुजगाकारां सार्धत्रिवलयस्थिताम् ।
नीवारशूकवत्तन्वीं तडित्कोटिसमप्रभाम् ।।६।।

सूर्यकोटिप्रभां दीप्तां चन्द्रकोटिसुशीतलाम् ।
शिवशक्तिमयीं देवीं शंखावर्तक्रमात्स्थिताम् ।।७।।

सुषुम्नामध्यमार्गेण यान्तीं परशिवावधि ।
ह्रींकारबीजरूपेण चिन्तयेद्योगवर्त्मना ।।८।।

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुर-
त्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।
पाणिभ्यां मणिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थसव्यचरणां ध्यायेत्परामम्बिकाम् ।।

कुण्डलिनीस्तुतिः

मूलोन्निद्रभुजङ्गराजसदृशीं यान्तीं सुषुम्नान्तरं
भित्वाधारसमूहमाशु विलसत्सौदामिनीसन्निभाम् ।
व्योमाम्भोजगतेन्दुमण्डलगलद्दिव्यामृतौघैः पतिं
सम्भाव्य स्वगृहागतां पुनरिमां सञ्चिन्तयेत्कुण्डलीम् ।।

हंसं नित्यमनन्तमद्वयगुणं स्वाधारतो निर्गता
शक्तिः कुण्डलिनी समस्तजननी हस्ते गृहीत्वा च तम् ।
याता शम्भुनिकेतनं परसुखं तेनानुभूय स्वयं
यान्ती स्वाश्रममर्ककोटिरुचिराध्येया जगन्मोहिनी ।।

अव्यक्तं परबिम्बमञ्चितरुचिं नीत्वा शिवस्यालयं
शक्तिः कुण्डलिनी गुणत्रयवपुर्विद्युल्लतासन्निभा ।
आनन्दामृतकन्दगं पुरमिदं चन्द्रार्ककोटिप्रभं
संवीक्ष्य स्वगृहं गता भगवती ध्येयानवद्या गुणैः ।।

मध्ये वर्त्म समीरणद्वयमिथस्सङ्घट्टसंक्षोभजं
शब्दस्तोममतीत्य तेजसि तडित्कोटिप्रभाभास्वराम् ।
उद्यन्तीं समुपास्महे नवजपासिन्दूरसान्द्रारुणां
सान्द्रानन्दसुधामयीं परशिवं प्राप्तां परां देवताम् ।।

गमनागमनेषु जाङ्घिकी सा
तनुताद्योगफलानि कुण्डली ।
मुदिता कुलकामधेनुरेषा
भजतां वाञ्छितकल्पवल्लरी ।।

आधारस्थितशक्तिबिन्दुनिलयां नीवारशूकोपमां
नित्यानन्दमयीं गलत्परसुधावर्षैः प्रबोधप्रदैः ।
सिक्त्वा षट्सरसीरुहाणि विधिवत्कोदण्डमध्योदितां
ध्यायेद्भास्वरबन्धुजीवरुचिरां संविन्मयीं देवताम् ।।

हृत्पङ्केरुह भानुबिम्बनिलयां विद्युल्लतामन्थरां
बालार्कारुणतेजसा भगवतीं निर्भर्त्सयन्तीं तमः ।
नादाख्यं परमर्धचन्द्रकुटिलं संविन्मयीं शाश्वतीं
यान्तीमक्षररूपिणीं विमलधीर्ध्यायेद्विभुं तेजसाम् ।।

भाले पूर्णनिशाकरप्रतिभटां नीहारहारत्विषा
सिञ्चन्तीममृतेन देवममितेनानन्दयन्तीं तनुम् ।
वर्णानां जननीं तदीयवपुषा संव्याप्य विश्वं स्थितां
ध्यायेत्सम्यगनाकुलेन मनसा संविन्मयीमम्बिकाम् ।।

मूले भाले हृदि च विलसद्वर्णरूपा सवित्री
पीनोत्तुङ्गस्तनभरनमन्मध्यदेशा महेशी ।
चक्रे चक्रे गलितसुधया सिक्तगात्री प्रकामं
दद्यादद्य श्रियमविकलां वाङ्मयी देवता नः ॥

आधारबन्धप्रमुखक्रियाभिः समुत्थिता कुण्डलिनी सुधाभिः ।
त्रिधामबीजं शिवमर्चयन्ती शिवाङ्गना वः शिवमातनोतु ॥

निजभवननिवासादुच्चलन्ती विलासैः
पथि पथि कमलानां चारु हासं विधाय ।
तरुणतपनकान्तिः कुण्डली देवता सा
शिवसदनसुधाभिः दीपयेदात्मतेजः ॥

सिन्दूरपुञ्जनिभमिन्दुकलावतंसमानन्दपूर्णनयनत्रयशोभिवक्त्रम् ।
आपीनतुङ्गकुचनम्रमनङ्गतन्त्रं शम्भोः कलत्रममितां श्रियमातनोतु ॥

वर्णैरर्णवषट्दिशा रविकलाचक्षुर्विभक्तैः क्रमा-
त्सान्तैरादिभिरावृतान् क्षहयुतैष्षट्चक्रमध्यानिमान् ।
डाकिन्यादिभिराश्रितान् परिचितान् ब्रह्मादिभिर्दैवतैः
भिन्दाना परदेवता त्रिजगतां चित्तेषु दत्तां मुदम् ॥

आधाराद्गुणवृत्तशोभिततनुं निर्गत्वरीं सत्वरं
भिन्दन्तीं कमलानि चिन्मयघनानन्दप्रबोधोद्धुराम् ।
संक्षुब्धध्रुवमण्डलामृतकरप्रस्यन्दमानामृत-
स्रोतःकन्दलिताममन्दतडिदाकारां शिवां भावये ॥

मूलाधारे त्रिकोणे तरुणतरणिभाभास्वरे विभ्रमन्तं
कामं बालार्ककालानलजरठकुरङ्गांककोटिप्रभाभम् ।
विद्युन्मालासहस्रद्युतिरुचिरलसद्बन्धुजीवाभिरामं
त्रैगुण्याक्रान्तबिन्दुं जगदुदयलयैकान्तहेतुं विचिन्त्य ॥

तस्योर्ध्वे विस्फुरन्तीं स्फुटरुचिरतटित्पुञ्जभाभास्वराङ्गी-
मुद्गच्छन्तीं सुषुम्नामनु सरणिशिखामा ललाटेन्दुबिम्बम् ।
चिन्मात्रां सूक्ष्मरूपां जगदुदयकरीं भावनामात्रगम्यां
मूलं या सर्वधाम्नां स्फुरति निरुपमा हूँकृतोदञ्चितोरः ॥

नीता सा शनकैरधोमुखसहस्राराराुणाब्जोदरे
च्योतत्पूर्णशशांकबिम्बमधुनः पीयूषधारास्रुतिम् ।
रक्तां मन्त्रमयीं निपीय च सुधानिःष्यन्दरूपा विशे-
द्भूयोऽप्यात्मनिकेतनं पुनरपि प्रोत्थाय पीत्वा विशेत् ।।

योऽभ्यस्यत्यनुदिनमेवमात्मनोऽन्त-
र्बीजांशं दुरितजरापमृत्युरोगान् ।
जित्वासौ स्वयमिव मूर्तिमाननङ्गः
सञ्जीवेच्चिरमातिनीलकेशजालः ।।

इति तद्रश्मिनिकरभस्मितसकलकश्मलजालो मूलं मनसा दशवारमावर्तयेत् ।

अथ षट्शताधिकैकविंशतिसाहस्रिकां निःश्वासोच्छ्वासरूपिणीं मूलाधारादिब्रह्मरन्ध्रान्तसप्तचक्रनिवासिनीभ्यो देवताभ्यो निवेदयामि, तथा——

मूलाधारे चतुर्दलपद्मे वं शं षं सं चतुरक्षरे चतुष्कोणयन्त्रे ऐरावतवाहने लं बीजे स्थिताय शुद्धबुद्धिसहिताय कुंकुमवर्णाय महागणपतये षट्सहस्रमजपागायत्रीजपं निवेदयामि,

बं भं मं यं रं लं षडक्षरे स्वाधिष्ठानचक्रे षट्दलपद्मेऽर्धचन्द्रे मकरवाहने वं बीजे स्थिताय सरस्वतीशक्तिसहिताय सिन्दूरवर्णाय ब्रह्मणे षट्सहस्रमजपाजपं निवेदयामि,

मणिपूरकचक्रे दशदलपद्मे डं ढं णं तं थं दं धं नं पं फं दशाक्षरे त्रिकोणयन्त्रे मेषवाहने रं बीजे स्थिताय लक्ष्मीशक्तिसहिताय नीलवर्णाय विष्णवे षट्सहस्रमजपाजपं निवेदयामि ।

अनाहतचक्रे द्वादशदलपद्मे कं खं गं घं ङं चं छं जं झं ञँ टं ठं द्वादशाक्षरे षट्कोणयन्त्रे हरिणवाहने स्थिताय पार्वतीशक्तिसहिताय हेमवर्णाय परमशिवाय षट्सहस्रमजपाजपं निवेदयामि ।

विशुद्धिचक्रे षोडशदलपद्मे अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः षोडशाक्षरे शून्ययन्त्रे हस्तिवाहने स्थिताय प्राणशक्तिसहिताय शुद्धस्फटिकसंकाशाय जीवाय सहस्रमेकमजपाजपं निवेदयामि,

आज्ञाचक्रे द्विदलपद्मे श्वेतवर्णे हं क्षं द्व्यक्षरे लिङ्गयन्त्रे नरवाहने स्थिताय ज्ञानशक्तिसहिताय विद्युद्वर्णाय गुरवे सहस्रमेकमजपाजपं निवेदयामि,

ब्रह्मरन्ध्रे सहस्रदलपद्मे चित्रवर्णे अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञँ टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं लं क्षं इति विंशतिवारोच्चारिते सहस्राक्षरे विसर्गयन्त्रे बिन्दुवाहने पूर्णचन्द्रमण्डले आनन्दमहासमुद्र-मध्ये चिन्मयमणिद्वीपे चित्सारचिन्तामणिमयमन्दिरे कल्पवृक्षाधस्तले अव्याकृतब्रह्ममहासिंहासने स्थिताय नानावर्णाय वर्णातीताय चिच्छक्ति-सहिताय परमात्मने सहस्रमेकमजपाजपं निवेदयामि इति निवेदयेत्।

अथ कतिचित् क्षणान् हंसः सोऽहमिति श्वासोच्छ्वासेषु भावयेत्।

हकारेण बहिर्याति सकारेण विशेत्पुनः।
हंसोऽतिपरमं मन्त्रं जीवो जपति सर्वदा।।

इति ध्यात्वा मानसैरुपचारैस्सर्वान् देवान् पूजयेत्।

लं पृथिव्यात्मकं गन्धं समर्पयामि (कनिष्ठिकांगुष्ठाभ्याम्)।

हं आकाशात्मकं पुष्पं -(अंगुष्ठतर्जनीभ्याम्)।

यं वाय्वात्मकं धूपमाघ्रापयामि (तर्जन्यंगुष्ठाभ्याम्)।

रं वन्ह्यात्मकं दीपं दर्शयामि (अंगुष्ठमध्यमाभ्याम्)।

वं अमृतात्मकं नैवेद्यं निवेदयामि (अंगुष्ठानामिकाभ्याम्)।

सं सर्वात्मकं ताम्बूलादिसर्वोपचारान् समर्पयामि। (साङ्गुष्ठा-भिस्सर्वाभिः)।

आमूलाधारादाब्रह्मबिलं विलसन्त्यां बिसतन्तुतनीयस्यां विद्युत्पुं-जपिंजरायां विवस्वदयुतप्रकाशायां कुण्डलिन्यामेव निम्नांकितेषु चक्रेषु श्रीचक्रस्थितां देवतां भावयन् पूजयेत्।

तद्यथा——मूलाधारादधोगते अकुलसहस्रारे देहश्रीचक्रयोरभेदेन भूपुरस्थिताः अणिमादिदेवीः पूजयामि। तदुपरि स्थिते विषुवन्नाम्नि रक्तवर्णषड्दलषोडशदलगतकामाकर्षिण्यादिदेवीः पूजयामि।

मूलाधारे चतुर्दलेऽष्टदलगतानङ्गकुसुमादि देवीःपूजयामि।

स्वाधिष्ठाने षट्दले चतुर्दशारगतसर्वसंक्षोभिण्यादिदेवीः पूजयामि ।

मणिपूरे दशदले बहिर्दशारगतसर्वसिद्धिप्रदादिदेवीः पूजयामि ।

अनाहते द्वादशदलेऽन्तर्दशारगतसर्वज्ञादिदेवीः पूजयामि ।

विशुद्धे षोडशदलेऽष्टारगतवशिन्यादिदेवीः पूजयामि ।

लम्बिकाग्रे रेखात्रये त्रिकोणगतमहाकामेश्वर्यादिदेवीश्च पूजयामि ।

आज्ञायां द्विदले बिन्दुगतश्रीत्रिपुरामहात्रिपुरसुन्दरीं कामेश्वरांकनिलयां देवीं पूजयामि इति ।

श्रीमहात्रिपुरसुन्दर्यां सचक्रावयवान्यावरणानि विलीनानि विभाव्य मध्यत्र्यश्राग्रे स्थितजीवात्मना सहितां देवीं हृदयं नीत्वा स्वाञ्जलिगतकुसुमैस्तां सम्पूज्य ततोऽकुलेन्दुगलितामृतधारारूपिणीः चन्दनकुसुमधूपदीपनैवेद्यशालिकरकमलाःपीतासितश्यामरक्तशुक्लवर्णाः भूवियदनिलानलजललक्षणाः पञ्चभूतमयीः सर्वावयवसुन्दरीः पञ्च देवता देव्यग्रे संस्मृत्य ताभिः चन्दनधूपाद्युपचारान् देव्यै समर्पितान् स्मारंस्मारं पञ्चोपचारमुद्राश्च प्रदर्शिता भावयेत् ।

ततो देव्या नासायां गन्धदेवता, श्रोत्रे पुष्पदेवता, नाभौ धूपदेवता, नयने दीपदेवता, जिह्वायां नैवेद्यदेवता इति क्रमेण ता विलीना विभाव्य मूलविद्यामुच्चरन् जीवात्मानं देवीपादमूले लीनं विभाव्य हृदयगतदेवीरूपं मध्यत्र्यस्रसहितं तथैव केवलं ज्योतिर्मयतामापन्नं ध्यायन् संक्षोभिण्यादिमुद्रा भावयित्वा क्षणं न किञ्चिदपि चिन्तयेत् ।

रश्मिमालामन्त्राः

ततो रश्मिमालाप्रवर्तनम् । रश्मिमालामन्त्रेषु वैदिकान्मन्त्रान् सस्वरान् पठेत् ।

'ओं भूर्भुवस्स्वः, तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात्' इति गायत्री मूलाधारे ॥१॥

(सावित्र्या विश्वामित्र ऋषिः नृचिद्गायत्रीच्छन्दः सविता देवता, तत्प्रीत्यर्थे जपे विनियोगः । ध्यानम्––

मुक्ताविद्रुमहेमनीलधवल छायैर्मुखैस्त्रीक्षणै-
र्युक्तामिन्दुनिबद्धरत्नमकुटां तत्त्वार्थवर्णात्मिकाम् ।

[नवमः पटलः]

[आत्मसंक्रान्तिः][1]

अथ विद्याव्रतविद्धीरः शिवाग्निगुरुपूजकः । निमित्तमशुभं दृष्ट्वा गजवाजिरथादिषु ॥ १ ॥
अस्त्राणामप्रसादं वा भृशं वा शत्रुवीक्षितः । दीर्घानरोग्यसंतप्तो [2]गृहीतो वाथ भूभृता ॥ २ ॥
तथा पञ्चात्मकं देहं विद्यामन्त्रात्मसंस्कृतम् । महाभूतानि ज्ञानाग्नौ जुहुयादस्त्रसंभवे ॥ ३ ॥
महीतले शुचिर्भूत्वा मन्त्रयुक्तेन चेतसा । शरदर्भान्परिस्तीर्य रुद्रं ध्यात्वाम्रविग्रहम् ॥ ४ ॥
जगत्संहारकर्तारं ब्रह्मात्मपराजितम् । ध्यानी विज्ञानयोगेन [3]चास्त्रं ध्यात्वा विचक्षणः ॥ ५ ॥
आसनं रुचिरं बध्वा स्वस्तिकं पद्ममेव वा । ऊर्ध्वकाय ऋजुग्रीवो बध्वाधः करकच्छपम् ॥ ६ ॥
दन्तान्न पीडयेद्दन्तैर्नेत्रे [4]चार्धनिमीलिते । विषयोरगसंरुद्धां विगृह्येन्द्रियवाहिनीम् ॥ ७ ॥
निरुद्धप्राणसंचारो नाभेरूर्ध्वं वितस्तितः । बालसूर्यप्रतीकाशं हृदयं संप्रकाशते ॥ ८ ॥
मण्डलं तत्र सूर्यस्य तन्मध्ये सोममण्डलम् । सोममण्डलमध्ये तु विमलं वह्निमण्डलम् ॥ ९ ॥
वह्निमण्डलमध्यस्थं शुद्धस्फटिकसन्निभम् । य . . . . . . कं विद्याद्रक्षार्थं तु महेश्वरम् ॥ १० ॥
तस्मिन्साधकचैतन्यं विद्यात्स्वपदगोचरम् । ततोत्यस्त्रमय वह्निदग्धां वेगेन हृद्गुहाम् ॥ ११ ॥
अस्त्रं शिरः कपालं च भित्त्वा सूर्यं प्रपद्यते । निश्चलं मूर्ध्नि [5]देवस्य ज्योतिः परममन्त्रवित् ॥ १२
अस्त्रमायासमाकृष्टो रौद्रीशक्त्येकवीरयोः । मूर्ध्नि सन्धानयेद्योगधारणाभिश्च निष्क्रमेत् ॥ १३ ॥
निष्क्रम्य पादयोरग्निः पुनर्मूर्धानमाश्रयेत् । [6]मूर्धनि तु ततो लोकालोकं बध्वा प्रभिद्य च ॥ १४
प्रकृतिं पुरुषं चैव सूक्ष्मतेजोमयो महान् । सर्वभूतात्मको भूत्वा विशेत्सूक्ष्मं महेश्वरम् ॥ १५ ॥
देहस्य [7]देहि दर्भाख्यं वस्त्रेणाप्यथवासनम् । संहारायेति भूतानि हिरण्येति शिरः स्पृशेत् ॥ १६
विद्याधिपेन होमे च ध्यायीत विधिरात्मकः । एवमस्त्रसमायोगान्मुच्यते नात्र संशयः ॥ १७ ॥

इति रौरवसूत्रसंग्रहे आत्मसंक्रान्तिपटलो नवमः[8]

---

[1] Voir *Niśśvāsakārikā*, *paṭala* 33 pour les détails du *ātmasaṅkrānti*.

[2] गृहीत्वा—ms.

[3] अस्त्रं pour चास्त्रं— ms.

[4] चार्धं निमीलिते—ms.

[5] देहस्य—ms.

[6] मूर्धनि —ms.

[7] देवदत्तास्त्रं ?—ms.

[8] समाप्तः pour नवमः—ms.

[सप्तमः पटलः]

[धारणाविधिः][1]

अथातः संप्रवक्ष्यामि ध्यानमार्गविधिक्रमम् । सकलो निष्कलश्चैव द्विविधस्तु शिवः स्मृतः ॥ १ ॥
सद्यो वामश्च घोरश्च पुरुषेशान एव च । कला ह्येताः समाख्याता निधनेशस्य सूरिभिः ॥ २ ॥
निष्कलस्तु परो देवो व्योमव्यापी महेश्वरः । प्रधानपुरुषेशानः परात्परतरः स्थितः ॥ ३ ॥
सर्वज्ञः सर्वकर्ता च सर्वगः सर्वतोमुखः । सर्वभूतात्मभूतस्थः शिवो ध्येयोऽथ शाश्वतः ॥ ४ ॥
[2]प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा । तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥ ५ ॥

[आग्नेयी]

[3]प्रथमा धारणाग्नेयी नाभिमध्ये तु धारयेत् । तस्यां वै धार्यमाणायां पापं निर्दहति क्षणात् ॥ ६ ॥

[सौम्या]

[4]हृदये धारयेद्विद्वान् सौम्यां सोमसुतां कलाम् । तस्यां वै धार्यमाणायां सर्वत्राप्यायनं भवेत् ॥ ७ ॥

---

[1] Pour *dhāraṇāvidhi* voir *Kiraṇa, yogapāda, paṭala* 1 et *Svāyambhuva, yogapā[da]*, *paṭala* 36.

[2] cf. *Mataṅga, yogapāda*, p. 208, *Kiraṇa*, IV, 1, 3, et *Niśśvāsakārikā*, ms. p. 2[…]

[3] cf. *Kiraṇa*, IV, 1, 18-21:

संसिद्धयोगिनो मुख्यं धारणानां चतुष्टयम् । वह्निसौम्यामृता वाक्या पराख्या धारणास्तु ताः ॥
मूलं रेफपुटान्तस्थं पञ्चमस्थं च बिन्दुगम् । ज्वलार्णसंयुता दीप्ता धारणा पावका मता ॥
सर्वोद्वारेऽरिहिंसादिपापः प्रागेव संक्षयेत् । त्रिकोणमण्डलस्थोऽयं कूटो वह्निस्स्वयं भवेत् ॥
वायुवेष्टितसर्वाङ्गो बीजदाहादिकृत्परः ॥

[4] cf. *Svāyambhuva*, 36, 3:

हृदये धारयेत्सौम्यां सदा सोमसमप्रभां । आप्याययति सर्वाणि यथा योगपदस्थितः ॥

cf. *Kiraṇa*, IV, 22-23*a*:

पूर्वोक्तवारिसंयुक्तस्सौम्ये बिन्दुयुतस्स्वयम् । तोयमण्डलमध्यस्थः परितस्तेन वेष्टितः ॥
शान्तिपुष्टिकरी चैवमुपसर्गविसर्जनी ॥

[ऐशानी]

[1]ऐशानीं धारयेन्मूर्ध्नि सर्वसिद्धिकरीं नृणाम्। यया प्रयान्ति वै क्षिप्रं शिवस्य परमं पदम् ॥ ८ ॥

[अमृता]

[2]अमृता धारणा या तु व्यापिनी तु शिवंकरी। आप्याययति सर्वत्र सर्वं ज्ञानामृतेन च ॥ ९ ॥
ओंकारपूर्विका ह्येता नाभीहृदयसंस्थिताः। मूर्धन्या च तथा चान्या चामृता सर्वगा शुभा १० ॥

[धारणामन्त्राः]

ओं ज्वलद्दीप्तमहसे ज्वालामालिनि वम स्वैरं दीप्य दीप्य पशुपतिः। आग्नेयीधारणामन्त्रः ॥

ओं श्री ओं नमः शिवाय प्लावय अमृतायामृतयोनये। सत्ये सत्ये शान्तब्रह्मण्ये वरिष्ठयोगं धर धर प्लावयामृतेन। सौम्यां हृदि धारयेत् ॥

ओं ओं श्रीयोगरूपायानाश्रिताय सर्वप्रभवे ज्योतीरूपाय नमः ठ ठ। ऐशानीं शिरसि धारयेत् ॥

ओं नमः शिवाय अमृताय पशुतत्त्वानुग्रहकरायामृतायामृतरूपिणे अमृतीकुरु स्वाहा। अमृता सर्वव्यापिनी ॥

इति रौरवसूत्रसंग्रहे [धारणापटलः सप्तमः]

---

[1] cf. *Svāyambhuva*, 36, 4-5:

धारयेन्मूर्ध्नि चैशानीं सर्वेशानीं विचक्षणः। यथा तु योगिनः सर्वे प्रयान्ति परमं पदम् ॥

cf. *Kiraṇa*, IV, 1, 25-26:

अकारबिन्दुसंयुक्तो नादशक्तिसमन्वितः। बिन्दुः शिवसर्वाङ्गो ललाटस्थानसंस्थितः ॥
तदा तत्स्थितो योगी भवेन्मृत्युबहिष्कृतः ॥

[2] cf. *Svāyambhuva*, 36, 5:

अमृता धारणा या तु सा सर्वत्र व्यवस्थिता ॥

cf. *Kiraṇa*, IV, 1, 23b-24:

स एवामृतसंयुक्तः प्रणवेनोर्ध्वयोजितः। बिन्दुगो बीजदाहादित्रिस्वरेण निवेदितः ॥
अमृतेयं सदा मूर्ध्नि व्यापिनी नीरुकाहृच्यता ॥

४७ब्)

त्रैलोक्य रक्षणरतां मंगलां प्रणमाम्यहं ॥

गुह्यकाली मंगला च सिद्धिकाली जयेश्वरी ।
चर्चिका त्रिपुरेशी च कालि च भुवनेश्वरी ॥

श्रीमंगलामहाकाली निर्वाण पददायिनी ।
राज्यदा धनदा नित्यं दशवक्त्रां परां भजेत् ॥

इति श्रीहाहारावमहामंत्रे षत्त्रिंशत् साहस्रे महाथर्वणसंहितायां
शिवपार्वती सामरस्ये श्रीगुह्यकालिका देव्याः सहस्रनामपटलः ॥

अथ तुरीयभावना ॥

पार्वत्युवाच ॥

देवदेव महादेव भक्तानाम भयप्रद ।
तुरीयं तु न जानामि भक्तानां हितकाम्य या ॥

श्रीशिव उवाच ॥

धन्यासि कृत पुण्यासि तुरीया भक्त पार्वति ।
यथा श्रुत्वा मयादेवि कथयामि तवाग्रतः ॥

चतुर्दश भूपर्यन्त स्थावरं जंगमाचरं ।
ब्रह्मविष्णुमहेशानं न पूजां तं चराचरं ॥

वरुणश्चानलं वायुं चन्द्रसूर्य हुताशनं ।
पृथ्वंतरीक्ष आकाशं प्रलयं गतधारिणं ॥

तुंरी रूपा महादेवि स्वयं तेजो ज्योतिर्मयं ।
एकाकिनी जगन्मूर्तिर्द्वितीयं परमं गता ॥

दृष्ट्वा लोमशं महादेवि मार्कण्डे यस्ततो गता ।

मार्कण्डेय प्रतिलोमश उवाच ॥

व्यक्ताव्यक्त स्वरूपाय नमस्ते पुंजरूपिणे ।

तुरीयायै नमस्तेस्तु नमः पुरुषवर्जिता ॥

परमतुरीय उवाच ॥

वरं शृणुष्व भद्रं ते यत्ते मनसि वर्त्तते ।
योगलक्ष्मीं यदीच्छेत ददामि तेन संशयः ॥

ऋषिरुवाच ॥

नमस्तैस्तु महामूर्तिं कथयामि जुषस्वते ।

तुरीयोवाच ॥

मुनिवर्ग महाभाग सावधानं शृणुष्वहि ।
अस्मद्विभूति वक्ष्यामि उत्पत्ति प्रकृते स्वयं ॥

मल्ललाटाश्ते?ब्रह्मा श्रवणात्पंचदेवता ।
नासाग्रात्सलिलं चैव मुखादग्निरजायत ॥

रसनात् सरस्वती देवी नेत्राभ्यां ह्यमराव्रजन्।
कंठान्नीला महादेवी भुजे दुर्गारिमर्दिनी॥

स्तन मध्ये कंदर्पं च कुक्षौ सप्तसमुद्रकं।
करमध्येन्य देवं च पापपुण्यं वक्षस्थले॥

४८अ)

हृदये चन्द्रमा देवां नाभौ च गरुडध्वजः।
वामपार्श्वे स पितरं दक्षिणे शक्र राजकं॥

गुह्ये गणपतिर्देव उरौ च कालमृत्युकं।
पृष्ठे नक्षत्र देवं च लिङ्गे चैव सदाशिवं॥

रुर्मेशमनसादेवी अस्थि च शिरपां तथा।
रुधिरं पर्वतो देवो जंघौ च धर्मदेवता॥

गुदेशं त्वेक देवं च ऋषि उरुदेशयोः।
दैत्यराक्षसनरयो जिह्वा यावन्तं देवता॥

देहमध्ये कुबेरदेवं ते विभूति मुनिवर्गः।
एवं विभूति योगं गोपनीयं प्रयत्नतः॥

ऋषि पार्वत्युवाचः॥

शृणु देव जगन्नाथ संसारार्णवतारकं।
तव वासः कुतस्तेषां कथयामि तवाग्रतः॥

तुरीय उवाच॥

साधु साधु महादेवि प्रसन्नोस्मि तव प्रिये।
रहस्यं कथयिष्यामि गोपनीयं प्रयत्नतः॥

सकलजीवमहं तुरीयं स्थावरं स चराचरं।
नाभि पश्चिम मार्गे च पाताललोक शेषकं॥

नाभ्यग्रं कंठपर्यन्तं मर्त्यलोक समुद्रकं।
कंठाग्राच्छीर्षपर्यन्तं स्वर्गलोकं महेश्वरि॥

पार्वत्युवाच ॥

कूटस्थानं कूटचक्रं नादबिन्दुश्च गोचरं।
उन्मनेः कुत्र संस्थानं न अगोचरं कुत्र व्यापि ॥

कुत्र ब्रह्मा कुत्र विष्णुः कुत्र देवस्सदाशिवः।
त्रयोदश कमलं च कुत्र शांभवि निर्वणं ॥

निरंजनः सदाशिवो महाविष्णुर्महेश्वरी।
इडापिंगला सुषुम्ना षट्चक्रं कुत्रस्थितिः ॥

कुंडली हंस अजपा निराकारस्य पद्मकं।

तुरीय उवाच ॥

शृणु देवि प्रवक्ष्यामि सावधानश्च ब्राह्मण।
प्रथमे अरूचक्रं च द्वादशपद्मसंयुतं ॥

प्रणवक्षस्थि तिष्टःअन्तु शक्तितिष्ठति नित्यशः।

द्वितीयं नाभिचक्रं तु षोडशनिर्वाणं तथा ॥

तन्मध्ये विष्णु देवं च लक्ष्मी शक्तिः सुमंडितं ।
कुण्डली तत्र तिष्ठंति सर्पाकारांग शापिनी ॥

तृतीये हृदयं चक्रं पंचाशत् कोणसंयुतं ।
तन्मध्यसंस्थितं ब्रह्मा सावित्री शक्ति शोभितं ॥

चतुर्थे कंठचक्रं च वर्गा देवी विभूषितं ।
तन्मध्ये भास्करं देवं स्वनक्षत्रो परिस्थितं ॥

पंचमे जिह्वाचक्रं च षट्दलपद्मसंयुतं ।
मध्ये तु शांभवी देवी महाविष्णुर्निरंजनं ॥

हंसनिर्वाण शिवं च उन्मनि स्थान एव च ।
एते षट्दल पद्मं च देवशांभवि संयुतं ॥

तदूर्ध्वं तालुचक्रं च अष्टदलं तु मंडितं ।
पृथिवी आपतेस्तेजो वायुराकाशमेव च ॥

४८ब्)

न ज्ञातविवयं मध्ये स्वर्णपंकजशोभितं ।
तन्मध्ये भावयेद् देवीं कोटीसूर्यसमप्रभां ॥

तस्य शब्दस्य अजयासोहं हंस इत्युच्यते ।
पूर्वभागे त्रिप्रवाहं हंसं गमं प्रणववीजगं ॥

इडा च वामभागे च रक्तरूपं जलोदरं ।
गंगा चैव इडादेवि यमुना पिङ्गला तथा ॥

कृष्णरूपी यमुना च मत्स्यकच्छप पूरितां ।
सुषुम्ना सूक्ष्मवर्ण च सरस्वतीं च भावयेत् ॥

पुण्यजलस्नानं नित्ययोगेश्वरेण भावयेत् ।
अष्टदलं तन्मध्ये च षट्दलमध्ये तुरीयका ॥

तन्मध्ये पद्मकोणे च षडाम्नायो परिस्थितिः ।
पूर्वपत्रे पूर्णदेवी उत्तरे दक्षिणकालिका ॥

पश्चिमे कुब्जिका देवी दक्षिणे च सरस्वती।
अध्वश्च वडवादेवी ऊर्ध्वं त्रिपुरसुन्दरी॥

स्ववाहनं स्वशक्तिश्च षडाम्नायेन पूरितम्।
ततः परं सहस्रं च पद्मं चैव सुशोभितम्॥

निराकारजवीजं च रन्ध्रे दशमद्वारके।
सहस्रदल पद्मं च अग्रे फणि विवेष्टितम्॥

अष्टपत्रं सहस्राक्षं ब्रह्मविष्णवीन्द्र सेवितम्।
मध्ये ज्योतिः पंकजं चांगुष्ठ प्रमाणपूरुषम्॥

तन्मध्ये ध्यायते देवि योनि लिंगविवर्जितम्।
ज्योतिरूपं महा उग्रं त्रिगुणं च विवर्जितम्॥

एतेद् ध्यानं तुरी ब्रह्म स्थूलध्यान प्रकाशितम्।
षट्पत्रं च षडाम्नायं यस्य देवस्य रूपकम्॥

पार्वत्युवाच ॥

शृणु शिवमहावाक्यं कथयामि य देवतम् ।
तस्य लक्षणं ब्रवीत् ममानुग्रहकारक ॥

शिव उवाच ॥

पर्वते ग्रहणे गुहायां एकान्ते देव सन्निधौ ।
तत्रवासं प्रकुर्वन्ति साधकः स्थिरमानसः ॥

भैरवं स्थापयेत् तत्र त्रिसन्ध्यं नियतः शुचिः ।
दृढबुद्धिर्जितेन्द्रियोमकारपञ्चकं प्रिये ॥

एकसन्ध्या भोजनं च बहुजल्पनता श्रुतम् ।
उच्चशब्दं ततः कृत्वा अल्पनिद्राद्युभोजनम् ॥

पद्मासनं साधयामि इष्टदेवं च भावयेत् ।
नासाग्रे चिन्तयेन्नित्यं शिखापर्यन्तभावना ॥

षण्मासाज्जायते सिद्धिः सत्यं सत्यं न संशयः।

ऋषिरुवाच ॥

किं सिद्धिर्यंत्रमंत्रं किं जापं जपति नित्यशः ॥

४९अ)

तुरीय उवाच ॥

कुमारीमंत्रं मया प्रोक्तं विदिध्यानेन संयुतम्।
विशेषं ब्रह्मयामले सिद्धि लक्षणं वक्ष्यामि ॥

तुरीया सिद्धिदानीया साधकः शिवतां व्रजेत्।
अन्ते ब्रह्ममयं यान्ति तदन्ते विष्णुदैवतम् ॥

महाप्रलयमासाद्य तुरीयोपासनाकरः।
मंत्रश्रवणमात्रेण योनिद्वारं न पश्यति ॥

तीर्थयाग व्रतं पुण्यं साधकस्य तु दर्शनात्।

अन्तध्यानं तुरीयं च विप्रं गच्छति निजालयम् ॥

इति ते कथितं देवि रहस्यं सारमुत्तमम् ।
गुह्याद्गुह्यतरं देवि तव प्रीत्या प्रकीर्तितम् ॥

गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।
शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ॥

खलाय भ्रष्टशिष्याय देवीपद्विमुखाय च ।
पुस्तकं योनरोदद्यान् मृत्युरेव न संशयः ॥

इति श्रीहाहारावतंत्रे अथर्वणसंहितायां गुह्यकालीप्रस्तारे अष्टमखण्डे तुरीयं पटलं सम्पूर्णम् ॥

४९ब्)

भैरव उवाच ॥

सृणु देवी प्रवक्ष्यामि कालिकायाः सुपूजितं ।
महाकर्मार्चणं वक्ष्ये दुर्लभं भुवनत्रये ॥

देव्युवाच

कालोदयं मयाज्ञातं अंशकानि विशेषतः।
अधुनाश्रोतुमिछामि वंच(ध)नं च यथा भवेत्॥

विपरीत न चारयोगे आत्मानं संक्रमते यथा।
चक्रस्थं तं बीजानीयाद् ध्यानधारणयोगतः॥

p. 38b)

श्रीभैरव उवाच

यत्नात् पूर्वं मयाख्यातं शक्त्योर्द्ध्वं अंशकत्रयं।
महानिलयं तस्योर्द्धे (तस्योर्द्धे तु महानीलं) त्रिपथं वरवर्णिनि॥

पच्य(ख)ते तत्र मध्ये तु विष्णुरुद्रप्रजापतिः।
उत्पन्नं तत्र मध्ये तु बीजभूतं वरानने॥

पृथिव्यायस्तथा तेजो वायुराकाश निष्कलं।
बीजमध्ये स्थिता ह्येते पृथग् भिन्ना क्रमेण तु॥

यदासौ निर्मले क्षेत्रे पतितं बीज रोहणं।

तदाभिद्यन्ति भूतानि स्वकीयगुणपञ्चकैः ॥

तत्रत्रिपथमध्ये तु सूक्ष्मभूताव्यवस्थिताः ।
ऊर्णातन्तु निभाकारा गतासानाभि मण्डले ॥

चतुरङ्गुलमानेन अष्टधा कुटिलं गताः ।

प्रसूता नाभि मध्ये तु शाखैः शाखमनेकधा ।
दशनाद्यावृ(धृ)तं चक्रं नाभिस्थाने प्रतिष्ठितम् ॥

इडा च पिंगला चैव सुषुम्ना च तृतीयका ।
उर्द्धभागे स्थिता ह्येता त्रिभिर्देवैर्व्यवस्थिता ॥

गान्धारि हस्ति जिह्वा च पूषा चैव वरानने ।
अधोमार्ग गता ह्येता वृहत् शाखा प्रलम्बिता ॥

यथा(जया) अलंवुषा चैव दक्षिणस्था भवन्ति हि ।
वाममार्ग प्रयोगेन संस्थिता कुहुशंखिनी ॥

नाभेरूर्द्ध गतानाडी एकात्रितयरूपिणी ।

सा प्रसूता वरारोहे ब्रह्मावर्तेनसंस्थिता ॥

नाडी संचारयोगेन संस्थितं पद्मया दृशम् ।
तमहंसंप्रवक्ष्यामि शृणुष्वेकाग्रमानसः ॥

पंचपंच पुनः पंच पंचपुनः पुनः पञ्च ।
पंचमालासमाख्याता संस्थिता पंचविंशकम्(तिः) ॥

p. 39a)

ग्रन्थिस्थानप्रयोगेन नाडीसंचारसंथिता ।
पूर्वमालादि उत्पन्नं द्वितीयस्य द्वितीयके ॥

विश्रान्ता तत्र मध्ये तु गतापूर्व तृ(द्वि)तीयके ।
पूर्वबिन्दु द्वितीयस्य प्रथमस्य द्वितीयकं ॥

ग्रन्थितं नाडियोगेन तृतीयस्य द्वितीयकम् ।
द्वितीयस्य द्वितीयेन तृतीयादि विभेदयेत् ॥

तृतीयस्य्य द्वितीयेन चतुर्थे आदियोजितम् ।
तृतीयादिं चतुर्थस्य द्वितीयं ग्रन्थितं कुरु ॥

चतुर्थस्य द्वितीयेन पंचमादिन्नियोजयेत्।
(पंचमस्य द्वितीयेन चतुर्थापि योजयेत्॥)

चतुर्थस्य द्वितीयेन पंचमस्य तृतीयकम्।
ग्रंथितं पूर्वयोगेन नाडीसंचारभेदितम्॥

चतुर्थस्य तृतीयं च पंचमस्य द्वितीयकम्।
पंचमस्य चतुर्थे च चतुर्थे पञ्च योजितम्॥

चतुर्थस्य चतुर्थेन पंचमं तु प्रयोजितम्।
पंचमान्त चतुर्थस्य चतुर्थस्थान योजितम्॥

(पञ्चमस्य चतुर्थेन चतुर्थान्तं नियोजयेत्।
वरानने पूर्वे चतुर्थ योगेन द्वितीयान्ते विभेदितम्।
द्वितीयस्य चतुर्थेन द्वय(पंच)मस्य तृतीयकम्।
भेदितं नात्रसंदेहो यथा पूर्वन्तथैव च॥
तृतीयेन द्वितीयस्य)?????

चतुर्थान्तं तृतीयस्य चतुर्थस्थान योजितम्।
चतुर्थस्य चतुःस्थानं तृतीयान्तेनसंयुतम्॥

तृतीयान्तं द्वितीयस्य चतुर्थस्थानसंस्थितम्।

तृतीयस्य चतुर्थेन द्वितीयान्तं नियोजयेत् ॥

पूर्वान्तेन चतुर्थं च द्वितीयस्य प्रथमस्य चतुर्थकं ।
ग्रंथितं पूर्ववद्देवि अत उर्द्धमतः शृणु ॥

प्रथमस्य द्वितीयेन द्वितीयस्य तृतीयकम् ।
एकत्र ग्रंथितं कुर्याद् ये चान्ये द्वे तथैव हि ॥

p. 39b)

नाडीचक्रमिदं शूक्ष्मं मष्ट(सप्त)पत्रं व्यवस्थितम् ।
शून्यरूपं स्थितं तत्र मध्यस्थं परमेश्वरम् ॥

तद्वाह्ये षोडशाकारं षोडशकलसंयुतम् ।
चन्द्रादित्यमयं सर्वं नाडीचक्रं व्यवस्थितम् ॥

एषा प्रकृतिराख्याता पंचविंशसमुद्भवा ।
अत्रमध्ये स्थितं देवं जीवाख्यं परमेश्वरम् ॥

सत्वंरजस्तमैश्चैव वेष्टितं त्रिविधेन तु ।
अष्टपत्रस्य मध्यस्थं दलेषु यादृशं शृणु ॥

इन्द्रो अग्निर्यमश्चैव नैर्-ऋत्यं वरुणानिलं।
कौबेरमीशपर्यन्तं दलेषुसंस्थितानि च॥

शब्दस्पर्शश्च रूपं च रसोगंधं च पंचमः।
मनोबुद्धिरहंकारो दलेधः संस्थितानि च॥

कामं क्रोधन्तथा लोभं मदं मात्सर्यमेव च।
मोहं दंभं च पैशून्यं एकैकस्य पृथक् पृथक्॥

यो सौ अचिंत्यमित्याहुः सर्वज्ञः परमेश्वरः।
मध्यस्थं तं विजानीयाद् रूपमव्यक्तसंस्थित॥

प्रेरकन्तस्य देवेशि मनोनामकमात्मनः।
येन येन हि भावेन मनः संयुज्यते नृणां॥

तस्य तन्मयतां याति विश्वरूपो मणिर्यथा।
चतुर्विंशति तत्त्वानि पत्रे पत्रे व्यवस्थिताः॥

प्रकृतिं च विजानीयात् पुरुषे बन्धनात्मिकां।
मुक्तिन्तेन विना देवि निष्कलं च तदा भवेत्॥

सकलं तत्र मध्यस्थं निष्कलं तेन वर्जितम् ।
अत्र मध्य गतं विद्यात् कालं कालोदयानि च ॥

प्रकृतिं योन जानाति चतुर्विंशात्मरूपिणीं ।
वृथापरिश्रमं तस्य मुक्तिस्थानं न गच्छति ॥

p. 40a)

अथातः संप्रवक्ष्यामि तिथिसंख्या यथा भवेत् ।
दिनमेकेन देवेशि ये दिनाः काय संभवाः ॥

प्राणा पानस्य चारेण दिनं रात्रिर्विधीयते ।
एकविंशसमाख्याताः सहस्राः षट्च्छताधिकाः ॥

सप्तविंशोत्तराज्ञेया संक्रान्तिषु शतानि च ।
विषुवाः षष्टि समाख्याता(विज्ञेया) अमावस्या च पूर्णिमा ॥

यो सौ त्रिकालरूपेन अष्टसंग्रहसंस्थितम् ।
विंशोत्तरशतं यावद् भ्रमते चन्द्रमण्डलम् ॥

यदाजानाति तत्त्वज्ञः सोमग्रहमुपागतम् ।

अमृताशनस्थितो योगी पूजयेत् तत्त्वनायकम् ॥

सर्वदेव मयंशंभुं सर्वविश्वेश्वरं प्रभुं ।
ज्योतिरूपं परंशातं अव्यक्तं निम्र्मलं च यत् ॥

जीवाख्यं परमं शुद्धं निर्मले मलनाशनं ।
तस्य पूजाप्रकर्त्तव्या प्लावितममृतेन तु ॥

येगता(पशुयो)तिर्यग्योनीषु * नरके चाति दारुणो ।
उद्धरेत् तत् कुलं सर्वं दशपूर्वं दशापरम् ॥

रस्मिज्वाला कुले दीप्तं भानुविवंसुनिर्मलं ।
ग्रंथि(ग्रसि)तं पंचवाराणि अहोरात्रेण दृश्यते ॥

पितृयानस्य पूर्वेण या कलादैविकी मृता ।
तां कलां तर्पयेद् देवि सूर्यग्रहसु पा गते ॥

देवया तस्य पूर्वेण पितृयानस्य चोत्तरे ।
सेतुबंधस्य मध्ये तु भूत्वा भूयो न जायते ॥

पूजितव्यं प्रयत्नेन हृदिस्थं परमेश्वरं ।
दिव्यधारामृतेनैव भानुग्रासं यदा भवेत् ॥

p. 40b) देवदानवसिद्धानां गन्धर्वो रगराक्षसां ।
तृप्यन्ति सर्वभूतानि विकला तर्पिता यदि ॥

यदा भवति संक्रान्तिर्विषु वा पिण्डमध्यतः ।
तुर्यस्थानसमारूढः पूजयेत् तत्त्वनायकम् ॥

गुरुपदेशयोगेन स्थानं परमुदुर्ल्लभं ।
त्वरितं तद्विजानीयाच्छीघ्रं सिद्धयति मानवः ॥

येनज्ञातं सुरेशानि तूर्यस्थानस्य तर्पणं ।
अश्वमेधस्य यागस्य क्षिप्रलभति तत्फलम् ॥

न योगात् सदृशं मन्त्रं न योगात् सदृशं तपः ॥

न योगात् सदृशं तीर्थं त्रिषुलोकेषु दृश्यते ।
ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥

तद्भावभावितात्मानं चिन्तयन्ति परापरं।
इन्द्राद्या देवताः सर्वे चन्द्रसूर्यादयोग्रहाः॥

महर्षयः सप्तपूर्वं मवादय अशेषतः।
अष्टाशीति सहस्राणि वा लखित्पादयोपि च॥

अनेनैव तु योगेन सिद्धास्ते वरवर्णिनी।
इतिखलुपुङ्गलाकारं नाडीसञ्चारमण्डले॥

मुख्यं कथितमिहसिद्धि हेतोर्बोद्धव्यं यत्नतः।
सिद्धिः एत देवि परंगुह्यं निर्वाणं परमं पदम्॥

शरीरस्थं परं दिव्यं न देयं यस्य कस्यचित्।

देव्युवाच

नैव जानाम्यहं नाथ उदयास्त मनं यथा।
विषुवं नैवजानामि ग्रहणं चन्द्रसूर्ययोः॥

राशिसंक्रमणं चैव सकलं निष्कलं कथं।

को वेत्ति अत्रमध्यस्थः सुखदुःखानि यानि च ॥

कस्य धर्म्मञ्च पापं च को गतः कोत्र तिष्ठति।
p. 41a) चन्द्रसूर्यादि भेदेन कथमात्माप्रतिष्ठितः ॥

ज्ञायते केन योगेन इन्द्रियं विषयानि च।
अनीता नागतं चैव वर्त्तमानार्थमेव च(बोधकम्) ॥

अनिमादि गुणोपेतं साधनं च कथं भवेत्।
निर्वाणं मोक्षमार्ग च विविधं कालवंचनम् ॥

अनेनैव शरीरेण यथाभवति तद्वद।

श्रीभैरव उवाच

यो सौ देवि मयाख्यातं चक्रं प्रकृति संभवं ॥

तत्रमध्यगतं देवं सर्वज्ञं परमेश्वरम्।
तद्ब्रह्म च महादेवं तद्विष्णुं परमं पदं ॥

तच्चन्द्रसूर्यमित्याहुरिन्दु वरुणमेव च।
तं कालं भवमित्युक्तं तं वायुं तं खगेश्वरम्॥

सर्वदेवमया सो हि तत् शून्यं भरितं स्थितम्।
चैतन्यं सर्वगं नित्यं सर्वप्राणि हृदि स्थितम्॥

विषयस्थमतीतं च वायुसंयोगसंस्थितम्।
भ्रमते चक्रमध्यस्थं मनः पवनसंयुतम्॥

दक्षिणचारुयोगेन पिंगलं भानुमारुतम्।
प्राणापाणप्रयोगेन नीयते च शनैः शनैः।

यस्य पत्रस्थ मध्यस्थं तिष्टते परमात्मनः।
तस्यतन्मयतां भावं धारयेन्नात्रसंशयः॥

अन्य पत्रस्य मध्यस्थं यदासंक्रमते तु सः।
संक्रान्तिं तद्विजानीयात् तैः षड्भिश्चोत्तरायणं॥

विषुवं द्वादशं चैव या राशिं संक्रमेषु च।
अब्दैर्द्वादभिश्चैव ग्रहणो भास्करस्य च॥

षण्मासदिनयोगेन चन्द्रस्य ग्रहणं भवेत्।
p. 41b) समाधिस्थो महायोगी रविचन्द्रस्य मध्यगः(त) ॥

प्रत्यक्षं दृश्यते ग्रा(श्वा)संस्थानभेदेन या दृशां।
चन्द्रमण्डलमध्यस्थं आत्मानं कुरुते यदा ॥

ग्रहणं तस्य जानामि सोमस्थं पश्यते ध्रुवं।
चन्द्रसूर्यस्य चक्राणि सृष्टिसंहारकारकाः ॥

पारंपर्यक्रमेणैव गुरुवक्त्रात्तु लभ्यते।
यस्य चक्रस्य मध्यस्थं आत्मानं क्रमते लयं ॥

चन्द्रसूर्यप्रयोगेन ज्ञायते नात्रसंशयः।
धर्माधर्मं च मोक्षं च ज्ञानं वैराग्यमेव च ॥

कामं क्रोधं च लोभं च यत्र(चक्र)स्थं कुरुते ध्रुवम्।
मरुतस्थं विजानाति संयोगे वामदक्षिणे ॥

प्राणापानस्य मध्यस्थं नासिकाग्रे व्यवस्थितम्।

ऊर्द्धं ह्यग्नि दधश्चापतिर्यगश्च प्रभञ्जनः॥

मध्ये तु पृथिवीं विंद्यान्नभश्चैव तु सर्वगः।
भूतान्ते विषुवं चारं सुषुम्नाभिन्नमस्तकं॥

यदा भवति मध्यस्थ मात्मानं वरवर्णिनि।
वहतिनात्रसंहेहो योगं विषुवमूत्तमम्॥

कोलचिह्नानि सर्वाणि उक्तानि यन्मया पुरा।
वंचनं तेषु देवेशि यथा भवति तच्छृणु॥

चन्द्रादित्य मयं सर्वं त्रैलोक्यं स चराचरम्।
मार्गं च तद्विजानीयाद मार्गन्तेषु वर्जितम्॥

संचारं कथयिष्यामि प्रकृतिस्तस्य चात्मनः।
वृषभं तत्र मध्ये तु मैथुनस्थं च वायसं॥

रुद्रमानं सदातिष्ठेत् महाशब्दमनाहतम्।
सत्वंरजस्तमश्चैव तस्य वंधत्रयं भवेत्॥

p. 42a)

सोमसूर्याग्नि चारेण त्रिपादास्तत्रसंस्थिताः।
अधस्तात् तु विजानीयाद् ब्रह्मादि अंशकेषु च ॥

पृथिव्यापस्तथा तेजश्चतुर्थं वायुसंस्थितम्।
ऊर्द्धभागे स्थिता ह्यते(क्षेत्रे) शृंगाश्चत्वारि यानि च ॥

सार्द्धं त्रीणि स्थिता वामे पुनरेत्तानि दक्षिणे।
नाडीसञ्चारभेदेन अस्थिरूपा व्यवस्थिताः ॥

एतानि सप्तहस्तानि द्वौशीर्षौ चन्द्रसूर्ययोः।
यो सौ मध्यगतो देवि रचते च अनाहतम् ॥

मैथुनेन विना तस्य नशब्दो नैव जीवितम्।
तस्मात् सर्वप्रयत्नेन मैथुनस्थं सदाकुरु ॥

मैथुने मोक्षमाप्नोति मैथुनमायुवर्द्धनम्।
सर्वसिद्धिकरं देविमैथुनं परिपठ्यते ॥

तस्य देवाधि देवस्य प्रकृतिस्थस्य सुन्दरि।
मोचनं संप्रवक्ष्यामि आत्मनो वंचनस्य च ॥

उत्पत्तिस्तत्रमध्ये तु कालं कालोदयेषु च ।
एते त्रीणि समाख्याता वृषपादांशकेषु च ॥

तत्रस्थं कारणं योज्यं नीयते च शनैः शनैः ।
संकोच्य सप्तहस्तानि नाडीस्थं यत्समीरणं ॥

द्वे शीर्षे चतुःशृङ्गानि त्रिबन्धं प्रकृतिता सह ।
गुरुवक्र शते नैव करणे वरवर्णिनि ॥

सव्यस्थं क्रमयोगेन चतुर्विंशात्मकं कुरु ।
संकोचमिति विख्यातं पिण्डस्थं च तदा भवेत् ॥

हृदि ह्याकाशमध्यस्थं दीपाकारं व्यवस्थितम् ।
दह्यते हृदिमध्यस्थं इन्द्रिया विषयानि च ॥

p. 42b)

सावित्री यस्य कायस्थाः कालानलसमप्रभा ।
यक्षदीप्ति गतो वह्निः शुष्कमार्द्रं च निर्दहेत् ॥

तथा दहति कर्माणि योगिशो अत्र संस्थितः ।

यदा सौ शिखिरूपेण सर्वं संकोच्यतिष्ठति ॥

तदामुक्तं समाख्यातं सर्वमार्गेषु गच्छति ।
पितृयानस्य पूर्वेण देवयानस्य चोत्तरे ॥

सेतुबन्धपूर्वे तु नीयते च शनैः शनैः ।
या सा वायु(म) कलासूष्मात्रिभिर्देहैर्व्यवस्थिता ॥

एकासंवरणीनाम द्वितीया च विसर्जनी ।
कला चैव तृतीया च अन्तेष्टिर्नामविश्रुता ॥

विसर्जनीं समाश्रित्य अभ्यासेन मुहुर्मुहुः ।
नीयते बंधयोगेन सा च संवरणी कला ॥

अन्तेष्टि पद(क्ष)मध्यस्थं विलोमेन प्रवेशयेत् ।
ब्रह्मस्थानं परित्यज्य विष्णुरुद्रेश्वरं पदम् ॥

शंखिणी द्वारभेदं च कुंचिको दद्याटयेद्विलम् ।
या सा नाडी परासूक्ष्मा सुषुम्ना नामविश्रुता ॥

विभिद्य मूर्द्धिर्नमार्गन्तु प्रतिष्ठा तत्र मध्यतः।
मार्गेन तेन गन्तव्यं स्थानं चैव निरामयं॥

प्रथमं च द्वितीयं च सुशिरमस्थिमध्यगम्।
तृतीयं च समाश्रित्य लयं कृत्वा सुयत्नतः॥

वंचनं च समाख्यातं कालस्य वरवर्णिनि।
न तत्र भिद्यते जन्म न कालक्षयमेव च॥

धर्माधर्मौ परित्यज्य लीयते परमे पदे।
तत्रस्थाने यदालीनं प्राणापानः क्षयं गतः॥

आगतं च गतं चैव नोस्वासं स्वासमेव च।
p. 43a) न शृणोति च शब्दानि मुक्ता चैव मनाहतम्॥

रूपं चैव नज्जानाति वर्णानि यादृशानि च।
नवसंसा ते जिह्वा शीतोष्णं स्पर्शमेव च॥

घ्राणश्चैव न गृह्णाति गन्धं दुर्गन्धमेव च।
बुद्धि दृश्यमिदं सर्वं त्रैलोक्यम् स चराचरम्॥

य स? चाह्य?मनेबुद्धिस्तदा द्वैतं न विद्यते।
एकीभूतं यदात्मानं सर्वेन्द्रिय विवर्जितम्॥

चैतन्यं चेतनं चेता न कालक्षयमेव च।
एतद्देवि परंब्रह्म निर्वाणं परमाक्षरम्॥

ज्ञायते गुरुवक्रस्थं मुक्तिस्थानं सुनिर्मलम्।
अन्यत्पुरप्रवेशं च कुरुते साधकेश्वरः॥

या सा देविमयाख्याता कलानामविव(स)र्ज्जनी।
हस्तमात्रप्रमाणेन पुष्पं करतले स्थितम्॥

अन्ते वंधं प्रकुर्वीत कलासंवरणी तु या।
नीतं पुष्पस्य मध्यस्थं मारुतं च शनैः शनैः॥

तं पुष्पं चलितं दृष्ट्वा द्विगुणं च समभ्यसेत्।
द्विहस्तमात्रयोगेन पुष्पसंक्रमणं यदा॥

सिधयते नात्रसंदेहः पंचहस्तप्रमाणतः।

पुष्पं च चलितं दृष्ट्वा वज्रक्षीरं विभेदयेत् ॥

विभेदिते वज्रवृक्षे परकायलयं कुरु ।
परस्य हृदिमध्ये तु पंकजस्थं यदा भवेत् ॥

तदा भिद्यन्ति भूतानि स्वकीय गुणपंचकैः ।
रूपे रूपं विजानाति श्रवणे शब्दं शृणोति च ॥

नासिकाग्रस्थितो वायुः प्राणं गृह्णाति या दृशाम् ।
सर्वं जानाति चैतन्यः शीतोष्णं स्पर्शमेव च ॥

p. 43b)

स्थाने स्थाने विसर्पन्ति इन्द्रिया विषयानि च ।
पूर्वोक्ता यादृशी विद्या तत्सर्वं वदते ध्रूवम् ॥

परकायप्रवेशश्च उक्तं देवि सुदुर्ल्लभं ।
द्विपदे चतुष्पदे चैव अपदे पदसंकले ॥

संक्रमेन्नात्रसंदेहो अस्य योगप्रभावतः ।
अथ उत्क्रान्तिमिच्छन्ति वैराग्यो पहता नराः ॥

तसहं संप्रवक्ष्यामि सद्य उत्क्रमणं यथा।
पूर्वं संकोचयोगेन लयं याति परे पदे॥

उत्क्रमेन्नात्रसंदेहः पुनर्जन्म न विद्यते।
सर्वं देविमयाख्यातं यत्सुरैरपि दुर्ल्लभं॥

आत्मसंविन्निभेदेन किमन्यत् परिपृच्छसि।

इति पारमेश्वरीमते गुह्ये आत्मसंवित्तिभेदश्चतुस्त्रिंशतिमः पटलः॥

देव्युवाच

अत्रैव मेरुमध्ये तु या स्थिता कुलनायिका।
त्रिपुरामन्त्रविख्याता वक्रांशाबान(गादिषु)संयुता॥

सप्तविंशति योगिन्यः पंचमुद्रा तथैव च।
वक्तुमर्हसि देवेश सामर्थं पूजने विधिं॥

चतुष्के च महातन्त्रे उत्तरे षट्ककेषु च।
रुद्रयामलमध्ये च पूर्वोक्तं तन्मया श्रुतम्॥

ज्ञानं भूतागारं च द्विरद तत्त्वमैश्वर्यं मीने कृष्णम् ॥

न ए ञ पूर्वन्तु जयतु दिशि चित्राणि गात्रपीठानि ।
सर्वेषु मन्त्रविद्यासु न्यासोऽयं कामदायकः ॥

मातृकां विन्यसेद्देहाभान्तरे विधिनामुना ।
अन्तर्यागं तथा योगं वायुं कुर्याद्विचक्षणः ॥

भूतशुद्धिं पुराकुर्यात् विधिनानेन दोहकः ।
यादिवान्तैर्विधानेन पूरककुम्भकरेचकैः ॥

इडया पुरयेद्वायुं श्वासनाड्याः शनैः शनैः ।
मात्रया षोडशेनैव ततः कुर्याच्च कुम्भकम् ॥

यंमन्त्रेण चतुःषष्ट्या यथा कुम्भं ततः परम् ।
सुषुम्नायां कुम्भयित्वा पिङ्गलायान्तु रेचयेत् ॥

चतुर्धाचन्द्र सह जप्त्वा रंवीजेनैव प्लावनी ।
श्वाससंहरणा नाड्या त्यजेद्वायुं शनैः शनैः ॥

पुरा कुक्षिगतः पापं चिन्तनीयो मनीषिभिः।
(p. 10) ब्रह्महत्या शिरङ्कञ्च स्वर्णस्तेय भुजद्वयम्॥

सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम्।
तत् संसर्गात् पदद्वन्य्द्व मङ्गप्रत्यङ्गपातकम्॥

उपपातकरोमाणं रक्तश्मश्रुविलोचनम्।
खड्गचर्मधरं वामाङ्गुष्ठपरिमाणकम्॥

अधोमुखः कृष्णवर्णं वामकुक्षौ विचिन्तयेत्।
एषु ये ऋषयः प्रोक्तास्तान् प्रवक्ष्याम्यनुक्रमात्॥

पुरकादिषु देवेशि ऋषयः सर्वसम्मताः।
किस्कन्दः कश्यपश्चैव हिरण्यगर्भस्ततः परम्॥

अस्य पापस्य देहस्य अन्तर्यामी ऋषिः स्मृतः।
एवं द्यात्वा वह्निनाडी दाहयेत् सकलां तनुम्॥

प्राणायामं ततः कुर्यात् भूतशुद्धिरनन्तरम्।
भूतानां शोधनं कृत्वा भावना तु तथा दिशेत्॥

आपादमुर्द्धिर्न पर्यान्तं भावयेद्देहमात्मनः।
पञ्चाशद्वर्णबीजाढयं महाभूतादिसंयुतम्॥

गन्धं रसं तथा स्पर्शं रूपं शब्दं ततः परम्।
भावयेदात्मनो देहं सहस्रं कमलं यतः॥

सहस्रारे महापद्मे ध्यायेद्देवीं सनातनीम्।
सदाशिवेन संयुक्तां विपरीतरतस्थिताम्॥

भूतानि च महापूर्वसंलीनानि विधानतः।
स्थापयेत् तत् पदाम्भोजे तदा वर्णादि चिन्तयेत्॥

क्षकारादि अकारान्तं प्रतिलोमेन देशिकः।
संहारचक्रं समुद्दिष्टं सर्वतन्त्र समन्वितम्॥

षट्चक्रं चिन्तयेद्देहे विधिनानेन देशिकः।
मूलाधारं स्वाधिष्ठानं मणिपूरमनाहतम्॥

आज्ञा विशुद्धं शुद्धाख्यं क्रमेणैव स्वदेहके।

सहस्रारं महापद्मं विशुद्धाख्यं प्रकीर्तितम् ॥

मूलाधारं तथोपस्तं नाभिदेशं ततः परम् ।
हृदयं कण्ठदेशञ्च भ्रूयुग्मं तदनन्तरम् ॥

सहस्रारान्तकं प्रोक्तं सप्तचक्रं सदेहके ।
डाकिनी हाकिनी चैव राकिनी लाकीनि तथा ॥

काकिनी शाकिनी चैव षट्चक्रस्य च देवताः ।
हाकिनी देवता प्रोक्ता सहस्रारे सुरेश्वरी ॥

पत्रवर्णात्मकं तत्र क्रमेण चिन्तयेद्धिया ।
चतुःपत्रं मूलाधारं वादिसान्तं महेश्वरी ॥

वादिलान्तञ्च षट्चक्रं स्वाधिष्ठानं विचिन्तयेत् ।
मूलाधारं गुदे चैव स्वाधिष्ठानञ्च लिङ्गके ॥

दशपत्रं डादिफान्तं नाभिदेशं विचिन्तयेत् ।
मणिपूरं महाचक्रं शब्दब्रह्मविभूषितम् ॥

विशुद्धं द्विदलं प्रोक्तं हक्षवर्णविभूषितम्।
सर्ववर्णात्मकं पत्रं पद्मना परिकीर्तितम्॥

दक्षिणावर्तयोगेन लिखनं चिन्तयेद्धिया।
अनुलोमः सृष्टिकाले संहारे प्रतिलोमकः॥

एवं विचिन्त्य स्वदेहं जीवात्मानं विचिन्तयेत्।
मूलाधारे स्थितं जीवं कुण्डलीरूपसंस्थितम्॥

बिद्युदग्निसमुद्भूतं तडित्कोटिसमप्रभम्।
हूङ्कारेण समुच्चार्य मूलाधारात् तदा पुनः॥

निर्वात् इव दीप्तोऽपि यथा देहसमन्वितः।
सोऽहं मन्त्रमयं देहं जीवात्मानं विचिन्तयेत्॥

(p. 10b) ध्यानेन ध्यानयोगेन चिन्तयेच्च शनैः शनैः।
एवं विचिन्त्य स्वदेहं प्राणायामं ततः परम्॥

देवता च तथा जीवं समभारं विचिन्त्य च।
अकारादिक्षकारान्तं पुरकं कुम्भ(क) रेचकम्॥

वारत्रयं ततः कुर्यात् विधिनानेन देहिकः।
अकारादि क्षकारान्तं पुरयेदिडया शनैः॥

एवं विचिन्त्य स्वदेहं प्राणायामः ततः परम्।
कादिमास्तैः कुम्भयेच्च सुषुम्नायां विधानतः॥

पिङ्गलायां रेचयेच्च यादिफान्तैः शनैः।
प्राणायाममिदं प्रोक्तं सर्वतन्त्रसमन्वितम्॥

त्रिः पठेदायतः प्राणः प्राणायामः प्रकीर्तितः।
कुम्भयित्वा समातृका मातृका चानुलोमतः॥

पञ्चभूतं महाभूतं स्वजीवञ्च विचिन्तयेत्।
स्वजीवं गुणसंयुक्तं विन्यस्य प्राणमुच्चरेत्॥

संपुट्य स्वरवर्णेन सर्वगेण हृदादिषु।
प्राणप्रतिष्ठां कूर्ध्वीत हृदये तनुसंयुतम्॥

दक्षस्य तनुसंयुक्तं कथितं मन्त्रवेदिना।

आननं बिन्दुसंयुक्तं अर्द्धचन्द्रविभूषितम् ॥

लज्जाबीजमिदं प्रोक्तमक्षोभ्येन सुरेश्वरि ।
ब्रह्मा बिन्दुसमायुक्तं वह्निबीजसमन्वितम् ॥

एषोदशस्वरेणाद्यं अङ्कुशं परिकीर्तितम् ।
प्राणप्रतिष्ठामन्त्रस्य देवता ब्राह्मणादयः ॥

ब्रह्मा विष्णुश्च रुद्रश्च ऋषयः परिकीर्तिताः ।
ऋग्यजुश्चैव सामानि च्छन्दांसि च तदा भवेत् ॥

याद्याः सप्तसकारान्ता अत्रिमेत्रसमन्विताः ।
शिरोऽर्द्धदन्तसंयुक्तं हंसमन्त्रसमन्वितम् ॥

कुण्डलीं तां समानीय तेन मार्गेण साधकः ।
मूलाधारे स्थापयित्वा हंसमन्त्रं जपेद्बुधः ॥

पञ्चाशद्वर्णबीजानि बिन्दुयुक्तानि चिन्तयेत् ।
मम प्राणा इह प्राणा मम जीव इह स्थितः ॥

सर्वेन्द्रियाणि धातुनि सत्वानि परिचिन्तयेत्।
भूतानि चैव तत्वानि विचिन्त्य विधिनामुना॥

इहागत्य सुखं चिरं तिष्ठस्तु वह्निसुन्दरी।
एष प्राणमनुः प्रोक्तः सर्वतन्त्रसमन्वितः॥

नृसिंहस्य च बीजेन प्राणप्रवेशनं स्मृतम्।
तदा प्राणस्य ध्यानञ्च संम्मरेत् प्रयतः शुचिः॥

वाह्यदेवतायाः प्राणमन्त्रं दिशेच्च सुन्दरी॥॥

इति श्रीविश्वसारतन्त्रे देहोत्पत्तिर्नाम प्रथमः पटलः॥ १॥

द्वितीयः पटलः।

अथ योगं प्रवक्ष्यामि शृणुष्व कमलानने।
ब्रह्मणा भाषितं पूर्वे नारदाय कृते युगे॥

तत् शृणुष्व महेशानि मन्त्रमूर्तिविशुद्धये।
पञ्चभूतस्य विज्ञानं प्रधानं योगमुत्तमम्॥

तेषां गतिं विचिन्त्याथ इष्टदेवीं विचिन्तयेत्।
भूतानाञ्च गतिं वक्ष्ये स्वदेहे शृणु पार्वति॥

(p. 11) तदा तत् कालकालदासा गतिः शुभदायिनी।
योगशास्त्रं महेशानि साङ्गं मोक्षप्रदायकम्॥

जीवात्मपरमात्मनोरैक्यं सञ्चिन्तयेद्धिया।
समाधिः परमं योगं सर्वतन्त्रसमन्वितम्॥

विशुद्धं निर्मलं नित्यं सदसद्भाववर्जितम्।
मनसा वचसा चैव कायिकेन विचिन्तयेत्॥

तदेव परमं योगं शिवेन भावितं पुरा।
शुद्धं शुद्धगुणं देवं चिन्तयेत् तमहर्निशिम्॥

सदाशिवं शक्तियुक्तं सहस्रदलसस्थितम्।
मनसा भावशुद्धेन समाधौ चिन्तयेत् सदा॥

मन्त्रवर्णात्मकं देवं मन्त्रवर्णात्मिकां शिवाम्।

मनसाभ्यासयोगेन चिन्तयेत् साधकः सदा ॥

निश्चेष्टो निरहङ्कारो निर्द्वन्द्वा निस्परिग्रहः।
गो-काक-मृग-चर्चायां यदाचरति देशिकः ॥

भावयेद्विधिनानेन सर्वकालेषु सर्वदा।
सर्वतत्वेषु तं देवं तां देवीं सुरपूजिताम् ॥

नित्यां विशुद्धां शुद्धाद्यां सदसद्भाववर्जिताम्।
सर्वकालक्षयकरीं सर्वमन्त्रेषु संस्थिताम् ॥

अस्त्रविद्यात्मिकां नित्यां नानास्वर निवासिनीम्।
न जरा मरणं तत्र चिन्तयेद्दक्षजात्मिकाम् ॥

ज्योतिर्ब्रह्मात्मिकां देवीं चिन्तयेद्ध्यानयोगतः।
जित्वा दारात्मनः शत्रुन् कामक्रोधादिकं प्रिये ॥

कामं क्रोधं तथा मोहं लोभहिंसादयस्तथा।
इन्द्रादयश्च तान् सर्वान् ध्यानेन विधिना मुना ॥

ध्यायेन्मानसपद्मस्थां शक्तिं शिवसमन्विताम्।
नानालङ्कारसंयुक्तां नानागुणसमन्विताम्॥

षडुर्मयन्तदा जिह्वा चिन्तयेज्जगदम्बिकाम्।
कामादयन्तु देवेशि दुःखानि कथितानि ते॥

योगाष्टाङ्गैरिमां जित्वा योगिनो युगमाप्नुयात्।
अपश्यदात्मनो देहे सहस्रारे शिवं स्मरेत्॥

तदेवं पुरुषं पूर्णं मायाञ्च तदपाश्रयाम्।
एवं चिन्तयित्वाथ समाधिं योगमभ्यसेत्॥

दाहशक्तिं यथाङ्गारे आश्रयं वाप्य तिष्ठति।
यमाद्यागमसस्पग्ने स एव श्रीसदाशिवं॥

तस्य चाङ्गविभागेन शास्त्रमेतत् प्रकीर्त्यते।
यमं नियममासनं प्राणायामस्तत परम्॥

प्रत्याहारं धारणञ्च ध्यानञ्चैव समाधिकम्।
अष्टाङ्गयोगमित्युक्तं सर्वतन्त्रसमन्वितम्॥

अहिंसा सत्यमन्तयं ब्रह्मचर्यकृपार्जवम्।

क्षमा धृतिर्मिताहारः शौचञ्च दमनं तथा॥

एते यमा महेशानि सर्वतन्त्रसमन्विताः।

तपः सन्तोषमास्तिक्यं दानं देवस्य पूजनम्॥

सिद्धान्तश्रवणं नित्यं ह्रीर्मतिश्च जपो हृदम्।

दशैते नियमाः प्रोक्ताः सरतन्त्रसमन्विताः॥

पद्मासनं स्वस्तिकाख्यं तथा।

बीरासनमिदं प्रोक्तं पञ्चकं क्रमतः सुधीः॥

उर्वो भद्रवज्रासनं रुपरि विन्यस्य सम्यक् पादयुगं प्रिये।

अङ्गुष्ठौ च निबद्धयात् व्युत्प्रमेणैव पृष्ठके॥

पद्मासनमिदं प्रोक्तं सर्वतन्त्रसमन्वितम्।

(p. 11b) जानुनोरन्तरे सम्यक् कृत्वा पादतले पुनः॥

ऋजुकायो विशेद्योगी स्वस्तिकासनमीरितम्।

सीमान्याः पार्श्वयोर्न्यसेद् गुल्फयुग्मं सुनिश्चितम् ॥

वृषाधः पार्श्वपादौ तु पाणिभ्यां परिलाञ्छयेत् ।
भद्रासनमिदं प्रोक्तं योगिनां हृदयङ्गमम् ॥

उर्वाः पादौ क्रमान्नस्य जान्वोः प्रत्यङ्मूखेऽङ्गुली ।
करौ निदध्याद्देवेशि वज्रासनमुदाहृतम् ॥

एकपादमधः कृत्वा विन्यस्योरौतथेतरम् ।
ऋजुकायो विशेद्योगी वीरासनमुदाहृतम् ॥

आसनानि वहुन्येव सन्ति वेदेषु पार्व्ति ।
सर्वेषां श्रेष्ठमित्युक्तं स्वस्तिकाख्यं सुखावहम् ॥

इडया पुरयेड्वायुं यं जप्त्वा षोडशमात्रया ।
धारयेच्च सुषुम्नायां चतुःषष्ट्या तु तं स्मृतम् ॥

पिङ्गलायां त्यजेद्वायुं द्वात्रिंशत्तेन मात्रया ।
भूतशुद्धयात्मकं प्राहूः सर्वतन्त्रविदो जनाः ॥

रंमन्त्रंअ प्रितलोमेन पूरककुम्भकरेचकम्।
तेनैव विधिना कृत्वा ठंमन्त्रं प्रज्पेत् ततः॥

तेनैव विधिना जम्वा पापे भष्मनि संत्यजेत्।
लंमन्त्रे चिन्तयेद्देहं पञ्चाशद्वर्णसंयुतम्॥

धराबीजेन तं देहं दृढीकृत्य स्वयं ततः।
मात्रावृद्धिक्रमेणैव जपेद् द्वादश षोडश॥

जपेन्न्यासादिकं कृत्वा सर्वसिद्धिं लभेन्नरः।
क्रमादभ्यसतस्तस्य न्वोदगमा * * * धमः॥

मध्यमं कल्पसंयुक्तो भूमित्यागं ततः परम्।
उत्तमस्य गुणावाप्तिर्यावत् शीलनमीष्यते॥

इन्द्रियाणां विचरतं विषयेषु द्विधा कृताम्।
वलादाहरणं तेभ्यः प्रत्याहारः समहृतः॥

अङ्गुष्ठगुलफजानुरुर्मनसि लिङ्गनाभिषु।
हृच्छिरः कण्ठदेशेषु लम्बिकायास्तथ नसि॥

भ्रूमध्ये मस्तके मूर्ध्नि द्वादशान्ते तथा विधिः।
धारणं प्राणमरुतो धारणा परिकीर्तिता॥

समाहितेन मनसा चैतस्यान्तरवर्तिना।
आत्मन्यभीष्ठदेवानां ध्यानं ध्यानविदो विदुः॥

समत्वभावनानित्यं जीवात्मपरमत्मानोः।
समाधिः कथितो देवि सर्वतन्त्रसमन्वितः॥

ध * * * वत्यङ्गुलायां शरीरमुभयात्मकम्।
गुदधवान्ते तु * स्कन्धमुत्सेधं द्वाङ्गुलं विदुः॥

तस्य द्विगुणविस्तारं वृत्ताकारेण संस्थिताम्।
नाड्यन्तत्र समुद्भूता मुख्यान्तिस्त्रः समीरिताः॥

इडा वामे स्थिता नाडी चित्र सा योगिनां शुभा।
ब्रह्मरन्ध्रं विदुस्तस्यां पद्मसुत्रनिभं प्रिये॥

आधारञ्च विदुस्तत्र सर्वतन्त्रसमन्वितम्।

दिव्यमग्र्मिदं प्राहरमृतानन्दलक्षणम् ॥

इडायां चिन्तयेच्चन्द्रं पिङ्गलायां दिवाकरम् ।
सुषुम्नायान्तु देवेशि तावुभौ चिन्तयेत् तनौ ॥

अग्निसोमात्मिका नाडी सुषुम्ना तन्त्रसम्मता ।
आधारपद्ममध्यह्लं? त्रिकोणमतिसुन्दरम् ॥

ज्योतिषां निलयं तच्च कथितं पद्मयोनिना ।
तत्र विद्युल्लताकारा कुण्डली परदेवता ॥

परिष्कृरति देहेऽस्मिन् सुप्ताहिसदृशाकृतिः ।
(p. 12) विभर्ति कुण्डली देहमात्मानं हंसमन्त्रतः ॥

हङ्कारवर्णसम्भूता कुण्डली कुलनायिका ।
गमनागमने मन्त्रं हङ्कारं लङ्करेण च ॥

कथितं बीजमन्त्रस्य कुण्डस्यास्तत्र सम्मतम् ।
हंसप्राणाश्रयो नित्यं प्राणनाडी पथाश्रयं ॥

आधाराद्वहते वायुर्यथावत् सर्वदेहिनाम् ।
देहं प्राप्य सुनाडीभिः प्रयाणं कुरुते वहिः ॥

द्वादशङ्गुलमात्रेण प्राणस्य पुरुषस्ततः ।
वायुरूपेण जीवोऽसौ सर्वज्ञो व्यापकः स्मृतः ॥

मुलाधारात् सहस्रारं व्याप्य तिष्ठति कुण्डली ।
सुषुम्ना मध्यदेहे च सुक्ष्मात् सुक्ष्मस्वरूपिणी ॥

वायुस्वरूपा सहिता वायुमास्थाय तिष्ठति ।
आयाति याति सततं कुण्डली परदेवता ॥

रम्ये मृद्वासने पुण्ये पटाजिनकुशोत्तरे ।
स्वस्तिकासनमास्थाय योगमार्गपरो भवेत् ॥

ज्ञात्वा भूतोदयं देहे यथावत् प्राणवायुना ।
शक्तिरूपां ध्यायेद्वामे पार्श्वे नाभौ सदा प्रिये ॥

पिङ्गलाया महेशानि शम्भुरूपं दिवाकरम् ।
चन्द्ररूपां वामनाड्यां शिवानीं चिन्तयेद्धिया ॥

भूतात्मके तु देहेऽस्मिन् सर्वभूतोदयं शृणु ।
चिन्तयेद्वायुनानेन सर्वसिद्धाप्तये सुधीः ॥

किं राज्यैरसदालापैर्षत्रायुर्वायतामियात् ।
श्वाससंहरणान्नाड्या गतिं तेषां विचिन्तयेत् ॥

ध्यात्वात्मकमिदं देहं पोषयेच्छम्बुगेहिनी ।
दण्डाकारगतिर्भूमेस्तोस्वस्य पु* कामता ॥

ऊर्द्धगतिः पावकस्य वायोतिर्यक् गतिः स्मृता ।
गतिर्व्योम्नोर्भवेन्मध्या सर्वतन्त्रसमन्विता ॥

ध्यात्वात्मकमिदं देहं पोषयेद्वायुरूपिणी ।
त्वचि स्थिता महामावा असृक् स्थिता शिवा शुभा ॥

तथा मांस स्थितां देवी तथा मेदं स्थिता सती ।
अस्थि स्थिता शिवपत्नी सा मज्जारां शम्भुसुन्दरी ॥

शुक्रस्था वायुरूपा च तथा प्राणात्मिका स्मृता ।

जीवप्रापात्मिका नित्या सर्वक्षेत्रेषु संस्थिता ॥

मारणादिं प्रकूर्वीत भूतानामुदये सुधीः ।
विचिन्त्य चात्मानो देहे गतिस्तस्य प्रिये सदा ॥

वरणेरुदये कुर्यात् स्तम्भनं सर्वसम्मतम् ।
शान्तिकं पौष्टिकं तोयस्य समये प्रिये ॥

मारणं कुरुते शत्रोरग्नेरुदययोगतः ।
वायोस्तु उदये कुर्यात् स्तम्भनं सर्वसम्मतम् ॥

अथ उच्चाटनं कुर्यात् सर्वतन्त्रसमन्वितम् ।
क्षेत्रादिनाशनं कुर्यात् आकाशस्योदये सुधीः ॥

आसुर्योदयमारभ्य यावद्वै घटिकाद्वयम् ।
एवं क्रमेण विज्ञाय षट्कर्मषु विचिन्तयेत् ॥

आधाय वायुनक्षत्रं योगमेवं विचिन्तयेत् ।
मारुतं चिन्तयेद्देहे ध्यानयोगेन देहिकः ॥

ध्यात्वा वायुं स्वदेहे तु चिन्तयेत् परदेवताम् ।
नादः संजायते क्षेत्रे वायुना परमेश्वरि ॥

मत्तभृङ्गसमश्चादौ तथा वंशीधवनिं श्रुतः ।
तदा घण्टास्वनो जातस्तदा मेघस्वनन्ततः ।

(p. 12b) एवमभ्यसतस्तस्य नास्ति शोकादिदोषजम् ।
भयं तस्य भवेत् सिद्धिः सर्वसिद्धिरनुत्तमा ॥

नादो भवेत् ततो बिन्दुश्चन्द्रसुर्यात्मकः स्मृतः ।
बिन्दुं नादात्मकं केचिद्वदन्ति मुनिमत्तमाः ॥

बिन्दुनादात्मकं सर्वं चराचरमिदं जगत् ।
बिन्दुः पुमान् भवेन्नादः स्त्रीरूपः सर्वसम्मतः ॥

जगतां कारणं नादः कथितः पद्मयोनिना ।
बिना मैथुनधर्मेण न सिद्धिः स्यात् कथञ्चन ॥

हंसौ तत्र समुद्भूतौ पुंस्त्रियौ तन्त्रसम्मतौ ।
हंमन्त्रे पुरुषः प्रोक्तः सकारः प्रकृतिः स्मृता ॥

तविमौ सकलं विश्वं व्याप्तौ तत् कुण्डकेन च।
तदा तद्भावमाप्नोति तदा सोऽहमिति स्मृतः॥

स एव परमं ब्रह्म कुटस्थो जगदङ्कुरः।
सर्वे देवास्तथावेदा दिग्वाताद्यादरन्तथा॥

त्रुट्यादिकालकल्पाश्च तत्तद्देवस्तदात्मकः।
यस्मिंश्च प्रणयं यान्ति विनाशं जगदीश्वरि॥

यस्मिन् सृष्टिः सदोद्भूतिर्यस्मिन्नद्यापि जायते।
स एवं परमं ब्रह्मसोऽहस्तावेन जायते॥

सहवर्णो बिन्दुपाथसक्तिवर्णं दिशेस्मुदा।
प्रणवं सर्वतन्त्रेषु कथितं पद्मयोनिना॥

परानन्दमयं ब्रह्म शब्दब्रह्मविभूषितम्।
आत्मनो देहमध्ये तु सर्वतन्त्रात्मकं प्रिये॥

चिन्तयेद्विधिनानेन ब्रह्मविष्णुशिवात्मकम्।

जगतां कारणं प्रोक्तं वेदमन्त्रस्य कारणम्॥

गायत्री प्रणवञ्चैव सर्वतन्त्रेष्वयं विधिः।
गायत्री प्रणवस्याथ मन्त्रार्थं ब्रह्मणा पुरा॥

चतुर्वेदेषु शास्त्रेषु न निष्ठातः पुरोगतः।
समाधियोगमेतद्धि कथितं पद्मयोनिना॥

समाधौ चिन्तयेद्देवीं भूतशुद्ध्यादिकं दिशेत्।
न्यासजालं विधायाथ समाधौ पूजयेत् सदा॥

समाधौ यादृशं कुर्यात् पूजनं जलतर्पणम्।
वाह्ये तु तादृशं कुर्यात् शङ्करेण च भाषितम्॥ ॥

अतः परं कर्मयोगं वक्ष्यामि शृणु शङ्करि।
आश्रमं विविधं तत्र कथितं पद्मयोनिना॥

ब्राह्मणाः क्षत्रिया वैश्याः सर्वतन्त्राधिकारिणः।
कर्माधिकारिणस्ते तु सर्व तन्त्राधिकारिणः॥

तत्प्रसादाद्भवेन्मुक्तिः संसारभवबन्धनात् ॥ ८६ ॥

इति निश्वासकारिकायां दीक्षोत्तरे तन्त्रावतारः चतुर्थः पटलः ।

देवी -

भगवन् श्रोतुमिच्छामि किञ्चित्कौतूहलान्विता ।

तत्वमाचक्ष्व देवेश यदि स्याद्वरदो मम ॥ १ ॥

बिन्दुनादं तथा शक्तिनाडीत्रयमिदं शुभम् ।

यत्र तत्वञ्च देवेश उत्क्रान्तिसिद्धिसाधनम् ॥ २ ॥

पृ। ८३८)

एकादशविधञ्चैव नवात्मे सर्वमाश्रितम् ।

तेन सर्वमिदं कार्यं तेन सर्वमिदं ततम् ॥ ३ ॥

दृश्यते च कथं बिन्दुः कतिरक्षरयोजितः ।

कस्मिन् कस्मिन् प्रदेशे तु द्रष्टव्यं बिन्दुमीश्वरम् ॥ ४ ॥

करण एव कथं तस्य येन दृश्यते तत्वतः ।

नादश्चैव तथा शक्तिः हृल्लक्षस्य च दर्शनम्॥ ५॥

सर्वमेतद्यथा न्यायं कथयस्व प्रसादतः।

ईश्वरः -

शृणु देवि परं गुह्यं रहस्यमिदमुत्तमम्॥ ६॥

तदहं संप्रवक्ष्यामि साधकानां हितावहम्।

पृ। ८३९)

नवात्मकेन सर्वेशि यथा भवति तच्छृणु॥ ७॥

वर्णाष्टकं धृवं देवि बिन्दुर्व्यापक उच्यते।
नादं तस्य शिखा प्रोक्ता शक्तिस्तु परमं स्थिता॥ ८॥

एकादश पदार्थन्तु कारणं परमस्ति च।
गुरुवक्राच्च लभ्येत यथा तेनैव चोदितः॥ ९॥

अकार उकार भेदेन मकारेण तथैव च।

यथा कर्माणि कुरुते कथयामि तवाखिलम्॥ १० ॥

सर्वज्ञानपरं सूक्ष्मं सर्वज्ञानं सुदुर्लभम्।
अनादिपरमं ज्ञानं अनादि परमव्ययम्॥ ११ ॥

बिन्दुनादं तथा शक्तिं सूक्ष्मं परमव्ययम्।

पृ। ८४०)

यथा प्राप्स्यसि तन्नादं बिन्दुश्च भुवि दुर्लभम्॥ १२ ॥

न मया कस्यचित्ख्यातं तत्ते वक्ष्यामि सुव्रते।
भ्रुवोर्मध्ये समाख्यातं देवदेवं महेश्वर॥ १३ ॥

शुद्धस्फटिकसङ्काशं सर्वतत्वप्रकाशकम्।
वर्जितं दर्शतत्वैश्च दर्शतत्वप्रकाशकम्॥ १४ ॥

दृश्यते च तदा तेजो ज्वलन्तं स्वेन तेजसा।
दीपौ तस्य समाख्यातौ उभौ तौ शशि भास्करौ॥ १५ ॥

अवस्था स्थिता चेताख्यातयन्तौ सन्ततः।

इडा दृश्यति वामेन सुषुम्ना दक्षिणेन तु॥ १६॥

ताभ्यां मध्ये परं स्थानं यत्र बिन्दुर्व्यवस्थितः।

पृ। ८४१)

घटमध्ये यथा दीपः तद्धटं वै प्रकाशते॥ १७॥

उपदेशविहीनस्तु परं तत्वं न दृश्यते।

यथादर्शो मलैर्ग्रस्तः प्रतिबिंबं न दृश्यते॥ १८॥

तद्वद्योगविहीनस्य प्रत्यक्षं न च दृश्यते।

उभयोरपि पाणिभ्यां धारसंस्थाप्य बुद्धिमान्॥ १९॥

उपदेशसमायोगात् दृश्यते बिन्दुरीश्वरः।

नासा श्रोत्रं तथा चक्षुः उभयोरपिच्छादयेत्॥ २०॥

षड् द्वाराणि च संस्थाप्य पश्यते बिन्दुमीश्वरम्।

छादनात् त्यज्यते बिन्दुः शुद्धस्फटिकनिर्मलः॥ २१॥

विधुं निर्मलं बिन्दुं स बिन्दुं तेजसान्वितम्।

पृ। ८४२)

शब्दनादविनिर्मुक्तं ध्यातव्यं परमं शिवम्॥ २२॥

बिन्दुलीनमनः कृत्वा ध्यायेद्बिन्दुसुयन्त्रितः।
यथा सर्वगतो वायुं पीठस्थो न च दृश्यते॥ २३॥

एवं सर्वगतो बिन्दुः योगहीनो न दृश्यते।
अरणिस्थो यथा वह्निः विद्यमानो न दृश्यते॥ २४॥

योगहीनस्तथा बिन्दुः न तु दृश्यति सुन्दरि।
संयोगेन तथा बिन्दुः प्रत्यक्षो दृश्यते तदा॥ २५॥

सर्पिः क्षीरे यथाव्यक्तं विद्यमानं न दृश्यते।
तद्वत् सर्वगतो बिन्दुः योगहीनो न दृश्यते॥ २६॥

यथा सर्पि च अग्निश्च प्रयोगेण तु सुन्दरि।

पृ। ८४३)

प्राप्यते च तथा बिन्दुः योगिनाञ्च महात्मनाम्॥ २७॥

तोयकान्तो मणिर्यद्वत् प्रक्षिप्तोपि महाहृदे।
प्रकाशयति तत्तोयं आत्मक्रीडेन तेजसा॥ २८॥

उद्धृतेन मणिर्यद्वत् जलमग्नौ प्रकाशके।
तद्वद्योगविहीनस्य बिन्दुश्चैव न दृश्यते॥ २९॥

ध्यानात्सा जायते बिन्दुः संयोगाद्दृश्यते पुनः।
ध्यानं योगं समाख्याय पश्यते बिन्दुमीश्वरम्॥ ३०॥

योगिनां प्रत्ययो बिन्दुः प्रत्ययात्प्राप्यते परम्।
परत्वादपरं नास्ति नित्ययुक्तं सदा भवेत्॥ ३१॥

कारणेन तु संप्राप्तिः प्रयोगाच्चैव सुन्दरि।

पृ। ८४४)

कथितं स रहस्यन्तु ज्ञातव्यं योगिभिस्सदा ॥ ३२ ॥

दृष्ट्वा बिन्दुर्ज्वलन्तं तु नेत्र मध्ये व्यवस्थितः ।
विज्ञेया च सदा देवि शिखा तस्यैव मध्यतः ॥ ३३ ॥

दृश्यते तत्परं सूक्ष्मं बिन्दुकोटिसमप्रभम् ।
तल्लयस्सततं योगी लक्षयेत्सुसमाहितः ॥ ३४ ॥

शृणुष्वावहिता देवि नादञ्च बिन्दुदुर्लभम् ।
नव तत्वानि देवेशि यान्युक्तानि नवात्मके ॥ ३५ ॥

तेषां मध्ये यकाराद्याः सप्तबीजाः समाहिताः ।
आदिहुङ्कारसंयुक्तः सप्तैते भुविदुर्लभाः ॥ ३६ ॥

फट्कारेण समायुक्ताः सद्योद्भ्रमण विश्रुताः ।

पृ। ८४५)

सद्यस्सङ्क्रामणन्त्येते एकमेव नियोजिताः ॥ ३७ ॥

षष्ठञ्च यत्परं बीजं वर्गान्ते च व्यवस्थितः ।

हाकाररूपसंयोगात् चिन्त्यमानस्तु सोत्क्रमात् ॥ ३८ ॥

एवमन्ये समाख्याताः पञ्चबीजं समासतः ।

अकारादिमकारान्ता मकारोकारयोजिताः ॥ ३९ ॥

सद्योत्क्रामकराह्येते कथितास्तव शोभने ।

एतास्सप्तसमाख्याताः क्षुरिकाः प्राणहारिकाः ॥ ४० ॥

लक्षञ्जपेन्न सन्देहः सत्यं देवि वदाम्यहम् ।

सप्तानान्तु समाख्यातमष्ट ओङ्कार उच्यते ॥ ४१ ॥

हुंफट्कारसमायुक्ताः सद्य उत्क्रामयेत्प्रभुः ।

पृ। ८४६)

ओङ्कारं सर्वदेवत्यं सर्वव्यापी परश्शिवः ॥ ४२ ॥

त्र्यक्षरञ्च त्रिदेवत्यं त्रिमात्राद्यधिकं तथा ।

तत्र चोत्पद्यते शंभुः शब्दातीतस्तु निष्कलः ॥ ४३ ॥

परस्सूक्ष्मतरो देवः सर्वपाशविमोचकः।

नानामार्गस्थितो व्यापी सर्वलोकस्य दुर्लभः॥ ४४॥

त्रीणि स्थानानि देहेस्मिन् यत्र नादो व्यवस्थितः।

हृदये चैव कर्णे च भ्रुवोर्मध्ये तथैव च॥ ४५॥

यत्र सूत्राकृतिः सूक्ष्मं शुद्धस्फटिकसप्रभम्।

तुर्यद्वारमिति प्रोक्तं देवयानमिति स्मृतम्॥ ४६॥

मार्गत्रयमिति प्रोक्तं नाडीत्रयमिति स्मृतम्।

पृ। ८४७)

देवतानां त्रयश्चैव शक्तित्रयमिति स्मृतम्॥ ४७॥

फलत्रयमिति ख्यातं देहेस्मिन् परमेश्वरि।

सर्वगः सर्वतो व्यापी सर्वमापूर्यतिष्ठति॥ ४८॥

अकारं हृदि मध्ये तु जागर्तीत्यवस्थितः।

पद्मस्य कर्णिकामध्ये ब्रह्मा तत्र व्यवस्थितः॥ ४९॥

उकारं कर्णमाश्रित्य ब्रह्मस्थानं तदुच्यते।
तालुजिह्वमिति ख्यातं द्वितीयं स्थानमुच्यते॥ ५०॥

अकारन्नेत्रमाध्ये तु सुषुप्तपदमुच्यते।
लवं कस्य तु तत्स्थानं कथितं तव शोभने॥ ५१॥

अर्धमात्रपदे तस्य तुर्यब्रह्मपदे स्थितः।

पृ। ८४८)

मूर्ध्नि स्थानं परं सूक्ष्मं मोक्षमार्गप्रदायकम्॥ ५२॥

तुर्यातीतं परं देवि सुसूक्ष्मपदमव्ययम्।
तं ज्ञात्वा मुच्यते जन्तुः भवेत्संसारबन्धनात्॥ ५३॥

तुर्यातीतमिति प्रोक्तं यत्र गत्वा न शोचति।
एवं व्याप्तमिदं सर्वं वाङ्मयं स चराचरम्॥ ५४॥

एतेषां नादमध्ये तु शिवं तत्र व्यवस्थितः।
हृदयं देहमध्ये तु तत्र पद्मं व्यवस्थितम्॥ ५५॥

कर्णिकापद्ममध्ये तु अकारं तस्य मध्यतः।
तस्य मध्ये विनिष्क्रान्तं नादं परमदुर्लभम्॥ ५६॥

उकारञ्च मकारञ्च भित्वा नादो विनिर्गतः।

पृ। ८४९)

तुर्यद्वारविनिष्क्रान्तं द्वयन्तस्य विचिन्तयेत्॥ ५७॥

अकारे तु समुत्थाय ब्रह्मद्वारसमुद्गतम्।
एष शब्दस्समाख्यातो मोक्षमार्गप्रदायकम्॥ ५८॥

एतद्ध्यानवरं दिव्यं सेवितव्यं प्रयत्नतः।
ध्यानेन तु किमन्येन तपसोग्रेण वा पुनः॥ ५९॥

किं तीर्थगमनैर्वापि ध्यानैर्वापि सुपुष्कलैः।
विदन्ते नादसद्भावे बिन्दुदेवे च शोभने॥ ६०॥

यद्येकं विदितं नादं सूक्ष्ममेकं परापरम्।
अथापि दीपदेहस्तु आकाशे तु यथा शिवा॥ ६१॥

लीना सर्वगता तद्वत् न दृश्यति चांबरम्।

पू। ८५०)

एवं सूक्ष्माति सूक्ष्मस्य नादतत्वस्य निर्णयः॥ ६२॥

एष नादः समुद्दिष्टः सर्वतन्त्रेषु चोत्तमः।
सूर्यरश्मिसहस्राभा मध्ये नाडी प्रकीर्तिता॥ ६३॥

सहिता सर्वतत्वैश्च शक्तिना सह संयुता।
सा नाडी सर्वशब्दानां तत्वानाञ्चैव शोभने॥ ६४॥

सङ्गृह्य समुदायेन शिवतत्वे तु लीयते।
सूक्ष्मा च सर्वगा चैव ज्ञात्वा ज्ञानी विमुच्यते॥ ६५॥

हित्वा सूर्यञ्च सोमञ्च सर्वगः स शिवो भवेत्।
* * * * * * * * * * * * ?

तु लीयते ॥ ६६ ॥

* * * * * * ? सा तु नादं तस्यां तु लीयते ।

पू। ८५१)

सूर्यमण्डलमध्ये तु अकारस्तु व्यवस्थितः ॥ ६७ ॥

तत्र चोत्पद्यते शब्दो विश्रमेच्छशिमण्डले ।

स्वयं विष्णुस्समुत् * * * * * * * * *

* ? ॥ ६८ ॥

* * * * ? परं स्थानं वह्निमण्डलमुत्तमम् ।

मकारेति च विख्यातो भित्वा नादो लयं स्थितः ॥ ६९ ॥

पिङ्गलामार्गमापन्ना तुर्यद्वारेति विश्रुता ।

अर्धमात्रा तु * * * * * * * * * *

* ? ॥ ७० ॥

ध्यायेत्तु परमं नादं तुर्यद्वारेण योगवित् ।

लयं तस्य तु देवेशे यत्रासौ परमश्शिवः ॥ ७१ ॥

तदेव निष्कलं तत्वं चिन्त्यते मोक्षवादिभिः ।

पृ। ८५२)

* * * * * * * ? न्ते शिवतत्वविदो जनाः ॥ ७२

॥

देव्युवाच -

मण्डलानाञ्च देवानां तत्वानाञ्च महेश्वर ।

हृल्लक्षः परमो ज्ञेयो योगिनाञ्च तथैव हि ॥ ७३ ॥

तस्मिन् प्रवर्तते सिद्धिः योगञ्च भु * * * * ? ।

* * * * * * * * * * * *

* ? महंसि ॥ ७४ ॥

ईश्वरः -

सबीजनिर्बीजविभागेन नवमात्मा परिकीर्तितः ।

ह्रासह्रासविभागेन नानासिद्धिफलप्रदा ॥ ७५ ॥

षडक्षरपरञ्चैव पञ्चाक्षरपरं शुभम् ।

पृ। ८५३)

चतुरक्षरं विजानीयात् * * * * * * * ? ॥ ७६ ॥

* * * * * ? देवेश अङ्गानि कथितानि तु ।
संपूर्णः शिव इत्युक्तः स एव परमेश्वरि ॥ ७७ ॥

एकैकह्रसिता ये तु बिन्दुरुकारयोजिता ।
हृदयादि समुद्दिष्टा ज्ञातव्यास्तु वरानने ॥ ७८ ॥

* * * * ? एते सर्वे उद्य उत्क्रमणा स्मृताः ।
हृल्लक्षदर्शनं देवि अचिरादेव जायते ॥ ७९ ॥

इदमन्यत्परं देवि कथिताम्यनु * * * ? ।
* * * * * * * * * * * ?
श्च तथैव च ॥ ८० ॥

यकार उकारसंयुक्तं वर्णत्रयविवर्जितम्।

पृ। ८५४)

ध्यायमानो वरारोहे बीजदीपेन बोधितः॥ ८१॥

सप्तरात्रेण पश्येत हृल्लक्षं परमेश्वरि।

विष्णुलिङ्गानि सङ्का * * * * * * * * *

? ॥ ८२॥

* * * * * ? ते योगी पीतनीलान्यनेकशः।

कृष्णशुक्लांस्तथा चान्यान् पश्यते रक्तवर्णकान्॥ ८३॥

निजैर्दीपितहृल्लक्षं संहरेत्सप्तमेहनि।

ज्वलते हृदि पद्मे तु निजदीपसुबो * * ?॥ ८४॥

* * * * * * * * * * * * * ?

स पश्यति।

ज्वलते दीप्तवद्देवि हृदयं निजदीपितम्॥ ८५॥

हृल्लक्षमेवं विख्यातं ज्ञातव्यं योगिभिस्सदा।

पृ। ८५५)

नाभेरूर्ध्वं वितन्तुकम् * * * * * * * *

? ॥ ८६ ॥

* * * * * * * * * * * *

* * * * ? ।

कर्णिकापद्ममध्ये तु बिन्दुस्तस्यैव मध्यतः।

ज्वलते भगवान् बिन्दुः दीपस्योर्ध्वशिखोपमः॥ ८७ ॥

हृदयं षडक्षरं प्राप्तं बीजं परमदुर्लभम्।

* * * * * * * * * * * ? त्तो

यथा कविः॥ ८८ ॥

एवमन्येपि ये प्रोक्ता वेदितव्या हितैषिभिः।

कथितं ते महाज्ञानं सर्वज्ञानेषु चोत्तमम्॥ ८९ ॥

इदं तत्परमं * * * * * * * * *

* ? ।

सुवर्णेन सहैकत्वं गच्छते नात्र संशयः ॥ ९० ॥

पृ। ८५६)

ज्ञानसिद्धिस्तथा देवि पशुर्याति परं पदम्।
शिवेन च सहैकत्वं गच्छते * * * * * ? ॥ ९१ ॥

* * * * ? दशाहाद्वा पश्यते नात्र संशयः।
दशाहान्नपरं लङ्घेत् पश्यते नात्र संशयः ॥ ९२ ॥

एतल्लक्षपरं दिव्यं सेवितव्यं प्रयत्नतः।
हिताय स * * * * * * * ? तव शोभने ॥ ९३ ॥

नवशक्तिसमायुक्तं धर्मज्ञानसमन्वितम्।
आसनं कल्प्य देवेशि तत्र न्यासन्तु कारयेत्॥ ९४ ॥

पूजयेत्सकलं देवि पञ्चब्रह्म समन्वितम्।
एकनावरणेनैव पूजनीयो महेश्वरः ॥ ९५ ॥

पृ। ८५७)

सर्वसिद्धिकरो देवः पूज्यमानो दिने दिने।

एवं पूज्य यथा न्यायं जपेध्यायेत्प्रयोगवित्॥ ९६॥

दशलक्षेण देवेशि मनसा यद्यदीप्सितम्।

तत्तत्प्राप्नोत्ययत्नेन साधको नात्र संशयः॥ ९७॥

इति निश्वासकारिकायां दीक्षोत्तरे बिन्दुनादयोगप्रकरणे पञ्चमः पटलः

-

देव्युवाच -

भगवन् श्रोतुमिच्छामि यजनञ्चानुपूर्वशः।

येन विज्ञातमात्रेण सिध्यते नात्र संशयः॥

प्। ८५८)

ईश्वरः -

प्रकृतिश्चादितः कृत्वा शिवतत्वमपश्चिमम्।

आद्यमध्ये तु ये तत्वाः कथयामि यथाक्रमम्॥ २॥

आदिवक्रं लिखेत्पद्मं केसरालं स कर्णिकम्।

सर्वसंहितसामान्यं कथितन्तु तवाखिलम्।

इति निश्वासकारिकायां दीक्षोत्तरे दशमः पटलः।

देव्युवाच -

भगवन् श्रोतुमिच्छामि मातृकाध्वानमुत्तमम्।
निस्संशयकरञ्चैव निर्वाणफलसाधनम्॥ १॥

ईश्वरः -

पृ। ९६६)

शृणु देवि परं गुह्यं कथयामि तवाखिलम्।
तेन विज्ञातमात्रेण प्राप्नोति परमं पदम्॥ २॥

मातृकायान्तु होतव्यमध्वानन्तु यथाक्रमम्।
षकारं शतरुद्रे तु दशधा परिकल्पयेत्॥ ३॥

पञ्चाष्टके शकारन्तु वकारो योनिरष्टके।
योगाष्टके यकारस्तु सुशिवेरं प्रभुस्मृतः॥ ४॥

पङ्क्तित्रये यकारस्तु मकारं पञ्चविंशके।
भकारस्संहितस्साध्ये बकारश्शिवसङ्करे॥ ५॥

असाध्ये तु फकारो वै वकारो हरिरुद्रके।
दशघाते नकारस्तु पञ्चशिष्ये च य स्मृतः॥ ६॥

पृ। ९६७)

महादेवे दकारस्तु थकारो गोपति स्मृतः।
शिवब्रह्मपदे तन्तु णकारो नन्दहेमके॥ ७॥

ढकारस्याद्दृषिकुले महामाया दृढप्रभुः।
वागेशान्ते ठकारस्तु टकारः प्रतिपाधिपः॥ ८॥

साधुस्थाने तृकारस्तु झकारो विमले स्थितः।
ध्यानाहारे झकारो वै विज्ञेयं साधकोत्तमैः॥ ९॥

दमने फस्तु विज्ञेयं चकारश्चैव रुद्रके।
धातारो वै दकारश्च घकारं भस्ममीश्वरे॥ १०॥

प्रणवाष्टगकारन्तु महविद्याष्टके च खम् ।
ककारो मूर्तिरष्टासु ओष्ठान्तो रूपकं विदुः ॥ ११ ॥

पृ । ९६८)

शक्तित्रये बिन्दुयुतं द्वे विद्ये औ तु कीर्तितम् ।
ओङ्कारोप्यस्त्रमित्युक्तमैङ्कारं कवचं विदुः ॥ १२ ॥

ए शिखा तु समाख्याता शिरं ॡकार उच्यते ।
हृदयन्तु ॡ विज्ञेयं ॠ सावित्री निगद्यते ॥ १३ ॥

गायत्री तु ऋकारन्तु धर्मादि ऊ प्रकीर्तितम् ।
आसने उ इति ज्ञेयं विज्ञेयं ई ति कर्णिका ॥ १४ ॥

इकारः शक्तिसंसक्तः आकारं पञ्चमीश्वरे ।
सदाशिवं विजानीयादकारः परमश्शिवः ॥ १५ ॥

पञ्चाशदक्षरैर्ह्येतैः अध्वानं यस्तु विन्दति ।
स ज्ञानात् स शिवस्साक्षात् स योगी स शिवं विदुः ॥ १६ ॥

पृ। ९६९)

पञ्चपञ्चभिराहुत्यैर्दशभिर्दशभिस्तथा।
विंशविंशतिभिश्चैव पञ्चविंशतिभिस्तथा॥ १७॥

पञ्चाशच्च शतञ्चैव ज्ञात्वा शक्तिबलाद्बलम्।
दीक्षाकार्या तु मन्त्रज्ञः पशूनाञ्च यथेच्छया॥ १८॥

निष्कले चतुराहुत्या शून्ये चैव त्रयं पुनः।
प्रशान्तेन द्वयं दद्यात् तत्तु एकाहुतिं हुनेत्॥ १९॥

सर्वाध्वानमशेषस्य एष एव विधिस्मृतः।
एतद्रहस्यं परमं गोपितं न प्रकाशितम्॥ २०॥

दीक्षिताय प्रशान्ताय अभिषिक्ताय धीमते।
गुरुप्रियाय दातव्यं शिवभक्तिरताय च॥ २१॥

पृ। ९७०)

अन्यथा नैव दातव्यं शिवभक्तिरताय च।

अन्यथा नैव दातव्यं दीक्षाज्ञानमिदं शुभम्॥ २२॥

सर्वसंहितसामान्यं सर्वतन्त्रेषु चोत्तमम्।
विदित्वा ज्ञानविज्ञानं मोचयेन्मुच्यतेति च॥ २३॥

विस्तरं कथितं यत्तु सकलेन तु होमयेत्।
वर्णमन्त्रपदेनैव कलया च चतुर्विधम्॥ २४॥

भुवनाध्वा कलाध्वा च तत्वाध्वा च वरानने।
ज्ञानाध्वा च पदाध्वा च वर्णाध्वा च यथा पुनः॥ २५॥

षट् प्रकारमिदं देवि अध्वानं परिकीर्तितम्।
एषामेकदशं शोध्यं देशिकेन महात्मना॥ २६॥

पृ। ९७१)

पूर्णाहुतिस्तु दातव्या योजनाय परे शिवे।
वसोर्धारप्रयोगेन दातव्यं देशिकेन तु॥ २७॥

मन्त्रद्रव्यप्रयोगेन युज्यते पशु तत्पदे।

तस्मान्मन्त्रञ्च तत्वञ्च महिमानञ्च शोभने ॥ २८ ॥

देवतानां परित्यागं स्वशरीरे यथाक्रमम् ।
बिन्दुनादलयञ्चैव लयातीतं परं पदम् ॥ २९ ॥

एवं क्रमेण देवेशि योजयेत्परमं पदम् ।
अतः संक्षेपतो देवि कथयामि तवाखिलम् ॥ ३० ॥

न रजो नाधिवासञ्च न भूक्षेत्रपरिग्रहः ।
यत्र यत्र प्रदेशे तु पूजयित्वा महेश्वरम् ॥ ३१ ॥

पृ। ९७२)

अध्वानं मनसा ध्यात्वा आचार्यस्तन्त्रपारगः ।
भुवनाध्वा तु यः प्रोक्तो मया तु तव सुवृते ॥ ३२ ॥

तं ध्यात्वाह्यात्मदेहे तु पशुदेशे तथैव च ।
होमयेत्तन्त्रवित्प्राज्ञः तत्वमार्गविचक्षणः ॥ ३३ ॥

आहुतीनां सहस्रन्तु अमनस्केन देशिकः ।

सहस्रेण तु युध्येत अमनस्केन शोभने ॥ ३४ ॥

भुवनाध्वैष विख्यातः शिवेन परमात्मना ।
स्रुवानुपूरणं यावत्तावत्कालं समादिशेत् ॥ ३५ ॥

अमनस्केन संयुक्तो देशिकः परमेश्वरि ।
सर्वमन्त्रमयः प्रोक्तः सर्वतत्वमयस्तथा ॥ ३६ ॥

पृ। ९७३)

सर्वदेवमयश्चैव सर्वभूतमयस्सदा ।
एतं हुत्वा तु पातव्यं पूर्णाहुत्या तु शोभने ॥ ३७ ॥

अन्ते तु योजनं कृत्वा शिवसायुज्यमिच्छता ।
एवं हुत्वा महादेवि लभते शाश्वतं शिवम् ॥ ३८ ॥

सर्वदीक्षामयं सारं शोभनं गोपितं मया ।
अन्याया कथिता दीक्षा एकाहुत्या तु शुध्यति ॥ ३९ ॥

एकाहुत्यापि देवेशि नियुज्येत्परमे पदे ।

किं पुनर्बहुधा हुत्या शुध्यतेति किमद्भुतम् ॥ ४० ॥

आहुतीनां सहस्रेण शुध्यते नात्र संशयः ।
अत एवं पुनर्वक्ष्ये संक्षेपं शृणु सुव्रते ॥ ४१ ॥

पृ। ९७४)

परमाक्षरेण होतव्यं सर्वाध्वानमशेषतः ।
पूर्णाहुतिशतेनैव शुध्यते च शिवाध्वरे ॥ ४२ ॥

एवं विधेन देवेशि दीक्षा निर्वाणगामिनी ।
निष्कलेन मया ख्यातं शून्येनैव तथा पुनः ॥ ४३ ॥

प्रशान्तेन समाख्यातं तत्वेनैव तथैव च ।
अकथ्येयमिदं शुद्धं गोपनीयं प्रयत्नतः ॥ ४४ ॥

एवं वै यो न जानाति न हि मोचयते पशुम् ।
न चासौ देशिकः प्रोक्तो न च योज्यः शिवाध्वरे ॥ ४५ ॥

इति निश्वासकारिकायां दीक्षोत्तरे शिवयागपटलः एकादशः ।

तेन तुष्टेन तुष्टास्तु अशेषभुवनाधिपाः ।
शिववत्पूजयेद्देवि आचार्यं तत्वपारगम् ॥ १२९ ॥

यथाहं तादृशस्सोहि गुरुस्तत्वविशारदः ।

इति निश्वासकारिकायां दीक्षोत्तरे अधिवासनः पटलः चतुर्दशः ।

पू । १०४१)

ईश्वरः -

शरीरं सर्वजन्तूनां सर्वदेवमयं स्मृतम् ।
वेदितव्यं प्रयत्नेन साधकैस्तत्वचिन्तकैः ॥ १ ॥

तत्वानि चोदितान्यादौ मया तु तव शोभने ।
शरीरे तानि सर्वाणि ज्ञातव्यानि विपश्चितैः ॥ २ ॥

इडा चैव सुषुम्ना च पिङ्गला च तथैव हि ।
नासां सञ्चारयोगं वै ज्ञातव्यं तत्ववेदिभिः ॥ ३ ॥

कलानाञ्चैव सर्वासां नाडीनां वायुभिस्सह ।
सञ्चारं ह्येष तत्वानां भोक्ता भोज्यं तथैव च ॥ ४ ॥

पृ। १०४२)

कालवेलविभागानि सङ्क्रमानि तथैव हि ।
ज्ञात्वा सर्वमशेषेण साधकस्सविधीयते ॥ ५ ॥

दक्षिणेन सुषुम्ना तु यदा वहति सुवृते ।
विज्ञेयस्स सदा तज्ज्ञो उत्तरायणमुत्तमम् ॥ ६ ॥

इडायान्तु यदा देवि तिष्ठते परमेश्वरः ।
दक्षिणायनमित्येव कथितं तव सुवृते ॥ ७ ॥

मध्यस्थन्तु यदा देवि पिङ्गलायां व्यवस्थितः ।
विषुवं स तु विज्ञेयं योगकालः प्रकीर्तितः ॥ ८ ॥

सुषुम्नायां स्थितो ब्रह्मा अकाराक्षरसंयुतः ।
आदित्यः स तु विज्ञेयो ज्येष्ठा शक्तिः प्रकीर्तिता ॥ ९ ॥

पृ। १०४३)

ज्ञानशक्तिरिति ज्ञेया सत्वस्थं तं विनिर्दिशेत्।
सांग्रत्स्थानं स विज्ञेयं दक्षिणेन व्यवस्थितः॥ १०॥

इडायां संस्थितो विष्णुरीकाराक्षरसंयुतः।
सोमस्य तु स तु ज्ञेयो वामा शक्तिः प्रकीर्तिता॥ ११॥

क्रियाशक्तिः स विज्ञेयो राजसं गुणलक्षणम्।
स्वप्नस्थानं स विज्ञेयं वामतस्तु व्यवस्थितम्॥ १२॥

मध्यमं रुद्रमित्याहुः उकारः परिकीर्तितः।
रौद्री तन्तु विजानीयादिच्छाशक्तिः प्रकीर्तिताः॥ १३॥

वह्निस्थानं हि यत्प्रोक्तं सुषुप्तं परिकीर्तितम्।
तामसन्तु विजानीयात् मध्यमे तु व्यवस्थितम्॥ १४॥

पृ। १०४४)

त्रिकालविषयं ज्ञानमेभ्यो देवि प्रकीर्त्यते।
भूतं ब्रह्म विजानीयात् भविष्यं वैष्णवे पदे॥ १५॥

वर्तमानं हि रुद्रत्वे सर्वशास्त्रे प्रतिष्ठिते।
त्रिकालमेकतो देवि बिन्दुदेवं व्यवस्थितम्॥ १६॥

सार्वकालं स*? वोक्तं ज्ञानकालस्वत स्मृतः।
तस्यातीतं भवोन्नादं देवदेवं सदाशिवम्॥ १७॥

त्रिकालज्ञानसंयुक्तं ज्ञात्वा भवति साधकः।
पञ्चधा पञ्चदेवत्यं सकलं व्याप्य संस्थितम्॥ १८॥

अनन्तमादितः कृत्वा प्रधानान्ते तु सुवृते।
ब्रह्माणमाधिपत्येन वेदितव्यं प्रयत्नतः॥ १९॥

पृ। १०४५)

पौरुषमादितः कृत्वा कालतत्वमपश्चिमम्।
ज्ञातव्यं हि तत्वज्ञैः विष्णुस्तत्राधिदैवतम्॥ २०॥

ग्रन्थिन्तु आदितः कृत्वा विद्यातत्वमपश्चिमम्।
विज्ञेयं तत्सदा तज्ज्ञैः रुद्रस्तत्राधिदैवतम्॥ २१॥

ईश्वरमादितः कृत्वा यावत्तत्वं सदाशिवम्।
ज्ञातव्यन्तु वरारोहे ईशस्तत्राधिदैवतम्॥ २२॥

उपरिष्टाच्छिवं तत्वं तत्र देवं सदाशिवम्।
एतत्सर्वमशेषेण ज्ञातव्यं देशिकेन तु॥ २३॥

सर्वेषामेव तत्वानां शिवो व्याप्य व्यवस्थितः।
ज्ञात्वा सर्वमशेषेण आचार्यस्स विधीयते॥ २४॥

पृ। १०४६)

निवृत्तिः कथितो ब्रह्मा प्रतिष्ठा विष्णुरुच्यते।
विद्या रुद्रस्समाख्यातः शान्तिरीश्वर उच्यते॥ २५॥

शान्त्यतीतन्तु देवेशि देवदेवं सदाशिवम्।
नादस्यैव क्रमेणैव देवता कथिता मया॥ २६॥

इण्डिका दीपिका चैव रेचिका मोचिका तथा।
*? नास्तु पञ्चमो ज्ञेयो निष्कलस्तु सदाशिवः॥ २७॥

ब्रह्माणमादितः कृत्वा ज्ञातव्यानि वरानने।
सूक्ष्मान्यायेन मया प्रोक्ता देवता ते प्रकीर्तिताः॥ २८॥

एताः कलाः समाख्याताः देवता नाडयस्तथा।
ज्ञातव्यं तत्वतो देवि साधकेन महात्मना॥ २९॥

पृ। १०४७)

कलानां देवतानाञ्च व्यापयित्वा व्यवस्थितः।
सञ्चारं कुरुते देवि स तु आत्मा विजानतः॥ ३०॥

अष्टतत्वा स्मृता देवि यैर्व्याप्तमखिलं जगत्।
तस्मिंस्तैस्तु समायुक्तसञ्चरेत् परमेश्वरः॥ ३१॥

तिर्यङ्मृगनराख्येषु तत्वभावेन्द्रियेषु च।
इष्टसेत्सर्वभूतेषु तत्वैर्युक्तो न संशयः॥ ३२॥

गमागमं ततो देवि विदित्वा साधको भवेत्।
अविदित्वा न सिध्येत न च याति परं पदम्॥ ३३॥

भोज्यं भोक्ता च दाता च तत्वैर्युक्तः करोति यः।

देव्युवाच -

पू। १०४८)

भगवन् श्रोतुमिच्छामि भोक्ता भोज्यञ्च शङ्कर॥ ३४॥

पानं पिबति कस्तत्र स्वादं गृह्णाति कः पुनः।
को वा क्षिपति गर्भे तु ग्रासं गृह्णाति कः प्रभो॥ ३५॥

रसानां विविधानान्तु विचारयति कः पुनः।
एतत्सर्वमशेषेण कथयस्व प्रसादतः॥ ३६॥

ईश्वरः -

शृणु देवि प्रवक्ष्यामि समासात्साधकस्य तु।
येन विज्ञातमात्रेण अन्नदोषे न लिप्यते॥ ३७॥

दाता भोक्ता च मन्ता च सादाख्यपदमाप्नुयात्।
अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो महेश्वरः॥ ३८॥

पृ। १०४९)

स्थितस्सर्वशरीरेषु भुङ्क्ते चैव ददाति च।
यो विजानाति कर्तारं भोक्ता भोज्यञ्च हे प्रिये॥ ३९॥

श्वपचेष्वपि भुञ्जानो न स पापे न लिप्यते।
तत्वानि मनसा चिन्त्य स्वशरीरे यथाक्रमम्॥ ४०॥

कर्णौ च चक्षुषी चैव नासायां वदने तथा।
दक्षिणे श्रवणे चैव खमलः परिकीर्तितः॥ ४१॥

वामे चैव कलाढ्यन्तु श्रवणे परिचिन्तयेत्।
सकलं निष्कलञ्चैव नासायां परिकल्पयेत्॥ ४२॥

क्षपणं क्षयमन्तञ्च चक्षुषी तौ विचिन्तयेत्।
शून्येन पश्यते चान्नं वेदितव्यं प्रयत्नतः॥ ४३॥

पृ। १०५०)

ग्रासं गृह्णाति देवेशो कण्ठोष्ठः परमेश्वरः।

ब्रह्मा च विष्णुश्श्रवणे रुद्रमीश्वरचक्षुषी॥ ४४॥

घ्राणे वक्त्रे स्थितो नित्यमुक्तिश्चैव सदाशिवः।

नासाशक्तिं विजानीयाद्वक्त्रे देवं सदाशिवम्॥ ४५॥

षण्मुख एककरणं कथितं तव शोभने।

एवं तत्वमयं ध्यात्वा शिवं परमकारणम्॥ ४६॥

शिवोहमिति सञ्चिन्त्य भुञ्जमानो न लिप्यते।

षण्मुखेनैव यागेन भुञ्जते सततं प्रभुः॥ ४७॥

त्रिविधेन प्रयोगेन सलिलं पिबते सदा।

खण्डखाद्यैश्च भुञ्जानः क्षपणे गृह्णते सदा॥ ४८॥

पृ। १०५१)

बध्यते सकलेनैव निष्कलेन तु स्वाद्विति।

ऊर्ध्वमुत्क्षिपते ग्रासन्न विद्यात्खमलं कृतम्॥ ४९॥

अन्तस्थो मुच्यते ग्राहिं नात्र कुर्याद्विचक्षणः।
शून्येनैव अन्नाद्य ग्रन्थेते सततं पुनः॥ ५० ॥

भोजनञ्चैव अन्नस्थो अन्नञ्चैव विचारति।
लेह्यं शोष्यञ्च पेयञ्च अन्नानि विविधानि च॥ ५१ ॥

कण्ठोष्ठं परमेशानो वेदितव्यं प्रयत्नतः।
एवं तत्वमयं दिव्यमाचार्यैच्छिन्नसंशयः॥ ५२ ॥

सकृद्भोजितमात्रेण कोटिर्भवति भोजितः।
अथ तत्वविदश्चैव एवं भुञ्जते प्रिये॥ ५३ ॥

पृ। १०५२)

परिसंख्या न विद्येत इत्याह भगवान् शिवः।
अतत्वप्रतिबुद्धस्य ज्ञानिने कोटिरुच्यते॥ ५४ ॥

ज्ञानितत्वविदश्चैव परिसंख्या न विद्यते।
द्विजानां वेदविदुषां कोटिं संभोज्य यत्फलम्॥ ५५ ॥

ज्ञानिने शान्तिचित्ताय सकृत् भुङ्क्ते तु तत्फलम् ।
भोज्यं मायात्मकं सर्वं कर्ता देवो महेश्वरः ॥ ५६ ॥

भोक्ता चैव शिवस्साक्षात् एवमेव न संशयः ।
एवं वै यो विजानाति देशिकस्तत्वपारगः ॥ ५७ ॥

तं दृष्ट्वा गृहमायान्तं क्रीडन्त्योषधयो गृहे ।
एवं भोज्यविधिं सम्यक् न तु सर्वत्र व्यापयेत् ॥ ५८ ॥

पू। १०५३)

पुत्रस्यापि न दातव्यं ये नराः पापबुद्धयः ।
एवं वै यो विजानीयादज्ञानीचान्यथा भवेत् ॥ ५९ ॥

आभुङ्क्ते सततं देवि अन्नपाने न संशयः ।
ऊर्ध्वेन वहते प्राण आपानोधः प्रवर्तते ॥ ६० ॥

एवं ज्ञात्वा तु भोक्तव्यं मुच्यते सर्वकिल्बिषैः ।
तेन भुक्तेन देवेशे दातरोऽस्य कुलानि तु ॥ ६१ ॥

मुच्यन्ते यातना क्षिप्रं सुचिरं नरकार्णवात्।

इति निश्वासकारिकायां दीक्षोत्तरे देवतातत्वभोज्यविधिः पञ्चदशः पटलः।

पृ। १०५४)

देव्युवाच -

पुर्यष्टकसमायुक्त आत्मा सर्वत्र युज्यते।
तदहं श्रोतुमिच्छामि भगवन् वक्तुमर्हसि॥ १॥

सुकृते कर्मभोक्तृत्वे दुष्कृते च तथैव हि।
पुर्यष्टके यदाह्यात्मा वायुभूतो व्यवस्थितः॥ २॥

विद्यमानेपि तद्देहे प्रत्यक्षेण तु दृश्यते।
श्रूयते यातना तस्य नरकेषु अनेकधा॥ ३॥

स्वर्गे च विविधं भोगमणिमाद्या महेश्वर।
तनुभूतश्शरीरात्मा भोगान् भुञ्जति शङ्कर॥ ४॥

सर्वाज्ञा लङ्घने चैव अन्त्येष्टि होमयेत्ततः ॥ ३७ ॥

ज्ञानविज्ञानसंपन्नः आचार्यस्तत्वपारगः।
कालचक्रविधानज्ञः कालज्ञस्स विधीयते ॥ ३८ ॥

स वै मोचयतेजन्तु द्वारज्ञो नात्र संशयः।

इति निश्वासकारिकायां दीक्षोत्तरे षोडशः पटलः।

१०६२)

देव्युवाच -

भगवन् श्रोतुमिच्छामि कालचक्रमनुत्तमम्।
कस्मात्प्रवर्तते कालः कथं कालो निगद्यते ॥ १ ॥

किमर्थं वर्तते कालः कः कालः प्रेरकस्तु कः।
येन सञ्चोद्यमानस्तु कालः कलयते प्रभो ॥ २ ॥

कस्मिन् कस्मिन् प्रदेशे तु चरते काल ईश्वरः।
लौकिकाध्यात्मिकञ्चैव कथं विज्ञायते प्रभो ॥ ३ ॥

गृहारिक्षास्तथांशाश्च होरादेक्काणधस्तथा ।
विनाविनावयश्चैव मुहूर्तानां तथैव च ॥ ४ ॥

वायव्यो नाडयश्चैव स्वराश्चैव कलास्तथा ।

पृ। १०६३)

घटिकानां समाख्या हि तत्वानाञ्च यथाक्रमम् ॥ ५ ॥

दक्षिणोत्तरसङ्क्रान्त्यो अयनं विषुवं तथा ।
लौकिकाध्यात्मिकञ्चैव कथयस्व प्रसादतः ॥ ६ ॥

शृणु देवि परं गुह्यं यत्त्वया परिपृच्छितम् ।
तदहं संप्रवक्ष्यामि यत्सुरैरपि दुर्लभम् ॥ ७ ॥

लौकिकाध्यात्मिकञ्चैव यथा वै कालसञ्चरः ।
यथा वै ज्ञायते देवि लौकिकं कालमुत्तमम् ॥ ८ ॥

आध्यात्मिकं यथा कालं कथयामि विशेषतः ।

एतत्कालविधानज्ञो लभते शाश्वतं पदम्॥ ९॥

सिध्यते नात्र सन्देहः कालज्ञस्तु महामते।

पृ। १०६४)

लौकिकाध्यात्मिकं कालं यो वेत्ति निखिलेन तु॥ १०॥

स कालज्ञस्मृतो देवि लौकिके ख्यातिं च गच्छति।
शुभाशुभञ्च देवेशो लोकस्यैव हिताहितम्॥ ११॥

कथयेत्सर्ववृत्तान्त आश्चर्य अनेकधा।
कालचक्रं समाख्यातमादित्यात् संप्रवर्तते॥ १२॥

मुहूर्ता तिथयश्चैव अहोरात्रायनानि च।
ऋतुर्मासस्तथा पक्षो गृहऋक्षाथराशयः॥ १३॥

सर्वमेतन्महादेवि आदित्यात् संप्रवर्तते।
अंशास्सन्ध्यस्तथा तारा होराद्रेक्काणयस्तथा॥ १४॥

उदिते भास्करे चैव सर्वमेतत्प्रवर्तते ।

पृ। १०६५)

स एष कथितः कालः लौकिकः परमेश्वरि ॥ १५ ॥

लौकिकेन तु कालेन यथा नाम व्यवस्थितम् ।
तथा ते कथयिष्यामि शृणुष्वायतलोचने ॥ १६ ॥

भास्करे उदिते चैव गृहचक्रं प्रवर्तते ।
भास्करेण समास्सर्वे राशयश्च न संशयः ॥ १७ ॥

भास्करः प्रथमः प्रोक्तः केतुरन्ते व्यवस्थितः ।
ग्रहान् पत्रेषु संस्थाप्य पूर्वादिदलसंस्थितान् ॥ १८ ॥

सोममादिक्रमेणैव केतुरन्ते वरानने ।
गृहचक्रं स्मृतो ह्येष ज्ञातव्यं कालवेदिना ॥ १९ ॥

सोमस्तु पूर्वदिग्भागे भौममाग्नेयदिग्दले ।

पृ। १०६६)

रजपुत्रं न्यसेद्देवि दक्षिणे सुसमाहितः॥ २०॥

शनैश्चरन्तु नैऋत्यां विन्यसेत यथाक्रमम्।
बृहस्पतिं न्यसेन्नित्यं पश्चिमे सुसमाहितः॥ २१॥

राहुं वायव्यतस्थाप्य शुक्रमुत्तरतो न्यसेत्।
केतुमीशानस्थाप्य ततो मन्त्राः प्रकल्पयेत्॥ २२॥

ब्रह्मस्थानन्तु यत्प्रोक्तं भास्करं तत्र विन्यसेत्।
सकलं निष्कलञ्चैव शून्यतत्वं तथैव च॥ २३॥

कलाढयं खमलञ्चैव क्षपणं क्षयमन्तकम्।
कण्ठोष्ठ्यञ्चैव देवेशे गृहाह्येते प्रकीर्तिताः॥ २४॥

सकलञ्चादितः कृत्वा यो जप्यानि वरानने।

पृ। १०६७)

पराक्षरं परं देवं ब्रह्मस्थानेन विन्यसेत्॥ २५॥

ब्रह्मस्थाने स्थितो नित्यं भास्करं सुरसुन्दरि।

कर्णिके देवतान्यासं कर्तव्यं कालवेदिना॥ २६॥

एवं गृहाणि विन्यस्य तत्र चारं समभ्यसेत्।

सकलादिक्रमेणैव कथयामि समासतः॥ २७॥

अयुते द्वे सहस्रञ्च षट्शतानि यथाक्रमम्।

एते प्राणा स्मृता देवि विभजेत यथाक्रमम्॥ २८॥

एकैकस्य तु कालज्ञस्सहस्रद्वयमेव च।

शतानि सप्तविज्ञेयमेकैकस्य वरानने॥ २९॥

गृहचारं समाख्यातं संक्षेपान्न तु विस्तरात्।

पृ। १०६८)

पत्रे पत्रे तु संस्थाप्य गृहान् सर्वान् वरानने॥ ३०॥

तत्क्रमानि तथा देवि कालज्ञः प्रविचारयेत्।

दीप्ताङ्गारिणि धूमा च स्थानत्रयमुदाहृतम् ॥ ३१ ॥

कर्णिकास्थस्थितस्सूर्यः त्रीणि पत्राणि लोकयेत् ।
आत्मना सह संयुक्तः कर्णिकास्थः प्रभु स्मृतः ॥ ३२ ॥

पूर्वे होमं विजानीयात् सौम्यं कर्म समारभेत् ।
रौद्रमाग्नेयदिग्भागे शान्तिं वै दक्षिणेन तु ॥ ३३ ॥

नैरृत्योच्चाटनार्थाय श्रीकामः पश्चिमेन तु ।
वायव्यां क्षिप्रनाशाय धनलाभाय चोत्तरे ॥ ३४ ॥

ईशान्यां ज्ञानलाभाय कथितं कालवेदिना ।

पृ। १०६९)

शान्तिके पौष्टिके चैव एवमादिक्रमेण तु ॥ ३५ ॥

ये च रन्ध्रोपरन्ध्राश्च पत्रान्ते च व्यवस्थिताः ।
अशुभमेकतः प्रोक्तं द्वितीयस्मिन् शुभं वदेत् ॥ ३६ ॥

यद्विरोधायते देवि साधकस्य गृहोत्तमः।
तद्गृहं पूजयेन्नित्यं कर्णिकास्थं यदा बुधः॥ ३७॥

तदा सौनुग्रहं याति स गृहो नात्र संशयः।
एकैकस्य गृहो देवि होरात्राणि प्रकीर्तिताः॥ ३८॥

तत्रापि चरते ह्यात्मा कथयामि समासतः।
एकैकस्य तु होरायां शतानि नवसंख्यया॥ ३९॥

प्राणानां देवदेवेशि ज्ञातव्यं कालवेदिना।

पृ। १०७०)

एतत्ते चारमाख्यातं शिवेन परमात्मना॥ ४०॥

एतच्चारविधानज्ञः कालज्ञो नावसीदति।
गृहहोरबलेनैव वक्तव्यन्तु शुभाशुभम्॥ ४१॥

पापे पापमतिं विद्यात् शुभेन शुभमादिशेत्।
एवं बलाबलं ज्ञात्वा आत्मनस्य परस्य वा॥ ४२॥

कथनात्पुण्यमाप्नोति कालज्ञो नात्र संशयः।

देहस्थं कथितं देवि होरचारमनुत्तमम्॥ ४३॥

अतः परतरं वक्ष्ये राशिसञ्चारमुत्तमम्।

राशौ राशौ यदाह्यात्मा चरते कथयाम्यहम्॥ ४४॥

संवत्सरमयञ्चेति द्वादशारं सुशोभने।

पृ। १०७१)

अकारः प्रथमो देवि मेषराशिः प्रकीर्तितः॥ ४५॥

एवमादिक्रमेणैव वेदितव्यं प्रयत्नतः।

तत्रस्थश्चरते ह्यात्मा यथावत्तन्निबोधमे॥ ४६॥

एकैकस्य तु देवेशि शतान्यष्टादश क्रमात्।

एष चारः समाख्यातः राशौ राशौ न संशयः॥ ४७॥

योगमुत्पद्यते तस्य कालयोगविदस्य तु।

यत्पत्रे पश्यते दोषं तन्मासे दोषमादिशेत् ॥ ४८ ॥

शस्त्रापातसुभिक्षञ्च दुर्भिक्षं नरकं तथा ।
क्षेममारोग्यार्थलाभं वदते कालयोगवित् ॥ ४९ ॥

राशौ राशौ पुनस्सर्वं द्रेक्काणन्तु समासतः ।

पृ । १०७२)

तद्रेक्काणे नवे राशौ चारं तेषां ददाम्यहम् ॥ ५० ॥

एकैकस्य तु द्रेक्काणे शतानि षट् प्रकीर्तिताः ।
एकैकोदयस्थावज्ञः सिध्यते नात्र संशयः ॥ ५१ ॥

योगमुत्पद्यते तस्य अचिरादेव योगिने ।
उत्तिष्ठे चादधाने च पादलेपेञ्जने तथा ॥ ५२ ॥

सिध्यते नात्र सन्देहः कालज्ञानविदस्य तु ।
गृहोपरागवन्मासे हृत्पद्मे तु स पश्यति ॥ ५३ ॥

चन्द्रसूर्योपरागे च सर्वं पश्यति योगिनः ।
शुभाशुभन्तु द्रेक्काणैः कथयेत वरानने ॥ ५४ ॥

अंशास्त्रयस्तु पञ्चैक एकैकस्य समासतः ।

पृ। १०७३)

अंशाद्रेक्काणहोरैश्च एकैकस्य समासतः ॥ ५५ ॥

अंशाद्रेक्काणहोरैश्च ग्रहराश्यादयो नव ।
तारचन्द्रबलेनैव शुभाशुभं न संशयः ॥ ५६ ॥

ताराचन्द्रबलेनैव शुभाशुभं न संशयः ।
वदते योगिनः श्रीमान् लोकस्यैव हिताहितम् ॥ ५७ ॥

एतेषु चरतेह्यात्मा तन्मे निगदतः शृणु ।
सहस्रद्वयं विज्ञेयं शतानि चतुरेव तु ॥ ५८ ॥

ताराणाञ्चारमाख्यातमंशानान्तु यथा शृणु ।
ताराणां यावती संख्या अंशानां तावती स्मृताः ॥ ५९ ॥

एष ते चारमाख्यातं चक्रे संवत्सरात्मिके ।

पृ। १०७४)

ज्ञानेन मुच्यते देवि नात्र कार्या विचारणा ॥ ६० ॥

एवं वै यो न जानाति कालज्ञानीत्थं भवेत् ।
आत्मा तु कथितः काल ईश्वरस्स तु कथ्यते ॥ ६१ ॥

तेन ज्ञातेन देवेशि कालज्ञो नावसीदति ।
अतः परं प्रवक्ष्यामि कालचक्रमनुत्तमम् ॥ ६२ ॥

नाडीवायुकलैस्साधं स्वरैश्वरससंयुतम् ।
तदहं संप्रवक्ष्यामि याथातथ्येन मे शृणु ॥ ६३ ॥

द्वात्रिंशमंशकां कृत्वा लिखेच्चक्रं समासतः ।
कला तु देवदेवेशे षोडशैव तु विन्यसेत् ॥ ६४ ॥

पूषा यशा च सुमना प्रीतितुष्टिरिति धृतिः ।

पू। १०७५)

तथा चक्रधृतिकरी सौमरी चिच्छुभं तथा ॥ ६५ ॥

शशिनीत्वङ्गिरा चैव छाया संपूर्णमण्डला।
दशपञ्च कला ज्ञेया अमृता चैव षोडशी ॥ ६६ ॥

कलाह्येतास्समाख्याता नाड्यो वै शृणु सांपृतम्।
ज्वालिनी तु शमा धूम्रा कामदा विजया तथा ॥ ६७ ॥

अमृता य हुला पक्षित्वचवाहात्यलंबुषा।
तालुजिह्वोपजिह्वा च तथा जिह्वावहा च या ॥ ६८ ॥

बुद्धिवाहा प्राणवाहा तथा चामृतवाहिनी।
षोडशैतास्समाख्याताः मरुतादिरलङ्कृता ॥ ६९ ॥

कृकरो देवदत्तश्च पौण्डरीको धनञ्जयः।

पू। १०७६)

वेपथुस्संभ्रमश्चैव विभ्रमो भ्रम एव च ॥ ७० ॥

प्राणोपानसमानश्च उदानो व्यान एव च ।

ऋषयो नागकूर्मश्च षोडशैते महानिलाः ॥ ७१ ॥

अकाराद्या स्वरा देवि ते त्वया विदिताः पुरा ।

बिभज्य कथयेत्प्राणान् कलादीनां यथाक्रमम् ॥ ७२ ॥

सहस्रैकं समाख्यातमेकैकस्य वरानने ।

शतत्रयञ्च ज्ञातव्यं प्राणाः पञ्चाशदेव तु ॥ ७३ ॥

कलाध्वरं तथा वायुः नाडयश्च समासतः ।

एकोदयेन ज्ञातव्यं देशिकेन महात्मना ॥ ७४ ॥

नाडीवायुकलैस्सार्धं कथितं तव शोभने ।

पृ। १०७७)

अतः परं प्रवक्ष्यामि ऋक्षेषु चमरे यथा ॥ ७५ ॥

तथा ते कथयिष्यामि तन्मे निगदतः शृणु।

शतानि सप्त विज्ञेयाः * *? प्राणास्तथैव च॥ ७६॥

प्राणमेकादशश्चैव निमेषैकं तथैव च।

लवमेकञ्च ज्ञातव्यं कालज्ञेन महात्मना॥ ७७॥

तृटिश्च सप्तभागेन नक्षत्रे कथितं तव।

अंशाध्वा दशमाख्याता ऋक्षाणां वरवर्णिनी॥ ७८॥

शतमेकञ्च ज्ञातव्यं कालज्ञेन महात्मना।

एभ्यश्चरति आत्मा तु कथयामि समासतः॥ ७९॥

ऋक्षे ऋक्षे वरारोहे अंशाश्चत्वारि कीर्तिताः।

पृ। १०७८)

यथा चरति विश्वात्मा शृणुष्व कथयामि ते॥ ८०॥

प्राणाश्शतं समाख्यातं प्राणायतिस्तथैव च।

प्राणा द्वादश विज्ञेया निमेषद्वय संयुतम्॥ ८१॥

लवद्वयं तथैवोक्तं शिवेन परमात्मना।

द्वा नवति शतैकन्तु प्राणसंख्या प्रकीर्तिताः॥ ८२॥

निमेषत्रयञ्च विख्यातं त्रिभागेन तृटिद्वयम्।

तृटे शृङ्गाग्रमाख्यातं ज्ञातव्यं सुसमाहितैः॥ ८३॥

सप्तविंशति नक्षत्रां शाह्यष्टोत्तरं शतम्।

अशीति चतुरंशन्तु सर्वत्र परिकीर्तितम्॥ ८४॥

कालं मध्यन्दिने देवि अवीची परिकीर्तिताः।

पृ। १०७९)

कृत्तिकादिषु रत्नेषु ज्ञातव्यं कालवेदिना॥ ८५॥

सर्वेषु सिद्धिदा देवी ची **? परिकीर्तिता।

यस्यै तच्छुभऋक्षेण वीचायां व्रजते नरः॥ ८६॥

सर्वसिद्धिमवाप्नोति धनिको नात्र संशयः।

न तस्य अशुभं किञ्चित् व्याभीच्यां व्रजते तु यः ॥ ८७ ॥

एष ते चारमाख्यातं कालचक्रमुपासिनाम्।

अहोरात्रेण ज्ञातव्यं कालज्ञेन महात्मना ॥ ८८ ॥

एतच्चारविभागज्ञो लभते शाश्वतं पदम्।

दिने दिने स्थिरेद्यस्तु इदं चक्रं समाधिना ॥ ८९ ॥

स लोके पूज्यतां याति परत्र च शिवान्तिकम्।

पृ। १०८०)

नैव पुण्यं भवेत्तस्य नैव पापं कथञ्चन ॥ ९० ॥

दर्शनात्तस्य कर्तव्यं ये केचित्पापकर्मिणः।

अतः परं प्रवक्ष्यामि फलसंख्या यथैव च ॥ ९१ ॥

तत्परा कथिता षष्टिं विदुषः परिकीर्तिताः।

विदुषाणि तथा षष्टिं बिन्दुरेकं प्रचक्षते ॥ ९२ ॥

षष्टिबिन्दुफलं प्रोक्तं कथितं तव शोभने।

फलस्य एषा संख्योक्ता कालं वै लौकिकस्य तु ॥ ९३ ॥

पुनरेव प्रवक्ष्यामि अध्यात्मेन वरानने।

तरुणस्य प्रधानस्य निरुद्धः प्राणिनः स तु ॥ ९४ ॥

षट् प्राणास्तु समाख्याता विना प्रीतिं समादिशेत्।

पू। १०८१)

षष्टिभिर्वी नाड्येका घटिका कथिता तु सा ॥ ९५ ॥

घटिकास्तु तथा षष्टि अहोरात्रं प्रचक्षते।

मुहूर्ता स्त्रिंशदाख्याता अहोरात्रविदो विदुः ॥ ९६ ॥

अहोरात्रेण मर्त्यानां मुहूर्तास्त्रिंशत्कीर्तिताः।

एतान्येकैव संख्यातं मातस्य सुरसुन्दरि ॥ ९७ ॥

मुहूर्ता नवशता ज्ञेयं कालज्ञेन महात्मना।

द्वादशे गणितं मासं संवत्सरमिहोच्यते ॥ ९८ ॥

संवत्सरे मुहूर्तानि यावन्ति कथयामि ते।

सहस्राणि दशप्रोक्ता स्तथाह्यष्टशतानि तु॥ ९९॥

मुहूर्तानि वरारोहे मया ते कथितानि तु।

पृ। १०८२)

मुहूर्ते नवये देवि तथैव कथयामि ते॥ १००॥

शतानि सप्तदेवेशे विंशतिश्च न संशयः।

एषचारं मया प्रोक्तं वेदितव्यं हितैषिभिः॥ १०१॥

अनेन क्रमयोगेन जपसिद्धिमवाप्नुयात्।

त्रिकालविषयं तस्य जायते जापिनस्य तु॥ १०२॥

घटिका पञ्चदेवेशे राशौ राशौ न संशयः।

घटिका पञ्चदेवेशे अकारस्योदयस्मृतः॥ १०३॥

एवमादिक्रमेणैव वेदितव्यं प्रयत्नतः।

लौकिकं प्रहरश्चैव षट्भागं परिकीर्तितम् ॥ १०४ ॥

षण्मासास्तु समाख्याता उत्तरस्तु प्रचक्षते ।

पृ। १०८३)

दक्षिणे तावती ज्ञेया कालज्ञेन महात्मना ॥ १०५ ॥

यद्राशौ वर्तते कालः तस्यैव कथयामि ते ।
उदयं प्रथमो देवि राशिभिः कथितस्तव ॥ १०६ ॥

यस्मिन् राशौ स्थितो ह्यात्मा मासमादि करोति सः ।
मकरः कुंभमीनश्च मेषश्च वृषभस्तथा ॥ १०७ ॥

मिथुनः कथितो षष्ठो राश्यः षण्मासकीर्तिताः ।
कर्कटस्सिंह कन्यश्च तुलावृश्चिकमेव च ॥ १०८ ॥

धनुषी च समाख्यातो दक्षिणे ऋतवास्त्रियः ।
मासि मासि समाख्यातो यथावच्छृणु सुव्रते ॥ १०९ ॥

शतानि चैव चत्वारि प्राणाः पञ्चदशैव तु ।

पृ। १०८४)

मासि मासि समाख्यातो यथावत्तव शोभने ॥ ११० ॥

उत्तरे वर्तमानस्तु यदा दक्षिणतो व्रजेत् ।
यावन्तं क्रमते देवि मध्ये तु विषुवं स्मृतम् ॥ १११ ॥

एषा सङ्क्रान्तिराख्याता दक्षिणोत्तरतस्थिता ।
इन्द्रियार्थं परित्यज्य व्योमावस्थो भवेद्यदा ॥ ११२ ॥

विषुवन्तं विनिर्दिष्टं वेदितव्यं हितैषिभिः ।
यदा ऊर्ध्वत्वमायाति देवदेवो जगद्गुरुः ॥ ११३ ॥

अह एवं विनिर्दिष्टं सर्वतन्त्रेषु भाषितम् ।
अधोभागे स्मृता रात्रिः मध्ये तु अयनं भवेत् ॥ ११४ ॥

निश्चलोर्ध्वमधश्चैव मध्यस्थन्तु विजृंभिभिः ।

पृ। १०८५)

हिक्कामुदाहृता चिक्का अष्टधा तु क्रमेण तु ॥ ११५ ॥

ऊनरात्रं भवेद्धिक्का अधिमास्यो विजृंभिका।
ऋणस्तु भवते कस्सो निश्वासो धन उच्यते ॥ ११६ ॥

एष चारः समाख्यातः कालचक्रमुपासिनाम्।
एवञ्चारविधानज्ञो लभते शाश्वतं पदम् ॥ ११७ ॥

प्रेरितः शक्तिना देवि नाना चेष्टानि कारयेत्।
चारसंयोगयोगेन आत्मानमुपचर्यते ॥ ११८ ॥

एतच्चारमिति प्रोक्तं शिवेन परमात्मना।
सकालं कल्पनामन्तु शक्तिनां परमेश्वरि ॥ ११९ ॥

विकारित्वमुपायाति स चारैरुपचर्यते।

पृ। १०८६)

अकालकलमित्युक्तं वादिनोपि द्विधोद्धृतम् ॥ १२० ॥

स्वयं साक्षात् स्मृतः कालो देवदेवस्सदाशिवः।

नित्यावस्थमिदं कालं ब्रह्मादीनां वरानने॥ १२१॥

तदेव चारयोगेन सञ्चारैरुपचर्यते।

नित्यावस्थोन्यथा कालः केन तदुपचर्यते॥ १२२॥

अनेन उपचारेण कालमेवमुपास्यते।

चारेण ज्ञायते कालं चारात् सिद्धिर्न संशयः॥ १२३॥

चारे भुक्तिश्च मुक्तिश्च चारज्ञो नावसीदति।

तस्माच्चारमिदं देवि वेदितव्यं प्रयत्नतः॥ १२४॥

स बाह्याभ्यन्तरं कालं यो विजानाति कालवित्।

पू। १०८७)

न कालज्ञस्स विज्ञेयो भवेन्नक्षत्र सूचकः॥ १२५॥

ज्योतिर्ज्ञानमिदं देवि मया ख्यातं समासतः।

वेदितव्यं प्रयत्नेन कालज्ञैस्स तु वेदिभिः ॥ १२६ ॥

अहर्वृद्धिक्षयं रात्रौ रात्रौ वृद्धिक्षयेहनि ।
अनेन उपचारेण लौकिकमुपचर्यते ॥ १२७ ॥

न रात्रिर्न दिवा यस्य अयनं विषुवं तथा ।
नित्यं नित्यस्थितो देवि स्वयं साक्षान्महेश्वरः ॥ १२८ ॥

इच्छा तस्य महादेवि उपचारैरुपचर्यते ।
एवं कालमिति प्रोक्तं सर्वतः संप्रवर्तते ॥ १२९ ॥

इति निश्वासकारिकायां दीक्षोत्तरे कालचक्रप्रकरणं नाम सप्तदशः
पटलः ।

पृ । १०८८)

देव्युवाच -

भगवन् श्रोतुमिच्छामि प्रसादात्कथयस्व मे ।
त्वन्मुखामृतसारन्तु पीतं ज्ञानामृतं मया ॥ १ ॥

कलाकलितसन्तानं जगज्जन्मलयोद्भवम् ।

श्रुतमेतन्मया सर्वं त्वत्प्रसादात् सुदुर्लभम् ॥ २ ॥

अधुना श्रोतुमिच्छामि प्रसादं कुरु शङ्कर ।

आयुः प्रमाणं यद्भोगं मनुजानां महेश्वर ॥ ३ ॥

विज्ञानं मरणं तेषां कथं ज्ञास्यन्ति मोहिताः ।

उत्पन्नस्य विनाशोस्ति कृतिरेषा तु कीर्तिताः ॥ ४ ॥

तद्विनाशे तु किं रूपं छिन्नं कालक्रमं यतः ।

पृ। १०८९)

अत्र मृत्युसमीपस्थं कथं विज्ञायते प्रभो ॥ ४ ॥

एतत्सर्वं समासेन कथयस्व प्रसादतः ।

ईश्वरः -

साधु साधु पुनस्साधु प्रश्नमेतत्सुदुर्लभम् ॥ ५ ॥

पृष्टोस्मित्वत्प्रसन्नार्थं श्रूयतान्तु वरानने।
यथा चासन्नमृत्युस्तु जायते तु परस्य तु॥ ६॥

दिवसमुदासिदाद्वन्तु मुहूर्तं सद्य एव च।
येन येन च चिह्नेन लक्ष्यते तु शृणुष्व मे॥ ७॥

स च वै द्विविधो लक्ष्यो बहिरभ्यन्तरे नृणाम्।
ऋक्षाचक्रं गृहैश्चैव अङ्गारिष्टा विपर्ययात्॥ ८॥

पृ। १०९०)

बहिर्लिङ्गन्तु विज्ञेयं अन्तर्लिङ्गन्तु नादजम्।
बहिर्लिङ्गानि वक्ष्यामि समासात्तु वरानने॥ ९॥

नवकोष्ठं कृतं चक्रं कृत्वा तु गणयेद्बुधः।
तत्रैव कोष्ठे कोष्ठे तु लिखेन्नक्षत्रमण्डलम्॥ १०॥

कृत्तिकादि भरण्यन्तं लक्षयेत गृहा हितम्।
रिक्षात्रयस्मृतो जन्म तथा संपद्विपर्ययौ॥ ११॥

क्षेमञ्च प्रत्यरञ्चैव साधनं नैधनं तथा ।
मैत्रं परममैत्रञ्च ताराचक्रं शुभाशुभम् ॥ १२ ॥

तं वै क्रूरग्रहाक्रान्तं जन्मादौ लक्षयेद्बुधः ।
आधानं कर्म जन्मैस्तु भौमादित्यशनैश्चरैः ॥ १३ ॥

पृ। १०९१)

एते क्रूरग्रहा देवि यस्य तिष्ठन्ति सो हतः ।
एते ग्रहा विरुद्धास्तु स नरो हि हतोद्ध्रुवम् ॥ १४ ॥

एकोपि सौम्यसंपृक्तो भवते कृच्छ्रजीवनः ।
सौम्यद्वये कपालस्थ संपदस्तु पदे पदे ॥ १५ ॥

सौम्यत्रयेपि सुमना नित्यतुष्टो भवेन्नरः ।
यथा जन्मत्रये देवि क्रूरास्सौम्यशुभाशुभाः ॥ १६ ॥

वदन्त्येवं तथान्येपि वद्यन्तां तारसङ्गमम् ।
पापघ्नास्संपदस्थास्स्युपीपत्स्था पदकारकाः ॥ १७ ॥

क्षेमघ्ना क्षेमदाश्चैव प्रत्यरे बहुदोषजाः ।
विद्यासिद्धिञ्च कार्यञ्च साधकस्य भवन्ति ते ॥ १८ ॥

पृ। १०९२)

देहनाशं प्रकुर्वन्ति निधनस्थान संस्थिताः ।
मैत्रे तु मैत्रतां कुर्युः यद्यस्यान्यापि क्रौर्यता ॥ १९ ॥

गृहा हिंसन्ति भार्याञ्च गृहाः परममैत्रगाः ।
सौम्याः शुभं प्रयच्छन्ति एकद्वित्रिगुणोदयाः ॥ २० ॥

गुणक्रमाच्छुभं क्रूरा प्रयच्छन्ति गृहा यदा ।
एवं गृहगतिं बुध्वा आत्मनश्च परस्य वा ॥ २१ ॥

प्रबुध्यन्ति नरा देवि आत्मनश्च शुभाशुभम् ।
अङ्गारिष्टं प्रवक्ष्यामि शृणु देवि यथा स्फुटम् ॥ २२ ॥

शुष्ककण्ठोष्ठतालुश्च अकस्माद्रुधिरच्छविः ।
स्कन्धोपि वक्रतामेति विनाशं वत्सरान्तिके ॥ २३ ॥

पृ। १०९३)

अग्निलमण्डलं व्योम्नि पश्यते च दिने दिने।

सितं हरितकृष्णञ्च वत्सरार्धायुषो हि सः॥ २४॥

यदादित्यं विरश्मिञ्च चन्द्रं लाञ्च्छनवर्जितम्।

सुषुम्णान्तारकाज्योति सोपि षाण्मासिकायुषः॥ २५॥

हिरण्यवर्णं पुरुषं स्वप्ने वा कृष्णपिङ्गलम्।

पश्यते वा शिरच्छायां ऋतुत्रयं स जीवति॥ २६॥

तैलपानं तथाभ्यङ्गरक्तमाल्यांवरस्रजा।

खरोष्ट्र्यानमासीनगृध्रकाकशिवादिभिः॥ २७॥

पश्येत्प्रेतपिशाचांश्च उद्वाहश्चाङ्गभक्षणम्।

स्वप्ने च लप्स्यते चैव सो दैकं यदि जीवति॥ २८॥

पृ। १०९४)

शङ्खावर्तभुजे नृत्तज्ञोममेधा गुल्फसन्धिषु।

यदा निष्पन्दतां याति सोवश्यं वधमाप्नुयात्॥ २९॥

अरुन्धतिधृवश्चैव सोमार्कज्योतिमण्डलम्।
न पश्य* * *? धानं सोवश्यं म्रियते नरः॥ ३०॥

अरुन्धती भवेज्जिह्वा न पश्येद्वर्षायुषः।
अल्पायुर्नैव पश्येत नासिकाग्रन्थि वा स्मृतम्॥ ३१॥

दु**? पाणिजैः कान्तै वक्ष्यले ज्योतिमण्डले।
पश्येदर्कसोममण्डलं चतुर्मासायुषो हि सः॥ ३२॥

तालुरन्ध्रगतं धूमं तन्म **? न मुच्यते।
न तु पश्यति मूढात्मा ऋतुमेकं स जीवति॥ ३३॥

पृ। १०९५)

अकस्माज्जायते स्थूलो अकस्माच्च कृशो भवेत्।
अतिभीतोति सं* * *? र्षमेकायुषो हि सः॥ ३४॥

लोहदण्डेन पाणिं कृष्णं कृष्णांबरच्छदम्।

पुरुषञ्चाभिमुखं स्वप्ने ऋतुध्या * * * *? ॥ ३५ ॥

*? यं वै स्नातमात्रस्य हृदयञ्चैव शुष्यति ।
अनुष्णञ्च भवेद्गात्रं द्वौमासायुर्गतायुषः ॥ ३६ ॥

अमेघविद्युदं पश्येद्दि * * * *? नुर्निशि ।
दृष्टे देशेपि दिग्दाहो मासत्रयपरायुषः ॥ ३७ ॥

न शृणोति स्फुटं शब्दं चक्षुषी श्रूयते सकृत् ।
गन्धमाघ्राति चाण्धान्य * * *? विगतायुषः ॥ ३८ ॥

पू। १०९६)

पश्य जिह्वा भवेत्कृष्णा रक्तपद्मोत्पलं मुखम् ।
वर्णञ्च विविधाङ्गेषु उदयं रुदते सकृत् ॥ ३९ ॥

नाभिकंपो **? शोश्च सोर्धमासाद्विपद्यते ।
नाभिज्ञाय श्रीजिह्वं दीपमाघ्रानि पाषिषा *? ॥ ४० ॥

काकैश्च कृतमासीन चतुर्मासायुषो नरः ।

हिक्का * * *? ते नित्यं वक्ररन्ध्रानुगो मरुत्॥ ४१॥

लंबकर्णैव पश्येत मासार्धे विगतायुषः।
एवं विधैर्बहुलिङ्गैः बोद्धव्यं मृत्युचोदितैः॥ ४२॥

अधुनान्तर्गता देवि योगिनां नादजं शृणु।
इदं त्रिनेत्र संप्रोक्तं योगिनो भास्करोदये॥ ४३॥

पू। १०९७)

तत्काले चात्मनो मृत्युं जीवितव्यं विचारयेत्।
ततो योगी शुचिर्भूत्वा धीरो योगासने स्थितः॥ ४४॥

बुध्यमानोत्मजन्नादं सुषुम्नान्तर्गतं बुधः।
अप्रमत्तस्सदा तिष्ठेत् युक्तो नादैकतां गतः॥ ४५॥

एकैकस्य तु नाड्यायाः प्राणान्नव शतं वहेत्।
नवशक्तीति सङ्क्रान्ति काले वै कलयेत्सदा॥ ४६॥

नाड्यावस्थः स्थितोह्यात्मा प्रकृत्या वहतीश्वरः।

ये तु सङ्क्रान्तिके प्राणा सुषुम्ना तु स्थितो वहेत्॥ ४७॥

विषु *? प्रवहे नाथ बुध्वा कालं समादिशेत्।
अहोरात्रेण चाब्दैकं योगी जीवितुमिच्छमि॥ ४८॥

पृ। १०९८)

अहोरात्रद्वयेनैव जीवेत्संवत्सरद्वयम्।
**? रब्दन्तु विज्ञेयश्चतुर्भिश्चतुरब्दिकम्॥ ४९॥

भवेत् पञ्चाब्दिकं मृत्युर्यस्य पञ्चाहनिर्गमम्।
षट्सप्ताष्टदिने व्यूढे तावद्वर्षाणि जीवति॥ ५०॥

अहोरात्रेणैव कालः कलयतेश्वरः * *?।
कदाचिच्छकलेशानः सप्तप्रहरनिर्गमम्॥ ५१॥

षण्मासायुर्भवेद्देवि त्रिमासं षट्प्रहारिकम्।
पञ्चकोह्यर्ध * * *? चतुर्भिर्मासजीविनः॥ ५२॥

अर्धमासायुषो मन्त्री प्रहरत्रयनिर्गमम्।

प्रहरद्वयं तथा व्यूढं दिनान्यष्टौ स जीवति ॥ ५३ ॥

पृ। १०९९)

व्युढं प्रहरमेकन्तु जीवेत् * *? चतुष्टयम् ।
प्रहरार्धं वहेद्यस्य स जीवति दिनद्वयम् ॥ ५४ ॥

सद्यो मृत्युमवाप्नोति यस्य द्वित्रिपथं गतः ।
यं वा कालं समारुह्य प्रवहेत् * * * * ? यम् ॥ ५५ ॥

मासार्धाह्वसमालक्ष्येत्तत्काले निश्चयो भवेत् ।
उत्तरायणजे काले कथितं तव शोभने ॥ ५६ ॥

अथवान्योपि देवेशि * * * ? योगिभिस्सदा ।
श्रोत्रमार्गकृताङ्गुष्ठौ घोषं न शृणुते नरः ॥ ५७ ॥

षण्मासाभ्यन्तरे देवि मारणं तस्य निर्दिशेत् ।
घोरमध्ये * * * * * * * *? न
कारवम् ॥ ५८ ॥

पृ। ११००)

न शृणोति सदा तस्य प्राप्यमासं म्रियेत सः।

उत्पाद्यञ्च तथाकर्ण्य मृत्युयोगं तथैव च॥ ५९॥

लक्ष्येत्सततयुक्तन्तु यो * * *? स्य चिन्तकः।

योगी वक्रान्तनिवहं कालसङ्क्रान्तिपञ्चकम्॥ ६०॥

उत्पाद्यमानमपर * * * * * ? रन्नयेत्।

द्रव्यहानिर्मनोद्वेगं कुर्याद्रोगविवर्धनम्॥ ६१॥

गृहभेदं सुहृन्नाशं तेजोहानिर्विवर्धनम्।

नासिकादक्षिणपुटे दक्षिणायनजीविते॥ ६२॥

सङ्क्रान्त्यष्टौ यदा याति करणयोगोदयो हि सः।

कानल * * * * * * ? न ग्रन्थिभङ्गन्दरम्॥

६३॥

पृ। ११०१)

स्फोटिका शूलरोगांश्च उरो दोषः प्रकोपनम्।

वामघ्राणपुटान्तस्थं सङ्क्रान्त्याह्यष्टपञ्चकम् ॥ ६४ ॥

ज्वररोगशिरोर्तिं वा शूलसंस्तंभनोरिषा ।
नीरोग प्रमेहञ्च मूत्रकृच्छ्रकापयेत् ॥ ६५ ॥

श्रेष्मलाव्याधिमर्धासंस्थो महेश्वरः * * *? ।
यत्काले वहते वायुः तत्काले दिवसे परे ॥ ६६ ॥

व्याधिभिः पीड्यते जन्तुर्वामयामे त *? नरे ।
अतोर्ध्वस्पर्शभं लक्षं नासाधस्तात्तु **? रि ॥ ६७ ॥

ऊर्ध्वेन ऊर्ध्वं विशशे तरुदोषाः पूर्वचोदिताः ।
दक्षिणे दक्षिणे स्पर्शि वा *? क्रोशपराभवम् ॥ ६८ ॥

पृ। ११०२)

मध्ये मध्यस्फुटस्पर्शि पराभिभवनं ययुः ।
साङ्क्रान्त्येको बहुधा प्रवहन्ते इतस्ततः ॥ ६९ ॥

तस्य ला * * * * * * * * * ? पू

जनितम्।

यदा तु मन्दं चारिस्यान्निबीजस्था समाश्रितः॥ ७०॥

धर्मैश्वर्याभिलाभं कुर्यात्प्रियसमागमम्।

यदा द्वादश * * * * * * * * *?

द्वये॥ ७१॥

संवत्सरेण म **? प्राप्तवान्योगिनस्सदा।

* *? रकविच्छेदान्मासैकैकन्तु छन्द * * ?॥ ७२॥

नवशीति तु * * * * * ? प्राणक्षयो भवेत्।

दिवसैकैकविच्छेदाद्यावत्त्रिंशत्समागताः॥ ७३॥

पृ। ११०३)

यदा पूर्वेद्यु वेलायां मृत्युः प्रवर * * *?।

* * * * * * * * * ? लमृत्युं

समादिशेत्॥ ७४॥

इडा सुषुम्नगेत्येवं बोद्धव्यं कालसञ्चरम्।

दक्षिणायनजं कालं क* * * * * * * ? ॥

७५ ॥

**? नां योगकाले तु शुद्धस्सप्राणगश्शिवः ।

सुषम्ना दक्षिणे प्राणे तद्वहे चैव * * *? ॥ ७६ ॥

* * * * * * * * * * * ?

मयनस्मृतम् ।

त्रिरुच्छ्वासव *? ताभ्यां ते चैव विषुवायनम् ॥ ७७ ॥

मकरं कुंभमीनञ्च मेषञ्च मिथुनं तथा ।

सुषुम्ना * * * * * * *? यचोत्तरायणा ॥ ७८

॥

पू। ११०४)

कर्कसिंहकन्या च तुलावृश्चिर्धनुस्तथा ।

इडयान्तर्महादेवि राशयो दि * * * * ? ॥ ७९ ॥

**? नाड्योदये देवि तत्कर्कपरिकीर्तितः ।

मकरमादिसङ्क्रान्त्यै कैकेया बुधः ॥ ८० ॥

आदित्यादि भवे * * * * * * ? चतुर्दश ।

विज्ञेयः प्राणविक्षेपः प्रबुध्यन्ते च ते क्रमात् ॥ ८१ ॥

दिवाचारो भवेद्यस्य वेत्ता तस्य द्वयं भवेत् ।

प्र* * * ? मतिकालं समीपरार्धकल्पितम् ॥ ८२ ॥

पूर्वोदयात्समारभ्य प्राणसप्तदश क्रमात् ।

प्राणाष्षष्टिस्समाख्याता प्राणाश्चैकादशं पुनः ॥ ८३ ॥

पृ। ११०५)

निमेषैकं लवं ह्येकं तृटिमेकादश न्यूनकम् ।

कृत्तिकाद्या भवेच्चारं भरण्यान्तानि मोदिताः ॥ ८४ ॥

एवं शरीरजञ्चाररिक्षेषु कथितं तव ।

ज्ञात्वा योगी जपेन्मृत्युं ध्यात्वा दे* *? लक्षरम् ॥ ८५ ॥

स एव भगवान् काल अजयः कृष्णपिङ्गलः ।

नाडिकाग्रहसंस्थो हि कालः कलयते प्रभुः ॥ ८६ ॥

इति ते कथिता देवि प्रथमा त्रातु घोषिणी ।

पृ। २६८)

अतः परं प्रवक्ष्यामि लयमायासवर्जितम् ॥ ५० ॥

स्वदेहादुत्थितां सद्य शृणुमात्रान्तु पिङ्गलाम्।

सूर्यातपे बहिस्स्थित्वा किञ्चित् भक्तिसमाश्रितः॥ ५१॥

लक्षयेदात्मनो धूमं तालुं भित्वा विनिर्गतम्।

यथा यथा तु चैतस्मिन् मनो लक्षे समादधे॥ ५२॥

तथा तथास्य महती वर्त्ति धूमस्य वर्द्धते।

एवं मासप्रयोगेन मूर्ध्निचारमपावृतम्॥ ५३॥

तुर्यान्ते पिङ्गला मात्रं लयं तस्योपलक्षयेत्।

देवयानपथं दृष्ट्वा पश्यतात्मानमात्मनि॥ ५४॥

लोकालोकांश्च सकलान् सहाह्याभ्यन्तरे स्थितान्।

पृ। २६९)

धूमानुमार्गाञ्ज्योतींषि तां दृष्ट्वा न भृतं पदम्॥ ५५॥

विमुक्तस्सर्वपापेभ्यो निर्द्वन्द्वं पदमाप्नुयात्।

एवं ते पिङ्गलालक्षं मनसा परिलक्षितम्॥ ५६॥

आत्मानं पश्यते तत्र शिवञ्चैव परापरम्।
अनेन विधिना देव तेजसा परिसंवृतः॥ ५७॥

सतताभ्यासयोगेन षण्मासेनैव सिध्यति।
चिन्तितं मनसा सर्वं संपादयति लीलया॥ ५८॥

देहपाते व्रजत्याशु शिवस्य परमं पदम्।
पञ्चविंशति मे तत्वे लक्षमेतत्प्रकीर्तितम्॥ ५९॥

कथितन्तु रहस्यन्तु मोक्षमार्गविशोधनम्।

पृ। २७०)

पञ्चविंशतिमं लक्षं कथितं तव शोभने॥ ६०॥

अथ षड्विंशके तत्वे वैद्युतीं शृणु सुवृते।
योगारंभं विनायामं लीलामार्गोपशोभितम्॥ ६१॥

रात्रौ शयनकाले तु प्रविश्याभ्यन्तरं विना।

विना दीपान्धकारे तु उद्धृत्य नयने स तु ॥ ६२ ॥

ततस्तान् नेत्रजान् दीप्तिं तटद्वलयसन्निभाम् ।
सौदामिनीव चपलां दृष्ट्वा द्रष्टृ प्रणश्यति ॥ ६३ ॥

प्रयोगमेतत् सततं कृत्वा कृत्वा तु विश्रमेत् ।
स्थित्वा कालान्तरं किञ्चित् तान्येवाभ्यसतः पुनः ॥ ६४ ॥

यथा यथा तु चाभ्यासं कुरुते साधको निशि ।

पृ। २७१)

तथा वर्धति तत्तेजस्तैलबिन्दुरिवांभसि ॥ ६५ ॥

पश्यतेन्यावृतं व्योम स्फुलिङ्गा इव काञ्चने ।
तानेव तु गृहान् विद्वान् पश्यते च न संशयः ॥ ६६ ॥

दशार्धमासयोगेन ज्योतिरन्ते प्रकाशते ।
दृष्ट्वा ज्वलनं सर्वत्र दिव्यं चक्षुःप्रवर्तते ॥ ६७ ॥

तत स्वतन्त्रतामेति विशते च परे शिवे।
एतत्ते कथितं लक्षं सुषुम्नायां व्यवस्थितम्॥ ६८॥

कथितं ते यथा न्यायं गूढं सङ्गोपितं मया।
ततस्वच्छन्दतामेति शिवतत्वेन संशयः॥ ६९॥

सप्तविंशति मे तत्वे या स्थिता बिन्दुमालिनी।

पृ। २७२)

तस्योपलब्धिं तस्यापि लक्षन्तु कथयामि ते॥ ७०॥

शुचिर्भूत्वा बहिर्ग्रामात् तरुच्छायां समाश्रितः।
किञ्चिदुन्नम्य वक्रन्तु शुद्धमालोक्येन्नभः॥ ७१॥

तस्मिन् स लाय चैतन्यं पश्यत्याकाशसातपम्।
ज्योतिस्फटिकसंकाशा निपतन्त्युत्पतन्ति च॥ ७२॥

इडयास्तद्भवेद्रूपं देवानान्ते च विद्युषा।
यथा यथा हि योगेन तस्मिन् लक्षं स सन्दधे॥ ७३॥

तथा तथा दिशस्सर्वा बहिः पूर्णैरिवा वृताः।
अनेकाकारवश्ये तु स बाह्याभ्यन्तरे स्थिताः॥ ७४॥

दृष्ट्वात्मना तदा योगी पुण्यपापैर्न लिप्यते।

पृ। २७३)

त्रैलोक्ये सर्वभूतानां सुभगः प्रियदर्शनः॥ ७५॥

जायते नात्र सन्देहः ततो नामाधि गच्छति।
एष ते कथिता मात्रा सौम्याख्या बिन्दुमालिनी॥ ७६॥

मुच्यते सर्वरोगैश्च देहपाते शिवं व्रजेत्।
सप्तविंशति मे तत्वे लक्ष्मायासवर्जितम्॥ ७७॥

अष्टाविंशति मे तत्वे मात्रा नाम्ना तु चान्द्रिणी।
योगारंभं विनायासं मन्त्रोच्चारविवर्जितम्॥ ७८॥

यत्र यत्र स्थितो देशे यत्र तत्राश्रमे रतः।

पूर्वमध्या परा हेतुः अभ्यसेल्लक्षमुत्तमम् ॥ ७९ ॥

श्वेता रक्ता तथा पीता कृष्णा चैव यथाक्रमम् ।

पृ। २७४)

वर्चसं स्फटिकाभन्तु लक्षयेत्परमाणवम् ॥ ८० ॥

किञ्चिदुन्नम्य वक्रन्तु निर्मले तु नभस्थले ।
एकैकाभ्यासयोगेन सिध्यते साधकेश्वरः ॥ ८१ ॥

वायव्याः कृष्णवर्णास्तु आद्ये शेषविनाशने ।
उच्चाटने यथोन्मत्ते योजयेद्योगवित्सदा ॥ ८२ ॥

एवमादीनि चान्यैस्तु ताडनं स्तंभनादि च ।
आप्यायनञ्च पुष्टिश्च शान्तिकादि क्रमेण च ॥ ८३ ॥

कुरुते योगविच्छ्रीमान् एकैकाभ्यासयोगतः ।
प्रतिमासप्रयोगेन एभिः कर्माणि कारयेत् ॥ ८४ ॥

षण्मासा ध्यानयोगेन त्रैलोक्यं यत्प्रवर्तते ।

पृ। २७५)

प्रत्यक्षं जायते तस्य सिध्यन्ते च शिवो भवेत्॥ ८५॥

पञ्चमः सर्वकर्माणि कुरुते परमाणवः ।
पञ्चरूपधरं ह्येतत् पञ्चमं यत्प्रकीर्तितम्॥ ८६ ॥

ध्यात्वात्मैवं विधं योगी सर्वकर्माणि कारयेत्।
तेषां मध्ये पुनर्योगी पश्यते ऊर्मिसङ्कुलाम्॥ ८७ ॥

वीचीतरङ्गकुटिलां विद्युद्रेखासमप्रभम्।
सभोग भोगिसङ्काशामिन्द्रायुधसमप्रभाम्॥ ८८ ॥

यथा यथा तु चैतन्यस्तस्मिन् लक्षे समादधे।
तथा तथा तु संपश्य ऊर्मिरेवतिरन्तरम्॥ ८९॥

एतां दृष्ट्वा तु योगीन्द्र पुण्यपापक्षयो भवेत्।

पृ। २७६)

सतताभ्यासयोगेन सिध्यते नात्र संशयः॥ ९० ॥

द्वादशार्धार्धमासेन क्षुत्तृष्णा परिवर्जितः।
दिव्यदृष्टितनुर्दिव्या जायते नात्र संशयः॥ ९१ ॥

संवत्सरेण युक्तात्मा योगीन्द्रः सुसमाहितः।
दूराच्छ्रवणविज्ञानं मनश्चावलोकनम्॥ ९२ ॥

प्रत्यक्षं जायते तस्य त्रैलोक्यं यत्प्रवर्तते।
अन्तर्धानो तथा कर्षो पादचारे तथैव च॥ ९३ ॥

वायव्येन च कर्तव्यं के च वैहायसादयः।
आग्नेयैः शोषणं कुर्यात् ताडनं मारणानि च॥ ९४ ॥

स्तंभनं मूकताञ्चैव पार्थिवेन तु कारयेत्।

पृ। २७७)

आप्यायनादितः कृत्वा वारुणेन तु कारयेत्॥ ९५ ॥

पञ्चमं सर्वकार्येषु प्रयोज्यं योगिना सदा।

अष्टाविंशति मात्रस्य लक्षह्येताः प्रकीर्तिताः॥ ९६॥

एकोनत्रिंशके तत्वे मात्रा तत्र मनोनुगा।

लक्षितव्या प्रयत्नेन यदिच्छेत्सिद्धिमात्मनः॥ ९७॥

एकान्ते विजने गत्वा दिव्ये चाक्ष्णौ निमीलयेत्।

आत्मा तु काञ्चनच्छाया अक्ष्णी आवृत्य तिष्ठति॥ ९८॥

तस्मिन् सन्धाय चैतन्यं निनादस्संप्रविश्यति।

सितरक्तपीतकृष्णमिन्द्रायुधसमप्रभम्॥ ९९॥

अन्योन्यवेधिनां वर्णा दृष्ट्वा दृष्ट्वा पुनः पुनः।

पृ। २७८)

लक्षयीत पुनस्तान्तु राजिकापरिवर्त्तुलाम्॥ १००॥

छायामध्ये तु लक्ष्यन्ते चित्रास्सर्वगताश्शुभाः।

सर्वदेवमयो देवि देवानाञ्च पृथक् पृथक् ॥ १०१ ॥

तानि रूपाणि पश्यन्ते बिन्दुरूपाणि सुन्दरी ।
तयोर्योगी दिवारात्रौ नान्यं पश्यति चक्षुषा ॥ १०२ ॥

मासेनाल्पपुरीषत्यं क्षुत्तृष्णापरिवर्जितः ।
सुगन्धास्य तनुर्दिव्या जायते तृप्तिरेव च ॥ १०३ ॥

मासद्वयानुबन्धेन दिव्यचक्षुः प्रजायते ।
नश्यन्ति पुण्यपापानि तमः सूर्योदये यथा ॥ १०४ ॥

सतताभ्यासयोगेन त्रिभिः मासैर्न संशयः ।

एकोनत्रिंशके तत्वे तुल्यमेतद्वरानने ॥ १०५ ॥

नाडी वै सुकृता नानामा महापातकनाशिनी ।
तस्य लक्षमिदं देवि शृणु एकमना मम ॥ १०६ ॥

अप्रयोगमनायास मात्रा बिन्दुविनाकृतिः।
कण्ठताल्वोष्ठरहितं मन्त्रोच्चारविवर्जितम्॥ १०७॥

सुनिष्णातो नरस्तस्मिन् अमृतत्वाय कल्पते।
अप्रयोगमनारंभमनायासोपलक्षितम्॥ १०८॥

येन सर्वमिदं पूर्णमाकाशं सर्वगेन तु।
तस्य यत्नात् शृणु देवि आकाशे मनसं दधेत्॥ १०९॥

यत्र तत्र स्थितो वापि शुचिवाप्यथवाशुचिः।

पृ। २८०)

चित्तं श्रोत्र समाधाय बाह्यशब्दविवर्जितम्॥ ११०॥

निवाते स्वल्पवाते वा घण्टानामिव ताडिता।
यवनिकाकर्णयेद्देवि पुण्यपापक्षयङ्करीम्॥ १११॥

कांसस्य सुविशुद्धस्य सुप्रभारहितस्य च।
सदृशं शब्द आकर्ण्य अमृतत्त्वाय कल्पते॥ ११२॥

तेन सर्वमिदं पूर्णं आकाशं सर्वगेन तु।

तस्याभ्यासेन सततं चिद्रा पश्यति मेदिनीम्॥ ११३॥

मासार्धं येन योगीन्द्रो व्याधिभिश्च न पीड्यते।

प्राप्नोति सुभगत्वञ्च देहपाते शिवं व्रजेत्॥ ११४॥

आदितस्त्र्यक्षरो योसौ त्रिविधो यः प्रकीर्तितः।

पृ। २८१)

शिवस्य वै स विज्ञेयः सामान्यत्वात्प्रकाशकः॥ ११५॥

द्वितीयः प्रणवो देवि हंसाकारसमन्वितः।

बिन्दुना सहितेनैव रुद्राकारः प्रकीर्तितः॥ ११६॥

अकामाद्याः प्रवर्तन्ते व्यापकत्वोपलक्षिताः।

स्वच्छन्दवृत्तिः सूक्ष्मोयं निधानोङ्कार उच्यते॥ ११७॥

हकारा उकारसंयुक्तमोंकारेण समन्वितः।

बिन्दुना सहितो देवि तृतीयः परिकीर्तितम्॥ ११८॥

आब्रह्मपथमोंकारस्स तु सूतिः प्रकीर्तितः।
श्रीकण्ठादिमनन्तान्तं रुद्रोङ्कारस्स उच्यते॥ ११९॥

तस्योपरिष्ठाद्विज्ञेयं तृतीयं प्रणवस्मृतम्॥

पृ। २८२)

शान्तिविद्याधिका सिद्धिः निधने निधनान्तिका॥ १२०॥

शब्दाकाशे व्यतीता तु गतिस्तस्यैरनुत्तमा।
त्रिभिन्नमेतत्सकलमध्वानं परिकीर्तितम्॥ १२१॥

सकलः पञ्चतत्त्वस्तु त्रयस्सकलनिष्कलः।
उच्चारेण यदा हीनो बिन्दुं निष्कलतां गतः॥ १२२॥

शिवेच्छयानुगृह्णाति साधको मुक्तिमिच्छति।
सौम्यनाडीति विख्याता महापातकनाशिनी॥ १२३॥

किं स स्वरादतिक्रम्य घण्टाशब्दादिलक्षणः।
यश्शब्दः श्रूयते देवि रुद्रोंकारस्स उच्यते॥ १२४॥

सर्वकर्मकरं दिव्यं अणिमादिफलप्रदम्।

पृ। २८३)

एकत्रिंशद्विजानीयात् शिवोङ्कारस्तु तत्परः॥ १२५॥

द्वात्रिंशत् तत्समाख्यातं तन्मात्रगुणवर्जितम्।
व्यापकेन समायुक्ता नाडी प्रोक्ता नरञ्जना॥ १२६॥

शिवोङ्कारा परं दिव्यं ओङ्कारममलं विदुः।
सतताभ्यासयोगेन साधकानां प्रयच्छति॥ १२७॥

मासार्ध दशभिश्चैव अणिमादि गुणाष्टकम्।
दूरश्रवणविज्ञानं सर्वलोकेषु भाषितम्॥ १२८॥

पश्यते च महातेजः सर्वत्र समवस्थितम्।
व्याप्नोति कामरूपित्वं सर्वज्ञत्वं तथैव हि॥ १२९॥

देहपातो व्रजन्त्याशु शिवस्य परमं पदम्।

पृ। २८४)

घण्टानादविरामान्ते शिवोङ्कारं निगद्यते ॥ १३० ॥

शिखा सा लक्षणेनोक्ता विमला परिकीर्तिता।
कालतत्वः स एवोक्तो नाडीप्रोक्ता निरञ्जना ॥ १३१ ॥

विमलाख्या वरारोहे परमाक्षरसंयुता।
निरालंबं प्रवक्ष्यामि नवतत्वफलप्रदम् ॥ १३२ ॥

पराक्षरपरोच्चार्यं बिन्दुतत्वमनुस्मरेत्।
पश्चात्तु परमेतत्तु न किञ्चिदपि चिन्तयेत् ॥ १३३ ॥

त्रयस्त्रिंशत् स्मृतं तत्वं विमलन्तु वरानने।
द्वात्रिंशकस्समाख्यातो निरालंबे परे स्थितः ॥ १३४ ॥

त्रयस्त्रिंशत् परो यस्तु निर्देश्यो नाम वर्जितः।

पृ। २८५)

तं ज्ञात्वा देवि सिद्ध्यन्ते लक्षैतत्परिकीर्तितम्॥ १३५॥

एवं बहुविधं प्रोक्तं तत्वमेकं शिवेन तु।
सिद्धिदं मोक्षदञ्चैव दिष्टन्तत्तु विचिन्तयेत्॥ १३६॥

ज्ञात्वैवं ज्ञानसर्वस्वं विचरस्व यथा सुखम्।
एतन्न कस्यचिद्देयं ज्ञानामृतमिदं शुभम्॥ १३७॥

एतत्सर्वं समाख्यातं तत्वध्यानं सुनिर्मलम्।
परं तावदिदं देवि तत्त्वानां परिकीर्तितम्॥ १३८॥

एतेषां यदपरो निरूपाख्यो निरामयः।
सर्वेषान्धारकस्सोहि स वै चाधार वर्जितः॥ १३९॥

न च तस्येदृशं ध्यानं तव देवि प्रकीर्तितम्।

पृ। २८६)

इति निश्वासकारिकायां त्रयस्त्रिंशत्पटलः।

देवि

आचार्यः शिवतन्त्रन्तु शिवज्ञानं शिवस्य च।
वेत्तिसर्वमशेषेण लोकहेतु विवर्जितः॥ १॥

विरक्तो लौकिके शास्त्रे शिवज्ञानैक रागवान्।
तेषाञ्च उत्तरं वाच्यं येनोपायेन ईश्वरम्॥ २॥

तदहं श्रोतुमिच्छामि त्वत्प्रसादान्महेश्वर।

ईश्वर उवाच

यो ब्रूयात् कश्चित् कश्शब्दो विनाशित्वेन पठ्यते॥ ३॥

पृ। २८७)

इतस्तस्य पुनर्ब्रूयात् तच्छृणुष्व वरानने।
त्रिगुणः पुद्गलो वायुराकाशस्याथ वा गुणः॥ ४॥

आशापाशैर्विमुक्तोयं अमृतं पर्युपासते।

इति निश्वासकारिकायां ज्ञानकाण्डे

सर्वज्ञार्चनसिद्धान्तज्ञानज्ञेयलक्षणन्नाम चत्वारिंशत्पटलः।

देव्युवाच

पञ्चभूतात्मके पिण्डे कस्मिन् के देवता स्थिताः।

पादौ च जानौ जङ्घायां ऊरुयुग्मे च के स्थिताः॥ १॥

पृ। ३६०)

लिङ्गे च देवदेवेश स्फिजौ कटिके स्थिताः।

नाभिःप्रदेशपार्श्वे च पृष्ठवंशे तथैव च॥ २॥

आन्त्रे मज्जे च देवेश रुधिरे कफपित्तयोः।

रोमकूपे च के चोक्ता हस्तौ पादौ * * * *॥ ३॥

* * * * * * * * * * * * च के

स्थिताः।

चुबुके चक्षुषोश्चैव ललाटे मस्तके चके॥ ४॥

वाचां नाडी देवेश अहङ्कारे च के स्थिताः।

इन्द्रियाणां च के देव विदिते यत्फलं भवेत्॥ ५॥

एतन्मे देवदेवेश प्रसादाद्वक्तुमर्हसि।

ईश्वर उवाच

पृ। ३६१)

शृणु देवि परं गुह्यं यत्त्वया परिपृच्छितम्॥ ६॥

तदहं संप्रवक्ष्यामि त्वत्प्रियार्थं वरानने।

सत्त्वञ्च आदितः कृत्वा प्रवक्ष्यामि निबोधत॥ ७॥

सत्त्वं प्रधानमित्युक्तं स ब्रह्मा तु निगद्यते।

रजो विष्णुस्तमो रुद्रो बुद्धिरष्टगुणाः शृणु॥ ८॥

धर्मज्ञानञ्च वैराग्यमैश्वर्यञ्च तथा परा ।
अधर्मश्चैव विज्ञेयं अज्ञानञ्च तथैव हि ॥ ९ ॥

अवैराग्यमनैश्वर्यं योगीशानां क्रमेण तु ।
ब्रह्मादि देवता बुद्धेर्धर्माद्याश्शक्रदेवताः ॥ १० ॥

अहङ्कारे स्थितो रुद्रः शून्ये शब्दः प्रतिष्ठितः ।

पृ। ३६२)

स्पर्शो वायुस्समाख्यातो रूपे वह्निः प्रकीर्तितः ॥ ११ ॥

तस्य तन्मात्रे वरुणो गन्धे तु पृथिवी स्थिता ।
प्रजापतिः पृथिव्यां वै द्रवे सोमः प्रतिष्ठितः ॥ १२ ॥

सूर्यस्तु संस्थितस्तेजे मारुतस्पर्शने स्थितः ।
शिवतत्वं परं गुह्यमाकाशे संप्रतिष्ठितम् ॥ १३ ॥

श्रोत्रेन्द्रिये महादेवि दिशः सर्वाः प्रतिष्ठिताः ।
त्वगिन्द्रिये तु मरुतः चक्षुभ्यां हुतभुक् स्थितः ॥ १४ ॥

जिह्वेन्द्रिये सदा देवि भुवशक्तिः सरस्वती।
घ्राणेन्द्रिये तु वै ज्ञानं पादयोर्विष्णुरेव हि॥ १५॥

क्रियाशक्तीति निर्दिष्टा मित्रो वायुश्च गृह्यते।

पृ। ३६३)

ज्येष्ठा प्रजापतिर्लिङ्गे वामा रौद्री च वचया॥ १६॥

जलेन्दुर्मनसि ज्ञेया वाक् सवित्री हृदि स्थिता।
गौरी वागीश्वरी कर्णे ललाटे विमलारि तु॥ १७॥

स्नायुवर्गे स्थितोनन्तः सूक्ष्मः शुक्ले व्यवस्थितः।
शिवोत्तमोत्तमो देवः स्थितोस्थि निचये सदा॥ १८॥

एकनेत्रस्थितो मांसे एकरुद्रस्तथापरे।
रुधिरे संस्थितो नित्यं त्रिमूर्तिः कफपित्तयोः॥ १९॥

श्रीकण्ठो रोमसङ्घाते मूत्रेषु च सदा स्थितः।

शिखण्डी च परो रुद्रो नखेषु सर्वतस्थितः ॥ २० ॥

तन्महेशस्थितो देहे ऋषयश्चापि सन्धिषु ।

पृ। ३६४)

पृष्ठवंशे च चण्डीशः पार्श्वेषु च संस्थितः ॥ २१ ॥

अङ्गुलीषु स्थिता नागा बाहौ पितरस्संस्थिताः ।
नाभौ वह्नि स्थितः साक्षात् सर्वेषामेव देहिनाम् ॥ २२ ॥

विद्याधरास्तथा यक्षाः रोमकूपेषु संस्थिताः ।
हस्तयोरिन्दुदेवत्यो जानुजङ्घे तथाश्विनौ ॥ २३ ॥

ऊरुयुग्मौ स्थितौ देवौ मित्रावरुणविश्रुतौ ।
नेत्रयोर्गन्धयोश्चैव ग्रीवायां चिबुके स्थिताः ॥ २४ ॥

सप्तगृहास्ससपस्संस्थिताश्चाधिदैवताः ।
नक्षत्रमण्डलं दिव्यं मुक्तनानु केनु संस्थिताः ॥ २५ ॥

एवं वै यो विजानाति सर्वदेवैरधिष्ठितम्।

पृ। ३६५)

शरीरं सर्वजं ज्ञानं न पापेन विलिप्यते॥ २६॥

एतन्न्यासपरं देवि योभ्यसेत दिने दिने।
स श्रियं लभते देवि ईश्वरेण समो भवेत्॥ २७॥

न पापं न च वै पुण्यं न भयेषु भयं भवेत्।
मुच्यते किल्बिषैर्घोरैः सप्तजन्मकृतैरपि॥ २८॥

सेवितव्यं प्रयत्नेन योगिनां मुक्तिमिच्छता।
नवोपायं मयाचोक्तं तेन त्वामृतसंस्थिताः॥ २९॥

सर्वेषां यः परो देवः सर्वव्यापी व्यवस्थितः।

इति निश्वासकारिकायां ज्ञानकाण्डे सर्वदेवशरीरन्यासे
एकचत्वारिंशत्पटलः॥

नारौ जयस्तु विज्ञेय सारे सिद्धिर्न संशयः।

इति निश्वासकारिकायां एकपञ्चाशत्पटलः।

देव्युवाच

विज्ञप्ते किं प्रमाणन्तु ज्ञातव्यं देशिकेन तु।
निस्सते किं प्रमाण स्यात् प्रविशेपि महेश्वर ॥ १ ॥

अन्तरे चायनस्यैव एतदिच्छामि वेदितुम्।

ईश्वरः

महत्पुण्यमिदं देवि न पृष्टं केनचित्पुरा ॥ २ ॥

तदहं संप्रवक्ष्यामि साधकानां हितावहम्।
प्राणस्यैव निरोधेन स्थातव्यं देशिकेन तु ॥ ३ ॥

एवं क्रमेण देवेशि अविच्छिन्नस्तु साधकः।
तावत्तक्षणमात्रेण स सिद्धेनैव साधकः॥ ४॥

पू। ६०७)

भवते नात्र सन्देहः सत्यं देवि वदाम्यहम्।
यदा प्राणनिरोधस्तु भवते साधकस्य तु॥ ५॥

तदासौ ज्ञातविज्ञेया ज्ञेयं तस्य कृतो भवेत्।
ऊर्ध्वभागे चरे यावदधश्शून्यं विनिर्दिशेत्॥ ६॥

ऊर्ध्वशून्यमधश्शून्यं मध्ये तु जयनं भवेत्।
उत्कर्षणी कला सूक्ष्मा सु सूत्रे च द्वितीयका॥ ७॥

अधोभागे स्थिते चैते ज्ञातव्ये तत्ववेदिना।
ऊर्ध्वं सञ्चरतस्तस्य कले दक्षिणतः स्थिते॥ ८॥

तदहस्संप्रबुद्धस्तु सर्वसिद्धिप्रदश्शुभः।
अधोमुखे प्रयातस्य कले द्वे वामतस्थिते॥ ९॥

पृ। ६०८)

निशान्तन्तु विजानीयाच्चारङ्गे कथितं तव।
यावद्दक्षिणतो याति तावद्वामेन शोभने॥ १०॥

तावच्छून्यं विजानीयात्त्रीण्येव वरवर्णिनी।
मध्ये तु निश्चलं शून्यमयनं तं विनिर्दिशेत्॥ ११॥

तस्य संस्पर्शभावेन यदा युज्यति साधकः।
तदा निर्वाणतां याति नात्र कार्या विचारणा॥ १२॥

तस्य संस्पर्शभावस्तु कथितस्तव शोभने।
शून्यस्थानानि वक्ष्यामि शृणुष्वावहिता प्रिये॥ १३॥

येन विज्ञातमात्रेण अभावपदमाप्नुयात्।
निवृत्तिमध्यभागे तु प्रतिष्ठा तिर्यगुत्तरे॥ १४॥

पृ। ६०९)

विद्या दक्षिणतः प्रोक्ता शान्तिः पूर्वदिगाश्रिता।
नादस्तु पञ्चमो ज्ञेयः स शिवः परिकीर्तितः॥ १५॥

कलाश्चतस्रो या प्रोक्ता नादसञ्चरणात्मकाः ।

पञ्चमस्तु शिवः प्रोक्तः सुसूक्ष्मः कथितस्तव ॥ १६ ॥

नादपूजां करोत्येवमनुध्यानेन सुवृते ।

जीवस्तु नाद इत्युक्तः स्पर्शशक्तिमयस्मृतः ॥ १७ ॥

जीवस्पर्शविनिर्मुक्तो गुरुवक्त्रे प्रतिष्ठितः ।

द्विविधेन तु देवेशि कर्तव्योनुग्रहस्सदा ॥ १८ ॥

एतद्देवि न दातव्यं ज्ञानं ज्ञेयमिदं शुभम् ।

देयञ्च गुरुभक्ताय शिवभक्ताय धीमते ॥ १९ ॥

पृ । ६१०)

अन्यथा दुष्टमर्त्यानां श्रेयस्सिद्धि निपातयेत् ।

इति निश्वासकारिकायां द्विपञ्चाशत्पटलः ॥

देव्युवाच

शीघ्रगं सलिलं यद्वत् जलं दहति पावकः।

मारुतः प्रवहं ब्रूते मन्त्रिणं मोक्षकस्तथा॥ १॥

केन मात्राविभागेन येन च च्छिवकृद्भवेत्।

एतदिच्छामि विज्ञातुं भगवन् वक्तुमर्हसि॥ २॥

ईश्वरः

त्रिभेदं कथयिष्यामि अक्षरस्यैव सुवृते।

पृ। ६११)

येन विज्ञातमात्रेण मुच्यते नात्र संशयः॥ ३॥

एकारेण यदा सान्तं संभिन्नं वरवर्णिनी।

बिन्दुनादेन ज्ञातव्यं शीघ्रगं सलिलं नदेत्॥ ४॥

श्रुत्वा पापैः प्रमुच्यन्ते नात्र कार्या विचारणा।

तेन विज्ञातमात्रेण अमृतत्वाय कल्पते॥ ५॥

ह सुकारसमायुक्तो ज्वलन्निव समं नदेत्।

आकारेण यदा भिन्नं देवदेवं सदातने॥ ६॥

मारुतः प्रवहं ब्रूते मया पूर्वमुदाहृतम्।

सीतकंपेन ह्रस्वेन मुखेनैव करोति यः॥ ७॥

एवं वेद्यस्वदेहे तु ज्ञात्वा पापक्षयो भवेत्।

पृ। ६१२)

ढ उकारविभागेन श्रुत्वा पापैर्विमुच्यते॥ ८॥

ह आकारविभागेन ज्ञात्वा मुच्येत बन्धनात्।

आकारेण तु विन्यस्य ध्यानादुत्क्रमते ध्रुवम्॥ ९॥

संहतप्राणिकरणं संमुखं पर्यवस्थितम्।

अधस्ताद्वायुना दीप्तमीकारं वह्निदेवतम्॥ १०॥

सप्ताहमभ्यसेद्देवि ज्योत्स्ना भावं स पश्यति।

शृणोति विविधान् नादान् मासादभ्यन्तरेण तु ॥ ११ ॥

सिद्धगन्धर्वदेवांश्च तिर्यग्वायुपथे स्थितः ।
त्रिभिर्मासैस्स पश्येत प्रत्यक्षं सर्वतः स्थितम् ॥ १२ ॥

यदा संहरते मानं योगी प्राणमशेषतः ।

पृ। ६१३)

अभ्यासेन तु देवेशि निश्चलः संप्रजायते ॥ १३ ॥

एष ते कथितो देवि आदिभिन्नस्य सुवृते ।
षण्मासानभ्यसेद्यस्तु उच्चामरपुरं व्रजेत् ॥ १४ ॥

इच्छया संहरेत्प्राणानिच्छया विकिरेत्पुनः ।
संवत्सरेण मुक्तात्मा भवेत्स्वच्छन्दमृत्युकः ॥ १५ ॥

उत्तिष्ठमादितः कृत्वा सर्वं सिद्ध्यति नान्यथा ।
ह्रस्वकारविभिन्नस्य शृणुष्व सुरसुन्दरि ॥ १६ ॥

रश्मिनाकर्षणं कुर्यात् स्वदेहेनैव योगवित्।
उदरे रक्तवर्णन्तु मध्याह्ने तेजमालिनम्॥ १७॥

तृतीये शीतरश्मिञ्च ध्यायेन्नित्यं स्वदेहतः।

पृ। ६१४)

अहन्यहनि चाभ्यासं कर्तव्यं योगिना प्रिये॥ १८॥

अभ्यासमासमात्रेण पश्यते त्रिविधं पुटम्।
योगमुत्पद्यते तस्य अचिरादेव योगिनः॥ १९॥

रक्तेनाकर्षणं कुर्याद्देवदैत्यवराङ्गनाः।
एवमादीनि चान्यानि कुर्यादाकर्षणानि च॥ २०॥

चित्तमाकर्षणञ्चैव सालभक्षास्तथैव हि।
चित्तगृहाणि रम्याणि वाहिनीश्च तथैव च॥ २१॥

शरीरव्याधि निर्नाशकुष्ठव्याधिक्षयं महत्।
षण्मासयोगयुक्तस्य इत्येतत्समुदाहृतम्॥ २२॥

संवत्सरेण योगीन्द्र उच्चावचपरा वपुः।

पृ। ६१५)

स्थूलात्स्थूलतरो भूत्वा सूक्ष्मात्सूक्ष्मतरः पुनः॥ २३॥

स तनुर्वितनुश्चैव जायते नात्र संशयः।
ह्रस्वका विभिन्नस्य कथितं तव शोभने॥ २४॥

षड्वर्णेन विभिन्नस्य शृणु देवि वदाम्यहम्।
सकृत्प्रभावविशदं चन्द्रार्कग्रहणं स्थितम्॥ २५॥

विमनस्कं परं शान्तं केवलं तच्छिवात्मकम्।
शून्यमाकाशभूतन्तु जरामृत्युविनाशनम्॥ २६॥

अभ्यासमासमात्रेण शृणु देवि वदाम्यहम्।
क्षुत्पिपासा विनिर्मुक्तो निर्द्वन्द्वच्छिन्न संशयः॥ २७॥

देवगन्धर्वसिद्धाश्च त्रिभिर्मासैः स पश्यति।

पृ। ६१६)

देवैश्च सततं याति षण्मासाभ्यन्तरेण तु ॥ २८ ॥

संवत्सरेण युक्तात्मा योगिनस्सुसमाहितः।
पश्यते देवि भूतेशं गणेशपरिवारितम् ॥ २९ ॥

स्वभावस्मरणाद्देवि कालक्षेपस्समुक्तिदः।
ध्यानर्निर्मथनाद्देवि सिद्धिरुत्पद्यते ततः ॥ ३० ॥

एतत्त्रिभेदभिन्नस्य ज्ञानसिद्धिर्न संशयः।

देव्युवाच

दूरस्थश्च समीपस्थः पीठस्थः पीठवर्जितः ॥ ३१ ॥

मलिनो निर्मलश्चेति त्वया पूर्वमुदाहृतः।
किं दूरमन्तिको वापि दूराद्दूरतरन्तु किम् ॥ ३२ ॥

पृ। ६१७)

सन्निकृष्टं ततो देव भेदानि कथयस्व मे।

ईश्वरः

अतिगुह्यतरं प्रश्नं केनचिन्नापि पृष्टवान्॥ ३३॥

तदहं संप्रवक्ष्यामि साधकानां हिताय वै।
दूरस्थं कथयिष्यामि सर्वयोगिहितावहम्॥ ३४॥

येन विज्ञातमात्रेण आत्मा वै योग्यतां व्रजेत्।
दशरूपा मया ख्याता सर्वे दृश्यन्ति शोभने॥ ३५॥

विद्यातत्वेन ते प्रोक्ता बिन्दुतत्वे वरानने।
खड्गेन गच्छतस्तस्य द्रष्टव्यं लक्षमुत्तमम्॥ ३६॥

शीतरश्मिर्यथा सौम्यमभ्यासाज्जायते प्रिये।

पृ। ६१८)

बीजद्वयसमायोगाज्जायते नात्र संशयः ॥ ३७ ॥

रूपं तत्र मया देवि पूर्वन्तु कथितं तव ।
एतद्वारं मया ख्यातं ज्ञातव्यं तत्वचिन्तकैः ॥ ३८ ॥

समीपं दीपदृष्ट्या तु व्याख्यातं तव शोभने ।
तत्त्वया विदितं सर्वं मयापि कथितं तव ॥ ३९ ॥

पीठस्थं चक्षुषा ख्यातं मयापि कथितं पुरा ।
त्वया देवि तथा ज्ञातं किमन्यत्कथयामि ते ॥ ४० ॥

दूरस्थं दिव्यमित्याहुः समीपं दिव्यसंज्ञितम् ।
पीठस्थं नयनं प्रोक्तं बिन्दुतत्वं समासतः ॥ ४१ ॥

देहस्थं मलिनं प्रोक्तं सर्वतत्वेषु शोभने ।

प्। ६१९)

ज्ञातव्यं योगिभिर्नित्यं अधमं योगिसिद्धिदम् ॥ ४२ ॥

निर्मलो देहहीनस्तु ज्ञाते सिद्धिर्न संशयः।

सर्वकर्माणि कर्तव्याण्याशु सिद्धिमवेप्सता ॥ ४३ ॥

निर्मलन्तु विनिर्दिष्ट सर्वतन्त्रेषु शोभने।

शक्तिचेष्टाविकाराणि कुरुते नित्यमेव च ॥ ४४ ॥

सकलस्तु स विज्ञेयः शक्तिचेष्टा अदेहतः।

दृश्या शक्तिरिति ख्याता त्वयापि विहिता तथा ॥ ४५ ॥

विज्ञानमपि शो ब्रूयान्नशोभमुपयात्यसौ।

यथा बिन्दुर्मया ख्यातः शक्तिस्तु विदिता तथा ॥ ४६ ॥

प्रत्यक्षं भवते सूक्ष्मं सुसूक्ष्मं दिव्यमुच्यते।

पृ। ६२०)

उच्चारं दूरमित्युक्तं कथितं तव शोभने ॥ ४७ ॥

दूराध्यातमिति प्रोक्तं कथितन्तु मया तव।

एतत्तस्मिन् मया ख्यातं परस्यैवापरस्य च ॥ ४८ ॥

त्वयापि विदितास्सर्वे सकलाः परमेश्वर ।

एतद्देवि रहस्यन्तु मया ख्यातं समासतः ॥ ४९ ॥

वेदितव्यं प्रयत्नेन गुरुमाराध्य यत्नतः ।

एतत्प्रश्नपरं देवि सर्वेषामपि चोत्तमम् ॥ ५० ॥

परीक्षा पूर्वमेवोक्तं दातव्यं तादृशाय तु ।

देव्युवाच

शक्तिचेष्टाविकारे तु यत्त्वयोक्तं महेश्वर ॥ ५१ ॥

पृ। ६२१)

तेन युक्तानि चेष्टानि कुरुते कथयस्व मे ।

ईश्वरः

एतत्प्रश्नं परं देवि सर्वेषामपि चोत्तमम् ॥ ५२ ॥

तदहं संप्रवक्ष्यामि तदेकाग्रमनाः शृणु ।

आधारो नाद इत्युक्तः स जीवः परिकीर्तितः ॥ ५३ ॥

तेजस्पर्शमृता शक्ति नादं व्याप्य व्यवस्थिता ।

स नादो बिन्दुमाश्रित्य शक्तिना प्रेरितो यदा ॥ ५४ ॥

तदा तत्क्षोभमायाति बिन्दुशक्त्या प्रचोदितः ।

बिन्दोर्वर्णाः समुद्भूताः यतः शास्त्रञ्च वाङ्मयम् ॥ ५५ ॥

शक्ता समरसी भूत्वा बिन्दुनादे व्यवस्थिताः ।

प्। ६२२)

सुषुप्त इव चात्मानं सुखदुःखं न बाधते ॥ ५६ ॥

बिन्दुदेवं तथैवेह ज्ञातव्यश्चैव देहिना ।

सर्वज्ञानता शुद्धा शिवकायाद्विनिर्गता ॥ ५७ ॥

बिन्दुनादस्तत्वेषु चेष्टते परमेश्वरि ।

बिन्दुनादस्य या चेष्टा तत्वानाञ्चैव सुवृते ॥ ५८ ॥

ज्ञातव्या सा सदा तज्ज्ञैः शिवशक्तिसमन्विता ।
शक्तेः समरसो देवि कथितश्चानुपूर्वशः ॥ ५९ ॥

बिन्दो रूपप्रकाशस्तु नादशब्दस्तु यत्स्मृतः ।
तत्सर्वं शक्तिना व्याप्तं वेदितव्यं प्रयत्नतः ॥ ६० ॥

बिन्दुनादो वरारोहे यदा शक्तिसमन्वितः ।

पृ। ६२३)

त्रिभिरेव तु संयुक्तः स जीव इति कीर्तितः ॥ ६१ ॥

शिवशब्दो वरारोहे त्रिभिरेभिः प्रकीर्तितः ।
ईषत्स्पर्शसमायुक्त मुखनासापुटस्य तु ॥ ६२ ॥

सा शक्तिः कथिता देवि शिवतत्वे प्रकीर्तिताः ।
इति ते कथितं देवि शक्तेस्समरसं तथा ॥ ६३ ॥

परीक्षा पूर्वमेवोक्ता दातव्या तादृशाय तु ।

देव्युवाच

प्रणवत्त्रयन्तु देवेश योगाध्याये यदुक्तवान् ॥ ६४ ॥

तदहं श्रोतुमिच्छामि भगवन् वक्तुमर्हसि ।

ईश्वरः

पृ। ६२४)

देहस्थं यजातान्तेषां व्योमस्थञ्च तथैव हि ॥ ६५ ॥

योगकाले च देवेशि प्रणवेन यजेत्सदा ।
अधस्तात्पञ्चतत्वानि ब्रह्मोङ्कारेण पूजयेत् ॥ ६६ ॥

विद्यातत्वे स्थिता ये तु रुद्रोङ्कारेण पूजयेत् ।
शिवतत्वे स्थिता ये तु निधनेन प्रपूजयेत् ॥ ६७ ॥

मानसं योगकाले तु पूजनीयः परः शिवः ।
शिवपूजाविधौ पश्चाद्योगं सेवेत योगवित् ॥ ६८ ॥

तत्वाद्या मया प्रोक्ता ब्रह्माद्यैश्च समायुताः ।
तेषां स्थलं पवित्राद्यं प्रणवेन तु दापयेत् ॥ ६९ ॥

देव्युवाच

पू। ६२५)

रूपस्पर्शादिशब्देभ्यः स्थिरकालास्सर्वतस्थिताः ? ।
यस्मिन् पूर्वाणि देवेश कस्मिन् स्पर्शः प्रतिष्ठितः ॥ ७० ॥

शब्दं कथय देवेश एतदिच्छामि वेदितुम् ।

ईश्वरः

जीवस्य भूतसंस्थस्य त्रिस्थाने शृणु दर्शनम् ॥ ७१ ॥

येन ज्ञातेन दृष्टेन श्रुतेन वरवर्णिनी ।

मुच्यते नात्र सन्देहः सिद्धिश्चैव न संशयः॥ ७२॥

शुद्धस्फटिकसङ्काशं हृत्पद्मे तु विचिन्तयेत्।
अङ्गुष्ठपर्वमात्रन्तु पञ्चवक्त्रं महेश्वरम्॥ ७३॥

पूर्वोक्तविविधा रूपाः शिवस्य कथिता मया।

पृ। ६२६)

एतद्रूपं मया ख्यातं सर्वतन्त्रेषु सुव्रते॥ ७४॥

स्पर्शं च शृणु देवेशि कथयामि न संशयः।
दिवारात्रविभागेन अयने विषुवे तथा॥ ७५॥

सङ्क्रान्त्यादिषु देवेशि स्पर्शस्तु समुदाहृतः।
उच्चारं स्पर्शमित्येते केचिदाहुर्मनीषिणः॥ ७६॥

स्पर्शमन्ये वदन्त्येवं बिन्दुमन्ये तथैव च।
इदं तेनाभिजानन्ते विवदन्ति परस्परम्॥ ७७॥

शब्दाशयमिति ज्ञेयं तस्मिन् पक्षास्तु ये स्मृताः।
तस्मिन् स्थितः शिवस्साक्षात् कथितं तव सुवृते ॥ ७८ ॥

एतत्ते पूर्वमाख्यातं त्रिभेदमनुपूर्वशः।

पृ। ६२७)

ना शिष्याय प्रदातव्यं रहस्यमिदमुत्तमम् ॥ ७९ ॥

देव्युवाच

व्योमनाभदिशापत्रं न मया च न धारितम्।
तदहं श्रोतुमिच्छामि भगवन् वक्तुमर्हसि ॥ ८० ॥

ईश्वरः

व्योमेत्याकाशमित्युक्तं व्योमसूर्यः प्रकीर्तितः।
व्योमपद्ममिति प्रोक्तं व्योमप्रोक्तः सदाशिवः ॥ ८१ ॥

कलाश्चतस्रो याः प्रोक्ताः कण्टकास्ते प्रकीर्तिताः।

व्योमनालस्मृताकाशं दिशा पत्राः प्रकीर्तिताः ॥ ८२ ॥

कर्णिकास्तु स्मृतास्सूर्यः कर्णिकास्थः सदाशिवः ।

पृ। ६२८)

दिशा पत्रेषु देवेशि विद्येशान् परिकल्पयेत् ॥ ८३ ॥

नवकालाग्निरुद्रस्तु अधस्रोते व्यवस्थितः ।

शिखादूर्ध्वमुखास्तस्य व्यापकन्ति व्यवस्थिताः ॥ ८४ ॥

जलबुद्बुदसङ्काशं तत्र देवस्सदाशिवः ।

स्वच्छं सुनिर्मलं तेजः सुषिरज्योतिरुत्तमः ॥ ८५ ॥

पुष्करास्तु मया ख्यातां केसरास्तु तत्तैव च ।

एतच्च बिन्दुयोगन्तु कथितं तव शोभने ॥ ८६ ॥

पुरुषत्रयविज्ञानं तत्क्रियादर्शनं तथा ।

अत्र पद्मे तु विज्ञेयं योगिभिस्तत्र चिन्तकैः ॥ ८७ ॥

शिवशास्त्रस्य सद्भावमस्मिन् पद्मे प्रकीर्तितम्।

पृ। ६२९)

प्रत्यक्षं दृश्यते देवि तत्वा ये पूर्वचोदिताः॥ ८८॥

स्वेन स्वेन तु रूपेण सर्वतन्त्रे व्यवस्थिताः।

तां दृष्ट्वा योगविच्छ्रीमान् सर्वज्ञत्वं प्रपद्यते॥ ८९॥

लीयते तस्य मध्ये तु स्वशरीरेण योगिनः।

एतद्रहस्यं परमं कथितं तव शोभने॥ ९०॥

सुपरीक्ष्य च दातव्यं न च नास्तिकनिन्दिते।

इदं ते कथितं देवि तारकं ज्ञानमुत्तमम्॥ ९१॥

देव्युवाच

चिन्ताध्यानमिदं देव न मया वेदितं पुरा।

एतदिच्छामि विज्ञातुं भगवन् वक्तुमर्हसि॥ ९२॥

पृ। ६३०)

ईश्वरः

यदद्दश्यध्यानमित्युक्तं चिन्ता मानस उच्यते।
मानसं मनसालोक्य यद्दलं प्रतिपादयेत्॥ ९३॥

चित्तचैतन्यसंयोगात् स वै मानस उच्यते।
ध्यायेल्लक्षवरं दिव्यं पूर्वदृष्टं वरानने॥ ९४॥

चैतन्यं तद्गतेनैव ध्यानमेतत्प्रकीर्तितम्।
एतद्देवि समाख्यातं ध्यानमानसमेव तु॥ ९५॥

द्विविधोत्पाद्यमर्थन्तु सदा तेनैव युज्यते।
तदा योगमिति प्रोक्तं युक्तस्य वरवर्णिनी॥ ९६॥

देव्युवाच

पृ। ६३१)

सन्धानं श्रोतुमिच्छामि भगवन् वक्तुमर्हसि।

कस्मिन् सन्ध्या कथं संज्ञो भगवन् कथयस्व मे ॥ ९७ ॥

ईश्वरः

साधु पृष्टं त्वया भद्रे तथा ते कथयाम्यहम् ।
त्वदीयं पद्मकं देवि न दृष्टं केनचित्पुरा ॥ ९८ ॥

केचित्त्रितत्वसन्धानमिच्छन्ति वरवर्णिनी ।
अन्येव पशुसन्धानं कथयन्ति वरानने ॥ ९९ ॥

तादृशं तत्वसन्धानं वदन्ति गुरवो बहुः ।
ईदृशं तत्वसन्धानं न विज्ञातन्तु देशिकाः ॥ १०० ॥

पूर्वमात्मनि मेधावी शिखां कृत्वा स्वकां तनुम् ।

पृ। ६३२)

तदा कर्मसमर्थन्तु भवते साधकेश्वरः ॥ १०१ ॥

आत्मनञ्च पशुञ्चैव एकीकृत्य विचक्षणः ।

तदा तत्वे तु संयोज्य विधिं कुर्यादशेषतः॥ १०२॥

पूर्वाहुत्या तु दातव्या तदन्ते चोद्धरेत्क्रमात्।
उद्धृत्यचात्मसंस्थन्तु कृत्वा तत्वविदं शुभम्॥ १०३॥

पृथिवीं तु तथोद्धृत्य आप्येन सह योजयेत्।
विलीनामापमध्ये तु आप भूतां विचिन्तयेत्॥ १०४॥

एवमभ्यस्तथा तेजो वायुरा * * * तथा।
एवं वै सर्वतत्वानि कर्म कृत्वानु संशयेत्॥ १०५॥

तत्वसन्धानमित्युक्तं अस्मिन् तन्त्रे वरानने।

प्।६३३)

एवं संस्थितस्तत्र पशुनालोक्येत्तदा॥ १०६॥

सर्वध्यानसमाप्तौ तु शृणु देवि यथा पुनः।
तत्वनीलं नयेत्तत्वं तत्वे तत्वे नियोजयेत्॥ १०७॥

तत्वसिद्धिं यदा तत्वं दीक्षानिर्वाणगामिनी ।
सर्वतन्त्रेषु सामान्यं विधिमेतत्समारभेत् ॥ १०८ ॥

एवं वै यो न जानाति न हि नोच्छ्रयते पशून् ।

देव्युवाच

किं तत्वं प्रथमं देव द्वितीयञ्च तथैव च ॥ १०९ ॥

तत्वे लीनतु कर्तृत्वं तत्वसिद्धिस्तु क स्मृतः ।

ईश्वरः

पृ । ६३४)

तत्वन्तु प्रथमाचार्यः तव देवि उदाहृतः ॥ ११० ॥

तत्वनीलन्तु यत्प्रोक्तं पशुतत्वं समासतः ।
पशुतत्वेषु संयोज्य पृथिव्यादिष्वनुक्रमात् ॥ १११ ॥

त्रितत्वापरशुद्धिन्तु आचार्यस्तत्वपारगः।
विद्यातत्वास्पदं कृत्वा योजयेत्परमे पदे ॥ ११२ ॥

युक्ते यद्धर्मसंज्ञो वै स धर्मः कथितस्तव।

देव्युवाच

भूतात्मा तत्र बाह्यात्मा अन्तरात्मा तु इन्द्रियः ॥ ११३ ॥

परमात्मा स्थिता देवि मनोहङ्कारबुद्धिषु।
भूतात्मा इन्द्रियात्मा च परमात्मा तथैव च ॥ ११४ ॥

पृ। ६३५)

चतुर्थश्चैव देवेशि एतेषां व्यापकश्शिवः।
भूतात्मा संस्थितो भूतैः इन्द्रियात्मा तथेन्द्रियैः ॥ ११५ ॥

परमात्मा स्थितो देवि मनोहङ्कारबुद्धिभिः।
त्रिरात्मानं विनिर्मुक्तं चतुर्थं परमेश्वरि ॥ ११६ ॥

निरात्मा स तु विज्ञेयः स जीवः परिकीर्तितः।

तस्य सादात्मकं देहं कृत्वा चैव विभागतः॥ ११७॥

तदात्त्वनुग्रहं कुर्याद्योगं स्थाप्य शिवं तथा।

एतत्समासतो देवि रहस्यं कथितं तव॥ ११८॥

इति निश्वासकारिकायां त्रिपञ्चाशत्पटलः॥

निर्विकल्पां तृतीयां वाशां कारणमन्त्यमः ॥ २० ॥

पृ। १५)

ज्ञान सिद्ध्यागमः।

मध्याद्भवं सूक्ष्मं कारेकः पश्यन्ति सम्भवम्।
उकारे मध्योत्पन्नमकारे वैखर्योदितम्॥ २१ ॥

ग्रर्तिसंयुक्तं हंकारोकारमकारम्।
बिन्दुतत्व प्रतीकाशं बैन्दवस्तत्व रूपकम्॥ २२ ॥

बिन्दुमध्योद्भवं सूक्ष्ममकारे पश्यन्ती संभवम्।
एवं वाग्वृत्ति संकेतं वैखर्यादि * र्णमुद्भवम्॥ २३ ॥

उकार उकार मकार बिन्दुनादं च पञ्चमम्।
मनो बुद्धिरहंकारश्चित्त * * * * * * ॥ २४ ॥

बिन्दुमध्योदितं सर्वं तत्कालं बैन्दवं तथा।
लयकालं तटाकुटिला तन्मध्ये प्रणवोदितम्॥ २५ ॥

ओ औ मायात्रयो बन्धं त्रिवृत्ताः कुण्डली तथा।
तत्र कुण्डलिनी मध्ये इडापिङ्गलयोद्भवम्॥ २६ ॥

इडा पिङ्गलयोर्मध्ये सुषुम्नानाम स्वरूपकम्।

सुषुम्नाभ्यन्तरे सूक्ष्मे चित्र नाटिप्रवेशनम्॥ २७॥

चित्रनाडिस्वमध्यस्थे प्राणापानसमन्वितः।

प्राणापानद्वयो * * * * परमकारणम्॥ २८॥

हकारं शिवरूपत्वं सकारं शक्तिरुच्यते।

हकार सकारयोर्मध्ये बिन्दुरूपं परायणम्॥ २९॥

बिन्दु मध्येगतो नादो नाद मध्ये गतः शिवः।

शिव मध्ये गतः शान्तं शान्त्यतीतं परात्परम्॥ ३०॥

सर्वोदित द्विधा शक्तिर्माया कुण्डलिनी तथा।

माया कुण्डलिनी भेदा सर्वलोकं चराचरम्॥ ३१॥

पृ। १६)

ग्रन्थि जन्यं कलाकालं विद्यारागेन्द्रियादयः।

गुणधी गर्वचित्ताक्षमात्रा भूतान्य * * *॥ ३२॥

कुण्डलिनी शक्ति माया कर्मानुसारिणी।

नादबिन्द्वादिकं कार्यं तस्या इति जगत्स्थितिः॥ ३३॥

कलाषोडशयोर्भेदं मूलकुण्डलिनोद्भवम्।
कलाषोडशयोरूप चन्द्रकान्ते प्रतिष्ठितम्॥ ३४॥

तत्र षोडशयोः शक्तिश्चन्द्रदेहे प्रतिष्ठितम्।
अन्य मन्त्र कलारूपं प्रासादपरमाक्षरम्॥ ३५॥

अकारश्च उकारश्च मकारोबिन्दुरेव च।
अर्धचन्द्र निरोधी च नादो * * * * * * * * ॥ ३६
॥

शक्तिश्च व्यापिनी चैव समना चोन्मना तथा।
समनान्तं पाशजालमुन्मन्यन्ते परं शिवम्॥ ३७॥

प्रस्थारं च विस्तारञ्च निस्थारं च क्रियोद्भवम्।
स्थैर्यमित्यनुसन्धत्ते प्रासादे पङ्क्तिस्तु पञ्चमाः॥ ३८॥

अकार स्वररूपत्वमुकारापीश रूपकम्।
मकारं विषरूपत्वं बिन्दुरेव फकाक्षरम् परम्॥ ३९॥

अर्धचन्द्रस्तथाकारं निरोधे तत्त्रिकोणकम्।
हलबिन्दुद्वयं नादं * * * तत्प्रतीहलम्॥ ४०॥

हलमित्राङ्कितश्शक्ति व्यापिनी तत्र शूलकम् ।
कुब्जिका व्योमरूपी चा नन्तादि शक्ति षष्ठमाः ॥ ४१ ॥

षड्बिन्दुः चूलिकाकारं तदग्रं तु शलाकया ।
तच्छिवं निष्कलं तत्वं प्रस्थारार्थमिति स्थितम् ॥ ४२ ॥

पृ । १७)

मध्ये षडवयव व्याप्तिविस्तीर्णं विस्थरक्रमम् ।
एकैक योज्ययोर्भावं निस्तारं निस्थर क्रमम् ॥ ४३ ॥

परान्तं परयोर्दृष्ट्वा स्थैर्यमित्यङ्ग भावनात्मकम् ।
तदानुसंन्धान संवृत्ति प्रासादस्त * * * ॥ ४४ ॥

अध्वा षोढा तत्र पदवर्णमस्त्रन्तु सर्गजा ।
सर्वस्य शक्तिरूपत्वात् एते वाचक रूपकाः ॥ ४५ ॥

* * * * कला तत्व भुवनानीति यत्र यम् ।
वाच्य रूपंत्रिक द्वन्द्वं एतच्छक्ति शिवात्मकम् ॥ ४६ ॥

वाच्यवाचक व्युत्पन्नं बैन्दवं मलसम्भवम् ।
आदिकारण मृद्रूपं तच्चक्रं सहकारणम् ॥ ४७ ॥

निमित्तस्य कुलालोक्त त्रियैव मृद्भाण्ड सम्भवम्।
ततोवग्रन्थि मृद्रूपं कुण्डलीचक्र संस्थितम्॥ ४८॥

परदेशं कुलाले * कुरुते तच्चराचरम्।
इच्छाज्ञान क्रियाशक्तिरिति व्याप्तस्य कारणम्॥ ४९॥

सृष्ट्यादिः पञ्चमं कृत्यं ब्रह्मादि * * साधकम्।
सर्वसृष्टिमयं बिन्दु तन्मध्ये वर्णमुद्भवम्॥ ५०॥

अचिन्त्य कुण्डलीशक्तिर्मध्ये सर्वोदितं भवेत्।

कृत्यर्थम्॥

तत्वात्मबन्धय सृष्टि तद्धोक्त स्थिति साधनम्॥ ५१॥

तत्वात्मनः पृथग्भावं तत्संहारं समुच्यते।
कर्म कुर्वन्ति तत्काल स्थिरो भावं तिरोभवम्॥ ५२॥

चतुर्थं कुरुते कृत्यं तदनुग्रह साधनम्।

एवं पञ्चमकृत्यर्थं पञ्चदिव्यादि संस्थितम् ॥ ५३ ॥

सूक्ष्म कृत्यं तु पञ्चैते केवलस्याग * * * ।
बोधनं शोधनं मूढं बन्धनं शंसनं तथा ॥ ५४ ॥

महासंहार काले तु कुटिलांशो ततोदितम् ।
इच्छा ज्ञान क्रियाशक्ति संग्रहं मूर्तिविग्रहम् ॥ ५५ ॥

ज्ञान रूपं शिवाकारं * * रूपन्तु शक्तयः ।
ज्ञानक्रिया समं तत्वं तत्सादाख्य स्वरूपकम् ॥ ५६ ॥

ज्ञानशून्यं क्रियाधिक्यं महेशस्तत्व विग्रहम् ।
क्रिया नूनं योगसिद्धं शुद्ध विद्यार्थ शङ्करम् ॥ ५७ ॥

इच्छाधिके क्रमं विष्णुः ब्रह्मणस्तत्व मुच्यते ।
तस्मादिच्छादयो भेदं ब्रह्म विष्णु स्वरूपकम् ॥ ५८ ॥

रुद्रो विष्णुर्विधानोक्तं कल्पभोगाधिकारकम् ।
बिन्दुशक्तिस्तथामध्ये मायाशक्ति समुद्भवम् ॥ ५९ ॥

मायाशक्ति मध्ये * * * * शक्तिस्तदुद्भवम् ।
काम्यशक्तिस्व मध्यस्थे मायेयं च तदुद्भवम् ॥ ६० ॥

चतुर्मलं तथा भेद्यं तत्तिरोधाधिकं भवेत्।
एवं पञ्चमलः शक्त्याः पाशबन्धस्तदुच्यते॥ ६१॥

एवं विग्रह कृत्यर्थमेवं सत्कृत्य निर्णयम्।
देवदेव महेशान महायोगी महेश्वर॥ ६२॥

यन्मन्त्रंसार संग्राह्यं तन्मन्त्राकारमुच्यते।

शङ्कर उवाच-

बिन्दुषष्ठ्यादिनादेन स्वनादे बिन्दु संभवम्॥ ६३॥

तद्रूपं प्रणवाकारं पञ्च * * र्ण संस्थितम्।

पृ। १९)

ओमित्येकाक्षरं ब्रह्म परमात्म स्वविग्रहम्॥ ६४॥

ओंकारं शिवरूपत्वं तद्भेदं पञ्चमत्रयम्।
मूलकुण्दलिनी व्याप्तमात्म मन्त्रस्ववर्णकम्॥ ६५॥

हंस विद्यामहाविद्या प्रासाद परया सह।

प्रासादपर * * * * * शक्तिस्वविग्रहम् ॥ ६६ ॥

प्रासादपरयोरैक्यं शाम्भवं शिवसम्भवम् ।
बिन्दुभिद्यदि नादेन सनादः खेन विद्यते ॥ ६७ ॥

बिन्दुनाद कलारूपं शिवशक्तिस्व विग्रहम् ।
आधारं मानसं * * * * धेयं परं शिवम् ॥ ६८ ॥

बिन्दुराधार पीठं च नादलिङ्गं समाचरेत् ।
बिन्दुभिद्यं सदाकारभगांशं शक्तिविग्रहम् ॥ ६९ ॥

त्रिकोण मध्ये हौकारं धर्महंसौ हरिं शिवम् ।
हंसे बिन्दुगतोनादे हंसमार्गे * * * * ॥ ७० ॥

नादं लिङ्गमिति प्राहुः बिन्दुपीठं उदाहृतम् ।
बिन्दुमध्ये गतोनादो नाद मध्येगतः शिवः ॥ ७१ ॥

शिवमध्यगतः शक्तिः शक्ति मध्ये स्वयं शिवम् ।
परहंस प्रभेदं च हकारहौकार इत्यपि ॥ ७२ ॥

हंसः परमहंसश्च द्विधा हंस प्रभेधकम् ।
अहं पृथिव्या अहमापः अहमीश्वरमेव हि ॥ ७३ ॥

अहं पृथिव्या अहं तेजो अहं हरिः।
अहमाकाश सद्भूतं अहमात्मा अहं परा ॥ ७४ ॥

हकारं ब्रह्मरूपत्वं उकारं विष्णुरूपकम्।

पृ। २०)

मकारं रुद्ररूपत्वं बिन्दुरीश्वरमेव हि ॥ ७५ ॥

नादं सदाशिवं प्रोक्तं नादातीतं परं शिवम्।
परतत्वं परं ज्ञेयं परामुक्ति स्वरूपकम्॥ ७६ ॥

हकारं निष्कलोपेतं सकारं सकलं भवेत्।
हकारं शिवरूपत्वं सकारं शक्तिरुच्यते ॥ ७७ ॥

हकारः सूर्य इत्यर्थः सकारश्चन्द्र इत्यपि।
इकारः पावको रूप इति ज्योतित्रयोदितम्॥ ७८ ॥

हकारो कारयोर्मध्ये बिन्दुरूपमुदाहृतम्।
बिन्दुमध्यगतोनादं नाद मध्यगतः शिवः॥ ७९॥

बिन्दुभिट्याति नादेन सनादेः खेन भिद्यते।

शिव मध्यगतं तत्वं तत्वमध्ये परात्परम् ॥ ८० ॥

परं परात्परं सूक्ष्मं परामुक्ति परिग्रहम् ।

व्योमाकारं महाशून्यं तुर्यातीतं परं शिवम् ॥ ८१ ॥

तुर्यातीतं चरं स्थानं परव्योम प्रकाशितम् ।

तुर्यातीतं पराकारं ओमिति ज्योतिरूपकम् ॥ ८२ ॥

बालवृद्धः सगारूपमाद्यन्त रहित * * ।

ज्ञानयोगक्रियाबीजं क्रियाकर्मान्यवर्णकम् ॥ ८३ ॥

ओङ्कारं परमात्मानं पराशक्ति प्रकाशितम् ।

तस्मात् ज्ञानमयं ब्रह्ममोमिति ज्योतिरूपकम् ॥ ८४ ॥

ओंकारोदात्तानुदात्त स्वरितः कुटिलस्वरः ।

ध्वनिरन्तर्गत ज्योतिः ज्योतिरन्तर्गतं मनः ॥ ८५ ॥

मनस्यान्तर्गतो बुद्धिरन्तर्गतो मम ।

ममान्तर्गत * चित्तश्चित्तमन्तर्गतात्मनः ॥ ८६ ॥

पृ । २१)

आत्मान्तर्गतो कालः कालमन्तर्गतः कला ।

कालान्तर्गतयो नादनादान्त * * * परा ॥ ८७ ॥

परान्तर्गतयो ज्ञान ज्ञानमन्तर्गतः शिवः ।
सर्वान्तर्गतयाद्ब्रह्म तद्ब्रह्म तत्परात्परम् ॥ ८८ ॥

एवमन्तर्गतस्यार्थ हौ ओं त्रीणि गुरुद्भवः ।
योगाष्टाङ्ग प्रकारोक्तमोंकारं परमाक्षरम् ॥ ८९ ॥

सप्तव्याहृति गायत्र्या सावित्री प्रकृता कृतिम् ।
षडङ्गाश्चतुर्वेदा स्मृति त्यागं ततो मयम् ॥ ९० ॥

मा * * * * * * * * * * * त्म
विवेकः
नानान्त्योत्पन्नय प्राप्तं तन्मायामयीमयम् ।

मायान्त स्थात्मकं बद्धं पाशं पञ्चममाचरेत् ।
पाशं शोधन जीवात्मा पशुतच्छोधनः पराः ॥ ९१ ॥

परा प्रणव संशोध्यं ओंकारान्तं गुरोः परम् ।
गुरोरन्यत् परं नास्ति गुरोरन्यत् शिवं न हि ॥ ९२ ॥

॥ प्रणव विवेकः समाप्तः ॥

॥ अथ लिङ्गोद्भव विवेकः ॥

प्रणवं बिन्दुनादोक्तं कुटिलाकारमुद्भवम्।

कुटिला * स्वशक्त्यर्थमुदितां कुरवः शिवम्॥ ९३॥

बिन्दुनाद कलाकारं प्रणवं तल्लिङ्गमाचरेत्।

नादान्तस्य कलापाशमुन्मन्यन्तं तदाधिकम्॥ ९४॥

समनान्तं पाशजालमुन्मन्यन्तं परं शिवम्।

शुद्धाध्वा वुन्मनीर्यन्तन्तदन्तं चरणोदितम्॥ ९५॥

पृ। २२)

काल भुवन वर्णञ्च मन्त्राध्वा च पदाध्व च।

तत्वाध्वा इति विज्ञेया षडध्वा सादाख्यरूपकम्॥ ९६॥

कलाध्वा वायवं प्रोक्तं भुवनं रोममेव च।

त्वग्वर्णा च * * शोणिपदाध्वा च नाड्यः शिराः॥ ९७॥

षड्विंशत्तत्व खण्डोक्तं धातुरूपं सदाशिवम्।

तद्भेद प्राणयश्शक्ति तत्परा शक्तिरुच्यते॥ ९८॥

शिवमात्म स्वरूपस्थमिदं सादाख्यमुद्भवम् ।
पञ्चकृत्याधिकारस्थं जगद्योनिं सदाशिवम् ॥ ९९ ॥

परमं बीजमध्यस्थे त्रिकोणरेखा स्तनादयः ।
त्रिकोणाकार मध्यस्थे भगाङ्गं लिङ्गमाचरेत् ॥ १०० ॥

भगमध्ये स्थितं लिङ्गं लिङ्ग मध्ये स्थितं भगम् ।
सदाशिवासनं लिङ्गं लिङ्गासनं तु पीठिका ॥ १०१ ॥

पीठिकासन भ्रूमध्ये देशिका ध्यानमासनम् ।
एवं ध्यात्वा तु मनसा पराशक्तिस्तु विन्यसेत् ॥ १०२ ॥

पञ्चभेदन्तु सादाख्यं तद्भेदं षोडशोद्भवम् ।
अष्टाविंशं महेशोक्तन्नटराजं प्रधानकम् ॥ १०३ ॥

परेच्छया शिवसादाख्यं तदादिः पञ्चमोद्भवम् ।
महेश विष्णुरुद्रादि पञ्चभूतस्तु पञ्चमम् ॥ १०४ ॥

सर्वं सादाख्यमुत्पन्नं कारणत्रयमाचरेत् ।
मूर्ता मूर्तिः कर्ममूर्तिः शिव * ?ख्य पञ्चमम् ॥ १०५ ॥

रुद्रोत्पन्न गणेशस्तत्स्वभेदं षोडशं तथा ।

रुद्रोत्पन्न विशाखश्च षट्भेदैक स्वसंग्रहम् ॥ १०६ ॥

पृ। २३)

देवासुरा नराशक्ति ऋषिभ्यः किन्नरादिकम्।
सर्वं रुद्रेशरोमस्य मध्योत्पन्नमसंख्यया ॥ १०७ ॥

ब्रह्मादि शिवतत्वान्त दशसादाख्य सम्भवम्।
वेधाः पश्चिमभागे तु हृषीकेशोत्तरस्तथा ॥ १०८ ॥

अघोर दक्षिणे भागं पुरुषं पूर्वयोदितम्।
ईशानस्थानमीशानं दृष्ट्वा मध्यमयोदितम् ॥ १०९ ॥

मध्यमाग्रस्तथा बिन्दुनादं रेखाग्रयशिवम्।
शिवमध्यन्तु शक्त्यर्थमेतत् सादाख्यमुद्भवम् ॥ ११० ॥

शान्तं पद्मासनस्थं शशिधरमकुटं पञ्चवक्त्रं त्रिणेत्रं।
शूलं वज्रं खड्गं परशुमभयदं वाम दक्ष भागे वहन्तम् ॥ १११ ॥

नासगं पाशं च घण्टां मलनकरयुतं सांकुशं वामभागे।
नानालंकारयुक्तं स्फटिकमणिनिभं सौम्यसादाख्य तत्वम् ॥ ११२ ॥

देवीशिर दक्षिणोत्तर सुपादं गोमुख पादान्तकृतवारि भुजयुक्तम्।

योनिगत मध्य मधु संस्थित लिङ्ग स्थापित सदाशिव-

मनोन्मनि स्वरूपम्। मनश्शक्तिक विज्ञेय उन्मनः परमः शिवः॥ १३॥

मन उन्मन सम्बन्धान्मनोन्मन्यभिधीयते॥ ११४॥

वामाद्यष्ट शक्तीनां मध्यतेजो मनोन्मनी।
मनोन्मनि ग मध्यस्थो सादाख्यं लिङ्गमध्यमम्॥ ११५॥

शिवशक्ति स्थितं लिङ्गं जगद्योन्युद्भवस्तथा।
नवज्ञाङ्ग पद्माङ्गं न चक्राङ्गश्च? गत्त्रयम्॥ ११६॥

लिङ्गांशाश्च भगांशाश्च तस्मान्माहेश्वराज्जगत्।
मूलाधारं चतुष्पत्रं तन्मध्ये वशाषस्सजम्॥ ११७॥

पृ। २४)

तन्मध्ये कुटिलाकारं त्रिकोणाकार संभवम्।
नाडी मूलावृताङ्काभि कुण्डली हंसनिस्वना॥ ११८॥

कुण्डल्याकार मध्यस्थे प्राणं प्रणवसम्भवम्।
प्रणवत्रयमध्यस्थं व्योमाकारं पराक्रमम्॥ ११९॥

पराक्रमं परोत्पन्नं परं सर्वत्र कारणम्।

चिद्घनं मेघतद्याप्तं नित्यं सद्योतित प्रभम्॥ १२०॥

सर्वात्म कारणं शम्भुर्विभुश्शर्वस्व साक्षिकम्।

शम्भोः शिवपरं सूक्ष्मं सर्वव्यापकमीश्वरम्॥ १२१॥

सर्व वर्णं तथा मन्त्रं मन्त्रमूर्तिमनेकधा।

सर्वकोटि महामन्त्रं सप्तकोटयंशि कारणम्॥ १२२॥

विज्ञानस्याष्ट विद्येशं मन्त्रमूर्ति प्रधानकम्।

सप्तकोटि महामन्त्रं चित्तव्याकुल कारणम्॥ १२३॥

एकेन सहजं मन्त्रं तुर्यातीते परं शिवम्।

नादबिन्दु द्विधाकारं त्रिधावाक् पञ्चमोद्भवम्॥ १२४॥

कुटिली कुण्डलीस्तारं बैन्दवैशानमीश्वरम्।

रुद्रविज्ञान काष्टांशं इच्छाज्ञानक्रियात्मकम्॥ १२५॥

आणवं माययाकाम्यं पावे?पंच तिरोभवम्।

स्थूल सूक्ष्म महान् प्राणा व्यक्ता पञ्चम कञ्चुकाः॥ १२६॥

जीवामेच्छादिषु त्रिंशत् षट्त्रिंशत्तत्वकारणम्।

कारणं कृत्य मूलस्थं माया कुण्डलिनोद्भवम् ॥ १२७ ॥

सर्व तत्वं मयाख्यातं सर्वात्म सृष्टिकारणम् ।
अचिन्त्यं तत्परा शक्तिश्चिन्त्यमाया विकल्पकम् ॥ १२८ ॥

पृ । २५)

अचिन्त्याचिन्त्ययः साक्षिरात्मरूपं परात्परम् ।
सर्वमन्त्रमयं तारन्तारश्चादयोदितम् ॥ १२९ ॥

ओमिति ज्योतिरूप ज्योतिरूपस्थं सत्यमुक्तम् ।
आसिकाबन्धनं शैवं नासिकाबन्धनं न च ॥ १३० ॥

न यनो नियमश्चैव स्वयमोमिति पश्यतः ।

॥ अर्थितत्व संग्रह विवेकः ॥

क्षित्यादि कुटिलान्तानि षट्त्रिंशत्तत्वरूपकम् ॥ १३१ ॥

शिवेच्छया कुटिलोत्पन्नं नादतत्व प्रधानकम् ।
नादमध्योदितं बिन्दु शिवशक्त्यर्थनामकम् ॥ १३२ ॥

ज्ञानक्रिया समुत्पन्नं शिवशक्ति स्वरूपकम् ।

ज्ञानक्रियोत यस्तत्वं तत्सादाख्य स्वरूपकम् ॥ १३३ ॥

ज्ञाननून क्रियाधिक्यं महेशस्तत्व विग्रहः ।
योगेच्छया क्रियान्यून शुद्धविद्याप्रकाशितम् ॥ १३४ ॥

शुद्ध विद्येश सादाख्यं बिन्दुनादाश्च पञ्चधा ।
शिवतत्वमिति प्रोक्तं बैन्दवस्तत्र कारणम् ॥ १३५ ॥

बिन्दुशक्तोद्भवं माया मोहिन्यो मोहकारणम् ।
अरूपं नित्यैक रूपस्थं व्याप्त्यन्तं स्वनविग्रहम् ॥ १३६ ॥

मायोद्भवस्तथा * * त्रिकृत्यर्थं त्रिभेदकम् ।
कालस्योत्पन्ननियति यत्कर्मं तत्सुनिश्चियम् ॥ १३७ ॥

कालो नियतिरुत्पन्न माणविस्तत्र शोधनम् ।
किञ्चिदिच्छा क्रियाज्ञान स्वात्ममध्ये प्रकाशितम् ॥ १३८ ॥

कारणत्वे तथा विद्या नाना ज्ञानोद्भवात्मकम् ।

पृ। २६)

रागा परिमिताशार्थं विद्या तत्वेति षष्ठमम् ॥ १३९ ॥

मूल प्रकृति विकृति कलातत्वोद्भवं तथा ।
त्रिगुणत्वोन्नतत्काल गुणत्वं प्रकृति स्थितम् ॥ १४० ॥

इन्द्रिय ग्र * * * रसाने पुरुष तत्वकम् ।
विषयग्राह्यैन्द्रियः कालेनात्मं पुर्यष्टकं तथा ॥ १४१ ॥

माया व्यक्तं तदव्यक्तं तद्व्यक्तं तन्महानिति ।
तत्वन्त्वहित यस्तत्वस्तच्चित्तं करणादिकम् ॥ १४२ ॥

अ * * * गुणोत्वञ्च त्रिधाभेदस्तथोच्यते ॥ १४३ ॥

सात्विके तैजसा हन्ताराजसे वैखरी तथा ।
तमसे भूतातिकन्तु तस्माद्भुज त्रयोदितम् ॥ १४४ ॥

तन्मध्ये तैजसाहन्ता मध्ये मानसमुद्भवम् ।
ज्ञानक * * याकारं वैखर्याहनयोद्भवम् ॥ १४५ ॥

शब्दादिः पञ्चमो भेदं भूताहन्तान्ततोद्भवम् ।
शब्दादिः पञ्चतन्मात्रे आकाशादि समुद्भवम् ॥ १४६ ॥

आकाशाद्वायुरुत्पन्नं वायव्येदं मनोभवम् ।
दहने जलवुत्पन्न जले मेदिनिरुद्भवम् ॥ १४७ ॥

चतुरमार्ध चन्द्रञ्च त्रिकोण षट्कोणवृत्तयः।

पृथिव्यादि स्वरूपोक्तं बुद्धिमत्कारणोद्भवम्॥ १४८॥

स्वर्णः श्वेतारुणः कृष्णं धूम्रं प्रव्याधि रूपकम्॥ १४९॥

* * * * ञ मादीनां लवरयह वर्णकम्॥ १५०॥

ब्रह्मा विष्णुस्तथा रुद्रमीशमीशान कारणम्।

भूत भेदमिदं प्रोक्तं तज्जन्यं तत्र कारणम्॥ १५१॥

पू। २७)

पृथिव्यप्तेजोवायुराकाशं भूतपञ्चमम्।

श्रोत्रं त्वक् चक्षुर्जिह्वा च प्राणञ्चैव तु पञ्चमम्॥ १५२॥

वाक्पाणिपादपायुरुपस्थञ्चैव तु पञ्चमम्॥ १५३॥

वचनागमनादान विसर्गानन्द पञ्चमम्।

तदन्यं पञ्चदश्यर्थं शब्दादिः पञ्चविंशतिः॥ १५४॥

मनोबुद्धिरहङ्कार चित्तज्ञेत्रज्ञ पञ्चमम्।

एवन्तु पञ्चविंशार्थमात्म तत्वं प्रकीर्तितम्॥ १५५॥

रागो नियति विद्या च कला कालश्च मोहिनी।
विद्या तत्वमिति प्रोक्तं षष्ठमं परिकीर्तितम्॥ १५६॥

शुद्धविद्येश सादाख्यः शिवशक्तिस्तु पञ्चमाः।
शिवतत्वमिति प्रोक्तं शुद्धाशुद्धश्च मिश्रितम्॥ १५७॥

आत्मतत्वं हृदायान्तं विद्यातत्वं भ्रुवान्तकम्।
शिवतत्वं शिखान्तस्थं तत्वन्नात्रमिति स्थितम्॥ १५८॥

सर्वतत्वं कलातीतं पराशक्ति प्रभेदकम्।

॥ ज्ञान सिद्ध्यागमे द्वितीयः शिवलक्षणाधिकारः समाप्तः॥

प्रथमस्तन्त्राधिकारार्थः द्वितीयः शिवलक्षणम्।
मन्त्र तत्वप्रसादार्थं शिवसादाख्य सम्भवम्॥ १॥

इत्थमधिकार संग्रह विवेकम्॥

देव्युवाच-

देव देव जगन्नाथ शिवशूलिन् महेश्वर।
आत्मवर्गं किमुत्पन्नः शृणु देवि वरानने॥ २॥

भग्नेव घटे यथा दीपस्सर्वतः संप्रकाशते।
देहे पाते तथा चात्मा भाति सर्वत्र सर्वदा ॥ १८ ॥

योग ज्ञानं शिव ज्ञानं शिवं सर्वत्र कारणम्।
शिवं शान्तं जगद्योनिं शिवमुक्ति प्रकाशकम् ॥ १९ ॥

गुरुः पिता गुरुर्माता गुरुर्भ्राता गुरुः सुहृत्।
गुरोस्तु न परं किञ्चिदित्याह परमेश्वरः ॥ २० ॥

न गुरोरधिकं न गुरोरधिकं न गुरोरधिकम्।
शिवसाधन यश्शिवशासशासनयश्शिव साशासनयः ॥ २१ ॥

प्रसं प्रदाधिकारः समाप्तः ॥

देव्युवाच-

देवदेव परानन्द शिवश्शूली महेश्वर।
योग * * * * * र्थं किं प्रकारं तदुच्यते ॥ १ ॥

महेश्वर उवाच-

महेशि देवदेवेशि शृणुदेवि वरानने।

योग सिद्धि प्रबोधन्तूपदेश क्रमं तथा ॥ २ ॥

योगसिद्धि प्रबोधन्तूपदेश क्रमं तथा ।
उपदेश क्रमं ह्येवं योग सिद्धस्य बोधकम् ॥ ३ ॥

योगमष्टाङ्ग तद्भेदं बाह्यार्थानामनन्तकम् ।

योगभेदः-

यमश्च द्विधमाप्रोक्तमासनं त्रिविधं परम् ॥ ४ ॥

प्राणायाम चतुर्थन्तु प्रत्याहारञ्च पञ्चकम् ।
धारणा ध्यान संकेतं समाध्यष्टाङ्ग उच्यते ॥ ५ ॥

स्वाधारञ्च निराधारं पाशयोगं तृतीयकम् ॥

पृ। ५८)

योगोपरिमितं शास्त्रे सारात् * * * * * * ।
योगेन सिद्धयत्यर्थं हि ज्ञानेन ह्युक्तिरुच्यते ॥ ६ ॥

योगभेदः-

यमं दशविधं यमं दशविधं भवेत् ।

आसना परिमिदं तञ्च तन्मध्ये दशमुत्तमम्॥ ७॥

प्राणायाम प्रभेदार्थश्चतुर्थं पूरकादिकम्।
प्रत्याहारञ्च पञ्चैते धारणाः पञ्चमं भवेत्॥ ८॥

अष्टाविंशति ध्यानं च मध्ये पञ्चम उत्तमम्।
एकं समाधिरित्युक्तं तन्मध्ये परमं पदम्॥ ९॥

यमं दशविधं प्रोक्तं शुद्धं कारुण्य सम्भवम्।
अल्पाहारमितिश्शान्तं सर्वार्थं समचिन्त्यकम्॥ १०॥

सत्यञ्च दृढचित्तं च ब्रह्माचार्यं तदष्टमम्।
न येयु न च * * * यमं दशविधं तथा॥ ११॥

एकैकं तु यथा प्रोक्तं सूक्ष्मात् सूक्ष्मतरं तथा।
यमं दशविधं प्रोक्तं शृणु देवि वरानने।
तपञ्चपयोगश्चैव स दोषास्ति कदाचन॥ १२॥

शिववृत्तं तत्वसिद्धः साधकः शिवपूजकः।
मतिर्लज्जा तथा प्रोक्ता आसनं दशमं शृणु॥ १३॥

पत्रं गोमुख पद्मं च सिंह स्वस्ति कदाचन।

पञ्चकम् ॥

वीरं सुखास निमुक्तं मयूरं दण्डासनं तथा ॥ १४ ॥

प्राणायामं चतुर्थञ्च शृणु देवि वरानने ।
पूरकं रेचकं चैव कुम्भकं त्रासनं तथा ॥ १५ ॥

एकैक वायुमापूर्य मात्रा दीर्घं तदुच्यते ।
प्रत्याहार प्रभेदार्थं शृणु देवि वरानने ॥ १६ ॥

पृ। ५९)

जितेन्द्रियोपाधिशून्या चैतन्यो भावसम्भवः ।
ज्ञानचक्षुः प्रकाशश्च * * * * * मूढकम् ॥ १७ ॥

एवं पञ्च मयं प्रोक्तं तत्प्रत्याहारमुच्यते ।
धारणं पञ्चका प्रोक्तं शृणु पार्वतिमत् प्रिये ॥ १८ ॥

मूलं लिङ्गेन नाभ्यन्तं हृदयं गलपञ्चकम् ।
नासिका भ्रूशिखामार्गे मरुन्नादोद्भव ध्वनिम् ॥ १९ ॥

प्रभेद सोष्ट भेदन्तु शिखादिं पञ्चमोत्तमम् ।

अन्यथा धारणं प्रोक्तं पृथिव्यादिकमेककम् ॥ २० ॥

तत्तज्ञात क्रमाद्योज्यं दिवौ ग्रन्थिस्तदुज्यकम् ।
ग्रन्थात्मपदे योज्यं तत्परो योज्यधारणम् ॥ २१ ॥

एवमष्टमधो भेदं धारणा सूक्ष्म मुच्यते ।
महेशी मायया देवि * * * * * * * णुः ॥ २२ ॥

निवृत्त्यादि कलापञ्च ध्यानं पञ्चात्मको भवम् ।
आधारं च निराधारं न साधारं न धारकम् ॥ २३ ॥

ऊर्ध्वाधार प्रविश्यार्थं पराशक्ति प्रकाशकम् ।
रूपारूप विदध्यानं रूपारूप द्विभावनम् ॥ २४ ॥

सत्यध्यानं समाध्यर्थं बोधध्यानं प्रबोधनम् ।
जितेन्द्रियं इन्द्रियध्यानं शक्त्या ध्यानमनन्तरः ॥ २५ ॥

वीर ध्यानं पर ध्यानं रक्त शुक्ल द्विमिश्रकम् ।
बोध बोधस्व बोध * परध्यानं परोदितम् ॥ २६ ॥

शिवध्यानात्म भावोक्ता ध्यानयोगमिदं तथा ।
इन्द्रियस्य पदध्यानं पराबोध शिवस्य तु ॥ २७ ॥

एवं * * * * युक्तं न ध्यानं व्यापकं शिवम्।

पृ। ६०)

समाधिर्योग संप्रोक्तं शृणु देवि महेश्वरि॥ २८॥

समाधिः समतावस्था जीवात्म परमात्मयोः।
तमतांश समाध्यर्थं जीवन्मुक्ति पदं परम्॥ २९॥

जीवत्व परयोरैक्यं वेदान्त ज्ञान सङ्गमम्।
वेदान्तार्थ मयं ज्ञानं सिद्धान्तं परमं शुभम्॥ ३०॥

देवस्य विहिताचारं दक्षिणाचारमुच्यते।
विपरीतं वाममन्त्रं शक्त्या ध्यान समाश्रितम्॥ ३१॥

* * सिद्धिस्तथा प्रोक्तं शृणुवेदान्त संग्रहम्।

॥ अष्टाङ्ग योगपटलः॥

अष्टाविंशस्तु ज्ञानांशमेव * * * * * *।
एवं शैव क्रियाभेदं चतुष्पादोद्भवाश्रयम्॥

चर्यादि ब्रह्मचर्यादि सिद्धान्ताश्रममुच्यते।

ऊर्ध्वशैवं महाशैवं मनादि शैवादि शैवकम्॥

भेदा भेद द्वयं शैवगुण शैव * * * *।

अध्व शैवं क्रियाशैवमवान्तरं योगशैवकम्॥

ज्ञानशैवं शिवः शैव शैव भेदश्चतुर्दशम्।

शुद्धशैवं तथा मुख्यश्चतुष्पादा प्रवर्तकम्॥

ज्ञानज्ञेय द्विधा ज्ञातुर्भावं साक्षान्निवर्तकम्।

पञ्चान्त * * * * * * * * ज्ञानसाधकम्॥

वेदान्तं शैव सिद्धान्तं नादान्तं बोधमन्तकम्।

योगान्तं पञ्चमान्तस्तु सर्वशास्त्रात्तु सारजम्॥

सिद्धिमुक्तिस्तथा प्रोक्तः साधनं ज्ञान साधनम्।

शुद्ध शैव * * * * शाभवं शाश्वतम् शुभम्॥

सर्व शास्त्रार्थ सारार्थः संग्राह्यं शुद्धशैवकम्॥

प।६१)

शुद्धशैव स्वमुक्त्यर्थं शुद्धमुक्तिस्व गोचरम्।

नानासमय भेदार्थं नानामुक्ति स्वभावकम् ॥

नानायोग प्रभेदार्थं नाना सिद्धिप्रवेशनम् ॥

पद * * * * * क्ताः मुक्तारूपा स्वमुक्तिकाः ।
अपिकारस्तथा * * एवं नानात्म मुक्तिकाः ॥

तन्मध्ये सिद्धिमुक्तिश्च शुद्धमुक्तिश्चतुर्द्वयम् ।
शुद्ध शैव स्वसिद्ध्यर्थं शाम्भवी मुद्रिकान्तकम् ॥

शाम्भवं * * * * * * क्षात् योग्यस्व वेधनम् ।
सत्य साम्भव शुद्धाय उग्रशाम्भवमुत्तरा ॥

अनुत्तरः शाम्भवश्चेति शाम्भवं ज्ञान पञ्चकम् ।
शाम्भवी खेचरी ज्ञानमुद्रा त्रितय शाम्भवम् ॥

अष्ट शाम्भव संवेद्यं शुद्धशैवार्थ निर्णयम् ।
योग शाम्भव त * * * * * * * भेदकम् ॥

नाना विध शास्त्रार्थैं * * * * * * * * * ।
अष्टक ज्ञान भेदोक्तं शुद्धशैवस्व शाम्भवम् ।
शैवमार्गे महासिद्धिरन्यं पाशुपतादिकम् ॥

कलाध्वा मध्यमो भागो पञ्चाध्वा * * मोद्भवम् ।
पाशं पशुपति ज्ञेयं शैव सिद्धान्त साधनम् ॥

ज्ञानयोग क्रियाचर्या शैवाश्रम विभेदकाः ।
नाना वेदागमाद्यर्थं नानाशास्त्रार्थ दर्शनम् ॥

नानाशब्द प्रवाहार्थं बैन्दवः कलहोदितम् ।
नानाशब्द प्रवाहार्थं बैन्दवः कलहोदितम् ॥

बैन्दवं कुटिल * * बिन्दुनादोदयोदितम् ।
बैन्दवस्तत्व * * * * * * * कलोदितम् ॥

पृ । ६२)

बिन्दुनाद कलामध्ये अकारोकारयोदितम् ।
अकरोकारमकारं च बिन्दुनादं च पञ्चमम् ॥

कलाध्वा मध्यमो भागो पञ्चा * * वमुद्भवम् ।
अकारो वैखरी जातमुकारे मध्यमोदितम् ॥

मकारे पश्यन्ती जातं बिन्द्वौ सूक्ष्मस्ततोदितम् ।
नादान्त सूक्ष्म वाग्जातं वाक्पञ्चम लोदितम् ।

वाग्भवं वेदशास्त्रार्थं वैखरी वर्ण उद्भवः ॥

वैखरी श्रोत्र विज्ञेया * * कल्पा तु मध्यमाः ।
निर्विकल्पा तृतीयाया आसांकारण मध्यमाः ॥

महासूक्ष्मा च रूपार्थ इति वाक् पञ्चमोद्भवः ।
अकारो ब्राह्मणो जातमकारो वैष्णवोद्भवम् ।
मकारो रुद्रांश वर्णन्तु बिन्दुरीशोद्भवस्तथा ॥

नादः सदाशिव इति नादादि पृथिव्यन्तकम् ।
त्रिंशत्तत्व द्विसंभिन्नं कुटिलाशक्तिरुद्भवम् ॥

कुटिलं कुण्डली व्याप्तं कुण्डली प्रणवोदितम् ।
यातु कुण्डलिनी शक्तिर्माया कर्मानुसारतः ॥

* * न्दु द्वादकार्यन्तु तस्य त्रि च जगत्स्थितिः ।
मकारः सामनादांशं बिन्द्वाधर्वणमुद्भवम् ॥

वेदान्त्योंकार नादान्ते ज्ञानरत्नं तथोद्भवम् ।
सर्वमोंकारमुत्पन्नमोमिति ज्योतिरूपकम् ॥

निवृत्ति कलांश रूपप्रतिष्ठा भावोदितोपमम् ।

बिन्द्वान्तं तटिदाकारं शान्तिदीपक समोपमम्॥

पू। ६३)

शुद्धस्फटिक संकाशं शक्त्यन्त तपसोपमम्।
निवृत्त्यादि कलारूपाकारादि कलोदिता॥

अकारादि कलामध्ये वाचा पञ्चमदेवता।
अकारादि कलारूपं हौकार * * * * *॥

* * * * ष्टमं बीजं षष्ठमस्वर संयुतम्।
चतुर्दश स्वरोपेतं बिन्दुनाद समन्वितम्॥

एवं पञ्चकलाप्रोक्तं मूलमन्त्रं तदुच्यते॥

हकारश्च उकारश्च मकारो बिन्दुरेव च।
अर्धचन्द्रो निरोधी च नादो नादान्त एव च॥

शक्तिश्च व्यापिनी चैव समना चोन्मना तथा।
समनान्तं पाशजालं उन्मन्यन्तं परं शिवम्॥

उन्मन्यन्ते परा तत्वा तदन्तं शिव मुच्यते।
कलाषोडश विज्ञेयं प्रासादं परमाक्षरम्।

प्रासादयेति प्रासादं प्रासादं शिवमन्त्रकम्॥

* * * * * * * * * शब्दो गतिरुच्यते।
दमत्स्वरूपमेवन्तु त्रिवर्णमभिधीयते॥

कला षोडशयोर्भेदं पञ्चकस्य कलमयम्।
कला पञ्चम मध्यस्थे पञ्चाध्व उद्भवं तथा॥

अकारे तत्वमुत्पन्नं उकारे भुवनोद्भवम्।
मकारे पदमुत्पन्नं बिन्द्वे वर्ण स्थितोदितम्॥

नादेमन्त्रोद्भवं ज्ञेयं जगत्यर्थं ततोदितम्।
हकारादि कलामध्ये पृथिव्यादि समुद्भवम्।
पृथिव्यादि कुटिलान्तं षट्त्रिंशत्तत्वमुद्भवम्॥

आत्मविद्या शिवत्वं च * * * * * * दकम्।
श्रोत्रत्वक् चक्षुर्जिह्वा च ज्ञान इन्द्रिय पञ्चमम्॥

वाक्पाणि पायूपस्थं कर्मेन्द्रिय पञ्चमम्।
शब्दस्पर्शरूपं च रसगन्धं च पञ्चमम्॥

वचनागम नादानां विसर्गानन्द पञ्चमम् ।
मनोबुद्धिरहंकारश्चित्त क्षेत्रज्ञ पञ्चकम् ॥

आत्मतत्वमिति ज्ञेयं भाग्यखण्डमशुद्धकम् ।
मायाकालं च नियतिः कला विद्यारागषष्ठमम् ॥

अशैव खण्डमित्युक्तं शुद्धाशुद्ध विमिश्रमम् ।
शुद्धविद्येश सादाख्यं बिन्दुनादान्त पञ्चमम् ॥

शिवतत्वमिति ज्ञेयं प्रेरखण्डं तदुच्यते ॥

शिवतत्वं शुद्ध तत्वार्थं तत्त्वातीतं समात्मनम् ।
तत्त्वातीतं परं शक्ति तत्वातीतं परं शिवम् ॥

तत्वार्थं कुण्डली व्याप्तं जगदुत्पत्ति कारणम् ।
कुटिलेच्छादितं भिन्नं तच्छक्ति तत्व विग्रहम् ॥

सर्वतत्वमयं व्याप्तं पाशतत्वार्थ कारणम् ।
तत्वतीतं पराशक्ति तत्वातीतं परं शिवम् ॥

कला पञ्चममध्यस्थे पाशः पञ्च मलोदितम् ।
पाशवो बद्धय पाशः पाशबन्धस्तथा पशुः ॥

पाशेन पशवो बद्धाः कारणं परमेश्वरः।
पतिर्नाम इति ज्ञातं पाशाभावेन यः पशुः॥

कालावसानात् शक्त्यर्थे तिष्ठन् बोधात् विमुक्तः॥

एवं शाश्वत शैवार्थमेवं सिद्धान्तगोचरम्।
मूलादि द्वादन्तार्थैः संयोज्यं परमाक्षरम्॥

तन्निराधार योगांशं स्वाधारं नव भावितम्।
परायोग्यां परामिश्रमन्वे योग्यं पृथक् तथा॥

योगभेदमिति प्रोक्तं तत्त्रिभेद इति स्थितिः।

कलायोगम् -

अकारे मनसोत्पन्नमुकारे बुद्धिरुद्भवम्॥

पृ। ६५)

उकारे हा त्रयोत्पन्नं बिन्द्वौ चित्तस्तदुद्भवम्।
नादे पुराणमुत्पन्नं नादान्ते शक्तिरुद्भवम्॥

शक्त्यन्ते शिवमुत्पन्नं तदन्ते परमं पदम्।
कलापन्न महाभागे जगदुत्पत्ति कारणम्॥

कलातीतं परातीतं परातीतं परं शिवम्॥

॥ तन्त्रावतार पटलः ॥

अष्टभेदं स्वसिद्ध्यर्थं शृणुदेवि वरानने।
अष्टभेद प्रभेदार्थे नाना सिद्धिसमुद्भवम्॥

अणिमा महिमा चैव लघिमा गरिमा तथा।
प्राप्य प्राकाम्यमीशित्वञ्च शिवत्वं कामरूपकम्॥

निर्मितस्व समर्थार्थ साधकः सिद्धिसम्भवम्।
उद्गतश्वासमात्रार्थं विषमाजात नाशनम्॥

अणिमदि प्रसिद्ध्यर्थं अष्टैश्वर्यं यथा तथा॥

वायुमापूर्य संसिद्धिरन्यथा द्वादशोद्भवम्।
कुण्डली मध्यम स्थाने कृपाकारं त्रिकोणकम्॥

तन्मध्यस्थे चतुर्मात्रा हंसो स्वरति नासिकः।

मार्गेण गम्यतां वायुर्जरामरण कारणम् ॥

हंसं परमहंसं न हंसं सोहं यथा * * ।

उद्गत श्वासयोर्नाशं निर्गतश्वास सिद्धिजम् ।
सन्ततं निर्गतश्वासं मन्त्रयोगस्व साधकम् ॥

सन्ततं निश्वासभावं साधयेद्द्वादशाब्दजम् ।
अन्यथा द्वादशाः सिद्धिरेकैकाब्दस्ततोदितम् ॥

प्रथमार्थाद्य व्याधिर्द्वितीयो जनवर्जितम् ।
तृतीयस्सर्व नाशास्त्रय चतुर्थे वाक्यार्थ सिद्धिजम् ॥

पञ्चमे पुराण श्रवण षष्ठ्यातीतन्तु नागतः ॥

पृ। ६६)

सप्तमे चण्डवेगार्थमष्टमे मरणानि च ।
नवमोनन्द कायस्थं दशं भू त्याग सम्भवम् ॥

एकादशं तथारुद्रा द्वादशाद्योगमिष्यति ।
एवं द्वादश सिद्ध्यर्थं वायुमापूर्य उद्भवम् ॥

वायुमापूर्य मार्गस्थे नाना सिद्धिसमुद्भवम् ।
इडा पिङ्गलयोर्मध्ये तन्मध्ये नाद सम्भवम् ॥

नाद * * * * * * * * न्तं परमः शिवः ।
शिवमध्ये गतश्शक्ति शक्तिमध्यगतः शिवः ॥

हकारं शिवरूपत्वं सकारं शक्तिरुच्यते ।
हकार सकार योर्मध्ये हंसमनूदितम् ॥

हंसमार्गस्वयं शक्तिनीलवर्णनिभं तथा ।
सोहं शस शरन्तत्र निश्वासो छ्वास तद्विधा ॥

सर्वनाडि स्वमध्यस्थे सुषुम्ना नाड्युत्तमं भवेत् ।
सुषुम्ना मूलाग्र मध्यस्थे मण्डलत्रय संयुतः ॥

मण्डलत्रय मध्यस्थे ज्योतीरूपं परामयम् ।
परा वा समया सिद्धिर्जरा मरण नाशनम् ॥

हातो विसर्जनैर्युक्तः पराविद्यामयं तथा ।
कारचञ्चु पुरीकारं शोष्यमाणा निलात्मकम् ॥

सदाभावं विशेषार्थं जरामरण नाशनम् ।

पराविद्या महाविद्या मूलविद्या समस्तथा ॥

परामूलं समाश्रित्य संघटी कृत्यार्थसिद्धिजः ।
आधार प्राणसंवेद्यमात्ममन्त्र स्वगोचरम् ॥

आधारं षष्ठमं भेदं निराधारं परं शिवम् ॥

आधार लक्षणम्-

पृ। ६७)

आधारे लिङ्गनाभौ हृदय सरसिजे तालुमूले ललटे
द्वेवक्रे षोडशारे द्विशत दशदले युते द्वादशार्धे चतुष्के ।
वासान्ते बालमध्ये सफकठ सहिते संविर्गेह लक्षे मध्ये हंसं स्वदीप्तं
सकलं कलयुतं वर्णरूप प्रकाशम् ॥

सर्व वर्णस्व मध्यस्थे हंसमात्मन्ततोदितम् ।
हंसं सर्वत्र वर्णानां आदि मध्यान्त रूपकम् ॥

एकं वर्ण स्वरूपं चैक मुद्रार्थ खेचरी ।
एकं देव परब्रह्म एकं शक्तिपरामयम् ॥

एकविंशत् सहस्राणि षट्शतं तत्र कारणम् ।

हंसमार्ग महोरात्रन्नासिमार्गे गमिष्यति ॥

त्रीण्यं शैकांश भोगन्तु तथापूरित मायुकम्।
निश्वासोश्वास सम्बन्धमेक प्राणावसानकम् ॥

वायुगम्यं यथा नाश तथा गम्यं स्वसिजम्।
गम्यन्ते वरणावस्था अगम्यं सिद्धिरुत्तमम्।
मूलमन्त्र प्रतीकाश मूल कुण्डलिनोदयम् ॥

तन्मध्येहंसमुद्योगं तन्मध्ये बिन्दु संस्थितम्।
अकारोकारमकारं च क्रियाकुण्डलिनोदयम् ॥

कुण्डलीत्रय मध्यस्थे सोमसूर्याग्नि सम्भवम्।
सोमसूर्याग्निमध्यस्थं सृष्टि स्थित्यन्तकारणम् ॥

नादमार्गं तथा शक्ति ज्ञानान्तं तच्छिवोदयम्।
शिवोहमस्य प्रकारं सोहमस्मिन् समाश्रितम् ॥

सोहंमार्ग सुषुम्नो हि प्रकाशे साधकोत्तमः ॥

पृ। ६८)

ऋद्धि सिद्धिर्भविष्यन्ति सोहंभावं समाचरेत्।

मूलारविन्द मध्यस्थे हकारं वह्नि मण्डलम्॥

वह्नि ज्वाला प्रतीकाशं हंस हौवर्णमुद्भवम्।
मूलास्मि नाभिचक्रान्तं सान्तवर्णस्ततोदितम्॥

नाभ्यादि हृदयान्तं च उकार ज्योतिरूपकम्।
* * * * जिह्वान्तस्ये ऋकार ज्योति सङ्गमम्॥

जिह्वादि नासिका मध्याहदान्तं बिन्दुरूपकम्।
भ्रुवादि मध्यगान्तं च नाभिस्थानं विशेष्यकम्॥

मस्तकादि शिखान्तं च नादान्त स्थानमाचरेत्।
तदूर्ध्वे परमाशक्तिस्तदूर्ध्वे परमः शिवः॥

आधारादि शिखान्तस्थे द्वे धनं मन्त्रशोधनम्।
शिखाग्रे द्वादशाङ्गुल्ये शिवं सूक्ष्म परोदितम्॥

प्रासाद परया विद्या साधकः साधकोत्तमः।
प्रासाद परसंघट्टं नवाधारस्तु शोभनम्॥

नवाधारस्य * * * * * * * * दर्शनम्।
प्रासाद परयोर्विद्या सर्वसिद्धिस्ततोदितम्।

॥ इत्यष्टसिद्धिपटलः समाप्तः ॥

अतः परं प्रवक्ष्यामि मूर्त्यंश स्वविधानकम्।
बिन्दुमध्यगतोनादं नादमध्यगतः शिवः॥

नादलिङ्गमिति प्रोक्तं बिन्दुपीठमिति स्थितम्।
बिन्दुनाद समाश्रेयं भगलिङ्गद्वयोदितम्।
भगस्यान्तर्गतं लिङ्गं लिङ्गस्यान्तर्गतं भवम्॥

भगलिङ्ग समाश्रेयं शिवशक्तिद्वि संगमम्।
क्रियाशक्ति स्थितो विष्णुः उमासोमप्रकिर्तिता ॥

इच्छा * * * * * * * * * * * * * ।?

शक्ति शिवः * * * *? नाडी वाम प्रकीर्तिता ॥

ब्रह्मी चैव सुषुम्ना जेष्ठा शक्तिप्रकीर्तिता ।

स्था? पिङ्गला ज्ञेया * * * * * * * * * * ।

ज्ञानसूलमिदं प्रोक्तं शक्तित्रयसमन्वितम् ।

भित्वा सोमञ्च सूर्यञ्च तृतीयावह्निमण्डलम् ।

रेख त्रय त * * * * * * * * * ? व्यवस्थिता ॥

तस्य वा सलिले वाथ ज्ञानशूल न विन्यसेत् ।

अग्निमध्ये यजेद्यस्तु स्वायम्भु भुवनेश्वरम् ॥

p. 42)

* * * * * * * * * *? कृस चराचर ।

पातालभन्त्रितहेलं ।?

सोमतीर्थे यजेद्यस्तु स्वयम्भुकाय पालनम् ।
पूजितन्तर सर्वस्या? निष्क? * * * * * * * ॥

पातालञ्च महीचार्द्ध मध्याह्ने चन्द्रमुच्छ्रयम् ।
रत्नानां पूर्णयो दद्या योगिना संसितव्रतं ॥

स्वदेह पुष्येमेके * * * * ? भन्तितच्छालं ।
विसुद्धसन्धिधस्या * प्रजात्रिभुवनेश्वरम् ॥

स्वभावेनजि * * * * ? वैराग्य सदतो * ।
* यन्तं स्तुति कृ *?व रत्नानां पूर्णयादद्या ॥

आचार्य कोति कोटि जि * * * * * * * * ।?
* * देह शिव पुष्प च * * * * * * * ॥?

द्विगुणं गन्ध?संयुक्तं धूपनैव चतुर्गुणम् ।
गन्धपुष्पसुलाभेन * * * * * * * * ॥?

* * * * * * * * * * * * *? व्या हृदय ।

यदेत निष्क? * * * * * * * * * तनम् ।
निष्कल निर्मलं शान्तं निष्प्रपञ्चमे लक्षणम् ॥

अप्रतर्क्यमविज्ञायम्विनाशोत्पत्ति वर्जितम् ।
कैवल्यं केवलं शान्तं शुद्ध *? करणं योगनिर्मुक्तं हेतु साधन वर्जितम् ।

तत्क्षणादेवमुच्यन्ते तं ज्ञानं ब्रूहि शङ्कर ।
यत्र मुक्ति तदाकाशं देहस्थं देहवर्जित ॥

p. 30)

* * * * कथ देह क देवा देहवर्जितम् ।?
कावे? जीवास्थिता देह जीवजीव प्रकीर्तितम् ॥

केन जीवन्यसौ जीव केन मार्गेण संचर ।
सकलस्तु कथं जीवा वि *? भवेत् ॥

कथं पश्यत्यसौ जीवौ कि * जीवस्य भाजनम् ।
कुत्र वालीयते जीवो जायते कोत्रमेव हि ॥

किं वर्णे किम्प्रमाणन्तु जीवस्य।
सर्वमेतन्समाख्या हि देवदेव महेश्वर ॥

भवसागरबन्धा तु आदि मोक्षदविप्रभो।

ईश्वर उवाच ॥

वायुस्तेज सुद्धा व * * * * * * संज्ञितम्।
जीवप्राणमित्युक्तम्बा बालाग्र शत कल्पितम्॥

जीव शुक्लस्तु विज्ञेयं *? वस * त संयुतम्।
रजेनं * * * * * * * * * प्रकीर्तितम्॥?

तमेन तु समायुक्तं जीव कृष्णा भवे ध्रुवम्।
जीवं सत्व समायुक्ता * * * * * * * ते ॥

रजेन * समाम * * * * * * * * भुः।?
* * * * * ?युक्तो तदा पापे प्रवर्त्तते ॥

* * * * * * * * * * * * * * * * ?।

* * * * * * * * * * * * * * * * ॥?

प्राणस्व विज्ञेयं नासाग्रं यावसंस्थितम् ॥

तत्रस्था निष्कलैः प्रोक्तः * * * * * * * * ।?

* * * * * * * * * * * * * * * * * * ॥?

तच्छ व्योमी तदालीनताव निष्कलताङ्गतः पुनश्वास तृतीयन्तु जीवस्य परिकीर्तितम् ।

हृत्पद्मसु सिरणैव अ * * * * * * ?वम् ।

जीव * व समित्युक्तं शिवेन परमात्मना ॥

यावननोश्वास देवी ताव निष्कलमुच्यते ।

नास्थिस्था निष्कला ज्ञा * * * * * * * * * ॥?

नाभिस्थं सर्वकार्येषु हृदिस्थं कार्य वर्जितम् ।

वक्रनासा पुटान्तस्था भुञ्जते विषयां प्रभुः ॥

देहस्थम्पश्यते जीवाजिघ्रते च सृणे * * * * * ।?

भुक्ते शुभाशुभं जीवो देह देहे व्यवस्थितः ॥

देहं त्यक्त्वा यदा जीवा बहिराकाशमासृतः ।
तदा निर्विषया जीवा भवते * * * * * * * * * ॥?

p. 44)

नव? व? निर्भव? ब्रह्मा तं ध्यात्वा स सदाशिवः ।
ध्यात्वा शिवमजन्नित्यं मुच्यते पापपञ्जरम् ॥

अनन्ता सर्वदेहस्थानासाग्रवस्थितं शिवम् ।
सर्वभूतानां दृश्यन्ते न च लक्षते ॥

नाभिमध्ये स्थितं देवी सिद्धि तत्व सुनिर्मलम् ।
आदित्यमिव दिप्यन्त न स्थितिः प्रज्वलन्ति च ॥

चाष्टमम्बीजं जीवाख्यं देहसंस्थितम् ।
नाभिमध्ये विनिष्क्रान्तं विषया व्याप्यसंस्थितम् ॥

ते नेदं व्याप्ये मलिनं क्षीरवत् शक्ति * * * *? ।
करणेरात्मकै गृह्य प्राण प्राण सदहकैः? ॥

श्वास निश्वास यागेन अधश्चोर्द्धञ्च ली * * वते।
सुष्क पत्रन्तु वाजिन * * * * * * * * * यथा ॥?

तथा भ्राम्यति जीवाख्या प्राणाप्राणख्योनाकजे।
प्राणाप्राणसमायुक्तो भीमाध्येव? हृदिस्थितम् ॥?

श्वास नि * * * * * * ? पुण्यपापैसमागतं? ।
अन्तर्यामी शक्त्यातो नाद * * * * * * * ॥?

* * * * * * * * * * * * * * * * ।?
* * * * * * * * * * * * * * * * ॥?

सिद्धकौलञ्च विख्यात अधसंचारवर्जितम्।
सुर * * * * * * * * * * * * * * * ॥?

* * * * * * * * * * * * * * * * * ।?
* * * * ?नभाश्चैव पतिताश्च विशेषतः ॥

अजरामर पदं व्याप्तं लभते चक्रमागतम्।
* * * * * * * * * * * * * * * मेव च ॥?

* * मण्डलाधिकारं अकुलं यागमासृताः एक पादुकमेव च ।?
तथैव पूजये नित्यं आत्मानस्तु विचक्षणः ॥

येन कौलार्णव * * * * * * * * क्षदा ? ।
चातुर्युगी प्रतिनाथ कलि पुयात्कथन्तुकः? ॥

तस्य कौलमिदं दिव्यं निर्नाशन्तु कदाचनः ।
येन व्याप्त सदासर्व * * * * * * * * ॥?

एकमेवन्तु मूलस्या शाखा तस्य मनेकधा ।
तस्य मूल प्रभावेन प्ररोहं स चराचरम् ॥

एक बीजन्तु तत्वस्थं चकाकारसमास्थितम् ।
व्यापकं व्योम *? येग? अनन्तम्विमल प्रभुः ॥

कारणन्निर्मलस्यान्ते शाश्वतं रूपनिश्चलः ।
निरात्मेति ना *? कासं निराचारस्वभावतः ॥

षट्वर्णरहितं तत्व निष्कल?म्बिता लम्बकः ।
p. 45) स्वभाव वर्तनिरूप स्वभाव पिण्डमध्यमः ॥

नित्य भक्त्य? सदायोगी साधये पिण्डमुत्तमम् ।

एकास्त्रमे समायुक्तं एक स्थान निवासिनी ॥

न पीठ गमनश्चैव नवति क्षेत्रमेव च ।
देहस्थ पीठ क्षेत्रे तु नान्य क्षेत्रं पर्यटते ॥

वलि वह्निवरं यत्र तत्रासौ कुलसमुद्भवम् ।
कुलाधारङ्कुलम्पीठ अकुलं क्षेत्रपालकम् ॥

न योगिनी मेलकश्चैव न तु चर्या विधिक्रमा ।
शिवशक्ति महामेला दिव्यमेलास उच्यते ॥

* * * याग?पट्वाशं न योगदण्डधारणम् ।
नेकेशो वञ्चनश्चैव मुञ्जमेखलादिकम् ॥

न कौपीनं व्रतश्चैव अ * कुलिङ्गवर्जितम् ।
रसंध्या अग्नि? * * *? न द्रव्यं होमकादिकम् ॥

देहस्थन्तु महाकुण्डं ज्वलन्तन्तेजमण्डलम् ।
कालानल प्रतीकाशं विद्युत्कान्ति समप्रभः ॥

समय सत * * * * * * ?जगसासयः ।?

अनाधि क्रमसम्प्राप्तं कुल भेदेन नि * * *? ॥

* * * * * * * * * * * * * * * * ।?

वज * वा? प्रयत्नेन एकाकार पदस्थितम् ॥

सर्वेषां ता * * * * * * * * * * * *? ।

* * * * * * * * * * * * * * न यद्वत् ॥?

महामार्ग यदा दृष्ट्वा सर्वतत्व न संशयः ।

एकाकार स्थितन्तत्वं व्याप्ति * * * ? संस्थितम् ॥

एतत्कौलमिदं द्रव्य शिवशक्ति समन्वितम् ।

सिद्धाश्च योगिनी चैव सर्वपीठसमाशृताः ॥

पूजयेत्कुलमार्गेणव्योमस्थित येन व्याप्तं समन्त्र प्राप्तमिदं दिव्यं यत्कुलं पीठमुत्तमम् ।

न तस्य यन्त्रमन्त्राणि न क्षुद्रमन्त्रसाधने ।

स पश्यते समरसं कट्मयं? सचराचरम् ॥

समत्वावीतरागन्तु उदार सान्ते च * सा ।
तथा वक्रविनिर्मुक्तं गुरु भक्तिसमाहितम् ॥

समयपालयेन्नित्यं एकाकार पदास्थितम् ।
तदात्मकौलमायान्ति निर्वाणं येन वाप्नुयात् ॥

ताञ्च स्वच्छया योगी निराचारपदस्थितम् ।
स मुक्ति सर्वतत्वेषु मुक्तिसंसारबन्धनात् ॥

अजरामर पदं व्याप्तं तदा मुक्ति न संशयः ।
दिव्य पीठे? भवेद्योगी वलीपलित वर्जितः ॥

p. 33)

पर्यष्टन्ति गगना भागा स देवासुरमानुषां ।
न पुनः वध्यते तेषाम्पद्मपत्रमिवाम्भसा ॥

एतत्तु विमलन्दिव्य *? सू?नान्तिमिरापहम् ।
ज्ञातव्यां सिद्धकौलन्तु सिद्धनाथेन भाषितम् ॥

न चन्द्ररविमध्यस्थं न वह्नि पवनन्तथा।
उपदेशेन तं गम्य गुरुवक्रं व्यवस्थितम्॥

अविकल्पेन गृहीत श्रीमुखेन विनिर्गतः।
अनन्तविमलं शान्त हेतु लक्षण वर्जितः॥

कथितं मीननाथेन तद्याग सुदुर्लभम्।

एते यागसद्भावसमाप्तः॥

भैरव उवाच॥

न नाभि हृदये चैव न कण्ठे नैव तालुके।
न ललाटे वरारोहे घण्टिकाग्रे न विद्यते॥

ब्रह्मरन्ध्रप्रवाहेन न मोक्षनैव साधने।
द्वादशान्तेन चित्तस्य द्वि * * *? भावनम्? ॥

मनसा तत्वरूपेण मे * * * * ? विद्यते।

बुद्धि नेत्र भवेत् किञ्चि बुद्धिरन्ध्र विकल्पना॥

* * * * * * * * * * * * * * * * * । ?

* * * * * * * * * * * * * * * * ॥ ?

मलमाला तथा वर्णे जीवशक्ति वराननै।

उच्चारये * * * * * * * * * * * * ॥ ?

सर्वतत्वरूपेण तेषां मोक्षा न विद्यते।

या सा ग्रन्थि? महाभागे ज्ञानरूप परा *? रम्॥

* *? ग्रन्थि? महादेवि अन्य * * * * * * । ?

* * श्रोत्र तथा घ्राणवक्र गृह्य सदार्यति॥

नाडी दिव्यपरेशानि ज्ञात्वा व्याप्तं स चराचरम्।

पू?रक कुम्भकश्चैव रेचकन्तु तृतीयम्।

वर्जयेत्तानि देवि यदिमिच्छसि सिद्धिमुत्तमम्।

अथातसत्प्रवक्ष्यामि यथा तत्वस्य लक्षणम्।

न रेता न जडाश्चैव गात्म? परस्तथाश्चैव भरितावस्था सम्पूर्ण सर्वज्ञान स्त्रीधारिणी।

न शून्यं न प्रत्यक्षं न दूरेनापि मध्यमे ।

भरितावस्था सम्पूर्ण सर्वज्ञान श्रीधारिणी ।

न देहे गगने वापि लोलीभूत नैव च ।

एत पक्षविनिर्मुक्तं सा वस्था कौलिका गता ॥

p. 34)

एतावस्था परित्यज्य पूर्णावस्था महासुख ।

भरितावस्था मन्त्रास्तु योजनाति स कौलिकम् ॥

एकाकारगता शान्ती? परापरस्य तत्वस्य ॥

प्रयागवस्या । वाराणस्यां धीमर । कोलाकन्दुबी । अट्टाहासे खटिणी । जयन्त्याया *?म्बिनी । चरित्राच्छिप्पिणी । एकम्बा भलिनी देवीकोटे मालिनी ॥ ० ॥

स्रीमदनयाद । श्रीभट्टपाद । स्रीकालव्या । श्रीकालश्या? ॥ * * * * *? । आनन्दव्वा ॥ श्रीनन्तव्वा । श्रीवनदव्वा । श्रीमच्छन्दपाद । श्रीभाट्टपाद । श्रीहरिणपाद । श्रीधवलपाद । श्रीव्याप्यपाद? । आख्या-इ । इला-इ । उहा-इ । ऋ?षा-इ । * सा-इ । एसा-इ । ढहा-इ । अह्ला-इ । * * * *? । माहेश्वरी । कौमारी । इन्द्राणी? । * * *? । वाराही । चामुण्डी । महाभैरव लक्षी । अम * * ।

लानै।

* ।?

जीवाप्येव यदा देवी पुण्यपापैस्तु च? स्थितम्।

ज्ञानविज्ञान योगेन * जुदा॥

* * * * * * * * * * * * * * * * * ।?

* * * * * * * * * * * * * * * * * ॥?

च्चार्य शिवो देवी लिख्यते न च पठ्यते।

पठ द्वय विनिष्क्रान्ते वायुपुत्रप्रलीयते॥

स मुक्ति तं परं ब्रह्म तं शिवपरमं पदम्।

मुखाध्यय? परमं सूक्ष्मं दृश्यते व्योममव्ययम्॥

नासापुटविनिष्क्रान्ता वायु तत्र प्रलीयते।

तस्तु संस्थं मनकृत्वात? ध्याय सवरारने॥

स शिवस्तुः *?र्ती स मोक्षमोक्षदं स्वसे।

वनि व्योमन्तु यत्प्रोक्तं नासाग्रे तु व्यवस्थितम्॥

निर्वाणकारिका ॥

ॐ नमः श्रीना *? य *? नादिनि *? गुप्तं वर्णाचार विवर्जितम् ।

पारम्पर्यक्रमागत प्रभ * *? निर्मलम् ॥?

एकाकार * *?द्यैलं एकवीरतदुच्यते ।

अकुलान्नमिदं? दिव्यं विमल? * वादहत्त *? समारुतः ॥

p. 35)

निष्कल सत्ता वज्ञेययावद्योम्ने विव * * * ? सकारस्या तुरबीजक्षकारस्या विपञ्चम ॥

एका * संयुक्तं षष्टेन तु समन्वितम् ।

आसनन्तु जगस्याक्तौ शिरेण परमात्मना ॥

सकला ह्येष देव स निष्कलं सृणुपार्वती ॥

द्वाद * त्तन्तु यद्बीजं नवान्तं चैव भाविनी ।

ऊर्द्ध एकादशनवानिर्मुक्तमधवर्जितम् ॥

वर्णान्ते तु यदा हीन तदा निष्कलमुच्यते।

निलं ह्येतदातव्यं तत्वतत्व न दुर्लभम्॥

वेद् *? वेदना नाम्नि मुक्तानिर्वाण कारिका।

पृच्छपित्वा ततो देवी गण गद?मृतं यथा॥

*? तं ज्ञानमेतस्तु शिवेन परमात्मना।

समासं बोधनांधाय? स्वयमात्मा प्रदर्शितः॥

साप?वेद सदादेवी पठ्यते मोक्षदं * प *?ताष्ये चैव विकल्प न वर? वीर

जगत्सर्वातिष्टन्ते परमेश्वरः॥

XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX
X
X title: j~naanasaara
X
X copied from manuscript c 4251 of banares hindu university
X
X
X data entered by the staff of muktabodha
X under the supervision of mark s.g. dyczkowski
X
X revision 0: april 7, 2012
X
XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX

* मः * रा * ये ॥

नाथज्ञानसारो लिख्यते ॥

कथमुत्पदते वाक् च कथं वाक् च विलीयते ।

वाच?स्तु निर्णयं ब्रूहि पश्चात् तत्वमुदीरय ॥

श्री * श्व * उ * च ॥

आहारं काङ्क्षयेत् प्राणः प्राणादुत्पद्यते मनः।
मनु स्युत्पद्यते वाक्य? मा? च मनसि लीयते ॥

श्री * व्यु * च ॥

आहारं काङ्क्षयेत् प्राणो भुञ्जानो पिचकः कथम्।
जागर्ति स्वपते कोसौ सप्तः कोवाप्रबु?ध्यते ॥ ३ ॥

श्री * श्व * उ * च

आहारं काङ्क्षयेत् प्राणो भुङ्क्ते चैव हुताशनः।
p. 174a) जागर्ति स्वपते वायुः सुप्तं तेजो विबुध्यते ॥ ४ ॥

श्री * व्यु * च

को वा करोति कर्माणि को वा लिप्येत पातकैः।
को वा करोति पापानि को वा पापे प्रवर्तयेत् ॥ ५ ॥

श्री * श्व * उ * च

मनः करोति कर्माणि मनो लिप्येतपातकैः।
मनो हि तन्मयी भूतं न धर्मों न च पातकम्॥ ६॥

श्री * व्यु * च

यदिदं निष्कलं ब्रह्म व्योमातीतं सनातनम्।
निर्द्वन्द्वं निर्मलं शान्तं निष्पापं समलक्षयेत्॥ ७॥

अप्रतर्क्यमविज्ञेयं विनासोत्पत्ति वर्जितम्।
कैवल्यकेवलं शश्वच्छुद्धस्फटिकसन्निभम्॥ ८॥

p. 174b) तत्क्षणान्मुच्यते येन तज्ज्ञानं ब्रूहि शङ्कर।
यदिदं शक्तिराकाशं देहस्थं देहवर्जितम्॥ ९॥

कथं जीवत्यसौजीवो निष्कलस्तु कथं भवेत्।
केन पश्यत्यसौजीवः किं वा जीवस्य भोजनम्॥ १०॥

कुत्र वा लीयते जीवो जागर्ति कुत्र एव वा।
को जनः किं प्रमाणं तु जीवस्यापि प्रकीर्तितम्॥ ११॥

एतत्सर्वं समासेन ब्रूहि मे परमेश्वर॥

श्री * श्व * उ * च

शृणु देवि प्रवक्ष्यामि यत्त्वया समुदीरितम्।
कथयामि न सन्देहः सारात्सारतरं परम्॥ १३॥

वायुर्जीवस्तथा काशस्तृतीयो जीवसंज्ञकः।
स जीवः प्रभुरित्युक्तो बालाग्रं शत कल्पितः॥ १४॥

p. 175a) जीवश्शुक्लस्तु विज्ञेयो यावत् सत्वेन संयुतः।
रजस्सत्त्वसमायुक्तो रक्तो जीवः प्रकीर्तितः॥ १५॥

तमस्सत्त्वसमायुक्तस्तदा कृष्णो भवेद्ध्रुवम्।
सत्त्वेन च समायुक्तो धर्मज्ञाने प्रवर्तते॥ १६॥

रजः सत्त्वसमायुक्तो भुङ्क्ते तु विषयानपि।
तमस्सत्त्वसमायुक्तस्तदा पापे प्रवर्तयेत्॥ १७॥

नासाग्रं चैव नाभिश्च हृदयं च तृतीयकम्।
स्थानान्येतानि जीवस्य कलितानि शिवेन तु॥ १८॥

कपलं हृत्स्वरूपं च ह्यधो यावद् व्यवस्थितम्।
देह स?ङ्ग न मित्युक्तं शिवेन परमात्मना॥ १९॥

यावन्निश्श्वासतो जीवो भवेन्निष्कलतां गतः।
p. 175b) नासाग्रे निष्कलं ज्ञात्वा मुच्यते जन्म बन्धनात्॥ २०॥

सर्वाङ्गः सर्वदेहस्थो नासाग्रे च प्रतिष्ठितः।
अतर्क्यः सर्वभूतानां दृश्यते न च लक्ष्यते॥ २१॥

नाभिमध्ये स्थितं विश्वं सिद्धतत्त्वं तु निर्मलम्।
आदित्यमिवतद्दीप्तं रस्मिभिस्तत्क्षणं शिवम्॥ २२॥

आकाराष्टकसञ्जीवं देहोक्तं देहवर्जितम्।

नाडीरन्ध्राद्विनिष्क्रान्तं विषयान्प्राप्यसंस्थितम् ॥ २३ ॥

तेनेदं निष्कलं विश्वं क्षीरसर्पि समोपमम् ।
करणात्मया?यान्मुक्तो भ्रमते हृदयस्थितः ॥ २४ ॥

गोलकस्थो यथा देवि खेलनाद्दण्डबाह्यतः ।
देष्ठते भ्रमते शीघ्रमविश्रान्तः पुनः पुनः ॥ २५ ॥

कीदृशी खेचरी विद्या चोन्मना वातुं कीदृशी ।
बन्धनं कीदृशं देव कथयस्व महेश्वर ॥ १ ॥

को दण्डमध्यगं देवि सङ्कोचेन त्रिलोचने ।
न सूर्यचन्द्रमार्गेण लम्पिका करणं प्रिये ॥ २ ॥

लोलां रन्ध्रमुखे कृ?त्वा विपथे योजयेत् प्रिये ।
सा भवेत् खेचरी मुद्रा व्योमचक्रं तदुच्यते ॥ ३ ॥

कण्ठसङ्कोचनं कृत्वा द्वे नाड्यौ स्तम्भयेद्ध्रुवम् ।
मध्यचक्रमिदं भद्रे षोडशाराधंबन्धनम् ॥ ४ ॥

p. 176b) नाभिशक्ति द्वये मध्ये स्थानं देयं पराङ्मुखम् ।
मूलचक्रमिदं भद्रे सत्पथव्याधिनाशनम् ॥ ५ ॥

रसनामूर्धगां कृत्वा क्षणाध्वं यदि तिष्ठति ।
क्षणेन मुच्यते योगी व्याधिभिस्तु जरादिभिः ॥ ६ ॥

रसनाभ्यन्तरे नित्यं यावद्ब्रह्मबिलंगता ।
अमृताग्रसने घ्राणं पीडयमानं विचिन्तयेत् ॥ ७ ॥

मासार्द्धाज्जयते मृत्युं सत्यं सत्यं महामते ।
सर्वव्याधिविनि *?क्तो योगीनाथो न संशयः ॥ ८ ॥

रसना तालु मूलेन वायुं पीत्वा शनैः शनैः ।
षण्मासाभ्यन्तरे विश्वे बलीपलित नाशनम् ॥ ९ ॥

घृतास्वादूपमानाश्च ह्यमरत्वं न संशयः ।
मधुस्वादूपमानाश्च शास्त्रोत्गीरणता भवेत् ॥ १० ॥

p. 177a) मृष्टानिखण्डकद्यानि लड्डुकाशोकवर्तिकाः।
एवं वाराह्यनेके च कामदेवो व्यवस्थितः॥ ११॥

दिव्यकन्यागणेनित्यमाकृष्टिर्जायते सदा।
हिक्कादद्यात्सदावक्रे प्रायश्चैव विजृम्भिकाम्॥ १२॥

एवमभ्यस्यमानस्तु कामदेवो द्वितीयकः।
योगिनी गुणसामान्यः सृष्टिसंहारकारकः॥ १३॥

न क्षुधा न च तृण्निद्रा नैव मुर्छा प्रजायते।
भवेत्स्वच्छन्ददेहस्तु सर्वोपद्रववर्जितः॥ १४॥

अनेन विधिना देवि योगीन्द्रो भूमिमण्डले।
नभस्य पुनरावृत्तिः पूजितः स्यात्सुरैरपि॥ १५॥

पुण्य पापैर्न लिप्येत भयमुद्रा विदुत्तमः॥

तालुमध्ये स्थितश्चन्द्रो नाभिमध्ये दिवाकरः।
अमृतं स्रवते चन्द्रो विषं प्रज्वलितो रविः॥ १॥

सूर्याग्रे वसते वायुश्चन्द्राग्रे वसते नभः।

सूर्याग्र मनुवर्तेत चन्द्राग्रं चैव नित्यशः॥ २॥

चन्द्रसूर्य द्वयोर्मध्ये मुडादद्या? तु खेचरीम्।

निरालम्बं मनः कृत्वा न किञ्चिदपि चिन्तयेत्॥ ३॥

स बाह्या भ्यन्तरे योगी घटवत्तिष्ठते प्रिये।

बाह्ये वायुस्तथा पृष्ठे चान्ते वायुर्न संशयः॥ ४॥

स्वस्थाने गच्छते वायुर्मनस्तत्रैव लीयते।

p. 178a) अमृतं प्राप्नुयाद्योगी महाबलपराक्रमः॥ ५॥

वायुवेगेन देवेशि सकलां भ्रमते महीम्।

अष्टधागुणमैश्वर्यं सत्यं सत्यं न चान्यथा॥ ६॥

शङ्खदुन्दु?भिनादेन न शृणोति कदाचन।

काष्टवज्ञायते योगी नोत्पत्त्या वै प्रजायते॥ ७॥

शक्ति द्वयस्य मध्ये तु हीन्द्रियाख्यं तदुच्यते।
अनेनैव च बन्धेन सद्यमृत्युविनाशनम्॥ ८॥

कायं च भजते क्षेत्रं मूलबन्धेन पार्वति।
निरालम्बं भवेद्बीजं नान्यथा सिद्ध्यति ध्रुवम्॥ ९॥

ऊर्ध्वाधो बन्धमादाय कृत्वा चिन्ता मनामये।
सिद्ध्यते नात्र सन्देहो गोपनीयो महामते॥ १०॥

p. 178b) अण्डजालजाश्चैव स्वेदजा भेदजास्तथा।
एक द्वि त्रि चतुष्पञ्चेन्द्रियाणि सर्वजन्तुषु॥ १॥

सर्वेषामेक एवात्मा साधारो बीजरूपवान्।
शब्दः स्पर्शश्च गन्धश्च रसोरूपं च पञ्चमं॥ २॥

बुद्ध्यहङ्कारसंयुक्तं मनस्तत्रव्यवस्थितम्।
यथामूले लताबीजं तथा पतन्ति जन्तवः॥ ३॥

सस्यवत्सर्वबीजानां जन्माप्तिश्च पुनः पुनः।

वाहकश्चैवमात्मापि धर्माधर्मौ तु बन्धनम्॥ ४॥

अन्तरात्मा यथा तिष्ठेत् स्वरूपं पारमेश्वरम्।
तस्मिन् काले वरारोहे लीयते घटवत्घृतम्॥ ५॥

p. 179a) सर्पिषावात्रयोगेन पृथत्त्वं च न विन्दते।
उल्का हस्तो यथा कश्चिद्द्रव्यमालोकतां नयेत्॥ ६॥

कर्मशौचं मनःसौचं मनसो ज्ञानमेव च।
ध्यायेत तु जगत्सर्वं देहिनां देहमाश्रयम्॥ ७॥

यथामृतेन तृप्तस्य पयसा किं प्रयोजनम्।
आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्॥ ८॥

ध्याननिर्मथनाभ्यासाद्देवं पश्येत कुण्डगम्।
कायस्थोपि न कायस्थः कायस्थोपि न नश्यति॥ ९॥

भुङ्क्ते भोगांश्च कायस्थः कायस्थोपि न वध्यते।
यथाखरश्चन्दनभारवाही भारस्य वा हीन तु चन्दनस्य।

तथैव मूर्खो बहुशास्त्रपाठी शास्त्रस्य पाठी न तु निश्चयस्य ॥ ११ ॥

p. 179b) आहारनिद्राभयमैथुनानि समानमेतत् पशुभिर्नराणाम् ।
ज्ञानं नराणामधिको विशेषास्ते नैव हीनः पशुभिः समानः ॥ १२ ॥

यावद्बिन्दु सहस्राणि कोटिबिन्दुशतानि च ।
सर्वथाभस्मतां यान्ति यत्र देवो निरालयः ॥ १३ ॥

ह्यन्यते मुष्टिना काशं क्षुधार्ता खण्डयेत्तुषम् ।
ब्रह्मदण्डं न जानाति न मुक्तिः स्याद्वरानने ॥ १४ ॥

शास्त्रं ह्यनन्तं बहुधा च विद्या अल्पश्च कालो बहवश्च विघ्नाः ।
यत्सारभूतं तदुपासितव्यं हंसो यथा नीरमिवाम्बु मध्ये ॥ १५ ॥

तद्ध्यानस्तत्गतिस्थोपि कृत्वा पापशतान्यपि ।
लिप्यतेन स पापेन पद्मपत्रमिवाम्भसा ॥ १६ ॥

इदं शास्त्रमिदं ज्ञानं यः सर्वं ज्ञातुमिच्छति ।
अपिवर्षसहस्रायुः शास्त्रान्तं नाधि गच्छति ॥ १७ ॥

XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX
X
X title: vij~naanabhairava
X
X copied from manuscript c.n. 4245 of banares hindu university
X
X
X data entered by the staff of muktabodha
X under the supervision of mark s.g. dyczkowski
X
X revision 0: april 7, 2012
X
XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX

विज्ञानभैरवभट्टारकोयं लिख्यते ।

ॐ नमः परम भैरवाय ॥

श्रुतं देव मया सर्वं रुद्रयामलसम्भवम् ।

त्रिकभेदमशेषेण सारात्सारविभागशः ॥ १ ॥

अद्यापि न निवृत्तं मे संशयः परमेश्वर।
किं नवात्मक भावेन भैरवे भैरवाकृतौ॥ २॥

p. 73a) त्रिशिरो भेदभिन्नात्मा किं वा शक्ति त्रयात्मकम्।
नादबिन्दु मयं वापि किं चन्द्रावनिरोधकम्॥ ३॥

चक्रारूढमनस्कं वा किं वा शक्ति स्वरूपकम्।
परापरायाः सकलमपरायाश्च वा पुनः॥ ४॥

पराया यादि तद्वत् स्यात् पुरत्वं तद्विरुद्धयते।
न हि वर्णविभेदेन देहभेदेन वा भवेत्॥ ५॥

परत्वं निष्कलत्वेन सकलत्वेन तद्भवेत्।
प्रसादं कुरु मे नाथ निश्शेषं च्छिन्दिसंशयम्॥ ६॥

साधु साधु त्वया पृष्टं तन्त्रसारमिदं प्रिये।
गूहनीयतमं भद्रे तथापि कथयामिते॥ ७॥

यत्किञ्चित् सकलं रूपं भैरवस्य प्रकीर्तितम्।

तदसारतया देवि विज्ञेयं चक्रजालवत् ॥ ८ ॥

मायास्वप्नोपमं चैव गन्धर्वनगरभ्रमम् ।
ध्यानार्थं भ्रान्तबुद्धीनां क्रियाडम्बरवर्तिनाम् ॥ ९ ॥

केवलं वर्णितं पुंसां विकल्पनिहतात्मनाम् ।
तत्त्वतो न नवात्मासौ शब्दराशिर्न भैरवः ॥ १० ॥

न चापि त्रिशिरा देवो न च शक्तित्रयात्मकः ।
न चक्रक्रमसं भिन्नं न च शक्तिस्वरूपकः ॥ ११ ॥

अप्रबुद्धमतीनां हि एताबालविभीषिकाः ।
मातृमोदकवत्सर्वं प्रवृत्यर्थमुदाहृतम् ॥ १२ ॥

दिक्कालकलना मुक्ता देशोद्देशां विशेषिणी ।
व्यपदेष्टूसुशक्त्यासानशक्त्यापरमार्थतः ॥ १३ ॥

अन्तः स्वानु भवानन्दा विकल्पोन्मुक्तगोचरा ।
p. 74a) यावस्थभरिताकार्या भैरवी भैरवात्मनः ॥ १४ ॥

तद्वपुस्तत्त्वतो ज्ञेयं विमलं विश्वपूरणम् ।
एवं विधे परे तत्त्वे कः पूज्यकश्च तृप्यति ॥ १५ ॥

एवं विधा भैरवस्य यावस्था परिगीयते ।
सा परापररूपेण परादेवी प्रकीर्तिता ॥ १६ ॥

शक्ति शक्ति मतो यस्मादभेदः सर्वदा स्थितः ।
अतस्तद्धर्मधर्मित्वात् पराशक्तिः परात्मनः ॥ १७ ॥

न वह्नेर्दाहिकाशक्तिर्व्यतिरिक्ता विभाव्यते ।
केवलं ज्ञानसत्तायां प्रारम्भेयं प्रवेशने ॥ १८ ॥

शक्त्योवस्थां प्रविष्टस्य निर्विभावेन भावना ।
तदासौ शिवरूपीस्याच्चैवीमुखमिहोच्यते ॥ १९ ॥

यथा लोके न दीपस्य किरणैर्भासकरस्य वा ।
p. 74b) ज्ञायते दिग्विभागादि तद्वद्भत्त्या शिवः प्रिये ॥ २० ॥

देव देव त्रिशूलाङ्क कपालकृतभूषण।

दिग्देशकालशून्या च व्यपदेशीववर्जिता ॥ २१ ॥

या शक्तिर्भरताकारा भैरवः सोपलभ्यते।

कैरुपायैर्मुखं तस्य परादेवी कथं भवेत् ॥ २२ ॥

यथा सम्यगहं वेद्मि तथा मे ब्रूहि भैरव ॥

ऊर्ध्वप्राणो ह्यधोजीवो विसर्गात्मासरोच्चयेत्।

उत्पत्ति द्वितयं स्थाने भरणाद्भवित स्थितिः ॥ २४ ॥

सरतोन्तर्बहिर्वापि विद्याद्युग्मनिवर्तनात्।

भैरव्या भैरवस्येत्थं भैरवि व्यज्यते वपुः ॥ २५ ॥

न व्रजेन्न विशेच्छक्तिर्मरुद्रूपाविकासते।

p. 75a) निर्विकल्पतयामध्ये तथा भैरवरूपधृत् ॥ २६ ॥

कुम्भितारे चितावापि पूरिता वा यथाभवेत्।

तदन्ते शान्तनामासौ शक्त्याचान्तः प्रकाशते ॥ २७ ॥

आमूलात्किरणाभासं सूक्ष्मासूक्ष्मतरात्मिकम् ।
चिन्तयोन्ते द्विषट्कान्ते शाम्यन्ते भैरवादयः ॥ २८ ॥

उद्गच्छन्ती तडिद्रूपां प्रतिचक्रं क्रमात् क्रमम् ।
ऊर्ध्वं मुष्टित्रयं यावत् तावदन्ते महोदयः ॥ २९ ॥

भ्रमद्वादशकं सम्यग् द्वादशाक्षरभेदितम् ।
स्थूलसूक्ष्मपरिस्थित्या मुक्त्वा मुक्त्वा ततः शिवः ॥ ३० ॥

तया पूर्यास्तु मूर्द्धान्तं भक्ष्याभृक्षे पसेत्तना ।
निर्विकल्पं मनः कृत्वा सर्वोद्ध्वें सर्वगोद्गमः ॥ ३१ ॥

शिखिपक्षैश्चित्तरूपैर्मण्डलैः शून्यपञ्चकम् ।
p. 75b) ध्यायतोनुत्तरः शून्ये प्रविशो हृदये भवेत् ॥ ३२ ॥

ईदृशेन क्रमेणैव यत्र यत्रापि चिन्तयेत् ।
शून्ये वक्रे परे पात्रे स्वयं लीना वरप्रदा ॥ ३३ ॥

कपालान्तर्मनोन्यस्य तिष्ठेन्मीलित लोचनः।

क्रमेण मनसो दाढर्याल्लक्षते लक्षमुत्तमम्॥ ३४॥

मध्यनाडी मध्यसंस्था विससूत्रावसू त्रया।

ध्यातात्तयो महादेव्या तया देवः प्रकाशते॥ ३५॥

कररुद्ध दृगस्तेन भ्रूभेदाद्द्वाररोदनात्।

दृष्टे बिन्दौ क्रमालीने तन्मध्ये परमास्थितिः॥ ३६॥

धामान्तः क्षोभसम्भूता सूक्ष्माग्नि तिलका कृतिः।

बिन्दुं शिखान्ते हृदये लयान्ते ध्यायते लयः॥ ३७॥

p. 76a) अनाहते पात्रकर्णे भग्नशब्दपरिश्रुते।

शब्दब्रह्मणि निष्णातः परं ब्रह्माधि गच्छति॥ ३८॥

प्रणवादि समुच्चारात् प्लुतान्ते शून्यभावनात्।

शून्यया परया शक्त्या शून्यता चेति भैरवि॥ ३९॥

यस्य यस्यापि वर्णस्य पूर्वान्तावनु भावयेत्।

शून्यया शून्य भूतोसौ शून्याकारः पुमान्भवेत्॥ ४० ॥

तन्त्र्यादि वाद्यशब्देषु दीर्घेषु क्रमसंस्थितः।
अनन्यचेताः प्रत्यन्ते परंव्योमवपुर्भवेत्॥ ४१ ॥

पिण्डमात्रस्य सर्वस्य सूक्ष्ममन्त्रक्रमेण तु।
अर्धेन्दुबिन्दुनादान्तः शून्योच्चाराद्भवच्छिवः॥ ४२ ॥

निजदेहे सर्वदिक्कं युगपद्भावयेद्द्वयम्।
निर्विकल्पमनास्तस्य वियत्सर्वं प्रवर्तते॥ ४३ ॥

p. 76b) पृष्ठशून्यं मूलशून्यं युगपद्भावये च यः।
युगपन्निर्विकल्पत्वान्निर्विकल्पोनयस्ततः॥ ४४ ॥

तनूद्देशे शून्यतया क्षणमात्रं विभावयेत्।
निर्विकल्पं निर्विकल्पे निर्विकल्पा स्वरूपभाक्॥ ४५ ॥

सर्वदेहगतं द्रव्यं नि * द्याप्तं मृगेक्षणे।
विभवेयद्यतस्तस्य भावना सा स्थिरी भवेत्॥ ४६ ॥

न किञ्चिदन्तरं तस्य ध्यायन्नध्येय भाग्भवेत्।
हृद्याकाशविलीनाक्षः पद्मसंपुटमध्यगः॥ ४७॥

अनन्य चेताः सुभगे परं सौभाग्यमाप्नुयात्।
सर्वतः स्वशरीरस्य द्वादशान्तं मना नयेत्॥ ४८॥

दृढबुद्धिर्दृढीभूतं तत्त्वलक्षं प्रवर्तते।
p. 77a) यथा यथा यत्र यत्र द्वादशान्ते मनः क्षिपेत्॥ ४९॥

प्रतिक्षणं क्षीणवृत्तेर्वै लक्षण्यं दिनैर्भवेत्।
कालाग्निना कालपुरादुर्थि तेन स्वकं पुरम्॥ ५०॥

प्लुष्टं विचिन्तयेदन्ते शान्ताभासस्तदा भवेत्।
एवमेव जगत्सर्वं दग्धं ध्यात्वा विकल्पितः॥ ५१॥

अनन्यचेतसः पुंसः पुंभावः परमो भवेत्।
स्वदेहे जगतो वापि सूक्ष्मसूक्ष्मतराणि च॥ ५२॥

तत्त्वानि यानि निरयं ध्यात्वान्तर्व्यथते परा।
पीनां च दुर्लभां चैव ध्यात्वा द्वादशगोचरे॥ ५३॥

प्रविश्य हृदये ध्यायन्युक्तः स्वातन्त्र्य माप्नुयात्।
भुवनत्वादि रूपेण चिन्तयेत्तपसोखिलम्॥ ५४॥

सूक्ष्मस्थूलपरित्यागं यावद्दत्ते मनोलयः।
अस्य सर्वस्य विश्वस्य पर्यन्तेषु समन्ततः॥ ५५॥

p. 77b) अध्वप्रक्रियया तत्त्वं देवं ध्यात्वा महोदयः।
विश्वमेतन्महादेवि शून्यभूतं विचिन्तयेत्॥ ५६॥

तत्रैव शमनोलीनं ततस्तल्लयभाजनम्।
निर्वृक्षगिरिभित्त्यादि देशे दृष्टिं विनिक्षिपेत्॥ ५७॥

विलीने मानसे भावे वृत्तिक्षीणा प्रजायते।
उभयोर्भावयोर्ज्ञाने ध्यात्वा मध्यं समाश्रयेत्॥ ५८॥

युगपश्च द्वयं त्यक्त्वा मध्ये तत्त्वं प्रकाशते।

भावे त्यक्ते निरुद्धा चेन्नैव भावान्तरं व्रजेत्॥ ५९॥

तदातन्मध्यभावेन विकसत्यति भावना।
सर्वदेहे तन्मयं हि जगद्वा परिभावयेत्॥ ६०॥

युगपन्निर्विकल्पेन मनसा परमोद्भवः।
वायु द्वयस्य सङ्घट्टादन्तर्वा बहिरन्ततः॥ ६१॥

p. 78a) योगी स तत्त्वविज्ञानं समुत्गमनभाजनम्।
सर्वं जगत् स्वदेहं वा स्वानन्दभरितं स्मरेत्॥ ६२॥

युगपत् स्वादृतेनैव परानन्दमयो भवेत्।
कुहरेण प्रयोगेन सद्य एव मृगे क्षणे॥ ६३॥

समुदेन महानन्दे येन तत्त्वं प्रकाशते।
सर्वस्त्रोतो निबन्धेन प्राणशक्त्याध्वशासनैः॥ ६४॥

पिप्पीलस्पर्श वेलायां प्रथमे परमं सुखम्।
वह्नेर्विषय मध्ये तु चित्तं सुख मयंक्षिपेत्॥ ६५॥

केवलं वायुपूर्णं वा स्मरानन्देन युज्यते ।
शक्तिसङ्गमसंक्षुब्धं शक्त्या वेशावसानिकम् ॥ ६६ ॥

यत् सुखं ब्रह्मतत्त्वस्य तत्सुखं स्वैक्यमुच्यते ।
लेहनामक्तनाकोटो स्त्रीमुखस्य भरात् स्मृतेः ॥ ६७ ॥

p. 78b) शक्त्या भावेपि देवेशि भवेदानन्दसंप्लवः ।
आनन्दे महते प्राप्ते दृष्टे वा बान्धवे चिरात् ॥ ६८ ॥

आनन्दमुत्गतं ध्यात्वा तल्लयस्तन्मना भवेत् ।
दग्धमानरसोल्लास रसानन्दविजृम्भनात् ॥ ६९ ॥

तावतोद्धरितावस्थां महानन्दस्ततो भवेत् ।
गीतादि विषया स्वादात्समसौख्यैकतन्मनः ॥ ७० ॥

योसिनस्तन्मयत्वेन मनोरूढेस्तदात्मना ।
यत्र यत्र मनस्सृष्टिर्मनस्तत्रैव धारयेत् ॥ ७१ ॥

तत्र तत्र परानन्दः स्वरूपः संप्रकाशते।

अनागतायां निद्रायां प्रनष्टे बाह्यगोचरे ॥ ७२ ॥

सावस्था मनसा गम्या परादेवी प्रकाशते।

तेजसा सूर्य दीपादेराकाशेशवली कृते ॥ ७३ ॥

७९अ) दृष्टिं निवेश्य तत्रैव स्वात्मरूपं प्रकाशते।

करङ्किण्ये क्रोधनया भैरव्या लेलिहानया ॥ ७४ ॥

खेचर्या दृष्टिकाले च पराव्याप्तिः प्रकाशते।

मृद्वासनेस्फिजैकेन हस्तपादौ निराश्रयम् ॥ ७५ ॥

विधायतत्प्रसङ्गेन परापूर्णामतिर्भवेत्।

उपविश्यासनेसम्यग्बाहूकृत्वावकुञ्चितौ ॥ ७६ ॥

कक्षव्योम्नि मनः कुर्वञ्च समानं च चिन्तयेत्।

स्थूलरूपस्य भावस्य सव्यां दृष्टिं निपातयेत् ॥ ७७ ॥

अचिरेण निराधारं मनः कृत्वा शिवं व्रजेत्।

आसने शयने स्थित्वा निराधारं विभावयेत्॥ ७८॥

स्वदेहं मनसि क्षीणे क्षीणात्क्षीणाशया भवेत्।
चलासने स्थितस्याथशनैर्वा देहचालनात्॥ ७९॥

p. 79b) प्रशान्ते मानुसे भावे देविदिव्यौघ माप्नुयात्।
लीनं मूर्ध्नि वियत्सर्वं भैरवत्वेन भावयेत्॥ ८०॥

तत्सर्वं भैरवाकारं तेजस्तत्वं समाविशेत्।
किञ्चिज्ज्ञात्वे द्वैतदायि बाह्यलोकस्तमः पुनः॥ ८१॥

विद्वावि भैरवं रूपं ज्ञात्वानन्त प्रकाशवत्।
एवमेवं दुर्निमाया कृष्णपक्षागमे चिरम्॥ ८२॥

तैमिरं भावयेद्रूपं भावयेद्भैरवो भवेत्।
यस्य यस्येन्द्रियस्यापि व्याघाताश्च निरोधतः॥ ८३॥

प्रविष्टस्या द्वये शून्ये तद्दैवात्मा प्रकाशयेत्।
अब्धिन्दु स विसर्गं च अकारं जपतो महान्॥ ८४॥

उदेति देवि सहसाज्ञानौघः परमेश्वरः ।
स विसर्गस्य वर्णस्य विसर्गान्तं चिति कुरु ॥ ८५ ॥

p. 80a) निराधारेण चित्तेन स्पृशेद्ब्रह्मसनातनम् ।
व्योमाकारं स्वमात्मानं ध्याने दिग्भिरनावृतम् ॥ ८६ ॥

निराशय चितिः शक्तिः स्वरूपे दर्शयेत् तदा ।
किञ्चिदङ्गं विभाव्यादौ तीक्ष्णसूच्यादिना ततः ॥ ८७ ॥

तत्रैव चेतना युक्ता भैरवेणामलागतिः ।
चित्ताद्यन्तः कृतन्नास्ति समन्तर्भावयेदिति ॥ ८८ ॥

विकल्पनामभावेन विकल्पैरुज्झितो भवेत् ।
मया विमोहनी नाम कलायाः कलनं स्थितम् ॥ ८९ ॥

* * दि तत्त्वं धर्माणां कलयन्न पृथग् भवेत् ।
जगतीच्छां समुत्पन्नामवलोक्यशमं नयेत् ॥ ९० ॥

यत एव समुद्भूता ततस्तत्रैव लीयते ।
यदाममेच्छानोत्पन्ना ज्ञानं वाकस्तदास्मि वै ॥ ९१ ॥

p. 80b) तत्त्वतोहं तदा भूतस्तल्लीनस्तन्मनो भवेत् ।
इच्छायामथवा ज्ञाने जाते चित्तं निवेशयेत् ॥ ९२ ॥

आत्मबुद्ध्यानान्यचेता ततस्तत्त्वात्मदर्शनम् ।
निराधारं भवेज्ज्ञानं निर्निमित्तं भ्रमात्मकम् ॥ ९३ ॥

तत्त्वतर्कस्य चिन्नैत देवं व्यापी शिवः प्रिये ।
चिद्धर्मा सर्वदेहेषु विशेषो नास्ति कुत्रचित् ॥ ९४ ॥

अतश्च तन्मयं सर्वं भावयेद्भवजीज्जनः ।
कामक्रोधलोभमोहमदमात्सर्यगोचरः ॥ ९५ ॥

बुद्धिं निस्तिमिभां? कृत्वा तत्तत्त्वमवशिष्यते ।
इन्द्रजालमयविश्वं न्यस्तं वा चित्त्रकर्मवत् ॥ ९६ ॥

भ्रमद्वा ध्यायतः सर्वं पश्यतश्च सुखोद्गमः ।

न चित्तं निक्षिपेद्दुःखेन सुखे वा परिक्षिपेत् ॥ ९७ ॥

p. 81a) भैरवि ज्यायतां मध्ये किं तत्त्वमवशिष्यते ।
विहाय निजदेहस्थं सर्वं नास्मीति भावयेत् ॥ ९८ ॥

दृढेन मनसा दृष्ट्या नान्वेक्षिण्या सुखी भवेत् ।
घटादौ यच्च विज्ञानमिच्छाद्यं वाममान्तरे ॥ ९९ ॥

नैव सर्वगतं जातं भावयन्निति सर्वगः ।
ग्राह्यग्राहकसंवित्तिः सामान्या सर्वदेहिनाम् ॥ १०० ॥

योगिनां तु विशेषोस्ति सम्बन्धे सावधानता ॥

स्वस्मादन्यशरीरेपि संवित्ति मनुभावयेत् ।
अपीक्षां स्वशरीरस्य त्यक्तवा वासी सुखी भवेत् ॥

निराधारं मनः कृत्वा विकल्पं न विकल्पयेत् ।
तदात्म परमात्मत्वे भैरवो मृगलोचने ॥ १०३ ॥

सर्वज्ञः सर्वकर्ता च व्यापकः परमेश्वरः।
p. 81b) स एवाहं चैव धर्मा इति दाढर्या भवेच्छिवः॥ ४॥

जलस्यैवोर्मयो वह्नेर्ज्वालाभङ्गः प्रभाभरः।
ममैव भैरवस्येता विश्वभङ्ग्यविभेदिताः॥ ५॥

भ्रान्त्वा भ्रान्त्वा शरीरेण त्वरितं तु विपातनात्।
क्षोभशक्तिविरामेण परासञ्जायते दशा॥ ६॥

आधारे त्वथवा शक्त्या ध्यानाच्चित्ततलेन वा।
जातशक्तिसमावेश क्षोभन्ते भैरवं वपुः॥ ७॥

संप्रदायमिदं भद्रे शृणु सम्यग् वरानने।
कैवल्यं जायते सद्यो नेत्रयोः स्तब्धमात्रयोः॥ ८॥

दशाधिके महागर्ते स्थित्वोपरि निरीक्षणात्।
अविकल्पमते सम्यक् सद्यच्चित्तनयस्फुटम्॥ ९॥

यत्र यत्र मनो याति बाह्ये बाह्यान्तरेपि वा।

p. 82a) तत्र तत्र शिवावस्था व्यापकत्वात्कयास्यति ॥ १० ॥

यत्र यत्राक्षमार्गेण चैतन्यं व्यज्यते विभोः ।

तस्य तन्मात्रधर्मित्वाच्चिल्लयाद्भरितात्मता ॥ ११ ॥

क्षुताद्यन्ते भयेशोके गह्वरे वारणद्रुते ।

कुर्धहले क्षुधाद्यन्ते ब्रह्मसत्ता मयी पशा ॥ १२ ॥

वस्तुषु स्म?र्यमाणेषु दृष्टे देशेमनस्त्यजेत् ।

स्वशरीरं निराधारं ततः प्रसरति प्रभुः ॥ १३ ॥

क्वचिद्वस्तु न बिन्दस्य शनैर्दृष्टिं निवर्तयेत् ।

तज्ज्ञानं * *? सहितं देहि शून्यालयो भवेत् ॥ १४ ॥

भक्त्यद्रेकाद्विरक्तस्य यादृशी ज्ञायते रतिः ।

सा शक्तिः शाङ्करी नित्यं भावयेर्थं ततः शिवः ॥ १५ ॥

वस्त्वन्तरे वेद्यमाने शनैर्वस्तुषु शून्यता ।

p. 82b) तामेवमनु सा ध्यात्वा विदितोपि प्रशाम्यति ॥ १६ ॥

किञ्चिज्ज्ञैर्यः स्मृता शुद्धिस्सशुद्धिश्शम्भुदर्शने ।
न शुचिर्ह्यशुचिस्तस्मान्निर्विकल्पः सुखी भवेत् ॥ १७ ॥

सर्वत्र भैरवो भावः सामान्ये ष्वेवगोचरे ।
न च तद्व्यतिरेकेन परोस्तीत्यद्वया गतिः ॥ १८ ॥

समः शत्रौ च मित्रे च समोमानावमानयोः ।
ब्रह्मणः परिपूर्णत्वादिति ज्ञात्वा सुखी भवेत् ॥ १९ ॥

न द्वेष भावयोः * * *? न रागं भावयेत् क्वचित् ।
रागद्वेषविनिर्मुक्तो मध्ये ब्रह्मप्रसर्पति ॥ २० ॥

यदि वेद्यं यदा ग्राह्यं यच्छून्यं यदवावगम् ।
तत्सर्वं भैरवं भाव्यं तदन्ते रोधसम्भवम् ॥ २१ ॥

नित्ये निराशये शून्ये व्यापके कलनोज्झिते ।
बाह्याकाशे मनः कृत्वा निराकाशं समाविशेत् ॥ २२ ॥

p. 83a) यत्र यत्र मनोयाति तत्तत्ते नैव लक्षणम् ।

परित्यज्य नवः स्थित्या निस्तरङ्गस्ततो भवेत् ॥ २३ ॥

क्रियात्सर्वं रवयति सर्व देव्यापकोखिले ।

इति भैरवशब्दस्य सन्ततोश्चारणा च्छिवः ॥ २४ ॥

अहं स समयेत्यादि प्रतिपत्ति प्रसङ्गतः ।

निराधारे मनोजाति तद्ध्याना प्रेरणाच्छमी ॥ २५ ॥

नित्यो विभुर्निराधारो व्यापकश्चाखिलाधिपः ।

शब्दाः प्रतिक्षणं ध्यायन्प्रकृतार्थानुरूपतः ॥ २६ ॥

अतत्त्वमिन्द्रजालाभमिदं सर्वमवस्थितम् ।

किं तत्वमिन्द्रजालस्य इति दाढर्याअच्छयं व्रजेत् ॥ २७ ॥

आत्मनो निर्विकारस्य क्व ज्ञानं क्व च वा क्रिया ।

ज्ञानायता बहिर्भावादतः शून्यमिदं जगत् ॥ २८ ॥

p. 83b) न मे बन्धन मोक्षोमेती तस्यैव विभीषिकाः ।

प्रतिबिम्बमिदं बुद्धेर्जलेष्विवविवस्वतः ॥ २९ ॥

इन्द्रियद्वारकं सर्वं सुखदुःखादि सङ्गमम् ।

इतीन्द्रियाणि सन्त्यज्य स्वस्थः स्वात्मनि वर्तते ॥ ३० ॥

ज्ञानं प्रकाशकं सर्वं सर्वमात्माप्रकाशकः ।

एवमेव स्वभावत्वाज्ज्ञानज्ञेयो विभाव्यते ॥ ३१ ॥

मानसं चेतना शक्तिरात्मा चेति चतुष्टयम् ।

यदा प्रियो परिक्षीणं तदातद्भैरवं वपुः ॥ ३२ ॥

निस्तरङ्गा पदेशानां शतमुक्तासमासतः ।

द्वादशाभ्यधिकं देवि यज्ज्ञात्वा ज्ञानविज्जनः ॥ ३३ ॥

अत्र चैव तपे युक्ते जायते भैरवः स्वयम् ।

p. 84a) वाचाकरोति कर्माणि शापानुग्रहकारकः ॥ ३४ ॥

अजरामरतामेति सोणिमादि गुणान्वितः ।

योगिनीनां प्रियो देवि सर्वमेलापकाधिपः ॥ ३५ ॥

जीवन्नपि विमुक्तोसौ कुर्वन्नपि च चेष्टितम् ॥ ३६ ॥

इदं यदि वपुर्देव परायाश्च महेश्वर ।
एवमुक्त्वाव्यवस्थायां जपते को जपश्चकः ॥ ३७ ॥

एषात्र प्रक्रिया वक्ष्ये स्थूलेष्येव मृगेक्षणे ।
भूयोभूयः परे भावे भावना भाव्यते यथा ॥ ३८ ॥

ध्याने या निश्चला बुद्धिर्निराकारा निराश्रया ।
न तु ध्यानं शरीरादि मुखहस्तादि कल्पना ॥ ३९ ॥

प्रजानामत्र पुष्पाद्यैर्या मतिः क्रियते दृढा ।
निर्विकल्पे परे व्योम्नि सा पूजा ह्यदराल्लयः ॥ ४० ॥

p. 84b) महाशून्या लये वह्नौ भूताक्षविषयादिकम् ।
हूयते मनसा सार्धं स होमश्चेतना स्रुचा ॥ ४१ ॥

यागेत्र परमेशानि तुष्टिरानन्द लक्षणा ।

क्षपणात् सर्वपापानां त्राणात्सर्वस्य पार्वति ॥ ४२ ॥

रुद्रशक्ति समावेशस्तत्क्षेत्रं भावना परा ।

अन्यथा तस्य तन्द्रस्य का पूजा कश्च तृप्यति ॥ ४३ ॥

यैरेव पूज्यते द्रव्यैस्तर्पते वा परापरः ।

यश्चैव पूजकः सर्वं स एवैकः प्रपूजनम् ॥ ४४ ॥

व्रजेत् प्राणो विशेज्जीव इच्छाया कुटिला कृतिः ।

दीर्घात्मा सा महादेवी परक्षेत्त्रं परापरा ॥ ४५ ॥

अस्यानु चरतस्तिष्ठेन्महानन्दमयेध्वरे ।

तथादेवा समाविष्टः परं भैरवमाप्नुयात् ॥ ४६ ॥

p. 85a) षट्कतानि दिवारात्रौ सहस्त्राण्येक विंशतिः ।

जपो देव्याः समुद्दिष्टः प्राणस्यान्ते सुदुर्लभः ॥ ४७ ॥

इत्ये तत्कथितं देवि परमामृतमुत्तमम् ।

एतच्च नैव कस्यापि प्रकाश्यं न कदाचन ॥ ४८ ॥

परिशिष्येखिले क्रूरे अभक्ते गुरुपादयोः ।
निर्विकल्पमतीनां तु वीराणामुन्नतात्मनाम् ॥ ४९ ॥

भक्तानां गुरुवर्गस्य दातव्यं निर्विशङ्कया ।
ग्रामोराज्यं परोदेशः पुत्रदारकुटुम्भकम् ॥ ५० ॥

सर्वमेतत्परित्यज्य ग्राह्यमेतन्द्दगेक्षणे ।
प्राणा अपि प्रदातव्या न देयं परमा मृतम् ॥ ५१ ॥

देव देव महादेव परितृप्तास्मि शङ्कर ।
रुद्रयामल मन्त्रस्य सरसद्यावधारितम् ॥ ५२ ।

p. 85b) सर्वशक्ति प्रभेदानां हृदयं ज्ञातमद्य च ।
इत्युक्त्वा नन्दिता देवी कण्ठे लग्ना शिवस्य तु ॥ ५३ ॥

ओं नमश्चिद्भैरवात्मने शंकराय

अथ

विज्ञानभैरवः

श्रीमद्भट्टानन्दविरचितविज्ञानकौमुदीटीकोपेतः।

श्रीविद्यां श्रीकण्ठमूर्तिं महेशं

सोमानन्दं भूतिराजोत्पलेशौ।

कालेनास्तंयातशिवागमानां

प्रोद्धृत्यै ये मर्त्यलोकेवतीर्णाः॥ १॥

नामं नामं तत्पदाम्भोजरेणुं

वाक्कायान्तर्वृत्तिभिर्नुत्तपङ्के।
चित्तादर्शे मादृशा दृष्टतत्त्वा-
वेशाः शोभन्तेनिशं सत्सदःसु ॥ २ ॥ (युगलकम्)

श्रीलक्ष्मणाभिनवगुप्तमुखांस्त्रिकार्थ-
तत्त्वानुशासनमहाम्बुधिशीतरश्मीन्।
ध्यात्वा गुरूञ्जडहृदब्जविकासनोद्य-
द्भास्वत्प्रभान्वितिमिरीकृतविश्वमार्गान्॥ ३ ॥

शर्वाननाम्बुजविनिःसृतधारणानां
गूढायनेपरविभानवलोकनेन।
संरच्यते प्रतिपदं स्खलतापि तावद्-
विज्ञानभैरवनये पददीपिकेयम्॥ ४ ॥ (युगलकम्)

पृ। २)

तदिह शास्त्रकृत्स्वयं भैरवः नीलपीतादिविचित्राभिरान्तरवाह्यस्वरूपाभिः तत्तदर्थक्रियाभिः स्वात्मानमाच्छाद्य ततश्च सूर्यमरीचिनिकरवत् बहिर्निःसृता भक्तजना एतज्ज्ञानमार्गद्वारा स्वात्मस्वरूपोपलब्ध्या पुनः प्रविशन्तु तदैक्यमुपयान्तु च इति प्रयोजनमुद्दिश्य स्वविज्ञानस्फारज्ञान-क्रियादिशक्तिद्वारा प्रष्टृरूपात्मना आह

श्रीभैरव्युवाच ।

इत्यादि

श्रुतं देव मया सर्वं यामलादिषु भाषितम् ।
त्रिकभेदमशेषेण सारात्सारविभागशः ॥ १ ॥

अद्यापि न निवृत्तो मे संशयः परमेश्वर ।
किं रूपं तत्त्वतो देव शब्दराशिकलात्मकम् ॥ २ ॥

किं वा नवात्मभेदेन भैरवे भैरवाकृतौ ।
त्रिशिरोभेदभिन्नं वा किं वा शक्तित्रयात्मकम् ॥ ३ ॥

नादबिन्दुमयं वापि किं चन्द्रार्धनिरोधकम् ।
चक्रारूढमनच्कं वा किं वा शक्तिस्वरूपकम् ॥ ४ ॥

परापरायाः सकलमपरायाश्च वा पुनः ।
पराया यदि तद्वत्स्यात्परत्वं तद्विरुध्यते ॥ ५ ॥

नहि वर्णविभेदेन देहभेदेन वा भवेत्।
परत्वं निष्कलत्वेन सकलत्वेन वा भवेत्॥ ६॥

पृ। ३)

प्रसादं कुरु मे नाथ निःशेषं छिन्धि संशयम्।

यत्र यत्किंचित् यामलादिषु शिवशक्तिसंघट्टनात्महेतुषु शास्त्रेषु ब्रह्मविष्णुरुद्रभैरवाख्ययामलेषु तदाख्येषु आगमेषु यत्किंचित् भवन्मुखात् श्रुतं तदैक्योपपत्त्या श्रुतपूर्वमेवास्ति दर्पणप्रतिबिम्बितन्यायेन तदनतिरिक्तं तदतिरिक्तं वा आन्तरतश्चैक्यतया बाह्यतश्च त्रिकभेदनरशक्तिशिवात्मकतया वा इत्यनेनासाधारणतया साधारणतया च श्रुतं श्रुतपूर्वमेवास्ति। इदानीमपि मम संदेहो न निवर्तते। मम भैरवीस्वरूपेण मायादिशक्तिस्वरूपे तदाश्यानतया तत्स्वरूपतादात्म्यात् मम भैरवीति नाम गीयत इत्यर्थः। तस्या मम न संदेहनिवृत्तिः - इदानीमपि न मम त्वदैक्योपपत्तिः संजातेति भावः। स्वात्मभित्तिसंलग्नत्वेन तदुल्लासाद्विश्वभर्त्रीं विश्वमयत्वेनैव सर्वत्र स्फुरणात्तद्धियमाणा वा संसारभीरूणामभयप्रदत्वेन हितकर्त्रीं भिया

संसारत्रासेन रवतां जनितपरामर्शरूपाक्रन्दवतां हृद्भूमौ स्फुरन्ती
वा इत्यादि निरुक्तनिर्दिष्टार्था भैरवी इत्युच्यते। तदेतत्सर्वम्
प्रश्नोत्तरतत्त्वनिर्णयं भैरवीभैरवयोः
सामरस्यात्मसंघट्टयामलस्वरूपप्रतिपादनं च
तन्त्रालोकपरात्रिंशिकादौ वितत्य प्रोक्तं नास्माभिरिह वितन्यते
रहस्यतस्करताप्रसङ्गात्। प्रकृतमनुसरामः - तस्य चानुत्तररूपस्य
किं रूपं तत्त्वतः सत्यतः तदेव वदेति भावः। तत्र किं
शब्दराशिकलात्मकं शब्दब्रह्मात्मकं

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।

इति। अथ वा अकारादि-क्षकारान्तशब्दतया अहमिति स्वरूपतया च वा अ क्ष
इत्यात्मतया चेति किं वा नवतत्त्वात्मतया नववामादिशक्तिस्वरूपतया च
भैरवे सच्चिदानन्दलक्षणपूर्णाहं-

पृ। ४)

भावस्वरूपभूते भैरवाकृतौ पञ्चकृत्यस्वभावभूते चित्तत्त्वे वा
नरशक्तिशिवात्मना त्रिशिरोभेदभिन्नं वा तत् तत्त्वं
मातृमानमेयादिव्यापारत्रयात्मना वा इच्छादिशक्तित्रयव्यापारात्मना च

वा नादबिन्दुमयेन

शिवशक्त्यात्मकशब्दप्रत्ययरूपज्ञानक्रियाशक्त्यात्मना वा

प्रणवाङ्गमाख्यार्धचन्द्रनिरोधात्मकव्यापारेण वा

षट्पत्रादिचक्रस्थितं किंचित्तत्त्वं कुण्डलिन्याकृतिसार्धत्रिवलयस्फुरितं वा

अकारादिक्षकारान्तचक्रारूढस्वभावम् अहमिति स्फुरणं वा अनच्कम्

अकारादिषोडशस्वरराहित्येन ककारादिक्षकारान्तरूपं क् ख् ग् घ् ङ् इत्यादि

स्वरूपं वा अथ च ओं नमः श्रीविद्यापादुकाभ्यः इत्येवं

स्वरव्यञ्जनसंयुक्तं रूपम् उच्चारवर्जितं निष्कलं रूपम् अ उ म् न् अ मः र् ई

व् इ द् य् आ प् आ द् उ क् आ भ् यः इत्येवं रूपं वा तत् सर्वं वद वा पराया

वाचः

स्वरूपं वा अपराया वाचः स्वरूपं वा परापराया वाचः स्वरूपमस्ति ?

स्वातन्त्र्यशक्तिरेव हि परा सैव क्रमं स्रष्टुमिच्छन्ती अपरा सैव च

क्रमरूपा सती परापरेति कथिता। तथा च तन्त्रालोके

स्वातन्त्र्यशक्तिः क्रमसंसिसृक्षा

क्रमात्मता चेति विभोर्विभूतिः।

तदेव देवीत्रयमन्तरास्ता-

मनुत्तरं मे प्रथयत्स्वरूपम्॥

इत्यादिना। इत्येवमपरायाः वा परापरायाश्च स्वरूपस्य तादात्म्यात् पराया अपि यदि तद्वदेव स्यात् परत्वं तदिविरुध्येत। परापरापराभेदयोर्भेदोपपत्त्यां तत्राभेदस्वभावात् तत् परत्वं परास्वरूपे विरुध्येतेति तथा परापरापरास्वरूपयोर्हि सकलमेव वेद्यराशिपतितं विरुध्येत परायामिति भावः। अत्र परायां तदभे-

पृ। ५)

ओदुपपादनादिति विरुद्धमेतत् न च ब्राह्मणक्षत्रियवैश्यशूद्रादिभेदेन न च देहभेदेन वा न च सुरनरतिर्यगादीनां नानाशरीररचनया तत्परत्वं निष्कलत्वेन सकलत्वेन वा भवेत् ? - इत्येवं वाक्कायमनसामेकीभावनया मम प्रसादं कुरु प्रसाददृष्टिं ददस्व किमिदं किमिदमित्यादिभावनया सर्वं विहाय एककोटिस्पर्शनात् परौन्मुख्यत्यागात् प्रमेयपरिहारात् वा प्रमातृतत्त्वाहंभावनया वा यत्किंचित् प्रमातृतत्त्वं तदेवोपपादयेति भावः। यच्च मम हृदि संशयः किमयम् किमयम् किमिदं किं वा इदम् किमन्यथा इत्यादि भेददशापन्ने निर्णयं वद - एकमेव यत् प्रमातृतत्त्वं स्वप्रकाशं तदेव मे दर्शय येन दर्पणप्रतिबिम्बितन्यायेन स्वात्मनि सर्वस्यास्यानतिरिक्तताप्रसङ्गात् अभेदोपपत्त्या अहमिति स्वरूपविश्रान्तेः सर्वमिदं मत्स्वरूपमिति निर्णयः स्यात्। प्रकर्षेणासादनं प्रसादः

भेदापसरणेनाभेदोपपत्त्या स्वात्मैक्यताप्रतिपादनयुक्तिं विरचयेति तात्पर्यम् ॥ १-६ ॥

तदेवं स्वाभिन्नस्वसंविद्भैरवीरूपेणानुयुक्तस्य तत्त्वविषयागमस्य निर्णायकपदस्थः स्वयं परमेश्वरः सिद्धान्तोपदेष्टा

भैरव उवाच

इत्यादिना तत्र भैरवशब्दार्थस्तदभिन्नस्वरूपत्वेन निर्दिष्टभैरवीशब्दे प्राङ्निर्वाहितः अथ च भैर्भीमादिभिरवति इति भैरवः अहमिति स्फुरणात् इदन्ताया विनाशात् आश्यानस्येव हिमघृतादेरिति भावः। उवाचेति स्वाभिन्नस्वरूपां संविच्छक्तिमभिमुखीकृत्य प्रतिशृणोति।

साधु साधु त्वया पृष्टं तन्त्रसारमिदं प्रिये ॥ ७ ॥

पृ। ६)

गूहनीयतमं भद्रे तथापि कथयामि ते।
यत्किंचित्सकलं रूपं भैरवस्य प्रकीर्तितम् ॥ ८ ॥

तदसारतया देवि विज्ञेयमिन्द्रजालवत्।
मायास्वप्नोपमं चैव गन्धर्वनगरभ्रमम्॥ ९॥

ध्यानार्थं भ्रान्तबुद्धीनां क्रियाडम्बरवर्तिनाम्।
केवलं वर्णितं पुंसां विकल्पनिहतात्मनाम्॥ १०॥

तत्त्वतो न नवात्मासौ शब्दराशिर्न भैरवः।
न चापि त्रिशिरा देवो न च शक्तित्रयात्मकः॥ ११॥

नादबिन्दुमयो वापि न चन्द्रार्धनिरोधकः।
न चक्रक्रमसंभिन्नो न च शक्तिस्वरूपकः॥ १२॥

अप्रबुद्धमतीनां हि चैता बालविभीषिकाः।
मातृमोदकवत्सर्वं प्रवृत्त्यर्थमुदाहृतम्॥ १३॥

दिक्कालकलनातीता देशोद्देशाविशेषिणी।
व्यपदेष्टुमशक्या सा न कथ्या परमार्थतः॥ १४॥

अन्तःस्वानुभवानन्दा विकल्पोन्मुक्तगोचरा ।
यावस्था भरिताकारा भैरवी भैरवात्मनः ॥ १५ ॥

तद्वपुस्तत्त्वतो ज्ञेयं विमलं विश्वपूरणम् ।
एवंविधे परे तत्त्वे कः पूज्यः कश्च तृप्यति ॥ १६ ॥

पृ। ७)

एवंइधा भैरवस्य यावस्था परिगीयते ।
सा परापररूपेण परा देवी प्रकीर्तिता ॥ १७ ॥

शक्तिशक्तिमतोर्यस्मादभेदः सर्वदा स्थितः ।
अतस्तद्धर्मधर्मित्वात्परा शक्तिः परात्मनः ॥ १८ ॥

न वह्नेर्दाहिका शक्तिर्व्यतिरिक्ता विभाव्यते ।
केवलं ज्ञानसत्तायां प्रारम्भोयं प्रवेशने ॥ १९ ॥

शक्त्यवस्थाप्रविष्टस्य निर्विभागेन भावना ।
तदासौ शिवरूपी स्याच्छैवी मुखमिहोच्यते ॥ २० ॥

यथालोकेन दीपस्य किरणैर्भास्करस्य वा।
ज्ञायते दिग्विभागादि तद्वच्छक्त्या शिवस्य च॥ २१॥

हे देवि यत् त्वया पृष्टं तत् साधु साधु परमेष्टत्वात् पुनरुक्त्या साधु साधु निर्देशः यत् त्वया तन्त्राणां निश्चयानां सारं पृष्टं तत् त्वया गूहनीयं स्वात्मनि अभेदेन ध्यातव्यमिति भावः न तु वाचा वैखर्यादिना ततोपि अहमपि वदामि नान्यथा। यच्च भैरवस्य द्वैविध्येन सकलं निष्कलं च रूपं प्रसिद्धमेतत्सकलं जगद्रूपं नीलानीलघटादिनानावैचित्र्येण तत् सर्वं गन्धर्वनगरवदिन्द्रजालतुल्यमिति शेषः - भुक्त्वा पीत्वा सुखमहमस्वाप्समित्यत्र स्वप्नोपमदृष्टतुल्यं गन्धर्वनगरतुल्यं चेति - तथा अप्रबुद्धमतीनां भ्रान्तमतीनां कर्मप्रधानफलाभिसन्धिवर्तिनां स्थूलध्यानयोगार्थम् अहं विष्णुं यजामि अहं गणपतिं यजामीति स पुत्रं दास्यति

पृ। ८)

मह्यम् इति विकल्पनिहतात्मनां पुंसां वर्णितम्। तत्त्वतो न नवात्मासौ - नवतत्त्वस्वरूपः न वा वामादिनवशक्तिस्वरूपः न चापि नरशक्तिशिवात्मा

न वा इच्छाज्ञानक्रियाशक्तित्रयात्मा च न च शिवशक्तिस्वरूपः नादः शक्तिः
बिन्दुश्च शिव इति शब्दप्रत्ययरूपं ज्ञानक्रियात्मकं वा न च
अमाख्यार्धचन्द्रनिरोधात्मकं च प्रणवस्य न च षट्चक्रादिभेदगं
कुण्डलिन्यादिरूपेण वा - अकारादिक्षकारान्तवर्णचक्रग-अहमिति
स्वरूपं न वा कुण्डलिन्यादिशक्तिस्वरूपभाक् - परं तु मूढमतीनाम्
एता बालविभीषिकाः अभिनिवेशादिप्रशमाय बालो हि विभीषिकाभिर्लाल्यत एव
स्वमात्रा अथ चौषधादिभक्षणार्थं स्वमात्रा मोदकं वा शर्करां
दास्यामीति लाल्यते। एवं सा परावस्था दिक्षु कालेषु भूतादिषु कलनातीता या
आसीत्
सास्ति भविष्यति चेति दूरासन्नादिनानात्वेन अविशेषिणी उपदेष्टुमशक्यापि तव
उपदिशामिति शेषः। पूर्णाहन्ता स्वप्रकाशैकस्वरूपा निर्विकल्पपरमार्था च
पूर्णस्वरूपस्य भैरवस्य या भरिताकारावस्था अहमिति विश्रान्तिमयी तदेव
भैरवं वपुर्विज्ञेयमिति भावः। एवमस्मिन् भैरवे तत्त्वे कः पूज्यः को वा
तृप्तः वा तृप्यति। एवमनेन रूपेण परावस्था भैरवस्य प्रकीर्तिता।
यतश्चानयोः शक्तिशक्तिमतोरभेदस्तस्मात् इयं परा शक्तिरिति कथ्यते। अत्र च
दृष्टान्तोपि - यथा वह्नेर्दाहिका शक्तिर्न भिन्ना तथेयं शक्तिरपि परा
इति एतन्मुखेन भैरवसांमुख्यं स्यादिति भावः। पुनरपि च दृष्टान्तोत्र
- यथा हि वर्क्रेणैव अयमिति लभ्यते तथा शक्त्यैव शिवोयमिति व्यपदेशः
। अपरोपि च दृष्टान्तः - यथा दीपप्रकाशेन वा सूर्यालोकेन च

दिग्विभागादि ज्ञायत एव एवं शक्त्या शिवावभसनमिति सिद्धम्॥ ७-२१॥

प्।९)

श्रीभैरवी उवाच

देवदेव त्रिशूलाङ्क कपालकृतभूषण।
दिग्देशकालशून्या च व्यपदेशविवर्जिता॥
या शक्तिर्भरिताकारा भैरवस्योपलभ्यते।
कैरुपायैर्मुखं तस्याः परा देवी कथं भवेत्॥
यथा सम्यगहं वेद्मि तथा ब्रूहि मम प्रभो॥

इच्छाज्ञानक्रियात्मशक्तित्रय-भरितस्वरूपसत्तया उपलक्षित ?
विश्वस्य च संहारेण स्वात्मनि तत्स्थित्या अस्थिशेषतया विश्वस्य धारणं
कपालपाणित्वं सिद्धमीश्वरस्य। दिक्षु दशसु देशे काले भूतादौ शून्या
तदविभागा परेति नाम्ना लक्ष्यते तन्मुखं तद्दर्शनं च केनोपायेन
भवेदिति शेषः। यथा चाहं त्वत्स्वरूपतया भवामि त्वदभेदोपपत्तेः
तथैव मे ब्रूहि - तत्रैव प्रवेशय इति भावः॥

श्रीभैरव उवाच

ऊर्ध्वे प्राणो ह्यधो जीवो विसर्गात्मा परोच्चरेत्।
उत्पत्तिद्वितयस्थाने भरणाद्भरितस्थितिः॥ २४॥

ऊर्ध्वे द्वादशान्ते प्राणः प्राणनरूपः जीवनाख्यः चित्तवृत्तिविशेषः संस्थाप्यः अधश्च - हृदि हृदयस्थाने जीवोपानः - जीव्यतेनेन इति जीवः भक्षणपानादेरधोमार्गप्रसरणात् जीव इति उच्यते तदुपाधिवान् अत एव जीव इति विसर्गात्मा अन्तर्बहिर्भावकरणरूप आत्मा यस्य तेनापि परैव उच्चारमायाति अहमैति अन्तश्चकारूढा एतयोर्द्वयोर्विभेदापत्त्या अहमिति प्रकाशनात्

पृ। १०)

उत्पत्तौ द्वादशान्ते द्वितीये हृदि च धारणात्। तत्र स्थित्या भरितस्थितिः स्यादेव इति सर्वोपाधिविस्मरणात् अहमिति विमर्शवान् स्यात् इति संबन्धः। इति प्रथमा धारणा॥ २४॥

अथ द्वितीयामाह

मरुतोन्तर्बहिर्वापि वियद्युग्मानुवर्तनात् [युग्मानिवर्तनात् भैरव्या
भैरवस्य इति च पाठः] ।
भैरवं भैरवस्येत्थं भैरवि व्यज्यते वपुः ॥ २५ ॥

प्राणापानरूपस्य मरुतोन्तर्बहिर्वियद्युग्मे द्वादशान्ते हृदये चातुवर्तनात्
- अनुन्मेषनिमेषणात् । हे भैरवि ? भैरवस्य परमात्मनः वपुः
शरीरं स्वरूपं व्यज्यते प्रकाशत एव ॥ २५ ॥

तृतीयां धारणामाह

न व्रजेन्न विशेच्छक्तिर्मरुद्रूपा विकासते [विकासिते भैरवरूपता इति
च पाठः] ।
निर्विकल्पतया मध्ये तया भैरवरूपधृत् ॥ २६ ॥

हृदि यः प्राणः स तु न व्रजेत् तत्स्थानात् नापि विशेत् यत्रैवास्ति
निर्विकल्परूपस्तत्रैवास्तु अस्पन्दात्मा । एवमेव द्वादशान्तेपि
स्पन्दास्पन्दराहित्येन निर्विकल्पसमाधौ तन्मध्ये भैरवरूपाभिव्यक्तिः ॥ २६
॥

चतुर्थीं धारणां निरूपयति

कुम्भिता रेचिता वापि पूरिता वा यदा भवेत्।
तदन्ते शान्तनामासौ शक्त्या शान्तः प्रकाशते॥ २७॥

पृ। ११)

शास्त्रमार्गानुसारेण कुम्भकं रेचकं वा पूरकं विधाय तत्तदभ्यासपरिशीलनेन च चक्रभ्रमिवत् शान्तवेगानुभवेन प्रकाशमात्रावस्थोदये परापरस्वभावः प्रकाशत एव। तथा च तिष्ठति संस्कारवशात् चक्रभ्रमिरिव धृतशरीर इत्यन्तेन प्रकाशः प्रकाशत एव। प्रत्यभिज्ञायां चैतत्प्रपञ्चितम्

इदमित्यस्य विच्छिन्नविमर्शस्य कृतार्थता।
या स्वस्वरूपे विश्रान्तिर्विमर्शः सोहमित्ययम्॥

इत्यादिना॥ २७॥

इदानीं पञ्चमीमाह

आ मूलात्किरणाभासां सूक्ष्मात्सूक्ष्मतरात्मिकाम् ।
चिन्तयेत्तां द्विषट्कान्ते शाम्यन्तीं भैरवोदयः ॥ २८ ॥

आ मूलात् हृदयात् किरणैर्भासमानां चन्द्रार्कबिम्बवत् भासनस्वभावां क्रमात् क्रमं तनुतां तनुतां श्रयन्तीं च अत एव च सूक्ष्मात् सूक्ष्मतरां नामरूपातीतां द्विषट्कान्ते द्वादशान्ते संचिन्त्य सुसूक्ष्मतमस्यापि ध्येयाकारस्य गलनात् भैरवरूपो भवेदिति शेषः तां च शाम्यन्तीं सतीं संत्यज्येति भावः ॥ २८ ॥

एतदेव दर्शयति षष्ठ्या

उद्गच्छन्तीं तडिद्रूपां प्रतिचक्रं क्रमात्क्रमम् ।
ऊर्ध्वं मुष्टित्रयं यावत्तावदन्ते महोदयः ॥ २९ ॥

कन्दादिब्रह्मरन्ध्रान्तं क्रमात् क्रमेण उद्गच्छन्तीं तडिदाकारसंनिभां प्रोज्ज्वलद्रूपां तद्रूर्ध्वं च चतुरङ्गुलपरिमितां मुष्टिं यावद्-

पृ। १२)

द्वादशान्तं तावदन्ते महोदयः मुष्टित्रयशेषेण महोदयः
अहमित्यवमर्शः स्यादेवेति । तथा च श्रीभगवता गीतम्

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।

इत्यादिना । तथा च

सर्वो ममायं विभव इत्येवं परिजानतः ।
विश्वात्मनो विकल्पानां प्रसरेपि महेशता ॥

इत्यादिना प्रत्यभिज्ञायामपि ॥ २९ ॥

सप्तमीमाह

क्रमद्वादशकं सम्यग्द्वादशाक्षरभेदितम् ।
स्थूलसूक्ष्मपरस्थित्या मुक्त्वा मुक्त्वा ततः [मुक्त्वान्तत इति
पाठः] शिवः ॥ ३० ॥

जन्माग्रमूलकन्दनाभिहृत्कण्ठतालुभ्रूमध्यललाटरन्ध्रशक्तिव्यापिन्या

ख्यं यत् चक्राणां द्वादशकं द्वादशस्थाननामभिः प्रसिद्धं तच्च
आदौ ध्यानेन स्फुटं ततश्च स्पन्दमानं ततोपि ज्योतीरूपतां प्राप्तं
सूक्ष्मं परमित्यभिधीयते तदभिधानेन च सर्वजित्त्वात् सर्वत्रावभासकः
शिव एव प्रकाशते परमार्थतः॥ ३०॥

इदानीमष्टमीमाह

तथापूर्याशु [तयापूर्येति पाठः] मूर्धान्तं भङ्क्त्वा
भ्रूक्षेपसेतुना।
निर्विकल्पं मनः कृत्वा सर्वोर्ध्वे सर्वगोद्गमः॥ ३१॥

पृ। १३)

जन्मादिचक्रेभ्य ऊर्ध्वोर्ध्वक्रमेण प्राणेन मूर्धान्तं द्वादशान्तं
पूरयित्वा उपारोहितयोर्भ्रुवोर्भङ्गेन सेतुनेव वारिप्रवाहं मनो भङ्क्त्वा
त्यक्तचापलं विधाय अत एव निर्विकल्पं तन्मनः कृत्वा सर्वोर्ध्वे
द्वादशान्तादपि चोर्ध्वे परमाकाशे सर्वव्यापकत्वं स्यादेव इति निश्चयः॥
३१॥

इदानीं नवमीमाह

शिखिपक्षैश्चित्ररूपरिमण्डलैः शून्यपञ्चकम् ।
ध्यायतोनुत्तरे शून्ये प्रवेशो हृदये भवेत् ॥ ३२ ॥

यथाहि शिखिपक्षैर्मयूरपुच्छैश्चित्ररूपैरनेकवर्णैरिव पञ्चेन्द्रियमण्डलानि चित्रवत् भासमानानि चित्रमेतत् शून्यमेव इति ध्यायतोनुत्तररूपे शून्ये परमधामनि प्रवेशः परमा गतिः स्यादिति निश्चयः। गन्धर्वनगरतुल्यं चित्रमिवेदम् इति निश्चयेन परमार्थसिद्धिः स्यादेवेति भावः ॥ ३२ ॥

इदानीं दशमीमाह

ईदृशेन क्रमेणैव यत्र यत्रापि चिन्तयेत् [चिन्तना इति पाठः] ।
शून्ये कुड्ये परे पात्रे स्वयं लीना वरप्रदा ॥ ३३ ॥

एवं क्रमेण ध्यायतः परे स्वात्मनि वा अन्यत्र कुड्यादौ वा परपात्रे च एकाग्रभावनादार्ढ्यावाप्तौ मरुच्छक्तिः स्वयं लीना स्यात् - यत्र तत्र परपदपरामर्शैक्यभावेन अहंरूपतादात्म्यताभिमानः स्यादित्यर्थः।

तथा च श्रीस्पन्दे

पृ। १४)

यस्मात्सर्वमयो जीवः सर्वभावसमुद्भवात्।
तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः॥

तेन शब्दार्थचिन्तासु न सावस्था न या शिवः।
भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः॥

इति वा यस्य संवित्तिः क्रीडात्वेनाखिलं जगत्।
संपश्यन्सततं युक्तो जीवन्मुक्तो न संशयः॥

इत्यादिना निरूपितम्॥ ३३॥

एकादशीमाह

कपालान्तर्मनो न्यस्य तिष्ठेन्मीलितलोचनः [तिष्ठन्मीलितेति पाठः]।

क्रमेण मनसो दाढर्याल्लक्षयेल्लक्ष्यमुत्तमम् ॥ ३४ ॥

कपालकुहरान्तः - शिरःकवाटमध्ये मीलितलोचनोन्तःसंकुचितहृदयादिबाह्यान्तरिन्द्रियवर्गः सुषुम्नायामस्तङ्गतप्राणापानादिचारेण तद्दाढर्यात् यत् लक्ष्यमस्ति तदेव लक्षयेत् घटोयमितिवत् प्रत्यक्षत उत्तमं ज्योतिः पश्यतीत्यर्थः ॥ ३४ ॥

द्वादशीमाह

मध्यनाडी मध्यसंस्था बिससूत्राभरूपया ।
ध्यातान्तर्व्योमया देव्या तया देवः प्रकाशते ॥ ३५ ॥

बिसतन्तुतनीयसी इति लक्षिताया ध्यातमन्तर्व्योम यस्यास्तादृश्या भैरव्याः शून्यं रूपं ध्यातं सत् दृष्टिमात्रतो देवः स्वयंप्रकाशः प्रकाशत इति भावः । स्पन्दे च

पृ। १५)

तदा तस्मिन्महाव्योम्नि प्रलीनशशिभास्करे ।

सौषुप्तपदवन्मूढः प्रबुद्धः स्यादनावृतः ॥

इत्यादिना वितत्य दर्शितम् ॥ ३५ ॥

त्रयोदशीमाह

कररुद्धदृगस्त्रेण भ्रूभेदाद्द्वाररोधनात् ।
दृष्टे बिन्दौ क्रमाल्लीने तन्मध्ये परमा स्थितिः ॥ ३६ ॥

कराभ्यां रुद्धानि दृगुपलक्षितानि मुखरन्ध्राणि येन एतादृशस्य योगिनो भ्रूमध्यग्रन्थिविदारणात् बिन्दौ दृष्टे क्रमात् एकाग्रताप्रकर्षेण लीने तन्मध्ये परमा स्थितिः - परभैरवाभिव्यक्तिः स्यादित्यर्थः ॥ ३६ ॥

चतुर्दशीमाह

धामान्तःक्षोभसंभूतसूक्ष्माग्नितिलकाकृतिम् ।
बिन्दुं शिखान्ते हृदये लयान्ते ध्यायतो लयः ॥ ३७ ॥

धाम्नो लोचनवर्तिनस्तेजसोन्तःक्षोभेण अत्यन्तनिष्पीडनादिना संभूतं ।

यद्वा धाम्नो दीपादेस्तेजोमयस्यान्ते निर्वाणताप्राप्तिसमये यः
क्षोभश्चाञ्चल्यं ततः संभूतं सूक्ष्माग्नितिलकाकृतिं बिन्दुं
ध्यायतः शिखान्ते द्वादशान्ते हृदये गलितलयान्तरे लयः
तदैक्योपपत्तिर्भवेत्। गलिते विकल्पे तदवसाने च परमतेजस्तत्त्वसमावेशः
स्यादित्यर्थः॥ ३८॥

पृ। १६)

पञ्चदशीमाह

अनाहतेपात्रकर्णेभग्नशब्दे सरिद्रुते।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥ ३८॥

यत् दशधोपलक्षितं शब्दब्रह्म तत्रनिष्ठत्वेन परं ब्रह्मावाप्तिः। शब्दे
कथंभूते न वहिः प्रसरणरूपैर्नीलादिभिराहते व्याप्ते अत एव च न पात्रे
कर्णौ यस्येति स्थूलशब्दादिव्यतिरिक्तत्वात् अतश्च अभग्नशब्दे न भग्नः
शब्दो यस्य अनाहते शब्दे नादभट्टारकशब्दब्रह्मरूपे सरिद्रुते च
वेगवाहिनि तत्र च दृढनिष्ठः सन् ब्रह्मत्वमाप्नुयादिति भावः॥ ३८॥

षोडशीं धारणामाह

प्रणवादिसमुच्चारात्प्लुतान्ते शून्यभावनात्।
शून्यया परया शक्त्या शून्यतामेति भैरवि ॥ ३९॥

प्रणवादीनां लघूच्चारात् तदनन्तरं च दीर्घोच्चारात् तदनन्तरं
प्लुतोच्चाराच्च कुक्कुटरुतवत् व्याप्तेः तदनन्तरं विजित्य तां
शून्यावस्थालम्बनेन शून्यातिशून्योच्चारेण शून्यतामुल्लङ्घ्य
अन्तर्मुखताभ्यासात् परमा गतिः करबिल्ववत् संभाव्या नान्यथा ॥ ३९॥

सप्तदशीमाह

यस्य कस्यापि वर्णस्य पूर्वान्तावनुभावयेत्।
शून्यया शून्यभूतोसौ शून्याकारः पुमान्भवेत्॥ ४० ॥

पृ। १७)

पूर्वं शिक्षा ततस्तदनुभवः ततोपि गुरुप्रसादादिना तदन्ते तन्निश्चयः
ततोन्तर्नाडीचक्रादिपरीक्षा ततश्च शून्यातिशून्ययोजनया ओमिति निश्चित्य तं च
परब्रह्मणि ततश्च शून्यातिशून्यतामेति - सर्वमिदं

गन्धर्वनगरादितुल्यवृत्तान्तं यदन्यत् तद्ब्रह्म इति बुद्धया अतिरिच्यते ॥ ४० ॥

अष्टादशीमाह

तन्त्र्यादिवाद्यशब्देषु दीर्घेषु क्रमसंस्थितेः ।
अनन्यचेताः प्रत्यन्ते परव्योमवपुर्भवेत् ॥ ४१ ॥

शब्दानुरणनन्यायेन पानकचर्वणन्यायेन च पश्चात् अनुभाव्य किमिदं किमत्र प्रयोजनं वा दे-व-द-ता इति प्रहरप्रहरोच्चारिता वर्णा नानुभवमधिरोहन्ति पश्चात् देवदत्त इति सामीप्यतया उच्चारात् अस्ति किंचिदिति तत्पश्चात् ज्ञानान्तरात् ज्ञानस्य संभवेन देवदत्तो नाम कश्चित् ब्राह्मण इति तदनन्तरं च पौर्वः पाश्चात्यः दाक्षिणः औत्तरो वा इति तदनन्तरं वेदाध्ययनशीलः तदनन्तरमयं वामनदत्तपुत्रः तदनन्तरं च सुखदत्तभ्राता तदनन्तरं च पृथूदर्याः पुत्रः इति जातिनामादियुक्ततया उपलभ्यत एव । तद्वत् तन्त्र्यादिवाद्यभूतेषु क्रमेषु अनन्यचेताः लयत्व-समत्व-तालादौ दत्तमनाः ऐकाग्र्यदृढाभ्यासात् तदेकीभावनया ब्रह्मैव भवति - परव्योमतनुः स्यादिति भावः शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति इति प्रागुक्तदिशा । अथ वा शब्दब्रह्मातिवर्तते इति ॥ ४१ ॥

प्। १८)

इदानीमेकोनविंशीमाह

पिण्डमन्त्रस्य सर्वस्य स्थूलवर्णक्रमेण तु।
अर्धेन्दुबिन्दुनादान्तशून्योच्चाराद्भवेच्छिवः॥ ४२॥

पूर्वोक्तनवात्मादेः वामादिशक्त्यादिना वा नवतत्त्वादेः अकारादि-
हकारान्तेन च शिवशक्तिसमागमेन अहमिति वा ओमित्यस्योच्चारो यः अकार-
उकार-मकार-बिन्दु-अर्धचन्द्र-नाद-नादान्त-
समना-उन्मना-परा-शक्ति-व्यापिन्यादिक्रमेण
पाश्चात्यरूपमेव निश्चयेन निश्चित्य पर्यवसानेन शून्योच्चारात् शिवो
भवेदिति भावः॥ ४२॥

इदानीं विंशतितमीं धारणामाह

निजदेहे सर्वदिक्कं युगपद्भावयेद्वियत्।
निर्विकल्पमनास्तस्य वियत्सर्वं प्रवर्तते॥ ४३॥

यदि निर्विकल्पमना एकाग्रमनाः स्यात् सर्वासु पूर्वादिदिक्षु वियदेव भावयन् - सर्वत एव शून्यतां भावयन् न नीलपीतादिकं किमप्यस्तीति शुक्ताविदं रजतम् इतिवत् अविषयम् इत्येवं भावनया परमशून्यः स्यादिति यतस्तस्य शून्यादिविकल्प एव। तथा च प्रत्यभिज्ञायामेतन्निर्दिष्टमस्ति

चित्तत्त्वं मायया हित्वा भिन्न एवावभाति यः।
देहे बुद्धावयः प्राणे कल्पिते नभसीव वा॥

प्रमातृत्वेनाहमिति विमर्शोऽन्यव्यपोहनात्।
विकल्प एव स परप्रतियोग्यवभासजः॥

प्।१९)

इत्यादिना यत्परं शून्यातिशून्यं शिवतत्त्वं तदेव ज्ञेयमिति भावः।
यतश्च तत्रैव

शून्याद्यबोधरूपास्तु कर्तारः प्रलयाकलाः।
तेषां कार्ममलोप्यस्ति मायीयस्तु विकल्पितः॥

इति निर्धारितम् ॥ ४३ ॥

इदानीमपरां धारणामाह

पृष्ठशून्यं मूलशून्यं युगपद्भावयेच्च यः ।

युगपन्निर्विकल्पत्वान्निर्विकल्पोदयस्ततः ॥ ४४ ॥

[पृष्ठशून्यं मूलशून्यं युगपद्भावयेश यः ।

शरीरनिरपेक्षिण्या शक्त्या शून्यमना भवेत् ॥

पृष्ठशून्यं मूलशून्यं हृच्छून्यं भावयेत्स्थिरम् ।

युगपन्निर्विकल्पत्वान्निर्विकल्पोदयस्ततः ॥

इत्यादिपाठः पद्यद्वयात्मा उद्योते मूलेस्ति ।

अनुमीयते च यदेतन्मध्यमं पादचतुष्टयं श्रीशिवोपाध्यायेर्व्याख्यातं

च पुनरुक्ततयाधिकं संभवति अत एवास्मिन्पुस्तके वस्तुतोविद्यमानं स्यादिति ।
]

ऊर्ध्वाधो दक्षिणतोत्तरतः सर्वतोपि शून्यमेव ध्यात्वा

सर्वं खल्विदं ब्रह्म ।

इति भावनया विचिन्त्य शिवतत्त्वं करस्थविल्ववत् आभाति इति नाश्चर्यम् ॥ ४४ ॥

अपरामाह

तनूदेशे शून्यतैव क्षणमात्रं विभावयेत् ।
निर्विकल्पे निर्विकल्पो निर्विकल्पस्वरूपभाक् [निर्विकल्पं निर्विकल्पो निर्विकल्पे वा इति पाठः] ॥ ४५ ॥

पृ। २०)

शिवतत्त्वं विना न किमपि सर्वमेतत् चिद्विलासास्पदमाश्यानतया चित्रितमिव विभाति । तथा च सिद्धान्तमुक्तावल्यां

पश्यामि चित्रमिव सर्वमिदं द्वितीयं
तिष्ठामि निष्कलवदेक अनेकरूपः ।
आत्मानमद्वयमनन्तसुखैकरूपं
स्मरामि दग्धरशनामिव सुप्रपञ्चम् ॥

आश्चर्यमप्यनुभवामि करस्थबिल्व-

तुल्यं शरीरमहिनिर्लुयनीव वीक्षे।
एवं च जीवनमपि प्रतिभासनं च
निःश्रेयसोधिगमनं च मम प्रसिद्धम्॥

इत्यादिना आम्नातमस्ति। इत्येवं गन्धर्वनगरादिवत् प्रसिद्धमप्रतिष्ठितम् इति सिद्धम्॥ ४५॥

अपरामपि आह

सर्वं देहगतं द्रव्यं वियद्व्याप्तं मृगेक्षणे।
विभावयेत्ततस्तस्य भावना सा स्थिरा भवे॥ ४६॥

शून्यव्याप्तं सर्वमिदं रज्जुभुजङ्गवत् असत्यस्वरूपसाध्यत्वाद्वा गन्धर्वनगरादिवत् इत्येवं धारणया यत् देहगतं मांसादि द्रव्यं तत् शून्यतया प्रसिद्धम् इति दृढभावनास्थित्या प्रकाशमानप्रकाशः स्यादित्यर्थः॥ ४६॥

पृ। २१)

अपरमाहा

देहान्तरे दिग्विभागं भित्तिमात्रं विचिन्तयेत्।

न किंचिदन्तरे तस्य ध्यायन्न ध्येयभाग्भवेत्॥ ४७॥

पञ्चभूतपञ्चीकरणयुक्त्या संबद्धं सत् शरीरमुद्भूतं यच्च स्थूलं विनश्यत्स्वभावं करिकर्णाग्रचपलं च इति नात्र स्थिरता आसीत् अस्ति स्याद्वा इति तथा दिग्विभागादि नास्ति बाह्यजडभित्तिमात्रमिदं दक्षिणपार्श्वम् इदं वोत्तरम् इत्यादिना तस्मात् असदिति समीक्षयेत्। प्रमाता च सदिति सन्निश्चयेन ज्ञानीत्युच्यते॥ ४७॥

अपरामाह

हृद्याकाशे निलीनाक्षः पद्मसंपुटमध्यगः।

अनन्यचेताः सुभगे परं सौभाग्यमाप्नुयात्॥ ४८॥

हृत्पद्मे बद्धबाह्याभ्यन्तरेन्द्रियचक्रः तत्पद्मपुटमध्यगश्च अत एवानन्यचेताः परं सौभाग्यमाप्नुयात् - बाह्यविषयोपरमात् आभ्यन्तरोदयः संभवेदित्यर्थः॥ ४८॥

अपरामाह

सर्वतः स्वशरीरस्य द्वादशान्ते मनोलयात्।
दृढबुद्धेर्दृढीभूतं तत्त्वलक्ष्यं प्रवर्तते [त्वग्विभागं
भित्तिभूतमिति ध्यायनध्येय इति च पाठः] ॥ ४९ ॥

पृ। २२)

दृढबुद्धेर्योगिनः दृढीभूतं प्राप्तैकाग्र्यं परप्रकाशरूपं
तत्त्वलक्ष्यं प्रवर्तते द्वादशान्ते शून्यातिशून्ये मनसो लयात् वासनाक्षयात्।
अथ वा मध्यधाम्नि सुषुम्नायां। तथा च

सौषुम्नेध्वन्यस्तमितौ हित्वा ब्रह्माण्डगोचरम्

इत्यादिना स्पन्दे विशदीकृतम्॥ ४९ ॥

अपरामाह

यथा तथा यत्र तत्र द्वादशान्ते मनः क्षिपेत्।

प्रतिक्षणं क्षीणवृत्तेर्वैलक्षण्यं दिनैर्भवेत् ॥ ५० ॥

एवमेव पूर्वोक्तेन प्रकारेण प्रशान्तचाञ्चल्यस्य असामान्यपरभैरवताभिव्यक्तिः स्यादेवेत्यर्थः ॥ ५० ॥

अपरामाह

कालाग्निना कालपुरादुत्थितेन स्वकं पुरम् ।
प्लुष्टं विचिन्तयेदन्ते शान्ताभासः प्रजायते [कालपदादिति शान्ताभासस्तदा भवेदिति च पाठः] ॥ ५१ ॥

दक्षपादाङ्गुष्ठात् उत्थितेन कालाग्निना देहं दग्धं योगतो विभाव्य योगिनः चिन्मयमूर्तिमान् विभावसुः प्रकाशत इत्यर्थः ॥ ५१ ॥

पपरामाह

एवमेव जगत्सर्वं दग्धं ध्यात्वा विकल्पतः ।
अनन्यचेतसः पुंसः पुंभावः परमो भवेत् ॥ ५२ ॥

पृ। २३)

एवमेवेति दक्षपादाङ्गुष्ठोद्भवकालाग्निरुद्रज्वालया सर्वं देहस्थं बाह्याभ्यन्तरं दग्धं विभाव्य निर्विकल्पचेतसः पुरुषार्थत्वं परोत्कृष्टतया भवेदिति शेषः॥ ५२॥

अपरामाह

स्वदेहे जगतो वापि सूक्ष्मसूक्ष्मान्तराणि च।
तत्त्वानि यानि निलयं ध्यात्वान्ते व्यज्यते परा॥ ५३॥

पृथिव्यादीनि पञ्चभूतानि तद्विकाराणि मांसास्थ्यादीनि यानि च सन्ति तेषां लयं - स्वस्वकारणेषु लीनतां ध्यात्वा पर्यन्ते परा देवी प्रकटा स्यात् मयूराण्डरसन्यायेन परा सर्वमेतदन्तः स्थित-मेव बहिः प्रकाशयेदिति भावः। अयमत्र तात्पर्यार्थः - सर्वभेदाभेदगलनात् पराप्रसादमन्त्रवान् परोदयः स्यादेवेति॥ ५३॥

अपरामाह

पीनां च दुर्बलां शक्तिं ध्यात्वा द्वादशगोचरे।
प्रविश्य हृदये ध्यायन्मुक्तःस्वातन्त्र्यमाप्नुयात्॥ ५४॥

प्राणशक्तिमादौ पीनाम् - अन्नपानादिभोजनदिशा पीनत्वं प्राप्तां ततोपि गुरूपदेशमार्गेण कुम्भकादिना सूक्ष्मां भवन्तीं ध्यात्वा ततस्तामेव हृदयादौ प्रावेश्य द्वादशान्ते वा ततः स्वतन्त्रपरमेश्वररूपः स्यादिति निश्चयः॥ ५४॥

पृ। २४)

अपरामाह

भुवनाध्वादिरूपेण चिन्तयेत्क्रमशोखिलम्।
स्थूलसूक्ष्मपरस्थित्या यावदन्ते मनोलयः॥ ५५॥

भुवनतत्त्वकलापदमन्त्रवर्णाख्यो यः षोढा वाच्यवाचकरूपोध्वा तस्याध्वनः स्थूलसूक्ष्मिमक्यरूपताभ्यसनात् ततस्तत्रैव मनोलयात् पराकाष्ठावगतिरिति भावः। तथा च मालिनीविजये

अध्वातीतो भवेच्छिवः

इत्यादिनानुशिष्टमस्ति ॥ ५५ ॥

अपरामाहा

अस्य सर्वस्य विश्वस्य पर्यन्तेषु समन्ततः ।
अध्वप्रक्रियया तत्त्वं ध्यात्वा शैवं महोदयः ॥ ५६ ॥

अध्वषट्केषु भुवनाध्वपर्यन्तेषु सामान्यतया विशेषतया वा न किमपि शिवतत्त्वं विना सारभूतम् इति विज्ञाय महोदयः - परमशिवावभासः स्यादित्यर्थः । एतदेव

अध्वषट्कादि संत्यज्य जित्वा चेन्द्रियमण्डलम् ।
कारणैः कृतकृत्योसौ राजते सूर्यवद्भुवि ॥

इत्यादिना मालिनीकल्पोत्तरेप्यादिष्टमस्ति ॥ ५६ ॥

अपरामाह

विश्वमेतन्महादेवि शून्यभूतं विचिन्तयेत्।
तत्रैव च मनो लीनं ततस्तल्लयभाजनम्॥ ५७॥

पृ। २५)

एतत् सर्वं विश्वं चराचरभूतं न किञ्चित् गन्धर्वनगरादितुल्यम्
अध्यासात्मकम् असदित्याद्याख्यं नामरूपादिहीनं मायागहनं च यदस्ति तत्
स्वप्रकाशात्मकं सदिति लक्षितं च सारं लयभाजनं चेति भावः॥ ५७॥

अपरामाह

घटादिभाजने दृष्टिं भित्तिस्त्यक्त्वा विनिक्षिपेत्।
तल्लयं तत्क्षणाद्गत्वा तल्लयात्तन्मयो भवेत्॥ ५८॥

अन्तःसुषिरे घटादिवस्तुनि दक्षिणोत्तरपार्श्वादि त्यक्त्वा तत्र आकाशे
विश्रान्तत्वात् परमशून्यातिशून्ये मनो लीनं विभाव्य
परंब्रह्मसमाविष्टः सन् ब्रह्मैव संपद्यत इति भावः॥ ५८॥

अपरामाह

निर्वृक्षगिरिभित्त्यादिदेशे दृष्टिं विनिक्षिपेत्।
विलीने मानसे भावे वृत्तिक्षीणः प्रजायते॥ ५९॥

पर्वतादौ शून्ये मरुद्देशादौ वा तुङ्गादिविषयादौ वा दृष्टिमात्रं
निक्षिप्य तत्तदालम्भनाभावात् गलिते मानसे क्षीणसमस्तवृत्तिः प्रजायते -
ब्रह्मैव संपद्यत इत्यर्थः॥ ५९॥

अपरामाह

उभयोर्भावयोर्ज्ञाने ज्ञात्वा मध्यं समाश्रयेत्।
युगपच्च द्वयं त्यक्त्वा मध्ये तत्त्वं प्रकाशते॥ ६०॥

घटोयं पटोयं तटोयमित्यादिनानात्वेन वेद्यराशिपतितस्य सारं विहाय
वा तन्मध्ये च ज्ञातृत्वावगमनं कृत्वा अत्र कश्चित्

वेदकोस्तीति तेन च ज्ञातृज्ञानज्ञेयादिनानात्वेन अनानात्वं विधाय विभागकल्पनात्यागात् ऐकाग्र्यमेव प्रमातृतत्त्वाख्यं तत्त्वमसि इति वत् निर्विकल्पदशामासाद्य विभागत्यागात् ऐकाग्र्यतापत्तिरिति सुष्ठु प्रोक्तमिति ॥ ६० ॥

अथापरामपि आह

भावे त्यक्ते [भावे न्यक्ते इति पाठः न्यक्ते अन्तर्हिते इत्यर्थः]
निरुद्धा चिन्नैव भावान्तरं व्रजेत्।
तदा तन्मध्यभावेन विकसत्यति भावना ॥ ६१ ॥

एकस्मिन् वस्तुनि स्वीकृते निरुद्धा चित् नैव भावान्तरं व्रजेत् अन्यद्वस्तुनि न व्रजेत् तत्र तन्मध्ये शून्यरूपस्थित्या भावना अतिविकसति अद्भुतफुल्लन्यायेन मनश्चातिविकासत्वं यायात् - ब्रह्मैव संपद्यत इत्यर्थः ॥ ६१ ॥

अपरामाह

सर्वं देहं चिन्मयं हि जगद्वा परिभावयेत्।
युगपन्निर्विकल्पेन मनसः परमा [मनसा परमोदय इति पाठः]
गतिः ॥ ६२ ॥

आ पादात् केशान्तं चिद्रूपं सर्वमिदं जगत् परिभावयेत् अक्रमेण च स्फुरच्चिच्चमत्कारव्याप्त्या मनसो गतिः परमा उत्कर्षरूपा गतिरस्तीति तात्पर्यम् ॥ ६२ ॥

अपरामाह

सर्वं जगत्स्वदेहं वा स्वानन्दभरितं स्मरेत् ।
युगपत्स्वामृतेनैव परानन्दमयो भवेत् ॥ ६३ ॥

पृ। २७)

आनन्दादेव खलु इमानि भूतानि जायन्ते आनन्दे प्रवर्तन्ते आनन्द एव प्रलीयन्त इति इत्थं दृष्ट्या कृतकृत्यो भवेदिति भावः ॥ ६३ ॥

अपरामाह

आयुद्वयस्य संघट्टादन्तर्वा बहिरन्ततः ।
योगी समत्वविज्ञानसमुद्गमनभाजनम् ॥ ६४ ॥

प्राणापानरूपस्य योजनात् हृदये द्वादशान्ते चान्तःप्रवेशनिर्गमने पर्यवसाने योगी प्रबुद्धः समत्वविज्ञानेन समुद्गमनभाजनं रहस्यस्थानपर्यवसायिप्राणापानादिगोचरः स्यादिति भावः तेन च परमसिद्धिभाग्भवेदित्यर्थः ॥ ६४ ॥

अपरामाह

कुहनेन प्रयोगेन सद्य एव मृगेक्षणे ।
समुदेति महानन्दो येन तत्त्वं प्रकाशते ॥ ६५ ॥

विस्मापकाद्भुतमायादिप्रयोगेन अद्भुतप्रयोगमयः परमानन्दोदयः स्यादिति भावः अहमेव परो हंसः इत्यादिकया युक्त्या पिपीलिकास्पर्शमात्रात् परमोदयव्याप्तिरिति शेषः ॥ ६५ ॥

अपरामाह

सर्वस्रोतोनिरोधेन [स्रोतोनिबन्धेनेति पाठः] प्राणशक्त्योर्ध्वया शनैः ।

पिपीलस्पर्शवेलायां प्रथते परमं सुखम् ॥ ६६ ॥

पृ। २८)

पञ्चेन्द्रियगुह्योपस्थरन्ध्रनिरोधेन आधारात् द्वादशान्तं यावत् ऊर्ध्वं
क्रमेण वहन्त्या प्राणशक्त्या

पिपीलिकास्पर्शमात्रात्प्रथते परमं सुखम्

इत्येतद्भावनया अन्तर्मुखारामो भवतीत्यर्थः। द्वादशान्त
आत्मविषयानुभवसमये पिपीलिकाया इव शनैः शनैः चरतः प्राणस्य यः
मूलाधारादिस्थानसकाशात् कन्दादिस्थानपर्यन्तः स्पर्शः तद्वेलायां हि
परीक्षन्ते योगिनः अमुतः स्थानात् उत्थाय अमुकस्थानं प्राप्तः प्राणः इति
निश्चितमेव इत्येतादृगुक्तभावनयोद्दिष्टसुखसिद्धिरिति भावः ॥ ६६ ॥

अपरामाह

वह्नेर्विषस्य मध्ये तु चित्तं सुखमयं क्षिपेत्।
केवलं वायुपूर्णं वा स्मरानन्दे न [स्मरानन्देन इति

तदनुसारेणार्थापितः समस्तः पाठः] युज्यते ॥ ६७ ॥

तद्धारणया सुखधारणया वह्नौ वा विषेपि कठिनतरे च सुखभावनयैव चित्तं क्षिपेत् प्राणस्य वा अपानस्य च मध्येपि कामानन्दे सर्वविषयविस्मारके न युज्यते कामधारणायां सर्वविषयविस्मरणात् अथ वा वायुपूर्णं केवलं प्राणायामवर्जितमपि तत्रापि भेदगलनेन अभेदापत्तिरिति भावः। यस्मात् दुःखे वह्निविपादौ सुखसंधारणमेव परमार्थ इति परमार्थविदः। स्त्रीसङ्गेन विना स्त्रिया य आनन्दानुभवः स एव परमार्थ इति कथ्यते ॥ ६७ ॥

अपरामाह

शक्तिसंगमसंक्षुब्धशक्त्यावेशावसानिकम्।
यत्सुखं ब्रह्मतत्त्वस्य तत्सुखं स्वाक्यमुच्यते ॥ ६८ ॥

पृ। २९)

स्त्रीसङ्गमेन य आनन्दोनुभूयते तमेव स्त्रियं विना ध्यात्वा आनन्दमयो भवेदित्याद्युक्तम्। उक्तं च

जायया संपरिष्वक्तो न बाह्यं वेत्ति चान्तरम्।
निदर्शनं श्रुतिं प्राह मूढस्तं मन्यते परम्॥

न सृष्टिर्जायते लिङ्गान्न भगान्नापि रेतसः।
आनन्दोच्छलिता शक्तिः सृजत्यात्मानमात्मना॥

इत्याद्युक्तरीत्या स्त्रीसङ्गानन्दाविर्भूतानन्दशक्तिसमावेशान्ते यत् सुखं स्त्रीपुरुषादिपर्यालोचनं स्वात्ममात्रनिष्ठं तत् स्वकम् - आत्मन एव संबन्धि नान्यत आयातं भावयेत् स्त्रीसङ्गमस्तु व्यक्तिकारणमेव इत्यादिना प्रोक्तं चान्यत्र अलं चातिविस्तरेण॥ ६८॥

अपरामाह

लेहनामन्थनाकोटैः स्त्रीसुखस्य भरात्स्मृतेः।
शक्त्यभावेपि देवेशि भवेदानन्दसंप्लवः॥ ६९॥

परिचुम्बनालिङ्गनदन्तक्षतनखक्षतादिभिर्विशेषैः स्त्रीसुखस्यानुभूतस्य पूर्वं तद्ध्यानमात्रेण इदानीमपि शक्त्यभावेपि करसौन्दर्यादौ

ध्यातमात्रे य आनदः प्रत्यक्षतयैव सर्वविषयविस्मारकः स एवानन्दोदय इति स्थितम् यतोनुभूते स्मरणं प्रत्यक्षतयैव प्रसिद्धमित्याचार्याः ॥ ६९ ॥

अपरामाह

आनन्दे महति प्राप्ते दृष्टे वा बान्धवेचिरात् ।
आनन्दमुद्गतं ध्यात्वा तल्लयस्तन्मना भवेत् ॥ ७० ॥

पृ। ३०)

एवमेव बान्धवे वा सुहृदादौ चिरकालानन्तरं प्रिये वा दृष्टे उद्गतमात्रमेवानन्दं गृहीत्वा तद्भावनान्तर्मनस्कत्वेन परानन्दोदये विश्रान्तः स्यादेवेत्यर्थः। तथा च स्पन्दे

अतिक्रुद्धः प्रहृष्टो वा किं करोमीति वा मृशन् ।
धावन्वा यत्पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः ॥

इत्यादिना अभिहितमस्ति ॥ ७० ॥

अपरामाह

जग्धिपानकृतोल्लासरसानन्दविजृम्भणात् ।
भावयेद्भरितावस्थां महानन्दस्ततो भवेत् ॥ ७१ ॥

अयमत्राशयः - मिष्टान्नपानभोजनक्षीरादिपानाशनाभ्याम् उल्लसद्रसो य आनन्दस्तदनुभवेन आनन्दपूर्णत्वावस्थायां भावयत एकाग्रचित्तस्य परमानन्दप्राप्तिरिति सिद्धम् ॥ ७१ ॥

अपरामाह

गीतादिविषयास्वादासमसौख्यैकतात्मनः ।
योगिनस्तन्मयत्वेन मनोरूढेस्तदात्मता ॥ ७२ ॥

गीतादिविषयस्य वंशवीणादेर्मधुरसूक्ष्मशब्दविषयस्य आस्वादात् तच्चर्वणाद्यः परमानन्दोदयः स्यात् तालक्रियाशब्दादिसाम्यं स एव परपरमानन्दोदय इति कथ्यते तत्काले शुभाशुभचिन्तादिविस्मरणादित्यलम् । अनेन च वेद्यराशेर्विस्मरणात् वेदकसत्तामात्रस्थितौ शान्तमेयमानादिव्यापृतौ महानन्दोदय इति निश्चितम् ॥ ७२ ॥

पृ। ३१)

यत्र यत्र मनस्तुष्टिर्मनस्तत्रैव धारयेत्।
तत्र तत्र परानन्दस्वरूपः संप्रकाशते [स्वरूपं संप्रवर्तते इति
पाठः] ॥ ७३ ॥

अयमत्र भावः - यत्र यत्र पञ्चेन्द्रियादिगुणेषु मनो रज्यते
एतच्छुभमेतदशुभम् इत्यादिना तत्रैव शुभे वाशुभे विश्रान्तः सन्
परपरानन्दमयः स्यात् इति निश्चयः। यत्र शुभे वाशुभे मनो लगति तत्समये
परविमर्शाविस्मृतेस्तत्रैवानन्दोदय इति निश्चयः॥ ७३ ॥

अपरामाह

अनागतायां निद्रायां प्रणष्टे बाह्यगोचरे।
सावस्था मनसा गम्या परा देवी प्रकाशते॥ ७४ ॥

निद्रा जागरणरूपोन्मग्नावस्था परावस्थेति कथ्यते सैव च
स्फुटीकरणावस्था चितेरिति हि स्थितम्। तथाहि

निद्रादौ जागरस्यान्ते यो भाव उपजायते।
तं भावं भावयन्साक्षादक्षयानन्दमश्नुते॥

इत्यादिना निरूपितमस्ति॥ ७४॥

अपरामाह

तेजसा सूर्यदीपादेराकाशे शबलीकृते।
दृष्टिर्निवेश्या तत्रैव स्वात्मरूपं प्रकाशते॥ ७५॥

दिवा सूर्यकिरणप्रकाशेन रात्रौ च चन्द्रज्योत्स्नया शबलीभूतम-

पृ। ३२)

हाकाशसंबन्ध्यूर्ध्वाधोवर्तिस्थानविशेषे
गृहैकदेशवर्तिदीपप्रकाशव्याप्तकोष्ठाकाशचित्रस्थाने वा
अव्यग्रमनस्कतया दृष्टिबन्धमभ्यस्यतः स्वस्वरूपचिदाकाशैकीभावेन
स्वात्मरूपाभिव्यक्तिर्जायते यत्फलं चतुर्दशभुवनज्ञानं
ताराव्यूहपरमनोभावाभिज्ञानं च समुत्पद्यते इति॥ ७५॥

अपरामाह

करङ्किण्या क्रोधनया भैरव्या लेलिहानया।
खेचर्या दृष्टिकाले च परा व्याप्तिः [परावाप्तिरिति पाठः]
प्रकाशते॥ ७६॥

विगतचेष्टं करङ्कमात्रं शवमिव विश्वं पश्यन्त्या क्रोधव्यग्रया दृक्शक्त्या भोक्तुमेकाग्रया वा दूरमाकाशदर्शनार्थं प्रसृतया वा दृष्टिकाले परा व्याप्तिः प्रकाशत इति भावः॥ ७६॥

अपरामाह

मृद्वासने स्फिजैकेन हस्तपादौ निराश्रये।
विधाय तत्प्रसङ्गेन परा पूर्णा मतिर्भवेत्॥ ७७॥

निराश्रये यथाभवति तथा पादौ हस्तौ च कृत्वा सर्वाङ्गेषु प्रत्यंशसाकल्येन चेतयन्ती विगलिततमोरजस्का सत्त्वमयी भवेद्बुद्धिरिति तात्पर्यार्थः। मृद्वासने कोमलासने कटिप्रोथैकेन। कठिनासने

उपवेशनेन हि तुङ्गकुब्जाद्युपाधेः समाधिचाञ्चल्यापत्तिरिति हि स्थितम् ॥ ७७ ॥

प्। ३३)

अपरामाह

उपविश्यासने सम्यग्बाहू कृत्वावकुञ्चितौ [कृत्वार्थकुञ्चिताविति
पाठः] ।
कक्षव्योम्नि निराकुर्वञ्छममायाति तल्लयात् ॥ ७९ ॥

आसने उपविश्य बाहू कक्षव्योम्नि संकुचितौ कृत्वा तल्लयेन शममायाति ॥ ७९
 ॥

अपरामाह

स्थूलरूपस्य भावस्य स्तब्धां दृष्टिं निपात्य च ।
अचिरेण निराधारं मनः कृत्वा शिवं व्रजेत् ॥ ८० ॥

विनोन्मेषनिमेषाभ्याम् अत एव स्तब्धां दृष्टिमवष्टभ्य मनो निराधारं

कृत्वा किंचिदप्यचिन्तयन् शिवं - परमात्मैक्यतां व्रजेदिति भावः॥ ८०
॥

अपरामाह

मध्यजिह्वे स्फारितास्ये मध्ये निक्षिप्य चेतनाम्।
होच्चारं मनसा कुर्वंस्ततः शान्ते प्रलीयते॥ ८१॥

मध्य अन्तराल एव जिह्वा यस्य ईदृशे विस्तारिते चास्ये सति तन्मध्ये बुद्धिं निक्षिप्य मनसैव ह इत्युच्चारं कुर्वन् शान्तात्मा प्रकाशत इत्यर्थः॥ ८१॥

पृ। ३४)

अपरामाह

आसने शयने स्थित्वा निराधारं विभावयेत् [विभावयन् स्वदेहं
क्षणात्क्षीणाशय इति पाठः।
लीनं मूर्ध्नि इति (८४) पद्यादनन्तरम् उ० मू०
आकाशं विमलं पश्यन्कृत्वा दृष्टिं निरन्तराम्।

स्तब्धात्मा तत्क्षणाद्देवि भैरवं वपुराप्नुयात् ॥
इति पद्यमधिकं वर्तते ।] ।
स्वदेहे मनसि क्षीणे क्षणाद्भूताशयो भवेत् ॥ ८२ ॥

देहे नैव आसने देहस्यापि निराधारभावनात् शयने स्थित्वा नाहं देहो न मे देहो इति समानाधारभूतस्य नाधारादिकल्पना इत्येवं परिकल्पनेन क्षीणे मनसि गलिते वेद्यराशौ भूताशयो भूतसिद्धार्थो भवेदिति संबन्धः ॥ ८२ ॥

अपरामाह

चलासने स्थितस्याथ शनैर्वा देहचालनात् ।
प्रशान्ते मानसे भावे देवि दिव्यौघमाप्नुयात् ॥ ८३ ॥

चलासन अश्वादौ शनैर्देहचालनं कुर्वन् प्रशान्ते च मानसे भावे दिव्यानां लोकानां परमयोगिनाम् ओघं समूहं संभूय तत्तेजस्तत्त्वमाप्नुयात् प्राप्नुयादिति भावः ॥ ८३ ॥

अपरामाह

लीनं मूर्ध्नि वियत्सर्वं भैरवत्वेन भावयेत्।
तत्सर्वं भैरवाकारं तेजस्तत्त्वं समाविशेत्॥ ८४॥

पृ। ३५)

लीनं श्लिष्टं सर्वं यन्नीलपीतादि तत्सर्वं शिवमयम् इति भावयतो ब्रह्म प्रकाशत इति भावः॥ ८४॥

अपरामाह

किंजिज्ज्ञात्वा [किंचिज्ज्ञातमिति ज्ञात्वानन्तेति च पाठः] द्वैतदायि बाह्यालोकस्तमः पुनः।
विश्वादि भैरवं रूपं ध्यात्वानन्तप्रकाशभृत्॥ ८५॥

आधौ भेदमयं ध्यात्वा स्थाणुर्वा पुरुषो वा इति ततश्च बाह्यश्चासावालोकः चन्द्रसूर्यादिः ततश्च तमः एतत्सर्वं भैरवरूपं ध्यात्वा नानात्वादनन्तप्रकाशमयो भैरवो भवति॥ ८५॥

अपरामाह

एवमेव दुर्निशायां कृष्णपक्षागमे चिरम्।
तैमिरं भावयेद्रूपं [भावयन्रूपमिति पाठः] भैरवं
रूपमेष्यति॥ ८६॥

मेघच्छन्ना रत्रिर्दुर्निशा तस्यामन्धतामिस्रमहातामिस्रतामिस्ररूपायां
यत् कालश्यामलादि भयङ्कररूपं भैरवमुद्रितं भैरवमुद्राङ्कितं
भयङ्करत्वाददृश्यं तत् भावयन् अक्षयानन्दमाप्नुयात् - तद्रूपस्य
आश्चर्यकारित्वात्॥ ८६॥

अपरामाह

एवमेव निमिल्यादौ नेत्रे कृष्णाभमग्रतः।
प्रसार्य भैरवं रूपं भावयेत्तन्मयो [भावयंस्तन्मय इति
पाठः] भवेत्॥ ८७॥

पृ। ३६)

स्वनेत्रे च निमील्य कृष्णपाक्षिकरात्र्यभावेपि कृष्णाभं तमोरूपं

ज्ञात्वा किमेतत् इत्याश्चर्यकारि एतदेव भैरवं रूपम् एतद्रूपेण तन्मयीभावः स्यादिति ॥ ८७ ॥

अपरामाह

यस्य यस्येन्द्रियस्यादौ [यस्य कस्येन्द्रियस्यापि इति तत्रैवात्मेति च पाठः] व्याघाताच्च निरोधतः ।
प्रविष्टस्याद्वये शून्ये तदैवात्मा प्रकाशते ॥ ८८ ॥

बाह्याधिकारनिवृत्तेरज्ञत्वात् तत एव च व्याघातात् विरुद्धसमुच्चयात् अथ च निरोधतः निरोधनाच्च अद्वये द्वयरहिते शून्ये अत एव प्रविष्टः सन् अन्तर्मुखपदाश्रयणेन आत्मा प्रकाशत इति भावः ॥ ८८ ॥

अपरामाह

अबिन्दुमविसर्गं च अकारं जपतो महान् ।
उदेति देवि सहसा ज्ञानौघः परमेश्वरः ॥ ८९ ॥

अम् इत्यत्र अः इत्यत्र च बिन्दुविसर्गौ परित्यज्य कुम्भकस्थस्य अ इत्येवमेव

केवलं जपतः परमेश्वरो ज्ञानौघ उदेति। सर्वविकल्पराहित्येन विकल्पादीन्
संत्यज्य यच्छिष्यते तदेव भवतीत्यर्थः। तत्त्वमसि इत्यादिवत्॥ ८९॥

अपरामाह

सविसर्गस्य वर्णस्य विसर्गान्ते [विसर्गान्तमिति पाठः] चितिं कुरु।
निराधारेण चित्तेन स्पृशेद्ब्रह्म सनातनम्॥ ९०॥

पृ। ३७)

पुनश्चात्र अ इत्येवमेव परित्यज्य यश्च अमित्यत्र अः इत्यत्र च (।)
(ः) बिन्दुविसर्गौ परिशिष्टौ तयोरनिर्वचनीयत्वात् प्राप्ता तत्र परा
निर्वृतिरिति सिद्धम्॥ ९०॥

अपरामाह

व्योमाकारं स्वमात्मानं ध्यायेद्दिग्भिरनावृतम्।
निराश्रया चितिः शक्तिः स्वरूपं दर्शयेत्तदा॥ ९१॥

अहमेव परो हंसः परमात्मा परात्परः।

इति व्योमाकारं स्वमात्मानं कृत्वा तथा
दिग्भिर्नीलपीतादिभिरुपाधिभिर्विवर्जितं कृत्वा चितिशक्तिर्निराश्रया स्वं रूपं
दर्शयेदिति भावः॥ ९१॥

अपरामाह

किंचिदङ्गं विभिद्यादौ तीक्ष्णसूच्यादिना ततः।
तत्रैव चेतना युक्ता भैरवी निर्मला गतिः॥ ९२॥

तीक्ष्णसूच्यादिना वा अग्निना शरीरं प्रमथ्य तत्सहनादिना या सहनशक्तिः
सैव चेतना इत्यभिधीयते।

अच्छेद्योयमदाह्योयमक्लेद्योशोष्य एव च।

इत्यादिभगवद्वाक्यस्मरणात् भैरवसारूप्याप्तिरिति भावः॥ ९२॥

अपरामाह

चित्ताद्यन्तःकृतिर्नास्ति ममान्तर्भावयेद्यदि [भावयेदितीति

पाठः] ।

विकल्पानामभावेपि विकल्पैरुज्झितो भवेत् ॥ ९३ ॥

पृ। ३८)

चित्ताद्यन्तःकरणवर्गो ममान्तर्नास्ति अस्त्यपि नास्त्येव इत्येवं

बाह्यविषयोपरमाद्दृढभावनस्ततो विकल्पानामभावेन

विकल्पैरुज्झितस्त्यक्तः निर्विकल्पतया शुद्धचैतन्यो भवेदित्यर्थः ॥ ९३ ॥

अपरामाह

माया विमोहिनी नाम कलायाः कलनं स्थितम् ।

इत्यादिधर्मं तत्त्वानां कलयन्ना पृथग्भवेत् [कलयन्न पृथगिति

पाठः] ॥ ९४ ॥

इयं माया विमोहिनी नाम तत्त्वानां च इत्यादिधर्मं कलायाः कलनं स्थितम्

इत्येवं कलयन् ना पुरुषः पृथक् भवेत् - सर्वोत्तिर्णः कूटस्थ इत्याख्यः

स्यादित्यर्थः॥ ९४॥

अपरामाह

झगितीच्छां समुत्पन्नामवलोक्य शमं नयेत्।
यत एव समुद्भूता ततस्तत्रैव लीयते॥ ९५॥

एवमन्तर्मुखतया विमृश्य यत एव क्षोभमयान्मनस उत्थिता तत्रैव शमं नयेत् प्रापयेत्।

तरङ्गा इव तोयेषु बुद्बुदा इव सागरे।

इत्यादिवत् ऐक्यमाश्रित्य तत्सर्वं च प्रशमय्य ब्रह्म संपद्यते तदा स्वयमेव॥ ९५॥

अपरामाह

यदा ममेच्छा नोत्पन्ना ज्ञानं वा कस्तदास्मि वै।
तत्त्वतोहं तथाभूतस्तल्लीनस्तन्मना भवेत्॥ ९६॥

पृ। ३९)

इच्छाज्ञानक्रियादिसन्दोहे समुत्पन्नेपि अहं करोमि गच्छामीत्यादिना तेन च ज्ञानं वा समुत्पन्नमपि तत्त्वतोहंस्वरूपं एवाहम् तस्मिंल्लीने तन्मयो भवेदिति गुरवः। तथा च स्पन्दे

गुणादिस्पन्दनिःष्यन्दाः सामान्यस्पन्दसंश्रयात्।
लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः॥

अप्रबुद्धधियस्त्वेते स्वस्थितिस्थगनोद्यताः।
पातयन्ति दुरुत्तारे घोरे संसारवर्त्मनि॥

अतः सततमुद्युक्तः स्पन्दतत्त्वविविक्तये।
जाग्रदेव निजं भावमचिरेणाधिगच्छति॥

इत्यादिना सुस्पष्टतया प्रतिपादितम्॥ ९६॥

अपरामाह

इच्छायामथवा ज्ञाने जाते चित्तं निवेशयेत्।
आत्मबुद्ध्यानन्यचेतास्ततस्तत्त्वार्थदर्शनम्॥ ९७॥

जातमात्रायामिच्छायां जातमात्रे ज्ञाने वा सति
सर्वस्मिन्स्वात्मरूपदृढभावनया अनन्यचेतसस्तत्त्वात्मदर्शनं
स्यादेवेति निश्चयः सर्वं खल्विदं ब्रह्म इत्यभ्यसनादिति भावः॥ ९७॥

अपरामाह

निर्निमित्तं भवेज्ज्ञानं निराधारं भ्रमात्मकम्।
तत्त्वतः कस्यचिन्नैतदेवंभावी शिवः प्रिये॥ ९८॥

भ्रममात्रान्निर्निमित्तं शुक्ताविदं रजतमित्यादिवत् भ्रममात्रस्वभावं
सर्वं दृश्यजातम् अत एव च निराधारमनाश्रयात्मकम्

पृ। ४०)

हि सर्वं चिन्मात्रम् चिद्व्यतिरिक्तस्यान्यस्याभावात् इत्येवंभावनादार्ढ्यात्

शिव एव स्यादिति भावः ॥ ९८ ॥

अपरामाह

चिद्धर्माः सर्व देहेषु विशेषो नस्ति कुत्रचित् ।
अतश्च तन्मयं सर्वं भावयन्भवजिज्जनः ॥ ९९ ॥

देवासुरनरतिर्यक्स्थावरजङ्गमादिषु मूर्तिषु चिद्धर्माः सामान्येन सन्ति न च तत्र विशेषोस्ति कुत्रचित् देहादेरेव विशेषोस्ति न तु चितेः इति भावयन् सर्वत्र चिदेव जृम्भते इत्यनुभवदार्ढ्यात् सोहमस्मीति भावयन् भवजित् दुस्तरसंसारोत्तिर्णो जनो भवति ॥ ९९ ॥

अपरामाह

कामक्रोधलोभमोहमदमात्सर्यगोचरे ।
बुद्धिं निस्तिमतां कृत्वा तत्तत्त्वमवशिष्यते ॥ १०० ॥

कामक्रोधादिषु मात्सर्यपर्यन्तेषु बुद्धिमेकाग्रां विधाय विकारानधिगमात् निस्पन्दां कृत्वा तत्तत्त्वं चिन्मात्रबोधमवशिष्यत इति शेषः ॥ १०० ॥

अपरामाह

इन्द्रजालमयं विश्वं न्यस्तं वा चित्रकर्मवत्।
भ्रमतो ध्यायतः [भ्रमद्वा ध्यायत इति पाठः] सर्वं
पश्यतश्च सुखोद्गमः॥ १०१॥

पृ। ४१)

इत्येवं ज्ञानानुभवयुक्त्या निश्चितया बुद्ध्या सर्वमिदमिन्द्रजालनिभं
विश्वं विभाव्य स्वस्पन्दारोहणेन सर्वमिदं भ्रमन्नपि ध्यायन्नपि
पश्यन्नपि अक्षयसुखीभवति - सर्वमिदं ब्रह्म इति पश्यन् मुच्यत
इत्यर्थः॥ १०१॥

अपरामाह

न चित्तं निक्षिपेद्दुःखे न सुखे वा परिक्षिपेत्।
भैरवि ध्यायतां मध्ये किं तत्त्वमवशिष्यते॥ १०२॥

सुखदुःखादिविभवे सर्वं सुखं वा दुःखमेव वेदं सर्वं विज्ञाय तदैकाग्र्यतया हे भैरवि ध्यायतां तन्मध्ये भैरवोदयः स्यादित्यर्थः ॥ १०२ ॥

अपरामाह

विहाय निजदेहास्थां सर्वमस्मीति भावयेत् ।
दृढेन मनसा दृष्ट्या नान्येक्षिण्या सुखी भवेत् ॥ १०३ ॥

निजदेहप्रमातृतां विहाय - न देहोहमित्यादिना पश्चात्सर्वमिदमहमेव इति भावयन् सुखी सर्वत्र सर्वदा ॥ १०३ ॥

अपरामाह

घटादौ यच्च विज्ञानमिच्छाद्यं वा ममान्तरे ।
नैव सर्वगतं जातं भावयन्निति सर्वगः [सर्वत्रामस्मीति भावयन् इति पाठः] ॥ १०४ ॥

सदा सर्वत्र सवास्ववस्थासु यत् दृश्यमानं घटादिविज्ञानेन घटोयमित्यादिना तदन्तरे या चेच्छा एवं करोमीत्यादिना तत्सर्वं जातमपि किमपि न भवति निःसारत्वादिति भावयन् सर्वत्र प्रकाशस्वरूपः स्यादिति भावः ॥ १०४ ॥

अपरामाह

ग्राह्यग्राहकसंवित्तिः सामान्या सर्वदेहिनाम् ।
योगिनां तु विशेषोयं [विशेषोस्तीति पाठः] संबन्धे सावधानता
॥ १०५ ॥

सर्वदेहिनां सदाशिवादिकीटान्तानाम् इदं ग्राह्यम् अयं ग्राहक इत्यादिना यो व्यवहारः स सामान्य एव सर्वदेहिनां यदेको जानाति तदपरोपि जानाति इत्यनेन सामान्या परंतु योगिनामयमेव विशेषः - संबन्धे ग्राह्यग्राहकस्वरूपावधारणे ग्रहीतृरूपाविस्मरणमित्यर्थः अहं स्मर्तीति सर्वदा प्रकाशस्वरूपः अन्यद्वेद्यमनित्यमसदित्युच्यते ॥ १०५ ॥

अपरामाह

स्ववदन्यशरीरेपि संवित्तिमनुभावयेत्।
अपेक्षां स्वशरीरस्य त्यक्त्वा व्यापी दिनैर्भवेत्॥ १०६॥

तस्य शरीरभूतं जगदिदमिति सर्वं विभावयन् केवलं भिन्नतया
स्वशरीरापेक्षां विहाय इदं मम शरीरं नास्तीतरस्मादन्यत्

पृ। ४३)

इत्यनेन परस्मिन्सर्वस्मिन्स्वात्मसंविन्मात्रदृढभावनेन व्यापकरूपोसौ
तद्दिनैरेव भवेदिति भावः॥ १०६॥

अपरामाह

निराधारं मनः कृत्वा विकल्पान्न विकल्पयेत्।
तदात्मपरमात्मत्वे भैरवो मृगलोचने॥ १०७॥

सर्वमेतत्त्याज्यं स्वस्वभावाध्यासरूपं स्थाणुर्वा पुरुषो वा इति-
वदध्यस्तमेव निःसारतया हेयमिति भावः। इत्यनेन निराधारतया

स्वात्मनः परमात्मत्वे निष्ठां प्राप्य परमात्मनि च लीनतां संप्राप्य वा विभाव्य भैरवरूपः परमात्मैव भवतीत्यर्थः ॥ १०७ ॥

अपरामाह

सर्वज्ञः सर्वकर्ता च व्यापकः परमेश्वरः ।
स एवाहं शैवधर्मा इति दाढर्याच्छिवो भवेत् ॥ १०८ ॥

स एवाहमहमेव सः शिवस्यायं शैव स एव धर्मो यस्य स्वातन्त्र्यादिर्मम सर्वोऽस्ति अनेन दृढभावनेन परमशिवताद्रूप्यं गम्यते ॥ १०८ ॥

अपरामाह

जलस्येवोर्मयो वह्नेर्ज्वालाभङ्ग्यः प्रभा रवेः ।
ममैव भैरवस्यैता विश्वभङ्ग्यो विभेदिताः ॥ १०९ ॥

यथा जलोर्मयः जलादेव वह्नेर्वा ज्वालाः रवेर्वा प्रभाः तथा भैरवस्यैता विश्वभङ्ग्यो गमनागमनभोजनाहवनदानप्रसारणनिर्गमनादीनि सन्तीति भावयेदिति शेषः ॥ १०९ ॥

पृ। ४४)

अपरामाह

भ्रान्त्वा भ्रान्त्वा शरीराणि [शरीरेणेति पाठः] त्वरितं भुवि
पातनात्।
क्षोभशक्तिविरामेण परा संजायते दशा॥ ११० ॥

प्रदक्षिणक्रियावत् सहस्रजन्मजन्मान्तरमासाद्य
मानुष्यदेवासुरतिर्यगादियोनिषु ततश्च सद्गुरुदृष्टिपातात् क्षीणशोकस्य परा
दशा प्रादुर्भवति इत्यर्थः। तथैव

यदा क्षोभः प्रलीयेत तदा स्यात्परमं पदम्। (९ उ।)

इत्यादिना स्पन्दे प्रतिपादितमस्ति॥ ११० ॥

अपरामाह

आधारेष्वथ वा शक्त्या ध्यानाच्चित्तलयेन [शक्त्याज्ञानाच्चितेति
पाठः]

संप्रदायं ११२ पद्यादनन्तरम् उ० मू०

संकोचं कर्णयोः कृत्वा ह्यधोद्वारे तथैव च ।

अनच्कमहलं ध्यायन्विशेद्ब्रह्म सनातनम् ॥ ११४ ॥

इति पद्यमधिकमस्ति ।] वा ।

जातशक्तिसमावेशक्षोभान्ते भैरवं वपुः ॥ १११ ॥

पदार्थेषु ज्ञातुमशक्यत्वात् वा ज्ञानादेरभावतो यश्चित्तस्य लयस्तेन यो जातोनाश्रितायां शक्तौ समावेशक्षोभस्तदन्ते भैरवं वपुर्व्यज्यत एवेत्यर्थः ॥ १११ ॥

अपरामाह

संप्रदायमिमं भद्रे शृणु सम्यग्वदाम्यहम् ।

कैवल्यं जायते सद्यो नेत्रयोः स्तब्धमात्रयोः ॥ ११२ ॥

पृ। ४५)

सर्वस्यास्य भेदाभेदमयस्य जगतो विस्मरणादन्तरात्मनि च दत्तदृष्टेर्योगिनो यत्र तत्र चित्तप्रकाशः स्यादेवेत्यर्थः

सर्वेषूक्तवक्ष्यमाणानुशासनेष्वेतेषु
चिन्मात्रावधारणचित्तैकाग्र्याभ्यसनमभिप्रेतमस्ति ॥ ११२ ॥

अपरामाह

कूपादिके महागर्ते स्थिते परिनिरीक्षणात् [स्थित्वोपरीति पाठः] ।
अविकल्पमतेः सम्यक्सद्यश्चित्तलयः स्फुटम् ॥ ११३ ॥

यद्येवं परिस्फुरति नास्त्यत्र किमपि वेद्यावेद्यपतितं नीलपीतादि परं तु
घोरतरं भैरवं वपुरत्राभासमानं भासत इति तात्पर्यार्थः ॥ ११३ ॥

अपरामाह

यत्र यत्र मनो याति बाह्ये वाभ्यन्तरे प्रिये ।
तत्र तत्र शिवावस्था व्यापकत्वात्क्व यास्यति ॥ ११४ ॥

यत्र यत्र मनो याति स्वतश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥

इत्यादिभगवन्मुखोक्त्या यत्र यत्र नीलपीतादौ मनो याति अन्तरात्मतया तत्र तत्र शिवावस्था इति निश्चयाद्भैरवाभिव्यक्तिः संजायते। तथा च श्रीस्पन्दे

पृ। ४६)

यस्मात्सर्वमयो जीवः सर्वभावसमुद्भवात्।
तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः॥

तेन शब्दार्थचिन्तासु न सावस्था न या शिवः।
भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः॥

इति वा यस्य संवित्तिः क्रीडात्वेनाखिलं जगत्।
संपश्यन्सततं युक्तो जीवन्मुक्तो न संशयः॥ (२८-२९-३०)

इत्यादिना प्रतिपादितमस्ति॥ ११४॥

अपरामाह

यत्र यत्राक्षमार्गेण चैतन्यं व्यज्यते विभोः।
तस्य तन्मात्रधर्मित्वाच्चिल्लयाद्भरितात्मता॥ ११५॥

यत्र यत्र शिवावस्थाध्यानेन चैतन्यं व्यज्यते विभोः तस्य च
तन्मात्रधर्मत्वात् दर्पणप्रतिबिम्बिताभासवैचित्र्येण
चैतन्यमात्रस्वभावत्वात् चितौ लयाद्विश्रान्तेर्भरितात्मता अहमेव विश्वमयो
महच्चैतन्यभरित इत्यनुभूततात्त्वकावस्थः संपद्यते
आश्यानीभूतहिमघृतादिवत् जलमयत्वापत्तेरिति भावः ॥ ११५ ॥

अपरामाह

क्षुताद्यन्ते भये शोके गह्वरे वा रणद्रुते [रणाद्द्रुते सत्तामयी दशा
इति च पाठः] ।
कुतूहले क्षुधाद्यन्ते ब्रह्मसत्ता समीपगा ॥ ११६ ॥

अतिक्रुद्धः प्रहृष्टो वा किं करोमीति वा मृशन् ।
धावन्वा यत्पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः ॥ (२२)

पृ। ४७)

इत्यादिस्पन्दोक्तदिशा निर्दिष्टस्य भैरवरूपस्यामर्शनात् क्षुतादिषु
गुरुमुखश्रुतयुक्त्या विभाव्य कृतकृत्यो भवत्येवेत्यर्थः। एतच्च

तन्त्रालोकादौ वितत्य निर्णीतमस्ति तत एवावधार्यम्। ग्रन्थविस्तरभयान्नेह प्रतन्यते तद्दिङ्मात्रेण उदाहृतमिति॥ ११६॥

अपरामाह

वस्तुषु स्मर्यमाणेषु दृष्टे देशे मनस्त्यजेत्।
स्वशरीरं निराधारं ततः प्रसरति [कृत्वा प्रसरतीति पाठः]
प्रभुः॥ ११७॥

स्मरणादिशक्त्या दृष्टे देशेनुभवशक्तौ स्वाधारभूतायां मनस्त्यजेत्
ऐकाग्र्येणादद्यात् स्वशरीरं च निराधारमहिकञ्चुकवदसङ्गं विभातयेत्
ततः प्रादुर्भवति स्वयमेव प्रभुरिति निश्चयः। अत्रायं भावः -
अनुभवात् स्मरणादौ सूत्र इव मणिगणः प्रोतश्चैतन्यप्रसर इति सिद्धम्
अतस्तमेव ध्यायेदिति शेषः॥ ११७॥

अपरामाह

क्वचिद्वस्तुनि विन्यस्य शनैर्दृष्टिं निवर्तयेत्।
तज्ज्ञानं चित्तसहितं देवि शून्यालयो भवेत्॥ ११८॥

कुत्रचित् दृष्टिं कृत्वा घटोयमिति तद्वस्त्वनुभवं तद्वासनायुक्तं चित्ते निधाय शून्यमतिर्भवेत् - ब्रह्म संपद्यत इत्यर्थः ॥ ११८ ॥

अपरामाह

भक्त्युद्रेकाद्विरक्तस्य यादृशी जायते मतिः ।
सा शक्तिः शाङ्करी नित्यं भावयेत्तां ततः शिवः ॥ ११९ ॥

पृ। ४८)

भक्त्यतिशयेन विरक्तस्य शान्तचित्तस्य चित्ते चित्तसमाधानेन यादृशी मतिर्जायते सा शांकरी शक्तिरिति गीयते इति तामेव भावयेत् येन तन्मयः स्यात्॥ ११९ ॥

अपरामाह

वस्त्वन्तरे वेद्यमाने शनैर्वस्तुषु शून्यता ।
तामेव मनसा ध्यात्वा विचित्तोपि [विदितोपीति पाठः] प्रशाम्यति ॥

१२० ॥

अयमत्राशयः - एकस्मिन्वस्तुनि चित्स्वरूपत्वेन ज्ञायमाने अन्यत्र चाभावबुद्धिः - सर्वस्यास्य जगत् एकरूपत्वापत्तेः तस्मात् एकस्यैव वस्तुनोपि चित्स्वभावात् सर्वस्वरूपप्रसंगापत्तेरिति तत्सर्ववेद्यशून्यतां ध्यात्वा विचित्रतया संकल्पविकल्पराहित्येन मुक्तः स्यादिति निश्चयः ॥ १२० ॥

अपरामाह

किंचिज्ज्ञैर्या स्मृता शुद्धिः सा शुद्धिः शंभुदर्शने ।
न शुचिर्ह्यशुचिस्तस्मान्निर्विकल्पः शिवो भवेत् ॥ १२१ ॥

धर्मशास्त्रविद्भिः

कृत्वालं पादशौचं विमलमथ जलं त्रिः पिबेत् ।

इत्यादिना शुद्धिः कथिता सा चैव शुद्धिः निर्विकल्पसमाधिस्थस्य न शुचिर्नाप्यशुचिरभेदापत्तेरिति पारमार्थिकपरमार्थः । तथा च

पृ। ४९)

तनुं त्यजतु काश्यां वा श्वपचस्य गृहेथ वा।

तज्ज्ञः कलङ्कं नाप्नोति हेम पङ्कगतं यथा॥

इत्यादिना स्मृतमस्ति॥ १२१॥

अपरामाह

सर्वत्र भैरवो भावः सामान्येष्वपि गोचरः।

न च तद्व्यतिरेकेण परोस्तीत्यद्वया गतिः॥ १२२॥

दर्पणबिम्बे यद्वन्नगरग्रामादि चित्रमविभागि।

भाति विभागेनैव च परस्परं दर्पणादपि च॥ (प० सा० १२)

इत्यादिना सर्वत्र सर्वदा बाह्याभन्तरेषु पदार्थेषु भैरवो भावः स्फुट इति
न च तद्व्यतिरिक्तं किंचित् इति संबोधाख्या द्वयातीता गतिरद्वैतज्ञानं स्यात्
तद्व्यतिरेके हि प्रकाशमानत्वाभावापत्तेः॥ १२२॥

अपरामाह

समः शत्रौ च मित्रेच समो मानापमानयोः।
ब्रह्मणः परिपूर्णत्वादिति ज्ञात्वा सुखी भवेत्॥ १२३॥

यच्च श्रीभगवता गीतं

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥

पृ। ५०)

तथा च शान्तरसादिनिदर्शने

अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
कदा पुण्येरण्ये शिवशिवशिवेति प्रलपतः॥

पुनश्च सिद्धान्तमुक्तावल्यां

स्नातं तेन समस्ततीर्थसलिले दत्ता च सर्वावनि-
यंज्ञानां च कृतं सहस्रमखिला देवाश्च संतर्पिताः।
संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योप्यसौ
यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात्॥

इत्येवं इच्छाज्ञानक्रियोल्लासं चिन्मयमेव विश्वप्रपञ्चं विज्ञाय सुखी भवतीति भावः॥ १२३॥

एवं सति अपरामाह

न द्वेषं भावयेत्क्वापि न रागं भावयेत्क्वचित्।
रागद्वेषविनिर्मुक्तौ मध्ये ब्रह्म प्रसर्पति॥ १२४॥

सर्पादौ द्वेषं हारादौ च रागः तद्विनिर्मुक्तस्वभावापत्तौ ब्रह्म संपद्यत इति भावः॥ १२४॥

अपरामाह

यदवेद्यं यदग्राह्यं यच्छून्यं यदभावगम्।
तत्सर्वं भैरवं भाव्यं तदन्ते बोधसंभवः॥ १२५॥

यतो वाचो निवर्तन्ते ह्यप्राप्य मनसा सह।
आनन्दं ब्रह्मणो विद्वान्न विभेति कुतश्चन॥

पृ। ५१)

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोयमग्निः।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति॥

आनन्दात्खल्विमानि भूतानि जायन्ते आनन्देन
जातानि जीवन्ति आनन्दं प्रयन्ति अभिसंविशन्ति। (तै० ३०३-६)

इत्यादिना प्रतिपादितं सर्वमेतद्ब्रह्मैव भवति इति दृढानुभवबलात् सर्वत्र
भैरवस्वरूपबोधवान् भैरव एव भवति - ब्रह्म संपद्यते इत्यर्थः॥
१२५॥

अपरामाह

नित्ये निराश्रये शून्ये व्यापके कलनोज्झिते।
बाह्याकाशे मनः कृत्वा निराकाशे समाविशेत्॥ १२६॥

इत्येवं नित्यत्वव्यापकत्वानुभूते बाह्याकाश एव शून्यधारणातिशयेन तदभ्यासातिशयाच्छून्यातिशून्यभूतं यद्धाम तत्रैव समाविशतीति भावः॥ १२६॥

अपरामाह

यत्र यत्र मनो याति तत्तत्तेनैव तत्क्षणम्।
परित्यज्यानवस्थित्या निस्तरङ्गस्ततो भवेत्॥ १२७॥

पृ। ५२)

अविकल्पसंवेदनरूपेण मनसा तत्क्षणे तत्सर्वं परित्यज्य निरालम्बनप्राप्तियुक्त्या परभैरवस्वरूपवान् भवेदिति भावः॥ १२७॥

अपरामाह

भिया सर्वं रवयति सर्वगो व्यापकोखिले ।
इति भैरवशब्दस्य सन्ततोच्चारणाच्छिवः ॥ १२८ ॥

विश्वमिदमखिलं भिया रवयति विमृशति अथ वा अवति रक्षति नीलानीलसुखासुखवेद्यराशेः सर्वस्याहमिति विमर्शनात् - बाह्यान्तरे सर्वत्र अहमस्मि इत्यनुभवदार्ढ्याधिगमाच्छिवः संपद्यते । तथा च न सावस्था न या शिवः इत्यादिना एतदाम्नातमस्ति ॥ १२८ ॥

अपरामाह

अहं मम मयेत्यादिप्रतिपत्तिप्रसङ्गतः ।
निराधारे मनो याति तद्ध्यानप्रेरणाच्छमी ॥ १२९ ॥

अहमिदं मम मया इत्यादिप्रसङ्गेषु निराधारं मनः कृत्वा नेदं नानास्ति किंचित् इति इत्यनेन तद्ध्यानाभ्यसनेन प्रेरणात् अहंविमर्शबलाधिगमात् शमी शान्तद्वन्द्वोवाप्तपरनिर्वाणो जायत इत्यर्थः ॥ १२९ ॥

अपरामाह

नित्यो विभुर्निराधारो व्यापकश्चाखिलाधिपः।

शब्दान्प्रतिक्षणं ध्याय्न्प्रकृतार्थानुरूपतः॥ १३०॥

पृ। ५३)

विभुः सर्वज्ञः सर्वत्र शिव एव इत्येवं प्रतिक्षणं ध्यायन्

प्रकृतार्थानुरूपतया पदार्थदृष्ट्या कृतकृत्यो भवत्येवेत्यर्थः

जानामि करोमि इत्यत्रैव मुक्तस्वभावः स्यादिति भावः। तथा च स्पन्दे

गुणादिस्पन्दनिःष्यन्दाः सामान्यस्पन्दसंश्रयात्।

लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः॥ १९॥

अप्रबुद्धधियस्त्वेते स्वस्थितिस्थगनोद्यताः।

पातयन्ति दुरुत्तारे घोरे संसारवर्त्मनि॥ २०॥

अतः सततमुद्युक्तः स्पन्दतत्त्वविविक्तये।

जाग्रदेव निजं भावमचिरेणाधिगच्छति ॥ २१ ॥

इत्यादिना निर्णीतमस्ति ॥ १३० ॥

अपरामाह

अतत्त्वमिन्द्रजालाभमिदं सर्वं व्यवस्थितम् ।
किं तत्त्वमिन्द्रजालस्य चेति दार्ढ्याच्छमं व्रजेत् ॥ १३१ ॥

अतत्त्वमसारम् इन्द्रजालवदिति प्रतीत्या - सर्वमिदमिन्द्रजालतुल्यमेव तत्परं सद्वस्तु व्यपदेश्यं प्रमातृतत्त्वमिति भावनादार्ढ्येन तत्त्वविदः निर्वाणपदावाप्तिर्भवेदिति भावः ॥ १३१ ॥

अपरामाह

आत्मनो निर्विकारस्य क्व ज्ञानं क्व च वा क्रिया ।
ज्ञानायत्ता बहिर्भावा अतः शून्यमिदं जगत् ॥ १३२ ॥

ज्ञानक्रियादिशक्त्ययोगाज्ज्ञेयादिकल्पना कुतः न कुतश्चन। अतो निर्विकल्पात्मकस्य निर्विकल्पमेवेदं जगत्प्रतिभासते इति भावः। तथाच मालिनीविजये

या सा शक्तिर्जगद्धातुः कथिता समवायिनी।
इच्छात्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते॥

सैकापि सत्यनेकत्वं यथा गच्छति तच्छृणु।
एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम्॥

ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते।
एवं भवत्विदं सर्वमिति कार्योन्मुखी यदा॥

जाता तदैव तत्तद्वत्कुर्वत्यत्र क्रिया मता।
एवं यथा द्विरूपैव पुनर्भेदैरनेकधा॥

अर्थोपाधिवशाद्याति चिन्तामणिरिवेश्वरी।
तत्र तावत्समापन्ना मातृभावं विभिद्यते॥

द्विधा च नवधा भेदैः पञ्चाशद्धा च मालिनी।

इत्यादिना प्रकाशितोयमर्थः॥ १३२॥

अपरामाह

न मे बन्धो न मे मोक्षो बालस्यैता विभीषिकाः।
प्रतिबिम्बमिदं बुद्धेर्जलेष्विव विवस्वतः॥ १३३॥

मायापरिग्रहवशाद्बोधो मलिनः पुमान्पशुर्भवति। (प० सा० १६)

इत्यादिना निर्णीतोयमर्थः परमार्थसारे सुस्पष्टः। अथ च तत्रैव

गच्छति गच्छति जल इव हिमकरबिम्बं स्थिते स्थितिं याति।
तनुकरणभुवनवर्गे तथायमात्मा महेशानः॥ (प० सा० ७)

पृ। ५५)

इत्यादिना एतत्सर्वं बुद्धेः प्रतिबिम्बितमेव सूर्याचन्द्रमसोरिव
जलप्रतिबिम्बादौ। इत्थं दृष्टान्तदार्स्टान्तिकयोर्योज्यमिति भावः॥ १३३॥

अपरामाह

इन्द्रियद्वारकं सर्वं सुखदुःखादिसंगतम्।
इतीन्द्रियाणि संत्यज्य स्वस्थः स्वात्मनि वर्तते॥ १३४॥

द्रष्टा दृश्यं दर्शनं च इति भेदकल्पनात्यागादात्मनि स्वस्थः - स्वात्मैव भवति इत्यर्थः॥ १३४॥

अपरामाह

ज्ञानप्रकाशकं सर्वमात्मा चैव प्रकाशकः।
एवमेकस्वभावत्वाज्ज्ञानं ज्ञेये विभाव्यते॥ १३५॥

प्रकाशमानं न पृथक्प्रकाशात्
स च प्रकाशो न पृथग्विमर्शात्।
नान्यो विमर्शोऽहमिति स्वरूपा-
दहं विमर्शोऽस्मि चिदेकरूपः॥

इति नीत्या न किमपि प्रकाशाद्व्यतिरिक्तं भाति वर्तते वा

ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं नास्ति वास्तवम्।

इत्यादिलक्षणेन च सर्वं चिन्मयमेव विभाव्य यज्ज्ञानं तदेव ज्ञेयादि
इत्यादि तत्त्वज्ञाननिष्ठः संभवति इति भावः॥ १३५॥

अपरामाह

मानसं चेतना शक्तिरात्मा चेति चतुष्टयम्।
यदा प्रिये परिक्षीणं तदा तद्भैरवं वपुः॥ १३६॥

पृ। ५६)

मानसं मनः चेतना बुद्धिः शक्तिः प्राणशक्तिः आत्मा च एतदुपाधिमयो
जीव इति कथ्यते इत्येतच्चतुष्टयमुपाधिमयं मायीयोपाधिगलितं यदा क्षीणं
- यदा क्षीयते तदा चिच्छेषतया हिमनिर्मुक्तभास्करवत् प्रकाशमानः
प्रकाश एवावशिष्यते - इति दृढानुभवसमधिगमात् साक्षाद्भैरव
एव भवतीति भावः॥ १३६॥

अपरामाह

निस्तरङ्गोपदेशानां शतमुक्तं समासतः ।

द्वादशाभ्यधिकं देवि यज्ज्ञात्वा ज्ञानविज्जनः ॥ १३७ ॥

इत्थं मया धारणोपदेशानां द्वादशाभ्यधिकं शतमुक्तम् एतदेव

विज्ञाय साक्स् ।आद्भैरवसारूप्यमेवैतीति तात्पर्यम् ॥ १३७ ॥

अत्र चैकतमे युक्तो जायते भैरवः स्वयम् ।

वाचा करोति कर्माणि शापानुग्रहकारकः ॥ १३८ ॥

एतासु धारणास्वन्यतमनिष्ठावान्

मायीयोपाधिसंव्लितवेद्यराशिपतितेन्द्रियगणोपि वाचा कथनमात्रेण

शापानुग्रहादिकर्माणि करोति तत्रापि तथैव समाध्येकीभावनया तत्तदुज्झित्य

निस्तरङ्गप्रकाशवान् भैरवः साक्षाद्भवतीति निश्चयः ॥ १३८ ॥

अजरामरतामेति सोणिमादिगुणैर्युतः ।

योगिनीनां प्रभुर्देवि सर्वमेलापकारकः ॥ १३९ ॥

अपाम सोमममृता अभूम

इत्यादिनोक्तधारणाभ्यासदार्ढ्येन अजरामरतां संप्राप्य विज्ञाना-

पृ। ५७)

त्मकसोमपानात् योगिनीनां - ज्ञानक्रियानन्दादिशक्तीनां प्रभुः स्वामी
सर्वत्र मेलापकृत् सकलस्यास्य वेद्यवेदकादिराशेः
खिलीकृतस्वभावोत्यन्तनिर्मलचिद्वपुरद्वैतप्रकाशमयः परमात्मा
भैरवः संपद्यते इति तात्पर्यार्थः ॥ १३९ ॥

जीवन्नपि विमुक्तोसौ कुर्वन्नपि न लिप्यते ।

जीवन्मुक्त एवासौ पश्यन्नपि शृण्वन्नपि जिघ्रन्नपि - इत्यादिक्रियाः
कुर्वन्न लिप्यते। तथा च भगवान्

पश्यञ्छृण्वन्स्पृशन् जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ।
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि । (५-८)

ब्रह्मण्यादाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।

लिप्यते न स पापेन पद्मपत्रमिवाम्भसा । (५-१०)

इत्यादिना समादिशति । तथा च स्पन्दे

गुणादिस्पन्दनिःष्यन्दाः सामान्यस्पन्दसंश्रयात् ।
लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः ॥ (१९)

इत्यादिना निर्णीतमस्ति । तस्मात् कर्माणि कुर्वन्नपि च न लिप्यते इति सिद्धम् ॥

ताद्रूप्येण भेदं संदिहानेव पुनरपि पृच्छन्ती

श्रीभैरवी उवाच

इदं यदि वपुर्देव परायाश्च महेश्वर ॥ १४० ॥

एवमुक्तव्यवस्थायां जप्यते को जपश्च कः ।
ध्यायते को महादेव पूज्यते कश्च तृप्यति ॥ १४१ ॥

पृ । ५८)

हूयते कस्य वा होमो यागः कस्य च किं कथम् ।

स्पष्टमेतत् ॥

उक्तानुयोगनिर्धारणां समादिशन्

श्रीभैरव उवाच

एषात्र प्रक्रिया बाह्या स्थूलेत्येव मृगेक्षणे ॥ १४२ ॥

भूयो भूयः परे भावे भावना भाव्यते हि या ।

प्रक्रिया बाह्या - जपपाठतीर्थाटनादिक्रिया परे तत्त्वे बाह्येति कथ्यते ॥

जपः सोत्र स्वयं नादो मन्त्रात्मा जप्य ईदृशः ॥ १४३ ॥

ध्यानं या निश्चला बुद्धिर्निर्विकारा निराश्रया ।

सोहं ब्रह्मेति शब्दस्य अनाहताख्यस्य श्रवणाज्जपः ईदृङ्मन्त्रात्मतया जपाङ्गश्च मन्त्रः वेद्यावेद्यपतितापि समाधानबलान्निवातदीपवद्या

निश्चला बुद्धिस्तद्ध्यानमिति कथ्यते अत एव निर्विकारा निराश्रया चेति ॥

न तु ध्यानं शरीरस्य मुखहस्तादिकल्पना ॥ १४४ ॥

पूजा नाम न पुष्पाद्यैर्या मतिः क्रियते दृढा ।
निर्विकल्पे परे व्योम्नि सा पूजा ह्यादराल्लयः ॥ १४५ ॥

पृ। ५९)

परे व्योम्नि परचिदाकाशे लयः विश्रान्तिरेव तत्त्वतः पूजेति भावः ॥ १४५ ॥

अत्रैकतमयुक्तिस्थे योत्पद्येत दिनाद्दिनम् ।
भरिताकारता सात्र तृप्तिरत्यन्तपूर्णता ॥ १४६ ॥

अत्र प्रोक्तधारणासु एकतमयुक्तिस्थे सिद्धसमाधानदार्ढ्ये योगिनि उत्तरोत्तरं निर्विकल्पसमाधिरसास्वादाद्या पूर्णस्वात्मस्वरूपोपलब्धिपूर्णता सा तृप्तिरित्यर्थः ॥ १४६ ॥

महाशून्यालये वह्नौ भूतादिविषयादिकम् ।
हूयते मनसा सार्धं स होमश्चेतना स्रुचा ॥ १४७ ॥

महाशून्यालये शून्यातिशून्यरूपे परभैरवस्वरूपे वह्नौ भूतेन्द्रियतत्त्वादिरूपं सर्वं जगत् संकल्पविकल्पात्मकं विभागकल्पनाहेतुना मनसा सह यत्र चैतनैव स्रुक् तया हूयते स होमस्तत्त्वत इति ॥ १४७ ॥

यागोत्र परमेशानि तुष्टिरानन्दलक्षणा ।
क्षपणात्सर्वपाशानां त्राणात्सर्वस्य पार्वति ॥ १४८ ॥

रुद्रशक्तिसमावेशस्तत्क्षेत्रं भावना परा ।

उक्तसमाधानोत्थानन्देन तुष्टिरेव यागो देवपूजा पाशक्षपणभवत्राणधर्मत्वादनाश्रितशक्त्यावेश एव क्षेत्रं न च पुनः कुरुक्षेत्रधर्मक्षेत्रादिगमनादि । रुद्रशक्तिसमावेशः - सर्वज्ञत्वादिषटशक्तिप्रादुर्भावश्चेति ॥ १४८ ॥

पृ। ६०)

अन्यथा तस्य तत्त्वस्य का पूजा कश्च तृप्यति ॥ १४९ ॥

प्रकारान्तरेणाद्वैतसत्तत्त्वस्य पूजनतर्पणादिकर्म व्यतिरिक्तं न संभवतीति भावः ॥ १४९ ॥

सदाचारेषु मुख्यतयानुष्ठेयं स्नानमपि निर्दिशति

स्वतन्त्रानन्दचिन्मात्रसारः स्वात्मा हि सर्वतः ।
आवेशनं तत्स्वरूपे स्वात्मनः स्नानमीरितम् ॥ १५० ॥

निगदितधारणाभ्यासेनाद्वैतस्वात्मस्वरूपस्य स्वतन्त्रानन्दचिन्मात्रसारतयानुभवात्तत्स्वरूपे लयभावनैव मुख्यं स्नानमित्यर्थः ॥ १५० ॥

यैरेव पूज्यते द्रव्यैस्तर्प्यते वा परापरः ।
यश्चैव पूजकः सर्वः स एवैकः क्व पूजनम् ॥ १५१ ॥

यैरेव द्रव्यैः कुसुमादिभिः पूज्यते क्षीरखण्डादिभिर्वा तर्प्यते परापर इति परादेव्या सहितः परः भैरवः इति यश्चैव पूजकः स एव पूज्य इत्येने न तत्त्वज्ञानेन क्व पूजनम् स्थूलमार्गेण यत् सर्वस्य

पूज्यपूजादेस्तदेकस्वरूपतया क्वापि भिन्नता नेति भावः ॥ ५१ ॥

व्रजेत्प्राणो विशेज्जीव इच्छया कुटिलाकृतिः ।
दीर्घात्मा सा महादेवी परं क्षेत्रं परात्परा ॥ १५२ ॥

प्राणप्रवेशनसमये अपानस्य संघट्टनात् हृदयादौ । अस्य पद्यस्य
विस्तृतो रहस्यार्थस्तन्त्रालोकादौ निगदितस्तत एवावधार्यः तत्रापि

पृ। ६१)

गुरुमुखत एव समाधेयतया नास्माभिरिह वितानित इति क्षन्तव्यम् ॥ १५२ ॥

अस्यामनुचरंस्तिष्ठन्महानन्दमयेध्वरे ।
तया देव्या समाविष्टः परं भैरवमाप्नुयात् ॥ १५३ ॥

षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः ।
हंस-हंसेति-मन्त्रेण जीवो जपति नित्यशः ॥ ५४ ॥

जपो देव्याः समुद्दिष्टः प्राणस्यान्ते सुदुर्लभः ।

प्राणस्यान्ते पर्यवसानावस्थायाम् ॥

इत्येतत्कथितं देवि परमामृतमुत्तमम् ॥ १५५ ॥

एतच्च नैव कस्यापि प्रकाश्यं तु कदाचन ।
परशिष्ये खले क्रूरे चाभक्ते गुरुपादयोः ॥ १५६ ॥

निर्विकल्पमतीनां तु वीराणामुन्नतात्मनाम् ।

निर्विकल्पमतीनां वीराणां च्छिन्नसंशयानाम् उन्नतात्मनां
शुद्धविद्याप्रधानमायोत्तीर्णानाम् ॥

भक्तानां गुरुवर्गस्य दातव्यं निर्विशङ्कया ॥ १५७ ॥

दिव्यौघ-सिद्धौघ-मानवौघादिगुरुपङ्क्तिभक्तानाम्
प्रदेयमेतद्रहस्यज्ञानमिति ॥ १५७ ॥

ग्रामं राज्यं पुरं देशं पुत्रदाराकुटुम्बकम् ।

सर्वमेतत्परित्यज्य ग्राह्यमेतन्मृगेक्षणे ॥ १५८ ॥

पृ। ६२)

किमेभिरस्थिरैर्देवि स्थिरं परमिदं धनम्।
प्राणा अपि प्रदादव्या न देयं परमामृतम्॥ १५९ ॥

राज्याद्यस्थिराननुगामिद्रव्यसंपत्त्यागेनैतदक्षयमनुवर्तमानमनुत्तरसुखफलं स्थिरधनं संग्राह्यं यत्सर्वथादेयं निर्दिष्टापात्रेभ्य इति ॥ १५८-१५९ ॥

श्रीभैरवी

देव देव महादेव परितृप्तास्मि शंकर।
रुद्रयामलतन्त्रस्य सारमद्यावधारितम्॥ १६० ॥

सर्वशक्तिप्रभेदानां हृदयं ज्ञातमद्य च।
इत्युक्त्वानन्दिता देवी कण्ठे लग्ना शिवस्य तु॥ १६१ ॥

इत्येतानि पद्यानि स्पष्टव्याख्यानानि तस्मादलं विवरणेन ॥ १६०-१६१ ॥

इति श्री विज्ञानभैरवं नाम योगशास्त्रं समाप्तम् ।

पृ । ६३)

श्रीविद्यानुग्रहावाप्तप्रेक्षालेशस्त्रिकागमान् ।
आलोड्यालोच्य तत्तत्त्वसंग्रहार्थं सुविस्तृतम् ॥ १ ॥

विज्ञानभैरवे गूढपथे पदप्रबोधिनीम् ।
दुर्ध्वान्तभवदुःश्वभ्रविभ्रंशात्पालनोदिताम् ॥ २ ॥

वेदसप्तर्षिवेदान्त्ययुगाब्दमधुपक्षतौ ।
विज्ञानकौमुदीमेतां भट्टानन्दो व्यकासयत् ॥ ३ ॥

समाप्तेयं विज्ञानकौमुदी नाम विज्ञानभैरवटीका ।
कृतिस्तत्रभवत्काश्मीरिकभट्टारकानन्दकस्य ॥

सद्विद्यानां संश्रय ग्रन्थविद्वद्-

व्यूहे ह्रासं कालवृत्त्योपयाते।

तत्तत्सद्धर्मोद्दिधीर्षैकतान-

सत्प्रेक्षौजःशालिना कर्मवृत्त्यै॥ १॥

श्रीमत्कश्मीराधिराजेन मुख्यै-

र्धर्मोद्युक्तैर्मन्त्रिभिः स्वैर्विविच्य।

प्रत्यष्ठापि ज्ञानविज्ञानगर्भ-

ग्रन्थोद्धृत्यै मुख्यकार्यालयो यः॥ २॥

पृ। ६४)

तत्राजीवं निर्विशद्भिर्मुकुन्द-

रामाध्यक्षत्वाश्रितैः सद्भिरेषः।

पूर्त्या शुद्ध्या व्याख्यया संस्कृतः स्तात्

पूर्णो ग्रन्थः श्रेयसे सज्जनानाम्॥ ३॥ (तिलकम्)

श्रीस्वात्मशिवार्पणमस्तु॥

XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX

****
****
* "Siva Sa.mhitaa
* Published by the Theosophical Society
* Tara Press, Varanasi 1928
* Data-entered by the staff of Muktabodha under the supervision of Mark S.G. Dyczkowski
* Velthius transliteration
* revision 0 January 28, 2007
****
****

प्रथमः पटलः

एकं ज्ञानं नित्यमाद्यन्तशून्यं नान्यत् किञ्चिद्वर्त्तते वस्तु सत्यम्।

यद्भेदोस्मिन्निन्द्रियोपाधिना वै ज्ञानस्यायं भासते नान्यथैव ॥ १-१ ॥

अथ भक्तानुरक्तोऽहं वक्ति योगानुशासनम्।

ईश्वरः सर्वभूतानामात्ममुक्तिप्रदायकः ॥ १-२ ॥

त्यक्त्वा विवादशीलानां मतं दुर्ज्ञानहेतुकम्।

आत्मज्ञानाय भूतानामनन्यगतिचेतसाम् ॥ १-३ ॥

सत्यं केचित्प्रशंसन्ति तपः शौचं तथापरे।
क्षमां केचित्प्रशंसंति तथैव सममार्ज्जवम्॥ १-४॥

केचिद्दानं प्रशंसन्ति पितृकर्म तथापरे।
केचित्कर्म प्रशंसन्ति केचिद्वैराग्यमुत्तमम्॥ १-५॥

केचिद्गृहस्थकर्माणि प्रशंसन्ति विचक्षणाः।
अग्निहोत्रादिकं कर्म तथा केचित् परं विदुः॥ १-६॥

मन्त्रयोगं प्रशंसन्ति किचित्तिर्थानुसेवनम्।
एवं बहूनुपायांस्तु प्रवदन्ति हि मुक्तये॥ १-७॥

एवं व्यवसिता लोके कृत्याकृत्यविदो जनाः।
व्यामोहमेव गच्छंति विमुक्ताः पापकर्मभिः॥ १-८॥

एतन्मतावलम्बी यो लब्ध्वा दुरितपुण्यके।
भ्रमतीत्यवशः सोऽत्र जन्ममृत्युपरम्पराम्॥ १-९॥

अन्यैर्मतिमता। श्रेष्ठैर्गुप्तालोकनतत्परैः।

आत्मानो बहवः प्रोक्ता नित्याः सर्वगतास्तथा ॥ १-१० ॥

यद्यत्प्रत्यक्षविषयं तदन्यन्नास्ति चक्षते ।
कुतः स्वर्गादयः सन्तीत्यन्ये निश्चितमानसाः ॥ १-११ ॥

ज्ञानप्रवाह इत्यन्ये शून्यं केचित्परं विदुः ।
द्वावेव तत्त्वं मन्यन्तेऽपरे प्रकृतिपूरुषौ ॥ १-१२ ॥

अत्यन्तभिन्नमतयः परमार्थपराङ्मुखाः ।
एवमन्ये तु संचिन्त्य यथामति यथाश्रुतम् ॥ १-१३ ॥

निरीश्वरमिदं प्राहुः सेश्वरञ्च तथापरे ।
वदन्ति विविधैर्भेदैः सुयुक्त्या स्थितिकातराः ॥ १-१४ ॥

एते चान्ये च मुनयः संज्ञाभेदा पृथग्विधाः ।
शास्त्रेषु कथिता ह्येते लोकव्यामोहकारकाः ॥ १-१५ ॥

एतद्विवादशीलानां मतं वक्तुं न शक्यते ।
भ्रमन्त्यस्मिञ्जनाः सर्वे मुक्तिमार्गबहिष्कृताः ॥ १-१६ ॥

आलोक्य सर्वशास्त्राणि विचार्य च पुनः पुनः।
इदमेकं सुनिष्पन्नं योगशास्त्रं परं मतम्॥ १-१७ ॥

यस्मिन् याते सर्वमिदं यातं भवति निश्चितम्।
तस्मिन्परिश्रमः कार्यः किमन्यच्छास्त्रभाषितम्॥ १-१८ ॥

योगशास्त्रमिदं गोप्यमस्माभिः परिभाषितम्।
सुभक्ताय प्रदातव्यं त्रैलोक्ये च महात्मने॥ १-१९ ॥

कर्मकाण्डं ज्ञानकाण्डमिति वेदो द्विधा मतः।
भवति द्विविधो भेदो ज्ञानकाण्डस्य कर्मणः॥ १-२० ॥

द्विविधः कर्मकाण्डः स्यान्निषेधविधिपूर्वकः॥ १-२१ ॥

निषिद्धकर्मकरणे पापं भवति निश्चितम्।
विधिना कर्मकरणे पुण्यं भवति निश्चितम्॥ १-२२ ॥

त्रिविधो विधिकूटः स्यान्नित्यनैमित्तकाम्यतः।
नित्येऽकृते किल्विषं स्यात्काम्ये नैमित्तिके फलम्॥ १-२३ ॥

द्विविधन्तु फलं ज्ञेयं स्वर्गो नरक एव च।

स्वर्गो नानाविधश्चैव नरकोपि तथा भवेत्॥ १-२४ ॥

पुण्यकर्माणि वै स्वर्गो नरकः पापकर्माणि।

कर्मबंधमयी सृष्टिर्नान्यथा भवति ध्रुवम्॥ १-२५ ॥

जन्तुभिश्चानुभूयंते स्वर्गे नानासुखानि च।

नानाविधानि दुःखानि नरके दुःसहानि वै॥ १-२५ ॥

पापकर्मवशाद्दुखं पुण्यकर्मवशात्सुखम्।

तस्मात्सुखार्थी विविधं पुण्यं प्रकुरुते ध्रुवम्॥ १-२७ ॥

पापभोगावसाने तु पुनर्जन्म भवेत्खलु।

पुण्यभोगावसाने तु नान्यथा भवति ध्रुवम्॥ १-२८ ॥

स्वर्गेऽपि दुःखसंभोगः परश्रीदर्शनादिषु।

ततो दुःखमिदं सर्वं भवेन्नास्त्यत्र संशयः॥ १-२९ ॥

तत्कर्मकल्पकैः प्रोक्तं पुण्यं पापमिति द्विधा।

पुण्यपापमयो बन्धो देहिनां भवति क्रमात्॥ १-३० ॥

इहामुत्र फलद्वेषी सफलं कर्म संत्यजेत्।
नित्यनैमित्तिकं संज्ञं त्यक्त्वा योगे प्रवर्तते ॥ १-३१ ॥

कर्मकाण्डस्य माहात्म्यं ज्ञात्वा योगी त्यजेत्सुधीः।
पुण्यपापद्वयं त्यक्त्वा ज्ञानकाण्डे प्रवर्तते ॥ १-३२ ॥

आत्मा वाऽरेतु द्रष्टव्यः श्रोतव्येत्यादि यच्छ्रुतिः।
सा सेव्या तत्प्रयत्नेन मुक्तिदा हेतुदायिनी ॥ १-३३ ॥

दुरितेषु च पुण्येषु यो धीर्वृत्तिं प्रचोदयात्।
सोऽहं प्रवर्तते मत्तो जगत्सर्वं चराचरम्॥
सर्वं च दृश्यते मत्तः सर्वं च मयि लीयते।
न तद्भिन्नोऽहमस्मीह मद्भिन्नो न तु किंचन ॥ १-३४ ॥

जलपूर्णेष्वसंख्येषु शरावेषु यथा भवेत्।
एकस्य भात्यसंख्यत्वं तद्भेदोऽत्र न दृश्यते॥
उपाधिषु शरावेषु या संख्या वर्तते परा।
सा संख्या भवति यथा रवौ चात्मनि तत् तथा॥ १-३५ ॥

यथैकः कल्पकः स्वप्ने नानाविधितयेष्यते ।
जागरेपि तथाप्येकस्तथैव बहुधा जगत् ॥ १-३६ ॥

सर्पबुद्धिर्यथा रज्जौ शुक्तौ वा रजतभ्रमः ।
तद्वदेवमिदं विश्वं विवृतं परमात्मनि ॥ १-३७ ॥

रज्जुज्ञानाद्यथा सर्पो मिथ्यारूपो निवर्तते ।
आत्मज्ञानात् तथा याति मिथ्याभूतमिदं जगत् ॥ १-३८ ॥

रौप्यभ्रान्तिरियं याति शुक्तिज्ञानाद्यथा खलु ।
जगद्भ्रान्तिरियं याति चात्मज्ञानात् सदा तथा ॥ १-३९ ॥

यथा वंशो रगभ्रान्तिर्भवेद्भेकवसाञ्जनात् ।
तथा जगदिदं भ्रांतिरभ्यासकल्पनाञ्जनात् ॥ १-४० ॥

आत्मज्ञानाद्यथा नास्ति रज्जुज्ञानाद्भुजङ्गमः ।
यथा दोषवशाच्छुक्लः पीतो भवति नान्यथा ।
अज्ञानदोषादात्मापि जगद्भवति दुस्त्यजम् ॥ १-४१ ॥

दोषनाशे यथा शुक्लो गृह्यते रोगिणा स्वयम् ।

शुक्तिज्ञानात्तथाऽज्ञाननाशादात्मा तथा कृतः ॥ १-४२ ॥

कालत्रयेपि न यथा रज्जुः सर्पो भवेदिति ।
तथात्मा न भवेद्विश्वं गुणातीतो निरञ्जनः ॥ १-४३ ॥

आगमाऽपायिनोऽनित्यानाश्यत्वेनेश्वरादयः ।
आत्मबोधेन केनापि शास्त्रादेतद्विनिश्चितम् ॥ १-४४ ॥

यथा वातवशात्सिन्धावुत्पन्नाः फेनबुद्बुदाः ।
तथात्मनि समुद्भूतं संसारं क्षणभंगुरम् ॥ १-४५ ॥

अभेदो भासते नित्यं वस्तुभेदो न भासते ।
द्विधात्रिधादिभेदोऽयं भ्रमत्वे पर्यवस्यति ॥ १-४६ ॥

यद्भूतं यच्च भाव्यं वै मूर्तामूर्तं तथैव च ।
सर्वमेव जगदिदं विवृतं परमात्मनि ॥ १-४७ ॥

कल्पकैः कल्पिता विद्या मिथ्या जाता मृषात्मिका ।
एतन्मूलं जगदिदं कथं सत्यं भविष्यति ॥ १-४८ ॥

चैतन्यात्सर्वमुत्पन्नं जगदेतच्चराचरम्।

तस्मात्सर्वं परित्यज्य चैतेन्यं तं समाश्रयेत्॥ १-४९॥

घटस्याभ्य तरे बाह्ये यथाकाशं प्रवर्तते।

तथात्माभ्यंतरे बाह्ये कार्यवर्गेषु नित्यशः॥ १-५०॥

असंलग्नं यथाकाशं मिथ्याभूतेषु पंचसु।

असंलग्नस्तथात्मा तु कार्यवर्गेषु नान्यथा॥ १-५१॥

ईश्वरादिजगत्सर्वमात्मव्याप्यं समन्ततः।

एकोऽस्ति सच्चिदानंदः पूर्णो द्वैतविवर्जितः॥ १-५२॥

यस्मात्प्रकाशको नास्ति स्वप्रकाशो भवेत् ततः।

स्वप्रकाशो यतस्तस्मादात्मा ज्योतिः स्वरूपकः॥ १-५३॥

अवच्छिन्नो यतो नास्ति दशकालस्वरूपतः।

आत्मनः सर्वथा तस्मादात्मा पूर्णो भवेत्खलु॥ १-५४॥

यस्मान्न विद्यते नाशः पंचभूतैर्वृथात्मकैः।

तस्मादात्मा भवेन्नित्यस्तन्नाशो न भवेत्खलु॥ १-५५॥

यस्मात् तदन्यो नास्तीह तस्मादेकोऽस्ति सर्वदा ।
यस्मात् तदन्यो मिथ्या स्यादात्मा सत्यो भवेत् खलु ॥ १-५६ ॥

अविद्याभुतसंसारे दुःखनाशे सुखं यतः ।
ज्ञानादाद्यंतशून्यं स्यात् तस्मादात्मा भवेत् सुखम् ॥ १-५७ ॥

यस्मान्नाशितमज्ञानं ज्ञानेन विश्वकारणम् ।
तस्मादात्मा भवेज्ज्ञानं ज्ञानं तस्मात् सनातनम् ॥ १-५८ ॥

कालतो विविधं विश्वं यदा चैव भवेदिदम् ।
तदेकोऽस्ति स एवात्मा कल्पनापथवर्जितः ॥ १-५९ ॥

बाह्यानि सर्वभूतानि विनाशं यान्ति कालतः ।
यतो वाचो निवर्तंते आत्मा द्वैतविवर्जितः ॥ १-६० ॥

न खं वायुर्न चाग्निश्च न जलं पृथिवी न च ।
नैतत्कार्यं नेश्वरादि पूर्णैकात्मा भवेत्खलु ॥ १-६१ ॥

आत्मानमात्मनो योगी पश्यत्यात्मनि निश्चितम् ।

सर्वसंकल्पसंन्यासी त्यक्तमिथ्याभवग्रहः ॥ १-६२ ॥

आत्मानात्मनि चात्मान दृष्ट्वानन्त सुखात्मकम् ।
विस्मृत्य विश्वं रमते समाधेस्तीव्रतस्तथा ॥ १-६३ ॥

मायैव विश्वजननी नान्या तत्त्वधियापरा ।
यदा नाशं समायाति विश्वं नास्ति तदा खलु ॥ १-६४ ॥

हेयं सर्वमिदं यस्य मायाविलसितं यतः ।
ततो न प्रीतिविषयस्तनुवित्तसुखात्मकः ॥ १-६५ ॥

अरिर्मित्रमुदासीनस्त्रिविधं स्यादिदं जगत् ।
व्यवहारेषु नियतं दृश्यते नान्यथा पुनः ॥
प्रियाप्रियादिभेदस्तु वस्तुषु नियतः स्फुटम् ॥ १-६६ ॥

आत्मोपाधिवशादेवं भवेत् पुत्रादि नान्यथा ।
मायाविलसितं विश्वं ज्ञात्वैवं श्रुतियुक्तितः ॥
अध्यारोपापवादाभ्यां लयं कुर्वन्ति योगिनः ॥ १-६७ ॥

निखिलोपाधिहीनो वै यदा भवति पुरुषः ।

तदा विवक्षतेऽखंडज्ञानरूपी निरंजनः ॥ १-६८ ॥

सो कामयतः पुरुषः सृजते च प्रजाः स्वयम् ।
अविद्या भासते यस्मात् तस्मान्मिथ्या स्वभावतः ॥ १-६९ ॥

शुद्ध ब्रह्मत्व संबद्धो विद्यया सहितो भवेत् ।
ब्रह्मतेनसती याति यत आभासते नभः ॥ १-७० ॥

तस्मात् प्रकाशते वायुर्वायोरग्निस्ततो जलम् ।
प्रकाशते ततः पृथ्वी कल्पनेयं स्थिता सति ॥ १-७१ ॥

आकाशाद्वायुराकाशपवनादग्निसंभवः ।
खवाताग्नेर्जलं व्योमवाताग्निवारितो मही ॥ १-७२ ॥

खं शब्दलक्षणं वायुश्चंचलः स्पर्शलक्षणः ।
स्याद्रूपलक्षणं तेजः सलिलं रसलक्षणम् ॥
गन्धलक्षणिका पृथ्वी नान्यथा भवति ध्रुवम् ॥ १-७३ ॥

स्यादेकगुणमाकाशं द्विगुणो वायुरुच्यते ।
तथैव त्रिगुणं तेजो भवन्त्यापश्चतुर्गुणाः ॥

शब्दः स्पर्शश्च रूपं च रसो गन्धस्तथैव च।

एतत् पंचगुणा पृथ्वी कल्पकैः कल्प्यतेऽधुना॥ १-७४॥

चक्षुषा गृह्यते रूपं गन्धो घ्राणेन गृह्यते।

रसो रसनया स्पर्शस्त्वचा संगृह्यते परम्॥ १-७५॥

श्रोत्रेण गृह्यते शब्दो नियतं भाति नान्यथा॥ १-७६॥

चैतन्यात्सर्वमुत्पन्नं जगदेतच्चराचरम्।

अस्ति चेत्कल्पनेय स्यान्नास्ति चेदस्ति चिन्मयम्॥ १-७७॥

पृथ्वी शीर्णा जलं मग्ना जलं मग्नञ्च तेजसि।

लीनं वायौ तथा तेजो व्योम्नि वातो लयं ययौ॥

अविद्यायां महाकाशो लीयते परमे पदे॥ १-७८॥

विक्षेपावरणा शक्तिर्दुरन्तासुखरूपिणी।

जडरूपा महामाया रजःसत्त्वतमोगुणा॥ १-७९॥

सा मायावरणाशक्त्यावृताविज्ञानरूपिणी।

दर्शयेज्जगदाकारं तं विक्षेपस्वभावतः॥ १-८०॥

तमो गुणाधिका विद्या या सा दूर्गा भवेत् स्वयम्।
ईश्वरस्तदुपहितं चैतन्यं तदभूद् ध्रुवम्॥
सत्ताधिका च या विद्या लक्ष्मीः स्याद्दिव्यरूपिणी।
चैतन्यं तदुपहितं विष्णुर्भवति नान्यथा॥ १-८१॥

रजोगुणाधिका विद्या ज्ञेया सा वै सरस्वती।
यश्चित्स्वरूपो भवति ब्रह्मातदुपधारकः॥ १-८२॥

ईशाद्याः सकला देवा दृश्यन्ते परमात्मनि।
शरीरादिजडं सर्वं सा विद्या तत् तथा तथा॥ १-८३॥

एवंरूपेण कल्पन्ते कल्पका विश्वसम्भवम्।
तत्त्वातत्त्वं भवंतीह कल्पनान्येन चोदिता॥ १-८४॥

प्रमेयत्वादिरूपेण सर्वं वस्तु प्रकाश्यते।
विशेषशब्दोपादाने भेदो भवति नान्यथा॥ १-८५॥

तथैव वस्तुनास्त्येव भासको वर्तकः परः।
स्वरूपत्वेन रूपेण स्वरूपं वस्तु भाष्यते॥ १-८६॥

एकः सत्तापूरितानन्दरूपः पूर्णो व्यापी वर्तते नास्ति किञ्चित्।

एतज्ज्ञानं यः करोत्येव नित्यं मुक्तः स स्यान्मृत्युसंसारदुःखात्॥ १-८७ ॥

यस्यारोपापवादाभ्यां यत्र सर्वे लयं गताः।

स एको वर्तते नान्यत्तच्चित्तेनावधार्यते॥ १-८८ ॥

पितुरन्नमयात्कोशाज्जायते पूर्वकर्मणः।

तच्छरीरंविदुर्दुःखं स्वप्राग्भोगाय सुन्दरम्॥ १-८९ ॥

मांसास्थिस्नायुमज्जादिनिर्मितं भोगमन्दिरम्।

केवलं दुःखभोगाय नाडी संततिगुल्फितम्॥ १-९० ॥

पारमेष्ठ्यमिदं गात्रं पंचभूतविनिर्मितम्।

ब्रह्माण्डसंज्ञकं दुःखसुखभोगाय कल्पितम्॥ १-९१ ॥

बिन्दुः शिवो रजः शक्तिरुभयोर्मिलनात्स्वयम्।

स्वप्नभूतानि जायन्ते स्वशक्त्या जडरूपया॥ १-९२ ॥

तत् पञ्चीकरणात् स्थूलान्यसंख्यानि समासतः।

ब्रह्मांडस्थानि वस्तूनि यत्र जीवोऽस्ति कर्मभिः ॥
तद्भूतपञ्चकात्सर्वं भोगाय जीवसंज्ञिता ॥ १-९३ ॥

पूर्वकर्मानुरोधेन करोमि घटनामहम् ।
अजडः सर्वभूतस्था जडस्थित्या भुनक्ति तान् ॥ १-९४ ॥

जडात्स्वकर्मभिर्बद्धो जीवाख्यो विविधो भवेत् ।
भोगायोत्पद्यते कर्म ब्रह्मांडाख्ये पुनः पुनः ॥ १-९५ ॥

जीवश्च लीयते भोगावसाने च स्वकर्मणः ॥ १-९६ ॥

द्वितीयः पटलः

देहेऽस्मिन्वर्तते मेरुः सप्तद्वीपसमन्वितः ।
सरितः सागराः शैलाः क्षेत्राणि क्षेत्रपालकाः ॥ २-१ ॥

ऋषयो मुनयः सर्वे नक्षत्राणि ग्रहास्तथा ।
पुण्यतीर्थानि पीठानि वर्तन्ते पीठदेवताः ॥ २-२ ॥

सृष्टिसंहारकर्तारौ भ्रमन्तौ शशिभास्करौ ।

नभो वायुश्च वह्निश्च जलं पृथ्वी तथैव च ॥ २-३ ॥

त्रैलोक्ये यानि भूतानि तानि सर्वाणि देहतः।
मेरुं संवेष्ट्य सर्वत्र व्यवहारः प्रवर्तते ॥ २-४ ॥

जानाति यः सर्वमिदं स योगी नात्र संशयः ॥ २-५ ॥

ब्रह्माण्डसंज्ञके देहे यथादेशं व्यवस्थितः।
मेरुशृंगे सुधारश्मिर्बहिरष्टकलायुतः ॥ २-६ ॥

वर्ततेऽहर्निशं सोऽपि सुधां वर्षत्यधोमुखः।
ततोऽमृतं द्विधाभूतं याति सूक्ष्मं यथा च वै ॥ २-७ ॥

इडामार्गेण पुष्ट्यर्थं याति मन्दाकिनीजलम्।
पुष्णाति सकलं देहमिडामार्गेण निश्चितम् ॥ २-८ ॥

एष पीयूषरश्मिर्हि वामपार्श्वे व्यवस्थितः ॥
अपरः शुद्धदुग्धाभो हठात्कर्षति मण्डलात्।
मध्यमार्गेण सृष्ट्यर्थं मेरौ संयाति चन्द्रमाः ॥ २-९ ॥

मेरुमूले स्थितः सूर्यः कलाद्वादशसंयुतः।
दक्षिणे पथि रश्मिभिर्वहत्यूर्ध्वं प्रजापतिः॥ २-१० ॥

पीयूषरश्मिनिर्यासं धातूंश्च ग्रसति ध्रुवम्।
समीरमण्डले सूर्यो भ्रमते सर्वविग्रहे॥ २-११ ॥

एषा सूर्यपरामूर्तिः निर्वाणं दक्षिणे पथि।
वहते लग्नयोगेन सृष्टिसंहारकारकः॥ २-१२ ॥

सार्धलक्षत्रयं नाड्यः सन्ति देहान्तरे नृणाम्।
प्रधानभूता नाड्यस्तु तासु मुख्याश्चतुर्दशः॥ २-१३ ॥

सुषुम्णेडा पिंगला च गांधारी हस्तिजिह्विका।
कुहूः सरस्वती पूषा शंखिनी च पयस्वनी॥ २-१४ ॥

वारुण्यलम्बुसा चैव विश्वोदरी यशस्विनी।
एतासु तिस्रो मुख्याः स्युः पिङ्गलेडा सुषुम्णिका॥ २-१५ ॥

तिस्रष्वेका सुषुम्णैव मुख्या सायोगिवल्लभा।
अन्यास्तदाश्रयं कृत्वा नाड्यः सन्ति हि देहिनाम्॥ २-१६ ॥

नाड्यस्तु ता अधोवक्त्राः पद्मतन्तुनिभाः स्थिताः।
पृष्ठवंशं समाश्रित्य सोमसूर्याग्निरूपिणी॥ २-१७॥

तासां मध्ये गता नाडी चित्रा सा मम वल्लभा।
ब्रह्मरन्ध्रञ्च तत्रैव सूक्ष्मात्सूक्ष्मतरं शुभम्॥ २-१८॥

पञ्चवर्णोज्ज्वला शुद्धा सुषुम्णा मध्यचारिणी।
देहस्योपाधिरूपा सा सुषुम्णा मध्यरूपिणी॥ २-१९॥

दिव्यमार्गमिदं प्रोक्तममृतानन्दकारकम्।
ध्यानमात्रेण योगींद्रो दुरितौघं विनाशयेत्॥ २-२०॥

गुदात्तुद्व्यंगुलादूर्ध्वं मेढ्रात्तु द्व्यंगुलादधः।
चतुरंगगुलविस्तारमाधारं वर्तते समम्॥ २-२१॥

तस्मिन्नाधारपद्मे च कर्णिकायां सुशोभना।
त्रिकोणा वर्तते योनिः सर्वतंत्रेषु गोपिता॥ २-२२॥

तत्र विद्युल्लताकारा कुण्डली परदेवता।

सार्द्धत्रिकरा कुटिला सुषुम्णा मार्गसंस्थिता ॥ २-२३ ॥

जगत्संसृष्टिरूपा सा निर्माणे सततोद्यता।
वाचामवाच्या वाग्देवी सदा देवैर्नमस्कृता ॥ २-२४ ॥

इडानाम्नी तु या नाडी वाममार्गे व्यवस्थिता।
सुषुम्णायां समाश्लिष्य दक्षनासापुटे गता ॥ २-२५ ॥

पिङ्गला नाम या नाडी दक्षमार्गे व्यवस्थिता।
मध्यनाडीं समाश्लिष्य वामनासापुटे गता ॥ २-२६ ॥

इडापिंगलयोर्मध्ये सुषुम्णा या भवेत्खलु।
षट्स्थानेषु च षट्शक्तिं षट्पद्मं योगिनो विदुः ॥ २-२७ ॥

पंचस्थानं सुषुम्णाया नामानि स्युर्बहूनि च।
प्रयोजनवशात्तानि ज्ञातव्यानीह शास्त्रतः ॥ २-२८ ॥

अन्या याऽस्त्यपरा नाडी मूलाधारात्समुत्थिता।
रसनामेढ्रनयनं पादांगुष्ठे च श्रोत्रकम् ॥
कुक्षिकक्षांगुष्ठकर्णं सर्वांगं पायुकुक्षिकम्।

लब्ध्वा तां वै निवर्तन्ते यथा देशसमुद्भवाः ॥ २-२९ ॥

एताभ्य एव नाडीभ्यः शखोपशाखतः क्रमात् ।
सार्धलक्षत्रयं जातं यथाभागं व्यवस्थितम् ॥ २-३० ॥

एता भोगवहा नाड्यो वायुसञ्चारदक्षकाः ।
ओतप्रोत्राः सुसंव्याप्य तिष्ठन्त्यस्मिन्कलेवरे ॥ २-३१ ॥

सूर्यमण्डलमध्यस्थः कलाद्वादशसंयुतः ।
वस्तिदेशे ज्वलद्वह्निर्वर्तते चान्नपाचकः ॥
एष वैश्वानरोग्निर्वै मम तेजोंशसम्भवः ।
करोति विविधं पाकं प्राणिनां देहमास्थितः ॥ २-३२ ॥

आयुः प्रदायको वह्निर्बलं पुष्टिं ददाति सः ।
शरीरपाटवञ्चापि ध्वस्तरोगसमुद्भवः ॥ २-३३ ॥

तस्माद्वैश्वानराग्निञ्च प्रज्वाल्य विधिवत्सुधीः ।
तस्मिन्नन्नं हुनेद्योगी प्रत्यहं गुरुशिक्षया ॥ २-३४ ॥

ब्रह्माण्डसंज्ञके देहे स्थानानि स्युर्बहूनि च ।

मयोक्तानि प्रधानानि ज्ञातव्यानीह शास्त्रके ॥ २-३५ ॥

नानाप्रकारनामानि स्थानानि विविधानि च ।
वर्तन्ते विग्रहे तानि कथितुं नैव शक्यते ॥ २-३६ ॥

इत्थं प्रकल्पिते देहे जीवो वसति सर्वगः ।
अनादिवासनामालाऽलंकृतः कर्मशंखलः ॥ २-३७ ॥

नानाविधगुणोपेतः सर्वव्यापारकारकः ।
पूर्वार्जितानि कर्माणि भुनक्ति विविधानि च ॥ २-३८ ॥

यद्यत्संदृश्यते लोके सर्वं तत्कर्मसम्भवम् ।
सर्वा कर्मानुसारेण जन्तुर्भोगान्भुनक्ति वै ॥ २-३९ ॥

ये ये कामादयो दोषाः सुखदुःखप्रदायकाः ।
ते ते सर्वे प्रवर्तन्ते जीवकर्मानुसारतः ॥ २-४० ॥

पुण्योपरक्तचैतन्ये प्राणान्प्रीणाति केवलम् ।
बाह्ये पुण्यमयं प्राप्य भोज्यवस्तु स्वयम्भवेत् ॥ २-४१ ॥

ततः कर्मबलात्पुंसः सुखं वा दुःखमेव च।

पापोपरक्तचैतन्यं नैव तिष्ठति निश्चितम्॥

न तद्भिन्नो भवेत्सोऽपि तद्भिन्नो न तु किञ्चन।

मायोपहितचैतन्यात्सर्वं वस्तु प्रजायते॥ २-४२॥

यथाकालेपि भोगाय जन्तूनां विविधोद्भवः।

यथा दोषवशाच्छुक्तौ रजतारोपणं भवेत्॥

तथा स्वकर्मदोषाद्वै ब्रह्मण्यारोप्यते जगत्॥ २-४३॥

सवासनाभ्रमोत्पन्नोन्मूलनातिसमर्थनम्।

उत्पन्नश्चेदीदृशं स्याज्ज्ञानं मोक्षप्रसाधनम्॥ २-४४॥

साक्षाद्वैशेषदृष्टिस्तु साक्षात्कारिणि विभ्रमे।

कारणं नान्यथा युक्त्या सत्यं सत्यं मयोदितम्॥ २-४५॥

साक्षात्कारिभ्रमे साक्षात्साक्षात्कारिणि नाशयेत्।

सो हि नास्तीति संसारे भ्रमो नैव निवर्तते॥ २-४६॥

मिथ्याज्ञाननिवृत्तिस्तु विशेषदर्शनाद्भवेत्।

अन्यथा न निवृत्तिः स्याद्दृश्यते रजतभ्रमः॥ २-४७॥

यावन्नोत्पद्यते ज्ञानं साक्षात्कारे निरञ्जने ।
तावत्सर्वाणि भूतानि दृश्यन्ते विविधानि च ॥ २-४८ ॥

यदा कर्मार्जितं देहं निर्वाणे साधनं भवेत् ।
तदा शरीरवहनं सफलं स्यान्न चान्यथा ॥ २-४९ ॥

यादृशी वासना मूला वर्तते जीवसंगिनी ।
तादृशं वहते जन्तुः कृत्याकृत्यविधौ भ्रमम् ॥ २-५० ॥

संसारसागरं तर्तुं यदीच्छेद्योगसाधकः ।
कृत्वा वर्णाश्रमं कर्म फलवर्जं तदाचरेत् ॥ २-५१ ॥

विषयासक्तपुरुषा विषयेषु सुखेप्सवः ।
वाचाभिरुद्धनिर्वाणा वर्तन्ते पापकर्मणि ॥ २-५२ ॥

आत्मानमात्मना पश्यन्न किञ्चिदिह पश्यति ।
तदा कर्मपरित्यागे न दोषोऽस्ति मतं मम ॥ २-५३ ॥

कामादयो विलीयन्ते ज्ञानादेव न चान्यथा ।

अभावे सर्वतत्त्वानां स्वयं तत्त्वं प्रकाशते ॥ २-५४ ॥

तृतीयः पटलः

हृद्यस्ति पङ्कजं दिव्यं दिव्यलिङ्गेन भूषितम् ।
कादिठान्ताक्षरोपेतं द्वादशार्णविभूषितम् ॥ ३-१ ॥

प्राणो वसति तत्रैव वासनाभिरलंकृतः ।
अनादिकर्मसंश्लिष्टः प्राप्याहङ्कारसंयुतः ॥ ३-२ ॥

प्राणस्य वृत्तिभेदेन नामानि विविधानि च ।
वर्तन्ते तानि सर्वाणि कथितुं नैव शक्यते ॥ ३-३ ॥

प्राणोऽपानः समानश्चादानो व्यानश्च पञ्चमः ।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ॥ ३-४ ॥

दश नामानि मुख्यानि मयोक्तानीह शास्त्रके ।
कुर्वन्ति तेऽत्र कार्याणि प्रेरितानि स्वकर्मभिः ॥ ३-५ ॥

अत्रापि वायवः पञ्च मुख्याः स्युर्दशतः पुनः ।

तत्रापि श्रेष्ठकर्तारौ प्राणापानौ मयोदितौ ॥ ३-६ ॥

हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥ ३-७ ॥

नागादिवायवः पञ्च ते कुर्वन्ति च विग्रहे ।
उद्गारोन्मीलनं क्षुत्तृड्जृम्भा हिक्का च पञ्चमः ॥ ३-८ ॥

अनेन विधिना यो वै ब्रह्माण्डं वेत्ति विग्रहम् ।
सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ ३-९ ॥

अधुना कथयिष्यामि क्षिप्रं योगस्य सिद्धये ।
अज्ज्ञात्वा नावसीदन्ति योगिनो योगसाधने ॥ ३-१० ॥

भवेद्वीर्यवती विद्या गुरुवक्त्रसमुद्भवा ।
अन्यथा फलहीना स्यान्निर्वीर्याप्यतिदुःखदा ॥ ३-११ ॥

गुरुं सन्तोष्य यत्नेन ये वै विद्यामुपासते ।
अवलम्बेन विद्यायास्तस्याः फलमवाप्नुयात् ॥ ३-१२ ॥

गुरुः पिता गुरुर्माता गुरुर्देवो न संशयः।
कर्मणा मनसा वाचा तस्मात्सर्वैः प्रसेव्यते॥ ३-१३॥

गुरुप्रसादतः सर्वं लभ्यते शुभमात्मनः।
तस्मात्सेव्यो गुरुर्नित्यमन्यथा न शुभं भवेत्॥ ३-१४॥

प्रदक्षिणत्रयं कृत्वा स्पृष्ट्वा सव्येन पाणिना।
अष्टांगेन नमस्कुर्याद् गुरुपादसरोरुहम्॥ ३-१५॥

श्रद्धयात्मवतां पुंसां सिद्धिर्भवति निश्चिता।
अन्येषाञ्च न सिद्धिः स्यात्तस्माद्यत्नेन साधयेत्॥ ३-१६॥

न भवेत्संगयुक्तानां तथाऽविश्वासिनामपि।
गुरुपूजाविहीनानां तथा च बहुसंगिनाम्॥ ३-१७॥

मिथ्यावादरतानां च तथा निष्ठुरभाषिणाम्।
गुरुसन्तोषहीनानां न सिद्धिः स्यात्कदाचन॥ ३-१७॥

फलिष्यतीति विश्वासः सिद्धेः प्रथमलक्षणम्।
द्वितीयं श्रद्धया युक्तं तृतीयं गुरुपूजनम्॥

चतुर्थं समताभावं पञ्चमेन्द्रियनिग्रहम् ।
षष्ठं च प्रमिताहारं सप्तमं नैव विद्यते ॥ ३-१८ ॥

योगोपदेशं संप्राप्य लब्ध्वा योगविदं गुरुम् ।
गुरूपदिष्टविधिना धिया निश्चित्य साधयेत् ॥ ३-१९ ॥

सुशोभने मठे योगी पद्मासनसमन्वितः ।
आसनोपरि संविश्य पवनाभ्यासमाचरेत् ॥ ३-२० ॥

समकायः प्राञ्जलिश्च प्रणम्य च गुरून् सुधीः ।
दक्षे वामे च विघ्नेशं क्षत्रपालांबिकां पुनः ॥ ३-२१ ॥

ततश्च दक्षांगुष्ठेन निरुद्ध्य पिंगलां सुधीः ।
इडया पूरयेद्वायुं यथाशक्त्या तु कुम्भयेत् ॥
ततस्त्यक्त्वा पिंगलयाशनैरेव न वेगतः ॥ ३-२२ ॥

पुनः पिंगलयापूर्य यथाशक्त्या तु कुम्भयेत् ।
इडया रेचयेद्वायुं न वेगेन शनैः शनैः ॥ ३-२३ ॥

इदं योगविधानेन कुर्याद्विंशतिकुम्भकान् ।

सर्वद्वन्द्वविनिर्मुक्तः प्रत्यहं विगतालसः ॥ ३-२४ ॥

प्रातःकाले च मध्याह्ने सूर्यास्ते चार्द्धरात्रके ।
कुर्यादेवं चतुर्वारं कालेष्वेतेषु कुम्भकान् ॥ ३-२५ ॥

इत्थं मासत्रयं कुर्यादनालस्यो दिने दिने ।
ततो नाडीविशुद्धिः स्यादविलम्बेन निश्चितम् ॥ ३-२६ ॥

यदा तु नाडीशुद्धिः स्याद्योगिनस्तत्त्वदर्शिनः ।
तदा विध्वस्तदोषश्च भवेदारम्भसम्भवः ॥ ३-२७ ॥

चिह्नानि योगिनो देहे दृश्यन्ते नाडिशुद्धितः ।
कथ्यन्ते तु समस्तान्यङ्गानि संक्षेपतो मया ॥ ३-२८ ॥

समकायः सुगन्धिश्च सुकान्तिः स्वरसाधकः ।
आरम्भघटकश्चैव यथा परिचयस्तदा ॥
निष्पत्तिः सर्वयोगेषु योगावस्था भवन्ति ताः ॥ ३-२९ ॥

आरम्भः कथितोऽस्माभिरधुना वायुसिद्धये ।
अपरः कथ्यते पश्चात् सर्वदुःखौघनाशनः ॥ ३-३० ॥

प्रौढवह्निः सुभोगी च सुखीसर्वाङ्गसुन्दरः।
संपूर्णहृदयो योगी सर्वोत्साहबलान्वितः॥
जायते योगिनोऽवश्यमेतत्सर्वं कलेवरे॥ ३-३१॥

अथ वर्ज्यं प्रवक्ष्यामि योगविघ्नकरं परम्।
येन संसारदुःखाब्धिं तीर्त्वा यास्यन्ति योगिन॥ ३-३२॥

आम्लं रूक्षं तथा तीक्ष्णं लवणं सार्षपं कटुम्।
बहुलं भ्रमणं प्रातः स्नानं तैलविदाहकम्॥

स्तेयं हिंसां जनद्वेषञ्चाहङ्कारमनार्जवम्।
उपवासमसत्यञ्च मोक्षञ्च प्राणिपीडनम्॥
स्त्रीसङ्गमग्निसेवां च बह्वालापं प्रियाप्रियम्।
अतीव भोजनं योगी त्यजेदेतानि निश्चितम्॥ ३-३३॥

उपायं च प्रवक्ष्यामि क्षिप्रं योगस्य सिद्धये।
गोपनीयं साधकानां येन सिद्धिर्भवेत्खलु॥ ३-३४॥

घृतं क्षीरं च मिष्टान्नं ताम्बूलं चूर्णवर्जितम्।

कर्पूरं निष्तुषं मिष्टं सुमठं सूक्ष्मरन्ध्रकम् ॥
सिद्धान्तश्रवणं नित्यं वैराग्यगृहसेवनम् ।
नामसङ्कीर्तनं विष्णोः सुनादश्रवणं परम् ॥
धृतिः क्षमा तपः शौचं ह्रीर्मतिर्गुरुसेवनम् ।
सदैतानि परं योगी नियमानि समाचरेत् ॥ ३-३५ ॥

अनिलेऽर्कप्रवेशे च भोक्तव्यं योगिभिः सदा ।
वायौ प्रविष्टे शशिनि शयनं साधकोत्तमैः ॥ ३-३६ ॥

सद्यो भुक्तेऽपि क्षुधिते नाभ्यासः क्रियत बुधैः ।
अभ्यासकाले प्रथमं कुर्यात्क्षीराज्यभोजनम् ॥ ३-३७ ॥

ततोऽभ्यासे स्थिरीभूते न तादृङ्नियमग्रहः ।
अभ्यासिना विभोक्तव्यं स्तोकं स्तोकमनेकधा ॥
पूर्वोक्तकाले कुर्यात्तु कुम्भकान्प्रतिवासरे ॥ ३-३८ ॥

ततो यथेष्टा शक्तिः स्याद्योगिनो वायुधारणे ।
यथेष्टं धारणाद्वायोः कुम्भकः सिध्यति ध्रुवम् ॥
केवले कुम्भके सिद्धे किं न स्यादिह योगिनः ॥ ३-३९ ॥

स्वेदः संजायते देहे योगिनः प्रथमोद्यमे।
यदा संजायते स्वेदो मर्दनं कारयेत्सुधीः॥
अन्यथा विग्रहे धातुर्नष्टो भवति योगिनः॥ ३-४० ॥

द्वितीये हि भवेत्कम्पो दार्दुरी मध्यमे मता।
ततोऽधिकतराभ्यासाद्गगनेचरसाधकः॥ ३-४१ ॥

योगी पद्मासनस्थोऽपि भुवमुत्सृज्य वर्तते।
वायुसिद्धिस्तदा ज्ञेया संसारध्वान्तनाशिनी॥ ३-४२ ॥

तावत्कालं प्रकुर्वीत योगोक्तनियमग्रहम्।
अल्पनिद्रा पुरीषं च स्तोकं मूत्रं च जायते॥ ३-४३ ॥

अरोगित्वमदीनत्वं योगिनस्तत्त्वदर्शिनः।
स्वेदो लाला कृमिश्चैव सर्वथैव न जायते॥ ३-४४ ॥

कफपित्तानिलाश्चैव साधकस्य कलेवरे।
तस्मिन्काले साधकस्य भोज्येष्वनियमग्रहः॥ ३-४५ ॥

अत्यल्पं बहुधा भुक्त्वा योगी न व्यथते हि सः।

अथाभ्यासवशाद्योगी भूचरीं सिद्धिमाप्नुयात्॥
यथा दर्दुरजन्तूनां गतिः स्यात्पाणिताडनात्॥ ३-४६॥

सन्त्यत्र बहवो विघ्ना दारुणा दुर्निवारणाः।
तथापि साधयेद्योगी प्राणैः कंथगतैरपि॥ ३-४७॥

ततो रहस्युपाविष्टः साधकः संयतेन्द्रियः।
प्रणवं प्रजपेद्दीर्घं विघ्नानां नाशहेतवे॥ ३-४८॥

पूर्वार्जितानि कर्माणि प्राणायामेन निश्चितम्।
नाशयेत्साधको धीमानिहलोकोद्भवानि च॥ ३-४९॥

पूर्वाजितानि पापानि पुण्यानि विविधानि च।
नाशयेत्षोडशप्राणायामेन योगि पुंगवः॥ ३-५०॥

पापतूलचयानाहोप्रदहेत्प्रलयाग्निना।
ततः पापविनिर्मुक्तः पश्चात्पुण्यानि नाशयेत्॥ ३-५१॥

प्राणायामेन योगीन्द्रो लब्ध्वैश्वर्याष्टकानि वै।
पापपुण्योदधिं तीर्त्वा त्रैलोक्यचरतामियात्॥ ३-५२॥

ततोऽभ्यासक्रमेणैव घटिकात्रितयं भवेत्।
येन स्यात्सकलासिद्धिर्योगिनः स्वेप्सिता ध्रुवम्॥ ३-५३॥

वाक्सिधिः कामचारित्वं दूरदृष्टिस्तथैव च।
दूरश्रुतिः सूक्ष्मदृष्टिः परकायप्रवेशनम्॥
विण्मूत्रलेपने स्वर्णमदृश्यकरणं तथा।
भवन्त्येतानि सर्वाणि खेचरत्वं च योगिनाम्॥ ३-५४॥

यदा भवेद्धटावस्था पवनाभ्यासने परा।
तदा संसारचक्रेऽस्मिन्नास्ति यन्न सधारयेत्॥ ३-५५॥

प्राणापाननादबिंदुजीवात्मपरमात्मनः।
मिलित्वा घटते यस्मात्तस्माद्वै घट उच्यते॥ ३-५६॥

याममात्रं यदा धर्तुं समर्थः स्यात्तदाद्भुतः।
प्रत्याहारस्तदैव स्यान्नांतरा भवति ध्रुवम्॥ ३-५७॥

यं यं जानाति योगीन्द्रस्तं तमात्मेति भावयेत्।
यैरिन्द्रियैर्यद्विधानस्तदिन्द्रियजयो भवेत्॥ ३-५८॥

याममात्रं यदा पूर्णं भवेदभ्यासयोगतः।
एकवारं प्रकुर्वीत तदा योगी च कुम्भकम्॥
दण्डाष्टकं यदा वायुर्निश्चलो योगिनो भवेत्।
स्वसामर्थ्यात्तदांगुष्ठे तिष्ठेद्वातुलवत्सुधीः॥ ३-५९॥

ततः परिचयावस्था योगिनोऽभ्यासतो भवेत्।
यदा वायुश्चंद्रसूर्यं त्यक्त्वा तिष्ठति निश्चलम्॥
वायुः परिचितो वायुः सुषुम्ना व्योम्नि संचरेत्॥ ३-६०॥

क्रियाशक्तिं गृहीत्वैव चक्रान्भित्त्वा सुनिश्चितम्।
यदा परिचयावस्था भवेदभ्यासयोगतः॥
त्रिकूटं कर्मणां योगी तदा पश्यति निश्चितम्॥ ३-६१॥

ततश्च कर्मकूटानि प्रणवेन विनाशयेत्।
स योगी कर्मभोगाय कायव्यूहं समाचरेत्॥ ३-६२॥

अस्मिन्काले महायोगी पंचधा धारणं चरेत्।
येन भूरादिसिद्धिः स्यात्ततो भूतभयापहा॥ ३-६३॥

आधारे घटिकाः पंच लिंगस्थाने तथैव च।
तदूर्ध्वं घटिकाः पञ्च नाभिहृन्मध्यके तथा॥
भ्रूमध्योर्ध्वं तथा पंच घटिका धारयेत्सुधीः।
तथा भूरादिना नष्टो योगीन्द्रो न भवेत्खलु॥ ३-६४॥

मेधावी सर्वभूतानां धारणां यः समभ्यसेत्।
शतब्रह्ममृतेनापि मृत्युस्तस्य न विद्यते॥ ३-६५॥

ततोऽभ्यासक्रमेणैव निष्पत्तिर्योगिनो भवेत्।
अनादिकर्मबीजानि येन तीर्त्वाऽमृतं पिबेत्॥ ३-६६॥

यदा निष्पत्तिर्भवति समाधेः स्वेनकर्मणा।
जीवन्मुक्तस्य शांतस्य भवेद्धीरस्य योगिनः॥
यदा निष्पत्तिसंपन्नः समाधिः स्वेच्छया भवेत्।
गृहीत्वा चेतनां वायुः क्रियाशक्तिं च वेगवान्॥
सर्वांश्चक्रान्विजित्वा च ज्ञानशक्तौ विलीयते॥ ३-६७॥

इदानीं क्लेशहान्यर्थं वक्तव्यं वायुसाधनम्।
येन संसारचक्रेस्मिन् भोगहानिर्भवेद्ध्रुवम्॥ ३-६८॥

रसनां तालुमूले यः स्थापयित्वा विचक्षणः।
पिबेत्प्राणानिलं तस्य योगानां संक्षयो भवेत्॥ ३-६९॥

काकचंच्वा पिबेद्वायुं शीतलं यो विचक्षणः।
प्राणापानविधानज्ञः स भवेन्मुक्तिभाजनः॥ ३-७०॥

सरसं यः पिबेद्वायुं प्रत्यहं विधिना सुधीः।
नश्यंति योगिनस्तस्य श्रमदाहजरामयाः॥ ३-७१॥

रसनामूर्ध्वगां कृत्वा यश्चन्द्रे सलिलं पिबेत्।
मासमात्रेण योगीन्द्रो मृत्युंजयति निश्चितम्॥ ३-७२॥

राजदंतबिलं गाढं संपीड्य विधिना पिबेत्।
ध्यात्वा कुण्डलिनीं देवीं षण्मासेन कविर्भवेत्॥ ३-७३॥

काकचंच्वा पिबेद्वायुं सन्ध्ययोरुभयोरपि।
कुण्डलिन्या मुखे ध्यात्वा क्षयरोगस्य शान्तये॥ ३-७४॥

अहर्निशं पिबेद्योगी काकचंच्वा विचक्षणः।
पिबेत्प्राणानिलं तस्य रोगाणां संक्षयो भवेत्॥

दूरश्रुतिर्दूरदृष्टिस्तथा स्याद्दर्शनं खलु ॥ ३-७५ ॥

दन्तैर्दन्तान्समापीड्य पिबेद्वायुं शनैः शनैः ।

ऊर्ध्वजिह्वः सुमेधावी मृत्युं जयति सोचिरात् ॥ ३-७६ ॥

षण्मासमात्रमभ्यासं यः करोति दिने दिने ।

सर्वपापविनिर्मुक्तो रोगान्नाशयते हि सः ॥ ३-७७ ॥

संवत्सरकृताऽभ्यासाद्भैरवो भवति ध्रुवम् ।

अणिमादिगुणाँल्लब्ध्वा जितभूतगणः स्वयम् ॥ ३-७८ ॥

रसनामूर्ध्वगां कृत्वा क्षणार्धं यदि तिष्ठति ।

क्षणेन मुच्यते योगी व्याधिमृत्युजरादिभिः ॥ ३-७९ ॥

रसनां प्राणसंयुक्तां पीड्यमानां विचिंतयेत् ।

न तस्य जायते मृत्युः सत्यं सत्यं मयोदितम् ॥ ३-८० ॥

एवमभ्यासयोगेन कामदेवो द्वितीयकः ।

न क्षुधा न तृषा निद्रा नैव मूर्च्छा प्रजायते ॥ ३-८१ ॥

अनेनैव विधानेन योगीन्द्रोऽवनिमण्डले।
भवेत्स्वच्छन्दचारी च सर्वापत्परिवर्जितः॥ ३-८२॥

न तस्य पुनरावृत्तिर्मोदते ससुरैरपि।
पुण्यपापैर्न लिप्येत एतदाक्षरणेन सः॥ ३-८३॥

चतुरशीत्यासनानि सन्ति नानाविधानि च।
तेभ्यश्चतुष्कमादाय मयोक्तानि ब्रवीम्यहम्॥
सिद्धासनं ततः पद्मासनञ्चोग्रं च स्वस्तिकम्॥ ३-८४॥

योनिं संपीड्य यत्नेन पादमूलेन साधकः।
मेढोपरि पादमूलं विन्यसेद्योगवित्सदा॥
ऊर्ध्वं निरीक्ष्य भ्रूमध्यं निश्चलः संयतेन्द्रियः।
विशेषोऽवक्रकायश्च रहस्युद्वेगवर्जितः॥
एतत् सिद्धासनं ज्ञेयं सिद्धानां सिद्धिदायकम्॥ ३-८५॥

येनाभ्यासवशाच्छीघ्रं योगनिष्पत्तिमाप्नुयात्।
सिद्धासनं सदा सेव्यं पवनाभ्यासिना परम्॥ ३-८६॥

येन संसारमुत्सृज्य लभते परमां गतिम्।

नातः परतरं गुह्यमासनं विद्यते भुवि ॥
येनानुध्यानमात्रेण योगी पापाद्विमुच्यते ॥ ३-८७ ॥

उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः ।
ऊरुमध्ये तथोत्तानौ पाणी कृत्वा तु तादृशौ ॥
नासाग्रे विन्यसेद्दृष्टिं दन्तमूलञ्च जिह्वया ।
उत्तोल्य चिबुकं वक्ष उत्थाप्य पवनं शनैः ॥
यथाशक्त्या समाकृष्य पूरयेदुदरं शनैः ।
यथा शक्त्यैव पश्चात्तु रेचयेदविरोधतः ॥
इदं पद्मासनं प्रोक्तं सर्वव्याधिविनाशनम् ॥ ३-८८ ॥

दुर्लभं येन केनापि धीमता लभ्यते परम् ॥ ३-८९ ॥

अनुष्ठाने कृते प्राणः समश्चलति तत्क्षणात् ।
भवेदभ्यासने सम्यक्साधकस्य न संशयः ॥ ३-९० ॥

पद्मासने स्थितो योगी प्राणापानविधानतः ।
पूरयेत्स विमुक्तः स्यात्सत्यं सत्यं वदाम्यहम् ॥ ३-९१ ॥

प्रसार्य चरणद्वन्द्वं परस्परमसंयुतम् ।

स्वपाणिभ्यां दृढं धृत्वा जानूपरि शिरो न्यसेत् ॥

आसनोग्रमिदं प्रोक्तं भवेदनिलदीपनम् ।

देहावसानहरणं पश्चिमोत्तानसंज्ञकम् ॥

य एतदासनं श्रेष्ठं प्रत्यहं साधयेत्सुधीः ।

वायुः पश्चिममार्गेण तस्य सञ्चरति ध्रुवम् ॥ ३-९२ ॥

एतदभ्यासशीलानां सर्वसिद्धिः प्रजायते ।

तस्माद्योगी प्रयत्नेन साधयेत्सिद्धमात्मनः ॥ ३-९३ ॥

गोपनीयं प्रयत्नेन न देयं यस्य कस्यचित् ।

येन शीघ्रं मरुत्सिद्धिर्भवेद् दुःखौघनाशिनी ॥ ३-९४ ॥

जानूर्वोरन्तरे सम्यग्धृत्वा पादतले उभे ।

समकायः सुखासीनः स्वस्तिकं तत्प्रचक्षते ॥ ३-९५ ॥

अनेन विधिना योगी मारुतं साधयेत्सुधीः ।

देहे न क्रमते व्याधिस्तस्य वायुश्च सिद्ध्यति ॥ ३-९६ ॥

सुखासनमिदं प्रोक्तं सर्वदुःखप्रणाशनम् ।

स्वस्तिकं योगिभिर्गोप्यं स्वस्तीकरणमुत्तमम् ॥ ३-९७ ॥

चतुर्थः पटलः

आदौ पूरक योगेन स्वाधारे पूरयेन्मनः।
गुदमेढ्रन्तरे योनिस्तामाकुंच्य प्रवर्तते॥ ४-१॥

ब्रह्मयोनिगतं ध्यात्वा कामं कन्दुकसन्निभम्।
सूर्यकोटि प्रतीकाशं चन्द्रकोटिसुशीतलम्॥
तस्योर्ध्वं तु शिखासूक्ष्मा चिद्रूपा परमाकला।
तया सहितमात्मानमेकीभूतं विचिन्तयेत्॥ ४-२॥

गच्छति ब्रह्ममार्गेण लिंगत्रयक्रमेण वै।
अमृतं तद्धि स्वर्गस्थं परमानन्दलक्षणम्॥
श्वेतरक्तं तेजसाढयं सुधाधाराप्रवर्षिणम्।
पीत्वा कुलामृतं दिव्यं पुनरेव विशेत्कुलम्॥ ४-३॥

पुनरेव कुलं गच्छेन्मात्रायोगेन नान्यथा।
सा च प्राणसमाख्याता ह्यस्मिंस्तन्त्रे मयोदिता॥ ४-४॥

पुनः प्रलीयते तस्यां कालाग्न्यादिशिवात्मकम्।

योनिमुद्रा परा ह्येषा बन्धस्तस्याः प्रकीर्तितः।
तस्यास्तु बन्धामत्रेण तन्नास्ति यन्न साधयेत्॥ ४-५॥

छिन्नरूपास्तु ये मन्त्राः कीलिताः स्तंभिताश्च ये।
दग्धामन्त्राः शिखाहीना मलिनास्तु तिरस्कृताः॥
मन्दा बालास्तथा वृद्धाः प्रौढा यौवनगर्विताः।
अरिपक्षे स्थिता ये च निर्वीर्याः सत्त्ववर्जिताः।
तथा सत्त्वेन हीनाश्च खण्डिताः शतधाकृताः॥
विधानेन च संयुक्ताः प्रभवन्त्यचिरेण तु।
सिद्धिमोक्षप्रदाः सर्वे गुरुणा विनियोजिताः॥
दीक्षयित्वा विधानेन अभिषिच्य सहस्रधा।
ततो मंत्राधिकारार्थमेषा मुद्रा प्रकीर्तिता॥ ४-६॥

ब्रह्महत्यासहस्राणि त्रैलोक्यमपि घातयेत्।
नासौ लिप्यति पापेन योनिमुद्रानिबन्धनात्॥ ४-७॥

गुरुहा च सुरापी च स्तेयी च गुरुतल्पगः।
एतैः पापैर्न बध्येत योनिमुद्रानिबन्धनात्॥ ४-८॥

तस्मादभ्यासनं नित्यं कर्तव्यं मोक्षकांक्षिभिः।

अभ्यासाज्जाय ते सिद्धिरभ्यासान्मोक्षमाप्नुयात्॥ ४-९॥

संविदं लभतेऽभ्यासाद्योगोभ्यासात्प्रवर्तते।
मुद्राणां सिद्धिरभ्यासादभ्यासाद्वायुसाधनम्॥
कालवञ्चनमभ्यासात्तथा मृत्युञ्जयो भवेत्॥ ४-१०॥

वाक्सिद्धिः कामचारित्वं भवेद्भ्यासयोगतः॥
योनिमुद्रा परं गोप्या न देया यस्य कस्यचित्।
सर्वथा नैव दातव्या प्राणैः कण्ठगतैरपि॥ ४-११॥

अधुना कथयिष्यामि योगसिद्धिकरं परम्।
गोपनीयं सुसिद्धानां योगं परमदुर्लभम्॥ ४-१२॥

सुप्ता गुरुप्रसादेन यदा जागर्ति कुण्डली।
तदा सर्वाणि पद्मानि भिद्यन्ते ग्रन्थयोपि च॥ ४-१३॥

तस्मात्सर्वप्रयत्नेन प्रबोधयितुमीश्वरीम्।
ब्रह्मरन्ध्रमुखे सुप्तां मुद्राभ्यासं समाचरेत्॥ ४-१४॥

महामुद्रा महाबन्धो महावेधश्च खेचरी।

जालंधरो मूलबंधो विपरीतकृतिस्तथा ॥
उड्डानं चैव वज्रोणी दशमे शक्तिचालनम् ।
इदं हि मुद्रादशकं मुद्राणामुत्तमोत्तमम् ॥ ४-१५ ॥

अथ महामुद्राकथनम् ।

महामुद्रां प्रवक्ष्यामि तन्त्रेऽस्मिन्मम वल्लभे ।
यां प्राप्य सिद्धाः सिद्धिं च कपिलाद्याः पुरागताः ॥ ४-१६ ॥

अपसव्येन संपीड्य पादमूलेन सादरम् ।
गुरूपदेशतो योनिं गुदमेड्रान्तरालगाम् ॥
सव्यं प्रसारितं पादं धृत्वा पाणियुगेन वै ।
नवद्वाराणि संयम्य चिबुकं हृदयोपरि ॥
चित्तं चित्तपथे दत्त्वा प्रभवेद्वायुसाधनम् ।
महामुद्राभवेदेषा सर्वतन्त्रेषु गोपिता ॥
वामाङ्गेन समभ्यस्य दक्षाङ्गेनाभ्यसेत् पुनः ।
प्राणायामं समं कृत्वा योगी नियतमानसः ॥ ४-१७ ॥

अनेन विधिना योगी मन्दभाग्योपि सिध्यति ।
सर्वासामेव नाडीनां चालनं बिन्दुमारणम् ॥

जीवनन्तु कषायस्य पातकानां विनाशनम्।
सवरोगोपशमनं जठराग्निविवर्धनम्॥

वपुषा कान्तिममलां जरामृत्युविनाशनम्।
वांछितार्थफलं सौख्यमिन्द्रियाणाञ्च मारणम्॥
एतदुक्तानि सर्वाणि योगारूढस्य योगिनः।
भवेदभ्यासतोऽवश्यं नात्र कार्या विचारणा॥ ४-१८॥

गोपनीया प्रयत्नेन मुद्रेयं सुरपूजिते।
यां तु प्राप्य भवाम्भोधेः पारं गच्छन्ति योगिनः॥ ४-१९॥

मुद्रा कामदुघा ह्येषा साधकानां मयोदिता।
गुप्ताचारेण कर्तव्या न देया यस्य कस्यचित्॥ ४-२०॥

अथ महाबन्धकथनम्।

ततः प्रसारितः पादो विन्यस्य तमुरूपरि।
गुदयोनिं समाकुंच्य कृत्वा चापानमूर्ध्वगम्।
योजयित्वा समानेन कृत्वा प्राणमधोमुखम्॥
बन्धयेदूर्ध्वगत्यर्थं प्राणापानेन यः सुधीः।

कथितोऽयं महाबन्धः सिद्धिमार्गप्रदायकः।

नाडीजालाद्रसव्यूहो मूर्धानं याति योगिनः॥

उभाभ्यां साधयेत् पद्भ्यामेकैकं सुप्रयत्नतः॥ ४-२१॥

भवेदभ्यासतो वायुः सुषुम्नां मध्यसङ्गतः।

अनेन वपुषः पुष्टिर्दृढबन्धोऽस्थिपंजरे॥

संपूर्णहृदयो योगी भवन्त्येतानि योगिनः।

बन्धेनानेन योगीन्द्रः साधयेत्सर्वमीप्सितम्॥ ४-२२॥

अथ महावेधकथनम्।

अपानप्राणयोरैक्यं कृत्वा त्रिभुवनेश्वरि।

महावेधस्थितो योगी कुक्षिमापूर्य वायुना।

स्फिचौ संताडयेद्धीमान्वेधोऽयं कीर्तितो मया॥ ४-२३॥

वेधेनानेन संविध्य वायुना योगिपुंगवः।

ग्रंथिं सुषुम्णामार्गेण ब्रह्मग्रंथिं भिनत्त्यसौ॥ ४-२४॥

यः करोति सदाभ्यासं महावेधं सुगोपितम्।

वायुसिद्धिर्भवेत्तस्य जरामरणनाशिनी॥ ४-२५॥

चक्रमधे स्थिता देवाः कम्पन्ति वायुताडनात्।
कुण्डल्यपि महामाया कैलासे सा विलीयते॥ ४-२६ ॥

महामुद्रामहाबन्धौ निष्फलौ वेधवर्जितौ।
तस्माद्योगी प्रयत्नेन करोति त्रितयं क्रमात्॥ ४-२७ ॥

एतत् त्रयं प्रयत्नेन चतुर्वारं करोति यः।
षण्मासाभ्यन्तरं मृत्युं जयत्येव न संशयः॥ ४-२८ ॥

एतत् त्रयस्य माहात्म्यं सिद्धो जानाति नेतरः।
यज्ज्ञात्वा साधकाः सर्वे सिद्धिं सम्यग्लभन्ति वै॥ ४-२९॥

गोपनीया प्रयत्नेन साधकैः सिद्धिमीप्सुभिः।
अन्यथा च न सिद्धिः स्यान्मुद्राणामेष निश्चयः॥ ४-३० ॥

अथ खेचरीमुद्राकथनम्।

भ्रुवोरन्तर्गतां दृष्टिं विधाय सुदृढां सुधीः।
उपविश्यासने वज्रे नानोपद्रववर्जितः॥

लम्बिकोर्ध्वं स्थिते गर्ते रसनां विपरीतगाम्।
संयोजयेत्प्रयत्नेन सुधाकूपे विचक्षणः।
मुद्रैषा खेचरी प्रोक्ता भक्तानामनुरोधतः॥ ४-३१॥

सिद्धीनां जननी ह्येषा मम प्राणाधिकप्रिया।
निरन्तरकृताभ्यासात्पीयूषं प्रत्यहं पिबेत्॥
तेन विग्रहसिद्धिः स्यान्मृत्युमातङ्गकेसरी॥ ४-३२॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपिवा।
खेचरी यस्य शुद्धा तु स शुद्धो नात्र संशयः॥ ४-३३॥

क्षणार्धं कुरुते यस्तु तीर्त्वा पापमहार्णवम्।
दिव्यभोगान्प्रभुक्त्वा च सत्कुले स प्रजायते॥ ४-३४॥

मुद्रैषा खेचरी यस्तु स्वस्थचित्तो ह्यतन्द्रितः।
शतब्रह्मगतेनापि क्षणार्धं मन्यते हि सः॥ ४-३५॥

गुरूपदेशतो मुद्रां यो वेत्ति खेचरीमिमाम्।
नानापापरतो धीमान् स याति परमां गतिम्॥ ४-३६॥

सा प्राणसदृशी मुद्रा यस्मिन्कस्मिन्न दीयते।
प्रच्छाद्यते प्रयत्नेन मुद्रेयं सुरपूजिते॥ ४-३७॥

अथ जालन्धरबन्ध।

बद्धागलशिराजालं हृदये चिबुकं न्यसेत्।
बन्धोजालन्धरः प्रोक्तो देवानामपि दुर्लभः॥
नाभिस्थवह्निर्जन्तूनां सहस्रकमलच्युतम्।
पिबेत्पीयूषविस्तारं तदर्थं बन्धयेदिमम्॥ ४-३८॥

बन्धेनानेन पीयूषं स्वयं पिबति बुद्धिमान्।
अमरत्वञ्च सम्प्राप्य मोदते भुवनत्रये॥ ४-३९॥

जालन्धरो बन्ध एष सिद्धानां सिद्धिदायकः।
अभ्यासः क्रियते नित्यं योगिना सिद्धिमिच्छता॥ ४-४०॥

अथ मूलबन्धः।

पादमूलेन संपीड्य गुदमार्गं सुयन्त्रितम्।
बलादपानमाकृष्य क्रमादूर्ध्वं सुचारयेत्।

कल्पितोऽयं मूलबन्धो जरामरणनाशनः ॥ ४-४१ ॥

अपानप्राणयोरैक्यं प्रकरोत्यधिकल्पितम् ।
बन्धेनानेन सुतरा योनिमुद्रा प्रसिद्ध्यति ॥ ४-४२ ॥

सिद्धायां योनिमुद्रायां किं न सिद्ध्यति भूतले ।
बन्धस्यास्य प्रसादेन गगने विजितालसः ॥
पद्मासने स्थितो योगी भुवमुत्सृज्य वर्तते ॥ ४-४३ ॥

सुगुप्ते निर्जने देशे बन्धमेनं समभ्यसेत् ।
संसारसागरं तर्तुं यदीच्छेद्योगि पुंगवः ॥ ४-४४ ॥

अथ विपरीतकरणी मुद्रा ।

भूतले स्वशिरोदत्त्वा खे नयेच्चरणद्वयम् ।
विपरीतकृतिश्चैषा सर्वतन्त्रेषु गोपिता ॥ ४-४५ ॥

एतद्यः कुरुते नित्यमभ्यासं याममात्रतः ।
मृत्युं जयति स योगी प्रलये नापि सीदति ॥ ४-४६ ॥

कुरुतेऽमृतपानं यः सिद्धानां समतामियात्।
स सेव्यः सर्वलोकानां बन्धमेनं करोति यः॥ ४-४७॥

नाभेरूर्ध्वमधश्चापि तानं पश्चिममाचरेत्।
उड्डयानबंध एष स्यात्सर्वदुःखौघनाशनः॥
उदरे पश्चिमं तानं नाभेरूर्ध्वं तु कारयेत्।
उडयानाख्योऽत्र बन्धोयं मृत्युमातङ्गकेसरी॥ ४-४८॥

नित्यं यः कुरुते योगी चतुर्वारं दिने दिने।
तस्य नाभेस्तु शुद्धिः स्याद्येन सिद्धो भवेन्मरुत्॥ ४-४९॥

षण्मासमभ्यसन्योगी मृत्युं जयति निश्चितम्।
तस्योदराग्निर्ज्वलति रसवृद्धिः प्रजायते॥ ४-५०॥

अनेन सुतरां सिद्धिर्विग्रहस्य प्रजायते।
रोगाणां संक्षयश्चापि योगिनो भवति ध्रुवम्॥ ४-५१॥

गुरोर्लब्ध्वा प्रयत्नेन साधयेत् तु विचक्षणः।
निर्जने सुस्थिते देशे बन्धं परम दुर्लभम्॥ ४-५२॥

अथ शक्तिचालनमुद्रा ।

आधारकमले सुप्तां चालयेत्कुण्डलीं दृढाम् ।
अपानवायुमारुह्य बलादाकृष्य बुद्धिमान् ।
शक्तिचालनमुद्रेयं सर्वशक्तिप्रदायिनी ॥ ४-५३ ॥

शक्तिचालनमेवं हि प्रत्यहं यः समाचरेत् ।
आयुर्वृद्धिर्भवेत्तस्य रोगाणां च विनाशनम् ॥ ४-५४ ॥

विहाय निद्रा भुजगी स्वयमूर्ध्वे भवेत्खलु ।
तस्मादभ्यासनं कार्यं योगिना सिद्धमिच्छता ॥ ४-५५ ॥

यः करोति सदाभ्यासं शक्तिचालनमुत्तमम् ।
येन विग्रहसिद्धिः स्यादणिमादिगुणप्रदा ।
गुरूपदेशविधिना तस्य मृत्युभयं कुतः ॥ ४-५६ ॥

मुहूर्तद्वयपर्यन्तं विधिना शक्तिचालनम् ।
यः करोति प्रयत्नेन तस्य सिद्धिरदूरतः ।
युक्तासनेन कर्तव्यं योगिभिः शक्तिचालनम् ॥ ४-५७ ॥

एतत्तुमुद्रादशकं न भूतं न भविष्यति ।

एकैकाभ्यासने सिद्धिः सिद्धो भवति नान्यथा ॥ ४-५८ ॥

इति श्रीशिवसंहितायां हरगौरीसंवादे मुद्राकथनं नाम चतुर्थपटलः समाप्तः ॥ ४ ॥

अथ पञ्चमः पटलः

श्रीदेव्युवाच ॥

ब्रूहि मे वाक्यमीशान परमार्थधियं प्रति ।

ये विघ्नाः सन्ति लोकानां वद मे प्रिय शङ्कर ॥ ५-१ ॥

ईश्वर उवाच ॥

शृणु देवि प्रवक्ष्यामि यथा विघ्नाः स्थिताः सदा ।

मुक्तिं प्रति नराणाञ्च भोगः परमबन्धनः ॥ ५-२ ॥

अथ भोगरूपयोगविघ्नकथनम् ।

नारी शय्यासनं वस्त्रं धनमस्य विडम्बनम् ।

ताम्बूलंभक्ष्ययानानि राज्यैश्वर्यविभूतयः।
हैमं रौप्यं तथा ताम्रं रत्नश्चागुरुधेनवः।
पाण्डित्यं वेदशास्त्राणि नृत्यं गीतं विभूषणम्।
वंशी वीणा मृदङ्गाश्च गजेंद्रश्चाश्ववाहनम्।
दारापत्यानि विषया विघ्ना एते प्रकीर्तिताः।
भोगरूपा इमे विघ्ना धर्मरूपानिमाञ्छृणु॥ ५-३॥

अथ धर्मरूपयोगविघ्नकथनम्।

स्नानं पूजाविधिर्होमं तथा मोक्षमयी स्थितिः।
व्रतोपवासनियममौनमिन्द्रियनिग्रहः।
ध्येयो ध्यानं तथा मन्त्रो दानं ख्यातिर्दिशासु च।

वापीकूपतडागादिप्रासादारामकल्पना।
यज्ञं चान्द्रायणं कृच्छ्रं तीर्थानि विविधानि च।
दृश्यन्ते च इमे विघ्ना धर्मरूपेण संस्थिताः॥ ५-४॥

अथ ज्ञानरूपविघ्नकथनम्।

यत्तु विघ्नं भवेज्ज्ञानं कथयामि वरानने।

गोमुखं स्वासनं कृत्वा धौतिप्रक्षालनं च तत्।
नाडीसञ्चारविज्ञानं प्रत्याहारनिरोधनम्।
कुक्षिसंचालनं क्षिप्रं प्रवेश इन्द्रियाध्वना।
नाडीकर्माणि कल्याणि भोजनं श्रूयतां मम॥ ५-५॥

नवधातुरसं छिन्धि शुण्ठिकास्ताडयेत्पुनः।
एककालं समाधिः स्याल्लिंगभूतमिदं शृणु॥ ५-६॥

सङ्गमं गच्छ साधूनां संकोचं भज दुर्जनात्।
प्रवेशनिर्गमे वायोर्गुरुलक्षं विलोकयेत्॥ ५-७॥

पिण्डस्थं रूपसंस्थञ्च रूपस्थं रूपवर्जितम्।
ब्रह्मैतस्मिन्मतावस्था हृदयञ्च प्रशाम्यति।
इत्येते कथिता विघ्ना ज्ञानरूपे व्यवस्थिताः॥ ५-८॥

अथ चतुर्विधयोगकथनम्।

मन्त्रयोगो हठश्चैव लययोगस्तृतीयकः।
चतुर्थो राजयोगः स्यात्स द्विधाभाववर्जितः॥ ५-९॥

चतुर्धा साधको ज्ञेयो मृदुमध्याधिमात्रकाः।
अधिमात्रतमः श्रेष्ठो भवाब्धौ लंघनक्षमः॥ ५-१० ॥

अथ मृदुसाधकलक्षणम्।

मन्दोत्साही सुसंमुढो व्याधिस्थो गुरुदूषकः।
लोभी पापमतिश्चैव बह्वाशी वनिताश्रयः॥
चपलः कातरो रोगी पराधीनोऽतिनिष्ठुरः।
मन्दाचारो मन्दवीर्यो ज्ञातव्यो मृदुमानवः॥
द्वादशाब्दे भवेत्सिद्धिरेतस्य यत्नतः परम्।
मन्त्रयोगाधिकारी स ज्ञातव्यो गुरुणा ध्रुवम्॥ ५-११ ॥

समबुद्धिः क्षमायुक्तः पुण्याकांक्षी प्रियंवदः।
मध्यस्थः सर्वकार्येषु सामान्यः स्यान्नसंशयः॥
एतज्ज्ञात्वैव गुरुभिर्दीयते मुक्तितो लयः॥ ५-१२ ॥

अथ अधिमात्रसाधकलक्षणम्

स्थिरबुद्धिर्लये युक्तः स्वाधीनो वीर्यवानपि।
महाशयो दयायुक्तः क्षमावान् सत्यवानपि॥

शूरो वयःस्थः श्रद्धावान् गुरुपादाब्जपूजकः।
योगाभ्यासरतश्चैव ज्ञातव्यश्चाधिमात्रकः॥
एतस्य सिद्धिः षड्वर्षे भवेदभ्यासयोगतः।
एतस्मै दीयते धीरो हठयोगश्च साङ्गतः॥ ५-१३॥

अथ अधिमात्रतमसाधकलक्षणम्।

महावीर्यान्वितोत्साही मनोज्ञः शौर्यवानपि।
शास्त्रज्ञोऽभ्यासशीलश्च निर्मोहश्च निराकुलः॥
नवयौवनसम्पन्नो मिताहारी जितेंद्रियः।
निर्भयश्च शुचिर्दक्षो दाता सर्वजनाश्रयः॥
अधिकारी स्थिरो धीमान् यथेच्छावस्थितः क्षमी।
सुशीलो धर्मचारी च गुप्तचेष्टः प्रियंवदः॥
शास्त्रविश्वाससम्पन्नो देवता गुरुपूजकः।
जनसंगविरक्तश्च महाव्याधि विवर्जितः॥
अधिमात्रव्रतशश्च सर्वयोगस्य साधकः।
त्रिभिः संवत्सरैः सिद्धिरेतस्य नात्र संशयः॥
सर्वयोगाधिकारी स नात्र कार्या विचारणा॥ ५-१४॥

अथ प्रतीकोपासनम्।

प्रतीकोपासना कार्या दृष्टादृष्टफलप्रदा ।
पुनाती दर्शनादत्र नात्र कार्या विचारणा ॥ ५-१५ ॥

गाढातपे स्वप्रतिबिम्बितेश्वरं निरीक्ष्य विस्फारितलोचनद्वयम् ।
यदा नभः पश्यति स्वप्रतीकं नभोङ्गणे तत्क्षणमेव पश्यति ॥ ५-१६ ॥

प्रत्यहं पश्यते यो वै स्वप्रतीकं नभोङ्गणे ।
आयुर्वृद्धिर्भवेत्तस्य न मृत्युः स्यात्कदाचन ॥ ५-१७ ॥

यदा पश्यति सम्पूर्णं स्वप्रतीकं नभोङ्गणे ।
तदा जयमवाप्नोति वायुं निर्जित्य सञ्चरेत् ॥ ५-१८ ॥

यः करोति सदाभ्यासं चात्मानं वन्दते परम् ।
पूर्णानन्दैकपुरुषं स्वप्रतीकप्रसादतः ॥ ५-१९ ॥

यात्राकाले विवाहे च शुभे कर्मणि सङ्कटे ।
पापक्षये पुण्यवृद्धौ प्रतीकोपासनञ्चरेत् ॥ ५-२० ॥

निरन्तरकृताभ्यासादन्तरे पश्यति ध्रुवम् ।

तदा मुक्तिमवाप्नोति योगी नियतमानसः ॥ ५-२१ ॥

अंगुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां द्विलोचने ।
नासारन्ध्रे च मध्याभ्यामनामाभ्यां मुखं दृढम् ॥
निरुध्य मारुतं योगी यदैव कुरुते भृशम् ।
तदा लक्षणमात्मानं ज्योतीरूपं स पश्यति ॥ ५-२२ ॥

तत्तेजो दृश्यते येन क्षणमात्रं निराकुलम् ।
सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ ५-२३ ॥

निरन्तरकृताभ्यासाद्योगी विगतकल्मषः ।
सर्वदेहादि विस्मृत्य तदभिन्नः स्वयं गतः ॥ ५-२४ ॥

यः करोति सदाभ्यासं गुप्ताचारेण मानवः ।
स वै ब्रह्मविलीनः स्यात्पापकर्मरतो यदि ॥ ५-२५ ॥

गोपनीयः प्रयत्नेन सद्यः प्रत्ययकारकः ।
निर्वाणदायको लोके योगोयं मम वल्लभः ॥
नादः संजायते तस्य क्रमेणाभ्यासतश्च वै ॥ ५-२६ ॥

मतभृङ्गवेणुवीणासदृशः प्रथमो ध्वनिः।

एवमभ्यासतः पश्चात् संसारध्वान्तनाशनम्॥

घण्टानादसमः पश्चात् ध्वनिर्मेघरवोपमः।

ध्वनौ तस्मिन्मनो दत्त्वा यदा तिष्ठति निर्भयः॥

तदा संजायते तस्य लयस्य मम वल्लभे॥ ५-२७॥

तत्र नादे यदा चित्तं रमते योगिनो भृशम्।

विस्मृत्य सकलं बाह्यं नादेन सह शाम्यति॥ ५-२८॥

एतदभ्यासयोगेन जित्वा सम्यग्गुणान्वहून्।

सर्वारम्भपरित्यागी चिदाकाशे विलीयते॥ ५-२९॥

नासनं सिद्धसदृशं न कुम्भसदृशं बलम्।

न खेचरीसमा मुद्रा न नादसदृशो लयः॥ ५-३०॥

इदानीं कथयिष्यामि मुक्तस्यानुभवं प्रिये।

यज्ज्ञात्वा लभते मुक्तिं पापयुक्तोपि साधकः॥ ५-३१॥

समभ्यर्च्येश्वरं सम्यक्कृत्वा च योगमुत्तमम्।

गृह्णीयात्सुस्थितो भूत्वा गुरुं सन्तोष्य बुद्धिमान्॥ ५-३२॥

जीवादि सकलं वस्तुं दत्त्वा योगविदं गुरुम्।
सन्तोष्यातिप्रयत्नेन योगोयं गृह्यते बुधैः॥ ५-३३॥

विप्रान्संतोष्य मेधावी नानामंगलसंयुतः।
ममालये शुचिर्भूत्वा प्रगृह्णीयाच्छुभात्मकम्॥ ५-३४॥

संन्यस्यानेन विधिना प्राक्तनं विग्रहादिकम्।
भूत्वा दिव्यवपुर्योगी गृह्णीयाद्वक्ष्यमाणकम्॥ ५-३५॥

पद्मासनस्थितो योगी जनसंगविवर्जितः।
विज्ञाननाडीद्वितयमङ्गुलीभ्यां निरोधयेत्॥ ५-३६॥

सिद्धेस्तदाविर्भवति सुखरूपी निरञ्जनः।
तस्मिन्परिश्रमः कार्यो येन सिद्धो भवेत्खलु॥ ५-३७॥

यः करोति सदाभ्यासं तस्य सिद्धिर्न दूरतः।
वायुसिद्धिर्भवेत्तस्य क्रमादेव न संशयः॥ ५-३८॥

सकृद्यः कुरुते योगी पापौघं नाशयेद्ध्रुवम्।

तस्य स्यान्मध्यमे वायोः प्रवेशो नात्र संशयः ॥ ५-३९ ॥

एतदभ्यासशीलो यः स योगी देवपूजितः ।

अणिमादिगुणाँल्लब्ध्वा विचरेद्भुवनत्रये ॥ ५-४० ॥

यो यथास्यानिलाभ्यासात्तद्भवेत्तस्य विग्रहः ।

तिष्ठेदात्मनि मेधावी संयुतः क्रीडते भृशम् ॥ ५-४१ ॥

एतद्योगं परं गोप्यं न देयं यस्य कस्यचित् ।

यः प्रमाणैः समायुक्तस्तमेव कथ्यते ध्रुवम् ॥ ५-४२ ॥

योगी पद्मासने तिष्ठेत्कण्ठकूपे यदा स्मरन् ।

जिह्वां कृत्वा तालुमूले क्षुत्पिपासा निवर्तते ॥ ५-४३ ॥

कण्ठकूपादधः स्याने कूर्मनाड्यिस्त शोभना ।

तस्मिन् योगी मनो दत्त्वा चित्तस्थैर्यं लभेद्भृशम् ॥ ५-४४ ॥

शिरः कपाले रुद्राक्षं विवरं चिन्तयेद्यदा ।

तदा ज्योतिः प्रकाशः स्याद्विद्युत्पुञ्जसमप्रभः ।

एतच्चिन्तनमात्रेण पापानां संक्षयो भवेत् ।

दुराचारोऽपि पुरुषो लभते परमं पदम् ॥ ५-४५ ॥

अहर्निशं यदा चिन्तां तत्करोति विचक्षणः ।
सिद्धानां दर्शनं तस्य भाषणञ्च भवेद्ध्रुवम् ॥ ५-४६ ॥

तिष्ठन् गच्छन् स्वपन् भुञ्जन् ध्यायेच्छून्यमहर्निशम् ।
तदाकाशमयो योगी चिदाकाशे विलीयते ॥ ५-४७ ॥

एतज्ज्ञानं सदा कार्यं योगिना सिद्धिमिच्छता ।
निरन्तरकृताभ्यासान्मम तुल्यो भवेद्ध्रुवम् ॥
एतज्ज्ञानबलाद्योगी सर्वेषां वल्लभो भवेत् ॥ ५-४८ ॥

सर्वान् भूतान् जयं कृत्वा निराशीरपरिग्रहः ।
नासाग्रे दृश्यते येन पद्मासनगतेन वै ॥
मनसो मरणं तस्य खेचरत्वं प्रसिद्ध्यति ॥ ५-४९ ॥

ज्योतिः पश्यति योगीन्द्रः शुद्धं शुद्धाचलोपमम् ।
तत्राभ्यासबलेनैव स्वयं तद्रक्षको भवेत् ॥ ५-५० ॥

उत्तानशयने भूमौ सुप्त्वा ध्यायन्निरन्तरम् ।

सद्यः श्रमविनाशाय स्वयं योगी विचक्षणः।

शिरः पश्चात्तु भागस्य ध्याने मृत्युञ्जयो भवेत्॥

भ्रूमध्ये दृष्टिमात्रेण ह्यपरः परिकीर्तितः॥ ५-५१॥

चतुर्विधस्य चान्नस्य रसस्त्रेधा विभज्यते।

तत्र सारतमो लिंगदेहस्य परिपोषकः॥

सप्तधातुमयं पिण्डमेती पुष्णाति मध्यगः॥ ५-५२॥

याति विण्मूत्ररूपेण तृतीयः सप्ततो बहिः॥

आद्यभागद्वयं नाड्यः प्रोक्तास्ताः सकला अपि।

पोषयन्ति वपुर्वायुमापादतलमस्तकम्॥ ५-५३॥

नाडीभिराभिः सर्वाभिर्वायुः सञ्चरते यदा।

तदैवान्नरसो देहे साम्येनेह प्रवर्तते॥ ५-५४॥

चतुर्दशानां तत्रेह व्यापारे मुख्यभागतः।

ता अनुग्रत्वहीनाश्च प्राणसञ्चारनाडिकाः॥ ५-५५॥

गुदाद्द्व्यंगुलतश्चोर्ध्वं मेढ्रैकांगुलतस्त्वधः।

एवञ्चास्ति समं कन्दं समताच्चतुरंगुलम्॥ ५-५६॥

पश्चिमाभिमुखीः योनिर्गुदमेढ्रान्तरालगा ।
तत्र कन्दं समाख्यातं तत्रास्ति कुण्डली सदा ॥
संवेष्ट्य सकला नाडीः सार्द्धत्रिकुटलाकृतीः ।
मुखे निवेश्य सा पुच्छं सुषुम्णाविवरे स्तिता ॥ ५-५७ ॥

सुप्ता नागोपमा ह्येषा स्फुरन्ती प्रभया स्वया ।
अहिवत्सन्धिसंस्थाना वाग्देवी बीजसंज्ञिका ॥ ५-५८ ॥

ज्ञेया शक्तिरियं विष्णोर्निर्झरा स्वर्णभास्वरा ।
सत्त्वं रजस्तमश्चेति गुणत्रयप्रसूतिका ॥ ५-५९ ॥

तत्र बन्धूकपुष्पाभं कामबीजं प्रकीर्तितम् ।
कलहेमसमं योगे प्रयुक्ताक्षररूपिणम् ॥ ५-६० ॥

सुषुम्णापि च संश्लिष्टा बीजं तत्र वरं स्थितम् ।
शरच्चंद्रनिभं तेजस्स्वयमेतत्स्फुरत्स्थितम् ॥
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम् ।
एतत्त्रयं मिलित्वैव देवी त्रिपुरभैरवी ॥
बीजसंज्ञं परंतेजस्तदेव परिकीर्तितम् ॥ ५-६१ ॥

क्रियाविज्ञानशक्तिभ्यां युतं यत्परितो भ्रमत्।

उत्तिष्ठद्विशतस्त्वम्भः सूक्ष्मं शोणशिखायुतम्॥

योनिस्थं तत्परं तेजः स्वयंभूलिंगसंज्ञितम्॥ ५-६२॥

आधारपद्ममेतद्धि योनिर्यस्यास्ति कन्दतः।

परिस्फुरद्वादिसान्तचतुर्वर्णं चतुर्दलम्॥ ५-६३॥

कुलाभिधं सुवर्णाभं स्वयम्भूलिङ्गसंगतम्।

द्विरण्डो यत्र सिद्धोस्ति डाकिनी यत्र देवता॥

तत्पद्ममध्यगा योनिस्तत्र कुण्डलिनी स्थिता।

तस्या ऊर्ध्वे स्फुरत्तेजः कामबीजं भ्रमन्मतम्॥

यः करोति सदा ध्यानं मूलाधारे विचक्षणः।

तस्य स्याद्दार्दुरी सिद्धिर्भूमित्यागक्रमेण वै॥ ५-६४॥

वपुषः कान्तिरुत्कृष्टा जठराग्निविवर्धनम्।

आरोग्यञ्च पटुत्वञ्च सर्वज्ञत्वञ्च जायते॥ ५-६५॥

भूतं भव्यं भविष्यञ्च वेत्ति सर्वं सकारणम्।

अश्रुतान्यपि शास्त्राणि सरहस्यं भवेद्ध्रुवम्॥ ५-६६॥

वक्त्रे सरस्वती देवी सदा नृत्यति निर्भरम्।
मन्त्रसिद्धिर्भवेत्तस्य जपादेव न संशयः॥ ५-६७॥

जरामरणदुःखौघान्नाशयति गुरोर्वचः।
इदं ध्यानं सदा कार्यं पवनाभ्यासिना परम्।
ध्यानमात्रेण योगीन्द्रो मुच्यते सर्वकिल्विषात्॥ ५-६८॥

मूलपद्मं यदा ध्यायेद्योगी स्वयम्भुलिङ्गकम्।
तदा तत्क्षणमात्रेण पापौघं नाशयेद्ध्रुवम्॥ ५-६९॥

यं यं कामयते चित्ते तं तं फलमवाप्नुयात्।
निरन्तरकृताभ्यासात्तं पश्यति विमुक्तिदम्॥
बहिरभ्यन्तरे श्रेष्ठं पूजनीयं प्रयत्नतः।
ततः श्रेष्ठतमं ह्येतन्नान्यदस्ति मतं मम॥ ५-७०॥

आत्मसंस्थं शिवं त्यक्त्वा बहिःस्थं यः समर्चयेत्।
हस्तस्थं पिण्डमुत्सृज्य भ्रमते जीविताशया॥ ५-७१॥

आत्मलिंगार्चनं कुर्यादनालस्यं दिने दिने।

तस्य स्यात्सकला सिद्धिर्नात्र कार्या विचारणा ॥ ५-७२ ॥

निरन्तरकृताभ्यासात्षण्मासैः सिद्धिमाप्नुयात् ।
तस्य वायुप्रवेशोपि सुषुम्णायाम्भवेद्ध्रुवम् ॥ ५-७३ ॥

मनोजयञ्च लभते वायुबिन्दुविधारणात् ।
ऐहिकामुष्मिकीसिद्धिर्भवेन्नैवात्र संशयः ॥ ५-७४ ॥

अथ स्वाधिष्ठानचक्रविवरणम् ।

द्वितीयन्तु सरोजञ्च लिंगमूले व्यवस्थितम् ।
बादिलान्तं च षड्वर्णं परिभास्वरषड्दलम् ॥
स्वाधिष्ठानाभिधं तत्तु पंकजं शोणरूपकम् ।
बालाख्यो यत्र सिद्धोऽस्ति देवी यत्रास्ति राकिणी ॥ ५-७५ ॥

वो ध्यायति सदा दिव्यं स्वाधिष्ठानारविन्दकम् ।
तस्य कामाङ्गनाः सर्वा भजन्ते काममोहिताः ॥ ५-७६ ॥

विविधञ्चाश्रुतं शास्त्रं निःशङ्को वै भवेद्ध्रुवम् ।
सर्वरोगविनिर्मुक्तो लोके चरति निर्भयः ॥ ५-७७ ॥

मरणं खाद्यते तेन स केनापि न खाद्यते।
तस्य स्यात्परमा सिद्धिरणिमादिगुणप्रदा॥
वायुः सञ्चरते देहे रसवृद्धिर्भवेद्ध्रुवम्।
आकाशपङ्कजगलत्पीयूषमपि वर्द्धते॥ ५-७८॥

अथ मणिपूरचक्रविवरणम्।

तृतीयं पङ्कजं नाभौ मणिपूरकसंज्ञकम्।
दशारंडादिफान्तार्णं शोभितं हेमवर्णकम्॥ ५-७९॥

रुद्राख्यो यत्र सिद्धोऽस्ति सर्वमङ्गलदायकः।
तत्रस्था लाकिनी नाम्नी देवी परमधार्मिका॥ ५-८०॥

तस्मिन् ध्यानं सदा योगी करोति मणिपूरके।
तस्य पातालसिद्धिः स्यान्निरन्तरसुखावहा॥
ईप्सितञ्च भवेल्लोके दुःखरोगविनाशनम्।
कालस्य वञ्चनञ्चापि परदेहप्रवेशनम्॥ ५-८१॥

जाम्बूनदादिकरणं सिद्धानां दर्शनं भवेत्।

ओषधीदर्शनञ्चापि निधीनां दर्शनं भवेत्॥ ५-८२॥

हृदयेऽनाहतं नाम चतुर्थं पङ्कजं भवेत्।
कादिठान्तार्णसंस्थानं द्वादशारसमन्वितम्॥
अतिशोणं वायुबीजं प्रसादस्थानमीरितम्॥ ५-८३॥

पद्मस्थं तत्परं तेजो बाणलिंगं प्रकीर्तितम्।
यस्य स्मरणमात्रेण दृष्टादृष्टफलं लभेत्॥ ५-८४॥

सिद्धः पिनाकी यत्रास्ते काकिनी यत्र देवता।
एतस्मिन्सततं ध्यानं हृत्पाथोजे करोति यः॥
क्षुभ्यन्ते तस्य कान्ता वै कामार्ता दिव्ययोषितः॥ ५-८५॥

ज्ञानञ्चाप्रतिमं तस्य त्रिकालविषयम्भवेत्।
दूरश्रुतिर्दूरदृष्टिः स्वेच्छया खगतां व्रजेत्॥ ५-८६॥

सिद्धानां दर्शनञ्चापि योगिनी दर्शनं तथा।
भवेत्खेचरसिद्धिश्च खेचराणां जयन्तथा॥ ५-८७॥

यो ध्यायति परं नित्यं बाणलिंगं द्वितीयकम्।

खेचरी भूचरी सिद्धिर्भवेत्तस्य न संशयः॥ ५-८८॥

एतद्ध्यानस्य माहात्म्यं कथितुं नैव शक्यते।
ब्रह्माद्याः सकला देवा गोपयन्ति परन्त्विदम्॥ ५-८९॥

अथ विशुद्धचक्रविवरणम्।

कण्ठस्थानस्थितं पद्मं विशुद्धं नामपञ्चमम्।
सुहेमाभं स्वरोपेतं षोडशस्वरसंयुतम्॥
छगलाण्डोऽस्ति सिद्धोत्र शाकिनी चाधिदेवता॥ ५-९०॥

ध्यानं करोति यो नित्यं स योगीश्वरपण्डितः।
किन्त्वस्य योगिनोऽन्यत्र विशुद्धाख्ये सरोरुहे॥
चतुर्वेदा विभासन्ते सरहस्या निधेरिव॥ ५-९१॥

रहःस्थाने स्थितो योगी यदा क्रोधवशो भवेत्।
तदा समस्तं त्रैलोक्यं कम्पते नात्र संशयः॥ ५-९२॥

इह स्थाने मनो यस्य दैवाद्यातिलयं यदा।
तदा बाह्यं परित्यज्य स्वान्तरे रमते ध्रुवम्॥ ५-९३॥

तस्य न क्षतिमायाति स्वशरीरस्य शक्तितः ।
संवत्सरसहस्रेऽपि वज्रातिकठिनस्य वै ॥ ५-९४ ॥

यदा त्यजति तद्ध्यानं योगींद्रोऽवनिमण्डले ।
तदा वर्षसहस्राणि मन्यते तत्क्षणं कृती ॥ ५-९५ ॥

अथ आज्ञाचक्रविवरणम् ।

आज्ञापद्मं भ्रुवोर्मध्ये हक्षोपेतं द्विपत्रकम् ।
शुक्लाभं तन्महाकालः सिद्धो देव्यत्र हाकिनी ॥ ५-९६ ॥

शरच्चंद्रनिभं तत्राक्षरबीजं विजृंभितम् ।
पुमान् परमहंसोऽयं यज्ज्ञात्वा नावसीदति ॥ ५-९७ ॥

एतदेव परन्तेजः सर्वतन्त्रेषु मन्त्रिणः ।
चिन्तयित्वा परां सिद्धिं लभते नात्र संशयः ॥ ५-९८ ॥

तुरीयं त्रितयं लिंगं तदाहं मुक्तिदायकः ।
ध्यानमात्रेण योगीन्द्रो मत्समो भवति ध्रुवम् ॥ ५-९९ ॥

इडा हि पिंगला ख्याता वरणासीति होच्यते ।
वाराणसी तयोर्मध्ये विश्वनाथोत्र भाषितः ॥ ५-१०० ॥

एतत्क्षेत्रस्य माहात्म्यमृषिभिस्तत्त्वदर्शिभिः ।
शास्त्रेषु बहुधा प्रोक्तं परं तत्त्वं सुभाषितम् ॥ ५-१०१ ॥

सुषुम्णा मेरुणा याता ब्रह्मरन्ध्रं यतोऽस्ति वै ।
ततश्चैषा परावृत्य तदाज्ञापद्मदक्षिणे ॥
वामनासापुटं याति गंगेति परिगीयते ॥ ५-१०२ ॥

ब्रह्मरन्ध्रे हि यत्पद्मं सहस्रारं व्यवस्थितम् ।
तत्र कन्देहि या योनिस्तस्यां चन्द्रो व्यवस्थितः ।
त्रिकोणाकारतस्तस्याः सुधा क्षरति सन्ततम् ॥
इडायाममृतं तत्र समं स्रवति चन्द्रमाः ।
अमृतं वहति धारा धारारूपं निरन्तरम् ॥
वामनासापुटं याति गंगेत्युक्ता हि योगिभिः ॥ ५-१०३ ॥

आज्ञापङ्कजदक्षांसाद्वामनासापुटंगता ।
उदग्वहेति तत्रेडा वरणा समुदाहृता ॥ ५-१०४ ॥

ततो द्वयोर्हि मध्ये तु वाराणसीति चिन्तयेत्।

तदाकारा पिंगलापि तदाज्ञाकमलान्तरे ॥

दक्षनासापुटे याति प्रोक्तास्माभिरसीति वै ॥ ५-१०५ ॥

मूलाधारे हि यत्पद्मं चतुष्पत्र व्यवस्थितम्।

तत्र मध्येहि या योनिस्तस्यां सूर्यो व्यवस्थितः ॥ ५-१०६ ॥

तत्सूर्यमण्डलद्वराद्विषं क्षरति सन्ततम्।

पिंगलायां विषं तत्र समर्पयति तापनः ॥ ५-१०७ ॥

विषं तत्र वहन्ती या धारारूपं निरन्तरम्।

दक्षनासापुटे याति कल्पितेयन्तु पूर्ववत्॥ ५-१०८ ॥

आज्ञापङ्कजवामास्याद्दक्षनासापुटं गता।

उदग्वहा पिंगलापि पुरासीति प्रकीर्तिता ॥ ५-१०९ ॥

आज्ञापद्ममिदं प्रोक्तं यत्र देवो महेश्वरः।

पीठत्रयं ततश्चोर्ध्वं निरुक्तं योगचिन्तकैः ॥

तद्बिन्दुनादशक्त्याख्यं भालपद्मे व्यवस्थितम्॥ ५-११० ॥

यः करोति सदाध्यानमाज्ञापद्मस्य गोपितम्।
पूर्वजन्मकृतं कर्म विनश्येदविरोधतः॥ ५-१११॥

इह स्थिते यदा योगी ध्यानं कुर्यान्निरन्तरम्।
तदा करोति प्रतिमां पूजाजपमनर्थवत्॥ ५-११२॥

यक्षराक्षसगन्धर्वा अपसरोगणकिन्नराः।
सेवन्ते चरणौ तस्य सर्वे तस्य वशानुगाः॥ ५-११३॥

करोति रसनां योगी प्रविष्टां विपरीतगाम्।
लम्बिकोर्ध्वेषु गर्तेषु धृत्वा ध्यानं भयापहम्॥
अस्मिन् स्थाने मनो यस्य क्षणार्धं वर्ततेऽचलम्।
तस्य सर्वाणि पापानि संक्षयं यान्ति तत्क्षणात्॥ ५-११४॥

यानि यानि हि प्रोक्तानि पंचपद्मे फलानि वै।
तानि सर्वाणि सुतरामेतज्ज्ञानाद्भवन्ति हि॥ ५-११५॥

यः करोति सदाभ्यासमाज्ञा पद्मे विचक्षणः।
वासनाया महाबन्धं तिरस्कृत्य प्रमोदते॥ ५-११६॥

प्राणप्रयाणसमये तत्पद्मं यः स्मरन्सुधीः ।
त्यजेत्प्राणं स धर्मात्मा परमात्मनि लीयते ॥ ५-११७ ॥

तिष्ठन् गच्छन् स्वपन् जाग्रत् यो ध्यानं कुरुते नरः ।
पापकर्मविकुर्वाणो नहि मज्जति किल्विषे ॥ ५-११८ ॥

योगी बन्धाद्विनिर्मुक्तः स्वीयया प्रभया स्वयम् ।
द्विदलध्यानमाहात्म्यं कथितुं नैव शक्यते ॥
ब्रह्मादिदेवताश्चैव किञ्चिन्मत्तो विदन्ति ते ॥ ५-११९ ॥

अत ऊर्ध्वं तालुमूले सहस्रारंसरोरुहम् ।
अस्ति यत्र सुषुम्णाया मूलं सविवरं स्थितम् ॥ ५-१२० ॥

तालुमूले सुषुम्णा सा अधोवक्त्रा प्रवर्तते ।
मूला धारेणयोन्यस्ताः सर्वनाड्यः समाश्रिताः ॥
ता बीजभूतास्तत्त्वस्य ब्रह्ममार्गप्रदायिकाः ॥ ५-१२१ ॥

तालुस्थाने च यत्पद्मं सहस्रारं पुराहितम् ।
तत्कन्दे योनिरेकास्ति पश्चिमाभिमुखी मता ॥ ५-१२२ ॥

तस्या मध्ये सुषुम्णाया मूलं सविवरं स्थितम्।
ब्रह्मरन्ध्रं तदेवोक्तमामूलाधारपङ्कजम्॥ ५-१२३॥

ततस्तद्रन्ध्रे तच्छक्तिः सुषुम्णा कुण्डली सदा।
सुषुम्णायां सदा शक्तिश्चित्रा स्यान्मम वल्लभे॥
तस्यां मम मते कार्या ब्रह्मरन्ध्रादिकल्पना॥ ५-१२४॥

यस्याः स्मरणमात्रेण ब्रह्मज्ञत्वं प्रजायते।
पापक्षयश्च भवति न भूयः पुरुषो भवेत्॥ ५-१२५॥

प्रवेशितं चलाङ्गुष्ठं मुखे स्वस्य निवेशयेत्।
तेनात्र न बहत्येव देहचारी समीरणः॥ ५-१२६॥

तेन संसारचक्रेस्मिन् भ्रमतीत्येव सर्वदा।
तदर्थं ये प्रवर्तन्ते योगी न प्राणधारणे।
तत एवाखिला नाडी विरुद्धा चाष्टवेष्टनम्।
इयं कुण्डलिनी शक्ती रन्ध्रं त्यजति नान्यथा॥ ५-१२७॥

यदा पूर्णासु नाडीषु सन्निरुद्धानिलास्तदा।

बन्धत्यागेन कुण्डल्या मुखं रन्ध्राद् बहिर्भवेत् ॥ ५-१२८ ॥

सुषुम्णायां सदैवायं वहेत्प्राणसमीरणः ।
मूलपद्मस्थिता योनिर्वामदक्षिणकोणतः ॥
इडापिंगलयोर्मध्ये सुषुम्णा योनिमध्यगा ॥ ५-१२९ ॥

ब्रह्मरन्ध्रं तु तत्रैव सुषुम्णाधारमण्डले ।
यो जानाति स मुक्तः स्यात्कर्मबन्धाद्विचक्षणः ॥ ५-१३० ॥

ब्रह्मरन्ध्रमुखे तासां संगमः स्यादसंशयः ।
तस्मिन्स्नाने स्नातकानां मुक्तिः स्यादविरोधतः ॥ ५-१३१ ॥

गंगायमुनयोर्मध्ये वहत्येषा सरस्वती ।
तासां तु संगमे स्नात्वा धन्यो याति परां गतिम् ॥ ५-१३२ ॥

इडा गंगा पुरा प्रोक्ता पिंगला चार्कपुत्रिका ।
मध्या सरस्वती प्रोक्ता तासां संगोऽतिदुर्लभः ॥ ५-१३३ ॥

सितासिते संगमे यो मनसा स्नानमाचरेत् ।
सर्वपापविनिर्मुक्तो याति ब्रह्म सनातनम् ॥ ५-३४ ॥

त्रिवेण्यां संगमे यो वै पितृकर्म समाचरेत्।
तारयित्वा पितॄन्सर्वान्स याति परमां गतिम्॥ ५-१३५॥

नित्यं नैमित्तिकं काम्यं प्रत्यहं यः समाचरेत्।
मनसा चिन्तयित्वा तु सोऽक्षयं फलमाप्नुयात्॥ ५-१३६॥

सकृद्यः कुरुते स्नानं स्वर्गे सौख्यं भुनक्ति सः।
दग्ध्वा पापानशेषान्वै योगी शुद्धमतिः स्वयम्॥ ५-१३७॥

अपवित्रः पवित्री वा सर्वावस्थां गतोपि वा।
स्नानाचरणमात्रेण पूतो भवति नान्यथा॥ ५-१३८॥

मृत्युकाले प्लुतं देहं त्रिवेण्याः सलिले यदा।
विचिन्त्य यस्त्यजेत्प्राणान्स तदा मोक्षमाप्नुयात्॥ ५-१३९॥

नातःपरतरं गुह्यं त्रिषु लोकेषु विद्यते।
गोप्तव्यं तत्प्रयत्नेन न व्याख्येयं कदाचन॥ ५-१४०॥

ब्रह्मरन्ध्र मनो दत्त्वा क्षणार्धं यदि तिष्ठति।

सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ ५-१४१ ॥

अस्मिँल्लीनं मनो यस्य स योगी मयि लीयते ।
अणिमादिगुणान्भुक्त्वा स्वेच्छया पुरुषोत्तमः ॥ ५-१४२ ॥

एतद्रन्ध्रध्यानमात्रेण मर्त्यः संसारे स्मिन्वल्लभो मे भवेत्सः ।
पापाञ्जित्वा मुक्तिमार्गाधिकारी, ज्ञानं दत्त्वा तारयत्यद्भुतं वै ॥ ५-१४३ ॥

चतुर्मुखादित्रिदशैरगम्यं योगिवल्लभम् ।
प्रयत्नेन सुगोप्यं तद्ब्रह्मरन्ध्रं मयोदितम् ॥ ५-१४४ ॥

पुरा मयोक्ता या योनिः सहस्रारे सरारुहे ।
तस्याऽधो वर्तते चन्द्रस्तद्ध्यानं क्रियते बुधैः ॥ ५-१४५ ॥

यस्य स्मरणमात्रेण योगीन्द्रोऽवनिमण्डले ।
पूज्यो भवति देवानां सिद्धानां सम्मतो भवेत् ॥ ५-१४६ ॥

शिरःकपालविवरे ध्यायेद्दुग्धमहोदधिम् ।
तत्र स्थित्वा सहस्रारे पद्मे चन्द्रं विचिन्तयेत् ॥ ५-१४७ ॥

शिरःकपालविवरे द्विरष्टकलया युतः।
पीयूषभानुहंसाख्यं भावयेत्तं निरंजनम्।
निरन्तरकृताभ्यासात्त्रिदिने पश्यति ध्रुवम्।
दृष्टिमात्रेण पापौघं दहत्येव स साधकः॥ ५-१४८ ॥

अनागतञ्च स्फुरति चित्तशुद्धिर्भवेत्खलु।
सद्यः कृत्वापि दहति महापातकपञ्चकम्॥ ५-१४९ ॥

आनुकूल्यं ग्रहा यान्ति सर्वे नश्यन्त्युपद्रवाः।
उपसर्गाः शमं यान्ति युद्धे जयमवाप्नुयात्।
खेचरीभूचरीसिद्धिर्भवेत्क्षीरेन्दुदर्शनात्।
ध्यानादेवभवेत्सर्वं नात्र कार्या विचारणा।
सतताभ्यासयोगेन सिद्धो भवति नान्यथा।
सत्यं सत्यं पुनः सत्यं मम तुल्यो भवेद्ध्रुवम्।
योगशास्त्रेऽप्यभिरतं योगिनां सिद्धिदायकम्॥ ५-१५० ॥

अथ राजयोगकथनम्।

अत ऊर्ध्वं दिव्यरूपं सहस्रारं सरोरुहम्।
ब्रह्माण्डाख्यस्य देहस्य बाह्ये तिष्ठति मुक्तिदम्॥ ५-१५१ ॥

कैलासो नाम तस्यैव महेशो यत्र तिष्ठति ।
नकुलाख्योऽविनाशी च क्षयवृद्धिविवर्जितः ॥ ५-१५२ ॥

स्थानस्यास्य ज्ञानमात्रेण नृणां, संसारेऽस्मिन्सम्भवो नैव भूयः ।
भूतग्रामं सन्तताभ्यासयोगात्कर्तुं हर्तुं स्याच्च शक्तिः समग्रा ॥ ५-१५३ ॥

स्थाने परे हंसनिवासभूते, कैलासनाम्नीह निविष्टचेताः ।
योगी हृतव्याधिरधः कृताधिवरायुश्चिरं जीवति मृत्युमुक्तः ॥ ५-१५४ ॥

चित्तवृत्तिर्यदा लीना कुलाख्ये परमेश्वरे ।
तदा समाधिसाम्येन योगी निश्चलतां व्रजेत् ॥ ५-१५५ ॥

निरन्तरकृते ध्याने जगद्विस्मरणं भवेत् ।
तदा विचित्रसामर्थ्यं योगिनो भवति ध्रुवम् ॥ ५-१५६ ॥

तस्माद्गलितपीयूषं पिबेद्योगी निरन्तरम् ।
मृत्योर्मृत्युं विधायाशु कुलं जित्वा सरोरुहे ।
अत्र कुण्डलिनी शक्तिर्लयं याति कुलाभिधा ।
तदा चतुर्विधा सृष्टिर्लीयते परमात्मनि ॥ ५-१५७ ॥

यज्ज्ञात्वा प्राप्य विषयं चित्तवृत्तिर्विलीयते।
तस्मिन् परिश्रमं योगी करोति निरपेक्षकः॥ ५-१५८॥

चित्तवृत्तियदालीना तस्मिन् योगी भवेद् ध्रुवम्।
तदा विज्ञायतेऽखण्डज्ञानरूपो निरञ्जनः॥ ५-१५९॥

ब्रह्माण्डबाह्ये संचिंत्य स्वप्रतीकं यथोदितम्।
तमावेश्य महच्छून्यं चिन्तयेदविरोधतः॥ ५-१६०॥

आद्यन्तमध्यशून्यं तत्कोटिसूर्यसमप्रभम्।
चन्द्रकोटिप्रतीकाशमभ्यस्य सिद्धिमाप्नुयात्॥ ५-१६१॥

एतद्ध्यानं सदा कुर्यादनालस्यं दिने दिने।
तस्य स्यात्सकला सिद्धिर्वत्सरान्नात्र संशयः॥ ५-१६२।

क्षणार्धं निश्चलं तत्र मनो यस्य भवेद् ध्रुवम्।
स एव योगी सद्भक्तः सर्वलोकेषु पूजितः॥ ५-१६३॥

तस्य कल्मषसंघातस्तत्क्षणादेव नश्यति॥ ५-१६४॥

यं दृष्ट्वा न प्रवर्तते मृत्युसंसारवर्त्मनि।
अभ्यसेत्तं प्रयत्नेन स्वाधिष्ठानेन वर्त्मना॥ ५-१६५॥

एतद्ध्यानस्य माहात्म्यं मया वक्तुं न शक्यते।
यः साधयति जानाति सोस्माकमपि सम्मतः॥ ५-१६६॥

ध्यानादेव विजानाति विचित्रेक्षणसम्भवम्।
अणिमादिगुणोपेतो भवत्येव न संशयः॥ ५-१६७॥

राजयोगो मयाख्यातः सर्वतन्त्रेषु गोपितः।
राजाधिराजयोगोऽयं कथयामि समासतः॥ ५-१६८॥

स्वस्तिकञ्चासनं कृत्वा सुमठे जन्तुवर्जिते।
गुरुं संपूज्य यत्नेन ध्यानमेतत्समाचरेत्॥ ५-१६९॥

निरालम्बं भवेज्जीवं ज्ञात्वा वेदान्तयुक्तितः।
निरालम्बं मनः कृत्वा न किञ्चिच्चिन्तयेत्सुधीः॥ ५-१७०॥

एतद्ध्यानान्महासिद्धिर्भवत्येव न संशयः।

वृत्तिहीनं मनः कृत्वा पूर्णरूपं स्वयं भवेत् ॥ ५-१७१ ॥

साधयेत्सततं यो वै स योगी विगतस्पृहः ।
अहंनाम न कोप्यस्ति सर्वदात्मैव विद्यते ॥ ५-१७२ ॥

को बन्धः कस्य वा मोक्ष एकं पश्येत्सदा हि सः ।
एतत्करोति यो नित्यं स मुक्तो नात्र संशयः ॥ ५-१७३ ॥

स एव योगी सद्भक्तः सर्वलोकेषु पूजितः ।
अहमस्मीति यन्मत्वा जीवात्मपरमात्मनोः ।
अहं त्वमेतदुभयं त्यक्त्वाखण्डं विचिन्तयेत् ।
अध्यारोपापवादाभ्यां यत्र सर्वं विलीयते ।
तद्बीजमाश्रयेद्योगी सर्वसंगविवर्जितः ॥ ५-१७४ ॥

अपरोक्षं चिदानन्दं पूर्णं त्यक्त्वा भ्रमाकुलाः ।
परोक्षं चापरोक्षं च कृत्वा मूढा भ्रमन्ति वै ॥ ५-१७५ ॥

चराचरमिदं विश्वं परोक्षं यः करोति च ।
अपरोक्षं परं ब्रह्म त्यक्तं तस्मिन् प्रलीयते ॥ ५-१७६ ॥

ज्ञानकारणमज्ञानं यथा नोत्पद्यते भृशम्।
अभ्यासं कुरुते योगी सदा सङ्गविवर्जितम्॥ ५-१७७॥

सर्वेन्द्रियाणि संयम्य विषयेभ्यो विचक्षणः।
विषयेभ्यः सुषुप्त्यैव तिष्ठेत्संगविवर्जितः॥ ५-१७८॥

एवमभ्यसतो नित्यं स्वप्रकाशं प्रकाशते।
श्रोतुं बुद्धिसमर्थार्थं निवर्तन्ते गुरोर्गिरः।
तदभ्यासवशादेकं स्वतो ज्ञानं प्रवर्तते॥ ५-१७९॥

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।
साधनादमलं ज्ञानं स्वयं स्फुरति तद्ध्रुवम्॥ ५-१८०॥

हठं विना राजयोगो राजयोगं विना हठः।
तस्मात्प्रवर्तते योगी हठे सद्गुरुमार्गतः॥ ५-१८१॥

स्थिते देहे जीवति च योगं न श्रियते भृशम्।
इन्द्रियार्थोपभोगेषु स जीवति न संशयः॥ ५-१८२॥

अभ्यासपाकपर्यन्तं मितान्नंस्मरणं भवेत्।

अनाथा साधनं धीमान् कर्तुं पारयतीहन ॥ ५-१८३ ॥

अतीवसाधुसंलापोवदेत् संसदिबुद्धिमान् ।
करोति पिण्डरक्षार्थं बह्वालापविवर्जितः ।
त्यज्यते त्यज्यते सङ्गं सर्वथा त्यज्यते भृशम् ।
अन्यथा न लभेन्मुक्तिं सत्यं सत्यं मयोदितम् ॥ ५-१८४ ॥

गुप्त्यैव क्रियतेऽभ्यासः संगं त्यक्त्वा तदन्तरे ।
व्यवहाराय कर्तव्यो बाह्येसंगानुरागतः ।
स्वे स्वे कर्मणि वर्तंते सर्वे ते कर्मसम्भवाः ।
निमित्तमात्रं करणे न दोषोष्ति कदाचन ॥ ५-१८५ ॥

एवं निश्चित्य सुधिया गृहस्थोपि यदाचरेत् ।
तदा सिद्धिमवाप्नोति नात्र कार्या विचारणा ॥ ५-१८६ ॥

पापपुण्यविनिर्मुक्तः परित्यक्ताङ्गसाधकः ।
यो भवेत्स विमुक्तः स्याद् गृहे तिष्ठन्सदा गृही ।
न पापपुण्यैर्लिप्येत योगयुक्तो सदा गृही ।
कुर्वन्नपि तदा पापान्स्वकार्ये लोकसंग्रहे ॥ ५-१८७ ॥

ॐ ऐँ क्लिँ स्त्रिँ

अधुना संप्रवक्ष्यामि मन्त्रसाधनमुत्तमम्।
ऐहिकामुष्मिकसुखं येन स्यादविरोधतः॥ ५-१८८ ॥

यस्मिन्मन्त्रे वरे ज्ञाते योगसिद्धिर्भवेत्खलु।
योगेन साधकेन्द्रस्य सर्वैश्वर्यसुखप्रदा॥ ५-१८९ ॥

मूलाधारेऽस्ति यत्पद्मं चतुर्दलसमन्वितम्।
तन्मध्ये वाग्भवं बीजं विस्फुरन्तं तडित्प्रभम्॥ ५-१९० ॥

हृदये कामबीजं तु बन्धूककुसुमप्रभम्।
आज्ञारविन्दे शक्त्याख्यं चन्द्रकोटिसमप्रभम्॥
बीजत्रयमिदं गोप्यं भुक्तिमुक्तिफलप्रदम्।
एतन्मन्त्रत्रयं योगी साधयेत्सिद्धिसाधकः॥ ५-१९१ ॥

एतन्मन्त्रं गुरोर्लब्ध्वा न द्रुतं न विलम्बितम्।
अक्षराक्षरसन्धानं निःसन्दिग्धमना जपेत्॥ ५-१९२ ॥

तद्गतश्चैकचित्तश्च शास्त्रोक्तविधिना सुधीः।

देव्यास्तु पुरतो लक्षं हुत्वा लक्षत्रयं जपेत्॥ ५-१९३॥

करवीरप्रसूनन्तु गुडक्षीराज्यसंयुतम्।
कुण्डे योन्याकृते धीमाञ्जपान्ते जुहुयात्सुधीः॥ ५-१९४॥

अनुष्ठाने कृते धीमान्पूर्वसेवा कृता भवेत्।
ततो ददाति कामान्वै देवी त्रिपुरभैरवी॥ ५-१९५॥

गुरुं सन्तोष्य विधिवल्लब्ध्वा मन्त्रवरोत्तमम्।
अनेन विधिना युक्तो मन्दभाग्योऽपि सिद्ध्यति॥ ५-१९६॥

लक्षमेकं जपेद्यस्तु साधको विजितेन्द्रियः।
दर्शनात्तस्य क्षुभ्यन्ते योषितो मदनातुराः॥
पतन्ति साधकस्याग्रे निर्लज्जा भयवर्जिताः॥ ५-१९७॥

जप्तेन चेद्द्विलक्षेण ये यस्मिन्विषये स्थिताः।
आगच्छन्ति यथातीर्थं विमुक्तकुलविग्रहाः॥
ददाति तस्य सर्वस्वं तस्यैव च वशे स्थिताः॥ ५-१९८॥

त्रिभिर्लक्षैस्तथाजप्तैर्मण्डलीकाः समण्डलाः।

वशमायान्ति ते सर्वे नात्र कार्या विचारणा ॥ ५-१९९ ॥

षडभिर्लक्षैर्महीपालं सभृत्यबलवाहनम् ॥ ५-२०० ॥

लक्षैर्द्वादशभिर्जप्तैर्यक्षरक्षोरगेश्वराः ।
वशमायान्ति ते सर्वे आज्ञां कुर्वन्ति नित्यशः ॥ ५-२०१ ॥

त्रिपञ्चलक्षजप्तैस्तु साधकेन्द्रस्य धीमतः ।
सिद्धविद्याधराश्चैव गन्धर्वाप्सरसांगणाः ॥
वशमायान्ति ते सर्वे नात्र कार्या विचारणा ।
हठाच्छ्रवणविज्ञानं सर्वज्ञत्वं प्रजायते ॥ ५-२०२ ॥

तथाष्टादशभिर्लक्षैर्देहेनानेन साधकः ।
उत्तिष्ठेन्मेदिनीं त्यक्त्वा दिव्यदेहस्तु जायते ॥
भ्रमते स्वेच्छया लोके छिद्रां पश्यति मेदिनीम् ॥ ५-२०३ ॥

अष्टाविंशतिभिर्लक्षैर्विद्याधरपतिर्भवेत् ।
साधकस्तु भवेद्धीमान्कामरूपो महाबलः ॥
त्रिंशल्लक्षैस्तथाजप्तैर्ब्रह्मविष्णुसमो भवेत् ।
रुद्रत्वं षष्टिभिर्लक्षैरमरत्वमशीतिभिः ॥

कोटयैकया महायोगी लीयते परमे पदे।

साधकस्तु भवेद्योगी त्रिलोक्ये सोऽतिदुर्लभः॥ ५-२०४॥

त्रिपुरे त्रिपुरन्त्वेकं शिवं परमकारणम्।

अक्षयं तत्पदं शन्तमप्रमेयमनामयम्॥

लभतेऽसौ न सन्देहो धीमान्सर्वमभीप्सितम्॥ ५-२०५॥

शिवविद्या महाविद्या गुप्ता चाग्रे महेश्वरी।

मद्भाषितमिदं शास्त्रंगोपनीयमतो बुधैः॥ ५-२०६॥

हठविद्या परंगोप्या योगिना सिद्धिमिच्छता।

भवेद्वीर्यवती गुप्ता निर्वीर्या च प्रकाशिता॥ ५-२०७॥

य इदं पठते नित्यमाद्योपान्तं विचक्षणः।

योगसिद्धिर्भवेत्तस्य क्रमेणैव न संशयः॥

समोक्ष लभते धीमान्य इदं नित्यमर्चयेत्॥ ५-२०८॥

मोक्षार्थिभ्यश्च सर्वेभ्यः साधुभ्यः श्रावयेदपि।

क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथम्भवेत्॥ ५-२०९॥

तस्मात्क्रियाविधानेन कर्तव्या योगिपुंगवैः ।

यदृच्छालाभसन्तुष्टः सन्त्यक्त्वान्तरसंज्ञकः ॥

गृहस्थश्चाप्यनासक्तः स मुक्तो योगसाधनात् ॥ ५-२१० ॥

गृहस्थानां भवेत्सिद्धिरीश्वराणां जपेन वै ।

योगक्रियाभियुक्तानां तस्मात्संयतते गृही ॥ ५-२११ ॥

गेहे स्थित्वा पुत्रदारादिपूर्णः

सङ्गं त्यक्त्वा चान्तरे योगमार्गे ।

सिद्धेश्चिह्नं वीक्ष्य पश्चाद् गृहस्थः

क्रीडेत्सो वै मम्मतं साधयित्वा ॥ ५-२१२ ॥

इति श्रीशिवसंहितायां हरगौरीसंवादे योगशास्त्रे

पंचमः पटलः समाप्तः ॥ ५ ॥ शुभम् ॥

X title: svapak.sa d.r.s.taantasa"ngraha.h
X
X copied from ifp/efeo transcript no. T00317 pages 968 - 1118
X
X data entered by the staff of muktabodha under the
X supervision of mark s. g. dyczkowski
X
X see on-line catalogue record for bibliographic details
X
XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX

शिवज्ञानसिद्धि स्वपक्ष दृष्टान्त सङ्ग्रहः ॥

अभीप्सितार्थसिध्यर्थं पूजितोयस्सुरैरपि ।

सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

वन्दे कुन्देन्दुधवलं दन्तभिन्नान्तरायकम् ।

दानधारापतत्भृङ्ग सङ्गीतं कुञ्जराननम् ॥

श्रीमदभ्र सभामध्ये नित्यमानन्द ताण्डवम् ।

कुर्वाणमुमया सार्धं सेव्यमानं शिवंभजे ॥

कैलासद्वार पार्श्वस्थं ब्रह्मविष्णवादि वन्दितम् ।
श्रीनन्दिकेशरं वन्दे सुयशावल्लभं प्रभुम् ॥

सत्यज्ञानिनमाचार्यं सम्यक् बोधप्रकाशकम् ।
तच्छिष्य अरुणन्द्याख्य अकरोच्छाशास्त्र मानमत् ॥

परपक्षावबोधाख्यं शतत्रयमकारयत् ।
उपोत्घाते पञ्चवृत्तं प्रमाणे तु चतुर्दश ॥

p. 969)

आद्ये सप्तति वृत्तानि द्वितीये नवतिश्च षट् ।
तृतीयेपि च चत्वारि चत्वारिंशच्चतुर्थके ॥

पञ्चमे नवकं पश्चात्तत्संख्या षष्ठसूत्रके ।
सप्तमे तु चतुष्कोनश्चत्वारिंशत्तथाष्टमे ॥

नवमे द्वादश प्रोक्तं दशमे षट्प्रकीर्तितम् ।
एकादशे द्वादशं च द्वादशे सप्तकं स्मृतम् ॥

स्वपक्षन्तु ततः पश्चात् सप्तविंशच्छ्शत त्रयम् ।
एवं पक्षद्वयोपेतं सप्तविंशति षट्छ्शतः ॥

श्रीमत्तिल्लवने पुण्ये गुहामठमुपासयन्।
निगमज्ञान नाम्ना तु प्रख्यातो भून्महीतले ॥

तन्नामधारितशिष्यस्संप्रदाय प्रवर्त्तकः।
इत्थं व्यवहितं शास्त्रं मवलोक्य यथामति ॥

तत्प्रामाणिक सिध्यर्थं मूलशास्त्र प्रसिद्धये।
उद्धृत्यागम शास्त्राणि चाकरोछ्शास्त्रमुत्तमम् ॥

स्वायम्भुवे -

वचनेनापि तुष्टि स्यादुत्तमस्याधिकारिणः
दृष्टान्ते नैव तुष्टि स्यान्मध्यमस्याधिकारिणः
येन केनापि तुष्टि स्यादधमस्याधिकारिणः।

अजिते -

लोकायतोथ बौद्धं चाथार्हं मीमांसमेव च।
मायावादं पाञ्चरात्रं षडेते समया बहिः

भीमसंहितायाम् -

p. 970)

गोष्ठिवत्समयं भेद क्षीरवच्छिवमुच्यते ।

शिवं सर्वगतं शान्तं भजेन्नित्यं शिवाश्रतः ॥

अजिते -

आदिमध्यान्त निर्मुक्त स्वभावविमलः प्रभुः ।

सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयश्शिवागमैः ॥

चिन्त्यविश्वे -

पूर्वोक्त दीक्षया युक्तं शिष्यं विज्ञान दीक्षया ।

दीक्षयेत् कृपया पूर्णो गुरुस्सन्मार्गदायकः ॥

मनोव्यापारमात्रेण या दीक्षा विद्यते क्रमात् ।

सा दीक्षा ज्ञान दीक्षा च विज्ञानाख्या स वै भवेत् ॥

* * * * * प्रदेशे * * वोस्थाने शिरस्थाने विशेषतः ।

श्री पादौ शिरसा धृत्वा स्वात्मज्ञान * * बोधयेत् ॥

शिवधर्म्मोत्तरे -

संस्कृतैः प्राकृतैर्वाक्यैर्यश्शिष्यमनुरूपतः ।

* * * * * * * * * * * * * * * * ।

* * * * * * * * * * * * * * * * ॥

ये चान्यासक्त हृदया यजन्तीशं प्रसङ्गतः ॥

तेषामिष्टन्ददातीश स्थानं भावानुरूपतः ।

p. 971)

तथा चोक्तमाचार्यैं -

ये चात्र शुद्ध भुवनोद्भव भोगकामा

स्त्वामर्चयन्ति * * * * * * * * * * ।

* * * * * * * * * * * * * केभ्यो

भोगन्ददासि तदनन्तरमेव मोक्षम् ॥

रत्नत्रये । वायव्य संहितायां च ।

यतो वाचो निवर्तन्ते न प्राप्यमनसा सह ।

आनन्दं यस्य वैशद्यन्नबिभेति कुतश्चन ॥

स्कान्दे -

ब्रह्माच्युतादिभिर्देवैः वेदैरपि वितर्क्कितम् ।

च्छन्दो रूपं शठात्मानश्शक्तास्तोतुं कथम् प्रभुम् ॥

पौष्करे -

अधुना श्रोतुमिच्छामः प्रमाणानि कृपानिधे ।
उत्तरम् ॥ श्रुणुध्वमथमानानि श्रोतुं कौतूहलं यदि ॥

सिद्धतन्त्रे -

त्रिपदार्थ प्रमाणाय प्रमाणानि दशोच्यते ।
प्रत्यक्षं प्रथमं प्रोक्तन्द्वितीयमनुमानकम् ॥

तृतीयं शब्दमित्युक्तम भावन्तु चतुर्थकम् ।
अर्थापत्तिः पञ्चमन्तु समानं षष्ठमेव च ॥

p. 972)

ऐतीहं नवमं प्रोक्तं दशमन्तु स्वभावकम् ।
दर्शनेप्यनुमाने च शास्त्रेन्तर्भूयते दश ॥

(चका) सिद्धतन्त्रे -

विकल्प भेदसन्देहं विना ज्ञेयं सुदर्शनम् ।
वस्तुतो विद्यमानार्था विनाभावाख्य हेतुना ॥

अनुमानं च शास्त्राख्यमनुमेयं च साधयेत् ।

सुप्रभेदे -

अक्षादिकरणैर्दृश्यं प्रत्यक्षन्तदिहोच्यते ।
लिङ्गेन लिङ्गि विज्ञानमनुमानमिति स्मृतम् ॥

आप्तोक्ति वचनैर्गम्यं शब्दमेतदुदाहृतम् ।

पौष्करे -

द्व्यालम्बा संशया बुद्धिस्समानाकार दर्शनात् ।
विपर्ययोन्यथा ज्ञानमतद्रूपं प्रतिष्ठितम् ॥

अक्षादि करणैर्दृश्यं प्रत्यक्षं द्विविधं च तत् ।
वस्तु स्वरूपमात्रस्य ग्रहणन्निर्विकल्पकम् ॥

नामजात्यादि सम्बन्धसहितं सविकल्पकम् ।

तथा सिद्धतन्त्रे -

सिद्धार्थान्वयमन्वेति सन्देहं पूर्वमुच्यते ।
सुतरार्थं स एवेति भेदो विद्यवसीयते ॥

p. 973)

नाम जाति गुणंकर्म्म चार्थपञ्च विकल्पते।
पदार्थाभावभूतं च निर्विकल्पं स मौनवत्॥

सिद्धतन्त्रे -

एवं पञ्च प्रकारेण चोङ्कारोद्धृतिरुच्यते।

अन्यत्र।

स्वर्गे देशात्म बोधश्च समुद्रे च तरङ्गवत् ॥

p. 1043)

अकारं ब्रह्मदैवत्यं उकारं विष्णुदैवतम् ।
मकारं रुद्रदैवत्यं बिन्दुरीश्वर एव च ॥

नादस्सदाशिवः प्रोक्त इत्येता अधिदेवताः ।

मकुटे -

इडा च पिङ्गला चैव वीणादण्डस्य पार्श्वयोः ।
सुषुम्ना मध्यगा तत्र तन्मध्ये सुषिरन्तथा ॥

जीवः प्राण समायुक्तस्तन्मध्ये सह सञ्चरन् ।
संयुक्तो योगमाख्यातं योगी योगं समाश्रयेत् ॥

सिद्धतन्त्रे -

अनेकार्थ पदार्थाख्यास्समूहो वात्मचेच्छृणु ।
पश्येत् भोक्तन्तथा ज्ञेयन्तथा पश्येद्यथार्थतः ॥

तद्दृष्टौ कोस्मिलोकेयज्ञात्र ज्ञेयस्य भिन्नवत् ।

तच्चैतन्यगतं ज्ञानमात्म उष्णमिवानले ।
अनेके नैक भावश्च गुणश्च गुणदृष्टयेत् ॥

मनादि तत्वजालानि करणं किकणन्तथा ।
मनादि तत्गुणायुक्तम् वेद्यामातत्स्वयं गते ।

p. 1044)

उत्तरम् ।

यदा ज्ञानक्रिया चैव आत्मनश्च न सम्युतम् ।
देहेथवा विवाद स्यात् सान्निध्येस्ति तथा न चेत् ॥

तदुक्तं सन्निधीभावो शवसुतौ क्व गच्छति ।
करणं रहितं चेत्तु सन्निधित्वं च गर्हितम् ॥

सान्निध्यमयस्कान्दमिवा ख्यातन्तत्कथं भवेत् ।
आकर्षणन्तत्स्वभावं हि आत्मनस्तदुदाहृतम् ॥

देह व्यापारमित्युक्तमात्मनैवेह विद्यते ।
रूपं च दृष्टवद्देहे अनित्यं भौतिकं भवेत् ॥

आत्मरूपं सुसूक्ष्मञ्चेदष्टं स्थूलकारणम् ।
अचेतनन्ततस्सूक्ष्मं सूक्ष्मरूपमनित्यता ॥

रूपारूपञ्चेदात्मा तदा च व्युत्क्रमोद्भवः
विभागवनैक एवं स्यात् काष्ठादग्निवदेव चेत् ॥

सर्वमात्मनि दृशं रूपं तस्य सत्वं लयंञ्चगम् ।

p. 1045)

चन्द्ररूपमिवाख्यं चेत् प्रत्यक्षं शिवरूपवत् ।
एतद्देहे सरूपिस्याज्जडाख्यं भौतिकं भवेत् ॥

आकाशमिवा रूपस्त्व विकारी चेतनस्तथा ।
देहबन्धश्चलनत्वात् गच्छगच्छान्त तत्भवेत् ॥

अचिदात्मान चिच्चापि चिदचिच्च कदाचन ।
समवाय विधा स्थित्यामचिन्त्यो न चिदचिद्य हि ॥

विद्यते क्रमचित् चित्या मतो तस्य सदन्नहि ।

आत्माणुराख्यद्देहेन बन्धोश्चमगुरुद्धृतम् ।
हरापि वहनोगश्चो * * विन? ततो लभेत् ॥

आत्मादेहैक देशस्थो लयेदेकेन चेत्तथा ।
दीपप्रकाशवत्ज्ञेयं चेदेकस्थमुदाहृतम् ॥

दीपं स्पर्शाद्देहेदेहमात्र स्पर्शोत्सतत्तथा ।
यदि सर्वं च युगपद्यद्यदेव हि ॥

च्छेद्यश्चेद्देह पूर्णस्थो तदानीं दृक्कथं भवेत् ।

p. 1046)

इन्द्रियैस्सह विज्ञानं युगपत्स्यात्तदा मुने ।
देहमात्रे हि बोधोपि देहान्ते लीयते सकृत् ।

सर्वत्रावस्थिति व्याप्तिर्यद्यवस्था गता गता ।
कीर्तिता कथितं ज्ञेयं प्रत्येकञ्च तदिन्द्रियैः ॥
देहप्रपञ्च संहारे किं स्थितात्मा तदा वदेत् ।

स्वायम्भुवे -

यद्यशुद्धिर्न्नपुंसोस्ति सक्तिर्भोगेषु किङ्कृता ।
शुद्धे सिनतत् भोगो जाघरीति विपश्चितः ॥

मृगेन्द्रे -

चैतन्यन्दृक्क्रिया रूपन्तदस्त्यात्मनि सर्वदा।
सर्वतश्च यतो मुक्तौ श्रूयते सर्वतोमुखम्॥

तदप्य भासमानत्वात्तन्निरुद्धं प्रतीयते।
वैश्योनावृत वीर्यस्य सो त एवाविमोक्षणात्॥

पाशाभावे पारतन्त्र्यं वक्तव्यं किन्निबन्धनम्।
स्वाभाविकश्चेन्मुक्तेषु मुक्तशब्दो निवर्त्तते॥

पराख्ये -

अचेतनममूर्तं यत् तत्कथन्नयते परः।

p. 1047)

तत्फलं भिन्नदेशस्थं विभुत्वन्त्वनुशोभितम्।

अन्यत्र -

व्यञ्जना यत्र यत्र स्युश्शरीरन्तत्र तत्र तु।
भोगार्थं स्यात् गुणव्यक्ति व्यापित्वन्तेन गम्यते॥

मतङ्गे -

निरुद्धशक्तयस्सर्वे शिवार्क्क करचोदिताः।
विकसत्यणु पत्मास्तु मायासरसि विस्तृते॥

पौष्करे -

पशुः पशुत्वसंरुद्ध दृक्क्रिया प्रसरस्तदा।

सिद्धतन्त्रे -

आत्मामायोदरान्तत्थो कलादीनां स्वभावतः।
चैतन्यं चय एतत्झे एकादशेयुते कृतिः॥

गुणत्रयादि सम्बन्धात् भोगेष्वपि च भुज्यते।

सिद्धतन्त्रे -

सूक्ष्मदेहे पशुस्थित्वा तत स्थूलं स्वरूपयुक्।
जाग्रदादि पञ्चावस्था कर्म्मणा भोगभुक्तिस्थतः॥

कालोत्तरे -

पुर्यष्टक समायोगादूर्ध्वाधस्संप्रयच्छति।

p. 1048)

चिन्त्ये

अन्नप्राणमनोज्ञानमानन्दमय पञ्चकम्।
अन्नमादिमयन्देवि अन्योन्यं सूक्ष्मरूपकम्॥

आत्मयुक्तेन्न रूपस्य मायोपादान कारणम्।
अन्तर्बहिस्थितस्तेषु अरूपः पञ्चकोशवत्॥

तदुक्तं सर्वसिद्धान्तसङ्ग्रहे -

आत्मत्वेन भ्रमन्त्यत्र वादिनः कोशकेश्वके।
अन्नप्राणन्मनोज्ञान मायाकोशस्तथात्मनः॥

आनन्दमयकोशश्च पञ्चकोशा उदीरिताः।
मनोविकारे विहित इत्यानन्दमयो विदुः॥

गृह्णात्यन्नमयात्मानन्देहालोकयतः खलु।
देहः परिणमितं प्राणमप्यार्हता विदुः॥

विज्ञानमयमात्मानं बौद्धा गृह्णन्ति नापरम्।
आनन्दमयमात्मानं वैदिकाः केचिदूचिरे॥

अहङ्कारात्म वादी तु प्राहुः प्रायोमनोमयाः ।

कर्म्मकृद्रूपनृत्तं च रूपनृत्तं च वृक्षवत् ।
रथैवाप्य नतः कश्चिन्नाटयस्य बहुरूपवत् ॥

p. 1049)

तक्ष आत्मैव इत्याहुस्तथा देहेन्द्रियाणि च ।

तथा स्कान्दपुराणे -

चर्माक्षिप्तानि रूपाणि शैलूषो निपुणो यथा ।
सूत्रग्रन्थित यन्त्राणि प्रनर्त्तयति लीलया ॥

चिन्त्ये -

देहेन्द्रिय प्रकरणं विद्यातेत्तपि विस्तृता ।
* * * * * * * * * * * * * * * * ॥

अन्यथा दृश्यते तेन तथा देहेन्द्रियाणि च ।

उत्तरम् ।

तथा तेन च देहात्मा नखकेशादिवर्जितः ।

धारयन्वस्त्राभरणं न स्वयं कश्चिद्विचारयेत्।
ते ततो वर्ज्यते दृश्यन्देहान्यात्मा तथापि च ॥

चिन्त्ये -

भिन्न देहात्म देवेश विद्यार्च्चनदृढः कथम्।
सा च वन्नव दीक्षायै विधिपूर्वक पूर्वकम्॥

पूर्वकम्र्मक्षयः कर्त्ता चरणं सर्वदेहिनाम्।

मनसाख्यं क्वचिद्बुद्धिर्बुध्या ख्यातं क्वचिन्मनः।
चित्ताख्यं क्वचिज्जीवो जिवाख्यं चित्तकं क्वचित्॥

p. 1050)

क्वचिदात्मा शिवाख्यातः आत्माख्यातः क्वचिच्छिवः।
सर्वेषामप्रबुद्धाख्यामितरे ह्यात्म भावतः॥

चिन्त्ये -

देहचित्तञ्च विद्यार्थमात्मेत्यात्मावृतः कथम्।
महा प्रकाश दीपाख्यमावास स्थानमेव च ॥

अभिन्नं विद्यते चात्मा * * * * * * * न्नता।

चिन्त्यवचनम्।

भुक्तोत्साहन्ततस्सुप्तौ दृष्टस्तत्र जाग्रता।
बोध्यते बोधतश्चात्मा देहान्यस्सर्वतश्चवित्॥

सैव बोधविदज्ञोपि दीयते चेन्द्रियादिकम्।
जायते मलरुद्धे आत्मा बोधेन्द्रियाणियुक्॥

दृतेन समवस्थोपि ददतोमात्य राजवत्।

ग्राम प्रदक्षिणोराजा क्रमेणान्तर्गतो यतः।
आत्मा सहेन्द्रियव्यापी पञ्चावस्थां गतस्ततः॥

तथा शिवज्ञानबोधे -

अवस्था पञ्चकन्तस्य मलरुद्धस्वदृक्क्रिया।

p. 1051)

चिन्त्ये -

मुखे जाग्रदिति ज्ञेयं स्वप्नन्तु हृदयान्तकम्।

हृदयादि समारभ्य नाभ्यन्तन्तु सुषुप्तिकम्॥

तस्मादधसताात्तुर्यन्तु तुर्यातीतन्तु लिङ्गकम्।
पञ्चत्रिंशत्पञ्चविंशत्त्रिद्व्येक इति तत्वयुक्॥

जाग्रादि स्थानमेवं हि प्रवत्तकमिहोच्यते।
श्रोत्रत्वङ्नेत्र जिह्वा च घ्राणश्चैव तु पञ्चकम्॥

शब्दस्पर्शौ रूपरसौ गन्धश्चैव तु पञ्चकम्।
वाक्पाणि पादपायुश्चोपस्थश्चैव तु पञ्चकम्॥

वचनादान गमनविसर्गानन्द पञ्चकम्।
प्राणोपानस्तथा व्यानोदानश्चैव समानकः॥

नागकुम्र्मौ कूकरो देवदत्तो धनञ्जयः।
मनोबुद्धिरहङ्कारचित्तज्ञानानि पञ्च च॥

पञ्चत्रिंशतिवर्त्तन्ते जाग्रैतानि विनिर्द्दिशेत्।
शब्दादि वचनादिश्च प्राणादि मन आदिकम्॥

एते चरन्ति वै स्वप्ने मायारूपेणजाग्रतः।
जाग्रे विषय भोगं स्यात् प्रतिभास्वप्न एव च॥

अयसाग्निसमायोगात् वियोगाग्निवदायसः ।

p. 1052)

प्राणयुक्तो मनश्चैव क्षेत्रज्ञश्च सुषुप्तिके ।
आत्मामुखे भ्रुवोर्म्मध्ये स्थितो जाग्रत्प्रकीर्तितः ॥

तथा चिन्त्यविश्वे -

अवस्थेयं पुमान्ज्ञेयो ललाटे करणादिभिः ।
ऊर्ध्वाधोवर्त्तते जीवो जाग्रादिकरणैस्सह ॥

लूतिकं वलये लूतो यथा भ्रमति नित्यशः ।
जाग्रत् स्वप्नसुषुप्तिस्तु तुर्यञ्च तदीतकम् ॥

अवस्था पञ्च विज्ञेया सदाचार्योपदेशतः ।
षट्त्रिंशत्तत्व संख्याभिर्ज्जाग्रत्काले विभावयेत् ॥

श्रोत्रादि स्थानके तस्मिन् शब्दादि ज्ञान संस्मरेत् ।
वागादौ वचनादींश्च भावयेन्नन्दिकेश्वर ॥

विंशतिश्च विसृज्याथ मनादींश्च विमर्शयेत् ।

मनोबुद्धिरहङ्कारान्विसृजेत्तत्रदेशके ॥

रागमाया कलाश्चापि विसृजेत्तच्चतुर्यके ।
विद्यादिशुद्धकालान्तं विसृजेत्तत्तृतीतके ॥

तुर्यातीतं परन्तत्वं मानसानां लयं भवेत् ।
मनसो लयतश्चैव परांमुक्तिं समश्नुते ॥

चिन्त्य विश्वे -

जाग्रादि द्विविधं ज्ञेयं भवमोक्षगतन्तु यत् ।

p. 1053)

स्थाणु स्थाने महामोक्षं भवमार्गमधोच्यते ।
स्थूलं सूक्ष्मं सुसूक्ष्मं च अतिसूक्ष्मन्तथाधिकम् ॥

स्थूलं जाग्रदिति ज्ञेया सूक्ष्मं स्वप्नमिहोच्यते ।
सुषुप्तिस्तु सुसूक्ष्मं स्यात् अतिसूक्ष्मन्तुरीयकम् ॥

ततोधिकं तुर्यातीतमेवं पञ्चविधं स्मृतम् ।
जाग्रत्स्थाने प्रदृश्येत योगाभ्यासवतः क्रमात् ॥

जाग्रभूर्विप्रवृत्तिश्च प्रत्याहारेण शाम्यति।
धारणेन त्यजेत् स्वप्नन्ध्यानेनैव सुषुप्तिकम्॥

समाधिनाजयेत्तुर्यं तुर्यातीतं शिवेन तु।
शिवेन दृश्यते सर्वं जाग्रदित्यभिधीयते॥

जाग्रादि पञ्चावस्थायां जाग्रत्स्थाने प्रदर्शयेत्।
सद्गुरोरूपदेशेन प्रासादे नैव सिध्यति॥

अभ्यास ज्ञानयोगेन भक्तिमार्गेण भावयेत्।

एवं वातुले -

ज्ञानातीतं परं शुद्धं सर्वगं सर्वतोमुखम्।
भावं शिवं च सम्भाव्य स्वस्मिन्नेवं विभावयेत्॥

एवं ध्यात्वा महायोगी अखण्डित महोदयम्।

केवलसकलशुद्धम्। स्वायम्भुवे -

अथात्मा विमलोबद्धः पुनर्म्मुक्तश्च दीक्षया।

p. 1054)

विज्ञेयस्स त्रिधावस्थः केवलस्सकलोमलः ॥

तत्रैव ।

अचेतनो विभुर्न्नित्योगुणहीनो क्रियः प्रभुः ।
व्याघात भागशक्तश्च शोध्यो बोद्धः खलः पशुः ॥

तथा किरणे -

पशुर्न्नित्यो सुमूर्तज्ञो निष्क्रियो निर्गुणो प्रभुः ।

स्वायम्भुवे -

कलोद्वलित चैतन्यो विद्यादर्शित गोचरः ।
रागेण रञ्जितश्चापि बुद्ध्यादिकरणैर्युतः ॥

मायाद्यवनि पर्यन्त तत्व भूतात्मवर्त्मनि ।
भुङ्क्ते तत्र स्थितान्भोगान् भोगैकरसिकः पुमान् ॥

संसारी विषयी भोक्ताक्षेत्री क्षेत्रज्ञ एव च ।
शरीरे चेति बद्धात्मा सकलश्चोच्यते बुधैः ॥

सुप्रभेदे -

अशीतिश्च चतुश्चैव शत साहस्र भेदकैः ।
संप्राप्य योनिभेदस्तु जीवनाम्ना तु तत्र च ॥

प्रोक्ता च सकलावस्था जीवाख्यानान्ततश्शृणु ।

समे कर्म्मणि सञ्जाते कालान्तरवशात्ततः ।

p. 1055)

तीव्रशक्ति निपातेन गुरुणा दीक्षितो यदा ।
सर्वज्ञस्सशिवो यद्वत् किंचिज्ञत्व विवर्जितः ॥

शिवत्व व्यक्तिसम्पूर्णस्स री न पुनस्तदा ।

सुप्रभेदे -

शुद्धावस्था इयं प्रोक्ता सर्वज्ञत्वादिभिर्गुणैः ।
शुद्धावस्थानमात्मानं शिवरूपमिति स्मरेत् ॥

त्रयोवस्थाश्चयो ज्ञात्वा पुनर्ज्जन्म न विद्यते ।

इति चतुर्थसूत्रं सम्पूर्णम् ॥

पञ्चमसूत्रम् ॥

शिवज्ञानबोधे -

विदन्त्यक्षाणि पुंसार्थान्न स्वयं सोपि शम्भुना ।

चिन्त्ये -

शिवो बोध्यादि सर्वस्य ज्ञानाप्रख्याधिकं च किम् ।

उत्तरम् ।

अर्कस्य सन्निधौ पद्म वक्रवत्कर्म्मणस्तथा ॥

तथा मतङ्गे -

निरुद्धशक्तयस्सर्वे शिवार्ककरचोदिताः ।
विकसन्त्यणुपत्मास्तु मायासरसि विस्तृते ॥

p. 1056)

शिवधर्म्मोत्तरे -

न करोति यतस्सर्वं स्वभोगाद्यं करोति च ।
अस्वतन्त्र्यादकर्त्ता यः किंचित्कर्त्ताणुरन्धवत् ॥

न वेत्ति तत्वतस्सर्वं तेनाज्ञः पुरुषः पशुः ।
सिद्धाध्यवसितं किंचित् ज्ञानात् किंचिज्ञ उच्यते ॥

तथा पौष्करे -

अज्ञो जन्तुरनीशोयं मात्मा यस्माद्विजर्षभाः ।
सोपि सापेक्ष एव स्यात् स्वप्रवृत्तौ घटादिवत् ॥

तथा निश्वासे -

किंचिज्ञस्सर्वतोप्यात्मा ततो बोध्यावबोधकः ।

किरणे -

तस्यशुद्धस्य संबन्धं समायाति शिवात्कला ।
तयोर्वेल्लित चैतन्यो विद्यादर्शितगोचरः ॥

रागेण रञ्जितश्चापि प्रधानेन गुणात्मना ।
बुद्ध्वादिकरणानेक सम्बन्धात् बध्यते पशुः ॥

ततो नियति संश्लेषात् स्वार्जिते विनियम्यते ।
कालेनकाल संख्या न कार्यभोग विमोहितः ॥

एवं तत्वकलाबन्धः किंचिज्ञो देहसंयुतः।
मायाभोगपरिष्षक्तस्तन्मयस्सहजावृतः॥

p. 1057)

ततस्सुखादिकं कृत्स्नं भोगं भुङ्क्ते स्वकर्म्मतः।

निश्वासे -

सर्वज्ञस्सर्वगस्तस्मादात्मानं बोधयेच्छिवः।
चराचराख्य जन्तूनां प्राणरूप इति स्मृतः॥

सिद्धतन्त्रे -

चिद्रूपे जडसम्बन्ध जनानां वस्तु वस्तुनि।
देवेषु चात्मनामेव सन्निधौ बोधजं वदेत्॥

सिद्धतन्त्रे -

सर्वलोकाश्च योनिश्च शिवस्याङ्गश्च विग्रहम्।
अन्तःकरण चैतन्यं विदितं कृत्यपञ्चकम्॥

तथा स्कान्दे -

पञ्चक्टच * * * * * * स्य विमायिनः।
इदमेव परन्दिव्यं ताण्डवं परिकीर्तितम्॥

पौष्करे -

कर्म्मणार्थस्य संवित्तिः पूर्वमालोचनात्मिका।
सन्देह रूपिणी पश्चादभिमानात्मिका ततः॥

व्यवसायात्मकी पश्चात्क्रमेणैव व्यवस्थिताः।

चिन्त्यविश्वसादाख्ये -

p. 1058)

सर्वात्मनां च जननं मरणं च तथैव च।
कारुण्यात् क्लेशमालोक्य तेषां शम्भुः पुनस्तथा॥

कर्म्मणां पाचनार्थाय सृष्टिन्निर्म्माय पूर्ववत्।
दुःखानि भोगमखिलं भोजयेन्नन्दिकेश्वर॥

मलेन परिपाके तु पक्वानां परमेश्वरः।
आचार्य मूर्तिमास्थाय दीक्षया नियतन्ददेत्॥

निश्वासे -

एकैव वस्तुतश्शैवी वा शक्तिन्निर्मला परा।
अ ना भाविना शम्भोश्शुचेष्णमिव प्रभा॥

तथात्म शिवयोस्सन्धिश्शिवबोधपरंपरा।

तथा वातुलोत्तरे -

न शिवेन * * * * * * * क्तिरहितश्शिवः।
गमवत्यन्धकारं * शिवश्शक्त्यार्कषत्गुह॥

इति पञ्चमं सूत्रं सम्पूर्णम्॥

षष्ठमसूत्रम्॥

शिवज्ञानबोधे

अदृश्यं चेदसत्भावो दृश्यञ्चेज्जडिमा भवेत्।
शम्भोस्तद्व्यतिरेकेण रूपं ज्ञेयं विदुर्बुधाः॥

p. 1059)

तथा वातुलोत्तरे -

ज्ञेयोज्ञेयोथवा सोमेत्यज्ञेयोचित सत्भवः।

अङ्गे नैव चातो वा द्वयं सन्मयत स्थितः ॥

वातुलोत्तरे -

सृष्टि स्थिति विनाशोपि चतुर्विधे कार्यदर्शने ।
आत्मज्ञानेन दृश्येत् जडस्याज्जडतोगुह ॥

वातुलोत्तरे -

लोकत्रयभावोपि ब्रह्मविष्णोः परास्पदम् ।
मरीचिका स्वप्नवत् ज्ञेयमसत्यन्निष्प्रयोजनम् ॥

निमिषाल्लयते चापि क्षुद्रस्यापि स्वभाववत् ।

स्वच्छन्दे -

मायाद्यवनि पर्यन्तमिन्द्र जालन्तु बुद्धितः ।
अदृश्येत् पदार्थश्चेन्न च तन्निष्प्रयोजनम् ।

उत्तरम् ।

पूर्वन्तदृश्यते ज्ञानं किन्तु लाभन्तथापि च ॥

आत्मज्ञानेन सदसदिदमुक्तेन निष्फलम् ।
वाङ्मनोतीततत्वं हि शिवभावमिति स्मृतम् ॥

p. 1060)

प्रयोजनं किमस्ति स्यात्तथापि परमेश्वरः ।

उत्तरम् ।

सद्भोगं वाङ्मनोतीतं स्वयमेवानुभूतिमत् ॥

तदेव शिवभोगं च तदेव परमं सुखम् ।

सर्वज्ञानोत्तरे -

सर्वभावं परित्यज्य अभावं भावयेत् सदा ।

तथा निश्वासे -

अभावे भावमालम्ब्य भावं कृत्वा निराश्रयम् ।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥

अभावे भावमाश्रित्य भावलीनोप्यशङ्कितः ।
विभुरिति समन्तव्यो नात्र कार्या विचारणा ॥

अभावस्य कुतो भावो निष्कलस्य महात्मनः ।
अमनो अव्यवस्थानन्निर्वाणन्तस्य तत्पदम् ॥

सर्वज्ञानोत्तरे -

अद्वैत भावनायुक्तस्सर्वदात्मनि संस्थितः ।
सर्वगं सर्वदेहस्थं प्रपश्येन्नात्र संशयः ॥

पौष्करे -

न मोक्षं याति पुरुष स्वसामर्थ्यात् कदाचन ।
मुक्त्वा प्रसादन्देवस्य शिवस्या शिवहारिणः ॥

अन्यत्र ।

p. 1061)

ज्ञान दृष्ट्या परोगद्यो रूपशरश्शिवः ।

सर्वज्ञानोत्तरे -

येन विज्ञायते सर्वं यत्ज्ञात्वा तु शिवो भवेत् ।

इति षष्ठसूत्रं सम्पूर्णम् ॥

सप्तमसूत्रम् ॥

शिवज्ञानबोधे -

नाचिच्चित्सन्निधौ किन्तु न चित्तस्मादुभे मितः ।
प्रपञ्च शिवयोर्वेत्ता यस्स आत्मातयोः पृथक् ॥

शिवं प्रपञ्च सदसत्ज्ञेयमात्म द्वयन्नपि ।
आत्मालाभार्थतः पश्येत्तनौजं गन्धपुष्पवत् ॥

आत्मनस्सर्वदोषं च परमात्मनि तन्नयुक् ।
यद्यपि त्रिपदार्थं च लवणां भोधिवत्स्थितम् ।

किरणे -

अनादिमलसम्बन्धात् किञ्चिज्ञोणुर्म्मयोदितः ।
अनादिमलमुक्तत्वात् सर्वज्ञो सौ ततश्शिवः ॥

वायव्ये -

यथा नादि प्रवृत्तोयं घोर संसारसागरात् ।

p. 1062)

शिवोपि हि तथा नादिस्संसारान्मोचक स्मृतः ।

सप्तमसूत्रम् सम्पूर्णम् ॥

अष्टमसूत्रम् ॥

शिवज्ञानबोधे ।

स्थित्वा सहेन्द्रिय व्याधैस्त्वान्न ।

वेत्सीति बोधितः ।

मुक्त्वैतान् गुरुणानन्यो
धन्यः प्राप्नोति तत्पदम् ॥

सुप्रभेदे

ब्राह्मणाः क्षत्रिया वैश्याश्शूद्राश्शुद्ध कुलोद्भवाः ।
आचार्यास्तेषु विज्ञेया नान्येषान्तु कदाचन ॥

शिवधर्म्मोत्तरे -

संसारपङ्कनिर्म्मग्नं यस्समुद्धरते नरम्।
शिवज्ञानेन हस्तेन कस्तेन सदृशः पिता॥

चिन्त्य विश्वे -

अनुग्राह्य स्त्रियश्शास्त्रे विज्ञानप्रलयाकलौ।
तृतीयस्सकलश्चैव आद्योपि मलमात्रकः॥

मलकर्म्म समायुक्तः प्रलयाकल एव च।
मलमाया कर्म्मयुतस्सकलस्सोभिधीयते॥

साधारोथ निराधारस्साधारस्सकलस्य तु।

p. 1063)

निराधाराह्वयान्येषामेव दीक्षा मयोदिता।
आचार्य निरपेक्षेण तीव्रशक्त्या तु शम्भुना॥

या क्रिया क्रियते सा तु निराधारेति कीर्तिता।
गुरुमूर्तिं समास्थाय मन्दतीव्रादि भेदया॥

शक्त्या शम्भुश्च कुरुते सा दीक्षा साधिकारिणी।

वरुण पद्धत्याम् -

शिवस्यानुग्रहो दीक्षा जायते कृतकर्म्मणाम् ॥

साचानेकविधा प्रोक्ता तत्प्रपञ्चोयमुच्यते ।
चाक्षुषी स्पर्शदीक्षा च वाचकी मानसी तथा ॥

शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकधा ।
रजः कुण्डवती हौत्री साद्विभेदा किलोदिता ॥

आद्या ज्ञानवती प्रोक्ता क्रियावत्य परा स्मृता ।
विनेज्यानलकर्म्मादि मनोव्यापारमात्रतः ॥

दीक्षा ज्ञानवती प्रोक्ता सम्यक् तत्त्वावबोधजा ।
इज्यानलवती या तु क्रियाकौशल सम्भवा ॥

क्रियवत्यय सा वेका निर्बीजा च स बीजका ।

कालोत्तरे -

बालादीनां तु निर्बीजा समयाचारवर्जिता ।

वरुणपद्धत्याम् -

p. 1064)

नित्यमात्राधिकारत्वात् समयिन्यथ पुत्रके ।
दीक्षा निरधिकारैव नैमित्ते नाधिकारिणी ॥

विजयोत्तरे -

पूजायतस्ततस्तत्र समयी नाधिकारभाक् ।
अथ निर्बीजिका दीक्षा प्रोक्ता सा द्विप्रकारिका ॥

एका निर्वाणदा सद्यो द्वितीया देह पाततः ।

सिद्धान्ते -

प्रारब्ध सञ्चिता गामि? कर्म्मजालं विशोध्यते ।
ययात्यन्त विरक्तानां सद्यो निर्वाणदा भवेत् ॥

प्रारब्ध कर्म्मणां भोगं यथा सा मुक्तिमन्तरा ।
यान्ति बालादयश्चैव स्वेच्छा निर्वाणदा भवेत् ॥

किरणे -

प्रारब्धकर्म्मनाशे तु स्वयन्देहोपपद्यते ।

कालोत्तरे -

स बीजा चैव शक्तानां समयाचारसम्युता ।
तेत्र बाल्या प्रयत्नेन मोक्षसिद्धि समीहिता ॥

वरुण पद्धत्याम् -

स बीजा च भवेद्दीक्षा साधकाचार्ययोरपि ।

षट्सहस्त्रिकायाम् -

p. 1065)

नित्यं नैमित्तिकं काम्यमाचार्यस्योदितं त्रयम् ।
नित्यं काम्यं साधकस्य स्वशास्त्रोक्तं षडानन ॥

वरुणपद्धत्याम् -

सर्वत्रैवाधिकारित्वात् साधिकारैव सा तयोः ।
साध्यमन्त्राभिषेकाच्च साधके सा प्रकीर्तिता ॥

सर्वविद्याभिषेकेण भवेदाचार्य गोचरे ।

षट्सहस्त्रिकायाम् -

द्विधा निर्वाण दीक्षा च लौकिकी शिवधर्म्मिणी ।

अधर्म्ममात्र संशुद्धा प्रोक्ता सा लोकधर्म्मिणी ॥

धर्म्माधर्म्मात्मकं कर्म प्रागागामि विचित्रकम् ।
सञ्चितंशोध्यते येन सैवोक्ता शिवधर्म्मिणी ॥

वातुले -

गुरुपदेश क्रमतो दीक्षितानां क्रमात् भवेत् ।
समयं च विशेषं च निर्वाणं चाभिषेचनम् ॥

वरुणपद्धत्याम् -

क्रियया वाथशक्त्या वा दीक्षा सा सर्वतोमता ।
दीक्षया मुच्यते देही त्रिविधात् भवबन्धनात् ॥

कामिके -

क्रियादीक्षा प्रबुद्धानां ज्ञानदीक्षामनीषिणाम् ।

p. 1066)

मुच्यते ज्ञानदीक्षाया विना पाशान्नमोचनम् ॥

वरुणपद्धत्याम् -

सा च दीक्षाध्व संशुद्धा स चाध्वा षड्विध स्मृतः।
मन्त्रः पदानि वर्णाश्च व्याप्तानीह समन्ततः॥

वर्णास्तु भुवनैर्व्याप्तास्तत्वैर्व्याप्तानितानि च।
कलाभिस्तानि तत्वानि व्याप्तानीह कला क्रमात्॥

इत्यध्वनां विचिन्त्याथ षडध्वव्यापिनं परम्।
ध्यात्वा शक्तिन्नदूर्ध्वे तु भवेयुः परमं पदम्॥

निवृत्तौ पार्थिवन्तत्वञ्चिन्त्यमेकं क्षकारकम्।
कालाग्नि प्रभृतीनां तु पुराण्यष्टोत्तरं शतम्॥

अन्त्यात्पदान्महादेव पदावधिविलोमतः।
व्योमव्यापि पदान्यष्टाविंशतिः परिसंख्यया॥

सद्यो जातश्च हृदयन्द्वौ मन्त्रौ परिकीर्तितौ।
गुणं गन्धादिशब्दान्तं पञ्चब्रह्मा च कारणम्॥

प्रतिष्ठायामवादीनि त्रयोविंशति संख्यया।
प्रकृत्यन्तानि तत्वानि ज्ञातव्यानि स्वभावतः॥

त्रयोविंशति वर्णाश्च हादिनान्ताविलोमतः।

ज्ञातव्यान्यमरेशादि षट्पञ्चाशत्पुराणि च ॥

p. 1067)

महेश्वराद्यरूप्यन्न पदानामेक विंशतिः ।

शिरोवामश्च मन्त्रौद्वौ चत्वारि तु गुणा स्मृताः ॥

रसादिशब्द पर्यन्ता विष्णुरत्र च कारणम् ।

विद्यायां सप्ततत्वानि पुरुषादीन्यनुक्रमात् ।

वामादि भुवनानां च विज्ञेया सप्तविंशतिः ॥

ध्यानाहरपदा * * न व्यापिनीति पदादितः ।

पदानां विंशतिर्म्मन्त्रौ * * * * * * * * ॥

* * * * * * * * * * * * * * * * |

रूपः स्पर्शश्च शब्दश्च गुणारुद्रस्तु कारणम् ।

शान्तौ तु त्रीणि तत्वानि विद्येश्वर सदाशिवः ॥

ण * * काश्च त्रयोवर्णा मन्त्रौ वक्त्र तनुच्छदौ ।

वामाख्यादि पुराण्या * * * * * * * * ।

* * * * * * * * * * * * * * * * ॥

व्योमव्यापिन इत्यन्तान्युक्तानीह विलोमतः ।
गुणौ स्पर्शश्च शब्दश्चद्वावी * * कारणम् ॥

शान्त्यातीत कलायान्तु शिवतत्वं व्यवस्थितम् ।
निवृत्त्यादि पुराण्यत्र भवन्ति दश पञ्च * * ॥

p. 1068)

विसर्गाद्या कारान्ता वर्णाष्षोडशकीर्तिताः ।
भवत्येको गुणश्शब्दः कारणन्तु सदा शिवः ॥

चिन्त्ये -

इत्येकादशमन्त्रेस्यादेकाशीति पदं भवेत् ।
अक्षराण्येक पञ्चाशाच्चतुर्विंशाच्छतद्वयम् ॥

षट्त्रिंशत्तत्वमेवं हि कला पञ्चक उच्यते ।

मतङ्गे -

सितं चैवासितं कर्म्मलोके तावत्प्रकीर्तितम् ।
हिंसादिकं कर्म्मयत् स्यात्तदकर्म्म च कर्म्मिणाम् ॥

वापी कूपतटाकाद्यैस्सितमेतत् प्रकीर्तितम् ।

एतत् कोटिद्वयोपेतंमुचितं सर्वजन्तुषु ॥

अपेक्ष्य वेदविध्युक्तमग्निष्टोमात्मिके पथि ।
कर्म्माकर्म्म विशेषोस्मिन् प्रोक्तन्तद्धिसितासितम् ॥

एतावत्त्रिविधं कर्म्म नेष्टंशास्त्रे शिवोदये ।

चिन्त्ये -

पूर्वजन्मकृतं कर्म्मभोगेन परिशुष्यति ।
इह जन्मनि यत्प्राप्तं ज्ञानेन शिथिलं कुरु ॥

तथान्यत्र -

p. 1069)

प्रारब्धं भोगतो न श्यात् सञ्चितं हन्ति दीक्षया ।
आगामि ध्यानपूजायामिति शास्त्रस्य निश्चयः ॥

योगजे -

स्थूलं च सूक्ष्मकं चैव द्विविधं समयं भवेत् ।

अचिन्त्ये -

लोकायतोय बौद्धश्चार्हतो मीमांस एव च।
मायावादं पाञ्चरात्रं षडेते समया बहिः॥

अन्यत्र।

मनुर्बृहस्पतिर्दक्षो गौतमोधरमोङ्गिराः।
योगीश्वरः प्रचेदाश्च शतातप पराशरौ॥

संवर्त्तेशनसश्शङ्खलिखितावत्रिरेव च।
वेदोक्तकर्म्मभरिता धर्म्मशास्त्र प्रवर्त्तकाः॥

सुप्रभेदे -

ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः।
ब्रह्मचारी द्विधा ज्ञेयो भौतिको नैष्ठिकस्तथा॥

कूर्म्मे -

उदासीनस्साधकश्च गृहस्थो द्विविधो भवेत्।
कुडुम्बभरणायत्तस्साधकोसौ प्रकीर्तितः॥

ऋणानि त्रीण्यपाकृत्य त्यक्त्वा भार्या धनादिकम्।
एकाकी विचरेद्यस्तु स उदासीन उच्यते॥

p. 1070)

चिन्त्य विश्वे -

यतयस्त्रिविधा ज्ञेयास्तपस्वी विदुषस्तथा ।
विद्वानिति त्रिधा प्रोक्तास्तेषां लक्षणमुच्यते ॥

तपश्चान्द्रायणादिकमिति सन्ताने -

चतुष्षष्ठि कलाश्चैव षट्कर्म्माणि तथैव च ।
योगशास्त्राणि सर्वाणि वेदान्तं ज्योतिषन्तथा ।

मतङ्गे -

सांख्य सिद्धान्तमार्गं च ज्ञात्वा वै देशिको भवेत् ।

शैवपुराणे -

ब्राह्मं च वैष्णवं पाद्मं शैवं भागवतन्तथा ।
भविष्यन्नारदीयं च मार्गण्डेयमतः परम् ॥

आग्नेयं ब्रह्मवैवर्तं लैङ्गं वाराहमेव च ।
स्कान्दं च वामनं प्रोक्तं कौर्म्मं मात्स्यं च गारुडम् ॥

ब्रह्माण्डं चेति पुण्योयं पुराणान्मानुक्रमात्।
ऋग्यजुस्सामाधर्वणाश्चतुर्वेदाः प्रकीर्तिताः॥

देविकालोत्तरे -

ज्ञानोत्पत्तिनिमित्तन्तु क्रियाचर्या प्रकीर्तिता।

सुप्रभेदे -

योगात् ज्ञानं समादाय ज्ञानतत्वं सदाभ्यसेत्।

p. 1071)

शैवे -

ज्ञानादेव हि मुक्ति स्यान्नान्यथा कर्म्मकोटिभिः।

चिन्त्ये -

अन्यथा बहवोमुक्तिश्शास्त्रे च वरानने।
शिवतुल्यं लभेन्मुक्तिरिदानीं कथ्यते मया॥

निश्वासे -

सिद्धान्त सङ्ग्रहे च॥

लोकायतिक पक्षे तु तत्वं भूत चतुष्टयम्।
इष्टलोकात् परोनान्य स्वर्गोऽस्ति नरको न च ॥

शिवलोकादयो मूढैः कल्प्यन्तेन्य प्रकारकैः।
स्वर्गानुभूतिमृष्टाष्टिद्यष्ट वर्षवधूरतिः ॥

सूक्ष्मवस्त्रसुगन्धसृक् चन्दनादि निषेवणम्।
नरकानुभवो वेदशास्त्रव्याध्याध्युपद्रवः ॥

मोक्षस्तु मरणं प्राण संज्ञवायु निवर्त्तनम्।

सर्वमतोपन्यासे -

तदेषां श्रुति वाक्यानां शब्दमात्रं हि देवता।
ज्योतिष्टोमाद्यनुष्ठानादपूर्वः कश्चिदार्जितः ॥

स्वर्गादिः फलरूपस्य प्रदानस्य तु देवता।
कर्म्ममीमांसकाः प्राहुरित्थं स्वमतलक्षणम्॥

p. 1072)

तथा मृगेन्द्रे -

न जातु देवता मूर्त्तिरस्मदादि शरीरवत्।

विशिष्टैश्वर्य सम्पन्नस्ततो नैतन्निदर्शितम् ॥

अतस्त्वेवं घटो न्यायश्शब्दत्वादिन्द्र शब्दवत् ।
ज्ञानसंस्कार संज्ञानं वेदना रूपयोरपि ॥

समूह स्कन्धशब्दार्थस्तत्तत्सन्तति वाचकः ।
ज्ञान सन्ततिरेवात्र विज्ञान स्कन्धमुच्यते ॥

संस्कारस्कन्ध इत्युक्तो वासनान्तन्तु सन्ततिः ।
सुखदुःखादिका बुद्धिस्सादीपेक्षात्मिका तथा ॥

वेदनस्कन्ध इत्युक्तस्संज्ञा स्कन्धान्तनावयत् ।
रूपस्कन्धो भवत्यत्र मुक्ति भूतस्य संहतिः ॥

चिन्त्ये -

शास्त्राणि समयाश्चैव अन्योन्येन विपर्यया: ।
एतेषा मुक्तिकोलाभादतित्वं यदि सृग्विसि ॥

एकेन नैतदित्युक्तमभिन्नन्यायतः प्रिये ।
सर्वेषां तु क्वचिद्दृष्टे स्थिते सन्ति तरुत्तमम् ॥

वेदागमेषु शास्त्रेषु ईश्वराढ्योति कीर्तितः।

तथा निश्वासे देवी -

वेदशास्त्र पुराणञ्च पाञ्चरात्रेतिहासयोः।

p. 1073)

योगिनश्च तथाचान्ये कुपथेष्वपि ये स्थिताः।
कुतर्कै मोहयित्वा तु स्वदेहन्दर्शयन्ति ते॥

देवि चात्र ब्रुवन्त्येव गतिरत्रकुतोन्वितः।
पक्षपातो भवे देषो मोक्षस्सर्वत्र वा भवेत्॥

एवं मे संशयो देव यत्सत्यं तत् ब्रूहि मे।

शिवधर्म्मोत्तरे -

विधिवाक्यमिदं शैवन्नार्थवादश्शिवात्मकम्।
यद्यथावस्थितं वस्तु गुणदोष स्वभावतः॥

यावत्फलं च तत्पुण्यं सर्वज्ञश्च तथा वदेत्।
रागज्ञानादिभिर्द्दोषैः ग्रस्तत्वादमृतं वदेत्॥

ते चेश्वरे न विद्यन्ते ब्रूयात्स कथमन्यथा।
अपास्ता शेषदोषेण सर्वज्ञेन शिवेन यत्॥

प्रणीतममलं वाक्यन्तत्प्रमाणन्न संशयः।
तस्मादीश्वर वाक्यानि श्रद्धेयानि विपश्चिता॥

मकुटे -

वेदान्तार्थमयं ज्ञानं सिद्धान्तं परमं शुभम्।
वेदसारार्थदं ज्ञेयमन्यत्वन्यार्थ साधकम्॥

कामिके -

p. 1074)

सिद्धान्तो वेदसारत्वादन्यत्वे तत्बहिष्कृतः।
सिद्धान्त विहिताचारो वैदिकाचार उच्यते॥

अजिते -

पञ्चवक्रधरो भूत्वा पञ्चभिस्तैर्मुखैरपि।
वेदादि ग्रन्थजालं यदवतारयति प्रभुः॥

कामिके -

लौकिकं वैदिकं चैव तथाध्यात्मिकमेव च ।
अतिमार्गं च मन्त्राख्यन्तत्र भेदमनेकधा ॥

सद्यो वाममघोरं च पुरुषेशानमूर्त्तयः ।
प्रत्येकं पञ्चवक्त्रास्युस्तैरुक्तं लौकिकादिकम् ॥

स्वायम्भुवे -

वेदादि ज्ञानभेदेन शिवज्ञानमिहोदितम् ।
चिन्तामणिरिवात्रासौ स्थितस्सर्वस्य कारणम् ॥

धर्म्मसाधन संवित्तिराम्नायादेव जायते ।
तन्मूलत्वात् स्मृतेश्चापि ताभ्यामेवापरस्य च ॥

पुराणादीनि शास्त्राणि सादरन्नित्यमाश्रयेत् ।
वेदमूलतयान्यानि प्रवृत्तान्यपि सत्तम ॥

सिद्धान्त सङ्ग्रहे -

अङ्गोपाङ्ग वेदास्युर्वेदस्यैवोपकारिकाः ।

p. 1075)

वेदाङ्गानि षडेतानिशीक्षाव्याकरणानि च ।

निरुक्तञ्ज्योतिषं कल्पं च्छन्दोविचितिरित्यपि ॥

मिमांसा न्यायशास्त्रं च पुराणं स्मृतिरित्यपि ।
चत्वार्येतान्युपाङ्गानि बहिरङ्गानि तानि वै ॥

कामिके -

ऋग्यजुस्सामाधर्वाणि पुरुषाद्यननोत्भवाः ।
पश्चिमाद्वामवक्रन्तु वामाद्दक्षिणमुत्तमम् ॥

दक्षिणात् पुरुषश्रेष्ठ उतरोत्रमेव वहि ।
पूर्वाननात्ततश्श्रेष्ठन्तस्मात् सिद्धान्तमुत्तमम् ॥

सिद्धान्तात्परमं ज्ञानं नेति शास्त्रस्य निश्चयः ।
अष्टाविंशति तन्त्राणि सिद्धान्तमिति कीर्तितम् ॥

रत्नत्रये -

सिद्धान्त एव सिद्धान्तः पूर्वपक्षास्ततः परे ।
सिद्धान्तस्सेव्यते सद्भिरशक्तिपात पवित्रितैः ॥

तथा कामिके -

आदावभूद्विधा ज्ञानमधिकारि विभेदतः।
परापर विभागेन पतिपाशात्म दर्शकम्॥

शिवप्रकाशकं ज्ञानं शिवज्ञानं परं स्मृतम्।
वेदाद्यपर विज्ञानं पशुपाशार्थ दर्शकम्॥

p. 1076)

यथा विलक्षणञ्चक्षु क्षपायान्नृबिडालयोः।
तथा विलक्षणं ज्ञानमेवमेतत् परापरम्॥

शिवधर्म्मोत्तरे -

आगमत्वेपि सामान्येकः प्रद्वेषश्शिवात्मके।
अनायासेन यत्प्रोक्ता मुक्तिरेकेन जन्मना॥

एवमेकेन भविकां विमुक्तिं परतस्थिताम्।
विहायानेक भविकां कः प्राज्ञः प्रतिपद्यते॥

तदुक्तन्निश्वासे -

शास्त्रेण सिध्यते सिद्धिस्सिधान्तस्तेन संस्मृतः।
शिवो देशिकदेहस्थः प्राण्यनुग्रहकारकः॥

पराख्ये -

सर्वकर्त्ता महान्विद्यात् सर्ववेत्ता महेश्वरः।

सर्वकृत्येषु तत्ज्ञानं व्या * * * * * * * * ॥

* * * * * * * * * * * * * * शिवः।

आगपि सर्वज्ञो गुणमाहात्म्य दर्शनात्॥

उभयोर्ज्ञापकत्वेन दोषस्त्वन्योन्य * * * भवेत्।

ज्ञापकं वर्तते शास्त्रन्तत्कर्त्ता वर्तते शिवः॥

ज्ञातृज्ञापकयोश्चैव न दोषस्त्वितरेतरः।

मृगेन्द्रे -

p. 1077)

सर्वज्ञस्सर्वकर्तृत्वात् साधनाङ्गफलैस्सह॥

यो यज्जानाति कुरुते स तथैवेति सुस्थितम्।

पराख्ये -

क्रियादि ज्ञानपर्यन्तं सद्यङ्मार्गञ्चतुर्विधम्।

तदुक्तं शिवज्ञाने -

चर्यापादन्दासमार्गं पुत्रमार्गं क्रियां विदुः ।
सहमार्गं योगपादं सन्मार्गं ज्ञानमेव च ॥

अथ चर्या क्रियापादं योगपादन्तथैव च ।
ज्ञानपादं क्रमाच्चैव शिवेन परिभाषितम् ॥

एतच्चतुर्विधं मार्गं सालोक्यादि फलप्रदम् ।

चिन्त्य विश्वे -

शिवसमानतारूपं शिवविग्रहमेव हि ।
सकले निष्कले चैव सर्वत्रैव समानता ॥

सायुज्यमिति तत्प्रोक्तं सारूप्यं मूर्तितुल्यता ।
सामीप्यं मूर्ति सामीप्यं स्वेच्छा विग्रहधारणात् ॥

शिवलोकादि संप्राप्तिस्सालोक्यं मुक्तिनामतः ।
एतच्चतुष्टयं मुक्तिस्सायुज्यश्चोत्तमं भवेत् ॥

कामिके -

दासमार्गं शिवोद्यान लिङ्गबिंबालयादिकृत्।

p. 1078)

शैव नर्त्तनतिस्तोत्रगान् कुद्रोहिमर्द्दकः।

शिवज्ञानबोध सङ्ग्रहे -

क्रियामूर्त्तेर्महेशस्य आलयेषु समाहितः।
शनैस्सम्मार्जनं कुर्यान्मार्ज्जन्यामृदुसूक्ष्मया ॥

तल्लक्षणमुक्तं सुप्रभेदे -

द्वादशाङ्गुलमानेन मार्ज्जिजालेन मार्जनम्।
नालिकेरस्य पत्राणां सारात्बहु च संयुतात्॥

अरत्निमात्र मायामन्तन्मूले रज्जु बन्धनम्।
द्विविधा मार्जनी प्रोक्ताह्यथमार्जन कर्म्माणि ॥

शिवधर्म्मे -

नाहारवश जीर्णाया न बन्ध्या क्षीण वत्सला।
रोगार्त्ता नवसूता वा त्याज्यागोमय सङ्ग्रहे ॥

ख संस्थं गोमयं ग्राह्यं स्थाने वा पतिते शुभे।

उपर्यधश्च संत्यज्य प्रत्यग्रञ्चतुवर्जितम् ॥

वस्त्र पूतेन तोयेन यः कुर्यादुपलेपनम् ।
पश्यन्परिहरन् जन्तून् चान्द्रायणफलं लभेत् ॥

शिवज्ञाने -

आत्मारामोद्भवैः पुष्पैस्समादाय शिवस्य तु ।
मालां संग्रथयित्वा तु यो दद्यात् परमेष्ठिने ॥

p. 1079)

यः कुर्याच्चु महेशाय पुष्पारामक्रिया विधिम् ।
स्तोत्रगानादिकं सर्वं यः कुर्याद्दासमार्गकः ॥

कामिके -

पुत्रमार्गीशिवार्चादि जपहोमपरायणः ।
प्रवेशकश्शिवज्ञानी औपदेशिक एव च ॥

वातुले -

मूर्तिं सदाशिवीं विद्याम् शुद्धस्फटिक सन्निभाम् ।
पञ्चपञ्च भुजैर्युक्तां पञ्चवक्त्रं स्मितानननाम् ॥

दशायुध समोपेतां सर्वाभरणभूषिताम्।
उन्मनी सहितं शम्भुं विन्यसेद्धृदयेन तु॥

विजने प्रयतस्सर्वं विद्यादेहं विचिन्तयेत्।
पराशक्ति समायुक्तं मूर्ध्निमध्ये तु विन्यसेत्॥

तदूर्ध्वे शिवमावाह्य सधोज्ञानमवाप्नुयात्।

ज्ञानरत्नावल्याम् -

किन्तु देहावसानेन यः पूजयति भक्तितः।
स शिवस्सर्वकृच्छम्भुर्जीवन्मुक्तस्सकथ्यते॥

कामिके -

सहमार्ग्गि भवेत्यक्त संसारीशुचिमन्त्रयुक्।
समदृङ्िनरहंकारी शिवयोगकृतश्रमः॥

p. 1080)

सुप्रभेदे -

गुदाच्च द्व्यङ्गुलादूर्ध्वं मेढ्राात्तु द्व्यङ्गुलादधः।
मूलाधारमिति ज्ञेयं तद्विज्ञेयमुदाहृतम्॥

आधारं गुदमित्युक्तं स्वाधिष्ठानन्तु लिङ्गकम्।
मणिपूरन्नाभिदेशे हृत्पद्मगमनाहतम्॥

विशुद्धिः कण्ठदेशे तु आज्ञाकोदण्डमध्यगा।
आधारमासनं प्रोक्तमाधेयः परमश्शिवः॥

मकुटे -

षडाधारादि देवानां शृणुष्वेवं महेश्वर।
विघ्नेशो भैरवश्चैव क्षेत्रपालश्च चण्डिका॥

मूलाधारादि देवास्यु स्वाधिष्ठानमथ श्रुणु।
प्रतिष्ठाशुद्ध भैरिण्या भवानी ऋषी पद्मिनी॥

पद्मासना पद्मयोगी स्वाधिष्ठानादि देवताः।
तुलाराक्षि नीलराक्षीराक्षीकैला स्फुलिङ्गिनी॥

उपाभ्युष्णीषिका चैव वशिनी च त्रिशङ्करी।
तपनी नवनी चैव मणिपूरक देवताः॥

मणिपूरमिदं प्रोक्तमनाहतमतश्श्रुणु।
काशनीशातनी चैव शोचिका वेणिवेणिका॥

अक्षिणी चैव चामुण्डी ज्येष्ठा दुर्गा वराटिका ।

p.1081)

अरणी स्वरणी चैव चाधिदेवास्त्वनाहते ।
अनाहतमिति प्रोक्तं विशुद्धेर्नाम तच्छ्रुणु ॥

मनाटी पुष्पटीस्तीटी शृङ्गि च च्छूर्पराटिनी ।
रात्रिश्च दामकरिणी जया पूजी च मेव च ।
अल्पाशिनी मकाराक्षी दूल्वाशी आपचारिणी ॥

कलासीकमला चैव विशुद्धस्याधि देवता ।
विशुद्धि देवता प्रोक्ता आज्ञादेवमथ श्रुणु ॥

अन्ते सुन्दरी आनन्दी आज्ञाया अधिदेवता ।
षडाधारमिदं ज्ञेयं अतिदेव समन्वितम् ॥

वायव्ये -

समाधिना च सर्वत्र प्रज्ञालोके प्रवर्तते ।
यदर्थमात्र नि सममितो दधिवत्स्थितम् ॥

स्वरूपशून्यं यत्भाति तत्समाध्यभिधीयते ।

तथा चिन्त्यविश्वे -

मूलाधाराख्य कालाग्नेर्म्मण्डलोपरि संस्थिताम् ।
आधाराणामशेषाणां भेदिनी बोधिनीपका ॥

सृष्ट्यन्तोमृत संवाही शिवशक्तिस्वरूपिणी ।
आप्लावयन्ती सर्वत्र सिद्धिमुक्ति प्रदायिनी ॥

एवं कुण्डलिनी प्रोक्ता चातिगुह्या महोदया ।

p. 1082)

कामिके -

सन्मार्गीत्यक्त संसारस्समत्वशुचिमत्वयुक् ।
त्रिपदार्थ परिज्ञान शिवयोगकृत श्रमः ॥

पुत्री कृत जनश्शैवाचार्यासन्तातिकश्च सः ।
शुद्धात्मनां हितं शास्त्रन्त्रायते यद्भवार्णवात् ॥

तच्छासन परित्राणात् शास्त्रमित्यभिधीयते ।

चिन्त्यविश्वे -

शाश्वतन्तुर्य रहितमानन्दं परमं पदम् ।
त्रिपुटी ज्ञानहीनं यत् प्रोक्तन्तत्परमं पदम् ॥

तथा स्कान्दे -

धारणध्यान युक्तस्य समाधिर्भवति ध्रुवम् ।
यत्सामरस्यमनयोर्ज्जीवात्म परमात्मनोः ॥

यत्परित्यक्तसङ्कल्पं समाधिरभिधीयते ।
प्रतिपत्तेस्समाधौ तु सङ्कल्परहितात्मनः ॥

ज्ञेयं ज्ञाता तथा ज्ञानमेतद्रूपं विलीयते ।

कामिके -

उत्तरोत्तरवैशिष्ट्यपटले ।

सन्मार्गादि क्रमेणापि वैशिष्ट्यमिह सम्मतम् ।
सन्मार्गी सहमार्गी च पुत्रमार्गी तथा परः ॥

p. 1083)

दासमार्गी चतुर्थेषां प्रतिलोमाद्विशिष्यते ।

शिवधर्म्मोत्तरे -

अध्ययञ्चाध्यपनं व्याख्याश्रवण चिन्तने ।
इति पञ्चप्रकारोयं ज्ञानयज्ञः प्रकीर्तितः ॥

उत्तरोत्तर वैशिष्ट्यं सर्वेषां परिकीर्तितम् ।
अथ पूजाद्यग्निकार्याद्यैर्भेदैर्बहुविधै स्मृतः ॥

कर्म्मयज्ञस्समाख्यातस्त पश्चान्द्रायणादिकम् ।
स्वाध्यायश्च जपः प्रोक्तश्शिवमन्त्राख्य संस्थितः ॥

ध्यान यज्ञस्समाख्यातश्शिवचिन्तामुर्हुमुर्हुः ।
पञ्चानामपि यज्ञानां ज्ञानयज्ञो विमुक्तिदः ॥

कर्म्मयज्ञात्तपो यज्ञो विशिष्ठो दशभिर्गुणैः ।
जपयज्ञस्तपो यज्ञात् ज्ञेयश्शतगुणाधिकः ॥

ज्ञान ध्यानात्मकस्सूक्ष्मश्शिवयोगो महामखः ।
विशिष्टस्सर्वयज्ञानांमसंख्यातैर्महागुणैः ॥

यस्मात्तस्माद्विशुद्धोयमपवर्गफलप्रदः ।

शिवधर्म्मोत्तरे -

आरम्भकाले श्रवणं क्रियाकाले तु चिन्तनम्।
निश्चयाद्भवनन्तस्य निष्ठाकाले प्रसन्नता॥

p. 1084)

चिन्त्यविश्वसादाख्ये -

यावत्कालं शिवज्ञानन्द्रयी भवति तस्य वै।
तावत्कालं च कर्त्तव्यं श्रवणादि विशेषतः॥

शिवधर्म्मोत्तरे -

ज्ञानं विकल्प बहुलं रागाद्यैः कलुषीकृतम्।
तदज्ञानन्न शुध्यर्थं कलुषोदकवद्भवेत्॥

तत्र ज्ञानाज्ञानयोर्ल्लक्षणमाह।

यदा प्रसन्नमेकाग्रं स्तिमितोदधिवत्स्थितम्।
तदा ज्ञानमिति प्रोक्तमज्ञान तिमिरापहम्॥

इति प्रसन्नं यत्ज्ञानं भावानामयमुत्तमम्।
रागाद्यैरपरामृष्टन्तद्विज्ञेयं विमुक्तिदम्॥

अज्ञाने सति रागाद्यैर्धर्म्माधर्म्मौ च तद्वशात्।
धर्म्माधर्म्म वशात् पुंसां शरीरमुपजायते ॥

शरीरे सति सत्क्लेशस्सर्वैस्संयुज्यते यतः।
ततः क्लेश व्यपोहार्थ पुनर्देहन्न कारयेत् ॥

जगतस्तस्य सम्बोधादज्ञानं विनिवर्त्तते।
तत्क्षयाच्च शरीरेण न पुनस्सं प्रयुज्यते ॥

मृते शिवपुरं गच्छेत् त्रिसप्त कुल संयुतः।
कल्पकोटिशतन्दिव्यं सेव्यमानं सतिष्ठति ॥

p. 1085)

क्रदन्ते विष्णुभवने तावत्काल * * स्यति।
विष्णुलोकाच्चयुतो ब्राह्मन्ततस्संप्राप्यमोदते ॥

सम्भोगैर्विविधैस्सूक्ष्मैस्तावत्कालमनुत्तमैः।
प्रजापतीन्द्र गन्धर्व यक्ष * * नुक्रमात् ॥

* * * * * * * * * * * * * * * * |

काले महति विप्राणां प्रज्ञाशील गुणान्वितः।

ततस्स * * * * * * गीन्द्रं समुपासते ॥

तत्संपर्क्काच्छिवज्ञानं प्राप्य योगन्निषेवते ।
योगाद्विरक्त संयोगादाप्नोति परमं पदम् ॥

व्रतानि दान नित यज्ञा-
स्सन्न्यास तीर्थाश्रम कर्म्मयोगाः ।
स्वर्ग्गीयमेतच्छुभमध्रुवं च
ज्ञानाद्ध्रुवं शान्तिकरं महार्थम् ॥

स्वात्म भोगाधिपत्यं स्याच्छिवस्सर्वजगत्पतिः ।
केचित् तत्रैव मुच्यन्ते ज्ञानयोगरतानराः ॥

आवर्त्तन्ते पुनश्चान्ये संसारे भोगतत्पराः ।
तस्माद्विपश्चिल्लोकेषु भोगासक्तिं विवर्जयेत् ॥

विरक्तिशान्त शुद्धात्मा शिवज्ञानमवाप्नुयात् ।

निश्वासे -

p. 1086)

यस्तु फलन्दानयज्ञादि कर्म्मणा समुपार्जितम् ।

तदस्याप्युपभोगेन क्षयमायेत्यशेषतः ॥

यज्ञात् स्वर्गफलावाप्तिस्तत्क्षयात् पुनरागमः ।

सुप्रभेदे -

अन्येषु पशुधर्म्मेषु स्वर्ग एव फलं हि तत् ।
एतद्धि शिवशास्त्रेषु भुक्तिमुक्तिप्रदायकम् ॥

सर्वशास्त्रं समुत्सृज्य शिवशास्त्रेषु योजयेत् ।

तत्रैव ।

शिवलोके निवासस्यादन्य लभ्यन्न देवतैः ।
भुक्त्वा तु विपुलान्भोगान्प्रलये समुपस्थिते ॥

ज्ञानयोगं समासाद्य स तत्रैव विमुच्यते ।
न तेषां पुनरावृत्तिर्घोरे संसारसागरे ॥

सर्वज्ञास्सर्वगाश्शुद्धाः परिपूर्णा महेश्वराः ।
शिवतुल्यबलास्सिद्धाः परं शिवपुरं गताः ॥

अत्यल्पमपि यद्दत्तं शिवज्ञानात्मवेदिने।
तन्महाप्रलयं यावद्दातुर्भोगाय कल्प्यते॥

मृगेन्द्रे -

मायाकार्योमरेशादि रुद्रस्थानेषु यत्सुखम्।
अपरन्तत्पदं विद्यादानन्दादि पदस्थितिः॥

p. 1087)

शिवधर्म्मोत्तरे -

अनेक भविकामुक्तिर्भवतः केनकार्यते।
तस्मादत्रैक भविकामुक्तिर्ज्ञानेन निश्चिता॥

सुप्रभेदे -

ज्ञाने नैव तु तत्तुल्यं प्राप्तस्तत्र न संशयः।

शिवधर्म्मोत्तरे -

अज्ञानपाशबन्धत्वादमुक्तः पुरुष स्मृतः।
ज्ञानेन मोचितं यस्मात्तस्मात् ज्ञानं विशिष्यते॥

संसारबीजमज्ञान संसार्यज्ञः पुमां स्मृतः।

ज्ञानात्तस्य विमुक्ति स्यात् प्रकाशात्तु तमो यथा ॥

शिवज्ञानात्परं ज्ञानं तत्समं च न विद्यते ।

सुप्रभेदे -

ज्ञानं प्रवर्त्तते वत्स भ्रान्तिर्निर्नाशिनाय च ।
अध्वश्रेणि विनाशाय शिवव्यक्तिकराय च ॥

अन्धकार वदज्ञानं ज्ञानन्दीपवदुच्यते ।
ज्ञेयं भास्करवत्प्रोक्तन्तस्मात् ज्ञानं विशिष्यते ॥

सूत संहितायाम् -

आत्मनः परमामुक्तिर्ज्ञानेनैव कर्म्मणा ॥

शैव पुराणे -

p. 1088)

ज्ञाना देव हि मुक्तिस्यान्नान्यथा कर्म्मकोटिभिः ।
यश्चशम्भोः प्रसादेन गुरोश्चैव प्रसादतः ॥

जायते तच्छिवज्ञानन्नान्यथा सत्यमीरितः ।

वातुले -

आदित्य सन्निधौ रश्मिस्सूर्यकान्तेपि चोदितम्।
आचार्यसन्निधौ ज्ञानमात्मन्येव तथोदितम्॥

सुप्रभेदे -

सर्वतत्वानि भूतानि दृश्यन्ते चात्म एव हि।

चिन्त्ये -

यस्साक्षी सुखदुःखानां लोकेस्मिन् सर्ववस्तुनि।
अणोरणु महीयांश्च महतो यत्परात्परम्॥

पौष्करे -

कर्म्मनाशान्मलस्यापि विपाके सहकारिणी।
पतत्युन्मीलिनी शक्तिस्तदानुग्रह रूपिणी॥

तस्यां पतितमात्रायां मलयोनिर्म्मलात्मिका।
शक्तिर्न्निर्वर्तते तस्यां निवृत्तायां महात्मनः॥

पुनाति साधिकारेण यं वापि परमेश्वरः।
यथानुग्रह रूपिण्याश्शक्तेर्न्नीति निरोधिका॥

p. 1089)

मलस्य क्षीयते शक्तिस्सा दीक्षा शाम्भवी क्रिया।

तथा किरणे -

तीव्रशक्ति निपातेन इत्यादि।

शिवधर्म्मोत्तरे -

न श्रुणोति न चाघ्राति न रस्यति न पश्यति।
न च स्पर्शं विजानाति न च सङ्कल्पते मनः॥

न चाभिमन्यते किञ्चिन्न च बुध्यादि काष्ठवत्।
एवमीश्वरके लीनस्समाधिस्थः प्रकीर्तितः॥

सुप्रभेदे -

स्वभावज्ञानतो मुक्तस्सजीवन्मुक्त एव हि।
समत्वं सुखदुःखाभ्यान्तत्प्रिया प्रिययोस्समम्॥

देविकालोत्तरे -

समस्तु मित्रामित्रे च समलोष्टाश्म काञ्चनः।

यस्यां यस्यामवस्थायां तस्यान्तस्थां स्मरेच्छिवम् ॥

कालोत्तरे -

निद्रायां बोधयेच्चित्तं विक्षिप्तं क्षमयेत्पुनः ।
पक्षद्वय परित्यागे संप्राप्ते नैव चालयेत् ॥

निराश्रयं यदा चित्तं सर्वालम्बनवर्ज्जितम् ।
नैव स्थान विनिर्म्मुक्तं विज्ञेयं मुक्तिलक्षणम् ॥

रत्नत्रये -

p. 1090)

तया हि विमलोदार गम्भीरे चिन्महोदधौ ।
स्वात्मनि प्रविलीयन्ते धन्या हि शिवयोगिनः ॥

शिवधर्म्मोत्तरे -

धर्म्मरज्वा व्रजत्यूर्ध्वं पापरज्वा व्रजत्यधः ।
द्वयं ज्ञानासि न च्छित्वा विदेहं शान्तिमृच्छति ॥

ज्ञानामृतरसोयेन सकृदा स्वादिनो भवेत् ।
स सर्वकार्याण्युत्सृज्य तत्रैव परिधावति ॥

ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः।
नैवास्ति किञ्चित् कर्त्तव्यमस्ति चेन्न च तत्ववित्॥

लोकत्रयेपि कर्तव्यं किंचित्तस्य न विद्यते।
देहपाते तथा चात्मा भाति सर्वत्र सर्वदा॥

तथा मतङ्गे -

ज्ञानाभि व्यक्तये व्यक्तिं व्यक्तं तत्वमणुं प्रति।

निश्वासे -

अप्रमेय गुणोपेतस्सर्वज्ञः खलु सर्वदा।
सर्वकृत्सर्वलोके शशिवतुल्यः प्रजायते॥

व्यक्तेसौ शिववत्भाति शिव एव तनुक्षये।

शिवधर्म्मोत्तरे -

p. 1091)

सर्वज्ञः परिपूर्णश्च शुद्धस्सर्वतः प्रभुः।
संसार सागरान्मुक्तश्शिवतुल्यः प्रजायते॥

तत्रैव।

प्रलयान्ते तनुन्त्यक्त्वा स्वात्मन्येवावतिष्ठते ।

सर्वज्ञानोत्तरे -

धर्म्माधर्म्म फलन्नास्ति लोकाचारं विशेषतः ।
नियमोपि न तस्यास्ति नोपवास व्रतानि च ॥

सङ्कल्पं च विकल्पं च ये चान्ये कुलधर्म्मकाः ।
यदा भेदन्न विद्यन्ते बालकोन्मत्तकादिभिः ॥

एतैर्न्नास्ति परामुक्तिश्चिद्रूपं व्यापकं विना ।

मतङ्गे -

लीलयैव स मुक्तात्मा विचरन् केन वार्यते ।

सर्वज्ञानोत्तरे -

दिग्देश जातिसम्बन्धान्वर्णाश्रम समन्वितान् ।
गच्छंस्तिष्ठन् स्वपन् जाग्रन् भुञ्जानन्मैथुनन्नपि ॥

सर्वदा सर्वकार्येषु वातशीतातपेषु च ।

भय दारिद्र्यरोगेषु मान्द्य विज्वरकादिषु ॥

भावानेतान्परित्यज्य चाभावं भावयेत् बुधः ।

निश्वासे -

p. 1092)

यथा वायुस्सुशीघ्रोपि मुक्त्वाकाशन्न गच्छति ।
ज्ञेय निक्षिप्त चित्तस्तु विषयस्थो न मुञ्चति ॥

सर्वज्ञानोत्तरे -

योमां सर्वगतं पश्येत् सर्वं च मयि संस्थितम् ।
तस्याहन्नित्यमात्मस्थस्स च नित्यं मयि स्थितः ॥

सद्गुरोरुपदेशेन स्वप्रकाशेन निश्चयः ।

चिन्त्यविश्वे -

जाग्रादि पञ्चावस्थायामतीते ज्ञानरूपकम् ।
सत्गुरोरुपदेशेन विज्ञानेन न संशयः ॥

एवं ज्ञात्वा विशेषेण समाधिं कारयेत् बुधः ।
चित्तं बुद्धिस्थितं कृत्वा शिवलक्षणमेव हि ॥

आनन्दं शिवभोगन्तु शिवयोगं सदाभ्यसेत् ।

सर्वज्ञानोत्तरे -

यस्य जाग्रदवस्थायान्नियमान्सकलेन्द्रियान् ।
तुर्यावस्था गुणोपेतः क्षारभावन्न गच्छति ॥

शब्दादि विषयान्भोगी तद्वत् ज्ञानी न लिप्यते ।
चित्तं शोधययत्नेन किमन्यैर्देहशोधनैः ॥

सुप्रभेदे -

समस्तसुखदुःखाभ्यान्तत्प्रिया प्रिययोस्समम् ।

p. 1093)

शरीरात्प्राग्वस्तुतोपि भुज्यते स्वयमेव तु ।
सार्धद्विशतिकायामानन्द लक्षणमुक्तम् ॥

रूपञ्च वर्णरूपञ्च आनन्दं त्रिविधं स्मृतम् ।
रूपं बहुविध ध्यानं वर्णरूपं च कल्पनम् ॥

रूपारूपन्न चा * * म् कल्पनारहितं मतम् ।

शाश्वतन्तुर्यरहितं आनन्दं परमं पदम् ॥

एतस्यैव तु संप्राप्तौ मुक्तिरेव न संशयः ।
गुरुवक्त्रेण सत्सिद्धिरानन्दन्तु न संशयः ॥

एवं ज्ञात्वा विशेषेण समाधिं कारयेत् बुधः ।

सुप्रभेदे -

* * * * * * * * * * * * * * स्थितम् ।
त्यक्त्वैतानि * * * न शुद्धस्फटिकमावहेत् ॥

रौरवे -

भिन्ने देहे शिवो भूत्वा शिवधर्म्मे समन्वितः ।
शिवधर्म्ममनुप्राप्य हविर्भागाय कल्पते ॥

यथा समुद्रमासाद्य नदी * * * * * * ।
* * * * * * * * * * * * महोदधेः ।
एवं * * * देहस्तु शिवत्वं समुपागतः ॥

p. 1094)

सरित् समुद्रसंयोगाद्विभाग * * * * * ते ।

निश्वासे दृष्टान्तमाह ।

काष्ठमध्य स्थितो यद्वन्मथितो निर्म्मलोमलः ।
स शान्ति समयं * * * * * * * * * * ॥

* * * समापन्नं न भवे * * * * * नः ।
सम्यक् ज्ञानं विदित्वा तु पशुत्वन्न भवेत्पुनः ॥

निश्वासे -

सर्वज्ञादि गुणादेव गीयन्ते सर्वतश्शिवे ।

सिद्धान्त रहस्ये -

स्वान्य प्रकाश चित्ज्ञप्तिस्सच्चिदानन्दलक्षणः ।
शिवस्य ये गुणास्तेषां समस्तास्सन्ति ते गुणाः ॥

परमेशार्ककिरण प्रकाशीकृत चक्षुषः ।
न जानात्यक्षिवान् शम्भुर्जानाति शिवचक्षुषा ॥

क्षीरे क्षीरमिवाभिन्नं विभिन्नं दृष्टि दृष्टवत् ।
शिवात्मनोस्सामरस्यं व्यज्यते गुणसाम्यतः ॥

ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधि गच्छति।
तदा तु सर्वदुःखानां हानिरस्योपजायते ॥

सर्वज्ञानोत्तरे -

p. 1095)

यावन्नोत्पद्यते ज्ञानं तावद्भ्रमति कर्म्मणा।
अज्ञानावृतदेहस्तु दुःखशोकपरिप्लुतः ॥

अष्टमसूत्रं सम्पूर्णम् ॥

नवमसूत्रम् ॥

शिवज्ञानबोधे।

चिद्दशात्मनि दृष्ट्वैशन्त्यत्तवा वृत्तिमरीचिकाम्।
लब्ध्वा शिवपदच्छायान्ध्यायेत् पञ्चाक्षरीं सुधीः ॥

स्वायम्भुवे -

पाशज्ञानन्न मुक्ति स्यात् पशुज्ञानन्तथैव च।
सर्वतश्च यतोमुक्तिः पशुज्ञानेन गम्यते ॥

जगतस्तत्व सम्बोधादज्ञानं विनिवर्त्तते ।
मोक्षं पञ्चाक्षरं विद्यादभिवृद्धि षडक्षरम् ॥

शास्त्रजालानि नादान्तं पाशज्ञानं वरानने ।
पशुज्ञानमिति प्रोक्तमुपदेश क्रमाद्यतः ॥

तथा निश्वासे -

वेदं सांख्यं बौद्धमार्हमपरं परमन्तथा ।
यानि कानि च शास्त्राणि सर्वे बिन्दोर्विनिःसृताः ॥

p. 1096)

अन्तर्गताण्ड जातस्यात् मुक्तश्चेत् करणक्षयात् ।
यथा ततो विचारेण ज्ञानातीतो हि विद्यते ॥

मलक्षयतया प्रोक्तन्तदा सायुज्यमुच्यते ।

कारणे -

सर्वतश्चात्मना वेदं ज्ञानेनैव हि गम्यते ।

तत्रैव मन्त्रोद्धारे -

वाच्यवाचक रहितो वाङ्मनोतीतगोचरः ।
सर्वज्ञादि गुणोपेतस्सर्वतत्वलयः प्रभुः ॥

आकाशमिव तत्त्वानि सर्वव्यापी निरञ्जनः ।
आकाश भावनन्त्यक्त्वा शिवभावेन भावयेत् ॥

वायव्य संहितायाम् -

स पश्यति शरीरन्त तच्छरीरन्न पश्यति ।
तौ पश्यस्ति परः कश्चित्तावुभौ तन्न पश्यति ॥

कालोत्तरे -

शिवोपकारतां पश्येत्तदा पश्येत निर्गतम् ।

शिवधर्म्मोत्तरे -

अणिमादि गुणैश्वर्यं सर्वज्ञत्वं च योगिनः ।
तृणवद्यस्त्यजेत् सर्वानीशस्तस्य प्रसीदति ॥

p. 1097)

ततः प्रसन्ने देवेशे बुद्धिस्सत्वात्प्रवर्त्तते ।
अणिमादिगुणैर्युक्तस्सन्तिष्ठेच्छिववत्प्रभुः ॥

सर्वज्ञानोत्तरे -

अणिमादिगुणावाप्तिर्ज्जायतां वा न जायताम्।
तथापि मुच्यते देही पतिं विज्ञाय निर्म्मलम्॥

सर्वोपाधिविनिर्म्मुक्तचिद्रूपं यन्निरन्तरम्।
तच्छिवोहमिति ज्ञात्वा सर्वावस्थां विवर्ज्जयेत्॥

तथा वातुले -

तिलानान्तु यथा तैलं पुष्पाद्गन्धस्समाश्रितः।
पुरुषस्य शरीरेस्मिन् स बाह्याभ्यन्तरे स्थितः॥

सर्वज्ञानोत्तरे -

यश्शिवस्सोहमेवेति अद्वैतं भावयेत्सदा।
सर्वपाप विनिर्म्मुक्तिर्गुरुध्यानादघक्षयः॥

शिवानन्द परध्यानात् स याति परमां गतिम्।
तत्वमस्मीति वेदान्ते तताख्यातमिति क्रमम्॥

सिद्धान्त सम्बोधिकायाम् -

शिव भावेन संयोज्य शिवोहं स्मृति निर्णयः।

शिवोहमिति सिद्धान्तं वेदान्ते सोहमस्मि तु ॥

p. 1098)

चिन्त्ये -

तिरोधं मलमित्युक्तमात्मा शक्ति शिवात्मकम् ।
पञ्चाक्षरमिदं देवि रहस्यन्न प्रकाशकम् ॥

अङ्गुष्ठादि कनिष्ठान्त तलयोश्चाङ्गषट्ककम् ।
विन्यस्य मूलमन्त्रेण व्यापकं च समाचरेत् ॥

रौरवे -

मन्त्रशुद्धौ वर्त्तते ।

अन्यूनाधिक वर्णन्तु सर्वमन्त्रान् समुच्चरेत् ।
ऊनवर्णेन मृत्युस्यादधिके शोकरोगकृत् ॥

स्वरहीने विपत्ति स्यात्तान्मन्त्रेण विशोधयेत् ।

करणे -

हृदये यजनं प्रोक्तं नाभौ होमं प्रकल्पयेत् ।
तथेशन्तु भ्रुवोर्म्मध्ये ध्यायेत्सर्वगतं प्रभुम् ॥

सुप्रभेदे -

कुण्डव्याख्या महानाडी नाभ्यधस्तात्प्रकीर्तिता ।
अष्टवर्त्तुलमेवन्तु कुण्डली सुप्तनागवत् ॥

नाभेरूर्ध्वं भवेत्पद्मं तटाकान्ताब्जवत्स्मृतम् ।
तस्य मध्ये स्थितो देवस्सूर्यकोटि समप्रभः ॥

चिन्त्ये -

अर्कस्य सन्निधौ तत्र राहुदर्शनवत् भवेत् ।

p. 1099)

पञ्चाक्षरं विजानीयाद्दर्शनं शिवमात्मनि ।

कामिके -

यद्वा विस्तरतः कुर्यान्मानसं यागमादरात् ।
शिवाद्यवनि पर्यन्त तत्वव्रातात्मकं स्वकम् ॥

सुप्रभेदे -

पार्थिवाण्डमयं कर्दमाप्यान्तन्नालमेव च ।

प्रधान तत्वपर्यन्तन्नाल कङ्कणकान्वितम् ॥

निश्वासे -

कदलीपुष्प सङ्काशं हृदयं सर्वदेहिनाम् ।
अष्टाङ्गुल प्रमाणन्तु नाभेरूर्ध्वं व्यवस्थितम् ॥

पद्मनालन्नवद्वारं समन्तात्कण्टकान्वितम् ।
तस्य मध्ये स्थितं पद्ममष्टपत्रं सकर्णिकम् ॥

वितस्ति मात्रं हृदयं कमलं चतुरङ्गुलम् ।

कालोत्तरे -

पञ्चाशत्परमं बीजञ्जगद्योनिं परापरम् ।
अङ्गुष्ठ पर्वतुल्यन्तु कर्णिकाकेसरैर्युतम् ॥

भीमसंहितायाम् -

आद्यन्तेषु दलेष्वष्टौ ओं शिवाय नमोनमः ।
इन्द्रादीशानपर्यन्तन्न्यसेदष्टाक्षरं क्रमात् ॥

p. 1100)

निश्वासे तत्रैव ।

कर्णिकायां स्थितो विष्णुर्ग्रन्थिर्म्माया प्रकीर्तिता ।
कर्णिकायां भवेत्सूर्य्यस्तस्य मध्ये तु चन्द्रमाः ॥

तस्य मध्ये भवेद्वह्निर्वह्निमध्ये महेश्वरः ।

किरणे -

मन्त्रात्मिका कला तस्य ते च मन्त्राश्शिवात्मकाः ।
तैः प्रकल्प्य शरीरन्तु शुद्धांध्वाध्यासितं महत् ॥

निश्वासे -

सदाशिवो महेशस्य तस्यापि परतश्शिवः ।

तत्रैव ।

सदाशिवं महात्मानन्तस्य चोर्ध्वं परात्परम् ॥

शीतांशुनिर्म्मलं दिव्यंमग्राह्यं परमं शिवम् ।

शिवधर्म्मोत्तरे -

ज्ञानयोग प्रधानत्वादन्तरङ्गो विमुक्तिदः।
ज्ञाने नैव तदज्ञानन्निवर्त्तेत न कर्म्मभिः॥

सुप्रभेदे -

अन्तर्यागसमायुक्त आत्माशुद्धः प्रकीर्तितः।

वातुले -

अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रिय निग्रहः।
क्षान्तिः पुष्पन्दया पुष्पं ज्ञानपुष्पमतः परम्॥

p. 1101)

तपस्सत्यं च भावश्च पुष्पमष्टविधं स्मृतम्।
एतान्यत्राष्ट पुष्पाणि बुद्धिधर्म्मस्वरूपतः॥

मोहशूरोत्तरे -

अग्निः प्राणो मनःपात्रं गुरुधूपशिखाकुलः।

इत्यादि पूजास्तवे उक्तः। तथा हि -

लिङ्गं तच्च सुधामयेन पयसा संस्नाप्य सम्यक्पुन-
र्वैराग्येण च चन्दनेन वसुभिः पुष्पैरहिंसादिभिः।

प्राणायामभवेन धूपविधिना चिद्दीपदानेन यः
प्रत्याहारमयेन सोमहविषा सौषुम्न जापेन च ॥

तच्चित्तो बहुधारणाभिरमल ध्यानोद्भवैर्भूषणै-
स्तत्साम्याणु निवेदनेन यजते धन्यस्स एवामतः ।

सुप्रभेदे -

आसनादीनि सर्वाणि तथैवा वरणानि च ।
हृत्पद्मो कल्पयेद्विद्वान्यथोक्तन्तु यथा क्रमम् ॥

गन्धाद्यैरूपचारैस्तु मनसाकल्प्य पूजयेत् ।

षट्सहस्त्रिकायाम् -

मनसास्यार्चनं प्रोक्तं ब्रह्मादीनामगोचरम् ।
अकृत्रिम प्रधानन्तु तेनान्त्यार्गमाचरेत् ॥

शिवधर्म्मोत्तरे -

p. 1102)

मर्त्यमाणो यथा नित्यन्दर्पणो निर्म्मलो भवेत् ।
ज्ञानाभ्यासात्तथा पुंसां बुद्धिर्भवति निर्म्मला ॥

देविकालोत्तरे -

स्वयं पतित पुष्पैश्च कर्तव्यं यदि पूजनम्।

शिवतन्त्ररहस्य सारे -

भावस्थिरतरो न स्याद्यदा बाह्ये शिवार्चनम्।
यथा ध्यानानुरूपन्त ध्यान * * * * * * * ॥

* * * * * * * * * * * * * * * ।

* * श्वे -

वासना परिपक्वं च स्वयं कुर्याच्च वारुणम्।
धर्म्माधर्म्मात्मिका बुद्धिः कर्म्मणां वासनावशात्॥

शिवलिङ्गार्चनादेव नाशनाय न संशयः।
* * * * * * * * * * * * * * * * ॥

* * * * * * * * * * * * * * * ।
सर्प्पि क्षीरे यथा व्याप्तन्तिले * * * * * * ।

तथाग्नि पुराणे -

तिलक्षीर प्रसूनेषु तैलाज्यामोदवत्प्रभुः।
फले रसोग्निवत् * * * * * * * * * * ॥

p. 1105)

शिवज्ञानबोध सङ्ग्रहे -

मलन्नेदमिति ज्ञात्वा शिवस्य परमात्मनः।
यश्शक्तिरिति जानाति ततश्शुद्धयभिधीयते ॥

सर्वज्ञानोत्तरे -

आत्मन्येव स्थितश्शान्त आत्मतृप्तस्तु निश्चलः।
नागतोहं गतोवापि नागमिष्ये न गच्छता ॥

न भूतो न भविष्यामि प्रकृत्ये स्थिर धर्म्मिणि।
प्राकृतानि तु कर्म्माणि प्रकृतेः कर्म्मसम्भवः ॥

नाहं किंचित्करोमीति युक्तो मन्येत तत्त्ववित्।
नैव प्रकृति वन्धोस्ति मुक्त इत्यभिधीयते ॥

भर्तृहरिः -

मीन स्नानपरः फणीपवन भुङ्मेषस्तु पर्णाशनो
नीराशी खलु चातकः प्रतिदिनं शेते बिले मूषिकः।

भस्मोद्धूलन तत्परः खलुखरो ध्यानानुरक्तो बको
निन्दैषामभवत् फलं किमधुना ज्ञान प्रधानन्तपः ॥

न तत्र वेदशास्त्राणि यज्ञाश्च बहुदक्षिणाः ।
आत्मवित् ज्ञानमाश्रित्य विमलं सर्वतोमुखम् ॥

परसंवित्स्वरूपायाश्शक्तेरसति बन्धने ।
परमात्रं प्रकाशेत मुक्ताणूनामनादरम् ॥

p. 1104)

कालोत्तरे -

स्वकृतान्युपतिष्ठन्ति दुःखानि च सुखानि च ।
हेतु भूतो यतस्तेषां सोहंकारेण बाध्यते ॥

किरणे -

हेतुर्ल्लक्षणमित्युक्तं मुक्तिलक्षणमुच्यते ।
मार्ज्जारभक्षिते दुःखं यादृशं गृहकुक्कुटे ॥

न तादृङ्ममताशून्ये कलपिङ्गेथमूषिके ।

शिवधर्म्मोत्तरे -

यथा वह्निर्म्महा दीप्तश्शुष्कमात्रन्तु निर्द्दहेत्।
तथाशुभां शुभं कर्म्म ज्ञानाग्निर्द्दहति क्षणात्॥

मतङ्गे -

यो भिलाषात्मको भावो ममत्वेनात्मवर्त्तिना।
सोंकुरोणोरविद्याख्य संसारोत्पत्तिकारणम्॥

शिवधर्म्मोत्तरे -

तस्मात्स पण्डितश्शक्तस्तपस्वी विजितेन्द्रियः।
यश्शिवज्ञान सद्भावमालोचयितुमुद्यतः॥

क्रीडन्न लिप्यते नीतस्तद्वदिन्द्रिय पन्नगैः।
पद्मपत्रं यथा तोयैस्तत्स्थैरपि न लिप्यते॥

तत्वादि विषयान् भोगी तत्त्वज्ञानी न लिप्यते।

p. 1105)

शिवज्ञानबोध सङ्ग्रहे -

मलन्नेदमिति ज्ञात्वा शिवस्य परमात्मनः।
यश्शक्तिरिति जानाति ततश्शुद्ध्यभिधीयते॥

सर्वज्ञानोत्तरे -

आत्मन्येव स्थितश्शान्त आत्मतृप्तस्तु निश्चलः।
नागतोहं गतोवापि नागमिष्ये न गच्छता॥

न भूतो न भविष्यामि प्रकृत्ये स्थिरधर्म्मिणि।
प्राकृतानि तु कर्म्माणि प्रकृतेः कर्म्मसम्भवः॥

नाहं किंचित्करोमीति युक्तो मन्येत तत्त्ववित्।
नैव प्रकृति वन्धोस्ति मुक्त इत्यभिधीयते॥

भर्तृहरिः -

मीनस्नानपरः फणीपवन भुङ्मेषस्तु पर्णाशनो
नीराशीखलु चातकः प्रतिदीनं शेते बिले मूषिकः।
भस्मोद्धूलनतत्परः खलुखरो ध्यानानुरक्तो बको
निन्दैषामभवत् फलं कीमधुना ज्ञान प्रधानन्तपः॥

न तत्र वेदशास्त्राणि यज्ञाश्च बहुदक्षिणाः।
आत्मवित् ज्ञानमाश्रित्य विमलं सर्वतोमुखम्॥

परसंवित् स्वरूपायाश्शक्तेरसति बन्धने।
परमात्रं प्रकाशेत मुक्ताणूनामनादरम्॥

p. 1107)

मलमायाद्यसंस्पृष्टौ भवति स्वानुभूतिमान्।

सुप्रभेदे -

मलमुक्तस्तथात्मानं शुद्ध इत्युच्यते बुधैः।
ईश्वर स्मृति ना काले मलेध्वंसति निर्म्मलः॥

अतोहमीश्वरं स्मृत्वा पश्चात्तन्मयतां गतः।

सर्वज्ञानोत्तरे -

अविज्ञातः पशुस्सोहि सृष्टिधर्म्म समाश्रितः।
विज्ञातश्शाश्वतस्सिद्धस्सशिवो नात्र संशयः॥

योगजे -

गुह्यात्गुह्यतमं गुह्यं स्वानुभूत्यनुगम्यते।

तथा सूतसंहितायाम् -

एवञ्जीवात्मकं रूपं शिवं पश्यति चेद्दृढम्।
स्वात्मन्येव रतिक्रीडां शुद्धात्मा कुरुते सदा॥

यत्र सुप्तो जनोनित्यं प्रबुद्धस्तत्र सङ्गमी ।
प्रबुद्धा यत्र ते विद्वन् सुषुप्तस्तत्र केशवान् ॥

शिवधर्म्मोत्तरे -

ज्ञानं विकल्पबहुलं रागाद्यैः कलुषीकृतम् ।
शिवप्रकाशकं ज्ञानं योगस्तत्रैकचित्तता ॥

p. 1108)

सर्वज्ञानोत्तरे -

परापर विभागेन स्थूलसूक्ष्म विभागतः ।
परः परमनिर्वाणः परसृष्टिविवर्जितः ॥

स्थूलं शब्दमयः प्रोक्तस्सूक्ष्मो ध्यानैक संश्रयः ।
इत्येवमात्मनो ज्ञानं कथितन्तु समासतः ॥

अथवा बहुनोक्तेन किमेतेन षडानन ।
वाग्विकल्प विशेषेण मनस्संमोह कारणा ॥

सर्वधर्म्मात्मनस्सारमेव ते परिकल्पयेत् ।

योगजे -

वाच्यवाचक रहितो वाङ्मनोतीत गोचरः।
शिवश्शुद्ध इति प्रोक्तो रूपी अव्यय ईश्वरः॥

चिन्त्ये -

ज्ञातृज्ञेयं तथात्मान विहीनन्तत्परं पदम्।

सुप्रभेदे -

ज्ञानं प्रवर्तते वत्स भ्रान्ति निर्णाशनाय च।
अध्वश्रेणि विनाशाय शिव व्यक्तिकराय च॥

अन्धकारवदज्ञानं ज्ञानन्दीपवदुच्यते।
ज्ञेयं भास्करवत्प्रोक्तं तस्माज्ज्ञानं विशिष्यते॥

मृगेन्द्रे -

p. 1109)

नाध्यक्षन्नापि तल्लैङ्गं न शाब्दमपि शाङ्करम्।
ज्ञानमाभाति विमलं सर्वदा सर्ववस्तुषु॥

चिन्त्ये -

कर्म्मक्षयान्न युज्यन्ते देहिनां देह सम्भवात्।
देहं विना पृथक्कर्म युज्यते न कदाचन॥

नित्यं द्वन्द्व समायुक्ता वेतौ चान्योन्यतः पुरा।
तथापि कर्म्मनाशश्च गात्रेण कुरुते पुनः॥

तत्रैव।

देहिनां पुण्य पापाभ्यां देहमारभ्यते पुरा।
यथा जीर्णानि वस्त्राणि त्यक्त्वा वस्त्रन्नवं वसेत्॥

तथा देहं परित्यक्त्वा देहान्तरमवाप्नुयात्।
एवं भवाब्धौ मज्जन्तं पुण्यपापसमाहितम्॥

ज्ञानबोधं समारभ्य तारयन्त्याशुजन्तपः।

चिन्त्य विश्वे -

तत्रात्मनां मलश्चैव बन्धधर्म्मत्व कारणम्।
मलानां वासनानां च नाशो मोक्षो न संशयः॥

सुप्रभेदे -

स्वभावज्ञानतो मुक्तस्स जीवन्मुक्त एव हि ।

यश्शिवं मुक्त इत्युक्तो देहान्ते मुक्त उच्यते ॥

किरणे -

p. 1110)

विषसम्बन्धिनी शक्तिर्यथा मन्त्रैर्निरुध्यते ।

तथा न तद्विषं क्षीणमेवं पुंसो मलक्षयः ॥

फलं कतक वृक्षस्य क्षिप्तं सत् कलुषे जले ।

कुरुते शक्तिसंरोधं किं क्षिपत्यन्यतो जलात् ॥

शिवज्ञानन्तथा तस्य शक्तिसंरोधकारकम् ।

किरणे -

ततो मलक्षयेनापि पुरुषस्यक्षयं भवेत् ।

उत्तरम् ।

सहजा कालिमाताम्रे तत्क्षयन्नव तत्क्षयः ॥

तथा ताम्रस्य तद्वत् स्यात् एवं पुंसो मलक्षयः ।

सुप्रभेदे -

मलैर्मुक्तस्तथात्मानं शुद्ध इत्युच्यते ध्रुवम्।

रौरवे -

यथा सूर्योदयं प्राप्य तमः क्षिप्रं विनश्यति॥

किरणे -

तुषकम्ब्वङ्कुरश्चैव पुरुषस्य मलक्षयः।
नित्यानादिराख्यातस्तत्कथं स्यान्महेश्वर॥

उत्तरम्।

शुद्धाक्षतम्य नैवास्ति शुद्धात्मस्य तथैव च।
शुद्धात्मान्न स्थितो तेषान्नास्ति नाशः कदाचन॥

तस्मिन्पुनरपि।

p. 1111)

चराचरादि जन्तूनां शिवैव प्राण उच्यते।
प्रसरन्तं विना नास्ति अक्षराणामकारवत्॥

शिवधर्म्मोत्तरे -

सर्वत्रावस्थितं शान्तन्न प्रपश्यति शङ्करम्।
ज्ञानचक्षुर्विहीनत्वादन्धस्सूर्यमिवोदितम्॥

मतङ्गे -

अथार्क रश्मिसंपर्शाद्यथा ज्ञानक्रियात्मिका।

निश्वासे -

सर्वज्ञानोत्तरे -

ताम्रस्यैव तु हेमत्वमन्तर्ल्लीनं यथा भवेत्।
अन्तर्लीनं तथा ज्ञेयं शिवत्वं पुत्गलस्य तु॥

रसविद्धं यथा ताम्रं हेमत्वं प्रतिपद्यते।
तथा विज्ञान सम्बन्धाच्छिवत्वं प्रतिपद्यते॥

रसेन्द्रेणैव लोहानां कालिमा स्पर्शवेधिना।
हारिता चाग्नि संयोगाद्धेमत्वं प्रतिपद्यते॥

हारितं परमेशेन पशूनां पाशकालिमा।

स्वकारण गुणावेशा हेमत्वं प्रतिपद्यते ॥

लभन्ते योगिनस्सर्वे विज्ञानात्तुल्यतान्तथा ।

p. 1112)

मृगेन्द्रे -

येपि तत्पदमापन्नाशैव साधनयोगतः ।
ते तत्स्थित्य महाह्लादं प्राप्य यान्ति परं पदम् ॥

न च सृष्ट्यादि कुर्वन्ति स्वार्थ निष्ठाहिते यतः ।

तथा सर्वमतोपन्यासे -

अवर्जनीय संसिद्धिं मुक्तानां कृत्यपञ्चकम् ।
कृपया तु शिवस्येव स्वार्थ निष्ठा हि ते यतः ॥

न ते विश्वस्य कर्तारः कर्तारश्शिव एव हि ।

सर्वज्ञानोत्तरे -

शिवज्ञानामृतं पीत्वा विचरन्स्वयमेव हि ।
शिववच्छाश्वतश्शुद्धस्सृष्टिधर्म विवर्जितः ॥

शिवधर्म्मोत्तरे -

प्रलयान्ते तनुन्त्यक्त्वा स्वात्मन्येवावतिष्ठते।

द्वयोश्च चित्स्वरूपोपि ज्ञात्वा बुध्या विभिन्नया।
तस्मादेकोपपूज्योपि न ह्येतीय कथ्यते॥

मृगेन्द्रे -

दृक्क्रियात्मकमैश्वर्यं यस्य तद्दातृपूर्वकम्।
ईश्वरस्तत्र मन्तव्यश्शक्तिद्वययुतः प्रभुः॥

p. 1113)

किरणे -

तदात्म शिवयोस्सन्धिरयस्कान्तेव युज्यते।

वातुले -

पुरुषञ्च शिवञ्चैव लीयते सायसाग्निवत्।
यथा ताम्रं रसं विध्येद्दोषमुक्तं पुरातनम्॥

तथात्मानं शिवेलीनं जलेन लवणेनवत्।
अविशेषं भवेत् तद्वदात्मानु परमात्मनि॥

एवं शिवामृतं प्रोक्तंमप्रकाश्यमिदं गुह ।

इत्येकादशसूत्रम् सम्पूर्णम् ॥

द्वादशसूत्रम् ॥

शिवज्ञानबोधे -

मुक्तिं प्राप्य ततस्तेषां भजेद्वेषं शिवालयम् ।

तथा मतङ्गे -

शासनस्यापि ये भक्तास्तेपि दुःखविवर्जिताः ।
अपसरोभिर्वृता नित्यं क्रीडन्त्युत्कृष्टचेतसः ॥

लिङ्गं महेश्वरं भक्त्या नमस्कारादिनाथवा ।
पूजयन्ति नराश्शूरास्तेपि सिद्धा गणेश्वराः ॥

रमन्ति विविधैर्भोगैः प्राप्य स्थानमुमापतेः ।

p. 1114)

आलये शिवलिङ्गस्य भक्त्या निर्वर्तते शुभे ।

श्रीकण्ठपदमारुह्य सुखमत्यद्भुतं लभेत्॥

एवं भक्तिविभागेन लिङ्गे वा पितरस्तथा।
उपासन्ति महादेवन्तेपि सिद्धा नरोत्तमाः॥

मतङ्गे -

शिववच्छिवभक्तास्तु द्रष्टव्याश्शिवकांक्षिभिः।
संस्कृताश्च शिवैर्मन्त्रैर्गुरुणा शिवमूर्तिना॥

सर्वे समानधर्म्माणस्तथाप्येषोच्यते विधिः।
गुरोरप्यग्रतस्तेषां ज्येष्ठानामेव मासनम्॥

यथानुक्रम शुश्रूषावन्दनादीनि चक्रतुः।
कार्याण्यन्योन्य संम्ह?ष्टैर्गमाचक्षुर्विषये गुरोः॥

चिन्त्य विश्वे -

जन्मान्तर तपोभिश्च सन्मार्गज्ञानसम्भवः।

मतङ्गे -

पुर्यष्टक समायोगात् पुंसां कर्मानुसारः।

कामिके -

शिवं वै शाश्वतन्नित्यं ज्ञानानन्दमयात्मकम्।
व्यापकं सर्वतत्वानामप्रमेयमनुपमम्॥

वाच्यवाचकरहितं वाङ्मनोतीतगोचरम्।

p. 1115)

व्यक्तिं कुर्याद्विशेषेण शिवकलसकलात्मनि॥

शिवपुराणे -

ब्रह्मयत्सच्चिदानन्दं परिपूर्णं च सर्वदा।
सर्वत्र दृश्यते नैव करणा गोचरत्वतः॥

कालोत्तरे -

प्राकृतं भावमुत्सृज्य शिवोहमिति भावयेत्।

निश्वासे -

शिवोदेशिकदेशस्थः प्राण्यनुग्रहकारकः।
ददाति विविधां सिद्धिं मोक्षं च नयते पशुम्॥

स्वदेहान्निर्विशेषेण शिवभक्तांश्च पालयेत्।

अंशुमति -

देहं प्रासादमित्युक्तं देही लिङ्गमिति स्मृतम्।
उभयोरन्तरन्नास्ति तस्मादित्थं प्रभावयेत्॥

अथवान्य प्रकारेण स्थूललिङ्गे सदाशिवम्।
अन्तर्लिङ्गे शिवं ज्ञेयं भावयेद्देशिकोत्तमः॥

व्याप्यव्यापक भावेन लिङ्गमेवं विमानकम्।
मूलादिस्थूपि पर्यन्तं शिवरूपमिति स्मृतम्॥

मलमायादि सर्वेषु गतेषु पर ईश्वरः।
सर्वाङ्गेषु तेषु भगवान्नहि देहेषु पूज्यते॥

p. 1116)

लिङ्गेथवा न्यत्रशुभे सम्पूज्यो भगवाञ्च्छिवः।
आवाहनमनुध्यानं मनेभुक्ति निरोधनम्॥

शिवेन सह संयोगं चिन्तयेन्मनसाधिया।

तथा पराख्ये -

पूज्यते परतश्शान्तस्सिद्धिमुक्ति फलार्थिभिः।
स एव मन्त्रदेहस्थः पूज्यतेसौ परश्शिवः॥

गवां सर्वाङ्गतः क्षीरं स्त्रवते न मुखाद्ययौ।
एवं लिङ्गमयं रूपं सर्वकामेषु रोहति॥

ज्ञानयोगम्।

किरणे -

ये यथा संस्थितास्ताक्ष्र्य तथैवेश प्रसादकृत्।
केचिच्चात्र क्रियायोग्यास्तेषां मुक्तिस्तथैव हि॥

ज्ञानयोग्यास्तथैवान्ये चर्यायोग्यास्तथापरे।
एवमेषां च यद्युक्तं मोक्षन्ते नै योजयेत्॥

मतङ्गे -

सदाशिवे पदे योगाच्चर्यातो वाथ दीक्षया।
प्राप्यते चित्तभेदेन मोक्षो वाथ चतुष्टयात्॥

तथा वायव्ये -

ज्ञानं क्रिया च चर्या च योगश्चेति सुरेश्वरि ।
चतुष्पादास्समाख्याता धर्म्माधर्म्मास्सनातनाः ॥

p. 1117)

पशुपाशपतिज्ञानं ज्ञानमित्यभिधीयते ।
षडध्वशुद्धिविधिना गुर्वधीना क्रियोच्यते ॥

वर्णाश्रम प्रयुक्तस्य मयैव विहितस्य च ।
मदर्च्चनादि धर्म्मस्य चर्याचर्येति कथ्यते ॥

मद्युक्ते नैव मार्गेण मय्यवस्था प्रचेतसः ।
प्रत्यन्तरे तिरोधेन स योग इति गीयते ॥

स्कन्दकालोत्तरे -

ईश्वरः ॥

लभ्यते शास्वतं ज्ञानं तत्प्रसादेन षणमुखम् ।
यमन्नियममासीनं प्राणायामन्ततः परम् ॥

प्रत्याहारो धारणा च समाधिध्यानतः परम्।
गुरुप्रसादाल्लभते दिव्ययोगं षडानन ॥

आकाशगमनं चैव परकाय प्रवेशनम्।
मनोजयत्वं हि जना तत्प्रसादेन लभ्यते ॥

अणिमा लघिमा चैव महिमा गरिमा तथा ।
प्राप्तिः प्राकाम्यमीशत्वं वशित्वं चाष्ट सिद्धयः ॥

गुरुप्रसादाल्लभते मुक्तो मृत्युजरादिभिः ।

विश्वसारे -

गुरु रूपं परं ब्रह्म गुरुरूपं परं शिवम्।
गुरु रूपं परं ज्ञानं गुरु रूपं परात्परम्॥

तस्मात्सर्वप्रयत्नेन गुरु रूपं सदा स्मरेत्।

p. 1118)

तथा ।

ईक्षणध्यान संस्पर्शैर्मत्स्य कूर्म्म विहङ्गमाः ।

पोषयन्ति स्वकान्पुत्रान् तद्वत्पण्डित वृत्तयः ॥

निश्वासे -

प्रकाशयस्वेदं ज्ञानं मद्भक्तानां वरानने ।
रक्षणीयं प्रयत्नेन तस्करेभ्यो धनं यथा ॥

देविकालोत्तरे -

ईदृशं ज्ञानसद्भावं न दद्याद्यस्य कस्यचित् ।
दीक्षयित्वा महादेवि दातव्यं सुपरीक्ष्य च ॥

नाशिष्याय प्रदातव्यन्ना पुत्राय कदाचन ।
गुरुदेवाग्नि भक्ताय मात्सर्यरहिताय च ॥

प्रदातव्यमिदं ज्ञानमितरेषान्न दापयेत् ।

द्वादशतमसूत्रं सम्पूर्णम् ॥

इति श्रीमद्व्याघ्रपुरवासनिगमज्ञान शिवयोगीशिष्यवेदज्ञान शिवाचार्य
सङ्ग्रहसकलागमसारभूत शिवज्ञानसिद्धेर्दृष्टान्तस्समाप्तः ॥

॥ ओं श्रीमदरुणाचलाय नमः ॥

XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX
X
X title: brahmasandhaana
X
X copied from manuscript c.n. 4242 of banares hindu university
X
X "saaradaa script
X
X data entered by the staff of muktabodha
X under the supervision of mark s.g. dyczkowski
X
X revision 0: april 7, 2012
X
XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX

* * * * * * * * * * * * * * * * भेत्।

हृत्पद्मे नाभिपद्मे च मुखपद्मे तथैव च ॥ ५॥

वसते परमात्मा वै यदि शक्नोषि वेदितुम्।

नवद्वाराणि सङ्घट्ट नवनाडीर्निरोधयेत्॥ ६ ॥

संहृत्य नववायूंश्च हृत्पद्मे तान् प्रवेशयेत्।

तस्य पद्मस्य वै नालं पिङ्गलानाडिरुच्यते ॥ ७ ॥

तया प्रोक्तास्त्रयः पश्चात् सूत्रे मणिगणा इव ।
प्रधानानाडयस्त्रिस्त्रस्तालब्ध्वा वेदयेत् पुरम् ॥ ८ ॥

तासां मुख्या तु वै ह्येका तां ज्ञात्वा ज्ञायंसे परम् ।
तस्या मध्ये स्थितं ज्ञेयं सर्वकारणमव्ययम् ॥ ९ ॥

यं विदित्वा महासेन उत्क्रान्त्रिं कर्तुं मर्हसि ।
दशमद्वारमाश्रित्य दशमानाडिका *? ह ॥ १० ॥

दशमं पवनं लब्ध्वा विषुवत् ग्रहणं भवेत् ।
आकाशं ग्राहयेत् तस्य ग्रन्थि भेदैः शनैः शनैः ॥ ११ ॥

p. 2) कृत्वा वै ब्रह्मसन्धानं सम्यग् ज्ञात्वा परां गतिम् ।
परे स्थाने लयं कृत्वा निष्कम्पः सुसमाहितः ॥ १२ ॥

प्रणवे संहरेदात्मा ग्राह्यं निश्शेषमारुतम् ।
प्रणवं तु समुच्चार्य ताल्वोष्ठपुटशोभितम् ॥ १३ ॥

कल्पायुरपि तत्रैवमाक्रमत्यनु संशयः।
करणान्यप्रशेषाणि ग्रन्थि द्वाराणि सर्वशः॥ १४॥

नाडयः पवनात् सर्वा विदित्वा सर्वमुच्यते।
यावच्च ज्ञायते वत्स तावद् ब्रह्मलयी भवेत्॥ १५॥

तं विदित्वा महासेन उत्क्रान्ति कर्तु मर्हसि॥ १६॥

कस्मिन् स्थाने स्थितो ब्रह्मा केन द्वारेण सिद्धयति।
एतत् सर्वं समाचक्ष्व यदि तुष्टोसि मे प्रभो॥ १७॥

p. 2b) ब्रह्मा ब्रह्मे लये कुर्याद् भूताद् भूतेषु वलयम्।
अन्यथा नैव सिद्धयन्ति कल्पकोटि शतैरपि॥ १८॥

भूतांस्त्यक्त्वा तु वै देव केन द्वारेण सिद्धयति।
एतन् मे संशयं सर्वं वक्तुमर्हस्य शेषतः॥ १९॥

गुह्याति गुह्यं गुह्यं च अतिगुह्यं षडानन।
यत्त्वया वेदितं प्रश्नं तत् सर्वं कथयामिते॥ २०॥

व्योम मध्ये स्थिता सूर्यः सूर्यमध्ये स्थितः सशी ।
शशि मध्ये स्थितं तेजस्तेजोमध्ये स्थितं परम् ॥ २१ ॥

ऋजु स्निग्धं च विमलं विद्युल्लेखे वदुस्सहम् ।
* *? कोटि? प्रतीकाशं दुष्प्रेक्षं लयवर्जितम् ॥ २२ ॥

हृत्प * * * * * * ? सूर्यं शशि हुतासनम् ।
तेषां मध्ये परं तेजो ये नेदं प्रतितिष्ठितम् ॥ २३ ॥

p. 3a) महत्तेजांसि यच्चित्तं प्रत्यक्षं यस्य षण्मुख ।
ब्रह्मद्वारस्य वै पृष्ठे धूम्रोयं सर्वतः स्थितः ॥ २४ ॥

हृदिस्थं गगनस्थं च उभावेकत्र चिन्तयेत् ।
अन्यथा नैव सिद्ध्यन्ति युक्तिहीनाः शिखिध्वज ॥ २५ ॥

यन्मयोक्तं परंब्रह्म हृद्याकाशे व्यवस्थितम् ।
सा शक्तिः स शिवं ज्ञानं ज्ञेयं चाक्षरमव्ययम् ॥ २६ ॥

एतत् ते ब्रह्मसन्धानं ब्रह्मद्वारेण यो भवेत्।
स मुक्तः सर्वदुःखेभ्यः सद्यो ब्रह्मणि कल्पयन्॥ २७ ॥

उत्क्रान्ति काले तस्येदं विदितं ब्रह्मणो लयम्।
स वै लीनो परे वत्स इत्याज्ञा पारमेश्वरी ॥ २८ ॥

ब्रह्मनाडिं ब्रह्मवायुं ब्रह्म * * * *? लभेत्।
ब्रह्मणं तु समन्तव्यं ब्रह्माक्षर ल * * *? ॥ २९ ॥

p. 3b) प्रणवं हृत्स्थितं पद्मं प्रणवं व्योम्नि संस्ति *? म्।
कालाग्नि रुद्रपर्यन्तं यावद्ब्रह्माण्डगोचरम्॥ ३० ॥

सर्वं दृष्टं परेणेदं प्रणवेण शिखिध्वज।
वाङ्मयं सकलं यश्च त्रैलोक्यं स चराचरम्॥ ३१ ॥

ब्रह्मादि स्तम्भ पर्यन्तं सर्वं प्रणवसम्भवम्।
तस्मिन् नेव लयं कुर्यात् ते चैव ब्रह्मवादिनः ॥ ३२ ॥

स एव परमं स्थानं स एव परमाक्षरम्।

त्र्यक्षरं च त्रिधा भिन्नं त्रिस्थानं त्रिगुणात्मकम्॥ ३३॥

त्रिदेवाग्नि त्रयं चैव त्रिदेवं परमं स्मृतम्।
पञ्चमूर्ति धरं देवं शिवं परमकारणम्॥ ३४॥

* * * द्यन्तरे वत्स यदि सक्नोषि वेदितुम्।
देवदानव * ? द्धानां गन्धर्वोरगरक्षसाम्॥ ३५॥

सर्वेषां प्रणवं योनि लयं तत्रैव ष * *?।
p. 4a) ब्रह्माविष्णुश्च रुद्रश्च ईश्वरः शिव एव च॥ ३६॥

प्रणवेण तु वै सिद्धाः सम्भूताः प्रणवेन तु।
अक्षरं चक्षरं चैव स नामं नामवर्जितम्॥ ३७॥

स रूपं रूपरहितं प्रणवं परिपठ्यते।
उच्चार्यं तु ह्यनुच्चार्यं स्वरमस्वरमेव च॥ ३८॥

घोषं चैव ह्यघोषं च प्रणवं परशक्ति धृत्।
स मन्त्रं च ह्यमन्त्रं च ग्राह्यमग्राह्यमेव च॥ ३९॥

ग्राह्यग्राहक भेदेन प्रणवं सर्वतः स्थितम् ।
प्रणवं यो न जानाति विश्वस्या यतनं परम् ॥ ४० ॥

तस्य मोक्षः कुतो वत्स कल्पकोटि शतैरपि ॥

अद्यापि सं *?

????????????????????????????

व हृदये वर्तते महान् ।
p. 4b) कस्मिन् स्थाने स्थितो ब्रह्मा तत् समाचक्ष्व मे प्रभो ॥

श्री ईश्वर उवाच

सर्वत्रावस्थितो ब्रह्मा प्राणिनां देहधारकः ।
विशेषतः पुनर्वत्स त्रिषु स्थानेषु संस्थितः ॥ २ ॥

हृत्पद्मे नाभिपद्मे तु मुखपद्मे तथैव च ।
स प्रत्यक्षं दृश्यते वै विकारावस्थितः प्रभुः ॥ ३ ॥

हसते रुदते चैव नृत्यते गायते तथा।
भुञ्जते जिघ्रते चैव शृणु वक्ष्यामि हेतुतः॥ ४॥

उन्मेषे च निमेषे च विषादे चैव हर्षिते।
सुखदुःखान्यसौ वेत्ति शीतोष्णस्पर्शनानि च॥ ५॥

क्षुट्तृष्णा मैथुनं निद्रा प्रबोधं जाग्रता स्थितम्।
एते प्रत्यक्षतो यस्य दृश्यन्ते वै षडानन॥ ६॥

नान्यदीपं स्वरूपेण परमात्मा च लभ्यते॥ ७॥

p. 5) विस्मयो मे महादेव अद्यापि न निवर्तते।
त्रिस्थानावस्थितं देवं श्रोतुमिच्छामि वै प्रभो॥ ८॥

तुष्टोहमद्यते पुत्र यत् त्वया पृच्छ्यते ह्यहम्।
त्रिस्थानावस्थितं ब्रह्म तच्छृणुष्व यथाक्रमम्॥ ९॥

हृत्पद्मे वसते नित्यं स्थिरा भावेन वै गुह।
मुखपद्मे नाभिपद्मे गतागतिं करोति सः॥ १०॥

हृत्पद्मस्य तु पत्राणि नाडयस्ताः प्रकीर्तिताः ।
प्रणाद्या वायवः सर्वे वहन्ते तेषु नाडिषु ॥ ११ ॥

नाडयो वै दश प्रोक्ताः पवनानि तु वै दश ।
प्रधाना पिङ्गला शून्य सृजते पहरे तु सः ॥ १२ ॥

नाडि चक्रस्य सर्वस्य नाभिभुव्यवस्थितम् ।
p. 5b) नाडि चक्रस्य वै तद् वत् पिङ्गला मध्यतोद्भवा ॥ १३ ॥

इडा चैव सुषुम्णा च पिङ्गला च तृतीयका ।
एककायं च सर्वासां युक्ति भेदे पृथक् पृथक् ॥ १४ ॥

इडा वहति वामेन तत्र सोमो व्यवस्थितः ।
सुषुपिङ्गला दक्षिणपुत्र त्रत्र सूर्यो व्यवस्थितः ॥ १५ ॥

सुषुम्णा मध्य नाडी तु तत्र सर्वं सदा स्थितम् ।
इडामध्ये स्थितं देव पितृयानेति कथ्यते ॥ १६ ॥

पिङ्गलावस्थितं पुत्र देवयानेति कथ्यते।

सुषुम्णा मध्यमानाडी तत्रस्थं मोक्षमार्गदश ॥ १७ ॥

सर्वारम्भेण योगीन्द्रो मोक्षमार्गपदावहः।

कर्णिकान्त स्थितं देवमव्यक्तं रूपवर्जितम् ॥ १८ ॥

तदुर्थावयव सर्वेयैर्व्याप्ता नाडयोदश।

p. 6a) तासां मध्ये तु वै ह्येका सुषुम्णा नाम श्रूयते ॥ १९ ॥

तया प्रोक्तास्त्रयः पद्माः सूत्रेण मणयो यथा।

तस्याभ्यन्तरसंलीनौ प्राणापानौ व्यवस्थितौ ॥ २० ॥

सुषुम्णामध्यसंस्थौ तु प्राणापानौ शिखिध्वज।

सृष्टिप्रलयरूपेण स्थिता वेतौ कुमारक ॥ २१ ॥

ग्रथितौ परयाशक्त्या अव्यक्ता मृतयोथया।

आधाराधेय भावेन परापर विभागशः ॥ २२ ॥

सृष्टि प्रलय रूपेण प्राणापानौ व्यवस्थितौ।

तयोर्मध्ये स्थितं ब्रह्म अन्यक्तं रूपवर्जितम्॥ २३॥

ग्रसते सृजते चैव सर्वं विश्वं चराचरम्।
नाभिपद्मस्य वै पृष्टे हृत्पद्मं तु अधो मुखम्॥ २४॥

उभाभ्यां कर्णिका मध्ये परं तद्वीक्ष्य पुत्रक॥ २५॥

p. 6b) कथं मे दृश्यते तात तस्य रूपस्य गोचरम्।
यं दृष्ट्वाहं गमिष्यामि अजन्म पदमव्ययम्॥ २६॥

साधु साधु महाप्राज्ञ योगयोगेश्वरेश्वर।
यत् त्वया चोदितं प्रश्नं दुर्विज्ञेयं सुरोरपि॥ २७॥

न ब्रह्मणा न सूर्येण न चन्द्रेन न विष्णुना।
न तु देव्या त्वया चैव यदभ्य परिपृच्छितम्॥ २८॥

तत् ते हं कथयिष्यामि गुहाद्गुह्यतरं परम्।
विक्षेप वचनं रक्षेच्छरणागतवत्स्वत॥ २९॥

राजामन्त्री वरक्ष्यो यं न देयं यस्य कस्य चित्।
अदीक्षितेन दातव्यमश्रद्धेयमनार्जवो॥ ३०॥

आकुले कूरहृदये दुर्जने च दापयेत्।
दातव्यं दीक्षते पुत्र गुरुदेवाग्निपूजके॥ ३१॥

p. 7a) श्रद्धधाने जितक्रोधे लोभमोहपराङ्मुखे।
परीक्ष्यते गुरुः शिष्यमब्दानि द्वादशानि वै॥ ३२॥

अनेन भावितं विश्वं सर्वमेव चराचरम्॥ ३३॥

अद्यमे जन्मसफलं अद्यमे सफलं श्रुतम्।
अद्यमे सफला बुद्धिरद्यमे सफलं तपः॥ ३४॥

स कृतार्थोस्मि वै ह्यद्य अद्य जातोस्मि वै पुनः।
मुक्तोस्मि चा?द्य वै तात भवसंसारबन्धनात्॥ ३५॥

गुह्यं ज्ञानं विदित्वा तु तृप्तोहं सर्वदा प्रभो।
अधुना श्रोतुमिच्छामि प्रणापानौ व

???????????????????????????

p. 7b) कथं स्थितौ ॥

शृणु वत्स महाप्राज्ञ यत् त्वया चोदितो ह्यहम् ।
तत् तोहं कथयिष्यामि प्राणापानौ यथा स्थितौ ॥ २ ॥

प्राणाद्या वायवः पञ्च ऊर्ध्वभागे व्यवस्थिताः ।
तेषां मध्ये प्रधानौ द्वौ प्राणापानौ प्रकीर्तितौ ॥ ३ ॥

कन्दुकन्यायमाश्रित्य अध ऊर्ध्वं प्रवर्तते ।
योगमार्गेषु सर्वेषु गतिरेषा प्रवर्तते ॥ ४ ॥

नवानां चैव वायूनां प्राणापानौ प्रकीर्तितौ ।
हृत्पद्मे नाभिपद्मे तु द्वादशान्ते तथैव च ॥ ५ ॥

विशते परमात्मा वै प्राणापान गति स्थितः ।
अपानः संहरेत् प्राणं प्राणोपानस्य वै तथा ॥ ६ ॥

प * * *? स्थितं तेषां सृजते संहरत्यसौ ।

उदयास्त मनं ह्येतन् नान्यं मन्ये शिखिध्वज ॥ ७ ॥

p. 8a) बाह्यसंस्थस्य सूर्यस्य नोदयो वै नास्तमयः ।
तपते सततं वत्स विश्वं दिङ्मार्गवीक्षणे ॥ ८ ॥

तस्मात् सर्वप्रयत्नेन शरीरस्थं विचारयेत् ।
यं ज्ञात्वा प्राप्यते मोक्षो येन भूयो न जायते ॥ ९ ॥

ज्ञातुमिच्छम्यहं देव उदयास्त मयं कथम् ।
अहोरात्रं कृतं चैव सङ्क्रान्ति विष्ववद् द्वयम् ॥ १० ॥

अति प्रियोपि मे पुत्र पृच्छसे शोभनं सुत ।
यत् त्वया चोदितं प्रश्नमनाख्यं कथयामिते ॥ ११ ॥

यन् मयोक्तं परं ब्रह्म हृदिस्थं तं षडानन ।
तस्य शक्तिर्भवेदेषा उदयास्त मनं प्रति ॥ १२ ॥

ऊर्ध्वमार्गे यदा ज्वाला वर्तते तस्य तेजसः ।
उदयं तं विजानी

??????????????????????

* * * तालयं यस्मात् तस्माल्लिङ्गं तदुच्यते ।

p. 8b) अलिङ्गं लिङ्गरूपेण अव्यक्तं व्यक्तगोचरम् ॥ ९ ॥

आकाशं सम्भवेद्भूत्स यो वै शक्त्या लयं गतः ।

पृथिव्यापस्तथा तेजो वायुराकाश एव च ॥ १० ॥

एते पञ्च महाभूता यतोत्पन्ना लयं हि तत् ।

आकाशं ग्रसते शक्तिर्यथाग्रस्ताखिलं जगत् ॥ ११ ॥

सृष्टिं तु कुरुते सा तु शिवाज्ञा चोदिता गुह ।

प्रलयं सर्वभूतानां मया ते कथितं सुत ॥ १२ ॥

मयि चोक्तं शिवे नेदं पूर्वं तुष्टेन सर्वदा ।

भूतोत्पत्ति लयं चैव मयाज्ञातं विभागशः ।

भूयो विज्ञातुमिच्छामि * * * * * * * * ।

पगे ९ तो १९ मिस्सिन्ग्

?????????????????????????????

p. 20a) * * * * * * * * आकारं ब्रह्मसंस्थितम् ॥ १ ॥

अतिगुह्यतमं प्रश्नं यत् त्वया चोदितं गुह ।
तत् सर्वं कथयिष्यामि शृणुष्वा वहितं तथा ॥ २ ॥

शून्यं शून्यं पुनः शून्यं शून्यं शून्यं पुनः पुनः ।
शून्याच्छून्यतरं शून्यं तच्छून्यं शून्यमेव च ॥ ३ ॥

शून्यं शून्यं त्वया प्रोक्तमनेन ज्ञानता मम ।
शून्यस्या शून्यतां ब्रूहि यदि तुष्टोसि मे प्रभो ॥ ४ ॥

शून्यं शून्यं तु यो वेत्ति शून्यं शून्यं तु यो भवेत् ।
अशून्यं तं विजानीयात् सर्वशून्या लयं हितम् ॥ ५ ॥

सर्वभूतेषु तं वत्स त्रिशून्यं हृदिसंस्थितम् ।
न तु जानन्ति तं शून्यमशून्या येन ते कृताः ॥ ६ ॥

शून्यभूतं शिवं ज्ञेयं शून्यभूता हि शक्तयः ॥

p. 20b) अशून्यं तेष्वमीरूपं सर्वगं चेतनात्मकम् ॥ ७ ॥

न हि शून्यस्य शून्यत्वं शून्यत्वं तस्य भावना ।
विज्ञानं ज्ञापकं शून्यं निरालम्बाबलम्बितम् ॥ ८ ॥

विभुत्वेन स्थितं शून्यं ये नेदं पूरितं जगत् ।
तं शून्यं शून्यमित्याहुर्वदन्ति ज्ञानबुद्धयः ॥ ९ ॥

शून्यस्य शून्यता नास्ति अशून्यं शून्यमुच्यते ।
सृष्टिप्रलय रोहित्वा च्छून्यस्याशून्यतां विदुः ॥ १० ॥

शून्यात् सृष्टिः प्रसवति शून्ये तु प्रलयं पुनः ।
तस्मादशून्यता शून्ये निरालम्भावलम्भिनम् ॥ ११ ॥

निरालम्भावलम्भित्वं शून्यता येन सिद्धयति ।
विज्ञानज्ञानयोगेन शून्यं ज्ञेयं लभेष्यसि ॥ १२ ॥

शून्यंत्व शून्यं ज्ञातव्यं न हि शून्योस्ति कुत्र चित् ।
p. 21a) तेषां शून्यमिदं शून्यमज्ञाना येषु भावना ॥ १३ ॥

अशून्यं सर्वदा वत्स त्रैलोक्यं स चराचरम्।
ब्रह्मादि स्तम्भपर्यन्तं सर्वं शून्येन पूरितम्॥ १४॥

तच्छून्यं पूरिता शक्त्या अव्यक्ता या शिवोत्थया।
यथा चैतन्य भावेन बोधितं भुवन त्रयम्॥ १५॥

वस्तु शून्यं न त च्छून्यं शून्यमज्ञानशून्यता।
तं शून्यं ज्ञान रूपेण ज्ञेयं शून्यं न तद्गुह॥ १६॥

ज्ञेय शून्यो पलब्धित्वं निरालम्बावबोधनम्।
न पुनः शून्य भावस्तु शून्येस्मिंस्तत्त्वतः सुत॥ १७॥

तमो भूतं जगत्सर्वं पूर्वमासी च्छिखिध्वज।
नष्ट सूर्येन्दु वातौघैर्ग्रहनक्षत्र तारकैः॥ १८॥

अप्रतर्कमविज्ञेयं दिशासु विदिशासु च।
न चोर्ध्वं नैव पातालं महाभूतैस्तु वर्जितम्॥ १९॥

p. 21b) व्यक्तिं न दृश्यते यत्र अव्यक्तं सर्वतः स्थितम् ।
तस्मिन् काले तया शक्त्या चिद्रूपाया शिवोत्थिता ॥ २० ॥

तुर्यस्थाने लयं कृत्वा ववर्ष ह्यमृतं बहु ।
भूतसृष्टि हितार्थाय प्लावितं चाखिलं जगत् ॥ २१ ॥

तदा ह्यण्डः समुत्पन्नश्चाष्टाङ्गः कनकोपमः ।
कल्पान्तं यावदण्डं तदणु रूपेणसंस्थितम् ॥ २२ ॥

स तु वत्स द्विधा भिन्नो दिवं भूमिं तु निर्ममे ।
अष्टा शा विदिशश्चाष्टौ मध्ये बीजाङ्कुरं पदम् ॥ २३ ॥

चिच्छक्त्या तु समुद्भूतं ये नेदं ग्रथितं जगत् ।
तस्याङ्कुरस्य पृष्ठे तु महापद्मं सितं शुभम् ॥ २४ ॥

सहस्रदलपत्राढयं कर्णिकाकेसरैर्युतम् ।
प्रणवं तं च विज्ञेयं पद्मं पद्मदले क्षणम् ॥ २५ ॥

p. 22a) तस्य मध्ये समुत्पन्नो ब्रह्मावेदनिधिर्गुह ।

कर्णिकान्ते स्थितं वत्स सर्वलोकपितामहम् ॥ २६ ॥

सृजते सर्वभूतानि चराणि ह्यचराणि तु ।
तदा प्रजापतिर्वत्स विश्वकर्ता महेश्वरः ॥ २७ ॥

चतुर्मुखं चतुर्बाहुं चतुर्वेद निधिं प्रभुम् ।
सूर्यकोटि प्रतीकाशं कल्पान्ताग्नि समप्रभम् ॥ २८ ॥

तेन तेजोवभासेन भासितं भुवनत्रयम् ।
व्यक्तीभूतं तदावत्स दिशोष्टौ गगनं क्षितिः ॥ २९ ॥

क्षितिभूतं स्थितं पद्मं मेरुभुता हि कर्णिका ।
दलाष्टकं दिशश्चाष्टौ ब्रह्मपद्मस्य षण्मुख ॥ ३० ॥

चतुर्दशविधं वत्स भूतसर्गं चराचरम् ।
सर्वं प्रणवसंभूतं चिच्छक्त्या चेतनोद्भवम् ॥ ३१ ॥

p. 22b) कालाग्नि रुद्रपर्यन्तं चिच्छक्त्याङ्कुरसम्भवम् ।
तच्च पद्मस्थितं वत्स अमृतोदधिमध्यगम् ॥ ३२ ॥

तं दृष्ट्वा तु स्वयं ब्रह्मा विस्मितो ह्यन्तरात्मना।
तदा तस्योदिता बुद्धिर्योगमभ्यमनं प्रति॥ ३३॥

तेन योगं समभ्यस्तं दिव्यायुतसहस्रकम्।
तस्य योग फलावाप्तिश्चिच्छत्तया प्रणवे हृतम्॥ ३४॥

तेन चोत्यादितं सर्वं विश्वं हि स चराचरम्।
ब्रह्मादि स्तम्भ पर्यन्तं यावत् कालादि गोचरम्॥ ३५॥

तस्मात् साकार भुतानि सर्वे ब्रह्ममयागुह।
सर्वं च खल्विदं ब्रह्मस्वतोर्थं ब्रह्म वादिनम्॥ ३६॥

ज्ञात्वा भूत हितं वत्स ये स्थितास्ते ह्यसम्भवाः।
सर्वेषां चैव भूतानां प्रणवं योनिशक्ति धृत्॥ ३७॥

तस्माद् ब्रह्मसमुत्पन्नमादौप्रणव योनिषु।
p. 23a) प्रणवेन भवेत् पद्मं चिच्छत्त्यङ्कुरसन्निभम्॥ ३८॥

तस्मिन् मध्यात्समुत्पन्नः पद्मयोनिस्तदुच्यते ।
प्रणवं योन जानाति बिन्दुनादेन्दु भूषितम् ॥ ३९ ॥

मात्रार्द्धमात्रसंयुक्तं तेन ब्रह्मविदो विदुः ।
अर्द्धमात्रासमुद्धुतं प्रणवं सर्वदा गुह ॥ ४० ॥

नादान्तान्तरसंस्थं तु परं ब्रह्मसनातनम् ।
तस्मिन्नेव लयं कुर्यात् तेनैवं ब्रह्मवादिनः ॥ ४१ ॥

शिवान्तरसमुद्धुत परं ब्रह्मशिखि ध्वज ।
तैर्ज्ञातममृतं तेषामज्ञानं च विषं भवेत् ॥ ४२ ॥

अर्धमात्राणि खर्वांशं तस्यांशः कोटिरंशकम् ।
तस्यापि लक्षसो ह्यंशो योजानाति स ब्रह्मवित् ॥ ४३ ॥

????????????????????????????
p. 23b) ब्रह्माण्डा ब्रह्मणोत्पत्तिं मया ज्ञातं मया श्रूतम् ।
अधुना श्रोतुमिच्छामि स्त्रीपुंसोश्चैव सम्भवम् ॥ १ ॥

यत् त्वया चोदितं प्रश्नं दुर्विज्ञेयं सुरैरपि ।

तत्तेहं कथंयिष्यामि रहस्यं प्रश्नपूर्वकम्॥ २॥

योगमभ्यसितं पूर्वं सृष्ट्यर्थं पद्मयोनिना।
तपश्च सुमहत्तीर्णां दुष्करं चाद्भुतोपमम्॥ ३॥

तदा तुष्टः स भगवाञ्शिवः परमकारणः।
परं ब्रह्मशिवं ज्ञेयं परं स्थानमनामयम्॥ ४॥

परापर शिवं वत्स सर्वेषां परतः स्थितम्।
तेन तुष्टेन देवेन चिच्छक्त्या चेतना गुह॥ ५॥

गच्छत्वं ब्रह्मणः नार्धं सृष्टिसृष्ट्यर्थ कारणम्।
p. 24a) आराधितो ह्यहं तेन भक्त्यापरमयायदा॥ ६॥

चिच्छक्त्या चोदितं देव प्रत्यक्षं त्वं कथं विभो।
तदादि दृष्ट पूर्वोयमेवं पद्म तनुर्भवेत्॥ ७॥

एवं मत्वा सर्वे शक्तिः शक्तिरूपेण संस्थिता।
स तु विष्णुर्विजानीया च्छक्तिरूपेण शक्ति धृत्॥ ८॥

अहं तु पुरुषः साक्षाच्छिव तेजस्समुद्भवः।
उभाभ्यां बीजरूपेण पद्मयोनिस्तृतीयकः॥ ९॥

एवं हि त्रिविधा सृष्टिः संभुताभुतजा गुह।
प्रणवं तु भवेदेष अ उ-मक्षरयोजितम्॥ १०॥

नादेन्दु बिन्दुरेते वै कलामात्रास्तथैव च।
चतुर्विंशति तत्वानि पुरुषं पञ्चविंशकम्॥ ११॥

आयुः कर्म च वित्तं च विद्यानिधनमेव च।
अन्ये ये केचिच्छारीरा व्यक्ता-अव्यक्त वायवः॥ १२॥

p. 24b) सर्वं समरसं भुत्वा चिच्छत्त्याव्यक्तया गुह।
तं रसं ब्रह्ममित्याहुरानन्दकरणं परम्॥ १३॥

शुक्रं तं तु विजानीयादमरत्वं कभो?तिसः।
सृष्टिरूपेणमर्त्यानाममरत्वे व्यवस्थितः॥ १४॥

देवानाममरत्वं च पुरातेनैव कल्पितः ।
चतुर्दशविधिवत्स भूतसर्गं चराचरम् ॥ १५ ॥

अग्रे खगात्मकं सर्वं सृष्टब्रह्मादिभिर्गुह ।
ब्रह्मतेजस्समुत्पन्नावग्नीषोमौ शिखिध्वज ॥ १६ ॥

तथा बीजस्य बीजत्वमन्यथा तु निरर्थकम् ।
एवं सर्वे समारम्भाः सर्वबीजेषु संस्थिताः ॥ १७ ॥

शरीरसृष्टिहेत्वर्थं चिच्छक्त्या चेतनात्मकम् ।
यथान्यग्रोध बीजानां न्यग्रोधाभ्यन्तरे स्थितः ॥ १८ ॥

p. 25a) तथा सर्वेषु भूतेषु चिच्छक्त्या चेतसंस्थितम् ।

?????????????????????????
सृष्टिन्यासं मयाज्ञातं दैविकं चैव मानुषम् ।
भूयश्च परिपृच्छामि स्त्रीपुंसो सम्भवो यथा ॥ ॥

इदं गुह्यं महागुह्यं सर्वगुह्येषु वै गुह ।
यत् त्वया चोदितं प्रश्नं तत् सर्वं शृणु षण्मुख ॥ २ ॥

प्राक्तनैः कर्मलेशैश्च शुभैश्चाप्य शुभैस्तथा।
समुत्पद्यन्ति संसारे योनि लक्ष्वान्तरेषु च॥ ३॥

शुभकर्ता शुभे योनौ दुष्कृती दुष्कृतेषु च।
एवं कर्ता च कर्मभ्यो भुञ्जते वै शुभा शुभम्॥ ४॥

यदा यमः स च भवेद् यदा सृष्टिः प्रवर्तते।
p. 26b) उभाभ्यां तत्र संयोगाद्भगलिङ्गसमागमे॥ ५॥

गर्भं सम्भवते गर्भे चिच्छक्त्या शक्तिचोदिते।
योनिद्वारस्य वै पृष्ठे नाभिपद्मं स्थितं गुह॥ ६॥

यदा विकसितं स्त्रीणाम तु कालस्तदा भवेत्।
रजः प्रवर्तते ह्यस्यां दिवसानि तु षोडश॥ ७॥

ऋतुकाले तु तत् पद्म मधोमार्ग मुखं भवेत्।
तस्मिन् बीजं यदा क्षिप्तमृतुकाले शिखिध्वज॥ ८॥

तदा तद्रोहते बीजमन्यथा रूपरेहितम्।
पुंसेत् कर्ष भवेत् पुंसः स्त्रियोत्कर्षे भवेत् स्त्रियः॥ ९॥

समेन पुंसकं ज्ञेयमाधिक्ये नैव किञ्चन।
युग्मे युगानु युग्मे स्त्री अन्तकालेन पुंसकम्॥ १०॥

ऋतुकाले द्युति क्रान्ते भूयः पद्मं समं भवेत्।
p. 26a) तस्य मध्ये स्थिता वत्स पिङ्गलादस्पृतोद्भवा॥ ११॥

सा नन्द यति सर्वेषां रतिकाले शिखिध्वज।
जायते पुरुषश्चैवमानन्दयति सर्वदा॥ १२॥

उभाभ्यां समयोगेन तदा बीजः प्ररोहति।
पुरप्रवेशमेतद्धि अमरत्वं च वै भवेत्॥ १३॥

तदा पुत्राश्च पौत्राश्च प्रपौत्राश्च न संशयः।
जन्तवो गोत्र सन्ताना अमरत्वं तदा भवेत्॥ १४॥

तस्य पद्मस्य मध्ये तु चिच्छक्तिरमृतोद्भवा।

वसते सततं वत्स दिवसानि तु षोडशः ॥ १५ ॥

तदा लिङ्ग च्युतं बीजं तस्मिन् स्थाने प्ररोहति ।
तस्य पद्मस्य गर्भोयं गर्भशय्या शिखिध्वज ॥ १६ ॥

पद्मिनी शङ्ख रूपेण गर्भशय्या स्थिता गुह ।
तस्य मध्ये यदा क्षिप्तं क्षिप्तं बीजेवकल्पयेत् ॥ १७ ॥

p. 26b) अन्यथा तु अबीजेयमौषधं क्षिपितं यथा ॥ ॥

???????????????????????????
सर्वं देव मया ज्ञातं सर्वं तात मया श्रूतम् ।
अधुना श्रोतुमिच्छामि रजोरेतः समुद्भवम् ॥

अत्यन्त कुत्सितं पुत्र यत् त्वया परिपृच्छितम् ।
दुष्कृतीनां च सर्वासां गर्भवासः प्रकीर्तितः ॥ २ ॥

कालाग्नि रुद्र पर्यन्तं यावद्ब्रह्माण्डगोचरम् ।
सर्वं चिच्छक्तिना व्याप्तं शिवाज्ञा चोदितं गुह ॥ ३ ॥

चिच्छक्ति संप्लुता भूताः सर्वेषामन्तरे स्थिताः।
प्ररोहं कुरु वृद्धिं च अन्यथा तस्य चोदनम्॥ ४॥

p. 27a) व्यक्तं न दृश्यते तस्य अव्यक्त त्वात् सृजत्यसौ।
तस्य बीजं कुरुत्यन्ता तया सृष्टं चराचरम्॥ ५॥

चराणामचराणां च भूतानां शिखिवाहन।
योसौ योनिः सनिधनं परमार्थं तु तं विदुः॥ ६॥

परमार्थं तु तं ज्ञेयं यस्य शक्तिर्न लुप्यते।
शक्तिर्न लुप्यते चास्य शिवयोगा शिखिध्वज॥ ७॥

सर्वेषामेव भूतानां योन्यण्ड स्वेदजोद्भिजः।
अग्नीषोमानिलयुतं विशते परमेश्वरः॥ ८॥

उत्पत्तिरेषा भूतानां प्राणापानोदयेन तु।
अस्तङ्गतैस्तैर्निधनं देहे देहेश्वरो गुह॥ ९॥

आदौ भूताः समुत्पन्नाः पश्चादण्डस्य सम्भवः।

ततोङ्कुरं च पद्मं च तत्व ब्रह्मादनन्तरम्॥ १० ॥

चतुर्विंशति तत्वानि अक्षतानि तु वै गुह।
गायत्री तु भवेत् तैस्तु महादेवाति निस्सृतम्॥ ११ ॥

p. 27b) ते नैव निस्सृतं विश्वं कर्मयुग्मसमन्वितम्।
चिच्छक्ति संभवं सर्वं ब्रह्माण्ड कुहरोदरम्॥ १२ ॥

तस्माद् वै सर्वदा वत्स चिच्छक्तिः परमार्थतः।
मया सृष्टं जगत्सर्वं भूतसर्गं चराचरम्॥ १३ ॥

स्त्रीरजो रेतसं मिश्रं कलिलं मासमेकतः।
चिच्छक्त्या चेतनोद्भूतं द्वितीये मासि बुद्बुदम्॥ १४ ॥

रेतोरक्तसमुद्भूतं तृतीये मासि षण्मुख।
चिच्छक्ति सम्भवा ह्यत सर्वेषामन्तरे स्थिताः॥ १५ ॥

प्ररोहाङ्कुर वृत्तिं च सर्वेषां तस्य चेतनाः।
व्यक्तिर्न दृश्यते तस्य अव्यक्त त्वात् सृजत्यसौ॥ १६ ॥

तस्य बीजाङ्कुरस्यान्तं तेन दृष्टं चराचरम्।
चराणा?मचराणां च भूतानां शिखिवाहन॥ १७॥

p. 28a) बुद्धधाङ्कुरसंलीनं चिच्छक्तिः सृजतेङ्कुरम्।
तं नालं पद्मगर्भस्य नाभिनालं प्रकीर्तितम्॥ १८॥

ततोमांसास्थि संभुतिस्तृतीये मासि षण्मुख।
यथा बीजाङ्कुरं वत्स अव्यक्तं नैव दृश्यते॥ १९॥

चतुर्थे मासि संप्राप्ते जायन्ते वयवाङ्कुराः।
तदा व्यक्तं भवेत् कायं पुरुषा कृति संज्ञकम्॥ २०॥

चिच्छक्त्या चेतनं तस्य जायन्ते स्तोकमात्रकम्।
मज्जास्थि स्नायुमेधं च मांसं रुदिरमेव च॥ २१॥

वातपित्तं तथा श्लेष्मं शुक्रं मूत्र पुरीषयोः।
सिरानाडी ग्रन्थयश्च द्वाराः कूर्माश्च जालकाः॥ २२॥

त्वचं मर्माणि सन्धीश्चलोमनाड्यस्तथैव च ।
एते चान्येपि ये केचिच्छरीरोत्पत्ति कारणम् ॥ २३ ॥

p. 28b) सम्भवन्ति च सर्वे वै अङ्गान्यवयवास्तथा (देहस्या) ।
पञ्चमे मासि समये न खलोमानि स्पन्दनम् ॥ २४ ॥

श्रोत्त्रशुक्तिश्च शोत्राणां धातूनां धातुरोपणम् ।
व्यक्तत्वं सर्वमङ्गानां यथा यस्य तु कल्पितम् ॥ २५ ॥

चिच्छक्ति चेतनवशात् सम्पन्नास्ते शिखिध्वज ।
षष्ठे मासि रसान् सर्वान् यदा ते मातृ भोजनात् ॥ २६ ॥

क्षुट्तृष्णा जाग्रनिद्राश्च शीतोष्ण मुखदुःखिताः ।
चिच्छक्ति चेतनोर्थे न चेतनां चेतते तु यः ॥ २७ ॥

सप्तमे मासि संप्राप्ते चैतन्यं मानुषोपमम् ।
यदा प्रबुध्यते चाग्निर्ह्यादिस्थं तच्च वै गुह ॥ २८ ॥

तदा स सर्वमखिलं शरीरे द्योतयत्यसौ ।

पद्मत्रयं प्रबुद्ध्येत ह्यन्नाभि मुखसंस्थितम् ॥ २९ ॥

p. 29a) वायवश्च प्रवर्तन्ते प्राणाद्या ये प्रकीर्तिताः ।
लिङ्गद्यानाडयः सर्वा हृत्पद्मदलसम्भवाः ॥ ३० ॥

तानिमां पूरितं सर्वं तेजोर्थेन जरायुभिः ।
तैर्व्याप्तमखिलं पिण्डं लोमान्तं यावत् षण्मुख ॥ ३१ ॥

नाडि चक्रं तु सर्वं वै व्यापितं सर्वरस्मिभिः ।
यथा सूर्योदये सर्वं रस्मिभिर्व्यापितं जगत् ॥ ३२ ॥

पाणाग्नि सूर्यौ निर्णीत्वा व्यापितं देहमात्मनः ।
चिच्छक्ति चेतनोर्थाय बहिः सूर्यं शिखिध्वज ॥ ३३ ॥

न तु तस्यात्मनाशक्तिर्यावच्चिच्छक्ति चोदिता ।
अष्टमेन तु मासेन बुद्धिर्गर्भस्य संभवेत् ॥ ३४ ॥

यथाहङ्कार दोषेण गर्भवासं वसाम्यहम् ।
तमोन्धकारगहने सर्वदुःखसमाकुले ॥ ३५ ॥

p. 29b) स्वेदमूत्रपुरीषोर्थे वसारुधिरसंयुते ।
कलिश्सेष्मसङ्कीर्णे मांसास्थिस्नायु सङ्कटे ॥ ३६ ॥

एकविंशति ये प्रोक्ता नरकाश्च भयावहाः ।
तेषां मध्यान्महाघोरं नरकं कुक्षि सम्भवम् ॥ ३७ ॥

चन्द्रार्करहितं भीमं वाय्वग्नि परिवर्जितम् ।
नरकार्णवसंप्रख्यं दुःखकल्लोलदुस्सहम् ॥ ३८ ॥

अहं जातः कथं पुत्र किं मया दुष्कृतं कृतम् ।
एवं सञ्चिन्त्यमानस्य चिच्छक्त्या चोदितस्य च ॥ ३९ ॥

नवमे मासि समये संप्राप्तेषु सर्वेगुह ।
अत ऊर्द्ध्वं तु ये केचित् गर्भवासे वसन्ति च ॥ ४० ॥

महापातकिनस्ते वै उपपातकिनस्तु ये ।
दर्शनं दशमे मासि सुकृतानि तु चिन्तयेत् ॥ ४१ ॥

p. 30a) येनाहं सन्तरिष्यामि योनिद्वाराद्भयानकात्।

तदहं तत् करिष्यामि येन भुयो न जायते॥ ४२॥

सुकृतानि ह्यशेषाणि यानि वै कथितानि तु।

वेदेषु सर्वशास्त्रेषु पुराणेषु स्मृतीषु च॥ ४३॥

तानि सर्वान् करिष्यामि यथोक्तानि विधानतः।

एवं सञ्चिन्त्य मानस्य चिच्छत्त्या प्रसवं कृतम्॥ ४४॥

महाभयं तु गर्भस्य प्रसवं तु शिखिध्वज।

अत्यन्त भयभीता तु मण्ड उद्विजिता गुह॥ ४५॥

हस्तपादशरीरेण स्वकेन शिखिवाहन।

विदार्य पद्मं गर्भस्य योनिद्वार मुखे गतम्॥ ४६॥

तदामाता भयं प्राप्ता मरणान्तिक गोचरम्।

p. 30b) विदार्य सृष्टिं द्वारेण मातुः सन्देह कारकम्॥ ४७॥

निर्गत्य पतते भूमौ निस्संज्ञं तु तदा भवेत्।

न तस्य सुकृते बुद्धिर्न च दुष्कृत कर्मणि ॥ ४८ ॥

मोहितो मायया वत्स चिच्छक्त्या बालसंज्ञया ।
उत्पत्तिरेषाभूतानां योनिजानां शिखिध्वज ॥ ४९ ॥

तस्मात् सर्व प्रयत्नेन अजातपदमभ्यसेत् ॥ ॥

?????????????????????????????
न किञ्चिदपि तं देव यन्मयानावधारितम् ।
तत्रापि संशयं देव वर्तते धातु सङ्क्षयात् ॥ १ ॥

अत्यन्त गहनं प्रश्नमप्रत्यक्षमगोचरम् ।
p. 31a) यत् त्वया चोदितं प्रश्नं पुत्रस्नेहाद्वदामिते ॥ २ ॥

पञ्चभौतिक पिण्डस्य चिच्छक्त्या निर्मितस्य च ।
यथा वै धातु संख्यानमङ्गानां च शृणुष्वमे ॥ ३ ॥

षड्रसाहारतृप्तस्य धातुसन्तर्पितस्य च ।
रसं सम्भवते वत्स मासमेकं तु निष्फला ॥ ४ ॥

तं रसं रसरूपेण चिच्छत्तया ह्यमृतं कृतम्।
पराग्नि संभवं तं वै न स शुक्रो भवत्यसौ॥ ५॥

सृष्टिबीजं तु तं ज्ञेयं ततः सृष्टिः प्रवर्तते।
रसाद्रक्तं ततो मांसं मांसान्मेदोथ जायते॥ ६॥

मेदसोस्थि तथा मज्जा मज्जा च्छूक्रं च जायते।
शुक्राद्धातूनि सर्वाणि धातुभ्यां देहमानुषम्॥ ७॥

तेषां सन्तर्पणं तुष्टि रसतर्पणतो व्ययम्।
एवं हि प्रथमं तावच्छरीरोत्पत्ति कारणम्॥ ८॥

p. 31b) अनन्तरं पुनर्वत्स यथा भवति तच्छृणु।
वातं पित्तं तथा श्लेष्मं धातवः परिकीर्तिताः॥ ९॥

विण्मूत्र शुक्रमज्जा तु मांसं चैवाष्टमं विदुः।
शरीरधारणा ह्येते सङ्ख्यासङ्ख्या कृतां गुणाः॥ १०॥

धातु साम्ये स्थिता देहे सर्वे ते गुणकारकाः।

तासां सङ्ख्या भवेदेषा कल्पना शिखिवाहन ॥ ११ ॥

विपर्ययेण धातूनां न हि सङ्ख्या भवेत् गुह ।
वायु भावे गुणा ये च ये वाने यौ ध्वने तथा ॥ १२ ॥

न तु मध्य वयोतीत समत्वं सर्वधातुषु ।
अतोर्था धातु पूर्वाये असङ्ख्येयाविलागुह ॥ १३ ॥

स्थितो यो सौ हृदि ह्यग्निः प्रणवोर्थः शिखिध्वज ।
तेन सन्तर्पिते नैव धातवस्तर्पिता गुह ॥ १४ ॥

स शृणोति स वै पश्येद् यो रसान् स्वादते चिरम् ।
p. 32a) स तु गन्ध गुणस्पर्शं भुञ्जते देहसंस्थितः ॥ १५ ॥

तस्य भावात् प्रलीयन्ते सर्वे ते धातवः सदा ।
तस्माद् वै सर्वदा वत्स स कर्तासेवकारणम् ॥ १६ ॥

यथा रस्मि सहस्राणि सूर्यायत्तानि षण्मुख ।
तथा सर्वाणि भूतानि ते जायत्तानि सर्वशः ॥ १७ ॥

????????????????????????

दातूत्पत्तिर्मया ज्ञाता यथा तथ्यं सुविस्तरम्।

सर्वेषामेव धातूनां रक्तं तु प्रथमं भवेत्।

स तु मांसं समाश्रित्य संस्थितं सर्वदेहिनाम्॥ २॥

तस्य मज्जा भवेद्वत्स पलद्वात्रिंश संख्यया।

p. 32b) मांसं पेशीशतान्यष्टौ शतैकेनैव चाधिकः॥ ३॥

पयः पीत्वा भवेद् रक्तं द्विगुणं तं शिखिध्वज।

पित्तस्य तु पलान्यष्टौ श्लेष्मरक्त समाश्रितम्॥ ४॥

रक्तस्य हि समं श्लेष्मं तद्वद्वृत्तिस्तु षण्मुख।

वसामेदः पृथत्त्वेन उभौ विंशत्पलीनकौ॥ ५॥

शुक्रं पित्तं समं ज्ञेयमस्थिमज्जान्तरेषु च।

वसादाहारपानांभ्यां विण्मूत्रं जायते पुनः॥ ६॥

तदा भावै ह्यसंख्येयं स्थिरत्वं तेषु नैव च।

रक्तं पित्तं तथा श्लेष्मं शुक्रं मज्जा तु षण्मुख॥ ७॥

रसोद्भवानि चैतानि रसभावा तु नैव हि ।
सर्वेषामेव धातूनां पित्तं वै श्लेष्म बन्धनम् ॥ ८ ॥

यस्माद्रसोद्भवाः सर्वे तदा तेषां निबन्धनम् ।
यस्माद्रसोद्भवाः सर्वे तदा तेषां निबन्धनम् ॥ ९ ॥

p. 33a) मज्जायां तु पलाविंशत् सर्वास्थ्यभ्यन्तरे स्थिताः ।
अस्थीनां तु शतां त्रीणि षष्ठ्य स्थिरधिकानि च ॥ १० ॥

तन्त्रीणां चैव विज्ञेयं शतमष्टाधिकं तथा ।
अष्टोत्तरं चर्मशतं सिराणां सप्त वै शतम् ॥ ११ ॥

ताश्च रक्त वहाः सर्वा देहमाच्छाद्यसंस्थिताः ।
ग्रन्थीनां तु शतं वत्स अष्टात्रिंशोत्तरं तथा ॥ १२ ॥

प्रधाना ग्रन्थयः पञ्च यैः कार्यं मोक्षसाधने ।
स्नायु जालमसंख्येयं यैर्बद्धं कायपञ्जरम् ॥ १३ ॥

मांसं तु धार्यते तैस्तु सङ्कोच करणानि ते।
चतुष्षष्टिर्भवेत् कूर्चं तयोः स्नायूंश्च सम्भवेत्॥ १४॥

सूचिताता भवेत् षष्टिः स्नायु सूत्रैस्तु यन्त्रितम्।
तदा यन्त्र मयं सर्वं शरीरं मानुषात्मकम्॥ १५॥

p. 33b) द्वासप्तति सहस्राणि नाडीनां परिकीर्तितम्।
तास्तु वायु वहाः सर्वास्सर्वास्ता मोक्षदाः शुभाः॥ १६॥

तासां मध्ये प्रधानैका पिङ्गला अमृतोद्भवा।
तदुद्भवाणि सर्वाणि यथा प्राणोद्भवानिलाः॥ १७॥

चर्ममेकं तु विख्यातं रोम च्छन्नं समन्ततः।
तिस्रः कोट्यो व कोटिस्तु रोमसङ्ख्यः प्रकीर्तिताः॥ १८॥

ते च नाडि समुद्भूता यस्मात् तेजोद्भवानि ते।
ते सङ्ख्ये या असङ्ख्ये या ये तु देहान्तरे स्थिता॥ १९॥

सर्वे तेजः समुद्भूता सर्वे ते तेजसंस्थिताः।

लोमक्रामानि सर्वाणि द्वाराणि शिखिवाहन ॥ २० ॥

अज्ञानान्नैव दृश्यन्ते दृश्यन्ते ज्ञान चक्षुषा ।

p. 34a) नखानां विंशतिः प्रोक्ता नवद्वाराणि षण्मुख ॥ २१ ॥

एवं सङ्ख्या समुद्भूता शरीरेषु शरीरिणाम् ॥ २२ ॥

????????????????

अवयवानां तु सर्वेषां सङ्ख्योत्पत्तिर्मया श्रूता ।

भूयो विज्ञातु मिच्छामि ब्रह्मवेश्म शरीरजाम् ॥ १ ॥

सर्वे प्रश्ना मयाप्रोक्ता रहस्यानि तु सर्वसः ।

यस्माद्ब्रह्म मयं देहमत्रब्रह्म तु लभ्यते ॥ २ ॥

अवयवाः पूर्वमुक्ता मया चैवं शिखिध्वज ।

यद्येकोन भवेत् तेषां तदा सर्वे ह्यपार्थकाः ॥ ३ ॥

प्राक्तनानभवन्त्येते संहतादेह धारकाः ।

p. 34b) एकैकं च तथा भूतमुत्पन्नं शक्ति चोदितम् ॥ ४ ॥

पुनरेव तु ते नैव यन्त्रितं भूत पञ्जरम् ।
तस्माद् यन्त्र मयं सर्वं शरीरं मानुषात्मकम् ॥ ५ ॥

गृहकृत्यसमादृश्यमस्थिदा रुचितं शुभम् ।
मांसरक्त मृदादिग्धं स्नायु कीलक कीलितम् ॥ ६ ॥

लिप्ते वै चर्म लेपेन नवद्वारोपशोभितम् ।
एकोन धार्यते स्तम्भं ब्रह्माण्डं येन धार्यते ॥ ७ ॥

ब्रह्मवेश्म सदावत्स तस्मिन् मध्ये परं स्थितम् ।
ब्रह्मणो वेश्मनो मध्ये वेदमग्नि त्रयस्य च ॥ ८ ॥

तेषां होमं प्रकुर्वीत प्रत्यहं चाहिताग्निना ।
आज्येन्ध न तिलैर्दर्भैर्धूमैर्गन्धैः स्त्रजैः शुभैः ॥ ९ ॥

न तेषां तुष्टिपुष्टिर्वाहुतैस्तैर्जीवसंज्ञकैः ।
तुष्यन्ते तर्पितावत्स प्राणापानाहुतीषु च ॥ १० ॥

p. 35a) न तेषां हूयते हव्यमजीवं ब्रह्मसंभवम् ।

जुहुयात् सततं वत्स प्राणापानावमृतोद्भवौ ॥ ११ ॥

तुर्यस्थानामृतं वत्स वसुधारेवसंस्थितम् ।
स्रवते सततं वत्स प्राणाग्नौ तर्पणं प्रति ॥ १२ ॥

अग्नयस्तेन तृप्यन्ति आज्येन्ध न निरर्थकाः ।
बाह्याग्नीतमुपासीत विधिदृष्टेन कर्मणा ॥ १३ ॥

भुर्भुवः स्वस्तपोलोका दृश्यन्ते तैर्हुताखिलाः ।
ब्रह्मवेदिर्भवेदेषा ब्रह्मवेश्मस्य मध्यतः ॥ १४ ॥

अन्तर्वेदी तथात्रैव सुषुम्णा त्रान्तरे स्थिता ।
प्रयागं च कुरुक्षेत्त्रं पुष्करं नैमिषं तथा ॥ १५ ।

वाराणसी तथा गङ्गा केदारं सिन्धु सागरम् ।
एते चान्येपि ये केचित् तीर्थान्यायतनानि च ॥

p. 35b) सर्वे तिष्ठन्ति ब्रह्मज्ञ परमाग्नौ जुहोति यः ।
सर्वं सर्वेषु भूतेषु प्रकटं संस्थितं गुह ॥

अज्ञानान्नैव पश्यन्ति पश्यन्ति ज्ञान चक्षुषा ॥ ॥

????????????????????

ब्रह्मवेश्म तथाज्यं च त्वत् प्रसादाच्छ्रुतं मया ।

अधुना श्रोतु मिच्छामि ब्रह्मब्रह्मपुरेस्थितम् ॥

सर्वं सर्वं मयाख्यातं यत् त्वया पृच्छितं गुह ।

अयं प्रश्नो गुरोर्वक्राद्यदि ज्ञास्यसि निश्चयात् ॥

रहस्यं सर्व शास्त्रेषु वेदादि संहितेषु च ।

सिद्धान्ते कुल सिद्धान्ते अवाच्यं यत् कथं च ते ॥ ३ ॥

नित्योदितं च नित्यं च अनित्यं कल्पनात्मकम् ।

p. 36a) यत् त्वया चोदितं वत्स अति स्नेहाद्वदामिते ॥ ४ ॥

यो सौ हृदि स्थितः पद्मः प्रणवोर्त्थः शिखिध्वज ।

तस्य मध्ये परं तेजो यः पश्यति स पश्यति ॥ ५ ॥

महाज्वाला समाकीर्णं रश्मिभिः परिवारितम् ।

असङ्ख्या भासुराभासं ब्रह्मवेश्मस्य दीपनम्॥ ६॥

तं च पश्यति यः पुत्र तं च ब्रह्म विदो विदुः।
नदते सततं यस्मात् तस्मान् नादमिहोच्यते॥ ७॥

प्रवाहेन स्थितं वत्स यथा नद्यो जलाशयाः।
अव्युच्छिन्नं च तं नादं नदते सर्व देहिनाम्॥ ८॥

देहे देहे न चान्यो वै एकं वै सर्वतः स्थितम्।
अनच्छं केचिदिच्छन्ति शून्यं केचित्व दन्ति च॥ ९॥

मात्रार्धमात्रं केचिच्च नास्ति नास्तीति नास्तिकाः।
p. 36b) तं नादं प्रकटं येषां तेषां मोक्षो ध्रुवं गुह॥ १०॥

धूलिभेदेन ते सिद्धं सिद्धं गुरुमुखाच्छुभम्।
त्वां विदित्वा महासेनं तं मोक्षं प्राप्स्यसे ध्रुर्वम्॥ ११॥

ध्रुवं भवेद्ध्रवेद्वत्स ध्रुवरूपेणसंस्थितम्।
परमाग्नि समुद्भूतं तं नादं नदते गुह॥ १२॥

तच्च दर्शयते वस्तु स गुरुर्गुरुरेव च ।
दैशिकस्तु स विज्ञेयो मोक्षो वै मोक्षिकस्तु सः ॥ १३ ॥

लक्षणं शृणु नादस्य यथात्वं लक्षयिष्यसि ।
येन विज्ञात मात्रेण भ्रान्ति ज्ञानं निवर्तते ॥ १४ ॥

यथेन्धनप्रदीप्तेग्नौ यथाक्षोभ च्युतं जले ।
यथा वाताहते वृक्षे शब्दोयं श्रूयते गुह ॥ १५ ॥

तथा शरीर ब्रह्मोयं प्रत्यक्षं शृणु षण्मुख ।
शृङ्गध्वनि निनादेन नदन्तं यः शृणोति वै ॥ १६ ॥

p. 37a) तं नादं ब्रह्ममित्याहुर्यः शृणोति शृणोति सः ।
न किञ्चिदपि तं वत्स यस्य तं न ह्यदि स्थितम् ॥ १७ ॥

न तु जानन्ति तं मूढा ज्ञान विज्ञान वर्जिताः ।
प्रकटं ज्ञान चक्षुर्भ्यां पश्यते शृणुते तु सः ॥ १८ ॥

तर्जनी प्रान्तसंरुद्धौ कर्णौ द्वौकारयेद्गुह ।
एतेन श्रूयते नादं न दन्तं ब्रह्मसंभवम् ॥ १९ ॥

एवं वै परमं नादं हृदिस्थं सर्वदेहिनाम् ।
ब्रह्मादि स्तम्भ पर्यन्तमाकारा ये भवन्ति वै ॥ २० ॥

तेषां हृदि स्थितं वत्स गुरुवक्त्रात् तु लभ्यते ।
गुरूपदेशगम्योयं यदि तुष्टो वदत्यसौ ॥ २१ ॥

अन्यथा न तु सिद्ध्येत कल्पकोटि शतैरपि ।
स तृप्तः स च वै मुक्तः सोमृतं चाश्नुते ध्रुवम् ॥ २२ ॥

p. 37b) यस्येदं विदितं ब्रह्म परस्पर पदानुगम् ।
परंपरगतं वत्स परात्परतरं हितम् ॥ २३ ॥

तं च नादं समाख्यातं येन व्याप्तं चराचरम् ।
ब्रह्मादि सर्व भूतेषु चरेषु ह्यचरेषु च ॥ २४ ॥

हृदिस्थं नदते नादं प्राणाद्या वायवेखिलाः ।

व्यापारेषु स वै कर्ता समस्तव्यस्तकेषु च ॥ २५ ॥

स कर्ता स हि विज्ञेयस्त्वं तर्ह्य न गतो गुह ।
सर्वे ये केचिद् व्यापाराः सृष्टिराद्याः क्षयान्तिकाः ॥ २६ ॥

स कर्ता चैव सर्वेषा परं ब्रह्म सदोदितम् ।
चतुर्विंशति तत्त्वानि पुरुषः पञ्चविंशकः ॥ २७ ॥

सर्वेषां स हि कर्ता वै तदा यत् तानि तानि तु ।

???????????????

p. 38a) सर्वं सर्वं मया ज्ञातं सर्वं सर्वं मया श्रुतम् ।
न पुनस्तात कौलेयं खेचरीणां मुखेस्थितम् ॥ १ ॥

महाज्ञानमिदं वत्स महाविज्ञानमेव च ।
यत् त्वया चोदितं प्रश्नं कौलं खेचरि गोचरम् ॥ २ ॥

पुत्र स्नेहात् कथिष्यामि रहस्यमद्भूतोपमम् ।
तं हि सिद्ध्यन्ति तासां वै तास्तस्मिंस्तेजसा गुह ॥ ३ ॥

सामान्यानां तु मर्त्यानां लोकोपहत चेतसाम्।
कुविकल्पगतानां वै सत्यं वत्स न सिद्धयति॥ ४॥

जीवाख्यममृतं यच्च हृदाकाशान्तरे स्थितम्।
पिबन्ति रूपिकास्तं तु नाडिमाश्रित्य मध्यमाम्॥ ५॥

तं पीत्वा तृप्ति मायान्ति अतोर्थं तं पिबन्ति हि।
देवान् पितृस्तर्पयन्ति कुलनाड्यांस्त संस्थिताः॥ ६॥

तासां मोक्षं शिवेनोक्तमनेन विधिना गुह।
न पुनर्होमहवनैर्यज्ञैश्च बहुदक्षिणैः॥ ७॥

मांसास्थि रुधिरं मज्जां भक्षयन्ति च रूपिकाः।
विवर्ते ह्यमृतं वत्स हृदिस्थं यत्परं पदम्॥ ८॥

सिद्धिस्तेषां तु ते नैव तर्पयित्वा तु भैरवम्।
भैरवस्तर्पितं तासां धर्मे च पशुं प्रोक्षणे॥ ९॥

चिच्छक्तिः पशवस्तेषां हृन्मध्यसंस्थिता।

मोक्षश्च निहितं यज्ञे भैरवोक्तेषु सर्वदा ॥ १० ॥

पिहितं तं तु विज्ञेयमन्यथा वद एव तु ।
अनेन विधिना वत्स हिंसन्ति पशवो यदि ॥ ११ ॥

समुक्तः पशुनासार्धं मोक्ष इत्यभिधीयते ।
p. 39a) सिद्धयते महतां सिद्धिरष्टसिद्धिसमन्विता ॥ १२ ॥

सामान्यानां तु सिद्धीनां कोविशेषोस्ति शक्ति धृत् ।
कस्येदं विदितं ज्ञानं ज्ञेयं विज्ञान सम्मितम् ॥ १३ ॥

ब्रह्माद्याः पशवस्तस्य पशोरन्यस्य का कथा ।
पशूनां चैव सर्वेषामादिकर्ता प्रजापतिः ॥ १४ ॥

स एव प्रोक्षितो यस्मात् तस्मात् कौलोधिकं भवेत् ।
वेदयज्ञेषु पशवो हिंसन्ति ब्राह्मणोत्तमाः ॥ १५ ॥

भैरवीयेषु सर्वेषु पुंपशुं हन्ति साधकाः ।
सूक्ष्मपुर्यष्टकं यच्च भूतानां हृदि संस्थितम् ॥ १६ ॥

तं पशुं हन्ति योगिन्यो हत्वा सिद्ध्यन्ति सिद्धिषु ।
प्राणापानोदये तस्मिन् बिन्दुनाद लयं गताः ॥ १७ ॥

पिबन्ति रूपिकास्तास्तु पशुं हत्वाशिखिध्वज ।
गतिरेषा हि चैतेषां तदात्मेतं लभन्ति हि ॥ १८ ॥

p. 39b) जीवव्योमान्तरं यच्च भूतानां हृदिसंस्थितम् ।
प्राणापानप्रवाहेन न विदित्वा पिबन्ति हि ॥ १९ ॥

सद्यो निर्धानदीर्ता? वै मोक्षकस्तु * * * * ।
* * * * * * * * * * भक्ष्यानि कानि तु ॥ २० ॥

पिबन्ति येन सिद्ध्यर्थं विधिना भैरवेन तु ।
भैरवोक्तेन विधिना सम्यग् योग बलेन तु ॥ २१ ॥

पिबन्ति मदिरां तु क्षीरवत्प्रकटं गुह ।
स सिद्धः साधकः सोहि शेषा वै मध्यमाः स्मृताः ॥ २२ ॥

पुष्पमात्रेण प्राप्येनं बह्णनां यस्तु निर्वपेत्।

क्षीरं तु कुरुते मध्यं संशये समुपस्थिते॥ २३॥

स सिद्धः सर्वदा वत्स कृष्णः श्वेत करो गुह।

प्राणापानान्तर चरोनाडि त्रितय यायिनः॥ २४॥

तं पिबन्त मृतं दिव्यं परं परमसिद्धिदम्।

p. 40a) सौरंमार्गं परित्यज्य चान्द्रं मार्गं तथैव च॥ २५॥

ब्रह्ममार्ग गमं यस्य तं पिबंत्य मृतं परम्॥

???????????

वदमे यदि तुष्टोसि इष्टं तथ्यं हितं विभो।

येन विज्ञात मात्रेण भ्रान्ति ज्ञानं निवर्तते॥ १॥

शृणु वत्स यथान्याय्यं सर्वप्राज्ञोत्तमोत्तम।

यत् त्वया चोदितं प्रश्नं निस्सन्दिग्धं वदाम्यहम्॥ २॥

या सा शक्तिः परासूक्ष्मा अव्यक्ता या शिवोर्थया।

संस्थिता सर्वभूतेषु जगदुर्द्धं? ययाखिलम्॥ ३॥

ब्रह्मादि स्तम्भ पर्यन्तं भूतसर्गं चराचरम्।
ग्रसते सृजते शक्तिश्शिवाज्ञा ज्ञापिता गुह॥ ४॥

न पुनः शक्तिरस्माकं सत्यं सत्यं शिखिध्वज।
वयं पितामहं विष्णुं न बीन्द्वनलमेव च॥ ५॥

इन्द्राद्या देवताः सर्वे सत्वाद्याश्च महर्षयः।
भूयो भूयो हि जायन्ते भूयो भूयो म्रियन्ति च॥ ६॥

न पुनः शक्ति संहारो भवतिह कदाचन।
शक्तिर्न लुप्यते सा वै परमाद्वैत वर्तिनी॥ ७॥

नित्योदिता तु सा सूक्ष्मा शिवामृतसमुद्भवा।
ययाव्याप्तमिदं विश्वं भूतसर्गं चराचरम्॥ ८॥

अन्तर्गता तु सा वत्स सर्वेषां हृदि संस्थिता।
एकैकं मणिमाश्रित्य यथाविद्धयन्ति वेधकाः॥ ९॥

महाभूतानि वै तद्वच्छक्तिबोधेन बोधिता।
सूत्रं तासां शिवं साक्षात् तेन ते ग्रथिता गुह॥ १०॥

p. 41a) यैर्व्याप्तमखिलं विश्वं ब्रह्माण्डावधि गोचरम्।
महाभूतानि सर्वाणि सर्वे चिच्छक्ति सम्भवाः॥ ११॥

चिच्छक्तिश्शिवसम्भूता अव्यक्ताः सर्वतः स्थिताः।
न हि जानन्ति तां मूढा महामाया विमोहिताः॥ १२॥

न कश्चिदपि तं भूतं यस्य सा हृदि न स्थिता।
स्थिता सा अग्नि रूपेण सर्वत्र वायुनाश्रिता॥ १३॥

ते पश्यन्ति हितावत्स येषां ज्ञानं मुनिर्मलम्।
ब्रह्मवेश्म भवेद् देहं ज्ञानं तत्रैव दीपकम्॥ १४॥

तं प्रज्वाल्य प्रपश्यन्ति यत्किञ्चिद्वेश्ममध्यगम्।
तं दृष्ट्या ते गमिष्यन्ति अजन्म पदमव्ययम्॥ १५॥

अजा सा अमला सूक्ष्मा नित्योदिता सुनिर्मला।

संस्थिता सर्वभूतानां ब्रह्मादीनां शिखिध्वज ॥ १६ ॥

p. 41b) यैर्ज्ञातास्ते विमुक्ता वै ते बद्धा यन्त्र लक्षिताः ।
वयं ब्रह्मादिभिस्सार्धं नैव मुक्ताः शिखिध्वज ॥ १७ ॥

तदा ध्यानावसक्ता वै तस्य ध्यान परायणाः ।
अन्येपि योगिनः सर्वे मक्षमार्गानु काङ्क्षिणः ॥ १८ ॥

यजन्ति विविधैर्यज्ञैस्तन्मध्यादुदितं गुह ।
कारणं तत्र वै ह्येकं युक्ति भेदः पृथक् पृथक् ॥ १९ ॥

सात्विकं येषु वै योगं तेषां मोक्षो भवेद्ध्रुवम् ।
राजसं स्वर्गकामानां नारकं तमसा वृतम् ॥ २० ॥

सात्विकं चैव तैर्यष्टं तदा ते मोक्ष यायिनः ।
राजसं मानुषैर्वत्स स्वर्गा वाप्ति फलप्रदम् ॥ २१ ॥

तामसं तिर्यग्योनिस्थैर्मूढैरज्ञैरपण्डितैः ।
तस्मात् सर्वप्रयत्नेन सात्विकं यागमारभेत् ॥ २२ ॥

राजसं तामसं वत्स पुनरावृत्ति कारकम्।

p. 42a) सात्विकं मानसं यागं तत्र हिंसा न विद्यते ॥ २३ ॥

राजसं तामसं वत्स उभौतौ हिंस पूर्वकौ।

मानसे नैव यागेन ये यजन्ति सदाशिवम्॥ २४ ॥

ते मुक्ताः सर्वपापेभ्यः सत्यं सत्यमुपासुत।

द्रव्यशुद्धिस्तु परमं सम्भारं येषु क्रीयते ॥ २५ ॥

तां विचारय यत्नेन सात्विकं भवते यदि।

तदा तं द्रव्य सम्भारं शुद्धो भवति षणमुख ॥ २६ ॥

राजसं तामसं द्रव्यमशुद्धं सर्वदा गमैः।

यष्टं हि निर्मलं तेन प्रत्युततृणवद्भवेत्॥ २७ ॥

सात्विकं नास्ति तद् द्रव्यं त्रिषु लोकेषु सर्वदा।

तदर्थं न विमुक्तास्ते ये यजन्ति सदा धनैः ॥ २८ ॥

अथवा सात्विकं चार्थं यदि लभेत् कथञ्चन।
p. 42b) तद् देयं देवगुरवे विप्रे वा ब्रह्मवादिने॥ २९॥

अनन्तं च असङ्ख्येयं स्वल्पमात्रे पशोदितम्।
अक्षय्यं भवते वत्स कल्पकोटि शतैरपि॥ ३०॥

सम्भारार्थं न तद् द्रव्यं प्रयुञ्जीत कदाचन।
संभारा ये बहिर्कैचित् सर्वे चिच्छक्ति सम्भवाः॥ ३१॥

तेषां बाधा भवेद् यस्मात् तस्मात् तां परिवर्जयेत्।
स जीवानि तु ते सर्वे शिवं तेषां हृदि स्थितम्॥ ३२॥

स जीवानि तु पुष्पाणि स जीवानि फलानि च।
स जीवाः पशवो ज्ञेयास्तरुजातीनिसर्वशः॥ ३३॥

तां त्यक्त्वा यजसेकस्त्वंक्तयागमघसिद्धिमान्।
ये स्थिताः फलसन्धो *? वश्याकर्षणमारणैः॥ ३४॥

ते यजन्ति स जीवैस्तु जीवैश्चिच्छक्ति सम्भवैः।

p. 43a) चतुर्दशविधं वत्स भूतसर्गं चराचरम् ॥ ३५ ॥

सर्वं चिच्छक्तिसंभूतं तं हत्वा नैव मुच्यते ॥ ॥

शक्त्योदयं मयाज्ञातं द्रव्यशुद्धिविनिर्णयम् ।
अधुना श्रोतुमिच्छामि इष्टमिष्टोतुरोत्तरम् ॥ १ ॥

मयातीर्णं तपश्चोग्रं युगकल्पान्यनेकशः ।
तदा स तुष्टो भगवाञ्शिवोप्यशिवहापरः ॥ २ ॥

वदते वदमे चाद्य तुष्टोहं ते उमापतिः ।
अहिंसा सर्वभूतेषु चरेषु ह्यचरेषु च ॥ ३ ॥

एतद्धि चामृतं वत्स अक्षरं ह्यक्षरं ध्रुवम् ।
हिंसाक्षरं विजानीयात् तस्मात् तं परिवर्जयेत् ॥ ४ ॥

अतोर्थं मानुसं यागमक्षरं ह्यमृतं गुह ।
ये यजन्ति हितं वत्स ते मुक्ता भवबन्धनात् ॥ ५ ॥

वयं भोगाभिलाषेण नैवमुक्ताः शिखिध्वज ।

अज्ञानादुपदेशस्य शिवज्ञान बहिष्कृतः ॥ ६ ॥

तदानु विदितं तत्त्वं मोक्षमार्गावलम्बिनम् ।

निष्प्रपञ्चं परं तत्वमपरं तु परापरम् ॥ ७ ॥

निष्प्रपञ्चा पराशक्तिर्निष्प्रपञ्चः परः शिवः ।

तस्य यागं च कुर्वीत निष्प्रपञ्चं हि मानुसम् ॥ ८ ॥

स्नानं ध्यानं तथा पूजा जपं होमं तु पञ्चमम् ।

मनसै तानि कर्तव्यं विधिदृष्टेन कर्मणा ॥ ९ ॥

इति श्री ॥ ॥

????????????????????????

स्नानादिकं त्वयैवोक्तं पूर्वं वै मानसं विभो ।

तदहं श्रोतुमिच्छामि यथार्थं तद्ब्रवीहि मे ॥ १ ॥

शिवतीर्थं स्थितं देहे सर्वतीर्थालां हितम् ।

भुर्लोके तु भुवो लोके स्वर्लोके तु तथैव च ॥ २ ॥

गङ्गाद्याः सरितः सर्वाः क्षीरोदाद्याश्च सागराः।
सर्वे तिष्ठन्ति तत्रैव मानसे त्वखिला गुह ॥ ३ ॥

हृत् पुण्डरीक मध्यस्थं शिवतीर्थं तु मानसम्।
तत्रस्थं सङ्गमं वत्स शिवं नादात्मकं शुभम्॥ ४ ॥

अग्नीषोमीयगहनं पाणापानजलाशयम्।
प्रवाहं तस्य तीर्थस्य सुषुम्णाड्यान्तरे स्थितम्॥ ५ ॥

p. 44b) तुर्यस्थानामृतौघेन प्लावितश्च समन्ततः।
न चात्र विघ्ना हिंसन्ति दुष्टा ये वै चराचरे ॥ ६ ॥

तदा स्नानं शुभं तत्र शिवतीर्थे च मानसे।
ना चात्र हिंसा दृश्येत न तु पीत्वा करं तथा ॥ ७ ॥

चराचरेस्मिन् ये लोकाः पुण्यन्यायतनानि च।
तेपि तिष्टन्ति चातेव आत्मशुद्धयर्थं कारणम्॥ ८ ॥

बाह्यतीर्थानि सर्वाणि कल्पनाकल्पितानि तु।
शिवतीर्थेन तिष्ठन्ति मानसे अशिवापहे ॥ ९॥

कल्पिता ये बहिष्कानि तीर्थान्यायतनानि च।
उत्तप्तास्ते सदा विघ्नैर्दिव्यभौमान्तरिक्षगैः॥ १०॥

तस्मात् ते दूषिता वत्स शिवतीर्थेन केन चित्।
अनोर्थाद्बाह्यतीर्थानि वर्जितानि सदा गुह ॥ ११॥

p. 45a) उच्चाटने तु विघ्नानां हिंसा भवति वै तदा।
यस्माद् बाधा भवेत् तेषां तस्मात् तास्तु विवर्जयेत्॥ १२॥

निर्मलं विघ्न रहितं मोहदं तु अघापहम्।
अमृतं स्रवते नित्यं पिङ्गलाभ्यन्तरे स्थितम्॥ १३॥

सौषुम्णा नन्द गम्भीरं तुर्या तु प्रान्तगोचरम्।
स्वर्णोपलब्धि विमलं सा नन्दं नन्दशीतलम्॥ १४॥

तं लब्धा शिवतीर्थं वै आत्मनो हृदि संस्थितम्।

तस्मिन् स्नानं सदा कुर्याद् विधि दृष्टेन कर्मणा ॥ १५ ॥

सन्ध्या तु वन्दयेत् तत्र तर्पयेत् पितृ देवताः ।
यत् किञ्चिदिति कर्तव्यं तत् सर्वं मानसं कुरु ॥ १६ ॥

अथवा स्मर्यते तीर्थं यत् किञ्चिन् मनसेप्सितम् ।
सर्वे तिष्ठन्ति चात्रैव अहिंसा तु समर्पिताः ॥ १७ ॥

p. 45b) वयं ब्रह्मादिभिः सार्धं शिवतीर्थाम्बु सेवनात् ।
एतद्धि परमं तीर्थमयं हि परमो जपः ॥ १८ ॥

एतद्धि परमं स्नानं तत्र स्नानं तु वै गुह ।
बाह्यतीर्थानि तुष्टानि मन्त्रान् बाह्यांस्तु सर्वशः ॥ १९ ॥

मन्त्रा हृष्टानि तुष्यन्ति अन्यथा जल एव सः ।
तीर्थेषु ये स्थिताः केचिद्दीनाद्याः प्राणिनो गुह ॥ २० ॥

अतोर्थास्तेन मुञ्चन्ति विज्ञान रहितास्तु ये ।
शिवतीर्थपरिज्ञानात्सम्यग्योग बलेन तु ॥ २१ ॥

स्नातो भवति तं नित्यं साधकः सु समाहितः।
न चात्र हिंसते कश्चिन् न तिलान्दर्भ एव च॥ २२॥

न तु रौ?प्य सुवर्णे वा खड्गा पातोथ वा पुनः।
स्मरणा च्छिवतीर्थस्य न किञ्चिदपि लुप्यते॥ २३॥

p. 46a) शिवतीर्थं मया ज्ञातं तस्मिन् स्थाने यथोदितम्।
भूयो विज्ञातुमिच्छामि ध्यानं देहेश्वरात्मकम्॥ १॥

सर्वं प्रत्यक्ष विज्ञानं मया ते प्रकटी कृतम्।
प्रत्यक्षं च परोक्षं च अधुना दर्शयामिते॥ २॥

शिवतीर्थ परिज्ञानं यैर्ज्ञातं ह्यात्म दर्शिभिः।
तैः प्राप्यमखिलं वत्स मोक्षमार्गं न संशयः॥ ३॥

आत्मज्ञाने स्थिता ये वै आत्मज्ञाश्चात्म दर्शिनः।
तैः शुद्धाः सर्वदा वत्स यत्र यत्राश्रमे स्थिताः॥ ४॥

स्नान शुद्धिर्न तेषां वै न मन्त्रैश्च प्रयोजनम्।

p. 46b) स तु मन्त्रं शिवं शास्त्रं क्षेत्रं हि परमं तु सः॥ ५॥

न तस्य विघ्ना हिंसन्ति ये केचिद्भुवन त्रये।

दर्शनादेव वै तस्य नश्यन्ते च दिशो दश॥ ६॥

न दिशो विदिशश्चैव न मुद्रा नासनानि च।

करणेन तु संपश्येत् सम्यग् योग बलेन तु॥ ७॥

पूरकं कुम्भकं चैव रेचकं च तृतीयकम्।

एतद् यथार्थं युञ्जीत ततो ध्यानं समारभेत्॥ ८॥

ध्यानेनालोकयेद्वत्स देहि सन्देह वर्जितः।

तं विचारय यत्नेन नाडिचक्रोदरे स्थितम्॥ ९॥

द्वासप्तति सहस्राणि आराणां तस्य षण्मुख।

एकैक भ्रमतैषा वै प्राणापानान्तर स्थिता॥ १०॥

सर्वेषामेव वायूनां प्राणापानौ तु चोदकौ।

p. 47a) प्राणं तेषां भवेत् प्राणं प्रणम्य तु परं विदुः ॥ ११ ॥

तेन ते नाडिचक्रं वै समस्तमवलोकयेत् ।

पिङ्गला तु भवेन्नाभिस्तस्य चक्रस्य षण्मुख ॥ १२ ॥

प्रणवं तं भवेच्चक्रं पिङ्गला तस्य वै शिखा ।

तं ज्ञात्वा पश्यते वत्स शिवं परम कारणम् ॥ १३ ॥

ज्ञानदीपं प्रजज्वाल्य ध्यात्वा ज्ञानाग्निना गुह ।

तदा गम्य स्थितं देवं पिङ्गलाभ्यन्तरे स्थितम् ॥ १४ ॥

हृद्गुहा सा तु विज्ञेया हृन्मध्ये सा तु कर्णिका ।

तस्य मध्ये स्थितं देवं यः पश्यति स पश्यति ॥ १५ ॥

सूर्येन्दु वह्नि मध्यस्थंमलक्षं लक्ष वर्जितम् ।

कदम्बगोलकाकारं सूर्यकोटि समप्रभम् ॥ १६ ॥

कल्पान्ता नलसङ्काशं दुष्प्रेक्षमकृतात्मभिः ।

p. 47b) अनुमानं न वै तस्य हेतुना नैव दृश्यते ॥ १७ ॥

एवं ध्यात्वा तु तं देवं हृद्गुहाभ्यन्तरे स्थितम्।
ततस्त्वा यतनं गच्छेन्मानुसं मानसेन तु॥ १८॥

ध्यानं धेयं मया ज्ञातं *? नं च ज्ञेयमेव च।
अधुना श्रोतुमिच्छामि हृद्गुह्येश्वर पूजनम्॥ १॥

गुह्यानि यानि चोक्तानि आदौ? ते शिखि वाहन।
इदं गुह्यं त्वयैवाद्य यन्न कस्यापि भाषितम्॥ २॥

अज्ञा ये च अनात्मज्ञ ये च पण्डित मावि *?।
*? यजन्ति स जीवैस्तु जीवैश्चिच्छक्ति सम्भवैः॥ ३॥

चैतन्यं? स?र्वभूतानां चित्स्वभावेन संस्थितम्।
p. 48a) स चेतनानि भूतानि यस्मात् तानेव मोहयेत्॥ ४॥

चिच्छक्तिं विन्दते वत्स मुखदुःखे शुभाशुभौ।
शिवात्मा दृष्ट रूपेण सर्वत्रैव व्यवस्थितः॥ ५॥

अशुभं च शुभं चैव सुखं दुःखं तथैव च।
भुञ्जते तु पराशक्तिः परं चात्र अलेपकम्॥ ६॥

साक्षि भूतं च तं वत्स पक्षयोरुभयोरपि।
एवं ज्ञात्वा अहिंसां वै सर्वभूतेषु कारयेत्॥ ७॥

अतोर्थं मानसं यागं कर्तव्यं मोक्षयायिभिः।
हिंसा युक्तेन योगेन सम्भार बहुलेन च॥ ८॥

ये यजन्ति हिते बद्धाः फलं तेषां त्रिविष्टपम्।
अमानाम्ना तु योगेन हिंसा भवति सर्वदा॥ ९॥

पुनरावर्तते भूयो भूयो भूयः क्षयं गतः।
p. 48b) एवं ज्ञात्वा यजेत् सर्वं मानुसं यागमुत्तमम्॥ १०॥

यस्य सर्वगतं भावं यथात्मनि तथापरे।
समं पश्यति सर्वेषामहिंसा प्रोच्यते तु सा॥ ११॥

यथात्मनि परे तद्वत्समं पश्यति यो गुह।

समुक्तः प्रकृतेर्बन्धाच्छिवे तिष्ठति शाश्वते ॥ १२ ॥

सात्त्विकं भावमेतद्धि शिवेनोक्तं हि मानसम् ।
अन्तः कर्णादिकं वत्स यन्मयोक्तं हि दर्शने ॥ १३ ॥

तेषु भूतानु हिंसन्ति तस्मात् तं हिंस पूर्वकम् ।
अन्तःकरण विन्यासं भूतशुद्ध्यर्थं कारणम् ॥ १४ ॥

क्रीयते सर्वतो वत्स विधि दृष्टेन कर्मणा ।
कृत्वान्तः करणं वत्स भूतशुद्धिं तथैव च ॥ १५ ॥

तदा भवति तं योग्यं साधकः शिव पूजने ।
p. 49a) आत्मज्ञं तु पुनर्वत्स नित्यशुद्धं सदा भवेत् ॥ १६ ॥

नास्य शुद्धिरशुद्धिर्वा शोधनीयं हि केतनम् ।
नित्य शुद्धि हितं भूत्वा न किञ्चित् साधयत्यसौ ॥ १७ ॥

विकल्पोर्थैर्मलैर्वत्स अशुद्धं तं च तत्त्वतः ।
यस्य शक्तिर्भवत्युग्रा यः शोधयति वै परम् ॥ १८ ॥

स शोधयति सर्वेषां भूतानां च समुद्धरेत्।
अतोर्थात् केतनं वत्स आत्मज्ञे निष्प्रयोजनम्॥ १९॥

स एव भोगवान्साक्षाच्छिवं परम कारणम्।
स एव परमं दाम तत्र शुद्धयति ते खिलं॥ २०॥

आत्मनेनात्मना चैव यजते परमेश्वरम्।
यथोक्तेन विधानेन सम्य्ग् योग बलेन तु॥ २१॥

यजते मानसं यागं मनसा तु अमीश्वरम्।
p. 49b) यजन्ते देवतास्सर्वे ब्रह्माद्याश्च महर्षयः॥ २२॥

तदात्वं मानसे नैव यागेन शिखिवाहन।
योगार्थं द्रव्य सम्भारं तं हि चात्रैव तिष्ठति॥ २३॥

अथ प्रार्थयसे कामं मनसा मनसेप्सितम्।
तं लभिष्यसि सर्वं वै मानसे तं शिखिध्वज॥ २४॥

साकारं यजते यस्तु निराकारोथ वा पुनः।

उभौ तावेकदा वत्स यजत्वं यत् तु रोचते॥ २५॥

निर्लक्षं निस्स्वभावस्तं स लक्षं प्रतिमाकृतिम्।

मनसा चित्स्वभावेन साकारा क्रियते क्रिया॥ २६॥

न चैवा कृतिमान्कश्चिच्चित्स्वभावोनिलं भवेत्।

तस्मात् त्वं सर्वदा वत्स नित्यं शक्ति स्थितं यजेत्॥ २७॥

XXXXXXp. 50a) ciccetanyaani bhutaani citsvabhaavaa citoditaa |

चित्संज्ञा चित्समुद्भुता भुताभुतेषु संस्थिता॥ २८॥

तत्त्वाश्च भुता भावानि चिच्छत्त्या भ्यन्तरे स्थिताः।

संस्थिताश्चिवतत्त्वे रसदसर्वगतो विभुः॥ २९॥

सर्वमेवं हितं वत्स हृदिस्थं प्रकटी कृतम्।

तं हि पूजय यत्वेन विधिदृष्टेन कर्मणा॥ ३०॥

न कश्चिदर्पितं वत्स यस्य तं न हृदि स्थितम्।

तस्मात्तं पूजयेद्वत्स अहिंसा कुसुमैः शुभैः॥ ३१॥

हृदिस्थं तु पुनर्वत्स सर्वकामैस्तु पूजयेत्।
दानानि यानि चोक्तानि शिवधर्मैखिलानि तु॥ ३२॥

तानि दत्तानि सर्वाणि भवन्ति शिखिवाहन।
सर्वकामानि वै तद्वत्मानसं याग मुत्तमम्॥ ३३॥

p. 50b) यागं तु परमं ह्येतत् सर्वयागोत्तमोत्तमम्।
इडादयो यजेद् यस्तु राजसं यागमुच्यते॥ ३४॥

सुषुम्णा तामसं? भोगं? ज्ञेयं सात्विकं पिङ्गलोदये।
सुषुम्णे त्वां परित्यज्य पिङ्गला नाडिस्थं यजेत्॥ ३५॥

तां विचार यत्नेन ब्रह्मनाडिश्च उच्यते।
तस्मिन् मध्ये स्थितं देवं तं नेदं पूजयेत् तु सः॥ ३६॥

यत्किञ्चिदिति कर्तव्यं तत्सर्वं पिङ्गलोदये।
तुर्योद्भवति? सर्वाणि तुर्यस्थाने गतानि तु॥ ३७॥

चिन्तयेत् सर्वकामानि अन्यथा हिंसितानि तु।
तुर्यस्थाने लयं कृत्वा हृधिस्थं पूजयेत् सदा॥ ३८॥

यस्य तुर्ये गतिर्नास्ति हृदिस्थं तु कथं यजेत्।
हृदिस्थं तुर्यसंस्थं तु उभौ यो वेत्ति तत्वतः॥ ३९॥

p. 51a) एकतं भूय एतेषां स पूजां कर्तु मर्हति।
प्राणापानान्तरस्थेन शिवेन शिखिवाहन॥ ४०॥

योजयेत् साधको वत्स स वै साधक उच्यते।
प्राणापानौ तु सन्दिग्धौ रजस्तमसमन्वितौ॥ ४१॥

तस्मात् तौ वर्जयेत् वत्स यागकाले तु सर्वदा।
सात्विकं सङ्गमं तेषां तेन कुर्याच्छिवार्चनम्॥ ४२॥

वह्नि पूजा तु ते नैव अन्यथा न कृता भवेत्।
ब्रह्मादि स्तम्भ पर्यन्तं त्रैलोक्यं स चराचरम्॥ ४३॥

अहिंसा पुष्पसेकेन पूजितं तं सदा भवेत्।

p. 51b) मानसे नैव यागेन मुक्तोहं सर्वदा विभो ॥ ४४ ॥

तथापि ज्ञातु मिच्छामि जप्यं वै सर्वदा परम् ॥ १ ॥

मानसैश्चाक्षरौघैश्च प्राणापानौ शिखिध्वज ।
रहस्यं चैव गुह्यं च जप्यं जप्योत्तमोत्तमम् ॥ २ ॥

जप्यं बहुविधं प्रोक्तं शिवेन परमात्मना ।
न पुनर्मानसं जप्यं मोक्षमार्गफलप्रदम् ॥ ३ ॥

मयि तुष्टेन नाथेन अयं मार्गः प्रदर्शितः ।
तदाहं कथयिष्यामि रहस्यं कृत्तिका सुत ॥ ४ ॥

सर्वेषामेव भूतानां हृदिस्थं यत्परं पदम् ।
स तु सङ्ख्या यते जप्यं जपं तु कुरुते तु सः ॥ ५ ॥

अज्ञाना नैव बुध्यन्ते ज्ञानविज्ञान वर्जिताः ।
p. 52a) प्रत्यहं प्रत्यहं वत्स जपसङ्ख्यं करोति सः ॥ ६ ॥

अब्युच्छिन्न प्रबन्धेन मणिभिः परमैः शुभैः ।
सूर्य चिच्छक्तिरित्याहुस्तस्मिंस्ते कथिता गुह ॥ ७ ॥

अक्षसूत्र परं ह्येतद्योगिनां तत्त्व चिन्तकः ।
ये स्थिता फलसन्धाने वश्याकर्षणमारणे ॥ ८ ॥

जपं तेषां तु मन्त्रैश्च अक्षसूत्रैरनेकशः ।
पुनरात्म विदे वत्स मन्त्र तन्त्रैः प्रयोजनम् ॥ ९ ॥

प्रयोजनं भवेत् तेषामात्मज्ञानेन केवलम् ।
तं विदित्वा महासेन मन्त्रतन्त्रांस्त्यजेद्गुह ॥ १० ॥

अथवा सङ्ख्यया कार्यं मानसेस्मिञ्जपे गुह ।
ततोहं कथयिष्यामि यथा भवति तच्छृणु ॥ ११ ॥

षट्कतानि सहस्र * * * * * * * * * ।
* * * * * * * * * * * * * * * * ॥ १२ ॥

* * * * * * * * * * * * * * * * ।

* * * * * * * * * * * * * * * * ॥ १३ ॥

p. 52b) अहोरात्रान्तरे जप्यं कुरुते सततं शिवः।
शिवजप्यं भवेदेष शिवं ह्यशिव कारिणम्॥ १४ ॥

प्राणश्च कर्षते पानमपानः प्राणमेव च।
उभौ चाकर्षयेद्यस्तु स जपं कुरुते गुह ॥ १५ ॥

हृत्स्थानाद् द्वादशान्तं तु द्वादशान्तात् पुनर्हृदि।
एवां गमागमं ज्ञेयं तं जपं ब्रह्मशाश्वतम्॥ १६ ॥

विदितं मानसं जप्यमक्षसूत्रं तथैव च।
अग्निकार्यं च मेताततत्वमाचक्ष्व वै प्रभो ॥ १ ॥

मयाज्ञानामृतं वत्स स्नेहात् ते प्रकटी कृतम्।
भूयोपि कथयिष्यामि अग्निकार्यं तु मानसम्॥ २ ॥

p. 53a) चराचराणां भूतानां सर्वेषां शिखिवाहन।
हृदिस्थं परमं तेजो न तु जानन्ति मोहिताः॥ ३ ॥

आदित्यस्तपते तस्य तेजसा तस्य वै गुह ।
ज्वलनस्य तु तत् तेजः पूर्णमिन्दुस्तथैव च ॥ ४ ॥

तर्ह्युपासीतविधिवदग्नी यः शिखिवाहन ।
बाह्येग्नीनां हुतं हव्यं हिंसन्ति गुह्यकादयः ॥ ५ ॥

मन्त्र दोषाश्च दोषाश्च अशुभैर्वादया भवेत् ।
तदा ते लुप्यते वत्स बाह्याग्निषु हुतं हविः ॥ ६ ॥

इध्मादि द्रव्यसंभारं सर्वं चिच्छक्ति संभवम् ।
यदात्र हूयते यस्मात् तस्मात् तं हिंसपूर्वकम् ॥ ७ ॥

अहिंसा पूर्वकं वत्स स्वदेहे ह्यग्नि पूजनम् ।
शिवाग्निर्वैभवत्येष शिवमशिवहारिणम् ॥ ८ ॥

??????????????????

p. 53b) गर्भादानादि संस्कारैर्न हि तत्र प्रयोजनम् ।
न हि कुण्डं नु वः कार्यं मेखलैर्वाथ योनिना ॥ ९ ॥

कार्यमेवं हि वै चात्र विधिनाशिखि वाहन।
कुण्डत्रयं स्थितं देहे अग्नि त्रितयमेव च॥ १०॥

गार्हपत्याग्नि हृत्कुण्डे नाभिकुण्डेग्नि दक्षिणम्।
मुखकुण्डे स्थितं वत्स नाम्नाचाहवनियकम्॥ ११॥

कुण्डाग्नि त्रितयं वत्स मया ते दर्शितं क्रमात्।
तेषां होमं प्रकुर्वीत विधि दृष्टेन कर्मणा॥ १२॥

सुषुम्णा नाडिमाश्रित्य कुर्याद्वै चोत्तरायणम्।
दक्षिणाग्निं ततो जुह्यान्नाभिकुण्डे स्थिते गुह॥ १३॥

इडा नाड्युदयं कृत्वा कुर्याद्वै दक्षिणायनम्।
तदाचाहवनीयोग्निर्मुखकुण्डे स्थितो गुह॥ १४॥

p. 54a) गार्हपत्यस्तु यो ह्यग्निर्हृत्कुण्डे संस्थितस्सदा।
तस्मिन् पूर्णाहुतिं दद्याद्विषुवत्करणेन तु॥ १५॥

विषुवं तु भवेद्वत्स पिङ्गनाड्युदयेन तु।

तस्मिन् काले यजेद् यस्तु तत्सर्वं चाक्षयं भवेत्॥ १६॥

सिद्ध्यन्ते सर्वकामानि मनसा चेप्सितानि च।
प्राणाद्या वायवः पञ्च होमयेत् तु यथा क्रमम्॥ १७॥

तैर्हुतैः सर्वमखिलं विश्वं सन्तर्पितं भवेत्।
अमृतं भवते वत्स अमृतं तंतु तिष्ठति॥ १८॥

तदा तदखिलं विश्वं तृप्तं भवति चापरे।
प्राणापानान्तरस्थं तु यैर्ज्ञातं शिखिवाहन॥ १९॥

तेपि वन्त्यमृतं दिव्यं तुर्यस्थानोद्भवं परम्।
तुर्योद्भवामृताज्येन नित्यमग्निं प्रपूजयेत्॥ २०॥

अग्नि पूजा भवत्येषा अक्षय्या मुक्तिदा शुभा॥

इति श्रीब्रह्मसन्धानाग्नि * जा * चा * नि * यो * मा॥

अद्य मे सफला बुद्धिः श्रुत्वा ब्रह्मपदं परम्॥ ॥

****
**
** kaulaj~naananir.naya of the school of Matsendryanatha edited by P.C. Bagchi, Calcutta, 1934
**
**
** Data entered by the staff of Muktabodha
**
*
*
**
** Encoded in Velthius transliteration
****
****

कौलज्ञाननिर्णयः

प्रथमः पटलः

मूलाङ्गुष्ठनखाग्रञ्च एते तत्त्वसन्तति (ः)।

अष्टादशविधं देवि ज्ञानञ्च कुलगोचरे ॥ १/१ ॥

कथितं सृष्टिसंयोगं यथा तथा न भैरवि।

किमन्यं पृच्छसे नाथ सुगोप्यं प्रकटीकृतम्॥ ॥

इति ज्ञाननिर्णितियोगिनीकौलम्महच्छ्रीमच्छघ्नपादावतारिते
चन्द्रद्वीपविनिर्गते प्रथमः पटलः ॥ १/१ ॥

द्वितीयः पटलः

देव्युवाच

पञ्चाग्नितपसं तप्तं वर्षकोटिरनेकधा।
तपस्तदद्य मे सम्यक् त्वत्प्रसादेन भैरव ॥
सृष्टियोगं मया ज्ञातं संहारं कथयस्व मे ॥ २/१ ॥

भैरव उवाच

साधु त्वां कथयिष्यामि संहारन्तु यथा भवेत्।
कालाग्निरुद्रसंज्ञा तु नखाग्रे नित्यसंस्थितम्॥ २/२ ॥
यदा प्रज्वलते ऊर्द्धं संहारन्तु तदा भवेत्।
वडवामुखमहत्त्वञ्च पाताले सहसंस्थितः॥ २/३ ॥
सप्तपातालमुद्दिष्टं तस्योर्द्धे स्वर्गसंस्थितम्।
एतानि कथिता भद्रे भुवनानि चतुर्दश॥ २/४ ॥
ज्ञातव्या देहमध्ये तु तत्त्वरूपा स्थिता प्रिये।

सर्वज्ञा (यत्र ?) संलीनं लयञ्च शक्तिगोचरे ॥ २/५ ॥

शिवमध्ये गता शक्तिः क्रियामध्यस्थितः शिवः ।

ज्ञानमध्ये क्रिया लीना क्रिया लीयति इच्छया ॥ २/६ ॥

इच्छाशक्तिर्लयं याति यत्र तेजः परः शिवः ।

संहारन्तु इमं भेदेन कथितन्तव शोभने ॥ २/७ ॥

संहारन्तु पदान्यस्तं क्रुद्धः संहरते जगत् ।

सृष्टियोगं पदान्यस्तं सृजत्येवं चराचरम् ॥ २/८ ॥

अधस्था संस्थिता भुक्तिः ऊर्द्धं मुक्तिर्वरानने ।

पूर्वं यत् सूचितं देवि सृष्टियोगं मया तव ॥ २/९ ॥

सृष्टिसंहारन्यायेन कुलाधारमुपवर्णितम् ।

किमन्यं पृच्छसे नाथे सुगोप्यं प्रकटीकृतम् ॥ २/१० ॥

इति ज्ञाननिर्णितियोगिनीकौलम्महच्छ्रीमच्छन्नपादावतारिते

चन्द्रद्वीपविनिर्गते द्वितीयः पटलः ॥ २/२ ॥

तृतीयः पटलः

देव्युवाच

कुललक्षं महेशान आत्मसम्वित्तिपूर्वकम् ।

एतन्मे संशयो नाथ प्रसादीभव शङ्करः ॥ ३/१ ॥

भैरव उवाच

शृणुमेकाग्रचित्ता कुललक्षन्निगद्यते ।

यत्र दृष्टिर्मनस्तत्र भूतेन्द्रियमपुद्गलः ॥ ३/२ ॥

स्वशक्तिजीवभूतानि दृष्टिर्लक्षैर्लयं गता ।

स्थानं ध्यानञ्च वर्णञ्च लक्षञ्चैव चतुष्टयम् ॥ ३/३ ॥

पिण्डसंज्ञा भवेत् स्थानं ध्यानन्तत्पदमुच्यते ।

वर्णरूपं विनिर्दिष्टं लक्षं वै रूपवर्जितम् ॥ ३/४ ॥

पिण्डञ्चोपपदरूपं रूपातीतं वरानने ।

स्थाने स्थाने स्थितन्देवि एकैकस्य चतुर्विधम् ॥ ३/५ ॥

चतुष्पत्रञ्च अष्टारं द्वादशारं वरानने ।

पञ्चारं षोडशारञ्च चतुःषष्टिदलम्प्रिये ॥ ३/६ ॥

शतपत्रं सुशोभाढ्यं सहस्रं दलशोभितम् ।

कोटिपत्रं सुतेजाढ्यं तस्योर्द्ध्वे अन्यथा शृणु ॥ ३/७ ॥

अर्द्धकोटिसमायुक्तं कोटित्रयसमन्वितम् ।

कर्णिकाकेशरैर्युक्तं दीप्यमानं (तथैव च) ॥ ३/८ ॥

तस्योर्द्ध्वे व्यापकन्तत्र नित्योदितमखण्डितम् ।

स्वातन्त्र्यमजमचलं सर्वव्यापी निरञ्जनम् ॥ ३/९ ॥

तस्येच्छया भवेत् सृष्टिर्लयन्तत्रैव गच्छति।

तेन लिङ्गन्तु विख्यातं यत्र लीनं चराचरम्॥ ३/१० ॥

अखण्डमण्डलं रूपं निर्विकारं सनिष्कलम्।

अज्ञात्वा बन्धमुद्दिष्टं ज्ञात्वा बन्धैः प्रमुच्यते॥ ३/११ ॥

उन्मनम्मनरहितं ध्यानधारणवर्जितम्।

प्रत्यक्षं सर्वदा नित्यं अतसिपुष्पसन्निभम्॥ ३/१२ ॥

सर्ववर्णमयन्देवं सर्ववर्णैर्विवर्जितम्।

ज्ञानगम्यं सदा देवि पारम्पर्यक्रमागतम्॥ ३/१३ ॥

कथितं देवि सङ्काशं कुललक्षं (तथा) स्थितम्।

न काष्ठं मृण्मयं लिङ्गं न शैलरत्नसम्भवम्॥ ३/१४ ॥

न चित्तं रीतिकादिनी न हेमं लोहसम्भवम्।

स्फटिकं मौलिकं वापि त्रपुं सीसकताम्रजम्॥ ३/१५ ॥

पुष्परागोद्भवादीनि ये चान्ये लोकपूजिताः।

अष्टादश लोकशास्त्राणि क्रुराश्चाध्यात्मिकास्तथा॥ ३/१६ ॥

तैस्तु यत् पूजितं देवि मनसापि न पूजयेत्।

किं कारणं महादेवि पशवो ज्ञानवर्जिताः॥ ३/१७ ॥

अज्ञानास्ते दुराचाराः कुलाज्ञकविवर्जिताः।

न तैस्तु सङ्गभोक्तव्यं न कुर्याद्द्रव्यसंग्रहम्॥ ३/१८ ॥

ब्रह्माद्यास्तु सुराः सर्वे असुराश्च तपोधनाः।

यक्षगान्धर्वसिद्धाश्च तृणगुल्मपिपीलिकाः॥ ३/१९ ॥

ग्रहनक्षत्रतारादिजगत्स्थावरजङ्गमा(ः)।

निष्क्रान्ता बिन्दुमध्ये तु लौलीभूतन्तु तत्समम्॥ ३/२०॥

सृष्टिसंहारकर्तारं तल्लिङ्गं सिद्धपूजितम्।

स्फुरन्तन् निर्मलन्नित्यं अप्रमेयं सदोदितम्॥ ३/२१॥

ज्वलन्तं उल्कसदृशं विद्युत्तेजो नभस्तले।

एतल्लिङ्गवरं ज्ञात्वा दृष्ट्वा मोक्षस्य भाजनः॥ ३/२२॥

पाषाणवृष्टिसंघातैर्महामेघैः सुदारुणैः।

न नश्येदग्निना लिङ्गं न पतेद् वज्रताडितम्॥ ३/२३॥

एतन्तु पूजयेद्देवि कौलिकं सिद्धिमिच्छता।

अर्चयेन्मानसैः पुष्पैः सुगन्धैर्धूपदीपितैः॥ ३/२४॥

अहिंसा प्रथमं पुष्पं द्वितीयेन्द्रियनि(ग्र)हम्।

तृतीयन्तु दयापुष्पम्भावपुष्पञ्चतुर्थकम्॥ ३/२५॥

पञ्चमन्तु क्षमापुष्पं षष्ठं क्रोधविनिर्जितम्।

सप्तमं ध्यानपुष्पन्तु ज्ञानपुष्पन्तु अष्टमम्॥ ३/२६॥

एतत् पुष्पविधिं ज्ञात्वा अर्चयेल्लिङ्गमानसम्।

भुक्तिमुक्तिमवाप्नोति देहलिङ्गार्चनेन तु॥ ३/२७॥

सिद्धिलिङ्गमिदं देवि देहस्थं प्रत्ययान्वितम्।

मनोलिङ्गं सदा ध्यायेद् यां यां फलसमीकृते॥ ३/२८॥

तां लभन्ते न सन्देहो आत्मसम्बित्तिपूर्वकम्।

एतत् ते कौलिकन्देवि देहलिङ्गस्य लक्षणम्॥ ३/२९॥

अन्यन्तु वर्जयेद्देवि पाषाणं काष्ठमृन्मयम् ।
लौकिकम् मार्गसम्पन्ना सिद्धिमुक्तिविवर्जिता ॥ ३/३० ॥
देहस्था वासना यस्य तस्यैवांशो कुलागमे ।
बहिस्था वासना यस्य सः पशुरङ्गरञ्जितः ॥ ३/३१ ॥
एतन्ते कथितं देवि नाम्ना ज्ञानस्य निर्णितिः ।
दातव्यं भक्तिसंयुक्ते न देयं भक्तिवर्जिते ॥ ३/३२ ॥

इति ज्ञाननिर्णितियोगिनीकौलम्महच्छ्रीमच्छघ्नपादावतारिते
चन्द्रद्वीपविनिर्गते तृतीयः पटलः ॥ ३/३ ॥

चतुर्थः पटलः

देव्युवाच

अद्य मे सफलञ्जन्म तपस्तप्तं सुरेश्वर ।
अद्य मे निर्मलन्देहं त्वत्प्रसादेन भैरव ॥ ४/१ ॥
स्वगृहे स्वदेशे वा पाशस्तोभं यदा भवेत् ।
निग्रहानुग्रहश्चैव क्रामणं हरणं तथा ॥ ४/२ ॥
प्रतिमाजल्पनञ्चैव घटपाषाणस्फोटनम् ।
कथं मे सर्वसंक्षेपात्त्वमेव शरणङ्गता ॥ ४/३ ॥

भैरव उवाच

साधु साधु महादेवि कथयामि महातपे।

कुलपिण्डं समालिख्य नाडी नाडीमुखैः सह ॥ ४/४ ॥

विद्यामन्त्रमयं पिण्डं भुक्तिमुक्तिप्रदं शुभम्।

नाडी नाडीमुखैर्वापि अधोर्द्धं रेफदीपितम्॥ ४/५॥

वायुविष्णु(ः) सबिन्दुश्च तप्तचामीकरप्रभम्।

जन्ममण्डलसंलीनं ध्वान्ततेज(ः)समप्रभम्॥ ४/६ ॥

साधकः साध्यदेहे तु पशुदेहे तु हृद्गतम्।

करस्तोभादिकं भद्रे करोत्येवं चराचरैः॥ ४/७ ॥

बिन्दुनाद(स्त) तथा शक्तिर्दीप्तध्यानमथापि वा।

जन्ममन्डलसंलीनं ध्वान्ततेज(ः)समप्रभम्॥ ४/८ ॥

साध्यदेहगतश्चिन्त्य निमेषार्द्धं स्तुभ्यते पशुः।

ध्यात्वा विद्युल्लताकारं शक्तिर्वै व्योमपञ्चके॥ ४/९॥

स्तुभ्यते च जगत्सर्वं घटिकार्द्धे वरानने।

शक्तिविज्ञानवेधेन मनाख्येन महान्मने॥ ४/१० ॥

बद्ध्वा चैतत् पाशेन पर्वतानपि लालयेत्।

परदेहे पराशक्तिनादिनाक्रम्य वेधयेत्॥ ४/११ ॥

चलने बाल्यने चैव बध्वा मुद्राबन्धने।

अतीतानागतञ्चैव पृष्टासौ कथयिष्यति ॥ ४/१२ ॥

अकारादिहकारान्तं कुलपिण्डस्य भैरवि ।

शंखाभिषेकविज्ञानं दन्तकाष्ठादिकम्प्रिये ॥ ४/१३ ॥

पुष्पाञ्जलिकरस्तोभमेकैकं वर्णदीपितम् ।

मारणोच्चाटनञ्चैव स्तम्भमोहादिकं प्रिये ॥ ४/१४ ॥

शान्तिकम्पौष्टिकं वापि आकृष्टिञ्च वशन्तथा ।

पञ्चाशवर्णसंयोगं ज्ञात्वा सर्वं कुरु प्रिये ॥ ४/१५ ॥

हूं मारणं यूं यः उच्चाटनं रूं र ज्वरकरणं बुं व
अध्यायनं लूं ल स्तम्भनं शूं श शान्तिकं षूं ष कीलनं क्षें
क्ष ॥ ॥ ॥ क्षुं क्ष पशुग्रहणं क्लीं क्ष्णीं वशीकरणं क्लें क्ष्णों
क्षोभणं मोहनञ्च सों स सद्यप्रत्ययः सिद्धिः हो हः विषनाशनं ह्वो
हः रक्ताकृष्टियोगिनीनाञ्च जूं सः मृत्युञ्जयः ॥ ॥ । प्रतिमादिषु जल्पनं
स्फोटनञ्च । स्त्रों शः पाशस्तोभादिकं कामरूपिन्धं भ्रू त्र
डाकिनीसिद्धिः झुर राक्षसीसिद्धिः । लूं ल लाकिनी सिद्धिः, लुं क
कुसुमालिनीसिद्धिः यूं य योगिनीसिद्धिः ह्रीं ह आकर्षणः ॥

एकैकेन तु बीजेन वर्णराशिर्विभेदयेत् ।

कुरुते विभिदं कर्म यद्देवि मनसेप्सितम् ॥ ४/१६ ॥

दीक्षान्तेष्टिककर्मेषु विपरीतं मातृकं (चरे)त् ।

योजयेत्तां कुलाधा(रं)तु सर्वं ज्ञात्वा दृढलक्षवित् ॥ ४/१७ ॥

तेजोरूढम्परं लिङ्गं तं लीनं स्थापयेत् पशुः।

स्वातन्त्रो मुक्तिमायाति सर्वहृद्भवने तु सः ॥ ४/१८ ॥

सर्वज्ञगुणसंपूर्ण इत्येवं भैरवोऽब्रवीत्।

यत् त्वयापृच्छितम्भद्रे सुगोप्य सिद्धिकारणम् ॥ ४/१९ ॥

गोपितव्यम्प्रयत्नेन दुष्टानाम्भक्तिवर्जितम्।

न देयं भक्तिहीनस्य कौलिकीं सिद्धिमिच्छताम् ॥ ४/२० ॥

इति ज्ञाननिर्णितियोगिनीकौलम्महच्छ्रीमच्छघ्नपादावतारिते

चन्द्रद्वीपविनिर्गते चतुर्थः पटलः ॥ ४/४ ॥

पञ्चमः पटलः

देव्युवाच

मृत्युञ्जयम्महादेव कथयस्व प्रसादतः।

अज्ञानतमसाच्छन्ना यथा भ्रान्तिर्विनश्यति ॥

कथयस्व महादेव भ्रान्तिनिर्नाशनं परम् ॥ ५/१ ॥

भैरव उवाच

येनैव ज्ञानमात्रेण ध्यानाभ्यासेन नित्यशः।

सर्वद्वन्द्वविनिर्मुक्त स गताभ्यासतत्परः॥ ५/२॥

साधयेत् सकलार्थानां मनसा यत् समीहितम्।

उत्तिष्ठ खड्गपातालं रोचनाञ्जनपादुकम्॥ ५/३॥

गुटिकाकाशगमनं रसञ्चैव रसायनम्।

अन्तर्द्धानम्भवेद्देवि तथान्यञ्च रसायनम्॥ ५/४॥

साधयेन्नात्र संदेहो ध्यानयुक्तपदा भवेत्।

शृणु त्वं एकचित्तन्तु कथ्यमानं मया प्रिये॥ ५/५॥

सितञ्च शीतलन्दिव्यं सुगन्धं भूरितेजसम्।

चन्द्राह्लादकरं दिव्यं आगच्छन्तं खमध्यतः॥ ५/६॥

स्रवन्तं बहुरन्ध्रेण अचिरान्मृत्युजिद्भवेत्।

न जरामरणन्तस्य व्याधिरोगो न विद्यते॥ ५/७॥

लीलया सिद्धिभाग्योऽसौ भवत्येवं वरानने।

क्षीरोदार्णवमध्यस्थं श्वेतं कमलविस्तरम्॥ ५/८॥

सहस्रकोटिपत्रं वा तन्मध्ये आत्मानं बुधः।

तस्मिंश्चैव निविष्टं तु सिताभरणभूषितम्॥ ५/९॥

तादृशेनैव पद्मेन उपरिष्टाद्यटितम्प्रिये।

क्षीरोदवि(शे)षैः सर्वैस्सिञ्च्यमानमनुस्मरेत्॥ ५/१०॥

मुच्यन्ते सर्वरोगैस्तु जरामरणबन्धनैः।

क्रीडते विविधैर्भोगैरिच्छारूपञ्च जायते ॥ ५११ ॥

अथान्यं सम्प्रवक्ष्यामि मृत्युञ्जयं विशेषतः।

ध्यात्वा चन्द्रासनस्थञ्च ऊर्द्धश्चन्द्रेण घट्टितम् ॥ ५१२ ॥

सीकरैः शीतलैर्दिव्यैः सिञ्च्यमानमनुस्मरेत्।

जरामरणनिर्मुक्तं सर्वव्याधिविवर्जितम् ॥ ५१३ ॥

संवत्सरप्रयोगेण सामान्यं योगिनीकुलैः।

अन्यञ्च अद्भुतन्देवि शृणु त्वं कुलभाविनि ॥ ५१४ ॥

संपूर्णोपूर्णमापूर्णशशाङ्कपरिमण्डलम्।

ध्यायमानमिदन्देवि जराव्याधिर्विनश्यति ॥ ५१५ ॥

अथान्यं शृणु कल्याणि यथातथ्येन भाविनि।

ध्यायेच्चन्द्रमिदं देवि नाभिमूर्ध्नि च हृद्गतम् ॥ ५१६ ॥

अभ्यसेत् समचित्तस्तु अब्दमेकं निरन्तरम्।

ततः स्वातन्त्रमायाति जरामरणवर्जितम् ॥ ५१७ ॥

पुनरन्यं प्रवक्ष्यामि शृणु त्वं वीरवन्दिते।

सहस्रदलशोभाढ्यं गोक्षीरधवलोपमम् ॥ ५१८ ॥

देव्या चक्रगतञ्चक्रं तादृशं खेचरैः स्थितम्।

अधश्चक्रसमारूढं ऊर्द्धचक्रेण प्लावितम् ॥ ५१९ ॥

सततमभ्यसेद् योगी सिञ्च्यमानश्च वि(शो)षैः।

वलीपलितनिर्मुक्तः सर्वव्याधिविवर्जितम् ॥ ५२० ॥

क्रीडते सः समुद्रान्तं स्वातन्त्रः सिध्यते प्रिये।

अन्यदप्यद्भुतं देवि शृणुतैकाग्रमानसम्॥ ५२१ ॥

षोडशारम्महापद्मं हिमकुन्देन्दुसम्प्रभम्।

स्थाने स्थाने तु तं ध्यात्वा शिवाद्यावीचिगोचरम्॥ ५२२ ॥

बिन्दुधारानिपातैश्च विप्लवैः पूरितन्तनुः।

निष्क्रान्तं रोमकूपइश्च गोक्षीरहिमसन्निभम्॥ ५२३ ॥

न जरामरणन्तस्य व्याधिरोगन्न विद्यते।

स्वातन्त्रः शिवतुल्यस्तु स्वच्छन्दगतिचेष्टितः॥ ५२४ ॥

पूज्यते सुरवृन्दैस्तु दिव्यकन्यारनेकधा।

गुह्यनाभिहृदि कण्ठे वक्त्रे मूर्ध्नि शिखान्तरे॥ ५२५ ॥

मुण्डसन्धिगता देवि पृष्ठमध्ये त्रिदण्डकम्।

एकादशविधा देवि चक्राणि च सहस्त्रिका॥ ५२६ ॥

पञ्चारं अष्टपत्रञ्च दश द्वादश पत्रकम्।

षोडशं शतपत्रञ्च कोटिपत्रं यथैव च॥ ५२७ ॥

एभिः स्थाने समभ्यस्तं ददते विविधं फलम्।

रक्तं वश्यं सदा देवि महाभोगप्रदायकम्॥ ५२८ ॥

पीतं स्तम्भकरन्नाथे धूम्रमुच्चाटनं सदा।

शुक्लमाप्यायने प्रोक्तं विशेषं शान्तिकारकम्॥ ५२९ ॥

गोक्षीरधाराधवलं कथितं मृत्युञ्जये हितम्।

तप्तचामीकरप्रभं पुरक्षोभादिकारणम्॥ ५३० ॥

बिन्दुनादतथाशक्तिरेवं ध्यात्वा पृथक् पृथक्।

धर्मार्थौ काममोक्षौ च अणिमादिगुणाष्टकम् ॥ ५/३१ ॥

अतीतानागतन्देवि रूपस्य परिवर्तनम् ।

भवत्येवं न सन्देहो अभ्यासात् तद्गतस्य तु ॥ ५/३२ ॥

गुरुभक्तिर्योगिनीनां कुलकौलागमेषु च ।

अमरत्वं भवेद्देवि जयेन्मृत्युं न संशयः ॥ ५/३३ ॥

कथितं मृत्युञ्जयन्देवि सर्वज्ञानस्य निर्णयम् ।

गोपितव्यं प्रयत्नेन मर्त्यलोके नराधमे ॥ ५/३४ ॥

दुर्लभं सिद्धिसन्दोहं गोपितव्यं प्रयत्नतः ।

दातव्यं पूर्वसिद्धस्य अब्दमेकपरीक्षितम् ॥ ५/३५ ॥

इति ज्ञाननिर्णितियोगिनीकौलम्महच्छ्रीमच्छघ्नपादावतारिते

चन्द्रद्वीपविनिर्गते पञ्चमः पटलः ॥ ५/५ ॥

षष्ठः पटलः

देव्युवाच

अद्य मे सफलं जन्म मम देहे कुलेश्वर ।

त्वत्प्रसादेन कौलेश ज्ञातोऽहं कौलनिर्णयः ॥ ६/१ ॥

अन्यानि ज्ञातुमिच्छामि वद मे जीवलक्षणम् ।

कोऽसौ जीवः समुद्दिष्टः किं वा जीवस्वरूपकम् ॥ ६/२ ॥

किं वर्णं किम्प्रमाणञ्च कस्मिन् स्थाने व्यवस्थितम् ।

कस्मिंश्चैव लयं याति तत्सर्वं कथयस्व मे ॥ ६/३ ॥

भैरव उवाच

शृणु त्वं वीरचामुण्डे वरं जीवस्य निर्णयम् ।

स(ः)परं निष्कलं नित्यं निरामयनिरञ्जनम् ॥ ६/४ ॥

परमाणुमुच्यते नाथो स शिवो व्यापकः परः ।

स(ः) जीवः परतरो यस्तु स(ः) हंसः शक्तिपुद्गल(ः) ॥ ६/५ ॥

स(ः) मनो मत्परं प्राणः स(ः) बुद्धिश्चित्तमेव च ।

समीरपूरको वायुः सर्वजीवेषु संस्थितम्(ः) ॥ ६/६ ॥

देहस्थस्तिष्ठते यावत्तावज्जीवोऽपि गीयते ।

स देहत्यक्तमात्रेण परं शिवो निगद्यते ॥ ६/७ ॥

नाभिस्थं हृदि कण्ठे च वक्रनासापुटन्तथा ।

कर्णस्थं श्रूयते देवि पारम्पर्यक्रमागतम् ॥ ६/८ ॥

कौलिकन्तु इदं देवि कर्णात् कर्णसमागतम् ।

अनेन ज्ञानमात्रेण श्रुतेन च वरानने ॥ ६/९ ॥

मुच्यते सर्वपापेभ्यो भवद्भिः समुपार्जितम् ।

षण्मासादभ्यसेद्यस्तु काषायं बन्धवर्जितम् ॥ ६/१० ॥

अस्यापि शोकसन्तापजराव्याधिर्विनश्यति ।

सर्वव्याधिविनिर्मुक्तो योगिभिः सहमेलकम् ॥ ६/११ ॥

अणिमादिगुणैश्वर्यं सिद्धिश्च मानसी भवेत् ।

एतत्ते जीवमभ्यासं कथितं ते च भैरवि ॥ ६/१२ ॥

कुलागमसुभक्ताय गुरुदेव्या प्रपूजके ।

सर्वभावोपपन्नस्य दातव्यं कृतनिश्चये ॥ ६/१३ ॥

मायाविने शठे क्रूरे प्रपञ्चैर्लिङ्गिने तथा ।

न देयं कौलिकं सारं योगिनीनान्तु सम्भवम् ॥ ६/१४ ॥

देव्युवाच

सफलं अद्य मे नाथ तपो मह्यं सुरेश्वर ।

अद्य मे निर्मलं देहमज्ञानपटलाहतम् ॥ ६/१५ ॥

प्रकाशितं महाज्ञानं यत्सुरैरपि दुर्लभम् ।

साम्प्रतं श्रोतुमिच्छामि कालस्य वञ्चनं शुभम् ॥ ६/१६ ॥

भैरव उवाच

अत्यन्तगहनं नाथे पृच्छितोऽहं त्वयाधुना ।

कथयामि न सन्देहो यथा मृत्युर्विनश्यति ॥ ६/१७ ॥

प्रसार्य दन्तुरायान्तु यावद् ब्रह्मविलङ्गतः।

अमृताग्रं रसाग्रेण दह्यमानसुधीरपि॥ ६/१८॥

मासेन जितयेन्मृत्युं सत्यं सत्यं महातपे।

रसनातालुमूले तु कृत्वा वायुं पिबेच्छनैः॥ ६/१९॥

षण्मासादभ्यसेद्देवि महारोगैः प्रमुच्यते।

अब्दमेकं यदाभ्यस्तज्जरामृत्युर्विनश्यति॥ ६/२०॥

अतीतानागतञ्चैव दूरादिश्रवणन्तथा।

विषं न क्रमते देहे दंशितोऽपि महोरगैः॥ ६/२१॥

स्थावरं जङ्गमं वापि कृत्रिमं गरलं तथा।

छेद्यमानो न छिद्येत तद्गतो तन्मनो यथा॥ ६/२२॥

द्वौ राजद(?)मध्यस्थं बिन्दुरूपं व्यवस्थितम्।

अमृतं तं विजानीयाद्बलीपलितनाशनम्॥ ६/२३॥

शीतलं स्पर्शसंस्थाने रसनां कृत्वा तु बुद्धिमान्।

बलीपलितनिर्मुक्तः सर्वव्याधिविवर्जितः॥ ६/२४॥

न तस्य भवते मृत्युर्योगयानपरः सदा।

रसना तालुमूले तु व्याधिनाशाय योजयेत्॥ ६/२५॥

तिष्ठञ्जाग्रन् स्वपङ्गच्छन् भुञ्जन् मैथुने रतः।

रसनं कुञ्चयेन्नित्यं स्ववक्रेण तु संयुतम्॥ ६/२६॥

न मृत्युर्भवते तस्य अब्दात् स्वच्छन्दगो भवेत्।

हृदिस्थञ्च मनः कृत्वा यावदुन्मनतां गतः॥ ६/२७॥

आगतं नाशयेन्मृत्युं घटिकार्द्धे वरानने।
कालस्य वञ्चनं देवि सुगोप्यं प्रकटीकृतम्॥ ६/२८॥

इति ज्ञाननिर्णितियोगिनीकौलम्महच्छ्रीमच्छघ्नपादावतारिते
चन्द्रद्वीपविनिर्गते षष्ठः पटलः॥ ६/६॥

सप्तमः पटलः

देव्युवाच

पलितस्तम्भविज्ञानं जरामरणनाशनम्।
त्रितत्त्वं कथ मे नाथ त्वमेव शरणं गता॥ ७/१॥

भैरव उवाच

पलितस्तम्भविज्ञानं शृणु त्वं वीरमातरे।
देव्याश्चक्रगतं चिन्त्य(?) प्रतिपदायां शशिर्यथा॥ ७/२॥
शीतलं चन्द्रसंकाशं वर्तिस्तु घृतबोधिता।
तत्र चैव शिखा लीना अस्थिचक्रे वरानने॥ ७/३॥
भावयेत् केशस्कन्धस्थं लग्नं वै अञ्जनन्तथा।

साद्रवं कृष्णरूपं च बलीपलितनाशनम्॥ ७/४ ॥

द्वितीयं साम्प्रतं देवि शृणुष्वैकाग्रमानसा।

आधारस्कन्धसंस्थाने योगं युञ्जीत शीतलम्॥ ७/५ ॥

लीनं वै ब्रह्मरन्ध्रे तु कृष्णाञ्जनद्रवात्मकम्।

आदित्यं शत्रुवत् पश्येत् सोमं वै मित्रवद् यथा॥ ७/६ ॥

कृष्णाम्बरधरो नित्यं कृष्णध्यानात्मरञ्जितम्।

भूगृहे निर्जने स्थाने दंशमशकवर्जिते॥ ७/७ ॥

न (स्थाने) जनसङ्कीर्णे सर्पव्याघ्रविवर्जिते।

एकान्ते निर्जने दिव्ये पुष्पप्रकरणशोभिते॥ ७/८ ॥

सुगन्धधूपितं कृत्वा शाल्योदनजितेन्द्रियः।

षण्मासाज् ज्ञायते सिद्धिर्योगिनीपदतत्समः॥ ७/९ ॥

कामदेवसमौपम्ये सुरकन्याप्रपूजितम्।

ब्रह्मग्रन्थिस्थिताद्येतां त्रीणि एव वरानने॥ ७/१० ॥

लीनां वै ब्रह्मखण्डे तु भिन्ननीलाञ्जनप्रभम्।

द्रवेण रञ्जयेत् सर्वं रोमकूपादिकं प्रिये॥ ७/११ ॥

ध्यानेन रञ्जितात्मा तु वृद्धोऽप्युन्नतयौवनः।

भवत्येवन्न सन्देहः षण्मासाभ्यन्तरेण तु॥ ७/१२ ॥

पिङ्गग्रन्थिगतश्चक्रं षोडशारं सुतेजसम्।

साद्रवं कृष्णवर्णञ्च षोडशस्वरभूषितम्॥ ७/१३ ॥

खद्योतितगतादूर्ध्वं ब्रह्मरन्ध्रं लयं गताः।

षण्मासासेवनाभ्यस्ताद् वृद्धोऽपि तरुणायते ॥ ७/१४ ॥

भवते नात्र सन्देहः कामदेवद्वितीयकः ।

योगिनीस्थानमाश्रित्य असितं कृष्णवर्णकम् ॥ ७/१५ ॥

अष्टपत्रद्रवञ्चैव शीतलं चन्द्रसन्निभम् ।

केशस्कन्धकपालस्थं रञ्जयेत् तस्य तेजसा ॥ ७/१६ ॥

अब्दार्द्धं वत्सरं वापि वृद्धोऽपि षोडशाकृतिः ।

जरामरणनिर्मुक्तो व्याधिरोगविवर्जितः ॥ ७/१७ ॥

योगिनीगणसामान्यासृष्टिसंहारकारकः ।

कण्ठकूपस्थितोद्योतं ब्रह्मरन्ध्रलयं गता ॥ ७/१८ ॥

साद्रवमञ्जनञ्चैव रोमकूपादिनिर्गतम् ।

अनङ्गस्यैव सौभाग्यं निगूढं सन्धिबन्धनम् ॥ ७/१९ ॥

रोमाणि सततन्तस्य घनास्थिषु च जायते ।

प्रथमे जनवाच्छल्यं द्वितीये रुजनाशनम् ॥ ७/२० ॥

तृतीये च कवित्वं हि सालङ्कारमनोहरम् ।

चतुर्थे वाचकामित्वं दूराश्रवणं पञ्चमे ॥ ७/२१ ॥

भूमित्यागन्तवेधं(?) षष्ठमन्यत् प्रकीर्तितम् ।

योगिनीमेलकत्वञ्च सप्तमे जायते ध्रुवम् ॥ ७/२२ ॥

जरापहरणन्देवि अष्टमे भवते प्रिये ।

नवमे चण्डवेगत्वं दशमेऽनेकरूपधृक् ॥ ७/२३ ॥

एकादशगुणं शान्तं त्रिविधा चैव वर्जितम् ।

एकादशगुणोपेतं पूज्यतेऽसौ यथा शिवम् ॥ ७/२४ ॥

इच्छयारोहणं कुर्याद्घूर्णनं नृत्यमेव च ।

यतस्तत्रैव गन्तव्यं यत्र वा रोचते मनः ॥ ७/२५ ॥

मनोरोधं न कर्तव्यं यदा ज्ञातं हि कौलिकम् ।

प्रपञ्चरहितं शास्त्रं प्रपञ्चरहितो गुरुः ॥ ७/२६ ॥

प्रपञ्चरहितो मन्त्रः प्रपञ्चरहितः शिवः ।

एतत् कौलागमं नाथ अप्रपञ्चैः पशुः प्रिये ॥ ७/२७ ॥

दम्भितमात्मनस्तैस्तु पुनर्दम्भयते परम् ।

केचिदज्ञानतो नष्टाः केचिन्नष्टाः प्रमादतः ॥ ७/२८ ॥

केचि(ज्) ज्ञानावलयेन केचिन्नष्टैर्विनाशिताः ।

कम्पस्तोभे तथा रोषा मुद्रामुत्पतनन्तथा ॥ ७/२९ ॥

भवते नात्र सन्देहः सप्तरात्रेण कौलवे ।

यां यां स्पृशति हस्तेन यां यां पश्यति चक्षुषा ॥ ७/३० ॥

शुद्धं भवति तत् सर्वं परबिन्दुकिरणाहतम् ।

पलितस्तम्भविज्ञानं कथितं योगिनीप्रिये ॥ ७/३१ ॥

देव्या(ः) चक्रादि देवेशि ब्रह्मरन्ध्रावशा(नु)गम् ।

युक्तं कामकलादेवि पलितस्तम्भनं परम् ।

एतन्ते कथितं गुह्यं उन्मनज्ञाननिर्णितिः ॥ ७/३२ ॥

इति ज्ञाननिर्णितियोगिनीकौलम्महच्छ्रीमच्छन्नपदावतारिते

चन्द्रद्वीपविनिर्गते सप्तमः पटमः ॥ ७/७ ॥

अष्टमः पटलः

देव्युवाच

अत्यन्तगहनं नाथ सुगोप्यं गुह्यमुत्तमम्।
अकुले तु कुलं देवं कथं जातं हि भैरव ॥ ८/१ ॥
क्षेत्रजा पीठजा वापि योगजा मन्त्रजा तथा।
सहजा कुलजा वापि अष्टाष्टकमतन्तथा ॥ ८/२ ॥
पूजाक्रमविधानन्तु कुलसिद्धं वद प्रभो।
गुरुपूजाविधानन्तु सर्वं संक्षेपतो वद ॥ ८/३ ॥

भैरव उवाच

शृणुष्वैकाग्रचित्तन्तु योगिनीवीरमातरे।
एकान्ते विजने स्थाने पुष्पदामोपशोभिते ॥ ८/४ ॥
सुधूपधूपितं कृत्वा मत्स्यमांसरा ॥। वम्।
भक्ष्यभोज्यसमायुक्तो मदिरानन्दसंयुतम् ॥ ८/५ ॥
शक्तियुक्तो महात्मानः सहजा कुलजापि वा।

अन्त्यजा वा महादेवि पृथग्भेदं वदाम्यहम् ॥ ८/६ ॥

विवाहं तु कृतं यस्य सहजा स तु उच्यते ।

कुलजा वेश्यमित्याहुरन्त्यजावर्ण अन्त्यजा ॥ ८/७ ॥

बहिस्था कथिता देवि आध्यात्म्यां शृणु साम्प्रतम् ।

गम्यागम्यप्रयोगेण मदनानन्दलक्षणम् ॥ ८/८ ॥

कुरुते देहमध्ये तु सा शक्तिः सहजा प्रिये ।

कुलजा किं न विज्ञाता वर्णराशिकुलात्मिकाम् ॥ ८/९ ॥

देहस्था त्रिविधा प्रोक्ता बहिस्था त्रिविधा प्रिये ।

अन्त्यजा संप्रवक्ष्यामि शृणु देवि यथास्थितम् ॥ ८/१० ॥

शुद्धस्फटिकसङ्काशा मुक्तामाला खगेश्वरी ।

ऊर्द्धतीर्यक्संशुद्धा महाशक्ति सुतेजसा ॥ ८/११ ॥

एषा शक्तिर्महात्मान अन्त्यजा व्योममालिनी ।

ताम्बुलपूरितं वक्रं विलिप्तं मुक्तमेन च ॥ ८/१२ ॥

श्रीखण्डं मृगमदञ्च हृष्टसंतुष्टचेतसा ।

योगिनीवीरसंयुक्तं युग्मपात्रं पृथक् पृथक् ॥ ८/१३ ॥

पूजयेत् तां चतुःषष्टिं पञ्चाशाष्टकमेवच ।

रक्ताम्बरधराः सर्वे केयूरकटकोज्ज्वलाः ॥ ८/१४ ॥

योगिनीवीरचक्रन्तु यथाशक्त्या (प्र)पूजयेत् ।

इत्थम्भूतं कुलाचार्यः कुलपुत्रैरधिष्ठितम् ॥ ८/१५ ॥

पूजितव्या महादेव्या क्षेत्रजा तु व्यवस्थिताः ।

करवीरं महाकालं देविकोटयं वरानने ॥ ८/१६ ॥

वाराणस्यां प्रयागन्तु चरित्रैकाम्रकन्तथा ।

अट्टहासं जयन्ती च एभिः क्षेत्रैश्च क्षेत्रजाः ।

तेषां मध्ये प्रधानन्तु ये जाताः क्षेत्रजा प्रिये ॥ ८/१७ ॥

ह्रीं श्रीं ह्री श्रीं कोङ्कणा-इपाद,

ह्रीं श्री ह्री श्रीं कलम्बा-इपाद ।

ह्रीं श्रीं ह्री श्रीं नागा-इ पाद,

ह्रीं श्रीं ह्री श्रीं हरसिद्धा-इ पाद ।

ह्रीं श्री ह्रीं श्रीं कम्व-इपाद,

ह्री श्री ह्री श्री मङ्गल इपाद ।

ह्रीं श्री ह्री श्री सिद्धा-इपाद,

ह्रीं श्रीं ह्री श्री वछा-इपाद ।

ह्रीं श्री ह्रीं श्री शिवा-इपाद ।

ह्री श्री ह्री श्री श्री-इच्छा-इपाद ।

ह्रीं श्री ह्री श्रीं आ-ईपाद ।

ह्रीं श्री ह्रीं श्री वीरा-इपाद ।

ह्रीं श्री ह्रीं श्री त्रिभुवनापाद ।

ह्रीं श्री ह्रीं श्री वराहरूपा-इपाद ।

ह्रीं श्री ह्रीं श्री कृतयुगा चैव ।

तथा त्रेताद्वापरकलिमेव च ।

चतुर्युगेषु देवेशि क्षेत्रजा सिद्धिपूजिता ॥ ८/१८ ॥

ह्री श्रीं पादान्तु आदौ तु तथा नाममुदीरयेत्।

क्षेत्रजा कथिता देवि पीठजा(ः) कथयामि ते ॥ ८/१९ ॥

प्रथमं पीठमुत्पन्नं कामाख्यानाम सुव्रते।

उपपीठस्थिता सप्त देवीनां सिद्ध-आलयम् ॥ ८/२० ॥

पुनः पीठं द्वितीयन्तु संज्ञा पूर्णगिरि प्रिये।

ओडियान महापीठमुपपीठसमन्वितम् ॥ ८/२१ ॥

अर्बुदमर्द्धं पीठन्तु उपपीठसमन्वित(म्)।

पीठोपपीठसन्दोहं क्षेत्रोपक्षेत्रमेव च।

पीठाद्यादेवतानां च शृणु पूजाविधिं प्रिये ॥ ८/२२ ॥

ह्रीं श्रीं ह्रीं श्रीं महालक्ष्मा-इ पाद।

ह्रीं श्रीं ह्रीं श्रीं कुसुमानङ्गा-इ पाद।

ह्रीं श्रीं ह्रीं श्रीं शुक्ला-इ - पाद।

ह्रीं श्रीं ह्रीं श्रीं प्रलम्बा-इ-पाद।

ह्रीं श्रीं ह्रीं श्रीं पुलिन्दा-इ-पाद।

ह्रीं श्रीं ह्रीं श्रीं शवरा-इ-पाद।

ह्रीं श्रीं ह्रीं श्रीं कृष्णा-इ-पाद।

ह्रीं श्रीं ह्रीं श्रीं लच्छा-इ-पाद।

ह्रीं श्रीं ह्रीं श्रीं नन्दा-इ-पाद्।

ह्रीं श्रीं ह्रीं श्रीं भद्रा-इ-पाद्।

ह्रीं श्रीं ह्रीं श्रीं कलम्बा-इ-पाद्।

ह्रीं श्रीं ह्रीं श्रीं चम्पा-इ-पाद्।

ह्रीं श्रीं ह्रीं श्रीं धवला-इ-पाद्।

ह्रीं श्रीं ह्रीं श्रीं हिडिम्बा-इ-पाद्।

ह्रीं श्रीं ह्रीं श्रीं महामाया-इ-पाद्।

पीठोपपीठसन्दोहे ये जाता वरयोगिनी।
एतैस्तु पूजिता भद्रे सर्वे सिध्यन्ति मातराः॥ ८/२३॥
योगाभ्यासेन ये सिद्धा मन्त्राणामाराधनेन तु।
योगेन योगजा माता मन्त्रेण मन्त्रजा प्रिये॥ ८/२४॥
सहजा मातरा देव्या रूरूयुद्धैर्महाबलाः।
भक्षितं तु चरुं दिव्यं सप्तजन्मान्तिकं पशुम्॥ ८/२५॥
तेषां गर्भे प्रसूतानां निर्यासप्राशितेन च।
गर्भे जातेन देवेशि गर्भं जानन्ति आत्मनः॥ ८/२६॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही वज्रहस्ता च तथा योगेश्वरीति च॥ ८/२७॥
अघोरेशी च विख्याता मातर्या व्यापकाः स्मृता (ः)।
तथान्या द्वारपालिन्या तैस्तु संव्यापितञ्जगत्॥ ८/२८॥

पञ्चजातक्रमे चान्या नगरे ग्रामेषु सर्वशः।
सर्वास्तां पूजयेन्नित्यं गुरुसिद्धसमन्विताम्॥ ८/२९॥
ग्रहा नागाश्च देवाश्च योगिन्यः सिद्धमेव च।
पूजितां पूजयन्त्येते निर्देहं त्यपमानिताः (?)।
कुलाष्टकं प्रवक्ष्यामि अष्टाष्टकविधि प्रिये॥ ८/३०॥

ह्रीं आ ह्रीं ह्रीं इं ह्रीं ह्रीं ऊं ह्रीं ह्रीं ॠ ह्रीं ह्रीं ऌ ह्रीं ह्रीं ऐं ह्रीं
ह्रीं ॐ ह्रीं ह्रीं ह्रीं अः ह्रीं प्रथमन्तु इमं देवि शृणु विद्यायमष्टकम्।

ह्रीं क्षः ह्रीं लः ह्रीं हः ह्रीं सः
ह्रीं षः ह्रीं शः ह्रीं व ह्रीं र

विद्यापदाष्टकाख्यातम्। ह्रीं क्लृ ह्रीं एतत् कौलिकं भैरवि।

अष्टधा तु लिखेद्विद्या प्रथमाष्टकभेदितम्।
यथा एतत् तथा सर्वे ज्ञातव्या योगिनीक्रमम्॥ ८/३१॥
अष्टाष्टकं विधानेन चतुःषष्टि यथाक्रमम्।
योगिनीमेलकं चक्रं अणिमादिगुणाष्टकम्॥ ८/३२॥
भवत्येव न सन्देहो ध्यानपूजारतस्य च।
द्वितीयन्तु महाचक्रं सर्वाकृष्टिप्रवर्तकम्॥ ८/३३॥

पशुग्रहणमावेशं पूजाध्यानरतस्य च।

तृतीयन्तु महाचक्रं परकायप्रवेशनम्॥ ८/३४ ॥

अतीतानागतञ्चैव अभ्यासाद्भवते प्रिये।

लभत्येव न सन्देहो विविधं यत् समीहितम्॥ ८/३५ ॥

चतुर्थं शान्तिकचक्रं मुक्तिमुक्तिप्रदं शुभम्।

पूजयित्वा इमं चक्रं यावद् ध्यानं प्रयुञ्जति ॥ ८/३६ ॥

क्षणेन भवते स्तोभो मुद्राबन्धत्यनेकधा।

भाषास्तु विविधाकारा अश्रुतानि श्रुतानि च ॥ ८/३७ ॥

उच्चरेदङ्गमयं शास्त्रं मन्त्रजालानि श्रूयते।

स्वयमेवात्मनात्मने श्रूयते चात्मनात्मनि ॥ ८/३८ ॥

षण्मासाद् भवते सिद्धिमनिशी(?) योगिनीप्रिये।

बलीपलितनिर्मुक्तः कामदेवो द्वितीयकः॥ ८/३९ ॥

पञ्चमन्तु महाचक्रं ध्यानपूजाक्रमेण तु।

वाय्वादेर्नाशयेद्वाचा मूकवत् तिष्ठते तु सः॥ ८/४० ॥

षष्ठं चैव महाचक्रं धर्मार्थकाममोक्षदम्।

सप्तमञ्चक्रं देवेशि सैन्यस्तम्भकरं परम्॥ ८/४१ ॥

स्तोभावेशादिकं चक्रं संसारबन्धमोचकम्।

दूराच्च दर्शनं तस्मिन् पूजाध्यानरतस्य तु॥ ८/४२ ॥

अष्टमं चक्रमुद्दिष्टं इच्छासिद्धिप्रवर्तकम्।

मारणोच्चाटनं भद्रे स्तम्भमोहादिकं प्रिये॥ ८/४३ ॥

वदनोतिष्ठमहाचक्रं कुलभक्त्यामधिष्ठितम् ।
अष्टाष्टकविधानन्तु ज्ञात्वा सिध्यति नान्यथा ॥ ८/४४ ॥
तत्तेषां गूढसद्भावं चतुःषष्टियोगिनीक्रमम् ।
निःसन्दिग्धं मया प्रोक्तं हि भक्तियुक्त्यावधारम् ॥ ८/४५ ॥

इति ज्ञाननिर्णितियोगिनीकौलम्महच्छ्रीमच्छघ्नपादावतारिते
चन्द्रद्वीपविनिर्गते अष्टमः पटलः ॥ ८/८ ॥

नवमः पटलः

भैरव उवाच

गुरुपङ्क्तिं प्रवक्ष्यामि सिद्धपङ्क्तिं सुलोचने ।
योगिनीपङ्क्तिविन्यासं कथयामि तव प्रिये ॥ ९/१ ॥
सर्वसिद्धियोगिनीनां खेचरीं सर्वमातरीम् ।
सर्वभूचरीसर्वगोचरयोगिनीनां सर्वक्षेत्रकम् ॥ ९/२ ॥
सर्वमन्त्रजाः सर्वयोगजाः सर्वपीठजाः ।
सर्वसहजाः सर्वकुलजा सर्वद्वारपालिकाः ॥ ९/३ ॥
सर्वगर्भजाः कृते च द्वापरे त्रेते कलियुगे महातपे ।
चतुर्युगविभागेन योगिनीसिद्धिपूजिताः ॥

गुह्यानां परमं गुह्यन्तव भक्त्या प्रकाशितम्॥ ९४॥

देव्युवाच

सुदग्धमग्निना देहम् अद्य निर्वापितं परम्।
तव प्रसादात् कौलेश ज्ञातोऽहम् ज्ञाननिर्णयम्।
साम्प्रतं श्रोतुमिच्छामि गुरुभ्यः सिद्धपूजनम्॥ ९५॥

भैरव उवाच

गुरुसिद्धिविधे देवि शृणु त्वं कुलभाविनि।

श्रीविश्वपादान्। (श्री) विचित्रपादान्। श्रीश्वेतपादान्।
श्रीभट्टपादान्। श्रीमछेन्द्रपादान्। श्रीबृहीषपादान्।
श्रीविंध्यपादान्। श्रीशबरपादान्। श्रीमहेन्द्रपादान्। श्रीचन्द्रपादान्।
श्रीहिंडिनिपादान्। श्रीसमुद्रपादान्। श्रीलवणपादान्। श्रीदुम्बरपादान्।
श्रीदेणेपादान्। श्रीधीवरपादान्। श्रीसिंहलपादान्।
(श्री) ओगिनीपादान् गुरु परमगुरु परमेष्ठ्य पूज्य महापूज्य लाकिनी
डाकिनी शाकिनी काकिनी याकिनी -

ह्रींकारमादितः कृत्वा श्रीकारं चैतदनन्तरम्।

अक्षरद्वयविन्यासमन्यन्तेषु प्रदापयेत्॥ ९६ ॥

एतत् सिद्धाश्च योगिन्या अस्मिन् सिद्धाः कुलागमे।

अनेन सदृशं ज्ञानं न भूयो न भविष्यति॥ ९७ ॥

कलियुगे महाघोरे रौरवेऽत्यन्तभीषणे।

सञ्जाताः षोडश सिद्धा अस्मिन् कौले सुलोचने।

कृते च द्वापरे त्रेते सिद्धाये वीरवन्दिताः।

तेषां नामविधिं वक्ष्ये शृणु त्वं वरलोचने॥ ९८ ॥

मृष्णिपादाः। अवतारपादाः। सूर्यपादाः। द्युतिपादाः।

ओमपादाः। व्याघ्रपादाः। हरिणिपादाः। पञ्चशिखिपादाः।

कोमलपादाः। लम्बोदरपादाः।

एते पूर्वमहासिद्धाः कुलकौलावतारकाः।

चतुर्युगेति देवेश स्वतन्त्र - कुलचोदका (:)॥ ९९ ॥

अस्य ज्ञानप्रभावेण बहवः सिध्यन्ति मानवाः।

दशकोटिप्रमाणन्तु इ(द)म् कौलं परोद्भवम्॥ ९१० ॥

सारात्सारतरं भद्रे महाकौलस्य शोभने।

इच्छाख्या योगिनी सिद्धैर्मायान्तं पर-इच्छया॥ ९११ ॥

खेचरीणां पुनः पश्चादिच्छया प्रकटीकृतम्।

मातराणां पुनर्देवि खेचरैः कथितं प्रिये ॥ ९/१२ ॥
मातराणि गमिष्यन्ति भूचरीणां कुलेश्वरि ।
भूचरीणां सुभक्षाणां भूचरी कथितं प्रिये ॥ ९/१३ ॥
योगिनीनां कुले जातौ लभते कौलिकी स्फूटम् ।
चतुरशीति सहस्रेषु योनियन्त्रेषु पीडिताः ॥ ९/१४ ॥
पुण्यात्मानं कुलाश्चर्यं पश्चाज् ज्ञानमिमां लभेत् ।
भुक्तिमुक्तिमहासिद्धिः योगिनीनां प्रियो भवेत् ॥ ९/१५ ॥

इति ज्ञाननिर्णितियोगिणीमहाकौलम्महच्छ्रीमच्छन्नपादावतारिते
चन्द्रद्वीपविनिर्गते नवमः पटलः ॥ ९/९ ॥

दशमः पटलः

देव्युवाच

अद्य मे सफलं नाथ मम पिण्डं सुरेश्वर ।
वह्निनावेष्टितात्मानमेकपादेन संस्थितम् ॥ १०/१ ॥
तत्तपः सफलं मेऽद्य त्वया तुष्टेन भैरव ।
ज्ञानस्य निर्णयन्देव अद्य मे प्रकटीकृतम् ॥ १०/२ ॥
पुनः पृच्छामि कौलेश यथातथ्यं वद प्रभो ।

अष्टाष्टकविभागन्तु परिज्ञातुमनन्तथा ॥ १०/३ ॥
अद्यापि संशयो नाथ तेषां चक्रं पृथक् पृथक् ।
गुह्यस्थानं यथाचक्रं क्षिप्रं सिध्यति भैरव ॥ १०/४ ॥
स्थानध्यानफलन्तेषां संक्षेपं कथ्यते प्रभो ।

भैरव उवाच

साधु साधु महादेवि पृष्टोऽहं सुरदुर्लभम् ॥ १०/५ ॥
कथयामि न सन्देहो भक्तियुक्ता वरानने ।

लां लीं लूं लृं लुं लैं लौं लः । हां हीं हूं हृं हृ हैं
हौं (हः) । सां सीं सूं सृं स्लं (सैं) सौं सः । षां षीं षूं
षृं ष्लं षैं षौं षः । शां शीं शूं शृं श्लं शैं शौं शः ।
वां वीं वूं वृं व्लं वैं वौं वः । ह्लां ह्लीं ह्लुं ह्लृं ह्लैं
ह्लौं ह्लः ॥ १०/

क्षकारं ब्रह्मरन्ध्रत्वं लंकारन्तु ललाटयोः ॥ १०/६ ॥
हकारन्तु भ्रुवोर्मध्ये सकारं वक्रमण्डले ।
षकारं कण्ठदेशे तु शकारं हृदये तदा ॥ १०/७ ॥
वकारं नाभिमध्ये तु ह्लकारं विसकन्दयो (:) ।
स्थानचक्रास्तु संप्रोक्तास्तेषां ध्यानं शृणु प्रिये ॥ १०/८ ॥

शुद्धस्फटिकसङ्काशं ऊद्ध्र्वतेजसुनिर्मलम् ।

अष्टारं पङ्कजं दिव्यं प्रथमाष्टकभूषितम् ॥ १०/९ ॥

सर्वद्वन्द्वविनिर्मुक्तं क्रोधाद्यैः शून्यवर्जितम् ।

अभ्यासात् समचित्तस्तु ग्रामधर्मञ्च वर्जयेत् ॥ १०/१० ॥

अतीतानागतञ्चैव वर्तमानन्तथैव च ।

दूराश्रवणविज्ञानं पाशस्तोभन्तथा प्रिये ॥ १०/११ ॥

पशुग्रहणमावेशं मृत्युनाशन्तथैव च ।

अमरत्वन्तथा देवि समासात् परिवर्तनम् ॥ १०/१२ ॥

वाचा सिद्धिर्भवत्येवं किं कुर्वाणं जगत्प्रिये ।

द्वितीयमष्टपत्रन्तु तेजध्यानसुदीपितम् ॥ १०/१३ ॥

आगमान्नाशयेन्मृत्युं पुरक्षोभादिकारकः ।

कुरुते बहुधा रूपं ध्यानैकगतचेतसः ॥ १०/१४ ॥

मण्डलीकनरेन्द्राणां किं कुर्वाणो विधीयते ।

क्रुद्धस्तु संहरेत् सर्वं त्रैलोक्यं सचराचरम् ॥ १०/१५ ॥

सृष्टिसंहारकर्तारं नित्याभ्यासरतः सदा ।

तृतीयन्तु महाचक्रं नवतत्त्वप्रमोचकः ॥ १०/१६ ॥

षण्मासादीप्सितं कामं ध्यात्वाधारन्तु तद्गुरुः ।

बलीपलितनाशन्तु सुदूराद्दर्शनन्तथा ॥ १०/१७ ॥

बेधन्तु कुरुते देवि योजनानां शतैरपि ।

एकान्ते बहुधा रूपं कुरु ध्यानञ्च तत्परः ॥ १०/१८ ॥

चतुर्थशान्तिकं चक्रं सुखप्रीतिविवर्द्धनम्।

कुरुते अमरत्वं हि सतताभ्यासतत्परः॥ १०/१९॥

वाचयो कुरुते मृत्युं रोगाणान्तु जयं प्रिये।

दिवसान्नाशनेनैव वयो मृत्युं गमिष्यते॥ १०/२०॥

नाशयेदहो(रा)त्रेण एतच्चक्रमनुत्तमम्।

सतताभ्यासयोगेन द्विरष्टवर्षाकृतिर्भवेत्॥ १०/२१॥

अष्टपत्रं महापद्मं पञ्चमं सुरसुन्दरि।

धूम्रवर्णं सदा चिन्त्य त्रैलोक्यं चालयेत् प्रिये॥ १०/२२॥

वाचापहारं कुरुते सैन्यस्तम्भकरं परम्।

षष्ठं तु चक्रं राजानमष्टपत्रसकर्णिकम्॥ १०/२३॥

तप्तचामीकरप्रभमिच्छासिद्धिप्रवर्तकम्।

अतीतानागतञ्चैव अणिमादिगुणाष्टकम्॥ १०/२४॥

ददते नात्र सन्देहो भक्तिध्यानप्रदीपितः।

सप्तमन्तु महादेवि पूर्णचन्द्रप्रभं प्रिये॥ १०/२५॥

तद्गतन्तन्मनं भद्रे भुक्तिमुक्तिप्रदं शुभम्।

जरामृत्युविनाशञ्च परदेहे प्रवेशनम्॥ १०/२६॥

किं कुर्वाणविधेयस्तु मण्डलीकनरोत्तम (:)।

अष्टमन्तु महाचक्रं पत्राष्टकविभूषितम्॥ १०/२७॥

धर्मकामार्थमोक्षञ्च ददत्येव सुलोचने।

रक्तध्याने सदावश्यं पीतस्तम्भकरं परम्॥ १०/२८॥

शुक्लमाध्यायन देवि स्फटिके मोक्षदायिकम्।
कृष्णेन मारणं प्रोक्तं धूम्रमुच्चाटने सदा ॥ १०/२९ ॥
गोक्षीरधारधवलं एतन्मृत्युञ्जयो हितम्।
पुरःक्षोभन्ततस्तोभं कम्पपातादिकं चरेत्॥ १०/३० ॥
अग्निज्वाला सुदीप्ताभं ध्यानं चैवाष्टमं सदा।
एकैकस्य स्थितन्देवि एतद्ध्यानन्तु अष्टधा ॥ १०/३१ ॥
चापञ्च कञ्चुकी देवि प्रणिपत्य मुहुर्मुहुः।
अद्य मे सफलं जातम्महाकौलेषु भैरव ॥ १०/३२ ॥

इति ज्ञाननिर्णितियोगिनीकौलम्महच्छ्रीमच्छन्नपादावतारिते
चन्द्रद्वीपविनिर्गते दशमः पटलः ॥ १०/१० ॥

एकादशः पटलः

देव्युवाच

कथयस्व महादेव चरुकाद्वैतलक्षणम्।
सर्वशङ्काविनिर्मुक्तं निःशङ्कं सिध्यते ध्रुवम्॥ ११/१ ॥

भैरव उवाच

यत्त्वया पृच्छितं देवि लोकेऽस्मिन् क्रूरभीषणे।

कथयामि निःसन्देहं सर्वशङ्काविमर्दकः॥ ११/२॥

अद्वैते नित्ययुक्तस्य तस्य सिद्धिः प्रजायते।

द्वैतन्तु कारयेद्यस्तु आकृष्टो योगिभिस्तु सः॥ ११/३॥

समयाद् भ्रष्टन्तु यो देवि स पशुर्नात्र संशयः।

द्वैतभावं परित्यज्य अद्वैताचारभावितः॥ ११/४॥

पञ्चामृतं प्रवक्ष्यामि गुह्यानां गुह्यमुत्तमम्।

ज्ञातव्यं कुलसमयं कुलपुत्रैर्विशेषतः॥ ११/५॥

साधकैः सिद्धिकामैस्तु तथान्यं कुलदेशिकैः।

अनुष्ठितमिदं पूर्वं कुलसिद्धैः सुलोचने॥ ११/६॥

एतज्ज्ञात्वा भवेत् सिद्धिर्मानसी योगिनीप्रिये।

यदिच्छेत् कौलवी सिद्धिः प्राप्य पञ्चामृतं परम्॥ ११/७॥

तदा सिध्यति योगिन्यां सिद्धिमेलापकं भवेत्।

ददन्ते च तदा देवि चरुकं पञ्चभिर्युतम्॥ ११/८॥

योगिनीभिः सकृद्दत्तं तत्क्षणात् तत्समो भवेत्।

अथ वा प्राशयेज्ज्ञात्वा योगयुक्तस्तु कौलवित्॥ ११/९॥

सिध्यते नात्र सन्देहो विघ्नजालविवर्जितम्।

योगिनीगणसामान्यामनः सुचिन्तितं भवेत्॥ ११/१०॥

विष्ठं धारामृतं शुक्रं रक्तमज्जाविमिश्रितम्।

एतत् पञ्च पवित्राणि नित्यमेव कुलागमे ॥ ११/११ ॥

नित्यनैमित्तिकं देवि कर्तव्यं च प्रयत्नतः ।

गोमांसं गोघृतं रक्तं गोक्षीरञ्च दधिन्तथा ॥ ११/१२ ॥

नैमित्तिके इमं कुर्यात् सिद्धिकामे महोत्सुकः ।

निःशङ्को निर्विकल्पस्तु एतत् कुर्यात् कुलागमे ॥ ११/१३ ॥

अन्यथा नैव सिध्यन्ति निर्मुक्तिस्तु मम प्रिये ।

पुनरन्यविशेषणं शृणुष्वैकाग्रमानसः ॥ ११/१४ ॥

श्वानमार्जार - उष्ट्रञ्च शृगालञ्च हयन्तथा (?) ।

कूर्मकच्छवराहञ्च मार्जारवककर्कटम् ॥ ११/१५ ॥

शलाकी कुकुटश्चापि बहु(?)नानाकुलन्तथा ।

शेरकञ्च मृगं वापि महिषं गण्डकं तथा ॥ ११/१६ ॥

अन्यानि यानि मच्छानि यथालाभं समाहरेत् ।

विज्ञानम्बलसामर्थ्यं सप्तजन्मान्तिकं पशु ॥ ११/१७ ॥

येन तेन प्रकारेण आकृष्टिं भक्षयेत् सदा ।

पूजयेद् योगिनीवृन्दं भक्ष्यभोज्यादिभिः प्रिये ॥ ११/१८ ॥

धारापानन्ततः कुर्याद् यदीच्छेच्चिरजीवितुम् ।

पिशितं त्रिविधं कुर्यात् पक्षाम्लमधुरन्तथा ॥ ११/१९ ॥

देवतातर्पणार्थाय सुरा देया यथोचिता ।

वृक्षजा मूलजा चैव पुष्पजा फलजापि वा ॥ ११/२० ॥

पेष्टी माध्वी तथा गौण्डी दद्यान्नैमित्तिके प्रिये ।

अद्वैतन्तु यथाख्यातं कर्तव्यं नान्यथा न हि ॥ ११/२१ ॥

अद्वैताचारमासृत्य यदान्यश्चरति पापकृत्।

पतन्ति नरके घोरे अवीचिरौरवे तथा ॥ ११/२२ ॥

अद्वैतं येन सन्त्यक्तं ममाभाष्यन्तु(?) तं पशुम्।

योगिनीगणमध्यस्थं स पशुः कीर्तितं कुले ॥ ११/२३ ॥

गुप्तं गुप्ततरं कुर्याद् गोपनीयं प्रयत्नतः।

जननीजारगर्भन्तु स्वपुत्रं गोपयेद्यथा ॥ ११/२४ ॥

अद्वैतं गोपयेन्नित्यं सुगोप्यमभ्यसेत् क्रमात्।

अणिमादिगुणैश्वर्यसिद्धिश्च मानसी भवेत् ॥ ११/२५ ॥

स्वयं गुरुः स्वयं सिद्धः स्वयं शिष्यः स्वयं शिवः।

अज्ञानबन्धनाज्ञेयं ज्ञानं ज्ञेयं विमोचनम् ॥ ११/२६ ॥

सुगन्धं पूतिगन्धञ्च नित्यं गृह्णाति निष्कलः।

पद्मपत्रे यथा तोये तथा चैवं न लिप्यते ॥ ११/२७ ॥

तद्वन्न लिप्यते योगी पुण्यपापैः सुरेश्वरि।

ब्रह्महत्यादिकं पापम् अश्वमेधादिकं फलम् ॥ ११/२८ ॥

सर्वतीर्थाभिषेकञ्च म्लेच्छादिस्पर्शनेन तु।

एतैर्न गृह्यते योगी क्रियमाणैरपि स्फुटम् ॥ ११/२९ ॥

समत्वं वीतरागत्वमुदासीनां ख-वृत्तिनाम्।

निष्परिग्रहसन्तोषं द्वन्द्वयोगं न कारयेत् ॥ ११/३० ॥

कामक्रोधञ्च दम्भञ्च त्यजेल्लोभं शनैः शनैः।

न चरुन्निन्दयेद्भद्रे समयाद्वैतमेव च ॥ ११/३१ ॥

यस्मिन्निष्पद्यते पिण्डं रक्तशुक्रं पिबेत् सदा ।

सिद्धानां योगिनीनाञ्च इमञ्चरुम्प्रियं सदा ॥ ११/३२ ॥

शाकिनीनां प्रियं मांसं देवीनाञ्च प्रियं शृणु ।

वुकपुष्पं शिवाम्बुञ्च रक्तशुक्रं सुरान्तथा ॥ ११/३३ ॥

ब्रह्मनिष्ठीवनाद्यञ्च सौरभ्यं पुष्पकादिकम् ।

गन्धं धूपञ्च गेयञ्च ताम्बूलं रक्तवाससम् ॥ ११/३४ ॥

रक्षाद्यं रक्तवर्णञ्च सिद्धानां देवता प्रिये ।

विज्ञानोन्मीलनम्भद्रे भवत्येवं नान्यसेवनात् ॥ ११/३५ ॥

शाकरं यन्न कुर्वीत जन्महीनवरस्त्रियै ।

लौल्यार्थी चपला नित्यं कुलशास्त्रविडम्बकम् ॥ ११/३६ ॥

स्वशक्तिदर्शनाद्रक्तं स्पर्शनाल्लक्षणेन तु ।

कुलविज्ञानसंभोगात् षण्मासात् सिद्धिभाजनः ॥ ११/३७ ॥

आदिमन्त्रविनिर्मुक्तं शिवाम्बु ब्रह्ममेव च ।

प्राशयेत् तत् सदा कालं योगिनीमेलको भवेत् ॥ ११/३८ ॥

पादप्रक्षालनन्तेन नित्यं तत् तथैव च ।

मुखप्रक्षालनं नित्यं ब्रह्मणोर्द्धगतम्प्रिये ॥ ११/३९ ॥

कुण्डगोलोद्भवन्नैव तिलकं कारयेत् सदा ।

अशीतिं नाशयेद्वातान् कुष्ठव्याधिन्तु नाशयेत् ॥ ११/४० ॥

मुच्यते सर्वरोगैश्च यथा सर्पस्य कञ्चुकम् ।

उदयार्कसमस्तेजन्नित्यं वै योगिनीप्रियम् ॥ ११/४१ ॥

त्रैलोक्यं वश्यतां याति ब्रह्मादयो दिवौकसः ।

चरुकाद्वैतमाचारं मन्त्रजैः (?) सह भोजनम् ॥ ११/४२ ॥

सर्वं समाचरेद् देवि इच्छाशक्रेरधिष्ठितम् ।

इच्छां विना न कुर्यात्तु बलात्कारेण तच्चरुम् ।

चरुकाद्वैतमाचारं कथितं ज्ञाननिर्णयम् ॥ ११/४३ ॥

इति ज्ञाननिर्णितियोगिणीमहाकौलम्महच्छ्रीमच्छम्नपादावतारिते

चन्द्रद्वीपविनिर्गते एकादशः पटलः ॥ ११/११ ॥

द्वादशः पटलः

देव्युवाच

रोमाञ्चकञ्चुका देवि हृष्टसन्तुष्टचेतसः ।

भक्ष्याणान्तु समुत्पन्नं पुनः पृच्छामि भैरव ॥ १२/१ ॥

अद्याहं कुलसमयमद्याहं लक्षणान्वितम् ।

साम्प्रतं श्रोतुमिच्छामि पात्राणां चर्यलक्षणम् ॥ १२/२ ॥

भैरव उवाच

शृणु त्वं वीरचामुण्डे पात्राणां चर्यलक्षणम्।

प्रथमं बालरूपेण द्वितीयम् उन्मत्तकाकृतिम्॥ १२/३॥

तृतीयं राजरूपेण चतुर्थं कश्मलं प्रिये।

स्वातन्त्रं पञ्चमं देवि षष्ठञ्च वीरनायकम्॥ १२/४॥

गन्धर्वसप्तमन्नाम नग्नं चैवाष्टकं प्रिये।

त्रिदण्डञ्चैव देवेशस्तथान्यं वेदविक्रयम्॥ १२/५॥

यां यान्तु कुरुते इच्छां तां ताञ्चैव व्रतं प्रिये।

अकुलञ्च कुलं ज्ञात्वा कुलं देव्या सुभामिनि॥ १२/६॥

भैरवं पूजितव्यञ्च कुलैः सिद्धिसमन्वितम्।

स्वगुरुं पुजयेन्नित्यं त्रिष्कालं भावितात्मनः॥ १२/७॥

मनसा कर्मणा वाचा गुरुञ्चैव स्वकं न तु।

निवेदयेत् प्रयत्नेन भुक्तिमुक्तिजिगीषया॥ १२/८॥

गुरुकौलागमे भक्ति अद्वैताचारभावितः।

ईप्सितं तु व्रतं कुर्यादद्वैतेन समन्वितम्॥ १२/९॥

देव्युवाच

चर्याया लक्षणं देव प्रसादादवधारितम्।

पुनः पृच्छामि देवेश पात्राणां लक्षणं शुभम्॥ १२/१०॥

भैरव उवाच

पात्राणां निर्णयं देवि शृणुष्वेकाग्रमानसः।

मृन्मयं कूर्मजं देवि कांसजं ताम्रलोहजम्॥ १२/११॥

हेमजं रौप्यजं वापि शुक्तिजं शङ्खजं प्रिये।

कौलिकं तु वरारोहे तथान्यं काचसम्भवम्॥ १२/१२॥

शृङ्गोद्भवं सकाष्ठाद्यापाषाणसम्भवं प्रिये।

विश्वामित्रकपालञ्च सर्वपात्रोत्तमं प्रिये॥ १२/१३॥

तस्मिन् कृत्वा पिबेत् किञ्चिद्भक्ष्यञ्च भक्षयेद् यदि।

पतिञ्च पतितञ्च तद्भवेच्चकोत्तमः (?)॥ १२/१४॥

ज्ञातव्यं पात्रमेतद्विशालं नारिकेलकम्।

एतत् पात्रमलाभेन अन्यपात्रे पिबेत् सुराम्॥ १२/१५॥

पात्राणां लक्षणं देवि चर्यायाश्चैव लक्षणम्।

कथितं देवि सद्भावं किमन्यं पृच्छसेऽधुना॥ १२/१६॥

देव्युवाच

अद्य मे सफलं जाता देवत्वं स्वरनायिक।

तत्प्रसादेन देवेश ज्ञातव्यं ज्ञाननिर्णयम्॥ १२/१७॥

इति ज्ञाननिर्णये श्रीयोगिनीकौलम्महच्छ्रीमछघ्नपादावतारिते
चर्यापात्रलक्षणो द्वादशः पटलः ॥ १२/१२ ॥

त्रयोदशः पटलः

भैरव उवाच

मोक्षप्रत्ययसंवित्ति शृणु त्वं वीरनायिके ।
अधोर्द्ध्वञ्च लभेज्जीवो ज्ञात्वा तं मुक्तिभोजनम् ॥ १३/१ ॥
हंस हंस वदेन्नित्यं देहस्थावरजङ्गमे ।
श्रुत्वा तस्य पतिर्दिव्यं याति मोक्षवरं शुभम् ॥ १३/२ ॥
येन व्याप्तं च त्रैलोक्यं जगद् यस्मिन् व्यवस्थितम् ।
तं ज्ञात्वा गूढसद्भावं सर्वज्ञत्वम्प्रजायते ॥ १३/३ ॥
न तेन विना मुच्यन्ते व्यवहारान्न हि तद्विना ।
शुभाशुभं च संभोक्तं न तेन रहितं क्वचित् ॥ १३/४ ॥
न मनश्चित्तमालब्धं न पेयं धारणं प्रिये ।
उन्मनन्तु मनो यस्य तस्य मोक्षो भवन्तीह ॥ १३/५ ॥
द्वादशान्ते यदा पश्येत् स्फूरन्तं मणिमालिका ।
तस्य मोक्षो भवेद्यस्तु पापपुण्यैर्न लिप्यते ॥ १३/६ ॥

देवयाने महायाने यस्य चित्तं सदा प्रिये।

तस्य मोक्षो न सन्देहः पद्मपत्राम्बुबिन्दुवत्॥ १३/७॥

इ गुदे इक्षु मेढ्रे इयौ नाभौ॥ इमौ वक्रे॥

इवौ दक्षिणनासा(यां)॥ इलौ वामपुटे॥ इरौ दक्षिणतः॥

इडो दक्षिणकर्णः॥ इशौ वाम कर्णः॥

इह्रौ भ्रूमध्ये॥ सं तं ललाटे॥ सं अं वामकर्णे॥

सः यं दक्षिणकर्णः॥ सः पं वामचक्षुः॥

सः ऋ दक्षिणचक्षुः॥

वः तं वामनासिका॥ सः पुं दक्षिणनासिका॥

सः रूं वक्रम्॥ सः यं नाभि॥ सः षुँ मेढ्रः॥

सः लं गुदे॥

इदं न्यासक्रमन्देवि यस्य देहे प्रवर्तते।

तस्य मोक्षो न सन्देहः परं संवित्तिपूर्वकम्॥

पिण्डपाते यदा देवि कपालम्भिद्यते तदा॥ १३/८॥

इति ज्ञाननिर्णये योगिनीकौलमहच्छ्रीमच्छेन्द्रपादावतारिते

चन्द्रद्वीपविनिर्गते न्यासः त्रयोदशः पटलः॥ १३/१३॥

चतुर्दशः पटलः

देव्युवाच

मन्त्रजालविनिर्मुक्तम्प्राणायामविवर्जितम्।

चक्रध्यानविनिर्मुक्तं सद्यः सिद्धिकरं परम्॥ १४/१॥

निर्गमं देहमध्ये तु संशयच्छित्तिकारकम्।

शृणु त्वमद्भुतं देवि महदाश्चर्यकारकम्॥ १४/२॥

ब्रह्मा विष्णुः सुराः सर्वे क्लिश्यन्ते मन्दबुद्धयः।

गन्र्धवाः किन्नरा यक्षा असुराश्च तपोधनाः॥ १४/३॥

न तेषां कथितं देवि इमं कौलं परं प्रिये।

कुलभक्तिविहीने तु गुरुभक्तिविवर्जिते॥ १४/४॥

न देयं कौलिकं सारं शिष्यैर्मन्दपरीक्षिते।

वञ्चका कृपणा मूढा हीनानि सत्यनिन्दिते॥ १४/५॥

न दद्यादनुग्रहा यस्या देवाग्नियतिद्वेषकाः।

ये दद्यास्तु इमे शिष्या देशिको सिद्धिर्हीयते॥ १४/६॥

गुर्वाज्ञाकारिणो नित्यं युक्तायुक्तपरीक्षकः।

धर्मे च रतये नित्यं क्रोधये शून्यवर्जितः॥ १४/७॥

निश्चितनिस्पृहे गुप्ते निस्संशैकान्तवासिने।

देवाग्नियतियोगिन्या भक्त्या नित्यं प्रसन्नधीः॥ १४/८॥

वरयेच्छिष्य कुर्वीत दृढभक्तिपरायणः।

सुपरीक्ष्य सदा तस्य यो दद्याच्चिरजीवितम्॥ १४/९॥

द्वौभावसुप्रपञ्चात्मा कपटव्रतधारिणः।

योगिनीनां च विद्विष्टे गुर्वाज्ञालोपकारकः॥ १४/१० ॥

न देयं कौलिकं ज्ञानं कामिने क्रोधिने तथा।

न शिवदूषके देवि निन्दके कुलभैरवे॥ १४/११ ॥

सागररत्नसंघाते अमूल्यं भुवि विक्रयः।

सागरं रत्नसंपूर्णमक्रेतुं यस्य संचयः॥ १४/१२ ॥

न(द)द्यान्निन्दको देवि सप्ताहनि परेण हि।

इमं कौलं महादेवि सर्वकालस्य निर्णयम्॥ १४/१३ ॥

यस्य कौलागमे स्पर्द्धा ना ज्ञातुमीदृशं प्रिये।

सम्यग् ज्ञानवरं देवि सप्ता ॥ँनदापयेत्॥ १४/१४ ॥

यत् क्रमं पृछितं देवि तत् क्रमं शृणु भाविनि।

प्रथमं मूलचक्रन्तु यदान्यभ्यसते प्रिये॥ १४/१५ ॥

तदा तु प्रत्ययं देवि महदाश्चर्यकारकः।

प्रथमं कम्पमायाति धूननन्तु द्वितीयकम्॥ १४/१६ ॥

हस्तपादशिरःकम्पभाषाणि विविधानि च।

मन्त्रमुद्रगणं सर्वं दुर्दुरप्लुत एव सः॥ १४/१७ ॥

भूमित्यागकवित्वञ्च अतीतानागतं तथा।

कालस्य वञ्चनं देवि रूपस्य परिवर्तनम्॥ १४/१८ ॥

बलीपलितनाशञ्च खेचरत्वं हि सुन्दरि।

अष्टौ च सिद्धिसंप्राप्तिर्मूलकौलं वरानने॥ १४/१९ ॥

शृणु त्वमद्भुतं देवि आधारस्यैव निर्णयम्।

देव्याश्चक्रोर्द्ध्वं देवेशि आधारश्चतुरङ्गुलम्॥ १४/२०॥

तस्मिंश्चैव मनः कृत्वा शुचि भूत्वा तु पार्वति।

कम्पस्तोभस्तथा भाषा मुद्रामुत्प्लवनन्तथा॥ १४/२१॥

अश्रुतानि तु शास्त्राणि मन्त्रमुद्रागणं महत्।

भून्मागं (?) खेचरत्वञ्च वश्यमाकर्षणन्तथा॥ १४/२२॥

जरापहरणं देवि मृत्युकालस्य वञ्चनम्।

पातालं खेचरत्वञ्च अचिराद्भवति प्रिये॥ १४/२३॥

एतत्ते कथितं तुभ्यं आधारस्य (तु) लक्षणम्।

अथान्यं (सं)प्रवक्ष्यामि ब्रह्मग्रन्थिविनिर्णयम्॥ १४/२४॥

तस्मिंस्थाने मनः कृत्वा प्रहरैकेण भाविनि।

कम्पस्तोभादिकं भद्रे भाषा चैव त्वनेकधा॥ १४/२५॥

दूराश्रवणं पुरक्षोभम् अतीतानागतन्तथा।

कालस्य वञ्चनं देवि अमरञ्च कवित्वता॥ १४/२६॥

अणिमादिगुणैश्वर्यं सिद्धिश्च मानसी भवेत्।

एतत्ते कथितं देवि ब्रह्मग्रन्थिविनिर्णयम्॥ १४/२७॥

अतोर्द्ध्वं शृणु कल्याणि यथातथ्यं यशस्विनि।

ऊर्द्ध्वं रोमाः प्रवर्तन्ते यस्मिंस्थाने तु त्र्यम्बके॥ १४/२८॥

ज्वलज्ज्योतिसमाकारा किञ्चिद्विद्युसमप्रभः।

चिन्तयेत् सप्तरात्रन्तु प्रत्ययश्चोपजायते॥ १४/२९॥

कम्पस्तोभस्तथा भाषा मुद्रामुत्पतनन्तथा।
पुरप्रवेशमावेशं वश्यमाकर्षणादिकम्॥ १४/३० ॥
अतीतानागतञ्चैव दूराच्च दर्शनं तथा।
बलीपलितनाशञ्च रूपस्य परिवर्तनम्॥ १४/३१ ॥
खेचरीणां च सामान्यो भवेदभ्यासतो रतः।
एतत्ते कथितं देवि रोमकूपादि कौलिकम्॥ १४/३२ ॥
वृषणोत्थस्य कौलस्य कथितं तव सुव्रते।
शृणु त्वं वरदे नित्यं वीराणां वीरमातरे॥ १४/३३ ॥
वह्निकौलस्य योऽभ्यासं कथयामि च सांप्रतम्।
तस्मिंश्चित्तं स्थिरं कृत्वा क्षणार्द्धं यावत्तिष्ठति॥ १४/३४ ॥
स्तोभभाषादिमुद्राश्च भूमित्यागादिकारकम्।
वश्यमाकर्षणं देवि जरामरणनाशनम्॥ १४/३५ ॥
पुरप्रवेशमावेशं पुरक्षोभादिकारकम्।
उत्तिष्ठ खड्गपातालं ध्रुवं सिध्यति कौलिके॥ १४/३६ ॥
ईप्सितं कुरुते रूपं सतताभ्यासतत्परः।
पुनरन्यं प्रवक्ष्यामि कौलसद्भावमुत्तमम्॥ १४/३७ ॥
हृदिस्थन्तु मनः कृत्वा तन्निष्ठं यावत्तिष्ठति।
तावत् समाधिमायाति स्तोभावेशादिलक्षणम्॥ १४/३८ ॥
भ्रमते अङ्गमङ्गानि हस्तपादशिरादिकम्।
वर्णना स्फोटना वापि पुरक्षोभं वरप्रदे॥ १४/३९ ॥

गान्धर्वी किन्नरी वापि यक्षी पातालवासिनी।

असुरी चैव देवेशि विद्याधरी सुलोचने॥ १४/४०॥

क्षुभ्यते च न संदेहो ह्यभ्यासात्तद्गतस्य तु।

अतीतानागतञ्चैव दूराश्रवणमेव च॥ १४/४१॥

पुरप्रवेशमावेशं मृत्युनाशं महातपे।

योगिनीमेलकत्वञ्च अचिराद्भवति स्फुटम्॥ १४/४२॥

एतत्ते कुलसद्भावं हृदिस्थं प्रकटीकृतम्।

पुनराश्चर्यं वक्ष्यामि शृणु त्वं मकरध्वजे॥ १४/४३॥

चित्तं कृत्वा प्रयत्नेन कण्ठकूपोद्भवं प्रिये।

वदने शास्त्रसद्भावं स्वशक्त्या चोदितं प्रिये॥ १४/४४॥

अतीतानागतञ्चैव वर्तमानन्तथैव च।

न मृत्युर्भवते तस्य अक्षयो ह्यमरद्युतिः॥ १४/४५॥

जराव्याधिविनिर्मुक्तं बलीपलितवर्जितम्।

क्रुद्धन्तु चालयेद्देवि त्रैलोक्यसचराचरम्॥ १४/४६॥

न ब्रह्मा न च वा विष्णुर्न रुद्रा रुद्र एव च।

यादृशो भवते सिद्धिस्सतताभ्यास एव च॥ १४/४७॥

पदोत्तिष्ठमिदं कौलं नात्मानं ज्ञाननिर्णयम्।

एतज् ज्ञानं वरं ज्ञानं स्वातन्त्रसिद्धिमानसी॥ १४/४८॥

कथितं ज्ञानसद्भावं सुगोप्यं कण्ठसंस्थितम्।

गृहीतव्यं प्रयत्नेन कौलवे सिद्धिमिच्छता॥ १४/४९॥

अत ऊर्द्धेश्वरं गुह्यं सर्वव्याधिविमर्दकम्।

रसना ऊर्द्धकं कृत्वा मनस्तस्मिन्निवेशयेत्॥ १४/५० ॥

सतताभ्यासयेत्तत्तु मुहूर्तं नाशयेत् प्रिये।

क्षणेन मुच्यते रोगैर्व्याधिमृत्युजरादिभिः॥ १४/५१ ॥

नश्यते व्याधिसंघातं सिंहस्यैव यथा मृगाः।

क्षणेन नश्यते व्याधिः कटुके कुष्ठनाशनम्॥ १४/५२ ॥

सुस्वादेन महादेवि बलीपलितनाशनम्।

क्षीरस्वादेन मेधावि अमरो जायते नरः॥ १४/५३ ॥

घृतस्वादोपमनं देवि स्वातन्त्रन्तु यथा भवेत्।

चित्तं दद्यान्तु चक्रेण नासे दद्यात् विजृम्भिका॥ १४/५४ ॥

वाचा सिद्धिर्भवत्येव कामदेवोऽपरः प्रिये।

देवकन्या सुराणाञ्च यक्षविद्याधरो भवेत्॥ १४/५५ ॥

मृष्टादिखण्डकाद्याश्च लट्टुकशोकवर्तिका।

दिव्यकन्या अनेकाश्च आकृष्य भुञ्जते प्रिये॥ १४/५६ ॥

अणिमा लघिमा देवि ऊर्द्धरेतःप्रवर्तनम्।

ऊर्द्धरेता भवेद् योगी न योगी करत(?) प्रिये॥ १४/५७ ॥

निष्ठीवनं न कर्तव्यं प्रसादादपि भाषिणि।

दुर्लभन्तु इमं चक्रं नास्ति योगं इमम्परम्॥ १४/५८ ॥

अत ऊर्द्धम्परं गुह्यं योगिनीकौलमुत्तमम्।

अभ्यासे तु पदाभ्यस्त महदाश्चर्यकारकम्॥ १४/५९ ॥

अणिमादिगुणास्तस्मिन् दूरात् स दर्शनन्तथा ।

भवते नात्र संदेहः सतताभ्यासतत्पराः ॥ १४/६० ॥

मृतकोत्त्थापनं देवि परदेहप्रवेशनम् ।

प्रतिमाजल्पनन्तस्मि(न्) घटपाषाणस्फोटनम् ॥ १४/६१ ॥

पशुग्रहणमावेशं रूपादिपरिवर्तनम् ।

ब्रह्मविष्णुयमेन्द्राश्च वरुणो वायुरेव च ॥ १४/६२ ॥

स्वर्गाद्यासोमराजानं देहमध्ये वरानने ।

गन्धर्वाः किन्नरा यक्षा नागा विद्याधराः प्रिये ॥ १४/६३ ॥

विमानकोटिसन्तानाः सर्वाभरणभूषिताः ।

नक्षत्रतारकोपेतं ब्रह्माण्डपरिघट्टितम् ॥ १४/६४ ॥

पश्यते देहमध्यस्थं त्रैलोक्यं सचराचरम् ।

दर्शयेत् स्वकपिण्डं सततध्यानादनेकधा ॥ १४/६५ ॥

सहस्रकोटिभिर्देवि कर्ता हर्ता स्वयं शिवः ।

अभ्यासाद् ददते सिद्धिरष्टधा शास्त्रचोदिता ॥ १४/६६ ॥

पूज्यते सर्वसिद्धैश्च मम तुल्यं वरानने ।

सतः कौलमिदं देयं न देयं यस्य कस्यचित् ॥ १४/६७ ॥

गुरुकौलागमे भक्त्या देव्याः पूजारतः सदा ।

एतदोद्धरणं गोप्यं नित्यन्तु कृतनिश्चयः ॥ १४/६८ ॥

अत ऊर्द्धं प्रवक्ष्यामि शृणु त्वं कुलभाविनि ।

ललाटवर्णराशिस्थं लक्षं कृत्य सुरार्चिते ॥ १४/६९ ॥

जल्पते बहुधा भाषा अङ्गस्य भ्रमणन्तथा।

नादं प्रमुञ्चते देवि महावेगञ्च जायते॥ १४/७० ॥

ईप्सितं कुरुते रूपम् अभ्यासन्तत्परं प्रिये।

अत ऊर्द्धम्परं गुह्यं शृणु त्वञ्च परापरम्॥ १४/७१ ॥

ललाटवर्णराशिस्थं ब्रह्मरन्ध्रस्य मध्यतः।

अभ्यासात् सततं वीर ग्रामधर्मञ्च वर्जयेत्॥ १४/७२ ॥

सृष्टिसंहारकर्तारो भवत्येव न संशयः।

जरा-मरणनिर्मुक्तो नित्यं वै योगिनी प्रिये॥ १४/७३ ॥

ज्ञातमात्रेण (तु) देवि अभ्यासे मोक्षतां गतिः।

अत ऊर्द्धं प्रवक्ष्यामि रन्ध्रकौशलस्य निर्णयम्॥ १४/७४ ॥

सततमभ्यसेत् प्राज्ञो व्याधिमृत्युर्न विद्यते।

मम तुल्यबलो भूत्वा संहारसृष्टिकारकम्॥ १४/७५ ॥

स्वतन्त्रं क्रीडते भद्रे इच्छारूपी भवेद् यथा।

विसर्जः कौलिकं देवि तस्मिंश्चित्ते स्थिरं सदा॥ १४/७६ ॥

शृण्वन्ति दूरतो देवि मननञ्चावलोकनम्।

कपालघट्टिका देवि निगूढं स्थापितं प्रिये॥ १४/७७ ॥

एतदभ्यसतो देवि निष्क्रमेद्बाह्यतः सदा।

मक्षिकामंक्षुणो वापि व्याघ्रसिंहगजस्तथा॥ १४/७८ ॥

एतत्तु धारयेद्रूपं मनसा चिन्तितं प्रिये।

एतत्तु कुलविज्ञानं पारम्पर्यक्रमागतम्॥ १४/७९ ॥

मोक्षदं सारमेवं (च) ज्ञातव्यं वरवर्णिनि ।

तस्मात् सर्वं प्रयत्नेन ज्ञातव्यं कुललक्षणम् ॥ १४/८० ॥

घटपूर्णमिव कुम्भं कुड्यस्तम्भा इवाचलः ।

व्यापयित्वा स्थितो देव तद्वद् योगीनसोपमः (?) ॥ १४/८१ ॥

अतोर्द्धं संप्रवक्ष्यामि शृणु त्वं वीरवन्दिते ।

न जलं चिन्तयेद्देवि न वह्निवायुराकाशम् ॥ १४/८२ ॥

नाधस्तादूर्द्धमध्यञ्च काष्ठवल्लोष्ट्रवत् प्रिये ।

मनस्य उन्मनीभावो यदा भवति सुन्दरि ॥ १४/८३ ॥

शून्यशून्यमनः कृत्वा निश्चिन्तो निश्चलस्थितिः ।

घटपटस्थितस्तम्भा ग्रामकूपादिकं बुधः ॥ १४/८४ ॥

भेरिशङ्खमृदङ्गैश्च वीणावंशनिनादितैः ।

ताड्यमानन्नबोध्यते जीवस्तल्लयतां गतः ॥ १४/८५ ॥

भूतं भव्यं भविष्यञ्च अतीतानागतन्तथा ।

अक्षयो ह्यमरो भूत्वा कामदेवद्वितीयकः ॥ १४/८६ ॥

भेद्यमानो न जाये ॥ ॥ । खाड्यमानस्तु पन्नगैः ।

पुष्पवृष्टिपतन्तस्य पारिजातस्य सुन्दरि ॥ १४/८७ ॥

पूज्यते नागकन्याभिर्यथाहं हाटकेश्वरः ।

पञ्चश्रोतात्मकञ्चैव मोक्षार्थं चोदितो मया ॥ १४/८८ ॥

त्वद्भक्त्या निर्णयं देवि चोदितं कुलगोचरे ।

अतोर्द्धं कथ्यते देवि मुद्रानिर्णयलक्षणम् ॥ १४/८९ ॥

अनामा हृदये लग्ना मुद्रेयमीश्वरीप्रदा।

द्वादशान्ते यदा पश्येत् स्फुरन्तम्मणिमालिका॥ १४/९०॥

अनामा नाम मुद्रेयं वपा (?) खेचरतां गतिम्।

मुद्रितम्पञ्चमुद्राभिश्चैतन्यसहितं प्रिये॥ १४/९१॥

भेदयेत्तत्कपाटञ्च अर्गलायासुसञ्चिता।

पश्चाद्द्वादशान्तं यावच्च् शक्त्याचारेण भेदयेत्॥ १४/९२॥

देव्या भूत्वा च योगिन्या मातृचक्रावशानुगा।

लीयन्ते खेचरीचक्रे क्षोभयेत् परमामृतम्॥ १४/९३॥

अमृतेन विना देवि अमरत्वं कथं प्रिये।

अमृतं कौलसद्भावं शृणु कामकलात्मकम्॥ १४/९४॥

सहजान्तस्थितन्तत्त्वं स्फुरन्तं मणिनिर्मलम्।

मुक्ताफलसमौपम्यं खद्योतसदृशं प्रिये॥ १४/९५॥

तारकोल्लाससंकाशं प्रस्फुरन्तन्नभःस्थले।

सित-रक्तञ्च कृष्णञ्च धूम्रपीतञ्च रूपकम्॥ १४/९६॥

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥। सृष्टिसंहारकारकम्।

उत्पत्तिप्रलयञ्चैव अकुल-कुल-वर्जितम्॥ १४/९७॥

दिवायामभ्यसेद्देवि कृत्वादित्यन्तु दृष्टत (?)।

स्वरूपं दृश्यते॥ ॥। ॥ १४/९८॥

॥ ॥ ॥ ॥ ॥ कुर्यात् प्रयत्नेन पररूपं न संशयः।

क्षणेन कुरुते सृष्टिं संहारञ्च वरानने॥ १४/९९॥

निशायामभ्यसेद्देवि उतुङ्गशतमीश्वरम्।

कोदण्डद्वयमध्यस्त ॥ १४/१०० ॥

एतन्ते परमं देवि येन सृष्टं चराचरः।

अस्मिन्नेव लयं भद्रे समुद्रेण नदी यथा ॥ १४/१०१ ॥

अनेन दृढमात्रेण पुण्यपापैर्न लिप्यते।

पिण्डमष्टप्रकारेण अष्टधातुपदं प्रिये ॥ १४/१०२ ॥

अष्टधा रूपविज्ञानं रूपातीतन्तु चाष्टधा।

अष्टाष्टविधिना चक्रं ज्ञातव्यं सिद्धिकारणम्॥ १४/१०३ ॥

कुललक्षं कुलाधारं नलिकावज्रसम्भवा।

क्षोभञ्च कुलयानञ्च परतत्त्वविदः प्रिये ॥ १४/१०४ ॥

अनुज्ञा गुरुसिद्धानां देवतानाञ्च भासिनि।

क्षीराम्भे फेनसदृशं शीतलं चन्द्रसन्निभम्॥ १४/१०५ ॥

निमेषार्द्धं क्षोभमायाति वेला इव महोदधेः।

मुच्यते ज्वरकुष्ठाद्यैर्व्याधिसंघैर्महातपे ॥ १४/१०६ ॥

इति ज्ञाननिर्णये श्रीयोगिनीकौलम्महच्छ्रीमच्छघ्नपादावतारिते

चन्द्रद्वीपविनिर्गते ध्यानयोगमुद्रा चतुर्दशः पटलः ॥ १४/१४ ॥

पञ्चदशः पटलः

देव्युवाच

अद्य मे सफलं जन्म सफलं च तपस्तथा।

देवत्वमद्य सफलं त्वत्प्रसादेन भैरव॥ १५१॥

तपश्च सफलं मेऽद्य अद्य नेत्रोपशोभितम्।

अद्याहं कृतकल्याणि ज्ञानदृष्टिकृतक्षमा॥ १५२॥

अद्य मे भूषितो कर्णौ महाकौलं श्रुतं मया।

अद्य मे तेजपिण्डन्तु महाज्ञान हृदि स्थितम्॥ १५३॥

अद्य मे कुलशीलञ्च अद्य मे रूपलक्षणम्।

अद्य मे भ्रान्तिरुच्छिन्ना त्वत्प्रसादात् सुराधिप॥ १५४॥

विज्ञात्वा यन्मया पूर्वन्न पृच्छामि पदे पदे।

यत् किञ्चित् दृढसद्भावं तत् सर्वं कथयस्व मे॥ १५५॥

अनधीतं मया पूर्वन्तुष्टस्त्वं मे पुनः पुनः।

चारणाकोटयः सप्त तन्मध्ये पृच्छितं इमम्॥ १५६॥

पूर्वमेकार्णवे घोरे नष्टे स्थावरजङ्गमे।

केनोपायेन वीरेश आत्मानं रक्षितं त्वया।

तद्वस्तु कथ मे नाथ येनात्मरक्षितं त्वया॥ १५७॥

भैरव उवाच

साधु साधु महाज्ञानि न पृष्टं केनचिदिमे।

अत्यन्तगहनं देवि सुगोप्यं रक्षितं मया॥ १५/८ ॥

मुण्डाधारैस्थित॥। नखाग्रे पश्य भैरवि।

अस्थिचक्रस्य मध्यस्थं सर्वञ्चैव सुसंस्थितम्॥ १५/९॥

सहजन्तु इ(मं) चक्रं वज्रनामातिकोद्भवम्।

वज्रयोगप्रयोगेण वज्रवद्भवते नरः॥ १५/१०॥

सप्तकोटिसहस्राणि पत्राणां केसरान्वितम्।

अर्द्धकोटिगतं चक्रं सहस्रं कोटिजं शुभम्॥ १५/११॥

त्रिगुणं वेष्टितं कृत्वा क्षीराधारे व्यवस्थित(ः)।

क्षीरादा॥॥ विप्लकारैः पूरयेत्तत्तनुं सदा॥ १५/१२॥

कर्णिकायां परं तत्त्वं अतसीपुष्पसन्निभम्।

पञ्चारमष्टपत्रञ्च षोडशारं सुशोभनम्॥ १५/१३॥

षोडशारं त्रिलिख्यन्तु अन्तरालसमन्वितम्।

अष्टारपद्मपत्रञ्च षोडशैकं वरानने॥ १५/१४॥

बिन्दुच्छिन्दञ्च कर्तव्यं अन्तराल(म)पि सुव्रते।

षोडशाक्षरभिन्नन्तु आत्मा वै प्राणसंयुतः॥ १५/१५॥

षोडशाक्षरभेदन्तु ऊर्द्धं चक्रे व्यवस्थितम्।

चतुष्कलं पुनर्देवि अन्यथा न कदाचन॥ १५/१६॥

आधारे च आत्मचक्रं॥॥। तदूर्द्धगम्।

कर्णिकायात्मनः कृत्वा ऊर्द्धचक्रेण प्लावयेत्॥ १५/१७॥

गोक्षीरविप्लुतैर्देवि प्लाव्यमानं सविप्लषैः।

द्विरष्टवर्षमात्मानं अधश्चक्रे व्यवस्थितम्॥ १५/१८॥

किञ्चिद्दर्शितवर्णाभं प्राणचक्रं सुलोचने।

प्लावयेत् पूर्वचक्रेण पूर्णचन्द्रनिभं तनु॥ १५/१९॥

आनयेन्निश्चलीभूतम् अस्थिचक्रोद्भवेन तु।

प्लावयित्वा जगत् सर्वं त्रयचक्रं समभ्यसेत्॥ १५/२०॥

आरमूर्द्धिचक्रन्तु तदूर्द्धे चैव पार्वति।

नलीकायां गर्भलीनं संहारन्तु कुतः प्रिये॥ १५/२१॥

बलीपलितनिर्मुक्तो ज्वरव्याधिविवर्जितः।

अक्षयो ह्यमरो नित्यो यथार्हन्तिष्ट मानसः (?)॥ १५/२२॥

यदा भवति संहारस्तदा पश्येच्चराचरम्।

तदाऽसौ तिष्ठते भद्रे मया सार्द्धं स्वरेश्वरि॥ १५/२३॥

यथा मह्यं प्रभुत्वञ्च त्रैलोक्यं सचराचरम्।

तद्वत् स भवते देवि सृष्टिसंहारकारकः॥ १५/२४॥

समचित्तं सदा लीनमस्थिचक्रं सुलोचने।

वज्रवत्तिष्ठत देहं संहा(र)न्तु न हि प्रिये॥ १५/२५॥

मयाभ्यस्त(मि)दम्पूर्वन्तेनाहमक्षयं प्रिये।

एतन्मया कथितं शास्त्रे अप्रमेयमनेकधा॥ १५/२६॥

इमन्तु गूढसद्भावं मम गुह्यं प्रगोपितम्।

गोपनीयं प्रयत्नेन सप्तादूर्द्धन्न दापयेत्।

एतत्ते कुलसद्भावम्मया तुभ्यम्प्रकाशितम् ॥ १५/२७ ॥

इति ज्ञाननिर्णये योगिनीकौलम्महच्छीमच्छेन्द्रपादावातारिते
चन्द्रद्वीपविनिर्गते परमवज्रीकरणं नाम पञ्चदशः पटलः ॥ १५/१५ ॥

षोडशः पटलः

देव्युवाच

योगिनीसिद्धसम्पन्नं दिव्यरूपेण भैरव ।
क्रीडते मातृमध्यस्थं स्वशक्तिं बलगर्वितम् ॥ १६/१ ॥
दुर्विज्ञेयं सदा नाथ तुभ्यं चरितचेष्टितम् ।
न ज्ञातं सुरगान्धर्वैः किं पुनर्भुवि सम्भवैः ॥ १६/२ ॥
त्रिष्कालं तिष्ठसे क्षेत्रे क्षेत्रं वा पीठपर्वते ।
तन्ममाचक्ष्व देवेश भक्ष्याणां दिव्यदर्शनम् ।
अतिध्यानविदं देव कथ्यतान्तु मम प्रभो ॥ १६/३ ॥

भैरव उवाच

शोभनं पृच्छितं भद्रे अद्भुतसिद्धिगोचरे ।

कथ्यमानं विशालाक्षि किं भयं तेजभामिनि ॥ १६/४ ॥

श्रीशैलश्च महेन्द्रश्च पीठका(मा)ख्य विश्रुतम् ।

सन्निधानो ह्यहं भद्रे त्रिष्कालसिद्धिमेलकम् ॥ १६/५ ॥

प्रसन्ना ये नरा भद्रे व्योमध्यानैकचेतसः ।

दर्शनं च भवते तस्मिन् मया सार्द्धं कुलेश्वरि ॥ १६/६ ॥

श्रीशैले नाम संसिद्धिर्महेन्द्रे राजसं स्मृतम् ।

साध्विकं योगसंयुक्तो कामाख्यं पीठमास्मृतम् ॥ १६/७ ॥

तस्मिन् मेलापकं लब्ध्वा योगिनीसिद्धिः तत्समम् ।

मनसा चिन्तितं रूपं अणिमादिगुणाष्टकम् ॥ १६/८ ॥

किन्त्वया तेन विज्ञातं मह्यं चरितचेष्टितम् ।

कथितं मेलकं स्थानं श्रुतं ते चेष्टितं शुभम् ॥ १६/९ ॥

पञ्चस्त्रोतात्मकं चैव गोपितं सिद्धिगोचरम् ।

अभक्ष्या चोद्यते नाथे अन्यथा न कदाचन ॥ १६/१० ॥

अहन्तत् परमं तत्त्वं अहं स भैरवः प्रिये ।

अहं सदा शिव ईशः श्रीकण्ठो रुद्र एव च ॥ १६/११ ॥

अहं सो धीवरो देवी अहं वीरेश्वरः प्रिये ॥ १६/१२ ॥

अनन्तोऽहम् महादेवि रुद्रोऽहं सुरसुन्दरि ।

संहरामि जगत् सर्वं संहारोऽहं कुलेश्वरि ॥ १६/१३ ॥

चराचरः पुनः सृष्टिः स्त्रष्टारो धीरवन्दिते ।

विहितं त्रायते नित्यं विधाताऽहं कुलागमे ॥ १६/१४ ॥

विश्वन्तु निशृतं येन विश्वपादेति गीयते।

विचित्रचित्रतासृष्टिर्विचित्रेति च विश्रुते॥ १६/१५॥

स्वेच्छया क्रीडितोऽहं च करोति विकरोति च।

श्वेतपादस्त्वहं देवि श्वेतपादेति गीयते॥ १६/१६॥

चन्द्रकान्तसमं तेजं भृङ्गवर्णं सुनिर्मलम्।

ते चाहं विश्रुते लोके भृङ्गपादा वरप्रदे॥ १६/१७॥

असुराणां सुराणां च अहं भट्टारकः प्रिये।

भट्टपादेति विख्यातो नामेदं मम सुन्दरि॥ १६/१८॥

श्रियामुत्कण्ठिता ये तु श्रीकण्ठस्तेन उच्यते।

रूरूपादं महादेवि रूद्रोऽहं द्रावणप्रिये॥ १६/१९॥

(रूरूपादं महादेवि महीद्रावणं प्रिये।)

त्व-उमातु महादेवि तुभ्यं पतिरहं प्रिये॥ १६/२०॥

श्रियाया तु अहन्नाथ श्रीनाथ सिद्धगोचरे।

यदावतारितं ज्ञानं कामरूपी त्वया मया।

तदावतारितं तुभ्यं तत्त्वन्तु षणमुखस्य च॥ १६/२१॥

तेन कौलागमे देवि विज्ञानं प्रणवप्रिये।

अव्यक्तेन तु रूपेण चन्द्रद्वीपे अहं प्रिये॥

अव्यक्तं गोचरं तेन कुलजातं मम प्रिये॥ १६/२२॥

श्रीदेव्युवाच

किमर्थं चन्द्रद्वीपन्तु अहञ्चैव गतः प्रभो ।

किमर्थं ग्रसिता प्राज्ञा आदिषणमुखस्य च ॥ १६/२३ ॥

अन्योऽपि विस्मयो देवि कौलवे सिद्धिमिच्छता ।

सूचितं सूचनार्थाय वटुको नाम नामतः ॥

किं वर्णा ध्यानमात्रञ्च श्रोतुमिच्छामि भैरव ॥ १६/२४ ॥

भैरव उवाच

आत्मानं बुध्यसे नाथ यद्यपि प्रियभाषिणि ।

इच्छा त्वं ज्ञानशक्तिश्च क्रियाख्या चैव भासिनि ॥ १६/२५ ॥

गौरी चैव महाकाली लक्ष्मी चैव श्रिया तया ।

अहं त्वं च विशालाक्षि सर्वशास्त्रावतारकः ॥ १६/२६ ॥

अहं चैव त्वया सार्द्धं चन्द्रद्विपं गतो यदा ।

तदा वटुकरूपेण कार्तिकेय(ः) समागतः ॥ १६/२७ ॥

अज्ञानभावमासृत्य तदा शास्त्रं हि मूषितम् ।

शासितोऽहं मया देवि षणमुखा मृषकातृकम् ॥ १६/२८ ॥

गतोऽहं सागरं भद्रे ज्ञानदृष्ट्यावलोकनम् ।

मच्छमाकर्षयित्वा तु स्फोटितं चोदरं प्रिये ॥ १६/२९ ॥

गृहीत्वा मत्स्योदरस्थन्तु आनीतन्तु गृही पुनः ।

स्थापयित्वा ज्ञानपट्टं मम गूढं तु रक्षितम् ॥ १६/३० ॥

पुनः क्रुद्धमनेनैव मुषकेण सुरेश्वरि ।

गार्तं कृत्वा सुरुङ्गाय पुनः क्षिप्तं हि सागरे ॥ १६/३१ ॥

दशकोटिप्रमाणेन महामांसेन भक्षितम् ।

मम क्रोध समुत्पन्नं शक्तिजालो मया कृतः ॥ १६/३२ ॥

आकर्षितो मत्स्यस्तानां सागरह्रदात् ।

नागतोऽसौ महामत्स्या मम तुल्यबलः प्रिये ॥ १६/३३ ॥

ज्ञानतेजेन संभूतो दुर्जयस्त्रिदशैरपि ।

ब्रह्मत्वं हि तदा त्यक्तं चित्तवी (?) धीवरात्मकम् ॥ १६/३४ ॥

अहं सो धीवरो देवि कैवर्तत्वं मया कृतः ।

आकृष्य तु तदा मत्स्यं शक्तिजालसमीकृतः ॥ १६/३५ ॥

मत्स्योदरन्तु तत्स्फोटय गृहीतञ्च कुलागमे ।

वदन्ति विदिता लोके पशवो ज्ञानवर्जिताः ॥ १६/३६ ॥

देव्युवाच

ब्राह्मणोऽसि महापुण्ये कैवर्तत्वं मया कृतः ।

मत्स्याभिघातिनैर्विप्रा मत्स्यघ्नमेति विश्रुताः ।

कैवर्तत्वं कृतं यस्मात् कैवर्तो विप्रनायकः ॥ १६/३७ ॥

भैरव उवाच

अव्यक्तेन महात्मान कृतं पूर्वन्तु सुन्दरि।

अव्यक्तगोचरं तेन कुलैर्जातम्महाकृपे॥ १६/३८॥

तुभ्यश्चैव महादेवि षट्मुखस्य च पार्वति।

विघ्नेशो नन्दिनश्चैव महाकालस्य धीमते॥ १६/३९॥

जया च विजयादीनां हरसिद्धिमहाबलाः।

कालिका योगिनी ख्याता ऊर्द्धतो मत्समं प्रिये॥ १६/४०॥

अकुलं तु इमं भद्रे यत्राहं तिष्ठते तदा।

कल्पान्ते च युगान्ते च मम देहे तु तिष्ठति॥ १६/४१॥

जीवमध्ये यदा देवि पुष्पमूलफलान्विता।

पत्रशाखासमायुक्तो वृक्षस्य चोद्भवं यथा॥ १६/४२॥

तद्वदुत्पादितान्येऽपि मद्देहे कुलभामिनि।

अज्ञानभाविता देवि पशुत्वं सुरनायिके॥ १६/४३॥

गृहीत्वा तु पुनर्देवि महाज्ञानं प्रकीर्तितम्।

कथितं तव कामेषि षट्मुखस्य गणस्य च॥ १६/४४॥

नन्दी चैव महाकाले जया च विजयादिषु।

भट्टाद्या द्रोणकादीनां तथा च हरसिद्धिका॥ १६/४५॥

कथितं कालिका योगी सर्वकौलस्य निर्णयम्।

भक्तियुक्ता समत्वेन सर्वे शृण्वन्तु कौलिकम्॥ १६/४६॥

महाकौलात् सिद्धकौलं सिद्धकौलात् मसादरम् (?)।

चतुर्युगविभागेन अवतारश्चोदितं मया॥ १६/४७॥

ज्ञानदौ निर्णीतिः कौलं द्वितीये महत् संज्ञितम्।

तृतीये सिद्धामृतन्नाम कलौ मत्स्योदरं प्रिये॥ १६/४८॥

ये चास्मान्निर्गता देवि वर्णयिष्यामि तेऽखिलम्।

एतस्माद् योगिनीकौलान्नाम्ना ज्ञानस्य निर्णीतौ॥ १६/४९॥

क्षणेन योगिनी हृष्टा देव्या सह विनायकः।

चत्वारः कुलसिद्धस्तु पृच्छमाना सुभाविता॥ १६/५०॥

रोमाञ्चकञ्चुका सर्वे पुष्पहस्तास्तु बोधिता।

दण्डवत् पतिताः सर्वे आत्मवादं वद प्रभो॥

योगाभ्यासरतानान्तु रक्तपालस्य निर्णयम्॥ १६/५१॥

भैरव उवा(च)

अहं त्वं च विशालाक्षि चन्द्रद्वीपसमागतौ।

षट्मुखो वटुको जाताः क्षेत्रपालकुलागमे॥ १६/५२॥

सिध्यन्ते कोटयः सप्त तावत्त्वं क्षेत्रपालकः।

वटुकौ किं न विज्ञातौ सुतौ तुल्यं वरानने॥ १६/५३॥

सिद्धामृते तु यत् प्रोक्तं गुरोर्निन्दा विगर्हिता।

तथ्याच्च्यवनसंजातं पतितं च महोदधौ॥ १६/५४॥

कलौ युगे महाघोरे दिव्यैः संसाधितोऽपि सः।

तन्त्रे तन्त्रे समाख्यातं यथाशापन्तु प्राप्तवान् ॥ १६/५५ ॥

तस्य पूजाबलिः पिण्ड आसनं जाप्यमेव च ।

कथयामि समासेन यथा सिध्यति साधके ॥ १६/५६ ॥

ह्रीं वटुकाय कपिलजटाय पिङ्गलनेत्राय देवीपुत्राय मातृपुत्राय

इमां बलिं ममोपनीतां गृह्ण गृह्ण चुरु मुरू ह्रीं बलिमन्त्र चाल चाल

भक्ष २०० पिण्डमन्त्रः यत्किञ्चित् भक्षयेत् प्राज्ञः अग्रपिण्डन्तु दापयेत् ।

ह्रीं वटुकाय आसनमन्त्रः ह्यौं ह्यौह्यं महाभैरव पूजनमन्त्रः ।

ह्रीं ह्रां जाप्य –

यः सदा जाप्यमिदं कुर्यान्निर्विघ्नं सिद्धिभाजनः ।

गृह्ण गृह्णेति वक्तव्यं गृह्णाति वटुकस्तथा ॥ १६/५७ ॥

दण्डहस्तं सदाध्यायेज्जटिलं ब्रह्मतेजसम् ।

रक्ताम्बरपरीधानं वटुकं विघ्नमर्दकम् ॥ १६/५८ ॥

पूज्यमानं सदाकालं अग्रतो दण्डपाणिनम् ।

चतुरङ्गबलं जित्वा उष्टानां (?) स्तम्भकारकम् ॥ १६/५९ ॥

चौरराजकुलादीनां सर्पव्याघ्रगजादिषु ।

ह्रीं च वटुक ह्रीं

इमां विद्यां जाप्यं कुर्याद्भयोर्द्धिता ॥ १६/६० ॥

नाशयेत् सर्वदुष्टानां सिंहस्यैव यथा गजाः ।

यत्र तत्र क्षुद्रसिद्धिर्बहुधा शास्त्रचोदिता ॥ १६/६१ ॥

ह्रीं वटुक उक्तमन्त्रेण करोति सुरसुन्दरि ।

ह्रीं काराङ्कराद्येवं वटुकं सिद्धिपूजितम् ।

पूजयेत्तत् प्र(य)त्नेन कौलवे सिद्धिमिच्छता ॥ १६/६२ ॥

इति ज्ञाननिर्णये महायोगिनीकौले मत्स्येन्द्रपादावतारे चन्द्रद्वीपविनिर्गते

षोडशः पटलः ॥ १६/१६ ॥

सप्तदशः पटलः

देव्युवाच

यन्मया पृच्छितं देव आत्मवादस्य निर्णयम् ।

साम्प्रतं श्रोतुमिच्छामि निःसन्दिग्धं वद प्रभो ॥ १७/१ ॥

भैरव उवाच

साधु देवि महायोगे योगिनीसिद्धनायिके ।

गूढं गुह्यं सनाभिञ्च हृदि पद्ममधोमुखम् ॥ १७/२ ॥

समीरस्तोभकं चक्रं घण्टिकाग्रन्थिशीतलम् ।

नासाग्रं द्वादशान्तं च भ्रुवोर्मध्ये व्यवस्थितम् ॥ १७/३ ॥

ललाटं ब्रह्मरन्ध्रं च शिखरस्थं सुतेजसम् ।

एकादशविधं प्रोक्तं विज्ञानं देहमध्यतः ॥ १७/४ ॥

क्लिश्यन्ति मनुजात्यन्तमज्ञात्वा तु कुलागमम् ।

हृदिस्थसहजो देव स्मरणार्हः स उच्यते ॥ १७/५ ॥

हकारो निष्कलो नित्यः संकारं सकलं तथा ।

सृकारं तु सदा सृष्टि हीत्येवं संहरेज्जगत् ॥ १७/६ ॥

सकारं शुक्लपक्षन्तु हकारं कृष्णपक्षकम् ।

हकारमीक्षमित्याहुर्महार्थञ्च गतं परम् ॥ १७/७ ॥

न शिवेन विना शक्तिर्न शक्तिरहितः शिवः ।

अन्योऽन्यञ्च प्रवर्तन्ते अग्निधूमौ यथा प्रिये ॥ १७/८ ॥

न वृक्षरहिता च्छाया न छायारहितो द्रुमः ।

शक्त्याभ्यासरतो योगी कुले सामान्यतां व्रजेत् ॥ १७/९ ॥

स्थूलं सूक्ष्मं परो हंसौ ज्ञात्वा सर्वात्मकं प्रिये ।

पारम्पर्यान् मतं कौलं कर्णात् कर्णगतं परम् ॥ १७/१० ॥

अपरीक्ष्ये न दातव्यं दातव्यं सुपरीक्षिते ।

कृत्वा कुलाभिषेकन्तु प्रकाश्यं त्वात्मनिर्णयम् ॥ १७/११ ॥

पञ्चरत्नादि देवेशि ज्ञातव्या तु कुलागमे ।

प्रथमं पलितस्तम्भं द्वितीयम् ईप्सितं भवेत् ॥ १७/१२ ॥

तृतीयं कामरूपत्वं चतुर्थमक्षयांशकम् ।

पञ्चमन्तु महारत्नं जरामरणनाशनम् ॥ १७/१३ ॥

कृत्वा प्रेतासनं दिव्यं द्वादशान्तमनासृतम् ।

भूगृहे निर्जने देशे गन्धधूपसुधूपिते ॥ १७/१४ ॥

शुक्लाम्बरधरो भूत्वा श्रीखण्डेन विलेखयेत् ।

पर्यङ्कं विन्यसेत्तत्र सुसहायसमन्वितम् ॥ १७/१५ ॥

महाव्याप्तिमहानिद्रां न शृणोति न पश्यति ।

सुगन्धं पूतिगन्धं वा कर्पूरञ्चन्दनादिषु ॥ १७/१६ ॥

न गन्धं वेत्ति तत्त्वज्ञो महाव्याप्तिरियं प्रिये ।

अतीतानागतञ्चैव तस्मिन् कालस्य वञ्चनम् ॥ १७/१७ ॥

कर्ता हर्ता भवेद्देवि यदुक्तो वीरमातरे ।

अधोद्र्ध्वे रमते हंसो द्वादशान्ते लयं पुनः ॥ १७/१८ ॥

हृदिस्थं निश्चलीभूतं कुम्भमध्ये जलं यथा ।

मृणालतन्तुसदृशं भावाभावविवर्जितम् ॥ १७/१९ ॥

धारणाधेयरहितं सर्वज्ञं सर्वतोदितम् ।

स्वयं च चलते चोद्र्ध्वम् अधश्चैव स्वयम्पुनः ॥ १७/२० ॥

रमते सहजं तत्त्वं यथात्मनि तथापरे ।

ज्ञात्वा तत्त्वमिदन्देवि भवबन्धात्मकैः प्रिये ॥ १७/२१ ॥

कर्णञ्च हृदये कृत्वा ज्ञातव्यं हंसलक्षणम् ।

कण्ठस्थाने ध्वनिर्दिव्या सकला तु परापरा ॥ १७/२२ ॥

आपादतलमूर्द्धान्ता वामाख्यं कुण्डलाकृतिम् ।

गुदस्थमुदयन्तस्या द्वादशान्ते लयं पुनः ॥ १७/२३ ॥

एवं तु चरते हंसो देहमध्ये शुभाशुभे ।

निर्लेपं निष्कलं चोर्द्धे शुद्धमत्यन्तनिर्मलम् ॥ १७/२४ ॥

निगर्भं गर्भरूपेण नित्यानन्दैकलक्षणम् ।

ज्ञातव्यं गहनं नाथ महाज्ञानगतं परम् ॥ १७/२५ ॥

अप्रमेयमचिन्त्यं च निराभ्यासपदं स्मृतम् ।

निश्वासोच्छ्वाससंयुक्तं भावाभावसमन्वितम् ॥ १७/२६ ॥

स सञ्चरति भूतेषु भूतग्रामे चतुर्विधे ।

स आत्मा स स्वयं कर्ता पिण्डं चैव तु संहरेत् ॥ १७/२७ ॥

पिण्डस्यैवम्भवेद्दुःखं बन्धस्यैव सुखं परम् ।

विषादं हरिषश्चैव जरामरणमेव च ॥ १७/२८ ॥

क्षुधा तृषा च मोहश्च भयाद्या लोभमेव च ।

दारिद्रम्बन्धनादीनि पिण्डस्यैव सुलोचने ॥ १७/२९ ॥

न चासौ छिद्यते शस्त्रैर्ण चक्रेण बलीयसा ।

भिद्यन्ति नैव वज्रेण न च वह्नौ दहत्यसौ ॥ १७/३० ॥

न जलेन भवेन्मृत्युर्न जले जीवितं भवेत् ।

न मोहं न च वा रागं न मदं मत्सरं सदा ॥ १७/३१ ॥

न लोभं न च वा कोपं न चिन्ता बाध्यते ते (?) सः ।

इन्द्रियाणामिदं सर्वं भूतानां च वरप्रदे ॥ १७/३२ ॥

जीवेन च जगत् सृष्टं स जीवस्तत्त्वनायकः ।

स जीवः पुद्गलो हंसः स शिवो व्यापकः परः॥ १७/३३॥

स मनस्तूच्यते भद्रे व्यापकः स चराचरे।

आत्मानमात्मना ज्ञात्वा भुक्तिमुक्तिप्रदायका॥ १७/३४॥

प्रथमा तु गुरुर्ह्यात्मा आत्मानं बन्धयेत् पुनः।

बन्धस्तु मोचयेद् ह्यात्मा आत्मानमात्मनः प्रभुः॥ १७/३५॥

आत्मानमात्मना ज्ञात्वा आत्मा वै कायरूपिणः।

आत्मनश्चापरो देवि येन ज्ञातं स योगिराट्॥ १७/३६॥

स शिवः प्रोच्यते साक्षात् स मुक्तो मोचयेत् परः।

सुविशुद्धः सदा देवि पङ्कस्थमिव पङ्कजम्॥ १७/३७॥

मानुष्यं पिण्डमासृत्य स शिवः क्रीडते भुवि।

इत्थम्भूतं परात्मानं येन ज्ञातं सुभामिनि॥ १७/७८॥

तस्यैव स्पर्शमात्रेण भवेन्मुक्तिर्न संशयः।

तस्योच्छिष्टञ्च संप्राप्य भवेन्मुक्तिः परा प्रिये॥ १७/७९॥

तेनैव स्नापिते देवि अभ्यङ्गोद्वर्तनेन तु।

तेन पादेन संस्पृष्टे सोऽपि मोक्षस्य भाजनः॥ १७/४०॥

एकेन तेन भुक्तेन भुक्तं चैव चराचरम्।

सर्वतीर्थेषु यत् पुण्यं स्नात्वा लभति मानवः।

तं ज्ञेयन्तु मनः कृत्वा अधिकं तु फलं लभेत्॥ १७/४१॥

योगिनीसिद्धसद्भावं वीरमातृगणादिषु।

अस्योद्ध्वें तु निगद्यतु भुक्तिमुक्तिप्रदं शुभम्॥ १७/४२॥

इति ज्ञाननिर्णये महायोगिनीकौलेश्रीमछेन्द्रपादावतारिते
चन्द्रद्वीपविनिर्गते सप्तदशः पटलः ॥ १७/१७ ॥

अष्टादशः पटलः

देव्युवाच

सिद्धानां पूजनन्देव देहस्थप्रत्ययात्मकम् ।
कुलद्वीपविधानं च संक्षेपात् कथ्यतां प्रभो ॥
कौलवं सिद्धिकामस्य अभिषेकं कीदृग् भवेत् ॥ १८/१ ॥

भैरव उवाच

साधूक्तं कथयिष्यामि कुलं द्वीपस्य यो विधिः ।
यवाद्याशालिचूर्णन्तु पिष्टं वा गोधूमोद्भवम् ॥ १८/२ ॥
येन केनचित् पिष्टेन अनेन सुरसुन्दरि ।
ह्रींकारमन्त्रितं कृत्वा वर्तिद्वादशभूषितम् ॥ १८/३ ॥
क्षीरखण्डादिमृष्टन्तु घृतपूर्णसुशोभनम् ।
पार्श्वे तु पूजयेत् सिद्धां योगिनीं गुरुमेव च ॥ १८/४ ॥

एककालं द्विकालं वा त्रिष्कालं पूजयेत् क्रमम्।

अग्रतः पूजयेन्नित्यं भुञ्जमानाग्रनायिके ॥ १८/५ ॥

जपेद्बीजपरं श्रेष्ठं ह्रींकारं योगिनीप्रियम्।

योगिनीमेलकं ह्यस्मिन् भुक्तिमुक्तिप्रदः सदा ॥ १८/६ ॥

अथान्यं सम्प्रवक्ष्यामि अभिषेके कुलगोचरे।

रक्तेन पूरयेद् रक्तं शुक्रस्यैव समं प्रिये ॥ १८/७ ॥

कुण्डगोलोद्भवेनैव मधुं च घृतसंयुतम्।

रक्तं वामामृतं शुक्रं सुरया ब्रह्ममिश्रितम् ॥ १८/८ ॥

वुकपुष्पसमायुक्तकृष्णासवसमायुतम्।

मदिरानन्दचैतन्यं भक्तियुक्तो महात्मनः ॥ १८/९ ॥

उद्धरेद्रुममन्त्रन्तु गुरुसिद्धाञ्च देवताम्।

ह्रीं क्लीं म्हौ जुं सः -

शङ्खस्थं कलशस्थं वा पूजयित्वा यथाक्रमम् ॥ १८/१० ॥

दृढभक्तस्य देवेशे आचार्यो दृढलक्षवित्।

जयाद्याश्चौषधीः (?) सर्वा मोहनाद्या कृताञ्जली ॥ १८/११ ॥

पञ्चरत्नसमोपेतां रक्तयुक्तेन वेष्टितम्।

क्षारक्षीरदधिसर्पि मद्योदे इक्षुमेव च ॥ १८/१२ ॥

स्वादुदञ्चैव गर्भादं क्रमेण परिजल्पयेत्।

वक्रेकैकशो (?) मध्ये च अष्टौ तां कुलपर्वताम्॥ १८/१३॥

वेश्याकुमारिकाभिर्वा आचार्यः स्वकरैस्तथा।

उद्धृत्य शिरसि दद्यात् ततो योगी भविष्यति॥ १८/१४॥

पुनस्तु यजनं वक्ष्ये यथावत्तन्निबोध मे।

रक्तं युक्तं समादाय अथवा चित्रजं शुभम्॥ १८/१५॥

ततस्तुष्टजयेद्देवि क्रमञ्चैव समाहित।

अक्षतैः शालिजैर्दिव्यैरन्यैर्वापि सुशोभनैः॥ १८/१६॥

चतुःषष्टिक्रमयुतैः पूजयेत् तत्क्रमं शुभम्।

दिव्यसुगन्धपुष्पैस्तु विचित्राभरणभूषितः॥ १८/१७॥

आचार्यः सुमनो भूत्वा सर्वसंभारसंभृतः।

योगिनी सिद्धवीराणां भवते मातृवल्लभः॥ १८/१८॥

मद्यमांससमायुक्तं भक्ष्यभोज्ययुतं प्रिये।

घृतखण्डसमायुक्तं शर्करायान्तु पूरयेत्॥ १८/१९॥

कुम्भादि च वरं दद्यात् सहस्रं वा शतैरपि।

चतुःषष्टिञ्च सौदर्य अष्टौ च गुणापि वा॥ १८/२०॥

निवेद्य गुरवे मानं गुरुपूजा विशेषतः।

वीरपूजां ततः कृत्वा येन तुष्येत् पुनः पुनः॥ १८/२१॥

चरुकं भक्षयेत् प्राज्ञः समयहीने न दापयेत्।

वक्राद्वक्रं विशेषेण सिद्धिभाग्यः समान्यथा॥ १८/२२॥

सामान्ये कथितं कुम्भे शङ्खाद्वक्रं विशेषतः।

शास्त्रोक्तं तु क्रमं पूज्य सर्वसंभारसम्भृतः ।
अनेनारब्धमात्रेण सिद्धियोग्यो भवेत्ततः ॥ १८/२३ ॥

इति ज्ञाननिर्णये महाकौले चन्द्रद्वीपविनिर्गते अष्टादशः पटलः ॥ १८/१८ ॥

ऊनविंशतितमः पटलः

देव्युवाच

देहस्थं पङ्कजं देव सिद्धानां साम्प्रतं वद ।

भैरव उवाच

देव्याश्चक्रङ्गताः सर्वे दिव्यरूपसुतेजसः ॥ १९/१ ॥
षोडशाकृतयः सर्वे तन्मध्ये आत्मनम्प्रिये ।
मोक्षकामी सदा ध्यायेच्छुक्लाम्बरधरां शुभाम् ॥ १९/२ ॥
सदा यौवनकामिन्यः कृष्णवर्णन्तु चिन्तयेत् ।
रक्ताम्बरधरा ध्यायेद्रक्तगन्धानुलेपनः ॥ १९/३ ॥
रक्ताभी रक्तमालाभिर्भूषिता सिद्धयोगिनी ।
तन्मध्ये चात्म(ना) देवि तद्रूपं परिभावयेत् ॥ १९/४ ॥

श्रीनाथं योगिनीसार्द्धं वृन्दरूपञ्च भासिनि ।

शङ्खहस्ता सदा ध्यायेन्मनसा चिन्तितं लभेत् ॥ १९/५ ॥

इति ज्ञाननिर्णये महायोगिनीकौले श्रीमीनपादावतारिते एकोन्नविंशतितमः

पटलः ॥ १९/१९ ॥

विंशतितमः पटलः

भैरव उवाच

शृणु त्वमद्भुतन्देवि लोकेऽस्मिन् मोक्षप्रत्ययम् ।

गूदोद्ध्र्वम्पीडयेन्नाथ हृदि कण्ठादिकं प्रिये ॥ २०/१ ॥

उत्पातं निक्षिपेदूद्ध्र्वं प्राणायामेन सुन्दरि ।

कपालं भेदमयाति यान्ति जीवो निरञ्जनम् ॥ २०/२ ॥

स शिवो व्यापको भूत्वा कर्ता हर्ता वरानने ।

आत्मानं च परं वेत्ति वेत्तित्येवं चराचरम् ॥ २०/३ ॥

दुःखन्तस्य न विद्येत सुखन्तस्य निरन्तरम् ।

अथान्यं साम्प्रतं देवि प्रत्यक्षमभ्यसेत् सदा ॥ २०/४ ॥

शक्त्याचाररतो नित्यं जिताहारैकमैथुनः ।

अनामापीडयेदूद्ध्र्वं नाभिञ्च हृदयन्तथा ॥ २०/५ ॥

श्यामसूत्रगतं लक्षं शक्त्याग्रसंस्थितं मनः ।

आत्मप्राणसमं कृत्वा शक्त्याचाराग्रसंस्थितम् ॥ २०/६ ॥

पुष्पे वा प्रतिमाद्येषु अभ्यासाच्चलते प्रिये।

षट्मासादभ्यसेद्देवि निश्वासोच्चपराङ्मुखाः ॥ २०/७ ॥

अब्दमनेकं देवेशे देशदेशान्तरं व्रजेत्।

परदेहप्रवेशं स्यादभ्यासं वर्णितं तव ॥ २०/८ ॥

अथान्यं साम्प्रतं भद्रे शृणु त्वं वीरनायिके।

कुलाशक्तेस्तु वीरस्य तथान्यं शक्तिलक्षणम् ॥ २०/९ ॥

अनादिनिधना शक्तिरिच्छा नाम शिवोद्भवा।

व्योममालिनी सा भद्रे खेचरीति निगद्यते ॥ २०/१० ॥

वामाख्या कुण्डलीनाम ज्येष्ठा चैव मनोन्मनी।

रुद्रशक्तिस्तु विख्याता कामाख्या तु गीयते ॥ २०/११ ॥

अग्रणी चैव सर्वेषां लिख्यते न च पठ्यते।

मातृका शब्दरा(शिश्व) सर्वग्रन्थेषु कीर्त्यते ॥ २०/१२ ॥

देव्युवाच

ज्ञानशक्तिर्मया ज्ञाता क्रियाशक्तीर्वद प्रभो।

भैरव उवाच

कथयामि समासेन वीरस्य शक्तिलक्षणम् ॥ २०/१३ ॥

उत्तमा धवलाक्षी तु कुटिलाग्राग्रकेशिनी ।

दशनैश्च ज्योत्स्नाकारैः सुरूपा चारुभाषिणी ॥ २०/१४ ॥

कुले भक्तिसमायुक्ता गुरुदेव्या प्रपूजका ।

सुरूपा सुखभावा च सुभ्रुवा सुललाटका ॥ २०/१५ ॥

कुलागमेन भक्ति ॥ ॥ ॥ ॥ भयवर्जिता ।

सुशीला सुभगा देवि जनानन्दकरा शुभा ॥ २०/१६ ॥

दुर्लभा लोकमध्ये तु ज्ञानवर्तस्य रक्ष्यते ।

इत्थंभूता यदा शक्तिर्वीरस्य लक्षणं शृणु ॥ २०/१७ ॥

सुरूपः सुस्वभावश्च सत्यवादी च निश्चयी ।

गुरुकौलागमे भक्तः सुसन्धः क्रोधवर्जितः ॥ २०/१८ ॥

सुशूरः सुभगो नित्यं स्वदेहप्रत्ययान्वितः ।

ईदृशी भवते वीरा रुद्रशक्त्या ह्यधिष्ठिता ॥ २०/१९ ॥

यत्तेजः स महालिङ्गमुत्पत्तिस्थितिकारकः ।

बिन्दुरूपं तु तं ज्ञात्वा स्फुरज्ज्वालावलीपरः ॥ २०/२० ॥

अक्षोभ्यः सर्वशक्तीनां आत्मशक्त्यान्तरञ्जितः ।

सुज्ञात्वा देहजं शक्तिं तदा शक्तिपरिग्रहे ॥ २०/२१ ॥

ज्ञानविज्ञानसम्पन्नः अद्वैताचारभावितः ।

कुलकौलागमे भक्ति ईदृशं वीरलक्षणम् ॥ २०/२२ ॥

इति ज्ञाननिर्णये योगिनीकौले श्रीमीनपादावतारिते चन्द्रद्वीपविनिर्गते

विंशतितमः पटलः ॥ २०/२० ॥

एकविंशतितमः पटलः

देव्युवाच

संग्रहं वद मे नाथ वर्तनं कुलगोचरे।

भैरव उवाच

कथयामि न सन्देहो संग्रहाचारलक्षणम्॥ २१/१ ॥

पञ्चपञ्चाशिको देवि मतं वै योगलक्षणम्।

तस्य भेदोपभेदेन कौलशास्त्रे विनिर्णयम्॥ २१/२ ॥

कुलपञ्चाशिकामूलं तथा च कुलसागरम्।

कुलोघो हृदयश्चैव भैरवोद्यानकं तथा॥ २१/३ ॥

चन्द्रकौलश्च वेष्टिश्च(?) तथा वै ज्ञाननिर्णयम्।

अस्य मध्ये विनिष्क्रान्तं सम्बरनाम विश्रुतम्॥ २१/४ ॥

सृष्टिकौलं महाकौलं तिमिरं च तथापरम्।

सिद्धामृतं तु कौलं मातकौलं तथापरम्॥ २१/५ ॥

शक्तिभेदं तथा कौलं ऊर्मिकौलमनुत्तमम्।

चतुर्युगेषु देवेशि ज्ञानकौलस्य संगतिः॥ २१/६॥

सिद्धेश्वरं तथा चान्यं कौलं वै वज्रसम्भवम्।

मेघजाञ्च दूरतं तस्मिन् कौले विनिर्गतम्॥ २१/७॥

अङ्गस्पर्शानिश्वरं देवि वज्रदाद्यामृतं तथा।

पूर्णिमायां अमावस्यां अष्टमी च चतुर्दशी॥ २१/८॥

सजीवं मत्स्यमद्यञ्च मांसञ्चैव बलिं द(देत्)।

व्याख्या चैव तु कर्तव्या आचार्यः शङ्कवर्जितः॥ २१/९॥

न तिथिर्न च नक्षत्रं नोपवासं विधीयते।

यत्र तत्र स्थितो योगी ज्ञानमेवं समाश्रयेत्।

कथितं कौलसद्भावं नाम्ना ज्ञानस्य निर्णये॥ २१/१०॥

इति ज्ञाननिर्णये महायोगिनीकौले श्रीमीनपादावतारिते चन्द्रद्वीपविनिर्गते

एकविंशतितमः पटलः॥ २१/२१॥

द्वाविंशतितमः पटलः

देव्युवाच

प्रणम्य प्राञ्जलि॥॥॥ व अद्याहं तव वल्लभ।

अद्याहं कृतकृत्या तु हर सिद्धिविनायकः॥ २२/१॥

षड्मुखश्च महाकाल(ः) कालिका योगिनी तथा।

नन्दीशो भट्टका चैव द्रोणका च तथ॥ ॥ ॥ २२/२॥

विजया तु महाभागा षड्योगिन्यस्तु मातराः।

कौलामृते न संतृप्तो अहं सर्वेऽपि भैरव॥ २२/३॥

भैरव उवाच

यत् पुरा गोपितं भद्रे तत् सर्वं प्रकटीकृतः।

भूलोके देवतानाञ्च कथितव्यं कुलागमे॥ २२/४॥

सिद्धानाञ्च विशेषेण ख्यापनीयं कुलान्व(यम्)।

समयाचारसमोपेतं विज्ञानं द्वैतवासिनाम्॥ २२/५॥

गुप्तलिङ्गी सदा कालं गुरुपूजनतत्परः।

वत्सलः सर्वलोकानां सर्वजीवदयान्वितः॥ २२/६॥

भैरववचनं श्रुत्वासर्वरोमाञ्चकञ्चुकाः।

सन्तुष्टमनसः सर्वे दण्डवत् पति(ताः) भुवि॥

कुलभावपराः सर्वे कृतकृत्या सुराधिपाः॥ २२/७॥

अद्य मे गहनं नष्टं अज्ञानपटलाहतम्।

संसारतरुविस्तीर्णमद्य छिन्नं त्वया प्रभो॥ २२/८॥

पाशजालतमोघञ्च छिन्नाद्य दुःखसंशयः।

दशकोटिस्तथा चार्द्धं नाम्ना ज्ञानस्य निर्णयः॥ २२/९॥

तस्य मध्ये इमं नाथ सारभूतं समुद्धृतम्।

कामरूपे इमं शास्त्रं योगिनीनां गृहे गृहे॥ २२/१०॥

निग्रहानुग्रहश्चैव सिद्धिमेलापकं तथा।

कुर्वन्ति सततं देवि अस्य ज्ञानप्रसादतः॥ २२/११॥

चन्द्रद्वीपं महाशास्त्रं अवतीर्णं सुलोचने।

कामाख्ये गीयते नाथे महामत्स्योदरस्थितिः॥ २२/१२॥

इति ज्ञाननिर्णये महायोगिनीकौले श्रीमत्स्येन्द्रपादावतारिते

चन्द्रद्वीपविनिर्गते द्वाविंशतितमः पटलः॥ २२/२२॥

त्रयोविंशतितमः पटलः

देव्युवाच

कौलवे योगिनी देव सञ्चरन्ति कथं भुवि।

तन्ममाचक्ष्व देवेश भक्त्या जानन्ति भूतले॥ २३/१॥

भैरव उवाच

मर्त्येऽस्मिन् देवतानान्तु सञ्चारं शृणु भामिनि ।

कपोतिका तथा गृध्री हंसी चैव नखी तथा ॥ २३/२ ॥

खञ्जः ॥ ॥ ॥ भाषी तु कोकाभाषी तु सुन्दरि ।

उलुकी पेचकी वा तु सररी वा गूली तथा ॥ २३/३ ॥

शृगाली अजा महिषी (उष्ट्री) मार्जारनकुली तथा ।

व्याघ्री हस्ती मयूरी च कुकुटी न ॥ ॥ ॥ ॥ ॥ ॥ ॥ । ॥ २३/४ ॥

अन्यानि यानि रूपाणि संस्थितानि महीतले ।

तानि रूपाणि संगृह्य योगिन्यः क्रीडन्ते भुवि ॥ २३/५ ॥

निपतन्ति यदा भद्रे अभक्ष्येषु कुलाधिपे ।

तद्रूपं कथ्यन्ते ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ । युक्तावधारयेत् ॥ २३/६ ॥

हयश्च नखरः सर्प चित्रिकोत्मानसस्तथा ।

वृश्चिकोध्यन्तरश्वानो मूषको दर्दुरः प्रिये ॥ २३/७ ॥

ग्रहभूतस्वरूपेण ज्वालाग्निशास्त्रसङ्कटैः ।

वेद ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥व्याधिराजानश्चैव तस्कराः ॥ २३/८ ॥

विद्युत्तुङ्गो तथा गण्ड व्याघ्रसिंहगजस्तथा ।

अनेकाकाररूपेण भयं नानाविधं विदुः ॥ २३/९ ॥

चतुःषष्टिश्च योगिन्यो ॥ ॥ ॥ ॥ ॥ ॥ ॥ ।प्यन्ति साधके ।

एवं रूपं समासृत्य क्षिप्रं गृह्णन्ति तं पशुम् ॥ २३/१० ॥

कोपन्तु नैव कर्तव्यं भाषमाणं सुराधिपे ।

कुमारिका स्त्रियो वापि भाषमाणे कदाचन ॥ २३/११ ॥

यथा शक्त्या सदा कालं स्त्री चैव व्रतमास्थितम्।

पूजनीया प्रयत्नेन कुमार्यश्च कुलाश्रितैः॥ २३/१२॥

पुन्नागं नागचंपाद्यैर्मुचुकुन्दैश्च पाटलैः।

पारिजातोद्भवेद्दिव्यैर्दाडिमैः कुसुमोज्ज्वलैः॥ २३/१३॥

बन्धुकः कुसुमोद्भूतैश्चम्पकः कुसुमोज्ज्वलैः।

जात्युत्पलकदम्बैश्च कर्णिकारैः सिंहकेशरैः॥ २३/१४॥

अम्भोरूहैस्तथा पुष्पैः शुभैः शालाविभूषितैः।

रक्ताम्बरधरां ध्यायेद्रक्तगन्धानुलेपिताम्॥ २३/१५॥

आत्मानं योगिनीसिद्धे रत्नमाला विभूषिताम्।

ध्यायेत्तां सततं वीरां बहिः पूजां विवर्जयेत्।

पूजनं कथितं भद्रे भुक्तिमुक्तिप्रसाधकम्॥ २३/१६॥

इति ज्ञाननिर्णये महायोगिनीकौले श्रीमत्स्येन्द्रपादावतारिते

चन्द्रद्वीपविनिर्गते त्रयोविंशतितमः पटलः॥ २३/२३॥

चतुर्विंशतितमः पटलः

देव्युवाच

सफलम(द्य) मे नाथ कारुण्यं तव भैरव।

असुराणां सुराणाञ्च प्रभुत्वमद्य मे प्रभो ॥ २४/१ ॥

महाकौलं महाज्ञानं कुलकौलस्य निर्णयम् ।

भ्रान्तिसंसारगहनमज्ञानपटल(न्त)मः ॥ २४/२ ॥

संसारपाशजालञ्च अद्य? निर्णाशितं त्वया ।

अद्यमापादिता मुक्तिः स्वतन्त्रा भुवि दुर्लभा ।

पुनः कथय कौलेश देहस्थं सिद्धपूजनम् ॥ २४/३ ॥

भैरव उवाच

॥ ॥ ॥ ॥षन्दिग्धं कथयिष्यामि कौलेऽस्मिन् पूजनं शृणु ।

कुलसिद्धाश्च योगिन्यो रुद्राश्चैव कुलाधिपे ॥ २४/४ ॥

देव्याश्चक्रगताः सर्वे हृदि मध्ये शिरेऽपि वा ।

बहिस्थं पूजये ॥ ॥ ॥ ॥ ॥ ॥ ॥पूजाविधि प्रिये ॥ २४/५ ॥

सुगन्धकुन्दकेतक्या मालिकाजातिकोत्पलैः ।

चम्पकैः किङ्करातैश्च नीलोत्पलसुगन्धिभिः ॥ २४/६ ॥

पुष्पैर्नानाविधैश्चैव शतपत्रैश्च ॥ ॥ ॥ ॥ ॥ ॥ ॥ ।

तरुजातन्तश्च रादेया (?) द्रव्या(पि) मधुमिश्रिताम् ॥ २४/७ ॥

मांसम्पलम्बलिर्देया ताम्बूलं चन्द्रसंयुतम् ।

धूपचन्दनसौरभ्यं अगुरुं मृगनाभिकम् ॥ २४/८ ॥

रक्तपुष्पैर्विशेषेण सुगन्ध (धूपदीपितम्) ।

उग्राणि यानि पुष्पाणि गन्धहीनं न दापयेत् ॥ २४/९ ॥

बहिस्थं पूजनं प्रोक्तं अध्यात्मं शृणु साम्प्रतम् ।

रक्ताम्बरधराः सर्वे रक्तगन्धानुलेपनाः ॥ २४/१० ॥

षोडशाकृतयः स ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ । विभूषिताः ।

प्रसन्नवदनाश्चैव पिबन्त्यो मदिरासवम् ॥ २४/११ ॥

इच्छारूपधराः सर्वे जरामरणवर्जिताः ।

सृष्टिप्रवर्तकाः सर्वे वरदानैकतत्पराः ॥

इ ॥ ॥ ॥ ॥ ॥ड़ाध्यायेदचिरान्तत्समो भवेत् ॥ २४/१२ ॥

इति ज्ञाननिर्णये महायोगिनीकौलश्रीमत्स्येन्द्रपादावतारिते

चन्द्रद्वीपविनिर्गते चतुर्विंशतितमः पटलः ॥ २४/२४ ॥

गुह्यपदधरं प्रोक्तं दशकोटिस्तु निर्णयः ।

सिद्धानां योगिनीनां च हृदयं पर(म)दुर्लभम् ॥ २५/१ ॥

गुह्याद् गुह्यतरं नाथे सारात् सारतरं परम् ।

सम्यगेतन्मया भद्रे अप्रकाश्यं प्रकाशितम् ॥ २५/२ ॥

महाकौल महादेवि शतैर्दशभिः सम्मितम् ।

ज्ञानस्य निर्णये सारं नाम्ना साहस्त्रिकं मतम् ॥ २५/३ ॥

इति महाकौले ज्ञाननिर्णये सारं श्रीमत्स्येन्द्रपादावता(रिते समाप्तं ?)

****

वाराहीतन्त्रे -

तारं वाणीं ततो लज्जां वह्निजायां ततः परम्।
पुनस्तारञ्च वाराही चण्डीमन्त्रः समीरितः॥ ७५॥

इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये विंशोल्लासः॥ २०॥

एकविंश उल्लासः

अवधूताश्रमनिरूपणम्

अथातः सम्प्रवक्ष्यामि अवधूतक्रमं शृणु।
चतुर्थाश्रमिणां मध्ये अवधूताश्रमो महान्॥ १॥

केवलं कुलयोगेन तस्य मोक्षः प्रजायते।
यदि न स्यात्तदा चैव शृणु यत् कथयामि ते॥ २॥

ज्ञान भावे च सम्पन्ने सम्प्राथ्यं निजकौलिकीम्।
तदाज्ञया विमुक्तः स्यात्तां सम्पूज्य कुलान्तरे॥ ३॥

कुण्डलीशक्तिविवरे तदा योगं समभ्यसेत्।

निर्द्वन्द्वो निरहङ्कारः शुद्धनाडीजितेन्द्रियः ॥ ४ ॥

मृद्वासने समासीनः षट्कसंयमने रतः ।

बद्धपद्मासनो योगी योगं युञ्जीत यत्नतः ॥ ५ ॥

ऊर्वोरुपरि वीरेन्द्रः कृत्वा पादतले उभे ।

p. 531)

अङ्गुष्ठौ तु निबध्नीयाद्धस्ताभ्यां व्युत्क्रमेण तु ॥ ६ ॥

पद्मासनं भवेदेतत् सर्वेषामेव पूजितम् ।

मुलाधारचक्रकथनम्

गुदात्तु द्व्यङ्गुलादूर्ध्वमधोमेढ्रात्तु द्व्यङ्गुलम् ॥ ७ ॥

एकाङ्गुलं तु तन्मध्ये देहमध्यं प्रकीर्तितम् ।

कन्दमस्ति शरीरेऽस्मिन् पुण्यापुण्यविवर्जितः ॥ ८ ॥

तन्तुपञ्जरमध्यस्थो यथा भ्रमति सूतिकः ।

जीवस्तु मूलचक्रेऽस्मिन् अधःप्राणश्चरत्यसौ ॥ ९ ॥

प्राणारूढो भवेज्जीवः सर्वदेहेषु सर्वदा ।

तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्ततिः ॥ १० ॥

मेरुदण्डबहिः पार्श्वे चन्द्रसूर्यात्मिके शुभे ।

इडा च पिङ्गला चैव वामदक्षिणतः स्थिते ॥ ११ ॥

कन्दमध्याद् द्वयोर्मध्ये सुषुम्ना सुप्रतिष्ठिता ।

पृष्ठमध्यगता सा तु सह मूर्ध्नि व्यवस्थिता ॥ १२ ॥

p. 532)

ऋज्वीभूता तु वज्राख्या ज्वलन्ती विश्वधारिणी ।

मुक्तिमार्गे सदा गुप्ता मेढ्रमूर्ध्नि व्यवस्थिता ॥ १३ ॥

तस्याश्चान्तर्गता नाडी चित्राख्या योगिवल्लभा ।

पञ्चवर्णोज्ज्वला देवी पञ्चभूतनिवासिनी ॥ १४ ॥

पञ्चदेवैर्युता देवी पञ्चतत्त्वप्रकाशिनी ।

पूरयित्वा तु विचिन्ना चित्रा सा ग्रन्थिरूपिणी ॥ १५ ॥

तयैव ग्रथितं सर्वं मूलादि पद्मपञ्चकम् ।

तस्या मध्ये ब्रह्मनाडी मृणालतन्तुरूपिणी ॥ १६ ॥

ब्रह्मरन्ध्रं तु तन्मध्ये हरवक्त्रं सदाशिवम् ।
गुदमेढ्रान्तरे ग्रन्थि सुषुम्ना सन्धिरुत्तमा ॥ १७ ॥

आधारे च गुदस्थाने पङ्कजञ्च चतुर्दलम् ।
सुवर्णाभं वादिसान्तं हेमवर्णं सुशोभनम् ॥ १८ ॥

कलिकारूपकं पद्मं पृथिवीपद्मिनीयुतम् ।
तरुणारुणसङ्काशां शूलखट्वाङ्गकौ ततः ॥ १९ ॥

वामे खड्गं सुराकुम्भं दधानामुग्रदंष्ट्रिणीम् ।

p. 533)

दुग्धाभां संस्थितां ध्यायेत् डाकिनीं लोचनत्रयाम् ॥ २० ॥

कर्णिकायां स्थिता योनिः कामाख्या योगिवल्लभा ।
अपानाख्यं हि कन्दर्पं आधारे च त्रिकोणके ॥ २१ ॥

स्वयम्भूलिङ्गं तन्मध्ये पश्चिमाभिमुखं भवेत् ।
बन्धूकपुष्पसङ्काशं सूर्यकोटिसमप्रभम् ॥ २२ ॥

भ्रमन्तं योनिमध्ये च शिशिरं शशभृत्समम् ।
तस्योर्ध्वे कुण्डली शक्तिरष्टधा कुण्डलाकृतिः ॥ २३ ॥

अष्टप्रकृतिरूपा सा नाभेस्तिर्यगधो गता ।
अधोवक्त्रस्थितादेवी ऊर्ध्वपुच्छाऽतिशोभना ॥ २४ ॥

अकारादिक्षकारान्ता कुण्डलीत्यभिधीयते ।
सा च विद्युल्लताकारा मृणालतन्तुसन्निभा ॥ २५ ॥

p. 534)

परिस्फुरति सर्वात्मा सुप्ताऽहिसदृशाकृतिः ।
ब्रह्मद्वारमुखं नित्यं मुखेनावृत्य तिष्ठति ॥ २६ ॥

येन मार्गेण गन्तव्यं ब्रह्मद्वारं निरामयम् ।
मुखेन श्वासं प्रविष्टा ब्रह्मरन्ध्रं मुखं तदा ॥ २७ ॥

मस्तके मणिवद्भिन्नस्वयम्भूलिङ्गवेष्टिनी ।
नान्यः पन्था द्वितीयोऽस्ति शरीरे परमस्य च ॥ २८ ॥

मूलाधारे कामरूपं पीठं परमदुर्लभम् ।
अधोवक्त्राणि पद्मानि मूलादीनि यथाक्रमात् ॥ २९ ॥

मूलाधारचक्रम् तध्यानफलम्

गुदात्तु द्व्यङ्गुलादूर्ध्वमधो मेढ्रात्तु द्व्यङ्गुलात्।
चतुरङ्गुलविस्तारं कन्दमूलं खगाण्डवत्॥ ३० ॥

एकाङ्गुलं तु तन्मध्ये चतुरस्रं त्रिकोणकम्।
एवं ध्यात्वा च वीरेन्द्रः स्थिरचित्तः स्थिरेन्द्रियः॥ ३१ ॥

आकुञ्चयेद् गुदमूलं चिबुकं हृदयोपरि।
नव द्वाराणि संयम्य कुक्षिमापूर्य वायुना॥ ३२ ॥

शब्दबीजेन तां देवीं दृढविभ्रामयेत्ततः।
वायुना भिद्य तद्वक्त्रं ऊर्ध्ववक्त्रं तु कारयेत्॥ ३३ ॥

p. 538)

उद्घाटयेत् कपाटं तु यथा कुञ्चिकया दृढम्।
उल्लासोज्ज्वलकारस्य शिखा याति समुज्ज्वला॥ ३४ ॥

मूलचक्रं ततो भित्त्वा ब्रह्मद्वारं विभेदयेत्।
ऊर्ध्वं भित्त्वा तु लिङ्गं वै इतरं पुष्करं ततः॥ ३५॥

मूलाधारे सन्ततं ध्यानयोगात्
स्तम्भक्षोभावुत्प्लुतिर्दार्दुरीव।
भूमित्यागः खेचरत्वं क्रमेण

नृणामेते षड्गुणाः सम्भवन्ति ॥ ३६ ॥

कान्तिप्रकर्षो वपुषोऽपि

नादव्यक्तिः प्रदीप्तिः जठरानलस्य ।

लघुत्वमङ्गस्य निजेन्द्रियाणां

पटुत्वमारोग्यमदीनता च ॥ ३७ ॥

स्वाधिष्ठानचक्रम् तद्ध्यानफलम्

मूलादिपद्मषट्कञ्च कलिकासदृशं शुभम् ।

स्वाधिष्ठानं महापद्मं लिङ्गमूले रसच्छदम् ॥ ३८ ॥

p. 536)

बन्धूक पुष्पसङ्काशं सदा जलसमन्वितम् ।

सिन्दूरप्रस्फुरद्वर्णैर्बादिलान्तैश्च मण्डितम् ॥ ३९ ॥

शूलं वज्रं तथा पद्मं डमरुं करपङ्कजैः ।

दधानां श्यामवर्णाञ्च राकिणीं त्रितयान्विताम् ॥ ४० ॥

रक्तधात्वेकनाथां तां चिन्तयेत्तत्र साधकः ।

विचिन्त्य स्थिरचित्तेन अधिष्ठानं प्रभेदयेत् ॥ ४१ ॥

इह वेत्ति निधाय मानसं स्वं

विविधश्चाश्रुतशास्त्रजालमुच्चैः ।

अवधूतजरामयः स मर्त्यः

सुचिरं जीवति वीतमृत्युभीतिः ॥ ४२ ॥

वपुषोऽशुचिता जनस्य शश्वत्

परमां शुद्धिमिहातनोति पुंसाम् ।

शरदम्बुजपेलवस्य देहे

दृढरुद्धो घनताञ्च शीतरश्मिः ॥ ४३ ॥

मणिपूरचक्रम् तद्ध्यानफलम्

तदूर्ध्वे सव्यदक्षाभ्यां चिन्तयेत् साधकोत्तमः ।

पद्ममध्ये स्थितं शुद्धं विद्युताभं त्रिकोणकम् ॥ ४४ ॥

p. 537)

तन्मध्ये चिन्तयेद् देवं ब्रह्माणं हंसवाहनम् ।

रक्तवर्णं चतुर्वक्त्रं दधतञ्च त्रिलोचनम् ॥ ४५ ॥

चिन्तयेत् कूर्चपद्मे च अक्षमालां कमण्डलुम् ।

ब्रह्मसत्त्वाक्षमोङ्कारं स्थितं नाभेरधः सदा ॥ ४६ ॥

नाभौ नीलनिभं पद्मं मणिपूरं दशास्त्रकम्।
विद्युत्पुञ्जस्फुरद्वर्णैर्डादिफान्तैश्च मण्डितम्॥ ४७॥

वह्निना संयुतं तत्र लाकिनीं मांसधातुगाम्।
मानसं संविभाव्याथ भेदयेत्तदनन्तरम्॥ ४८॥

स्थानेऽस्मिन्निहितात्मनः सुकृतिनः पातालसिद्धिं परां
खड्गस्याप्रतिमस्य साधनमपि स्यादीप्सितञ्च क्षितौ।
रूपं भूमिविसर्जनं परपुरे शक्तः प्रवेष्टुं जरा-
हानिश्चाखिलदुःखरोगशमनं कालस्य वा वञ्चनम्॥ ४९॥

अनाहतचक्रम् तद्ध्यानफलम्

अनाहतं हृदि ध्यायेत् पिङ्गाभं द्वादशच्छदम्।
द्रुतस्वर्णप्रभावर्णैः कादिठान्तैश्च मण्डितम्॥ ५०॥

p. 538)

मेदःस्थां काकिनीं तत्र पीताभां मत्तरूपिणीम्।
अभयं डमरुं शूलं पाशञ्च करपङ्कजैः॥ ५१॥

दधानां चारुरुपाञ्च नानाभरणभूषिताम्।
तत्रैवाङ्गुष्ठमात्मानं प्रदीपकलिकोपमम्॥ ५२॥

तत्र सञ्चिन्तयेद् देवं नारायणं निरञ्जनम् ।
शुद्धस्फटिकसङ्काशं वाणीलक्ष्मीविभूषितम् ॥ ५३ ॥

वैनतेयसमारूढं शङ्खचक्रगदाधरम् ।
पीताम्बरधरं शान्तं वनमालाविभूषितम् ॥ ५४ ॥

पूर्णशैलं महापीठं तत्रैव परिचिन्तयेत् ।
प्रभेदयेत्ततः पश्चात् साधकः स्थिरमानसः ॥ ५५ ॥

एतस्मिन् सततं निविष्टमनसः स्थाने विमानस्थिताः
क्षुभ्यन्त्यद्भुतरूपकान्तिकलिता दिव्यस्त्रियो योगिनः ।
ज्ञानञ्चाप्रतिमं त्रिकालविषयं क्षोभः पुरस्य श्रुति-
दूरादेव च दर्शनञ्च खगतिः स्याद्योगिनीमेलनम् ॥ ५६ ॥

विशुद्धचक्रम् तद्ध्यानफलम्

विशुद्धं षोडशारञ्च धूम्राभं कण्ठदेशके ।

p. 539)

तदन्ते व्योमबीजञ्च शुक्लं हैमगजस्थितम् ॥ ५७ ॥

तरुणारुणसङ्काशैः स्वरैश्च परिमण्डितम्।
आकाशसहितं पद्मं शाकिनीं परिचिन्तयेत्॥ ५८॥

अस्थिसंस्थां चतुर्बाहुं पञ्चवक्त्रां त्रिलोचनाम्।
पाशाङ्कुशौ पुस्तकञ्च ज्ञानमुद्राञ्च धारिणीम्॥ ५९॥

दंष्ट्रिणीमुग्ररूपाञ्च सदा मधुमदाकुलाम्।
अर्धनारीश्वरं देवं नानामणिविभूषितम्॥ ६०॥

चन्द्रचूडं त्रिनयनं वराभयकरं शुभम्।
ध्यात्वैवं चक्रराजं तु भेदयेत् साधकोत्तमः॥ ६१॥

स्थानेऽत्र संसक्तमना मनुष्य-
स्त्रिकालदर्शी विगताधिरोगः।
जित्वा जरामञ्जननीलकेशः
क्षितौ चिरं जीवति वीतमृत्युः॥ ६२॥

इह स्थाने चित्तं सततमवधायात्तपवनो
यदि क्रुद्धो योगी चलयति समस्तं त्रिभुवनम्।
न च ब्रह्मा विष्णुर्न च हरिहरो नैव खमणि-
स्तदीयं सामर्थ्यं शमयितुमलं नापि गणपः॥ ६३॥

p. 540)

आज्ञाचक्रम् तद्ध्यानफलम्

द्विदलं हक्षवर्णाभ्यां शुभाभ्यां परिमण्डितम् ।
विद्युत्कोटिप्रभं चक्रं भ्रुवोरूर्ध्वे मनोन्मनी ॥ ६४ ॥

बिन्दुयुक्तं सर्ववर्णं सर्वपद्मेषु चिन्तयेत् ।
योनिमध्ये स्थितं लिङ्गमितरं तरुणारुणम् ॥ ६५ ॥

जालन्धरं महापीठं हाकिनीं तत्र चिन्तयेत् ।
बिन्दुस्थां हाकिनीं शुक्रमेदोमज्जास्वरूपिणीम् ॥ ६६ ॥

अक्षमालाञ्च डमरुं कपालं पुस्तकं तथा ।
चापं मुद्रां दधानाञ्च शुक्लां नेत्रत्रयान्विताम् ॥ ६७ ॥

पद्ममध्येऽन्तरात्मानं प्रभारूपं हि कारणम् ।
ओङ्कारज्योतिषं कल्पप्रदीपाभं जगन्मयम् ॥ ६८ ॥

बालसूर्यप्रतीकाशां सदा बिन्दुमदक्षरम् ।
ततः सङ्क्षोभणद्वारे ध्यायेत् पद्मं सुशोभनम् ॥ ६९ ॥

p. 541)

ध्यानयोगनिरतस्य जायते पूर्वजन्मकृतकर्मणां स्मृतिः।
तत्र बिन्दुनिलये च दूरतो दर्शनश्रवणयोः समर्थता॥ ७०॥

इह सन्निहितस्वचित्तवृत्तिः प्रतिमायाः प्रतिजल्पनं करोति।
गमनञ्च पुरे परेषां पुनरुत्थानमप्यहो मृतस्य॥ ७१॥

निरालम्बां मुद्रां निजगुरुमुखेनैव विदिता-
मिह स्थाने कृत्वा स्थिरनिशितधीः साधकवरः।
सदाऽभ्यासात् पश्यत्यमरनिलयानन्तरखिला-
मुडुश्रेणीं विष्णोरपि पदमुडूनामपि पतिम्॥ ७२॥

भेदान्ते पद्मषट्कं च प्रस्फुटञ्चोर्ध्ववक्त्रकम्।
भवत्येव न सन्देहोऽप्यथ स्यात् साधकस्य च॥ ७३॥

तदूर्ध्वे चार्धचन्द्रे च भानुमण्डलमुत्तमम्।
मकारबिन्दुरूपेण तदूर्ध्वे चन्द्रमण्डलम्॥ ७४॥

बिन्दोरुपरि नादं हि शुद्धस्फटिकसन्निभम्।
चेतसा सम्प्रपश्यन्ति नादान्ते वृषभध्वजम्॥ ७५॥

शुद्धस्फटिकसङ्काशं कपर्दशशिभूषणम्।

p. 542)

व्याघ्राम्बरं तु तन्मध्ये अधोमुखं सशक्तिकम्॥ ७६ ॥

स्थाने ह्यत्र परीतञ्च वरदाभयपाणिकम्।
प्रसन्नवदनं शान्तं सर्पयज्ञोपवीतिनम्॥ ७७ ॥

नादोपरि महादेवं पश्यन्ति ज्ञानचक्षुषा।
नान्यत् पश्यन्ति तत्रैव अन्तरं वृषभध्वजम्॥ ७८ ॥

पुरत्रयविनिष्क्रान्तो यत्र वायुः प्रलीयते।
तत्र संस्थं मनः कृत्वा तद्ध्यानमीश्वरं विदुः॥ ७९॥

विभाव्य साधकश्रेष्ठो भेदयेत्तदनन्तरम्।
शङ्खिनीनालं संस्थाप्यव्याप्तिशून्यं विभर्ति यः॥ ८० ॥

अमृतोदधिसङ्काशं शतयोजनविस्तृतम्।
चन्दनोद्यानमध्यस्थं वेदिकां तु तदन्तरे॥ ८१ ॥

तन्मध्ये स्फटिकं ध्यायेत् पश्चिमाननमम्बुजम्।
स्रवन्तममृतं नित्यं देव्यङ्के कमलान्तरे॥ ८२ ॥

p. 543)

सहस्रारपद्मवर्णनम्

सहस्रारपद्मं विसर्गादधस्ता-

दधो वक्त्रमारक्तकिञ्जल्कपुञ्जम्।

कुरङ्गेण हीनस्त्रिशृङ्गस्तदन्तः

स्फुरद्रश्मिजालः सुधांशुः समास्ते ॥ ८३ ॥

तदन्तर्गतं ब्रह्मरन्ध्रं सुसूक्ष्मं

यदाधारभूतं सुषुम्णाख्यनाड्याः।

तदेतत् पदं दिव्यमत्यन्तगुह्यं

सुरैरप्यगम्यं सुगोप्यं सुयत्नात्॥ ८४ ॥

एतत् कैलाससञ्ज्ञं परमकुलपदं बिन्दुरूपी स्वरूपी

यत्रास्ते देवेदवो भवभयतिमिरध्वंसहंसो महेशः।

भूतानामादिदेवो रसविसरसितां सन्ततामन्तरङ्गे

सौधीं धारां विमुञ्चन्नभिमत फलदो योगिनां योगगम्यः॥ ८५॥

स्थानस्यास्य ज्ञानमात्रेण पुंसां

संसारेऽस्मिन् सम्भवो नैव भूयः।

भूतग्रामं सन्ततन्यासयोगात्

कर्तुं हर्तुं स्याच्च शक्तिः समग्रा ॥ ८६ ॥

स्थाने परे हंसनिवासभूते-

कैलासनाम्नीह विधाय चेतः ।

p. 544)

योगी गतव्याधिरधःकृताधि-

वाधश्चिरं जीवति मृत्युमुक्तः ॥ ८७ ॥

स्थानेऽस्मिन् क्षयवृद्धिभावरहिता नित्योदिताऽधोमुखी

बालादित्यनिभप्रभाशशभृतः साऽस्ते कला षोडशी ।

बालाग्रस्य विखण्डितस्य शतधा चैकेन भागेन या

सूक्ष्मत्वात् सदृशी निरन्तरगलत्पीयूषधाराधरा ॥ ८८ ॥

एतस्याः परतः स्थिता भगवती भूताधिदेवाधिपा

निर्वाणाख्यकलाऽर्धचन्द्रकुटिला सा षोडशान्तर्गता ।

बालाग्रस्य सहस्रधा विगलितस्यैकेन भागेन या

सूक्ष्मत्वात् सदृशी त्रिलोकजननी या द्वादशार्कप्रभा ॥ ८९ ॥

निर्वाणाख्यकलापदोपरिगता निर्वाणशक्तिः परा

कोट्यादित्यसमप्रभाऽतिगहना बालाग्रभागस्य या ।

कोट्यंशेन समा समस्तजननी नित्योदिता निर्मला

नित्यानन्दपदस्थलोरुविगलद्धारा निरालम्बना ॥ ९० ॥

p. 545)

एतस्याः परतः परात्परतरं निर्वाणशक्तेः पदं
शैवं शाश्वतमप्रमेयममलं नित्योदितं निष्क्रियम् ।
तद्विष्णोः पदमित्युशन्ति सुधियः केचित् पदं ब्रह्मणः
केचिद्धंसपदं निरञ्जनपदं केचिन्निरालम्बनम् ॥ ९१ ॥

आरोप्याऽरोप्य शक्तिं कमलजनिलयादात्मना साकमेषु
स्थानेष्वाज्ञावसानेष्ववहितहृदयश्चिन्तयित्वा क्रमेण ।
नीत्वा नादावसानं खगत कुलमहापद्मसद्मान्तरस्थां
ध्यायेच्चैतन्यरूपामभिमतफलसम्प्राप्तये शक्तिमाद्याम् ॥ ९२ ॥

साक्षाल्लाक्षारसाभं गगनगतमहापद्मसद्मस्थहंसां
पीत्वा दिव्यामृतौघं पुनरपि च विशेन्मध्यदेशं कुलस्य ।
चक्रे चक्रे क्रमेणामृतरसविसरैस्तर्पयेत् देवतास्ता
हाकिन्याद्याः समस्ताः कमलजपदगां तर्पयेत् कुण्डलीं ताम् ॥ ९३ ॥

कुण्डली कुण्डलाकारानक्रीभूता निवासिनी ।
इडा च पिङ्गला चैव सुषुम्नानिलयं व्रजेत् ॥ ९४ ॥

शक्तिं भैरवसंयोगादमृतानन्दमानयेत् ।

p. 546)

चन्द्रमार्गेण वायुञ्च पिबेत्तञ्च शनैः शनैः ॥ ९५ ॥

कुम्भकञ्च यथाशक्त्या सुर्यमार्गेण रेचयेत् ।
सूर्यमार्गे पिबेद्वायुं चन्द्रमार्गेण रेचयेत् ॥ ९६ ॥

शून्यञ्च प्रतिविम्बचन्द्रसदृशं सूक्ष्मातिसूक्ष्मं परं
सर्वं व्याप्य तमोमयं जगति सद्धामप्रकाशं परम् ।
दृश्यादृश्यविनाशभेदसकलं ज्योतिर्मयं सर्वतो
ध्यात्वा तच्च पदं तु साधकवरैः दूरीकृतश्चान्तकः ॥ ९७ ॥

एवमभ्यस्यमानस्य अहन्यहनि निश्चितम् ।
जरामरणदुःखाद्यैर्मुच्यते भवसागरात् ॥ ९८ ॥

योनिमुद्राबन्धफलकथनम्

चतुर्विधा तु या सृष्टिर्यस्यां योनौ प्रजायते ।
पुनः प्रलीयते यस्यां कालाग्न्यादिशिवान्तकम् ॥ ९९ ॥

योनिमुद्रा परा ह्येषा बन्धस्तस्याः प्रकीर्तितः ।
तस्यास्तु बन्धमात्रेण तन्नास्ति यन्न साधयेत् ॥ १०० ॥

p. 547)

अन्यथा जप्यते यस्तु अन्यथा कुरुते तु यः।
नासौ तत्फलपात्रञ्च सत्यं सत्यं न संशयः॥ १०१॥

छिन्ना बन्धाश्च ये मन्त्राःकीलिताः स्तम्भिताश्च ये।
दग्धाः सन्त्रासिता हीना मलिनाश्च तिरस्कृताः॥ १०२॥

भेदिता भ्रमसंयुक्ताः सुप्ता सम्मुर्च्छिताश्च ये।
वृद्धा बालास्तथा प्रौढास्तथा यौवनगर्विताः॥ १०३॥

अरिपक्षे स्थिता ये च निर्वीर्याः सत्त्ववर्जिताः।
अंशकेन विहीनाश्च खण्डशः शतधा कृताः॥ १०४॥

विधिनानेन संयुक्ताः प्रभवन्त्यचिरेण तु।
सिद्धिमोक्षप्रदाः सर्वे साधकेन नियोजिताः॥ १०५॥

यद्यदुच्चरते मन्त्री वर्णरूपं शुभाशुभं।
तत्तत् सिध्यत्यसन्देहो योनिमुद्रानिबन्धनात्॥ १०६॥

दीक्षयित्वा विधानेन अभिषिच्य सहस्रधा।
ततोऽधिकारी भवति तन्त्रेऽस्मिन् साधकोत्तमः॥ १०७॥

ब्रह्महत्यासहस्राणि त्रैलोक्यमपि घातयेत्।

नासौ लिप्यति पापेन योनिमुद्रानिबन्धनात्॥ १०८ ॥

p. 548)

तस्मादभ्यसनं नित्यं कर्तव्यं पुण्यकाङ्क्षिभिः।
अयासाज्जायते सिद्धिरभ्यासान्मोक्षमाप्नुयात्॥ १०९ ॥

सम्विर्त्तिं लभतेऽभ्यासात् योगोऽभ्यासात् प्रवर्तते।
मन्त्राणां सिद्धिरभ्यासादभ्यासाद्वायुसाधनम्॥ ११० ॥

कालवञ्चनमभ्यासात्तथा मृत्युञ्जयो भवेत्।
एतद्भेदं विजानाति स याति परमं पदम्॥ १११ ॥

तदष्टधा तु जीवोऽसौ बहिर्याति दिने दिने।
दिनेशाङ्गुलिमानेन तदर्धञ्चोपवासतः॥ ११२ ॥

त्रिगुणं रतिकाले च द्विगुणं भोजनाद् बहिः।
अत ऊर्ध्वं वहेद्वायुस्त्रिगुणं यदि दैवतम्॥ ११३ ॥

न्यूनं धत्ते ततः प्राणः शरीरं परिमुञ्चति।
शरीरसमतां नीत्वा न्यूनं वा साधकोत्तमः॥ ११४ ॥

कुम्भयित्वा अधोवायुं कुण्डलीमुखवर्त्मनि।

योजयित्वा ततो जीवं कुण्डल्या सहितं सुधीः ॥ ११५ ॥

गमागमं कारयित्वा सिद्धो भवति नापरः ।
पीयते खाद्यते यत्तु तत्सर्वं कुण्डलीमुखे ॥ ११६ ॥

हुत्वा सिद्धिमवाप्नोति न च बन्धेन बाध्यते ।

p. 549)

अवधूताचारकथनम्

भिक्षा कार्या न च स्वार्थं कुण्डल्याः प्रकृतेः पुनः ॥ ११७ ॥

रे मातर्देहि मे भिक्षां कुण्डलीं तर्पयाम्यहम् ।
अवधूताश्रमे स्थित्वा भैरवानन्दतत्परः ॥ ११८ ॥

भैरवोऽहं न चान्योऽस्मि न चान्यो मत्परः क्वचित् ।
तन्त्रमन्त्रार्चनं सर्वं मयि जातं न चान्यथा ॥ ११९ ॥

शिवोऽहं भैरवानन्दो मत्तोऽहं कुलनायकः ।
रक्तमाल्याम्बरधरो हेतुयुक्तः सदा भवेत् ॥ १२० ॥

एवं भिक्षां व्रजन् भिक्षुर्भैरवानन्दतत्परः ।

येन केनापि वेशेन येन केनाऽप्यलक्षितः ॥ १२१ ॥

यत्र कुत्राश्रमे तिष्ठन् कुलयोगीश्वरः सदा ।
उन्मत्तमुकजडवत् विरले लोकमध्यगे ॥ १२२ ॥

p. 550)

क्वचिच्छिष्टः क्वचिद्भ्रष्टः क्वचिद् भूतपिशाचवत् ।
नानावेशधरो योगी विचरेत्तु महीतले ॥ १२३ ॥

सर्वस्पर्शो यथा वायुर्यथाकाशश्च सर्वगः ।
सर्वभक्षो यथा वह्निस्तथा योगी सदा शुचिः ॥ १२४ ॥

तथा म्लेच्छगृहान्नादि योगीहस्तगतं शुचि ।
क्षीयते न च पापेन बध्यते न च जन्मना ॥ १२५ ॥

यद्वन्मन्त्रबलोपेतः क्रीडन् सर्पैर्न दंश्यते ।
तथा ज्ञानपरो योगी क्रीडन्निन्द्रियपन्नगैः ॥ १२६ ॥

पूजयन्ति महादेवीं कुलाङ्गकृष्टिमात्रतः ।
गन्धं पुष्पञ्च ताम्बुलं नैवेद्यं यत्र यद्भवेत् ॥ १२७ ॥

मनसा तत् समुत्सृज्य बाह्यतः कुलवारिणा ।

आत्मन्येव समायोज्य देवीरूपकुलेश्वरः ॥ १२८ ॥

p. 551)

न पूजा नापि तन्नाम न निष्ठा न व्रतादिकम् ।
पूर्णोऽहं भैरवश्चाहं नित्यानन्दोऽहमव्ययः ॥ १२९ ॥

निरञ्जनस्वरूपोऽहं निर्विकारो ह्यहं प्रभुः ।
सर्वशास्त्राभियुक्तोऽहं सर्वमन्त्रार्थपास्याः ॥ १३० ॥

अस्मत्परतरो देशो न जातो न जनिष्यति ।
आनन्दरूपवान् भूत्वा सर्वेषां प्रियकारक ॥ १३१ ॥

न योगी न भोगी न वात्मा न काङ्क्षी
न वीरो न धीरो न वा साधकेन्द्रः ।
सदानन्दपूर्णो धरण्यां विवेकी
चिराज्ज्ञातधूतो द्वितीयो महेशः ॥ १३२ ॥

श्रुतौ कुण्डलेऽसृग् गले मुण्डमाला
करे पानपात्रं मुखे हन्त हाला ।
परित्यक्तकर्मा लयन्यस्तधर्मा
विरक्तोऽवधूतो द्वितीयो महेशः ॥ १३३ ॥

p. 552)

वामे रामा रमणकुशला दक्षिणे पानपात्रं

मध्ये न्यस्तं मरिचसहितं शूकरस्योष्णमांसम्।

स्कन्धे वीणा ललितसुभगा सद्गुरूणां प्रपञ्चः

कौलो धर्मः परमगहनो योगिनामप्यगम्यः ॥ १३४ ॥

इति श्रीमज्ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये एकविंशोल्लासः समाप्तः ॥ २१ ॥

अनेनाधिकारेण स्थूलध्यानमुक्तम्, भाविना तु सप्तमेन सूक्ष्ममुच्यते,
इति शिवम् ॥ ५० ॥

समस्तदुःखदलनं सर्वसंपत्प्रवर्तनम् ।

परनिर्वाणजननं नयनं शाङ्करं नुमः ॥ ॥

इति श्रीनेत्रतन्त्रे श्रीमहामाहेश्वराचार्यवर्यश्रीक्षेमराजविरचित-
नेत्रोद्योते साधनविधिः षष्ठोऽधिकारः ॥ ६ ॥

सप्तमोऽधिकारः

नेत्रोद्योतः

चक्राधारवियल्लक्ष्यग्रन्थिनाड्यादिसंकुलम् ।

स्वामृतैर्देहमासिञ्चत् स्मराम्यूर्ध्वेक्षणं विभोः ॥

अथ सूक्ष्मध्यानं निर्णेतुं भगवानुवाच

अतः परं प्रवक्ष्यामि ध्यानं सूक्ष्ममनुत्तमम्।

न विद्यते उत्तममन्यत् सूक्ष्मध्यानं यतः, परं त्वतोऽप्युत्तमं भविष्यति॥

तदुपक्रमते

ऋतुचक्रं स्वराधारं त्रिलक्ष्यं व्योमपञ्चकम्॥ ७-१॥

ग्रन्थिद्वादशसंयुक्तं शक्तित्रयसमन्वितम्।

धामत्रयपथाक्रान्तं नाडित्रयसमन्वितम्॥ ७-२॥

ज्ञात्वा शरीरं सुश्रोणि दशनाडिपथावृतम्।

द्वासप्तत्या सहस्रैस्तु सार्धकोटित्रयेण च॥ ७-३॥

नाडिवृन्दैः समाक्रान्तं मलिनं व्याधिभिर्वृतम्।

सूक्ष्मध्यानामृतेनैव परेणैवोदितेन तु ॥ ७-४ ॥

आप्यायं कुरुते योगी आत्मनो वा परस्य च ।

दिव्यदेहः स भवति सर्वव्याधिविवर्जितः ॥ ७-५ ॥

ॠतवः षट् जन्म-नाभि-हृत्-तालु-विन्दु-नादस्थानानि नाडिमायायोगभेदनदीप्तिशाण्ताख्यानि नाडिमायादिप्रसराश्रयत्वात् चक्राणि यत्र, स्वराः षोडश अङ्गुष्ठगुल्फ-जानु-मेढ्र-पायु-कन्द-नाडि-जठर-हृत-कूर्मनाडी-कण्ठ-तालु-भ्रूमध्य-ललाट-ब्रह्मरन्ध्रद्वादशान्ताख्या जीवस्याधारकत्वादाधारा यत्र, यदि वा सर्वसहत्वादस्य नयस्य कुलप्रक्रियया

मेढ्रस्याधः कुलो ज्ञेयो मध्ये तु विषसंज्ञितः ।

मूले तु शाक्तः कथितो बोधनादप्रवर्तकः ॥

अग्निसंज्ञस्ततश्चोर्ध्वमङ्गुलानां चतुष्टये ।

नाभ्यधः पवनाधारे नाभावेव घटाभिधः ॥

नाभिहृन्मध्यमार्गे तु सर्वकामाभिधो मतः।

सञ्जीवन्यभिधानाख्यो हृत्पद्मोदरमध्यगः॥

वक्षःस्थले स्थितः कूर्मो गले लोलाभिधः स्मृतः।

लम्भकस्य स्थितश्चोर्ध्वे सुधाधारः सुधात्मकः॥

तस्यैव मूलमाश्रित्य सौम्यः सोमकलावृतः।

भ्रूमध्ये गगनाभोगे विद्याकमलसंज्ञितः॥

रौद्रस्तालुतलाधारो रुद्रशक्त्या त्वधिष्ठितः।

चिन्तामण्यभिधानाख्यश्चतुष्पथनिवासि यत्॥

ब्रह्मरन्ध्रस्य मध्ये तु तुर्याधारस्तु मस्तके।

नाड्याधारः परः सूक्ष्मो घनव्याप्तिप्रबोधकः॥

इत्युक्ताः षोडशाधाराः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ । ॥

इति । त्रीण्यन्तर्बहिरुभयरूपाणि लक्ष्याणि लक्षणीयानि यत्र ।

निरावरणरूपत्वात्

खमनन्तं तु जन्माख्यं । (७-२७)

इति वक्ष्यमाणानां जन्म-नाभि-हृद्-बिन्दु-नादरूपाणां व्योम्नां

पञ्चकं विद्यते यत्र,

जन्ममूले तु मायाख्यो । (७-२२)

इत्यभिधास्यमानाश्चैतन्यावृतिहेतुत्वाद् ग्रन्थयो माया-पाशव-ब्रह्म-

विष्णु-रुद्र-रिश्वरसदाशिव-इन्धिका-दीपिका-बैन्दव-नाद-शक्त्याख्या

ये पाशास्तैः संयुक्तम् । इच्छादिना शक्तित्रयेण

सम्यगन्वितमेषणीयादिविषये प्रवर्तमानम् । सोम-सूर्य-

वह्निरूपधामत्रयपथैः सव्यापसव्यपवनैर्मध्यमपवनेन

चाधिष्ठितम् । इडापिङ्गलासुषुम्नाख्येन पवनाश्रयेण नाडित्रयेण

युक्तम् । गान्धारी-हस्तिजिह्वा-पूषा-यशा-अलम्बुसा-

कुहूशङ्खिनीभिश्च युक्तत्वाद् दश नाडयः पन्थानो येषां

प्राणापानसमानोदानव्याननागकूर्मकृकरदेवदत्तधनञ्जया-

ख्यास्तैः आ समन्ताद् वृतमोतप्रोतम्।

दिग्दशकावस्थितनाडिदशकप्रपञ्चभूताभिर्द्वासप्तत्या

सहस्रैर्मध्यव्याप्त्या सार्धकोटित्रयेण च महाव्याप्त्या नाडिवृन्दैः

समाक्रान्तम्। आणवमायीयकार्ममलयोगान्मलिनम्। योगिनामपि

येनेदं तद्धि भोगतः।

इति स्थित्यावश्यंभाविक्रोडीकृतं शरीरं ज्ञात्वा योगी यस्य

आत्मनः परस्य वा, परेणैवेति पररूपतामनुज्झतापि

समनन्तरभाविना सूक्ष्मध्यानामृतेनोदितेन स्फुटीभूतेनाप्यायं

करोति, स गतव्याधिर्दिव्यदेह इति

सूक्ष्मध्यानामृतोन्मिषच्छाक्तमूर्तिर्भवति॥ ५॥

शूक्ष्मध्यानामृतेनैव परेणैवोदितेन। इति यदुक्तं तत्सोपक्रमं

स्फुटयति

यत्स्वरूपं स्वसंवेद्यं स्वस्थं स्वव्याप्तिसंभवम्।

स्वोदिता तु परा शक्तिस्तत्स्था तद्गर्भगा शिवा॥ ७-६॥

तां वहेन्मध्यमप्राणे प्राणापानान्तरे ध्रुवे ।

अहं भूत्वा ततो मन्त्रं तत्स्थं तद्गर्भगं ध्रुवम् ॥ ७-७ ॥

स्वोदितेन वरारोहे स्पन्दनं स्पन्दनेन तु ।

कृत्वा तमभिमानं तु जन्मस्थाने निधापयेत् ॥ ७-८ ॥

भावभेदेन तत्स्थानान्मूलाधारे नियोजयेत् ।

नादसूच्या प्रयोगेन वेधयेत् सूक्ष्मयोगतः ॥ ७-९ ॥

आधारषोडशं भित्त्वा ग्रन्थिद्वादशकं तथा ।

मध्यनाडिपथारूढो वेधयेत् परमं ध्रुवम् ॥ ७-१० ॥

तत्प्रविश्य ततो भूत्वा तत्स्थोऽसौ व्यापकः शिवः ।

सर्वामयपरित्यागान्निष्कलाक्षोभशक्तितः ॥ ७-११ ॥

पुनरापूर्य तेनैव मार्गेण हृदयान्तरम् ।

तत्र प्रविष्टमात्रं तु ध्यायेल्लब्धं रसायनम् ॥ ७-१२ ॥

विश्रामानुभवं प्राप्य तस्मात् स्थानात् प्रवाहयेत् ।

सर्वं तदमृतं वेगात् सर्वत्रैव विरेचयेत् ॥ ७-१३ ॥

अनन्तनाडिभेदेन अनन्तामृतमुत्तमम् ।

अनन्तध्यानयोगेन परिपूर्य पुरं स्वकम् ॥ ७-१४ ॥

अजरामरस्ततो भूत्वा सबाह्याभ्यन्तरं प्रिये ।

एवं मृत्युजिता सर्वं सूक्ष्मध्यानेन पूरितम् ॥ ७-१५ ॥

ततोऽसौ सिद्ध्यति क्षिप्रं सत्यं देवि न चान्यथा ।

यदिति प्रथमाधिकारनिर्दिष्टपरधामात्मवीर्यम्, स्वरूपमिति
विशेषानिर्देशात् सर्वस्य, स्वसंवेद्यं स्वप्रकाशम् न तु

स्वसंवेदनान्यप्रमाणप्रमेयम्

तस्य देवातिदेवस्य परापेक्षा न विद्यते ।

परस्य तदपेक्षत्वात् स्वतन्त्रोऽयमतः स्थितः ॥

इति कामिकोक्तनीत्याऽस्य भगवतः प्रमाणागोचरत्वात् अत एव

स्वतन्त्रात्मन्यवतिष्ठते न त्वन्यत्र तद्विविक्तस्यान्यस्याभावात्,

प्रत्युतान्यद्विश्वं तद्याप्तत्वात्तन्मयमेव संभवतीत्याह

स्वव्याप्तिसंभवम्, स्वव्याप्त्या संभवो विश्वरूपतयोन्मज्जनं यस्य ।

अस्य च भगवतः परा स्वातन्त्र्यात्मा शक्तिः स्वा अव्यभिचारिणी चासौ

उदिता प्रस्फुरद्रूपा, तत्रैव च भगवद्रूपे स्थिता, न

चाधाराधेयभावेन, अपि तु सामरस्येनेत्याह तद्गर्भगा । अतश्च शिवा

परमार्थशिवाभिन्नरूपत्वात् शिवा । एवं परं रूपं

भित्तिभूतत्वेन प्रकाश्य सूक्ष्मध्यानं वक्तुमुपक्रमते तामित्यादिना ।

तां परां चितिशक्तिम्, मध्यमप्राणे

सुषुम्नास्थोदानाख्यप्राणब्रह्मणि, वहेत् निमज्जितप्राणापानव्याप्तिं

उन्मग्नतया विमृशेत् । कथम् ? अहं भूत्वा,

देहादिप्रमातृताप्रशमनेन पूर्णाहन्तामाविश्येत्यर्थः । तत

उक्तवक्ष्यमाणवीर्यव्याप्तिकं मूलमन्त्रं तत्स्थं तद्गर्भगमिति

पराशक्तिसामरस्यमयम्, अत एव स्पन्दनमिति सामान्यस्पन्दरूपं कृत्वा

कथं ? स्वोदितेन स्पन्दनेन अप्राणाद्यवष्टम्भेन । एवं

मन्त्रवीर्यसारमामृश्य तमभिमानं तदसामान्यचमत्कारमयं स्वं
वीर्यं जन्माधारे आनन्दचक्रे निधापयेत् प्रतिष्ठापयेत्। कथम् ?
भावस्य देहप्राणादिमिताभिमानमयस्य भेदेन प्रशमनेन। ततोऽपि
मूलाधारे कन्दे तमभिमानं भावभेदेनैव नियोजयेद् निरूढं कुर्यात्
। ततोऽपि स्फुरत्तोन्मिषत्तारूपमन्त्रनाथप्राणसूच्या हेतुना कृतो यः
प्रकृष्टः क्रमात्क्रममूर्ध्वारोहात्मा योगस्तेन। तथा सूक्ष्मयोगत
इति उन्मिषत्स्फुरत्तोत्तेजनप्रकर्षेण। मध्यनाडीपथमारूढः
पूर्वोद्दिष्टकुलशास्त्रादिष्टमाधारषोडशकं
तथोपक्रान्तनिर्णेष्यमाणं ग्रन्थिद्वादशकं च भित्त्वा परमं
ध्रुवं द्वादशान्तधाम वेधयेदाविशेत्। तच्च प्रविश्य,
सर्वस्यामयस्य महामायापर्यन्तस्य बन्धस्य परित्यागात्, तत्रैव
ध्रुवपदे स्थितः सन्, व्यापको नित्योदितपराशक्तिसमरसः
परमशिवैकरूपो भूत्वा, तेनैव द्वादशान्तादन्तःप्रसृतेन मध्यमेन
मार्गेण हृदयमध्यमापूर्य परानन्दप्रसरणाच्छुरितं कृत्वा, तत्र
हृदि प्रविष्टमात्रं तत् परमानन्दरूपं रसायनमासादितं
ध्यायेद्विमृशेत् तावद्यावत्तत्र विश्रान्तिमेति,
ततस्तस्माद्धृदयादुच्छलितं तदमृतं प्रवाहयेत्
नानाप्रवाहाभिमुखं कुर्यात्। ततस्तेनैवामृतेन
अनन्तनाडीप्रवाहप्रसृतेन बहलध्यानध्यातेन सबाह्याभ्यन्तरं
स्वं पूरं देहं परिपूर्य तदनन्तरं सर्वममृतं वेगाद्

द्रुतप्रवाहेन सर्वरोमरन्ध्रैः सर्वत्र गोचरे रेचयेद्
अव्युच्छिन्नप्रवाहं प्रेरयेत्। एवं परवीर्यात्मना भगवता मृत्युजिता
प्रोक्तसूक्ष्मशाक्तानन्दध्यानेन यदा सर्वमापूरितं चिन्तयति योगी
तदासौ अजरामरो भूत्वा क्षिप्रं सिद्ध्यति
मृत्युजिद्भट्टारकतामाप्नोति। नात्र प्रमातृसुलभः संशयः
कार्यः॥ १५॥

एवं शाक्तानन्दमार्गावष्टम्भात्मककौलिकप्रक्रियोक्ताधारादिभेदेन
सूक्ष्मध्यानमुक्त्वा, स्थूलयुक्तिक्रमेण तन्त्रप्रक्रियोक्ताधारादिभेदेन
पूर्णासितामृतकल्लोलचिन्तनात्मसूक्ष्मध्यानं वक्तुमुपक्रमते

जन्मस्थाने समाश्रित्य स्पन्दस्थां मध्यमां कलाम्॥ ७-१६॥

तत्स्थं कृत्वा तदात्मानं कालाग्निं तु समाश्रयेत्।

गत्वा गृहीतविज्ञानं वीर्यं तत्रैव निक्षिपेत्॥ ७-१७॥

तद्वीर्यापूरिता शक्तिः क्रियाख्या मध्यमोत्तमा।

विज्ञानेनोर्ध्वतो भित्त्वा ग्रन्थिभेदेन चेच्छया॥ ७-१८॥

मूलस्पन्दं समाश्रित्य त्यक्त्वा वाहद्वयं ततः।

मध्यमार्गप्रवाहिन्या सुषुम्नाख्यां समाश्रयेत्॥ ७-१९॥

तामेवाश्रित्य विरमेत्तत्सर्वेन्द्रियगोचरात्।

तदा प्रत्यस्तमायेन विज्ञानेनोर्ध्वतः पुनः॥ ७-२०॥

ब्रह्मादिकारणानां तु त्यागं कृत्वा शनैः शनैः।

षण्णां शक्तिमतां प्राप्य कुण्डलाख्यां निरोधिकाम्॥ ७-२१
॥

मायादिग्रन्थिभेदेन हृदादिव्योमपञ्चकम्।

पूर्वं जन्मस्थानमानन्देन्द्रियमुक्तम् इह तु कन्दः, तत्र स्पन्दस्थामिति
स्पन्दाविष्टाम्, मध्यमां कलां प्राणशक्तिमाश्रित्य
मत्तगन्धस्थानसङ्कोचविकासाभ्यां शतश उन्मिषितां
सूक्ष्मप्राणशक्तिमध्यास्य, आत्मानं मनस्तदवसरे तत्स्थं

तन्निभालनैकाविष्टं कृत्वा, कालाग्निमिति पादाङ्गुष्ठाधारं
गत्वा, समाश्रयेत् भावनयाध्यासीत। तत्रैव च गृहीतविज्ञानं
वीर्यमिति कन्दभूम्यासादितं शाक्तस्पन्दात्म वीर्यं निक्षिपेद्
भावनाप्रकर्षेण स्फुटयेत्। इत्थं तद्वीर्येत्युक्तवीर्येणापूरिता
लब्धोदया, प्राणस्पन्दात्मा क्रियाशक्तिरुत्तमातिशयेनोद्गता सती
मध्यमा भवति, समस्तदेहस्य नाभिर्मध्यं तत्र प्राप्ता जायते।
कथम् ? इच्छया सङ्कोचक्रमोत्थोध्वारोहणप्रयत्नेन, विज्ञानेन च
भावनया, ऊर्ध्वत इत्युपरितनगुल्फजानुमेढ्रकन्दनाभ्याख्यानां
ग्रन्थीनां भेदेन वेधनव्यापारेण भित्त्वा, अर्थात्
तान्येवोर्ध्वस्थानान्याक्रम्य भेदिता माण्डलिका भूभुजा,
इतिवदद्भिः (वद् भिदिः) स्वीकारार्थः। अथ मूलस्पन्दं समाश्रित्येति
मत्तगन्धस्थानं विकासाकुञ्चनपरम्परापुरःसरं निरोध्य। एतच्च
श्रीस्वच्छन्दोक्तदिव्यकरणोपलक्षणपरम्। अत एव वाहद्वयं
पार्श्वनाड्यौ त्यक्त्वा परिहृत्य, तत इति
प्रोक्तेच्छाज्ञानावष्टम्भयुक्त्या, मध्यमार्गप्रवाहिण्या प्रोक्तया
मध्यप्राणब्रह्मशक्त्या सुषुम्नाख्यां नाडीं सम्यगाश्रयेत्।
तामाश्रित्य तत इत्यभ्यस्तात् सर्वेन्द्रियगोचराद्बहिरमेद्
अन्तर्मुखीकृतसर्वेन्द्रियस्तिष्ठेत्। तदा च प्रत्यस्ता प्रतिक्षिप्ता माया
प्राणादिप्रधानतात्माख्यातिर्येन तादृशा, प्रकाशानन्दात्मना
ज्ञानेन हृत्कण्ठादिगतसृष्ट्यादिसंवित्स्वभावब्रह्मादिकारणानि

क्रमात् त्यक्त्वा, वक्ष्यमाणमायादिग्रन्थिभेदेन सह

हृदादिव्योमपञ्चकं च त्यक्त्वा, षण्णां

ब्रह्मविष्णुरुद्रेश्वरसदाशिवशिवाख्यानां कारणानामूर्ध्वत

ऊर्ध्वे स्थितां कुण्डलाख्यां शक्तिं

शून्यातिशून्यान्तमशेषविश्वगर्भाकारात्मककुण्डलरूपतयावस्थित

अं समनाख्यां शक्तिं प्राप्य, विज्ञानेनोर्ध्वं विरमेद्

उन्मनापरतत्त्वात्मतामाविशेदिति दूरेण संबन्धः। विरमेदिति

पूर्वस्थमिहापि योज्यम्॥

तत्र निर्भेद्यग्रन्थ्यादीनां स्वरूपं तावत्क्रमेणादिशति

जन्ममूले तु मायाख्यो ग्रन्थिर्जन्मनि पाशवः॥ ७-२२॥

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।

कारणस्थास्तु पञ्चैवं ग्रन्थयः समुदाहृताः॥ ७-२३॥

इन्धिकाख्यस्तु यो ग्रन्थिर्द्विमार्गाशमनः शिवः।

तदूर्ध्वे दीपिका नाम तदूर्ध्वे चैव बैन्दवः॥ ७-२४॥

नादाख्यस्तु महाग्रन्थिः शक्तिग्रन्थिरतः परः।

जन्ममूलमानन्देन्द्रियम् तच्छरीरोत्पत्तिहेतुर्मायारूपतया मायाख्यो ग्रन्थिः, जन्मनि कन्दे पाशवः पशूनां संकुचितदृक्शक्तित्वात् पाश्यानामयमाधारनानानाडीप्राणादीनां प्रथमोद्भेदकल्पः। हृत्कण्ठतालुभ्रूमध्यललाटस्थानां ब्रह्मादीनां कारणानां पशुं प्रति सृष्ट्यादिकर्तृत्वेन निरोधकत्वाद् ग्रन्थिरूपकत्वात् तत्स्थाः पञ्च ग्रन्थयः निरोधिकोर्ध्वे

इन्धिका दीपिका चैव रोचिका मोचिकोर्ध्वगा। (१०-१२२६)

इति श्रीस्वच्छन्दे नादशक्तयो या उक्ताः, ता एवेह परचित्प्रकाशावारकरूपत्वाद् ग्रन्थय उक्ताः। तत्रेन्धिकाख्यो यो ग्रन्थिरसौ द्विमार्गाशमन इति निरोधिकास्पृष्टवामदक्षिणवाहनिःशेषप्रशमनहेतुः, अत एव शिव ऊर्ध्वैकमार्गारोहकत्वात् श्रेयोरूपः। तदूर्ध्वे किंचिद्दीप्तिहेतुत्वाद् दीपिकाख्यो ग्रन्थिः, अतोऽपि किंचिदधिकप्रकाशहेतुत्वाद् बैन्दवः। रोचिकेत्यन्यत्र योक्ता शक्तिस्तद्रूपो ग्रन्थिः। तदुपरि नादाख्यो महाग्रन्थिरिति। मोचिकोर्ध्वगेत्यन्यत्र यच्छक्तिद्वयमुक्तं तत्रोर्ध्वगा नादान्तेति तत्रैव योक्ता सैवेहान्तर्भावितमोचिका नादाख्यो

महाग्रन्थिरित्युक्तः। महत्त्वं चास्य ग्रन्थ्यन्तर्भावादेव। अतः परः शक्तिस्थानस्थो ग्रन्थिः शक्तिग्रन्थिः॥

यदेवं निर्णीतं तत्

ग्रन्थिद्वादशकं भित्त्वा प्रविशेत् परमे पदे॥ ७-२५॥

उन्मनापरतत्त्वात्मनि धाम्नि॥ २५॥

अत्र ब्रह्मादिकारणग्रन्थिभेदनादेव तदधिष्ठितहृदादिस्थानानि शक्तिग्रन्थिभेदेन च शक्तिस्थानं तदुपरि च व्यापिनीधामशिवस्थाने दलयेदित्याह

ब्रह्माणं च तथा विष्णुं रुद्रं चैवेश्वरं तथा।

सदाशिवं तथा शक्तिं शिवस्थानं प्रभेदयेत्॥ २६॥

अन्ते स्थानशब्दो ब्रह्मादिशब्दानामपि तत्स्थानप्रतिपादकत्वसूचनाय॥ २६॥

अथ पूर्वोद्दिष्टं शून्यपञ्चकं षट्चक्रं च प्रदर्शयति

खमनन्तं तु जन्माख्यं नाभौ व्योम द्वितीयकम्।

तृतीयं तु हृदि स्थाने चतुर्थं बिन्दुमध्यतः॥ ७-२७॥

नादाख्यं तु समुद्दिष्टं षट्चक्रमधुनोच्यते।

जन्माख्ये नाडिचक्रं तु नाभौ मायाख्यमुत्तमम्॥ ७-२८॥

हृदिस्थं योगिचक्रं तु तालुस्थं भेदनं स्मृतम्।

बिन्दुस्थं दीप्तिचक्रं तु नादस्थं शान्तमुच्यते॥ ७-२९॥

अनन्तवह्निश्वाश्रयत्वादनन्तम्। नादाश्रयत्वाद् नादाख्यम्।
नाडिप्रसरहेतुत्वात्,

ङाभिचक्रे कायव्यूहज्ञानम्। (पा। यो। ३-२५)

इति नीत्या समस्तमायाप्रपञ्चख्यातिहेतुत्वात्, योगिनां
चित्तैकाग्र्यप्रदत्वात्, प्रयत्नेन भेदनीयत्वात्, दीप्तिरूपत्वात्,
शान्तिप्रदत्वादिति क्रमेण नाडिचक्रादौ हेतवः। एतानि शून्यानि

सौषुप्तावेशप्रदत्वात्, चक्राणि तु भेदप्रसरहेतुत्वात् हेयानीति कृत्वा ॥ २९ ॥

तैः सह

पूर्वोक्तानि च सर्वाणि ज्ञानशूलेन भेदयेत्।

पूर्वोक्तनीत्याधारग्रन्थ्यादीनि। ज्ञानशूलं मन्त्रवीर्यभूतचित्स्फुरत्ता ॥

ज्ञानशूलोत्तेजने युक्तिमाह

आक्रम्य जन्माधाराख्यं तन्मूलं पीडयेच्छनैः ॥ ७-३० ॥

चित्तप्राणैकाग्र्येण कन्दभूमिमवष्टभ्य, तन्मूलमिति मत्तगन्धस्थानम्, शनैरिति सङ्कोचविकासाभ्यासेन, शक्त्युन्मेषमुपलक्ष्य पीडयेद् यथा शक्तिरूर्ध्वमुखैव भवति ॥ ३० ॥

अथ प्रसङ्गान्नानाशास्त्रप्रसिद्धान् पर्यायान् जन्माधारस्याह

जन्माधारस्य सुश्रोणि पर्यायान् शृण्वतः परम् ।

जन्मस्थानं तु कन्दाख्यं कूर्माख्यं स्थानपञ्चकम् ॥ ७-३१ ॥

मत्स्योदरं तथैवेह मूलाधारस्तथोच्यते ।

मरुदुद्भवहेतुत्वात्, मध्यनाडीकन्दरूपत्वात्, कूर्माकारत्वात्, पृथिव्यादिव्योमान्ततत्त्वपञ्चकस्थानत्वात्, मत्स्योदरवत् स्फुरणात्, मूलभूतत्वाच्च जन्मादि आख्यायते ॥

एवं महामाहात्म्याच्छास्त्रेषु निरुच्यते या कन्दभूः

तत्स्थां वै खेचराख्यां तु मुद्रां विन्देत योगवित् ॥ ७-३२ ॥

मुद्रया तु तया देवि आत्मा वै मुद्रितो यदा ।

तदा चोर्ध्वं तु विसरेद्विज्ञानेनोर्ध्वतः क्रमात् ॥ ७-३३ ॥

तत्स्थामिति कन्दभूमिविस्फुरितां शक्तिम्, मुदो हर्षस्य राणात्

पाशमोचनभेदद्रावणात्मत्वात् परसंविद्द्रविणमुद्रणाच्च मुद्राम्, खे बोधगगने चरणात् खेचर्याख्यां योगी लभेत। लब्धया तु तया यदा आत्माणुर्मुद्रितः तद्वशः संपन्नः, तदामन्त्रवीर्यस्फुरत्तात्मना विज्ञानेनोर्ध्वं द्वादशान्तं यावद्विसरेत् प्रसरेत्॥ ३३॥

एतदेव स्फुटयति

भिन्द्याद्भिन्द्यात् परं स्थानं यावत् स्वरवरार्चिते।

तत्स्थानं चैव संप्राप्य योगी समरसो भवेत्॥ ७-३४॥

निष्कलं भावमापन्नो व्यापकः परमः शिवः।

परं स्थानं द्वादशान्तम्। भिन्द्यादिति वीप्सया क्रमादित्युक्तिः स्फुटीकृता। समरस इति सर्वस्याधस्तनस्याध्वनस्तन्मयीभावप्राप्तेः। परमः शिव इति, न तु भेदवाद्युक्तव्यतिरिक्तमुक्तशिवरूपः॥

अथ श्लोकार्धेन परमशिवाभेदव्याप्तिमनुवदन् शक्तेरवरोहक्रमेण व्याप्तिमादेष्टुमुपक्रमते

एवं भूत्वा समं सर्वं निःस्पन्दं सर्वदोदितम् ॥ ७-३५ ॥

ततः प्रवर्तते शक्तिर्लक्ष्यहीना निरामया ।

इच्छामात्रविनिर्दिष्टा ज्ञानरूपा क्रियात्मिका ॥ ७-३६ ॥

एका सा भावभेदेन तस्य भेदेन संस्थिता ।

भूत्वेत्यन्तर्भावितणिजर्थः । तेन सर्वं समनान्तम्, एवं द्वादशान्तारोहणेन, समं समरसम्, निःस्पन्दं प्रशान्तकल्लोलम्, सर्वदोदितं प्राप्तपरचित्प्रकाशैक्यम्, भावयित्वा संपाद्य, तत एव द्वादशान्तधाम्नो लक्ष्यहीना परस्फुरत्तात्मा, निष्क्रान्त आमयो महामाया यस्यास्तादृशी महामायाद्युल्लासिका परा शक्तिः, प्रवर्तते समुन्मिषति इच्छा-ज्ञान-क्रियारूपतया क्रमेण स्फुरतीत्यर्थः । तत एवैका, तस्येति परमशिवस्य, संबन्धिना भावभेदेन एषणीयज्ञेयकार्यावभासनोदयवैचित्र्येण हेतुना, भेदेन संस्थिता गृहीतेच्छादिनानात्वा ।

यत एवं परमशिवाच्छक्तिः स्वयं प्रवर्तते, तेन

खेचरीमुद्रयापूर्य शक्त्यन्तं तत्र सर्वतः ॥ ७-३७ ॥

यावच्च नोदितश्चन्द्रस्तावत् सूक्ष्मं निरञ्जनम् ।

भावग्राह्यमसंदिग्धं सर्वावस्थोज्झितं परम् ॥ ७-३८ ॥

व्यापकं पदमैशानमनौपम्यमनामयम् ।

भवन्ति योगिनस्तत्तु तदारूढौ वरानने ॥ ७-३९ ॥

तत्र

बद्ध्वा पद्मासनं योगी नाभावक्षेश्वरं न्यसेत् ।

दण्डाकारं तु तावत्तन्नयेद्यावत् कखत्रयम् ॥

निगृह्य तत्र तत्तूर्णं प्रेरयेत् खत्रयेण तु ।

एतां बद्ध्वा महायोगी खे गतिं प्रतिपद्यते ॥ (७-१५-१७)

इति श्रीमालिनीविजयलक्षितया पूर्वोद्दिष्टखेचरीमुद्रया शक्त्यन्तं यावत्, सर्वतः सर्वप्रकारेणापूर्य, यावत् तत्र चन्द्र इत्यपानो नोदितो भवेत् तावत् तदारूढौ तच्छक्तिपदारोहे सति, योगिनः, सूक्ष्ममतीन्द्रियम्, निरञ्जनमनावरणम्, भावग्राह्यं स्वप्रकाशम्, असन्दिग्धं स्वविमर्शसारम्, सर्वाभिर्जागराद्यवस्थाभिरुज्झितम्, सर्वसामरस्यावस्थानात्परम्, दिग्देशाद्यनवच्छेदाद् व्यापकम्, परमेशानं स्वतन्त्रम्, अद्वितीयत्वाद् अनौपम्यम्, न विद्यते आमयो महामायावच्छेदो यतो भक्तिभाजां तदनामयम्, यत् परं धाम तद्भवन्ति तन्मया जायन्त इत्यर्थः ॥ ३९ ॥

एवं प्राप्तपरतत्त्वाभेदस्य योगिनः तत् प्रवर्तते शक्तिः इत्यनेन योन्मिषन्ती परा शक्तिरुक्ता

सा योनिः सर्वदेवानां शक्तीनां चाप्यनेकधा ।

अग्नीषोमात्मिका योनिस्तस्याः सर्वं प्रवर्तते ॥ ७-४० ॥

तत्र संग्रथिता मन्त्रास्त्राणवन्तो भवन्ति हि ।

सर्वेषां चैव संहारस्तदेव परमं पदम् ॥ ७-४१ ॥

तस्मात् प्रवर्तते सृष्टिर्विक्षोभ्य परमं शिवम्।

अनौपम्यामृतं प्राप्य बिन्दुं विक्षोभ्य लीलया॥ ७-४२॥

चन्द्रोदये तदा ख्याते परमामृतमुत्तमम्।

बहलामृतकल्लोलमनन्तं तत्र संस्मरेत्॥ ७-४३॥

तस्मात् प्राप्यामृतं शुद्धं स्वशक्त्या चैव कर्षयेत्।

मध्यमार्गेण सुश्रोणि कारणादि प्रभेदयेत्॥ ७-४४॥

आप्यायनं प्रकुर्वीत् स्थाने स्थाने ह्यनुक्रमात्।

यावद् ब्रह्मपदं प्राप्तं तस्मादाप्याययेदधः॥ ७-४५॥

जन्मस्थानपथाच्चैव कालाग्नौ तु प्रवर्तयेत्।

तदापूर्य समन्ताच्चु परिपूर्णं स्मरेत् पुरम्॥ ७-४६॥

सुषुम्नामृतेनाखिलं परिपूर्णं विभावयेत्।

अनन्तनाडिभिस्तत्र रोमकूपैः समन्ततः॥ ७-४७॥

निष्क्रम्य व्यापको भूत्वा ह्यमृतोर्मिभिराकुलम्।

अमृतार्णवसंरूढं मज्जन्तममृतार्णवे॥ ७-४८॥

तदूर्ध्वे ह्यमृतार्णं तु प्रद्रुतं व्यापकं शिवम्।

एवं समरसीभूतं ह्यमृतं सर्वतोमुखम्॥ ७-४९॥

इच्छाज्ञानक्रियारूपं शिवमात्मस्वरूपकम्।

निरामयमनुप्राप्य स्वानुभूत्या विभावयेत्॥ ७-५०॥

अमृतेशपदं सूक्ष्मं संप्राप्यैवामृतीभवेत्।

तदासावमृतीभूय मृत्युजिन्नात्र संशयः॥ ७-५१॥

कालजित् सुभगो धीरो मृत्युस्तं च न बाधते।

सर्वदेवानामित्यनाश्रितसदाशिवेश्वरानन्तरुद्रादीनाम्, शक्तीनामिति वामाज्येष्ठादीनां च, यतश्च सा शक्तिरग्नीषोमात्मिका योनिस्तत एव सोमप्रधाना, यतस्तस्याः सर्वं प्रवर्तते उद्भवति, अत एवाग्नीषोमात्मशक्तिप्रकृति विश्वमग्नीषोममयमेव। तथा चाग्निरप्याह्लादयति हिममपि च दहति, इति तत्त्वविद आहुः। किं च, तत्राग्नीषोमात्मशक्तिधाम्नि संग्रथितास्तद्वीर्यसारत्वेनोच्चारिता मन्त्रास्त्राणवन्तः सिद्धिमुक्तिदाः, इति शक्तेः स्थितिहेतुत्वमुक्तम्। तदेवेत्यग्नीषोमात्मनः शक्तेरग्निरूपत्वात् संहर्तृत्वं च। एवं सृष्टिस्थितिसंहारहेतुत्वं शक्तेः प्रदर्श्य प्रकृतमाह-तस्मादिति। यत एवंभूतैषा शक्तिस्तस्मात्परं शिवं विक्षोभ्य समनापदावरोहणेन सृष्ट्युन्मुखं कृत्वा, तत्रानौपम्यमिति परमानन्दमयममृतं प्राप्य, बिन्दुमिति महाप्रकाशात्म समनारूढं धाम, लीलया स्वातन्त्र्यक्रीडया, विक्षोभ्य सृष्टिप्रसरोन्मुखं विधाय, तदा चन्द्रोदयेऽपानोल्लासे ख्याते सति, तत एव शाक्ताद्धाम्न उदितं परमामृतमुत्तममानन्दरसप्रधानं बहला अमृतकल्लोलाः सुसितसुधाप्रसारा यस्य तादृक्, अनन्तमनवच्छिन्नम्, तत्र स्मरेद् ध्यायेत् । तस्मात् चन्द्रोदयाच्छुद्धममृतं प्राप्यान्तर्मुखीभूतया स्वशक्त्या

मध्यमार्गेण कर्षयेदधोऽधः प्रवर्तयेत्। तेन च कारणादीति
कारणानि ब्रह्मादीनि, आदिशब्दात् पूर्वोक्तं चक्राधारादि सर्वं
प्रभेदयेद् निषिञ्चेत्। एतदेवाप्यायनमित्यादिनानेन स्फुटीकृतम्।
ब्रह्मस्थानं हृद्धाम यावत्तदमृतं प्राप्तं भवति, ततोऽप्यधो
नाभेरधःस्थाने निषिच्य कालाग्न्यन्तमापूर्य समन्तात् परिपूर्णं
देहं स्मरेत्। ततः सर्वरोमकूपैः प्रसृत्यान्तर्बहिरासादितव्याप्ति
सर्वदिक्कममृतार्णवप्लावनसमरसीभूतपरमामृतरूपम्
इच्छाज्ञानक्रियाशक्तिकचितं परमशिवरूपं निरामयमात्मानं
चिन्तयेत्। एवं सूक्ष्मध्यानाद्विजितमृत्युरासादितपरमसौभाग्योऽमृते-
शतुल्यो भवति॥ ५१॥

उपसंहरति

कालस्य वञ्चनं सूक्ष्मं मया ते प्रकटीकृतम्॥ ७-५२॥

न कस्यचिन्मयाख्यातं त्वदृते भक्तवत्सले॥ ५३॥

तवैव परानुग्रहैकव्रताया एवं प्रकटीकृतम्॥ ५३॥

सूक्ष्मध्यानसमुल्लासिसुधाकल्लोलकेलिभिः।

प्लावयन्निखिलं नौमि नेत्रमुच्चैर्महेशितुः ॥

इति श्रीनेत्रतन्त्रे श्रीमहामाहेश्वराचार्यवर्यश्रीक्षेमराजविरचिते-
नेत्रोद्योते सूक्ष्मध्याननिरूपणं नाम सप्तमोऽधिकारः ॥ ७ ॥

अष्टमोऽधिकारः

नेत्रोद्योतः

अमन्दानन्दसन्दोहि स्पन्दान्दोलनसुन्दरम् ।

स्वज्योतिश्चिन्महाज्योतिर्नेत्रं जयति मृत्युजित् ॥

सूक्ष्मध्यानानन्तरं परध्याननिर्णयाय श्रीभगवानुवाच

अथ मृत्युञ्जयं नित्यं परं चैवाधुनोच्यते ।

यत्प्राप्य न प्रवर्तेत संसारे त्रिविधे प्रिये ॥ ८-१ ॥

अथशब्दः सूक्ष्मध्यानानन्तर्यप्रथनाय, नित्यमेव च यन्मृत्युञ्जयं कालग्रासि, परमनुत्तरं परमेशस्वरूपम्। त्रिविध इति मायान्तसदाशिवान्तशिवान्तभवाभवातिभवरूपे ॥ १ ॥

किं च

योगी सर्वगतो भाति सर्वदृक् सर्वकृच्छिवः।

तदहं कथयिष्यामि यस्मादन्यन्न विद्यते ॥ ८-२ ॥

यत्प्राप्य तन्मयत्वेन भवति ह्यजरामरः।

परयोगिनोऽस्य देहादिप्रमातृताऽस्पर्शाद् जरामरणादिकथैव न काचिदस्तीत्यर्थः ॥

तदेतद्वक्तुमुपक्रमते

यन्न वाग्वदते नित्यं यन्न दृश्येत चक्षुषा ॥ ८-३ ॥

यच्च न श्रूयते कर्णैर्नासा यच्च न जिघ्रति।

यन्नास्वादयते जिह्वा न स्पृशेद्यत् त्वगिन्द्रियम् ॥ ८-४ ॥

न चेतसा चिन्तनीयं सर्ववर्णरसोज्झितम् ।

सर्ववर्णरसैर्युक्तमप्रमेयमतीन्द्रियम् ॥ ८-५ ॥

यत्प्राप्य योगिनो देवि भवन्ति ह्यजरामराः ।

तदभ्यासेन महता वैराग्येण परेण च ॥ ८-६ ॥

रागद्वेषपरित्यागाल्लोभमोहक्षयात् प्रिये ।

मदमात्सर्यसंत्यागान्मानगर्वतमःक्षयात् ॥ ८-७ ॥

लभ्यते शाश्वतं नित्यं शिवमव्ययमुत्तमम् ।

पश्यन्त्यादित्रिरूपापि वाग् यन्न भाषते, यच्च बहिरन्तःकरणागोचरः, वर्णयन्तीति वर्णा वाचकाः, वर्ण्यन्त इति वर्णा वाच्याः, सर्वे च ते वर्णास्तेषां रसाः

प्रसरास्तैरुज्झितमवाच्यवाचकात्मेत्यर्थः। अथ च तैः सर्वैर्युक्तं
विश्वात्मकत्वात्, अतश्चातीन्द्रियत्वान्न प्रमेयमपि तु
परप्रमात्रेकरूपमिति पर्यवसितम्, यदेवंभूतं तत्त्वं प्राप्य
समाविश्य,

योगमेकत्वमिच्छन्ति। मा। वि। (४-४)

इति स्थित्या योगिनः परतत्त्वैकशालिनस्तत्त्वतो जरामृत्युरहिता भवन्ति
। तन्महताभ्यासेन

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते। (भ। गी। १२-२)

इति सततसमावेशप्रयत्नेन परेण वैराग्येण
दृष्टागमिकधराद्यनाश्रितान्तसमस्तभोगवैतृष्ण्येन,
अत एव रागद्वेषादिसर्वदोषप्रशमाच्च लभ्यते, मानाच्छङ्करपूजातो
तस्य क्षयात् शाश्वतमविवर्तात्मकम्, नित्यं लोकोत्तरं शिवं
परश्रेयोरूपमव्ययमपरिणामि, अतश्चोत्तमं सर्वोत्कृष्टम्॥

इयांश्चास्य स्फारोऽयम्

निमेषोन्मेषमात्रेण यदि चैवोपलभ्यते॥ ८-८॥

ततः प्रभृति मुक्तोऽसौ न पुनर्जन्म चाप्नुयात।

केनचिदिति मध्येऽध्याहार्यम्। उपलभ्यते समाविश्यते। ततःप्रभृति न तु कालान्तरे। मुक्तः स्थितैरपि देहप्राणैरगुणीकृतः। न च तद्देहत्यागे पुनर्जन्म देहान्तरसंबन्धमाप्नोति, अपि तु परमशिव एव भवति॥

ततश्च योगी

अष्टाङ्गेन तु योगेन प्राप्नुयान्नान्यतः क्वचित॥ ८-९॥

तमष्टाङ्गयोगमन्यशास्त्रप्रतिपादितरूपवैलक्षण्येन क्रमेणादिशति देवः

संसाराद्विरतिर्नित्यं यमः पर उदाहृतः।

भावना तु परे तत्त्वे नित्यं नियम उच्यते॥ ८-१०॥

स्पष्टम्॥ १०॥

मध्यमं प्राणमाश्रित्य प्राणापानपथान्तरम्।

आलम्ब्य ज्ञानशक्तिं च तत्स्थं चैवासनं लभेत॥ ८-११॥

प्राणापानमार्गयोः सव्यापसव्ययोरान्तरं मध्यनाड्यां भवं प्राणमित्यूर्ध्वंगामिनमुदानमाश्रित्य, ततश्च प्राणीयव्याप्तिनिमज्जनेन चिद्व्याप्त्युन्मज्जनाद् ज्ञानशक्तिमुन्मिषत्स्फुरत्तारूपां संविदमालम्ब्यावष्टभ्य, तत्स्थमेवासनं योगी लभते निजज्ञानशक्त्यासनासीनश्चिन्महेशरूपो भवतीत्यर्थः॥ ११॥

प्राणादिस्थूलभावं तु त्यक्त्वा सूक्ष्ममथान्तरम्।

सूक्ष्मातीतं तु परमं स्पन्दनं लभ्यते यतः॥ ८-१२॥

प्राणायामः स उद्दिष्टो यस्मान्न च्यवते पुनः।

प्राणादौ प्राणापानसमानेषु यः स्थूलो रेचकपूरकादिर्भावः स्वभावस्तं त्यक्त्वा उज्झित्वा, अथेत्येतत्स्थूलप्राणायामानन्तरभावि, सूक्ष्ममान्तरमिति मध्यपथेन रेचनाचमनादिरूपं च तं त्यक्त्वा,

यतो यस्मात् सूक्ष्ममप्यतीतं परममिति प्राणाद्यचित्स्फुरत्तात्म स्पन्दनं लभ्यते, तस्मात्तदेव परं स्पन्दनं यत् स एव स्थूलसूक्ष्मभेदभाजां प्राणानामायामः प्रशमितप्राधान्यावभासात्मा नियम उत्कृष्टतयादिष्टो निरूपितः। यस्मादिति यं प्राणायाममासाद्य न पुनश्च्यवते चित्प्रमातृमयतां न कदाचिज्जहाति ॥

शब्दादिगुणवृत्तिर्या चेतसा ह्यनुभूयते ॥ ८-१३ ॥

त्यक्त्वा तां प्रविशेद्धाम परमं तत्स्वचेतसा।

प्रत्याहार इति प्रोक्तो भवपाशनिकृन्तकः ॥ ८-१४ ॥

शब्दस्पर्शादीनां गुणानां सत्त्वादिरूपाणां या काचिद्वृत्तिर्दशा चेतसा संविदाऽनुभूयते, तां त्यक्त्वानादरेणापहस्त्य, स्वचेतसा विकल्पसंवित्परामर्शेनैव परचिद्धामप्रवेशो हीति यस्माच्चितिभूमेः प्रसृतस्य चित्तस्य तत्प्रतीपप्रापणात्मा प्रत्याहारोऽतश्च भवपाशानां निकृन्तकः ॥ १४ ॥

धीगुणान् समतिक्रम्य निर्ध्येयं चाव्ययं विभुम्।

ध्यात्वा ध्येयं स्वसंवेद्यं ध्यानं तच्च विदुर्बुधाः ॥ ८-१५

॥

धियो बुद्धेः सत्त्वादिगुणान् समतिक्रम्य समावेशेन प्रशमय्य,
निर्ध्येयमिति ध्येयेभ्यो नियत्याकृत्यादिरूपेभ्यो निष्क्रान्तं,
निष्क्रान्तानि च तानि यस्मात् तम्, विभुं व्यापकमव्ययं नित्यम्,
स्वसंवेद्यं स्वप्रकाशम् ध्येयं ध्यानार्हमथ चाध्येयमध्येतव्यम्
विम्रष्टव्यं स्मर्तव्यं च, अर्थाच्चिदानन्दघनं परमेश्वरं
ध्यात्वा विमृश्य ये बुधास्तत्त्वज्ञास्ते, तच्चेति तद्विमर्शात्मैव,
ध्यानं विदुरविच्छिन्नेन पारम्पर्येण जानन्ति । च एवार्थे ॥ १५ ॥

धारणा परमात्मत्वं धार्यते येन सर्वदा ।

धारणा सा विनिर्दिष्टा भवबन्धविनाशिनी ॥ ८-१६ ॥

येन योगिना सर्वदा परमात्मत्वं चैतन्यं धार्यते
समावेशेनावलम्ब्यते, तस्य या धारणा चैतन्यविमर्शनात्मा वृत्तिः,
सा भवबन्धविनाशहेतुर्धारणान्यधारणावैलक्षण्येन विनिर्दिष्टा
॥ १६ ॥

एवं यमनियमासनप्राणायामप्रत्याहारध्यानधारणा लोकोत्तरदृष्ट्या प्रतिपाद्य, समाधिमपि परस्वरूपविषयमाणवशाक्तशाम्भवोपायप्राप्यमनुपायं चादिशति श्लोकचतुष्केण

समं सर्वेषु भूतेषु आधानं चित्तनिग्रहः।

समाधानमिति प्रोक्तमन्यथा लोकदाम्भिकम्॥ ८-१७॥

सर्वप्राणिषु चित्तस्य समं वैषम्यप्रतिपत्तिनिग्रहात्म आधानं चित्तनिग्रहः समाधानमिति चोक्तम्। स्वात्मतुल्यताचिन्तनं यत्तत्समाधानं प्रोक्तम्। अन्यथा लोचननिमीलनादिप्रकारेणैतद्विपरीतं यत् समाधानं तत् लोकदम्भैकप्रयोजनम्॥ १७॥

एतद्ध्यानोपायकमाणवं समाधानम्, शुद्धविकल्पोपायं शाक्तम्। तदाह

स्वपरस्थेषु भूतेषु जगत्यस्मिन् समानधीः।

शिवोऽहमद्वितीयोऽहं समाधिः स परः स्मृतः ॥ ८-१८ ॥

सर्वमिदमहमेव,

इत्यहन्तेदन्तासामानाधिकरण्यात्मशुद्धविद्योत्थाध्यवसायरूपः

परः समाधिः स्मृतः पारम्पर्यतः प्रसिद्धः ॥ १८ ॥

अथैकवारोपायप्राप्यमपि पुनरुपायानपेक्षतयानुपायं

सततोदितं समाधिमादिशति

सम्यक्स्वरूपसंवेद्यं संविद्रूपं स्वभावजम् ।

स्वसंवेद्यस्वरूपं च समाधानं परं विदुः ॥ ८-१९ ॥

सम्यगेकवारोपायतः संवेद्यं स्फुरितं यत्स्वाभाविकं संविद्रूपं

चकासच्चिद्धाम, तत् स्वसंवेद्यस्वरूपमिति स्वप्रकाशं

नित्योदितत्वेनाव्युत्थानं समाधानम् ॥ १९ ॥

अविकल्पोपायं शाम्भवं समाधिमाह

राशिभ्यां चिज्जडाभ्यां च विचार्य निपुणं पदम् ।

यन्नित्यं शाश्वतं रूपं समाधानं तु तद्विदुः ॥ ८-२० ॥

जडराशिर्भुवनभावदेहादिः । चिद्राशिः सकलप्रलयाकलविज्ञानाकलमन्त्रमन्त्रेशमन्त्रमहेशशिवाख्यः प्रमातृवर्गः । ततो मध्यात् पदं विश्वप्रतिष्ठास्थानं निपुणं विचार्य बाढं विमृश्य यन्नित्यमविनाशि शाश्वतं विवर्तपरिणामशून्यं सदा स्वप्रकाशं च रूपमर्थात् स्फुरति, तत्समाधानं विदुस्तत्त्वज्ञाः ॥ २० ॥

अष्टाङ्गेन तु योगेन इत्युपक्रान्तमुपसंहरन् प्रकृते योजयति

एवमष्टाङ्गयोगेन स्वभावस्थं परं ध्रुवम् ।

दृष्ट्वा वञ्चयते कालममृतेशं परं विभुम् ॥ ८-२१ ॥

मृत्युजित् स भवेद्देवि न कालः कलयेच्च तम् ।

एवमित्युक्तरूपेण न त्वन्यशास्त्रोक्ताहिंसासत्याद्यात्मना, परममृतेशं चिन्नाथं परं

विभुमनाश्रितान्ताशेषकारणस्वामिनम्, दृष्ट्वा कालं वञ्चयति, अकालकलितचिदानन्दैकघन एव जायते। अत एव तत्त्वतोऽयमेव सङ्कोचात्ममृत्युविदलनाद् मृत्युजित्। सुचिरमपि स्थिरीकृतदेहस्तु न वस्तुतो मृत्युजिदित्याशयशेषः॥

किं च

तत्त्वषट्त्रिंशतस्त्यागाद् भुवनानन्त्यवर्जनात्॥ ८-२२॥

एकाशीतिपदोर्ध्वं वै वर्णपञ्चाशतः परम्।

व्यापकं सर्वमन्त्रेषु सर्वेष्वेव हि जीवनम्॥ ८-२३॥

अष्टात्रिंशत्कलोर्ध्वं तु सर्वान्तः सर्वमध्यगम्।

आदिर्मध्यं न चैवान्तो लभ्यते यस्य केनचित्॥ ८-२४॥

तदप्रमेयमतुलं प्राप्य सर्वं न लभ्यते।

पृथ्व्यादिशिवान्तानि तत्त्वानि, कालाग्न्याद्यनाश्रितान्तानि भुवनानि च

त्यक्त्वा नवात्मादिप्रक्रियया प्रणवादिपदानामकारादिवर्णपञ्चाशत
ईशानपुरुषाघोरादिकलाष्टात्रिंशतश्चोर्ध्वं सर्वमन्त्रव्यापकम्,
एवं च षड्विधाध्वोत्तीर्णम्, अतश्च सर्वजीवितभूतं
सर्वेषामन्तः पूर्वापरकोट्यात्म, तन्मयत्वादेव च विश्वस्य
सर्वमध्यगतम्, न चास्य केनाप्यादिमध्यान्ता लभ्यन्ते
दिक्कालादिकथोत्तीर्णत्वात्, अतश्चाप्रमेयम्, अद्वितीयत्वादतुलम्, प्राप्य
षड्विधाध्वमयदेहप्राणाद्युल्लङ्घनेन योगिभिरासाद्य,
सर्वमित्यध्वप्रपञ्चात्म निखिलं न लभ्यते न प्राप्यते तेन प्राग्वत्
नाव्रियते, अथ च काक्वा सर्वं न लभ्यते, अपितु लभ्यते (एव),
सर्वसर्वात्मामृतेशभैरवता विद्यत इत्यर्थः ॥

तथा

येनैकेन जगत् सर्वमप्रमेयेन पूरितम् ॥ ८-२५ ॥

तज्ज्ञात्वा मुच्यते क्षिप्रं घोरात् संसारबन्धनात् ।

ज्ञात्वा दाढ्र्येन निश्चित्य ॥

अपि च

तत्त्वत्रयविनिर्मुक्तं शाश्वतं चाचलं ध्रुवम् ॥ ८-२६ ॥

दिव्येन योगमार्गेण दृष्ट्वा भूयो न जायते ।

सर्वेन्द्रियविनिर्मुक्तमवेद्यं चाप्यनामयम् ॥ ८-२७ ॥

तत्त्वत्रयं नरशक्तिशिवाख्यम् । शाश्वतं विवर्तवाद इव
नासत्यविभक्तान्यरूपोपग्राहि, अचलमपरिणामि, ध्रुवं नित्यम्
इन्द्रियविनिर्मुक्तमनामयमिति मायेन्द्रियानावृतम्, अवेद्यं च, दिव्येन
योगमार्गेण विकल्पहानोन्मिषदविकल्पविमर्शावष्टम्भोपायेन,
दृष्ट्वा साक्षात्कृत्य, न पुर्जन्मैति ॥ २७ ॥

एवमाणवेन शाक्तेन शाम्भवेन चोपायेनासादितं परं तत्त्वं
मुक्तिदं न केवलमिहैवोपादेयमुक्तम्, यावत् सर्वशास्त्रेषु इत्याह

परमात्मस्वरूपं तु सर्वोपाधिविवर्जितम् ।

चैतन्यमात्मनो रूपं सर्वशास्त्रेषु कथ्यते ॥ २८ ॥

यत् सर्वैः समनान्तैरुपाधिभिरवच्छेदकैर्विशेषेण वर्जितं
तत्सङ्कोचासंकुचितं चैतन्यमात्मनो ग्राहकस्य रूपम्, तदेव
परमात्मनः परमशिवस्य स्वरूपम्, न तु व्यतिरिक्तं यथा भेदवादिनो
मन्यन्ते। अत एव शिवोऽहमद्वितीयोऽहमिति तात्त्विकसमाधिनिर्णयावसरे
उक्तम्। सर्वशास्त्रेषु चैतत्कथ्यते, न तु क्वचिदेवेत्यनेन
सिद्धान्तानामपि रहस्याद्वयसारता अन्तःसंभवन्त्यपि
गाढप्ररूढसांसारिकद्वैतवासनानां न स्फुटीकृता। यथोक्तं
श्रीकुलपञ्चाशिकायाम्

यन्नास्ति सर्वलोकस्य तदस्तीति विरुध्यते।

निगद्यते यदा देवि हृदये न प्ररोहति॥

एतस्मात् कारणाद्देवि देवताभिः प्रगोपितम्।

तेन सिद्धेन देवेशि किं न सिद्ध्यति भूतले॥

इति। तत एव समस्तशैवशास्त्रसारसंग्रहरूपेषु शिवसूत्रेषु
चैतन्यमात्मा इति प्रारम्भ एवोक्तम्॥ २८॥

एवंभूतमपि चैतदात्मनो रूपम्

निर्मलं न भवेद्देवी यावच्छक्त्या न बोधितम्।

शैवी मुखमिहोच्यते। (२०)

इति श्रीविज्ञानभट्टारकादिष्टनीत्या परमेश्वरस्यैव शक्त्यां शक्त्याभासात्मनोऽणोः स्वस्फुरत्ताप्रवेशनयाऽणुत्वं निमज्ज्य, परमशिवत्वमुन्मील्यते॥

ननु दीक्षयाभिव्यक्तशिवत्वा अपि मुक्तशिवा भिन्ना एव परमशिवात्, तत्कथं परमात्मस्वरूपैक्यमात्मचैतन्यस्योक्तम् इत्याशङ्कां शमयति

दीक्षाज्ञानादिना शोध्यमात्मानं चैव निर्मलम्॥ ८-२९॥

ये वदन्ति न चैवान्यं विन्दन्ति परमं शिवम्।

त आत्मोपासकाः शैवे न गच्छन्ति परं पदम्॥ ८-३०॥

दीक्षाज्ञानयोगचर्याभिः शोध्यमात्मानं निर्मलमन्यमेव परमशिवाद् व्यक्तिरिक्तमेव वदन्ति, न तु परमशिवं विन्दन्ति परमशिवरूपं

नासादयन्ति, ते आत्मोपासकाः शुद्धात्मतत्त्वाराधकाः शैवे यत्
परं पदं परमशिवत्वम्, तन्न गच्छन्ति नाप्नुवन्ति। यदि तु कदाचित्
तीव्रशक्तिपाताद् गच्छन्ति, तच्छैवेन शिवादिष्टाद्वयज्ञानेनैव न
त्वन्येन ज्ञानेनेति सप्तमीतृतीये तन्त्रेण योज्ये। तदुक्तं
श्रीस्वच्छन्दे समनान्तस्थशुद्धात्मनिर्णयावसरे

अविदित्वा परं तत्त्वं शिवत्वं कल्पितं तु यैः।

त आत्मोपासका शैवे न गच्छन्ति परं शिवम्॥ (४-३९२)

इति॥ ३०॥

एतदेव भङ्ग्यन्तरेण स्फुटयति

यद्वा तु परमाशक्तिः सर्वज्ञादिगुणान्विता।

आपादादिविकासिन्या न विकास्येत निर्मला॥ ८-३१॥

तावन्न निर्मलो ह्यात्मा बद्धः शैवे तदोच्यते।

तावच्छब्दापेक्षया यावच्छब्दोऽध्याहार्यः। तेनापादादि

पाङ्गुष्ठात्प्रभृति विकासिन्या प्राणप्राधान्यनिमज्जनेन चित्प्राधान्यमुन्मज्जयन्त्या दीक्षाज्ञानादिरूपया अनुग्रहिकया शक्त्या यावत् सर्वज्ञत्वसर्वकर्तृत्वस्वतन्त्रताद्यात्मा परमा शक्तिर्न विकास्येत नोन्मिष्येत, न तावदात्मा जीवो निर्मलः। यदा चैवं तदा शैवेऽसावात्मा जीवन्मुक्तेरनासादाद्बद्ध एवोच्यते॥

विकासितायाः शक्तेः स्वरूपं दर्शयति

यत्रस्थः पुरुषः सर्वं वेत्त्यतीतमनागतम्॥ ८-३२॥

सन्नियम्येन्द्रियग्रामं तत्तत्त्वं शक्तिलक्षणम्।

इन्द्रियाण्यन्तर्मुखीकृत्य यत्र तुटिपातात्मनि आद्योन्मेषस्थितौ लब्धावस्थितिर्योगी, अतीतानागतादि सर्वं वेत्ति, तत् प्रतिभात्म तत्त्वं शक्तिलक्षणम्॥

तथा

यत्र यत्र भवेदिच्छा ज्ञानं वापि प्रवर्तते॥ ८-३३॥

क्रियाकृत्यस्वरूपा वा तत्तत्त्वं शक्तिलक्षणम् ।

न कृत्यं निष्पाद्यं स्वरूपं यस्यास्तादृश्यकृत्रिमा निर्विकल्पा इच्छा ज्ञप्तिः स्फुरत्तात्मा क्रिया वा यत्र यत्रावसरे प्रवर्तते, तत्र तत्र तद् एषणीयाद्यनारूषितशुद्धेच्छादिमात्रात्मतत्त्वं शक्तिलक्षणम् ॥

तथा

व्यापकस्य यतो देवि चिद्रूपस्यात्मनः शिवात् ॥ ८-३४ ॥

प्रसरत्यद्भुतानन्दा सा शक्तिः परमा स्मृता ।

व्यापकचिन्मात्रमयतामात्मनो भावयतो योगिनो या आश्चर्यरूपा आनन्दात्मा शक्तिः शिवात् प्रसरत्युन्मिषति, सा परमा स्मृता तत्तत्त्वं शक्तिलक्षणमित्यर्थः ॥

एवं लक्षितशक्त्यवष्टम्भविस्फारेण

विप्रसार्य तमात्मानं सर्वज्ञादिगुणैर्गुणी ॥ ८-३५ ॥

साभासः कथ्यते देवि शिवः परमकारणम्।

सर्वज्ञादिगुणैरिति तद्विमर्शनेनात्मानं विप्रसार्य बहिरकल्पिता वृत्तिर्महाविदेहा यतः प्रकाशावरणक्षयः (यो। सू। ३-४३) इति स्थित्या विकास्य यो योगी तैरेव सर्वज्ञत्वादिगुणैर्गुणी संपन्नः, स सर्वज्ञत्वाद्याभासविमर्शनादेव साभासः शिवः कथ्यते॥

एतदेव स्फुटयति

सर्वज्ञः परितृप्तश्च यस्य बोधो ह्यनादिमान्॥ ८-३६॥

स्वतन्त्रो ह्यप्रलुप्तश्च यश्च वानन्तशक्तिकः।

शक्तिमान् गुणभेदेन स्वगुणान् विन्दते गुणी॥ ८-३७॥

पृथग्भेदविभेदेन नानात्वं विमृशेदिह।

स साभास इति प्रोक्तो निराभासस्तु कथ्यते॥ ८-३८॥

परितृप्तो नैराकांक्ष्येण चिदानन्दघनः, अनादिमान् न तु
भावनोत्थः, स्वतन्त्रो न तु भेदेश्वरवत् कर्ममलपरिपाकाद्यपेक्षः,
अप्रलुप्तो न तु ब्रह्मादिवत् स्वापाद्यावृतः, अनन्तशक्तिकः

शक्तयोऽस्य जगत्कृत्स्नम्।

इति स्थित्या मरीचिरूपाशेषविश्वशरीरः, शक्तिमानिति
समुत्पन्नयथालक्षितपरशक्तिस्वरूपः, गुणानां सत्त्वरजस्तमसां
भेदेन चिद्भुवि देहादिप्रमातृतानिमज्जनोत्थेन विदारणेन, स्वगुणान्
सर्वज्ञत्वादीन् लभते। तैरेव च गुणैर्गुणी, भेदानां
सर्वज्ञत्वादिविशेषाणां व्याख्यातदृशा व्यावृत्तिकृतो यः
पृथग्विभेदस्तेन नानात्वं विचित्राभासरूपतां य आत्मनो विमृशेत्
स साभास इत्युक्तः। निराभासस्तु उच्यते॥

तमाह

नाहमस्मि न चान्योऽस्ति निराभासस्तदा भवेत्।

सावस्था परमा प्रोक्ता शिवस्य परमात्मनः॥ ८-३९॥

आभासेभ्यो ग्राह्यग्राहकविमर्शात्मकेभ्यो निष्क्रान्तः
चिद्विमर्शैकपरमार्थः। तदुक्तं श्रीप्रत्यभिज्ञायाम्

शर्वथा त्वन्तरालीनानन्ततत्त्वौघनिर्भरः।

शिवश्चिदानन्दघनः परमाक्षरविग्रहः॥ (४-१।१४)

इति॥ ३९॥

एतद्दशासमापन्नस्य च योगिन ईदृशी स्फुरत्तेत्याह

नाहमस्मि न चान्योऽस्ति ध्येयं चात्र न विद्यते।

आनन्दपदसंलीनं मनः समरसीगतम्॥ ८-४०॥

अहमिति देहादिग्राहकः। अन्यो मद्व्यतिरिक्तो नीलादिः।
ध्येयमित्यनुग्राहकत्वेन बुद्ध्योपस्थापितम्॥ ४०॥

एतत्पदलाभाय शाम्भवोपायमादिशति देवः

नोर्ध्वे ध्यानं प्रयुञ्जीत नाधस्तान्न च मध्यतः।

नाग्रतः पृष्ठतः किञ्चित् पार्श्वयोरुभयोरपि ॥ ८-४१ ॥

नान्तःशरीरसंस्थाने न बाह्ये भावयेत् क्वचित् ।

नाकाशे बन्धयेल्लक्ष्यं नाधो दृष्टिं निवेशयेत् ॥ ८-४२ ॥

न चाक्ष्णोर्मीलनं किञ्चिन्न किञ्चिद् दृष्टिबन्धनम् ।

अवलम्बं निरालम्बं सालम्बं न च भावयेत् ॥ ८-४३ ॥

नेन्द्रियाणि न भूतानि शब्दस्पर्शरसादि यत् ।

सर्वं त्यक्त्वा समाधिस्थः केवलं तन्मयो भवेत् ॥ ८-४४ ॥

ऊर्ध्वे द्वादशान्ते, अधः कन्दादौ, मध्ये हृदादौ, अग्रतः
पृष्ठतः पार्श्वयोः, तत्पुरुषसद्योजातादिरूपम् । अन्तःशरीर इति

आमूलात्किरणाभासां सूक्ष्मात्सूक्ष्मतरात्मिकाम् ।
चिन्तयेत्तां द्विषट्कान्ते शाम्यन्तीं भैरवोदयः ॥ (वि । भै ।

२८)

इतिवत्। न बाह्य इति

वस्त्वन्तरे वेद्यमाने सर्वविद्येषु शून्यता।

तामेव मनसा ध्यायन् विदितोऽपि प्रशाम्यति ॥(वि। भै। १२२)

इतिवत्। नाकाश इति

तेजसा सूर्यदीपादेराकाशे शबलीकृते।

दृष्टिं निवेश्य तत्रैव स्वात्मरूपं प्रकाशते॥ (वि। भै।
७६)

इतिवत्। नाध इति

कूपादिके महागर्ते स्थित्वोपरि निरीक्षणात्।

अविकल्पमतेः सम्यक् सद्यश्चित्तलयः स्फुटम्॥ (वि। भै। ११५)

इतिवत्। न चाक्ष्णोर्मीलनमिति

एवमेव निमील्यादौ नेत्रे कृष्णाभमग्रतः।

प्रसार्य भैरवं रूपं भावयंस्तन्मयो भवेत्॥ (वि। भै। ८८)

इतिवत्। न दृष्टिबन्धनमिति

निर्वृक्षगिरिभित्त्यादिदेशे दृष्टिं विनिक्षिपेत्।

निलीने मानसे भावे वृत्तिक्षीणः प्रजायते॥ (वि। भै। ६०)

इतिवत्। अवलम्ब्यत इति अवलम्बो ध्येय आकारस्तम्

भावे त्यक्ते निरुद्धा चिन्नैव भावान्तरं ब्रजेत्।

तदा तन्मध्यभावेन विकसत्यतिभावना॥ (वि। भै। ६२)

इतिवत्। निरालम्ब इति

उभयोर्भावयोर्ज्ञाने ज्ञात्वा मध्यं समाश्रयेत्।

युगपच्च द्वयं त्यक्त्वा मध्ये तत्त्वं प्रकाशते॥ (वि। भै। ६१)

इतिवत्। सहालम्बेन वर्तते सालम्बं साकारं ज्ञानम्

इच्छायामथवा ज्ञाने जाते चित्तं निवेशयेत्।

तत्र बुद्ध्यानन्यचेतास्ततः स्यादात्मदर्शनम्॥ (वि। भै। ९८)

इतिवत्। नेन्द्रियाणि न भूतानीति तत्तद्धारणापटलोक्तनीत्या सर्वं
त्यक्त्वा समाधिस्थ
इति अकिञ्चिच्चिन्तकत्वेन स्वस्वरूपविमर्शनप्रवणस्तन्मय
इत्यानन्दपदसंलीनसमरसज्ञानमयः॥ ४४॥

या चैवंभूता दशा

सावस्था परमा प्रोक्ता परस्य परमात्मनः।

निराभासं पदं तच्चु तत्प्राप्य विनिवर्तते॥ ८-४५॥

सांसारिकी स्थितिमुज्झति॥ ४५॥

अतश्च यः

भावयेदेवमात्मानमात्मनो भावनाबलात्।

स गच्छेत् परमं शान्तं शिवमत्यन्तनिर्मलम् ॥ ८-४६ ॥

आत्मनो निर्विकल्पसंवेदनस्य या भावना विकल्पहानेन संपादना, तस्या यद्बलं विमर्शदार्ढ्यं तेन भावयेत् ॥ ४६ ॥

किं च

तत्तत्त्वमेकं सर्वत्र भवति(ते) मृत्युजिच्छिवम् ।

तच्चामृतेशं परमं तृतीयं पदमुत्तमम् ॥ ८-४७ ॥

आख्यातं तव देवेशि किमन्यत् कथयामि ते ।

सर्वत्र क्षित्याद्यनाश्रितान्ते, तदेवैकमद्वितीयम्, तत्त्वं पारमार्थिकं स्वरूपम्, शिवं श्रेयोरूपम्, मृत्युजिद्भवति । तृतीयमिति प्रोक्तस्थूलसूक्ष्मज्ञानद्वयापेक्षया, तवेत्यनुग्रहैकपरायाः, किमन्यत् कथयामीति नातोऽन्यद्रहस्यं कथनीयं किञ्चिदस्तीत्यर्थः ॥

एतदुपसंहरति

एवं मृत्युजिता सर्वं ध्यात्वा व्याप्तं विमुच्यते ॥ ८-४८ ॥

योगी ॥ ४८ ॥

एतच्च

सर्वकालं तु कालस्य वञ्चनं कथितं प्रिये ।

अकालकलितचिद्धामसमावेशोपदेशात् ॥

प्रकृतमुपसंहृत्य पूर्वप्रस्तुतमुपसंहरति

एवं तु त्रिविधं देवि मया ते प्रकटीकृतम् ॥ ८-४९ ॥

कालस्य वञ्चनं नाम ॥ ॥ ॥ ॥ ॥

एष च

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥योगः परमदुर्लभः ।

किं च

अनेनाभ्यासयोगेन मृत्युजिद् भवति(ते) नरः ॥ ८-५० ॥

न केवलमात्मनः, यावत्

अनेनैव तु योगेन लोकानुग्रहकाम्यया ।

भवते मृत्युजिद्योगी सर्वप्राणिषु सर्वदा ॥ ८-५१ ॥

एतज्ज्ञाननिष्ठो विश्वानुग्रहकरणक्षम इत्यर्थः ।

यत्त्वत्राधिकारे परं ज्ञानमुक्तम्

एष मृत्युञ्जयः ख्यातः शाश्वतः परमो ध्रुवः ।

अस्मात् परतरो नास्ति सत्यमेतद्वदाम्यहम् ॥ ८-५२ ॥

शिष्याणामत्रार्थे दृढ आश्वासो

जायतामित्याशयेनादरादुक्तमर्थमत्युपादेयत्वात् पुनः
पुनरादिशति

यत्परामृतरूपं तु त्रिविधं चोदितं मया।

तदभ्यासाद् भवेज्जन्तुरात्मनोऽथ परस्य वा॥ ८-५३॥

अमृतेशसमो देवि मृत्युजिन्नात्र संशयः।

किञ्चेमं मृत्युजिन्नाथम्

येन येन प्रकारेण यत्र यत्रैव संस्मरेत्॥ ८-५४॥

तेन तेनैव भावेन स योगी कालजिद् भवेत्।

येन येनेत्याणवेन शाक्तेन शाम्भवेन वा। यत्र यत्रेति नात्र
देशकालावस्थादिनियम इत्यर्थः॥

अयं च योगी

यत्र यत्र स्थितो वापि येन येन व्रतेन वा ॥ ८-५५ ॥

येन येन च योगेन भावभेदेन सिद्ध्यति ।

येन येन योगेन तत्तत्संहितासु योगपादोक्तेन,
भावभेदेनेत्येतत्तत्त्वनिष्ठभावनाविशेषेण ॥

यच्चेदममृतेशनाथाख्यं परं तत्त्वम्

तदेकं बहुधा देवि ध्यातं वै सिद्धिदं भवेत् ॥ ८-५६ ॥

द्वैताद्वैतविमिश्रे वा एकवीरेऽथ यामले ।

सर्वशास्त्रप्रकारेण सर्वदा सिद्धिदं भवेत् ॥ ८-५७ ॥

एकमिति पराद्वयस्वतन्त्रचित्सतत्त्वम्, अत एव
बहुधेत्येतत्स्वातन्त्र्यावभासितभाविपटलवक्ष्यमाणश्रीसदाशिवतुम्बु
उरुभैरवकुलेश्वरादिरूपतया ध्यातं सिद्धिं ददात्येवेत्यर्थः ।
परमाद्वैतरूपत्वाच्चास्य नाथस्य
द्वैताद्वैतादिसर्वप्रकारक्रोडीकारित्वं न विरुध्यते । वक्ष्यति

चैकविंशाधिकारे

अद्वैतं कल्पनाहीनं चिद्घनम्। (२१-२३)

इति ॥ ५७ ॥

किं च

चिन्तारत्नं यथा लोके चिन्तितार्थफलप्रदम्।

तथैव मन्त्रराजस्तु चिन्तितार्थफलप्रदः ॥ ८-५८ ॥

अत्रत्य इत्यर्थः ॥ ५८ ॥

किं च

मन्त्राणां सप्तकोटीनामालयः परमो बली।

तेषामपि परार्द्ध्यैकवीर्यत्वात् ॥

अपि च

भावहीनास्तु ये मन्त्राः शक्तिहीनास्तु कीलिताः ॥ ८-५९ ॥

वर्णमात्राविहीनास्तु गुर्वागमविवर्जिताः ।

भ्रष्टाम्नायविहीना ये आगमोज्झितविघ्निताः ॥ ८-६० ॥

न सिद्ध्यन्ति यदा देवि जप्ता इष्टाः सहस्रशः ।

असिद्धा रिपवो ये च सर्वांशकविवर्जिताः ॥ ८-६१ ॥

आद्यन्तसंपुटेनैव साद्यर्णेन तु रोधिताः ।

मन्त्रेणानेन देवेशि अमृतेशेन जीविताः ॥ ८-६२ ॥

सिद्ध्यन्ति ह्यप्रयत्नेन जप्ता इष्टा न संशयः ।

ध्याताः सर्वप्रदा देवि भवन्ति न वचोऽनृतम् ॥ ८-६३ ॥

भावहीना अज्ञातवीर्याः, शक्तिहीनाः साञ्जनाः । यथोक्तम्

शाङ्गनास्तेऽण्डमध्यस्थाः सात्त्वराजसतामसाः ।

इति । कीलिता व्यत्यस्तवर्णपदाः, गुर्वाम्नायविवर्जिताः शिष्यैः स्वयमेव पुस्तकाद् गृहीताः, भ्रष्टाम्नाया अज्ञातसंहितोत्थानाः, तत एव विनष्टाः, आगमोज्झितैर्विघ्निता नित्यं क्षुद्रसिद्धिविनियोगेन विघ्नाभिभूताः कृताः । असिद्धा रिपवो ये इति नामाक्षरान्मन्त्राक्षरं मातृकाक्रमेणाङ्गुलिपर्वचतुष्टये पुनःपुनरावर्तनया गण्यमानं यदि (प्रथमं पर्व स्पृशति तदा सिद्धं भवति यदि) द्वितीयं पर्व स्पृशति, तदा सिद्धं साध्यं तदुच्यते । यदि तृतीयं पर्व स्पृशति, तदा सुसिद्धं भवति । अथ चतुर्थं पर्व स्पृशति, तदास्य विरुध्यते । सर्वे अंशका भावस्वभावपुष्पपाताद्याख्याः । एवमादि च श्रीस्वच्छन्दादेर्ज्ञेयम् । एवमीदृशा अपि मन्त्रा नेत्रनाथसंपुटीकारेण इष्टा ध्याता जप्ताश्च सर्वसिद्धिप्रदा भवन्ति । न संशय इति, न वचोऽनृतमिति चोक्त्यानाश्वस्तानामप्याश्वासं रोहयति ॥ ६३ ॥

उपसंहरति

इति सर्वं समाख्यातं रहस्यं परमं प्रिये ॥ ६४ ॥

प्रथमाधिकारे यत् परमं रहस्यं प्रश्नितम् तदित्युक्तदृशा सर्वं समाख्यातमिति

शिवम् ॥ ६४ ॥

चिदानन्दघनं धाम शाङ्करं परमामृतम् ।

मृत्युजिज्जयति श्रीमत् स्वावेशेनोद्धरज्जगत् ॥

इति श्रीनेत्रतन्त्रे श्रीमहामाहेश्वराचार्यवर्यश्रीक्षेमराजविरचित-
नेत्रोद्योते अष्टमोऽधिकारः ॥ ८ ॥

नवमोऽधिकारः

नेत्रोद्योतः

स्वच्छस्वच्छन्दचिन्नेत्रं चित्रानुग्रहहेतुतः ।

सदाशिवादिभी रूपैः प्रस्फुरज्जयति प्रभुः ॥

****
**
** j~naanakaarikaa of the school of matsendryanatha edited by P.C. Bagchi, Calcutta, 1934
**
**
** Data entered by the staff of Muktabodha
**
*
*
**
** Encoded in Velthius transliteration
****
****

ज्ञानकारिका

प्रथमः पटलः

ॐ नमः शिवाय। सिद्धेभ्यो पुरुषेभ्यो नमः।

श्रीशङ्करपादेभ्यो नमः। अप्रतिहततत्त्वेभ्यो नमः।

अथातः संप्रवक्ष्यामि ज्ञानसर्वं (सु)भाषितम्।

कारिका श्री(ज्ञाना)ख्यातं विसर्ज ज्ञानकारिका(म्) ॥ १/१ ॥

कारिकानाम विज्ञानं श्रूयन्ते च ॥ ॥ ।वल ।

साम्प्रतं कथयिष्यामि योगिनां युक्तकारणम् ॥ १/२ ॥

मुक्तिमार्गी च (सर्व)तो सर्वेन्द्रियविवर्जिताः ।

पञ्चपञ्चविनिर्मुक्तो ॥ ॥ ॥ ॥ ॥ ॥वर्जितम् ॥ १/३ ॥

एते सुरास्तं ज्ञानं मुक्ति ॥ ॥ ॥ ॥वान् यथास्थितः ।

सर्वव्या(धि)विनिर्मुक्तं यच्च इन्द्रियगोचर(म्) ॥ १/४ ॥

द्वादशान्तं तथा ॥ ॥ ॥ ॥ ॥ ॥ ॥शान्तं तथैव च ।

द्वादशान्तं कलाशतं वर्णाक्षरविवर्जितम् ॥ १/५ ॥

सर्वज्ञश्च सदा शान्तं (सर्वा)श्रवविवर्जितम् ।

ब्रह्मा विष्णुस्तथा रुद्र ईश्वरः शिव एव च ॥ १/६ ॥

मूर्तिरूपं स्थितं हेतुरनुत्तरं यथास्थितः ।

रूपकायः सदातीतं मन्त्रतन्त्राविवर्जितम् ॥ १/७ ॥

आत्मापरविनिर्मुक्तं पक्षातीतं श्रयम् ।

॥ लक्षणा ॥ १/८ ॥

सर्वद्वन्द्वविनिर्मुक्तं निश्चितन्तु निराकुलम् ।

साकुलत्वं यदा चित्तं विषयासक्तचेतसाम् ॥ १/९ ॥

तदा भ्रमन्ति संसारं मायामलविमोहिताः ।

एतद्द्वन्द्वसमाख्यातं संसारस्य तु निर्णयम् ॥ १/१० ॥

साम्प्रतं कथयिष्यामि मुक्तिस्तदस्तु दुर्लभम् ।

येन विज्ञानमात्रेण मुक्तिर्भवति योगिनाम् ॥ १/११ ॥

सर्वसंसाररहित-मुक्तिश्चैव निराकुलम्।

निश्चितं निश्चलं साम्यं निर्द्वन्द्वं च निराकुलम्॥ १/१२॥

भवेन् मोक्षो नराणाञ्च द्वन्द्वभावविवर्जितम्।

निश्चित्तं चित्तरहितं कारिकाज्ञानमुत्तमम्॥ १/१३॥

एतद्भेदं मयाख्यातं मोक्षस्यैव तु निर्णयम्।

सर्वाश्रयविनिर्मुक्तं चित्ताश्चै(व) निराश्रयम्॥ १/१४॥

चित्ताश्रयं भवेद्धर्मं निराश्रयं मोक्षदं स्मृतम्।

देवो देवी तथान्यश्च धर्माधर्मविवर्जितम्॥ १/१५॥

धर्माधर्माश्रयं प्रोक्तं संसारस्य तु बन्धनम्।

आश्रयं बन्धमित्युक्तं मुक्तिश्चैव निराश्रयम्॥ १/१६॥

निराश्रयं भवेत्तत्त्वमचिन्त्यमुक्तिलक्षणम्।

विषयावस्थं यदा चित्तं द्वन्द्वमुक्तिविवर्जित(म्)॥ १/१७॥

तदा भ्रमति संसारं यत्तं निश्चयतालयः।

मनोऽवस्थाविनिर्मुक्तं यावत्तं चञ्चलीभवेत्।

कथन्तं निश्चलं देवि ज्ञातव्यं ज्ञानकारिके॥ १/१८॥

इति ज्ञानकारिकायां मोक्षाधिकारः प्रथमः पटलः।

द्वितीयः पटलः

अतः परं प्रवक्ष्यामि ज्ञानं त्रैलोक्यदुर्लभम्।

कारिकातत्त्वसद्भावं सिद्धनाथकुलोद्भवम्॥ २/१॥

चन्द्रसूर्यविनिर्मुक्तं द्वारणाक्षविवर्जितम् (१)।

पृथिव्यापस्तं तथा योगी वायुराकाशमेव च॥ २/२॥

पञ्चभिराहेतो देहो श्रूयते तत्त्वनायके।

सर्वेषां व्यापकः शान्त व्याप्ती तस्य न विद्यते॥ २/३॥

व्यापकत्वे स्थितः साक्षाद्यथा क्षीरेषु सर्पिषः।

कथितं तत्त्वभिर्वस्तु ज्ञानरत्नं सुदुर्लभम्॥ २/४॥

आत्मापरविनिर्मुक्तं चित्तं चैव निराश्रयम्।

चित्ताश्रयं भवेद्द्वन्द्वं निराश्रयञ्चमौषदम्(?)॥ २/५

॥

मनसस्तु विधं प्रोक्तं राजसन्तामसन्तथा।

सात्त्विकन्तु तृतीयञ्च त्रिभिर्धर्मेण लक्षणम्॥ २/६॥

तामसं चञ्चलं क्षुद्रं राजसङ्गतिरागतिः।

सात्त्विकं तृतीयं ज्ञेयं धर्मयुक्तं सदा स्थितम्॥ २/७॥

चतुर्थन्तु मनश्चैव कथयामि विशेषतः।

गुणत्रयविनिर्मुक्तं सदा निर्वाणलक्षणम्॥ २/८॥

उत्तमोत्तमचतुर्थन्तु येन संशुद्धचेतसा।

सर्वाग्निविनयातीतमिन्द्रियातीतमव्ययम्॥ २/९॥

अनाभ्यासं सदा तत्त्वं सर्वचिन्ताविवर्जितम्।

चित्ताभावविनिर्मुक्तं निमित्तं तत्त्वलौकिकम्॥ २/१० ॥

अभावं भावनातीतं चित्ताचित्तविवर्जितम्।

चित्ताद्यचिन्तितं ज्ञानमवाच्यज्ञाननिर्णयम्॥ २/११ ॥

यथैव सदात्युक्ताः तावच्चित्तं सुचञ्चलम्।

चञ्चलं भावमित्युक्तमचलं मुक्तिलक्षणम्॥ २/१२ ॥

चित्तायुक्तं यदा चित्तं तदासौ चञ्चलं स्मृतम्।

चित्तातीतं यदा चित्तं निश्चितमचलं भवेत्॥ २/१३ ॥

सर्वचिन्ताविनिर्मुक्तमभावे निश्चलं भवेत्।

न योगाध्यातचित्तस्तु न च लक्षणसाधकम्॥ २/१४ ॥

न निरोधो भवेत् तत्र न कायशून्यमेव च।

न बहिरन्तमन्तस्थं न चान्त आदिमध्यगः॥ २/१५ ॥

न तेजो वायुराकाशं पृथिव्या आपभावना।

न बुद्धिर्न चाहंकारो न मन इन्द्रियो न च॥ २/१६ ॥

न चित्ताचित्तकस्तत्त्वं चिन्तातीतं स्थितं सदा।

न चिन्ता यस्तु विज्ञेया ज्ञातव्य कालशासनः॥ २/१७ ॥

यो सो निश्चिन्तसर्वज्ञः समाधिपरमेश्वरः।

ज्ञातव्यं मोक्षसद्भावं गुप्तभेदप्रकाशितम्॥ २/१८ ॥

संसारार्णवनिर्मुक्तं कल्पनातीतगोचरम्।

निर्विकल्पं सदा ज्ञानं कथितं ज्ञानकारिकम्॥ २/१९ ॥

चेतनाचेतना चैव कल्पना भावनास्तथा।

धारणाधरविन्यासचन्द्रसूर्याग्निमण्डले ॥ २/२० ॥

वायुराकाशस्तथा सृत्याः ब्रह्मा रुद्रादिदेवताः।

सर्वे ते कल्पना प्रोक्तं निर्विकल्पस्तथान्यथा ॥ २/२१ ॥

कल्पनाज्ञानयुक्तास्तु भ्रमन्ति घटयन्त्रवत्।

परिपूर्णं कथं तेषां सिद्धक्रमविवर्जितम्॥ २/२२ ॥

पतन्ति क्षिप्रं संसारे चित्तज्ञानेन रञ्जितः।

न यान्ति चेह संसारे ये स्थिता उत्तमं पदम्॥ २/२३ ॥

नरके गमनन्तस्य न स्वर्गे गमनन्तथा।

पाशद्वयविनिरूपस्तु धर्माधर्मनिबन्धने ॥ २/२४ ॥

ज्ञानखड्गेन छित्वा पाशद्वयनिबन्धनम्।

अन्धपाशं यदा चित्तं कुतो गच्छन्ति योगिनः॥ २/२५ ॥

धर्माधर्मद्वयः पाशो पतन्त्युत्पतन्ति च।

तेन पाशेन बद्धस्तु भुञ्जते कर्मसञ्चयम्॥ २/२६ ॥

धर्मेण भुञ्जते स्वर्गमधर्मं नरकादिषु।

धर्माधर्मौ तु द्वौ योऽसौ त्रैलोक्यस्य निबन्धनम्॥ २/२७ ॥

धर्माधर्मं यदा त्यक्तं क्षिप्रं मुञ्चन्ति मानवाः।

धर्मा चैव अधर्मा द्वौ द्विविधं परिकीर्तितम्॥ २/२८ ॥

सबा(ह्य)भ्यन्तरचेतः धर्माधर्मप्रतिष्ठितम्।

अध्यात्मजातसद्भावं योगिनामेवसंस्थितः॥ २/२९ ॥

लौकिकास्थलकर्मञ्चाध्यात्मकस्येदं सूक्ष्मम्।

आध्यात्मिके चैव धर्माधर्मस्थितिः सदा ॥ २/३० ॥

ऊद्ध्र्वचारो भवेद्धर्मोऽद्वयस्योऽधर्मलक्षणम्।

धर्माधर्मक्षये क्षीणे मुच्यते सर्वैर्धनैः (?) ॥ २/३१ ॥

धर्माधर्मद्वयं ज्ञात्वा पुनर्ज्ञानमवाप्नुयात्।

धर्माधर्मविचारोऽयं कथितं ज्ञानकारिकैः ॥ २/३२ ॥

इति ज्ञानकारिकायां धर्माधर्मविचारो नाम द्वितीयः पटलः

॥

तृतीयः पटलः

अथ चर्यान् (प्र)वक्ष्यामि योगिनामुपजायते।

स चेताज्ञान न सर्वः चैतन्यं ज्ञानवर्जितम्॥ ३/१ ॥

चेताचेतसमायुक्तं ज्ञानत्वं सम्प्रकीर्तितम्।

भुक्तितत्त्वं यदा चेतं स चेत्तम्मुक्तिलक्षणम्॥ ३/२ ॥

चेताचेतसमायुक्तं चैतन्यं शाश्वतं पदम्।

योगिनां योगचिन्तितमार्यसंज्ञानवर्जितम्॥ ३/३ ॥

यो मार्गविनिर्मुक्तं योगिनां मुक्तिलक्षणम्।

एकलिङ्गे श्मशाने वा नदीनां सङ्गमेषु च॥ ३/४ ॥

शून्यागारे गुहावासे वृक्षमूले तु चत्वरे।

महोदधितटे चैव त्रिपथे वापि साधकः ॥ ३/५ ॥

नग्नास्ते मुक्तकेशास्तु मदिरानन्दचेतसः ।

मालानिर्मालिता योगी एकाकी भ्रमते सदा ॥ ३/६ ॥

लिङ्गन्तु कथयिष्यामि यल्लिङ्गं कौलिकं स्मृतम् ।

लयपूजाष्टकं यत्तं लिङ्गन्तु स चराचरम् ॥ ३/७ ॥

लय वै यानि सर्वेषां तेन लिङ्गं मुदा कृतम् ।

एतत् कौलिकं यल्लिङ्गं न शैलहेमरौप्यजम् ॥ ३/८ ॥

कथितं देहजं लिङ्गं एकन्तु न द्वितीयकम् ।

एकलिङ्गं समाख्यातं श्मशानं कथयामि ते ॥ ३/९ ॥

शोभते च यदा देहः सर्वेषां एकदेहिनाम् ।

निस्वासस्वाससंयुक्तं श्मशानं परिकीर्तितम् ॥ ३/१० ॥

अधोर्द्धं प्राणसञ्चारः बहते चैव नित्यशः ।

ऊद्र्ध्वचारे भवेद् गङ्गा यस्ना(?) चाधो व्यवस्थितः ॥ ३/११

॥

द्वाभ्यां मेलापकं यत्न स न मेतत् (?) प्रकीर्तिता ।

अशरीरं यदा तत्त्वं स्वदेहे सा स्थिता यदि ॥ ३/१२ ॥

शून्यं निरञ्जनं ज्ञात्वा मुच्यते नात्र संशयः ।

गुह्यं तु कथयिष्यामि गुह्ये सचराचरम् ॥ ३/१३ ॥

गुह्यं शरीरमित्युक्तं वासितं ज्ञानराशिना ।

गुह्यावासं स्थितो योगी चर्या तस्य न उच्यते ॥ ३/१४ ॥

वासस्तु कथितं दिव्यं वृक्षमूलं शृणु तथा।

वृक्षः शरीरमित्युक्तं पादादिकरशाखयोः॥ ३/१५॥

ऊद्ध्र्वमूलं भवेद्वक्रं मूलवे (?) वृक्षधारकम्।

वृक्षमूलं ततो ज्ञात्वा बाह्यवृक्षस्य वर्जितम्॥ ३/१६॥

वृक्षमूलं समाख्यातं चत्वारः शृणु साम्प्रतम्।

जया च विजया चैव अजिता चापराजिता॥ ३/१७॥

चतुःशक्तिसमोपेतं चत्वारं मात्रकोद्भवम्।

चत्वारं कथितं दिव्यं महोदधितटः शृणु॥ ३/१८॥

बिन्दुस्तञ्च पराशक्तिः तटस्थः चारुरूपिणी।

बिन्दुचारुस्थिता नित्यं तटस्थं बिन्दुमण्डलम्॥ ३/१९॥

तटस्थञ्च स्थिता योगी तटं चैव प्रकीर्तितम्।

चन्द्रं त्यक्त्वा यदा याति आधारं सूर्यमण्डलम्॥ ३/२०॥

णुम्बेरिन्ग् गलत है

सूर्यं त्यक्त्वा यदा याति व्योमाऽस्तु चन्द्रमण्डले।

गगनमास्थितो (?) नित्यं वेला इव महोदधेः॥ ३/७२॥

एतद्वेला समाख्यातम् अध्यात्मैव प्रतिष्ठितम्।

नास्थिरं भवति श्वासं बहिस्थं मनरञ्जितम्॥ ३/७३॥

अथिरं सर्वयोगिनां प्रवाहं वहते सदा।

प्रवाहं गमनश्चैव गमनागमनं पुनः ॥ ३/७४ ॥

गमनागमनसंयुक्तो वेलाऽस्मिन् यथा स्थितम् ।

गमागम यथा वेला नास्ति रञ्जित कश्चित् (?) ॥ ३/७५ ॥

गगनोपमं स्थितं जगत् भावन्निश्चलतां व्रजेत् (?) ।

महोदधितटे स्थित्वा उदधि कथितं ततः ॥ ३/७६ ॥

निश्चलं परिपूर्णत्वं महोदधि स्मृतम् ॥ ॥ ॥ । ।

योगिनां चर्यसद्भावं कथितं तत्त्वं विशेषतः ॥ ३/७७ ॥

महोदधि समाख्यातं त्रिपञ्चकं कथयाम्यहम् ।

सत्त्वरजस्तमश्चैव एकत्वे तु यथा स्थितम् ॥ ३/७८ ॥

त्रिपथं तु विनिर्मुक्तं शाश्वतो ज्ञानकारिका ।

त्रिपथं तु समाख्यातं नग्नन्तु कथयामि ते ॥ ३/७९ ॥

अविद्या ॥ ॥ ॥ ॥ ॥ ।पत्यत्काल(?) (न)ग्नकं च साधकेश्वरम् ।

नग्नस्तु कथितान् देवान् मुक्तकेशन्ततः शृणु ॥ ३/८० ॥

केशस्तु पाशमित्युक्तं मुक्तिमार्गप्रबन्धकम् ।

धर्मस्तु नैकेन पाशश्चैव विशेषतः ॥ ३/८१ ॥

षड्भिर्मुक्तो यदा योगी मुक्तकेशः स उच्यते ।

मुक्तकेशः समाख्यात आनन्दं शृणु साम्प्रतम् ॥ ३/८१ ॥

योगपारगतो योगी महापारविवर्जितः ।

पानयोगामृतं दिव्यं योगिनां सम्प्रकीर्तितम् ॥ ३/८३ ॥

एभिर्युक्तो महायोगी मदिरामत्त उच्यते ।

मदिरानन्दमाख्यातं नैर्माल्यमालिनो (?) शृणु ॥ ३/८४ ॥

वर्णं चैवास्ति मालाग्रं संस्थितो शक्तिसूत्रके ।

माला चैव समाख्याता योगिनां चान्यकारणम् ॥

नैर्माल्यमालिनो योगी योगचर्यां करोति सः ॥ ३/८५ ॥

एकाकीमतिथिर्यस्तु भ्रमिते प्रवदेत् सदा ।

असंहायो भ्रमते धीरः स एकाकीनमुच्यते ॥ ३/८६ ॥

एकाकी तु समाख्याता शास्त्रं मिलकारिका (?) ।

एतच्चर्या समाख्याता विश च ज्ञानधारक (?) ॥ ३/८७ ॥

इति ज्ञानकारिमहामछिन्द्रनाथपादावतारितेनोक्तं

चर्याधिकारस्तु तृतीयः पटलः ॥

****
**
** akulaviiratantram of the school of Matsendryanatha edited by P.C. Bagchi, Calcutta, 1934
**
**
** Data entered by the staff of Muktabodha
**
*
*
**
** Encoded in Velthius transliteration
****
****

[आ]

श्रीमच्छन्दपादकेभ्यो नमः।

श्रीमीनसहजानन्दं स्वकीयाङ्गसमुद्भवम्।

सर्वमाधारगम्भीरमचलं व्यापकं परम्।

मायामलविनिर्मुक्तं मीननाथं नमाम्यहम्॥

अथातः सम्प्रवक्ष्यामि अकुलवीरं महद्भूतम्।

गुह्याद् गुह्यतरं गुह्यं सिद्धसद्भावसन्ततिः॥ १॥

अनुग्रहाय लोकानां सिद्धनाथेन भाषितम् ।

गोपनीयं प्रयत्नेन यदीच्छन् शाश्वतं पदम् ॥ २ ॥

संसारार्णवमग्नानां भूतानां महदाश्रयम् ।

यथा नदीनदाः सर्वे सागरे समुपागताः ॥ ३ ॥

तथा अकुलवीरेषु सर्वधर्मा लयङ्गताः ।

सर्वाधारमशेषस्य जगतः सर्वदा प्रभुः ॥ ४ ॥

सहजानन्दं न विन्दन्ति सर्वधर्मसमासृताः ।

अजानन्तमलैर्ग्रस्ता महामायान्धच्छादिताः ॥ ५ ॥

शास्त्रजालेन सन्तुष्टा मोहितास्त्यजयन्तिताः (?) ।

न विन्दन्ति पदं शान्तं कौलानां निष्कलं गुरुम् ॥ ६ ॥

संवादयन्ति ये केचिन् न्यायवैशेषिकास्तथा ।

बौधास्तु अरिहन्ता ये सोमसिद्धन्तवादिनः ॥ ७ ॥

मीमांस पञ्चस्रोताश्च वामसिद्धान्तदक्षिणाः ।

इतिहासपुराणञ्च भूततत्वन्तु गारुडम् ॥ ८ ॥

एभिः शैवागमैः सर्वैः परोक्षञ्च क्रियान्वितैः ।

सविकल्पसिद्धिसञ्चारं तत् सर्वं पापबन्धवित् ॥ ९ ॥

विकल्पबहुलाः सर्वैर्मिथ्यावादा निरर्थकाः ।

न ते मुञ्चन्ति संसारे अकुलवीरविवर्जिताः ॥ १० ॥

सर्वज्ञं सर्वमासृत्य सर्वतो हितलक्षणम् ।

सर्वेषां सिद्धिस्तत्रस्था सर्वसिद्धिश्च तत्र वै ॥ ११ ॥

यत्रासौ अकुलवीरो दृश्यते सर्वतोमुखम्।

तं विदित्वा परं रूपं मनो निश्चलतां व्रजेत्॥ १२ ॥

शब्दरूपरसस्पर्शगन्धश्चैवात्र पञ्चमम्।

सर्वभावाश्च तत्रैव प्रलीणाः प्रलयं गताः ॥ १३ ॥

भावाभावविनिर्मुक्त उदयास्तमनवर्जितः।

स्वभावमतिमतं शान्तं मनो यस्य मनोमयम्॥ १४ ॥

अकुलवीरमिति ख्यातं सर्वाधारपरापरम्।

नाधारलक्षभेदन्तु न नादगोचरे पठेत्॥ १५ ॥

हृदि स्थाने न वक्रे च घण्टिका तालरन्ध्रके।

न इडा पिङ्गला शान्ता न चास्तीति गमागमे ॥ १६ ॥

न नाभिचक्रकण्ठे च न शिरे नैव मस्तके।

तथा चक्षुरुन्मीलने च न नासाग्रनिरीक्षणे ॥ १७ ॥

न पूरककुम्भके तत्र रेचके (च) तथा पुनः।

न बिन्दुभेदके ग्रन्थौ ललाटे न तु वह्निके ॥ १८ ॥

(p. 86)

प्रवेशनिर्गमे नैव नावाहनविसर्जनम्।

न करणैर्नासनं मुद्रैर्नामासे भिन्नतालुके (?) ॥ १९ ॥

न निरोधो न चोद्धारो नातीतां चालनं न हि।

न प्रेर्यप्रेरकञ्चैव न स्थानन्नैव चाश्रयम्॥ २० ॥

न चात्मनैव तद् ग्राह्यं ग्राह्यातीतपदं भवेत्।

एतत् पक्षविनिर्मुक्तं हेतुदृष्टान्तवर्जितम्।

सबाह्याभ्यन्तरन्तत्र एकोच्चारं चराचरम्॥ २१॥

न दूरे न च वै निकटे न भरितो न च रिक्तक(ः)।

न उन्नो न सोऽधिक एभिः पक्षैर्विवर्जितम्॥ २२॥

यश्च विंशात्मको ह्येष पुद्गल नास्ति यत्र वै।

यत्र लक्षं न विद्येत अकुलवीर स उच्यते॥ २३॥

यस्यैवं संस्थितं कश्चित् समरस संस्थितः।

स ब्रह्मा सो हरिश्चेशः स रुद्रो स च ईश्वरः॥ २४॥

स शिवः परमदेवः स सोमार्काग्निकस्तथा।

स च सांख्यः पुराणाश्च अर्हन्तबुद्ध एव च॥ २५॥

स्वयं देवी स्वयं देवः स्वयं शिष्यः स्वयं गुरुः।

स्वयं ध्यानं स्वयं ध्याता स्वयं सर्वत्र देवता॥ २६॥

यादृशेन तु भावेन पुरुषो भावयेत् सदा।

तादृशं फलमा(व)प्नोति नात्र कार्यविचारणात्॥ २७॥

अस्यैव हि नामानि पृथग्भूतानि योगिभिः।

अनाम तस्य गीयन्ते भ्रान्तिज्ञानविमोहितैः॥ २८॥

धर्माधर्मसमाक्लिष्टाविकल्पतमश्छादिताः।

तेन मुञ्चन्ति संसारं नरकं योनिसंकुलम्॥ २९॥

अकुलवीरं महद्भूतं यदा पश्यन्ति सर्वगम्।

स बाह्याभ्यन्तरे नित्यं एकाकारं चराचरम्॥ ३०॥

निस्तरङ्गं निराभासं पदभेदविवर्जितम्।

सर्वावयवनिर्मुक्तं निर्लयं निर्विकारजम्॥ ३१॥

अदृष्टनिर्गुणं शान्तं तत्त्वातीतं निरञ्जनम्।

सर्वज्ञं परिपूर्णञ्च स्वभावश्चैवमक्षयम्॥ ३२॥

कार्यकारणनिर्मुक्तमचिन्त्यमनामयम्।

मायातीतं निरालम्बं व्यापकं सर्वतोमुखम्॥ ३३॥

समत्वं एकभूतञ्च ऊहापोहविवर्जितम्।

अकुलवीरं महद्भूतम् अस्तिनास्तिविवर्जितम्॥ ३४॥

न मनो न च वै बुद्धिर्न चिन्ताचेतनादिकम्।

न कालः कलनाशक्तिर्न शिवो न च इन्द्रियः॥ ३५॥

न भूते गृह्यते सो हि न सुखं दुःखमेव च।

न रसो हि न सुखं दुःखमेव च (?)॥ ३६॥

न रसो विरसश्चैव न कृतो न च जायते।

न च्छाया न च तापस्तु न शीतो न च उष्णवान्॥ ३७॥

न (दृश्यते मन्) स्तत्र उदयास्तमनवर्जितम्।

न सीमा दृश्यते तत्र न च तीर्थ्यं न चैव हि (?)॥ ३८॥

अद्वैतमचलं शान्तं संगदोषविवर्जितम्।

निराकुलं निर्विकल्पञ्च निबद्धञ्च मलक्षणम्॥ ३९॥

अनाथं सर्वनाथञ्च उन्मना मदवर्जितम्।

अनिगूढमसन्धिञ्च स्थावरं जङ्गमेव च ॥ ४० ॥

(p. 88)

ज्वलज्ज्वलनभूम्या च आपोञ्चैव तथैव च।

सर्वं समरसं पूर्णं अकुलवीरन्तु केवलम्॥ ४१ ॥

यस्यैषा संस्थिता मुक्तिः स मुक्तो भवबन्धनात्।

न तस्य मातापिता (वा)बान्धवं न च देवता ॥ ४२ ॥

न यज्ञं नोपवासञ्च न क्रिया वर्णभेदकम्।

त्यक्त्वा विकल्पसंघातम् अकुलवीरलयं गताः ॥ ४३ ॥

न जपो नार्चनं स्नानं न होमं नैव साधनम्।

अग्निप्रवेशनं नास्ति हेमन्तभृगु नोदनम्॥ ४४ ॥

नियमोऽपि न तस्यास्ति नोपवासो विधीयते।

पितृकार्यं न करोताति तीर्थयात्राव्रतानि च ॥ ४५ ॥

धर्माधर्मफलं नास्ति न स्नानं नोदकक्रिया।

स्वयं त्यज सर्वकार्याणि लोकाचाराणि यानि च ॥ ४६ ॥

समयाचारविचारञ्च कृतका बन्धकानि तु।

संकल्पञ्च विकल्पञ्च ये चान्ये किल धर्मिणः ॥ ४७ ॥

भवे योगी निराचारो पशुचारविवर्जितः।

सिद्धिश्च विविधाकारा पाताले च रसायनम्॥ ४८ ॥

प्रत्यक्षञ्च या लब्धं न गृह्णीयात् कदाचन।

सर्वञ्च पाशजालञ्च अधोमार्गप्रदायकः ॥ ४९ ॥

एतेषु मोचना नास्ति अकुलवीरविवर्जिताः।

यथा मृताः (न) जानन्ति स्वादं कटुमधुरस्य तु ॥ ५० ॥

तथा अकुलवीरन्तु न जानन्ति स्वभावगम्।

यथा मदिरा महान्तस्य कथितं नेवशकृते (?) ॥ ५१ ॥

अगे ८९ तो ९६ मिस्सिन्ग्

(p. 97)

रहस्यपरमानन्दमतिगुह्यं सुगोपितम्।

लोकानां च हितार्थाय सिद्धनाथेन भाषितम्॥ ३९ ॥

निर्विकल्पं पदं शान्तं यत्र लीनं परापरम्।

मोक्षस्य तन्महास्थानं मन्त्ररूपविवर्जितम्॥ ४० ॥

तत्रैव सृष्टिरूपेण पुनस्तत्र लयं गता।

किन्तेन बहुनोक्तेन सर्वबन्धविवर्जितम्॥ ४१ ॥

अकुलवीरं यदा लब्धं तदा किं कौलिकैः क्रमैः।

लब्ध्वा तु मोक्षसद्भावम् अकुलवीरं मलापहम्॥ ४२ ॥

कौलमार्गे द्वयो सन्ति कृतका सहजा तथा।

कुण्डली कृतका ज्ञेया सहजा समरसे स्थिता ॥ ४३ ॥

प्रेर्यप्रेरकभावस्था कृतका साऽभिधीयते।

ततः स पातयेद् भूमौ मुद्रामन्त्रैर्नियोजितैः ॥ ४४ ॥

आहुते पतने चान्ये कर्णजापेन धूपकैः ।

एतत् साध्यमिदं तत्त्वं (एतद्) ध्यानञ्च धारणा ॥ ४५ ॥

अनेकैः कर्मसंघातैः नानामार्गविभावनैः ।

विकल्पकल्लोलोल्लोला उद्भ्रान्ता भ्रान्तचेतसः ॥ ४६ ॥

हृदि शोकेन सन्तप्ता व्यासङ्गाच्च महाभयैः ।

हर्षविषादसम्पन्ना शोच्यमाना मुहुर्मुहुः ॥ ४७ ॥

तावद्भ्रमन्ति संसारे कल्पाकल्पैर्भवार्णवैः ।

दग्धबीजेषु संभूतिर्यथा नैव प्रजायते ॥ ४८ ॥

मूलछिन्ने यथा वृक्षे न प्ररोहं विद्यते ।

अकुलवीरगतं भिन्नं नानाभावानुबन्धनैः ॥ ४९ ॥

न बध्यते यथा विमले रसं विप्रलयं गतम् ।

तद्वद्कुलवीरे च सत्त्वे भ्राभ्राख्य यद्गतः (?) ॥ ५० ॥

तिमिरेण यथाच्छन्नमुदितार्कं न पश्यति ।

अज्ञानमनस्तद्वद् भ्रान्तिजालविमोहिता ॥ ५१ ॥

अकुले वीरे च सम्प्राप्ते सर्वमेतद्विनश्यति ।

दधिमध्ये यथा सर्पिः काष्ठे चाग्निः स्थितो यथा ॥ ५२ ॥

पुष्पे गन्धस्तिले तैलं वृक्षे छाया समाश्रिता ।

मद्यमध्ये यथानन्दं दीपे प्रभा समाश्रिता ॥ ५३ ॥

पद्ममध्ये च कुण्डल्या अङ्गप्रत्यङ्गमेव च ।

रक्तार्थाकुलवीरे (?) च तत्सर्वं विनियोजितम्॥ ५४॥

भावाऽभावादिसंयुक्तैः प्रत्ययैर्दृष्टिगोचरैः।

अकुलवीरं न जानन्ति कृतकैर्मोहितात्मनः॥ ५५॥

पाशजालनिबद्धाश्च महामायाविमोहिताः।

न जानन्ति पदं शान्तमचिन्त्यं नित्यसम्भवः॥ ५६॥

सर्वव्यापिभावस्थं स्थानवर्णविवर्जितम्।

सर्वभूतस्थितं ह्येकमध्येयं ध्येयवर्जितम्॥ ५७॥

स च सर्वगतो भावः स्थिरे पूर्णे निरन्तरे।

तत्र मनो विलीनन्तु अचलं भवतन्मयम्॥ ५८॥

मनोवृद्धिस्तथा चिन्त्यं क्षिप्ता तन्मयतां गता।

यथा तिष्ठति तत्त्वस्थः शिवनिष्कलमव्यये॥ ५९॥

तदा तन्मयतां याति निर्मलं निश्चलं पदम्।

अकुलवीरं महद्भुतमेकवीरं च सर्वगम्॥ ६०॥

(p. 99)

दुर्लभं सुरसिद्धानां योगिनीनाञ्च गोचरम्।

केचिद् वदन्तीदं धर्ममिदं शास्त्रमिदं तपः॥ ६१॥

अयं लोकमिमं स्वर्गमिदं साध्यमिदं फलम्।

इदं ज्ञानञ्च विज्ञानं शुद्धाशुद्धमिदं परम्॥ ६२॥

ज्ञेयञ्च तत्त्वकूटञ्च यत्र ध्यानञ्च धारणा।

तदासौ योगिनी ह्येकः नान्यस्तु हि द्वितीयकः॥ ६३॥

(अ)नागतन्तु गतञ्चैव न गच्छेन्न च तिष्ठति ।

न भूतं न भविष्यञ्च स्थितिप्रलयवर्जितम् ॥ ६४ ॥

न चाहं प्रचितैर्दोषैः लिप्यते न कदाचन ।

नाहं कश्चिन्न मे कश्चिन्न बद्धो न च बाधकः ॥ ६५ ॥

न मुक्तो वै न च न मुक्तमे (?) मोक्षस्य च स्पृहा ।

गच्छंस्तिष्ठन् स्वपन् जाग्रद्भूञ्जानो मैथुनेऽपि वा ॥ ६६ ॥

भयदारिद्रशोकैश्च विविधैर्भक्षणैस्तथा ।

चिकित्सा नैव कुर्वीत इन्द्रियार्थैः कदाचन ॥ ६७ ॥

आचरेत् सर्ववर्णैस्तु न तु भक्ष्यं विचारयेत् ।

एवं स चरते योगी यथारण्ये हुताशनः ॥ ६८ ॥

पिण्डबधाञ्च नानास्ति अवस्था मूर्खवासनाम् (?) ।

सोमशून्यस्तथा वह्निप्राणायामविवर्जितम् ॥ ६९ ॥

अप्रमेयनिराभासं धारणाध्यानवर्जितम् ।

येन जन्मसहस्राणि भक्तया संपूजितो गुरुः ॥ ७० ॥

(p. 100)

ते लभन्ति महाज्ञानं अकुलवीरन्तु मोक्षदम् ।

योगिनीराकिणीचक्रे यस्य भक्तिः सुनिश्चला ॥ ७१ ॥

अकुलवीरं महद्भूतं गम्भीरं गहनामयम् ।

पिण्डातीतं यदा ज्ञेयमपिण्डं पिण्डवर्जितम् ॥ ७२ ॥

पदव्यञ्जननिर्मुक्तं विमलं सततोदितम् ।

तल्लीने तन्मयात्मानं विन्दते श्वाश्वतं पदम् ॥ ७३ ॥

चिन्तातीतं भवेत् सो हि योगसंयोगवर्जितम् ।

निर्वाणं वासनाहीनं तृप्तात्मा च निरामयः ॥ ७४ ॥

तेन लब्धा न सन्देहोऽमला मलच्छेदनाः ।

तस्य प्रवर्तते क्षिप्रं तस्यैव सर्वसर्वगम् ॥ ७५ ॥

वेदसिद्धान्तशास्त्राणि नानाविधानि शिखानि च ।

तानि सर्वाणि मोहानि कायक्लेशैर्निरर्थकम् ॥ ७६ ॥

विद्याहङ्कारग्रस्तास्तु गर्विताः कुगतिं गताः ।

अनर्थेन च सन्तुष्टा बहुग्रन्थार्थचिन्तकाः ॥ ७७ ॥

अकुलवीरं न विन्दन्ति कृतकैर्मोहितात्मनः ।

गर्वितानां कुतो ज्ञानं ग्रन्थकोटिशतैरपि ॥ ७८ ॥

कर्पूरकुङ्कुमादीनां वस्त्रताम्बूलमेव च ।

खरवद्भवति तद्भारं सर्वं तस्य निरर्थकम् ॥

अकुलवीरञ्च देहस्थं यदा पश्यति सर्वगम् ॥ ७९ ॥

धर्माधर्मफलं नास्ति नोदकं तीर्थसेवना ।

न क्रिया सत्यशौचं वा कर्मकाण्डे न भावना ॥ ८० ॥

(p. 101)

न तस्य कर्मकर्माणि लोकाचाराणि यानि च ।

चरिताः समयाचारा जनैर्भ्रान्तिविमोहितैः ॥ ८१ ॥

अकुलवीरं न जानन्ति किं विशिष्टं कुतः स्थितम् ।

कृतका बन्धना लोके कल्पिताश्च कुपण्डितैः ॥ ८२ ॥

संकल्पविकल्पश्च कलाकर्माणि यानि च ।

सिद्धयो विविधा लोके पातालं च रसायनम् ॥ ८३ ॥

प्रत्यक्षश्च यदा लब्धं न विगृह्णीयात् कदाचन ।

सर्वे ते पाशबद्धश्च अधोमार्गप्रदायकाः ॥ ८४ ॥

न चैतैर्मुक्तिः संसारे अकुलं वीरवर्जिताः ।

यथा मदिरमानन्दं कथितं नैव जायते ॥ ८५ ॥

तद्वदकुलवीराख्यं स्वसंवेद्यनिरोपणम् ।

न जानन्ति नरा मूढाः सारात् सारतरं परम् ॥ ८६ ॥

तावद् भ्रान्तिविमुग्धात्मा यावत्तलं न विन्दति ।

चिन्तातीते यदा योगी स योगी योगचिन्तकः ॥ ८७ ॥

विरक्ता वासना यस्य तृप्तात्मा च निरामयः ।

तावद् भ्रमन्ति मोहात्मा नानाभावानुबन्धनैः ॥ ८८ ॥

यावत् सममेकत्वं परमानन्दं न विन्दति ।

मूर्खाणां च यथाशास्त्रं कुमारीसुरतिं यथा ॥ ८९ ॥

अकुलवीरं विन्दन्ति कथ्यमानैः कुमारिकाः ।

दिशवेशविनिर्मुक्तं स्थानवर्णविवर्जितम् ॥ ९० ॥

(p. 102)

निराकुलं निर्विकल्पं निर्गुणञ्च सुनिर्मलम् ।

अनाथं सर्वनाथञ्च प्रमादोन्मादवर्जितम् ॥ ९१ ॥

घननिविडनि(ः)सन्धिस्थावरे जङ्गमेषु च ।

जले ज्वलने तथा पवने भूम्याकाशे तथैव च ॥ ९२ ॥

सर्वत्र समरसं भरितमकुलवीरन्तु केवलम् ।

तं ज्ञातं येन देहस्थं स मुक्तः सर्वबन्धनात् ॥ ९३ ॥

न तस्य क्रियाबन्धेन न वेद्यं न च वेदना ।

न यज्ञो नोपवासश्च न चर्या न क्रियोदयः ॥ ९४ ॥

न वर्णो वर्णभेदश्च अकुलवीरं यदागतम् ।

न जापो नार्चनाग्नीनां न होमो नैव साधनम् ॥ ९५ ॥

नाग्निप्रवेशनन्तस्य मन्त्रपूजाचरणोदकम् ।

नियमाश्च न तस्यास्ति क्षेत्रपीठे च सेवनैः ॥ ९६ ॥

न क्रिया नार्चनाकाद्यैर्न तीर्थानि व्रतानि च ।

निरालम्बपदं शान्तं तथातीतं निरञ्जनम् ॥ ९७ ॥

सर्वज्ञपरिपूर्णञ्च स्वभावेन विलक्ष्यते ।

कार्यकारणनिर्मुक्तमचिन्तितञ्च अनामयम् ॥ ९८ ॥

मायातीतं निरालम्बं व्यापकं सर्वतोमुखम् ।

स्वदेहे संस्थितं शान्तमकुलवीरं तदुच्यते ॥ ९९ ॥

समस्तमेकदाभूतं द्वैताभावविवर्जितम् ।

अकुलवीरं महद्भूतमस्तिनास्तिविवर्जितम् ॥ १०० ॥

(p. 103)

मनोबुद्धिचित्तस्तचित्ता नैव स्वचेतना (?) ।

न कालकलना चैव न शक्तिश्च न चेन्द्रियः ॥ १०१ ॥

न भूते गृह्यते सो हि न दुःखं सुखमेव च ।

न रसोऽधिरसश्चैव कृतकं नैव कारकम् ॥ १०२ ॥

न च्छाया नातपो वह्निर्न च शीतोष्णवेदना ।

न दिनं रात्रिमित्युक्तमुदयास्तमनवर्जितम् ॥ १०३ ॥

न मनो दृश्यते तत्र नोर्द्ध्वमध्यं च ज्ञायते ।

अक्षोभ्यमचलं शान्तमीदृशं तत्त्वनिर्णयम् ॥ १०४ ॥

यादृशेन तु भावेन पुरुषो भावयेत् सदा ।

तादृशं फलमाप्नोति नात्र कार्यविचारणात् ॥ १०५ ॥

एवञ्च कुलसद्भावमवाच्यं परमामृतम् ।

अगम्यं गम्यते कस्माद् भ्रान्तिज्ञानविमोहिताः ॥ १०६ ॥

न दूरे निकटे चैव प्रत्यक्षं न परोक्षता ।

न भरितो न रिक्तो वा निपुणो नापि चाधिकः ॥ १०७ ॥

एतत् पक्षविनिर्मुक्तो हेतुदृष्टान्तवर्जितः ।

कृतकैर्मोहिता मूढाः कर्मकाण्डरतास्तु ये ॥ १०८ ॥

न तेषां मुक्तिः संसारे नरके योनिसंकुले ।

अकुलवीरं महद्भूतं यदा पश्यति सर्वगम् ॥ १०९ ॥

सबाह्याभ्यन्तरैकत्वं सर्वत्रैव व्यवस्थित(म्) ।

निस्तरङ्गं निराभासं पदच्छेदविवर्जितम् ॥ ११० ॥

सर्वावयवनिर्मुक्तं निर्विकारञ्च निर्मलम् ।

अदृश्यं निर्गुणं नित्यं निर्णिरोधञ्च निश्चलम् ॥ १११ ॥

(p. 104)

न ध्यानं धारणा नैव न स्थानं वर्णमेव च ।

न रेचकं पूरकञ्चैव नरोद्घातञ्च (?) कुम्भकम् ॥ ११२ ॥

न चान्तमादिमध्यस्थं न सतो वृद्धिरेव च ।

ग्राह्यग्राहकनिर्मुक्तग्रन्थातीतञ्च यद्भवेत् ॥ ११३ ॥

एतैः सर्वैर्विनिर्मुक्तं हेतुदृष्टान्तवर्जितम् ।

सबाह्याभ्यन्तरैकत्वं सर्वत्रैव व्यवस्थितम् ॥ ११४ ॥

समरसानन्दरूपेण एकाकारं चराचरे ।

ये च ज्ञातं स्वदेहस्थमकुलवीरं महद्भूतम् ॥ ११५ ॥

यस्या (?) वशं स्थितः कश्चित् समरसं रससंस्थितम् ।

स ब्रह्मा स हरिश्चैव स रुद्रश्चै(वे)श्वरस्तथा ॥ ११६ ॥

स शिवः शाश्वतो देवः स च सोमार्कशङ्करः ।

स विशाख्यो मयूराक्षो अर्हन्तो बुधमेव च ॥ ११७ ॥

स्वयं देवि स्वयं देवः स्वयं शिष्यः स्वयं गुरुः ।

स्वयं ध्यानं स्वयं ध्याता स्वयं सर्वेश्वरो गुरुः ॥ ११८ ॥

सर्वज्ञः सर्वमासृत्य सर्वतो हितलक्षणः ।

सर्वयोगिनी तत्रस्था सर्वे सिद्धाश्च तत्र वै ॥ ११९ ॥

सर्वं सर्वार्थकं चैव सर्वज्ञानश्च तत्र वै ।

यथासौ महार्थञ्च अकुलवीरमिति स्मृतम् ॥ १२० ॥

शब्दः स्पर्शौ रसो रूपं गन्धो वद्याणिपम च (?)।

सर्वे भीराश्च (?) तत्रैव ये प्रलीनाः प्रलयं गताः॥ १२१॥

नाधारे ध्येयलक्ष्ये च न नादगोचरे परे।

न हृदि नाभिकण्ठे वा वक्रे घण्टिकरन्ध्रयोः॥ १२२॥

(p. 105)

न इडा पिङ्गला चैव सुष्मणा च गमागमैः।

न नाभिचक्रे कण्ठे च न शिरे बिन्दुके तथा॥ १२३॥

चक्षुकर्णोन्मीलनं नैवं नासिकाग्रनिरीक्षणे।

न पूरके कुम्भके चैव रेचके च तथा पुनः॥ १२४॥

न बिन्दुभेदग्रन्थौ च ललाटे न च चन्द्रमाः।

प्रवेशे निर्गमे चैव शिखा ऊद्ध्र्वे न बिन्दुके॥ १२५॥

न करैर्न सरैर्मुद्रैः नाकाशे वायुमण्डले।

न चापे चन्द्रसूर्ये च भावाभावे समागमे॥ १२६॥

अनौपम्यं निरालम्बं पक्षापक्षविवर्जितम्।

अज्ञानमलग्रस्तात्मा महामायाविमोहिताः॥ १२७॥

शास्त्रार्थेन विमुढात्मा मोहिता विदुषो जनाः।

न विदन्ति पदं शान्तं कैवल्यं निष्क्रियं गुरुम्॥ १२८॥

संख्यादयश्च ये केचित् न्यायवैशेषिकास्तथा।

बौद्धारहन्ताश्च ये केचित् सोमसिद्धान्तदक्षिणाः॥ १२९॥

मीमांसा पञ्चरात्रञ्च वामदक्षिणकौलिकाः।

इतिहासपुराणानि भूततत्त्वञ्च गारुडम् ॥ १३० ॥

एते चैव समाः सर्वे केचित् वा(ऽपि) क्रियान्विताः ।

विकल्पसिद्धिदाः सर्वे तद्विदुर्न च पण्डिताः ॥ १३१ ॥

विकल्पबहुलाः सर्वे मिथ्यावादनिरर्थकाः ।

न ते मुच्यन्ति संसारे अकुलवीरविवर्जिताः ॥ १३२ ॥

यानि कानि च स्थानानि गिरिर्निगरसागरम् ।

सर्वत्र संस्थितं नित्यं स्थावरे जङ्गमेषु च ॥ १३३ ॥

पञ्चभूतात्मकं सर्वे यत् किञ्चित् सचराचरम् ।

शिवाद्यदेवपर्यन्तं सर्वं तत्रैव संस्थितम् ॥ १३४ ॥

ईदृशं योगिनं दृष्ट्वा उपसर्पन्ति ये नराः ।

गन्धैः पुष्पैश्च धूपैश्च खानपानादिभक्षणैः ॥ १३५ ॥

तर्पयन्ति च ये भक्तास्त्रिविधैश्चैवान्तरात्मना ।

तेऽपि बन्धैः प्रमुच्यन्ति मुक्तिमार्गी न (?) काङ्क्षिणः ॥ १३६ ॥

ब्रह्मेन्द्रविष्णुरुद्रञ्च अरहन्ता बुद्धमेव च ।

विषाख्यो मयूराक्ष (?) ये च ऋषयस्तपोधनाः ॥ १३७ ॥

देवादिभ्यो नरेन्द्राश्च ये चान्ये मोक्षकाङ्क्षिणः ।

ते (सर्वे) मोक्षमिच्छन्ति अकुलवीरन्तु मोक्षदम् ॥ १३८ ॥

अथान्यं संप्रवक्ष्यामि भिन्नावस्थां स्वभावगः ।

पूर्वं यदुक्ता सर्वे अन्वयमार्गे त्वकौलिके (?) ॥ १३९ ॥

* * * * * * * * * * * * * * * * * ।

* * * * * * * * * * * नात्र संशयः ।

परमामृतसन्तृप्ताः सहजानन्दं च केवलम् ॥ १४० ॥

न जरास्तेषां न मृत्युश्च न शोको दुःखमेव च ।

सर्वव्याधिहरश्चैव न पुनर्भवसंभवः ॥ १४१ ॥

अकुलवीरं स्थितं दिव्यं सिद्धनाथप्रसादतः ।

सर्वतः सर्वदा शुद्धः सर्वतः सर्वदा प्रभुः ॥ १४२ ॥

इति मच्छेन्द्रपादावतारिते कामरूपिस्थाने योगिनी प्रसादाल्लब्ध(म्) अकुलवीरं समाप्तम् ॥

शुद्धस्फटिकसंकाशां शुद्धक्षौमविराजिताम् ।
मुक्तावज्रस्फुरद्भूषां जपमालां कमण्डलुम् ॥ ६६ ॥
पुस्तकं वरदानं च बिभ्रतीं परमेश्वरीम् ।
एवं ध्यात्वा न्यसेत्पश्चाद्वीर्यान्यासं सुरेश्वरि ॥ ६७ ॥
कुर्वीत देहसंत्राहं त्रिभिर्बीजैः क्रमात्प्रिये ।
करयोर्विन्यसेदादौ मणिबन्धे तले नखे ॥ ६८ ॥
दक्षे वामे च विन्यस्य कक्षकर्पूरपाणिषु ।
पुनर्दक्षे च वामे च पादयोश्च तथा न्यसेत् ॥ ६९ ॥
नादान्ते हृदये लिङ्गे न्यसेद्देवि ततः परम् ।
एतेष्वङ्गेषु देवेशि संहारक्रमतो न्यसेत् ॥ ७० ॥
विद्यां सृष्टिक्रमेणैव जानीहि परमेश्वरि ।
ततो न्यसेन्महादेवि नवयोन्यङ्किताभिधम् ॥ ७१ ॥
कर्णयोश्चुबुके भूयः शङ्खयोर्मुखमण्डले ।
नेत्रयोर्नासिकायां च बाहुयुग्मे हृदि प्रिये ॥ ७२ ॥
तथा कूर्परयोर्नाभौ जान्वोरन्धुनि विन्यसेत् ।
पादयोर्देवि गुह्ये च पार्श्वयोर्हृत्स्तनद्वये ॥ ७३ ॥
कण्ठे च नवयोन्याख्यं न्यसेद्बीजत्रयात्मकम् ।
षडङ्गमाचरेद्देवि द्विरावृत्त्या क्रमेण तु ॥ ७४ ॥
त्रिद्व्येकदशकैस्त्रिद्विसंख्यया शैलसंभवे ।
अङ्गुलीनां पुनर्देवि बाणान्कामांश्च विन्यसेत् ॥ ७५ ॥
ललाटगलहृन्नाभिमूलाधारेषु वै क्रमात् ।
मूलेन व्यापकं कृत्वा प्राणायामं समाचरेत् ॥ ७६ ॥

इति श्रीमज्ज्ञानार्णवे नित्यातन्त्रे बालान्यासविधिर्नाम
द्वितीयः पटलः ॥ २ ॥

अथ तृतीयः पटलः ।

ईश्वर उवाच—

एवं विन्यस्तदेहः सन्समाहितमनास्ततः ।
अन्तर्यागविधिं कुर्यात्साक्षाद्ब्रह्ममयं प्रिये ॥ १ ॥

---

१ क. °सेद्देवि पश्चा° । २ क. °था सु° । ३ क. तलाग्रके । ४ ख. कद्वित्रिसं° । ५ °वं सन्यस्तदे° ।

मूलाधारे मूलविद्यां विद्युत्कोटिसमप्रभाम् ।
सूर्यकोटिप्रतीकाशां चन्द्रकोटिद्रवां प्रिये ॥ २ ॥
बिसतन्तुस्वरूपां तां बिन्दुत्रिवलयां प्रिये ।
ऊर्ध्वशक्तिनिपातेन सहजेन वरानने ॥ ३ ॥
मूलशक्तिदृढत्वेन मध्यबीजप्रबोधतः ।
परमानन्दसंदोहसानन्दं चिन्तयेत्पराम् ॥ ४ ॥
इत्यन्तर्यजनं कृत्वा बाह्यपूजां समाचरेत् ।
तत्र प्राङ्मुख आसीनश्चक्रोद्धारं समाचरेत् ॥ ५ ॥
सुस्थले श्रीभवे पट्टे लिखेद्यन्त्रमनुत्तमम् ।
ईशानादग्निपर्यन्तमृजुरेखां समालिखेत् ॥ ६ ॥
ईशादग्नेस्तदग्राभ्यां रेखे आकृष्य देशिकः ।
एकीकृत्य च वारुण्यां शक्तिरेखा परा प्रिये ॥ ७ ॥
त्रिकोणाकाररूपेयं तस्या उपरि संलिखेत् ।
त्रिकोणाकाररूपात्तु शक्तिद्वयमुदाहृतम् ॥ ८ ॥
पूर्वशक्त्यग्रभागे तु मानयष्टिवदालिखेत् ।
रेखां तु परमेशानि वायुराक्षसकोणगाम् ॥ ९ ॥
संधिभेदक्रमेणैव तयोः शक्त्योस्ततः परम् ।
रेखे आकृष्य कोणाभ्यां तदग्रात्पूर्वगे कुरु ॥ १० ॥
वह्निमण्डलमेतत्तु पूर्वाग्रं वीरवन्दिते ।
एकेन वह्निना शक्तिद्वयेनैतद्भवेत्प्रिये ॥ ११ ॥
नवयोनिविशोभाढ्यं चक्रराजमिदं प्रिये ।
सर्वसौभाग्यजनकं सर्वैश्वर्यप्रदायकम् ॥ १२ ॥
सर्वसिद्धिप्रदं रोगहरणं धनदायकम् ।
एतद्बाह्ये तु संलेख्यं वृत्तं पूर्णेन्दुसंनिभम् ॥ १३ ॥
तद्बाह्यमष्टपत्रं च ग्रन्थिभिश्चाष्टभिर्युतम् ।
ग्रन्थयः प्रणवाभ्यां च संपुटत्वेन कारयेत् ॥ १४ ॥
ग्रन्थयः कुलिशा ज्ञेयाः प्रणवैरेव सुव्रते ।
त्रिशूलाष्टकमालिख्य चतुरस्रं लिखेत्प्रिये ॥ १५ ॥

---

१ ख. °ध्यशक्तिप्र° । २ ख. °तू । श्रीखण्डसंभवे पट्टे स्थापयेद्यन्त्रमुत्त° । ३ ख. तस्योपरि च सं° । ४ ख. °रूपं तु श° ।

चतुर्द्वारविशोभाढ्यं सर्वानन्दकरं तथा ।
हसौःकारं त्रिकोणान्तः संलिख्य वरवर्णिनि ॥ १६ ॥
कामबीजं मध्यमं यदष्टकोणेषु संलिखेत् ।
स्वरान्षोडश देवेशि युग्मयुग्मप्रभेदतः ॥ १७ ॥
दलाष्टकेषु संलिख्य पश्चिमादिप्रदक्षिणम् ।
ग्रन्थिस्थानेषु वर्गाणां कादीनां परमेश्वरि ॥ १८ ॥
विलिखेत्सप्तसंख्यानामाद्यार्णं क्रमतः प्रिये ।
क्षकारमष्टमे योज्यं शेषान्वर्णान्क्रमेण तु ॥ १९ ॥
त्रिशूलाग्रेषु संलिख्य पश्चिमादिक्रमेण तु ।
तद्बाह्ये मातृकावृत्तं विलिख्य परमेश्वरि ॥ २० ॥
चतुरस्रे महेशानि मातृकां कामगर्भिताम् ।
विलिख्य पूजयेद्यन्त्रं हेमरौप्यादिपट्टके ॥ २१ ॥
ताम्रे वा दर्पले ताणे काश्मीरप्रभवेऽपि वा ।
चन्दनाद्यन्विते भूमौ कुङ्कुमेनाथ वा पुनः ॥ २२ ॥
सिन्दूररजसा वाऽपि कस्तूरीघुसृणेन्दुभिः ।
भूर्जे गोरोचनाद्रव्यैः कल्पितं मानसेऽथ वा ॥ २३ ॥
सुवर्णरत्नलेखिन्या सर्वकार्यार्थसाधकः ।
विलिख्य यन्त्रं देवेशि पूजाद्रव्यैः प्रपूजयेत ॥ २४ ॥
कुलागमक्रमेणैव ध्यात्वा ब्रह्मविकाशिनीम् ।
मूलादिब्रह्मरन्ध्रान्तं बिसतन्तुतनीयसीम् ॥ २५ ॥
*उद्यदादित्यरुचिरां स्मरेदशुभशान्तये ।
भ्रमद्भ्रमरनीलाभधम्मिल्लामलपुष्पिणीम् ॥ २६ ॥
ब्रह्मरन्ध्रस्फुरद्भृङ्गमुक्तारेखाविराजिताम् ।
मुक्तारेखालसद्रत्नतिलकां मुकुटोज्ज्वलाम् ॥ २७ ॥
विशुद्धमुक्तारत्नाढ्यां चन्द्ररेखाकिरीटिनीम् ।
भ्रमद्भ्रमरनीलाभनयनत्रयराजिनीम् ॥ २८ ॥
सूर्यभास्वन्महारत्नकुण्डलालंकृतां पराम् ।
शुक्राकारस्फुरन्मुक्ताहारभूषणभूषिताम् ॥ २९ ॥

* इदमर्धं ख. पुस्तके नास्ति ।

१ ख. ग्रन्थि स्था° । २ क स्थाने । ३ ख. वा । चारुपीठेऽथ वा भू° । ४ ख. कुङ्कुमागरुचन्दनैः । ५ ख. °धकम् । वि° ।

ग्रैवेयाङ्गदमुक्ताभिः स्फुरत्कान्तिविराजिताम् ।
गङ्गातरङ्गकर्पूरशुभ्राम्बरविराजिताम् ॥ ३० ॥
श्रीखण्डवल्लीसदृशबाहुवल्लीविराजिताम् ।
कङ्कणादिलसद्भूषां मणिबन्धलसत्प्रभाम् ॥ ३१ ॥
प्रवालपल्लवाकारपाणिपल्लवराजिताम् ।
वज्रवैडूर्यमुक्तालिमेखलां विमलप्रभाम् ॥ ३२ ॥
रक्तोत्पलदलाकारपादपल्लवभूषिताम् ।
नक्षत्रमालासंकाशमुक्तामञ्जीरमण्डिताम् ॥ ३३ ॥
वामेन पाणिनैकेन पुस्तकं चापरेण तु ।
अभयं च प्रयच्छन्तीं साधकाय वरानने ॥ ३४ ॥
अक्षमालां च वरदं दक्षपाणिद्वयेन हि ।
दधतीं चिन्तयेद्देवीं वश्यसौभाग्यवाक्प्रदाम् ॥ ३५ ॥
क्षीरकुन्देन्दुधवलां प्रसन्नां संस्मरेत्प्रिये ॥ ३६ ॥

इति श्रीमज्ज्ञानार्णवे नित्यातन्त्रे त्रिपुरेश्वरीध्यानं नाम तृतीयः पटलः ॥ ३ ॥

अथ चतुर्थः पटलः ।

श्रीदेव्युवाच—

चक्रमण्डलमाख्यातं न पूजा तत्र मण्डले ।
कथिता परमेशान श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि पूजामण्डलमुत्तमम् ।
पीठपूजां विधायाऽऽदौ रविदेवीविराजिताम् ॥ २ ॥
वामा ज्येष्ठा च रौद्री च अम्बिकेच्छा ततः परम् ।
ज्ञाना क्रिया कुब्जिका च ऋद्धिश्चैव विषघ्निका ॥३॥
दूतरी चैव आनन्दा देवि द्वादश शक्तयः ।
मुक्ताफलामलमणिस्फुरच्छत्रं शशिप्रभम् ॥ ४ ॥
गङ्गातरङ्गधवलं चामरद्वयमद्रिजे ।
नवरत्नस्फुरद्दीप्ति ताम्बूलस्य करण्डकम् ॥ ५ ॥

---

१ ख. °दपत्रालिस्फु° । २ क. °न्तिजितामृता° । ३ ख. °न्धमणिप्र° । ४ ख. °धर-लग्नालि° । ५ ख. °शमञ्जुम° । ६ ख. °विवेदावि° ।

अध्याय – चतुर्थ

आचार्य अमृतवाग्भव के अनुसार

सैद्ध योग

1) नादयोग :-

' श्रीसिद्धमहारहस्यम् ' में श्रीमदअमृतवाग्भवाचार्य ने जिस योग विशेष का निरूपन किया है, उसको उन्होंने सिद्धों द्वारा अनुसरित होने से ' सैद्धयोग ' संबोधित किया है । जिस नाद योग का विशेषतः उन्होंने उल्लेख किया है, उसको नादयोग के अतिरिक्त ध्वनियोग एवं वर्णयोग भी कहा जाता है । शंकराचार्य ने योगतारावली में इसे 'नादानुसंधानयोग ' कहा है । सिद्ध गोरखनाथ की परम्परा एवं योग ग्रन्थों में भी इसे इसी नाम से स्मर्ण किया गया है । भक्तिकाल के कबीर, गुरूनानक, रविदास, मीरां, तुलसीदास आदि सन्तों ने इसे 'सुरति शब्द' योग नाम से अभिहित किया है । अभिनवगुप्त ने तन्त्रालोक में इसके सम्बन्ध में कहा है कि प्राण के उच्चार से एक अव्यक्त ध्वनि का सतत स्फुरण होता है, जिसको 'ध्वनिवर्ण ' कहते है ।[1] इस नादात्मक वर्ण में सभी प्रकार के वर्ण अभिव्यक्त रूप में रहते हैं । चूंकि यह शास्वत् और अकृत्म, अकृत्रम तथा स्वाभाविक रूप वाला है, इसलिए इसे ' अनाहतनाद ' भी कहते हैं ।[2]

---

1) उक्तो य एष उच्चारस्तत योऽसौ स्फुरन् स्थितः ।
अव्यक्तानुकृतिप्रायो ध्वनिर्वर्णः स कथ्यते ।। (तं. आ. 2 – 131)

2) एको नादात्मको वर्णः सर्ववर्णविभागवान् ।
सोऽनस्तमितरूपत्वादनाहत होदितः ।। (तं. आ., 6/216)

स्वच्छन्दतन्त्र में कहा गया है कि इस अनाहदनाद को कोई उच्चारित नहीं करता है और न ही किसी से यह उत्पन्न होता है । सभी प्राणियों के हृदय में यह स्वयं ही स्फुरित होता रहता है ।[1]

नदयोग की विधि :- आचार्य अमृत्वाग्भव जी के अनुसार इस प्राचीन महान् योग के करने से आत्म स्वरूप की अभिव्यक्ति सहज ही हो जाती है । यह नादयोग गुफा आदि एकान्त और निःशब्द स्थान में अपनी दो तर्जनियों के द्वारा अपने दोनों कर्णछिद्रों को बन्द करके किया जाता है ।[2]

'योगप्रदीपिका ' में श्रीस्वात्माराम योगी ने ' नादयोग ' पर विस्तृत प्रकाश डाला है । उनके अनुसार यह नाद साधन विक्षिप्तचित मूर्खों के लिए भी चित्त को समाहित करने में विशेष उपयोगी है ।[3] बहुत ही सरल साधन होने से सर्व साधारण अभ्यासी भी इसके अभ्यास से मन की एकाग्रता पा सकते हैं । नादयोग की चार अवस्थाएँ मानी जाती हैं –

---

1) नास्योच्चारयिता कश्चित्प्रतिहन्ता न विद्यते । (तं. आ. वि. पृ.-149)
स्वयमुच्चरते देवः प्राणिनामुरसि स्थितः ।।

2) पिधान कर्णकुहरे तर्जनीभ्यां गुहादिषु । (सि. रह. आह. 6/2)
नादयोगेन सेवन्ते मुनयः शाकमेव नः ।।

3) अशक्यतत्त्वबोधानां मूढानामपि सम्मतम् । (यो. प्र. पृ.-65 श्लो. - 65)

आरम्भावस्था, घटावस्था, परिचयावस्था और निष्पत्त्यवस्था ।[1]

1) **आरम्भावस्था** :- इन चारों अवस्थाओं में आरम्भावस्था को प्रथम कहा जाता है । प्राणायाम के अभ्यास से जब 'हृदय देश के समीपस्थ अनाहत चक्र ' में वर्तमान ब्रह्मग्रन्थि का भेदन हो जाता है । तब वहाँ पर चित्त को स्थित करने से शरीर के भीतर हृदयरूप आकाश से आनन्दप्रद आभूषणों की सी विचित्र ध्वनि सुनाई देती है, जिस के श्रवण से मन स्थित होने लगता है ।[2]

जिस अभ्यासी को हृदय आकाश से आनन्दप्रद ध्वनि श्रवण होने लगती है, वह अभ्यास के दृढ़भूमि होने पर उत्तमदेह, सुन्दरगन्ध तेजस्वी, स्वस्थ योगी हो जाता है । इस अवस्था को आरम्भावस्था करते हैं ।[3]

2) **घटावस्ता** :- नाद श्रवण के उपरान्त चित्त की एकाग्रता के परिणामस्वरूप द्वितीय स्थिति का नाम घटावस्था है । जब विशेष प्राणायाम एवं नाद श्रवण से अभ्यासी के, प्राणवायु, अपानवाय,

---

1) आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पतिः सर्वयोगेषु स्यादवस्थाचतुष्टयम् ।। (यो. प्र. 4/49)

2) ब्रह्मग्रन्थेर्भवेद् भेदोह्यानन्दः शून्यसम्भवः ।
विचित्रः क्वणको देहेऽनाहत्तः श्रूये ध्वनिः ।। (यो. प्र. 4/7)

3) दिव्यदेहश्च तेजस्वी दिव्यगन्धस्त्वरोगवान् ।
सम्पूर्णहृदयः शून्य आरम्भो योगवान् भवेत ।। (यो. प्र. 4/71)

अभ्यासी के, प्राणवायु, अपानवायु, वीर्य और चित्त समानचेष्टा हो जाते हैं तथा सुषुम्ना मार्ग से प्राणगति होने लगती है वह 'घटावस्था ' होती है । जो अभ्यासी घटावस्था को प्राप्त कर लेता है । वह स्थिर – आसन, विवेकी देवसदृश मेधावी हो जाता है ।[1]

3. <u>परिचयावस्था</u> :- जब प्राणवायु सुषुम्ना मार्ग से भृकुटी में पहुँच जाती है तथा मन भी समाहित हो जाता है । तब सम्प्रज्ञात् समाधि का भृकुटी स्थान में ही परिचय होने लगता है । भृकुटी में प्राण और चित्त के समाहित होने पर जो स्थिति बनती है, वह परिचयावस्था कहलाती है । उस अवस्था में अनेक प्रकार के शब्द श्रवण होते हैं तथा अणिमा आदि सिद्धियाँ प्राप्त होने लगती हैं ।[2]

4. <u>निष्पत्त्यवस्था</u> :- कुछ योगी भृकुटी को ईश्वर का स्थान मानते हैं । जब भृकुटी ध्यान करते हुए प्राणवायु भी वहाँ चली जाती है तब ''रूद्रग्रन्थि '' का भेदन माना जाता है ।

---

1) द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः ।
दृढासनो भवेद्योगी ज्ञानी देवसमस्तदा ।। (यो. प्र. 4/72)

2) तृतीयायां तु विज्ञेयो विहायोमर्दलध्वनिः ।
महाशून्य तदायाति सर्वसिद्धिसमाश्रयम् ।। (यो. प्र. 4/74)

जिस अवस्था में प्राणवायु भृकटी से ऊपर ब्रह्मरन्ध्र में चली जाती है, उस अवस्था को निष्पत्त्यवस्था कहते हैं । निष्पत्त्यवस्था में बॉस की वीणा के तुल्य शब्द होता है ।[1]

इन चारों साधनों के अभ्यास से जब चित्त समाहित हो जाता है, जब पातञ्जल राजयोग के अन्तरङ्ग साधन धारणा, ध्यान और समाधि की योग्यता हो जाती है । समाधि में जब चित्तधर्मों से पृथक् आत्मा को अनुभव कर लिया जाता है, तब चेतना, विशुद्धता और नित्यता गुणों से जीवात्मा स्वस्वरूप को, सृष्टि के पालक और संहारक योगीश्वर परमात्मा के समान ही सजातीय मानने लग जाता है । उस समय बैषयिक संस्कारों का पर्यवसान हो जाता है ।[2] भगवान् गौतम आचार्य के "युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगम् " इस मनोलक्षण के अनुसार किसी एक पदार्थ में चित्त के लगने पर अन्य पदार्थ की ओर चित्तवृति नहीं जाती है ।"

---

1. रूद्रगन्थिं यदा भित्त्वा शर्वपीठगतोऽनिलः । (यो. प्र. 4/76)
   निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत् ।।
2. एकीभूतं यदा चित्तं राजयोगाभिधानकम् । (यो. प्र. 4/77)
   सृष्टिसंहारकर्त्तासौ योगीश्वरसमो भवेत् ।।

इससे नादानुरक्त चित्त अन्य विषयों में नहीं जाता ।[1]

नादयोग की उपयोगिता :- श्रीस्वात्माराम योगी 'योगप्रदीपिका' में नादयोग की उपयोगिता पर प्रकार डालते हुए लिखते हैं कि शब्द, रूप, रस, गन्ध और स्पर्श पञ्च विषयरूपी उद्यान में स्वच्छन्द विचरण करने वाले चित्तरूपी उन्मत्त हाथी को अपने वश में करने के लिए नादरूपी तीक्ष्ण अंकुश आवश्यक है ।[2] जिस प्रकार से सपेरे की बीन ध्वनि को सुनकर सर्प शीघ्र ही धावन क्रिया का परित्याग करके स्थिर हो जाता है । उसी प्रकार अन्तःकरण चित्तरूपी सर्प (भुजङ्ग) नाद श्रवण द्वारा अन्य रूप स्पर्श, गन्ध, रस इन विषयों की ओर दौड़ना त्याग कर समाहित हो जाता है ।[3]

नाद श्रवण के निरन्तर अभ्यास से निश्चित् ही चित्त और प्राण समाहित हो जाते हैं । चित्त और प्राण के अवस्थित होने पर चित्त में होने वाले काम – क्रोध, लोभ, मोह आदि मानस विकार रूपी पापचक्र क्षीण हो जाता है । तथा आत्मदर्शन की योग्यता आ जाती है । जिस प्रकार से औषधि प्रयोग विशेष द्वारा आबद्ध पारा चाञ्चल्य हीन होकर आकाश में गमनागमन करने योग्य हो जाता है, उसी प्रकार नाद रूप गन्धक भस्म द्वारा विक्षिप्त चित्त समाहित हो कर निराकार सर्वव्यापक परमात्मा में अवस्थित होने योग्य हो जाता है ।[4]

---

1) " नादासक्तं तथा चित्तं विषयान्नहि काङ्क्षते " ।। (यो. प्र. 4/90)

2) मनो मत्तगजेन्द्रस्य विषयोद्यानचारिणः ।
नियन्त्रणे समर्थोऽयं निनादनिशिताङ्कुशः ।। (यो. प्र. 4/91)

3) नादश्रवणतः क्षिप्रमन्तरङ्गम : ।
विस्मृत्य सर्वमेकाग्रः कुत्रचिन्न हि धावति ।। (यो. प्र. 4/97)

4) बद्धं विमुक्तचाञ्चल्यं नाद्रगन्धकजारणात् ।
मनः पारदमाप्नोति निशलम्बाख्यखेऽटनम् ।। (यो. प्र. 4/96)

2. **त्राटक योग** :- आचार्य अमृत्वाग्भव जी के अनुसार त्राटक योग को निर्वात स्थान पर निश्चितत्‌तया चमकती हुई दीपक की ज्योति पर अथवा दीवार पर अङ्कित किए हुए बिन्दु पर दृष्टि जमा कर किया जाता है ऐसा करके योगी महानुभाव अपने आपको शक्तिधन चिद्रूपदा में पहचान लेते हैं ।[1] इस योग में किसी सूक्ष्म पदार्थ को तब तक देखते रहना चाहिए, जब तक आँखों में आँसु न आ जाए । अश्रुपात होने पर ही देखना बन्द करना चाहिए ।[2]

त्राटक कर्म के लाभ :- श्रीस्वात्माराम योगी ने योगप्रदीपिका में त्राटक कर्म के लाभ बताते हुए कहा है कि त्राटक करने से नेत्रों के अनेक रोगों का तथा तन्द्रा, आलस्य आदि दोषों का विनाश हो जाता है । इस त्राटक कर्म को अजितेन्द्रिय, सदाचारहीन एवं अधर्मात्मा लोगों से सदा स्वर्ण पेटिका के समान बचाकर रखना चाहिए ।[3]

---

1) दीपज्योतिषि निर्वाते बिन्दौ वा भित्तिलाञ्छिते ।
केचित् त्राटकयोगेन शाकं प्रत्यभिजानते ।। (सि. रह. आह. 6/3)

2) निरीक्षेन्निरचलदृशा सूक्ष्मलक्ष्यं समाहितः ।
अश्रुसम्पातपर्यन्तमाचार्यैस्त्राटकं स्मृतम् ।। (यो. प्र. 2/31)

3) मोचनं नेत्ररोगाणां तन्द्रादीनां कपाटकम् ।
यत्नतस्त्राटकं गोप्यं यथा हाटकपेटकम् ।। (यो. प्र 2/32)

3. लययोग :- श्रीमदामृतवाग्भवाचार्य जी के अनुसार लययोग के द्वारा योगी महानुभाव प्रपञ्च को अपने में विलीन करके तथा पुनः स्वयमपि परम्परा से कारण तत्त्वों से उनके भी कारण तत्त्वों में विलीन होकर परमशिव अर्थात् मोक्ष को प्राप्त होते हैं ।[1] क्योंकि अन्ततोगत्वा सारी की सारी कारण परम्परा का मूल कारण परमेश्वर है, जिसका वास्तविक स्वरूप परिपूर्ण शक्ति ही है । शिवसूत्र में भी ऐसा ही कहा गया है ।[2] राजानक क्षेमराज भी लययोग के सम्बन्ध में ऐसा ह ीमत अभिव्यक्त करते हैं ।[3] विज्ञानभैरभ में इसके लिए भुवनाध्वा एवं कालाध्वा शब्द प्रयुक्त किये गए हैं । भुवनाध्वा के अनुसार साधक को मन के द्वारा समस्त स्थूल प्रपञ्च को सूक्ष्म में और सूक्ष्म को परमकारण में तब तक लय चिन्तन करना चाहिए, जब तक की मन का भी उसमें लय न हो जाए ।[4] कालाध्वा योग के अनुसार साधक को अपने पॉव के दायें अंगुष्ठ से कालाग्निरूद्र का उदय चिन्तन करते हुए क्रमशः सम्पूर्ण शरीर का दहन अनुभव करना होता है, जब तक के अन्त में शानताभास की अनुभूति न हो जाए । इसको दाहभावना भी कहते हैं ।[5]

---

1) आपाद्य पञ्चतां केचित् प्रपञ्चं लययोगतः ।
कारणात् कारणे लीनाः शाकमेवाश्रयन्ति नः ।। (सि. रह. आह. 6/6)

2) शरीरे संहारः कलानाम् (शि. सू. 3/4)

3) महाभूततात्मकं, पुर्यष्टकरूपं , समनान्तं यत् स्थूलं , सूक्ष्मं, परं शरीर, यत्रं याः पृथिव्यादिशिवान्ततत्त्वरूपाः कला भागाः तासां संहारः , स्वकारणे लयभावनया दाहादिचिन्तनयुक्त्या वा ध्यातव्यः (शि.सू.वि. पृ-135)

4) भुवनाध्वादिरूपेण चिन्तयेत्क्रमशोऽखिलम् ।
स्थूलसूक्ष्मपरस्थित्या यावदन्ते मनोलयः ।। (शि. सू. 3/56)

5) कालाग्निन कालपदादुत्थितेन स्वकं पुरम ।
प्लुष्टं विचिन्तयेदन्ते शान्ताभासः प्रजायते ।। (वि. भै. श्लो.-52)

4. खेचरी मुद्रा :- शब्दिक रूप से खेचरी का तात्पर्य आकाश में विचरण करने वाली होता है और शरीर के अंगों के विशेष प्रकार के विन्यास को मुद्रा कहते हैं । परन्तु अध्यात्मपरक शास्त्रों में 'ख ' से तात्पर्य चेतना से लिया गया है । अतेव खेचर से तात्पर्य 'शिव ' लिया गया है और इससे सम्बन्धित मुद्रा को खेचरी मुद्रा कहा जाता है । जिसके अनुसरण से शैवी चेतन्यता की अनुभूति अनयास हो जाती है । मुद्रा शब्द शैवागमानुसार अनेक अर्थों का प्रतीक है -

1. मुदम् (हर्षम्) राति (ददाति) अर्थात् जो आनन्द प्रदान करती है ।
2. मुम् (बन्धनम्) द्रावयति निवारयति अर्थात् जो बन्धन को दूर कर देती है ।
3. मुद्रयति इति मुद्रा अर्थात् जो जगत की सृष्टि, स्थिति, संहार को तुर्या में मुद्रित करती है , उसे मुद्रा कहते हैं । अभिवन गुप्त ने तन्त्रालोक में कहा है कि इसको मुद्रा इसलिए कहते हैं क्योंकि यह शरीर की सभी जाग्रत् आदि अवस्थाओं में आत्मस्वरूप को अनुभव करने के योग्य बनाती है । [1] खेचरी मुद्रा को व्योमचक्र भी कहते हैं ।

---

1) मुदं स्वरूपलाभाख्यं देहद्वारेण चात्मना ।
रात्यर्पयति यत्तेन मुद्रा शास्त्रेषु वर्णिता ।। (तं. आ. आह. - 32)

भगवान शिव सिद्धवसुगुप्त को उपदेश देते हुए बतलाते हैं कि शुद्धविद्या के उदय होने पर स्वाभाविक खेचरी शिव अवस्था की प्राप्ति हो जाती है ।[1] कुलचूड़ामणि में कहा गया है कि परमसत्ता का एक ही सृष्टिमय बीज और मुद्राओं में एक ही खेचरी मुद्रा है इन दोनों की जिनको अनुभूति हो जाती है, तो वह अतिशान्त पद को प्राप्त हो जाता है ।[2] स्पन्दशास्त्र में मन्त्रवीर्य के स्वरूप को निरूपित करते हुए मुद्रावीर्य को संग्रहित किया गया है , जिसमें बताया गया है कि जब क्षोभ नष्ट (प्रलीन) हो जाता है, तब परमपद की प्राप्ति हो जाती है ।[3]

खेचरी मुद्रा की विधि :- श्रीमदअमृतवाग्भवाचार्य के अनुसार इस अद्वितीय मुद्रा को करने के लिए ऊपर की ओर सञ्चार करने वाली अपनी जिहा से अपने मस्तिष्क की ओर जाने वाले छिद्र को भरकर चन्द्रमण्डल से टपकने वाले अमृत का पान किया जाता है ।[4]

---

1) ' विद्यासमुत्थाने स्वाभाविके खेचरी शिवावस्था ' (शि. सू. 2/5)

2) त्रयुक्तं कुलचुड़ामणौ –
एकं सृष्टिमयं बीजमेका मुद्रा च खेचरी ।
द्वावेतौ यस्य जायेते सोऽतिशान्तपदे स्थित : ।। (शि. सू. पृ.- 99)

3) यदा क्षोमः प्रतीयेत तदा स्यात्परमं परम् ।
इत्यर्धेन अन्यपरेणापि चूड़ामण्युक्तं खेचरीस्वरूपं भङ्गया सूचितम् ।। (स्. का. 1/9)

4) केचित् कपालक कुहरं खेचर्यापूर्य जिह्वया ।
सोमपीयूषपानेन यजन्ते शाकमेव नः ।। (सि. रह. आह. 6/5)

खेचरी मुद्रा के लाभ :-

खेचरी मुद्रा को करते हुए जो योगी जिह्वा को लौटाकर कपाल के मध्य छिद्र में लगाकर अर्धक्षण भी स्थित रहता है, वह सर्प वृश्चिक आदि के विषों से तथा शीघ्र जरा और मृत्यु के आक्रमण से सुरक्षित रहता है ।[1] खेचरी मुद्रा का अभ्यास करनेवाले योगी को रोग, मृत्यु, निद्रा, आलस्य, भूख, प्यास, मुर्च्छा शीघ्र नहीं सताते हैं । अर्थात् इसके अभ्यास से तितिक्षा बढ़ती है । रोगों के आक्रमण से मुक्त होकर कर्मबन्धन का क्षय तथा दीर्घायुष्य लाभ होता है ।[2] जो योगी इस खेचरी मुद्रा से अपने वीर्य की सुरक्षा करके अपने शरीर को पुष्ट बना लेता है, वह सर्पादि विषैले जन्तुओं के काटने पर भी विषाक्रान्त नहीं होता है ।[3] जिस प्रकार से अग्नि काष्ठों को तथा दीपक तेल और बत्ती को नहीं त्यागते, ठीक उसी प्रकार से ब्रह्मचर्ययुक्त शरीर को आत्मा नहीं त्यागती ।[4] अथर्ववेद में भी कहा गया है कि ब्रह्मचर्य तप से ही देवों ने मृत्यु पर विजय प्राप्त की है ।[5]

---

1) रसनामूर्ध्वगां कृत्वा क्षणार्धमपि तिष्ठति ।
विषैर्विमुच्यते योगी व्याधिमृत्युजरादिभिः ।। (यो. प्र. 3/38)

2) न रोगो मरणं तन्द्रा न क्षुधा तृषा ।
न च मूर्च्छा भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ।। (यो. प्र. – 3/45)

3) नित्यं सोमकलापूर्णं शरीरं यस्य योगिनः ।
तक्षकेणापि दष्टस्य विषं तस्य न सर्पत्ति ।। (यो. प्र. – 3/45)

4) इन्धनानि यथा वह्निस्तैलवर्तिं च दीपकः ।
तथा सोमकलापूर्णं देही देहं न मुञ्चति ।। (यो.प्र. 3/46)

5) ''ब्रह्मचर्येण तपसा देवा मृत्युमपाध्नत ''। (अथर्व 11/5/19)

खेचरी मुद्रा में जिह्वा को तालुभाग में लगाने पर तथा मन को भृकुटी में स्थिर करने पर प्राणवायु सुषुम्ना मार्ग से चलकर ब्रह्मरन्ध्र में स्थिर होने लगती है । वायु सुषुम्ना मार्ग से बहने पर वीर्य भी मस्तिक की ओर गति करने लगता है । इस स्थिति में ऊपर मस्तिक में स्थित चन्द्रवत् शीतल वार्य के प्रभाव से जो ब्रह्म को प्राप्त करने में आनन्द प्राप्त होगा, उस आनन्द को अमरवारूणी आनन्द कहेंगे । [1] जब कपालछिद्र जिह्वा द्वारा, लवण, कटु, अम्ल, दुग्ध, मधु, धृत के तुल्य रसों का आस्वादन होने लगता है, तब अनेक रोगों का क्षय, वृद्धत्व नाश, शास्त्र प्रहारकाल में रक्षा, अणिमा आदि अष्ट ऐश्वर्य लाभ तथा सिद्धों का साक्षात्कार इत्यादि लाभ होने लगते हैं ।[2] जिस प्रकार से सृष्टिरूपी कार्य का कारण मूल प्रकृति, तथा देवों में परमात्मा देव है एवं प्रत्याहारात्मक अवस्ताओं में मनोन्मनी अवस्था श्रेष्ठ है उसी प्रकार सम्पूर्ण मुद्राओं में खेचरी मुद्रा उत्तम है ।[3]

---

1) जिह्वाप्रवेशसम्भूतवह्निनोत्पादितः खलु ।
चन्द्रात् यः सारः स स्यादमरवारूणो ।। (यो. प्र. 3/49)

2) चुम्बन्ती यदि लम्बिकाग्रमनिशं जिह्वारसस्पन्दिनी,
सक्षारा कटुकाम्लदुग्धसदृशी मध्वाज्यतुल्या तथा ।
व्याधीनां हरणं जरान्तकरणं शस्त्रागमोदीरणं,
तस्य स्यादमरत्वमष्टगुणितं सिद्धाङ्गनाकर्षणम् ।। (यो. प्र. 3/50)

3) एकं सृष्मियं बीजमेका मुद्रा च खेचरी ।
एको देवो निरालम्ब एकावस्था मनोन्मनी ।। (यो. प्र. 3/54)

बज्रोली मुद्रा :- श्रीमद् अमृतवाग्भव आचार्य जी ने श्रीसिद्धमहारहस्यम् में बज्रोली क्रिया पर अधिक प्रकाश नहीं डाला है । उनके अनुसार कोई विरले ही साधक स्त्री के साथ मिथुन बनकर बज्रोली क्रिया के अभ्यास के द्वारा अपने शरीर को वज्रसार जैसा सुदृढ़ बनाकर ' सकने ' (परमशिव) का भजन करते हैं ।[1] अतः बज्रोली क्रिया का मूल प्रयोजन अपनी शक्तिघनता का साक्षात्कार करना ही है ।

योगप्रदीपिका में श्रीस्वात्माराम योगी ने बज्रोली क्रिया के सम्बन्ध में अपने विचार प्रकट करते हुए कहा है कि योग और भोग ये दोनों शब्द सर्वथा परस्पर विरोधार्थक हैं । ''ब्रह्मचर्य की रक्षा योग की सिद्धि के बिना तीनों कालों में असम्भव है '' पतञ्जलि आदि महर्षियों ने जो योग में यम और नियम को योग की आधार शिला माना है तथा वही मार्ग श्रेयस्कर है । श्रीस्वात्माराम योगी के अनुसार वीर्य की सुरक्षा से जीवन तथा वीर्य के विनाश से मृत्यु होती है, अतः योगी को मृत्युञ्जय

---

1) योषिता मिथुनीभूता विरलाः साधकाः पुनः ।
वज्रोल्या वज्रसाराङ्गा भजन्ते शाकमेव नः ।। (सि. रह. आह. 6/7)

के उत्कृष्ट साधन वीर्य की सुरक्षा करनी चाहिए ।[1] वीर्य सुरक्षा से योगी का शरीर सुगन्धमय हो जाता है । जब तक ब्रह्मचर्य के सुपरिपालन से शरीर में वीर्य सुरक्षित रहता है, तब तक असामयिक मृत्यु नहीं होती है तथा दीर्घायुष्य प्राप्त होता है ।[2] अतः योगाभ्यासी को महान् प्रयत्न से मन तथा वीर्य की सुरक्षा करनी चाहिये । क्योंकि मनुष्यों के चित्त की पवित्रता से वीर्य रक्षा तथा वीर्य की रक्षा से चित्त स्वच्छ बनता है ।[3]

---

1) एवं संरक्षयेद्बिन्दुं मृत्युं जयति योगवित् ।
मरणं बिन्दुपातेन जीवनं बिन्दुधारणात् ।। (यो. प्र. 3/88)

2) सुगन्धो योगिनो देहे जायते बिन्दुधारणात् ।
यावद् बिन्दुः स्थिरो देहे तावत् कालभयं कुतः ।। (यो. प्र. 3/89)

3) चित्तायत्तं नृणां शुक्रं शुक्रायत्तं च जीवितम् । (यो. प्र. 3/90)

5. षण्मुखी मुद्रा :- आचार्य के अनुसार योग की इस मुद्रा को पद्मासन लगाकर तथा प्राणों को रोककर किया जाता है ।[1] अर्थात् दोनों हाथों के अंगुठों कनिष्टिकाओं ओर अनामिकाओं के द्वारा क्रम से कर्णछिद्रों को और नेत्रों को दबाए रखते हुए शेष दो - दो अंगुलियों को माथे पर जमाकर रखकर षण्मुखी मुद्रा की जाती है ।

सैद्धदर्शन में माया दशा को भव, विद्या दशा को अभव और शक्ति दशा को अतिभव कहा जाता है । साधक द्वारा अपने आप का परम - आनन्दमय चमत्कारात्मक विमर्शन ही उसका अभिनन्दन होता है । इस प्रकार साधक में कृतकृत्यता रूपी अपूर्व सन्तोष अभिष्यक्त होता रहता है । अतः साधक पद्मासन में ठहरकर, शरीर के सभी अंगों को समभाव में सीधे ठहराकर, एक दूसरे के ऊपर रखे हुए दोनों हाथों को (हथेलिया ऊपर किए हुए) गोद में ठहराकर [2] निर्वात स्थान पर जलते हुए दीपज्योति की तरह निश्चल बैठा हुआ, इच्छा, ज्ञान और क्रिया, इन सभी का न ही उपादान और न ही परित्याग करता हुआ तथा स्थिर एवं निश्चल ठहरा हुआ नित्य आत्मरूप परमशिव का लगातार साक्षातकार करता है ।[3]

---

1) पद्मासनमधिष्ठाय मुद्रामालम्ब्य षण्मुखीम् ।
केचित् प्राणनिरोधेन भजन्ते शाकमेव नः ।। (सि. रह. आह. 5/4)

2) पद्मासनमधिष्ठाय समसर्वाङ्गविग्रहम् ।
परस्परोपरिधृतौ करौ कृत्वाङ्गावुभौ ।। (सि. रह. आह. 6/21)

3) निवातदीपवत्तिष्ठन् क्रियाज्ञानैषणाः समाः ।
अमृह णन्नत्यजन् नित्यं स्वात्मानं शम्भुमीक्षते ।। (सि. रह. आह. 6/22)

क्योंकि असीम सामर्थ्य युक्त और असीम परमशिव रूपी सकना ही माया दशा और विद्यादशा में अपने ही प्रकाश से शक्ति दशा का विमर्शन करके साधकों को आनन्दित करता है ।[1]

इस प्रकार जब इच्छा, ज्ञान और क्रिया तीनों ही शान्त हो जाती है और अन्तःकरण निश्चल ठहरे रहते हैं तो सारे संकल्प – विकल्पों के शान्त हो जाने पर आत्मदेव अपने ही चित्प्रकाश से स्वयमेव चमकता हुआ अपने आप का अपने आप ही साक्षात्कार करता रहता है । इस अवस्था में किसी उपाय के अभ्यास को किए बिना ही स्वयमेव आत्मसाक्षात्कार हो जाता है ।

निष्कर्षतः आचार्य के अनुसार सैद्ध ही सभी योगों में अत्कृष्ट योग तथा सभी राजयोगों में महाराजाधिराज योग है । इस प्रकार सैद्ध योग ही स्वात्मरूप ' सकने ' की प्रत्यभिज्ञा को प्राप्त कराने में महाशक्ति स्वरूप है । इस योग के अभ्यास से साधक अवश्य ही समस्त दिव्य शक्तियों के एकधन स्वरूप अपने वास्तविक आप (स्वरूप) को पहचान कर पूरी तरह से कृतकृत्य हो जाता है ।[2]

---

1) भवाभवे चातिभवं विमृश्य स्वप्रकाशतः ।
स्वात्मानमभिनन्दामि महाशाको महाबलः ।। (सि. रह. आह. 6/20)

2) महाराजाधिराजोऽयं योगानामुत्तमोत्तम : ।
स्वशाकप्रत्यभिज्ञाने महाशाको न संशयः ।। (सि. रह. आह. 6/33)

कैलाशशिखरासीनं देवदेवं जगद्गुरुम्।
पृच्छति स्म महादेवी ब्रूहि ज्ञानं महेश्वर॥ १॥

देवी उवाच

कुतः सृष्टिर्भवेद् देव कथं सृष्टिर्विनश्यति।
ब्रह्मज्ञानं कथं देव सृष्टिसंहारवर्जितम्॥ २॥

ईश्वर उवाच

अव्यक्ताच्च भवेत् सृष्टिरव्यक्ताच्च विनश्यति।
अव्यक्तं ब्रह्मणो ज्ञानं सृष्टिसंहार वर्जितम्॥ ३॥
ओङ्कारादक्षरात् सर्वास्त्वेता विद्याश्चतुर्दश।
मन्त्र - पूजा - तपो - ध्यानं कर्माकर्म तथैव च॥ ४॥
षडङ्गं वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रपुराणानि एता विद्याश्चतुर्दश॥ ५॥
तावद् विद्या भवेत् सर्वा यावद् ज्ञानं न जायते।
ब्रह्मज्ञानं पदं ज्ञात्वा सर्वविद्या स्थिरा भवेत्॥ ६॥
वेदशास्त्रपुराणानि सामान्यगणिका इव।

या पुनः शाम्भवी विद्या गुप्ता कुलवधूरिव ॥ ७ ॥

देहस्थाः सर्वविद्याश्च देहस्थाः सर्वदेवताः ।

देहस्थाः सर्वतीर्थानि गुरुवाक्येन लभ्यते ॥ ८ ॥

अध्यात्मविद्या हि नृणां सौख्यमोक्षकरी भवेत् ।

धर्म कर्म तथा जप्यमेतत् सर्वं निवर्तते ॥ ९ ॥

काष्ठमध्ये यथा वह्निः पुष्पे गन्धः पयोऽमृतम् ।

देहमध्ये तथा देवः पुण्यपापविवर्जितः ॥ १० ॥

इडा भगवती गङ्गा पिङ्गला यमुना नदी ।

इडापिङ्गलयोर्मध्ये सुषुम्ना च सरस्वती ॥ ११ ॥

त्रिवेणीसंगमो यत्र तीर्थराजः स उच्यते ।

तत्र स्नानं प्रकुर्वीत सर्वपापैः प्रमुच्यते ॥ १२ ॥

देवी उवाच

कीदृशी खेचरी मुद्रा विद्या च शाम्भवी पुनः ।

कीदृश्यध्यात्मविद्या च तन्मे ब्रूहि महेश्वर ॥ १३ ॥

ईश्वर उवाच

मनः स्थिरं यस्य विनावलम्बनं

वायुः स्थिरो यस्य विना निरोधनम्।

दृष्टिः स्थिरा यस्य विनावलोकनं

सा एव मुद्रा विचरन्ती खेचरी॥ १४॥

बालस्य मूर्खस्य यथैव चेतः

स्वप्नेन हीनोऽपि करोति निद्राम्।

ततो गतः पथो निरावलम्बः

सा एव विद्या विचरन्ती शाम्भवी॥ १५॥

देवी उवाच

देवदेव जगन्नाथ ब्रूहि मे परमेश्वर।

दर्शनानि कथं देव भवन्ति च पृथक् पृथक्॥ १६॥

ईश्वर उवाच

त्रिदण्डी च भवेद् भक्तो वेदाभ्यासरतः सदा।

प्रकृतिवादरताः शाक्ता बौद्धा शून्यातिवादिनः॥ १७॥

अतोर्ध्वं गामिनो ये वा तत्त्वज्ञा अपि तादृशाः।

सर्वं नास्तीति चार्वाका जल्पन्ति विषयाश्रिताः॥ १८॥

उमा पृच्छति हे देव पिण्डब्रह्माण्डलक्षणम्।

पञ्चभूतं कथं देव गुणाः के पञ्चविंशतिः ॥ १९ ॥

ईश्वर उवाच

अस्थि मांसं नखं चैव त्वङ्लोमानि च पञ्चमम् ।
पृथ्वी पञ्चगुणा प्रोक्ता ब्रह्मज्ञानेन भासते ॥ २० ॥
शुक्रशोणितमज्जा च मलं मूत्रं च पञ्चमम् ।
अपां पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भासते ॥ २१ ॥
निद्रा क्षुधा तृषा चैव क्लान्तिरालस्यपञ्चमम् ।
तेजः पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भासते ॥ २२ ॥
धारणं चालनं क्षेपं संकोचं प्रसरं तथा ।
वायोः पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भासते ॥ २३ ॥
कामं क्रोधं तथा मोहं लज्जा लोभश्च पञ्चमम् ।
नभः पञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भासते ॥ २४ ॥
आकाशाज्जायते वायुर्वायोरुत्पद्यते रविः ।
रवेरुत्पद्यते तोयं तोयादुत्पद्यते मही ॥ २५ ॥
मही विलीयते तोये तोयं विलीयते रवौ ।
रविर्विलीयते वायौ वायुर्विलीयते तु खे ॥ २६ ॥
पञ्चतत्त्वाद् भवेत् सृष्टिस्तत्त्वात् तत्त्वं वीलीयते ।
पञ्चतत्त्वात् परं तत्त्वं तत्त्वातीतं निरञ्जनम् ॥ २७ ॥

स्पर्शनं रसनं चैव घ्राणं चक्षुश्च श्रोत्रकम्।
पञ्चेन्द्रियमिदं तत्त्वं मनः साधकमिन्द्रियम्॥ २८॥
ब्रह्माण्डलक्षणं सर्वं देहमध्ये व्यवस्थितम्।
साकाराश्च विनश्यन्ति निराकारो न नश्यति॥ २९॥
निराकारं मनो यस्य निराकारसमो भवेत्।
तस्मात् सर्वप्रयत्नेन साकारं तु परित्यजेत्॥ ३०॥

देवी उवाच

आदिनाथ मयि ब्रूहि सप्तधातुः कथं भवेत्।
आत्मा चैवान्तरात्मा च परमात्मा कथं भवेत्॥ ३१॥

ईश्वर उवाच

शुक्रशोणितमज्जा च मेदो मांसं च पञ्चमम्।
अस्ति त्वक् चैव सप्तैते शरीरेषु व्यवस्थिताः॥ ३२॥
शरीरं चैवमात्मानमन्तरात्मा मनो भवेत्।
परमात्मा भवेच्छून्यं मनो यत्र विलीयते॥ ३३॥
रक्तधातुर्भवेन्माता शुक्रधातुर्भवेत् पिता।
शून्यधातुर्भवेत् प्राणो गर्भपिण्डं प्रजायते॥ ३४॥

देवी उवाच

कथमुत्पद्यते वाचा कथं वाचा विलीयते।
वाक्यस्य निर्णयं ब्रूहि पश्य ज्ञानमुदाहर॥ ३५॥

ईश्वर उवाच

अव्यक्ताज्जायते प्राणः प्राणादुत्पद्यते मनः।
मनसोत्पद्यते वाचा मनो वाचा विलीयते॥ ३६॥

देवी उवाच

कस्मिन् स्थाने वसेत् सूर्यः कस्मिन् स्थाने वसेच्छशी।
कस्मिन् स्थाने वसेद् वायुः कस्मिन् स्थाने वसेन्मनः॥ ३७॥

ईश्वर उवाच

तालुमूले स्थितश्चन्द्रो नाभिमूले दिवाकरः।
सूर्याग्रे वसते वायुश्चन्द्राग्रे वसते मनः॥ ३८॥

सूर्याग्रे वसते चित्तं चन्द्राग्रे जीवितं प्रिये।
एतद्युक्तं महादेवि गुरुवाक्येन लभ्यते॥ ३९॥

देवी उवाच

कस्मिन् स्थाने वसेच्छक्तिः कस्मिन् स्थाने वसेच्छिवः।
कस्मिन् स्थाने वसेत् कालो जरा केन प्रजायते॥ ४०॥

ईश्वर उवाच

पाताले वसते शक्तिर्ब्रह्माण्डे वसते शिवः।
अन्तरिक्षे वसेत् कालो जरा तेन प्रजायते॥ ४१॥

देवी उवाच

आहारं काङ्क्षते कोऽसौ भुञ्जते पिबते कथम्।
जाग्रत् स्वप्नसुषुप्तौ च को वाऽसौ प्रतिबुध्यति॥ ४२॥

ईश्वर उवाच

आहारं काङ्क्षते प्राणो भुञ्जतेऽपि हुताशनः ।
जाग्रत्स्वप्नसुषुप्तौ च वायुश्च प्रतिबुध्यति ॥ ४३ ॥

देवी उवाच

को वा करोति कर्माणि को वा लप्येत पातकैः ।
को वा करोति पापानि को वा पापैः प्रमुच्यते ॥ ४४ ॥

शिव उवाच

मनः करोति पापानि मनो लिप्येत पातकैः ।
मनश्च तन्मना भूत्वा न पुण्यैर्न च पातकैः ॥ ४५ ॥

देवी उवाच

जीवः केन प्रकारेण शिवो भवति कस्य च ।
कार्यस्य कारणं ब्रूहि कथं किञ्च प्रसादनम् ॥ ४६ ॥

शिव उवाच

भ्रान्तिबद्धो भवेज्जीवो भ्रान्तिमुक्तः सदाशिवः।

कार्यं हि कारणं त्वञ्च पुनर्बोधो विशिष्यते॥ ४७॥

मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः।

इदं तीर्थमिदं तीर्थं भ्रमन्ति तामसा जनाः॥ ४८॥

आत्मतीर्थं न जानाति कथं मोक्षो वरानने॥

न वेदं वेदमित्याहुर्वेदो ब्रह्म सनातनम्।

ब्रह्मविद्यारतो यस्तु स विप्रो वेदपारगः॥ ४९॥

मथित्वा चतुरो वेदान् सर्वशास्त्राणि चैव हि।

सारं तु योगिभिः पीतं तक्रं पिबन्ति पण्डिताः॥ ५०॥

उच्छीष्टं सर्वशास्त्राणि सर्वा विद्या मुखे मुखे।

नोच्छिष्टं ब्रह्मणो ज्ञानमव्यक्तं चेतनामयम्॥ ५१॥

न तपस्तप इत्याहुर्ब्रह्मचर्यं तपोत्तमम्।

ऊर्ध्वरेता भवेद् यस्तु स देवो न तु मानुषः॥ ५२॥

न ध्यानं ध्यानमित्याहुर्ध्यानं शून्यगतं मनः।

तस्य ध्यानप्रसादेन सौख्यं मोक्षं न संशयः॥ ५३॥

न होमं होममित्याहुः समाधौ तत्तु भूयते।

ब्रह्माग्नौ हूयते प्राणं होमकर्म तदुच्यते॥ ५४॥

पापकर्म भवेद् भव्यं पुण्यं चैव प्रवर्तते।

तस्मात् सर्वप्रयत्नेन ताद्रूप्यं च त्यजेद् बुधः॥ ५५॥

यावद् वर्णं कुलं सर्वं तावज्ज्ञानं न जायते।

ब्रह्मज्ञानपदं ज्ञात्वा सर्ववर्णविवर्जितः ॥ ५६ ॥

देवी उवाच

यत्त्वया कथितं ज्ञानं नाहं जानामि शङ्कर।
निश्चयं ब्रूहि देवेश मनो यत्र विलीयते ॥ ५७ ॥

शंकर उवाच

मनो वाक्यं तथा कर्म तृतीयं यत्र लीयते।
विना स्वप्नं यथा निद्रा ब्रह्मज्ञानं तदुच्यते ॥ ५९ ॥
एकाकी निस्पृहः शान्तश्चिन्ताविवर्जितः।
बालभावस्तथा भावो ब्रह्मज्ञानं तदुच्यते ॥ ६० ॥

श्लोकार्धं तु प्रवक्ष्यामि यदुक्तं तत्त्वदर्शिभिः।
सर्वचिन्तापरित्यागो निश्चिन्तो योग उच्यते ॥ ६१ ॥
निमिषं निमिषार्द्धं वा समाधिमधिगच्छति।
शतजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥ ६२ ॥

देवी उवाच

कस्य नाम भवेच्छक्तिः कस्य नाम भवेच्छिवः।

एतन्मे ब्रूहि भो देव पश्चाज्ज्ञानं प्रकाशय॥ ६३॥

ईश्वर उवाच

चलच्चित्ते वसेच्छक्तिः स्थिरचित्ते वसेच्छिवः।

स्थिरचित्तो भवेद्देवि स देहस्थोऽपि सिध्यति॥ ६४॥

देवी उवाच

कस्मिन् स्थाने त्रिधा शक्तिः षट्चक्रं च तथैव च।

एकविंशतिब्रह्माण्डं सप्तपातालमेव च॥ ६५॥

ईश्वर उवाच

ऊर्ध्वशक्तिर्भवेत् कण्ठः अधशक्तिर्भवेत् गुदः।

मध्यशक्तिर्भवेन्नाभिः शक्त्यतीतं निरञ्जनम्॥ ६६॥

आधारं गुह्यचक्रं तु स्वाधिष्ठानं च लिङ्गकम्।

चक्रभेदं मयाख्यातं चक्रातीतं नमो नमः॥ ६७॥

कायोर्ध्वं च ब्रह्मलोकः स्वाधः पातालमेव च।
ऊर्ध्वमूलमधःशाखं वृक्षाकारं कलेवरम्॥ ६८॥

देवी उवाच

शिव शंकर ईशान ब्रूहि मे परमेश्वर।
दशवायुः कथं देव दशद्वाराणि चैव हि॥ ६९॥

ईश्वर उवाच

हृदि प्राणः स्थितो वायुरपानो गुदसंस्थितः।
समानो नाभिदेशे तु उदानः कण्ठमाश्रितः॥ ७०॥
व्यानः सर्वगतो देहे सर्वागात्रेषु संस्थितः।
नाग ऊर्ध्वगतो वायुः कूर्मस्तीर्थानि संस्थितः॥ ७१॥
कृकरः क्षोभिते चैव देवदत्तोऽपि जृम्भणे।
धनञ्जयो नादघोषे निर्विशेच्चैव शाम्यति॥ ७२॥
एष वायुर्निरालम्बो योगिनां योगसम्मतः।
नवद्वारं च प्रात्यक्षं दशमं मन उच्यते॥ ७३॥

देवी उवाच

नाडीभेदं च मे ब्रूहि सर्वगात्रेषु संस्थितम् ।
शक्तिः कुण्डलिनी चैव प्रसूता दशनाडिका ॥ ७४ ॥

ईश्वर उवाच

इडा च पिङ्गला चैव सुषुम्ना चोर्ध्वगामिनी ।
गान्धारी हस्तिजिह्वा च प्रसवा गमनायता ॥ ७५ ॥
अलम्बुसा यशा चैव दक्षिणाङ्गे च संस्थिताः ।
कुलश्च शङ्खिनी चैव वामाङ्गे च व्यवस्थिताः ॥ ७६ ॥
एतासु दशनाडीषु नानानाडीप्रसूतिका ।
द्विसप्ततिसहस्राणि शरीरे नाडिकाः स्मृताः ॥ ७७ ॥
एता यो विन्दते योगी स योगी योगलक्षणः ।
ज्ञाननाडी भवेद्देवी योगिनां सिद्धिदायिनी ॥ ७८ ॥

देवी उवाच

भूतनाथ महादेव ब्रूहि मे परमेश्वर ।
त्रयो देवा कथं देव त्रयो भावास्त्रयो गुणाः ॥ ७९ ॥

ईश्वर उवाच

रजोभावस्थितो ब्रह्मा सत्त्वभावस्थितो हरिः।

क्रोधभावस्थितो रुद्रस्त्रयो देवास्त्रयो गुणाः॥ ८०॥

एकमूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः।

नानाभावं मनो यस्य तस्य मुक्तिर्न जायते॥ ८१॥

वीर्यरूपी भवेद् ब्रह्मा वायुरूपः स्थितो हरिः।

मनोरूपः स्थितो रुद्रस्त्रयो देवास्त्रयो गुणाः॥ ८२॥

दयाभावस्थितो ब्रह्मा शुद्धभावस्थितो हरिः।

अग्निभावस्थितो रुद्रस्त्रयो देवास्त्रयो गुणाः॥ ८३॥

एकं भूतं परं ब्रह्म जगत् सर्वं चराचरम्।

नानाभावं मनो यस्य तस्य मुक्तिर्न जायते॥ ८४॥

अहं सृष्टिरहं कालोऽप्यहं ब्रह्माऽप्यहं हरिः।

अहं रुद्रोऽप्यहं शून्यमहं व्यापी निरञ्जनम्॥ ८५॥

अहं सर्वात्मको देवि निष्कामो गगनोपमः।

स्वभावनिर्मलं स्वान्तं स एवाहं न संशयः॥ ८६॥

जितेन्द्रियो भवेच्छूरो ब्रह्मचारी सुपण्डितः।

सत्यवादी भवेद् भक्तो दाता धीरो हितेरतः॥ ८७॥

ब्रह्मचर्यं तपोमूलं धर्ममूला दया स्मृता।

तस्मात् सर्वप्रयत्नेन दयाधर्मं समाश्रयेत्॥ ८८॥

देवी उवाच

योगेश्वर जगन्नाथ उमायाः प्राणवल्लभ।
वेदसन्ध्या तपो ध्यानं होमकर्म कुलं कथम्॥ ८९॥

ईश्वर उवाच

अश्वमेधसहस्राणि वाजपेयशतानि च।
ब्रह्मज्ञानसमं पुण्यं कलां नार्हति षोडशीम्॥ ९०॥
सर्वदा सर्वतीर्थेषु यत् फलं लभते शुचिः।
ब्रह्मज्ञानसमं पुण्यं कलां नार्हति षोडशीम्॥ ९१॥
न मित्रं न च पुत्राश्च न पिता न च बान्धवाः।
न स्वामी च गुरोस्तुल्यं यद्दृष्टं परमं पदम्॥ ९२॥
न च विद्यागुरोस्तुल्यं न तीर्थं न च देवताः।
गुरोस्तुल्यं न वै कोऽपि यद्दृष्टं परमं पदम्॥ ९३॥
एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा चानृणी भवेत्॥ ९४॥
यस्य कस्य न दातव्यं ब्रह्मज्ञानं सुगोपितम्।
यस्य कस्यापि भक्तस्य सद्गुरुस्तस्य दीयते॥ ९५॥

मन्त्रं पूजां तपो ध्यानं होमं जप्यं बलिक्रियाम्।

संन्यासं सर्वकर्माणि लौकिकानि त्यजेद् बुधः॥ ९६॥

संसर्गाद् बहवो दोषा निःसङ्गाद् बहवो गुणाः।

तस्मात् सर्वप्रयत्नेन यतिः सङ्गं परित्यजेत्॥ ९७॥

अकारः सात्त्विको ज्ञेय उकारो राजसः स्मृतः।

मकारस्तामसः प्रोक्तस्त्रिभिः प्रकृतिरुच्यते॥ ९८॥

अक्षरा प्रकृतिः प्रोक्ता रक्षरः स्वयमीश्वरः।

ईश्वरान्निर्गता सा हि प्रकृतिर्गुणबन्धना॥ ९९॥

सा माया पालिनी शक्तिः सृष्टिसंहारकारिणी।

अविद्या मोहिनी या सा शब्दरूपा यशस्विनी॥ १००॥

अकारश्चैव ऋग्वेद उकारो यजुरुच्यते।

मकारः सामवेदस्तु त्रिषु युक्तोऽप्यथर्वणः॥ १०१॥

ओङ्कारस्तु प्लुतो ज्ञेयस्त्रिनाद इति संज्ञितः।

अकारस्त्वथ भूर्लोक उकारो भुव उच्यते॥ १०२॥

सव्यञ्जनो मकारस्तु स्वर्लोकस्तु विधीयते।

अक्षरैस्त्रिभिरेतैश्च भवेदात्मा व्यवस्थितः॥ १०३॥

अकारः पृथिवी ज्ञेया पीतवर्णेन संयुतः।

अन्तरीक्षं उकारस्तु विद्युद्वर्ण इहोच्यते॥ १०४॥

मकारः स्वरिति ज्ञेयः शुक्लवर्णेन संयुतः।

ध्रुवमेकाक्षरं ब्रह्म ॐ इत्येवं व्यवस्थितम्॥ १०५॥

स्थिरासनो भवेन्नित्यं चिन्तानिद्राविवर्जितः।
आसु स जायते योगी नान्यथा शिवभाषितम्॥ १०६॥
य इदं पठते नित्यं शृणोति च दिने दिने।
सर्वपापविशुद्धात्मा शिवलोकं स गच्छति॥ १०७॥

देवी उवाच

स्थूलस्य लक्षणं ब्रूहि कथं मनो विलीयते।
परमार्थं च निर्वाणं स्थूलसूक्ष्मस्य लक्षणम्॥ १०८॥

शिव उवाच

येन ज्ञानेन हे देवि विद्यते न च किल्बिषी।
पृथिव्यापस्तथा तेजो वायुराकाशमेव च।
स्थूलरूपी स्थितोऽयं च सूक्ष्मश्च अन्यथा स्थितः॥ १०९॥

इति ज्ञानसङ्कलिनीतन्त्रं समाप्तम्॥

****
*

श्रीः

योगप्रकरणम् सर्वज्ञानोत्तरवृत्तिः

अतः परं प्रवक्ष्यामि योगं

योगस्यारब्दकार्याक्षिप्तमलादिक्षपणोपायत्वात्पदार्थसंबन्धः

पतिपदार्थतया पाटलिकः संबन्धः। * द्विहेतुत्वात् शुचिशब्देन

सूचितः प्रकरणसंबन्धो योगकाण्डतया सूत्रसंबन्धः

समुच्चयपदेनैव वाक्यात्मकोऽपि योगि योगात्मकान् गुणानि *

भिर्वाक्यैः। अतश्चर्याकाण्डादनन्तरं योगं संक्षेपतः

प्रकर्षाद्वक्ष्यामि। कस्यायं योगसंस्कार अत-आह-

एकाकिनस्तु शान्तस्य यतचित्तस्य विरागिणः निस्पृहस्य।

उक्ताहारविहारस्य उक्तचेष्टस्य कर्मसु। उक्तस्वप्नोवबोधस्य तत्त्वतः

श्रृणु षण्मुख। पुरुषस्यैवायं संस्कारको न * * तं

जलानामिवचित्तस्येत्यर्थः। शिवयोगस्य सर्वज्ञत्वादि प्रकाशकात्।

कीदृशस्य एकाकिनः सर्वसङ्गपरित्यागादपरिग्रहस्य

संन्यासाश्रमः शान्तस्य हिंसादिरहितस्य

यमनियमयुक्तस्येत्यर्थः। चित्तसंयमो हि यमो

नियमश्चेंद्रियसंयमः। यदाह पतञ्जलिः -

अहिंसां सत्यमस्तेयं ब्रह्मचर्यापरिग्रहः यमाः।

शौचसंतोषस्वाध्यायेश्वर प्रणिधानानि नियमा इति॥

अत एव यतचित्तस्य प्राणायामप्रत्याहाराभ्यां वशीकृत * * *

पलक्षितसर्वज्ञः यस्य शक्तिपादवशात् विरागिणः

p. 2) संसारवैराग्ययुक्तस्य निस्पृहस्य वैहिका भोगविमुखस्य

युक्ताहारविहारस्य यदु * मन्मृगेन्द्रेमिलं जीर्णाशनस्वस्थेत्यादि।

किं च। सर्वकर्मसु युक्तचेष्टस्य उचितकरण इति यावत्।

उक्तस्वप्नावबोधश्चोक्तकालानति * मयस्य? तस्य तं योग ध्येय

ध्यातृ संबन्धात्मकस्त्वतः श्रृणु। न तु पतञ्जलादेरिव

समाधिरूपं तस्य योगाङ्गत्वेन श्रुते यदुक्तं श्रीमन्मतङ्गे -

प्राणायामस्तथा ध्यानं प्रत्याहारोऽय धारणम्।

नर्कश्चैव समाधिश्च षडङ्गो योग उच्यते इति॥

अत एव युजिन् योग एव इत्यस्माद्धातोर्योगशब्दोन तु युज

समाधाविति। एतदेव सूचयन् ज्ञानिन एव योगाधिकार इत्याह योध्यो

यच्चत ध्यानं तद्वै ध्यानप्रयोजनम्। सर्वाण्येतानि यो सयोगं

योक्तुमर्हति। च शब्दा ध्येयं चेत्यर्थः। यदाह -

आत्मा ध्याता मनो ध्यानं ध्येयः सूक्ष्मो महेश्वरः।

यत्परं परमैश्वर्यमेतध्यान प्रयोज * ननं मनः।

यथावध्येय वस्तुस्वरूपालोचनं चिन्तेत्यर्थः। ततो ध्यानमुच्येते।

यच्छ्रूयते तद्रूपचिन्तनं ध्यानमिति ननु मनश्चित्तमिति व्या * यं

तस्य योगाङ्गत्वेनाप्रसिद्धेः। उपलक्षणं चैतत् अन्यान्यपि

यागाङ्गान्यं गिनं च योगं ज्ञात्वा योगाभ्यासः कार्यः।

p. 3) किं च।

मानामानौ समौ कृत्वा सुखदुःखे समे तथा।

हर्षं भयं विषादं च संत्यज्य योगमभ्यसेत्॥

यदाहुः -

न हृष्यत्युपकारेण नापकारेण कुप्यति।

यः समः सर्वभूतेषु जीवन्मु * * * म इष्यत इति॥

अथ योगस्थानम्-

शून्यागारे मठे रम्ये देवतायतने शुभे।

नदीतीरे विविक्ते वा गृहे घोरवनेऽपि वा॥

प्रच्छन्ने च विविक्ते च निः * तनवर्जिते।

योगदोषविनिर्मुक्ते निर्विकल्पे निरातपे॥

योगदोषा पिपीलिकादयः। निर्विकल्प इति परकीयत्वादि विकल्परहिते॥

योगाभ्यासोपक्रमः।

स्नात्वा शुचिरूपस्पृश्य प्रणम्य शिरसा शिवम्।

योगाचार्यं नमस्कृत्य योगं युञ्जीत मानवः॥

योगासनान्याह -

पद्मस्वस्तिकं वापि उपस्थायाञ्जलिं तथा।
पीठार्थमर्धचन्द्रं वा सर्वतोभद्रमेव च॥

आसनं रुचितं बध्वा पद्माद्यासनलक्षणम्।
संहितान्तरो देवध *॥

अथकरणमाह -

p. 4) ऊर्ध्वकायः समशिराः।
सर्वसंगान्परित्यज्य आत्मसंस्थमनोगुहः।
कुर्यादित्यध्याहारः?।

ततश्च सर्वसंगान्परित्यज्य आत्मसंस्थं मनः कुर्यादिति विषयेभ्यः समस्तेन्द्रियाधिष्ठातुर्मनसः प्रत्याहरणं कुर्यादिति यावत्। अनेन प्रत्याहाराख्यं योगाङ्गं संक्षेपात् ज्ञेयम्। किं च तदानीं न दंतैः संस्पर्शेद्दन्तान् सृक्कण्यौ च न जिह्वया, किंचित्कुञ्चितनेत्रस्तु शिवं सम्यक् नदोच्चरेत्। प्रत्याहारकाले

विबीजात्मकमूल * * मनसा स्मरेदित्यर्थः। अथतदुच्चारप्रयोजनम्।
सोद्गासयति तत्वानि तन्मात्राद्यानि देहिनाम्। अयमभिप्रायः।
छांदसो।

विसर्जनीयलोपात् * ति शिवमन्त्रो श्वक्ष्यमाणवत्।
सगर्भप्राणायामपूर्वं शिवाधिष्ठिततत्वाद्यनेनोच्चार्यमाणः।
समाधिलाभक्रमेण तत्त्वानि तावत्प्रकाशयति। मन *
त्रानुसंधानेन शिवाधिष्ठिताभिमतत्वयोजना॥ तत्तत्साक्षात्कारो
भवतीति यावत् तन्मात्रा माद्यानि यानि पृथिव्यादीनि भूतानि तन्मा
वाद्या एषामिन्द्रियादीनां तानि सर्वाणितत्त्वानि
श्रीमन्मतङ्गाद्युक्तवत्प्रकाशयतीति वेदितव्यम्। तानि च तत्त्वानि।
तस्यैव च शास्त्रस्यानुसं(धाना)त् बन्धकत्वान्निवर्तत इत्याह-

पुनर्विनाशकश्चैव असंयुक्तः षडाननः। तेषामिति शेषः।
p. 5) तदानीं चाङ्गानामपि तदुद्भूतत्वात् पृथगुच्चारणयोगीत्याह
। न पृथक् हृदयं तस्य शिरो न शिखा गुह। चर्मास्त्र नेत्रसहितं
तस्मादेव प्रवर्तते। अथ प्राणायामस्यापि सगर्भतां प्रय * नु
कुंभक प्राणायामपूर्वकं ध्यानं कार्यमित्याह।

प्राणापानौ समौ कृत्वा सुषुम्नान्तरचारिणौ।

तयोर्वृत्तिं निरुध्यात्मा शिवं ध्यायेद्वि * गः॥

प्राणायामस्य सगर्भतोक्तां श्रीमन्मृगेन्द्रेऽपि।
सोऽपि ध्यानजपोपेतः सगर्भौ न्यस्तदुज्झित इति॥

अथ ध्यानस्यैव प्रकर्षावस्थात्मकं समा * * * ह

अविनाभावसंयुक्तो ज्योतीरूपं सुनिर्मलम्।
सुसूक्ष्मव्यापकं नित्यं निर्विकल्पं सदा बुधः॥

निर्विकल्पमिति ध्येयाकारस्फुटीभावेन ध्यात्रादि * * गेरहितमित्यर्थः
। यदाह पतञ्जलिः। प्रत्ययै तानता ध्यानं तदेव
स्वरूपशून्यमेव समाधिरिति। इत्थं सगर्भनिगर्भभेदेन
प्राणायामानां द्वैविध्ये * न्यथा त्रैविध्यमाह।
उत्तमामध्यमामन्दाः सगर्भास्त्रिविधाः स्मृताः। सगर्भा
इत्युपलक्षणम्। अगर्भाणामप्युत्तमादि भेदं चानन्तरमेव
वक्ष्यति। * * रांतरेणापि त्रैविध्यमाह।

प्राणायामांश्च तान् कुर्यात् पूरककुम्भकरेचकान्। सगर्भाणां
प्राणायामादीनां समाधिलाभक्रमेण तत्त्वजयस्योक्त * * *

p. 6) अगर्भाणां फलमाह -

प्राणायामैर्बहिर्दोषान् धारणाभिस्तु किल्विषम्।

प्रत्याहारेण संसृज्य ध्यानेनानश्वरान्गुणान्॥

यावच्छरीरभावि * * णि मादीन् गुणानित्यर्थः। अनश्वरः अशून्यः शरीरः स्थैर्यमपि जायत इति सिद्धम्। अथ पूरकादिलक्षणमाह -

उदरं पूरयित्वा तु वायुना या * * प्सितम्।

प्राणायामो भवेदेव पूरको देहपूरकः

विधाय सर्वद्वाराणि निश्वासोच्छ्वासवर्जितः।

संपूर्णकुम्भवत्तिष्ठेत्प्राणायामः स कुम्भकः।

तदो * रेचयेद्वायुं मृदुनिश्वाससंयुतम्।

रेचकस्त्वेषविख्यातः प्राणसंशयकारकः।

पूरकरेचकौवामदक्षिणनाडीभ्यां कार्यावित्युक्तं प्राणसंशयकारक इत्युत्क्रान्तिदशायां ग्रन्थिछेदपूर्वं रेचकस्य प्राणवियोगहेतुत्वादुच्यते।

तेषामेव कालभेदादुत्तमादि भेदमाह।

प्रसार्य चाग्रहस्तं तु जानु कृत्वा प्रदक्षिणम्॥

छोटिकां तु ततो दद्यान्मात्रैषा त्वभिधीयते।
मात्राद्वादशविज्ञेयः प्रमाणं तालसंज्ञकम्।
तालद्वादशकं ज्ञेयं प्राणायामस्तु कस्यसः।
मध्यमस्तु चतुर्विंशत् ज्येष्ठो द्विगुणो भवेत्॥
तेषां चानुष्ठानविधिः।

p. 7) एकैकान्वर्धयेन्मात्रां प्रत्यहं योगवित्तमः।
सत्वरेण विलम्बेन क्रमेणैव विवर्धयेत्॥

इदानीं हृदयादिस्थानेषु ध्येयस्वरूपविषये निबद्धस्य मनसो
धारणादिकालमाह।

प्राणायामोत्तमो यत्तद्विगुणा धारणामता।
धारणाद्विगुणो योगो योगोऽपि द्विगुणी कृतः।
योगसिद्धिरिति ज्ञेया शिवेन परमात्मना॥

अत्र योगशब्देन ध्येयस्वरूपचिन्तनमपि।
ध्यात्रा सह ध्येयस्थ संबन्ध इति कृत्वाध्यानमुच्यते।

योगसिद्धिशब्देन तु समाधि। धारणाध्यानसमाधीनां
योगाङ्गानां क्रमेण प्राप्ते श्रवणात्।

ननु श्रीमन्मृगेन्द्रे धारणादीनां कालाधिक्यं श्रूयते
उक्तं हि तत्र -

अयमर्कगुणः कालः कृतचित्तव्यवस्थितिः।
प्राप्नोति धारणाशब्दो धारणा सिद्धिदानतः॥

धारणा द्वादश ध्यान दिव्यालोकप्रवृत्तितः।
समाधिमणिमादीनां द्वादशैतानि कारणमिति॥

सत्यं क्रियाभेदस्य तन्त्रभेदहेतुत्वादविरोधः अङ्गी तु योगो
ध्येयवस्तुसाक्षात्कारात्मको विशेषसंबन्ध इत्याह। तदानु पश्यते
सूक्ष्मं गन्धतन्मात्रमात्मनि।

रसं तेजश्च स्पर्शं च सब्दतन्मात्रमेव च।
पश्यते क्रमयोगेन वर्णभावैः पृथग्विधैः॥

p. 8) अहंकारं मनोबुद्धिगुणमव्यक्तपूरुषम्।

अभिव्यक्तानि जानीयात् स्वधर्मगुणलक्षणम्॥

विद्यां कलां ततः कालमायां विद्यां ततः परम्।
दृष्ट्वानुक्रमशः सर्वान् पुनरस्त्रेण भेदयेत्॥

विद्येश्वरं ततस्तत्वं ततस्सादाशिवं परम्।
हित्वार्कं तु क्षुरिकास्त्रेण ततः सूक्ष्मं शिवं विशेत्॥

अत्र च भूतानां स्थूलानामस्य प्रत्यक्षेणापि विज्ञातुं
शक्यत्वात् केवलयोगसाक्षात्कार्याणि तन्मात्रादीन्युच्यन्ते
परमार्थतः पृथिव्यादिस्वरूपमपि सूक्ष्मयोगेन
साक्षात्कर्तव्यमित्युक्तं श्रीमन्मतङ्गादौ।

ततश्च पृथिव्यादीनि शिवान्तानि तत्त्वान्येवं साक्षात्कृत्य
प्रागुक्तवन्मूलयुक्तेन क्षूरिकास्त्रेण भेदयेज्जयेत्।
बन्धकत्वान्निवर्तयेदित्यर्थः। उक्तं हि प्राक् सोद्वासयति तत्त्वानि
तन्मात्राद्यानि देहिनाम् पुनर्विनाशकश्चैव अस्त्रयुक्तः षडाननेति।
एवमेतानि सालम्बनेन योगेन निष्कले शिवे स्वात्मानं युज्यादित्यर्थः।
अत्र च तत्वजयोपयोगित्वेन शास्त्रान्तरोक्तं तर्काख्यमपि
योगाङ्गमर्थसिद्धिमेव यच्छ्रूयते-ऊहोऽन्तरङ्गो योगस्येति। अथ

योगफलं दर्शयति।

अमृतात्मा शिवः साक्षात् तस्मिन्विष्ठस्तु योगवित्।
सर्वज्ञः सर्वगः सूक्ष्मः सर्वेशः सर्वकृद्भवेत्।

ननु। यद्येवं योगेनैव मुक्तिसिद्धेर्दीक्षाया अप्यानर्थक्यप्रसङ्गः।

p.9) तन्न एवं विधस्य शिवयोगस्य दीक्षाया
विनानुष्ठानासिद्धेरारब्धकार्यकर्माक्षिप्तमलादिनिवर्तन एव
चरितार्थत्वादनधिकारिणां शिवशास्त्रं विना
समस्ततत्त्वविषयज्ञानाद्यभावाच्च। अत एव मात्रप्रसङ्गात् ज्ञेयं
वस्तुदर्शयति।

सर्वेष्वेव शास्त्रेषु ज्ञेयं वस्तुचतुष्टयम्।
पशुः पाशः पतिश्चैव शिवश्चेति यथाक्रमम्।

पतिरधिकारावस्थं शिव एवातश्च पतिपदार्थः सैव सोपाधिका
निरूपाधिकाभ्यां भेदद्वयमुपचारादुच्यत इति वक्ष्यामः।
ततश्च ज्ञानस्यापि दीक्षाद्यङ्गत्वान्मोक्षहेतुत्वं परंपरया
सिद्धमित्याह।

ज्ञात्वा तु तत्त्वसद्भावं तत्रसारं तु दुर्लभम्।
सर्वथावर्तमानोऽपि गृह्णाति न पुनस्तनुम्॥

इति लक्षद्वयाध्यापक श्रीमदघोरशिवाचार्यविरचितायां
श्रीमत्सर्वज्ञानोत्तरवृत्तौ योगप्रकरणम्॥

॥ सप्तमः पटलः॥

श्री देव्युवाच

आसां मन्त्रोदयं दिव्यं कथय स्व प्रसादतः।
येन विज्ञानमात्रेण मन्दपुण्योऽपि सिद्ध्यते॥१॥

एतच्छ्रुत्वा तु वैष्णव्यं देवदेवेन शूलिनः।
विहस्य सुचिरं कालं प्राश्यपञ्चामृतं चरुम्॥२॥

सन्दष्टोष्ठ पुटं नाथं प्राह गद्गदया गिरा।

श्री भैरव उवाच

श्रृणुत्वं खेचरी ज्ञानं स्वपिण्डे खगतिप्रदम्।
भुक्तिमुक्तिप्रदातारं सर्वकामविभूतिदम्॥४॥

शान्तौघरूपकं दिव्यं मन्त्रोद्धारं तु कौलिकम्।
द्विधाभेदेन वक्ष्यामि कर्णान्ते खटिकागमे॥५॥

शून्यं शून्यसमायुक्तं वह्निसम्पुटमध्यगम्।
मायानादकलोपेतं ना रुद्रो लभते स्फुटम्॥६॥

कामसम्पुटमध्यस्थं कामारिङ्कामसंस्थितम्।
नादबिन्दुकलोपेतं लभते योगिनी सुतम्॥७॥

सर्वगाद्यं पुनर्भद्रे सर्वगं बिन्दुभूषितम्।
षष्ठस्वरसमारूढं जीवं चन्द्रार्कभूषितम्॥८॥

एतत्पञ्चाक्षरं मन्त्रं स्वपिण्डे भोगमोक्षदम्।
प्रेतनाथस्य कथितं हृदयं सर्वकामदम्॥९॥

अधुना क्षेत्रपालानां सपत्नीकं शृणु प्रिये।
सप्तादशाक्षरं पूर्वं तृतयं तु चतुष्फलम्।।१०।।

चतुर्थं कथितं बीजं रक्षां तदनन्तरम्।
कामराजपराबीजमेतदष्टाक्षरान्तिमम्।।११।।

चणा - - क्षेत्रपालानां सपत्नीकां प्रकीर्तितम्।
सामान्यं हृदयं वीक्ष्य - - - रिक्षनन्तरम्।।१२।।

शक्तिबीजं शिवं शान्तं तृतीयं पारमेश्वरम्।
अनेनार्चयते दिव्यं गुरुपर्वक्रमान्तिमम्।।१३।।

तृतीयं भोगमन्त्राद्यं रावं रेफविवर्जितम्।
पायहा पञ्चमी बीजं एतत्पञ्चाक्षरान्तिमम्।।१४।।

धर्माधर्मक्षयकरं श्रीमन्त्रानक्षमान्वयम्।
अनेनार्चयते दिव्यं सिद्धचक्रं सदोदितम्।।१५।।

सर्वाधिकारफलदं शापानुग्रहसिद्धिदम्।
भोगहस्ते मयाख्यातं दिव्यरूपमकीलितम्।।१६।।

अथान्यं तु चतुष्पीठं चतुष्पीठसमन्वितम्।
सप्ताक्षरं महादीप्तं सुसिद्धं सर्वसिद्धिदम्।।१७।।

ह्रीं हुँ क्रीं तृतीयं पूर्वं निष्फलं निष्फलात्मकम्।
सर्वगं पूर्व सम्भिन्नं जीवसृष्टिसमन्वितम्।।१८।।

एषोसौ कौलिकं गुह्यं मन्त्रराजात्मतो लभेत्।
हृदयं सर्वपीठानां योगिनीनां महोदयम्।।१९।।

अधुना शक्ति सङ्घट्टं तृतीयं परमेश्वरम्।
परा च अपरा चैव तृतीया तु परापरा।।२०।।

अपरे संस्थिता ह्येव इत्याद्या सर्वदेहिनः।
आसां मन्त्रोदयं वक्ष्ये स्वपिण्डे भोगमोक्षदा॥२१॥

शिव शक्तिमयं युग्मं पराबीजं सदारुणम्।
एतत् त्रिरक्षरं मन्त्रं परादेव्या प्रकाशितम्॥२२॥

ज्ञानविज्ञानफलदमपरा च मतश्शृणु।
तदेवाद्यं परं युग्मं पराख्यं वरुणोर्ज्जितम्॥२३॥

सर्वगो दीपितं कृत्वा अपरा तृतयोदितम्।
सर्वस्वहृदयान्तस्थं - - - - - - - - - - ॥२४॥

- - - - - - ष्टस्तु मदिरानन्दनन्दितः।
- - - - - - - - - - - भैरवं वपुम्॥२६॥

प्रस्तरे भूतलं - - - - - - - - - - - - - ॥२७॥

- - स्व स्वभाव स्वरूपेण शिवं भु - - - ॥२८॥

- - - न्यसेत्पुष्पं ध्यात्वां प्रेतं जगद् गुरुम्।
- - - - - - - - - - - - सर्वकारणम्॥२९॥

पूजयित्वा ततः पश्चात् स्वे स्वे मन्त्रेण सुव्रते।
अर्चयेत् क्षेत्रपालेशं ततो धूपं सुकल्पयेत्॥३०॥

ततो वै स्थापयेल्लिंग गन्धधूपाद्यनुक्रमैः।
दधिक्षीराज्यमधुकै र्द्राक्षश्चेक्षुरमासवः॥३१॥

सुरादि सोत्तमैर्द्रव्यैर्दध्यमासादिनुक्रमैः।
पश्चाद्वेषोत्तमं दिव्यं महास्नानं प्रकल्पयेत्॥३२॥

मणिरत्नमये पात्रे सौवर्णे राजतेऽपि वा।
कास्ये चैवात्र सङ्कट्टे तदाभावास्तु बिल्वजे॥३३॥

मध्यवृत्तिपदोद्भूतं गृहीत्वा स्वकुलामृतम्।
कर्पूरागुरुसंयुक्ते मृगजामलयान्वितम्।।३४।।

मूलमन्त्रेति सत्कृत्वा मुनिसङ्ख्या विधानवित्।
अयमेवाथोऽयस्कान्ते पात्रान्ते लिङ्गमुत्तमम्।।३५।।

स्नात्वा चैवोपविष्टे वै लिङ्गावित्सङ्ख्यया शुभम्।
धर्माधर्मक्षये प्रोक्ते विशुद्धे विशुवे परे।।३६।।

चिच्यितान्तरसंल्लीने ध्यात्वा सङ्घट्टभैरवम्।
युक्ति युक्तं पिवेन्मद्यं पिङ्गलं निर्मलं रसम्।।३७।।

तत्क्षणाद् भवती वीरो वलीपलित वर्जितः।
- - - - - - - मपरे नित्यं द्वितीयमिव भैरवः।।३८।।

एवं स्नानविधिङ्कृत्वा कर्णिकान्ते जगद्गुरुम्।
मुनिसङ्ख्यार्चयेद्देवं पराशक्तिसमन्वितम्।।३९।।

अष्टत्रिंशाक्षरं घोरं काली सप्तादशाक्षरा।
पूजामन्त्रेण वो पश्चात् त्र्यक्षरे सर्वकामदे।।४०।।

भूतसङ्ख्यार्चयेद्देवं द्विधाशाक्ति स्त्रिधाशिवम्।
पश्चात्क्रमेऽर्चयेत्सर्वा गुरुसिद्धादिपीठगाः।।४१।।

तृसङ्घट्टं ततः पद्मं द्वादशारं ततोर्चयेत्।
षट्कोणं परमं धाम सर्वशक्त्यालयोद्भवम्।।४२।।

गृह्य पुष्पात्रजलिं पश्चाज्जातंत्यक्त्वा तु भूतले।
विद्यायुग्मं ततः पूज्यं त्रिवर्णेशं सकृत् सकृत्।।४३।।

ततो वै समयाख्या तु भोगमोक्षार्थकामदा।
पञ्चषड्भिस्तु कोटीनां विद्यां समयमुत्तमाम्।।४४।।

या स्मृता राजराजेशी पञ्चशार्णा पराकला।
मूलमुख्यतरा दीप्ता धर्माधर्मक्षयङ्करी।।४५।।

यत्रोत्पन्नास्तु ते मन्त्रा अघोराद्यादिनुक्रमा।
सप्तादशाक्षराद्यादि मूलमुख्यतरान्तिमा।।४६।।

राजराजेश्वरादिव्या तया विद्याजगाम्बिके।
त्रिरावृत्तं प्रयोगेण नित्यमेवं प्रपूजयेत्।।४७।।

यया पूजित मात्रा वै सकृत्स्मृत्वा वानघे।
अनेन शरीरेण सायोज्यत्वं प्रयच्छति।।४८।।

पश्चात्प्रकल्पये धूपं पञ्चब्रह्मनवात्मकम्।
ततश्चाष्टाङ्गविधिना दण्डपातं प्रदक्षिणम्।।४९।।

कृत्वा दिव्या महाराणि कर्मणा मनसागिरा।
निवेदयेत्परे तत्त्वे पुष्पहस्तं प्रकल्पयेत्।।५०।।

धर्माधर्मं च - - पुण्यपापं शुभाशुभम्।
कामक्रोधमलं लोभं शब्द स्पर्श रसं तथा[क]।।५१।।

ब्रह्माविष्णुश्च रुद्रश्च ईश्वर श्च सदाशिवः।
एतत् सर्वमशेषेण नानावृत्यौघमण्डलम्।।५२।।

पञ्चाभूतात्मकं पिण्डं तत्त्व षट्त्रिंशबृंहितम्।
चतुर्विंशपदोपेतं षड्ध्वनिलयं परम्।।५३।।

षट्चक्रं षोडशाधारं त्रिलक्षं व्योमपञ्चकम्।
आब्रह्मभुवनं सर्वं स्वकुलं कौलिकं पशुम्।।५४।।

निवेदयेत्परे ब्रह्मे भैरवोत्सङ्गबृंहिते।
स्वदेहोत्कर्तनं कृत्वा ज्वलयेत् - - - ।।५५।।

क. खण्डितोऽत्र पाठः।

होम एतत्समाख्यातं यन्त्रस्याप्यायनं महत्।
एतद्वै त्रिविधं का - - - - - ट्कायिक वाचिकम्।।५६।।

कृत्वा पूर्वेनयेत्पश्चात् महापशूपहारकम्।
सर्वाङ्गलक्षणोपेतं प्रत्यग्रं तु नरेश्वरम्।।५७।।

स्वसातं सुमहानन्दं बद्धनेत्रपदं शुभान्।
तदनाप्तमशेषं व अजं वा महिषं वृषम्।।५८।।

मीनं चाथ वरारोहे यत्किञ्चिज्जीवरूपिणम्।
सुशुष्कं चैव सुस्नातं सुरोमं शृङ्गिणं शुभम्।।५९।।

सर्वलक्षणसम्पूर्णं अक्षताङ्गमरोगिणम्।
ह्रीं क्षां क्षं तृतीये नेन आकर्णान्तावलोकयेत्।।६०।।

ततो नेत्रपटोद्धाट्य कुलाचारसमन्वितैः।
अर्घपुष्पासवोपेते शिरः पृष्ठे कटिस्थले।।६१।।

प्रेक्षयित्वा प्रधानेन दिव्येन वेघ रूपकैः।
यावन्न चालयेद्देहं तावन्न पशुपातयेत्।।६२।।

ह्रीं धूंक्षः तृतये नैव वीरकर्म समार्चयेत्।
- - - - - - - - - - कामविभूतिदम्।।६३।।

यदादौ चालयेद् वक्त्रं पश्चाद् देहं वरानने।
अशुभं ते तु विज्ञेयं दुःख शोकामयप्रदम्।।६४।।

यदादौ धुनते वक्त्रं पश्चाद्देहं पुनश्शिरम्।
सिद्धिदं तत्र विज्ञेयं सप्तदेहविलम्बितम्।।६५।।

प्रवृष्टिं तु यदा मुञ्चे पुरीषाण्डानि शोभने।
समैर्वित्तागमैविन्द्या द्विषमं ज्ञानसिद्धिदम्।।६६।।

पुरीषं तु यदा मुञ्चेत् गृहीत्वा वीर वन्दिते।
स्वकुलामृतसंयुक्तं मातृभृङ्गिरजान्वितम्।।६७।।

कुहा कुष्ठसमोपेतं मुनिसंख्याभिमन्त्रितम्।।६८।।

सप्तादशाक्षरा विद्या नस्ये पाने पिवेद् गुदः।
आपादतलमुण्डान्तं सर्वाङ्गेषु समालभेत्।।६९।।

चतुष्षष्ठिविधैर्घोरैः कालकूटादिनुक्रमात्।
नाभिभूयति सो भद्रे शस्त्रास्त्रै तु स बाध्यति।।७०।।

स्तम्भयेत्सर्वसैन्यानि मन्त्रं देवासुरोपमः।
दिक्पूर्वोभिमुखे भूत्वा यदा यासौ धुनतेऽनघे।।७१।।

तदा अक्षागमं विन्द्याद दिव्यस्त्रीप्रियसंगमम्।
स्थानलाभं शरीरस्य वज्रकायवलं भवेत्।।७२।।

आग्नेया तु भवं घोरे वह्नि सञ्जाननं भवेत्।
दुर्भिक्षं राष्ट्र संपातं राजा चैव विनश्यति।।७३।।

याम्यायां मरणं घोरं कष्टारं - - - भा।
अतिवृष्टिरनावृष्टिः भवते वाम सुव्रते।।७४।।

मन्त्रहस्ताद्भवेत् - - - - - भूहानिर्वियोगम्।।७५।।

कटुबन्धुर्जनैस्सार्धं दुष्ट शत्रभयं भवेत्।
सुभिक्षं वारुणे भागे सर्व सत्त्वसुसिद्धिदम्।।७६।।

- - - गास्साधकेन्द्रस्य सर्वभूताश्चराचराः।
वायव्यां विधुसंपातं विद्वेषोच्चाटमारणम्।।७७।।

वज्रपाताशिरभयं मरणेचार्थनाशनम्।
यत्किञ्चिदशुभं भद्रे तत्सर्वं वायवीदिशम्।।७८।।

उत्तरे ज्ञान सिद्धिः स्याद्वश्याकर्षणमारणम्।
प्रसादं सर्वदेवीनां सिद्धिं चैव मनेप्सितम्।।७९।।

अधमां मध्यमां कामां कौबेर्यां धुनते यदा।
ईशान्यभिमुखो भूत्वा यदासौ धुनते पशुम्।।८०।।

।। इति महाकौलागमे पातालपिङ्गलान्तरखण्डविर्निर्गते श्री वृद्धस्वच्छन्द-कौलाभिधाने व्याधिभक्षभैरवे सप्तमः पटलः।।

योग

डॉ. अनिता स्वामी
सहायक, आचार्य, संस्कृत विभाग
इन्द्रप्रस्थ महिला महाविद्यालय
दिल्ली विश्वविद्यालय

भारतीय ज्ञान–परम्परा का सनातन ज्ञान 'योग' है। 'योग' शब्द का प्रयोग श्रुति एवं स्मृति ग्रन्थों में अति पुरातन काल से होता आया है। योग का ज्ञान इस ब्रह्माण्ड में अनादि काल से विद्यमान है अर्थात् सृष्टि की उत्पत्ति से पूर्व भी योग विद्यमान था। अतएव "योग" उतना ही प्राचीन है जितनी कि "सृष्टि"। योग साधना–पद्धति से ही प्राप्त ऋतम्भरा–प्रज्ञा के द्वारा वैदिक ऋषि यों ने ऋचाओं का साक्षात्कार किया एवं सृष्टि की उत्पत्ति के कारण 'ब्रह्म' (चेतन), कार्य रूपी सृष्टि तथा उसके शाश्वत एवं अपरिवर्तनशील नियमों का अनुभव प्राप्त किया। अतएव योग भारतीय प्राचीन परम्परा एवं संस्कृति की अमूल्य धरोहर है जो कि आज भी सुरक्षित है एवं मानव–सभ्यता के लिये उपयोगी है।

'योग' मोक्ष के 'साधन' एवं 'साध्य' दोनों अर्थों में प्रयुक्त होता है। "युज् समाधौ" धातु से "घञ्"

प्रत्यय लगाने से निष्पन्न योग शब्द 'चित्तवृत्तिनिरोध' रूपी 'समाधि' के अर्थ में है जो कि 'योग' के 'साधन' के रूप में स्वीकृत है। अतएव पतंजलि कृत योग–दर्शन में 'योग' शब्द 'साधन' अर्थ में प्रयुक्त है। युजिर् योगे धातु से बने 'योग' शब्द ''आत्मा एवं परमात्मा के संयोगरूप'' साध्य के अर्थ में प्रयुक्त है, जो कि वेदान्त द्वारा स्वीकृत है। बृहदारण्यकोपनिषद् (2/4/5) के सारतम उपदेश याज्ञवल्क्य–मैत्रेयी–संवाद– 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'– में भारतीय जीवन–प्रवाह की समग्र आशा, आकांक्षा का पर्यवसान होता है। आत्मतत्त्व के विश्लेषण एवं उसके साक्षात्कार के साधन और स्वरूप के निरूपण में ही योग–दर्शन का तात्पर्य है। महाभारत में शुकदेवजी ने कहा है कि – 'न तु योगमृते प्राप्तुं शक्या सा परमागतिः।' इसीलिये श्रीमद भगवद्गीता में श्रीकृष्ण द्वारा अर्जुन को 'योगी' बनने की प्रेरणा देते हुए कहा गया है –

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ।।

श्रीमद भगवद् गीता, 6/46 ।।

महाभारत एवं याज्ञवल्क्य–स्मृति के अनुसार ऋग्वेदोक्त ''हिरण्यगर्भ'' (ऋग्वेद 10/21) दवेता ही योगशास्त्र के पुरातन ज्ञाता (वेत्ता) हैं। श्रीमद्भागवत में कहा है कि हे योगेश्वर! यह योगकौशल वही है जिसे भगवान् हिरण्यगर्भ ने कहा था। महाभारत (11/339/69) के अनुसार भगवान् नारायण (विष्णु) ही हिरण्यगर्भ हैं। श्रीमद भगवद्गीता (महाभारत भीष्मपर्व–अध्याय–25–42) के चतुर्थ अध्याय (4/1–3) में श्रीकृष्ण, अर्जुन से कहते हैं –

''मैंने इस अविनाशी–योग को सूर्य से कहा था, सूर्य ने अपने पुत्र वैवस्वत मनु से कहा था और मनु ने अपने राजा इक्ष्वाकु से कहा था। इस प्रकार परम्परा से प्राप्त–योग को राजर्षियों ने जाना, किन्तु उसके बाद वह योग बहुत काल से इस पृथ्वी लोक में लुप्त हो गया था। तू मेरा भक्त और प्रिय सखा है, इसलिये वह परम रहस्ययुक्त, पुरातन–योग आज मैंने तुझको कहा है।''

इस प्रकार परम्परा से प्राप्त 'योग' वैदिक एवं लौकिक वाङ्मय में प्राप्त होता है। वेदों (ऋग्वेद–1/5/ 3,11/18/7, 1/30/17 यजुर्वेद–11/2, सामवेद–2/ 2/7/9 (पूर्वार्चिक), 1/2/10/3 (उत्तरार्चिक), तथा अथर्ववेद–20/26/1, 20/99/1, ब्राह्मण–ग्रन्थों (ऐतरेय–ब्राह्मण–11/5, शतपथ–ब्राह्मण– 3/2/2/26, तैत्तिरीय–ब्राह्मण– 1/2/1/15), आरण्यकों (ऐतरेय–आरण्यक–2/1/6, शांखायन– आरण्यक–5/2–3), उपनिषदों (बृहदारण्यकोपनिषद्–3/7/2, मुण्डकोपनिषद्–3/1/5, श्वेताश्वतरोपनिषद्– 1/3, 2/8–9, मैत्रायणी– उपनिषद्–6/18, कठोपनिषद् 1/2/12, 2/3/10–11), रामायण (सुन्दरकाण्ड), महाभारत (शान्तिपर्व), पुराण (ब्रह्मपुराण, अध्याय 235, भगवद्पुराण अध्याय– 2,12, अग्निपुराण अध्याय– 352–58, गरुड़पुराण–अध्याय– 14, 49 व 118, शिवपुराण अध्याय–17, 37–39, मार्कण्डेय पुराण अध्याय–36–43) तथा वैदिक–दर्शन के सूत्र–साहित्यों में पूर्णतया योग का स्वरूप उपलब्ध होता है। कठोपनिषद् में योग को परिभाषित करते हुए कहा गया है कि जिस समय पाँचों ज्ञानेन्द्रियाँ मन के सहित आत्मा में स्थित हो जाती हैं और बुद्धि भी चेष्टा नहीं करती, उस अवस्था को परमगति कहते हैं। उस स्थिर इन्द्रियधारण को ही 'योग' कहते हैं। इस प्रकार स्पष्ट है कि सृष्टि के प्रारम्भ से पूर्व 'योग' विद्यमान था तथा तात्विक ज्ञान की प्राप्ति के साधन के रूप में 'योग' की महत्ता सर्वसम्मत रूप से विद्यमान थी।

योग के प्रकार

पद्धतियों की भिन्नता के आधार पर 'योग' के विभिन्न प्रकार होते हैं। इनमें से वैदिक–दर्शन के अन्तर्गत 7 प्रकार के प्रमुख योग होते हैं– राजयोग, ज्ञानयोग, भक्तियोग, मन्त्रयोग, लययोग और हठयोग। योगराजोपनिषद् (1,2) में मन्त्रयोग, लययोग, हठयोग और राजयोग के रूप में योग को विभक्त किया गया है, जबकि 'योगशिखोपनिषद् (129, 130)' में मंत्रयोग, लययोग, हठयोग एवं राजयोग को एक ही महायोग की अन्तर्भूमिकाओं के रूप में स्वीकार किया गया है। जीव एवं ब्रह्म के संयोग को 'परमयोग' के रूप में वर्णित करने वाले 'गरुड़ पुराण' के 14वें अध्याय में

'ध्यान–योग' का विस्तृत वर्णन प्राप्त होता है। श्रीमद्‌भागवतपुराण (11/206) में ज्ञानयोग, कर्मयोग और भक्तियोग के रूप में मानव– कल्याण हतु 'योग' का वर्णन प्राप्त होता है। देवी भागवत–पुराण में मोक्ष प्राप्ति के साधन के रूप में ज्ञानयोग, भक्तियोग और कर्मयोग को स्वीकार किया गया है। श्री मद्‌भगवद्‌गीता में श्रीकृष्ण द्वारा चार प्रकार के योग– ज्ञानयोग, अभ्यास योग, भक्तियोग व कर्म योग का वर्णन किया गया है। इस प्रकार वैदिक–दर्शन में प्राप्त 'योग' को हम सात प्रमखु भागों में विभक्त कर सकते हैं जो इस प्रकार हैं –

(1) राज–योग–मंत्रयोग, लययोग, हठयोग का फल राजयोग है, अतः यह योग सर्वश्रेष्ठ योग अर्थात् 'राजयोग' है। साधारणतया 'राजयोग' को पातंजल का सूचक माना जाता है, क्योंकि यह समाधि के साधन के रूप में वर्णित है। योगशिखोपनिषद् (1/136) में राजयोग को परिभाषित करते हुए कहा गया है– 'रजसो रेतसो योगात् शक्तिशिवयोगाद राजयोगः।' श्रीमद्‌भगवद्‌गीता (12/9) में 'राजयोग' को 'अभ्यास–योग' के नाम से कहा गया है। श्रीकृष्ण, धनंज्जय को कहते हैं कि– ''यदि तू अपने मन को अचल स्थापन करने में असमर्थ हो तो अभ्यास रूपी योग के द्वारा मुझको प्राप्त करने की इच्छा कर।'' मन को अन्य

विषयों से हटाकर पुनः–पुनः आलम्बन पर केन्द्रित करना ही 'अभ्यास–योग' अर्थात 'राजयोग' है। जो अभ्यास–योग से मन एवं प्राण दोनों को ही आत्मा में लीन कर लेते हैं, वे राजयोगी सर्वश्रेष्ठ हैं।

(2) हठ–योग – हठ पद दो वर्णों (ह – सूर्य, ठ – चन्द्रमा) से मिलकर बना है। हठयोग का अर्थ है बलपूर्वक शरीर व मन के नियन्त्रण से 'योग–साधना' में सिद्धि लाभ प्राप्त करना। 'हठयोग' के सम्बन्ध में नाथयोगी सम्प्रदाय विशेष ज्ञान रखता है। पातंजल योग के 'अष्टां डग–योग' में 'शरीर–नियन्त्रण' का अत्यल्प वर्णन प्राप्त होता है। 'हठयोग' के आधारभूत ग्रन्थ 'हठयोगप्रदीपिका'– (4/103) में कहा गया है कि– 'हठयोग' का लक्ष्य 'राजयोग' ही है। हठयोग की साधना का अन्तिम साध्य इड़ा और पिंगला की सुषुम्ना से, 'प्राण' और 'अपान' वायुओं की जीवन–शक्ति के केन्द्रबिन्दु से, 'बिन्दु' और 'रज' को सम्पूर्ण मानसिक–शारीरिक शक्ति के केन्द्रबिन्दु से और अन्ततः चेतना की उच्चतम स्थिति में शिव और शक्ति की एकता स्थापित करना है, जो 'राजयोग' का लक्ष्य है।

(3) लय–योग– 'लययोग' से तात्पर्य है 'लय' के द्वारा 'समाधि' को प्राप्त करना। योगतत्त्वोनिषद् के अनुसार 'लययोग' का स्वरूप 'चित्तलय' है। कठोपनिषद् (1/3/3) में ब्रह्म–साक्षात्कार के साधन के रूप में 'लय' का वर्णन करते हुए कहा गया है कि ''विवेकी पुरुष वाक्–इन्द्रिय का मन में उपसंहार करे, उसका प्रकाशस्वरूप बुद्धि में लय करे, बुद्धि को महत्–तत्त्व में लीन करे और महत्व को शान्त आत्मा में लीन करे।' हठयोगप्रदीपिका के अनुसार राजयोग के सन्दर्भ में ही हठयोग और लययोग की सार्थकता है। दूसरे शब्दों में हठयोग और लययोग, राजयोग की प्राप्ति में सहायक है, क्योंकि राजयोगी काल की सीमा से परे अर्थात् कालातीत अवस्था को प्राप्त होकर मृत्यु पर भी विजय प्राप्त कर लेता है।

कार रूपिणी। जीवात्मा तिष्ठति तत्र प्रदीपकलिका कृतिः ॥" तंत्र सारमें लिखा है "ध्यायेत् कुण्डलिनी सूक्ष्मा मूलाधार निवासिनीम्। तामिष्ट देवता रूपां सार्द्ध त्रिवलयान्वितम्। कोटि सौदामिनी भासां स्वयंभुलिंग वेष्टिनीम्। तामुत्थाय महादेवी प्राण मन्त्रेण साधकः"॥ देवीतन्त्रमें यही मत दिये हैं "या मात्रा त्रपुषीलता तनुलसत तंतुस्थिति स्पार्धिनी। वाग् बीजे प्रथमे स्थिता (मूलाधारमें स्थित) तव सदांतामन्महे ते वयम्। शक्तिः कुण्डलिनी ति विश्वजनन व्यापार बध्योद्यमो। ज्ञात्वेत्थं न पुनः स्पृशन्ति जननी गर्भेऽर्भकंत्वं नरा ॥ देवीतंत्र ॥

> " कुंडलिनी शक्तेरवस्थात्रयविद्यते। यद्यास्मिन् चक्रे
> कुमारी कुमारावस्थामापन्ना। प्रथमंसुप्ता स्थिता
> मन्द्रयते मन्द्रंस्वरं करोति। पूर २ हिरणमयीं
> ब्रह्मा विवेशो पराजताः ॥   यजर्वेद

प्रथम–आधारचक्र

इसमें कुण्डलिनी मूलाधार चक्रमें है।

एक मत और पाया जाता है उसमें लिखा है कि "मूलाधारा द्व्यंगुलादूर्ध्वं प्रसूतभूजगाकारां स्वयंभुलिंगवेष्टितां बिसतन्तु निभां सोमसूर्याग्नि रूपिणीं तडित्वल्लीनिभां कुण्डलिनी ध्यात्वा सुषुम्ना मार्गेण तां ब्रह्मरन्ध्रे-नयेत् ॥ लक्ष्मीस्तुति ॥" कुण्डलिनी मूलाधार चक्रके दो अंगुल ऊपर है। यह ऊपर दिये हुए मतोंके अनुसार कुण्डलिनी नाभिस्थानमें और मूलाधारके ऊपर को माना जाय तो अनवस्था प्रसंगको प्राप्त होना है।" क्योंकि सब योगशास्त्रके ग्रंथोंमें और सब तन्त्रग्रंथोंमें एकही मत प्रदर्शित किया है वह यह है कि कुण्डलिनी षट्चक्रोंका और तीनों ग्रंथि-

योंका भेदन कर ब्रह्मरन्ध्रमें चढ़ती है। आद्य आचार्य शंकराचार्यजीने अपने "योगतारावली और सौंदर्यलहरीमें लिखते हैं "अपराजिता कुण्डलिनी शक्तिः षट्चक्राणि भित्वा भूयेभूय प्रविशति"॥ योगतारावली, और 'महीम् मूलाधारे कमपि मणिपूरे हुतवहं। जलं स्वाधिष्ठाने हृदि मरुत् आकाशमुपरी ॥ मनोऽपिभ्रूमध्ये सकलमपि भित्वा कुलपथं। सहस्रारे पद्मे सहरहसि पत्याविहरसे॥" चित्रिणी नाड़ी कुंडलिनी होती है। इसका प्रमाण सुनिए।

"उद्घाटयेत्कपाटन्तु यथाकुञ्चिकया हठात्।
कुण्डलिन्या तथा योगी मोक्षद्वार विभेदयेत ॥

मध्ये सुषुम्णा तन्मध्ये वज्राख्या लिंङ्ग मूलतः।
तन्मध्ये चित्रिणी सूक्ष्मा बिसतन्तु सहोदरा।
मूलात्सहस्रार स्तत्तदन्तर ब्रह्मनाडिका॥

येन मार्गेणगतव्यं ब्रह्मस्थान निरामयम्।
मुखेनाच्छाद्यतद्द्वारं प्रसुप्तापरमेश्वरी॥

महायोग विज्ञान, पृष्ठ ४०-४१ द्वितीय प्रकाशन
लेखक—श्री योगानन्द जी ब्रह्मचारी
स्वर्ग आश्रम ऋषिकेश देहरादून

पराशक्तिः कुंडलिनी बिसतन्तु तनीयसी।
ललिता सहस्रनाम।

षट्चक्र निरूपण नामक ग्रंथमें इस कुण्डालिनीका निश्चित स्थान दिया हुआ है उसे देखिये।

" तन्मध्ये चित्रिणीसा प्रणव विलसिता योगिना योगगम्या ।
लूतातंतूपमेया सकल सरसिजान् मेरूमध्यान्तर स्थान ॥
भित्वा देदीप्यते तद् ग्रथन रचनया शुद्ध बोध स्वरूपा ।
तन्मध्ये ब्रह्मनाडी हरमुख कुहरात् आदि देवान्त संस्था ॥१॥
विद्युन्माला विलासा मुनिमनसि लसत्तन्तुरूपासुसूक्ष्मा ।
शुद्ध ज्ञान प्रबोधा सकल सुखमयी शुद्ध बोध स्वभावा ॥
ब्रम्हद्वारं तदास्ये प्रविलसति सुधाधार गम्य प्रदेशं ।
ग्रंथिस्थान तदेतद्वदन मिति सुषुम्णाख्य नाड्या लपान्ति ॥ २ ॥

तस्योर्ध्वे बिसतंतु सोदर लसत सूक्ष्मां जगन्मोहिनी ।
ब्रम्हद्वार मुखं मुखेन मधुरं सन्छादयन्ति स्वयम् ॥
शङ्खावर्तनिभानवीनचपला मालाविलासास्पदा ।
सुप्ता सर्प समाशिवोपरिसलत् सार्द्ध त्रिवृत्ताकृति ॥ ३ ॥

प्रथम श्लोकमें कहा गया है कि चित्रिणी नाड़ीका स्थान "-मेरु मध्यान्तर स्थान-" मेरु दंड के भीतर मध्य स्थानमें है Cauda Equina से निकलकर coccyx में मिलती है दोनों बाजूकी तरफ सुषुम्ना और वज्रा नाड़ी है और बीचमें चित्रिणी नाड़ी है। इस नाड़ीको मैं कुंडलिनी कहता हूं। इस चित्रिणी नाड़ीको अंग्रेजी अनॉटामिस्ट Anatomist Filum Terminal कहते हैं। "Below the end of of the spinal cord, the Pia Mater though, at first, retaining its tubular form, afterwards becomes suddenly reduced in size, and finally prolonged as a sheath to the delicate thread-like continuation of the spinal cord, the filum terminale or

central ligament. *Its glistening and silvery hue distinguishes this ligament amidst the surrounding bundles of nerve-roots.*

कुंडलिनी क्या चीज है, यह अंग्रेजी अॅनॉटमिस्ट लिखते हैं—

The Medulla spinalis or spinal cord is the elongated nearly cylindrical part of the central nervous system which occupies the upper two-thirds of the vertebral canal. It's average length in the male is 45 C. M. (about 18 inches) its weight is obout 30 gms. It extends from the leval of the upper border of the atlas vertebra to that of the lawer border of the first or upper border of the second lumber vertebra. Above it is continuous with the brain, below, it ends in the conus medullaris from the apex of which a delicate non-nervous filament, the Filum Terminale descends as far as the first segment of the coccyx. The Filum Terminale is a delicate filament about 20 c. m. (about 8 inches) in length prolonged down wards from the apex of the conus medullaris. Its upper part or Filum Terminale Internum about 15 c. m. (about 6 inches) long is continued within the tubular sheath of dura mater and reaches, as far as the lower border of the second saeral vertabra. It is surrounded by the nerves

राहु

FILUM
TERMINALE

चित्रिणीनाड़ी
अथवा कुण्डलिनी

चित्र नंबर ८

forming the Cauda Equina, but can be readily distinguished from them by its bluish-white colour. Its lower part, or Filum Terminale externum, is closely invested by, and adherent to the dura, it decends from the apex of the tubular sheath of the dura mater and is attached to the back of the first segment of the coccyx. The Filum Terminale consists mainly of fibrous tissue continuous about with that of the pia mater but adhering to its outer surface are a few strands of nerve fibres which probably represent rudimentary second and third caccygeal nerves, further, Tne Central coccygeal canal of the medulla spinalis is continued downwards into it for 5 c. m.

अमेरिकन अनाटमिस्ट अपने ग्रंथमें लिखते हैं कि—

ABOUT FILUM TERMINALE

In the midst of this bundle you will be able to pick out a slender, silvary looking thread, the Filum Terminale or Central Ligament. Continuous with the apex of the conus medullaris, this terminal filament runs down the middle line amongst the nerve-roots the lower end of the dural cavity. There it pierces the dural sheath

and receiving an investment from it, decends to be attached to the back of the coccyx.

"The Filum Terminale begins at the foramen magnum, where it is continuous with periosteum, and dura mater of the brain and ends opposite the second or third piece of the sacrum in the thread like filum terminale externum which anchors the end of the dural tube to the back of the coccyx." Page 245-47 Chapter III, Anatomy of the brain, cord, and Autonomic System, The Practitioners Library of Medicine Surgery, Vol I America.

यह नाड़ी ८ इंच लंबी, रेशमके तंतुके समान तेजस्वी, प्रकाशमान सूक्ष्म, पतली और बड़ीही नाजूक है। इतनी नाजूक है। कि प्राचीन ग्रंथकारोंने "लुतातन्तूपमेया—याने मकड़ी दूसरे सूक्ष्म जीवोंको पकड़नेके लिये जो घरके कोनेमें जाल बनाती है (She is fine like the spider's thread) उसका तंतु इतना सूक्ष्म होता है कि आखोंसे देख सकते हैं किन्तु वह इतना बारीक है कि हाथमें पकड़नेसे विशेष स्पर्श नहीं होता। यह लसततन्तु बिसतन्तु, त्रपुषीलतातनुलसत तन्तू इस नामसे बतलाया गया है। यह चित्रिणी नाड़ी (Filum terminal) कुण्डलिनी होती है। इसके और भी प्रमाण सुनिए सभी योग शास्त्रकारोंने यह कहा है कि कुण्डालिनी "स्वयंभूलिंग" को वेष्टित है। इसलिये प्रथम स्वयंभू लिंग शरीरमें किस स्थानपर है यह निश्चित करना जरूर है।

अंग्रेजी शारीरशास्त्रज्ञ Gray अपने अनाटमीमें कहते हैं।

स्त्रयंभुलिंग—मंगल

Fig. 1163.—A section through an irregular nodule of the glomus coccygeum. × 85. (Sertoli.) (From Quain's Elements of Anatomy.)

स्वयंभुलिंग.

The section shows the fibrous covering of the nodule, the blood-vessels within it, and the epithelial cells of which it is constituted.

चित्र नंबर १

The Glomus Coccygeum

The Glomus Coccygeum (Coccygeal Body) is placed in front of, or immediately below the tip of the Coccyx, It is about 2-5 M. M. in diameter and is irregularly oval in shape, sevaral smaller nodules are found round or near the main mass. (See Gray's Anatomy old copy Figure 1116 page 1208) दुसरा अमरिकन anatomist अपने ग्रंथ में लिखते हैं।

The coccygeal Body (Gland of Laschka) Glomus Coccygeum has no known function, but is probably connected with that stage of development in which the tail was a prominent factor. It is found in front of the tip of the Coccyx. This gland is not uncommonly the seat of neoplastic growth at times malignant in character. The gland has capsul from which fibres connective tissue invade the substance of the organ to divide masses of epithelial cells. Numerous arterial branches remify through the structure.

Page 510
The Endocrine Glands
Anatomy and Physiology
by
Jessie Feiring Williams. M.D.

इस स्वयंभू लिंगका स्थान मैंने निश्चित बताया है।

ऊपर दिये हुए प्रमाणसे पाठकोंको ज्ञात होगा कि कुण्डलिनी क्या चीज है। इस विषयमें और एक ठोस प्रमाण दिया जाता है । "योनिस्थानकमांघ्रिमूलघटितं कृत्वा दृढं विन्यसेन्मेंढ्रे पादमथैकमेव हृदये कृत्वा हनुंसुस्थिरम्। स्थाणुः संयमितेन्द्रियोऽचल दृशा पश्येत्भ्रुवोरन्तरं । ह्येतन्मोक्ष कपाट भेदजनकं सिद्धासनं प्रोच्यते ॥११॥ गोरक्ष पद्धति पृष्ठ २०।" अर्थ सर्वोत्कृष्ठ दो आसनोंमेंसे प्रथम सिद्धासनकी विधिमें कहते हैं कि गुदा और लिंगके बीचमें योनि (कुण्डालिनीका) स्थान है इसको वामपादकी एड़ीसे दृढ़ पीडन (दबाव) करे। दाहिने पैरकी एड़ी लिंगके ऊपर लगाकर दबावें दोनों पैरोंकी एड़ीयां नीचे ऊपर बराबर हो जाती हैं तथा दोनों पैरोंकी अंगुष्ठ जंघा और गुल्फोंके बीच नीचे छिप जाते हैं। इनके दबावसे योनिस्थानके तल ऊपरके दो इंद्रिय गुदा उपस्थ रुक जाते हैं । तदनन्तर हृदयके चार अंगुल ऊपर चिबुक (ठोडी) स्थिर करें और समस्त इंद्रियोंसे मनको हटाकर एकाग्र चित्त करें तथा दोनों नेत्रोंसे अचल दृष्टि कर भ्रमध्यमें देखता रहे।

इस मोक्षरुपी द्वार खोलनेपर बताया हुआ मोक्ष मार्ग दिखाता है। यह द्वार कुण्डालिनीसे रुका हुआ है। सुषुम्णाद्वार उसे खोलकर मोक्ष मार्गके (सुषुम्णाके) द्वारा मोक्षस्थान सहस्रदलकमल कर्णिकांतर्गत परमात्मामें पहुँचानेके यत्न करता है यह सिद्धासन है ; गोरक्ष पद्धति श्लोक २१ वा पृष्ठ १० । सिद्धासनसे एक बात सिद्ध होती है कि कुण्डालिनीका निश्चित स्थान इस आसनमें वाम पादकी एड़ीसे योनि स्थान पीडीत करना है, तात्पर्य यह है कि कुण्डालिनीको जगानेकी रीति इस प्रमाणसे ज्ञात होगी और दूसरा प्रमाण भी देखिए—षट्चक्र निरूपण श्लोकमें कहा है। तन्मध्ये ब्रम्ह नाडी हरमुख कुहरात आदि

भ्रमध्यदृष्टी—शनि

चित्र नंबर १०

ब्रम्हद्वार—शनि

Sacral canal

ब्रम्हद्वार

चित्र नंबर ११

देवान्त संस्थाः ॥ ब्रम्हद्वार मुखंमुखेन मधुर संछादयन्ति स्वयम्। इस श्लोकमें "हरमुख कुहर" ऐसा शब्द है इसका अर्थ क्या होता है तो कुण्डालिनीको ऊपर सहस्रार चक्रमें चढनेके लिये जो रास्ता है। उस रस्तेको दरवाजा होता है, इसको अंग्रजी अनाटामिस्ट Sacral canal कहते हैं। यह मेरूदंड के नीचे और Tip of the coccyx के उपर है। The Spinal cord ends Blindly in the Filum Terminale, and is apparently closed there. The Sushumna is said to be closed at it base called the gate of Brahman (Brahmadwara) until, by Yoga Kundalini, makes its way through it. चित्र देखिये।

(It is called in Anatomy Sacral Canal)

इस प्रमाणसे भी ज्ञात होता है कि कुण्डालिनीका मूलाधारके नीचे वास्तव्य है। ऊपर दिए हुए अनेकों प्रमाण तथा मेरी ओरसे भी दिए गए प्रमाणोंसे पाठक इस विषयको भली भाँति समझ सकेंगे।

कुण्डालिनी क्या चीज है यह निश्चित करना शेष रहा है। इसके विषयमें भी बहुतसे मतभेद पाये जाते हैं। मत १— यह कुण्डालिनी केवल तेज मात्र है। इस विषयका एक प्रमाण सुनिए—

तडित्कोटि ज्योतिर्द्युतिदलित षट् ग्रंथिगहनं। प्रविष्टं स्वाधारं पुनरपि सुधावृष्टि वपुषां। किमप्यष्ट त्रिशंत्किरण सकलीभूत मनिशं। भजे धामं श्यामंकुच भरनतं बर्बरकचम ॥ ८ ॥ चतुष्पत्रान्तः षट्दलपुट भगान्त त्रिवलय। स्फुर द्विद्युद्वन्हि द्युमणि नियताभ द्युतियुते।

षडश्रं भित्वाऽन्द्वोदशदल मथद्वादशदलं । कलाश्रंचत्र्यश्रंगतुवातिनमस्ते गिरिसुते ॥९॥ देवी पंचस्तवी । इस श्लोकका आधार लेकर कतिपय थिऑसॉफिस्ट लोगोंने झूठे ग्रंथ लिखे हैं उन लोगोंको योगशास्त्र बिलकूल नहीं समझा है और न समझ सकेगा । देखिये C. W. Leadbeater. G. C. Arundale ये कैसे भूलमे पडे है । Aurther Avelon afterwards sir john Woodraff Calcutta High court justice इन्होने Serpent Power नामक ग्रंथ लिखा है उनको भी यही शंका थी कि मूलाधार चक्रके नीचे कुंडलीनी है । इस विषयमें मैंने एक डॉक्टर महाशयसे पूछा था । I am told that recent microscopic investigations by Dr. Cunningham have disclosed the existance of highly sensitive gray matter in the Filum Terminale, which was hitherto thought to be mere fibrous cord." Page I07, The-Centres of Lotuses. Serpent Power by Aurther Avelon. उसका सारांश यहां दिया जाता है ।

स्वामी शिवानन्द हृषीकेश (हरिद्वार) अपने Kundalini yog नामक ग्रंथमें Filum Terminal यह नाड़ी कुंडलिनी होती है यह लिखा है । फिर स्वामीजीने ऐसा भी लिखा है कि मानवी शरीरमें जो षड्चक्र है यह सब चक्र लिंग शरीरमें है न कि स्थूल शरीरमें । मैं इस मतसे सहमत नहीं, मेरे विचारसे स्वामीजीकी यहाँ बड़ी भूल हुयी है । इस सारे विवेचनसे आपको ज्ञात होगा कि कुण्डलिनी क्या चीज है । कुंडलिनी इतनी विचित्र और अगम्य क्यों ? इस बारेमें मैं इतनाही कहता हूँ कि जब यह कुंडलिनी रीढकी हड्डीके अंदर है तबतक यह चित्रेणी नाड़ी

कहलाती है और रीढकी हड्डीके बाहार आकर स्वयंभू लिंगको वेष्टित होती है तब इसे कण्डालिनी कहते हैं। जब यह नाड़ी सिद्धासनसे और प्राणवायुसे नीचे दबानेसे और अपानवायुको ऊर्ध्व गती देनेसे जगाई जाती है तभी इस नाड़ीमेंसे "सूर्य कोटिःसम प्रभाः" ऐसा असामान्य तेज बाहर निकलता है और यह तेज प्रथम मूलाधार चक्रमें प्रवेश करता है। इस मूलाधार चक्रमें ही कंद है। इस कंदपर यह शक्ति प्रथम आती है। इस कंदके बारेमें भी मत-भेद पाया जाता है। इसपर भी विचार करना आवश्यक है। शिवस्वरो-दय इस ग्रंथमें नाभिके नीचे जो कंद माना गया है इस मतको आयुर्वेदीय ग्रंथकार "सुश्रुत और वाग्भट" अपने सार्थ सुश्रुत संहिता और सार्थ वाग्भट ग्रंथमें "नाभिस्थान चार अंगुल विस्तार रहनेवाला कंद है ऐसा कहते हैं। फिर योगतत्वामृतमें पाया जाता है "ऊर्ध्वं मेंढ्रादधोनाभेः कन्दयोनि खगाण्डवत्। तत्र नाडयः समुत्पन्ना सहस्राणां द्विसप्तति॥ कंदस्थानं मनुष्याणा देह मध्यान्नवांगुलम्। चतुरंगुल विस्तार मायामंच तथा विधम्। अंडाकृति वदाकारं भूषितंच त्वगादिभिः॥ मेंढ्रके ऊपर और नाभीके नीचे बस्तीमें। (यहभाग नाभिस्थानके नीचे और लिंगके ऊपरके शरीरका भाग इसको बस्ती कहते हैं।) मुरगी के अण्डे समान कंद होता है। इस प्रमाणसे विरुद्ध षट्चक्र निरूपण में लिखा है गुदात्तु द्व्यंगुलादूर्ध्वं मेंढ्रातुद्व्यंगुलादधः इस कंदका स्थान गुदाके ऊपर २ अंगुल और मेंढ्रके नीचे २ अंगुल है इससे यह समझमें आता है की यह कंद योनिस्थानमें है। मेरे मतसे यह बराबर है कारण "अंग्रेजी अनाटामिस्ट लिखते हैं" The fibres of the sympathetic form NETWORKS FORM WHICH PROCEEDS THE DISTRIBUTION TO VISC-

ERA " (देखिये Sympathetic plexus का चित्र) उपर्युक्त विवेचनसे आपको ज्ञात होगा कि कुण्डलिनी मूलाधारके नीचे है। यह नाडी होती है और इस नाडीसे भयंकर तेजस्वी तेज निकलता है। यह दोनों मिलके कुण्डलिनी होती है। कुण्डलिनी सुषुम्ना मार्ग Canalis centralis मेरूदंडके मध्यमें जो विवर है उस मार्गको सूषम्ना मार्ग कहते हैं।

THE CENTRAL CANAL OF THE MEDULLA SPINALIS

The Central canal traverses the entire length of the medulla spinalis. The gray substance in front of the canalis named the anterior gray commissure; that behind it; the posterior grey commissure. The anterior grey commissure is thin, and incontact anteriory with the anterior white commisure; it contains a pair of longitudinal veins, one on either side of the middle line. The posterior gray commissure reaches from the central canal to the posterior median septum; is thinnest in the thoracic region, and thikest in the conus medullaris. The central canal is continued upwards through the lower parts of the medulla oblongata and opens into the fourth ventrical of the brain; below it reaches for a short distance (5-6 c. m.) into the filum terminale. In the lower part of the conus medullaris

it exhibits a fusiform diletation, the terminal ventricle; this has a verticle measurement of from 8 to 10 m. m. is triangular on cross section with its base directed forwards and tends to undergo obliteration after the age of forty years.

Throughout the cervical and thoracic regions the central canal is situated in the anterior third of the medulla spinalis in the lumbar enlargement it is near the middle; and in the conus medullaris it approaches the posterior surface. It is filled with cerebrospinal fluid and lived by ciliatul, columnar epithelium, which is encircled by a band of gelatinous substance, the substantia gelatinosa centralis. This gelatinous substance consists mainly of neuroglia but contains. a few nerve-cells and nerve fibres: it is traversed by processes from the deep ends of the cells which line the central canal (Gray's Anatomy page 750)

This filament is the atrophied remnent of the lower part of the embryonic spinal cord. It extends from the end of the spinal cord viz, 1st

or 2nd lumber vertebra, to the back of the coccyx. In the upper part of its extent, the filum terminale consists of a central canal.................

Anatomy of the Brain and Spinal Cord
by
J. Ryland, Whiteker.
B. A, M. B.
Pages 6, 9, 15.

कुण्डालिनी मेरूदंडमेंसे ब्रम्हरन्ध्रमें चढ़ती है और षड्चक्रोंका भेदन करती है। इस जगहपर एक शंका उपस्थित होती है कि जब कुण्डालिनी मेरूदंडमेंसे ऊपर चढ़ती है तो बाहरके चक्रोंका भेदन कैसे होता है। इसका स्पष्टीकरण ऐसा है कि षड्चक्रोंमेंसे कुछ नाड़ियाँ निकलकर मेरूदंडको लिपटी हुयी हैं और मेरूदंडमेंसे कुछ नाड़ियाँ निकलकर षड्चक्रोंमें जाकर मिली हैं। अंग्रेजी अनाटमीमें इन नाड़ियोंका नाम Spinal Ganglia लिखा है। Spinal Ganglia को कुंडलिनी धक्का मारती है इस क्रियासे सब चक्र खुलकर शुद्ध होते हैं। इस प्रकार परमेश्वरी ज्ञान देनेवाली नाड़ीका विवेचन इस अष्टमस्थानमें करना है। इस भावमें मूलाधार चक्रको देखना लगता है।

मूलाधार चक्र

Pelvic Plexus. बुध

रक्तवर्ण, भगाकृति; तीन आवर्त, चतर्दल, दलोंके अंग्रेजीनाम—Pelvic plexus, 2nd-The middle Haemorrhoidal Ple-

xus, 3-The Vesical Plexus, 4th-The Prostatic Plexus. ४ मातृका वँ शँ षँ सँ, सरस्वति द्विरण्डनामक सिद्धलिंग देवतागणेश,शक्तिडाकिनी, शक्तिरूप एकवक्त्रा, चार हाथोंवाली, सुवर्णवर्ण, यंत्र पृथ्वी तत्वका और चतुष्कोण है, यंत्रकावर्ण-पीत, बीज लँ,बीजकावाहन-ऐरावत हस्ती, जपसंख्या६००,स्थान-गुद और लिंगके बीचमें योनिस्थानमें, भुलोक, गुण-गन्ध (देव-ब्रह्मा वैश्वानर) ज्ञानेंद्रिय-नासिका, कर्मेंद्रिय स्थान-योनि-The yoni that is in the centre of this chakra is called kama and it is beloved and worshipped by sidhas. ब्रह्मग्रंथी, परावाणी, लँ कारबीज पृथ्वी, कार्य-पृथ्वी संकलीकरण गंधवाह, देवता ब्रह्मा, अष्टकोणशूरु, दो नाडिया,-इल्वला और कालधामिनी, बस्तीकर्म, कुण्डलिनीके बीचमें महाप्रकृति, अपानवायू-संत्रेकावर्ण गुदद्वार-Ejection of urinal Falces. सहवायू कूर्म-पलक खोलना और बन्द करना। इस चक्रपर निजानंदको देखना है। सप्तज्ञानकी भूमिका शुभेच्छा नामक होती है। शुभेच्छा किसे कहते हैं "नित्यानित्य वस्तु विवेकादिपुरःसराफलपर्यवसायिनी मोक्षेच्छा" इसीको शुभेच्छा कहते है। इस चक्रपर यह भूमिका देखना है। इस चक्रपर मेरे मतसे बुध ग्रहका अमल होता है और जर्मन महात्मा गिखतऊके मतसे इसपर चंद्रमाका अमल होता है ?? The Adhara, the Sacro-coccygeal Plexus, with four branches, nine Angulis (about six inches and a half) below the solar plexus. (Kanda, brahmagranthi); the source of a massive plèasurable aesthetia, voluminous organic sensations of repose, an inch and half above it, and the same distance below. The membrum viril

(mehana) is a minor centre called Agnishikha. इस स्थानमें समाधिकी और मृत्युकी अवस्था भी देखनी है। समाधि और मृत्यु इन दोनोंमें बहुत फर्क है। मृत्युमें ज्ञान और चेतना नहीं परंतु समाधिमें ये दोनों मौजूद हैं। फिर शरीरकी अवस्था दोनोंमें समान रहती है। इस भावमें योगीयोंकी मृत्यु किस प्रकारसे होगी? योगी योग बलसे देहत्याग करेगा या रोग बलसे? अपनी इच्छासे त्याग करेगा या मृत्यूकी इच्छासे! योगीके देह त्यागते समय प्राण ब्रह्मरन्ध्रसे जायेगा या अन्य मार्गसे! योगी लोगों का आयुष्य कितना है! आदि ये सारी बातें देखना है। जिन योगी लोगोंने अपनी इच्छासे देह छोड़ दिया हैं उनके नाम—स्वामी रामतीर्थ आपने जल समाधी ली, योगीश्वर पव्हरीबाबाने इच्छासे अग्निकाष्ठ भक्षण किया, मेरे गुरुदेव ब्रह्मीभूत ब्रह्मचैतन्य गोंदावलेकर महाराज, श्रीमत् ब्रह्मीभूत योगीश्वर विद्यानन्द सरस्वती महाराज बेलापूरकर, (नगरजिला) ब्रह्मीभूत टेंबे स्वामी आदि योगीश्वरोंने अपनी इच्छासे जीतेजी समाधी लेकर देह छोड़ दिया। श्रीमंत कै. नारायण महाराज केडगांवकर इनकी मृत्यु रोगबलसे हुई। योगीकी कुंडली अर्थात् जन्मपत्री देखकर उनकी आयुर्मर्यादा बतलाना सामान्य ज्योतिषियोंकी शक्तिके और ज्योतिष शास्त्र के बाहर है। क्योंकि पूर्णावस्थाको पहुँचे हुए योगी पुरुष योगबलसे अपनी आयुर्मर्यादा बढ़ा सकते हैं। कारण योगी अपने योगबलसे अपना प्राण ब्रह्मांडमें रखकर मृत्युको धोका देते हैं; मतलब यह है कि मृत्यु इनके स्वाधीन है।

योगिओंको चाहिए कि वह अपने रहनेके लिए आश्रम कुटी, या मठ नहीं बांधना चाहिए। जिस प्रकार बिच्छु घरके कोनेमें रहता है वैसेही योगी

जंगलमें निसर्ग निर्मित फा या गिरिकन्दरमें रहना चाहिये। किंतु हठयोग प्रदीपिकामें मठ बांधनेके लिये मछिन्द्रनाथने अनुज्ञा दी है। निम्न श्लोक देखिए, मठ लक्षण—सुराज्ये धार्मिके देशे सुभिक्षे निरुपद्रवे। धनुःप्रमाणपर्यंतं शिलाग्निजलवर्जिते। एकान्ते मठिकामध्ये स्थातव्यं हठयोगिनः॥ अल्पद्वारमरन्ध्र गर्त्त विवरं नात्युच्च नीचायतं॥ सम्यक् गोमय सांद्रलिप्त ममलं निशेष जन्तुज्झितम्। बाह्य मण्डपकूपवेदि रुचिरं प्राकार संवेष्टितं। प्रोक्तं योग मठस्यलक्षणमिदं सिद्धैर्हठाभ्यासिभिः॥ एवं विधे मठेस्थित्वा सर्वचिन्ता विवर्जितः। गुरुपादिष्ट मार्गेण योगमेव समभ्यसेत। भगवत् गीताके ६ वें अध्यायमें भगवान कहते हैं "शुचौदेशे प्रतिष्ठाप्य स्थिरमासनमात्मनः। नात्युच्छ्रितं नातिनीचं चैलाजिन कुशोत्तरम्॥ इस प्रकारसे मठके लक्षण कहे गये हैं। यह सब किस लिए? मेरी रायमें अपना अभ्यास पूरा करनेके लिये है। योगीको मठकी जरूरत नहीं है।

इस भावमें और कई बातें देखना है। क्रियायोग, हठयोग, कूहू-नाड़ी, शंखिनी नाड़ी, जलबस्ती, महामुद्रा, सिद्धासन, मूलबंध, अश्विनी-मुद्रा, शक्तिचालन मुद्रा, शवासन, भुजंगासन और परकायाप्रवेश क्रिया आदि विषयों पर विचार करना है।

गर्भके आठवे माह पर लग्न स्वामीका प्रभाव रहता है। इस माहमें गर्भको पूर्व जन्मका स्मरण होता है।

इस भाव पर भगवान शंकरजीका अमल है।

बंगालके एक सच्चे शाक्त उपासक नेताजी

महान क्रान्तिकारी स्वर्गीय मौलाना मोहम्मद बरकत उल्लाहकी मौत हो गई किन्तु उनकी आजादीकी भावना अमर है और वह सदा अमर रहेगी। सभी क्रान्तियोंका अन्तर्राष्ट्रीय रूप होता है। कोई

प्रमाणत्वात् । एवं च वदता मयैतद्योगबलेन विदितमिति मूर्खे प्रमाणमावेदितं भवति ॥ १०१ ॥ १०२ ॥ १०३ ॥

किं च—

रसस्य नव विज्ञेया जलस्याञ्जलयो दश ॥
सप्तैव तु पुरीषस्य रक्तस्याष्टौ प्रकीर्तिताः ॥ १०४ ॥
षट् श्लेष्मा पञ्च पित्तं च चत्वारो मूत्रमेव च ॥
वसा त्रयो द्वौ तु मेदो मज्जैकोऽर्धं तु मस्तके ॥१०५॥
श्लेष्मौजसस्तावदेव रेतसस्तावदेव च ॥

भुक्तस्यान्नस्य साररूपः परिणामो रसस्तस्याञ्जलयो नव विज्ञेयाः । शरीरारम्भ[क]पार्थिवद्रव्यानुग्राहकस्य जलस्य दश । पुरीषस्य सप्त । अष्टौ रक्तस्य । श्लेष्मणः षट् । पित्तस्य पञ्च । मूत्रस्य चत्वारः । वसायाः शरीरस्नेहस्य त्रयः । मेदसो मांसाभ्यन्तरवर्तिनो धातुविशेषस्य द्वौ । अस्थिमध्यस्थधातुविशेषस्य मज्जासंज्ञकस्यैकः । अर्धाञ्जलिर्मस्तके । श्लेष्मण ओजसस्तावदेवाञ्जल्यर्धमेव । हृदयवर्ती जीवनहेतुर्द्रव्यविशेष ओजः । रेतसोऽप्यञ्जल्यर्धमेव ॥ १०४ ॥ १०५ ॥

कृतस्य शरीरनिरूपणस्य प्रयोजनमाह—

इत्येतदस्थिरं वर्ष्म यस्य मोक्षाय कृत्यसौ ॥ १०६ ॥

एवमेतद्वर्ष्म शरीरमस्थिरं यस्य पुरुषविशेषस्य मोक्षाय संपद्यते स कृती पण्डितः । अस्थिरेणापि शरीरेण मोक्षः साध्यत इति तात्पर्यार्थः ॥ १०६ ॥

एवं नित्यात्मनः शरीरस्य विवेकार्थ[3]मनित्यत्वमुक्तम् । अधुनोक्तायां परमात्माभिन्नक्षेत्रज्ञोपासनायामसमर्थं प्रति प्रकारान्तरेणाऽऽत्मोपासनामाह—

द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः ॥
+हिता नाम हि ता नाड्यस्तासां मध्ये शशिप्रभम् ॥१०७॥
मण्डलं तस्य मध्यस्थ आत्मा दीप इवाचलः ॥
स ज्ञेयस्तं विदित्वेह पुनराजायते न तु ॥ १०८ ॥

+ मिताक्षरायां त्वन्यः पाठ उपलभ्यते स यथा—"हिताहिता नाम नाड्य." इति ।

---

१ घ. मूर्खे । २ घ. छ मेदो म । ३ घ. छ 'कार्थं नि' । ४ घ. छ. नामा हि ।

या हृदयकमलप्रदेशादभिनिःसृता ऊर्ध्वाधस्तिर्यक्प्रवृत्तास्ता हितासंज्ञिता द्वासप्ततिसहस्रसंख्याका नाड्यः । हि प्रसिद्धौ । तासां नाडीनां मध्ये हृदयाकाशे शशिप्रभं चन्द्रतुल्यमण्डलं तस्य मध्य आत्मा निश्चलो दीप इव स्थितो यः स ज्ञेयः साक्षात्कार्यः । दीप इवेति वदतोऽयमभिप्रायः—यथा दीपो दीपान्तरमन्तरेणैव स्वयं प्रकाशते प्रकाशयति च चक्षुर्विषयमेवमात्माऽपि सर्वस्य प्रकाशकः प्रकाशकान्तरमन्तरेण स्वयं प्रकाशते प्रकाशयति च सकलवस्तुजातमिति । एतमात्मानं विदित्वा साक्षात्कृत्येह संसारे पुनर्न जायते । आत्यन्तिकः शरीरच्छेदो भवतीत्यर्थः ॥ १०७ ॥ १०८ ॥

अपवर्गहेतुतयोक्तं परमात्मज्ञानं प्रत्युपायमाह—

ज्ञेयं चाऽऽरण्यकमहं यदादित्यादवाप्तवान् ॥
योगशास्त्रं च मत्प्रोक्तं ज्ञेयं योगमभीप्सता ॥ १०९ ॥

यदादित्यादारण्यकमधीतवान्, यच्च मया योगशास्त्रं प्रणीतम्, तदुभयं योगं प्राप्तुकामेनार्थतो ज्ञेयम् । प्रदर्शनार्थं चैतत् । तेनान्यान्यप्युपनिषद्योगशास्त्राणि ज्ञेयान्येव । अरण्याध्येयं ब्रह्माऽऽरण्यकं, जीवपरमात्मनोरभेदविज्ञानं विषयान्तरासंभिन्नं योगः । तथा च विष्णुपुराणम्—

"आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः ।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते" ॥

देवलः—"विषयेभ्यो निवर्त्याभिप्रेतेऽर्थे मनसोऽवस्थापनं योगः" ।

दक्षः—"वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञः परमात्मनि ।
एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते" ॥

उक्तं योगशास्त्रं मत्प्रोक्तमित्यस्योपलक्षकत्वं, तत्र यान्युपलक्षणीयानि तानि कानिचित्क्ले(ले)शतो निर्दिश्यन्ते । तत्र देवलः—

"अथातो धर्मवर्जितत्वान्न तिर्यग्योन्यां पुरुषार्थोपदेशः ।
देवमानुषयोर्द्विविधः पुरुषार्थः—अभ्युदयो निःश्रेयसमिति ।
तयोरभ्युदयः पूर्वोक्तः । द्विविधं निःश्रेयसम्—सांख्ययोगाविति । पञ्चविंशतितत्त्वज्ञानं सांख्यम् । विषयेभ्यो निवर्त्याभिप्रेतेऽर्थे मनसोऽवस्था[प]नं योगः । उभयत्रापव-

---

१ क. °न्तरं विनैव स्वयं प्रकाशते प्रकाशयति च सकलं वस्तुजातं तथाऽयमात्मेति । ए° । २ घ. छ. °ज्ञानवि° । ३ घ. ■ °भिन्नयो° । ४ घ. छ. °त्नमापे° ।

र्ग(र्गः)फलम् । जन्ममरणदुःखयोरत्यन्ताभावोऽपवर्गः । एतौ सांख्ययोगौ चाधिकृत्य यैर्युक्तितः समयतश्च पूर्वप्रणीतानि विशालानि गम्भीराणि तन्त्राणीह संक्षिप्योद्देशतो वक्ष्यन्ते । तत्र सांख्यानामेका मूलप्रकृतिः । सप्त प्रकृतिविकृतयः । पञ्च तन्मात्राणि । षोडश विकाराः । पञ्च पञ्चेन्द्रियाणि । अर्थाच्च(श्च) पञ्चभूतविशेषाः । त्रयोदश करणानि । त्रीण्यन्तःकरणानि । चतस्रश्चतस्रो मातृजाः पितृजाश्च कोशाः । पञ्च वायुविशेषाः । त्रयो गुणाः । त्रिविधो बन्धः । त्रयो बन्धहेतवः । द्वौ बन्धरागौ । त्रीणि प्रमाणानि । त्रिविधं दुःखम् । चतुर्विधः प्रत्यय[1]वर्गः । तथा द्विविधः सर्गः । तथा विपर्ययः पञ्चविधः । अशक्तिरष्टाविंशतिविधा । तुष्टिर्नवविधा । सिद्धिरष्टविधेति प्रत्ययभेदाः पञ्चाशत् ।

अस्तित्वमेकत्वमथार्थवत्त्वं परार्थमन्यत्वमथो* निवृत्तिः ।
योगो वियोगो बहवः पुमांसः स्थितिः शरीरस्य +च शेषवृत्तिः ॥

इति दश मूलिकार्थाः । अथ मूलप्रकृतिरव्यक्तमहानहंकारः पञ्च तन्मात्राणीति प्रकृतिविकृतयः । शब्दतन्मात्रं स्पर्शतन्मात्रं रसतन्मात्रं रूपतन्मात्रं गन्धतन्मात्रमिति तन्मात्राणि । द्विविधानीन्द्रियाणि । भूतविशेषाश्च विकाराः । चक्षुःश्रोत्रघ्राणजिह्वात्वचो बुद्धीन्द्रियाणि । रूपशब्दगन्धरसस्पर्शास्तेषामर्थाः । वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियाणि । भाषणं क्रिया गमनमुत्सर्ग आनन्द एषां कर्माणि । वाय्वग्न्यब्वाकाशपृथिव्यो भूतविशेषाः । दशेन्द्रियाणि बुद्ध्यहंकारमनांसि च करणानि । तेषु मनोबुद्ध्यहंकाराश्चान्तःकरणानि । दश बहिष्करणानीन्द्रियाणि च गुणसाम्यलक्षणमव्यक्तं प्रधानं प्रकृतिर्विधानमित्यनर्थान्तरम् । अध्यवसायलक्षणो

* तत्वसमासग्रन्थे परार्थमन्यत्वमकर्तृता चेत्युपलभ्यते पाठः । + तत्वसमासग्रन्थे विशेषवृत्तिरिति पाठस्तद्व्याख्याऽपि तत्रोपलभ्यते ।

[1] क. °यसर्गः । त°।

महान्बुद्धिर्मतिरुपलब्धिरित्यनर्थान्तरम् । अभिमान-
लक्षणोऽहंकारो वैकारिकोऽभिमान इत्यनर्थान्तरम् । ने
पूर्वपूर्विका प्रकृतिः । प्रकृतेर्महानुत्पद्यते, ततोऽहंकारः ।
अहंकारात्तन्मात्राणीन्द्रियाणि च, तन्मात्रेभ्यो विशेषा
इत्युत्पत्तिक्रमः । यो यस्मादुत्पद्यते स तस्मिँल्ली-
यत इति वाऽप्ययं(य)क्रमः " ।

यमः—" मनो बुद्धिरहंकारः खानिलाग्निजलानि भूः ।
एताः प्रकृतयस्त्वष्टौ विकाराः षोडशापरे ॥
श्रोत्राक्षिरसनघ्राणत्वचः संकल्प एव च ।
शब्दरूपरसस्पर्शगन्धवाक्पाणिपायवः ॥
पादावुपस्थ इति ते विकाराः षोडश स्मृताः ।
चतुर्विंशकमित्येतज्ज्ञानमाहुर्मनीषिणः ॥
पञ्चविंशकमव्यक्तं षड्विंशः पुरुषोत्तमः ।
एतज्ज्ञात्वा तु मुच्यन्ते यतयः शान्तबुद्धयः ॥
पञ्चविंशतितत्त्वज्ञो यत्र यत्राऽऽश्रमे रतः ।
प्रकृतिज्ञो विकारज्ञो याति विष्णोः परं पदम् " इति ॥१०९॥

यध्ध्येयमुक्तं तत्प्रयोगकथनायाऽऽह—

अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम् ॥
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत्प्रभुः ॥११०॥

अन्तःकरणसामग्र्यैकत्र स्पष्टीकृतः संकल्पादिदर्शनात्सर्वव्यापित्वे सत्यपि । यथा वह्निः सकलकाष्ठव्यापित्वे सति यत्रैव मथनादिसामग्री भवति, तत्र स्पष्ट उपलभ्यते । ध्येयोऽसावात्मा पूर्वोक्तफलसिद्ध्यर्थम् । कथम् । अनन्यविषयं कृत्वा । किं, मनोबुद्धिस्मृतीन्द्रियं, विषयान्तरत्वनिषेधेनाऽऽत्मविषयत्वप्रतिप- त्त्यर्थमनन्यविषयग्रहणम् । अन्यथाऽऽत्मनो विषयत्वनिषेधेन तद्ध्यानानुपपत्तिः । नहि निर्विषयं मनः प्रवर्तते नापि बुद्धिस्मृती, स्मृतेरनुभूतविषयत्वात् । न चेन्द्रियस्याविषयत्वे संवेदनम् । तस्मान्नैवाऽऽत्मनि विषयता निषिध्यते । तेन यदपि पा(प)तञ्जलिनोक्तम्—" योगश्चित्तवृत्तिनिरोधः " इति, तदप्यनेनैवाभि- प्रायेणेतरथाऽपि चित्तवृत्तेरभाव इत्यभिलषितासिद्धिः समुच्छिन्नाकारत्वात् ।

---

१ क. न सर्वपूर्वे । २ क. °रनि° । ३ क. °त्मवि° ।

अत एव " तदा द्रष्टुः स्वरूपेणावस्थानम् " इति तेनैवोक्तम् । अमुनैवाभिप्रायेण गीतासूक्तम्—

" शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् " इति ॥

तेषां चेन्द्रियाणां बहिर्विषयावभाससंकोचनानन्यविषयत्वं यदैव कृतं तदैवाभ्यन्तरविषयप्रवणता भवति । यथा यदा प्रदीपस्य रश्मयो बहिर्मुखा भवन्ति तदा घटादेः प्रकाशं कुर्वन्ति । यदा पुनः शरावसंपुटनिरुद्धप्रसरास्तदाऽऽत्मन्येव व्यवस्थानं कुर्वन्ति । एवमेवान्धकारे व्यवस्थितस्यैकाकिनो बहिर्मुखावभासनिरोधेन स्वचैतन्यमात्रेऽवस्थानम् । अत एवाऽऽरण्यके " शान्तायां वाचि किंज्योतिः " इति प्रश्ने कृते "आत्मज्योतिः" इत्येतदुत्तरम् । एवमेतदात्मज्ञानं यद्विषयतिरस्कारेणाऽऽत्मचैतन्यव्यवस्थानादन्त्यस्य चिन्मात्ररूपत्वात् । अत एव "तदिदमनल्पमह्रस्वमदीर्घमरसमगन्धमरूपमस्पर्शम्" इत्याद्यारण्यकेऽभिहितम् । ननु सर्व एव स्वं चैतन्यं समनुभवत्यहं पश्यामीत्युपदेशानर्थक्यं, सत्यं, यद्येतावन्मात्रं ज्ञेयं यावता विषयान्तरशून्यस्वचैतन्यावस्था निष्प्रकम्पा यावदिच्छ(ष्ट)कर्तृकरणकारकशून्या कार्या । अत एव—

" यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता "

इति । अतश्च प्राणायामध्यानप्रत्याहारधारणातर्कसमाधिभिः क्रियते । तत्रोक्तलक्षणैः प्राणायामैरिन्द्रियाणां दोषा निराक्रियन्ते । यथा—

" दह्यन्ते ध्या(ध्मा)यमानानां धातूनां हि यथा मलाः ।
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् " इति ॥

ततो ध्यानमात्मानुस्मरणं, ततो मनसश्चञ्चलत्वाद्विषयं विषयं प्रति प्रवृत्तस्याऽऽहरणं प्रत्याहारः । गीतास्वपि—

" यतो यतो निःसरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतच्छनकैर्वशमानयेत् " इति ॥

एतच्च मनसो दुर्ग्रहत्वादिन्द्रियमूलत्वाच्चोच्यते—

" चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरपि सुदुष्करम् " इति ॥

पुनः पुनराहृत्याऽऽत्मनि धार्यत इति धारणा । एते च पृथक्फलाः ।

---

१ घ. छ. °स्थानं त्वस्य । २ क. यद्येता° ।

यथा—"प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषम् ।
प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् " इति ॥

अनीश्वरा गुणा रागद्वेषादयः । ततो मनोबुद्धिपरित्यागेनाऽऽत्मनि विमर्शस्तर्कः ।

"यदाऽऽत्मव्यतिरिक्तेन द्वितीयं नैव पश्यति ।
ब्रह्मभूतस्तदा शान्तः सुखमत्यन्तमश्नुते " इति ॥

ततः सकलविदितवेद्यस्याऽऽत्मनः सम्यगाधानमप्रकम्पतया समाधिरुच्यते । अत एव—

"प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा ।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते "

इति स्मर्यते ॥ ११० ॥

यस्य पुनरस्मिन्सवितर्के समाधौ निरालम्बनतया बहिर्मुखावभासतिरस्कारेण चित्तवृत्तिर्नाभिरमते तस्य शब्दब्रह्मोपासनेन ब्रह्मज्ञानाभ्यासात्परब्रह्माधिगमोपायमाह—

*यथावधानेन पठन्साम गायत्यविस्वरम् ॥
सावधानस्तथाऽभ्यासात्परं ब्रह्माधिगच्छति ॥ १११॥

अवधानेनैकाग्रचित्ततया साम पठन्नधीयानोऽविस्वरमविरुद्धस्वरं यथा गायति तथा सावधानो ब्रह्मज्ञानमभ्यस्यन्परं ब्रह्म परमात्मानमधिगच्छति वेत्ति ॥ १११ ॥

ब्रह्मज्ञाना[३]भ्यासोपायविशेषमाह—

अपरा[४]न्तिकमुल्लोप्यं मद्रकं प्रकरीं तथा[५] ॥
वैणुकं सराबिन्दमुत्तरं गीतकानि तु ॥ ११२ ॥
ऋग्[६]गाथाः पाणिका दक्षविहिता ब्रह्मगीति[७]काः ॥
गायन्नेतत्तदभ्या[८]सकारणान्मोक्षसंज्ञितम् ॥ ११३ ॥

---

* एतदर्थस्थानेऽयं पाठो ङ. पुस्तके—"यथाविधानेन पठन्सामगायमविच्युतम् " इति ॥

---

१ घ. छ. °ल्बिषान् । प्र° । २ क °वेदस्याऽऽ° । ३ क. °भ्यासे विशेषोपायमा° । ४ घ. ङ. छ. °रान्तक° । ५ ङ. °था । औवैणकं सरोबिदुमु° । ६ क. °ग्गाथाऽपणि° । ७ ङ. °तिका । गेयमेत° । ८ ङ. °सकर° ।

अपरान्तिकादयो भारतशास्त्रोक्ता गीतप्रकारविशेषा ब्रह्मज्ञानाभ्यासहेतोर्गेयाः[1] । एतेषु गीयमानेषु नादस्य यत उदयो यत्र च लयस्तदवगन्तव्यम् । तदेव ब्रह्म । ततश्च तज्ज्ञानाभ्यासाय ते गेया इति युज्यते वक्तुम् ॥ ११२ ॥ ११३ ॥

अपि च—

वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ॥
तालज्ञश्चाप्रयत्नेन[3] मोक्षमार्गं निगच्छति ॥ ११४ ॥

वीणा वाद्यविशेषः । तद्वादनतत्त्वज्ञो[4] भारतशास्त्रोक्तेन मार्गेण तालं तत्त्वतो यो वेत्ति, *तथा श्रुतिषु गीतशास्त्रोक्तस्वरूपासु जातिषु तच्छास्त्रोक्तास्वेव विशारदः प्रवीणः । तथा गन्धर्ववेदोक्तमार्गेण तालं तत्त्वतो यो वेत्ति सोऽनायासेन मोक्षमार्गं मोक्षोपायभूतं मनस ऐकाग्र्यं ब्रह्मज्ञानहेतुं निगच्छति ॥ ११४ ॥

यस्तु वीणादिनादानां यत उदयो यत्र च लयस्त[त्त्व]ान्तरेभ्यो विविक्ततया न सम्यग्वेत्ति तं प्रत्याह—

गीतज्ञो यदि गीतेन[5] नाऽऽप्नोति परमं पदम् ॥
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥ ११५ ॥

यदि दैवापादितमनोविक्षेपवशेन गीतज्ञो गीतं कुर्वाणोऽपि परं पदं नाऽऽसादयति तदा रुद्रस्य परमेश्वरस्यानुचरोऽनुवर्ती भूत्वा तेनैव रुद्रेणैव सार्धं मोदते हृष्यति ॥ ११५ ॥

मुनीनां प्रश्नमाह—

अनादिरात्मा कथितस्तस्याऽऽदिस्तु शरीरकम् ॥
आत्मनश्च जगत्सर्वं जगतश्चाऽऽत्मसंभवः ॥ ११६ ॥
कथमेतद्विमुह्यामः सदेवासुरमानवम् ॥
जगदुद्भूतमात्मा च कथं तस्मिन्वदस्व नः ॥ ११७ ॥

हे भगवन्याज्ञवल्क्य त्वयाऽऽत्माऽनादिः प्रागभावरहितः कथितः । तस्याऽऽदिव्यवहारः शरीरस्याऽऽदिमत्त्वेनेति[6] चोक्तम्—

---

* इत आरभ्य वेत्तीत्यन्तं न विद्यते घ. छ. पुस्तकयोः ।

---

1 घ. छ. °तोर्ज्ञेयाः । 2 घ. छ. ज्ञेयाः । 3 ङ. °प्रयासेन मोक्षमार्गं निगच्छ° । 4 घ. छ. °ज्ञो भर° । 5 ङ. योगेन । 6 घ. छ. °दिमत्त्वेने° ।

" अजः शरीरग्रहणात्स जात इति कीर्त्यते "

इत्यत्र। तथाऽऽत्मनश्च सकलं जगदुत्पद्यत इति त्वयैवोक्तं " सर्गादौ स यथाकाम(श)म् " इत्यत्र। तथा जगतः सकाशादात्मनः शरीरवतः संभवो जन्मेति ब्रवीषि, तदेतद्भगवतो वचनं परस्परं व्याहतमिति विमुह्यामः। भवांस्तावदाप्ततरोऽतो भवद्वचनं न व्याहतं भवितुमर्हति, व्याघातं च पश्यामोऽतो विमुह्यामः। व्याघातमेव स्पष्टयति—सदेवासुरमानवं जगदात्मन उद्भूतं चेदात्मा शरीरग्रहणनिरपेक्ष एव स्वकार्यं करोति, ततश्च तस्मिन्कथमाकाशादौ कारणीभूते सत्यात्मनः संभवः शरीरग्रहणं शरीरनिरपेक्षस्यैवाऽऽत्मनो जगत्सृष्ट्यादिकार्यकारत्वाच्छरीरग्रहणमनर्थकं स्यात्। अथ तद्ग्रहणस्यार्थवत्त्वाय शरीरवानेव कार्यकारी, कथं तर्हि सर्गादावशरीर एवाऽऽत्माऽऽकाशादि सृजति, इत्येतन्मोहनिवृत्तयेऽस्मान्प्रति ब्रूहि ॥ ११६ ॥ ११७ ॥

अत्रोत्तरमाह[3]—

मोहजालमपास्येह पुरुषो दृश्यते हि यः ॥
सहस्रकरपन्नेत्रः सूर्यवर्चाः सहस्रकः ॥ ११८ ॥
स आत्मा चैव यज्ञश्च विश्वरूपः प्रजापतिः ॥

मोहजालं नानाप्रकारं मिथ्याज्ञानं सत्कर्माचरणवेदान्तार्थावगाहनवशादपास्य निरस्य यः पुरुषः सहस्रकरोऽपरिमितहस्त एवं सहस्रपात्, सहस्रनेत्रः, सहस्रसूर्यवर्चाः सूर्य इव ज्योतिःसहस्रकः सहस्रमूर्धा च दृश्यते विद्वद्भिः स एवाऽऽत्मा क्षेत्रज्ञो जीव इति(वो) विज्ञानात्मेति यावत्। यज्ञो धर्मश्च स एव वेदान्तैकवेद्यः परमः पुरुषो विश्वरूपो भोक्तृभोग्यभोगायतनभोगसाधनभोगरूप इति यावत्। एकस्य चानेकरूपत्वं दृष्टं यथा वृक्षस्य स्कन्धशाखाविटपादिरूपता, अतो नानुपपन्नं वैश्वरूप्यम्। स एव प्रजानां पुनरनादिरूपाणां पतिः स्वामी। अत्र चामूर्तस्य निरवयवस्य परमात्मनोऽसंख्यकरादियोगः सर्वत्र सर्वदा च करादिकार्यकारणशक्तिमत्त्वादुपचारेणोच्यते। ततश्च सर्वविषयाचिन्तनीयशक्तेः परमात्मनोऽशरीरस्यापि व्योमादिविश्वस्रष्टृत्वं नानुपपन्नमित्युक्तं भवति। विश्वरूपत्वाभिधानेन च जगदुपादानकारणं च परमात्मैवेति बोधयति। यथा घटकरशरावोदञ्चनादिरूपा मृत्तिका तदुपादानकारणमेवं जगद्रूप आत्मा

१ क. व्याहतं। २ क. °र्यकर°। ३ क. °ह श्रीयाज्ञवल्क्य इत्यादिना। मो। ४ घ. छ. °रपाने°। ५ घ. छ. °दार्था°। ६ क. °र्यकर°। ७ क. °था-करघटशरावादिरूपमृ°।

तदुपादानकारणम् । विश्वशब्देनैव यज्ञस्यापि ग्रहणे सिद्धे पृथगुपादानं प्राधान्यख्यापनार्थम् । एवं च परमात्मा शरीरानपेक्ष एवं स्वकार्यकारीत्युक्तम् । ततश्चार्थाच्छरीरसापेक्षता क्षेत्रज्ञस्येत्यापद्यते । ततश्च सापेक्षत्वानपेक्षत्वयोरविरोधः ॥ ११८ ॥

औपाधिकश्च तस्य परमात्मनो भेदोऽस्तीत्युक्तमेव परमात्मनो महासृष्टिहेतुत्वं सर्वशक्तित्वेनोपपाद्यावान्तरसृष्टौ तद्धेतुत्वमुपपादयन्निदानीमाह—

विराट्[3] च सोऽन्नरूपेण यज्ञत्वमुपगच्छति ॥ ११९ ॥
यो द्रव्यदेवतात्यागात्[4]संभूतो रस उत्तमः ॥
देवान्संतर्प्य *स रसो यजमानं फलेन च ॥ १२० ॥
संयोज्य वायुना सोमं[5] नीयते रश्मिभिस्ततः ॥
ऋग्यजुःसामविहितं सौरं धामोपनीयते[6] ॥ १२१ ॥
तन्मण्डलमसौ सूर्यः सृजत्यमृतमुत्तमम् ॥
यज्जन्म सर्वभूतानामशनानशनात्मनाम् ॥ १२२ ॥
तस्मादन्नात्पुनर्यज्ञः पुनरन्नं पुनः क्रतुः ॥
एवमेतदनाद्यन्तं चक्रं संपरिवर्तते ॥ १२३ ॥

विविधं विशेषेण वा राजत इति विराट्सूर्यः स एव पूर्वोक्तः[7] परमात्मैव स आदित्योऽन्नरूपेण यज्ञो भवति । तदेव मपञ्चयितुमुक्तं योद्रव्यदेवतेत्यादि । द्रव्यस्य च पुरोडाशादेर्हविषस्त्याज्यस्य देवताया उद्देशकारकस्याग्न्यादेर्यः संबन्धी त्यागो यज्ञस्तस्मात्संभूत उत्तमो रसः पुण्यधर्मादिपर्यायो देवानमृतेन प्रीणयित्वा यजमानं च स्वर्गादिना फलेन संयोज्य स धर्मो रसोऽमृतं भवति, सोऽमृतात्मा रसो वायुना सोममण्डलं नीयते । ततः सोममण्डलाद्रश्मिभिः सौरं धाम सूर्यस्थानमृग्यजुःसामात्मकतया विहितं वेदैः सैषा त्रय्येव विद्या तपतीत्यादिभिरवबोधितमुपनीयते । यत्तु त्रयीमयत्वेन विहितं[8] तत्सूर्यस्य

* तपस इत्यपि पाठो घ. छ. पुस्तकयोः ।

१ घ. छ. °थक्त्वस्योपा° । २ घ. छ. °व स्वाकार्य° । ३ ङ. °राजः सो° । ४ ङ. °त्याग. भू° । ५ घ. छ. सोमो नी° । ६ ङ. °ते । स्वमण्डलादसौ । ७ क. °र्वोक्तप्रकारेण प° । ८ घ. छ. °यत्वेन वि° ।

मण्डलं वेदितव्यम् । सर्वभूतानामशनानशनात्मनां चराचराणां स्थिराणां जन्मबीजमसौ सूर्यो मण्डलान्तर्वर्ती पुरुषोऽन्नरूपं रसं विसृजति । तस्माद- न्नाच्च पुरोडाशादिरूपात्स्यज्यमानात्पुनर्यज्ञोदयः । ततश्च यज्ञादुक्तेन क्रमेण पुनरन्नसंभवः । ततश्च क्रतुर्भवति । एवमाद्यन्तरहितमेतदुक्तं वस्तुजातं पर- स्परं हेतुहेतुस(म)द्भावेन व्यवस्थितं चक्रवत्परिवर्तते भ्राम्यति व्यवतिष्ठत इत्यर्थः । तथाऽऽह भगवान्गीतासु—

" अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥
कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥
एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति " ॥

यज्ञोऽपूर्वं, ब्रह्म वेदः । अक्षरं परमात्मा ।

मनुः—" अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः " ॥ ११९ ॥
॥ १२० ॥ १२१ ॥ १२२ ॥ १२३ ॥

यदि कार्यकारणभावव्यवस्थितं संसारचक्रं, न तर्ह्यात्मनः कैवल्यरूपो मोक्षः संभवतीत्यत्राऽऽह—

अनादिरात्मा संभूतिर्विद्यते नान्तरात्मनः ॥
समवायी तु पुरुषो मोहेच्छाद्वेषकर्मजः ॥ १२४ ॥

सत्यं यद्यादिमानात्मा स्यात्तदा विनाश्यपि स्यात्ततश्च विनाशे मोक्षल- क्षणोऽस्य धर्मो न स्यात् । किं त्वनादिरनुत्पत्तिरात्मा, न ह्यस्यान्तरात्मनः संभूतिः कारणमस्ति । न च नित्यस्यापि पूर्वोक्तचक्रेण स्वाभाविकसमवाययो- गित्वादनिर्मोक्षो वाच्यः । यतोऽयं पुरुषोऽन्तरात्मा यज्ञादिचक्रस्य समवायी संबन्धी मोहेच्छाद्वेषसंभवात्कर्मतो जायते न स्वतः । ते च मोहादयश्चक्रसम- वायोपाधयो विद्यातपोभ्यासातिशयाद्वैराग्याच्च निवर्तन्ते, तन्निबन्धनानि च कर्माणि ॥ १२४ ॥

---

१ घ. छ. सूर्यम° । २ घ. छ. 'पात्याज्य° । ३ घ. छ. °क्तं जा' । ४ घ. छ. °रणभा° । ५ घ. छ. 'मेणः । स' । ६ क. घ. किं तु नाऽऽदि° ।

महासृष्टिकर्तृत्वे परमात्मनः प्रकारविशेषमाह—

सहस्रात्मा मया यो व आदिदेव उदाहृतः ॥
मुखबाहूरुपज्जाः स्युस्तस्य वर्णा यथाक्रमम् ॥१२५॥
पृथिवी पादतस्तस्य शिरसो द्यौरजायत ॥
नस्तः प्राणा दिशः श्रोत्रात्स्पर्शाद्वायुर्मुखाच्छिखी॥१२६॥
मनसश्चन्द्रमा जातश्चक्षुषश्च दिवाकरः ॥
जघनादन्तरिक्षं च जगच्च सचराचरम् ॥ १२७ ॥

"सहस्रकरपन्नेत्रः सूर्यवर्चाः सहस्रकः" इत्यत्र यो मया युष्माकमादिदेवो जगत्कारणभूतो देव उदाहृत उक्तः, तस्य मुखबाहूरुपादेभ्यो यथासंख्यं ब्राह्मणक्षत्रियवैश्यशूद्रा जाताः । तथाऽस्य पादतो भूः शिरसश्च द्यौरजायत । नस्तो नासिकातः प्राणा जाताः । श्रोत्राद्दिशः । त्वचो वायुः । मुखादग्निः । मनसश्चन्द्रः । चक्षुषो रविर्जातः । जघनान्नाभितोऽन्तरिक्षं जङ्गमं स्थावरं जगज्जातम् ॥ १२५ ॥ १२६ ॥ १२७ ॥

मुनयोऽत्राऽऽक्षेपमाहुः—

यद्येवं स कथं ब्रह्मन्पापयोनिषु जायते ॥
ईश्वरः स कथं भावैरनिष्टैः संप्रयुज्यते ॥ १२८ ॥
करणैरन्वितस्यापि पूर्वज्ञानं कथं च न ॥
वेत्ति सर्वगतां कस्मात्सर्वगोऽपि न वेदनाम् ॥१२९॥

यद्यात्मैवमुक्तप्रकारेण विश्वसृष्टिहेतुरतश्च सर्वज्ञः सर्वशक्तिः सर्वेश्वरः कथं तर्हि ब्रह्मन्याज्ञवल्क्य परमात्मा पापयोनिषु श्वसूकरादिषु जायते कुत्सित-शरीरं परिगृह्णातीति यावत् । तथेश्वरः स्वतन्त्रोऽपि सन्कथमनिष्टैर्मूकान्धबधि-रत्वादिभिर्भावैः संबध्यते । तथा करणैः षड्भिरिन्द्रियैर्ज्ञानकारणैर्युक्तस्यापि पूर्वजन्मानुभूतार्थविषयचक्षुरादिभिः प्रत्यभिज्ञानं मनसा च स्मरणं कथं न भवति, सर्वपुरुषगतां च वेदनां दुःखं सर्वगः सर्वक्षेत्रज्ञात्माऽपि सन्कस्मान्न वेत्ति । वेदनाग्रहणमुपलक्षणार्थम् । तेन सर्वपुरुषसमवेतान्सुखादीन्भावान्कथं न वेत्तीति चोद्यार्थः ॥ १२८ ॥ १२९ ॥

---

१ ङ. °रसो द्यौ° । २ क. घ. छ. °ते । कार° ।

अत्रोत्तरमाह—

अन्त्यपक्षिस्थावरतां मनोवाक्कायकर्मजैः ॥
दोषैः प्रयाति जीवोऽयं भवंयोनिशतेषु च ॥ १३० ॥

नैवेश्वरो निरुपाधिः सन्प्रातिस्विकेनैव रूपेणान्त्यजादिकुत्सितदेहपरिग्रहं करोति, किं तु जीवः सन्नन्तःकरणोपहितः सन्मानसवाचिककायिकैर्निषिद्धैः कर्मभिर्ये जनिता दोषाः पापानि पूर्वाणि तैर्यथासंख्यमन्त्यजत्वं पक्षित्वं स्थावरत्वं च भवशतेषु कुत्सितयोनिशतेषु च याति । अत्र च पक्षिग्रहणं तिर्यङ्मात्रोपलक्षणार्थम् । तथा च मनुः—

" शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् " ॥

न चोपहितस्य यो धर्मे योगः स तस्य निरुपाधेर्भवितुमर्हति, यथा घटोपहितस्याऽऽकाशस्य धूलिधूमादियोगे(गो) नै महाकाशस्य जीवभावश्चानादिरनादित्वादुपाधियोगस्य ॥ १३० ॥

किं च—

अनन्ता हि यथा भावाः शरीरेषु शरीरिणाम् ॥
रूपाण्यपि तथैवेह सर्वयोनिषु देहिनाम् ॥ १३१ ॥

यथा शरीरेषु वर्तमानानां शरीरिणां जीवानामनन्ता असंख्याता भावाश्चित्तवृत्तयः कुशलाकुशलप्रवृत्तिहेतवो भवन्ति, तथा रूपाण्यपि काणकुब्जान्धबधिरत्वादीन्यशुभानि सर्वयोनिषु वर्तमानानां देहभाजां भवन्ति । अनेन चेश्वरः स कथं भावैरनिष्टैः संप्रयुज्यत इति चोद्यं परिहृतम् । अनेन च श्लोकद्वयेन सूक्ष्मशरीरोपहितस्य परमात्मनो जीवभूतस्य पापवशात्कुत्सितयोनिकुत्सितरूपप्राप्तिर्न परमात्मन इति परिहार उक्तः । अनेनैव च हेतुना भवान्तरानुभूतानां भावानामनवगमोऽनुसंधेयः । अत एव योगिनां क्षीणदोषाणां जातिस्मरत्वादिकं शास्त्रकारैरुच्यते ॥ १३१ ॥

न केवलं रूपवैचित्र्ये भाववैचित्र्यं कारणम् । शुभाशुभकर्मणां चैहिकामुष्मिकफलत्वेऽपि तदेव हेतुरित्याह—

---

१ ङ. 'वन्योनि' । २ घ. छ. 'निषु श' । ३ घ. छ. °न सह' । ४ क. °भावाश्चाना° । ५ क. घ. छ. °वंदेहेषु । ६ क. 'मव' । ७ घ. छ. °चित्र्यभा° ।

विपाकः कर्मणां प्रेत्य केषांचिदिह जायते ॥
इह चामुत्र चैकेषां भावस्तत्र प्रयोजनम् ॥ १३२ ॥

केषांचित्कर्मणां विपाकः फलं शुभमायुरादि विपरीतं च तत्क्षयादि, केषांचिन्मर्मा[1]ग्रहेण कृतानां प्रेत्य जन्मान्तरे भवति, केषांचित्पुनरत्यन्ताभिनिवेशवशात्पुनः पुनः कृतानामत्रैव जन्मनि विपाको भवति। अन्येषां तु कर्मणां प्रचुरतराग्रहसंपादितानामिह परत्र च जन्मनि फलं भवति। तत्र च[2] सर्वफलवैचित्र्ये भावश्चित्तवृत्ति[3]विशेषोपेतः प्रयोजनं प्रयोजककारणमिति यावत् ॥ १३२ ॥

यदुक्तम्—"अन्त्यपक्षिस्थावरतां मनोवाक्कायकर्मजैः।
दोषैः" इति तदेव प्रपञ्चयन्नाह—

परद्रव्याण्यभिध्यायंस्तथाऽनिष्टानि चिन्तयन् ॥
वितथाभिनिवेशी च जायतेऽन्त्यासु योनिषु॥१३३॥

परकीयानि (णि)धनान्यभिध्यायन्कथमेतानि परस्य न भवेयुर्मम च भवेयुरित्यभिचिन्तयन्नित्यर्थः। तथा यः परस्यानिष्टानि प्रतिकूलानि चिन्तयन्भवति, यद्ययमप्रजा अपशुरधनः स्यात्तथा सति सम्यग्भवतीति। तथा यो वितथाभिनिवेशी वितथे प्रमाणरहिते बौद्धचार्वाकादिसिद्धान्तादावभिनिवेश्यत्य[4]न्ताग्रही, तादृशेषु[5] प्रत्यवायवानन्त्यासु चण्डालादियोनिषु जायते। तदेतत्रिविधं मानसं पापम्। तदाह मनुः—

"परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्।
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम्" ॥ १३३ ॥

वाचिकान्याह—

पुरुषोऽनृतवादी च पिशुनः पु(प)रुषस्तथा ॥
अनिबद्धप्रलापी च मृगपक्षिषु जायते ॥ १३४ ॥

योऽनृतमयथा[6]दृष्टं वदतीत्येवंशीलो यश्च पिशुनः परदोषसूचको यो वा परोद्वेगकरणशीलो योऽनिबद्धप्रलापी पुराणादिविद्यास्थानप्रसिद्धविरुद्धाभि-

---

१ क. °न्मदाग्रहे कृ°। २ क. °त्र फलवै°। ३ घ. छ. 'विशेषस्तारतम्यविशेषोपेतोः प्र°। ४ घ. छ. 'न्ताग्राही। ५ घ. छ. 'षु तथेति प्रतिवायान्। अन्त्या°। ६ क. 'थार्थंद'।

धायी पुरुषः स मृगयोनिषु पक्षियोनिषु वा दोषाभ्यासरततारतस्य (तारतम्य)-वशेन जायते तत्तनुमुपादत्ते । एतच्चतुर्विधं वाचिकं पापम् । तदाह मनुः—

" पारुष्यमनृतं चैव पैशुन्यमपि सर्वतः ।
अनिबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥ १३४ ॥

कायिकान्याह—

अदत्तादाननिरतः परदारोपसेवकः ॥
हिंसकश्चाविधानेन स्थावरेषूपजायते ॥ १३५ ॥

यः पुनरदत्तादाने चौर्ये निरतोऽत्यन्तसक्तः परभार्यागामी वा यथाविहितं प्राणिवधं कुर्यात्स स्थावरेष्वोषधिवनस्पतिगुच्छगुल्मादिषु जायते ।

मनुः—" अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च शारीरं त्रिविधं स्मृतम् " ॥

एवं दशविधं मनोवाक्कायजं पापं समत्ययं साभ्यासं चाऽऽचरितं[1]पत्या-दियोनिप्राप्तिनिमित्तमुक्तमिति वेदितव्यम् । यत्तूक्तादन्यद्वाङ्मनःकायसाध्य-मप्यबुद्धिपूर्वकं कृतमनाग्रहसेवितं स्यात्तस्य फलान्तरं बोद्धव्यम् । तथा च हारीतः—

" सर्वाभक्ष्यभक्षणमभोज्यभोजनमपेयपानमयाज्ययाजनमस-त्प्रतिग्रहः परदाराभिगमनं परद्रव्यापहरणं प्राणिहिंसा चेति शारीराणि, पारुष्यमनृतं विवादः श्रुतिविक्रय-श्चेति वाच्यानि, परोपतापनपरद्रव्याभिद्रोहौ क्रोधलोभौ[3] मानोऽहंकारश्चेति मानसानि, तदेतान्यष्टादश समान-रूपाणि कर्माणि । यस्मिन्यस्मिन्वयसि यः करोति शुभाशुभानि तस्मिंस्तस्मिन्वयसि शारीरवाचिकमानसा-न्याप्नोति । एवं ह्याह—
यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम् ।
तस्यां तस्यामवस्थायां तत्तत्फलमवाप्नुयात् ॥
शरीरेण तु शारीरं वाङ्मयेन तु वाङ्मयम् ।
मानसं मनसा चैव स्वकर्मफलमश्नुते " ॥ १३५ ॥

उत्कृष्टयोनिप्राप्तिकारणमाह—

---

१ क. 'सता॰' । २ घ. छ. 'रिते मर्त्यादि' । ३ क. 'भौ मनोऽ॰' ।

आत्मज्ञः शौचवान्दान्तस्तपस्वी विजितेन्द्रियः ॥
धर्मकृद्वेदविद्याति सात्त्विको देवयोनिताम् ॥ १३६ ॥

आत्मज्ञ आत्मोपासको न तत्साक्षात्कारी शौचेन शमप्रकारेण चोपेतो दान्तो दमयुक्तस्तपस्वी कृच्छ्रादिकारी विजितेन्द्रियो वशीकृतेन्द्रियो धर्मरतो नित्यनैमित्तिककारी वेदार्थज्ञो यः स सात्त्विकत्वाद्देवयोनितां प्राप्नोति । उद्रिक्तसत्त्वो योगी सात्त्विकः । सत्त्वस्वरूपमाह मनुः—

" तत्र यत्प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् ।
प्रभातमिव शुद्धाभं सत्त्वं तदुपधारयेत् " ॥

प्रीतिः सुखं तत्कारणं प्रीतिसंयुक्तं, शुद्धाभमनवद्यविज्ञानकारणं यत्तत्सत्त्वमित्यर्थः । तथा—

" वेदाभ्यासस्तपो ज्ञानं शौचमिन्द्रियनिग्रहः ।
धर्मक्रियाऽऽत्मचिन्ता च सात्त्विकं गुणलक्षणम् " ॥

गुणलक्षणं गुणलिङ्गं, सात्त्विकं सत्त्वसंबन्धिवेदाभ्यासादिकं सत्त्वकार्यत्वाद्भवति सत्त्वे लिङ्गम् ।

तथा—" यत्सर्वेणेच्छति ज्ञातुं लज्जते यच्च चाऽऽचरन् ।
येन तुष्यति चाऽऽत्माऽस्य तत्सत्त्वगुणलक्षणम् " ॥

सत्त्वे ह्युद्रिक्ते पुरुषो ज्ञेयं वस्तु सर्वेण वस्तुना साधारणासाधारणधर्मयोगेना ज्ञातुमिच्छति, अतस्तादृशीच्छा भवति सत्त्वलक्षणम् ।

तथा—" तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते ।
सत्त्वस्य लक्षणं धर्मः श्रेष्ठमेतद्यथाक्रमम् " ॥

सत्त्वविपाकश्च प्रथममध्यमोत्तमभेदेन त्रिविधः । तत्र देवत्वप्राप्तिर्मध्यमस्तत्पाकः । तदाह मनुरेव—

" तापसा यतयो विप्रा ये च वैमानिका गणाः ।
नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः ॥
यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः ।
पितरश्चैव साध्याश्च द्वितीया सात्त्विकी गतिः ॥
ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च ।
उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः " ॥ १३६ ॥

ह. °यः । कर्मकृद्वेदवित्साक्षी सा° । २ क. °र्मतो । ३ क. सत्त्वलि° । ४ क. °ति । इति [illegible]

असत्कार्यरतोऽधीर आरम्भी विषयी च यः ॥
स राजसो मनुष्येषु पुनर्जन्माधिगच्छति ॥ १३७ ॥

सत्कार्यं धर्मस्ततोऽन्यदधर्म इति यावत्। तत्र विषयेऽनन्यव्यापारेण रतः सक्तस्तन्निरतोऽधीरः शीततापादिद्वंद्वासहिष्णुः। आरम्भी काम्ययुद्धकारी, विषयसक्तो य एवंविधः स राजसः, स पुनरपि मनुष्य एव भवति। रजो-विपाकत्रैविध्यं मनुराह—

"कल्ला मल्ला नटाश्चैव पुरुषाश्च कुवृत्तयः।
द्यूतपानप्रसक्ताश्च प्रथमा राजसी गतिः ॥
राजानः क्षत्रियश्चैव राज्ञां चैव पुरोहिताः।
दानयुद्धप्रधानाश्च द्वितीया राजसी गतिः ॥
गन्धर्वा गुह्यकाश्चैव विविधा भूचराश्च ये।
तथैवाप्सरसः सर्वा राजसेपूत्तमा गतिः" ॥ १३७ ॥

अथ तामसलक्षणमाह—

निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचकस्तथा ॥
प्रमादवान्भिन्नवृत्तो भवेत्तिर्यक्षु तामसः ॥ १३८ ॥

निद्रालुर्निद्राशीलः। क्रूरकृत्परदुःखकारी। लुब्धनास्तिकौ प्रसिद्धौ। याचकः सति द्रव्ये भिक्षणशीलः। प्रमादकार्य(दः कार्यो) नादरः। भिन्नवृत्तो दुराचारः स तामसः स तिर्यक्षु जायते।

मनुः—" स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सरीसृपाः।
पशवश्च शृगालाश्च जघन्या तामसी गतिः ॥
हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छा विगर्हिताः।
सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः ॥
चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः।
रक्षांसि च पिशाचाश्च तामसेपूत्तमा गतिः" ॥

अत्र च कर्मतारतम्येन फलतारतम्यम् ॥ १३८ ॥

रजसा तमसा चैवं समाविष्टो भ्रमन्निह ॥
भावैरनिष्टैः संयुक्तः संसारं प्रतिपद्यते ॥ १३९ ॥

---

१ ङ. 'षु मृतो जन्मा'।

एवमुक्तप्रकारेण रजसा तमसा च समाविष्ट उपहित इह संसारे भ्रमन्ननेकयोनीः प्रतिपद्यमानोऽनिष्टैर्मूकादिभिर्भावैः संबद्धः संसारं जन्मपरम्परां प्रतिपद्यते । अनेन च—

"ईश्वरः स कथं भावैरनेकैः संप्रयुज्यते"

इत्यादि चोद्यं परिहृतम् । न हीश्वरस्य निरुपाधेर्महाकाशकल्पस्यौपाधिकानिष्टभावयोगो भवति किंतु रजःप्रमुखेनो(णो)पाधिनोपहितस्य जीवस्य न स्वाभाविकं किं त्वौपाधिकम् । न चौपाधिकानिष्टभावयोगो दूषणम् । यथाऽऽदर्शोपाधिकं मुखस्य वक्रत्वं कुरूपत्वं वा ॥ १३९ ॥

"करणैरन्वितस्यापि" इति चोद्यस्य परिहारमाह—

मलिनो हि यथाऽऽदर्शो रूपालोकस्य न क्षमः ॥
तथाऽविपक्वकरण आत्मज्ञानस्य न क्षमः ॥ १४० ॥

यद्यप्यात्मा जन्मान्तरानुभूतमर्थजातं पुरुषान्तरसमवेतं वेदनादिकं च स्वभावतो ज्ञातुं शक्तो मनःप्रभृतीनि च करणानि[1] तदवबोधसमर्थानि, तथा तान्यविपक्वानि कर्मभिः प्रतिबद्धशक्तीनि न भावान्तरानुभूतमर्थजातमुपलभन्ते । अत्र दृष्टान्तः—आदर्शस्य यथा सहजायां रूपावलोकनशक्तौ मलेन प्रतिबद्धायां न रूपालोकनक्षमोऽसौ भवति तथाऽऽत्माऽप्यपक्वकरणः । यद्यपि सर्वान्तःकरणेषु जलपात्रकल्पेषु सूर्यवदेक एवाऽऽत्माऽवभासते, ततश्चोपाध्यन्तरावच्छिन्नेऽस्मिन्सुखदुःखानुभवो जायमानोऽन्योपाध्युपहितेन तेनैव प्रतिसंधातव्य इति न्याय्यं भवति, तथाऽपि सुखदुःखयोरुपाध्यन्तरसमवेतयोरैन्द्रियकत्वं परिपक्वे चेन्द्रिये सुखादिग्रहणासंभवात्तदवच्छिन्नानुभवो न शक्यः प्रतिसंधातुमिति ॥ १४० ॥

सन्नप्यर्थः परिपाकमन्तरेण न प्रकाशत इत्यत्र दृष्टान्तमाह—

कट्वेर्वारौ यथाऽपक्वे मधुरः सन्रसोऽपि न ॥
प्राप्यते ह्यात्मनि तथा नापक्वकरणे ज्ञता ॥ १४१ ॥

अपक्वे कट्वेर्वारौ चिर्भिटविशेषे यथा सन्नपि मधुरो रसो न प्राप्यते

---

१ क. कारणानि । २ घ. छ. °न्तरभू° । ३ घ. छ. °पहते° । ४ क. °योरेन्द्रि° । ५ घ. छ. °नाम भ° । ६ क. °न्तरमा° । ७ घ. छ. °टूर्वारौ ।

नोपलभ्यते, तथैवापक्ककरणेऽन्तरात्मनि ज्ञाता व्यवहितविप्रकृष्टार्थबोद्धृता सत्यपि न प्राप्यते । कटुशब्दोऽयं न रसविशेषे वर्तते, किंतु जातिविशेषे ॥ १४१ ॥

उक्तमेवार्थं स्पष्टयितुमाह—

सर्वाश्रयां निजे देहे देही विन्दति वेदनाम् ॥
+योगयुक्तश्च सर्वासां ज्ञाता नाऽऽप्नोति वेदनाम् ॥१४२॥

देही देहविषयाहंप्रत्ययवान्सर्वाश्रयां शिरःपाणिपादादिसकलदेहावयवायत्तोदयां वेदनां सुखदुःखात्मिकां निज एव देहे विन्दत्युपलभते । यस्तु योगयुक्तः सन्सिद्धयोगे निवृत्तदेहविषयाहंप्रत्ययः सर्वासां सर्वक्षेत्रवर्तिनीनां वेदनानां ज्ञाता वेदिता भवति न चासौ सर्वपुरुषवर्तिनीं वेदनां प्राप्नोति । स्वाभाव्यत्वेन प्रतिपद्यते परः सुखादिमान्न पुनरहमिति प्रतिपद्येत इत्यर्थः ॥ १४२ ॥

ननु सर्वान्तःकरणेषु यदैक एवाऽऽत्मा भवेत्ततो योगिनः सर्ववेदनाबोद्धृतोपपद्यते, तदेवाऽऽत्मैक्यमहमिति भेदप्रत्ययेऽनुपपन्नमित्यत्राऽऽह—

आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ॥
तथाऽऽत्मैको ह्यनेकश्च जलाधारेष्विवांशुमान् ॥१४३॥

अनौपाधिकं हि नानात्वमेकेन विरुध्यते न त्वौपाधिकम् । दृश्यते ह्येकस्यापि व्योम्नो घटाद्युपाधिवशान्नानात्वं घटाकाशः कुसूलाकाश इति । यथा च भिन्नेषु जलाधारेष्वेकोऽप्यंशुमान्नानेति प्रतीयते, एवमेकोऽप्यात्माऽन्तःकरणरूपोपाधिभेदादयमहमिति नानात्वेनावभासते । ततश्च स्वाभाविकमेकत्वमौपाधिकं च नानात्वमित्यविरोधः । न त्वे(चै)कत्वप्रत्यये सति नानात्वमौपाधिकं स्यात्स एव च कुत इति वाच्यम् । आगमादहमिति प्रत्यक्षत्वाच्चैकत्वसिद्धेः । भवति हि सर्वेषां जन्तूनां ग्राह्यावभासे विलक्षणो ग्राहकोऽहमित्यवभासः ॥ १४३ ॥

ननु ग्राहको व्योमादेर्भूतधातोरन्यो नास्तीत्यत आह—

+ एतदर्धे पाठान्तरं ङ. पुस्तके—'' योगी मुक्तश्च सर्वासां यो न चाऽऽप्नोति वेदनाम् '' इति ।

---

१ क. °बोध्यता । २ घ. छ °यते ज्ञातह° । ३ घ. छ. यथेक । ४ ङ. जलभाण्डेषि° । ५ घ. छ. °त्वमैक्येन । ६ घ. छ °ति न वा° ।

ब्रह्मखानिलतेजांसि जलं भूश्चेति धातवः ॥
इमे लोका एष चाऽऽत्मा तस्माच्च सचराचरम् ॥१४४॥

ब्रह्मादयः षड्धातवो धारयितारो न पुनर्व्योमादयो लोकाः । लोक्यन्त इति लोका ग्राह्या इति यावत् । न च ग्राह्या एव ग्राहका भवितुमर्हन्ति । अहमिदं गृह्णामीति ग्राह्याद्भिन्नतयैव ग्राहकस्यावभासात् । तस्मादेष ब्रह्मधातुरेवाऽऽत्मा सर्वस्य ग्राहकः । अत एव ब्रह्म सर्वानुभूरित्युपनिषद्युक्तम् । यद्येवं ग्राह्यात्सर्वस्मादचेतनाद्ग्राहकस्य चेतनस्य भेद एव ततश्च—

" सर्वं खल्विदं ब्रह्म "

इत्यादिश्रुतिविरोध इत्येतत्परिहारायोक्तं-तस्माच्च सचराचरमिति। तस्माद्ब्रह्मणश्चेतनात्सचराचरं जगज्जायत इति शेषः । ततश्च " जनिकर्तुः प्रकृतिः " इत्येतल्लक्षणोक्तं प्रकृतिस्वरूपं समा(पमपा)दानत्वं तस्मादिति पञ्चम्याचष्टे । न च प्रकृतितो विकृतिर्भिन्नैव, तथा सति हि सुवर्णकुण्डलं मृद्घट इति सामानाधिकरण्यप्रत्ययो नोपपद्यते । स ह्यत्यन्तभिन्नेभ्यो दण्डदेवदत्तादिभ्यो व्यावृत्त इति । न हि भवति दण्डो देवदत्त इति, किंतु दण्डवान्देवदत्त इति। तथाऽत्यन्ताभिन्नेभ्योऽपि निवृत्तो न हि भवति देवदत्तो देवदत्त इति किंतु देवदत्त इत्येव, तेन ब्रह्मैवेदं सर्वमिति सामानाधिकरण्यप्रत्ययो वाक्यजन्यो ब्रह्मणा सह जगत आत्यन्तिकाद्भेदादभेदाच्च विलक्षणं भेदाभेदतादात्म्यादिपदास्पदीभूतं प्रकारं व्यवस्थापयति । न च सर्वं खल्विदं ब्रह्मेति गौणस्तादात्म्यव्यपदेशो गौर्बाहीक इतिवद(दि)ति वाच्यम् । प्रमाणान्तरे गोबाहीकयोरत्यन्तभेदमवगम्य व्यपदेश्यगौणत्वमवसीयते । न च जगद्ब्रह्मणोरत्यन्तभेदग्राहकं किंचन प्रमाणमस्ति । यस्तु ग्राह्यग्राहकतया भेदप्रत्ययः स भेदं विधत्ते नाभेदं निषेधात् । ब्रह्मप्रपञ्चयोरभेदविधायिका श्रुतिरुदीरितैव । यस्मात्तयोस्त्वभेदोऽपि भेद एव तस्मात्सचराचरमित्यत्र जायत इत्यध्याहार्यम् । अन्यथा—

" सर्वं खल्विदं ब्रह्म "

इति श्रुतिविरोधो दुष्परिहारः स्यात् ॥ १४४ ॥

यथाऽऽत्मा चराचरं सृजति तथाऽऽह—

---

१ घ. छ. जन्तवः । २ क. °दय एव । यत इमे व्योमादयो लोका ग्रा° । ३ घ. छ. °का भावि° । ४ क. °ह्मनुभूरित्याद्यनुशासनमुप° । ५ क. °देशगौ° ।

मृद्दण्डचक्रसंयोगात्कुम्भकारो यथा घटम् ॥
करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः ॥ १४५ ॥
हेममात्रामुपादाय रूपं वा हेमकारकः ॥
निजलालासमायोगात्कोशं वा कोशकारकः ॥ १४६ ॥
कारणान्येवमादाय तासु तास्विह योनिषु ॥
सृजत्यात्मानमात्मैव संभूय करणानि च ॥ १४७ ॥

यथा कुम्भकारः कुम्भस्य प्रकृतिभूताया मृदो दण्डादीनां चाप्रकृतिभूतानामन्योन्यसमवधानात्कुम्भं करोति । यथा वा गृहकर्ता गृहोपादानकारणैस्तृणमृत्काष्ठैरन्योन्यसंयुक्तैर्गृहं निर्मिमीते । यथा हेमकारकः सुवर्णैकदेशं गृहीत्वा रूपानुग्राहकं भूषणं कटकादि करोति । यथा च कोशकारकः शस्त्रशरीरसंज्ञकः कीटो निजलालयैव कोशं जनयति, एवमात्माऽनेकासु योनिष्वात्मानमात्मीयं शरीरं तत्कारणानि च पृथ्व्यादीनि करणानीन्द्रियाणि चाऽऽदाय सहकारित्वेन स्वीकृत्य स आत्मा भूयः पुनः पुनः सृजति । यद्यपि भूतादीनि सहकारीणि नाऽऽत्मनो भिद्यन्ते तथाऽपि तेषां सहकारित्वमुपपद्यते । यथा कोशकारकं प्रति तल्लालाया इति वक्तुं कोशकारदृष्टान्तः ॥ १४५ ॥ ॥ १४६ ॥ १४७ ॥

बुद्धीन्द्रियशरीरव्यतिरिक्ते ह्यात्मनि प्रामाणिके सति शास्त्रेण तस्य ब्रह्मीभावः " तत्त्वमसि " इत्यादिना प्रतिपाद्यते, अतश्च ब्रह्मखानिलतेजांसीत्युपपद्यत इति क्षेत्रज्ञस्य प्रामाणिकतां तावदाह—

महाभूतानि सत्यानि यथाऽऽत्माऽपि तथैव हि ॥
कोऽन्यथैकेन नेत्रेण दृष्टमन्येन पश्यति ॥ १४८ ॥
वाचं वा को विजानाति पुनः संश्रुत्य संश्रुताम् ॥
अतीतार्था स्मृतिः कस्य को वा स्वप्नस्य कारकः ॥ १४९ ॥

यथा कारणदोषबाधकप्रत्ययरहितानि विज्ञानवेद्यत्वादाकाशादीनि महाभूतानि सत्यानि, तथाऽऽत्माऽप्यहंप्रत्यये भासमानः सत्य एव । न चाहंप्रत्य

१ क. °मात्रमु° । २ क. घ. छ. °षु । करोत्या° । ३ क. निर्मीयते । ४ क. °कः शास्त्र°
५ क. °दोषाबा° । ६ घ. छ. °तावि° । ७ क. °नि त° ।

(यतिप्रकरणम् ४)

न्द्रियालम्बनः । तथा ह्येकेन नेत्रेण दृष्टार्थो नेत्रान्तरेण न प्रत्यभिज्ञायते, ग्राहक-
भिन्नत्वात् । न ह्यन्येन गृहीतमन्यः प्रत्यभिजानीते । ज्ञानमात्रालम्बनेन
ाहंप्रत्ययस्यापूर्वर्णात्मिकां वाचं संश्रुत्य पुनस्तां श्रुतां सैवेयं वागिति को
जानाति, न कश्चिदित्यर्थः । न हि क्षणिकानि विज्ञानान्यन्योन्यं प्रत्यभि-
ानन्ति, पूर्वोत्तरप्रत्यययोर्ह्येकस्मिन्प्रत्येतरि प्रत्येतव्ये च प्रत्यभिज्ञा भवति
पुनरन्यथा । तस्मात्स्थायी बुद्ध्यादिव्यतिरिक्त आत्माऽस्तीति निश्चीयते ।
था स्थायिन्यात्मन्यसत्यतीतार्थविषया स्मृतिर्न कस्यचित्स्यात् । अर्थस्य
ातीतता प्रदर्शनार्था, तेन ज्ञानेन्द्रियात्मवादिनोस्तदत्यये स्मृतिदर्शनानु-
पत्तिः स्मर्तुरभावात् । तस्मादपि स्थाय्यात्मसिद्धिः । तथा स्थिरात्माभावे
वप्नज्ञानकर्ता को भवेत्, न कश्चिदित्यर्थः । तस्यां दशायां ज्ञानान्तराणि न
न्ति । इन्द्रियाणि चोपरतव्यापाराणीति नैतानि तत्कारकाणि । विज्ञानवादे
न्द्रियाण्यपि न सन्ति, तेन मनसोऽपि स्वप्नकर्तृत्वमनाशङ्कनीयम् । न च
हश्चेतयते, तदारम्भकद्रव्याणामचेतनत्वात् । तेषामपि चेतनत्वे तदारब्धानां
टादिद्रव्याणां चैतन्यप्राप्तिः । ततश्चासिततन्त्वारब्धः पटो यथा न सितः,
द्वदचेतनद्रव्यारब्धो देहोऽप्यचेतनः ॥ १४८ ॥ १४९ ॥

किं च—

जातिरूपवयोवित्तविद्यादिभिरहंकृतः ॥
शब्दादिविषये सक्तः कर्मणा मनसा गिरा ॥ १५० ॥

यदि स्थायिनमेकमात्मानं लोको न प्रतिसंधत्ते तदा कस्य ब्राह्मण्यादि-
जात्या गौरत्वादिना च रूपेण यौवनेन च वयसा वित्तविद्याभ्यां चाहंकृतो
र्वितः को भवेत् । न हि ज्ञानानां क्षणिकानां जात्यादिनिमित्ताहंकारसंभवः ।
था शब्दादिविषयोपभोगे वाङ्मनःकर्मासक्तिः कस्य ॥ १५० ॥

उक्तान्यात्मनि कानिचित्प्रमाणानि बन्धविशेषमधुना तत्प्रमाणत्वेनाऽऽह—

स संदिग्धमतिः कर्मफलमस्ति न वेति वा ॥
संप्लुतः सिद्धमात्मानमसिद्धोऽपि हि मन्यते ॥ १५१ ॥

---

१ क. °ण प्र° । २ घ. छ. °त्ययो हि एक° । ३ क. °न्द्रियवा° । ४ घ. ■ °दारम्भा° ।
५ क. °रणवि° । ६ घ. छ. °सोविस्व° । ७ ङ. °योवृत्त° । ८ ङ. °वयोयोगं क° । ९ क. °कारा-
णि° । १० ङ. विप्लुतः ।

मम दाराः सुतामात्या अहमेषामिति स्थितिः ॥
हिताहितेषु भावेषु विपरीतमतिः सदा ॥ १५२ ॥
ज्ञेये च प्रकृतौ चैव विकारे चाविशेषवान् ॥
अनाशकानलापातजलप्रपतनोद्यमी ॥ १५३ ॥
एवंवृत्तोऽविनीतात्मा वितथाभिनिवेशवान् ॥
कर्मणा द्वेषमोहाभ्यामिच्छया चैव बध्यते ॥ १५४ ॥

संसारात्मबन्धः खलु बुद्धीन्द्रियशरीराणां न संभवति, न हि तेषामनेकेषु जन्मस्वनुवृत्तिरस्तीति भवति बुद्ध्यादिविलक्षणात्मसद्भावे प्रमाणं, तस्य चायमुपक्रमः—शास्त्रविहितस्य कर्मणः फलं स्वर्गादिकमस्ति वा नवेति संदिग्धमतिः संसारी भवति। अनेन च शास्त्रप्रामाण्ये संशय(यि)त्वमुच्यते। तत्र च संशयानः शास्त्रमतिक्रामतीति तात्पर्यार्थः। अत्र च श्लोकार्धान्तगतो वाशब्दोऽस्तीत्यनेन योजनीयः। तथा संप्लुतो विप्लुतोऽनात्मनि शरीर आत्मप्रत्ययवानिति यावत्। वस्तुतोऽसिद्धमनुत्पन्नमप्यात्मानं सिद्धमुत्पन्नं मन्यते। अथवाऽऽत्मनि पारमार्थिके[2] केनोपनिषद्वेद्येन रूपेणासिद्धमनवगतमपि कर्तृत्वभोक्तृत्वविशिष्टेन रूपेण सिद्धमात्मानं मन्यते। एतावदेवाऽऽत्मनो रूपमिति मन्यत[3] इत्यर्थः। अनात्मन्यात्मबुद्धेश्च मम संबन्धिन एते दारादयोऽहमेतेषां संबन्धीति स्थितिः[3] पर्यवसानं भवति। तथा हिताहितेष्वनुकूलप्रतिकूलेषु भावेषु विपर्यस्तमतिर्भवति। हितमहितत्वेनाहितं च हितत्वेन मन्यत इत्यर्थः। तथा[4] ज्ञेय आत्मयाथात्म्ये प्रकृतावव्याकृतविकारे च तत्कार्ये महदहंकारादावविशेषवान्, सन्तमप्येषां विशेषं न वेत्तीत्यर्थः। तथा दुःखरहितमप्यात्मानं दुःखितं मन्यमानस्तद्धानायानशनाग्निप्रवेशादिना देहत्यागोद्यमी भवति। एवंवृत्त एवंचेष्टितोऽविनीतस्तत्त्वावबोधविधुर आत्मा यस्य स तथोक्तः। वितथे मिथ्याभूते वेदाप्रामाण्यनैरात्म्यादावर्थेऽभिनिवेशवांस्तथेति प्रतीतिमान्। कर्मणा काम्येन निषिद्धेन च द्वेषेणाप्रीत्या[6] मोहेनाविद्यया, इच्छया रागेण च बध्यते संसर्य(स्रिय)त इति ॥ १५१ ॥ १५२ ॥ १५३ ॥ १५४ ॥

अधुना मोक्षं सोपायमात्मनि प्रमाणत्वेन श्लोकचतुष्टयेनाऽऽह—

---

१ ङ. ज्ञेयज्ञे प्र°। २ घ. छ. र्थिकेणोप°। ३ क. °तिः। विपर्ययमाणं भ°। ४ घ. छ. °था याज्ञवल्क्येय आत्मा याथात्म्येन प्र°। ५ क. °घरहित आ°। ६ घ. छ. °त्या मौढ्येन वि°।

आचार्योपासनं वेदशास्त्रस्य च विवेचनम् ॥
तत्कर्मणामनुष्ठानं सङ्गः सद्भिर्गिरः शुभाः ॥ १५५ ॥
स्त्र्यालोकालम्भविगमः सर्वभूतात्मदर्शनम् ॥
त्यागः परिग्रहाणां च जीर्णकाषायधारणम् ॥ १५६ ॥
विषयेन्द्रियसंरोधस्तन्द्रालस्यविवर्जनम् ॥
शरीरपरिसंख्यानं प्रवृत्तिष्वघदर्शनम् ॥ १५७ ॥
नीरजस्तमता सत्त्वशुद्धिर्निस्पृहता शमः ॥
एतैरुपायैः संशुद्धः स च योग्यमृती भवेत् ॥१५८॥

आचार्यः प्रसिद्धस्तस्योपासनं परिचर्या, वेदस्यान्येषां पुराणादीनां च विविक्तार्थज्ञता, शास्त्रोक्तानां नित्यनैमित्तिकानां कर्मणामनुष्ठानम् । सद्भिर्योगिभिः सङ्गस्तत्त्वे(त्त्व) परामर्ष(र्श)प्रयोजनं सहावस्थानम् । गिरः शुभा हितमितसत्यरूपाः । स्त्रीविषयालोकनस्पर्शनयोर्विगमो वर्जनम् । ऐकात्म्यज्ञानरूपं सर्वभूतेष्वात्मनस्तेषां वा स्वात्मनि दर्शनम् । परिग्रहाणां स्वीकाराणां त्यागः। जीर्णस्य पुराणस्य काषायस्य वृक्षनिर्यासादिरक्तस्य वाससो धारणम्। विषयाणामिन्द्रियाणां च संरोधः संनिकर्षनिरोधः । तन्द्रा निद्रातुल्यो जाड्यविशेषः । आलस्यमनुद्यमः । तयोस्त्यागः । शरीरस्य सर्वतोऽस्थिरत्वाशुचित्वादिना संख्यानं सम्यङ्निरूपणं च कार्यम् । सर्वासु चानावश्यकीषु प्रवृत्तिषु पापदर्शनम् । आवश्यकमेव लौकिकं वैदिकं च कर्म कार्यं नान्यादित्यर्थः । रजस्तमसोरुद्रेकपरिहारो राजसतामसाहारादिपरिहारेण कार्यः । सत्त्वशुद्धिः प्राणायामशुद्धाहारत्वादिना विधेया । निस्पृहता निरीहता धनादिष्वनीप्सा । शमः परापराधक्षमा । एतैरुक्तैरुपायैः संशुद्धो विपाप्मा सत्त्वोद्रेकयोगी सन्नमृती भवेदित्यर्थः ॥ १५५ ॥ १५६ ॥ १५७ ॥ १५८ ॥

स चायं भवेद्ब्रह्मीभावो देहादिभ्यो व्यावृत्तस्तद्व्यतिरिक्तात्मसद्भावे प्रमाणं योगमुक्तेः कारणमिति तदुपायमाह—

१ ङ. °शास्त्रेषु. च विवेकिता । त° । २ ङ. सत्त्वयो° । ३ घ. छ° °षां च पु° । ४ क. °णां स्वदाराणां । ५ क. °सु. च ना° । ६ क. °गमुक्तेः ।

*तत्त्वस्मृतेरवस्थानात्सत्त्वयोगात्परिक्षयात् ॥
कर्मणां संनिकर्षाच्च सतां योगः प्रवर्तते ॥ १५९ ॥

तत्त्वस्य परमात्मनः शास्त्रावगतरूपस्य सातत्येन स्मृत्युदयाच्छुद्धसत्त्वयोगान्निषिद्धकाम्यकर्मणां यथासंभवं ब्रह्मज्ञानफलोपभोगाभ्यां परिक्षयात्सतां साधूनां योगिनां च संनिकर्षात्सम्यग्योगः प्रवर्तते ॥ १५९ ॥

इदानीमसिद्धयोगं योगिनं प्रत्याह—

शरीरसंक्षये यस्य मनः सत्त्वस्थमीश्वरम् ॥
अविप्लुतस्मृतिः सम्यक्स जातिस्मरतामियात् ॥१६०॥

शरीरसंक्षये मरणकाले यस्य योगमारुरुक्षतो मनः सत्त्वस्थं रजस्तमसी विहाय सत्त्व एव वर्तमानमीश्वरं मरणदशाभाविना दुःखेनोप(ना)पीड्यमानं +यस्य सोऽविप्लुतश्वरस्मृतिर्जन्मान्तरे सकलपूर्वजन्मस्मृतिं दृढतरवैराग्यनिमित्तभूतां प्राप्नुयात् ॥ १६० ॥

इदानीं त्वयोगिनं प्रत्याह—

यथा हि भरतो वर्णैर्वर्णयत्यात्मनस्तनुम् ॥
नानारूपाणि कुर्वाणस्तथाऽऽत्मा कर्मजास्तनूः ॥१६१॥

यथा भरतो नटो नानाविधानि रामरावणादिरूपाणि कुर्वाणो वर्णैर्वर्णकैः सितासितादिभिरात्मनस्तनुं वर्णयति तथाऽऽत्माऽप्यक्षीणकर्मा कर्मजास्तनूः शरीराणि सुरनराद्यात्मकानि गृह्णाति । भरतदृष्टान्तेनाऽऽत्मनः शरीरयोग औपाधिको न स्वाभाविक इति गमयति । कर्मजा इति वदन्कर्मणामुपाधित्वं दर्शयति ॥ १६१ ॥

रूपनानात्वेऽपि हेत्वन्तरमस्तीत्याह—

कालकर्मात्मबीजानां दोषैर्मातुस्तथैव च ॥
गर्भस्य वैकृतं दृष्टमङ्गहीनादि जन्मनः ॥ १६२ ॥

गर्भस्याङ्गेषु शिरःपाण्यादिषु श्रोत्रनेत्रादिषु च हीनत्वातिरिक्तत्वादि वैकृतं विकृतरूपत्वं कालकर्मबीजमातॄणां दोषैर्भवतीति शास्त्रदृष्टम् । न चैतद्गर्भ-

* सत्त्वस्मृतेरुपस्थानादिति पाठो ङ. पुस्तके । + यस्येत्यधिकम् ।

१ ङ. °तमतिः । २ घ. छ. जन्मतः । ३ क. °तिरेकत्वा° ।

काल एव किंतु जन्मन ऊर्ध्वे(र्ध्व)कालेऽपि । कालस्य दोषो ग्रहदौःस्थित्यम्[1] । कर्मदोषः श्रद्धादिवैधुर्यं कर्मान्तरस्य च प्रतिषिद्धत्वम्[2] । कर्मात्र धर्मः । भूतात्मनश्च दोषो धातुवैषम्यम् । बीजदोषः पितृदोषः । मातृदोषो गर्भविरुद्धचेष्टाकर्तृत्वम् । अङ्गविकारे काणादिदोषाणां निमित्तत्वमत्रोक्तम् । तनूत्पत्तिनिमित्तत्वं च कर्मणां पूर्वश्लोके, तेन पूर्वापराविरोधः ॥ १६२ ॥

प्रथमशरीराद्युत्पत्तिः कथमिति च न वाच्यमनादित्वाच्छरीरपरम्पर(रा)या इत्याह—

अहंकारेण मनसा गत्या कर्मफलेन च ॥
शरीरेण च नाऽऽत्माऽयं मुक्तपूर्वः कथंचन ॥१६३॥
*दाता सत्यः क्षमी प्राज्ञः शुभकर्मा जितेन्द्रियः ॥
तपोरतो योगशीलो न रोगैरभिभूयते ॥ १६४ ॥

गतिर्धर्मात्मिका, कर्मफलं सुखदुःखभावानामनुभवः । प्रसिद्धमन्यत् ॥ १६३ ॥ ॥ १६४ ॥

यदि कर्मभिर्देहिनः फलोपभोगाय देह आरभ्यते तर्हि तत्फलोपभोगसमाप्तेः प्राङ्न देहेन देहिनो वियोगः संभवतीत्यकालमृत्युनिवारणाय कर्मविधानर्थक्यमित्यत्राऽऽह—

वर्त्याधारस्नेहयोगाद्यथा दीपस्य संस्थितिः ॥
विक्रियाऽपि च दृष्टैवमकाले देह(प्राण)संक्षयः ॥१६५

यथा वर्त्यादीनां योगाद्दीपस्य वर्तिकावर्तिन्या ज्वालायाः संस्थितिरवस्थानं वर्त्यादियोगे सत्यपि विक्रिया प्रबलपवनाभिघातादिना दीपप्रध्वंसोऽपि दृष्टः, एवमकाले देहारम्भककर्मफलोपभोगासमाप्तावपि तत्परिपन्थिकर्मणा प्रतिबन्धे प्राणसंक्षयोऽपि संभवतीति । ततश्च परिपन्थिकर्मनिवारणार्थमकालमृत्युशान्तिफलाः कर्मविधय उपपन्नाः ॥ १६५ ॥

उक्तयोगवशादमृतीभावस्तन्मार्गमिदानीमाह—

अनन्ता रश्मयस्तस्य दीपवद्यः स्थितो हृदि ॥
सितासिता बभ्रुनीलाः कपिला[3] नीललोहिताः ॥१६६॥

---

* न विद्यतेऽयं श्लोको घ. छ. पुस्तकयोः ।

---

१ घ. छ. °म् । धर्मस्य कर्मणो दो° । २ घ. छ. °म् । भ° । ३ ङ. °पिलाः पीतलो° ।

ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् ॥
ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥ १६७ ॥

तस्य जीवस्य सूर्यस्य वाऽनन्ता असंख्याता रश्मयस्ते च सितासिताद्यनेकवर्णास्तेषां मध्ये रश्मिरेका (क) ऊर्ध्वगामी सूर्यमण्डलं भित्त्वा ब्रह्मलोकं चातिक्रम्य स्थितः। तेन रश्मिना मार्गेण परां गतिं परं गन्तव्यं ब्रह्म याति। हिताहितसंज्ञकनाडीचक्रमध्यगतस्य शशिसूर्यमण्डलस्यैते रश्मयो न तु जीवस्य। उपचारेण हि तस्य तेऽभिधीयन्ते। ननु च—

"नास्य प्राणा उत्क्रामन्ति"

इत्यादिश्रुतिविरुद्धैषा स्मृतिः। मैवम्।

"तयोर्ध्वमायन्नमृतत्वमेति"

इतिप्रत्यक्षश्रुतिमूलत्वादस्याः स्मृतेः। तेन श्रुत्योरेवात्र परस्परं विरोधो न श्रुतिस्मृत्योः। न च श्रुत्योरपि परमार्थतो विरोधोऽस्ति। नास्य प्राणा व्युत्क्रामन्तीत्यत्र पुनरुत्पत्तय इति वाक्यशेषः प्रकल्प्यते श्रुत्यन्तराविरोधाय। यद्वा प्राणानां तस्य प्रभुत्वादवशमिव तं परित्यज्य न यान्ति, किंतु स्वेच्छया देहं त्यजन्तीत्यर्थः। तथाऽत्रैव समवनीयन्त इत्यत्रात्रैव जन्मनि समवनीयन्ते न जन्मान्तर इति व्याख्या न पुनरत्रैव शरीर इति ॥ १६६ ॥ १६७ ॥

किं च—

यदस्यान्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितम् ॥
तेन देवशरीराणि सधामानि प्रपद्यते ॥ १६८ ॥

परमगतिमार्गभूताद्रश्मेरन्यद्रश्मिशतमस्याऽऽत्मन ऊर्ध्वां दिशं प्रति व्यवस्थितम्। तेनास्माच्छरीरादुत्क्रामन्नयं जीवो देवजातीयानि शरीराणि देवानां धाम्ना स्थानेन सह प्रपद्यते। देवलोके देवो भवतीत्यर्थः। शरीराणीति बहुवचनमेकस्यामेव जात्याख्यायाम् ॥ १६८ ॥

इदानीं संसरणमार्गमाह—

येनैकरूपाश्चाधस्ताद्रश्मयोऽस्य मितप्रभाः[1] ॥
इह कर्मोपभोगाय तैः संसरति सोऽवशः ॥ १६९ ॥

---

१ घ. छ. °श्मयोऽस्यमृत°। ङ. °श्मयश्च मृदुप्र°।

अस्याऽऽत्मनो हृदयदेशस्थितस्याधस्तान्मन्दप्रभा अनेकरश्मयस्तैरितः शरीरान्निर्गच्छन्नत्रैव लोके कर्मफलभोगाय संसरति, देहान्तरं कर्मवशः संप्रतिपद्यते ॥ १६९ ॥

प्रमाणतः साधितमप्यात्मानं दार्ढ्यार्थं पुनरपि प्रमाणान्तरैः साधयति—

वेदैः शास्त्रैः सविज्ञानैर्जन्मना मरणेन च ॥
आर्त्या गत्या तथाऽगत्या सत्येन ह्यनृतेन च ॥ १७०॥
श्रेयसा सुखदुःखाभ्यां कर्मभिश्च शुभाशुभैः ॥
निमित्तशाकुनज्ञानग्रहसंयोगजैः फलैः ॥ १७१ ॥
तारानक्षत्रसंचारैर्जागरैः स्वप्नजैः फलैः ॥
आकाशपवनज्योतिर्जलभूतिमिरैस्तथा ॥ १७२ ॥
मन्वन्तरैर्युगप्राप्त्या मन्त्रौषधिफलैरपि ॥
वित्ताऽऽत्मानं वि(वे)द्यमानं सर्वस्य(कारणं) जगतस्तथा॥

हे महर्षयो वेदादिभिः प्रमाणैर्बुद्धीन्द्रियशरीरव्यतिरिक्तमात्मानं वि(वे)द्यमानं वित्त जानीत । तत्रैव वेदैः कर्मकाण्डात्मकैरग्निहोत्रादिकर्तृगामिस्वर्गादिफलमाचक्षाणैरात्मा प्रसाध्यते । देहादीनामात्मत्वे कर्तृगामि फलं न स्यात् । उपनिषद्भागात्मकैस्तु वेदैः—

" अविनाशी वाऽरेऽयमात्माऽनुच्छित्तिधर्मा "

इत्येवमादिभिः श्रुत्यैव देहाद्यतिरिक्तात्मसद्भावोऽवबोध्यते । शास्त्रैश्च मीमांसादिभिरात्मा(त्म)साधकयुक्तिबोधकैर्विज्ञानसहितैरात्माऽवबोध्यते । तत्र शास्त्राण्यात्मसाधकयुक्तिप्रसाधनानि, विज्ञानानि शास्त्राण्यात्मसाक्षात्कारकारणप्राणायामादिप्रदर्शकानि । जन्मापि सुखदुःखहेतुभूतत्वेन विचित्रत्वोपपादकौ धर्माधर्मौ कल्पयत्तदाश्रयमात्मानं गमयति । एवं मरणमपि तद्धि दृष्टे तत्कारणे समानेऽपि[3] कस्यचिदेव भवददृष्टस्य[4] व्यवस्थापकत्वेनाऽऽक्षिपदात्मानमपि तदाश्रयमाक्षिपति । मरणसंबन्धिन्याऽऽर्त्या प्राणिषु स्तोकास्तोकरूपेण वर्तमानया स्वोपपादकाधर्माल्पानल्पत्वकल्पनामुखेनाऽऽत्माऽपि कल्प्यते । तथा

१ घ. छ. आन्त्या । २ घ. ■. तद्विद । ३ घ. छ °मानोऽपि । ४ क. °दृस्वव्य° । ५ घ छ. °न्यान्त्याप्रा ° । ६ घ. छ. °ना सुखे ।

त्यज्यमानादेहात्सुखदुःखोपभोगाय स्वर्गं नरकं वा गच्छति । स्वर्गं नरकं वोपभुज्य वृष्ट्युदकेन सहेमं लोकमागच्छत्यात्मेति उपनिषदाद्यागमप्रसिद्धया गत्या चागत्या च देहादिव्यतिरिक्त आत्मा साध्यते । सत्यं यथार्थं वाक्यम् । अनृतमयथार्थं, ताभ्यामात्मा साध्यते । न खलु तमन्तरेण सत्यत्वासत्यत्वे सिध्यतः । यतोऽयमर्थं वाक्यादवगतवानस्मि, तमेव प्रमाणान्तरेण प्रत्येमीति प्रत्यभिजानन्वाक्यस्य सत्यत्वमध्यवस्यति । विपर्ययेण सत्यत्वमुक्तनीत्या च वाक्यार्थं न बुद्ध्यादयः प्रत्यभिजानन्तीति तद्व्यतिरिक्तात्मसिद्धिः । श्रेयः पुरुषप्रीतिः । तेन च पुरुषः प्रमीयते । एवं सुखदुःखाभ्यामप्यात्मा साध्यते । धर्माधर्मयुक्तात्मसाध्यत्वात्तयोस्तुल्यव्युत्पत्तिभिस्तुल्यकुलोत्पन्नैः कर्तृभिः कैश्चिच्छुभानि धर्म्याणि कर्माणि क्रियन्ते, कैश्चित्तद्विपरीतानि । तत्र जन्मान्तरीयधर्माधर्मानुष्ठानाभ्यासवासनाभेदो व्यवस्थापकतयाऽऽत्मसमवायी कल्प्य इति शुभाशुभकर्मणामात्मनि प्रामाण्यम् । निमित्तमुपश्रुत्यादि । शाकुनं शकुनीनां गतिस्वनादि, तदेव प्रत्यासन्नफलस्य शुभाशुभकर्मणो ज्ञापकत्वाज्ज्ञानम् । ग्रहा आदित्यादयः । तेषां च परस्परं राशिभिर्वा संबन्धः संयोगस्तत्सूचितानि धर्माधर्मफलान्यात्मनि प्रमाणम् । निमित्तसूचितं ह्यदृष्टं जन्मान्तरार्जितमपि संभवति, तच्च देहाद्यतिरिक्तमात्मानमन्तरेण न संभवतीति निमित्तादेवाऽऽत्मनि प्रामाण्यम् । नक्षत्राण्यश्विन्यादीनि । उडूनि तारास्तेषु ग्रहाणां संचारस्तथा जाग्रद्दशाभावीनि नक्तंचरदर्शनादीनि । स्वप्नजानि च खराद्यारोहणादिदर्शनानि । तत्सूचितैश्च फलैः पूर्ववदात्मानुमानम् । आकाशादिभिः शरीरेन्द्रियविषयादिरूपेण भोग्यतयाऽवस्थितैर्भोक्ताऽनुमीयते । मन्वन्तराणां स्वायंभुवादीनां च युगानां कृतत्रेतादीनां च विलक्षणस्वभावत्वेनाऽऽत्मसाधकत्वम् । उक्तं च मनुना—

" अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
कृते त्रेतादिषु त्वेषां वयो ह्रसति पादशः ॥
चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे ।
चौरिकानृतमायाभिर्धर्मश्चापैति पादशः " इत्यादि ।

ततश्च कृतयुगे प्राणिनां धर्मोपचयः कलावधर्मोपचयस्तेषामेवेत्यनेकयुगस्थायिन्यात्मनि मन्वन्तरादिस्थितिः प्रमाणम् । एवं स एव मन्त्रस्तदेवौषधं कस्य·

---

१ क. 'तः । अतोऽयमर्थं वाक्यादेव' । २ क. 'षप्रतीतिः ।

तदभीष्टफलदं कस्यचिन्नेति व्यवस्थां घटयितुं जन्मान्तरार्जितादृष्टाश्रय आत्माऽनुमेय इति मन्त्रौषधफलमप्युक्तेऽर्थे प्रमाणम् ॥ १७० ॥ १७१ ॥ १७२ ॥ १७३ ॥

किंच—

अहंकारः स्मृतिर्मेधा द्वेषो बुद्धिः सुखं धृतिः ॥
इन्द्रियान्तरसंचार इच्छा धारणजीविते ॥ १७४ ॥
स्वर्गः स्वप्नश्च भावानां प्रेरणं मनसोऽगतिः ॥
उन्मेषश्चेतना यत्न आदानं पाञ्चभौतिकम् ॥१७५॥
यत एतानि लिङ्गानि दृश्यन्ते परमात्मनः ॥
तस्मादस्ति परो देहादात्मा सर्वज्ञ ईश्वरः ॥१७६॥

यस्मादहंकारादीनि लिङ्गान्यात्मनोऽनुमापकानि दृश्यन्ते तस्मादस्ति देहान्यः परम आन्तर आत्मा । सर्वज्ञः सर्वानुभाविता । ईश्वरः स्वामी । विशेषानुपादानात्सर्वस्याहंकारोऽहंप्रत्यय इदंप्रत्ययवेद्ये देहे नोपपद्यते । न भ्रान्तस्य प्रमेयविशेषे तदन्यवस्तुसंबन्धी प्रत्ययो घटते । तथा मम शरीरमिति प्रत्ययः शरीरादन्यस्याहंभावे घटते नान्यथा । ममाऽऽत्मेति च व्यपदेशो लाक्षणिकः । नाऽऽत्मन्यात्मशब्दः । अन्यथा ममाहमित्युक्तं स्यात् । एवमहंकृतिः शरीरादन्यस्याऽऽत्मनो लिङ्गम् । स्मृतिश्च जन्मान्तरानुभूते स्तनपानादौ भवन्ती सुखसाधनत्वेन भवत्यात्मनि लिङ्गम् । न ह्यधुना तेन देहेन प्राग्भवीयस्तनपानस्यापेक्षितोपायत्वमनुभूतं येन स एव स्मर्ता स्यात् । मेधा ग्रन्थधारणशक्तिर्जन्मान्तरीयतद्ग्रन्थविषयानुभावजनितं संस्कारातिशयं कल्पयति । देहान्तरेऽक्षिणि संस्कारवत्यात्मनि लिङ्गम् । द्वेषोऽपि संसारे कस्यचित्प्राक्तनार्थपरिचयाज्जायमान आत्मनि लिङ्गम् । स हि दोषस्मरणाद्भवति । तच्च जन्मान्तराधीनमिति भवत्यात्मनि लिङ्गम् । बुद्धिः प्रज्ञा, साऽपि जन्मान्तरायत्ते आत्मनि लिङ्गम् । सुखमानन्दः । नासौ शरीरगुणः । वैशेषिकगुणत्वे सत्यकारणगुणपूर्वकत्वात् । कारणगुणपूर्वको हि यावच्छरीरभावी स्यात् । तस्मान्नायं शरीराकारपरिणतानां भूतानां गुणः किंतु ततोऽन्यस्येति भवत्यात्मनि लिङ्गम् । एवं द्वंद्वसहिष्णुत्वलक्षणा धृतिरपि । इन्द्रियान्तरसंचार इन्द्रियान्तरं मति

---

१ ङ. °रणा म° । २ ङ. °तिः । निमेष° । ३ ङ. °र्वेश ई° । ४ घ. छ. °म आनन्तर । ५ क. °त्मनो लि° । ६ क. °न्तरप्र° ।

गतिः । सा देहस्य सर्वेन्द्रियव्यापिनो नोपपद्यते । आत्मनः पुनरणुपरिमाणा-न्तःकरणोपहितस्याणोरिन्द्रियसंचारो युज्यते । अत एव बृहदारण्यके—

" अणीयान्नीवारतण्डुलादणीयाञ्श्यामाकतण्डुलात् "

इत्युक्तम् । इच्छाऽपि जन्मान्तरानुभूतस्मृतार्थविषया परमात्मलिङ्गम् धारणजीविते अपि। धारणं शरीरस्य न तच्छरीरेणैव शक्यं कर्तुम् । एकैकस्य क्रियायां कर्मकर्तृत्वविरोधात् । शरीरमेव धार्यं तदेव धारकमिति नोपपद्यते जीवितं प्राणधारणं तदपि न शरीरकार्यं प्रयत्नसाध्यत्वात् । प्रयत्नश्च न शरीर गुणः । अयावद्द्रव्यभावित्वात्पाकान्तरानिवर्त्यत्वाच्च[1] । स्वर्ग(र्गो) लोकान्तरभोग्यं सातिशयं सुखम् । स देहव्यतिरिक्त आत्मा तू(त्मन्यु)पपद्यते । अन्यथा कृतना-शाकृताभ्युपगमप्रसङ्गः स्यात् । स्वप्नप्रत्यय आत्मलिङ्गम् । इह जन्मन्य[न]नुभूतस्य स्वप्ने दर्शनं जन्मान्तरीयानुभवाहितसंस्कारवशाद्भवतीत्यात्मलिङ्गता[2] स्वप्नस्य । भावानां शरीरेन्द्रियाणां स्वकार्ये प्रेरणमात्मलिङ्गम् । न ह्यन्यस्तत्प्रेरकोऽपि । मन-सोऽतिसूक्ष्मस्यानेकद्वारे शरीरेऽवस्थितस्यागतिरपतनमात्माश्रितादृष्टनिमित्तमा-त्मलिङ्गम् । उन्मेषश्च प्रयत्नवदात्मकार्यत्वादात्मलिङ्गम् । चेतना ज्ञानमचेतना-रब्धाच्छरीरादन्यश्चे(न्यं चे)तनं गमयति[3] । यत्नश्च शरीराश्रितो न भवतीति स्वाश्रयमात्मानमनुमापयति । देहत्वेन पञ्चानां भूतानां परिग्रहः स्वीकर्तर्या-त्मनि लिङ्गम् ॥ १७४ ॥ १७५ ॥ १७६ ॥

आत्मन उक्तां सर्वज्ञतामुपपादयन्नाह—

बुद्धीन्द्रियाणि सार्थानि मनः कर्मेन्द्रियाणि च ॥
अहंकारश्च बुद्धिश्च पृथिव्यादीनि चैव हि ॥ १७७ ॥
अव्यक्तमात्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते ॥
ईश्वरः सर्वभूतस्थः सन्नसन्सदसच्च यः ॥ १७८ ॥

बुद्धेर्गन्धादिसाक्षात्कारस्य करणतया संबन्धीनि घ्राणादीनि पञ्च बुद्धी-न्द्रियाणि । तानि चार्थैर्गन्धादिभिर्विषयैः सहितानि सार्थानि । मनोऽन्तःक-रणम् । कर्मेन्द्रियाणि वागादीनि । बुद्ध्यहंकारौ, पृथिव्यादीनि पञ्च भूतानि, अव्यक्तं प्रधानमित्येतस्य क्षेत्रस्याऽऽत्मा सर्वेश्वरः सर्वभूतहृदये भासमानोऽत एव सन्स एव विभक्तयाऽनवभासमानतयाऽसन् । सदसद्भावाभावप्रकृति-त्वाज्ज्ञाता, तस्मात्क्षेत्रज्ञ इति तज्ज्ञैरुच्यते ॥ १७७ ॥ १७८ ॥

---

१ क॰ °निवर्तत्वा° । २ घ. छ. °लिङ्गिता । ३ घ. छ. °ति । प्रय° ।

बुद्ध्यादीनां कारणान्याह—

बुद्धेरुत्पत्तिरव्यक्तात्ततोऽहंकारसंभवः ॥
तन्मात्रादीन्यहंकारादेकोत्तरगुणानि तु ॥ १७९ ॥

बुद्धेर्विषयनिश्चयहेतोरन्तःकरणस्याव्यक्तात्प्रधानादुत्पत्तिः। समानि सत्त्वरजस्तमांसि अव्यक्तं, ततो बुद्धेरहंकारस्य ज्ञानक्रियाकर्तृत्वाभिमानिनोऽन्तःकरणस्य संभवो जन्म। सूक्ष्माः शब्दस्पर्शरूपरसगन्धास्तन्मात्राणि तान्यादिर्येषां भूतानामिन्द्रियाणां च तांवन्मात्रादीनि तान्यहंकाराज्जायन्ते। भूतानि तु तन्मात्रव्यवधानेन। अहंकारश्च त्रिविधः, सात्त्विकः स एव तैजस इति पुराणेषु गीयते। तस्माद्बुद्धीन्द्रियाणामुदयो राजसोऽपरः। तस्माद्वैकारिकसंज्ञात्कर्मेन्द्रियाणां तामसस्तृतीयो भूतादिसंज्ञकस्तस्माच्छब्दादितन्मात्राणि तेभ्यो यथाक्रमं व्योमादिभूतानि[^1] तानि च वक्ष्यमाणैः शब्दादिभिर्गुणैरेकोत्तरगुणानि। तत्र व्योम्नि शब्द एको गुणो वायोः स च स्पर्शश्च। तेजसि तौ च रूपं च। अम्भसि ते च रसश्च, भूमौ गन्धश्च पञ्चमः ॥ १७९ ॥

गुणानाह—

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्गुणाः ॥
यो यस्मान्निःसृतश्चैषां स तस्मिन्नेव लीयते ॥ १८० ॥

ये व्योमादीनामेकोत्तरगुणा उक्तास्ते शब्दादयो गन्धपर्यन्ताः। यश्चैषां बुद्ध्यादीनां मध्ये यस्मात्कारणादव्यक्तादेः सृष्टिकाले निःसृतोऽभिव्यक्तः स तस्मिन्नेव कारणात्मनि प्रलयकाले लीयते तिरोहितो भवति। तत्र च निःसृतो लीयत इति वदता सत्कार्यवादो दर्शितः ॥ १८० ॥

प्रकरणार्थोपसंहारमाह—

यथाऽऽत्मानं सृजत्यात्मा तथा वः कथितो मया ॥
विपाकात्त्रिप्रकाराणां कर्मणामीश्वरोऽपि सन् ॥१८१॥

ईश्वरः स्वतन्त्रोऽपि सन्नात्मा यथाऽऽत्मानं देहवन्तं मानसवाचिककायिकया सात्त्विकराजसतामसतया त्रिविधस्य कर्मणो विपाकपूर्वं तदुपादानवशात्सृजति, तथा वो युष्मभ्यं हे मुनयो मया कथितः ॥ १८१ ॥

[^1]: १ क. तानि तन्मा°। २ घ. छ. °नि च। ३ घ. छ. °पाकोऽपू°।

सत्त्वं रजस्तमश्चैव गुणास्तस्य प्रकीर्तिताः ॥
रजस्तमोभ्यामाविष्टश्चक्रवद्भ्राम्यते हि सः ॥१८२॥

सत्त्वादयो गुणास्तस्य क्षेत्रज्ञस्य तन्निबन्धनबन्धमुक्तिभावित्वात्, तदेव दर्शयति—रजस्तमोभ्यामित्यादिना। अर्थाच्च केवलसत्त्वोद्रेकेण विमुच्यत इत्यपि दर्शितम्। चक्रदृष्टान्तेन चानवस्थितत्वमुक्तं, ततश्च तमसाऽऽत्मस्वरूपापरिज्ञानात्मको मोहः। रजसा च फले रागात्कर्मसु प्रवृत्तिस्ततः कर्मफलस्य जात्यायुषोः सुखदुःखानुभवस्य चोदय इत्येतच्चक्रवच्चक्रम्। एतस्य परिवर्तनादात्माऽपि परिवर्तत इत्युपचर्यते ॥ १८२ ॥

अनादिरादिमांश्चैव स एव पुरुषः परः ॥
लिङ्गेन्द्रियग्राह्यरूपः सविकार उदाहृतः ॥ १८३ ॥

स्वरूपतोऽनादिरादिमच्छरीरयोगित्वादादिमान्। परम औपनिषदः पुरुष एव क्षेत्रज्ञः समस्वरूपतो विकारतश्च यथासंख्यं लिङ्गेन्द्रियग्राह्यः। तत्राहंकारादिभिर्लिङ्गैः क्षेत्रज्ञात्मनो रूपं गृह्यते। तद्विकारस्तु शब्दादिभिरिन्द्रियैरेवंविध उक्त उत्तरश्लोकार्थतयाऽनुवादः ॥ १८३ ॥

पितृयानोऽजवीथ्याश्च तथाऽ(यद)गस्त्यस्य चान्तरम् ॥
तेनाग्निहोत्रिणो यान्ति स्वर्गकामा दिवं प्रति ॥ १८४ ॥

अजवीथीमाह गर्गः—

"हस्तश्चित्रा विशाखिका अजवीथी" इति।

कश्यपस्तु श्रवणादिनक्षत्रत्रयमजवीथीमाह—"अजवीथी विष्णुमाद्या" इति तस्याश्चागस्त्यस्य यदन्तरं स पितृयानसंज्ञको मार्गः। तेन काम्यकर्मकारिणः दिवं स्वर्गं यान्ति। अग्निहोत्रग्रहणं वैतानिककर्मप्रदर्शनार्थम्। दुःखसंभिन्न चिरकालोपभोग्यसुखानुभवास्पदीभूतो देशविशेषो द्यौः ॥ १८४ ॥

किं च—

ये च दानपराः सम्यगष्टाभिश्च गुणैर्युताः ॥
तेऽपि तेनैव (मार्गेण) सत्यव्रतपरायणाः ॥ १८५ ॥

ये च सम्यग्दानादिपूर्तधर्मनिरतास्तथा दया सर्वेषु भूतेषु, क्षान्तिरनसू

---

१ ङ. °स्तस्यैव की°। २ घ. छ. °भावात्। त°। ३ क. घ. छ. °दिमानादिमांश्च स। ४ ङ. सर्वस्व°। ५ ङ. °याणोऽज°। ६ क. घ. छ. गच्छन्ति।

शौचमनायासो मङ्गलमकार्पण्यमस्पृहेत्यष्टाभिरात्मगुणैर्युक्ताः । ये च नियमेन सत्यव्रतादिनस्तेऽपि पितृयानेनैव मार्गेण दिवं यान्ति ॥ १८५ ॥

तन्मार्गगामिनां(णां) पुनरावृत्तिमितिहासमुखेनाऽऽह—

*अष्टाशीतिसहस्राणि मुनयो गृहमेधिनः ॥
पुनरावृत्ति(र्ति)नो बीजभूता धर्मप्रवर्तकाः ॥ १८६ ॥

अष्टाशीतिसहस्रसंख्या मुनयस्तापसाः । इष्टापूर्तधर्मकारिण इति यावत् । गृहमेधिनो गृहस्थाः । अनेन चाकाम्यकर्मकारित्वं सूचयति । पुनरावर्तिनः पुनर्जन्मभाजः । जगत्सृष्टेर्धर्मप्रभावायास्ते प्रागनुष्ठितधर्मत्वाद्बीजभूताः । प्रवृ-त्त्याख्यस्य धर्मस्य च प्रवर्तकाः ॥ १८६ ॥

सप्तर्षिनागवीथ्यन्ते देवलोकं समाश्रिताः ॥
तावन्त एव मुनयः सर्वारम्भविवर्जिताः ॥ १८७ ॥
तपसा ब्रह्मचर्येण सङ्गत्यागेन मेधया ॥
तत्र गत्वाऽवतिष्ठन्ते यावदाभूतसंप्लवम् ॥ १८८ ॥

नागवीथीमाह गर्गः—

"कृत्तिका भरणी स्वातिर्नागवीथी प्रकीर्तिता" इति ।

देवलस्तु—"अश्विन्यादित्रिभाः सर्वा नागाद्या दहनान्तिकाः" ।

अयमर्थः—प्रत्येकमश्विन्यादित्रिनक्षत्रा नागाद्या नव वीथयः । नागा गजा ऐरावती ऋषभा गौर्जरद्गवी मृगी अजा दहनेति । तस्या नागवीथ्याः सप्तर्षीणां च यदन्तरालं तेन मार्गेण गत्वाऽष्टाशीतिसहस्राण्येव मुनयः सकलनिषिद्धकाम्यकर्मारम्भनिवृत्तास्तपसाऽऽवश्यकेन वर्णधर्मेण तथा ब्रह्मचर्येण सङ्गत्यागेन धर्मानुष्ठाननिमित्तख्यातिलाभपूजापरित्यागेन मेधया मेधाकार्येण वेदधारणेन युक्ता देवलोकं समाश्रित्य तत्र यावदाभूतसंप्लवं[3] महाप्रलयं यावदवतिष्ठन्ते । तेऽपि पूर्ववत्पुनरावर्तिनो बीजभूता निवृत्तधर्मप्रवर्तकाश्च ॥ १८७ ॥ ॥ १८८ ॥

एवं श्लोकद्वयेनाऽऽत्मज्ञानरहितं काम्यं कर्माऽऽवश्यकं वा कुर्वतां पुनरावृत्तिरुक्ता । "स ह्याश्रमैर्विजिज्ञास्यः" इत्यादौ त्वात्मज्ञानसहितस्य कर्मणोऽना-

---

* तत्राष्टाशीतिसाहस्रमुनय इति ङ. पुस्तके पाठः ।

---

१ घ. छ. 'वृत्ताख्य' । २ क. 'थ्यन्तं दे' । ङ. 'थ्यन्तर्देव' । ३ क. निवृत्तिध' ।

मुक्तिफलत्वं वक्ष्यति । तत्राधुना तावज्ज्ञातव्यमात्मानं तज्ज्ञानोपायं च श्लोकद्वयेनाऽऽह—

यतो वेदाः पुराणानि विद्योपनिषदस्तथा ॥
श्लोकाः सूत्राणि भाष्याणि यच्चान्यद्वाङ्मयं क्वचित् १८९
वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः ॥
श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः ॥ १९० ॥

द्विधा ह्यात्मा व्यवस्थितो बन्धवर्तितया तद्रहिततया च । तस्य यन्मुक्तस्वभावं रूपं तत्सर्वेश्वरत्वसर्वज्ञत्वादिगुणयोगित्वेन वेदान्तैरुपास्यतयोच्यते, न पुनर्यद्बद्धस्वभावम् । प्रकाशते हि स्वत एव तत्सर्वेषां हृदयेषु तत्प्रकाशाधीनो विश्वप्रकाशः ॥

" तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति " इति ।

तत्र शास्त्रेण यदुपास्यतयोक्तं तदुपलक्षयितुमिदमुच्यते—यतो वेदा इत्यादि यतो जगत्कारणाद्वेदाः श्रुतयः, पुराणानि प्रसिद्धानि । अन्याश्च धर्मशास्त्राद्या उपनिषदो ब्रह्मावबोधका वेदभागाः । तासाममृतीभावहेतुविज्ञानविषयकत्वात्प्राधान्येन वेदत्वे सत्यपि पृथग्ग्रहणम् । ये च(तथा)केचन श्लोकाः— " यदक्षरं पञ्चविधं समेति " इत्येवमादयः । सूत्राणि विवक्षितार्थवाचकानि वाक्यानि । भाष्याणि सूत्रादीनां विवरणानि । अन्यदपि वाङ्मयं यत उद्भूतं तस्य परमात्मनो वेदानुवचनादयो ज्ञानहेतवः । वेदानुवचनं वेदाध्ययनं, गुरुवचनमनु पश्चाद्वचनमनुवचनम् । अनेन च सर्वस्य वेदाध्ययनस्य गुर्वध्ययनपूर्वकत्वं वदन्वेदस्यापौरुषेयत्वं गमयति । यत्तु परमात्मसकाशाद्वेदानामुद्भव इत्युक्तं न तेन वेदानां पौरुषेयतापत्तिः । प्रमाणान्तरेण हि वाक्यार्थं निश्चित्य तत्प्रतिपादनायेदं प्रथमतया वाक्यस्योत्पादितत्वं पौरुषेयत्वम् । अत एव बृहदारण्यके निःश्वसिततुल्यत्वमुक्तम्—

" स यथाऽऽर्द्रैधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि निःश्वसितानि " इति ।

---

१ क. यच्च किञ्चन वाङ्मयम् । मे° । २ क. तस्य ।

ब्रह्मचर्यं ब्रह्मचारिकर्म । श्रद्धा भक्तिरास्तिक्यं वा । उपवासो गुरूपास्तिः । स्वातन्त्र्यं वश्येन्द्रियता । प्रसिद्धमन्यत् ॥ १८९ ॥ १९० ॥

पूर्वश्लोके ये निर्दिष्टा वेदानुवचनादयोऽर्थास्त एव ब्रह्मज्ञानस्वरूपमात्रोत्पादकतया विनियुक्ता इति भ्रान्तिनिरासायाऽऽह—

स ह्याश्रमैर्विजिज्ञास्यः समस्तैरेवमेव तु ॥
द्रष्टव्यस्त्वथ मन्तव्यः श्रोतव्यश्च द्विजातिभिः ॥ १९१ ॥

स खलु परमात्मा समस्तैश्चतुर्भिरप्याश्रमैर्विजिज्ञास्यो विशेषतो ज्ञातुमेष्टव्यः । अत्र परमात्मविषयविज्ञानस्याऽऽश्रमान्प्रति साध्यता प्रत्येतव्या, इष्यमाणत्वात् । न पुनस्तद्विषयेच्छाया इष्यमाणत्वं प्रति गुणत्वात् । प्रधानं च पदार्थान्तरेण संबध्यते न गुणः । न च प्रत्ययार्थत्वेनेच्छायाः प्राधान्यं वाच्यम् । स हि सन्प्रत्ययेन धात्वर्थमीप्सिततमं प्रति गुणत्वेनैवोच्यते, तेन प्रत्ययार्थत्वेऽपि तस्या गुणभाव एव प्रयोजनवानेव च धात्वर्थ इष्यते, न सुखावाप्तिवत्स्वरूपेण । तेन "ब्रह्म वेद ब्रह्म भवति । [* न च (स) पुनरावर्तते" इत्यादिवचनावगतौ(ता) पुनरावृत्तिप्रयोजनं विज्ञानमाश्रमाणां साध्यमित्युक्तं भवति]। ब्रह्मज्ञानस्य सप्रयोजनत्वादेव तद्विषयेच्छासिद्धेर्नेच्छाया विधेयता । अप्राप्तविषयत्वाद्विधेः । किं पुनस्तज्ज्ञानं वेदितव्यमित्यपेक्षित उक्तं—द्रष्टव्य इति । द्रष्टव्यः साक्षात्कर्तव्य इत्यर्थः । दर्शनोपायतयोक्तं—मन्तव्य इति । श्रुतस्य युक्तिभिरनुसंधानं मननम् । तच्च श्रवणमन्तरेण न संभवतीति मत्वोक्तं—श्रोतव्य इति । उपनिषद्वाक्येभ्योऽवधारणीयः । द्विजातिभिरिति शूद्रव्युदासार्थम् ॥ १९१ ॥

विहितयोर्ज्ञानकर्मणोः फलमाह—

य एवमेनं विन्दन्ति ये चाऽऽरण्यकमाश्रिताः ॥
उपासते द्विजाः सत्यं श्रद्धया परया युताः ॥ १९२ ॥
क्रमात्ते संभवन्त्यर्चिरहः शुक्लं तथोत्तरम् ॥
अयनं देवलोकं च सवितारं सवैद्युतम् ॥ १९३ ॥

---

* एतच्चिह्नान्तर्गतं न विद्यते घ. छ. पुस्तकयोः ।

---

१ ङ. 'मस्तैरे° । २ क. 'येच्छया । ३ घ. छ. 'माणं प्र° । ४ घ. छ. °ते गु' । ५ घ. छ. 'नादे° ।

ततस्तान्पुरुषोऽभ्येत्य मानवो ब्रह्मलौकिकान् ॥
करोति पुनरावृत्तिस्तेषामिह न विद्यते ॥ १९४ ॥

ये द्विजातय एनं परमात्मानमेवं श्रवणमननाभ्यां विन्दन्ति लभन्ते ब्रह्माहमस्मीति साक्षात्कुर्वन्ति, ये चाऽऽरण्यकमारण्याध्येतव्यं ब्रह्मविद्यात्मकं वेदभागं ब्रह्मप्रमाणतया समाश्रिताः सन्तः परमया भक्त्योपेताः सत्यं यथार्थभूतं परमेश्वरमुपासते ध्यायन्ति। अत्र ये चेत्युपासकत्वेन श्रवणमननं(न) कर्तृत्वेन समुच्चयार्थश्चकारो न पुरुषव्यक्तिसमुच्चयार्थः। तेन श्रवणमननध्यानार्चनवन्तो देहादुत्क्रम्य वक्ष्यमाणार्चिराद्यभिमानिनीर्देवताः संभवन्ति प्राप्नुवन्ति। अर्चिरग्निः। अहः दिवसः। शुक्लः शुक्लपक्षः। उत्तरमयनं सूर्यस्योदगयनम्। देवलोकसवितृवैद्युताः प्रसिद्धाः। ततो वैद्युताग्निं प्राप्तांस्तान्मानवः पुरुषोऽभ्येति। ततोऽसौ ब्रह्मलौकिकान्ब्रह्मलोकनिवासिनस्तान्करोति। ब्रह्मलोकं प्राप्तानां न पुनरावृत्तिर्जन्म न विद्यते ॥ १९२ ॥ १९३ ॥ १९४ ॥

काम्यकर्मकारिणः प्रत्याह—

यज्ञेन तपसा दानैर्ये हि स्वर्गजितो नराः ॥
धूमं निशां कृष्णपक्षं दक्षिणायनमेव च ॥ १९५ ॥
पितृलोकं चन्द्रमसं वायुं वृष्टिं जलं महीम् ॥
क्रमात्ते संभवन्तीह पुनरेव व्रजन्ति च ॥ १९६ ॥

फलार्थं विहितैर्यज्ञतपोदानादिभिर्ये स्वर्गं जितवन्तः स्वर्गप्रदं धर्मं कृतवन्तस्ते वक्ष्यमाणक्रमेण धूमादीन्संभवन्ति। धूमाद्यभिमानिनीर्देवताः प्राप्नुवन्ति। तत्र चन्द्रं यावदारोहणं वाय्वाद्यवरोहणं महीं पृथ्वीं तत्रत्यानोषधिवनस्पतीन्संभवन्तीत्यर्थः। तत ओषधिवनस्पतीन्भुक्तवतोः स्त्रीपुरुषयोर्विशुद्धे शुक्रशोणिते पञ्च धातूनित्यादि पूर्वोक्तमनुसंधेयम्। न पुनर्यज्ञाद्यनुष्ठाय देहपातादूर्ध्वमुक्तक्रमेण यान्त्यायान्ति च। अत एवोक्तं भगवता—

" गतागतं कामकामा लभन्ते "

इति गीतासु ॥ १९५ ॥ १९६ ॥

उक्तविपर्यये दोषमाह—

---

१ ङ. °नसो ब्र° ।

एतद्यो न विजानाति मार्गद्वितयमात्मनः ॥
दन्दशूकः पतङ्गो वा भवेत्कीटोऽथवा कृमिः॥ १९७॥

उक्तमात्मनो मार्गद्वयं यो न विजानाति ज्ञात्वा च तन्मार्गगमनोपायं नानुतिष्ठति, स दन्दशूकः सर्पः पतङ्गः पक्षी कृमिः कीटो वा भवेत् ॥ १९७ ॥

उपासनेतिकर्तव्यतामाह—

ऊरुस्थोत्तानचरणः सव्ये न्यस्येतरं करम् ॥
उत्तानं किंचिदुन्नम्य मुखं विष्टभ्य चोरसा ॥ १९८ ॥
निमीलिताक्षः सत्त्वस्थो दन्तैर्दन्तानसंस्पृशन् ॥
तालुस्थाचलजिह्वश्च संवृतास्यः सुनिश्चलः ॥ १९९ ॥
संनिरुद्धेन्द्रियग्रामो नातिनीचोच्छ्रितासनः ॥
द्विगुणं त्रिगुणं वाऽपि प्राणायाममुपक्रमेत् ॥ २०० ॥
ततो ध्येयः स्थितो योऽसौ हृदये दीपवत्प्रभुः ॥
धारयेत्तत्र चाऽऽत्मानं धारणां धारयन्बुधः ॥ २०१ ॥

अनतिनीचोच्छ्रित आसन उपविश्योत्तानौ चरणौ स्थापयित्वा पद्मासनं बद्ध्वेति यावत् । तदुपरि सव्ये करे दक्षिणं करमुत्तानं निधायाऽऽस्यं किंचिदुन्नम्य वक्षसा च कायं विष्टभ्याक्षिणी निमील्य रागद्वेषादिरजस्तमःकार्यविरोधि सत्त्वकार्यं मनःप्रसादादिकमास्थाय दन्तपङ्क्त्योरन्योन्यसंस्पर्शं परिहरंस्तालुनि जिह्वामचलां कृत्वा निष्कम्पः सन्विषयेभ्य इन्द्रियाणि प्रत्याहृत्य द्वादशमात्रिकात्कनीयसः प्राणायामाद्द्विगुणं त्रिगुणं वा प्राणायामं कुर्यात् । ततो हृद्व्योम्नि हितसंज्ञकनाडीसंभेदलक्षणे दीपवदवस्थित आत्मा सर्वेश्वरो ध्येयश्चिन्तनीयः । ध्यानानन्तरं धारणां कुर्वंस्तत्राऽऽत्मन्यात्मानमात्मीयं मनो धारयेन्नियच्छेत् । दत्तात्रेयः—

" निवाते विजने स्थाने शुभे चैव मनोरमे ।
निर्जन्तुके निराबाधे शर्करावालुकादिभिः ॥
शब्दादिवर्जिते स्थाने शुभं कृत्वा तु संस्तरम् ।
बद्ध्वा सुखासनं तत्र प्राङ्मुखो वाऽप्युदङ्मुखः ॥

---

१ ङ. °त्मवान् । द° । २ ङ. न्यस्योत्तरं । ३ ङ. °रुध्येन्द्रियग्रामं ना° । ४ छ. °क्षणी दी° ।

कृत्वा सुसंनतं [illegible] सुसमं योगवित्तमः ।
नमस्कृत्य महादेवं महायोगीश्वरं हरिम् ॥
शोधयित्वा पुरा नाडीः प्राणायामांश्चरेत्ततः ।
प्राणायामांश्चरेत्तावद्यावच्चित्तं प्रसीदति " ॥

महाभारते—" यमनियम(मासन) प्राणायामप्रत्याहारधारणा-
ध्यानसमाधयोऽष्टावङ्गानि योगस्य " ॥

ब्रह्मपुराणे—" ब्रह्मचर्यमहिंसा च सत्यास्तेयापरिग्रेहान्[१] ।
सेवेत योगी निष्कामो योग्यतां स्वमनो नयन् ॥
स्वाध्यायशौचसंतोषतपांसि नियतात्मवान् ।
कुर्वीत ब्रह्मणि तथा परस्मिन्प्रवणं मनः ॥
एते यमाश्च नियमाः पञ्च पञ्च प्रकीर्तिताः ।
विशिष्टफलदाः काम्या निष्कामानां(णां) विमुक्तिदाः ॥
एकं भद्रासनादीनां समास्थाय गुणैर्युतः ।
यमाख्यैर्नियमाख्यैश्च युञ्जीत नियतो मुनिः " ॥

वायुपुराणे—"पद्ममर्धासनं वाऽपि तथा स्वस्तिकमासनम् ।
आस्थाय योगी युञ्जीत कृत्वा तु प्रणवं हृदि " ॥

मार्कण्डेयपुराणे—" प्राणापाननिरोधश्च प्राणायाम उदाहृतः " ॥

विष्णुपुराणे—" प्राणाख्यमनिलं वश्यमभ्यासात्क्रिय(त्कुरु)ते हि यः ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च " ॥

सबीजः समन्त्रकः । अबीज इतरः ।

मार्कण्डेयपुराणे—" लघुमर्ध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदलर्क शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिस्तु मात्राभिरुत्तमः स उदाहृतः ॥
निमेषोन्मेषणे मात्रा तालो लघ्वक्षरस्तथा " ॥

योगयाज्ञवल्क्यः—" अङ्गुलिमोक्षत्रितयं जान्वोः परिमार्जनं वाऽपि ।
तालत्रयमपि तज्ज्ञा मात्रासंज्ञं प्रशंसन्ति " ॥

---

१ छ. 'योगेश्व'। २ क. 'ग्रहम् । से'। ३ छ. 'न् । संवीत । ४ क. 'तां समनो नयेत् । स्वा'
५ क. 'न्प्रणवं । ६ क. 'ध्योतुरी' ।

(यतिप्रकरणम् ४)

देवलः—" त्रिविधः प्राणायामः कुम्भो रेचनं पूरणमिति ।
निःश्वासनिरोधः कुम्भः । अजस्रनिःश्वासो रेचनम् ।
निःश्वासाध्मानं पूरणमिति । स पुनरेकद्वित्रिभिरुद्धा-
तैर्मृद्वंस(दुर्म)न्दस्तीक्ष्णो वा भवति । प्राणापानव्यानोदान-
समानानां सकृदुद्गमनं(म्य) मूर्धानमाहत्य निवृत्तिरुद्धातः " ॥

मार्कण्डेयपुराणे—" प्रथमेन जयेत्स्वेदं द्वितीयेन तु वेपथुम् ।
विषादं तु तृतीयेन जयेद्दोषमनुक्रमात् ॥
मृदुत्वे सेवमानस्य सिंहशार्दुलकुञ्जराः ।
यथा यान्ति तथा प्राणो वश्यो भवति योगिनः ॥
वश्यं सन्तं यथेच्छातो नागं वहति हस्तिपः ।
तथैव योगी छन्देन प्राणं नैयति साधितम् ॥
यथा हि साधितः सिंहो मृगान्हन्ति न मानवान् ।
तद्वन्निषिद्धः पवनः किल्बिषं न नृणां तनुम् ॥
तस्माद्युक्तः सदा योगी प्राणायामपरो भवेत् ।
इत्थं योगी यताहारः प्राणायामपरायणः ॥
जितां जितां शनैर्भूमिमारु(रो)हेत्तु यथा गृहम् ।
दोषान्व्याधिं तथा मोहमाक्रान्ता भूरनिर्जिता ॥
विवर्धयति नाऽऽरोहेत्तस्माद्भूमिमनिर्जिताम् ।
प्राङ्नाभ्यां हृदये चाथ तृतीया च तथोरसि ॥
कण्ठे मुखे नासिकाग्रे नेत्रभ्रूमध्यमूर्धसु ।
किंचित्तस्मात्परस्मिंश्च धारणा परमा स्मृता ॥
दशैता धारणाः प्राप्य प्राप्नोत्यक्षरसात्म्यताम् ।
नाऽऽध्मातः क्षुधितः श्रान्तो न च व्याकुलचेतनः ॥
युञ्जीत योगं राजेन्द्र योगी सिद्ध्यर्थमादृतः ।
नातिशीते न चैवोष्णे द्वंद्वे नाम्ब्वनिलात्मके ॥
कालेष्वेतेषु युञ्जीत न योगं ध्यानतत्परः ।
सशब्देऽग्निजलाभ्याशे जीर्णगोष्ठे चतुष्पथे ॥
शुष्कपर्णचये नद्यां श्मशाने ससरीसृपे ।
सभये कूपतीरे वा चैत्यवल्मीकसंचये ॥

[1] छ. 'मृदुस्तौ'। २ छ. मृतसंभे'। ३ छ नियति । ४ छ. 'जिताः । वि' । ५ क. नेत्रेभ्रू'।

देशेष्वेतेषु तत्त्वज्ञो योगाभ्यासं विवर्जयेत् ।
सत्त्वस्यानुपपत्तौ च देशकालविवर्जिते ॥
न सतो दर्शनं यागं तस्मात्तत्परिवर्जयेत् ।
दोषानेताननादृत्य मूढत्वाद्यो युनक्ति वै ॥
विघ्नाय तस्य ये दोषा जायन्ते तान्निबोध मे ।
बाधिर्यं[1] जडता लोपः स्मृतेर्मूकत्वमन्धता ॥
ज्वरश्च जायते सद्यस्तद्वदज्ञानयोगिनः ।
प्रमादाद्योगिनो दोषा यद्येते स्युश्चिकित्सितम् ॥
तेषां नाशाय कर्तव्यं योगिनस्तन्निबोध मे ।
स्निग्धां यवागूमत्युष्णां भुक्त्वा तत्रैव धारयेत् ॥
वातगुल्मप्रशान्त्यर्थं गुल्मावर्ते तथा दधि ।
यवागूं वाऽपि पवनं वायुग्रन्थीन्प्रति क्षिपेत् ॥
तद्वत्कम्पो(म्पे) महाशैलं स्थितं मनसि धारयेत् ।
विघाते वचसो वाचि बाधिर्ये श्रवणेन्द्रिये ॥
तथैवाऽऽम्रफलं ध्यायेत्तृषार्ते रसनेन्द्रिये ।
यस्मिन्यस्मिन्रुजा देशे तस्मिंस्तदुपकारिणीम् ॥
धारयेद्धारणामुष्णे शीतां शीते विदाहिनीम् ।
कीलं शिरसि संस्थाप्य काष्ठं काष्ठेन ताडयेत् ॥
लुप्तस्मृतेः स्मृतिः सद्यो योगिनस्तेन जायते ।
यावत्पृथिव्यां वाय्वग्नी व्यापिनावपि धारयेत् ॥
अमानुषात्सत्त्वजाताद्बाधा स्याच्चेच्चिकित्सयेत् ।
अमानुषं सत्त्वमन्तर्योगिनं(नः) प्रविशेद्यदि ॥
वाय्वग्निधारणादेनं देहसंस्थं विनिर्दहेत् ।
एवं सर्वात्मना कार्या रक्षा योगविदा नृप ॥
धर्मार्थकाममोक्षाणां शरीरं साधनं यतः ।
प्राणायामा दश द्वौ च धारणा साऽभिधीयते ॥
द्वे धारणे स्मृते[2] योगे योगिभिस्तत्त्वदर्शिभिः ।
तथा वै योगयुक्तस्य योगिनो नियतात्मनः ॥

---

१ क. °धितं ज° । २ क. स्मृतियोगो यागि° ।

सर्वे दोषाः प्रणश्यन्ति स्वस्थश्चैवोपजायते[1] ।
ईक्षते च परं ब्रह्म प्राकृतांश्च गुणान्पृथक् ॥
व्योमादिपरमाणूंश्च तथाऽऽत्मानमकल्मषम् " ।

तथा—" शब्दादिभ्यो निवृत्तानि यदक्षाणि यतात्मभिः ।
प्रत्याह्रियन्ते योगेन प्रत्याहारस्ततः स्मृतः " ॥

हारीतः—" अणुत्वाल्लाघवाच्चापलाद्वायोर्योगभ्रष्टस्य मनसः समानीयार्थे योजनं प्रत्याहारः " ।

विष्णुपुराणे—" शब्दादिष्वनुरक्तानि सम्यगक्षाणि योगवित् ।
कुर्याच्चित्तानुकारीणि[2] प्रत्याहारः स उच्यते ॥
वश्यता परमा तेषां जायतेऽतिबलात्मनाम् ।
इन्द्रियाणामवश्यैस्तैर्न[3] योगी योगसाधनः " ॥

देवलः—" शरीरेन्द्रियमनोबुध्यात्मनां धारणाद्धारणा[4] " ।

अत्राऽऽत्माऽहंकारः ।

शङ्खः—" मनःसंयमनात्तज्ज्ञैर्धारणेति निगद्यते " ।

मार्कण्डेयपुराणे—" योगयुक्तः सदा योगी लध्वाहारो जितेन्द्रियः ।
सूक्ष्मास्तु धारणाः सप्त भूराद्या मूर्ध्नि धारयेत् ॥
धरित्रीं धारयन्योगी गन्धसौक्ष्म्यं प्रपद्यते ।
आत्मानं मन्यते पृथ्वीं तद्गन्धं च जहाति सः ॥
तथैवाप्सु रसं सूक्ष्मं तद्वद्रूपं च तेजसि ।
स्पर्शं वायौ तथा तद्वद्बिभ्रतस्तस्य धारणाम् ॥
व्योम्नः सूक्ष्मप्रवृत्तस्य शब्दं तद्वज्जहाति सः ।
मनसा सर्वभूतानां मन आविशते यदा[5] ॥
मानसीं धारणां बिभ्रन्मनःसौक्ष्म्यं जहाति च ।
तद्वद्बुद्धिमशेषाणां सत्त्वानामेत्य योगवित् ॥
परित्यजति संप्राप्य बुद्धिसौक्ष्म्यमनुत्तमम्[6] ।
एतासां धारणानां तु सप्तानां सौक्ष्म्यमाप्तवान् ॥

---

१ क. घ. स्वस्तिश्चै°। २ क. °च्चित्तानु°। ३ छ. °वश्यैस्तै°। ४ क. °णा । अ°। ५ क. यदि ।
६ क. °मनन्तरम् । ए°।

दृष्ट्वा दृष्ट्वा ततः सिद्धिं त्यक्त्वा त्यक्त्वा परां[1] भजेत् ।
एतान्येव च संधाय सप्त सूक्ष्माणि पार्थिव ॥
भूरादीनां[2] विरागोऽत्र सद्भाववैज्ञस्य[3] मुक्तये "।

विष्णुपुराणे—"प्राणायामेन पवनैः प्रत्याहारेण चेन्द्रियैः ।
वशीकृतं ततः कुर्यात्स्थितं चेतः शुभाश्रये ॥
तद्रूपप्रत्ययायैकसंततिः साऽन्यनिःस्पृहा ।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप " ॥

अयमर्थः—ब्रह्मरूपप्रत्ययात्मिका संततिः प्रवाहः, सा विषयान्तरासंस्पृष्टा सती ध्यानमित्युच्यत इति ।

तथा—तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते " ॥

तस्य ब्रह्मणः कल्पनाहीनं ध्येयं ध्यानं ध्यातेतिभेदप्रत्ययरहितं ध्यानजनितसंस्कारसहितेन मनसा निर्विकल्पकमहं ब्रह्मास्मीति प्रत्यक्षसमाधिः । ध्रियमाणशरीरस्य ब्रह्मसाक्षात्कारोऽपि मानस[4] इत्यभिप्रायेण मनसेत्युक्तम् । मुक्तावेव स्वयंप्रकाशो ब्रह्मीभावः । शरीरपातोत्तरकाला च मुक्तिरित्यतो वाक्याद्गम्यते ।

विष्णुः—" ऊरुस्थोत्तानचरणः सव्ये करे करं न्यस्य तालुस्थाचलजिह्वो दन्तैर्दन्तानसंस्पृशन्स्वं नासाग्रं पश्यन्दिशस्त्वनवलोकयन्विभीः प्रशान्तात्मा चतुर्विंशत्यात्मतत्त्वैर्व्यतीतं चिन्तयेन्नित्यमतीन्द्रियमगुणं शब्दस्पर्शरसरूपगन्धातीतं सर्वस्थमतिस्थूलं सर्वगमतिसूक्ष्मं सर्वतःपाणिपादान्तं सर्वतोक्षिशिरोमुखं सर्वतःशक्तिमेवं ध्यायेत् । ध्याननिरतस्य संवत्सरेण योगाविर्भावो[5] भवति । अथ निराकारे लक्ष्यबन्धं कर्तुं न शक्नोति, तदा पृथिव्यप्तेजोवाय्वाकाशादिमनोबुद्ध्यात्माव्यक्तपुरुषाणां पूर्वं पूर्वं ध्यात्वा तत्र लब्धलक्ष्यस्तं परित्यजेदपरमपरं ध्यायेत् । एवं पुरुषो ध्यानमारोहेत् । तत्राप्यस-

१ क. परं । २ क. भूतादी° । ३ क. °वस्य च मु° । ४ क. मनस । ५ क. °पो योगमा° ।

मर्थो हृदयपद्मस्य मध्ये दीपवत्पुरुषं ध्यायेत्। एवं पुरुषध्यानमपोहेत्। तत्राप्यसमर्थो भगवन्तं वासुदेवं कुण्डलिनमङ्गदिनं वनमालाविभूषितोरस्कं स्वरूपं चतुर्भुजं शङ्खचक्रगदापद्मधरं चरणमध्यगतवसुधं ध्यायेत्। यद्यद्ध्यायति तत्तदाप्नोतीति ध्यानगुह्यम्[1]। तस्मात्सर्वमेव क्षरं त्यक्त्वाऽक्षरमेव ध्यायेत्। न पुरुषं विना किंचिदप्यक्षरमस्ति तं प्राप्य मुक्तो भवति"।

मनुः—"पुरमाक्रम्य सकलं शेते यस्मान्महाप्रभुः।
तस्मात्पुरुष इत्येव प्रोच्यते तत्त्वचिन्तकैः॥
प्राग्रात्रापररात्रेषु योगी नित्यमतन्द्रितः।
ध्यायते पुरुषं नित्यं निर्गुणं पञ्चविंशकम्॥
एतद्वोऽभिहितं सर्वं निःश्रेयसकरं परम्।
अस्मादप्रच्युतो विप्रः प्राप्नोति परमां गतिम्॥
एवं स भगवान्देवो लोकानां हितकाम्यया।
धर्मस्य परमं गुह्यं ममेदं सर्वमुक्तवान्॥
सर्वमात्मनि संपश्येत्सच्चासच्च समाहितः।
सर्वमात्मनि संपश्यन्नाधर्मे कुरुते मनः॥
आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम्।
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम्॥
खं संनिवेशयेत्खे तु चेष्टनस्पर्शनेऽनिलम्।
पङ्क्तिदृष्ट्योः[2] परं तेजः स्नेहोऽ(हेऽ)पो गां च मूर्तिषु॥
मनसीन्द्रं[3] दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम्।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्॥
प्रशासितारमेतेषामणीयांसमणोरपि।
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम्॥
एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम्॥
एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः।
जन्मवृद्धिक्षयै नित्यं संसारयति चक्रवत्॥

---

१ क. ध्यानं गु°। २ क. 'दृष्ट्योः प°'। ३ क. 'सीन्द्रदि°'।

य एवं सर्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम् " ॥ १९८ ॥
॥ १९९ ॥ २०० ॥ २०१ ॥

योगसिद्धेर्लक्षणमाह—

अन्तर्धानं स्मृतिः कान्तिर्दृष्टिः श्रोत्रज्ञता तथा ॥
निजं शरीरमुत्सृज्य परकायप्रवेशनम् ॥ २०२ ॥
अर्थानां छन्दतः सृष्टिर्योगसिद्धेस्तु लक्षणम् ॥
सिद्धे योगे त्यजन्देहममृतत्वाय कल्पते ॥ २०३ ॥

अन्तर्धानमदृश्यशरीरत्वम् । तच्चाणुपरिमाणत्वे तस्य भवति । तच्चाणिमाख्यगुणप्राप्त्या, स्मृतिर्जन्मान्तरानुभूतार्थविषया । कान्तिः कमनीयत्वं, दृष्टिरतीतानागतव्यवहितविप्रद(कृ)ष्टार्थे(र्थ)विषया । श्रोत्रज्ञता श्रोत्रेन्द्रियसाक्षात्कारित्वम् । अनेन चाऽऽत्मव्यतिरिक्ताव्यक्तबुद्ध्यहंकारपञ्चतन्मात्रैकादशेन्द्रियपञ्चभूतानां साक्षात्कारित्वमुपलक्ष्यते। निजं स्वकीयं शरीरं पूर्वकर्मारब्धमुत्सृज्य परकायं प्रविश्य तदन्तर्गततया तद्विषयोपभोक्तृत्वम्। अर्थानां पृथिव्यादीनां स्रष्टव्यानां स्वेच्छया स्वातन्त्र्येणोत्पादनमित्येतद्योगसिद्धेर्लक्षणं लिङ्गम्। एतच्च लक्षणमेव योगसिद्धेर्न प्रयोजनम्। प्रयोजनं त्वमृतीभाव एव, तदाह-सिद्धे योगे त्यजन्देहममृतत्वाय कल्पत इति । त्यजन्देहमितिवचनसामर्थ्याच्छरीरे नास्ति मुक्तिरिति दर्शयति । युक्तं चैतत् । मुक्तिर्हि बन्धाभावः । बन्धश्चोपाधिभूतान्तःकरणसंबन्धः । शरीरं च बध्यतेऽन्तःकरणेन, शरीरी तेनोपाधीयत इति व्याहतम्। रागद्वेषमोहादीनां क्षयोऽन्तर्धानादिगुणोदयश्च न मोक्षः, प्रत्युत मोक्षान्तरायः । अत एव च तत्राऽऽसक्तिर्योगिना परिहरणीयेति यत्नतः शास्त्रकारैरुच्यते ॥ २०२ ॥ २०३ ॥

एतत्सर्वं यतिं प्रत्यभिहितम्। वानप्रस्थं प्रतीदानीमाह—

अथवाऽप्यभ्यसन्वेदं न्यस्तकर्मा वने वसन् ॥
अयाचिताशी मितभुक्परां सिद्धिमवाप्नुयात् ॥२०४ ॥

चतुर्णां वेदानामेकं वेदमेकां शाखामरण्ये निर्जने। अयाचिताशी स्वयमुपनताशी, मितभुक्प्राणधारणायैव भुञ्जानो न्यस्तकर्मा त्यक्तकाम्यनिषिद्ध-

१ क. °दृश्य° । २ क. °तानवे° । ३ छ °नां द्रष्टृ° । ४ क. प्रचक्ष° । ५ क. °रण्यै° ।

क्रियः । अथवा ब्रह्मणि निक्षिप्तावश्यकक्रियः । परां सिद्धिं मुक्तिमवाप्नुयात् ॥ २०४ ॥

इदानीं गृहस्थं प्रत्याह—

न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ॥
श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते ॥२०५॥

न्यायेनानिषिद्धेन कर्मणाऽर्जितं स्वीकृतं धनं येन स न्यायार्जितधनः । तथा तत्त्वज्ञाने निष्ठा तात्पर्यं यस्य स तत्त्वज्ञाननिष्ठः । अतिथयः प्रिया यस्य सोऽतिथिप्रियः । तत्प्रियत्वेन च तत्पूजकत्वं लक्ष्यते । श्राद्धमावश्यकं पार्वणादिकं करोतीति श्राद्धकृत् । भूतहितार्थं वाक्यं सत्यं तद्वदतीत्येवंशीलः सत्यवादी । एवंविधो गृहस्थोऽपि विमुच्यतेऽपवृज्यते । अपिशब्देनान्येऽप्याश्रमिणो गृह्यन्ते । अत्र च न्यायार्जितधनत्वादिभिर्वर्णाश्रमधर्मा नित्यनैमित्तिकाश्चोपलक्षिता ज्ञानसहिता मुक्तये विधीयन्ते, तदेतद्व्याख्यानं केचिन्नानुमन्यन्ते, यत एतदर्थायाः स्मृतेरस्याः श्रुतिविरोधः स्यात् । तथा हि—

" न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति "

इत्यनेन गृहस्थधर्माणां यागादिकर्मप्रजोत्पादनादीनाममृतत्वप्राप्तिहेतुभावं प्रतिषिध्य यतीनामेव तत्प्राप्तिर्विधीयते । तेनात्र त्यागशब्देन ब्रह्मचर्याद्याश्रमत्रयकर्मणां त्यागादमृतीभाव इति प्रतिपाद्यते । तथा यतिव्यतिरिक्ताश्रमिणां पुण्यलोकप्राप्तिर्यतेरेवामृतप्राप्तिरिति च्छान्दोग्योपनिषत्—

" सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति " इति ॥

ब्रह्मसंस्थो भिक्षुः । तथाऽग्निहोत्रादीन्यावश्यकानि कर्माणि दुरितक्षयाय श्रुत्या विहितानि । तानि मुक्तये विदधाना स्मृतिः श्रुत्या विरुध्यत एव । यदुच्यते श्रुत्यैव—

" विविदिषन्ति यज्ञेन दानेन तपसा न चै(ऽनाश)केन "

इत्यादिकया वर्णाश्रमकर्माणि मुक्तौ विनियुक्तानीति, तन्न ब्रह्मज्ञानेच्छायामेव ह्येषा श्रुतिः कर्मणां विनियोक्त्री, न मुक्तौ नापि तत्साधने ज्ञाने । इच्छाऽपि च विधेयप्रतियोगिनी भवति । यथा भेषजविशेषस्य बुभुक्षा । ननु च

१ ङ. 'यागत°' । २ छ. यद्युच्य° । ३ छ. विधीय° ।

प्रधानेऽन्यत्प्रधीयते न गुणे, विविदिषन्तीत्यत्र च वेदनमिच्छां प्रति प्रधानम्। तेन विद्यायामेवमाद्येच्छां प्रति कर्मीभूतायां कर्मणां विनियोगो नेच्छायाम्। यथाऽश्वेन जिगमिषतीत्यश्वस्य गतौ, न पुनस्तदिच्छायामित्युच्यते । सत्यं प्रधानेऽन्यद्विनियुज्यते। प्रधानं तु द्विविधम्— शाब्दमार्थं च । तत्र शाब्दमन्वय उपयुज्यते नाऽऽर्थम् । अत एव राजपुरुषमानयेति पुरुष आनयनेन संबध्यते, न राजाऽर्थतः प्रधानभूतोऽपि। स हि शब्देन विशेष(ष्य)तया प्रधानभूतं पुरुषं प्रति विशेषणतां नीयते। सन्नन्तेषु च शब्देषु इच्छैव प्रत्ययार्थत्वात्प्रधानम् । तेन तत्रैव यज्ञादिविनियोगः । अश्वस्य तु गत्यन्वयः प्रमाणान्तरवशान्न शब्दतः प्रसिद्धहेतुकायामपि विविदिषायां, वैदिको यज्ञादिरुपायः पशुप्राप्ताविव चित्रादिः "चित्रया यजेत पशुकामः" इत्यत्र । किं च कर्माणि कुर्वताऽहं कर्ता कर्मणां फलभोक्ता चेतिप्रत्ययदार्ढ्यमवलम्बनीयम् । तत्त्वज्ञाननिष्ठेन पुनरस्यैव प्रत्ययस्य मिथ्यात्वमापाद्यम् । ततश्च ज्ञानकर्मणोर्विरोधादसमुच्चयः षोडशिन इव ग्रहणाग्रहणयोः। किं च परमकार्यभेदेऽवान्तरव्यापारभेदे तु कारकं कारकान्तरेण समुच्चीयते। यथा "अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति" इत्यत्राऽऽरुण्यमेकहायन्या न पुनरवान्तरव्यापारैक्ये, न हि व्रीहयो यवैः समुच्चीयन्ते । तुल्यं च ज्ञानकर्मणोर्दुरितक्षपणमवान्तरकार्यम् । न च ज्ञानस्याविद्यानिवृत्तिरेव कार्यं न तु कर्मक्षय इति वाच्यम्। न हि कर्मजन्याया अविद्यायाः कर्माण्यक्षपयता ज्ञानेन निवृत्तिः शक्या कर्तुम् । तस्मान्न्यायविरुद्धमपि समुच्चयस्मरणं स्मृत्यन्तरविरुद्धं च । तत्र महाभारते—

शुक उवाच— " यदिदं वेदवचनं कुरु कर्म त्यजेति च ।
कां दिशं विद्यया याति कां च गच्छति कर्मणा ॥
एते चान्योन्यवैरूप्ये वर्तेते प्रतिकूलता(तः) ।
इत्युक्तः प्रत्युवाचेदं पराशरसुतः सुतम् ॥
कर्मविद्यामयावेतौ व्याख्यास्यामि क्षराक्षरौ ।
यां दिशं विद्यया याति यां च गच्छति कर्मणा ॥
शृणुष्वैकमनाः पुत्र गह्वरं ह्येतदन्तरम् ।
कर्मणा बध्यते जन्तुर्विद्यया च प्रमुच्यते ॥

---

१ क. °न्यद्विधी°। २ क. तेनावि°। ३ क. °पाराभे°। ४ छ. °रैक्येन। ५ क. एत्य चान्योन्यरूपे वर्तते प्रतिकूलतः। इ°। ६ छ. °त्युक्त्वा प्र°।

तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ।
कर्मणा जायते प्रेत्य मूर्तिमान्षोडशात्मकः ॥
विद्यया जायते नित्यमव्ययो ह्यव्ययात्मकः ।
कर्म त्वेके प्रशंसन्ति स्वल्पबुद्धितरा नराः ॥
तेन ते देहजातानि रमयन्त उपासते ।
ये तु बुद्धिपथं प्राप्ता धर्मनैपुणदर्शिनः ॥
न ते कर्म प्रशंसन्ति कूपं नद्यां पिबन्निव ।
कर्मणा फलमाप्नोति सुखदुःखे भवाभवौ ॥
विद्यया तदवाप्नोति यत्र गत्वा न शोचति ।
यत्र गत्वा न म्रियते यत्र गत्वा न जायते ॥
न हीयते यत्र गत्वा यत्र गत्वा न वर्धते " इति ।

मार्कण्डेयपुराणे पितापुत्रसंवादे—

" एवं संसारचक्रेऽस्मिन्भ्रमता तात संकटे ।
ज्ञानमेतन्मया [1]प्रोक्तं मोक्षसंप्राप्तिकारणम् ॥
विज्ञाते यत्र सर्वोऽयमृग्यजुःसामसंज्ञितः ।
क्रियाकलापो विगुणो न सम्यक्प्रतिभाति मे ॥
तस्मादुत्पन्नबोधस्य वेदैर्मे किं प्रयोजनम् " ।

बृहस्पतिः—"सत्यं ज्ञानं तपो दानमेतद्धर्मस्य साधनम् ॥
धर्मात्सुखं च ज्ञानं च ज्ञानान्मोक्षोऽधिगम्यते " इति ।

तस्मादुक्तविरोधपरिहाराय स्मृतिरियमेवं व्याख्यातव्या । गृहस्थोऽपि [2]विधि-विहितकर्मकारी मुक्त्यनर्होऽपि तत्त्वज्ञाननिष्ठत्वाद्विमुच्यते किं पुनर्भिक्षुः कर्म-त्यागी तत्त्वज्ञानैकनिष्ठ इति । तदेतदन्ये नानुमन्यन्ते । न हि समुच्चयविधाय-कस्मृतेः श्रुतिविरोधादप्रामाण्यमस्ति । यतः समुच्चयविधायकं प्रत्यक्षमेव श्रुतिवाक्यमस्या मूलमस्ति । तद्यथा—

" विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं
तीर्त्वा विद्ययाऽमृतमश्नुते " इति ।

विद्या ब्रह्मज्ञानम् । अविद्या कर्म । तदुभयं सह समुच्चयं यो वेदानुष्ठान-[3]यन्ततया जानाति ■ कर्मणा मृत्युं मृत्युफलदं दुरितं तीर्त्वाऽतिक्रम्य

---

1 क. प्राप्तं । २ छ. विविधवि° । ३ क. 'ति स्वक' ।

विद्ययाऽमृतमश्नुत इति प्रसिद्धार्थम्। अत्र च विद्याशब्दं देवताज्ञानपरत्वेन केचन व्याचक्षते, तदयुक्तम्। प्रकृतहान्यप्रकृतप्रक्रियाप्रसङ्गात्। "ईशा वास्यम्" इत्यादिना परमेश्वरस्यैव प्रकृतत्वात्। एवमत्र मन्त्रे विद्याकर्मणोरमृतीभावे समुच्चयः। तदुपपादकतया चावान्तरव्यापारभेदो विद्यया मृत्युं तीर्त्वेति कथितः। क्त्वाप्रत्ययेन च विद्यां प्रति कर्मणोऽङ्गभावः। एतदेव स्पष्टयति—"विविदिषन्ति यज्ञेन" इत्यादिश्रुतिः। यद्यप्यत्र विविदिषा प्रत्ययार्थत्वाच्छब्दतः प्रधानं तथाऽपि न तत्र यज्ञान्वयो वाक्यप्रमेयोऽर्थसिद्धत्वात्। तथा हि—न हि विविदिषासंबन्धमन्तरेण विद्यार्थता यज्ञादीनामस्ति। न ह्यनिष्यमाणं प्रधानं भवति, तेन यज्ञादीन्प्रति विद्यायाः प्राधान्याद्विविदिषान्वयस्तेषां गम्यमानो न विधेयः, किं तु विद्यान्वय एवाप्राप्तत्वात्। यथा "एतयाऽन्नाद्यकामं याजयेत्" इत्यत्र याजनान्वयमनूद्य यागान्वय एव प्राप्तोऽन्नाद्यकामस्य विधीयते। अत एव चाश्वेन जिगमिषतीत्यत्राश्वेन गत्यन्वयः शाब्द एव। अस्तु वा विविदिषैव यज्ञादीन्प्रति प्रधानं किं तु विविदिषाप्रयोजनीभूतया च विद्यया विशिष्टेच्छा विविदिषोच्यते[३]। यच्च प्रयोजनवतोऽङ्गं तत्प्रयोजनस्यापि। यथा "अग्निं चित्वा सौत्रामण्या यजेत" इति। अत्र सौत्रामण्यग्निं प्रत्यङ्गं भवन्ती तत्प्रयोजनं यागं प्रति चाङ्गतां याति। विद्याऽपि चापवर्गेण फलेन फलवती सती[४]च्छायाः प्रयोजनं भवति, न केवला। ततश्च विद्याङ्गभावं भजन्तोऽप्यविद्यादयोऽपवर्गेऽङ्गतां यान्ति। विद्यायाश्चापवर्गः फलं "ब्रह्मविदाप्नोति परम्। ब्रह्म वेद ब्रह्म भवति" इत्यादिवाक्यप्रसिद्धेः[६]। न च वाच्यं यथाऽऽधानमाहवनीयादिस्वरूपोत्पत्त्यङ्गं न तु तत्कार्योत्तरक्रत्वर्थं तथा यज्ञादयोऽपि विद्यास्वरूपमुत्पादयन्ति न तु तत्कार्यमपवर्गं कुर्वन्तीति। युक्तं ह्याधानस्याऽऽहवनीयादिस्वरूपोत्पत्तिमात्रशेषत्वम्। न ह्याधानविनियोगदशायां "यदाहवनीये जुहोति" इत्यादिभिराहवनीयादीनां प्रयोजनवतामवगमोऽस्ति। प्रसिद्धे ह्याहवनीयादौ तत्प्रयोजनावगमो भवति। तत्प्रसिद्धिश्चाऽऽधानविनियोगायत्ता। तेन पूर्वमाधानमग्निषु विनियोज्यं पश्चात्क्रतुष्वग्नयः। तेनागत्या विनियोक्ष्यमाणातीन्द्रियाहवनीयादिस्वरूपशेषताऽऽधानस्याऽऽश्रीयते, न तु गतिसंभवे। संभवति चात्र गतिः। यज्ञादिविनियोगात्प्रागेव विद्याया अपवर्गताज्ञानात्। विद्यास्वरूपस्य चैन्द्रिय-

---

१ छ. चाऽऽवर्तनव्या'। २ क. 'योऽर्थे सि'। ३ क. 'ते। तच्च। ४ छ. 'तीच्छया प्र'। ५ क. 'द्याङ्गभावं भजन्तोऽपि वि'। ६ छ. 'सिद्धः। न।

कत्वात् । नच यथा पश्वादीनां प्रमाणान्तराद्विदितपुरुषार्थभावानां शास्त्रेण चित्रादिरुपायो विधीयते तथा विद्यायां यज्ञादिरिति वाच्यम् । तस्य प्रमाणान्तरतः पुरुषार्थत्वावेदनात् । तस्माच्छास्त्रावगम्यापवर्गहेतुभूतायां विद्यायां साक्षादिच्छाद्वारेण वा यज्ञादयो विनियुज्यन्त इति सिद्धम् । ततश्च सर्वाण्येवाऽऽवश्यकानि वर्णाश्रमकर्माणि मोक्षे साध्ये ब्रह्मज्ञानेन समुच्चीयन्ते । "न कर्मणा" इत्यादयस्तु कर्मणां मोक्षोपायत्वनिषेधाज्ज्ञानरहितकर्मविषयाः । अन्यथा समुच्चयविधिनिरोधः स्यात् । अत एव मन्त्रेणाविद्याशब्दवाच्यं कर्म केवलं निन्दित्वा विद्याऽपि केवला निन्द्यते "अन्धं तमः प्रविशन्ति ये विद्यामुपासते । ततो भूय इव ते तमो यदविद्यायां रताः" इति । यदपि च "सर्वे एते पुण्यलोका भवन्ति" इति वाक्यं तदपि केवलकर्मविषयम् । "ब्रह्मसंस्थोऽमृतत्वमेति" इत्यस्यायमर्थः—प्रकृतानामाश्रमिणां मध्ये यो ब्रह्मसंस्थो ब्रह्मप्रवणो ब्रह्मज्ञानाङ्गभूतं कर्म करोतीति यावत्, सोऽमृतत्वमेतीति । न पुनर्ब्रह्मसंस्थशब्देन भिक्षुराख्यायते । तस्य तत्संज्ञत्वे प्रमाणाभावात् । योऽपि विद्याकर्मणोर्विरोध उक्तः सोऽपि नोपासनात्मिकया विद्यया किंतु साक्षात्कारात्मिकया ।

तथा चोक्तम्—"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" इति ॥

तस्माद्गृहस्थोऽपि विमुच्यत इति स्मृतिर्न भङ्क्त्वा व्याख्येया । गृहस्थस्य तु मुक्तिरुक्ता छान्दोग्ये "कुटुम्बी शुचौ देशे वेदमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्याहिंसन्सर्वभूतानि अन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न पुनरावर्तते" इति । विहिता हिंसा तीर्थानि(र्थेषु) । ब्रह्मैव लोको ब्रह्मलोकः । मुक्तौ ज्ञानकर्मसमुच्चयं स्मृतिकाराश्चाऽऽहुः ।

तत्र मनुः—"सुखाभ्युदयिकं चैतन्नैःश्रेयसिकमेव च ।
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥
इह वाऽमुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते ।
ज्ञानपूर्वं तु विद्वद्भिर्निवृत्तमुपदिश्यते ॥
प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम् ।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै" ॥

---

१ क. शास्त्रादिरु° । २ छ. °तुभावायां वि° । ३ क. मोक्षसा° । ४ क °त्मिकाया विद्यायाः किंतु साक्षात्कारात्मिकायाः । त° ।

वसिष्ठः—" यथाऽन्नं मधुसंयुक्तं मधु चान्नेन संयुतम् ।
एवं तपश्च विद्या च संयुक्तं भेषजं महत् " ॥

योगयाज्ञवल्क्यः—" परिज्ञानाद्भवेन्मुक्तिरेतदालस्यलक्षणम् ।
कायक्लेशभयाच्चैव कर्म नेच्छन्ति पण्डिताः ॥
ज्ञानकर्मसमायोगात्परमाप्नोति पूरुषः ।
पृथग्भावो न सिध्येत उभे तस्मात्समाश्रयेत् " ॥

इत्यादि । तच्च न्यायार्जितधन इत्यादिस्मृतिर्मुख्यतयैव व्याख्यातव्येति । तदनयोर्मतयोर्यद्रुच्यं तद्ग्राह्यम् ॥ २०५ ॥

इति श्रीविद्याधरवंशप्रभवश्रीशिलाहारनरेन्द्रजीमूतवाहनान्वयप्रसूतश्रीमदपरादित्यदेवविरचिते याज्ञवल्कीयधर्मशास्त्रनिबन्धेऽपरार्के मोक्ष(यति)प्रकरणम् ॥ ४ ॥

अथ सटीकयाज्ञवल्क्यस्मृतौ

प्रायश्चित्तप्रकरणम् (५) ।

पापक्षयाय प्रायश्चित्तानि विधास्यन्ते, दुःखफलत्वेन च पापस्य तत्क्षयार्थता प्रायश्चित्तानुष्ठानस्य प्रयुज्यत इति तत्फलत्वं पापस्य तावदाह—

महापातकजान्घोरान्नरकान्प्राप्य गर्हितान्[2] ॥
कर्मक्षयात्प्रजायन्ते महापातकिनस्त्विह ॥ २०६ ॥

ब्रह्महत्यादिमहापातकप्रभृतिपापनिमित्तान्नरकांस्तामिस्रादीन्घोरान्सुदुःसहान्गर्हितानत्यन्तहेयान्प्राप्यानुभूय नरकदेशोपभोग्यदुःखविशेषफलस्य कर्मणः क्षयान्महापातकशेषवन्त इह लोके कुत्सितयोनिषु वक्ष्यमाणासु जायन्ते नरकभोगतीव्रतरदुःखप्रदानरूपेण कर्मणः[3] क्षयः स्वल्पदुःखप्रदानाकारेणावस्थानमिति कर्मणः क्षयो महापातकित्वं चेति द्वयमविरुद्धम् ॥ २०६ ॥

सामान्यत उक्तमर्थं विशेषत आह—

---

१ छ. ॰तिमुख्य॰ । २ ङ दारुणान् । ३ छ. ॰णः स्व॰ ।

श्रीमदष्टाक्षरीं जप्त्वा सिद्धिं पाश्यथं (प्राश्नुत) शाश्वतीम् ।
दीक्षाभिषेचनं प्रोक्तमिति युष्मभ्यमादरात् ॥

इतः परं द्विजश्रेष्ठाः किं पुनः श्रोतुमिच्छथ ।

॥ इति श्रीमदनुत्तरब्रह्मतत्त्वरहस्ये दाशरथीये तन्त्रे
वेदार्थसंग्रहे द्विचत्वारिंशोऽध्यायः ॥

—○○※○○—

॥ अथ त्रिचत्वारिंशोऽध्यायः ॥

ऋषय ऊचुः –

ऋष्यशृङ्ग महाभाग भवद्वदनपङ्कजात् ।
श्रुतमस्माभिरत्यन्तरहस्यमपि सिद्धिदम् ॥

कृतकृत्या वयं सर्वे भूयो धन्यतरा वयम् ।
भगवच्छास्त्रमस्माभिः श्रुतं त्वद्वदनाम्बुजात् ॥

भूयोऽपि तव वक्त्राब्जाच्छ्रोतुकामा जगद्धितम् ।
योगस्वरूपं पृच्छामस्तदस्माकं वद प्रभो ॥

योगो नाम किमेतस्य स्वरूपं कीदृशं परम् ।
अङ्गान्यष्टाविति प्रोक्तमस्य तत्सकलं वद ॥

श्री ऋष्यशृङ्ग उवाच —

शृणुध्वं ब्राह्मणश्रेष्ठा यथा दाशरथिः पुरा ।
वसिष्ठादि महर्षीणां सन्निधौ जानकीपतिः ॥ –५

कथयामास योगस्य स्वरूपं शम्भवे विभुः ।
यथा नारायणो योगी जनकाय महात्मने ॥

कथयामास योगस्य स्वरूपं ब्रह्मसाधनम् ।

श्री भगवानुवाच –

शृणु राजन् प्रवक्ष्यामि योगमष्टाङ्गसंयुतम् ॥

यदभ्यासान्नरो याति तत्परं ब्रह्म शाश्वतम् ।
नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ॥

योगाभ्यासरतो भूयात्तत्साधनमथोच्यते ।
त्यज दुर्जनसंसर्गं भज साधुसमागमम् ॥

कुरु पुण्यमहोरात्रं स्मरविष्णुं सनातनम् ।
अष्टावङ्गानि वक्ष्यामि योगस्य वसुधापते ॥ –१०

पातकेभ्यो विमुक्तः स्याद्येषां श्रवणतोऽपि च ।
यमश्च नियमः पश्चादासनं च तृतीयकम् ॥

प्राणायामश्चतुर्थः स्यात् प्रत्याहारस्तु पञ्चमः ।
धारणा च तथा ध्यानं समाधिरिति चाष्टमम् ॥

प्रत्येकमेषां वक्ष्यामि लक्षणान्यपि सुव्रत ।
तद्विभज्य प्रवक्ष्यामि तत्वस्य लक्षणमप्यथ ॥

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम् ।
क्षमा धृतिर्मिताहारः शौचं चेति यमा दश ॥

सर्वेषामपि भूतानामक्लेशजननं हि यत् ।
वाङ्मनःकर्मभिर्नूनमहिंसेत्यभिधीयते ॥ –१५

यथादृष्टश्रुतार्थानां स्वरूपकथनं पुनः ।
सत्यमित्युच्यते धीरैस्तद्ब्रह्म प्राप्तिसाधनम् ॥

तृणादेरप्यनादानं परेषां वसुधापते ।
अस्तेयमेतदप्यङ्गं ब्रह्मप्राप्तेः सनातनम् ॥

अवस्थास्वपि सर्वासु कर्मणा मनसा गिरा ।
स्त्रीसङ्गतिपरित्यागो ब्रह्मचर्यं प्रवक्ष्यते ॥

परेषां दुःखमालोक्य स्वस्यैवालोक्य यत्नतः ।
उत्सादनानुसन्धानं दयेति प्रोच्यते बुधैः ॥

व्यवहारेषु सर्वेषु मनोवाक्कायकर्मभिः ।
सर्वेषामपि कौटिल्यराहित्यं ह्यार्जवं भवेत् ॥ –२०

सर्वात्मना सर्वदापि सर्वत्राप्यपकारिषु ।
बन्धुष्विव समाचारः क्षमास्याद्ब्रह्मवित्तम ॥

इच्छा प्रयत्नराहित्यं ज्ञातेषु विषयेष्वपि ।
लोभवस्तु धृतिं धीराः प्रवदन्ति सतां वर ॥

भोज्यस्यैव चतुर्थांशभोजनं स्वस्थचेतसः ।
अत्युग्रकटुतिक्ताम्ललवणादिविवर्जितम् ॥

हितं मेध्यं महीपाल मिताहारं प्रचक्षते ।
निर्गतं नवरन्ध्रेभ्यो रोमकूपेभ्य एव च ॥

मलं वदन्ति तद्द्वारा क्षालनं शौचमुच्यते ।
मृज्जलाभ्यां बहिस्सम्यङ्निर्मलीकरणं तथा ॥ —२५

मनस्स्थैर्यं बहिः शौचमन्तः शौचं विदुर्बुधाः ।
एते दश यमा भूप ब्रह्मताप्राप्तिहेतवः ॥

तपश्च तुष्टिरास्तिक्यमीश्वराराधनं तथा ।
सिद्धान्तालोचनं चैव लज्जा दानं मतिस्तथा ॥

जपो व्रतं दशैतानि सुतीक्ष्णनियमाः स्मृताः ।
प्रत्येकमेषां वक्ष्यामि लक्षणानि महीपते ॥

तपस्त्वनशनं नाम विधिपूर्वकमिष्यते ।
अनायासोपपन्नेन तृप्त्यर्थेनैव जीवनम् ॥

तुष्टिरेषाऽमृता श्वेन तत्प्राप्तिर्नानया विना ।
श्रुत्याद्युक्तेषु विश्वासमास्तिक्यं प्रवदन्तिहि ॥ —३०

इष्टदेवार्चनं सम्यग्विधिपूर्वकमन्वहम् ।
त्रिसन्ध्यमेकसंध्यं वा भवत्येवेश्वरार्चनम् ॥

वैष्णवागमसिद्धान्तश्रवणं मननं तथा ।
श्रुतिस्मृतिपुराणादि मध्यान्तोक्तार्थदर्शनम् ॥

सिद्धान्तश्रवणं ह्येतत्पोच्यते तत्वदर्शिभिः ।
श्रुत्यादिभिर्लौकिकैश्च यद्यदत्यन्तनिन्दितम् ॥

तत्राप्रवर्तनं लज्जा वाङ्मनःकर्मणामपि ।
यदिष्टदेवतां ध्यात्वा तदर्पणधियाऽन्वहम् ॥

सत्पात्रे दीयतेऽन्नादि तद्दानमभिधीयते ।
तर्केणाप्यनुसन्धानं सम्यक् सदसतोरपि ॥ —३५

शास्त्रयोर्मतिरियं तत्वविद्भिरुदीर्यते ।
गुरोर्लब्धस्य मन्त्रस्य शश्वदावर्तनं हि यत् ॥

अन्तरङ्गाक्षराणां च न्यासपूर्वं जपो भवेत् ।
कर्तव्यस्य समस्तस्य नियमग्रहणं व्रतम् ॥

नियमव्यतिरेकेण सर्वं भवति निष्फलम् ।
यमैश्च नियमैर्यद्यत् कृतं तत्सफलं भवेत् ॥

एकमन्त्रे स्थिरीभावः पूर्वोक्तैर्नियमैः सह ।
आचार्यार्पितदेहस्य चैतदासनमुच्यते ॥

वहुविद्यावतोऽप्येक विद्यायां स्थिरचित्तता ।
अङ्गत्वेनान्यविद्यानां जप आसनमुच्यते ॥ —४०

प्राणायामानथो वक्ष्ये मुमुक्षोरुपकारकान् ।
यैः कृतैर्दह्यतेऽघौघः शुष्केन्धनमिवाग्निना ॥

इन्द्रियेष्वपि ये दोषा वातपित्तकफोद्भवाः ।
त्वगसृङ्मांसमेदोस्थिमज्जाशुक्रादिसंभवाः ॥

एते सर्वेऽपि दह्यन्ते प्राणस्यान्तर्निरोधनात् ।
प्रायश्चित्तमघौघानां मुख्यमेतद्वदन्त्यपि ॥

पुनरावृत्तिरहितशाश्वतब्रह्मकाङ्क्षिभिः ।
प्राणायामश्च सततं कर्तव्यो विधिवन्मुने ॥

सम्यङ् निरुध्य च प्राणानन्तःकरणमात्मनि ।
स्वयमेवावशिष्टः सन् ब्रह्मभूयाय कल्पते ॥ —४५

जानुद्वयं कराग्रेण त्रिःपरामृश्य सत्वरम् ।
प्रदद्याच्छोटिकामेकामियं मात्रा कनीयसी ॥

दश प्रणवसंयुक्तां गायत्रीं शिरसा सह ।
त्रिर्जपेदायतप्राणः प्राणायामोऽयमुच्यते ॥

अधमो मध्यमश्चैव प्राणायामस्तथोत्तमः ।
अधमः पञ्चदशभिः श्रीमदष्टाक्षरीजपैः ॥

मध्यमः पञ्चविंशद्भिः श्रीमदष्टाक्षरीजपैः ।
पञ्चाधिकैश्च चत्वारिंशद्भिरष्टाक्षरीजपैः ॥

प्राणायामोऽयमुक्तोऽसावुत्तमो ब्रह्मवादिभिः ।
पूरकेऽथ त्रिधोच्चार्य कुम्भके पूर्ववन्नृप ॥ —५०

रेचके त्रिशउच्चार्य प्राणायामोऽयमुच्यते ।
प्राणायामैः कृतैः शश्वन्नित्यं षोडशिभिर्नृप ॥

संवत्सरकृतैः पापैस्सद्य एव विमुच्यते ।
परोपसन्तापजं पापं परद्रव्यापहारजम् ॥

परस्त्रीमैथुनोत्पन्नं प्राणायामशतं दहेत् ।
महापातकजं पापं शतावृत्त्योपपातकम् ॥

अन्यानि शतधावृत्तान्युपपापानि भूपते ।
सर्वाण्यपि प्रदह्यन्ते प्राणायामैः चतुःशतैः ॥

आदावन्ते च यत्नेन प्राणायामान् समाचरेत् ।
कर्मस्वपि च सर्वेषु शुभेषु ह्यशुभेषु च ॥ —५५

प्राणायामैर्विना यद्यत्कृतं कर्म निरर्थकम् ।
अतो यत्नेन कर्तव्याः प्राणायामाः शुभार्थिभिः ॥

यावच्छ्वयं नियम्यासून् मनसैव जपेन्मनुम् ।
नारायणं हृदा ध्यायन्मुहुर्मुहुरनन्यधीः ॥

धारयन्नन्तरेवासून्नेत्रे किञ्चिन्निमील्य च ।
परं ज्योतिः परं ध्यायन्नन्तरेव मनुं जपेत् ॥

समस्तकर्मणां साक्षी प्राणायामो महीपते ।
दशप्रणवसंयुक्तं गायत्र्या सर्वकर्मसु ॥

आदावन्ते च कर्तव्यः प्राणायामः फलप्रदः ।
श्रीमदष्टार्णविद्यादि जपहोमादिकर्मसु ॥ —६०

तत्तन्मन्त्रेण कर्तव्यः प्राणायामो महीपते ।
श्रीरामरूपिणं वाऽपि नरसिंहाकृतिं तु वा ॥

गोपाल रूपिणं वाऽपि यद्वा शङ्कररूपिणम् ।
मद्रूपिणं वा सततं स्मरन्नारायणं विभुम् ॥

श्रीमदष्टाक्षरीं विद्यां मनसैव जपन् शुचिः ।
नियम्य वायुं कर्तव्यः प्राणायामोऽघनाशनः ॥

प्राणायामैर्विना सर्वजपहोमार्चनक्रियाः ।
न फलन्त्येव ताः सर्वा यत्नेनापि कृतास्तथा ॥

इन्द्रियाणां हृदा सार्धं विषयेभ्यो निवर्तनम् ।
प्रत्याहारो भवत्येतत्सम्यगिन्द्रियनिग्रहः ॥ —६५

जीवस्य ब्रह्मरूपेण निर्धारो न्याययुक्तिभिः ।
पूर्वोक्तोत्तममात्राश्च प्राणायामत्रयोद्भवाः ॥

आत्मन्यपि स्थिरीभावः चित्तस्यैवात्र धारणा ।
सम्यगालोकनं ध्यानं निधाय हृदये विभुम् ॥

अङ्गानि भूषणैः सार्धं वाहनावरणैरपि ।
सत्यज्ञानसुखैकत्वप्राप्तये प्राप्तिसाधकः ॥

समाधिर्धर्मचिन्तास्याद्भवान्तरशतेष्वपि ।
समाधिरथवा जीवब्रह्मणो जीवचिन्तितम् ॥

ब्रह्मीभूतः स्वयंजीवो निरुद्धासुर्विलीनहृत् ।
स्वतोऽप्यनन्यसद्भावात् स्वयमेवावशिष्यते ॥ —७०

मुहूर्तावस्थितो वापि समाधिरप्यथोच्यते ।
एवमष्टाङ्गसंपन्नयोगयुक्तस्सुसंयतः ॥

सूर्यस्य मण्डलं भित्त्वा याति ब्रह्म सनातनम् ।
य एवमभ्यसेन्नित्यं विनीतः शान्तमानसः ॥

वशीकृतेन्द्रियग्रामः सोऽमृतत्वाय कल्पते ।
निरस्ताशेषदुरितः कामक्रोधादिवर्जितः ॥

एवमभ्यासयोगेन स याति परमां गतिम् ।
कर्मयोगेन वा ज्ञानयोगेनाथोभयेन वा ॥

प्राप्यते पुनरावृत्तिरहितं ब्रह्म शाश्वतम् ।
करोत्यनुदिनं यस्तु तत्फले विगतस्पृहः ॥ -७५

जपहोमादिकं कर्म स मुनिर्याति तत्पदम् ।
सगुणं निर्गुणं वापि नारायणमजं विभुम् ॥

लक्ष्मीपतिं रघुपतिं कृष्णं विष्णुं हरिं शिवम् ।
ध्यात्वा कर्मानपेक्ष्याऽथ यान्त्येव परमं पदम् ॥

ध्यानेन कर्मणा चैव योऽभ्यसेद्योगमन्वहम् ।
स यात्येवोत्तमस्थानं यद्गत्वा न निवर्तते ॥

तस्मात्सकलयत्नेन योगेन भव तपोनिधे ।
व्रतोपवासनियमैर्जन्मकोटिष्वनुष्ठितैः ॥

यत्नैश्च विविधैस्सम्यग्भक्तिर्नारायणे दृढा ।
संसारसागरस्यास्य पारं प्राप्तुं यदीच्छसि ॥ -८०

कर्मयोगेऽथवा ज्ञानयोगे प्रविश सत्वरम् ।
सर्वदुःखाभिभूतानां भ्रान्तानां हतचेतसाम् ॥

त्राता स एक एवात्र संसारे श्रीपतिः स्वयम् ।
स एव जानकीनाथो ब्रह्मरूपी जगत्पतिः ॥

त्राता संसारमग्नानां तारको नान्य उच्यते ।
प्रक्षीणाशेषपापानां ज्ञानयोगः प्रशस्यते ॥

कर्मयोगस्तु सर्वेषां भवेन्निर्वाण साधनम् ।
ज्ञानैककर्मणा वापि देवं नारायणं विभुम् ॥

आदिमध्यान्तरहितं रामं सम्यगिहार्चय ।
जनकैतच्छरीरं हि क्षयिष्ण्वपि पतिष्णु च ॥ —८५

त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्रमयं नृप ।
शास्त्रोपपादितं सम्यगनुतिष्ठार्तिनाशनम् ॥

कर्मयोगं तथा ज्ञानयोगं वा योगवित्तमः ।
करिष्यामि न कर्तव्यमिति कश्चिद्विचिन्तयेत् ॥

स्वस्यास्ये स्वयमेवार्य मन्दो धूलीं हतः क्षिपेत् ।
श्वः कार्यमद्य कुर्वीत मध्याह्ने चापराह्णिकम् ॥

सायन्तनं च मध्याह्ने विघ्नबाहुल्यतो नृप ।
सम्यग्वैराग्यनिष्ठस्य परतत्वस्थचेतसः ॥

छर्दितान्ननिभाः सर्वे दृश्यन्ते विषयाः स्वयम् ।
शरीरित्वमपिप्रायो विरक्तस्यैव शोभयेत् ॥ —९०

विरक्तस्य तदप्याशु त्याज्यं सर्वात्मना भवेत् ।
अत्यमेध्यं शरीरस्थं विष्टामध्यगतादपि ॥

तत्वनिष्ठो विशेषेण प्राणिनं मनुते हतम् ।
शरीरेऽस्मिन्नमेध्यत्वमीदृशं नाम देहिनाम् ॥

त्वगाद्येकैकसंस्पर्शे ज्ञानमेव विशोधनम् ।
शृगालैरपि गृध्रैश्च नीयते यद्यहो विधिः ॥

विधत्ते चर्मणा क्लेशं शरीराणि शरीरिणाम् ।
एतत्प्रतिपदं सम्यगापदां पदमीदृशम् ॥

ततः शरीरं विश्वस्य य उदास्ते स मूढधीः ।
दुःखैकानुभवार्थाय विधिनैतत्कृतं पुनः ॥ —९५

परमार्थविदप्येतद्वीक्षमाणो न वीक्ष्यते ।
व्यामोहितो जगत्यस्मिन् माययैव महात्मनः ॥

विष्णोस्तत्वविदप्याशु देहान्तरमुपैत्यहो ।
सुखं मिथ्या दुःखमेव भूयोऽप्यनुभवत्ययम् ॥

आपद्यकिञ्चनो भूत्वा कुटुम्बभरणाकुलः ।
भ्रमत्येवातुरो भूत्वा दुःखावर्ते पुनः पुनः ॥

दुःखमित्यपि जानाति दुःखं नैव महीपते ।
सर्वात्मना परित्याज्ये सर्वेषामपि दुःखदे ॥

प्रविशेत्को भवेन्मन्दो हताप्याशु पुनर्हतः ।
न किञ्चिदपि कर्मात्र निष्फलं विद्यते मुने ॥ —१००

तच्चेत्पुनः प्रवेशाय भवेन्मुक्तोऽपि बध्यते ।
ततो न कर्म कर्तव्यं फलार्थित्वेन सूरिभिः ॥

यदि कुर्युः फलं तत्तदनपेक्ष्यार्चनादिकम् ।
न सञ्चरन्ति संसारे दुःखावर्तविमोहिताः ॥

ईश्वरोऽपि समुद्धर्तुं शक्तो भवति नान्यथा ।
योगाभ्यासरतो वापि गुरुशुश्रूषणेरतः ॥
श्रीमदष्टाक्षरेणैव ब्रह्म प्राप्नोति शाश्वतम् ॥

॥ इति श्रीमदनुत्तरब्रह्मतत्त्वरहस्ये दाशरथीये तन्त्रे
वेदार्थसंग्रहे त्रिचत्वारिंशोऽध्यायः ॥

॥ अथ चतुश्चत्वारिंशोऽध्यायः ॥

राजोवाच —

श्रुतिस्मृतिपुराणार्थनिश्चयज्ञानवित्तम ।
संशयं छिन्धि पृच्छामि तातातानुग्रहं कुरु ॥

आत्मानुभवरूपेण साक्षात्कारेण केवलम् ।
पुनरावृत्तिरहितं शाश्वतं ब्रह्म यात्यपि ॥

इत्यादि श्रुतितत्त्वज्ञाः प्रवदन्ति मनीषिणः ।
श्रीमताभिहितं ब्रह्मविद्यानुष्ठानतत्पराः ॥

भुक्तिं मुक्तिं च विन्दन्ति कथमेतन्निबोधय ।
निवृत्तिरेव मुक्तिस्तु प्रवृत्तिर्भुक्तिरुच्यते ॥

प्राणायामैस्तदभ्यस्य पूरकाद्यैश्च वायुभिः ॥
पूरक-कुम्भकौ वायू रेचकस्तु तृतीयकः ॥ ३८ ॥
येन व्यावर्तते वायुर्नासाग्रान्निःसरेद्वहिः ॥
पूरयेत् श्वासयोगेन पूरकं तद्विदो विदुः ॥ ३९ ॥
आपूर्य निश्चलीकृत्य यःकश्चिद्धार्यते निलः ॥
श्वासयोगं वदन्त्येनं कवयः कुम्भकं त्विति ॥
ब्रह्मध्यानसमायुक्तं वायुं यो न वहिर्नयेत् ॥ ४० ॥
कुम्भकः पवनः स स्याद्यो वहिर्नैव मुच्यते ॥
रेचकं तद्विदुस्तज्ञा रेच्यते यः शनैः शनैः ॥ ४१ ॥
न वेगाद्रेचयेद्वायुं सर्वथा विघ्नभाग् भवेत् ॥
मोचयेन्मन्दमन्दं तु वहिः स्यात्कुम्भितो यथा ॥ ४२ ॥
नासाग्रस्थितपाणिस्तु साशिरश्चालनक्षमम् ॥
अनिलं रेचयेद्योगी न मन्दं नातिवेगतः ॥ ४३ ॥
न ज्ञायतेऽनिलो यस्य निःसरन् नासिकाग्रतः ॥
यस्यास्ते कुम्भितोऽजस्रं प्राणयोगी स उच्यते ॥ ४४ ॥
दीर्घायुस्त्वं परं ज्ञानं समस्ता योगसिद्धयः ॥
देहे तस्याऽवतिष्ठन्ति प्राणो येन वशीकृतः ॥ ४५ ॥
यत्र तिष्ठति जीवःस्यान्निःसृतेमृत उच्यते ॥
स किन्न धार्यते प्राणो ब्रम्हाप्तिः साति यत्र तु ॥ ४६ ॥
प्राण एवायमात्मास्ते प्राणो देहस्य वाहकः ॥
शरीरान्निःसृते प्राणे नात्मा विग्रहवाहकः ॥ ४७ ॥
देहं त्यक्त्वा यदा जीवो वहिराकाशमास्थितः ॥
तदा निर्विषयो वायुर्भवेदत्र न संशयः ॥ ४८ ॥

---

१. C. reads द्वितीयकः for तृतीयकः. २. A. reads:—
श्वासयोगेन तं प्राहुः पूरकं तद्विदोऽनिलम् ।.

३. B. reads निर्गतो भयात् for विघ्नभाग्भवेत्; D. E. and F. also read B.; ४. A. reads स त्वीषघानलक्षमम्, B. स्वच्छयेघानलक्षमम्, C. स [illegible] चालनक्षयम्, D. सशिखश्चालनं क्षमम् and E. सस्कोपचलनक्षमम् all [illegible] शिरश्चालनक्षमम्. ५. B. and E. read प्राणयागी for प्राणयोगी. ६. [illegible] A. reads ज्ञ्यं for ज्ञानं. ७. C. reads प्राणायाम° for प्राणो येन. ८. [illegible] reads प्राणान् ब्रम्हा तिष्ठति यत्र तु for प्राणो ब्रम्हाप्तिः स हि यत्र तु. ९. B. [illegible] E. read निग्रह° for विग्रह°.

तदा स सर्वदेहेषु नासाग्रमास्थितः शिवः ॥
प्रत्यक्षः सर्वभूतानां तिष्ठते न च लक्ष्यते ॥ ४९ ॥

यदा न श्वसते वायुस्तदा निष्कलमुच्यते ॥
नाभिसंस्थं तु विज्ञाय जन्मबन्धाद्विमुच्यते ॥ ५० ॥

देहस्थः सर्वसत्वानां स जीवति शृणोति च ॥
धर्माधर्मैस्त्ववष्टब्धो देहे देहे व्यवस्थितः ॥ ५१ ॥

स हृत्पंकजसंस्थस्तु अध ऊर्ध्वं प्रधावति ॥
धर्माधर्ममहापाशैर्गृहीतःसन् प्रवर्तते ॥ ५२ ॥

उर्ध्वमुच्छ्वसते यावत्प्राणाख्यस्तु समीरणः ॥
तावत्प्राणस्तु विज्ञेयो यावन्नासाग्रमास्थितः ॥ ५३ ॥

अग्रस्थं निष्कलं ब्रह्म यावन्न श्वसिति द्विज ॥
श्वासेन हि समायोगादाकाशात्पुनरागतः ॥ ५५ ॥

नासारन्ध्रसमालीनस्तदा निष्फलमुच्यते ॥
स जीव इति विख्यातः स विष्णुः स महेश्वरः ॥ ५६ ॥

ध्यातव्या देवतास्तत्र क्रमेण पूरकादिषु ॥
विष्णु-ब्रह्मेश्वरास्तेषु स्थानेषु स्थानवित्द्विजैः ॥ ५७ ॥

नीलपङ्कजवत् श्याममासीनं नाभिमध्यतः ॥
महात्मानं चतुर्बाहुं पूरके तु हरिं स्मरेत् ॥ ५८ ॥

हृत्पद्मे कुम्भके ध्यायेद् ब्रह्माणं पङ्कजासनम् ॥
रक्तेन्दीवरवर्णाभं चतुर्वक्त्रं पितामहम् ॥ ५९ ॥

रेचके शङ्करं ध्यायेल्ललाटस्थं त्रिशूलिनम् ॥
शुद्धस्फटिकसङ्काशं संसारार्णवतारकम् ॥ ६० ॥

एवं श्वसनसंरोधाद्देवतात्रयचिन्तनात् ॥
अग्नि-वाय्वंभसंयोगादन्तरं शुध्यते त्रिभिः ॥ ६१ ॥

---

१. A. reads निःकलम् for निष्कलम्. F. also reads as A.; २. B. and E. read महापाशैर्गृहीतःसन्प्रवर्तते for °स्त्ववष्टब्धो देहेदेहे व्यवस्थितः. ३. B. E. read सकृत्पंकज° for स हृत्पंक ज.° ४. B. reads निष्फलं for निष्कलं. ५. Only B. and E. read स जीवति इति ख्यातः for स जीव इति विख्यातः. ६. A. reads ध्यानकृत्° for स्थानावित्° and B. ध्यानेषु विधिवत् for स्थानेषु स्थानवित्°; while C. reads स्थावरा for स्थानावित्°. E. reads the same as B.

निरोधादभवद्वायुस्तस्मादग्निस्ततो जलम् ॥
इति त्रिदेवतायोगात् शुद्ध्यतेऽन्तः पुनर्द्विजाः ॥ ६२ ॥

व्योहृतिप्रणवोपेताः प्राणायामास्तु षोडश ॥
अपि भ्रूणहणं मासात्पुनन्त्यहरहः कृताः ॥ ६३ ॥

प्रातरह्नि च सायं च पूरकं ब्रह्मणोऽन्तिकम् ॥
रेचकेन तृतीयेन प्राप्नुयात्परमं पदम् ॥ ६४ ॥

न प्राणेनाप्यपानेन वायुं वेगेन रेचयेत् ॥
प्रागुक्तेन प्रयोगेण मोचयेत्प्राणसंयमी ॥ ६५ ॥

शरीरं च शिरोग्रीवा विद्वान् पाणी च पद्वयम् ॥
सर्वाङ्गं निश्चलं धार्यमापूर्यसर्वनाडिकाः ॥ ६६ ॥

संवृत्याङ्गानि सर्वाणि कूर्मवद्ध्यानकृद्द्विजः ॥
बद्धासनोऽचलाङ्गस्तु कुर्यादसुनिरोधनम् ॥ ६७ ॥

कृत्वा सुसंयमं विद्वान्विधिवत्समुपस्पृशेत् ॥
अन्तरं शुध्यते यस्मात्तस्मादाचमनं स्मृतम् ॥ ६८ ॥

इत्युक्तः प्राणसंरोधो देवतात्रयसंयुतः ॥
त्रिमात्रः प्रणवस्तत्र ध्यातव्यः सर्वयोगिभिः ॥ ६९ ॥

स्मर्यमाणस्य यातस्य विश्रान्तिःस्यादमात्रके ॥
तत्परं निष्कलं ज्ञानं तद्विदुर्ब्रह्मचिन्तकाः ॥ ७० ॥

मृदुमध्यान्तसत्वाच्च स्थूलसूक्ष्मानुभावतः ॥
त्रिविधं प्राणसंरोधं विदुस्तत्तत्ववेदिनः ॥ ७१ ॥

क्रियमाणो विशेषेण प्रत्याहारोऽयमुच्यते ॥
सर्वं प्रागुक्तमेवास्य विशेषं तु निबोधत ॥ ७२ ॥

---

१. C. reads भवन्ति for व्याहृति°. २. A. B. D. E. and F. read अहश्च for अन्हि च. ३. B. reads उज्वलाङ्गः for अचलाङ्गः. E. also reads the same. ४. C. reads सुसंचयं for सुसंयमं and विधिस्तुः for विधिवत् respectively. ५. A. reads अमात्रिके for अमात्रके. ६. C. and D. read निष्फलं for निष्कलं. ७. B. D. E. and F. read—

मृदुमध्यस्थसत्वाच स्थूललक्ष्यानुभावतः ।;

while C. reads °मध्योत्तमसत्वाच for मध्यान्तसत्वाच.

बाह्यं वायुं यथोत्थाप्य आकृष्य यच्छनैः शनैः ॥
निरुन्ध्याद्विधिवद्योगी प्रत्याहारः स उच्यते ॥ ७३ ॥

व्याहृत्याऽभिमुखीकृत्य खानि यत्र निरुध्य च ॥
चिन्तयेन्निश्चलीकृत्य प्रत्याहारः स उच्यते ॥ ७४ ॥

प्राणाद्या वायवः स्थूलाः सङ्कल्पाद्यास्तथाऽणवः ॥
निरोद्धव्या दशाप्येते प्राणसंयमकारिभिः ॥ ७५ ॥

वायुरेकोऽपि देहस्थः क्रियाभेदेन भिद्यते ॥
प्रकर्षेणासमन्ताच्च नयनादिक्रियाः स्मृताः ॥ ७६ ॥

भविष्या-ऽतीतकालेभ्यः कर्मभ्यश्चांशु संयमी ॥
सर्वानिलांस्तथा खानि निरुध्यैकत्र धारयेत् ॥
स धीमान्वेदविद्विद्वान् स योगी ब्रह्मवित्तमः ॥ ७७ ॥

स्थानं द्विजन्मा विधिवत्त्वजस्त्रमभ्यस्य संयाति विधेःपरस्य ॥
पराशरोक्तैर्बहुभिःप्रकारैरुक्तो विधिः प्राणनिरोधनस्य ॥ ७८ ॥

प्रत्याहारो विशेषस्तु प्रोक्तस्तस्यैव वित्तमाः ॥
यदभ्यस्याप्नुयाद्ब्रह्म सर्वदानंदमव्ययम् ॥ ८० ॥

एतैस्तु पुनरावृत्तिः कदाचिदिह दृश्यते ॥
संसृतिं नाप्नुयायेन शक्तिसूनुस्तदब्रवीत् ॥ ८१ ॥

उक्तस्तु संयमः पूर्वं त्रिविधो मलनाशनः ॥
निबोधत चतुर्थं तु ध्यानं प्रणववेधसः ॥ ८२ ॥

विधिवत्प्रणवध्यानमेकाचित्तस्तु योऽभ्यसेत् ॥
ब्रम्हाभ्येति स मुक्तात्मा स योगी योगिनां वरः ॥ ८३ ॥

---

१. A. reads यथोत्साहं for यथोत्थाप्य. B. E. and F. also read th same. २. Only F. reads व्याहृत्यभिमुखोऽन्यत्र for व्याहृत्याऽभिमुखीकृ ३. Only C. reads प्राणाद्यवयवाः for प्राणाद्या वायवः. ४. C. read सुवायवः for तथाऽणवः. ५. A. reads दशस्वेते and D. तथाप्येते for दशाप्येते while C. reads दृशोऽप्येते. ६. C. reads न यानादि° for नयनादि°. ७. B and E. read अनुसंयमी and F. reads आत्मसंयमी for शुसंयमी; while C reads भस्तु संयमी. ८. B. E. read नितान्तं for अजस्रं. ९. B. read संस्मृतं, and C. संस्मृतिं for संसृतिं. १०. Only C. reads विधिहीनो हि नाशन for त्रिविधो मलनाशनः.

तद्ध्यानमसुसंरोधस्तुर्यं सम्यगिहोच्यते ॥
तदन्यथानपेक्षं च चित्तक्षेपविवर्जितम् ॥ ८४ ॥
चतुर्णामाश्रमाणां तु भेदमुक्त्वा पराशरः ॥
अथाब्रवीद्द्विजा योगं शृणुध्वं पापनाशनम् ॥ ८५ ॥
तच्छान्तं निर्मलं शुद्धं ध्यातव्यं हृत्सरोरुहे ॥
तद्वरेण्यं तद्वरेण्यं च बीजं मुक्तेस्तदुच्यते ॥ ८६ ॥
सञ्चिन्त्य व्याहृतीः सप्त प्रणवाद्यास्तदन्तकाः ॥
सम्यगुक्तमिदं ध्यात्वा परब्रह्मणि योजयेत् ॥ ८७ ॥
हुतभुक् पवनो जीवस्त्रयोऽप्येते हृदि स्थिताः ॥
एतत्सर्वं तु चैकत्र संस्मरेत् ध्यानकृद्द्विजः ॥ ८८ ॥
ॐकारवर्त्मनालेन उद्धृत्योपरि योजयेत् ॥
योजयेत्सर्वमप्येतत्सिद्धयोगी स उच्यते ॥ ८९ ॥
शून्यभूतस्तु यत्प्राणः श्वासं जीवेति संज्ञितम् ॥
यस्मादुत्पद्यते श्वासः पुनस्तत्र निवेशयेत् ॥ ९० ॥
आद्यं तं प्रणवं विद्वान् घटाकाशवदभ्यसेत् ॥ ९१ ॥
स पश्येन्निर्मलं शुद्धं पुरुषं तमसंशयम् ॥
अन्तर्वक्त्रो बहिः सर्पन् त्सर्पवत्कुण्डलाकृतिः ॥ ९२ ॥
ध्यातव्यः प्रणवस्तत्र मध्यगं धाम संस्मरेत् ॥
स मात्रां स च विन्दुश्च तदेव परमं पदम् ॥ ९३ ॥
तदभ्यस्यं हि तज्ज्ञात्वा स तस्मिन्नेव लीयते ॥
प्रथमं प्रणवो ऽव्यक्तः त्र्यक्षरः परमाक्षरः ॥
सर्वज्ञत्वमवाप्नोति प्राप्नोति परमं पदम् ॥ ९४ ॥

---

१. B. E. F. read तदन्यार्थानपेक्षं for तदन्यथानपेक्षं. २. [illegible] whole verse is not mentioned in A. C. D. and F.; ३. B [illegible] read ओंकारवर्त्मना तेन; while C. reads ओंकारावर्तनालेन for ओंक[illegible] वर्त्मनालेन. ४. C. reads ह्रासजीवितसंज्ञितम्. ५. C. reads निर्गलं [illegible] निर्मलं. ६. B. E. and F. read मध्यमं for मध्यगं. ७. A. reads स धाम[illegible] C. reads स ध्यातात्मा, for समात्रा स. ८. B. and E. read तदर्थस्य [illegible] तदभ्यस्यं and D. तदभ्यसन्. ९. B. reads प्रथमाक्षरः for परमाक्षरः. १०. [illegible] reads रुजत्वमन्यदाप्नोति for सर्वज्ञत्वमवाप्नोति.

पञ्चमं तु पदं विद्वान् तत्सार्धमवतिष्ठते ॥
नादबिन्दुसमभ्यासात् प्राप्नुयात्परमं पदम् ॥ ९५ ॥
पदं प्राप्य निवर्तन्ते धाम स्वं स्वान्तमेव च ॥
सर्वेऽप्यमातृका वर्णाः पुनस्तत्र विशन्ति च ॥ ९६ ॥
वर्णात्मा सप्तवर्णस्तु समस्तवर्णजीवनम् ॥
न दीर्घं नापि ह्रस्वं च न घोषं नाप्यघोषवत् ॥ ९७ ॥
न विसर्गं न तद्धीनं नानुस्वारविपर्ययः ॥
हृदाकाशनिविष्टं यदचलत्वं प्रयाति चेत् ॥ ९८ ॥
ज्ञानयोगे त्रिषष्टिर्वै विभ्रतीत्यक्षराणि तु ॥
तत्पदं योगिभिर्ध्येयं व्योम यस्य तु मध्यगम् ॥ ९९ ॥
व्योमान्तं सततं ध्येयमनंताकाशमव्ययम् ॥
चिन्तयामो वयं यद्वै धियो यो नः प्रचोदयात् ॥ १०० ॥
एतद्ब्रह्म त्रयीरूपमेतद्भर्गस्त्रयीमयम् ॥
एषा सा परमा मुक्तिर्गत्वा यां न निवर्तते ॥ १०१ ॥
आदाय चापं प्रणवं च बाणं सन्धाय चात्मानमवेक्ष्य लक्ष्यम् ॥
स तद्विधिं तत्र निवेश्य योगी प्राप्नोति नित्यं स तु मुक्तिकामः ॥ १०२ ॥
उद्देशतः किञ्चिदवादि विद्वन् ध्यानं विधेयं तत्ध्वनिपूर्वकस्य ॥
सर्वं विधानं विधिवच्च सम्यक् वक्तुं समर्थो विधिरेव चास्य ॥ १०३ ॥

इति बृहत्पराशरे प्रणवध्यानविधिः ॥

अथान्यत्सम्प्रवक्ष्यामि विधानं ध्यानकर्मणाम् ॥
नानामंत्रोदितं कार्यं परब्रह्माप्तिकारकम् ॥ १०४ ॥

---

१. A. C. D. F. read तन्तुर्भन्यवतिष्ठते for तत्सार्धमवतिष्ठते. २ .A. reads भास्त्यथान्त्यमेव च, and B. यदि for पदं, C. यत्प्राप्य न for पदं प्राप्य and F. यदि प्राप्य निवर्तन्ते भास्वयः स्वान्तमेव च. ३. C. reads सर्वेभ्यो for सर्वेऽप्य° ४. A. reads लक्ष्योनं for तद्धीनं. ५. A. reads भवन्ति for विभ्रति. B. D. and F. also read as A.; while E. reads विभर्ति for the original. ६. A. reads विविश्य; while C. reads प्रविश्य for निवेश्य. ७. A. B. D. E. F. read योगी for नित्यं. ८. A. D. F. read °धाम for °कामः. ९. A. D. F. read उद्दिश्यतः for उद्देशतः; while C. उद्देशेन for उद्देशतः. १०. B. D. C. E. and F. read विधेयं for विधेयंत्. ११. B. D. E. F. read °विभुश्रितं for °मनोश्रितं.

श्रीभैरव उवाच ॥

शृणु देवि प्रवक्षामि लक्षणं जपमुत्तमं।
जप ध्यान परा शक्ति नादमार्गा नियोजितं ॥

जपस्य कीदृशं जपं जपयति। एकाशते त्योयवत् सहस्रं संख्याता
वर्जपयति। ध्यानकीदृशं। यत्र करण कलापं न किंचित् मन्त्र तं स्मरेत्।

यन्न स्मरेत्। शरीरण स्मरेत्। लज्जा शंका भय न स्मरेत्। एतत् काष्टी भूतं।

१४ब)

शीतातपक्षुत्पिपासा निर्विकल्प न किञ्चिन भवेद्ध्यानं। अन्यच्च किं स्वसु
*?।

कन्दाकुण्डलिनी यावत् कुण्डल्यान् केशरं भवेत्।
केशरार्कर्ण देशे तु कण्ठा भ्रुमध्य संस्थितः ॥

भ्रूणमध्या द्वादशान्तं तु द्वादशान्त। षोडशान्तकं। सम्वत्
कुटिलाकारा नववर्णा च घटयेत्। सर्पवत् कुण्डलनी। कुटिलात्। अगम्यात्।
नववर्णा। नव द्वार घटयेत्। पुटीकृतः स कोवः। कन्दाकुण्डलनी पचत्।
कुण्डल्या * * *?। हृदयात् कण्ठाकण्ठस्य भ्रुमध्य।
भ्रुमध्या द्वादशान्तं। द्वादशान्तं। द्वादशान्ता। शोडशान्तं
तदूर्ध्वेन्निरालम्वं तिष्टति। शनैः शनैः *? तनीयं। प्राणशक्तिः
यद्वत्। उदापन काल। तथा शुद्ध स्फटिक निर्मल शिखि प्रज्वलंतं चिन्तयेत्।
अन्यच्च। इन्द्र गोपक संकासं तालुरन्ध्राद् विनिर्गतं।

१५अ)

ब्रह्मनाडि प्रयोगेन प्राणशक्तिस्तु चिन्तयेत्।

ओं हां कलादिक्षित्यन्ततत्वेभ्यो नमः। ओं हां
कलादिक्षित्यन्ततत्वादिपेभ्यो ज्ञानविन्द्वादिभ्यो नमः। ओं हां
कलादिक्षित्यन्ततत्वाधिपा यूयम् अस्य स्वकार्यं कुरुत कुरुत
नमः। एवं तत्वादिविन्यस्य नाड्यादीन् विन्यसेद्यथा उद्गाता
कन्दमध्याच्च कुण्डलीनाभिमाश्रता

p. 880)

नाभेरूर्ध्वं हृदिस्थाने पद्मं पद्मवदास्थितम्।
तन्मध्यकर्णिकासंस्थं सूर्यसोमाग्निमण्डलम्॥

तन्मध्ये चित्तयेद्देवमों हां हं हेति नामतः।
तदधिष्ठेयमीशानं सूर्यकोटिसमप्रभम्॥

सुषुम्ना मध्यमेङ्गुष्ठाद्यावद्ब्रह्मवलिं गता। इडानडीं
पुटे वामे दक्षिणे पिङ्गला स्थिता॥

गान्धारि दक्षिणे नेत्रे हस्ति जिह्वा च वामके। पूषा
दक्षिणकर्णे स्याद्वामकर्णे यशस्वती॥

मेढ्रेत्वलंपूषानाडी कुहूनाडी गुदे स्थिता। शङ्खिनी
नाभिमध्ये स्यादास्ये प्राणादि वायवः॥

प्राणोपानः समानस्यामुदानोव्यान एव च। नागः कूर्मः
कृकरेको देवदत्तो धनञ्जयः॥

ओं हां सुपुम्नायै नमः। ओं हां सुपुम्ना प्रवाहाय प्राण
वायवे नमः।

इत्यादयो मन्त्राः। यद्वादशनाडीभ्यो दशप्राणेभ्यो नम इति
वा मन्त्राः। सर्वाधिष्ठितवामायां कालं च नियतिं न्यसेत्।

ओं हां मायायै नमः। ओं हां मायाधिपाय विपणाय नमः
। ओं हां मायाधिपत्वमस्य विपयेकरभ्यतां कुरु कुरु नमः।

तामशीं सर्वकृत्यानां साक्षिणीं मध्यवर्तिनीं।
योजनानां चतुःकोटि सतस्यामलमण्डले ॥

अथान्यामर्द्धरात्रे तु स्यामं वा रूपवर्जितां।
द्वादशान्ते परे तत्वे निविष्टां व्यापिनी शिवां ॥

एवं काल क्रमात् संध्या सञ्चिन्त्य त्रिगुणादिकां।
तत्प्रभा मण्डलाभोग प्रविष्टां स्वतन्त्रं? स्मरेत् ॥

कृत्वाम्भः सक्तशे वाम पाणोर्दक्षेण त्रिर्हृदा अपरोत्तरसंचारन्तदधो
गलितं जलमूद्धिर्न संहितया प्राग्वदा ध्यायं कक्षिपेदिदं ॥

५ब)

मार्जनंस्तत्पुनस्तोयमेवसिष्टं तु दक्षिणे।
करेस्थितं धर्मरूपं शुभं पूरक वायुना ॥

वामनाशा प्रविष्ठन्तु ततः कुम्भक योगतः।

अन्तःपापक्षयं कृत्वा तत्पापं कज्जलोपमं ॥

रेचकेन तु निस्सार्य दक्षणासा पुटेन तु।
हस्ते विभाव्य चास्त्रेण कूँ फडन्तेन ताडयेत् ॥

क्ष?लद्वंजलियांस्यादद्यमर्पस्स्वथा चमैत्।
रेचकोजश्रनिःस्वासात् पूरकस्तन्निरोधकः ॥

न तदाति न गृह्णाति कुम्भकः। पूर्णकुम्भवत्।

अर्घाञ्जलिं तु सूर्याभिमुखं मूलेन सम्भवे।
स्वाहान्तेन समुत्थाय दत्वेनमुपविधा त्रिलोचनां ॥

पद्मोपरि ध्वशुक्लसौ दहैकवक्षकदंतिवप्रसृभ(?) दक्षां
हि वामाग्राञ्जदुलस्थितां।

Scanned by CamScanner

भूतशुद्धिं पुराकुर्यात् विधिनानेन दोहकः।
यादिवान्तैर्विधानेन पूरककुम्भकरेचकैः॥

इडया पुरयेद्वायुं श्वासनाड्याः शनैः शनैः।
मात्रया षोडशेनैव ततः कुर्याच्च कुम्भकम्॥

यंमन्त्रेण चतुःषष्ट्या यथा कुम्भं ततः परम्।
सुषुम्नायां कुम्भयित्वा पिङ्गलायान्तु रेचयेत्?॥

चतुर्धाचन्द्र सह जप्त्वा रंवीजेनैव प्लावनी।
श्वाससंहरणा नाड्या त्यजेद्वायुं शनैः शनैः॥

पुरा कुक्षिगतः पापं चिन्तनीयो मनीषिभिः।
(p. 10) ब्रह्महत्या शिरङ्कञ्च स्वर्णस्तेय भुजद्वयम्॥

सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम्।
तत् संसर्गात् पदद्वन्द्व मङ्गप्रत्यङ्गपातकम्॥

उपपातकरोमाणं रक्तश्मश्रुविलोचनम्।
खड्गचर्मधरं वामाङ्गुष्ठपरिमाणकम्॥

अधोमुखः कृष्णवर्णं वामकुक्षौ विचिन्तयेत्।
एषु ये ऋषयः प्रोक्तास्तान् प्रवक्ष्याम्यनुक्रमात्॥

पुरकादिषु देवेशि ऋषयः सर्वसम्मताः।
किस्कन्दः कश्यपश्चैव हिरण्यगर्भस्ततः परम्॥

अस्य पापस्य देहस्य अन्तर्यामी ऋषिः स्मृतः।
एवं ध्यात्वा वह्निनाडी दाहयेत् सकलां तनुम्॥

प्राणायामं ततः कुर्यात् भूतशुद्धिरनन्तरम्।
भूतानां शोधनं कृत्वा भावना तु तथा दिशेत्॥

प्रसाद्यान्येषूदङ्मुख उपविश्य पूर्वोक्तक्रमेण करन्यासं कृत्वा

पूर्वमन्तर्गतमशुद्धं वायुं

पूरककुम्भकरेचकपूर्वकप्राणायामेनास्त्रमन्त्रेणोत्सार्य

बाह्येन शिवाधिष्ठितेन वायुनोदरं प्रपूर्य

चरणाङ्गुष्ठयोर्युग्मात् प्रभृति यावन्मूलाधारं द्विधा

भूतां तत ऊर्ध्वं द्वादशान्तमेकीभूतां

p. 81)

सुषुम्नां शिवधामसंज्ञितां शरीरान्तरालविद्युल्लेखामिव

भास्वरां चिन्तयेत्। तस्यान्तर्बहिः परमेश्वरस्य नित्याधिष्ठेयां

कुण्डलिनीं शक्तिं व्यापिनीं चिन्तयेत्। तस्या सुषुम्नाया मध्ये

हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रेषु अधोमुखमवस्थितं

पद्मवृन्दं पूरकेण पूरितं सद्वित् सकुम्भकेन रोधितमुत्तम्भितं

रेचकेनाक्षिप्तमूर्ध्वमुखं भवति ततो मूधारप्रदेशे

दीपशिखोपममन्ध्यायं शिखावीजं शास्त्रमुच्चार्य फडन्तेन

पूरककुम्भकरेचकपूर्वेण यावच्छक्तिमात्रा कल्पितेन

प्राणायामेन हृत्कण्ठतालुभ्रूमध्यब्रह्मविलद्वादशान्तेषु

रन्ध्रीन् दक्षनासापुटेन वायुं विमुञ्चन् प्रतिनिवृत्त्य पुनरपि

शिखावीजं पूर्वप्रदेशे ध्यानपूर्वमुच्चार्य तस्मिन् मनः

सन्निवेश्य तद्वृत्तिरूपमवधानं च तत्र

निक्षिप्यापादमस्तकशरीरवर्तिनं पुर्यष्टकाविच्छिन्नमात्मानं

नक्षत्राकारं दीपशिखाकार * * * स्योपरि प्राणवृत्तिनिरोधवशेन

निक्षिप्य तत्संस्पर्शात् शुद्धं ध्यात्वा उद्घाटितेन प्राणवथा

एकोद्घातवशेन द्वादशान्तपद्मस्थे शिवे

p. 82)

रश्मिमात्रवियोगेन संयोज्य पृथिव्यादिबिन्दुपर्यन्तं

षट्त्रिंशत्तत्त्वानि स्वकारणलयक्रमेण शोधयेत्। तथा हि

गन्धे भूः सलिलं रसे हुतवहो रूपे मरुत्स्पर्शने

शब्दे स्यात् खमहं कृतौ पुनरिमास्तन्मातृकास्तामसे। कर्माक्षाणि

च राजसे सह मनोबुद्धीन्द्रियैः सात्त्विके बुद्धौ तच्च गुणेषु सा

गुणगणो व्यक्ते लयं गच्छति।

पूर्वमन्तर्गतमशुद्धं वायुं
पूरककुम्भकरेचकपूर्वकप्राणायामेनास्त्रमन्त्रेणोत्सार्य
बाह्येन शिवाधिष्ठितेन वायुनोदरं प्रपूर्य
चरणाङ्गुष्ठयोर्युग्मात् प्रभृति यावन्मूलाधारं द्विधा
भूतां तत ऊर्ध्वं द्वादशान्तमेकीभूतां

p. 81)

सुषुम्नां शिवधामसंज्ञितां शरीरान्तरालविद्युल्लेखामिव
भास्वरां चिन्तयेत्। तस्यान्तर्बहिः परमेश्वरस्य नित्याधिष्ठेयां
कुण्डलिनीं शक्तिं व्यापिनीं चिन्तयेत्। तस्या सुषुम्नाया मध्ये
हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रेषु अधोमुखमवस्थितं
पद्मवृन्दं पूरकेण पूरितं सद्वित् सकुम्भकेन रोधितमुत्तम्भितं
रेचकेनाक्षिप्तमूर्ध्वमुखं भवति ततो मूधारप्रदेशे
दीपशिखोपममन्ध्यायं शिखाबीजं शास्त्रमुच्चार्य फडन्तेन
पूरककुम्भकरेचकपूर्वेण यावच्छक्तिमात्रा कल्पितेन

प्राणायामेन हृत्कण्ठतालुभ्रूमध्यब्रह्मबिलद्वादशान्तेषु
रन्ध्रीन् दक्षनासापुटेन वायुं विमुञ्चन् प्रतिनिवृत्त्य पुनरपि
शिखाबीजं पूर्वप्रदेशे ध्यानपूर्वमुच्चार्य तस्मिन् मनः
सन्निवेश्य तद्वृत्तिरूपमवधानं च तत्र
निक्षिप्यापादमस्तकशरीरवर्तिनं पुर्यष्टकाविच्छिन्नमात्मानं
नक्षत्राकारं दीपशिखाकार * * * स्योपरि प्राणवृत्तिनिरोधवशेन
निक्षिप्य तत्संस्पर्शात् शुद्धं ध्यात्वा उद्घाटितेन प्राणवथा
एकोद्घातवशेन द्वादशान्तपद्मस्थे शिवे

p. 82)

रश्मिमात्रवियोगेन संयोज्य पृथिव्यादिविन्दुपर्यन्तं
षट्त्रिंशत्तत्त्वानि स्वकारणलयक्रमेण शोधयेत्। तथा हि

गन्धे भूः सलिलं रसे हुतवहो रूपे मरुत्स्पर्शने

शब्दे स्यात् खमहं कृतौ पुनरिमास्तन्मातृकास्तामसे। कर्माक्षाणि
च राजसे सह मनोबुद्धीन्द्रियैः सात्त्विके बुद्धौ तच्च गुणेषु सा
गुणगणो व्यक्ते लयं गच्छति।

पूर्वमन्तर्गतमशुद्धं वायुं
पूरककुम्भकरेचकपूर्वकप्राणायामेनास्त्रमन्त्रेणोत्सार्य
बाह्येन शिवाधिष्ठितेन वायुनोदरं प्रपूर्य
चरणाङ्गुष्ठयोर्युग्मात् प्रभृति यावन्मूलाधारं द्विधा
भूतां तत ऊर्ध्वं द्वादशान्तमेकीभूतां

p. 81)

सुषुम्नां शिवधामसंज्ञितां शरीरान्तरालविद्युल्लेखामिव
भास्वरां चिन्तयेत्। तस्यान्तर्बहिः परमेश्वरस्य नित्याधिष्ठेयां
कुण्डलिनीं शक्तिं व्यापिनीं चिन्तयेत्। तस्या सुषुम्नाया मध्ये
हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रेषु अधोमुखमवस्थितं
पद्मबृन्दं पूरकेण पूरितं सद्वित् सकुम्भकेन रोधितमुत्तम्भितं
रेचकेनाक्षिप्तमूर्ध्वमुखं भवति ततो मूधारप्रदेशे
दीपशिखोपममनध्यायं शिखाबीजं शास्त्रमुच्चार्य फडन्तेन
पूरककुम्भकरेचकपूर्वेण यावच्छक्तिमात्रा कल्पितेन

प्राणायामेन हृत्कण्ठतालुभ्रूमध्यब्रह्मबिलद्वादशान्तेषु
रन्ध्रीन् दक्षनासापुटेन वायुं विमुञ्चन् प्रतिनिवृत्त्य पुनरपि
शिखाबीजं पूर्वप्रदेशे ध्यानपूर्वमुच्चार्य तस्मिन् मनः
सन्निवेश्य तद्वृत्तिरूपमवधानं च तत्र
निक्षिप्यापादमस्तकशरीरवर्तिनं पुर्यष्टकाविच्छिन्नमात्मानं
नक्षत्राकारं दीपशिखाकार * * * स्योपरि प्राणवृत्तिनिरोधवशेन
निक्षिप्य तत्संस्पर्शात् शुद्धं ध्यात्वा उद्घाटितेन प्राणवथा
एकोद्घातवशेन द्वादशान्तपद्मस्थे शिवे

p. 82)

रश्मिमात्रवियोगेन संयोज्य पृथिव्यादिबिन्दुपर्यन्तं
षट्त्रिंशत्तत्त्वानि स्वकारणलयक्रमेण शोधयेत्। तथा हि

गन्धे भूः सलिलं रसे हुतवहो रूपे मरुत्स्पर्शने

शब्दे स्यात् खमहं कृतौ पुनरिमास्तन्मातृकास्तामसे। कर्माक्षाणि
च राजसे सह मनोबुद्धीन्द्रियैः सात्त्विके बुद्धौ तच्च गुणेषु सा
गुणगणो व्यक्ते लयं गच्छति।

षष्ठमाह्निकम्

विवेक

कवलयितुं किल कालं कलयति यो व्यायतास्यतां सततम्।

जयति स सुजयः साक्षात्संसारपराकृतौ सजयः॥

इदानीमाणवोपायस्यैवाङ्गभूतमुच्चारादिप्रमेयचतुष्टयानन्तरोद्दिष्।
तं स्थानकल्पनाख्यं परमं प्रमेयं
द्वितीयार्धेनावतारयितुमुपक्रमते

स्थानप्रकल्पाख्यतया स्फुटस्तु बाह्योऽभ्युपायः प्रविविच्यतेऽथ॥ ६-
१॥

अथशब्दोऽधिकारे। तेनेतः प्रभृत्याद्वादशाह्निकं यत्किंचिदुच्यते
तत्सर्वं स्थानकल्पनाधिकारेण, इति पञ्चदशाह्निकात्प्रभृति
पुनरेतदेव बाह्यस्थण्डिलमण्डलाद्यधिकृत्याभिधीयते
इत्याग्रन्थपरिसमाप्तेः प्राधान्यात् स्थानकल्पनस्यैव सकलोऽयं
प्रपञ्च इति॥ १॥

तदेवाह

स्थानभेदस्त्रिधा प्रोक्तः प्राणे देहे बहिस्तथा।

एषामपि भेदान्तराणि सन्ति इत्याह

प्राणश्च पञ्चधा देहे द्विधा बाह्यान्तरत्वतः॥ ६-२॥

मण्डलं स्थण्डिलं पात्रमक्षसूत्रं सपुस्तकम्।

लिङ्गं तूरं पटः पुस्तं प्रतिमा मूर्तिरेव च॥ ६-३॥

इत्येकादशधा बाह्यं पुनस्तद् बहुधा भवेत्।

पुस्तं लेपादिनिर्मिताकृतिः। मूर्तिर्गुर्वादिसंबन्धिनी।
तदित्यानन्तर्याद् बाह्यं, पुनरित्येकादशविधत्वेऽपि। बहुधेति
मण्डलादीनामप्येकशूलत्रित्रिशूलादिक्रमेण नानात्वात्॥ ३॥

एवं स्वरूपतः स्थानभेदमभिधाय तद्गतं विधिमप्युपदेष्टुं

प्रतिजानीते

तत्र प्राणाश्रयं तावद्विधानमुपदिश्यते ॥ ६-४ ॥

तदेवाह

अध्वा समस्त एवायं षड्वधोऽप्यतिविस्तृतः ।

यो वक्ष्यते स एकत्र प्राणे तावत्प्रतिष्ठितः ॥ ६-५ ॥

वक्ष्यत इति भुवनाध्वप्रकाशनादौ । प्राण इति
सामान्यस्पन्दनात्मनि । यदुक्तम्

षङ्वधाध्वविभागस्तु प्राणैकत्र यथा स्थितः । (स्वटं । ४ ।२३२)

इति । विशिष्टे पुनः पदमन्त्रवर्णात्मा त्रिविध एव । यद्वक्ष्यति

षड्वधादध्वनः प्राच्यं यदेतत्त्रितयं पुनः ।

एष एव स कालाध्वा प्राणे स्पष्टं प्रतिष्ठितः ॥ (तंऽ । ६ ।३७)

इति ॥ ५ ॥

तदेवोपपादयति

अध्वनः कलनं यत्तत्क्रमाक्रमतया स्थितम्।

क्रमाक्रमौ हि चित्रैककलना भावगोचरे॥ ६-६॥

नन्वेतत्क्रमाक्रमात्मतयैव कस्मात्स्थितमित्याशङ्क्याह क्रमेत्यादि।
इह द्विधैव भावानामवभासः क्रमेणाक्रमेण च तत्र क्रमेण यथा
कार्यकारणादौ, अक्रमेण यथा चित्रज्ञानादौ। स च चित्रे
यदैकस्यैवैकदैव च कंचित्पूर्वकालभाविनं समानकालभाविनं च
भावमपेक्ष्य क्रमेणाक्रमेण चावभासः इति। तद्या नाम
भावानामेवं कलना परिच्छित्तिः स एव क्रमाक्रमात्मा इति॥ ६॥

ननु सर्वमिदं जगत्संविल्लग्नमेवावभासतेऽन्यथा ह्यस्य भानमेव न
भवेत्, संविदि च नित्यत्वात्कालयोगो नास्ति, इति कथमसौ तदनुषक्तस्य
भावजातस्यापि स्यात्? इत्याशङ्क्याह

क्रमाक्रमात्मा कालश्च परः संविदि वर्तते।

नन्वेवं क्रमाक्रमकथातीतं संवित्तत्त्वं सुनिर्मलम् इत्याद्युक्तं व्याहन्येत, सौगतमतान्तःपातश्च स्यात् इत्याशङ्क्याह

काली नाम परा शक्तिः सैव देवस्य गीयते ॥ ७ ॥

यन्नाम परस्य प्रकाशस्य कालेन योगः सास्य शक्तिः स्वेच्छावभासितस्य प्रमातृप्रमेयाद्यात्मनो जगतस्तत्तद्रूपतया कलने सामर्थ्यं न पुनः स्वात्मनि कश्चिदक्रमः क्रमो वा इति न ह्यग्नेर्दाहशक्तियोगे स्वात्मनि स्फोटाद्याविर्भावः ॥ ७ ॥

तदाह

सैव संविद् बहिः स्वात्मगर्भीभूतौ क्रमाक्रमौ ।

स्फुटयन्ती प्ररोहेण प्राणवृत्तिरिति स्थिता ॥ ६-८ ॥

सैव कालशक्तियोगिनी संवित्स्वाविभागेनावस्थितौ क्रमाक्रमौ बहिः प्ररूढतयावभासयन्ती प्राणवृत्तिरिति स्थिता, प्राणनात्मतया प्रस्फुरितेत्यर्थः ॥ ८ ॥

ननु कथं नामेयं प्राणवृत्त्यात्मना प्रस्फुरिता इत्याशङ्क्याह

संविन्मात्रं हि यच्छुद्धं प्रकाशपरमार्थकम्।

तन्मेयमात्मनः प्रोज्झ्य विविक्तं भासते नभः॥ ६-९॥

यन्नाम हीदं प्रमातृप्रमेयात्मनो विश्वस्य
स्वाविभागेनैवावभासनात्प्रकाशपरमार्थकम्, अत एव
तदारूषणाया अभावाच्छुद्धं संविन्मात्रं तत्स्वस्वातन्त्र्यात्
स्वात्मन्यपूर्णत्वावबिभासयिषया स्वाविभागेनावस्थितं विश्वात्म
मेयं आत्मनः सकाशात् प्रोज्झ्य पृथक्कृत्य
विश्वस्मादुत्तीर्णोऽहम् इत्यामृश्य विविक्तं नभोऽवभासते
सकलभावशून्यत्वान्निरावरणरूपतया प्रस्फुरतीत्यर्थः॥ ९॥

अत एवाह

तदेव शून्यरूपत्वं संविदः परिगीयते।

शून्यरूपत्वम् इति शून्यप्रमातृत्वमित्यर्थः। शून्यत्वं चास्य
सर्वस्य संवेद्यस्य संक्षयात् न तु संविदोऽपि, तथात्वे हि

निखिलमिदमनेलमूकप्रायं स्यात्। यदुक्तम्

अशून्यं शून्यमित्युक्तं शून्यं चाभाव उच्यते।

अभावः स समुद्दिष्टो यत्र भावाः क्षयं गताः॥ (स्व। ४।२९१)

इति।

शर्वालम्बनधर्मैश्च सर्वसत्त्वैरशेषतः।

सर्वक्लेशाशयैः शून्यं न शून्यं परमार्थतः॥

इति च॥

एतच्च परमुपेयमितो बाह्यानामित्याह

नेति नेति विमर्शेन योगिनां सा परा दशा॥ १०॥

सेयं

ङ भावो नापि चाभावो मध्यमाप्रतिपत्तितः।

इत्याद्युक्तयुक्त्या भावाभावविषयेण नेति नेति परामर्शद्वयेन मध्यमपदावेशशालिनां योगिनां परा शून्यातिशून्यरूपा दशा विश्रान्तिस्थानमित्यर्थः। यदाहुः

शून्यतावस्थितः पश्चात्संवेदनविवर्जितः।

निर्वाणः कृष्णवर्त्मेव निरुपाख्यो भवत्यसौ॥

इति॥ १०॥

स एव च शून्यप्रमाता बहिर्मुखीभवन्प्राणप्रमातृतामासादयति इत्याह

स एव खात्मा मेयेऽस्मिन्भेदिते स्वीक्रियोन्मुखः।

पतन्समुच्छलत्त्वेन प्राणस्पन्दोर्मिसंज्ञितः॥ ६-११॥

स एव च खात्मा शून्यप्रमाता

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥अभिलाषो मलोऽत्र तु। (स्वटं। ४-१०४)

इत्याद्युक्तेरपूर्णम्मन्यतात्मकाणवमलयोगात्साकाङ्क्षतया पुनस्तत्स्वीकरणोन्मुखः सन् स्वस्मात् भेदिते पृथक्कृतेऽस्मिन् नीलसुखादिरूपे मेये समुच्छलत्त्वेन पतन बहिर्मुखीभवन् प्राणादिशब्दव्यपदेश्यो भवेदित्यर्थः। किंचिच्चलनात्मनः स्वविमर्शरूपस्य स्पन्दनस्यैवायमाद्यः प्रसरः इत्युपचारात्तच्छब्दव्यपदेश्यो न तु स एवायं, तस्य शून्यप्रमात्रुल्लासादप्यूर्ध्वभावात्। एवमूर्मिशब्दादावुत्तरत्रापि ज्ञेयम्॥ ११॥

यदभिप्रायेणैव भट्टश्रीकल्लटादयोऽप्येवमूचुः इत्याह

तेनाहुः किल संवित्प्राक्प्राणे परिणता तथा।

अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः॥ ६-१२॥

यद्यपि शून्यतावभासनपुरःसरं संवित्प्राणरूपतया परिस्फुरिता तथापि तदवभासनेऽस्या न कश्चिद्रूपान्तरोपग्रहः इत्युक्तं प्राक् संवित्प्राणे परिणता इति। तैरप्येतन्निर्मूलमेव नोक्तम् इत्यागमोऽपि संवादितः अन्तःकरणेत्यादिना। अन्तःकरणानां तत्त्वं

सारभूता बुद्धिस्तस्य बुद्धिप्रमातुरित्यर्थः। तेन

बुद्धिप्रमातुरित्यर्थः। तेन बुद्धिप्रमातुः पूर्वं प्राणोल्लासः

इति सिद्धम्। अन्यथा कथं स तस्याश्रयः स्यात्॥ १२॥

एवमयमेव परस्याः संविदः प्रथमः परिस्पन्दः इति

तद्भेदवृत्त्यैव सर्वत्रास्य व्यवहारः इत्याह

इयं सा प्राणनाशक्तिरान्तरोद्योगदोहदा।

स्पन्दः स्फुरत्ता विश्रान्तिर्जीवो हृत्प्रतिभा मता॥ ६-१३॥

आन्तर आद्यो योऽसौ उद्योग उद्यन्तृतात्मा परिस्पन्दस्तत्र

दोहदोऽभिलाषो यस्याः सा तदेकनिष्ठेत्यर्थः॥ १३॥

नन्वेवमुल्लसिताया अस्याः किं प्रयोजनम्? इत्याशङ्क्याह

सा प्राणवृत्तिः प्राणाद्यै रूपैः पञ्चभिरात्मसात्।

देहं यत्कुरुते संवित्पूर्णस्तेनैष भासते॥ ६-१४॥

सेयं सामान्यपरिस्पन्दात्मा प्राणवृत्तिः, पञ्चभिः प्राणापानाद्यै
रूपैर्यत्तदन्तर्बहिष्करणाद्याक्रान्तं पाञ्चभौतिकं
देहमात्मसात्कुरुते व्याप्यावतिष्ठते तेनैष देहो
घटादिवत्संवेद्यत्वेऽपि संवित्पूर्णो भासते संवेत्तृतया प्रथत
इत्यर्थः। अत एव मूढानामयं भ्रमो
यच्चैतन्यविशिष्टात्कायादन्यः कश्चिन्नास्ति इति। यदुक्तम्

चैतन्यखचितात्कायान्नात्मान्योऽस्तीति मन्वते।

इति ॥ १४ ॥

तदाह

प्राणनावृत्तितादात्म्यसंवित्खचितदेहजाम्।

चेष्टां पश्यन्त्यतो मुग्धा नास्त्यन्यदिति मन्वते ॥ १५ ॥

मुग्धा इति देहात्मनोर्विवेकमजानानाः। अयमेषां भावः
भूतान्येव हि मृदाद्यवस्थायामचेतनान्यपि सुराकारतया परिणता
गुडपिष्टादय इव मदशक्तिं, शरीराकारपरिणतानि चैतन्यं

प्रतिपद्यन्ते, कालान्तरे च परिणामविशेषभात्त्वाच्च
तच्छून्यतामुपगच्छन्ति, तावन्तं च कालं
चैतन्यानपायात्स्मृत्यनुसन्धानादिव्यवहारनिपुणतया चेष्टन्ते इति
किमन्येन तदतिरिक्तेनात्मनेति ॥ १५ ॥

एतदधिशयाना एव चार्वाका इत्युच्यन्ते इत्याह

तामेव बालमूर्खस्त्रीप्रायवेदितृसंश्रिताम्।

मतिं प्रमाणीकुर्वन्तश्चार्वाकास्तत्त्वदर्शिनः ॥ ६-१६ ॥

तामेव मतिमिति, चैतन्यविशिष्टः कायः पुरुषः इत्याद्युक्त्या
चैतन्यखचितो देह एवात्मा न पुनस्तदतिरिक्तः कश्चित् इत्येवंरूपाम्।
बालादिसंश्रयेणास्या महाजनानुपसेव्यत्वं दर्शितम्।
प्रमाणीकुर्वन्त इति, देहादूर्ध्वमपि यदि कश्चित्तदतिरिक्त आत्मा
संभवेत्तत्तस्य पूर्वशरीरमपहाय शरीरान्तरमधितिष्ठत
एतच्छरीरशैशवादिदशानुभूतार्थस्मरणवत्
पूर्वपूर्वशरीरानुभूतार्थस्मरणमपि भवेत्। न हि तस्य
शरीरभेदेऽपि नित्यत्वात्स्मरणविशेषे कारणं किंचिदुत्पश्यामो
येनेह जन्मन्येवानुभूतं स्मरति नान्यजन्मानुभूतम् इति

तस्मादूर्ध्वमन्यः कश्चिन्नात्मास्तीत्येव युक्तम्। यच्छ्रुतिरपि

विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु-

विनश्यति न प्रेत्य संज्ञास्ति (बृ॰।उ। ४।५।१३)

इति। अतश्च परलोकादिचिन्तामपास्य यावज्जीवं सुखमेवासितव्यम्
इत्येषां तत्त्वमित्युक्तं तत्त्वदर्शिन इति। यदाहुः

यावज्जीवं सुखं जीवेन्नास्ति मृत्युरगोचरः।

भस्मीभूतस्य शान्तस्य पुनरागमनं कुतः॥

इति॥ १६॥

नन्वेवं तत्त्वमनुशीलयतामेषां किं स्यात्? इत्याशङ्क्याह

तेषां तथा भावना चेद्दाढर्यमेति निरन्तरम्।

तद्देहभङ्गे सुप्ताः स्युरातादृग्वासनाक्षयात्॥ ६-१७॥

शुप्ता इति अपवेद्यप्रलयाकलप्राया इत्यर्थः॥ १७॥

तद्वासनाक्षये त्वेषां किं भवेत्? इत्याशङ्क्याह

तद्वासनाक्षये त्वेषामक्षीणं वासनान्तरम्।

बुद्धं कुतश्चित्संसूते विचित्रां फलसम्पदम्॥ ६-१८॥

नन्वेषां सांख्यादिभिरपि साम्यं यत्तेषामप्येवंप्रायैव मुक्तिः,
पुनरपि तत्तद्वासनानुसारं विचित्रफलोपभोगस्योदयात्। यद्वक्ष्यति

शांख्यवेदादिसंसिद्धाञ्छीकर्ण्ठस्तदहर्मुखे।

सृजत्येव पुनस्तेन न सम्यङ्मुक्तिरीदृशी॥ (तं। ६।१५३)

इति। तत्सर्वत्रास्यैव कथमवरतया निर्देशः। यदाहुः
चार्वाकास्तु वराकाः प्रतिक्षेप्तव्या एव कः क्षुद्रतर्कस्य तदीयस्येह
गणनावसरः इति। तत्किमेतत्? इत्याशङ्क्याह

अदार्ढ्यशङ्कनात्प्राच्यवासनातादवस्थ्यतः।

अन्यकर्तव्यशैथिल्यात्संभाव्यानुशयत्वतः ॥ ६-१९ ॥

अतद्रूढान्यजनताकर्तव्यपरिलोपनात् ।

नास्तिक्यवासनामाहुः पापात्पापीयसीमिमाम् ॥ ६-२० ॥

यदप्यस्मदपेक्षया दर्शनान्तराणां तुल्यमेव पापत्वं तथापि नास्तिक्यवासनायास्ततोऽप्यतिशयेन पापत्वं, यतः प्राच्या अनिषेध्यत्वात्पूर्वभाविनी येयमास्तिक्यवासना तस्यास्तादवस्थ्यं। नहि नास्तिक्यवासनाया दाढर्येन प्ररोहोऽस्ति येनैतदुपरमो भवेन्निर्मूलत्वेनादाढर्यस्यात्राशङ्क्यमानत्वात्। यथा परं ब्रह्म मूलत्वेनावलम्ब्य प्रपञ्चो मिथ्या इत्याद्युच्यमानं दाढर्येन प्ररोहमियान्नैवमेतत आत्मनो हि नास्तित्वे किमन्यदवशिष्यते यन्नामाजडं मूलभूतमधिकृत्य सर्वमिदं सुव्यवस्थितं स्यात जडानामेव च परिणामो भवेदिति न चेतनत्वेनासौ युज्यते इत्यन्यैर्बहूक्तमिति तत एवावधार्यम्। अत एवास्तिक्यवासनायास्तादवस्थ्येन अन्येषां दर्शनान्तरस्थानाम् अग्निहोत्रं जुहुयात, ङ हिंस्यात्सर्वभूतानि इत्याद्यात्मना विधिनिषेधरूपेण कर्तव्येन शैथिल्यमस्या जायते। यदात्मनोऽस्तित्वे यदि कैश्चित्पारलौकिकं किंचिदनुष्ठीयते तद्यावद्दूरे आस्ताम्

आत्मनः पुनर्नास्तित्वेऽप्यन्यैः कुशलप्रवृत्तिरकुशलविरतिश्च क्रियते

इत्यत्र निमित्तं किंचित्संभवेत्, अन्यथा सर्व एव किमेवं कुर्यः।

अस्माकं च किंचिदपि कर्तव्यं नास्ति इत्यस्थान एवास्माभिर्भ्रान्तं,

किमिदं व्यामूढैरिवासितम् इत्येवमात्मा पश्चात्तापोऽप्यत्र

संभावनीयस्तस्मिन्नुत्पन्ने सति सुखमेव न्यायोपन्यासकदर्थनां

परिहृत्य

शन्दिग्धेऽपि परे लोके त्याज्यमेवाशुभं बुधैः।

यदि नास्ति ततः किं स्यादस्ति चेन्नास्तिको हतः॥

इत्यादिना मित्रसंमतेनाप्युपदेशेन तस्यामास्तिक्यवासनाया

रूढयान्यया दर्शनान्तरस्थया जनतयावश्यमेवास्याः परिलोपः

कार्यः इति॥ २०॥

तदेवमत्र प्रसक्तानुप्रसक्तिकया परदर्शनकथा मा प्रसाङ्क्षीत् इति

प्रकृतमेवानुसरति

अलमप्रस्तुतेनाथ प्रकृतं प्रविविच्यते।

तदेवाह

यावान्समस्त एवायमध्वा प्राणे प्रतिष्ठितः ॥ ६-२१ ॥

द्विधा च सोऽध्वा क्रियया मूर्त्या च प्रविभज्यते ।

द्विधेति देशकालभेदेन । तत्र क्रियया कालाध्वा प्रविभज्यते मूर्त्या
च देशाध्वा ।

यदुक्तम्

मूर्तिवैचित्र्यतो देशक्रममाभासयत्यसौ ।

क्रियावैचित्र्यनिर्भासात्कालक्रममपीश्वरः ॥ (रि । प्र । २ ।१ ।५)

इति ॥ २१ ॥

ननु

अध्वा समस्त एवायं चिन्मात्रे संप्रतिष्ठितः ।

यत्तत्र नहि विश्रान्तं तन्नभःकुसुमायते ॥ (८।३)

इत्यादिवक्ष्यमाणनीत्यास्य संविदि प्रतिष्ठितत्वं युक्तं न
जडात्मनि प्राणे ? इत्याशङ्क्याह

प्राण एव शिखा श्रीमत्त्रिशिरस्युदिता हि सा ॥ ६-२२ ॥

बद्धा यागादिकाले तु निष्कलत्वाच्छिवात्मिका ।

शिखा परिमिता शक्तिर्भैरवस्य तु कथ्यते ।

क्रियाशक्तिरिति ख्याता ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ । ॥

इति ॥ २२ ॥

ननु को नामास्या बन्धो येन यागादौ निष्कलत्वाच्छिवात्मिकेयं स्यात् ?
इत्याशङ्क्याह

यतोऽहोरात्रमध्येऽस्याश्चतुर्विंशतिधा गतिः ॥ ६-२३ ॥

प्राणविक्षेपरन्ध्रख्यशतैश्चित्रफलप्रदा ।

यत्षष्टिघटिकासंख्याकस्य बाह्यस्याहोरात्रस्य मध्येऽस्याः

प्राणरूपायाः पारमेश्वर्याः क्रियाशक्तेः प्राणचाराणां

रन्ध्रख्यैर्द्वारसंख्याकैर्नवभिः शतैरुपलक्षिता, अत एव

चतुर्विंशतिभिः संक्रान्तिलक्षणैः

प्रकारैरैहिकामुत्रिकभेदाच्चित्रफलप्रदा

गतिरूर्ध्वाधरवाहलक्षणश्चारो भवेदित्यर्थः। अयमत्राभिप्रायः

इह खलु सर्वप्राणिनां

मनोऽप्यन्यत्र निक्षिप्तं चक्षुरन्यत्र पातितम्।

तथा प्रवर्तते प्राणस्त्वयत्नादेव सर्वदा॥ (स्वटं। ७।५७)

इत्याद्युक्तया स्वरसत एव मध्यमः प्राणो वहति इति

बाह्येनाहोरात्रेण

षट्शतानि वरारोहे सहस्राण्येकविंशतिः।

अहोरात्रेण बाह्येन अध्यात्मं तु सुराधिपे॥ (स्वटं। ७।५३)

इत्याद्युक्तयान्तः सषट्शता सहस्रैकविंशतिः प्राणचाराणां

भवेत्। तत्र प्रतिघटिकं

शतानि त्रीण्यहोरात्राः षष्टिरेव तथाधिकाः।

वर्षमेतत्समाख्यातं बाह्ये वैघटिका च सा॥ (स्वटं। ७।५१)

इत्याद्युक्त्या प्राणचाराणां सषष्टिस्त्रिशती इति सार्धेन घटिकाद्वयेन नवशतानि भवन्ति, स एव च संक्रान्तीनां प्रत्येकमुदयः। यदुक्तम्

चतुर्विंशतिसंक्रान्त्यः समधातोः स्वभावतः।

शतानि नव वै हंस एकामेकां वहेत्सदा॥ (स्वटं। ७।१६८)

इति। सार्धं च घटिकाद्वयं चतुर्विंशतिधा गुणितं षष्टिर्घटिका भवन्ति इत्यहोरात्रमध्ये तत्संख्याकानामुदयः। यदुक्तम्

बाह्ये चैव त्वहोरात्रे अध्यात्मं तु वरानने।

चतुर्विंशतिसंक्रान्तीः प्राणहंसस्तु संक्रमेत्॥

अहनि द्वादश प्रोक्ता रात्रौ वै द्वादश स्मृताः। (स्वटं। ७।१६६)

इति। यद्यपीयन्तः प्राणचारा अहोरात्रमध्ये भवन्ति इत्येतावदत्र वक्तव्यं, तथापि तथात्वे तेषां गणनामात्रं प्रदर्शितं भवेत् न तु तत्तद्विचित्रफलोदयनिमित्तत्वमपीत्येवमुक्तम्॥ २३॥

नन्वेवंविधः शिखाया बन्धः इति वक्तुं प्रस्तुते किमिदमप्रस्तुतमभिधीयते यत्प्राणचाराणामियती गतिरिति। नैतत्, अयमेव हि शिखाबन्धो यत्प्राणशक्तेः प्रतिचारमादिमध्यान्तेष्ववधानेन पुनः पुनः परामर्शनं नाम। यदभिप्रायेणैव

षट् शतानि दिवा रात्रौ सहस्राण्येकविंशतिः।

जपो देव्याः समुद्दिष्टः सुलभो दुर्लभो जडैः॥ (वि। भै। १५६)

इत्याद्यन्यत्रोक्तं, तदाह

क्षपा शशी तथापानो नाद एकत्र तिष्ठति॥ ६-२४॥

जीवादित्यो न चोद्गच्छेत्तुटयर्धं सान्ध्यमीदृशम्।

ऊर्ध्ववक्त्रो रविश्चन्द्रोऽधोमुखो वह्निरन्तरे॥ ६-२५॥

माध्याह्निकी मोक्षदा स्याद् व्योममध्यस्थितो रविः ।

अनन्तमितसारो हि जन्तुचक्रप्रबोधकः ॥ ६-२६ ॥

बिन्दुः प्राणो ह्यहश्चैव रविरेकत्र तिष्ठति ।

महासन्ध्या तृतीया तु सुप्रशान्तात्मिका स्थिता ॥ ६-२७ ॥

यदात्रैकत्र वामपार्श्वे द्वादशान्ताद्धृदन्तं चरन्क्षपाशशी
तिष्ठति हृदये निवृत्तगतिर्भवति प्राणादित्यश्च ततो नोद्गच्छति
तदेद्दशमपानीयमन्त्यं तुट्यर्धं सान्ध्यं
वक्ष्यमाणनीत्योद्गच्छत्प्राणार्काद्यतुट्यर्धसंमीलनया स
चतुर्भागाङ्गुलद्वयप्रमाणप्राणचाररूपा प्राभातिकी सन्ध्या
भवेदित्यर्थः । यदुक्तं तत्र

श चन्द्रो विद्यमानोऽपि अपानो हृदि मध्यतः ।

यदा तूत्सन्नतां याति जीवादित्यो न चोद्गमेत् ॥

प्राभातिकीति विज्ञेया आत्मतत्त्वप्रबोधिनी।

क्षपा शशी तथापानो नाद एकत्र तिष्ठति॥

तुट्यर्धं ज्ञानमहसा सन्ध्या वै समुदाहृता।

इति। तदनन्तरं च यदा प्राणात्मा रविरूर्ध्वमुखत्वेन चरंस्ताल्वाद्यात्मन्यन्तरे स्थितश्चन्द्रश्चापानात्माधोमुखत्वेन इति तयोः प्रमाणप्रमेयात्मनोः सङ्घट्टात्प्रमातृरूपो वह्निरुदियात्तदेयं माध्याह्निकी सन्ध्या मोक्षदा स्यात यतो मध्यनाडीसंबन्धिनो व्योम्नः सुषिरस्य मध्ये तालुस्थाने स्थितो बहिर्मुखत्वेन प्रमाणत्वेऽपि प्रमातृरूपस्यानपायादनस्तमितसारो रविर्जन्तुचक्रस्य प्रकर्षेण बोधकः प्रमाणप्रमेयमयत्वेऽपि प्रमातृरूपतयावभासक इत्यर्थः। यदुक्तं तत्र

ऊर्द्ध्ववक्त्रः स्थितो भानुश्चन्द्रश्चाधोमुखः स्थितः।

इत्युपक्रम्य

तदन्तराले उदितस्ताल्वाकाशान्तगोचरे।

प्रमाणरहितो भाव्यः सुशान्तः शान्तबोधनात् ॥

व्योमवद् व्योमवह्निस्तु तुट्यर्धं कालकल्पनात् ।

माध्याह्निकी तु विज्ञेया संध्या मोक्षप्रदायिका ॥

व्योममध्यस्थितः सूर्यः परादित्येति कथ्यते ।

अनस्तमितसारो हि जन्तुचक्रप्रबोधकः ॥

इति । तदनन्तरं च बिन्द्वाद्यात्मना रविर्यदैकत्र द्वादशान्ते तिष्ठति निवृत्तगतिर्भवति, अर्थाच्चापानचन्द्रश्च नोद्गच्छति तदा निःशेषविश्वोपशमात्स्वप्रशान्तात्मिका, अत एवेयं महती सन्ध्या तृतीया स्थिता स्वरसोदितत्वेन वर्तमानेत्यर्थः । यदुक्तम् तत्र

बिन्दुः प्राणोऽप्यहश्चैव रविरेकत्र तिष्ठति ।

सुप्रशान्तं तु संतिष्ठेन्मनोव्यावृत्तिवर्जितः ॥

कृत्वा प्रशान्तभूमौ च स्वरूपं सन्धिदेशतः।

महासन्ध्या तु विज्ञेया तृतीया परिकीर्तिता॥

इति॥ २७॥

एतच्चोपसंहारद्वारेण प्रकृते योजयति

एवं बद्धा शिखा यत्र तत्तत्फलनियोजिका।

एवमुक्तेन प्रकारेण क्रमेण यत्र यागादौ प्राणशक्त्यात्मिका शिखा बद्धा मार्गान्तरखिलीकारेण मध्यधामन्येव निश्चलत्वमापादिता तत्र तस्य तस्य मन्त्रसंनिधानादेः फलस्य नियोजिका भवेदित्यर्थः। तदुक्तं तत्र

तया निबद्धया देहे संनिधानं गुणेश्वराः।

विदध्युः साधकेन्द्राणां देवि नास्त्यत्र संशयः॥

इति॥

एवं प्राणः पारमेश्वरी शक्तिरिति तत्र यदध्वनः
प्रतिष्ठानमुक्तं तत्संविद्येव पर्यवस्येत् इत्याह

अतः संविदि सर्वोऽयमध्वा विश्रम्य तिष्ठति ॥ ६-२८ ॥

नन्वमूर्तायां निष्क्रियायां च संविदि मूर्तः क्रमिकश्चाध्वा
कथमास्ते ? इत्याशङ्क्याह

अमूर्तायाः सर्वगत्वान्निष्क्रियायाश्च संविदः ।

मूर्तिक्रियाभासनं यत्स एवाध्वा महेशितुः ॥ ६-२९ ॥

एवमेवंविधायाः संविदो यन्नाम मूर्तिक्रियात्मनावभासनं स एव
भुवनादिरूपो मन्त्रादिरूपो वाऽध्वा न त्वतिरिक्तः कश्चिदाधेयो
येनैवमाशङ्का स्यात् ॥ २९ ॥

नन्वत्राध्वशब्दस्य प्रवृत्तौ किं निमित्तम् ? इत्याशङ्क्याह

अध्वा क्रमेण यातव्ये पदे संप्राप्तिकारणम् ।

द्वैतिनां भोग्यभावात्तु प्रबुद्धानां यतोऽद्यते ॥ ६-३० ॥

यातव्ये पदे इति शिवतत्त्वात्मनि। भेददशायां हि तत्तत्तत्त्वोल्लङ्घनक्रमेण षट्त्रिंशं शिवतत्त्वं प्राप्यत्वेनोक्तम्। भोग्यभावादित्यदनीयत्वात अधिगतसंवित्तत्त्वा हि सर्वं स्वात्मसात्कुर्वन्तीति भावः। तेनाध्वैवाध्वा, अद्यत इत्यध्वा चेति ॥ ३० ॥

ननु सर्वशब्दानां समयमात्रादेवार्थप्रतिपादनं सिद्ध्येत् इति किमत्रान्वर्थस्मरणेन नहि सर्वत्रैवैतत्संभवेत्? इत्याशङ्क्याह --

इह सर्वत्र शब्दानामन्वर्थं चर्चयेद्यतः।

यद्यप्यर्थाभिधाने शब्दानां त्रयी गतिर्यौगिकी रूढा योगरूढा च। तत्रापि यौगिक्या एव प्राधान्यं, सनिमित्तं तत्र तस्याः प्रवृत्तेः, अत एवान्यद्द्वयमत्रैव यथाकथंचिदन्तर्भावनीयं येन सर्वत्रैवान्वर्थचर्चा पारं यायात् ॥

तदाह

उक्तं श्रीमन्निशाचारे संज्ञात्र त्रिविधा मता ॥ ६-३१ ॥

नैमित्तिकी प्रसिद्धा च तथान्या पारिभाषिकी ।

पूर्वत्वे वा प्रधानं स्यात्तत्रान्तर्भावयेत्ततः ॥ ६-३२ ॥

अतोऽध्वशब्दस्योक्तेयं निरुक्तिर्नोदितापि चेत् ।

क्वचित्स्वबुद्ध्या साप्यूह्या कियल्लेख्यं हि पुस्तके ॥ ६-३३ ॥

प्रसिद्धेति, सनिमित्तत्वेऽपि क्वचिदेव रूढेः । यदुक्तं तत्र

शंज्ञा हि त्रिविधा ज्ञेया शिवशास्त्रेषु सर्वदा ।

पारिभाषिकनैमित्ती सिद्धा चासौ प्रसिद्धिभाक् ॥

इह नैमित्तिकी संज्ञा निमित्तात्तु समागता ।

इति। एवमिह सर्वसंज्ञानां निमित्ततापयवश्यं
वाच्येत्यत्रैवमुक्तमित्याह अतो इति। ननु यद्येवं तत्सर्वत्रैव
कस्मादेवं नोक्तमित्याशङ्क्याह ? नोदितेत्यादि। कियदिति, नह्यत्र
शब्दव्युत्पादनं प्रस्तुतमिति भावः॥ ३३॥

ननु परस्याः संविदो मूर्तिक्रियाभासनमध्वेत्युक्तं तत्र
क्रियावभासने कतरोऽध्वा मूर्त्यवभासने च कतरः ?
इत्याशङ्क्याह

तत्र क्रियाभासनं यत्सोऽध्वा कालाह्व उच्यते।

वर्णमन्त्रपदाभिख्यमत्रास्तेऽध्वत्रयं स्फुटम्॥ ६-३४॥

यस्तु मूर्त्यवभासांशः स देशाध्वा निगद्यते।

कलातत्त्वपुराभिख्यमन्तर्भूतमिह त्रयम्॥ ६-३५॥

ननु यदि नाम मूर्तिक्रिययोर्वैचित्र्यावभासाद्देशकालभेदेनाध्वनो
द्वैविध्यमुच्यते तदास्तां, तत्रापि प्रत्येकं त्रैविध्ये किं निमित्तम् ?
इत्याशङ्क्याह

त्रिकद्वयेऽत्र प्रत्येकं स्थूलं सूक्ष्मं परं वपुः।

यतोऽस्ति तेन सर्वोऽयमध्वा षड्वध उच्यते॥ ६-३६॥

तेनेति, स्थूलसूक्ष्मपरत्वेन पदवर्णमन्त्रात्मतया
भुवनतत्त्वकलात्मतया च प्रत्येकं त्रैविध्येन हेतुनेत्यर्थः। यदुक्तम्

पदानि मन्त्रारब्धानि मन्त्रा वर्णैकविग्रहाः।

वर्णाः स्वनिष्ठा इत्येषां स्थूलसूक्ष्मपरात्मता॥

इति। तथा

भुवनव्यापिता तत्त्वेष्वनन्तादिशिवान्तके। (स्व। ४।९६)

इति। तथा

कलान्तर्भाविनस्ते वै निवृत्त्याद्यास्तु ताः कलाः॥ (स्वटं। ४।९७)

इति॥ ३६॥

तत्र प्रस्तुतं कालाध्वानं तावदवतारयति

षड्वधादध्वनः प्राच्यं यदेतत् त्रितयं पुनः।

एष एव स कालाध्वा प्राणे स्पष्टं प्रतिष्ठितः॥ ६-३७॥

प्राच्यमिति पूर्वोद्दिष्टं पदमन्त्रवर्णाख्यम्। प्राण
इत्युपलक्षणं, तेनापानादावप्येवमेव॥ ३७॥

नन्वेवं क्रमाक्रमात्मा काल उक्तः स एव किं तत्त्वानामन्तः
परिगणितो न वा ? इत्याशङ्क्याह

तत्त्वमध्यस्थितात्कालादन्योऽयं काल उच्यते।

अन्यस्तद्वैलक्षण्यात्॥

तदेवाह

एष कालो हि देवस्य विश्वाभासनकारिणी॥ ६-३८॥

क्रियाशक्तिः समस्तानां तत्त्वानां च परं वपुः।

परं वपुः इत्युत्पत्तिस्थानम्, अत एव विश्वावभासनकारिणी
इत्युक्तम्॥ ३८॥

ननु परस्याः संविदो विश्वावभासकारित्वं नाम बहिरुन्मेष उच्यते
तदेवमस्येश्वररूपत्वमुक्तं स्यादित्याह

एतदीश्वरतत्त्वं तच्छिवस्य वपुरुच्यते॥ ३९॥

उद्रिक्ताभोगकार्यात्मविश्वैकात्म्यमिदं यतः।

तत तस्माद्
बहिरुन्मेषलक्षणाद्विश्वावभासकारित्वाद्धेतोरेतदीश्वरतत्त्वमुच्यते,
कालात्मनः क्रियाशक्तेरेवैतद्विश्वकलनात्मकत्वं बहिर्मुखं
रूपमित्यर्थः। ननु मायादीनामप्येवं रूपं संभाव्यते, इत्येतदेव
कथमुक्तमित्याशङ्क्याह शिवस्य वपुः इति। बहिरौन्मुख्येऽपि
स्वात्मन्येव विश्रान्तं, यत इदं बहिर्मुखत्वस्य
धाराधिरूढत्वादुद्रिक्ताभोगम्, अत एव कार्यात्म यद्विश्वं तस्य
इदमहम् इति प्रतीतेः एकात्म्यं स्वात्मसात्कार इत्यर्थः। अत एव

भेदाभेददशेयमिति सर्वैरुद्घोष्यते ॥ ३९ ॥

नन्वेवमनेनैव विकलनात्कालतत्त्वस्य पृथक् परिगणनं न प्राप्तमिति,

एवं कालः प्रसर्तव्यस्तच्च तत्त्वमनिन्दितम्।

इत्यादिश्रुतिविरोध आपतेदिति किमेतत्? इत्याशङ्क्याह

एतदीश्वररूपत्वं परमात्मनि यत्किल ॥ ६-४० ॥

तत्प्रमातरि मायीये कालतत्त्वं निगद्यते।

ननु मायाप्रमातरि किमेवं कालतत्त्वमेवोत तत्त्वान्तराण्यपि
इत्याशङ्क्याह

शिवादिशुद्धविद्यान्तं यच्छिवस्य स्वकं वपुः ॥ ६-४१ ॥

तदेव पंसो मायादिरागान्तं कञ्चुकीभवेत्।

शिवादीत्यनेन शिवशब्देनानाश्रितभट्टारक उक्तः। स्वकं
वपुरित्या नन्दादिशक्तिरूपत्वात्। पुंसः इति शिवस्यैव

स्वस्वातन्त्र्याद् गृहीतपशुभावस्येत्यर्थः ॥ ४१ ॥

एतदेव विभजते

अनाश्रितं यतो माया कलाविद्ये सदाशिवः ॥ ६-४२ ॥

ईश्वरः कालनियती सद्विद्या राग उच्यते ।

यदुक्तम्

शक्त्यादिस्तत्त्ववर्गस्तु कञ्चुकत्वेन वै पशोः ।

शक्तिर्माया कला विद्या कालो नियतिरेव च ॥

सदाशिवेश्वरौ विद्या रागस्तु वरवर्णिनि ।

इति ॥ ४२ ॥

न केवलमेषामेवंरूपत्वमेव यावत्प्रमातृत्वमपि इत्याह

अनाश्रितः शून्यमाता बुद्धिमाता सदाशिवः ॥ ६-४३ ॥

ईश्वरः प्राणमाता च विद्या देहप्रमातृता ।

नन्वेषां शून्यादिप्रमातृत्वे किं निमित्तम् ? इत्याशङ्क्याह

अनाश्रयो हि शून्यत्वं ज्ञानमेव हि बुद्धिता ॥ ६-४४ ॥

विश्वात्मता च प्राणत्वं देहे वेद्यैकतानता ।

शून्यमिति, विश्वोच्छेदात् । ज्ञानमिति, सदाशिवस्य ज्ञानशक्तिप्राधान्यात् । विश्वात्मता इति बहिरुन्मेषरूपत्वात् । वेद्यैकतानतेति, तत्रैवाभिष्वङ्गात् ॥ ४४ ॥

एवं प्राणे विश्वात्मत्वमस्ति इति तदेवात्र संप्रत्यभिधीयते इत्याह

तेन प्राणपथे विश्वाकलनेयं विराजते ॥ ६-४५ ॥

येन रूपेण तद्वच्म्ः सद्भिस्तदवधीयताम् ।

येन रूपेणेति, कालात्मना ॥ ४५ ॥

ननु प्राणस्य सर्वशरीव्यापकत्वेनावश्यमवस्थानमस्ति, अन्यथा हि कानिचिदङ्गानि स्तम्भादिवत्स्तब्धान्येव भवेयुः, तदस्य श्रीस्वच्छन्दशास्त्रादौ हृदयादारभ्यैव चारः कस्मादुक्त ? इत्याशङ्क्याह

द्वादशान्तावधावस्मिन्देहे यद्यपि सर्वतः ॥ ६-४६ ॥

ओतप्रोतात्मकः प्राणस्तथापीत्थं न सुस्फुटः ।

इत्थमिति, ओतप्रोतत्वेन । न सुस्फुट इति सर्वत्रैव देहे क्वचिद्धि शरीरे सुस्फुटत्वेन प्राणोऽवभासते क्वचिच्चास्फुटत्वेनेति ॥ ४६ ॥

अत एवाह

यत्नो जीवनमात्रात्मा तत्परश्च द्विधा मतः ॥ ६-४७ ॥

संवेद्यश्चाप्यसंवेद्यो द्विधेत्थं भिद्यते पुनः ।

स्फुटास्फुटत्वाद् द्वैविध्यं प्रत्येकं परिभावयेत्॥ ६-४८॥

यत्न इति प्राणीयः स्पन्दः। जीवनमात्रात्मेति, स्वारसिको येनावयवानां स्तब्धतैव न स्यात्। तत्पर इच्छापूर्वकः। प्रत्येकमिति, चतुर्णां द्वैविध्येऽष्टधा प्राणीयो यत्न इति सिद्धम्॥ ४८॥

तत्र स्वारसिकः प्राणीयो यत्नः कन्दात्प्रभृत्येव संवेद्यते किंत्वस्फुटत्वेन इत्याह

संवेद्यजीवनाभिख्यप्रयत्नस्पन्दसुन्दरः।

प्राणः कन्दात्प्रभृत्येव तथाप्यत्र न सुस्फुटः॥ ६-४९॥

यदभिप्रायेणैव श्रीस्वच्छन्दशास्त्रे ततः प्रभृति प्राणादेरवस्थानमुक्तम् इत्याह

कन्दाधारात्प्रभृत्येव व्यवस्था तेन कथ्यते।

स्वच्छन्दशास्त्रे नाडीनां वाय्वाधारतया स्फुटम् ॥ ६-५० ॥

तेनेति, प्राणस्य संवेद्यत्वेन हेतुनेत्यर्थः ।

यदुक्तं तत्र

ङाभ्यधो मेढ्रकन्दे च स्थिता वै नाभिमध्यतः ।

तस्माद्विनिर्गता नाड्यस्तिर्यगूर्ध्वमधः प्रिये ॥ (स्वटं । ७ ।८)

इति ॥ ५० ॥

ननु यद्येवं तत्तत्रैव

हृच्चक्रे तु समाख्याताः साधकानां हितावहाः ।

प्राणो वै चरते तासु अहोरात्रविभागतः ॥

तथा ते कथयिष्यामि प्रविभज्य यथा स्फुटम् । (स्वटं । ७ ।२१)

इत्यादिना हृदयात्प्रभृति वितत्य पुनः प्राणचारः कस्मादुक्त ?

इत्याशङ्क्याह

तत्रापि तु प्रयत्नोऽसौ न संवेद्यतया स्थितः।

तत्र कन्दाधारे ह्यसावपीच्छापूर्वकः प्रयत्नो न स्फुटं संवद्यते इति न तत्र वितत्य प्राणचार उक्तः। न हि स्वारसिकेन प्राणचारेणोक्तेन किंचित्फलं, स्वेच्छया हि चारितः प्राणस्तत्तत्सिद्धिनिमित्तं योगिनां स्यात् यदर्थमेवमुपदेशः। तच्च हृदयात्प्रभृत्येव भवेत् इति तत्रैवासौ तथा निर्दिष्टः॥

एतच्चास्माभिरप्येवमेवोच्यते इत्याह

वेद्ययत्नात्तु हृदयात्प्राणचारो विभज्यते॥ ५१॥

वेद्ययत्नादिति, अर्थादिच्छापूर्वकस्य। विभज्यते इति तुट्याद्यात्मना विभागेनोच्यत इत्यर्थः॥ ५१॥

ननु व्यापकत्वात्सर्वत्राविशेषेऽपि प्राणनस्य क्वचित्स्फुटं तदीयो यत्नः संवेद्यते, क्वचिच्चान्यथेत्यत्र किं निमित्तम्? इत्याशङ्क्याह –
–

प्रभोः शिवस्य या शक्तिर्वामा ज्येष्ठा च रौद्रिका ।

सतदन्यतमावात्मप्राणौ यत्नविधायिनौ ॥ ६-५२ ॥

इह खलु परमेश्वरसंबन्धिन्या तासां वामादीनां मध्यादन्यतमया
शक्त्या सहभूतावात्मप्राणौ यत्नविधायिनौ, प्रभुशक्तिरात्मा
प्राणश्चेति त्रयः संमिलिताः प्राणस्पन्दं विदधतीत्यर्थः ।
यदुक्तम्

तत्रात्मा प्रभुशक्तिश्च वायुर्वै नाडिभिश्चरन् । (स्व ।७ ।७)

इति ॥ ५२ ॥

एवमेषां समानेऽपि यत्नविधायित्वे क्वचित्कस्यचिन्मुख्यत्वम् इत्याह

प्रभुशक्तिः क्वचित्कन्दसङ्कोचस्पन्दने यथा ।

प्राणशक्तिः क्वचिन्मुख्या यथाङ्गमरुदीरणे ॥ ६-५३ ॥

आत्मशक्तिः क्वचित्प्राणचारे हार्दे यथा स्फुटम् ।

त्रयं द्वयं वा मुख्यं स्याद्योगिनामवधानिनाम् ॥ ६-५४ ॥

अङ्गमरुदीरणे चक्षुःस्फुरणादौ । अत्र हि
भाविशकुनाशकुनप्रकाशनाद्यर्थं प्रभुशक्तेरेव प्राधान्येन
प्राणस्पन्दने कर्तृत्वम् । कन्दस्य आनन्देन्द्रियस्य सङ्कोचे विकासात्मनि
स्पन्दने चात्मन एव प्राधान्यं, तत्र हि तदिच्छैव निबन्धनम् । हृदि च
प्राधान्येन प्राणस्यैव स्वरसवाहित्वात्स्पन्दने कर्तृत्वम्, एतद् द्वयं
पुनः सर्वत्रैव गुणभावेन स्थितमन्यथैवंभावाभावात् ।
एवमेषां स्वारसिकत्वेन गौणमुख्यभावमुक्त्वा
प्रायत्निकत्वेनाप्यभिधत्ते त्रयम् इत्यादिना । योगिनो हि तत्तत्फलेप्सवो
यत्रैवावधानातिशयात्प्राणं योजयन्ति, तत्रैवात्मानं प्रभुशक्तिं
तदन्यतमं वेति ॥ ५४ ॥

न केवलमेषां गौणमुख्यभावो भवेद्यावदन्यथापि इत्याह

अवधानाददृष्टांशाद् बलवत्त्वादथेरणात् ।

विपर्ययोऽपि प्राणात्मशक्तीनां मुख्यतां प्रति ॥ ६-५५ ॥

अवधानाद्यथा योग्यपि स्वावधानेनैव चक्षुः स्फारयेत्

इत्यत्रात्मनः प्राधान्यम्। अदृष्टांशाद्यथा गवामपि जन्मान्तरीयसंस्कारवशात् स्वारसिक्यैव प्राणशक्त्या नियतमङ्गं स्फुरेत् येनात्र तस्या एव प्राधान्यम्। बलवत्त्वाद्यथा मल्लादीनां श्रमाद्यभ्यासादायत्तीकृतया प्राणशक्त्यैव तत्तत्प्लुत्यादिसिद्धिः। ईरणाद्यथा वाताभिभूतानां प्राणस्य बलवत्त्वेऽपि प्रभुशक्त्यैव तत्तदङ्गपरिस्पन्दो भवेत् इति तस्या एव मुख्यत्वम्। एवमेषां यत्रैवोद्रिक्तत्वेनावस्थानं तत्रैव प्राणीयस्यापि यत्नस्य स्फुटतया संवेद्यत्वमन्यथा पुनरतथात्वमिति सिद्धम्॥ ५५॥

ननु प्रभुशक्तिर्यद्यात्मप्राणाभ्यां सह प्राणीयं यत्नं विदधाति तदस्तु, तस्यास्तु त्रैविध्यं किमर्थमुक्तम्? इत्याशङ्क्याह

वामा संसारिणामीशा प्रभुशक्तिर्विधायिनी।

ज्येष्ठा तु सुप्रबुद्धानां बुभुत्सूनां च रौद्रिका॥ ६-५६॥

विधायिनी इत्यर्थात्प्राणीयं यत्नं विदधातीति॥ ५६॥

अत्र किं निमित्तम्? इत्याशङ्क्याह

वामा संसारवमना ज्येष्ठा शिवमयी यतः।

द्रावयित्री रुजां रौद्री रोद्ध्री चाखिलकर्मणाम्॥ ५७॥

वामाद्या किं प्राभव्यः शक्तयः सृष्टिसंहारस्थित्यात्मिकाः इति
तथैषां प्राणीयं यत्नं विदधति यथा संसारिणामधोधःपातो
भवेत्, सुप्रबुद्धानां शिवीभावापत्तिर्बुभुत्सूनां च
शिवीभावौन्मुख्येन संसार एवावस्थानमिति। तदुक्तम्

अणुं स्वरूपदृश्वानं वामाधो विनिपातयेत्।

रौद्री सांसारिकानन्दं कदाचिद्वितरेदपि॥

ज्येष्ठा स्वातन्त्र्यलेशं तु तनुते ज्ञानकर्मणोः।

इति॥ ५७॥

नन्वेतत्स्वरसत एव सिद्ध्येदिति किमनेनैवमुपदिष्टेन ? इत्याशङ्क्याह

सृष्ट्यादितत्त्वमज्ञात्वा न मुक्तो नापि मोचयेत्।

नन्वत्र किं प्रमाणम् ? इत्याशङ्क्याह

उक्तं च श्रीयोगचारे मोक्षः सर्वप्रकाशनात्॥ ६-५८ ॥

सर्वप्रकाशनादिति, सर्वस्य सृष्ट्यादेर्यथातत्त्वं
परिज्ञानादित्यर्थः। नहि तदतिरिक्तमन्यत्किंचित्संभवेदिति भावः॥
५८ ॥

अत एवाह

उत्पत्तिस्थितिसंहारान् ये न जानन्ति योगिनः।

न मुक्तास्ते तदज्ञानबन्धनैकाधिवासिताः॥ ६-५९ ॥

तदज्ञानं सृष्ट्यादितत्त्वासंवित्तिः॥ ५९ ॥

ततश्च प्रकृते किम् ? इत्याशङ्क्याह

सृष्ट्यादयश्च ते सर्वे कालाधीना न संशयः।

स च प्राणात्मकस्तस्मादुच्चारः कथ्यते स्फुटः ॥ ६-६० ॥

कालाधीना इति, सृष्टिः स्थितिः संहारश्चेति क्रमात्मकत्वात्।
उच्चारः इति प्राणचारः, तत्कथनेन हि सृष्ट्यादीनां
यथातत्त्वं परिज्ञानं भवेदिति भावः ॥ ६० ॥

तदाह

हृदयात्प्राणचारश्च नासिक्यद्वादशान्तः।

षट्त्रिंशदङ्गुलो जन्तोः सर्वस्य स्वाङ्गुलक्रमात्॥ ६-६१ ॥

नसते कुटिलं गच्छतीति नासिका शक्तिः, तस्या इदं (अयं)
ङासिक्यः शाक्तो द्वादशान्तः। तदुक्तम्

षट्त्रिंशाङ्गुलश्चारो हृत्पद्माद्यावशक्तितः। (स्वटं। ४।२३५)

इति ॥ ६१ ॥

ननु यद्येवं तदतिक्षुद्रे मशकादिसंबन्धिन्यतिमहति वा हस्त्यादिसत्के

देहे कथमेतत्सङ्गच्छते? इत्याशङ्क्याह

क्षोदिष्ठे वा महिष्ठे वा देहे तादृश एव हि।

तादृशः षट्त्रिंशदङ्गुल एव किन्तु स्वाङ्गुलापेक्षया॥

न च सर्वस्य जन्तोः प्राणचार एव समो यावद्वीर्यादयोऽपि इत्याह

वीर्यमोजो बलं स्पन्दः प्राणचारः समं ततः॥ ६-६२॥

अयमत्राशयः संविद एव ह्ययं स्फारो यत्क्षोदिष्ठो महिष्ठो वा
जन्तुवर्गः समुज्जृम्भते, न च तस्याः क्वचित्कश्चिद्विशेषः। यदुक्तम् -
-

यैव चिद् गगनाभोगभूषणे भाति भास्वति।

धराविवरकोशस्थे सैव चित्कीटकोदरे॥ (वासिष्ठे)

इति। तदाहिताश्च वीर्यादयः इति तेषामपि विशेषे न
किंचिन्निमित्तमुत्पश्यामः। यत्पुनरेषां तारतम्यमभिलक्ष्यते तत्र
कर्मवैचित्र्यमपराध्यति, यत्पुंसामप्यन्योन्यापेक्षया

वीर्याद्यतिशाययतीति ॥ ६२ ॥

एवं सपीठिकाबन्धं प्राणस्य चारमानमभिधाय
तदानन्तर्येणानुजोद्देशोद्दिष्टमहोरात्राद्यपि विभक्तुमपक्रमते

षट्त्रिंशदङ्गुले चारे यद् गमागमयुग्मकम् ।

नालिकातिथिमासाब्दतत्सङ्घोऽत्र स्फुटं स्थितः ॥ ६-६३ ॥

गमागमौ प्राणापानारूपावारोहावरोहौ । तच्छब्देन नालिकादीनां
सर्वेषामेव परामर्शः ॥ ६३ ॥

एतदेव क्रमेण विभजते

तुटिः सपादाङ्गुलयुक्प्राणस्ताः षोडशोच्छ्वसन् ।

निःश्वसंश्चात्र चषकः सपञ्चांशोऽङ्गुलेऽङ्गुले ॥ ६-६४ ॥

श्वासप्रश्वासयोर्नाली प्रोक्ताहोरात्र उच्यते ।

नवाङ्गुलाम्बुधितुटौ प्रहरास्तेऽब्धयो दिनम् ॥ ६-६५ ॥

निर्गमेऽन्तर्निशेनेन्दू तयाः संध्ये तुटेर्दले ।

सचतुर्भागमङ्गुलयुग्मं तुटिरुच्यते इति तत्षोडशधा गुणितं षट्त्रिंशदङ्गुलानि भवन्तीत्युक्तं प्राणस्ताः षोडशोच्छ्वसन इति । अपानवाहेऽप्येवमित्युक्तम् ङिश्वसंश्वेति तेनोभयत्र द्वात्रिंशत्तुटयः । यदुक्तम्

प्राणापानाश्रिते वाहे द्वात्रिंशत्तुटयः स्थिताः ।

इति । तथात्र षट्त्रिंशदङ्गुलात्मनि प्राणचारे सपञ्चभागमङ्गुलं प्रति चषकः इति त्रिंशद्धा विभक्ते प्राणवाहे त्रिंशच्चषका भवन्ति, एवमपानवाहेऽपि इति प्राणापानोभयमीलनेन चषकषष्ट्यात्मनो घटिकाया उदयः इत्युक्तं श्वासप्रश्वासयोर्नाडी प्रोक्ता इति । ङिर्गमे प्राणस्य बहिरुल्लासे, ङवाङ्गुलाम्बुधितुटौ नवाङ्गुलिस्थानासु चतसृषु तुटिषु प्रहरो, नवस्वङ्गुलीष्वसावुदेतीत्यर्थः । यदुक्तम्

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ । प्रहरः स्यान्नवाङ्गुलः ।

इति। ते इति नवाङ्गुलिमानाः प्रहराः अब्धयः चत्वारः,

अन्तरित्यर्थादपानस्योदये। एवं निशापि चत्वारः प्रहराः। तदुक्तम्

अहोरात्रस्त्वथोऽष्टभिः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ (स्वटं। ७।२८)

इति। तावेव च प्राणापानौ इनेन्दू सूर्याचन्द्रमसौ भवत इत्यर्थः

। यदुक्तम्

वासरे तु चरेत्सूर्यो धारायां सञ्चरञ्छशी।

चन्द्रसूर्योदयो ह्येष॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥। ॥ (स्वटं। ७।४०)

इति। तयोः प्राणापानरूपयो रात्रिदिनयोरर्थाद्द्वादशान्ते हृदि च
तुटेर्दले संध्ये। सायंप्रातःसंध्ययोः प्रत्येकं
प्राणीयस्यापानीयस्य चान्त्यस्यान्त्यस्य च तुट्यर्धस्य संमेलनया
सकलैव तुटिरुदयस्थानमित्यर्थः। अत एव
संध्ययोस्तुटिद्वयमहोरात्रस्य च त्रिंशत्तुटयः। यदाहुः

शंध्याकालं विना त्रिंशत्तुटिकोऽहोरात्रः।

इति। यत्तु

चतुर्थान्ते च देवेशि प्राणसूर्यः सदास्तगः।

ततोऽस्तमयसंध्यात्र तुट्यर्धं ।ई् तु भवेत्प्रिये॥ (स्वटं। ७।३६)

इति। तथा

हृत्पद्मं तु यदा प्राप्तः प्रभातसमयस्तदा।

तुट्यर्धं तु वरारोहे पूर्वसंध्या भवेत्ततः॥ (स्वटं। ७।३९)

इत्याद्युक्तं तत्केवलमेव प्राणवाहमधिकृत्यापानवाहं

चेत्यधिगन्तव्यम्। एवं

शक्तेर्मध्योर्ध्वभागे तु तुट्यर्धं यत्प्रकीर्तितम्।

पक्षसन्धिस्त्वसौ ज्ञेयः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ (स्वटं। ७।६८)

इत्यादौ पक्षसन्धिग्रन्थेऽप्ययमेवाशयो योज्यः। अन्यथा ह्येका

तुटिरकृतविनियोगा स्यात्॥ ६५॥

न केवलमत्र सूर्याचन्द्रमसोरेवोदयो यावद् ग्रहान्तराणामपि इत्याह

केतुः सूर्ये विधौ राहुर्भौमादेर्वारभागिनः ॥ ६-६६ ॥

प्रहरद्वयमन्येषां ग्रहाणामुदयोऽन्तरा ।

केतुः सूर्येऽन्तर्भवति, एवं विधौ राहुः । तेन य एव
सूर्याचन्द्रमसोरुदयः स एवानयोरित्यर्थः । यदुक्तम्

राहुश्चरति सोमेन केतुश्चरति भास्वता । (स्वटं । ७ ।४२)

इति । वारभागिनः पुनर्भौमादेर्ग्रहस्य प्रहरद्वयमुदयस्तस्य
प्रत्यहोरात्रामाद्यन्तार्धप्रहरचतुष्टयोपभोगात्, अन्येषां
षष्ठपञ्चमानां ग्रहाणामन्तरा प्रहरं प्रहरं प्रत्येकमुदयः
प्रत्यहोरात्रमर्धप्रहरद्वयोपभोगात् । तदुक्तम्

पूर्वोऽष्टभागो दिवसाधिपस्य तथैव चान्ते दिवसस्य विद्यात् ।

शेषाः ग्रहाः षट्परिवर्तनेन भुञ्जन्ति होरां निशि पञ्चमेन ॥

इति ॥ ६६ ॥

अत्रैव प्रथमार्धप्रहरादारभ्य क्रमेण फलं निर्दिशति

सिद्धिर्दवीयसी मोक्षोऽभिचारः पारलौकिकी ॥ ६-६७ ॥

एहिकी दूरनैकट्यातिशया प्रहराष्टके।

सिद्धिर्दवीयसीत्यादिना सप्त भेदाः ॥ ६७ ॥

ननु संध्यायाश्चतुर्धोदयोऽपि कथं द्विधैवोक्त ? इत्याशङ्क्याह -

-

मध्याह्नमध्यनिशयोरभिजिन्मोक्षभोगदा ॥ ६-६८ ॥

अभिजयति सर्वान्विघ्नानित्यभिजिन्नक्षत्रविशेषः। यदुक्तम्

मध्याह्ने चार्धरात्रे च उदयोऽभिजितो भवेत्।

अभीप्सितं फलं तत्र साधकानां भवेदिह ॥ (स्वटं। ७।४७)

इति।

स च तालुनि, इत्यधिगन्तव्यम्। यदुक्तम्

॥ ॥ ॥ ॥ ॥ ॥ ॥ंअध्याह्नस्तालुमध्यतः। (७।३३)

इति॥ ६८॥

न केवलमत्राभिजित एवोदयो यावदश्विन्यादीनामपि इत्याह

नक्षत्राणां तदन्येषामुदयो मध्यतः क्रमात्।

तदन्येषाम् इति राशितारादीनाम्। यदुक्तम्

ऋक्षाणिराशयश्चैव तारास्त्वंशास्तथैव च।

प्राणे वै उदयन्त्येते अहोरात्रेण सुव्रते॥ (स्वछं। ७।३१)

इति। अत्र च नक्षत्राणां सत्रिभागमङ्गुलमुदयस्थानम्,
एवमन्येषामपि संख्यानुसारमुदयस्थानं परिकल्पनीयम्।
प्रहराष्टके च न नक्षत्राणामेवोदयोऽपि त्वन्येषामपि इत्याह

नागा लोकेशमूर्तीशा गणेशा जलतत्त्वतः॥ ६-६९॥

प्रधानान्तं नायकाश्च विद्यातत्त्वाधिनायकाः।

सकलाद्याश्च कण्ठयोष्ठ्यपर्यन्ता भैरवास्तथा॥ ६-७०॥

शक्तयः पारमेश्वर्यो वामेशा वीरनायकाः।

अष्टावष्टौ ये य इत्थं व्याप्यव्यापकताजुषः॥ ६-७१॥

स्थूलसूक्ष्माः क्रमात्तेषामुदयः प्रहराष्टके।

ङागा इत्यनन्ताद्याः। यदुक्तम्

इनस्त्वनन्त इत्युक्तः सोमो वासुकिरुच्यते।

तक्षकः कुज इत्युक्तः कार्कोटः सोमजो भवेत्॥

सरोजो गुरुराख्यातो महाब्जः शुक्र उच्यते।

शङ्खो मन्दगतिर्ज्ञेयः सप्त नागा ग्रहाः क्रमात्॥

अष्टमः कुलिको नाम राहुः क्रूरग्रहो भवेत्। इति।

एषां च ग्रहवदेव षट्परिवृत्त्यादिक्रमेणोदयः किन्तु कुलिकस्य
शङ्खवन्मन्दगतिनैव सहोदयः। यदुक्तम्

शनैश्चरस्य यः कालस्तं भुङ्क्ते कुलिकः प्रिये।

सोऽपि दुष्टः समाख्यातः सर्वकर्मस्वसिद्धिदः॥

इति। लोकेश्वरादीनां पुनराद्यार्धप्रहरक्रमेणैवोदयोऽन्यथा
सप्तानां ग्रहाणामष्टकैः सह सङ्गत्ययोगात्। एते च सर्व
एवाष्टका भुवनाध्वनि वक्ष्यन्तं इति तत एवावधार्याः इति किं
तद्व्यावर्णनग्रन्थविस्तरेण। व्याप्यव्यापकत्वे स्थूलसूक्ष्मत्वं
हेतुः, हि सूक्ष्मेण व्याप्यत इति भावः। यथा ग्रहाणां नागा
व्यापकास्तेषामपि लोकेश्वराः इत्याद्युत्तरोत्तरम् अत एव क्रमादित्युक्तम्।
तदुक्तम्

ये ग्रहास्ते च वै नागा लोकपालाष्टकं च ते।

मूर्तयश्चैव ते चाष्टावष्टौ ते च गणेश्वराः॥ (स्वटं। ७।४३)

इत्यादि ।

एवमनेन तेन प्राणपथे विश्वाकलनेयं विराजते ॥ (तं । ६ ।४५)

इत्यादि यदुक्तं तत्स्मारितमित्यवसेयम् ॥ ७१ ॥

ननु यत्र प्रहराष्टके फलभेद उक्तस्तत्र दिननिशयोः कथं न ?
इत्याशङ्क्याह

दिने क्रूराणि सौम्यानि रात्रौ कर्माण्यसंशयम् ॥ ६-७२ ॥

ननु वासनाभेदतः प्राप्तिः संध्यमन्त्रप्रचोदिता ।

इत्यादिदृशानुसन्धानभेदेन फलमपि भिद्यते इति कथमेवं नियम
एव भवेत् ? इत्याशङ्क्याह

क्रूरता सौम्यता वाभिसन्धेरपि निरूपिता ।

तेन कदाचिद्व्यत्ययोऽपि भवेदिति भावः ॥

ननु संध्याद्वयस्य फलं निर्दिष्टं सायंप्रातःसंध्ययोः पुनः

किं न ? इत्याशङ्क्याह

दिनरात्रिक्षये मुक्तिः सा व्याप्तिध्यानयोगतः ॥ ६-७३ ॥

ते चोक्ताः परमेशेन श्रीमद्वीरावलीकुले ।

दिनरात्रिक्षये इति सायंप्रातःसन्ध्ययोः । ते इति
व्याप्तिध्यानादयः ॥ ७३ ॥

तदेव पठति

सितासितौ दीर्घह्रस्वौ धर्माधर्मौ दिनक्षपे ॥ ६-७४ ॥

क्षीयेते यदि तद्दीक्षा व्याप्त्या ध्यानेन योगतः ।

अहोरात्रः प्राणचारे कथितो मास उच्यते ॥ ६-७५ ॥

यदि नाम प्राणापानरूपौ सितासितौ परस्परव्यावृत्त्या वर्तमानौ
दीर्घह्रस्वादिशब्दव्यपदेश्यौ शुभाशुभौ पक्षौ क्षीयेते
अपोहात्मविकल्परूपताघट्टनेन निर्विकल्पात्मपरसंविद्रूपत्वेन

परिस्फुरतस्तदेव व्याप्त्या ध्यानेन योगेन च दीक्षा,
ज्ञानयोगक्रियात्मिकया दीक्षया निर्यन्त्रणमेव मुक्तिर्भवेदित्यर्थः।
एतदेव हि व्याप्तिध्यानयोगानां मुख्यं रूपं यत्सितासितादिपक्षयोः
प्रक्षयो नामेति। तदुक्तं तत्र

शितासितौ च यौ पक्षौ दीर्घह्रस्वौ च कीर्तितौ।

धर्माधर्ममयौ पाशौ महाघोरौ भयानकौ॥

द्वयोर्यत्र भवेच्छेदः क्षयेन्माया तु योगिनी।

क्षये शून्यं परं ज्ञेयं दीक्षा ह्येषा प्रकीर्तिता॥

नान्यथा भवते दीक्षा रजसां पातने न तु।

नैव शास्त्रैर्भवेन्मुक्तिर्यजने नैव याजने॥

एषा ब्रह्मविदां दीक्षा नान्यथा तु वदाम्यहम्।

इति। तथा

शितासितौ कथिष्यामि (वदिष्यामि) नामपर्यायवाचकैः।

इत्युपक्रम्य

अहः शुक्लस्तथा प्राणः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ।

इति।

अधर्मश्च क्षपा चैव ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ।

इति एवमहोरात्रमुपसंहृत्य मासमवतारयति अहोरात्र इत्यादिना ॥ ७५
॥

तमेवाह

दिनं कृष्णो निशा शुक्लः पक्षौ कर्मसु पूर्ववत्।

पूर्ववदिति, रात्रिन्दिनवत्। तेन कृष्णपक्षे क्रूराणि कर्माण्यन्यत्र
च सौम्यानीति। तदुक्तम्

क्रूरकर्माणि तत्रैव कुर्वन्सिद्धिमवाप्नुयात् ।

शुभकर्माणि कृष्णे च न च सिद्ध्यन्ति सुव्रते ॥

इति । तथा

तदारभ्य च कर्माणि शुभान्याभ्युदयानि च ।

ध्यानमन्त्राभियुक्तस्य सिद्ध्यन्ते नात्र संशयः ॥

इति ॥

तत्रैव तिथिभागमाह

याः षोडशोक्तास्तिथयस्तासु ये पूर्वपश्चिमे ॥ ६-७६ ॥

तयोस्तु विश्रमोऽर्धेऽर्धे तिथ्यः पञ्चदशेतराः ।

उक्ता इति, प्राणवाहेऽपानवाहे वा । तयोरिति, पूर्वपश्चिमयोस्तुटयोः ।

विश्रम इति, पक्षसंधित्वेन वक्ष्यमाणः। अर्धेऽर्ध इति,
प्राणीयेऽपानीये च। तयोश्च संमेलनात्तुटिर्विश्रमस्थानं स्यान्नतु
तुट्यर्धम्। इतरा इति हृदि द्वादशान्ते च
विश्रमस्थानत्वेनार्धार्धिकयोक्तायाः षोडश्यास्तुटेरन्या इत्यर्थः।
यदुक्तम्

तुट्यर्धं चाप्यधश्चोर्ध्वं विश्रमः परिकीर्तितः।

मध्ये पञ्चदशोक्ता यास्तिथयस्ताः प्रकीर्तिताः॥ (७।६१)

इति॥ ७६॥

अत्राप्यहोरात्रविभागमाह

सपादे द्व्यङ्गुले तिथ्या अहोरात्रो विभज्यते॥ ६-७७॥

प्रकाशविश्रमवशात्तावेव हि दिनक्षपे।

विभज्यत इति प्रकाशविश्रमात्मना विभागेन व्यवस्थाप्यत इत्यर्थः
। क्वचित् ह्यत्र प्रकाशस्य प्राधान्यं, क्वचिच्च विश्रमात्मन आनन्दस्य
तत्र प्रकाशप्राधान्ये दिनमन्यथा तु रात्रिरित्युक्तं तावेव हि

दिनक्षपे इति। तेनैककस्यास्तुटेः

साष्टभागाङ्गुलपरीमाणमाद्यमर्धं प्रकाशरूपं दिनं, परं

तु विश्रान्त्यात्मा रात्रिरिति। तदुक्तम्

प्रथमोदये हृत्पद्मात्तुट्यर्धं तु दिनं भवेत्।

द्वितीये चैव तुट्यर्धे यदा चरति शर्वरी॥ (स्वटं। ७।६२)

इति॥ ७७॥

ननु यदहोरात्रस्य प्रकाशविश्रान्तितारतम्येन दिननिशाविभाग

उक्तस्तदास्तां को दोषः,

यत्पुनर्बाह्याहोरात्रक्रमातिक्रमेणाप्युक्तमन्तः प्राणापानरूपं

दिननिशाविभागमुल्लङ्घ्य तुट्यन्तरमितयोरवस्थानमुच्यते तदपूर्वमिव

नः प्रतिभाति? इत्याशङ्क्याह

संवित्प्रतिक्षणं यस्मात्प्रकाशानन्दयोगिनी॥ ६-७८॥

तौ क्लृप्तौ यावति तया तावत्येव दिनक्षपे।

प्रतिक्षणमिति, सदैव प्रकाशानन्दमयीत्यर्थः। अतश्च तथा

संविद् उदयः प्रमातॄणां

वेद्यग्रहणपरत्वादेस्तारतम्यात्कस्यचित्क्षणः कस्यचित्कल्पः

कस्यचिन्निमेषोऽपि वा स्यात् ॥ ७८ ॥

अत एवाह

यावत्येव हि संवित्तिरुदितोदितसुस्फुटा ॥ ६-७९ ॥

तावानेव क्षणः कल्पो निमेषो वा तदस्त्वपि ।

नन्वेवमपि भवतु को दोषस्तत्राप्यस्या वेद्यग्रहणपरत्वं स्वात्मनि

विश्रान्तिपरत्वं वा किं तुल्यकक्ष्यतयैव भवेदुतान्यथापि ?

इत्याशङ्क्याह

यावानेवोदयो वित्तेर्वेद्यैकग्रहतत्परः ॥ ६-८० ॥

तावदेवास्तमयनं वेदितृस्वात्मचर्वणम् ।

वित्तेः इति संविदः । अस्तमयनमिति, वेद्यप्रकाशस्य न्यग्भावात् ।

चर्वणम् इति विश्रान्तिः । एवकाराभ्यां च साम्यमेव द्योतितम् ॥ ८० ॥

ननु स्वात्मविश्रान्तिपरत्वेऽप्यन्तारूपाणां सुखादीनां वेद्यानां सद्भावात् तद्ग्रहणपरत्वं न हीयेत् इति कथमनयोस्तुल्यकक्ष्यत्वं स्यात् ? इत्याशङ्क्याह

वेद्ये च बहिरन्तर्वा द्वये वाथ द्वयोज्झिते ॥ ६-८१ ॥

सर्वथा तन्मयीभूतिर्दिनं वेत्तृस्थता निशा।

वेद्यं नाम बहिरस्त्वन्तर्वा, मा वा भूत्किमनेन प्रयोजनं, यावता हि तन्मयीभावो नाम सर्वथा दिनं वेत्तृस्थता स्वात्मविश्रान्तिश्च निशा, इत्यस्माकं विवक्षितं तेन यावद्वेद्यग्रहस्तावद्दिनमन्यथा तु रात्रिरिति। यदाहुः

ततो यत्र यावत्तावदनया वेद्यग्रहवेदकविश्रान्तिभूमौ प्रकाशानन्दावाभास्येते तत्र तावद्रूपे एव दिननिशे इति। अतश्च दिननिशयोस्तुल्यकक्ष्यत्वमेव भवति, इति न कश्चिन्नियमः। द्वयोज्झिते इत्यनेन वेद्यस्यानवक्लृप्तिरेवोपोद्बलिता न त्वेवमस्य संभवो दर्शितः, नह्यनन्तर्बहीरूपं वेद्यं किंचित्संभवेत्॥ ८१ ॥

ननु योऽयं संविदः प्रकाशविमर्शयोरेकतरप्राधान्याद्विशेष उक्तः
स किं प्रमातॄणामपि संभवेन्न वा ? इत्याशङ्क्याह

वेदिता वेद्यविश्रान्तो वेत्ता त्वन्तर्मुखस्थितिः ॥ ६-८२ ॥

वेदिता इति ज्ञाता, वेत्ता इति विचारयिता विमृष्टेत्यर्थः ।
तेनैकत्र प्रकाशप्राधान्यमन्यत्र तु विमर्शस्य इति प्रमातुरपि
द्वैविध्यम् ॥ ८२ ॥

वेत्तापि द्विधा इत्याह

पुरा विचारयन्पश्चात्सत्तामात्रस्वरूपकः ।

विमर्शनान्तरीयक एव हि स्वरूपलाभो भवेदिति भावः । एवमत्र
ज्ञानविचारसत्तार्थतया त्रिविधोऽपि विधिराश्रयणीयो येन
प्रमातुस्त्रैविध्यं सिध्येदिति भावः ॥

अत्रैव प्रसङ्गाज्जाग्रदादिस्वरूपमपि निरूपयति

जाग्रद्वेदितृता स्वप्नो वेत्तृभावः पुरातनः ॥ ६-८३ ॥

परः सुप्तं क्षये रात्रिदिनयोस्तुर्यमद्वयम्।

जाग्रदिति, वेद्यविश्रान्तेरेव प्राधान्यात्। पुरातन इति,
विम्रष्टृतात्मकः। स्वप्न इति, वेद्यस्य कथंचिदप्राधान्यात्। पर
इति, सत्तामात्रनिष्ठः। सुप्तमिति, वेद्यक्षोभप्रक्षयात्। अद्वयमिति,
प्रमातृभेदस्यापि विगलनात्। अनेन च विश्वात्मता च प्राणत्वम्
इत्याद्युक्तं स्मारितम्॥ ८३॥

ननु रात्रिदिनयोर्बहिः कदाचित्साम्यं भवेत् कदाचिच्च वैषम्यमित्यत्र
किं निमित्तम्? इत्याशङ्क्याह

कदाचिद्वस्तुविश्रान्तिसाम्येनात्मनि चर्वणम्॥ ६-८४॥

वेद्यवेदकसाम्यं तत् सा रात्रिदिनतुल्यता।

यन्नाम कदाचिद्वेद्ये स्वात्मनि च तुल्यकक्ष्यतया विश्रान्तिर्भवेत् तदेव
वेद्यवेदकयोः साम्यं भवेत्, तदनुप्राणितं च रात्रिदिनयोस्तुल्यत्वं,
यत्सर्व एव योगिनो महापुण्यं विषुवत्कालमाचक्षते यदुक्तम्

वेद्यवेदकसाम्येन वस्तुविश्रमचर्वणम्।

यदा कदाचिद्भवति सा रात्रिदिनतुल्यता॥

विषुवत्कालयोगोऽसौ योगिभिः समुदाहृतः।

इति॥ ८४॥

एवं च वेद्यस्य वेदकस्य च विश्रान्तेराधिक्ये दिनस्य निशायाश्च
दैर्घ्यं।ह्रं भवेदन्यथा त्वपचयः, तदाह

वेद्ये विश्रान्तिरधिका दिनदैर्घ्याय तत्र तु॥ ६-८५॥

न्यूना स्यात्स्वात्मविश्रान्तिर्विपरीते विपर्ययः।

स्वात्मौत्सुक्ये प्रबुद्धे हि वेद्यविश्रान्तिरल्पिका॥ ६-८६॥

न्यूनेति, अन्यथा हि वेद्यविश्रान्तेराधिक्यमेव न स्यात्।
स्यादित्यर्थाद्रात्र्यपचयनिमित्तम्, विपरीत इति स्वात्मनो
विश्रान्तेराधिक्ये वेद्यस्य चान्यथात्वे यतः स्वात्मन्यौत्सुक्ये

विश्रान्त्यभिलाषे विकस्वरतामुपेयुषि वेद्यविश्रान्तिरल्पीयसी भवेत्
येन निशाया दैर्घ्यं दिनस्यापचयः। तदुक्तम्

द्राघीयसी वेद्यवृत्तिर्दिनदैर्घ्याय कल्पते।

तथैव स्वात्मविश्रान्तिवृत्तिः स्याद्रात्रिविस्तरः॥

इति॥ ८६॥

अयमेव चात्र पक्षो युक्तः इत्याह

इत्थमेव दिवारात्रिन्यूनाधिक्यक्रमं वदेत्।

नन्वन्तर्बहिश्च रात्रिदिनयोः स्थितेऽप्यौत्सर्गिके क्रमे
यथान्तरसावुक्तयुक्त्या
प्रकाशविमर्शयोरेकतरप्राधान्यात्प्रतिप्रमातृ विशिष्यते, तथा
बहिरपि प्रतिभुवनं किं विशिष्यते न वा ? इत्याशङ्क्याह

यथा देहेष्वहोरात्रन्यूनाधिक्यादि नो समम्॥ ६-८७॥

तथा पुरेष्वपीत्येवं तद्विशेषेण नोदितम्।

विशेषेणेति देहमधिकृत्य, तथात्वेन हि तत्कथितं तत्तत्फलसंपत्तिनिमित्तं स्यादित्याशयः॥ ८७॥

नन्वेवं रात्रिदिनविभजने किं प्रमाणम्? इत्याशङ्क्याह

श्रीत्रैयम्बकसन्तानविततताम्बरभास्करः॥ ६-८८॥

दिनरात्रिक्रमं मे श्रीशंभुरित्थमपप्रथत्।

अत एवान्यथान्यैर्यत्तद्विभजनं कृतं तदग्राह्यमेव इत्याह

श्रीसन्तानगुरुस्त्वाह स्थानं बुद्धाप्रबुद्धयोः॥ ६-८९॥

हृद आरभ्य यत्तेन रात्रिन्दिवविभाजनम्।

तदसत्सितपक्षेऽन्तः प्रवेशोल्लासभागिनि॥ ६-९०॥

अबुद्धस्थानमेवैतद्दिनत्वेन कथं भवेत्।

यन्नाम प्राच्यैर्हृदयादारभ्य द्वादशान्तं

यावत्तुट्यर्धपरीमाणं प्राणीयमाद्यं स्थानं बुद्धस्य परं

त्वबुद्धस्य इत्युक्तं, तेनैव बुद्धाबुद्धास्थानवदनेन

समाख्यौचित्याद्रात्रिदिनयोरपि विभागः कृतो यद्बुद्धस्थानं

दिनमबुद्धस्थानं तु रात्रिरिति, तत्त्वयुक्तं

यदन्तःप्रवेशात्मन्यपानवाहे स्थानस्याविशेषाद्रात्रित्वेन

परिकल्पितमबुद्धस्थानमेव दिनं स्यात् इति पूर्वापरव्याहतत्वम् ॥ ९०

॥

न चैतद्विद्वेषपूर्वमस्माभिरुक्तमिति न शिष्टनिन्दा कृता स्यात्

इत्याह

अलं वानेन नेदं वा मम प्राङ्मतमत्सरः ॥ ६-९१ ॥

हेये तु दर्शिते शिष्याः सत्पथैकान्तदर्शिनः ।

इदानीं प्रकृतमेवावतारयति

व्याख्यातः कृष्णपक्षो यस्तत्र प्राणगतः शशी ॥ ६-९२ ॥

आप्यायनात्मनैकैकां कलां प्रतितिथित त्यजेत्।

द्वादशान्तसमीपे तु यासौ पञ्चदशी तुटिः॥ ६-९३॥

सामावस्यात्र स क्षीणश्चन्द्रः प्राणार्कमाविशेत्।

प्राणगत इति, तत्रास्य प्राधान्यात्। तेन तुटिस्थानावस्थितां यां (यां) तिथिं प्राणादित्य आक्रमते तस्यां तस्यामपानचन्द्रः सुरादीनामपानरूपेण हेतुना एकैकां कलां त्यजेत एकैककलाह्रासक्रमेण क्षैण्यमासादयेत यावत्स एव कलामात्रशेषत्वात्क्षीणः सन् द्वादशान्तसमीपस्थायां पञ्चदशतुट्यात्मिकायाममावास्यायां प्राणार्कमाविशेत तदन्तर्लीनो भवेत्, यदेवास्य बहिरस्तमय इत्युच्यते॥ ९३॥

न चैतन्निर्मूलमेवोक्तम् इत्याह

उक्तं श्रीकामिकायां च नोर्ध्वेऽधः प्रकृतिः परा।

अर्धार्धे क्रमते माया द्विखण्डा शिवरूपिणी॥ ६-९४॥

चन्द्रसूर्यात्मना देहं पूरयेत्प्रविलापयेत्।

इह खलु परा पूर्णा, अत एव शिवरूपिणी शक्तिमदवियुक्ता
प्रकृतिः, विश्वोत्पत्तिभूः संवित् माया स्वरूपगोपनशीला
प्रथमं प्राणात्मतया समुच्छलन्ती द्विखण्डा प्राणापानात्मतया
द्वैध्यमापन्ना सती नोर्ध्व एव नाध एव अपि तूर्ध्वाधःप्रवाहात्मना
अर्धार्धे क्रमते दक्षवामनाड्योरन्तः समप्रविभागेन
प्रवहतीत्यर्थः। अत एव प्राणापानदशामधिशयाना परा
संविच्चन्द्रात्मनाप्यायकारितया देहं प्रपूरयेत् सूर्यात्मना च
चान्द्रीणामेव कलानामपचयात् प्रविलापयेत शोषयेदित्यर्थः॥ ९४॥

ननु चान्द्रीणां कलानामपचये किं निमित्तम्? इत्याशङ्क्याह

अमृतं चन्द्ररूपेण द्विधा षोडशधा पुनः॥ ६-९५॥

पिबन्ति च सुराः सर्वे दशपञ्च पराः कलाः।

अमा शेषगुहान्तःस्थामावास्या विश्वतर्पिणी॥ ६-९६॥

यच्चन्द्ररूपेण षोडशधा भिन्नममृतं स्थितं तत्पुनर्द्विधा

दृश्यमानसितरूपपञ्चदशकलात्मना

तद्भित्तिभूतातिस्वच्छाबूर्पकलात्मना चेत्यर्थः। तत्र पञ्चदश

कलाः सर्व एव बहिः सुरादयोऽन्त करणानिःकार्याणि चाप्यायलिप्सया

पिबन्ति येनासां प्रतिदिनमपचयः स्यात्। यदभिप्रायेणैव

यस्मिन्सोमः सुरपितृनरैरन्वहं पीयमानः

क्षीणः क्षीणः प्रविशति ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ । (साम्ब पं। ८ श्लोक)

इत्याद्यन्यत्रोक्तम्। अमाख्या षोडशी पुनः कला सुराद्युपसंहृतकला

पञ्चदशकावशिष्टस्वभावत्वाच्छेषरूपा, अत एव गुहान्तरिव

स्थितं वस्तु सुरक्षितत्वादक्षीणं स्यात्तथैवेयमपीत्यर्थः। यतः

सा विश्वस्य पञ्चदशकलाक्रोडीकारितयाप्यायकारिणी, अत एव

येयममा सह यौगपद्येन पञ्चदशानां कलानां वसनात् अमावास्या

तद्व्यपदेश्येत्यर्थः। तिथौ

पुनस्तदधिष्ठितत्वादौपचारिकस्तद्व्यापदेश इत्याशयः॥ ९६॥

एतदेव प्रकृते योजयति

एवं कलाः पञ्चदश क्षीयन्ते शशिनः क्रमात्।

आप्यायिन्यमृताबूर्पतादात्म्यात्षोडशी न तु ॥ ६-९७ ॥

षोडशी न तु क्षीयते, यदबूर्पतादात्म्यादर्कस्तं क्षपयितुमक्षम इत्यभि प्रायः ॥ ९७ ॥

इदानीमेतदनन्तरभाविनं कृष्णस्य शुक्लस्य च पक्षस्य सन्धिं दर्शयति

तत्र पञ्चदशी यासौ तुटिः प्रक्षीणचन्द्रमाः ।

तदूर्ध्वगं यत्तुटयर्धं पक्षसंधिः स कीर्तितः ॥ ६-९८ ॥

पञ्चदशी तुटिरित्यमावास्योदयस्थानम्, अत एव प्रक्षीणचन्द्रमा इत्युक्तम् । यदिति, प्राणीयं षोडशतुटिसंबन्धि ॥ ९८ ॥

ननु संधिर्ह्युभयोर्भवति, तत्कथमेकस्यैव प्राणीयस्य तृटयर्धस्यासौ स्यात् ? इत्याशङ्क्याह

तस्माद्विश्रमतुटयर्धादामावस्यं पुरादलम् ।

परं प्रातिपदं चार्धमिति संधिः स कल्प्यते ॥ ६-९९ ॥

तत्प्राणीयमन्त्यं विश्रमतुट्यर्धमवलम्ब्य पुरादलं
प्रथममर्धमामावस्यं तत्संलग्नं परं द्वितीयं
चापानीयमाद्यं तुट्यर्धं प्रातिपदं तत्संलग्नम्
इत्यनयोरुभयोरर्धयोः
संमेलनात्प्रतिपदमामावस्यान्तरालभूतोऽसावेकतुट्यात्मा शन्धिः
कल्प्यते तथा व्यपदिश्यत इत्यर्थः। तदुक्तम्

श पक्षसन्धिः प्रतिपत्पञ्चदश्योर्यदन्तरम्। (अ। को। १।४।७)

इति। इदमेवान्यत्र प्रधानतया पूजाकालत्वेनोक्तम्। यदुक्तम्

ङ दिवा पूजयेद्देवं रात्रौ नैव च नैव च।

अर्चयेद्देवदेवेशं दिनरात्रिपरिक्षये ॥

इति। अत्र विश्रमतुट्यर्ध एवाधार्धिकया विभक्ते यदि
सन्धिर्व्याख्यायते तत्सन्धिद्वयस्याप्येकैव तुटिरर्धार्धिकया स्यात्
इत्येकस्यास्तुटेर्विनियोगाभावादासमञ्जस्यं पर्यवस्येदित्यलं बहुना ॥

९९ ॥

एवं प्राणे पक्षोदयं प्रदश्यं सूर्यग्रहणमपि दर्शयति

तत्र प्रातिपदे तस्मिंस्तुट्यधार्धे पुरादलम् ।

आमावस्यं तिथिच्छेदात्कुर्यात्सूर्यग्रहं विशत् ॥ ६-१०० ॥

अर्धं चार्धं च अर्धार्धं, तुटेरर्धार्धं तुट्यर्धार्धं, तस्मिन्
सन्धित्वेन परिकल्पिते तुट्यर्धद्वय इत्यर्थः । तत्रैवं स्थिते सति
तुट्यर्धद्वयमध्यादामावस्यं पूर्वमर्धम्
अर्थात्परस्मिन्प्रातिपदेऽर्धे वक्ष्यमाणादृणशब्दाभिधेयात्
तिथिच्छेदाद्विशत् सत् सूर्यग्रहणं कुर्यात्,
प्रतिपदमावास्यासङ्घट्टात्सूर्यग्रहणं भवेदित्यर्थः ॥ १०० ॥

नन्वेतावन्मात्रात्सूर्यग्रहणं भवेदित्यत्र क इवाशयः ?
इत्याशङ्क्याह

तत्रार्कमण्डले लीनः शशी स्रवति यन्मधु ।

तप्तत्वात्तत्पिबेदिन्दुसहभूः सिंहिकासुतः ॥ ६-१०१ ॥

मध्वित्यमृतं। तप्तत्वादिति, यथायथमर्केण संनिकर्षात्।
इन्दुसहभूरिति विधौ राहुः इत्याद्युक्त्या तत्सहचारित्वात्
अन्यथैषां त्रयाणामपि सङ्घट्टो न भवेदिति भावः। यदुक्तम्

रविबिम्बान्तरे देवि चन्द्रबिम्बं तदा भवेत्।

तदन्तरे भवेद्राहुरमृतार्थी वरानने॥

अमृतं स्रवते चन्द्रो राहुश्च ग्रसते तु तत्।

पीत्वा त्यजति तद् बिम्बं तदा मुक्तः स उच्यते। (स्वटं। ७।७०)

इति ॥ १०१ ॥

ननु त्रयाणामप्येषां सङ्घट्टे किं सतत्त्वम्? इत्याशङ्क्याह

अर्कः प्रमाणं सोमस्तु मेयं ज्ञानक्रियात्मकौ।

राहुर्मायाप्रमाता स्यात्तदाच्छादनकोविदः॥ ६-१०२ ॥

तत एव तमोरूपो विलापयितुमक्षमः।

तयोः प्रमाणप्रमेययोः आच्छादनं स्वात्मसात्कारेण तिरोधानं न पुनरत्यन्तमेव विलयः, संस्कारात्मना पुनरपि बोधकमाहात्म्यात्तदुदयस्य भावात्, अत एवोक्तं विलापयितुमक्षमः इति। तत इत्याच्छादकत्वात्, तमसो ह्यावरकत्वमेव तत्त्वम्॥ १०२॥

नन्वेवमेतद्विलापने कः क्षम ? इत्याशङ्क्याह

तत्सङ्घट्टाद्द्वयोल्लासो मुख्यो माता विलापकः॥ ६-१०३॥

तेषां मातृमानमेयानां शङ्घट्टः सामरस्यं ततः समुल्लसितमद्वयमेव मुख्यः प्रमाता विलापकस्तत्त्रयसङ्घट्टनेन परसंविन्मात्रसार एवेत्यर्थः। यदाहुः

प्राणार्कमानहठघट्टितमेयचन्द्र
विद्रावितामृतरसोत्सुकितः खमाता।

स्वर्भानुरावृणुत एव रविं रसं तु

पुण्ये ग्रहेऽत्र रसयेत्त्रयघट्टनज्ञः ॥

इति ॥ १०३ ॥

अत एव चायं कालो महापुण्यः इत्याह

अर्केन्दुराहुसङ्घट्टात् प्रमाणं वेद्यवेदकौ ।

अद्वयेन ततस्तेन पुण्य एष महाग्रहः ॥ ६-१०४ ॥

अद्वयेन चिन्मात्रात्मना भवन्तीत्यर्थः । तदुक्तम्

राहुरादित्यचन्द्रौ च त्रय एते ग्रहा यदा ।

दृश्यन्ते समवायेन तन्महाग्रहणं भवेत् ॥

स कालः सर्वलोकानां महापुण्यतमो भवेत् ॥ (स्व । ७ ।७३)

इति ॥ १०४ ॥

नन्वयं सूर्यादीनां सङ्घट्टः किं प्रतिपदमावस्यासंभेद एव

भवेदुतान्यथापि? इत्याशङ्क्याह

अमावस्यां विनाप्येष सङ्घट्टश्चेन्महाग्रहः।

यथार्के मेषगे राहावश्विनीस्थेऽश्विनीदिने॥ ६-१०५॥

अमावस्यां विनापि शुद्धायामेव प्रतिपदि यद्येष सङ्घट्टः स्यात्
तदापीदं महद् ग्रहणं भवेदेव। यथा
बहिश्चन्द्रार्कराहूणामश्विन्यामेवावस्थानादेकर्क्षेण
वैशाखामावस्यायां प्रहरद्वयादूर्ध्वं शुद्धायामेव प्रतिपदि
सूर्यस्य ग्रहणं संभवेत्, लम्बनस्य धनगतत्वाद्
ग्रहणस्थित्यर्धस्य लम्बनादूनत्वात्। एवं यत्र
प्रतिपदमामावास्यासंभेदेन सूर्यग्रहणं भवेत् तत्रामावस्यायां
प्रग्रहणं मोक्षस्तु प्रतिपदि, अन्यथा तूभयमपि
प्रतिपद्येवेत्यर्थसिद्धम्॥ १०५॥

तदेवाह

आमावास्यं यदा त्वर्धं लीनं प्रातिपदे दले।

प्रतिपच्च विशुद्धा स्यात्तन्मोक्षो दूरगे विधौ ॥ ६-१०६ ॥

तन्मोक्षे च विधुदूरीभावो हेतुरित्युक्तं दूरगे विधौ इति। तस्मिन् हि दूरीभूते तत्सहचारी राहुरपि तथा भवेदिति भावः ॥ १०६ ॥

अस्य च ग्रहणस्य महत्त्वे निमित्तं दर्शयति

ग्रासमोक्षान्तरे स्नानध्यानहोमजपादिकम्।

लौकिकालौकिकं भूयःफलं स्यात्पारलौकिकम्॥ ६-१०७ ॥

भूयःफलमित्यन्तफलम्। यदुक्तम्

तत्र स्नानं तथा दानं पूजाहोमजपादिकम्।

यत्कृतं साधकैर्देवि तदन्तफलं भवेत्॥ (स्वटं। ७।७४)

इति ॥ १०७ ॥

पारलौकिकत्वे निमित्तमाह

ग्रास्यग्रासकताक्षोभप्रक्षये क्षणमाविशन्।

मोक्षभाग्ध्यानपूजादि कूर्वंश्चन्द्रार्कयोर्ग्रहे ॥ ६-१०८ ॥

इह खलु योगी चन्द्रार्कयोर्ग्रहे सूर्यग्रहणे ग्रास्यग्रासकयोः प्रमेयप्रमात्रोर्यः संबन्धस्तद्रूपो यः क्षोभः तत्प्रक्षयात्मनि परस्मिन्प्रमातर्याविशन् परां वृत्तिमवलम्ब्य क्षणमात्रं ध्यानादि कुर्वन् मोक्षभागपवृज्यत एवेत्यर्थः। यदुक्तम्

पक्षद्वयं परित्यज्य पूर्वोक्तकरणेन च।

उन्मन्यन्ते स्थितो नित्यं परवृत्त्यवलम्बकः॥

परित्यज्य त्वधः सर्वं ध्यानामास्थाय योजयेत्।

तस्य मुक्तिर्न सन्देहस्त्वन्यथा सिद्धिभाग्भवेत्॥

इति ॥ १०८ ॥

तिथिच्छेदादित्युक्तमधिकावापेन लक्षयति

तिथिच्छेद ऋणं कासो वृद्धिर्निःश्वसनं धनम्।

अयत्नजं यत्नजं तु रेचनादथ रोधनात्॥ ६-१०९॥

यन्नाम कासवशेन शीघ्रमेव प्राणस्य प्रसरणात् सहसैवामावास्यो भागः प्रतिपद्भागमनुप्रविशति तदुच्यते ऋणं, तिथिच्छेदयोः कार्यकारणयोरभेदोपचारात्कासश्चेति। यन्नाम च निःश्वासवशादपानवाहस्य चिरेण प्रसरणात् तिथेरधिकीभावेन पूर्णतया पौर्णमास्युदयस्तदुच्यते वृद्धिर्धनं निःश्वसनं च, इत्येतच्चोभयं सर्वेषामयोगिनामपि कासश्वासादिना स्वरसत एवोत्पद्यते इत्युक्तम् अयत्नजम् इति, यद्वशादन्तरा चन्द्रसूर्योपरागो भवन्नपि तैरनवधानान्न परं लक्ष्यते। योगिनां पुनश्चन्द्रसूर्योपरागयोग्ये तत्प्राणस्य रेचकपूरकाद्यात्मना यत्नेन भवेदित्युक्तं यत्नजम् इति। यदुक्तम्

तिथिच्छेद ऋणं ज्ञेयं वृद्धौ चैव धनं भवेत्।

ऋणं चैव भवेत्कासो निःश्वासो धनमुच्यते॥ (स्वटं। ७।६४)

इति। तथा

तिथिच्छेदस्तथा वृद्धिः कासश्वासादि वा भवेत्।

अयत्नजो यत्नजस्तु प्राणवृत्तिनिरोधतः॥

इति॥ १०९॥

एतदेवापानवाहेऽप्यतिदेष्टुमाह

एवं प्राणे विशति चित्सूर्य इन्दुं सुधामयम्।

एकैकध्येन बोधांशुकलया परिपूरयेत्॥ ६-११०॥

क्रमसंपूरणाशालिशशाङ्कामृतसुन्दराः।

तुट्यः पञ्चदशैताः स्युस्तिथयः सितपक्षगाः॥ ६-१११॥

एवं पूर्वोक्तयैव गत्या प्राणे विशति शक्तेर्हृदन्तमवरोहति
चिदात्मा प्राणसूर्यः प्रतितुट्यैकैकध्येन प्रबुद्धांशुजालया
कलया सुधामयमिन्दुं परिपूरयेत्, येन प्रतिपद्येककलो द्वितीयस्यां

द्विकलः इत्याद्यात्मना क्रमेण संपूरणाशालिनः शशाङ्कस्यामृतेन सुन्दरा एताः पञ्चदश तुट्य एव सितपक्षगास्तिथयो भवेयुः। यदुक्तम्

प्राणहंसो यदा प्राप्तस्त्वधस्तात्प्रथमां तुटिम्।

पूर्वमर्धं त्वहः प्रोक्तं तुट्यर्धमपरं निशा॥ (७।७७)

इत्युपक्रम्य

प्रतिपत्सा तु विज्ञेया चन्द्रश्चैककलो भवेत्।

द्वितीयायां द्वितीया तु वृद्धिमेति क्रमेण तु॥

तिथयश्चैवमारभ्य यावत्पञ्चदशी तुटिः। (स्वटं। ७।७९)

इति॥ १११॥

अत्रैव च पक्षसन्धिताद्यप्यतिदिशति

अन्त्यायां पूर्णमस्तुट्यां पूर्ववत्पक्षसन्धिता।

इन्दुग्रहश्च प्रतिपत्सन्धौ पूर्वप्रवेशतः ॥ ६-११२ ॥

ऐहिकं ग्रहणे चात्र साधकानां महाफलम् ।

प्राग्वदन्यदयं मासः प्राणचारेऽब्द उच्यते ॥ ६-११३ ॥

पूर्णो माश्चन्द्रो यस्यामेवंविधायां पञ्चदश्यां तुट्यां
पूर्ववदिति, तुट्यर्धद्वयसंमेलनया । पूर्वेति, पूर्वं पौर्णमासं
सन्धिलक्षणं तुट्यर्धं तत्प्रवेशात् । एतच्च यद्यपि
पूर्ववदित्यतिदेशाद् गतार्थमेव तथापि
पूर्णिमाप्रतिपत्संभेदेनैवेन्दुग्रहो भवेत् न तु शुद्धायामेव
प्रतिपद्यपि इति दर्शयितुं साक्षादुक्तम् । ऐहिकमिति,
सृष्टिप्राधान्यात् । प्राग्वदन्यदिति, मातृमेयसंघट्टादि । यदाहुः

शक्तिसंस्नुतसुधारसक्रमात् पूर्णमिन्दुमणुराहुराहरन् ।

छादयेदिह महाशुभे ग्रहे द्रावितं पिबति तं महामुनिः ॥

इति । इदानीं मासमुपसंहरन्नब्दमवतारयति अयमित्यादिना ॥ ११३ ॥

तमेवाह

षट्सु षट्स्वङ्गुलेष्वर्को हृदयान्मकरादिषु।

तिष्ठन्माघादिकं षट्कं कुर्यात्तच्चोत्तरायणम्॥ ६-११४॥

मकरादिष्वर्थान्मिथुनान्तेषु, तेन षड्भिरङ्गुलैः षड्गुणितानि षट्त्रिंशद्भवन्तीति भावः। माघे हि मकरस्योदयो यावदाषाढे मिथुनस्य। यदुक्तम्

षडङ्गुलं च संक्रामो मकरादिषु राशिषु।

भानोर्माघाद्याषाढान्तं भवेत्तच्चोत्तरायणम्॥

इति॥ ११४॥

अत्रैव विषुवत्सङ्क्रान्तिं दर्शयति

संक्रान्तित्रितये वृत्ते भुंक्ते चाष्टादशाङ्गुले।

मेषं प्राप्ते रवौ पुण्यं विषुवत्पारलौकिकम् ॥ ६-११५ ॥

अष्टादशाङ्गुल इति प्रतिसंक्रान्त्यङ्गुलषट्कस्य भोगात् ।

हृदयादुदयस्थानात्सङ्क्रान्तिर्मकरे स्मृता ।

षडङ्गुलान्यधस्त्यक्त्वा कुम्भे सङ्क्रमते पुनः ॥

कण्ठोर्ध्वं द्व्यङ्गुलं त्यक्त्वा मीने संक्रमते पुनः ।

गलोर्ध्वाद्यावत्ताल्वन्तं त्यक्त्वा मेषेऽथ संक्रमेत् ॥

नासान्तं यावत्संक्रान्तिरङ्गुलानि षडेव हि ।

एषा वै विषुसंक्रान्तिरुत्तरे संव्यवस्थिता ॥ (स्व । तं । ७ ।९४)

इति । विषुं व्याप्तिं साम्यमर्हति इति विषुवत् । विषुवत्पारलौकिकम्
इत्येतच्च यद्यपि निखिलस्यैवोत्तरायणस्य संभवति तथाप्यत्र
विशेषेणेति स्वकण्ठेनैतदुक्तम् । यदुक्तम्

मकराच्च समारभ्य मिथुनान्तं च सुव्रते ।

उत्तरायणमत्रैतदैहिकीसिद्धिवर्जितम् ॥ (स्व । तं । ७ ।९७)

इति ॥ ११५ ॥

ननु यद्येतद्विषुवत्पारलौकिकं दक्षिणायनं पुनः कीदृक् ?
इत्याशङ्क्याह

प्रवेशे तु तुलास्थेऽर्के तदव विषुवद्भवेत् ।

इह सिद्धिप्रदं चैतद्दक्षिणायनगं ततः ॥ ६-११६ ॥

प्रवेशे इति शक्तितो हृदन्तम् । तदेव
इत्यष्टादशाङ्गुलोपभोगात्मसंक्रान्तित्रयानन्तरभावीत्यर्थः ।
यदुक्तम्

शक्त्यधो हृदये हंसः संक्रामेत्कर्कटे प्रिये ।

षडङ्गुलानि संत्यज्य सिंहे वै संक्रमेत्पुनः ॥

षडङ्गुलैः पुनस्त्यक्तैः कन्यां संक्रमते पुनः ।

नासिकाग्रात्तु ताल्वन्तं त्यक्ते वै विषुवद्भवेत्॥

तुलासंक्रान्तिरेषोक्ता दक्षिणं विषुवद्भवेत्॥ (स्वटं। ७।११३)

इति। इह सिद्धिप्रदमिति, यदुक्तम्

शाधनं यत्कृतं तत्र इह जन्मनि सिद्धिदम्। इति॥ ११६॥

ननु मकरादे राशिद्वादशकस्य सामान्येन पारलौकिकैहलौकिकत्वेऽपि प्रत्येकमस्ति कश्चिद्विशेषो न वा ? इत्याशङ्क्याह

गर्भता प्रोद्बुभूषिष्यद्भावश्चाथोद्बुभूषुता।

उद्भविष्यत्त्वमुद्भूतिप्रारम्भोऽप्युद्भवस्थितिः॥ ६-११७॥

जन्म सत्ता परिणतिर्वृद्धिर्ह्रासः क्षयः क्रमात्।

मकरादीनि तेनात्र क्रिया सूते सदृक्फलम्॥ ६-११८॥

गर्भता आधानं, प्रोद्भवितुमेषिष्यन् भावः सत्ता यस्यासौ तथा

आद्य इच्छापरिस्पन्दः। उद्भवितुमिच्छुरुद्बुभूषुस्तस्य भावस्तत्त्वं, उद्भवनात्मकैषणीयसंयुक्तमिच्छामात्रमित्यर्थः। उद्भविष्यत्त्वम् उद्भवनाय स्वात्मन्येवोच्छलत्त्वेनावस्थानम्। उद्भूतिप्रारम्भः तत्रैव नैविड्यम्। उद्भवस्थितिः तत्रैवौन्मुख्यम्। एवं मकरादिराशिद्वादशकं क्रमादिति, गर्भतादिरूपं यतो भवति तेन हेतुनात्र बाह्यबीजादिवज्जपादि क्रियापि गर्भताद्यनुगुणमेव फलं शूते ददातीत्यर्थः। यदुक्तम्

आधानमिच्छा संयोग आनन्दो घनता स्थितिः।

जन्म सत्ता परिणतिर्वृद्धिर्ह्रासः क्षयः क्रमात्॥

माघान्मासात्समारभ्य स्थितयः परिकीर्तिताः।

साधकानां सिद्धिविधौ भावानां चापि संभवे॥

इति॥ ११८॥

अत्राप्यवान्तरोऽस्ति विशेषः इत्याह

आमुत्रिके झषः कुम्भो मन्त्रादेः पूर्वसेवने ।

चतुष्कं किल मीनाद्यमन्तिकं चोत्तरोत्तरम् ॥ ६-११९ ॥

प्रवेशे खलु तत्रैव शान्तिपुष्ट्यादिसुन्दरम् ।

कर्म स्यादैहिकं तच्च दूरदूरफलं क्रमात् ॥ ६-१२० ॥

झषो मकरः । एतौ चार्थात्सिद्धमन्त्रस्य, असिद्धमन्त्रस्य तु
मन्त्रादिसेवानिमित्तं मीनादिचतुष्कं प्रवेशे इत्यपानवाहे । यदुक्तम्

तस्मादारभ्य मकराद्ध्यानहोमजपादिकम् ।

परलोकनिमित्ताय तदनन्तफलं भवेत् ॥

पुरश्चर्यानिमित्ताय मन्त्रग्रहव्रतं च यत् ।

मीनादावारभेत्सर्वं मन्त्रसिद्ध्यर्थमात्मनः ॥ (स्वटं । ७ ।१०३)

इति । तथा

तस्मादिहात्मसिद्ध्यर्थं पुष्ट्यर्थं चैव साधयेत्।

दक्षिणायनजे काले यस्मात्सृष्टिः प्रजायते॥ (स्वटं। ७।११०)

इति।

एवमुत्तरायणस्य वेद्यग्रहणपरत्वम् इति यथायथं
फलदानेऽप्यासन्नत्वं दक्षिणायनस्य त्वन्तर्विश्रान्तिपरत्वम् इति
फलदाने यथायथं दूरत्वम्। अत एवोत्तरायणे दिनस्य
वृद्धिर्निशाया ह्रासोऽत्र त्वन्यथा॥ १२०॥

तदाह

निर्गमे दिनवृद्धिः स्याद्विपरीते विपर्ययः।

वर्षेऽस्मिंस्तिथयः पञ्च प्रत्यङ्गुलमिति क्रमः॥ ६-१२१॥

तत्राप्यहोरात्रविधिरिति सर्वं हि पूर्ववत्।

ननु मासारब्धो वर्षः इति तेषां प्रत्यङ्गुलषट्के उदय उक्तः ते
च तिथ्यारब्धा इति कथमत्र न तासाम्? इत्याशङ्क्याह

प्रत्यङ्गुलं पञ्च तिथय इति। तत्षट्के त्रिंशद्भवन्ति येन तत्र मासोदय उक्तः। तत्रापि इत्यङ्गुलपञ्चांशे तेन प्रत्यङ्गुलदशांशं दिनं निशा च। शर्वं पक्षादि, तेन पूर्वस्मिन्नङ्गुलत्रये कृष्णपक्षोऽन्यत्र तु परः। तदुक्तम्

अङ्गुले ह्यङ्गुले ह्यत्र तिथयः पञ्च संस्थिताः।

तस्याप्यर्धं दिनं पूर्वमपरार्धं निशा भवेत्॥

षट्पञ्चकास्तिथीनां ये तेऽहोरात्रास्तु मासिकाः।

त्रिंशता तैरहोरात्रैर्द्विपक्षो मास उच्यते॥ (स्वटं। ७।९१)

इति॥ १२१॥

ननु प्रहराष्टकन्यायेन मासद्वादशकस्यापि किमधिष्ठातारः केचित्संभवन्ति न वा? इत्याशङ्क्याह

प्राणीये वर्ष एतस्मिन्कार्तिकादिषु दक्षतः॥ ६-१२२॥

पितामहान्तं रुद्राः स्युर्द्वादशाग्रेऽत्र भाविनः।

यदुक्तम्

दक्षनामा तु यो रुद्रः कथितोऽत्र महेश्वरि।

कार्तिकं मासमखिलं स तु भुङ्क्ते महेश्वरि॥

चण्डो मार्गशिरोमासि हरः पौषे तु कीर्तितः।

शौण्डी तु माघमासे च प्रमथः फाल्गुने तथा॥

भीमश्चैत्रे समाख्यातो वैशाखे मन्मथः स्मृतः।

शकुनिर्ज्येष्ठमासे तु आषाढे सुमतिस्तथा॥

नन्दोऽथ श्रावणे मासि भाद्रे गोपालकस्तथा।

पितामहश्च वीरेशो मासस्याश्वयुजस्य च॥

इति। अग्र इत्येकीकारप्रकाशनाह्निके॥ १२२॥

एतदुपसंहरन्नन्यदवतारयति

प्राणे वर्षोदयः प्रोक्तो द्वादशाब्दोदयोऽधुना ॥ ६-१२३ ॥

खरसास्तिथ्य एकस्मिन्नेकस्मिन्नङ्गुले क्रमात् ।

द्वादशाब्दोदये ते च चैत्राद्या द्वादशोदिताः ॥ ६-१२४ ॥

खरसा इति । खेति, शून्यं रसाः षट्, एवं षष्टिः । तेन प्रत्यङ्गुलमृतुरङ्गुलानां त्रयेऽयनं षट्के वर्षः । एवमेकस्मिन्नेव प्राणचारे वर्षोदये यथा प्रत्यङ्गुलषट्कं द्वादशानां संक्रान्तीनामुदयः एवमिहाब्दानामित्यभिप्रायः । यदुक्तम्

शंक्रान्तयो द्वादशात्र यद्वदब्दे प्रकीर्तिताः ।

द्वादशाब्दोदये प्राणे वत्सरास्ते प्रकीर्तिताः ॥ (स्वटं । ७ ।१२६)

इति ॥ १२४ ॥

ननु चैत्रस्य प्राक् तालुन्युदयः, इति ततः प्रभृति मन्त्रसेवादि

कार्यमित्युक्तम्, इह तु हृदि तस्यैवोदय उक्तः तदिदानीं साधकः कुत्र मन्त्रादिसेवां कुर्यात्? इत्याशङ्क्याह

चैत्रे मन्त्रोदितिः सोऽपि तालुन्युक्तोऽधुना पुनः।

हृदि चैत्रोदितिस्तेन तत्र मन्त्रोदयोऽपि हि॥ ६-१२५॥

उक्त इत्यब्दोदये। अधुनेति, द्वादशाब्दोदये॥ १२५॥

एवं द्वादशाब्दोदयमभिधाय षष्ट्यब्दोदयमप्यभिधत्ते

प्रत्यङ्गुलं तिथीनां तु त्रिशते परिकल्पिते।

सपञ्चांशाङ्गुलेऽब्दः स्यात्प्राणे षष्ट्यब्दता पुनः॥ ६-१२६॥

प्रत्यङ्गुलं तिथिशतत्रयमित्यङ्गुलपञ्चभागे षष्टिरहोरात्राः। एवं सपञ्चभागेऽङ्गुले षष्ट्यधिकशतत्रयात्माब्द उदियात्। ततः सपञ्चांशाङ्गुलेऽब्दस्योदयात्प्रागुक्तचषकोदयस्थित्या प्राणापानवाहात्मनि प्राणे षष्ट्यब्दता, षष्टिरब्दा भवन्तीत्यर्थः। यदुक्तम्

हृत्पद्माद्याव शक्त्यन्तं त्रिंशदब्दोदयो भवेत्। (स्वटं। ७।१३४)

इति ॥ १२६ ॥

अत्रैवाहोरात्राणां सङ्कलनां दर्शयति

शतानि षट् सहस्राणि चैकविंशतिरित्ययम्।

विभागः प्राणगः षष्टिवर्षाहोरात्र उच्यते ॥ ६-१२७ ॥

अनेन चात्र श्रोतृणामपूर्वदर्शनात् संमोहो मा भूत् इति
बाह्याहोरात्रगतप्राणचारसंख्यासाजात्यमुद्भावितम्। तदुक्तम्

विंशतिस्तु सहस्राणि सहस्रं षट्शताधिकम्।

अहोरात्रास्तु षष्ट्यब्दे संख्यातास्तु वरानने ॥ (स्वटं। ६।१३६)

इति ॥ १२७ ॥

नन्वेवं तिथिविभाजनेऽस्य किं प्रयोजनम्? इत्याशङ्क्याह

प्रहराहर्निशामासऋत्वब्दरविषष्टिगः।

यश्छेदस्तत्र यः सन्धिः स पुण्यो ध्यानपूजने ॥ ६-१२८ ॥

अब्दरवीत्यब्दद्वादशकं छेदः समाप्तिः, शन्धिः संध्या।
अयमत्राशयः यन्नाम हि नित्यनैमित्तिकादि बाह्ये प्रयत्नशतैरपि
पुरुषायुषेण निष्पत्तिं यायात् न वा, तदन्तरेकस्मिन्नेव प्राणचारे
प्रहराहर्निशादिक्रमेण क्षणमात्रमवधानात्सुखमेव योगिनः
सिध्येदिति। यदुक्तम्

चन्द्रसूर्योपरागे च पक्षमासायनेषु च।

युगादिषु युगान्तेषु यच्च संवत्सरेऽप्यथ ॥

वर्षद्वादशके चैव षष्ट्यब्देऽथ वरानने।

स्नानदानेन यज्ञैश्च पूजाहोमजपेन च ॥

ध्यानयोगतपोभिश्च बाह्ये कालेऽथ यत्कृतम्।

अमुनोक्ते वरारोहे तत्फलं लभते महत् ॥

प्राणहंसगतिं चारे ज्ञात्वैकस्मिंस्तु तद्व्रजेत् । (स्वटं । ७ ।१४०)

इति । यदभिप्रायेणैवाह

या अग्निहोत्राहुतयः सहस्रद्वासप्ततिः स्युः पुरुषायुषेण ।

नाड्यंशयुक्त्या सकृदाशु जुह्वत् संपादयेद्यस्तव मार्गवित्सः ॥

इत्याद्यन्यैरुक्तम् । ननु भवतु नामैतद्यदन्तः
क्षणमवधानमात्राद्योगिनो जन्मकृत्यं सिद्ध्येदिति, इदं तु न नः
प्रतिभाति यदन्तःप्राणचारे नालिकाद्यब्दान्तं क्रमेणाभिधाय
द्वित्रिचतुरब्दादिक्रमव्यतिक्रमेण निष्कारणमेव
द्वादशाब्दाद्यभिहितमिति । तत्रापि द्वादशानामेवाब्दानामुदयो न
त्रयोदशानां, षष्टिरेव न पुनरेकोनषष्टिरिति, तदधिकस्य
चोदयानभिधानमिति न किंचिदत्र निमित्तमुत्पश्यामः इति किमेतदिति न
जानीमः । अत्रोच्यते इह तावद्योगिनां प्राणे जिते सत्येतद्भवेत् न
त्वन्यथा, प्राणजयश्च योगशास्त्राद्युक्त्या क्रमेणैव भवेत अत एव
तत्र क्रामेदजितां मात्राम् इत्याद्युक्तम् । ततश्चात्र
तुट्यादिक्रमेणैव यथायथं तारतम्यादब्दपर्यन्तं तदुदय उक्तः ।

एवं जितप्राणः कश्चिद्योगी यदि क्रममपहाय तत्र
द्वादशानामब्दानामुदयमसंदध्यात्, तत्तस्य निमित्ततामियात्
अत्यन्तमेव प्राणस्य जितत्वात न चेह ज्योतिःशास्त्रवत् संवत्सराणां
क्रमः कश्चिद्विवक्षितो येनास्यातिक्रमः स्यात यावता हि जितप्राणो
योगी यन्नाम तत्रानुसन्धत्ते तत्तस्य साक्षात्कृतं भवेत्
इत्यभिधानीयं, तच्चैवमस्तु नैवं वा को विशेषः। न चात्र योगिनां
प्राणं जेतुं किंचिदपेक्षान्तरमस्ति येन क्रमोऽवश्यस्वीकार्यः स्यात्
। न च सहसैवात्यन्तं विदूरेऽप्यनुसन्धानं कार्यम् इत्यन्तरा
सोपानकल्पतया द्वादशाब्दोदय उक्तः। एवं षष्ट्यब्दोदयेऽपि वाच्यम्
। तस्माद्यथांशांशिकाक्रमेण विषं भक्षयन् कश्चिज्जीर्णविषः
सन् अक्रमेण बह्वपि विषं भक्षयन् जरयेदेवमिहापि ज्ञेयम्। एतदेव च
तदधिकस्याप्युदयानभिधाने निमित्तम्। एवं परां काष्ठां प्राप्तो
योगी यत्किंचित्तत्रानुसंदध्यात् तदेव साक्षात्कुर्यात्
इत्यानन्त्यात्कियदन्यदभिधीयते इति। न ह्यतोऽधिकेनोक्तेन
किंचित्प्रयोजनान्तरमुत्पश्यामः। यदुक्तमनेनान्यत्र

ङ षष्ट्यब्दोदयादधिकं परीक्ष्यते आनन्त्यात्। (तंषा। ६आ।)

इति। यत्पुनरन्यत्र विंशत्यधिकोत्तराब्दशतोदयोऽप्युक्तस्तदप्येवं
प्रदर्शनपरमेवेत्येकस्मिन्नेव प्राणचारे कल्पोऽप्यनुपसंहितः
साक्षात्कृतो भवेदेव को नामात्र विरोधः। यत्तु

द्वादशानामेवाब्दानां षष्टेरेव वा कथमभ्युदयोऽभिहितः
इत्युक्तं तद्यद्यपि शिंशपाचोद्यं
तदन्याभिधानेऽप्येवञ्चोद्यावकाशात्, तथापि
अत्यन्तमेवापूर्वार्थदर्शनेन श्रोतॄणामत्र संमोहो मा भूत् इति
कारुण्याद्भगवता प्राच्यगणनाक्रमसजातीयमेवैतदुक्तमिति न
कश्चिद्दोषः ॥ १२८ ॥

एवमन्तःकालस्य स्वरूपं निरूप्य बहिरपि निरूपयति

इति प्राणोदये योऽयं कालः शक्त्येकविग्रहः।

विश्वात्मान्तःस्थितस्तस्य बाह्ये रूपं निरूप्यते ॥ ६-१२९ ॥

प्राणोदय इत्यर्थादपानोदयेऽपि विश्वात्मत्वे हेतुः शक्त्येकविग्रह इति
॥

तदेवाह

षट् प्राणाश्चषकस्तेषां षष्टिर्नाली च तास्तथा।

तिथिस्तत्त्रिंशता मासस्ते द्वादश तु वत्सरः ॥ १३० ॥

अब्दं पित्र्यस्त्वहोरात्र उदग्दक्षिणतोऽयनात्।

पितॄणां यत्स्वमाने वर्षं तद्दिव्यमुच्यते ॥ १३१ ॥

षष्ट्यधिकं च त्रिशतं वर्षाणामत्र मानुषम्।

तथेति षष्टिरेव। स्वमानेनेति
मानुषात्मकस्वकाहोरात्रकल्पनयेत्यर्थः। यत्पित्र्यं वर्षं तदेव
दिव्यमुच्यते, येन पितॄणां देवानामप्यहोरात्रादि समानमेवेति भावः।
तस्य च पित्र्यस्य दिव्यस्य वा वर्षस्य कियन्मानमित्युक्तं मानुषं
षष्ट्यधिकं वर्षशतत्रयम् इति ॥ १३१ ॥

एतदेव विभजति

तच्च द्वादशभिर्हत्वा माससंख्यात्र लभ्यते ॥ ६-१३२ ॥

तां पुनस्त्रिंशता हत्वाहोरात्रकल्पना वदेत्।

हत्वा तां चैकविंशत्या सहस्रैः षट्शतेन च ॥ ६-१३३ ॥

प्राणसंख्यां वदेत्तत्र षष्ट्याद्यब्दोदयं पुनः ।

तदिति, दिव्यं वर्षं द्वादशभिर्हत्वा, इति द्वादशभिर्विभज्य,
तेनात्र मानुषवर्षत्रिंशदात्मा द्वादशो भागो मासः । तामिति,
माससंख्यां त्रिंशता हत्वा त्रिंशद्धा कृत्वा, तेनात्र
मानुषवर्षात्मा त्रिंशो भागो दिव्योऽहोरात्रः । तामिति,
मानुषषष्ट्यधिकशतत्रयदिनात्मिकामहोरात्रकल्पनाम् एकविंशत्या
सहस्रैः षट्शतेन च हत्वा इति तथात्वेन भागशः कृत्वेत्यर्थः ।
एवं हि प्रति मानुषीं नालिकां दिव्यः प्राणचारो भवेदिति भावः ।
एवमविशिष्टैव सर्वत्र प्रत्यहं प्राणचारे संख्येत्याख्यातं स्यात्
। तत्रैति प्राणसंख्यायां, पुनरित्यादाविवेत्यर्थः ॥ १३३ ॥

नन्वन्ये पित्र्यमेव वर्षं देवानां दिनमित्युक्तवन्तस्तत्कथमिह तयोः
साम्यमुक्तं, किमत्र किंचित्साधकं प्रमाणमस्ति ? इत्याशङ्क्याह

उक्तं च गुरुभिः श्रीमद्रौरवादिस्ववृत्तिषु ॥ ६-१३४ ॥

तदेव पठति

देवानां यदहोरात्रं मानुषाणां स हायनः।

शतत्रयेण षष्ट्या च नृणां विबुधवत्सरः॥ ६-१३५॥

पित्र्यं दिनं मानुषाणां हायन इत्यविवादः।

देवानामप्येवमित्युक्तेरनयोः साम्यमेव इत्यर्थसिद्धम्। नृणामित्यत्र हायनानामिति शेषः॥

न केवलमेतद् गुरुभिरेवोक्तं यावदागमोऽप्येवमेव इत्याह

श्रीमत्स्वच्छन्दशास्त्रे च तदेव मतमीक्ष्यते।

पितृणां तदहोरात्रमित्युपक्रम्य पृष्ठतः॥ ६-१३६॥

एवं दैवस्त्वहोरात्र इति ह्यैक्योपसंहृतिः।

पृष्ठत इति पश्चात्। यदुक्तम् तत्र

दक्षिणं चायनं रात्रिरुत्तरं चायनं दिनम्।

पितॄणां तदहोरात्रमनेनाब्दस्तु पूर्ववत्॥

एवं दैवस्त्वहोरात्रस्तत्राप्यब्दादि पूर्ववत्। (स्वटं। ११।२०८)

इति॥ १३६॥

एवं पित्र्यं वर्षं देवानां दिनमिति यदन्यैरुक्तं तदयुक्तमेव
इत्याह

तेन ये गुरवः श्रीमत्स्वच्छन्दोक्तिद्वयादितः॥ ६-१३७॥

पित्र्यं वर्षं दिव्यदिनमूचुर्भ्रान्ता हि ते मुधा।

भ्रान्ता इत्यत्र हेतुः उक्तिद्वयादितः इति। पितॄणामित्येकोक्तिः, एवं
दैव इति द्वितीया, आदिशब्दाद्गुरुवृत्तिकारोक्तिः॥ १३७॥

इदानीमेतदुपजीवनेनैव युगादिव्यवस्थामप्याह

दिव्यार्काब्दसहस्राणि युगेषु चतुरादितः॥ ६-१३८॥

एकैकहान्या तावद्भिः शतैस्तेष्वष्ट संधयः।

चतुर्युगैकसप्तत्या मन्वन्तरस्ते चतुर्दश॥ ६-१३९॥

ब्रह्मणोऽहस्तत्र चेन्द्राः क्रमाद्यान्ति चतुर्दश।

अर्का द्वादश। युगेषु चतुर्ष्वपि चतुरादित एकैकहान्येत्येषां विभागः तेन कृते चत्वारि सहस्राणि, त्रेतायां त्रीणि, द्वापरे द्वे, कलावेकम् इति दिव्यानां वर्षाणां दशसहस्राणि चतुर्षु युगेषु मानम्। अवशिष्टस्य सहस्रद्वयस्य विभागमाह तावद्भिरित्यादिना। तावद्भिश्चतुस्त्र्यादिभिरेवाष्ट सन्धय इति चतुर्णां युगानामाद्यन्तयोर्भावात्, उभयमीलनया तु चत्वारः। एवं कलेरन्तगं शतं कृतस्यादौ चत्वारि शतानीति कलिकृतयुगसंध्या पञ्चशतानि एवं कृतत्रेतयोः संध्या सप्तशतानि, त्रेताद्वापरयोः पञ्च, द्वापरकलियुगयोस्त्रीणि गणयित्वा सहस्रद्वयम् इत्युभयतो दिव्यं वर्षसहस्रद्वादशकं चतुर्युगम्। तदुक्तम्

द्वादशाब्दसहस्राणि विज्ञेयं तु चतुर्युगम्।

चतुर्भिस्तु कृतं देवि सहस्रैस्तु यथाक्रमम् ॥

त्रेता ज्ञेया त्रिभिर्देवि द्वाभ्यां वै द्वापरः स्मृतः ।

सहस्रेणैव वर्षाणां विज्ञेयस्तु कलिः प्रिये ॥ (स्वटं । ११ ।२१०)

इति । तथा

शतानि चत्वारि कृते त्वादिरन्तश्च कीर्त्यते ।

त्रेते शतत्रयं ज्ञेयं द्वापरे तु शतद्वयम् ॥

कलौ चापि शतं ज्ञेयं संध्यामानमिदं स्मृतम् । (स्वटं । ११ ।२१२)

इति । त इति मन्वन्ताः । तत्रेति ब्रह्मेऽह्नि, चतुर्दशेति तेन प्रतिमन्वन्तरमेकैक इन्द्रः संहारं यातीत्यर्थः । तदुक्तम्

दिनेनैकेन ब्रह्मेण इन्द्राश्चैव चतुर्दश ।

राज्यं कृत्वा क्रमाद्यान्ति मन्वन्तरव्यवस्थया ॥ (स्वटं । ११ ।२२९)

इति । अत एवानेन संहारचित्रताया अप्यवकाशो दत्तः ॥ १३९ ॥

तदाह

ब्रह्माहोऽन्ते कालवह्नेर्ज्वाला योजनलक्षिणी॥ ६-१४० ॥

दग्ध्वा लोकत्रयं धूमात्त्वन्यत्प्रस्वापयेत्त्रयम्।

लोकत्रयमिति, निरयेभ्यः प्रभृति भूर्भवःस्वपर्यन्तमित्यर्थः।
यदुक्तम्

शा दहेन्नरकान्देवि पातालानि समन्ततः।

त्रींल्लोकांश्चैव दहति भूर्भुवःस्वःपदान्तकान्॥
(स्वछं। ११।२३७)

इति। अन्यदिति, महोजनस्तपःसंज्ञम्॥ १४० ॥

ननु सर्वेषां भुवनेश्वराणामधोऽध एव सर्वत्र
सृष्टिसंहारकारित्वं श्रूयते वक्ष्यते च पुरस्तात्तदिदं पुनः
कस्मादन्यथोक्तम् इत्याशङ्क्याह

निरयेभ्यः पुरा कालवह्नेर्व्यक्तिर्यतस्ततः ॥ ६-१४१ ॥

विभुरधःस्थितोऽपीश इति श्रीरौरवं मतम् ।

अस्य खलु निरयेभ्यः पूर्वं सृष्टिरिति तदधोऽवस्थानं न तु तदपकर्षात् अतश्च तदधःस्थितोऽपि विभुर्व्यापकत्वादूर्ध्वमपि संहारादौ स्वामीत्यर्थः । न चैतदस्माभिः स्वोपज्ञमेवोक्तमित्याह इति श्रीरौरवं मतम इति । तदुक्तम् तत्र

ङरकाणामधः पूर्वं व्यक्तिरस्योपजायते ।

सर्वस्थानोऽपि संस्तस्मादधःस्थ इव लक्ष्यते ॥

इति ॥ १४१ ॥

न केवलमेवं विश्वमास्ते यावदेकार्णवीभावेऽपि इत्याह

ब्रह्मनिःश्वासनिर्धूते भस्मनि स्वेदवारिणा ॥ ६-१४२ ॥

तदीयेनाप्लुतं विश्वं तिष्ठेत्तावन्निशागमे ।

ननु यद्येवं तत्तदा तेषां भुवनानामीश्वरास्तद्वासिनो वा जीवाः कुत्रासते? इत्याशङ्क्याह

तस्मिन्निशावधौ सर्वे पुद्गलाः सूक्ष्मदेहगाः ॥ ६-१४३ ॥

अग्निवेगेरिता लोके जने स्युर्लयकेवलाः ।

कूष्माण्डहाटकाद्यास्तु क्रीडन्ति महदालये ॥ ६-१४४ ॥

शूक्ष्मदेहगाः पुर्यष्टकरूपाः । तुशब्दो व्यतिरेके । अत एव क्रीडन्तीत्युक्तम् ॥ १४४ ॥

निशाक्षये पुनः किं स्यात्? इत्याशङ्क्याह

निशाक्षये पुनः सृष्टिं कुरुते तामसादितः ।

तामसादित इति, यदुक्तम्

प्रथमं तामसीं सृष्टिं करोति तमसोत्कटाम् । (स्वटं । ११ ।२४४)

इत्युपक्रम्य तमोरजःसमावेशान्मानवान्स सृजेत्पुनः ।

रजःसत्त्वसमाविष्टः सृजेन्मुनिवरेश्वरान् ॥

गतनिद्रः प्रबुद्धः स सत्त्वाविष्टो जगत्पतिः ।

सृजेद्देवान्सलोकांश्च पूर्वयैव व्यवस्थया ॥ (स्वटं । ११ ।२४६)

इति ॥

एवं प्रत्यहं कुर्वतो मन्वन्तराष्टाविंशत्यात्मकाहोरात्रकलनया स्वकवर्षशतान्तेऽस्य संहारः इत्याह

स्वकवर्षशतान्तेऽस्य क्षयस्तद्वैष्णवं दिनम् ॥ १४५ ॥

रात्रिश्च तावतीत्येवं विष्णुरुद्रशताभिधाः ।

क्रमात्स्वस्वशतान्तेषु नश्यन्त्यत्राण्डलोपतः ॥ १४६ ॥

एतदेव यथोत्तरमतिदिशति तदित्यादिना । तद् ब्राह्मं वर्षशतम् । अण्डलोपतः इत्यण्डलोपमवधिं कृत्वा, तेन

तन्नाशाद्ब्रह्माण्डोऽपि नश्यतीत्यर्थः। तदुक्तम्

विष्णोश्च तद्दिनं प्रोक्तं रात्रिर्वै तत्समा भवेत्।

अनेन परिमाणेन तस्याब्दं तु विधीयते॥

वर्षाणां च शते पूर्णे सोऽपि याति परे लयम्।

विष्णोरायुर्यदेवोक्तं रुद्रस्यैतद्दिनं प्रिये॥ (स्वटं। ११।२६३)

इति।

वत्सराणां शते पूर्णे शतरुद्रदिनक्षयात्।

सोऽपि याति परं स्थानं॥॥॥॥॥॥॥॥॥॥॥॥ (स्वटं। ११।२७१)

इति।

शतरुद्राश्च देवेशि स्वाब्दानां तु शतात्यये।

ते प्रयान्ति परं तत्त्वं ततोऽण्डं च विनश्यति॥ (स्वटं। ११।२७३)

इति च। अण्डनाशाच्च कालाग्निरुद्रस्यापि नाशः इत्यर्थसिद्धम्।

यदुक्तम्

ततः कालाग्निरुद्रश्च कालतत्त्वे लयं व्रजेत्। (स्वटं। ११।२७७)

इति ॥ १४६ ॥

अव्यक्तान्तमपीयमेव व्यवस्था इत्याह

अबाद्यव्यक्ततत्त्वान्तेष्वित्थं वर्षशतं क्रमात्।

दिनरात्रिविभागः स्यात् स्वस्वायुःशतमानतः ॥ ६-१४७ ॥

एवं व्यवस्थयाव्यक्तस्थानां कियन्मानं दिनं भवेत्
इत्याशङ्क्याह

ब्रह्मणः प्रलयोल्लाससहस्रैस्तु रसाग्निभिः।

अव्यक्तस्थेषु रुद्रेषु दिनं रात्रिश्च तावती ॥ ६-१४८ ॥

रसाग्निभिरिति, षट्त्रिंशता। ब्रह्मण इति, बुद्धितत्त्वस्थस्य न तु

सत्यलोकस्थस्य नहि तदायुष्कलनयैतत्कलयितुमेव शक्यमिति भावः।
तेन बुद्धितत्त्वस्थस्य ब्रह्मणो गुणतत्त्वशतरुद्रदिनान्ते
संहारस्तद्दिनारम्भे च सृष्टिः इति तदीयेऽब्दे तस्य
सषष्टिशतत्रयं प्रलयोल्लासा भवन्ति, ते च शतेन गुणिताः
षट्त्रिंशत्सहस्रसंख्याका भवेयुरित्युक्तं रसाग्निभिः
प्रलयोल्लाससहस्रैरिति। तावद्गुणपरीमाणं च गुणतत्त्ववासिनां
रुद्राणामायुर्यदव्यक्तस्थानां दिनमित्युक्तम् अव्यक्तस्थेषु दिनं
रात्रिश्च तावती इति। यदुक्तम्

षट्त्रिंशत्तु सहस्राणि ब्रह्मणां प्रलयोद्भवाः।

अव्यक्ते च दिनं प्रोक्तं रुद्राणां तन्निवासिनाम्॥ (स्वटं। ११।२८९)

इति। अस्याश्च व्यवस्थायाः
शक्तितत्त्वान्तमविशेषेऽप्यव्यक्तान्तमेवमतिदेशस्येद मेव प्रयोजनं
यदत्र गुणतत्त्ववर्तिरुद्रायुरपेक्षया दिनमानस्य
संख्यानैयत्यमुत्पन्न मिति॥ १४८॥

अत्र च सृष्टिसंहारादौ कस्याधिकारः इत्याशङ्क्याह

तदा श्रीकण्ठ एव स्यात्साक्षात्संहारकृत्प्रभुः।

सर्वे रुद्रास्तथा मूले मायागर्भाधिकारिणः ॥ ६-१४९ ॥

अव्यक्ताख्ये ह्याविरिञ्चाच्छ्रीकण्ठेन सहासते ।

साक्षान्न तु विरिञ्चादिमुखेन, यतस्तदानीं विरिञ्चात्प्रभृति प्रकृतिगर्भाधिकारिणः सर्व एव तत्तद्भुवनेश्वररूपा रुद्रा अव्यक्ताख्ये मूले प्रकृतितत्त्वे श्रीकण्ठेन सहासते, अर्थाच्छ्रीकण्ठनाथमेव नायकतया प्रधानीकृत्य तिष्ठन्तीत्यर्थः । यदुक्तम्

प्रजाः प्रजानां पतयः पितरो मानवैः सह ।

सांख्यज्ञानेन ये सिद्धा वेदेन ब्रह्मवादिनः ॥

छन्दःसामानि चोङ्कारो बुद्धिस्तद्देवताः प्रिये ।

अह्नि तिष्ठन्ति ते सर्वे परमेशस्य धीमतः ॥

इति ॥ १४९ ॥

ननु

महाकल्पस्य पर्यन्ते ब्रह्मा याति परे लयम्। (स्व। ११।२६१)

इत्याद्युक्तया तस्य परशिवे लय उक्तस्तत्कथमसावास्ते ?

इत्याशङ्क्याह

निवृत्ताधःस्थकर्मा हि ब्रह्मा तत्राधरे धियः॥ ६-१५०॥

न भोक्ता ज्ञोऽधिकारे तु वृत्त एव शिवीभवेत्।

स एषोऽवान्तरलयस्तत्क्षये सृष्टिरुच्यते॥ ६-१५१॥

यद्यसाववृत्तपरशक्तिपातस्तद्बुध्यधोनिवृत्तकर्मतया भोगाभावात्तत्र भोक्ता न भवेत् इत्यत्रैवास्ते, अन्यथा पुनर्यदि ज्ञानी साक्षात्कृतात्मतत्त्वः स्यात् अधिकारनिवृत्त्यनन्तरं स शिवीभवेत् तदैकात्म्येनैव प्रस्फुरेदित्यर्थः। एवमन्येषामपि ज्ञेयम्। अवान्तरलय इति, ब्रह्माण्डलयस्योक्तत्वात्प्रकृत्यण्डलयस्य च वक्ष्यमाणत्वात्॥ १५१॥

नन्वत्र

बुद्धितत्त्वे स्थिता बौद्धा गुणेष्वप्यार्हताः स्थिताः।

स्थिता वेदविदः पुंसि त्वव्यक्ते पाञ्चरात्रिकाः॥

इत्याद्युक्त्या केचिदात्मानो मुक्ताः संभवन्ति, केचिच्च
बद्धास्तत्कथमविशेषेणैवोक्तं तत्क्षये सृष्टिरुच्यते इति। नहि
मुक्तात्मनां पुनः संसृतिः स्यात्? इत्याशङ्क्याह

सांख्यवेदादिसंसिद्धाञ्छ्रीकण्ठस्तदहर्मुखे।

सृजत्येव पुनस्तेन न सम्यङ् मुक्तिरीदृशी॥ ६-१५२॥

इदानीं पूर्वोक्तयैव नीत्या यथोत्तरं वृद्धिक्रमेण
दिनादिव्यवस्थामतिदेशद्वारेण दर्शयति प्रधाने इत्यादिना शामनसे
पदे इत्यन्तम्

प्रधाने यदहोरात्रं तज्जं वर्षशतं विभोः।

श्रीकण्ठस्यायुरेतच्च दिनं कञ्चुकवासिनाम्॥ ६-१५३॥

तत्क्रमान्नियतिः कालो रागो विद्या कलेत्यमी।

यान्त्यन्योन्यं लयं तेषामायुर्गाहनिकं दिनम्॥ ६-१५४॥

तद्दिनप्रक्षये विश्वं मायायां प्रविलीयते।

क्षीणायां निशि तावत्यां गहनेशः सृजेत्पुनः॥ ६-१५५॥

एवमव्यक्तकालं तु परार्धैर्दशभिर्जहि।

मायाहस्तावती रात्रिर्भवेत्प्रलय एष सः॥ ६-१५६॥

मायाकालं परार्धानां गुणयित्वा शतेन तु।

एश्वरो दिवसो नादः प्राणात्मात्र सृजेज्जगत्॥ ६-१५७॥

तावती चैश्वरी रात्रिर्यत्र प्राणः प्रशाम्यति।

अहोरात्रमिति, गुणतत्त्ववर्तिरुद्रायुरपेक्षया ब्रह्मप्रलयोल्लासद्वासप्ततिसहस्रसंख्याकम्। तज्जमिति, षष्ट्यधिकेन शतत्रयेण गुणयित्वा इत्यर्थः। एतदिति, वर्षशतपरीमाणं श्रीकण्ठीयमायुः। कञ्चुकवासिनामित्यर्थान्नियतितत्त्वस्थानां वामदेवादीनां न तु कालतत्त्वादिगतानामपि तदपेक्षया हि कालतत्त्वादौ यथोत्तरं वृद्ध्यादिव्यवस्था संभवेत्, अत एव

क्रमादन्योन्यं लयं यान्ति

इत्युक्तम्। आगमोऽप्येवं

ततो नियतिकालौ च रागो विद्या कला तथा।

परस्परं लयं यान्ति क्रमात्सर्वे स्वमानतः॥ (स्वछं। ११।२९२)

इति। तेषामिति, कलातत्त्वस्थानां महादेवादीनां न तु सर्वेषां कञ्चुकवासिनां तथात्वे हि गाहनिकं दिनमव्यक्तकालसंख्यामपेक्ष्य पञ्चदशस्थानावस्थितेन दशगुणेन परार्धेन वक्ष्यमाणं गुणनं सङ्गतिमियात्। तत्सर्वेषामेव कञ्चुकवासिनां यथोत्तरमायुषो वृद्ध्या गाहनिकस्य दिनस्यानवच्छिन्नसंख्याप्रतिपादनार्थमेवं वक्ष्यमाणं सङ्गच्छते इत्यलं बहुना। गणना तु

ग्रन्थविस्तरभयान्न लिखिता इति स्वयमेवाभ्यूह्या। तावत्यामिति, वक्ष्यमाणदिनसमानायाम्। जहीति गुणयेत्यर्थः। यदुक्तम्

प्राधानिकपरार्धेन दशधा गुणितेन च।

माया संहरते सर्वं पुनश्चैव सृजेज्जगत्॥

मायाकालपरार्धस्य शतधा गुणितस्य च।

ऐश्वरः कुरुते सृष्टिं संहरेच्च पुनः सृजेत्॥ (स्वटं। ११।२९७)

इति। अनेन चात्रोत्तरोत्तरं कालः प्रकृष्यते इत्युक्तं स्यात एवमुत्तरत्रापि ज्ञेयम्। ङाद इति बहिरुन्मेषरूपतया नदनस्वभाव ईश्वरः। प्राणात्मेति, प्राणप्रमातृत्वात्। प्रशाम्यतीति, अत ऊर्ध्वं प्राणस्य प्राधान्याभावात्, विश्वमिति तस्याप्यहन्तायां विश्रान्तेः॥ १५७॥

न केवलमात्र नादात्मनः प्राणस्यैव प्रशमो यावद् बिन्द्वाद्यात्मिकायाः संविदोऽपि भविष्यति इत्याह

प्राणगर्भस्थमप्यत्र विश्वं सौषुम्नवर्त्मना॥ ६-१५८॥

प्राणे ब्रह्मविले शान्ते संविद्याप्यवशिष्यते ।

अंशांशिकातोऽप्येतस्याः सूक्ष्मसूक्ष्मतरो लयः ॥ ६-१५९ ॥

गुणयित्वैश्वरं कालं परार्धानां शतेन तु ।

सदाशिवं दिनं रात्रिर्महाप्रलय एव च ॥ ६-१६० ॥

सदाशिवः स्वकालान्ते बिन्द्वर्धेन्दुनिरोधिकाः ।

आक्रम्य नादे लीयेत गृहीत्वा सचराचरम् ॥ ६-१६१ ॥

नादो नादान्तवृत्त्या तु भित्त्वा ब्रह्मबिलं हठात् ।

शक्तितत्त्वे लयं याति निजकालपरिक्षये ॥ ६-१६२ ॥

एतावच्छक्तितत्त्वे तु विज्ञेयं खल्वहर्निशम् ।

शक्तिः स्वकालविलये व्यापिन्यां लीयते पुनः ॥ ६-१६३ ॥

व्यापिन्या तद्दिवारात्रं लीयते साप्यनाश्रिते।

परार्धकोटया हत्वापि शक्तिकालमनाश्रिते॥ ६-१६४॥

दिनं रात्रिश्च तत्काले परार्धगुणितेऽपि च।

सोऽपि याति लयं साम्यसंज्ञे सामनसे पदे॥ ६-१६५॥

महाप्रलय इति, शुद्धाध्वनोऽपि संहरणात्। तदुक्तम्

ततः सदाशिवो देवः स्वमानेन च संहरेत्।

सृजते च पुनर्भूय आत्मीये देव्यहर्मुखे॥

महाप्रलय एवोक्तः सादाख्ये तु दिनक्षये। (स्वटं। ११।२९८)

इति।

बिन्दुं चैवार्धचन्द्रं च भित्त्वा चैव निरोधिकाम्।

नादतत्त्वे लयं याति गृहीत्वा सचराचरम् ॥ (स्वटं। ११।३००)

इति। नादानुवृत्त्येति, नादान्तभूमिकामासाद्येत्यर्थः। यदुक्तम्

ङादः सौषुम्नमार्गेण भित्त्वा ब्रह्मबिलं प्रिये।

शक्तितत्त्वे लयं याति शक्तितत्त्वदिनक्षये॥ (स्वटं। ११।३०१)

इति। एतावदिति, सदाशिवायुःसंख्यातम्। तदिति, यः शक्तिलयकालः।
परार्धकोट्येति, यदुक्तम्

शक्तिकालपरार्धस्य कोटिधा गुणितस्य तु।

अनाश्रितस्य देवस्य दिनमेकं प्रकीर्तितम्॥ (स्वटं। ११।३०३)

सोऽपीत्यनाश्रितः। तदुक्तम्

अनेन परिमाणेन परार्धगुणितेन च।

सोऽपि याति परं स्थानं कारणं समनाश्रयम्॥ (स्वटं। ११।३०४)

इति॥ १६५॥

नन्वेवं समनाया अपि लयः कस्मान्नोच्यते इत्याशङ्क्याह

स कालः साम्यसंज्ञः स्यान्नित्योऽकल्यः कलात्मकः।

यत्तत्सामनसं रूपं तत्साम्यं ब्रह्म विश्वगम्॥ ६-१६६॥

यतः स विश्वकलनाकारी कालः समनाख्या येयं
कलाशक्तिस्तदात्मकोऽत एव नित्यो, न ह्यस्याः समनाख्यायाः
शक्तेर्महाप्रलयेऽपि नाशः इत्याशयः। यदभिप्रायेणैवान्यैः
शंभुः पुरुषो माया नित्यम् इत्याद्युक्तम्। अत एव
पृथिव्यादेरनाश्रितान्तस्य विश्वस्याभेदात्मना
साम्येनावस्थानात्साम्यशब्दाभिधेयः। अत एव भेदप्रथाया अभावात्
अकल्यः कलयितुमशक्य इत्यर्थः। शक्त्यन्तं हि विश्वसंहारे वृत्ते
सकलोऽयमणुवर्गः संभूय समनायामेवास्ते इत्याह
यत्तत्सामनसं रूपं तद्विश्वगं साम्यम् इति। न चैवमपि
भेदवादिवदिदं परस्माद् ब्रह्मणोऽतिरिक्तमित्युक्तं ब्रह्म इति,
परब्रह्मरूपमित्यर्थः। तदुक्तम्

श कालः साम्यसंज्ञश्च जन्ममृत्युभयापहः।

तस्याप्यूर्ध्वममेयस्तु कालः स्यात्परमावधिः ॥

नित्यो नित्योदितो देवि अकल्यश्च न कल्यते । (स्वटं । ११ ।३४६)

इति ॥ १६६ ॥

न केवलमत्र प्रलयावसरे विश्वस्यावस्थानमेव
यावत्सृष्टिर(ष्टाव)पि इत्याह

अतः सामनसात्कालान्निमेषोन्मेषमात्रतः ।

तुट्यादिकं परार्धान्तं सूते सैवात्र निष्ठितम् ॥ ६-१६७ ॥

निमेषोन्मेषमात्रत इति, सदाशिवेश्वरदशामधिशयानादित्यर्थः ।
यदुक्तम्

श चाधः कलयेत्सर्वं व्यापिन्याद्यं धरावधि ।

तुट्यादिभिः कलाभिश्च देव्यध्वानं चराचरम् ॥ (स्वटं । ११ ।३०७)

इति । अत एव चान्यैरस्मच्छास्त्रप्रक्रियामजानानैः शक्त्यन्तं
महाप्रलये वृत्ते सकलोऽयमणुवर्गः प्रलयान्त

ऊर्ध्वोर्ध्वमवस्थितेरभिधानात्परिशिष्टं शिवतत्त्वमेवासादयेत्।
तदासादनमेव च मुक्तिः तदक्रमेण सर्वेषामनायासमेव सा
सिद्धयेदिति किं शास्त्रानुष्ठानादिना इत्यादि यच्चोदितं
तदुत्थानोपहतमेव। न हि शक्त्यन्तं प्रलयेऽप्येषां शिवतत्व
एवावस्थानं समनायामेवमभिधानात्

शमनान्तं वरारोहे पाशजालमनन्तकम्। (स्वटं। ४।४२९)

इत्याद्युक्तया तदन्तं च बन्ध एव इति को नाम तत्र मुक्तेरवकाशः।
न चैवमपि शंभुवत्समनाया अपि नित्यत्वादभेदवादक्षतिः,
भेदमेवाधिकृत्य सृष्टिप्रलयादिव्यवहारस्योत्थानात वस्तुतः
पुनरभेदवादचर्चा प्रतिपदमिह दर्शिता दर्शयिष्यते च इत्यलं
बहुना॥ १६७॥

एवमुक्तवक्ष्यमाणपरिमाणोपयोगिन्याः संख्यायाः क्रमेण रूपं
दर्शयति

दशशतसहस्रमयुतं लक्षनियुतकोटि सार्बुदं वृन्दम्।

खर्वनिखर्वे शङ्खाब्जजलधिमध्यान्तमथ परार्धं च॥ ६-१६८॥

अब्जेति पद्मं, जलधीति सागरः ॥ १६८ ॥

नन्वेवमवस्थानमेषां कथं स्यात् ? इत्याशङ्क्याह

इत्येकस्मात्प्रभृति हि दशधा दशधा क्रमेण कलयित्वा ।

एकादिपरार्धान्तेष्वष्टादशसु स्थितिं ब्रूयात् ॥ ६-१६९ ॥

यदुक्तम्

एकं दशगुणं पूर्वं शतं दशगुणं तु तत् ।

शतं दशगुणं कृत्वा सहस्रं परिकीर्तितम् ॥

सहस्रं दशधा चैवमयुतं तद्धि कीर्तितम् ।

दशायुतानि लक्षं तु नियुतं दश तानि तु ॥

दश तानि च कोटिः स्याद्दश कोटयस्तदर्बुदम् ।

अर्बुदैर्दशभिर्वृन्दं खर्वं दशभिरेव तैः ॥

दशभिस्तन्निखर्वं तु शङ्कुः स्याद्दश तानि तु ।

शङ्कुभिर्दशभिः पद्मं दश पद्मानि सागरः ॥

सागरैर्दशभिर्मध्यमन्तस्तैर्दशभिः स्मृतः ।

अन्तं दशाहतं कृत्वा परार्धं तु प्रकीर्तितम् ॥

एवमष्टादशैतानि स्थानानि गणितस्य तु । इति ॥ १६९ ॥

एवमत्र सृष्टिप्रलयानामानन्त्येऽपि गौणमुख्यभावं दर्शयितुमाह -

-

चत्वार एते प्रलया मुख्याः सर्गाश्च तत्कलाः ।

भूमूलनैशशक्तिस्थास्तदेवाण्डचतुष्टयम् ॥ ६-१७० ॥

मुख्या इत्यवान्तराणामनन्तानां प्रलयानां सर्गाणां

चात्रैवान्तर्भावात्। तत्कला इति तेषां प्रलयानां सर्गाणां च कला पृथिव्यादिभेदचतुष्टयरूपा अंशा इत्यर्थः। तदेवेति, भूमूलादि। तदुक्तम्

ङिजशक्तिवैभवभरादण्डचतुष्टयमिदं विभागेन।

शक्तिर्माया प्रकृतिः पृथ्वी चेति प्रभावितं प्रभुणा॥
(प। सा। ४ श्लोक)

इति॥ १७०॥

अत्रैव स्रष्टसंहर्तृविभागमपि दर्शयति

कालाग्निर्भुवि संहर्ता मायान्ते कालतत्त्वराट्।

श्रीकण्ठो मूल एकत्र सृष्टिसंहारकारकः॥ ६-१७१॥

तल्लयो वान्तरस्तस्मादेकः सृष्टिलयेशिता।

श्रीमानघोरः शक्त्यन्ते संहर्ता सृष्टिकृच्च सः॥ ६-१७२॥

संहर्ता न पुनः स्रष्टा तद्धि ब्रह्मादीनामेव हि पूर्वमुक्तं,
कालतत्त्वराडिति कालतत्त्वाधिपः श्रीकण्ठः। यदुक्तम्

एकवीरः शिखोदश्च श्रीकण्ठः कालमाश्रितः। (मा।वि। ५।२७)

इति। श्रीकण्ठ इत्यव्यक्तस्थः। एकत्रेति त्रिष्वपि योज्यम्। तल्लय इति
श्रीकण्ठकर्त्तृकः संहारः। यद्वा त्रिष्वपि पृथिव्यादिषु
स्थानेषु परापररूपतामधिशयानः श्रीकण्ठनाथ एककः
सृष्टिसंहारकारकः। यदुक्तम्

श्रीकण्ठ एव परया मूर्त्या कालाग्निरुच्यते।

इति। तथा

त्रिष्वेव संस्थितो रुद्रः कालरूपी महेश्वरः।

इति। शक्त्यन्ते इति शुद्धाध्वनि। तदुक्तम्

तदूर्ध्वे शुद्धमध्वानं यावच्छक्त्यन्तगोचरम्।

तत्सर्वं संहरेद् घोरमघोरो घोरनाशनः॥

इति ॥ १७२ ॥

न केवलं शक्त्यन्तं प्रलयस्यैव महत्त्वं यावत्सृष्टेरपीत्याह

तत्सृष्टौ सृष्टिसंहारा निःसंख्या जगतां यतः ।

अन्तर्भूतास्ततः शाक्ती महासृष्टिरुदाहृता ॥ ६-१७३ ॥

ननु पृथिव्यादितत्त्वप्रलये यैव तन्निवासिनामणूनां व्यवस्था सैव किं तत्त्वेश्वरणां न वा ? इत्याशङ्क्याह

लये ब्रह्मा हरी रुद्रशतान्यष्टकपञ्चकम् ।

इत्यन्योन्यं क्रमाद्यान्ति लयं मायान्तकेऽध्वनि ॥ ६-१७४ ॥

मायातत्त्वलये त्वेते प्रयान्ति परमं पदम् ।

शुद्धाध्वव्यवस्थितानां पुनः किं परमं पदम् ? इत्याशङ्क्याह -

-

मायोर्ध्वे ये सिताध्वस्थास्तेषां परशिवे लयः ॥ ६-१७५ ॥

तत्राप्यौपाधिकाद्भेदाल्लये भेदं परे विदुः।

तत्रापीति, परशिवे। परे विदुरिति, न पुनरस्माकमिदं मत मित्याशयः ॥ १७५ ॥

नन्वेवमपवृक्तेषु पुनः सृष्टौ तत्र केषामधिकारः ?
इत्याशङ्क्याह

एवं तात्त्वेश्वरे वर्गे लीने सृष्टौ पुनः परे ॥ ६-१७६ ॥

तत्साधकाः शिवेष्टा वा तत्स्थानमधिशेरते।

तत्साधका इति

लोकधर्मिणमारोप्य मते भुवनभर्तरि।

इत्यादिना निरूपिताश्चर्यादिक्रमेण प्रेप्सिततत्तद्भुवनैश्वर्याः।

शिवेष्टा इति, तदिच्छामात्रानुगृहीताः ॥ १७६ ॥

नन्वेवमप्येषां ब्रह्मादिशब्दप्रवृत्तौ किं निमित्तम्? इत्याशङ्क्याह

ब्रह्मी नाम परस्येव शक्तिस्तां यत्र पातयेत्॥ ६-१७७ ॥

स ब्रह्मा विष्णुरुद्राद्या वैष्णव्यादेरतः क्रमात्।

अत इति शक्तेः। तदुक्तम्

ब्रह्मी च वैष्णवी शक्तिरधिकारपदं गता।

यं चाधितिष्ठत्यात्मानं तत्संज्ञां स प्रपद्यते॥

तदाधिकारं कुरुते इच्छया परमात्मनः। (स्वटं। ११।२६५)

इति॥ १७७ ॥

ननु ब्रह्मी नाम यदि शिवस्यैव शक्तिस्तत्कथमसावन्यं यायाद्येनायं ब्रह्मेत्युच्यते, न ह्यन्यदीयधर्मस्यान्यत्रान्वयः संभवेत्? इत्याशङ्क्याह

शक्तिमन्तं विहायान्यं शक्तिः किं याति नेदृशम् ॥ ६-१७८ ॥

छादितप्रथिताशेषशक्तिरेकः शिवस्तथा ।

न ह्येतच्छिवलक्षणं शक्तिमन्तं विहायान्यं ब्रह्मादिलक्षणं शक्तिर्याति इत्येवंविधमुक्तं, किं त्वनन्तशक्तिखचितत्वेऽपि कांचिच्छक्तिं प्रच्छाद्य कांचिच्च प्रकटीकृत्यैक एव शिवस्तथा ब्रह्मविष्णवाद्यात्मनावभासत इति ॥ १७८ ॥

ननु प्राणस्य परं तत्त्वं प्रत्युपायत्वमस्तीति प्रागुपक्रान्तं तत्तदनभिधाय तदाश्रयेण सृष्टिसंहारादीनामेव स्वरूपमुच्यते -- इति किमेतत् ? इत्याशङ्क्याह

एवं विसृष्टिप्रलयाः प्राण एकत्र निष्ठिताः ॥ ६-१७९ ॥

सोऽपि संविदि संविच्च चिन्मात्रे ज्ञेयवर्जिते ।

चिन्मात्रमेव देवी च सा परा परमेश्वरी ॥ ६-१८० ॥

अष्टात्रिंशं च तत्तत्त्वं हृदयं तत्परापरम्।

संविदीति, तत्तन्नीलाद्याभाससंभिन्नायां परिमितात्मरूपायाम्। चिन्मात्रमेव चाष्टात्रिंशं तत्त्वमित्येतदग्र एवोपपादयिष्यते इति नेहायस्तम्। तत्स्थितमेवास्य चिन्मात्रविश्रान्तत्वं यद्वशादेवात्र नालिकादिषष्ट्यब्दोदयान्तं लयोदययोर्वैचित्र्य मिति॥ १८०॥

तदाह

तेन संवित्त्वमेवैतत्स्पन्दमानं स्वभावतः॥ १८१॥

लयोदया इति प्राणे षष्ट्यब्दोदयकीर्तनम्।

संवित्त्वमिति ये नाम लयोदयास्तत्संवित्स्वातन्त्र्यम् इत्येवं संविदधीनमेव सर्वमेतत्कालीयं वैचित्र्यं, न पुनरस्वाधीनं किञ्चिद्रूपं बहिरस्तीत्युक्तं स्यात्॥ १८१॥

अत आह

इच्छामात्रप्रतिष्ठेयं क्रियावैचित्र्यचर्चना॥ ६-१८२॥

कालशक्तिस्ततो बाह्ये नैतस्या नियतं वपुः।

नैतस्या नियतं वपुरिति, तथात्वे हि यत्रैकचषकोदयस्यत्रैवाब्दोदयः कथं भवेदिति भावः॥ १८२॥

ननु कथमतिपरिमितस्यापि कालांशस्य वैतत्येनावभासो भवेत्? इत्याशङ्क्याह

स्वप्नस्वप्ने तथा स्वप्ने सुप्ते सङ्कल्पगोचरे॥ ६-१८३॥

समाधौ विश्वसंहारसृष्टिक्रमविवेचने।

मितोऽपि किल कालांशो विततत्वेन भासते॥ ६-१८४॥

यत्राद्यां स्वाप्नीमेव दशां जाग्रद्दशात्वेन परिकल्प्य द्वितीयां स्वप्नत्वेन कश्चिदभिमन्यते स स्वप्नस्वप्न उच्यते। एवं स्वप्ने क्षणेनैव हरिश्चन्द्रस्येवानेककालिकोऽप्यनुभवोऽभवदिति युक्तमुक्तं -- मितेऽपि काले वैतत्येनावभासः इति। शुप्ते इति सुषुप्तदशायाम्ः तत्र हि क्षणमात्रमपि मोहादौ चिरस्य गाढमूढोऽहमासम्

इत्याद्यभिमानोदयः। शङ्कल्पगोचरे इति स्वतन्त्रविकल्पादौ तत्र हि क्षणेनैव कल्पपरिकल्पनमपि शक्यम्। शमाधौ इति विश्वसाक्षात्कारात्मनि। विश्वसंहारसृष्टिक्रमस्य विवेचने समनन्तरोक्तकालीयप्रमेयसङ्कलनाबुद्धावित्यर्थः। एतच्च कालीयं वैतत्यं स्वपरदृष्टत्वेनापि वैचित्र्यमियात् इत्याह

प्रमात्रभेदे भेदेऽथ चित्रो विततिमाप्यसौ।

अनेनैतत्स्वप्नादावनुभूतम् इति प्रमात्रन्तरैकीकारेण विततिम्नोऽवभासः मयैवैतदसाधारण्येनानुभूतम् इति वा॥

इदानीं प्राणीयमेव कालविभागमपानेऽप्यतिदिशति

एवं प्राणे यथा कालः क्रियावैचित्र्यशक्तिजः॥ ६-१८५॥

तथापानेऽपि हृदयान्मूलपीठविसर्पिणी।

यद्यपि द्वादशान्ताद्धृदन्तमपाने कालवैचित्र्यमुक्तं तथापि हृदयान्मत्तगन्धपर्यन्तं प्रसरणेऽस्यैव प्राधान्यमित्येवमुक्तम्। तदुक्तम्

अपानस्यापि सञ्चारे सर्पितेयं सुविस्तृता।

गुदं यावत्ततो वायुरधस्तादुपयाति हि॥

इति॥ १८५॥

नन्वत्रापि प्राणवत्कालवैचित्र्यं किं सञ्चेत्यते न वा ?
इत्याशङ्क्याह

मूलाभिधमहापीठसङ्कोचप्रविकासयोः॥ ६-१८६॥

ब्रह्माद्यनाश्रितान्तानां चिनुते सृष्टिसंहृती।

रासभी वडवा यद्वत (तं। ५।५८) इत्यादिप्रागुक्तयुक्त्या
जन्माधारोदितायाः शक्तेर्यौ सङ्कोचविकासौ तौ
ब्रह्माद्यनाश्रितान्तस्य विश्वस्य सृष्टिसंहारादौ
योगिनामनुभवसिद्धावित्युक्तं चिनुते सृष्टिसंहृती इति॥ १८६॥

ननु यद्येवं तत्सर्वत्र प्राणोदय एव प्राधान्येनैतत्कस्मान्निर्दिष्टम् ?

इत्याशङ्क्याह

शश्वद्यद्यप्यपानोऽयमित्थं वहति किंत्वसौ ॥ ६-१८७ ॥

अवेद्ययत्नो यत्नेन योगिभिः समुपास्यते ।

ननु यद्यत्र ब्रह्मादीनां कारणानां सृष्ट्यादि संभवेत् तत्कुत्र कस्यावस्थानम् ? इत्याशङ्क्याह

हृत्कन्दानन्दसङ्कोचविकासद्वादशान्तगाः ॥ ६-१८८ ॥

ब्रह्मादयोऽनाश्रितान्ताः सेव्यन्तेऽत्र सुयोगिभिः ।

द्वादशान्तः शक्तेरुदयविश्रान्तिस्थानम् । सुयोगिभिरित्यन्तःप्राणे सावधानैर्न सामान्यैस्तेषामपानस्यावेद्ययत्नतया तत्सेवनस्य यत्नसाध्यत्वात् ॥ १८८ ॥

ननु व्यापकत्वादेषां स्वरसत एव सर्वत्रावस्थानं सिद्धमित्यत्र विशेषाभिधाने किं प्रयोजनम् ? इत्याशङ्क्याह

एते च परमेशानशक्तित्वाद्विश्ववर्तिनः ॥ ६-१८९ ॥

देहमप्यश्नुवानास्तत्कारणानीति कामिके ।

तत्कारणानीति, तस्य देहस्य कारणानि
तत्तदधिष्ठानद्वारेणोत्पत्तिनिमित्तमित्यर्थः ॥ १८९ ॥

कामिकीयमेव ग्रन्थं पठति

बाल्ययौवनवृद्धत्वनिधनेषु पुनर्भवे ॥ ६-१९० ॥

मुक्तौ च देहे ब्रह्माद्याः षडधिष्ठानकारिणः ।

तद्बाल्ये ब्रह्मणोऽधिष्ठानकारित्वं, यावन्मुक्तावनाश्रितस्येति ॥ १९०
॥

नन्वस्मद्दर्शने मुक्तेः किमनाश्रिताधिष्ठानं युक्तम् ?
इत्याशङ्क्याह

तस्यान्ते तु परा देवी यत्र युक्तो न जायते ॥ ६-१९१ ॥

अनेन ज्ञातमात्रेण दीक्षानुग्रहकृद्भवेत्।

अन्त इति, यदुक्तम्

षट्त्यागात्सप्तमे लयः। (स्वटं। ४।२६७)

इति।

युक्तइत्यर्थाद् गुरुणा योजितः॥ १९१॥

नन्वपानस्य कालवैचित्र्याभिधाने प्रक्रान्ते किमनेनोपदिष्टेन ?
इत्याशङ्क्याह

समस्तकारणोल्लासपदे सुविदिते यतः॥ ६-१९२॥

अकारणं शिवं विन्देद्यत्तद्विश्वस्य कारणम्।

हेये हि सुष्ठु ज्ञाते सुखमुपादेये विश्रान्तिर्भवेदिति भावः॥ १९२॥

ननु प्राणक्रमेण द्वादशान्ते परः शिवः इत्याद्युक्त्या

तत्तत्कारणोल्लङ्घनेन तत्र शिवे विश्रान्तिः स्यादिह पुनः सा कुत्र यत्रैवं स्यात् ? इत्याशङ्क्याह

अधोवक्त्रं त्विदं द्वैतकलङ्कैकान्तशातनम् ॥ ६-९३ ॥

क्षीयते तदुपासायां येनोर्ध्वाधरडम्बरः ।

यत्र नामापानस्य विश्रान्तिस्तदिदं द्वैतकलङ्कापहम् अधोवक्त्रं षष्ठस्त्रोतोरूपं योगिनीवक्त्रमित्युच्यते यतोऽयमद्वैतार्थोपदेशिनां रहस्यशास्त्राणामुदयो, येन द्वैतापहतत्वेन हेतुना तत्र विश्रान्तिभाजाम् ऊर्ध्वाधरडम्बरः शाम्येत् चिदानन्दैकघनपरशिवैकात्म्यमुल्लसेदित्यर्थः ॥ १९३ ॥

नन्वत्रैवं विश्रान्तिः किं प्राणवत्तुट्यादिक्रमेणैव भवेदुतान्यथापि ? इत्याशङ्क्याह

अत्रापानोदये प्राग्वत्षष्ट्यब्दोदययोजनाम् ॥ ६-१९४ ॥

यावत्कुर्वीत तुट्यादेर्युक्तांगुलविभागतः ।

युक्तं तुट्यनुगुणमंगुलविभागमाश्रित्य तुट्यादेरारभ्य षष्ट्यब्दोदययोजनां यावत् प्राग्वदत्रापानोदयेऽर्थाद्योजनां कुर्वीत, येनैवं विश्रान्तिः स्यात्॥ १९४ ॥

न केवलमेतदपाने यावत्समानेऽपि इत्याह

एवं समानेऽपि विधिः स हि हार्दीषु नाडिषु॥ ६-१९५॥

सञ्चरन्सर्वतोदिक्कं दशधैव विभाव्यते।

हार्दीषु, हृदि तासामभिव्यक्तेः, वस्तुतस्त्वासां नाभेरुदयः। यदुक्तम्

ऊर्ध्वाधो मेढ्रकन्दे च स्थिता वै नाभिमध्यतः।

तस्माद्विनिर्गता नाड्यस्तिर्यगूर्ध्वमधः प्रिये॥

चक्रवत्संस्थितास्तत्र प्रधाना दश नाडयः। (स्वटं। ७।८)

इति। समानस्यापि मुख्यया वृत्त्या नाभिरेव स्थानम्। यदुक्तम्

हृद्गुदे नाभिकण्ठे च सर्वसन्धौ तथैव च।

प्राणाद्याः संस्थिता ह्येते ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ । ॥ (स्वटं। ७।३०१)

इति ॥ १९५ ॥

नन्वेवं व्यपदेशस्य किं निमित्तम्? इत्याशङ्क्याह

दश मुख्या महानाडीः पूरयन्नेष तद्गताः ॥ ६-१९६ ॥

नाडयन्तराश्रिता नाडीः क्रामन्देहे समस्थितिः।

मुख्या इति प्रधानाः। तदुक्तम्

इडा च पिङ्गला चैव सुषुम्ना च तृतीयिका।

गान्धारी हस्तिजिह्वा च पूषा चैवार्यमा तथा ॥

अलम्बुसा कुहूश्चैव शङ्खिनी दशमी स्मृता।

एताः प्राणवहाः प्रोक्ताः प्रधाना दश नाडयः ॥ (स्वटं। ७।१६)

इति। तद्गताः इति तद्भेदरूपद्वासप्ततिसहस्रसंख्याकाः।
नाड्यन्तरेतितदुपभेदरूपाणि। यदुक्तम्

द्वासप्ततिसहस्राणि नाड्यस्ताभ्यो विनिर्गताः।

पुनर्विनिर्गताश्चान्या आभ्योऽप्यन्याः पुनः पुनः॥ (स्वटं। ७।९)

इति। अत एव देहे समननात्समाननामायमित्युक्तं शमस्थितिः इति॥ १९६
॥

ननु यदि नामायं दश नाडीराक्रम्य वर्तते तावतास्य किमायातं
येन दशधात्वमुच्यते ? इत्याशङ्क्याह

अष्टासु दिग्दलेष्वेष क्रामंस्तद्दिक्पतेः क्रमात्॥ ६-१९७ ॥

चेष्टितान्यनुकुर्वाणो रौद्रः सौम्यश्च भासते।

तद्दिक्पतेरिति, इन्द्रादेः। चेष्टितानीति, स्तम्भादिरूपाणि। रौद्रो
याम्यादौ, सौम्यश्च वारुण्यादौ अत एव पुंसां प्रतिक्षणं
क्रोधहर्षाद्याविर्भावः। यदुक्तम्

पद्मस्याष्टदलस्येत्थं तन्मध्ये भोगभुक्सदा ।

संस्थितः सर्वगोऽप्यस्मात्कारणात्सुप्रतीयते ॥

येनाशु विषयान्दृष्ट्वा विचारयति सादरम् ।

शोकः क्रोधो विषादो वा विस्मयस्ताप एव च ॥

हर्षो वाप्यथ संचिन्त्य हृदयेनैव भाव्यते ।

इति ॥ १९७ ॥

एवमस्य सर्वत्र साम्येनावस्थानेऽपि मुख्यया वृत्त्या नाडीत्रय एव चारः इत्याह

स एव नाडीत्रितये वामदक्षिणमध्यगे ॥ ६-१९८ ॥

इन्द्वर्काग्निमये मुख्ये चरंस्तिष्ठत्यहर्निशम् ।

नाडीत्रितये इति, इडापिङ्गलासुषुम्नात्मके । यदुक्तम्

दक्षिणे तु स्थितः सूर्यो वामे सोमो विराजते।

पाके प्रकाशकत्वे च मध्यस्थश्चैव पावकः॥ (स्वटं। ७।५२)

इति यदुक्तम्

दशानां तु परं देवि नाडीत्रयमुदाहृतम्।

बिन्दुनादात्मिके द्वे वै मध्ये शक्त्यात्मिका स्मृता॥

इति। नन्वत्र कथमसावहर्निशं चरन्नास्ते ? इत्याशङ्क्याह

सार्धनालीद्वयं प्राणशतानि नव यत्स्थितम्॥ ६-१९९॥

तावद्वहन्नहोरात्रं चतुर्विंशतिधा चरेत्।

षट्प्राणाश्चषकस्तेषां षष्टिर्नाली तथा तिथिः।

इत्याद्युक्त्या बाह्यायां घटिकायामन्तःप्राणचाराणां
सषष्टिशतत्रयमुदियात् इति बाह्येन सार्धेन घटिकाद्वयेन

नवशतानि वहन् षष्टिघटिकात्म बाह्यमहोरात्रं चतुर्विंशतिभिः प्रकारैरर्थात् स एव समानश्चरेत् येनात्र सषट्शतसहस्रैकविंशत्यात्मकप्राणचाराश्रयेण चतुर्विंशतिः संक्रान्तीनामुदियात्। यदुक्तम्

चतुर्विंशतिसंक्रान्त्यः समधातोः स्वभावतः।

शतानि नव वै हंस एकामेकां वहेत्सदा॥ (स्वच्छं। ७।१६८)

इति।

बाह्ये चैव त्वहोरात्रे अध्यात्मं तु वरानने।

चतुर्विंशतिसंक्रान्तीः प्राणहंसस्तु संक्रमेत्॥

अहनि द्वादश प्रोक्ता रात्रौ वै द्वादश स्मृताः। (स्वच्छं। ७।१६६)

इति च॥ १९९॥

एतदेव विभजते

विषुवद्वासरे प्रातः सांशां नालीं स मध्यगः॥ ६-२००॥

वामेतरोदक्सव्यान्यैर्यावत्संक्रान्तिपञ्चकम् ।

एवं क्षीणासु पादोनचतुर्दशसु नालिषु ॥ ६-२०१ ॥

मध्याह्ने दक्षविषुवन्नवप्राणशतीं वहेत् ।

दक्षोदगन्योदग्दक्षैः पुनः संक्रान्तिपञ्चकम् ॥ ६-२०२ ॥

नवासुशतमेकैकं ततो विषुवदुत्तरम् ।

पञ्चके पञ्चकेऽतीते संक्रान्तेर्विषुवद्बहिः ॥ ६-२०३ ॥

यद्वत्तथान्तः सङ्क्रान्तिर्नवप्राणशतानि सा ।

विषुवद्वासरे रात्रिन्दिनसाम्यात्मनि मेषसंक्रान्तिदिने प्रातः
सार्धशतचतुष्टयप्राणचारात्मिकां सचतुर्भागां घटिकां
मध्यगः सौषुम्नमार्गावस्थितः सन् स
समानस्तावद्वामेतरोदक्सव्यान्यैर्वामदक्षनाड्योः प्रत्येकं
सार्धनालीद्वयं पञ्चधा गमागमैश्चरेत् यावद्वृषादिकन्यान्तं

संक्रान्तिपञ्चकं भवेत्, येन सभागत्रयासु त्रयोदशसु घटिकासु
व्यतीतासु मध्यनाड्यां मध्याह्नसमये
दक्षविषुवत्तुलासंक्रान्तिर्नवप्राणशतीं वहेत्,
सार्धघटिकाद्वयमुदियादित्यर्थः। ततोऽपि
दक्षोदगन्योदग्दक्षैर्दक्षवामनाड्योः समानस्य पञ्चधा गमागमैः
पुनरेकैकं नवासुशतं प्रत्येकं सार्धनालीद्वयं
वृश्चिकादिमीनान्तं सङ्क्रातिपञ्चकमुदेतीत्यर्थः। तदनन्तरं च
मध्यनाड्यां सायमुत्तरं मेषसङ्क्रान्तिरूपं विषुवत्
प्राग्वत्सार्धशतचतुष्टयप्राणचारात्म सचतुर्भागैकघटिकोदयं
भवेद्येन त्रिंशद्घटिकात्मनि दिने सङ्क्रान्तिद्वादशकमुदियात्। तत्र
सङ्क्रान्तीनामेकादशकमखण्डम्, एका तु सायंप्रातरर्धार्धिकया,
तस्य चार्धद्वयस्य
पक्षसन्धिवद्रात्रीयार्धद्वयसंमेलनेऽप्यखण्डत्वम्, इति
सायंप्रातरुत्तरविषुवद्द्वयं मध्याह्नार्धरात्रयोश्च
दक्षविषुवद्द्वयमिति। यद्वक्ष्यति

रात्र्यन्तदिनपूर्वांशौ मध्याह्नो दिवसक्षयः।

स शर्वर्युदयो मध्यमुदक्तो विषुतेदृशी॥ (तं। ६।२०५)

इति। एतच्च दक्षविषुवद्दिनोदयाभिप्रायेण

दक्षिणादुत्तरं याति उत्तराद्दक्षिणं यदा ।

दक्षिणोत्तरसंक्रान्तिः सा चैवं संविधीयते ॥

दक्षिणस्यां यदा नाड्यां संक्रामेत्तु यदोत्तरम् ।

यावदर्धं तु तत्रस्थं मध्येनोत्तरतो वहेत् ॥

तावत्तु विषुवत्प्रोक्तमुत्तरं तूत्तरायणे ।

उत्तराद्दक्षिणायां तु संक्रामन्स वरानने ॥

यावदर्धं वहेत्तत्र अर्धं दक्षिणतो वहेत् ।

विषुवद्दक्षिणं तावद्दक्षिणायनजं प्रिये ॥ (स्वटं । ७ ।१६३)

इत्यादि श्रीस्वच्छन्दशास्त्रेऽभिहितम् । न चान्तरपूर्व एवायं संक्रान्तीनामुदय इत्याह पञ्चक इत्यादि । सङ्क्रान्तिरिति, विषुवद्रूपा । ङवप्राणशतानि सा इत्यनेन यथोक्तमेव मानं स्मारितम् ॥ २०३ ॥

एतदेवान्यत्राप्यतिदिशति

एवं रात्रावपीत्येवं विषुवद्दिवसात्समात्॥ ६-२०४ ॥

आरभ्याहर्निशावृद्धिह्रासससङ्क्रान्तिगोऽप्यसौ।

इत्येवं बाह्येनाहोरात्रेण संक्रान्तिचतुर्विंशतेरुदयादि सर्वं समात्
त्रिंशद्घटिकाद्विषुवद्दिवसादारभ्योक्तम्, अन्यथा
ह्यहर्निशयोर्वृद्धिह्रासौ न स्यातां, येन संक्रान्तिष्वपि
चयापचयाभ्याम् अहनि द्वादश संक्रान्तयो रात्रौ च, इत्येवं
विभागनियमो नोक्तः स्यात्॥ २०४ ॥

अत्र च विषुवत्संक्रान्तीनां विभागं स्फुटयति

रात्र्यन्तदिनपूर्वांशौ मध्याह्नो दिवसक्षयः॥ ६-२०५ ॥

स शर्वर्युदयो मध्यमुदक्तो विषुतेदृशी।

मध्यमित्यर्थाच्छर्वर्याः। उदक्तः इति उत्तराद्विषुवत

आरभ्येत्यर्थः। यदुक्तम्

पूर्वाह्णे विषुवत्त्वेकं मध्याह्ने तु द्वितीयकम्।

तृतीयं चापराह्णे वै अर्धरात्रे चतुर्थकम्॥

चतुर्धा विषुवत्प्रोक्तमहोरात्रेण मुक्तिदम्॥ (स्वटं। ७।१६७)

इति॥ २०५॥

नान्वासां चतसृणां संक्रान्तीनामेवं व्यपदेशे किं निमित्तम्?

इत्याशङ्क्याह

व्याप्तौ विषेर्यतो वृत्तिः साम्यं च व्याप्तिरुच्यते॥ ६-२०६॥

तदर्हति च यः कालो विषुवत्तदिहोदितः।

वृत्तिरिति, विष्लृ व्याप्तौ इति पाठात्। अर्हति इत्यर्हेऽर्थे वतेः

प्रयोगात्॥ २०६॥

ननु विषुवत्संक्रान्तौ यद्येवं नियमस्तत्तदितरासु का व्यवस्था?

इत्याशङ्क्याह

विषुवत्प्रभृति ह्रासवृद्धी ये दिनरात्रिगे ॥ ६-२०७ ॥

तत्क्रमेणैव संक्रान्तिह्रासवृद्धी दिवानिशोः ।

तत्क्रमेणेति, रात्रिदिनवृद्धिह्रास्यपरिपाट्या तेन पञ्चत्रिंशद्घटिके दिने चतुर्दश संक्रान्तयः, पञ्चविंशतिघटिकायां रात्रौ दशेति ॥ २०७ ॥

तदेवोपसंहरति

इत्थं समानमरुतो वर्षद्वयविकल्पनम् ॥ ६-२०८ ॥

चार एकत्र नह्यत्र श्वासप्रश्वासचर्चनम् ।

वर्षद्वय इति, संक्रान्तिचतुर्विंशतेरुदयात् । एकत्रेति, न तु प्राग्वत्प्राणापानात्मनि चारद्वये ॥ २०८ ॥

ननु किमत्र वर्षद्वयमेवोदियादुतान्यदपि ? इत्याशङ्क्याह

समानेऽपि तुटेः पूर्वं यावत्षष्ट्यब्दगोचरम् ॥ ६-२०९ ॥

कालसंख्या सुसूक्ष्मैकचारगा गण्यते बुधैः।

सुसूक्ष्मत्वे हेतुः एकचारगा इति। पूर्वं हि तुट्याद्युदयश्चारद्वये प्रोक्तः इत्येतदपेक्षया तत्र स्थौल्यं संभाव्यमिति भावः ॥ २०९ ॥

नन्वत्राप्येवं विभागेन कोऽर्थ ? इत्याशङ्क्याह

संध्यापूर्वाह्णमध्याह्णमध्यरात्रादि यत्किल ॥ ६-२१० ॥

अन्तःसंक्रान्तिगं ग्राह्यं तन्मुख्यं तत्फलोदितेः।

एतदुपसंहरन्नन्यदवतारयति

उक्तः समानगः काल उदाने तु निरूप्यते ॥ ६-२११ ॥

तदेवाह

प्राणव्याप्तौ यदुक्तं तदुदानेऽप्यत्र केवलम्।

नासाशक्त्यन्तयोः स्थाने ब्रह्मरन्ध्रेऽर्ध्वधामनी॥ ६-२१२॥

तेनोदानेऽत्र हृदयान्मूर्धन्यद्वादशान्तगम्।

तुट्यादिषष्ठिवर्षान्तं विश्वं काले विचारयेत्॥ ६-२१३॥

यदि परमत्रानयोः प्राणोदानयोरियान्विशेषो यत्प्राणस्य ब्रह्मरन्ध्रवर्तिनासिक्यद्वादशान्तमुदयस्थानमस्य तु ऊर्ध्वधामवर्तिशक्तिद्वादशान्तमिति। तेनेति, शक्तिद्वादशान्तं यावदुदानव्याप्तेः॥ २१३॥

नन्वेवं कालीयो विभागः किं व्याने संभवेन्न वा ? इत्याशङ्क्याह

व्याने तु विश्वात्ममये व्यापके क्रमवर्जिते।

सूक्ष्मसूक्ष्मोच्छलद्रूपमात्रः कालो व्यवस्थितः॥ ६-२१४॥

सूक्ष्मसूक्ष्मेति, स्पन्दमात्रात्मेत्यर्थः। अत्रैव
विश्वात्ममयत्वादिविशेषणद्वारेण हेतुत्रयम् अत एव चास्य
व्यापकत्वात्मना विशेषेणाननाद् व्यानत्वम्॥ २१४॥

एषां च क्रमेण सृष्ट्यादिपञ्चकृत्यकारित्वमस्ति इत्याह

सृष्टिः प्रविलयः स्थेमा संहारोऽनुग्रहो यतः।

क्रमात्प्राणादिके काले तं तं तत्राश्रयेत्ततः॥ ६-२१५॥

तं तमिति, प्राणादिकम्। तत्रेति, सृष्ट्यादिकारित्वे॥ २१५॥

एवं प्राणे चारमानादि सर्वमभिधाय
तदानन्तर्येणानुजोद्देशोद्दिष्टं वर्णोदयं वक्तुमुपक्रमते

प्राणचारेऽत्र यो वर्णपदमन्त्रोदयः स्थितः।

यत्नजोऽयत्नजः सूक्ष्मः परः स्थूलः स कथ्यते॥ ६-२१६॥

इह तावत्प्राणचारे वर्णानां पदानां मन्त्राणां चोदय इति स्थितम्

। स तु द्विधा स्वारसिकः प्रायत्निकश्चेति। तत्राद्यो वर्णानां,
तेषां नैयत्येन सर्वत्रैवाविशेषात द्वितीयस्तु पदानां मन्त्राणां
च। ते हि वर्णवदपरिगणितत्वादनियताः, इति योगीच्छानिबन्धन
एवैषामुदयः। यो हि यस्याभिप्रेतो मन्त्रादिः स तस्योदयं कारयेत
अतश्च परेच्छाधीनत्वादेषां प्रायत्निक एवोदयः, स च
समनन्तराह्निके प्रतिपादयिष्यते। यद्वक्ष्यति

इत्ययत्नजमाख्यातं यत्नजं तु निगद्यते। (तं। ७।२)

इति॥ २१६॥

इह पुनर्वर्णोदय एवायत्नजः परसूक्ष्मस्थूलात्मतया
त्रिप्रकारोऽभिधीयते। तत्र परस्यापि वर्णोदयस्य तरतमभावेन
द्वैविध्यमिति परतमं तदुदयमभिधातुमुपक्रमते

एको नादात्मको वर्णः सर्ववर्णाविभागवान्।

सोऽनस्तमितरूपत्वादनाहत इहोदितः॥ ६-२१७॥

इह खल्वेक एव सर्ववर्णसामान्यात्मा
सततोच्चरद्रूपत्वादनाहतशब्दाभिधेयो नादात्मको वर्ण उदितः

सततमेवोदयमान आस्त इत्यर्थः॥ २१७॥

स एव च परमुपेयः इत्याह

स तु भैरवसद्भावो मातृसद्भाव एष सः।

परा सैकाक्षरा देवी यत्र लीनं चराचरम्॥ ६-२१८॥

द्वितीयं परतमपि एषामुदयमभिधातुमाह

ह्रस्वार्णत्रयमेकैकं रव्यंगुलमथेतरत्।

प्रवेश इति षड्वर्णाः सूर्येन्दुपथगाः क्रमात्॥ ६-२१९॥

इकारोकारयोरादिसन्धौ संध्यक्षरद्वयम्।

ए इति प्रवेशे तु ए इतिद्वयं विदुः॥ ६-२२०॥

षण्ठार्णानि प्रवेशे तु द्वादशान्तललाटयोः।

गले हृदि च बिन्द्वर्णविसर्गौ परितः स्थितौ ॥ ६-२२१ ॥

खव्यंगुलम् इति द्वादशाङ्गुलम् अत
एवाकारादेर्ह्रस्वत्रयस्योदयात्प्राणवाहे षट्त्रिंशदंगुलानि भवन्ति
। इतरदिति, दीर्घत्रयम्। षड्वर्णा इति, अकाराद्युकारान्ताः।
क्रमादिति सूर्यपथे ह्रस्वानां त्रयमिन्दुपथे च दीर्घाणामिति।
आदिसंधाविति, अकारेणाकारेण च शंधौ संधिकार्ये कृते
सतीत्यर्थः। अस्यैव
संध्यक्षरद्वयस्यादिसंधावितरत्संध्यक्षरद्वयम्। एषां च
प्रत्येकमष्टादशांगुलमुदयो येन प्राणापानवाहयोर्व्याप्तिः सिद्ध्येत्
। प्रवेश इति न तु निर्गमेऽपि। द्वादशान्तेति न तु
समचतुर्भागकलनया, तेन द्वादशान्ते ऋकारः, इत्यादि क्रमः।
परितः इति सर्वतः। तेन प्राणे बिन्दोः
षट्त्रिंशदङ्गुलात्मन्यभ्युदयो विसर्गस्य त्वपाने, द्वयोरपि
बिन्दुनादात्मकत्वात्॥ २२१ ॥

एतदेवान्यत्राप्यतिदिशति

कादिपञ्चकमाद्यस्य वर्णस्यान्तः सदोदितम्।

एवं सस्थानवर्णानामन्तः सा सार्णसन्ततिः ॥ ६-२२२ ॥

अन्तरिति, तेन यदेवाकारस्योदयस्थानं तदेव कवर्गस्येति।
सस्थानवर्णानामितीकारादीनां सा सेति चवर्गादिका,
तदिकारोदयस्थाने चवर्गस्य यकारशकारयोश्चोदय इत्यादिक्रमः ॥ २२२
॥

ननु सर्वत्रायं नियमः किं संभवेन्न वा ? इत्याशङ्क्याह

हृद्येष प्राणरूपस्तु सकारो जीवनात्मकः।

बिन्दुः प्रकाशो हार्णश्च पूरणात्मतया स्थितः ॥ ६-२२३ ॥

यद्यपि सस्थानतया सकारस्य दन्ता उदयस्थानं हकारस्य च कण्ठ
स्तथापि प्राणात्मजीवनरूपत्वात्सकारो हृद्युदेति हकारश्च
प्रकाशात्मकत्वात्सर्वत इति ॥ २२३ ॥

एतदुपसंहरन्नन्यदवतारयति

उक्तः परोऽयमुदयो वर्णानां सूक्ष्म उच्यते।

सूक्ष्मश्च त्रिधेति। तत्र सूक्ष्मसूक्ष्मं तावदुदयमाह

प्रवेशे षोडशौन्मुख्ये रवयः षण्ठवर्जिताः॥ ६-२२४॥

तदेवेन्द्वर्कमत्रान्ये वर्णाः सूक्ष्मोदयस्त्वयम्।

षोडशेति, अपानवाहस्यानन्दप्राधान्यात अत एव परोदयेऽप्यपानवाह
एव षण्ठवर्णानामुदय उक्तः। औन्मुख्ये इति निर्गमे। तेनापाने
प्रत्येकं सचतुर्भागमंगुलद्वयमुदयः प्राणे पुनरंगुलत्रयमिति।
तदेव वर्णानां षोडशकं द्वादशकं वावलम्ब्यान्ये सस्थानाः
कवर्गाद्या इन्द्वर्कप्राणापानविषये समुदयन्ति इत्यत्र सूक्ष्मेऽपि
वर्णोदये सूक्ष्मोऽयमुदय इत्यर्थः॥ २२४॥

एवं सूक्ष्मसूक्ष्मं वर्णोदयमभिधाय सूक्ष्मस्थूलमप्याह

कालोऽर्धमात्रः कादीनां त्रयस्त्रिंशत उच्यते॥ २२५॥

मात्रा ह्रस्वाः पञ्च दीर्घाष्टकं द्विस्त्रिःप्लुतं तु लृ।

दीर्घाष्टकमिति, संध्यक्षरैः सह। द्विरिति, द्विमात्रं, त्रिरिति त्रिमात्रं, दीर्घाणां च प्लुतत्वेऽपि तन्नोक्तं तस्योच्चारणापेक्षत्वात नह्येषां दीर्घत्ववत्प्लुतत्वमपि स्वाभाविकमिति भावः। एवं ऌकारस्यापि प्लुतत्वमेव स्वभावः इति दीर्घत्वापरिगणनेन तदेवेहास्य प्राधान्येनोक्तमिति न कश्चिद्दोषः। तेन कादीनां त्रयस्त्रिंशदर्धमात्राः ह्रस्वानां दश, दीर्घाणां द्वात्रिंशत्, प्लुतस्य षडित्येकाशीतिरर्धमात्राणा मिति ॥ २२५॥

नन्वेवं विभाजने किं प्रमाणम्? इत्याशङ्क्याह

एकाशीतिमिमामर्धमात्राणामाह नो गुरुः॥ २२६॥

तस्याप्येवमभिधाने क इवाशयः? इत्याशङ्क्याह

यद्वशाद्भगवानेकाशीतिकं मन्त्रमभ्यधात्।

यद्वशादिति, अस्याः परस्या मन्त्रमातुरेकाशीतिमात्रासद्भावात्। एकाशीतिकमिति, तावत्संख्याकपदारब्धत्वात्॥

ननु भगवतो व्योमव्याप्यभिधानेऽप्येतन्निमित्तमित्यत्र किं प्रमाणम् ?
इत्याशङ्क्याह

एकाशीतिपदा देवी शक्तिः प्रोक्ता शिवात्मिका ॥ ६-२२७ ॥

श्रीमातङ्गे तथा धर्मसङ्घातात्मा शिवो यतः ।

शक्तिरिति, व्योमव्यापिरूपा । प्रोक्तेति श्रीमातङ्गे । यदुक्तम् तत्र

एकाशीतिपदा देवी या सा शक्तिः शिवात्मिका । (म । तं । १ ।७ ।३१)

इति । तथा

मन्त्राश्च शक्तिगर्भस्थाः शक्तिर्वै पारमेश्वरी ।

कालानलान्तमध्वानं शिवाद् व्याप्तं यया मुने ॥

एकाशीतिदोपेता विद्यापादे मयोदिता । (म । तं ।)

इति । नन्वस्या व्योमव्यापिरूपिण्याः पारमेश्वर्याः
शक्तेस्तत्तद्धृदादिमन्त्रात्मकत्वेऽपि कथं शिवात्मकत्वमपि स्यात् ?
इत्याशङ्क्योक्तं तथेत्यादि । यत्तथोक्तेन प्रकारेण धर्माणां

पत्युर्धर्माः शक्तयस्तु ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ । । (मटं । १ ।२०)

इत्याद्युक्तया शक्तीनामेकाशीत्यात्मा यः सङ्घातस्तदात्मा शिवः

इति सामस्त्येनास्यास्तदात्मकत्वम् ।

तदुक्तं तत्र

एकत्रैव समस्तानि एकाशीतिपदानि तु ।

अष्टषष्ठ्यधिकं प्रोक्तं वर्णानां तु शतत्रयम् ॥

अर्चा तु देवदेवस्य समस्तव्यस्तरूपिणी ।

इति ।

एकोऽपि वर्णो देवानां वाचकः परिकीर्तितः ।

सर्वेऽप्येकस्य युज्यन्ते यतस्ते विश्वमूर्तयः ॥

इति च ॥

न चैतदागमेनैव सिद्धं यावद्युक्तितोऽपि इत्याह

तथा तथा परामर्शशक्तिचक्रेश्वरः प्रभुः ॥ ६-२२८ ॥

स्थूलैकाशीतिपदजपरामर्शैर्विभाव्यते ।

शक्तिमतः खलु शक्तिरनन्या इत्याद्युक्तयुक्त्या वस्तुतः
सर्वशक्त्यविभिन्नस्वभावोऽपि प्रभुः परमेश्वरः
शिवस्तत्तद्वर्णारब्धत्वात् स्थूलानि यान्येकाशीतिपदानि तज्जा ये
प्रणवाद्याः परामर्शास्तैस्तथा तथा सर्वात्मानन्तादितया
परामर्शो यस्यैवंविधो यद्धृदादिशक्तिचक्रं तस्य रिश्वरः
संयोजनवियोजनकारी विभाव्यते एवं यस्य ज्ञप्तिः क्रियते इत्यर्थः
। अत एव चात्र सर्वात्मादीनां यावता परामर्शः सिद्ध्येत् तावत्येव
पदत्वं, येनैकाशीतित्वं स्यात् ॥ २२८ ॥

तदाह

तत एव परामर्शो यावत्येकः समाप्यते ॥ ६-२२९ ॥

तावत्तत्पदमुक्तं नो सुप्तिङ्नियमयन्त्रितम्।

नो सुप्तिङ्नियमः, तथात्वे हि ङमः शिवायेति पदं षडर्णं
प्रणवादिकम्। इत्याद्युक्त्यैकत्वेऽप्यस्य पदस्य त्रिपदत्वमापतेदिति
गणना विसंवदेत्॥२२९॥

ननु यद्येवं तदेकाशीत्यर्धमात्रात्मिकेयमेव भगवती परा
शक्तिरवस्थितेति किमनेनैतत्समव्याप्तिकेन व्योमव्यापिनोपदिष्टेन ?
इत्याशङ्क्याह

एकाशीतिपदोदारविमर्शक्रमबृंहितः॥ ६-२३० ॥

स्थूलोपायः परोपायस्त्वेष मात्राकृतो लयः।

लयः इति स्वात्ममात्रविश्रान्तिः। स्थूलोपायः
इत्यनेनोपदेश्यभेदादुपदेशस्यापि भेदः इति प्रकाशितम्॥ २३० ॥

एवमेतत्प्रसङ्गादभिधाय प्रकृतमेवानुसरति

अर्धमात्रा नव नव स्युश्चतुर्षु चतुर्षु यत्॥ ६-२३१ ॥

अंगुलेष्विति षट्त्रिंशत्येकाशीतिपदोदयः।

प्रत्यंगुलचतुष्टयं नवार्धमात्राः इत्यंगुलषट्त्रिंशदात्मनि प्राणचारेऽर्धमात्राणामेकाशीतिरुदियात्॥ २३१॥

आसां चोदये विभागान्तरमस्ति इत्याह

अङ्गुले नवभागेन विभक्ते नवमांशकाः॥ ६-२३२॥

वेदा मात्रार्धमन्यत्तु द्विचतुःषड्गुणं त्रयम्।

एकैकस्मिन्नंगुले नवधा विभाजिते षट्त्रिंशतोंगुलानां सचतुर्विंशतिशतत्रयं मानं भवेत्। भागानां तत्रैकैकस्यार्धमात्रात्मनो व्यञ्जनस्य चत्वारो नव भागा उदयस्थानमित्युक्तं ङवमांशका वेदाः मात्रार्धम् इति। अन्यत्पुनर्ह्रस्वदीर्घप्लुतलक्षणं त्रयं द्विचतुःषड्गुणं, ह्रस्वस्यैकमात्रत्वादष्टौ नव भागा उदयस्थानं, दीर्घस्य द्विमात्रत्वात्षोडश, प्लुतस्य त्रिमात्रत्वाच्चतुर्विंशतिः॥

एतदेव सङ्कलयति

एवमङ्गुलरन्ध्रंशाचतुष्कद्वयगं लघु ॥ २३३ ॥

दीर्घं प्लुतं क्रमाद् द्वित्रिगुणमर्धं ततोऽपि हल्।

रन्ध्रंशानां नवभागानां चतुष्कद्वयम् अष्टौ नवभागा
इत्यर्थः। लघ्विति, ह्रस्वं ततो लघोरपीत्यर्थः। तेन पञ्चानां
ह्रस्वानां प्रत्येकमष्टसु भागेषूदयाच्चत्वारिंशन्नव नव भागा
भवन्ति, दीर्घाणामष्टानां प्रत्येकं षोडशभागकलनया
साष्टाविंशतिशतम् इति। प्लुतस्य चतुर्विंशतिस्त्रयस्त्रिंशतां
हलां प्रत्येकं भागचतुष्टयकलनया द्वात्रिंशदधिकं शतमिति।
यद्यप्येकाशीतेरर्धमात्राणां प्रत्येकमङ्गुलीयाश्चत्वारो नव भागा
उदयस्थानमित्येव स्पष्टमभिधातव्यं, तथाप्येवमभिधानेऽयमाशयो
यदादौ ह्रस्वानामुदयस्तदनन्तरं दीर्घाणां प्लुतस्य व्यञ्जनानां
च, इति क्रमः प्रदर्शितो भवेदिति ॥ २३३ ॥

नन्वेतन्मध्ये क्षकारश्चेद् गण्यते तदा कियत्योऽर्धमात्रा
अधिकीभवन्ति, तथात्वे वासां कथमुदयः? इत्याशङ्क्याह

क्षकारस्त्र्यर्धमात्रात्मा मात्रिकः स तथान्तरा ॥ ६-३४ ॥

विश्रान्तावर्धमात्रास्य तस्मिंस्तु कलिते सति ।

अङ्गुलार्धेऽद्रिभागेन त्वर्धमात्रा पुरा पुनः ॥ ६-२३५ ॥

क्षकारः सर्वसंयोगग्रहणात्मा तु सर्वगः ।

सर्ववर्णोदयाद्यन्तसन्धिषूदयभाग्विभुः ॥ ६-२३६ ॥

कथमस्य त्र्यर्धमात्रात्मकत्वमित्याशङ्क्योक्तं मात्रिकः इत्यादि । ककारसकारात्मकार्धमात्राद्वयारब्धत्वात् । अन्तरा विश्रान्ताविति, ककारान्तरमर्धमात्रीयं कालं विश्रम्य सकारस्योच्चारात् । कलिते इत्येकाशीत्या, तेनार्धमात्राणां चतुरशीतिरिति । अद्रि इति सप्त । अङ्गुलार्धे हि सप्तधा विभक्ते प्रत्यङ्गुलं चतुर्दश भागाः इति षट्त्रिंशतोऽङ्गुलानां सचतुष्टयं शतपञ्चकं भागानां भवेत् । तेनार्धाङ्गुलीयेषु षट्सु सप्तभागेष्वर्धमात्रेति षट्त्रिंशदङ्गुलात्मनि प्राणचारे चतुरशीतेरर्धमात्राणामुदय इति । नन्वेवमेकाशीतिकलोदयपक्षे क्षकारस्य नास्त्येवोदयः-इत्युक्तं स्यादित्याशङ्क्याह पुरेत्यादि । सर्वसंयोगग्रहणात्मेति,

संयोगान्तलक्षणपरत्वात्। यदुक्तं प्राक्

योनिरूपेण तस्यापि योगे क्षोभान्तरं विदुः।

तन्निदर्शनयोगेन पञ्चाशत्तमवर्णता॥ (तं। ३।१८९)

इति। अनुत्तरविसर्गानुप्राणितयोः ककारसकारयोः
प्रत्याहारतयोपादाने निखिलस्य वर्णजातस्य गर्भीकारात्। अत एवायं
सर्ववर्णानामादावन्ते परस्परं संमेलनात्मनि शंधौ
चोदयभाक्सर्ववर्णानुस्यूततयोदियात्, यतोऽयं विभुः व्यापक
इत्यर्थः॥ २३६॥

नन्वेवं वर्णोदयेनाभिहितेन कोऽर्थः? इत्याशङ्क्याह

इत्थं षट्त्रिंशके चारे वर्णानामुदयः फले।

क्रूरे सौम्ये विलोमेन हादि यावदपश्चिमम्॥ ६-२३७॥

वर्णानाम् इत्यकारादीनां, उदय इत्यर्थाद्धृदयाद्द्वादशान्तम्।
क्रूरे इति मुक्तिलक्षणे, शौम्ये इति तत्तत्सिद्धयात्मनि भोगलक्षणे।
विलोमेन इत्यर्थादपानोदये। विलोममेवाह हादि यावदपश्चिमम् इति

। तदुक्तम्

अधः प्रवहणे सिद्धिर्हृत्पद्मं यावदागतः।

मुक्तिश्चैव भवेदूर्ध्वे परतत्त्वे तु सुव्रते॥ (स्वछं। ७।५६)

इति। वस्तुतस्त्वकारस्य हृद्युदयस्थानं, हकारस्य तु द्वादशान्त इति
॥ २३७॥

एवमेतदुपजीवनेनैव सूक्ष्मपरमपि वर्णानामुदयमाह

हृद्यकारो द्वादशान्ते हकारस्तदिदं विदुः।

अहमात्मकमद्वैतं यः प्रकाशात्मविश्रमः॥ ६-२३८॥

अद्वैतमिति, प्रत्याहारक्रमेणाशेषवर्णान्तःकारात्। प्रकाशेति,
यदुक्तम्

प्रकाशस्यात्मविश्रान्तिरहंभावो हि कीर्तितः। (अ।प्रषि। २२)

इति॥ २३८॥

एतच्चापानोदयेऽप्येतिदेष्टुमाह

शिवशक्त्यविभागेन मात्रैकाशीतिका त्वियम्।

द्वासप्ततावङ्गुलेषु द्विगुणत्वेन संसरेत्॥ ६-२३९॥

शिवशक्त्योरविभाग इति,
बिन्दुनादात्मप्राणापानोभयमेलनायामित्यर्थः।
एकाशीतिरित्युपलक्षणं, तेन चतुरशीतिरपि। द्विगुणत्वेनेति,
षट्त्रिंशतोंगुलानाम्॥ २३९॥

एतदुपसंहरन्नन्यदवतारयति

उक्तः सूक्ष्मोदयस्त्रेधं द्विधोक्तस्तु परोदयः।

अथ स्थूलोदयोऽर्णानां भण्यते गुरुणोदितः॥ ६-२४०॥

अथ इत्यानन्तर्ये। गुरुणोदित इति सर्वशेषः॥

तत्र वर्गक्रमेण तावद्वर्णानां स्थूलमुदयमाह

एकैकमर्धप्रहरं दिने वर्गाष्टकोदयः।

रात्रौ च ह्रासवृद्ध्यत्र केचिदाहुर्न केऽपि तु॥ ६-२४१॥

ह्रासवृद्धीति, बाह्यमहोरात्रमपेक्ष्यानपेक्ष्य वा॥ २४१॥

तत्र बाह्याहोरात्रानपेक्षिमते साम्येनैवैषामुदयः इत्याह

एष वर्गोदयो रात्रौ दिवा चाप्यर्धयामगः।

अर्धयामग इति, प्रतिवर्गं सार्धचतुरङ्गुलमुदय इत्यर्थः॥

एवं बाह्याहोरात्रानपेक्षिमतमभिधाय तदितरेषोमपि दर्शयति

प्राणत्रयोदशशती पञ्चाशदधिका च सा॥ ६-२४२॥

अध्यर्धा किल संक्रान्तिर्वर्गे वर्गे दिवानिशोः।

सेति प्राणचारीया सार्धत्रयोदशशती। अध्यर्धा इति सार्धा,

प्रतिसंक्रान्ति नवानां प्राणचारशतानामभिधानात्। तेन दिने द्वादशानां संक्रान्तीनामुदयः, इति साष्टशतं सहस्रदशकं प्राणचाराणां भवेत्। रात्रावप्येवं सषट्शतसहस्रैक विंशतिः ॥ २४२ ॥

अहोरात्रमेलनायां पुनः प्रतिसंक्रान्तित्रयमेकैकस्य वर्गस्योदयः इत्याह

तदैक्ये तूदयश्चारशतानां सप्तविंशतिः ॥ ६-२४३ ॥

एवं प्रागुक्तसंक्रान्तिद्वयवद् बाह्याहोरात्रह्रासवृद्ध्यनुसारं वर्गाष्टकोदयस्यापि ह्रासवृद्धी भवतः इति सिद्धम्, अन्यथा प्रतिवर्गोदयं प्राणचाराणां नैयत्यं न स्यात्॥ २४३ ॥

ननु क्षकारेण सह नव वर्गाः इति येषां मतं तत्रैषामुदये प्राणचाराणां कीदृग्विभागः ? इत्याशङ्क्याह नव वर्गांस्तु ये प्राहुस्तेषां प्राणशती रवीन् (विः) ॥

सत्रिभागैव संक्रान्तिर्वर्गे प्रत्येकमुच्यते ॥ ६-२४४ ॥

अहर्निशं तदैक्ये तु शतानां श्रुतिचक्षुषी।

रवीनिति द्वादश। सत्रिभागेति प्राणशतत्रयस्याधिक्येनोपदानात्
। तेन प्रतिवर्गं प्राणचाराणां शतद्वादशकम् इति वर्गनवके
साष्टशतं सहस्रदशकं भवेत् तदैक्ये इत्यहर्निशमेलने।
श्रुतिचक्षुषी इति चतुर्विंशतिः॥

एवं वर्णानां वर्गक्रमेण स्थूलमुदयमभिधाय क्रमान्तरेणाप्याह

स्थूलो वर्गोदयः सोऽयमथार्णोदय उच्यते॥ ६-२४५॥

तदाह

एकैकवर्णे प्राणानां द्विशतं षोडशाधिकम्।

बहिश्चषकषट्त्रिंशद्दिन इत्थं तथा निशि॥ ६-२४६॥

चषकषट्त्रिंशदिति, प्रतिचषकं षण्णां प्राणचाराणामुदयात्।
तेन पञ्चाशतो वर्णानां साष्टशतं सहस्रदशकं
प्राणचाराणां स्यात्॥ २४६॥

अत्र चोदये विशेषं दर्शयति

शतमष्टोत्तरं तत्र रौद्रं शाक्तमथोत्तरम्।

यामलस्थितियोगे तु रुद्रशक्त्यविभागिता ॥ ६-२४७ ॥

यामलस्थितियोगे इत्युभयसंमेलनायाम्॥ २४७ ॥

एतदेव चाहोरात्रसंमेलनायां द्विगुणी भवेत् इत्याह

दिनरात्र्यविभागे तु दृग्वह्न्यब्ध्यसुचारणाः।

सपञ्चमांशा नाडी च बहिर्वर्णोदयः स्मृतः॥ ६-२४८ ॥

दृग्वह्न्यब्धिरिति, द्वात्रिंशदधिकं शतचतुष्टयम् असुचारणाः इति प्राणसञ्चारणाः। सपञ्चमांशा नाडीति, चषकषट्त्रिंशतो द्वैगुण्यात्॥ २४८ ॥

एतदुपसंहरन्नन्यदतारयति

इति पञ्चाशिका सेयं वर्णानां परिचर्चिता ।

एकोनां ये तु तामाहुस्तन्मतं संप्रचक्ष्महे ॥ ६-२४९ ॥

तदाह

वेदाश्चाराः पञ्चमांशन्यूनं चारार्धमेकशः ।

वर्णेऽधिकं तद्द्विगुणमविभागे दिवानिशोः ॥ ६-२५० ॥

वेदाश्चत्वारः । पञ्चमांशेनार्थात्किंचिदंशेन ङ्यूनं रहितम्
। अधिकमिति, षोडशाधिकशतद्वयस्योपरीत्यर्थः । तेनैकोनपञ्चाशतो
वर्णानां प्रत्येकं षोडशाधिकशतद्वयात्मकत्वात्
चतुरशीतिशतपञ्चकाधिकं सहस्त्रदशकं प्राणचारा भवन्ति,
अधिकैश्च प्रत्येकं चतुर्भिः सषण्णवतिशतम् । अनेन च चाराणां
सार्धचतुर्विंशतेः किंचिदंशन्यूनं पञ्चभागं विंशति (?)
साष्टशतं सहस्त्रदशकम् ॥ २५० ॥

एतदेवोपसंहरति

स्थूलो वर्णोदयः सोऽयं पुरा सूक्ष्मो निगद्यते।

सूक्ष्म इत्यर्थात्परोऽपि पुरा निगदित इत्यर्थः॥ ६-२५१॥

इदानीमाह्निकार्थमार्यायाः प्रथमार्धेनोपसंहरति

इति कालतत्त्वमुदितं शास्त्रमुखागमनिजानुभवसिद्धम्।

इति श्रामदाचार्याभिनवगुप्तपादविरचिते श्रीतन्त्रालोके
कालतत्त्वप्रकाशनं नाम षष्ठमाह्निकम्॥ ६॥

मुखागमेति

शैवी मुखमिहोच्यते (वि।भै। २० श्लोक)

इत्यादिन्यायेन परतत्त्वप्रवेशोपायत्वाद् गुरुस्तस्य आगमो
वचनमित्यर्थः। सिद्धमिति

यतः शास्त्रक्रमात्तज्ज्ञगुरुप्रज्ञानुशीलनात्।

आत्मप्रत्ययितं ज्ञानं पूर्णत्वाद्भैरवायते ॥ (तं । ४ ।७७)

इत्याद्युक्तयुक्त्या पारिपूर्ण्येन लब्धसिद्धीति शिवम् ॥

प्राणापानसमाश्रयचारप्रविचारचातुरीनिष्ठः ।

षष्ठाह्निके वरिष्ठां विवृत्तिमिमां जयरथश्चक्रे ॥

इति श्रीमन्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तविरचिते
श्रीतन्त्रालोके श्रीजयरथविरचितविवेकाभिख्यव्याख्योपेते
कालतत्वप्रकाशनं नाम षष्ठमाह्निकं समाप्तम् ॥ ६ ॥

सप्तममाह्निकम्

विवेक

तत्तन्मन्त्राभ्युदयप्रगुणीकृतचण्डभैरवावेशः ।

विद्रावितभवमुद्रो द्रढयतु भद्राणि जयरुद्रः ॥

इदानीं कालतत्त्वानुषक्तमेव द्वितीयार्धेन चक्रोदयं वक्तुमुपक्रमते

अथ परमरहस्योऽयं चक्राणां भण्यतेऽभ्युदयः ॥ ७-१ ॥

चक्राणामिति मन्त्राद्यात्मनाम् ॥ १ ॥

ननु सर्वमन्त्रसामान्यभूताया भगवत्या मातृकायाः
समनन्तरमेवोदय उक्तः, तत्तद्विशेषरूपाणां मन्त्राद्यात्मनां
चक्राणामप्युदयाभिधाने किं निमित्तम् ? इत्याशङ्क्याह

इत्ययत्नजमाख्यात यत्नजं तु निगद्यते ।

नन्वेतन्निगदनेन कोऽर्थः इत्याशङ्क्याह

बीजपिण्डात्मकं सर्वं संविदः स्पन्दनात्मताम् ॥ ७-२ ॥

विदधत्परसंवित्तावुपाय इति वर्णितम् ।

सर्वमिदं बीजपिण्डात्मकं मन्त्रजातम् अर्थात्प्राणान्तरुदयत्
संविदः स्पन्दनात्मतां शाक्तस्वरूपावेशं विदधत्
परसंवित्तावुपायः पारम्पर्येण शाम्भवमपि रूपमाविशेत्

इत्याणवोपाये वर्णतत्त्वान्तर्वर्णितं तन्नास्यानर्थक्यमित्यर्थः॥ २
॥

नन्विह मन्त्राणां प्राणान्तरेवमुदयः, इत्यभिधातु प्रक्रान्तं, स
च यत्नजः, इति तत्र यत्ने क्रियमाणे तदेव सिद्धयेत् नान्यदिति
कथमत्रैव परसंविदुपायत्वमप्येषां स्यात्? इत्याशङ्क्याह

यथारघट्टचक्राग्रघटीयन्त्रौघवाहनम्॥ ७-३॥

एकानुसंधियत्नेन चित्रं यन्त्रोदयं भजेत्।

एकानुसंधानबलाज्जाते मन्त्रोदयेऽनिशम्॥ ७-४॥

तन्मन्त्रदेवता यत्नात्तादात्म्येन प्रसीदति।

इहारघट्टवाहकस्य यन्त्रमात्रवाहनक्रियाविषयत्वात्
एकेनैवानुसंधानेन अरघट्टचक्राग्रगतघटीसंबन्धिनो
यन्त्रस्यौघेन नैरन्तर्येण वाहनं यथा चित्रं यन्त्रोदयं भजेत
ऊर्ध्वाधोमुखरिक्तपूर्णघटीचक्रात्मना वैचित्र्येण निष्पत्तिमियात्
तथा साधकस्यानिशं मन्त्रोदयविषयेणैकेनैवानुसंधानेन न

केवलमेतदुदय एव सिध्येत् यावत्तन्नान्तरीयकतया प्रयत्नान्तरमन्तरेण एतन्मन्त्रदेवतापि तादात्म्येन प्रसीदतीति। इदमत्र तात्पर्यम् यथा हि यन्त्रं वाहयन् अरघट्टवाहकस्तत्र वैचित्र्यान्तरमपि प्रयत्नान्तरनिरपेक्षमासादयेत्, एवं साधकोऽपि मन्त्रोदय एव प्रयतमानः परसंविदैकात्म्यमिति। एवं चक्रोदयः परसंविदासादने निमित्तमित्यावश्याभिधेयः, इत्युक्तं स्यात्॥ ४॥

तदाह

खे रसैकाक्षि नित्योत्थे तदर्धं द्विकपिण्डके॥ ७-५॥

त्रिके सप्त सहस्राणि द्विशतीत्युदयो मतः।

चतुष्के तु सहस्राणि पञ्च चैव चतुःशती॥ ७-६॥

पञ्चार्णेऽब्धिसहस्राणि त्रिशती विंशतिस्तथा।

षट्के सहस्रत्रितयं षट्शती चोदयो भवेत्॥ ७-७॥

सप्तके त्रिसहस्रं तु षडशीत्यधिकं स्मृतम्।

शतैस्तु सप्तविंशत्या वर्णाष्टकविकल्पिते ॥ ७-८ ॥

चतुर्विंशतिशत्या तु नवार्णेषूदयो भवेत्।

अधिषष्ठ्येकविंशत्या शतानां दशवर्णके ॥ ७-९ ॥

एकान्नविंशतिशतं चतुःषष्ठिः शिवार्णके।

अष्टादश शतानि स्युरुदयो द्वादशार्णके ॥ ७-१० ॥

त्रयोदशार्णे द्वाषष्ठ्या शतानि किल षोडश।

त्रिचत्वारिंशता पञ्चदशेति भुवनार्णके ॥ ७-११ ॥

चतुर्दशशती खाब्धिः स्यात्पञ्चदशवर्णके।

त्रयोदशशती सार्धा षोडशार्णे तु कथ्यते ॥ ७-१२ ॥

शतद्वादशिका सप्तदशार्णे सैकसप्ततिः।

अष्टादशार्णे विज्ञेया शतद्वादशिका बुधैः ॥ ७-१३ ॥

चतुर्विंशतिसंख्याके चक्रे नवशती भवेत्।

सप्तविंशतिसंख्याते तूदयोऽष्टशतात्मकः ॥ ७-१४ ॥

द्वात्रिंशके महाचक्रे षट्शती पञ्चसप्ततिः।

द्विचतुर्विंशके चक्रे सार्धां शतचतुष्टयीम्॥ ७-१५ ॥

उदयं पिण्डयोगज्ञः पिण्डमन्त्रेषु लक्षयेत्।

चतुष्पञ्चाशके चक्रे शतानां तु चतुष्टयम्॥ ७-१६ ॥

सप्तत्रिंशत्सहार्धेन त्रिशत्यष्टाष्टके भवेत्।

अर्धमर्धत्रिभागश्च षट्षष्टिर्द्विशती भवेत्॥ ७-१७ ॥

एकाशीतिपदे चक्रे उदयः प्राणचारगः।

चक्रे तु षण्णवत्याख्ये सपादा द्विशती भवेत्॥ ७-१८ ॥

अष्टोत्तरशते चक्रे द्विशतस्तूदयो भवेत्।

खे इति द्वे शून्ये, रसाः षट्, अक्षीति द्वयं, नित्योत्थ इति स्वरसत एव हि सततं प्रवहतः प्राणस्य सषट्शतसहस्रैकविंशत्या (तिः) चाराणां भवेदिति भावः। एवमेकपिण्डात्मनो मन्त्रस्य प्रतिप्राणचारं तदानुगुण्यात् तत्संख्याक एवोदयः तेन प्रतिप्राणचारमेकैकस्य पिण्डस्य वर्णस्य वोदयात् द्व्यादिपिण्डवर्णात्मनां मन्त्राणां नित्योदितप्राणाचारार्धत्रिभागक्रमेण न्यूनसंख्याक उदयः, इत्याह तदर्धं द्विकपिण्डके इति। तस्याः सषट्शतायाः सहस्रैकविंशतेरर्धं साष्टशतं सहस्रदशकम्। अत्र हि स्वारसिकप्राणचारद्वयकालस्यैकप्राणचारतयोदयस्य चिकीर्षितत्वं जपः प्राणसमः कार्यः इति हि सर्वत्राविशेषेणोद्घोष्यते, अत एवेह यत्नजत्वमुक्तम्। सप्त सहस्राणि द्विशतीति, स्वारसिकप्राणचारत्रयकालस्यैकप्राणचारतयोदयस्य कर्तुमभिप्रेतत्वात्। एवमुत्तरत्रापि अवसेयम्। अब्धीति चत्वारः। षडशीत्यधिकमिति भूम्ना, एवं हि चारद्वयमधिकं भवेत्, तेनात्र

प्रतिचारं किंचिदंशन्यूनता कार्या येन गणनासाम्यं स्यात्। न
चैतदस्माभिः स्वोत्प्रेक्षितमुक्तमिति साक्षादागम एव पठितः।
अस्माभिरप्यत्र गणना विभज्य न दर्शिता
ग्रन्थविस्तरभयादनुपयोगाच्च। अधिकषष्टिरेकविंशतिशती तया
दशवर्णग इत्युदयः। शिवाः रुद्रा एकादश, चतुःषष्टिरिति
भूम्ना, एवं हि चारचतुष्टयमधिकं भवेत्। द्वाषष्ट्येति भूम्ना,
षण्णां प्राणचाराणामतिरेकात्। त्रिचत्वारिंशतेति भूम्ना,
चारद्वयाधिक्यात्। पञ्चदशेति शतानि। भुवनेति चतुर्दश।
खाब्धिरिति चत्वारिंशत्। सैकसप्ततिरिति भूम्ना चारसप्तकातिरेकात्।
न चात्र संख्यायाः कश्चित्क्रमो विवक्षितः, इत्येकोनविंशादीनां
चक्राणामन्तरानुपदेशे न कश्चिद्दोषो, यावता हि अत्र
प्रतिप्राणचारमेकैकस्य चक्रस्योदये यत्नः कार्यः, इत्यभिधित्सितं
तच्चैवमपि सिद्ध्येदिति। द्विचतुर्विंशके इत्यष्टाचत्वारिंशदात्मक
इत्यर्थः। अष्टाष्टके इति चतुःषष्ट्यात्मके। सहार्धेनेति
येनावशिष्टा द्वात्रिंशत्प्राणचारा भवन्ति। अर्धमिति अर्धत्रिभाग
इति, येन सार्धाश्चत्वारिंशत्प्राणचारा भवेयुः सार्धास्त्रयोदश
चेत्युभयथा चतुःपञ्चाशदिति गणनासाम्यं स्यात्। तदुक्तं
श्रीयोगिनीकौले

ङित्योदिते सहस्राणि एकविंशच्छतानि षट्।

द्विके दश सहस्राणि तथाष्टौ च शतानि तु ॥

त्रिके सप्त सहस्राणि द्विशतीत्युदयः स्मृतः ।

चतुष्के तु सहस्राणि पञ्च तुर्यशतानि तु ॥

पञ्चाक्षरे सहस्राणि चत्वारि त्रिशतोदयः ।

विंशाधिकः समाख्यातो ज्ञेयश्चोदयवाहिभिः ॥

षट्के तु त्रिसहस्राख्यः षट् शतान्तोदयः स्मृतः ।

सप्तके त्रिसहस्रं तु षडशीत्यधिकं स्मृतम् ॥

इत्यादि ।

अष्टोत्तरशते चक्रे मन्त्रपिण्डाक्षरात्मके ।

द्विशतात्मा पुनः प्रोक्त उदयः सर्वसिद्धिदः ॥

इत्यन्तम् ॥ ५-१८ ॥

न चैतावतैव विरन्तव्यमित्याह

क्रमेणेत्थमिदं चक्रं षट्कृत्वो द्विगुणं यदा ॥ ७-१९ ॥

ततोऽपि द्विगुणेऽष्टांशस्यार्धमध्यर्धमेककम् ।

ततोऽपि सूक्ष्मकुशलैरर्धार्धादिप्रकल्पने ॥ ७-२० ॥

भागषोडशकस्थित्या सूक्ष्मश्चारोऽभिलक्ष्यते ।

इत्थं वक्ष्यमाणेन प्रकारेणेदमष्टोत्तरशतात्मकं चक्रं
क्रमेण षट्कृत्वो द्विगुणं प्रथमं षोडशाधिकशतद्वयात्मकं
यावदन्ते सद्वादशशतनवकाधिकषट्सहस्रात्मकं यदा भवेत् तदा
तस्मिन्नपि द्विगुणे सचतुर्विंशतिशताष्टकाधिकसहस्रत्रयोदशात्मके
चक्रेऽध्यर्धमत्रेति कृत्वा सार्धमेककं प्राणस्य
चरणमष्टांशस्यार्धं षोडशो भागश्चोदयो भवेदित्यर्थः ।
तदनन्तरमपि भागषोडशकस्थित्यार्धार्धादिकल्पने कृते सति

शूक्ष्मकुशलैः परधाराधिरूढैर्योगिभिः शूक्ष्मोअतिपरिमितः प्राणीयश्चारांशोभिलक्ष्यते ज्ञायते इत्यर्थः। इदमत्र तात्पर्यम् एवंकलनायां हि प्राणचारीयः षोडशो भागः सषट्शतपञ्चचत्वारिंशत्सहस्राधिकलक्षत्रयात्मनश्चक्रस्योदयः स्यात तस्याप्यर्धकल्पने सशतद्वयैकनवतिसहस्राधिकलक्षषट्कात्मनश्चक्रस्य द्वात्रिंशो भागः तस्याप्येवं कल्पने सचतुःशतद्व्यशीतिसहस्राधिकत्रयोदशलक्षात्मनश्चक्रस्य चतुःषष्टितमो भागः, इत्यन्तमेव परिमितः प्राणचारीयो भागो योगिनामभिलक्ष्यो भवतीति ॥१९-२० ॥

नन्वेवमभिलक्षणेन योगिनां किं स्यात्? इत्याशङ्क्याह

एवं प्रयत्नसंरुद्धप्राणचारस्य योगिनः ॥ ७-२१ ॥

क्रमेण प्राणचारस्य ग्रास एवोपजायते।

ग्रास इति विरुद्धतया पुनरनुदयात्॥

अतोऽप्यस्य किं स्यात्? इत्याशङ्क्याह

प्राणग्रासक्रमावाप्तकालसङ्कर्षणस्थितिः ॥ ७-२२ ॥

संविदेकैव पूर्णा स्याज्ज्ञानभेदव्यपोहनात् ।

ज्ञानभेदापोहनमेवोपपादयति

तथा हि प्राणचारस्य नवस्यानुदये सति ॥ ७-२३ ॥

न कालभेदजनितो ज्ञानभेदः प्रकल्पते ।

कालस्य हि साक्षात् प्राणोऽधिष्ठानमिति प्राणस्यानुदये कालोऽपि
नोदियात्, इति तस्याभावात् तज्जनितोऽपि ज्ञानस्य भेदो न भवेत्, इति
युक्तमुक्तम्, एकैव पूर्णा संवित्स्यात इति ॥ २३ ॥

ननु प्राणग्रासक्रमेण कालस्यापि ग्रासो वृत्तः, इति
तदाहितश्चेत्संविदि भेदो नास्ति तज्ज्ञेयाहितो भविष्यति येनेदं
नीलज्ञानमिदं पीतज्ञानमिति विभागः, इत्येतावतैव
कथमेकत्वमस्याः सिद्ध्येत् ? इत्याशङ्क्याह

संवेद्यभेदान्न ज्ञानं भिन्नं शिखरिवृत्तवत्॥ ७-२४॥

नहि एकान्ततः संवेद्यभेदः संविदं भिन्द्यात्। एवं हि
तत्तद्गृहाणां नामादिवेद्यभेदेऽपि कथमेकमेव नगरादिज्ञानं
स्यादित्युक्तं शिखरिवृत्तवत इति। उन्नतप्रदेशावस्थितस्य हि
पुंसस्तत्तदाभासमय एक एव प्रकाशो भवेदिति भावः। यदाहुः

तस्मात्सत्यपि बाह्येऽर्थे धीरेकानेकवेदनात्।

अनेकसदृशाकारा नानेकेव प्रसज्यते॥

इति। तस्मादस्य काल एव भेदकः, स चातिसूक्ष्मक्षणात्माभिमतो येन
ज्ञानस्योत्पादानन्तरं निरोधो भवेत्॥ २४॥

तदाह

कालस्तु भेदकस्तस्य स तु सूक्ष्मः क्षणो मतः।

तुशब्दो हेतौ। स इति कालः॥

ननु चास्य सौक्ष्म्ये कोऽवधिः ? इत्याशङ्क्याह

सौक्ष्म्यस्य चावधिर्ज्ञानं यावत्तिष्ठति स क्षणः ॥ ७-२५ ॥

तेन नियतोभयान्तपरिच्छिन्ना ज्ञानीयैव सत्तास्य सत्तेत्यर्थः ॥ २५ ॥

नन्वस्य परोपाधिकः कस्मादेवं निर्देशः ? इत्याशङ्क्याह

अन्यथा न स निर्वक्तुं निपुणैरपि पार्यते ।

अन्यथेति अभेद्यो निरंशः काललवक्षणः इत्यादिना
साक्षाल्लक्षणेनेत्यर्थः। एवं हि उत्पादानन्तरं निरोध
इत्येवमुच्यमाने तस्याद्यन्तौ कथितौ स्यातां तत्सद्भावे च
मध्यमप्यवश्यसंभाव्यम्
इत्यस्यादिमध्यावसानैस्त्र्यंशत्वमापतेदिति निरंशत्वेऽभिधित्सिते
सांशत्वमभिहितं स्यात्। यदाहुः

यथान्तोऽस्ति क्षणस्यैवमादिर्मध्यं च चिन्त्यताम्।

आत्मकत्वात्क्षणस्यैवं न लोकस्य क्षणे स्थितिः ॥

इति। इत्थम्

आदिमध्यावसानानि चिन्त्यानि क्षणवत्पुनः।

इत्याद्युक्तयुक्त्यादिमध्यान्तरूपाणां तदंशानामप्येवंविचारे क्रियमाणे स एव पर्यनुयोगः, इत्यनवस्थानात् न किंचित्सिद्ध्येत् इत्यतिनिपुणैरपि तस्य लक्षणं कर्तुं न शक्यं, कृतं वा न प्ररोहमियात्॥

ननु यद्येवं तज्ज्ञानस्यापि कोऽवधिर्येनैतन्निरूपितं भवेत्? इत्याशङ्क्याह

ज्ञानं कियद्भवेत्तावत्तदभावो न भासते॥ ७-२६॥

कियदिति, क्षणिकत्वेऽपि किंपरिमाणमित्यर्थः। तदभावः इति ज्ञानाभावः, तेन यावत्तदभावो न वृत्तस्तावदेकमेव तज्ज्ञानं भवेदिति भावः। अभावश्च प्रत्यक्षग्राह्यः कार्यश्चेति अन्यत्रोपपादितमिति तत एवावधार्यम्॥ २६॥

ननु यद्येवं तत्तदभावोऽपि कदा जायते येन ज्ञानस्याप्यवधिः ?
इत्याशङ्क्याह

तदभावश्च नो तावद्यावत्तत्राक्षवर्त्मनि ।

अर्थे वात्मप्रदेशे वा न संयोगविभागिता ॥ ७-२७ ॥

ज्ञानस्य च तावदभावो न जायते यावदिन्द्रियाणामर्थस्य प्रमातुर्वा
संयोगविभागौ न स्यातां, तदविरतेन्द्रियव्यापारस्य
प्रमातुर्नीलादिविषये ज्ञाने जायमाने यदा नीलादिना विभाग
उत्पद्यते, पीतादिना वा संयोगस्तदा तदभाव इति । ननु प्रदीपादिवत्
प्रतिक्षणं करणोपयोगात् ज्ञानस्य क्षणिकत्वे सर्वेषां
तावदविवादोऽन्यथा विततकरणव्यापारस्यापि प्रमातुर्नीलादिज्ञानं
न स्यात्, तत्किमेतदुक्तं यदिन्द्रियाणां यावन्न
संयोगविभागोदयस्तावदेकमेव ज्ञानमिति एवं हि धारावाहिनां
विज्ञानानामभावोऽभिहितो भवेत् । सत्यं, किन्तु भवदभिरुचितं
निरन्वयविनाशात्म क्षणिकत्वं ज्ञानस्य न स्यात् इत्यभिदध्मः ।
अनन्तरं हि त्रिचतुरादिक्षणावस्थायि ज्ञानं भवेदिति समनन्तरं
क्षणनिर्णयेनैवोपपादितम् । तस्मादेकरसेऽपि नीलादिविषये
विज्ञानेऽन्तरा चक्षुरादीन्द्रियविभागादिना तदभावादि स्थितमेव

किंतु न तथा सञ्चेत्यते तेन धारावाहिनां विज्ञानानामप्यभावो न स्यादिति न कश्चिद्विरोधः ॥ २७ ॥

ननु संयोगविभागितापि किं सकारणिका भवेत् न वा ?
इत्याशङ्क्याह

सा चेदुदयते स्पन्दमयी तत्प्राणगा ध्रुवम् ।

भवेदेव ततः प्राणस्पन्दाभावे न सा भवेत् ॥ ७-२८ ॥

स्पन्दमयीति, स्पन्दः प्रकृतिर्मूलकारणं यस्याः सा स्पन्दाधीनैव इत्यर्थः। देशाद्देशान्तरं हि चलद्वस्तु वस्त्वन्तरेण संयुज्यते वियुज्यते वेत्यभिप्रायः। स्पन्दश्च प्राणाश्रयः, इति पारम्पर्येण संयोगविभागितापि प्राणगतैव निश्चितं भवेत्, इति प्राणस्पन्दाभावे सा न भवेत निमित्ताभावे नैमित्तिकस्याप्यभावः इतिनीत्या तद्भावोऽपि कुतस्त्य इत्यर्थः ॥ २८ ॥

ननु भवतु नाम संयोगविभागिता मा वा भूत् किमनया नश्चिन्तया, यावता ह्यत्र प्राणग्रासक्रमेण कालग्रासे वृत्ते एकैव पूर्णा संवित्स्यादित्युपक्रान्तं तदेव कथं निर्वहेत् इत्युच्यताम् ?

इत्याशङ्क्याह

तदभावान्न विज्ञानाभावः सैवं तु सैव धीः।

तस्याः संयोगविभागिताया अभावाद्विज्ञानस्याप्यभावो न स्यात्, यद्धि यदन्वयव्यतिरेकानुविधायि तत्तत्कार्यं भवेदिति भावः। एवं हि सति सा प्राच्या या धीः संवित्सैवेयं नतु संविदन्तरमेकैव पूर्णा संवित्स्यादित्यर्थः॥

नन्वेवमेकस्या एव संविदः किं पूर्वापरैकीकाराद्वैतत्येनावभासो भवेत्? इत्याशङ्क्याह

न चासौ वस्तुतो दीर्घा कालभेदव्यपोहनात्॥ ७-२९॥

असाविति धीः, दीर्घेत्यर्थान्न सूक्ष्मापि, दैर्घ्यादि हि कालाधीनं, न चास्यास्तत्स्पर्श एवास्ति अकालकलितत्वात्॥ २९॥

तदाह

वस्तुतो ह्यत एवेयं कालं संविन्न संस्पृशेत्।

एवं वस्तुतो नित्यत्वमप्यस्या न संभवेत्, तद्धि

कालत्रयानुगामित्वमुच्यते नतु सदाभासमानत्वम्, एवं हि त्रिषु कालेषु

भासमानत्वमुक्तं स्यात्। यदाहुः

ङ सदा न तदा न चैकदेत्यपि सा यत्र न कालधीर्भवेत्।

तदिदं भवदीयदर्शनं न च नित्यं न च कथ्यतेऽन्यथा॥

(उ। स्तो। १२।५)

ननु यद्येवमकालकलिता वस्तुत एकैव संविदस्ति तत्कथमयं

बहिर्भेदनिष्ठो व्यवहारः सिद्ध्येत्? इत्याशङ्क्याह

अत एकैव संवित्तिर्नानारूपे तथा तथा॥ ७-३० ॥

विन्दाना निर्विकल्पापि विकल्पो भावगोचरे।

अतः कालसंस्पर्शाभावात् एकैव निर्विकल्पापि

संवित्तिर्नानारूपेऽनेकाभाससंमूर्छनात्मनि भावविषये तथा

तथा नीलानीलादिरूपतया विन्दाना विमृशन्ती विकल्प इत्युच्यते, इति न

बाह्यस्यापि व्यवहारस्य विप्रलोपः॥ ३० ॥

ननु तथा तथा विमर्शोऽप्यस्याः कथमेकत्वमेव ? इत्याशंक्याह

स्पन्दान्तरं न यावत्तदुदितं तावदेव सः ॥ ७-३१ ॥

तावानेको विकल्पः स्याद्विविधं वस्तु कल्पयन् ।

तत्तस्मात्पूर्वोक्तात्तत्तदर्थादिसंयोगविभागोत्पादलक्षणात्
हेतोर्यावद्विकल्प्यवस्त्वन्तरविषयं स्पन्दान्तरं नोदितं
तावन्नानाप्रकारं वस्तु कल्पयन्नपि तावान्दीर्घदीर्घ एक एव
विकल्पः स्यात् न पुनरनेक इत्यर्थः ।
यत्तदनेकाभाससंमूर्छनात्मतया विकल्प्यमानेऽपि नीलादौ
विकल्पस्यैक्यमेव तावत् एकस्यैवानुसंधानस्य भावात् अन्यथा पुनरस्य
स्वरूपलाभ एव न भवेदिति भावः ॥ ३१ ॥

तदाह

ये त्वित्थं च विदुस्तेषां विकल्पो नोपपद्यते ॥ ७-३२ ॥

स ह्येको न भवेत्कश्चित् त्रिजगत्यपि जातुचित् ।

ये इति बौद्धाः। इत्थमिति स्पन्दान्तरोदय एव विकल्पान्तराणामुदयो नत्वेकस्मिन्नेव स्पन्दे इत्यर्थः। एक इति, येन स्मृत्यपलापाद्यनेकाश्रयनिबन्धनो बाह्यो व्यवहारः सिद्ध्येत्। एतदेव दर्शयति   शब्दारूषणया ज्ञानं विकल्पः किल कथ्यते ॥ ३३ ॥

सा च स्यात्क्रमिकैवेत्थं किं कथं को विकल्पयेत्।

घट इत्यपि नेयान्स्याद्विकल्पः का कथा स्थितौ ॥ ७-३४ ॥

न विकल्पश्च कोऽप्यस्ति यो मात्रामात्रनिष्ठितः।

कथ्यते इति भवद्भिः। यदुक्तं अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना इति। सेति शब्दारूषणा, क्रमिकेति वाचः क्रमभावित्वात् इत्थं क्रमिकत्वाद्विकल्पस्योदितानां तत्क्षणानां प्रध्वस्तत्वान्नवानां चानुदयात् को न कश्चित्कल्पितोऽपि विकल्पात्मा प्रमाता किमुत्पन्न प्रध्वस्तप्रकल्प्यं पूर्वापरानुसंधानादेरभावाच्च कथं विकल्पयेत् विकल्पस्य स्वरूपलाभ एव न भवेदित्यर्थः। अत एव घकारोच्चारकाले टकारस्याभावात्तदुच्चारकाले च तस्य प्रध्वस्तत्वात् यत्र घट

इत्येतावन्मात्रोऽपि विकल्पो न सिध्येत्‌ तत्र व्यवहारादिचिन्ता दूर एवास्तां, तदवस्थानमात्रेऽपि का वार्तेत्यर्थः। नहि तन्मते कोऽप्येवंविधो विकल्पोऽस्ति यस्यांशमात्रेऽपि परिनिष्ठितत्वं, तथात्वे ह्येषां क्षणभङ्गव्रतविलोपो भवेदिति भावः॥ ३३-३४॥

नन्वेकमेव मालासूत्रवत्सर्वत्रानुयायि ज्ञानं किंचिन्नास्ति, इत्यस्माकं मतं नतु क्षणभङ्गुराण्यनेकानि ज्ञानानि न सन्तीति तत्तान्येव समुदितानि बाह्यव्यवहारनैपुण्यभाञ्जि भविष्यन्ति, इति को दोषः? इत्याशङ्क्याह

न च ज्ञानसमूहोऽस्ति तेषामयुगपत्स्थितेः॥ ७-३५॥

अयुगपत्स्थितेरिति, उत्पादानन्तरं तन्निरोधस्याभिधानात्‌॥ ३५॥

तस्माद्वैकल्पिकः सकल एवायं व्यवहारस्तन्मते न सिद्धयेत्‌, इत्याह

तेनास्तङ्गत एवैष व्यवहारो विकल्पजः।

तेनास्मत्पक्ष एव ज्यायानित्याह

तस्मात्स्पन्दान्तरं यावन्नोदियात्तावदेककम् ॥ ७-३६ ॥

विज्ञानं तद्विकल्पात्मधर्मकोटीरपि स्पृशेत् ।

तद्यावद्विकल्पान्तरनिष्ठं स्पन्दान्तरं नोदेति तावद्
गोत्वशुक्लत्वचलत्वाद्यात्मकं धर्मौघमपि विकल्पयेत्
एकमेवैतद्वैकल्पिकं ज्ञानं स्यात् येनैकानुसंध्यनुप्राणितः समग्र
एवायं व्यवहारः सिध्येत् ॥ ३६ ॥

न चैतदपूर्वतया स्वोपज्ञमेवोक्तमित्याह

एकाशीतिपदोदारशक्त्यामर्शात्मकस्ततः ॥ ७-३७ ॥

विकल्पः शिवतादायी पूर्वमेव निरूपितः ।

तत
उक्तानेकधर्मपरामर्शकत्वेऽप्येकत्वलक्षणाद्धेतोर्व्योमव्यापिरूपः
शुद्धविद्यात्मा विकल्पस्तत्तदनेकहृदादिशक्त्यामर्शकत्वेऽप्येकत्वात्
पार्यन्तिकफलरूपां शिवतामेव ददातीति पूर्वमेवास्माभिरुक्तम् ॥ ३७
॥

नन्वेवमेकस्मिन्नेव प्राणचारे एकपिण्डात्मकाच्चक्रादारभ्य सचतुःशतद्व्यशीतिसहस्राधिकत्रयोदशलक्षात्मकचक्राद्यन्तं यावच्चक्राणां स्वारसिक एवोदयो वर्तते, इति योगिनां प्रतिनियतचक्रविषयः कथमवगमो भवेत्? इत्याशङ्कां दृष्टान्तोपदर्शनेनोपशमयति यथा

कर्णौ नर्तयामीत्येवं यत्नात्तथा भवेत्॥ ७-३८ ॥

चक्रचारगताद्यत्नात्तद्वत्तच्चक्रगैव धीः।

कर्णौ नर्तयामीत्येवमिच्छापूर्वकात्प्राणीयाद्यत्नात् यद्वद्योगिनस्तथा भवेत्, गोस्फुरितादिन्यायेन कर्णद्वयमेव नृत्यत्स्यात् तद्वदेकपिण्डादिचक्रप्रधानो यः प्राणीयश्चारस्तद्गतादपि यत्नात्तच्चक्रगैव धीः प्रारिप्सितोदयप्रतिनियतचक्रनिष्ठ एवावबोधो भवेदित्यर्थः। अयमत्र भावः इह खलु योगिना यत्र क्वापि कर्मणि यस्य कस्यचिन्मन्त्रस्यावश्यं प्राणसाम्येनोच्चारः कार्यः अन्यथा हि न कार्यसिद्धिः स्यात्। तदुक्तम्

जपेत्तु प्राणसाम्येन ततः सिद्धिर्भवेद् ध्रुवम्।

नान्यथा सिद्धिमाप्नोति हास्यमाप्नोति सुन्दरि ॥

इति । ततश्चैकपिण्डात्मनोऽन्यस्य वा चक्रस्योदये तुल्य एव विधिः प्राणसाम्यस्य सर्वत्राविशेषात् ॥ ३८ ॥

तदाह

जपहोमार्चनादीनां प्राणसाम्यमतो विधिः ॥ ७-३९ ॥

होमेति, तत्रापि मन्त्रोच्चारस्य भावात् । अत इत्युक्ताच्चक्रोदयाद्धेतेः, संख्यायास्तु स्वारसिकप्राणचाराभिप्रायेण वर्णभूयस्त्वाभूयस्त्वनिबन्धनं तथात्वमिति न कश्चिद्विरोधः ॥ ३९ ॥

किमत्र प्रमाणम् ? इत्याशङ्क्याह

सिद्धामते कुण्डलिनीशक्तिः प्राणसमोन्मना ।

उक्तं च योगिनीकौले तदेतत्परमेशिना ॥ ७-४० ॥

तदेतत्परमेशिना श्रीसिद्धयोगीश्वरीमते श्रीयोगिनीकौले चोक्तमिति संबन्धः। तत्तदेकपिण्डाद्यात्मकमन्त्ररूपतया बहिरुल्लसन्ती वर्णकुण्डलिन्याख्या पारमेश्वरी शक्तिर्यदि नाम प्राणसमा प्राणसाम्येनोदयमियात् तदुन्मना शिवैकात्म्येन प्रस्फुरेदित्यर्थः। यदुक्तं तत्र

कुर्यात्प्राणसमं जप्यं होमं प्राणसमं कुरु।

एवं प्राणसमा शक्तिः कुण्डलाख्या मनोन्मनी॥

इति॥ ४०॥

श्रीयोगिनीकौलग्रन्थं पठति

पदमन्त्राक्षरे चक्रे विभागं शक्तितत्त्वगम्।

पदेषु कृत्वा मन्त्रज्ञो जपादौ फलभाग्भवेत्॥ ७-४१॥

पदप्रधानानि मन्त्राक्षराणि यत्रैवंविधे चक्रे पदेषु

शक्तितत्त्वगं विभागं कृत्वा एकैकं पदं प्रतिप्राणचारं प्रविभागेनोदयं कारयित्वा जपहोमादौ मन्त्रोदयं जानानो योगी फलभाग्भवेत्, यथोचितं फलमाप्नुयादित्यर्थः ॥ ४१ ॥

ननु कोऽसौ विभागः किं वा फलम् ? इत्याशङ्क्याह

द्वित्रिसप्ताष्टसंख्यातं लोपयेच्छतिकोदयम् ।

इह चक्राणां प्रागुक्तवदेकद्वित्रिसप्ताष्टादिपदपिण्डसंख्यातम्, अर्थात् शतिकोदयमनेकपदपिण्डात्मकचक्रपर्यन्तं विभागमाश्रित्य, अर्थात् प्राणचारं लोपयेत् प्राणग्रासं कुर्यादित्यर्थः । एतदेव हि मुख्यं फलं योगिनां यदकालकलितायां परस्यां संविद्यनुप्रवेश इति । एवं चात्रैवावधातव्यमित्याह

इति शक्तिस्थिता मन्त्रा विद्या वा चक्रनायकाः ॥ ७-४२ ॥

पदपिण्डस्वरूपेण ज्ञात्वा योज्याः सदा प्रिये ।

नित्योदये महातत्त्वे उदयस्थे सदाशिवे ॥ ७-४३ ॥

अयुक्ताः शक्तिमार्गे तु न जप्ताश्चोदयेन ये।

ते न सिद्धयन्ति यत्नेन जप्ताः कोटिशतैरपि॥ ७-४४॥

इति प्रागुक्तं सर्वं ज्ञात्वा चक्रप्रधाना मन्त्रा विद्या वा पदपिण्डस्वरूपेण समनन्तरोक्तपदपिण्डादिगत्या शक्तिस्थिताः प्राणसाम्येनोदिताः सर्वकालं जपादौ योज्या येन यथोचिता योगिनां सिद्धिः स्यात्। अन्यथा हि नित्योदयेऽत एव परमुपेयत्वान्महातत्त्वे, सृष्टिप्राधान्यादुदयस्थेऽत एव तत्सिद्धिप्रदायित्वात् सदैव श्रेयोरूपे शक्तिरूपे मध्यधाम्न्ययोजिताः, तथा प्राणस्योदयेन निर्गमने अर्थात्प्रवेशेनापि ये मन्त्रादयो न जप्तास्ते कोटिशतैर्यत्नेनापि जप्ता न सिद्धयन्ति, तां पूर्णां दातुं न शक्ता इत्यर्थः। यदुक्तम्

ङ विन्दति यदा मन्त्री सृष्टिसंहारवर्त्मनी।

उदयास्तमरूपेण मन्त्रा अल्पफलप्रदाः॥

भोगं मोक्षं न यच्छन्ति जप्ता ध्यातास्तु पूजिताः।

रिषत्फलं प्रयच्छन्ति शिवाज्ञासंप्रचोदिताः॥

इति। मन्त्रा विद्या वेत्यनेनानुजोद्देशोद्दिष्टो
मन्त्रविद्याभेदोऽप्यासूत्रितः॥ ४४॥

ननु सर्वेषां मन्त्रादीनामविशेषेणैव किमियं व्यवस्था किमन्यथा
वा ? इत्याशङ्क्याह

मालामन्त्रेषु सर्वेषु मानसो जप उच्यते।

उपांशुर्वा शक्त्युदयं तेषां न परिकल्पयेत्॥ ७-४५॥

सर्वेष्विति विद्यास्वपि, मानस इति। तदुक्तम्

आत्मा न शृणुते यं स मानसो जप उच्यते।

आत्मना शृणुते यस्तु तमुपांशं विजानते॥

परे शृण्वन्ति यं देवि सशब्दः स उदाहृतः। (स्वटं। २।१४७)

इति। वेति विकल्पे। सशब्दस्यार्थसिद्धो निषेधः॥

ननु समनन्तरमेवोक्तं यच्छक्तिवर्त्मन्ययोजिता मन्त्रा न सिद्ध्यन्तीति

तत्कथमिदमुच्यते शक्त्युदयं तेषां न परिकल्पयेत ?

इत्याशङ्क्याह

पदमन्त्रेषु सर्वेषु यावत्तत्पदशक्तिगम्।

शक्यते सततं युक्तैस्तावज्जप्यं तु साधकैः॥ ७-४६॥

तावती तेषु वै संख्या पदेषु पदसंज्ञिता।

तावन्तमुदयं कृत्वा त्रिपदोत्त्यादितः क्रमात्॥ ७-४७॥

द्वादशाख्ये द्वादशिते चक्रे सार्धं शतं भवेत्।

उदयस्तद्धि सचतुश्चत्वारिंशच्छतं भवेत्॥ ७-४८॥

षोडशाख्ये द्वादशिते द्वानवत्यधिके शते।

चारार्धेन समं प्रोक्तं शतं द्वादशकाधिकम्॥ ७-४९॥

षोडशाख्ये षोडशिते भवेच्चतुरशीतिगः।

उदयो द्विशतं तद्धि षट्पञ्चाशत्समुत्तरम्॥ ७-५० ॥

चाराष्टभागांस्त्रीनत्र कथयन्त्यधिकान्बुधाः।

अष्टाष्टके द्वादशिते पादार्धं विंशतिं वसून्॥ ७-५१ ॥

उदयः सप्तशतिका साष्टा षष्टिर्यतो हि सः।

पदप्रधानेषु सर्वेषु विद्यादिरूपेषु मन्त्रेषु पदानां
प्राणाशक्तेश्च साम्यं गतं तज्जपादि अभियुक्तैः
साधकैर्यावत्कर्तुं शक्यते तावदेव सर्वकालं जपनीयं, येन तेषु
पदेषु त्रिपदोत्तयादिकं क्रममवलम्ब्य त्रिषु बहुत्वं परिसमाप्यते
इत्यादिनीत्या क्रमेणैकैकं पदं बहुपदतया विभज्य समस्तस्य परस्य
प्राणचारसाम्येन सकृदुच्चारयितुमशक्यत्वात् तावन्तं
पदांशपरीमाणं प्राणशक्तावुदयं कृत्वा तावती
पदांशपरिमाणैव पदसंज्ञिता जपस्य संख्या स्यादिति। अयमत्र
भावः न केवलमनेकपदस्य मन्त्रस्य प्राणशक्तौ

सकृदुच्चारियतुमशक्यत्वं यावद् बह्वर्णतया तत्पदस्यापीति
तस्याप्यंशांशिकया विभागः कार्यो येन शनैः शनैरेकमेकं
तदंशे प्राणसाम्येनोच्चारयतां योगिनां लक्षजपादि सिद्धयेदिति।
तदुक्तं तत्र

पदमन्त्राक्षरे चक्रे विभागं शक्तितत्त्वगम्।

पदेषु कृत्वा मन्त्रज्ञो जपं नित्यं तु कारयेत्॥

द्वित्रिसप्ताष्टसंख्यातं लोपयेच्छतिकोदयम्।

इति शक्तिस्थिता मन्त्रा विद्या वा चक्रनायकाः॥

पदपिण्डस्वरूपेण ज्ञात्वा योज्याः सदा प्रिये।

नित्योदये महातत्त्वे उदयस्थे सदाशिवे॥

अयुक्तः शक्तिमार्गे तु अजप्ताश्चोदयेन तु।

नैव सिद्धयन्ति यत्नेन॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ । ॥

इति। तथा

मालामन्त्रेषु सर्वेषु मानसो जप उच्यते।

शक्त्योदयं तु वै तेषु न कदाचित्प्रकल्पयेत्॥

यतस्तेषां वरारोहे मानसस्तु जपः स्मृतः।

क्वचिच्चैव उपांशुः स्याज्जपः शास्त्रेषु कीर्तितः॥

महामन्त्रेषु सर्वेषु यावत्तत्पदशक्तिगम्।

शक्यते सततं युक्तैः प्रजप्तुं साधकोत्तमैः॥

तावती तेषु वै संख्या पदेषु पदसंज्ञिता।

तावन्तमुदयं कृत्वा त्रिपदोत्त्यादितः क्रमात्॥

इति। अतश्च सामस्त्येन मालामन्त्रादीनां प्राणशक्तावुदयं कर्तुं

न शक्यते इत्युक्तमेषां शक्त्युदयं न परिकल्पयेदिति। न तु सर्वसर्विकया, तथात्वे हि जपस्याल्पफलप्रदत्वादधमत्वं स्यात्। यदुक्तम्

अधमस्तु जपः प्रोक्तः प्राणसंख्याविवर्जितः।

इति। पदविभागमेव दर्शयति द्वादशेत्यादिना। द्वादशाख्ये द्वादशपदात्मके मालामन्त्राद्यात्मनि चक्रे द्वादशिते सञ्जातद्वादशसंख्याके प्रत्येकं पदद्वादशकस्य द्वादशधा विभागे कृते सति द्वादशानां चतुश्चत्वारिंशदधिकं शतं भवेत् येन तस्यापि प्रत्येकं सार्धं शतं प्राणचाराणामुदयः, इति सषट्शता सहस्रैकविंशतिः प्राणचारणां स्यात्। तथा षोडशपदात्मके चक्रे द्वादशधा कृते तदंशानां द्वानवत्यधिकं शतं षण्णवतेरवशिष्टत्वादयं चोदयः। तथा षोडशाख्ये एव चक्रे षोडशधा कृते षोडशांशानां षट्पञ्चाशदधिकं शतद्वयं भवेदिति भावः। तस्य प्रत्येकं प्राणचाराणां चतुरशीतिः षण्णवतेरेवावशिष्टत्वात् चाराष्टभागैरयमुदयो भवेत्। तथाष्टाष्टके चतुष्षष्टिपदात्मके चक्रे द्वादशधा कृते प्रतिपदं द्वादशकं प्राणचाराणां विंशतिवसूनष्टाविंशतिं तथा षण्णवतेरर्धावशिष्टत्वात् पादार्धमष्टभागमुदयो

यतश्चतुःषष्ट्यात्मनश्चक्रस्य द्वादशभिर्गुणनात्
अष्टषष्ट्यधिकशतसप्तकलक्षणा सा संख्या भवेदित्येवमत्र
सर्वत्र प्राणचाराणां सषट्शता सहस्रैकविंशतिरेव भवेत् ॥

एतदेवोपसंहरति

एष चक्रोदयः प्रोक्तः साधकानां हितावहः ॥ ७-५२ ॥

ननु प्राणचारोदयानुसारं चक्राणामुदय इति स एव कीदृक् येन सोऽपि
स्यात् ? इत्याशङ्क्याह

निरुद्ध्य मानसीर्वृत्तीश्चक्रे विश्रान्तिमागतः ।

व्युत्थाय यावद्विश्राम्येत्तावच्चारोदयो ह्ययम् ॥ ७-५३ ॥

इह खलु योगी सङ्कल्पात्मिका मानसीर्वृत्तीः ङिरुद्ध्य
अन्तर्मुखीकृत्य चक्रस्य एकपिण्डाद्यात्मनो मन्त्रस्य विश्रान्तिं
मध्यधामैकात्म्यमागतः सन् यावदुत्थाय हृद आरम्भ्य
द्वादशान्तपर्यन्तं निर्गम्य पुनरन्तः प्रविश्य हृद्येव विश्राम्येत्
तावदयं प्राणस्योदयो भवेदित्यर्थः ॥ ५३ ॥

अत्रैव त्रैरूप्यं निरूपयन् सिद्ध्यादिविभागमप्याह

पूर्णे समुदये त्वत्र प्रवेशैकात्मनिर्गमाः।

त्रय इत्यत एवोक्तः सिद्धौ मध्योदयो वरः॥ ७-५४॥

अत्र पुनः सम्यक् मध्यधामैकात्म्येन प्रवेशपर्यन्तं प्राणस्योदये
निर्गमे पूर्णे यथोक्तगत्या परिपूर्तिं प्राप्ते
प्रवेशैकात्म्यनिर्गमलक्षणास्त्रयः प्रकाराः सन्तीत्यतः
प्रकारत्रयमध्यात्सिद्धिनिमित्तमैकात्म्यलक्षणो मध्योदय एव
प्रवेशादपि वरः श्रेष्ठ उक्त इत्यर्थः॥ ५४॥

नन्वेवंवचने किं प्रमाणम्? इत्याशङ्क्याह

आद्यन्तोदयनिर्मुक्ता मध्यमोदयसंयुताः।

मन्त्रविद्याचक्रगणाः सिद्धिभाजो भवन्ति हि॥ ७-५५॥

मन्त्रचक्रोदयज्ञस्तु विद्याचक्रोदयार्थवित्।

क्षिप्रं सिद्ध्येयेदिति प्रोक्तं श्रीमद्विंशतिके त्रिके ॥ ७-५६ ॥

आद्यन्तोदयौ निर्गमप्रवेशौ, मध्यमोदयो मध्यधामैकात्म्यम्।
हिर्हेतौ। तेनैवं मन्त्रविद्याचक्रोदयं जानानो योगी निर्विलम्बमेव
सिद्धिभाग्भवेदित्यर्थः ॥ ५६ ॥

ननु जितप्राणस्यारूढस्य योगिनः किं नामासाध्यं यन्न प्राणगं
कुर्यात्, प्राणं जयतः पुनरारुरुक्षोः कथमेतत्सिध्येत् ?
इत्याशङ्क्याह

द्वित्रिश्चतुर्वा मात्राभिर्विद्यां वा चक्रमेव वा।

तत्त्वोदययुतं नित्यं पृथग्भूतं जपेत्सदा ॥ ७-५७ ॥

पिण्डाक्षरपदैर्मन्त्रमेकैकं शक्तितत्त्वगम्।

बह्वक्षरस्तु यो मन्त्रो विद्या वा चक्रमेव वा ॥ ७-५८ ॥

शक्तिस्थं नैव तं तत्र विभागस्त्वोंनमोन्तगः।

आरुरुक्षुः पुनर्योगी नित्यं

द्विःत्रिश्चतुर्वाभ्यासतारतम्यानुसारमेकद्व्यादिक्रमेण

त्रिर्जानुवेष्टनान्मात्रा त्रिगुणच्छोटिकात्रयात्। (मा। वि। १७।१२)

इति लक्षिताभिर्मात्राभिरनेकाक्षरां विद्यामनेकपिण्डं वा

चक्रमनेकपदं वा मन्त्रमेकैकं पिण्डाक्षरपदैः

पृथग्भूतमेकमेव पिण्डमक्षरं पदं वा पूर्वोक्तयुक्त्या

प्राणशक्तितत्त्वगतं कृत्वा तत्त्वोदययुतं मध्यधामैकात्म्येन सदा

जपेत् लक्षजपादि कुर्यादित्यर्थः। अत एव पदादिविभागशून्यो

बह्वक्षर एव यः पुनर्मन्त्रादिस्तमारुरुक्षुर्योगी तावतः

प्राणनिरोधस्याशक्यत्वात् शक्तिस्थं नैव कुर्यात् शक्त्युदयमेषां न

परिकल्पयेदित्यर्थः। ननु यद्येषां बह्वक्षरतया सामस्त्येन

प्राणशक्तावुदयं कर्तुं न शक्यते तत्समनन्तरोक्तक्रमेण

व्यस्ततयैतदस्तु इत्याशङ्क्योक्तं तत्रेत्यादि। आंनमोन्तग इति,

नतु मन्त्रान्तरवत् पदपिण्डादिक्रमेणैषां विभागोऽस्ति

येनांशांशिकयापि शक्तावुदयः सिद्ध्येत्

अतश्चारुरुक्षुभिरेवंविधानां मन्त्राणां जप एव न कार्यः

इत्युक्तं स्यात्॥ ५९॥

आरूढस्य पुनर्योगिनो न केवलं पूर्ण एव समुदये
प्रवेशादित्रैविध्यं यावत्तदंशेष्वपीत्याह

अस्मिंस्तत्त्वोदये तस्मादहोरात्रस्त्रिशस्त्रिशः ॥ ७-५९ ॥

विभज्यते विभागश्च पुनरेव त्रिशस्त्रिशः।

तस्मात्पूर्वोक्ताद्धेतोः, अस्मिन् प्रक्रान्ते तत्त्वोदये
कार्यकारणयोरभेदोपचारात् चक्रोदये
प्राणापानत्माहोरात्रस्त्रिशस्त्रिशो विभज्यते, केवल एव प्राणोऽपानो
वा प्रवेशैकात्म्यनिर्गमात्मना प्रकारत्रयेण विभागमापद्यते
इत्यर्थः। तेन षट्त्रिंशदात्मनोरुभयोरपि प्राणापानवाहयोः
प्रत्येकं प्रवेशादित्रैविध्यमिति प्रवेशादेः
प्रत्यङ्गुलद्वादशकमुदयः। एवमात्मा विभागोऽपि पुनस्त्रिशस्त्रिश
एव, प्रवेशाद्यपि
प्रवेशष्निर्गमैकात्म्यलक्षणप्रकारत्रयभाग्भवेदित्यर्थः,। तेन
प्रत्यङ्गुलचतुष्टयमपि प्रवेशादीनामुदयः, इति सिद्धम्
तदारूढस्य योगिनः परिमिते प्राणचारीयेऽप्यंशेऽप्येवं चक्रोदयः
सिद्ध्येदित्यभिप्रायः॥

एवमेतत्प्रसङ्गादभिधाय प्रकृतमेवानुसरति

पूर्वोदये तु विश्रम्य द्वितीयेनोल्लसेद्यदा ॥ ७-६० ॥

विशेच्चार्धार्धिकायोगात्तदोक्तार्धोदयो भवेत्।

यदा पूर्णोदयात्मा तु समः कालस्त्रिके स्फुरेत्॥ ७-६१ ॥

प्रवेशविश्रान्त्युल्लासे स्यात्स्वत्र्यंशोदयस्तदा।

तस्मात् पूर्वस्मिन् प्रधाने मध्यधामात्मनि उदये विश्रम्य
तदैकात्म्येन स्थित्वा यदा द्वितीयेन निर्गमात्मना प्रकारेण उल्लसेत
प्राणक्रमेणोर्ध्वं गच्छेत्, अर्थात्तृतीयेनापि प्रवेशात्मना प्रकारेण
विशेत अपानक्रमेण हृदन्तं प्रवेशं कुर्यात् तदा प्राणापानयोः
प्रत्येकमर्धार्धिकया संबन्धात् सषट्शतसहस्रैकविंशत्यात्मन
उक्तस्य कालस्यार्धेन प्राणचाराणां साष्टशतं सहस्रदशकमुदयो
भवेत्। यदा पुनः पूर्णः सषट्छतसहस्रैकविंशतिरूपो
योऽसावुदयस्तदात्मा कालः प्रवेशविश्रान्त्युल्लासाख्ये त्रिके साम्येन
स्फुरेत् तदा प्रवेशादीनां प्रत्येकं श्वः आत्मीयो यः
सशतद्वयसहस्रसप्तकात्मा त्र्यंशः तस्योदयो भवेदित्यर्थः ॥

ननु प्राक्

अन्तः संविदि सर्वोऽयमध्वा विश्रम्य तिष्ठति। (तं। ६।२८)

इति प्रतिज्ञातं तत्कथमिह कालाध्वनः प्राण एवैवं
प्रतिष्ठितत्वमुच्यते ? इत्याशङ्क्याह

इत्येष कालविभवः प्राण एव प्रतिष्ठितः॥ ७-६२॥

स स्पन्दे खे स तच्चित्यां तेनास्यां विश्वनिष्ठितिः।

प्राण इति प्राधान्यात् तेनापानादावपि। स इति प्राणः। स्पन्दे इति
सामान्यात्मिकायामाद्यप्रसररूपायां प्राणनावृत्तौ। खे इति
शून्यप्रमातरि। स इति मेयौत्सुक्येन
बहिःसमुच्छलन्प्राणस्पन्दादिशब्दव्यपदेश्यो भवेदिति भावः। तदिति
खं, चित एव स्वातन्त्र्याच्छून्यरूपत्वेन परिस्फुरणात्। तेनेत्युक्तेन
पारम्पर्येण हेतुना, विश्वेति षड्विधस्याध्वनः। यद्वक्ष्यति

अध्वा समस्त एवायं चिन्मात्रे संप्रतिष्ठितः।

यत्तत्र न हि विश्रान्तं तन्नभःकुसुमायते ॥

संविद्द्वारेण तत्सृष्टे शून्ये धियि मरुत्सु च ।

नाडीचक्रानुचक्रेषु बहिर्देहेऽध्वसंस्थितिः ।(तं । ८ ।४)

इति ॥

एवं संविदधीनावेव विश्वस्य सृष्टिसंहारावित्याह

अतः संवित्प्रतिष्ठानौ यतो विश्वलयोदयौ ॥ ७-६३ ॥

शक्त्यन्तेऽध्वनि तत्स्पन्दासंख्याता वास्तवी ततः ।

अतः कालस्य पारम्पर्येण संविद्येव निष्ठितत्वात् संवित्कर्तृकावेव
यतो विश्वस्य सृष्टिसंहारौ, ततः शक्त्यन्तेऽध्वनि तेषां
प्रागुक्तानां सृष्टिसंहाराद्यात्मनां स्पन्दानां

तत्सृष्टौ सृष्टिसंहारा निःसंख्या जगतां यतः ।

अन्तुर्भूता ततः शाक्ती महासृष्टिरुदाहृता ॥

इत्याद्युक्तयुक्त्यावान्तराणां स्पन्दानामन्तर्भावात् असंख्यातापि
वास्तवी सन्मात्रैकरूपत्वात् पारमार्थिकीत्यर्थः। या हि नाम बहिः
कश्चन परिस्पन्दः स संवित्सतत्त्व एव इत्यभिप्रायः॥

न चैतदस्मदुपज्ञमेव, यावदागमेऽपि एवमित्याह

उक्तं श्रीमालिनीतन्त्रे गात्रे यत्रैव कुत्रचित्॥ ७-६४॥

विकार उपजायेत तत्तत्त्वं तत्त्वमुत्तमम्।

इह खलु परसंविदावेशशालिनो योगिनो यत्रैव कुत्रचिच्चक्षुरादौ गात्रे
शर्वो ममायं विभवः इत्यादिसङ्कल्पपूर्वक उपजायमानो यो विकारः
स्पन्दस्तस्य यत्तत्त्वं सर्वभावानां स्वाविभागेनावभासनं
तदुत्तमं तत्त्वं, संविदनतिरेकात्परः परमार्थ इत्यर्थः।
तदुक्तं तत्र

यत्रैव कुत्रचिद् गात्रे विकार उपजायते।

सङ्कल्पपूर्वको देवि तत्तत्त्वं तत्त्वमुत्तमम्॥

इति। (मा।वि। १८।४२) ननु भवतु नामैतत् तत्राप्यस्य प्राणस्य देहनिष्ठत्वेन कस्माद्रूपमुच्यते ? इत्याशङ्क्याह

प्राणे प्रतिष्ठितः कालस्तदाविष्टा च यत्तनुः॥ ७-६५॥

देहे प्रतिष्ठितस्यास्य ततो रूपं निरूप्यते।

तदाविष्टेति, तच्छब्देन प्राणपरामर्शः। तत इति, प्राणस्य तनावाविष्टत्वात्॥

ननु कथं नाम देहस्य तदावेशः ? इत्याशङ्क्याह

चित्स्पन्दप्राणवृत्तीनामन्त्या या स्थूलता सुषिः॥ ७-६६॥

सा नाडीरूपतामेत्य देहं संतानयेदिमम्।

प्राङ्निरूपितस्वरूपाणां चिदादीनां कार्यजननौन्मुख्यादन्त्या, अत एव चिदादेरन्तःकरणात् सुषिशब्दव्यपदेश्या या स्थूलता बहीरूपतया श्यानीभावः सा

पादाङ्गुष्ठाग्रतो व्यक्ता नाभितो हृदयं गता।

सुषुम्ना नाम सा ज्ञेया ब्रह्मरन्ध्रजनिर्गता।

प्राणिनां प्राणसञ्चारे निर्मिता परमेष्ठिना॥

इत्याद्युक्तया प्रथमं मध्यस्थूणान्यायेन मध्यनाडीरूपतामाश्रित्य वक्ष्यमाणप्रमाणमिमं देहं संतानयेत् सर्वतो भेदोपभेदरूपतया नाड्यन्तरोपजननात् जालवत् संतानवन्तं कुर्यादित्यर्थः॥

अतश्चागमोऽप्येवमित्याह

श्रीस्वच्छन्देऽत एवोक्तं यथा पर्णं स्वतन्तुभिः॥ ७-६७॥

व्याप्तं तद्वत्तनुर्द्वारद्वारिभावेन नाडिभिः।

यथा पलाशपत्रं मध्यतन्त्ववलम्बिभिरात्मीयैस्तन्त्वन्तरैः सर्वत्र व्याप्तं तथा शरीरमपि भेदोपभेदरूपत्वेन द्वारद्वारिकया मध्यनाडिसंलग्नाभिर्गुणप्रधानभावेनावस्थिताभिर्नाडीभिरिति

वाक्यार्थः। यदुक्तं तत्र

ङाभ्यधो मेढ्रकन्दे च स्थिता वै नाभिमध्यतः।

तस्माद्विनिर्गता नाड्यस्तिर्यगूर्ध्वमधः प्रिये॥

चक्रवत्संस्थितास्तत्र प्रधाना दश नाडयः।

द्वासप्ततिसहस्राणि नाड्यस्ताभ्यो विनिर्गताः॥

पुनर्विनिर्गताश्चान्याः आभ्योऽप्यन्याः पुनः पुनः।

यावत्यो रोमकोट्यस्तु तावत्यो नाडयः स्मृताः।

यथा पर्णं पलाशस्य व्याप्तं सर्वत्र तन्तुभिः। (स्वटं। ७।११)

इति। ननु मारुतापूरिताः सर्वाः इत्याद्युक्त्या सर्वा एव
तावन्नाडयः प्राणवहाः, ताभिश्च निखिलमेव शरीरं व्याप्तमिति
नास्त्यत्र विमतिः, तत्कथं हृदयाद् द्वादशान्तं मत्तगन्धस्थानं
वा यावत्षट्त्रिंशदङ्गुल एव प्राणचार उक्तः? इत्याशङ्क्याह –
–

पादाङ्गुष्ठादिकोर्ध्वस्थब्रह्मकुण्डलिकान्तगः ॥ ७-६८ ॥

कालः समस्तश्चतुरशीतावेवाङ्गुलेष्वितः ।

द्वादशान्तावधिं किंचित्सूक्ष्मकालस्थितिं विदुः ॥ ७-६९ ॥

षण्णवत्यामधः षड्द्विक्रमाच्चाष्टोत्तरं शतम् ।

उर्ध्वस्था ब्रह्मकुण्डलिका ब्रह्मबिलं, समस्तः प्रागुक्तः कालश्चतुरशीतावङ्गुलेष्विति सार्धत्रिहस्तात्मकत्वात् देहस्य । इत इति, गतः स्थित इत्यर्थः । षण्णवत्यामङ्गुलेष्विति पूर्वतो योज्यम् । तथात्वे च द्वादशानामङ्गुलानामाधिक्येनोपादानात् सूक्ष्मशब्दसन्निधेः पूर्वापरयोर्मानयोः स्थूलत्वं परत्वं चार्थसिद्धम् । अध इति पादाङ्गुष्ठात् । षड्द्विक्रमादिति, षण्णां द्विर्योऽसौ द्वादशाङ्गुलात्मा क्रमस्तस्माद्यदूर्ध्व इवाधोऽपि द्वादशान्तः संभवेदिति भावः ॥

नन्वेवं देहस्य मानवैचित्र्ये प्राणादेरपि कश्चिदतिशयो न वा ?
इत्याशङ्क्याह

अत्र मध्यमसञ्चारिप्राणोदयलयान्तरे ॥ ७-७० ॥

विश्वे सृष्टिलयास्ते तु चित्रा वाय्वन्तरक्रमात् ।

अत्र त्रिप्रकारप्रमाणावच्छिन्ने देहे प्राधान्यान्मध्यवाहिनः प्राणस्य
ये उदयलया निर्गमप्रवेशास्तदन्तराले विश्वे प्रागुक्तकलना एव सर्वे
सृष्टिसंहारा भवन्ति, किंत्वेषामपानवाय्वन्तरक्रमादेव
प्राग्वद्वैचित्र्यं नतु देहवैचित्र्यादित्यर्थः ॥

इदानीमाह्निकार्थमेव श्लोकस्य प्रथमार्धेनोपसंहरति इत्येष
सूक्ष्मपरिमर्शनशीलनीयश्चक्रोदयोऽनुभवशास्त्रदृशा मयोक्तः ॥
७१ ॥

इति श्रामदाचार्याभिनवगुप्तपादविरचिते श्रीतन्त्रालोके
चक्रोदयप्रकाशनं नाम सप्तममाह्निकम् ॥ ७ ॥

सूक्ष्मपरिमर्शनेत्यनेन अत्यन्तमस्यावधानगम्यत्वमुक्तमिति शिवम् ॥

प्रतिनियतमन्त्रसमुदयचारभिदनुभवनिभालनोद्युक्तः ।

सप्तममाह्निकमेतद्व्याकृतावाङ्जयरथाभिख्यः ॥

इति श्रीमन्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तविरचिते
श्रीतन्त्रालोके श्रीजयरथविरचितविवेकाभिख्यव्याख्योपेते
चक्रोदयप्रकाशनं नाम सप्तममाह्निकं समाप्तम् ॥ ७ ॥

अष्टममाह्निकम्

विवेक

जयकीर्तिरियं जयताज्जगदम्भोजं विभक्तभुवनदलम् ।

रविरिव विकासयति यश्चिदेकनालाश्रयत्वेन ॥

इदानीं द्वितीयार्धेन देशाध्वनः स्वरूपं संगिरितुमुपक्रमते

देशाध्वनोऽप्यथ समासविकासयोगात्सङ्गीयते विधिरयं
शिवशास्त्रदृष्टः ॥ १ ॥

१. योग-उपनिषदः

योगराजोपनिषत्

योगराजं प्रवक्ष्यामि योगिनां योगसिद्धये ।
मन्त्रयोगो लयश्चैव राजयोगो हठस्तथा ॥ १ ॥
योगश्चतुर्विधः प्रोक्तो योगिभिस्तत्त्वदर्शिभिः ।
आसनं प्राणसंरोधो ध्यानं चैव समाधिकः ॥ २ ॥
एतच्चतुष्टयं विद्धि सर्वयोगेषु सम्मतम् ।
ब्रह्मविष्णुशिवादीनां मन्त्रं जाप्यं विशारदैः ॥ ३ ॥
साध्यते मन्त्रयोगस्तु वत्सराजादिभिर्यथा ।
कृष्णद्वैपायनाद्यैस्तु साधितो लयसंज्ञितः ॥ ४ ॥
नवस्वेव हि चक्रेषु लयं कृत्वा महात्मभिः ।
प्रथमं ब्रह्मचक्रं स्यात् त्रिरावृत्तं भगाकृति ॥ ५ ॥
अपाने मूलकन्दाख्यं कामरूपं च तज्जगुः ।
तदेव वह्निकुण्डं स्यात् तत्त्वकुण्डलिनी तथा ॥ ६ ॥

तां जीवरूपिणीं ध्यायेज्ज्योतिष्ठं मुक्तिहेतवे ।
स्वाधिष्ठानं द्वितीयं स्याच्चक्रं तन्मध्यगं विदुः ॥ ७ ॥
पश्चिमाभिमुखं लिङ्गं प्रवालाङ्कुरसन्निभम् ।
तत्रोड्डीयाणपीठेषु तं ध्यात्वाकर्षयेज्जगत् ॥ ८ ॥
तृतीयं नाभिचक्रं स्यात्तन्मध्ये तु जगत् स्थितम् ।
पञ्चावर्तां मध्यशक्तिं चिन्तयेद्विद्युदाकृति ॥ ९ ॥
तां ध्यात्वा सर्वसिद्धीनां भाजनं जायते बुधः ।
चतुर्थं हृदये चक्रं विज्ञेयं तदधोमुखम् ॥ १० ॥
ज्योतीरूपं च तन्मध्ये हंसं ध्यायेत् प्रयत्नतः ।
तं ध्यायतो जगत् सर्वं वश्यं स्यान्नात्र संशयः ॥ ११ ॥
पञ्चमं कण्ठचक्रं स्यात् तत्र वामे इडा भवेत् ।
दक्षिणे पिङ्गला ज्ञेया सुषुम्ना मध्यतः स्थिता ॥ १२ ॥
तत्र ध्यात्वा शुचि ज्योतिः सिद्धीनां भाजनं भवेत् ।
षष्ठं च तालुकाचक्रं घण्टिकास्थानमुच्यते ॥ १३ ॥
दशमद्वारमार्गं तद्राजदन्तं च तज्जगुः ।
तत्र शून्ये लयं कृत्वा मुक्तो भवति निश्चितम् ॥ १४ ॥
भ्रूचक्रं सप्तमं विद्याद्बिन्दुस्थानं च तद्विदुः ।
भ्रुवोर्मध्ये वर्तुलं च ध्यात्वा ज्योतिः प्रमुच्यते ॥ १५ ॥
अष्टमं ब्रह्मरन्ध्रं स्यात् परं निर्वाणसूचकम् ।
तं ध्यात्वा सूतिकाग्रामं धूमाकारं विमुच्यते ॥ १६ ॥
तच्च जालन्धरं ज्ञेयं मोक्षदं नीलचेतसम् ।
नवमं व्योमचक्रं स्यादश्रैः षोडशभिर्युतम् ॥ १७ ॥

संविद्भ्रूयाञ्च तन्मध्ये शक्तिरुद्धा स्थिता परा ।
तत्र पूर्णो गिरौ पीठे शक्तिं ध्यात्वा विमुच्यते ॥ १८ ॥
एतेषां नवचक्राणामेकैकं ध्यायतो मुनेः ।
सिद्धयो मुक्तिसहिताः करस्थाः स्युर्दिने दिने ॥ १९ ॥
एको दण्डद्वयं मध्ये पश्यति ज्ञानचक्षुषा ।
कदम्बगोलकाकारं ब्रह्मलोकं व्रजन्ति ते ॥ २० ॥
ऊर्ध्वशक्तिनिपातेन अधःशक्तेर्निकुञ्चनात् ।
मध्यशक्तिप्रबोधेन जायते परमं सुखं
जायते परमं सुखम् । इति ॥ २१ ॥

इति योगराजोपनिषत् समाप्ता

षष्ठः पटलः

कर्मयोगादिक्रमनिरूपणम्

पार्वत्युवाच—

देव्याः पूजा समाख्याता तृतीया या महेश्वर ।
कथय तां सुरश्रेष्ठ विस्तरेणाधुना प्रभो ॥ १ ॥

पार्वती ने कहा—हे महेश्वर! देवी की जो तीसरी पूजा की चर्चा की गयी, हे सुरश्रेष्ठ! हे प्रभो! उसको आप विस्तार से बतलाइये ॥ १ ॥

देहशुद्धिवर्णनोपक्रमः

ज्ञानेन कर्मणा चेह देहशुद्धिर्द्विधा भवेत् ।
ज्ञानशुद्धिस्त्वया प्रोक्ता कर्मशुद्धिर्न दर्शिता ॥ २ ॥
वि(न्मु?ण्मू)त्रपिच्छलो देहः कथं देवमयो भवेत्।
तन्मे वद महादेव प्रसादसुमुख प्रभो ॥ ३ ॥

देहशुद्धिवर्णन का उपक्रम—इस संसार में देहशुद्धि ज्ञान से और कर्म से; इस प्रकार दो रीति से सम्पन्न होती है । आपने ज्ञानशुद्धि की चर्चा तो की किन्तु कर्मशुद्धि का दिग्दर्शन अभी नहीं कराया । मलमूत्र से भरा हुआ यह पिच्छिल देह कैसे देवमय होता है, हे प्रभो! हे प्रसादसुमुख! हे महादेव! कृपया उसको मुझे बताइये ॥ २-३ ॥

कर्मयोगवर्णनम्

ईश्वर उवाच—

ज्ञानेन कर्मणा वापि सिद्धिर्भवति नान्यथा ।
ज्ञानयोगश्च वक्तव्यः कर्मयोगं शृणु प्रिये ॥ ४ ॥
ब्राह्मे मुहूर्ते उत्थाय साधकः स्थिरमानसः ।
पद्मासनसमासीनः प्राणायामपुरःसरः ॥ ५ ॥

ब्रह्मरन्ध्रस्थिते पद्मे सहस्रदलशोभिते ।
विमले पूर्णचन्द्रस्य मण्डले चिन्तयेद् गुरुम् ॥ ६ ॥
शुद्धस्फटिकसङ्काशं श्वेताभरणभूषितम् ।
तादृक्प्रसूनमाल्यादिविभूषितनुं तथा ॥ ७ ॥
पद्मासनसमासीनं सर्वयोगिनिषेवितम् ।
वराभयकरं शान्तं द्विनेत्रं करुणामयम् ॥ ८ ॥
वामोरुगतया शक्त्या रक्तया वामपाणिना ।
धारयन्त्योत्पलं दक्षहस्तेनालिङ्गितं विभुम् ॥ ९ ॥
परमानन्दसंदोहसान्द्रमानसमीश्वरम् ।
आनन्दसान्द्ररक्ताक्षं स्मरेत् स्मितमुखाम्बुजम् ॥ १० ॥

कर्मयोग का वर्णन—सिद्धि ज्ञान से अथवा कर्म से प्राप्त होती है । किसी तीसरे साधन से वह प्राप्त नहीं होती । हे प्रिये! ज्ञानयोग की चर्चा आगे की जायेगी कर्मयोग को सुनो । स्थिरचित्त वाला साधक ब्राह्ममुहूर्त्त में उठकर पद्मासन पर बैठ जाय । प्राणायाम करने के बाद ब्रह्मरन्ध्र में स्थित सहस्रदल कमल के अन्दर स्वच्छ पूर्ण चन्द्रमण्डल में गुरु का ध्यान करे । (ध्यान का स्वरूप इस प्रकार है) वे गुरु शुद्ध स्फटिक के समान तथा श्वेत अलङ्कारों से अलङ्कृत हैं । उनका शरीर उसी प्रकार अर्थात् श्वेत रंग की पुष्पमाला आदि से विभूषित है । पद्मासन लगाकर बैठे हुए वे समस्त योगिजनों से निरन्तर सेवित हैं । उनके हाथों में वरद एवं अभय मुद्रा है । वे शान्त, दो नेत्रों वाले तथा करुणामय हैं । उनकी बायीं जाँघ पर रक्त वर्ण की तथा अनुरागपूर्ण शक्ति विराजमान है । वह बायें हाथ में रक्तकमल लेकर तथा दाँयें हाथ से परमेश्वर को आलिङ्गित कर बैठे हैं । ऐसे परम आनन्दसमूह से पूरित चित्त वाले, आनन्द से भरित रक्त नेत्रों वाले, स्मयमान मुखमण्डल वाले ईश्वर का स्मरण करना चाहिये ॥ ४-१० ॥

गुरुशक्तिपूजामन्त्रोद्धारः

बालाद्यं भुवनेशानी रमा चैवाथ खेचरी ।
शिवचन्द्रौ मातृकान्तं कालशक्रा(द्यु?म्बु)वह्नयः ॥ ११ ॥
वायुश्च वामकर्णेन योजिता बिन्दुनादिनः ।
(च?व)क्रं कृत्वादिमन्तेषु कर्णे वामाक्षियोजयेत् ॥ १२ ॥
शिवचन्द्रौ त्रिशूलाढ्यौ बिन्दुना परिमण्डितौ ।
चन्द्रशिवौ त्रिशूलाढ्यौ (स्व?स)र्गवन्तौ महेश्वरि ॥ १३ ॥
तस्मात् स्वगुरुनामान्ते आनन्दनाथ चालिखेत् ।

तथा शक्तिपदान्ते वै अम्बापदमतो लिखेत् ॥ १४ ॥
पादुकां पूजयामीति विधिना परिपूजयेत् ।

गुरुशक्तिपूजा-मन्त्र का उद्धार—बालाद्य भुवनेश्वरी रमा खेचरी शिव चन्द्र मातृका का अन्त, काल शक्र अम्बु वह्नि वायु वामकर्ण से योजित बिन्दु नाद, इनमें से वक्र को प्रथम बनाकर वामाक्षि को कर्ण से जोड़ना चाहिये । शिव और चन्द्र को त्रिशूल से संयुक्त कर बिन्दु से अलङ्कृत करना चाहिये । हे महेश्वरि! चन्द्र और शिव को त्रिशूल से संयुक्त कर विसर्गयुक्त करना चाहिये । उसके बाद अपने गुरु के नाम के अन्त में 'आनन्दनाथ' लिखना चाहिये । इसी प्रकार शक्तिपद के अन्त में 'अम्बा' पद लिखना चाहिये । पुनः 'पादुकां पूजयामि' कहकर पूरे मन्त्र के द्वारा गुरु और शक्ति की विधिवत् पूजा करनी चाहिये । (मन्त्र को इस प्रकार समझें—बालाद्य = ऐं, भुवनेश्वरी = ह्रीं, रमा = श्रीं, खेचरी = हसखफ्रें, शिव = ह, चन्द्र = स, मातृकान्त = क्ष, काल = म, शक्र = ल, अम्बु = व, वह्नि = र, वायु = य, वामकर्ण = ऊ से योजित बिन्दु नाद अर्थात् ऊं, वक्र अर्थात् खेचरी अर्थात् हसखफ्रें को पहले रखकर उनमें वामाक्षि = ई को जोडना चाहिये । शिव और चन्द्र = हस को, त्रिशूल = औ से अलङ्कृत कर बिन्दु से जोडिये । इस प्रकार हसौं बना । फिर चन्द्र शिव = स्ह् को त्रिशूल से जोड़कर विसर्ग से अलङ्कृत कीजिये तब स्हौः बनता है । इस प्रकार पूरा मन्त्रस्वरूप होगा—ऐं ह्रीं श्रीं हसखफ्रें ह स क्ष म ल व र य ऊं हसखफ्रें ईं ऊं हसौं स्हौः अमुकानन्दनाथ (अथवा अमुकाम्बा) पादुकां पूजयामि । इस मन्त्र का उच्चारण करना चाहिये) ॥ ११-१४- ॥

लं पृथिव्यात्मना ब्रह्मणा गन्धं कल्पयामि गन्धतन्मात्रात्मने घ्रा(ण?णेन्द्रियाय) गन्धं गृहाण स्वाहा,
अथाङ्गुष्ठकनिष्ठाभ्यां योजयेद्गन्धमुत्तमम् ॥ १५ ॥
हं आकाशात्मना सदाशिवेन पुष्पं कल्पयामि शब्दतन्मात्रात्मने श्रोत्रेन्द्रि (य?याय) शब्दं गृहाण स्वाहा,
अङ्गुष्ठतर्जनीयोगं पुष्पदानं तथैव हि ।
यं वाय्वात्मना ईश्वरेण धूपं कल्पयामि स्पर्शतन्मात्रात्मने त्वगिन्द्रियाय स्पर्शं गृहाण स्वाहा,
अङ्गुष्ठमध्यमायोगं धूपदानं तथैव हि ॥ १६ ॥
(वं?रं) वह्न्यात्मना रुद्रेण दीपं कल्पयामि रूपतन्मात्रात्मने चक्षुरिन्द्रियाय रूपं गृहाण स्वाहा,
अङ्गुष्ठाभ्यां महेशानि दीपं दद्यात् समाहितः ।

वं अमृतात्मना विष्णुना नैवेद्यं कल्पयामि रसतन्मात्रात्मने जिह्वेन्द्रियाय रसं गृहाण स्वाहा,

अङ्गुष्ठानामिकायोगं नैवेद्यं तत्प्रतिष्ठितम् ॥ १७ ॥
एवं कुलगुरुं देवि पूजयित्वा विधानतः ।
योनिमुद्रां प्रदर्श्याथ प्रणमेत् सिद्धिहेतवे ॥ १८ ॥

(गन्ध पुष्प आदि के समर्पण के मन्त्र निम्नलिखित हैं—) 'लं पृथिव्यात्मना ब्रह्मणा......गृहाण स्वाहा' । यह मन्त्र पढ़कर अङ्गुष्ठा और कनिष्ठा को जोड़कर उससे गन्ध देना चाहिये । इसी प्रकार 'हं आकाशात्मना सदाशिवेन..........गृहाण स्वाहा' कहकर अङ्गुष्ठा और तर्जनी से पुष्प देना चाहिये । 'यं वाय्वात्मना ईश्वरेण. ...गृहाण स्वाहा' कहकर अङ्गुष्ठा मध्यमा को जोड़कर धूप देना चाहिये । 'रं वह्न्यात्मना रुद्रेण.........गृहाण स्वाहा' से दोनों अङ्गूठों को जोड़कर दीप देना चाहिये । 'वं अमृतात्मना विष्णुना.........गृहाण स्वाहा' से अङ्गुष्ठ अनामिका को जोड़कर नैवेद्य देना चाहिये । हे देवि! इस प्रकार कुलगुरु की विधिवत् पूजा उनके सामने योनिमुद्रा[1] का प्रदर्शन कर लक्ष्य की सिद्धि के लिये प्रणाम कर प्रार्थना करनी चाहिये ॥ १५-१८ ॥

गुरुप्रार्थनागुरुपूजामाहात्म्यवर्णनम्

नमस्ते भगवन्नाथ शिवाय गुरुरूपिणे ।
विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ॥ १९ ॥
नवाय नवरूपाय परमात्मैकरूपिणे ।
सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ॥ २० ॥
स्वतन्त्राय दया (तृ?क्लृ)प्तविग्रहाय शिवात्मने ।
परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ॥ २१ ॥
विवेकिनां विवेकाय विम(र्षा?र्शा)य विम(र्ष?र्शि)नाम् ।
प्रकाशिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ॥ २२ ॥
पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः ।
सदा सच्चित्स्वरूपेण विधेहि भवदासनम् ॥ २३ ॥

---

१. मिथः कनिष्ठिके बद्ध्वा तर्जनीभ्यामनामिके ।
अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः ।
अङ्गुष्ठाग्रद्वयं न्यस्येद् योनिमुद्रेयमीरिता ॥ मुद्रानिघण्टु ७० ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ २४ ॥
नमोऽस्तु गुरवे तुभ्यं ब्रह्मविष्णुशिवात्मने ।
अविद्याग्रस्तसंसारसागरोत्तारहेतवे ॥ २५ ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ज्ञानं गुरुरेव परं तपः ॥ २६ ॥
अतः सर्वत्र देवेशि गुरुपूजा गरीयसी ।
अन्यदेव सपर्या वा चान्यदेवस्य कीर्तनम् ॥ २७ ॥
गुरुदेवं विना देवि तदग्रे क्रियते यदि ।
तदा नरकमाप्नोति सत्यमेतद्वदाम्यहम् ॥ २८ ॥
पूजिते गुरुपादे वै सर्व(देव?दैव)सुखी भवेत् ।
सर्वेषां मन्त्रतन्त्राणां पितासौ यः सदाशिवः ॥ २९ ॥
यस्य भक्तिर्गुरौ नित्यं वर्तते देववत् प्रिये ।
तस्य सर्वार्थसिद्धिः स्यान्नान्यथा खलु पार्वति ॥ ३० ॥
गुरुपादरजो मूर्ध्नि ध्यात्वा कर्म समारभेत् ।
ब्रह्मरन्ध्रे सहस्रारे कर्पूरधवलो गुरुः ॥ ३१ ॥
वराभयकरो नित्यो ब्रह्मरूपी सदानघः ।
जागर्ति परमेशानि निजस्थानप्रकाशकः ॥ ३२ ॥
कुलनाथं परित्यज्य ये शाक्ताःप(रि?र)सेविनः ।
तेषां दीक्षा च यागश्च ह्यभिचाराय कल्पते ॥ ३३ ॥
तस्मात् सर्वप्रयत्नेन कुलीनं गुरुमाश्रयेत् ।
कुलीनः सर्वविद्यानामधिकारीति गीयते ॥ ३४ ॥
दीक्षाप्रभुः स एवात्र सर्वमन्त्रेषु नापरः ।
गुरुमण्डलपूजां तु कुर्यात् सप्तसु पर्वसु ॥ ३५ ॥

गुरु-प्रार्थना और गुरु-पूजा माहात्म्य का वर्णन—हे भगवन्! हे नाथ! आपको नमस्कार है । गुरु रूपी शिव, विद्यावतार की सिद्धि के लिये अनेक शरीर धारण करने वाले, नवीन, नवीन रूप वाले, परमात्मरूप, समस्त अज्ञानरूपी अन्धकार को दूर करने के लिये सूर्य के समान, चिद्घन, स्वतन्त्र, दयापूर्ण शरीर वाले, शिवात्मक, भक्तों के अधीन, भव्यों के भव्य, विवेकियों के विवेक, विमर्श करने वालों के विमर्श, प्रकाशयुक्त लोगों के प्रकाश, ज्ञानियों के

ज्ञानरूप आपको सामने दोनों पार्श्वों, पीछे ऊपर नीचे सब ओर से नमस्कार है। आप मेरे अन्दर सदा सच्चित्रूप से अपना आसन ग्रहण कीजिये। जिसने अज्ञानरूपी तिमिरान्धता से युक्त मनुष्य के नेत्रों को ज्ञानरूपी अञ्जनशलाका से उन्मीलित किया उस गुरु को नमस्कार है। अविद्याग्रस्त संसाररूपी सागर को पार करने के साधनस्वरूप ब्रह्मा विष्णु शिवात्मक आप गुरु को नमस्कार है। गुरु ब्रह्मा हैं गुरु विष्णु और गुरु ही देवाधिदेव महेश्वर हैं। गुरु ही परम ज्ञान एवं गुरु ही परम तप हैं। इसलिए हे देवेशि! सर्वत्र गुरुपूजा अन्य पूजाओं से बढ़कर है। हे देवि! गुरुदेव के विना यदि उनके आगे अन्य देवता की पूजा अथवा कीर्त्तन किया जाता है तो ऐसा करने वाला नरक को जाता है—यह मैं सत्य कह रहा हूँ। गुरु के चरणकमलों की पूजा करने पर पूजक सर्वदा सुखी रहता है। सदाशिव सारे मन्त्र तन्त्रों के पिता हैं। हे प्रिये! जिस मनुष्य की गुरु के प्रति देवता के समान सर्वदा भक्ति रहती है, हे पार्वति! उसके समस्त उद्देश्यों की पूर्ति होती है, अन्यथा नहीं होती। इसलिये गुरुचरणों की धूलि का शिर पर ध्यान कर किसी कार्य का प्रारम्भ करना चाहिये। हे परमेशानि! सहस्रार ब्रह्मरन्ध्र में गुरु कपूर के समान धवल स्वरूप वाले, हाथों में वरद एवं अभय मुद्रा धारण किये हुए, ब्रह्मस्वरूपी, निष्कलुष और अपने स्थान के प्रकाशक के रूप में नित्य जाग्रत रहते हैं। जो शाक्त साधक कुलनाथ अर्थात् कुलगुरु का त्याग कर दूसरे की सेवा करते हैं उनकी दीक्षा एवं यज्ञक्रिया अभिचार का कारण बनती है। इसलिये सब प्रयास कर कुलीन गुरु का आश्रयण करना चाहिये। कुलीन गुरु सारी विद्याओं का अधिकारी कहा जाता है। सारे मन्त्रों के विषय में वही दीक्षा देने का अधिकारी होता है दूसरा नहीं। सात पर्वों (= विशिष्ट अवसरों) पर गुरुमण्डल की पूजा करनी चाहिये ॥ १९-३५ ॥

योगकथनोपक्रमः

देव्युवाच—

विना योगं न सिध्येत कुण्डलीचङ्क्रमः प्रभो।
मूलपद्मे कुण्डलिनी यावन्निद्रायिता प्रभो ॥ ३६ ॥
तावन्न किंचित् सिध्येत मन्त्रयन्त्रार्चनादिकम्।
जागर्ति यदि सा देवी बहुभिः पुण्यसञ्चयै ॥ ३७ ॥
तदा प्रसादमायान्ति मन्त्रयन्त्रार्चनादयः।
शिववद्विहरेल्लोके अष्टैश्वर्यसमन्वितः ॥ ३८ ॥
योगयोगाद् भवेन्मुक्तिर्मन्त्रसिद्धिरखण्डिता।
सिद्धे मनौ परावाप्तिरिति शास्त्रार्थनिर्णयः ॥ ३९ ॥

युक्तात्मा येन विहरेत् स्वर्गे मर्त्ये रसातले ।
जीवन्मुक्तश्च देहान्ते परं निर्वाणमाप्नुयात् ॥ ४० ॥
तत् कात्स्न्येन परं योगं कथयस्व मयीश्वर ।

योगकथन का उपक्रम—देवी ने कहा—हे प्रभो! विना योग के कुण्डलिनी का चंक्रम अर्थात् जागरण सिद्ध नहीं होता । हे प्रभो! मूलाधाररूपी कमल में जब तक कुण्डलिनी सुप्त रहती है तब तक मन्त्र यन्त्र पूजा आदि कुछ भी सिद्ध नहीं होता । अनेक पुण्यसञ्चय से जब वह देवी जागृत होती है तब मन्त्र यन्त्र पूजा आदि सफल होते हैं । (जिस साधक की कुण्डलिनी जाग जाती है वह) आठ ऐश्वर्यों अर्थात् आठ सिद्धियों से युक्त होकर शिव के समान इस संसार में विचरण करता है । योग के योग से मुक्ति और मन्त्र की अखण्ड सिद्धि होती है । मन्त्र के सिद्ध होने पर परतत्त्व का साक्षात्कार होता है—ऐसा शास्त्रों के तात्पर्य का निर्णय है । हे ईश्वर! जिसके द्वारा योगयुक्त मनुष्य स्वर्ग मर्त्य और पाताल में स्वच्छन्द विचरण करता है और जीवन्मुक्त होकर देहान्त में परम निर्वाण को प्राप्त होता है उस परयोग को मुझको बतलाइये ॥ ३६-४०- ॥

योगयोगाङ्गवर्णनम्

ईश्वर उवाच—

कथयामि तव स्नेहाद् योगयोग्यासि पार्वति ॥ ४१ ॥
संसारोत्तारणं मुक्तिर्योगशब्देन कथ्यते ।
योगो हि ललिता देवी निश्चितं विद्धि पार्वति ॥ ४२ ॥
न योगो नभसः पृष्ठे न भूमौ न रसातले ।
ऐक्यं जीवात्मनोश्चाहुर्योगं योगविशारदाः ॥ ४३ ॥
कामक्रोधलोभमोहमदमात्सर्यसंज्ञकाः ।
तत्समूहाः षडाख्याता योगविघ्नकरा इमे ॥ ४४ ॥
यो(गज्ञै?गाङ्गै)रेभिर्जित्वै तान्योगिनो योगमाप्नुयुः ।
यमं नियममासनप्राणायामौ ततः परम् ॥ ४५ ॥
प्रत्याहारं धारणाख्यं ध्यानं सार्धं समाधिना ।
अष्टाङ्गान्याहुरेतानि योगिनो योगसाधने ॥ ४६ ॥
अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम् ।
क्षमा धृतिर्मिताहारः शौचं चेति यमा दश ॥ ४७ ॥
तपः सन्तोषमास्तिक्यं दानं देवस्य पूजनम् ।
सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो हुतम् ॥ ४८ ॥

दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः ।
पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा ॥ ४९ ॥
वीरासनमिति प्रोक्तं क्रमादासनपञ्चकम् ।
ऊर्वोरुपरि विन्यस्य सम्यक् पादतले उभे ॥ ५० ॥
अङ्गुष्ठौ च निबध्नीयाद् हस्ताभ्यां व्युत्क्रमात् ततः ।
पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम् ॥ ५१ ॥
जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे ।
ऋजुकायो वसेद्योगो स्वस्तिकं तत्प्रचक्षते ॥ ५२ ॥
सीवन्याः पार्श्वयोर्न्यस्येद् गुल्फयुग्मं सुनिश्चलम् ।
वृषणाधः पादपार्ष्णि पाणिभ्यां परिबन्धयेत् ॥ ५३ ॥
भद्रासनं समुद्दिष्टं योगिभिः परिकीर्तितम् ।
ऊर्वोः पादौ क्रमान्न्यस्य जान्वोः प्रत्यङ्मुखाङ्गुली॥ ५४ ॥
करौ निदध्यादाख्यातं वज्रासनमनुत्तमम् ।
एकं पादमधः कृत्वा विन्यस्योरावथेतरम् ॥ ५५ ॥
ऋजुकायो वसेद्योगी वीरासनमितीरितम् ।

योग और योगाङ्गों का वर्णन—ईश्वर ने कहा—हे पार्वति! तुम्हारे प्रेम के कारण मैं तुमको बतला रहा हूँ क्योंकि तुम योग के योग्य हो । संसार से पार होना मुक्ति है और 'योग' शब्द से यही कही जाती है । योग ही ललिता देवी है—यह निश्चित रूप से जानो । योग न तो आकाश के पीछे, न ही पृथ्वी पर और न रसातल में रहता है । जीवात्मा और परमात्मा की एकता को ही योगविशारद लोग योग कहते हैं । काम क्रोध लोभ मोह मद और मात्सर्य ये छह पृथक-पृथक अथवा उनका समूह, ये सब योग के विघ्नकारक हैं । अधोलिखित योगाङ्गो के द्वारा इनको जीतकर योगी लोग योग को प्राप्त किये । यम निमय आसन प्राणायाम प्रत्याहार धारणा ध्यान और समाधि इन आठ अङ्गों को योगीलोग योगसाधन के विषय में अङ्ग मानते हैं ।

१. यम—अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य, दया, सरलता, क्षमा, धैर्य, सीमित आहार और शौच ये दश यम कहे जाते हैं ।

२. नियम—तप, सन्तोष, आस्तिक्य, दान, देवता का पूजन, शास्त्रीय सिद्धान्तों का श्रवण, लज्जा, मनन, जप और होम, योगशास्त्रविशारदों ने इन्हें नियम कहा है ।

३. आसन—पद्मासन, स्वस्तिकासन, भद्रासन, वज्रासन तथा वीरासन—ये पाँच आसन कहे गये हैं । (इनका विशेष विवरण निम्नलिखित है—) दोनों जाँघों के ऊपर पैर के दोनों तलुवों को भली प्रकार रखकर दोनों हाथों से पीछे की ओर दोनों अङ्गूठों को पकड़ना पद्मासन कहा गया है । यह योगियों का अत्यन्त प्रिय आसन है । दोनों पादतलों को जाँघों और घुटनों के अन्तर भली-भाँति घुसाकर रखता हुआ योगी शरीर को सीधा रखता है तो इसे लोग स्वस्तिक आसन कहते हैं । सीवनी (= लिङ्गमणि का सन्धिशोथ) के दोनों ओर दोनों गुल्फों (= टखनों) को स्थिर रूप से रखना एवं पैरों की एड़ियों को अण्डकोष के नीचे दोनों हाथों से बाँध देना, योगियों ने इसे भद्रासन कहा है । दोनों पैरों को क्रम से दोनों जाँघों पर रखकर घुटनों पर हाथों को उनकी उँगलियों के साथ उल्टा कर रखें । यह उत्तम वज्रासन है । जब एक पैर को नीचे कर दूसरे पैर को उरु के ऊपर रखने के साथ शरीर को सीधा रख कर योगी लेटता है तो यह वीरासन कहा गया है ॥ ४१-५५- ॥

इडया कर्षयेद्वायुं बाह्यं षोडशमात्रया ॥ ५६ ॥
धारयेत् पूरितं योगी चतुःषष्ट्या च मात्रया ।
सुषुम्नामध्यगं सम्यग् द्वात्रिंशन्मात्रया शनैः ॥ ५७ ॥
नाड्या पिङ्गलया चैवं रेचयेद्योगवित्तमः ।
प्राणायाममिमं प्राहुर्योगशास्त्रविशारदाः ॥ ५८ ॥
भूयोभूयः क्रमात्तस्य व्यत्यासेन समाचरेत् ।
मात्रावृद्धिक्रमेणैव सम्यग् द्वादश षोडश ॥ ५९ ॥
जपध्यानादिभिर्युक्तं सगर्भं तद्विदुर्बुधाः ।
त(दु?द)पेतं विगर्भं च प्राणायामं परं विदुः ॥ ६० ॥
क्रमादभ्यसतः पुंसो देहे स्वेदोद्गमोऽधमः ।
मध्यमः क(ल्प?म्प)संयुक्तो भूमित्यागः परो मतः ॥ ६१ ॥
उत्तमस्य गुणावाप्तिर्यच्छीलनकमिष्यते ।
इन्द्रियाणां विचरतां विषयेषु निराकुलम् ॥ ६२ ॥
बलादाहरणं तेभ्यः प्रत्याहारोऽयमीरितः ।
अङ्गुष्ठगुल्फजानुषु सी(म?व)नीलिङ्गनाभिषु ॥ ६३ ॥
हृद्ग्रीवाकण्ठदेशेषु लम्बिकायां ततो नसि ।
भ्रूमध्ये स्तनके मूर्ध्नि द्वादशान्ते यथाविधि ॥ ६४ ॥
धारणं प्राणमरुतोर्धारणेति निगद्यते ।
समाहितेन मनसा चैतन्यान्तरवर्तिना ॥ ६५ ॥

आत्मन्यभीष्टदेवानां ध्यानं ध्यानमिहोच्यते ।
समत्वभावना नित्यं जीवात्मपरमात्मनोः ॥ ६६ ॥
समाधिमाहुर्मुनयः प्रोक्तमष्टाङ्गलक्षणम् ।
इति ते कथितं देवि कामादिषट्कनाशनम् ॥ ६७ ॥
दुर्लभं विषयासक्तैः सुलभं संयमात्मनाम् ।

४. प्राणायाम[1]—योगी जब इडा नाडी के द्वारा सोलह मात्रा से बाह्य वायु को अन्दर खींचता है और चौंसठ मात्रा से उसे अन्दर रोकता है तथा पिङ्गला नाडी के द्वारा बत्तीस मात्रा से धीरे-धीरे बाहर छोड़ता है तो इसे योगशात्र विशारदजन प्राणायाम कहते हैं । इस प्राणायाम का बार-बार उलट फेर करके अभ्यास करना चाहिये । इसकी मात्रा बारह या सोलह मात्रा के क्रम से बढ़ाई जानी चाहिये (अर्थात् सोलह मात्रा के स्थान पर १६ + १२ = २८ मात्रा इसी प्रकार ६४ + १२ = ७२ करना चाहिये । इसी प्रकार १६ मात्रा से बढ़ाना चाहिये ।) इसे एक बार से प्रारम्भ कर क्रमशः बढ़ाते हुए बारह बार अथवा सोलह बार करना चाहिये । यह प्राणायाम यदि जप ध्यान आदि से युक्त होता है तो उसे विद्वान् लोग सगर्भ प्राणायाम मानते हैं और उनसे रहित को विगर्भ कहते हैं । इस प्राणायाम का क्रमशः अभ्यास करने वाले पुरुष के शरीर में पसीना होने लगता है । यह अधम कोटि का प्राणायाम है । मध्यम प्राणायाम में शरीर में कम्पन होती है और प्राणायाम करने के समय यदि योगी भूमि को छोड़कर ऊपर उठ जाय तो यह उत्तम प्राणायाम होता है । उत्तम प्राणायाम में गुणों की जो प्राप्ति होती है उसे शीलनक कहते हैं ।

५. प्रत्याहार—विषयों में स्वच्छन्द विचरण करने वाली इन्द्रियों को बलपूर्वक उनके विषयों से हटाना प्रत्याहार कहा जाता है ।

६. धारणा—अङ्गूठा गुल्फ जानु सीवनी लिङ्ग नाभि हृदय ग्रीवा कण्ठ लम्बिका नासिका भ्रूमध्य स्तनक (= ललाट?) शिर तथा द्वादशान्त में प्राणवायु को विधिवत् धारण करना धारणा कही जाती है ।

७. ध्यान—एकाग्र एवं चैतन्यान्तरवर्ती मन के द्वारा अपने अन्दर अभीष्ट देवता का चिन्तन ध्यान कहलाता है ।

८. समाधि—जीवात्मा और परमात्मा में नित्य समत्व भावना को मुनिलोग समाधि कहते हैं । हे देवि! इस प्रकार तुमको काम आदि छह रिपुओं का नाश

---

१. इसके अनेक प्रकार योगोपनिषदों में वर्णित हैं ।

करने वाला, विषयी लोगों के द्वारा दुर्लभ और संयमी लोगों के द्वारा सुलभ, अष्टाङ्गयोग बतलाया गया ॥ ५६-६७- ॥

समाधिस्वरूपवर्णनम्

समाधिः संविदुत्पत्तिः परजीवैकतां प्रति ॥ ६८ ॥
यदि जीवः पराद्भिन्नः कार्य्यतामेति सुव्रते ।
(स्व?अ)चित्त्वं च प्रसज्येत घटवत् परमेश्वरि ॥ ६९ ॥
विनाशित्वं भयं चैव
द्वि(त?ती)या(वि?दि)ति ते श्रुतिः ।
नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ॥ ७० ॥
एकः सन् विद्यते भ्रान्त्या मायया न स्वरूपतः ।
तस्माद् द्वैतं न मे चास्ति न प्रपञ्चो न सं(स्मृ?सृ)तिः॥ ७१ ॥
यथाकाशो घटाकाशो महाकाश इतीरितः ।
तथा भ्रान्तिर्द्विधा प्रोक्ता ह्यात्मजीवेश्वरात्मना ॥ ७२ ॥
नाहं देहो न च प्राणो नेन्द्रियाणि तथैव च ।
न मनो नैव बुद्धिश्च नैव चित्तमहंकृतिः ॥ ७३ ॥
नाहं पृथ्वी न सलिलं न च वह्निस्तथानिलः ।
न चाकाशो न शब्दश्च न च स्पर्शस्तथा रसः ॥ ७४ ॥
नहि गन्धो न रूपं च न मायाहं न संसृतिः ।
सदा साक्षिस्वरूपत्वाद् ब्रह्म चैवास्मि केवलः ॥ ७५ ॥
सोऽहं ब्रह्म न संसारी न मत्तोऽन्यत् कदाचन ।
इति विद्यात् स्वमात्मानं समाधिः परिकीर्तितः ॥ ७६ ॥

समाधि के स्वरूप का वर्णन—परमात्मा और जीवात्मा के ऐक्य की संवित् अर्थात् भावना की उत्पत्ति समाधि कही जाती है । हे सुव्रते! यदि जीवात्मा परमात्मा से भिन्न है तो वह कार्य माना जायगा और फिर हे परमेश्वरि! वह घट के समान अचित् (= जड़) हो जायगा । तब वह विनाशी और भयवाला होने लगेगा क्योंकि द्वितीय से भय होता है—यह तुम्हारी श्रुति[1] है । इसलिये जीवात्मा नित्य सर्वव्यापी कूटस्थ[2] एवं दोषरहित है । वह एक होता हुआ भी माया के कारण भ्रमवश भिन्न प्रतीत होता है । स्वरूपतः वह भिन्न नहीं है । इसलिये मेरे

---

१. द्वितीयाद् वै भयं भवति । बृ.उ. १।४।२
२. कूट इव तिष्ठति इति कूटस्थः अर्थात् कूट (= लोहार की निहाई) के समान अपरिवर्तनशील रहता है ।

अन्दर न द्वैत है, न प्रपञ्च और न संसार । जिस प्रकार एक ही आकाश घटाकाश और महाकाश (के रूप में भिन्न) कहा जाता है उसी प्रकार भ्रान्ति जीवात्मा और परमात्मा के भेद से दो प्रकार की कही गयी है । मैं न देह हूँ न प्राण न इन्द्रियाँ न मन, न बुद्धि न चित्त और न अहङ्कार । न मैं पृथ्वी हूँ न जल न अग्नि न वायु और न आकाश । न मैं शब्द हूँ न स्पर्श न रस न गन्ध और न रूप । न मैं माया हूँ न संसार । मैं सर्वदा साक्षीस्वरूप होने के कारण केवल ब्रह्म हूँ । वह मैं ब्रह्म संसारी नहीं हूँ । मुझसे अन्य कोई नहीं है । इस प्रकार जो अपने को जानता है वह समाधि वाला कहा जाता है ॥ ६८-७६ ॥

समाधौ स्वस्वरूपोऽसौ तुरीयस्वर एव हि ।
तुरीयांशः पराशक्तिर्बिन्द्वात्मा ब्रह्म केवलम् ॥ ७७ ॥
प्रज्ञात्मानं वदन्त्येके एकेऽपि ब्रह्म केवलम् ।
जीवमीश्वरभावेन विद्यात् सोऽहमिति ध्रुवम् ॥ ७८ ॥
यथा फेनतरङ्गादि समुद्रादुत्थितं पुनः ।
समुद्रे लीयते तद्वज्जगदात्मनि (प्र)लीयते ॥ ७९ ॥
यस्यैवं परमात्मा(स?स्वा)-पृथग्भूतःप्रकाशितः।
स याति परमं भावं स्वयं साक्षात् परामृतम् ॥ ८० ॥
यदा मनसि चैतन्यं भाति सर्वात्मकं सदा ।
योगिनोऽव्यवधानेन तदा सम्पद्यते स्वयम् ॥ ८१ ॥
यदा भूतानि सर्वाणि स्वात्मन्येवाभिपश्यति ।
सर्वभूतेषु चात्मानं ब्रह्म सम्पद्यते (स?त) दा ॥ ८२ ॥
यदा सर्वाणि भूतानि समाधिस्थो न पश्यति ।
एकीभूतः परेणासौ तदा भवति केवलः ॥ ८३ ॥
यदा जन्मजरादुःखव्याधीनामेव भेषजम् ।
केवलं ब्रह्मविज्ञानं जायतेऽसौ तदा शिवः ॥ ८४ ॥
तस्माद्विज्ञानतो मुक्तिर्नान्यथा भवकोटिभिः ।
मन्त्रौषधिबलैर्यद्वज्जीर्यते भक्षितं विषम् ॥ ८५ ॥
तद्वत् सर्वाणि कर्माणि जीर्यन्ति ज्ञानिनः क्षणात्।
देहाभिमाने गलिते विदिते परमात्मनि ॥ ८६ ॥
यत्र यत्र मनो याति तत्र तत्र समाधयः ।

समाधि अवस्था में यह योगी अपने स्वरूप में स्थित हो जाता है । यह चतुर्थ स्वर (= ह्रस्व दीर्घ प्लुत की अपेक्षा सूक्ष्मतर) होता है । यह तुरीयांश

पराशक्ति बिन्दुस्वरूप केवल ब्रह्म होता है । कुछ लोग इस अवस्था को प्रज्ञास्वरूप मानते हैं । दूसरे लोग इस स्थिति को केवल ब्रह्म मानते हैं । साधक को चाहिये कि वह जीव को ईश्वर समझे । उस अवधारणा का स्वरूप है— सोऽहम् (= वह मैं हूँ/मैं वह हूँ) । जिस प्रकार समुद्र में उठने वाले फेन लहर इत्यादि पुनः समुद्र में ही लीन हो जाते हैं उसी प्रकार यह जगत् आत्मतत्त्व (से प्रकट होता है और उसी में) लीन हो जाता है । जिस साधक को इस प्रकार परमात्मा अपने से अपृथक् प्रतीत होता है, वह परम भाव को प्राप्त होता है । वह स्वयं साक्षात् परम अमृत हो जाता है । जब योगी के मन में चैतन्य अव्यवहित रूप से विश्वरूप से आभासित होने लगता है तब वह स्वभाव को प्राप्त हो जाता है । योगी जब समस्त प्राणियों को अपने में तथा अपने को समस्त प्राणियों में देखता है तब वह ब्रह्म हो जाता है ।[१] योगी समाधिस्थ होने पर जब समस्त प्राणियों को नहीं देखता तब वह परतत्त्व के साथ एक हो जाता है । तब वह केवली होता है । जब उसका ब्रह्मविज्ञान केवल जन्म वृद्धत्व दुःख और व्याधि की औषधि बनकर रह जाता है तब वह योगी साक्षात् शिव स्वरूप हो जाता है । इस कारण ब्रह्म विज्ञान से ही मोक्ष लाभ होता है, करोड़ों बार संसार में जन्म लेने से नहीं । जिस प्रकार खाया हुआ विष मन्त्र तथा औषधि के बल से पच जाता है (और खाने वाले की मृत्यु नहीं होती) उसी प्रकार ज्ञानी के समस्त (सञ्चित) कर्म (ज्ञान के प्रभाव से) नष्ट हो जाते हैं (और ज्ञानी उनके संस्कार से प्रभावित नहीं होता) । जब देहाभिमान (अर्थात् यह देह ही मैं हूँ अथवा यह मेरा शरीर है इस प्रकार की धारणा) समाप्त हो जाता है तथा परमात्मा का साक्षात्कार हो जाता है तब जहाँ-जहाँ मन जाता है वहाँ-वहाँ उसके लिये समाधि हो जाती है ॥ ७७-८६- ॥

अहं ब्रह्म न चान्योऽस्मि मुक्तोऽहमिति भावयेत् ॥ ८७ ॥
सच्चिदानन्दरूपोऽहं नित्यं मुक्तस्वभाववान् ।
एवं समाधियुक्तो य समाधये स कल्पते ॥ ८८ ॥
सदाशिवोऽहमित्युक्त्वा स्वेच्छया विहरेद्यतिः ।
लिप्यते न स पापेन बध्यते न च कर्मणा ॥ ८९ ॥
यथाग्निविद्रुतं स्वर्णं मालिन्यं दहति क्षणात् ।
तथा ब्रह्मार्पितात्मासौ सर्वकर्माणि दह्यति ॥ ९० ॥
आत्मस्थां देवतां त्यक्त्वा बहिर्देवान्विचिन्वते ।
करस्थं कौस्तुभं त्यक्त्वा भ्रमते(?न्ते) काचतृष्णया॥ ९१ ॥

---

१. तुलनीय—सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ भ.गी. ६।२९

न योगेन न यन्त्रेण न मन्त्रेण विना हि सः (?) ।
द्वयोरभ्यासयोगेन ब्रह्म संसिद्धिकारणम् ॥ ९२ ॥
तमःपरिवृते गेहे घटो दीपेन दृश्यते ।
एवं मायावृतो ह्यात्मा मनुना गोचरीकृतः ॥ ९३ ॥
एतत्ते कथितं देवि ब्रह्मज्ञानमिदं महत् ।
विज्ञाय गुरुतो जप्त्वा संसारसागरं तरेत् ॥ ९४ ॥
यत्र यत्र मृतश्चायं गङ्गायां श्वपचालये ।
ब्रह्मविद् ब्रह्मभूयाय कल्पते नान्यथा प्रिये ॥ ९५ ॥

योगी को चाहिये कि वह—'मैं ब्रह्म हूँ दूसरा नहीं, मैं मुक्त हूँ' ऐसी भावना करता रहे । 'मैं सच्चिदानन्दरूप हूँ नित्य मुक्त स्वभाव वाला हूँ' इस प्रकार की समाधि से जो युक्त होता है वह समाधि लगाने में समर्थ होता है । 'मैं सदाशिव हूँ' ऐसा कहकर जो यति स्वेच्छापूर्वक विहार करता है वह न तो पाप से लिप्त होता है और न कर्म के कारण बन्धन में पड़ता है । जिस प्रकार अग्नि में पिघलाया गया सोना एक क्षण में अशुद्धि को जला देता है उसी प्रकार अपने को ब्रह्म के लिये समर्पित करने वाला यह यति सारे कर्मों को जला देता है । अपने अन्दर स्थित देवता को छोड़कर जो लोग बाहरी देवता की आराधना करते हैं वे हाथ में स्थित कौस्तुभमणि को छोड़कर शीशा को प्राप्त करने के लिये इधर-उधर भटकते हैं । योग यन्त्र और मन्त्र के विना वह योगी ब्रह्मज्ञान प्राप्त नहीं कर सकता । किन्तु (मन्त्र और ध्यान) दोनों के अभ्यास से सिद्धि मिलती है । अन्धकार से भरे घर में घट को दीपक से देखा जाता है । इसी प्रकार माया से आवृत आत्मा का साक्षात्कार मन्त्र से होता है । हे देवि! तुमको यह महान् ब्रह्मज्ञान बतलाया । गुरु से मन्त्र की दीक्षा लेकर उसका जप कर साधक संसारसागर के पार जाता है । हे प्रिये! यह जापक चाहे गङ्गा में प्राणत्याग करे अथवा चाण्डाल के घर में, ऐसा ब्रह्मवेत्ता ब्रह्म हो जाता है । अन्य उपायों से ऐसा नहीं होता ॥ ८७-९५ ॥

शरीरस्थनाडीषट्चक्रवर्णनम्

विश्वं शरीरमित्युक्तं पञ्चभूतात्मकं प्रिये ।
चन्द्रसूर्याग्नितेजोभिर्जीवब्रह्मैकरूपकम् ॥ ९६ ॥
तिस्र कोट्यस्तदर्धेन शरीरे नाडयो मताः ।
तासु मुख्या दश प्रोक्तास्तासु तिस्रो व्यवस्थिताः॥ ९७ ॥
प्रधाना मेरुदण्डेऽत्र चन्द्रसूर्याग्निरूपिणी ।
शक्तिरूपा तु सा नाडी साक्षादमृतविग्रहा ॥ ९८ ॥

इडा वामे स्थिता नाडी शुक्ला तु चन्द्ररूपिणी।
पिङ्गलाख्या च या दक्षे पुंरूपा सूर्यविग्रहा ॥ ९९ ॥
दाडिमीकुसुमप्रख्या विषाख्या चापरा मता।
मेरुमध्यस्थिता या तु मूलादाब्रह्मरन्ध्रगा ॥ १०० ॥
सर्वतेजोमयी सा तु सुषुम्ना वह्निरूपिणी।
तस्या मध्ये विचित्राख्या अमृतस्राविणी शुभा ॥ १०१ ॥
सर्वदेवमयी सा तु योगिनां हृदयङ्गमा।
विसर्गाद्बिन्दुपर्यन्तं व्याप्य तिष्ठति तत्त्वतः ॥ १०२ ॥

शरीरस्थ नाडी एवं षट्चक्र का वर्णन—हे प्रिये! यह पञ्चभूतनिर्मित शरीर ही विश्व कहा जाता है। चन्द्र सूर्य अग्नि रूप तेज से समन्वित यह जीवरूपी ब्रह्म वाला है। इस शरीर में साढ़े तीन करोड़ नाड़ियाँ स्थित मानी गयी हैं। उनमें दश मुख्य हैं। उन दश में भी तीन सर्वप्रमुख हैं। इनमें सर्वप्रधान नाडी मेरुदण्ड में स्थित है। ये तीनों नाड़ियाँ चन्द्र सूर्य और अग्नि रूप हैं। वह अर्थात् सुषुम्ना नाड़ी शक्तिरूपा है। जो साक्षात् अमृतरूपा है वह इडा नाडी मेरुदण्ड के बायें भाग में स्थित है। यह नाडी शुक्ल वर्ण की तथा चन्द्ररूपिणी है। पिङ्गला नाडी जो कि मेरुदण्ड के दायें पार्श्व में स्थित है, पुरुषरूपा तथा सूर्यविग्रहा है। यह अनार के फूल के रंग की है। दूसरी अर्थात् पिङ्गला नाडी साक्षात् विष कही गयी है। जो मेरु के अन्दर स्थित है तथा मूलाधार से ब्रह्मरन्ध्र तक जाती है; सर्वतेजोमयी वह सुषुम्ना है जो कि अग्निरूपिणी है। उस सुषुम्ना के मध्य में एक विचित्रा नाम की नाडी है। यह अमृतस्राव करने वाली शुभ नाडी सर्वदेवमयी और योगियों की अत्यन्त प्रिय है। यह विसर्ग से लेकर बिन्दु पर्यन्त व्याप्त होकर विराजमान है ॥ ९६-१०२ ॥

मूलाधारे त्रिपुराख्ये इच्छाज्ञानक्रियात्मके।
मध्ये स्वयम्भूलिङ्गं तु कोटिसूर्यसमप्रभम् ॥ १०३ ॥
तदूर्ध्वे तत्तुरीयं तु ध्यायेद्बन्धूकसन्निभम्।
तदूर्ध्वे तच्छिखाकारा कुण्डली रक्तविग्रहा ॥ १०४ ॥
सा एव हि परा सूक्ष्मा महात्रिपुरसुन्दरी।
चैतन्यं सर्वभूतानां शब्दब्रह्म यदुच्यते ॥ १०५ ॥

इच्छा-ज्ञान-क्रियात्मक त्रिपुर नामक मूलाधार के मध्य में कोटिसूर्य के समान कान्ति वाला स्वयम्भू लिङ्ग है। उस लिङ्ग के ऊपर तुरीय (= इच्छा ज्ञान क्रिया से परे चतुर्थ) रूप का ध्यान करना चाहिये। इसका रंग बन्धूक के समान है। उसके ऊपर उसकी शिखा के आकार वाली कुण्डलिनी शक्ति है जिसका शरीर

रक्तवर्ण का है । वही परा सूक्ष्मा महात्रिपुरसुन्दरी है । यही समस्त प्राणियों का चैतन्य और शब्दब्रह्म कही जाती है ॥ १०३-१०५ ॥

तत्प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम् ।
सर्वतेजोमयं तत्तु सच्चिदानन्दमव्ययम् ॥ १०६ ॥
तद्बाह्ये हेमवर्णाभं (रं?व)सवर्णं चतुर्दलम् ।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ॥ १०७ ॥
तदूर्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् ।
बादिलान्तषडर्णेन युक् स्वाधिष्ठानसंज्ञकम् ॥ १०८ ॥
मूलमाधारषट्कानां मूलाधारं ततो विदुः ।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥ १०९ ॥
तदूर्ध्वे नाभिदेशे तु मणिपूरं महत् पुरम् ।
हेमाभं वैद्युताभं च बहुतेजोमयं तथा ॥ ११० ॥
मणिवद्भिन्नं तत्पूरं मणिपूरं ततो विदुः ।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ॥ १११ ॥
विष्णुनाधिष्ठितं पद्मं विश्वालोकनकारणम् ।

उस चैतन्य भूत शब्दब्रह्म को प्राप्त कर अपने शरीर में उसकी भावना करनी चाहिये । वह इस प्रकार—वह चैतन्य प्राणियों के देह के मध्यभाग में अर्थात् लिङ्ग के ऊपर और नाभि के नीचे कुण्डलिनी रूप में स्थित है। वह सर्वतेजोमय, सच्चिदानन्द स्वरूप और अव्यय है । उसके बाहर अर्थात् ऊपर सोने के रंग का चार दलों वाला कमल है । जिसके दलों पर वस अर्थात् व श ष स चार वर्ण स्थित हैं । (इसे मूल आधार कहते हैं) । उसके ऊपर अग्नि के समान आभा वाले छह दलों से युक्त हीरे जैसी चमक वाला कमल है । इसके छह दलों में बादिलान्त अर्थात् ब भ म य र ल ये छह वर्ण स्थित हैं । इस कमल का नाम स्वाधिष्ठान चक्र है । पूर्ववर्णित चक्र चूँकि सारे आधार भूत छह चक्रों का मूल है अतः उसे मूलाधार चक्र कहते हैं । स्व-अधिष्ठान पद में 'स्व' का अर्थ है—परलिङ्ग । चूँकि यह चक्र परलिङ्ग का अधिष्ठान अर्थात् स्थितिस्थल है अतः उसे विद्वान् लोग स्वाधिष्ठान के नाम से जानते है । इसका स्थितिस्थान मूत्राशय के पास नाभि के नीचे पेल्विक प्रदेश है । उसके ऊपर नाभि प्रदेश में मणिपूर नामक महापुर है । यह सोने जैसी आभा वाला साथ ही विद्युत् की कान्ति से युक्त अत्यन्त तेजोमय स्थान है । चूँकि यह मणि के समान भिन्न अर्थात् अन्य चक्रों से पृथक् तथा कठिनाई से भेदन करने योग्य है अतः इसको मणिपूर कहा जाता है । यह चक्र दश दलों वाले कमल से युक्त है और उन दलों पर ड ढ

ण त थ द ध न प और फ—ये दश वर्ण हैं। इस कमल पर विष्णु विराजमान हैं। यह विश्वदर्शन का कारण है अर्थात् इस चक्र का भेदन करने पर योगी को सम्पूर्ण विश्व का करामलकवत् साक्षात्कार होता है ॥ १०६-१११- ॥

तदूर्ध्वेऽनाहतं पद्ममुद्यदादित्यसन्निभम् ॥ ११२ ॥
कादिठान्ताक्षरैरर्कपत्रैश्च समलंकृतम् ।
तन्मध्ये बाणलिङ्गं तु सूर्यायुतसमप्रभम् ॥ ११३ ॥
शब्दब्रह्ममयः शब्दोऽनाहतस्तत्र दृश्यते ।
अनाहताख्यं तत्पद्मं योगिभिः परिकीर्त्यते ॥ ११४ ॥
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ।
तदूर्ध्वे तु विशुद्धाख्यं दलैः षोडशभिर्युतम् ॥ ११५ ॥
स्वरैः षोडशकैर्युक्तं धूम्रवर्णं महत्प्रभम् ।
विशुद्धिं तनुते यस्माज्जीवस्य हंसलोकनात् ॥ ११६ ॥
विशुद्धं पद्ममाख्यातमाकाशाख्यं महाद्भुतम् ।
आज्ञाचक्रं तदूर्ध्वे तु आत्मनाधिष्ठितं परम् ॥ ११७ ॥
हक्षादिद्विदलं पद्मं चन्द्रेणाधिष्ठितं तु तत् ।
आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्तितम् ॥ ११८ ॥
कैलासाख्यं तदूर्ध्वे तु बोधिनी तु तदूर्ध्वतः ।
सहस्राराम्बुजं देवि बिन्दुस्थानं तदूर्ध्वतः ॥ ११९ ॥

उस मणिपूर के ऊपर अनाहत चक्र है जो कि उगते हुए सुर्य के समान अत्यन्त अरुण वर्ण का है। यहाँ जो कमल है वह क ख ग घ ङ च छ ज झ ञ ट और ठ इन बारह अक्षरों वाला है। इस अनाहत चक्र के मध्य में दश हजार सूर्य के समान प्रभा वाला बाणलिङ्ग है। वहाँ अनाहत शब्दब्रह्म स्थित है। उस कमल चक्र को योगी लोग अनाहत कहते हैं। वह आनन्द का आगार एवं पुरुष अर्थात् ईश्वर से अधिष्ठित है। उसके ऊपर विशुद्ध नामक चक्र है जो षोडश दल कमल वाला है। उसके दलों में सोलह स्वर (= अ आ.........अं अः) रहते हैं। इसका रंग धूम जैसा है तथा यह महाकान्ति वाला है। चूँकि हंस अर्थात् सूर्य का अवलोकन करने से यह जीव की विशुद्धि का विस्तार करता है अतः इसे विशुद्ध पद्म कहा गया है। यह महा अद्भुत आकाश तत्त्व है। इसके ऊपर आज्ञाचक्र है। जिसका अधिष्ठाता आत्मा है। यहाँ द्विदल पद्म है। (ऊपर नीचे दल वाले) इस पद्म के दोनो दलों में ह और क्ष वर्ण स्थित है। यह कमल चन्द्र से अधिष्ठित है। यहाँ जो आज्ञा का संक्रमण होता है वह गुरु की

आज्ञा होती है। आज्ञा चक्र के ऊपर कैलास और उसके ऊपर बोधिनी स्थित है। हे देवि! उसके ऊपर सहस्र दल कमलों वाला बिन्दु स्थान है ॥ ११२-११९ ॥

योनिमुद्राबन्धवर्णनम्

आदौ पूरकयोगेन स्वाधारे योजयेन्मनः ।
गुदमेढ्रान्तरे शक्तिं तामाकुञ्च्य प्रबोधयेत् ॥ १२० ॥
लिङ्गभेदक्रमेणैव बिन्दुस्थानं समानयेत् ।
शम्भुना तां परां शक्तिमेकी(भाव? भूतां) विचिन्तयेत्॥ १२१ ॥
तदुद्भवामृतं वक्त्रद्रुतं लाक्षारसोपमम् ।
पाययित्वा च तां शक्तिं परोक्षां योगसिद्धिदाम् ॥ १२२ ॥
षट्चक्रदेवतास्तत्र सन्तर्प्यामृतधारया ।
आनयेत्तेन मार्गेण मूलाधारं पुनः सुधीः ॥ १२३ ॥
यातायातक्रमेणैव तत्र कुर्यान्मनोलयम् ।
एवमभ्यस्यमानं तु अहन्यहनि पार्वति ॥ १२४ ॥
जरामरणदुःखाद्यैर्मुच्यते भवबन्धनैः ।
इत्युक्तं परमं योगं योनिमुद्राप्रबन्धनम् ॥ १२५ ॥

योनिमुद्रा बन्धन—सबसे पहले पूरक प्राणायाम के द्वारा मन को मूलाधार में लगाना चाहिये। फिर उस शक्ति को गुदा और लिङ्ग के बीच सङ्कुचित कर उसका प्रबोधन करना चाहिये। फिर लिङ्गभेद के क्रम से उस शक्ति को ऊपर बिन्दुस्थान में ले जाना चाहिये। फिर वह शक्ति शिव के साथ अभिन्न हुई है—ऐसी भावना करनी चाहिये। तत्पश्चात् उस योग के कारण उसके मुख से द्रुत अमृत, जो कि लाक्षारस के समान है, को उस योगसिद्धिदायिनी शक्ति को पिलाने के बाद अमृतधारा से छह चक्रों में स्थित देवताओं को तृप्त कर जिस मार्ग से शक्ति को बिन्दु तक ले जाया गया था उसी मार्ग में विद्वान् पुनः उसको मूलाधार तक ले आये। इस पद्धति से बार-बार कुण्डलिनी शक्ति को मूलाधार से बिन्दु और बिन्दु से मूलाधार तक यातायात कर उसमें मन को लीन कर देना चाहिये। हे पार्वति! इस प्रकार प्रतिदिन अभ्यास कर साधक संसार के बन्धन तथा जरा एवं मृत्यु से मुक्त हो जाता है। इस प्रकार तुमको योनिमुद्रा बन्ध नामक परमयोग बतलाया गया ॥ १२०-१२५ ॥

अन्यविधसमाधिवर्णनम्

अथापरं प्रवक्ष्यामि समाधिं भवनाशनम् ।
अथवा परमेशानि यथोक्तध्यानयोगतः ॥ १२६ ॥

हृत्पद्मकर्णिकामध्ये ध्यायेद्देवीमनन्यधीः ।
त्रिपुरात्मकमात्मानं भावयेन्न्यस्तविग्रहः ॥ १२७ ॥
ऐक्यं सम्भावयेन्नित्यं स्वगुरुदेवतात्मनाम् ।
अहं देवो न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ॥ १२८ ॥
सच्चिदानन्दरूपोऽहं शुद्धबुद्धस्वभाववान् ।
प्रणवं पूर्वमुद्धृत्य तदिति परतस्ततः ॥ १२९ ॥
सदिति तु समालोच्य कर्म कुर्याद्विचक्षणः ।
स्मरणात् कर्मणामाद्ये ब्रह्मभूयाय कल्पते ॥ १३० ॥
सर्वमङ्गलसम्पन्नो बहिर्निर्गत्य साधकः ।
त्य(क्त?क्त्वा)मूत्रपुरीषे च करपादौ विशोधयेत्॥ १३१ ॥
मुखं प्रक्षाल्य देवेशि नासारन्ध्रद्वयं ततः ।
नेत्राञ्जनं विधायैव शुद्धस्थानं समाश्रयेत् ॥ १३२ ॥
नेत्राञ्जनमकृत्वैव यः पश्येत् सौरमण्डलम् ।
जन्मार्जितफलं नश्येत् का कथा तस्य दुर्मतेः ॥ १३३ ॥
त्रितत्त्वेन त्रि(धा?रा)चम्य दन्तधावनमाचरेत् ।
दन्तकाष्ठम(था?खा)दित्वा पूजयेद्यस्तु देवताम् ॥ १३४ ॥
तत्पूजा विफला देवि मृते च नरकं व्रजेत् ।
क्लीमात्मकं कामदेवं सर्वान्ते जनमालिखेत् ॥ १३५ ॥
प्रियाय हृदयान्तोऽयं मनुर्दन्तविशुद्धये ।
चतुर्दशस्वरैर्वक्त्रं क्षालयेच्छुद्धिहेतवे ॥ १३६ ॥

॥ इति श्रीगन्धर्वतन्त्रे पार्वतीश्वरसंवादे कर्मयोगादिक्रमनिरूपण नामकः षष्ठः पटलः ॥ ६ ॥

अन्य प्रकार की समाधि का वर्णन—अब मैं जन्म एवं संसार की नाशक अन्य समाधि का वर्णन करूँगा । हे परमेशानि! दूसरा विकल्प यह है कि पूर्वोक्त ध्यानयोग के द्वारा हृदयकमल की कर्णिका के मध्य एकत्रित होकर साधक देवी अर्थात् शक्ति का ध्यान करे और अपना शरीर से पृथक शिव रूप में ध्यान करे । साथ ही अपना गुरु एवं देवता आदि से अभिन्न के रूप में ध्यान करे । ध्यान का स्वरूप इस प्रकार है—मैं देव हूँ दूसरा कुछ नहीं । मैं ब्रह्म नहीं हूँ,

सर्वभावात् परं तत्त्वमथर्व वेदपत्रकम् ॥ ६ ॥
द्विबिन्दुनिलयस्थानं ब्रह्मविष्णुशिवात्मकम् ।
चतुर्वेदान्वितं तत्त्वं शरीरं दृढनिर्मितम् ॥ ७ ॥

उसी पर वीरभाव तथा पशुभाव भी रहता है । इस प्रकार सबको उत्पन्न करने के

---

१. शूकसूत्रसदृशी—क० ।   २. विद्या—क० ख० ।
३. मृणालसूत्रेण कमलतन्तुना सदृशी ।

कारण वेद पत्र वाला यह अथर्व सबका तत्त्व है । वह दो बिन्दुओं के निलय का स्थान, ब्रह्मा, विष्णु, शिवात्मक यह शरीर तत्त्व चारों वेदों से युक्त है, इसकी रचना दृढ़तापूर्वक की गई है ॥ ६-७ ॥

चतुर्विंशतितत्त्वानि सन्ति गात्रे मनोहरे ।
ब्रह्मा रजोगुणाक्रान्तः पूरकेणाभिरक्षति ॥ ८ ॥
विष्णुः सत्त्वगुणाक्रान्तः[१] कुम्भकैः स्थिरभावनैः ।
हरस्तमोगुणाक्रान्तो रेचकेणापि विग्रहम् ॥ ९ ॥

इस मनोहर शरीर में चौबीस तत्त्व हैं, इसकी रक्षा रजोगुण से आक्रान्त ब्रह्मदेव पूरक प्राणायाम से करते हैं । सत्त्वगुण से आक्रान्त विष्णुदेव स्थिरभावना वाले कुम्भक प्राणायाम से तथा तमोगुण से आक्रान्त सदाशिव रेचक के द्वारा इस शरीर की रक्षा करते हैं ॥ ८-९ ॥

अथर्ववेदचक्रस्था कुण्डली परदेवता ।
एतन्माया तु यो नैव ब्रह्मविष्णुशिवेन च ॥ १० ॥
शरीरं देवनिलयं भक्तं ज्ञात्वा प्रवक्ष्यति ।
सर्ववेदमयी देवी सर्वमन्त्रस्वरूपिणी ॥ ११ ॥

कुण्डलिनी की महिमा—अथर्ववेद के चक्र पर रहने वाली कुण्डलिनी परा शक्ति हैं । यही माया है जो ब्रह्मा, विष्णु तथा शिव से अलग रहती है । यह शरीर देवताओं का निवास स्थान है, जिसे सर्वदेवमयी, सर्व मन्त्र स्वरूपिणी यह कुण्डलिनी अपने भक्त को ही प्रदान करती है ॥ १०-११ ॥

सर्वयन्त्रात्मिका विद्या वेदविद्याप्रकाशिनी ।
चैतन्या सर्वधर्मज्ञा स्वधर्मस्थानवासिनी ॥ १२ ॥
अचैतन्या ज्ञानरूपा हेमचम्पकमालिनी ।
अकलङ्का निराधारा शुद्धज्ञानमनोजवा ॥ १३ ॥

यह सर्व यन्त्रात्मिका है । यह विद्या है तथा वेद विद्या का प्रकाश इसी से होता है । यह चैतन्य है । यह सब प्रकार के धर्मो को जानने वाली है तथा अपने धर्मस्थान पर निवास करती है । यह अचैतन्या एवं ज्ञानरूपा है । यह सुवर्ण के समान पीत वर्ण की चम्पकमाला धारण करने वाली हैं और कलङ्क से रहित सर्वथा स्वच्छ एवं किसी के आधार पर न रहने वाली शुद्ध ज्ञान स्वरूपा तथा मन के समान वेगवती है ॥ १२-१३ ॥

सर्वसङ्कटहन्त्री च सा शरीरं प्रपाति हि ।
तस्याः कार्यमिदं विश्वं तस्याः पुण्यानि हन्ति हि ॥ १४ ॥
तस्याश्चैतन्यकरणे सदा व्याकुलचेतसः ।
महात्मानः प्रसिद्ध्यन्ति यदि कुर्वन्ति चेतनाम् ॥ १५ ॥

---

४. सत्त्वगुर्णराक्रान्तः ।

तस्या अनुग्रहादेव किं न [1]सिद्ध्यति भूतले ।
षण्मासाभ्यासयोगेन चैतन्या कुण्डली भवेत् ॥ १६ ॥

यह सारे सङ्कटों का विनाश करने वाली है । वही शरीर की रक्षा भी करती है, यह समस्त विश्व उसी का कार्य है, उसी के पुण्य इस विश्व का विनाश भी करते हैं । महात्मा लोग उसी को सचैतन्य बनाने के लिए सदा व्याकुल हो कर यत्न करते रहते हैं यदि उसे सचेतन बना लेते है । तब उसके अनुग्रह से इस भूतल पर क्या सिद्ध नहीं होता ? छः महीने निरन्तर अभ्यास करते रहने पर यह कुण्डलिनी चेतना प्राप्त करती है ॥ १४-१६ ॥

सा देवी वायवी शक्तिः परमाकाशवाहिनी ।
तारिणी वेदमाता च बहिर्याति दिने दिने ॥ १७ ॥
द्वादशाङ्गुलमानेन आयुः क्षरति नित्यशः ।
द्वादशाङ्गुलवायुश्च क्षयं कुर्याद्दिने दिने ॥ १८ ॥
यावद् यावद् बहिर्याति कुण्डली परदेवता ।
तावत्तावत्खण्डलयं भवेद्धि पापमोक्षणम् ॥ १९ ॥

यही वायवी शक्ति है जो सर्वदा परमाकाश में बहती रहती है । यह तारने वाली है । वेदों की जननी है तथा प्रतिदिन (शरीर के) बाहर जाती रहती है । मनुष्य की आयु १२ अंगुल के प्रमाण से नित्य संक्षरण करती है । इसलिए पुरुष को चाहिए कि वह १२ अंगुल के वायु को नित्य क्षय करता रहे । यह पर देवता स्वरूपा, कुण्डलिनी, जब जब बाहर जाती है तब तब खण्डलय होता रहता है, और पाप से छुटकारा मिलता रहता है ॥ १७-१९ ॥

यदा यदा न क्षरति वायवी सूक्ष्मरूपिणी ।
बाह्यचन्द्रे महादेव आग्नेयी सोममण्डले ॥ २० ॥
मूलाधारे कामरूपे ज्वलन्ती चण्डिका शिखा ।
यदा शिरोमण्डले च सहस्रदलपङ्कजे ॥ २१ ॥
तेजोमयी सदा याति शिवं कामेश्वरं प्रभुम् ।
अच्युताख्यं महादेवं तदा ज्ञानी स योगिराट् ॥ २२ ॥

हे महादेव ! जब यह सूक्ष्मरूपिणी अग्निदेवता वाली वायवी शक्ति वाह्य चन्द्र वाले सोम-मण्डल में संक्षरण नहीं करती तब तक कामरूप मूलाधार में यह चण्डिका बन कर शिखा के समान जलती रहती है। जब यह तेजोमयी शिरो मण्डल में स्थित सहस्त्र दल कमल में कामेश्वर सदाशिव अच्युत महादेव के समीप जाती है, तब साधक ज्ञानी एवं योगिराज बन जाता है ॥ २०-२२ ॥

यदि क्षरति सा देवी बाह्यचन्द्रे मनोलये ।
तदा योगं समाकुर्यात् यावत् शीर्षेण[2] गच्छति ॥ २३ ॥

---

१. किं न सिद्धयति, सर्व सिध्यति इति तात्पर्यम् ।

२. वैदिकोऽयं शब्दः क्वचिल्लोकेऽपि ।

यदि शीर्षे समागम्यामृतपानं करोति सा ।
वायवी सूक्ष्मदेहस्था सूक्ष्मालयप्रिया सती ॥ २४ ॥
तदेव[1] परमा सिद्धिर्भक्तिमार्गो न संशयः ।
चतुर्वेद ज्ञानसारं अथर्वं परिकीर्तितम् ॥ २५ ॥

जब यह देवी मन को लीन करने वाले बाह्य चन्द्र में क्षरण करती हैं तब योगारम्भ करना चाहिए, जिससे यह शिरः प्रदेश से सहस्त्र दल पङ्कज में गमन करे । यदि सूक्ष्म देह में रहने वाली सूक्ष्मालय प्रिया यह वायवी शक्ति शिरः स्थान के सहस्त्रदल पङ्कज में जाकर अमृत पान करती है, तभी साधक को परमा सिद्धि प्राप्त होती है । वही भक्ति मार्ग है । इसमें संशय नहीं । इसलिए अथर्व चारों वेदों के ज्ञान का सार कहा जाता है ॥ २३-२५ ॥

अथर्ववेदविद्या च देवता वायवी मता ।
तस्याः सेवनमात्रेण रुद्ररूपो भवेन्नरः ॥ २६ ॥
केवलं कुम्भकस्था सा एका ब्रह्मप्रकाशिनी ।

भैरव उवाच

केन वा वायवी शक्तिः[2] कृपा भवति पार्वति ॥ २७ ॥

अर्थव वेद विद्या की देवता वायवी शक्ति कही गई है । उसके सेवन मात्र से मनुष्य रुद्रस्वरूप बन जाता है । वह केवल कुम्भक प्राणायाम में अकेले रह कर ब्रह्मविद्या का प्रकाश करती है ॥ २६-२७ ॥

भैरव ने कहा—हे पार्वती ! यह वायवी शक्ति किससे उत्पन्न होती है और किस प्रकार कृपा करती है ? ॥ २७ ॥

स्थिरचेता भवेत् केन विवेकी वा कथं भवेत् ।
मन्त्रसिद्धिर्भवेत् केन कायसिद्धिः कथं भवेत् ॥ २८ ॥
विस्तार्य वद चामुण्डे आनन्दभैरवेश्वरी ।

आनन्दभैरवी उवाच

शृणुष्वैकमनाः शम्भो मम प्राणकुलेश्वर ॥ २९ ॥

साधक अपने चित्त को किस प्रकार स्थिर करता है ? और किस प्रकार विवेकी बनता है? किस प्रकार से मन्त्र की सिद्धि की जाती है तथा काय की सिद्धि कैसे होती है ? । हे आनन्द भैरवेश्वरि चामुण्डे ! विस्तार पूर्वक इसका वर्णन कीजिए । **आनन्द भैरवी ने कहा**—हे मेरे प्राणकुलेश्वर ! हे शम्भो ! अब सावधान होकर सुनिए ॥ २८-२९ ॥

एकवाक्येन सकलं कथयामि समासतः ।
श्रद्धया परया भक्त्या मनोनियमतत्परः ॥ ३० ॥

---

१. रूपिणी—ग० । २. आनन्दभैरव—ग० ।

स प्राप्नोति पराशक्तिं वायवीं [१]सूक्ष्मरूपिणीम् ।
धैर्यक्षमामिताहारी[२] शान्तियुक्तो यतिर्महान् ॥ ३१ ॥
सत्यवादी ब्रह्मचारी दयाधर्मसुखोदयः ।
मनसः संयमज्ञानी दिगम्बरकलेवरः ॥ ३२ ॥
सर्वत्र समबुद्धिश्च परमार्थविचारवित् ।
शरशय्या भूमितले वायवीं परमामृतम् ॥ ३३ ॥

वायवी सिद्धि का वर्णन—मैं आपके सभी प्रश्नों का संक्षेप में एक वाक्य से उत्तर दे रही हूँ । श्रद्धा एवं पराभक्ति से जो साधक अपने मन को नियम में तत्पर रखता है, वह सूक्ष्मरूपिणी वायवी पराशक्ति को प्राप्त कर लेता है । जो धैर्य धारण करने वाला क्षमावान् परिमित आहार करने वाला शान्ति युक्त, चित्त को संयम में रखने वाला महान् है । सत्यवादी, ब्रह्मचारी, दयावान् धर्मवान्, सुख पूर्वक अभ्युदय चाहने वाला, मन के संयम का उपाय जानने वाला, नग्न वेश में रहने वाला, सभी में समान बुद्धि रखने वाला, परमार्थ के विचार को जानने वाला, भूमितल पर अथवा चटाई पर सोने वाला साधक है वही वायवी परमामृत शक्ति को प्राप्त करता है ॥ ३०-३३ ॥

य एवं पिबति क्षिप्रं तत्रैव वायवी कृपा ।
गुरुसेवापरे धीरे [३] शुद्धसत्त्वतनुप्रभे ॥ ३४ ॥
भक्ते अष्टाङ्गनिरते वायवी सुकृपा भवेत् ।
अतिथिं भोजयेद्यस्तु न भुक्त्वा स्वयमेव च ॥ ३५ ॥

वायवी कृपा—जो इस प्रकार रह कर उस वायवी परमामृत का पान करता हैं उसी पर वायवी शक्ति की कृपा होती है, जो गुरु की सेवा में सर्वदा निरत रहने वाला धैर्यवान् शुद्ध सत्त्व से युक्त शरीर वाला, अष्टाङ्ग योग से युक्त भक्त है उस पर वायवी शक्ति की सुकृपा होती है, जो स्वयं बिना भोजन किए, अतिथि को भोजन कराता है, उस पर वायवी शक्ति की कृपा होती है ॥ ३४-३५ ॥

सर्वपापविनिर्मुक्तो वायवी सुकृपा ततः ।
अन्तरात्मा महात्मा यः कुरुते वायुधारणम् ॥ ३६ ॥
देवगुरौ सत्यबुद्धिर्वायवी सुकृपा ततः ।
एककालो वृथा याति नैव यस्य महेश्वर ॥ ३७ ॥
वायव्यां चित्तमादाय तत्रानिलकृपा भवेत् ।
विचरन्ति महीमध्ये योगशिक्षानिबन्धनम् ॥ ३८ ॥
प्राणायामेच्छुको यो वा वायवी सुकृपा ततः ।
प्रतिवत्सरमानेन पीठे पीठे वसन्ति ये ॥ ३९ ॥

---

१. गामिनीम्—ग० ।
२. केन हेतुना या वायवी शक्तिः तन्त्रशास्त्रप्रसिद्धा, तस्याः कृपा भवति, पार्वति ! इति सम्बोधनम् । ३. परमाणु—ग० ।

वायवीं प्रजपन्तीह वायवी सुकृपा ततः।
अल्पाहारी निरोगी च विजयानन्दनन्दितः ॥ ४० ॥

जो सभी पापों से विनिर्मुक्त है उस पर वायवी कृपा होती हैं, जो अन्तः करण से महात्मा है और वायु को धारण करता है। देवता तथा गुरुजनों में सात्त्विक बुद्धि रखता है उस पर वायवी सुकृपा होती है, हे महेश्वर ! वायवी शक्ति को चित्त में धारण करने से जिसका एक काल भी व्यर्थ नहीं जाता, उस पर वायवी कृपा होती है, जो लोग योग शिक्षा से निपुणता प्राप्त कर पृथ्वी मण्डल में विचरण करते हैं, अथवा जो प्राणायाम में अभिलाषा रखते हैं उन पर वायवी कृपा होती है। जो एक-एक संवत्सर के क्रम से शक्ति के एक एक पीठ में निवास करते हैं और वायवी शक्ति का जप करते हैं उन पर वायवी शक्ति की कृपा समझनी चाहिए ॥ ३६-४० ॥

वायवीं भजतो योगी वायवी सुकृपा भवेत्।
अन्तर्यागे पीठचक्रे चित्तमाधाय यत्नतः ॥ ४१ ॥
नामनिष्ठो धारणाख्यो वायवी सुकृपा ततः।
पशुभाव समाक्रान्तः सदा रेतोविवर्जितः ॥ ४२ ॥

जो स्वल्प आहार करने वाला, नीरोग, विजया के आनन्द से मस्त रहने वाला योगी वायवी शक्ति का भजन करता है उस पर वायवी कृपा होती है। जो साधक यत्न पूर्वक अन्तर्याग रूप पीठचक्र में चित्त को स्थिर कर नाम में निष्ठा रखता हुआ धारण करता है, उस पर वायवी कृपा होती है ॥ ४०-४२ ॥

शुक्रमैथुनहीनश्च वायवी सुकृपा ततः।
अकालेऽपि सकालेऽपि नित्यं धारणतत्परः ॥ ४३ ॥
योगिनामपि सङ्गी यो वायवी सुकृपा ततः।
बन्धुबान्धवहीनश्च विवेकाक्रान्तमानसः ॥ ४४ ॥

जो पशुभाव से समाक्रान्त होकर रेतः का स्खलन नहीं करता तथा शुक्रपात वाला मैथुन नहीं करता उस पर वायवी सुकृपा होती है। अकाल में अथवा उत्तम काल में जो नित्य 'धारणा' में लगा रहता है और योगियों का साथ करता है, उस पर वायवी कृपा समझनी चाहिए ॥ ४२-४४ ॥

शोकाशोकसमं[१] भावं वायवी सुकृपा ततः।
सर्वदानन्दहृदयः कालज्ञो भौतसाधनः ॥ ४५ ॥
मौनधारणजापश्च वायवी सुकृपा ततः।
निर्जनस्थाननिरतो[२] निश्चेष्टो दीनवत्सलः ॥ ४६ ॥

---

१. शोकः, अशोकः शोकाभावः, उभाभ्यां समं भावमधिगच्छति वायवीकृपया इति भावः।
२. सर्वशास्त्रार्थवेत्ता च विधिवेत्ता च धार्मिकः। सूक्ष्मवायुप्रसादज्ञो वायवी सुकृपा ततः ॥
सहसा बहु इष्टज्ञो निन्दाधर्मविवर्जितः। शिल्पकर्माभिमानी यो वायवी सुकृपा ततः ॥
इति क० अ० पु० पाठः।

जो बन्धु-बान्धव से हीन तथा विवेक युक्त चित्त वाला है, शोक और हर्ष के भाव जिसके लिए समान है, उस पर वायवी कृपा समझनी चाहिए। जिसका हृदय सर्वदा आनन्द से परिपूर्ण है, जो काल का ज्ञाता है, पञ्चभूत शरीर जिसका साधन है, जो मौन धारण करने वाला तथा जप करने वाला है, उस पर वायवी कृपा समझनी चाहिए ॥ ४४-४६ ॥

बहुजल्पनशून्यश्च स्थिरचेताः प्रकीर्तितः ।
हास्य सन्तोषहिंसादिरहितः[१] पीठपारगः ॥ ४७ ॥
योगशिक्षासमाप्त्यर्थी स्थिरचेताः प्रकीर्तितः ।
मत्कुलागमभावो ज्ञो महाविद्यादिमन्त्रवित् ॥ ४८ ॥

निर्जन स्थान में रहने वाला, किसी प्रकार की चेष्टा न करने वाला, दीनों के ऊपर प्रेम करने वाला, अधिक न बोलने वाला पुरुष स्थिरचित्त कहा जाता है। हास्य, असंतोष, हिंसादि से रहित, पीठ (आसन) का पारवेत्ता योग शिक्षा की समाप्ति चाहने वाला साधक स्थिरचित्त कहा जाता है ॥ ४७-४८ ॥

शुद्धभक्तियुतः शान्तः स्थिरचेताः प्रकीर्तितः ।
मूलाधारे कामरूपे हृदि जालन्धरे तथा ॥ ४९ ॥

मेरे कुलागम के समस्त प्रक्रियाओं को जानने वाला महाविद्या आदि मन्त्रों का जानकार शुद्ध भक्ति से युक्त तथा शान्त साधक स्थिर चित्त वाला कहा जाता है ॥ ४८-४९ ॥

ललाटे पूर्णगिर्याख्ये उड्डीयाने तदूर्ध्वके ।
वाराणस्यां भ्रुवोर्मध्ये ज्वलन्त्यां लोचनत्रये ॥ ५० ॥
मायावत्यां सुखवृत्ते कण्ठे चाष्टपुरे तथा ।
अयोध्यायां नाभिदेशे कट्यां काञ्च्यां महेश्वर ॥ ५१ ॥
पीठेष्वेतेषु भूलोके चित्तमाधाय यत्नतः ।
उदरे पूरयेद् वायुं सूक्ष्मसङ्केतभाषया ॥ ५२ ॥

मूलाधार रूपी कामरूप पीठ में, हृदय रूपी जालन्धर पीठ में, ललाट रूपी पूर्णगिरि पीठ में, उससे ऊपर (मूर्धा) उड्डीयान में, भ्रू के मध्य रूपी वाराणसी में, लोचनत्रय रूपी ज्वालामुखी में, मुखवृत्त रूपी माया तीर्थ में, कण्ठ रूपी अष्टपुरी में, नाभिदेश रूपी अयोध्या में, कटिरूपी काञ्चीपुरी में हे महेश्वर ! जो भूलोक के इन पीठों में यत्न पूर्वक चित्त को लगाकर सूक्ष्म सङ्केत की भाषा से उदर में वायु को पूर्ण बनाता है ॥ ४९-५२ ॥

पादाङ्गुष्ठे च जङ्घायां जानुयुग्मे च मूलके ।
चतुर्दले षड्दले च तथा दशदले तथा ॥ ५३ ॥
दले द्वादशके चैव सिद्धिसिद्धान्तनिर्मले[२] ।
कण्ठे षोडशपत्रे च द्विदले पूर्णतेजसि ॥ ५४ ॥

---

१. हास्यसन्तोषहिंसादिभिः रहितः, तृतीयातत्पुरुषः ।

२. सिद्धिसिद्धान्ताभ्यां निर्मले ।

कैलासाख्ये [१]ब्रह्मरन्ध्रपदे निर्मलतेजसि ।
सहस्रारे महापद्मे कोटिकोटिविधुप्रभे ॥ ५५ ॥
चालयित्वा महावायुं कुम्भयित्वा पुनः पुनः ।
पूरयित्वा रेचयित्वा रोमकूपाद्विनिर्गतम् ॥ ५६ ॥

अपने पैर के दोनों अंगूठों को जंघा पर तथा दोनो जानुओं को मूलाधार में स्थापित कर चार दल वाले छः दल वाले, दश दल वाले, सिद्धि सिद्धान्त से निर्मल द्वादश दल वाले, कण्ठ में रहने वाले सोलह पत्र वाले, पूर्णतेजःस्वरूप में दो दल वाले, करोड़ों करोड़ों चन्द्रमा की प्रभा के समान सहस्र पत्र वाले महापद्म में महावायु को चला चला कर, पुनः पुनः उसे कुम्भक कर, फिर पूरक करे । तदनन्तर रेचक कर रोमकूप से निकले हुये ॥ ५३-५६ ॥

तिस्रः कोट्यर्धकोटि च यानि लोमानि मानुषे ।
नाडीमुखानि सर्वाणि धर्मबिन्दुं च्यवन्ति हि ॥ ५७ ॥
यावत्तद्बिन्दुपातश्च तावत्कालं लयं[२] स्मृतम् ।
तावत्कालं प्राणयोगात् प्रस्वेदाधमसिद्धिदम् ॥ ५८ ॥

अधम सिद्धि का लक्षण—मनुष्य के शरीर में होने वाले साढ़े तीन करोड़ रोम हैं वे तथा सभी प्रमुख नाडियाँ घर्म बिन्दु को चुआते रहते हैं । जब तक इस प्रकार का बिन्दु पात होता रहता है तब तक लय की स्थिति रहती है, उतने समय तक अर्थात् प्रस्वेद पर्यन्त किया गया प्राणायाम अधम प्रकार की सिद्धि प्रदान करता है ॥ ५७-५८ ॥

सूक्ष्मवायुसेवया च किन्न सिद्ध्यति भूतले ।
लोमकूपे मनो दद्यात् लयस्थाने मनोरमे ॥ ५९ ॥
स्थिरचेता भवेत् शीघ्रं नात्र कार्या विचारणा ।
वायुसेवां विना नाथ कथं सिद्धिर्भवेद् भवे ॥ ६० ॥

स्थिरचित्त साधक के लक्षण—सूक्ष्म वायु की सेवा से (= प्राणायाम) इस पृथ्वी तल में कौन सी वस्तु है जो सिद्ध न हो लोभकूप में जो मनोरम लय का स्थान है उसमें अपने मन को लगाना चाहिए । ऐसा करने से साधक अपने चित्त को स्थिर कर लेता है, इसमें संदेह या विचार की आवश्यकता नहीं । हे नाथ ! वायु सेवा (प्राणायाम) किए बिना इस संसार में भला सिद्धि किस प्रकार प्राप्त हो सकती है ॥ ५९-६० ॥

स्थिरचित्तं बिना नाथ मध्यमापि न जायते ।
स्थाने स्थाने मनो दत्वा वायुना कुम्भकेन च ॥ ६१ ॥
धारयेन्मारुतं मन्त्री कालज्ञानी दिवानिशम् ।
एकान्तनिर्जने स्थित्वा स्थिरचेता भवेद् ध्रुवम् ॥ ६२ ॥

---

१. लोकमुखात्—ग० ।
२. लयमिति लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति नियमेन नपुंसकता, अन्यथा 'घञजपाः पुंसि' इति सूत्रेणाच्प्रत्ययान्ततया पुंल्लिङ्गता स्यात् ।

हे नाथ ! चित्त को स्थिर किए बिना मध्यमा सिद्धि भी नहीं होती । इसलिए कुम्भक रूप वायु के द्वारा उन उन स्थानों में मन को लगाना चाहिए । काल का ज्ञान रखते हुये मन्त्रज्ञ साधक किसी एकान्त निर्जन स्थान में रह कर वायु धारण (प्राणायाम) करे । ऐसा करने से वह निश्चय ही स्थिर चित्त वाला हो जाता है ॥ ६१-६२ ॥

स्थिरचित्तं विना शम्भो सिद्धिः स्यादुत्तमा कथम् ॥ ६३ ॥
निवार्य पञ्चेन्द्रियसञ्ज्ञकानि यत्नेन धैर्यायतिरीश्वरस्त्वम् ।
प्राप्नोति मासन्नयसाधनेन विषासवं भोक्तुमसौ समर्थः ॥ ६४ ॥

हे शम्भो ! जब तक चित्त स्थिर न हो तब तक उत्तमा सिद्धि भी क्या किसी प्रकार प्राप्त हो सकती है ? पञ्चेन्द्रिय संज्ञक वालों को अपने वश में कर यति यत्नपूर्वक धीरता धारण करते हुये एक महीने पर्यन्त वायु का साधन करने से ईश्वरत्व प्राप्त कर लेता है, और वह विष के आसव को भी पान करने में समर्थ हो जाता है ॥ ६३-६४ ॥

मासत्रयाभ्यास-सुसञ्चयेन स्थिरेन्द्रियः स्यादधमादिसिद्धिः ।
सा खेचरी सिद्धिरत्र प्रबुद्धा चतुर्थये मासे तु भवेद्विकल्पनम् ॥ ६५ ॥

तीन महीने तक इस प्रकार के अभ्यास के सञ्चय से साधक की इन्द्रियाँ स्थिर हो जाती है और उसे अधम प्राणायाम की सिद्धि हो जाती है । फिर चार महीने में उसे प्रबुद्ध होने वाली खेचरी (आकाशगमत्व) सिद्धि भी प्राप्त होती है ऐसा विकल्प संभव है ॥ ६५ ॥

तदाधिकारी पवनाशनोऽसौ स्थिरासनानन्दसुचेतसा भुवि ।
प्रकल्पने सिद्धिं यथार्थगामिनीमुपेति शीघ्रं वरवीरभावम् ॥ ६६ ॥

इस भूमण्डल में वह अधिकारी तब हो सकता है जब स्थिरासन होकर आनन्द युक्त चित्त से वायु पीता रहे अर्थात् प्राणायाम करता रहे, ऐसा करते रहने से उसे यथार्थ गामिनी सिद्धि प्राप्त होती है, तथा वह शीघ्र ही श्रेष्ठ वीरभाव को प्राप्त कर लेता है ॥ ६६ ॥

सा वयवी शक्तिरनन्तरूपिणी लोभावलीनां कुहरे महासुखम् ।
ददाति सौख्यं गतिचञ्चलं जयं स्थिराशयत्वं सति शास्त्रकोविदम् ॥ ६७ ॥

यह वायवी शक्ति अनन्त स्वरूपिणी है, जो रोम समूहों से कुहर में रह कर साधक को महासुख प्रदान करती है, सौख्य देती है तथा गति चाञ्चल्य प्रदान करती है, जय देती है, अन्तःकरण में स्थिरता देती है तथा शास्त्र का ज्ञान प्रदान करती है ॥ ६७ ॥

षण्मासयोगासननिष्ठदेहा[१] वायुश्रमानन्दरसाप्तविग्रहः ।
विहाय कल्पान्वितयोगभावं श्रुत्यागमान् कर्तुमसौ समर्थः ॥ ६८ ॥

जो साधक छः महीने तक योगासन (के अभ्यास) में शरीर को लगा देता है, उसे वायु के श्रम से आनन्द रस की प्राप्ति होती रहती है, फिर वह कल्प युक्त योगभाव

---

१. सर्वत्रगामिनो भावात्—ग० ।

को त्याग कर श्रुति (वेद) तथा आगम (मन्त्र या तन्त्र शास्त्र) की रचना करने में भी समर्थ हो जाता है ॥ ६८ ॥

स्थिरचेता महासिद्धिं प्राप्नोति नात्र संशयः ।
संवत्सरकृताभ्यासे महाखेचरतां व्रजेत् ॥ ६९ ॥
यावन्निर्गच्छति प्रीता वायवी शक्तिरुत्तमा ।
नासाग्रमववार्यैव स्थिरचेता महामतिः ॥ ७० ॥

जिसका चित्त स्थिर होता है, वही महासिद्धि प्राप्त करता है इसमें संशय नहीं । संवत्सर पर्यन्त अभ्यास करते रहने पर साधक महाखेचरत्त्व प्राप्त कर लेता है । जब तक यह उत्तमा वायवी शक्ति, सुखपूर्वक बाहर निकलती रहती है, तब तक महाबुद्धिमान् नासा के अग्रभाग में चित्त को लगावे, ऐसा करने से वह स्थिर चित्त हो जाता है ॥ ६९-७० ॥

चण्डवेगा यदा क्षिप्रमन्तरालं न गच्छति ।
सर्वत्रगामी स भवेत् तावत्कालं विचक्षणः ॥ ७१ ॥
यदि शीर्षादूर्ध्वदिशे द्वादशाङ्गुलकोपरि ।
गन्तुं समर्थो भगवान् शिवतुल्यो गणेश्वरः ॥ ७२ ॥
सर्वत्रगामी प्रभवेत् खेचरो योगिराड् वशी ।
इति सिद्धिर्वत्सरे स्यात् स्थिरचित्तेन शङ्कर ॥ ७३ ॥

प्रचण्ड वेग वाली वायु जब शीघ्रता से भीतर न प्रवेश करे तब तक वह विचक्षण सर्वत्रगामी हो सकता है । यदि शिरःप्रदेश के ऊपर १२ अंगुल ऊपर तक साधक जाने में समर्थ हो जावे तो वह शिव के सदृश भगवान् एवं गणेश्वर है । हे शङ्कर ! एक वर्ष के भीतर स्थिर चित्त होने से सिद्धि अवश्य हो जाती है, वह साधक आकाशचारी, सर्वत्रगामी, योगिराट् तथा जितेन्द्रिय हो जाता है ॥ ७१-७३ ॥

योगी भूत्वा मनःस्थैर्यं न करोति यदा भुवि ।
कृच्छ्रेण पदमारुह्य प्रपतेन्नारकी यथा ॥ ७४ ॥
अत एव महाकाल स्थिरचेता भव प्रभो ।
तदा मां प्राप्स्यसि क्षिप्रं वायवीमष्टसिद्धिदाम्[1] ॥ ७५ ॥

यदि साधक इस भूलोक में योगी बन कर भी मन की स्थिरता का अभ्यास न करे तो वह बड़े कष्ट से ऊंचाई पर जा कर भी नारकीय मनुष्य के समान नीचे गिर जाता है । इसलिए, हे महाकाल ! हे प्रभो ! चित्त को स्थिर रखिए, तब बड़ी शीघ्रता से आठों प्रकार की सिद्धियों को देने वाली मुझे आप प्राप्त कर लेंगे ॥ ७४-७५ ॥

यदि सिद्धो भवेद् भूमौ वायवीसुकृपादिभिः ।
सदा कामस्थिरो भूत्वा गोपयेन्मातृजारवत्[2] ॥ ७६ ॥

---

१. अष्टौ सिद्धयोऽष्टसिद्धयस्ता ददाति या सा ताम् ।
२. मातुः जारो यथा गोपनीयो भवति, तद्वत् ।

यदि साधक वायवी शक्ति की सुन्दर कृपा आदि के द्वारा सिद्धि प्राप्त कर ले तो वह सभी कामनाओं से स्थिर हो कर अपनी सिद्धि को इस प्रकार गोपनीय रखे जैसे कोई अपनी माता के जार (उपपति) को प्रगट नहीं करता ॥ ७६ ॥

यदा यदा महादेव योगाभ्यासं करोति यः ।
शिष्येभ्योऽपि सुतेभ्योऽपि दत्वा कार्यं करोति यः ॥ ७७ ॥
तदैव स महासिद्धिं प्राप्नोति नात्र संशयः ।
संवत्सरं चरेद्धर्मं योगमार्गं हि दुर्गमम् ॥ ७८ ॥

हे महादेव ! जो पुरुष जैसे-जैसे योगाभ्यास करता है । उसे वह अपने शिष्यों को तथा अपने पुत्रों को भी शिक्षित करते हुये साधना कार्य करता रहे । उस समय ही वह महासिद्धि प्राप्त कर लेता है, इसमें संशय नहीं । यतः योगमार्ग बहुत दुर्गम है । अतः संवत्सर पर्यन्त धर्म का आचरण करते रहना चाहिए ॥ ७७-७८ ॥

प्रकाशयेन्न कदापि कृत्वा मृत्युमवाप्नुयात् ।
योगयोगाद् भवेन्मोक्षो मन्त्रसिद्धिरखण्डिता ॥ ७९ ॥
न प्रकाश्यमतो योगं भुक्तिमुक्तिफलाय च ।
नित्यं सुखं महाधर्मं प्राप्नोति वत्सराद् बहिः ॥ ८० ॥

योगमार्ग में सिद्धि प्राप्त कर लेने पर साधक उसे कदापि प्रगट न करे । यदि सबको प्रगट कर देता है तो वह मृत्यु को प्राप्त करता है । योग से युक्त हो जाने पर मोक्ष की प्राप्ति होती है और मन्त्रसिद्धि भी खण्डित नहीं होती । यतः योग 'भोग और मोक्ष' दोनों प्रकार का फल देने वाला है, इसलिए उसे प्रकाशित न करे । एक संवत्सर से ऊपर बीत जाने पर साधक योगाभ्यास से सुख तथा महाधर्म प्राप्त करने लग जाता है ॥ ७९-८० ॥

आत्मसुखं नित्यसुखं मन्त्रं यन्त्रं तथागमम् ।
प्रकाशयेन्न कदापि कुलमार्गं कुलेश्वर ॥ ८१ ॥
यद्येवं कुरुते धर्मं तदा मरणमाप्नुयात् ।
योगभ्रष्टो विज्ञानज्ञोऽजड़ो मृत्युमवाप्नुयात् ॥ ८२ ॥

आत्मानन्द का सुख, नित्य सुख, मन्त्र, यन्त्र तथा आगम शास्त्र तथा कुलमार्ग कुण्डलिनी का ज्ञान हो जाने पर, हे कुलेश्वर ! उसे कदापि प्रकाशित नहीं करना चाहिए । यदि इस प्रकार के धर्म का आचरण करे तो उसकी मृत्यु नहीं होती । योग से भ्रष्ट हो जाने वाला एवं विधान को न जानने वाला चाहे कितना भी पण्डित हो वह मृत्यु अवश्य प्राप्त करता है ॥ ८१-८२ ॥

येन मृत्युवशो याति तत्कार्यं नापि दर्शयेत् ।
दत्तात्रेयो महायोगी शुको नारद एव च ॥ ८३ ॥
येन कृतं सिद्धिमन्त्रं वर्णजालं कुलार्णवम् ।
एकेन लोकनाथेन योगमार्गपरेण च ॥ ८४ ॥

तथा मङ्गलकार्येण ध्यानेन साधकोत्तमः[1] ।
उत्तमां सिद्धिमाप्नोति वत्सराद् योगशासनात् ॥ ८५ ॥

जिसके प्रकाशित करने से साधक मृत्यु के वश में जा सकता हैं उस कार्य को कदापि प्रकाशित न करे । दत्तात्रेय, महायोगी शुक, और नारद इनमें से प्रत्येक लोगों ने कुलार्णव के समस्त मन्त्र जालों को सिद्ध किया था । योगमार्ग प्रदर्शित करने वाले, लोक को वश में करने वाले एवं समस्त मङ्गल प्रदान करने वाले केवल एक ही मन्त्र से साधकोत्तम अपने ध्यान की सहायता से योगशास्त्र के अनुसार एक संवत्सर में ही सिद्धि प्राप्त कर लेता है ॥ ८३-८५ ॥

आदौ वै ब्रह्मणो ध्यानं पूरकाष्टाङ्गलक्षणैः ।
कुर्यात् सकलसिद्ध्यर्थमम्बिकापूजनेन च ॥ ८६ ॥
ऋग्वेदं चेतसि ध्यात्वा मूलाधारे चतुर्द्दले ।
वायुना चन्द्ररूपेण धारयेन्मारुतं सुधीः ॥ ८७ ॥

सर्वप्रथम पूरक प्राणायाम कर (अष्टाङ्ग विशिष्ट) लक्षण योग से ब्रह्मदेव का ध्यान करना चाहिए । फिर समस्त प्रकार की सिद्धि की प्राप्ति के लिए अम्बिका का पूजन करे । मूलाधार स्थित चतुर्दल कमल में अपने चित्त में ऋग्वेद का ध्यान कर सुधी साधक चन्द्ररूप वायु से वायु धारण (प्राणायाम) करे ॥ ८६-८७ ॥

अथर्वान्निर्गतं सर्वं ऋग्वेदादि चराचरम् ।
तेन पूर्णचन्द्रमसा जीवेनार्यामृतेन च ॥ ८८ ॥
जुहुयादेकभावेन कुण्डलीसूर्यगोऽनले ।
कुम्भकं कारयेन्मन्त्री यजुर्वेदपुरःसरम् ॥ ८९ ॥

अथर्ववेद से समस्त ऋग्वेदादि चराचर निकले हुये है। इसलिए उस चन्द्रमा से निर्गत अमृत द्वारा कुण्डलिनी रूप सूर्याग्नि में होम करना चाहिए । मन्त्र वेत्ता यजुर्वेद को आगे रखकर कुम्भक प्राणायाम करे ॥ ८८-८९ ॥

सर्वसत्त्वाधिष्ठितं तत् सर्वविज्ञानमुत्तमम् ।
वायव्याः पूर्णसंस्थानं योगिनामभिधायकम् ॥ ९० ॥
पुनः पुनः कुम्भयित्वा सत्त्वे निर्मलतेजसि ।
महाप्रलयसारज्ञो[2] भवतीति न संशयः ॥ ९१ ॥
रेचकं शम्भुना व्याप्तं तमोगुणमनोलयम्[3] ।
सर्वमृत्युकुलस्थानं व्याप्तं धर्मफलाफलैः ॥ ९२ ॥

कुम्भक समस्त सत्त्वों से अधिष्ठित है, और वह सभी विज्ञानों में उत्तम है ।

---

१. साधकेषु उत्तमः, सुप्सुपेति समासः । २. महाप्रलयस्य सारं जानाति ।
३. तमोगुणविशिष्टस्य मनसो लयो यस्मिन् रेचके, तत् ।

वायवी शक्ति का पूर्ण रूप से स्थान है तथा योगियों के द्वारा प्रशंसित है । बारम्बार निर्मल तेज वाले सत्त्व में कुम्भक प्राणायाम कर साधक महा प्रलय के सार का मर्मज्ञ हो जाता है इसमें संशय नहीं । रेचक प्राणायाम शिव से व्याप्त है । वह तमोगुण वाले मन को अपने में लीन कर लेता है । समस्त मृत्यु रूप कुल का स्थान है तथा धर्म के फलाफल से व्याप्त है ॥ ९०-९२ ॥

पुनः पुनः क्षोभनिष्ठो रेचकेन निवर्तते ।
रेचकेन लयं याति रेचनेन परं पदम् ॥ ९३ ॥
प्राप्नोति साधकश्रेष्ठो रेचकेनापि सिद्धिभाक् ।
रेचकं वह्निरूपञ्च कोटिवह्निशिखोज्ज्वलम् ॥ ९४ ॥
द्वादशाङ्गुलमध्यस्थं ध्यात्वा बाह्ये[1] लयं दिशेत् ।
चन्द्रव्याप्तं सर्वलोकं सर्वपुण्यसमुद्भवम् ॥ ९५ ॥

पुनः पुनः होने वाली चञ्चलता रेचक से दूर हो जाती है । रेचक से चञ्चलता लय को प्राप्त होती है, रेचक से परम पद की प्राप्ति होती है । श्रेष्ठ साधक केवल रेचक से भी सिद्धि का अधिकारी हो जाता है । **रेचक** वह अग्नि है जो करोड़ों-करोड़ों अग्नि ज्वाला से उज्वल है । यह बारह अंगुल के मध्य में रहने वाला है इसका ध्यान कर बाह्य लय करना चाहिए । सब प्रकार के पुण्यों से उत्पन्न यह समस्त लोक चन्द्रमा से व्याप्त है ॥ ९३-९५ ॥

रेचकाग्निर्दहतीह वायुसख्यो महाबली ।
तत् शशाङ्कजीवरूपं पीत्वा जीवति वायवी ॥ ९६ ॥
आग्नेयी दह्यति क्षिप्रं एष होमः परो मतः ।
एतत् कार्यं यः करोति स न मृत्युवशो भवेत् ॥ ९७ ॥

वायु की मित्रता वाली महाबली रेचकाग्नि उसे जलाती रहती है । इस प्रकार वायवी कला शशाङ्क जीवरूप को पी कर वह सर्वदा जीवित रहती है । आग्नेयी उस वायु को शीघ्र जलाती रहती हैं, यह सबसे उत्कृष्ट होम है जो इस कार्य को करता है, वह मृत्यु के वश में नहीं जाता ॥ ९६-९७ ॥

एतयोः सन्धिकालञ्च कुम्भकं तत्त्वसाधनम् ।
तदेव भावकानाञ्च परमस्थानमेव च ॥ ९८ ॥
महाकुम्भकलाकृत्या स्थिरं स्थित्वा च कुम्भके ।
अथर्वगामिनीं देवीं भावयेदमरो महान् ॥ ९९ ॥

कुम्भक—इस वायवी तथा रेचकाग्नि को मिलाने वाला कुम्भक उस तत्त्व का साधन है, जो उन भावुकों के लिए परमस्थान कहा जाता है । महाकुम्भ की कला की आकृती वाले कुम्भक में स्थिर रूप से स्थित रह कर अमर महान् साधक अथर्व वेद में रहने वाली (योगिनी) देवी का ध्यान करे ॥ ९८-९९ ॥

---

१. राज्ये—ग० ।

अनन्तभावनं शम्भोरशेषसृष्टिशोभितम् ।
अथर्वं भावयेन्मन्त्री शक्तिचक्रक्रमेण तु ॥१००॥
आज्ञाचक्रे वेददले चतुर्दलसुमन्दिरे ।
अथर्वयोगिनीं ध्यायेत् समाधिस्थेन चेतसा ॥१०१॥

यह अथर्व अनन्त भावना वाला है । सदाशिव की समस्त सृष्टि से शोभित है । उसका शक्ति चक्र के क्रम से मन्त्रवेत्ता साधक ध्यान करे । आज्ञाचक्र में चार पत्तों वाला कमल है उस चतुर्दल कमल कोष में अथर्व रूप योगिनी का समाधि में स्थित चित्त से ध्यान करे ॥१००-१०१ ॥

ततोऽच्युताख्यं जगतामीश्वरं शीर्षपङ्कजे ।
प्रपश्यति जगन्नाथं नित्यसूक्ष्मसुखोदयम्[१] ॥१०२॥
आज्ञाचक्रे शोधनमशेषदलमथर्वं परिकीर्तितम् ।
ज्योतिश्चक्रे तन्मध्ये योगमार्गेण सद्बिलम् ॥१०३॥

तदनन्तर शीर्षस्थ कमल में जगत् के ईश्वर जिन्हें अच्युत कहा जाता है उन जगन्नाथ का दर्शन होता है, जो नित्य सूक्ष्म तथा सुखोदय स्वरूप हैं । इस आज्ञाचक्र में जिसका संपूर्ण दल शुद्ध करने वाला है वही अथर्व नाम से पुकारा जाता है उसी के मध्य में ज्योतिश्चक्र है जिसका उत्तम बिल (द्वार) योगमार्ग से जाना जाता है ॥ १०२-१०३ ॥

प्रपश्यति महाज्ञानी बाह्यदृष्ट्या यथाम्बुजम् ।
कालेन सिद्धिमाप्नोति ब्रह्मज्ञानी च साधकः ॥१०४॥
ततो भजेत् कौलमार्गं ततो विद्यां प्रपश्यति ।
महाविद्यां कोटिसूर्यज्वालामालासमाकुलम् ॥१०५॥

महाज्ञानी बाह्य दृष्टि से जिस प्रकार कमल देखते हैं उसी प्रकार उस द्वार का भी दर्शन करते है, जिससे ब्रह्मज्ञानी साधक काल (समय) पाकर सिद्धि प्राप्त करते हैं । इसलिए कौलमार्ग का आश्रय लेना चाहिए । तभी महाविद्या का दर्शन संभव है । वह महाविद्या करोड़ों सूर्य की ज्वालामाला से व्याप्त है ॥ १०४-१०५ ॥

एतत्तत्त्वं विना नाथ न पश्यति कदाचन ।
वसिष्ठो ब्रह्मपुत्रोऽपि चिरकालं सुसाधनम् ॥१०६॥
चकार निर्जने देशे कृच्छ्रेण तपसा वशी ।
शतसहस्रं वत्सरं च व्याप्य योगादिसाधनम् ॥१०७॥

बुद्ध-वशिष्ठ वृत्तान्त--हे नाथ ! यही तत्त्व है, जिसके बिना महाविद्या का दर्शन नहीं होता । ब्रह्मा के पुत्र वशिष्ठ जी ने भी बहुत काल तक निर्जन स्थान में निवास कर बहुत बड़ी कठिन तपस्या से श्रेष्ठ साधन किया । इस प्रकार वे योगादि साधन निरन्तर एक लाख वर्ष तक करते रहे ॥ १०६-१०७ ॥

---

१. नित्यं सूक्ष्मसुखोदयो यस्मिन्, तं जगन्नाथमित्यर्थः ।

अथ त्रयोविंशः पटलः

श्रीभैरवी[1] उवाच

अथातः सम्प्रवक्ष्यामि ब्रह्ममार्गमनुत्तमम् ।
यद् यज्ज्ञात्वा सुराः सर्वे जयाख्याः [2]परमं जगुः ॥ १ ॥

श्री आनन्दभैरवी ने कहा—हे महाभैरव अब इसके अनन्तर मैं सर्वश्रेष्ठ ब्रह्ममार्ग का वर्णन करूँगी । जिसके ज्ञान करने मात्र से सभी देवताओं ने उत्कृष्ट विजय प्राप्त की ॥ १ ॥

न तत्तेजःप्रकाशाय[3] महतां धर्मवृद्धये ।
योगाय योगिनां देव[4] भक्षप्रस्थनिरूपणम् ॥ २ ॥

भक्तों में तेजःप्रकाश के लिए, महान् लोगों में धर्म की वृद्धि के लिए और योगियों में योग के लिए, हे देव ! प्रस्थ मात्रा में भक्ष का निरूपण किया गया है ॥ २ ॥

योगाभ्यासं यः करोति न जानातीह भक्षणम् ।
कोटिवर्षसहस्रेण न योगी भवति ध्रुवम् ॥ ३ ॥
अतो वै भक्षमाहात्म्यं प्रवदामि[5] समासतः ।
यज्ज्ञात्वा सिद्धिमाप्नोति स्वाधिष्ठानादिभेदनम् ॥ ४ ॥
आदौ विवेकी यो भूयाद् भूतले परमेश्वर ।
स एव भक्षनियमं[6] गृहेऽरण्ये समाचरेत् ॥ ५ ॥

जो योगाभ्यास करता है, किन्तु भक्षण की प्रक्रिया नहीं जानता वह करोड़ों वर्षों में भी योगी नहीं बन सकता यह निश्चित है । इसलिए भक्ष का माहात्म्य मैं संक्षेप में कहती हूँ, जिसके जान लेने पर साधक सिद्धि प्राप्त कर लेता है तथा स्वाधिष्ठान नामक चक्र के भेदन को भी जान लेता है । हे परमेश्वर ! इस भूतल पर सर्वप्रथम जो ज्ञानी बनना चाहता है, उसे घर पर अथवा अरण्य प्रदेश में भक्ष के नियम का आचरण करना चाहिए ॥ ३-५ ॥

वाय्वासन[7]दृढानन्दपरमानन्दनिर्भरः ।
मिताहारं सदा कुर्यात् पूरकाह्लादहेतुना ॥ ६ ॥
तदा पूरकसिद्धिः स्याद् भक्षणादिनिरूपणात् ।
उदरं पूरयेन्नित्यं कुम्भयित्वा पुनः पुनः ॥ ७ ॥

---

१. भैरवी उवाच—ग० ।
२. परमा जगुः—क० ।
३. मनः स्थैर्य—क० ।
४. नाथ—क० ।
५. प्रवक्ष्यामि—क० ।
६. भक्षणोयज्च—क० ।
७. वाय्वासने दृढानन्द एव परमानन्दः, तत्र निर्भरः ।

वायु, आसन, दृढ़ानन्द तथा परमानन्द में निर्भर साधक पूरक प्राणायाम के आह्लाद प्राप्ति हेतु सदैव प्रमित (संतुलित) आहार करना चाहिए । भक्षणादि नियम का पालन करने से पूरक प्राणायाम की सिद्धि होती है । उदर को कुम्भक प्राणायाम के द्वारा बारम्बार परिपूर्ण करते रहना चाहिए ॥ ६-७ ॥

निजहस्तप्रमाणाभिः[१] पूरयेत् पूर्णमेव च ।
तत्पूरयेत् स्थापयेन्नाथ विश्वामित्रकपालके ॥ ८ ॥
हंसद्वादशवारेण शिलायामपि घर्षयेत् ।
नित्यं तत्पात्रपूर्णं च [२]पाकेनैकेन भक्षयेत् ॥ ९ ॥
तण्डुलान् शालिसम्भूतान्कपालप्रस्थपूर्णकान् ।
दिने दिने क्षयं कुर्याद् भक्षणादिषु कर्मसु ॥ १० ॥

अपने हाथ का जितना प्रमाण हो उतने ही ग्रासों से उदर को पूर्ण करे । हे नाथ ! जितनी अञ्जलि पूर्ण करे उसे विश्वामित्रकपाल (तावा) में स्थापित करे । १२ बार हंस मन्त्र का जप करते हुये उस कपाल की शिला पर घर्षण करे । तदनन्तर उस पूर्ण पात्र को एक बार पका (?) कर भक्षण करे । शालिधान्य का तन्दुल (चावल) कपाल में एक प्रस्थ परिमाण में स्थापित कर प्रतिदिन उसका भक्षण करे और प्रतिदिन भक्षण कर उसे खाली कर दे ॥ ८-१० ॥

हंसद्वादशवारेण जपेन संक्षयं चरेत् ।
शिलायां तत्कपालं च वर्द्धयेत् पूरकादिकम्[३] ॥ ११ ॥
यावत्कालं क्षयं याति निजभक्षणनिर्णयम् ।
तत्कालं वायुनापूर्य [४]नोदरं काकचञ्चुभिः ॥ १२ ॥

नियमपूर्वक १२ बार हंस मन्त्र का जप कर कपालस्थ तण्डुल का भोजन करे । पूरकादि प्राणायाम से युक्त उस कपाल को नित्य शिला पर अभिवर्द्धित करे । जब तक भक्षण से उस कपाल का क्षय हो तब तक उदर को वायु से पूर्ण करे किन्तु काकचञ्चु के समान वायु का आकर्षण कर उसे पूर्ण न करे ॥ ११-१२ ॥

आकुञ्चयेत् सदा मूले कुण्डली भक्षधारणात्[५] ।
तत्र[६] सम्पूरयेद्योगी भक्षप्रस्थावनाशनात् ॥ १३ ॥
कालक्रमेण तत् सिद्धिमवाप्नोति जितेन्द्रियः[७] ।
यत्स्थानं भक्षणस्यैव तत्स्थाने पूरयेत्सुखम् ॥ १४ ॥
पुनः[८] पुनर्भक्षणेन[९] भक्षसिद्धिमुपैति हि ।
विना पूरकयोगेन भक्षणं नापि सिद्ध्यति ॥ १५ ॥

---

१. प्रमाणेनाभिप्रस्थं पूर्णमेव च—क० । २. वायुनैकेन—क० ।
३. पूरकानिलम्—क० । ४. सोदरम्—क० । ५. वारणात्—क० ।
६. तत्र सम्पूरयेत् योगी भक्षणस्य विनाशनात्—अ० पा० क० ।
७. निजेन्द्रियः—क० । ८. यत् स्थानं भक्षणस्यैव तत्स्थानं पूरयेत्सुखम्—क० ।
९. प्रमादेव—क० ।

अथवान्यप्रकारेण भक्षत्यागं विनिर्णयम् ।
येन हीना न सिद्ध्यन्ति [१]नाडीचक्रस्थदेवताः ॥ १६ ॥

योगी साधक भक्षण कर लेने पर सदैव मूलाधार में स्थित कुण्डली का सङ्कोचन करे और वायुप्राशन के द्वारा उसे पूर्ण करता रहे । यदि साधक भक्षण का जो नियत स्थान है उस स्थान में सुखपूर्वक वायु पूर्ण करता रहे तो ऐसा जितेन्द्रिय योगी धीरे-धीरे काल बीतने पर सिद्धि प्राप्त कर लेता है ।

इस प्रकार बारम्बार वायुभक्षण से भक्ष पदार्थ पच जाता है । क्योंकि बिना पूरक प्राणायाम के भक्षण किया गया पदार्थ नहीं पचता । अथवा इस प्रकार के भक्षण को त्याग कर अन्य प्रकार से भक्षण करना चाहिए । क्योंकि भक्षण के बिना नाड़ी समूह पर स्थित देवता तृप्त नहीं होते ॥ १३-१६ ॥

द्वात्रिंशद्[२] ग्रासमादाय त्रिपर्व्वाणि यथास्थितम् ।
अर्द्धग्रासं विहायापि नित्यं भक्षणमाचरेत् ॥ १७ ॥
सदा सम्पूरयेद् वायुं भावको गतभीर्महान् ।
भक्षस्थाने समायोज्य पिबेद् वायुमहर्निशम् ॥ १८ ॥

साधक बत्तीस ग्रास अन्न तीन सन्ध्याओं में जैसा भी हो उसे लेकर आधा ग्रास छोड़कर नित्य भक्षण करे । फिर वह महान् एवं भावुक साधक निडर हो कर वायु से (उदर) पूर्ण करता रहे । उसकी विधि इस प्रकार है कि भक्ष स्थान में वायु को संयुक्त कर दिन रात वायु पान करता रहे ॥ १७-१८ ॥

चतुःषष्टिदिने[३] सर्वं क्षयं कृत्वा ततः सुधीः ।
पयोभक्षणमाकुर्यात् स्थिरचेता जितेन्द्रियः ॥ १९ ॥
पयः प्रमाणं वक्ष्यामि हस्तप्रस्थत्रयं त्रयम् ।
शनैः शनैर्विजेतव्याः प्राणा मत्तगजेन्द्रवत् ॥ २० ॥

इस प्रकार चौसठ दिन लगातार करते हुए सुधी साधक सब का परित्याग कर स्थिर चित्त तथा जितेन्द्रिय हो दूध का भक्षण करे । अब दूध का प्रमाण कहती हूँ । दूध की मात्रा हाथ के द्वारा ३, ३ प्रस्थ होना चाहिए । इस प्रकार की प्रक्रिया से साधक पञ्च प्राणों को मत्त गजेन्द्र के समान अपने वश में करे ॥ १९-२० ॥

षण्मासाज्जायते सिद्धिः पूरकादिषु लक्षणम् ।
क्रमेणाष्टाङ्गसिद्धिः स्यात् यतीनां कामरूपिणाम् ॥ २१ ॥
बद्धपद्मासनं कृत्वा विजयानन्दनन्दितः ।
धारयेन्मारुतं मन्त्री मूलाधारे मनोलयम्[४] ॥ २२ ॥

---

१. चक्रस्य—ग० ।
२. द्वात्रिंशत्संख्याको ग्रासः, ग्रामसमुदायः, अनया रीत्या अर्थबोधः कार्यः ।
३. चतुःषष्टिशब्दः चतुःषष्टितमपरः, अत एव दिनेति एकवचनान्तस्य प्रयोगः ।
४. नलोदयम्—क० ।

इस प्रकार की पूरक की प्रक्रिया में छः मास में सिद्धि हो जाती है यही (प्राणायाम की पूर्णता का) लक्षण है । ऐसा करने वाले कामरूप यतियों को क्रमशः योगमार्ग के प्राणायामादि अष्टाङ्ग योग सिद्ध हो जाते हैं । बद्ध पद्मासन कर विजया के आनन्द में मस्त साधक मूलाधार में वायु धारण करे और वहीं अपने मन का भी लय करे ॥ २१-२२ ॥

अथासनप्रभेदञ्च शृणु मत्सिद्धिकाङ्क्षिणाम् ।
येन विना पूरकाणां सिद्धिभाक् न महीतले ॥ २३ ॥
अधो मुण्डासनं वक्ष्ये सर्वेषां प्राणिनां सुखम् ।
ऊर्द्ध्वमार्गे पदं दत्त्वा धारयेन्मारुतं सुधीः ॥ २४ ॥

आसन निरूपण—हे महाभैरव ! अब मेरी सिद्धि चाहने वाले साधकों के लिए आसन के प्रभेदों को सुनिए जिन आसनों को बिना किए पूरक प्राणायाम करने वाले पृथ्वी पर सिद्धि के अधिकारी नहीं बनते । सर्वप्रथम **मुण्डासन** कहती हूँ जिससे सारे प्राणियों को सुख प्राप्त होता है । अपने पैर को ऊपर की ओर खड़ा करे, फिर नीचे मुख करके वायु का पान करे ॥ २३-२४ ॥

सर्वासनानां श्रेष्ठं हि ऊर्द्ध्वपादो यदा चरेत् ।
तदैव महतीं सिद्धिं ददाति वायवी कला ॥ २५ ॥
एतत्पद्मासनं कुर्यात् प्राणवायुप्रसिद्धये ।
शुभासनं तदा ध्यायेत्पूरयित्वा पुनः पुनः ॥ २६ ॥

पैर को ऊपर खड़ा करने वाला मुण्डासन का आचरण सभी आसनों में श्रेष्ठ है, क्योंकि वायवी कला उसी समय साधक को महती सिद्धि प्रदान करती है । प्राणवायु की सिद्धि के लिए **पद्मासन** उत्तम आसन है, इस आसन पर स्थित होकर पूरक प्राणायाम करते हुए ध्यान करे । इसे इस प्रकार करे ॥ २५-२६ ॥

ऊरुमूले वामपादं पुनस्तद्दक्षिणं पदम् ।
वामोरौ स्थापयित्वा च पद्मासनमितिस्मृतम् ॥ २७ ॥
सव्यपादस्य[1] योगेन आसनं परिकल्पयेत् ।
तदैकासनकाले तु द्वितीयासनमाभवेत् ॥ २८ ॥

दाहिने ऊरु के मूल में वामपाद, फिर दाहिना पैर बायें पैर के ऊरुमूल में स्थापित करे, तब उसी को पद्मासन कहते हैं । यह आसन प्रथम सव्यपाद को दाहिने पैर के ऊरुमूल में, तदनन्तर दाहिने पैर को बायें पैर के ऊरु पर रख कर करे अर्थात् एक पैर से आसन के बाद दूसरा पैर बदल कर आसन करे ॥ २७-२८ ॥

पृष्ठे करद्वयं नीत्वा वृद्धाङ्गुष्ठद्वयं सुधीः ।
कायसङ्कोचमाकृत्य[2] धृत्वा बद्धासनो भवेत् ॥ २९ ॥
बद्धपद्मासनं[3] कृत्वा वायुबद्धं पुनः पुनः ।
चिबुकं स्थापयेद्यत्नाद् हलादितेजसि भास्करे ॥ ३० ॥

---

१. सव्यापसव्य—क० । २. माहृत्य—क० । ३. इति बद्धपद्मासनम्—क० ।

पीछे की ओर दोनों हाथ कर शरीर को सिकोड़ कर बायें हाथ से दाहिने पैर का अंगूठा और दाहिने हाथ से बायें पैर का अंगूठा पकड़कर (पद्म की तरह) बद्धासन हो जावे । इस प्रकार बद्धपद्मासन कर वायु से बँधे चिबुक को सुखदायक प्रकाश वाले सूर्य में प्रयत्नपूर्वक स्थापित करे ॥ २९-३० ॥

इत्यासनं हि सर्वेषां प्राणिनां सिद्धिकारणम् ।
वायुवश्याय यः कुर्यात् स योगी नात्र संशयः ॥ ३१ ॥

यह आसन समस्त प्राणियों की सिद्धि में हेतु है, इसलिए वायु को वश में करने के लिए योगी को अवश्य करना चाहिए इसमें संशय न करे ॥ ३१ ॥

स्वभावसिद्धिकरणं सर्वेषां स्वस्तिकासनम् ।
वामपादतले कुर्यात्पाददक्षिणमेव च ॥ ३२ ॥
सव्यापसव्ययोगेन आसनद्वयमेव च ।
सर्वत्रैवं प्रकारं च कृत्वा नाडीव[1] सारमेत् ॥ ३३ ॥

सभी को स्वभावतः सिद्धि प्रदान करने वाला **स्वस्तिकासन** है । बायें पैर के तलवे पर दाहिना पैर अथवा दाहिने पैर के तलवे पर बायाँ पर रखे इस प्रकार सव्यापसव्य के योग से दोनों आसन करे । सर्वत्र इस प्रकार का आसन कर नाड़ियों का संचालन करे ॥ ३२-३३ ॥

आसनानि [2]शृणु ह्येतत्त्रिंशतासंख्यकानि च ।
सव्यापसव्ययोगेन द्विगुणं प्रभवेदिह ॥ ३४ ॥
चतुःषष्ट्यासनानीह वदामि वायुसाधनात् ।
द्वात्रिंशद्बिन्दुभेदाय[3] कल्पयेद् वायुवृद्धये ॥ ३५ ॥

अब, हे महाभैरव ! तीस आसनों को सुनिए, ये सव्यापसव्य के योग से दूनी संख्या में हो जाते हैं । वायु साधन के लिए चौसठ आसनों को मैं कहती हूँ, जिसमें से वायु की वृद्धि के लिए एवं बिन्दु का भेद करने के लिए बत्तीस आसन अवश्य करे ॥ ३४-३५ ॥

कार्मुकासनमाकृत्य[4] उदरे पूरयेत् सुखम् ।
तदा वायुर्वशो याति कालेन सूक्ष्मवायुना ॥ ३६ ॥
कृत्वा पद्मासनं मन्त्री वेष्टयित्वा प्रधारयेत् ।
करेण दक्षिणेनैव वामपादान्तिकं तटम्[5] ॥ ३७ ॥
सव्यापसव्यद्विगुणं कार्मुकासनमेव च ।
कार्मुकद्वययोगेन शरवद् वायुमानयेत् ॥ ३८ ॥

कार्मुकासन—धनुष के समान शरीर को बढ़ाकर सुख से उदर में वायु को पूर्ण करे तो इस सूक्ष्म वायु के प्रभाव से समय आने पर वायु स्वयं वश में हो जाता है । मन्त्रज्ञ

---

१. सावसेत्—क० । २. शृणुष्वैतत् द्वात्रिंशत्—क० ।
३. ग्रन्थिभेदाय—क० । ४. माहत्य—क० ।
५. पादाङ्गुलि—क० ।

साधक पद्मासन कर दाहिने हाथ से पृष्ठभाग में घुमाकर बायें पैर की अंगुली को पकड़े। इसी प्रकार बायें हाथ से पृष्ठभाग में घुमाकर दाहिने पैर की अंगुली को पकड़े तो सव्यापसव्य योग से यह आसन दुगुना हो जाता है, इसी प्रकार कार्मुकासन भी सव्यापसव्य से दुगुना हो जाता है, कार्मुकासन के द्वारा सीधे बाण की तरह वायु को भीतर ले जावे ॥ ३६-३८ ॥

कुक्कुटासनमावक्ष्ये नाडीनिर्मलहेतुना।
मत्कुलागमयोगेन[१] कुर्याद् वायुनिषेवणम् ॥ ३९ ॥
निजहस्तद्वयं भूमौ पातयित्वा जितेन्द्रियः[२]।
पद्भ्यां बद्धं यः करोति कूर्परद्वयमध्यतः ॥ ४० ॥
सव्यापसव्ययुगलं कुक्कुटं ब्रह्मणा कृतम्।
बद्धं कृत्वा अधःशीर्षं यः करोति खगासनम् ॥ ४१ ॥
खगासन प्रसादेन श्रमलोपो[३] भवेद् द्रुतम्।
पुनः पुनः श्रमादेव[४] विषयश्रमलोपकृत् ॥ ४२ ॥

अब नाड़ियों को निर्मल करने के लिए मैं **कुक्कुटासन** की विधि कहती हूँ। मेरे सम्प्रदाय के आगम के अनुसार कुक्कुटासन से वायु सेवन करे। साधक अपने इन्द्रियों को वश में कर, दोनों हाथों को भूमि पर स्थापित कर, फिर दोनों पैरों को दोनों हाथ के केहुनी में घुमा कर दोनों हाथों को उससे आबद्ध करे। सव्यापसव्य योग से यह आसन भी दो की संख्या में हो जाता है। इसे ब्रह्मदेव ने किया है। शिर के नीचे वाले भाग को अपने हाथ मे बाँध कर जो किया जाता है वह **खगासन** है। खगासन की कृपा से निश्चय ही थकावट शीघ्रता से दूर हो जाती है। यह पुनः पुनः श्रम करने से तथा विषयों से होने वाले श्रम को विनष्ट करता है ॥ ३९-४२ ॥

लोलासनं सदा कुर्याद् वायुलोलापघातनात्।
स्थिरवायुप्रसादेन स्थिरचेता भवेद्द्रुतम्[५] ॥ ४३ ॥
पद्मासनं समाकृत्य पादयोः सन्धिगह्वरे।
हस्तद्वयं मध्यदेशं नियोज्य कुक्कुटाकृतिः ॥ ४४ ॥

वायु की चञ्चलता को दूर करने के लिए सर्वदा **लोलासन** का अभ्यास करना चाहिए क्योंकि वायु के स्थिर होने से ही शीघ्रता से चित्त स्थिर हो जाता है। दोनों पैरों के छिद्र के भीतर पद्मासन को समान रूप से करके हाथों को शरीर के मध्य भाग में नियुक्त करे तो **कुक्कुटाकृति आसन** होता है ॥ ४३-४४ ॥

निजहस्तद्वयद्वन्द्वं[६] निपात्य हस्तनिर्भरम्।
कृत्वा शरीरमुल्लाप्य[७] स्थित्वा पद्मासनेऽनिलः ॥ ४५ ॥

---

१. मार्गेण—क०। २. द्विजोत्तमः—क०।
३. लेप—ग०। ४. श्रयादेव—क०।
५. ध्रुवम्—क०। ६. तत्रद्वन्द्वम्—क०।
७. मुत्थाप्य—क०।

स्थित्वैतदासने मन्त्री अधःशीर्षं करोति चेत् ।
उत्तमाङ्गासनं ज्ञेयं योगिनामतिदुर्लभम् ॥ ४६ ॥

दोनों हाथ के द्वन्द्व (जोड़े) को नीचे कर हाथ के बल शरीर को ऊपर उठाकर पद्मासन पर वायु के समान ऊपर उठ जावे । फिर इस आसन पर स्थित हो कर अपने शिर को नीचा करले तो वह **उत्तमाङ्गासन** हो जाता है, जो योगियों के लिए अत्यन्त दुर्लभ है ॥ ४५-४६ ॥

एतदासनमात्रेण शरीरं शीतलं भवेत् ।
पुनः पुनः प्रसादेन[१] चैतन्या कुण्डली भवेत् ॥ ४७ ॥
सव्यापसव्य[२]योगेन यः करोति पुनः पुनः ।
पूरयित्वा मूलपद्मे सूक्ष्मवायुं विकुम्भयेत्[३] ॥ ४८ ॥
कृत्वा कुम्भकमेवं हि सूक्ष्मवायुलयं विधौ ।
मूलादिब्रह्मरन्ध्रान्ते स्थापयेल्लयगे पदे[४] ॥ ४९ ॥
एतत् शुभासनं कृत्वा सूक्ष्मरन्ध्रे मनोलयम् ।
सूचीरन्ध्रे[५] यथासूत्रं पूरयेत् सूक्ष्मवायुना ॥ ५० ॥

इस आसन के करने मात्र से शरीर शीतल हो जाता है । बारम्बार इस आसन के करने से कुण्डलिनी चेतनता को प्राप्त करती है । सव्यापसव्य योग से जो बारम्बार उत्तमाङ्गसन करता है और मूलाधार पद्म में सूक्ष्म वायु भर कर फिर कुम्भक करता है । इस प्रकार कुम्भक प्राणायाम करने से सूक्ष्मवायु को चन्द्र नाड़ी में लय कर उसे मूलाधार से लय करने वाले ब्रह्मरन्ध्र में स्थापित करना चाहिए । इस शुभासन को करने के बाद जिस प्रकार सूई के छिद्र को सूत डालकर पूर्ण किया जाता है, उसी प्रकार सूक्ष्म वायु से सूक्ष्म रन्ध्र को पूर्ण करे तब मन का लय हो जाता है ॥ ४७-५० ॥

एतत् क्रमेण षण्मासान् पूरकस्यापि लक्षणम् ।
महासुखं समाप्नोति योगाष्टाङ्गनिषेवणात् ॥ ५१ ॥
अथ वक्ष्ये महादेव पर्वतासनमङ्गलम् ।
यत्कृत्वा स्थिररूपी स्याद् षट्चक्रादिविलोपनम्[६] ॥ ५२ ॥

इसी क्रम से ६ महीने तक योग के आठों अङ्गों को करता हुआ साधक पूरक द्वारा सूक्ष्म रन्ध्र पूर्ण करे तो महान् सुख प्राप्त करता है । हे महादेव ! अब मैं मङ्गलकारी **पर्वतासन** कहती हूँ जिसके करने से साधक स्थिर स्वरूप हो जाता है । षट्चक्रादि का भेदन ही पर्वतासन है ॥ ५१-५२ ॥

योन्यासनं पर्वतेन योगं योगफलेऽनिलम्[७] ।
तत्कालफललन्तावत्[८] खेचरो यावदेव हि ॥ ५३ ॥

---

१. प्रमादेव—क० । २. सव्यापसव्ययोर्योगः, तेनेत्यर्थः ।
३. निकुम्भयेत्—क० । ४. लयगोपथे—क० ।
५. शुचिरन्ध्रे—क० । ६. विलोडनम्—क० ।
७. फलोल्वणम्—क० । ८. सफलस्तावत्—क० ।

पादयोगेन[१] चक्रस्य लिङ्गाग्रं यो नियोजयेत् ।
अन्यत्पदमूरौ दत्त्वा तत्र योन्यासनं भुवि ॥ ५४ ॥

पर्वत आसन के साथ योन्यासन का संयोग करने से योग के फलस्वरूप अनिल तब तक फल प्रदान करता है जब तक वह खेचर हो जाता है । जो पृथ्वी पर अपने लिङ्ग के अग्रभाग को एक पैर के अंगूठे से दबाकर रखता है तथा दूसरे पैर को दूसरे पैर के ऊरु पर स्थापित करता है, तो वह योन्यासन हो जाता है ॥ ५३-५४ ॥

तत्र मध्ये[२] महादेव बन्द्धयोन्यासनं शृणु ।
यत्कृत्वा खेचरो भूत्वा विचरेदीश्वरो यथा ॥ ५५ ॥
कृत्वा योन्यासनं नाथ लिङ्गगुह्यादिबन्धनम् ।
मुखनासा[३]नेत्रकर्णकनिष्ठाङ्गुलिभिस्तथा ॥ ५६ ॥
ओष्ठाधरं कनिष्ठाभ्यामनामाभ्याञ्च नासिके ।
मध्यमाभ्यां[४] नेत्रयुग्मं तर्ज्जनीभ्यां[५] परै: श्रुती[६] ॥ ५७ ॥

हे महादेव ! अब उसके मध्य में **बद्धयोन्यासन** सुनिए, जिसके करने से साधक खेचरता प्राप्त कर ईश्वर के समान सर्वत्र विचरण करता है । उक्त विधि से लिङ्ग गुह्यादि स्थान को बाँधकर योन्यासन कर मुख को दोनों कनिष्ठा से, नासिका को दोनों अनामिका से, दोनों नेत्रों को दोनों मध्यमा से और दोनों कानों को दोनों तर्जनी से आच्छादित करे । यह बद्ध योन्यासन है ॥ ५५-५७ ॥

कृत्वा योन्यासनं नाथ योगिनामति दुर्लभम् ।
कृत्वा य: पूरयेद्द वायुं मूलमाकुञ्च्य स्तम्भयेत् ॥ ५८ ॥
सव्यापसव्ययोगेन सिद्धो भवति साधक: ।
शनै: शनै: समारुह्य कुम्भकं परिपूरयेत् ॥ ५९ ॥

हे नाथ ! योगियों को अत्यन्त दुर्लभ बद्ध योन्यासन कर जो शरीर में वायु को पूर्ण करता है तथा मूलाधार का सङ्कोच कर उसे स्तम्भित करता है । इस प्रकार बायें से दाहिने तथा दाहिने से बायें के क्रम से जो पूरक तथा स्तम्भन प्राणायाम करता है तो वह साधक सिद्ध हो जाता है ॥ ५८-५९ ॥

अरुणोदयकालाच्च वसुदण्डे[७] सदाशिव ।
सव्यापसव्ययोगेन [८]गृह्णीयाद्वायुगानिलम् ॥ ६० ॥

हे सदाशिव ! अरुणोदय काल से आठ दण्ड पर्यन्त धीरे-धीरे पूरक द्वारा वायु पूर्ण

---

१. पादाङ्गुष्ठेन चाक्रम्य—क० । २. एतन्मध्ये—क० ।
३. अथ——क० । ४. मध्यमाख्यम्—क० ।
५. छादयित्वा परै: श्रुतिम्—क० ।
६. श्रूयते आभ्यामिति श्रुती । करणे स्त्रियां क्तिन् । प्रथमाद्विवचनान्तं पदम्
७. वत्स्वदण्डे (दन्ते)—क० । ८. गृहणत्वं बाह्यगानिलम्—क० ।

कर कुम्भक करे । बायें से दाहिने तथा दाहिने से बायें दोनों प्रकार से सव्यापसव्य योग से नासिका से वायु ग्रहण करे ॥ ५९-६० ॥

द्वितीयप्रहरे कुर्याद् वायुपूजां[१] मनोरमाम् ।
एतदासनमाकृत्य[२] सिद्धो भवति साधकः ॥ ६१ ॥
अथान्यदासनं वक्ष्ये यत्कृत्वा सोऽमरो भवेत् ।
मत्साधकः शुचिः श्रीमान् कुर्याद्गत्वा निराविले ॥ ६२ ॥

इसके बाद द्वितीय प्रहर प्राप्त होने पर मन को रमण करने वाली वायु की पूजा करनी चाहिए । यह पूजा भी किसी आसन विशेष को करते हुए करनी चाहिए । अब इसके बाद अन्य आसन कहती हूँ, जिसके करने से साधक अमर हो जाता है । मेरा साधक पवित्र एवं शोभा सम्पन्न हो कर किसी निर्दोष स्थान में जाकर इन आसनों को करे ॥ ६१-६२ ॥

भेकानामासनं[३] योगं निजवक्षसि सम्मुखम्[४] ।
निधाय पादयुगलं स्कन्धे बाहू पदोपरि ॥ ६३ ॥
ध्यायेद्धि[५] चित्पदं भ्रान्तमासनस्थः सुखाय च ।
यदि सर्वाङ्गमुत्तोल्य गगने खेचरासनम् ॥ ६४ ॥

साधक अपने दोनों पैरों को आमने-सामने वक्षः स्थल पर स्थापित करे । तदनन्तर दोनों हाथों को पैर के ऊपर से ले जाकर अपने कन्धे पर रखे । इस प्रकार के **भेकासन** पर बैठकर सुख प्राप्ति के हेतु प्रकाशमान चित्पद का ध्यान करे । सभी अङ्गों को समान समान भाग में ऊपर आकाश में स्थापित करे तो **खेचरासन** हो जाता है ॥ ६३-६४ ॥

महाभेकासनं[६] प्रोक्तं सर्वसिद्धिप्रदायकम् ।
महाविद्यां महामन्त्रं प्राप्नोति जपतीह यः ॥ ६५ ॥
एतत् प्रभेदं वक्ष्यामि करोति यः स चामरः ।
एकपादमूरौ बद्ध्वा स्कन्धेऽन्यत्पादरक्षणम् ॥ ६६ ॥
एतत्प्राणासनं नाम सर्वसिद्धिप्रदायकम् ।
वायुमूले समारोप्य ध्यात्वाऽऽकुञ्च्य प्रकारयेत् ॥ ६७ ॥

सम्पूर्ण सिद्धियों को देने वाला भेकासन हम पहले कह आए हैं । इस आसन पर बैठकर जो महाविद्या के मन्त्र का जप करता है वह अवश्य ही महाविद्या को प्राप्त कर लेता है । अब इस (भेकासन) के भेद को कहती हूँ जो इसे करता है वह अमर हो जाता है । एक पैर को ऊरु पर और दूसरा पैर कन्धे पर रखे तो उसे **प्राणासन** कहते हैं । यह सभी प्रकार की सिद्धियों को देने वाला है । वस्तुतः वायु को मूलाधार में स्थापित कर ध्यान करते हुए उसे संकुचित कर प्राणासन करना चाहिए ॥ ६५-६७ ॥

---

१. बाह्यपूजाम्—क० । २. माहत्य—क० ।
३. भेकनामासनम्—क० । ४. षण्मुखम्—क० ।
५. ध्यायेदिष्टपदं श्रीमानासनस्थः—क० ।
६. महाँश्चासौ भेकश्चेति महाभेकः, महान् दर्दुरः, तस्यासनम् ।

केवलं पादमेकञ्च स्कन्धे चारोप्य यत्नतः ।
एकपादेन गगने तिष्ठेत् स दण्डवत् प्रभो ॥ ६८ ॥
अपानासनमेतद्धि सर्वेषां पूरकाश्रयम् ।
कृत्वा सूक्ष्मे शीर्षपद्मे समारोप्य[1] च वायुभिः ॥ ६९ ॥
तदा सिद्धो भवेन्मर्त्यः प्राणापानसमागमः ।
अपानासनयोगेन कृत्वा योगेश्वरो भुवि ॥ ७० ॥

केवल एक पैर यत्न पूर्वक कन्धे पर स्थापित करे और दूसरा पैर ऊपर आकाश में डण्डे की तरह तान कर स्थित रहे, तो हे प्रभो ! यह **अपान** नामक आसन हो जाता है । यदि वायु के द्वारा सूक्ष्म शीर्षपद्म में पूरक प्राणायाम करते हुए इसे करे तो साधक मनुष्य सिद्ध हो जाता है । इसमें प्राण और अपान दोनों परस्पर एक हो जाते हैं । अपान आसन करने से साधक पृथ्वी में योगेश्वर बन जाता है ॥ ६८-७० ॥

समानासनमावक्ष्ये सिद्धमन्त्रादिसाधनात् ।
एकपादमूरौ दत्त्वा गुह्येऽन्यल्लिङ्गवक्त्रके[2] ॥ ७१ ॥
एतद् वीरासनं नाथ समानासनसंज्ञकम् ।
इत्याकृत्य जपेन्मन्त्रं धृत्वा वायुं चतुर्दले ॥ ७२ ॥

अब सिद्धमन्त्र का कारणभूत **समानासन** (=वीरासन) कहती हूँ । एक पैर ऊरु पर रखे दूसरा पैर गुह्य तथा लिङ्ग के मुख भाग पर रखे तो इसे वीरासन और समानासन दोनों कहा जाता है । इस आसन को करते हुए मूलाधार में स्थित चतुर्दल पर वायु धारण कर मन्त्र का जप करे ॥ ७१-७२ ॥

कुण्डलीं [3]भावयेन्मन्त्रं कोटिविद्युल्लताकृतिम् ।
आत्मचन्द्रामृत[4]रसैराप्लुतां योगिनीं सदा ॥ ७३ ॥
वीरासनं तु वीराणां योगवायुप्रधारणम् ।
यो जानाति महावीरः स योगी भवति ध्रुवम् ॥ ७४ ॥

अथवा मन्त्रज्ञ साधक आत्मा रूप चन्द्रमा से निकले हुए अमृत रस से परिपूर्ण योगिनी स्वरूपा करोड़ों विद्युल्लता के समान कुण्डलिनी का ध्यान करे । यही वीरासन वीरों को योगवायु धारण करने के लिए है, जो महावीर इस आसन को जानता है वह निश्चित रूप से योगी हो जाता है ॥ ७३-७४ ॥

अथ वक्ष्ये महाकाल समानासनसाधनम्[5] ।
भेदक्रमेण यज्ज्ञात्वा वीराणामधिपो भवेत् ॥ ७५ ॥

---

१. स्वं समारोप्य—क० । २. लिङ्गरन्ध्रके—क० ।
३. मन्त्री—क० ।
४. आत्मा च चन्द्रश्चेति आत्मचन्द्रौ, तयोरमृतरसैरित्यर्थः ।
५. सज्ज्ञकम्—क० ।

समानासनमाकृत्य वृद्धाङ्गुष्ठं करेण च ।
एकेन सोऽधिकारी स्यात् स्वरयोगादिसाधने ॥ ७६ ॥

हे महाकाल ! अब समानासन के साधन को कहती हूँ, जिसके भेदों को क्रमशः जान कर साधक वीरेश्वर बन जाता है । समानासन कर एक हाथ से अंगूठा बाँध रखे । ऐसा करने से साधक स्वरयोगादि के साधन में अधिकारी बन जाता है ॥ ७५-७६ ॥

आसनं यो हि जानाति वायूनां हरणं तथा ।
कालादीनां निर्णयं तु स कदाचिन्न नश्यति ॥ ७७ ॥
कालेन लभ्यते सिद्धिः कालरूपो महोज्ज्वलः ।
साधकैर्योगिभिर्ध्येयः सिद्धवीरासनात्मना ॥ ७८ ॥

जो आसन करना जानता है, वायु का हरण करना जानता है तथा कालादि का निर्णय करना जानता है, वह कभी नष्ट नहीं होता । काल प्राप्त करने पर सिद्धि होती है । काल का स्वरूप उज्ज्वल (प्रकाश करने वाला) है । इसलिए साधक योगियों को सिद्ध वीरासन से उसका ध्यान करना चाहिए ॥ ७७-७८ ॥

अथ वक्ष्ये नीलकण्ठ ग्रन्थिभेदासनं शुभम् ।
ज्ञात्वा रुद्रो भवेत् क्षिप्रं सूक्ष्मवायुनिषेवणात् ॥ ७९ ॥
कृत्वा पद्मासनं मन्त्री जङ्घयोः हृदये करौ ।
कूर्परस्थान[1]पर्यन्तं विभेद्य स्कन्धधारणम् ॥ ८० ॥

अब हे नीलकण्ठ ! परम कल्याणकारी **ग्रन्थि भेद** नामक आसन कहती हूँ । जिसके द्वारा सूक्ष्म वायु ग्रहण कर साधक शीघ्रता से रुद्र बन जाता है । मन्त्रज्ञ साधक पद्मासन कर दोनों जंघा और हृदय में दोनों हाथों को कूर्पर (केहुनी) पर्यन्त उसमें डालकर कन्धे पर धारण करे ॥ ७९-८० ॥

भित्वा पद्मासनं मन्त्री सहस्रार्द्धेन[2] घाटनम् ।
येन शीर्षं भावनम्रं[3] सर्वाङ्गुलिभिराश्रमम् ॥ ८१ ॥
ग्रन्थिभेदासनञ्चैतत् खेचरादिप्रदर्शनम् ।
कृत्वा सूक्ष्मवायुलयं परमात्मनि भावयेत् ॥ ८२ ॥

मन्त्रवेत्ता साधक पद्मासन के भीतर हाथ डालकर ५०० बार सिर को नीचे की ओर झुका कर नम्र करे । यह ग्रन्थिभेद नामक आसन है । ऐसा करने से आकाश में रहने वाले समस्त खेचर दिखाई पड़ते हैं अतः साधक इससे सूक्ष्म वायु में मन का लय कर परमात्मा में ध्यान करे ॥ ८१-८२ ॥

---

१. कूर्परस्तनपर्यन्तम्—क० ।
२. हस्तोर्ध्वेन स्वाघाटनम्—क० ।
३. येन शीर्षं भवेन्नम्रं सर्वाङ्गुलिभिराश्रयम्—क० ।

अथान्यासनमावक्ष्ये योगपूरकरक्षणात् ।
कृत्वा पद्मासनं पादा[1] अङ्गुष्ठजङ्घयोः स्थितम् ॥ ८३ ॥
हस्तमेकं तु जङ्घायाः कार्मुकं कूर्परोर्द्धकम् ।
पद्मासने समाधाय अङ्गुष्ठं परिधावयेत् ॥ ८४ ॥
कार्मुकासनमेतद्धि सव्यापसव्ययोगतः ।
पद्मासनं वेष्टयित्वा अङ्गुष्ठाग्रं प्रधावयेत्[2] ॥ ८५ ॥

इसके बाद अन्य आसन कहती हूँ यह योग में पूरक प्राणायाम के रक्षण में कारण है । पद्मासन कर दोनों पैर के अंगूठों को जङ्घा पर रक्खे । एक हाथ जङ्घा पर रखे, दूसरा हाथ धनुष के समान टेढ़ा कर कूर्पर के अग्रभाग पर और पद्मासन पर रक्खे अपने पैर के अंगूठों को चलाता रहे । सव्यापसव्य के योग से इसे **कार्मुकासन** कहते हैं ॥ ८३-८५ ॥

यः करोति सदा नाथ कार्मुकासनमुत्तमम् ।
तस्य रोगादिशत्रूणां क्षयं नीत्वा सुखी भवेत् ॥ ८६ ॥
अथ वक्ष्येऽत्र संक्षेपात् सर्वाङ्गासनमुत्तमम् ।
यत्कृत्वा योगनिपुणो विद्याभिः पण्डितो यथा ॥ ८७ ॥
अधो निधाय शीर्षं च ऊर्द्ध्वपादद्वयं चरेत् ।
पद्मासनं तु तत्रैव भूमौ कूर्परयुग्मकम् ॥ ८८ ॥

हे नाथ ! जो इस उत्तम कार्मुकासन को करता है, उसके रोगादि समस्त शत्रु नष्ट हो जाते हैं और वह सुखी हो जाता है । अब इसके अनन्तर संक्षेप में सर्वश्रेष्ठ **सर्वाङ्गासन** कहती हूँ । जिसके करने से साधक योगशास्त्र में इस प्रकार निपुण हो जाता है जैसे विद्या में पण्डित निपुण होता है । यह आसन नीचे शिर रख कर तथा दोनों पैरों को ऊपर कर करना चाहिए । भूमि में दोनों हाथों की केहुनियों को पद्मासन की तरह स्थापित करे ॥ ८६-८८ ॥

दण्डे दण्डे सदा कुर्यात् [3]श्रमशान्तिपरः सुधीः ।
नित्यं सर्वासनं हित्वा न कुर्याद् वायुधारणम् ॥ ८९ ॥
मासेन[4] सूक्ष्मवायूनां गमनं चोपलभ्यते ।
त्रिमासे[5] देवपदवीं त्रिमासे शीतलो भवेत् ॥ ९० ॥

बुद्धिमान् साधक को अपने श्रमापनोदन के लिए एक एक दण्ड के अनन्तर यह आसन करना चाहिए । सर्वाङ्गासन को छोड़कर नित्य वायु धारण न करे । ऐसा करने वाले

---

१. जंघा बहिःस्थितम्—क० । २. प्रधारयेत्—क० ।

३. श्रमश्च शान्तिश्च श्रमशान्ती, तयोः परः । अथवा—श्रमजनिता शान्तिः श्रमशान्तिः, मध्यमपदलोपिसमासः, तत्र परः ।

४. यामेन—क० । ५. द्विमासे—क० ।

साधक के शरीर में एक महीने में सूक्ष्म वायु चलने लगती है और वह तीन मास में देव पदवी प्राप्त कर शीतल हो जाता है ॥ ८९-९० ॥

अथ वक्ष्ये महादेव मयूरासनमुत्तमम् ।
भूमौ निपात्य हस्तौ द्वौ कूर्परोपरि देहकम् ॥ ९१ ॥
कूर्परोपरि संस्थाप्य सर्वदेहं स्थिराशयः ।
केवलं हस्तयुगलं निपात्य भुवि सुस्थिरः ॥ ९२ ॥

हे महादेव ! अब इसके अनन्तर सर्वश्रेष्ठ **मयूरासन** कहती हूँ । दोनों हाथों को पृथ्वी पर स्थापित करे तथा दोनों केहुनी पर समस्त शरीर स्थापित करे और आशय (उदर) को केहुनी पर स्थिर रखे तो मयूरासन हो जाता है ॥ ९१-९२ ॥

एतदासनमात्रेण नाडीसम्भेदनं भवेत् ।
पूरकेण दृढो याति सर्वत्राङ्गाश्रयेण च ॥ ९३ ॥
अथान्यदासनं कृत्वा[१] सर्वव्याधिनिवारणम् ।
योगाभ्यासी भवेत्क्षिप्रं ज्ञानासनप्रसादतः ॥ ९४ ॥

केवल दोनों हाथों को पृथ्वी पर रखकर सुस्थिर होकर बैठ जावे । इस आसन के करने मात्र से सभी नाड़ियाँ परस्पर एक हो जाती हैं । पूरक प्राणायाम के द्वारा सर्वाङ्ग का आश्रय हो जाने से साधक दृढ़ता प्राप्त करता है । इसके बाद अन्य ज्ञानासन करने से सभी व्याधियों का विनाश हो जाता है और साधक शीघ्रता से योगाभ्यासी बन जाता है ॥ ९३-९४ ॥

दक्षपादोरुमूले[२] च वामपादतलंतथा ।
दक्षपादतलं दक्षपार्श्वे संयोज्य धारयेत् ॥ ९५ ॥
एतज्ज्ञानासनं नाथ ज्ञानाद्विद्याप्रकाशकम् ।
निरन्तरं यः करोति तस्य ग्रन्थिः श्लथी भवेत् ॥ ९६ ॥

दाहिने पैर के ऊरुमूल पर बायें पैर का तलवा रखे । फिर दाहिने पैर के तलवे को दाहिने बगल के पार्श्वभाग से संयुक्त कर धारण करे । हे नाथ ! इसे ज्ञानासन कहा जाता है । इस ज्ञानासन से विद्या का प्रकाश होता है । अतः जो इस आसन का अभ्यास निरन्तर करता है उसकी अज्ञान ग्रन्थि ढ़ीली पड़ जाती है ॥ ९५-९६ ॥

सव्यापसव्ययोगेन मुण्डासनमिति स्मृतम् ।
कृत्वा ध्यात्वा स्थिरो भूत्वा लीयते परमात्मनि ॥ ९७ ॥
गरुडासनमावक्ष्ये येन ध्यानं स्थिरं भुवि ।
सर्वदोषाद्विनिर्मुक्तो भवतीह महाबली ॥ ९८ ॥

---

१. वक्ष्ये—क० ।

२. दक्षपादस्य ऊरुमूले इत्यर्थः ।

सव्यापसव्य के योग से इसे **मुण्डासन** भी कहा जाता है। इसको करने से, ध्यान करने से और स्थिर रखने से साधक परमात्मा में लीन हो जाता है। अब मैं **गरुड़ासन** कहती हूँ जिसके करने से पृथ्वी पर ध्यान स्थिर रहता है, साधक सारे दोषों से मुक्त हो जाता है और महाबलवान् हो जाता है॥ ९७-९८॥

एकपादमुरौ बद्ध्वा एकपादेन दण्डवत्।
जङ्घापादसन्धिदेशे ज्ञानव्यग्रं व्यवस्थितम्॥ ९९॥
एतदासनमाकृत्य पृष्ठे संहारमुद्रया।
आराध्य योगनाथं च सदा सर्वेश्वरस्य च॥ १००॥

एक पैर को ऊरु पर रखे दूसरे पैर से दण्ड के समान खड़ा रहे तो गरुड़ासन होता है। एक पैर को जंघा और पैर के सन्धि स्थान में रखे दूसरे को डण्डे के समान खड़ा रखे तो वह व्यवस्थित किन्तु ज्ञानव्यग्र होता है। इस आसन को करने के पश्चात् पीछे से संहार मुद्रा द्वारा योगनाथ की तथा सर्वेश्वर की आराधना करनी चाहिए॥ ९९-१००॥

अथान्यदासनं वक्ष्ये येन सिद्धो भवेन्नरः।
अकस्माद् वायुसञ्चारं कोकिलाख्यासनेन[1] च॥ १०१॥
ऊर्ध्वे हस्तद्वयं कृत्वा तदग्रे पादयोः सुधीः।
वृद्धाङ्गुष्ठद्वयं नाथ शनैः शनैः प्रकारयेत्॥ १०२॥

अब मैं अन्य आसन कहती हूँ जिससे मनुष्य सिद्धि प्राप्त करता है। वह है **कोकिल** नामक आसन, जिससे शरीर में अकस्मात् वायुसञ्चार होता है। पैर को आगे पसार कर उस पर दोनों हाथ रख कर पैर के आगे का अंगूठा पकड़े, इस क्रिया को धीरे-धीरे सम्पन्न करे॥ १०१-१०२॥

पद्मासनं समाकृत्य कूर्परोपरि संस्थितः[2]।
अथ[3] वक्ष्ये वीरनाथ आनन्दमन्दिरासनम्॥ १०३॥
यत्कृत्वा अमरो धीरो भवत्येवेह साधकः।
हस्तयुग्मं पाददेशे पादयुग्मं प्रदापयेत्॥ १०४॥
प्रकृत्य दण्डवत् कौल नितम्बाग्रे प्रतिष्ठति।
खञ्जनासनमावक्ष्ये यत्कृत्वा सुस्थिरो भवेत्॥ १०५॥

अथवा पद्मासन कर दोनों कूर्पर के बल स्थित हो जावे तो **कोकिलासन** होता है। हे वीरनाथ! अब मैं **आनन्दमन्दिरासन** कहती हूँ, जिसके करने से धीर साधक अमर बन जाता

---

१. कोटिलाख्यामलेन च—क०।

२. रञ्जसम्—क०।

३. स्थापयेत् कौलिकानाञ्च कौलिकासनमुत्तमम्।
एतदासनमाकृत्य वायुस्थम्भाङ्गनिर्मलम्॥
तिष्ठेत् ऊर्ध्वमुखो वीरः लिककासनमुत्तमम्॥ क० अ० पा०।

है । हे कौल ! दोनों पैरों के ऊपर किसी देश पर क्रमशः दोनों हाथों को रखकर फिर उन्हें दण्डे के समान खड़ा कर नितम्ब के अग्रभाग में स्थापित करे ॥ १०३-१०५ ॥

पृष्ठे पादद्वयं बद्ध्वा हस्तौ भूमौ प्रधारयेत् ।
भूमौ हस्तद्वयं नाथ पातयित्वानिलं पिबेत् ॥ १०६ ॥
पृष्ठे पादद्वयं बद्ध्वा खञ्जनेन जयी भवेत् ।
अथान्यदासनं वक्ष्ये साधकानां हिताय वै ॥ १०७ ॥

अब **खञ्जनासन** कहती हूँ, जिसके करने से साधक सुस्थिर हो जाता है । दोनों पैरों को पीठ पर बाँधकर दोनों हाथ पृथ्वी पर रखे । हे नाथ ! भूमि पर दोनों हाथों को रख कर वायु पान करे । पीठ पर दोनों पैर को बाँध कर खञ्जनासन करने से साधक जयी हो जाता है ॥ १०५-१०७ ॥

पवनासनरूपेण खेचरो योगिराड्भवेत् ।
स्थित्वा बद्धासने[1] धीरो नाभेरधःकरद्वयम् ॥ १०८ ॥
ऊर्द्ध्वमुण्डः पिबेद् वायुं निरुद्ध्येत[2] यमाविले ।

अब साधकों के लिए अन्य आसन कहती हूँ । **पवनासन** करने से साधक खेचर तथा योगिराज हो जाता है । धीर हो कर पद्मासन पर स्थित हो कर नाभि के नीचे दोनों हाथ रखकर शिर को ऊपर उठा कर वायु पान करे और दो छिद्र वाले इन्द्रियों (कान, आँख, नासिका) को रोके ॥ १०८-१०९ ॥

अथ सर्पासनं वक्ष्ये वायुपानाय केवलम् ॥ १०९ ॥
शरीरं दण्डवत्तिष्ठेद्रज्जुबद्धस्तु[3] पादयोः ।
वायवी कुण्डली देवी कुण्डलाकारमङ्गुले ॥ ११० ॥
मण्डिता भूषणाद्यैश्च वक्ष्ये सर्पासनस्थितम् ।
निद्रालस्यभयान् त्यक्त्वा रात्रौ कुर्यात्पुनः पुनः ॥ १११ ॥

अब केवल वायु पान के लिए सर्पासन कहती हूँ । दोनों पैरों में रस्सी बाँधकर शरीर को डण्डे के समान खड़ा रखे । कुण्डली देवी वायवी हैं । उनका आकार कुण्डल के समान गोला है । वे भूषणादि से मण्डित हैं तथा सर्पासन पर स्थित रहने वाली हैं इसे आगे कहूँगी । साधक निद्रा आलस्य तथा भय का त्याग कर बारम्बार इस सर्पासन को करे ॥ १०९-१११ ॥

सर्वान् विघ्नान् वशीकृत्य निद्रादीन् वायुसाधनात् ।
अथ वक्ष्ये [4]काकरूपस्कन्धासनमनुत्तमम् ॥ ११२ ॥

---

१. पद्मासने—क० ।
२. निरुद्धेन्द्रियमारिणे—क० ।
३. रज्वा—क० ।
४. कालरूप कल्पदासनमनुत्तमम्—क० ।
—काकरूपं यत्स्कन्धासनम्, इत्यर्थः ।

कलिपापात् प्रमुच्येत वायवीं वशमानयेत् ।
निजपादद्वयं बद्ध्वा स्कन्धदेशे च साधकः ॥ ११३ ॥
नित्यमेतत्[३] पदद्वन्द्वं भूमौ पुष्टिकरद्वयम् ॥ ११४ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावासननिर्णये पाशवकल्पे षट्चक्रसारसङ्केते सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे त्रयोविंशः पटलः ॥ २३ ॥

— ❖ —

इस आसन से वायु साधन करने के कारण सभी प्रकार के विघ्न तथा निद्रादि उसके वश में हो जाते हैं । अब सर्वश्रेष्ठ **काकस्कन्ध** आसन कहती हूँ । इस आसन से साधक कलि के पापों से मुक्त हो जाता है । वायवी कुण्डलिनी को वश में कर लेता है । साधक अपने दोनों पैरों को बाँधकर कन्धे पर रखे । अथवा दोनों पैरों को पृथ्वी पर ही बाँध कर रखे । ये दोनों प्रकार के आसन पुष्टिकारक हैं ॥ ११२-११४ ॥

॥ श्रीरुद्रयामल के उत्तरतन्त्र में महातन्त्रोद्दीपन में भावासन निर्णय में पाशवकल्प में षट्चक्रसारसङ्केत में सिद्धमन्त्रप्रकरण में भैरवी-भैरव संवाद के तेइसवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ २३ ॥

— ❖ —

३. निपात्य—क० ।

अथ चतुर्विंशः पटलः

आनन्दभैरवी उवाच

अथ वक्ष्ये महादेव योगशास्त्रार्थनिर्णयम् ।
येन विज्ञानमात्रेण षट्चक्रग्रन्थिभेदकः ॥ १ ॥

योगसाधननिरूपणम्

पर्व्वातिरिक्तदिवसे कुर्यात् श्रीयोगसाधनम् ।
कालिकाकुलसर्वस्वं कला[1] कालसमन्वितम् ॥ २ ॥

आनन्दभैरवी ने कहा—हे महादेव ! अब इसके अनन्तर योगशास्त्र के अर्थ का निर्णय कहती हूँ जिसके ज्ञानमात्र से पुरुष षट्चक्र का भेदन करने वाला बन जाता है । पर्व के दिनों को छोड़कर श्रीविद्या के योग का साधन करना चाहिए । यह श्रीयोग महाकाल से युक्त कालिका कुल सर्वस्व की कला है ॥ १-२ ॥

आसनं विधिना ज्ञानं कोटिकोटिक्रियान्वितम् ।
शतलक्षसहस्राणि आसनानि महीतले ॥ ३ ॥
स्वर्गे पातालमध्ये तु सम्मुक्तानि महर्षिभिः ।
भेदाभेदक्रमेणैव कुर्यान्नित्यं सदासनम् ॥ ४ ॥

करोड़ों करोड़ों क्रियाओं से युक्त आसन का ज्ञान विधिपूर्वक करना चाहिए । इस पृथ्वी पर ही सौ लाख हजार आसन कहे गए हैं । जिन्हें महर्षियों ने स्वर्ग में एवं पाताल में किया था । अतः भेदाभेद के क्रम से उन अच्छे अच्छे आसनों को सर्वदा करना चाहिए ॥ ३-४ ॥

तत्प्रकारं च विविधं यत्कृत्वा सोऽमरो भवेत् ।
अमरः सिद्ध इत्याहुरष्टैश्वर्यसमन्वितम् ॥ ५ ॥
प्रतिभाति स एवार्थो मूलमन्त्रार्थवेदिनः[2] ।
अमरास्ते प्रशंसन्ति सर्वलोकनिरन्तरम् ॥ ६ ॥

अष्टैश्वर्य समन्वित उस आसन के अनेक प्रकार हैं, जिन्हें करने पर साधक अमर हो जाता है । ऐसा लोग कहते हैं कि देवता लोग आसन के प्रभाव से सिद्ध हो गए हैं । यही बात मूलमन्त्र के अर्थवित्ताओं को भी भासित होती है । देवता लोग भी सभी लोकों में निरन्तर आसन की प्रशंसा करते हैं ॥ ५-६ ॥

---

१. काली (?)—क० ।

२. मूलमन्त्रार्थं विदन्ति, तच्छीला मूलमन्त्रार्थवेदिनः, ताच्छील्ये णिनिः ।

देवाः श्रीकामिनीकान्ताः प्रभवन्ति जगत्त्रये ।
कालं हि वशमाकर्त्तुं नियुक्तो यश्च भावकः ॥ ७ ॥
ते सर्वे विचरन्तीह कोटिवर्षशतेषु च ।
तत्तदासननामानि शृणु तत्साधनानि च ॥ ८ ॥
येन विज्ञानमात्रेण साक्षादीशस्य भक्तिमान् ।
अथ कूर्मासनं नाथ कृत्वा वायुं प्रपूरयेत् ॥ ९ ॥

ऐसे तो देवता लोग श्री (कामिनी) में प्रेम करने वाले होते हैं, किन्तु जो आसन में भावना करने वाले हैं, वे काल को भी वश में करने में समर्थ हैं । ऐसे भावक इस लोक में सैकड़ों करोड़ों वर्षों तक विचरण करते हैं । अब हे सदाशिव ! उन-उन आसनों के नाम तथा उनके सिद्धि के साधनों को सुनिए, जिनके ज्ञानमात्र से साधक ईश्वर की भक्ति करने वाला बन जाता है ॥ ७-९ ॥

कामरूपो भवेत् क्षिप्रं कलिकल्मषनाशनम् ।
समानासनमाकृत्य लिङ्गाग्रे स्वीयमस्तकम् ॥ १० ॥
नितम्बे हस्तयुगलं भूमौ सङ्कोचितः पतेत् ।
कुम्भीरासनमावक्ष्ये वायूनां धारणाय च ॥ ११ ॥

आसन निरूपण—हे नाथ ! **कूर्मासन** कर वायु से शरीर को पूर्ण करे । यह कूर्मासन कलि के समस्त पापों को नष्ट करने वाला है । इसके करने से साधक कामनानुसार रूप धारण करने वाला बन जाता है ! **समानासन** (द्र० . २३ . ७१) करके लिङ्ग के आगे अपना मस्तक तथा नितम्ब पर दोनों हाथ रखकर शरीर को सिकोड़ते हुए पृथ्वी पर गिर जावे ॥ ९-११ ॥

तिष्ठेत् कुण्डाकृतिर्भूमौ करौ शीर्षोपरि स्थितौ ।
पदोपरि पदं दत्त्वा शीर्षोपरि करद्वयम् ॥ १२ ॥
तिष्ठेत् कुण्डाकृतिर्भूमौ कुम्भीरासनमेव तत् ।
अथ मत्स्यासनं पृष्ठे हस्तोपरि कराङ्गुलिः ॥ १३ ॥
पादयुग्मप्रमाणेन[1] वृद्धाङ्गुष्ठस्य योजनम् ।

अब वायु धारण के लिए कुम्भीरासन कहती हूँ । दोनों हाथों को शिर के ऊपर रखे, पैर के ऊपर पैर रखकर कुण्ड की आकृति में पृथ्वी पर गिर जावे, यह कुम्भीरासन कहा जाता है । अब मत्स्यासन सुनिए । हाथ की फैली हुई अङ्गुलियों के ऊपर दोनो पैरों को फैलाकर शरीर को मयूर के समान बनाते हुए पैर के अंगुष्ठ का समायोजन मत्स्यासन कहलाता है ॥ १३-१४ ॥

मकरासनमावक्ष्ये वायुपानाय कुम्भयेत् ॥ १४ ॥
पृष्ठे पादद्वयं दत्त्वा हस्ताभ्यां पृष्ठबन्धनम् ।
अथ सिंहासनं नाथ कूर्परोपरि जानुनी ॥ १५ ॥

---

१. समानन—क० ।

स्थापयित्वा ऊर्द्ध्वमुखो वायुपानं समाचरेत् ।
अथ वक्ष्ये महादेव कुञ्जरासनमुत्तमम् ॥ १६ ॥

अब **मकरासन** कहती हूँ जिससे वायुपान के लिए कुम्भक किया जाता है । पीठ पर दोनों पैर रखकर दोनों हाथों से पीठ को बाँध लेवे—यह मकरासन है । अब **सिंहासन** कहती हूँ । क्रमशः दोनों हाथ की केहुनी पर दोनों पैर का जानु स्थापित करे । तदनन्तर मुख को ऊपर कर वायु पान करे । यह सिंहासन है ॥ १४-१६ ॥

करेणैकेन पादाभ्यां भूमौ तिष्ठेत् शिरः करः ।
व्याघ्रासनमथो वक्ष्ये [१]क्रोधकालविनाशनम् ॥ १७ ॥
एकपादं शीर्षमध्ये मेरुदण्डोपरि स्थितम् ।
भल्लूकासनमावक्ष्ये यत्कृत्वा योगिराड् भवेत् ॥ १८ ॥

हे महादेव ! अब इसके बाद सर्वश्रेष्ठ **कुञ्जरासन** कहती हूँ—एक हाथ तथा दोनों पैरों के सहारे पृथ्वी पर स्थित रह कर शिर पर दूसरा पैर रखे तो सिंहासन होता है । अब क्रोधरूपी काल को विनाश करने वाले **व्याघ्रासन** को कहती हूँ । मेरुदण्ड के ऊपर से ले जाकर एक पैर शिर के मध्य में स्थापित करे तो व्याघ्रासन हो जाता है ॥ १७-१८ ॥

नितम्बे च पादगोष्ठी [२]हस्ताभ्यामङ्गुलीयकम् ।
अथ कामासनं वक्ष्ये कामसङ्गेन[३] हेतुना ॥ १९ ॥
गरुडासनमाकृत्य कनिष्ठाग्रं स्पृशोद्भवम्[४] ।
वर्त्तुलासनमावक्ष्ये यत्कृत्वा भैरवो भवेत् ॥ २० ॥
आकाशस्थितपादाभ्यां पृष्ठदेशं निबन्धयेत् ।

अब **भल्लूकासन** कहती हूँ जिसके करने से साधक योगिराज बन जाता है । दोनों नितम्ब पर पैर रखकर हाथों से (पैर की) अंगुली पकड़ रखे—यह भल्लूकासन है ।

अब काम का मर्दन करने वाले **कामासन** को कहती हूँ । गरुड़ासन (द्र०. २३. ९९) कर उसे कनिष्ठा अंगुली से पकड़े रहे । अब **वर्तुलासन** कहती हूँ जिसके करने से साधक साक्षात् भैरव बन जाता है । दोनों पैर को आकाश में खड़ाकर पीठ को बाँध लेवे ।

अथ मोक्षासनं वक्ष्ये यत्कृत्वा मोक्षमन्दिरम्[५] ॥ २१ ॥
दक्षहस्तं दक्षपादं केवलं स्थापयेत्सुधीः ।
अथ मालासनं नाथ यत्कृत्वा वायवीप्रियः ॥ २२ ॥
शुभयोगं समाप्नोति एकहस्तस्थितो नरः ।
अथ दिव्यासनं वक्ष्ये पृष्ठं हस्तेन बन्धयेत् ॥ २३ ॥

अब **मोक्षासन** कहती हूँ जिसके करने से मोक्षाधिकारी बन जाता है ।

---

१. क्रोध एव कालस्तस्य विनाशनं विनाशकमित्यर्थः ।
२. अङ्गुलीद्वयम्—क० ।
३. काममर्दनम्—क० ।
४. भुवि—क० ।
५. क्षेम—क० ।

सुधी साधक दाहिना हाथ दाहिना पैर केवल पृथ्वी पर स्थापित करे । अब **मालासन** कहती हूँ जिसके करने से वायु देवता कुण्डलिनी प्रसन्न होती हैं । केवल एक हाथ के बल पृथ्वी पर स्थित रहने वाला साधक उत्तम योग प्राप्त कर लेता है । अब **दिव्यासन** कहती हूँ । पीठ को एक हाथ से बाँधे ॥ २१-२३ ॥

एकहस्तमध्यदेशं भूमिहस्तञ्च नासया ।
अर्द्धोदयासनं नाथ सर्वाङ्गं खे नियोजयेत् ॥ २४ ॥
केवलं हस्तयुगलं भूमिमालोक्य[1] नासया ।
अथ चन्द्रासनं वक्ष्ये पादाभ्यां स्वशरीरकम् ॥ २५ ॥
पुनः पुनः धारयेद्[2] यो वायुधारणपूर्वकम् ।

हे नाथ ! अर्द्धोदयासन उसे कहते हैं जिसमें अपने सभी अङ्गो को आकाश में स्थापित करे और नासिका से पृथ्वी का घर्षण करते हुए दोनों हाथों को पृथ्वी पर रखे । अब **चन्द्रासन** कहती हूँ । बारम्बार वायु को धारण करते हुए दोनों पैरों के बल पर अपना समस्त शरीर बारम्बार स्थापित करे ॥ २४-२६ ॥

अथ हंसासनं वक्ष्ये शरीरेण पुनः पुनः ॥ २६ ॥
भूमौ सन्ताडयेत् श्वासैः प्राणवायुदृढः[3] सुधीः ।
अथ सूर्यासनं वक्ष्ये पृष्ठात् पादेन बन्धनम् ॥ २७ ॥
पृष्ठे[4] भेदान्वितं पादं तस्य हस्तेन[5] बन्धयेत् ।
अथ योगासनं वक्ष्ये यत्कृत्वा योगिराड् भवेत् ॥ २८ ॥

अब **हंसासन** कहती हूँ । सुधी साधक प्राणवायु को दृढ़ करते हुए अपने शरीर से निर्गत श्वासों द्वारा पृथ्वी को बारम्बार प्रताड़ित करे । अब **सूर्यासन** कहती हूँ । इससे पीछे से पैर के द्वारा सारा शरीर बाँधा जाता है । पीठ पर भेदयुक्त पैर रखकर उसे हाथ से बाँध रखे । अब **योगासन** कहती हूँ जिसके करने से साधक योगिराज बन जाता है ॥ २७-२८ ॥

सर्वाः[6] पादतलद्वन्द्वं स्वाङ्के बद्ध्वा करद्वयम् ।
गदासनमतो वक्ष्ये गदाकृतिर्वसेद् भुवि ॥ २९ ॥
ऊर्द्ध्वबाहुर्भवेद्येन कायशोधनहेतुना ।
अथ लक्ष्म्यासनं वक्ष्ये लिङ्गाग्रेऽङ्घ्रितलद्वयम् ॥ ३० ॥
गुह्यदेशे हस्तयुग्मं तलाभ्यां बन्धयेद् भुवि ।
अथ कुल्यासनं वक्ष्ये यत्कृत्वा कौलिको भवेत्[7] ॥ ३१ ॥

दोनों ऊरु पर दोनों पैर के तलवे रखकर अपने गोद में दोनों हाथों को परस्पर बाँध

---

१. भुवि व्यालोड्य—क० ।
२. भ्रामयेत् यो वायुधारणतत्परः—क० ।
३. प्राणवायुं दृढं सुधीः—क० ।
४. पृष्ठ—क० ।
५. अन्यहस्तेन—क० ।
६. उर्वो—क० ।
७. कौलिको मुनिः—क० ।

लेवे । अब **गदासन** कहती हूँ । गदा की आकृति में पृथ्वी पर स्थित हो जावे । और कायशुद्धि के लिए बाहुओं को ऊपर उठाए रखे । अब **लक्ष्म्यासन** कहती हूँ—लिङ्ग के अग्रभाग पर दोनों पैर का तलवा रखे तथा गुह्यदेश पर दोनों हाथ रख कर उसके तलवे से भूमि को पकड़ लेवे । अब **कुल्यासन** कहती हूँ, जिसके करने से साधक कुलमार्ग का अधिकारी बन जाता है ॥ ३०-३१ ॥

एकहस्तं मस्तकस्योऽधः शीर्षेऽभिन्नगे[1] करम् ।
ब्राह्मणासनमावक्ष्ये यत्कृत्वा ब्राह्मणो भवेत् ॥ ३२ ॥
एकपादमूरौ दत्त्वा तिष्ठेद् दण्डाकृतिर्भुवि ।
क्षत्रियासनमावक्ष्ये यत्कृत्वा धनवान् भवेत् ॥ ३३ ॥
केशेन पादयुगलं बद्ध्वा तिष्ठेदधोमुखः ।
अथ वैश्यासनं वक्ष्ये यत्कृत्वा सत्यवान्भवेत् ॥ ३४ ॥

एक हाथ को मस्तक के ऊपर रखे, दूसरे हाथ को शीर्ष के नीचे भाग में रखे । अब **ब्रह्मणासन** कहती हूँ, जिसके करने से साधक ब्राह्मण बन जाता है । एक पैर को ऊरु पर स्थापित करे तथा दूसरे पैर को डण्डे के समान पृथ्वी पर खड़ा रखे । अब **क्षत्रियासन** कहती हूँ, जिसके करने से साधक धनी हो जाता है । केश से दोनों पैरों को बाँधकर नीचे अधोमुख स्थित रहे ॥ ३२-३४ ॥

वृद्धाङ्गुष्ठेन यस्तिष्ठेत्[2] हस्तयुग्मं स्वकोरसि[3] ।
अथ शूद्रासनं वक्ष्ये यत्कृत्वा सेवको भवेत् ॥ ३५ ॥
धृत्वाङ्गुष्ठद्वयं योज्यं नासाग्रपादमध्यके[4] ।
अथ जात्यासनं वक्ष्ये येन जातिस्मरो भवेत् ॥ ३६ ॥
हस्ताङ्घ्रियुग्मं भूमौ च गमनागमनं ततः ।
पाशवासनमावक्ष्ये कृत्वा पशुपतिर्भवेत् ॥ ३७ ॥
पृष्ठे हस्तद्वयं दत्त्वा कूर्पराग्रे स्वमस्तकम् ।
एतेषां साधनादेव चिरजीवी भवेन्नरः ॥ ३८ ॥

अब **वैश्यासन** कहती हूँ जिसे कर के वैश्य सत्यनिष्ठ हो जाता है । दोनों हाथों को वक्षःस्थल पर स्थापित करे और दोनों पैर के अंगूठे को एक में सटा पर पृथ्वी पर खड़ा रहे । अब **शूद्रासन** कहती हूँ, जिसे करके साधक सेवक बन जाता है । दोनों अंगूठों को पकड़कर एक को नासिका के अग्रभाग में तथा दूसरे को पैर के मध्य भाग में स्थापित करे । अब **जात्यासन** कहती हूँ, जिसे करने पर साधक को पूर्वजन्म का ज्ञान होता है । दोनों हाथ और दोनों पैर को पृथ्वी पर रखकर गमनागमन करे ।

अब **पाशवासन** कहती हूँ, जिसके करने से साधक पशुपति बन जाता है । पीठ पर दोनों हाथ रखे, दोनों कूर्पर के आगे अपना मस्तक रखे, इन सभी आसनों की साधना से

---

१. एकहस्तमस्तकस्याऽधःशीर्षेऽतिगे करम्—क० ।
२. सन्तिष्ठेत्—क० ।
३. स्ववक्षसि—क० ।
४. नासाग्रम्—क० ।

मनुष्य चिरञ्जीवी बन जाता है ॥ ३४-३८ ॥

संवत्सरं साधनाद्वै जीवन्मुक्तो भवेद् ध्रुवम् ।
श्रीविद्यासाधनं पश्चात् कथितव्यं तव प्रभो ॥ ३९ ॥
आसनं योगसिद्ध्यर्थं [1]कायशोधनहेतुना ।
इदानीं शृणु देवेश रहस्यं कोमलासनम् ॥ ४० ॥
योगसिद्धिविचाराय [2] रहस्यं चर्मासनं शुभम् ।
अथ नरासनं वक्ष्ये षोडशादिप्रकारकम् ॥ ४१ ॥
येन साधनमात्रेण योगी भवति साधकः ।
प्रकारं षोडशप्रोक्तं मत्कुलागमसम्भवम् ॥ ४२ ॥

किं बहुना एक संवत्सर की साधना से निश्चित रूप से मनुष्य जीवन्मुक्त हो जाता है । हे प्रभो ! अब इसके आगे श्री विद्या के आसन का साधन आपसे कहूँगी । आसन कायशुद्धि के लिए है । कायशुद्धि से योगसिद्धि होती है । हे देवेश ! अब **कोमलासन** के गुप्त रहस्य को श्रवण कीजिए । योगसिद्धि के लिए चर्मासन शुभकारक गोपनीय रहस्य है ।

अब मैं सोलह प्रकार वाले नरासन को कहती हूँ, जिसके साधन से साधक योगी बन जाता है । नरासन का उक्त सोलह प्रकार हमारे शाक्तागम से उत्पन्न हुआ है ॥ ३९-४२ ॥

येन साधनमात्रेण साक्षाद्योगी महीतले ।
एकमासाद् भवेत्कल्पो [3] द्विमासे द्रुतकल्पनम् [4] ॥ ४३ ॥
त्रिमासे योगकल्पः [5] स्याच्चतुर्मासे स्थिराशयः [6] ।
पञ्चमासे सूक्ष्मकल्पे [7] षष्ठमासे विवेकगः ॥ ४४ ॥
सप्तमासे ज्ञानयुक्तो भावको भवति ध्रुवम् ।
अष्टमासेऽन्नसंयुक्तो [8] जितेन्द्रियकलेवरः ॥ ४५ ॥
नवमे सिद्धिमिलनो दशमे चक्रभेदवान् ।
एकादशे महावीरो द्वादशे खेचरो भवेत् ॥ ४६ ॥

इसके साधन से पृथ्वी पर साधक एक मास में योगी के समान हो जाता है । दो मास में योग कल्पक, तीन मास में योगीकल्प, चार मास में स्थिराशय, पाँच मास में सूक्ष्मकल्प तथा षष्ठमास में ज्ञान का पात्र हो जाता है ।

भावक सात मास में निश्चित रूप से ज्ञानवान् हो जाता है । आठ महीने में सत्त्वसम्पन्न तथा इन्द्रिय विजेता बन जाता है । नव महीनें में सिद्धि का मिलन होता है, दश मास में चक्रों का भेदन करने वाला, एकादश में महावीर तथा द्वादश मास में खेचर हो जाता है ॥ ४५-४६ ॥

---

१. कायसाधन—क० । २. योगशिक्षा—क० ।
३. कम्पो—क० । ४. कम्पनम्—क० । ५. कम्पः—क० ।
६. स्थिर आशयोऽन्तःकरणं यस्यासौ । आ समन्तात् शेते यस्मिन्नसौ आशयः ।
७. सूक्ष्मकम्पो—क० । ८. अष्टमे सत्त्वसंयुक्तो—क० ।

इति योगासनस्थश्च[१] योगी भवति साधकः।
नरासनं यः करोति स सिद्धो नात्र संशयः ॥ ४७ ॥
तत्प्रकारं प्रवक्ष्यामि येन सिद्धो भवेत्प्रभो ।
अधोमुखं महादेव नरासनस्य साधने ॥ ४८ ॥

इस प्रकार योग और आसन से संयुक्त साधक योगी बन जाता है, जो नरासन करता है वह सिद्ध हो जाता है इसमें संशय नहीं ॥ ४७ ॥

शवसिद्धिकथन—हे प्रभो ! अब नरासन का प्रकार कहती हूँ, जिससे साधक सिद्ध बन जाता है । नरासन के साधन काल में अधोमुख रहना चाहिए ॥ ४८ ॥

करणीयं साधकेन्द्रैर्योगशास्त्रार्थसम्मतैः ।
अक्षीणं यौवनोद्दामं सुन्दरं [२]चारुकुन्तलम् ॥ ४९ ॥
लोकानां श्रेष्ठमेवं हि पतितं रणसम्मुखे ।
तत्सर्वं[३] हि समानीय मङ्गले वासरे निशि ॥ ५० ॥
चन्द्रसूर्यासनं कृत्वा साधयेत्तत्र कौलिकः ।
अथान्यत् सम्प्रवक्ष्यामि सर्वसिद्धिप्रकारकम्[४] ॥ ५१ ॥
भेकासनं यः करोति स एव योगिनीपतिः ।

योगशास्त्र में निष्ठा रखने वाले साधकेन्द्रों को जिस प्रकार नरासन करना चाहिए उसका प्रकार कहती हूँ । जिसकी उत्कृष्ट जवानी क्षीण न हुई हो, जिसके केश अत्यन्त सुन्दर हों, जो शरीर से सुन्दर हो, युद्धभूमि में सामने मारा गया है, ऐसे लोक श्रेष्ठ युवक के शरीर को सर्वाङ्गतया लाकर मङ्गलवार के दिन रात्रि के समय चन्द्रासन और सूर्यासन कर कौलिक (शाक्त) साधक उसकी सिद्धि करे । इसके अतिरिक्त एक और सर्वसिद्धि का प्रकार कहती हूँ । जो उक्त शव पर बैठकर भेकासन करता है वही योगिनीपति होता है ॥ ४९-५२ ॥

अथान्यत् सम्प्रवक्ष्यामि यत्कृत्वा योगिराड् भवेत् ॥ ५२ ॥
तत्सर्वोत्तरशिरसि[५] स्थित्वा चन्द्रासने जपेत् ।
अथान्यत् तत्प्रकारञ्च महाविद्यादिदर्शनात् ॥ ५३ ॥
मत्सरे[६] गौरवर्णे च तत्र शैलासने जपेत् ।
अथान्यत्तत्प्रकारं च योगिकौलो न संशयः ॥ ५४ ॥
यद्येवं म्रियते सोऽपि तदा भद्रासने जपेत् ।
तत्तत्साधनकाले च एवं कुर्याद्दिने दिने ॥ ५५ ॥

अब दूसरा आसन कहती हूँ जिसको करके साधक योगिराज बन जाता है । उस शव के शिर के पीछे चन्द्रासन पर स्थित हो जप करे । अब उसका और प्रकार कहती हूँ, जो महाविद्या के दर्शन में कारण है ॥ ५२-५३ ॥

---

१. योगासनद्वन्द्वम्—क० । २. मण्डलम्—क० । ३. शवम्—क० ।
४. सर्वसिद्धिप्रकारणात्—क० ।—सर्वासां सिद्धीनां प्रकृष्टं कारणम्, तस्मात् ।
५. शवोत्तरशिरसि—क० । ६. यत् शवे—क० ।

मत्सर युक्त किन्तु गौरवर्ण के शवासन पर शैलासन से जप करे। अब उसका एक और प्रकार कहती हूँ, जिससे निस्सन्देह योगी शाक्त बन जाता है। जो उक्त प्रकार से मरा हुआ शव है उस पर भद्रासन से स्थित हो कर जप करे। उसकी सिद्धिकाल में प्रतिदिन ऐसा करे ॥ ५४-५५ ॥

नृत्यवाद्यगीतरागभोगोनविंशतौ[१] दिने।
चतुर्दशं न वीक्ष्येत[२] भैरवाणां भयाद्दर्दनात् ॥ ५६ ॥
मनोनिवेशमात्रेण योगी भवति भैरव।
स्वेच्छासनं[३] समाकृत्य मन्त्रं जपति यो नरः ॥ ५७ ॥
महासारो[४] वीतरागः सिद्धो भवति निश्चितम्।

शवसाधनानिरूपणम्

अथान्यत् शवमाहात्म्यं शृणुष्वावहितो मम ॥ ५८ ॥

उन्नीसवें दिन साधक नृत्य, वाद्य, गीत, राग तथा भोग इन १४ का दर्शन न करे क्योंकि दर्शन से भैरवों का भय होता है। हे भैरव ! इस प्रकार मन के सन्निवेश मात्र से साधक योगी हो जाता है। स्वेच्छासन करके जो मनुष्य जप करता है, दृढ़ सत्त्ववान्, वीतराग तथा निश्चित रूप से योगी होता है। अब हे सदाशिव ! सावधान हो कर अन्य प्रकार के शव माहात्म्य को सुनिए ॥ ५६-५८ ॥

तत्सर्वं[५] गृहमानीयाच्छाद्य शार्दूलचर्मणा।
तत्र मन्त्री महापूजां कृत्वा[६]प्रविश्य संजपेत् ॥ ५९ ॥
पद्मासनस्थस्तस्यैव[७] झटिद् योगी न संशयः ॥ ६० ॥
एतत्प्रकाररासनमाशु कृत्वा
जितेन्द्रियो योगफलार्थविज्ञः।
भवेन्मनुष्यो मम चाज्ञया हि
सिद्धो गणोऽसौ[८] जगतामधीशः ॥ ६१ ॥

उस शव को घर पर लाकर व्याघ्र चर्म से उसे आच्छादित करे। फिर उसकी महापूजा कर उस पर बैठ कर जप करे। पद्मासन लगाकर जप करने से शीघ्र ही योगी बन जाता है इसमें संशय नहीं। इस प्रकार शवसिद्धि का प्रकार सम्पादन कर साधक जितेन्द्रिय और योगफल के अर्थ का ज्ञाता हो जाता है। मेरी आज्ञा से ऐसा साधक सिद्ध हो जाता है, शिवगण हो जाता है तथा जगत् का स्वामी बन जाता है ॥ ५९-६१ ॥

---

१. भोगीन—क०।—नृत्यवादित्र। २. न वेक्षेत् (ना रक्षेत्)—क०।
३. देहासनम्—क०। ४. महाशवे—क०।
५. तत् शवं गृहमानीयच्छाद्यं शार्दूलचर्मणा—क०।—शार्दूलस्य चर्मणा, इति षष्ठीतत्पुरुषः।
६. कृत्वोपविश्य—क०। ७. पद्मासनस्थस्तु सैव—क०।
८. गणेशो—क०।

मूलखड्ग[१] यष्टिपरडितरवारादिना युतम् ।
.... भूतसर्पराज[२] व्याघ्रं सद्यो मृतं यजेत् ॥ ६२ ॥
यस्य मृत्युर्भवेन्नाथ भैरवस्य सुरापतेः ।
रणे सम्मुखयुद्धस्य तदानीय जपं चरेत् ॥ ६३ ॥
तत्र कौलासनं कृत्वा अथवा कमलासनम् ।
महाविद्यामहामन्त्रं जप्त्वा लिङ्गमवाप्नुयात्[३] ॥ ६४ ॥

मरे हुए भूत सर्प, राजा और व्याघ्र के शव पर मूल, खड्ग, यष्टि, परडि ?, तलवार लेकर जप करे । हे नाथ ! सुरा पीने वाले जिस भैरवोपासक की सम्मुख युद्ध करते हुए मृत्यु हो गई हो उसे लाकर जप किया जा सकता है । उस पर कौलासन अथवा कमलासन (=पद्मासन) से बैठकर महाविद्या के महामन्त्र का जप करे तो स्पष्ट रूप से महाविद्या के चिन्ह दिखाई पड़ने लगते हैं ॥ ६२-६४ ॥

एतत्सर्वं[४] न गृह्णीयाद् यदीच्छेदात्मनो हितम्[५] ।
कुव्याधिमरणं [६]कुष्ठं स्त्रीवश्यं पतितं [७]मृतम् ॥ ६५ ॥
दुर्भिक्षमृतमुन्मत्तमव्यक्तलिङ्गमेव च ।
हीनाङ्गं भूचरवृद्धं[८] पलायनपरं तथा[९] ॥ ६६ ॥
अन्यद्युो[१०] यद् विचारेण हत्वा लोकं जपन्ति ये ।
ते सर्वे व्याघ्रभक्षा[११] स्युः खादन्ति व्याघ्ररूपिणः ॥ ६७ ॥

शवसाधना में त्याज्य शव—यदि साधक अपना कल्याण चाहे तो निम्न प्रकार के शवों को जप के लिए न ग्रहण करे । जिसकी कुव्याधि से मृत्यु हो, जो कोढ़ी हो, स्त्री-वश्य हो अथवा पतित होकर मरा हो, जो दुर्भिक्ष में मरा हो, उन्मत्त हो कर मरा हो, जो स्त्री पुरुष के लिङ्ग से रहित (नपुंसक) होकर मरा हो, हीनाङ्ग होकर मरा हो, पृथ्वी पर विचरण करने वाला वृद्ध तथा युद्ध में भागते हुए मरा हो अथवा जिसने जिस विचार से किसी की हत्या कर दी हो, ऐसे शव पर बैठकर जो जप करते हैं वे सब व्याघ्र के भक्ष्य हो जाते हैं, उन्हें प्रेत बाघ का रूप धारण कर खा जाते हैं ॥ ६५-६७ ॥

पर्युषितं तथाशवस्थमधिकाङ्गं[१२] कुकिल्बिषम् ।
ब्राह्मणं गोमयं वीरं धार्मिकं सन्त्यजेत् सुधीः ॥ ६८ ॥
स्त्रीजनं योगिनं त्यक्त्वा साधयेद्वीरसाधनम् ।
तदा सिद्धो भवेन्मन्त्री आज्ञया मे न संशयः ॥ ६९ ॥

---

१. ग० नास्ति । २. श्रृणु शङ्क तव वारादिनायुतम् वृद्ध अथवा बहु—क० । ३. सिद्धिम्—क० । ४. शवम्—क० । ५. यदिच्छेत्—क० । ६. कुष्ठिम्—क० । ७. गुरुम्—क० । ८. तु वरं वृद्धम्—क० । ९. परायणः—क० । १०. अन्यायादविचारेण—क० । ११. व्याघ्रभक्षाः स्यात्—मूले क० । १२. तथास्पृश्यम्—क० ।

जो शव बासी हो गया हो, अश्व पर स्थित होकर मरा हो, अधिकाङ्ग हो, बुरे से बुरा पाप किया हो. ब्राह्मण हो, गोबर पर स्थित हो, वीरमार्ग में रहने वाला हो, धार्मिक हो ऐसे शव का परित्याग कर देना चाहिए। स्त्रीजन का शव और योगी का शव इन्हें छोड़कर वीर साधन करना चाहिए। तब मन्त्रज्ञ मेरी आज्ञा से सिद्ध हो जाता है इसमें संशय नहीं ॥ ६९ ॥

तरुणं सुन्दरं शूरं मन्त्रविद्यं समुज्ज्वलम्।
गृहीत्वा जपमाकृत्य सिद्धो भवति नान्यथा ॥ ७० ॥
मनुष्यशवहृत्पद्मे सर्वसिद्धिकुलाकुलाः[१]।
तत्र सर्वासनान्येव सिद्ध्यन्ति नात्र संशयः ॥ ७१ ॥
अथान्यत्तत्प्रकारं तु यत्कृत्वा योगिराट्[२] भवेत्।
कोमलाद्यासने स्थित्वा धारयन्[३] मारुतं सुधीः ॥ ७२ ॥

तरुण, सुन्दर, शूर, मन्त्रवेत्ता, प्रकाश से उज्ज्वल शव को ग्रहण कर उस पर जप करने से साधक सिद्ध हो जाता है, अन्यथा नही। मनुष्य के हृत्पद्म में कुल अथवा अकुल सभी सिद्धियाँ रहती हैं। उन पर उन-उन आसनों से जप करने से सिद्धि होती हैं इसमें संशय नहीं। इसके अतिरिक्त **एक अन्य प्रकार** है। कोमलादि आसन पर स्थित रहने वाला सुधी साधक वायु को धारण करने से योगिराज हो जाता है ॥ ७०-७२ ॥

तत्कोमलासनं[४] वक्ष्ये शृणुष्व मम तद्वचः।
अवृद्धकं[५] मृतं बालं षण्मासात् कोमलं परम् ॥ ७३ ॥
तद्विभेदं प्रवक्ष्यामि गर्भच्युत महाशवम्।
तद्धि व्याघ्रत्वचारूढं कृत्वा तत्र जपेत् स्थितः ॥ ७४ ॥

अब मैं उस कोमलासन को कहती हूँ, मेरी बात सुनिए। जो बहुत बड़ा न हुआ हो ऐसा ६ महीने के भीतर का मरा हुआ बालक अत्यन्त कोमल कहा जाता है। उनके भेदों को कहती हूँ। गिरे हुए गर्भ वाला बालक महाशव कहा जाता है। उसे व्याघ्र के चमड़े के ऊपर रख कर सुधी साधक जप करे ॥ ७३-७४ ॥

षण्मासानन्तरं यावद्दशमासाच्च पूर्वकम्।
मृतं चारुमुखं बालं गर्भाष्टमपुरःसरम् ॥ ७५ ॥
एकहस्ते द्विहस्ते वा चतुर्हस्ते समन्ततः।
विशुद्ध आसने कुर्यात् संस्कारं पूजनं ततः ॥ ७६ ॥

६ महीने के बाद दश महीने की अवस्था वाले सुन्दर मुख वाले मरे बालक को जो आठवें गर्भ से उत्पन्न हो, उसे लाकर एक हाथ दो हाथ, अथवा चार हाथ वाले विशुद्ध आसन पर बैठकर उसका संस्कार तथा पूजन करे ॥ ७५-७६ ॥

---

१. सर्वसिद्धिकलाकुला—क०। २. योगिनी—मूले क०।
३. धारयेन् मारुतं सुधीः—क०। ४. तत्कोमलादिमाहात्म्यं शृणुष्वासनं तत्त्वतः—क०।
५. अचूडकम्—क०।

पूर्णे पञ्चमवर्षे च साधको वीतभीः स्वयम् ।
हीनवीतोपनयनो[1] यो मृतस्तं हि कोमलम् ॥ ७७ ॥
गर्भच्युतफलं नाथ शृणु तत्फलसिद्धये ।
अणिमाद्यष्टसिद्धिः स्यात् संवत्सरस्य साधनात् ॥ ७८ ॥

पाँच वर्ष पूर्ण हो जाने पर साधक सर्वथा निर्भय हो जाता है । बिना यज्ञोपवीत हुए अथवा वीतोपनयन (?) वाला मरा हुआ बालक भी कोमल कहा जाता है । हे नाथ ! अब गिरे हुए गर्भ वाले बालकों के विषय में होने वाले फलों को सुनिए । जिस पर एक संवत्सर पर्यन्त साधन करने से अणिमा आदि अष्टसिद्धियों की सिद्धि होती है ॥ ७७-७८ ॥

मृतासने जपेन्मन्त्री महाविद्याममुं शुभम् ।
अचिरात्तस्य सिद्धिः स्यान्नात्र कार्या विचारणा ॥ ७९ ॥
अथान्यत् शवमाहात्म्यं शृणु सिद्धिश्च[2] साधनात् ।
साधको योगिराट् भूत्वा मम पादतले वसेत् ॥ ८० ॥

गर्भच्युत मरे हुए बालक के आसन पर बैठकर साधक महाविद्या के मन्त्र का जप करे तो उसे शीघ्र ही सिद्धि होती है इसमें विचार की आवश्यकता नहीं है । अब हे नाथ ! अन्य प्रकार से शव माहात्म्य का श्रवण कीजिए, जिसकी साधना से सिद्धि होती है । ऐसा साधक योगिराज बन कर मेरे पैर के नीचे निवास करता है ॥ ७९-८० ॥

दशसंवत्सरे पूर्णे यो म्रियेत शुभे दिने ।
शनौ मङ्गलवारे च तमानीय प्रसाधयेत् ॥ ८१ ॥
तत्र वीरासनं कृत्वा यो जपेद् भद्रकालिकाम् ।
अथवा बद्धपद्मे च स सिद्धो भवति ध्रुवम् ॥ ८२ ॥

ठीक दश वर्ष बीत जाने पर जो किसी शुभ दिन में मरा हो साधक उसे शनिवार अथवा मङ्गलवार के दिन लाकर सिद्ध करे । इस प्रकार के शव पर वीरासन लगाकर भद्रकाली मन्त्र का जप करे अथवा पद्मासन लगाकर जप करे तो वह निश्चित रूप से सिद्ध हो जाता है ॥ ८१-८२ ॥

अथ भावफलं वक्ष्ये येन शवादिसाधनम् ।
अकस्मात् प्राप्तिमात्रेण शवस्य विहितस्य च ॥ ८३ ॥
यं पञ्चदशवर्षीयं सुन्दरं पतितं रणे ।
तमानीय जपेद्विद्यां निशि वीरासने स्थितः ॥ ८४ ॥

शव के अकस्मात् प्राप्त होने पर उसकी साधना से होने वाले फल कहती हूँ, जो शवादि के साधन से प्राप्त होता है । सुन्दर १५ वर्ष की अवस्था वाला जो रणभूमि में मारा गया हो, ऐसे शव को लाकर वीरासन पर स्थित हो रात्रि के समय महाविद्या मन्त्र का जप करे ॥ ८३-८४ ॥

---

१. हीनवृद्धोपनयनम्—क० । २. तत् सिद्धिसाधनात्—क० ।

शीघ्रमेव सुसिद्धिः स्यात् खेचरी वायुपूरणी ।
धारणाशक्तिसिद्धिः स्यात् यः करोतीह साधनम् ॥ ८५ ॥
अथ [१]षोडशवर्षीयं सर्वसिद्धिकरं नृणाम् ।
भोगमोक्षौ करे तस्य शवेन्द्रस्य च साधनात् ॥ ८६ ॥

ऐसा करने से खेचरी वायुपूरणी सिद्धि होती है । इस प्रकार से साधन करने वाले की धारणा शक्ति की सिद्धि होती है । ऐसे ही षोडश वर्षीय शव पर वीरासन से स्थित हो साधना करे तो पुरुष को सारी सिद्धियाँ प्राप्त हो जाती हैं । ऐसे शवेन्द्र साधन करने से साधक के हाथ में भोग और मोक्ष दोनों हो जाते हैं ॥ ८५-८६ ॥

एवं क्रमेण पञ्चाशद् वर्षीयं सुन्दरं वरम् ।
आनीय साधयेद्यस्तु स योगी भवति ध्रुवम् ॥ ८७ ॥
शवं [२] रणस्थमानीय साधयेत्सुसमाहितः ।
इन्द्रतुल्यो भवेन्नाथ रणस्थशवसाधनात् ॥ ८८ ॥

इसी प्रकार क्रमशः पचास वर्ष तक की अवस्था वाले युद्ध में मरे हुए श्रेष्ठ शव को लाकर उसके ऊपर जो साधना करता है, वह निश्चित रूप से योगी हो जाता है । रण में मरे हुए शव को लाकर बड़ी सावधानी के साथ सिद्ध करना चाहिए । हे नाथ ! रण में मरे हुए शव के साधन से साधक इन्द्र के समान बलवान् हो जाता है ॥ ८७-८८ ॥

यदि सम्मुखयुद्धे वा [३] शृणु पट्टीशघातनम् ।
शवमानीय वीरेन्द्रो जपेद्वीरासनस्थितः ॥ ८९ ॥
तत् शवं तु महादेव पूजार्थं निजमन्दिरे ।
देवालये निर्णये च स्थापयित्वा जपं चरेत् ॥ ९० ॥

हे नाथ ! और भी सुनिए । यदि सम्मुख युद्ध में पट्टिश अस्त्र से कोई मर गया हो तो ऐसे शव को लाकर उस पर वीरेन्द्र साधक वीरासन से स्थित हो कर जप करे । हे महादेव ! उस शव को पूजा के लिए अपने घर पर देवालय में अथवा किसी निर्जन स्थान में स्थापित कर जप करना चाहिए ॥ ८९-९० ॥

तत्र वीरासनं किं वा योनिमुद्रासनादिकम् ।
पद्मासनं तथाकृत्य वायुं धृत्वा जपं चरेत् ॥ ९१ ॥
मासैकेन भवेद्योगी विप्रो गुणधरः शुचिः ।
सूक्ष्मवायुधारणज्ञो जपेद् यौवनगे शवे ॥ ९२ ॥

उस पर न केवल वीरासन अपितु योनिमुद्रासनादि अथवा पद्मासन लगाकर वायु को

---

१. षोडशसंख्याकानि वर्षाणि इति षोडशवर्षाणि, मध्यमपदलोपिसमासः, तत्र भवं षोडशवर्षीयम् । गहादित्वाच्छप्रत्ययः ।

२. एतद्रणस्थम्—क० । ३. शूल—क० ।

धारण करते हुए जप करे। ऐसा करने से ब्राह्मण साधक गुणी, पवित्र और योगी बन जाता है। युवावस्था वाले शव पर जप करने से सूक्ष्म वायु के धारण का ज्ञान हो जाता है ॥ ९१-९२ ॥

शवसाधनकालेन[1] यद्यत् कर्म करोति हि।
तत्कर्मसाधनादेव योगी स्यादमरो नरः ॥ ९३ ॥

आनन्दभैरवी[2] उवाच

कालक्रियादिकं ज्ञात्वा सूक्ष्मानिलनिधारणम्।
साधको विचरेद्वीरो वीराचारविवेचकः ॥ ९४ ॥

शव साधन काल से लेकर साधक जो जो कर्म करता है उस कर्म की साधना से मनुष्य योगी तथा अमर हो जाता है ॥ ९३ ॥

आनन्दभैरवी ने पुनः कहा—काल-क्रिया का ज्ञानकर सूक्ष्म वायु धारण करना चाहिए। ऐसा वीराचार का विवेचन करने वाला वीर साधक भूमण्डल में विचरण करे ॥ ९४ ॥

शवादे[3] रणयातस्य क्रियामाहात्म्यमुत्तमम्।
शृणु सङ्केतभाषाभिः शिवेन्द्रचन्द्रशेखर ॥ ९५ ॥
एकहस्तार्द्धमाने[4] तु भूम्यधोविधिमन्दिरे[5]।
संस्थाप्य सुशवं नाथ मायादवगतः प्रभो ॥ ९६ ॥

अब हे शिवेन्द्र ! हे चन्द्रशेखर ! रण में मरे हुए शव की उत्तम क्रिया के माहात्म्य को सुनिए। पृथ्वी में डेढ़ हाथ नीचे खने हुए गड्डे में विधिपूर्वक मन्दिर बनाकर उसमें शव स्थापन कर हे प्रभो ! माया मन में निम्न धारणा करे ॥ ९५-९६ ॥

एकाहं जगदाधारा आधारान्तर्गता सती।
पतिहीना सूक्ष्मरूपादधरादिचराचरम् ॥ ९७ ॥
मदीयं साधकं पुण्यं धर्मकामार्थमोक्षगम्।
प्रकरोमि[6] सदा रक्षां धात्रीरूपा सरस्वती ॥ ९८ ॥

आधार के अन्तर्गत रहने वाली जगत् की आधारभूता केवल मैं ही हूँ। मेरा कोई स्वामी नहीं है। यह सारा चराचर जगत सूक्ष्मरूप से मेरा ही है। मेरा साधक बहुत पुण्य वाला है। वह धर्म, अर्थ, काम, मोक्ष का अधिकारी है। सरस्वती रूप से मैं उसकी धात्री बनकर रक्षा करती हूँ ॥ ९७-९८ ॥

केवलं तदभावेन[7] शम्भो योगपरायण।
मग्ना संसारकरणात्त्वयि त्वञ्चाहमेव च ॥ ९९ ॥

---

१. वै—क० । २. इति श्रीरुद्रयामले विशतिपटलः समाप्तः—क० ।
३. रणघातस्य—क० । ४. हस्तोर्ध्व—क० ।
५. भूमेरधः स्थिते विधिमन्दिरे इत्यत्र षष्ठीतत्पुरुषः । विधिर्ब्रह्मा।
६. एकावामि—क० । ७. तवभावेन—क० ।

यद्यत्पदार्थनिकरे तिष्ठसि त्वं सदा मुदा।
तत्रैव संस्थिरा हृष्टा चाहमेव न संशयः ॥ १०० ॥

हे योगपरायण शम्भो ! केवल मेरा ज्ञान न होने से अपके द्वारा संसार बनाने के कारण लोग आप में मग्न हो जाते हैं, ऐसे जो आप हैं वही मैं भी हूँ। हे सदाशिव ! जिन पदार्थ समूहों में आप प्रसन्नता से निवास करते हो, उन-उन पदार्थों में प्रसन्नता पूर्वक मैं भी निवास करती हूँ, इसमें संशय नहीं ॥ ९९-१०० ॥

एतद्भावं त्वं करोषि कस्य हेतोस्तव प्रिया।
वामाङ्गे संस्थिरा नित्यं कामक्रोधविवर्जिता ॥ १०१ ॥

आनन्दभैरव उवाच

किं प्रयोजनमेवं हि शवादीनाञ्च साधनात्।
यदि ते श्रीपदाम्भोजमधून्मत्तो भवेद्यतिः ॥ १०२ ॥

आप भी यही भावना करते हो, इसी हेतु से मैं भी आपको प्यारी हूँ, और काम क्रोधादि दोषों से वर्जित रहकर नित्य आपके वामाङ्ग में स्थित रहती हूँ ॥ १०१ ॥

आनन्दभैरव ने कहा—हे भद्रे ! शवादि के साधन से क्या प्रयोजन है ? साधक यदि तुम्हारे चरण कमलों के मधु को पीकर उन्मत्त बना रहे ॥ १०२ ॥

त्रैलोक्यपूजिते भीमे वाग्वादिनीस्वरूपिणी।
शवसाधनमात्रेण केन योगी भवेद्वद ॥ १०३ ॥
आनन्दरस [1]लावण्यमन्द हासमुखाम्बुजे।
योगी भजति योगार्थं केन तत्फलमावद ॥ १०४ ॥

हे त्रैलोक्यपूजिते ! हे भीमे ! हे वाग्वादनस्वरूपिणि ! किस प्रकार शव साधन मात्र से साधक योगी बन जाता है उसे कहिए। आनन्द रस के लावण्य से युक्त मुखाम्बुज से मन्द हास्य करने वाली हे देवी ! साधक लोग योग के लिए जब योगी होते हैं, फिर किस प्रकार शव साधन करते हैं उसका फल कहिए ॥ १०३-१०४ ॥

आनन्दभैरवी[2] उवाच

यदि शङ्कर भक्तोऽसि मम जापपरायणः।
तथापि शवभावेन शववत् शवसाधनम् ॥ १०५ ॥
रात्रियोगे प्रकर्त्तव्यं दिवसे न कदाचन।
शवे स्थिरो यो बभूव स भक्तो मे न संशयः ॥ १०६ ॥

आनन्द भैरवी ने कहा—हे शङ्कर ! यद्यपि आप मेरे भक्त हैं, मुझ शक्ति के जप में परायण है फिर भी शव भाव से शव के समान बनकर शव साधन करना चाहिए। शव

---

१. आनन्दरसलावण्यं च मन्दहासश्च मुखाम्बुजे यस्याः सा।
२. आनन्दभैरवी—क०।

साधन रात्रि में ही करे । दिन में कदापि न करे जो शव पर स्थिर रह गया वह मेरा भक्त है इसमें संशय नहीं ॥ १०५-१०६ ॥

मे [१]शवाकृतिमद्द्रव्यं मम तुष्टिनिबन्धनम् ।
ममाज्ञापालने योग्यः कुर्याद् वीरः शवासनम् ॥ १०७ ॥
यद्यहं तत्र गच्छामि तदैव स शिवो भवेत् ।
निःशेषत्यागमात्रेण शवत्वं प्रलयं तनोः ॥ १०८ ॥

शव के समान आकृति वाली वस्तु सदैव मेरे संतुष्टि का साधन है । मेरी आज्ञा पालन की योग्यता रखने वाला वीर साधक शव साधन करे । मैं जिस समय उसके पास जाती हूँ, उसी समय वह शिव स्वरूप बन जाता है । शरीर का सब कुछ त्याग देने पर अथवा प्रलय कर देने पर शवत्व प्राप्त होता है ॥ १०७-१०८ ॥

यः करोति भावराशिं मयि देव्यां महेश्वर ।
त्रैलोक्यपूजितायां तु स शिवः शवमाश्रयेत् ॥ १०९ ॥
अधिकारी[२] तु भक्तस्य पालनं [३]परपृष्ठतः ।
करोमि कामिनीनाथ सन्देहो नात्र भूतले[४] ॥ ११० ॥

हे महेश्वर ! त्रैलोक्य पूजित मुझ देवी में जो साधक अपनी समस्त भावराशि समर्पित कर देता है और शव का आश्रय ले लेता है, वह शिव है । हे कामिनी नाथ ! मैं पृथ्वी पर भक्त पर अधिकार रखती हूँ और शव की पीठ से उसका पालन करती हूँ इसमें संदेह नहीं ॥ १०९-११० ॥

यदाहं त्यज्यते गात्रं पशूनां मारणाय च ।
तदैते च मृताः सर्वे [५]जीवन्ते केन हेतुना ॥ १११ ॥
तदाहुतिमहाद्रव्यं[६] शवेन्द्रं रणहानिगम् ।
आनीय साधयेद्यस्तु स स्थिरो मे सुभक्तिगः ॥ ११२ ॥

पशुमारण के लिए जब शरीर उपस्थित किया जाता है तभी वह अहङ्कार त्याग देता है । इसी प्रकार सभी मरे हुए अपना अहङ्कार त्याग देते हैं वे किस हेतु के बल पर जीवित रहें । रण में प्राण त्याग करने वाला शवेन्द्र हमारी आहुति का महान् द्रव्य है । अतः उसको लाकर जो साधक उससे साधन करता है वह स्थिर रूप से मेरी भक्ति का अधिकारी हो जाता है ॥ १११-११२ ॥

सदा क्रोधी भवेद्यस्तु स क्रूरो नात्र संशयः ।
स कथं [७]वीररात्रौ च साधयेद् विह्वलः शवम् ॥ ११३ ॥
भयविह्वलचेता यः स क्रोधी नात्र संशयः ।

---

१. मे शवा इति सद्द्रव्यम्—क० ।　२. अधिकालाय भक्तस्य—क० ।
३. शव—क० ।　४. नात्र विद्यते इति—क० ।
५. केवलाकृतिहेतुना—क० ।　६. तदाकृति—क० ।　७. घोररात्रौ—क० ।

नास्ति क्रोधसमं पापं पापात् क्षिप्तो भवेत् शवे ॥ ११४ ॥

जो सर्वदा क्रोध करता है वही क्रूर है इसमें संशय नहीं । ऐसा विह्वल (क्रूर) वीर साधक रात्रि में किस प्रकार शव साधन करने में समर्थ हो सकता है ? । जिसका चित्त भय से विह्वल है वहीं क्रोधी है इसमें संशय नहीं । क्रोध के समान कोई पाप नहीं है अतः पाप से शव साधन करने वाला साधक विक्षिप्त हो जाता है ॥ ११३-११४ ॥

योे भक्तः पापनिर्मुक्तः सिद्धरूपी निराश्रयः ।
विवेकी ध्याननिष्ठश्च स्थिरः संसाधयेत् शवम् ॥ ११५ ॥
यावत्कालं स्थिरचित्तं न प्राप्नोति जितेन्द्रियः ।
तावत्कालं नापि कुर्यात् शवेन्द्रस्यापि साधनम् ॥ ११६ ॥

शवसाधना के अधिकारी—जो भक्त पाप से निर्मुक्त है और किसी (क्रोधादि) का आश्रय नहीं लेता वह सिद्ध का स्वरूप है, विवेकी है और ध्यान निष्ठ है । अतः स्थिर रहने के कारण वह शव साधन का अधिकारी है । जब तक चित्त स्थिर न हो जब तक इन्द्रियाँ अपने वश में न हों तब तक शवेन्द्र का साधन कदापि नहीं करना चाहिए ॥ ११५-११६ ॥

शवमानीय तद्द्वारे तेनैव परिखन्य च ।
तद्दिनात्तद्दिनं यावत् यद्बद्ध्वा[1] व्याप्य साधयेत् ॥ ११७ ॥
एवं कृत्वा हविष्याशी महाविद्यादिसाधनम् ।
जितेन्द्रियो मुदा कुर्याद् अष्टाङ्गसाधनेन च ॥ ११८ ॥

साधक उस शव को द्वार पर ले आवे, उसे खन कर पृथ्वी में गाड़ देवे, फिर उसी से उस दिन से आरम्भ कर उसी दिन पर्यन्त अर्थात् संवत्सर पर्यन्त साधना करनी चाहिए । इस प्रकार जितेन्द्रिय होकर हविष्यान्न भोजन करते हुए प्रसन्नता के साथ अष्टाङ्ग साधन द्वारा महाविद्या की साधना करे ॥ ११७-११८ ॥

शवसाधनाफलश्रुतिकथनम्

तदष्टाङ्गफलं ह्येतत् यत्कृत्वा सिद्धिभाग् भवेत् ।
नाडीमुद्राभेदकञ्च कुलाचारफलान्वितम् ॥ ११९ ॥
अष्टाङ्गसाधनादेव सिद्धरूपो महीतले ।
पश्चादन्य[2]स्वर्गगामी भवेन्न भूतलं विना ॥ १२० ॥

शवसाधन की फलश्रुति—अष्टाङ्ग साधन योग की साधना का यही फल है कि साधक सिद्धि का सत्पात्र हो जावे । अष्टाङ्ग साधना से कुलाचार के फल से संयुक्त नाडी भेद तथा मुद्रा भेद का ज्ञान हो जाता है । इसी पृथ्वी पर साधक सिद्ध हो जाता है । इसके पश्चात् वह भूलोक को छोड़कर स्वर्गगामी हो जाता है ॥ ११९-१२० ॥

---

१. वत्सरं व्याप्य साधयेत्—क० । बद्ध्वा इति पाठे बन्धनार्थकबन्धधातोः क्त्वाप्रत्ययः । अनिदितामिति नलोपः । २. शून्य—क० ।

आदौ भूतलसिद्धिः[१] स्याद्भुवोलोकस्य सिद्धिभाक् ।
जनलोकस्य[२] सिद्धीशस्तपोलोकस्य सिद्धिभाक् ॥ १२१ ॥
सत्यलोकस्य सिद्धीशः पश्चाद् भवति साधकः ।
एवं क्रमेण सिद्धिः स्यात् स्वर्गादीनां महेश्वर ॥ १२२ ॥

प्रथम भूलोक में सिद्धि, फिर भुवर्लोक में सिद्धि, फिर जनलोक में सिद्धि, फिर तपोलोक में वह सिद्धि का पात्र बन जाता है । इसके बाद वही साधक सत्यलोक में सिद्धेश्वर हो जाता है । हे महेश्वर ! इसी प्रकार स्वर्गादि लोकों में वह साधक सिद्धि प्राप्त कर लेता है ॥ १२१-१२२ ॥

अष्टाङ्गसाधनार्थाय देवा भवन्ति भूतले ।
भूतले सिद्धिमाहृत्य गच्छन्ति ब्रह्ममन्दिरे ॥ १२३ ॥
क्रमेणैवं विलीनास्ते अतो भूतलसाधनम् ।

शवसाधकस्य विधिनिषेध—कथनम्

भूतले शवमास्थाय ब्रह्मचारी दिवा शुचिः ॥ १२४ ॥

इस अष्टाङ्ग योग की सिद्धि के लिए देवता भी पृथ्वी तल पर अवतार लेते हैं फिर भूतल में सिद्धि प्राप्त कर वे ब्रह्मलोक चले जाते हैं । इस प्रकार क्रमशः वे ब्रह्मलोक में विलीन हो जाते है । अतः भूतल ही भूतलसाधन के लिए श्रेष्ठ है । साधक दिन में ब्रह्मचारी और पवित्र रहे ॥ १२३-१२४ ॥

निशायां पञ्चतत्त्वेन दिवसेऽष्टाङ्गसाधनम् ।
जितेन्द्रियो [३]निर्विकारो वित्तवानपरो नरः ॥ १२५ ॥
शवं संसाधयेद्धीरश्चिन्तालस्यविवर्जितः ।
चिन्ताभिर्जायते लोभो लोभात् कामः प्रपद्यते ॥ १२६ ॥
कामाद्भवति सम्मोहो मोहादालस्य सञ्चयः ।
आलस्यदोषजालेन निद्रा भवति तत्क्षणात्[४] ॥ १२७ ॥

रात्रि के समय शव पर बैठकर पञ्चतत्त्व की साधना करे और दिन में अष्टाङ्ग योग करे । जितेन्द्रिय एवं विकाररहित पुरुष चाहे वह धनवान् हो चाहे दरिद्र हो धीर होकर चिन्ता आलस्य का त्याग कर शव सिद्धि करे । चिन्ता से लोभ, लोभ से काम उत्पन्न होता है । काम से मोह, मोह से आलस्य का सञ्चय होता है, आलस्य दोष समूहों से सद्यः तत्क्षण निद्रा उत्पन्न होती है ॥ १२५-१२७ ॥

महानिद्राविपाकेन मृत्युर्भवति निश्चितम् ।
अपक्षनिद्राभङ्गेन[५] क्रोधो भवति निश्चितम् ॥ १२८ ॥

---

१. भुवोलोकस्य—क० ।
२. पश्चात् स्वरलोकसिद्धिः स्यात् महालोकस्य सिद्धिभाक्—क० ।
३. वित्तध्यानपरो—क० ।
४. स चासौ क्षणश्चेति कर्मधारयसमासः ।
५. अपक्व—क० ।

तत्क्रोधाच्चित्तविकलो विकलात् श्वासवर्द्धनः।
वृथायुः क्षयमाप्नोति विस्तरे श्वाससंक्षये ॥ १२९ ॥
बलबुद्धिक्षयं याति बुद्धिहीनो जडात्मकः ।
जडभावेन मन्त्राणां जपहीनो भवेन्नरः ॥ १३० ॥
जपहीने[१] श्वासनाशः श्वासनाशे तनुक्षयम् ।
अतस्तनुं समाश्रित्य जपनिष्ठो भवेत् शुचिः ॥ १३१ ॥

महानिद्रा के परिणाम स्वरूप निश्चित रूप में मृत्यु होती है । असमय में निद्रा भङ्ग होने से निश्चित रूप से क्रोध उत्पन्न होता है । क्रोध से चित्त विकल होता है, चित्त विकल होने से श्वास की वृद्धि होती है, फिर जो अधिक श्वास के संक्षय होते ही आयु का क्षय होने लगता है ॥ १२८-१२९ ॥

श्वास की अधिकता से बल एवं बुद्धि का क्षय होने लगता है । बुद्धि के नष्ट होने से जड़ता आती है । जड़ता से मन्त्र का जप नहीं हो पाता । जपहीन होने से श्वास का नाश और श्वसन प्रश्वसन का नाश होने पर मृत्यु होती है । इसलिए शरीर की रक्षा करते हुए पवित्रता पूर्वक जप करना चाहिए ॥ १३०-१३१ ॥

अष्टाङ्गधारणेनैव सिद्धो भवति नान्यथा ।
अष्टाङ्गलक्षणं वक्ष्ये साक्षात् सिद्धिकरं परम् ॥ १३२ ॥
जन्मकोटिसहस्राणां फलेन कुरुते नरः ।
यमेन लभ्यते ज्ञानं ज्ञानात् कुलपतिर्भवेत् ॥ १३३ ॥

अष्टाङ्गयोग निरूपण—मनुष्य अष्टाङ्ग योग से ही सिद्ध होता है । सिद्ध होने का और कोई दूसरा उपाय नहीं है । अब साक्षात् सिद्धि देने वाले अष्टाङ्ग योग के विषय में कहती हूँ । मनुष्य करोड़ों जन्म के पुण्य के फल से अष्टाङ्ग योग में प्रवृत्त होता है अष्टाङ्ग योग के प्रथम सोपानभूत यम से ज्ञान उत्पन्न होता है । ज्ञान से कुलपति बनता है ॥ १३२-१३३ ॥

यो योगेशः स कुलेशः शिशुभावस्थनिर्मलः ।
नियमेन भवेत् पूजा पूजया लभते शिवम् ॥ १३४ ॥
यत्र कल्याण[२] सम्पूर्णा सम्पूर्णः शुचिरुच्यते ।
आसनेन दीर्घजीवी रोगशोकविवर्जितः ॥ १३५ ॥

वही कुलेश्वर योगेश्वर बनता है, जो शिशुभावापन्न होकर सर्वथा निर्मल रहता है । द्वितीय सोपानभूत **नियम** का फल यह है कि नियम से ठीक प्रकार से पूजा होती है और पूजा से कल्याण होता है । **जहां पूर्ण रूप से कल्याण होता है वहां संपूर्ण शुचिता होती है । आसन** का यह फल है कि आसन से दीर्घ जीवन प्राप्त होता है । रोग और शोक सन्निकट नहीं आते ॥ १३४-१३५ ॥

---

१. बलहीने—क० ।
२. यत्र कन्या न सम्पूर्णः सम्पूर्णः शुचिरुच्यते—ख० ।

ग्रन्थिभेदनमात्रेण साधकः शीतलो भवेत् ।
प्राणायामेन शुद्धः स्यात् प्राणवायुवशेन च ॥ १३६ ॥
वशी भवति देवेश आत्मारामेऽपि[1] लीयते ।
प्रत्याहारेण चित्तं तु चञ्चलं कामनाप्रियम् ॥ १३७ ॥
तत्कामनाविनाशाय स्थापयेत् पदपङ्कजे ।
धारणेन वायुसिद्धिरष्ट[2]सिद्धिस्ततः परम् ॥ १३८ ॥

साधक जब नाड़ियों की ग्रन्थि तोड़ देता है तो वह शीतल हो जाता है । चतुर्थ सोपानभूत **प्राणायाम** से प्राणवायु को वश में कर लेने से वह शुद्ध हो जाता है । हे देवेश ! वह जितेन्द्रिय हो जाता है और आत्माराम होकर आत्मा में रमण करता है । चित्त स्वभावतः चञ्चल और कामना चाहता रहता है ॥ १३६-१३७ ॥

अतः उस काम के विनाश के लिए **प्रत्याहार** द्वारा भगवत्पादपङ्कज में चित्त को स्थापित करें । षष्ठ सोपानभूत **धारणा** से वायुसिद्धि, फिर वायुसिद्धि से अष्टसिद्धि प्राप्त होती है ॥ १३८ ॥

अणिमासिद्धिमाप्नोति अणुरूपेण वायुना ।
ध्यानेन लभते मोक्षं मोक्षेण लभते सुखम् ॥ १३९ ॥
सुखेनानन्दवृद्धिः स्यादानन्दो ब्रह्मविग्रहः ।
समाधिना महाज्ञानी सूर्याचन्द्रमसोर्गतिः ॥ १४० ॥

इतना ही नहीं, अणुरूप वायु से अष्टसिद्धियाँ प्राप्त होती हैं । सप्तम सोपान **ध्यान** से मोक्ष प्राप्ति होती है । मोक्ष से सुख प्राप्त होता है । सुख से आनन्द की वृद्धि होती है और आनन्द साक्षात् ब्रह्म का स्वरूप है । अष्टम सोपान **समाधि** से महा ज्ञानी होता है । सूर्य तथा चन्द्रमा तक समाधि के बल से जा सकता है ॥ १३९-१४० ॥

महाशून्ये लयस्थाने श्रीपदानन्दसागरः ।
तत्तरङ्गे मनो दत्त्वा परमार्थविनिर्मले ॥ १४१ ॥
श्रीपादमूर्तिमाकल्प्य ध्यायेत् कोटिरवीन्दुवत् ।
श्रीमूर्तिं कोटिचपलां समुज्ज्वलां सुनिर्मलाम् ॥ १४२ ॥

महाशून्य में जहाँ लय का स्थान है वहाँ महाश्री के चरणों में आनन्द का सागर प्रवाहित होता है, उस परमार्थ विनिर्मल आनन्द सागर की तरंगों में मन को स्थापित करना चाहिए । करोड़ों सूर्य एवं चन्द्रमा के समान प्रकाशमान् भगवती महाश्री के पादारविन्द की कल्पना करे तथा करोड़ों विद्युत के समान प्रभा से उज्ज्वल शुभ्र श्री मूर्ति की भी कल्पना करे ॥ १४१-१४२ ॥

ध्यायेद्योगी सहस्रारे कोटिसूर्येन्दुमन्दिराम् ॥ १४३ ॥

---

१. आत्मारामोऽपि—क० ।
२. रिष्टसिद्धि—क० ।—अष्टसंख्याका सिद्धिरष्टसिद्धिः, मध्यमपदलोपिसमासः ।

श्रीविद्यामतिसुन्दरीं त्रिजगतामानन्दपुञ्जेश्वरीं
कोट्यर्कायुत तेजसि प्रियकरीं योगादरीं शाङ्करीम् ।
तां मालां स्थिरचञ्चलां गुरुवनां[1] व्यालाचलां केवलां
ध्यायेत्[2] सूक्ष्मसमाधिना स्थिरमतिः सश्रीपतिर्गच्छति ॥ १४४ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये पाशवकल्पे
षट्चक्रसारसङ्केते योगविद्याप्रकरणे मन्त्रसिद्धिशक्त्युपाये
भैरवीभैरवसंवादे चतुर्विंशः पटलः ॥ २४ ॥

— ❖ —

योगी को सहस्रार चक्र में रहने वाली करोड़ों सूर्य तथा चन्द्रमा के समान मन्दिर में रहने वाली भगवती महा श्रीविद्या की मूर्ति का ध्यान करना चाहिए । श्रीविद्या अत्यन्त सुन्दरी हैं और तीनों जगत् के आनन्द पुञ्ज की स्वामिनी हैं । वह करोड़ों अयुत सूर्य तेज में निवास करती हैं । स्वामिनी सब का प्रिय करती हैं योग का आदर करने वाली हैं और शङ्कर वल्लभा हैं । ऐसी स्थिर तथा चञ्चल रहने वाली, महाविद्या का स्थिर चित्त से समाधि द्वारा ध्यान करना चाहिए । इस प्रकार ध्यान करने वाला साधक श्रीपति श्रीविद्या को प्राप्त कर लेता है ॥ १४३-१४४ ॥

॥ श्रीरुद्रयामल के उत्तरतन्त्र में महातन्त्रोद्दीपन में भावनिर्णय में पाशवकल्प में षट्चक्रसारसङ्केत में योगविद्याप्रकरण में मन्त्रसिद्धि के उपाय कथन में भैरवी-भैरव संवाद में चौबीसवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ २४ ॥

— ❖ —

---

१. व्यालोचनाय—क० ।
२. यः सुसमाधिना—क० ।

अथ पञ्चविंशः पटलः

आनन्दभैरव उवाच

वद कान्ते रहस्यं मे तत्त्वावधानपूर्वकम् ।
यद् यज्ज्ञात्वा महायोगी प्रविशत्यनलाम्बुजे ॥ १ ॥
यदि स्नेहदृष्टिरस्ति मम ब्रह्मनिरूपणम् ।
योगसारं तत्त्वपथं निर्मलं वद योगिने ॥ २ ॥

आनन्दभैरव ने कहा—हे कान्ते ! निश्चयपूर्वक तत्त्वों के रहस्यों को कहिए, जिसे जानकर महायोगी वायुरूप में पद्म में प्रवेश करता है । यदि मुझमें आपका स्नेह है, तो योग का सारभूत तत्त्व का प्रदर्शक सर्वथा निर्मलब्रह्म निरूपण मुझ योगी के लिए कहिए ॥ १-२ ॥

आनन्दभैरवी उवाच

शृणु प्राणेश वक्ष्यामि योगनाथ क्रियागुरो ।
योगाङ्गं योगिनामिष्टं तत्त्वब्रह्मनिरूपणम् ॥ ३ ॥
एतत्[1] सृष्टिप्रकारञ्च प्रपालनविधिं तथा ।
असंख्यसृष्टिसंहारं वदामि तत्त्वतः शृणु ॥ ४ ॥

सूक्ष्मसृष्टिस्थितिसंहारकथनम्

त्वमेव संहारकरो[2] वरप्रियः प्रधानमेषु त्रितयेषु शङ्कर ।
संहारभावं मलभूतिनाशनं[3] प्रधानमाद्यस्य जगत्प्रपालनम् ॥ ५ ॥

आनन्दभैरवी ने कहा—हे योगनाथ ! हे क्रियागुरो ! हे प्राणेश ! योगिजनों के लिए इष्टसाधनभूत योग का अङ्गतत्त्व ब्रह्म निरूपण कहती हूँ, सुनिए । इस जगत् की सृष्टि का प्रकार, उसके प्रकृष्ट रूप से पालन का विधान तथा इस असंख्य सृष्टि का संहार तत्त्वतः कहती हूँ, इसे सुनिए ॥ ३-४ ॥

हे शङ्कर ! सृष्टि, पालन और संहार इन तीनों के क्रम में आप ही संहार करने वाले वरदाता तथा प्रधान हैं । त्रिलोक के मलभूत विभूतियों का विनाश ही संहार का लक्षण है । इसके बाद जगत् का पालन प्रधान है ॥ ५ ॥

तत्राधनं[4] मेरुभुजङ्गमङ्गं सृष्टिप्रकारं खलु तत्र मध्यमम् ।
तत्पालनञ्चेति[5] मयैव राज्ये संहाररूपं प्रकृतेर्गुणार्थकम् ॥ ६ ॥

---

१. तत्र दृष्टिप्रकारञ्च—क० । २. कलेवरप्रियः—क० ।
३. भवभूतिनाशनात्—क० । जननाशनात् सदा—इति जीव० पाठः ।
४. तत्राधमम्—क० । ५. तत्पालनं चोक्तमेव बाह्ये—क० ।

एतत्त्रयं नाथ भयादिकारणं तन्नाशनाम्ने[1] प्रणवं गुणात्मकम् ।
त्रयं गुणातीतमनन्तमक्षरं सम्भाव्य योगी भवतीह साधकः ॥ ७ ॥

मेरु के समान अङ्ग को भुजङ्ग के समान रखना यह सृष्टि का प्रकार अधम है । उसका पालन करना मध्यम है प्रकृति के गुणों के अर्थ को बाहर कर देना 'संहार' है ॥ ६ ॥

हे नाथ ! सृष्टि, पालन और संहार ये तीनों ही योगयों के लिए भयप्रद हैं इसके नाश हो जाने पर गुणात्मक प्रणव ही शेष रहता है । यह तीन अक्षरों वाला प्रणव गुणातीत है, अनन्त है और अक्षर है । अतः उस प्रणव का ध्यान करने से योगी सच्चा साधक बन जाता है ॥ ७ ॥

अव्यक्तरूपात् प्रणवाद्धि सृष्टिस्तल्लीयते व्यक्ततनोः समासा ।
सूक्ष्माद्यकारात् प्रतिभान्ति खे सदा प्रणश्यति स्थूलकलान्निरक्षरात् ॥ ८ ॥

अव्यक्त रूप प्रणव से ही सृष्टि होती है उस प्रणव के व्यक्त आकार होने पर सृष्टि संक्षिप्त होकर उसी में लीन हो जाती है । आदि में रहने वाले 'अ उ म' ये तीनों अक्षर आकाश में सर्वदा भासित होते हैं, निरक्षर स्थूल कला से वह 'ॐ' नष्ट हो जाता है ॥ ८ ॥

अतीव चित्रं जगतां विचित्रं नित्यं चरित्रं कथितुं न शक्यते ।
हंसाश्रितास्ते भववासिनो जना ज्ञात्वा न देहस्थमुपाश्रयन्ते ॥ ९ ॥

जगत् के इस विचित्र नित्य चरित्र का वर्णन करना अशक्य है । संसारी मनुष्य इस हंस मन्त्र का आश्रय ले लेने पर पुनः देहबन्धन के झञ्झट में नहीं पड़ते ॥ ९ ॥

देहाधिकारी प्रणवादिदेव मायाश्रितो निद्रित एष[2] कालः ।
प्रलीयते दीर्घपथे च काले तदा प्रणश्यन्ति जगत् स्थिता जनाः ॥ १० ॥
कालो[3] जगद्भक्षक ईशवेशो तरी तु जीर्णा पतिहीनदीना ।
स एव मृत्युर्विहितं चराचरं प्रभुञ्जति श्रीरहितं पलायनम् ॥ ११ ॥
पञ्चेन्दुतत्त्वेन महेन्द्रसृष्टिः प्रतिष्ठिता यज्ञविधानहेतुना ।
सदैव यज्ञं कुरुते भवार्णवे निःसृष्टिकाले वरयज्ञसाधनम् ॥ १२ ॥

प्रणव रूप ये आदिदेव ही इस देह के अधिकारी हैं, जब देहधारी जीव माया का आश्रय ले लेता है तब वह काल उसके निद्रा का काल कहा जाता है । जब जीव इस दीर्घमार्ग वाले (माया रूप) काल में अपने को लीन कर लेता है तब उसके लिए जगत् में स्थित समस्त जन लीन हो जाते हैं । जब 'आप डूबे तो जग डूबा' ईश्वर रूप धारण करने वाला यह काल जगत् का भक्षक हो जाता है । स्वामी विहीन मेरी जीर्ण नाव दीन हीन है और वही चराचर जगत् का मृत्यु है । श्री से हीन, अहितकारी एवं भगने वाले को वह माया खा जाती है ॥ ११ ॥

यज्ञों के विधान के लिए महेन्द्र से लेकर मनुष्य पर्यन्त यह सारी सृष्टि पञ्च शून्य तत्त्व से रची गई है । योगी जन इस संसार सागर में नित्य यज्ञ करते रहते हैं, क्योंकि निःसृष्टि काल में यज्ञ ही उत्तम साधन कहा गया है ॥ १२ ॥

---

१. तन्नाशनाशे—क० । २. एव—क० ।
३. कालो जगद्भक्षक ईशरोषात् विस्तीर्णगात्रो गतिहीनमीनः—कः । अयमेव पाठो युक्तः ।

हिताहितं तत्र महार्णवे भयं विलोक्य लोका भयविह्वलाः सदा ।
विशन्ति ते कुत्सितमार्गमण्डले अतो महानारकिबुद्धिहीनाः ॥ १३ ॥
मायामये धर्मकुलानले भवे लीनो हरेर्याति[1] पथानुसारी ।
म्रियेत कालानलतुल्यमृत्युना कथं तु योगी कथमेव साधकः ॥ १४ ॥

इस संसार रूप समुद्र में हित और अहित दोनों ही महाभय हैं, फिर भी लोक में अभय होने के लिए व्याकुल वे जन इसी भय को देखकर लोग भयविह्वल हो जाते हैं और कुत्सित मार्ग मण्डल में प्रवेश करते हैं । ऐसे लोग महानारकी एवं बुद्धिहीन हैं ॥ १३ ॥

यह संसार मायामय है । मानव अधर्म समूह रूप अग्नियों से घिरा हुआ है, ऐसा सोचकर जो भगवत्प्राप्ति के पथ से जाकर उसमें लीन हो जाता है, वही श्रेष्ठ है । किन्तु जो कालाग्नि के समान मृत्यु से मर जाता है, भला वह किस प्रकार योगी हो सकता है तथा किस प्रकार साधक हो सकता है ॥ १४ ॥

यः साधकः प्रेम-कलासुभक्त्या स एव मूर्खो यदि याति संसृतौ ।
संसारहीनः प्रियचारुकाल्याः सिद्धो भवेत् कामदचक्रवर्ती ॥ १५ ॥
वसेन्न सिद्धो गृहीणीसमृद्ध्यां महाविपद्दुःखविशोषिकायाम् ।
यदीह काले प्रकरोति वासनां तदा भवेन्मृत्युरतीव निश्चितम् ॥ १६ ॥

जो साधक प्रेम कला सुभक्ति के होते हुए भी इस संसृति में भटकता है वही मूर्ख है किन्तु जो संसार की वासना से हीन है, अत्यन्त सुन्दरी महाकाली का प्रेमी है, वही कामद चक्रवर्ती साधक सिद्ध होता है ॥ १५ ॥

सिद्ध साधक को कभी भी गृहिणी की समृद्धि में निवास नहीं करना चाहिये क्योंकि वह समृद्धि महाविपत्ति दुःख तथा शरीर का शोषण करने वाली है । यदि इस संसार में गृहिणी विषयक कामना हुई तो मृत्यु भी निश्चित है ॥ १६ ॥

कृपावलोक्यं वदनारविन्दं तदैव हे नाथ ममैव चेद्यदि ।
सदैव यः साधुगणाश्रितो नरो ध्यात्वा निगूढमतिभागगद्वतः[2] ॥ १७ ॥
स एव साधुः प्रकृतेर्गुणाश्रितः कृती वशी वेदपुराणवक्ता[3] ।
सत्त्वं महाकाल इतीह चाहं प्रणिश्चयं ते कथितं श्रिये मया ॥ १८ ॥

हे नाथ ! यदि साधक का मुखारविन्द मेरी कृपा के अवलोकन का पात्र बना, तो वह सदैव सज्जनों का समाश्रित हो जाता है और मेरा ध्यान कर गुप्त रहस्य में मतिमान् हो जाता है ॥ १७ ॥

वही साधु है, प्रकृति के गुणों से आश्रित, कृती, वशी और पुराण वक्ता है । हे महाकाल ! मैं सत्त्वगुण स्वरूपा हूँ । मैने श्रीप्राप्ति के लिए यहाँ पर यह सब आप से कहा ॥ १८ ॥

---

१. यतो वेदपथानुसारी—क० ।
२. अतिभावलग्नः—क० ।
३. वेदानां पुराणानां च वक्ता, षष्ठीतत्पुरुषः, तृजकाभ्यामित्यस्यानित्यत्वात् । वक्तेत्यस्य तृन्नन्तपक्षे गम्यादीनामिति द्वितीयाघटितः समासः ।

गुणेन भक्तेन्द्रगणाधिकानां साक्षात् फलं योगजपाख्यसङ्गतिम् ।
अष्टाङ्गभेदेन शृणुष्व कामप्रेमाय भावाय जयाय[1] वक्ष्ये ॥ १९ ॥
मायादिकं यः प्रथमं वशं नयेत् स एव योगी जगतां प्रतिष्ठितः ।
रविप्रकारं यमवासनावशे शृणुष्व तं कालवशार्थकेवलम् ॥ २० ॥

भक्तेन्द्र गुणों में सब से श्रेष्ठ होने वाला फल योगजय की सङ्गति है । अब उस योग के अष्टाङ्ग भेद से होने वाले फलों को सुनिए । यह काम प्रेम के लिए, भावना के लिए तथा जय के लिए कहती हूँ ॥ १९ ॥

जो इस जगत् में रह कर सर्वप्रथम माया को अपने वश में कर लेता है, वही योगी प्रतिष्ठा का पात्र है । निम्नलिखित १२ प्रकार के यम से (द्र० २५. २३-२५) माया को अपने वश में करना चाहिए । अब उन यमों का समय आने पर केवल श्रवण करना चाहिए ॥ २० ॥

सर्वत्र कामादिकमाशु जित्वा जेतुं समर्थो यमकर्मसाधकः ।
कामं तथा क्रोधमतीव लोभं मोहं मदं मात्सरितं[2] सुदुष्टकृतम् ॥ २१ ॥
अतो मया द्वादश शब्द घातकं वशं समाकृत्य महेन्द्रतुल्यम् ।
सर्वत्र वायोर्वशकारणाय करोति योगी सचलान्यथा भवेत् ॥ २२ ॥

यम क्रिया को सिद्ध करने वाला साधक ही कामादि दोषों को अपने वश में कर माया पर विजय प्राप्त कर सकता है । काम, क्रोध, लोभ, मोह, मद (अहङ्कार), मत्सरादि—ये सभी बड़े दुर्घट पाप हैं ॥ २१ ॥

इनको विनष्ट करने वाला द्वादश प्रकार का यम ही है । ये इन्द्र के समान बलवान् है, अतः इन्हे अपने वश में करे । शरीर में सर्वनाम वायु को वश में करने के लिए यम का अनुष्ठान अत्यन्त आवश्यक है, अन्यथा योगी अस्थिर हो जाता है ॥ २२ ॥

अहिंसनं सत्यसुवाक्यसुप्रियमस्तेयभावं कुरुते वसिष्ठवत् ।
सुब्रह्मचर्यं सुदृढार्ज्जवं सदा क्षमाधृतिं सेवसुसूक्ष्मवायुनः ॥ २३ ॥
तथा मिताहारमसंशयं मनः शौचं प्रपञ्चार्थविवर्जनं प्रभो ।
करोति यः साधकचक्रवर्ती वाद्योत्सवाज्ञानविवर्जनं[3] सदा ॥ २४ ॥

प्रथम यम अहिंसा है, दूसरा सत्य और प्रिय वाक्य है, तीसरा अस्तेय 'अदत्तानामुपादानम्' है । साधक को इन्हें वशिष्ठ के समान संयम करना चाहिए । चौथा ब्रह्मचर्य, पाँचवा अत्यन्त ऋजुता, छठवाँ क्षमा, सातवाँ धैर्य, आठवाँ सुसूक्ष्मवायु की सेवा (प्राणायाम), नवाँ मिताहार का सेवन, दसवाँ मन में किसी प्रकार का संशय न आने देना, ग्यारहवाँ शौच, बारहवाँ प्रपञ्चार्थ का विवर्जन—ये द्वादश संख्या वाले यम हैं । जो इनका अनुष्ठान करता है, वह साधक चक्रवर्ती है । इसके अतिरिक्त उस साधक को वाद्य, उत्सव तथा अज्ञान का त्याग करना चाहिए ॥ २३-२४ ॥

---

१. यमाय—क० । २. त्वहङ्कृतम्—क० ।
३. वाद्योत्सवम्—क० ।

वशी यमद्वादशसंख्ययेति करोति चाष्टाङ्गफलार्थसाधनम् ।
वरानना श्रीचरणारविन्दं [१]सत्त्वादशाच्छन्नत्रिनेत्रगोचरम् ॥ २५ ॥
तपश्च सन्तोषमनस्थिरं सदा आस्तिक्यमेवं द्विजदानपूजनम् ।
नितान्तदेवार्चनमेव भक्त्या सिद्धान्तशुद्धश्रवणं च ह्रीर्मतिः ॥ २६ ॥
जपोहुतं तर्पणमेव सेवनं तद्भावनं चेष्टनमेव नित्यम् ।
इतीह शास्त्रे नियमाश्चतुर्दशा भक्तिक्रियामङ्गलसूचनानि ॥ २७ ॥

जितेन्द्रिय साधक को योग के अष्टाङ्ग के फल की प्राप्ति के लिए उसके साधन भूत १२ यमों का अभ्यास करना चाहिए । ऐसा करने से वरानना महाश्री के चरणारविन्द उसके नेत्र के सामने प्रकट हो जाते हैं ॥ २५ ॥

१. तप, २. संतोष, ३. मन की स्थिरता, ४. आस्तिक्य, ५. द्विजदम्पती की पूजा, ६. मन लगाकर देवार्चन, ७. भक्तिपूर्वक शुद्ध सिद्धान्त का श्रवण, ८. लज्जा, ९. बुद्धि, १०. जप, ११. होम, १२. तर्पण, १३. भगवान् की सेवा और १४. भावनापूर्वक चेष्टा—ये १४ नियम हैं, जो शास्त्र प्रतिपादित हैं और भक्ति, क्रिया तथा मङ्गल के सूचक हैं ॥ २६-२७ ॥

पूर्वोक्तयोन्यासनमेव सत्यं भेकासनं बद्धमहोत्पलासनम् ।
वीरासनं भद्रसुभकासनं[२] च पूर्वोक्तमेवासनमाशु कुर्यात् ॥ २८ ॥
सर्वाणि तन्त्राणि कृतानि नाथ सूक्ष्माणि[३] नालं वशहेतुना मया ।
तथापि मूढो यदि वायुपान[४]माहत्य योनौ भ्रमतीह पातकी ॥ २९ ॥

पूर्व में कहा गया योन्यासन भेकासन, बद्धपद्मासन, वीरासन, भद्रासन, सुभकासन तथा अन्य पूर्वोक्त आसनों को करना चाहिए । हे नाथ ! मैंने सभी सूक्ष्म तन्त्रों का निर्माण किया, किन्तु कोई भी मन को वश में करने के लिए समर्थ नहीं है, फिर भी मूर्ख व पापी वह है जो वायु पान को छोड़कर ८४ लक्ष योनियों में भटकता रहता है ॥ २८-२९ ॥

प्राणानिलानन्दवशेन मत्तो गजेन्द्रगामी[५] पुरुषोत्तमं[६] स्मृतम् ।
तस्यैव[७] सेवानिपुणो भवेद्वशी ब्रह्माण्डलोकं परिपाति यो बली ॥ ३० ॥
वदामि देवादिसुरेश्वर प्रभो सूक्ष्मानिलं प्राणवशेन धारयेत् ।
सिद्धो भवेत् साधकचक्रवर्ती सर्वान्तरस्थं परिपश्यति प्रभुम् ॥ ३१ ॥

जो प्राण वायु के आनन्द के वश में हो कर मस्ती में गजेन्द्र के समान चलता है वही पुरुषोत्तम है । ब्रह्माण्ड लोक का परिपालन करने वाला, महाबलवान् वशी परमात्मा उसी की सेवा सर्वोत्तम मानता है ॥ ३०॥

हे देवादि सुरेश्वर ! हे प्रभो ! मैं कहती हूँ कि सूक्ष्मवायु को अपने प्राण द्वारा धारण

---

१. सत्वादशाब्दमतिनेत्रगोचरम्—क० । २. भद्रसु भद्रकासनम्—क० ।
३. सूक्ष्मानिलानाम्—क० । ४. नाहत्य योनौ—क० ।
५. गजेन्द्र इव गच्छति, तच्छीलो गजेन्द्रगामी, ताच्छील्ये णिनिः ।
६. पुरुषोत्तमः स्मृतः—क० । ७. तस्यैवमेवानिपुणो—मूले ।

करे । ऐसा साधक साधन चक्रवर्ती तथा सिद्ध हो जाता है और सभी की अन्तरात्मा में परमात्मा प्रभु को देखता है ॥ ३१ ॥

आनन्दभैरव उवाच

वद कान्ते महाब्रह्मज्ञानं सर्वत्र शोभनम् ।
येन वायुवशं कृत्वा खेचरो भूभृतां पतिः ॥ ३२ ॥
साधको ब्रह्मरूपी स्यात् ब्रह्मज्ञानप्रसादतः ।
ब्रह्मज्ञानात् परं ज्ञानं कुत्रास्ति वद सुन्दरि ॥ ३३ ॥

श्री आनन्दभैरव ने कहा—हे कान्ते ! अब सर्वत्र शोभा देने वाले उस महा ब्रह्मज्ञान को कहिए, जिससे साधक वायु को अपने वश में कर राजाधिराज बन जाता है । जिस ब्रह्मज्ञान की कृपा से ब्रह्मज्ञान द्वारा ब्रह्मरूप हो कर साधक पर ज्ञान प्राप्त कर लेता है, हे सुन्दरि ! ऐसा ज्ञान कहाँ प्राप्त होता है ॥ ३२-३३ ॥

आनन्दभैरवी उवाच

शृणुष्व योगिनां नाथ धर्मज्ञो ब्रह्मसञ्ज्ञक[१] ।
अज्ञानध्वान्तमोहानां निर्मलं ब्रह्मसाधनम् ॥ ३४ ॥
ब्रह्मज्ञानसमो धर्मो नान्यधर्मो विधीयते ।
यदि[२] ब्रह्मज्ञानधर्मी स सिद्धो नात्र संशयः ॥ ३५ ॥

श्री आनन्दभैरवी ने कहा—आप धर्मज्ञ हैं । अतः हे योगेश्वर ! हे ब्रह्म संज्ञा वाले ! अज्ञान रूपी अन्धकार से मोहित होने वालों के लिए ब्रह्मसाधन अत्यन्त निर्मल मार्ग है । ब्रह्मज्ञान के धर्म के समान अन्य धर्म का कहीं कोई विधान नहीं प्राप्त होता । यदि साधक ब्रह्मज्ञान का धर्मवेत्ता हो गया तो वह सिद्ध है इसमें संशय नहीं ॥ ३४-३५ ॥

कोटिकन्याप्रदानेन कोटिजापेन किं फलम् ।
ब्रह्मज्ञानसमो धर्मो नान्यधर्मो विधीयते ॥ ३६ ॥
सरोवरसहस्रेण कोटिहेमाचलेन च ।
कोटिब्राह्मणभोज्येन कोटितीर्थेन किं फलम् ॥ ३७ ॥

करोड़ों कन्यादान से, करोड़ों संख्या के जप से क्या फल है, जब कि ब्रह्मज्ञान की बराबरी करने वाला कोई अन्य धर्म नहीं है । हजारों तीर्थों में करोड़ों सुवर्ण पर्वत से, करोड़ों ब्राह्मण के भोजन से, तथा करोड़ों तीर्थों से क्या फल है, जबकि ब्रह्मज्ञान सबसे श्रेष्ठ है ॥ ३६-३७ ॥

---

१. ब्रह्मसाधक—इति क० पुस्तके पाठः।

२. गयायां पिण्डदानेन वाराणस्यां मृतेन किम् । किं कुरुक्षेत्रदानेन प्रयागे वपनं यदि ॥
अश्वमेधसहस्रेण राजसूयशतेन किम् । ब्रह्मज्ञानसमो धर्मो नान्यधर्मो विधीयते ॥—क०।

कामरूपे महापीठे साधकैर्लभ्यते यदि ।
ब्रह्मज्ञानसमो धर्मो नान्यधर्मो विधीयते ॥ ३८ ॥
ब्रह्मज्ञानं तु द्विविधं प्राणायामजमव्ययम् ।
भक्तिवाक्यं शब्दरसं स्वरूपं ब्रह्मणः पथम्[१] ॥ ३९ ॥
प्राणायामं तु द्विविधं सुगर्भञ्च निगर्भकम् ।
जपध्यानं सगर्भं तु तदा[२] युक्तं निगर्भकम् ॥ ४० ॥
अव्यया[३]लक्षणाक्रान्तं प्राणायामं परात् परम् ।
ब्रह्मज्ञानेन जानाति साधको विजितेन्द्रियः ॥ ४१ ॥

कामरूप महापीठ में साधक को भले ही लाभ प्राप्त हो जावे, फिर भी ब्रह्मज्ञान के समान कोई अन्य धर्म का विधान नहीं है । ब्रह्मज्ञान दो प्रकार का है—एक अव्यय प्राणायाम जन्य है तथा दूसरा भक्ति वाक्य जो शब्द रस से परिप्लुत ब्रह्म का स्वरूप है । प्राणायाम भी दो प्रकार का है—पहला सुगर्भ तथा दूसरा अगर्भ । मन्त्र, जप, ध्यान सहित प्राणायाम सगर्भ है । बिना जप ध्यान के जो प्राणायाम है वह अगर्भ है । अव्ययालक्षण से आक्रान्त प्राणायाम सबसे श्रेष्ठ है । जितेन्द्रिय साधक ब्रह्मज्ञान होने पर उसका ज्ञान कर पाता है ॥ ३८-४१ ॥

तत्प्रकारद्वयं नाथ [४]मालावृत्तिं जपक्रमम् ।
मालावृत्ति[५]द्वादशकं जपक्रमं तु षोडश ॥ ४२ ॥
नासिकायां महादेव लक्षणत्रयमनुत्तमम्[६] ।
पूरकं कुम्भकं तत्र रेचकं देवतात्रयम् ॥ ४३ ॥
एतेषामप्यधिष्ठाने ब्रह्मविष्णुशिवाः प्रजाः ।
त्रिवेणी सङ्गमे यान्ति सर्वपापापहारकाः ॥ ४४ ॥

उस प्राणायाम के भी दो भेद है—पहला मालावृत्ति तथा दूसरा जपक्रम । मालावृत्ति में द्वादश संख्या तथा जपक्रम में षोडश संख्या होती हैं । हे महादेव ! नासिका में प्राणायाम के तीन लक्षण हैं—पहला पूरक, दूसरा कुम्भक तथा तीसरा रेचक है । इनके भी तीन देवता हैं । ब्रह्मा, विष्णु तथा सदाशिव इन प्राणायामों के अधिष्ठातृ देवता हैं । जिस प्रकार प्रजा अपने समस्त पापों को विनष्ट करने के लिए त्रिवेणी सङ्गम में जाती है, उसी प्रकार साधक को इस त्रिवेणी में जाना चाहिए ॥ ४२-४४ ॥

योगिनां सूक्ष्मतीर्थानि

ईडा च भारती गङ्गा पिङ्गला यमुना मता ।
ईडापिङ्गलयोर्मध्ये सुषुम्ना च सरस्वती ॥ ४५ ॥

योगियों के शरीर में ईडा भागीरथी गङ्गा है । पिङ्गला यमुना है । ईडा और पिङ्गला के मध्य में सुषुम्ना भारती सरस्वती हैं ॥ ४५ ॥

---

१. पदम्—क० ।
२. तदयुक्तम्—क० ।
३. अव्ययलक्षणाक्लान्तम्—क० ।
४. मालावर्ति—क० ।
५. मात्रावर्ति—क० ।
६. लक्षणत्रयमुत्तमम्—क० ।

त्रिवेणीसङ्गमो यत्र तीर्थराजः स उच्यते ।
त्रिवेणीसङ्गमे वीरश्चालयेत्तान् पुनः पुनः ॥ ४६ ॥
सर्वपापाद् विनिर्मुक्तः सिद्धो भवति नान्यथा ।
पुनः पुनः [१]भ्रामयित्वा महातीर्थे निरञ्जने ॥ ४७ ॥
वायुरूपं महादेवं सिद्धो भवति नान्यथा ।
चन्द्रसूर्यात्मिकामध्ये वह्निरूपे महोज्ज्वले ॥ ४८ ॥

वहाँ जहाँ त्रिवेणी का सङ्गम है उसे तीर्थराज कहा जाता है । यहाँ इस त्रिवेणी सङ्गम में साधक ईडा, पिङ्गला और सुषुम्ना का बारम्बार सञ्चालन करे । इस माया रहित महातीर्थ में बारम्बार इन तीन नाडियों का संचालन करने वाला साधक सभी प्रकारों के पाप से मुक्त हो जाता है और कोई अन्य उपाय नहीं है । चन्द्रात्मक नाडी ईडा, सूर्यात्मक नाडी पिङ्गला, इनके मध्य में रहने वाली अग्निस्वरूपा, महोज्वला सुषुम्ना में वायु स्वरूप महादेव का ध्यान करे, यही सिद्धि का उपाय है और कोई अन्य उपाय नहीं है ॥ ४६-४८ ॥

ध्यात्वा कोटि(रवि)करं कुण्डलीकिरणं वशी ।
त्रिवारभ्रमणं वायोरुत्तमाधममध्यमाः ॥ ४९ ॥
यत्र यत्र गतो वायुस्तत्र तत्र त्रयं त्रयम् ।
इडादेवी च चन्द्राख्या सूर्याख्या पिङ्गला तथा ॥ ५० ॥
सुषुम्ना जननी मुख्या सूक्ष्मा पङ्कजतन्तुवत् ।
सुषुम्ना मध्यदेशे च वज्राख्या नाडिका शुभा ॥ ५१ ॥

करोड़ों सूर्य के समान देदीप्यमान कुण्डली की किरण का ध्यान कर तीन बार वायु का संचालन करे तो उत्तम, मध्यम तथा अधम प्राणायाम होता है ? जहाँ जहाँ वायु जाती है, वहाँ ये तीनों नाडियाँ भी जाती हैं । इडा नाडी चन्द्रा है, पिङ्गला सूर्या है, इन दोनों के मध्य में सुषुम्ना जननी मुख्या है और पङ्कज तन्तु के समान वह सूक्ष्म है । सुषुम्ना के मध्य में कल्याणकारिणी वज्रा नाम की नाडी है ॥ ४९-५१ ॥

तत्र सूक्ष्मा चित्रिणी च तत्र श्रीकुण्डलीगतिः ।
तया सङ्ग्राह्य तं नाड्या षट्पद्मं सुमनोहरम् ॥ ५२ ॥
ध्यानगम्यापरं ज्ञानं षट्शरं शक्तिसंयुतम् ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ ५३ ॥
ततः परशिवो नाथ षट्शिवाः परिकीर्तिताः ।
डाकिनी राकिणी शक्तिर्लाकिनी काकिनी तथा ॥ ५४ ॥
साकिनी[२] तत्र षट्पद्मे शक्तयः षट्शिवान्विताः ।
मूलाधारं स्वाधिष्ठानं मणिपूरं सुपङ्कजम् ॥ ५५ ॥

---

१. भावयित्वा—क० ।

२. शाकिनी हाकिनी तत्र षट्पद्मे षट्शिवात्मिका—क० ।

उस वज्रा में अत्यन्त सूक्ष्मा चित्रिणी है । उसी में से कुण्डली जाती है । वह कुण्डलिनी उस नाडी से अत्यन्त मनोहर षट् पद्मों को ग्रहण कर चलती है । उन षट् पद्मों पर शक्ति से संयुक्त ६ शिव निवास करते हैं । ब्रह्मा, विष्णु, रुद्र, ईश्वर, सदाशिव तथा परशिव ये ६ शिव हैं । डाकिनी, राकिणी, शक्ति, लाकिनी, काकिनी तथा साकिनी ये षट् पद्मों पर षट् शिव के साथ निवास करने वाली उनकी शक्तियाँ हैं ॥ ५२-५५ ॥

अनाहतं [१]विशुद्धाख्यमाज्ञाचक्रं महोत्पलम् ।
आज्ञाचक्रादिमध्ये तु चन्द्रं शीतलतेजसम् ॥ ५६ ॥
प्रपतन्तं मूलपद्मे तं ध्यात्वा [२] पूरकानिलम् ।
यावत्कालं स्थैर्यगुणं तत्कालं कुम्भकं स्मृतम् ॥ ५७ ॥
पिङ्गलायां प्रगच्छन्तं रेचकं तं वशं नयेत् ।
अङ्गुष्ठैकपर्वणा [३] च दक्षनासापुटं वशी ॥ ५८ ॥
धृत्वा [४] षोडशवारेण प्रणवेन जपं चरेत् ।
एतत्पूरकमाकृत्य कुर्यात्कुम्भकमद्भुतम् [५] ॥ ५९ ॥

मूलाधार, स्वाधिष्ठान, मणिपूर, अनाहत, विशुद्ध और आज्ञाचक्र ये ६ महाचक्र रूप पद्म हैं । आज्ञाचक्र के आदि से लेकर मध्य के पद्मों में होते हुए शीतल तेज वाले चन्द्रमा को नीचे के मूलाधार में आते हुए ध्यान करे तथा पूरक प्राणायाम करे । जब तक वायु को खींचकर स्थिर रखे तब तक कुम्भक प्राणायाम कहा जाता है ॥ ५६-५७ ॥

साधक पिङ्गला में जाते हुए रेचक को अपने वश में करे । अंगूठे के किसी एक पर्व से दाहिने नासिका का छिद्र पकड़कर सोलह बार प्रणव का जप करते हुए वायु को खींचे । यह पूरक प्राणायाम है । इसके बाद अत्यन्त अद्भुत कुम्भक प्राणायाम करे ॥ ५८-५९॥

चतुःषष्टिप्रणवेन जपं ध्यानं समाचरेत् ।
कुम्भकानन्तरं नाथ रेचकं कारयेद् बुधः ॥ ६० ॥
द्वात्रिंशद्वारजापेन मूलेन प्रणवेन वा ।
द्विनासिकापुटं बद्ध्वा कुम्भकं सर्वसिद्धिदम् ॥ ६१ ॥

चौसठ बार प्रणव का जप तथा ध्यान करते हुए वायु को रोके । हे नाथ ! इस प्रकार कुम्भक प्राणायाम करने के बाद बुद्धिमान् साधक रेचक प्राणायाम करे । यह प्राणायाम बत्तीस बार प्रणव का जप करते हुए अथवा ध्यान करते हुए करना चाहिए । कुम्भक प्राणायाम के समय दोनों नासिकाच्छिद्र बन्द रखे, यह प्राणायाम सब प्रकार की सिद्धियों को देने वाला है ॥ ६०-६१ ॥

---

१. आनाख्यं षण्मनोहरम्—क० । २. ध्यायेत्—क० ।
३. अङ्गुष्ठस्य एकं पर्व इति षष्ठीतत्पुरुषगर्भः कर्मधारयसमासः ।
४. ध्यात्वा—क० । ५. मुत्तमम्—क० ।

कनिष्ठानामिकाभ्यां तु वाममङ्गुष्ठदक्षिणम् ।
पुनर्दक्षिणनासाग्रे[1] वायुमापूरयेद् बुधः ॥ ६२ ॥
मनुषोडशजापेन[2] कुम्भयेत् [3]पूर्ववत्ततः ।
ततो वामे रेचकञ्च द्वात्रिंशत्प्रणवेन तु ॥ ६३ ॥

पुनः कनिष्ठा और अनामिका से बायें नासिका छिद्र को बन्द कर दाहिने हाथ के अंगूठे से दाहिना नासिका पुट पकड़े हुए दाहिनी नासिका से वायु को पूर्ण कर पूरक करे । तदनन्तर १६ बार मन्त्र का जप करते हुए पूर्ववत् कुम्भक करें, फिर बत्तीस बार प्रणव का जप करते हुए बायीं नासिका से रेचक प्राणायाम करे ॥ ६२-६३ ॥

पुनर्वामेन सम्पूर्य षोडशप्रणवेन तु ।
पुनर्दक्षिणनासाग्रे द्वादशाङ्गुलमानतः ॥ ६४ ॥
कुम्भयित्वा रेचयेद्यः सर्वत्र पूर्ववत् प्रभो ।
प्राणायामत्रयेणैव प्राणायामैकमुत्तमम् ॥ ६५ ॥
द्विवारं मध्यमं प्रोक्तं मध्यमं चैकवारकम् ।
त्रिकालं कारयेद्यत्नात् अनन्तफलसिद्धये ॥ ६६ ॥

इसके बाद फिर सोलह प्रणव का जप कर बाईं नासिका से वायु खींचे फिर दाहिनी नासिका से बारह अंगुल पर्यन्त वायु को रोक कर हे प्रभो ! पूर्ववत् रेचक करे (द्र० . २५, ६०-६१) । तीन बार पूरक, कुम्भक, रेचक प्राणायाम से एक उत्तम प्राणायाम होता है । केवल दो बार का (पूरक कुम्भक) प्राणायाम मध्यम तथा केवल एक बार मात्र पूरक प्राणायाम अधम कहा जाता है । किन्तु साधक को अनन्त फल की सिद्धि के लिए तीन बार वाला उत्तम प्राणायाम यत्नपूर्वक करना चाहिए ॥ ६४-६६ ॥

प्रातर्मध्याह्नकाले च सायह्ने नियतः शुचिः ।
जपध्यानादिभिर्मु(र्यु)क्तं सगर्भं यः करोति हि ॥ ६७ ॥
मासात् सल्लक्षणं प्राप्य षण्मासे पवनासनः ।
तालुमूले समारोप्य जिह्वाग्रं योगसिद्धये ॥ ६८ ॥

साधक को प्रातः काल, मध्याह्न काल तथा सायङ्काल, नियमपूर्वक पवित्र हो कर प्राणायाम करना चाहिए । जो जप ध्यान से युक्त सगर्भ प्राणायाम करता है, एक महीने के बाद उसे प्राणायाम सिद्धि के लक्षण मालुम पड़ने लगते हैं । इसके बाद योगसिद्धि प्राप्त करने के लिए वायु पान करना चाहिए । जिह्वा के अग्रभाग को तालु के मूल में स्थापित करना चाहिए ॥ ६७-६८ ॥

त्रिकाले सिद्धिमाप्नोति प्राणायामेन षोडश ।
सदाभ्यासी वशीभूत्वा पवनं[4] जनयेत् पुमान् ॥ ६९ ॥

---

१. सम्पूरयेत् ततः—क० । २. मनोः षोडशजापेन—क० ।
३. पूरयेत्ततः—क० । ४. पवनः पाचयेत्—क० ।

षण्मासाभ्यन्तरे सिद्धिरिति योगार्थनिर्णयः ।
योगेन लभ्यते सर्वं योगाधीनमिदं जगत् ॥ ७० ॥

योगाभ्यास प्रशंसा—१६-१६ प्राणायाम तीनों काल में करने से साधक सिद्ध हो जाता है । इस प्रकार जितेन्द्रिय हो कर सदाभ्यास करने के बाद मनुष्य वायु पान करे । ऐसा करने से ६ महीने में सिद्धि प्राप्त हो जाती है । यह योगशास्त्र का निर्णय है । क्योंकि योग से सब कुछ प्राप्त किया जा सकता है, यह सारा जगत् योग के आधीन है ॥ ६९-७० ॥

तस्माद् योगं परं कार्यं यदा योगी तदा सुखी ।
बिना योगं न सिद्धेऽपि कुण्डली परदेवता ॥ ७१ ॥
अथ योगं सदा कुर्यात् ईश्वरीपाददर्शनात् ।
योगयोगाद् भवेन्मोक्ष इति योगार्थनिर्णयः ॥ ७२ ॥

इसलिए सर्वश्रेष्ठ योग सदैव करना चाहिए । इससे योगी सर्वदा सुखी रहता है । बिना योग के परदेवता कुण्डली सिद्ध नहीं होती । यह योग ईश्वर पद प्राप्ति कराने वाला है । इस कारण सर्वदा योग करना चाहिए । योग से युक्त होने पर ही मोक्ष होता है—ऐसा योग के अर्थ का निर्णय है ॥ ७१-७२ ॥

मन्त्रसिद्धीच्छुको यो वा सैव योगं सदाभ्यसेत् ।
मात्रावृत्तिं प्रवक्ष्यामि काकचञ्चुपुटं तथा ॥ ७३ ॥
सूक्ष्मवायु भक्षणं तत् चन्द्रमण्डलचालनम् ।
त्र्यावृत्तिञ्चैव[१] विविधं तन्मध्ये उत्तमं त्रयम् ॥ ७४ ॥

जो मन्त्र के सिद्धि की इच्छा रखता हो उसे योगाभ्यास सदैव करते रहना चाहिए । अब (प्राणायाम के अन्य प्रकार) मालावृत्ति (द्र० . २५ . ४२) तथा काकचञ्चुपुट कहती हूँ । मालावृत्ति वह है जिसमें सूक्ष्म वायु का भक्षण किया जाता है, वायु भक्षण से चन्द्रमण्डल का संचालन होता है । उसकी तीन आवृत्तियाँ हैं तथा प्रकार अनेक हैं, उसमें भी तीन उत्तम हैं ॥ ७३-७४ ॥

वर्णं सचन्दं संयुक्तं मूलं त्र्यक्षरमेव वा ।
जानुजङ्घामध्यदेशे तत्तत्सर्वासनस्थितः ॥ ७५ ॥
वामहस्ततालुमूलं भ्रामयेद् द्वादशक्रमात् ।
द्वादशक्रमशः कुर्यात् प्राणायामं हि पूर्ववत् ॥ ७६ ॥

१ . अनुस्वार युक्त वर्ण, मूलमन्त्र का जप, अथवा त्र्यक्षर (ॐकार) का जप ये तीन उत्तम हैं । जानु, जंघा के मध्य में जो जो आसन है, उनमें से किसी एक पर स्थित होकर इसका जप करना चाहिए ॥ ७५ ॥

२ . बायाँ हाथ तथा तालु का मूल भाग क्रमशः बारी बारी से घुमावें और इसी क्रम से बायें से दाहिनें तथा दाहिने से बायें १२ प्राणायाम भी करे ॥ ७६ ॥

---

१ . मात्रावृत्तिञ्च—क० ।

मात्रावृत्तिक्रमेणैव जपमष्टसहस्रकम् ।
प्राणायामद्वादशैकैर्भवेत्तदष्टसहस्रकम् ।
कृत्वा सिद्धीश्वरो नाम निष्पापी चैकमासतः ॥ ७७ ॥
त्रिसन्ध्यं कारयेद्यत्नाद् ब्रह्मज्ञानी निरञ्जनः ।
भवतीति न सन्देहः सदाभ्यासी हि योगिराट् ॥ ७८ ॥

३. मालावृत्ति का क्रम से आठ हजार जप करना चाहिए । यह आठ हजार जप उक्त १२ प्राणायाम को करते हुए करे, ऐसा एक मास करने से साधक सिद्धिश्वर बन जाता है तथा निष्पाप हो जाता है । इस क्रिया को तीनों सन्ध्या में करने से साधक माया से रहित ब्रह्मज्ञानी हो जाता है तथा सदैव अभ्यास करने से योगिराज बन जाता है इसमें संदेह नहीं ॥ ७७-७८ ॥

योगाभ्यासाद् भवेन्मुक्तो योगाभ्यासात् कुलेश्वरः ।
योगाभ्यासाच्च संन्यासी ब्रह्मज्ञानी निरामयः[1] ॥ ७९ ॥
सदाभ्यासाद् भवेद्योगी सदाभ्यासात् परन्तपः ।
सदाभ्यासात् पापमुक्तो [2]विधिविद्याशकृत् शकृत् ॥ ८० ॥
काकचञ्चुपुटं कृत्वा पिबेद्वायुमहर्निशम् ।
सूक्ष्मवायुक्रमेणैव सिद्धो भवति [3]योगिराट् ॥ ८१ ॥

योगिनां जपनियमः

बद्धपद्मासनं कृत्वा योगिमुद्रां विभाव्य च ।
मूले सम्पूरयेद् वायुं काकचञ्चुपुटेन तु ॥ ८२ ॥

योगाभ्यास से साधक मुक्त हो जाता है । योगाभ्यास से कुलेश्वर (महाशाक्त) हो जाता है, योगाभ्यास से सन्यासी ब्रह्मज्ञानी और नीरोग हो जाता है । सदैव योग के अभ्यास से योगी, सदैव योगाभ्यास से उत्तम तपस्वी अथवा शत्रुहन्ता तथा सदैव योगाभ्यास से वह निष्पाप हो जाता है । काक के समान चञ्चुपुट बना कर दिन रात वायु पान करे । सूक्ष्म वायु के क्रम से साधक सिद्ध तथा योगिराज बन जाता है । पद्मासन लगाकर योगीमुद्रा प्रदर्शित कर मूलाधार में काकचञ्चुपुट से वायु को पूर्ण करे ॥ ७९-८२ ॥

मूलमाकुञ्च्य सर्वत्र प्राणायामे मनोरमे ।
प्रबोधयेत् कुण्डलिनीं[4] चैतन्यां चित्स्वरूपिणीम् ॥ ८३ ॥
ओष्ठाधरकाकतुलं[5] दन्ते दन्ताः प्रगाढकम् ।
बद्ध्वा[6] वा यद् यजेद् योगी जिह्वां नैव प्रसारयेत् ॥ ८४ ॥
राजदन्तयुगं नाथ न स्पृशेज्जिह्वया सुधीः ।
काकचञ्चुपुटं कृत्वा बद्ध्वा वीरासने[7] स्थितः ॥ ८५ ॥

---

१. निर्गता आमया आधिव्याध्यादयो यस्य सः, बहुव्रीहिसमासः ।
२. विधिविद्यात् प्रकाशकृत्—क० ।
३. नान्यथा—क० ।
४. कुण्डलिनी चैतन्या चेन्न महासुखी—क० ।
५. ओष्ठाधारं काकतुल्यम्—क० ।
६. बद्धराजद्विजो योगी जिह्वां नैव—क० ।
७. बद्धवीरासनस्थितः—क० ।

तदनन्तर मूलाधार को संकुचित कर उत्तम प्राणायाम से चैतन्या चित्स्वरूपिणी कुण्डलिनी को उद्‌बुद्ध करे। कौवे के तुण्ड के समान अपने ओष्ठ और अधर को तथा दाँतों को दाँत पर प्रगाढ़ रूप से बाँधकर स्थापित करे। जीभ को न प्रसारे, इस प्रकार काकचञ्चुपुट से वायु पान करे। हे नाथ! सुधी साधक गजदन्त (आगे के प्रधान दो दाँत) जिह्वा से स्पर्श न करे। वीरासन पर स्थित होकर काक के चञ्चुपुट के समान ओष्ठाधर को स्थापित करे ॥ ८३-८५ ॥

तालुजिह्वामूलदेशे चान्यजिह्वां प्रयोजयेत्।
तदुद्भूतामृतरसं काकचञ्चुपुटे पिबेत् ॥ ८६ ॥
यः काकचञ्चुपुटके सूक्ष्मवायुप्रवेशनम्।
करोति स्तम्भनं योगी सोऽमरो भवति ध्रुवम्[1] ॥ ८७ ॥

तालु तथा जिह्वा के मूल स्थान में अन्य जिह्वा को संयुक्त करे और उससे गिरते हुए अमृत रस को काकचञ्चुपुट में पान करे। जो काकचञ्चुपुट में सूक्ष्म वायु का प्रवेश कर उसका संस्तम्भन करता है वह योगी निश्चित रूप से अमर हो जाता है ॥ ८६-८७ ॥

एतद्योगप्रसादेन जीवन्मुक्तस्तु साधकः।
जराव्याधि[2]महापीडारहितो भवति क्षणात् ॥ ८८ ॥
अथवा मात्रया कुर्यात् षोडशस्वरसम्पुटम्।
स्वमन्त्रं प्रणवं वापि जप्त्वा योगी भवेन्नरः ॥ ८९ ॥
अथवा[3] वर्णमालाभिः पुटितं मूलमन्त्रकम्।
मालासंख्याक्रमेणैव जप्त्वा कालवशं नयेत् ॥ ९० ॥

इस योग की क्रिया के सिद्ध हो जाने पर साधक जीवन्मुक्त हो जाता है और क्षण भर में जरा व्याधि तथा महापीड़ा से रहित हो जाता है। अथवा मातृका वर्णों से षोडश स्वर का सम्पुट करे, अथवा अपने मन्त्र को अथवा प्रणव को सम्पुटित करे ऐसा जप करने से मनुष्य योगी हो जाता है। अथवा वर्णमाला से मूलमन्त्र को सम्पुटित करे, वर्णमाला के संख्या के क्रम से मूलमन्त्र को सम्पुटित करने से साधक काल को अपने वश में कर लेता है ॥ ८८-९० ॥

वदने नोच्चरेद्वर्णं वाञ्छाफलसमृद्धये।
केवल जिह्वया जप्यं कामनाफलसिद्धये ॥ ९१ ॥
नाभौ सूर्यो वह्निरूपी ललाटे चन्द्रमास्तथा।
अग्निशिखास्पर्शनेन गलितं चन्द्रमण्डलम् ॥ ९२ ॥
तत्परामृतधाराभिः दीप्तिमाप्नोति भास्करः।
सन्तुष्टः पाति सततं पूरकेण च योगिनाम् ॥ ९३ ॥

---

१. सूक्ष्मवायुक्रमेणैव सिद्धो भवति योगिराट्—ग० ।
२. जरा च व्याधिश्च महापीडा च, ताभिः रहितः । ३. अथर्व—ग० ।

मनोरथ फल की समृद्धि के लिए मुख से वर्णों का (वैखरी) उच्चारण न करे, कामना फल सिद्धि के लिए केवल जिह्वा से ही जप करे । नाभि में अग्निरूप से सूर्य का निवास है, ललाट में चन्द्रमा का निवास है । प्राणवायु की अग्नि शिखा के स्पर्श से चन्द्रमण्डल द्रवित होता है । उस चन्द्र मण्डल से चूने वाली अमृतधारा से सूर्य प्रकाशित होता है । जब वह संतुष्ट रहता है तो पूरक से योगी की रक्षा करता है ॥ ९१-९३ ॥

ततः पूरकयोगेन अमृतं श्रावयेत् सुधीः ।
कुर्यात्प्रज्वलितं वह्निं रेचकेन वराग्निना ॥ ९४ ॥
अथ मौनजपं कृत्वा ततः सूक्ष्मानिलं मुदा ।
सहस्रारे गुरुं ध्यात्वा योगी भवति भावकः ॥ ९५ ॥
प्राणवायुस्थिरो यावत् तावन्मृत्युभयं कुतः ।
ऊर्ध्वरिता भवेद्यावत्तावत्कालभयं कुतः ॥ ९६ ॥
यावद्बिन्दुः स्थितो देहे विधुरूपी सुनिर्मलः ।
सदागलत्सुधाव्याप्तस्तावन्मृत्युभयं कुतः ॥ ९७ ॥

तदनन्तर पूरक प्राणायाम के द्वारा सुधी साधक अमृत को गिरावे और रेचक रूप श्रेष्ठ अग्नि से वह्नि को प्रज्वलित करे । इसके बाद मौन हो कर जप करे फिर सूक्ष्म वायु को सहस्रार चक्र में ले जाकर गुरु का ध्यान करे, ऐसा करने से साधक योगी हो जाता है । जब तक प्राणवायु स्थिर है तब तक भला मृत्यु का भय किस प्रकार हो सकता है । जब तक ऊर्ध्वरिता है तब तक भला काल का भय किस प्रकार हो सकता है ॥ ९४-९६ ॥

जब तक चन्द्रमण्डल से गिरे हुए अमृत से व्याप्त वीर्य शरीर में स्थित है, तब तक किस प्रकार मृत्यु का भय हो सकता है ॥ ९७ ॥

आनन्दभैरव उवाच

वद कान्ते कुलानन्दरसिके ज्ञानरूपिणि ।
सर्वतेजोऽग्रदेवेन येन सिद्धो भवेन्नरः ॥ ९८ ॥
महामृता खेचरी च सर्वतत्त्वस्वरूपिणी[१] ।
कीदृशी शाङ्करीविद्या श्रोतुमिच्छामि तत्क्रियाम् ॥ ९९ ॥
अध्यात्म[२]विद्यायोगेशी कीदृशी भवितव्यता ।
कीदृशी परमा देवी तत्प्रकारं वदस्व मे ॥ १०० ॥

आनन्दभैरव ने कहा—हे कुलानन्दरसिके ! हे ज्ञान स्वरूपिणि ! हे कान्ते ! जिस सर्वगा सर्वतेजोग्र देवता से मनुष्य सिद्ध होता है उसे कहिए । सर्वतत्त्वस्वरूपिणी महामृता खेचरी तथा शाङ्करी विद्या क्या है मैं उसकी क्रिया सुनना चाहता हूँ । समस्त योगों की अधीश्वरी वह अध्यात्म विद्या क्या है ? परमा देवी भवितव्यता क्या है ? उसका प्रकार मुझ से कहिए ॥ ९८-१०० ॥

---

१. सर्वाणि च तानि तत्त्वानि च संवतत्त्वानि, पूर्वकालैकसर्वजरदित्यादिना समासः, तेषां स्वरूपमस्ति यस्यामिति नित्ययोगे इनिः । २. अध्याय—ग० ।

आनन्दभैरवी उवाच

यस्य नाथ मनस्थैर्यं महासत्त्वे सुनिर्मले ।
भक्त्या सम्भावनं यत्र विनावलम्बनं प्रभो ॥ १०१ ॥
यस्या मनश्चित्तवशं स्वमिन्द्रियं
स्थिरा स्वदृष्टिर्जगदीश्वरीपदे ।
न खेन्दुशोगे च विनावलोकनं
वायुः स्थिरो यस्य बिना निरोधनम् ॥ १०२ ॥
त एव मुद्रा विचरन्ति खेचरी पापाद्विमुक्ताः प्रपिबन्ति वायुम् ।
यथा हि बालस्य च तस्य चेष्टी निद्राविहीनाः प्रतियान्ति निद्राम् ॥ १०३ ॥

खेचरी मुद्रा—आनन्दभैरवी ने कहा—हे नाथ ! जो साधक बिना अवलम्बन वाले मन को भक्तिपूर्वक सुनिर्मल महासत्त्व में भक्तिपूर्वक स्थापित कर उसका ध्यान करता है, जगदीश्वर पद में उस भक्ति से मन, चित्त तथा समस्त इन्द्रियाँ वश में हो जाती हैं, आकाश स्थित इन्दु के बिना जो देखने में समर्थ है तथा वायु के निरोध के बिना ही जिसका वायु स्थिर है, वही खेचरी मुद्रा है । पाप से विमुक्त साधक उसी खेचरी मुद्रा में वैसे ही विचरण करता है और वायु का पान करता है जिस प्रकार बालक (विचरण करता है) ॥ १०१-१०३ ॥

शाङ्करी-विद्यानिरूपणम्

पथापथज्ञानविवर्जिता ये धर्मार्थकामाद्धि विहीनमानसाः ।
विनावलम्बं जगतामधीश्वर एवैव मुद्रा विचरन्ति शाङ्करी ॥ १०४ ॥

आध्यात्मनिरूपणम्

ज्ञाने साध्यात्मविद्यार्थं जानाति कुलनायकम् ।
अध्याज्ञाचक्रपद्मस्थं शिवात्मानं सुविद्यया ॥ १०५ ॥
अध्यात्मज्ञानमात्रेण सिद्धो योगी न संशयः ।
षट्चक्रभेदको यो हि अध्यात्मज्ञः स उच्यते ॥ १०६ ॥
अध्यात्मशास्त्रसङ्केतमात्मना मण्डितं शिवम् ।
कोटिचन्द्राकृतिं शान्तिं यो जानाति षडम्बुधे ॥ १०७ ॥

शाङ्करी मुद्रा—हे जगत् के अधीश्वर ! जिन्हें मार्ग कुमार्ग का ज्ञान नहीं है तथा जिनका मन धर्म, अर्थ तथा काम से रहित है, ऐसे लोग जिसमें बिनावलम्ब के विचरण करते हैं, वही शाङ्करी मुद्रा है ॥ १०४ ॥

विमर्श—जिस प्रकार बक निद्राविहीन होकर जगत् के प्रति जागरूक नहीं रहता उसी प्रकार शाङ्करी मुद्रा में योगी हो जाता है । (पथापथज्ञानविवर्जिता-) पथे गतौ इत्यस्मात् कर्तरि पचाद्यच्, पथम् इति सिध्यति, तच्चापथं चेति पथापथे, ताभ्यां विहीनाः ॥ १०४ ॥

अध्यात्म के सहित महाविद्या के लिए ज्ञान सम्पन्न होने पर साधक आज्ञा चक्र रूप पद्म में रहने वाले कुल नायक शिव स्वरूप आत्मा को जान लेता है । ऐसा योगी मात्र

अध्यात्म के ज्ञान से सिद्ध हो जाता है इसमें संशय नहीं । अध्यात्म का ज्ञाता वह है जो षट्चक्र का भेदन करना जानता है । वह षट्चक्र रूप समुद्र में रहने वाले, अध्यात्म शास्त्र के सङ्केत से जानने योग्य, आत्मा से मण्डित, करोड़ों चन्द्रमा के समान शीतल सदाशिव को जान लेता है और अन्ततः वह शान्ति प्राप्त कर लेता है ॥ १०५-१०७ ॥

स ज्ञानी सैव योगी स्यात् सैव देवो महेश्वरः ।
स मां जानाति हे कान्त विस्मयो नास्ति शङ्कर ॥ १०८ ॥
मम सर्वात्मकं रूपं जगत्स्थावरजङ्गमम् ।
सृष्टिस्थितिप्रलयगं[1] यो जानाति स योगिराट् ॥ १०९ ॥

हे कान्त ! हे सदाशिव ! वही ज्ञानी है । वही योगी है । वही महेश्वर देव है और वही मुझे जानता है इसमें विस्मय नहीं करना चाहिए । स्थावर जङ्गमात्मक सारा जगत् मेरा सर्वात्मक रूप है, जो सृष्टि में उसकी स्थिति में तथा उसके प्रलय काल में भी विद्यमान रहता है, ऐसा जो जानता है, वह योगिराज है ॥ १०८-१०९ ॥

आध्यात्मज्ञाननिरूपणम्

अध्यात्मविद्यां विज्ञाप्य[2] नानाशास्त्रं प्रकाशितम् ।
तच्छास्त्रजालयुग्मा[3] ये तेऽध्यात्मज्ञाः कथं नराः ॥ ११० ॥
त्रिदण्डी स्यात्सदाभक्तो[4] वेदाभ्यासपरः कृती ।
वेदादुद्भवशास्त्राणि त्यक्त्वा मां भावयेद्यदि ॥ १११ ॥

अध्यात्म विद्या को उद्देश्य कर अनेक शास्त्र प्रकाशित किए गए हैं । किन्तु जो उस शास्त्र जाल में उलझ गए हैं वे मनुष्य किस प्रकार अध्यात्म ज्ञान प्राप्त कर सकते हैं । जो त्रिदण्ड धारण करे सर्वदा मुझ में भक्ति रखे, वेदाभ्यास करे, कृतज्ञ हो, ऐसा पुरुष यदि वेद से उत्पन्न समस्त शास्त्रों का त्याग कर मेरा ध्यान करे, तो वह अध्यात्मज्ञ हो सकता है ॥ ११०-१११ ॥

वेदाभ्यासं समाकृत्य नानाशास्त्रार्थनिर्णयम् ।
समुत्पन्नां महाशक्तिं समालोक्य भजेद्यतिः ॥ ११२ ॥
सर्वत्र व्यापिकां शक्तिं कामरूपां[5] निराश्रयाम् ।
व्यक्ताव्यक्तां स्थिरपदां वायवीं मां भजेद्यतिः ॥ ११३ ॥

वेदाभ्यास का आचरण करते हुए नाना शास्त्रों के अर्थ के निर्णय से उत्पन्न मुझ महाशक्ति को जान कर यति मेरा भजन करे । सब जगह व्यापक रूप से रहने वाली बिना किसी आधार के अधिष्ठित इच्छानुसार रूप धारण करने वाली, व्यक्त तथा अव्यक्त सर्वथा स्थिर मुझ वायवी शक्ति का यति भजन करे ॥ ११२-११३ ॥

---

१. सृष्टिश्च स्थितिश्च प्रलयश्चेति सृष्टिस्थितिप्रलयाः, तान् गच्छति, इति गमेर्डप्रत्ययः ।
२. संगोप्य—क० ।
३. मुग्धा—क० ।
४. सदा भोक्ता—क० ।
५. कालरूपाम—क० ।

यस्या आनन्दमतुलं [१]ज्ञानं यस्य फलाफलम् ।
योगिनां निश्चयज्ञानमेकमेव न संशयः ॥ ११४ ॥
यस्याः प्रभावमात्रेण [२] तत्त्वचिन्तापरो नरः ।
तामेव परमां देवीं सर्पराजसु कुण्डलीम् ॥ ११५ ॥
तामेव वायवीं शक्तिं सूक्ष्मरूपां स्थिराशयाम् ।
आनन्दरसिकां गौरीं ध्यायेत् श्वासनिवासिनीम् ॥ ११६ ॥

जिसके आश्रय में अतुल आनन्द है, जिसमें ज्ञान है, जो फलाफल देने वाली है, जो योगियों में निश्चय ज्ञान देने वाली है, वह तत्त्व एक ही है । जिसके प्रभाव मात्र से मनुष्य तत्त्व की चिन्ता में लग जाता है । सर्पराज पर अधिष्ठित वह परमा देवी कुण्डली वायवीशक्ति हैं, सूक्ष्मस्वरूपा हैं, स्थिर रहने वाली हैं और आनन्द की रसिका हैं । ऐसी श्वास में रहने वाली उस गौरी का ध्यान करे ॥ ११४-११६ ॥

आनन्दं ब्रह्मणो रूपं तत्त्वदेहे [३] व्यवस्थितम् ।
तस्याभिव्यञ्जकं द्रव्यं योगिभिः परिपीयते ॥ ११७ ॥

आनन्द ही ब्रह्म का स्वरूप हैं, वह तत्त्व साक्षात्कर्ता के देह में निवास करता है । उस आनन्द के अभिव्यञ्जक द्रव्य को योगीजन पान करते हैं ॥ ११७ ॥

तद्द्रव्यस्थां महादेवीं नीलोत्पलदलप्रभाम् ।
मानवीं परमां देवीमष्टादशभुजैर्युताम् ॥ ११८ ॥
कुण्डलीं चेतनाकान्तिं चैतन्यां परदेवताम् ।
आनन्दभैरवीं नित्यां घोरहासां [४] भयानकाम् ॥ ११९ ॥
तामेव परमां देवीं सर्ववायुवशङ्करीम् ।
मदिरासिन्धुसम्भूतां मत्तां रौद्रीं वराभयाम् ॥ १२० ॥
योगिनीं योगजननीं ज्ञानिनां मोहिनीसमाम् [५] ।
सर्वभूत [६]सर्वपक्षस्थितिरूपां महोज्ज्वलाम् ॥ १२१ ॥
षट्चक्रभेदिकां सिद्धिं तासां नित्यां मतिस्थिताम् ।
विमलां निर्मलां ध्यात्वा योगी मूलाम्बुजे यजेत् ॥ १२२ ॥

उन द्रव्यों में रहने वाली, नीलकमल पत्र के समान कान्ति वाली, मन्त्रस्वरूपा, अष्टादश भुजा से युक्त परमा महादेवी ही हैं । उस चैतन्या, चेतना से संयुक्त कान्ति वाली, परदेवतास्वरूपा कुण्डली आनन्दभैरवी नित्य घोर हास करने वाली, भयानक, समस्त वायु मण्डल को अपने वश में करने वाली, मदिरा समुद्र से उत्पन्न मस्ती से युक्त, रुद्र स्वरूपा, वर तथा अभय धारण करने वाली योगिनी, योगीजनों की जननी, ज्ञानियों को

---

१. ज्ञानात्—क० (ज्ञानाज्ञस्य)—क० । २. प्रसाद—क० ।
३. तत्त्व—क० । ४. धीरहासाम्—ग० ।
५. मोहिनीमुमाम्—क० । ३. सर्वभूतेषु सर्वपक्षेषु च या स्थितिः, सा रूपं यस्याः सा ताम् ।

भी मोह के फन्दे में डालने वाली, सब में समभाव से विराजमान, समस्त प्राणियों में तथा समस्त पक्षों में रहने वाली महान् उज्ज्वल स्वरूपा, षट्चक्रों का भेदन करने वाली सिद्धि, नित्या, बुद्धि में स्थित रहने वाली विमला एवं निर्मला का ध्यान कर योगी मूलाधार में उनका यजन करे ॥ ११८-१२२ ॥

एतत्पटलपाठे तु पापमुक्तो विभाकरः।
यथोर्द्ध्वरेता धर्मज्ञो विचरेत् ज्ञानसिद्धये ॥ १२३ ॥
एतत्क्रियादर्शनेन ज्ञानी भवति साधकः।
ज्ञानादेव हि मोक्षः स्यान्मोक्षः समाधिसाधनः ॥ १२४ ॥

इस (२५ वें) पटल के पाठ से साधक पाप मुक्त हो जाता है । सूर्य के समान तेजस्वी हो जाता है । जिस प्रकार ऊर्ध्वरेता विचरण करता है, उसी प्रकार वह धर्मज्ञ भी ज्ञान सिद्धि के लिए विचरण करता है । इस क्रिया को देखने से भी साधक ज्ञानी हो जाता है । ज्ञान से ही मोक्ष होता है । जो मोक्ष समाधि के साधन से प्राप्त होता है ॥ १२३-१२४ ॥

यदुद्धरति[१] वायुश्च धारणाशक्तिरेव च।
तन्मन्त्रं[२] वर्द्धयित्वा प्राणायामं समाचरेत् ॥ १२५ ॥
प्राणायामात् परं नास्ति पापराशिक्षयाय च।
सर्वपापक्षये याते किन्न सिद्ध्यति भूतले ॥ १२६ ॥

जो मन्त्र वायु को धारण कराता है, जिससे धारणा शक्ति उत्पन्न होती है, उस मन्त्र के जप को बढ़ाकर प्राणायाम का अभ्यास करना चाहिए । पापराशि के क्षय के लिए प्राणायाम से बढ़कर अन्य कोई साधन नहीं है । जब सभी पापों का क्षय हो जाता है तब वह कौन सा पदार्थ है जो इस पृथ्वी पर सिद्ध न हो ? ॥ १२५-१२६ ॥

प्राणवायुं महोग्रं तु महत्तेजोमयं परम्।
प्राणायामेन जित्वा च योगी मत्तगजं यथा[३] ॥ १२७ ॥
प्राणायामं विना नाथ कुत्र सिद्धो भवेन्नरः।
सर्वसिद्धिक्रियासारं[४] प्राणायामं परं स्मृतम् ॥ १२८ ॥
प्राणायामं त्रिवेणीस्थं यः करोति मुहुर्मुहुः।
तस्याष्टाङ्गसमृद्धिः स्याद्योगिनां योगवल्लभः ॥ १२९ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये पाशवकल्पे
षट्चक्रसारसङ्केते सिद्धमन्त्रप्रकरणे प्राणायामोल्लासे
भैरवीभैरवसंवादे पञ्चविंशः पटलः ॥ २५ ॥

---

१. यद् यद्वर्धति—क० । २. तत्तन्मन्त्रम्—ग० ।
३. तथा—क० । ४. सर्वासां सिद्धीनां क्रियाः, तासां सारं सारभूतम् ।

प्राणवायु बडा प्रचण्ड है । महातेजस्वी है । योगी उस प्राणवायु को मत्त गजेन्द्र के समान प्राणायाम द्वारा अपने वश में कर लेता है । हे नाथ ! प्राणायाम के बिना कौन मनुष्य कब सिद्ध हुआ है । यह प्राणायाम सभी क्रियाओं की सिद्धि का सार है तथा सबसे श्रेष्ठ है । जो साधक त्रिवेणी में रहने वाले इस प्राणायाम का बारम्बार अभ्यास करते हैं, उन्हें अष्टाङ्ग सिद्धि प्राप्त हो जाती है और वे योगियों के प्रेमपात्र हो जाते हैं ॥ १२७-१२९ ॥

॥ श्रीरुद्रयामल के उत्तरतन्त्र में महातन्त्रोद्दीपन में भावनिर्णय में पाशवकल्प में षट्चक्रसारसङ्केत में सिद्धमन्त्रप्रकरण में प्राणायामोल्लास में भैरवी-भैरव संवाद के मध्य पच्चीसवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ २५ ॥

— ❖ —

अथ षड्विंशः पटलः

आनन्दभैरवी उवाच

शृणु प्राणेश सकलं प्राणायामनिरूपणम् ।
प्राणायामे जपं ध्यानं तत्त्वयुक्तं वदामि तत् ॥ १ ॥
प्रकारयेय[1]मुल्लासं प्राणायामेषु शोभितम् ।
देवताविधिविष्णवीशास्ते तु मध्यममध्यमाः ॥ २ ॥
रजस्तमोगुणं नाथ सत्त्वे संस्थाप्य यत्नतः ।
कामक्रोधादिकं त्यक्त्वा योगी भवति योगवित् ॥ ३ ॥

आनन्दभैरवी ने कहा—हे प्राणेश ! अब सब प्रकार के प्राणायाम का निरूपण कर रही हूँ उसे सुनिए । जिस प्राणायाम में तत्त्वयुक्त जप और ध्यान है उसे कहती हूँ । प्राणायाम क्रिया में शोभा पाने वाले इस उल्लास के कई प्रकार हैं । इसके ब्रह्मा, विष्णु और ईश्वर—ये देवता वे तो मध्यम से भी मध्यम हैं । हे नाथ ! साधक सत्त्व में रज तम गुणों को स्थापित कर तथा काम क्रोधादि दोषों को त्याग कर प्राणायाम करे तो वह योगी योगवेत्ता हो जाता है ॥ १-३ ॥

रजोगुणं नृपाणां तु तमोगुणमतीव च ।
अधिकं तु पशूनां हि साधूनां सत्त्वमेव च ॥ ४ ॥
सत्त्वं विष्णुं वेदरूपं[2] निर्मलं द्वैतवर्जितम् ।
आत्मोपलब्धिविषयं त्रिमूर्तिमूलमाश्रयेत् ॥ ५ ॥

राजाओं में रजोगुण रहता है उससे भी अधिक तमोगुण रहता है, उससे भी अधिक तमोगुण पशुओं में रहता है, किन्तु साधुओं में मात्र सतोगुण की स्थिति रहती है । विष्णु में सत्त्वगुण है वे वेद के स्वरूप निर्मल तथा द्वैत से वर्जित हैं । आत्मोपलब्धि के विषय हैं, तीनों मूर्तियों के मूल हैं, अतः उनका ही आश्रय लेना चाहिए ॥ ४-५ ॥

सत्त्वगुणाश्रयादेव निष्पापी सर्वसिद्धिभाक् ।
जितेन्द्रियो भवेत् शीघ्रं ब्रह्मचारिव्रतेन च ॥ ६ ॥
प्राणवायुवशेनापि वशीभूताश्चराचराः ।
तस्यैव[3] कारणे नाथ जपं ध्यानं समाचरेत् ॥ ७ ॥

---

१. प्रकारत्रयमुल्लासम्—क० । २. विष्णु वेदरूपम्—क० ।
३. करणे—क० ।

वक्ष्यामि तत्प्रकारं जपध्यानं विधिद्वयम् ।
एतत्करणमात्रेण योगी स्यान्नात्र संशयः ॥ ८ ॥

सत्त्वगुण का आश्रय लेने से साधक पाप रहित और सभी सिद्धियों का पात्र होता है, किं बहुना ब्रह्मचर्य व्रत से वह शीघ्र जितेन्द्रिय हो जाता है । हे नाथ ! प्राणवायु को भी वश में कर लेने से संसार के सभी चराचर वश में हो जाते हैं । इसलिए प्राणवायु को वश में करने के लिए जप और ध्यान भी करते रहना चाहिए । प्राणवायु को वश में करने के लिए जप और ध्यान दो ही विधियाँ हैं । उनका प्रकार आगे कहूँगी । इनके कारण ही साधक योगी बन जाता है इसमें संशय नहीं ॥ ६-८ ॥

जपं च त्रिविधं प्रोक्तं व्यक्ताव्यक्तातिसूक्ष्मगम् ।
व्यक्तं वाचिकमुपांशुमव्यक्तं[१] सूक्ष्ममानसम् ॥ ९ ॥
तत्र ध्यानं प्रवक्ष्यामि प्रकारमेकविंशतिम् ।
ध्यानेन जपसिद्धिः स्यात् जपात् सिद्धिर्न संशयः ॥ १० ॥

जप के प्रकार - १. व्यक्त रूप से होने वाला, २. अव्यक्त रूप से होने वाला तथा ३. अत्यन्त सूक्ष्म रूप से होने वाला—ये जप के तीन भेद हैं । व्यक्त जप वह है जिसे वचन रूप से उच्चारण किया जाय, उपांशु (जिह्वा संचालन) से जो जप किया जाय वह अव्यक्त है और मन से किया जाने वाला जप अत्यन्त सूक्ष्म है । अब ध्यान के विषय में कहती हूँ । उस ध्यान के २१ प्रकार हैं । ध्यान से जप कर सिद्धि होती है और जप से वास्तविक सिद्धि होती है इसमें संशय नहीं ॥ ९-१० ॥

आदौ विद्यामहादेवीध्यानं वक्ष्यामि शङ्कर ।
एषा देवी कुण्डलिनी [२]यस्या मूलाम्बुजे मनः ॥ ११ ॥
मनः करोति सर्वाणि धर्मकर्माणि सर्वदा ।
यत्र गच्छति स श्रीमान् तत्र वायुश्च गच्छति ॥ १२ ॥

हे शङ्कर ! सर्वप्रथम मैं विद्यामहादेवी का ध्यान कहती हूँ । यह कुण्डलिनी, ही महाविद्या हैं जिनके मूलाधार रूप कमल में मन का निवास है । यह मन ही समस्त धर्म कर्म सर्वदा किया करता है जहाँ-जहाँ वह जाता है वायु भी उसी स्थान पर उसके साथ जाता है ॥ ११-१२ ॥

अतो मूले समारोप्य मानसं वायुरूपिणम् ।
द्वादशाङ्गुलकं बाह्ये नासाग्रे चावधारयेत् ॥ १३ ॥
मनःस्थं रूपमाकल्प्य मनोधर्मं मुहुर्मुहुः ।
मनस्तत् [३]सदृशं याति गतिर्यत्र[४] सदा भवेत् ॥ १४ ॥
मनोविकाररूपं तु एकमेव न संशयः ।
अज्ञानिनां हि देवेश ब्रह्मणो रूपकल्पना ॥ १५ ॥

---

१. स व्यक्तम्—ग० । २. अस्या—क० ।
३. सहस्रम्—ग० । ४. मतिर्यत्र—ग० ।

अव्यक्तं ब्रह्मरूपं हि तच्च देहे व्यवस्थितम् ।
धर्मकर्मविनिर्मुक्तं मनोगम्यं भजेद्यतिः ॥ १६ ॥

अतः मूलाधार में वायु स्वरूप मन को स्थापित कर नासा के अग्रभाग के बाहर १२ अंगुल पर्यन्त वायु धारण करे । मन में रहने वाले धर्म के स्वरूपभूत (इष्टदेव) की मन में कल्पना करे । मन भी उस स्वरूप के अनुसार ही चलता है जहाँ उसकी गति है । मन में रहने वाला विकार एक ही है, इसमें संशय नहीं । हे देवेश ! परब्रह्म के रूप की कल्पना तो अज्ञानियों की है । वस्तुतः ब्रह्म का स्वरूप अव्यक्त है और वह ब्रह्म शरीर में व्यवस्थित रूप से वर्तमान है । वह धर्म कर्म से सर्वथा निर्लेप है । अतः मनोगम्य होने से साधक यति को उसका भजन करना चाहिए ॥ १३-१६ ॥

पद्मं चतुर्दलं मूले स्वर्णवर्णं मनोहरम् ।
तत्कर्णिकामध्यदेशे स्वयम्भूवेष्टितां भजेत् ॥ १७ ॥
कोटिसूर्यप्रतीकाशां सुषुम्नारन्ध्रगामिनीम्[१] ।
ऊर्द्ध्वं गलत्सुधाधारामण्डितां कुण्डलीं भजेत् ॥ १८ ॥

मूलाधार में स्थित कमल चार दलों वाला है, जो मनोहर तथा सुवर्ण के समान वर्ण वाले हैं उसकी कर्णिका के मध्य में स्वयंभू लिङ्ग को वेष्टित करने वाली कुण्डलिनी का भजन करना चाहिए । वह कुण्डलिनी करोड़ों सूर्य के समान दीप्तिमती है जो सुषुम्ना रन्ध्र से ऊपर जाती है और बहते हुए सुधा धारा से मण्डित है । यति साधक को उस कुण्डलिनी का भजन करना चाहिए ॥ १७-१८ ॥

स्वयम्भूलिङ्गं परमं ज्ञानं [२]चिरविवर्द्धनम् ।
सूक्ष्मातिसूक्ष्ममाकाशं कुण्डलीजडितं भजेत् ॥ १९ ॥
पूर्वोक्तयोगपटलं तत्र मूले विभावयेत् ।
कुण्डलीध्यानमात्रेण षट्चक्रभेदको भवेत् ॥ २० ॥
ध्यायेद् देवीं कुण्डलिनीं परापरगुरुप्रियाम् ।
आनन्दां[३] भुवि मध्यस्थां योगिनीं योगमातरम् ॥ २१ ॥

उससे परिवेष्टित स्वयंम्भू लिङ्ग है, जो सूक्ष्म से भी अति सूक्ष्म है और आकाश के समान निर्लेप है तथा जो परम ज्ञान को निरन्तर बढ़ाता रहता है, उसका भजन करना चाहिए । साधक उस मूलाधार में कुण्डली तथा तत् परिवेष्टित स्वयंभू लिङ्ग के उभय योग का ध्यान करे । इस प्रकार के कुण्डलिनी के ध्यान मात्र से वह सिद्ध साधक षट्चक्रों का भेदक हो जाता है । पर और अवर गुरुओं की प्रेमास्पदा, आनन्दस्वरूपा, मूलाधार रूप भूलोक में रहने वाली योगी जनों की योगमाता कुण्डलिनी का ध्यान करना चाहिए ॥ १९-२१ ॥

---

१. वज्रगामिनीम्—ग० । सुषुम्नाया रन्ध्रे गच्छति तच्छीला, ताम् ।
२. ज्ञानाङ्कुर—क० । ३. आनन्दार्णव—क० ।

कोटिविद्युल्लताभासां सूक्ष्मातिसूक्ष्मवर्त्मगाम्[1] ।
ऊर्द्ध्वमार्गव्याचलन्तीं प्रथमारुणविग्रहाम् ॥ २२ ॥
प्रथमोद्गमने कौलीं[2] ज्ञानमार्गप्रकाशिकाम् ।
प्रति[3] प्रयाणे प्रत्यक्षाममृतव्याप्तविग्रहाम् ॥ २३ ॥
धर्मोदयां भानुमतीं जगत्स्थावरजङ्गमाम् ।
सर्वान्तस्थां निर्विकल्पाञ्चैतन्यानन्दनिर्मलाम् ॥ २४ ॥

करोड़ों विद्युल्लता के समान देदीप्यमान, सूक्ष्म से भी अतिसूक्ष्म मार्ग में गमन करने वाली, ऊपर की ओर के चलने वाली और सर्वश्रेष्ठ अरुण वर्ण के शरीर वाली कुण्डलिनी का ध्यान करना चाहिए । प्रथम गमन के समय कौलीय रूप धारण करने वाली, ज्ञान मार्ग का प्रकाश करने वाली और ऊपर से नीचे की ओर आने के समय अमृत से व्याप्त विग्रह वाली कुण्डलिनी का ध्यान करना चाहिए । धर्म से उदय होने वाली, किरणों से व्याप्त, जगत् के स्थावर-जङ्गम स्वरूप वाली, सभी के अन्तःकरण में निवास करने वाली, निर्विकल्पा चैतन्य एवं आनन्द से सर्वथा निर्मल स्वरूप वाली कुण्डलिनी का ध्यान करना चाहिए ॥ २२-२४ ॥

आकाशवाहिनीं नित्यां [4]सर्ववर्णस्वरूपिणीम् ।
महाकुण्डलिनीं ध्येयां ब्रह्मविष्णुशिवादिभिः ॥ २५ ॥
प्रणवान्तःस्थितां शुद्धांशुद्धज्ञानाश्रयां शिवाम् ।
कुलकुण्डलिनीं सिद्धिं चन्द्रमण्डलभेदिनीम् ॥ २६ ॥

आकाश में उड़ने वाली नित्य स्वरूपा, समस्त वर्ण स्वरूपा, ब्रह्मा, विष्णु, शिवादि, देवताओं से ध्यान करने योग्य श्रीकुण्डली का ध्यान करना चाहिए । प्रणव के मध्य में रहने वाली, शुद्ध स्वरूपा, शुद्ध ज्ञानाश्रया, सबका कल्याण करने वाली, चन्द्र मण्डल का भेदन करने वाली एवं सिद्धि स्वरूपा कुल कुण्डलिनी का ध्यान करना चाहिए ॥ २५-२६ ॥

मूलाम्भोजस्थितामाद्यां जगद्योनिं जगत्प्रियाम् ।
स्वाधिष्ठानादिपद्मस्थां सर्वशक्तिमयीं पराम् ॥ २७ ॥
आत्मविद्यां शिवानन्दां पीठस्थामतिसुन्दरीम् ।
सर्पाकृतिं रक्तवर्णां [5]सर्वरूपविमोहिनीम् ॥ २८ ॥

मूलाधार के कमल पर निवास करने वाली, आद्या जगत् की कारणभूता, समस्त जगत् से प्रेम करने वाली, स्वाधिष्ठानादि पद्मों में रहने वाली, सर्वशक्तिमयी परा कुण्डलिनी का ध्यान करना चाहिए । आत्म विद्या, शिवानन्दा पीठ में निवास करने वाली, अत्यन्त सुन्दरी, साँप के समान आकृति वाली, रक्तवर्णा रूप से सबको संमोहित करने वाली कुल कुण्डलिनी का ध्यान करना चाहिए ॥ २७-२८ ॥

---

१. सूक्ष्मवर्णगाम्—क० ।—सूक्ष्मातिसूक्ष्मं यद् वर्त्म (मार्गः) तद् गच्छति—इति । गमेर्डप्रत्ययः ।
२. प्रथमोद्धमने कौला—ग० ।
३. प्रति प्रमाणे प्रत्यक्षाममृतव्याप्तविग्रहाम्—ग० ।
४. निर्बिवर्ण—ग० ।
५. सर्प—ग० ।

कामिनीं कामरूपस्थां [१]मातृकामात्मदायिनीम् ।
कुलमार्गानन्दमयीं कालीं कुण्डलिनीं भजेत् ॥ २९ ॥
इति ध्यात्वा मूलपद्मे निर्मले योगसाधने ।
धर्मोदये ज्ञानरूपीं साधयेत् परकुण्डलीम् ॥ ३० ॥

कामिनी, कामरूप में रहने वाली मातृका स्वरूपा, आत्मविद्या देने वाली, कुलमार्ग के उपासकों को आनन्द देने वाली महाकाली कुण्डलिनी का ध्यान करना चाहिए । पवित्र योगसाधन काल में इस प्रकार मूलपद्म में कुण्डलिनी का ध्यान कर धर्म के उदय हो जाने पर ज्ञानरूपी पर कुण्डलिनी की सिद्धि करनी चाहिए ॥ २९-३० ॥

कुण्डलीभावनादेव खेचराद्यष्टसिद्धिभाक् ।
ईश्वरत्वमवाप्नोति साधको भूपतिर्भवेत् ॥ ३१ ॥
योगाभ्यासे भावसिद्धौ स्मृतो वायुर्महोदयः ।
प्राणानामादुर्निवार्यो यत्नेन तं प्रचालयेत् ॥ ३२ ॥
प्रतिक्षणं समाकृष्य मूलपद्मस्थ कुण्डलीम् ।
तदा प्राणमहावायुर्वशी भवति निश्चितम् ॥ ३३ ॥

कुण्डलिनी की भावना के करने से ही खेचरता तथा अष्टसिद्धियाँ प्राप्त हो जाती हैं और साधक ईश्वरत्व प्राप्त कर लेता है, । किं बहुना वह राजा भी हो जाता है । योगाभ्यास में महोदय वायु भावना से सिद्ध होता है । इन प्राण नाम के वायु को रोकना बड़ा कठिन कार्य है । अतः धीरे-धीरे इनका संचालन करे । मूलपद्म में रहने वाली कुण्डली को प्रतिक्षण ऊपर की ओर खींचते रहना चाहिए तभी प्राणरूप महावायु निश्चित रूप से वश में हो जाती है ॥ ३२-३३ ॥

ये देवाश्चैव ब्रह्माण्डे क्षेत्रे पीठे सुतीर्थके ।
शिलायां [२]शून्यगे नाथ सिद्धाः स्युः प्राणवायुना ॥ ३४ ॥
ब्रह्माण्डे यानि संसन्ति तानि सन्ति कलेवरे ।
ते सर्वे प्राणसंलग्नाः प्राणातीतं निरञ्जनम् ॥ ३५ ॥
यावत्प्राणः स्थितो देहे तावन्मृत्युभयं कुतः ।
गते प्राणे समायान्ति देवताश्चेतनास्थिताः ॥ ३६ ॥

ब्रह्माण्ड में, क्षेत्र में, पीठ में तथा उत्तम तीर्थ में, शिला में, शून्य स्थान में रहने वाले जितने तत्त्व भी हैं वे सभी प्राणवायु से सिद्ध हो जाते हैं । वस्तुतः जितने तीर्थ ब्रह्माण्ड में है उतने ही तीर्थ इस शरीर में भी हैं, वे सभी प्राण से जुड़े हुए हैं, किन्तु निरञ्जन परब्रह्म प्राण से सर्वथा परे हैं । जब तक इस शरीर में प्राण है, तब तक मरने का भय किस प्रकार हो सकता है । प्राण के जाते ही चेतना में रहने वाले सभी देवता भी (शरीर से) चले जाते हैं ॥ ३४-३६ ॥

---

१. मातृकामर्यदायिनीम्—क० ।
२. मृण्मये—क० ।—'मृन्मये' इति पाठान्तरमुचितम्, न तु मृण्मये इति ।णत्वस्याप्राप्तेः।

सर्वेषां मूलभूता सा कुण्डली भूतदेवता[१] ।
वायुरूपा पाति सर्वमानन्दचेतनामयी ॥ ३७ ॥
जगतां चेतनारूपी कुण्डली योगदेवता ।
आत्ममनःसमायुक्ता ददाति मोक्षमेव सा ॥ ३८ ॥
अतस्तां भावयेन्मन्त्री भावज्ञानप्रसिद्धये ।
भवानीं भोगमोक्षस्थां यदि योगमिहेच्छसि ॥ ३९ ॥

सभी का मूलभूत कुण्डलीभूत देवता है, जो आनन्द युक्त एवं चेतनामयी है इस प्रकार यही वायु रूपा कुण्डलिनी सबकी रक्षा करती है । समस्त जगत् में चेतना रूपी कुण्डलिनी योग की अधिष्ठातृ देवता है जो आत्मा और मन से संयुक्त रह कर मोक्ष प्रदान करती है । इसलिए मन्त्रज्ञ साधक भावज्ञान की सिद्धि के लिए उसका ध्यान करे । यदि कोई योग चाहता हो तो वह भोग और मोक्ष में रहने वाली उस भवानी का ध्यान करें ॥ ३७-३९ ॥

वायुरोधनकाले च कुण्डली चेतनामयी[२] ।
ब्रह्मरन्ध्रावधि ध्येया योगिनं पाति कामिनी ॥ ४० ॥
वायुरूपां[३] परां देवीं नित्यां योगेश्वरीं जयाम् ।
निर्विकल्पां त्रिकोणस्थां[४] सदा ध्यायेत् कुलेश्वरीम् ॥ ४१ ॥
अनन्तां कोटिसूर्याभां ब्रह्मविष्णुशिवात्मिकाम् ।
अनन्तज्ञाननिलयां यां भजन्ति मुमुक्षवः ॥ ४२ ॥
अज्ञानतिमिरे घोरे सा लग्ना मूढचेतसि ।
सुप्ता सर्पासना मौला पाति साधकमीश्वरी ॥ ४३ ॥

वायु के रोकने के समय चेतनामयी कुण्डली का ब्रह्मरन्ध्र पर्यन्त ध्यान करें क्योंकि वह कामिनी योगी की रक्षा करती है । वायुरूपा, परादेवी, नित्या, योगीश्वरी, जया, निर्विकल्पा, त्रिकोण में रहने वाली कुलेश्वरी कुण्डलिनी का ध्यान करना चाहिए । वह अनन्ता करोड़ों सूर्य के समान आभा वाली और ब्रह्मा, विष्णु, शिव स्वरूपा वह अनन्तज्ञान निलया है । मुमुक्षु जन उसी का भजन करते हैं । वह मूर्खों के चित्त में घोर अज्ञानान्धकार में पड़ी रहती हैं । सर्पासन पर सवार रहती हैं, सोई रहती है और मूलाधार में स्थित रहने वाली वह ईश्वरी साधक का पालन करती है ॥ ४०-४३ ॥

ईश्वरीं सर्वभूतानां ज्ञानाज्ञानप्रकाशिनीम् ।
धर्माधर्मफलव्याप्तां करुणामयविग्रहाम् ॥ ४४ ॥
नित्यां ध्यायन्ति योगीन्द्राः काञ्चनाभाः कलिस्थिताः ।
कुलकुण्डलिनीं देवीं चैतन्यानन्दनिर्भराम् ॥ ४५ ॥

उस सर्व प्राणियों की ईश्वरी, ज्ञान और अज्ञान का प्रकाशन करने वाली, धर्म और

---

१. परदेवता—क० । २. चेतनमुखी—ग० । ३. जयारूपाम्—क० ।
४. त्रिलोकस्थाम्—क० ।—त्र्यवयवो लोकस्त्रिलोकस्तत्रस्थिताम् । मध्यमपदलोपिसमासगर्भस्तत्पुरुषः ।

अधर्म के फल से व्याप्त करुणामय विग्रह वाली नित्या भगवती का स्वर्ण के समान आभा वाले कलिकाल में उत्पन्न योगेन्द्र ध्यान करते हैं ॥ ४४-४५ ॥

ककारादिमान्तवर्णां मालाविद्युल्लतावृताम्[१] ।
हेमालङ्कारभूषाङ्गीं[२] ये मां सम्भावयन्ति ते ॥ ४६ ॥
ये वै[३] कुण्डलिनीं विद्यां कुलमार्गप्रकाशिनीम् ।
ध्यायन्ति[४] वर्षसंयुक्तास्ते मुक्ता नात्र संशयः ॥ ४७ ॥

चैतन्य और आनन्द से परिपूर्ण, वकार से सकार वर्ण वाली, विद्युल्लता से आवृत सुवर्ण के अलङ्कार से भूषित इस प्रकार के रूप में मेरा जो ध्यान करते हैं वे मुक्त हो जाते हैं। इस प्रकार जो कुलमार्ग का प्रकाश करने वाली कुण्डलिनी विद्या का ध्यान वर्ण पर्यन्त करते हैं वे मुक्त हो जाते हैं इसमें संशय नहीं ॥ ४६-४७ ॥

ये मुक्ता[५] पापराशेस्तु धर्मज्ञानसुमानसाः ।
तेऽवश्यं ध्यानमाकुर्वन् स्तुवन्ति[६] कुण्डलीं पराम् ॥ ४८ ॥
कुलकुण्डलिनीध्यानं भोगमोक्षप्रदायकम् ।
यः करोति महायोगी भूतले नात्र संशयः ॥ ४९ ॥

जो पापराशि से मुक्त हैं, जिनके मन में धर्म ज्ञान हो गया है, वे अवश्य ही कुण्डलिनी का ध्यान कर उस पराकुण्डलिनी की स्तुति करते हैं। कुल कुण्डलिनी का ध्यान भोग और मोक्ष दोनों प्रदान करता है और जो उसका ध्यान करते हैं वह इस भूतल में महायोगी हैं इसमें सन्देह नहीं ॥ ४८-४९ ॥

त्रिविधं कुण्डलिनीध्यानं दिव्यवीरपशुक्रमम् ।
पशुभावादियोगेन सिद्धो भवति योगिराट् ॥ ५० ॥
दिव्यध्यानं प्रवक्ष्यामि सामान्यानन्तरं प्रभो ।
आदौ सामान्यमाकृत्य दिव्यादीन् कारयेत्ततः ॥ ५१ ॥

दिव्य, वीर और पशुभाव से कुण्डलिनी का ध्यान तीन प्रकार का कहा गया है। प्रथम पशुभाव, फिर वीरभाव, फिर दिव्यभाव, इस क्रम से प्राप्त होने पर योगिराज सिद्ध हो जाता है। हे प्रभो ! अब पशु भावादि कहने के बाद दिव्य ध्यान कहूँगी पहले सामान्य पशुभाव का ध्यान, फिर वीरभाव का ध्यान तदनन्तर दिव्यभाव का ध्यान करे ॥ ५०-५१ ॥

कोटिचन्द्रप्रतीकाशां[७] तेजोबिम्बां[८] निराकुलाम् ।
ज्वालामाला[९]सहस्राढ्यां कालानलशतोपमाम् ॥ ५२ ॥

---

१. च्युताम्—ग० । मालाविद्युतां लताभिरावृताम् । २. मन्त्याम्—क० ।
३. ये कुलीनाः कुलाधिस्याम्—क० । ४. हर्ष—क० ।
५. भक्ताः—क० । ६. कुलकुण्डलीम्—क० ।
७. सूर्य—क० । ८. विध्याम्—ग० । ९. प्राणायाम—ग० ।

द्रंष्ट्राकरालदुर्धर्षां जटामण्डलमण्डिताम् ।
घोररूपां महारौद्रीं सहस्रकोटिचञ्चलाम् ॥ ५३ ॥
कोटिचन्द्रसमस्निग्धां सर्वत्रस्थां भयानकाम् ।
अनन्तसृष्टिसंहारपालनोन्मत्तमानसाम् ॥ ५४ ॥
सर्वव्यापकरूपाद्यामादिनीलाकलेवराम् ।
अनन्तसृष्टिनिलयां ध्यायन्ति तां मुमुक्षवः ॥ ५५ ॥

करोड़ों चन्द्रमा के समान सुशीतल, तेज का बिम्ब, सर्वथा स्थिर सहस्रों ज्वालामाला से युक्त, सैकड़ों कालाग्नि के समान भयङ्कर, कराल दाँतों से एवं महाभयानक जटामण्डल से मण्डित, घोर रूपा, महारौद्री सहस्र करोड़ विद्युत के समान चञ्चल, करोड़ों चन्द्रमा के समान मनोहर, सर्वत्र व्याप्त रहने वाली, महाभयानक, अनन्त जगत् की सृष्टि एवं अनन्त सृष्टि का पालन तथा अनन्त सृष्टि के संहार में उन्मत्त रहने वाली सर्व व्यापक रूप से रहने वाली, आद्या, आदि नील कलेवर वाली तथा अनन्त सृष्टि की निलयभूता उस महाविद्या का मुमुक्षु जन ध्यान करते हैं ॥ ५२-५५ ॥

वीरध्यानं प्रवक्ष्यामि यत्कृत्वा वीरवल्लभः ।
वराणां वल्लभो यो हि मुक्तो[1] भोगी स उच्यते ॥ ५६ ॥
वीराचारे[2] सत्त्वगुणं निर्मलं दिव्यमुत्तमम् ।
सम्प्राप्य च महावीरो योगी भवति तत्क्षणात् ॥ ५७ ॥

अब वीर ध्यान कहती हूँ, जिसके करने से वीर वल्लभ होता है और जो वीरों का वल्लभ हो जाता है, वह योगी भी मुक्त कहा जाता है । वीराचार में सत्त्वगुण की प्रधानता रहती है, दिव्यभाव से साधक निर्मल होता है । इन भावों को प्राप्त कर योगी तत्क्षण महावीर बन जाता है ॥ ५६-५७ ॥

वीराचारं बिना नाथ दिव्याचारं न लभ्यते ।
ततो वीराचारधर्मं कृत्वा दिव्यं समाचरेत् ॥ ५८ ॥
वीराचारं कोटिफलं वारैकजपसाधनम् ।
कोटिकोटिजन्मपापदुःखनाशं स भक्तकः ॥ ५९ ॥

हे नाथ ! बिना वीराचार के दिव्याचार प्राप्त नहीं होता, इसलिए वीराचार करने के बाद दिव्यभाव का आचरण करना चाहिए । वीराचार करोड़ गुना फल देने वाला है और उसका साधन एकमात्र जप है जिससे करोड़ों करोड़ों जन्म के पापों एवं दुःखों का नाश हो जाता है । अन्ततः वही भक्त भी होता है ॥ ५८-५९ ॥

---

१. मुक्तिभागी—क० ।
२. यदि वीराचारभावं करोति भूभृतां पतिः ।
स योगी भोगवक्ता स्यादानन्दपूर्णभावकः ॥
मुषि दाता विधाता विधाता वेदवाचकैः ।
वेदवक्ता महारुद्रो वीराचारेण सम्भवेत् ॥ क० अधिकः ।

कुलाचारं समाचारं वीराचारं महाफलम् ।
कृत्वा सिद्धिश्च[1] वै ध्यानं कुलध्यानं[2] मदीयकम् ॥ ६० ॥
कुलकुण्डलिनीं देवीं मां ध्यात्वा पूजयन्ति ये ।
मूलपद्मे[3] महावीरो ध्यात्वा भवति योगिराट् ॥ ६१ ॥

कुलाचार, समाचार (समयाचार) और वीराचार महान् फल देने वाला है । इसलिए मेरा ध्यान अर्थात् कुल ध्यान करके ही साधक सिद्धि प्राप्त करता है । जो महावीर मूलाधार के पद्म में स्थिर रहने वाली कुल कुण्डलिनी देवी के रूप में ध्यान करते हैं, वे ध्यान कर महावीर एवं योगिराज हो जाते हैं ॥ ६०-६१ ॥

कालीं कौलां कुलेशीं कलकल-कलिजध्यानकालानलार्का
कल्योल्कां कालकवलां किलिकिलिकलिकां केलिलावण्यलीलाम् ।
सूक्ष्माख्यां संक्षयाख्यां क्षयकुलकमले सूक्ष्मतेजोमयीन्ता-
माद्यन्तस्थां भजन्ति प्रणतगतजनाः[4] सुन्दरीं चारुवर्णाम् ॥ ६२ ॥

काली, कौला, कुलमार्ग की ईश्वरी, कलकल कलिजों के ध्यान के लिए कालानल का सूर्य, कलि युग की उल्का, काल को कवलित करने वाली, किलिकिलि की कलिका केलि में अपने लावण्य से लीला करने वाली, सूक्ष्म नाम से अभिहित होने वाली, सूक्ष्म नाम से अभिहित होने वाली, संक्षय नाम से अभिहित होने वाली, क्षयकुल कमल में तेजोरूप से विराजमान, आदि और अन्त में रहने वाली, उन चारुवर्णा सुन्दरी को प्रणत रहने वाले भक्त जन निरन्तर भजते हैं ॥ ६२ ॥

अष्टादशभुजैर्युक्तां नीलेन्दीवरलोचनाम् ।
मदिरासागरोत्पन्नां चन्द्रसूर्याग्निरूपिणीम् ॥ ६३ ॥
चन्द्रसूर्याग्निमध्यस्थां सुन्दरीं वरदायिनीम् ।
कामिनीं कोटिकन्दर्पदर्पान्तकपतिप्रियाम् ॥ ६४ ॥
आनन्दभैरवाक्रान्तामानन्दभैरवीं पराम् ।
भोगिनीं कोटिशीतांशुगलद्गात्रमनोहराम् ॥ ६५ ॥
कोटिविद्युल्लताकारां सदसद्व्यक्तिवर्जिताम् ।
ज्ञानचैतन्यनिरतां तां वीरा भावयन्ति हि ॥ ६६ ॥

अट्ठारह भुजाओं वाली, नीले कमल के समान मनोहर नेत्रों वाली, मदिरा के सागर से उत्पन्न होने वाली, चन्द्र, सूर्य तथा अग्नि स्वरूपा, चन्द्र, सूर्य एवं अग्नि के मध्य में रहने वाली परम सुन्दरी, वरदायिनी, करोड़ों कन्दर्प के दर्प को दलन करने वाली, पति प्रिया, कामिनी, आनन्दभैरव से आक्रान्त, पर स्वरूपा, आनन्दभैरवी, भोगिनी, करोड़ों चन्द्रमा से गिरते हुए अमृतमय गात्र से मनोहर, करोड़ों विद्युल्लता के समान आकार वाली, सदसत् की

---

१. सिद्धश्च—क० । २. यद् यद्—क० ।
३. मूलपद्मे महावीरां भैरवीं ते वशेन्द्रियाम्—ग० । ४. जलाम्—ग० ।

अभिव्यक्ति से वर्जित, ज्ञान एवं चैतन्य में निरत रहने वाली उस महाविद्या का ध्यान वीराचार के लोग करते हैं ॥ ६३-६६ ॥

अस्या ध्यानप्रसादेन त्वं तुष्टो भैरवः स्वयम्।
अहं च तुष्टा संसारे सर्वे तुष्टा न संशयः ॥ ६७ ॥
प्राणायामान् स करोति साधकः स्थिरमानसः ।
ध्यात्वा देवीं मूलपद्मे वीरो योगमवाप्नुयात् ॥ ६८ ॥
वीरभावं सूक्ष्मवायुधारणेन महेश्वर ।
साधको भुवि जानाति स्वमृत्युं जन्मसङ्कटम् ॥ ६९ ॥

हे प्रभो ! इस देवी के ध्यान से स्वयं आप भैरव संतुष्ट होते हैं और मैं भी संतुष्ट होती हूँ, फिर तो सारा संसार ही संतुष्ट रहता है इसमें संशय नहीं । जो वीर साधक स्थिर चित्त से प्राणायाम करता है और मूलाधार पद्म में देवी का ध्यान करता है वह योग प्राप्त कर लेता है । हे महेश्वर ! सूक्ष्म वायु के धारण करने से वीरभाव को प्राप्त करने वाला साधक इस पृथ्वी पर अपनी मृत्यु तथा जन्म में होने वाले सङ्कटों को जान लेता है ॥ ६७-६९ ॥

मासादाकर्षणीसिद्धिर्वाक्सिद्धिश्च द्विमासतः ।
मासत्रयेण[१] संयोगाज्जायते देववल्लभः[२] ॥ ७० ॥
एवञ्चतुष्टये मासि भवेद्दिकपालगोचरः ।
पञ्चमे पञ्चबाणः स्यात् षष्ठे रुद्रो न संशयः ॥ ७१ ॥

एक महीने में आकर्षण की सिद्धि, दो महीने में वाक्सिद्धि तथा तीन महीने में वायु के संयोग से साधक देवताओं का वल्लभ हो जाता है । इसी प्रकार ऐसा करते रहने से उसे दिक्पालों के दर्शन हो जाते हैं । पाँचवें महीने में वह काम के समान सुन्दर, छठें महीने में (साक्षात्) रुद्र हो जाता है इसमें संशय नहीं ॥ ७०-७१ ॥

वीरभावस्य माहात्म्यं कोटिजन्मफलेन च ।
जानाति साधकश्रेष्ठो [३]देवीभक्तः स योगिराट् ॥ ७२ ॥
वीराचारं महाधर्मं चित्तस्थैर्यस्य कारणम् ।
यस्य प्रसादमात्रेण दिव्यभावाश्रितो भवेत् ॥ ७३ ॥

जो साधक श्रेष्ठ एवं करोड़ों जन्मों के फल से वीरभाव का माहात्म्य जान लेता है वही देवी का भक्त तथा योगिराज है । चित्त को स्थिर रखने में कारणभूत वीराचार महान् धर्म है, जिसकी कृपा होने पर साधक दिव्यभाव का आश्रित बन जाता है ॥ ७२-७३ ॥

स्वयं रुद्रो महायोगी महाविष्णुः कृपानिधिः ।
महावीरः स एवात्मा[४] मोक्षभोगी न संशयः ॥ ७४ ॥

---

१. संयोगी—ग० । २. देवानां वल्लभः प्रिय इत्यर्थः ।
३. देव—ग० । ४. स तु वात्मा—ग० ।

अथ नाथ महावीर भावस्नानं कुलाश्रयम् ।
यत्कृत्वा शुचिरेव स्यात् शुचिश्चेत् किं न सिद्ध्यति ॥ ७५ ॥

वीराचार के प्रभाव से रुद्र स्वयं महायोगी हुए और महाविष्णु कृपा के निधान हो गए। इस प्रकार वही आत्मा महावीर है, वही मोक्ष का भोक्ता है, इसमें संशय नहीं । हे नाथ ! हे महावीर ! कुल (= शाक्तों) का यह आश्रय है और भाव स्नान हैं जिसके करने से साधक शुचि हो जाता है और शुचि होने पर क्या नहीं सिद्ध होता ॥ ७४-७५ ॥

कुलस्नानं महास्नानं योगिनामतिदुर्लभम् ।
कृत्वा जितेन्द्रियो वीरः कुलध्यानं समाचरेत् ॥ ७६ ॥
स्नानं तु त्रिविधं प्रोक्तं मज्जनं गात्रमार्जनम् ।
मन्त्रज्ञानादिभिः[१] स्नानमुत्तमं परिकीर्तितम् ॥ ७७ ॥

कुल (शाक्तों) का स्नान (वीराचार) है । यह महास्नान योगियों को भी अत्यन्त दुर्लभ हैं । अतः जितेन्द्रिय वीर साधक इसे कर के कुल का ध्यान करे । स्नान तीन प्रकार का कहा गया है—पहला डुबकी लगाकर, दूसरा शरीर का मार्जन कर, तीसरा मन्त्र और ज्ञान पूर्वक स्नान जो सर्वोत्तम कहा गया है ॥ ७६-७७ ॥

तत्प्रकारं शृणु प्राणवल्लभ प्रियकारक ।
स्नानमात्रेण मुक्तः स्यात् पापशैलादनन्तगः ॥ ७८ ॥
स्नानञ्च[२] विमले तीर्थे हृदयाम्भोजपुष्करे ।
बिन्दुतीर्थेऽथवा स्नायात् सर्वजन्माघमुक्तये ॥ ७९ ॥

हे प्राण वल्लभ ! हे प्रिय करने वाले ! अब उस स्नान का प्रकार सुनिए, जिस स्नान मात्र से स्नानकर्ता पाप के पहाड़ से मुक्त हो जाता है और अनन्त को प्राप्त कर लेता है । सभी जन्म के पापों से छुटकारा पाने के लिए, हृदय रूपी कमल में होने वाले विमल पुष्कर नाम वाले तीर्थ में स्नान करे अथवा बिन्दुतीर्थ में स्नान करना चाहिए ॥ ७८-७९ ॥

इडासुषुम्ने शिवतीर्थकेऽस्मिन् ज्ञानाम्बुपूर्णे वहतः शरीरे ।
ब्रह्मादिभिः[३] स्नाति तयोस्तु नीरे किं तस्य गाङ्गैरपि पुष्करैर्वा ॥ ८० ॥

इस शरीर में कल्याणकारी तीर्थ ईडा और सुषुम्ना नाडियाँ विद्यमान हैं जिसमें ज्ञान का जल बह रहा है, ब्रह्मादि देवता भी उस जल में स्नान करते हैं, जिसने इसमें स्नान कर लिया उसे गङ्गा जल में अथवा पुष्कर में स्नान से क्या लाभ ? ॥ ८० ॥

इडामलस्थान[४]निवासिनी या सूर्यात्मिकायां यमुना प्रवाहिका[५]।
तथा सुषुम्ना मलदेशगामिनी[६] सरस्वती मज्जति[७] भक्षणार्थकम् ॥ ८१ ॥

---

१. मन्त्रजलादिभिः—क० ।—मन्त्रश्च ज्ञानं च मन्त्रज्ञाने, ते आदिर्येषां तैः ।
२. स्नायाच्च—क० ।
३. ब्रह्माम्बुभिः—क० ।
४. इडामलस्थाम्बुनि नाथकन्या—क० ।
५. प्रकाशिका—क० ।
६. वासिनी—क० ।
७. रक्षति मज्जनात्मकम्—क० ।

ईडा जो सर्वथा पवित्र स्थान से निकलने वाली गङ्गा है तथा पिङ्गला सूर्य से उत्पन्न होने वाली यमुना है, उनके बीच में ब्रह्मलोक तक जाने वाली सरस्वती है। अतः जो उसमें स्नान करता है, वह उसके पापों को खा जाती हैं ॥ ८०-८१ ॥

मनोगतस्नानपरो मनुष्यो मन्त्रक्रियायोग विशिष्ट तत्त्ववित् ।
महीस्थतीर्थे विमले जले मुदा मूलाम्बुजे स्नाति च मुक्तिभाग् भवेत् ॥ ८२ ॥
सर्वादितीर्थे सुरतीर्थपावनी गङ्गा महासत्त्वविनिर्गता सती ।
करोति पापक्षयमेव मुक्तिं ददाति साक्षादतुलार्थपुण्यदा ॥ ८३ ॥

मन में ही स्नान करने वाला मनुष्य मन्त्र की क्रिया के योग का जानने वाला है, जो मूलाधार कमल रूप मही में रहने वाले इस तीर्थ में प्रसन्नता पूर्वक स्नान करता है वह मुक्ति का भागी हो जाता है। देवताओं के तीर्थ को पवित्र करने वाली गङ्गा इस सर्वादि तीर्थ में महासत्त्व से निकली हुई हैं। जो पापों का क्षय करती हैं और मुक्ति प्रदान करती हैं। किं बहुना वे साक्षात् इतना पुण्य प्रदान करती हैं, जिसकी कोई तुलना नहीं है ॥ ८२-८३ ॥

सर्गस्थं यावदातीर्थं स्वाधिष्ठाने सुपङ्कजे ।
मनो निधाय योगीन्द्रः स्नाति गङ्गाजले तथा[१] ॥ ८४ ॥
मणिपूरे देवतीर्थे[२] पञ्चकुण्डं सरोवरम् ।
एतत् श्रीकामनातीर्थं स्नाति यो मुक्तिमिच्छति ॥ ८५ ॥

इस सृष्टि में जहाँ तक जितने तीर्थ है वे सभी तीर्थ स्वाधिष्ठान के कमल में निवास करते हैं, योगीन्द्र उसी में अपना मन उस प्रकार लगाकर स्नान करते हैं जैसे गङ्गा जल में स्नान किया जाता है। देवताओं के तीर्थरूप मणिपूर हैं जो पाँच कुण्डों वाला सरोवर है। इसे श्रीकामना तीर्थ भी कहते हैं। जो मुक्ति चाहता है वह इस तीर्थ में स्नान करता है ॥ ८४-८५ ॥

अनाहते सर्वतीर्थं सूर्यमण्डलमध्यगम्[३] ।
विभवः[४] सर्वतीर्थानि स्नाति यो मुक्तिमिच्छति ॥ ८६ ॥
विशुद्धाख्ये महापद्मे अष्टतीर्थं समुद्भवम्[५] ।
कैवल्यमुक्तिदं ध्यात्वा स्नाति वीरो विमुक्तये ॥ ८७ ॥

सूर्य मण्डल के मध्य में रहने वाला अनाहत तीर्थ है जिसमें सभी तीर्थ रहते हैं। किं बहुना यहाँ सभी विभव तथा सभी तीर्थ हैं जो साधक मुक्ति चाहता है वह इसमें स्नान करता है। **विशुद्ध** नामक महापद्म में आठ तीर्थ उत्पन्न हुए हैं, वीराचार वाला पुरुष विमुक्ति के लिए कैवल्य मुक्ति देने वाले परमात्मा का ध्यान कर इसमें स्नान करता है ॥ ८६-८७ ॥

---

१. यथा—क० । २. देवतीर्थम्—क० ।
३. सूर्यस्य मण्डलं सूर्यमण्डलम्, तस्य मध्यं गच्छति—इति सूर्यमण्डलमध्यगम् ।
४. विभाव्य—क० । ५. हस्ततीर्थमधूद्भवम्—क० ।

मानसं बिन्दुतीर्थञ्च कालीकुण्डं[1] कलात्मकम् ।
आज्ञाचक्रे[2] सदा ध्यात्वा स्नाति निर्वाणसिद्धये ॥ ८८ ॥
एतत् कुले प्रियस्नानं कुर्वन्ति योगिनो मुदा ।
अतो वीराः सत्त्वयुक्ताः सर्वसिद्धियुताः सुराः ॥ ८९ ॥

आज्ञाचक्र में मानस तीर्थ, बिन्दु तीर्थ, कलात्मक कालीकुण्ड नामक तीर्थों का निवास है । अतः निर्वाण चाहने वाला उनका ध्यान करते हुए स्नान करता है । योगी लोग कुल में रहने वाले इन तीर्थों में प्रसन्नता पूर्वक स्नान करते हैं, इसलिए वीराचार वाले सत्त्व से संयुक्त हैं और देवतागण समस्त सिद्धियों से युक्त हैं ॥ ८८-८९ ॥

नाना पापं सदा कृत्वा ब्रह्महत्याविनिर्गतम् ।
कृत्वा स्नानं महातीर्थे सिद्धाः स्युरणिमादिगाः ॥ ९० ॥
स्नानमात्रेण निष्पापी शक्तः स्याद्वायुसङ्ग्रहे ।
तीर्थानां दर्शनं येषां शक्तो योगी भवेद् ध्रुवम् ॥ ९१ ॥

सदैव ब्रह्म हत्यादि से होने वाले अनेक प्रकार के महा पापों को सदैव करके भी इस महातीर्थ में स्नान कर मनुष्य अणिमादि से उत्पन्न होने वाली सिद्धि प्राप्त कर लेता है । वह इस तीर्थ में स्नान मात्र से पाप रहित हो जाता है और वायु ग्रहण करने में समर्थ हो जाता है । जिन्हें इन तीर्थों का दर्शन भी हो गया है, वे सर्वसमर्थ योगी बन जाते हैं यह निश्चय है ॥ ९०-९१ ॥

अथ सन्ध्यां महातीर्थे कुलनिष्ठः समाचरेत् ।
कुलरूपां योगविद्यां योगयोगाद् यतीश्वरः ॥ ९२ ॥
शिवशक्तौ समायोगो यस्मिन् काले प्रजायते ।
सा सन्ध्या कुलनिष्ठानां समाधिस्थे प्रजायते ॥ ९३ ॥
शिवं सूर्यं हृदि ध्यात्वा भालशक्तीन्दुसङ्गमम् ।
सा सन्ध्या कुलनिष्ठानां समाधिस्थे प्रजायते ॥ ९४ ॥

कुलमार्ग के साधक की सन्ध्या—इस प्रकार स्नान करने के बाद कुलमार्ग का अधिकारी सन्ध्या करे । कुलरूपा महाविद्या रूप योग में युक्त होने के कारण साधक यतीश्वर हो जाता है । जिस समय शिव की महाशक्ति से साधक युक्त हो जाता है, शाक्तों की समाधि में होने वाली वही महासन्ध्या है । हृदय में शिव का तथा सूर्य का ध्यान कर भाल प्रदेश में शक्ति तथा चन्द्रमा के सङ्गम का ध्यान करे तो शाक्तों की समाधि में होने वाली यही सन्ध्या है ॥ ९२-९४ ॥

अथवेन्दुं[3] शिवं ध्यात्वा हृत्सूर्यशक्तिसङ्गमम् ।
संयोगविद्या सा सन्ध्या समाधिस्थे प्रजायते ॥ ९५ ॥

---

१. कलाधरम्—क० । २. आज्ञाचक्रम्—क०
३. अथ बिन्दुम्—क० ।

इति[1] सन्ध्या च कथिता ज्ञानरूपा जगन्मयी ।
सा नित्या वायवी शक्तिः छिन्नभिन्ना विनाशनात् ॥ ९६ ॥

अथवा, इन्दु तथा शिव का ध्यान कर हृदय में शक्ति और सूर्य के सङ्गम का ध्यान करें, तो यही शाक्तों की समाधि में होने वाली संयोग विद्या सन्ध्या हो जाती है । इस प्रकार ज्ञानरूपा जगन्मयी सन्ध्या का निरूपण हमने किया । वही नित्या वायवी शक्ति है जिसके विनष्ट होने से सन्ध्या भी छिन्न-भिन्न हो जाती है ॥ ९५-९६ ॥

तत्त्वतीर्थे[2] महादेव तर्पणं यः करोति हि ।
त्रैलोक्यं तर्पितं तेन तत्प्रकारं शृणु प्रभो ॥ ९७ ॥
मूलाम्भोजे कुण्डलिनीं चन्द्रसूर्याग्निरूपिणीम् ।
समुत्थाप्य कुण्डलिनीं परं बिन्दुं निवेश्य च ॥ ९८ ॥
तदुद्भवामृतेनेह तर्पयेद् देहदेवताम् ।
कुलेश्वरीमादिविद्यां स सिद्धो भवति ध्रुवम् ॥ ९९ ॥

हे महादेव ! जो तत्त्वतीर्थ में तर्पण करता है उसने सारे त्रिलोकी को तृप्त कर दिया, हे प्रभो अब उस तर्पण के प्रकार को सुनिए । मूलाधार रूप कमल में रहने वाली चन्द्र सूर्याग्नि स्वरूपा कुण्डलिनी को ऊपर उठाकर उसमें पर बिन्दु (सहस्रार चक्र में स्थित चन्द्र मण्डल से झरने वाली सुधा) सन्निविष्ट कर उसमें रहने वाले अमृतमय देह में रहने वाली कुलेश्वरी महाविद्या स्वरूप देवता को तृप्त करे तो वह निश्चय ही सिद्ध हो जाता है ॥ ९७-९९ ॥

चन्द्रसूर्यमहावह्निसम्भूतामृतधारया ।
तर्पयेत् कौलिनीं नित्याममृताक्तां विभावयेत् ॥ १०० ॥
एतत्परपदा काली [3]स्त्रीविद्यादिप्रतर्पणम् ।
कृत्वा योगी भवेदेव सत्यं सत्यं कुलेश्वर ॥ १०१ ॥

चन्द्रमा सूर्य तथा महाग्नि से उत्पन्न हुई अमृतधारा से नित्या कौलिनी का तर्पण करे । तदनन्तर अमृत से भीङ्गी हुई उन देवता का ध्यान करे । यह पर-पद में निवास करने वाली, काली स्त्रीविद्यादि का तर्पण कर साधक योगी हो जाता है । हे कुलेश्वर ! यह सत्य है यह सत्य है ॥ १००-१०१ ॥

मूले पात्रं चान्द्रमसं ललाटेन्द्वमृते न च ।
सम्पूर्य ज्ञानमार्गेण तर्पयेत्तेन खेचरीम् ॥ १०२ ॥

---

१. किं वा देहस्थिता शक्तिर्वायवी सुशिवान्विता ।
नासाग्रसन्धिनिलया सा सन्ध्या वायुसङ्गमा ॥
किं वा बाह्यगता शक्तिः सुन्दरि शिवसङ्गमम् ।
सा सन्ध्या तत्त्वनिष्ठानां सामाधिस्थे प्रजायते ॥ क० ।

२. तत्तु तीर्थे—क० ३. श्रीविद्या—क० ।

सुधासिन्धोर्मध्यदेशे कुलकन्यां प्रतर्पयेत् ।
मदिरामृतधाराभिः सिद्धो भवति योगिराट् ॥ १०३ ॥

मूलाधार रूप पात्र के ललाटस्थ चन्द्रमण्डल से निर्गत अमृत से ज्ञानमार्ग द्वारा पूर्ण करे । फिर उससे खेचरी देवता का तर्पण करे । सुधा-सिन्धु के मध्य देश में कुल कन्या का तर्पण मदिरा रूप अमृत धारा से करे तो वह योगिराज सिद्ध हो जाता है ॥ १०२-१०३ ॥

तत्र तीर्थे महाज्ञानी ध्यानं कुर्यात्[१] प्रयत्नतः ।
तद्गर्भमध्य[२]सेन्नित्यं ध्यानमेतद्धि योगिनाम् ॥ १०४ ॥
स्वीयां कन्यां भोजयेद्वै परकीयामथापि वा ।
परितोषाय सर्वेषां युवतीं वा प्रतोषयेत् ॥ १०५ ॥

उस तीर्थ में महाज्ञानी प्रयत्नपूर्वक ध्यान करे और उसके बाद सगर्भ प्राणायाम करे - यही योगियों का ध्यान है । अपनी कन्या को अथवा दूसरों की कन्या को भोजन करावे । अथवा सबको तृप्त करने के लिए युवती को संतुष्ट करे ॥ १०४-१०५ ॥

स्तोत्रेणानेन[३] दिव्येन तोषयेत् शङ्कर प्रभो ।
सहस्रनाम्ना कौमार्याः स्तुत्वा देवीं प्रतोषयेत् ॥ १०६ ॥
यः करोति पूर्णयज्ञं पञ्चाङ्गं जपकर्मणि ।
पुरश्चरणकार्यं च प्राणायामेन[४] कारयेत् ॥ १०७ ॥
प्राणवायुः स्थिरो गेहे पूजाग्रहणहेतुना ।
येऽन्तरस्थं न कुर्वन्ति तेषां सिद्धिः कुतः स्थिता ॥ १०८ ॥

फिर हे प्रभो शङ्कर ! दिव्य कुमारी के सहस्रनाम वाले स्तोत्र से स्तुति कर देवी को संतुष्ट करे । जो जप कर्म में पञ्चाङ्ग पूर्ण यज्ञ (द्र० . २५ . ७८-१०६) स्नान, सन्ध्या, तर्पण, ध्यान एवं कुमारी भोजनपूर्वक सहस्रनाम से स्तुति करता है तथा प्राणायाम के साथ पुरश्चरण कार्य करता है उनके शरीर रूपी गृह में पूजा ग्रहण करने के कारण प्राणवायु स्थिर रहता है । हे प्रभो ! जो अन्तरस्थ इस कर्म को नहीं करता उन्हें सिद्धि कैसे मिले ? ॥ १०६-१०८ ॥

अतोऽन्तर्यजनेनैव[५] कुण्डलीतुष्टमानसा ।
यदि तुष्टा महादेवी तदैव सिद्धिभाक् पुमान् ॥ १०९ ॥

---

१. दहर्निशम्—क० ।
२. प्राणायामपरो भूत्वा एतत्सर्वं विभावयेत् ।
   किरणस्थं तदग्निस्थं चन्द्रभास्करमध्यगम् ॥
   महाशून्ये त्वयं कृत्वा पूर्णः तिष्ठति योगिराट् ।
   निरालम्बे पदे शून्ये यत्तेज उपपद्यते ॥ क० ।
३. पूर्वोक्तस्तोत्रसारेण कवचाङ्केन शङ्कर—क० ।
४. प्राणायामम्—ग० ।
५. जलेनापि—क० ।

अभिषिच्य जगद्धात्रीं प्रत्यक्षपरदेवताम् ।
मूलाम्भोजात् सहस्रारे पूजयेद् बिन्दुधारया ॥ ११० ॥

इससे यह सिद्ध होता है कि कुण्डलिनी अन्तर्यजन से ही संतुष्ट मन वाली होती है, जब कुण्डली महादेवी संतुष्ट हो गई तो उसी समय मनुष्य सिद्धि का भाजन बन जाता है । प्रत्यक्ष रूप से पर देवता स्वरूपा जगद्धात्री का अभिषेचन कर मूलाम्भोज से सहस्रार चक्र में जाने वाली उस कुण्डलिनी का बिन्दुधारा द्वारा पूजन करे ॥ १०९-११० ॥

गलच्चन्द्रामृतोल्लासिधारयासिच्य[1] पार्वतीम् ।
पूजयेत् परया भक्त्या मूलमन्त्रं स्मरन् सुधीः ॥ १११ ॥
अर्च्चयन्विषयैः पुष्पैस्तत्क्षणात्तन्मयो भवेत् ।
न्यासस्तन्मयताबुद्धिः सोऽहंभावेन पूजयेत् ॥ ११२ ॥

चन्द्रमा के द्वारा गिरती हुई, अमृत से सुशोभित धारा से पार्वती को अभिषिक्त कर मूलमन्त्र का स्मरण करते हुए सुधी साधक उनका पूजन करे । उनके पूजा के विषय में एकत्रित किए गए पुष्पों से ध्यान कर तत्क्षण तन्मय हो जावें, उनमें तन्मय हो जाने वाली बुद्धि को **न्यास** कहते हैं । इसलिए जो वह हैं, वही मैं हूँ । अतः इस सोऽहं भाव से उनका पूजन करे ॥ १११-११२ ॥

मन्त्राक्षराणि चिच्छक्तौ प्रोतानि परिभावयेत् ।
तामेव[2] परमे व्योम्नि परमानन्दसंस्थिते ॥ ११३ ॥
दर्शयत्यात्मसद्भावं[3] पूजाहोमादिभिर्विना[4] ।
तदन्तर्यजनं ज्ञेयं योगिनां शङ्कर प्रभो ॥ ११४ ॥

परमानन्द स्वरूप उस पराकाश में रहने वाली उस महाशक्ति का ध्यान करे जिस चिच्छक्ति में समस्त मन्त्राक्षर ओत प्रोत हैं । ऐसा करने से वह महाविद्या, पूजा, होमादि, के बिना ही अपनी आत्मीयता प्रगट कर देती है । हे शङ्कर ! हे प्रभो ! योगियों का यही अन्तर्याग है ॥ ११३-११४ ॥

अन्तरात्मा महात्मा च परमात्मा स उच्यते ।
तस्य स्मरणमात्रेण साधुयोगी भवेन्नरः ॥ ११५ ॥
अमायमनहङ्कारमरागममदं तथा ।
अमोहकमदम्भञ्च [5]अनिन्दाक्षोभकौ तथा ॥ ११६ ॥
अमात्सर्यमलोभश्च दशपुष्पाणि योगिनाम् ।
अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहः ॥ ११७ ॥

---

१. ल्लास—ग० । २. भासेव—ग० ।
३. दर्शयेत्यात्म—ग० ।
४. ध्यानपूजादिभिर्विना—क० ।
५. अद्वेष्टा—क० ।—निन्दा च क्षोभश्च (क्षोभकश्च) निन्दाक्षोभकौ, स्वार्थे कप्रत्ययः, ततो नञ्तत्पुरुषः ।

दया पुष्पं क्षमा पुष्पं ज्ञानपुष्पं च पञ्चमम् ।
इत्यष्टसप्तभिः पुष्पैः पूजयेत् परदेवताम् ॥ ११८ ॥

ऐसा साधक अन्तरात्मा, महात्मा और परमात्मा कहा जाता है उसके स्मरण मात्र से मनुष्य उत्तम योगी बन जाता है । १. अमाय (माया से रहित), २. अहङ्कार, ३. अराग, ४. अमद, ५. अमोह, ६. अदम्भ, ७. अनिन्दा और ८. अक्षोभ, ९. अमात्सर्य, १०. अलोभ, पूजा में योगियों के लिए ये दश पुष्प कहे गए हैं । इसके अतिरिक्त अहिंसा सर्वोत्कृष्ट पुष्प है, इन्द्रिय निग्रह दूसरा पुष्प है, दया तीसरा पुष्प है, क्षमा चौथा पुष्प है, ज्ञान पाँचवा पुष्प है—इस प्रकार कुल १५ पुष्पों से परदेवता का पूजन करे ॥ ११५-११८ ॥

अथ होमविधिं वक्ष्ये पुरश्चरणसिद्धये ।
सङ्केतभाषया नाथ कथयामि शृणुष्व तत् ॥ ११९ ॥
आत्मानमपरिच्छिन्नं विभाव्य सूक्ष्मवत् स्थितः ।
आत्मत्रयस्वरूपं तु चित्कुण्डं चतुरस्रकम् ॥ १२० ॥
आनन्दमेखलायुक्तं नाभिस्थज्ञानवह्निषु ।
अर्द्धमात्राकृतिर्योनिभूषितं जुहुयात् सुधीः ॥ १२१ ॥

होमविधि—हे नाथ ! अब पुरश्चरण की सिद्धि के लिए सङ्केत भाषा द्वारा **होम का विधान** कहती हूँ, उसे सुनिए । आत्मा अपरिच्छिन्न है और वह सूक्ष्म रूप में स्थित है, ऐसा ध्यान कर आत्मा के तीन स्वरूप की कल्पना करे । चित्त को चौकोर कुण्ड, जिसमें आनन्द की मेखला तथा नाभि ज्ञान की वह्नि हो, जिसकी योनि अर्द्धमात्रा वाली आकृति से भूषित हो साधक को उसी में होम करना चाहिए ॥ ११९-१२१ ॥

इतिमन्त्रेण तद्वह्नौ सोऽहंभावेन होमयेत् ।
बाह्यनारीविधिं त्यक्त्वा मूलान्तेन स्वतेजसम् ॥ १२२ ॥
नाभिचैतन्यरूपाग्नौ हविषा मनसा स्रुचा ।
ज्ञानप्रदीपिते नित्यमक्षवृत्तिर्जुहोम्यहम् ॥ १२३ ॥
इति प्रथममाहुत्या मूलान्ते सञ्चरेत्[1] क्रियाम् ।
द्वितीयाहुतिदानेन होमं कृत्वा भवेद्वशी ॥ १२४ ॥

इस प्रकार मन्त्र से उस वह्नि में सोऽहं भाव से होम करे । वाह्न्यादि में विहित विधान का त्याग कर मूल मन्त्र से अपने तेज को छवि मानकर ज्ञान से प्रदीप्त नाभि स्थित चैतन्य रूप अग्नि में मन रूपी स्रुचा के द्वारा अक्षवृत्ति वाला मैं यह नित्य होम करता हूँ, इस प्रकार की प्रथम आहुति से मूल मन्त्र पढ़ते हुए क्रिया का आरम्भ करें, फिर दूसरी आहुति दे कर होम करने से जितेन्द्रिय हो जावे ॥ १२२-१२४ ॥

धर्माधर्मप्रदीप्ते[2] च आत्माग्नौ मनसा स्रुचा ।
सुषुम्ना वर्त्मना नित्यमक्षवृत्तिं जुहोम्यहम् ॥ १२५ ॥

---

१. मन्त्रमुच्चरेत्—क० । २. हविर्दीप्तिम्—क० ।

स्वाहान्तं[१] मन्त्रमुच्चार्य आद्ये[२] मूलं नियोज्य च ।
जुहुयादेकभावेन मूलाम्भोरुहमण्डले ॥ १२६ ॥

धर्माधर्म से प्रदीप्त हुई आत्मा रूप अग्नि में मन की स्रुचा से सुषुम्ना मार्ग द्वारा मैं अपनी अक्षवृत्ति का हवन करता हूँ । प्रथम मूल मन्त्र पढ़कर अन्त में स्वाहा का उच्चारण कर एक भाव से मूलाधार के पद्म मण्डल में होम करे ॥ १२५-१२६ ॥

चतुर्थे पूर्णहवने एतन्मन्त्रेण कारयेत् ।
एतन्मन्त्रचतुर्थं तु पूर्णविद्याफलप्रदम् ॥ १२७ ॥
अन्तर्निरन्तरनिरन्धनमेधमाने
मायान्धकारपरिपन्थिनि संविदग्नौ ।
कस्मिंश्चिदद्भुतमरीचिविकासभूमौ
विश्वं जुहोमि वसुधादिशिवावसानम् ॥ १२८ ॥

चौथी बार पूर्णाहुति के होम में इसी मन्त्र से होम करे । यह चौथा वक्ष्यमाण मन्त्र पूर्ण विद्या का फल प्रदान करता है । अन्तःकरणावच्छिन्न देश में बिना इन्धन के निरन्तर प्रज्वलित होने वाले, माया रूप अन्धकार को नष्ट करने वाले, अद्भुत प्रकाश के विकास की भूमि वाले, ज्ञानरूप अग्नि में वसुधा से लेकर शिव पर्यन्त मैं सबकी आहुति दे देता हूँ ॥ १२७-१२८ ॥

इत्यन्तर्यजनं कृत्वा साक्षाद् ब्रह्ममयो भवेत् ।
न तस्य पुण्यपापानि जीवन्मुक्तो भवेद् ध्रुवम् ॥ १२९ ॥
ज्ञानिनां योगिनामेव अन्तर्यागो हि सिद्धिदः ।

इस प्रकार अन्तर्याग कर साधक साक्षात् ब्रह्ममय हो जाता है, उसको पुण्य पाप नहीं लगते, वह निश्चय ही जीवन्मुक्त हो जाता है । ज्ञानी योगियों को उक्त अन्तर्याग सिद्धि प्रदान करता है ॥ १२९-१३० ॥

अथान्तः पञ्चमकारयजनं शृणु शङ्कर ॥ १३० ॥
अन्तर्यजनकाले तु दृढभावेन भावयेत् ।
त्वां मां नाथैकतां ध्यात्वा दिवारात्र्यैकतां यथा ॥ १३१ ॥
सुराशक्तिः शिवो मांसं तद्भक्तो भैरवः स्वयम् ।
तयोरैक्यसमुत्पन्न आनन्दो मोक्षनिर्णयः ॥ १३२ ॥

अब हे शङ्कर ! अन्तःकरण में किए जाने वाले पञ्च मकार के यजन को

---

१. द्वितीयाहुतिमेतत्तु तृतीयाहुतिमाशृणु ।
प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचा ॥
धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहम् ॥ क० ।
२. मूलान्ते सञ्चरेत् क्रियाम्—क० ।

सुनिए । हे नाथ ! पञ्चमकार के द्वारा किए जाने वाले अन्तर्याग में दृढ़तापूर्वक आपकी और हमारी एकता का इस प्रकार ध्यान करे, जिस प्रकार दिन और रात्रि की एकता का । पञ्चमकार में प्रथम सुरा (मद्य) शक्ति हैं । मांस शिव हैं, उनका भक्त स्वयं भैरव है, जब शिव-शक्ति रूप मास और सुरा एक में हो जाते हैं तो आनन्द रूप मोक्ष उत्पन्न होता है, ऐसा निर्णय है ॥ १३०-१३२ ॥

आनन्दं ब्रह्मकिरणं देहमध्ये व्यवस्थितम् ।
तदभिव्यञ्जकैर्द्रव्यै: कुर्याद् ब्रह्मादितर्पणम्[1] ॥ १३३ ॥
आनन्दं जगतां सारं ब्रह्मरूपं तनुस्थितम् ।
तदभिव्यञ्जकं द्रव्यं योगिभिस्तै: प्रपूजयेत्[2] ॥ १३४ ॥

इस शरीर के मध्य में आनन्द रूप में ब्रह्म की किरण व्यवस्थित है । इसलिए आनन्द रूप ब्रह्मकिरण के अभिव्यञ्जक द्रव्य से ब्रह्मादि का तर्पण करना चाहिए । आनन्द सारे जगत् का सार है, शरीर में रहने वाला ब्रह्म का स्वरूप है, उसका अभिव्यञ्जक द्रव्य है, योगी जन उन्हीं द्रव्यों से ब्रह्मा का पूजन करते हैं ॥ १३३-१३४ ॥

लिङ्गत्रयं[3] च षट्पद्माधारमध्येन्दुभेदक:[4] ।
पीठस्थानानि चागत्य महापद्मवनं व्रजेत् ॥ १३५ ॥
मूलाम्भोजो ब्रह्मरन्ध्रं चालयेदसुचालयेत्[5] ।
गत्वा पुन: पुनस्तत्र चिच्चन्द्र: परमोदय: ॥ १३६ ॥

साधक षट् पद्माधार के मध्य में रहने वाले तीनों लिंगों के तथा इन्दुमण्डल (चन्द्रमण्डल) को भेदन करते हुए पीठ स्थान में पहुँच कर सहस्रदल कमल रूप महापद्मवन में प्रवेश करे । वहाँ जा कर मूलाम्भोज युक्त ब्रह्मरन्ध्र को संचालन करते हुए प्राण वायु का भी संचालन करे । इस प्रकार बारम्बार करते हुए चिच्चन्द्र (ज्ञान रूप चन्द्र) का परमोदय होता है ॥ १३५-१३६ ॥

चिच्चन्द्र: कुण्डलीशक्ति: सामरस्यमहोदय: ।
व्योमपङ्कजनिस्पन्दसुधापानरतो नर: ॥ १३७ ॥
मधुपानमिदं नाथ बाह्ये चाभ्यन्तरे सताम् ।
इतरं मद्यपानं तु योगिनां योगघातनात् ॥ १३८ ॥
इतरं तु महापानं भ्रान्तिमिथ्याविवर्जित: ।
महावीर: सङ्करोति योगाष्टाङ्गसमृद्धये ॥ १३९ ॥

कुण्डलिनी शक्ति चिच्चन्द्र है । उसकी समरसता महान् अभ्युदयकारक है । साधक व्योम पङ्कज से चूते हुए आनन्द पान में निरत हो जावे । हे नाथ ! सज्जन योगियों के लिए

---

१. ब्रह्मामृतापर्णम्—क० । २. प्रपूज्यते—क० । ३. लिङ्गत्रयज्ञ:—क० ।
४. भेदन:—क० ।—षट्पद्माधारमध्येन्दुं भिनत्ति इति फलितार्थ: ।
५. दनुचालयेत्—क० ।

बाह्य और अभ्यन्तर में होने वाला यही **मधु पान** है और बाह्य मद्यपान तो योगियों के योग का घातक है । इतर (दूसरा) तो महायान है । भ्रान्ति तथा मिथ्या दोष से विवर्जित महावीर तो योग के अष्टाङ्ग की समृद्धि के लिए प्रथम (= योग पङ्कजनिष्यन्दपरामृत) सुधा का पान करता है ॥ १३७-१३९ ॥

पुण्यापुण्यपशुं हत्वा ज्ञानखड्गेन[1] योगवित् ।
परशिवेन[2] यश्चित्तं नियोजयति साधकः ॥ १४० ॥
मांसाशी[3] स भवेदेव इतरे[4] प्राणिघातकाः ।
शरीरस्थे महावह्नौ दग्धमत्स्यानि पूजयेत् ॥ १४१ ॥
शरीरस्थजलस्थानि इतराण्यशुभानि च ।
महीगतस्निग्धसौम्योद्भवमुद्रामहाबलाः ॥ १४२ ॥
तत्सर्वं ब्रह्मकिरणे आरोप्य तर्पयेत्[5] सुधीः ।
तत्र मुद्राभोजनानि[6] आनन्दवर्द्धकानि च ॥ १४३ ॥

योगवेत्ता साधक तो ज्ञान खड्ग से पुण्यापुण्य रूप पशु को मार कर अपने चित्त को परशिव में समर्पण करता है । वही मांसाशी है । इतर तो पशुओं के हत्यारे हैं । शरीर में रहने वाली महावह्नि में शरीरस्थ जल में रहने वाली जलती हुई मानस इन्द्रिय गणों को रोके—यही **मत्स्य-भोजन** (अलौकिक) है और प्रकार का मत्स्य भोजन तो अशुभ है ।

महीगत स्निग्ध सौम्य से उत्पन्न होने वाली **मुद्रा** महाबल प्रदान करती है । उन सभी को ब्रह्म किरण में आरोपित कर सुधी साधक कुण्डलिनी को तृप्त करे । इस प्रकार की मुद्रा के द्वारा किया जाने वाला भोजन आनन्द का वर्द्धक होता है ॥ १४०-१४३ ॥

इतराणि च भोगार्थे एतद्धि योगिनां परम् ।
परशक्त्यात्ममिथुनसंयोगानन्दनिर्भराः ॥ १४४ ॥
मुक्तास्ते मैथुनं तत्स्यादितरे स्त्रीनिषेवकाः ।
एतत्पञ्चमकारेण पूजयेत् परनायिकाम् ॥ १४५ ॥

और (लौकिक) मुद्रायें तो भोग के लिए बनाई गई हैं, योगियों के लिए तो उक्त मुद्रा ही हैं । परशक्ति के साथ आत्मा को मिथुन में संयुक्त करने वाले आनन्द से मस्त हो जाते हैं वही **(अलौकिक) मैथुन** है जिसे मुक्त साधक लोग करते हैं और (लौकिक) मैथुन तो स्त्री का सहवास करने वाले करते हैं । इस प्रकार कहे गए पञ्चमकार से कुण्डलिनी का पूजन करे ॥ १४४-१४५ ॥

---

१. ज्ञानलभ्यो—क० । २. परे शिवे त्रयं चित्तं मांसाशी स महीतले—क० ।
३. बाह्यस्थानं पशूनान्तु मासं वीरेन्द्रभोजनम् ।
यदि तद्बुद्धिमाप्नोति तदा तत्कर्म प्राचरेत् ॥
मानसेन्द्रियगणं संयम्यात्मनि विनियोजयेत्—क० ।
४. प्राण—ग० । ५. तर्पयेत्—क० । ६. एतन्नमुद्रा—क० ।

पुरश्चरणगूढार्थसारमन्त्रप्रपूजनम् ।
एतद्योगं[1] सदाभ्यसेद् निद्रालस्यविवर्जितः ॥ १४६ ॥
प्राणवायुरयं[2] कुर्यात्[3] कालकारणवारणात् ।
एतत्क्रियां प्राणवशे यः करोति निरन्तरम् ॥ १४७ ॥
तस्य योगसमृद्धिः स्यात् कालसिद्धिमवाप्नुयात् ॥ १४८ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये सूक्ष्मयोगसिद्ध्यधिकरणे पाशवकल्पे षट्चक्रसारसङ्केते सिद्धिमन्त्रप्रकरणे भैरवभैरवीसंवादे षड्विंशः[4] पटलः ॥ २६ ॥

— ❖ —

यहीं तक पुरश्चरण के गूढार्थ का सारभूत मन्त्र प्रपूजन है—निद्रालस्य को त्याग कर इस योग का सदाभ्यास करे । कालरूपी महामत्त गजराज से बचने के लिए यह प्राण वायु करे । निरन्तर इस क्रिया द्वारा जो प्राणवायु को अपने वश में कर लेता है वह योग में समृद्ध होता है तथा कालसिद्धि प्राप्त करता है ॥ १४६-१४८ ॥

॥ इस प्रकार श्रीरुद्रयामल के उत्तरतन्त्र में महातन्त्रोद्दीपन में भावार्थनिर्णय में, पाशवकल्प में, षट्चक्रसङ्केत में सिद्धमन्त्रप्रकरण में सूक्ष्मयोगसिद्ध्याधिकरण में भैरवी-भैरव संवाद के छब्बीसवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ २६ ॥

— ❖ —

---

१. एतद्योगसदाभ्यासात्—ग० ।
२. प्राणश्चासौ वायुश्च, तस्य रयो वेगः, तम् ।
३. वारणकारणात्—ग० ।—कालकारणस्य वारणम्, तस्मात् ।
४. अष्टाविंशः पटलः—क० ।

अथ सप्तविंशः पटलः

आनन्दभैरव उवाच

विविधानि त्वयोक्तानि योगशास्त्राणि भैरवि ।
सर्वरूपत्वमेवास्या[1] मम कान्ते प्रियंवदे ॥ १ ॥
योगाष्टाङ्गफलान्येव सर्वतत्त्वजलानि[2] च ।
इदानीं श्रोतुमिच्छामि शक्तितत्त्वक्रमेण[3] तु ॥ २ ॥
पूर्वोक्तप्राणवायूनां हरणं वायुधारणम् ।
प्रत्याहारं धारणाख्यं ध्यानं [4]समाधिमावद ॥ ३ ॥

आनन्दभैरव ने कहा—हे भैरवी ! हे कान्ते ! हे प्रियम्वदे ! तुमने अनेक प्रकार के योगशास्त्र, इसकी सर्वरूपता तथा सभी तत्त्वों में उज्ज्वल अष्टाङ्गयोग के फलों का प्रतिपादन किया । अब मैं शक्ति-तत्त्व के क्रम से पूर्वोक्त प्राणवायु का ग्रहण, उस प्राणवायु का धारण, फिर प्रत्याहार, धारणा, ध्यान तथा समाधि सुनना चाहता हूँ उसे कहिए ॥ १-३ ॥

आनन्दभैरवी उवाच

शृणु लोकेश वक्ष्यामि प्राणायामफलाफलम् ।
न गृह्णीयाद्विस्तरं तु [5]स्वल्पं नैव तु कुम्भयेत् ॥ ४ ॥

आनन्दभैरवी ने कहा—हे प्राणेश ! अब प्राणायाम के फलाफल को कहती हूँ । बहुत विस्तार पूर्वक प्राणवायु को ग्रहण न करे और स्वल्प रूप में कुम्भक भी न करे ॥ ४ ॥

शनैः शनैः प्रकर्तव्यं [6]सङ्घातञ्च विवर्जयेत् ।
पूरकाह्लादसिद्धेश्च[7] प्राणायामशतं शतम् ॥ ५ ॥
वृद्ध्यै[8] प्राणलक्षणं तु यस्मिन् यस्मिन् दिने गतिः ।
कृष्णपक्षे शुक्लपक्षे तिथित्रिंशत्फलोदयः ॥ ६ ॥

---

१. सर्वरूपा त्वमेवात्मा—क० ।   २. सर्व तत्त्वोज्ज्वलानि च—क० ।
३. शान्ति—क० ।   ४. मादर—ग०
५. आल्पम्—क० ।   ६. सहारञ्च—क० ।
७. सिद्धेश्च—ग० ।—पूरकेण जनिता याऽऽह्लादसिद्धिः, तस्या इत्यर्थः ।
८. वक्ष्ये—क० ।

प्राणायाम धीरे धीरे करना चाहिए, संघात (= एक साथ तेजी से वायु खींचना) विवर्जित रखे । पूरकाह्लाद की सिद्धि के लिए सौ सौ की संख्या में प्राणायाम का विधान है प्राण लक्षण की वृद्धि के लिए जिस जिस दिन प्राण वायु की गति जहाँ से होती है उसका फलोदय इस प्रकार है - कृष्ण पक्ष में तथा शुक्लपक्ष में कुल ३० तिथियाँ होती है ॥ ५-६ ॥

शुक्लपक्षे इडायां तु कृष्णपक्षेऽन्यदेव हि ।
कुर्यात् सर्वत्र गमनं सुषुम्ना बहुरूपिणी ॥ ७ ॥
तिथित्रयं सितस्यापि प्रतिपदादिसम्भवम् ।
तद्द्वयं दक्षनासायां वायोर्ज्ञेयं महाप्रभो ॥ ८ ॥

शुक्लपक्ष में ईळा से कृष्णपक्ष में पिङ्गला द्वारा वायु को सर्वत्र गमन कराना चाहिए । सुषुम्ना तो बहुरूपिणी है । शुक्लपक्ष में प्रतिपदा से लेकर तीन तिथि पर्यन्त हे महाप्रभो ! दाहिनी नासिका से पिङ्गला से दोनों से वायुसञ्चार होता है ॥ ७-८ ॥

चतुर्थीं पञ्चमीं षष्ठीं व्याप्योदयति देवता ।
वामनासापुटे ध्येया वायुधारणकर्मणि ॥ ९ ॥
सप्तमीमष्टमीञ्चैव नवमीं व्याप्य तिष्ठति ।
वामनासापुटे ध्येया साधकैः कुलपण्डितैः ॥ १० ॥

इसके बाद शुक्ल पक्ष से चतुर्थी पञ्चमी, षष्ठी, पर्यन्त वायुधारण कर्म में बायें नासिका से देवताओं का उदय होता है, अतः उसी से वायु ग्रहण करना चाहिए । इसके अनन्तर शाक्त विद्या के उपासकों को सप्तमी अष्टमी, नवमीं पर्यन्त बाई नासिका से ही वायु ग्रहण करना चाहिए ॥ ९-१० ॥

दशम्येकादशीं चैव द्वादशीं व्याप्य तिष्ठति ।
वायुर्दक्षिणनासाग्रे ध्येयो योगिभिरीश्वरः ॥ ११ ॥
त्रयोदशीं व्याप्य वायुः पौर्णमासीं चतुर्दशीम् ।
वामनासापुटे ध्येयः संहारहरणाय च ॥ १२ ॥
कृष्णपक्षफलं वक्ष्ये यज्ज्ञात्वा अमरो भवेत् ।
कालज्ञानी भवेत् शीघ्रं नात्र कार्या विचारणा ॥ १३ ॥

इसके बाद दशमीं, एकादशी तथा द्वादशी, को वायु दक्षिण नासापुट में व्याप्त हो कर चलता है, अतः उसी से वायु ग्रहण करना चाहिए । फिर त्रयोदशी, चतुर्दशी तथा पूर्णमासी को बायें नासिका के छिद्र से वायु ग्रहण करना चाहिए । अब कृष्णपक्ष में चलने वाले वायु का फल कहती हूँ, जिसे जान कर साधक अमर हो जाता है तथा काल का ज्ञानी हो जाता है, इसमें विचार की आवश्यकता नहीं ॥ ११-१३ ॥

प्रतिपद्द्वितीयामस्य तृतीयामपि तस्य च ।
पिङ्गलायां समावाप्य वायर्निःसरते सदा ॥ १४ ॥

चतुर्थी पञ्चमीं षष्ठीं वामे व्याप्य प्रतिष्ठति ।
सप्तमीमष्टमीं वायुर्नवमीं दक्षिणे ततः ॥ १५ ॥

कृष्णपक्ष में प्रतिपदा, द्वितीया तथा तृतीया तक पिङ्गला में व्याप्त हो कर वायु निकलता रहता है । फिर कृष्णपक्ष के चतुर्थी, पञ्चमी तथा षष्ठी, तिथि को बायें नासिका के छिद्र से वायु संचरण होता है, इसके बाद सप्तमी, अष्टमी, नवमी, तिथि पर्यन्त दक्षिण नासिका से वायु सञ्चार होता है ॥ १४-१५ ॥

दशम्येकादशीं वायुर्व्याप्य भ्रमति[1] सर्वदा ।
वामे च दक्षिणेऽन्यानि तिथ्यादीनि सदानिशम् ॥ १६ ॥
यदा[2] एतद्व्यस्तभावं समाप्नोति नरोत्तमः ।
तदैव मरणं रोगं बन्धुनाशं त्रिपक्षके ॥ १७ ॥

इसके बाद दशमी एकादशी पर्यन्त वायु सर्वदा वामनासापुट से चलता है अन्य तिथियों में सर्वदा दक्षिण नासापुट से वायु प्रवाहित होती है । जब मनुष्य इससे विपरीत वायु का सञ्चार प्राप्त करता है तब उस विपक्ष की अवस्था में उसे मरण रोग तथा बन्धुनाश प्राप्त होता है ॥ १६-१७ ॥

भिन्नजन्मतिथिं ज्ञात्वा तस्मिन् काले विरोधयेत् ।
आरभ्य जन्मनाशाय प्राणायामं समाचरेत् ॥ १८ ॥
यदा प्रत्ययभावेन देहं त्यक्त्वा प्रयच्छति[3] ।
तदा निरुध्य श्वसनं कालाग्नौ धारयेदधः ॥ १९ ॥

इस लक्षण को देखकर अपनी जन्म तिथि से भिन्न तिथि में उसे रोकने का प्रयत्न करे और जन्म नाश के लिए प्राणायाम करने का प्रयत्न करे । जब मरण का ज्ञान निश्चित हो जाय और देह त्याग कर जाने की बारी आ जाय तब अपनी श्वास रोक कर कालाग्नि में नीचे वायु धारण करें ॥ १८-१९ ॥

यावत् स्वस्थानमायाति तावत्कालं[4] समभ्यसेत् ।
यावन्न चलते देहं यावन्न चलते मनः ॥ २० ॥
क्रमादभ्यसतः पुंसो देहे स्वेदोद्गमोऽधमः ।
मध्यमं कम्पसंयुक्तो भूमित्यागः परस्य तु ॥ २१ ॥
षण्मासाद्भूतदर्शी स्यात् दूरश्रवणमेव च ।
संवत्सराभ्यासयोगात् योगविद्याप्रकाशकृत् ॥ २२ ॥

---

१. जप्त्वा—क० । २. दन्तभावम्—क० ।

३. प्रगच्छति—क० ।—'प्रयच्छति' इति पाठे दाण्—दाने इत्यस्य रूपम्, यच्छादेश घटितम् । 'प्रगच्छति' इति पाठे तु गम्धातो रूपम् । प्रकृष्टगमनेऽर्थे प्रयोगः ।

४. तत्त्वमस्य—ग० ।

जब तक वायु अपने स्थान पर न आ जाय तब तक इस क्रिया का अभ्यास करे, जिससे देह चलायमान न हो और न तो मन ही चञ्चल हो । प्राणायाम के धीरे धीरे अभ्यास करने से पुरुष के देह में स्वेद का उद्गम होने लगता है - यह **अधम प्राणायाम** है । इसके बाद जब शरीर में कम्पन होने लगे तो **मध्यम प्राणायाम** होता है । जबकि भूमित्याग कर ऊपर उठने की अवस्था तो **उत्तम प्राणायाम** का लक्षण है । ६ महीने के अनन्तर उसे समस्त भूत तत्त्वों के दर्शन हो जाते हैं । इतना ही नही वह दूर की भी बात सुनने में समर्थ हो जाता है । इस प्रकार एक संवत्सर के अभ्यास से वह योग विद्या प्रकाश करने लगता है ॥ २०-२२ ॥

योगी जानाति सर्वाणि तन्त्राणि स्वक्रमाणि च ।
यदि दर्शनदृष्टिः स्यात्तदा योगी न संशयः ॥ २३ ॥
प्रत्याहारफलं वक्ष्ये यत्कृत्वा खेचरो भवेत् ।
ईश्वरे भक्तिमाप्नोति धर्मज्ञानी भवेन्नरः ॥ २४ ॥

योगी को सूक्ष्म दर्शन दृष्टि प्राप्त होने लगे तो वह वास्तव में योगी बन जाता है । ऐसा योगी सारे तन्त्रों का तथा अपने क्रमों का जानकार हो जाता है । इस प्राकर प्राणायाम का फल कहा । अब **प्रत्याहार का फल** कहती हूँ, जिसके करने से साधक खेचर बन जाता है । वह ईश्वर में भक्ति प्राप्त करता है और सारे धर्मों का साक्षात्कार करने लगता है ॥ २३-२४ ॥

उत्तमस्य गुणप्राप्तिर्यावच्छीलनमिष्यते ।
तावज्जपेत् सूक्ष्मवायुः प्रत्याहारप्रसिद्धये ॥ २५ ॥
इन्द्रियाणां विचरतां [१]विषयेषु निवर्तनम् ।
बलादाहरणं तेभ्यः प्रत्याहारो विधीयते ॥ २६ ॥

जब तक अभ्यास करने से उत्तम गुणों की प्राप्ति हो तब तक प्रत्याहार की प्राप्ति के लिए सूक्ष्म वायु धारण करें । विषयों में चलायमान इन्द्रियों को विषयों से हठपूर्वक निवृत्त करना या हटा लेना यही प्रत्याहार का लक्षण है ॥ २५-२६ ॥

नान्यकर्मसु धर्मेषु शास्त्रधर्मेषु योगिराट् ।
पतितं चित्तमानीय स्थापयेत् पादपङ्कजे ॥ २७ ॥
दुर्निवार्यं दृढचित्तं दुरत्ययमसम्मतम् ।
बलादाहरणं तस्य प्रत्याहारो विधीयते ॥ २८ ॥

योगिराज अपने चित्त को अन्य कर्मों में अन्य धर्मों में तथा अन्य शास्त्र धर्मों में न लगावे । किन्तु उसमें आसक्त हुए चित्त को वहाँ से हटाकर भगवती के चरण कमलों में लगावे । यह चित्त बहुत दृढ़ एवं दुर्निवार्य है । इसको रोकना बड़ा कठिन काम है । अपने वश के बाहर है । फिर भी हठपूर्वक उसे विषयों से हटाना प्रत्याहार कहा जाता है ॥ २७-२८ ॥

एतत् प्रत्याहारबलात् योगी स्वस्थो भवेद् ध्रुवम् ।
अकस्माद् भावमाप्नोति भावराशिस्थिरो नरः ॥ २९ ॥

---

१. विषाय वनिवर्गणम्—क० ।

भावात् परतरं नास्ति भावाधीनमिदं जगत् ।
भावेन लभ्यते योगं तस्माद्भावं समाश्रयेत् ॥ ३० ॥

इस प्रत्याहार के बल से निश्चित रूप से योगी स्वस्थ हो जाता है उसे अकस्मात् भाव की प्राप्ति होने लगती है । इस प्रकार वह भाव राशि से स्थिर हो जाता है । इस जगत् में भाव से बढ़कर कोई भी श्रेष्ठ पदार्थ नहीं है । यह सारा जगत् भावाधीन है । भाव से ही योग प्राप्त होता है । अतः भाव प्राप्ति के लिए प्रयत्न करते रहना चाहिए ॥ २९-३० ॥

अथ धारणमावक्ष्ये यत्कृत्वा धैर्यरूपभाक् ।
त्रैलोक्यमुदरे कृत्वा पूर्णः तिष्ठति[1] योगिराट् ॥ ३१ ॥
अङ्गुष्ठगुल्फजानूरुसीमनि लिङ्गनाभिषु ।
हृद्ग्रीवाकण्ठदेशेषु लम्बिकायां तथा नसि[2] ॥ ३२ ॥
भ्रूमध्ये मस्तके मूर्ध्नि द्वादशान्ते यथाविधि ।
धारणं प्राणमरुतो धारणेति निगद्यते ॥ ३३ ॥
सर्वनाडीग्रन्थिदेशे षट्चक्रे देवतालये ।
ब्रह्ममार्गे धारणं यद् धारणेति निगद्यते ॥ ३४ ॥

अब **धारणा** कहती हूँ जिसके करने से साधक धीर हो जाता है । धारणा वाला योगी सारे त्रैलोक्य को अपने उदर में रख कर पूर्णता प्राप्त कर लेता है । १. अंगूठा, २. गुल्फ, ३. जानु, ४. ऊरु, ५. अण्डकोश, ६. लिङ्ग, ७. नाभि, ८. हृदय, ९. ग्रीवा, १०. कण्ठ प्रदेश में, ११. जिह्वा में एवं १२. नासिका इन द्वादश स्थानों के बाद मस्तक के भ्रूमध्य में अथवा शिरःप्रदेश में प्राणवायु के धारण करने को धारणा कहा जाता है । अथवा सभी नाडियों के ग्रन्थि स्थल में, षटचक्र में जहाँ देवताओं का स्थान है अथवा ब्रह्ममार्ग (सहस्रारचक्र) में प्राणवायु को धारण करना ही धारणा कहा जाता है ॥ ३१-३४ ॥

धारणं मूलदेशे तु कुण्डलीं नासिकातटे ।
प्राणवायोः प्रशमनं[3] धारणेति निगद्यते ॥ ३५ ॥
तत्र श्रीचरणाम्भोजमङ्गले चारुतेजसि ।
भावेन स्थापयेच्चित्तं धारणाशक्तिमाप्नुयात् ॥ ३६ ॥
अथ ध्यानं प्रवक्ष्यामि यत् कृत्वा सर्वगो भवेत् ।
ध्यानयोगाद् भवेन्मोक्षो मत्कुलागमनिर्गमः ॥ ३७ ॥

अथवा, मूलाधार में, कुण्डली में तथा नासिका प्रदेश में प्राणवायु को शान्त रखना **धारणा** कहा जाता है । अथवा अत्यन्त सुन्दर तेज वाले श्री भगवती के मङ्गलदायी चरणाम्भोज में भावपूर्वक चित्त को स्थापित करना चाहिए, जिससे धारणा शक्ति प्राप्त हो । अब **ध्यान** कहती हूँ, जिसके करने से साधक सर्वज्ञ हो जाता है । ध्यान योग से साधक को मोक्ष मिलता है और वह मेरे कौलिक आगम का ज्ञाता हो जाता है ॥ ३५-३७ ॥

---

१. स्त्रष्टति—ग० । २. निशि—क० । ३. प्रसम्बन्धो—क० ।

समाहितेन मनसा चैतन्यान्तर्वर्तिना ।
आत्मन्यभीष्टदेवानां[1] योगध्यानमिहोच्यते ॥ ३८ ॥
श्रीपदाम्भोरुहद्वन्द्वे नखकिञ्जल्कचित्रिते ।
स्थापयित्वा मनःपद्मं ध्यायेदिष्टगणं[2] महत् ॥ ३९ ॥

मन को अत्यन्त समाहित कर अन्तःकरणवर्ती चैतन्य द्वारा अपनी आत्मा में अथवा अभीष्ट देवता में ध्यान करना ही योग ध्यान कहा जाता है । अथवा भगवती महाश्री के नख किञ्जल्क से चित्रित दोनों चरण कमलों में मन रूपी कमल को स्थापित कर इष्टदेवता का ध्यान करना ही ध्यान कहा जाता है ॥ ३८-३९ ॥

अथ समाधिमाहात्म्यं वदामि तत्त्वतः शृणु ।
यस्यैव कारणादेव पूर्णयोगी भवेन्नरः ॥ ४० ॥
समत्वभावना नित्यं जीवात्मपरमात्मनोः ।
समाधिना जयी भूयादानन्दभैरवेश्वर ॥ ४१ ॥
संयोगसिद्धिमात्रेण समाधिस्थं महाजनम् ।
प्रपश्यति महायोगी समाध्यष्टाङ्गलक्षणैः ॥ ४२ ॥

हे सदाशिव ! अब समाधि का माहात्म्य तत्त्वतः कहती हूँ, उसे सुनिए जिसके साधन से साधक मनुष्य पूर्णयोगी बन जाता है । जीवात्मा और परमात्मा में नित्य समत्व की भावना ही समाधि है । हे आनन्दभैरवेश्वर ! इस समाधि से साधक विजय प्राप्त करता है । जीवात्मा तथा परमात्मा के संयोग की सिद्धि हो जाने पर महायोगी साधक, समाधि में स्थित महाजन का दर्शन प्राप्त करता है, यह अष्टाङ्ग लक्षण योग के आठवें भेद समाधि का फल कहा गया है ॥ ४०-४२ ॥

एतत्समाधिमाकृत्य योगी योगान्वितो भवेत् ।
अथ[3] चन्द्रे मनः कुर्यात् समारोप्य विभावयेत् ॥ ४३ ॥
एतदष्टाङ्गसारेण योगयोग्यो भवेन्नरः ।
योगयोगाद् भवेन्मोक्षो मन्त्रसिद्धिरखण्डिता ॥ ४४ ॥
योगशास्त्र प्रकारेण सर्वे वै भैरवाः स्मृताः ।
योगशास्त्रात् परं शास्त्रं त्रैलोक्ये नापि वर्तते ॥ ४५ ॥

इस समाधि के पूर्ण हो जाने पर ही योगी योगान्वित होता है । चन्द्रमा में मन लगाकर योगी उसी का ध्यान करे । इस समाधि रूपयोग के आठवें लक्षण से साधक योग के योग्य हो जाता है । योग से युक्त होने पर मोक्ष की प्राप्ति होती है और उसके मन्त्र की सिद्धि कभी खण्डित नहीं होती । योगशास्त्र के विधान के पालन करने से सभी साधक भैरव के समान हो जाते हैं ॥ ४३-४५ ॥

---

१. ध्यानम्—ग० । २. गुणम्—ग० ।
३. क० नास्ति ।

त्रैलोक्यातीतशास्त्राणि योगाङ्गविविधानि च ।
ज्ञात्वा या[१] पश्यति क्षिप्रं नानाध्यायेन शङ्कर ॥ ४६ ॥

ऐसे तो त्रैलोक्य में अतीत काल में कितने शास्त्र बने हुए हैं, अनेक प्रकार के योगाङ्ग भी बताए गए हैं, किन्तु योग शास्त्र से बढ़कर अन्य कोई दूसरा शास्त्र नहीं है। हे शङ्कर ! योग के अङ्गभूत इन नाना प्रकार के ध्यानों से साधक मेरा दर्शन शीघ्र ही प्राप्त कर लेता है ॥ ४५-४६ ॥

कामादिदोषनाशाय कथितं ज्ञानमुत्तमम् ।
इदानीं शृणु वक्ष्यामि मन्त्रयोगार्थनिर्णयम् ॥ ४७ ॥
विश्वं [२]शरीरमाक्लेशं पञ्चभूताश्रयं प्रभो ।
चन्द्रसूर्याग्नितेजोभिः जीवब्रह्मैकरूपकम् ॥ ४८ ॥

कामादि दोषों के नाश के लिए हमने यहाँ तक उत्तम योग का ज्ञान (प्राणायाम प्रत्याहार, धारणा, ध्यान व समाधि) कहा । अब मन्त्र के योगार्थ निर्णय को सुनिए । हे प्रभो ! पञ्चभूतों का आश्रयभूत यह सारा शरीर क्लेश से व्याप्त है । इसमें चन्द्रमा, सूर्य एवं अग्नि के तेज से ब्रह्म का अंशभूत जीव निवास करता है ॥ ४७-४८ ॥

तिस्रः कोट्यस्तदर्धेन शरीरे[३] नाड्यो[४] मताः ।
तेषु मुख्या दश प्रोक्तास्तासु तिस्रो व्यवस्थिताः ॥ ४९ ॥
प्रधाना मेरुदण्डेऽत्र सोमसूर्याग्निरूपिणी ।
नाडीत्रयस्वरूपेण योगमाता प्रतिष्ठिता ॥ ५० ॥

इस शरीर में साढ़े तीन करोड़ नाड़ियाँ हैं । उसमें भी दश मुख्य हैं । उन दशों में भी तीन व्यवस्थित हैं । ये तीन नाड़ियाँ मेरुदण्ड में रहने वाली सोम, सूर्य तथा अग्नि स्वरूपा हैं । इन तीन नाड़ियों के रूप में इस शरीर में योगमाता प्रतिष्ठित हैं ॥ ४९-५० ॥

इडा वामे स्थिता नाडी शुक्ला तु चन्द्ररूपिणी ।
शक्तिरूपा च सा नाडी साक्षादमृतविग्रहा ॥ ५१ ॥
दक्षिणे पिङ्गलाख्या तु [५]पुंरूपा सूर्यविग्रहा ।
दाडिमीकुसुमप्रख्या विषाख्या परिकीर्तिता ॥ ५२ ॥

मेरुदण्ड के वामभाग में चन्द्ररूपा शुक्लवर्णा इड़ा नाड़ी है जो साक्षात् शक्ति का स्वरूप एवं अमृतमय शरीर वाली है । मेरु के दक्षिण भाग में पिङ्गला नाम की नाड़ी, पुरुष रूप में सूर्य विग्रह स्वरूप से स्थित है, जो अनार के पुष्प के समान लालवर्ण वाली है । इसे विष भी कहा जाता है ॥ ५१-५२ ॥

---

१. सम्प्राप्यते क्षिप्तम् इति—क० ।
२. माकाशम् इति—ग० । आक्लेशमिति पाठे आ समन्तात् क्लेशो यस्य तदिति बहुव्रीहिसमासो बोध्यः ।
३. दक्षिणत इति—ग० ।
४. शरीरेण तयोः इति—ग० ।
५. स इति—ग० ।

मेरुमध्ये स्थिता या तु सुषुम्ना बहुरूपिणी ।
विसर्गाद्बिन्दुपर्यन्तं व्याप्य तिष्ठति तत्त्वतः ॥ ५३ ॥
मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयंभूलिङ्गं तं कोटिसूर्यसमप्रभम् ॥ ५४ ॥

मेरु के मध्य में जो स्थित है, उसका नाम सुषुम्ना है जो बहुरूपिणी है और विसर्ग से बिन्दु पर्यन्त तत्त्वतः व्याप्य हो कर स्थित है । इच्छा, ज्ञान तथा क्रिया को उत्पन्न करने वाले त्रिकोणात्मक मूलाधार के मध्य में करोड़ों सूर्य के समान तेजस्वी स्वयम्भू लिङ्ग स्थित हैं ॥ ५३-५४ ॥

तदूर्ध्वे कामबीजं तु कलाशान्तीन्दुनायकम् ।
तदूर्ध्वे तु शिखाकारा कुण्डली ब्रह्मविग्रहा ॥ ५५ ॥
तद्बाह्ये हेमवर्णाभं वसुवर्णचतुर्दलम् ।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ॥ ५६ ॥

उसके ऊपर कला, शान्ति तथा इन्दु रूप में सर्वश्रेष्ठ कामबीज का निवास है । उसके ऊपर शिखा के आकार वाली ब्रह्मस्वरूपा कुण्डलिनी रहती है । उसके बाहर वाले भाग में सुवर्ण के समान आभा वाला 'व श ष स' - इन चार वर्णों से युक्त चार पत्तों वाला द्रवीभूत सुर्वण के समान कमल है उसका ध्यान करना चाहिए ॥ ५५-५६ ॥

तदूर्ध्वेऽग्निसमप्रख्यं[१] षड्दलं हीरकप्रभम् ।
वादिलान्तं[२] तु षड्वर्णसहितं[३] रसपत्रकम् ॥ ५७ ॥
स्वाधिष्ठानाख्यममलं[४] योगिनां हृदयङ्गमम् ।
मूलमाधारषट्कानां[५] मूलाधारं प्रकीर्तितम् ॥ ५८ ॥

उसके ऊपर अग्नि के समान प्रदीप्त एवं हीरे के समान प्रदीप्त ६ पत्तों का कमल है । उसमें 'ब भ म य र ल' - ये ६ वर्ण हैं । इस प्रकार षड्दलों पर ६ वर्णों वाले कमल का ध्यान करना चाहिए । इसके ऊपर योगियों द्वारा जानने योग्य अत्यन्त निर्मल स्वाधिष्ठान नाम का चक्र है, मूल आधार में रहने वाले ६ चक्रों में मूलाधार नामक चक्र हमने पहले (बाइसवें पटल में) कह दिया है ॥ ५७-५८ ॥

स्वशब्देन परं लिङ्गं स्वाधिष्ठानं स्वलिङ्गकम् ।
तदूर्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम् ॥ ५९ ॥
मेघाभं विद्युताभं च बहुतेजोमयं ततः ।
मणिमद्भिन्नतत्पद्मं मणिपूरं शशिप्रभम् ॥ ६० ॥

स्वाधिष्ठान के स्वशब्द से कहा जाने वाला सर्वश्रेष्ठ स्वाधिष्ठान नामक लिङ्ग ही स्व

---

१. सद्ग्रन्थम् इति—ग० । २. लान्तार्ण इति—ग० । ३. वत्स इति—ग० ।
४. सदनम् इति—ग० । ५. षड्कोणम् इति—ग० ।

शब्द का अर्थ है । उसके ऊपर नाभि देश में महाकान्तिमान् मणिपूर नामक चक्र है । मेघ की आभा वाला तथा विद्युत् की आभा वाला अनेक वर्ण के तेजों वाली मणियों से युक्त वह मणिपूर नामक पद्म चन्द्रमा के समान कान्तिमान् है ॥ ५९-६० ॥

कथितं [1]सकलं नाथ हृदयाब्जं शृणु प्रिय ।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ॥ ६१ ॥
शिवेनाधिष्ठितं पद्मं विश्वालोकनकारकम् ।
तदूर्ध्वेऽनाहतं पद्मं हृदिस्थं [2]किरणाकुलम् ॥ ६२ ॥

वह पद्म 'ड ढ ण त थ द ध न प और फ' इन दश वर्णों वाले दश दलों से युक्त है । हे नाथ ! उसके विषय में सब कुछ कह दिया । अब हृदय पर विराजमान पद्म चक्र के बारे में सुनिए । हे नाथ ! उस पद्म पर शिव अधिष्ठित हैं, जो चारों ओर अपना प्रकाश विकीर्ण करते रहते हैं । वहाँ पर किरणों से युक्त अनाहत नाम का पद्म है ॥ ६१-६२ ॥

उद्यदादित्यसङ्काशं कादिठान्ताक्षरान्वितम् ।
दलद्वादशसंयुक्तमीश्वराद्यसमन्वितम् ॥ ६३ ॥
तन्मध्ये बाणलिङ्गं तु सूर्यायुतसमप्रभम् ।
शब्दब्रह्ममयं [3]वक्ष्येऽनाहतस्तत्र दृश्यते ॥ ६४ ॥

जो उदीयमान सूर्य के समान प्रकाश वाला तथा 'क ख ग घ ङ च छ ज झ ञ ट और ठ' इन द्वादश वर्णों से युक्त द्वादश पत्तों वाला है । उस पद्म के मध्य में हजारों सूर्य के समान आभा वाला बाणलिङ्ग है वह शब्द ब्रह्ममय है और अनाहत रूप में दिखाई पड़ता है ॥ ६३-६४ ॥

तेनानाहतपद्माख्यं योगिनां योगसाधनम् ।
आनन्दसदनं तत्तु सिद्धेनाधिष्ठितं परम् ॥ ६५ ॥
तदूर्ध्वं तु विशुद्धाख्यं दलषोडशपङ्कजम् ।
वर्णैः षोडशभिर्युक्तं धूम्रवर्णं महाप्रभम् ॥ ६६ ॥

वह अनाहत होने के कारण '**अनाहत पद्म**' नाम से कहा जाता है, जो योगियों के योग का साधन है, आनन्द का सदन है और सिद्धों से अधिष्ठित है । उसके ऊपर **विशुद्धाख्य** नामक पद्म है जिसके दल में १६ पत्ते हैं, वे दल १६ वर्णों से विराजमान हैं । धूम्र के समान उनका वर्ण है तथा महाकान्तिमान् हैं ॥ ६५-६६ ॥

योगिनामद्भुतस्थानं [4]सिद्धिवर्णं समभ्यसेत् ।
विशुद्धं तनुते यस्मात् जीवस्य हंसलोकनात् ॥ ६७ ॥

---

१. सफलम् इति—क० ।
२. विकलाकुलम् इति—ग० । किरणाकुलमिति पाठे किरणैः आकुलमिति तृतीयासमासः ।
३. शब्दो । ४. वर्ग यः इति—ग० ।

विशुद्धं पद्ममाख्यातमाकाशाख्यं महाप्रभम् ।
आज्ञाचक्रं तदूर्ध्वे तु अर्थिनाधिष्ठितं परम् ॥ ६८ ॥

योगियों के अद्भुत स्थानभूत उन सिद्ध वर्णों का सर्वदा अभ्यास करना चाहिए । हंस का परम प्रकाश होने के कारण वह जीव को विशुद्ध ज्ञान देता है । इसलिए उसे विशुद्ध कहते हैं । वह आकाश के समान निर्मल है और अत्यन्त कान्तिमान् है । उसके ऊपर आज्ञाचक्र है जो अनेक प्रकार के अर्थों से अधिष्ठित है ॥ ६७-६८ ॥

आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्तितम् ।
कैलासाख्यं तदूर्ध्वे तु तदूर्ध्वे बोधनं ततः ॥ ६९ ॥
एवंविधानि चक्राणि कथितानि तव प्रभो ।
तदूर्ध्वस्थानममलं सहस्राराम्बुजं परम् ॥ ७० ॥

वहाँ से आज्ञा का संक्रमण होता है । वह आज्ञा गुरु के द्वारा होती है । ऐसा कहा गया है और उसके ऊपर कैलास है उसके ऊपर ज्ञान का निवास है । हे प्रभो ! इस प्रकार हमने चक्रों के विषय में आपसे कहा । उन सबसे ऊपर अत्यन्त निर्मल सर्वश्रेष्ठ सहस्रदल कमल है ॥ ६९-७० ॥

बिन्दुस्थानं परं ज्ञेयं गणानां मतमाशृणु ।
बौद्धा वदन्ति चात्मानमात्मज्ञानी न ईश्वरः ॥ ७१ ॥
सर्वं नास्तीति चार्वाका नानाकर्मविवर्जिताः ।
वेदनिन्दापराः सर्वे बौद्धाः शून्याभिवादिनः[१] ॥ ७२ ॥

वही सर्वश्रेष्ठ बिन्दु स्थान है, अन्य मतावलम्बियों का मत सुनिए । ज्ञानीजन उसी को आत्मा कहते हैं और आत्मज्ञानी उसी को ईश्वर कहते हैं । नाना कर्म न करने वाले मात्र शरीरवादी चार्वाक 'कुछ भी नहीं हैं' ऐसा कहते हैं । वेद की निन्दा करने वाले सभी बौद्ध शून्य वादी हैं । वे किसी की सत्ता नहीं मानते ॥ ७१-७२ ॥

मम ज्ञानाश्रिताः कान्ताश्चीनभूमिनिवासिनः ।
आत्मानमपरिच्छिन्नं विभाव्य भाव्यते मया ॥ ७३ ॥
श्रीपदाब्जे बिन्दुयुग्मं नखेन्दुमण्डलं शुभम् ।
शिवस्थानं प्रवदन्ति शैवाः शाक्ता महर्षयः ॥ ७४ ॥

ये बौद्ध चीनभूमि में निवास करने वाले मेरे ज्ञानाश्रित होने के कारण मुझे प्रिय हैं । मैं तो अपने को अपरिच्छिन्न समझकर उस बिन्दु स्थान का ध्यान करती हूँ । भगवती महाश्री के चरण कमलों में नखेन्दु मण्डल के रूप में उन दो बिन्दुओं को शैव, शाक्त तथा महर्षिगण शिव का स्थान देते हैं ॥ ७३-७४ ॥

---

१. शून्यमभिवदन्ति तच्छीलाः शून्याभिवादिनः, शून्योपासनारता इत्यर्थः ।

परमं पुरुषं नित्यं वैष्णवा:[१] प्रीतिकारकाः ।
हरिहरात्मकं रूपं संवदन्ति परे जनाः ॥ ७५ ॥
देव्याः पदं नित्यरूपाश्चरणानन्दनिर्भराः ।
वदन्ति मुनयो मुख्याः पुरुषं प्रकृतात्मकम् ॥ ७६ ॥
पुंप्रकृत्याख्यभावेन मग्ना मान्ति महीतले ।
इति ते कथितं नाथ मन्त्रयोगमनुत्तमम् ॥ ७७ ॥

सबसे प्रेम करने वाले वैष्णव उस बिन्दु मण्डल को परम पुरुष के रूप में मानते हैं । अन्य जन उन दोनों बिन्दुमण्डलों को हरिहरात्मक रूप में मानते हैं । भगवती के चरणानन्द में निर्भर भक्त उस बिन्दु को देवी का साक्षात् पद मानते हैं । मुख्य मुख्य मुनिगण उसे प्रकृत्यात्मक पुरुष मानते हैं । इस पृथ्वीतल में प्रायः सभी उस बिन्दु को प्रकृत्यात्मक भाव से मान कर उसी में निमग्न हैं । हे नाथ ! इस प्रकार हमने सर्वश्रेष्ठ मन्त्रयोग कहा ॥ ७५-७७ ॥

योगमार्गानुसारेण भावयेत् सुसमाहितः ।
आदौ [२]महापूरकेण मूले संयोजयेन्मनः ॥ ७८ ॥
गुदमेढ्रान्तरे शक्तिं तामाकुञ्च्य प्रबुद्धयेत् ।
लिङ्गभेदक्रमेणैव प्रापयेद्बिन्दुचक्रकम् ॥ ७९ ॥
शम्भुलाभां परां [३]शक्तिमेकीभावैर्विचिन्तयेत् ।
तत्रोत्थितामृतरसं द्रुतलाक्षारसोपमम् ॥ ८० ॥
पाययित्वा परां शक्तिं कृष्णाख्यां योगसिद्धिदाम् ।
षट्चक्रभेदकस्तत्र सन्तर्प्यामृतधारया ॥ ८१ ॥

योग मार्ग के अनुसार साधक समाहित चित्त से उस बिन्दु का ध्यान करे । सर्वप्रथम महापूरक के द्वारा मूलाधार में अपने मन को लगावे । गुदा और मेढ्र के मध्य में रहने वाली शक्ति को संकुचित कर जागृत करे । इस प्रकार तत्तच्चिन्हों का भेदन कर उसे सहस्रार स्थित बिन्दु चक्र में ले जावे । वहाँ से उस पर शक्ति का शिव के साथ एकीभाव के रूप में ध्यान करे । वहाँ से पिघले हुए द्राक्षारस के समान उत्पन्न हुए अमृत रस का उसे पान करावें । इस प्रकार षट्चक्र का भेदन करने वाला साधक अमृत धारा के द्वारा योग में सिद्धि प्रदान करने वाली उस महाकाली शक्ति को तृप्त करावे ॥ ७८-८१ ॥

आनयेत्तेन मार्गेण मूलाधारं ततः सुधीः ।
एवमभ्यस्यमानस्य अहन्यहनि मारुतम् ॥ ८२ ॥
जरामरणदुःखाद्यैर्मुच्यते भवबन्धनात् ।
तन्त्रोक्तकथिता मन्त्राः[४] सर्वे सिद्ध्यन्ति नान्यथा ॥ ८३ ॥

---

१. प्रतिकारकाः इति—क० । २. प्रकरणे इति—ग० ।
३. भावम् इति—क० । ४. दूषिता इति—क० ।

उसे तृप्त कराने के बाद सुधी साधक पुनः उसी मार्ग से उसे मूलाधार में ले आवे। इस प्रकार प्रतिदिन वायु का अभ्यास करते हुए साधक जरा मरण तथा समस्त दुःखों से छुटकारा पा जाता है और वह संसार बन्धन से मुक्त हो जाता है, किं बहुना तन्त्र शास्त्र में कहे हुए वे, सभी मन्त्र उसे सिद्ध हो जाते है, जिसे सिद्ध करने का कोई अन्य उपाय नहीं है ॥ ८२-८३ ॥

स्वयं सिद्धो भवेत् क्षिप्रं योगे हि योगवल्लभा।
ये गुणाः सन्ति देवस्य पञ्चकृत्यविधायिनः[१] ॥ ८४ ॥
ते गुणाः साधकवरे भवन्त्येव न चान्यथा।
इति ते कथितं नाथ मन्त्रयोगमनुत्तमम् ॥ ८५ ॥

वह स्वयं शीघ्रतापूर्वक सिद्ध हो जाता है, योग में रहने वाली योगवल्लभा उस पर कृपा करती हैं, पञ्चकृत्य विधायी सदाशिव देव में जितने गुण हैं वे सभी गुण उस साधक श्रेष्ठ में आ जाते हैं। अन्यथा नहीं। हे नाथ! इस प्रकार हमने श्रेष्ठ मन्त्र योग कहा ॥ ८४-८५ ॥

इदानीं धारणाख्यञ्च शृणुष्व परमाञ्जनम्।
दिक्कालाद्यनवच्छिन्नं त्वयि चित्तं निधाय च ॥ ८६ ॥
मयि वा साधकवरो ध्यात्वा तन्मयतामियात्।
तन्मयो भवति क्षिप्रं जीवब्रह्मैकयोजनात् ॥ ८७ ॥

वैष्णव ध्यान - अब सर्वश्रेष्ठ अञ्जन के समान दृष्टि प्रदान करने वाले **धारणा** के विषय में सुनिए। देश और काल से सर्वथा अनवच्छिन्न आप शङ्कर में अथवा मुझमें साधक अपना चित्त सन्निविष्ट कर तन्मयता प्राप्त करे। इस प्रकार जीव और **ब्रह्म में एकत्व** की भावना कर शीघ्र ही तन्मयता प्राप्त करे, इस प्रकार जीव और ब्रह्म में एकत्व की भावना करने से शीघ्र ही तन्मयता प्राप्त हो जाती है ॥ ८६-८७ ॥

इष्टपादे मति दत्वा नखकिञ्जल्कचित्रिते।
अथवा मननं चित्तं यदा क्षिप्रं न सिद्ध्यति ॥ ८८ ॥
तदावयवयोगेन योगी योगं समभ्यसेत्।
पादाम्भोजे मनो दद्याद् नखकिञ्जल्कचित्रिते ॥ ८९ ॥

अथवा नखकिञ्जल्क से चित्रित अपने इष्टदेव के पाद में मन लगावे तब भी चित्त स्थिर हो जाता है। अथवा मनन करने वाला यह चञ्चल चित्त यदि शीघ्रता से सिद्धक (स्थिर) न हो तो शरीर के अवयवभूत एक-एक अङ्गों में योगी योग द्वारा चित्त स्थिर रखे। प्रथम नखकिञ्जलक चित्रित इष्टदेव के चरण कमलों में मन लगावे ॥ ८८-८९ ॥

---

१. पञ्चसंख्याकानि च तानि कृत्यानि चेति पञ्चकृत्यानि, मध्यमपदलोपिसमासः। तानि विदधति तच्छीला इत्यर्थः।

जङ्घायुग्मे तथाराम[1]कदलीकाण्डमण्डिते ।
ऊरुद्वये मत्तहस्तिकरदण्डसमप्रभे ॥ ९० ॥
गङ्गावर्त्तगभीरे तु नाभौ सिद्धिबिले ततः ।
उदरे वक्षसि तथा हस्ते श्रीवत्सकौस्तुभे ॥ ९१ ॥

इसके बाद वाटिका स्थित कदली काण्ड के समान प्रभा वाले दोनों जाँघों में मन लगावे । फिर मदमत्त हाथी के शुण्डाग्रदण्ड के समान दोनों ऊरु में मन को स्थिर करे । इसके बाद सिद्धि के लिए प्रवेश किए जाने वाले बिल के समान गङ्गा के आवर्त के समान गम्भीर नाभि स्थान में मन लगावे । इसके बाद श्रीवत्सकौस्तुभ से विराजमान उदर एवं वक्षःस्थल में, तदनन्तर कर कमल में मन लगावे ॥ ९०-९१ ॥

पूर्णचन्द्रामृतप्रख्ये ललाटे चारुकुण्डले ।
शङ्खचक्रगदाम्भोजदोर्दण्डपरिमण्डिते ॥ ९२ ॥
सहस्रादित्यसङ्काशे किरीटकुण्डलद्वये ।
स्थानेष्वेषु भजेन्मन्त्री विशुद्धः शुद्धचेतसा ॥ ९३ ॥
मनो निवेश्य श्रीकृष्णे वैष्णवो भवति ध्रुवम् ।
इति वैष्णवमाख्यातं ध्यानं सत्त्वं सुनिर्मलम् ॥ ९४ ॥

इसके बाद अमृत से संयुक्त पूर्णमासी के चन्द्रमा के समान तथा मनोहर कुण्डल से मण्डित ललाट में मन लगावे । फिर शंख, चक्र गदा और कमल से मण्डित चार भुजाओं से संयुक्त सहस्रों सूर्यों के समान देदीप्यमान किरीट एवं दो कुण्डलों से युक्त श्रीकृष्ण परमात्मा में मन लगावे । भगवान् श्रीकृष्ण के इन स्थानों में विशुद्ध चित्त से मन को लगाने वाला मन्त्रज्ञ साधक निश्चित रूप से विष्णुभक्त बन जाता है । यहाँ तक हमने सत्त्वगुण से संयुक्त अत्यन्त निर्मल वैष्णव ध्यान का वर्णन किया ॥ ९२-९४ ॥

विष्णुभक्ताः प्रभजन्ति [2]स्वाधिष्ठानं मनः स्थिराः ।
यावन्मनोलयं याति कृष्णे [3]आत्मनि चिन्तयेत् ॥ ९५ ॥
तावत् स्वाधिष्ठानसिद्धिरिति योगार्थनिर्णयः ।
तावज्जपेन्मनुं मन्त्री जपहोमं समभ्यसेत् ॥ ९६ ॥

जिनका मन स्थिर है, ऐसे विष्णुभक्त स्वाधिष्ठान चक्र में विष्णु का ध्यान करते हैं । जब तक मन श्रीकृष्ण में लय को न प्राप्त होवे, तब तब तक आत्मा में उक्त प्रकार से श्री कृष्ण का ध्यान करना चाहिए । तभी स्वाधिष्ठान चक्र की सिद्धि होती है, ऐसा योगशास्त्र का निर्णय है तभी तक मन्त्रज्ञ मन्त्र का जप करे तथा जप और होम का अभ्यास करे ॥ ९५-९६ ॥

---

१. सिद्धवने इति—ग० ।
२. चन्द्रायुत इति—ग० ।
३. स्वात्मनि चिन्तयेत् इति—ग० ।

अतः परं न किञ्चिच्च कृत्यमस्ति मनोहरे[1] ।
विदिते परतत्त्वे तु समस्तैर्नियमैरलम् ॥ ९७ ॥
अत[2] एव सदा कुर्यात् ध्यानं योगं मनुं जपेत् ।
तमः परिवृते गेहे घटो दीपेन दृश्यते ॥ ९८ ॥

सिद्धि प्राप्त कर लेने के पश्चात् और कोई कृत्य शेष नहीं रह जाता । क्योंकि मन को हरण करने वाले परतत्त्व परमात्मा का साक्षात्कार हो जाने पर समस्त नियम व्यर्थ ही हैं । इसीलिए सर्वदा ध्यान करे, योग करे, मन्त्र का जप करे, जिस प्रकार अन्धकारपूर्ण घर में रहने वाला घड़ा दीप से दिखाई पड़ता है ॥ ९७-९८ ॥

एवं स यो वृतो ह्यात्मा मनुना गोचरीकृतः ।
इति ते कथितं नाथ मन्त्रयोगमनुत्तमम् ॥ ९९ ॥
कृत्वा पापोद्भवैर्दुःखैर्मुच्यते नात्र संशयः ।
दुर्लभं विषयासक्तैः सुलभं योगिनामपि ॥ १०० ॥

उसी प्रकार माया से आवृत आत्मा मन्त्र के द्वारा प्रत्यक्ष हो जाती है । हे नाथ ! यहाँ तक हमने सर्वश्रेष्ठ मन्त्र योग कहा । ऐसा करने से साधक पापों से तथा सब प्रकार के दुःखों से छूट जाता है इसमें संशय नहीं । यह ध्यान विषयी लोगों के लिए दुर्लभ है तथा योगियों के लिए सुलभ हैं ॥ ९९-१०० ॥

सुलभं न त्यजेद्विद्वान् यदि सिद्धिमिहेच्छति ।
ब्रह्मज्ञानं योगध्यानं मन्त्रजाप्यं क्रियादिकम् ॥ १०१ ॥
यः करोति सदा भद्रो वीरभद्रो हि योगिराट् ।
भक्तिं कुर्यात् सदा शम्भोः श्रीविद्यायाः परात्पराम् ॥ १०२ ॥

विद्वान् साधक यदि सिद्धि चाहे तो उसे इस सुलभ मार्ग का त्याग नहीं करना चाहिए। जो ब्रह्मज्ञानी ! योग, ध्यान, मन्त्र का जाप तथा अपनी क्रिया करता रहता है वह सदा कल्याणकारी योगिराज वीरभद्र बन जाता है । इसलिए सदैव सदाशिव की भक्ति करनी चाहिए अथवा परात्परा श्रीविद्या की भक्ति करनी चाहिए ॥ १०१-१०२ ॥

योगसाधनकाले च केवलं भावनादिभिः ।
मननं कीर्त्तनं ध्यानं स्मरणं पादसेवनम् ॥ १०३ ॥
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।
एतद्भक्तिप्रसादेन जीवन्मुक्तस्तु साधकः ॥ १०४ ॥

---

१. हरति इति हरा, पचाद्यच् टाप् । मनसो हरा-मनोहरा, तत्सम्बोधने मनोहरे ! इति रूपम्।
२. तालवृन्तेन किं कार्यं लब्धे मलयमारुते ।
मन्त्राभ्यासेन योगेन ज्ञानं ज्ञानाय कल्प्यते ॥
न योगेन बिना मन्त्रो न मन्त्रेण विना हि सः ।
द्वयोरभ्यासयोगो हि ब्रह्मत्वं सिद्धिकारणम् ॥ इति—क० अधिकः पाठः ।

योगिनां वल्लभो भूत्वा समाधिस्थो भवेद्यतिः ॥ १०५ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावार्थनिर्णये पाशवकल्पे षट्चक्रसारसङ्केते सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे[१] सप्तविंशः पटलः ॥ २७ ॥

— ❖ —

योगसाधन काल में केवल भावनादि से ही भक्ति करे । मनन, कीर्तन, ध्यान, स्मरण, पादसेवन, अर्चन, वन्दन, दास्य, सख्य तथा आत्मनिवेदन उक्त प्रकार वाली भक्ति के सिद्ध हो जाने पर साधक जीवन्मुक्त हो जाता है और योगियों का वल्लभ हो कर समाधि में स्थित (प्रज्ञ) योगी बन जाता है ॥ १०३-१०५ ॥

॥ श्रीरुद्रयामल के उत्तरतन्त्र में महातन्त्रोद्दीपन में भावार्थ निर्णय में, पाशवकल्प में, षट्चक्रसङ्केत में सिद्धमन्त्रप्रकरण में भैरवी-भैरव संवाद में सत्ताइसवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ २७ ॥

— ❖ —

१. ऊनविंशः पटल इति—क० ।

अथ त्रयस्त्रिंशः पटलः

श्री आनन्दभैरवी उवाच[1]

अथ वक्ष्ये महादेव कुण्डलीकवचं शुभम् ।
परमानन्ददं सिद्धं सिद्धवृन्दनिषेवितम् ॥ १ ॥

आनन्दभैरवी ने कहा—हे महादेव ! अब इसके अनन्तर कल्याणकारी कुण्डलिनी कवच कहती हूँ । यह कवच परमानन्द देने वाला तथा सिद्ध है और सिद्ध समूहों से सुसेवित है ॥ १ ॥

यत्कृत्वा योगिनः सर्वं धर्माधर्मप्रदर्शकाः ।
ज्ञानिनो मानिनो धर्मा विचरन्ति यथामराः ॥ २ ॥
सिद्धयोऽप्यणिमाद्याश्च करस्थाः सर्वदेवताः ।
एतत् कवचपाठेन देवेन्द्रो योगिराड् भवेत् ॥ ३ ॥

इसके पाठ करने से सभी योगी, धर्म-अधर्म का ज्ञान करने वाले, ज्ञानी, मानी तथा धर्मवान् हो जाते हैं और देवताओं के समान पृथ्वी पर विचरण करते हैं । उनके हाथ में सभी अणिमादि सिद्धियाँ तथा सभी देवता हो जाते हैं । इस कवच के पाठ से पाठकर्ता देवेन्द्र तथा योगिराज बन जाता है ॥ २-३ ॥

ऋषयो योगिनः सर्वे जटिलाः कुलभैरवाः ।
प्रातःकाले त्रिवारं च मध्याह्ने वारयुग्मकम् ॥ ४ ॥
सायाह्ने वारमेकं तु पठेत् कवचमेव च ।
पठेदेवं महायोगी कुण्डलीदर्शनं भवेत् ॥ ५ ॥

सभी योगीजन इसका पाठ करने से ऋषि एवं जटा धारण करने वाले भैरव बन जाते हैं । प्रातः काल में तीन बार, मध्याह्नकाल में दो बार, सायङ्काल में एक बार यदि महायोगी इस कवच का पाठ करें तो उन्हें साक्षात् कुण्डलिनी का दर्शन प्राप्त हो जाता है ॥ ४-५ ॥

कुलकुण्डलीकवचस्य ब्रह्मेन्द्र ऋषिर्गायत्री छन्दः, कुलकुण्डली
देवता सर्वाभीष्टसिद्ध्यर्थे विनियोगः ॥

इस कुलकुण्डलीकवच के ब्रह्मेन्द्र ऋषि है; गायत्री छन्द है और कुलकुण्डली देवता है, सभी अभीष्टसिद्धि के लिए इनका विनियोग है ।

---

१. पुस्तके नास्ति—क० ।

कुलकुण्डलीकवचम्

ॐ ईश्वरी जगतां धात्री ललिता सुन्दरी परा ।
कुण्डली कुलरूपा च पातु मां कुलचण्डिका ॥ ६ ॥

विधि—हाथ में जल लेकर 'अस्य कुलकुण्डलीकवचस्य ब्रह्मेन्द्र ऋषिर्गायत्री छन्दः, कुलकुण्डली देवता सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः' पर्यन्त वाक्य पढ़कर पाठकर्ता उस जल को पृथ्वी पर अथवा किसी पात्र में गिरा देवे ।

ॐ ईश्वरी, कुलरूपा, जगत् का पालन करने वाली परा, सुन्दरी, ललिता, कुण्डलिनी कुल चण्डिका मेरी रक्षा करें ॥ ६ ॥

शिरो मे ललिता देवी पातूग्राख्या कपोलकम् ।
ब्रह्ममन्त्रेण[1] पुटिता भ्रूमध्यं पातु मे सदा ॥ ७ ॥
नेत्रत्रयं महाकाली कालाग्निभक्षिका शिखाम् ।
दन्तावलीं विशालाक्षी ओष्ठमिष्टानुवासिनी ॥ ८ ॥

ललिता देवी मेरे शिर की रक्षा करें । उग्रनाम वाली देवी मेरे कपोल की तथा ब्रह्ममन्त्र से सम्पुटित देवी मेरे भ्रूमध्य की रक्षा करें । महाकाली तीनों नेत्रों की, कालाग्नि भक्षिका देवी शिखा की, विशालाक्षी दन्त समूहों की एवं इष्ट (यज्ञकर्म में) में निवास करने वाली मेरे ओष्ठ की रक्षा करें ॥ ७-८ ॥

कामबीजात्मिका विद्या अधरं पातु मे सदा ।
लृयुगस्था गण्डयुग्मं माया विश्वा रसप्रिया ॥ ९ ॥
भुवनेशी कर्णयुग्मं चिबुकं क्रोधकालिका ।
कपिला मे गलं पातु सर्वबीजस्वरूपिणी ॥ १० ॥

कामबीजात्मिका महाविद्या सर्वदा मेरे अधर की रक्षा करें । दो प्रकार के लृकार में रहने वाली, रस से प्रेम करने वाली, विश्वा एवं माया दोनों गण्डस्थलों की रक्षा करें । भुवनेशी दोनों कानों की, क्रोधकालिका देवी चिबुक की और सर्व बीजस्वरूपिणी कपिला मेरे गले की रक्षा करें ॥ ९-१० ॥

मातृकावर्णपुटिता कुण्डली कण्ठमेव च ।
हृदयं कालपृथ्वी[2] च कङ्काली पातु मे मुखम् ॥ ११ ॥
भुजयुग्मं चतुर्वर्गा चण्डदोर्द्दण्डखण्डिनी ।
स्कन्धयुग्मं स्कन्दमाता हालाहलगता मम ॥ १२ ॥

मातृका वर्णों से सम्पुटित कुण्डलिनी कण्ठ की और कालपृथ्वी हृदय की तथा कङ्काली देवी मेरे मुख की रक्षा करें । चण्ड के दोनों बाहुओं को खण्ड खण्ड करने वाली चतुर्वर्गा

---

१. ब्रह्मरन्ध्रेण—क० । २. कौल—क० ।

देवी मेरे दोनों भुजाओं की, हालाहल (विष) में रहने वाली स्कन्दमाता मेरे दोनों कन्धों की रक्षा करें ॥ ११-१२ ॥

अङ्गुल्यग्रं कुलानन्दा श्रीविद्या नखमण्डलम् ।
कालिका भुवनेशानी पृष्ठदेशं सदावतु ॥ १३ ॥
पार्श्वयुग्मं महावीरा वीरासनधराभया ।
पातु मां कुलदर्भस्था नाभिमुदरमम्बिका ॥ १४ ॥
कटिदेशं पीठसंस्था महामहिषघातिनी ।
लिङ्गस्थानं महामुद्रा भगं मालामनुप्रिया ॥ १५ ॥

कुलानन्दा अंगुली के अग्रभागों की, श्रीविद्या समस्त नखमण्डलों की, कालिका तथा भुवनेशानी सर्वदा मेरे पृष्ठदेश की रक्षा करें । वीरासन धारण करने वाली महावीरा और अभया मेरे दोनों पार्श्व भाग की, कुलदर्भस्था मेरी तथा अम्बिका मेरे नाभि और उदर प्रदेश की रक्षा करें । पीठ में निवास करने वाली देवी महामहिषघातिनी मेरे कटिदेश की, महामुद्रा लिङ्गस्थान की और माला से प्रेम करने वाली मेरे भग (= ऐश्वर्य) की रक्षा करें ॥ १३-१५ ॥

भगीरथप्रिया धूम्रा मूलाधारं गणेश्वरी ।
चतुर्दलं कक्ष्यपूज्या दलाग्रं मे वसुन्धरा ॥ १६ ॥
शीर्षं राधा रणाख्या च ब्रह्माणी[१] पातु मे मुखम् ।
मेदिनी पातु कमला वाग्देवी पूर्वगं[२] दलम् ॥ १७ ॥

भगीरथ प्रिया धूम्रा और गणेश्वरी मेरे मूलाधार की, कक्ष्य पूज्या देवी मेरे (कुण्डली के) चतुर्दल की तथा वसुन्धरा देवी दल के अग्रभाग की रक्षा करें । राधा तथा रणाख्या मेरे शिरोभाग की, ब्रह्माणी मुख की और मेदिनी वाग्देवी कमला मेरी कुण्डलिनी के पूर्वदल की रक्षा करें ॥ १६-१७ ॥

छेदिनी दक्षिणे पातु पातु चण्डा महातपा ।
चन्द्रघण्टा सदा पातु योगिनी वारुणं दलम् ॥ १८ ॥
उत्तरस्थं दलं पातु पृथिवीमिन्द्रपालिता ।
चतुष्कोणं कामविद्या ब्रह्मविद्याब्जकोणकम् ॥ १९ ॥
अष्टशूलं सदा पातु सर्ववाहनवाहना ।
चतुर्भुजा सदा पातु डाकिनी कुलचञ्चला ॥ २० ॥
मेढ्रस्था मदनाधारा पातु मे चारुपङ्कजम् ।
स्वयम्भूलिङ्गं चार्वाका कोटराक्षी[३] ममासनम् ॥ २१ ॥
कदम्बवनमापातु कदम्बवनवासिनी ।

---

१. ब्राह्मणं पातु मे सदा—ग० । २. सर्वगम् —क० ।
३. कोटरे इवाक्षिणी यस्याः सा ।

वैष्णवी परमा माया पातु मे वैष्णवं पदम् ॥ २२ ॥

छेदिनीदेवी दक्षिण दल की, महातपा, चण्डा, चन्द्रघण्टा एवं योगिनी पश्चिम दल की रक्षा करें । उत्तर दल की, इन्द्र पालिता पृथ्वी (भूपुर) की, कामविद्या चतुष्कोणों की तथा ब्रह्मविद्या कमलरूप कोणों की रक्षा करें ॥ १८-१९ ॥

सर्ववाहन वाहना चतुर्भुजा कुलचञ्चला डाकिनी सदैव मेरे अष्टशूल की रक्षा करें । मेढ्र पर रहने वाली मदनाधारा मेरे सुन्दर कमल की रक्षा करें । चार्वाका स्वयंभू लिङ्ग की तथा कोटराक्षी मेरे आसन की रक्षा करें । कदम्ब वनवासिनी कदम्बवन की रक्षा करें तथा वैष्णवी परमा माया मेरे वैष्णव पद की रक्षा करें ॥ २०-२२ ॥

षड्दलं[१] राकिणी पातु राकिणी कामवासिनी।
कामेश्वरी कामरूपा श्रीकृष्णं पीतवाससम् ॥ २३ ॥
वनमालां वनदुर्गा शङ्खं मे शङ्खिनी[२] शिवा ।
चक्रं चक्रेश्वरी पातु कमलाक्षी गदां मम ॥ २४ ॥
पद्मं मे पद्मगन्धा च पद्ममाला मनोहरा ।
रादिलान्ताक्षरं[३] पातु लाकिनी लोकपालिनी ॥ २५ ॥
षड्दले[४] स्थितदेवांश्च पातु कैलासवासिनी।
अग्निवर्णा सदा पातु गणं[५] मे परमेश्वरी ॥ २६ ॥

कामवासना वाली राकिणी देवी षड्दल की तथा कामरूपा कामेश्वरी उस पर रहने वाले पीताम्बरधारी श्रीकृष्ण की रक्षा करें । मेरी वनमाला की रक्षा वनदुर्गा करें । शिवा शङ्खिनी शङ्ख की, चक्रेश्वरी चक्र की तथा कमलाक्षी मेरे गदा की रक्षा करें ॥ २३-२४ ॥

पद्मगन्धा पद्म की, मनोहरा पद्ममाला की, ब भ म य र ल इन छः अक्षरों की लोकपालिनी लाकिनी रक्षा करें । कैलास वासिनी षड्दल पर स्थित देवताओं की, अग्निवर्णा परमेश्वरी मेरे गणों की सदैव रक्षा करें ॥ २५-२६ ॥

मणिपूरं सदा पातु मणिमालाविभूषणा ।
दशपत्रं दशवर्णं डादिफान्तं त्रिविक्रमा ॥ २७ ॥
पातु नीला महाकाली भद्रा भीमा सरस्वती ।
अयोध्यावासिनी देवी महापीठनिवासिनी ॥ २८ ॥
वाग्भवाद्या महाविद्या कुण्डली कालकुण्डली ।
दशच्छदगतं[६] पातु रुद्रं रुद्रात्मकं मम ॥ २९ ॥

मणिमाला विभूषणा मणिपूर की सदा रक्षा करें । त्रिविक्रमा मणिपूर में रहने वाले ड ढ ण त थ द ध न प फ इन दश वर्णों से युक्त दश पत्ते वाले पद्म की रक्षा करें ॥ २७ ॥

नीला, महाकाली, भद्रा, भीमा, सरस्वती, अयोध्यावासिनी देवी, महापीठाधिवासिनी,

---

१. षड्वर्गम्—ग० । २. शक्तिक्षणी—ग० । ३. वादि—क० ।
४. षड्वर्गस्थितदेवीश्च—ग० । ५. जलम्—ग० । ६. शतम्—क० ।

वाग्भवाद्या, महाविद्या, कुण्डली और कालकुण्डली, दशच्छद पर रहने वाले मेरे रुद्रात्मक रुद्र की रक्षा करें ॥ २८-२९ ॥

सूक्ष्मात् सूक्ष्मतरा पातु सूक्ष्मस्थाननिवासिनी ।
राकिणी लोकजननी पातु कूटाक्षरस्थिता ॥ ३० ॥
तैजसं पातु नियतं रजकी राजपूजिता ।
विजया कुलबीजस्था तवर्गं तिमिरापहा ॥ ३१ ॥

(मेरे) सूक्ष्म से सूक्ष्म (पाप की) रक्षा करें । सूक्ष्म स्थान में रहने वाली, कूटाक्षर स्थिता, लोकजननी राकिणी नियमपूर्वक मेरे तेज की रक्षा करें । राजपूजिता, रजकी, कुलबीजस्था, तिमिरापहा विजया त वर्ग की रक्षा करें ॥ ३०-३१ ॥

मन्त्रात्मिका मणिग्रन्थिं भेदिनी पातु सर्वदा ।
गर्भदाता भृगुसुता पातु मां नाभिवासिनी ॥ ३२ ॥
नन्दिनी पातु सकलं कुण्डली कालकम्पिता ।
हृत्पद्मं पातु कालाख्या धूम्रवर्णा मनोहरा ॥ ३३ ॥

मन्त्रात्मिका भेदिनी सर्वदा मणिग्रन्थि की रक्षा करें । नाभि में रहने वाली, गर्भदाता भृगुसुता (लक्ष्मी) मेरी रक्षा करें । नन्दिनी, कालकम्पिता, कुण्डली सम्पूर्ण वस्तुओं की रक्षा करें । मनोहरा, धूर्मवर्णा एवं कालाख्या हृत्पद्म की रक्षा करें ॥ ३२-३३ ॥

दलद्वादशवर्णं च भास्करी भावसिद्धिदा ।
पातु मे परमा विद्या कवर्गं कामचारिणी ॥ ३४ ॥
चवर्गं चारुवसना व्याघ्रास्या टङ्कधारिणी ।
चकारं पातु कृष्णाख्या काकिनीं[1] पातु कालिका ॥ ३५ ॥
टकुराङ्गी टकारं मे जीवभावा महोदया ।
ईश्वरी पातु विमला मम हृत्पद्मवासिनी ॥ ३६ ॥
कर्णिकां कालसन्दर्भा योगिनी योगमातरम् ।
इन्द्राणी वारुणी पातु कुलमाला कुलान्तरम् ॥ ३७ ॥

भावसिद्धि प्रदान करने वाली भास्करी द्वादशवर्ण वाले दल की रक्षा करें । कामचारिणी परमा विद्या क वर्ग की रक्षा करें । मनोहर वेश भूषा वाली व्याघ्रमुखी टङ्कधारिणी च वर्ग की रक्षा करें । कृष्णा नाम वाली काकिनी कालिका चकार की रक्षा करें ॥ ३४-३५ ॥

जीवभाव को प्राप्त होने वाली, महान् अभ्युदय देने वाली, टकुराङ्गी टकार की रक्षा करें । मेरे हृदयरूप कमल में निवास करने वाली विमला ईश्वरी मेरी रक्षा करें । कालसंदर्भा कर्णिका की, योगिनी योगमाता की, इन्द्राणी, वारुणी एवं कुलमाला कुलान्तर की रक्षा करें ॥ ३६-३७ ॥

तारिणी शक्तिमाता च कण्ठवाक्यं सदावतु ।
विप्रचित्ता महोग्रोग्रा प्रभा दीप्ता घनासना ॥ ३८ ॥

---

१. काकानी—क० ।

वाक्स्तम्भिनी वज्रदेहा[१] वैदेही वृषवाहिनी ।
उन्मत्तानन्दचित्ता च क्षणोशीशा भगान्तरा ॥ ३९ ॥
मम षोडशपत्राणि पातु मातृतनुस्थिता[१] ।
सुरान् रक्षतु वेदज्ञा सर्वभाषा च कर्णिकाम् ॥ ४० ॥

तारिणी तथा शक्ति माता मेरे कण्ठगत वाक्य की सदा रक्षा करें । १. विप्रचित्ता, २. महोग्रा, ३. उग्रा, ४. प्रभा, ५. दीप्ता, ६. घनासना, ७. वाक्स्तम्भिनी, ८. वज्रदेहा, ९. वैदेही, १०. वृषवाहिनी, ११. उन्मत्ता, १२. आनन्दचित्ता, १३. क्षोणीशा (क्षणोशी?), १४. ईशा, १५. (?) तथा १६. भगान्तरा मेरे षोडश पत्रों की रक्षा करें । मातृतनुस्थिता देवताओं की रक्षा करें, वेदज्ञा सर्वभाषा कर्णिका की रक्षा करें ॥ ३८-४० ॥

ईश्वरार्द्धासनगता प्रपायान्मे सदाशिवम् ।
शाकम्भरी महामाया साकिनी पातु सर्वदा ॥ ४१ ॥
भवानी भवमाता च पायाद् भ्रूमध्यपङ्कजम् ।
द्विदलं व्रतकामाख्या अष्टाङ्गसिद्धिदायिनी ॥ ४२ ॥
पातु नासामखिलानन्दा मनोरूपा जगत्प्रिया ।
लकारं लक्षणाक्रान्ता सर्वलक्षणलक्षणा ॥ ४३ ॥
कृष्णाजिनधरा देवी क्षकारं पातु सर्वदा ।
द्विदलस्थं सर्वदेवं सदा पातु वरानना ॥ ४४ ॥

ईश्वर के आधे आसन पर रहने वाली मेरे सदाशिव की रक्षा करें । शाकम्भरी, महामाया एवं साकिनी मेरी सर्वदा रक्षा करें । भवानी, भवमाता मेरे भ्रूमध्यस्थ पङ्कज की रक्षा करें । अष्टाङ्ग सिद्धि देने वाली व्रतकामाख्या भ्रू पङ्कज में रहने वाले द्विदल की रक्षा करें ॥ ४१-४२ ॥

जगत्प्रिया, मनोरूपा एवं अखिलानन्दा मेरे नासिका की रक्षा करें । लक्षणाक्रान्ता एवं सर्वलक्षणलक्षणा लकार की रक्षा करें । कृष्णमृग का चर्म धारण करने वाली देवी सर्वदा क्षकार की रक्षा करें । वरानना देवी द्विदल पर रहने वाले सभी देवों की रक्षा करें ॥ ४३-४४ ॥

बहुरूपा विश्वरूपा हाकिनी पातु संस्थिता ।
हरापरशिवं पातु मानसं पातु पञ्चमी ॥ ४५ ॥
षट्चक्रस्था सदा पातु षट्चक्रकुलवासिनी ।
अकारादिक्षकारान्ता बिन्दुसर्गसमन्विता ॥ ४६ ॥
मातृकार्णा सदा पातु कुण्डली ज्ञानकुण्डली ।
देवकाली गतिप्रेमा पूर्णा गिरितटं शिवा ॥ ४७ ॥
उड्डीयानेश्वरी देवी सकलं पातु सर्वदा ।
कैलासपर्वतं पातु कैलासगिरिवासिनी ॥ ४८ ॥

---

१. मातुलसंस्थिता—ग० । २. नासा सुनानन्दा—क० ।

पातु मे [२]डाकिनीशक्तिर्लाकिनी राकिणी कला ।
साकिनी हाकिनी देवी षट्चक्रादीन् प्रपातु मे ॥ ४९ ॥

बहुरूपा, विश्वरूपा, संस्थिता हाकिनी, हरा परशिव की रक्षा करें तथा पञ्चमी मेरे मन की रक्षा करें । षट्चक्रो में रहने वाली एवं षट्चक्र कुल में निवास करने वाली बिन्दु तथा सर्ग अर्थात् विसर्ग युक्त अकारादि से लेकर क्षकारान्त वर्ण समुदाय की रक्षा करें ॥ ४५-४६ ॥

ज्ञान का कुण्डल धारण करने वाली कुण्डली मातृका वर्णों की रक्षा करें । देवकाली, गतिप्रेमा तथा पूर्ण शिवा गिरितट से रक्षा करें । उड्डीयानेश्वरी देवी सर्वदा हमारे सम्पूर्ण वस्तुओं की रक्षा करें । कैलास गिरिवासिनी देवी कैलास पर्वत की रक्षा करें । डाकिनी, लाकिनी, राकिणी, साकिनी, हाकिनी तथा कला ये छः शक्ति देवी हमारे षट्चक्रों की सर्वदा रक्षा करें ॥ ४७-४९ ॥

कैलासाख्यं सदा पातु पञ्चानन[१]तनूद्भवा ।
हिरण्यवर्णा रजनी चन्द्रसूर्याग्निभक्षिणी ॥ ५० ॥
सहस्रदलपद्मं मे सदा पातु कुलाकुला ।
सहस्रदलपद्मस्था दैवतं पातु खेचरी ॥ ५१ ॥
काली तारा षोडशाख्या मातङ्गी पद्मवासिनी ।
शशिकोटिगलद्रूपा पातु मे सकलं तमः ॥ ५२ ॥
वने[२] घोरे जले देशे युद्धे वादे[३] श्मशानके ।
सर्वत्र गमने ज्ञाने सदा मां पातु शैलजा ॥ ५३ ॥

पञ्चाननतनूद्भवा देवी कैलास नाम की रक्षा करें, हिरण्यवर्णा रजनी चन्द्र सूर्याग्नि भक्षिणी तथा कुलाकुला हमारे सहस्रदल पद्म की सदा रक्षा करें । खेचरी सहस्रदल पद्म पर रहने वाले समस्त देवताओं की रक्षा करें ॥ ५०-५१ ॥

काली, तारा, षोडशी, मातङ्गी, महालक्ष्मी जिनका स्वरूप करोड़ों चन्द्रमा के समान कान्तिमान् है वे मेरे समस्त अज्ञान रूप अन्धकार की रक्षा करें । घोर वन में, जल प्रदेश में, युद्ध में, विवाद में, श्मशान में और सभी स्थानों की यात्रा में तथा ज्ञान में शैलजा मेरी रक्षा करें ॥ ५२-५३ ॥

पर्वते विविधायासे विनाशे पातु कुण्डली ।
पादादिब्रह्मरन्ध्रान्तं सर्वाकाशं सुरेश्वरी ॥ ५४ ॥
सदा पातु सर्वविद्या सर्वज्ञानं सदा मम ।
नवलक्षमहाविद्या दशदिक्षु प्रपातु माम् ॥ ५५ ॥

पर्वत पर, अनेक प्रकार के आयास साध्य कार्य में तथा विनाश में कुण्डली हमारी रक्षा

---

१. मानं मन—ग० । २. रणे— क० ।
३. युद्धे वा देश शानेके—ग० ।

करें । पैर से लेकर ब्रह्मरन्ध्र पर्यन्त तथा सभी सर्वाकाश में सुरेश्वरी हमारी रक्षा करें । सर्वविद्या सदैव मेरे सर्वज्ञान की रक्षा करें । नव लाख की संख्या में होने वाली महाविद्या देवियाँ दशों दिशाओं में हमारी रक्षा करें ॥ ५४-५५ ॥

इत्येतत् कवचं देवि कुण्डलिन्याः प्रसिद्धिदम् ।
ये पठन्ति ध्यानयोगे योगमार्गव्यवस्थिताः ॥ ५६ ॥
ते यान्ति मुक्तिपदवीमैहिके नात्र संशयः ।
मूलपद्मे मनोयोगं कृत्वा हृदासनस्थितः ॥ ५७ ॥
मन्त्रं ध्यायेत् कुण्डलिनीं मूलपद्मप्रकाशिनीम् ।
धर्मोदयां दयारूढामाकाशस्थानवासिनीम्[१] ॥ ५८ ॥

फलश्रुति—प्रकृष्ट सिद्धि देने वाले कुण्डलिनी देवी के इस कवच का जो लोग योगमार्ग का पालन करते हुए ध्यान पूर्वक पाठ करते हैं वे इसी लोक में मुक्त हो जाते हैं इसमें संशय नहीं । मूलाधार के चतुर्दल पद्म में हृदयासन पर स्थित हो मन लगाकर मन्त्र का जप करते हुए मूलाधार पद्म को प्रकाशित करने वाली, धर्म की अभ्युदयकारिणी दयावती आकाश स्थान में रहने वाली कुण्डलिनी का ध्यान करना चाहिए ॥ ५६-५८ ॥

अमृतानन्दरसिकां विकलां सुकलां शिताम् ।
अजितां[२] रक्तरहितां विशक्तां रक्तविग्रहाम् ॥ ५९ ॥
रक्तनेत्रां कुलक्षिप्तां ज्ञानाञ्जनजयोज्ज्वलाम् ।
विश्वाकारां मनोरूपां मूले ध्यात्वा प्रपूजयेत् ॥ ६० ॥

वह कुण्डलिनी देवी अमृतानन्द की रसिक कला रहित (निराकार) सुकला (साकार) शुभ्रवर्णा, अजिता, राग रहित, विशेष आसक्ति वाली, रक्तवर्ण की विग्रह वाली, रक्तनेत्रा, कुल में निवास करने वाली, ज्ञान रूप अञ्जन से विजयोज्ज्वला, विश्वाकारा, मनोरूपा हैं । मूलाधार में स्थित इस प्रकार के स्वरूप वाली उन कुण्डलिनी का ध्यान कर साधक को पूजा करनी चाहिए ॥ ५९-६० ॥

यो योगी कुरुते एवं स सिद्धो नात्र संशयः ।
रोगी रोगात् प्रमुच्येत बद्धो मुच्येत बन्धनात् ॥ ६१ ॥
राज्यं श्रियमवाप्नोति राज्यहीनः पठेद्यदि ।
पुत्रहीनो लभेत् पुत्रं योगहीनो भवेद्वशी ॥ ६२ ॥

जो योगी ऐसा करता है वह सिद्ध हो जाता है इसमें संशय नहीं । इसका पाठ करने से रोगी रोग से मुक्त हो जाता है, बन्धन में पड़ा हुआ व्यक्ति बन्धन मुक्त हो जाता है । यदि राज्य भ्रष्ट इसका पाठ करे तो वह राज्य तो प्राप्त करता ही है श्री भी प्राप्त करता है पुत्रहीन पुत्र प्राप्त करता है, योग न जानने वाला जितेन्द्रिय हो जाता है ॥ ६१-६२ ॥

---

१. वाहिनीम्—ग० । —आकाशस्थाने वसति तच्छीला ताम् ।
२. असिताम्—ग० । —कृष्णामित्यर्थः ।
३. शिखाकाराम्—ग० ।

कवचं धारयेद्यस्तु शिखायां[२] दक्षिणे भुजे ।
वामा वामकरे धृत्वा सर्वाभीष्टमवाप्नुयात् ॥ ६३ ॥
स्वर्णे रौप्ये तथा ताम्रे स्थापयित्वा प्रपूजयेत् ।
सर्वदेशे सर्वकाले पठित्वा सिद्धिमाप्नुयात् ॥ ६४ ॥
स भूयात् कुण्डलीपुत्रो नात्र कार्या विचारणा ॥ ६५ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिविद्याप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे कन्दवासिनीकवचं नाम त्रयस्त्रिंशः[१] पटलः ॥ ३३ ॥

— ❖ —

जो साधक शिखा में अथवा दक्षिण भुजा में इस कवच को धारण करता है अथवा स्त्री बाई भुजा में धारण करे तो उनके सारे अभीष्टों की तत्काल सिद्धि हो जाती है । स्वर्ण के या चाँदी के अथवा ताम्रपात्र में देवी की स्थापना कर पूजा करनी चाहिए । सभी स्थान पर सभी काल में (कवच) पढ़ने से सिद्धि प्राप्त होती है । ऐसा पुरुष कुण्डली का पुत्र बन जाता है, इसमें विचार की आवश्यकता नहीं ॥ ६३-६५ ॥

॥ श्री रुद्रयामल के उत्तरतन्त्र के महातन्त्रोद्दीपन के सिद्धि विद्या प्रकरण में षष्टचक्र प्रकाश में भैरवी भैरव संवाद में कन्दवासिनी कवच नामक तैंतीसवें पटल की डा० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ३३ ॥

— ❖ —

१. पञ्चत्रिंशत्—क० ।

अथ चतुस्त्रिंशः पटलः

आनन्दभैरवी उवाच[1]

अथ भेदान् प्रवक्ष्यामि हिताय जगतां प्रभो ।
निर्मलात्मा शुचिः श्रीमान् ध्यानात्मा[2] च सदाशिवः ॥ १ ॥

आनन्दभैरवी ने कहा—हे प्रभो ! इसके अनन्तर जगत् के हित के लिए (योग को) कहती हूँ । सदाशिव निर्मलात्मा शुचि श्रीमान् ध्यानात्मा हैं ॥ १ ॥

स मोक्षगो ज्ञानरूपी स षट्चक्रार्थभेदकः[3] ।
त्रिगुणज्ञानविकलो[4] न पश्यति दिवानिशम् ॥ २ ॥
दिवारात्र्यज्ञानहेतोर्न पश्यति कलेवरम् ।
इति कृत्वा हि मरणं नृणां जन्मनि जन्मनि ॥ ३ ॥

वही मोक्ष देने वाले ज्ञान स्वरूप तथा षट्चक्रों का भेदन करने वाले हैं । किन्तु मनुष्य दिन रात त्रिगुणात्मक ज्ञान (सत्त्व, रज, तम) से विकल रहने के कारण उनको नहीं देख पाता । दिन रात का ज्ञान न रहने के कारण वह अपने शरीर का भी ध्यान नहीं करता । इसी कारण वह प्रत्येक जन्म में मृत्यु को प्राप्त होता रहता है ॥ २-३ ॥

तज्जन्मक्षयहेतोश्च[5] मम योगं समभ्यसेत् ।
पञ्चस्वरं[6] महायोगं कृत्वा स्यादमरो नरः ॥ ४ ॥

इसलिए जन्म के क्षय के लिए हमारे द्वारा बताए गए योग का अभ्यास करना चाहिए। उस महायोग का नाम पञ्चस्वर है, जिसके करने से मनुष्य अमर हो जाता है ॥ ४ ॥

तत्प्रकारं शृणुष्वाथ[7] वल्लभ प्रियदर्शन ।
तव भावेन[8] कथये न कुत्र वद शङ्कर ॥ ५ ॥

हे वल्लभ ! हे प्रिय दर्शन ! हे शङ्कर ! अब उस पञ्चस्वर नामक महायोग के प्रकार को सुनिए । मैं आपके ऊपर स्नेह के कारण उसे कहती हूँ । अतः उसे अन्यत्र प्रकाशित न कीजिये ॥ ५ ॥

---

१. श्रीभैरवी उवाच—क० । २. ध्यानाचार—ग० । ३. विभेदकः—ग० ।
४. त्रिगुणो विकुको देवोऽनुपश्यति दिवानिशम्—ग० ।
५. तज्जन्य—ग० ।—तज्जन्मनः क्षयस्य हेतुः, तस्येत्यर्थः ।
६. पञ्चामरा—क० । ७. प्राण—ग० ।
८. तदभावेन कायेन कुत्रापि वद शङ्कर—ग० ।

यदि लोकस्य निकटे कथ्यते योगसाधनम्[1] ।
विघ्ना घोरा वसन्त्येव गात्रे योगादिकं कथम् ॥ ६ ॥
योगयोगाद् भवेन्मोक्षः[2] तत्प्रकाशाद्विनाशनम् ।
अतो न दर्शयेद् योगं यदीच्छेदात्मनः शुभम् ॥ ७ ॥

यदि लोगों के सामने योग साधन प्रकाशित हो जाता है तो साधक को महान् विघ्न होने लगते हैं फिर शरीर से किस प्रकार योग संभव हो सकता है । योग से युक्त हो जाने पर मोक्ष प्राप्ति संभव है । यदि योग प्रकाशित हो जाता है तो साधक का विनाश हो जाता है । इसलिए यदि अपना कल्याण चाहे तो अपना योग किसी के सामने प्रगट न करे ॥ ६-७ ॥

कृत्वा पञ्चामरा[3] योगं प्रत्यहं भक्तिसंयुतः ।
पठेत् श्रीकुण्डलीदेवीसहस्रनाम चाष्टकम् ॥ ८ ॥
महायोगी भवेन्नाथ षण्मासे नात्र संशयः ।
पञ्चमे वा[4] योगविद्या सर्वविद्याप्रकाशिनी ॥ ९ ॥

पञ्चामरयोग प्रतिदिन भक्तिपूर्वक निष्पन्न कर श्री कुण्डली देवी के एक हजार आठ नाम का पाठ करना चाहिए । हे नाथ ! ऐसा करने से साधक छः महीने में अथवा पाँच महीने में महायोगी बन जाता है इसमें संशय नहीं । वस्तुतः योगविद्या समस्त विद्याओं को प्रकाशित करने वाली हैं ॥ ८-९ ॥

कृत्वा पञ्चस्वरा सिद्धिं ततोऽष्टाङ्गादिधारणा ।
आदौ पञ्चस्वरा सिद्धिस्ततोऽन्या योगधारणा ॥ १० ॥

पञ्चस्वरों की सिद्धि कर तब अष्टाङ्ग योग वर्णित धारणा करनी चाहिए । अर्थात् पञ्चस्वर की सिद्धि प्रथमतः करके, तदनन्तर अन्य योग धारण का विधान कहा गया है ॥ १० ॥

तत्प्रकारं प्रवक्ष्यामि सावधानावधारय ।
अहं जानामि संसारे केवलं योगपण्डितान् ॥ ११ ॥
तत् साक्षिणी ह्यहं नाथ भक्तानामुदयाय च ।
इदानीं कथये तेऽहं मम वा योगसाधनम् ॥ १२ ॥

हे नाथ ! उसका प्रकार कहती हूँ, सावधान होकर धारण कीजिए । क्योंकि सभी योग पण्डितों में केवल मैं ही उसका विधान जानती हूँ । हे नाथ ! मैं उसकी साक्षिणी हूँ, इसलिए इस समय भक्तों के कल्याण के लिए उसे कहती हूँ, क्योंकि योग साधन आपके पास है अथवा हमारे पास है ॥ ११-१२ ॥

एवं कृत्वा नित्यरूपी योगानामष्टधा यतः ।
ततः कालेन पुरुषः सिद्धिमाप्नोति निश्चितम् ॥ १३ ॥

---

१. योगधारणम्—ग० । २. योगानां योगस्तस्मादित्यर्थः ।
३. स्वरा—ग० । ४. स्वरा—ग० ।

इसे नित्य करके तब अष्टाङ्ग योग करना चाहिए । फिर तो कुछ काल के अनन्तर पुरुष को निश्चित रूप से सिद्धि प्राप्त होती है ॥ १३ ॥

पञ्चामरा विधानानि क्रमेण शृणु शङ्कर ।
नेतीयोगं हि सिद्धानां महाकफविनाशनम् ॥ १४ ॥
दन्तियोगं[1] प्रवक्ष्यामि[2] पश्चाद् हृदयभेदनात् ।
धौतीयोगं ततः पश्चात् सर्वमलविनाशनात्[3] ॥ १५ ॥

हे शङ्कर ! अब पञ्चामर विधान को एक एक के क्रम से सुनिए ! **नेती योग** सिद्धों के समस्त कफ को विनष्ट करने वाला है । उसके पश्चात् हृदय का भेदन करने वाले **दन्तीयोग** कहूँगी । इसके पश्चात् सम्पूर्णमल के विनाश करने वाले **धौती योग** कहूँगी ॥ १४-१५ ॥

नेउलीयोगमपरं सर्वाङ्गोदरचालनात् ।
क्षालनं परमं योगं नाडीनां क्षालनात्[4] स्मृतम् ॥ १६ ॥
एतत् पञ्चामरायोगं यमिनामतिगोचरम्[5] ।
यमनियमकाले[6] तु पञ्चामराक्रियां यजेत् ॥ १७ ॥

फिर सर्वाङ्ग तथा उदर को संचालित करने वाले **नेउली योग** इसके बाद **क्षालन** नामक परमयोग को कहूँगी । नाडियों का प्रक्षालन करने के कारण इसका नाम क्षालन हैं । यह पञ्चामर योग संयम करने वाले योगियों की जानकारी से बाहर है । इसलिए यम नियम के समय योगी को पञ्चामर क्रिया करनी चाहिए ॥ १६-१७ ॥

अमरा साधनादेव[7] अमरत्वं लभेद् ध्रुवम् ।
एतत्करणकाले च तथा पञ्चामरासनम्[8] ॥ १८ ॥
पञ्चामराभक्षणेन[9] अमरो योगसिद्धिभाक् ।

अमरा के साधन से साधक अवश्य ही अमरता प्राप्त कर लेता है, इसके करने के समय पञ्चामरासन तथा पञ्चामरा का भक्षण करने से योग की सिद्धि प्राप्त हो जाती है और साधक अमर हो जाता है ॥ १८-१९ ॥

तानि द्रव्याणि वक्ष्यामि तवाग्रे परमेश्वर ॥ १९ ॥
येन हीना न सिद्ध्यन्ति कल्पकोटिशतेन च ।
एका तु अमरा दूर्वा तस्या ग्रन्थिं समानयेत् ॥ २० ॥

हे परमेश्वर ! अब भक्षण के लिए आपके आगे उन पञ्चामर द्रव्यों को कहती हूँ ।

---

१. दन्तीं—क० । २. ततः पश्चात् हृदयग्रन्थिभेदनात्—ग० ।
३. विनाशनम्—ग० । ४. क्षालनम्—ग० ।
५. स्वरा—ग० । ६. यमाश्च नियमाश्च यमनियमाः, तेषां काले इति भावः ।
७. त्वरक्रियाञ्चरेत्—ग० । ८. पञ्चाखर—ग० । ९. पञ्चमद्या—ग० ।

जिनके बिना सेवन किए कोई सैकड़ों करोड़ कल्प में भी सिद्ध नहीं हो सकता । एक **अमरा दूर्वा** है उसकी ग्रन्थि ले आनी चाहिए ॥ १९-२० ॥

अन्या तु विजया देवी सिद्धिरूपा सरस्वती ।
अन्या तु बिल्वपत्रस्था शिवसन्तोषकारिणी ॥ २१ ॥
अन्या तु योगसिद्ध्यर्थे निर्गुण्डी[1] चामरा मता ।
अन्या तु कालितुलसी श्रीविष्णोः परितोषिणी ॥ २२ ॥

दूसरी अन्य **विजया** देवी हैं जो सिद्धि स्वरूपा सरस्वती हैं, तीसरी **अमरा बिल्वपत्र** में रहने वाली है, जो सदाशिव को तृप्त करने वाली हैं । इसके अतिरिक्त योगसिद्धि के लिए चौथी **निर्गुण्डी अमरा** कही गई है । इसके बाद पाँचवी अमरा **काली तुलसी** हैं, जो श्री विष्णु को संतुष्ट करने वाली हैं ॥ २१-२२ ॥

एताः पञ्चस्वराः ज्ञेया योगसाधनकर्मणि ।
एतासां द्विगुणं ग्राह्यं विजयापत्रमुत्तमम्[2] ॥ २३ ॥

इन्हें पञ्चस्वरा भी कहते हैं, योगसाधन कर्म में इनका उपयोग करना चाहिए । इन सभी का दुगुना उत्तम विजया पत्र ग्रहण करना चाहिए ॥ २३ ॥

ब्राह्मणी क्षत्रिया वैश्या शूद्राः सर्वत्र पूजिताः ।
एतद्द्रव्याणि सङ्ग्राह्य भक्षयेच्चूर्णमुत्तमम् ॥ २४ ॥
तच्चूर्णभक्षसमये एतन्मन्त्रादिपञ्चमम् ।
पठित्वा भक्षणं कृत्वा नरो मुच्येत सङ्कटात् ॥ २५ ॥

ब्राह्मणी, क्षत्रिया, वैश्या और शूद्रा जाति की सभी विजया सर्वत्र पूजनीय हैं । इन द्रव्यों को एकत्रित कर इनका श्रेष्ठ चूर्ण भक्षण करना चाहिए । इनके चूर्ण को भक्षण करते समय इन पाँच मन्त्रों को पढ़कर भक्षण करना चाहिए ऐसा करने से मनुष्य सङ्कटों से छूट जाता है ॥ २४-२५ ॥

ॐ त्वं दूर्वेऽमरपूज्ये त्वं अमृतोद्भवसम्भवे ।
अमरं मां सदा भद्रे कुरुष्व नृहरिप्रिये ॥ २६ ॥
ॐ दूर्वायै नमः स्वाहा इति दूर्वायाः ।
पुनर्विजयामन्त्रेण शोधयेत् सर्वकन्यकाः ।
ॐ संविदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदाऽनघे ।
भैरवाणां च तृप्त्यर्थे पवित्रा भव सर्वदा ॥ २७ ॥
ॐ ब्राह्मण्यै नमः स्वाहा ।
ॐ सिद्धिमूलकरे देवि हीनबोधप्रबोधिनि ।

---

१. नृत्यन्ती—ग० ।
२. विजयाया भङ्गायाः पत्रम् । भङ्गा इति तु 'भाँग' इति लोके प्रसिद्धम् ।

राजपुत्रीवशङ्करि शूलकण्ठत्रिशूलिनि ॥ २८ ॥
ॐ क्षत्रियायै नमः स्वाहा ।
ॐ अज्ञानेन्धनदीप्ताग्नि ज्ञानाग्निज्ज्वालरूपिणि[१] ।
आनन्दाद्याहुतिं कृत्वा[२] सम्यक्ज्ञानं प्रयच्छ मे ॥ २९ ॥
ह्रीं ह्रीं वैश्यायै नमः स्वाहा
ॐ नमस्यामि नमस्यामि योगमार्गप्रदर्शिनि ।
त्रैलोक्यविजये मातः समाधिफलदा भव ॥ ३० ॥
श्रीं शूद्रायै नमः स्वाहा ।
ॐ काव्यसिद्धिकरी[३] देवी बिल्वपत्रनिवासिनि ।
अमरत्वं सदा देहि शिवतुल्यं कुरुष्व माम् ॥ ३१ ॥
ॐ शिवदायै नमः स्वाहा ।
निर्गुण्डि परमानन्दे योगानामधिदेवते ।
सा मां रक्षतु अमरे भावसिद्धिप्रदे नमः ॥ ३२ ॥
ॐ शोकापहायै नमः स्वाहा ।
ॐ विष्णोः प्रिये महामाये महाकालनिवारिणी[४] ।
तुलसी मां सदा रक्ष मामेकममरं कुरु ॥ ३३ ॥
ॐ ह्रीं श्रीं ऐं क्लीं अमरायै नमः स्वाहा ।
पुनरेव समाकृत्य सर्वासां शोधनञ्चरेत् ॥ ३४ ॥

१. 'ॐ त्वं दूर्वे ... ... नमः स्वाहा' पर्यन्त मन्त्र दूर्वा के लिए है । फिर विजया मन्त्र पढ़कर ब्राह्मण, क्षत्रिय, वैश्य तथा शूद्र जाति वाली विजया कन्याओं का इस प्रकार शोधन करें ।

२. 'ॐ सम्विदे ... ... ॐ ब्राह्मण्यै नमः स्वाहा' पर्यन्त मन्त्र पढ़कर ब्राह्मण जाति वाली विजया का संशोधन करे । तदनन्तर 'ॐ सिद्धिमूल करे ... ... क्षत्रियायै नमः स्वाहा' पर्यन्त मन्त्र पढ़कर क्षत्रिय जाति वाली विजया का शोधन करे । इसके बाद 'ॐ अज्ञानेन्धन ... ... वैश्यायै नमः स्वाहा' पर्यन्त मन्त्र पढ़कर वैश्या जाति वाली विजया का शोधन करना चाहिए । इसके पश्चात् 'ॐ नमस्यामि ... ... शूद्रायै नमः स्वाहा' पर्यन्त मन्त्र पढ़कर शूद्रा जाति वाली विजया का संशोधन करे ।

३. तदनन्तर 'ॐ काव्यसिद्धिकरी ... .. शिवदायै नमः स्वाहा' पर्यन्त मन्त्र पढ़कर बिल्वपत्र का संशोधन करे ।

४. फिर 'निर्गुण्डि परमानन्दे ... ... शोकापहायै नमः स्वाहा' पर्यन्त मन्त्र पढ़ कर निर्गुण्डी का संशोधन करे ।

५. फिर 'ॐ विष्णो. प्रिये ... ... मामेकममरं कुरु' पर्यन्त पढ़कर काली तुलसी का

---

१. ज्ञानाग्निज्वल—ग० । २. दत्वा—ग० ।

३. काम—ग० ।

४. कालजालविधारिणी—ग० ।—महाकालं निवारयति, तच्छीला ।

संशोधन करे । इसके बाद 'ॐ ह्रीं श्रीं ऐं क्लीं अमरायै नमः स्वाहा' पर्यन्त मन्त्र पढ़कर सभी को एक में मिलाकर सभी का संशोधन करे ॥ २६-३४ ॥

ॐ अमृते अमृतोद्भवेऽमृतवर्षिणि अमृतमाकर्षय ।
आकर्षय सिद्धिं देहि स्वाहा ।
धेनुमुद्रां योनिमुद्रां मत्स्यमुद्रां प्रदर्शयेत् ।
तत्त्वमुद्राक्रमेणैव तर्पणं कारयेद् बुधः ॥ ३५ ॥

इसके बाद 'ॐ अमृते अमृतोद्भवेऽमृतवर्षिणि अमृतमाकर्षय आकर्षय सिद्धिं देहि स्वाहा' पर्यन्त मन्त्र पढ़कर धेनु मुद्रा,. योनिमुद्रा तथा मत्स्य मुद्रा प्रदर्शित करे । तदनन्तर तत्त्व मुद्रा के क्रम से बुद्धिमान् पुरुष तर्पण भी करावे ॥ ३५ ॥

अमन्त्रकं सप्तवारं[१] गुरोर्नाम्ना शिवेऽर्पयेत् ।
सप्तकञ्च स्वेष्टदेव्या नाम्ना शुद्धिं[२] प्रदापयेत् ॥ ३६ ॥
ततस्तर्पणमाकुर्यात्तर्पयामि नमो नमः ।
एतद्वाक्यस्य पूर्वे च इष्टमन्त्रं समुच्चरेत् ॥ ३७ ॥

उस चूर्ण को बिना मन्त्र पढ़े केवल सात बार गुरु का नाम लेकर सदाशिव को अर्पण करे । तदन्तर सात बार अपनी इष्टदेवी का नाम ले कर शुद्धि करवावे । इसके बाद 'तर्पयामि नमो नमः' मन्त्र पढ़कर तर्पण करें । किन्तु इसके पहले अपने इष्ट देवता का मन्त्र उच्चारण करे ॥ ३६-३७ ॥

परदेवतां समुद्धृत्य सर्वाद्यप्रणवं स्मृतम् ।
ततो मुखे प्रजुहुयात् कुण्डलीनामपूर्वकम् ॥ ३८ ॥

फिर सर्वाद्य प्रणव, तदनन्तर परदेवता, फिर कुण्डली का नाम ले कर अपने मुख में उस चूर्ण की आहुति देवे । मन्त्र का स्वरूप इस प्रकार है 'ॐ परदेवता मे कुण्डल्यै स्वाहा' ॥ ३८ ॥

ॐ ऐं वद वद वाग्वादिनि मम जिह्वाग्रे स्थिरीभव ।
सर्वसत्त्ववशङ्करि[३] शत्रुकण्ठत्रिशूलिनि स्वाहा ।
एतज्जप्त्वा साश्रमी[४] च वशी साधकसत्तमः ।
पञ्चामरा[५] शासनज्ञः कुलाचारविधिप्रियः ॥ ३९ ॥
स्थिरचेता भवेद्योगी यदि पञ्चामरागतः[६] ।

इसके बाद 'ॐ ऐं वद वद वाग्वादिनि मम जिह्वाग्रे स्थिरीभव सर्वसत्त्ववशङ्करी शत्रुकण्ठत्रिशूलिनि स्वाहा' मन्त्र का जप करे । आश्रम युक्त जितेन्द्रिय साधक इस मन्त्र

---

१. सप्तबारमिष्ट—ग० । २. सिद्धिम्—ग० ।
३. स्वर—ग० । ४. यशस्वी—ग० ।
५. पञ्चस्वरा साधकज्ञः—ग० । ६. पञ्चमद्यागतः—ग० ।

का जप कर पञ्चामरा के शासन को जानकार, कुलाचार विधि मे प्रेम रखने वाला, स्थिर चित्त योगी तथा पञ्चाङ्ग का सेवक हो जाता है ॥ ३९-४० ॥

नेतीयोगविधानानि शृणु कैलासपूजिते ॥ ४० ॥
येन सर्वमस्तकस्थकफानां दहनं भवेत् ।

अब हे कैलास पूजित ! नेती के योग के विधान को सुनिए । इसके करने से मस्तक में रहने वाले समस्त कफ जल जाते हैं ॥ ४०-४१ ॥

सूक्ष्मसूत्रं दृढतरं प्रदद्यात् नासिकाबिले[१] ॥ ४१ ॥
मुखरन्ध्रे समानीय सन्धानेन समानयेत् ।
पुनः पुनः सदा योगी यातायातेन[२] घर्षयेत् ॥ ४२ ॥

अत्यन्त पतला किन्तु परिपुष्ट सूत्र नासिका के बिल में डालना चाहिए । फिर उसे मुख के छिद्र से बाहर निकाल कर पुनः पुनः यातायात द्वारा घर्षण करना चाहिए ॥ ४१-४२ ॥

क्रमेण वर्द्धनं कुर्यात् सूत्रस्य परमेश्वर ।
नेतीयोगेन नासाया रन्ध्रं निर्मलकं भवेत् ॥ ४३ ॥
वायोर्गमनकाले तु महासुखमिति प्रभो ।
दन्तीयोगं ततः पश्चात्कुर्यात् साधकसत्तमः ॥ ४४ ॥

हे परमेश्वर ! क्रमशः क्रमशः सूत्र को बढ़ाता रहे । इस प्रकार के नेती योग से नासा का छिद्र सर्वथा निर्मल हो जाता है । जब नासिका छिद्र से वायु का सञ्चार होता है तब, हे प्रभो ! नेती करने वाले को महासुख की अनुभूति होती है । नेती योग के बाद उत्तम साधक दन्ती योग करे ॥ ४३-४४ ॥

दन्तधावनकाले तु योगमेतत् प्रकाशयेत् ।
दन्तधावनकाष्ठञ्च सार्धहस्तैकसम्भवम् ॥ ४५ ॥
नातिस्थूलं नातिसूक्ष्मं नवीनं नम्रमुत्तमम् ।
अपक्वं यत्नतो ग्राह्यं मृणालसदृशं तरुम् ॥ ४६ ॥

यह योग दन्तधावन काल में प्रदर्शित करना चाहिए । दन्तधावन वाला काष्ठ लगभग डेढ़ हाथ का बनाना चाहिए । जो अत्यन्त मोटा न हो और अत्यन्त पतला भी न हो । सर्वथा नवीन कोमल और उत्तम होना चाहिए । यह बहुत पका भी न हो, मृणाल के सदृश न टूटने वाले पेड़ का होना चाहिए ॥ ४५-४६ ॥

गृहीत्वा दन्तकाष्ठं वै योगी[३] नित्यं प्रभक्षयेत् ।
दन्तकाष्ठाग्रभागञ्च कनिष्ठाङ्गुलिपर्वतः ॥ ४७ ॥
एवं दन्तावलिभ्याञ्च चर्वणं सुन्दरं चरेत् ।

---

१. नासिकाया बिलं छिद्रम् ।
२. यातं चायातं चानयोः समाहारस्तेनेत्यर्थः ।
३. तत् क्रमेण तु—ग० ।

ततः प्रक्षाल्य तोयेन शनैर्गिलनमाचरेत् ॥ ४८ ॥
शनैः शनैः प्रकर्त्तव्यं कायावाक्चित्तशोधनम् ।

योगी इस प्रकार के दन्त काष्ठ को लेकर नित्य उसको चबाना चाहिए । दन्त काष्ठ का अग्रभाग कानी अंगुली के पर्व के समान होना चाहिए । ऐसे दन्तकाष्ठ को दाँतों के बल चबाते रहना उत्तम प्रक्रिया है, उसे जल से धो कर धीरे धीरे निगलते रहना चाहिए । इस प्रकार धीरे धीरे शरीर, वाणी एवं चित्त का शोधन करना चाहिए ॥ ४७-४९ ॥

यावदभिन्नकाष्ठाग्रं[१] नाभिमूले त्वनाक्षतम् ॥ ४९ ॥
तावत् सूक्ष्मतरं ग्राह्यमवश्यं प्रत्यहञ्चरेत् ।
हृदये जलचक्रञ्च यावत् खण्डं न जायते ॥ ५० ॥
तावत्कालं सर्वदिने प्रभाते दन्तधावनम्[२] ।
हृदये कफभाण्डस्य खण्डनं जायते ध्रुवम् ॥ ५१ ॥

जब तक काष्ठ का अग्रभाग बिना टूटे हुए बिना क्षति के नाभिमूल में पहुँच न जाय तब तक सूक्ष्मतर दन्त धावन प्रतिदिन आवश्यक रूप से करते रहना चाहिए । जब तक हृदय में रहने वाला जलचक्र खण्डित न हो, तब तक प्रतिदिन प्रभात समय में उक्त दन्तधावन करें, जिससे हृदय में स्थित कफभाण्ड निश्चित रूप से खण्डित हो जाए ॥ ४९-५१ ॥

पवनागमने सौख्यं प्रयाति योगनिर्भरम् ।
खेचरत्वं[३] स लभताम् अम्लानञ्च कटूद्भवम् ॥ ५२ ॥
मिष्टान्नं शाकदध्यन्नं द्विवारं रात्रिभोजनम् ।
अवश्यं सन्त्यजेद्योगी यदि योगमिहेच्छति ॥ ५३ ॥

ऐसा करने से वायु के मुख से वायु का आना सुखपूर्वक होता है, वह आकाश गमन में समर्थ हो जाता है ऐसा करने वाले योगी को खट्टा, कडुआ, मीठा, शाक तथा दधि से मिला हुआ अन्न, दो बार भोजन तथा रात्रि भोजन अवश्यमेव त्याग देना चाहिए ॥ ५२-५३ ॥

एकभागं मुद्गबीजं द्विभागं तण्डुलं मतम् ।
उत्तमं पाकमाकृत्य घृतदुग्धेन भक्षयेत् ॥ ५४ ॥
अथवा केवलं दुग्धं तर्पणं कारयेद् बुधः ।
कुण्डलीं कुलरूपाञ्च दुग्धेन परितर्पयेत् ॥ ५५ ॥

यदि वह योग चाहता हो तो एक भाग मूँग का बीज, उसका दूना चावल मिलाकर उत्तम पाक बनावे, फिर घृत मिश्रित दूध से उसका भक्षण करें । अथवा केवल

---

१. यावन्नायाति काष्ठाग्रं नाभिमूले त्वनाकुलम्—क० ।—न भिन्नं छिन्नं यत् काष्ठं तस्य अग्रमित्यर्थः ।

२. वद् धारणम्—ग० ।

३. खेचरान्नं लवणजं अम्लान्नं कटूद्भवम् —क० ।

दूध से ही बुद्धिमान् साधक उदर की तृप्ति करे क्योंकि कुलरूपा कुण्डलिनी दुग्ध से ही संतुष्ट रहती हैं ॥ ५२-५५ ॥

कुण्डलीतर्पणं योगी यदि जानाति शङ्कर ।
अनायासेन योगी स्यात् स ज्ञानीन्द्रो भवेद्ध्रुवम् ॥ ५६ ॥

हे शङ्कर ! यदि योगी कुण्डली का तर्पण जान ले तो वह अनायास ही योगी बन जाता है और निश्चित रूप से ज्ञानियों में सर्वश्रेष्ठ हो जाता है ॥ ५६ ॥

यमनियमपरो यः कुण्डलीसेवनस्थो
विभवविरहितो वा भूरिभाराश्रितो[१] वा ।
स भवति परयोगी सर्वविद्यार्थवेद्यो
गुणगणगगनस्थो मुक्तरूपी गणेशः ॥ ५७ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे भैरवभैरवीसंवादे पञ्चामरासाधनं[२] नाम चतुस्त्रिशः[३] पटलः ॥ ३४ ॥

— ❖ —

जो यम नियम का अभ्यास करते हुए कुण्डलिनी का सेवन करता है, वह भले ही वैभव रहित हो अथवा भूमिभार से आक्रान्त हो, वह अवश्य ही सर्वश्रेष्ठ योगी बन जाता है, सभी विद्याओं का अर्थ उसे भासित होने लगता है और गुणगणों में सबसे ऊँचा मुक्त स्वरूप तथा गणेश बन जाता है ॥ ५७ ॥

॥ श्री रुद्रयामल के उत्तरतन्त्र में महातन्त्रोद्दीपन के षट्चक्रप्रकाश प्रकरण में भैरवीभैरव संवाद में चौंतीसवें पटल की डा० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ३४ ॥

— ❖ —

---

१. भूति—ग० ।—भूरिभारमाश्रित इत्यर्थः ।
२. पञ्चस्वरायोग—ग० ।   ३. षट्त्रिंशः—क० ।

अथ पञ्चत्रिंशः पटलः

आनन्दभैरवी उवाच

अथ वक्ष्ये महाकाल रहस्यं चातिदुर्लभम् ।
यस्य विज्ञानमात्रेण नरो ब्रह्मपदं लभेत् ॥ १ ॥
आकाशे तस्य राज्यञ्च खेचरेशो भवेद् ध्रुवम् ।
धनेशो भवति क्षिप्रं ब्रह्मज्ञानी भवेन्नरः ॥ २ ॥

श्री आनन्दभैरवी ने कहा—हे महाकाल ! अब अत्यन्त दुर्लभ रहस्य कहती हूँ जिसके जान लेने मात्र से मनुष्य ब्रह्मपद प्राप्त कर लेता है । उसका राज्य आकाश मण्डल में हो जाता है अवश्यमेव वह खेचरगामी हो जाता है । ऐसा मनुष्य शीघ्र ही धनपति बन जाता है तथा ब्रह्मज्ञानी हो जाता है ॥ १-२ ॥

योगानामधिपो राजा वीरभद्रो यथाकविः ।
विरिञ्चिगणनाथस्य[१] कृपा भवति सर्वदा ॥ ३ ॥

वह वीरभद्र के समान योगेश्वर तथा शुक्र के समान हो जाता है । उसके ऊपर सर्वदा विरिञ्चि (ब्रह्मा) तथा गणनाथ (गणेश) की कृपा रहती है ॥ ३ ॥

यः करोति पञ्चयोगं स स्यादमरविग्रहः ।
धौतीयोगं प्रवक्ष्यामि यत्कृत्वा निर्मलो भवेत् ॥ ४ ॥

जो पञ्चयोग (नेती आदि) की क्रिया करता है वह शरीर से अमर हो जाता है । अब मैं धौत योग कहूँगी, जिसके करने से साधक निष्पाप हो जाता है ॥ ४ ॥

अत्यन्तगुह्यं योगं च समाधिकरणं नृणाम् ।
यदि न कुरुते योगं तदा मरणमाप्नुयात् ॥ ५ ॥

यह योग अत्यन्त, गुप्त है, मनुष्यों को समाधि प्रदान करता है । यदि इस योग का अनुष्ठान नहीं किया गया तो मृत्यु की प्राप्ति होती है ॥ ४-५ ॥

धौतीयोगं विना नाथ कः सिद्ध्यति महीतले ।
सूक्ष्मात्सूक्ष्मतरं वस्त्रं द्वात्रिंशद्धस्तमानतः[२] ॥ ६ ॥

---

१. गोविन्द—क० ।   २. कुम्भमानकम्—ग० ।

एकहस्तक्रमेणैव यः करोति शनैः शनैः ।
यावद् द्वात्रिंशद्धस्तञ्च[१] तावत्कालं क्रियाञ्चरेत् ॥ ७ ॥

हे नाथ ! इस भूतल पर धौती योग के बिना कौन सिद्ध हो सकता है ? पतला से पतला वस्त्र जो प्रमाण में ३२ हाथ लम्बा हो उसे ग्रहण करे । एक एक हाथ के क्रम से धीरे-धीरे जो प्रतिदिन निगलता है जब तक ३२ हाथ का निगलन न कर ले तब तक इस क्रिया को करते रहना चाहिए ॥ ६-७ ॥

एतत्क्रिया[२] प्रयोगेण योगी भवति तत्क्षणात् ।
क्रमेण मन्त्रसिद्धिः स्यात् कालजालवशं नयेत् ॥ ८ ॥
एतन्मध्ये चासनानि शरीरस्थानि चाचरेत् ।
दृढासने योगसिद्धिरिति तन्त्रार्थनिर्णयः[३] ॥ ९ ॥

इस क्रिया के अनुष्ठान से साधक तत्क्षण योगी बन जाता है, उसे मन्त्र की सिद्धि हो जाती है तथा वह काल समूहों को अपने वश में कर लेता है । इस क्रिया के करते समय शरीर में होने वाले आसनों को करता रहे । क्योंकि आसन के दृढ़ होने पर ही योगसिद्धि होती है, ऐसा तन्त्र शास्त्रों के द्वारा अर्थ निर्णय किया गया है ॥ ८-९ ॥

सिद्धे मनौ परावाप्तिः पञ्चयोगासनेन च ।
पार्श्वे चाष्टाङ्गुलं वस्त्रं दीर्घे द्वात्रिंशदीश्वर ॥ १० ॥
एतत् सूक्ष्मं सुवसनं गृहीत्वा कारयेद् यतिः ।
जितेन्द्रियः सदा कुर्याद् ज्ञानध्याननिषेवणः ॥ ११ ॥
कुलीनः पण्डितो मानी विवेकी सुस्थिराशयः ।
धौतीयोगं सदा कुर्यात्तदेव शुचिगो भवेत् ॥ १२ ॥

पञ्चयोगासन से मन्त्र सिद्ध होता है और मन्त्र सिद्ध होने पर तत्त्व प्राप्त होता है । हे ईश्वर ! आठ अंगुल चौड़ा तथा ३२ अंगुल लम्बा अत्यन्त पतला सुन्दर वस्त्र ले कर यति को इस क्रिया का आरम्भ करना चाहिए । जितेन्द्रिय, ज्ञान और ध्यान में परायण कुलीन, पण्डित, मानी, विवेकी तथा स्थिर अन्तःकरण वाले साधक को धौतीयोग सर्वदा करना चाहिए, इसके करने से वह सर्वथा पवित्र हो जाता है ॥ १०-१२ ॥

अनाचारेण हानिः स्यादिन्द्रियाणां बलेन च ।
महापातकमुख्यानां सङ्गदोषेण हानयः ॥ १३ ॥

अनाचार करने से हानि तो होती ही है इन्द्रियों के बलवान् होने से तथा प्रधान महापातकों के सङ्ग दोष से भी अनेक हानियाँ उठानी पड़ती है ॥ १३ ॥

सम्भवन्ति महादेव कालयोगं सुकर्म च ।
वृद्धो वा यौवनस्थो वा बालो वा जड एव च ॥ १४ ॥

---

१. घात्रि कुम्भकञ्च—ग० ।

२. एषा चासौ क्रिया च, तस्याः प्रयोगः, तेनेत्यर्थः ।　　　३. मन्त्रार्थ—ग० ।

करणाद्दीर्घजीवी स्यादमरो लोकवल्लभः ।
मन्त्रसिद्धिरष्टसिद्धिः स सिद्धीनामधीश्वरः ॥ १५ ॥

हे महादेव ! उत्तम काल में इस पुण्यधर्म को करना चाहिए । चाहे वृद्ध हो, चाहे जवानी की अवस्था में, चाहे बालक अथवा जड़ ही क्यों न हो, इस क्रिया के करने से दीर्घजीवी, अमर तथा लोकप्रिय होता है, मन्त्रसिद्धि (और अणिमा, महिमा आदि) अष्टसिद्धि प्राप्त करता है तथा सिद्धों का अधीश्वर बन जाता है ॥ १४-१५ ॥

शनैः शनैः सदा कुर्यात् कालदोषविनाशनात् ।
हृदयग्रन्थिभेदेन[1] सर्वावयववर्धनम्[2] ॥ १६ ॥

यह क्रिया धीरे-धीरे और सर्वदा करते रहना चाहिए, फिर काल के दोषों के विनष्ट हो जाने पर तथा हृदयान्तर्गत ग्रन्थि के नष्ट हो जाने पर साधक के शरीरावयवों की वृद्धि होने लगती है ॥ १७ ॥

तदा महाबलो ज्ञानी चारुवर्णो महाशयः ।
धौतीयोगोद्भवं कामं महामरणकारणम् ॥ १७ ॥

वह महाबलवान्, ज्ञानी, मनोहर वर्ण का तथा महाशय हो जाता है । धौती योग का अनुष्ठान करते समय यदि कामवासना उत्पन्न हो गई तो उसे महामरण का कारण समझना चाहिए ॥ १७ ॥

तस्य त्यागं यः करोति स नरो देवविक्रमः ।
श्वासं त्यक्त्वा स्तम्भनञ्च मनो दद्यान्महानिले ॥ १८ ॥

जो उस कामवासना का परित्याग कर देता है, वह साधक साक्षात् देवता के समान पुरुषार्थी है । श्वास का परित्याग कर उसे स्थिर रखे तथा मन को महानिल (प्राणायाम) में लगावे ॥ १८ ॥

श्वासादीनाञ्च गणनमवश्यं भावयेद् गृहे ।
प्राणायामविधानेन सर्वकालं सुखी भवेत् ॥ १९ ॥
वायुपानं सदा कुर्यात् ध्यानं कुर्यात्सदैव हि ।
प्रत्याहारं सदा कुर्यात् मनोनिवेशनं सदा ॥ २० ॥

घर पर प्राणायाम करते समय श्वास की गणना अवश्य करते रहना चाहिए । इस प्रकार के प्राणायाम के विधान से साधक सभी कालों में सुखी रहता है । सर्वदा वायुपान करें तथा सदैव ध्यान करे । इसी प्रकार इन्द्रियों को समेट कर सदा प्रत्याहार करे । जिससे मन परमात्मा में सन्निविष्ट हो जावे ॥ १९-२० ॥

---

१. हृदयस्य ग्रन्थिस्तस्य भेदेनेत्यर्थः ।
२. सर्वे च ते अवयवास्तेषां वर्धनम् ।

मानसादिप्रजाप्यञ्च सदा कुर्यान्मनोलयम् ।
धौतीयोगान्तरं हि नेउलीङ्कर्म चाचरेत् ॥ २१ ॥
नेउलीयोगमात्रेण[१] आसने नेउलोपमः ।
नेउलीसाधनादेव चिरजीवी निरामयः ॥ २२ ॥

मानस जाप कर सदा मन का (ध्यान में) लय करे । धौतीयोग करने के अनन्तर नेउली कर्म का अनुष्ठान करना चाहिए । साधक नेउली के योग मात्रा से आसन पर नेउली के समान हो जाता है नेउली की साधना मात्रा से वह चिरञ्जीवी तथा नीरोग हो जाता है ॥ २१-२२ ॥

अन्तरात्मा सदा मौनी निर्मलात्मा सदा सुखी ।
सर्वदा समयानन्दः कारणानन्दविग्रहः ॥ २३ ॥
योगाभ्यासं सदा कुर्यात् कुण्डली साधनादिकम् ।
कृत्वा मन्त्री खेचरत्वं प्राप्नोति नात्र संशयः ॥ २४ ॥

उसकी अन्तरात्मा सदा मौन हो जाती है वह निर्मलात्मा हो कर सदा सुखी हो जाता है वह योगाचार के समय से आनन्द प्राप्त करता है और इस नेउली के कारण उसका शरीर आनन्द से प्रफुल्लित रहता है । साधक को कुण्डलिनी साधनादि योगाभ्यास सदा करते रहना चाहिए । कुण्डलिनी साधन करने पर मन्त्रवेत्ता खेचरता प्राप्त कर लेता है, इसमें संशय नहीं ॥ २३-२४ ॥

तत्प्रकारं प्रवक्ष्यामि सावधानावधारय ।
भुक्त्वा मुद्गान्नपक्वञ्च बारैकं प्रतिपालयेत् ॥ २५ ॥
प्रपालयेत्सोदरञ्च कटिनासाविवर्जितः[२] ।
पुनः पुनश्चालनञ्च कुर्यात्[३] स्वोदरमध्यकम् ॥ २६ ॥

हे सदाशिव ! अब उस नेउली का प्रकार कहती हूँ सावधान हो कर सुनिए । मात्र एक बार पका हुआ अन्न खाकर उसके पचने तक प्रतीक्षा करे । फिर कटि तथा नासा को छोड़कर उदर का मध्य भाग बारम्बार संचालन करे ॥ २५-२६ ॥

कुलालचक्रवत् कुर्यात् भ्रामणञ्चोदरस्य च ।
सर्वाङ्गचालनादेव कुण्डलीचालनं भवेत् ॥ २७ ॥
चालनात् कुण्डलीदेव्याश्चैतन्या सा भवेत् प्रभो ।

उदर का सञ्चालन कुम्हार के चक्र के समान करना चाहिए । उदर के सर्वांग संचालन से कुण्डलिनी भी चलने लगती है । कुण्डली देवी के सञ्चालन से, हे प्रभो ! वह चेतनता प्राप्त करती है । (यहाँ तक नेउली क्रिया कही गई) ॥ २७-२८ ॥

---

१. कर्मयोगेन इति—ग० ।—कर्मणां योगेनेति षष्ठीतत्पुरुषः । अत्र कुमति चेति सूत्रेण नित्यं णत्वं भवितुमर्हति । किन्तु युवादेर्नेति वार्तिकेन निषेधः ।

२. कटि इति—ग० । ३. शीलनञ्च इति—क० ।

एतस्यानन्तरं नाथ क्षालनं परिकीर्तितम् ॥ २८ ॥
नाडीनां क्षालनादेव सर्वविद्यानिधिर्भवेत् ।
सर्वत्र जयमाप्नोति कालिकादर्शनं भवेत् ॥ २९ ॥

अब इसके बाद क्षालन की क्रिया करनी चाहिए । नाड़ियों के प्रक्षालन से साधक सभी विद्याओं का निधि बन जाता है । वह सर्वत्र विजय प्राप्त करता है तथा कालिका का दर्शन उसको होता है ॥ २८-२९ ॥

वायुसिद्धिर्भवेत्तस्य पञ्चभूतस्य सिद्धिभाक् ।
तस्य कीर्तिस्त्रिभुवने कामदेवबलोपमः ॥ ३० ॥
सर्वत्रगामी स भवेदिन्द्रियाणां पतिर्भवेत् ।
मुण्डासनं[१] हि सर्वत्र सर्वदा कारयेद् बुधः ॥ ३१ ॥

उस साधक को वायुसिद्धि हो जाती है तथा वह पञ्चभूतों के साधन का अधिकारी हो जाता है उसकी त्रिभुवन में कीर्ति होती है तथा कामदेव के समान बलवान् होता है । उसकी सर्वत्र अबाध गति हो जाती है, वह अपने इन्द्रियों का स्वामी हो जाता है । बुद्धिमान् साधक सर्वत्र सर्वदा मुण्डासन (शीर्षासन) करे ॥ ३०-३१ ॥

ऊर्द्ध्वे मुण्डासनं[२] कृत्वा अधोहस्ते जपं चरेत् ।
यदि त्रिदिनमाकर्तुं समर्थो मुण्डिकासनम् ॥ ३२ ॥
तदा हि सर्वनाड्यश्च वशीभूता न संशयः ।
नाडीक्षालनयोगेन मोक्षदाता स्वयं भवेत् ॥ ३३ ॥

ऊपर की ओर पैर, नीचे अपने शिर का आसन (द्र० २३, २४, २५) बनावे तदनन्तर नीचे की ओर रहने वाले हाथ से जप करें । यदि साधक मात्र तीन दिन तक मुण्डिकासन करने में समर्थ हो तो उसके शरीर की सभी नाडियाँ वशीभूत हो जाती हैं इसमें संशय नहीं । नाड़ी क्षालन नामक योग करने से वह स्वयं मोक्ष का अधिकारी हो जाता है ॥ ३२-३३ ॥

नाडीयोगेन सर्वार्थसिद्धिः स्यान्मुण्डिकासनात् ।
मुण्डासन यः करोति नेऊलि-सिद्धिगो यदि ॥ ३४ ॥
नेऊलीसाधनगतो नेऊलीसाधनोत्तमः ।
तदा क्षालनयोगेन सिद्धिमाप्नोति साधकः ॥ ३५ ॥

मुण्डिकासन करने से तथा नाडी क्षालन योग से सभी अर्थों की सिद्धि हो जाती है । नेउली की सिद्धि करने वाला जो पुरुष है, वही मुण्डासन करे । नेउली साधन करने वाला जब नेउली साधन में निपुण हो जाय तब वह साधक नाडियों का क्षालन योग कर सिद्धि प्राप्त करता है ॥ ३४-३५ ॥

---

१. मुद्रासनम् इति—क० । २. पद्मासतम् इति—ग० ।

नेऊलीं यो न जानाति स कथं कर्तुमुत्तमः ।
स धीरो मानसचरो मतिमान् स[१] जितेन्द्रियः ॥ ३६ ॥

जो नेउली क्रिया नहीं जानता वह उससे आगे की क्रिया करने में किस प्रकार समर्थ हो सकता है । वही धीर है वही मानस राज्य में सञ्चरण करने वाला है वही मतिमान् तथा जितेन्द्रिय भी है ॥ ३६ ॥

यो नेऊली योगसारं कर्तुमुत्तमपारगः ।
स चावश्य क्षालनञ्च कुर्यात् नाड्यादिशोधनात्[२] ॥ ३७ ॥
नेऊलीयोगमार्गेण नाडीक्षालनपारगः ।
भवत्येव महाकाल राजराजेश्वरो यथा ॥ ३८ ॥

जो साधक नेउली योगसार करके उसके अनन्तर उसका उत्तम पारगामी बन जाता है, उसे नाड्यादि शोधन के विधान से अवश्य ही क्षालन योग करना चाहिए नेउली योग के मार्ग से नाडी क्षालन का पारगामी पुरुष, हे महाकाल ! राज राजेश्वर के समान हो जाता है ॥ ३६-३८ ॥

पृथिवीपालनरतो विग्रहस्ते प्रपालनम् ।
केवलं प्राणवायोश्च धारणात्[३] क्षालनं भवेत् ॥ ३९ ॥

वह पृथ्वीपालन में निरत रहकर मात्र शरीर धारण करता है । केवल प्राणवायु (प्राणायाम) के धारण करने से भी नाडियों का संक्षालन हो जाता है ॥ ३९ ॥

विना क्षालनयोगेन देहशुद्धिर्नजायते ।
क्षालनं नाडिकादीनां कफपित्तमलादिकम् ॥ ४० ॥
करोति यत्नतो योगी मुण्डासननिषेवणात्[४] ।
वायुग्रहणमेवं हि नेऊलीवशकालके ॥ ४१ ॥

क्षालन क्रिया के किए बिना देह शुद्धि कदापि संभव नहीं है । मुण्डासन का अभ्यास करने वाला योगी साधक नाडी में रहने वाले कफ, पित्तादि समस्त मलों को अपने प्रयत्न से प्रक्षालित कर देता है । इसी प्रकार हे नाथ ! नेउली के वश करने वाले काल में केवल वायु भी ग्रहण नहीं करना चाहिए ॥ ४०-४१ ॥

न कुर्यात् केवलं नाथ अन्यकाले सदा चरेत् ।
यावन्नेऊलीं न जानाति तावत् वायुं न संपिबेत् ॥ ४२ ॥
बहुतरं न सङ्ग्राह्यं वायोरागमनादिकम्[५] ।
केवलं श्वासगणनं यावन्नेऊली न सिद्ध्यति ॥ ४३ ॥

---

१. त्रिदिनमाकर्णय (?) इति—ग० ।
२. धारणम् इति—ग० ।
३. हार्ये इति—ग० ।
४. नादिमासनम् इति—ग० ।
५. आगमनमादिर्यस्य तदिति बहुव्रीहिसमासः ।

अन्यकाल में सर्वदा वायु ग्रहण करे । जब तक नेउली का ज्ञान न हो तब तक वायुपान न करे । अधिक संख्या में वायु का आगमन ग्रहण न करें । जब तक नेउली सिद्ध न हो तब तक केवल श्वास गणना (प्राणायाम) ही करे ॥ ४२-४३ ॥

पञ्चस्वरा[१] प्रकथिता[२] योगिनी सिद्धिदायिका ।
पञ्चस्वरसाधनादेव[३] पञ्चवायुर्वशो भवेत् ॥ ४४ ॥
प्रतापे सूर्यतुल्यः स्यात् शोकदोषापहारकः ।
सर्वयोगस्थिरतरं संप्राप्य योगिराड् भवेत् ॥ ४५ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे भैरवभैरवी संवादे पञ्चस्वरयोगसाधनं नाम पञ्चत्रिंशः[४] पटलः ॥ ३५ ॥

— ❖ —

योगिनी सिद्ध करने वाले पञ्चस्वरों का वर्णन हमने पूर्व में कर दिया है । पञ्चस्वरों की साधना से ही पञ्च प्राणवायु वशीभूत हो जाते हैं । पञ्चवायु को वश में करने वाला साधक प्रताप में सूर्य के समान शोक और दोषों को दूर कर देता है तथा सर्वयोग से स्थिर वायु को प्राप्त कर योगिराज बन जाता है ॥ ४४-४५ ॥

॥ श्री रुद्रयामल के उत्तर तन्त्र में महामन्त्रोद्दीपन प्रकरण के षट्चक्र प्रकाश वर्णन में भैरवीभैरव संवाद में साधन नामक पैंतीसवें पटल की डा० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ३५ ॥

— ❖ —

१. श्वासोच्छ्वासं प्रगणयेत यावन्नेऊली न सिव्यति इति—क अधिकः पाठः ।
२. पञ्चामरा इति—क० । ३. पञ्चमे साधनादेव इति—ग० ।
४. सप्तत्रिंशः इति—क० ।

सप्तमः पटलः

प्रातःकृत्यादि शौचान्तकर्मनिरूपणम्

एवं सद्भावमापन्नो मन्त्राराधनमाचरेत् ।

तत्प्रथमतः प्रातःकृत्यमेव निरूप्यते । यदकरणे दोषमाह यामले—

प्रातःकृत्यमकृत्या तु यो देवं भक्तितोऽर्चयेत् ।
तस्य पूजा तु विफला शौचहीना यथा क्रिया ॥ १ ॥

इस प्रकार शक्ति को ही सर्वप्राधान्य मानकर साधक मन्त्राराधन में प्रवृत्त हो जावे—इसलिये सर्वप्रथम प्रात:कृत्य का निरूपण किया जा रहा है जिसके न करने से दोष होता है ऐसा यामल का वचन है—

जो साधक प्रात:कृत्य किये बिना देवता की भक्तिपूर्वक अर्चना करता है उसकी सारी पूजा व्यर्थ है और उसी प्रकार फलहीन है जिस प्रकार अशौचावस्था में किया गया सारा कर्म व्यर्थ रहता है ॥ १ ॥

अतः—

ब्राह्मे मुहूर्त्ते चोत्थाय चिन्तयेद् गुरुदैवतम् ।
स्वमूर्धनि सहस्रारे शिवाख्यपुरविन्दुके ॥ २ ॥ इति।

इसलिये—साधक ब्राह्ममुहूर्त्त में उठकर गुरु और देवता का ध्यान करे । वह ध्यान अपने शिर स्थान में स्थित सहस्रार चक्र में स्थित बिन्दु में करे जहाँ शिव का निवास है ॥ २ ॥

ब्राह्ममुहूर्त्तमाह यामले—

द्वौ दण्डौ रात्रिशेषे तु मुहूर्त्तं ब्राह्मकं विदुः ॥ ३ ॥ इति ।

अब ब्राह्ममुहूर्त्त का लक्षण, जैसा यामल में कहा है, उसे कहते हैं—जब रात्रि दो दण्ड अर्थात् एक मुहूर्त्त शेष रहे, तो उसे 'ब्रह्ममुहूर्त्त' कहते हैं ॥ ३ ॥

गुरुध्यानञ्च तत्रैव—

ब्राह्मे मुहूर्त्ते चोत्थाय कृत्वा शौचादिकं सुधीः ।

परिधायाम्बरं शुद्धं मन्त्रस्नानं समाचरेत् ॥ ४ ॥

सुधी साधक ब्राह्ममुहूर्त्त में उठकर, शौचादि क्रिया सम्पन्न कर, शुद्ध वस्त्र धारण कर प्रथम मन्त्र स्नान करे ॥ ४ ॥

मन्त्रस्नानं यथा यामले—

प्राणायामप्रयोगेन चिन्तयेन्मूलमात्मनः ।
मन्त्रदैवतयोरैक्यं मन्त्रस्नानं विदुर्बुधाः ॥ ५ ॥

मन्त्रस्नान का प्रकार जैसा यामल में कहा है उसे कहते हैं—प्राणायाम का प्रयोग करते हुये अपने मूल (कुतोऽहं समागतः) का चिन्तन करे । बुद्धिमान् लोग मन्त्र और मन्त्रदेवता की एकता को मन्त्र स्नान कहते हैं ॥ ५ ॥

तद्यथा—

इडा भगवती गङ्गा पिङ्गला यमुना नदी ।
तयोरन्तर्गता नाडी सुषुम्णाख्या सरस्वती ॥ ६ ॥

वह इस प्रकार—इडा भगवती गङ्गा है, पिङ्गला यमुना नदी है और उन दोनों के बीच में रहने वाली नाडी सुषुम्ना है जो सरस्वती है ॥ ६ ॥

ज्ञानह्रदे ध्यानजले रागद्वेषसमाकुले ।
यः स्नाति मानसे तीर्थे तस्य जन्म न विद्यते ।
इदं मानसिकं स्नानं प्रोक्तं हरिहरादिभिः ॥ ७ ॥ इति।

ज्ञान ह्रद है, उसमें ध्यान जल है, जिसमें रागद्वेष का निवास है, ऐसे मानस तीर्थ में जो स्नान करता है, उसका पुनर्जन्म नहीं होता । हरिहर आदि आचार्यों ने इसी को मानसिक स्नान कहा है ॥ ७ ॥

मन्त्रतन्त्रप्रकाशे—

स्मृत्युक्तेन विधानेन सम्यक् शौचं विधाय च।
प्रक्षाल्य पादावाचम्य कृत्त्वा न्यासं यतात्मवान्॥ ८ ॥

मन्त्रतन्त्रप्रकाश में भी बतलाया गया है—स्मृति में कहे गये नियम के अनुसार जितेन्द्रिय पुरुष शौच क्रिया कर पाद प्रक्षालन करे । फिर आचमन कर न्यास करे ॥ ८ ॥

प्रविश्य देवतास्थानं निर्माल्यमपकृष्य च ।
दद्यात् पुष्पाञ्जलिं विद्वानर्घ्यपाद्ये तथैव च ॥ ९ ॥

फिर देवतास्थान (मन्दिर) में प्रवेश कर निर्माल्य का अपसारण करे । फिर विद्वान् अर्घपात्र में पुष्पाञ्जलि देवे ॥ ९ ॥

मुखप्रक्षालनं दद्यात् दद्याद् वै दन्तधावनम् ।
दद्यादाचमनीयं च दद्याद् वासोऽमलं शुभम् ॥ १० ॥

तदनन्तर मुख प्रक्षालन देवे, फिर दन्तधावन देवे, फिर आचमन करावे, तदनन्तर शुद्ध श्वेत वस्त्र देवे ॥ १० ॥

नमस्कृत्यासने शुद्धे उपविश्य गुरुं स्मरेत् ।
शिरस्थशुक्लपद्मस्थं प्रसन्नं द्विभुजाक्षिकम् ॥ ११ ॥
शशाङ्कामृतसङ्काशं वराभयलसत्करम् ।
शुक्लाम्बरधरं श्रीमच्छुक्लमाल्यानुलेपनम् ॥ १२ ॥
वामोरौ रक्तशक्त्या च युतं पद्मकरस्थया ।
एवं ध्यात्वा पुनश्चैनं पञ्चभूतमयैर्यजेत् ॥ १३ ॥

तदनन्तर साधक देवता को नमस्कार कर, शुद्ध आसन पर बैठ कर, गुरु का इस प्रकार स्मरण करे—जो शिर पर रहने वाले शुक्ल वर्ण के पद्म पर स्थित हैं, जिनकी दो भुजायें तथा दो नेत्र हैं । जो चन्द्रमा में रहने वाले अमृत के समान शुक्ल वर्ण का शुद्ध अम्बर धारण किये हुये हैं और शुक्ल माल्य तथा शुक्ल अनुलेपन धारण किये हुये हैं । जो अपने बायें ऊरु पर रक्त पद्म धारण की हुई शक्ति विराजमान है, इस प्रकार गुरु का ध्यान करने के बाद पञ्चभूतमय पदार्थों से उनकी इस प्रकार पूजा करे ॥ ११-१३ ॥

गन्धतत्त्वं पार्थिवस्य कनिष्ठाङ्गुष्ठयोगतः ।
खमयं च महापुष्पं तर्जन्यङ्गुष्ठयोगतः ॥ १४ ॥
वायुरूपं महाधूपं तर्जन्या विनियोजयेत् ।
तेजोरूपं महादीपं मध्यमाङ्गुष्ठयोगतः ॥ १५ ॥
अमृतं चैव नैवेद्यमनामाङ्गुष्ठयोगतः ।
अञ्जल्याऽथ नमस्कारं ताम्बूलं वाग्भवात्स्मृतम् ॥ १६ ॥

१. 'गुरवे नमः पार्थिवं गन्धतत्त्वं समर्पयामि', ऐसा कहकर कनिष्ठा अङ्गुष्ठ के योग से गन्ध देवे । २. इसी प्रकार खमयं महापुष्पं समर्पयामि, कहकर तर्जनी अङ्गुष्ठ के योग से महापुष्प देवे । ३. फिर 'वायुरूपं महाधूपं समर्पयामि' कहकर तर्जनी अङ्गुष्ठ के योग से धूप देवे । ४. 'तेजोरूपं महादीपं समर्पयामि' कहकर मध्यमा अङ्गुष्ठ मिलाकर दीप प्रदान करे । फिर 'अमृतं चैव नैवेद्यं समर्पयामि' कहकर अनामा अङ्गुष्ठ मिलाकर नैवेद्य समर्पित करे । अञ्जलि से नमस्कार करे और वाग्भव बीज (ऐं) से ताम्बूल प्रदान करे ॥ १४-१६ ॥

स्वस्वबीजेन सर्वं तु नमस्कारेण योजयेत् ।
गुरोर्मन्त्रं प्रयत्नेन प्रजपेत् सुरवन्दिते ॥ १७ ॥

पञ्चभूतों के बीज—पृथ्वी का 'लं', जल का 'वं', अग्नि का 'रं', वायु का 'यं' और आकाश का 'हं' । इसी प्रकार स्व स्व बीज के साथ नमस्कार करते हुये सभी उपचार निवेदन करे । तदनन्तर हे सुरवन्दिते! गुरु का मन्त्र प्रयत्नपूर्वक जप करना चाहिए ॥ १७ ॥

बाला च भुवनेशानी रमा चैव सुरेश्वरि ।
भावत्रयमिदं प्रोक्तं गुरुमन्त्रे प्रतिष्ठितम् ॥ १८ ॥

हे सुरेश्वरि! गुरु के मन्त्र में बाला, भुवनेश्वरी और रमा—इन तीनों के मन्त्रों की भावना प्रतिष्ठित कही गई है ॥ १८ ॥

ततः स्वगुरुनामान्ते आनन्दनाथमालिखेत् ।
रक्तशक्तिपदान्ते च अम्बापदमथालिखेत् ॥ १९ ॥
श्रीपादुकां समुच्चार्य पूजयामीति सञ्जपेत् ।
तेजोरूपं समर्प्याऽथ स्तवेन तोषयेद् गुरुम् ॥ २० ॥

अन्यदपि पादुकाम्भेदमुत्तरार्धे बृहद्दीक्षापटले लिखामः ।

इसके बाद गुरु के नाम के अन्त में 'आनन्दनाथ' लिखे । फिर 'रक्तशक्ति' पद के अन्त में अम्बा पद लिखे । तदनन्तर 'पादुका' पद का उच्चारण कर 'पूजयामि' लिखे । इस प्रकार उनके तेजो रूप का समर्पण कर स्तोत्र द्वारा गुरु को सन्तुष्ट करे ॥ १९-२० ॥

स्वरूप यथा—आनन्दनाथ रक्तशक्ति अम्बा श्रीपादुकां पूजयामि ।

अथ श्रीगुरुस्तोत्रं यथा भूतशुद्धौ—

ॐ नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये ॥ २१ ॥
श्रीगुरुं परमानन्दं नमाम्यानन्दविग्रहम् ।
यस्य सन्निधिमात्रेण चिदानन्दायते परम् ॥ २२ ॥

अब श्रीगुरुस्तोत्र, जैसा भूतशुद्धि में है, उसे कहते हैं—मैं मुक्ति की कामना की सिद्धि के लिये योगपीठ पर स्थित, शिर से प्रत्यक्ष शिवस्वरूप, शान्त, सद्गुरु को नमस्कार करता हूँ । जिनके सन्निधान में होने मात्र से साधक को चिदानन्द की प्राप्ति हो जाती है । आनन्दविग्रह परमानन्द श्रीगुरु को नमस्कार करता हूँ ॥ २१-२२ ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ २३ ॥

जिन गुरु ने अज्ञानान्धकार से अन्धे शिष्य के चक्षु का ज्ञानाञ्जनशलाका द्वारा

उन्मीलन किया है, उन गुरु को मैं नमस्कार करता हूँ ॥ २३ ॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ २४ ॥

जो अखण्डमण्डलाकार स्वरूप से समस्त जगत् में व्याप्त हैं और जिन्होंने तत्पद (ब्रह्मस्वरूप) का दर्शन कराया, उन गुरु को नमस्कार है ॥ २४ ॥

गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ २५ ॥

गुरु ब्रह्मा हैं, गुरु विष्णु हैं, गुरु साक्षात् महेश्वर देव हैं और गुरु ही परमब्रह्म है, उन श्रीगुरु को मेरा नमस्कार है ॥ २५ ॥

एवं च श्रीगुरुं नत्वा मूले कुण्डलिनीं ततः ।
स्मरेत् षट्पद्मयोगेन तत्तद्वर्णं तदीश्वरम् ॥ २६ ॥

इस प्रकार श्रीगुरु को नमस्कार कर मूलाधार में स्थित कुण्डलिनी का स्मरण करे । तत्तद् पद्म के योग के साथ तत्तद् वर्ण वाले ईश्वर का भी स्मरण करे ॥२६॥

तिस्रः कोट्यस्तदर्धेन शरीरे नाडिका मताः ।
तासु मुख्या दश प्रोक्तास्तासु तिस्रो व्यवस्थिताः॥ २७ ॥

मनुष्य के शरीर में साढ़े तीन करोड़ नाडियाँ स्थित हैं । उनमें दश नाडियाँ प्रधान कही गई हैं और उनमें भी तीन व्यवस्थित कही गई हैं ॥ २७ ॥

प्रधानं मेरुदण्डोऽत्र सोमसूर्याग्निरूपिणी ।
इडा नाम्नी तु या नाडी शुक्ला तु चन्द्ररूपिणी॥ २८ ॥
शक्तिरूपा च सा नाडी साक्षादमृतविग्रहा ।
पिङ्गलाख्या द्वितीया च पुंरूपा सूर्यविग्रहा ॥ २९ ॥

इन नाडियों में मेरुदण्ड सबसे प्रधान है । जिसमें सोम, सूर्य एवं अग्नि रूपिणी तीन नाडियाँ हैं । इडा नाम वाली नाडी शुक्ल वर्ण की है, जो चन्द्ररूपिणी है । वह नाडी शक्ति स्वरूपा और अमृत विग्रहा है । दूसरी नाडी का नाम पिङ्गला है, जो पुरुष स्वरूपा एवं सूर्य विग्रहा है ॥ २८-२९ ॥

दाडिमीकुसुमप्रख्या विषाख्या चापरा मता ।
मेरुमध्ये स्थिता या तु मूलादाब्रह्मरन्ध्रगा ॥ ३० ॥

पिङ्गला नाडी का वर्ण अनार के पुष्प के समान है । इसके अतिरिक्त तीसरी नाडी 'विष' नाम से प्रसिद्ध है, जो मेरुदण्ड के मध्य में स्थित है । वह मूल स्थान से ब्रह्मरन्ध्र तक जाती है ॥ ३० ॥

सर्वतेजोमयी शक्तिः सुषुम्णा वह्निरूपिणी ।
सुषुम्णान्तर्गता चित्रा चन्द्रकोटिसमप्रभा ॥ ३१ ॥

यह अग्निस्वरूपा 'सुषुम्णा' शक्ति सर्वतेजोमयी है । उस सुषुम्णा के भीतर रहने वाली 'चित्रा' नाडी करोड़ों चन्द्रमा के समान प्रकाशमयी है ॥ ३१ ॥

सर्वदेवमयी सा तु योगिनां हृदयङ्गमा ।
तस्य मध्ये ब्रह्मनाडी मृणालतन्तुरूपिणी ।
ब्रह्मरन्ध्रं तु तन्मध्ये हरवक्त्रात् सदाशिवम् ॥ ३२ ॥
वामावर्तक्रमेणैव वेष्टितं बिसतन्तुवत् ।
सुषुम्णामध्यसंस्थानि षट्पद्मानि यथाक्रमात् ॥ ३३ ॥

वह सर्वदेवमयी है । उसका ध्यान योगी लोग हृदय में करते हैं । उस चित्रा के मध्य में मृणालतन्तु के समान सूक्ष्म ब्रह्मनाडी है, उसी के मध्य में ब्रह्मरन्ध्र है । वहाँ सुषुम्णा नाडी शिवजी के मुख से लेकर सदाशिव पर्यन्त स्वयम्भू लिङ्ग को वामावर्त्त क्रम से विसतन्तु के समान वेष्टित किए हुए है । उस सुषुम्णा के मध्य में यथाक्रम छह पद्म चक्र स्थित हैं ॥ ३२-३३ ॥

आधाराख्ये मूलचक्रे रक्तवर्णे चतुर्दले ।
वादिसान्तार्णसंयुक्ते क्षेत्रे गोदावरीसमे ॥ ३४ ॥

प्रथम आधार चक्र नामक मूल चक्र में रक्तवर्ण का चार दलों वाला पद्म स्थित है । इस पर 'व श ष स'—ये चार वर्ण स्थित बतलाये गये हैं जो 'गोदावरी' का क्षेत्र कहा जाता है ॥ ३४ ॥

कर्णिकायां स्थिता योनिस्त्रिकोणं परमेश्वरि! ।
तद्योनिः परमेशानि इच्छाज्ञानक्रियात्मिका ॥ ३५ ॥

हे परमेश्वरि! उसकी कार्णिका में त्रिकोण योनि स्थित है । हे परमेशानि! वही योनि इच्छा, ज्ञान एवं क्रियात्मिका कही जाती है ॥ ३५ ॥

अपराख्यं हि कन्दर्पमाधारे तत्त्रिकोणके ।
स्वयम्भुलिङ्गं तन्मध्ये सरन्ध्रं पश्चिमाननम् ॥ ३६ ॥
ध्यायेच्च परमेशानि! शिवं चामलसुन्दरम् ।
कुण्डली तेन मार्गेण यातायातं करोति हि ॥ ३७ ॥

उस त्रिकोण के आधार में अपर नाम का कन्दर्प (=कामदेव) है । उस त्रिकोण के ठीक मध्य में छिद्र सहित पश्चिमाभिमुख 'स्वयम्भू लिङ्ग' है । हे परमेशानि! वहीं स्वच्छ सुन्दर सदाशिव का ध्यान करे । क्योंकि कुण्डलिनी उसी मार्ग से यातायात करती है ॥ ३६-३७ ॥

भित्त्वा भित्त्वा पुरीं याति आयाति कुण्डली सदा।
तत्र विद्युल्लताकारा कुण्डली परदेवता ॥ ३८ ॥

वह कुण्डलिनी उन षट्चक्रों का भेदन कर ब्रह्मरन्ध्र तक जाती है और पुनः उसी मार्ग से लौटती है । यह विद्युल्लता के आकार वाली परदेवता है ॥ ३८ ॥

प्रसुप्तभुजगाकारा सार्द्धत्रिवलयान्विता ।
शिवं वेष्ट्य महेशानि! सर्वदा परितिष्ठति ॥ ३९ ॥

सोती हुई सर्पिणी के समान कुण्डलिनी साढ़े तीन वलय (गोला) में स्थित हैं। हे महेशानि! वह शिव को वेष्टित कर सर्वदा निवास करती है ॥ ३९ ॥

येन मार्गेण गन्तव्यं ब्रह्मद्वारं निरामयम् ।
मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ॥ ४० ॥

जिस मार्ग से निरामय एवं पर देवता ब्रह्मद्वार तक जाना चाहिये, वह प्रसुप्ता परमेश्वरी कुण्डलिनी, उसी द्वार को मुख से बन्द कर सोती रहती है ॥ ४० ॥

मूलमाधारषट्कानां मूलाधारं ततो विदुः ।
लिङ्गमूले पुष्कराख्ये स्वाधिष्ठानं तु षड्दलम् ॥ ४१ ॥
बादिलान्तार्णसंयुक्तं विद्रुमाभं मनोहरम् ।
नाभौ तु गण्डकीक्षेत्रं मणिपूरेऽथ नीलभम् ॥ ४२ ॥

यतः वह छह अक्षरों का मूल आधार है, इसलिये उसे 'मूलाधार' कहते हैं । पुष्कर नाम क्षेत्र वाले लिङ्ग के मूल में स्वाधिष्ठान नामक छह पत्तों वाला दूसरा पद्म चक्र है, जहाँ 'व भ म य र ल' वर्ण हैं । वह मूँगे के समान लाल वर्ण का अत्यन्त मनोहर चक्र है । नाभि में गण्डकी क्षेत्र है, जहाँ नीलमणि के समान मणिपूर चक्र स्थित है ॥ ४१-४२ ॥

डादिफान्तार्णसंयुक्तदलैश्च दशभिर्युतम् ।
हृदये द्वादशदले काश्यां पिङ्गलवर्णके ॥ ४३ ॥
कादिठान्तार्णसंयुक्तं तप्तहाटकसन्निभम् ।
तन्मध्ये बाणलिङ्गं तु सूर्यायुतसमप्रभम् ॥ ४४ ॥
शब्दब्रह्ममयः शब्दोऽनाहतस्तत्र दृश्यते ।
तेनाऽऽहतं तु तत्पद्मं योगीष्टं परिकीर्तितम् ॥ ४५ ॥

वह ड से लेकर फ पर्यन्त दश वर्णों से युक्त है । हृदय में काशी क्षेत्र है, जो पिङ्गल वर्ण का है । वह क से लेकर ठ पर्यन्त द्वादश वर्णों से युक्त है । देदीप्यमान सुवर्ण के समान उसका वर्ण है और उसके मध्य में 'बाणलिङ्ग' है, जो दश हजार सूर्य की प्रभा वाला है । वही शब्दब्रह्ममय शब्दस्वरूप 'अनाहत चक्र'

है। वह पद्म उस शब्द से आहत नहीं होता। यह योगियों का अभीष्ट स्थान कहा गया है ॥ ४३-४५ ॥

कण्ठदेशे विशुद्ध्याख्यं धूम्रवर्णं मनोहरम् ।
स्वरैः षोडशभिर्युक्तं कुरुक्षेत्रमनुत्तमम् ॥ ४६ ॥

हे देवि! कण्ठ देश में 'विशुद्ध' नाम का चक्र स्थित है, जिसका वर्ण धूयें के समान है, किन्तु यह मनोहर है। वह चक्र षोडश स्वरों से युक्त है जो सर्वश्रेष्ठ 'कुरुक्षेत्र' है ॥ ४६ ॥

विशुद्धिस्तन्मयं यस्मादाकाशाख्यं महाद्भुतम् ।
आज्ञानाम भ्रुवोर्मध्ये द्विदलं तन्मनोहरम् ।
हंसाक्षरयुतं देवि! त्रिवेणीक्षेत्रमुत्तमम् ॥ ४७ ॥

यतः 'विशुद्धि' नाम का चक्र आकाश के समान अत्यन्त विशुद्ध तथा अद्भुत है, इसलिये उसे 'विशुद्ध' कहा जाता है। हे देवि! दोनों भ्रू के मध्य में आज्ञा नामक चक्र हैं जो 'ह स' दो दलों से युक्त अत्यन्त मनोहर है। उसे सर्वश्रेष्ठ 'त्रिवेणी क्षेत्र' कहा जाता है ॥ ४७ ॥

इतराख्यं महालिङ्गं तन्मध्ये काञ्चनप्रभम् ।
आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्तितम् ॥ ४८ ॥

वहाँ सुवर्ण के समान देदीप्यमान 'इतर' नामक 'महालिङ्ग' स्थित है। क्योंकि वहाँ तक गुरु की आज्ञा का संक्रमण होता है, इसलिये उसे 'आज्ञा' चक्र कहा जाता है ॥ ४८ ॥

कैलासाख्यं तदूर्ध्वे तु रोधिनीति तदूर्ध्वतः।
तत्र पद्मं सहस्रारं नादविन्दुत्रयान्वितम् ॥ ४९ ॥

उसके ऊपर 'कैलास' है और उसके ऊपर 'रोधिनी' क्षेत्र है, जहाँ नाद, बिन्दु समन्वित 'सहस्रार' नामक पद्म है ॥ ४९ ॥

अकथादित्रिरेखाभिर्हळक्षत्रयकोणके ।
तन्मध्ये परविन्दुं च सृष्टिस्थितिलयात्मकम् ॥ ५० ॥
वामावर्तस्थितं देवि अकथादित्रयं शुभे ।
शून्यरूपं शिवं साक्षाद् विन्दुं परमकुण्डलीम् ॥ ५१ ॥
सार्धत्रिवलयाकारां कोटिविद्युत्समप्रभाम् ।
वृत्ता कुण्डलिनीशक्तिर्गुणत्रयसमन्विता ॥ ५२ ॥

अ आदि (अ से लेकर अः तक सोलह स्वर), ककारदि (क से लेकर त

पर्यन्त) सत्रह वर्ण और थादि से लेकर ह पर्यन्त सत्रह वर्ण, इस प्रकार कुल (पचास वर्ण) तीन रेखाओं के ह ळ क्ष इन त्रिकोण में स्थित है। उस त्रिकोण के मध्य में सृष्टि, स्थिति एवं लयात्मक पर बिन्दु है। हे शुभे! वह अ क थ (आदि, कादि एवं थादि) वामावर्त्त स्थित है। वहाँ शिव शून्य रूप है और बिन्दु परमकुण्डली है जो साढ़े तीन वलय वाली है। करोड़ों सूर्य के समान देदीप्यमान इसकी प्रभा है। वह कुण्डलिनी गुणत्रय समन्विता तथा गोलाकार है॥ ५०-५२॥

शून्यभागं महादेवि! शिवशक्त्यात्मकं प्रिये।
सर्पाकारा शिवं वेष्ट्य सर्वदा तत्र संस्थिता॥ ५३ ॥

हे महादेवि! उस ब्रह्मरन्ध्र में शून्यभाग शिव-शक्त्यात्मक है। हे प्रिये! वहाँ सर्पाकारा कुण्डली शिव को वेष्टित कर सर्वदा स्थित रहती है॥ ५३ ॥

शिवशक्त्यात्मकं विन्दुं भुक्तिमुक्तिफलप्रदम्।
नादरूपेण सा देवी योनिरूपा सनातनी॥ ५४ ॥ इति।

शिवशक्त्यात्मक बिन्दु, भोग और मोक्ष दोनों फल प्रदान करता है। योनिरूपा सनातनी देवी 'नाद' रूप से वहीं स्थित है॥ ५४ ॥

गन्धर्वमालिकायाम्—

शिवविष्णुब्रह्ममयं विन्दुं योनिं शुचिस्मिते।
सर्पोपरि महेशानि विन्दुब्रह्मस्वरूपिणी॥ ५५ ॥ इति।
भवो विन्दुरितिख्यातं भवं च तत्त्रिकोणकम्।
भवनं भवसम्बन्धात् जायते भुवनत्रयम्॥ ५६ ॥ इति।

अब गन्धर्वमालिका तन्त्र में भी बतलाया गया है—हे शुचिस्मिते! सर्प के ऊपर बिन्दु ब्रह्मस्वरूप है और बिन्दु एवं योनि शिव, विष्णु एवं ब्रह्ममय हैं। भव (अर्थात् शिव) 'बिन्दु' नामक हैं। हे महेशानि! इस प्रकार भव (शिव) तथा त्रिकोणक (योनि) के सम्बन्ध से तीनों भुवनों की उत्पत्ति होती है॥ ५५-५६ ॥

अन्यच्च यामले—

पञ्चभूतानि देवेशि! षष्ठं मानसमीश्वरि।
षट्चक्रस्थस्थितान्येव चक्रमार्गे विचिन्तयेत्॥ ५७ ॥

अन्य स्थान पर यामल में भी कहा है—हे ईश्वरि! चक्रमार्ग के छहों चक्रों में पञ्चमहाभूत तथा एक मन की स्थिति है। अतः छह चक्रों में क्रमशः साधक उन्हीं का चिन्तन करे॥ ५७ ॥

शिवरूपं सहस्त्रारं सुखदुःखविवर्जितम्।
मन्दारपुष्परचितं नानागन्धानुमोदितम्।

तत्रोपरि महादेवः सदा तिष्ठति सुन्दरि ॥ ५८ ॥

सहस्रार चक्र को सुख-दुःख से रहित शिव रूप समझे । हे सुन्दरि! नाना गन्धों से सुगन्धित मन्दार पुष्प से विरचित आसन पर सहस्रार में महादेव सर्वदा स्थित रहते हैं ॥ ५८ ॥

ध्यायेत् सदाशिवं देवं शुद्धस्फटिकसन्निभम् ।
महारत्नलसद्भूषं दीर्घबाहुं मनोहरम् ॥ ५९ ॥
सुखप्रसन्ननयनं स्मेरास्यं सततं प्रिये ।
सकुण्डलं महारत्नहारेण च विभूषितम् ॥ ६० ॥
गोलपद्मसहस्राणां मालया शोभितं वपुः ।
अष्टबाहुं त्रिनयनं विभुं पद्मदलेक्षणम् ॥ ६१ ॥
किङ्किणीकटिसंयुक्तं नूपुरादिविभूषितम् ।
एवं स्थूलं वपुस्तस्य भावयेत् कमलेक्षणे ॥ ६२ ॥

शुद्ध स्फटिक के समान ऐसे सदाशिव का साधक सर्वदा ध्यान करे । जो महारत्नों से विभूषित हैं । जिनकी भुजायें विशाल हैं और जो अत्यन्त सुन्दर हैं । सुख से जिनके नेत्र अत्यन्त प्रसन्न हैं । हे प्रिये! जो मन्द-मन्द हास से युक्त हैं । जिनके कानों में कुण्डल तथा गले में महारत्न का हार सुशोभित हो रहा है । जिनके आठ बाहू एवं कमल के समान तीन नेत्र हैं । उनका शरीर सहस्रों कमलों की माला से भूषित हो रहा है एवं कटि में किङ्किणी और पद में नूपुर शोभा दे रहा है। हे कमलेक्षणे! साधक को सहस्रार चक्र में उनके इस प्रकार के स्थूल शरीर का ध्यान करना चाहिए ॥ ५९-६२ ॥

पद्ममध्ये स्थितं देवं निरीहं शब्दरूपकम् ।
एवं सर्वेषु चक्रेषु शक्तिरुद्रौ विचिन्तयेत् ॥ ६३ ॥

सहस्रार पद्म में जो सदाशिव स्थित हैं, वे ईहारहित तथा शब्दस्वरूप हैं । साधक इस प्रकार सभी चक्रों में शक्ति और रुद्र का ध्यान करे ॥ ६३ ॥

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
ततः परशिवश्चैव षट्शिवाः परिकीर्तिताः ॥ ६४ ॥

प्रान्तालोकनमातनोतु भवतां भूतिं भवान्याः शुभम् ॥ १ ॥
संसेव्यमानमृषिभिः सनकादिमुख्यै-
र्योगेन गम्यमविनश्वरमादिभूतम् ।
संसारहन्त्रिगमसारविचारसारं
शैवं महो मनसि मे मुदमादधातु ॥ २ ॥
भद्राय भवतां भूयाद् भारती भक्तिभाविता ।
स्मृतिरुज्जृम्भते यस्या वाग्विलासोऽतिदुर्लभः ॥ ३ ॥
शारदातिलके तन्त्रे गुरूणामुपदेशतः ।
पदार्थादर्शटीकेयं राघवेण विरच्यते ॥ ४ ॥
सम्प्रदायागतं किञ्चिद् गणितागमसम्मतम् ।
यदुक्तमत्र तत् सन्तो विचारयितुमर्हथ ॥ ५ ॥
पिशुनो दूषकश्चेत् स्यात्र तद्दोषाय दूषणम् ।
दोषावहा हि विकृतिर्न स्वभावो हि दुस्त्यजः ॥ ६ ॥

अथेश्वरः सर्वा अपि श्रुतीर्भवपाशबद्धानां जन्तूनां स्वर्गाय मुक्तये च समुपदिशति स्म । अन्येषां तु स्मृतिशास्त्रादीनां तन्मूलकत्त्वेन तदर्थप्रतिपादकत्त्वेन च प्रामाण्यमिति सुप्रसिद्धतरम् । अस्यास्त्वागमस्मृतेः कथं तन्मूलकत्त्वम् । अन्यच्च तैरेव विशेषेण पर्यालोचितैः स्वर्गोऽथवा मुक्तिरपि भविष्यतीति किमनयेति प्राप्ते ब्रूमः ।

'स ऐक्षत बहु स्यां प्रजायेय' इति ।

तथा च 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व' इत्युपक्रम्य 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्ति' इत्यादि । 'इदं सर्वं यदयमात्मा एव' इत्यन्तेनोपसंहृतम् । अथ—

उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

इत्युक्तत्त्वादुपक्रमोपसंहाराभ्यां स्वलीलारूपानाद्यनिर्वाच्याविद्यासहायसम्पन्नं परमानन्दस्वरूपं नित्यशुद्धबुद्धस्वभावं परब्रह्मैव स्वात्मविवर्त्तरूपं सकलं जगत् ससर्जेति श्रुतिवाक्यप्रतिपादितोऽर्थः ।

नन्वस्तु जगत्सृष्टिकर्त्तृत्वं ब्रह्मणः अनाद्यविद्याङ्गीकरणं किमर्थम् इति चेन्न । तया विना असङ्गस्य तस्य कारणतैवानुपपन्ना । तथेममर्थं श्रुत्यागमावपि वदतः ।

'इन्द्रो मायाभिः पुरुरूप ईयते' इति ।

'शिवो हि शक्तिरहितः शक्तः कर्त्तुं न किञ्चन' इति । एवं जाते जगति निजकर्मपाशबद्धा जन्तवोऽनात्मज्ञा उत्पत्तिमरणप्रवाहपतिता नाशक्नुवन् संसारसिन्धुं तरीतुम् । एवं भूतान् तानवलोक्य परमकरुणतया किञ्चिदुपाधिविशिष्टः सर्वाः श्रुतीः समुपदिशति स्म ।

तत्र सर्वासु श्रुतिषु काण्डत्रयं कर्मोपासनाब्रह्मभेदेन । तत्र कर्मकाण्डं जैमिनिप्रभृतिभिः सम्यक्तया विवृतम् । इदमुपासनाकाण्डं नारदादिभिः ब्रह्मकाण्डं भगवद्व्यासादिभिरपि । श्रुतिमूलकताऽस्य प्रत्यक्षोपलब्धश्रुतिमूलकता अप्रत्यक्षोपलब्धश्रुतिमूलकता च । रामपूर्वोत्तरतापनीय नृसिंहपूर्वोत्तरतापनीयसौराष्टाक्षरशैवपञ्चाक्षरात्मिका तु साक्षात्श्रुतिरूपलभ्यत एव । तत्र कर्मकाण्डे सर्वोऽप्यधिकारी । मुमुक्षोरपि तत्त्वज्ञानपर्यन्तं स्वचित्तशुद्ध्यर्थं प्रत्यवायपरिहारार्थञ्च कर्मकरणेऽधिकारसम्भवात् । तद्वदुपासनाकाण्डेऽपि ।

यतः साकारोपासनातः स्वर्गादिबहुफलं भवति क्रमतो मुक्तिश्च । कर्मकाण्डात्तु स्वर्गादिकं बहुतरव्ययायासेन भवति । ब्रह्मकाण्डान्मुक्तिरपि आदरनैरन्तर्यदीर्घकालाभ्याससाध्यानेकेषु जन्मसु तादृशेषु एव गतेषु भवति । 'अनेकजन्मसंसिद्धस्ततो याति परां गतिम्' इति वचनात् । अत एतदुपासनाकाण्डमेवागमशास्त्रात्मकं गरीय इति सिद्धम् ।

तत्रोत्पलाचार्यपूज्यपादशिष्यः श्रीलक्ष्मणाचार्यः पूर्वतन्त्राणामनेकेषामेकैकमन्त्रविधानकथनप्रवृत्तानामतिविततानां गम्भीराणामिदानीन्तनानामल्पबुद्धीनामल्पायुषामेकस्मिन् सर्वमन्त्रविधानमभीप्सूनां पुंसामशक्त्या दुरवगाहत्वमत्रावलोक्याति-

कृपालुः शारदातिलकं तन्त्रं चिकीर्षुश्चिकीर्षितस्याविघ्नेन समाप्त्यर्थं प्रचयगमनार्थञ्च सकलशिष्टैकवाक्यतयाऽभिमतकर्मभारम्भसमये तत्समाप्तिकामैर्मङ्गलमाचरणीयमिति सदाचारानुमितश्रुतिबोधितपरदेवतानुस्मरणलक्षणं मङ्गलं शिष्यशिक्षार्थमुपनिबध्नन्नाह—नित्येति । तन्महोऽनिशं वोऽव्यादित्यन्वयः । तन्मह एतावतैव परदेवतानुस्मरणस्य सिद्धौ सत्यामप्यस्य पदस्य यत्किञ्चित् क्रियापेक्षायां विघ्नोपशमनद्वाराऽभिलषितफलवितरणरूपावनक्रियानिर्देशेन देवतासाम्मुख्यं दर्शितम् । तत्र सामान्य कर्मसम्बन्धे प्राप्ते क्रियमाणस्य ग्रन्थस्य निर्विघ्नं पाठमभिप्रेप्सोः शिष्योपरि कृपां सूचयतो व इति कर्मणो निर्देशः। वो युष्मान् शिष्यानित्यर्थः। एषामेवात्र सम्बोधनयोग्यत्वात् सम्बोधनप्रधानत्त्वाच्च युष्मच्छब्दस्य । यतः शिष्यकृपयैव विदितवेद्य आचार्यो ग्रन्थकरणे प्रवृत्तः । तेषां कञ्चित्कालमवने सिद्धे स्वशिष्याणां तच्छिष्याणामपि निर्विघ्नं पाठसिद्ध्यसम्भवेन ग्रन्थप्रचारो न भवतीत्युक्तमनिशमिति । तथा च तेषां चिरकालावने सिद्धे स्वशिष्याणां तच्छिष्याणामपि निर्विघ्नं पाठसिद्धौ ग्रन्थप्रचारो भविष्यतीत्याशयः ।

किं तन्मह इत्यपेक्षायामाह—नित्यानन्दवपुरिति । नित्यो योऽयमानन्दः स वपुर्यस्य एतेन शक्त्यभिन्नं परशिवस्वरूपमुक्तम् । ननु 'शक्त्या विना शिवे सूक्ष्मे नाम धाम न विद्यते' इत्युक्तेर्निर्गुणस्याऽसङ्गस्य निराकारस्य तस्य कथमवनक्रियाकर्तृत्त्वम् इत्याह—वाचामधीशमिति । अनेन शक्त्युपहितं सदाशिवात्मकं रूपं वागुपदेष्टृत्त्वेनोक्तम् । ननु वागुपदेष्टृत्त्वं चतुर्मुखोपाध्युपहितस्यापि वर्त्तते तन्निवृत्त्यर्थमाह —शशाङ्कसदनमिति । शशाङ्कस्य चन्द्रस्य सदनं स्थानं चन्द्रकलावतंसमित्यर्थः । शब्दसृष्टेरत्र मुख्यत्वात् मन्त्रमयं तत्स्वरूपं सूचयति । यदाध्यामः विष्णुस्तेन सङ्कर्षणः तेन औ एतेन सहिता निशा हकारो यत्रेत्युत्तरपदलोपी बहुव्रीहिस्तेन हाविति सिद्धम् । शशाङ्केत्यादिना बिन्दुरुक्तः । तत्र वागैश्वर्यमुपबृंहयन् वक्ष्यमाणां शब्दार्थसृष्टिं सूचयन् व्यापकतामाह—येन चराचरात्मकमिदं स्थावरजङ्गमात्मकं शब्दार्थरूपं जगत् क्रमाद् व्याप्तम् । कैः निरन्तरगलत्पञ्चाशदर्णैः निरन्तरमनवरतं गलन्तो व्यक्तीभवन्तः पञ्चाशदर्णा वर्णास्तैः ।

अत्र समासे वर्णशब्दस्य वावलोपो वक्तव्य इति स्वर्णशब्द इव वलोपे अर्णशब्दो वर्णवाची । केचित्तु नित्येत्याद्यर्णैरित्यन्तमेकमेव पदमित्याहुः । अत्र वर्णानामेकपञ्चाशत्त्वेऽपि सामीप्यसम्बन्धेन लक्षणया पञ्चाशत्त्वमुक्तम् । अन्वयानुपपत्तिवत्तात्पर्या-नुपपत्तेरपि लक्षणाबीजस्याभ्युपगतत्वात् । अथवा 'मकारः पुरुषो यतः' इत्युक्तेः तस्य स्वस्वरूपत्वात् पञ्चाशदित्युक्तिः । यद्वा क्षकारस्य क-ष संयोगात्मकत्वात् तयोरुपदेशेनैवास्योपदेश इत्यपुनरुक्तं पञ्चाशद्ग्रहणम् । यद्वा विसर्गस्य केवलं शक्तित्वात् पञ्चभूतात्मकत्वाभावात् सर्ववर्णोत्पत्तिहेतुत्वाच्च तं त्यक्त्वा तथोक्तिः । तदुक्तम्—

'अमायोऽनन्त्य एव वा' इति ।

क्वचिद्बाह्येऽपि तावतामेवोपयोगाद्वा तथोक्तिः । यद्वा मूलाधारादि आज्ञापर्यन्तं षट्चक्रेषु पञ्चाशद्वर्णानामेव स्थितत्वात् पञ्चाशदित्युक्तिः । अनयोर्व्याख्यानयोः बहिरान्तरभेदेन व्यवस्था ज्ञेया । आन्तरस्य च मुख्यत्वात् शास्त्रे सर्वत्र मुख्येन व्यवहार इति ज्ञेयम् । अनेनान्तर्मातृकान्यासोऽपि सूचितः । स चान्त्यपटले (२५) कुण्डली-

प्रस्तावे स्फुटीभविष्यति । अतएव द्वितीयादिचतुर्विंशतिपटलान्तं यत् प्रपञ्चितं तत् सर्वं मातृकाविकार इत्यपि सूचितम् ।

ननु 'सर्वव्यापी सदाशिवः' (शा. १. १५) इति वक्ष्यमाणत्वात् तस्य स्वत एव सर्वव्यापित्वे कुतः कैरिति कारणापेक्षा इति चेत्, सत्यम्। तस्य स्वत एव सर्वव्यापित्वं किन्तु अत्र शास्त्रे शब्दसृष्टेः मुख्यत्वद्योतनाय निरन्तरगलत्पञ्चाशदर्णै-रिति कारणतोक्तिः । किञ्च पूर्वमपि यत्किञ्चिच्छक्त्युपाधिविशिष्टत्वे वक्तव्ये या वाचामधीशमित्युक्तिः सा अत्र च वर्णानामर्थरूपव्यापकतोक्तिरपि । तत्र शब्दस्वरूप-मभिव्याप्य एव अर्थरूपं व्याप्नोतीति क्रमादित्युक्तिः । तेषां शब्दरूपव्यापकता सम्भवत्येव । अर्थरूपव्यापकता तु सर्वस्याप्यर्थस्य शब्दप्रकाश्यत्वंनियमात् ज्ञेया । तदुक्तं भगवता भर्तृहरिणा—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिदं ज्ञानं सर्वं शब्देन गृह्यते ॥ इति । (वा.)

अथवा येषां मते शब्दार्थयोरभेदस्तन्मतमालम्ब्योक्तम् । तदुक्तं तेनैव—

एकस्यैवात्मनो भेदः शब्दार्थावपृथक्स्थितौ । इति । (वा.)

अतएव मन्त्रदैवतयोरैक्यां मन्त्रशास्त्रे । अतएव पूर्वं सदाशिवमन्त्रोद्धारः । यद्वा शक्तिसम्भिन्नत्वात्तस्य शक्त्यंशत्वेन शब्दरूपव्यापकत्वं शिवांशत्वेन अर्थरूप-व्यापकत्वं ज्ञेयम् । तदुक्तं वायवीयसंहितायाम्—

शब्दजातमशेषन्तु धत्ते शङ्करवल्लभा ।
अर्थस्वरूपमखिलं धत्ते मुग्धेन्दुशेखरः ॥ इति ।

एतत्पक्षे तृतीया उपलक्षणत्वेन ज्ञेया । उपलक्षणत्वन्तु तदुत्पन्नत्वात्तेषाम् । शब्दसृष्टिप्राधान्यमेवोपबृंहयन्नाह—सुकृतिनो यदन्तर्गतं चैतन्यं शब्दब्रह्म इत्यूचिरे । सुकृतिनस्तत्त्वज्ञा इत्यर्थः । 'चैतन्यं सर्वभूतानां शब्दब्रह्मेति मे मतिः' (शा. १. १३) इति वक्ष्यमाणत्वात् । तस्य सर्वव्यापित्वात् तदंशस्यैव सर्वजन्तुचैतन्यरूपत्वात् शुद्धब्रह्मणः शब्दब्रह्मत्वं सम्भवत्येव । किञ्च यस्माद् बिन्दोः शब्दब्रह्मण उत्पत्ति-स्तस्मादेव बिन्दोः सदाशिवस्याप्युत्पत्तिरित्यपि सम्भवति । तत्र शब्दसृष्टौ शब्द-ब्रह्मेत्युक्तिः अर्थसृष्टौ सदाशिव इति परं विशेषः ।

भिद्यमानात् पराद्बिन्दोरव्यक्तात्मा रवोऽभवत् ।
शब्दब्रह्मेति तं प्राहुः सर्वागमविशारदाः ॥ (शा. १. ११, १२)
अथ बिन्द्वात्मनः शम्भोः कालबन्धोः कलात्मनः ।
अजायत जगत्साक्षी सर्वव्यापी सदाशिवः ॥ (शा. १. १५)

इति वक्ष्यमाणत्वात् ।

अथवा हेतु-हेतुमद्भावेन योजना कार्या । यतः सुकृतिनः यत् अन्तर्गतं चैतन्यं शब्दब्रह्म इत्यूचिरे अतो येन निरन्तरगलत्पञ्चाशदर्णैः जगत् व्याप्तमिति ।

तत् प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम् ।
वर्णात्मनाऽऽविर्भवति गद्यपद्यादिभेदतः ॥ (शा. १. १४)

इति वक्ष्यमाणत्वात् ।

अन्ये त्वन्यथा योजयन्ति । यत् परमशिवस्वरूपं सुकृतिनो वेदान्तिनः तत् शब्देन ब्रह्म इत्यूचिरे । अयमर्थः—अस्माभिः परमशिव इत्युच्यते, तैस्तु ब्रह्म इत्युच्यत इति शब्दमात्रेण परं भेदः । वस्तुतस्तु नित्यानन्दादिस्वरूपत्वं तैरिवास्माभिरपि अङ्गीक्रियत एव । तत् कीदृक् वाचामधीशम् 'यस्य निःश्वसितं वेदाः' इत्यादिश्रुतेः वाचामधीशत्वं प्रसिद्धमेव । यतो वाचामधीशमतएव निरन्तरगलत्पञ्चाशदर्णैर्येन जगद्व्याप्तमिति यथासम्भवं तत्रापि योजनीयम् । यतो वेदस्य वर्णमयत्वात् ।

यद्वाऽत्र शास्त्रे शब्दसृष्टेरर्थसृष्टेरपि कुण्डलिन्या एवोत्पत्तेस्तस्या एव 'कुण्डली परदेवता' (शा. १. ५७) इति परदेवतात्वोक्तेस्तदनुस्मरणमेवोचितमिति महःशब्देन तेजोरूपा कुण्डलिनीत्युच्यते । 'आदित्येन्द्वग्नितेजोमद्यद्यत्तत्तन्मयी विभुः' इत्युक्तेः। सा कीदृशी नित्यानन्दवपुः । असावेवान्त्यपटले कुण्डलीस्वरूपं वक्ष्यति 'नित्यानन्दमयी गलत्परसुधावर्षैः' (शा. २५. ६९) इत्यादिना । यया कुण्डल्या शब्दार्थरूपं परा-पश्यन्ती-मध्यमा-वैखरी-रूपत्वेन शब्दजनकत्वात् कार्ये कारणोपचारात् शब्दरूपं विषयत्वात् अर्थरूपस्वभावेन चरम् पृथिव्यंशाधिक्यात् कार्ये कारणोपचारात् अचरम्, एवम्भूतं गच्छतीति जगद् विनश्वरं शरीरं व्याप्तम् ।

यद्वा, यया शब्दार्थरूपं चराचरात्मकं जगद् विश्वं व्याप्तम् । 'सर्वगा विश्वरूपिणी, दिक्कालाद्यनवच्छिन्ना' (शा.१. ५३) इत्यग्रत उक्तेः। कैः निरन्तरगलत्पञ्चाशदर्णैः 'पञ्चाशद्वारगुणिता पञ्चाशद्वर्णमालिकां सूते' (शा. १. १११) इति वक्ष्यमाणत्वात् । सुकृतिनः पुण्यात्मानस्तत्त्वज्ञा इत्यर्थः । यां शब्दब्रह्ममयीमाहुः 'सा प्रसूते कुण्डलिनी शब्दब्रह्ममयी विभुः' (शा. १. १०८) इति वक्ष्यमाणत्वात्। चैतन्यं चिच्छक्तिस्वरूपा । अयमेव वक्ष्यति 'ततश्चैतन्यरूपा सा' (शा. १. ५१) इति । अन्तर्गतं सुषुम्नान्तर्गतमित्यर्थः। 'या मूलाधारदण्डान्तरविवरगता' इत्युक्तेः। शशाङ्कसदनं सहस्रारगमने चन्द्रमण्डलगतत्वात् । वाचामधीशं सर्वशब्दोत्पादकत्वात् सर्वमन्त्रोत्पादकत्वाच्च । तथायमेव वक्ष्यति—'विश्वात्मना प्रबुद्धा सा सूते मन्त्रमयं जगत्' (शा. १. ५७) इति । यद्वा, वाचामधीशं वागृदेवतारूपेत्यर्थः । 'शक्तिः कुण्डलिनीति या निगदिता आईमसंज्ञा' इत्युक्तेः । यद्वा ग्रन्थारम्भे प्रकृते सरस्वती देवता तस्या एव स्मरणाद् ग्रन्थरूपा स्फूर्त्तिर्भवित्री । किञ्चात्र ग्रन्थे प्रथमतः सरस्वतीमन्त्राणामेव वक्ष्यमाणत्वात् । तेन सरस्वतीदेवतानुस्मरणमेवोचितमिति । तद्वाचामधीशं महः सारस्वतं तेजः वोऽव्यात् । अथ वाचामधीशमित्यनेन केवलं वाग्भवस्य सरस्वतीमन्त्रत्वमुक्तम् ।

एतज्जपन्नरवरो भुवि वाग्भवाख्यं ।
वाचां सुधारसमुचां लभते स सिद्धिम् ॥

इत्युक्तेः । तत् कीदृक् शशाङ्कसदनम् अनेन चन्द्रकलावतंसत्वेन ध्यानमुक्तम् ।

यदाहुः— धृतशशधरखण्डोल्लासिकोटीरचूडा ।
भवतु सपदि वाचामीश्वरी भूतये वः ॥ इति ।

पुनः कीदृक् नित्यं सर्वदा आनन्दयतीत्यानन्दं आनन्दजनकं वपुर्यस्य तत् । साधकानां सुधारससहोदरसरससूक्तिसंस्फुरणादाह्लादजनकमित्यर्थः । तथा च सरस्वतीस्तवे आचार्याः—

क्षौमाम्बरपरीधाने मुक्तामणिविभूषणे, मुदावासे । इति ।

पुनः कीदृक् चैतन्यमन्तर्गतम् अनेन सूक्ष्मा परपर्याया पराख्या उक्ता । यदाहुः—

स्वरूपज्योतिरेवाहुः सूक्ष्मा वागनपायिनी । इति ।

अन्यत्रापि—सूक्ष्मा कुण्डलिनी मध्ये ज्योतिर्मात्रा परा मता । इति ।

येन महसा निरन्तरगलत्पञ्चाशदर्णैश्चराचरात्मकं शब्दार्थरूपं जगद् व्याप्तम् । अत्र पञ्चाशदर्णैरित्यनेन वर्णरूपा पश्यन्ती उक्ता । शब्दार्थरूपमित्यनेन पदरूपा मध्यमा उक्ता । यत् सारस्वतं महः सुकृतिनः शब्दब्रह्मेत्यूचिरे । अत्र शब्दब्रह्मशब्देन वेदा उच्यन्ते । तेन वेदात्मकमित्यर्थः । तदुक्तं वार्त्तिककारपादैर्ग्रहाधिकरणे—

शब्दब्रह्मेति यद् वेदशास्त्रं वेदाख्यमुच्यते । इति ।

अनेन वाक्यरूपा वैखरी उक्ता । यदाहुः—

ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम् ।
यस्याः सूक्ष्मादिभेदेन वागधीशामुपास्महे ॥ इति ।

अन्यत्रापि— आदिक्षान्तविलाससलालसतया तासां तुरीया तु या
क्रोडीकृत्य जगत्त्रयं विजयते वेदादिविद्यामयी । इति ।

अपरे त्वत्र ग्रन्थकृता भैरवीमन्त्रोद्धारः कृत इति वदन्ति । तद् यथा । तत् त्रैपुरं महो वोऽव्यात् । कीदृक् अगलत् अविनश्वरम् । पुनः कीदृक् नित्यानन्दवपुः नित्यः पुरुषः तेन हकारः आनन्दमयीत्वात् आनन्दोत्पादकत्वात् वा आनन्दः शक्तिः तेन सः एतौ वपुः शरीरं यस्य । एतेनैतयोः बीजत्रयेऽपि सत्त्वमुक्तम्भवति । अन्तः मध्यं मध्यबीजमित्यर्थः । तत् कीदृक् क्रमात् कश्च रश्च मश्च करमाः तान् अत्ति लक्षणया गृहणातीति क्रमात् । तेन ककारः तदधो लकारः । अत्र रेफेण लकारस्य ग्रहणं व्याकरणपरिभाषया । उक्तञ्च 'रेण लोऽपीष्यते ग्रहणं तेन' इति । संहितायामपि— 'अतएव महेशानि र-लयोः समता भवेत् ।' इति । तदधो मकारः पुरुषः तेन हः। पुनः कीदृक् अन्तर्गतं अन्ते रो रेफः गतः सङ्गतो यत्र तत् । पुनः कीदृक् व्याप्तं विः चतुःसंख्या चतुर्थस्वरः तेनाप्तं गृहीतम् । अत्र ग्रन्थकृतो वाररुचः सङ्केतोऽभिप्रेतः । स द्वितीयपटले स्फुटीभविष्यति । 'नञि च शून्यं ज्ञेयम्' इति वाररुचः सङ्केतः । तेन शून्यं तस्य बिन्दुरूपत्वात् बिन्दुरुद्धृतः । एतेन षट्कूटं मध्यबीजमुद्धृतम् । अतएव वक्ष्यते 'षट्कूटं त्रिपुरामन्त्रम्' इति ॥ एवं मध्यमं बीजमुक्त्वा प्रथमबीजे हकारसकारयोः पूर्वमेवोक्तत्वात् एवम् ऐकारोऽपि योजनीयः । कीदृक् प्रथमं शशाङ्कसदनम् एतेन बिन्दुस्थम् । एवं प्रथमबीजमुद्धृतम् । अन्त्यं कीदृक् शब्दार्थरूपम् अत्र शब्दशब्देन शब्दादयो गृह्यन्ते, अर्थशब्दो विषयवाची । तेन शब्दादयो विषयास्ते च दशेति दशसंख्या तया औकारः तद्रूपं यत्र तत्तथा । अन्यच्च 'अङ्कानां वामतो गतिः' इत्युक्तेः वाररुचेन सङ्केतेन तकारस्य षट्संख्या । 'पिण्डान्त्यैरक्षरैरङ्काः' इत्युक्तेः न्यकारान्तयकारस्य एकाङ्कः । एवं षोडश तेन विसर्गः । एवं तृतीय-बीजमुद्धृतम् । तदुक्तं सिद्धेश्वरीमते—

हंसास्त्रयो दन्त्यसकारयुक्ता वस्वब्धिपंक्तिस्वरसंविभिन्नाः ।
अन्त्यो विसर्गी इतरौ सबिन्दू मध्यो विरिञ्चीन्द्रहराग्नियुक्तः ॥ इति ।

अस्यायमर्थः—वसु अष्टसंख्या । अब्धिश्चतुःसंख्या । पंक्तिर्दशसंख्या । तथा च 'पंक्तिर्दशाक्षरच्छन्दो दशसंख्यावली अपि' इत्यमरः । हंसा हकारास्त्रयः । कीदृशाः दन्त्यसकारयुक्ताः । तथा क्रमाद् वस्वब्धिपंक्तिस्वरैः क्लीवान् विना अष्टम ऐ चतुर्थ ई दशम औ तैर्युक्ताः । ऋकारादि स्वरचतुष्टयं नपुंसकं 'स्वराणां मध्यकं यत्तु तच्चतुष्कं नपुंसकम्' (शा. २. ६) इत्युक्तत्वात् । नपुंसकस्वरपरित्यागेन बिन्दु-विसर्गसहितानां स्वराणामष्टम ऐकारः दशम औकार इति बोध्यम् । विशेषमाह तृतीयो विसर्गयुक्तः, इतरौ प्रथमद्वितीयौ सानुस्वरौ । मध्यः पुनः विरिञ्च्यादियुतः विरिञ्चिः कः इन्द्रो लः, हरो हः, अग्नी रेफः एतैर्युतः । इदं षट्कूटं मध्यबीजम् । इयं त्रिबीजा भैरवी ।

अथ च ऐचेति स्वतन्त्रतया निर्देशात् व्याप्तमित्याप्तशब्दग्रहणात् शब्दार्थ-रूपमिति रूपशब्दोपादानात् केवलास्त्रयः स्वरा एवास्य मन्त्रस्य चेतनीमन्त्र इति सूचितम् । यदाहुः—

शिवाष्टमं केवलमादिबीजं भगस्य पूर्वाष्टमबीजमन्यत् ।
परं शिरोऽन्तं गदिता त्रिवर्गा सङ्केतविद्या गुरुवक्त्रगम्या ॥ इति ।

शिव उकारः, तस्याष्टम ऐकारः । भगम् एकारः, तस्य पूर्वाष्टमश्चतुर्थः स्वरः। शिरो बिन्दुः सोऽन्ते यस्य शिरोऽन्त औकारः ।

उक्तबीजानां क्रमेण वाग्भव-कामराज-शाक्तत्वमाह । वाचामधीशमित्यने-नाद्यस्य वाग्भवत्वमुक्तम् । चराचरात्मकं मैथुनसृष्टजगतः कामोत्पन्नत्वात् मध्यम-बीजस्य कामराजतोक्ता । सुकृतिनः यदन्त्यबीजं शब्दब्रह्मेत्यूचिरे इत्यनेनान्त्यस्य शाक्तत्वमुक्तम् । 'त्रिधामजननी देवी शब्दब्रह्मस्वरूपिणी' (शा. १. ५६) इति वक्ष्य-माणत्वात् । यदुक्तं सिद्धेश्वरीमते—

वाग्भवं प्रथमं बीजं कामराजं द्वितीयकम् ।
शक्तिबीजं तृतीयन्तु चतुर्वर्गफलप्रदम् ॥ इति ।

अथ च—'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इत्युक्तेः शब्दात्मकं ब्रह्म शब्दब्रह्मेति प्रणवम् । चराचरात्मकं जगद् येनेति मैथुनसृष्टेः कामादुत्पत्तेः कामबीजम् । वाचा नकारः । बृहत्तत्त्वन्यासे नकारेण सह शब्दतत्त्वन्यासात् । मश्च[१]। धीः शक्तिरूपः । ईशः प्रभुः अनेन विसर्गः । 'मायाशक्त्यभिधः सर्गः सर्वभूतात्मकः प्रभुः' इत्युक्तेः । एवं नमः शब्दः । एवमस्य मन्त्रस्य ह्लादिनी मन्त्र उक्तः । यदाहुः—

कमलं परिलुप्तमध्यमान्त्यस्वरमीशादियुतं सबिन्दुनादम् ।
निगमादिनमोऽन्तरे विराजद्भुवि देवीहृदयं प्रदिष्टमेतत् ॥ इति ।

त्रयाणां बीजानां सामान्येन विशेषणमाह—अनिशमिति । न विद्यते निशा हकारो यत्र आदाविति शेषः । केशवादिन्यासे निशा हकारः शक्तिः । तेनादौ हका-राभावे सकारस्यादित्वमुक्तम् । तेनादौ सकारः पश्चात् हकारः । यद्वा, निरित्यनेनैव

---

१ मस्वरूपं ग्राह्यमित्यर्थः ।

आद्यबीजस्यापि बिन्दोरुद्धृतत्वात् अनिशं हकाररहितं शशाङ्कसदनम् शशाङ्कः सकारः सदने स्थाने यस्य। अनेन हकारस्य स्थाने सकारः तदधो हस्त्वर्थायातः। उक्तञ्च—

भैरवीयमुदिताऽकुलपूर्वा देशिकैर्यदि भवेत् कुलपूर्वा।
सैव शीघ्रफलदा भुवि विद्येत्युच्यते पशुजनेष्वतिगोप्या॥ इति।

अनेनास्य मन्त्रत्वं विद्यात्वमप्युक्तम्। यत् पिङ्गलामते—

शक्त्याद्या तु भवेद् विद्या शिवाद्यो मन्त्र उच्यते।
दीक्षाभिषेकपूजा तु प्राणिनां भुक्तिमुक्तिदा॥ इति।

अन्यदपि बीजत्रयसामान्यविशेषणमाह पञ्चाशदर्णैरुपलक्षितमित्यर्थः। अनेन सर्वस्य मन्त्रस्य मातृकान्तरितत्वेन जप उक्तः। यदाहुः—

मन्त्रराजममुं समस्तजगद्विमोहनकारणं।
मातृकान्तरितं जपेदनुलोमतोऽपि विलोमतः॥ इति।

अथवा अनेन विशेषणेन च हहसैं सहसैं इत्यादि 'हसकलह्रीं सहकलह्रीं' इत्यादि अहसौः आहसौः इत्याद्यन्तर्मातृकान्यासोऽपि सूचितः। यदाहुः—

क्रमेण षट्चक्रवर्णान् तद्दलेषु प्रविन्यसेत्।
चक्रद्वयक्रमेणैव देवीरुद्धांश्च मन्त्रवित्॥ इति।

अन्यत्रापि मूलाधारकथनप्रस्तावे

चतुर्ष्वब्जपत्रेषु देवीनिरुद्धान् जलेन्द्राग्निवायून् न्यसेत् केवलान् वा।
सबिन्दूनमन्दप्रभावान् प्रसिद्धान्। इति।

अथवा पञ्चाशच्छब्देन सामीप्यसम्बन्धेन लक्षणया एकपञ्चाशद्ग्रहणे तैरूपलक्षितमित्यनेन बीजत्रयस्यापि दीपिन्युद्धारः सूचितः। तत्र प्रथमबीजदीपिनी तु व्यञ्जनस्वरैः पृथक्कृतैः सप्तदशवर्णात्मिका। द्वितीयबीजदीपिनी तु पूर्ववदेव पञ्चविंशत्यक्षरा। तृतीयबीजदीपिनी पूर्ववन्नवाक्षरा। एवमेकपञ्चाशद्वर्णात्मिका। तत्र द्वितीयतृतीययोः क्षकारस्य सत्त्वात् तस्य चैकमेव व्यञ्जनं गृहीतम्। मातृकायां पृथगुपदेशात्। यद्ययं व्यञ्जनद्वयात्मैव स्यात् तदा क्षवदस्यापि पृथगुपदेशो न स्यात्। तयोरेव बिन्दुद्वयमस्ति तदपि न पृथग्गणितम्। तादृशस्यैव पञ्चदशस्वरत्वात्। प्रणवेऽपि बिन्दुः प्रणवान्तर्गत एवेति न पृथग्गणित इति सर्वमनवद्यम्। अयञ्च दीपिन्युद्धारो ग्रन्थकृताऽत्र सूचितः। मया तु भैरवीपटले (१२) स्फुटीकरिष्यते।

अथवा बालामन्त्रोद्धारो ग्रस्थकृतोऽभिप्रेत इति। यतो भैरव्यादीनामपि स एव मूलभूतः। यदाहुः बालामुक्त्वा—

विद्यामूलोत्पत्तिरेषा मयोक्ता ज्ञातव्येयं देशिकैः सिद्धिकामैः। इति।

तद्यथा—वाचामधीशमिति वाग्भवम्। अन्तर्मध्यं मध्यस्थम्। क्रमात् कश्च रश्च मा लक्ष्मीः तेन ईकारः। रेण पूर्ववल्लस्य ग्रहणम्। निरिति बिन्दुः। एवं मध्यमं बीजम्, शशाङ्कः सकारः, सत् ओंकारः। अकारो नकारश्च शून्यद्वयं तेन विसर्गः। 'नेत्रे च शून्यं ज्ञेयं तथा स्वरे केवले कथिते' इत्युक्तेः। सच्छब्देन कथमोंकारग्रहणमिति चेदुच्यते। ॐकारस्य तावत् 'ॐ तत्सदिति निर्देशो ब्रह्मण-

स्त्रिविधः स्मृतः' इत्युभयोः ब्रह्मवाचकत्वात् 'सदोंकारो निगद्यते' इत्युक्तेश्च सच्छब्द-वाचकता, सोऽत्राकृतपररूप एव केवलं विवक्षितः । स च सामीप्यसम्बन्धेन अग्रिमस्य लक्षकः।

यद्वा 'तस्यैवोकारयोगेन स्यादौकाराक्षरं तथा' इति आचार्योक्तेः ओकार एव स्वजन्यस्य औकारस्य लक्षकः । यद्वा शशो रूपमस्मिन् इति मत्वर्थीयोऽच् । तेन शशश्चन्द्रः, तेन सः, शशन् गमनशीलः, शशो हंसः, तेन वा सः । अङ्कशब्देन पिण्डन्यायात् अकारः । यथा 'स वामदृक् पवनगुणान्वितः करः' इत्यत्र करशब्देन ककारः । यथा 'हरिहयषष्ठवत्' वनम् इत्यत्र वनशब्देन वकारः । सच्छब्देन ओकार एव । तस्य पूर्वेन सह सन्धौ औकारः । अनाभ्यां विसर्गः । ननु प्रणवस्य सबिन्दु-कत्वात् बालान्त्यबीजे ग्रन्थकारो विसर्गमात्रं वक्ष्यति । अत्र च बिन्दुविसर्गावुद्धृताविति विरोध इति चेन्न । बालाया मन्त्रभेदेषु क्वचिद् बिन्दुः क्वचिद् विसर्गः क्वचिद्बिन्दु-विसर्गावप्युद्धृतौ । तदपि सूचयितुमत्रेदृश उद्धारः कृतः । यदाहुः सनत्कुमारे—

अष्टमस्य तृतीयन्तु चतुर्दशसमन्वितम् ।
दण्डकुण्डलमेतद्धि सारस्वतमुदाहृतम् ॥ इति ।

अन्यत्र तु—दन्तान्तेन युतं तु दण्डिसकलं सम्मोहनाख्यं कुलम् । इति ।

अन्यत् पूर्ववदिति संक्षेपः । एतच्च व्याख्यानद्वयं गुरुवचननियन्त्रितेन मया कृतमिति क्षन्तव्यं देशिकेन्द्रैः ॥ १ ॥

* सुधा *

साम्बं सदाशिवं नत्वा भानुं विष्णुं गणेश्वरम् ।
सर्वश्रेयस्करीं नित्यां मन्त्ररूपां सरस्वतीम् ॥ १ ॥
सर्वलोकस्य जननीं सर्वाभीष्टफलप्रदाम् ।
शब्दब्रह्मात्मिकां देवीं नत्वा कुण्डलिनीं पराम् ॥ २ ॥
मालवीयकुलोत्पन्नः कुबेरविदुषः सुधीः ।
पुत्रः सुधाकरो नाम्ना पदार्थानां प्रकाशिकाम् ॥ ३ ॥
पाठकानां हितार्थाय तन्त्रस्य प्रतिपत्तये ।
शारदातिलकस्यास्य 'सुधां' टीकां तनोम्यहम् ॥ ४ ॥

जिनका शरीर नित्य आनन्द स्वरूप है, निरन्तर प्रवाहित हो रहे पचास वर्णों से जिसके द्वारा शब्दार्थ रूप चराचरात्मक यह सम्पूर्ण जगत् व्याप्त है, तत्त्वज्ञ लोग जिसे शब्दब्रह्ममय कहते हैं, जो सुषुम्ना के अन्तर्गत चैतन्य रूप से स्थित रहकर सहस्रार पद्म स्थित चन्द्रमण्डल तक गमन करते हैं, जो सभी वर्णों के उत्पादक तथा सम्पूर्ण मन्त्रों के जनक होने के कारण वाणी के अधीश्वर हैं—ऐसे तेज:स्वरूप वाग्देवता आप सभी शिष्यों की रक्षा करें ॥ १ ॥

विमर्श—आरम्भ में ग्रन्थकार क्रियमाण ग्रन्थ की निर्विघ्न समाप्ति के लिये तथा शिष्य प्रशिष्यों की शिक्षा के लिये शिष्टाचारानुमितकर्तव्यताक मङ्गल करते

हैं । यत: इस ग्रन्थ में सर्वप्रथम सरस्वती के मन्त्रों का प्रतिपादन किया गया है, अत: ग्रन्थारम्भ में सरस्वती का स्मरण करना उचित है । इसलिए ग्रन्थकार सर्वप्रथम वाग्देवता रूप तेज का स्मरण करते है । श्लोक का अन्य अर्थ इस प्रकार भी है—

(१) शिवशक्त्यात्मक जिस तेज का आनन्दमय शरीर है, चन्द्रकला को मस्तक में धारण करने से जो शशाङ्कसदन हैं और जो (अनिशम् अश्च अश्च औ तेन सहिता निशा अर्थात् हकार उस पर शशाङ्कसदन अर्थात् अनुस्वार देने से) हौँ इस मन्त्र के देवता हैं और वाणी रूप सृष्टि का उपबृंहण करने के कारण क्रमश: व्यक्त हो रहे अपने पचास वर्णों से सारे शब्दार्थ रूप चराचर जगत् में व्याप्त हैं, पुण्यात्मा लोग जिसके अन्तर्गत चैतन्य को शब्दब्रह्म कहते हैं इस प्रकार का कोई अभूतपूर्व तेज आप सब शिष्यों की रक्षा करे ।

अथवा शब्दसृष्टि एवं अर्थसृष्टि दोनों ही प्रकार की सृष्टि कुण्डलिनी से होती है इसलिए ग्रन्थकार कुण्डलिनी रूप महातेज का स्मरण करते हैं ।

(२) जिस कुण्डलिनी रूप तेज का नित्य आनन्दस्वरूप शरीर है, जो परा, पश्यन्ती, मध्यमा और वैखरी रूप वाणी को उत्पन्न करने से वाणी का अधीश्वर है, जो सुषुम्नान्तर्गत चैतन्य रूप में चन्द्रमण्डल तक गमन करता है और पचास बार में पचास बर्णो को उत्पन्न कर उसी से इस शरीर में व्याप्त है, वह कुण्डलिनी रूप तेज आप सभी शिष्यों की रक्षा करें ॥ १ ॥

शक्तिस्तुतिः

अन्तःस्मितोल्लसितमिन्दुकलावतंस-
मिन्दीवरोदरसहोदरनेत्रशोभि ।
हेतुस्त्रिलोकविभवस्य नवेन्दुमौले-
रन्तःपुरं दिशतु मङ्गलमादराद् वः ॥ २ ॥

यदुपहितस्य शिवस्य सृष्टिकर्तृत्वं तामुपस्तौति—अन्तरिति । नवेन्दुमौलेरन्तःपुरं वो मङ्गलमादराद् दिशत्विति योजना । अत्रापि वो मङ्गलं दिशतु इत्यनेन शिष्यकृपा सूचिता । यद्यपि तत्त्वतः शैवदर्शने—

न शिवेन विना शक्तिर्न शक्तिरहितः शिवः ।
न तत्त्वतस्तयोर्भेदश्चन्द्रचन्द्रिकयोरिव ॥ इति

शक्ति-शिवयोरैक्यमेव तथापि द्वितीयेन विना सृष्ट्यनुपपत्तेः लीलागृहीतं रूपं स्त्रीस्वरूपं वर्ण्यते । एतेन मैथुनसृष्टिः सूचिता । तस्या जगत्कारणतामाह— त्रिलोकविभवस्य हेतुरिति । चराचरात्मकत्वेन विस्तारो विभवः । कीदृशं अन्तः-स्मितोल्लसितं कल्पितमिदं जगद् विलसतीति हास्यकारणम् । ईश्वरे साभिलाषतया वा हासः । एतेनास्या ईश्वरक्षोभकता सूचिता । किञ्च 'यत्रानुकूल्यं दम्पत्योस्त्रि-वर्गस्तत्र वर्द्धते'

इति स्मृतेः दम्पत्यानुकूल्यतो विचित्रजगन्निर्माणं सूचितम् । पुनः कीदृक् इन्दुकलावतंसम् । अत्रावतंसशब्देन मुकुटाभरणमुच्यते । तथा नामलिङ्गानुशासने—

'पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखरे' इति ।

पुनः कीदृक् । इन्दीवरोदरसहोदरनेत्रशोभि । एतेन सर्वातिशायि सौन्दर्यं वर्णितम् । यद्वा नवेन्दुमौलेरित्यनेन भुवनेशीमन्त्र उक्तः । विशेषणैस्तदुद्धारः । त्रिलोकविभवस्य हेतुः शिवस्तेन हकारः । अन्तः स्मितं प्रकाशो यस्यासावन्तः-स्मितोऽग्निः रेफः तेनोल्लसितं युतम् । इन्दुकलावतंसमिति बिन्दुः । इन्दीवरोदर-सहोदरे नेत्रे यस्याः सा लक्ष्मीः तेन दीर्घ ईकारः । यद्वा इन्दीवरोदरस्य सहोदरं सुहृत् यन्नेत्रं चन्द्ररूपं तच्च वाममिति दीर्घ ईकारः तेन शोभि युक्तम् । एवं मिलित्वा भुवनेशीबीजम् ॥ २ ॥

अब ग्रन्थकार **सदाशिव एवं शक्ति की** स्तुति करते हैं—

क्योंकि शिव शक्ति से संयुक्त होने पर ही सृष्टि करने में समर्थ होते हैं । यद्यपि शिव शक्ति की एकात्मकता है तथापि सृष्टि में शक्ति की आवश्यकता होती है । उनके बिना सृष्टि संभव नहीं है। अतः शिव ही लीला से शक्ति का रूप धारण करते हैं ।

अपने अन्तःस्मित मात्र से इस समस्त विश्व की रचना कर देने वाले, इन्दुकला को मुकुटाभरण में धारण करने वाले, कमल के समान विशाल नेत्रों से सुशोभित तथा त्रैलोक्य रूप अनन्त ऐश्वर्य के हेतुभूत भगवान् सदाशिव का अन्तःपुर आदरपूर्वक आप सभी शिष्यों को मङ्गल प्रदान करे ॥ २ ॥

विमर्श—प्रस्तुत श्लोक में श्लेष से भुवनेश्वरी मन्त्र का भी निर्देश है—यथा त्रिलोक विभव 'हकार', अन्तःस्मित अग्नि 'रकार', इन्दीवरसहोदर लक्ष्मी 'दीर्घ ईकार', चन्द्रकलावतंस 'अनुस्वार'—इस प्रकार सब मिलाकर 'ह्रीँ' यह भुवनेश्वरी मन्त्र भी निर्दिष्ट है ॥ २ ॥

गुरुस्तुतिः

संसारसिन्धोस्तरणैकहेतून्
दधे गुरून् मूर्ध्नि शिवस्वरूपान् ।
रजांसि येषां पदपङ्कजानां
तीर्थाभिषेकश्रियमावहन्ति ॥ ३ ॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इत्यागमात् परदेवताभक्तिवद् गुरुभक्तेरपि विद्याप्राप्तावन्तरङ्गसाधनत्वावगमात् परदेवतायाः स्मरणानन्तरं गुरुनमस्कारमाह—संसारेति । शिवस्वभावान् गुरून् मूर्ध्नि दधे इत्यन्वयः । शिवस्वभावान् शिवस्वरूपानित्यर्थः । एतेन गुरुध्यानं तत्तद्देवता-रूपतया कर्त्तव्यमित्युक्तं भवति । तदुक्तम्—

गुरुं न मर्त्यं बुध्येत यदि बुध्येत तस्य तु ।
कदापि च भवेत् सिद्धिर्न मन्त्रैर्देवपूजनैः ॥ इति ।

अन्यत्रापि— तस्मादेवं विदित्वा तु गुरुं देवञ्च नान्यथा ।
त्रिकालप्रणिपातेन ध्यानयोगेन संयजेत् ॥ इति ।

अन्यत्रापि— ललाटे नयनं चान्द्रीं कलामपि च दोर्द्वयम् ।
अन्तर्निधाय वक्ष्यामि गुरुर्मर्त्ये महीयते ॥ इति ।
मूर्ध्नि दधे इत्यनेन गुरुध्यानं मूर्द्धनि कर्त्तव्यमित्युक्तं भवति ।

तदुक्तम्— प्रातः शिरसि शुक्लेऽब्जे द्विनेत्रं द्विभुजं गुरुम् ।
प्रसन्नवदनं शान्तं स्मरेत्तन्नामपूर्वकम् ॥ इति ।

अन्यत्रापि— श्रीमद्गुरुपदाम्भोजं मूर्द्धन्येव सदास्थितम् ।
यः स्मरेत् सात्त्विकैर्भावैः सोऽचिरात् खेचरो भवेत् ॥ इति ।

गुरूनिति बहुवचनं पूजार्थं गुरु-परमगुरु-परापरगुरु-परमेष्ठिगुर्वपेक्षया वा । तथा च ग्रन्थकृद्गुरुपङ्क्तिः । 'श्रीकण्ठं वसुमन्तं श्रीसोमानन्दमुत्पलाचार्यान्' इति । 'लक्ष्मणमभिनवगुप्तं वन्दे श्रीक्षेमराजञ्च' इति तच्छिष्याः । कीदृशान् संसारसिन्धोस्तरणैकहेतून् । अनेन विना गुरूपदेशं संसारतरणमशक्यमित्यप्युक्तम् । तथाच श्रुतिः—

'आचार्यवान् पुरुषो वेद' 'स गुरुमेवाभिगच्छेत्' इति ।

आगमश्च अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरुवे नमः ॥ इति ।

गुरुप्रणाममाहात्म्यमाह रजांसीति । एतेन पादोपसंग्रहणपूर्वकं गुरुनमस्कारः कर्त्तव्य इत्युक्तं भवति ॥ ३ ॥

अब 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ' इस आगम वचन के अनुसार गुरुभक्ति भी विद्या प्राप्ति में अन्तरङ्ग साधन है । इसलिए परदेवता के स्मरण के अनन्तर गुरु को ग्रन्थकार नमस्कार करते हैं—

संसार रूपी समुद्र के तारण में एकमात्र कारण शिवस्वरूप को मैं अपने शिर पर धारण करता हूँ, जिनके चरण कमलों की धूलि तीर्थाभिषेक का फल प्रदान करती है ॥ ३ ॥

विमर्श—श्लोक में 'गुरुन्' इस बहुवचन का प्रयोग है जो आदरार्थ है अथवा 'गुरु, परमगुरु, परापरगुरु और परमेष्ठि गुरु की अपेक्षा से बहुवचन का प्रयोग है—'येषां रजांसि' इस पद से यह व्यक्त किया गया है कि पादोपसंग्रहणपूर्वक गुरु को नमस्कार करना चाहिए ।

ग्रन्थ-प्रयोजनम्

सारं वक्ष्यामि तन्त्राणां शारदातिलकं शुभम् ।
धर्मार्थकाममोक्षाणां प्राप्तेः प्रथमकारणम् ॥ ४ ॥

ग्रन्थ प्रतिपाद्यविषयाः

शब्दार्थसृष्टिर्मुनिभिश्छन्दोभिर्दैवतैः सह ।
विधिश्च यन्त्रमन्त्राणां तन्त्रेऽस्मिन्नभिधीयते ॥ ५ ॥

सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥

इत्युक्तेः शिष्यबुद्ध्यनुकूलनार्थं ग्रन्थमाहात्म्यं प्रकाशयन् श्रोतृप्रवृत्तिनिमित्त-भूतान् विषय-प्रयोजन-सम्बन्धाधिकारिणो दर्शयति सारमित्यादिश्लोकद्वयेन । तन्त्राणां सारं श्रेष्ठं संग्रहरूपञ्च इत्यनेनास्योपादेयताऽतिसंक्षिप्तता चोक्ता । तत्र तन्त्राणामिति वैष्णव-शैव-शाक्त-गाणपत्य-सौराणां यतः सारम् अतएव शुभम् । शब्दसंक्षेपेऽप्याकांक्षित सकलार्थप्रतिपादकत्वमेव शुभत्वम् । धर्मार्थकामेत्यादि वक्ष्यति । तदुपयिको नामनिर्देशः शारदातिलकमिति । शीर्यत इति शारं स्थूलं कर्मफलं तद्ददातीति शारदा। तत्तत्कारणत्वेन ब्रह्मविद्याधिरूढा सती द्यति खण्डयतीति वा शारदा चिच्छक्तिः । यद्वा शरः स्वतन्त्रं तस्य भावः शारं स्वातन्त्र्यां तद्ददातीति अनाद्यविद्यां परिछेद्यजीवभावनिरासेन परमैश्वर्यप्रदायिका । तदुक्तं गौतमेन तन्त्रव्याकरणे—

शरः स्वतन्त्रं हृदयं स्फुरत्ता परमेशिता ।
शारश्चेत्युदिताः शब्दाः पर्यायाः स्वार्थवाचकाः॥ इति ।

तस्यास्तिलको भूषणम् । अनेनोत्कृष्टता दर्शिता । तत्रापि भूषणान्तरं न भवति किन्तु तिलकरूपः । तेन यथा मुखे वर्त्तमानस्तिलकाः सर्वतः प्रथमं दृश्यो भवति तद्वदयमपीत्यभिप्रायः । प्रथमं कारणं मुख्यकारणम् । यथा चास्य मुख्यत्वं तथा ग्रन्थसङ्गतिकथनप्रस्तावेऽस्माभिः पूर्वमेव प्रपञ्चितम् । शब्दार्थसृष्ट्यादि विषयः । चतुर्वर्गः फलम् । अनयोः प्रतिपाद्य-प्रतिपादकभावः सम्बन्धः । तदर्थी चाधिकारी । अस्य शास्त्रस्य च व्युत्पाद्य-व्युत्पादकभावः सम्बन्धः । शास्त्रविषयस्य फलस्य च साध्यसाधनभावः सम्बन्धः । इत्याद्यन्योऽपि यथायथमूहनीयः । सहेति त्रिभिः सम्बध्यते । मुनिभिः तपोयोगबलेन मन्त्रप्रथमज्ञातृभिः प्रथमाराधकैः ।

तदुक्तं गौतमेन— महेश्वरमुखाज्ज्ञात्वा गुरुर्यस्तपसा मनुम् ।
संसाधयति शुद्धात्मा पूर्वं च ऋषिरीरितः ॥ इति ।

तथाऽन्यत्र— येन यदृषिणा दृष्टं सिद्धिः प्राप्ता च येन वै ।
मन्त्रेण तस्य तत् प्रोक्तमृषेर्भावस्तदार्षकम् ॥ इति ।

छन्दः शब्दव्युत्पत्तिरुक्ताऽन्यत्र—

छादनाच्छन्द उद्दिष्टं वाससी इव चाकृतेः ।
आत्मनाच्छादितो देवैर्मृत्योर्भीतैस्तु वै पुरा ।
आदित्यैर्वसुभी रुद्रैस्तेन च्छन्दांसि तानि वै ॥ इति ।

तथाऽन्यत्रापि— मृत्युभीतैः पुरा देवैरात्मनश्छादनाय च ।
छन्दांसि संस्मृतानीह छादितास्तैस्ततोऽमराः ।
छादनाच्छन्द उद्दिष्टं सर्वं छन्दोभिरावृतम् ॥ इति ।

तत्तु गायत्र्यादि प्रसिद्धम् । दैवतं तत्तन्मन्त्रोद्दिष्टम् । यदाहुः—

यस्य यस्य च मन्त्रस्य उद्दिष्टा या तु देवता ।
तदाकारं भवेत्तस्य देवत्वं देवतोच्यते ॥ इति ।

दैवतैरिति विनियोगस्याप्युपलक्षणम् ।

तत्स्वरूपमुक्तमन्यत्र—

पुराकल्पे समुत्पन्ना मन्त्राः कर्मार्थमेव च ।
अनेन चेदं कर्त्तव्यं विनियोगः स उच्यते ॥ इति ।

अन्यत्रापि— धर्मार्थकाममोक्षेषु शास्त्रमार्गेण योजनम् ।
सिद्धमन्त्रस्य सम्प्रोक्तो विनियोगो विचक्षणैः ॥ इति ।

तज्ज्ञानाभावे दोष उक्तोऽन्यत्र—

दौर्बल्यं याति तन्मन्त्रो विनियोगमजानतः ॥ इति ।

छन्द-ऋषि-देवताज्ञानं मन्त्रसाफल्यार्थमवश्यमपेक्षितम् ।

तदुक्तं छन्दोगानामार्षेयब्राह्मणे—

यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्त्तं वा पद्यति प्र वा मीयते पापीयान् भवति । यातयामान्यस्य छन्दांसि भवन्ति । अथ यो मन्त्रे मन्त्रे वेद सर्वमायुरेति श्रेयान् भवति अयातयामान्यस्य छन्दांसि भवन्ति । तस्मादेतानि मन्त्रे मन्त्रे विद्यादृषीणां संस्थानो भवति संस्थानो भवति ब्रह्मणः स्वर्गे लोके महीयते स्मरन्न जायते पुनरिति ।

कात्यायनोऽपि—एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजयति वा तस्य ब्रह्मवीर्यं यातयामं भवति । अनुविज्ञायैतानि योऽधीते वीर्यवत्तरं यो यथार्थवित् तस्य वीर्यवत्तमं भवति । जपित्वा हुत्वेष्ट्वा फलं प्राप्नोतीति ।

'यश्च जानाति तत्त्वेन आर्षं छन्दश्च दैवतम् ।' इत्यादिना आगमेऽपि ।

याज्ञवल्क्योऽपि—आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च ।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ॥

अविदित्वा तु यः कुर्याद्याजनाध्ययनं जपम् ।
होममन्यच्च यत् किञ्चित् तस्य चाल्पं फलं भवेत् ॥ इति ।

विधिरिति । न्यास-जप-पूजा-होम-तर्पणाभिषेकसम्पातपातादिः । चकारः शब्दसृष्ट्यादेः प्रधानाप्रधानस्य समुच्चये । मन्त्रयन्त्राणामित्येकपदोपादानेऽपि मुन्यादीनां यथायोगं सम्बन्धः । तत्र मुनिच्छन्दसी होमतर्पणे च मन्त्र एव । देवतादीनि अन्यान्युभयत्रापि । सम्पातपातस्तु यन्त्रे तदुपलक्षितेषु प्रतिकृतिकुम्भशिलाप्रतिमाङ्गुलिकातैलघृतादिषु सम्बध्यते । एतानि देवतोपासकस्य स्थूलरूपतयोक्तानि । येषां सूक्ष्मरूपं यथा । यदाहुः—

स्वात्मैव देवता प्रोक्ता मनोज्ञा विश्वविग्रहा ।
न्यासस्तु देवतात्मत्वात् स्वात्मनो देहकल्पना ॥
जपस्तन्मयतारूपभावनं सम्यगीस्तिम् ।

पूजा तु चञ्चलत्वेऽपि तन्मयत्वाप्रमत्तता ॥
होमो विश्वविकल्पानामात्मन्यस्तमयो मतः ।
एषामन्योन्यसम्मेलभावनं तर्पणं स्मृतम् ॥
अभिषेकस्तु विद्या स्यादात्मैव स्वाश्रयो महान् ।
प्रयोगाः स्युरुपाधीनां हेतोः स्वात्मविमर्शनम् ॥
सन्ध्यासु भजनं तासामादिमध्यान्तवर्जनम् ।
मोहाज्ञानादिदुःखानामात्मन्यस्तमयो दृढम् ॥ इति ॥ ४-५ ॥

अब इस ग्रन्थ में शिष्य को प्रवृत्त करने के लिये ग्रन्थ का माहात्म्य तथा ग्रन्थ के विषय, प्रयोजन, सम्बन्ध एवं अधिकारी रूप चार अनुबन्धों का दिग्दर्शन कराते हैं, क्योंकि इन चार के होने पर ही श्रोता की प्रवृत्ति ग्रन्थ में होती है ।

(वैष्णव, शैव, शाक्त, गाणपत्य एवं सौर) सभी तन्त्रों का सार होने से सर्वथा कल्याणकारक, धर्म, अर्थ, काम तथा मोक्ष की प्राप्ति में प्रथम कारण भूत इस शारदा तिलक नामक ग्रन्थ को कहता हूँ ॥ ४ ॥

विमर्श—शारदातिलक का अर्थ है स्थूलकर्म का फल जो प्रदान करे उसे 'शारदा' कहते हैं, उसका तिलक अर्थात् भूषण स्वरूप शारदातिलक । अथवा शरः/स्वतन्त्रम्, तस्य भावः शारम्/स्वातन्त्र्यम् तद् ददातीति शारदा, तस्याः तिलकम् । प्राणी का जीवभाव निरस्त कर उसे अनन्त ऐश्वर्य प्रदान करने वाली शारदा का तिलक है । तिलक कहने का एक अभिप्राय यह भी है कि शरीर में सर्वप्रथम तिलक दिखाई पड़ता है उसी प्रकार यह भी तन्त्र के सभी ग्रन्थों में मुख्य एवं अपने ढङ्ग का अनूठा ग्रन्थ है । इस ग्रन्थ में शब्दार्थ सृष्टि आदि विषय हैं, धर्मार्थादि पुरुषार्थ चतुष्टय की प्राप्ति **फल** है प्रतिपाद्य प्रतिपादक भाव **सम्बन्ध** है । पुरुषार्थ चतुष्टय को चाहने वाला **अधिकारी** है ॥ ४ ॥

अब **इस ग्रन्थ का विषय** कहते हैं—इस शारदातिलक नामक तन्त्र ग्रन्थ में ऋषि, छन्द और देवता के सहित शब्दार्थ की सृष्टि तथा यन्त्र एवं मन्त्रों की विधि न्यास, जप पूजा होम, तर्पण, अभिषेक, संपात पातादि का निरूपण करता हूँ ।

विमर्श—किसी भी मन्त्र में मुनि, छन्द, देवता तथा विनियोग की आवश्यकता होती है, इसके जाने बिना मन्त्र की सिद्धि नहीं होती । मुनि वे हैं जिन्हें तपोयोगबल से मन्त्रों का साक्षात्कार हुआ है, अथवा उस मन्त्र के जप द्वारा उन्हें सिद्धि प्राप्त हुई हैं, वे ही उस मन्त्र के ऋषि कहे जाते हैं ।

जिस प्रकार शरीर को वस्त्र से आच्छादित किया जाता है उसी प्रकार मृत्यु से भयभीत ऋषियों ने जिससे अपने को ढक लिया वही छन्द है, देवताओं को आच्छादित करने के कारण ही उसकी छन्द संज्ञा कही गई है । यह छन्द गायत्री आदि नामों से प्रसिद्ध हैं । जिस जिस देवता को उद्देश्य कर जो जो मन्त्र कहे जाते हैं वे ही उस मन्त्र के देवता कहे जाते हैं, अतः उन मन्त्रों का भी उस देवता

के समान आकार होता है, इसलिये मन्त्र और देवता में कोई भेद नहीं अतः मन्त्र देवता स्वरूप ही होते हैं।

विनियोग का अर्थ है, कर्त्तव्य। मन्त्रों के उत्पत्ति कर्म के लिये ही हुई है, जिस मन्त्र से जो कार्य कर्त्तव्य हो, उस मन्त्र का वह विनियोग होता है, जैसे जपे विनियोगः। न्यासे विनियोगः। पाठे विनियोगः। अथवा धर्म, अर्थ, काम और मोक्ष रूप कार्यों में शास्त्रीय रीति से सिद्ध मन्त्रों की योजना करने का नाम विनियोग है। मन्त्र की फल प्राप्ति के लिये उसके ऋषि छन्द, देवता तथा विनियोग की आवश्यकता है। इसके बिना मन्त्र फलवान् नहीं होता ॥ ५ ॥

शिवस्य निर्गुणसगुणभेदेन द्वैविध्यम्

निर्गुणः सगुणश्चेति शिवो ज्ञेयः सनातनः।
निर्गुणः प्रकृतेरन्यः सगुणः सकलः स्मृतः ॥ ६ ॥

सृष्टिं वक्तुमुपोद्घातमाह निर्गुण इति। सनातनो नित्यः शिवो निर्गुणः सगुणश्च ज्ञेयः। आद्यस्य स्वरूपमाह निरिति। प्रकृतेरन्यः तत्सम्बन्धशून्यः। षष्ठ्या एवात्र प्राधान्येनोद्देश्यत्वात्। तेन सूक्ष्म इत्यर्थः। अतएवान्यशब्दार्थाभावात् न पञ्चमीयम्। तथा सत्यनुवादे पर्यवसानं स्यात्। यदुक्तं प्रयोगसारे—

नित्यः सर्वगतः सूक्ष्मः सदानन्दो निरामयः।
विकाररहितः साक्षी शिवो ज्ञेयः सनातनः ॥ इति।

नारायणीयेऽपि— निष्क्रियं निर्गुणं शान्तमानन्दमजमव्ययम्।
अजरामरमव्यक्तमज्ञेयमचलं ध्रुवम् ॥
ज्ञानात्मकं परं ब्रह्म स्वसंवेद्यं हृदिस्थितम्।
सत्यं बुद्धेः परं नित्यं निर्मलं निष्कलं स्मृतम् ॥ इति।

द्वितीयस्य स्वरूपमाह स इति। सगुणः सकलः कला प्रकृतिः तत्संहितः। सांख्यमते सत्त्वरजस्तमसां साम्यावस्था प्रधाना परपर्याया प्रकृतिः। अतएव सगुण इत्युक्तिः। वेदान्तनये तु अविद्या। शिवतन्त्रे शक्तिः।

उक्तञ्च नारायणीयप्रयोगसारयोः—

तच्छक्तिभूतः सर्वेशो भिन्नो ब्रह्मादिमूर्त्तिभिः।
कर्त्ता भोक्ता च संहर्त्ता सकलः स जगन्मयः ॥ इति ॥ ६॥

अब **शिव के निर्गुण एवं सगुण भेद** को कहते हैं—सनातन शिव निर्गुण और सगुण दो प्रकार के कहे गये हैं, प्रकृति सम्बन्ध से शून्य शिव निर्गुण हैं और प्रकृति के साथ रहने से सगुण हैं ॥ ६ ॥

विमर्श—वेदान्त मत में प्रकृति को अविद्या कहते हैं तथा उसी को शैव लोग शक्ति कहते हैं। सांख्य के मत में सत्त्व, रज और तम की साम्यावस्था को प्रधान या प्रकृति कहते हैं।

शक्त्याविर्भावः, नादोत्पत्तिः, ततो बिन्दूद्भवः

सच्चिदानन्दविभवात् सकलात् परमेश्वरात् ।
आसीच्छक्तिस्ततो नादो नादाद् बिन्दुसमुद्भवः ॥ ७ ॥

सृष्टिमाह सदिति । तस्याविद्याशबलितत्वेन जडत्वे कथं सृष्टिकर्तृत्वम् इति शङ्कां वारयति सच्चिदानन्दविभवादिति । अनेनाविद्योपहितत्वेऽपि तस्य न स्वरूपहानिरित्यर्थः । सकलाच्छक्तिरासीदिति योजना । शक्तिसहितादेव पुनः शक्तिः कथमासीदिति चेत् सत्यम् । या अनादिरूपा चैतन्याध्यासेन महाप्रलये सूक्ष्मा स्थिता तस्या गुणवैषम्यानुगुणतया सात्त्विक-राजस-तामसस्रष्टव्यप्रपञ्चकार्य साधने उच्छूनावस्थात्वमेव उपचारादुत्पत्तिः। इयञ्च सदुत्पत्तिवादिसांख्यमतमाश्रित्य ग्रन्थकारस्योक्तिरिति ज्ञेयम् । तदुक्तं प्रयोगसारे—

तस्माद् विनिर्गता नित्या सर्वगा विश्वसम्भवा । इति ।

वायवीयसंहितायामपि—शिवेच्छया पराशक्तिः शिवतत्त्वैकतां गता ।
ततः परिस्फुरत्यादौ सर्गे तैलं तिलादिव ॥ इति ।

पञ्चरात्रेऽपि—एवमालोक्य सर्गादौ सच्चिदानन्दरूपिणीम् ।
समस्ततत्त्वसङ्घात्मस्फुर्त्त्यधिष्ठानरूपिणीम् ।
व्यक्तां करोति नित्यां तां प्रकृतिं परमः पुमान् ॥ इति ।
तस्या एव नादबिन्दू सृष्ट्युपयोगावस्थारूपौ ।

तदुक्तं प्रयोगसारे—
नादात्मना प्रबुद्धा सा निरामयपदोन्मुखी ।
शिवोन्मुखी यदा शक्तिः पुंरूपा सा तदा स्मृता ॥
सैव सर्गक्षमा तेन । इति ।
आचार्यास्तु-सा तत्त्वसंज्ञा चिन्मात्रज्योतिषः सन्निधेस्तदा ।
विचिकीर्षुर्घनीभूता क्वचिदभ्येति बिन्दुताम् ॥ इति ।

अन्यत्रापि— अभिव्यक्ता परा शक्तिरविनाभावलक्षणा ।
अखण्डपरचिच्छक्तिर्व्याप्ता चिद्रूपिणी विभुः ॥
समस्ततत्त्वभावेन विवर्त्तेच्छासमन्विता ।
प्रयाति बिन्दुभावञ्च क्रियाप्राधान्यलक्षणम् ॥ इति ।

अतएव वक्ष्यमाणशैवतत्त्वेषु शुद्धानां पञ्चानामेव ग्रहणम्। अत्र यद्यप्यन्यैर्ग्रन्थकृद्भिर्नादावस्था नोक्ता तथापि ग्रन्थकृता तारस्य सप्तात्मकत्वं सूचयितुमेतदुक्तिः कृता । कालं प्रस्तुवद्भिराचार्यैः सूचितैव नादावस्था । यदाहुः—'रवात्मन्यथो कालतत्त्वे' इति । भुवनेशीस्तुतावप्याचार्याः 'नमस्ते रवत्वेन तत्त्वाभिधाने' इति ॥ ७ ॥

अब **सृष्टि का क्रम** कहते हैं—सत् चित् एवं आनन्द रूप ऐश्वर्य से पूर्ण उस सगुण परमेश्वर के प्रकृति से युक्त हो जाने पर शक्ति उत्पन्न हुई, शक्ति से नाद और नाद से बिन्दु की उत्पत्ति हुई ॥ ७ ॥

विमर्श—परमेश्वर की प्रथम कला (शक्ति या प्रकृति) जो प्रलय काल में अत्यन्त सूक्ष्म अनादि और चैतन्य युक्त थी वही परमेश्वर के संयोग होने पर पुनः सत्त्व, रज और तमोगुण से युक्त हो कर सृष्टि के योग्य, प्रपञ्च कार्य में साधन में सक्षम हो कर स्थूल रूप से उत्पन्न हुई । इसीलिये शैवागम में प्रधानतया, शक्ति, नाद और बिन्दु पाँच तत्त्व निष्कल, सकल माने गये हैं ।

नादोत्थबिन्दोस्त्रिभेदः

परशक्तिमयः साक्षात् त्रिधाऽसौ भिद्यते पुनः ।
बिन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः ॥ ८ ॥
बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः ।
समवायः समाख्यातः सर्वागमविशारदैः ॥ ९ ॥

इच्छाशक्त्या(सत्त्वा)दिरूपतया बिन्दोस्त्रैविध्यमाह परेति । साक्षात् परशक्तिमयः अतः पश्चात्तदवस्थात्मकत्वमेवोक्तम् । अथवा परः शिवः तन्मयः शक्तिमयः एवमुभयात्मकः । 'बिन्दुः शिवात्मकः' इति वक्ष्यमाणत्वात् । असौ त्रिधा भिद्यते । एतौ नादबिन्दू प्रथमोक्तनादबिन्दुभ्यामन्यौ तत्कार्यरूपौ ज्ञेयौ । तदुक्तं 'स बिन्दुर्भवति त्रिधा' इति ॥ ८ ॥

बिन्द्वादेर्भेदत्रयस्य परम्परास्वरूपमाह बिन्दुरिति । धर्मिणावुक्त्वा तत् सम्बन्धो वाच्य इत्यभिप्रायेण व्युत्क्रमः शक्त्युत्पत्त्यनुरोधात् पूर्वत्र तथाक्रमः । समवायः सम्बन्धः क्षोभ्यक्षोभकरूपः सृष्टिहेतुः । उक्तेऽर्थे प्रमाणमाह सर्वागमविशारदैरिति ॥ ९ ॥

वह परशक्तिमय बिन्दु पुनः तीन रूपों में प्रविभक्त हुआ । १. बिन्दु, २. नाद और ३. बीज—ये उसके तीन भेद हैं । इसमें कहे गये बिन्दु और नाद प्रथम कहे गये (१, ७) नाद और बिन्दु से भिन्न हैं ।

बिन्दु शिवात्मक है, बीज शक्त्यात्मक है, शिव शक्ति के सम्बन्ध से नाद की उत्पत्ति हुई है ऐसा तत्त्वागम विशारदों ने कहा है । शिव जब शक्ति में क्षोभ उत्पन्न करता है तो उससे उत्पन्न हुआ नाद सृष्टि का हेतु हो जाता है ।

विमर्श—यहाँ बिन्दु के कथन के बाद नाद कहना चाहिए था किन्तु शक्ति का कथन किये बिना नाद नहीं कहा जा सकता था, इसलिये यहाँ क्रम विरुद्ध कहा गया है ॥ ८-९ ॥

रौद्री बिन्दोस्ततो नादाज्ज्येष्ठा बीजादजायत ।
वामा ताभ्यः समुत्पन्ना रुद्रब्रह्मरमाधिपाः ॥ १० ॥

रौद्रीति । ततस्तस्माद् बिन्दो रौद्री यतस्तस्य शिवमयत्वम् अतोऽन्वर्थतापि । नादात् ज्येष्ठा इति मध्योच्चारितत्वे तत्त्वेनान्वर्थत्वं ज्ञेयम् । बीजाद् वामा अजायतेति सम्बन्धः । तस्य शक्तिमयत्वादन्वर्थत्वम् । तदुक्तं प्रयोगसारे—

बिन्दुः शिवात्मकस्तत्र बीजं शक्त्यात्मकं स्मृतम् ।
तयोर्योगे भवेन्नादस्तेभ्यो जातास्त्रिशक्तयः ॥
रौद्री बिन्दोः समुद्भूता ज्येष्ठा नादादजायत ।
वामा बीजादभूच्छक्तिस्ताभ्यो देवास्त्रयोऽभवन् ॥ इति ॥ १० ॥

बिन्दु से रौद्री, नाद से ज्येष्ठा और बीज से वामा की उत्पत्ति हुई । पुनः उनसे क्रमशः रुद्र, ब्रह्मा और विष्णु उत्पन्न हुये ॥ १० ॥

शब्दब्रह्मोत्पत्तिः

संज्ञानेच्छाक्रियात्मानो वह्निन्द्वर्कस्वरूपिणः ।
भिद्यमानात् परात् बिन्दोरव्यक्तात्मा रवोऽभवत् ॥ ११ ॥

संज्ञाने इति । संज्ञाने इच्छाक्रियो तदात्मानः तेन रुद्रब्रह्मरमाधिपाः क्रमेण इच्छाशक्ति-क्रियाशक्ति-ज्ञानशक्तिस्वरूपाः । क्वचित् ते ज्ञानेच्छेति पाठः सः असाम्प्रदायिक एव । एते वह्नीन्द्वर्कस्वरूपिणो रुद्रब्रह्मरमाधिपाः शब्दसृष्ट्यन्तर्गताः निरोधिकार्द्धेन्दु बिन्दुरूपाः शक्तेरेवावस्थाविशेषा ज्ञेयाः । एषामिच्छाक्रियाज्ञानात्मत्वं शक्तित उत्पन्नत्वात् । वक्ष्यति च—'इच्छाज्ञानक्रियात्माऽसौ' इति ।

ईश्वरप्रत्यभिज्ञायामपि—

यत इच्छन्ति तज्ज्ञातुं कर्त्तुं वा स्वेच्छया क्रियाः ।
अनन्तरं हि तत्कार्यज्ञानदर्शनशक्तिता ॥
ज्ञानशक्तिस्तदर्थं हि योऽसौ स्थलः समुद्यमः ।
सा क्रियाशक्तिरुदिता ततः सर्वं जगत् परम् ॥ इति ।

यतः पुनस्तेषां वक्ष्यमाणत्वात् ततो रुद्रसमुद्भवस्ततो विष्णुस्ततो ब्रह्मा इति । अन्यथा पूर्वापरविरोधोऽपि स्यात् । यतो ग्रन्थकृत् तस्यां सूर्येन्दुपावकान् 'प्रणवस्य त्रिभिर्वर्णैरिति' वक्ष्यति । तत्र प्रणवांशा अकारोकारमकारा ब्रह्मविष्णु रुद्रात्मकाः । 'अकाराद् ब्रह्मणोत्पन्नः' इत्यादेर्वक्ष्यमाणत्वात् । आगमान्तरे च—ब्रह्मविष्णवीश्वरास्तत्तन्मण्डलेषु व्यवस्थिताः । इति ।

तेन तत्र सूर्यरूपः अकारो ब्रह्मा अत्र च सूर्यरूपो विष्णुरिति । अतो वक्ष्यमाणक्रमोऽर्थसृष्ट्यनुसारेणानुसन्धेयः । ग्रन्थकृच्च वक्ष्यति—

शब्दार्थभाविभुवनं सृजतीन्दुरूपा या तद्विभर्त्ति पुनरर्कतनुः स्वशक्त्या । वह्न्यात्मिका हरति तत् सकलं युगान्ते तां शारदां मनसि जातु न विस्मरामि ॥ इति।

गोरक्षसंहितायामपि—

इच्छा क्रिया तथा ज्ञानं गौरी ब्राह्मी तु वैष्णवी ।
त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति ॥
आचार्या अपि—आद्यैस्त्रिभेदै स्तपनान्तिकैर्यत् । इति—

शब्दब्रह्मण उत्पत्तिमाह भिद्यमानादिति । पराद् बिन्दोरित्यनेन शक्त्यवस्थारूपो यः प्रथमो बिन्दुस्तस्मादव्यक्तात्मा वर्णादिविशेषरहितोऽखण्डो नादमात्र उत्पन्नः ॥ ११ ॥

वे रुद्र ब्रह्मा और विष्णु, क्रमशः इच्छा, क्रिया और ज्ञानात्मा हैं तथा अग्नि, चन्द्र और सूर्य स्वरूप हैं (प्रथम इच्छा, तदनन्तर कार्य, तदनन्तर ज्ञान यही क्रम है और ये शक्ति से उत्पन्न हुये हैं) इच्छा शक्ति गौरी, क्रिया शक्ति ब्राह्मी और ज्ञान शक्ति वैष्णवी शक्ति है पर बिन्दु के (शक्त्यवस्था रूप) प्रथम बिन्दु (द्र० १. ७) से वर्ण विशेष रहित अखण्ड नाद उत्पन्न हुआ ॥ ११ ॥

शब्दब्रह्मेति तं प्राहुः सर्वागमविशारदाः।
शब्दब्रह्मेति शब्दार्थं शब्दमित्यपरे जगुः॥ १२ ॥

तस्य चैतन्यात्मकता

न हि तेषां तयोः सिद्धिर्जडत्वादुभयोरपि ।
चैतन्यं सर्वभूतानां शब्दब्रह्मेति मे मतिः ॥ १३ ॥

तत्स्वरूपमाह शब्देति । सर्वागमविशारदाः सर्वश्रुत्यर्थविदः। तदुक्तमाचार्यैः—

स रवः श्रुतिसम्पन्नैः शब्दब्रह्मेति कथ्यते। इति । सृष्ट्युन्मुखपरमशिवप्रथमोल्लासमात्रम् अखण्डोऽव्यक्तो नादबिन्दुमय एवं व्यापको ब्रह्मात्मकः शब्दः शब्दब्रह्मेत्यर्थः ॥ उक्तञ्च—

क्रियाशक्तिप्रधानायाः शब्दः शब्दार्थकारणम् ।
प्रकृतेर्विन्दुरूपिण्याः शब्दब्रह्माऽभवत् परम् ॥

अथान्तरस्फोटवादिमतं जातिव्यक्तिस्फोटात्मकं वा बाह्यस्फोटमतञ्च दूषयितुमुपक्रमते शब्देति । एके आचार्याः शब्दार्थमान्तरस्फोटं शब्दब्रह्मेत्याहुः । यथाहि—

'निरंश एवाभिन्नो नित्यो बोधस्वभावः शब्दार्थमयान्तरः स्फोटः' इति । अपरे वैयाकरणाः पूर्ववर्णोच्चारणाभिव्यक्तं तत्तत्पदसंस्कारसहायचरमपदग्रहणोद्बुद्धं वाक्यस्फोटलक्षणं शब्दमखण्डैकार्थप्रकाशकं शब्दब्रह्मेति वदन्ति । यदाह—

'एक एव नित्यो वाक्याभिव्यङ्ग्योऽखण्डो व्यक्तिस्फोटो जातिस्फोटो वा वहोरूपः' इति ॥ १२ ॥

तदुभयमतं दूषयन् स्वमतमाह नहीति । तेषां वादिनां मते तयोः शब्दशब्दार्थयोः सिद्धिः शब्दब्रह्मत्वसिद्धिर्न । उभयोस्तयोर्जडत्वात् । यदि शब्दार्थः शब्दो वा शब्दब्रह्मेत्युच्यते तदा ब्रह्मपदवाच्यत्वं नोपपद्यते । यतः सच्चिदानन्दरूपो ब्रह्मपदार्थः । तौ च जडौ । तदुक्तं भर्तृहरिणा—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ इति ।

अन्यत्रापि—शब्दब्रह्मेति शब्दावगम्यमर्थं विदुर्बुधाः ।
स्वतोऽर्थानवबोधत्वात् प्रोक्तो नैतादृशो रवः ॥
स तु सर्वत्र संस्यूतो जाते भूताकरे पुनः ।
आविर्भवति देहेषु प्राणिनामर्थविस्तृतः ॥ इति ।

तेन सर्वागमविशारदा इत्यनेन सहैकवाक्यतैवास्य । तद्बिन्दुरूपरवस्यैव सर्वशरीरेष्वाविर्भूतत्वेन वक्ष्यमाणत्वात् ।

यदुक्तं प्रयोगसारे—

सोऽन्तरात्मा तदा देवी नादात्मा नदते स्वयम् ।
यथासंस्थानभेदेन स भूयो वर्णतां गतः ।
वायुना प्रेर्यमाणोऽसौ पिण्डाद् व्यक्तिं प्रयास्यति ॥ इति ।

केचित्तु शब्दब्रह्मेति शब्दस्यार्थं शब्दमेवाहुरिति योजनां कृत्वा सर्वागमविशारदा इत्येकः पक्षः । अपरे बिन्दुरिति द्वितीयः, तयोर्दूषणमित्याहुः । तत्र । जडत्वादिति हेतुः प्रथमपक्षे न सम्भवति आचार्यमतविरोधश्चापद्येत । तेन सर्वागमविशारदा इत्ययमेवपक्षो ग्रन्थकृदभिमत इति ॥ १३ ॥

संपूर्ण आगम शास्त्र के विद्वान् उसे **शब्दब्रह्म** कहते हैं कोई शब्दार्थ को **शब्दब्रह्म** कहते हैं, कोई केवल अखण्ड स्फोटात्मक शब्द को **शब्दब्रह्म** कहते हैं। किन्तु ये दोनों ही जड़ होने से सृष्टि के योग्य नहीं, अतः वे **शब्दब्रह्म** नहीं हो सकते। ग्रन्थकार कहते हैं कि हमारा मत तो यह है कि बिन्दु से उत्पन्न हुआ संपूर्ण प्राणियों के भीतर चैतन्य रूप से विद्यमान अखण्डनाद ही **शब्दब्रह्म** है (द्र. १.·११-१२) यहाँ तक शब्दसृष्टि कही गई । अब नीचे के श्लोक में उसका समापन करते हैं ॥ १२-१३ ॥

तस्य कुण्डलीरूपेण प्राणिदेहे स्थितिः

तत् प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम् ।
वर्णात्मनाऽविर्भवति गद्यपद्यादिभेदतः ॥ १४ ॥

एवं परां तां शब्दसृष्टिमुक्त्वा सामान्यतः समापयति तत् प्राप्येति । प्राणिनां देहमध्यगं कुण्डलीरूपं कुण्डलिनीस्वरूपं तच्चैतन्यं गद्यपद्यादिभेदतो वर्णात्मना आविर्भवतीति सम्बन्धः । किं कृत्वा । प्राप्य कण्ठादिकरणानीति शेषः । अतएव वक्ष्यमाणा सृष्टिः कुण्डलिनीत इति ज्ञेयम् ॥ १४ ॥

प्राणियों के शरीर के मध्य में कुण्डली रूप को प्राप्त हुआ वही चैतन्य कण्ठादि स्थानों को प्राप्त कर गद्य पद्यादि भेद से वर्णात्मक स्वरूप से आविर्भूत होता है । इसलिये ये सारी शब्द सृष्टि कुण्डलिनी से ही होती है ॥ १४ ॥

पश्यन्तीशब्दसृष्टिकथनारम्भः

अथ बिन्द्वात्मनः शम्भोः कालबन्धोः कलात्मनः।
अजायत जगत्साक्षी सर्वव्यापी सदाशिवः ॥ १५ ॥

सदाशिवेशरुद्रविष्णुब्रह्मोत्पत्तिः

सदाशिवाद् भवेदीशस्ततो रुद्रसमुद्भवः ।
ततो विष्णुस्ततो ब्रह्मा तेषामेवं समुद्भवः ॥ १६ ॥

एवं प्राधान्यद्योतनाय प्रथमोद्दिष्टां परां तां शब्दसृष्टिमुक्त्वा पश्यन्त्यादीनां शरीरसृष्टिव्यतिरेकेण वक्तुमशक्यत्वात् तां वक्तुमर्थसृष्टिमारभते अथेति । कला माया तदात्मनः तत उत्पन्नत्वात् । बिन्दुरपि तस्यैवावस्थान्तरम् । तदात्मन इत्युभयत्र कार्ये कारणोपचारात् । तदुक्तम्—

सर्वज्ञादिगुणोपेतामभिन्नामात्मनः सदा । इति ।

यद्वा कला निवृत्त्याद्या अधिष्ठातृसदाशिवादीनां प्रातिलोम्येनोत्पादिकाः तदात्मनः। कालबन्धोरिति । अनाद्यनन्ते काले सृष्टिरूपकालसहायान्नादात्मन इत्यर्थः। शम्भोः परमशिवात् सृष्टिस्थितिध्वंसनिग्रहानुग्रहकार्यपञ्चककर्त्ता, अतएव जगन्निर्माणबीजरूपो जगत्साक्षी सदाशिवो जातः । अथ च कालबन्धोः, अतएव कालात्मन इति हेतुहेतुमद्भावेन योजना ।

'सा तु कालात्मना सम्यक् मयैव ज्ञायते सदा' इति आचार्योक्तेः ।

अनेन विशेषणद्वयेन प्रकृतेः कालस्य च महाप्रलयेऽप्यवस्थानमुक्तम् । अतएव अनयोरापेक्षकनित्यता । स्वतो नित्यत्वं पुरुषस्यैव । सर्वविनाशस्य पुरुषावधित्वादन्यथाऽनवस्थानादित्यादियुक्तिः द्रष्टव्या । अथ च कालबन्धोरिति बन्धुशब्देन कालस्य निमित्तत्वं सूचितम् । यदाहुः—

लवादिप्रलयान्तोऽयं तमः शक्तिविजृम्भितः ।
निमित्तभूतः कालोऽयं भावानां जन्मनाशयोः ॥ इति ।

अन्यत्रापि—अनादिर्भगवान् कालो नान्तोऽस्य द्विज विद्यते ।
अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः ॥ इति ।

कालबन्धोरित्यनेन अपरो लवादिप्रलयान्तः कालोऽपि सूचितः । तेनैव परकालस्योक्तत्वात् । स च—

'नलिनीपत्रसंहत्या सूक्ष्मसूच्यभिवेधने ।
दले दले तु यः कालः स कालो लवसंज्ञकः ॥
लवैस्त्रुटिः स्यात् त्रिंशद्भिः' इत्यादिना
'तवायुर्मम निश्वासः कालेनैव प्रचोद्यते ।'

इत्यन्तेन ग्रन्थसन्दर्भेणाचार्यैः विवेचितः । अस्माभिस्तु ग्रन्थगौरवभयात् नोक्तः । अन्ये त्वेवं व्याचक्षते कालबन्धोः कालात्मनः कश्च लश्च इति प्रत्याहारेण व्यञ्जनानि गृहीतानि । अश्चेत्यनेन स्वरा अपि गृहीताः । तदात्मन इति । अन्ये त्वन्यथा व्याचक्षते—कश्च लश्च आत्मा दीर्घेकारः । चतुर्णामात्मनां चतुर्थ इत्युक्तेः । कालशब्देनार्कस्तेन मः । यद्वा कालशब्देन महाकालो मकारस्य रुद्रमूर्त्तिर्गृहीता । भीमो भीमसेन इतिवत् । तेन मकारः। एवं मिलित्वा कामबीजमुद्धृतम् । तस्मादित्युक्तं भवति । तस्य जगन्मूलत्वात् शम्भोः भ्रमन्तं योन्यन्तःस्फुरदरुणबन्धककुसुमप्रभं कामं ध्यायेज्जठरशशभृत्कोटिशिखरम् ।

इत्यादिना शरीरे मूलाधारे तेजस्त्रयरूपस्य तस्यैवोक्तत्वात् शक्तिरूपत्वाच्च बिन्द्वात्मन इति । तदुक्तम्—

विश्वं भूतेन्द्रियान्तःकरणमयमिनेन्द्वग्निरूपं समस्तं
वर्णात्मैतत् प्रधाने कमलनयनमये बीजरूपे क्रमेण ।
नीत्वा तां पुंसि बिन्द्वात्मनि तमपि रवात्मन्यथो कालतत्त्वे
तं वै शक्तौ चिदात्मन्यपि नयतु च तां केवले धाम्नि शान्ते ॥ इति ।

अन्ये तु शम्भोः हकारात् कलाऽर्द्धेन्दुरात्मा ईकारः बिन्दुः बिन्दुरेव कालोऽग्निः प्रलये सर्वविनाशकत्वात् । एवं मायाबीजमुद्धृतम् । तस्मादित्युक्तम् अस्य जगन्मूलबीजभूतत्वं प्रसिद्धमेव । इदञ्च व्याख्यानमाचार्यचरणसम्मतमिति । तदुक्तमाचार्यैः—

स्वामिन् प्रसीद विश्वेश के वयं केन भाविताः ।
किं मूलाः किं क्रियाः सर्वमस्मभ्यं वक्तुमर्हथ ।
इति पृष्टः परं ज्योतिरुवाच प्रमिताक्षरम् ॥

इत्यस्य पद्यस्य व्याख्याने पद्मपादाचार्यैर्व्याख्यातम्—सर्वेश्वर उपादानादिकं संग्रहेणोक्तवान् इत्याह—इति पृष्टेति । प्रकर्षेण मीयते ज्ञायते इति प्रमिता प्रकृतिः प्रमिनोति जानातीति प्रमितः पुरुषः प्रमिनोति परिच्छिनत्तीति प्रमितः कालः । तेषां प्रमितानां वाचकमक्षरं तदभिन्नं प्रमिताक्षरम् । परा वाक् सतत्त्वं हकार इत्यर्थः । तस्य बीजबिन्दुनादरूपेण प्रकृत्यादिवाचकत्वं द्रष्टव्यम् । एतेन इत्युत्तरमुवाचेत्यर्थः । संग्रहेणोक्तस्याप्रतिपत्तिमालक्ष्य तदेव विवृणोति—

यूयमक्षरसम्भूताः सृष्टिस्थित्यन्तहेतवः । इति ।

न क्षरत्यश्नुते वेति व्युत्पत्त्या 'अक्षरात् सम्भवतीह विश्वम्' इत्यादिना । तेषामिति । शब्दसृष्टौ तेषामुद्भव उक्त एव । तेषामेवं समुद्भवः अर्थसृष्टा वित्यर्थः ॥ १५-१६ ॥

अब परा, पश्यन्ती आदि वाणियों के उत्पत्तिस्थानभूत शरीर की सृष्टि का उपक्रम बताते हैं, क्योंकि शरीर के बिना परा, पश्यन्ती आदि वाणियों का उत्पन्न होना संभव नहीं है । इसलिये अर्थ सृष्टि का आरम्भ करते हैं—

माया (प्रकृति) से संवलित बिन्द्वात्मक शरीर वाले उस परम शिव से अनादि अनन्त काल की सहायता से सृष्टि, स्थिति, ध्वंस, निग्रह और अनुग्रह में समर्थ जगन्निर्माणबीजरूप जगत्साक्षी सदाशिव उत्पन्न हुये ।

विमर्श—लव से लेकर प्रलयान्त समय की काल संज्ञा है । सूक्ष्म सूई से कमल पत्र समूह में एक पत्र के भेदन में जितना समय लगता है वह लव कहा जाता है ।। १५ ।।

सदाशिव से ईश्वर उत्पन्न हुये, ईश्वर से रुद्र उत्पन्न हुये रुद्र से विष्णु और विष्णु से ब्रह्मदेव की उत्पत्ति हुई ।

विमर्श—इस प्रकार त्रिदेवों की उत्पत्ति का क्रम कहा गया । शब्द सृष्टि के प्रकरण में इनके उत्पत्ति का क्रम पूर्व (१. ८-११) में कह दिया गया है । इस प्रकार यहाँ अर्थ सृष्टि में इनकी उत्पत्ति कही गई है ॥ १६ ॥

तत्त्वसृष्टिकथनारम्भः

मूलभूतात् ततोऽव्यक्ताद् विकृतात् परवस्तुनः।

महत्तत्त्वोत्पत्तिः

आसीत् किल महत्तत्त्वं गुणान्तः करणात्मकम् ॥ १७ ॥

एवं प्रकृतायामर्थसृष्टौ तत्त्वसृष्टिं वक्तुमारभते मूलेति। मूलभूतात् सर्वसृष्टिमूलरूपादतएव परवस्तुनः अव्यक्ताद् बिन्दुरूपात् । यद्वा शब्दब्रह्मणः विकृतात् सृष्ट्युन्मुखात् महत्तत्त्वं महन्नामपदार्थः आसीत् उत्पन्नः । यस्य शैवमते बुद्धितत्त्वमिति संज्ञा । किं रूपं सत्वरजस्तमोगुणात्मकम् मनोबुद्ध्यहङ्कारचित्तस्वरूपम् । अन्तः-करणचतुष्टयात्मकता तु तत्कारणत्वेन कार्ये कारणोपचारात् । एवं शैव-सिद्धान्तविदः । तदुक्तमीशानशिवेन—

बोद्धव्यलक्षणा सैव प्रकृतिः शक्तिजृम्भिता ।
बुद्धितत्त्वं भवेद्व्यक्तं सात्त्विकं गुणमाश्रिता ।
सैव बुद्धिर्महन्नाम तत्त्वं सांख्ये निगद्यते ॥ इति ।

वामकेश्वरेऽपि—

अव्यक्तविग्रहाच्छब्दब्रह्मणः सर्वकारणम् ।
व्यक्तसत्त्वगुणं व्यक्तं बुद्धितत्त्वमजायत ॥ इति ।

सांख्यमते तु—सत्त्वरजस्तमसां साम्यावस्थारूपं प्रकृतिः प्रधानापरपर्यायम-व्यक्तशब्देनोच्यते । तत् परवस्तु सर्वमूलभूतम् । गुणन्यूनातिरेकेण विकृतात्तस्मात् महानुत्पन्नः । स कीदृशः । गुणान्तःकरणात्मा । गुणाः शब्दस्पर्शरूपरसगन्ध-तन्मात्राणि । येषामन्तःकरणचतुष्टयस्यापि कारणरूपः । उपचारादुभयात्मकः । तथा तत्सृष्टिक्रमोऽपि प्रकृतेर्महान् महतोऽहङ्कार इति ॥ १७ ॥

जगत् के कारण भूत उस अव्यक्त मूल प्रकृति (परवस्तु) में (सत्त्वादि) गुणों के वैषम्य के कारण पञ्चतन्मात्रायें एवं अन्तःकरण चतुष्टय का कारणभूत इस प्रकार उभयात्मक महत्तत्त्व उत्पन्न हुआ ॥ १७ ॥

अहङ्कारोत्पत्तिः । तस्य त्रैविध्यम्

अभूत्तस्मादहङ्कारस्त्रिविधिः सृष्टिभेदतः ।
वैकारिकादहङ्काराद्देवा वैकारिका दश ॥ १८ ॥

ततो देवेन्द्रियभूतानामुत्पत्तिः

दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ।

पञ्चतन्मात्रोत्पत्तिः

तैजसादिन्द्रियाण्यासंस्तन्मात्राक्रमयोगतः ॥ १९ ॥

अभूदिति । तस्मान्महतस्त्रिविधोऽहङ्कारः सृष्टिभेदतो जातः । वैकारिकास्तैजसो भूतादिश्चेति । तदुक्तम्—

अव्यक्तमेव तु व्यक्तं तन्महन्नामलक्षणम् ।
ततोऽहङ्कारतत्त्वं स्यात् सत्त्वादिगुणभेदकम् ॥
सोऽहङ्कारस्त्रिभेदः स्यात् पृथक् सत्त्वादिभेदतः ।
वैकारः सात्विको नाम तैजसो राजसः स्मृतः ।
भूतादिस्तामसस्तेऽपि पृथक् तत्त्वान्यवासृजन् ॥ इत्यादि ।

तत्तत्कार्यं वदन्नेवं त्रैविध्यमुन्मीलयति वैकारिकादित्यादिना। शक्तिसामरस्यविकृतपरमेश्वरादुत्पन्नत्वात् वैकारिकत्वमस्य । तदुत्पन्नत्वाद् देवानामपि तथात्वम् । सांख्यमतेऽपि गुणोद्रेकविकृतप्रधानोत्पत्तेस्तादृक्त्वम् ॥ १८ ॥

तानेवाह दिगित्यादि । अश्वीत्यश्विनीकुमारौ यद्यप्येतौ द्वौ तथापि सहचारित्वात् सहजातत्वादेकत्वेनोक्तिः । उपेन्द्रो विष्णोरेकामूर्त्तिः । मित्रस्तृतीयः सूर्यः । तदुक्तं 'मित्रो भानुस्तृतीयकः' इति । को ब्रह्मण एका मूर्त्तिः । चन्द्रोऽपि ज्ञेयः । एते इन्द्रियाधिष्ठातृदेवा इति ज्ञेयम् । यदाहुः—

वैकारिका दिगाद्या ये चन्द्रेणैकादश स्मृताः ।
इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिताः ॥ इति ।

तैजसादिति । तैजसादहङ्कारादिन्द्रियाणि कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि मनश्च । तदुक्तम्—

यच्चापरं मनस्तत्त्वं ससङ्कल्पविकल्पकम् ।
तैजसादेव सञ्जातम् । इति ।

अन्यत्रापि—तैजसतस्तत्र मनो वैकारितो भवन्ति चाक्षाणि ।
भूतादेस्तन्मात्राण्येषां यत् सर्गोऽयमेतस्मात् ॥ इति ।

अक्षाणि अक्षाधिष्ठातृदेवताः । सांख्यमते वैकारिकादहङ्कारात् तैजसाहङ्कारमिलितात् इन्द्रियाण्यासन्निति । एवं तैजसाहङ्कारसहिताद् भूतादेरपि तन्मात्रोत्पत्तिः । तदुक्तम्—

सात्त्विक एकादशकः प्रवर्त्तते वैकारिकादहङ्कारात् ।
भूतादेस्तन्मात्रः स तामसः तैजसादुभयम् ॥ इति ॥ १९ ॥

उस महत्तत्त्व से सृष्टिभेद के कारण वैकारिक, तैजस एवं भूतादि रूप तीन अहंकारों की उत्पत्ति हुई । वैकारिक अहंकार से दश वैकारिक देव, १. दिक्, २. वात, ३. अर्क, ४. प्रचेता, ५. अश्विनी, ६. अग्नि, ७. इन्द्र, ८. उपेन्द्र, ९. मित्र (द्वादश आदित्यों में तृतीय) और १०. ब्रह्मा उत्पन्न हुये । वैकारिक अहंकार से उत्पन्न होने के कारण ये देव भी वैकारिक कहे जाते हैं जो इन्द्रियों के अधिष्ठातृ देवता हैं । ग्यारहवाँ चन्द्रमा भी हैं जो मन के अधिष्ठातृ देवता हैं । तैजस अहंकार से पाँच कर्मेन्द्रियाँ, पाँच ज्ञानेन्द्रियाँ, एकादश मन तथा तन्मात्राओं (रूप, रस, गन्ध, स्पर्श और शब्द) की उत्पत्ति हुई ॥ १८-१९ ॥

पञ्चभूतोत्पत्तिः

भूतादिकादहङ्कारात् पञ्चभूतानि जज्ञिरे ।
शब्दात् पूर्वं वियत् स्पर्शाद् वायू रूपाद्धुताशनः ॥ २० ॥

भूतवर्णनिरूपणम्

रसादम्भः क्षमा गन्धादिति तेषां समुद्भवः ।
स्वच्छं वियन्मरुत् कृष्णो रक्तोऽग्निर्विशदं पयः ॥ २१ ॥
पीता भूमिः पञ्चभूतान्येकैकाधारतो विदुः ।
शब्दस्पर्शरूपरसगन्धा भूतगुणाः स्मृताः ॥ २२ ॥

भूतेति । भूतादिकादहङ्कारात्तन्मात्राक्रमयोगतः पञ्चभूतानि जज्ञिरे इति सम्बन्धः । कः स्वार्थिकः । तत्रादौ आकाशादीनां कारणभूताः पञ्चतन्मात्रा जाताः । शब्दतन्मात्रास्पर्शतन्मात्रा-रूपतन्मात्रा-रसतन्मात्रा-गन्धतन्मात्राः । एताभ्य आकाश-वायुतेजोजलपृथिवीरूपाणि पञ्चभूतान्युत्पन्नानि । उक्तञ्च—

शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः ।
तन्मात्राण्येव विषया भूतादेरभवन् क्रमात् ॥
ततः समभवद्व्योम शब्दतन्मात्ररूपकम् ।
स्पर्शात्मकस्ततो वायुस्तेजोरूपात्मकं ततः ॥
आपो रसात्मिकास्तस्मात् ताभ्यो गन्धात्मिका मही ।
ततः स्थूलानि भूतानि पञ्च तेभ्यो विराडपि ॥ इति ।

तत्र भूतोत्पत्तिप्रकारमाह शब्दादिति । शब्दतन्मात्रात् आकाशः स्पर्शतन्मात्रातो वायुः रूपतन्मात्रातोऽग्निः रसतन्मात्रातो जलं गन्धतन्मात्रातः पृथिवी । केचित् पूर्वपूर्वानुविद्धानामेषां कारणत्वमाहुः पूर्वशब्दसामर्थ्यात् । तदुक्तम्—

शब्दाद्व्योम स्पर्शतस्तेन वायुस्ताभ्यां रूपाद्वह्निरेभ्यो रसाच्च ।
अम्भांस्येभिर्गन्धतो भूः । इति ।

पञ्चभूतवर्णानुपदिशति स्वच्छमिति । स्वच्छं श्वेतम् । अत्र केषाञ्चिदरूपि द्रव्याणां वर्णकथनम् उपासनार्थं स्वशास्त्रानुरोधेन । तेषां स्वरूपमन्यत्रोक्तम्—

खमपि सुषिरचिह्नमीरणः स्याच्चलनपरः परिपाकवान् कृशानुः ।
जलमपि रसवद् घना धरा । इति ।

एतैस्तानि ज्ञायन्ते इत्यर्थः । एकैकाधारत इति । स्वस्वकारणाधाराणीत्यर्थः ।

तदुक्तम्— परस्परानुप्रविष्टैर्महाभूतैश्चतुर्विधैः ।
व्याप्ताकाशैर्जगत् सर्वं दृश्यं निष्पाद्यतेऽखिलम् ॥ इति ।

अन्यत्रापि—व्योम्नि मरुदत्र दहनस्तत्रापस्तासु संस्थिता पृथ्वी । इति ।

भूतगुणाः तत्तद्विशेषगुणा इति नैयायिकाः । यद्वा शब्दो गुणो वियतः । शब्दस्पर्शौ वायोः । तौ रूपञ्चाग्नेः । रसेन सह तानि जलस्य । गन्धेन सह पञ्च

पृथिव्या इति सांख्याः । इदमेव स्फोटयितुमेकैकाधारत इत्युक्तिः । उक्तञ्च ईशान-शिवेनशब्दैकगुण आकाशः शब्दस्पर्शगुणो मरुत् ।

शब्दस्पर्शरूपगुणैस्त्रिगुणं तेज इष्यते ॥
शब्दस्पर्शरूपरसगुणैरापश्चतुर्गुणाः ।
शब्दस्पर्शरूपरसगन्धैः पञ्चगुणा मही ॥ इति ॥ २०-२२ ॥

भूतादि अहंकारों से (तन्मात्राओं के योग द्वारा) पृथ्वी आदि पञ्चमहाभूतों की उत्पत्ति हुई । सर्वप्रथम शब्द तन्मात्रा से आकाश, स्पर्श तन्मात्रा से वायु, रूप तन्मात्रा से हुताशन (तेज), रस तन्मात्रा से जल और गन्ध तन्मात्रा से पृथ्वी उत्पन्न हुई । इसप्रकार पञ्चमहाभूत उत्पन्न हुये । उसमें आकाश का वर्ण स्वच्छ है, वायु का काला, अग्नि (तेज) का लाल तथा जल का विशद (स्वच्छ) और पृथ्वी का वर्ण पीत है । ये सभी अपने अपने कारणों के गुण को भी धारण करते हैं । यथा—आकाश में शब्द, वायु में स्पर्श और शब्द, तेज में रूप, स्पर्श एवं शब्द, जल में रस, रूप, स्पर्श और शब्द तथा पृथ्वी में गन्ध, रस, रूप, स्पर्श और शब्द—ये गुण हैं ॥ २०-२२ ॥

भूतमण्डलस्वरूपम्

वृत्तं दिवस्तत् षड्बिन्दुलाञ्छितं मातरिश्वनः।
त्रिकोणं स्वस्तिकोपेतं वह्नेरर्धेन्दुसंयुतम् ॥ २३ ॥
अम्भोजमम्भसो भूमेश्चतुरस्रं सवज्रकम् ।
तत्तद्भूतसमाभानि मण्डलानि विदुर्बुधाः ॥ २४ ॥

भूतमण्डलान्याह—वृत्तमिति । दिवः आकाशस्य वृत्तम् । तद्वृत्तमेव समभागेन वृत्तपरिधिरेखामध्ये षड्बिन्दुलाञ्छितं मातरिश्वनः वायोः । त्रिकोणमूर्द्धाग्रम् । 'ऊर्द्ध्वं वह्निरधः शक्तिः' इत्युक्त्वात् । अन्यत्रापि—

इन्द्रराक्षसवायव्यकोणैस्तद्वह्निमण्डलम् । इति ।

स्वस्तिकोपेतं त्रिकोणसम्पातरेखाः सम्वर्द्ध्य तत्र स्वस्तिकाकारं कुर्यादित्यर्थः ।

तदुक्तम्—हृदि त्रिकोणं निर्गच्छत् स्वस्तिके रक्ततेजसि । इति ।

स्वस्तिकं नाम परस्परसम्बद्धं विदिग्गतचतुर्वक्त्रं रेखाद्वयम् । वह्नेरिति पूर्वेणान्वयेति । अर्द्धेन्दुसंयुतम् अम्भोजमम्भस इति सम्बन्धः । अर्द्धेन्दौ संयुतम् अर्द्धेन्दुसंयुतमिति । सप्तमीति योगविभागात् समासः । यद्वा अर्द्धेन्दु अम्भोजं संयुतम् उभयं मिलितम् अम्भसो मण्डलं तेनार्द्धेन्दु कृत्वा तदुभयभागे सरोजद्वयं कुर्यादिति ।

यदुक्तमाचार्यैः—अब्जोपेतार्द्धेन्दुमद् बिम्बमाप्यम् । इति ।

अन्यत्रापि—अर्द्धचन्द्रं द्रवं सौम्यं शुभ्रमम्भोजसंयुतम् । इति ।

प्रयोगसारेऽपि—अब्जाङ्कोऽर्द्धेन्दुरम्भसः । इति ।

अन्यत्रापि—तेषां क्रमेण शशिबिम्ब समन्तदेव
षड् बिन्दुमद्दहनशस्त्रयुतं त्रिकोणम् ।
अम्भोजयुग्मशशिखण्ड समानरूपं
वेदास्त्रकं सदशनन्विह मण्डलानि ॥ इति ।

मन्त्रतन्त्रप्रकाशेऽपि—चन्द्रार्द्धमण्डलं वापि श्वेतं पङ्कजयुग्मयुक् । इति ।

स्वायम्भुवे नारसिंहेऽपि—आप्यमर्द्धेन्दुपद्माङ्कितम् । इति ।

यस्तु अष्टदलपद्मं कृत्वा तद्दलाग्रेषु अर्द्धचन्द्राकारान् कुर्यात् इति वदति स्म स भ्रान्त एव । अन्ये तु अर्द्धचन्द्रं कृत्वा तन्मध्ये पद्मं लिखेदिति वदन्ति । तदपि भूतलिपिपटले वक्ष्यमाणत्वात् अत्र न वाच्यम् । सवज्रकं चतुरस्रं भूमेरिति सम्बन्धः। चतुरस्रसम्पातरेखाः सम्वर्द्ध्य अष्टवज्राणि कुर्यादिति केचित् । सम्प्रदायविदस्तु चतुरस्ररेखास्वेव अष्टवज्राणि कार्याणीति वदन्ति । तदुक्तम् शौनककल्पे—

भूम्रहं चतुरस्रं स्यादष्टवज्रविभूषितम् । इति ।

हिरण्यगर्भसंहितायामपि—बाह्ये वज्राष्टभूषितं चतुष्कोणं शुभमथो । इति । आचार्यास्तु—'वसुकुलिशगम्' इति । ग्रन्थकारोऽपि—'वज्रेष्वष्टसु' इति ।

अन्योन्याभिमुखतया त्रिवक्त्रं रेखाद्वयं परस्परसंबद्धं वज्रम् । परस्परसम्बद्धमध्यं रेखाद्वयमिति केचित् । मण्डलध्यानमाह तत्तदिति । अनेन भूम्यादौ मण्डललिखने तत्तद्वर्णरजोभिश्च पूरणमप्युक्तं भवति ॥ २३-२४ ॥

अब इन **पञ्चभूतों का मण्डल** कहते हैं—आकाश का मण्डल वृत्ताकार (गोला) है, उस वृत्त परिधि की रेखा में छः बिन्दु अंकित कर देने से वह वायु का मण्डल हो जाता है । त्रिकोण की संपात रेखाओं को बढ़ाकर उसे स्वस्तिकाकार बना देने पर उससे युक्त त्रिकोण अग्नि का मण्डल होता है । कमल को चन्द्राकार दो भागों में विभक्त कर देने पर निष्पन्न अर्धचन्द्राकार दो कमल जल का मण्डल हो जाता है । तथा चौकोर और अष्ट वज्र विभूषित मण्डल पृथ्वी का मण्डल कहा जाता है । पञ्चभूतों में जिस नाम के जो जो मण्डल बनाए जायँ उन्हें उन उनके वर्णों से पूर्ण भी करना चाहिए ॥ २३-२४ ॥

विमर्श—दो परस्पर संबद्ध रेखाओं को आमने सामने तीन जगह मोड़ देवे तो उसे वज्र कहते हैं । इस प्रकार चतुरस्र में एक ओर की रेखा में दो वज्र हुये चारों रेखाओं में कुल ८ वज्र हुये । भूमि में जिसका मण्डल बनावे, उसे उसके वर्ण से पूर्ण करना चाहिए ॥ २३-२४ ॥

पञ्चभूतकलाः

वर्णैः स्वैरञ्चितान्याहुः स्वस्वनामावृतान्यपि ।
धरादिपञ्चभूतानां निवृत्त्याद्याः कलाः स्मृताः ॥ २५ ॥
निवृत्तिः सप्रतिष्ठा स्याद् विद्या शान्तिरनन्तरम् ।
शान्त्यतीतेति विज्ञेया नाददेहसमुद्भवाः ॥ २६ ॥

वर्णैर्द्वितीये वक्ष्यमाणभूतवर्णैः । स्वस्वनामावृतान्यपीत्यस्याप्ययमर्थः । वक्ष्यमाणभूतलिपियन्त्रेषु यः कर्णिकालिखितो मन्त्रस्तेनावृतानीति । साम्प्रदायिकाश्चैवं मन्यन्ते । 'कलात्मनः' इति पूर्वमुक्तेः भूतकारणभूताः बिन्दुतत्त्वनिर्गताः शक्तीः । संहारक्रमेण प्रयोगाद्यर्थमाह धरेति । धरादिपञ्चभूतानामुत्यादिका इति शेषः । तदुक्तं वायवीयसंहितायाम्—

शक्तिः प्रथमसम्भूता शान्त्यतीतपदोत्तरा ।
शान्त्यतीतपदं शक्तेस्ततः शान्तिपदं क्रमात् ॥
ततो विद्यापदं तस्मात् प्रतिष्ठापदसंग्रहः ।
निवृत्तिपदमुत्पन्नं प्रतिष्ठापदतः परम् ॥
एवमुक्ता समासेन सृष्टिरीश्वरचोदिता ।
आनुलोम्यादथैतेषां प्रातिलोम्येन संहतिः ॥
अस्मात् पञ्चपदोद्दिष्टात्र सृष्ट्यन्तरमिष्यते ।
कलाभिः पञ्चभिर्व्याप्तं यस्माद् विश्वमिदं जगत् ॥ इति ।

नादेति । नादाद् देहो यस्य स नाददेहो बिन्दुः तत्समुद्भवा इति । यद्वा तासां स्थूलवाचकांशमाह नाददेहसमुद्भवा इति । नादो हकारः नादस्य ध्वनेर्देह उत्पत्तिर्यस्मात् स नाददेहो वायुस्तेन यः । धर्मधर्मिणोरभेदात् देहशब्देनोत्पत्तिरुक्ता । 'मारुतस्तूरसि चरन् मन्द्रं जनयति ध्वनिम्' इत्युक्तेर्नादोत्पत्तिहेतुत्वं तस्य । समुद्दीप्यमाना भा दीप्तिर्यस्येति समुद्धोऽग्निस्तेन रः । व स्वरूपम् । तत्र हयरवलानां क्रमेण ग्रहणे कर्त्तव्ये यच्चतुर्णामेव ग्रहणं कृतवान् तेन लकारोऽप्यस्तीति ज्ञेयम् । प्रथमतो नादग्रहणाद् बिन्दुयोगोऽप्येषां ज्ञेयः । एतानि विलोमेन तन्मात्राबीजानि । अथवा नादो हकारस्तस्य देहः स्वरूपं तत्र समुद्भवः स्थितिर्येषां एवम्भूता आईकारादयः आ ई ऊ ऐ औकाराः । एषां सबिन्दुकत्वञ्च ज्ञेयम् । तदुक्तं त्रिकोणोत्तरे—

नादाख्यं यत् परं बीजं सर्वभूतेष्ववस्थितम् ।
मूर्त्तिदं परमं दिव्यं सर्वसिद्धिप्रदायकम् ।
शान्तं सर्वगतं शून्यं मात्रापञ्चकसंस्थितम् ॥ इति ।

केचन क्रमेण एषां ल व र य ह योगमाहुः । तद्यथा—ह्लाँ ह्वीँ ह्रूँ ह्यैँ ह्हौँ । एतानि अपञ्चीकृतभूतबीजानि । अथवा नादो हकारः । शरीरस्य पृथिव्यंशाधिक्याद् देहशब्देन लकारस्तस्य समुद्भवः स्थितिर्यत्र स नाददेहसमुद्भवः । येषु आकारादिषु ते नाददेहसमुद्भवाः । अत्र क्रमेण लवरयह योगमाहुः । तद्यथा—ह्लां हल्वीं ह्रूं हल्यैं ह्हौं । एतानि पञ्चीकृतभूतबीजानि । भूतबीजानामेव तदभिमानिनिवृत्त्यादिबीजत्वं ज्ञेयम् । तदुक्तमाचार्यैः 'नादकलादिभूता' इति ॥ २५-२६ ॥

अब **पृथ्व्यादि पञ्च महाभूतों की कला** कहते हैं—पृथ्व्यादि पञ्चभूतों की निवृत्ति आदि कलायें कही गई हैं ॥ २५ ॥

विमर्श—यहाँ प्रथम आकाश की कला कहनी चाहिए थी—किन्तु संहार क्रम से कलाओं का वर्णन करते हैं ॥ २५ ॥

पृथ्वी की कला का नाम निवृत्ति, जल की कला का नाम प्रतिष्ठा, तेज की

कला का नाम विद्या, वायु की कला का नाम शान्ति तथा आकाश की कला का नाम शान्त्यतीता है जो वायु से समुद्भूत है ॥ २६ ॥

जगतः पञ्चभूतात्मकत्वम्

पञ्चभूतात्मकं सर्वं चराचरमिदं जगत् ।

चराचरस्वरूपम्

अचरा बहुधा भिन्ना गिरिवृक्षादिभेदतः॥ २७ ॥

एवं भूतान्युक्त्वा जगतस्तदात्मकत्वमाह पञ्चेति । एतेन त्रिवृत्करणपक्षः पञ्चीकरणपक्षोऽपि सूचितः । तत्र ये तैजसा देवाः तेषामपि शरीरार्द्धो भागः तैजसः पृथिव्याश्चतुर्थांशः चतुर्थांशो जलस्येति त्रिवृत्करणपक्षः । पञ्चीकरणपक्षे तु पृथिव्याश्चत्वारोंऽशा अन्येषामष्टमोऽष्टमोंऽशः । एवमन्यत्रापि । तदुक्तम्—

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।
स्वस्वेतर द्वितीयांशैर्योजनात् पञ्च पञ्च ते ॥ इति ।

अथवा—षडंशास्तेजसः पृथिवीजलवाय्वाकाशानां दशमो दशमोंऽशः । एवं पार्थिवे अस्मदादिशरीरेऽपि षड्भागाः पृथिव्याः अन्येषां दशमो दशमोंऽशः । एवं वरुणादिलोकनिवासिनामाप्यादिशरीराणामपि अवगन्तव्यम् । तदुक्तम्—

पृथिव्यादीनि भूतानि प्रत्येकं विभजेद् द्विधा ।
एकैकं भागमादाय पञ्चधा विभजेत् पुनः ॥
एकैकभागमेकैकं भूते संवेशयेत् क्रमात् ।
तत आकाशभूतस्य स्वभागाः षड् भवन्ति हि ॥
वाय्वादिभागाश्चत्वारो वाय्वादिष्वेवमादिशेत् ।
पञ्चीकरण मेतत्स्यादित्याहुस्तत्त्ववेदिनः ॥ इति ।

अन्यत्र विशेषः—

अस्थि मांसं त्वचं स्नायु रोम एव तु पञ्चमम् ।
इति पञ्चविधा प्रोक्ता पृथिवीं कठिनात्मिका ॥
लाला मूत्रं तथा शुक्रं शोणितं मज्ज पञ्चमम् ।
अपां पञ्च गुणा एते द्रवरूपाः प्रकीर्त्तिताः ॥
क्षुधा तृष्णा भयं निद्रा आलस्यं क्षान्तिरेव च ।
ऊष्णात्मका गुणा एते तेजसः परिकीर्त्तिताः ॥
धावनं वल्गनं भुक्तिराकुञ्चनं प्रसारणम् ।
एते पञ्च गुणा वायोः क्रियारूपा व्यवस्थिताः ॥
रागद्वेषौ तथा लज्जा भयं मोहस्तथैव च ।
व्योम्नः पञ्चगुणा एते शून्याख्ये सुषिरात्मनि ॥ इति ।

चरं जङ्गमम् । अचरं स्थावरम् । चरेषु बहुवक्तव्यत्वात् प्रथमोद्दिष्टं तं विहायाचरानाह अचरा इति । तत्र ते चराः स्वेदाण्डजजरायुजा इति वक्ष्यति । तेन शिष्टत्वादेषामौद्भिदत्वमुक्तम् । यदाहुः—

देहश्चतुर्विधो ज्ञेयो जन्तोरुत्पत्तिभेदतः ।
उद्भिज्जः स्वेदजोऽण्डोत्थश्चतुर्थस्तु जरायुजः ।
उद्भिद्य भूमिं निर्गच्छेदौद्भिदः स्थावरस्तु सः ॥ इति ।

एषामुत्पत्तिप्रकारोऽन्यत्रोक्तः—

उद्भिदः स्थावरा ज्ञेयास्तृणगुल्मादिरूपिणः ।
तत्र सिक्ता जलैर्भूमिरन्तरूष्मविपाचिता ॥
वायुना व्यूह्यमाना तु बीजत्वं प्रतिपद्यते ।
तथा चोप्तानि बीजानि संसिक्तान्यम्भसा पुनः ॥

उच्छूनत्वं मृदुत्वञ्च मूलभावं प्रयान्ति च । तन्मूलादङ्कुरोत्पत्तिस्तस्मात् पर्णसमुद्भवः । पर्णात्मकं ततः काण्डं काण्डाच्च प्रसवः पुनः ॥ इति ॥ २७ ॥

यह सारा चराचरात्मक जगत् पञ्चभूतात्मक है । जिसमें अचरों के गिरि वृक्षादि भेद से अनेक प्रकार होते हैं ।

विमर्श—यहाँ चराचर में पञ्चभूत हैं यह कह कर त्रिवृत्करण पक्ष और पञ्चीकरण पक्ष दोनों ही सूचित करते हैं । जैसे देवताओं का तैजस शरीर हैं किन्तु उसमें आधा तैजस है चतुर्थांश पृथ्वी का और चतुर्थांश जल का यह त्रिवृत्करण पक्ष हुआ । पञ्चीकरण पक्ष में तेज के छः भाग और पृथ्वी जल, वायु, आकाश के दशम दशम भाग समझना चाहिए ॥ २७ ॥

चराणां त्रिभेदः

चरास्तु त्रिविधाः प्रोक्ताः स्वेदाण्डजजरायुजाः ।
स्वेदजाः क्रिमिकीटाद्या अण्डजाः पन्नगादयः ॥ २८ ॥

विभागपूर्वकं चरानुद्दिशति चरास्त्विति । जनेः प्रत्येकं सम्बन्धं दर्शयन् तद्विशेषानाह स्वेदजा इत्यादिना । कृमिकीटाद्या इति उभयोरपिदंशकत्वादंशकत्वाभ्यां भेदः । आदिशब्देन पतङ्गादीनां ग्रहणम् ।

यदाहुः—कृमिकीटपतङ्गाद्याः स्वेदजा नाम देहिनः । इति ।

तदुत्पत्तिप्रकारोऽन्यत्र दर्शितः—

स्वेदजं स्विद्यमानेभ्यो भूवह्न्यद्भ्यः प्रजायते । इति ।

तेनैषामयोनिजत्वमुक्तम् । यदुक्तं प्रयोगसारे-

किन्त्वत्र स्वेदजा ये तु ज्ञेयास्ते चाप्ययोनिजाः ।
स्थिरा विवायवो भिन्नाश्चत्वारिंशत्सहस्रधा ॥ इति ।

पन्नगादय इत्यादिशब्देन पक्षिकच्छपादिग्रहणम् । यदाहुः—

अण्डजाः पक्षिणः सर्वे नक्रमत्स्याश्च कच्छपाः । इति ।

तदुत्पत्तिप्रकारोऽपि—

अण्डजो वर्त्तुलीभूताच्छुक्रशोणितसंयुतात् ।
कालेन भिन्नात्पूर्णात्मा निर्गच्छन् प्रक्रमिष्यति ॥ इति ॥ २८॥

स्त्रीपुंनपुंसकोत्पत्तौ हेतुः

जरायुजा मनुष्याद्यास्तेषु नृणां निगद्यते ।
उद्भवः पुंस्त्रियोर्योगात् शुक्रशोणितसंयुतात् ॥ २९ ॥
बिन्दुरेको विशेद् गर्भमुभयात्मा क्रमादसौ ।
रजोऽधिके भवेन्नारी भवेद्रेतोऽधिकः पुमान् ।
उभयोः समतायान्तु नपुंसकमिति स्थितिः ॥ ३० ॥

जरायुर्गर्भाशयो जालिकारूपः । मनुष्याद्या इत्यादिशब्देन पश्वादयः । एषां संख्योक्ता प्रयोगसारे—

योनिजाः प्राणिनो भिन्नाश्चतुःषष्टिसहस्रधा । इति ।

तेषु नृणां निगद्यते उद्भव इति सम्बन्धः । यतः सर्वशास्त्रस्य मनुष्याधिकारित्वात् । शोणित संयुतादित्यनेन तस्याप्रधानतोक्ता । अतः पुत्रः पितृजात्यादियुक्तः ।

तथाच महाभारते—माता भस्त्रा पितुः पुत्रो येन जातः स एव सः । इति । भस्त्रा वाय्वाधारं चर्ममयम् । उभयात्मा शुक्रशोणितात्मा अतएवाग्नीषोमात्मा एको बिन्दुर्गर्भं विशेत् । क्रमादसावित्युत्तरेण सम्बध्यते । असौ बिन्दुः रजोऽधिकः क्रमान्नारी भवेत् । रेतोऽधिकः क्रमात् पुमान् भवेदिति योजना । अत्राधिक्यमुक्त प्रमाणतो ज्ञेयम् । उक्तप्रमाणसाम्ये नपुंसकोत्पत्तिरित्यपि ज्ञेयम् । यदाहुः—

द्वाविंशती रजोभागाः शुक्रमात्राश्चतुर्दश ।
गर्भसञ्जनने काले पुंस्त्रियोः सम्भवन्ति च ॥
नारी रजोऽधिकेंऽशे स्यान्नरः शुक्राधिकेंऽशके ।
उभयो रुक्तसंख्यायां स्यान्नपुंसकसम्भवः ॥ इति ।

क्रमादित्यनेन नैतदुक्तं भवति । स एवं बिन्दुर्वायुना पृथग् भिन्नः बह्वपत्यतां जनयतीति । यदाहुः—वाग्भटे शारीरस्थाने—शुक्रार्त्तवे पुनः पुनः ।

वायुना बहुशो भिन्ने यथास्वं बह्वपत्यता ॥
वियोनिविकृताकारा जायन्ते विकृतैर्मलैः ।
पूर्णषोडशवर्षा स्त्री पूर्णविंशेन संगता ॥
शुद्धे गर्भाशये मार्गे रक्ते शुक्रेऽनिले हृदि ।
वीर्यवन्तं सुतं सूते ततो न्यूनाब्दयोः पुनः ॥
रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा ॥ इति ॥ २९-३०॥

स्वेदज, अण्डज और जरायुज भेद से चर के तीन भाग हैं । जिसमें कृमि कीट आदि स्वेदज हैं । पक्षि, कच्छप सर्पादि अण्डज हैं और मनुष्य आदि जरायुज हैं । उन तीनों में मनुष्यों की उत्पत्ति का प्रकार कहते हैं । पुरुष और स्त्री के संयोग से जब शुक्र शोणित योनि में एकत्रित हो जाते हैं तो मनुष्य की उत्पत्ति होती है ॥ २८-२९ ॥

शुक्र शोणित उभयात्मक अथवा अग्नीषोमात्मक एक बिन्दु गर्भ में प्रविष्ट होता है, यदि उस बिन्दु में रज की अधिकता होती है तो स्त्री और रेत की अधिकता होने पर पुरुष पैदा होता है, किन्तु जब दोनों समान समान होते हैं, तो नपुंसक की उत्पत्ति होती है ॥ ३० ॥

बिन्दौ जीवसञ्चारः

पूर्वकर्मानुरूपेण मोहपाशेन यन्त्रितः।
कश्चिदात्मा तदा तस्मिन् जीवभावं प्रपद्यते॥ ३१ ॥

तस्मिन् बिन्दौ जीवसञ्चारमाह पूर्वेति । पूर्वजन्मशतसञ्चितकर्मणां मध्ये फलदानोन्मुखं प्रबलमेकं पुण्यपापात्मकं सुखदुःखोभयात्मकफलकं मनुष्यशरीरोपभोगयोग्यं यत् कर्म तदनुरूपेण मोहपाशेन अविद्यारूपेण यन्त्रितो बद्धः उत्पद्यते । एतेन नित्यस्यात्मनोऽनुत्पत्तिरुक्ता । गृहमिव देहमात्मा प्रविष्ट इत्यर्थः । कश्चिदिति । 'नानात्मानो व्यवस्थातः' इति कणादसूत्रानुसारात् । 'पुरुषबहुत्वं सिद्धम्' इति सांख्योक्तेश्च । वेदान्तनये तु अविद्याकल्पितो भेदोऽङ्गीकर्त्तव्यः । अन्यथा यद्यात्मज्ञानेनाविद्या नष्टा तदा—

ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन ।

इति वचनात् पूर्वसञ्चितकर्मणां फलदानासामर्थ्यादग्रिमकर्मनिर्लेप एव नास्ति ।

न लिप्यते कर्मभिः स पद्मपत्रमिवाम्भसा ।

इति वचनात् तस्यैकत्वात् मुक्तत्वाच्च अवतार एव न स्यात् । इत्यवतारकारणं मोहपाशेनेत्युक्तम् । तदुक्तमध्यात्मविवेके—

अस्ति ब्रह्म चिदानन्दं स्वयंज्योतिर्निरञ्जनम् ।
सर्वशक्तिः च सर्वज्ञं तदंशा जीवसंज्ञकाः ॥
अनाद्यविद्योपहिता यथाग्नेर्विस्फुलिङ्गकाः ।
दीर्घाद्युपाधिसंभिन्नास्ते कर्म्भभिरनादिभिः ॥
सुखदुःखप्रदैः पुण्यपापरूपैर्नियन्त्रिताः ।
तत्तज्जातियुतं देहमायुर्भोगञ्च कर्मजम् ॥
प्रतिजन्म प्रपद्यन्ते । इति ॥ ३१ ॥

अब उस **बिन्दु में जीव सञ्चार की प्रक्रिया का वर्णन** करते हैं—

पूर्वजन्म के किये गये सञ्चित कर्मों (में जब फलदानोन्मुख कोई प्रबल पुण्यपापात्मक कर्म जिसका फल सुख दुःख अथवा उभयात्मक है और जो मनुष्य शरीर के द्वारा भोगा जा सकता है, उस कर्म) के अनुरूप (अविद्या रूप) मोहपाश से बँधने के कारण जीव शरीर में प्रविष्ट होता है, (मनुष्य जैसे घर में प्रवेश करता है, उसी प्रकार कर्म पाश में बँधा हुआ जीव भोगायतन शरीर में प्रवेश करता है) इस प्रकार आत्मा जीवभाव को प्राप्त करता है ॥ ३१ ॥

गर्भाशये जीवसञ्चारः

अथ मात्राहृतैरन्नपानाद्यैः पोषितः क्रमात् ।

गर्भस्थजन्तोर्वृद्धिक्रमः

दिनात् पक्षात् ततो मासाद् वर्द्धते तत्त्वदेहवान् ॥ ३२ ॥

अथेति । अत्र प्रकारो योगार्णवे—

आविश्य भुक्तमाहारं स वायुः कुरुते द्विधा ।
संप्रविश्यान्त्रमध्यस्थं पृथक् किट्टं पृथग् जलम् ॥
अग्नेरूर्द्ध्वं जलं स्थाप्य तदन्नञ्च जलोपरि ।
जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमते शनैः ॥
वायुना व्यूह्यमानोऽग्निरत्युष्णं कुरुते जलम् ।
अन्नं तदुष्णतोयेन समन्तात् पच्यते पुनः ॥
द्विधा भवति तत् पक्वं पृथक् किट्टं पृथग् रसम् ।
रसेन तेन ता नाडीः प्राणः पूरयते पुनः ॥
प्रतर्पयन्ति सम्पूर्णास्ताश्च देहं समन्ततः ।
मातृ रसवहा नाडी मनुविद्धा पराभिधा ॥
नाभिस्थनाडीगर्भस्य मात्राहृतरसावहा । इति ।

दिनादिति । तदुक्तम्—

त्रसरेणुद्वयं जन्तुः क्षणमात्रेण वर्द्धते ।
नाडिकामात्रतो यूका युगलञ्च मुहूर्त्ततः ।
यूकानां वेदसंख्यञ्च दिनमात्राद् यवद्वयम् ॥ इति ।

योगार्णवे च— कललं चैकरात्रेण पञ्चरात्रेण बुद्बुदम् ।
शोणितं दशरात्रेण मांसपेशी चतुर्दशे ॥
घनमांसञ्च विंशाहे पिण्डीभावोपलक्षितम् ।
पञ्चविंशति पूर्णाहे पलं सर्वाङ्कुरायते ॥
एकमासे तु सम्पूर्णे पञ्चभूतानि धारयेत् ।
मासद्वये तु सम्प्राप्ते शिरोमेदः प्रजायते ॥
मज्जास्थि च त्रिभिर्मासैः केशाङ्गुल्यश्चतुर्थके ।
कर्णाक्षिनासिकानाञ्च रन्ध्रं मासे तु पञ्चमे ॥
आस्यरन्ध्रोदरं षष्ठे पायुरन्ध्रञ्च सप्तमे ।
सर्वाङ्गसन्धि सम्पूर्णं मासैरष्टभिरिष्यते ॥ इति ।

अध्यात्मविवेके तु विशेषः—

द्रवत्वं प्रथमे मासे कललाख्यं प्रजायते ।
द्वितीये तु घनः पिण्डः पेशी बड्घनमर्वुदम् ॥
पुंस्त्रीनपुंसकानां तु प्रायोऽवस्थाः क्रमादिमाः ।
तृतीये त्वङ्कुराः पञ्च कराङ्घ्रिशिरसो मताः ॥

अङ्गप्रत्यङ्गभागाश्च सूक्ष्माः स्युर्युगपत्तदा ।
विहाय श्मश्रुदन्तादीन् जन्मानन्तरसम्भवान् ॥
एषा प्रकृतिरन्या तु विकृतिः सम्मता सताम् ।
चतुर्थे व्यक्तता तेषां भावानामपि जायते ॥
मातृजश्चास्य हृदयं विषयानभिकाङ्क्षति ।
अतो मातुर्मनोऽभीष्टं कुर्याद् गर्भविवृद्धये ॥
ताञ्च द्विहृदयां नारीमाहुर्दोहदिनीं बुधाः ।
अदानाद्दोहदानां स्युर्गर्भस्य व्यङ्गतादयः ॥
मातुर्यद्विषयालाभस्तदार्त्तो जायते सुतः ।
गर्भः स्यादर्थवान् भोगी दोहदाद् राजदर्शने ॥
अलङ्कारे सुललितो धर्मिष्ठस्तापसाश्रमे ।
देवतादर्शने भक्तो हिंस्रो भुजगदर्शने ॥
गोधाशने तु निद्रालुर्बली गोमांसभक्षणे ।
माहिषेण तु रक्ताक्षं लोमशं सूयते सुतम् ॥
प्रवृ(बु)द्धं पञ्चमे पिण्डं (त्तं) मांसशोणितपुष्टता ।
षष्ठेऽस्थिस्नायुनखरकेशरोमविविक्तता ॥
बलवर्णौ चोपचितौ सप्तमे त्वङ्गपूर्णता ।
अष्टमे त्वक्श्रुती स्यातामोजश्चेतश्च हृद्भवम् ॥
शुद्धमापीतरक्तञ्च निमित्तं जीविते मतम् ।
पुनरम्बां पुनर्गर्भं चञ्चलं तत् प्रधावति ॥
अतो जातोऽष्टमे मासे न जीवत्योजसोज्झितः ॥ इति ।

याज्ञवल्क्योऽपि— पुनर्धात्रीं पुनर्गर्भमोजस्तस्य प्रधावति ।
अष्टमे मास्यतो गर्भो जातः प्राणैर्वियुज्यते ॥ इति ।

एवं यदा ओजो बाले भवेत्तदा माता न जीवतीति ज्ञेयम् । यदा तूभयोर्हृदि तदोजो न स्यात् तदोभयोरपि जीवनं नेति ज्ञेयम् । तत्त्वदेहवान् चतुर्विंशति तत्त्वात्मकशरीरः । तत्त्वान्यनन्तरमेव वक्ष्यति ॥ ३२ ॥

वहाँ वह माता के द्वारा खाये गये अन्न से पोषित होकर क्रमशः दिन पक्ष और एक महीने में (चतुर्विंशति) तत्त्वात्मक शरीर धारण कर वृद्धि को प्राप्त करता है ॥ ३२ ॥

दोषदूष्यनिरूपणम्

दोषैर्दूष्यैः सुखं प्राप्तो व्यक्तिं याति निजेन्द्रियैः ।
वातपित्तकफा दोषा दूष्याः स्युः सप्त धातवः ।
त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि तान् विदुः ॥ ३३ ॥

दोषैरिति । सुखं यथा स्यात् तथा दोषैः दूष्यैः प्राप्तः निजेन्द्रियैर्व्यक्तिं याति । अनेनाष्टममासपर्यन्तं वृद्धिरुक्ता । दोषादीनेवाह वातेति । तानिति धातून् । एषां पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणता ज्ञेया । तदुक्तं सुश्रुते—

रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः ।
भवन्त्यन्योन्यतः सर्वे प्रचिताः पित्ततेजसा ॥ इति ।

ननु कथं त्वचोऽसृजं प्रति कारणता इति चेत् सत्यम् । त्वगसृजी तु रसत उत्पन्ने ।

तदुक्तम्—रसः न नाडीमध्यस्थः शारीरेणोष्मणा भृशम् ।
पच्यते पच्यमानाच्च भवेत् पाकद्वयं पुनः ।
चर्मावेष्ट्य समन्ताच्च रुधिरञ्च प्रजायते ॥ इति ।

अन्यत्रापि—त्वगसृङ्मांसमेदोऽस्थिः मज्जशुक्राणि धातवः ।
सप्त स्युस्तत्र चोक्ता त्वक् रक्तं जाठरवह्निना ॥
पक्वाद्भवेदन्नरसादेवं रक्तादिभिस्तथा ।
स्वस्वकोशाग्निना पक्वैर्जन्यन्ते धातवः क्रमात् ॥ इति ।

नारायणीये तु त्वगित्यादि पठित्वा रसासृगिति पठन्त्येके इत्युक्तम् ॥ ३३ ॥

वह सुखपूर्वक क्रमेण वात, पित्त, कफ तथा सप्त धातुओं को प्राप्त कर धीरे-धीरे अपने इन्द्रियों के द्वारा अभिव्यक्त होता है । वात, पित्त एवं कफ की 'दोष' संज्ञा है और सप्त धातुओं की 'दूष्य' संज्ञा है । वे सप्त धातु १. त्वक्, २. असृङ्, ३. मांस, ४. मेद, ५. अस्थि, ६. मज्जा और ७. शुक्र नामों से कहे गये हैं ॥ ३३ ॥

इन्द्रियव्यापारनिरूपणम्

ज्ञानेन्द्रियाणि श्रोत्रं त्वग् दृग् जिह्वा नासिका विदुः ।
ज्ञानेन्द्रियार्थाः शब्दाद्याः स्मृताः कर्मेन्द्रियाण्यपि ॥ ३४ ॥
वाक्पाणिपादपाय्वन्धुसंज्ञान्याहुर्मनीषिणः ।
वचनादानगतयो विसर्गानन्दसंयुताः ॥ ३५ ॥

अन्तःकरणस्य चातुर्विध्यम्

कर्मेन्द्रियार्थाः संप्रोक्ता अन्तःकरणमात्मनः ।
मनोबुद्धिरहङ्कारश्चित्तञ्च परिकीर्तितम् ॥ ३६ ॥

व्यक्तिं याति निजेन्द्रियैरित्युक्तम् । तानीन्द्रियाणि तत्प्रसङ्गात्तेषां विषयानप्याह ज्ञानेति । अर्थशब्दो विषयवाची उभयत्रापि । शब्दाद्याः शब्दस्पर्शरूपरसगन्धाः । पूर्वं भूतगुणेषु उक्तेरत्रादिनोक्तिः इत्यवधेयम् । अन्धु लिङ्गम् । आत्मनः ग्राहकमिति शेषः। तेन मनसो विषय आत्मा इत्युक्तं भवति । अन्तःकरणस्यैव चातुर्विध्यमाह मन इत्यादिना । तत्र सङ्कल्पविकल्पात्मकं मनः । सर्वभावनिश्चयकारिणी बुद्धिः । ज्ञात्रभिमानयुक्तोऽहङ्कारः । निर्विकल्पकं चित्तम् । इत्येतेषां भेदः । तदुक्तम्—

एषा शक्तिः परा जीवरूपिणी प्रोक्तलक्षणा ।
सङ्कल्पश्च विकल्पश्च कुर्वाणा तु मनो भवेत् ॥
बुद्धिरूपा तथा सर्वभावनिश्चयकारिणी ।
ज्ञात्र्यस्मीत्यभिमानाद्या सैवाहङ्कारसंज्ञिता ॥

निर्विकल्पात्मिका सैव खलु चित्तस्वरूपिणी ।
एवमेकैव बहुधा नर्त्तकीव प्रतीयते ॥ इति ॥ ३४-३६ ॥

१. कान, २. त्वक्, ३. नेत्र, ४. जिह्वा और ५. नासिका—ये पाँच ज्ञानेन्द्रियाँ कही गई हैं । इन ज्ञानेन्द्रियों के शब्द, स्पर्श, रूप, रस और गन्ध ये विषय हैं । अब कर्मेन्द्रियों को कहता हूँ ॥ ३४ ॥

वाणी (मुख) हाथ, पैर, गुदा और लिङ्ग नाम से विद्वानों ने इन्हें अभिहित किया है । इनका क्रम से बोलना, ग्रहण करना, चलना, मलत्याग करना और आनन्द करना यह काम कहा गया है ॥ ३५ ॥

इस प्रकार हमने कर्मेन्द्रियों एवं उनसे किये जाने वाले कार्यों को कहा है । मन, बुद्धि, अहङ्कार तथा चित्त के भेद से अन्तःकरण के चार भेद कहे गये हैं ॥ ३६ ॥

सांख्योक्त-तत्त्वकथनम्

दशेन्द्रियाणि भूतानि मनसा सह षोडश ।
विकाराः स्युः प्रकृतयः पञ्च भूतान्यहङ्कृतिः ॥ ३७ ॥
अव्यक्तं महदित्यष्टौ तन्मात्राश्च महानपि ।
साहङ्कारा विकृतयः सप्त तत्त्वविदो विदुः ॥ ३८ ॥

एवं पूर्वं भूतानि इन्द्रियाण्यप्युक्त्वा तेषां मिलितानां संज्ञान्तराण्यप्याह दशेति श्लोकद्वयेन । अथवा तत्त्वदेहवानित्युक्तं तानि तत्त्वान्याह दशेति । विकारादि संज्ञास्तत्प्रसङ्गसङ्गत्या उक्ता इति ज्ञेयम् । यद्वा सूचीकटाहन्यायेन दोषान् दूष्यानुक्त्वा तत्त्वदेहवानित्युद्दिष्टानि तत्त्वानि । तानि कानीत्यपेक्षायामाह ज्ञानेत्यादि । कर्मेन्द्रियार्थाः सम्प्रोक्ताः पृथिव्यादय इत्यर्थः । तेन पञ्चभूतानि दशेन्द्रियाणि दशेन्द्रियार्था एवं पञ्चविंशतितत्त्वानि । यदाहुः—

भूतेन्द्रियेन्द्रियार्थैरुद्दिष्टस्तत्त्वपञ्चविंशतिकः । इति ।

अथच विसर्गानन्दसंयुता इति भिन्नपदकरणेन पायूपस्थयोः विसर्गस्यैव कार्यत्वात् आनन्दरहितत्वेन चतुर्विंशतिरेव तत्त्वमुक्तं भवति । यदाहुः—

व्यानन्दकैश्च तैरपि तत्त्वचतुर्विंशतिस्तथा प्रोक्ता । इति ।

मनोबुद्धिरहङ्कारश्चित्तञ्च इत्यनेन वचनादिव्यावर्त्तनेन एतच्चतुष्टययुक्तत्वेन चतुर्विंशतिर्वा तत्त्वानि इत्युक्तं भवति । यदाहुः—

करणोपेतैरेतैस्तत्त्वान्युक्तानि रहितवचनाद्यैः । इति ।

सांख्यमतोक्तचतुर्विंशतितत्त्वानि वदन् तेषां कियतामपि तत्प्रसिद्धाः संज्ञा अप्याह दशेति । अनेन दशेन्द्रियाणि पञ्चभूतानि पञ्चतन्मात्राः मनः अहङ्कारः बुद्धिः प्रधानं प्रकृतिरिति चतुर्विंशतितत्त्वानि इत्युक्तम् । ग्रन्थकृदेव पञ्चमे वक्ष्यति—

पञ्च भूतानि तन्मात्रा इन्द्रियाणि मनस्तथा ।
गर्वो बुद्धिः प्रधानञ्च मैत्राणीति विदुर्बुधाः ॥ इति ।

विकाराः स्युरित्येषां नित्यकार्यरूपत्वेन विकारता । अष्टौ प्रकृतय इति सम्बन्धः । उत्तरोत्तरं प्रतिकारणत्वादेषां प्रकृतित्वम् । अत्र भूतानीति भूतशब्देन तन्मात्रा उच्यन्ते । कारणे कार्योपचारात् । भूतानां केवलकार्यत्वेन विकारेषूक्तत्वात् । अग्रे तन्मात्रा इति परामर्शाच्च । यदाहुः—

अप्राकृतिकानि सप्त प्रकृतिविकृतिसंज्ञकानि स्युः । इति ।

अव्यक्तं प्रधानापरपर्याया प्रकृतिरित्यर्थः । अव्यक्तं महदिति । छन्दोऽनुरोधाद् गोपनार्थं वा व्यत्ययः । साव्यक्तं महदिति वा पाठः । यतोऽत्र संहारक्रमो विवक्षितः।

यदाहुः—चतुर्विंशतितत्त्वानि प्रकृत्यन्तानि संजगुः । इति ।

अन्यत्र सृष्टिक्रमापेक्षयोक्तम् अव्यक्तं महदहङ्कृतिभूतानीति । तन्मात्राश्च इति। साहङ्कार इति तन्मात्रविशेषणं तेन व्यत्ययः । चकारेण प्रकृतय इत्यस्य समुच्चयः । तेनैते सप्तप्रकृतिविकृतिशब्दवाच्या इत्यर्थः । उत्तरोत्तरं प्रति पूर्वपूर्वस्य प्रकृतिभूतत्वात् पूर्वपूर्वं प्रति उत्तरोत्तरस्य विकृतिभूतत्वादेषां प्रकृतिविकृतित्वम् ।

यदाहुः— मूलप्रकृति रविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ इति ।

उपसंहरति तत्त्वविदो विदुरिति। अयमर्थः । ज्ञानेन्द्रियाणीत्यादि एतदन्तं यत्तत्त्वनिरूपणं मया कृतं तत् तत्त्वविदामपि सम्मतमिति । अथ वा तत्त्वविदो विदुरित्यनेन पूर्वप्रकारत्रयोक्ततत्त्वानि नास्मत्सम्मतानि । अपितु एतानि प्रकृत्यन्तान्येव चतुर्विंशतितत्त्वानि । पुरुषान्तानि पञ्चविंशतिः । परान्तानि षड्विंशतिः अस्मत्सम्मतानीत्युक्तं भवति । इयं योजना साम्प्रदायिकी । तदुक्तं वायवीयसंहितायाम्—

त्रयोविंशतितत्त्वेभ्यः परा प्रकृतिरुच्यते ।
प्रकृतेस्तु परं प्राहुः पुरुषं पञ्चविंशकम् ॥
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ।
तदधीनप्रवृत्तित्वात् प्रकृतेः पुरुषस्य च ॥ इति ।

केचनान्यथा योजयन्ति । भूतादिकाहङ्कारसृष्टिमुक्त्वा तैजसादिन्द्रियाण्यासन् इत्युद्दिष्टानीन्द्रियाणि तत्प्रसङ्गात्तेषां विषयानप्याह ज्ञानेत्यादि परिकीर्त्तितमित्यन्तेन । उत्तरव्यवहारशेषतया केषाञ्चिन्मन्त्राणां वर्णतत्त्वन्यासयोगादिशेषतया च विकारादि दर्शयति दशेत्यादि । तत्त्वविद इदं विदुः । एषां तत्रान्तर्भावात् तत्त्वविद्भिरेताः संज्ञाः कृता इत्यर्थः ॥ ३७-३८ ॥

दश इन्द्रियाँ, पञ्च महाभूत और मन—ये १६ विकार हैं । पञ्चभूत, अहङ्कार महत्तत्व और अव्यक्त—ये आठ प्रकृतियाँ हैं । पञ्चतन्मात्रा, महत्तत्त्व और अहङ्कार—ये सात विकृतियाँ हैं—ऐसा तत्त्ववेत्ता लोग कहते हैं ॥ ३७-३८ ॥

देहस्य अग्नीषोमात्मकत्वम्

अग्नीषोमात्मको देहो बिन्दुर्यदुभयात्मकः।
दक्षिणांशः स्मृतः सूर्यो वामभागो निशाकरः॥ ३९ ॥

एवं प्रासङ्गिकमुक्त्वा प्रकृतमाह अग्नीति । देहः अग्नीषोमात्मकः । कुत इत्यपेक्षायां हेतुमाह यद् यस्मात् कारणादुभयात्मको बिन्दुः । शुक्रमग्निरूपं रक्तं सोमरूपम् एतदात्मकः । यदाहुः—

> कलाषोडशकश्चन्द्रः स्याद् द्वादशकलो रविः ।
> कलादशयुतो वह्निः कलाष्टत्रिंशदंशभुक् ॥
> सप्त(अष्ट)त्रिंशद् भवन्तीह गर्भाधानस्य हेतवे ।
> अग्नीषोमात्मकं तेन गीयते सचराचरम् ॥
> कलांशकेन योगेन भूयाद् गर्भस्य सम्भवः ॥ इति ।

एवमप्यग्नीषोमात्मकत्वमित्यर्थः । अग्नीषोमात्मको देहः इत्युक्तम् । तयोः प्रयोगादिविशेषतया देशविशेषे व्यवहाराय स्थितिमाह दक्षिणांश इति । अत्र शास्त्रे दक्षिणभागः क्वचिदग्निशब्देन क्वचित् सूर्यशब्देनापि व्यवह्रियते । 'अग्नेर्यो दक्षिणो भागः' इत्युक्तेः । वायवीयसंहितायामपि—

> द्विधा वै तैजसी वृत्तिः सूर्यात्मा चानलात्मिका । इति ॥ ३९ ॥

यह शरीर अग्नीषोमात्मक है, क्योंकि जिस बिन्दु से यह शरीर बना है, उसमें शुक्र शोणित का संयोग है । शुक्र अग्नि स्वरूप है और शोणित सोमात्मक है । इस प्रकार शरीर अग्नीषोमात्मक हुआ । अब शरीर में अग्नीषोमा का स्थान निर्देश करते हैं, इस शरीर का दाहिना भाग सूर्य या अग्नि है और बायाँ भाग चन्द्रमा है ॥ ३९ ॥

नाडीनिरूपणम् । इडादिस्थितिस्वरूपम्

नाडीर्दश विदुस्तासु मुख्यास्तिस्रः प्रकीर्त्तिताः ।
इडा वामे तनोर्मध्ये सुषुम्णा पिङ्गला परे ॥ ४० ॥

पूर्वोक्तसूर्यनिशाकरयोः स्थितिमुपपादयितुं शरीरे नाडीराह नाडीरिति । तासु अनन्तासु दशनाडीः मुख्या विदुरित्यन्वयः । नाड्योऽनन्ता इति वक्ष्यमाणत्वात् । तासु दशस्वपि तिस्रो मुख्याः प्रकीर्त्तिताः । तासु मुख्या इति पदस्य चावृत्त्या योजना । प्रकीर्त्तिता इत्यस्योपादानमन्यथा विदुरित्यनेनैव गतार्थत्वात् । उक्तञ्च तत्राद्यास्तिस्रः । अत्रावृत्तिकरणं मुख्यतमाः स्मृता इति । तासामेव स्थितिमाह इडेति । तनोरिति त्रिषु स्थानेषु सम्बध्यते । वामे इडा वाममुष्कोत्था धनुर्वक्रा सती वामनासापर्यन्तं गतेत्यर्थः। तनोर्मध्ये पृष्ठवंशान्तर्गता सुषुम्णा । 'या मुण्डाधारदण्डान्तरविवरगता' इत्युक्तेः । परे दक्षिणे दक्षिणमुष्कोत्था धनुर्वक्रा दक्षिणनासापर्यन्तं गतेत्यर्थः । यदाहुः—

> या वाममुष्कसम्बद्धा सा श्लिषन्ती सुषुम्णाया ।
> दक्षिणं वृक्कमाश्रित्य धनुर्वक्रा हृदि स्थिता ॥
> वामांशजत्र्वन्तरगा दक्षिणां नासिकामियात् ।
> यथा दक्षिणमुष्कोत्था नासाया वामरन्ध्रगा ॥ इति ।

तन्त्रान्तरेऽपि—

> सुषुम्णाकल्पिता याता मुष्कं दक्षिणमाश्रिता ।
> हृद्गता वामभागस्य जत्रुमध्यं समाश्रिता ॥

दक्षिणं नासिकाद्वारं प्राप्नोति गिरिजात्मजे ।
वाममुष्कसमुद्भूता तथाऽन्या सव्यनासिकाम् ॥ इति ।

अनयोः स्वरूपमुक्तं योगार्णवे—

इडा च शङ्खकुन्दाभा तस्याः सव्ये व्यवस्थिता ।
पिङ्गला सितरक्ताभा दक्षिणं पार्श्वमाश्रिता ॥ इति ।

अनेन पिङ्गलेडयोः क्रमेण सूर्याचन्द्रमसोः स्थितिरुक्ता भवति ।

'इडायां सञ्चरेच्चन्द्रः पिङ्गलायां दिवाकरः'—इत्युक्तेः ॥ ४० ॥

ऐसे तो शरीर में अनन्त नाडियाँ हैं, किन्तु उसमें दश मुख्य नाडियाँ हैं, उन दशों में भी तीन नाड़ियाँ मुख्यतम हैं—१. शरीर के मध्य में **इडा** वाम अण्डकोश से धनुष के समान वक्र होकर बाईं नासिका तक जाती है । २. शरीर के मध्य में **सुषुम्ना** पीठ की ओर से दण्डाकार रीढ़ की हड्डी से होती हुई ब्रह्मरन्ध्र तक जाती है । ३. पिङ्गला दाहिने अण्डकोश से धनुषाकार वक्र होकर दाहिनी नासिका पर्यन्त जाती है ॥ ४० ॥

मध्या तास्वपि नाडी स्यादग्नीषोमस्वरूपिणी ॥ ४१ ॥

सुषुम्णाया मुख्यत्वं वदन् तत्स्वरूपमाह मध्येति । तास्वपीत्यपिशब्दात् मुख्येत्यनुषज्यते । तासु तिसृषु मध्या सुषुम्णा मुख्या । 'सुषुम्णैव च तासु नाडी' इत्युक्तेः । सा कीदृशी अग्नीषोमस्वरूपिणी । मुख्यत्वे हेतुत्वेन योज्यम् । यतः पूर्वोक्तसोमाग्निरूपयोरिडापिङ्गलयोः अत्रैव लयात् । तदुक्तं—'राहोरास्यगतः' इति। अनेनास्या ब्रह्मरन्ध्रपर्यन्तं स्थितिरित्यप्युक्तम् । यदाहुः—

तयोः पृष्ठवंशमाश्रित्य मध्ये सुषुम्णा स्थिता ब्रह्मरन्ध्रं तु यावत् ।

इति ॥ ४१ ॥

सुषुम्ना नाड़ी इडा और पिङ्गला के मध्य में रहती है, यह तीनों नाड़ियों में सबसे मुख्य है, जो अग्निषोमात्मिका है । ऊपर हम कह आये हैं कि यह पीठ की ओर से ब्रह्मरन्ध्र तक जाती है ॥ ४१ ॥

गान्धारी हस्तिजिह्वा च सुपूषालम्बुषा मता ।
यशस्विनी शङ्खिनी च कुहूः स्युः सप्तनाडयः ॥ ४२ ॥

शिष्टानां सप्तानां नामान्याह गान्धारीति । आसां स्थितिस्वरूपञ्चोक्तम् योगार्णवे—

इडापृष्ठे तु गान्धारी मयूरगलसन्निभा ।
सव्यपादादिनेत्रान्ता गान्धारी परिकीर्त्तिता ॥
हस्तिजिह्वोत्पलप्रख्या नाडी तस्याः पुरःस्थिता ।
सव्यभागस्य मूर्द्धादिपादाङ्गुष्ठान्तमाश्रिता ॥
पूषा तु पिङ्गलापृष्ठे नीलजीमूतसन्निभा ।
याम्यभागस्य नेत्रान्ताद् यावत् पादतलं गता ॥

अलम्बुषा पीतवर्णा कण्ठमध्ये व्यवस्थिता ।
यशस्विनी शङ्खवर्णा पिङ्गलापूर्वदेशगा ॥
गान्धार्याश्च सरस्वत्या मध्यस्था शङ्खिनी मता ।
सुवर्णवर्णा पादादि कर्णान्ता सव्यभागके ॥
पादाङ्गुष्ठादिमूर्द्धान्तं याम्यभागे कुहूर्मता । इति ।

अन्यैस्तु वारणा सरस्वती विश्वोदरा पयस्विनी एता अपि मुख्यत्वेनोक्ताः । यदाहुः—

ताश्च भूरितरास्तासु मुख्याः प्रोक्ताश्चतुर्दशः ।
सुषुम्णेडापिङ्गला च कुहूरथ सरस्वती ॥
गान्धारी हस्तिजिह्वा च वारणा च यशस्विनी ।
विश्वोदरा शङ्खिनी च ततः पूषा पयस्विनी ॥
अलम्बुषा । इति ।

अन्यत्रापि—चतुर्दशात्र यद्देहे प्राधाना नाडयः स्मृताः । इति ।

आसां ध्यानं संस्थानञ्च ग्रन्थगौरवभयान्नोक्तम् । मुख्या इत्यनेनैव सूचिताः ॥ ४२ ॥

ऊपर दश नाडियाँ मुख्य हैं, यह कह आये हैं जिसमें तीन का विवरण दिया गया शेष सात नाडियों के नाम का निर्देश करते हैं—१. गान्धारी, २. हस्तिजिह्वा, ३. सुपूषा, ४. अलम्बुषा, ५. यशस्विनी, ६. शङ्खिनी और ७. कुहू—ये सात नाडियाँ है ॥ ४२ ॥

नाड्योऽनन्ताः

नाड्योऽनन्ताः समुत्पन्नाः सुषुम्णापञ्चपर्वसु ।
मूलाधारोद्गतप्राणस्ताभिर्व्याप्नोति तत्तनुम् ॥ ४३ ॥

एवं मुख्या नाडीरुक्त्वा सामान्या आह नाड्य इति । सुषुम्णापञ्चपर्वसु अनन्तानाड्यः समुत्पन्नाः । पञ्चपर्वाणि स्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञान्तानि । तत्राधोधोग्रन्थिमारभ्योर्द्ध्वोर्द्ध्वग्रन्थिपर्यन्तं पर्वसमाप्तिः । यद्यपि 'ग्रन्थिर्ना पर्वपरुषी' इति कोशः 'इक्षुपर्वावधिः स्मृतः' इति व्यवहारश्च तथाप्यत्र षण्णां ग्रन्थीनां सत्त्वादेवं व्याख्यातम् । आश्वलायनश्रौतसूत्रभाष्यकारेण 'पर्वण्यं जपेत्' इत्यत्र पर्वशब्दस्यैवं व्याकृतत्वात् । एतदभिप्रायेणैव वक्ष्यति 'मध्यमाङ्गुलिपर्वणि' इति । सुषुम्णायामेतेषु पर्वसु इडापिङ्गलयोर्योगो भवतीति ज्ञेयम् । अनन्ता इति गणयितुमशक्यत्वादानन्त्यम् । यदाहुः—

पूर्वोक्तायाः सुषुम्णाया मध्यस्थायाः सुलोचने ।
नाभिहृत्कण्ठदेशभ्रू मध्यपर्वसमुद्भवाः ॥
अधोमुख्यः शिराः काश्चित् काश्चिदूर्द्ध्वमुखास्तथा ।
परास्तिर्यग्गतास्त्याश्च तत्र लक्षत्रयाधिकाः
नाड्योऽर्द्धलक्षसंख्याताः प्रधानाः समुदीरिताः ।
तासु सर्वासु बलवान् प्राणो वायुः समन्ततः ॥
संस्थितः सर्वदा व्याप्तः । इति ।

अध्यात्मविवेके तु विशेषः—

अस्थ्नां शरीरे संख्या स्यात् षष्टियुतं शतत्रयम् ।
त्रीण्येवास्थिशतान्यत्र धन्वन्तरिरभाषत ॥
द्वे शते त्वस्थिसन्धीनां स्यातामत्र दशोत्तरे ।
पेशीस्नायुशिरासन्धिः सहस्रद्वितयं मतम् ॥
नव स्नायुशतानि स्युः पञ्चपेशीशतान्यपि ।
अधिका विंशतिः स्त्रीणां स्तनयोर्दिग् भगे दश ॥
शिराधमनिकानान्तु लक्षाणि नवविंशतिः ।
सार्द्धानिस्युर्नवशती षट्पञ्चाशद्युता तथा ॥ इति ।

तन्नाडीनां फलमाह मूलेति । वक्ष्यमाणेभ्यो भिन्नो मुख्यो देहधारकप्राणाभिधो वायुः । यदाहुः—

राजसः प्राणसंज्ञस्यान्मुख्यो देहस्य धारकः ।
तद्भेदा दश विख्याता यैर्व्याप्तं स्याच्छरीरकम् ॥ इति ।

सा चासौ तनुश्च ताम् पूर्वोक्तं शरीरम् ॥ ४३ ॥

सुषुम्ना नाडी में स्वाधिष्ठान, मणिपूर अनाहत, विशुद्ध और आज्ञाचक्र—ये पाँच पर्व हैं, इन पर्वों से अनन्त नाडियाँ उत्पन्न हुई हैं । मूलाधार से उद्गत प्राण इन नाडियों से सारे शरीर में व्याप्त रहता है ॥ ४३ ॥

दशवायवः । दशाग्नयः

वायवोऽत्र दश प्रोक्ता वह्नयश्च दश स्मृताः ।
प्राणाद्या मरुतः पञ्च नागः कूर्मो धनञ्जयः ॥ ४४ ॥
कृकलः स्याद् देवदत्त इति नामभिरीरिताः ।
अग्नयो दोषदूष्येषु संलीना दश देहिनः ॥ ४५ ॥

तद्भेदान् वदन् प्रसङ्गादग्नीनप्याह—वायवोऽत्रेति । तन्नामान्येवाह प्राणाद्या इति । आदिशब्देनापानव्यानोदानसमानाः प्रसिद्धत्वेनादिनोक्तिः । तत्र विशेषो योगार्णवे—

इन्द्रनीलप्रतीकाशं प्राणरूपं प्रकीर्त्तितम् ।
आस्यनासिकयोर्मध्ये हृन्मध्ये नाभिमध्यगे ॥
प्राणालय इति प्राहुः पादाङ्गुष्ठेऽपि केचन ।
अपानयत्यपानोऽयमाहारञ्च मलायितम् ॥
शुक्रं मूत्रं तथोत्सर्गमपानस्तेन मारुतः ।
इन्द्रगोपप्रतीकाशः सन्ध्याजलदसन्निभः ॥
स च मेढ्रे च पायौ च ऊरुवङ्क्षणजानुषु ।
जङ्घोदरे कृकाट्याञ्च नाभिमूले च तिष्ठति ॥
व्यानो व्यानशयत्यन्नं सर्वव्याधिप्रकोपनः ।
महारजतसुप्रख्यो हानोपादानकारकः ॥

स चाक्षिकर्णयोर्मध्ये काट्यां वै गुल्फयोरपि ।
घ्राणे गले स्फिगुद्देशे तिष्ठत्यत्र निरन्तरम् ॥
स्पन्दयत्यधरं-वक्त्रं गात्रनेत्रप्रकोपनः ।
उद्वेजयति मर्माणि उदानो नाम मारुतः ॥
विद्युत्पावकवर्णः स्यादुत्थानासनकारकः ।
पादयोर्हस्तयोश्चापि स तु सन्धिषु वर्त्तते ॥
पीतं भक्षितमाघातं रक्तपित्तकफानिलान् ।
समं नयति गात्राणि समानो नाम मारुतः ॥
गोक्षीरसदृशाकारः सर्वदेहे व्यवस्थितः ।
उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः ॥
उन्मीलने स्थितः कूर्म्मो भिन्नाञ्जनसमप्रभः ।
कृकरस्तु क्षुते चैव जवाकुसुमसन्निभः ॥
विजृम्भने देवदत्तः शुद्धस्फटिकसन्निभः ।
धनञ्जयस्तथा घोषे महारजतवर्णकः ॥
ललाटे चोरसि स्कन्धे हृदि नाभौ त्वगस्थिषु ।
नागाद्या वायवः पञ्च सहैव परिनिष्ठिताः ॥ इति ।

आचार्यास्तुधनञ्जयाख्यो देहेऽस्मिन् कुर्यात् बहुविधान् रवान् ।
स तु लौकिकवायुत्वान्मृतञ्च न विमुञ्चति ॥ इति ।

अन्यैस्तु चत्वारो वायवोऽधिका उक्ताः ।

वैरम्भणः स्थानमुख्यः प्रद्योतः प्रकृतस्तथा ।
वैरम्भणादयस्तत्र सर्ववायुवशङ्गताः ॥ इति

अग्नीनां स्थितिमाह अग्नय इति । तेषां नामान्यन्यत्रोक्तानि—

ते जातवेदसः सर्वे कल्माषः कुसुमस्तथा ।
दहनः शोषणश्चैव तपनश्च महाबलः ॥
पिठरः पतगः स्वर्णस्त्वगाधो भ्राज एव च । इति ।

अन्यत्र तु नामान्तराण्युक्तानि—

जृम्भको दीपकश्चैव विभ्रमभ्रमशोभनाः ।
आवसथ्याहवनीयौ च दक्षिणाग्निस्तथैव च ॥
अन्वाहार्यो गार्हपत्य इत्येते दश वह्नयः । इति ।

अन्यैरन्यथोक्तानि— भ्राजको रञ्जकश्चैव क्लेदकः स्नेहकस्तथा ।
धारको रन्धकश्चैव द्रावकाख्यश्च सप्तमः ॥
व्यापकः पावकश्चैव श्लेष्मको दशमः स्मृतः । इति ।

दोषा वातपित्तकफाः । दूष्याः सप्त धातव इति प्रागेवोक्तम् ॥ ४४-४५ ॥

इस शरीर में दश वायु हैं और दश अग्नियाँ भी हैं । प्राण, अपान, समान, व्यान और उदान ये पाँच प्राण हैं । इनको नाग, कूर्म, धनञ्जय, कृकल और

देवदत्त नाम से भी कहा गया है । दश अग्नियाँ प्राणियों के शरीर में रहने वाले वात, कफ एवं पित्त में तथा सप्त धातुओं में छिपी हुई रहती हैं ॥ ४४-४५ ॥

षडूर्मयः

बुभुक्षा च पिपासा च प्राणस्य मनसः स्मृतौ ।
शोकमोहौ शरीरस्य जरामृत्यू षडूर्मयः ॥ ४६ ॥

एवं प्राणमुक्त्वा तस्य विशिष्टे अवस्थे वदन् प्रसङ्गात् मनःशरीरयोरप्याह बुभुक्षेति । ऊर्मिर्नाम आर्त्त्युत्पादकः अवस्थाविशेषः ॥ ४६ ॥

भूख और प्यास ये प्राण की ऊर्मियाँ हैं, शोक और मोह मन की ऊर्मियाँ हैं और जरा एवं मृत्यु शरीर की ऊर्मियाँ हैं । इस प्रकार कुल ६ ऊर्मियाँ होती हैं (व्याकुलता उत्पन्न करने वाली अवस्था विशेष को ऊर्मि कहते हैं) ॥ ४६ ॥

षट्कोशोत्पत्तिः

स्नायवस्थिमज्जा शुक्रात् त्वङ्मांसास्राणि शोणितात् ।
षाट्कौशिकमिदं प्रोक्तं सर्वदेहेषु देहिनाम् ॥ ४७ ॥

षडूर्मिप्रसङ्गात् षाट्कौशिकं वदन् शुक्रशोणितकार्याणि विविच्याचष्टे स्नाय्विति। शुक्रात् पितुः शुक्रात् स्नाय्वादि । शोणितात् मातुः शोणितात् त्वगादि ।

तदुक्तम्— मातृतस्त्रीणि पितृतस्त्रीणि । इति ।

अन्यत्र तु— मृदवः शोणितं मेदो-मांसं-प्लीहा-यकृद्-गुदः ।
हृन्नाभीत्येवमाद्यास्तु भावा मातृभवा मताः ॥
श्मश्रुलोमकचाः स्नायुशिराधमनयोनखाः ।
दशनाः शुक्रमित्यादि स्थिराः पितृसमुद्भवाः ॥ इति ॥ ४७ ॥

पिता के शुक्र से स्नायु, अस्थि और मज्जा का निर्माण होता है, माता के शोणित से त्वक्, मांस और शोणित का निर्माण होता है । इस प्रकार प्राणी के समस्त देह में छः कोशों की स्थिति है ॥ ४७ ॥

जन्तोर्गर्भाशयस्थितिवर्णनम्

इत्थम्भूतस्तदा गर्भे पूर्वजन्मशुभाशुभम् ।

शुक्रशोणितकार्याणि

स्मरंस्तिष्ठति दुःखात्मा च्छन्नदेहो जरायुणा ॥ ४८ ॥

गर्भाशये तत्स्थिति प्रकारमाह इत्थम्भूत इति । इत्थम्भूत ऊर्वन्तरितहस्तबद्धश्रोत्रः मातृपृष्ठमाश्रितो मोक्षोपायमभिध्यायन्नित्यर्थः । यदाहुः—

पाल्यन्तरितहस्ताभ्यां श्रोत्ररन्ध्रे पिधाय सः ।
उद्विग्नो गर्भसंवासादास्ते गर्भे भयान्वितः ॥

स्मरन् पूर्वानुभूताः स नानायोनीश्च यातनाः ।
मोक्षोपायमभिध्यायन् वर्त्ततेऽभ्यासतत्परः ॥ इति ।

अन्यत्र विशेषः— कृताञ्जलिर्ललाटेऽसौ मातृपृष्ठमभिश्रितः ।
अध्यास्ते सङ्कुचद्गात्रो गर्भे दक्षिणपार्श्वगः ॥
वामपार्श्वाश्रिता नारी क्लीबं मध्याश्रितं मतम् । इति ॥ ४८॥

जीव इस प्रकार गर्भ में शरीर धारण कर अपने पूर्व जन्मों के शुभाशुभ कर्म का स्मरण करता हुआ निवास करता है । उसका शरीर जरायु से आच्छन्न रहता है, जिससे वह बहुत दुःखी रहता है ॥ ४८ ॥

बालोत्पत्तिः

कालक्रमेण स शिशुर्मातरं क्लेशयन्नपि ।
सम्पिण्डितशरीरोऽथ जायतेऽयमवाङ्मुखः ॥ ४९ ॥
क्षणं तिष्ठति निश्चेष्टो भीत्या रोदितुमिच्छति ॥ ५० ॥

कालक्रमेणेति । कालक्रममाह याज्ञवल्क्याः—'नवमे दशमे वापि' इति ।

अन्यत्रापि—समयः प्रसवस्याथ मासेषु नवमादिषु । इति ।

सम्पिण्डितशरीरः सङ्कुचद्गात्रः अवाङ्मुखः अधोमुखः सन् जायते उत्पद्यते। सूतिमारुतैर्नूत्र इति शेषः । यदाहुः—

नवमे दशमे मासि प्रबलैः सूतिमारुतैः ।
निःसार्यते वाण इव जन्तुश्छिद्रेण सज्वरः ॥ इति ।

अन्यत्रापि—क्रियतेऽधःशिराः सूतिमारुतैः प्रबलैस्ततः ।
निःसार्यते रुजद्गात्रो योनिच्छिद्रेण बालकः ॥ इति ।

क्षणं निश्चेष्टस्तिष्ठति भूमाविति शेषः ॥ ४९-५० ॥

कालक्रम से (नवें या दसवें महीने) वह शिशु माता को क्लेश पहुँचाते हुए संकुचित गात्र होकर अधोमुख होकर पृथ्वी पर जन्म लेता है । वह कुछ क्षण के लिए भूमि पर निश्चेष्ट रहकर भय से रोने की इच्छा करता है अर्थात् रोने लगता है ॥ ४९-५० ॥

कुण्डलीतो मन्त्रमयजगदुत्पत्तिः

ततश्चैतन्यरूपा सा सर्वगा विश्वरूपिणी ।
शिवसन्निधिमासाद्य नित्यानन्दगुणोदया ॥ ५१ ॥

एवं शरीरोत्पत्तिपर्यन्तामर्थसृष्टिमुक्त्वा 'तत् प्राप्य' (१. १४) इति सामान्यत उक्तां शब्दसृष्टिं विविच्य वक्तुं भीत्या रोदितुमिच्छति इत्युक्तरोदनस्याप्यव्यक्त-वर्णात्मकत्वाद् वर्णोत्पत्तिप्रकारश्च वदन् सर्वमन्त्राणां सामान्यतः कुण्डलीत उत्पत्तिमाह तत इत्यादि । तदुक्तम्—

मूलाधारात् प्रथममुदितो यस्तु भावः पराख्यः
पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः ।
वक्त्रे वैखर्यथ रुरुदिषोरस्य जन्तोः सुषुम्णा
बद्धस्तस्माद्भवति पवनप्रेरितो वर्णसङ्घः ॥
स्त्रोतोमार्गस्याविभक्तत्वहेतोस्तत्रार्णानां जायते न प्रकाशः । इति ।

तत्र ततः शरीरोत्पत्त्यनन्तरं चैतन्यरूपा, अतएव शब्दब्रह्ममयी सा देवी कुण्डली परदेवता सर्वगात्रेण गुणिता, अतएव विश्वात्मना सर्वात्मना प्रबुद्धा जातप्रबोधा मन्त्रमयं जगत् सूते इति दूरेण सम्बन्धः । तत्र मूलाधारे कुण्डलीभूत-सर्पवन्नाडी वर्त्तते। तन्मध्ये वायुवशादस्याः सञ्चरणमेव गुणनम् । तत्र चैतन्यरूपा इति स्वरूपाख्यानम् । सा प्रसिद्धाः । सर्वगेति सामान्यतो व्याप्तिर्दर्शिता । विश्वरूपिणीति विषयव्याप्तिः । शिवसन्निधिमासाद्य स्थितेति शेषः । अनेन शैवसिद्धान्ते शक्ति-शब्दवाच्येयमित्युक्तम् । सन्निधिशब्द औपचारिकः। तन्मते शिवशक्त्योरभेदात् । तदुक्तमभिनवगुप्तपादाचार्यैः-

शक्तिश्च शक्तिमद्रूपाद् व्यतिरेकं न वाञ्छति ।
तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव ॥ इति ।

यद्वा सम्यङ्निधिः स्वरूपं शिवस्वरूपं प्राप्य इत्यर्थः । वक्ष्यति च—'पिण्डं भवेत् कुण्डलिनी शिवात्मा' इति । गुणानां सत्त्वरजस्तमसां उदयो यस्यां सा । नित्यानन्दा चासौ गुणोदया च सा । नित्यानन्देत्यनेन कुण्डलिनीस्वरूपमुक्तम् । गुणोदयेत्यनेन सांख्यमते प्रकृतिवाच्येत्युक्तम् । यदाहुः—

प्रधानमिति यामाहुर्याशक्तिरिति कथ्यते । इति ॥ ५१ ॥

कुण्डलीशक्तेर्विभुत्वम्

दिक्कालाद्यनवच्छिन्ना सर्वदेहानुगा शुभा ।

कुण्डलीशक्तेः स्फूर्त्तिः

परापरविभागेन परशक्तिरियं स्मृता॥ ५२ ॥

अस्या वर्णमयत्वं भूतलिपित्वञ्च

योगिनां हृदयाम्भोजे नृत्यन्ती नित्यमञ्जसा ।
आधारे सर्वभूतानां स्फुरन्ती विद्युदाकृतिः ॥ ५३ ॥

कुण्डलीशक्तेः स्थितिप्रकारः

शङ्खावर्त्तक्रमाद् देवी सर्वमावृत्य तिष्ठति ।
कुण्डलीभूतसर्पाणामङ्गश्रियमुपेयुषी ॥ ५४ ॥

कुण्डलीशक्तेर्देहादिव्याप्तिः

सर्वदेवमयी देवी सर्वमन्त्रमयी शिवा।
सर्वतत्त्वमयी साक्षात् सूक्ष्मात् सूक्ष्मतरा विभुः ॥ ५५ ॥

इदानीमाध्यात्माधिभूताधिगुणाधिविषयाधिज्यौतिषक्रमेण तस्या व्याप्तिमाहदिक्कालेति । सर्वदेहानुगेति देहव्याप्तिः । परापरविभागः । काचन परशक्तिः तद्विभागेनापि इयं परशक्तिरेव । यदाहुः—

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ इति

यद्वा परः स्थूलः अपरो महास्थूलः महदादिः तद्विभागेन परशक्तिः स्थूला शक्तिः। 'स्थूलात् स्थूला' इत्युक्तेः । अनेन महदादिव्याप्तिः । यद्वा सर्वदेहानुगेत्यनेन शब्दतोऽर्थतश्च पुंस्त्रीनपुंसकलिङ्गव्याप्तिर्दर्शिता । शब्दतो यथा शिव इत्युच्यते कुण्डलिनीत्युच्यते प्रधानमित्युच्यते । एवम्भूतापि सा स्त्रीत्वेनैव निर्दिश्यते इत्याह परापरेति । परा प्रकृतिः अपरं पुंनपुंसकप्रकृतिः तद्विभागेन तत्त्यागेन इयं परशक्तिः स्मृता । अयमर्थः । यद्यपि लिङ्गत्रयवाच्या तथापि तूर्णमेवाचलभक्तिभारपरिश्रान्तभक्तजनसमस्ताकाङ्क्षाकल्पवल्ली परशक्तिशब्दवाच्येति । अत एव शुभा रमणीया । यदाहुराचार्याः—

पुंनपुंसकयोस्तुल्याऽप्यङ्गनासु विशिष्यते । इति ।

नित्यक्लिन्नाम्नायेऽपि—

सर्वत्रापि स्थिता ह्येषा कामिनीषु विशेषतः ।
प्रकाशते ततस्तासामतिवृत्तिं न कारयेत् ॥ इति ।

अञ्जसा तत्त्वेन । योगिनां हृदयाम्भोजे नृत्यन्ती नित्यमित्यनेन तैरेव गुरूपदेशेन ज्ञायत इत्यर्थः । 'दृश्या देशिकदेशितैः' इत्युक्तेः । सर्वभूतानां सर्वजन्तूनां आधारे मूलाधारचक्रे स्फुरन्तीत्यनेन स्थाननिर्देशः । विद्युदाकृतिरित्यनेन ध्यानमुक्तम् । यदाहुः— तडित्कोटिप्रख्यां स्वरुचिजितकालानलरुचिम् । इति ।

अथवा अनेनानेकशब्दोत्पत्तिहेतुत्वेनानेकविलासवतीत्युक्तम् । शङ्खमध्ये य आवर्तः स यथा शङ्खमावृत्य तिष्ठति तद्वदियमपि देवीत्यर्थः । इदमवान्तरवाक्यं भिन्नमेव । शङ्खेति कुण्डलीत्यनयोः हेतुहेतुमद्भावेन योजना । कुण्डलीभूताः कुण्डलाकारतां प्राप्ता ये सर्पास्तेषाम् । केचन कुण्डलीति भिन्नं पदं वर्णयन्ति । भूतानि सर्पाश्च एते तथा कुटिलगतयः तद्वदियमपीत्यर्थ इति । तन्न । कुण्डली परदेवतेत्यनेन पुनरुक्तेः । सर्वदेवमयीति देवव्याप्तिः । दिव्यतीति देवी तेजोरूपेत्यर्थः। अनेन तेजोव्याप्तिः । सर्वमन्त्रमयीति मन्त्रव्याप्तिः । शिवा शिवरूपेत्यर्थः । यद्वा शिवा कल्याणरूपा । अनेन कल्याणव्याप्तिः । साक्षात् सर्वतत्त्वमयीति तत्त्वव्याप्तिः । सूक्ष्मात् सूक्ष्मतरा विभुः इति विरोध परिहारस्तु सूक्ष्मतरा दुर्ज्ञाना । यद्वा सूक्ष्मात् त्रसरेणोरपि सूक्ष्मतरा अन्तःस्थितत्वात् सूक्ष्मतरा अणुतरा । अनेन अण्वादिव्याप्तिर्दर्शिता । तदुक्तम्—

बालाग्रस्य सहस्रधा विदलितस्यैकेन भागेन या
सूक्ष्मत्वात् सदृशी त्रिलोकजननी । इति ।

विभुः इयत्तया ज्ञातुमशक्या ॥ ५२-५५ ॥

अस्याः सोमसूर्याग्निरूपत्वम्

त्रिधामजननी देवी शब्दब्रह्मस्वरूपिणी ।
द्विचत्वारिंशद्वर्णात्मा पञ्चाशद्वर्णरूपिणी ॥ ५६ ॥
गुणिता सर्वगात्रेषु कुण्डली परदेवता ।
विश्वात्मना प्रबुद्‌वा सा सूते मन्त्रमयं जगत् ॥ ५७ ॥

त्रिधामेति सोमसूर्याग्निरूपम् । यद्वा त्रिधामेति स्थानत्रयम् । पातालभूस्वर्गरूपम् । अनेन स्थानव्याप्तिर्दर्शिता । द्विचत्वारिंशद्वर्णात्मेति भूतलिपिमन्त्रमयी । पञ्चाशद्वर्णरूपिणीति मातृकामयी ॥ ५६-५७ ॥

इस प्रकार शरीर की उत्पत्ति पर्यन्त अर्थसृष्टि का क्रम कहकर सामान्य रूप से उक्त शब्दसृष्टि का विवेचन करने के लिए 'भय से रोने की इच्छा करता है' यह कह कर अव्यक्त वर्णात्मक रोदन होने से वर्णोत्पत्ति का प्रकार कहते हुए सभी मन्त्रों में सामान्यतः कुण्डलिनी की उत्पत्ति बतलाते हैं—

इसके बाद चैतन्यरूपा वह (कुण्डलिनी) सर्वत्र व्याप्त होने वाली, विश्व स्वरूपिणी, शिव के सन्निधान को प्राप्त कर, नित्य आनन्द एवं सत्त्वादि गुणों को प्राप्त करने वाली, दिशा और काल से परे, संपूर्ण शरीर में व्याप्त, परम रमणीय एवं परापर विभाग से परशक्ति कही जाने वाली, योगियों के हृत्कमल में तत्त्वतः नित्य नृत्य करने वाली, सम्पूर्ण जन्तुओं के मूलाधार में विद्युत् के समान स्फुरित होने वाली, शङ्खावर्त्त के समान सभी वस्तुओं को आवृत करने वाली, कुण्डलीभूत सर्प के समान आकारवाली, सर्वदेवमयी देवी सर्वमन्त्रमयी शिवा, सर्वतत्त्वमयी, सूक्ष्म से भी सूक्ष्मतर, विभु, सोम, सूर्य एवं अग्नि—इन तीनों प्रकार के तेजों की जननी (अथवा पाताल, भू एवं स्वर्ग रूप तीन स्थानों में व्याप्त) देवी, शब्दब्रह्मस्वरूपिणी, बयालिस वर्णात्मक भूतलिपिमन्त्रमयी, पञ्चाशद् वर्णमातृकारूपा, सम्पूर्ण शरीर में व्याप्त रहने वाली तथा परदेवतास्वरूपा कुण्डलिनी सब प्रकार से प्रबुद्ध होकर मन्त्रमय इस जगत् को उत्पन्न करती है ॥ ५१-५७ ॥

कुण्डलीतो विविधमन्त्रोत्पत्तिः

एकधा गुणिता शक्तिः सर्वविश्वप्रवर्त्तिनी ।
वेदादिबीजं श्रीबीजं शक्तिबीजं मनोभवम् ॥ ५८ ॥
प्रासादं तुम्बुरुं पिण्डं चिन्तारत्नं गणेश्वरम् ।
मार्त्तण्डभैरवं दौर्गं नारसिंहवराहजम् ॥ ५९ ॥
वासुदेवं हयग्रीवं बीजं श्रीपुरुषोत्तमम् ।
अन्यान्यपि च बीजानि तदोत्पादयति ध्रुवम् ॥ ६० ॥

एवं सामान्यत उत्पत्तिमुक्त्वा एकद्वयादिविशेषाकारेण शब्दसृष्टिं वदन् प्रसङ्गादन्तरं तज्जगच्छब्दसूचितामर्थसृष्टिमप्यभिधातुमुपक्रमते एकधेति । सर्वं विश्वं

शब्दार्थरूपं तत्प्रवर्त्तिनी तदुत्पादिका शक्तिः । एकधा गुणिता वेदादिबीजमुत्पादयतीति सम्बन्धः । एवमग्रेऽपि बोद्धव्यम् । वेदादिबीजं प्रणवम् अन्त्ये वक्ष्यति । श्रीबीजम् अष्टमे । शक्तिबीजं नवमे। मनोभवं सप्तदशे। प्रासादम् अष्टादशे । तुम्बुरुमेकोनविंशे। पिण्डमुपान्त्ये । चिन्तारत्नमेकोनविंशे । गणेश्वरं त्रयोदशे । मार्त्तण्डभैरवं चतुर्दशे । दौर्गम् एकादशे । नारसिंहं षोडशे । वाराहं पञ्चदशे । वासुदेवं ग्लौं । इदं गोपाल-बीजत्वेनोद्धृतम् । तद्वासुदेवशब्देनोक्तम् । तत् सप्तदशे । नारदपञ्चरात्रोक्तं वियन्मात्रं वासुदेवबीजं वा । हयग्रीवं पञ्चदशे । श्रीपुरुषोत्तममिति श्रीयुक्तपुरुषोत्तममित्युक्तत्वात् शक्तिशक्तिमतोरभेदात् पुरुषोत्तमशक्तिबीजं श्रीपुरुषोत्तमबीजशब्देनोक्तम् । तत् सप्तदशे । अत्र कामबीजमेव पुरुषोत्तमबीजत्वेनोक्तम् ।

यदाहुः— धरयालिङ्गितो ब्रह्मा मायाबिन्दुविभूषितः ।
पुरुषोत्तमसंज्ञोऽत्र देवो मन्मथविग्रहः ॥ इति ।

अन्यान्यपीति चन्द्रबीजबिम्बबीजादीनि ॥ ५८-६० ॥

शब्दार्थरूप से सारे संसार की उत्पादिका शक्ति जब एक गुणित संख्या में रहती है तो वह वेद का आदि बीज (प्रणव), श्री बीज (श्रीँ), शक्तिबीज (ह्रीँ), मनोभव बीज (क्लीँ) प्रासाद, तुम्बुरु, पिण्ड, चिन्तामणि विनायक का मन्त्र, मार्त्तण्ड, भैरव, दुर्गा, नरसिंह, वराह, वासुदेव, हयग्रीव और श्री पुरुषोत्तम बीज एवं इसी प्रकार अन्य एकाक्षर मन्त्रों (जैसे चन्द्रबीज विम्बबीज) को निश्चित रूप से उत्पन्न करती हैं ॥ ५८-६० ॥

यदा भवति सा संवित् द्विगुणीकृतविग्रहा ।
हंसवर्णौ परात्मानौ शब्दार्थौ वासरक्षपे ॥ ६१ ॥
सृजत्येषा परा देवी तदा प्रकृतिपुरुषौ ।
यद्यदन्यज्जगत्यस्यां युग्मं तत्तदजायत ॥ ६२ ॥
त्रिगुणीकृतसर्वाङ्गी चिद्रूपा शिवगेहिनी ।
प्रसूते त्रैपुरं मन्त्रं मन्त्रं त्रैपुटं चण्डनायकम् ॥ ६३ ॥
सौरं मृत्युञ्जयं शक्तिसम्भवं विनतासुतम् ।
वागीशीत्र्यक्षरं मन्त्रं नीलकण्ठं विषापहम् ॥ ६४ ॥

हंसवर्णौ चतुर्दशे । परात्मानौ वर्णाविति सम्बध्यते । परमात्मवाचकावित्यर्थः । तौ सोहंरूपावन्त्ये । प्रकृतिपुरुषाविति । यद्यपि पुरुषोऽनादिस्तथापि मायाशबलि-तत्वेनात्र प्रादुर्भाव उपचारात् । अन्यद्युग्मं यद्जगति अस्याः सकाशादजायतेति सम्बन्धः । तच्च ज्योतिर्मन्त्रादि । त्रैपुरं मन्त्रद्वयं द्वादशे । शक्तिविनायकं त्रयोदशे । यद्यप्यग्रे नवाक्षरयोगाद् द्वादशाक्षरस्तथापि बीजत्रयात्मकत्वं त्रयाणां बीजरूपत्वेन प्राधान्यात् । ह्रीँ श्रीँ ह्रीँ इति तन्त्रान्तरोक्तो वा । पाशाद्यं नवमे । त्र्यक्षरमिति त्रिकण्टकीद्वयं दशमे । विशेषणविशेष्यभावो वा । त्रैपुटं दशमे । चण्डनायकं चण्डेश्वरं विंशे । सौरं चतुर्दशे । मृत्युञ्जयमष्टादशे । शक्तिसम्भवं मन्त्रद्वयं नवमे । शाक्तं शाम्भवमिति पाठे शाम्भवं तन्त्रान्तरोक्तं प्रणवमायाबीजप्रासादात्मकम् ।

विनतासुतं क्षिप ॐ इति तन्त्रान्तरोक्तम् । वागीशीत्र्यक्षरं सप्तमे । वागीशमिति पाठे त्र्यक्षरमिति नवमस्थं शाक्तमेकम् । विषापहं नीलकण्ठमेकोनविंशे ॥ ६१-६४ ॥

यन्त्रं त्रिगुणितं देव्या लोकत्रयं गुणत्रयम् ।
धामत्रयं सा वेदानां त्रयं वर्णत्रयं शुभम् ॥ ६५ ॥
त्रिपुष्करं स्वरान् देवी ब्रह्मादीनां त्रयं त्रयम् ।
वह्नेः कालत्रयं शक्तित्रयं वृत्तित्रयं महत् ।
नाडीत्रयं त्रिवर्गं सा यद्यदन्यत् त्रिधा मतम् ॥ ६६ ॥

यन्त्रं नवमे । गुणत्रयं धामत्रयं चतुर्थे । यद्यप्यथर्ववेदोऽस्ति तथापि होत्रध्वर्यूद्गातृरूपपदार्थत्रयेण यज्ञनिष्पादनात् वेदत्रयमित्युक्तम् । श्रुतिरपि—'सैषा त्रयी विद्या यज्ञे' इति । वर्णत्रयं प्रणवस्य अकारोकारमकाराः । त्रिपुष्करं तीर्थत्रयम् । तस्य ज्येष्ठमध्यमकनीयस्त्वेन त्रित्वम् । स्वरान् उदात्तानुदात्तस्वरितान् । देव्यः गायत्रीसरस्वतीसावित्र्यः । ब्रह्मादीनां ब्रह्मविष्णुमहेश्वराणां त्रयं नवमे । देवीति भिन्ने पदे कुण्डलीविशेषणम् । वह्नेस्त्रयं दक्षिणाग्निगार्हपत्याहवनीयम् । कालत्रयं अतीतवर्त्तमानभविष्यद्रूपम्, प्रातर्मध्याह्नसायंकालरूपं वा । शक्तित्रयं रौद्रीज्येष्ठावामात्मकं तदाद्ये । प्रभावोत्साहमन्त्ररूपं वा । वृत्तित्रयं यजनाध्यापनप्रतिग्रहरूपम् । 'त्रीणि कर्माणि जीविकेति' स्मरणात् । कृषिपाशुपाल्यवाणिज्यं वा वृत्तित्रयम् । महदिति पाठे नाडीत्रयस्य विशेषणत्वेन महदिति योज्यम् । नाडीत्रयं इडापिङ्गलासुषुम्णारूपमाद्ये । त्रिवर्गं धर्मार्थकामाः । 'त्रिवर्गो धर्मकामार्थैः' इत्युक्तेः । अन्यदिति दोषत्रयादि ॥ ६५-६६ ॥

जब वह ज्ञान स्वरूपा कुण्डलिनी द्विगुणित विग्रहा (दुगुने शरीर वाली) होती है तो परमात्मा के वाचक 'हं' 'सः' इन दो वर्णों को, शब्द अर्थ को दिन रात को तथा प्रकृति पुरुष को उत्पन्न करती है । इस प्रकार इस जगत् में जितने भी युग्म युग्म (जोड़े-जोड़े) पदार्थ हैं वे सभी देवी से उत्पन्न हुये हैं ॥ ६१-६२ ॥

जब वह ज्ञानस्वरूपा शिवगेहिनी त्रिगुणित (तीन गुना शरीर वाली) होती हैं, तब त्रिपुरा मन्त्र, शक्तिविनायक मन्त्र, पाशादि त्र्यक्षर मन्त्र, त्रैपुट चण्डेश्वर, सौर, मृत्युञ्जय, शक्ति से उत्पन्न दो मन्त्र, विनता सुत (गारुड़) मन्त्र (यथा 'क्षिप ॐ'), वागीश्वरी का त्र्यक्षर मन्त्र, नीलकण्ठ का विषापह त्र्यक्षर मन्त्र, देवी का त्रिगुणित यन्त्र, तीन लोक, तीन गुण, तीन धाम, वेदत्रयी, वर्णत्रय (ॐकार अकार मकार उकार वर्ण) ज्येष्ठ मध्यमकनीयस्त्वेन तीर्थत्रय, उदात्त, अनुदात्त, एवं स्वरित तीन स्वर ब्रह्मा, विष्णु, रुद्र इस प्रकार त्रिदेव और गायत्री, सरस्वती, सावित्री तीन देवियाँ, अग्नित्रय (दक्षिणाग्नि, गार्हपत्य, आहवनीय), कालत्रय (भूत, भविष्यद् वर्तमान अथवा प्रातः, मध्याह्न, सायाह्न) शक्तित्रय (रौद्री, ज्येष्ठा, वामात्मक) वृत्तित्रय (यजन, अध्यापन, प्रतिग्रह अथवा कृषि, वाणिज्य, पाशुपालन), महान् नाडीत्रय (ईडा, पिङ्गला और सुषुम्ना), त्रिवर्ग (धर्म, अर्थ,

काम), इसके अतिरिक्त और और जो त्रित्व संख्या विशिष्ट पदार्थ (जैसे दोषत्रय आदि) हैं उन्हें उत्पन्न करती हैं ॥ ६३-६६ ॥

चतुः प्रकारगुणिता शाम्भवी शर्मदायिणी ।
तदानीं पद्मिनीबन्धोः करोति चतुरक्षरम् ॥ ६७ ॥
चतुरर्णं महादेव्या देवीतत्त्वचतुष्टयम् ।
चतुरः सागरानन्तःकरणानां चतुष्टयम् ॥ ६८ ॥

पद्मिनीबन्धोरिति । तन्त्रान्तरोक्तः प्रणवमायाहंसवर्णात्मकः । महादेव्या महालक्ष्म्या अष्टमे । देवीतत्त्वचतुष्टयम् आत्मतत्त्वं विद्यातत्त्वं शिवतत्त्वं सर्वतत्त्वञ्चेति। चतुरः सागरानिति । प्रागादिदिगपेक्षया चतुष्ट्यं वस्तुतस्तस्यैकत्वात् । अन्तःकरणानि मनोबुद्ध्यहङ्कारचित्तरूपाणि ॥ ६७-६८ ॥

सूक्ष्मादींश्चतुरो भावान् विष्णोर्मूर्त्तिचतुष्टयम् ।
चतुष्टयं गणेशानामात्मादीनां चतुष्टयम् ॥ ६९ ॥
ओजापूकादिकं पीठं धर्मादीनां चतुष्टयम् ।
दमकादीन् गजान् देवी यद्यदन्यच्चतुष्टयम् ॥ ७० ॥

सूक्ष्मादीनिति आद्ये—सूक्ष्मा परा । आदिशब्देन पश्यन्तीमध्यमावैखर्यः ।

तदुक्तम्— वैखरी मध्यमा चैव पश्यन्ती चापि सूक्ष्मया ।
व्युत्क्रमेण भवन्त्येताः कुण्डलिन्यादितः क्रमात् ॥ इति ।

भावान् अवस्थाविशेषान् जाग्रत्स्वप्नसुषुप्तितुरीयान् । विशेषणविशेष्यभावो वा । विष्णुमूर्त्तिरष्टमे । गणेशानामिति त्रयोदशे । आत्मादीनामिति चतुर्थे । पीठमिति ओडडीयानजालन्धरपूर्णगिरिकामरूपाणि । धर्मादीनामिति चतुर्थे । अधर्मादीनामप्युपलक्षकम् । धर्मार्थादीनां वा तदाद्ये । गजान् इत्यष्टमे । अन्यदिति सिद्धादिमण्डलदीक्षा हेरम्बमन्त्र देवीदूतीबीजादि ॥ ६९-७० ॥

सबकी कल्याणकारिणी वह शाम्भवी (कुण्डलिनी) जब चौगुनी होती है, तब वह पद्मिनीबन्धु (सूर्य) के प्रणव, माया, हं, सः—इस प्रकार चार अक्षरों में व्यक्त होती है । इसी प्रकार वह महालक्ष्मी के चतुरक्षर मन्त्र, देवी के तत्त्व चतुष्टय (आत्मतत्त्व, विद्यातत्त्व, शिवतत्त्व और सर्वतत्त्व), चतुःसमुद्र, चार अन्तःकरण (परा, पश्यन्ती, मध्यमा, वैखरी रूप) वाक् चतुष्टय, (जाग्रत्, स्वप्न, सुषुप्ति, तुरीय रूप) भावचतुष्टय, विष्णुमूर्त्तिचतुष्टय, गणेशचतुष्टय, आत्मचतुष्टय, (उड्डीयान, जालन्धर, पूर्णगिरि, कामरूप रूप) पीठचतुष्टय, धर्मादिचतुष्टय (धर्म, अर्थ, काम, मोक्ष), दमादिचतुष्टय (शम, दम, तितिक्षा उपरति), गजचतुष्टय, इसी प्रकार अन्य अन्य चतुष्टय (जैसे सिद्धादि, मण्डल, दीक्षा, हेरम्बमन्त्र, देवी, दूती बीजादि) को उत्पन्न करती है ॥ ६७-७० ॥

पञ्चधा गुणिता पत्नी शम्भोः सर्वार्थदायिनी ।
त्रिपुरापञ्चकूटं सा तस्याः पञ्चाक्षरद्वयम् ॥ ७१ ॥
पञ्चरत्नं महादेव्याः सर्वकामफलप्रदम् ।
पञ्चाक्षरं महेशस्य पञ्चवर्णं गरुत्मतः ॥ ७२ ॥
सम्मोहनान् पञ्च कामान् बाणान् पञ्च सुरद्रुमान् ।
पञ्च प्राणादिकान् वायून् पञ्च वर्णान् महेशितुः ॥ ७३ ॥
मूर्त्तीः पञ्च कलाः पञ्च पञ्च ब्रह्मऋचः क्रमात् ।
सृजत्येषा पराशक्तिर्वेदवेदार्थरूपिणी ॥ ७४ ॥

पञ्चधेति । क्रमात् पञ्चकूटादिकम् एषा सृजतीति । क्रमस्तु वक्ष्यमाणः शक्तिध्वन्यादिकः । एवमग्रेऽपि षट्क्रमादिति पदानि शब्दसृष्टौ संयोज्य अयमेवार्थस्तेषां व्याख्येयः । पञ्चकूटमिति । ह स क ल र एते पञ्चवर्णाः एकीकृताः कूट शब्देनोच्यन्ते । तस्याः पञ्चाक्षरद्वयमिति । एकः पञ्चकामैरपरे वाणबीजैरेतानि द्वादशे। तदुक्तं दक्षिणामूर्त्तिसंहितायाम्—

त्रिपुरेशी मन्त्रमध्ये वाणाः प्रोक्ता महेश्वरिः ।
तैरेव पञ्चभिर्वाणैर्विद्या पञ्चाक्षरी भवेत् ॥
पूर्वोक्तपञ्चकामैस्तु पञ्चकामेश्वरी भवेत् । इति ।

पञ्चरत्नमिति । ग्लुं स्लुं म्लुं प्लुं न्लुं इति मन्त्रपञ्चकं तन्त्रान्तरोक्तम् ।

सिद्धाद्या विजया श्यामा वाराही सुन्दरीत्यपि । इति ।

महेशस्येत्यष्टादशे । गरुत्मत इति चतुर्विंशे । समोहनानिति बहुवचनमाद्यर्थं समोहनादीन् । कामान् वाणान् द्वादशे । सुरद्रुमान् मन्दारपारिजातसन्तानकल्पद्रुमहरिचन्दनान् । वायून् आद्ये । वर्णान् शुक्लादीन् तृतीये । महेशितुरिति अग्रिमेण सम्बध्यते । मूर्त्तीरष्टादशे । कला निवृत्त्याद्या आद्ये । ब्रह्मऋच ईशानाद्या अष्टादशे । अन्यदिति ज्ञेयम् । तच्च भूतप्रणवभेदादित्यमूर्त्तिपञ्चगव्यादि धत्ते विधत्ते करोतीत्यर्थः ॥ ७१-७४ ॥

जब वह सम्पूर्ण अर्थों को देने वाली शम्भु पत्नी, जो वेद-वेदार्थ रूपिणी, परा, शक्ति है, वह देवी पञ्चगुणित होती है, तब त्रिपुरा के पञ्चवर्ण समूहों (ह् स् क् ल् र इन पाँच वर्णों को एकत्र करने) से वह त्रिपुरा पञ्चकूट हो जाती है । त्रिपुरा के दो प्रकार को पञ्चाक्षर मन्त्रों सर्वकाम फलप्रद महादेवीं के पञ्चरत्न (ग्लुं स्लुं म्लुं प्लुं न्लुं) महेश्वर के पञ्चाक्षर (नमः शिवाय) मन्त्र को, गरुड़ के पञ्चाक्षर मन्त्र, संमोहनादि पञ्चकामों को तथा संमोहनादि पञ्च वाणों को, (मन्दार परिजात सन्तान कल्पद्रुम हरिचन्दन रूप) पञ्च देव वृक्षों को प्राणादि पञ्च वायु, पञ्चवर्ण, महेश्वर की पञ्चमूर्त्ति (ईशान, सद्योजात, वामदेव, अघोर एवं तत्पुरुष), उनकी पाँच कला निवृत्तियों को तथा ब्रह्म ऋचाओं को क्रमशः उत्पन्न करती हैं ॥ ७१-७४ ॥

षोढा सा गुणिता देवी धत्ते मन्त्रं षडक्षरम्।
षट्कूटं त्रिपुरामन्त्रं गाणपत्यं षडक्षरम् ॥ ७५ ॥
षडक्षरं हिमरुचेर्नारसिंहं षडक्षरम् ।
ऋतून् वसन्तमुख्यान् षडामोदादीन् गणाधिपान्॥ ७६ ॥
कोशानूर्मीन् रसान् शक्तीः शाकिन्याद्याः षडध्वनः।
यन्त्रं षड्गुणितं शक्तेः षडाधारानजीजनत्।
षड्विधं यज्जगत्यस्मिन् सर्वं तत् परमेश्वरी ॥ ७७ ॥

षडक्षरं राममन्त्रं पञ्चदशे । षट्कूटमिति त्रिपुरार्णवोक्तम् । षट्कूटं मध्यबीजम्। तदुक्तम्—

कान्तान्तवान्ताकुललान्तवाम नेत्रान्वितं दण्डिकुलं सनादम् ।
षट्कूटमेतत् त्रिपुरार्णवोक्तमत्यन्तगुह्यं स्मर एव साक्षात् ॥ इति ।

गाणपत्यं तन्त्रान्तरोक्तं चतुर्थ्यन्तं वक्रतुण्डं वर्मान्तम् । षडक्षरं शैवमष्टादशे । षडक्षरं कृष्णमन्त्रं सप्तदशे । विशेषणविशेष्यभावो वा । हिमरुचेः षडक्षरं चतुर्दशे । नारसिंहं षोडशे । षडक्षरं पाशुपतास्त्रं विंशे । विशेषणविशेष्य भावो वा । ऋतूनिति त्रयोविंशे । आमोदादीनिति त्रयोदशे । कोशानूर्मीनाद्ये । रसान् मधुरादीन् । शक्तीरामोदादीनां त्रयोदशे । शाकिन्याद्या इति विंशे । शक्तिः शाकिन्याद्या इति विशेषण-विशेष्यभावो वा । षडध्वनः पञ्चमे । यन्त्रं नवमे । आधारान् पञ्चमे । जगति यत् सर्वं षड्विधं षडङ्गसीतामन्त्रषट्कर्मासनादि ॥ ७५-७७ ॥

जब वह देवी छः गुना रूप (छः भागों में प्रविभक्त होकर) रूप धारण करती है, तो षडक्षर मन्त्र, (त्रिपुरार्णव में कहा गया) षट्कूट मन्त्र, षडक्षर गाणपत्य मन्त्र, हिमरुचि (चन्द्रमा) का षडक्षर मन्त्र, नारसिंह का षडक्षर मन्त्र, बसन्तादि षड् ऋतु आमोदादि षड् विनायक, षड्कोश (द्र० १. ४७) षडूर्मि (१. ४६), षड् रस, षड् शक्तियाँ, षडध्वजा, शाकिनी आदि षड्गुणित यन्त्र षडाधार-आदि जितनी भी षड् जगत् में षड्विध वस्तुयें हैं उन सभी को वह परमेश्वरी उत्पन्न करती हैं ॥ ७५-७७ ॥

सप्तधा गुणिता नित्या शङ्करार्धशरीरिणी ।
सप्तार्णं त्रिपुरामन्त्रं सप्तवर्णं विनायकम् ॥ ७८ ॥
सप्तकं व्याहृतीनां सा सप्तवर्णं सुदर्शनम् ।
लोकान् गिरीन् स्वरान् धातून् मुनीन् द्वीपान् ग्रहानपि ॥७९॥
समिधः सप्त संख्याता सप्त जिहवा हविर्भुजः।
अन्यत् सप्तविधं यद्यत् तदस्याः समजायत ॥ ८० ॥

सप्तार्णमिति । सप्तवर्णं पद्मावतीमन्त्रं दशमे । त्रिपुरामन्त्रमिति मायाबीजाद्यनुलोमविलोमभैरवीमन्त्रः । सप्तवर्णं शङ्खमन्त्रं सप्तदशे । विनायकं सुब्रह्मण्यं

त्रयोदशे। यद्वा सप्तार्णं त्रिपुरामन्त्रं विनायकं सप्तवर्णमिति विशेषणविशेष्य भावः। व्याहृतीनामिति एकविंशे। सप्तवर्णमिति अङ्कुशमन्त्रं सप्तदशे। सुदर्शनं षोडशे। विशेषणविशेष्यभावो वा। लोकान् भूरादिकान्। गिरीन् विन्ध्यपारियात्रसह्यऋक्ष-मलयमहेन्द्रशुक्तिमतः। स्वरान् षड्जऋषभगान्धार मध्यमपञ्चमधैवतनिषादान्। धातून् त्वगादीन् आद्ये। मुनीन् वशिष्ठकश्यपात्रिजमदग्निगौतमविश्वामित्रभरद्वाजान् वैवस्वतमन्वन्तरे अत एव ऋषयः सप्तः। द्वीपान् जम्बूप्लक्षशाल्मलीकुश-क्रौञ्चशाकपुष्करान्। ग्रहानिति। केषाञ्चिन्मते राहुकेत्वोर्ग्रहत्वाभावात् सप्तेत्युक्ताः तान् षष्ठे। तथा च वराहमिहिराचार्यैः—

अमृतास्वादविशेषात् छिन्नमपि शिरः किलासुरस्येदम्।
प्राणैरपरित्यक्तं ग्रहभावं नैवमाप्नोति॥ इत्यादिना।
एवमुपरागकारणमुक्तमिदं दिव्यदृग्भिराचार्यैः।
राहुरकारणमस्मिन्नित्युक्तः शास्त्रसद्भावः॥
योऽसावसुरो राहुस्तस्य वरो ब्रह्मणा पुरा दत्तः।
आप्यायनमुपरागे दत्तहुतांशेन ते भवितेति॥

इत्यादिना च बहुना ग्रन्थसन्दर्भेण राहुकेत्वोः ग्रहता निरस्ता। अपिशब्दादजी-जनदिति क्रियाऽनुषज्यते। समिध इत्युत्तरपदमुत्तरक्रिययाऽन्वेति। हविर्भुजः समिधः सप्त श्रुत्युक्ताः। तथाच श्रुतिः—

सप्त ते अग्ने समिधः सप्तजिह्वाः सप्तऋषयः सप्तधाम प्रियाणि। इति।

सप्तग्रहाणां वा—

अर्कः पलाशः खदिरोऽप्यपामार्गोऽथ पिप्पलः। औडुम्बरः शमी। इति। तदा हविर्भुज इत्यत्र न सम्बध्यते। सप्तजिह्वास्त्रिविधा अपि पञ्चमे। अन्यदिति प्रकृतिविकृतित्रिपुरातत्त्वगरुडमन्त्रयन्त्रपटलमन्त्रद्वयवैवस्वतमन्त्रादि॥ ७८-८०॥

जब वह शंकरार्धशरीरिणी (सात भागों में प्रविभक्त होकर) देवी सात गुना मन्त्रात्मक रूप धारण करती हैं, तो सप्ताक्षर त्रिपुरा मन्त्र, सप्तवर्ण विनायक मन्त्र, भूर्भुवः स्वरादि सप्त व्याहृतियाँ, राप्त वर्ण सुदर्शन मन्त्र, सप्त लोक, सप्त मर्यादा पर्वत, सप्त स्वर, सप्त धातु, सप्तर्षि, सप्त द्वीप, सप्त ग्रह (इस ग्रन्थ में राहु केतु को ग्रह की कोटि में नहीं माना गया है), सप्त समिधायें, अग्नि की सात जिह्वायें, आदि जो भी इस जगत के सात सात पदार्थ हैं वे सभी इन देवी से उत्पन्न हुये॥ ७८-८०॥

अष्टधा गुणिता शक्तिः शैवमष्टाक्षरद्वयम्।
विष्णोः श्रीकरनामानं मन्त्रमष्टाक्षरं परम्॥ ८१॥
अष्टाक्षरं हरेः शक्तेरष्टाक्षरयुगं परम्।
भानोरष्टाक्षरं दौर्गमष्टार्णं परमात्मनः॥ ८२॥
अष्टार्णं नीलकण्ठस्य वासुदेवात्मकं मनुम्।
यन्त्रं कामार्गलं दिव्यं देवीयन्त्रं घटार्गलम्॥ ८३॥

गन्धाष्टकं शुभं देवीदेवानां हृदयङ्गमम् ।
ब्रह्माद्या भैरवान् सर्पान् मूर्त्तीराशा वसूनपि ॥ ८४ ॥
अष्टपीठं महादेव्या अष्टाष्टकसमन्वितम् ।
अष्टौ सा प्रकृतीर्विघ्नवक्रतुण्डादिकान् क्रमात् ॥ ८५ ॥
अणिमादिगुणान् नागान् वह्नेर्मूर्त्तीर्यमादिकान् ।
अष्टात्मकं जगत्यस्मिन् सर्वं वितनुते यदा ॥ ८६ ॥

शैवं द्वयमप्येकोनविंशे । विष्णोः श्रीकरनामानं परमष्टाक्षरं कृष्णस्य द्वावपि सप्तदशे । हरेरिति पञ्चदशे । शक्तेरिति नवमे युगलमपि । भानोरिति चतुर्दशे । दौर्गद्वयमप्येकादशे । परमात्मन इति षष्ठे । नीलकण्ठस्येति । नीलकण्ठशब्देन क्षेत्रपालमन्त्रो गृहीतः, स विंशे । तन्त्रान्तरोक्तो वा 'ॐ नीलकण्ठाय स्वाहा' इति । वासुदेवात्मकं मनुं मन्त्रम् । आगमशास्त्रे मनुशब्दो मन्त्रस्य संज्ञा । 'ॐ नमो वासुदेवाय' इति तन्त्रान्तरोक्तम् ।

कामार्गलं सप्तदशे । तस्य कामार्गलत्वेन प्रसिद्ध्यभावात् तन्त्रान्तरोक्तं कामार्गलम् ।

व्योम ब्रह्मेन्द्रलोकेशवह्निवामाक्षिबिन्दुमत् ।
कर्णिकायां लिखेत् साध्यं कामिनीञ्च दलाष्टके ॥
मूलं मासकलापत्रेष्वालिखेत् स्वरभेदितम् ।
दन्तपत्रेषु तद्भिन्नवर्णैः सान्तैश्च कादिभिः ॥
वेष्टयेन्मन्दिरेणैतत् वहिः शक्त्याङ्कुशेन च ।
यन्त्रं घटार्गलेनैतत्तुल्यं कामार्गलं विदुः ॥ इति ।

दिव्यं यमार्गलमित्यर्थः । 'दिव्यं यमार्गलं यन्त्रम्' इत्युक्तेः । इदं चतुर्विंशे । देवी भुवनेशी । 'हृल्लेखा शक्तिदेव्याख्या' इत्युक्तेः । तस्या यन्त्रं घटार्गलं नवमे ।

गन्धाष्टकं त्रिविधमपि तूर्ये । देवो विष्णुः देवः शिवश्च देवौ । देवी च देवौ च देवाः तेषाम् । क्वचिद् दिव्यमिति पाठः । तदा देवानामिति सामान्येन । ब्राह्म्याद्याः षष्ठे । अष्टौ भैरवान् नवमे । सर्पास्त्रयोविंशे । अष्टमूर्त्तीर्विंशे । आशाः पूर्वादिदिशः । वसूनिति—

धरो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च अष्टौ ते वसवः स्मृताः ॥ इति ।

अष्टाष्टकसमन्वितमष्टपीठं चतुःषष्टिविधं यथा—

मायामङ्गलनागवामनमहालक्ष्मीचरित्राभृगु-
च्छायाछत्रहिरण्यहस्तिनमहेन्द्रोडडीश चम्पापुरम् ।
षष्ठक्षीरक मञ्जनेश्वरपुरैलाश्चन्द्रपूः श्रीगिरिः
कोलाकुल्लक पूर्णपर्वत कुरुक्षेत्रैकलिङ्गार्बुदाः ॥
काश्मीरैकाम्रकाञ्चीमलयगिरिवरैकारकन्थूतदेवी
कोट्टाम्रातेशजालन्धरसुरभिमनीषाद्रिकाशीप्रयागाः ।

त्रिस्रोतः कामकोट्टोज्जयिनि समथुरं कोशलाकान्यकुब्जो-
इ्यानौङ्काराट्टहासाविरज इह ततः कुण्डिनं राजगेहम् ॥
नेपालपुण्ड्रवर्द्धनमालवपरसीर कामरूपकेदाराः
विन्ध्यमहामठगोश्रुति काम्पिल्यश्रीपीठमरुदीशाः ॥ इति ।

प्रकृतीराद्ये । विघ्नान् वक्रतुण्डांश्च त्रयोदशे । अणिमादीति ।

अणिमा महिमा चैव गरिमा लघिमा तथा ।
ईशित्वञ्च वशित्वञ्च प्राकाम्यं प्राप्तिरेव च ॥ इति ।

नागान् गजान् अष्टमे । वह्नेरिति पञ्चमे । यमादिकान् अन्त्ये । अन्यदिति श्रीवाणरतिप्रिय धूमावतीमन्त्रादि ॥ ८१-८६ ॥

जब वह देवी अठगुनी (आठ भागों में प्रविभक्त) होती है, तब वह शिव के दो प्रकार के अष्टाक्षर मन्त्र, विष्णु के श्रीकर नामक अष्टाक्षर मन्त्र, हरि के अष्टाक्षर मन्त्र, शक्ति के दो प्रकार के अष्टाक्षर मन्त्र, सूर्य के अष्टाक्षर मन्त्र, दुर्गा के अष्टाक्षर मन्त्र, परमात्मा के अष्टाक्षर मन्त्र, नीलकण्ठ के अष्टाक्षर मन्त्र, वासुदेवात्मक अष्टाक्षर मन्त्र, दिव्य कामार्गल मन्त्र, देवी का घटार्गल मन्त्र, तीन प्रकार के गन्धाष्टक, देवी और देवताओं के हृदयङ्गम मन्त्रों, ब्रह्मादि आठ देवताओं को, आठ भैरवों को, अष्ट सर्पों को, अष्टमूर्त्तियों को, अष्टदिशाओं को, अष्ट वसुओं को, आठ-आठ संख्या समन्वित महादेवी के आठ पीठों की, आठ प्रकृतियों को, अष्टविघ्नं, अष्ट वक्रतुण्डादि, अष्ट अणिमादि, अष्ट नाग, अग्नि की अष्टमूर्त्तियों को और अष्ट यमादि जितने भी इस जगत् के अष्टात्मक पदार्थ हैं, वह सब इस देवी से उत्पन्न हुये हैं ॥ ८१-८६ ॥

गुणिता नवधा नित्या सूते मन्त्रं नवात्मकम् ।
नवकं शक्तितत्त्वानां तत्त्वरूपा महेश्वरी ॥ ८७ ॥
नवकं पीठशक्तीनां शृङ्गारादीन् रसान् नव ।
माणिक्यादीनि रत्नानि नववर्गयुतानि सा ॥ ८८ ॥
नवकं प्राणदूतीनां मण्डलं नवकं शुभम् ।
यद्यन्नवात्मकं लोके सर्वमस्या उदञ्चति ॥ ८९ ॥

नवधेति । जगति यावान् नवात्मको नवाक्षरो मन्त्रस्तं सूते । सशार्ङ्ग-नवार्णगोपालमन्त्रादि । सेत्यन्तं पूर्वक्रियया उत्तरपद्यमुत्तरक्रियया सम्बध्यते । शक्ति-तत्त्वानामिति प्रकृतिर्नादो बिन्दुः बिन्दुर्नादो बीजं रौद्री ज्येष्ठा वामेति नवशक्तितत्त्वानि आद्ये । वक्ष्यमाणानि दश सदाशिवव्यतिरिक्तानि नवेत्यन्ये । पीठशक्तीनामिति तत्त-न्मन्त्रेष्वपि तत्र तत्र । शृङ्गारादीन् ।

शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।
बीभत्सरौद्रशान्ताश्च नव काव्ये रसाः स्मृताः ॥ इति ।

रत्नानि नव वर्गाश्च षष्ठे । प्राणदूतीनामिति त्रयोविंशे । मण्डलं नवनाभं तृतीये । यद्यदिति । नवकुण्डनवग्रहकूर्मचक्रनवकोष्ठादि ॥ ८७-८९ ॥

नवात्मक सृष्टि—जब वह देवी अपने को नव भागों में विभक्त करती है तब वह जगत् के जितने नवात्मक मन्त्र, नव शक्ति तत्त्व, नव पीठ शक्तियाँ, शृङ्गारादि नव रस, नव प्रकार के माणिक्य आदि रत्न, नव वर्ग आदि उत्पन्न करती है, इसी प्रकार नव प्राणदूती, नव मण्डल आदि जो भी (लोक में ९ कुण्ड, ९ ग्रह और ९ कोष्ठक के कूर्मादि चक सभी) नव संख्यक वस्तुयें हैं उन्हें यह देवी उत्पन्न करती है ॥ ८७-८९ ॥

दशधा विकृता शम्भोर्भामिनी भवदुःखहा ।
दशाक्षरं गणपतेस्त्वरिताया दशाक्षरम् ॥ ९० ॥
दशाक्षरं सरस्वत्या यक्षिण्याः सा दशाक्षरम् ।
वासुदेवात्मकं मन्त्रमश्वारूढादशाक्षरम् ॥ ९१ ॥
त्रिपुरादशकूटं सा त्रिपुराया दशाक्षरम् ।
नाम्ना पद्मावतीमन्त्रं रमामन्त्रं दशाक्षरम् ॥ ९२ ॥
दशकं शक्तितत्त्वानां तत्त्वरूपा महेश्वरी ।
नाडीनां दशकं विष्णोरवतारान् दश क्रमात् ।
दशकं लोकपालानां यद्यदन्यत् सृजत्यसौ ॥ ९३ ॥

गणपतेरिति । क्षिप्रप्रसादनस्य त्रयोदशे । त्वरिताया इति दशमे मायाहीनम् ।

तदुक्तम्— वर्म खे च तदन्त्यः शिवयुक् चरमोऽङ्गनाद्यु सार्विलवम् ।
अन्त्यः सयोनिरस्त्रान्तिकः सतारो मनुर्दशार्णयुतः ॥ इति ।

वर्मेति । वर्म हुं । खे स्वरूपम् । च स्वरूपम् । तदन्त्यः छः शिवयुगेकारयुतः छे । चरमः क्षः । अङ्गना स्त्रीँ । द्यु हकारः सार्विलवं उकारानुस्वारयुतं तेन हुं । अन्त्यः क्षः सयोनिरेयुतः क्षे । अस्त्रं फट् तदन्तः । सतारः प्रणवयुक् आद्यौ । इति त्वरितादशाक्षरोद्धारः । नारायणीयेऽपि—

भुवनेशो भूतदण्डी कलान्तान्त्यं सयोनिकम् ।
तत्पञ्चमं तदन्तं सरुद्रं सामन्तान्तालयम् ॥
वामाख्या दीर्घमाद्यञ्च कोपतत्त्वं हरान्तयुक् ।
एतत् फडन्तं तारादि मन्त्रं विद्यादशाक्षरम् ॥ इति ।

भुवनेति । भुवनेशो हः भूत उः दण्डोऽनुस्वारः तेन हुं । कलाः स्वराः तदन्तः कः तदन्त्यः खः सयोनिकम् एकारयुतं तेन खे । तत्पञ्चमं च तदन्तं छः । सरुद्रम् एकारयुतं तेन छे । सामन्तान्तः विसर्गान्तः । आलयं क्षकारः । वामाख्या स्त्रीँ । आद्यं हुं तद्दीर्घं हूं । कोपतत्त्वं क्षः । हरेण एकारेण अन्ते युक् क्षे । एतत् फडन्तं प्रणवादिकं दशवर्णम् ।

सरस्वत्या इति सप्तमे । यक्षिण्या इति तन्त्रान्तरोक्तं 'श्रीँ श्रीँ यक्षिणि हं हं हं

स्वाहा' इति । वासुदेवात्मकमिति गोपालं सप्तदशे । अश्वारुढेति बीजत्रयं मुक्त्वा दशमे । तन्त्रान्तरे दशाक्षर्या एव उद्धृतत्वात् । तदुक्तम्—

आद्यस्त्रयोदशो दण्डी ततस्त्वेकादशः परम् ।
अष्टमस्य तृतीयं स्यादाद्यतार्त्तीयसंयुतम् ॥
षष्ठाद्यं सप्तमस्यापि द्वितीयं षष्ठपञ्चमम् ।
आद्यैकादशसंयुक्तं पश्चात् सप्तम पञ्चमम् ॥
तत्तूर्येण युतं पश्चात् सप्तमस्य द्वितीयकम् ।
आद्यतार्त्तीयसंयुक्तं द्विठः प्रोक्ता दशाक्षरी ॥ इति ।

दशकूटमिति मध्यबीजस्य षट्कूटत्वमाद्यन्तबीजयोः क्रमेण कूटद्वयम् । कूटद्वयमिति मिलित्वा दशकूटं त्रिपुराया इति तन्त्रान्तरोक्तम् 'ऐं स्हैं स्हीं स्हौं त्रिपुरायै नमः' इति । पद्मावतीमन्त्रं तन्त्रान्तरोक्तं 'ॐ ह्रें पद्मे पद्मावति स्वाहा' इति । रमामन्त्रमष्टमे । राममन्त्रमितिपाठे पञ्चदशे । शक्तितत्त्वानामिति पञ्चमे । नाडीनामित्याद्ये । अवतारानिति सप्तदशे । लोकपालानामिति तूर्ये । अन्यदिति अग्निमन्त्रसंस्कार जयदुर्गामन्त्रादि ॥ ९०-९३ ॥

जब संसार के दुःखों को नष्ट करने वाली यह शम्भु पत्नी अपने को दश भागों में प्रविभक्त करती है तब गणपति के दशाक्षर मन्त्र, त्वरिता देवी के दशाक्षर मन्त्र, सरस्वती देवी के दशाक्षर मन्त्र, यक्षिणी के दशाक्षर मन्त्र, वासुदेव का दशाक्षर मन्त्र, अश्वारुढ़ा का दशाक्षरमन्त्र, त्रिपुरादशकूट, त्रिपुरा दशाक्षर, पद्मावती मन्त्र, दश अक्षर वाले रमा मन्त्र, दश शक्ति तत्त्व को प्रगट करती हैं । इसी प्रकार वह तत्त्वरूपा महेश्वरी दश नाडियाँ, विष्णु के क्रमशः दश अवतार, दश लोकपाल और ऐसे ही जो दश दश पदार्थ हैं उन्हें प्रगट करती हैं ॥ ९०-९३ ॥

एकादशक्रमात् संविद् गुणिता सा जगन्मयी ।
रुद्रैकादशनीमाद्यशक्तेरेकादशाक्षरम् ।
एकादशाक्षरं वाण्या रुद्रानेकादश क्रमात् ॥ ९४ ॥

रुद्रैकादशनीमिति ।

षडङ्गरुद्रैकावृत्ती रुद्राध्यायस्य तादृशः ।
एकादश तु रुद्रस्य रुद्रैकादशनी त्विति ॥

षडङ्गरुद्रस्तु—'यज्जाग्रतः षट्' सहस्रशीर्षा द्वाविंशतिः' ततः 'आशुःशिशानो' 'विभ्राट्' इत्यनुवाकद्वयम् शतम्। सहस्रशीर्षेति षोडशभिर्द्वितीयम्। षड्भिस्तृतीयम्। शतमिति । शतरुद्रीयेणास्त्रम् । शतरुद्रस्तु—

षट्षष्टिर्नीलसूक्तञ्च पुनः षोडशऋग्जपः ।
एष ते हे नमस्ते द्वे नतं विद्वयमेव च ॥
मीढुष्टमचतुष्कञ्च एतत्तु शतरुद्रीयम् । इति ।

आद्यशक्तेः सरस्वत्या एकादशाक्षरं सप्तमे । यद्वा आद्यशक्तेः नित्यक्लिन्नायास्तन्त्रान्तरोक्तम् । 'ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा' इति । आद्या इति पाठे

देवीविशेषणम् । वाण्या अयमपि सप्तमे । रुद्रानिति—

हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः ।
वृषाकपिश्च शम्भुश्च कपर्दी रैवतस्तथा ॥
मृगव्याधश्च शर्वश्च कापालीति शिवा मताः । इति ।

अत्राप्यन्यदिति ज्ञेयम् । तच्च शक्तिविनायकमन्त्रादि ॥ ९४ ॥

पुनः वह जगन्मयी, ज्ञान शक्तिस्वरूपा, जगन्माता जब अपने को एकादश भागों में विभक्त करती हैं तब रुद्रैकादशनी, आद्याशक्ति (सरस्वती) के एकादशाक्षर मन्त्र, वाणी के एकादशाक्षर और एकादश रुद्रों को क्रमशः उत्पन्न करती हैं ॥ ९४ ॥

विमर्श—अन्य तन्त्र में नित्यक्लिन्ना आद्या शक्ति हैं । उनका ११ अक्षर का मन्त्र है—'ह्रीँ नित्यक्लिन्ने मदद्रवे स्वाहा' ॥

समुद्गिरति सर्वात्मा गुणिता द्वादशक्रमात् ।
नित्यामन्त्रं महेशान्या वासुदेवात्मकं मनुम् ॥ ९५ ॥
राशीन् भानून् हरेर्मूर्त्तीर्यन्त्रं सा द्वादशात्मकम् ।
अन्यदेतादृशं सर्वं यत् तदस्यामजायत ॥ ९६ ॥

समुद्गिरतीति क्रिया काकाक्षिगोलकन्यायेन पूर्वोत्तरवाक्ययोः सम्बध्यते। अन्त्याद्यो निर्बन्धनात् सर्वोत्तरवाक्ये अन्यदित्यन्तं सम्बध्यते । इत उत्तरं भिन्नमेव वाक्यम् । नित्यामन्त्रं महेशान्या वज्रप्रस्तारिण्याश्च दशमे । वासुदेवं पञ्चदशे । राशीनष्टमे । भानून् हरेर्मूर्त्तीश्च पञ्चदशे । यन्त्रं नवमे ।

अन्यदिति खड्गमन्त्रादि । एतादृशमित्यनेनैतदुक्तं भवति । त्रयोदशधागुणिता वागीश्वर्यश्वारूढामन्त्रं विश्वेदेवादिकम् । चतुर्दशधा लक्ष्मीवासुदेवगोपालमन्त्र-भुवनादिकम् । पञ्चदशधा नित्याशूलिनीमन्त्रतिथ्यादिकम् । षोडशधा चक्रमन्त्रस्वर-कलादिकम् । सप्तदशधा लघुपञ्चमीतारादिविद्यामन्त्रादिकम् । अष्टादशधा कृष्णव-ामनमन्त्रमग्निसंस्कारादिकम् । ऊनविंशतिधा कृष्णधरामन्त्रादिकम् । विंशतिधा हल-धरोमामहेस्वरमन्त्रादिकम् । एकविंशतिधा वटुकनाममन्त्रतद्यन्त्रादिकम् । द्वाविंशतिधा कृष्णात्राधिपतिसुमुखीमन्त्रादिकम् । त्रयोविंशतिधा लघुश्यामा पुरुषोत्तमहृदङ्ग-मन्त्रादिकं सूत इति ॥ ९५-९६ ॥

वही सर्वात्मा भगवती अपने द्वादशात्मक रूप से क्रमशः महेशानी के नित्या मन्त्र, वासुदेवात्मक मन्त्र, द्वादश राशियाँ, द्वादश सूर्य, द्वादश विष्णु की मूर्त्ति और द्वादशात्मक मन्त्र, इसी प्रकार अन्य जितने जितने भी द्वादश पदार्थ हैं उन सभी को उत्पन्न करती हैं ॥ ९५-९६ ॥

चतुर्विंशतितत्त्वा सा यदा भवति शोभना ।
गायत्रीं सवितुः शम्भोः गायत्रीं मदनात्मिकाम् ॥ ९७ ॥

गायत्रीं विष्णुगायत्रीं गायत्रीं त्रिपदात्मनः।
गायत्रीं दक्षिणामूर्त्तेर्गायत्रीं शम्भुयोषितः॥ ९८ ॥
चतुर्विंशतितत्त्वानि तस्यामासन् परात्मनि ॥ ९९ ॥

यद्यपि त्रयोदशविश्वेदेवात्मिका चतुर्दशभुवनात्मिका पञ्चदशतिथ्यात्मिकापि सृष्टेर्भगवत्युत्पादितैव तथापि परार्द्धपर्यन्तं तस्याः सत्त्वात् वह्वीनां वक्तुमशक्यत्त्वात् प्रधानभूता आह चतुरिति । चतुर्विंशतिस्तत्त्वस्वरूपं तद्रूप आत्मा यस्याः सा चतुर्विंशतिधा गुणितेत्यर्थः । सवितुरित्येकविंशे । शम्भोरिति तन्त्रान्तरोक्ता । तत् 'महेशाय विद्महे वाग्विशुद्धाय धीमहि । तन्नः शिवः प्रचोदयात्' इति । मदनात्मिका सप्तदशे ॥ ९७ ॥

विष्णुगायत्री अपि सप्तदशे । पुरुषोत्तमगायत्री च विष्णुगायत्रीशब्देनोक्ता तन्त्रान्तरोक्ता वा ।

'नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात्' इति ।

त्रिपदात्मनस्त्रिपुरायाः सा द्वादशे । दक्षिणामूर्त्तेरिति । 'दक्षिणामूर्त्तये विद्महे ध्यानस्थाय धीमहि । तन्नो घोरः प्रचोदयात्' इति । शम्भुयोषित इति । 'सर्वमोहिन्यै विद्महे विश्वजनन्यै धीमहि । तन्नः क्लिन्ने प्रचोदयात्' इति । तत्त्वानि आद्ये । एता गायत्र्यस्तत्त्वान्यप्यस्यामासन्नुत्पन्नानि । अत्राप्यन्यदिति ज्ञेयम् । तच्चाग्निसमृद्धाग्नि-दक्षिणामूर्त्तिचिटिमन्त्रवक्रतुण्डदुर्गात्वरिताग्निनृसिंहगरुडहयग्रीवगायत्र्यादि ॥ ९७-९९ ॥

जब वह मङ्गलकारिणी चतुर्विंशति तत्त्व स्वरूपा होती हैं, तब वह सविता देवता की चतुर्विंशत्यक्षरा गायत्री, शिव की मदनात्मिका गायत्री, विष्णु की विष्णुगायत्री (पुरुषोत्तम गायत्री), त्रिपुरा देवी की त्रिपुरागायत्री, गुरुरूप दक्षिणामूर्त्ति की दक्षिणामूर्त्तिगायत्री, शम्भु योषिता अम्बा की गायत्री और अन्य चतुर्विंशति तत्त्वों को उत्पन्न करती हैं ॥ ९७-९९ ॥

द्वात्रिंशद्भेदगुणिता सर्वमन्त्रमयी विभुः।
सूते मृत्युञ्जयं मन्त्रं नारसिंहं महामनुम् ॥ १०० ॥
लवणाख्यं मनुं मन्त्रं वरुणस्य महात्मनः।
हयग्रीवं मनुं दौर्गं वाराहं वह्निनायकम् ॥ १०१ ॥
गणेशितुर्महामन्त्रं मन्त्रमन्त्राधिपस्य सा ।
मन्त्रं श्रीदक्षिणामूर्त्तेर्मालामन्त्रं मनोभुवः॥ १०२ ॥
त्रिष्टुभं वनवासिन्या अघोराख्यं महामनुम्।
भद्रकालीमनुं लक्ष्म्या मालामन्त्रं यमात्मकम् ॥ १०३ ॥
मन्त्रं सा देवकीसूनोर्मन्त्रं श्रीपुरुषोत्तमम्।
श्रीगोपालमनुं भूमेर्मनुं तारामनुं क्रमात् ॥ १०४ ॥
महामन्त्रं महालक्ष्म्या मन्त्रं भूतेश्वरस्य सा ।

क्षेत्रपालात्मकं मन्त्रं मन्त्रमापन्निवारणम्।
सूते मातङ्गिनीं विद्यां सिद्धविद्यां शुभोदयाम्॥ १०५ ॥

मृत्युञ्जयं वैदिकं त्रयोविंशे । नारसिंहं षोडशे । महामनुं मन्त्रराजमिति पूर्वविशेषणम् । लवणाख्यं द्वाविंशे । वरुणस्येति श्रुत्युक्तम् । महात्मन इति विशेषणम्, तेन महावारुणमित्यर्थः । हयग्रीवं पञ्चदशे । दौर्गं श्रुत्युक्तम् । 'अम्बिके अम्बालिके' इत्यादिकम् । वाराहं पञ्चदशे । वह्निनायकम् अग्न्युपस्थानमन्त्रं पञ्चमे । गणेशितुर्हरिद्रागणेशस्य 'ॐ हुं गं ग्लौं हरिद्रागणपतये वरवरद सर्वजनहृदयं स्तम्भय स्तम्भय स्वाहा' । आथर्वणिको वक्रतुण्डस्य वा—

रायस्पोषप्रदाता च निधिदो रत्नदो मतः ।
रक्षोहणो वलाहनो वक्रतुण्डाय हूं नमः ॥

महामन्त्रमित्युक्तेः अत्रैव वक्ष्यमाणो महागणपतिमन्त्रो वा । सम्प्रदायेन तस्य द्वात्रिंशदक्षरत्वात् । अन्नाधिपस्य तन्त्रान्तरोक्तः 'ॐ ह्रीँ अन्नरूप रसचतुष्टयरूप नमो नमः अन्नाधिपतये ममान्नं प्रयच्छ स्वाहा' इति दक्षिणामूर्तेरेकोनविंशे । मालामन्त्रं द्वात्रिंशदक्षरं मनोभुवस्तन्त्रान्तरोक्तम् । त्रिष्टुभमिति तदन्तर्गतोक्तोपचारात् द्वात्रिंशदक्षर उच्यते। तदन्तर्द्वासप्ततिमन्त्राणामुद्धृतत्वात् । तन्मध्ये द्वात्रिंशदक्षराणामपि सत्त्वात् । अघोराख्यं तन्त्रान्तरोक्तम् । ग्रन्थकारोक्तस्यैकपञ्चाशदक्षरत्वात् । यदाह—

नकारस्ततो दन्तसम्भिन्नकालं भगस्यान्ततो वाथ ते तस्य चान्ते ।
ततोऽघोररूपा यकारस्य चान्ते हनद्वन्द्वतोऽथो दहद्वन्द्वतश्च ॥
पचाभ्यासमुक्त्वा तथा भ्रामय स्यात् शिरोऽन्तश्च वर्मादिकं फट्पदश्च ।

इति ।

नकारेति । 'नमो भगवते अघोररूपाय हन हन दह दह पच पच भ्रामय भ्रामय हुं फट् स्वाहा' । चतुस्त्रिंशदर्णोऽघोरमन्त्रः अघोरानुष्टुप् अघोरामुनाद्याः (६, ६, ८, १०, २, २=३४) षडङ्गम् । भद्रकालीमनुं चतुर्विंशे । महालक्ष्म्या दशमे । सर्वतोभद्ररूपं यमात्मकमिति मन्त्रद्वयं चतुर्विंशे । देवकीसूनोरिति सुकीर्त्यादिकं सप्तदशे । श्रीपुरुषोत्तममन्त्रं तन्त्रान्तरोक्तम्—'ॐ नमो भगवते वासुदेवाय पुरुषोत्तम आयुर्मे देहि विष्णवे प्रभविष्णवे नमः' । श्रीगोपालमनुं यन्त्राङ्गद्वयमपि सप्तदशे । भूमेर्मनुम्—

उद्धृताऽसि वराहेण कृष्णेन शतबाहुना ।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ॥

इति तन्त्रान्तरोक्तम् । तारामनुं तन्त्रान्तरोक्तम्—'ॐ ह्रीँ हौं हूं नमस्तारायै महातारायै सकलदुस्तरांस्तारय तारय तर तर स्वाहा' इति । महालक्ष्म्या महामन्त्रं श्रीसूक्तलक्षणम् । भूतेश्वरस्य मन्त्रं तन्त्रान्तरोक्तम्—'ॐ नमो भगवते रुद्राय सर्वभूताधिपतये भूतप्रेतपिशाचिनीर्नाशय नाशय' इति । क्षेत्रपालात्मकं तन्त्रान्तरोक्तम् —'एह्येहि विदुषि विमुखि नर्त्तय नर्त्तय विघ्नमहाभैरव क्षेत्रपाल इमं बलिं गृह्ण गृह्ण स्वाहा' इति । आपन्निवारणं तन्त्रान्तरोक्तम् । अत्र एकविंशत्यक्षरस्य वक्ष्यमाणत्वात्। मातङ्गिनीं तन्त्रान्तरोक्तम्—'ॐ ह्रीँ ऐं श्रीँ नमो भगवति उच्छिष्टचाण्डालि

श्रीमातङ्गेश्वरि सर्वजनवशङ्करि स्वाहा' इति । सिद्धविद्यां तन्त्रान्तरोक्ताम् । पूर्वोक्ताया एव सिद्धेत्यादि विशेषणद्वयं वा । अन्यदित्यपि ज्ञेयम् । तच्च वैष्णवतत्त्वशैवव्यापक-मन्त्रादि ॥ १००-१०५ ॥

जब संपूर्ण मन्त्रमयी वह बत्तीस भेदों में अपना स्वरूप धारण करती हैं, तो मृत्युञ्जय मन्त्र, नारसिंह महामन्त्र, महात्मा महावरुण के लवण नामक महामन्त्र हयग्रीव मन्त्र, दुर्गा मन्त्र, वाराह मन्त्र, अग्नि के उपस्थान मन्त्र, महागणपति मन्त्र, अन्नाधिप का मन्त्र, दक्षिणामूर्त्ति मन्त्र, मालामन्त्र, मनोभुव का मन्त्र, वनवासिनी का त्रिष्टुप् मन्त्र, अघोर नामक महामन्त्र, भद्रकाली मन्त्र, लक्ष्मी के दो दो (=यमात्मक = ४) माला मन्त्र, श्रीकृष्ण का मन्त्र, श्रीपुरुषोत्तम का मन्त्र, श्रीगोपालमन्त्र, भूमि मन्त्र, तारा मन्त्र, महालक्ष्मी का महामन्त्र, भूतेश्वर का मन्त्र, क्षेत्रपालात्मक मन्त्र, त्रिपुरा का आपन्निवारण मन्त्र, मातङ्गिनी विद्या, कल्याणकारिणी सिद्धविद्या आदि इसी प्रकार के मन्त्रों को उत्पन्न करती हैं ॥ १००-१०५ ॥

कुण्डलीतः शैवतत्त्वोत्पत्तिः

अनेन क्रमयोगेन गुणिता शिववल्लभा ।
षट्त्रिंशतश्च तत्त्वानां शैवानां रचयत्यसौ ॥ १०६ ॥

अनेनेति । अनेन क्रमयोगेन गुणिता षट्त्रिंशद्वारगुणिता इत्यर्थः । शैवानामिति पञ्चमे ॥ १०६ ॥

मन्त्रोत्पत्तौ क्रमः

अन्यान् मन्त्रांश्च यन्त्राणि शुभदानि प्रसूयते ।
द्विचत्वारिंशता मूले गुणिता विश्वनायिका ॥ १०७ ॥

अन्यान्मन्त्रानिति । तन्त्रान्तरोक्तोच्छिष्टगणपति पुरुषोत्तमव्यापक मन्त्रादीन् । पूर्वो यथा—'ॐ नमो भगवते एकदंष्ट्राय हस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने क्रों ह्रुं ह्रीं ह्रूं घे घे स्वाहा' इति । तृतीयं सप्तदशे । यन्त्राणीति यन्त्रपटल-प्रोक्तकोष्टात्मकयन्त्राष्टमपटलप्रोक्तमहालक्ष्मीयन्त्रादीनि । अनेन क्रमयोगेनेति सामा-न्योक्तेर्मन्त्रान् यन्त्राणीति च तथोक्तेरष्टत्रिंशता गुणिता अष्टत्रिंशत्कला मन्त्रास्तद्-बीजादि । (वन) नवदुर्गापुरुषोत्तमनेत्राङ्गमन्त्रादीन् यन्त्राणि वृद्धश्यामा वराहनृसिंह-यन्त्रादीनि सूते इति सूचितम् ॥

द्विचत्वारिंशतेति । मूले मूलाधारे द्विचत्वारिंशता गुणिता विश्वनायिका कुण्डलिनी अनेन क्रमेण अकारादिसकारान्तां द्विचत्वारिंशदात्मिकां भूतलिपि-मन्त्रात्मिकां वर्णमालिकां सृजतीति सम्बन्धः ॥ १०७ ॥

इसी क्रम से वह शिव वल्लभा ३६ स्वरूप में प्रगट हो कर शिव सम्बन्धी ३६ तत्त्वों को उत्पन्न करती हैं एवं शुभदायक ३६ मन्त्रों को तथा मन्त्रों का निर्माण करती हैं ॥ १०६-१०७ ॥

कुण्डलीतः शक्त्याद्युत्पत्तिः

सा प्रसूते कुण्डलिनी शब्दब्रह्ममयी विभुः ।
शक्तिं ततो ध्वनिस्तस्मान्नादस्तस्मान्निरोधिका ॥ १०८ ॥

परादिवागुत्पत्तिः

ततोऽर्धेन्दुस्ततो बिन्दुस्तस्मादासीत् परा ततः ।
पश्यन्ती मध्यमा वाचि वैखरी शब्दजन्मभूः ।
इच्छाज्ञानक्रियात्माऽसौ तेजोरूपा गुणात्मिका ॥ १०९ ॥
क्रमेणानेन सृजति कुण्डली वर्णमालिकाम् ।
अकारादिसकारान्तां द्विचत्वारिंशदात्मिकाम् ॥ ११० ॥
पञ्चाशद्वारगुणिता पञ्चाशद्वर्णमालिकाम् ।
सूते तद्वर्णतोऽभिन्ना कला रुद्रादिकान् क्रमात् ॥ १११ ॥

तमेव क्रममाह शक्तिमिति । सा कुण्डलिनी शक्तिं प्रसूते । (शक्तिर्नाम मूलकारणस्य शब्दस्योन्मुखीकरणावस्थेति गूढार्थदीपिकाकारः)। ततः शक्तेर्ध्वनिः । ततः तस्माद् ध्वनेरित्यादि ज्ञेयम् । अयञ्च क्रमो ग्रन्थकृता सर्वशेषे उक्तोऽपि एकाद्यक्षरोत्पत्तावप्यनुसन्धेयः । तत्र सत्त्वप्रविष्टा चिच्छक्तिवाच्या परमाकाशावस्था, सैव सत्त्वप्रविष्टा रजोऽनुविद्धा सती ध्वनिशब्दवाच्या अक्षरावस्था, सैव तमोऽनुविद्धा नाद शब्दवाच्या अव्यक्तावस्था, सैव तमःप्राचुर्यान्निरोधिकाशब्दवाच्या, सैव सत्त्वप्राचुर्यादर्द्धेन्दु शब्दवाच्या तदुभयसंयोगाद् बिन्दुशब्दवाच्या । यदाहुः—

इच्छाशक्तिबलोत्कृष्टो ज्ञानशक्तिप्रदीपकः ।
पुंरूपिणी च सा शक्तिः क्रियाख्यां सृजति प्रभुः ॥ इति ।

असावेव बिन्दुः स्थानान्तरगतः पराद्याख्यो भवति । तस्मादिति बिन्दोः । परा मूले, पश्यन्ती स्वाधिष्ठाने, मध्यमा हृदये, वैखरी मुखे । तदुक्तम्—

सूक्ष्मा कुण्डलिनीमध्ये ज्योतिर्मात्रात्मरूपिणी ।
अश्रोत्रविषया तस्मादुद्गच्छत्यूर्द्धगामिनी ॥
स्वयंप्रकाशा पश्यन्ती सुषुम्णामाश्रिता भवेत् ।
सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी ॥
ततः संजल्पमात्रा स्यादविभक्तोर्द्धगामिनी ।
सैवोरः कण्ठतालुस्था शिरोघ्राणरदस्थिता ॥
जिह्वामूलौष्ठनिस्यूतसर्ववर्णपरिग्रहा ।
शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी ॥ इति ।

कादिमतेऽपि— स्वात्मेच्छाशक्तिघातेन प्राणवायुस्वरूपतः ।
मूलाधारे समुत्पन्नः पराख्यो नाद उत्तमः ॥
स एवोर्द्धं तया नीतः स्वाधिष्ठाने विजृम्भितः ।
पश्यन्त्याख्यामवाप्नोति तयैवोर्द्धं शनैः शनैः ॥

अनाहते बुद्धितत्त्वसमेतो मध्यमाभिधः ।
तथा तयोर्द्ध्वं नुन्नः सन् विशुद्धौ कण्ठदेशतः ॥
वैखर्याख्यस्ततः कण्ठशीर्षताल्वोष्ठदन्तगः ।
जिह्वामूलाग्रपृष्ठस्थस्तथा नासाग्रतः क्रमात् ॥
कण्ठताल्वोष्ठकण्ठौष्ठाद्दन्तौष्ठद्वयतस्तथा ।
समुत्पन्नान्यक्षराणि क्रमादादिक्षकावधि ॥
आदिक्षान्तरतेत्येषामक्षरत्वमुदीरितम् ॥ इति ।

तथाच श्रुतिः—

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥
इति ।

अथ वा चिच्छक्तिरेव पराख्या चैतन्याभासविशिष्टतया प्रकाशिका माया निष्पन्दा परा वागित्यर्थः । सस्पन्दावस्थाः पश्यन्त्याद्याः । तत्र सामान्यप्रस्पन्दप्रकाशरूपिणीं बिन्दुतत्त्वात्मिकां मूलाधारादिनाभ्यन्तरव्यक्तिस्थानां पश्यन्तीमाह पश्यन्तीति । ज्ञानात्मकत्वात् पश्यन्तीत्यर्थः । बाह्यान्तःकरणात्मिकां हिरण्यगर्भरूपिणीं नादबिन्दुमयीं नाभ्यादिहृदयान्ताभिव्यक्तिस्थानां विशेषसङ्कल्पादिसतत्त्वां मध्यमामाह मध्यमेति । मध्ये मा बुद्धिर्यस्या इति विग्रहः । विराड्रूपिणीं बीजात्मिकां हृदयाद्यास्यान्ताभिव्यक्तिस्थानां शब्दसामान्यात्मिकां वैखरीमाह वाचीति । विशेषेण खरत्वात् वैखरीत्यर्थः । तद्वर्णत इति । ते च ते वर्णाश्च तः अभिन्ना याः कलाः ताः सूते । रुद्रादिकान् सूते । आदिशब्देन तच्छक्तयः विष्णवः विष्णुशक्तयः पञ्चाशदोषधयश्च पञ्चाशत् कामाः तच्छक्तयश्च पञ्चाशद्गणेशास्तच्छक्तयः पञ्चाशत् क्षेत्रपालास्तच्छक्तयश्च । अत्र पञ्चाशदोषधयो यथा—

चन्दनकुचन्दनागुरुकर्पूरोशीररोगजलघुसृणाः ।
कक्कोलजातीमांसीमुरचोरग्रन्थिरोचनापत्राः ॥
पिप्पलबिल्वगुहारुणतृणकलवङ्गाह्वकुम्भिवन्दिन्यः ।
सौदुम्बरी काश्मरिका स्थिराब्जदरपुष्पिकामयूरशिखाः ॥
प्लक्षाग्निमन्थसिंही कुशाह्वदर्भाश्च कृष्णदरपुष्पी ।
रोहिणलुण्डु कबृहती पाटलिचित्रा तुलस्यपामार्गाः ॥
शतमखलता द्विरेफा विष्णुक्रान्तामुसल्यथाञ्जलिनी ।
दूर्वाश्रीदेविसहे तथैव लक्ष्मीसदाभद्रे ॥
आदीनामिति कथिता वर्णानां क्रमवशादथौषधयः ।
गुलिकाकषायभसितप्रभेदतो निखिलसिद्धिदायिन्यः ॥ इति ।

आसामोषधीनां प्रयोजनान्तरमप्युक्तं कादिमते—

यो यो मन्त्रस्तस्य तस्य वर्णौषधिविनिर्मिताः ।
तत्तद्वर्णोत्थसंख्याभिर्गुलिका मन्त्रसिद्धिदा ॥
तयाभिषेकस्तद्धारणं तत्स्वादस्तद्विलेपनम् ।
तत्पूजा च तथा सिद्धिलाभाय स्यान्न चान्यथा ॥ इति ।

पञ्चाशत् कामास्तच्छक्तयश्च यथा—

कामकामदकान्ताश्च कान्तिमान् कामगस्तथा ।
कामाचारश्च कामी च कामुकः कामवर्द्धनः ॥
रामो रमश्च रमणो रतिनाथो रतिप्रियः ।
रात्रिनाथो रमाकान्तो रममाणो निशाचरः ॥
नन्दको नन्दनश्चैव नन्दी नन्दयिता पुनः ।
पञ्चबाणो रतिसखः पुष्पधन्वा महाधनुः ॥
भ्रामणो भ्रमणश्चैव भ्रममाणो भ्रमोऽपरः ।
भ्रान्तश्च भ्रामकश्चैव भ्रान्ताचारो भ्रमावहः ॥
मोहको मोहनो मोहो मोहवर्द्धन एव च ।
मदनो मन्मथश्चैव मातङ्गो भृङ्गनायकः ॥
गायनो गीतिजश्चैव नर्त्तकः खेलकस्तथा ।
उन्मत्तो मत्तकश्चैव विलासो लोभवर्द्धनः ॥
दाडिमीकुसुमाभाश्च वामाङ्के शक्तिसंयुताः ।
सौम्या रक्ताम्बराः सर्वे पुष्पबाणेक्षुकार्मुके ॥
बिभ्राणाः सर्वभूषाढ्याः कामाः पञ्चाशदीरिताः ।
रतिः प्रीतिः कामिनी च मोहिनी कमलप्रिया ॥
विलासिनी कल्पलता (का) श्यामला च शुचिस्मिता ।
विस्मिताक्षी विशालाक्षी लेलिहाना दिगम्बरा ॥
वामा कुब्जा धरा नित्या कल्याणी मोहिनी तथा ।
मदना च सुरश्रेष्ठा लापिनी मर्दिनी तथा ॥
कलहप्रिया चैकाक्षी सुमुखी नलिनी तथा ।
जपिनी पालिनी चैव शिवा मुग्धा रसा भ्रमा ॥
चारुलोला चञ्चला च दीर्घजिह्वा रतिप्रिया ।
लोलाक्षी भृङ्गिणी चैव पाटला मादनी तथा ॥
माला च हंसिनी विश्वतोमुखी नन्दिनी तथा ।
रमणी च तथा कान्तिः कलकण्ठी वृकोदरी ॥
मेघश्यामा मदोन्मत्ता एताः पञ्चाशदीरिताः ।
शक्तयः कुङ्कुमनिभाः सर्वाभरणभूषिताः ।
नीलोत्पलकरा ध्येयास्त्रैलोक्याकर्षणक्षमाः ॥ इति ।

पञ्चाशद्गणेशास्तच्छक्तयश्च यथा—

विघ्नेशो विघ्नराजश्च विनायकशिवोत्तमौ ।
विघ्नकृद् विघ्नहर्त्ता च गणैकद्विसुदन्तकाः ॥
गजवक्त्रनिरञ्जनौ कपर्दी दीर्घजिह्वकः ।
शङ्कुकर्णश्च वृषभध्वजश्च गणनायकः ॥
गजेन्द्रः सूर्पकर्णश्च स्यात् त्रिलोचनसंज्ञकः ।
लम्बोदरमहानन्दौ चतुर्मूर्त्तिः सदाशिवः ॥
आमोददुर्मुखौ चैव सुमुखश्च प्रमोदकः ।

एकरदो द्विजिह्वश्च शूरवीरसषण्मुखाः ॥
वरदो वामदेवश्च वक्रतुण्डो द्विरण्डकः ।
सेनानीर्ग्रामणीर्मत्तो विमत्तो मत्तवाहनः ॥
जटी मुण्डी तथा खड्गी वरेण्यो वृषकेतनः ।
भक्षप्रियो गणेशश्च मेघनादकसंज्ञकः ॥
व्यापी गणेश्वरः प्रोक्ताः पञ्चाशद् गणपा इमे ।
(ध्यानम्) तरुणारुणसङ्काशा गजवक्त्रास्त्रिलोचनाः ॥
पाशाङ्कुशवराभीतिहस्ताः शक्तिसमन्विताः ।
(५० शक्तयः) श्रीर्ह्रीश्च पुष्टिशान्ती च स्वस्तिश्चैव सरस्वती ॥
स्वाहामेधाकान्तिकामिन्यो मोहिन्यपि वै नटी ।
पार्वती ज्वालिनी नन्दा सुपाशा कामरूपिणी ॥
उमा तेजोवती सत्या विघ्नेशा विघ्नरूपिणी ।
कामदा मदजिह्वा च भूतिः स्याद्भौतिका सिता ॥
रमा च महिषी प्रोक्ता भञ्जिनी च विकर्णपा ।
भ्रूकुटिः स्यात्तथा लज्जा दीर्घघोणा धनुर्धरा ॥
यामिनी रात्रिसंज्ञा च कामान्धा च शशिप्रभा ।
लोलाक्षी चञ्चला दीप्तिः सुभगा दुर्भगा शिवा ॥
भर्गा च भगिनी चैव भोगिनी सुभगा मता ।
कालरात्रिः कालिका च पञ्चाशच्छक्तयः स्मृताः ॥
सर्वालङ्करणोद्दीप्ताः प्रियाङ्कस्थाः सुलोचनाः ।
रक्तोत्पलकरा ध्येया रक्तमाल्याम्बरारुणाः ॥ इति ।

पञ्चाशत् क्षेत्रपालाः क्षेत्रपालमन्त्रे वक्ष्यन्ते ॥ १०८-१११ ॥

वही विश्वनायिका शब्द ब्रह्ममयी सर्वव्यापिका कुण्डलिनी शक्ति जब मूल से ४२ गुना रूप धारण करती हैं तो प्रथम शक्ति, शक्ति से ध्वनि, ध्वनि से नाद, नाद से निरोधिका को उत्पन्न करती हैं ॥ १०८ ॥

निरोधिका से अर्द्धेन्दु, पुनः दो अर्द्धेन्दु से बिन्दु, बिन्दु से परा, उससे पश्यन्ती, तदनन्तर मध्यमा, फिर वैखरी उत्पन्न होती हैं, यही वाणियों की उत्पत्ति के स्थान हैं ॥ १०९ ॥

इच्छारूपा ज्ञानरूपा, क्रियारूपा और तेजोरूपा त्रिगुणा, वही कुण्डलिनी इसी क्रम से अकारादि सकारान्त ४२ बयालीस अक्षरों की सृष्टि करती हैं ॥ ११० ॥

जब वह पचास रूप में स्थित होती हैं, तब पच्चास वर्णों की तथा उन वर्णों से अभिन्न रुद्र कलाओं की क्रमशः सृष्टि करती हैं ॥ १११ ॥

निरोधिकार्द्धेन्दुबिन्दूनामर्काग्नीन्दुरूपत्वम्

निरोधिका भवेद्वह्निरर्द्धेन्दुः स्यान्निशाकरः ।
अर्कः स्यादुभयोर्योगे बिन्द्वात्मा तेजसां निधिः ॥ ११२ ॥

वर्णानां सोमसूर्याग्निरूपत्वम्

जाता वर्णा यतो बिन्दोः शिवशक्तिमयादतः ।
अग्नीषोमात्मकास्ते स्युः शिवशक्तिमयाद्रवेः ।
येन सम्भवमापन्नाः सोमसूर्याग्निरूपिणः ॥ ११३ ॥

॥ इति श्रीलक्ष्मणदेशिकेन्द्रविरचिते शारदातिलके
प्रथमः पटलः समाप्तः ॥ १ ॥

वर्णानामग्नीषोमात्मकत्वं सोमसूर्याग्निरूपत्वञ्च अग्रे उपयोगीति तद्विविक्ष्याह निरोधिकेति । निरोधिकाया अग्निरूपत्वात् शिवस्वरूपत्वम् । अर्द्धेन्दोः सोमरूपत्वात् शक्तिस्वरूपत्वम् । येन कारणेन शिवशक्तिमयाद्रवेः सम्भवमापन्नाः । रवेः शिवशक्तिमयत्वम् । अर्कः स्यादुभयोर्योगे इत्युक्तेः । तेन सोमसूर्याग्निरूपिणो भवन्ति । कार्यकारणयोरभेदात् ॥ ११२-११३ ॥

॥ इति श्रीराघवभट्टविरचित-शारदातिलकटीकायां सत्सम्प्रदायकृतव्याख्यायां पदार्थादर्शाभिख्यायां प्रथमः पटलः ॥ १ ॥

निरोधिका अग्नि स्वरूपा है, इसलिये शिवात्मक है । बिन्दु चन्द्र स्वरूप है, इसलिये शक्त्यात्मक है । शिव शक्ति के योग में वही बिन्द्वात्मा, तेजो निधान सूर्य स्वरूप हो जाता है । यतः शिव शक्तिमय बिन्दु से वर्णों की उत्पत्ति होती है, अतः वे सभी अग्नीषोमात्मक हैं और शिव शक्ति का योग पूर्व में सूर्य स्वरूप कहा गया है इसलिये सभी वर्ण सोम, सूर्य और अग्निस्वरूप हैं ॥ ११२-११३॥

॥ इस प्रकार शारदातिलक के प्रथम पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ १ ॥

अथ पञ्चविंशः पटलः

अथ योगप्रकरणम्

अथ योगं प्रवक्ष्यामि साङ्गं संवित्प्रदायकम् ।
ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः ॥ १ ॥

लैङ्गीक्रियामन्त्रवतीस्ववेध ज्ञानाह्वयाः पञ्च भवन्ति दीक्षाः ।
चतुर्विधास्ताः समयाभिधान सामान्यनिर्वाणविशेषदीक्षाः ॥

एवं दीक्षासु सर्वासु गुरुः शिष्यं प्रबोधयेत् ।
बोधितोऽबोधितश्चेत् स्यान्नाऽन्यथा दीक्षितो भवेत् ॥

इत्युक्तेः योगं विना दीक्षाया अनिर्वाहात् सूर्यमन्त्रादौ च प्रयोगविषये अनेके योगप्रकारा उक्ताः । तेषां च ज्ञानाय योगं वक्तुं प्रतिजानीते अथेति । साङ्गं यम-नियमादियुक्तम् । संवित्प्रदायकं नित्यानन्दानुभवरूपमोक्षदायकमित्यर्थः । एतेन आत्मविशेषगुणोच्छेदो मोक्ष एतन्मतम् निरस्तम् । सुखाभावस्य पुरुषार्थत्वाभावात् ।

वेदान्तपक्षमाश्रित्याह ऐक्यमिति । तच्च 'तत्त्वमसि' इत्यादि श्रुतिसिद्धम् ।

यत् प्रयोगसारे— निष्कलस्याऽप्रमेयस्य देवस्य परमात्मनः ।
सन्धानं योगमित्याहुः संसारोच्छित्तिसाधनम् ॥ इति ॥ १ ॥

अब ग्रन्थकार योग का प्रतिपादन करने के लिये इस पटल में योग का वर्णन करते हैं—अब नित्यानन्दानुभव रूप मोक्ष को देने वाले साङ्ग योग का वर्णन करता हूँ । योगशास्त्र के विशारद विद्वज्जन जीव और आत्मा के एक हो जाने का नाम योग है, ऐसा मानते हैं ॥ १ ॥

शिवात्मनोरभेदेन प्रतिपत्तिः परे विदुः ।
शिवशक्त्यात्मकं ज्ञानं जगुरागमवेदिनः ॥ २ ॥

शिवप्रोक्तसूत्रमतप्रवृत्तप्रत्यभिज्ञादिग्रन्थमतमाह—शिवेति । प्रतिपत्तिर्ज्ञानम् । परे शैवाः । तदुक्तं शिवसूत्रवृत्तौ—

धीः स्वात्त्विकी विमर्शेन जायते नियतात्मनः ।
चंक्रमन्ती शिवं प्राप्य लीयते चेन्द्रियैः सह ॥ इति ।

त्रिकभेदेऽपि— सत्त्वस्थश्च तमःस्थो गुणभेदकः ।
एवं पर्यटते देही स्थानात् स्थानान्तरं व्रजन् ॥

तन्मात्रोदयरूपेण मनोऽहंबुद्धिवर्त्मना ।
पूर्यष्टकेन संरुद्धो दुःखं तत्प्रत्ययोद्भवम् ॥
भुङ्क्ते परवशो भोगं तत्रस्थं संहरेच्छिवः ॥ इति ।

स्वच्छन्दभैरवेऽपि—अणुमात्रं शिवानन्दस्फुरणं सर्वदोषहृत् ।
मलत्रयविनाशाच्च माया गच्छेत् समूलतः ॥ इति ।

आनन्दभैरवेऽपि—प्राणादिभावनं त्यक्त्वा तथा तद्दृश्यसम्पदः ।
स्वात्मभावेन चित्तेन विशेच्छिवपदं शनैः ॥ इति ।

उत्तराम्नायमतमाह—शिवेति । शिवशक्त्यात्मकं ज्ञानं शिवशक्तोरभेदज्ञान-मित्यर्थः । यदाहुः—एषा बोधमयी शक्तिः परमानन्दरूपिणी ।
सत्त्वादिगुणसंबद्धा स्वमायान्तर्गता विभुः ॥
समस्ततत्त्वजातानामिह सृष्टेरनन्तरम् ।
सर्वैः शरीरैस्तत्संस्थैरपि मर्त्यैः परस्परम् ॥
अनाद्यध्यासम्बद्ध विस्मृत्यात्मस्वरूपिणी ।
शिवा (विश्वा)त्मिका भवेदेषा देवी सर्वात्मना शिवे ॥ इति ॥ २ ॥

अन्य लोग शिव एवं आत्मा की जिससे अभेदेन प्रतिपत्ति (ज्ञान) हो उसे योग कहते हैं और आगम शास्त्र के विद्वान् शिवशक्त्यात्मक ज्ञान को योग कहते हैं ॥ २ ॥

पुराणपुरुषस्याऽन्ये ज्ञानमाहुर्विशारदाः ।
जित्वाऽऽदावात्मनः शत्रून् कामादीन् योगमभ्यसेत् ॥ ३ ॥

भेदवादिवैष्णवादिमतमाह पुराणेति । पुरुषोत्तमः । पुरुषः सांख्यमते । ईश्वरो न्यायमते । नारायणो वैष्णवमते । तत्परिचयो योगः । तत्र पूज्यत्वात् प्रथमोपन्यस्त-त्वाच्च प्रथमं मतं ग्रन्थकृत्सम्मतमिति गम्यते ॥ ३ ॥

कामक्रोधौ लोभमोहौ तत्परं मदमत्सरौ ।
वदन्ति दुःखदानेतानरिषड्वर्गमात्मनः ॥ ४ ॥

कामेति । स्त्रीभोगाद्यभिलाषः कामः । सत्त्वादिजिघांसा क्रोधः । धनादितृष्णा लोभः । तत्त्वाज्ञानं मोहः । अहं सुखी धनी विद्यावानिति गर्वः मदः । अन्यशुभद्वेषो मत्सरः इति । दुःखदानेतान् आत्मनः अरिषड्वर्गमाहुरित्यन्वयः । आत्मस्वरूपचिन्तनव्यापारतिरोधानेन तेषां शत्रुत्वम् ॥ ४ ॥

अन्य विद्वान् लोग जिससे पुराण पुरुष (पुरुषोत्तम, पुरुष, ईश्वर एवं नारायण) का ज्ञान हो उसे योग कहते हैं । अब योग के अधिकारी पात्र का वर्णन करते हैं—काम, क्रोध, लोभ, मोह, मद और मत्सर इन ६ शत्रुओं को जीतकर तब योग का अभ्यास करना चाहिए ।

विमर्श—स्त्री योगादि में अभिलाषा का नाम काम हैं । इच्छा के प्रतिघात होने पर सत्वगुण का विनाश क्रोध हैं । धनादि की तृष्णा का नाम लोभ है, तत्त्व

का अज्ञान मोह है । 'मैं ही सब कुछ हूँ, इस प्रकार का अभिमान मद है और अन्य जन में रहने वाले शुभ गुणों से डाह करना मत्सर है । ये ६ ऐसे शत्रु हैं, जो आत्मा को निरन्तर दुःख देते रहते हैं ॥ ३-४ ॥

योगाष्टाङ्गानि

योगाष्टाङ्गैरिमान् जित्वा योगिनो योगमाप्नुयुः ।
यमनियमावासनप्राणायामौ ततः परम् ॥ ५ ॥
प्रत्याहारं धारणाख्यं ध्यानं सार्द्धं समाधिना ।
अष्टाङ्गान्याहुरेतानि योगिनो योगसाधने ॥ ६ ॥

एतज्जयोपायमाह योगेति । तान्याह यमेति ॥ ५-६ ॥

योगी जन योग के अष्टाङ्गों के अभ्यास से इन कामादि विकारों को जीत कर योग की प्राप्ति करते हैं । (अब योग के अष्टाङ्गों को कहते हैं)—१. यम, २. नियम, ३. आसन, ४. प्राणायाम, ५. प्रत्याहार, ६. धारणा, ७. ध्यान तथा ८. समाधि को योग का आठ अङ्ग कहा गया है । ये अष्टाङ्ग योग सिद्धि के साधन हैं ॥ ५-६ ॥

अहिंसादि दश यमाः

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं कृपार्जवम् ।
क्षमा धृतिर्मिताहारः शौचं चेति यमा दश ॥ ७ ॥

क्रमादेषां स्वरूपमाह—अहिंसेति । न कञ्चन हन्मि इत्यभ्यासप्रवणता अहिंसा । असत्यं न वच्मि इत्यभ्यासप्रवणचित्तता सत्यम् । चौर्यनिवृत्तिः अस्तेयम् । स्त्रीभोगेच्छानिवृत्तिः ब्रह्मचर्यम् । प्राणिषु क्रूरबुद्धिनिवृत्तिः कृपा । चित्तकौटिल्य-निवृत्तिः आर्जवम् । अभिभावकं प्रति अक्रोधप्रवणचित्तता क्षमा । इष्टवस्त्वाद्यला-भतश्चिन्ताभावो धृतिः । क्रमेण आहारापकर्षणात् यावच्छरीरस्थितिमात्रभोजनं मिताहारः । चित्तनैर्मल्यार्थं यथोक्तशौचशीलता शौचम् यमा इति 'यमु' उपरमे कामादेर्निवृत्तिरूपा इत्यर्थः । तत्र धृतिः सर्वत्राऽनुषक्ता । अहिंसाब्रह्मचर्याभ्यां कामस्य जयः । कृपाक्षमाभ्यां क्रोधस्य । अस्तेयसत्यार्जवेभ्यो लोभस्य । मिताहार-शौचाभ्यां मोहस्य । क्षमार्जवाभ्यां मदस्य । अहिंसाकृपार्जवक्षमाभ्यो मत्सरस्य । इत्यन्यदपि यथायथमूह्यम् । तदुक्तं संहितायाम्—

सर्वेषामपि जन्तूनामक्लेशजननं मुने ।
वाङ्मनः कर्मभिर्न्यूनमहिंसेत्यभिधीयते ॥
यथादृष्टश्रुतार्थानां स्वरूपकथनं पुनः ।
सत्यमित्युच्यते ॥ इति ।
तृणादेरप्यनादानं परस्वस्य तपोधन ॥
अस्तेयम् ॥ इति ।
अवस्थास्वपि सर्वासु कर्मणा मनसा गिरा ।

स्त्रीसङ्गतिपरित्यागो ब्रह्मचर्यं प्रचक्षते ॥
परेषां दुःखमालोक्य स्वस्यैवालोक्य तस्य तु ।
उत्सादनानुसन्धानं दया ॥ इति ।
व्यवहारेषु सर्वेषु मनोवाक्कायकर्मभिः ।
सर्वेषामपि कौटिल्यराहित्यमार्जवं भवेत् ॥ इति ।
सर्वात्मना सर्वदाऽपि सर्वत्राऽस्याऽपकारिषु ।
बन्धुष्विव समाचारः क्षमा स्यात् ॥ इति ।
इच्छाप्रयत्नराहित्यं जातेषु विषयेष्वपि ।
लोभवत्सु धृतिः ॥ इति ।
भोज्यस्यैव चतुर्थांशभोजनं स्वच्छचेतसः ।
हितं मेध्यं सुतीक्ष्णेन मिताहारं प्रचक्षते ॥
निर्गतं रोमकूपेभ्यो नवरन्ध्रेभ्य एव च ।
मलं वदन्ति द्वाराणां (तोयैस्तत्) क्षालनं शौचमुच्यते ॥
मृज्जलाभ्यां बहिः सम्यगान्तरं त्वथवा पुनः ।
पूर्वोक्तभूतशुद्ध्यन्तं शौचमाचक्षते बुधाः ॥ इति ॥ ७ ॥

१. **यम**—अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य, कृपा, आर्जव, क्षमा, धैर्य, परिमित आहार और शौच ये दश यम कहे गये हैं।

विमर्श—इनका लक्षण इस प्रकार है—१. किसी को किसी प्रकार का कष्ट नहीं दूँगा इस प्रकार के संकल्प का नाम **अहिंसा** है । २. 'मैं कभी झूठ न बोलूँगा' इस प्रकार के संकल्प का नाम सत्य है अथवा यथा दृष्टश्रुतार्थ के कथन का नाम **सत्य** है अथवा जिससे प्राणियों का हित हो, अहित न हो उसका नाम सत्य है । ३. किसी की तृण जैसी लघु वस्तु बिना पूछे नहीं लूँगा इस प्रकार की वृत्ति का नाम **अस्तेय** है । ४. स्त्री भोगेच्छा से मनसा, वचसा, कर्मणा निवृत्ति का नाम **ब्रह्मचर्य** है । ५. प्राणियों में के अनिष्ट न करने का संकल्प करना और उनका हित करते रहना यह **कृपा** है । ६. किसी के प्रति अपने चित्त में कुटिलता न रखना इस प्रकार का भाव **आर्जव** है । ७. जो अपना अनिष्ट कर रहा है उसके प्रति भी किसी प्रकार का अनिष्ट न करने के संकल्प का नाम **क्षमा** है । ८. महान् विपत्ति आने पर अथवा इष्ट प्राप्ति के लिये किये जाने वाले प्रयासों के व्यर्थ होने पर सिद्धान्त से विचलित न होने का नाम **धैर्य** है । ९. शरीर स्थितिमात्र स्वल्प सात्विक आहार जो हितकारी एवं लघु हो, उसको ग्रहण करते रहना **मिताहार** है । १०. चित्त की निर्मलता संपादन हेतु शास्त्र में कहे गये शौच के नियमों का पालन **शौच** है । इसके अर्थ—शौच एवं स्त्रीशौचादि अनेक प्रकार के भेद शास्त्रों में कहे गये हैं ॥ ७ ॥

तपआदि दशनियमः

तपः सन्तोष आस्तिक्यं दानं देवस्य पूजनम् ।
सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो हुतम् ॥ ८ ॥

दशैते नियमाः प्रोक्ताः योगशास्त्रविशारदैः ।

तप इति । कृच्छ्रादिव्रतचर्या तपः । बह्विष्टतरानभिलाषाः सन्तोषः । अस्ति परलोक इति मतिर्यस्य स आस्तिकः । तस्य भाव आस्तिक्यम् । परलोकबुद्धया धर्माद्याचरणमिति यावत् । यथाविभवं देवपितृमनुष्योद्देशेन वितरणं दानम् । देवस्य पूजनम् उक्तरीत्याऽनुष्ठानादेव मोक्षोपायप्रवृत्तस्य विघ्नाभावाय भवति । सिद्धान्त उपनिषन्मोक्षोपायोपदेशपरिमलादिशास्त्रम् तस्य श्रवणम् । कुत्सिताचारात् स्वत उद्वेगो ह्रीः । तथा सति चित्तमालिन्येन ज्ञानानुदयात् । मतिर्मननम् ।

तथा च स्मृतिः—श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः । इति ।

जप इत्युक्तप्रकारेण । 'जपतो नास्ति पातकम्' इत्युक्तेः । चित्तशुद्धावुपयोगात् । हुतमग्निहोत्रादिहोमः । यदकरणे प्रत्यवायात् चित्तमालिन्येन ज्ञानानुदयात् । यद्वा हुतं मन्त्रजपस्य दशांशहोमः । यथा चोक्तम्—

नाऽजपात् सिध्यते मन्त्रो नाऽहुताच फलप्रदः ।
अनर्चितो हरेत् कामान् तस्मात् त्रितयमाचरेत् ॥ इति ।

नियमा इति । अवश्यकर्त्तव्यतया नियमत्वमेषाम् । अतः कदाचिदालस्यादिना त्यागो न कार्यः । तदुक्तं संहितायाम्—

तपस्त्वनशनं नाम विधिपूर्वकमिष्यते ।
अनायासोपवासेन तृप्त्यर्थं भैक्ष्यसेवनम् ॥
तुष्टिरेषा । इति ।
श्रुत्याद्युक्तेषु विश्वास आस्तिक्यं संप्रचक्षते ।
यदिष्टदेवतां ध्यात्वा तदर्पणाधियाऽन्वहम् ॥
सत्पात्रे दीयतेऽन्नादि तद्दानमभिधीयते ।
इष्टदेवार्चनं सम्यक् विधिपूर्वकमन्वहम् ॥
त्रिसन्ध्यमेकदा वा तु भवत्येव तदर्चनम् ।
वैष्णवागमसिद्धान्तश्रवणं श्रावणं (स्मरणं) तथा ॥
श्रुत्यादिभिर्लौकिकैश्च यदत्यन्तविनिन्दितम् ।
तत्राऽप्रवर्त्तनं लज्जा । इति ।
तर्कैर्यदनुसन्धानं सम्यक् शब्दस्थितैरपि ।
शास्त्रोक्तयोर्मतिरियम् ॥ इति ।
गुरोर्लब्धस्य मन्त्रस्य शश्वदावर्त्तनं जपः ।
द्रव्यैः कल्पोदितैर्होमो हुतम् ॥ इति ॥ ८-९ ॥

२. **नियम**—तप, संतोष, आस्तिक्य, दान, देवपूजन, सिद्धान्त श्रवण, ह्रीं (लज्जा), मति, जप एवं होम—ये दश योग शास्त्र विशारदों के द्वारा **नियम** कहे गए हैं ।

विमर्श—१. कृच्छ्र, चान्द्रायण एवं सान्तपन आदि व्रतों के द्वारा शरीर को शोषण करने का नाम **तप** है । शरीर के निर्वाह से अधिक न चाहने का नाम **संतोष** है । ईश्वर परलोक देवता, गुरु एवं शास्त्र वचनों में विश्वास का नाम

आस्तिक्य है। विभवानुसार देश-काल तथा पात्र का विचार कर परलोक देव पितर एवं मनुष्य के उद्देश्य से वितरण करने का नाम **दान** है । कल्याण, परलोक अथवा मुक्ति प्राप्ति में बाधा न आवे इस उद्देश्य से देव पूजा में प्रवृत्त होने का नाम **देवपूजन** है । मोक्षोपाय के साधनभूत उपनिषद् वचनों को सतत् श्रवण करने का नाम **सिद्धान्तश्रवण** है । कुत्सित आचारों से उद्विग्न होकर उनसे दूर रहने का नाम ह्री (लज्जा) है । क्योंकि कुत्सित आचार के परिपालन से बुद्धि मलिन हो जाती है और ज्ञान नहीं हो पाता । शास्त्र के सिद्धान्तों का मनन ही **मति** है । इष्ट देवता मन्त्र अथवा गुरु परम्परा से प्राप्त दीक्षा मन्त्र का त्रिकाल अथवा एक काल पर्यन्त जप करते रहना इसका नाम **जप** है । 'जपः' पौनः पुन्येन आवृत्तिः जपतो नास्ति पातकम्' यह जप का लक्षण एवं फल है । हविमन्त्र, देशकाल, वैध आधार, अग्नि, एवं आचार्य के संयोग का नाम **होम** है। इन्हें नियम इसलिये कहा जाता है कि इन कर्त्तव्यों का पालन अशौच से अतिरिक्त सभी काल में आवश्यक है । इनके पालन में कभी किसी प्रकार का प्रमाद नहीं करना चाहिए । अन्यथा संस्कार लुप्त होने की संभावना हो जाती है ॥ ८ ॥

आसनपञ्चकम्

पद्मासनं स्वस्तिकाख्यं वज्रं भद्रासनं तथा ॥ ९ ॥
वीरासनमिति प्रोक्तं क्रमादासनपञ्चकम् ।
ऊर्वोरुपरि विन्यस्य सम्यक् पादतले उभे ॥ १० ॥
अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः ।
पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम् ॥ ११ ॥

आसनपञ्चकमिति । स्थितं श्रमः तल्पादौ दण्डवत् पतितं तु निद्राऽभिभवति इति उपविष्टस्यैव ज्ञानाभ्यासाधिकारः । तत्र यथाकथञ्चिदुपवेशने रोगः कुण्डल्यानुगण्याभावश्च । तस्मात् पद्मासनाद्युक्तिः । तदुक्तं वशिष्ठसंहितायाम्—

आसनेन रुजो हन्ति प्राणायामेन पातकम् ।
विकारं मानसं योगी प्रत्याहारेण सर्वदा ॥
धारणाभिर्मनोधैर्यं ज्ञानादैश्वर्यमुत्तमम् ।
समाधौ मोक्षमाप्नोति त्यक्तकर्मशुभाशुभः ॥ इति ।

ऊर्वोरिति । ऊर्वोरुपरि परस्परस्योर्वोरुपरि । व्युत्क्रमात् इत्यस्य अत्रापि सम्बन्धात् । निबध्नीयादित्यत्र व्युत्क्रमादिति पृष्ठभागे हस्तमात्रव्युत्क्रमः । अङ्गुष्ठबन्धने तु तत्तद्धस्तेनैव तत्तदङ्गुष्ठबन्धनम् ॥ ९-११ ॥

अब ग्रन्थकार स्थिति श्रम की अवस्था में शयन पर पड़ जाने से निद्रा आ जाती है, अथवा योग में अनुचित रूप में अवस्थान की स्थिति से रोग होते हैं । इसके अतिरिक्त बैठकर ही योग करना चाहिए, ऐसा नियम भी है । इसलिये (अष्टाङ्ग योग में प्रथम) आसन का वर्णन करते हैं—

३. **आसन**—पद्मासन, स्वास्तिकासन, वज्रासन, भद्रासन एवं वीरासन क्रमशः ये पाँच (मुख्य) आसन हैं । दोनों ऊरु के ऊपर दोनों पादतल को स्थापित कर व्युत्क्रम (हाथों को उलट कर) पूर्वक दोनों हाथों से दोनों हाथ के अंगूठे को बाँध लेने का नाम पद्मासन कहा गया है, यह आसन योगियों को अत्यन्त प्रिय है ॥ ९-११ ॥

जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे ।
ऋजुकायो विशेद्योगी स्वस्तिकं तत् प्रचक्षते ॥ १२ ॥

जान्विति । अन्तरे इति दक्षिणे वामपादं वामे दक्षिणम् । पूर्वासने अङ्गुष्ठ-बन्धेनैव ऋजुकायता सिद्धा । अत्र तु तथाऽभावात् ऋजुकाय इति उक्तम् ॥ १२ ॥

पैर के दोनों जानु और दोनों ऊरू के बीच दोनों पादतल को अर्थात् दक्षिण पाद के जानु और ऊरू के मध्य वाम पादतल एवं वामपाद के जानु और ऊरू के मध्य दक्षिण पादतल को स्थापित करे । इस प्रकार शरीर को सीधे कर बैठने का नाम स्वस्तिकासन है ॥ १२ ॥

भद्रासनलक्षणम्

सीवन्याः पार्श्वयोर्न्यस्येद् गुल्फयुग्मं सुनिश्चलम्।
वृषणाधः पार्ष्णिपादौ पाणिभ्यां परिबन्धयेत्॥ १३ ॥
भद्रासनं समुद्दिष्टं योगिभिः पूजितं परम् ।

वज्रासनलक्षणम्

ऊर्वोः पादौ क्रमान्न्यस्येज्जान्वोः प्रत्यङ्मुखाङ्गुली ॥१४॥
करौ निदध्यादाख्यातं वज्रासनमनुत्तमम् ।

वीरासनलक्षणम्

एकं पादमधः कृत्वा विन्यस्योरौ तथेतरम्॥ १५ ॥
ऋजुकायो विशेद्योगी वीरासनमितीरितम् ।

सीवन्या इति । गुदमेढ्रान्तरालोर्ध्वरेखा सीवनी । तस्याः पार्श्वयोः । वाम-पार्श्वे दक्षिणपादगुल्फम् । अन्यस्मिन् अन्यम् । वृषणाधः अण्डकोषाधः पादपार्ष्णी व्यत्यासेन भवत इति शेषः । 'तद्ग्रन्थी घुटिके गुल्फौ पुमान् पार्ष्णिस्तयोरधः' इति कोशः । पाणिभ्यां परिबन्धयेत् पूर्ववत् अङ्गुष्ठाविति शेषः । अङ्गुष्ठबन्धनेन ऋजुकायत्वं सिद्धम् । तदुक्तं योगसारे—

सीवन्या आत्मनः पार्श्वे गुल्फौ निक्षिप्य पादयोः ।
सव्ये दक्षिणगुल्फञ्च दक्षिणे दक्षिणेतरम् ॥
दक्षे सव्यकरं न्यस्य सव्ये न्यस्येतरं करम् ।
अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमेण तु ॥ इति ।

ऊर्वोरिति । स्वस्योरुमूले क्रमात् पादद्वयं कुर्यात् । प्रत्यङ्मुखाङ्गुली स्वसम्मुखाङ्गुली । प्रत्यङ्मुखाङ्गुली करौ जान्वोरुपरि निदध्यादित्यन्वयः । अत्र ऋजुकायत्वं जानुहस्तदानादेव सिद्धम् ।

एकमिति । अथ इति अपरस्फिचः ॥ १३-१६ ॥

भद्रासन—सीवनी (गुदा और लिङ्ग के बीचोबीच ऊपर जाने वाली रेखा एक जैसी पतली नाडी का नाम सीवन है) के दोनों तरफ दोनों पैर के गुल्फों को अर्थात् वामपार्श्व में दक्षिणपाद के गुल्फ एवं दक्षिण पार्श्व में वाम पाद के गुल्फ को निश्चल रूप से स्थापित कर वृषण (अण्डकोश) के नीचे दोनों पैर की घुट्टी, अर्थात् वृषण के नीचे दाहिनी ओर वाम पाद की घुट्टी तथा बाईं ओर दक्षिण पाद की घुट्टी स्थापित कर पूर्ववत् दोनों हाथों से दोनों अङ्गुष्ठ को बाँध लेने से भद्रासन हो जाता हैं योगी जन इसकी बहुत प्रशंसा करते हैं ॥ १३ ॥

वज्रासन—पैर के परस्पर जानु प्रदेश पर एक दूसरे पैर को स्थापित करे तथा हाथ की अङ्गुलियों को सीधे ऊपर की ओर उठाये रखे तो इस प्रकार के आसन को वज्रासन कहते हैं, यह बड़ा श्रेष्ठ आसन हैं ॥ १४ ॥

वीरासन—एक पैर को दूसरे पैर के नितम्ब के नीचे स्थापित करे, तथा दूसरे पादतल को नितम्ब के नीचे स्थापित किये गये पैर के ऊरू पर रखे तथा शरीर को सीधे रखे तो वह वीरासन कहा जाता है ॥ १५-१६ ॥

प्राणायामः

इडयाऽऽकर्षयेद्वायुं बाह्यं षोडशमात्रया ॥ १६ ॥
धारयेत् पूरितं योगी चतुःषष्ट्या तु मात्रया ।
सुषुम्णामध्यगं सम्यक् द्वात्रिंशन्मात्रया शनैः ॥ १७ ॥
नाड्या पिङ्गलया चैनं रेचयेद्योगवित्तमः ।
प्राणायाममिमं प्राहुर्योगशास्त्रविशारदाः ॥ १८ ॥
भूयो भूयः क्रमात्तस्य व्यत्यासेन समाचरेत् ।
मात्रावृद्धिक्रमेणैव सम्यग्द्वादश षोडश ॥ १९ ॥
प्राणायामो हि द्विविधः सगर्भोऽगर्भ एव च ।
जपध्यानादिभिर्युक्तं सगर्भं तं विदुर्बुधाः ॥ २० ॥
तदपेतं विगर्भं च प्राणायामं परे विदुः ।
क्रमादभ्यसतः पुंसो देहे स्वेदोद्गमोऽधमः ॥ २१ ॥
मध्यमः कम्पसंयुक्तो भूमित्यागः परो मतः ।
उत्तमस्य गुणावाप्तिर्यावच्छीलनमिष्यते ॥ २२ ॥

षोडशमात्रयेति । मात्रालक्षणमुक्तं तन्त्रान्तरे—

कालेन यावता स्वीयो हस्तः स्वं जानुमण्डलम् ।
पर्येति मात्रा सा तुल्या स्वीयैकश्वासमात्रया ॥ इति ।

अन्ये अन्यथा मात्रालक्षणमाहुः—

स्वजानुमण्डलं पूर्वं त्रिः परामृश्य पाणिना ।
प्रपद्य छोटिकामेकां मात्रा सा स्याल्लघीयसी ॥ इति ।

अन्यत्र तु— सोऽङ्गुलिस्फोटतुल्यश्च मात्राष्टाभिश्च तैः स्मृता ॥ इति ।

वायवीयसंहितायां तु—जानु प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् ।
अङ्गुलिस्फोटनं कुर्यात् सा मात्रेति प्रकीर्त्तिता ॥ इति ।

आकर्षयेदिति पूरकः । पूरितं धारयेदिति कुम्भकः । सुषुम्णामध्यगं सम्यगिति पूर्वेण सम्बध्यते । रेचयेदिति रेचकः । केचन रेचकादिकुम्भकान्तं मन्यन्ते । एवं क्रमाद् भूयोभूयः पौनःपुन्येन क्रमेण एकैकवृद्ध्या द्वित्रिवृद्ध्यादिक्रमेण तस्य व्यत्यासेन उक्तवैपरीत्येन द्वादश षोडश वा प्राणायामान् समाचरेदित्यन्वयः ।

तदुक्तम्— शुचिः प्राणायामान् प्रणवसहितान् षोडश वशी
प्रभाते सायं च प्रतिदिवसमेवं वितनुते ।
द्विजो यस्तु भ्रूणप्रहणनकृतांहोऽभिकलितं
पुनन्त्येते मासादपि दुरिततूलौघदहनाः ॥ इति ।

परमतमाह श्लोकेन जपेति । परे बुधा विदुरित्यन्वयः । अयं च प्राणायामः पूजाविषय इति ज्ञेयम् । तदुक्तम्—

अयं प्राणायामः सकलदुरितध्वंसनकरो
विगर्भः प्रोक्तोऽसौ शतगुणफलो गर्भकलितः ।
जपध्यानोपेतः स तु निगदितो गर्भरहितः
सगर्भस्तद्युक्तो मुनिपरिवृढैर्योगनिरतैः ॥ इति ।

शीलनं प्राणायामस्येति शेषः ॥ १६-२२ ॥

४. अब **प्राणायाम का प्रकार** कहते हैं—योगी सर्वप्रथम इडा नाडी से १६ मात्रा काल पर्यन्त बाहरी वायु को भीतर की ओर खींचे तो वह **पूरक प्राणायाम** कहा जाता हैं पुनः उस खींचे गये वायु को सुषुम्णा के मध्य में ६४ मात्रा काल पर्यन्त धारण करे तो वह **कुम्भक** कहा जाता है, फिर उस धारण किये गये वायु को ३२ मात्रात्मक काल में बाहर निकाल देवे तो **रेचक प्राणायाम** कहा जाता है । इसी को योगशास्त्र **विशारद प्राणायाम** कहते हैं (अपने हाथ को जानु मण्डल के चारों ओर घुमाने में जितना समय लगता हैं उसी काल को मात्रा कहते हैं अथवा इसी को एक श्वास कहते हैं) ॥ १६-१८ ॥

इस प्रकार ऊपर कहा गया प्राणायाम एक एक मात्रा की वृद्धि के क्रम से ६४ मात्रा पर्यन्त, पुनः उसके व्यत्यस्त क्रम (एक एक घटा कर) प्रतिदिन द्वादश अथवा षोडश बार प्राणायाम करना चाहिए ॥ १९ ॥

प्राणायाम सगर्भ एवं अगर्भ भेद से दो प्रकार का कहा गया है। बुद्धिमान् लोग जप और ध्यान पूर्वक किये गये प्राणायाम को सगर्भ प्राणायाम कहते हैं। किन्तु जो प्राणायाम जप ध्यान से रहित किया जाता है उसे दूसरा अगर्भ प्राणायाम कहते हैं। क्रमशः प्राणायाम का अभ्यास करते हुये जब स्वेद निकलने लगे तो उसे अधम प्राणायाम कहा जाता है ॥ २०-२१ ॥

प्राणायाम के अभ्यास से जब शरीर में कम्प होने लगे तो वह मध्यम प्राणायाम कहा जाता है और जब शरीर भूमि से ऊपर की ओर उठने लगे तो उत्तम प्राणायाम कहा जाता है इन तीन प्राणायामों की प्रक्रिया में ज्यों ज्यों उत्तम प्रकार के प्राणायाम का अभ्यास बढ़ने लगता है तब उसमें अधिकाधिक गुण प्रगट होने लगते हैं ॥ २२ ॥

इन्द्रियाणां विचरतां विषयेषु निरर्गलम्।
बलादाहरणं तेभ्यः प्रत्याहारोऽभिधीयते ॥ २३ ॥
अङ्गुष्ठगुल्फजानूरुसीवनीलिङ्गनाभिषु ।
हृद्ग्रीवाकण्ठदेशेषु लम्बिकायां ततो नसि ॥ २४ ॥
भ्रूमध्ये मस्तके मूर्ध्नि द्वादशान्ते यथाविधि।
धारणं प्राणमरुतो धारणेति निगद्यते ॥ २५ ॥

इन्द्रियाणामित्यादिना मनस एव एकत्र स्थितिः कार्येत्युक्तं भवति । यतो मनः सहायानामेव एतेषां स्वस्वविषयग्रहणशक्तिः अतस्तन्निरोधेनैव निरोधादिति भावः । लम्बिका तालुमूलम् । मस्तकं ललाटकेशसन्धिः । मूर्ध्नीति तदुपरिभागः । द्वादशान्ते ब्रह्मरन्ध्रे । यथाविधि इति गुरूक्तक्रमेण ।

वशिष्ठसंहितायांपञ्च धारणा उक्ता—

भूतानां मानसञ्चैकं धारणा च पृथक् पृथक् ।
मनसो निश्चलत्वे तु धारणा च विधीयते ॥
या पृथ्वी हरितालहेमरुचिरा तत्त्वं कलालान्वितं
संयुक्ता कमलासनेन च चतुष्कोणा हृदि स्थायिनी ।
प्राणांस्तत्र विलीय पञ्चघटिका चित्तान्वितं धारये-
देषा स्तम्भकरी सदा क्षितिपरा ख्याता क्षमाधारणा ॥ १ ॥
अर्द्धेन्दुप्रतिमं च कुन्दधवलं कण्ठे च तत्त्वान्वितं
तत् पीयूषवकारबीजसहितं युक्तं सदा विष्णुना ।
प्राणांस्तत्र विलीय पञ्चघटिका चित्तान्वितं धारये-
देषा दुःसहकालकूटजरणा स्याद् वारुणीधारणा ॥ २ ॥
तत्त्वस्थं शिवमिन्द्रगोपसदृशं तत्र त्रिकोणेऽनलं
तेजोऽनेकमयं प्रवालरुचिरं रुद्रेण तत् सङ्गतम् ।
प्राणांस्तत्र विलीय पञ्चघटिका चित्तान्वितं धारये-
देषा वह्निसमं वपुर्विदधती वैश्वानरीधारणा ॥ ३ ॥

यन्मूलं कमलं प्रपञ्चसहितं दृष्टं भ्रुवोरन्तरे
तद्वत् सत्त्वमयं यकारसहितं तत्रेश्वरो देवता ।
प्राणांस्तत्र विलीय पञ्चघटिका चित्तान्वितं धारये-
देषा खे गमनं करोति नियतं वायोः सदाधारणा ॥ ४ ॥
आकाशं सुविशुद्धवारिसदृशं यद्ब्रह्मरन्ध्रस्थितं
तन्नाथेन सदाशिवेन सहितं युक्तं हकाराक्षरैः ।
प्राणांस्तत्र विलीय पञ्चघटिका चित्तान्वितं धारये-
देषा मोक्षकपाटभेदनपटुः प्रोक्ता नभोधारणा ॥ ५ ॥
कर्मणां साधकाः सर्वा धारणाः पञ्च दुर्लभाः ।
तासां विज्ञानतो योगो सर्वपापैः प्रमुच्यते ॥ इति ॥ २१-२५ ॥

५. प्रत्याहार—ये इन्द्रियाँ विषयों में बे रोक-टोक दौड़ते रहने से निरन्तर चञ्चल रहती हैं, अतः उन विषयों से इन्द्रियों को निरुद्ध कर मन को स्थिर करने का नाम प्रत्याहार है ॥ २३ ॥

६. धारणा—अङ्गुष्ठ, गुल्फ, जानु, ऊरू, सीवनी (गुदा और लिङ्ग के मध्य में ऊपर की ओर उठी हुई रेखा के सदृश) लिङ्ग नाभि, हृदय, ग्रीवा, कण्ठ, लम्बिका (तालु का मूलभाग) नासिका, भ्रूमध्य, मस्तक, शिर और ब्रह्मरन्ध्र इन स्थानों में प्राणवायु के धारण का नाम **धारणा** है ॥ २४-२५ ॥

ध्यानलक्षणम्

समाहितेन मनसा चैतन्यान्तरवर्तिना ।
आत्मन्य(नो)ऽभीष्टदेवानां ध्यानं ध्यानमिहोच्यते ॥ २६ ॥
समत्वभावना नित्यं जीवात्मपरमात्मनोः ।
समाधिमाहुर्मुनयः प्रोक्तमष्टाङ्गलक्षणम् ॥ २७ ॥

अभीष्टदेवानामिति सगर्भं ध्यानमुक्तम् । विगर्भमपि ध्यानमुक्तं तन्त्रान्तरे । यदाहुः—

यत्तत्त्वे निश्चलं चित्तं तद्ध्यानं परमं मतम् ।
भवति तद्ध्यानं सगुणं निर्गुणं तथा ॥
सगुणं वर्णभेदेन निर्गुणं केवलं तथा ।
अश्वमेधसहस्राणि वाजपेयशतानि च ॥
एकस्य ध्यानयोगस्य कलां नार्हन्ति षोडशीम् ।
अन्तश्चेतो बहिश्चक्षुरधः स्थाप्य सुखासनः ॥
समत्वञ्च शरीराणां ध्यानमाहुश्च सिद्धिदम् ।
नासाग्रे दृष्टिमादाय ध्यात्वा मुञ्चति बन्धनात् ॥ इत्यादिना ॥
गुदे मेढ्रे च नाभौ च हृदये कण्ठदेशके ।
घण्टिकालम्बिकास्थाने भ्रूमध्ये परमेश्वरम् ॥
निर्गुणं गगनाकारं मरीचिजलसन्निभम् ।
शून्ये सर्वमयं ध्यात्वा योगी योगमवाप्नुयात् ॥

इत्यन्तेन ॥ २६-२७ ॥

८.ध्यान—भीतर रहने वाले चैतन्ययुक्त चित्त को मन के साथ समाहित कर अपनी आत्मा में अपने अभीष्ट देवता का ध्यान करना **ध्यान** कहलाता है ॥ २६॥

९. **समाधि**—जीवात्मा एवं परमात्मा में निरन्तर समत्व की भावना ही मुनियों ने **समाधि** कही है । यहाँ तक हमने अष्टाङ्ग लक्षण युक्त योग का वर्णन किया ॥ २७ ॥

शरीरप्रमाणम्

षण्णवत्यङ्गुलायामं शरीरमुभयात्मकम् ।
गुदध्वजान्तरे कन्दमुत्सेधाद् द्व्यङ्गुलं विदुः ॥ २८ ॥

शरीरस्थ नाडीनिर्णयः

तस्मात् द्विगुणविस्तारं वृत्तरूपेण शोभितम् ।
नाड्यस्तत्र समुद्भूता मुख्यास्तिस्रः प्रकीर्त्तिताः ॥ २९ ॥
इडा वामे स्थिता नाडी पिङ्गला दक्षिणे मता ।
तयोर्मध्यगता नाडी सुषुम्णा वंशमाश्रिता ॥ ३० ॥
पादाङ्गुष्ठद्वये याता शिफाभ्यां शिरसा पुनः ।
ब्रह्मस्थानं समापन्ना सोमसूर्याग्निरूपिणी ॥ ३१ ॥
तस्या मध्यगता नाडी चित्राख्या योगिवल्लभा ।
ब्रह्मरन्ध्रं विदुस्तस्यां पद्मसूत्रनिभं परम् ॥ ३२ ॥

योगसिद्ध्यर्थं शरीराभ्यन्तरे मूलाधारमारभ्य तत्तन्नाडीस्थाने वायुसञ्चारं वक्तुं शरीरप्रमाणमाह षडिति । उभयात्मकं शिवशक्त्यात्मकम् । अग्नीषोमात्मकं वा शुक्रशोणितात्मकं वा इति प्रथमपटलोक्तानुवादः । तस्मादित्युत्सेधात् । वंशं पृष्ठवंशम् आश्रिता तदन्तर्गता । यदाहुः—या मुण्डाधारदण्डान्तरविवरगता । इति शिफाभ्यां मूलाभ्याम् ॥ २८-३२ ॥

यह उभयात्मक अर्थात् शिवशक्त्यात्मक अथवा अग्नीषोमात्मक अथवा शुक्रशोणितात्मक शरीर (द्र. १, ३९) छानबे ९६ अङ्गुल लम्बा है । गुदा एवं लिङ्ग के मध्य में एक कन्द है, जो दो अङ्गुल ऊँचा है और वह उससे द्विगुणित विस्तार युक्त एक वृत्त के रूप में स्थित है, उसी कन्द से समस्त नाडियों की उत्पत्ति हुई है जिसमें मुख्य रूप से तीन नाडियाँ प्रधान हैं ॥ २८-२९ ॥

इसी कन्द के बायें भाग से इडा, तथा दक्षिण भाग से पिङ्गला नाडियाँ निकली हैं । इनके मध्य भाग से होकर सुषुम्णा नाडी निकली है । ये तीनों नाड़ियाँ पीठ की रीढ़ के भीतर स्थित हैं ॥ ३० ॥

सुषुम्ना नाडी मूलाधार से हो कर दोनों पैर के अंगूठों तक जाती है पुनः वही शिरः प्रदेश में होती हुई ब्रह्मस्थान तक जाती हैं । यह सोम, सूर्य एवं अग्निस्वरूपा हैं ॥ ३१ ॥

इसके बीच में चित्रा नाम की एक नाड़ी हैं, जो योगियों को अत्यन्त प्रिय हैं इसी चित्रा नाम की नाड़ी में पद्मसूत्र के समान अत्यन्त पतला ब्रह्मरन्ध्र हैं ॥३२॥

आधारांश्च विदुस्तत्र मतभेदादनेकधा ।
दिव्यमार्गमिदं प्राहुरमृतानन्दकारणम् ॥ ३३ ॥
इडायां सञ्चरेच्चन्द्रः पिङ्गलायां दिवाकरः ।
ज्ञातौ योगनिदानज्ञैः सुषुम्णायां तु तावुभौ ॥ ३४ ॥

आधारान् इति केचन द्वादश अन्ये षोडश आहुः । परे बहूनि च । यदाहुः—

ततस्तु ब्रह्मकंकाले ध्यायेच्चक्रक्रमं सुधीः ।
आधारचक्रं प्रथमं कुलदीपमनन्तरम् ॥
वज्र (यज्ञ) चक्रं ततः प्रोक्तं स्वाधिष्ठानात्मकं परम् ।
रौद्रं करालचक्रं च गह्वरात्मकमेव च ॥
विद्याप (प्र)दं च त्रिमुखं त्रिपदं कालदण्डकम् ।
सा (उ) कारचक्रं च ततः कालोदारं करङ्क(बन्ध)कम् ॥
दीपकं क्षोभजनकमानन्दकलिला (ललिता)त्मकम् ।
मणिपूरकसंज्ञञ्च लाङ्गलं का (कु) लभेदनम् ॥
मदोत्साहञ्च परमं माद (र्ग)कं पदमुच्यते ।
कल्पजालं ततश्चिन्त्यं घोषकल्लोलनं ततः ॥
नादावर्त्तपदं प्रोक्तं त्रिपुटञ्च तदुत्तरम् ।
कङ्कालकं तम(मन)श्चक्रं विख्यातं पुटभेदनम् ॥
महाग्रन्थिविकाशं च बन्धोज्ज्वलनसंज्ञितम् ।
अनाहतं पद्मपुटं व्योमचक्रं तथा भवेत् ॥
बोधनं ध्रुवसंज्ञञ्च काल (कला) कन्दलकं ततः ।
क्रौञ्चं भेरण्डविभवं डामरं कुलपीठकम् ॥
कुलकोलाहलं हालाहलावर्त्तं महद्रथम्(द्भयम्) ।
घोरभैरवसंज्ञञ्च विशुद्धिः कण्ठमुत्तमम् ॥
घूर्णकंपदमाख्यातमाज्ञाकाकपुटं तथा ।
शृङ्गाटं कामरूपाख्यं पूर्णगिर्यात्मकं परम् ।
महाव्योमात्मकं चक्रं शक्तिरूपमनुस्मरेत् ॥ इति ॥ ३३-३४ ॥

इसमें कोई विद्वान् बारह, कोई सोलह तथा कोई अनेक आधार चक्र बताते हैं । यही दिव्यमार्ग है और अमृतानन्द की प्राप्ति में हेतु है ॥ ३३ ॥

इडा में चन्द्रमा, पिङ्गला में सूर्य रहते है, किन्तु योगनिदानज्ञों ने सुषुम्णा में सूर्य और चन्द्र दोनों की स्थिति ज्ञात की है ॥ ३४ ॥

आधारकन्दमध्यस्थं त्रिकोणमतिसुन्दरम् ।
ज्योतिषां निलयं दिव्यं प्राहुरागमवेदिनः ॥ ३५ ॥
तत्र विद्युल्लताकारा कुण्डली परदेवता ।

परिस्फुरति सर्वात्मा सुप्ताहिसदृशाकृतिः ॥ ३६ ॥
बिभर्त्ति कुण्डलीशक्तिरात्मानं हंसमाश्रिता ।
हंसः प्राणाश्रयो नित्यं प्राणो नाडीसमाश्रयः ॥ ३७ ॥

कुण्डलीस्थानमाह आधारेति । कुण्डलीशक्तिः आत्मानं परमात्मानं बिभर्त्ति तद्योगभागिनी भवतीत्यर्थः । कीदृक् । हंसं जीवात्मानम् आश्रिता जीवाधिष्ठाना सतीत्यर्थः । हंसः प्राणाश्रयः प्राणवायुसमाश्रय इत्यर्थः । प्राणो नाडीसमाश्रयः ॥ ३५-३७ ॥

आधारकन्द (द्र. २५, २८) के मध्य में एक त्रिकोण है जो अत्यन्त मनोहर है । आगम वेत्ता लोग उसी को संपूर्ण प्रकाशों का स्थान बताते हैं ॥ ३५ ॥

उसी त्रिकोण में विद्युल्लता के आकार वाली परदेवता स्वरूपा कुण्डली जिसकी आकृति सोती हुई सर्पिणी के समान है और निरन्तर परिस्फुरित होती रहती है । वह कुण्डली शक्ति जीव की अधिष्ठानभूता है और परमात्मा को धारण करने वाली है । जीव का आश्रय प्राणवायु है और प्राणवायु की आश्रिता नाडियाँ हैं। नाडी में निरन्तर प्रयाण करते रहने के कारण वायु को **प्राण** कहा जाता है ॥ ३६-३७ ॥

प्राणशब्दव्युत्पत्तिः

आधारादुद्गतो वायुर्यथावत् सर्वदेहिनाम् ।
देहं व्याप्य स्वनाडीभिः प्रयाणं कुरुते बहिः ॥ ३८ ॥
द्वादशाङ्गुलमानेन तस्मात् प्राण इतीरितः ।

कथं तस्य नाडीसमाश्रयत्वमित्यत आह आधारादिति । प्रयाणं कुरुते अतएव प्राण इति प्राणशब्दव्युत्पत्तिः दर्शिता । द्वादशाङ्गुलमानेनेति वामदक्षिणयोरिति ज्ञेयम् । एतत्फलमुक्तं तन्त्रान्तरे—

भोजनं मैथुनं युद्धं फलपुष्पग्रहं तथा ।
कुर्यात् क्रूराणि कर्माणि वायौ दक्षिणसंश्रिते ॥
यात्राविवाहकर्माणि शुभकर्माणि यानि च ।
तानि सर्वाणि कुर्वीत वामे वायौ तु संस्थिते ॥

तथा— व्यायामं शयनं क्रूरं षट्कर्मादिकसाधनम् ।
तानि सिध्यन्ति सूर्येण नात्र कार्या विचारणा ॥ इति ।

अन्यत्र— देवदक्षिणभागगेऽथ पुरुषे रोगातुरे दक्षिणे
स्थित्वा पृच्छति पृच्छकः स पुरुषो जीवत्यरोगश्चिरम् ।
वामायां तु रुजाऽऽकुलीकृततनौ वामाश्रिते चेश्वरे
वामे पृच्छति चेत् स्थिता गतगदा वामा चिरं जीवति ॥ इति ।

देवे गते पृच्छति वामभागं स्थित्वा नरो दक्षिणतो यदीह ।
व्यत्यासतोऽस्मादपि कृच्छ्रसाध्यं वदन्ति सन्तः खलु रोगजातम् ॥ इति ।

अथवा आधारात् उद्गतः बहिः प्रयाणं कुरुत इत्यनेन उत्पत्तिलये सन्ध्ये अहोरात्रमित्यादि सर्वमुक्तम् । यदाहुः—

जानीयादुदयं बुधः स्वजङ्गरे देवस्य कन्दे नृणां
घ्राणास्मिमकराङ्गुले खलु लयं सन्ध्ये च पूर्वापरे ।
उत्पत्तिं च लयं च सन्ततमधोवृत्तिं निशां वासरं
ऊर्ध्वां वृत्तिमधस्तथा हिमकरं चोर्ध्वां दिनेशं गतिम् ॥

इति ॥ ३८-३९ ॥

यह वायु आधार स्थान से ऊपर उठकर सभी प्राणियों के शरीर में नाड़ियों द्वारा व्याप्त हो कर बाहर की ओर प्रयाण करता है । इसका आयाम नासिका में वायीं ओर एवं दाहिनी ओर द्वादश अङ्गुल है । नाडियों में प्रयाण के कारण ही इसकी प्राण संज्ञा है ॥ ३८-३९ ॥

विमर्श—नाडियों में प्रवाहित वायु (=प्राण) का ही प्राणायाम द्वारा नियमन (Control) किया जाता है । दक्षिण नासिका से बहने वाली वायु तीक्ष्णता उत्पन्न करती है । अतः भोजन, मैथुन एवं युद्ध, फूल एवं पुष्प का ग्रहण और अन्य क्रूर कर्मों को दक्षिण नासिकागत वायु के समय करना चाहिए । यात्रा तथा विवाह आदि शुभ कर्मों को वामनासिकागत प्राणवायु के समय करना चाहिए । व्यायाम, शयन, क्रूर आदि षट्कर्म सूर्यगत प्राणवायु से सिद्ध होते हैं । वामनासिकागत वायु जिस पुरुष में होती है वह निरोग एवं चिरञ्जीवी होता है ।

रम्ये मृद्वासने शुद्धे पटाजिनकुशोत्तरे ॥ ३९ ॥

भूतोदयज्ञानकथनम्

बद्धैकमासनं योगी योगमार्गपरो भवेत् ।
ज्ञात्वा भूतोदयं देहे विधिवत् प्राणवायुना ॥ ४० ॥
तत्तद्भूतं जपेद्देहदृढत्वाप्तये सुधीः ।
दण्डाकारा गतिर्भूमेः पुटयोरुभयोरधः ॥ ४१ ॥
तोयस्य पावकस्योर्द्धङ्गतिस्तिर्यङ् नभस्वतः ।
गतिर्व्योम्नो भवेन्मध्ये भूतानामुदयः स्मृतः ॥ ४२ ॥

योगप्रकारमाह—रम्य इति । रम्य एकान्ते इत्यर्थः । अन्यथा चित्तविक्षेपः स्यादिति । काठिन्ये सति देहपीडाया तत्रैव मनो गमिष्यतीति मृद्वासन इत्युक्तम् । भूतपरिचर्यार्थमाह दण्डेति ॥ ३९-४२ ॥

अब **योगाभ्यास का प्रकार** कहते हैं—योगी पहले कुशा, उसके ऊपर मृगचर्म, और उसके ऊपर कपड़ा बिछाये गये सुरम्य मृदु आसन पर (पद्मासन या भद्रासन आदि) एक आसन बाँध कर योगमार्ग का साधन करे (अन्यथा कड़े आसन पर देह पीडा होने से मन चञ्चल हो सकता है) ॥ ३९-४० ॥

बुद्धिमान् साधक प्राणवायु के द्वारा क्रमशः पञ्चभूतों के उदय का विधिवत् ज्ञान कर अर्थात् योगारम्भ काल में जिस भूत का उदय हो, उस उस भूत का जप करे जिससे शरीर में दृढ़ता बनी रहे। दोनों नासा पुटों में भूमि की गति दण्डाकार एवं अधोगामिनी होती है, अतः जब ऐसे लक्षण प्रतीत हों तो भूमि रूप भूत का उदय समझना चाहिए ॥ ४१ ॥

जल एवं पावक की गति ऊर्ध्व की ओर होती है, और पवन की गति तिरछी होती है आकाश तत्त्व के उदय काल में मध्य गति होती है- इस प्रकार नासापुटों में चलने वाले वायु से भूतों के उदय का लक्षण जानना चाहिए ॥ ४२॥

धरणेरुदये कुर्यात् स्तम्भनं वश्यमात्मवित्।
शान्तिकं पौष्टिकं कर्म तोयस्य समये वसोः॥ ४३ ॥
मारणादीनि मरुतो विपक्षोच्चाटनादिकम्।
क्षुद्रा(क्ष्वेडा)दिनाशनं शस्तमुदये च विहायसः॥ ४४ ॥

प्रसङ्गतस्तत्तद्भूतोदयमाह धरणेरिति। वसोरग्नेः ॥ ४३-४४ ॥

मन्त्रवेत्ता पुरुष, भूमितत्त्व के उदय में स्तम्भन तथा वश्य कार्य करे। जल तत्त्व के उदय में शान्तिक पौष्टिक कर्म करे। अग्नितत्त्व के उदय में मारणादि क्रिया करे ॥ ४३ ॥

वायु तत्त्व के उदय काल में शत्रु के उच्चाटन की क्रिया करे तथा आकाश तत्त्व के उदय होने पर क्षुद्रा (?) आदि के विनाश की क्रिया करे ॥ ४४ ॥

अङ्गुलीभिर्दृढं बध्वा करणानि समाहितः।
अङ्गुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां विलोचने॥ ४५ ॥
नासारन्ध्रे मध्यमाभ्यामन्याभिर्वदनं दृढम्।
बद्धात्मप्राणमनसामेकत्वं समनुस्मरन् ॥ ४६ ॥
धारयेन्मरुतं सम्यग्योगोऽयं योगिवल्लभः।
नादः सञ्जायते तस्य क्रमादभ्यसतः शनैः॥ ४७ ॥

दशविधनादोत्पत्तिः

मत्तभृङ्गाङ्गनागीतसदृशः प्रथमो ध्वनिः।
वंशिकस्याऽनिलापूर्णवंशध्वनिनिभोऽपरः ॥ ४८ ॥
घण्टारवसमः पश्चात् घनमेघस्वनोपमः।
एवमभ्यसतः पुंसः संसारध्वान्तनाशनम् ॥ ४९ ॥
ज्ञानमुत्पद्यते पूर्वं हंसलक्षणमव्ययम्।

बद्धेति। अन्यथा यदि इन्द्रियमार्गेण हठात् वायुः निर्गच्छेत् तदुपघातः स्यात्। करणानि इन्द्रियाणि। उभे इति त्रिषु अन्वेति। घनो निविडो मेघस्वनवत्

स्वनो यस्य इति मध्यपदलोपी समासः । एवमित्यनेनाऽन्वेति । ध्वनिदशकमाहुः— चिणीति प्रथमः शब्दश्चिञ्चिणीति द्वितीयकः ।

चिचिचाकी तृतीयस्तु चतुर्थो घर्घरः स्वरः ॥
पञ्चमस्तु मनागुच्चः षष्ठो मदकलध्वनिः ।
सप्तमः सूक्ष्मनादः स्यादष्टमो वेणुवर्द्धनः ॥
नवमो मधुरध्वानो दशमो दुन्दुभिस्वनः ॥ इति ।

हंसोपनिषद्यपि—अथ दशकोषो नादमनुभवति । हंसवशात् नादो दशविधो जायते । चिणीति प्रथमः । चिणिचिणीति द्वितीयकः । घण्टानादस्तृतीयकः । शङ्खनादस्तुर्यः । पञ्चमस्तन्त्रीनादः । षष्ठस्तालनादः । सप्तमो वेणुनादः । अष्टमो भेरीनादः । नवमो मृदङ्गनादः । दशमो मेघनादः । नवमं परित्यज्य दशममभ्यसेत् । अस्मात् मनो विलीयते । विलीने मनसि गते सङ्कल्पविकल्पे दग्धे पुण्यपापे सदाशिवोमिति । सदाशिवः शक्त्यात्मा सर्वत्रावस्थिता स्वयं ज्योतिः शुद्धो बुद्धो नित्यो निरञ्जनः शान्तः प्रकाशत इति । हंसलक्षणं शिवशक्त्यात्मकं जीवात्मकं वा ।

प्रयोगसारे तु— कम्परोमोद्गमानन्दं वैमल्यस्थैर्यलाघवम् ।
प्रकाशज्ञानवैदूष्यं भावोऽद्वैतात्मसञ्चयः ॥
सम्भवन्ति दशाऽवस्था योगिनः सिद्धिसूचकाः ।
ततस्त्रैकाल्यविज्ञानं महाप्रज्ञा मनोज्ञता ॥
छन्दतः प्राणसंरोधो नाडीनां क्रमणं तथा ।
वाचां सिद्धिश्चिरायुष्यमिन्द्रजालानुवर्त्तनम् ॥
देहाद्देहान्तरप्राप्तिरात्मज्योतिः प्रकाशनम् ।
प्रत्यया दश दृश्यते प्राप्तयोगस्य योगिनः ॥ इति ॥ ४५-५० ॥

योगारम्भ के समय साधक समस्त ज्ञानेन्द्रियों को इस प्रकार बाँधे—दोनों अंगूठों से दोनों कान बन्द करे । दोनों तर्जनी से दोनों नेत्र बन्द करे ॥ ४५ ॥

दोनों मध्यमा से दोनों नासा छिद्रों को, तथा शेष अन्य अङ्गुलियों से मुख को अच्छी प्रकार बन्द कर लेवे । इस प्रकार समस्त ज्ञानेन्द्रियों को बाँधकर आत्मा प्राण एवं मन में एकत्व की भावना का स्मरण करते हुये, वायु को भीतर रोक रखे । यह योग योगियों को अत्यन्त प्रिय है । इस प्रकार के योग का क्रमशः अभ्यास करते रहने से नाद का श्रवण होने लगता है ॥ ४६-४७ ॥

मतवाली भ्रमरी के गीत के समान प्रथम ध्वनि, बाँस के छिद्रों में वायु के भर जाने पर जिस प्रकार बाँस से ध्वनि निकलती है उस प्रकार की ध्वनि दूसरी प्रकार की ध्वनि है जो योगी को सुनाई देती है ॥ ४८ ॥

इसके बाद घण्टा के समान तीसरी ध्वनि, पश्चात् मेघ शब्द के समान चौथी ध्वनि सुनाई पड़ती हैं । जब अभ्यास करते करते इस प्रकार के शब्द सुनाई पड़ने लगें तो समझना चाहिए कि अब सांसारिक अँधेरा क्रमशः विनष्ट हो रहा है । सांसारिक अज्ञान के नष्ट हो जाने पर निर्विकार हंस लक्षण ज्ञान उत्पन्न होता है ॥ ४९-५० ॥

विमर्श—हंस लक्षण अर्थात् शिवशक्त्यात्मक या जीवात्मक ज्ञान । हंसोपनिषद् में नाद के दस प्रकार के नाम इस प्रकार आए हैं—१. चिणि, २. चिणिचिणि, ३. घण्टानाद, ४. शङ्खनाद, ५. तन्त्रीनाद, ६. तालनाद, ७. वेणुनाद, ८. भेरीनाद, ९. मृदङ्गनाद, १०. मेघनाद । प्रयोगसार में योगियों की सिद्धिसूचक ये दस अवस्थाएँ बताई गई हैं—कम्प, रोमोदगम, आनन्द, विमलत्व, स्थिरता, लाघव, प्रकाश, ज्ञान, वैदुष्य और अद्वैतात्मसञ्चय का भाव ।

प्रणवोत्पत्तिः

पुंप्रकृत्यात्मकौ प्रोक्तौ बिन्दुसर्गौ मनीषिभिः ॥ ५० ॥
ताभ्यां क्रमात्समुद्भूतौ बिन्दुसर्गावसानकौ ।
हंसौ तौ पुंप्रकृत्याख्यौ हं पुमान् प्रकृतिस्तु सः ॥ ५१ ॥
अजपा कथिता ताभ्यां जीवोऽयमुपतिष्ठति ।
पुरुषं स्वाश्रयं मत्वा प्रकृतिर्नित्यमास्थिता ॥ ५२ ॥
यदा तद्भावमाप्नोति तदा सोऽहमयं भवेत् ।
सकारार्णं हकारार्णं लोपयित्वा ततः परम् ।
सन्धिं कुर्यात् पूर्वरूपस्तदाऽसौ प्रणवो भवेत् ॥ ५३ ॥

प्रणवोत्पत्तिमाह—पुमिति । क्रमादिति बिन्दोः हं विसर्गात् सः । पुं प्रकृत्याख्यौ इति नाम काल्पनिकम् । तत्त्वतः बिन्दुविसर्गाविव । हं पुमानिति । अतएव अत्र आदौ अकारे निपाते योजिते अहमिति लोकप्रसिद्ध आत्माभिनयः । उपतिष्ठति आराधयति । पुरुषं स्वाश्रयं मत्वा नित्यं तमेव अस्थिता प्रकृतिरिति सम्बन्धः । यदा तु प्रकृतेर्नित्यमात्मन इति पाठः तदा आत्मनः प्रकृतेरिति समानाधिकरणे षष्ठ्यौ । प्रकृतिरविद्या सा ब्रह्मभिन्नत्वेन जीवकल्पकत्वात् तदभिन्नेव स्वाश्रयं सदाश्रयं गत्वा इयं यदा तद्भावमाप्नोतीति सम्बन्धः । तद्भावमिति । प्रकृतिपुरुषयोरभेदात् परमात्मैवाऽहम् इति जीवब्रह्मणोरैक्यम् । अस्यार्थः । अजपाख्यासाच्चैवमैक्यमुदेतीति व्यक्तीकृतम् । लोपयित्वेति । व्यञ्जनयोः कल्पितत्वादेव लोपः। पूर्वरूपं 'एङः पदान्तादति' इत्यनेन ॥ ५०-५३ ॥

अब जिस प्रकार यह ज्ञान उत्पन्न होता है उसे कहते हैं—मनीषियों ने बिन्दु (अनुस्वार) तथा विसर्ग को पुरुष प्रकृत्यात्मक कहा है ॥ ५० ॥

उनसे क्रमशः बिन्दु (अनुस्वारात्मक हं) तथा विसर्गान्तात्मक (सः) इस प्रकार हंसौ दो पुरुष प्रकृत्यात्मक वर्ण उत्पन्न हुये, जिसमें हँ पुरुष है, और सः प्रकृति है ॥ ५१ ॥

इन्हीं दोनों को अजपा कहते हैं, जिसे जीव नित्य जपता रहता है । प्रकृति पुरुष को अपना आश्रय मानकर निरन्तर उसी के आश्रित रहा करती है । जब प्रकृति पुरुष में अभिन्न होकर एक में मिल जाती है तब जीव और ब्रह्म का ऐक्यभाव हो जाता है और फिर जीव को 'सोऽहम्' की प्रतीति होने लगती है ॥ ५२-५३ ॥

अब **'सोऽहम्' रूप प्रणव की उत्पत्ति** कहते है—'हँ' पुरुष के पहले अकार का निपातन कर देने से 'अहम्' होता है जब सः रूप प्रकृति उससे मिलने (सन्धि करने) जाती है तब दोनों (सः और अहम्) के बीच अकार एङः पदान्तादति से पूर्वरूप होकर लुप्त हो जाता है इस प्रकार सोऽहम् रूप प्रणव की उत्पत्ति होती है ॥ ५३ ॥

परानन्दमयं नित्यञ्चैतन्यैकगुणात्मकम् ।
आत्माभेदस्थितं योगी प्रणवं भावयेत्सदा ॥ ५४ ॥

परानन्दमयमिति । 'आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितम्' इति श्रुतेः । नित्यं वक्ष्यमाणश्रुतेरेव । चैतन्यं ज्ञानं स चासावेको गुणश्च तदात्मकम् । 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः । यद्वा चैतन्यं ज्ञानरूपमेकम् । 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतेः । संसारोत्पत्तिकर्तृत्वात् कल्पितसत्त्वरजस्तमोगुणरूपम् । आत्माभेदस्थितं सोऽहंशब्दोत्थतया तस्य च तदर्थकत्वात् ॥ ५४ ॥

यह प्रणव परानन्दमय है, नित्य ज्ञान स्वरूप है, अविक्रिय एवं एकरस हैं और आत्मा से अभिन्न होकर स्थित रहता है । अतः योगी जन इस (सोऽहम्) का सर्वदा ध्यान कीजिए ॥ ५४ ॥

आम्नायवाचामतिदूरमाद्यं वेद्यं स्वसंवेद्यगुणेन सन्तः ।
आत्मानमानन्दरसैकसिन्धुं पश्यन्ति तारात्मकमात्मनिष्ठाः ॥ ५५ ॥

आम्नायेति । 'यतो वाचो निवर्त्तन्ते' इति श्रुतेः । आद्यम् । शास्त्रयोनित्वात् । स्वसंवेद्यगुणेन वेद्यं स्वप्रकाशमित्यर्थः । आनन्दमिति । 'आनन्दं ब्रह्मणो रूपम्' इति श्रुतेः । तारात्मकमुक्तरीत्या । आत्मनिष्ठा आदरनैरन्तर्यदीर्घकालाभ्यासैस्तच्चिन्तनपरा योगिनः ॥ ५५ ॥

यह आम्नाय रूप वाणी से नहीं जाना जा सकता, समस्त शास्त्रों का कारण होने से आद्य है तथा स्वयं अपने ही प्रकाश से प्रकाशित है । आदरपूर्वक निरन्तर दीर्घकाल पर्यन्त अभ्यास में लगे हुये योगी जन आत्मस्वरूप आनन्द रस के एक मात्र समुद्र इस प्रणवात्मक का दर्शन करते हैं ॥ ५५ ॥

सत्यं हेतुविवर्जितं श्रुतिगिरामाद्यं जगत्कारणं
व्याप्तस्थावर जङ्गमं निरुपमं चैतन्यमन्तर्गतम् ।
आत्मानं रविवह्निचन्द्रवपुषं तारात्मकं सन्ततं
नित्यानन्दगुणालयं सुकृतिनः पश्यन्ति रुद्धेन्द्रियाः ॥ ५६ ॥

सत्यम् । 'सत्यं ज्ञानम्' इति श्रुतेः । हेतुविवर्जितम् । नित्यत्वात् अनुत्पाद्यम् । यद्वा ये हेतवो दुस्तर्कास्तद्विवर्जितम् । श्रुतिगिरामाद्यम् । 'शास्त्रयोनित्वात्' इति सूत्रे वेदकर्तृत्वोक्तेः । प्रणवात्मकत्वाद्वा । जगत्कारणम् । 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इति श्रुतेः । व्याप्तेति । तद्विवर्त्तरूपत्वात् जगतः । निरूपममिति ।

अद्वितीयत्वेन । चैतन्यमन्तर्गतम् । प्रत्यक्चैतन्यम् आत्मरूपचैतन्यमित्यर्थः । रविचन्द्रवह्निवपुरिव वपुर्यस्य । प्रकाशरूपमित्यर्थः । न तु तद्वदाकारग्राहित्वे अयं दृष्टान्तः । तस्य निराकारत्वात् प्रणवरूपत्वात् वा तद्वदुक्तिः ॥ ५६ ॥

यह सत्य हैं नित्य होने से इसका कोई कारण नहीं है, यह श्रुति का भी आदि हैं, इसी से संसार उत्पन्न होता है, स्थावर एवं जङ्गम में सर्वत्र व्याप्त है, इसकी किसी से उपमा नहीं दी जा सकती, अतः अद्वितीय है। आत्मरूप चैतन्य से अन्तःकरण में स्थित है, सूर्य चन्द्र एवं अग्नि के समान स्वयं प्रकाशित हैं यह तारात्मक एवं शाश्वत है, नित्यानन्द स्वरूप है गुण का आलय है, इन्द्रियों को वश में करने वाले पुण्यात्मा योगीन्द्रगण ही इसका दर्शन करते हैं ॥ ५६ ॥

तारस्य सप्तविभवैः परिचीयमानं
मानैरगम्यमनिशं श्रुतिमौलिमृग्यम् ।
संवित्समस्तगमनश्वरमच्युतं तत्
तेजः परं भजत सान्द्रसुधाम्बुराशिम् ॥ ५७ ॥

तारस्येति । अकारोकारमकारबिन्दुनादशक्तिशान्ताख्यैः परिचीयमानं तद्बुच्यमानम् । तदेवाह मानैरगम्यमिति । श्रुतिमौलिरुपनिषत् तन्मृग्यम् । सत्तात्मकमस्ति इति भानात् । संवित् प्रकाशम् । 'सद्धीदं सर्वं सत् सत्' इति 'चिद्धीदं सर्वं प्रकाशते' इति श्रुतेः । समस्तगं व्यापकम् । अनश्वरम् अविश्वंसि । अच्युतमेकरूपत्वात् । वाक्यान्तरोपदेशात् श्लोकत्रयस्थानां पदानां परस्परं न पौनरुक्त्यम् ॥ ५७ ॥

प्रणव के अकार उकार मकार, बिन्दु, नाद, शक्ति एवं शान्त इन सात भेदों से इसका संकेत प्राप्त होता है, यह किसी भी प्रकार के प्रमाण से परे है, निरन्तर उपनिषदों के अभ्यास से यह मृग्य है संवित् (प्रकाश) स्वरूप है, सब में व्याप्त है, अविनाशी हैं और अच्युत है। अतः हे योगिजनों आप इस प्रकार घने अमृत समुद्र स्वरूप, इस परतेज का भजन कीजिए ॥ ५७ ॥

हिरणमयं दीप्तमनेकवर्णं
त्रिमूर्त्तिमूलं निगमादिबीजम् ।
अङ्गुष्ठमात्रं पुरुषं भजन्ते
चैतन्यमात्रं रविमण्डलस्थम् ॥ ५८ ॥

सगुणब्रह्मोपास्तिरपि सगुणब्रह्म (हिरण्यगर्भ) लोकप्राप्तिद्वारा मुक्तेः क्रमात् कारणमिति शास्त्रोक्तेः निर्गुणब्रह्मोपास्तौ असमर्थानां सगुणब्रह्मोपास्तिमाह— हिरणमयमिति । त्रिमूर्त्तिमूलमित्यनेन अस्याऽभ्यसनीयानि नामानि सूचितानि ।

यदाहुः—ब्रह्मा विष्णुश्च रुद्रश्च ॐकारः प्रलयस्तथा । सर्वव्यापी ह्यनन्तश्च तारः सूक्ष्मश्च शुक्लकः ॥ वैद्युतश्च परं ब्रह्म एकश्चाऽप्येकरुद्रकः । ईशानो भगवांश्चैव ततः स्यात्तु महेश्वरः ॥ महादेवः सदापूर्वः शिवः सर्वादयस्त्रयः । रक्षिताव-

गतश्चैव तथा प्रियतमः स्मृतः ॥ नित्यतृप्तश्च सर्वाद्या षोडशान्तः प्रकीर्त्तिताः । आद्यश्चावगमः कान्त प्रदिष्टश्रोतृस्वामिनौ ॥ समर्थो यावकश्चैव क्रियेच्छादीप्त एव च । अवाप्तालिङ्गितौ चैद हिंसको दाहकस्तथा ॥ भाववृद्धौ गुणं बीजं ध्रुवो वेदादिरादियुक् । उमध्यो मपरश्चैव त्रिमात्रो योनिरेव च ॥ देहाश्रयश्च संवादात्मानौ सर्वादिकास्त्रयः ॥ इति ॥ ५८ ॥

अब निर्गुण ब्रह्म स्वरूप की प्राप्ति में असमर्थ लोगों के लिये इसके सगुण स्वरूप का वर्णन करते हैं—यह हिरण्मय है स्वयं प्रकाशित है इसके अनेक वर्ण हैं, यह त्रिमूर्त्ति (ब्रह्मा, विष्णु एवं शिव इन तीन मूर्त्तियों) का मूल कारण है-निगम का बीज है, अङ्गुष्ठ मात्र पुरुष स्वरूप है, सूर्यमण्डल में रहने वाले चैतन्य स्वरूप उस परमात्मा का योगी जन ध्यान करते हैं ॥ ५८ ॥

ध्यायन्ति दुग्धाब्धिभुजङ्गभोगे
शयानमाद्यं कमलासहायम् ।
प्रफुल्लनेत्राम्बुजमञ्जनाभं
चतुर्मुखेनाश्रि(श्रि)तनाभिपद्मम् ॥ ५९ ॥
आम्नायगं द्विवरणं घननीलमुद्य-
च्छ्रीवत्सकौस्तुभगदाम्बुजशङ्खचक्रम् ।
हृत्पुण्डरीकनिलयं जगदेकमूल-
मालोकयन्ति कृतिनः पुरुषं पुराणम् ॥ ६० ॥

क्रममुक्त्यर्थमन्यां साकारोपास्तिमाह—ध्यायन्तीति श्लोकद्वयेन । आम्नाया वेदास्तद्ग्रथितस्रष्टं (सुष्टु ?) वचनं यस्य ॥ ५९-६० ॥

क्षीर समुद्र में शेष शय्या पर सोये हुये, आद्य, कमला से सुसेवित फूले हुये कमलों के समान नेत्र वाले, अञ्जन के समान शरीर की कान्ति से युक्त, एवं नाभिनिर्गत पद्म से ब्रह्म देव को उत्पन्न करने वाले ऐसे परमात्मा का योगी जन ध्यान करते हैं ॥ ५९ ॥

श्रुतियों में व्याप्त, पृथ्वी तथा लक्ष्मी से आवृत, घन के समान नीले, श्रीवत्स, कौस्तुभ, गदा, पद्म, शङ्ख तथा चक्र धारण करने वाले, हृदय रूपी पुण्डरीक में निवास करने वाले तथा संसार के मूलभूत ऐसे पुराण पुरुष का सुकृती लोग दर्शन करते हैं ॥ ६० ॥

बिन्दोर्नादसमुद्भवः समुदिते नादे जगत्कारणं
तारं तत्त्वमुखाम्बुजं परिवृतं वर्णात्मकैर्भूतजैः ।
आम्नायाङ्घ्रिचतुष्टयं(मुखं)पुररिपोरानन्दमूलं वपुः
पायाद् वो मुकुटेन्दुखण्डविगलद्दिव्यामृतौघप्लुतम् ॥ ६१॥

क्रममुक्त्यर्थमन्यसाकारध्यानयोगमाह—बिन्दोरिति । बिन्दुः शिवात्मा ॐकारस्य शिरोरूपः । तत्त्वमुखाम्बुजं चतुर्विंशतितत्त्वमयमुखकमलम् ॥ ६१ ॥

अब अन्य साकार रूप का वर्णन करते हैं—बिन्दुरूप शिवात्मा से नाद उत्पन्न हुआ, पुनः नाद के उत्पन्न होने पर जगत के कारण भूत शिव हुये प्रणव जिसका शिर हैः २५ तत्त्व जिनके मुख हैं, जो पञ्चमहाभूत जन्य वर्णों से परिवृत हैं, चारों वेद जिनके अङ्घ्रिचतुष्टय है, जिनका शरीर मुकुट में रहने वाले इन्द्र खण्ड से गिरते हुये अमृत समूह से परिप्लुत है ऐसे सदाशिव का आनन्दमूल भूत शरीर आप योगी लोगों की रक्षा करे ॥ ६१ ॥

पिण्डं भवेत् कुण्डलिनी शिवात्मा
पदं तु हंसः सकलान्तरात्मा ।
रूपं भवेद्बिन्दुरनन्त(मन्द) कान्ति
रतीतरूपं शिवसामरस्यम् ॥ ६२ ॥

सबीजयोगमाह—पिण्डमिति । अकारोकारमकारात्मकत्वात् पिण्डं प्रणवः । कुण्डलिनी तद्रूपा सैव शिवात्मा सकलान्तरात्मा हंसः । तस्याः पदं स्थानम् । अनयोरनन्तकान्तिः बिन्दुरूपम् । परमार्थतस्तु शिवयोः सामरस्यमतीतरूपं नीरूपमेव। यद्वा अतीतेति अतिपूर्वस्येणो लोट्मध्यमपुरुषबहुवचनम् । हे लोकाः यूयं सर्वं जगदतिक्रम्यैवं ध्यानात् शिवसामरस्यरूपमतीत आतियात गच्छतेत्यर्थः ॥ ६२ ॥

अकार, उकार तथा मकार रूप होने से पिण्ड अर्थात् (प्रणव) सकलान्तरात्मा कुण्डलिनी हैं । शिवात्मा, सकलान्तरात्मा शिव उसके स्थान हैं, उन दोनों का मिला हुआ स्वरूप बिन्दु है जो अनन्त कान्ति संपन्न हैं अतः हे योगियों आप लोग शिव शक्त्यात्मक उस बिन्दु रूप को प्राप्त कीजिए ॥ ६२ ॥

पिण्डादियोगं शिवसामरस्यात्
सबीजयोगं प्रवदन्ति सन्तः ।
शिवे लयं नित्यगुणाभियुक्ते
निर्बीजयोगं फलनिर्व्यपेक्षम् ॥ ६३ ॥

अनेन सायुज्यमुक्तिर्भवतीत्याह—पिण्डादीति । सारूप्यमुक्तिमाह—शिव इति ॥६३॥

शिव के सामरस्य से पिण्डादियोग को सन्त लोग सबीज योग कहते हैं । इस प्रकार सगुण शिव में लीन होने से सायुज्य मुक्ति प्राप्त होती है । निर्बीज योग का फल निराकार शिव में लीन होना कहा गया है, जो सब प्रकार के अपेक्षाओं से रहित है ॥ ६३ ॥

कुण्डलिनीध्यानम्

मूलोन्निद्रभुजङ्गराज महिषीं यान्तीं सुषुम्णान्तरं
भित्वाऽऽधारसमूहमाशु विलसत्सौदामिनी सन्निभाम् ।

व्योमाम्भोजगतेन्दु मण्डलगलद्दिव्यामृतौघप्लुतं(घैः पतिं)
सम्भाव्य स्वगृहं गतां पुनरिमां सञ्चिन्तयेत् कुण्डलीम् ॥ ६४ ॥

सम्प्रति आत्मानुभवैकगम्यकुण्डलिनीचिन्तनरूपं राजयोगादिप्रकारमाह मूलेति। मूलात् मूलाधारात् । उन्निद्रा जाग्रद्रूपा । कुण्डल्या सर्पाकारत्वात् भुजङ्गराजमहिषी-व्यपदेशः । सुषुम्णान्तरमाशु यान्तीम् । आधारसमूहं स्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञारूपम् । व्योमाम्भोजेति । सहस्रदलपतिं शिवम् । स्वगृहं मूलाधारम् ॥ ६४ ॥

मूलाधार से उठी हुई जाग्रत्स्वरूपा जो कुण्डलिनी चमकती हुई बिजली के समान सुषुम्णा के भीतर से जाती हुई समस्त षट्चक्र रूप आधारों का भेदन कर ब्रह्मरन्ध्र में रहने वाले चन्द्रमण्डल से गिरते हुये अमृत समूहों से शिवस्वरूप पति की पूजा कर पुनः अपने स्थान को लौटी आ रही हैं इस प्रकार के कुण्डलिनी का योगी लोग चिन्तन करें ॥ ६४ ॥

हंसं नित्यमनन्तमव्ययगुणं स्वाधारतो निर्गता
शक्तिः कुण्डलिनी समस्तजननी हस्ते गृहीत्वा च तम् ।
याता शम्भुनिकेतनं परसुखं तेनाऽनुभूय स्वयं
यान्ती स्वाश्रयमर्ककोटिरुचिरा ध्येया जगन्मोहिनी ॥ ६५ ॥

तं जीवं जप्यमानं हंसं हस्ते गृहीत्वेति सम्बन्धः । यथा च जीवो जपति तथा हंसमन्त्रप्रस्ताव एव उक्तम् । स्वाश्रयं मूलाधारम् । पूर्वश्लोकाद्धंसं गृहीत्वा यातेति विशेषः ॥ ६५ ॥

समस्त जगज्जननी स्वरूपा जो कुण्डलिनी अपने मूल आधार से निकल कर हंस का जप करते हुये जीव को अपने हाथ में लेकर शम्भुनिकेतन (परब्रह्म शिव जो सहस्रार कमल में स्थित है वहाँ) तक जाती है । पुनः उनके साथ परमानन्द का अनुभव कर स्वाश्रय मूलाधार में प्रविष्ट हो जाती है, ऐसी जगन्मोहिनी, करोड़ों सूर्यों के समान भास्वती भगवती कुण्डलिनी का ध्यान योगिजनों को करना चाहिए ॥ ६५ ॥

अव्यक्तं परबिन्दुमञ्चितरुचिं नीत्वा शिवस्यालयं
शक्तिः कुण्डलिनी गुणत्रयवपुर्विद्युल्लतासन्निभा ।
आनन्दामृतमध्यगं पुरमिदं चन्द्रार्ककोटिप्रभं
संवीक्ष्य स्वपुरं गता भगवती ध्येया न वेद्या गुणैः ॥ ६६ ॥

अव्यक्तं परबिन्दुं नीत्वेति । पूर्वतो विशेषः । स्वपुरं मूलाधारम् ॥ ६६ ॥

सुन्दर कान्ति वाले अव्यक्त पर बिन्दु को साथ लेकर त्रिगुणात्मक शरीर वाली बिजली के समान जगमगाती हुई जो कुण्डलिनी शक्ति, शिव के निवासभूत, आनन्दामृत के मध्य में रहने वाले पुर को, जो करोड़ों चन्द्रमा के समान भासित हो रहा है, उसे देखकर पुनः अपने पुर को लौट आती है योगिजन ऐसी भगवती का ध्यान करें जो गुणों से वेद्य नहीं है ॥ ६६ ॥

मध्ये वर्त्म समीरणद्वयमिथः सङ्घट्टसंक्षोभजं
शब्दस्तोममतीत्य तेजसि तडित्कोटिप्रभाभासुरे।
उद्यन्तीं समुपास्महे नवजवासिन्दूरसन्ध्यारुणां
सान्द्रानन्दसुधामयीं परशिवं प्राप्तां परां देवताम्॥ ६७ ॥

समीरणद्वयेति । अपानवायुनिरोधात् प्राणवायुनिरोधाच्चोर्ध्वाधोगतयोस्तयो-मिथः सङ्घट्ट इत्यर्थः । अत्र प्राणापानसङ्घट्टजशब्दातिक्रमणमेव विशेषः, आरक्त-ध्यानञ्च । तदुक्तम्—श्वेतध्याने वाग्विलास आरक्ते वश्यता भवेत् । इति ।

अन्यत्रापि—ध्यायेद्वश्याकर्षणे तां जपाभां श्वेतां शान्तौ स्तम्भने पीतवर्णाम् ।
श्यामां मुक्तौ मारणे कृष्णवर्णां धूम्राभासां द्वेषणोच्चाटने च ॥

इत्याद्यानुषङ्गिकं फलमपि ज्ञेयम् ॥ ६७ ॥

जो अपने बीच मार्ग में प्राण एवं अपान वायु के सङ्घर्षण से उत्पन्न शब्द समूहों को लाँघकर करोडों बिजली की कान्ति के समान प्रकाश समूह में उदय हो रही हैं ऐसी नवीन खिले हुये जपाकुसुम के समान (रक्त) वर्ण वाली अथवा सिन्दूर के समान अथवा सन्ध्या के समान वर्ण वाली भगवती कुण्डलिनी की मैं उपासना करता हूँ, जो घने आनन्द रूप सुधा स्वरूपा है और पर शिव को प्राप्त करने वाली पर देवता हैं ॥ ६७ ॥

गमनागमनेषु जा(ला)ङ्घिकी सा
तनुयाद्योगफलानि कुण्डली ।
मुदिता कुलकामधेनुरेषा
भजतां काङ्क्षितकल्पवल्लरी ॥ ६८ ॥

गमनेति । अत्र गमनागमनेषु जाङ्घिकीति विशेषः ॥ ६८ ॥

जो गमन एवं आगमन में अत्यन्त त्वरित गति से चलने के कारण बलवान् जङ्घों वाली हैं ऐसी यह कुण्डलिनी योगिजनों को योग फल प्रदान करें । जो प्रसन्न होने पर कौल मार्ग वालों को कामधेनु के समान फल देती हैं और भजन करने वालों के लिये तो साक्षात् कल्पलता ही हैं ॥ ६८ ॥

आधारस्थितशक्तिबिन्दुनिलयां नीवारशूकोपमां
नित्यानन्दमयीं गलत्परसुधावर्षैः प्रबोधप्रदैः।
सिक्त्वा षट् सरसीरुहाणि विधिवत् कोदण्डमध्योदितां
ध्यायेद्भास्वर बन्धुजीवरुचिरां संचि(वि)न्मयीं देवताम् ॥६९॥

आधारेति । आधारो मूलाधारचक्रम् । तत्र स्थिता या शक्तिः त्रिकोणं तस्या मध्यस्थानं बिन्दुः तन्निलयाम् । यद्वा आधारस्थिता या शक्तिः त्रिकोणं अथ च तत्रस्थं कामबीजं तदपि शक्तिबीजमेव । तस्य शिरसि यो बिन्दुः तन्निलयामित्यर्थः ।

यदाहुः—तडित्कोटिप्रख्यं स्वरुचिजितकालानलरुचिं

सहस्रादित्यांशुप्रकरसदृशोद्योतकलितम् ।
स्फुरन्तं योन्यन्तः स्फुटदरुणबन्धूककुसुम
प्रभं कामं ध्यायेद्वुचिरशशभृत्कोटिशिरसम् ॥
तस्योर्ध्वेऽग्निशिखा चिरद्युतिलतापुञ्जप्रभाभासुरा
सूक्ष्मा ब्रह्मपथान्तराम्बरगता चैतन्यमात्रा कला ॥ इति ।

कोदण्डमध्यं भ्रूमध्यम् आज्ञाचक्रम् । तत्रोदिता । अत्रायमेव विशेषः ॥ ६९॥

जो मूलाधार स्थित त्रिकोण रूप शक्ति के मध्य में रहने वाले बिन्दु में निवास करती हैं नीवार के अग्रभाग के समान अत्यन्त सूक्ष्म हैं, नित्यानन्दमयी हैं ज्ञान देने वाले गिरते हुये परसुधा की वर्षा से कमल युक्त षट् चक्रों को विधिपूर्वक सींचती हुई भ्रूमध्य में स्थित आज्ञा चक्र में उदित होती हैं ऐसी उद्दीप्त बन्धुजीव के समान रुधिर वर्ण वाली मोक्ष तथा ज्ञान प्रदात्री परदेवता का योगीजनों को ध्यान करना चाहिए ॥ ६९ ॥

हृत्पङ्केरुहभानु विम्बनिलयां विद्युल्लतामत्सरां
बालार्कारुणतेजसा भगवतीं निर्भर्त्सयन्तीं तमः ।
नादाख्यं पदमर्द्धचन्द्रकुटिलं संविन्मयं शाश्वतं
यान्तीमक्षररूपिणीं विमलधीर्ध्यायेद् विभुं तेजसाम् ॥ ७० ॥

मत्सरशब्दः सदृशार्थः । बालार्कारुणतेजसा तमो निर्भर्त्सयन्तीमिति सम्बन्धः। अत्र हृदयादेव नाथं प्रति गमनं वर्णमयध्यानमिति विशेषः । एतच्च प्रतिचक्रं भिन्नाः कुण्डल्य इति मते तैः कुण्डलिनीषट्कस्य स्वीकृतत्वात् ॥ ७० ॥

हृदय में स्थित कमल के भीतर निवास करने वाली, विद्युल्लता को भी अपनी प्रभा से नीचा दिखाने वाली, प्रातःकालीन उदय होते हुये सूर्य के समान अपने तेज से समस्त अन्धकार को दूर करने वाली, जो अक्षरस्वरूपा कुण्डलिनी अर्द्ध-चन्द्र के समान टेढ़े ज्ञानमय शाश्वतनाद नामक पद की ओर निरन्तर गमन करती हैं, विमल बोध वाला योगी इस प्रकार के तेजों के प्रभु का ध्यान करे ॥ ७० ॥

भाले पूर्णनिशापतिप्रतिजटां नीहारहारत्विषा
सिञ्चन्तीममृतेन देवममितेनानन्दयन्तीं तनुम् ।
वर्णानां जननीं तदीयवपुषा संप्राप्य विश्वं स्थितां
ध्यायेत् सम्यगनाकुलेन मनसा संवि(चि)न्मयीमम्बिकाम् ॥७१॥

भाल इति । अत्राज्ञायां शिवेन सङ्गः वर्णोत्पादकत्वञ्च विशेषः । तदुक्तम्—

स्वयम्भुलिङ्गं निजयोनिमध्यरन्ध्रान्तरे हृत्सरसीरुहान्तः ।
बाणाह्वयं चेतरमन्तराले वदन्ति सन्तो गगनाम्बुजेऽन्यः ॥ इति ॥ ७१ ॥

जो नीहार के हार के समान कान्ति वाले अपने अनन्त अमृत समूहों से सदाशिव के शरीर में आनन्द उत्पन्न करती हुई आज्ञा चक्र में उनके शिरःस्थ

जटाओं को सींच रही हैं, जो समस्त वर्णों की जननी हैं तथा जो शिव से संयुक्त होकर अपने शिव शक्त्यात्मक रूप से जगत् में व्याप्त हो कर स्थित हैं, ऐसी मोक्ष तथा ज्ञान स्वरूपा अम्बिका का योगीजन ध्यान करें ॥ ७१ ॥

मूले भाले हृदि च विलसद्वर्णरूपा सवित्री
पीनोत्तुङ्गस्तनभरनम(लस)न्मध्यदेशा महेशी ।
चक्रे चक्रे गलितसुधया सिक्तगात्रा प्रकामं
दद्यादाद्या श्रियमविकलां वाङ्मयी देवता वः ॥ ७२ ॥

स्थानत्रयेऽपि शिवसङ्गमाह—मूल इति । मूलाधारादाज्ञापर्यन्तं गत्वा ततो निवृत्तिर्विशेषः ॥ ७२ ॥

जो मूलाधार, भाल, आज्ञा तथा हृदय, इन तीन स्थानों में शिव से संयुक्त होती है और वर्णरूपा एवं जगत्प्रसू हैं, पीन एवं उत्तुङ्ग स्तन के भार से जिन महेश्वरी का मध्यभाग नीचे की ओर झुक गया है, जिनका शरीर प्रत्येक चक्रों से गिरती हुयी सुधा से निरन्तर सिञ्चित हो रहा हैं, ऐसी आद्या वाङ्मयी देवता आप योगीजन को स्थिर लक्ष्मी प्रदान करे ॥ ७२ ॥

कुण्डलिनीस्तुतिः

निजभवन निवासादुच्चरन्ती विलासैः
पथि पथि कमलानां चारुहासं विधाय ।
तरुणतरणिकान्तिः कुण्डली देवता सा
शिवसदनसुधाभिर्दीपयेदात्मतेजः ॥ ७३ ॥
आधारबन्धप्रमुखक्रियाभिः
समुत्थिता कुण्डलिनी सुधाभिः ।
त्रिधामबीजं शिवमर्चयन्ती
शिवाङ्गना वः शिवमातनोतु ॥ ७४ ॥
सिन्दूरपुञ्जनिभमिन्दुकलावतंस-
मानन्दपूर्ण नयनत्रयशोभिवक्त्रम् ।
आपीनतुङ्गकुचनम्रमनङ्गतन्त्रं
शम्भोः कलत्रममितां श्रियमातनोतु ॥ ७५ ॥

इतः परं वासनादार्ढ्याय कुण्डलिनीध्यानविशेषान् वदन् स्तुतिमाह—निजभवनेत्यादिना । अपानवायुसंकोचादाधारबन्धः । एवं प्राणवायुनिरोधेऽपि प्रमुखशब्दवाच्यः । अनङ्गतन्त्रम् अनङ्गप्रधानम् ॥ ७३-७५ ॥

अब वासना की दृढ़ता के लिये कुण्डलिनी का ध्यान कहते हैं—जो अपने निवास भूत भवन (मूलाधार) से विलास पूर्वक चलती हुई, अपने मार्ग (षट्चक्रों) में रहने वाले समस्त कमल समूहों को विकसित करती हुई ब्रह्मरन्ध्र

प्रदेश तक जाती है, ऐसी मध्याह्नकालीन सूर्य के समान तेज वाली परदेवता नामक कुण्डलिनी शक्ति सहस्त्रार चक्र में स्थित शिव के सुधा द्वारा हमारी आत्मा का तेज उद्दीप्त करें ॥ ७३ ॥

आधार संकोचादि प्रमुख क्रियाओं से ऊपर की ओर उठी हुई जो कुण्डलिनी अपनी सुधा से त्रिधाम बीज स्वरूप (तीन स्थान, मूलाधार, भाल और हृदय में रहने वाले) शिव का अर्चन करता हैं ऐसी शिवाङ्गना आप सब योगीजनों का कल्याण करें ॥ ७४ ॥

जिनके शरीर की कान्ति सिन्दूर पुञ्ज के समान है-जिनके भाल में पर चन्द्रमा की कला का आभूषण है, जो निरन्तर आनन्द से परिपूर्ण हैं तथा जिनका मुख तीन नेत्रों से सुशोभित है, जिनका मोटा तथा ऊँचा स्तन अनङ्ग का वर्धन करता है, ऐसी शम्भु की कलत्रभूता भगवती आप योगी जनों को अथाह लक्ष्मी प्रदान करें ॥ ७५ ॥

नयनकमलैर्दीर्घा दीर्घैरलङ्कृतदिङ्मुखं
विनतमरुतां कोटीराग्रैर्निघृष्ट पदाम्बुजम् ।
तरुणशकलं चान्द्रं बिभ्रद् घटस्तनमण्डलं
स्फुरतु हृदये बन्धूकाभं कलत्रमुमापतेः ॥ ७६ ॥

दीर्घादीर्घैरिति । कटाक्षेण दीर्घत्वं तत्संकोचेनाऽदीर्घत्वञ्च । विनतमरुतां विनतदेवानाम् । कोटीराग्रैः मुकुटाग्रभागैः ॥ ७६ ॥

अपने नेत्रों के विकास और संकोच से जो समस्त दिशाओं को अलंकृत कर रहीं है, चरण पर विनम्र हुये देवताओं के प्रणाम काल में उनके मुकुटमणियों से जिन भगवती के चरण कमल बारम्बार निघृष्ट हैं, जो पूर्णमासी के चन्द्रमा के समान घन स्तन मण्डल को धारण की हैं बन्धूक पुष्प की कान्ति के समान (लाल) वर्ण वाली ऐसी शम्भुवनिता हमारे हृदय प्रदेश में स्फुरित होती रहें ॥७६॥

वर्णैरर्णवषड्दिशारविकलाचक्षुर्विभक्तैः क्रमा-
दाद्यैः सादिभिरावृतान् क्षहयुतैः षट्चक्रमध्यानिमान् ।
डाकिन्यादिभिराश्रितान् परिचितान् ब्रह्मादिभिर्दैवतै-
र्भिन्दाना परदेवता त्रिजगतां चित्ते विधत्तां मुदम् ॥ ७७ ॥

अन्तर्मातृकाक्रमेण कुण्डलिनीध्यानमाह—वर्णैरिति । अर्णवाश्चत्वारः, दिशा दश, रवयो द्वादश, कलाः षोडश, चक्षुर्द्वयम् । सादिभिरित्यनेन व्युत्क्रमो दर्शितः । आद्यैरिति मूलाधारस्थितत्वेन आद्यत्वम् । यद्वा साद्यैः सकारादिककारान्तैः । आद्यैः षोडशस्वरैः हक्षयुतैरिति योजना । तत्र विशुद्धचक्रे अकारादीनां क्रमेण स्थितैराद्यै-रिति पृथक्ग्रहणमिति केचित् । अथवाऽन्यत्राकारस्याद्यत्वम् । अत्र वैपरीत्यक्रमेण सकारस्य आद्यत्वमिति आद्यैरित्युक्तम् ।

द्विदले क्षहौ प्रतिलोमार्थमेव क्षहेतिग्रहणम् । डाकिन्यादिभिराश्रितान् । डाकिनी-राकिणी-लाकिनी-काकिनी-शाकिनी-हाकिनीभिः । ब्रह्मादिभिर्दैवतैः परीतान् । ब्रह्मादिस्थितिः दीक्षापटले (=चतुर्थ) उक्ता । एवम्भूतान् षट्चक्रमध्यान् भिन्दानेति सम्बन्धः । तदुक्तम्—

आधारस्तु चतुर्दलोऽरुणरुचिर्वासान्तवर्णाश्रयः
स्वाधिष्ठानमनल्पवैद्युतनिभं बालान्तषट्पत्रकम् ।
रक्ताभं मणिपूरकं दशदलं डाद्यं फकारान्तकं
पत्रैर्द्वादशभिस्त्वनाहतपुरं हैमं कठान्तान्वितम् ॥
मात्राषोडशपत्रकं विशदरुग्युक्तं विशुद्धाम्बुजं
हक्षेत्यक्षरयुग्दलद्वययुतं रत्नाभमाज्ञापुरम् ।
तस्मादूर्ध्वमधोमुखं विकसितं पद्मं सहस्रच्छदं
नित्यानन्दमयं भजे शिवपदं शक्त्यर्णमच्छारुणम् ॥ इति ।

अन्यत्र तु— मूलाधारं ब्रह्मणः स्थानमेतत् सौवर्णाभं डाकिनी देवताऽत्र ।
स्वाधिष्ठानं विष्णुगेहं प्रदिष्टं बालार्काभं राकिणी देवताऽत्र ॥
मणिपूरकं तु नीलं रुद्रस्थानं लाकिनी देवताऽत्र ।
रक्तमनाहतमीश्वरगृहं तु शाकिन्यपीहोक्ता ॥
सदाशिवस्थानमिदं विशुद्धं काकिन्यथेहाऽपि च धूम्रवर्णम् ।
आज्ञापुरं शारदचन्द्रकान्तं हाकिन्यथोक्ता शिवगेहमेतत् ॥ इति ।

अध्यात्मविवेके एषां प्रतिदलं जीवसञ्चारे फलमुक्तम्—

गुदलिङ्गान्तरे चक्रमाधारं तु चतुर्दलम् ।
परमः सहजस्तद्वदानन्दो वीरपूर्वकः ॥
योगानन्दश्च तस्य स्यादीशानादिदले फलम् ।
स्वाधिष्ठानं लिङ्गमूले षट्पत्रञ्च क्रमस्य तु ॥
पूर्वादिषु दलेष्वाहुः फलान्येतान्यनुक्रमात् ।
प्रश्रयः क्रूरता गर्वो नाशो मूर्च्छा ततः परम् ॥
अवज्ञा स्यादविश्वासो जीवस्य चरतो ध्रुवम् ।
नाभौ दशदलं चक्रं मणिपूरकसंज्ञकम् ॥
सुषुप्तिरत्र तृष्णा स्यादीर्ष्या पिशुनता तथा ।
लज्जा भयं घृणा मोहः कषायोऽथ विषादिता ॥
हृदयेऽनाहतं चक्रं दलैर्द्वादशभिर्युतम् ।
लौल्यं प्रणाशः कपटं वितर्कोऽप्यनुतापिता ॥
आशा प्रकाशश्चिन्ता च समीहा ममता ततः ।
क्रमेण दम्भो वैकल्यं विवेकोऽहंकृतिस्तथा ॥
फलान्येतानि पूर्वादिदलस्थस्यात्मनो जगुः ।
कण्ठेऽस्ति भारतीस्थानं विशुद्धिः षोडशच्छदम् ॥
तत्र प्रणव उद्गीथो हुं फट् वषट् स्वधा तथा ।
स्वाहा नमोऽमृतं सप्त स्वराः षड्जादयो विषम् ॥
इति पूर्वादिपत्रस्थे फलान्यात्मनि षोडश ॥ इति ॥ ७७ ॥

अब **अन्तर्मातृका क्रम से कुण्डलिनी का ध्यान** कहते हैं—जो व्युत्क्रम (संहार क्रम) से क्रमशः व श ष स इन चार वर्णों वाले चतुर्दल कमल से युक्त मूलाधार चक्र में, पुनः ब भ म य र ल, इन छः वर्णों वाले षड्दल कमल से युक्त स्वाधिष्ठान चक्र में, ड ढ ण त थ द ध न प फ वर्णों वाले दश दल कमल युक्त मणिपूर चक्र में, क ख ग घ ङ च छ ज झ ञ ट ठ इन द्वादश वर्णों वाले द्वादश दल कमल युक्त अनाहत चक्र में, अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः इन सोरह स्वरों वाले सोलह दल कमलयुक्त विशुद्ध चक्र में तथा ह क्ष वर्ण वाले द्विदल कमल से युक्त आज्ञाचक्र में, जहाँ क्रमशः डाकिनी, राकिणी, लाकिनी, काकिनी, शाकिनी, तथा हाकिनी यक्षिणियों का एवं ब्रह्मादि देवता स्थित हैं—इस प्रकार के उन सभी यक्षिणियों एवं देवताओं से युक्त षट्चक्रों का भेदन करती हुई सहस्रार चक्र पर्यन्त जाने वाली परदेवता तीनों लोकों के जनों के चित्त में प्रसन्नता उत्पन्न करें ॥ ७७ ॥

आधाराद् गुणवृत्तशोभिततनुं लिङ्गत्रयं सत्वरं
भिन्दन्तीं कमलानि चिन्मयघनानन्दप्रबोधोत्तराम् ।
संक्षुब्धध्रुवमण्डलामृतकरप्रस्यन्दमानामृत-
स्रोतः कन्दलिता(निभा)ममन्दतडिदाकारां शिवां भावयेत् ॥ ७८

आधारादिति । त्रिकोणकर्णिकं वृत्तं वर्त्तुलमाधारस्वरूपं तस्माद्गुणवृत्तं सत्त्वरजस्तमोगुणात्मकम् । (लिङ्गत्रयमित्यत्र निर्गच्छन्तीमिति निर्गत्वरीमिति च क्वचित्पाठौ दृश्येते) ॥ ७८ ॥

त्रिकोण कर्णिका युक्त गोलाकार आधार के ऊपर त्रिगुणात्मक स्वरूप शरीर से शोभित होने वाली, तीन लिङ्गों वाली, षट्चक्र स्थित कमलों का भेदन करने वाली, चिन्मय घन सच्चिदानन्द स्वरूपा, जो कुण्डलिनी ध्रुव मण्डल स्थित संक्षुब्ध चन्द्रमण्डल से झरते हुये अमृत कणों के स्रोत से कन्दलित हो रही है, तथा जिसका स्वरूप अत्यन्त प्रकाशित होने वाली बिजली के समान देदीप्यमान है योगीजनों को ऐसी शिवा का ध्यान करना चाहिए ॥ ७८ ॥

आनन्दमौलिमनिशं श्रुतिमौलिमृग्य
मर्द्धेन्दुभूषणमधिष्ठितसर्वलोकम् ।
भक्तार्त्तिभञ्जनपरं पदमीश्वरस्य
दद्याच्छुभानि नियतं वपुरम्बिकायाः ॥ ७९ ॥

आनन्द स्वरूप, निरन्तर श्रुतियों एवं उपनिषदों के अभ्यास से प्राप्त होने वाले अर्धचन्द्र से विभूषित, समस्त जगत् में नाम रूपों से व्याप्त, भक्तों के आर्ति को नाश करने वाले साक्षात् परब्रह्म के निवासभूत स्थान इस प्रकार का अम्बिका का विग्रह आप सभी को निश्चित रूप से कल्याण प्रदान करे ॥ ७९ ॥

मञ्जुसिञ्जितमञ्जीरं वाममर्द्धं महेशितुः।
आश्रयामि जगन्मूलं यन्मूलं वचसामपि॥ ८० ॥
स्थूलेन्द्र नीलरुचिरं कुचभारनम्रं
भास्वत्सुभूषणगणैः प्रविभक्तशोभम्।
विश्वैकमूलमनिशं श्रुतिमौलिमृग्य-
मर्द्धं महेशितुरखण्डितमाश्रयामः॥ ८१ ॥

मधुर और मनोहर शब्द करने वाले मञ्जीर धारण करने वाली और महेश्वर के वाम में अर्धनारी रूप से निवास करने वाली भगवती का मैं आश्रय लेता हूँ, जो जगत् का मूल तो हैं ही कुण्डलिनी रूप से समस्त वाणियों का भी मूल हैं ॥ ८० ॥

जो स्थूल इन्द्रनीलमणि के समान मनोहर कान्ति से युक्त है, कुचभार से नीचे की ओर झुके हुये जिसके कटि प्रदेश हैं, जगमगाते हुये नाना प्रकार के आभूषणों से शोभित होने वाले, समस्त जगत् के मूल कारण, श्रुति तथा उपनिषदों के द्वारा प्राप्य, महेश्वर के अर्द्धभाग में अखण्ड रूप से विराजमान किसी अनिर्वचनीय तेज का मैं आश्रय लेता हूँ ॥ ८१ ॥

दिक्कालादिविवर्जिते परशिवे चैतन्यमात्रात्मके
शून्ये कारणपञ्चकस्य विलयं नीते निरालम्बने।
आत्मानं विनिवेश्य निश्चलधिया निर्लीनसर्वेन्द्रियो
योगी योगफलं प्रयाति सुलभं नित्योदितं निष्क्रियम्॥ ८२॥

दिगिति देशतः कालतः । आदिशब्दात् स्वरूपतश्चाऽनवच्छिन्ने । कारण-पञ्चकस्य उपादानसमवायिनिमित्तप्रयोजकसहकारिकारणपञ्चकस्य । यद्यपि प्रयोजकसहकारिकारणे निमित्तकारणान्तर्गते एवेति तार्किकाः कारणत्रयमेवाहुः । तथापीषद्भेदमाश्रित्य कारणपञ्चकोपन्यासः । यद्वा पञ्चभूतानां पञ्चतन्मात्ररूपाणि कारणानि । तदुक्तं महाकपिलपञ्चरात्रे—

मात्राः पञ्च परित्यज्य ततः कारणपञ्चकम् ।
दिव्यन्तु कारणं कृत्वा योजयेत् परमं पदम् ॥ इति ।

अतएव शून्ये अरूपे । निरालम्बने आधाररहिते । आत्मानं जीवात्मानम् । निश्चलधिया विनिवेश्य योगफलं प्रयाति ॥ ८२ ॥

देशकाल और स्वरूप से परे, परशिव, चैतन्यमात्रात्मक उपादानकारण, समवायिकारण, निमित्त कारण, प्रयोजक कारण तथा सहकारिकारण इन पाँच कारणों के विलीन कर देने पर निरालम्ब, अतएव शून्य में निश्चल बुद्धि से सभी इन्द्रियों को वश में कर लेने वाला साधक जब अपनी जीवात्मा को सन्निविष्ट कर देता है, तब वह नित्योदित एवं निष्क्रिय योग फल को प्राप्त कर लेता है ॥ ८२॥

ग्रन्थकृत्परिचयः

महाबलाय प्रणतोऽस्मि तस्मै
संविल्लतालिङ्गनशीतलाय ।
येनाऽर्पितं मुक्तिफलं विपक्व-
माम्नायशाखाभिरुपाश्रितेभ्यः ॥ ८३ ॥

तस्मादभूदखिलदेशिकवारणेन्द्रः
षट्कर्मसागरविहारविनोदशीलः ।
यस्य त्रिलोकविततं विजयाभिधान-
माचार्यपण्डित इति प्रथयन्ति सन्तः ॥ ८४ ॥

तन्नन्दनो देशिकदेशिकोऽभू-
च्छ्रीकृष्ण इत्यभ्युदितप्रभावः ।
यत्पादकारुण्यसुधाभिषेका-
ल्लक्ष्मीं परामश्नुवते कृतार्थाः ॥ ८५ ॥

आचार्य विद्याविभवस्य तस्य
जातः प्रभोर्लक्ष्मणदेशिकेन्द्रः ।
विद्यास्वशेषासु कलासु सर्वा-
स्वपि प्रथां यो महतीं प्रपेदे ॥ ८६ ॥

ग्रन्थकर्त्ता स्ववंशमाख्याति महाबलायेति । महाबलनाम ग्रन्थकर्त्तुः पूर्वजः । तत्पुत्र आचार्यपण्डितः तत्पुत्रः श्रीकृष्णः ॥ ८३-८६ ॥

अब **ग्रन्थकर्त्ता ग्रन्थ की समाप्ति में अपने वंश का परिचय** देते हैं—

मैं (लक्ष्मण देशिक) संविल्लता के आलिङ्गन से शान्त स्वभाव वाले उन महाबल नामक अपने पूर्वज को प्रणाम करता हूँ, जिन्होंने अपने आश्रितों को वेद की शाखाओं के द्वारा परिपक्व मुक्ता फल (मुक्ति रूपी फल अथवा मोतियों का फल) समर्पित किया ॥ ८३ ॥

उन महात्मा महाबल से आचार्य पण्डित नाम से सन्तों द्वारा विख्यात मेरे पूर्वज हुये, जो संपूर्ण देशिक रूपी हस्ति समूहों के इन्द्र (यूथपति) थे, और ब्राह्मणों के लिये विहित षट्कर्म रूप सागर में बिहार (आचरण) के प्रेमी थे, जिन्हें त्रिलोकी में विख्यात विजय पद से विभूषित, आचार्य पण्डित के नाम से सन्त लोग पुकारते थे ॥ ८४ ॥

उन आचार्य पण्डित के श्री कृष्ण नामक पुत्र हुये, जिनका प्रभाव जगत् में विख्यात था, वे समस्त आचार्यों के भी आचार्य थे, उन महापुरुष की करुणा युक्त सुधामयी दृष्टि के अवलोकन मात्र से मनुष्य कृतार्थ हो जाता था और महान् लक्ष्मी प्राप्त करता था ॥ ८५ ॥

उन आचार्य तथा विद्या विभव संपन्न महाप्रभु पण्डित श्री कृष्ण से लक्ष्मण देशिकेन्द्र उत्पन्न हुये जिन्होंने संपूर्ण विद्याओं में एवं संपूर्ण कलाओ में महान् प्रसिद्धि प्राप्त की ॥ ८६ ॥

ग्रन्थपरिचयः

आदाय सारमखिलं निखिलागमेभ्यः
श्रीशारदातिलकनाम चकार तन्त्रम् ।
प्राज्ञः स एष पटलैरिह तत्त्वसंख्यैः
प्रीतिप्रदानविधये विदुषां चिराय ॥ ८७ ॥

तत्त्वसंख्यैः पञ्चविंशतिसंख्यैः । अत्र आद्यपटलः सृष्टिप्रतिपादकत्वेन मूलप्रकृतिप्रतिपादनपरः । मध्ये त्रयोविंशतिपटलास्तु प्रकृतिविकृतिप्रतिपादनपराः । अन्त्यपटलस्तु प्रकृतिविकृतिव्यतिरिक्तपुरुषप्रतिपादनपरः । एवं पञ्चविंशतितत्त्वात्मकत्वम् अस्य ग्रन्थस्योक्तं भवति ॥ ८७ ॥

उन्हीं लक्ष्मण देशिकेन्द्र ने समस्त आगम शास्त्रों का सार ग्रहण कर श्री शारदातिलक नामक इस तन्त्र ग्रन्थ की रचना की । यतः तत्त्व संख्या २५ है अतः उन्होंने भी २५ पटलों में विद्वानों पर चिरकाल पर्यन्त प्रीति उत्पन्न करने के लिये इस ग्रन्थ की रचना की है ॥ ८७ ॥

अनाद्यन्तात् शम्भोर्वपुषि कलितार्द्धेन वपुषा
जगद्रूपं शश्वत् सृजति महनीयामपि गिरम् ।
सदर्था शब्दार्थस्तनभरनता शङ्करवधू-
र्भवेद् भूत्यै भूयाद् भवजनितदुःखौघशमनीं ॥ ८८ ॥

सुखदा दातृसुभगा शङ्करार्द्धशरीरिणी ।
ग्रन्थपुष्पोपहारेण प्रीता नः पार्वती सदा ॥ ८९ ॥

॥ इति श्रीलक्ष्मणदेशिकेन्द्रविरचिते शारदातिलके
पञ्चविंशः पटलः समाप्तः ॥ २५ ॥

परदेवतैव ध्येयेति सकलतन्त्रार्थमुपसंहरन् आशिषा मङ्गलं करोति— अनादीति । 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते । वीरपुरुषकाणि भवन्ति आयुष्यपुरुषकाणि च' ।

इति भगवत्पतञ्जलिवचनादिति । शिवम् ॥ ८८-८९ ॥

॥ समाप्तोऽयं पदार्थादर्शः ॥

दुर्लभ बौद्ध ग्रन्थ माला—2

ज्ञानोदयतन्त्रम्

JÑĀNODAYA TANTRAM

भोट विद्या संस्थानम्

सम्पादक :

प्रो० समदोङ रिनपोछे
योजना निदेशक

प्रो० व्रजवल्लभ द्विवेदी
उपनिदेशक

दुर्लभ बौद्ध ग्रन्थ शोध योजना
केन्द्रीय उच्च तिब्बती शिक्षा संस्थान
सारनाथ, वाराणसी

बुद्धाब्द २५३१ ख्रीष्टाब्द १९८८

सहायक मण्डल

जनार्दन पाण्डेय डॉ० ठाकुरसेन नेगी
बनारसी लाल महेन्द्ररत्न वज्राचार्य
वङ्छुग दोर्जे

मूल्य : रु० १५.००

प्रकाशक :
केन्द्रीय उच्च तिब्बती शिक्षा संस्थान
सारनाथ, वाराणसी

मुद्रक :
रत्ना प्रिंटिंग वर्क्स, बी० 21/42 ए०, कमच्छा, वाराणसी

RARE BUDDHIST TEXT SERIES—2

JÑĀNODAYA TANTRAM

भोट विद्या संस्थानम्

Editors :

PROF. SAMDHONG RINPOCHE
Project Director

PROF. VRAJVALLABH DWIVEDĪ
Deputy Director

RARE BUDDHIST TEXT PROJECT
Central Institute of Higher Tibetan Studies
SARNATH, VARNASI

B. E. 2531 C. E. 1988

प्रस्तावना

दुर्लभ बौद्ध ग्रन्थ शोध योजना की परामर्शदात्री समिति के दिनांक 11–8–1987 के निर्णय के अनुसार 'धीः' के इस चतुर्थ अंक में ज्ञानोदयतन्त्र का प्रकाशन किया जा रहा है। यह तन्त्र क्रिया, चर्या, योग और अनुत्तर विभागों में विभक्त बौद्ध तन्त्रों के योग विभाग के अन्तर्गत आता है।

इसमें चित्त, वाक् और काय चक्रों के अन्तर्गत ध्येय दस भूमियों और चौबीस पीठों का विवरण देने के बाद शरीर में स्थित नाड़ियों और चक्रों का विवरण देकर उनकी भावना का प्रकार बताया गया है। इसके बाद सहजप्रज्ञा योग, वसन्ततिलक योग, समुत्पन्नक्रम योग और प्रज्ञोपाय योग का विवरण देकर षट्चक्र विशुद्धि और पंचज्ञान विशुद्धि की भावना का विस्तार किया गया है।

यह ग्रन्थ अतिसंक्षेप में बौद्ध तन्त्रों में वर्णित योग का समग्र वर्णन प्रस्तुत करता है। इस ग्रन्थ का तिब्बती अनुवाद उपलब्ध नहीं होता। इन विशेषताओं को देखते हुए ही दुर्लभ बौद्ध ग्रन्थ शोध योजना द्वारा प्रकाशनीय ग्रन्थों में इसका समावेश किया गया था। इसको विज्ञ पाठकों के समक्ष प्रस्तुत करते हुए हमें प्रसन्नता का अनुभव हो रहा है।

जिन 11 हस्तलेखों के आधार पर इस ग्रन्थ के पाठों का निर्धारण किया गया है, उनका विवरण इस प्रकार है :—

क—राष्ट्रीय अभिलेखालय काठमाण्डू, नेपाल सं० 3।658, पत्र सं० 11, देवनागरी लिपि, पूर्ण। श्री जगन्नाथ उपाध्याय जी के संग्रह की प्रतिलिपि।

ख—रा० अ० का० ने० सं० 5।39, पत्र सं० 19, नेवारी लिपि, पूर्ण। श्री जगन्नाथ उपाध्यायजी के संग्रह की प्रतिलिपि।

ग—रा० अ० का० ने० सं० 3।338, पत्र सं० 20, देवनागरी लिपि, पूर्ण। डा० ठाकुरसेन नेगी के पास की प्रतिलिपि।

घ—इंस्टिट्यूट फार एडवांस स्टडीज आफ वर्ल्ड रिलिजन्स, अमेरिका एम० बी० बी०-II–184, पत्र सं० 13, नेवारी लिपि, पूर्ण। माइक्रोफिश के० ति० उ० शि० सं० सारनाथ, वाराणसी। फोटो प्रिंट तथा जिराक्स प्रति अस्पष्ट है।

ङ—इंस्टिट्यूट फार···अमेरिका, एम० बी० बी०-I–120, पत्र सं० 20, नेवारी लिपि, अपूर्ण (9–11) पत्र नहीं हैं। माइक्रोफिश के० ति० उ० शि० सं०। माइक्रोफिश अस्पष्ट है।

च—इंस्टिट्यूट फार···अमेरिका, एम० बी० बी०-I–72, पत्र सं० 13, नेवारी लिपि, अपूर्ण (अन्त में खण्डित)। माइक्रोफिश के० ति० उ० शि० सं०।

छ—संस्कृत मैन्युस्क्रिप्ट इन टोक्यो युनिवर्सिटी लाइब्रेरी जापान, सं० 143, पत्र सं० 11, नेवारी लिपि, पूर्ण। माइक्रोफिल्म के० ति० उ० शि० सं०।

ज—संस्कृत मैन्युस्क्रिप्ट इन टोक्यो···सं० 142, पत्र सं० 20, देवनागरी लिपि, पूर्ण। माइक्रोफिल्म के० ति० उ० शि० सं०।

झ—आशा सफू कुशी संग्रह, काठमाण्डू, सं० 2।634, पत्र सं० 26, देवनागरी लिपि, पूर्ण। जिराक्स प्रति के० ति० उ० शि० सं०।

ञ—गायकवाड़ ओरियन्टल, इंस्टिट्यूट बड़ौदा, सं० 13279, पत्र सं० 9, देवनागरी लिपि, पूर्ण।

ट—इंस्टिट्यूट फार····अमेरिका, एम० बी० बी०-I-74, पत्र सं० 19, नेवारी लिपि, माइक्रोफिश प्रति के० उ० ति० शि० सं०। अस्पष्ट एवं अपठनीय।

इन 11 हस्तलेखों की सहायता से सावधानी के साथ संशोधन और सम्पादन करने के उपरान्त भी इस ग्रन्थ के कुछ स्थान अभी पूरी तरह से स्पष्ट नहीं हो पाये हैं। इस सम्बन्ध में हम विद्वानों के सुझाव का स्वागत करेंगे।

इस ग्रन्थ के हस्तलेखों को सुलभ कराने में जिन व्यक्तियों और संस्थाओं ने सहायता की है, जिनका कि नाम निर्देश ऊपर किया जा चुका है, उनका हम आभार स्वीकार करते हैं। दुर्लभ बौद्ध ग्रन्थ शोध योजना में कार्यरत विद्वानों को भी हम धन्यवाद देते हैं, जिन्होंने बड़ी तत्परता से पाठसंकलन, सम्पादन अदि कार्य सुचारु रूप से सम्पन्न कर परिष्कृत रूप में इस ग्रन्थ को प्रस्तुत किया है।

एस० रिन्पोछे
निदेशक
दुर्लभ बौद्ध ग्रन्थ शोध योजना

PREFACE

The *Jñānodaya Tantra* which is of the Yoga genre of the Buddhist Tantra as of the three other classes, the Kriyā, the Caryā and the Anuttara Tantras, is being published here as a part of the first volume of the Rare Buddhist Minor Text Series, appearing in the *Dhī* review.

The text enumerates under wheels of the mind, speech and body the ten grounds (Bhūmis) and the twenty four establishments (Pīṭhas) to be reflected upon. These postulates precede the description of the nervous system and the numerous *Cakras* in the body. The awareness of the vital limbs is important in the comprehension of the esoteric system. The work further elicits understanding of the Sahaja-Prajñā Yoga, Vasanta-Tilaka Yoga, Samutpann-Krama Yoga and the Prajñopāya Yoga with the purifying methods of the six cakras and the five sensory perceptions.

The work presents a total view of yoga, as found in Buddhist esotericism. The Tibetan translation of the text has not been found. Keeping in view these importance the work is included in the texts to be published by The Project. We are happy to bring it out for the readers.

For the presentament of the text in its edited form acknowledgement is due to the following organisations for furbishing the contextual matters.

a. National Archives of kathmandu, Nepal. Ms. No. 3/658 fol. 11, Devanāgarī Script—Complete. Ms-in Prof. J. Upadhyaya's private collections.

b. NAKN. Ms. No. 5/39, fol, 19, Nevārī Script, Complete, J (Ms)

c. NAKN, Ms. No. 3/338, fol. 20, Devanāgarī Script, Complete. Ms with Thakur Sen Negi.

d. Institute for Advanced Studies of World Religions, U S A, Ms. No. MBB. II–184, fol, 13, Nevārī Script, complete, microfische copy in the Śāntarakṣhita Library, Saranath.

e. IASWR, U S A, Ms No. MBB, I-120, fol. 20, Nevārī Script, incomplete, microfische copy in Śāntarakṣhita library, Saranath.

f. IASWR, Ms. No. MBB, I-72, fol. 13-Nevārī Script, incomplete fragile last part. microfische copy. in Śāntarakṣhita Library, Saranath.

g. Sanskrit MSS in Tokyo University Library, Japan. MS. No. 143, fol. 11, Nevārī Script, complete, microfilm, Śāntrakṣhita Library, Saranath.

h. SMTUL, MS. No. 142, fol. 20, Devanāgarī Script, complete, microfilm, Śāntarakṣhita Library, Saranath,

i. Āshā Safu Kuśi collections, Kathmandu, MS. No. 2/634, fol. 26, Devanāgari Script, complete, zyrox copy in the Śāntrakṣhita Library, Saranath.

j. Gaekwad Oriental Institute, Baroda, MS. No. 13279/29 fol. 9. Davanāgarī Script, complete.

k. IASWR, U S A, MS. No. MBB--174, fol. 19, Nevārī Script, microfische copy in the Śāntarakṣhita Library, Saranath, illegible.

We are very grateful to individuals and the Institutes which made the mansuscripts available for us. I also express my pleasure for the work done by the scholars of the project in bringing it out in an accomplished form.

S. Rinpoche
Director
Rare Buddhist text Project

विषयसूची

ज्ञानोदयतन्त्रम्

ॐ नमः [1]सर्वज्ञाय[2]

अथातः संप्रवक्ष्यामि ज्ञानं ज्ञानोदयोत्तमम् ।
शरीरार्थं[3] च सर्वेषां ज्ञात्वा [4]यद्धेतुकारणात् ॥ 1 ॥

गिरिगुहायां महोदधौ नदीतीरे वृक्षमूले मातृकागृहे शिवालये उद्याने श्मशाने[5] चतुष्पथे विहारे चैत्यालये वा गृहे विजने निरुपद्रवेऽनुकूले कृतनिलये एषु स्थानेषु प्रदर्शयेत् ।

स्वभावशुद्धाः सर्वधर्माः स्वभावशुद्धोऽहमिति, प्रकृतिपरिशुद्धाः सर्वधर्माः प्रकृतिपरिशुद्धोऽहमिति निश्चित्य[6] [चित्ते] स्वदेहे [7]वाऽऽधाराधेयमण्डलमधिमुञ्चेत्[8] । अनेन शरीरं कूटागारं[9] समं[10] चतुरस्रं चतुर्द्वारं [11]चाष्टभिरङ्गैरष्टस्तम्भैः शोभितं मध्यमण्डलं रम्यं पञ्चतथागतं [12]पञ्चकामात्मकं [13]पञ्चचक्रम् । तत्र रोमाणि कीरकान्[14] चर्ममांसवज्रप्राकारमस्थिपञ्जरं वज्रपञ्जरं [15]थुलामाला[16]मलजालं च मणिवज्रवितानम्—

[17]वितानं [18]वारसिंहं च मध्ये[19]ऽष्टस्तबकं हृदि ।
कोणे[20]ऽष्टस्तबकं ज्ञात्वा खेटौ[21]फूफुसवुक्कचाः ॥ 2 ॥

चण्डालीज्वाला[22]मालानलार्कः [23]पण्यादिकं वज्रमयमधिमुञ्चेत् । अन्तरालं धर्मोदयमधिमुञ्चेत् । तत्र [24]कबन्धोऽर्धद्वयशूलभिन्नादिसु(सू)चकैश्चक्रं[25]मन[:]स्थानं पश्येत् । निषद्यादिकारकैर्द्विपुट[26]त्वेन द्विगुणं पृथिव्यप्तेजोवायुधात्वात्मकैः परिगतानष्टौ धातुं(तून्) स्वसनि(न्नि)त्यतया युक्ता[न]ष्टौ श्मशानानधिमुञ्चेत् ।

---

1. श्रीसर्व—च. । 2. 'ॐ नमः श्रीचक्रसंवराय' इत्यधिकः पाठः—घ. । 3. र्थश्च—क. ज. । 4. ये हेतु—ख.छ.झ.ञ । 5. नास्ति—च. । 6 निश्चिते—क. ग. ज. झ. । 7. वाधावाधेय—क. ख. ग. घ. ङ. च. छ. । 8. मुच्येत्—क ग घ. ज. । 9. कूटाङ्गारं—घ. छ. ज. ञ. । 10. समचतुरस्रचतुर्द्वारैः—च. । 11. वाष्टाभि—ङ. । 12. पञ्चकात्म—ख., पञ्चकायात्म—क. घ. च. छ. ज. झ. । 13. पञ्चक्रमं—छ. । 14. कील—छ. । 15. थूला—ख.च छ.झ.ञ , थूल—घ. । 16. मालासरजालं—ख. ग. घ. च. ज. झ. ञ. । 17. वीता—क ग. ङ. । 18. वाल—छ. । 19. मध्यष्ठास्ते—ग. ज., मध्यस्थं—घ., ष्ठं—ङ च झ. । 20. कोणष्ठां—ङ. च. ज. झ. । 21. खेर्वे—क. । 22. ज्वालावज्रज्वालानला—ख. घ. ङ. च. झ. ञ. । 23. पक्ष्या—ज.ञ. । 24. कबन्धोर्द्धत्वशायित—क. ख. ग. घ., द्वशा—ङ. झ. ञ., द्वन्द्वशा—च. । 25. चक्रमणस्था—घ छ.ञ., मशस्था—क.ग.ज., मूलस्थानं—ङ. । 26. द्विप्रभ—क., द्विपुल—ग , द्विपूत—झ. ।

ततः पादद्वयं(ये) धन्वाभं वायुमण्डलम्, नाभितले त्रिकोणमाग्नेयमण्डलम्, जठलं(रे) वर्तुलं वारुणमण्डलम्, कक्षस्थं(स्थे) चतुरस्रं माहेन्द्रमण्डलमधिमुञ्चेत् । उत्तमाङ्गमष्टशृङ्गसुमेरुमधिमुञ्चेत् । ततस्तत्पृष्ठेऽधिष्ठितं द्वात्रिंशद्दलकमलं तन्मध्ये चन्द्रमण्डलं तन्मध्यगता नाडी [1]सूक्ष्मं [2]खगमुखाकारमनाहतमालिकालिज[3]हूंकारं वज्रसत्त्वस्वरूपं ष[ट्]त्रिंशन्नाडीजनकं समधिमुञ्चेत् । तदुद्भवचन्द्रफलभवैः[4] शशाङ्क-संकाशं सहजसंभोगकायात्मकं [5]कालिस्वभावमुपायरूपं सुविशुद्धधर्मधातुज्ञानात्मकं श्रीहेरुकम्, ततः सहजनिर्माणनभोनिभं सर्वाङ्गप्रत्यङ्गसर्वाशाकाशव्यापकं स्व[ा]भाविक-कायात्मकमालिस्वभाव(वं) [6]प्रज्ञारूपं [7]शु(सु)विशुद्धधर्मधातुस्वभावं [8]वज्रवाराहीमधि-मुञ्चेत् ।

ततः समयचक्रात्मके तारु(लु)कमले पूर्वदले भगवतः पूर्वमूर्ति[ः] शब्दवहा दर्शनज्ञानरूपा शशानामनाडी डाकिनी, उत्तरमूर्तिर्गन्धवहा समताज्ञानरूपा क्षीरवहानाम-नाडी लामा । पश्चिमदले पश्चिममूर्ति[ः] रसवहा प्रत्यवेक्षणाज्ञानस्वभावस्निग्धा नाडी खण्डरोहा, दक्षिणदले दक्षिणमूर्तिः स्पर्शवहा कृत्यानुष्ठानरूपा मधुरानामनाडी रूपिणी । हृत्कमल इत्यपरमुखचतुर्षु [9]इत्ये[व] लोक[ाः] कथयन्ति, त्रिकोणेषु पत्रेषु च[10] सहस्रं प्रनाडिकाः[11] बोधिचित्तवहा वाहे(बाह्ये) [12]चतुःपूजारूपा बोधिचित्तकरोटकाः ।

इति महासुखचक्रं बुद्धभूमिवज्रमतितत्त्वं त्रिलोकं त्रिकायम्

ततः पूं जां ऊं आं गों लां दं[13]मां कां वं[14] त्रि कां[15] क्रां कां[16] लां[17] कां ह्लीं प्रं[18] गुं सां[19] सुं[20] नं सिं [21]मं कूं[22] इति बीजाक्षराणि यथास्थानं क्रमेण भावयेत् ।

ततः पुल्लीरमलयशिरसि खण्डकपालि[23]नखदन्तवहा अजानाडी प्रचण्डा, जालन्धरशिखायां महाकङ्कालकेशरोमवहा नाडी चण्डाक्षी, ओडियानदक्षिणकर्णे कंकार-(ल)[24]त्वङ्मलवहा [25]महानाडी प्रभामति(ती) । मस्तकपृष्ठे अर्बुदविकटदंष्ट्रि(ष्ट्री) मांसवहा बलानाडी महानासा । इति [26]पीठप्रमुदिता[27]भूमिपोठदानदुःखज्ञानम् ।

---

1. शुष्कं–च. । 2. खङ्ख–ङ.च. । 3. लितः–क. आलिज–छ. । 4. चन्द्रम्भाव–क ग., 'चन्द्रफलभवैः' नास्ति–ज. झ. ञ. । 5. 'कालि' नास्ति–क. ग. च. ज. । 6. प्रत्यङ्ग–ञ. । 7. शुचिशु–क. ख. ग. घ. । 8. वज्रवज्रवा–ङ. । 9. इत्यनो कथ–क. ङ. ज. । 10. चतुरस्रं–क. ख. ग. घ. ङ. च. ज. । 11. डिकां–ख. ग. ङ. छ. । 12. चतुर्भुजा–ङ. च. । 13. दें–ङ च. ज. । 14. भौँ–ङ.च., जां–ख घ., ऊं–ज. ञ. । 15. कौं–ख.घ., कें–ङ.च.छ.झ. । 16. 'कां क्रां' इति विपर्यस्तः पाठः–छ. । 17. लं–ङ. । 18. प्रें–ङ. ज. ञ. । 19. सौं–ङ. च. ज. झ. ञ. । 20. सूं–ख. च. । 21. मुं–ङ., मूं–च. । 22. कुं–ङ. । 23. पाल–ङ. । 24. त्वगाल–क. ख. ग. घ. ङ. च. ज. । 25. मला–छ. । 26. 'पीठ' नास्ति–घ. । 27. 'भूमिपीठ' नास्ति–क. ख. ग. ङ. छ. ज. झ. ञ. ।

गोदावरीवामकर्णे [1]स्वरवैरिणस्नायुवहा रजानाडी वि(वी)रमती, रामेश्वर-भ्रूमध्ये अमिताभा अस्थिवहा [2]पटानाडी खर्वरी। देवीकोटचक्षुर्द्वये वज्रप्रभा वुक्कवहा भगानाडी लङ्केश्वरी, ता(मा)लवस्कन्धद्वयो[3]र्वज्रदेह[4]हृदयवहा [5]चोद्धतानाडी द्रुमच्छाया। इत्युपपीठविमलाभूमि[6] शीलसमुदयज्ञानम्[7]। चित्तचक्रं धर्मं हूँ खर्वरी स्वर्गालयः।

कामरूपकक्षद्वयं अङ्कुरिकः[8] अक्षिवहा महानाडी ऐरावती। ओड्रे स्तनयुगले वज्रजटिले[9] पित्तवहा महानाडी महाभैरवी। इति क्षेत्रं प्रभाकरी[10]क्षान्तिनिरोधज्ञानम्।

[11]त्रिशकुनिनाभौ महावीरफुफ्फुसवहा प्रभानाडी वायुवेगा। कोशले नासि-काग्रे वज्रहूंकार-अन्त्रमालावहा [12]हलानाडी सुराभक्षी। इति उपक्षेत्रम् अर्चिष्मती-[13]भूमिवीर्यमार्गज्ञानम्।

कलिङ्गे मुखे [14]सुभद्रगुणवर्तिवहा महानाडी श्यामादेवी। लम्पाककण्ठे वज्र-भद्रा[15] बलवहा[16] सौख्यदा नाडी सुभद्रा। इति छन्दोह-अभिमुखीभूमि[17]ध्यानक्षय-[18]ज्ञानम्।

काञ्चिद्वय[19](पायु) महाभैरवपुली(री)षवहा [20]घनानाडी हयकर्णा। हिमालये मेढ्रे विरूपाक्षां(क्षा) सीमान्तवहा सितानाडी खगानना। इति उपछन्दोहसुदुर्जयाभूमि-प्रज्ञाऽनुत्पाद[21]ज्ञानम्। इति वाक्चक्रम्। संभोग-आभूचरीमर्त्यभोगः।

प्रेतपुर्यां लिङ्गे महाबला[22] श्लेष्मवहा नाडी चक्रवेगा। गृहदेवतायां गुदे रत्न-वज्रपूयवहा[23] नटीनाडी खण्डरोहा। इति मेलापकदूरङ्गमाभूम्युपायो धर्मज्ञानम्।

सौराष्ट्रे ऊरुद्वयोर्हयग्रीवलोहितवहा स्फुटानाडी शौण्डिनी, सुवर्णद्वीपे जङ्घायामाकाशगर्भ[24]स्वेदवहा लतानाडी चक्रवर्मिणी। इति उपमेलापकम् अचलाभूमि-प्रणिधानमद्वयं ज्ञानम्।

नगल(र)पादाङ्गुलिषु श्रीहेरुकमेदोवहा बलानाडी सुवीरा। सिन्धौ पादपृष्ठे पद्मनर्तेश्वर[25]अश्रुवहा शठानाडी महाबला। इति श्मशानं साधुमतिभूमिबलसंवृत्तिज्ञानम्।

---

1. सुरवै–ख. ग. ङ. च. छ. ञ.। 2. परा–च.। 3. 'द्वयो' नास्ति–ज.। 4. देहा–छ. ज.। 5. छता–ञ.। 6. इतः परं 'भूमि' पदं नास्ति–क. ख. ग. च. छ. ज. झ. ञ। 7. स्थानम्–क. ग. घ.। 8. रिक–छ. ज.। 9. युगलवज्रतिल–क. ग. जटिल–ज.। 10. प्रभास्था-क. ख. ग. ज., प्रभास्य–च.। 11. त्रिशकुली–क. ग. ज. ञ.। 12. हल–क. ग. ज., लतानाडी–च.। 13. 'भूमि' नास्ति–क. ख. ग. च. छ. ज.। 14. सुभद्रा–घ., द्रे–च.। 15. वज्रप्रभा–घ.। 16. दलवहा–ख. ङ. च. छ. झ., उदरवहा–घ.। 17. 'भूमि'नास्ति–क.ख.ग.च.छ.ज.। 18. ध्यानकरं–क.। 19. काञ्चित्रिय–क. ग., हृदय–घ. झ. ञ., घ्रिय–ज.। 20. तना–क.ग.ज.। 21. अनुत्पन्न.–च.। 22. महाचण्डास्यवहा–क. ग.। 23. पूयमहामती–क. ग.। 24. शसंगर्भश्वेत–छ.। 25. नृत्येश्वर–क. ग. ज. झ.।

मरौ[1] अङ्गुष्ठयोर्वैरोचनश्वेत[2]वहा गणानाडी चक्रवर्तिनी। [3]कुलतायां जानुद्वयं(ये) वज्रसत्त्वबालसिंघा[4]वहा समानाडी महावीर्या। इति उपशमशानधर्ममेघा[5]ज्ञानपरचित्तज्ञानम्। इति काय[6]चक्रनिर्माणम्। ॐ पातालवासिनि पातालमधिकारः।

एतेषां दशपीठ-दशभूमि-दशपारमितास्वभावम्। मुखपूर्वद्वारे उग्रानाडी काकास्या, दक्षिणनासा-उत्तरद्वारे घोरानाडी उलूकास्या, गुदे पश्चिमद्वारे अग्निवदनानाडी श्वानास्या, वामनासादक्षिणद्वारे तेजिनीनाडी शूकरास्या, वामकर्णे आग्नेये खड्गधारी नाडी यमदाती[7], दक्षिणकर्णे नैर्ऋत्ये चक्रीनाडी यमदूती, दक्षिणनेत्रे वायव्ये [8]सूचीमुखानाडी यमदंष्ट्री, वामनेत्रे ऐशाने स्वभावकुक्षिनाडी यममथनी।

अत्र केचिदेवं वदन्ति—वामपादस्याग्रोत्तरं गुल्फपार्ष्णिदक्षिणगुल्फेषु[9] स्थिता या[10] द्वारपालिन्यः, दक्षिणपादस्याग्रे दक्षिणगुल्फपार्ष्णिवामगुल्फेषु स्थिताः कोणवासिन्या(न्यो) योगिन्या(न्यः) इति।

एवमध्यात्ममाराध्य मण्डलं भावयेत्। यदि वाराहीमूलं विश्ववज्रतन्मध्य-[11] विश्वपङ्करुह[12]मन्त्र(न्त)श्चतुर्दलं बहिरष्टदलं बिन्दुरूपं[13] विभाव्य तन्मध्यगां निरालम्बां यावद् [14]नाडीत्रयैकरूपां[15] प्रभास्वरां[16] नालरूपां[17] वज्रवाराहीं भावयेत्। तत्र त्रिदलं(ले) बिन्दुरूपास्तिस्रस्तिस्रः शशाद्या नाडिका[18] डाकिन्यादिडाकिनीस्वभावा[19] विभाव्य नाडीचक्रान्तर्वर्तिव्यापकं महाज्ञानं [20]श्रीचक्रसंवरं यावदित्थं(च्छं) चिन्तयेत्। ततः [21]स्फूलयोगेन वाराहीमुत्थाप्य सुखस्थाने[22] सर्वतथागतांश्चोदयेत्। चोदितैरमृतीभूतैर्यथोक्तमण्डलं सेवयेत्। ततोऽभिमुखीकृत्य अमृतरूपपरममन्त्रमावर्तयेत्। सैव पूजा, सैव स्मृतिः, स एवामृतास्वाद इति।

इति[23]ज्ञानोदय(ये) नाडीचक्रात्मकपरमगम्भीरो[24]त्पन्नक्रमः

---

1. मरुत–क. ख. ग. ज. झ. ञ.। 2. खेट–ख.ङ.छ.ज.झ.ञ., विड्–घ.। 3. कुलजा–क., कुलताजा–ख.ग.। 4. भालसिंही–च.। 5. मेघा–ञ.। 6. कायक्रम–झ.ञ.। 7. दाढी–ञ.। 8. शुचिमु–क. छ.ज.ञ.। 9. गुल्फे प्रस्थितात्–क. ग.। 10. प्राद्वारपारिण्या–क. ख. ग. ज. ञ., प्रावारपारिण्या–घ. ङ. च, न्याद्वार–झ.। 11. मध्ये–ङ. च.। 12. सहे–ङ. च.। 13. 'बिन्दुरूपं' नास्ति–क. ख. ग. घ. छ. ज. झ. ञ.। 14. हृदयैक–घ.। 15. रूपात्–क. ग. ज.। 16. स्वरात्–क. ग. ज.। 17 नाड्यरूपात्–क. ख. ग. घ. ङ. च., नाडीरूपात्–झ.। 18. नाडी–च. छ. ङ. ञ.। 19. भावं–क. ख. ग. घ.। 20. श्रीमहाचक्र–छ., श्रीचक्रसंवरसंवरं–झ. ञ.। 21. स्फुलन–क. ग. ज. झ., स्फरण–ङ., स्फलन–ञ.। 22. स्थानेन–घ., स्थान्–ङ.। 23. तत्त्वज्ञानो–छ.। 24 .गभीरो–च.।

जिह्वां तालुगतां कृत्वा योगी योगपरो भवेत् ।
योगजं [1]स्फारयेद् बुद्धं सर्वाशाकाशवस्तुषु ॥ 3 ॥
सिद्धयते जन्मनीहैव मन्दपुण्योऽपि मानवः ।
गुरुपादप्रसादेन योगाभ्यासात्सेन(भ्यासवशेन) च ॥ 4 ॥

तथा [2]चोक्तम्—

वीरस्य वीर[3]जिह्वायां जिह्वा ताल्वन्तरे पुनः ।
तालुदेशे तु वीरेशः कृत्वा ध्यानपरो भवेत् ॥
षण्मासात् सिद्धयते ज्ञानं चिन्तामणिरिवापरम् ॥ 5 ॥ इत्यादि ।

अथा[4]परयोग उच्यते—झटित्यात्मानं श्रीहेरुकं विभाव्य नाभिहृत्कण्ठशीर्षेषु चत्वारि चक्रं(क्राणि) चिन्तयेत् । तत्र नाभिमूले चतुःषष्टिदल[5]विशुद्धया चतुर्देवीनां षोडशशून्यतादिस्वभावषोडशाब्दविशुद्धया वा चतुःषष्टिदलं त्रिकोणं विचित्रं निर्माणचक्रं दलेष्वनुरो(लो)मतः ककारादीनि द्वात्रिंशद्वयञ्जनानि विलोमतस्तानि द्वात्रिंशद्वयञ्जनान्येव च[6] मध्ये अंकारं प्रभास्वरं भावयेत् । हृदये[7] अष्ट[8]दलं चतुरस्रं कृष्टं[9] धर्मचक्रं तस्य दिग्लेषु ॐ[10]हूँ त्रां ह्रीं खँ तद्विदिग्दलेषु लाँ माँ पाँ ताँ तदूर्ध्वतो अ क च ट त प य [11]शं सा(शा)न्तभूतभौतिकरूपं मध्ये[12] हूँकारं भावयेत् । कण्ठे षोडशशून्यताविशुद्धया वा[13]षोडशमर्धचन्द्राभं रक्तं संभोगचक्रम् । तस्य दलेषु षोडशस्वरा मध्ये [14]वंकारं भावयेत् । शिरसि द्वात्रिंशन्नाडीविशुद्धया द्वात्रिंशत्पुरुषलक्षणविशुद्धया द्वात्रिंशद्दलं [15]वर्तुलं शुक्लं महासुखचक्रम् । तस्य दलेषु ककारादिद्वात्रिंशद्वयञ्जनानि तदुपरि षोडशस्वराननुलोमतो मध्ये [16]हूँकारमनाहतश्रवं[17]चित्तधरं[18] विभावयेत् ।

[19]अथवाऽऽहुः—ऊर्ध्वंचक्रमधश्चक्रं त्रिकोणं[20] मध्ये चक्रद्वये [21]हुंकारमिति ।

---

1. स्फुर–क. ग. ज. ञ. । 2. प्रो–क. ग. । 3. वीरं–ञ. । 4. अथ प–ग., परो–घ. । 5. दण्ड–क.ख.ग.घ.च.ज.झ.ञ., दण्डविशुद्धाश्च–ङ, शुद्धांश्च–च. । 6. 'च' नास्ति–छ. ज. झ. ञ. । 7. 'हृदयेऽष्टपते-(त्र)विशुद्धया आर्याष्टाङ्गमार्गविशुद्धया अष्टौ विमोक्षविशुद्धया' इत्यधिकः पाठः–झ. । 8. मण्डलं–छ. । 9. कृष्ट्या–क., कृष्णा–ग. ज. झ., ष्णं–ङ. च. छ. । 10. 'हूं' नास्ति–क. ख. ग. घ. ङ. ज. झ. । 11. शः–च. ञ., सं–ज. । 12. मध्यहुं–क. ख. ग. झ. । 13. 'षोडशान्यप्रज्ञासंभोगविशुद्धया षोडशकान्तिविशुद्धया' इत्यधिकः पाठः–झ., 'वा' नास्ति–ज. ञ. । 14. ॐकारं–झ. भ. । 15. चतुर्दलं–ङ. च. । 16. हंकार–क. ख. ग. घ. ज. ञ. । 17. श्रवचि–ग. घ. ड. ज. ञ. । 18. धारं–ख. ग. घ. ङ. ज. झ. । 19. अथ त्वा–ख. घ. ङ. च. । 20. त्रिकोणमध्य–च., विकारं–क. ग. । 21. हंकार–ख. घ. च. ज., हूँकार–ञ. ।

[1]ततस्तेषु चतुर्षु चक्रेषु चतू[2](तुश्)चतूरूपान् यथाक्रमं विभाव्य विचित्र-विपाक-विमर्दविलक्षण—आनन्द-परमानन्द-विरमानन्द-सहजानन्द—दुःख-समुदय—निरोध-मार्ग[3]—आत्मतत्त्व-मन्त्रतत्त्व-देवतातत्त्व-ज्ञानतत्त्व—स्थावर-सर्वास्ति-संविति[4] - महासंघी—निष्पन्न—विपाक-पुरुषकार - वैमल्यानि—त्वरित-बाष्प - विवर्च - विश्वस्थात्[5]—आचार्य-भिक्षु - श्रावणैरक[6]-चैरक[7]—परपीठ - आत्मपीठ - योगपीठ - तत्त्वपीठ—एकार-वंकार-मकार-यकार—लोचना-मामकी-पाण्डरा-तारा—कर्ममुद्रा - धर्ममुद्रा - ज्ञानमुद्रा-महामुद्रा—शून्यता -निर्मिता[8]- प्रणिहिता-अनभिस्कारा[9]—गंगा-सागर - प्रयाग- कुरुक्षेत्र—गया-वाराणसी - जगन्नाथ - काशी—कृत-त्रेता-द्वापर-कलि—पूर्वाह्ण-मध्याह्न-ऽपराह्ण-अर्धरात्रान्, शरत्-शिशिर - ग्रीष्म - वर्षा ओडियान-जालन्धर-देवीकोट-पुल्लीरान्, वात-पित्त-श्लेष्म-सन्निपातान्, सेवा-उपसाधन-रो(सा)धन-महासाधन—पृथ्वी-आप-तेज-वायु—मैत्री-करुणा-मुदिता- उपेक्षा—मृदुयोग-अनु-योग-नियोग-महायोग—पूर्वविदेह- जम्बूद्वीप - अपरगोदावरि-उत्तरकुरु—चतुःसागरस्वभाव—[10]शुभ्रवर्ण-पीतवर्ण-रक्तवर्ण-हरितवर्ण—ॐकार-आकार - हूँकार - फट्कार—प्रज्ञा[11]-उपाय-कालि-आलि—धर्म-संभोग - निर्माण - महासुख—यंकार - रंकार - लंकार-वंकार—ब्राह्मण - क्षत्री-वैश्य-शूद्र—चन्द्र-सूर्य-तारा-राहु—पाताल-पृथ्वी-आकाश-स्वर्गांश्च क्रमेणाधिमुञ्चेत् ।

एवं बुद्धकायं चतुष्टयस्वभावं चतुश्चक्रं विभाव्य चक्रस्थबीजा[12]क्षरैर्मरीचिमुखेभ्यः सर्वतथागतान् [13]सर्वबोधिसत्त्वान् वीरयोगिनीमण्डलाकारेण संस्फार्य तान् विहितजगदर्थान् गृहीताखिलजिन[14]मतांस्तेष्वेव संहृत्य चक्रचतुष्टयं यावदित्थं(च्छं) भावयेत् । तदिदं [15]भावरत्नं चिरकालं भावयेत् । कायचतुष्टयं(य)लाभो इहैव जन्मनि संपद्येत[16] ।

इति ज्ञानोदये[17]चतुश्चक्रभावनायोगः

अथ नाडीत्रययोग उच्यते ।

कण्ठादारभ्य वामेना(न) प्रवृत्ताऽधोमुखी नाभिमण्डलगता मूत्रवहाऽऽलिव्याप्ता नाभेरारभ्य सव्येन प्रवृत्तोर्द्ध(र्ध्व)मुखी कण्ठपर्यन्तगता रक्तवहा कालिव्याप्ता ।

---

1. तत्र—ङ. । 2. 'चतू' नास्ति—क. ग. घ. । 3. मार्गान्—ग. घ. ङ. च. । 4. संवृति-ञ । 5. स्फात्—क. ग., स्थाने—च. । 6. मैरक—क. ग. घ. झ. । 7. नेरक—घ. च. । 8. निमित्ता—ङ. । 9. नाभिरका—ग., नाभिसंस्था—घ. । 10. श्वेत—च. । 11. उपायप्रज्ञा—ख. ग. च. । 12. वीता—क. ग. । 13. सबोधि—क. ग. ज. झ. ञ., संबोधि—च. छ. । 14. जिनज्ञानमतां—क. ख. ग. घ. ङ. च. ज. झ. । 15. सादरं निरन्तरं—ख.घ.छ. ज. ञ., सारदं—झ. । 16. द्यते—ञ. । 17. 'चतुश्' नास्ति—च. ।

तेन[1] प्रज्ञोपाय–शून्यताकरुणा–चन्द्रसूर्य–आलिकालि–प्रवेशनिष्काश–दिनरात्रि-व(अ)स्तमनोदय–उत्तरायणदक्षिणायां(यन)–संभोगनिर्माण–स्वप्नप्रबोध–परमार्थसंवृति-सूक्ष्म-स्थूल–वेकारवंकार–कंकारअंकार–भावाभाव–ज्ञेयज्ञानौ(न)–ग्राह्यग्राहकौ(क)–ल(र)स-नाललना–इंगलापिंगला–एवमूनविंशत्याकारमधिमुञ्चेत् ।

मध्यमा तु नाडिका द्वयद्वयैकरूपाऽधोमुखी बोधिचित्तवहा कदलीपुष्पसन्निभा लम्बमाना तैलवह्निरिवादी(वोद्दी)प्ता धर्मकाय[2]वाक्चित्तैकरूपा सहजानन्ददायिका । एता एव तिस्रो नाडिका(:) । कुह सन्धिर्भवेत्(?) एकीभावः । योनिनाड्यो भवन्ति । ताः पुनस्त्रि[3]भवपरिणता ग्राह्यग्राहकवर्जिता महासुखकायात्मिका[:] [4]शून्यताकरुणाभिन्नं(न्न)-बोधिचित्तस्वभावा इत्यधिमुञ्चेत् ।

तद्गतैकमानसो[5] मन्त्री यावदिच्छं तिष्ठेत्[6] । नियतं प्रज्ञोपायाद्वयसिद्धिः(द्धीः) संपश्येत[7] ।

इति ज्ञानोदये नाडीत्रयभावनायोगः

अथ सहजप्रज्ञायोग उच्यते—

> निर्माणचक्रमध्यस्था प्रज्ञावर्णाग्ररूपिणी ।
> कर्ममारुतनिर्धूता ज्वलन्ती सहजात्मिका ।। ६ ।।
> विद्यु[8]च्छता(त)प्रतीकाशा सुसूक्ष्मा बिसतन्तुवत् ।
> [9]विभाव्योत्थापयेन्मन्त्री सद्गुरू(रोरु)पदेशतः[10]।। ७ ।।

ततस्तान् धर्मसंभोगचक्रमा(गां)स्तथागतान् सबोधिसत्त्वगणान् दग्ध्वा निष्काश-मार्गेण निष्क्रम्य उपायं त्रि[:] प्रदक्षिणीकृत्य ऊर्णाकोशान्(कोश)गतान् भावयेत् । ततो मर्मोद्घाटकद्वारेण निःसृत्य दशदिग्गतानां बुद्धबोधिसत्त्वानां प्रवेशमार्गेण प्रविश्य जाल-न्धरगतांश्चक्रस्थान् ससुतान् सर्वसुगतान् दग्ध्वा गृहीतं तत्पीयूषरसं शिखारन्ध्रेण निर्गत्य स्वप्रवेशमार्गेण प्रविश्य दग्धांस्तथागतादि(तांस्त्रिः) प्रदक्षिणीकृत्य ओडियानेन निर्गत्य जालन्धरेण प्रविष्टांश्चिन्तयेत् । तत्र तत्र श्रवन्ती क्षीरधारा वहन्तः(न्ती) सीमान्तरगता[न्]

1. ते पुनः–क. ख. ग. घ. ङ. च. झ. । 2. वाग्भिर्नैक–क. ङ., बोधिचित्तैक–च. । 3. विभव–क.ङ., परिरता–क. ग. ङ. । 4. 'शून्यता' नास्ति–क. ख. ग. ङ. ज. । 5. मानसामग्रीं–क. ङ. । 6. तिष्ठतु–ग., इष्टतु–क. ङ. । 7. संपश्यते–ख. घ. ङ. ज. ञ. । 8. विशुद्धता–क. ङ. । 9. विविच्योत्था–क. ग.ङ. । 10. देशक–ज. झ. ञ. ।

दग्धा[न्] तथागतांस्तोषयन्ती[1] पुनरपि निर्माणचक्रे स्थितान् पश्येत् । एवमरहत(ट्ट)-घटिकावच्चित्तविश्रामपूर्वकं पुनः पुनर्भावयेत् । एवम[2]भ्यस्यते(तोऽ)चिरादेव महामुद्रा[3]-सिद्धिरभिमुखी भविष्यति ।

इति ज्ञानोदये सहजप्रज्ञायोगमि(ग इ)ति

[4]अथापरयोगः कथ्यते ।

निर्माणचक्रमध्यस्थां ज्वलन्तीमालीं(लिं) संक्षेपरूपां तिलकाख्यां प्रज्ञामुत्पत्य धर्मचक्रगतेन कालिसंक्षिप्तरूपेण श्रवदमृतधारेण वसन्ताख्येनोपायेन सहजसमापन्नामनु-रक्तामा स(सं)क्षोभ्य सानन्दा(न्दां) भावयेत् । तत्र स्फरणयोगेन व्याप्ताशेषाकाशभावं तामधिमुञ्चेत् ।

इति ज्ञानोदये वसन्ततिलकयोगः

[5]एषामन्यतमो योगः कर्तव्यः सिद्धिमिच्छता ।
तत्राक्षसूत्रेण नियमो जपो ध्यानं तथार्चनम् ॥ ८ ॥
न तिथिर्न च नक्षत्रं नोपवासो न चाहुतिः ।
न च धर्मसमादाय[:] प्रतिमावन्दना न च ॥ ९ ॥
न पूजा [न] परं ध्यानं न मण्डलं तथार्चनम् ।
स एव नियमः[6]पीठे वन्दना सैव योगिनः ॥ १० ॥
सिद्धौ[7] च वसुधादीनां लय[:] [8]स्याद(द्व)शवर्ति ते[9]।
ज्ञानमात्रं [10]सदा तिष्ठेद् [11]भासुरो गगनोपमः ॥ ११ ॥
निमित्तसिद्धि जानीयान्निमित्तानि[12] तु पञ्चधा ।
अतः संलक्ष्य(क्ष)येत्[13]तानि योगि(गी) धारणचेतसा ॥ १२ ॥
प्रथमं मरीचिकाकारं धूमाकारं द्वितीयकम् ।
तृतीयं खद्योताकारं चतुर्थं दीपवज्ज्वलेत् ॥
पञ्चमं तु सदालोकं निरभ्रं गगणसन्निभम् ॥ १३ ॥

इति पञ्चाकारमिति ।

---

1. यन्ति–ञ. । 2. मत्यास्यते–क. ख. ग. घ. ङ. छ. झ., मुत्पश्यते–च. । 3. समुद्रा–ख. घ. च. । 4. 'अथ' नास्ति–ख. छ. ञ., अथ पर–ग. ज. झ., अपरो–च. । 5. यथा मन्यते मायागः–क. ग. घ. ङ. । 6. मोऽपोत्थं–क. घ. ङ. । 7. सिन्धौ–क. घ. ङ. । 8. स्मा–ग. । 9. मे–ज. झ. । 10 तदा–च. छ. ज. झ. ञ. । 11. दास्तरो–क. घ. ङ., हास्त–ग. । 12. त्तहानि–क. ङ. ज. । 13. लक्षताज्ञानि–क. ग. ङ. ज. ।

एवमभ्यस्यतः[1] सम्यग् योगिनो योगसंभवात्[2] ।
महामुद्राह्वया[3] सिद्धिर्जायते नात्र संशयः ॥ 14 ॥
किं पुनः सिद्धयः क्षुद्रा[:] खड्गवेतालकादयः ।
अणिमादिगुणाश्चापि महाभिज्ञादयस्तथा ॥ 15 ॥

समाप्तोऽयं समुत्पन्नक्रमयोगः

शुक्ला याऽस्ति अथ कृष्णा दशम्यां कृतमण्डला(लः) ।
वीरवीरेश्वरीपूजां विदध्याद् विधिवत् सदा ॥ 16 ॥
कृष्णाष्टम्यां चतुर्दश्यां शुक्लपक्षे च साधकः ।
संपूज्य वीरयोगिन्या(न्यो) विधिना मदनैर्बलैः ॥ 17 ॥
एवं संपूजिताः स्तोत्रं(त्रैः) पुष्टिमि(मृ)च्छन्ति सर्वथा ।
तुष्टाः सिद्धिं[4] प्रयच्छन्ति तस्मात्पूजा(ज्याः)सदैव ताः॥ 18 ॥
वामोद्गतं[5] यत्र जगत् सर्वं स्थावरजङ्गमम् ।
अतः सर्वाणि कर्माणि कुर्याद् वामेन पाणिना ॥ 19 ॥
वामोच्चारो[6] भवेद् योगी वामसर्वार्थसाधनः ।
वामजापकरो नित्यं सर्वोपद्रवनाशनम् ॥ 20 ॥
इति सञ्चिन्त्य योगीन्द्रः सर्वशङ्काविवर्जितः ।
सिंहवद् विचरेत् [7]स्त्रीभिः सदा योगेन तत्परः ॥ 21 ॥
पञ्चस्वपि च वर्णेषु विचरेदेकवर्णवत् ।
निर्विकल्पात्मको भूत्वा भुञ्जयेत् कामपञ्चकम् ॥ 22 ॥
योगिनीभिश्च्युतो योगी नीयते परमं पदम् ।
पूजाभि[8]र्बाह्यगुह्याभिः संपूज्या(ज्य) च विधानतः ॥ 23 ॥
कृत्वाऽसौ संवरस्य त्रिभवभवस्वभोः[9] साधनं संवराग्रं
यन्मे पुण्यं प्रसूतिं(तं) विध(धु)करविमर(लं)[10] दोषविध्वंसदक्षम्[11] ।
तेनास्य सर्वसत्त्वास्त्रिभवभयहरश्रीसुखस्फीतगात्रा
वीराः श्रीहेरुकाद्या निजयुवतियुता आत्मगोत्रानुरूपाः ॥ 24 ॥

इति ज्ञानोदये प्रज्ञोपाययोगः

---

1. मत्यस्यते–क. । 2. संभवेत्–घ. । 3. द्रांकया–क.ग.ङ.झ. । 4. ऋद्धि–क.ख. । 5. गता–क.ख.ग.घ.ङ.ज. । 6. वामचारो–ज.झ.ञ. । 7. नित्यं–छ.ञ., त्रिभिः–झ. । 8. रार्यगुह्या–क, वार्यगुह्या–ग. । 9. भवे–क.ख.ग.ङ.च.छ.ज. । 10. विसरं–च. । 11. विद्युत्सुदक्षं–ख. घ. ङ. च. छ., सदक्षं–क. ग. ।

अथ षट्चक्रविशुद्धिमाह—

शिखास्थाने ललाटे च कण्ठे हृदयनाभितः ।
लिङ्गेषु त्रिदलं पद्मं चतुःषष्ट्यष्टषोडशम् ॥ 25 ॥
द्वात्रिंशं[1] चतुर्दलं चैव बोधिबीजेन[2] शोभितम् ।
व्यञ्जनं च स्वरं तेषां मातृकास्वरव्यञ्जनम् ॥ 26 ॥

[3]त्रये दले रं च ह्लींकारं वज्रयोगिनी वंकारं हूँकारं हेरुकं ध्यात्वा षट्चक्र परिकीर्तितम् । षट्चक्रः [4]षट्पटाकारमधिमुञ्चेत् । तद्यथा—

वज्रसत्त्वः, अक्षोभ्यः, अमोघसिद्धिः, वैरोचनः, रत्नसंभवः, अमिताभश्चेति षट्जिन[5]स्वभावम् । सर्वस्कन्ध-विज्ञानस्कन्ध-संसारस्कन्ध[6]-रूपस्कन्ध-वेदनास्कन्ध-संज्ञानस्कन्ध[7]इति षट्[8]स्कन्धाकार.(रम्) । [9]विज्ञानधातु-आकाशधातु-वायुधातु-पृथ्वीधातु-तेजोधातु-तोयधातु इति षट्धातुस्वभावम् । मनः-श्रोत्र-घ्राण-काय-चक्षुर्जिह्वा षडिन्द्रिय-स्वभावम् । शब्द-धर्मधातु-स्पर्श-गन्ध-रस-रूप इति षड्रसः । धर्मधात्वीश्वरी[10]-स्पर्श-वज्री-तारा[11]-लोचना-मामकी-पाण्डरा षट् तारा[12] चेति । हेर-नील-मल्प-मुक्ति-कर्केतन-पद्मराग षड्धातुः । इदं ब्रह्माण्डसदृशाकारं ब्रह्मभुवनं गुह्यचक्रं धर्मोदयाकारम् ।

धर्मोदयामहोद्याने नानाकुसुमविराजिते ।
शुक्लरक्तादिपुष्पेण फलप्रसवमण्डितम्[13] ॥
[14]महाधर्मव्याख्यानस्थाने[15] [16]प्रसवभूमिसम्पदम् ॥ 27 ॥

अथ नाडीत्रयभावना—

ललना प्रज्ञास्वभावेन रसनोपायसंस्थिता ।
अवधूती मध्यदेशे तु ग्राह्यग्राहकवर्जिता ॥ 28 ॥
कदलीपुष्पसंकाशं(शा) लम्बमाना त्वधोमुखं(खी) ।
तैलवह्निरिवोद्दीप्ता बोधिचित्तसमावहा ॥ 29 ॥
सावधूती स(सु)विज्ञाय(ता) सहजानन्ददायिका ।
प्रधाना[17] सर्वनाडीनां ललनाद्यास्तु नाडिकाः ॥ 30 ॥

---

1. शच्चतुर्दले—क.ख.ङ.छ.ज. । 2. वीर्येण—ङ. । 3. त्रयदलरंचनयो—क., त्रयं दं लं रं च ह्लींकारयो—ङ. ज , त्रयदलं च ह्लींकारं वज्रयो—घ. च. । 4. चक्रमध्यपकार—क., चक्रं—ङ., षड्घटाकार—ग. घ. ज. । 5. जित—क. । 6. 'स्कन्ध' नास्ति—च. । 7. संज्ञास्कं—च.छ. । 8. षट्चक्रस्कन्धा—च. । 9. ज्ञान—ज.झ. । 10. धात्वे—ज.ञ. । 11. वती—क. । 12. तारादेवी—च. 13. ते—क.ख.ग.घ.ङ.च. । 14. सद्धर्म—च. । 15. स्थानेन—क. ख.ग.घ.ङ.च.छ. । 16. प्रशस्त—ज.ग. । 17. प्राधान्य—झ ।

अत एवा[1]श्रयामन्या गङ्गासिन्धुपरापगाः[2] ।
ता एव [3]योनिनाड्या(ड्यः) स्युरेकी[4]भूताः खगानना ॥ 31 ॥

संभोगकायरूपात्मा जानीयाद् देहमाश्रिताः ।
तिस्रस्त्रिया[5](स्त्विमाः) प्रधाना या ललनाद्यास्तु नाडिकाः ॥ 32 ॥

ललना संभोगिककायो ल(र)सना निर्माणिकी तनुः[6] ।
अवधूती धर्मकाय[:] स्यादिति कायत्रयो मतः ॥ 33 ॥

एता नाडिकाः सर्वाः शरीरशुभकारिणो ।
तस्याः समूहसंजाता(तं) पिण्डेन देवतात्मकाः ॥ 34 ॥

पिण्डातीतं भवेत् पिण्डं पिण्डातीतं च देवता ।
तस्मादचित्तयोगेन तथतामयसर्वगा ॥ 35 ॥

प्रवेशाद्[7] वै भवेत्सृष्टि[:] स्थिति[:] निश्चलरूपतः ।
विनाशो निर्गतो वायुर्यावज्जीवं प्रवर्तते ॥ 36 ॥

प्रत्यक्षं[8] भावयेत् स्वाङ्गे तिष्ठति[9] चक्र उष्णीषे ।
कर्मनित्यक्रमे चैव ललाटे विधि भावयेत् ॥ 37 ॥

खाद्यभोज्यं तथा पिबेत् [10]कण्ठचक्रं विभावयेत् ।
सम्पूर्णं खादयेत् पश्चाद् हृच्चक्रे सुखं तिष्ठति ॥ 38 ॥

मध्याह्ने भावयेद्योगं [11]नाभ्यक्ता क्रम भावयेत् ।
सन्ध्यान्ते गुह्यचक्रे तु प्रज्ञोपायसुखं भवेत् ॥ 39 ॥

येन येनैव भावेन फुल्लितः सर्वहेतुना ।
तेन तेनैव[12] योगेन साधकी[13] सिद्धि[14]मुक्तिदम् ॥ 40 ॥

वर्षं च बह्वतिक्रान्तं [15]मूर्धंमूर्द्धंगतं भवेत् ।
निर्वाणा[16]कारं जानीयाद्विनिर्गंत्पुष्टिशो[17]षयोः ॥ 41 ॥

---

1. वशया–क. ग. ज. झ. ञ. । 2. परोगया–ख. ङ. च., परायणा–घ. । 3. योगिनीनाड्या–क. ङ. ज. ञ., योगिन्याद्याः–घ. । 4. स्युरकीर्तिताः–क. ग. ज. । 5. स्त्रिमस्त्रिमा–क. ग. ङ. । 6. ततः–ख. घ. ङ. च. । 7. शार्द्धं–क. ग. ज. । 8. प्रत्येकं–क. ग., प्रत्यक्ष–ख. घ. च झ । 9. भोष्टानि–क. ज । 10. घण्ट–ङ. च, चक्रे–ञ. । 11. नानेका–क. ग., नोत्यक्ता–ङ. च., नाङ्का–ज, नात्यक्षा–ञ. । 12. तेन च–क ख. । 13. कीः–क. ख. ग. घ. ङ. च. । 14 मुक्तिसिद्धि–घ. ङ. च. । 15. मुद्रमूर्धं–क ज. । 16. णकालं–च. । 17. त्यष्टिषो ययोः–क. ख. ञ, ययौ–घ. ज., पुष्टिपोषयोः–च. ।

कुतो ध्यायान्मृत्युकाले धर्मचक्रे स्वयंभुवः[1] ।
स(त)एव भावमात्रेण गच्छन्ति च सुखावतीम् ॥ 42 ॥

हृदया[2]ब्जगतं वायुः(युं) शीतहूँकारसन्निभम् ।
ध्यायात् समाहितो योऽसौ भवेन्निर्वाणकारकः ॥ 43 ॥

संसार ऊर्ध्वगो वायुर्निर्वाणं स्यादधोगतम्(तः) ।
अप्रतिष्ठितनिर्वाण(णं) हृदयाम्भोरुहस्थिता(तः) ॥ 44 ॥

[3]चक्रैः षड् ज्ञायते धीमान्[4] गुह्यचक्रं विनिर्गतम् ।
स एवंभूतजातीयान्[5] मलमूत्रेषु [6]ज्वालयेत् ॥ 45 ॥

सैव निर्माणकं ज्ञेयं शरीरे नालके जले ।
धर्मचक्रं शुभकुले नोयते सुखात्मकः(कम्) ॥ 46 ॥

नारके अवीचिकण्ठे ललाटे देवशासने ।
उष्णीषं साधकं ध्यात्वा[7] गच्छन्ति अधिमुक्तिके[8] ॥ 47 ॥

इदं पश्यथ भूतानां धर्मकर्म कुरु क्षणम् ।
संयोगं[9] पवनं भेदं[10] सदृशी(शो) नास्ति कस्यचित् ॥ 48 ॥

द्रव्येषु काष्ठेषु च मृत्तिकासु शिलासु चित्तेषु न सन्ति देवाः ।
सर्वेषु देवा मनसो विकारास्तस्मान्मनसाऽऽचरत्ये[11]तदेवम् ॥ 49 ॥

आत्मना सर्वबुद्धत्वं सर्वस्वं चित्तमेव च ।
तस्मात् सर्वप्रयत्नेन आत्मानं पूजयेत् सदा ॥ 50 ॥

न[12] वन्दयेद्धीमान् देवान् काष्ठपाषाणमृण्मयान् ।
चित्तादेव भवन्तीति कल्पते भावहेतुना ॥ 51 ॥

इति ज्ञानोदये षट्चक्रविशुद्धियोगः

---

1. स्वयं भवेत्–क. ग. ज., भुवे–च. । 2 हृदयाक्षि–क. ख. ग. घ. ञ., हृदयाक्रमणं–च. । 3. चक्रे–क. ग. । 4. ऽधिमानं–क ख. ग. । 5 जानीयात्–छ. ज. ञ., यान् नित्यमूल–च. । 6. मेलयेत्–क., जोलयेत्–ग. ङ. ज. ञ. । 7. ज्ञात्वा–क. ख. ग. घ. ङ. च. झ. । 8. मुक्तिवै–क. ख. ग. घ. ङ. च. झ. । 9. योगे–च. । 10. भेदे–च. । 11. चरमेत–क. ख. ग. घ. छ. ज. ञ. । 12. वन्देद्धी–ग. घ. ङ च. छ. ज. झ. ञ. । 'न चापि वन्दयेद् देवान्' इत्यद्वयसिद्धि(15 श्लो०)–सुभाषितसंग्रह(पृ० 54)-स्थितः पाठः ।

अथ बाह्याध्यात्म[1]पञ्चज्ञान[2]विशुद्धिमाह—

ततश्चतुर्दलकमलोपरि मध्ये श्रीवज्रवाराहीरूपं [3]चूर्णीकृतरक्तवर्ष(र्ण)[4]मद्यं पद्मभाजनं पश्येत् ।

(1) पूर्वदले डाकिनीरूपं जलचरं आदिरक्तं मद्यं [5]शुक्तिपात्रम् ।

(2) दक्षिणदले रूपिणीरूपं वनचरं शुभ्रमद्यं नारिकेलपात्रम् ।

(3) पश्चिमदले खण्डरोहारूपमाकाशचरं मार्जाल[6]कमद्यं कूर्मपात्रम् ।

(4) उत्तरदले लामारूपं पृथ्वीचरमग्निमद्यं कांस[7]पात्रम् ।

एते(वं)रूपान् विभाव्य ततः कुण्डेन पातालं वरुणभुवं पात्रेण स्वर्गं त्रिभुवनं त्रिकायं त्रिरत्नं त्र्यक्षरं त्रियानं त्रिशरणं त्रिसन्ध्याः—इति त्रयरूपाख्यं विभाव्य कुण्डं पञ्च[8]सारं पञ्चाकारेण रूपमधिमुञ्चेत् । तद्यथा—प्रथमं गोकुदहनं पञ्चाङ्कुशमिति । चक्षुर्घ्राणश्रोत्रजिह्वामनःपञ्चेन्द्रियधातुम् । मध्यद्वीप-पूर्वविदेह-जम्बूद्वीप-अपरगोदावरी-उत्तरकुरु इति पञ्चद्वीपस्वभावम् । चक्रडाक-वज्रडाक-रत्नडाक-पद्मडाक-विश्वडाक इति पञ्चडाकजिनस्वभावो भवेत् । प्राणवायु-अपानवायु-समानवायु-उदानवायु-व्यानवायु इति पञ्चवायु-[9]रूपेति । [10]पाचिनी-मारणी-आकर्षणी-पद्मनृत्येश्वरी-पद्मज्वालिनी[11] पञ्च-चक्र[12]रूपेति, पीठ-क्षेत्र-छन्दोह-मेलापक-श्मशान इति पञ्चपीठरूपम्[13] । रूप्यधातु-शीशकधातु-सुवर्णधातु-ताम्रधातु-लोहधातु इति पञ्चधातुस्वभावम् । डोम्बि(म्बी)-शूद्री-क्षत्री-वैश्या-ब्राह्मी पञ्चजातीति, नर[14]वज्रधाते(त्वी)श्वरी-हस्तिलोचनी-गोमामकी-अश्व-पाण्डुरा[15]-श्वानतारा पञ्चदेवीसंभवेति[16] । आकाश-आप-पृथ्वी-तेज-वायु पञ्चमण्डल-स्वभावेति । रूप-शब्द-गन्ध-रस-स्पर्श-स्वभावम् । आदर्शण-समता-प्रत्यवेक्षणा-कृत्यानु-ष्ठान-शु(सु)विशुद्धधर्मधातुज्ञानं पञ्चज्ञानमिति । [17]श्रद्धा-वीर्य-स्मृति-समाधि-प्रज्ञा इति पञ्चेन्द्रियरूपं ततोऽभ्यन्तरे भावयेत्[18] ।

---

1. ध्यात्मिकं—क. ख. ग. घ. ङ. च. ज. । 2. पञ्चसार—ङ. ज. ञ., सालि—च. । 3. वर्ण—च. । 4. मयं—क. । 5. मुक्ति—क. ग. ज. ञ. । 6. रकमलं—च. । 7. कंत्रपा—क., कामपा—च., कंसपा—ज. । 8. सारेण—ज. ञ । 9. 'इति' नास्ति—ञ., रुत्पत्तिः—क., रूपम्—घ. । 10. पातनी—ङ., वाचनी—च. । 11. ज्वालो—क. ख. ग. घ. च. ज. झ. । 12. उत्पत्तिः—क. च. । 13. रूपां—क. च. । 14. नरः—ख. घ. । 15. पाण्डरी—ङ. छ ज. । 16. संभोति—ग. घ., संभाति—ङ. ज. ञ, समावेति—च. छ. । 17. शुद्धां—क. ख. ङ. झ. । 18. भावयन्—क. ।

दधिना बोधिचित्तरूपम्, [1]अम्रे(म्ले)न रक्तरूपम्, लवणेन पेयलरूपम्, तैलेन स्वेदरूपम्, चूर्णकृतमांसेन ब्राह्मण्यासारमांसरूपं विभाव्य पुनर्बोधिचित्त[2]रूपेण कोषपानं रक्तेन जलचर[3]रूपम्, पेयलेन वनचररूपम्[4], स्वेदेन आकाशचररूपम्[5], ब्राह्मण्यासारमांसेन पृथ्वीचररूपम्[6], एवंरूपान्[7] विभाव्य ततः स्वशरीरेण कुम्भं बोधिचित्ताद्या(द्य)चरुमयम्, मस्तकेन पात्रम्, अर्बुदेन पात्रस्थामृतस्वभावम्, हस्तद्वयेन [8]कुण्डेष्वनन्तवासुकीरूपम्, कुचद्वयेन [9]चन्द्रार्धसूर्याकारम्—एवं[10]रूपांश्च स्वशरीरे सर्वान् [11]भावयित्वा पूजां च कारयेत्[12] ।

अन्य[द्] विवर्जयन्नित्यं स्वशरीरेषु भावयेत् ।
सर्वं च स्वशरीरेऽस्ति[13] तेन शरीरमुत्तमम् ॥ 52 ॥

पुनर्बाह्यपूजाचूर्णकृतमेकेन अर्चयेत् । ततश्चूर्णकृतमेकेन [14]पञ्चाकारोऽस्ति, कथम् ? दधिना मध्ये कोषपानम्, अम्लेन[15] म्लेच्छरूपम्, लवणेन वनचररूपम्, तैलेन आकाशचररूपम्, चूर्णकृतमांसेन पृथ्वीचररूपम्, तदूर्ध्वस्थ[16]मांसेन गोकुदहनं पञ्चाङ्कुशरूपम् । एवमेतेन[17] बाह्यपूजां च कारयेत् ।

ततः स्वादस्य वर्णनमाह—चूर्णकृतरसून[18]सदृशम् । जलचर-मधु । वनचर-लवणम् । आकाशचर-तिक्तम् । पृथ्वीचर-आर्द्रस्वादम् । पञ्चरस-पञ्चस्वादरूपं बाह्यकषायाम्र(म्लं) [19]इत्येतेन षड्रसमधिमुञ्चेत् ॥

॥ [20]इति ज्ञानोदयतन्त्रं समाप्तम् ॥

---

1. आमिषेण–च छ । 2. चित्तेन–क. ख. ग. घ. ञ. । 3. जलचरं–क. ख. ग. घ. ङ. ज. ञ. । 4. 5. 6. 'रूपम्' नास्ति–क. ख. ग. घ. ङ छ. झ. ञ. । 7. रूपं–च. छ. । 8. कुण्डस्थे–क. ग. ज., कुण्डस्य–घ. च., कण्ठस्थे–ङ. ञ । 9. अर्धचन्द्र–च. । 10. द्वया–क., रूपा–ख. ग. घ. च. झ. । 11. भावित्वा–क ख.ग घ.ङ ज.झ.ञ. । 12 अत्र च. मातृका समाप्ता । 13. स्थितेन–ङ. । 14. पञ्चाकारोऽपि–क.ग.च. । 15 अमृतेन–क.ख.घ च. । 16. तदूर्ध्वमां–ङ., तदर्थस्तमां–क. ग., तदर्धमष्टमां–घ. । 17. मेतेनाचार्यपूजां–क ख. ग. घ. ङ. च. छ. । 18. कृसर–क.ग., कृतरसेन–घ ङ । 19. इत्यनेन–ज. ञ. । 20 इति ज्ञानोदयपञ्जिकायां बाह्यात्मिक कुम्भसाधनं समाप्तम्–ख. ङ. छ. झ. ञ. ।

ज्ञानोदयतन्त्रस्य श्लोकार्धानुक्रमणी

विशिष्टशब्दानुक्रमणी

ऋत्विग्भ्य इति ब्रह्मादिभ्यः । तत्र प्रणीतामार्जनं कृत्वा ब्रह्मणे दक्षिणां दत्त्वा ब्रह्माणमुद्वास्य हुतचरुशेषम् प्राशयेदिति ज्ञेयम् । तदुक्तं संहितायाम्—

प्रणीतामार्जनं कृत्वा दद्याच्च ब्रह्मदक्षिणाम् ।
स्वस्ववित्तानुसारेण लोभमोहविवर्जितः ॥
ततो ब्रह्माणमुद्वास्य ब्राह्मणान् भोजयेदथ ।
आशीर्वचोभिर्विदुषामेधमानः सुखी भवेत् ॥

हुतशेषं ततः प्राश्य कुक्कुटाण्डप्रमाणकम् । मन्त्रितं मन्त्रगायत्र्या । इति ।

अन्यच्च 'त्र्यायुषं यमदग्ने' इति मन्त्रेण भस्म धारयेत् ।

पूर्णपात्रं पूर्यतोयैः सप्तकृत्वोऽभिमन्त्रितैः ।
आत्मानमभिषिञ्चेत्तैः सदूर्वैस्तुलसीदलैः ॥ इति ॥ ११४-११५॥

उसी दिन से वह अनन्य बुद्धि हो गुरु का समस्त प्रिय कार्य करे तथा प्रसन्न मन से समस्त ऋत्विजों को दक्षिणा देवे ॥ ११४ ॥

पुनः भक्ष्य एवं भोज्य पदार्थों का ब्राह्मणों को भोजन करावे और उन्हें दक्षिणा द्वारा संतुष्ट करे । यहाँ तक हमने क्रियावती दीक्षा का वर्णन किया । इस दीक्षा से संपूर्ण समृद्धि प्राप्त होती है ॥ ११५ ॥

वर्णात्मिकादीक्षा

अथ वर्णात्मिकां वक्ष्ये दीक्षामागमवेदिताम् ।
पुंप्रकृत्यात्मका वर्णाः शरीरमपि तादृशम् ॥ ११६ ॥
यतस्तस्मात्तनौ न्यस्येद् वर्णान् शिष्यस्य देशिकः ।
तत्तत्स्थानयुतान् वर्णान् प्रतिलोमेन संहरेत् ॥ ११७ ॥
स्वाज्ञया देवताभावाद् विधिना देशिकोत्तमः ।
तदा विलीनतत्त्वोऽयं शिष्यो दिव्यतनुर्भवेत् ॥ ११८ ॥
परमात्मनि संयोज्य तच्चैतन्यं गुरूत्तमः ।
तस्मादुत्पाद्य तान् वर्णान् न्यस्येच्छिष्यतनौ पुनः ॥ ११९ ॥
सृष्टिक्रमेण विधिवच्चैतन्यञ्च नियोजयेत् ।
जायते देवताभावः परानन्दमयः शिशोः ॥ १२० ॥

क्रमप्राप्तां वर्णात्मिकां दीक्षामाह अथेति । तत्तदिति । देशिकोत्तमः तच्चैतन्यं शिष्यच्चैतन्यं परमात्मनि संयोज्य देवताभावात् स्वस्य देवतात्वात् अतएव आज्ञासिद्धत्वात् । स्वस्याज्ञया विधिना प्रतिलोमेन वर्णस्थानोभयप्रातिलोम्येन तत्तत्स्थानयुतान् वर्णान् संहरेत् । अग्रिमं स्थानं वर्णं पूर्वस्मिन् स्थाने वर्णे च संहरेदित्यर्थः । गुरूत्तम इत्युत्तरेण सम्बध्यते । तस्मात् परमात्मनः । विधिवदिति पूर्वस्मात् स्थानाद् वर्णादग्रिमं स्थानं वर्णञ्च । चैतन्यञ्चेति चकारेण शिष्यतनावित्यनुषज्यते । तदुक्तमाचार्यैः—

अग्नीन्दुयोगविकृता लिपयो हि सृष्टा-
स्ताभिर्विलोमपठिताभिरिदं शरीरम् ।
भूतात्मकं त्वगसृगादियुतं समस्तं
संव्यापयेन्निशितधीर्विधिना यथावत् ॥

अन्त्यावूष्मस्वमून् वादिषु लिपिषु तांस्तांश्चतुर्वर्गवर्णे-
ष्वेतान्नस्यम्पदस्तद्दुति तदपि परेषु स्वरेषु क्रमेण ।
संहृत्य स्थानयुक्तं क्षपितसकलदेहो ललाटस्थितान्तः
प्राप्तिव्याप्तद्विसप्ताधिकभुवनतलो यातु मद्भावमेव ॥

मूलाधारात् स्फुरिततडिदाभाप्रभा सूक्ष्मरूपो-
द्गच्छन्त्यामस्तकमणुतरा तेजसां मूलभूता ।
सौषुम्नाध्वा चरणनिपुणा सा सवित्रानुविद्धा
ध्याता सद्योऽमृतमथ रवेः स्रावयेत् सार्द्धसोमात् ॥

शिरसि निपतिता या बिन्दुधारा सुधाया
भवति लिपिमयी सा ताभिरङ्गं मुखाद्यम् ।
विरचयतु समस्तं पातितान्तश्च तेज-
स्यनल इव घृतस्योद्दीपयेदात्मतेजः ॥

संहृत्य चोत्पाद्य शरीरमेवं
तेजोमयं व्याप्तसमस्तलोकम् ।
सङ्कल्प्य शक्त्यात्मकमात्मरूपं
तच्चिन्हमात्मन्यपि सन्दधीत ॥ इति ॥ ११६-१२० ॥

अब आगम शास्त्र में प्रतिपादित वर्णात्मिका दीक्षा का वर्णन करता हूँ—सभी वर्ण पुरुष रूप हैं तथा शरीर भी पुरुष रूप है । इसलिये आचार्य पुरुष रूप वर्णों को शिष्य के पुरुष शरीर में न्यास करें । पुनः शिष्यगत चैतन्य को परमात्मा में संयुक्त कर, स्वयं देवस्वरूप हो अपनी आज्ञा से प्रतिलोम क्रम से आगे आगे के स्थान युक्त वर्णों को पूर्व पूर्व स्थान युक्त वर्णों में उपसंहृत करें । इस प्रकार शिष्य के शरीर में वर्णों के विलीन कर देने से उसका शरीर देवमय हो जाता है ॥ ११६-११९ ॥

पुनः उत्तम गुरु उन्हीं वर्णों को शिष्य के शरीर से उद्भूत कर शरीर में सृष्टिक्रम के अनुसार न्यास करें और शिष्यगत् चैतन्य को परमात्मा में संयुक्त करें । ऐसा करने से शिष्य में देवताभाव आता है और वह शुद्ध आनन्द स्वरूप हो जाता है । इस प्रकार हमने वर्ण दीक्षा का विधान कहा जो समस्त ज्ञानों की जननी है ॥ ११९-१२१ ॥

कलावतीदीक्षा

एषा वर्णमयी दीक्षा प्रोक्ता सम्वित्प्रदायिनी ।
ततः कलावती दीक्षा यथावदभिधीयते ॥ १२१ ॥

निवृत्त्याद्याः कलाः पञ्च भूतानां शक्तयो यतः ।
तस्माद् भूतमये देहे ध्यात्वा ता वेधयेच्छिशोः ॥ १२२ ॥
निवृत्तिर्जानुपर्यन्तं तलादारभ्य संस्थिता ।
जानुनोर्नाभिपर्यन्तं प्रतिष्ठा व्याप्य तिष्ठति ॥ १२३ ॥
नाभेः कण्ठावधि व्याप्ता विद्या शान्तिस्ततः परम् ।
कण्ठाल्ललाटपर्यन्तं व्याप्ता तस्माच्छिखावधि ॥ १२४ ॥
शान्त्यतीता कला ज्ञेया कलाव्याप्तिरितीरिता ।
संहारक्रमयोगेन स्थानात् स्थानान्तरे गुरुः ॥ १२५ ॥
संयोज्य वेधयेद् विद्वानाज्ञया ताः शिवा(रो)ऽवधि ।
इयं प्रोक्ता कला दीक्षा दिव्यभावप्रदायिनी ॥ १२६ ॥

कलावतीदीक्षाक्रममाह तत इति । ध्यात्वेत्यत्र यद् ध्यानमुद्दिष्टं तन्निवृत्तिरित्यादि ईरितेत्यन्तेनोक्तम् । तलात् पादतलात् । जानुनोर्नाभेः कण्ठात् तस्माल्ललाटादारभ्येति सम्बन्धः । स्थानात् स्थानान्तरे ताः संयोज्य संहारक्रमयोगेन शिशोर्देहे वेधयेदिति सम्बन्धः । संहारः पूर्ववदेव स्वस्वकारणे । शिवावधि शिवपर्यन्तम् । शिवात् सृष्टिमार्गेणोत्पत्तिरनुक्तापि पूर्ववदेवाऽनुसन्धेया ॥ १२१-१२६ ॥

अब **कलावती दीक्षा का विधान** कहता हूँ—

यतः निवृत्ति आदि पाँच कलायें समस्त भूतों की शक्तियाँ हैं अतः आचार्य उन कलाओं का ध्यान कर शिष्य के पञ्चभूतमय शरीर का भेदन कर उन्हें शरीर में प्रवष्टि करावें ॥ १२१-१२२ ॥

शरीर में पैर के तलवे के आरम्भ से जानुपर्यन्त भाग में निवृत्तिकला स्थित है और जानु से नाभि पर्यन्त भाग में प्रतिष्ठाकला व्याप्त होकर स्थित है ॥१२३॥

नाभि से आरम्भ कर कण्ठावधि पर्यन्त भाग में विद्या कला, उसके बाद कण्ठ से ललाट पर्यन्त भाग में शान्तिकला, तथा ललाट से शिखा पर्यन्त भाग में शान्त्यतीता कला व्याप्त है—ऐसा समझना चाहिए । गुरु इन पाँच कलाओं का वेधन संहार क्रम के अनुसार करे । आज्ञाचक्र से शिवचक्र पर्यन्त एक चक्र को दूसरे चक्र में संयुक्त करें । इसे कला दीक्षा कहते हैं । इस दीक्षा से दिव्यभाव की प्राप्ति होती है ॥ १२४-१२६ ॥

वेधमयीदीक्षा

ततो वेधमयीं वक्ष्ये दीक्षां संसारमोचनीम् ।
ध्यायेच्छिष्यतनोर्मध्ये मूलाधारे चतुर्दले ॥ १२७ ॥
त्रिकोणमध्ये विमले तेजस्त्रयविजृम्भिते ।
वलयत्रयसंयुक्तां तडित्कोटिसमप्रभाम् ॥ १२८ ॥

षट्चक्रभेदवर्णनम्

शिवशक्तिमयीं देवीं चेतनामात्रविग्रहाम् ।
सूक्ष्मां सूक्ष्मतरां शक्तिं भित्वा षट्चक्रमञ्जसा ॥ १२९ ॥
गच्छन्तीं मध्यमार्गेण दिव्यां परशिवावधि।
वादिसान्तदलस्थार्णान् संहरेत् कमलासने ॥ १३० ॥
तं षट्पत्रमये पद्मे बादिलान्ताक्षरान्विते ।
स्वाधिष्ठाने समायोज्य वेधयेदाज्ञया गुरुः॥ १३१ ॥
तान् वर्णान् संहरेद् विष्णौ तं पुनर्नाभिपङ्कजे।
दशपत्रे डादिफान्त-वर्णाढ्ये योजयेद् गुरुः॥ १३२ ॥
तान् वर्णान् संहरेद् रुद्रे तं पुनर्हृदयाम्बुजे।
कादिठान्तार्कवर्णाढ्ये योजयित्वेश्वरे गुरुः॥ १३३ ॥
तान् वर्णान् सहरेदस्मिंस्तं भूयः कण्ठपङ्कजे।
स्वराढ्यषोडशदले योजयित्वा स्वरान् पुनः॥ १३४ ॥
सदाशिवे तान् संहृत्य तं पुनर्भ्रूसरोरुहे।
द्विपत्रे हक्षलसिते योजयित्वा ततो गुरुः॥ १३५ ॥
तदर्णौ संहरेद् बिन्दौ कलायां तं नियोजयेत्।
तां नादेऽनन्तर नादं नादान्ते योजयेद् गुरुः॥ १३६ ॥
तमुन्मन्यां समायोज्य विष्णुवक्त्रान्तरे च ताम्।
तां पुनर्गुरुवक्त्रे तु योजयेद् देशिकोत्तमः॥ १३७ ॥

अनया शिष्यस्य दिव्यबोधावाप्तिः

सहैवमात्मना शक्तिं वेधयेत् परमेश्वरे ।
गुर्वाज्ञया छिन्नपाशस्तदा शिष्यः पतेद्भुवि ॥ १३८ ॥
सञ्जातदिव्यबोधोऽसौ सर्वं विन्दति तत्क्षणात्।
साक्षात् शिवो भवत्येष नात्र कार्या विचारणा ॥ १३९ ॥
एषा वेधमयी दीक्षा सर्वसम्वित्प्रदायिनी ।
क्रमाच्चतुर्विधा दीक्षा तन्त्रेऽस्मिन् सम्यगीरिता ॥ १४० ॥

वेधमयीं दीक्षामाह तत इति । तनोर्मध्ये मूलाधारे त्रिकोणमध्ये व्यधिकरण्यः सप्तम्यः । शिष्यतनोर्मध्ये चतुर्दले मूलाधारे त्रिकोणमध्ये एवम्भूतां शक्तिं ध्यायेदिति सम्बन्धः । कीदृशीं शक्तिं वलयत्रयसंयुक्ताम् । अत्र यद्यपि शक्तेरपरिमितानि वलयानि तथापि वेदत्रयादेः प्रधानतमसृष्टेर्वलयत्रयादुत्पत्तेस्तदुक्तिः । पुनः कीदृशीम् । षट्चक्रं भित्त्वा मध्यमार्गेण सुषुम्नामार्गेण परशिवावधि गच्छन्तीम् । षट्चक्राणि तु मूलाधार-स्वाधिष्ठान-मणिपूरकानाहत-विशुद्धाज्ञाख्यानि । कमलासने ब्रह्मणि आधाराधिष्ठातृ-

देवतायाम् । एवं विष्णवादयः स्वाधिष्ठानाद्यधिष्ठातृदेवाः ज्ञेयाः । तं ब्रह्माणम् तान् वर्णान् बादिलान्तान् । तं विष्णुं नाभिपङ्कजे मणिपूरके योजयेत् । ततो वेधयेदित्य-नुषङ्गः । तान् वर्णान् डादिफान्तान् । तं रुद्रम् । अर्कपत्राढ्ये द्वादशपत्राढ्ये । हृदयाम्बुजे अनाहते योजयित्वा वेधयेदित्यनुषङ्गः । गुरुस्तान् वर्णान् कादिठान्तान् ईश्वरे संहरेदित्यन्वयः । भूयोऽनन्तरमीश्वरमस्मिन् कण्ठपङ्कजे विशुद्धौ योजयित्वा वेधयेदित्यनुषङ्गः । तान् स्वरान् सदाशिवे संहृत्येत्यन्वयः । तं सदाशिवं भ्रूसरोरुहे आज्ञायां योजयित्वा वेधयेदित्यनुषङ्गः । अग्रे नियोजयेदित्यादेर्वेधयेदित्यर्थः । तदर्णौ हक्षौ । बिन्दौ शिवे । बिन्दुः शिवात्मकः इत्युक्तेः । तं शिवम् । कलादीनि भ्रूमध्यादुपर्युपरि एतानि षट्चक्राणि । अत एव सहस्रारस्य द्वादशान्तता । एवं पूर्वोक्तक्रमेण आत्मना शिष्यजीवात्मना शक्तिं कुण्डलिनीं परमेश्वरे शिवे वेधयेदिति सम्बन्धः । शक्तिं विना वेधस्य कर्त्तुमशक्यत्वात् । अत एवादौ मूलाधारे शक्तिं ध्यायेदित्युक्तिः । ततश्च स्वाधिष्ठानादावपि शक्त्या एव वेध इति ज्ञेयम् । छिन्नपाशः पाशत्रयविमुक्त इत्यर्थः । यत् प्रयोगसारे—

पाशस्तु सत्सु चासत्सु कर्मस्वास्था समीरिता ।
त्रिविधः स तु विज्ञेयः पाशो बन्धैकसाधनः ॥
प्रथमः सहजः पाशस्तथा चागन्तुकः परः ।
प्रासंगि (संसर्गि) कस्ततीयः स्यादिति पाशत्रयं स्मृतम् ॥ इति ।

यथा ग्रन्थकृत्परमगुरुसोमानन्दाचार्यकृतवेधेन ग्रन्थकृद्गुरव उत्पलाचार्या शिवात्मानो जाताः । ग्रन्थकृद्गुरुपङ्क्तिस्तु तृतीयश्लोकव्याख्याने दर्शिता । तथा चण्डेश्वराचार्यकृतवेधेन शिवस्वामी शिवात्मा जातः । तथा श्रीकण्ठाचार्या ऊचुः—

कालज्ञानं तथा कालवञ्चनान्यतनौ तथा ।
प्रवेशो वेध इत्यादि प्रसन्ने लभ्यते शिवे ॥ इति ।

उपसंहरति क्रमादिति । षडन्वयमहारत्ने इयमाणवी दीक्षा दशविधा इत्युक्तम् ।

तद्यथा— आणवी बहुधा दीक्षा शाक्तेयी शाम्भवी पुनः ।
एकधैवेति विद्वद्भिः पठ्यते शास्त्रकोविदैः ॥
आणवी बहुधेत्युक्ता तद्भेदमधुनोच्यते ।
स्मार्त्ती मानसिकी यौगी चाक्षुषी स्पार्शनी तथा ॥
वाचिकी मान्त्रिकी हौत्री शास्त्री चेत्याभिषेचिकी ।
विदेशस्थं गुरुः स्मृत्वा शिष्यं पाशत्रयं क्रमात् ॥
विश्लिष्य लयभोगाङ्गविधानेन परे शिवे ।
सम्यग् योजनरूपैषा स्मार्त्ती दीक्षेति कथ्यते ॥
स्वसन्निधौ समासीनमालोक्य मनसा शुचिम् ।
मलत्रयादुपायैर्या मोचिका सा तु मानसी ॥
योगोक्तक्रमतो योगी शिष्यदेहं प्रविश्य तु ।
गृहीत्वा तस्य चात्मानं स्वात्मना योजनात्मिका ॥
योगदीक्षेति सा प्रोक्ता मलत्रयविनाशिनी ।
शिवोऽहमिति निश्चित्य वीक्षणं करुणार्द्रया ॥

दृशा सा चाक्षुषी दीक्षा सर्वपापप्रणाशिनी ।
स्वयं परशिवो भूत्वा निःसन्दिग्धमना गुरुः ॥
शिवहस्तेन शिष्यस्य समन्त्रं मूर्द्धिन संस्पृशेत् ।
स्पर्शदीक्षेति सा प्रोक्ता शिवाभिव्यक्तिकारिणी ॥

(शिवहस्तलक्षणं सोमशम्भौ—

गन्धैर्मण्डलकं स्वीये विदध्याद् दक्षिणे करे ।
विधिनात्राऽर्चयेद् देवमित्थं स्याच्छिवहस्तकम् ॥ इति ।)
गुरुवक्त्रं निजवक्त्रं विभाव्य गुरुरादरात् ।
गुरुवक्त्रप्रयोगेन दिव्यमन्त्रादिकं शिशौ ॥
मुद्रान्यासादिभिः सार्द्धं दद्यात् सेयं हि वाचिकी ।
दीक्षा परा तथा मन्त्रन्याससंयुक्तविग्रहः ॥
स्वयं मन्त्रतनुर्भूत्वा सक्रमं मन्त्रमादरात् ।
दद्याच्छिष्याय सा दीक्षा मान्त्री मलविघातिनी ॥
कुण्डे वा स्थाण्डिले वापि निक्षिप्याऽग्निं विधानतः ।
लयभोगक्रमेणैव प्रत्यध्वानं यथाक्रमम् ॥
मन्त्रवर्णकलातत्त्वपदविष्टपमेव च ।
शुद्ध्यर्थं होमरूपैषा हौत्री दीक्षा समीरिता ॥
योग्यशिष्याय भक्ताय शुश्रूषार्चापराय च ।
सार्द्धं शास्त्रपदा त्रय्या शास्त्री दीक्षेति सोच्यते ॥
शिवञ्च शिवपत्नीञ्च कुम्भे सम्पूज्य सादरम् ।
शिवकुम्भाभिषेकात् सा दीक्षा स्यादाभिषेचिकी ॥१२७-१४०॥

अब **संसार से मुक्त करने वाली वेधमयी दीक्षा का वर्णन** करता हूँ—आचार्य सर्वप्रथम शिष्य के शरीर के मूलाधार स्थित त्रिकोण के मध्य में जहाँ विमल चतुर्दल कमल है जो सोम, सूर्य तथा अग्निमय तीनों तेजों से खिला हुआ है वहाँ कुण्डलिनी का ध्यान करें । वह कुण्डलिनी तीन वलय से युक्त है, उसका प्रकाश करोड़ों विद्युत्प्रभा के समान है । उसका शरीर चैतन्य से युक्त है वह सूक्ष्म से भी सूक्ष्म है, इस प्रकार शिव शक्तिमयी कुण्डलिनी देवी का ध्यान करना चाहिए ॥ १२७-१२९ ॥

वह अनायास षट्चक्रों (मूलाधार स्वाधिष्ठान, मणिपूर, अनाहत, विशुद्ध एवं आज्ञा) का भेदन कर सुषुम्नारूप मध्य मार्ग के द्वारा परशिव पर्यन्त जाती है, ऐसी दिव्य कुण्डलिनी देवी का ध्यान करें ॥ १२९-१३० ॥

तदनन्तर उस **मूलाधार** स्थित व र ल श ष स इन अक्षरों वाले षड्दल कमल को ब्रह्म में उपसंहार कर, ब भ म य र ल रूप षट् पत्रमय कमल रूप **स्वाधिष्ठान चक्र** में उसे युक्त कर विष्णु में उपसंहृत करे । पुनः उन वर्णों को भी वहाँ से उठाकर नाभि चक्र स्थित ड ढ ण त थ द ध न प फ रूप दशपत्र कमल वाले **मणिपूर चक्र** में संयुक्त करे ॥ १३०-१३२ ॥

पुनः उन वर्णों का रुद्र में उपसंहार कर हृदय स्थित क ख ग घ ङ, च छ ज झ ञ ट ठ रूप द्वादशपत्रात्मक कमल वाले **आज्ञा चक्र** में स्थापित कर ईश्वर में गुरु उपसंहृत करे ॥ १३३ ॥

पुनः उन वर्णों को वहाँ से ऊपर उठाकर कण्ठ स्थित षोडश स्वरात्मक रूप षोडश पत्र कमल वाले **विशुद्ध चक्र** में स्थापित कर सदाशिव में उनका उपसंहार करे ॥ १३४-१३५ ॥

पुनः उन वर्णों को भी वहाँ से ऊपर उठाकर भ्रूमध्य स्थित ह क्ष वर्ण वाले द्विपत्रात्मक कमल वाले **आज्ञाचक्र** में स्थापित कर बिन्दु में उसे कला से संयुक्त करे । पुनः उसे नाद में एवं नाद को पुनः नाद में तथा उन्हें भी नादान्त में संयुक्त करे । पुनः उसे उन्मनी में संयुक्त कर विष्णु के मुख में, पुनः उसे भी गुरु के मुख में आचार्य संयुक्त करें ॥ १३५-१३७ ॥

इस प्रकार शिष्य की जीवात्मा को कुण्डलिनी शक्ति द्वारा भेदन कर उसे परमात्मा में स्थापित करे । ऐसा करने से शिष्य पाश से मुक्त हो पृथ्वी पर गिर कर गुरु को प्रणाम करे ॥ १३८ ॥

विमर्श—पाशत्रय निम्न हैं—१. सहज प्राप्त भोग, २. आगन्तुक भोग और ३. संसर्ग जन्य भोग । ये तीनों पाश बन्धन करने वाले हैं जैसा कि कहा है—

पाशस्तु सत्सु चासत्सु कर्मस्वास्था समीरित ।
त्रिविधः स तु विज्ञेयः पाशो बन्धैकसाधनः ॥
प्रथमः सहजः पाशस्तथा चागन्तुकः परः ।
प्रासंगि(संसर्गि)कस्तृतीयः स्यादिति पाशत्रयं स्मृतम् ॥

इस प्रकार दीक्षा का प्रयोजन पाशत्रय से मुक्ति है । इनका विधि-विधान अन्य ग्रन्थों से लेकर विस्तृत विवेचन पदार्थादर्श में भी किया गया है । इसे इसी ग्रन्थ की भूमिका में देखना चाहिए ॥ १३८ ॥

वेध के होने से शिष्य में सर्वज्ञता आ जाती है और वह सब कुछ जानने लगता है, वह शिव स्वरूप हो जाता है, इसमें संदेह नहीं ॥ १३९ ॥

यहाँ तक हमने वेधमयी दीक्षा का वर्णन किया । यह वेधमयी दीक्षा संपूर्ण ज्ञान को देने वाली है । इस प्रकार यहाँ तक इस तन्त्र में क्रमशः चार प्रकार की दीक्षा का वर्णन सम्यक् रूप से किया गया है ॥ १४० ॥

होमद्रव्यमानम्

अथाऽत्र होमद्रव्याणां प्रमाणमभिधीयते ।
कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतम् ॥ १४१ ॥
उक्तानि पञ्च गव्यानि तत्समानि मनीषिभिः ।
तत्समं मधु-दुग्धान्नमक्षमात्रमुदाहृतम् ॥ १४२ ॥

सांख्यदर्शनमते पञ्चविंशतितत्त्वविमर्शः

❑ प्रो. (डॉ.) हरेराम त्रिपाठी

साङ्ख्यदर्शन षडास्तिकदर्शनों में अन्यतम है। साङ्ख्यशास्त्र का प्रयोजन अन्य दर्शनों की भांति ही परमपुरुषार्थ मोक्ष की प्राप्ति है, जो त्रिविध दुःखों का आत्यन्तिक विघातरूप है। त्रिविध दुःखों का आत्यन्तिक नाश व्यक्ताव्यक्तज्ञ के तत्त्वज्ञान (विज्ञान) से सम्भव है। इन तीनों तत्त्वों का विस्तार पञ्चविंशति तत्त्वों में करते हुए साङ्ख्यदर्शन ज्ञ पुरुष, अव्यक्त प्रकृति तथा व्यक्त महत् अहङ्कार मन पञ्चकर्मेन्द्रियाँ पञ्चज्ञानेन्द्रियाँ पञ्चतन्मात्राएँ और पञ्चमहाभूत, इस प्रकार तत्त्व विभाग करता है। इनको पुनः कार्यकारणविभाग की दृष्टि से चार वर्गों में रखा गया- मूलप्रकृति जो अविकारी है, किसी का कार्य नहीं है, महत् अहङ्कार तथा पञ्चतन्मात्राएं प्रकृतिविकृति अर्थात् किसी का कारण तथा किसी का कार्य हैं। मन, पञ्चकर्मेन्द्रियाँ, पञ्चज्ञानेन्द्रियाँ तथा पञ्चभूत विकृति अर्थात् केवल कार्य हैं। तथा पुरुष न प्रकृति न विकृति अर्थात् न तो किसी का कारण है और न किसी का कार्य। इन पच्चीस तत्त्वों का लक्षण तथा स्वरूप साङ्ख्यशास्त्र में विस्तारपूर्वक बतलाया गया है। इनकी सिद्धि प्रत्यक्ष अनुमान तथा आप्तवचन, इन तीन प्रमाणों द्वारा होती है।

प्रकृति के विकाररूप महत् से पञ्चभूत तक सभी तत्त्व प्रकृति के ही समान त्रिगुणात्मक होते हैं। यह प्रतिपादित करने वाला सिद्धान्त सत्कार्यवाद के नाम से ख्यात है। इन तत्त्वों के सत्त्वरजस्तमोगुण के गुणप्राधान्य से विविध अवान्तरभेद होते हैं। त्रिगुणातीत पुरुष हेय अविद्या के कारण सर्ग के प्रयोजन से प्रकृति से पङ्ग्वन्धवत् संयोग को प्राप्त करता है। परिणामतः महत् से लेकर नाना प्रपञ्चात्मक जगत् की सृष्टि होती है। विवेकज्ञान द्वारा कैवल्य की प्राप्ति साङ्ख्यदर्शन का साध्य है।

लेखक ने साङ्ख्यसूत्र तथा साङ्ख्यदर्शनकारिका को विशेषतः सन्दर्भित करते हुए साङ्ख्यसम्मत पञ्चविंशति तत्त्वों का परिचयात्मक विवेचन इस निबन्ध में किया है।

●

भारतीयदर्शनेषु सांख्यशास्त्रस्य प्रमुखं स्थानं विद्यते। धर्मार्थकाममोक्षपुरुषार्थेषु मध्ये नित्यः परमपुरुषार्थः मोक्ष एव वर्तत इति। यथा आयुर्वेदशास्त्रे रोगः, रोगहेतुः, आरोग्यम्, आरोग्योपायश्चेति चत्वारः व्यूहाः[1] भवन्ति तथैव सांख्यशास्त्रे हेयम्, हेयहेतुः, हानम्, हानोपायश्चेति चत्वारः व्यूहाः इति।

---

१. सांख्यप्रवचनभाष्यम्

हेयमनागतदुःखं हेयहेतुः अविद्या वा मिथ्याज्ञानम्, हानम् दुःखानामात्यन्तिकनिवृत्तिः वा मोक्षः, हानोपायः सांख्यशास्त्रोक्तोपायः वा प्रकृतिपुरुषविवेकज्ञानमिति। सर्वेषां दर्शनानां मुख्यप्रयोजनं मोक्ष एव विद्यत इति। अत एव कपिलेन मुनिना उक्तम्–

"अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः"[1] अत्र अथशब्दार्थः मङ्गलम्। शारीरमानसिकयोराध्यात्मिकत्वेन एकत्वमिति। तथा चाध्यात्मिकाधिभौतिकाधिदैविकभेदेन दुःखं त्रिविधम्। वातपित्तश्लेष्मणां वैषम्यनिमित्तत्वम् शारीरदुःखस्य लक्षणम्। कामक्रोधादिजनितत्वम् मानसिकदुःखस्य साधर्म्यमिति। पशुपक्ष्यादिजनितत्वमाधिभौतिकत्वम्। ग्रहभूतादिजनितत्वमाधिदैविकस्य लक्षणम्।[2] मुक्तिदीपिकाकारैरुच्यते शारीरं तावद् वातपित्तश्लेष्मणां वैषम्यनिमित्तम्। मानसं कामक्रोधलोभमोहविषादभयेर्ष्याऽसूयाऽरत्यविशेषदर्शननिमित्तम्। आधिभौतिकञ्च मनुष्यपशुमृगसरीसृपस्था-वरनिमित्तम्। आधिभौतिकं शीतोष्णवातवर्षाऽशन्यवश्यायावेशनिमित्तम्।[3] वाचस्पतिमिश्रः आधिभौतिकदुःखस्य स्वरूपं निरूपयन् आह"[4] यक्षराक्षसविनायकग्रहावेशनिबन्धनमाधिभौतिकं दुःखमिति। तथा चेदं निष्पन्नं भवति यद् दुःखानामात्यन्तिकनिवृत्तिरे व मोक्षपदार्थः। दुःखानां निवृत्यर्थं त्रयः उपायाः सन्ति। लौकिकोपायः वैदिकोपायः, सांख्यशास्त्रोपायश्चेति। लौकिकोपायेन आत्यन्तिकनिवृत्तिः न सम्भवति। वैदिकोपायेनापि तन्न अविशुद्धिक्षयातिशयदोषस्य तत्र विद्यमानत्वात्। सांख्यशास्त्रोपायेन दुःखस्यात्यन्तिकनिवृत्तिर्सम्भवति। अत एव सांख्यकारिकाकारः प्रतिपादयति यत् "तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्"[5] इति। व्यक्तं चाव्यक्तं ज्ञश्च व्यक्ताव्यक्तज्ञाः तेषां विज्ञानं विवेकेन ज्ञानम् इति व्यक्ताव्यक्तज्ञविज्ञानम् तस्मात् इति व्यक्ताव्यक्तज्ञविज्ञानादिति। व्यक्तं त्रयोविंशतितत्त्वानि अव्यक्तं मूलप्रकृतिः ज्ञः पुरुषश्चेति पञ्चविंशति तत्त्वानां विवेकज्ञानान्मोक्षस्य प्राप्तिर्भवति। सांख्यकारिकाकारैः सांख्यशास्त्रे पदार्थस्य चत्वारः भेदाः[6] निरूपिताः। कश्चित् पदार्थः प्रकृतिरेव कश्चित् पदार्थः विकृतिरेव, कश्चित् पदार्थः प्रकृतिविकृतिः, कश्चिदनुभयरूपश्चेति। ईश्वरकृष्णः आह सांख्यकारिकायाम्–

"मूलप्रकृतिरविकृतिः महदाद्याः प्रकृतिविकृतयः सप्त।
षोडकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।।

मूलं च असौ प्रकृतिश्चेति मूलप्रकृतिः, इदं जगत् संघातरूपम् अस्य या मूलं सा प्रकृतिः। यदि विश्वस्य यत्मूलं तस्यापि मूलान्तरं विद्यत इति स्वीक्रियते तर्हि अनवस्थादोषः आपतति। अनवस्थादोषभयादस्य जगतः मूलं मूलप्रकृतिरेव भवितुमर्हतीति। सा प्रकृतिः अविकृतिरेवेति। मूलप्रकृतिविषये सांख्यसूत्रकारः आह "मूले मूलाभावादमूलं मूलम्।[7]" अर्थात् त्रयोविंशतितत्त्वानां मूलम् उपादानकारणं मूलशून्यमनवस्थापत्त्या मूले मूलान्तरं न सम्भवति।

प्रक्रियते कार्यादिकमनया इति व्युत्पत्त्या प्र उपसर्गपूर्वक-कृधातोः क्तिन् प्रत्ययो भवति। प्रकृतिरित्यस्य शब्दार्थः स्वभावः। चरक संहितायां प्रकृतिशब्दस्य वाच्यः स्वभाव[8] एवास्तीति लभ्यते। प्रकृतेः कोशतः अनेके अर्थाः

---

१. सांख्यसूत्रमनिरुद्धवृत्तिसहितम् पृ. सं. ३, २. सांख्यसूत्रमनिरुद्धवृत्ति सहितम् पृ.सं. ४, ३. युक्तिदीपिका पृ.सं. २२
४. सांख्यतत्त्वकौमुदी पृ.सं. १५, ५. सांख्यकारिका सांख्यतत्त्वकौमुदीसहिता सां.का. २ पृ.सं. ८१
६. सांख्यकारिका ३ पृ.सं. ४५, ७. सांख्यसूत्रम् अध्याय १ सूत्र ६७
८. चरकसंहिता–तत्र प्रकृतिरुच्यते स्वभावो यः स पुनराहारौषधद्रव्याणां स्वाभाविको गुर्वादिगुणः

उपलभ्यन्ते। योनिः, लिङ्गं, स्वामी, अमात्यः, सुहृत्, कोशः, राष्ट्रम्, दुर्गम्, बलम्[1] इति। अत एव मनुस्मृतौ उक्तम्–

स्वाम्यमात्यौ पुरं राष्ट्रं, कोषदण्डौ सुहृत्तथा।
सप्तप्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते।।

प्रकृतिशब्दस्यान्येऽपि अर्थाः सन्ति–रूपावस्था,[2] शिल्पी,[3] शक्तिः।[4] व्याकरणशास्त्रे नामधातुभेदेन प्रकृतिः द्विविधा। वस्तुतः प्रकर्षेण सृष्ट्यादिकं करोतीति प्रकृतिः वा सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः इत्यर्थो विवक्षितः सांख्यदर्शने। प्रकृतेः पर्यायवाची प्रधानम्, अव्यक्तम्, माया, शक्तिश्चेति सन्ति। महाभारते उक्तम्–

प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः।
सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्तिता।।

केचन वदन्ति प्रकृति इत्यत्र प्रशब्दार्थः सत्त्वगुणः, कृशब्दार्थः रजः तिशब्दार्थः तमः इति। केचित्तु ज्ञानस्य भार्याः तिस्रः भवन्ति।[5] बुद्धिः, मेधा स्मृतिश्चेति। युक्तिदीपिकाकारः मूलप्रकृतिशब्दार्थं मूलमाधार[6]मुक्तवान्। महदादीनां मूलं प्रकृतिर्भवति इयं प्रकृतिः अविकृतिर्वा अनुत्पाद्य इति। नैयायिकवैशेषिकानां नये जगतः कर्त्ता ईश्वर एव विद्यते। परन्तु सांख्याः वदन्ति यत् जगतः कर्त्री प्रकृतिरेव सा च प्रकृतिः मूल प्रकृतिपदवाच्या भवति।

महत्तत्त्वम्, अहङ्कारः, पञ्चतन्मात्राणि चेति सप्त प्रकृतिविकृतयः सन्ति। महत्तत्त्वमहङ्कारस्य प्रकृतिः मूलप्रकृतेः विकृतिः, अहङ्कारतत्त्वं पञ्चतन्मात्राणाम् एकादशेन्द्रियाणाञ्च प्रकृतिः अथ च महत्तत्त्वस्य विकृतिः एवं पञ्चतन्मात्राणि पञ्चमहाभूतानां प्रकृतयः अहङ्कारस्य विकृतयश्च भवन्ति। पृथिव्यप्तेजोवाय्वाकाशाः पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि मनश्चेति एतेषां षोडशतत्त्वानां प्रकृतिः यथाक्रमं पञ्चतन्मात्राणि अहङ्कारश्चेति भवतः। एतानि षोडशतत्त्वानि विकारस्वरूपाणि एव सन्ति। सांख्यकारिकायां षोडशको गणः[7] विकार एव न प्रकृतिः। तु शब्दः अवधारणे भिन्नक्रमः, पञ्चमहाभूतानि एकादशेन्द्रियाणि च षोडशको गणः इति। वस्तुतः "तत्त्वान्तरोपादानत्वं" प्रकृतेः लक्षणम्। "तद्भिन्नत्वे सति उपादानकत्वम्" विकृतेः लक्षणम्। तत्त्वान्तरोपादानत्वे सति उपादानकत्वम् प्रकृतिविकृतेः लक्षणमिति। सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रधानापदवाच्या वा अव्यक्तपदवाच्या भवति। मूल-प्रकृतितः[8] महत्तत्त्वस्य, महत्तत्त्वतः अहङ्कारस्य, सात्त्विकाहङ्कारतः एकादशेन्द्रियाणां तामसिकाहङ्कारतः

---

१. शब्दकल्पद्रुम भाग ३ पृ. २४२, २. मार्कण्डेय पुराणम्। शब्दकल्पद्रुम भा. ३ पृ. २४२
३. हेमचन्द्रः। शब्दकल्पद्रुम भा. ३ पृ. २४२, ४. शारङ्गधरः। शब्दकल्पद्रुम भा. ३ पृ. २४२
५. शब्दकल्पद्रुम भा. ३ पृ. २४४, ६. मूलमाधारः, प्रतिष्ठा इति अर्थान्तरम्। युक्तिदीपिका पृ. ८२
७. मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।। सां.का. ३ सांख्यतत्त्वकौमुदी पृ. ४५
८. सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात्पञ्च तन्मात्राणि, उभयमिन्द्रियं, तन्मात्रेभ्यः, स्थूलभूतानि पुरुष इति पञ्चविंशतिगणः सां सू.भ.१-६१ सांख्यसूत्रवृत्तिः पृ. ४६

पञ्चतन्मात्राणां पञ्चतन्मात्रतः पञ्चमहाभूतानाञ्चोत्पत्तिर्भवति इति सांख्यसिद्धान्तः अहङ्कारस्य सात्विकतामसिकसर्गयोः विषये सांख्यशास्त्रे मतभेदो दरीदृश्यते सांख्यकारिकाकारः अहङ्कारस्य स्वरूपं ततः जायमानस्य सर्गस्य भेदं निरूपयनाह–

अभिमानोऽहङ्कारः, तस्माद् द्विविधः प्रवर्तते सर्गः।[1]
एकादशकश्च गणः तन्मात्रपञ्चकश्चैव।[2]

अहङ्कारतः एकादशेन्द्रियाणां सृष्टिः सात्त्विकी अथ च पञ्चतन्मात्राणां सृष्टिः तामसी तत्कथं सम्भवति ? इत्यत्र ईश्वरकृष्णः ब्रवीति–

सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्।
भूतादेस्तन्मात्रः, स तामसस्तैजसादुभयम्।।[3]

एकादशेन्द्रियाणां लाघवत्वात् प्रकाशकत्वात् सात्त्विकादहङ्कारादुत्पत्तिः पञ्चतन्मात्राणां जडत्वाच्च तामसादहङ्कारादुत्पत्तिर्भवति अथ च राजसाहङ्कारः सात्विकसृष्टिं तामससृष्टिं प्रति च कारणं भवति सक्रियत्वात् प्रेरकत्वाच्च इति वाचस्पतिमिश्रादयः वदन्ति।[4] परन्तु उक्तकारिकायाः विवरणं भिन्नरूपेण विज्ञानभिक्षुमहाशयाः कुर्वन्ति। ते वदन्ति यत् एकादशकः इत्यत्र एकादशसंख्यापूरणे क प्रत्ययो भवति तथाच एकादशकः मनः इति एवञ्च सात्त्विकादहङ्कारात् मनो जायते। तामसादहङ्कारात् ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चोभयमिति।[5] विज्ञानभिक्षुदिशा उक्तकारिकायाः अर्थस्य क्रमः भिन्न एवास्ति अतः सृष्टिविषये किञ्चिद्वैलक्ष्यमिति।

पञ्विंशति तत्त्वानि प्रमेयाणि सन्ति। एतेषां प्रमेयाणां सिद्धिः प्रमाणादेव भवति। अतः प्रमाणानि निरूप्यन्ते। प्रमीयते अनेन इति व्युत्पत्त्या प्रमाकरणत्वं प्रमाणस्य लक्षणम् सांख्यसूत्रकारः ब्रवीति यत् 'द्वयोरेकतरस्य वाप्यसन्निकृष्टार्थपरिच्छित्तिः प्रमा।[6] तत्साधकतमं यत् तत्' इन्द्रियार्थयोः अनधिगतं यत् ज्ञानं तदेव प्रमा प्रत्यक्षप्रमा इति। इन्द्रियार्थयोरेकतरस्यानधिगतं यज्ज्ञानं तज्ज्ञानम् अनुमितिशाब्दप्रमेति। वस्तुतस्तु इत्यनेन परिष्कृतायाः प्रमायाः लक्षणमुच्यते "असन्निकृष्टार्थपरिच्छित्तिः[7] एव प्रमायाः लक्षणम्। असन्न्किृष्टशब्दार्थः अनधिगतम् एवञ्च अनधिगतार्थविषयकबोधः प्रमा तस्या करणं[8] प्रमाणं भवति। सांख्यास्तु प्रत्यक्षानुमानशब्दभेदात् त्रीणि प्रमाणानि मन्यन्ते। दृष्टानुमानमाप्तवचनञ्चेत्यनेन।[9] तत्र प्रत्यक्षप्रमाणन्तु विषयेण सह इन्द्रियस्य यदा सम्बन्धो भवति तदा या चित्तवृत्तिः जायते[10] ततः यः बुद्धिधर्मोऽध्यवसायः तच्च प्रत्यक्षप्रमाणं तत्र पौरुषेयो बोधः प्रत्यक्षप्रमेति। प्रत्यक्षस्य

---

१. सांख्यकारिका २२ सांख्यतत्त्वकौमुदी १७६ विद्वत्तोषणी व्याख्या सहित
२. सांख्यकारिका २४ सांख्यकौमुदी पृ.सं. १७६ ३. सांख्यकारिका २५ सांख्यतत्त्वकौमुदी पृ.सं. १७६
४. सांख्यप्रवचनभाष्यम् पृ.सं., ५. सांख्य प्रवचनभाष्यम् पृ.सं., ६. सांख्यसूत्रमनिरुद्धवृत्तिसहितम् पृ.सं. ५३
७. श्रीप्रमथनाथतर्कभूषण टीका पृ.सं. ५३
८. सांख्यसूत्रवृत्तिः – एतेनाधिगतार्थगन्तृप्रमाणमित्युक्तम्। प्रमासाधकतमं यत् तत् प्रमाणम् इति प्रमाणसामान्यलक्षणम्
९. सांख्यकारिका युक्तिदीपिकासहिता पृ. १०७, १०. युक्तिदीपिका पृ. १०७

लक्षणं सूत्रकारेणोच्यते "यत्सम्बन्धसिद्धं तदाकारोल्लेखि विज्ञानं तत्प्रत्यक्षम्"[1] अर्थात् येन विषयेण इन्द्रियाणां सम्बन्धो भवति तादृशसम्बन्धात् जातम् तद्विषयतानिरूपक-अन्तःकरणवृत्तिः तद्वृत्तिरूपं विज्ञानं प्रत्यक्षं प्रमाणमिति। निर्विकल्पकसविकल्पकसाधारणमिदं लक्षणम्। "प्रतिविषयाध्यवसायो[2] दृष्टमित्यनेन प्रत्यक्षस्य लक्षणं ईश्वरकृष्णः उक्तवान्। अस्य लक्षणस्य विवरणप्रसङ्गे युक्तिदीपिकाकारः आह–"विषिण्वन्तीति विषयाः शब्दादयः। अथवा विषीयन्ते उपलभ्यन्ते इति"। अर्थात् यः ज्ञानं स्वस्मिन् नियोजयति स च विषयः। यथा रूपरसगन्धस्पर्शशब्दाः विपयाः भवन्ति। एते विषयाः द्विविधाः भवन्ति। विशिष्टाः अविशिष्टाश्च। विशिष्टाः पृथिव्यप्तेजोवाय्वाकाशानि अस्मदादीनां विषयाः भवन्ति। अविशिष्टाः सूक्ष्मभूतानि वा पञ्चतन्मात्राणि। एते विषयाः योगिनामूर्ध्वस्रोतसां च गम्याः भवन्ति। विषयं विषयं प्रति वर्तते इति प्रतिविषयं इन्द्रियं तस्मिन् यः अध्यवसायः तत्प्रत्यक्षं प्रमाणमिति। सांख्यसूत्रकारः अनुमानस्य स्वरूपं निरूपयन् आह– "प्रतिबन्धदृशः प्रतिबद्धज्ञानमनुमानम्"[3] अर्थात् अविनाभावो व्याप्तिः तादृशव्याप्तिविशिष्टात् व्याप्यज्ञानात् अनुः पश्चात् व्यापकज्ञानमनुमानमिति। केचन व्याप्तेः स्वरूपमित्थं वर्णयन्ति साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगिताकसाध्याभावाधिकरणं निरूपितवृत्तित्वाभावो व्याप्तिरिति। तल्लिङ्गलिङ्गिपूर्वकमिति[4] ईश्वरकृष्णः। अनुमानस्य लक्षणमस्तीदं वाक्यम्। लिङ्गं = व्याप्यं लिङ्गि = व्यापकमिति। तथाच व्याप्यव्यापकभावपूर्वकं यद् भवति तदेवानुमानम्। अथवा लिङ्गं पक्षधर्मता लिङ्गि यस्य व्यापकस्य व्याप्तिः हेतौ तिष्ठति तादृशं व्यापकमिति तथाच व्याप्तिविशिष्टपक्षधर्मताज्ञानमनुमानमिति वाचस्पतिमिश्रोऽपि वदति "तद् व्याप्यव्यापकभावपक्षधर्मताज्ञानपूर्वकमनुमानमिति" अनुमानसामान्यं लक्षितम्।[5] पूर्ववत्-शेषवत् सामान्यतोदृष्टभेदेन अनुमानं त्रिविधम्। कार्यं दृष्ट्वा कारणमनुमीयते तदनुमानं शेषवदिति। कारणेन कार्यं भविष्यतीति यत्रानुमीयते तदनुमानं पूर्ववदिति। यथा मेघोन्नत्या भविष्यति वृष्टिरित्यनुमीयते। पूर्वमस्यामस्तीति पूर्ववत्। शेषोऽस्यास्तीति शेषवदिति। सामान्यतोदृष्टस्य लक्षणमुच्यते यत्रैकदाऽर्थयोरव्यभिचारमुपलभ्य देशान्तरे कालान्तरे च तज्जातीययोरव्यभिचारं प्रतिपद्यते। तद्यथा क्वचिद् धूमाग्निसम्बन्धं दृष्ट्वा क्वचिद्धूमान्तरेणाग्न्यन्तरस्यास्तित्वं प्रतिपद्यते।"[6] वाचस्पतिमिश्रेण अनुमानस्य द्वैविध्यमेव प्रतिपादितम्। वीतमवीतञ्चेति भेदेन। अन्वयसहचारग्रहजन्यव्याप्तिग्रहत्वेन अनुमितिजनकत्वं वीतस्य[7] लक्षणम्। व्यतिरेकसहचारमात्रग्रह-जन्यव्याप्तिग्रहत्वेन प्रवर्तमानत्वे सति निषेधकत्वम् अवीतानुमानस्य लक्षणम्। अवीतं शेषवदनुमानम्। वीतानुमानं द्विविधम् भवति – पूर्ववत्, सामान्यतोदृष्टञ्चेति भेदात्। शिष्यते परिशिष्यते इति शेषः। अतएव न्यायभाष्ये उक्तम् "प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्च शिष्यमाणे सम्प्रत्ययः परिशेष"[8] इति। दृष्टस्वलक्षणसामान्यत्वं पूर्ववदित्यनुमानस्य लक्षणम्। अदृष्टस्वलक्षणसामान्यविषयत्वं सामान्यतोदृष्टस्य लक्षणमिति। आप्तोपदेशत्वं[9] शब्दप्रमाणस्य लक्षणमिति

---

१. सांख्यसूत्रवृत्तिः पृ.सं. ५५, २. सांख्यकारिका युक्तिदीपिकासहिता पृ.सं. १२०
३. सांख्यसूत्रमनिरुद्धवृत्तिसहितम् पृ.सं. ६३, ४. सांख्यतत्त्वकौमुदी पृ.सं. १२६
५. सांख्यतत्त्वकौमुदी पृ.सं. १३६, ६. युक्तिदीपिका पृ.सं. १३६
७. सांख्यतत्त्वकौमुदी पृ.सं. १४० तत्र प्रथमं तावद् द्विविधं वीतमवीतञ्च। अन्वयमुखेन प्रवर्तमानं विधायकं वीतम्, व्यतिरेकमुखेन प्रवर्तमानं निषेधकमवीतम्।
८. न्यायवात्स्यायनभाष्य अध्याय १ आह्निक १ सूत्र ५ संख्याकस्य भाष्ये
९. आप्तोपदेशः शब्दः सांख्यसूत्रम् अध्यायः १ सूत्रम् १०१

सांख्यसूत्रकारो वदति। आप्तत्वं नाम अनधिगताबाधितार्थविषयकज्ञानजनकत्वमिति। सांख्यकारिकायामुच्यते ''आप्तश्रुतिराप्तवचनं ''तु'' अत्र आप्तवचनपदेन शब्दप्रमाणस्य ग्रहणं भवति। आप्तश्रुतिरेव तस्य लक्षणं विद्यते। आप्ता = प्राप्ता[1] तस्यार्थः युक्ता इति आप्ता चासौ श्रुतिः इति आप्तश्रुतिः। सत्यार्थबोधनसामर्थ्येन समीचीनः वा दोषरहितः आप्तपदार्थः। श्रुतिपदार्थस्तु वाक्यजनितं वाक्यार्थज्ञानमिति। तथाच दोषरहितत्वे सति वाक्यार्थज्ञानत्वं शब्दप्रमाणस्य लक्षणम्। एतानि त्रीण्येव प्रमाणानि सांख्यमते भवन्ति। परन्तु केचन चत्वारि, केचन पञ्च, केचन षड्, केचन चाष्टप्रमाणानि स्वीकुर्वन्ति दार्शनिकाः। तर्हि कथं त्रीण्येव प्रमाणानि सांख्यमते भवन्तीति। अत्र ईश्वरकृष्णैरुच्यते[2] ''सर्वप्रमाणसिद्धत्वादि'' ति। अस्यार्थो भवति प्रत्यक्षानुमानाप्तवचनेषु एव सर्वेषां प्रमाणानामन्तर्भावात् त्रीण्येव प्रमाणानि भवन्तीति। सूत्रकारोऽपि वदति ''त्रिविधं प्रमाणम्। तत्सिद्धौ सर्वसिद्धेर्नाधिक्यसिद्धिः''।[3] सामान्यतोदृष्टानुमानेन प्रकृतिपुरुषयोर्सिद्धिः[4] जायते।

तथा चोक्तम्-

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्
तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धम्।।[5]

अर्थात् सामान्यतोदृष्टादनुमानादतीन्द्रियाणां प्रधानपुरुषादीनां ज्ञानं भवति। सूक्ष्मत्वादनयोः प्रत्यक्षं न भवति न तु अभावात्। प्रकृतेः कार्याणि दृष्ट्वा प्रकृतिरनुमीयते। अत एवोच्यते-''महदादि तत्त्वं कार्यं प्रकृतिसरूपं विरूपञ्च''।[6]

अर्थात् महदादित्रयोविंशतितत्त्वानि मूलप्रकृतेः कार्याणि सन्ति। तत्रापि केचन मूलप्रकृतिसरूपाणि सन्ति महत्तत्त्वमहङ्कारः पञ्चतन्मात्राणि चेति। मूलप्रकृतेः विरूपाणि सन्ति एकादशेन्द्रियाणि पञ्चमहाभूतानि च। मूलप्रकृतेः सिद्ध्यर्थं पञ्चहेतवः सन्ति। भेदानां परिमाणम्,[7] समन्वयः, शक्तितः प्रवृत्तिः, कार्यकारणविभागः, वैश्वरूप्यस्य अविभागश्चेति।[8] अत एवात्रानुमानप्रकारो भवति भेदानां महदादीनां त्रयोविंशतितत्त्वानां कार्याणां मूलकारणम् अव्यक्तमस्ति बुद्ध्यादीनां परिमाणात् (परिमितत्वात्) अथवा विवादाध्यासिता महदादिभेदा अव्यक्तकारणवन्तः परिमितत्वात् यथा घटः परिमितो विद्यते तथैव। द्वितीयोऽनुमानाकारः ''विवादाध्यासिताः भेदाः (बुद्ध्यादयः) अव्यक्तकारणवन्तः समन्वयात् (सुखाद्यात्मसामान्यान्वितत्वात्) घटादिवत्। तृतीयोऽनुमानाकारः बुद्ध्यादयः अव्यक्तकारणवन्तः शक्तितः प्रवृत्तेः। यथा मृत्तिकागतशक्तितः घटरूपं कार्यं जायते तथैव अव्यक्तनिष्ठशक्तितः बुद्ध्यादीनि कार्याणि जायन्त इति। चतुर्थोऽनुमानाकारः बुद्ध्यादयः अव्यक्तकारणवन्तः

---

१. सांख्यतत्त्वकौमुदी पृ.सं. १५३, २. सांख्यतत्त्वकौमुदी पृ.सं. १०५ सांख्यकारिका ४
३. सांख्यसूत्रम् अध्यायः १ सूत्रसङ्ख्या ८८ पृ.सं. ५५, ४. सांख्यकारिका ६ पृ.सं. २०६
५. सांख्यकारिका ६ सांख्यतत्त्वकौमुदी पृ.सं. ६५, ६. सांख्यतत्त्वकौमुदी पृ.सं. २१६ सांख्यकारिका ८
७. सांख्यतत्त्वकौमुदी पृ.सं. २६५ भेदानां परिमाणात् समन्वयात्, शक्तितः प्रवृत्तेश्च।
कारणकार्यविभागादविभागाद् वैश्वरूप्यस्य।। सांख्यकारिका ५
८. सांख्यसूत्रमनिरुद्धवृत्तिसहितम् पृ.सं. ७७ परिमाणात् १/१३० समन्वयात् १/१३१ शक्तितश्चेति १/१३२

कारणकार्यविभागात्। पञ्चमोऽनुमानाकारः बुद्ध्यादयः अव्यक्तकारणवन्तः वैश्वरूप्यस्य अविभागात्। अर्थात् महदादिकं कार्यं स्वीयसूक्ष्मावस्थापूर्वकं भवितुमर्हति आविर्भावतिरोभाववत्त्वात्। यथा कूर्मस्य शरीरे[1] विद्यमानानि एव अङ्गानि निःसरन्ति विभज्यन्ते च तथैव पञ्चमहाभूतानि स्वकारणेभ्यः पञ्चतन्मात्रेभ्यः आविर्भवन्ति विभज्यन्ते च। पञ्चतन्मात्राणि अहङ्कारात्, अहङ्कारः महतः आविर्भवति विभज्यते च। महानपि स्वकारणादाविर्भवति विभज्यते च अतः बुद्धेः यत्कारणं विद्यते तदेव मूलप्रकृतिरिति रीत्या अव्यक्तस्य सिद्धिर्भवति। सामान्यतोदृष्टानुमानेनैव पुरुषस्य सिद्धिर्भवति। पुरे शरीरे तिष्ठति निवसति वा पुरुषः जीवात्मापरपर्यायः इति। स च पुरुष अतीन्द्रियो विद्यते अतिसूक्ष्मत्वात्। पुरुषस्य सिद्धिः संघातपरार्थत्वहेतुना[2] भवति। अव्यक्तादेर्व्यतिरिक्तः पुरुषोऽस्ति संघातपरार्थत्वात् शयनासनवत् यथा शयनासनतैलादयः संघाताः सन्ति। एते सर्वे परार्थाः सन्ति तत्र यत् परं तदेव शरीरमिति तथैव अव्यक्तमहदहङ्कारादयः परार्थाः सन्ति तत्र यः परः स एव पुरुषः इति। तत्र केचन वदन्ति शयनासनादयः संघाताः सन्ति तत्र यत् परं शरीरं तदपि संघातस्वरूपं परन्तु अहङ्कारादीनां यः परः स च न संघातरूपः अपितु तदतिरिक्तः पुरुष इति चेन्न बुद्ध्यादयः संघाताः परार्थाः तत्र परोऽपि संघातः सोऽपि संघातः परार्थः अनया रीत्या अनवस्थादोषः आपतति अतः बुद्ध्यादयः संघाताः परार्थाः तत्र परः पुरुष एव भवितुमर्हति। पुरुषसिद्ध्यर्थं पञ्चहेतवः भवन्ति अतएव पञ्चानुमानाकारोऽपि विद्यत इति। पुरुषः अस्ति संघातपरार्थत्वात्।[3] पुरुषः अस्ति त्रिगुणादिविपर्ययात्। पुरुषः अस्ति अधिष्ठानात्। पुरुषः अस्ति भोक्तृभावात्। पुरुषः अस्ति कैवल्यार्थं प्रवृत्तेः। संहताः अव्यक्तादयः भवन्ति त्रिगुणत्वात्। त्रिगुणानामभावो पुरुषे विद्यते अतः पुरुषः असंहतः इति। अत एव वाचस्पतिमिश्रः निगदति ''तस्मादाचार्येण त्रिगुणादिविपर्ययाद् इति वदताऽसंहतः परो विवक्षितः, स चात्मेति सिद्धम्''।[4] त्रिगुणात्मकानामधिष्ठीयमानत्वेऽपि पुरुषस्य सिद्धिर्जायते। यः व्यापारवान् भवति सः अधिष्ठाता भवति यथा रथे व्यापारो जायते यस्य व्यापारेण रथस्य समीचीना गतिर्भवति तद्वेव सारथी इति। तथैव सुखदुःखमोहात्मकं महदादिसर्वं परेणाधिष्ठीयमानं तत्र यः परः स चात्मा इति। अत्र केचन शङ्कन्ते यत् पुरुषस्तु व्यापारवानेव न भवितुमर्हति निर्गुणत्वात् निष्क्रियत्वाच्च इति चेन्न यथा अयस्कान्तमणिः निष्क्रियो विद्यते तत्र व्यापारो न भवति परन्तु सन्निधिमात्रेण स चाधिष्ठातृपदवाच्यो भवति तथैव व्यापाररहितत्वेऽपि पुरुषः अधिष्ठाता विद्यते। अत एव सूत्रकारोऽपि वदति ''तत्सन्निधानादधिष्ठातृत्वं मणिवत्''[5] अनुकूलवेदनीयत्वं सुखं प्रतिकूलवेदनीयत्वं दुःखं, बुद्ध्यादयः सुखदुःखमोहस्वरूपाः एतदतिरिक्तः कश्चन विद्यते असुखादिस्वरूपः, येन अनुकूलत्वं प्रतिकूलत्वञ्चानुभूयते।

---

१. सांख्यतत्त्वकौमुदी पृ.सं. २६६

२. सांख्य कारिका १७ संघातपरार्थत्वाद् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेश्च ।।१७।। सांख्यतत्त्वकौमुदी पृ.सं. ३०७-०८

३. ''संहतपरार्थत्वात्'' अ.१ सूत्राणि ४० पृ. सं. ८० ''त्रिगुणादिविपर्य्ययात्'' अ.१ सूत्राणि १४१ ''अधिष्ठानाच्चेति'' अ.१ सूत्राणि १४२ ''भोक्तृभावात्'' अ.१ सूत्र १४३, ''कैवल्यार्थं प्रवृत्तेः'' अ.१ सूत्राणि १४४ पृ.सं. ८२ पृ.सं. ८१ (सांख्यसूत्रवृत्तिः)

४. सांख्यतत्त्वकौमुदी पृ.सं. ३१०

५. सांख्यसूत्रम् अ. १ सूत्राणि ९६

तत्र यः परः स च पुरुष इति। आत्यन्तिकदुःखत्रयस्य निवृत्तिः बुद्ध्यादीनां न सम्भवति तेषां दुःखस्वभावत्वात्। यस्य दुःखस्य निवृत्तिर्भवति स च पुरुषः इति। स च पुरुषोऽनेको विद्यते। जन्ममरणकरणानां प्रतिनियमात्। अद्वैतवेदान्तिनः जीवब्रह्मणोरैक्यं प्रतिपादयन्ति। तेषां नये पुरुषः नानेकः अपितु एक एव। तन्मतं खडयन्नाह ईश्वरकृष्णः "पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययात्[1] पुरुषबहुत्वं सिद्धं जन्मप्रतिनियमात्। पुरुषबहुत्वं सिद्धं मरणप्रतिनियमात्। पुरुष बहुत्वं सिद्धं करणप्रतिनियमात्। पुरुषबहुत्वं सिद्धं अयुगपत्प्रवृत्तेः। पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययादिति। जन्ममरणस्वरूपं प्रतिपादयन्नाह वाचस्पतिमिश्रः "निकायविशिष्टाभिरपूर्वाभिर्देहेन्द्रियमनोऽहङ्कारबुद्धिवेदनाभिः[2] पुरुषस्य अभिसन्बन्धो जन्म" "देहादीनामुपात्तानां परित्यागः मरणं"[3] करणानि त्रयोदशविधानि सन्ति बुद्धिः अहङ्कारः एकादशेन्द्रियाणि चेति। तेषां जन्ममरणकरणानां व्यवस्था पृथग् पृथग् विद्यते। यदि सर्वेषु शरीरेषु एक एव पुरुषः स्वीक्रियते तदा एकस्मिन् पुरुषे जायमाने सर्वे जायेरन्। एकस्मिन् म्रियमाणे सर्वे म्रियेरन्। एकस्मिन् विचित्ते सर्वे विचित्ताः स्युः। अतः जगतः अव्यवस्था भविष्यति। परन्तु पुरुषभेदे सति सर्वा व्यवस्था समीचीना भविष्यति अतः प्रतिशरीरभेदात् पुरुषस्यापि भेदो विद्यते। सर्वेषां जीवानां स्वकार्ये पृथग् पृथग् प्रवृत्तिः भवति। यदि पुरुषः एकः तर्हि तन्न सम्भवति अतः अयुगपत्प्रवृत्तेः पुरुषस्यानेकत्वं सिद्ध्यति।

सांख्यदर्शनस्य प्रमुखः सिद्धान्तः सत्कार्यवादः वा परिणामवादो विद्यते। इमं सिद्धान्तमाश्रित्यैव पञ्चविंशतितत्त्वानां निरूपणं भवति। सत्कार्यवादस्य प्रतिपादने पूर्वपक्षरूपेण आरम्भवादस्य, विवर्तवादस्य, अभाववादस्य च प्रतिपादनं सांख्यदर्शने दरीदृश्यते। अत एव सांख्यतत्त्वकौमुदीकारैः निगद्यते "कार्यात् कारणमात्रं[4] गम्यते। सन्ति चात्र वादिनां विप्रतिपत्तयः। "असतः सज्जायते"[5] "एकस्य सतो विवर्तः कार्यजातं[6] न वस्तु सत्" 'सतोऽसज्जायते"[7] "सतः सज्जायते"[8] इति। "असतः सज्जायते' अर्थात् असतः कारणात् सतः कार्यस्योत्पत्तिर्भवति इति बौद्धाः वदन्ति। अभावात् भावो जायत इति। विनष्टादेव बीजादङ्कुर उत्पद्यते। यथा नष्टादेव दुग्धाद् दधि, ध्वंसादेव च मृत्पिण्डाद् घटश्चोद्यते। बौद्धाः अत्रानुमानस्याकारम् इत्थं वदन्ति। "सर्वे कार्यरूपा[9] भावा अभावकारणकाः कार्यत्वाद् बीजनाशोत्तरोत्पन्नाङ्कुरादिवत्"। बौद्धमतस्यानुवादं पूर्वपक्षेण गौतमः ऋषिः करोति अभावाद्[10] भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात्" अर्थात् कार्यस्याव्यवहितपूर्ववर्ती कारणमेव भवति यथा अङ्कुरादिकार्यादव्यवहितपूर्ववर्ती बीजस्य ध्वंस एव सम्भवति न तु बीजादेरिति अभावस्य कारणत्वं सिद्धं भवति। अत्र श्रुतिरपि प्रमाणं विद्यते। "एक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयम् तस्मादसतः सज्जायते" इति श्रुतिः। अनया श्रुत्या उत्पत्तेः प्राक् सर्ववस्तूनामभाव एवासीत्। अतः अभावादेव भावोत्पत्तिरित्येवं समीचीनं प्रतिभाति इति बौद्धानां सिद्धान्तः।

---

१. सांख्यतत्त्वकौमुदी पृ.सं. ३१४ सांख्यकारिका-जन्ममरणकरणानां प्रतिनियमाद्, अयुगपत्प्रवृत्तेश्च पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ।।१८।।

२. सांख्यतत्त्वकौमुदी पृ.सं. ३१६, ३. सांख्यतत्त्वकौमुदी पृ.सं. ३१७, ४. सांख्यतत्त्वकौमुदी पृ. २१६

५. सांख्यतत्त्वकौमुदी पृ. २१६, ६. वेदान्तदर्शनस्य सिद्धान्तः

७. सांख्यतत्त्वकौमुदी पृ. सं. २२३ अभाववादस्य मूलं बौद्धानां सिद्धान्तः।

८. सांख्यानां सिद्धान्तः सत्कार्यवादः पृ. सं. २२३ सां.त.कौ., ९. सांख्यतत्त्वकौमुदी पृ. सं. २२८

१०. न्यायसूत्रम् अध्याय ४ आ.१ सूत्र ४

अद्वितीयस्य त्रैकालिकबाधविधुरस्य ब्रह्मणः विवर्तः शुक्तेरिव रजतमतात्त्विकान्यथाप्रथात्मकं दृश्यमात्रं परमार्थतो न सदिति। विवर्तस्य स्वरूपमस्ति "अतात्त्विकोऽन्यथाभावः विवर्तः स उदीरितः"[१] इति। वा वस्तुनः असमसत्ताके विवर्तः अथवा कारणसलक्षणोऽन्यथाभावविलक्षणो विवर्तः[२] इति। अर्थादुपादानत्वाभिमत-वस्तुसत्ताविषमसत्ताकत्वे सति तदवस्थाविशेषरूपत्वम् विवर्तस्य लक्षणमिति। अद्वैतवेदान्ते कारणमेव कार्यस्वरूपेण भासते। अत एव कारणस्यैव सत्यत्वं भवति कार्यस्य सत्यत्वं न भवति। यथा शुक्तौ "इदं रजतम्" इति ज्ञाने जाते सति कालान्तरे तस्य यदाधिष्ठानभूतस्य शुक्तेः ज्ञानानन्तरं पूर्वज्ञातं रजतं निवर्तते तथैव ब्रह्मणः ज्ञाने सति जगदादिभेदप्रपञ्चो निवर्तते इति। तथाच एका कारणसत्तैव विविधकार्याकारेण भासिता भवति। घटशरावादयः परस्परं विभिन्ना अपि मृत्तिकातः नातिरिच्यन्ते। तथैव विविधस्वरूपः संसारः सद् ब्रह्मवस्तुनः नातिरिक्तः इति। एवञ्च सदः वस्तुनः एव रूपान्तरं संसारः इति।

न्यायवैशेषिकाः वदन्ति "सतः असज्जायते"[३] अर्थात् भावरूपात् परमाण्वादेः पूर्वमविद्यमानो द्व्यणुकादिः जायते। घटः पूर्वमसदेव आसीत् परन्तु दण्डचक्रचीवरादिसामग्रीसमवहितात् मृदादिकारणाद् भिन्नं सदेवोत्पद्यते। एतेषां नये स्वोत्पत्तेः पूर्वं घटकार्यं नासीदिति। परन्तु समेषां तत्कारणसामग्रीणां समवधाने सति तज्जायते। कार्यकारणयोः भिन्नत्वमत्र विवक्षितं विद्यते। द्व्यणुकादेः उत्पद्यमानत्वादनित्याद् असदिति सिद्धम्। परमाणवः त्रिषु कालेषु विद्यन्ते अतः तस्य नित्यत्वात् सदिति सिद्धम्। तथाच सतः परमाणुतः कारणात् असद्द्वयणुकादयः जायन्ते इति न्यायवैशेषिकाः इति।

"सतः सज्जायते"[४] सतः कारणात् सतः कार्यस्योत्पत्तिर्भवति। इति वृद्धाः इत्यनेन श्रेष्ठत्वमथ च श्रद्धा द्योत्यते। "सतः सज्जायते" इति परिणामवादस्योपलक्षकमिति। तथाच भारतीयदर्शनेषु चत्वारः वादाः प्रसिद्धाः सन्ति। अभावकारणवादः, विवर्तवादः, आरम्भवादश्चेति त्रयः वादाः अत्र पूर्वपक्षरूपेण प्रतिपादिताः सन्ति। परिणामवादोऽत्र सिद्धान्तपक्ष इति। पूर्वपक्षिणां मतं खण्डयन्नाह सांख्यसूत्रकारः "नासदुत्पादो नृश्रृङ्गवत्"[५] नृश्रङ्गस्य अप्रसिद्धत्वात् तस्यासदेव स्वभावो विद्यते। आकाशस्य विद्यमानत्वात् तस्य सदेव स्वभावोऽस्ति। अतः असतः उत्पत्तिर्न सम्भवति नृश्रृङ्गवत्तथाच कारणव्यापारात्प्रागपि कार्यं सत् असदकरणादिति नृश्रृङ्गवत्। एव चत्वारि अन्यान्यपि सत्कार्यवादस्य साधकानि सूत्राणि सन्ति। "उपादाननियमात्"[६] "सर्वत्रसर्वदा[७] सर्वासम्भवात्" "शक्तस्य शक्यकरणात्"[८] "कारणभावाच्च"[९] एतानि सूत्राण्याश्रित्य ईश्वरकृष्णैरुच्यते–

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।।[१०]

---

१. सांख्यतत्त्वकौमुदी, सारबोधिनी टीका पृ. सं. २२०, २. सिद्धान्तलेशसंग्रहः पृ. सं. ५४
३. सांख्यतत्त्वकौमुदी पृ. सं. २२३, ४. सत्कार्यवादस्य स्थापनम् सांख्यमतम्।
५. सांख्यसूत्रवृत्तिः प्रथमोऽध्याय सूत्र सं. ११ पृ. ६६, ६. सांख्यसूत्रवृत्तिः प्रथमोऽध्याय ११५ पृ. सं. ७०
७. सांख्यसूत्रवृत्तिः प्रथमोऽध्याय ११६ पृ. सं. ७१, ८. सांख्यसूत्रवृत्तिः प्रथमोऽध्याय ११७ पृ. सं. ७१
९. सांख्यसूत्रवृत्तिः प्रथमोऽध्याय ११८ पृ. सं. ७१
१०. सांख्यतत्त्वकौमुदी पृ.सं. १०३ (विद्वत्तोषिणी टीका सहित) भारतीय विद्या भवन वाराणसी

यद्यपि बीजस्य ध्वंसानन्तरमेवाङ्कुरस्योत्पत्तिर्भवतीति दृश्यते तथापि ध्वंसरूपस्याभावस्य कारणत्वं न स्वीक्रियते अपितु बीजस्यावयवानामेव कारणत्वं स्वीकार्यमेव। यदि अभावात् भावोत्पत्तिःसम्भवति तदा अभावस्य सर्वत्र सत्त्वात् सर्वत्र सर्वेषां कार्याणाम् उत्पत्तिः स्यादिति। अतः कार्यं सत् असदकरणात् इति। इदमनुमानं समर्थयनाह वाचस्पति मिश्रः "असच्चेत् कारणव्यापारात्पूर्वं कार्यं नास्य सत्त्वं कर्तुं केनापि शक्यं, नहि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं शक्यते"।[1]

कारणव्यापारात्प्रागपि कार्यं सदुपादानग्रहणात्। कारणव्यापारात्प्रागपि कार्यं सत् सर्वसम्भवाभावात्। कारणव्यापारात्प्रागपि कार्यं सत् शक्तस्य शक्यकरणाच्चेति हेतुभिः सत्कार्यवादस्य सिद्धिर्भवति। अत्र शक्तस्य शक्यकरणादित्यत्र सांख्यवादिभिरुच्यते यत् यस्य कार्यस्योत्पादिका शक्तिः यस्मिन् कार्ये विद्यते तेन कारणेन तस्य कार्यस्योत्पत्तिर्भवति। यथा दध्युत्पादिका शक्तिः दुग्धे विद्यते अतः दुग्धेनैव दधिवस्तुनः उत्पत्तिर्भवति। पञ्चमो हेतु कारणभावो विद्यते। अस्यार्थो भवति कार्यं कारणस्वरूपमेव भवति। यदि कारणादभिन्नं कार्यं, कारणञ्च सदस्ति तर्हि तदभिन्नं कार्यमसद् कथं स्यात् इति। अतः कारणव्यापारात्प्रागपि कार्यं सत् कारणभावादिति। कार्यकारणयोः मध्ये तादात्म्यसम्बन्धो विद्यत इत्यत्र साधकानि प्रमाणानि प्रतिपादयन्ति वाचस्पतिमिश्राः "न[2] पटः तन्तुभ्यो भिद्यते तद्धर्मत्वाद् इह यद् यतो भिद्यते तत् तस्य धर्मो न भवति यथा गौरश्वस्य धर्मश्च पटस्तन्तूनां तस्मान्नार्थान्तरम्"। "उपादानोपादेयभावाच्च नार्थान्तरत्वं तन्तुपटयोः"[3] नार्थान्तरत्वं तन्तुपटयोः संयोगाप्राप्त्यभावाद्"[4] "पटस्तन्तुभ्यो न भिद्यते गुरुत्वान्तरकार्याग्रहणात्"।[5] उक्तानुमानेन कार्यकारणयोर्मध्ये तादात्म्यसम्बन्धस्य सिद्धिर्जायते। ततः सत्कार्यवादस्य सिद्धिर्जायते। सांख्यदर्शने जडचेतनभेदेन तत्त्वं द्विविधं भवति। तत्र चेतनः पुरुषः स च प्रतिशरीरभेदेन भिन्नो विद्यते। जडस्वरूपा प्रकृतिरेव तस्याः विकृतयः व्यक्तपदवाच्याः भवन्ति। मूलप्रकृतिस्तु अव्यक्तमेव। व्यक्तन्तु त्रयोविंशतिविधम्। तेषां साधर्म्यन्तु हेतुमत्त्वम् अनित्यत्वम्, अव्यापित्वम्, सक्रियत्वम्, अनेकत्वम्, आश्रितत्वं, लिङ्गत्वं, सावयवत्वं, परतन्त्रत्वञ्चेति। हेतुमत्त्वमनित्यत्वमव्यापित्वं सक्रियत्वमनेकत्वमाश्रितत्वं लिङ्गत्वं, सावयवत्वं परतन्त्रत्वञ्चेति मूलप्रकृतेः अव्यक्तस्य वैधर्म्याणि सन्ति।[6] व्यक्ताव्यक्तयोः साधर्म्याणि त्रिगुणत्वमविवेकित्वं विषमत्वं सामान्यत्वमचेतनत्वं प्रसवधर्मित्वञ्चेति भवन्ति।[7]

दुःखस्वरूपः रजोगुणः, सुखस्वरूपः सत्त्वगुणः मोहस्वरूपश्च तमोगुणो भवति। सत्त्वं लघु प्रकाशकं रजोगुणः उत्तेजकः सक्रियः तमोगुणः गुरुः आवरकश्च भवति। एते गुणाः अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च भवन्ति। पुरुषस्य साधर्म्याणि तु निर्गुणत्वं, विवेकित्वमविषयत्वमसामान्यत्वं चेतनत्वम् अप्रसवधर्मित्वञ्चेति। तस्मादयं पुरुषः साक्षी, केवली, मध्यस्थः द्रष्टा अकर्त्ता[8] च वर्तत इति सिद्धं भवति। पूर्वोक्तप्रकृतिपुरुषयोः साधर्म्यवैधर्म्याभ्यां

---

१. सांख्यतत्त्वकौमुदी पृ. सं. १०५, २. सांख्यतत्त्वकौमुदी पृ. सं. ११०, ३. सांख्यतत्त्वकौमुदी पृ. सं. १११

४. सांख्यतत्त्वकौमुदी पृ. सं. १११, ५. सांख्यतत्त्वकौमुदी पृ. सं. १११

६. हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्।। सांख्यकारिका ।। १० ।। पृ. सं. १२०

७. त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि। व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्।।११।। पृ. सं. १२३

८. तस्माच्च विपर्यासात्, सिद्धं साक्षित्वमस्य पुरुषस्य। कैवल्यं माध्यस्थ्यं, द्रष्टृत्वमकर्तृभावश्च।। १९।। पृ.सं. ।। १६६ ।।

चैतन्यकर्तृत्वे भिन्नाधिकरणे सिद्धे ततः "चेतनोऽहं करोमि" इति सामानाधिकरण्यप्रतीतिः भ्रान्तिरेव। भ्रान्तेः कारणन्तु चेतनपुरुषस्य सन्निधानमेव विद्यते। पुरुषसंयोगात् बुद्ध्यादिकमचेतनं चेतनमिव[1] भवति। बुद्धियादिरूपेण परिणतानां गुणानां कृतिमत्त्वेऽपि, बुद्ध्युपरागात् अर्थात् तत्प्रतिबिम्बितत्वात् उदासीनोऽपि पुरुषः कर्ता[2] इव भवति। पङ्ग्वन्धवत्[3] प्रकृतिपुरुषयोः संयोगो भवति तत्र प्रयोजनं भवति प्रधानेन सुखाद्यात्मकस्वस्वरूपानुभवरूपभोगार्थं पुरुषोऽपेक्ष्यते, पुरुषेण च कैवल्यकारणविवेकज्ञानरूपप्रकृतिपरिणामार्थं प्रधानमपेक्ष्यते। प्रकृतिपुरुषयोः संयोगेन सर्गो जायते। अध्यवसायो बुद्धेः लक्षणं भवति। अध्यवसायो नाम मया इदं कर्त्तव्यमित्याकारकनिश्चयः। बुद्धौ अष्टौ धर्माः विद्यन्ते उत्पद्यन्ते वा। तत्र विवेकज्ञानोपयोगिनः धर्माः धर्मः, ज्ञानम्, वैराग्यमैश्वर्यञ्चेति सात्त्विकाः सन्ति। अधर्माज्ञानवैराग्यानैश्वर्यरूपं तामसमिति। तत्र धर्मः अभ्युदयनिःश्रेयसहेतुः, प्रकृतिपुरुषयोः विवेकज्ञानमत्र ज्ञानमिति। रागाभावः वैराग्यम् तच्चतुर्विधम् यतमानव्यतिरेकैकेन्द्रियवशीकारभेदात्। बुद्धेः सात्त्विकधर्मः चतुर्थः ऐश्वर्यमिति ऐश्वर्येणैव अणिमा, लघिमा, महिमा, प्राप्तिः, प्राकाम्यं, वशित्वमीशित्वं कामावसायित्वञ्चेति[4] धर्माणां प्राप्तिर्भवति। अत एव ऐश्वर्यमष्टविधं भवति। अणुभावः अणिमातया शिलामपि प्रविशति। लघुभावः लघिमातया सूर्यमरीचीनाश्रित्य सूर्यलोकं स च योगी गच्छति। महतो भावः महिमा यस्मात् योगी महान् भवति। सर्वेषां भावानां सन्निधानं प्राप्तिः यस्मादङ्गुल्यग्रेण स्पृशति चन्द्रमसम्।[5] इच्छानभिघातः प्राकाम्यं यतः पृथिव्यां उन्मज्जति। वशित्वेन भूतभौतिकमवश्यं वशीभवति। पृथिव्यादीनि भूतानि गोघटादीनि भौतिकानि, तेषामुत्पादः अवस्थापनं नाशश्चेति तत्र यः समर्थो भवति सः ईशः तादृशं सामर्थ्यम् ईशत्वेन प्राप्यते। कामावसायित्वं नाम सत्यसङ्कल्पता। कामावसायित्वैश्वर्ययुक्तः योगी यथा वाञ्छति वा तस्य सङ्कल्पो भूतेषु यथा भवति तथैव भूतानि भवन्ति।

अभिमानोऽहङ्कारस्य लक्षणं भवति। संकल्पकत्वं मनसः लक्षणम्।[6] चक्षुःश्रोत्रत्वग्रसनाघ्राणेन्द्रियाणां रूपशब्दस्पर्शरसगन्धेषु सम्मुग्धवस्तुमात्रदर्शनरूपमालोचनं वृत्तिर्भवति। वाक्पाणिपादपायूपस्थानामिन्द्रियाणां यथाक्रमं वचनादानविहरणोत्सर्गानन्दाश्च[7] वृत्तयः वा व्यापाराः भवन्ति। रात्रौ अन्धकारे यदा दिव्यविद्युतः सम्पातो जायते तदा कश्चन पुरुषः व्याघ्रमभिमुखमतिसन्निहितं पश्यति। तदा चक्षुषा आलोचनं मनसा संकल्पः अहङ्कारेणाभिमानं महता अध्यवसायश्च युगपदेव भवन्ति।[8] कुत्रचित् वस्तुनः सामान्यदर्शने एतच्चतुष्टयं क्रमशः भवति।

---

१. "अन्तःकरणस्य तदुज्ज्वलितत्वाल्लोहवदधिष्ठातृत्वम्" सांख्यसूत्रम् अ.१ सूत्राणि ६६

२. उपरागात्कर्तृत्वं चित्सान्निध्याच्चित्सान्निध्यात् सांख्यसूत्रम् अ.२ सूत्र १६४ "अहंकारः कर्त्ता न पुरुषः" सां.सू.अ. ६ सू. ५४।

३. पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।। सां.का. २१।। सां.त. कौ. संहिता पृ. १७०

४. अध्यवसायो बुद्धिधर्मो ज्ञानं विराग ऐश्वर्यम्। सात्विकमेतद्रूपं तामसमस्माद् विर्पयस्तम्।। ।।२३।। सां.त.कौ. २७३ पृ.

५. नाणिमादियोगोऽप्यवश्यम्भावित्वात्तदुच्छित्तेरितरवियोगवत् ।। सां.सू. अ. ५ सू. ८२

६. उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियं च साधर्म्यात्।। सांख्यकारिकांशः ।।२७।। पृ.सं. ३५१

७. वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्।। सांख्यतत्त्वकौमुदी २८। पृ.सं. ३५६

८. क्रमशोऽक्रमशश्चेन्द्रियवृत्तिः ।। अ. २ सू. ३२ ।। सांख्यसूत्रवृत्तिः पृ. १०२

त्रयोदशविधानि करणानि स्वस्वकार्याणि कुर्वन्ति अत्र पुरुषार्थ एव हेतुर्विद्यते। त्रयोदशविधेषु करणेषु मुख्या बुद्धिरेव विद्यते यतोहि सैव प्रकृतिपुरुषयोः भेदं कारयति। पञ्चमहाभूतानि विशेषपदवाच्यानि भवन्ति। एतानि विशेषाः शान्ताः घोराः मूढाश्च भवन्ति। विशेषः त्रिविधः सूक्ष्ममातापितृजपञ्चमहाभूतभेदात्। मातापितृजशरीरं निवर्तते सूक्ष्मशरीरं नियतं भवति।[1] सृष्टिकाले एव सूक्ष्मशरीरस्योत्पत्तिर्भवति। सूक्ष्मशरीरे सप्तदशावयवाः[2] भवन्ति। एकादशेन्द्रियाणि पञ्चतन्मात्राणि बुद्धिश्चेति सप्तदशावयवाः सन्ति। अहङ्कारस्यान्तर्भावो बुद्धावेव भवति। मनबुद्ध्यहंकाराणां विशेषवृत्तयः अध्यवसायाभिमानसंकल्पाः सामान्यवृत्तिस्तु प्राणापानव्यानोदानसमानाः वायवः पञ्च भवन्ति। भावैर्युक्तं सूक्ष्मशरीरं जराशरीरं विहाय नूतनशरीरे प्रविशति। भोगापवर्गस्वरूपपुरुषार्थहेतुना सूक्ष्मशरीरं धर्मादिः धर्मादिकारणकं स्थूलदेहादिश्चैतदुभयसम्बन्धेन प्रकृतेर्विभुत्वयोगात् यथा नटः बहूनि रूपाणि गृहीत्वा व्यवहरति तथैव पुरुषः देवादिशरीरं परिगृह्य व्यवहरति।[3]

धर्मेण द्युप्रभृतिषु लोकेषु गमनं भवति। अधर्मेण अतलवितलसुतलरसातलतलातलमहातलपाताललोकेषु गमनं भवति। अतत्त्वज्ञानात् प्राकृतिकः वैकृतिकः दाक्षिणकश्चेति बन्धो जायते। तत्त्वज्ञानेन मोक्षस्य प्राप्तिर्भवति।

सांख्यदर्शने प्रत्ययसर्गः चतुर्विधो भवति। विपर्ययाशक्तितुष्टिसिद्ध्याख्यभेदात्।[4] व्यस्तरूपेण प्रत्ययसर्गस्य पञ्चाशत् भेदाः भवन्ति। तमः, मोहः, महामोहः, तामिस्रः, अन्धतामिस्रश्चेति भेदात् विपर्ययः पञ्चविधः।[5] त्रयोदशकरणानां वैकल्यात् अशक्तेरष्टाविंशति भेदाः[6] भवन्ति। तुष्टिर्नवधा, सिद्धिरष्टधा इति। विपर्ययेषु तमः अष्टविधं मोहः अष्टविधः महामोहः दशविधः, अष्टादशधा तामिस्रः, अन्धतामिस्रश्चापि अष्टादशधा भवन्ति। विपर्ययादीनां स्वरूपमधोलिखितं विद्यते।

तमः = अविद्या

१. प्रकृतिरेव आत्मा इति अज्ञानम्।

२. बुद्धिरेवात्मा इति अज्ञानम्।

३. अहङ्कार एवात्मा इति अज्ञानम्।

४. शब्दतन्मात्रा एवात्मा इत्यज्ञानम्।

---

१. मातापितृजं स्थूलं प्रायशः इतरन्न तथा सांख्यसूत्रम्। अ. ३ सूत्राणि ७।। सांख्यसूत्रवृत्तिः पृ.सं. ११०

२. सप्तदशैकं लिङ्गम् ।। अ.३१ सूत्र ८।। सांख्यसूत्रवृत्तिः पृ. १११

३. पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन। प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्गम्।। सां.का. ४२/सां.त.कौ. २०२ पृ.

४. एष प्रत्ययसर्गो विपर्ययाऽऽशक्तितुष्टिसिद्ध्याख्यः।
गुणवैषम्यविमर्दात्तस्य च भेदास्तु पञ्चाशत् सा.का. ४६ सा.त.कौ. २०५

५. सांख्यकारिका ४७ सां.त.कौ. पृ.सं. २०५

६. अशक्तिरष्टाविंशतिधा ।। सांख्यसूत्रम् अ. ३ सू. ३८

५. स्पर्शतन्मात्रा एवात्मा इत्यज्ञानम्।

६. रूपतन्मात्रा एवात्मा इत्यज्ञानम्।

७. रसतन्मात्रा एवात्मा इत्यज्ञानम्।

८. गन्धतन्मात्रा एवात्मा इत्यज्ञानम्।

मोहः = अस्मिता

१. अणिमा मम शाश्वतिकमैश्वर्यमस्ति इत्यभिमानः।

२. महिमा मम शाश्वतिकमैश्वर्यमस्ति इत्यभिमानः।

३. लघिमा मम शाश्वतिकमैश्वर्यमस्ति इत्यभिमानः।

४. प्राप्तिः मम शाश्वतिकमैश्वर्यमस्ति इत्यभिमानः।

५. प्राकाम्यं मम शाश्वतिकमैश्वर्यमस्ति इत्यभिमानः।

६. वशित्वं मम शाश्वतिकमैश्वर्यमस्ति इत्यभिमानः।

७. ईशित्वं मम शाश्वतिकमैश्वर्यमस्ति इत्यभिमानः।

८. कामावसायित्वं मम शाश्वतिकमैश्वर्यमस्ति इत्यभिमानः।

महामोहः = रागः

१. दिव्यशब्दरञ्जनीविषये आसक्तिः।

२. दिव्यस्पर्शरञ्जनीविषये आसक्तिः।

३. दिव्यरूपरञ्जनीविषये आसक्तिः।

४. दिव्यरसरञ्जनीविषये आसक्तिः।

५. दिव्यगन्धरञ्जनीविषये आसक्तिः।

अदिव्यगन्धादिपञ्च विषयाः

६. गन्धरञ्जनीयविषये आसक्तिः।

७. रसरञ्जनीयविषये आसक्तिः।

८. रूपरञ्जनीयविषये आसक्तिः।

९. स्पर्शरञ्जनीयविषये आसक्तिः।

१०. शब्दरञ्जनीयविषये आसक्तिः।

एवं दिव्यादिव्यभेदेन दशविधाः शब्दादिविषयाः परस्परेण उपहन्यमानाः सन्तः द्वेषस्य विषयाः भवन्ति। अष्टविधैश्वर्याणि प्रति द्वेषः तथाचैतेषामष्टादशविधत्वादष्टादशभेदाः[१] तामिस्रस्य भवन्ति। अणिमाद्यष्टैश्वर्याणां दिव्यादिव्यभेदेन शब्दस्पर्शरूपरसगन्धानां मिलित्वा अष्टादशविषयाः भवन्ति। एतेषां कश्चन दुष्टः न अपहरतु इति भयं जायते। भयविषयाणामष्टादशविधत्वात् अन्धतामिस्रः अष्टादशधा[२] भवति। नवतुष्टीनामभावः अष्टसिद्धीनामभावः एकादशेन्द्रियवधाः तादृशतुष्टिसिद्धीनामभावविशिष्टा बुद्धिश्च एतेषां विषयाणामष्टविंशतिविधत्वादष्टाविंशतिभेदाः अशक्तेः[३] भवन्ति। एकादशेन्द्रियाणां वधैः सह बुद्धिवधस्य व्यस्तरूपेण स्वरूपं निम्नलिखितं विद्यते।

१. बाधिर्यम्

२. कुष्ठित्वम्

३. अन्धत्वम्

४. जडत्वम्

५. अजिघ्रत्वम्

६. मूकत्वम्

७. कौण्यम्

८. पङ्गुत्वम्

९. क्लैव्यम्

१०. उदावर्तम्

११. मन्दता[४]

अशक्तिः

१२. अम्भतुष्ट्यभावविशिष्टा बुद्धिः।

१३. सलिलतुष्ट्यभावविशिष्टा बुद्धिः।

१४. ओघतुष्ट्यभावविशिष्टा बुद्धिः।

---

१. अवान्तरभेदाः पूर्ववत् सां.सू. अ. ३ सू. ४१

२. भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः।। सां.का. ।।४८।। पृ.सं. सां.त.कौ. पृ.सं. ४१६

३. एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा।
सप्तदशवधा बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम्।। सां.का. ४९।। पृ.सं. ४२३

४. बाधिर्यं कुष्ठिताऽन्धत्वं जडताऽजिघ्रता तथा।
मूकता कौण्यपङ्गुत्वे क्लैव्योदावर्तमन्दताः।। सांख्यतत्त्वकौमुदी पृ. ४२४

१५. वृष्टितुष्ट्यभावविशिष्टा बुद्धिः।

१६. पारतुष्ट्यभावविशिष्टा बुद्धिः।

१७. सुपारतुष्ट्यभावविशिष्टा बुद्धिः।

१८. परापारविशिष्टा बुद्धिः।

१९. अनुत्तमाम्भविशिष्टा बुद्धिः।

२०. उत्तमाम्भविशिष्टा बुद्धिः।

२१. तारसिद्ध्यभावविशिष्टा बुद्धिः।

२२. सुतारसिद्ध्यभावविशिष्टा बुद्धिः।

२३. तारतारसिद्ध्यभावविशिष्टा बुद्धिः।

२४. रम्यकसिद्ध्यभावविशिष्टा बुद्धिः।

२५. सदामुदितसिद्ध्यभावविशिष्टा बुद्धिः।

२६. प्रमोदसिद्ध्यभावविशिष्टा बुद्धिः।

२७. मुदितसिद्ध्यभावविशिष्टा बुद्धिः।

२८. मोदमानसिद्ध्यभावविशिष्टा बुद्धिः।

व्यस्तरूपेण अशक्तेरष्टविंशति भेदाः उक्ताः। नवतुष्टीनामष्टसिद्धीनां लक्षणमिदानीमुच्यते-

तुष्टयः नवविधाः[1] भवन्ति। चतस्रः आध्यात्मिक्यः तुष्टयः, पञ्चबाह्यतुष्टयश्च। आत्मानमधिकृत्य जायमानाः आभ्यन्तराः तुष्टयः आध्यात्मिक्यः तुष्टयः भवन्ति। अत एव वाचस्पतिमिश्रोऽपि ब्रवीति "प्रकृतिव्यतिरिक्तमात्मानम-धिकृत्य यस्मात्ताः तुष्टयस्तस्माद् "आध्यात्मिक्यः" "प्रकृत्युपादानकालभागाख्याः"[2] इति। अनिरुद्धवृत्तिकारोऽपि वदति "अनात्मनि आत्मबुद्ध्या प्रवर्त्तमाना आध्यात्मिक्यः चतस्रः"[3] तुष्टयः भवन्ति। प्रकृतिविवेकदर्शनात् चेत् मुक्तिः अत एव प्रकृतिरेव उपास्या इति मत्वा यः प्रकृतिमुपासते एषा प्रकृतितुष्टिः अम्भपदवाच्येति। विवेकज्ञानात् अपि न साक्षात्, अदर्शनात् व्रतग्रहणात्, वा सन्यासग्रहणात् भविष्यति "प्रव्रज्यामुपाददीथाः, कृतं ते ध्यानाभ्यासेनायुष्मन्"[4] इति उपदेशे या तुष्टिः सोपादानाख्या सलिलमिति।

सन्यासग्रहणेनापि न सद्यः मुक्तिरपितु कालपरिपाकमपेक्ष्य सिद्धिं ते विधास्यन्ति इयं तुष्टिः कालाख्या ओघपदवाच्या भवति।

---

१. आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभागाख्याः।
बाह्या विषयोपरमात्पञ्च च नव तुष्टयोऽभिमता।।५०।। सां.का. सां.त.कौ.पृ.४२६

२. सां. तत्त्व कौ. पृ. ४२७, ३. सांख्यसूत्रवृत्तिः पृ.सं. १२३, ४. सांख्यतत्त्वकौमुदी पृ.सं. ४२८

कालवशादपि न सर्वेषां मुक्तिः अपितु भाग्यादेव भविष्यति। अथवा जन्मान्तरकृतध्यानाभ्यासजनिता दृष्टद्वारैव मुक्तिः भविष्यति इति उपदेशे या तुष्टिः भवति सा भागाख्या वृष्टिपदवाच्या इति। विषयार्जनदुःखादुपरमे पारतुष्टिः, विषयरक्षणदुःखादुपरमे सुपारतुष्टिः, क्षयं भावयतः दुःखादुपरमे पारपारतुष्टिः, भोगदोषं भावयतः दुःखादुपरमे अनुत्तमाम्भतुष्टिः, नानुपहत्य भूतानि भोगसिद्धिः इति दुःखादुपरमे उत्तमाम्भतुष्टिश्च भवन्ति। ऊहः तर्कः मननमिति ऊहसिद्धिः[१] सुतारमिति। ऊहसिद्धेः स्वरूपं प्रतिपादयन्नाह सांख्यतत्त्वकौमुदीकारः "ऊहः तर्कः आगमविरोधिन्यायेन[२] आगमार्थपरीक्षणम्। परीक्षणञ्च संशयपूर्वपक्षनिराकरणेनोत्तरपक्षव्यवस्थापनमिति'। शब्दज्ञानं द्वितीया तारसिद्धिः अथवा शब्दजनितमर्थज्ञानम् शब्दसिद्धिरिति'। अध्ययनं तृतीया सिद्धिः तारतारमिति वा विधिवद्गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपग्रहणमध्ययनसिद्धिरिति।

गुरुब्रह्मचारिणां प्राप्तिः सुहृत्प्राप्तिरूपा सिद्धिः रम्यकमिति, वा न्यायेन स्वयं परीक्षितमप्यर्थं न श्रद्दधते न यावद् गुरुशिष्यसब्रह्मचारिभिः सह संवाद्यते, अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सुहृत्प्राप्तिः। बाह्यान्तः शुद्धिः[३] पञ्चमीसिद्धिः सदामुदितमिति अथवा दानं-शुद्धविवेकज्ञानम्[४] तच्च सवासनसंशयविपर्यासानां परिहारेण विवेकसाक्षात्कारस्य स्वच्छप्रवाहेऽवस्थापनमिति।

आध्यात्मिकदुःखविघातः प्रमोदनामिका सिद्धिः।[५] आधिभौतिकदुःखविघातः मुदितनामिका सिद्धिः। आधिदैविकदुःखविघातः अष्टमी मोदमानाख्या सिद्धिरिति। प्रत्ययसर्गस्य अवान्तरभेदः प्रतिपादितः। भूतादिसर्गस्यावान्तरभेदं प्रतिपादयिष्ये इति। दैवसर्गः अष्टप्रकारो[६] भवति। ब्राह्मः, प्राजापत्यः, ऐन्द्रः, पैत्रो, गान्धर्वो, याक्षो, राक्षसः, पैशाचश्चेति। तैर्यग्योनिश्च पञ्चविधो भवति पशुमृगपक्षिसरीसृपस्थावरा इति। मानुषकश्च एकविधो भवति। भुवलोकस्वर्गलोकमहलोकजनलोकतपलोकसत्यलोकेषु सत्त्वगुणस्य बहुलता[७] भवति। भूर्लोके रजोगुणस्य, पश्वादिस्थावरान्तेषु तमोगुणस्य बहुलता च भवति। यथा नर्तकी नृत्यं दर्शयित्वा नृत्यात् निवर्तते तथैव प्रकृतिः आत्मानं दर्शयित्वा निवर्तते। प्रकृतिः सुकुमारतरा वर्तते। स्वं रूपं प्रदर्श्य सा परावृता भवति। पुरुषः गुणरहितः अपरिणामी विद्यते अतः कश्चिद् पुरुषः न बद्धो भवति न प्रेत्यभावापरनामानं संसारं लभते नापि पुरुषः मुक्तो भवति। अपितु प्रकृतिरेव नानापुरुषाश्रया सती बद्धा भवति संसारं लभते मुक्ता च भवति इति। धर्मवैराग्यैश्वर्यानैश्वर्याधर्माज्ञानावैराग्यैरेभिः सप्तभिः[८] आत्मना आत्मानं बध्नाति। विवेकज्ञानरूपेणैकेन पुरुषं विमोचयति इति। तत्त्वविषयज्ञानाभ्यासात् संशयभ्रमराहित्यात् प्रमात्मकं मिथ्याज्ञानरहितं नास्ति परिशेषः ज्ञातव्यो

---

१. ऊहादिभिः सिद्धिरष्टधा ।।४४।। अ. ३ सू. ४४ सांख्यसूत्रवृत्तिः पृ.सं. १२५

२. सांख्यसूत्रवृत्तिः पृ.सं. ४२८, ३. सांख्यसूत्रवृत्तिः पृ.सं. ४२८, ४. सांख्यतत्त्वकौमुदी पृ.सं. ४४१

५. सांख्यसूत्रवृत्तिः पृ.सं. १२६,

६. अष्टविकल्पो दैवस्तैर्यग्योनिश्च पञ्चधा भवति।
मानुषकश्चैकविधः समासतो भौतिकः सर्गः ।।सां.का. ५३।। सां.त.कौ. पृ. ४५।

७. "ऊर्ध्वं सत्त्वविशाला" ।। अ. ३ सू. ४८।।
तमो विशाला मूलतः अ.३ सू. ४९। "मध्ये रजोविशालः" अ. ३ सू. ।।५०।।

८. रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः। सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ।। सां.का. ६३ ।।

विषयो यस्मिन् तादृशम् अहं क्रियाशून्योऽस्मि, अहम् अकर्ताऽस्मि स्वामितारहितोऽस्मि इति ज्ञानं जायते। अत्र वाचस्पतिमिश्रोऽपि वदति ''यतश्चात्मनि[1] व्यापारावेशो नास्त्यतो ''नाहम्''। अहमिति कर्तृपरम्। अहं जानामि' 'अहं जुहोमि' 'अहं ददे' 'अहं भुञ्जे' इति सर्वत्र कर्तुः परामर्शात्, निष्क्रियत्वे च सर्वकर्तृत्वाभावः। ततः सुष्ठूक्तम् ''नाहम्'' इति। अत एव ''न मे''। कर्ता हि स्वामितां लभते, तदभावात्तु कुतः स्वाभाविकी स्वामिता ? इत्यर्थः। अथवा ''नास्मि'' इति पुरुषोऽस्मि न प्रसवधर्मा इति।

विवेकज्ञाने जाते सति प्रकृतिः मया दृष्टा इति निश्चित्य पुरुषः प्रकृतिं पुनः सकौतुकं द्रष्टुं नेच्छति। प्रकृतिरपि पुरुषेणाहं दृष्टा इति निश्चित्य विरमति न पुनर्दर्शनाय प्रवर्तते[2] इति। सांख्यनये मोक्षस्तु द्विविधो भवति जीवन्मुक्तिः विदेहमुक्तिश्च। विशुद्धज्ञानप्राप्तेः देहारम्भकानां संचितक्रियमाणानां धर्मादीनां संसारकारणत्वाप्राप्तौ अर्थात् स्वाश्रये स्वफलोत्पादनासामर्थ्यस्य प्राप्तौ देहारम्भकादृष्टवशात् स च तत्त्वज्ञानी धृतशरीरः तिष्ठति यथा कुलालव्यापारात् चक्रे वेगसंस्कारो जायते ततः घटनिर्माणानन्तरमपि चक्र भ्रमिः तिष्ठति तथैव तत्त्वज्ञानीति इयमवस्था जीवन्मुक्तस्य भवति। जीवन्मुक्तौ श्रुतिरपि प्रमाणं विद्यते।

''दीक्षयैव नरो मुच्येत्तिष्ठेन्मुक्तोऽपि विग्रहे।
कुलालचक्रमध्यस्थो विच्छिन्नोऽपि भ्रमेद् घटः''[3] ।।८२।।

सांख्यदर्शने जीवन्मुक्तिः स्वीक्रियत इत्यत्र सूत्रत्रयं प्रमाणं विद्यते। ''जीवन्मुक्तश्च''[4] ''चक्रभ्रमणवद्धृतशरीरः''[5] ''संस्कारलेशतस्तत्सिद्धिः''[6] अर्थात् जीवन्मुक्तः मुक्तो भवति रागाभावात्। यथा दण्डस्यापगमे वेगसंस्कारवशात् चक्रं भ्रमति तथैव तत्त्वज्ञानिनामपि देहधारणकर्मणः अक्षयत्वात् तस्मिन् क्षणे विदेहमुक्तिस्तु न भवति परन्तु सञ्चितकर्मणां क्षयात् जीवन्मुक्तिदशायां संस्कारस्य विद्यमानत्वात् जीवन्मुक्तस्य सिद्धिर्भवति। तदनन्तरमारब्धभोगेन कर्मणोत्पादितस्य शरीरस्य नाशे जाते बुद्धितत्त्वादिद्वारा भोगापवर्गपुरुषार्थयोः प्राप्त्यनन्तरं प्रधानं विनिवर्तते। ततः पुरुषः ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति। अत्र सूत्रकारः वदति-

''विवेकान्निःशेषदुःख निवृत्तौ कृतकृत्यः नेतरान्नेतरात्''[7] अर्थात् अशेषरूपेण त्रिविधदुःखस्यात्यन्तनिवृत्तो कृतकृत्यः पुरुषः परममुक्तिं प्राप्नोति। मोक्षस्वरूपं प्रतिपादयन्नाह सूत्रकारः - ''द्वयोरेकतरस्य वौदासीन्यमपवर्गः[8] अर्थात् प्रकृतिपुरुषयोः, प्रकृतेः औदासीन्यं विवेकिनं प्रति अप्रवर्तनम्, पुरुषस्य औदासीन्यं प्रकृत्यनभिष्वङ्गः उभयोरेकतरः पुरुषः तस्य स्वस्वरूपे अवस्थानं मोक्षः।

---

१. सांख्यतत्त्वकौमुदी पृ.सं. ४८४

२. दृष्टा मयेत्युपेक्षत एको दृष्टाहमित्युपरमत्यन्या। सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य।। ।। सां.का. ६६ ।।

३. सांख्यसूत्रवृत्तिः पृ.सं. ४२८, ४. सांख्यसूत्र अ. ३ सू. ७८, ५. सांख्यसूत्रम् अ. ३ सू. ८२

६. सांख्यसूत्रम् अ. ३ सू. ८३, ७. सांख्यसूत्रम् अ. ३ सू. ८४

८. सांख्यसूत्रम् अ. ३ सू. ६५ सांख्यसूत्रवृत्तिः पृ. १३३

संक्षेपेण पञ्चविंशतितत्त्वानां निरूपणे मया विहितं विस्तरभयादत्रैव विरम्यते चित्ररूपेण जगतः विकासक्रम उच्यते-

मूलप्रकृतिः = अव्यक्तम् = प्रधानम्।

पुरुषः पञ्चविंशतितमं तत्त्वमिति।

↓

महान् = बुद्धिः

↓

अहङ्कारः

सात्त्विकी सृष्टिः ↓ तामसीसृष्टिः

मनः | पञ्चज्ञानेन्द्रियाणि | पञ्च कर्मेन्द्रियाणि | पञ्चतन्मात्राणि

पञ्चज्ञानेन्द्रियाणि: श्रोतम् चक्षुः घ्राणम् रसना त्वक्

पञ्च कर्मेन्द्रियाणि: वाक् पाणी पादौ पायुः उपस्थः

पञ्चतन्मात्राणि: शब्दतन्मात्रा स्पर्शतन्मात्रा रूपतन्मात्रा रसतन्मात्रा गन्ध-तन्मात्रा

आकाशः वायुः तेजः जलम् पृथिवी

अनया रीत्या समासतः पञ्चविंशतितत्त्वानां स्वरूपं प्रतिपादितमिति।

▢▢ सङ्केतः उपाचार्यः सर्वदर्शनविभागाध्यक्षश्च
श्री लाल बहादुरशास्त्री राष्ट्रिय-संस्कृत-विद्यापीठम्
(मानित-विश्वविद्यालयः)

नादतत्त्वविमर्शः

❑ प्रो. राधेश्याम चतुर्वेदी

भारतीय दर्शन परम्परा में जगत् की सृष्टि के विषय में भिन्न-भिन्न प्रकार से चिन्तन हुआ है। इस क्रम में नाद-ब्रह्म से जगत् की उत्पत्ति हुई है यह अन्यतम सिद्धान्त है। इस सिद्धान्त को स्वीकार करने वाले दार्शनिक सम्प्रदायों में स्फोटवादी वैयाकरण तथा अनेक तन्त्रागमाश्रित शैव दर्शनादि हैं। तन्त्रागमों के अनुसार जब परम शिव अथवा परम शक्ति स्वातन्त्र्यवशाद् लीलावश सिसृक्षा करता है, तो समवायिनी विमर्श शक्ति शून्य रूप से परिणमित होती है। शून्य से स्पर्श तथा स्पर्श से नाद की उत्पत्ति होती है। शून्य बिन्दु रूप होता है जो प्राणवायु का घनीभूत सङ्घट्ट होता है। प्राण सर्वत्र सञ्चरण करता हुआ ब्रह्माण्ड, प्राकृताण्ड, मायाण्ड आदि क्रम से व्यष्टितया प्रति पिण्ड में स्पन्दित होता है। प्राण ही नादरूप है, जिसका उत्पत्ति स्थान मूलाधारचक्र है। कुछ विद्वान् इसका उत्पत्तिस्थान हृदय मानते है। नाद की व्यक्ति परम पुरुष के वाचक 'हम्' तथा परम प्रकृति के वाचक 'स', जो कि संहार तथा सृष्टि बीज होते हैं, से होती है। इसी कारण प्राणियों के देह में स्वभावतः स्पन्दन रूप प्राण अथवा नाद 'हंस' इस प्रकार उच्चार्यमाण होता है।

ऋग्वेद तथा अथर्ववेद में वाग्रूप से, उपनिषदों में शब्द ब्रह्म रूप से, योगसाधना में भ्रमरस्वन के समान आन्तर्नादरूप से, शब्दविवर्तमत में अखण्डस्फोट रूप से तथा तन्त्रसाधना में विविध अर्थ वाले ओङ्कार उच्चारण द्वारा कृत्रिमवर्णविभाग के विगलित हो जाने पर अखण्ड नादरूप से गृहीत है। यही नाथ सम्प्रदाय में मन्त्रयोग मन्त्रसाधना नादसाधना आदि नामों से ज्ञेय है। पर बीजरूप नाद समस्त प्राणियों में स्थित होता हुआ परमेश्वर की ज्ञानशक्ति के रूप में नाद तथा क्रियाशक्ति के रूप में बिन्दु कहलाता है। इस नादानुसन्धान को पुरुषार्थलाभ का अन्यतम उपाय बतलाया गया है। यही परावाक् परब्रह्म नाद सृष्टि का कारण है।

विद्वान् लेखक ने नादविमर्श की शास्त्रोक्त प्रक्रिया को अत्यन्त सरल तथा रोचक शैली में प्रतिपादित करते हुए तथा नादसाधना में गुरु की अनिवार्यता आत्मसाक्षात्कार हेतु बतलाते हुए नादतत्त्व के विमर्श पर प्रकाश डाला है।

●

नादस्य स्वरूपम्

जगतः सृष्टिविषये भिन्नभिन्नदार्शनिकसम्प्रदायानां भिन्नभिन्नानि मतानि शास्त्रेषूपलभ्यन्ते। तत्र शब्दब्रह्मणो नादाद्वा जगत उत्पत्तिरिति अन्यतमः सिद्धान्तः। परमा शक्तिः परमशिवो वा यदा निरपेक्षः सन् स्वस्वातन्त्र्यवशाल्लीलान्यायेन जगत् स्रष्टुमिच्छति तदा तस्मिन् समवायसम्बन्धेन वर्त्तमाना तत्समवायिनी विमर्शशक्तिः शून्यरूपेण परिणमते। शून्यात् शक्तिरूपस्य स्पर्शस्योत्पत्तिस्ततो नादः। तदाह स्वच्छन्दतन्त्रे–

'तस्माच्छून्यं समुत्पन्नं शून्यात् स्पर्शसमुद्भवः।
तस्मान्नादः समुत्पन्नः।।' (११।१५)

बिन्दुरेव शून्यम्। यथा बिन्दोः संसरणेन रेखा प्रकटीभवति तथा शक्तेः परिणामभूतेन बिन्दुना नादस्य समुद्भवः।

बिन्दोस्तस्माद् भिद्यमानाद्रवोऽव्यक्तात्मकोऽभवत्।
स एव श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते।। (प्रपञ्चसार तन्त्रम् १।४३)

अयं बिन्दुः प्राणवायोर्घनीभूतः सङ्घट्टः। परमात्मन एकस्या एव शक्तेः तदिच्छया त्रयः प्रकारा आविर्भूता भवन्ति। तेषां नामानि संविच्छक्तिः सन्धिनीशक्तिः ह्लादिनीशक्तिश्च सन्ति। आसां शक्तीनां मध्ये संविच्छक्तिः प्रधानीभूताऽस्ति। आकाशरूपेयं संविच्छक्तिः पारमेश्वरस्वातन्त्र्येणादौ प्राणरूपेण परिणमते–'प्राक् संवित् प्राणे परिणता।' अयं प्राणवायुर्व्यापकरूपेण ब्रह्माण्डे व्याप्यरूपेण च पिण्डे प्रवहन्नास्ते, पिण्डब्रह्माण्डयोः सादृश्यात्। असंख्यब्रह्माण्डेषु उपाधिवशात् पृथक् पृथग् रूपेणोच्चरमाणोऽप्ययं प्राणः समष्टिरूपेणैक एव। यथा पृथक् पृथक् पिण्डे प्रवहमाणः प्राणः समष्टिरूपेण एक एव सन् तत्तत्पिण्डोपाधिना प्रतिपिण्डं पृथक् पृथग् व्यवहरति जीवनमृत्युरूपेण, तथैव पृथक् पृथग् ब्रह्माण्डे प्रवर्त्तमानः प्राणः ब्रह्माण्डानां समष्टिभूते प्राकृताण्डे एक एव। अनयैव रीत्या नानाप्राकृताण्डेषु पृथक् पृथग् विचरन् प्राणः प्राकृताण्डानां समिष्टभूते मायाण्डेऽपि एक एव। तथैव पद्धत्याऽधिसङ्ख्यमायाण्डेषु प्रवहमाणः प्राणः शाक्ताण्डे एक एव। इत्थं पश्यामो वयं यत् शक्त्यधिष्ठानभूतात् शाक्ताण्डात् प्रचलितः प्राणः प्रतिपिण्डं व्यष्टिरूपेण स्पन्दमान आस्ते। अयमेव प्राणवायुर्नादिति नाम्ना प्रसिद्धः। परमशिवमतिरिच्य नान्यः कोऽपि अस्य प्रेरयितोच्चारयिता वा विश्वस्मिन् वरीवर्त्ति। अयं नादो निखिलेऽपि विश्वस्मिन् अजस्रं प्रवहमान आस्ते। स न तु कदाचिद् विरमति नाप्यवरुध्यते केनचित्–

नास्योच्चारयिता कश्चित् प्रतिहन्ता न विद्यते।
स्वयमुच्चरते देवः प्राणिनामुरसि स्थितः।। (स्व.तं. ७।५८)

एष नादः 'महाशब्दः' इति नाम्नापि प्रसिद्धः। परबीजरूपोऽयं सर्वप्राणिनां हृदयेऽवस्थितः। तदुक्तं कालोत्तरतन्त्रे–'नादाख्यं यत् परं बीजं सर्वभूतेष्ववस्थितम्।' (१।५)

उत्पत्तिस्थानम्

पूर्वमेवोक्तं यत् सृष्टेरादौ संवित् शक्तिः प्राणरूपेण परिणमते। अस्मिन् प्राणे नादस्योत्पत्तिः किं वा प्राण एव नादः। केषाञ्चिन्मते संविदेव परावाग्रूपाऽस्ति। इयं च वाङ्मूलाधारे तिष्ठति–

'परावाङ् मूलचक्रस्था पश्यन्ती नाभिदेशगा।
हृदिस्था मध्यमा प्रोक्ता वैखरी कण्ठदेशगा।।' (प.ल.मं.स्फो.)

अत एव नादस्योत्पत्तिस्थानं मूलाधारचक्रम्। प्राणः पारमेश्वरेच्छावशाच्चिदचिदुभयधर्मयुक्तः। चित्त्वाद्धेतोरस्मिन् प्राणे शश्वत् स्पन्दनं स्वाभाविकरूपेण भवति। इदं स्पन्दनमुच्चार इति कथ्यते। अस्मादुच्चारादव्यक्तो ध्वनिरनाहतनादो वा निरन्तरमुत्पद्यमान आस्ते। अन्येषां विदुषां मते यतो हि पिण्डाभिधे शरीरे प्राणस्य स्थानं हृदयं वर्त्तते तस्माच्च हृदयात्प्राणः समग्रे शरीरे धावति अतः हृदयमेव तस्य नादस्योत्पत्तिस्थानम्। अस्यानाहतनादस्याभिव्यक्तिस्थानं बीजद्वयम्– सृष्टिबीजं 'सः' इति, संहारबीजं च 'हम्' इति। इदं बीजद्वयमाधृत्य नादस्याभिव्यक्तिर्भवति। 'हम्' इति परमपुरुषस्य 'सः' इति परमप्रकृतेश्च वाचकः। उभयोर्यामलस्वरूपं 'हंसः' इति। इदमेवास्य ध्वनिरूपेण प्रथमः परिणामः। अयं नित्यतया निखिलेष्वपि ब्रह्माण्डादिषु प्रवहमान आस्ते। प्राणिनां देहेष्वप्ययं नादो 'हंसः' 'हंसः' इति स्वाभाविकतया उच्चरन्नास्ते।

साहित्यम्

नादतत्त्वस्य वाग्रूपेण वर्णनं सर्वप्रथमतया सर्वप्राचीनतया वा ऋग्वेदे प्राप्यते। तत्र वाक्सूक्ते वाक् सर्वकार्यस्य कर्त्रीरूपा कथिता। सर्वेषु देवेष्वन्तः शक्तिरूपेण वर्त्तमाना सा भरणधारणादिकं कर्म करोति। तदाह–

अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमाश्वनोभा। .....अहं दधामि द्रविणं हविष्मते .....अहमेव स्वयमिदं वदामि .....यं कामये तं तमुग्रं करोमि .....। (ऋ.वे. १०।१२५।३) अथर्ववेदेऽप्ययं मन्त्रो लभ्यते। अस्मिन्नेव वेदेऽनेकेषु मन्त्रेषु वाचो वर्णनं क्रियते ऋषिभिः। तद्यथा–

'वाग्वै देवेभ्योऽपाक्रामत् यज्ञायातिष्ठमाना। सा वनस्पतीः प्राविशत्। सैषा वाग् वनस्पतिषु वदति दुन्दुभौ या तूणवे वीणायाम्।' (अथ. ६।१।४।१)। तथा– 'वाग्वै पराच्यव्याकृताऽवदत्। ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुरु.....।' (अथ. ६।४।७।५)। मैत्रायणीसंहितायामपि–

'द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।' (६।२२)

एतेनेदमायातं यद् यत्तत्त्वं वाग्रूपेण वर्णितं तन्नाद एव।
उपनिषत्स्वपि नादतत्त्वस्य चर्चा समायाति। नादबिन्दूपनिषद्युक्तम्–

'ब्रह्मप्रणवसंलग्ननादो ज्योतिर्मयात्मकः।
मनस्तत्र लयं याति तद्विष्णोः परमं पदम्।।' (ना.वि. ४६)

एष नादो निरतिशयः। अयमेव शब्दब्रह्म, प्रणवनादः, ब्रह्मनादः, परावाक् इत्यादि नानानामभिरभिधीयते। ब्रह्मबिन्दूपनिषद्यपि शब्दब्रह्मणश्चर्चाऽऽयाति–

द्वे विद्ये वेदितव्ये शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।। इति।

शब्दब्रह्मैव नादतत्त्वमिति पूर्वमेवोक्तम्। इदमेव विष्णोः परमं पदं यत्सूरयः सदा पश्यन्तो विराजन्ते। अवरकोटिकाः सर्वेऽपि नादाः ये आभ्यन्तरीणा बाह्या वा सन्ति ते सर्वे अस्मिन्नेव निरञ्जने नादे उत्पद्यन्ते विलीयन्ते च। एष नादो यद्यपि नित्यनिरञ्जनः सर्वव्यापी योगिजनानुभवगम्योऽस्ति तथापि तत्तदुपाधिभिरुपहितोऽसौ तत्तद्रूपतां व्रजति। अतएव ध्वनिरुत्पद्यते, नादस्तिरोहितो भवति, इत्यादि व्यवहारा लोके प्रचलिता दृश्यन्ते। यथोक्तं योगचूडामण्युपनिषदि–

गगनं पवने प्राप्ते ध्वनिरुत्पद्यते महान्।
घण्टादीनां प्रवाद्यानां नादसिद्धिरुदीरिता।। (यो.चू. ११५)

नादविन्दूपनिषदाह–

'अभ्यस्यमानो नादोऽयं बाह्यमावृणुते ध्वनिम्।
पक्षाद् विपक्षमखिलं जित्वा तुर्यपदं व्रजेत्।।
श्रूयते प्रथमाभ्यासे नादो नानाविधो महान्।
वर्धमाने तथाभ्यासे श्रूयते सूक्ष्मसूक्ष्मतः।।
आदौ जलधिजीमूतभेरीनिर्झरसम्भवः।
मध्ये मर्दलशब्दाभो घण्टाकाहलजस्तथा।।
अन्ते तु किङ्किणीवंशवीणाभ्रमरनिःस्वनः।
इति नानाविधा नादाः श्रूयन्ते सूक्ष्मसूक्ष्मतः।।' (३२-३५)

साधको यदा बाह्यं नादं विस्मृत्यान्तर्नादे समाहितो भवति तदा तस्य मनो बाह्यविषयेभ्यो विरतं भूत्वा तस्मिन् सुनादगन्धे भृङ्गवन्मकरन्दं पिबन्नास्ते। यत्रकुत्रापि नादे साधकस्य मनः स्थिरं भवति तत्र स्थिरीभूय तदूर्ध्वं सूक्ष्मतरं नादमनुसन्दध्याद्योगीति सिद्धान्तः। अयं नादो निशिताङ्कुश इव विषयकान्तारचारिमत्तमनोवारणस्य वारकः। अस्यामवस्थायां योगी मृतवदवतिष्ठते। स शीतोष्णसुखदुःखमानावमानादुत्तीर्णो भवति। एवंप्रकारेणाभ्यस्यन् योगी शाम्भवीमुद्रामापन्नो जाग्रतस्वप्नसुषुप्त्यवस्थात्रयविनिर्मुक्तः तुरीयामवस्थां भजते। यथोक्तं नादबिन्दूपनिषदि–

'अवस्थात्रयमन्वेति न चित्तं योगिनस्तदा।
जाग्रन्निद्राविनिर्मुक्तः स्वरूपावस्थतामियात्।।' इति।

'दृष्टिः स्थिरा यस्य विना सदृश्यं
वायुः स्थिरो यस्य विना प्रयत्नम्।
चित्तं स्थिरं यस्य विनावलम्बं
स ब्रह्मतारान्तरनादरूपः।।' इति च।

महाभारतेऽपि–

वेदाः प्रमाणं लोकानां न वेदाः पृष्ठतः कृताः।
द्वे ब्रह्मणी वेदितव्ये शब्द ब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।। (म.भा.शा.प. २७०)

अत्र शब्दब्रह्मेति ओंकारः। ओंकार एव च नादतत्त्वम्। सूतसंहितायां च शब्दब्रह्मणो निरूपणं यथा–

परः परतरं ब्रह्म ज्ञानानन्दादिलक्षणम्।
प्रकर्षेण नवं यस्मात् परं ब्रह्म स्वाभावतः।।
अपरः प्रणवः साक्षाच्छन्दरूपः सुनिर्मलः।
प्रकर्षेण नवत्वस्य हेतुत्वात् प्रणवः स्मृतः।।

प्रणवो द्विविधः, परोऽपरश्चेति। परो ब्रह्मात्मकः, अपरः शब्दात्मकः। अयमेव नाद इति कथ्यते। वैय्याकरणमतमनुसृत्य नादसम्बन्धे किञ्चिदुच्यते। योगी भर्तृहरिः वाक्यपदीये शब्दब्रह्मणश्चर्चां करोति–

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः।। (१।१)

नादरूपादस्माद्ब्रह्मणो जगद् विवर्त्तमानं भवति। शान्तब्रह्मणो स्पन्दनमेव शब्दब्रह्म।

नादैराहितबीजायामन्त्येन ध्वनिना सह। (वा.प. १।८३)

इति कारिकायां नादशब्देनानित्या ध्वनयः सङ्केत्यन्ते। बीजशब्देन संस्कारो भावना वा कथ्यते। एतेषां सर्वेषां पृष्ठभूमौ परनादः शब्दब्रह्म वा तिष्ठति यो हि अन्यैर्वैयाकरणैः स्फोटशब्देन वाच्यतां नीयते। भर्तृहरिणाऽपि स्फोटशब्दस्य प्रयोगः कृतः–

'स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः।' इति। (वा.प. १।७४)

हेलाराजः परां वाचं शब्दब्रह्मेति कथयति–

'संविच्च पश्यन्तीरूपा भिद्यते। परावाक् शब्दब्रह्ममयी इति ब्रह्मतत्त्वं शब्दात् पारमार्थिकान्न भिद्यते।' (द्रव्यसमुद्देश ११ टी.)

कौण्डभट्टेन वैय्याकरणभूषणसारे नागेशभट्टेन च वैय्याकरणमञ्जूषायां वारं वारं स्फोटशब्दः प्रयुक्तः–

'वाक्यस्फोटोतिनिष्कर्षे तिष्ठतीति मतस्थितिः' इत्यादि। (वै.भू.सा. ६१)

'स चायं स्फोट आन्तरप्रणवरूप एव। तत्राप्यवयवद्वारा प्रणवोपलक्षणत्वम्।' (वै.सि.ल.मं. स्फोटप्रकरणम्)

इत्थमिदं निश्चीयते यद् वैय्याकरणैरपि नादतत्त्वस्य स्फोटरूपेण यत्र तत्र चर्चा कृता। नादतत्त्वमेव अखण्डस्फोटः, शब्दब्रह्म, अनाहतनाद इत्यादि नानाशब्दैरभिव्यज्यते।

नाथसम्प्रदाये नादतत्त्वस्याधिकं महत्त्वं वर्त्तते। अयं सम्प्रदायो भगवता शिवेन प्रवर्त्तितः अतएव भगवान् शिवः 'आदिनाथः' इति नाम्नालङ्कृतः। नाथसम्प्रदाये नवनाथानां चर्चायाति। तत्र मच्छन्दनाथो मत्स्येन्द्रनाथ इति वा प्रथम आचार्य उद्दिष्टः। उक्ता नवनाथा पाशुपतदर्शनस्यानुयायिन आसन्। श्री गोरक्षनाथोऽत्र प्रसिद्धतम आचार्यः। मत्स्येन्द्रनाथस्य शिष्यभूतोऽयं स्वपूर्वप्रचलितं नाथसम्प्रदायं सुव्यवस्थितं सुसङ्घटितं च कृत्वा अपूर्वां साधनपद्धतिं प्रवर्त्तयामास। ८०० ईस्वीतः १७०० ईस्वीपर्यन्तं नाथसम्प्रदायस्य प्रचारो बृहद्रूपेणासीत्। एतन्मते प्राणायाम-साधना-ओंकारसाधना चेति साधनाद्वयी मुख्यतमा मता। ओंकारस्था अ उ म् इति त्रयो वर्णाः त्रयाणां कालानां त्रयाणां वेदानां त्रयाणां लोकानां त्रयाणामग्नीनां त्रयाणां देवानां तिरॄणां पारमेश्वरीशक्तीनां च वाचकाः सन्ति-इति शास्त्रमर्मज्ञाः कथयन्ति। ओंकारसाधनमेव नादानुसन्धानमिति कथ्यते। अकारो वह्निदेशे ब्रह्मग्रन्थ्यभिधे नाभिस्थले, उकारो विष्णुग्रन्थौ हृद्देशे मकारश्च रुद्रग्रन्थौ भ्रुवोर्मध्ये तिष्ठति। ओंकारस्य अउम् इति कृत्रिमो वर्णविभागो नामस्मरणादोङ्कारस्मरणाद्वा यदा विगलितो भवति तदाऽखण्डनादः साधकस्यानुभवपथमायाति। नामस्मरणमेव मन्त्रयोग-मन्त्रसाधना-नादसाधना-इत्यदि नानानामभिर्व्यवह्रियते। इदं नादानुसन्धानमद्वैतशब्दब्रह्मानुसन्धानम्। नादतत्त्वमाश्रित्य परब्रह्मतत्त्वस्य साक्षात्कारो भवति। अयमेवात्मसाक्षात्कारः परमपुरुषार्थलाभो मोक्षावाप्तिर्वेति कथ्यते।

तान्त्रिकवाङ्मये नादतत्त्वस्य वर्णनमनेकेषु ग्रन्थेषूपलभ्यते। ईश्वरप्रत्यभिज्ञायामुक्तमुत्पलदेवेन–

मूर्त्तिवैचित्र्यतो देशक्रममाभासयत्यसौ।
क्रियावैचित्र्यनिर्भासात् कालक्रममपीश्वरः।। (२।१।५)

परमेश्वरः स्वेच्छया स्वाव्यतिरिक्तमपि व्यतिरिक्तमिव जगदाभासयति। तत्र कालक्रमाभासने नादस्याविर्भावः। स्वच्छन्दतन्त्रे च–'अत्रारूढस्तु कुरुते शिवः परमकारणम्।' (१०।१२५८)

इत्युक्तम्। अस्यायमर्थः– परमेश्वरो व्यपिनीशक्तिसदाशिवादिभावाभावात्मकस्वशक्तिभित्तिभूतसमनाशक्तिमवलम्ब्य जगदाभासयति। अर्थाज्जगदाभासने शक्तिव्यापिनीसमनेति त्रीणि कारणानि सन्ति। समनातः शून्यस्योत्पत्तिः। तदनन्तरमन्यानि तत्त्वानि समुद्भवन्ति। तदेवाह–

'तस्माच्छून्यं समुत्पन्नं शून्यात् स्पर्शसमुद्भवः।
तस्मान्नादः समुत्पन्नः ....।।' (स्व.तं. ११।५)

एकैव पारमेश्वरीच्छाशक्तिः परसूक्ष्मस्थूलरूपतया समनाव्यापिनीशक्तिः-इति नामभिर्व्यवह्रियते। शक्तेः स्पर्शाच्छून्यरूपवाच्यवाचकोभयात्मकस्य जगतो मध्यात् प्रथमं वाच्यवाचकाविभागमयो नादः प्रस्फुटितो भवति। ध्वनिप्रभेदतः स घोषरावाद्यष्टधा रूपं गृह्णाति। नवमस्तु प्रकारो 'महाशब्दः' इति। अयं सर्वेषां व्यापको मतः। अयं

नादः स्थावरादिदेवयोन्यन्तेषु सर्वेषु प्राणिषु स्थितः सन्नजस्रं नदन्नास्ते। कालोत्तरतन्त्रानुसारेणायं सृष्टेर्बीजम्। तदाह–**'नादाख्यं यत् परं बीजं सर्वभूतेष्ववस्थितम्।'** इति।

स एव नादो ज्ञानक्रियारूपसदाशिवभट्टारकरूपेणाभिव्यज्यते। परमेश्वरो यदाऽन्तःकृतज्ञानशक्तिप्रधानस्तदा 'नादः' इति, यदा च क्रियाशक्तिरूपः प्रकाशस्तदा बिन्दुरिति कथ्यते। अस्माद् बिन्दोः सदाशिवस्योत्पत्तिः। यथोक्तम्–

'बिन्दोः सदाशिवो ज्ञेयः।' इति (स्व.तं. ११।१०)

सदाशिवात् ईश्वरशुद्धविद्यादिक्रमेण पृथिव्यन्ता जगत उत्पत्तिः।

आकाश एकः सन्नपि उपाधिभेदेन त्रिधा। भूताकाशः, चित्ताकाशश्चिदाकाशश्चेति। चक्षुषि निमीलिते सति यो घनान्धकारो दृश्यते तद् भूताकाशस्य रूपम्। अत्र भेद एव स्फुरति। अस्य भूताकाशस्य दर्शनं चक्षुरिन्द्रियेण भवति। चित्ताकाशस्य दर्शनं हृदये भवति। अयमाकाशो भेदाभेदमयः। यदा भूताकाशादन्धकारमयमावरणं किञ्चित्कालायापसृतं भवति तदा हृदये चित्ताकाशस्य दर्शनमाभ्यन्तरचक्षुषा भवति। चिदाकाशस्य स्थानं सहस्रारम्। भूतशुद्धेः प्रभावाच्चित्ताकाशे चित्तशुद्धेश्च प्रभावाच्चिदाकाशे साधकस्य स्थितिर्भवति। चिदाकाश एव विष्णोः परमं पदं यत् सूरयः सदा पश्यन्ति। नादतत्त्वं त्रिष्वप्याकाशेषु नदति। किं वा चिदाकाशः स्वयमेव नादरूपः। परमात्मनः स्वातन्त्र्यशक्तिः स्वात्मविमर्शकाले दर्पणतुल्ये चिदाकाशे भावराशिमभिव्यनक्ति। भावराशेः स्फुटीभाव एव परनादः। अयं परावागिति नाम्ना प्रसिद्ध इति पूर्वमेवोक्तम्। अत्र शब्दार्थौ अस्फुटरूपेणाभेदेन च तिष्ठतः। अस्याधिष्ठानं सुषुम्णानाडी। कुण्डलिनीशक्तिर्यदा प्रबुद्धा सती मूलाधारादूर्ध्वं व्रजति तदा मनसा सह प्राणवायोरूर्ध्वसञ्चारो भवति। अनेन सञ्चारेण सह कुण्डलिनीनामको बिन्दुरपि नादस्य रूपं दधाति।

नादो द्विधा– एकोऽनित्यो भौतिको नादः द्वितीयश्च नित्योऽनाहतनादः। केनचिदाघातेन कण्ठादिभ्य उत्थितो नादः शब्दवज्ज्ञानवद्वा तृतीयक्षणध्वसंप्रतियोगी। अतएवासौ आनत्यः। अयं मृदुकटुमन्दमध्यतीव्रादिभेदेन नानारूपः सन् सखण्डो भवति। तत्तद्देशकालावच्छिन्नोऽयं क्वाचित्कः कादाचित्कश्च भवति। अपरो यो नित्योऽनाहतो नादः स स्वयमुच्चरते। 'नास्योच्चारयिता कश्चित् प्रतिहन्ता न विद्यते।' इति पूर्वमेवोक्तम्। अत्रेदमवधेयम् नादरूपस्य प्राणस्य गतिर्द्विधा– स्वाभाविकी यत्नजा च। तत्र प्राणस्य नादस्य वा यत् स्पन्दनं किञ्चिच्चलनं तस्माद्धेतोः स्वाभाविकरूपेण वर्णानामुदयः। अत्र कस्यचिदपि यत्नस्यापेक्षा न भवति। स्वप्रकाशो नित्यश्चायं नादः सरलतया ऋजुगत्या वा परिस्फुटति। अत्र परापररूपेण सूक्ष्मं तारतम्यम्। तत्र परनादोऽविभक्तः एकरूपो नित्योऽनाहतश्चास्ति। यथोक्तं तन्त्रालोके–

'एको नादात्मको वर्णः सर्ववर्णाविभागवान्।
सोऽनस्तमितरूपत्वादनाहत इवोदितः।।' (६।२१७)

ब्रह्मप्रणवसंलग्नोऽयं नादो ज्योतीरूपः। अयमेव परावाक्पदवाच्य इत्यसकृदुक्तम्। शैवशास्त्रेऽयं पूर्णाहन्तेति कथ्यते। अयं नादो यद्यपि नित्यस्तथापि पारमेश्वरलीलयाऽस्योदयोऽपि भवति। एतद्विषये– 'प्राक् संवित् प्राणे

परिणता।' इति वचनं प्रमाणम्। एवञ्चेदमायाति यत् परावस्थायामस्योदय एव भवति न चास्तमिता। अन्येषां यत्नजानां नादानामुदयास्तावुभावपि घटतः।

नादोऽयं प्राणमाश्रित्योत्पद्यते। केषाञ्चिन्मते प्राणस्य परिमाणं षट्त्रिंशदङ्गुलम्। प्राणसञ्चारश्च बाह्याहोरात्राधीनः। दिवा प्राणस्य सञ्चारः अष्टशतोत्तरदशसहस्रसंख्याकः (१०८००) भवति। रात्रावपि सञ्चारसंख्या एतावत्येव। इत्थमेकस्मिन्नहोरात्रे प्राणस्य षट्शतोत्तरैकविंशतिसहस्रसंख्याकः सञ्चारो भवति। इयं मनुष्याणां स्वाभाविकी निःश्वासप्रश्वाससंख्या। संहारबीजेन हकारेण बहिर्गमनं प्राणस्य, सृष्टिबीजेन च सकारेणाभ्यन्तरागमनमिति 'हं सः' इति मन्त्रोऽजपा गायत्रीति कथ्यते। प्रातरुत्थायास्या परमेश्वरार्पणसङ्कल्पमात्रेण जीवो मुक्तो भवतीति शास्त्रतात्पर्यविदां ऋषीणां मतम्।

विमर्शप्रक्रिया–

जैसे मांस का लोभी मत्स्य लोहे के बने शंकु (कील) को नहीं देख पाता है वैसे ही सुख पाने के लोभ में पड़ा हुआ जीव मृत्यु को नहीं देख पाता ॥ ६७ ॥

हिताहितं ना जानन्तो नित्यमुन्मार्गगामिनः ।
कुक्षिपूरणनिष्ठा ये तेऽबुधा नारकाः प्रिये ॥ ६८ ॥

हे प्रिये ! हित एवं अहित को न जानकर पेट भरने में ही जो अज्ञानी लोग लगे रहते हैं वे नित्य ही उलटे मार्ग पर जाने वाले नरक को नहीं जानते हैं ।

विमर्श—अपना हिताहित न जानने वाले जो मूर्ख उदरपूर्त्यर्थ नित्य ही बुरे रास्ते का अनुसरण करते हैं निश्चय ही वे नरकगामी हैं ॥ ६८ ॥

निद्रादिमैथुनाहाराः सर्वेषां प्राणिनां समाः ।
ज्ञानवान् मानवः प्रोक्तो ज्ञानहीनः पशुः प्रिये ॥ ६९ ॥

निद्रा, मैथुन और भोजन सभी प्राणियों में समान रूप से होते हैं । किन्तु जो ज्ञानी है, वही 'मानव' कहा जाता है । हे प्रिये ! ज्ञान से हीन मानव 'पशु' है ॥ ६९ ॥

प्रभाते मलमूत्राभ्यां क्षुत्तृड्भ्यां मध्यगे रवौ ।
रात्रौ मदननिद्राभ्यां बाध्यन्ते मानवाः प्रिये ॥ ७० ॥

हे प्रिये ! प्रात:काल मल मूत्र से, मध्याह्न में भूख प्यास से और रात्रि में वासना एवं निद्रा से मनुष्य पीड़ित रहते हैं ॥ ७० ॥

स्वदेहधर्मदारादिनिरताः सर्वजन्तवः ।
जायन्ते च म्रियन्ते च हा हन्ताज्ञानमोहिताः ॥ ७१ ॥

हाय ! यह अत्यन्त खेद की बात है कि अपने शरीर, धर्म और स्त्री आदि में आसक्त रहने वाले सभी जीव अज्ञान से मोहित होकर जन्म लेते रहते हैं और मरते रहते हैं ॥ ७१ ॥

स्वस्ववर्णाश्रमाचारनिरताः सर्वमानवाः ।
न जानन्ति परं तत्त्वं मूढा नश्यन्ति पार्वति ॥ ७२ ॥

हे पार्वति ! अपने अपने वर्ण और आश्रम के आचार में पड़े हुए सभी मूर्ख मानव परम तत्त्व को नहीं जानते अतः नष्ट हो जाते हैं ॥ ७२ ॥

क्रियायासपराः केचित् क्रतुचर्यादि संयुताः।
अज्ञानसंयुतात्मानः सञ्चरन्ति प्रतारकाः॥ ७३ ॥

कुछ लोग कर्मनिष्ठ होते हैं, तो कुछ यज्ञ-पूजादि करते हैं। इस प्रकार के अज्ञान में पड़े हुए लोग दूसरों को धोखा देते रहते हैं॥ ७३ ॥

नाममात्रेण सन्तुष्टाः कर्मकाण्डरता नराः।
मन्त्रोच्चारणहोमाद्यैर्भ्रामिताः क्रतुविस्तरैः॥ ७४ ॥
एकभक्तोपवासाद्यैर्नियमैः कायशोषणैः।
मूढाः परोक्षमिच्छन्ति तव मायाविमोहिताः॥ ७५ ॥

कर्मकाण्ड में निरत विशाल यज्ञों में मन्त्रोच्चारण द्वारा किये गये होम से नाम मात्र संतुष्ट, एक बार भोजन अथवा उपवास आदि नियमों से शरीर को सुखाकर आपकी माया से विमोहित हुए मूर्ख जन परोक्ष परब्रह्म को पाने की इच्छा करते हैं।

विमर्श—कर्मकाण्ड में लगे हुए मनुष्य नाम मात्र से सन्तुष्ट होकर मन्त्र जप, होमादि विस्तृत यज्ञों में भ्रमित रहते हैं और एक समय भोजन एवं उपवास आदि के नियमों से शरीर को सुखाकर मूर्ख लोग मायावश मोक्ष पाने की आशा करते हैं॥ ७४-७५ ॥

देहदण्डनमात्रेण का मुक्तिरविवेकिनाम्।
वल्मीकताडनाद्देवि मृतः किन्नु महोरगः॥ ७६ ॥

विवेक ज्ञान के बिना शारीरिक कष्टादि द्वारा मुक्ति नहीं—हे देवि! जिस प्रकार वल्मीक के ताडन मात्र से महान् सर्प नहीं मरता है? उसी प्रकार शरीर को कष्ट देने मात्रसे अविवेकी (अज्ञानी) लोगों को मुक्ति नहीं प्राप्त होती?

धनाहारार्जने युक्ता दाम्भिका वेषधारिणः।
भ्रमन्ति ज्ञानिवल्लोके भ्रामयन्ति जनानपि॥ ७७ ॥

दम्भ करने वाले लोग, धन और भोजन कमाने के लिए अनेक प्रकार का वेश धारण कर अपने को ज्ञानी मान कर संसार में घूमते रहते हैं तथा लोगों को भ्रम में डालते हैं॥ ७७ ॥

सांसारिकसुखासक्तं ब्रह्मज्ञोऽस्मीति वादिनम्।
कर्मब्रह्मोभयभ्रष्टं तं त्यजेदन्त्यजं यथा॥ ७८ ॥

इस प्रकार संसार के सुख में आसक्त, किन्तु 'मैं ब्रह्म हूँ' यह कहने वाले व्यक्ति कर्म और ब्रह्म दोनों से भ्रष्ट होते हैं। अतः अन्त्यज के समान उनका सर्वथा त्याग करना चाहिए॥ ७८ ॥

गृहारण्यसमा लोके गतव्रीडा दिगम्बराः ।
चरन्ति गर्दभाद्याश्च योगिनस्ते भवन्ति किम् ॥ ७९ ॥

अकेले कर्मकाण्ड का दोष—जिनके लिए घर एवं वन एक समान है ऐसे लज्जा शून्य नङ्गे होकर घूमने वाले गर्दभादि पशु क्या योगी होते हैं ? अर्थात् निर्लज्ज नङ्गे रह कर घूमने मात्र से कोई योगी नहीं होता ॥ ७९ ॥

मृद्भस्मप्रक्षणाद् देवि मुक्ताः स्युर्यदि मानवाः ।
मृद्भस्मवासिनो ग्राम्याः किं ते मुक्ता भवन्ति हि ॥ ८० ॥

हे देवि ! मिट्टी और भस्म लगाने से यदि मुक्ति मिलती है, तो क्या गाँव की मिट्टी में तथा राख में रहने वाले ग्रामजन क्या मुक्त होते हैं ?

तृणपर्णोदकाहाराः सततं वनवासिनः ।
हिरणादिमृगा देवि योगिनस्ते भवन्ति किम् ॥ ८१ ॥

हे प्रिये ! हरिण आदि पशु घास पत्ते और जल का आहार करते हैं तथा सदैव वन में रहते हैं, तो क्या वे योगी हैं ? ॥ ८१ ॥

आजन्ममरणान्तञ्च गङ्गादितटिनीस्थिताः ।
मण्डूकमत्स्यप्रमुखा व्रतिनस्ते भवन्ति किम् ॥ ८२ ॥

मेढ़क, मछली आदि जन्म से मृत्यु तक गङ्गा आदि नदियों में रहते हैं, तो क्या वे व्रत करने वाले हैं ? ॥ ८२ ॥

वदन्ति हृदयानन्दं पठन्ति शुकसारिकाः ।
जनानां पुरतो देवि विबुधाः किं भवन्ति हि ॥ ८३ ॥

हे देवि ! तोते और मैना लोगों के सामने आनन्दपूर्वक राम राम का पाठ करते हैं, तो क्या वे इस शब्दोच्चारण मात्र से विद्वान् समझे जाते हैं ?

पारावताः शिलाहाराः परमेश्वरि चातकाः ।
न पिबन्ति महीतोयं योगिनस्ते भवन्ति किम् ॥ ८४ ॥

हे परमेश्वरि ! कबूतर कंकड़ों का आहार करते हैं और चातक पक्षी पृथ्वी पर पड़ा हुआ जल नहीं पीते, तो क्या वे योगी हो जाते हैं ? ॥ ८४ ॥

शीतवातातपसहा भक्ष्याभक्ष्यसमाः प्रिये ।
तिष्ठन्ति शूकराद्याश्च योगिनस्ते भवन्ति किम् ॥ ८५ ॥

हे प्रिये ! सूअर आदि पशु जाड़े, गर्मी, धूप को सहन करते हैं, भक्ष्य-अभक्ष्य जिनके लिए समान है, तो क्या वे योगी बन जाते हैं ? ॥ ८५ ॥

तस्मादित्यादिकं कर्म लोकवञ्चनकारकम् ।
मोक्षस्य कारणं साक्षात्तत्त्वज्ञानं कुलेश्वरि ॥ ८६ ॥

तत्त्वज्ञान ही मोक्ष का कारण—इस प्रकार उक्त कर्म लोगों को भ्रम में डालने वाले हैं । हे कुलेश्वरि! मोक्ष का कारण तो साक्षात् तत्त्वज्ञान है ॥८६॥

षड्दर्शनमहाकूपे पतिताः पशवः प्रिये ।
परमार्थं न जानन्ति पशुपाशानियन्त्रिताः ॥ ८७ ॥

परमार्थ ज्ञान के विना शास्त्रादि पाठ से मुक्ति नहीं—हे प्रिये ! षड्दर्शन रूपी गहरे कुएँ में पड़े हुए लोग पशु । पशु-पाशों में बँधे हुये वे परमार्थ को नहीं जानते ॥ ८७ ॥

वेदशास्त्रार्णवे घोरे ताड्यमाना इतस्ततः ।
कालोर्मिग्राहग्रस्ताश्च तिष्ठन्ति हि कुतार्किकाः ॥ ८८ ॥

इस वेद शास्त्र रूपी घोर सागर में इधर उधर टक्कर खाते हुए काल रूपी ग्राह से ग्रस्त कुतार्किक निवास करते हैं । डूबते उतराते हुये वे लोग कुतर्क रूपी भयंकर लहरों और मगर घड़ियालों के मध्य फँसे रहते हैं ॥ ८८॥

वेदागमपुराणज्ञः परमार्थं न वेत्ति यः ।
विडम्बकस्य तस्यापि तत् सर्वं काकभाषितम् ॥ ८९ ॥

वेद, आगम और पुराणों को जानने वाला जो व्यक्ति परमार्थ को नहीं जानता, उस दाम्भिक का सारा कथन कौए के काँव-काँव के समान निरर्थक होता है ॥ ८९ ॥

इदं ज्ञानमिदं ज्ञेयमिति चिन्तासमाकुलाः ।
पठन्त्यहर्निशं देवि परतत्त्वपराङ्मुखः ॥ ९० ॥

हे देवि ! परतत्त्व से दूर रहकर लोग रात-दिन 'यह ज्ञान है यह ज्ञेय है' यही पढ़ते हैं और इसी बात के विचार में व्याकुल रहते हैं ॥ ९० ॥

वाक्यच्छन्दोनिबन्धेन काव्यालङ्कारशोभिना ।
चिन्तया दुःखिता मूढास्तिष्ठन्ति व्याकुलेन्द्रियाः ॥ ९१॥

मूर्ख लोग वाक्य, छन्द, निबन्ध, काव्य और अलङ्कार में किस प्रकार शोभा हो इसी चिन्ता से दुःखी हो व्याकुल रहते हैं ॥ ९१ ॥

अन्यथा परमं तत्त्वं जनाः क्लिश्यन्ति चान्यथा ।
अन्यथा शास्त्रसद्भावो व्याख्यां कुर्वन्ति चान्यथा ॥ ९२ ॥

परम तत्त्व कुछ और है किन्तु लोग व्यर्थ की बातों से क्लेश पाते हैं । शास्त्र का सद्भाव कुछ और है किन्तु लोग उसकी भिन्न व्याख्या करते हैं ॥ ९२ ॥

कथयन्त्युन्मनीभावं स्वयं नानुभवन्ति हि ।
अहङ्कारहताः केचिदुपदेशविवर्जिताः ॥ ९३ ॥
पठन्ति वेदशास्त्राणि विवदन्ति परस्परम् ।
न जानन्ति परं तत्त्वं दर्वी पाकरसं यथा ॥ ९४ ॥

उन्मनी भाव की चर्चा तो करते हैं किन्तु स्वयं उस भाव को अनुभव नहीं करते । कुछ लोग अहङ्कार से मारे जाते हैं किन्तु उपदेश सुनना नहीं चाहते। वेद शास्त्र अवश्य पढ़त हैं किन्तु परस्पर विवाद में फँस रहते हैं । परम तत्त्व को वे उसी प्रकार नहीं जानते जिस प्रकार कलछुल दाल के स्वाद को नहीं जानती ॥ ९३-९४ ॥

शिरो वहति पुष्पाणि गन्धं जानाति नासिका ।
पठन्ति वेदशास्त्राणि दुर्लभो भाववेदकः ॥ ९५ ॥

आत्मस्थ तत्त्व—जैसे शिर पुष्प का वहन तो करता है किन्तु गन्ध तो नासिका ही प्राप्त करती है, वैसे ही वेद एवं शास्त्रों को लोग पढ़ते हैं किन्तु उनके भाव को समझने वाले दुर्लभ हैं ॥ ९५ ॥

तत्त्वमात्मस्थमज्ञात्त्वा मूढः शास्त्रेषु मुह्यति ।
गोपः कक्षगतं छागं कूपे पश्यति दुर्मतिः ॥ ९६ ॥

आत्मस्थ तत्त्व को न जानकर मूढ़ लोग शास्त्रों में मोहित रहते हैं, जैसे ग्वाले के बगल में ही छाग विद्यमान हैं किन्तु उसे वह मूर्ख कूएँ में ढूँढ़ता है ॥ ९६ ॥

संसार मोहनाशाय शाब्दबोधो न हि क्षमः ।
न निवर्त्तेत तिमिरं कदाचिद्दीपवार्त्तया ॥ ९७ ॥

संसार का मोह शब्दज्ञान से वैसे ही नष्ट नहीं होता है, जैसे दीपक की बात करने मात्र से अँधेरा दूर नहीं होता ॥ ९७ ॥

प्रज्ञाहीनस्य पठनम् अन्धस्यादर्शदर्शनम् ।
देवि प्रज्ञावतः शास्त्रं तत्त्वज्ञानस्य कारणम् ॥ ९८ ॥

प्रज्ञा से हीन व्यक्ति का पढ़ना उसी प्रकार है, जैसे अन्धे को दर्पण में दिखाना । हे देवि ! प्रज्ञावान् को ही शास्त्र से ज्ञान मिलता है ॥ ९८ ॥

अग्रतः पृष्ठतः केचित् पार्श्वयोरपि केचन ।
तत्त्वमीदृक् तादृगिति विवदन्ति परस्परम् ।
सद्विद्यादानशूराद्यैर्गुणैर्विख्यातमानवाः ॥ ९९ ॥
प्रत्यक्षग्रहणं नास्ति वार्त्तया ग्रहणं कुतः ।
एवं ये शास्त्रसम्मूढास्ते दूरस्था न संशयः ॥ १०० ॥

विद्या, दान, शूरता आदि गुणों से प्रसिद्ध लोग आगे पीछे, अगल बगल यह विवाद करते रहते हैं कि 'कोई तत्त्व इस प्रकार का है, कोई उस प्रकार का है।' इत्यादि विवाद करते हैं किन्तु प्रत्यक्ष को ग्रहण नहीं करते, भला वार्ता करने से क्या प्राप्त होगा । इस प्रकार शास्त्र में जो मोहित हैं, वे 'तत्त्व' से निःसन्देह बहुत दूर रहते हैं ॥ ९९-१०० ॥

इदं ज्ञानमिदं ज्ञेयं सर्वतः श्रोतुमिच्छति ।
देवि वर्षसहस्रायुः शास्त्रान्तं नैव गच्छति ॥ १०१ ॥

'यह ज्ञान है, यह ज्ञेय है'—इस प्रकार सर्वत्र सुनना चाहते हैं । इस तरह हे देवि ! वे सहस्र वर्षों की आयु में भी शास्त्र का सार नहीं समझ पाते।

वेदाद्यनेकशास्त्राणि स्वल्पायुर्विघ्नकोटयः।
तस्मात् सारं विजानीयात् क्षीरं हंस इवाम्भसः॥ १०२ ॥

वेद आदि अनेक शास्त्र हैं और आयु स्वल्प है और असंख्य विघ्न हैं । अतः सार तत्व को जानना चाहिए जैसे हंस पानी में दूध को पहचान लेता है ॥ १०२ ॥

अभ्यस्य सर्वशास्त्राणि तत्त्वं ज्ञात्वा हि बुद्धिमान् ।
पलालमिव धान्यार्थी सर्वशास्त्रं परित्यजेत् ॥ १०३ ॥

सब शास्त्रों का अभ्यास कर तत्त्व को जानकर बुद्धिमान् व्यक्ति को सभी शास्त्रों को छोड़ देना चाहिये, जिस प्रकार चावल को चाहने वाला भूसी का त्याग कर देता है ॥ १०३ ॥

यथामृतेन तृप्तस्य नाहारेण प्रयोजनम् ।
तत्त्वज्ञस्य तथा देवि न शास्त्रेण प्रयोजनम् ॥ १०४ ॥

जो अमृत का पान कर तृप्त हो जाता है, वह भोजन की चिन्ता नहीं करता । हे देवि ! इसी प्रकार तत्त्व का ज्ञाता शास्त्रों से सम्बन्ध नहीं रखता ।

न वेदाध्ययनान्मुक्तिर्न शास्त्रपठनादपि ।
ज्ञानादेव हि मुक्तिः स्यान्नान्यथा वीरवन्दिते ॥ १०५ ॥

ज्ञान से ही मुक्ति—न तो वेदों के अध्ययन से मुक्ति मिलती है और न शास्त्रों के पढने से ही । ज्ञान ही से मुक्ति मिलती है । हे वीरवन्दिते ! अन्य से नहीं ।। १०५ ।।

नाश्रमाः कारणं मुक्तेर्दर्शनानि न कारणम् ।
तथैव सर्वशास्त्राणि ज्ञानमेव हि कारणम् ।। १०६ ।।

मुक्ति में न आश्रम (चार आश्रम) ही कारण हैं, न दर्शनों के मनन से ही मुक्ति प्राप्त होती है । उसी प्रकार समस्त शास्त्र भी मुक्ति में कारण नहीं केवल ज्ञान ही कारण है ।। १०६ ।।

मुक्तिदा गुरुवागेका विद्याः सर्वा विडम्बकाः ।
काष्ठभारश्रमादस्मादेकं सञ्जीवनं परम् ।। १०७ ।।

गुरुवाणी ही मुक्तिदायिनी—मुक्तिदायिनी एकमात्र गुरुवाणी है, शेष सभी विद्याएँ विडम्बनामात्र हैं । काठ के भार से श्रम प्राप्त करने की अपेक्षा एक संजीवन जड़ी का ढोना कहीं अच्छा है ।। १०७ ।।

अद्वैतन्तु शिवेनोक्तं क्रियायासविवर्जितम् ।
गुरुवक्त्रेण लभ्येत नान्यथागमकोटिभिः ।। १०८ ।।

अद्वैतवाद शिव जी ने कह है जिसमें किसी प्रकार क कर्म का आयास नहीं है । वह गुरुमुख से ही प्राप्त होता है, अन्य करोडों आगमों से नहीं प्राप्त होता ।। १०८ ।।

आगमोत्थं विवेकोत्थं द्विधा ज्ञानं प्रचक्षते ।
शब्दब्रह्मागममयं परं ब्रह्म विवेकजम् ।। १०९ ।।

ज्ञान के दो प्रकार—१. आगम, २. विवेक—ज्ञान दो प्रकार का बताया गया हैं—एक तो आगम से प्राप्त होता है और दूसरा विवेक से । आगम से प्राप्त ज्ञान शब्द ब्रह्मपरक होता है और विवेक से प्राप्त ज्ञान परब्रह्म का निदर्शक होता है ।। १०९ ।।

अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चापरे ।
मम तत्त्वं च जानन्ति द्वैताद्वैतविवर्जितम् ।। ११० ।।

कुछ लोग द्वैत को चाहते हैं तो कुछ अद्वैत को, किन्तु मेरे तत्त्व को वही जानते हैं जो द्वैत-अद्वैत से परे हैं ।। ११० ।।

द्वे पदे बन्धमोक्षाय ममेति निर्ममेति च ।
ममेति बाध्यते जन्तुर्न ममेति विमुच्यते ।। १११ ।।

यह मेरा है, यह मेरा नहीं है यही दो पद क्रमशः बन्धन और मोक्ष के कारण है। मेरा है—यही जीव को बांधता है। मेरा नहीं है—यह जीव को मुक्ति दिलाता है ॥ १११ ॥

तत् कर्म यन्न बन्धाय विद्या सा या विमुक्तये।
आयासायापरं कर्म विद्यान्या शिल्पनैपुणम् ॥ ११२ ॥

कर्म वही है जो बन्धनकारक न हो और वही विद्या है जो मुक्तिकारक हैं अर्थात् वही वास्तव में कर्म है, जो बन्धनकारक न हो और वही विद्या है, जो मुक्तिकारिणी हो। अन्य कर्म दुःख के कारण होते हैं और अन्य विद्याएँ मात्र शिल्प नैपुण्य है ॥ ११२ ॥

यावत् कामादि दीप्येत यावत् संसारवासना।
यावदिन्द्रियचापल्यं तावत्तत्त्वकथा कुतः ॥ ११३ ॥
यावत् प्रयत्नवेगोऽस्ति यावत् सङ्कल्पकल्पना।
यावन्न मनसः स्थैर्यं तावत्तत्त्वकथा कुतः ॥ ११४ ॥

इन्द्रियनिग्रह और गुरुकृपा बिना तत्त्वज्ञान के नहीं—जब तक कामना उत्तेजित रहती है, जब तक सांसारिक इच्छाएँ बनी रहती हैं, और जब तक इन्द्रियाँ चञ्चल हैं, तब तक तत्व की बात कहाँ ? जब तक प्रयत्न का वेग है, जब तक संकल्प की कल्पना बनी हुई है और जब तक मन में स्थिरता नहीं है, तब तक तत्व की बात कहाँ ? ॥ ११३-११४ ॥

यावद्देहाभिमानश्च ममता यावदस्ति हि।
यावन्न गुरुकारुण्यं तावत्तत्त्वकथा कुतः ॥ ११५ ॥
तावत्तपो व्रतं तीर्थं जपहोमार्च्चनादिकम्।
वेदशास्त्रागमकथा यावत्तत्त्वं न विन्दते ॥ ११६ ॥

जब तक देहाभिमान है, जब तक ममता बनी है और जब तक गुरु की दया प्राप्त नहीं है, तब तक तत्त्व की कथा कहाँ ? तप, व्रत, तीर्थ, जप, होम, अर्चन आदि तभी तक हैं और वेदशास्त्र आगम की चर्चा भी तभी तक है, जब तक तत्त्व की प्राप्ति नहीं होती ? ॥ ११५-११६ ॥

तस्मात् सर्वप्रयत्नेन सर्वावस्थासु सर्वदा।
तत्त्वनिष्ठो भवेद्देवि यदीच्छेन्मोक्षमात्मनः ॥ ११७ ॥

अतएव, हे देवि ! यदि आत्ममुक्ति की इच्छा हो तो सभी प्रयत्नों से सभी अवस्थाओं में सदैव तत्त्वनिष्ठ रहे ॥ ११७ ॥

धर्मज्ञानसुपुष्पस्य स्वर्गलोक फलस्य च ।
तापत्रयार्त्तिसन्तप्तश्छायां मोक्षतरोः श्रयेत् ॥ ११८ ॥

तापत्रय के कष्ट से पीड़ित व्यक्ति स्वधर्मज्ञानरूपी पुष्प और स्वकुलोक्त (अर्थात् अपने कुल धर्म में जो बातें प्रचलित हैं ऐसे) स्वर्ग के फल वाले मोक्षरूप कल्पवृक्ष की छाया का आश्रय ग्रहण करे ॥ ११८ ॥

बहुनात्र किंमुक्तेन रहस्यं शृणु पार्वति ।
कुलधर्ममृते मुक्तिर्नास्ति सत्यं न संशयः॥ ११९ ॥

हे पार्वति ! अधिक कहने से क्या लाभ ? रहस्य की बात सुनिए । कुलधर्म के सिवा मुक्ति नहीं है, यह सत्य है, इसमें सन्देह नहीं है ॥ ११९ ॥

तस्माद्वदामि तत्त्वन्ते विज्ञाय श्रीगुरोर्मुखात् ।
सुखेन मुच्यते देवि घोरसंसारबन्धनात् ॥ १२० ॥

अतएव मैं गुरुमुख से उस तत्त्व को जानकर आपसे कहता हूँ, जिससे हे देवि ! इस घोर संसार के बन्धन से जीव सहज ही मुक्त हो जाता है ॥ १२० ॥

इति ते कथिता काचिज्जीवजातिस्थितिः प्रिये ।
समासेन कुलेशानि किं भूयः श्रोतुमिच्छसि ॥ १२१ ॥

॥ इति श्रीकुलार्णवे निर्वाणमोक्षद्वारे महारहस्ये सर्वागमोत्तमोत्तमे सपादलक्षग्रन्थे पञ्चमखण्डे ऊर्ध्वाम्नायतन्त्रे जीवस्थितिकथनं नाम प्रथमोल्लासः ॥ १ ॥

हे प्रिये ! इस प्रकार मैंने आपसे जीवों के जन्म और उनकी स्थिति के विषय में संक्षेप से कहा है । अब हे कुलेशानि ! आप और क्या सुनना चाहती हैं ॥ १२१ ॥

॥ इस प्रकार श्रीकुलार्णवतन्त्र के ऊर्ध्वाम्नायतन्त्र में जीवस्थिति कथन नामक प्रथम उल्लास की पं० चित्तरञ्जन मालवीय कृत हिन्दी पूर्ण हुई ॥ १ ॥

अथ नवमोल्लासः

श्री देव्युवाच

कुलेश श्रोतुमिच्छामि योगं योगीशलक्षणम् ।
कुलभक्त्यार्चनफलं वद मे करुणानिधे ॥ १ ॥

योग एवं योगीशलक्षण और कौलपूजा—श्री देवी ने कहा—हे कुलेश! हे करुणानिधे ! योग और योगीश के लक्षण मैं सुनना चाहती हूँ तथा कुलभक्त की पूजा करने का फल मुझे बताइये ॥ १ ॥

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
तस्य श्रवणमात्रेण योगः साक्षात् प्रकाशते ॥ २ ॥

ईश्वर ने कहा—हे देवि ! सुनिए, जो आपने मुझसे पूछा है, उसे मैं कहूँगा। उसके सुनने मात्र से योग साक्षात् प्रकट होता है ॥ २ ॥

ध्यानन्तु द्विविधं प्रोक्तं स्थूलसूक्ष्मप्रभेदतः ।
साकारं स्थूलमित्याहुनिराकारन्तु सूक्ष्मकम् ॥ ३ ॥

ध्यान के दो भेद—ध्यान स्थूल और सूक्ष्म दो प्रकार का कहा गया है । साकार का ध्यान स्थूल है और निराकार का ध्यान सूक्ष्म कहा जाता है ॥ ३ ॥

स्थिरार्थमनसः केचित् स्थूलध्यानं प्रचक्षते ।
स्थूलेऽपि निश्चलं चेतो भवेत् सूक्ष्मेऽपि निश्चलम् ॥ ४ ॥

स्थूल ध्यान से बुद्धि निश्चित होती है और स्थूल ध्यान से मन स्थिर होता है तथा दोनों स्थूल एवं सूक्ष्म ध्यान से भी मन निश्चल होता है ॥ ४ ॥

करपादोदरास्यादिरहितं परमेश्वरम् ।
सर्वतेजोमयं ध्यायेत् सच्चिदानन्दनिष्कलम् ॥ ५ ॥

हाथ, पैर, पेटादि अङ्ग और अस्थि से रहित सर्वतेजोमय, सच्चिदानन्द निष्कल परमेश्वर का ध्यान करे ॥ ५ ॥

नोदेति नास्तमभ्येति न वृद्धिं याति न क्षयम् ।
स्वयं विभात्यथान्यानि भासयन् साधनं विना ॥ ६ ॥

न उसका उदय होता है, न अस्त । न बढ़ता है, न घटता है । वह स्वयं प्रकाश है और बिना साधन के अन्यों को प्रकाशित करता है ॥ ६ ॥

अनन्तं गतभारूपं सत्तामात्रमगोचरम् ।
मनसा मात्रसम्वेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥ ७ ॥

ब्रह्मज्ञान—सत्ता मात्र उस अदृश्य, अवस्था हीन जिस रूप का केवल मन से अनुभव होता है, उस ज्ञान को 'ब्रह्म' कहा गया है ॥ ७ ॥

प्रणष्टवायुसञ्चारः पाषाण इव निश्चलः ।
परजीवैकधामज्ञो योगी योगविदुच्यते ॥ ८ ॥

योगी का लक्षण—वायुसञ्चार को रोक कर, पत्थर के समान स्थिर हो, परम जीव के एक धाम को जानने वाला 'योगविद्' 'योगी' कहलाता है ॥ ८॥

यदत्र नात्र निर्भासः स्तिमितोदधिवत् स्थितम् ।
स्वरूपशून्यं तद्ध्यानं समाधिरभिधीयते ॥ ९ ॥

समाधि का लक्षण—जिस ध्यानावस्था में पदार्थ मात्र भासित हो, शान्त सागर के समान स्थिति हो और स्वरूप का अभाव हो जाय, वह 'समाधि' कही जाती है ॥ ९ ॥

न किञ्चिच्चिन्तनादेव स्वयं तत्त्वं प्रकाशते ।
स्वयं प्रकाशिते तत्त्वे तत्क्षणात्तन्मयो भवेत् ॥ १० ॥

जीवन्मुक्त का लक्षण—किसी भी चिन्तन से तत्त्व प्रकाशित नहीं होता, वह स्वयं ही प्रकाशित होता है । तत्त्व के स्वयं प्रकाशित होते ही तत्क्षण उसमें तन्मय हो जाय ॥ १० ॥

स्वप्नजाग्रदवस्थायां सुप्तवत् योऽवतिष्ठते ।
निश्वासोच्छ्वासहीनश्च निश्चितं मुक्त एव सः ॥ ११ ॥

स्वप्न और जाग्रत् अवस्थाओं में जो सोए हुए के समान व निःश्वास और श्वास से रहित रहता है, वह निश्चय ही 'मुक्त' है ॥ ११ ॥

निष्पन्दकरणग्रामः स्वात्मलीनमनोऽनिलः ।
य आस्ते मृतवत्साक्षात् जीवन्मुक्तः स उच्यते ॥ १२ ॥

इन्द्रियसमूह को निष्क्रिय रखकर अपनी आत्मा में मन को जो लीन

रखता हुआ मृतवत् रहता है, वह साक्षात् 'जीवन्मुक्त' कहा जाता है ॥ १२ ॥

न शृणोति न चाघ्राति न स्पृशति न पश्यति ।
न जानाति सुखं दुःखं न सङ्कल्पयते मनः ॥ १३ ॥
न चापि किञ्चिज्जानाति न च बुध्यति काष्ठवत् ।
एवं शिवे विलीनात्मा समाधिस्थ इहोच्यते ॥ १४ ॥

समाधिस्थ का लक्षण—वह साधक जो न सुनता है, न देखता है, न सूंघता है, न स्पर्श करता है, न सुख-दुःख को जानता है, न मन में कोई सङ्कल्प होता है, न कुछ भी जानता है और न काष्ठवत् कुछ अनुभव करता है—इस प्रकार जो शिव में अपनी आत्मा को लीन रखता है, वह संसार में 'समाधिस्थ' कहा जाता है ॥ १३-१४ ॥

यथा जले जलं क्षिप्तं क्षीरे क्षीरं घृते घृतम् ।
अविशेषो भवेत्तद्वज्जीवात्मपरमात्मनोः ॥ १५ ॥

जीवात्मा और परमात्मा में अभेद—जिस प्रकार जल में जल, दूध में दूध और घी में घी डालने से कोई अन्तर नहीं पड़ता, उसी प्रकार जीवात्मा और परमात्मा का सम्बन्ध है ॥ १५ ॥

यथा ध्यानस्य सामर्थ्यात् कीटोऽपि भ्रमरायते ।
तथा समाधिसामर्थ्याद् ब्रह्मभूतो भवेन्नरः॥ १६ ॥

जिस प्रकार ध्यान की शक्ति से कीड़ा भी भौंरा बन जाता है, उसी प्रकार समाधि की शक्ति से मनुष्य ब्रह्मभूत हो जाता है ॥ १६ ॥

क्षीरोद्धृतं घृतं यद्वत्तत्र क्षिप्तं न पूर्ववत् ।
पृथक्कृतो गुणेभ्यः स्यादात्मा तद्वदिहोच्यते ॥ १७ ॥

दूध से निकाला हुआ घी जैसे पुनः उसमें डालने से पहले जैसा मिश्रित नहीं होता, वैसे ही गुणों के द्वारा अलग की गई आत्मा इस संसार में अलग कही जाती है ॥ १७ ॥

यथा गाढान्धकारस्थो न किञ्चिदिह पश्यति ।
अलक्ष्यश्च तथा योगी प्रपञ्चं नैव पश्यति॥ १८ ॥

जिस प्रकार गहरे अँधेरे में यहाँ कुछ भी दिखाई नहीं पड़ता, उसी प्रकार अन्यमनस्क योगी प्रपञ्च को नहीं देखता ॥ १८ ॥

यथा निमीलने काले प्रपञ्चं नैव पश्यति ।
तथैवोन्मीलनेऽपि स्यादेतद्ध्यानस्य लक्षणम् ॥ १९ ॥

ध्यान का लक्षण—जैसे आँख बन्द रहने पर प्रपञ्च नहीं दिखाई देता, वैसे ही आँख खुली होने पर भी साधक को वह प्रपञ्च दिखाई न दे, यही ध्यान का लक्षण है ॥ १९ ॥

जनः स्वदेहकण्डूतिं विजानाति यथा तथा ।
परं ब्रह्मस्वरूपी च वेत्ति विश्वविचेष्टितम् ॥ २० ॥

परम तत्त्वज्ञान का फल—जिस प्रकार लोग अपने देह की खुजली का अनुभव करते हैं, उसी प्रकार परब्रह्म स्वरूपी साधक क्रियाशील विश्व को जानता है ॥ २० ॥

विदिते परमे तत्त्वे वर्णातीते ह्यविक्रिये ।
किङ्करत्वं हि गच्छन्ति मन्त्रा मन्त्राधिपैः सह ॥ २१ ॥

वर्णों से अतीत परम तत्त्व को जान लेने पर सभी मन्त्र अपने अधिष्ठातृ देवताओं सहित साधक के दास बन जाते हैं ॥ २१ ॥

आत्मैकभावनिष्ठस्य या या चेष्टा तदर्चनम् ।
यो यो जल्पः स सन्मन्त्रस्तद्ध्यानं यन्निरीक्षणम् ॥ २२ ॥

आत्मा से एक भाव से निष्ठा रखने वाले साधक की जो भी चेष्टा होती है, वह पूजा स्वरूपा ही होती है; जो भी बात वह करता है, वह मन्त्र स्वरूप होता है और जो कुछ देखता है, वह ध्यान स्वरूप होता है ॥ २२ ॥

देहाभिमाने गलिते विज्ञाते परमात्मनि ।
यत्र यत्र मनो याति तत्र तत्र समाधयः ॥ २३ ॥

परमात्मा के ज्ञात होने पर देहाभिमान दूर हो जाता है और जहाँ कहीं भी ऐसे साधक का मन जाता है, वहाँ उसे समाधि प्राप्त होती है ॥ २३ ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परात्मनि ॥ २४ ॥

उसके हृदय की ग्रन्थि खुल जाती है एवं उसके सभी सन्देह दूर हो जाते हैं । परमात्मा को देख लेने से उसके सभी कर्मों का क्षय हो जाता है ।

योगीन्द्रेण यदा प्राप्तं निर्मलं परमं पदम् ।
देवासुरपदं यत्तत्प्राप्तञ्चापि न गृह्यते ॥ २५ ॥

योगीन्द्र को जैसा निर्मल परम पद प्राप्त होता है, उसके समक्ष देवासुर पद भी प्राप्त होने पर ग्रहण करने योग्य नहीं है ॥ २५ ॥

यः पश्येत् सर्वगं शान्तमानन्दात्मकमव्ययम्।
तस्य किञ्चिदनालभ्यं ज्ञातव्यं नावशिष्यते ॥ २६ ॥

जो सर्वव्यापी, शान्त, आनन्दमय, अव्यय को देख लेता है, उसे कुछ भी पाने या जानने को नहीं बचता ॥ २६ ॥

सम्प्राप्ते ज्ञानविज्ञाने ज्ञेये च हृदि संस्थिते।
लब्धे शान्तिपदे देवि न योगो नैव धारणा ॥ २७ ॥

ज्ञान विज्ञान के प्राप्त होने पर, हृदय में ज्ञेय की स्थिति होने पर और शान्ति पद के मिल जाने पर, हे देवि! न योग की आवश्यकता रहती है, न धारणा की ॥ २७ ॥

परे ब्रह्मणि विज्ञाते समस्तैर्नियमैरलम्।
तालवृन्तेन किं कार्यं लब्धे मलयमारुते ॥ २८ ॥
आसिकाबन्धनं नास्ति नासिकाबन्धनं न हि ।
न यमो नियमो नास्ति स्वयमोमिति पश्यताम् ॥ २९ ॥

परब्रह्म को जान लेने पर सभी नियम समाप्त हो जाते हैं । सुगन्धित वायु के मिलने पर पंखे की क्या आवश्यकता ? न आसन लगाना पड़ता है, न प्राणायाम करना होता है । यम नियम भी नहीं रहते । स्वयं ही आत्मदर्शन होता रहता है ॥ २८-२९ ॥

न पद्मासनतो योगो न नासाग्रनिरीक्षणम् ।
ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः ॥ ३० ॥

योग का लक्षण—योग के मर्मज्ञों ने जीव और आत्मा के ऐक्य को ही 'योग' कहा है । न पद्मासन से और न नासिका के अग्रभाग को देखने से योग होता है ॥ ३० ॥

ध्यायतां क्षणमात्रं हि श्रद्धया परमन्त्विह।
यद्भवेत् सुमहत् पुण्यं तस्यान्तो नैव गण्यते ॥ ३१ ॥

श्रद्धापूर्वक क्षण मात्र के लिये भी परम पद का ध्यान करने से जो महान् पुण्य होता है, उसकी गणना नहीं की जा सकती ॥ ३१ ॥

क्षणं ब्रह्माहमस्मीति यः कुर्यादात्मचिन्तनम् ।
स सर्वं पातकं हन्यात्तमः सूर्योदयो यथा ॥ ३२ ॥

जो क्षण भर के लिए यह आत्मचिन्तन करता है कि 'मैं ब्रह्म हूँ', वह अपने सभी पापों को उसी प्रकार नष्ट कर देता है, जिस प्रकार सूर्य के उदय होने से अँधेरा नष्ट होता है ॥ ३२ ॥

व्रतक्रतुतपस्तीर्थदानदेवार्चनादिषु　　।
यत् फलं कोटिगुणितं तदवाप्नोति तत्त्ववित् ॥ ३३ ॥

व्रत, यज्ञ, तप, तीर्थ, दान, देव पूजादि से जो फल होता है, उससे कोटि गुना फल तत्त्व के ज्ञाता को मिलता है ॥ ३३ ॥

उत्तमा सहजावस्था मध्यमा ध्यानधारणा ।
जपस्तुतिः स्यादधमा होमपूजाऽधमाधमा ॥ ३४ ॥

साधक की चार अवस्थाएँ—१. सहजावस्था उत्तम है । २. ध्यान—धारणा की अवस्था मध्यम है । ३. जप—स्तुति की अवस्था अधम है और ४. होम—पूजा की अवस्था अधम से भी अधम है ॥ ३४ ॥

उत्तमा तत्त्वचिन्ता स्याज्जपचिन्ता तु मध्यमा ।
शास्त्रचिन्ताऽधमा ज्ञेया लोकचिन्ताऽधमाधमा ॥ ३५ ॥
पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः ।
जपकोटिसमं ध्यानं ध्यानकोटिसमो लयः ॥ ३६ ॥

तत्त्व का चिन्तन करना उत्तम है । जप की चिन्ता करना मध्यम है । शास्त्र की चिन्ता करना अधम और संसार की चिन्ता करना अधम से भी अधम है । कोटि पूजाओं के बराबर स्तोत्रपाठ है, कोटि स्तोत्रपाठ के बराबर जप है, कोटि जप के बराबर ध्यान है और कोटि ध्यान के बराबर लय (समाधि) है ॥ ३५-३६ ॥

न हि ध्यानात् परो मन्त्रो न देवस्त्वात्मनः परः ।
नानुसन्धात् परा पूजा न हि तृप्तेः परं फलम् ॥ ३७ ॥

न ध्यान से श्रेष्ठ मन्त्र है, न आत्मा से श्रेष्ठ देवता है, न अनुसन्धान से श्रेष्ठ पूजा है और न तृप्ति से श्रेष्ठ कोई फल है ॥ ३७ ॥

अक्रियैव परा पूजा मौनमेव परो जपः ।
अचिन्तेव परं ध्यानमनिच्छैव परं फलम् ॥ ३८ ॥

क्रिया की हीनता ही श्रेष्ठ पूजा है, मौन ही श्रेष्ठ जप है, चिन्ता हीनता ही श्रेष्ठ ध्यान है और इच्छारहित होना ही श्रेष्ठ फल है ॥ ३८ ॥

मन्त्रोदकैर्विना सन्ध्यां पूजाहोमैर्विना तपः ।
उपचारैर्विना पूजां योगी नित्यं समाचरेत् ॥ ३९ ॥

तत्त्वज्ञानी की उपासना विधि—मन्त्रोदक के बिना सन्ध्या, पूजा और होम के बिना जप—इस प्रकार योगी नित्य उपचारों के बिना पूजा करे ॥ ३९॥

निःसङ्गश्च विसङ्गश्च निस्तीर्णोपाधिवासनः ।
निजस्वरूपनिर्मग्नः स योगी परतत्त्ववित् ॥ ४० ॥

सङ्गहीन और उपाधियों से रहित होकर निज स्वरूप में तल्लीन रहता हुआ योगी परम तत्त्व का ज्ञाता होता है ॥ ४० ॥

देहो देवालयो देवि जीवो देवः सदाशिवः ।
त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत् ॥ ४१ ॥

जीव और परमात्मा का स्वरूप—हे देवि ! देह देवालय है और जीव सदाशिव है । अज्ञानरूपी निर्माल्य को छोड़कर साधक को 'सोऽहं' भाव से पूजन करना चाहिए ॥ ४१ ॥

जीवः शिवः शिवो जीवः स जीवः केवलः शिवः ।
पाशबद्धः स्मृतो जीवः पाशमुक्तः सदाशिवः ॥ ४२ ॥
तुषेण बद्धो व्रीहिः स्यात्तुषाभावे हि तण्डुलः ।
कर्मबद्धः स्मृतो जीवः कर्ममुक्तः सदाशिवः ॥ ४३ ॥

जीव शिव है, शिव जीव है—वह जीव केवल शिव है । पाशों से बँधा हुआ 'जीव' माना जाता है और पाशों से मुक्त 'सदाशिव' कहलाता है । जिस प्रकार भूसी से युक्त धान होता है और भूसी के दूर हो जाने पर चावल कहलाता है, उसी प्रकार कर्मों से बँधा हुआ 'जीव' और कर्मों से छूटा हुआ 'सदाशिव' माना जाता है ॥ ४२-४३ ॥

अग्नी तिष्ठति विप्राणां हृदि देवो मनीषिणाम् ।
प्रतिमास्वप्रबुद्धानां सर्वत्र विदितात्मनाम् ॥ ४४ ॥

अधिकारीभेद से देवता का स्थान—विप्रों का देवता अग्नि में, मनीषियों का हृदय में, अल्पबुद्धि लोगों का मूर्तियों में और आत्मज्ञानियों का देवता सर्वत्र रहता है ॥ ४४ ॥

यो निन्दास्तुतिशीतोष्णसुखदुःखारिबन्धुषु ।
सम आस्ते स योगीन्द्रो हर्षाहर्षविवर्जितः ॥ ४५ ॥
निस्पृहो नित्यसन्तुष्टः समदर्शी जितेन्द्रियः ।
आस्ते देहे प्रवासीव योगी परमतत्त्ववित् ॥ ४६ ॥

तत्त्वज्ञ योगी के लक्षण—जो निन्दा-स्तुति, सुख-दुःख, शत्रु-मित्र में समान भाव रखता है, वही प्रसन्नता एवं अप्रसन्नता रहित 'योगीन्द्र' है । इच्छाहीन, सदा सन्तुष्ट, समदर्शी, जितेन्द्रिय, देह में परदेश के समान रहने वाला परम तत्त्व का ज्ञाता 'योगी' है ॥ ४५-४६ ॥

निःसङ्कल्पो निर्विकल्पो निर्लिप्तोपाधिवासनः ।
निजस्वरूपनिर्मग्नः स योगी परतत्त्ववित् ॥ ४७ ॥

सङ्कल्प-विकल्प से रहित और उपाधि-वस्त्रादि से उदासीन, अपने स्वरूप में तल्लीन, परम तत्त्व का ज्ञाता 'योगी' है ॥ ४७ ॥

यथा पङ्ग्वन्धबधिरक्लीबोन्मत्तजडादयः ।
निवसन्ति कुलेशानि तथा योगी च तत्त्ववित् ॥ ४८ ॥

हे कुलेशानि ! लँगड़े, अन्धे, बहरे, नपुंसक, पागल और मूर्खादि के समान रहता है वह तत्त्वज्ञ 'योगी' है ॥ ४८ ॥

पञ्चमुद्रासमुत्पन्नपरमानन्दनिर्भरः ।
य आस्ते स तु योगीन्द्रः पश्यत्यात्मानमात्मनि ॥ ४९ ॥

पञ्चमुद्राओं (द्रव्यों) से उत्पन्न परमानन्द में मग्न रहने वाला योगीन्द्र सर्वत्र आत्मा को अपने में देखता रहता है ॥ ४९ ॥

अलिमांसाङ्गनासङ्गे यत् सुखं जायते प्रिये।
तदेव मोक्षो विदुषामबुधानान्तु पातकम् ॥ ५० ॥

अलि (मद्य), मांस और अङ्गनासङ्ग (मैथुन) में जो सुख मिलता है, वह ज्ञानियों के लिये तो पुण्य है किन्तु मूर्खों के लिये पाप ॥ ५० ॥

सदा मांसासवोल्लासी सदा चरणचिन्तकः ।
सदासंशयहीनो यः कुलयोगी स उच्यते ॥ ५१ ॥

कुलयोगी के लक्षण—सदा मांस मद्य के उल्लास में रहने वाला, सदा परम तत्त्व का चिन्तन करने वाला और सदा संशयों से दूर रहने वाला 'कुलयोगी' कहा जाता है ॥ ५१ ॥

पिबन्मद्यं पलं खादन् स्वेच्छाचारपरायणः ।
अहं तदनयोरैक्यं भावयन्निवसेत् सुखी ॥ ५२ ॥

मद्यपान करता हुआ, मांस खाता हुआ, स्वेच्छाचार में लगा हुआ और 'मैं' 'तुम' तथा 'वह' में ऐक्यभाव का चिन्तन करता हुआ वह सदा सुखी रहता है ।

आमिषासवसौरभ्यहीनं यस्य मुखं भवेत् ।
प्रायश्चित्ती स वर्ज्यश्च पशुरेव न संशयः ॥ ५३ ॥

मांस और मद्य की सुगन्धि से जिसका मुख रहित है, वह प्रायश्चित का भागी होता है । उसका त्याग करे, वह 'पशु' ही है, इसमें सन्देह नहीं ॥५३॥

यावदासवगन्धः स्यात् पशुः पशुपतिः स्वयम् ।
विनालिमांसगन्धेन साक्षात् पशुपतिः पशुः ॥ ५४ ॥

जब तक मद्य की गन्ध है, तब तक पशु साधक स्वयं पशुपति स्वरूप है । मद्य मांस की सुगन्ध के बिना साक्षात् पशुपति भी पशु के समान होते हैं ॥ ५४ ॥

लोके निकृष्टमुत्कृष्टं लोकोत्कृष्टं निकृष्टकम् ।
कुलमार्गं समुद्दिष्टं भैरवेण महात्मना ॥ ५५ ॥

कौलिक के लिये विधि निषेध नहीं—संसार में निकृष्ट को उत्कृष्ट मानना और उत्कृष्ट को निकृष्ट मानना—महात्मा भैरव ने इसी को 'कुलमार्ग' निर्दिष्ट किया है ॥ ५५ ॥

अनाचारः सदाचारस्त्वकार्यं कार्यमुत्तमम् ।
असत्यमपि सत्यं स्यात् कौलिकानां कुलेश्वरि ॥ ५६ ॥
अपेयमपि पेयं स्यादभक्ष्यं भक्ष्यमेव च ।
अगम्यमपि गम्यं स्यात् कौलिकानां कुलेश्वरि ॥ ५७ ॥

अनाचार सदाचार है, अकार्य ही उत्तम कार्य है, हे कुलेश्वरि ! असत्य भी कौलिकों के लिये सत्य होता है । अपेय भी पेय है, अभक्ष्य भक्ष्य है और हे कुलेश्वरि ! अगम्य भी कौलिकों के लिये गम्य होता है ॥ ५६-५७ ॥

न विधिर्न निषेधः स्यान्न पुण्यं न च पातकम् ।
न स्वर्गो नैव नरकं कौलिकानां कुलेश्वरि ॥ ५८ ॥

हे कुलेश्वरि ! कौलिकों के लिये न विधि है, न निषेध, न पुण्य है, न पाप और न स्वर्ग है, न नरक ॥ ५८ ॥

अनभिज्ञा अभिज्ञन्ति दरिद्रा धनयन्ति च ।
विनष्टा अपि वर्द्धन्ते कौलिकाः कुलनायिके ॥ ५९ ॥

अनभिज्ञ विशेषज्ञ होता है, दरिद्र धनी है और हे कुलेश्वरि ! नाशवान् होते हुये भी कौलिक वृद्धि को प्राप्त करते हैं ॥ ५९ ॥

रिपवश्चापि मित्रन्ति साक्षाद्दासन्ति भूमिपाः ।
बान्धवन्ति जनाः सर्वे कौलिकानां कुलेश्वरि ॥ ६० ॥

शत्रु भी मित्र बन जाते हैं, राजा प्रत्यक्ष सेवा करते हैं और हे कुलेश्वरि ! सभी लोग कौलिकों को अपना बन्धु मानते हैं ॥ ६० ॥

विमुखाः सुमुखाः सर्वे गर्विताः प्रणयन्ति च।
बाधकाः साधकायन्ते कौलिकानां कुलेश्वरि ॥ ६१ ॥

प्रतिकूल अनुकूल हो जाते हैं, सभी अभिमानी प्रणाम करते हैं और हे कुलेश्वरि! बाधा डालने वाले कौलिकों का काम बनाने वाले हो जाते हैं ॥६१॥

निर्गुणाः सगुणायन्ते अकुलं सुकुलायते ।
अधर्माश्चापि धर्मन्ति कौलिकानां कुलेश्वरि ॥ ६२ ॥
मृत्युर्वैद्यायते देवि साक्षात् स्वर्गायते गृहम् ।
पुण्यायन्तेऽङ्गनासङ्गाः कौलिकानां कुलेश्वरि ॥ ६३ ॥

गुणहीन गुणी, अकुलीन कुलीन और अधर्मी भी कौलिकों के लिये हे कुलेश्वरि ! धर्मवान् बन जाते हैं । मृत्यु वैद्य बन जाती है, घर साक्षात् स्वर्ग हो जाता है और हे कुलेश्वरि ! स्त्रियों का सङ्ग कौलिकों के लिये पुण्यकारक हो जाता है ॥ ६२-६३ ॥

बहुनात्र किमुक्तेन कुलयोगीश्वराः प्रिये ।
सदा सङ्कल्पसिद्धाः स्युर्नात्र कार्या विचारणा ॥ ६४ ॥

यहाँ अधिक कहने से क्या, हे प्रिये ! कुलयोगीश्वर के सभी सङ्कल्प सिद्ध होते हैं, इसमें सन्देह करने की कोई आवश्यकता नहीं है ॥ ६४ ॥

येन केनापि वेशेन येन केनाप्यलक्षितः ।
यत्र कुत्राश्रमे तिष्ठेत् कुलयोगी कुलेश्वरि ॥ ६५ ॥

कुलयोगी के आचरण—एक कौल योगी जहां कहीं भी रह सकता है। किसी भी वेष में दिखाई पड़ता है और सभी से विना देखे रहता है । हे कुलेश्वरि! वह किसी भी आश्रम में स्थित रह सकता है । वह 'कुलयोगी' होता है ॥ ६५ ॥

योगिनो विविधैर्वेशैर्नराणां हितकारिणः ।
भ्रमन्ति पृथिवीमेतामविज्ञातस्वरूपिणः ॥ ६६ ॥

विविध वेषभूषा में, लोगों के हितकारी योगीजन अज्ञात रूप से इस पृथ्वी पर भ्रमण करते रहते हैं ॥ ६६ ॥

सकृन्नैवात्मविज्ञानं क्षपयन्ति कुलेश्वरि ।
उन्मत्तमूकजडवन्निवसेल्लोकमध्यतः ॥ ६७ ॥

हे कुलेश्वरि ! वे एक बार भी अपने को प्रकट नहीं करते और उन्मत्त, मूक, जड़ के समान लोकों के बीच निवास करते हैं ॥ ६७ ॥

अलक्ष्यो हि यथा लोके व्योम्नि चन्द्रार्कयोगतः ।
नक्षत्राणां ग्रहाणाञ्च तथा वृत्तन्तु योगिनाम् ॥ ६८ ॥

इस संसार में वे अलक्ष्य ही रहते हैं, जैसे आकाश में सूर्य चन्द्र की गति। नक्षत्रों और ग्रहों के समान ही कुलयोगियों का हाल है ॥ ६८ ॥

आकाशे पक्षिणां देवि जलेऽपि जलचारिणाम् ।
यथा गतिर्न दृश्येत तथा वृत्तं हि योगिनाम् ॥ ६९ ॥

हे देवि ! जैसे आकाश में पक्षियों की और जल में जलचर प्राणियों की गति दिखाई नहीं देती, वैसा ही योगियों का आचरण है ॥ ६९ ॥

असन्त इव भाषन्ते चरन्त्यज्ञा इव प्रिये ।
पामरा इव दृश्यन्ते कुलयोग विशारदाः ॥ ७० ॥
जना यथावमन्यन्ते गच्छेयुर्नैव सङ्गतिम्।
न किञ्चिदपि भाषन्ते तथा योगी प्रवर्त्तते ॥ ७१ ॥
मुक्तोऽपि बालवत् क्रीडेत् कुलेशो जडवच्चरेत् ।
वदेदुन्मत्तवद्विद्वान् कुलयोगी महेश्वरि ॥ ७२ ॥
यथा हसति लोकोऽयं जुगुप्सति च कुत्सति ।
विलोक्य दूरतो याति तथा योगी प्रवर्त्तते ॥ ७३ ॥

हे प्रिये ! 'कुलयोग' के मर्मज्ञ असन्त के समान बोलते हैं, मूर्खों के समान घूमते फिरते हैं और पापियों के समान दिखाई देते हैं । जिससे लोग उनकी उपेक्षा करें और उन्हें किसी सङ्ग में न पड़ना पड़े । वे कुछ भी नहीं बोलते । ऐसा योगी आचरण करते हैं । क्योंकि वे वस्तुतः योगी होते हैं । हे महेश्वरि! मुक्त होते हुए भी वे बच्चे के समान क्रीड़ा करते हैं, मूर्ख के समान आचरण करते हैं और उन्मत्त के समान बात करते हैं । जिससे लोग हँसें, निन्दा करें और दूर से ही देखकर चले जायँ—ऐसा आचरण योगी करते हैं ॥ ७०-७३ ॥

क्वचिच्छिष्टः क्वचिद्भ्रष्टः क्वचिद् भूतपिशाचवत्।
नानावेशधरो योगी विचरेज्जगतीतले ॥ ७४ ॥
योगी लोकोपकाराय भोगान् भुङ्क्ते न कांङ्क्षया ।
अनुगृहणन् जनान् सर्वान् क्रीडेच्च पृथिवीतले ॥ ७५ ॥

कहीं शिष्ट रूप में, कहीं भ्रष्ट रूप में, कहीं भूत पिशाच के समान–इस प्रकार योगी नाना वेश धारण कर पृथ्वी पर घूमता रहता है। योगी लोककल्याण के लिये भोग करता है । वे स्वयं की अपनी इच्छा से भोगों को नहीं भोगते हैं। वे लोगों को अनुगृहीत करते हुए इस पृथ्वी पर क्रीड़ा करते हैं ॥ ७४-७५ ॥

सर्वशोषी यथा सूर्यः सवभोगी यथाऽनलः ।
योगी भुक्त्वाखिलान् भोगान् तथा पापैर्न लिप्यते॥ ७६ ॥

जैसे सूर्य सभी को सोख लेता है एवं अग्नि सभीको जलाकर खा जाता है, वैसे ही योगी सभी भोगों को भोगकर भी पापों से लिप्त नहीं होता ॥७६॥

सर्वस्पर्शी यथा वायुर्यथाकाशश्च सर्वगः।
सर्वे यथा नदीस्नातास्तथा योगी सदा शुचिः॥ ७७ ॥

जैसे वायु सभी को छूता है, आकाश सभी जगह है और नदी में सभी नहाते हैं, वैसे ही योगी सदा पवित्र रहता है ॥ ७७ ॥

यथा ग्रामगतं तोयं नदीयुक्तं भवेच्छुचि ।
तथा म्लेच्छगृहान्नादि योगिहस्तार्पितं शुचि॥ ७८ ॥

जैसे गाँव में गया हुआ जल नदी से मिलने पर पवित्र हो जाता है, वैसे ही म्लेच्छ के घर का अन्नादि योगी के हाथ में पहुँचकर पवित्र हो जाता है ।

यथाऽऽचरन्ति देवेशि कुलज्ञानविशारदाः।
तदेव विदुषां मान्यमात्मनो हितकाङ्क्षिणाम् ॥ ७९ ॥

हे देवेशि ! कुलज्ञान के मर्मज्ञ जिस प्रकार आचरण करते हैं, उसी को आत्मकल्याणेच्छु विद्वान् आदर देते हैं ॥ ७९ ॥

यस्मिंश्चरन्ति योगीशाः सा मार्गः परमो मतः।
यस्यामुदेति सूर्यो हि पूर्वाशा सा निगद्यते ॥ ८० ॥

जिस मार्ग से योगीश जाते हैं, वही श्रेष्ठ माना जाता है, क्योंकि सूर्य जिधर निकलते हैं, उधर ही पूर्व दिशा कही जाती है ॥ ८० ॥

यत्र यत्र गजो याति तत्र मार्गो यथा भवेत् ।
कुलयोगी चरेद् यत्र स स मार्गः कुलेश्वरि ॥ ८१ ॥

जैसे हाथी जिधर जाता है, उधर ही मार्ग बन जाता है, वैसे ही कुलयोगी जैसा आचरण करता है, हे कुलेश्वरि! वही दूसरों के लिए मार्गदर्शक होता है ।

नदीं वक्रामृजुं कर्तुं निरोद्धुं तत्प्रवाहकम् ।
स्वेच्छाविहारिणं शान्तं को वा वारयितुं क्षमः॥ ८२ ॥

टेढ़ी नदी को सीधा करना, उसके प्रवाह को रोकना सम्भव नहीं है । इसी प्रकार स्वेच्छा से बिहार करने वाले शान्त योगी को मना करने में कोई समर्थ नहीं है ॥ ८२ ॥

यद्वन्मन्त्रबलोपेतः क्रीडनीयैर्न दृश्यते ।
तद्वन्न दृश्यते ज्ञानी क्रीडन्निन्द्रियपन्नगैः ॥ ८३ ॥

जैसे मन्त्रबल से युक्त खिलाड़ियों द्वारा नहीं देखा जाता, वैसे ही ज्ञानी इन्द्रियरूपी सर्पों से क्रीडा करते नहीं दिखाई देता ॥ ८३ ॥

निवृत्तदुःखसन्तुष्टा निर्द्वन्द्वा गतमत्सराः ।
कुलज्ञानरताः शान्तास्त्वद्भक्तास्ते च कौलिकाः ॥ ८४ ॥

उत्तम कौलिक के लक्षण—दुःखों से निवृत्त, सन्तुष्ट, निर्द्वन्द्व और मत्सरहीन होकर जो कुलज्ञान में तन्मय, शान्त और आपके भक्त होते हैं, वे 'कौलिक' हैं ॥ ८४ ॥

अमदक्रोधदम्भाशाहङ्काराः सत्यवादिनः ।
कौलिकेन्द्रा ह्यचपला ये नेन्द्रियवशानुगाः ॥ ८५ ॥

मद, क्रोध, दम्भ, आशा, अहङ्कार से हीन, सत्यवादी कौलिकेन्द्र इन्द्रिय के वशवर्ती न होकर जितेन्द्रिय होते हैं ॥ ८५ ॥

कीर्त्यमाने कुले येषां रोमाञ्चो गद्गदस्वरः ।
आनन्दाश्रु पतेद्देवि कथिताः कौलिकोत्तमाः॥ ८६ ॥

कुल की प्रशंसा होने पर वे रोमाञ्चित हो उठते हैं, उनका स्वर गद्गद हो जाता है और आनन्दाश्रु गिरने लगता है । हे देवि ! ये ही उत्तम कौलिक कहे गये हैं ॥ ८६ ॥

सर्वधर्माधिको लोके कुलधर्मः शिवोदितः ।
इति ते निश्चितधियः प्रोक्तास्ते कौलिकोत्तमाः ॥ ८७ ॥

संसार में शिवोक्त कुलधर्म सब धर्मों से श्रेष्ठ है, ऐसे निश्चय से युक्त बुद्धि वाले उत्तम कौलिक कहे जाते हैं ॥ ८७ ॥

यो भवेत् कुलतत्त्वज्ञः कुलशास्त्रविशारदः ।
कुलार्चनरतः स स्यात् कौलिको नापरः प्रिये ॥ ८८ ॥

जो कुलतत्त्व का ज्ञाता है, कुलशास्त्र का मर्मज्ञ है, वह कुलार्चन में तत्पर रहता है और हे प्रिये ! वही कौलिक है, अन्य नहीं ॥ ८८ ॥

कुलभक्तान् कुलज्ञानान् कुलाचारकुलव्रतान् ।
प्रीतो भवति यो दृष्ट्वा कौलिकः स च मे प्रियः ॥ ८९ ॥

कुलभक्तों, कुलज्ञानियों, कुलाचार वालों और कुलव्रतों को देखकर जो प्रसन्न होता है, वही कौलिक मुझे प्रिय है ॥ ८९ ॥

तत्त्वत्रयश्रीचरणमूलमन्त्रार्थतत्त्ववित् ।
देवतागुरुभक्ताश्च कौलिकः स्याच्च दीक्षया ॥ ९० ॥

तत्त्वत्रय को स्वीकार करने से, मूलमन्त्र के तत्त्वार्थ को जानने वाला, देवता और गुरु का भक्त दीक्षा के द्वारा कौलिक होता है ॥ ९० ॥

दुर्लभं सर्वलोकेषु कुलाचार्यस्य दर्शनम् ।
सुपाकेनैव पुण्यानां लभ्यते नान्यथा प्रिये ॥ ९१ ॥

हे प्रिये ! सारे लोकों में कुलाचार्य का दर्शन दुर्लभ है । पुण्यों के सुफलित होने पर ही उसका दर्शन मिलता है, अन्यथा नहीं ॥ ९१ ॥

संस्मृतः कीर्त्तितो दृष्टो वन्दितो भाषितोऽपि वा ।
पुनाति कुलधर्मिष्ठश्चाण्डालोऽपि यदृच्छया ॥ ९२ ॥

कौलिक की महिमा—स्मरण करने से, कीर्तिगान से, दर्शन करने से, वन्दना करने से और वार्तालाप से कुलधर्मिष्ठ साधक इच्छा मात्र से चाण्डाल को भी पवित्र बना देता है ॥ ९२ ॥

सर्वज्ञो वापि मूर्खो वाप्युत्तमो वाऽधमोऽपि वा ।
यत्र देवि कुलज्ञानी तत्राहञ्च त्वया सह ॥ ९३ ॥

हे देवि ! जहाँ कुलज्ञानी है, वहीं मैं आपके साथ रहता हूँ, भले ही वह सर्वज्ञ हो या मूर्ख, उत्तम हो या अधम ॥ ९३ ॥

नाहं वसामि कैलासे न मेरौ न च मन्दिरे ।
कुलज्ञा यत्र तिष्ठन्ति तत्र तिष्ठामि भामिनि ॥ ९४ ॥

न मैं कैलास में रहता हूँ, न मेरु में और न मन्दिर में । हे भामिनी ! कुलज्ञ जहाँ रहते हैं, वहीं मैं रहता हूँ ॥ ९४ ॥

सुदूरमपि गन्तव्यं यत्र माहेश्वरो जनः ।
द्रष्टव्यश्च प्रयत्नेन तत्र सन्निहितो ह्यहम् ॥ ९५ ॥

माहेश्वर साधक जहाँ हो, वहाँ दूर होते हुये भी जाना चाहिये और प्रयत्न करके उसका दर्शन करना चाहिये क्योंकि वहीं मैं स्थित हूँ ॥ ९५ ॥

अतिदूरस्थितो वापि द्रष्टव्यः कुलदेशिकः ।
समीपे वर्त्तमानोऽपि न द्रष्टव्यः पशुः प्रिये ॥ ९६ ॥

हे प्रिये ! कुलदेशिक बहुत दूर स्थित हों, तो भी उनका दर्शन करना चाहिये और पशु पास ही स्थित हो, तो भी उसे देखना नहीं चाहिये ॥ ९६ ॥

कुलज्ञानी वसेद् यत्र स देशः पुण्यभाक् ततः।
दर्शनादर्चनात्तस्य त्रिसप्तकुलमुद्धरेत् ॥ ९७ ॥

कुलज्ञानी जिस देश में निवास करता है, वह पुण्यशाली होता है। उसका दर्शन पूजन करने से इक्कीस पीढ़ियों का उद्धार होता है ॥ ९७ ॥

कुलज्ञानिनमालोक्य स्वसन्तानगृहे स्थितम्।
शंसन्ति पितरस्तस्य यास्यामः परमां गतिम् ॥ ९८ ॥

अपनी सन्तान के घर में कुलज्ञानी को बैठा हुआ देखकर उसके पितर लोग कहते हैं कि 'हम परम गति प्राप्त करेंगे' ॥ ९८ ॥

समाश्वसन्ति पितरः सुवृष्टिमिव कर्षकाः।
योऽस्मत्कुलेषु पुत्रो वा पौत्रो वा कौलिको भवेत् ॥ ९९ ॥

किसानों को अच्छी वर्षा से जैसे सन्तोष मिलता है, उसी प्रकार पितरों को आशा होती है कि 'हमारे कुलों में भी पुत्र या पौत्र कौलिक होगा' ॥ ९९॥

स धन्यः खलु लोकेऽस्मिन् पुरुषः क्षीणकल्मषः।
यत्समीपं समायान्ति कुलाचार्या मुदा प्रिये ॥ १०० ॥

हे प्रिये ! इस संसार में निश्चय ही वह पुरुष क्षीणपाप होकर धन्य हो जाता है, जिसके पास कुलाचार्य प्रसन्नता से आते हैं ॥ १०० ॥

कौलिकेन्द्रे समायाते कौलिकावसथं प्रति।
समायान्ति मुदा देवि योगिन्यो योगिभिः सह ॥ १०१ ॥

कौलिकेन्द्र के निकट आने पर हे देवि ! योगिनियाँ योगियों सहित सहर्ष पास आती हैं ॥ १०१ ॥

प्रविश्य कुलयोगीन्द्रं भणन्ते पितृदेवताः।
तस्मात् सम्पूजयेद्भक्त्या कुलज्ञानपरायणान् ॥ १०२ ॥

कुलयोगीन्द्र में प्रवेश कर पितृ देवता भोग ग्रहण करते हैं। अतः कुल के मर्मज्ञों का पूजन भक्तिपूर्वक करना चाहिये ॥ १०२ ॥

अभ्यर्चयित्वा त्वां देवि त्वद्भक्तान्नार्चयन्ति ये।
पापिष्ठास्त्वत्प्रसादस्य भाजनं न भवन्ति ते ॥ १०३ ॥

कौलिकपूजा का फल—हे देवि! आपकी अर्चा करके जो आपके भक्तों का अर्चन नहीं करते, वे पापी आपके प्रसाद के अधिकारी नहीं होते ॥१०३॥

नैवेद्यं पुरतो न्यस्तं दर्शनात् स्वीकृतं त्वया ।
रसान् भक्तस्य जिह्वाग्रादश्नामि कमलेक्षणे ॥ १०४ ॥

सामने रखा हुआ नैवेद्य देखकर आप स्वीकार करती हैं और हे कमल-लोचने! भक्त की जिह्वा के अग्र भाग से रसों को मैं ग्रहण करता हूँ ॥ १०४॥

त्वद्भक्तपूजनाद्देवि पूजितोऽहं न संशयः ।
तस्मान्मम प्रियाकाङ्क्षी त्वद्भक्तानेव पूजयेत् ॥ १०५ ॥

अतः आपके भक्त की पूजा होने से हे देवि ! मैं पूजित होता हूँ, इसमें सन्देह नहीं । इसलिये जो मेरी प्रसन्नता चाहते हैं, उन्हें आपके भक्तों की ही पूजा करनी चाहिए ॥ १०५ ॥

यत् कृतं कुलनिष्ठानां तद्देवानां कृतं भवेत् ।
सुराः कुलप्रियाः सर्वे तस्मात् कौलिकमर्चयेत् ॥ १०६ ॥

जो कुछ कुलनिष्ठों के लिए किया जाता है, वह देवताओं के लिए होता है । सुरा कुल की प्रिया है, अतः सभी को उससे कौलिक का अर्चन करना चाहिये ॥ १०६ ॥

न तुष्याम्यहमन्यत्र तथा भक्त्या सुपूजितः ।
कौलिकेन्द्रेऽर्चिते सम्यक् यथा तुष्यामि पार्वति ॥ १०७ ॥

हे पार्वति ! मैं अन्य कहीं भक्तिपूर्वक सुपूजित होने पर उतना सन्तुष्ट नहीं होता, जितना कौलिकेन्द्र से पूजित किए जाने पर होता हूँ ॥ १०७ ॥

यत् फलं कौलिकेन्द्राणां पूजया लभते प्रिये ।
तत् फलं नाप्नुयात्तीर्थतपोदानमखव्रतैः ॥ १०८ ॥

हे प्रिये ! कौलिकेन्द्रों की पूजा करने से जो फल मिलता है, वह तीर्थ, तप, दान, यज्ञ एवं व्रतों से नहीं मिलता ॥ १०८ ॥

दत्तमिष्टं हुतं तप्तं पूजितं जप्तमम्बिके ।
कौलिकस्य भवेद्व्यर्थं कुलज्ञं योऽवमानयेत् ॥ १०९ ॥

कुलज्ञ की उपेक्षा करने से हानि—जो कुल के ज्ञाता का अपमान करता है, उसके द्वारा किया गया अभीष्ट दान, हवन, पूजन और जप सब व्यर्थ होता है ॥ १०९ ॥

श्मशानं तद् गृहं देवि स पापी श्वपचाधमः ।
यः प्रविश्य कुलं धर्मं कुलाचारं न वेत्ति चेत् ॥ ११० ॥

जो कुलधर्म में प्रवेश कर कुलाचार को नहीं जानता, उसका घर श्मशानवत् है और वह स्वयं चाण्डाल से भी अधिक पतित होता है ॥ ११०॥

कुलनिष्ठान् परित्यज्य यच्चान्यस्मै प्रदीयते।
तद्दानं निष्फलं देवि दाता च नरकं व्रजेत् ॥ १११ ॥
भिन्नभाण्डे जलं यद्वत् शिलायामुप्तबीजवत्।
भस्मनीव हुतं हव्यं तद्वद्दानमकौलिके ॥ ११२ ॥

हे देवि ! कुलनिष्ठों को छोड़कर जो अन्य को दान देता है, उसका वह दान निष्फल होता है और दान देने वाला नरक में जाता है। टूटे हुए बर्तन में जल, चट्टान में बोए हुये बीज और राख में किए गये हवन के समान अकौलिक को दिया गया दान व्यर्थ होता है ॥ १११-११२ ॥

यथाशक्त्या तु यत् किञ्चिद् यो दद्यात् कुलयोगिने ।
विशेषतिथिषु प्रीत्या तत्फलं नैव वर्ण्यते ॥ ११३ ॥

कुलयोगी को दान देने की विधि—यथाशक्ति जो कुछ भी प्रेमपूर्वक विशेष तिथियों में कुलयोगी को दान किया जाता है, उसके फल का वर्णन नहीं किया जा सकता ॥ ११३ ॥

यो देवि स्वयमाहूय कुलज्ञानान् शुभे दिने ।
अभ्यर्च्य देवताबुद्धया गन्धपुष्पाक्षतादिभिः॥ ११४ ॥
मादिभिः पञ्चमुद्राभिः सद्भक्त्या परितोषयेत्।
तेषु तुष्टेष्वहं तुष्टस्तुष्टाः स्युः सर्वदेवताः॥ ११५ ॥

हे देवि ! जो शुभ दिन में कुलज्ञानियों को स्वयं बुलाकर देवता मानकर गन्ध पुष्पाक्षत आदि से उनकी पूजा कर पञ्चमकारों से भक्तिपूर्वक उन्हें सन्तुष्ट करता है, तो उनके सन्तुष्ट होने पर मैं सन्तुष्ट होता हूँ और मेरे सन्तुष्ट होने पर सभी देवता सन्तुष्ट होते हैं ॥ ११४-११५ ॥

भगिनीं वा सुतां भार्यां यो दद्यात् कुलयोगिने।
मधुमत्ताय देवेशि तस्य पुण्यं न गण्यते ॥ ११६ ॥

हे देवेशि ! मधुमत्त कुलयोगी को जो शक्ति रूप से बहन, लड़की या भार्या को प्रदान करता है, उसके पुण्य की गणना नहीं की जा सकती ॥११६।

अनिखातविनिक्षिप्तमप्रयत्नेन वर्द्धितम् ।
परलोकस्य पाथेयं वीरचक्रेऽर्पितं मधु ॥ ११७ ॥

वीरचक्र में प्रयत्नपूर्वक अर्पित मधु परलोक के पथ को अनायास ही प्रशस्त करता है ॥ ११७ ॥

पापाचारसमायुक्तं सर्वलोकबहिष्कृतम् ।
जायते हि कुलद्रव्यं कुलयोगीश्वरार्पितम् ॥ ११८ ॥

पापाचार से युक्त और सभी लोकों से बहिष्कृत मद्य कुलयोगीश्वर को अर्पित करने पर 'कुलद्रव्य' बन जाता है ॥ ११८ ॥

यस्मिन् देशे वसेत् वीरः कुलपूजारतः प्रिये ।
सोऽपि देशो भवेत् पूतः किं पुनस्तत्पुरस्थिताः ॥ ११९ ॥

हे प्रिये! जिस देश में कुलपूजा करने वाला वीर निवास करता है, वह देश पवित्र हो जाता है। फिर उसके समक्ष रहने की महिमा क्या कही जाय ॥११९॥

कौलिकेन्द्रे सकृद्भुक्ते पुण्यं कोटिगुणं भवेत् ।
किं पुनर्बहुभिर्भुक्तैस्तत् पुण्यं नैव गण्यते ॥ १२० ॥

कौलिकेन्द्र के एक बार भोजन करने से दाता का पुण्य कोटि गुना अधिक हो जाता है । फिर उसके बहुत बार भोजन करने के पुण्य की तो गणना ही नहीं हो सकती ॥ १२० ॥

तस्मात् सर्वप्रयत्नेन सर्वावस्थासु सर्वदा ।
कुलधर्मरतो भूयात् कुलज्ञानिनमर्चयेत् ॥ १२१ ॥

अतः सब प्रयत्न करके, सभी अवस्थाओं में, सदैव कुलधर्म में तत्पर हो और कुलज्ञानी का अर्चन करे ॥ १२१ ॥

ज्ञानिनोऽज्ञानिनो वापि यावत् देहस्य धारणा ।
तावद्वर्णाश्रमाचारः कर्त्तव्यः कर्ममुक्तये ॥ १२२ ॥

वर्णाश्रम के आचार का पालन—ज्ञानी हो, चाहे अज्ञानी—सभी प्रकार से कर्म की मुक्ति के लिये, जब तक शरीर की स्थिति है, तब तक अपने अपने वर्ण और आश्रम के आचार का पालन करना चाहिए ॥ १२२ ॥

कर्मणोन्मूलितेऽज्ञाने ज्ञानेन शिवतां व्रजेत् ।
शिवे तेनैव मुक्तिः स्यादतः कर्म समाचरेत् ॥ १२३ ॥

कर्म करने का उद्देश्य–कर्म के द्वारा अज्ञान का उन्मूलन होने पर ज्ञान के द्वारा 'शिवत्व' की प्राप्ति होती है और शिव से ऐक्य स्थापित करने वाले की ही मुक्ति होती है । अतः कर्म का समुचित रूप से पालन करे ॥ १२३ ॥

कुर्यादनिन्द्यकर्माणि नित्यकर्माणि वा चरेत् ।
कर्ममुक्तः सुखाकाङ्क्षी कर्मनिष्ठः सुखं व्रजेत् ॥ १२४ ॥

अनिन्द्य कर्मों को या नित्य कर्मों को करे । कर्म से मुक्त होकर सुख की आकांक्षा करने वाला कर्मनिष्ठ होकर सुख से रहे ॥ १२४ ॥

सर्वकर्माणि संत्यक्तुं न शक्यं देहधारिणा ।
त्यजेत् कर्मफलं यो वा स त्यागीत्यभिधीयते ॥ १२५ ॥

कर्मयोग का अधिकारी—देहधारी मनुष्य सभी कर्मों का त्याग नहीं कर सकता। जो कर्मों के फल का त्याग करता है, वही 'त्यागी' कहा जाता है ।

स्वकार्येषु प्रवर्त्तन्ते करणानीति चिन्तयेत् ।
अहम्भावमपास्यैव यः कुर्यात् स न लिप्यते ॥ १२६ ॥

इन्द्रियां अपने कर्मों में लगी रहती हैं, ऐसा विचार कर जो अहंभाव को छोड़कर कर्म करते हैं, वे उनमें लिप्त नहीं होते ॥ १२६ ॥

क्रियमाणानि कर्माणि ज्ञानप्राप्तेरनन्तरम् ।
न च स्पृशन्ति तत्त्वज्ञं जलं पद्मदलं यथा ॥ १२७ ॥

ज्ञान हो जाने पर क्रियमाण कर्म तत्त्वज्ञ को स्पर्श नहीं करते, जिस प्रकार जल कमल की पंखुड़ियों से दूर रहता है ॥ १२७ ॥

तन्निष्ठस्य च कर्माणि पुण्यापुण्यानि संक्षयम् ।
प्रयान्ति नैव लिप्यन्ते क्रियमाणानि वा पुनः ॥ १२८ ॥

इस प्रकार कर्मनिष्ठ के पुण्य और पाप कर्मों का क्षय हो जाता है और क्रियमाण कर्मों में वह पुनः लिप्त नहीं होता ॥ १२८ ॥

उत्पन्नसहजानन्दतत्त्वज्ञानरतः प्रिये ।
संत्यक्तसर्वसङ्कल्पः स विद्वान् कर्म सन्त्यजेत् ॥ १२९ ॥

हे प्रिये ! तत्त्वज्ञान में मग्न साधक को सहजानन्द (स्वाभाविक आनन्द) का लाभ होता है । वह विद्वान् सब सङ्कल्पों का त्याग कर कर्म को छोड़ देता है ॥ १२९ ॥

वृथैव यैः परित्यक्तं कर्मकाण्डमपण्डितैः ।
पाषण्डाः पण्डितम्मन्यास्ते यान्ति नरकं प्रिये ॥ १३० ॥

अनधिकारी द्वारा कर्म त्याग निषिद्ध—हे प्रिये ! जो मूर्ख व्यर्थ ही कर्म काण्ड को छोड़ देते हैं, वे पाखण्डी और अहङ्कारी नरक में जाते हैं ॥ १३०॥

फलं प्राप्य यथा वृक्षः पुष्पं त्यजति निस्पृहः ।
तत्त्वं प्राप्य तथा योगी त्यजेत् कर्मपरिग्रहम् ॥ १३१ ॥

तत्त्वज्ञ ब्रह्मज्ञानी ही कर्म से मुक्त—जिस प्रकार फल को पाकर निस्पृह वृक्ष फूल को छोड़ देते हैं, उसी प्रक़ार तत्त्व को पाकर योगी कर्मानुष्ठान का त्याग करते हैं ॥ १३१ ॥

अश्वमेधायुतेनापि ब्रह्महत्यायुतेन च।
पुण्यपापैर्न लिप्यन्ते येषां ब्रह्म हृदि स्थितम् ॥ १३२ ॥

जिन साधकों के हृदय में ब्रह्म स्थित है, वे अयुत अश्वमेधों को करके या अयुत ब्रह्महत्याओं से युक्त होकर भी उनके पुण्य या पापों से लिप्त नहीं होते ॥ १३२ ॥

पृथिव्यां यानि कर्माणि जिह्वोपस्थनिमित्ततः।
जिह्वोपस्थपरित्यागी कर्मणा किं करिष्यति ॥ १३३ ॥

पृथ्वी पर जो कर्म जीभ और उपस्थ के लिये हैं, उन कर्मों से उन अङ्गों के त्यागी का क्या सम्बन्ध ? ॥ १३३ ॥

इति ते कथितं किञ्चित् योगं योगीशलक्षणम्।
समासेन कुलेशानि किं भूयः श्रोतुमिच्छसि ॥ १३४ ॥

॥ इति श्रीकुलार्णवे निर्वाणमोक्षद्वारे महारहस्ये सर्वागमोत्तमोत्तमे सपादलक्षग्रन्थे पञ्चमखण्डे ऊर्ध्वाम्नायतन्त्रे योग-संस्थापनकथनं नाम नवमोल्लासः ॥ ९ ॥

इस प्रकार मैंने योग और योगीश के कुछ लक्षण आपसे संक्षेप में कहे। हे कुलेशानि ! आप और क्या सुनना चाहती हैं ? ॥ १३४ ॥

॥ इस प्रकार श्रीकुलार्णवतन्त्र के ऊर्ध्वाम्नायतन्त्र में योगसंस्थापन-कथन नामक नौवें उल्लास की पं० चित्तरञ्जन मालवीय कृत हिन्दी पूर्ण हुई ॥ ९ ॥

विष्णुग्रन्थिंततोभित्वा रुद्रग्रन्थिञ्चलिष्ठति ।
ततस्तुकुम्भकेगाढे पूरयित्वापुनःपुनः ॥९१॥

फिर विष्णु ग्रन्थिभेद करके रुद्र ग्रन्थि विभेदन पूर्वक अवस्थिति करनी चाहिये । फिर बारंबार गाढ़तर कुंभक का अभ्यास करै ॥९१॥

एवंनित्यमभ्यसेच्च स्याच्चतुष्टयकुम्भकं ।
वन्धत्रयेणसंयुक्तः केवलंप्राप्तिकारकः ॥
अथास्यलक्षणंसम्यक् कथयामिसमासतः९२

इस प्रकार नित्य अभ्यास से क्रमानुसार चार कुंभक का अभ्यास होता है, तब तीनबंधन संयुक्त होकर केवल उद्देश साधन का प्राप्ति कारक होता है । अब मैं विस्तार पूर्वक इसके लक्षण का विषय कहता हूं ॥९२॥

एकाकिनासमुपगम्यविविक्तदेशंप्राणादिरूपमभृतंपरमार्थतत्वं । लब्धाशिनीधृतिमतापरिभावितव्यं संसाररोगहरमौषधमद्वितीयं९३

जो व्यक्ति योगी है, उसको धैर्यावलम्बन पूर्वक प्रथम निर्जन प्रदेश आश्रय करनी चाहिये फिर प्राणादि रूप अमृत पान करके परमार्थ तत्वको चिन्ता करनी कर्त्तव्य है तिसकाल दीर्घ कालतक जीवन धारणोपयोगी आहार वृत्ति ग्रहण करनी चाहिये, यथार्थ कहा गया है, परमार्थ तत्व संसार रोग के लिये अद्वितीय औषधी है ॥९३॥

सर्व्वनाड्यासमाकृष्य वायुमभ्यासयोगिनां
विधिवत्कुम्भकंकृत्वा रेचयेत्शीतरश्मिता ॥

जो अभ्यास के वल से योगी है, उसको नाड़ी आकर्षण पूर्वक वायु ग्रहण करनी चाहिये। फिर विधि पूर्वक कुंभक का अनुष्ठान करके शीतल किरणों के संयोगमें रेचक क्रियाकरै ॥

उदरेवातदोषघ्नं कण्ठदोषंनिहन्तिच ।
मुहुर्मुहुरिदंकार्य्यं सूर्य्यभेदमुदाहृतं ॥९५॥

इस कार्य के द्वारा उदर की वायु और कण्ठ दोष का विनाश होता है। यथार्थ कहा जाता है यह कार्य वारंवार करना चाहिये, इसकाही नाम सूर्य भेद है ॥९५॥

नाड़ीभ्यांवायुमाकृष्य कुण्डल्याःपार्श्वयोर्नरः
धारयेदुदरेसोऽपि रेचयेदिडयासुधीः ॥९६॥

जो व्यक्ति बुद्धिमान है, नाड़ी समूह के द्वारा वायु आकर्षण पूर्वक इनकी सहायता से कुण्डलिनी के पार्श्व में और उदर में धारण करना उनका कर्त्तव्य है ॥९६॥

कण्ठकफादिदोषघ्नं शरीराग्निविवर्द्धनं ।
शिरोजलोदधारातु गलरोगविनाशनं ॥९७॥

इसके प्रभाव से कण्ठमें कफका अधिकार नष्ट, शरीर का तेज वर्द्धित मस्तक स्निग्ध और सब रोग निवारित होते हैं ॥

गच्छतस्तिष्ठतःकार्य्यं उज्जयाख्यन्तुकुम्भकं।

मुखेनवायुसंगृह्य प्राणरन्ध्रेविरेचयेत् ॥९८॥

योगी व्यक्ति क्यास्थिति क्या गमन क्योंन करै, उसको उज्जय नामक कुंभक का अनुष्ठान करना चाहिये, इसकार्य में मुख द्वारा वायु ग्रहण पूर्वक प्राण रन्ध्र में विरेचन करने का नियम है ॥९८॥

शीतलीकरणंचेदं हन्तिपित्तंतथाज्वरं ।
स्तनयोरथभस्त्रेव लोहकारस्यवेगतः ॥९९॥

इसका नाम स्निग्धि करण है और इसके द्वारा पित्त कोप और ज्वर कोप नष्ट होता है, कर्मकार जिस प्रकार बेग सहित रयभस्त्रा की शक्ति चालित करके शब्दित करते हैं यह भी इसी प्रकार है ॥९९॥

रेचयेत्पूरयेत्वायु माश्रमंदेहगंधिया ।
यदाश्रमोभवेद्देहे तथासूर्येणरेचयेत् ॥१००॥

चतुरयोगी को अपने देहाश्रम में रेचक और पूरक का कार्य करना चाहिये और सूर्य के सहित रेचक का अनुष्ठान करनाही विधि है ॥१००॥

कण्ठसंकोचनंकृत्वा पुनश्चन्द्रेणरेचयेत् ।
वातपित्तश्लेष्महरं शरीराग्निविवर्द्धनं ॥१०१

तदनन्तर कंठका संकोच करके चन्द्रके सहित रेचक करनो चाहिये, इसके द्वारा वात पित्त और कफ की शक्ति शान्त होती है और शरीर की अग्नि बढ़ती है ॥१०१॥

कुण्डलीवोधकंवक्त भावघ्नंसुखदंशुभं ।
ब्रह्मनारीसुखंसंस्थ्यं कफाद्यर्गलनाशनं॥१०२

यदि कुण्डली का रोध होतो वक्रभाव दूरीभूत सुख और स्वास्थ अधिकृत होता है और कफादिक की कोई मति बंधकता नहीं रहती ॥१०२॥

सम्यक्गात्रसमुद्भूत ग्रान्थित्रयविभेदकं ।
विशेषैवकर्त्तव्यं भस्त्रीख्यंकुम्भकन्तुदं १०३

विशेष प्रकार से भस्त्र नामक कुंभक का अनुष्ठान करना चाहिये, इसके द्वारा शरीरोत्पन्न तीनों ग्रन्थिका विभेद होताहै ॥

चतुर्णामपिभेदानां कुम्भकेसमुपस्थिते ।
वन्धत्रयमिदंकार्य्यं वक्ष्यमाणंमयास्फुटं १०४

चार भेद विषय में कुम्भक का आविर्भाव हुआ है, मैं तुम्हारे निकट स्पष्ट भाव से जो कहता हूं इन्हीं तीन बंधन का अनुष्ठान करना चाहिये ॥१०४॥

प्रथमोमूलवन्धस्तु द्वितीयउड्डियानकः ।
जालन्धरस्तृतीयस्तु लक्षणंकथयाम्यहं १०५

प्रथम मूलबंध, द्वितीय उड्डीयान और तृतीय जालन्धर नामसे परिचित है, मैं क्रमानुसार इनका लक्षण वर्णन करताहूं ॥

योनिपार्ष्णाभ्यांतुसंपीड्य वायुमाकुञ्चयेद्बलात्।
वारंवारंतथाचोर्द्धं समायातिसमीरणः १०६

पार्ष्णिदेश (पैरका तलुआ) द्वारा योनि को निपीडित करके बल पूर्वक वायुको आकुञ्चित करना। इस प्रकार करनेसे वायु वारंवार ऊर्द्ध में प्रसर गति होती है ॥१०६॥

प्राणापानंनादविन्दु मूलवन्धेनचैकतां।
गत्वायोगस्यसंसिद्धिं यच्छतेनात्रसंशयः १०७

मूलबंध द्वारा प्राण और अपान के सहित जो नादविन्दु मिलित होता है, उस में निःसन्देह योगी को सिद्धावस्था होती है ॥१०७॥

कुम्भकास्तेरेचकान्ते कर्त्तव्यस्तूड्डियानकः।
बद्धोयेनसुषुम्नायां प्राणस्तूड्डियतेततः १०८

रेचक और कुंभक के अन्त में उड्डियान नामक बंधन का अनुष्ठान करना चाहिये, यह सुषुम्ना में बद्ध होने से प्राण को उड्डीन दशामें होती है ॥१०८॥

तस्मादुड्डियानाख्योऽहं योगिभिःसमुदाहृतः
उड्डियानस्तुसहजं गुरुणाकथितंमुदा ॥१०९॥

योगीगण इसका नाम उड्डीयान कहते हैं, गुरु प्रसन्न मनसे इसकाही स्वाभाविक गुण गरिमा वर्णन करते हैं १०९

अभ्यासादस्वतन्त्रस्तु वृद्धोऽपितरुणायते।
नाभेरूर्द्धमधश्चापि प्राणंकुर्य्यात्प्रयत्नतः११०

वास्तविक अभ्यास होनेसे इसके द्वारा स्वतंत्रता लाभ

होती है, अन्यबात क्याहै, इसकी शक्ति से वृद्धभी नवीन भाव धारण करता है। जोहो, सर्व प्रयत्न से प्राण को नाड़ी के अर्द्ध और अधोदेश में स्थापन करना चाहिये ॥११०॥

षन्मासमभ्यसेन्मृत्युं जयत्येवनसंशयः ।
पूरकान्तेतिकर्त्तव्यो बन्धोजालन्धराभिधः ॥

अधिक क्या कहूं यदि इस प्रकार के अभ्यास से छैमास पर्यन्त कार्य किया जायतो जीवमृत्यु को जीतसकता है जोहो पूरक के अन्त में जालन्धर नामक बंधन का अनुष्ठान करना चाहिये ॥१११॥

कण्ठसंकोचरूपोऽसौ वायुमार्गनिरोधकः ।
कण्ठमाकुञ्च्यहृदये स्थापयेद्दृढमिच्छया ॥

यह बंधन कंठ शक्ति का संकोचक और वायु पथ निरोधक है कंठको आकुञ्चन करके हृदय में रक्षा करनाही दृढता भिलाषी योगी का कार्य है ॥११२॥

बन्धोजालन्धराख्योऽयममृताव्ययकारकः
अधस्तात्कुञ्चनेनाशु कण्ठसंकोचनेनच ११३

मध्यमाभ्रमणेनस्यात् सप्राणोब्रह्मनाड़िगः
वज्रासनस्थितोयोगीचालयित्वातुकुण्डलीं ॥

यह जालन्धर नामक बंधनही अव्यय और अमृत दायक है, अधःस्थान कुंचन और कंठ संकोचन द्वारा मध्यमा भ्रमण

हस्तौ पादौ च कण्ठो भवति समशिरः कूर्मः, अपरा **सूक्ष्मनाड्यः करचरणमुखे कण्ठदेशे** करचरणानां षट्सन्धिषु मुखकण्ठे सहजसम्भोगनाड्योऽतिसूक्ष्माश्च**चतुर्थे मासे** पूर्णे सति भवन्तीति **कूर्मा**वस्था। **पञ्चमे** मासे वाराह्ये भावे **मांसान्याश्रित्य चास्थीनि खरसहुतभुगिति** षष्ट्युत्तरत्रिशतान्यस्थीनि **सन्धयश्च** तावत् यः **षष्ठे मासे च** चकारात् **वाराह्ये** भावे **मांसं रुधिरं भवति**, वेदना भवति, सुखदुःखं च वेत्ति, अभिज्ञाबलेन पूर्वनिवासानुस्मृतिं च, स्वचित्तेन वैराग्यं करोति, भवदुःखं निन्दयति, **बुद्धमार्गं** प्रशंसयति।

T 297

भ्रूकेशा रन्ध्ररोमाण्यपि मुनिवरे नाडिकाः सावशेषा
मासादूर्ध्वं हि जाताः प्रतिदिनसमये शून्यशून्याक्षिसंख्या।
मर्माण्यस्थीनि मज्जा भवति च रसना मूत्रगूथेऽष्टमे च
रन्ध्राख्ये घोरदुःखं प्रसवनसमये योनिना पीडितस्य ॥११॥

ततो **भ्रूकेशा रोमरन्ध्राणि** चक्षुरादीनि। **अपि च** वाराह्ये भावे **मुनिवरे** सप्तमे मासे पूर्णे सति सम्पूर्णान्यायतनानि भवन्ति। इह गर्भ**मासादूर्ध्वं प्रतिदिनसमये शून्यशून्याक्षिसंख्या** द्विशतसंख्याः **प्रत्य**हं नाडिका भवन्ति। ततः षष्ट्युत्तरत्रिशत**मर्माणि अस्थीनि**, तन्मध्ये **मज्जा भवति रसना** जिह्वा जिह्वेन्द्रियोत्पादाय, [89a] पूर्वंचक्षुरादयो भवन्ति कठिनाः। ततो रसनोत्पादकालादिह **मूत्रगूथे चाष्टमे** मासे भवतः। वाराह्ये भावे ततो **रन्ध्राख्ये** नवमे मासे पूर्णे सति क्वचिद् दशमे, एकादशे द्वादशे वा वाराह्यभावावसाने **घोरदुःखं** भवति **प्रसवनकाले योनिना पीडितस्य** नारसिंहे भावे गर्भजातकस्येति गर्भोत्पत्तिनियमः।

चतुरार्यसत्येषु संसारिणां दुःखसत्यमाह **गर्भे** इत्यादि—

गर्भे गर्भस्थदुःखं प्रसवनसमये बालभावेऽपि दुःखं
कौमारे यौवने श्रो (स्त्री)[1]धनविभवहृतं क्लेशदुःखं महद् यत्।
वृद्धत्वे मृत्युदुःखं पुनरपि भयदं षड्गतौ रौरवाद्यं
दुःखाद् गृह्णाति दुःखं सकलजगदिदं मोहितं मायया च ॥१२॥

इह संसारिणां प्रथमं तावत् **गर्भे** स्थितानां **गर्भस्थदुःखं** कुम्भीपाकसदृशं भवति **प्रसवनसमये** मुद्गरयन्त्रपीडितवत्, **बालभावेऽपि** विष्ठाभक्षणे शूकरवत्, **कौमारे यौवने** च **श्री(स्त्री)**[1]वियोगदुःखं **धनविभवहृतं** दुःखम्, तदभावात्। **वृद्धत्वेऽपि** जरामरणदुःखम्, **पुनरपि** मरणान्ते **षड्गतौ भयदं रौरवाद्यम्**। आदितः प्रेततिर्यग्गतौ रौद्रं दुःखं भवति पापवशाद् दशा(श)कुशल[2]परित्यागात्। एवं **दुःखाद् गृह्णाति दुःखं सकल-**

---

१. भो. Bud Med (स्त्री)। २. भो dGe ba bCu (दशकुशल)।

जगदिदं मोहितं मायया च। इह संसारे मायया मोहितमहङ्कारममकारात्मिकया नरक-प्रेततिर्यग्गतो दुःखं गृह्णातीति।

मार्गसत्यमाह **संसार** इत्यादि—

संसारे मानुषत्वं क्वचिदपि तु भवेद् धर्मबुद्धिः कदाचित्
तस्माद् बुद्धेऽनुरागो भवति शुभवशादादियाने प्रवृत्तिः। 5
तस्माद् श्रीवज्रयाने क्वचिदखिलमतिर्वर्त्तते भावनायां
तस्यां बुद्धत्वमिष्टं परमसुखपदेऽहो प्रवेशोऽतिकष्टः (कष्टम्) ॥१३॥

[89b] इह षट्गत्यात्मके **संसारे मानुषत्व क्वचिदपि तु भवेत्**, ततो **धर्मबुद्धिः कदाचिद्** भवति नराणां तीर्थिकदानादिधर्मेषु। **तस्माद् बुद्धेऽनुरागः** कदाचित् **शुभवशाद्** भवति, दानाद्यनुरागोऽपि। ततोऽपि **शुभवशादादियाने प्रवृत्तिर्भवति** श्रावकप्रत्येक- 10 बुद्धयाने। **तस्मात् श्रीवज्रयाने** प्रवृत्तिः, वज्रमभेद्यमच्छेद्यं महदिति। तदेव यानं मन्त्र-नयं पारमितानयं फलहेत्वात्मकम्, एकलोलीभूतम्, तस्मिन् प्रवृत्तिर्वज्रयाने प्रवृत्तिः। ततः **क्वचिदखिलमतिर्वर्त्तते भावनायाम्**, कस्याञ्चित्[1] सालम्बनशून्यतानिरालम्बन-करुणात्मिकायां पुण्यज्ञानवशेन, **तस्यां** भावनायां **बुद्धत्वमिष्टं** भवति। एवं **परमसुख-पदेऽहो प्रवेशोऽतिकष्टः** (ष्टम्) दूराद् दूरतरः संसारिणां संसारसुखाभिलाषिणामिति। 15

समुदयसत्यमाह **गर्भ** इत्यादिना—

गर्भे संशुद्धकायः प्रसवनसमयाद् दन्तभावोऽर्थं (भावे च)[2] धर्मः
दन्तानां वै प्रपातः प्रभवति नृप सम्भोगकायो जिनस्य।
तस्मान्निर्माणकायः प्रकटितनियतो मृत्युसीम्नो नराणां
गर्भे बाह्ये चतुर्धा भवति पुनरसौ ज्ञानविज्ञानभेदात् ॥ १४ ॥ 20

इह प्रथमं लोकसंवृत्या **विशुद्धकायादिकं** गर्भजातस्य शरीरे संदृश्यते; पश्चाद् तद् वै धर्मेण बुद्धस्य भगवतः सुविशुद्धकायादिकं योगिभिर्वेदितव्यम्। अत्र मातृगर्भे यावत् तिष्ठति तावत् पञ्चाभिज्ञो **संशुद्ध कायो** भवति शरीरिणः। ततः **प्रसवनसमयमारभ्य** यावद् **दन्तोत्थानं** तावद् धर्मकायो भवति। ततो दन्तोत्थानाद् यावद् **दन्तप्रपातो** भवति तावत् **सम्भोगकायो जिनस्य** बोधिचित्तवज्रस्य। **नृपे**त्यामन्त्रणम्। **तस्माद्** दन्तपाता- 25 **न्निर्माणकायः प्रकटितो नियतो मृत्युसीम्नो नराणां** गर्भजानामिति। **गर्भे बाह्ये चतुर्धा भवति, पुनरसौ** कायसमूहः, इह **ज्ञानभेदात्** गर्भे षड्विज्ञानभेदात् बाह्ये, **ज्ञानविज्ञान-भेदा**दिति। [90a]

---

१. क. ख. कस्याचित्ते।
२. भो. So Ni sKyes Pa Dag Kyaṅ (दन्तोत्थानं)।

विज्ञानं चन्द्रसूर्यावपि कमलगताः शुद्धकायः स गर्भे
धातुस्कन्धोद्भवो यो भवति दशविधो धर्मकायो जिनस्य ।
तस्मात् सम्भोगकायो भवति गुणवशाच्छोत्रशब्दादिजाते
तस्मात् केशादिजाते प्रसवनसमयश्चात्र निर्माणकायः ।। १५ ।।

अत्र **गर्भे** तावद् **विज्ञानम्** आलयविज्ञानं सत् सौख्यं ज्ञानमिति । **चन्द्रसूर्यौ** शुक्र-रजसी **अपि कमलगता** मातृकमलगतास्त्रयः एकीभूता गर्भनिष्पत्तये; **शुद्धकायः स गर्भे** भगवत(ता) उच्यते, मात्रापित्रा(त्र्या) लयविज्ञानैकसुखावस्थातः । **धातुस्कन्धानामुद्भवो यो दशविधः**, स **धर्मकायो जिनस्य** बोधिचित्तवज्रस्य । अतोऽध्यात्मश्रोत्रादीनामि-न्द्रियाणां **शब्दादीनां** विषयाणां **जाते** सति **गुणवशाद्** दिवसवशात् **सम्भोगकायो भवति** । **तस्मात् केशादिजाते** आदितः लोमविट्मूत्रनिष्पत्तिः । **प्रसवनसमयो** योनेरु-त्पादो **निर्माणकाय**[1] उच्यते गर्भे ।

जाते श्वासोद्भवो यः भवति निर्गुणः शुद्धकायः स एव
तस्मात् दन्तोद्भवो योऽस्फुटमपि वचनं धर्मकायस्तथैव ।
तस्मात् पातो द्विजानां प्रसवति नृप सम्भोगकायो जिनस्य
दन्तेभ्यः मृत्युसीम्ने भवति जिनपतेर्बाह्यनिर्माणकायः ।। १६ ।।

ततो बाह्ये कायचतुष्टयं(ये) **जाते** सति **श्वासस्य** प्रथम **उद्भवो यो** मध्यनाड्यां **भवति, स निर्गुणो** वाग्वज्रविषये सं**शुद्धकायः, स एव** सपादषट्पञ्चाशत्श्वाससमूहं यावत् तावत् शुद्धकायो मध्यमाप्रवाहतः । **तस्मात्** प्राणसञ्चारवशाद् **दन्तोद्भवो योऽस्फुटमपि वचनं** यत् तत् संज्ञालक्षणम्, स वाग्वज्रविषये **धर्मकायः** । **तस्मात् पातो द्विजानां** दन्तानां पातो भवति, यावत् **सम्भोगकायो**ऽष्टवर्षपर्यन्तं परिस्फुटवचनात् । **दन्तेभ्यः** पतितेभ्योमृत्युपर्यन्तं **निर्माणकायो बाह्ये** भवति । इह गर्भे काय[90b]भेदेन चतुर्विधः कायभेदः । बाह्ये प्राण[सं]चारभेदेन चतुर्धा कायभेदो ज्ञानं विज्ञानं च देहे (अन्तः)[2] बाह्येऽपि कायप्राणयोः सहायः । अत्र कायभेदः शुक्रसम्बन्धी, वाग्भेदो रक्तसम्बन्धी; एवं व्याप्यव्यापकसम्बन्धेन चित्तभेदेन चतुर्विधः कायभेदः । जाग्रदादिलक्षणेन ज्ञानभेदे-नापि चतुर्विधः कायभेदः, आनन्दादिना चतुर्विधस्वभावेनेति देहे बाह्ये सहजादिकायो-त्पादनियमः ।

कायवाक्चित्तज्ञानोत्पत्तिमाह **गर्भे** इत्यादिना—

गर्भे श्रीकायवज्रं प्रथममिह भवेद् वाक्स्वरूपं प्रसूते
चित्तं दन्तोद्भवे वै पुनरपि पतनादुद्भवे ज्ञानवज्रम् ।
ज्ञानं विज्ञानमिश्रं रविशशिसहितं ज्ञानवज्रादिसर्वं
गर्भे रूढं क्रमेण प्रभवति बलवत् कायवज्रादिना च ।।१७।।

---

१. क. ख. निर्माण । २. भो. Nan (अन्तः) ।

इह मातृगर्भे ज्ञानं सहजानन्दं विज्ञानमिश्रितमालयविज्ञानम्, रविशशिसहितं रजःशुक्राभ्यां सहितं ज्ञानवज्रादिसर्वं सहजानन्दादिकं भवति। गर्भे रूढं क्रमेण प्रभवति बलवत् कायवज्रादिना च। अत्र प्रथमं[1] गर्भे[2] श्रीकायवज्रं भवति प्रसूत्यवधिं यावत्, कायावयवनिष्पत्तिरित्यर्थः। ततः प्रसूते वाग्वज्रं प्राणसंचारः प्राणोत्पत्तिः। ततश्चित्तं[3] संज्ञाग्राहकं[4] द्वात्रिंशद्दन्तोभवे सति भवति। वै इत्येकान्तनिश्चितमित्यर्थः। 5 T298 पुनरपि दन्तपतनात् द्वात्रिंशद्दन्तोद्भवे सति स्त्रीणां द्वादशवर्षावधि ज्ञानवज्रं शुक्रच्युत्यवस्थालक्षणं सहजानन्दलक्षणं[5] नराणां षोडशवर्षावधेर्वेदितव्यमिति कायवाक्चित्तज्ञाननिष्पत्तिकथनम्।

आधाराधेयसम्बन्धमाह पृथ्वीत्यादि—

पृथ्वीगर्भो हुताशो भवति च (न)[6] धरणीमारुतौ शून्यगर्भो 10
वायोर्भूमेश्च गर्भो भवति हि सलिलं निःस्वभावःस्वभावम्।
भूमेराधार अम्बु ज्वलनमपि जलस्यानिलः पावकस्य
वायोः शून्यं नरेन्द्र प्रभवति हि तथाधार आधेयभूतः॥ १८ ॥[91a]

इह पृथ्व्या गर्भो हुताशोऽग्निर्भवति, न तत्कुली, पृथ्वीगुणस्वभावाभावात्। आकाशगर्भे[7] शून्यमध्ये तिष्ठतो धरणीमारुतौ न[8] तत्कुलजातौ, आकाशगुणाभावात्। 15 एवं वायुगर्भ(:) भूमेश्च गर्भ(:) सलिलं भवति; तदेव वायुगर्भे निःस्वभावानुरूपेणावस्थितम्[9]; यत्र यत्र वायुः संसरति, तत्र तत्र तेन सार्द्धं व्रजति। यद् भूमिमध्ये व्यवस्थित तत् स्वभावं द्रवरूपं खन्यमानं दृश्यते भूम्यमिति। अत्र पुनः सर्वेषां पृथ्व्यादीनामाकाशमाधारः, पृथिव्यादयो भूता आधेयाः। अत्र यथाक्रममाधाराधेयौ भवतः। भूमेराधारमम्बु भूमिमण्डलस्य बाह्ये यथा जलमण्डलमाधरः तथा शरीरेऽपि। ज्वलनमप्यग्निमण्डलं जलस्येति जलमण्डलस्याधारः। अनिल इति वायुपण्डलम्। पावकस्याग्निमण्डलस्य वायुरिति वायुमण्डलस्स्य शून्यमाकाशमाधारः। एवं सर्वेषां भूतानां पृथिव्यादीनां शून्यमाधारो भवति॥ 20

समूहाधाराधेयमाह स्कन्ध इत्यादि—

स्कन्धाधारो हि भौतो भवति वरतनौ भूतवृन्दस्य नाड्यो 25
नाडीनां प्राणवायुर्भवति दशविधश्चेतना प्राणवायोः।
तच्चित्तं द्विस्वभावं भवति गुणवशात् सस्वभावास्वभावं
भर्त्ताधारस्तयोश्च त्रिभुवननमितोऽनाहतः सर्वगो यः॥ १९ ॥

१-२. ख. प्रथमगर्भे। ३-४. क. ततश्चित्तसंज्ञाग्राहकं। ५. क. सहजानन्दक्षणं।
६. भो. Ma yin (न)। ७. क. ख. ०गर्भो। ८. भो. Ma yin (न)।
९. क. ख. निःस्वभावमन्दरूपेण; ग. ० मण्डरूपेण।

इह शरीरे **पञ्चस्कन्धानामाधारो हि भौतं** (तो) पृथिव्यादिभूतसमूहं (हो) भवति। तत्कस्य हेतोः ? इह पृथिव्यादिप्रकृतेरभावात् प्रत्ययो नास्त्यविद्यादिकः। अविद्यासंस्कारविज्ञानादिप्रत्ययाभावे रूपादिस्कन्धाभावः। यतश्चतुर्भूतात्मकं रूपम्, षड्धात्वात्मको महापुरुषपुद्ग(द्ग)लः, अतः स्कन्धाधारो हि भौतं(तो)भवति। **वरतनौ** 5 **भूतवृन्दस्य नाड्यो** द्वासप्ततिसहस्रसंख्या भवन्त्याधारास्तासां **नाडीनामपि प्राणवायुराधारः**, संस्कारकारणात्। स च **दशविधो** वक्ष्यमाणो वक्तव्यः। **चेतना** [91b] **प्राणवायोराधारः**; सा चेतना **तदेव द्विस्वभावं चित्तं भवति**, **गुणवशादिति** सत्त्वरजोवशात् (स)स्वभावं[1] जाग्रत्स्वप्नलक्षणम्, तमोगुणवसान्निःस्वभावं सुसु(षु]प्तलक्षणं निरिन्द्रियं भवति। **तयोश्च** सस्वभावास्वभावयो**र्भर्त्ताधारः** सुखदुःखावस्थाधावी(धारी)[2] संसारि- 10 णाम्। स च सुखदुःखाभ्यां रहितस्त्रि**भुवननमितो यः** सोऽनाहतः **सर्वगो भवति** सुखदुःखान्तकृन्निष्ठ इति।

गन्धोत्पत्तिर्धरण्यामपि शिखिनि रसस्योदके रूपधातोः
वायौ स्पर्शस्य शान्ते त्वपि भवति रवस्याम्बरे धर्मधातोः।
शून्यं गृह्णाति शब्दं खलु जिनजनको धर्मधातुं च वायुः
15 गन्धं वह्निश्च रूपं रसमपि सलिलं स्पर्शमेव धरित्री ॥ २० ॥

धातूनां[3] जन्यजनकसम्बन्धमाह **गन्ध** इत्यादिना—

इह बाह्ये वाऽध्यात्मनि **गन्धोत्पत्तिर्धरण्यां** भवति मुख्यतः, रसादीनां पुनर्गौणत इति। **अपि** सम्भावने, **शिखि**न्यग्निधातौ **रसस्य** षट्प्रकारस्याग्नेः परिपाकहेतुतो रसस्योत्पत्तिर्भवति, यतस्तस्मा**दुदके रूपधातोः**। इहाङ्कुरादीनां प्ररोहादिकं नानावर्णं 20 नानासंस्थानमुदकाद् भवति मुख्यतः, गौणतः पुनः रसादीनामप्युत्पत्तिः। एवं **वायौ** वायुधातौ **स्पर्शस्यो**त्पत्तिर्भवति; **शान्ते** ज्ञानधातौ **रवस्ये**ति शब्दोत्पादः। **अम्बरे** पञ्चात्मकरसधातौ शूतके (सूचके)[4] धर्मधातोर्बोधिचित्तधातोरुत्पत्तिर्भवति सुखावस्थाया इति।

इदानीं ग्राह्यग्राहकसम्बन्ध उच्यते—

25 इह परकुलालिङ्गनतः कार्यसिद्धिर्भवति, स्वकुलालिङ्गनेन स्वात्मनि क्रियाविरोधात्। अतः परकुलालिङ्गनं शरीरोत्पत्तिकारणं भवति। तेन **शून्यमिति** शून्यकुलोद्भूतं श्रोत्रेन्द्रियं **गृह्णाति शब्दं** ज्ञानधातूद्भूतम्। **खलु जिनजनक** इति निश्चितं ज्ञानधातूद्भूतं मनइन्द्रियं गृह्णाति, **धर्मधातुमा**काशधातूद्भूतविषयम्। **वायुरिति** जन्यजनकाभेद्यत्वेन वायूद्भूतं घ्राणेन्द्रियं भूमिधातूद्भूतं **गन्धविषयं** गृह्णाति। **व**[92a]**ह्नि**-

---

१. भो. Rañ bSin Can (सस्वभावं)। २. ग. भो. ḥdzin Pa (धारी)।
३. अत्र ख. पुस्तके 'गन्धोत्पत्तिर्धरण्यामपि शिखिनि रसस्योदके रूपधातोः वायौ इत्यादिश्लोकः' इत्यधिको लिखितः। ४. भो. gSal Bar Byed Pa (सूचके)।

श्चेति अग्निधातूद्भूतं चक्षुरिन्द्रियं गृह्णाति तोयधातुजनितं **रूपविषयम्**। **वह्निधातु-जनितं** रसविषयं जलधातूद्भूतं रसनेन्द्रियं गृह्णाति। **धरित्री** पृथ्वीधातूद्भूतं कायेन्द्रियं गृह्णाति वायुधातूद्भूतं स्पर्शविषयमिति विषयविषयिणां ग्राह्यग्राहकलक्षणनियमः।

लोकसंवृत्या रूपादीनां स्कन्धानां प्रत्येकधातौ सिद्धिमाह **सिद्धमित्यादि**—

सिद्धं रूपं धरण्यां त्रिभुवननिलये चोदके सिद्धसंज्ञा 5
वह्नौ वै वेदना च प्रभवति पवने सिद्धसंस्कार एव।
विज्ञानं ज्ञानमिश्रं सगगनकुलिशे सिद्धमेवात्र काये
धातुस्कन्धादिसर्वं भवति च रजसा बोधिचित्तादियोगात् ॥ २१ ॥

इह धातुस्कन्धानामैक्यं **सिद्धमुच्यते**; अत्र **धरण्यां** मुख्यतो **रूपं सिद्धम्**, संज्ञादयो गौणतः सिद्धाः। **त्रिभुवननिलये** त्रैधातुकविषये, न निर्वाणधर्मे भवतीति। **चकारादुदके** 10 **संज्ञा सिद्धा** भवति। इह संज्ञानामस्वरधर्मचन्द्रः, शुक्रं तोयप्रकृतिः, तोयप्रकृतित्वात् संज्ञा सिद्धा भवति, **उदक** इति निश्चयः। **वह्नौ वै वेदना चेति** इह वह्निप्रकृतिः सूर्यो रजः, कालिः सूर्यरजः कालिस्वभावा वेदना। अतो वह्नौ वेदना सिद्धा भवति मुख्यतः, शेषा गौणतः **प्रभवन्ति**। **पवने सिद्धः संस्कारस्कन्धः**, एवमत्र वायुः कायवाक्चित्त-संचालकः संस्कारजनकः, तेन वायुप्रकृतिः संस्कारः सिद्धः। एवं **विज्ञानं ज्ञानमिश्रं** 15 ज्ञानसहितम्। यथाक्रमं **सगगनकुलिशे** आकाशे विज्ञानं सिद्धं श्रोत्रविज्ञानादिलक्षणम्। **कुलिशे** ज्ञानधातौ ज्ञानं **सिद्धं** बोधिचित्तच्यवनान्ते सुखक्षणात्मकम्। **अत्र काये** षड्-धात्वात्मके महापुरुषपुंग(पुद्ग)ले। कस्माद् **धातुस्कन्धादिसर्वमित्याह**। **रजसा बोधि-चित्तादियोगात्** इह शरीरे धातुस्कन्धादिकं यत् सर्वं तद् रजः शुक्रालयविज्ञानसुख-क्षणावस्थासंयोगाद् भवति [92b]। 20

श्रोत्रादीनां ग्राहकाणां शब्दादिविषयग्राहकत्वेन तत् स्वभावत्वमाह **श्रोत्र-मित्यादि**—

श्रोत्रं वज्रस्वभावं भवति नरपते चित्तमाकाशभावं
घ्राणो भूमिस्वभावो भवति च रसना वह्निभावा तथैव।
चक्षुस्तोयस्वभावं त्रिभुवननिलये वायुभावश्च कायः 25
एवं श्रोत्रादिसर्वं भवति गुणवशात् ज्ञानविज्ञानयोगात् ॥ २२ ॥

इह शरीरधर्मे **श्रोत्रं** ग्राहकत्वेन शून्यलक्षणं ग्राह्यविषयग्रहणेन **वज्रस्वभावं** शब्दस्वभावमिति। अत्र ग्राहको धर्मः कायभेद उच्यते, ग्राह्यो धर्मो भावभेदः। अतो ग्राह्यस्वभावेन जन्यजनकस्वभावो विज्ञेयो **नरपत** इत्यामन्त्रणम्। **चित्तं** मनः **आकाश-स्वभावं** धर्मधातुस्वभावम्, धर्मधातुविषयग्राहकत्वात्। **घ्राणो भूमिस्वभावो** गन्ध- 30 स्वभावः, गन्धग्रहणाद्। **भवति च रसना वह्निस्वभावा तथैव**, यथा पूर्वे वह्निजन्म-

T299 (न्य)रस(स्व)भावो[1] रसग्रहणात् । **चक्षुस्तोयस्वभावम्**, तोयजनितरूपग्रहणात् । **त्रिभुवननिलये**, न निर्वाणे । **वायु[स्व]भावश्च काय** इति कायेन्द्रियं वायुजनितं स्पर्शविषयग्रहणात् । **एवमुक्तक्रमेण श्रोत्रादिकं सर्वं भवति गुणवशादिति** शब्दधर्मधातुगन्धरसरूपस्पर्शवशात् । श्रोत्रं मनो घ्राणो जिह्वा चक्षुः कायः—एते षडिन्द्रियधातवः **ज्ञानविज्ञानयोगाद्** विज्ञेया इति ।

षड्धातुवशेन मात्सर्यादयः (दीन्) षट् चित्तविकारानाह **मात्सर्यमित्यादि**—

मात्सर्यं ज्ञानधातौ भवति वरतनौ चाम्बरे द्वेषवज्रं (चित्तम्)
ईर्ष्याचित्तं हि वायौ प्रकटितमनले रागचित्तं तथैव ।
तोये श्रीमानवज्रं(चित्तं) प्रकृतिगुणवशान्मोहवज्रं (चित्तं) धरण्यां
वाग्हस्तौ पादपायू मरुदनलजलक्ष्मासु सर्वे बभूवुः ॥ २३ ॥

इह शरीरे चित्तस्य **मात्सर्यं ज्ञानधातौ**, पञ्चम्यर्थे सप्तमी; ज्ञानधातुवशात्, मात्सर्यचित्तं सत्त्वाना[93a]मित्यर्थः । **अम्बरे द्वेषवज्र(चित्त)मिति** आकाशधातुवशात् सत्त्वानां द्वेषचित्तम् । एवं **वायुधातुवशादीर्ष्याचित्तम्**, **अनलधातुवशाद् रागचित्तम्**, तदेव **प्रकटितं** मुनिना । **तथैव तोयधातुवशान्मानचित्तम्**, **पृथ्वीधातुवशान्मोहचित्तम्**, **प्रकृति**र्ज्ञानादिधातुधर्मस्तस्य **गुणाः** स्वभावास्तत्स्वभाव**वशा**न्मात्सर्यादयो भवन्ति चित्ते संसारिणाम् ।

धातुवशेन कर्मेन्द्रियाण्याह—**वागित्यादि** । इह **वागिन्द्रियं वायु**धातोर्भवति, **पाणीन्द्रियं तेजो**धातोः, **पादेन्द्रियं तोय**धातोः, पृथ्वीधातोः **पाय्विन्द्रियम्**, अनुक्तत्वात्, **आकाश**धातोः गुह्येन्द्रियम् । षोडशवर्षान्ते ज्ञानधातौ दिव्येन्द्रियं भवतीति षट्कर्मेन्द्रियनियमः ।

षड्धातुभ्योऽपानादयो वायवो भण्यन्ते **अपानेऽत्यादिना**—

आपानो ज्ञानधातौ त्रिविध इति भवेत् प्राणवायुश्च शून्ये
वायोर्मध्ये समानः शिखिनि पुनरुदानोऽम्भसि व्यान एव ।
भूम्यां नागोऽथ कूर्मोऽपि कृकरपवनो देवदत्तो धनञ्ज-
श्चत्वारो वायुवह्न्योरपि पयसि महो संभ्र(भ)वन्ति[2] क्रमेण ॥ २४ ॥

इह शरीरे **अपानवायुर्ज्ञानधातोर्भवति**; अत्रापि पञ्चम्यर्थे सप्तमी । स च विण्मूत्रशुक्रकर्षणतस्त्रि**विध इति भवेत् प्राणवायुश्च शून्ये**, आकाशधातोः, **च**कारात् सोऽपि त्रिविधो वामदक्षिणमध्यनाडीप्रवाहतः । **वायोर्मध्ये** वायुधातुस्वभावात् **समानो** भवति । **शिखिन्यग्निधातौ पुनरुदानोऽम्भसि** उदकधातौ **व्यानः** । **भूम्यामिति** भूधातौ **नागः** ।

---

१. भो. Ran bSin (स्वभाव) । १. भो. Yan Dag ḥGyur (संभवन्ति) ।

अथ अनन्तरं **कूर्मादयश्चत्वारः** वायुधातोः **कूर्मो** भवति, तेजोधातोः **कृकरः**, उदकधातो-**र्देवदत्तः**, पृथ्वीधातोर्**धनञ्जयः**। षोडशवर्षान्ते आकाशधातोरानन्दवायुः, ज्ञानधातोः सहजानन्दवायुः [93b]।

धातुवशाच्छरीरे हस्तादिसन्धौ चक्रादीन्युच्यन्ते **उष्णीषमित्यादिना**—

उष्णीषः शून्यधातौ भवति सुरनृणां ज्ञानधातौ च गुह्यं 5
हृत्पद्मं वायुधातौ प्रकटशिखिनि वै कण्ठचक्रं स्फुरद्धि ।
तोये भ्रूमध्यपद्मं वसुवसुदलकं नाभिचक्रं च भूम्यां
षट्सन्धिः पादपाण्योर्महिजलहुतभुग् मारुतेषु त्रिसंख्या ।। २५ ।।

अत्र **आकाशातोरुष्णीषकमलं** चक्रं वा **भवति**। दलसंख्या वक्ष्यमाणे वक्तव्या। **सुरनृणां ज्ञानधातोश्च गुह्यं** भवति, गुह्यकमलमित्यर्थः। **हृत्पद्मं वायुधातोर्भवति**। 10 **प्रकटशिखिनः कण्ठचक्रं** भवति। **स्फुरत्** (स्फुटम्[1]), हिर्निश्चये, **तोयधातौ भ्रूमध्य-पद्मम्**। **वसुवसु** चतुःषष्टि**दलकं नाभिचक्रं** (पद्म[2])**भूमि**धातौ भवति। **षट्सन्धिरि**रिति बहुवचने एकवचनम्। **पादपाण्योर्वा**मपादे तिस्रो भूमिधातोः सत्त्वरजस्तमोगुणानां भेदात् भवन्ति। **महीति** ह्रस्वो भूपर्यायः। दक्षिणपादे तिस्रः **उदकधातोर्गुणत्रयभेदात्** इति; वामहस्ते तिस्रोऽग्निगुणत्रयभेदादिति; दक्षिणहस्ते तिस्रो **वायुगुणत्रयभेदात् मारु-** 15 **तेषु त्रिसंख्येति**। द्वादश चक्राणि वक्ष्यमाणे वक्तव्यानीति अष्टादशचक्रनियमः।

इदानीं धातुवशादङ्गुल्यो(ल्यु)त्पादमाह **भूमीत्यादिना**—

भूम्यादौ पञ्चधातौ त्रिविधगुणवशात् पादपाण्योर्बभूवुः
अङ्गुल्योऽङ्गुष्ठकाद्यास्त्रिगुणितदशकाः पर्वरूपाः समस्ताः ।
संग्राह्यास्ता नखान्ताः पुनरपि दशनान्ये च तत्त्वप्रभेदै- 20
रन्यद् यल्लोमकान्तं भवति वरतनौ तत् तदेवञ्च धातौ ।। २६ ।।

इह हस्तपादयोरङ्गुष्ठकाद्याः कनिष्ठान्ताः; वामे दक्षिणे च **पञ्चधातुगुणत्रयस्व-भावेन त्रिपर्वात्मिकाः**। ततः[94a]पृथ्वीधातुवशादङ्गुष्ठको भवति, पृथिवीधातुगुणत्रय-वशाङ्गुष्ठपर्वाः त्रयः। एवं तोयधातुस्वभावेन तर्जनी, तथा तेजोधातुस्वभावेन मध्यमा; एवं वायुधातुस्वाभावेनानामिका, आकाशधातुस्वभावेन कनिष्ठिका। यथा वामहस्ते तथा 25 दक्षिणेऽपि। एवं पादयोर्विज्ञेया इति। हस्तद्वये पादद्वयेऽपि **त्रिगुणितदशकास्त्रिंशत् पर्व-रूपाः समस्ता संग्राह्यास्ता नखान्ताः**।

दशनान्युच्यन्ते—अत्र यदि प्रथमं बालस्योर्ध्वं दन्तद्वयं भवति, तदा दक्षिणदन्त-भूमिस्वभावं भवति, वामं तोयस्वभावम्। अथाधो भवति, तदा दक्षिणवह्निस्वभावम्,

---

१. भो. gSal Bar (स्फुटं)। २. भो. Pad Ma (पद्म)।

वामं वायुस्वभावः(वम्)। एवं पुनरूर्ध्वं तेजोवायुस्वभावौ, अधः पृथिवीतोयस्वभावौ, पुनरधो वायुतेजःस्वभावौ, पुनरूर्ध्वे पृथ्वीतोयस्वभावौ। एवमनुलोमविलोमेनोर्ध्वाधश्च-तुर्धातुस्वभावेन द्वात्रिंशद् दन्ता वेदितव्या। यदा वक्रदन्तास्तदा आकाशधातुः। एवं लोमकेशानीति धातुभेदात् ज्ञेयानि।

5 **अन्यद् यल्लोमकान्तं भवति वरतनौ तत्**[1] **तदेव** पञ्चधातौ[2] वेदितव्यम्, कायविवेकं सार्द्धत्रिकोटिभेदं यावद् धातुविकाराः। रजःशुक्रवशाद् धातुविकारः, समुदयसत्यं कायविधै(वे)केनेति[3] भगवतोक्तम्।

इति श्रीमूलतन्त्रानुसारिण्यां[4] लघुकालचक्रतन्त्रराजटीकायां
द्वादशसाहस्रिकायां विमलप्रभायां
10 कायवाक्चित्तोत्पत्तिदुःख-मार्ग-समुदय-निरोधसत्यनिर्णयमहोद्देशः
प्रथमः ॥ १ ॥

(२) समुदयसत्यादिमहोद्देशः

इदानीमाधाराधेयसमुदाय उच्यते गुह्येत्यादिना—

गुह्योष्णीषे च नाभौ सहजजिनतनुर्निःस्वभावस्वभावा
हृच्चक्रे धर्मकायो भवति हि नृप सम्भोगचक्रे जिनस्य।
15 बिन्दौ निर्माणकायो भवति गुणवशाच्चाधिदैवक्रमेण
हृच्चक्रं कण्ठचक्रं शिरसि च कमलं धर्मसम्भोगशुद्धम् ॥ २७ ॥

इह शरीरे षट् चक्राण्याधारभूतानि, चत्वारः काया आधेयाः; तेषु **सहजकाय**-स्त्रिकमलेषु स्वभावास्वभावभे[94b]देन। अतो **गुह्य**कमले **उष्णीष**कमले **नाभि**कमले विशुद्धकायोऽधिदेवता **निःस्वभावा**, अकल्पनास्वभावा, प्रतिसेनोपमा। **हृदये धर्मकायः**, 20 कण्ठाब्जे **सम्भोग**कायोऽधिदेवता कायभेदन। **बिन्दाविति** शिरसोऽब्जे शुद्धचक्रे **निर्माणकायोऽधिदेवता**। कायभेदेन **नाभौ** निर्माणचक्रे निर्माणकायोऽधिदेवता इति कायभेदे नियमः। **गुणवशादिति** चक्राणां गुणः; ज्ञानाकाशभूमिगुणः सहजकायाधाराणाम्; वायु-गुणो धर्मकायाधारस्य; तेजोगुणः सम्भोगकायाधारस्य; उदकगुणो निर्माणकायाधारस्येति आधाराधेयभावः। उक्तक्रमेण **हृच्चक्रं कण्ठचक्रं शिरसि च कमलं धर्मसम्भोगशुद्ध**-25 मिति।

नाभौ कण्ठे च गुह्ये शिरसि च हृदये तद्वदुष्णीषमध्ये
मातुर्भर्त्तुः क्रमेण त्रिविधमपि भवेत् कायवाक्चित्तवज्रम्।
चक्रं रत्नं खपद्मं जलजमसिवरं षट्कुलं वज्रयुक्तं
तान्यूर्ध्वाधस्त्रिनाड्यस्त्रिविधपथगताश्चन्द्रसूर्याग्निभेदैः ॥ २८ ॥

१-२. ग. तत्तदेवञ्च धातौ। ३. भो. dBen Pas (विवेक)। ४. क. ख. मूल०।

कायाधारभेदेन षट्कुलान्युच्यन्ते **नाभावित्यादिना**—

इह शरीरे षड्धातुवशेन षट्चक्रेषु षट्कुलानि भवन्ति **यथासंख्यम्—मातुः** कुलानि त्रीणि, **भर्त्तुः** पितुः कुलानि च। **नाभौ** पृथिवीचक्रे **चक्रकुलं** भवति, **कण्ठे** अग्नि-पद्मे **रत्नकुलं** भवति, **गुह्ये** ज्ञानकमले **कर्तिकाकुलं** भवति, **मातुर्यथासंख्यं** कायो(य) वाक्चित्तञ्च। एवं **शिरसि तोयकमले कमलकुलं** भवति; **हृदये** वायुकमले **खड्गकुलं** भवति। **तद्वदुष्णीषमध्ये आकाशधातुकमले वज्रकुलं** भवति। **भर्त्तुः** कायवाक्चित्तञ्च यथाक्रमं रजःशुक्रयोः कुलं भवति। पृथिव्यादिधातूत्पन्नानां विकाराणां यथानुक्रमेणेति। 5 T 300

वायुनाडीभेदेन तान्येवाह **तानीत्यादि**—

इह प्राणापानत्रिनाडिकाभेदतः त्रिनाडीसंज्ञाल [95a] क्षणानि भवन्ति–विड्नाडी **चक्रकुलमपाने**, **सूर्यनाडी रत्नकुलं** प्राणे, **शुक्रनाडी कर्तिकाकुलम्** अपाने इति मातुस्त्रि-कुलानि कायवाक्चित्तानि; तथा **चन्द्रनाडी** प्राणे **कमलकुलम्**, अपाने **मूत्रनाडी खड्ग-**कुलम्, प्राणे मध्ये **राहुनाडी वज्रकुलमिति** भर्त्तुः कायवाक्चित्तानीति षट्कुलनियमः। 10

काये भावप्रवेश-धातुवर्णा उच्यन्ते **काय** इत्यादिना—

काये भावप्रवेशः खमिव समरसो भावमध्ये च कायो
ज्ञातव्यो योगयुक्तैः प्रकृतिगुणवशाद् धातुवर्णादिभेदैः। 15
पीतः कृष्णश्च वर्णस्त्वरुण इति सितो भूमिवाताग्नितोये
ज्ञानाकाशे च नीलो भवति च हरितः कायभावप्रभेदैः॥ २९॥

इह शरीरे ग्राहग्राहकभेदो धातूनां परस्परं भवति। तत्र यो ग्राहको धातुः सामग्रीवशात् स **कायसंज्ञो** भवति; यो ग्राह्यः सामग्रीवशात् स **भावसंज्ञो** भवति। तेन ग्राह्यग्राहकयोः परस्परमेकत्वं समरसत्वम्, अतः **काये भावप्रवेशः**। 20 **खमिव समरसो भावमध्ये च कायो, ज्ञातव्यो योगयुक्तैः प्रकृतिगुणवशाद् धातुवर्णादिभेदैरिति**। अत्र प्रकृतयः पृथिव्यादिधातवः कायेन्द्रियादीनां गन्धादि-विषयाणां चतुर्णां भवन्ति। अत्र कायभेदेन कायेन्द्रियम्, गन्धविषयम्, पाय्विन्द्रियम्, आलापः पृथिवीकायस्वभावतः[1] **पीतवर्णाः** भाववशात्, वायुप्रकृतितः **कृष्णवर्णाः**। एवं घ्राणेन्द्रियम्, स्पर्शः, वागिन्द्रियम्, विट्स्रावो वायुप्रकृतयः कायभेदेन 25 कृष्णवर्णाः; पृथिवी भावभेदेन पीताः; चक्षुरिन्द्रियम्, रसः, पाणीन्द्रियम्, गतिस्तेजः प्रकृतयः कायवशाद् **रक्तवर्णा** भवन्ति, भाववशादुदकप्रकृतयः **सिता** भवन्ति। एवं जिह्वेन्द्रियम्, वर्णो[2]रूपम्[3] (वर्णरूपम्), पादेन्द्रियम्, आदानमुदकप्रकृतयः काय-भेदेन सितवर्णा भवन्ति, अग्निप्रकृतिभाववशाद् रक्तवर्णा भव[95b]न्ति। **भूमिवाता-ग्नितोये** भूप्रकृतौ वातप्रकृतौ अग्निप्रकृतौ तोयप्रकृतौ वर्णो वेदितव्यः। एवं श्रोत्रेन्द्रियम्, 30 धर्मधातुविषयम्, भगेन्द्रियम्, शुक्रच्यवनम्, एते **आकाशप्रकृतयः** कायभेदेन **हरितवर्णाः**,

---

१. ग पृथिवीप्रकृतयः। २-३. भो Kha Dog Gi gZugs (वर्णरूपं)।

ज्ञानप्रकृतिभावभेदेन नीलाः। तथा मनेन्द्रियम् (मन इन्द्रियम्), शब्दः, द्वियेन्द्रियम्, मूत्रस्रावः, एते ज्ञानधातुप्रकृतयः काल(य)[1]भेदेन नीलवर्णाः आकाशप्रकृतयो भावभेदेन हरिताः। अतो **ज्ञानाकाशे च नीलो भवति च हरितः कायभावप्रभेदैरिति** कायभावप्रकृतिवर्णनियमः।

5 प्रज्ञोपायालिङ्गनमस्थिमांसादिधातूनामाह **प्रज्ञेत्यादि**—

प्रज्ञोपायोऽस्थिमांसं ससलिलरुधिरं पावको मूत्रमेव
वातो विट्शून्यशुक्रं भवति वरतनौ श्रीरजश्चित्तमेव।
श्रोत्राच्छब्दादयोऽन्ये स्वजिनकुलवशाद् वाक्स्वरूपादयश्च
एवं देव्यः सबुद्धा विषयविषयिणो मण्डले वेदितव्याः ॥३०॥

10 इह शरीरे **प्रज्ञा अस्थि**धातुः, **उपायो मांस**धातुः, तयोः परस्परं संयोगः पृथिवीसंस्कारयोः, यत् कठिनतत्वं तत् पृथिवीधातुरिति ज्ञापकात् **प्रज्ञोपायास्थिमांसमिति**। एवं प्रज्ञोपायः **ससलिलरुधिरमु**दकधातुना सार्द्धं वेदनास्कन्धः। तथा **पावक** इति उष्णता **मूत्रमि**ति संज्ञा, अनयो प्रज्ञोपायतः[2]। ननु शुक्रधातुः संज्ञास्कन्धः, कथं मूत्रमित्युच्यते? इह शरीरे या संज्ञा सा जातमात्रस्य बालस्य मूत्रस्रावतः, यन्महासुखज्ञानं 15 तत् षोडशवर्षावधेर्भवति शुक्रच्यवनधर्मतः। अतो मूत्रं संज्ञाधर्मः, शुक्रं ज्ञानधर्म इति विशेषात् मूत्रं संज्ञास्कन्ध इति। एवं* **वातो विट्** प्रज्ञोपायवायुधातु रूपस्कन्ध इति। **शून्यमिति** रजोधातुः, **शुक्रमिति** विज्ञानधातुः प्रज्ञोपाय इति। **भवति वरतनौ श्रीरजो** धर्मधातुविषयं[3] **बोधिचित्तमेव**+। एवं **श्रोत्रात् शब्दादयोऽन्ये** इति। शब्दः प्रज्ञा श्रोत्र उपायः, गन्धं प्रज्ञा घ्राणोपायः (घ्राण उपायः), रूपं प्रज्ञा चक्षुरुपायः, रसः प्रज्ञा 20 जिह्वोपायः, स्पर्शः प्रज्ञा काय उपायः, धर्मधातुः प्रज्ञा म[96a]न उपायः, विट्स्रावः प्रज्ञा गुद उपायः, गति प्रज्ञा पाद उपायः, आदानं प्रज्ञा कर उपायः, आलापः प्रज्ञा वागिन्द्रियमुपायः, मूत्रक्रिया प्रज्ञा भग उपायः, लिङ्गं वा शुक्रच्यवनप्रज्ञा शङ्खिनीन्द्रियमुपाय इति।

स्वजिनकुलवशात् वाक्स्वरूपादयश्च कर्मेन्द्रियाद्या इति। **एवमुक्तक्रमेण देव्यः** 25 पृथिव्यादयः **सबुद्धा**[4]वैरोचनादिभिः सार्द्धं **विषयविषयिणो मण्डले** वक्ष्यमाणे वक्तव्या इति परस्परं प्रज्ञोपायालिङ्गनविधिनियमः।

इदानीं चन्द्रसूर्यशुक्ररजःकृत्यमुच्यते **नाडीत्यादिना**—

नाडीनां षट्सहस्रं दिनकरगुणितं गर्भमध्ये च कृत्वा
वर्षे पूर्णे च वृद्धिं त्यजति शशधरोऽर्कश्च वृद्धिं करोति।

---

१. भो. Lus (काय)। २. क. ख. प्रज्ञोपाय इति। ३. क. पुस्तके नास्ति।
४. ग. सर्वबुद्धा।
*-+ख. पुस्तके नास्ति।

वर्षेषु द्वादशेषु त्यजति दिनकरो धातुवृद्धिं स्वदेहे
नाडीच्छेदं प्रसूते भवति दिनदिनं युग्मसंख्याक्रमेण ॥३१॥

इह शरीरे **गर्भं**मासादेकादूर्ध्वं प्रत्यहं नाडीशतद्वयं भवति; मासमध्ये त्रिंशद्भिर्दिनैः षट्सहस्रसंख्या भवति; दादशमासावधेः पष्ट्युत्तरत्रिशतदिनैर्द्वासप्ततिसहस्रसंख्या भवति। **नाडीनां षट्सहस्रं दिनकरगुणितमि**ति द्वादशगुणितं **गर्भमध्ये च**[वृद्धिं][1] कत्वा। 5
चकाराद् वाह्येऽपि द्वादशमासान्तं यावत्। गर्भाधानमे[स्य][2]एकमासं वर्जयित्वा **वर्षे पूर्णे** सति **वृद्धिं त्यजति शशधरः, चका**रात् त्रयोदशभिर्मासैरिति **अर्कश्च वृद्धिं करोती**ति। ततश्चन्द्रशुक्रनाडी धातुसंख्यापरिच्छित्तौ सत्यां **धातुवृद्धिं** रजः करोति द्वादशवर्षान्(णि) यावदिति। **चकारा**त् शुक्रं च धातुवृद्धिं करोति। **वर्षेषु द्वादशेषु त्यजति दिनकरो धातुवृद्धिं स्वदेहे** स्त्रीणां रजः सम्भवो(वां) यावदिति सूर्यवृद्धिः। पुंसां षोडशवर्षावधेः 10
शुक्रससम्भवो(वां) यावदिति। **चकारः** समुच्चये। एवं **नाडी**[96b]**च्छेदो**ऽपि(मपि) **प्रसूते** सति **भवति प्रतिदिनं युग्मसंख्याक्रमेण**ेति वक्ष्यमाणे विस्तरेण वक्तव्यमिति नाडी-धातुवृद्धिनियमः।

इदानीमाकाशादितत्त्वान्युच्यन्ते[3] **श्री भूतानी**त्यादिना—

श्री भूतानीन्द्रियाणि प्रभवति दशकं पञ्च कर्मेन्द्रियाणि 15
तन्मात्राः पञ्च चोक्ताः सगुणमपि मनो बुद्ध्यहङ्कारदिव्या।
तत्त्वान्येतानि देहे त्रिभुवननिलये भुक्तिरेषा विभोश्च
पञ्चस्कन्धात्मकस्य त्रिविधभवगतस्यात्मकर्मार्जितस्य ॥३२॥

इह शरीरे बालकस्य **श्रो भूतानि** पञ्चे**न्द्रियाणि** पञ्चाकाशादीनि श्रोत्रादीन्येकत्र **दशकं** भवति। एवं **पञ्च कर्मेन्द्रियाणि तन्मात्रा** इति शब्दतन्त्रमात्रादय इति 20
पञ्च चोक्ताः। **सगुणमपि मनः**, सत्त्वरजस्तमोभिः सहितं मनः। एवं **बुद्धि**रपि **अहङ्कारो**ऽपि **दिव्या**[4] प्रकृतिरपीति।[5] **तत्त्वान्येतानि** चतुर्विंशतिः **देहे त्रिभुवननिलये** बाह्ये **भुक्तिरेषा विभोश्च**। किम्भूतस्य ? **पञ्चस्कन्धात्मकस्य** लोकसंवृत्या **त्रिविधभवगतस्यात्मकर्मार्जितस्य** भुक्तिर्भवति। चतुर्विंशत्यात्मिका प्रकृतिः पुरुषस्य ग्राह[क]धर्मिणो ग्राह्यधर्मिणी प्रकृतिः। स्वाभाविका पुनर्ग्राह्यधर्मरहिताऽपरा प्रभास्वराऽस्तीति प्रकृति- 25
पुरुषनियमः। T 301

इदानीं शरीरे पृथिव्यादीनां लक्षणमुच्यते **पृथ्वी**त्यादिना—

पृथ्वी काठिन्यमम्बु द्रवमपि हविरुष्णं च वायुर्लघुत्वं
छिद्रं शून्यं दृढास्थि त्वमरगिरवरो वृष्टिरत्रामृतं स्यात्।

---

१. भो. ḥPhel ba (वृद्धि)। २. भो. mÑal bZun baḥi ZLa ba (गर्भाधानस्य मासं)। ३. ग. आह। ४–५. भो. mChog gi Raṅ bŠin (दिव्ययाः प्रकृतिः)।

वज्रं शब्दश्च वायुं(यु) विडपि च घटिकाः श्वासनिःश्वासयुग्मं
युग्मैः संक्रान्तिरेका द्विगुणनवशतैः ज्योतिषा रन्ध्रभेदाः ॥३३॥

इह शरीरे **पृथिवी कठिनम्, अम्बु द्रवम्**। **अपि हविरुष्णत्वं च** [97a]। **वायु**र्लघुत्वम्, यतः संकोचनं प्रसारणं करोति।[1] **छिद्रं शून्यं दृढास्थि** पृष्ठास्थिदण्डः कटिमारभ्य स्कन्धपर्यन्तं **अमरगिरिवरो** मेरुरिति। **वृष्टिर्या** बाह्ये तत्र [सा अत्र] शरीरे **अमृतं** जिह्वालम्बिकाभ्यां स्तुकस्रावः[2]। **वज्रं शब्दो** हृदये अन्त्राणां गर्जिर्या। **वायु** (चापः)[3] इन्द्रधनुर्**विडपि**। **घटिका** या बाह्ये षष्टिपाणीपलात्मिका, सा देहे **श्वासनिःश्वासयुग्मं** निर्गमप्रवेशयुग्मं प्राणवायुरिति घटिका। एभिर्**युग्मै द्विगुणनवशतै**रित्यष्टादशशतैः **संक्रान्तिरेका** भवति। बाह्ये संक्रान्तिः मासैस्त्रिंशद्भिर्दिनैरिति अध्यात्मनि पञ्च नाड्यः पञ्चमण्डलवाहिन्यः। **ज्योतिष** आदित्यादयो ग्रहास्ते **रन्ध्रभेदा** दश भवन्ति। अत्र गुदरन्ध्रं चन्द्रः, मूत्ररन्ध्रं रविः, शुक्ररन्ध्रं कालाग्निः, मुखरन्ध्रं राहुः, दक्षिणनेत्ररन्ध्रं मङ्गलः, वामनेत्ररन्ध्रं बुधः, दक्षिणघ्राणरन्ध्रं बृहस्पतिः, वामघ्राणरन्ध्रं शुक्रः, दक्षिणकर्णरन्ध्रं मन्दः, वामकर्णरन्ध्रं केतुरिति। एषां पुनर्मङ्गलादीनां षडिन्द्रियभेदो वक्ष्यमाणे पञ्चमपटले वक्तव्य इति पृथिव्यादिनियमः।

इदानीं नक्षत्रादिकमुच्यते **नक्षत्रमि**त्यादिना—

नक्षत्रं दन्तपंक्तिस्त्वनुदिनघटिका सन्धिभेदाद् भवन्ति
नाड्यो नद्यन्त्रमेघास्त्वपरशशिकला धातवो द्विस्वभावाः।
लोमा यूका च शुक्रं कृमिकुलसहितं भूतयोनिश्चतुर्धा
नन्दाद्यङ्गुष्ठपर्वा(र्वं)कमलमपि शिरो गुह्यपद्मं च शक्तिः ॥३४॥

अभीचिना (अभिजिता) सहाष्टविंशन्नक्षत्राणि सप्तशलाकाचक्रभेदेन। चत्वारि दण्डनक्षत्राणि, चतुःकोणे शलाकानक्षत्राणाम्, एवं द्वात्रिंशदिति। **दन्तानां** क्रमोत्क्रमचारभेदेन चतुर्दश नक्षत्राण्यो(ण्यू)र्ध्वचक्रे चतुर्दशाधश्चक्रे स्थितानि दन्तानां **पंक्तिरू**र्ध्वाधो भवति [97b] अर्द्धचक्रभेदत[4] इति **नक्षत्रं दन्तपंक्तिः**। अत्र **दिनघटिका सन्धिभेदा[द्]भवन्ति** इति प्रत्यहं षष्टिघटिका वर्षानु**दिनैः** श्वाससंख्या भवन्ति। ता घटिकाः षष्ट्युत्तरत्रिशतदिनानि भवन्ति। तानि च षष्ट्युत्तरत्रिशतसन्धयो भवन्तीति सन्धि[भेदाः]।

नाड्यो नद्य इति इह लोकधातौ बाह्ये द्वासप्ततिसहस्रनद्यः समुद्रगामिन्यः, अध्यात्मनि द्वासप्ततिसहस्रनाड्यो रसवाहिन्यो भवन्तीति। **अन्त्रमेघाः**। **अन्त्र** इति अविभक्तिकं पदम्, अन्त्राणि मेघा भवन्तीति, रसस्रवणादिति गर्जनलक्षणात्। **अपरशशिकला धातवो द्विस्वभावाः**। अत्र कला द्विधा—**लोमा**दिधातुविकारेणैका, **शुक्र**च्यवनधर्मेणेत्यपरा। अनयोः पुनर्या लोमादिधातुविकारेणावस्थिताः, ता अपि द्विधा अपरा

---

१. क. ख. भवति। २. क. ख. श्रुक०। ३. भो. gŠu (चापः)। ४. ग. भेदेन।

शशिकला इति। अत्र सूक्ष्मलोमवृहल्लोमप्रतिपत् द्वितीया, एवं त्वक् तृतीया चतुर्थी, रक्तं पञ्चमी षष्ठी, एवं मांसः सप्तमी अष्टमी, तथा नाड्यो नवमी दशमी, एवमस्थीनि एकादशी द्वादशी, तथा मज्जा त्रयोदशी चतुर्दशी, एवं शुक्रं पञ्चदशी षोडशी कला, धातवो द्विस्वभावा इति नियमः।

इदानीं भूतयोनिरुच्यते **लोमे**त्यादिना—

इह लोकधातौ **चतुर्धा भूतयोनिः**—इह पृथिवीयोनिः स्थावरा बाह्ये, अध्यात्मनि **लोमानि**; बाह्ये वायुयोनिरण्डजाः, अध्यात्मनि **यूकाः**; बाह्ये उदकयोनिः **कृमिकुलादयः** संस्वेदजाः, शरीरेऽपि कृमिकुलादीनि, बाह्ये जरायुजाः **शुक्रसम्भूता**, अध्यात्मनि **शुक्रमेव**; बाह्येऽनुक्तत्वादिति आकाशधातुः रसरूपा उपपादुकाः, अध्यात्मन्यण्डरूपा सूक्ष्मप्राणिनः इति भूतयोनिश्चतुर्धा च।

नन्दाद्यङ्गुष्ठपर्वमि(इ)ति। इह बाह्ये प्रतिपदादयः पञ्चपञ्चतिथयो नन्दादय उच्यन्ते। ते च शुक्लकृष्णपक्षभेदेन कनिष्ठाङ्गुष्ठादिना त्रित्रिपर्वस्वभावेन वामकराङ्गुली-पर्वा(णि) नन्दादयो भवन्ति, आकाशादिधातुभेदेन। दक्षिणकराङ्गुलीपर्वा(णि) पृथिव्यादिभेदेन, वृद्धाङ्गुष्ठादिपर्वभेदेन[1] पञ्चदश; एवं पादाङ्गुलीपर्वा(णि) द्वि[98a]-तीयमासतिथिभेदेन ज्ञेया(नि) इति। एवं प्रत्येकऋतु[2]भेदेन वर्षे षट् परिवर्त्ता भवन्ति षड्ऋतुभिरिति नन्दाद्यङ्गुष्ठपर्वनियमः।

कमलमपि शिरो नाभिपद्मञ्च शक्तिरिति सहजतनुर्भवतीति पूर्वोक्तविधिनेति शक्तिनियमः।

इदानीं स्वर्गादय उच्यन्ते **ब्रह्माण्ड[मि]**त्यादिना—

ब्रह्माण्डं स्वर्गलोको वरकरचरणौ मर्त्यपाताललोकौ
अब्धिद्वीपाश्च शैला द्रवमृदुकठिना धातवस्त्रिस्वभावाः।
क्षाराब्धि मूत्रमेषां शिखिचलवलयं रक्तचर्माणि राजन्
केशाः सिद्धाः समस्तास्त्रिभुवननिलयेऽनेकभेदैश्च सिद्धाः ॥३५॥

इह शरीरे **ब्रह्माण्डमु**ष्णीषात् कण्ठचक्रपर्यन्तं **स्वर्गलोको** भवति। **वरकरौ मर्त्यलोको** भवति। **चरणौ पाताललोको** भवति। **अब्धयश्च द्वीपाश्चाब्धिद्वीपाः**। **शैलाश्च** सप्त यथासंख्यं **द्रवधातवः**।

शरीरे सप्त समुद्राः। तेषु **क्षारसमुद्रो मूत्रम्**, मद्यसमुद्रः प्रस्वेदः, उदकसमुद्रः स्तुकः[3] दुग्धसमुद्रः स्त्रीणां दुग्धो नराणां श्लेष्मधातुः, दधिसमुद्रः शिरोमस्तिष्कम्, घृतसमुद्रो वसाः, मधुसमुद्रः शुक्रमिति।

---

१. ग. वृद्धाङ्गुष्ठपर्वादिभेदेन। २. क. ख. ०चित्त; भो. Dus (ऋतु)। ३. क. ख. श्रूकः।

तथा द्वीपाः। द्वादशारं जम्बूद्वीपम्, हस्तपादद्वादशखण्डेषु; मांसं रौद्रम्, कालजं क्रौञ्चम्, किन्नरजं बुक्कम्, कुशं मेदम्, सिताभं मूत्रम्, चन्द्र नाड्य इति मृदुधातवः।

शैला इति वज्रपर्वताः पादकरनखाः। शीताद्रिः करास्थीनि, द्रोण उपवाह्व-स्थीनि, मणिकरो बाह्वस्थीनि, निषढः(टः) पादास्थीनि, मन्द्राद्रिः जङ्घास्थीनि, 5 नीलाभ ऊर्वस्थीनि इति कठिनधातवः सप्तशैलाः। अष्टमो मेरुः, शरीरकङ्कालं कटि-मारम्य स्कन्धपर्यन्तमिति नियमः।

द्रवमृदुकठिना धातवस्त्रिस्वभावाः। **शिखिचलवलय**[98b]**मिति शिखिवलयं रक्तम्**, वायुवलयं **चर्माणि**। **राजन्** इत्यामन्त्रणम्। **केशाः सिद्धाः समस्तास्त्रिभुवन-निलयेऽनेकभेदैश्च सिद्धा** इति। इह बाह्ये लोकधातौ त्रिधा सिद्धाः—खेचराः, भूचराः, T 302 10 पातालवासिनः। तेषु खेचराः शिरोरुहाः, भूचराः कक्षसम्भूताः, पातालवासिनो भग-लिङ्गसम्भूताः। लोमानुक्तत्वात् सार्द्धत्रिकोटिलक्षणा इति स्वर्गादिनियमः।

इदानीमग्नित्रयमुच्यते **हृदि**त्यादिना—

हृत्कण्ठे नाभिपद्मे पविरत्रिशिखिनस्तत् स्फुरन्ति क्रमेण
धन्वाकारे च वृत्ते त्वनुदिनहवने चाब्धिकोणे च कुण्डे।
15 तेषामूर्ध्वे परोऽग्निः स्फुरदमलकरो ज्ञानमूर्तिस्तमोऽन्ते
यस्मिन् सूर्यो न विद्युत्पतिशशधरो न ग्रहास्तारकाद्याः॥ ३६॥

इह शरीरे दक्षिणाग्निर्गार्हपत्यमावहनीयोऽग्नित्रयम्। यथासंख्यं हृत्पद्मे धन्वा-कारे **पवि(:)** विद्युदग्निः, **कण्ठ**कमले **वृत्ते** सूर्याग्निर्गार्हपत्यम्, **नाभौ** चतुरस्रे कुण्डे आहवनीयः क्रव्यादाग्निरिति **स्फुरन्ति क्रमेण। अनुदिनहवने चाब्धिकोणे च कुण्डे** 20 [इति] नियमः। **तेषामूर्ध्वे परोऽग्निः स्फुरदमलकरो ज्ञानमूर्तिस्तमोऽन्ते** गुह्यकमले ललाटकमलेऽच्छिन्नः। **यस्मिन्** स्थाने **सूर्यो न विद्युत्पतिशशधरो न ग्रहास्तारकाद्याः**, आदितः क्रव्यादाग्निरिति चतुर्थः सत्योऽग्निर्ज्ञानमूर्तिरित्यग्नित्रयनियमः।

[99a] इदानीं वारघटिकादय उच्यन्ते **वारा** इत्यादिना—

वारा हृत्पद्मपत्रे प्रकटितघटिका नाभिपद्मे च षष्टि-
25 र्भूमध्येऽह्नः पदं वै मनुरपि नृप सम्भोगचक्रेऽपि चर्क्षम्।
ऋक्षाणां नाभिपद्मं पुनरपि घटिका योगिना वेदितव्या
नाड्यः पाणीपलानि स्फुटसकलतनौ हस्तपादादिसन्धौ॥ ३७॥

इह बाह्ये सप्तवाराः। अष्टमी कुलिका भुक्तिः शरीरे ते **हृत्कमलदले**ष्वष्टष्वष्टौ भवन्ति—पूर्वदले आदित्यः, आग्नेय्यां सोमः, दक्षिणे मङ्गलः, नैर्ऋत्ये बुधः, वारुण्ये

बृहस्पतिः, वायव्ये शुक्रः, कुवेरे शनिः, ईशाने कुलिकाभोगे केतुः[1], अपरभोगार्धे राहुरिति **प्रकटितघटिका नाभिपद्मे च षष्टिः**। दल[2]चतस्रः शून्यघटिकादलानि, शेषाणि षष्टिदलानि षष्टिमण्डलवाहिन्यः दलानि[3] षष्ट्रिघटिका इति प्रत्येकवारस्य षष्टिसंख्या। **भ्रू मध्ये** षोडशदलेषु दलद्वयं शून्यवाहकम्। चतुर्दशदलेषु चतुर्दश **पदानि** चन्द्रस्य भूताभूतेष्वित्यादीनि[4]। तत्र प्रथमदले भृता(भूता) इति पञ्चघटिकात्मकं पदम्; एवं द्वितीये तृतीये। वेदा इति चतुर्थघटिकात्मकः चतुर्थदले। शिखि[नि] तिस्रो नाड्यः पञ्चमे पदम्। कर इति द्विघटिकात्मकं पदं षष्ठदले। शशिन इति एकघटिकात्मकं पदं सप्तमं सप्तमे दले। एवं विलोमेनाष्टमे एकघटिकात्मकं[5] पदम्[6], नवमे द्विघटिकात्मकम्, दशमे त्रिघटिकात्मकम्, एकादशमे(शे) चतुर्घटिकात्मकम्, द्वादशमे(शे) पञ्चघटिकात्मकम्, त्रयोदशे चतुर्दशेऽप्येवं ज्ञेयमिति। चन्द्रपदानि **मनुसंख्यकानि** भवन्ति। **नृप** इत्यामन्त्रणम्। **सम्भोगचक्रे** कण्ठचक्रे द्वात्रिंशद्दलेषु दलचतुष्टयं शून्यम्। अन्येष्वष्टाविंशतिदलेषु अभीचि(अभिजित)सहितान्यष्टाविंशत् **ऋक्षाणि** भवन्ति; तानि वामावर्त्तेन पूर्वसप्तशलाकासु मध्ये मध्यमायां रेवत्यन्तेषु। अश्विनी द्वितीयायाम्, भरणी तृतीयायाम्, कृत्तिका चतुर्थ्याम्; ततो दण्डनक्षत्रं स(श)लाका सप्त सप्तदलसंज्ञा नाड्य इति। तत उत्तरस(श)लाकासु सप्तसु वामावर्त्तेन प्रथमस(श)लाकायां रोहिणी, द्वितीयायां मृगशिरा, तृतीयायामार्द्रा, चतुर्थ्यां पुनर्वसुः, पञ्चम्यां पुष्यः, षष्ठ्यामश्लेषा, सप्तम्यां मघा, तत एवमन्यापि वेदितव्या इति। **ऋक्षाणां नाभिपद्मेषु पुनरपि घटिकाः षष्टि वेदितव्येति**। **नाड्यः पाणीपलानि** षष्टिः, षष्टीनां षट्त्रिंश[त् श][7]तानि **स्फुटसकलतनौ हस्तपादादिसन्धाविति** वक्ष्यमाणे वक्तव्यो विस्तरेणेति वारादिनियमः [99b]।

इदानीं प्राणशक्तेर्नाभ्यादिचक्रमणमुच्यते **नाभीत्यादिना**—

नाभ्यब्जे सूर्यपत्रे भ्रमति परकला संक्रमन्ती क्रमेण
संक्रान्तिः प्राणयुग्मैर्द्विगुणनवशतैः कर्किलग्ने नरेन्द्र।
यस्मिन् लग्ने स्थितोऽर्को भ्रमति दिननिशं तत्र सा वेदितव्या
ज्ञातव्यं लग्नमानं धनमृणविषुवं चायनं सव्यमानम् ॥ ३८ ॥

इह यथा बाह्ये सूर्यो द्वादशराशिषु वर्षसंक्रान्तिभेदेन भ्रमति, तथाध्यात्मनि द्वादशराशिषु प्रतिदिनं द्वादशसंक्रान्तिभेदेन प्राणशक्तिश्च भ्रमति। **नाभ्यब्जे सूर्यपत्रे भ्रमति परकला** प्राणशक्तिः **संक्रमन्ती क्रमेण** द्वादशराशिपत्रेषु। **संक्रान्तिः प्राणयुग्मैर्द्विगुणनवशतैरिति**। इह बाह्ये सूर्यस्याष्टादशशतैर्दण्डैरेकसंक्रान्तिर्भवति, तथा

---

१. क. ख. सति; ग. शनिः; भो mJug Riṅs (केतु)। २. क. ख. पुस्तके 'दल' इति नास्ति। ३. क. ख. पुस्तके 'दलानि' इति नास्ति। ४. क. ख. भृताभृतेषु; भो. ḥByuṅ Daṅ ḥByuṅ ba mDaḥ (भूताभूतेषु)। ५-६. क. ख. एकघटिकापदम्। ७. भो. brGya Phrag Sum Cu rTsa Drug (षट्त्रिंशत् शतानि)।

श्वासैरष्टादशशतैः प्राणशक्तिरेकदले संक्रान्तिर्भवति। सा च **कर्क्कि(कर्कट)लग्ने नरेन्द्र**। इह बाह्ये सूर्यस्य कर्कटो जन्मराशिः। एवं सर्वजातकानां यस्मिन् लग्ने जन्म भवति, सा राशिः कर्कटसंज्ञा वेदितव्या 'प्राणजन्मराशि स्थानीया' इति न्यायात्। **कर्क्कि(कर्कट)लग्ने नरेन्द्र** इत्यामन्त्रणम्। **यस्मिन् लग्ने** बाह्ये **स्थितोऽर्क** उदयकालात् **भ्रमति दिननिशं तत्र सा वेदितव्या** सप्तस(श)लाकाभेदेन। **ज्ञातव्या-(व्यं) लग्नमानं**। यथा बाह्ये सूर्यस्य संक्रान्तिरूनाधिका दिनैर्वेदितव्या, तथाध्यात्मनि ऊनाधिकश्वासैर्वेदितव्येति सूर्यस्य दण्डभेदेन शरीरे श्वासनियमः। प्राणस्य **ऋणधनविषुवं** कर्कटादिषु रविका[पाद]वशेन **ऋणम्**, मकरादिषु **धनम्**। ज्योतिषोक्तविधिना **विषुवं** प्रतिसंक्रान्तिदिनं सपादषट्पञ्चाशद्दण्डात्मकमिति बाह्ये, अध्यात्मनि श्वासात्मकं प्रति-लग्नसंक्रान्तिभेदेनेति द्वादशसंक्रान्तिभ्रमणम्।

इदानीं प्रत्येककमलदले पञ्चमण्डलप्रवाह उच्यते **एकैक** इत्यादिना—

एकैके पद्मपत्रे प्रवहति धरणी पश्चिमे चोत्तरेऽम्बु
वह्निः सव्ये च पूर्वे प्रवहति पवनः पत्रमध्ये च शून्यम्।
संक्रान्ति(:) [100a] पञ्चभेदैः प्रवहति विषुवं होननिःश्वासषष्टिः
एवं संक्रान्तिभेदाः प्रतिदिनसमये लग्नभेदैर्भवन्ति ॥ ३९ ॥

इह बाह्ये सूर्यस्य **एकैक**संक्रान्तौ पञ्चमण्डलभोगाः। त्रिंशद्दिनैः पञ्चमण्डलभोगः; षड्दिनैः षष्ठ्युत्तरत्रिशतदण्डैरेकमण्डलभोगः; तथाध्यात्मन्यष्टादशशतैः श्वासैः पञ्चमण्डल-भोगः, षष्ठ्युत्तरत्रिशतश्वासैरेकमण्डलभोगो भवति(तीति) नियमः। अत्र प्रत्येकसंक्रान्ति-दले पञ्च स्थानानि भवन्ति—दलस्य पश्चिममुत्तरं दक्षिणं पूर्वं मध्यम्। तत्र प्रत्येके **पद्म-पत्रैकैके प्रवहति धरणी**-मण्डलं **पश्चिमे** दलस्यो**त्तरेऽम्बु**मण्डलं वहति, **वह्नि**मण्डलं **सव्ये** वहति, पुनः **पूर्वे प्रवहति पवन**मण्डलम्। **पत्रमध्ये च शून्य**मण्डलं वहति। प्रत्येकं षष्ठ्युत्तरनिःश्वासशतत्रयं प्राणशक्तिरिति एवं **संक्रान्तिः पञ्चभेदैः** भवति प्रत्येका। एषु मण्डलेषु षष्ठ्युत्तरत्रिशतश्वासमध्ये सपादएकादशैकादशश्वासान् गृहीत्वा **प्रवहति विषुवं** लग्नोदयाभिसन्धौ, **होननिःश्वासषष्टि**रिति सत्रिपादश्वासत्रयोनानुवहति श्वासान् सपाद-षट्पञ्चाशदिति। **एवं संक्रान्तिभेदो (भेदाः)** अध्यात्मनि द्वादशल**ग्नभेदैर्भवन्ति**, इति संक्रान्तिनियमः।

इदानीं पञ्चमण्डलाधिदेवा उच्यन्ते **शून्ये**त्यादिना—

शून्याद्यं पञ्च तत्त्वं प्रवहति नियतं चोत्तरे क्ष्मादिसव्ये
राह्वग्नी चन्द्रसूर्यौ बुद्धमहीतनयौ दैत्यमन्त्री गुरुश्च।
केतुर्मन्दश्च खादिष्विति दशपतयः क्षेत्रिणो मण्डलेषु
षण्मासं चन्द्र ईशो भवति नरपते चोत्तरे दक्षिणेऽर्कः ॥ ४० ॥

इह बाह्ये सूर्यस्य मेषादिविषमलग्ने शून्यमण्डलादिभोगः, वृषभादिसमलग्ने पृथिवीमण्डलादिभो[100b] गः; तथाध्यात्मनि **शून्याद्यं पञ्च तत्त्वमिति** शून्यं वायुरग्निस्तोयं पृथिवीमण्डलं **प्रवहति नियतमुत्तरे** वामनासापुटे। **क्ष्मादि(दी)ति** पृथिव्यप्तेजोवायुशून्यमण्डलं **सव्यनासापुटे** वहति। एषु वाम(अपसव्य)सव्येषु दशमण्डलेषु **यथासंख्यं** वामे शून्यमण्लं **राहुरधिदेवता** प्रवाहकाले; दक्षिणे कालाग्निः; वामे वायुमण्डले **चन्द्रः**, दक्षिणे **सूर्यः**; वामे वह्निमण्डले **बुधः**, दक्षिणे **मङ्गलः**; वामे तोयमण्डले **शुक्रः**, दक्षिणे **बृहस्पतिः**; वामे पृथिवीमण्डले **केतुः**, दक्षिणे **मन्दः**[1]; एवं **खादिषु** मण्डलेष्वधिपतयो दश क्षेत्रिणो भवन्तीति। एवं **षण्मासं चन्द्र ईशो भवति**, मेषमिथुनसिंहतुलाधनुः, कुम्भराशौ वामनाड्यां चन्द्रः, शुक्रधातुरीश उत्तरे; दक्षिणे वृषभकर्कटकन्यावृश्चिकमकरमीनराशौ; **अर्को** रजोधातुरीशो भवति। **नरपत** इत्यामन्त्रणमिति मण्डलाधिपतिनियमः।

T 303

इदानीं प्राणादयो वायव उच्यन्ते **तस्येत्यादिना**—

तस्योर्ध्वं हृत्प्रदेशे वसुदलकमले संस्थितं नाडिचक्रं
प्राणाद्यं वायुवृन्दं रविशशिशिखिनो वामसव्ये च मध्ये।
वामे नाडी शशाङ्को वहति खलु सिता दक्षिणे रक्तसूर्या
मध्ये कालाग्निरूपा प्रवहति विषुवे हीननिःश्वासषष्टिः ॥ ४१ ॥

इह नाभिचक्रे गर्भे चतुर्दलात्मके, तद्बाह्ये अष्टदलात्मके, तद्बाह्ये द्वादश दलात्मके, तद्बाह्ये चतुःषष्टिदलात्मके। **दल**शब्देन नाड्यः श्वासधर्मिण्यो[2] गृह्यन्ते। **तस्य** नाभिचक्रस्योर्ध्वं **सार्द्धद्वादशाङ्गुलादूर्ध्वं हृत्प्रदेशे संस्थितम्, नाडीचक्रमष्टारम्** अष्टनाड्यात्मकम्। तेषु **प्राणाद्यं वायुवृन्दं वसुदलकमले शशिरविशिखिनः**। **शिखीति** राहुः। **वामे** चन्द्रनाडी **शशाङ्को वहति** सितवर्णा, **दक्षिणे रक्त**वर्णा सूर्यस्य नाडी व[101a]हति, अष्टसु दलेषु **मध्ये कालाग्निरूपा** नाडी राहुनाडी **प्रवहति, विषुवे** लग्नोदयाभिसन्धौ सपादषट्पञ्चाशत् **श्वासानि(इ)ति**। अस्मिन्नष्टारे हृदब्जे प्रहरसंक्रान्तिनाड्यो वेदितव्याः। नासारन्ध्रे पञ्चमण्डलवाहिन्योऽमी भवन्ति। नाड्या नाड्यां प्राणसञ्चारः सप्तविंशतिशतैः श्वासप्रश्वासैर्भवति सार्द्धसप्तदण्डैरिति।

प्राणोऽपानः समानः कमलवसुदले मारुतश्चाप्युदानो
व्यानो नागश्च कूर्मोऽथ कृकरपवनो देवदत्तो धनञ्जः।
इत्येवं नाडि(डी)चक्रे दशविधपवनाः संस्थिताः कर्मभेदैः
शङ्खिन्यन्तं त्विडाद्यं स्वहृदयकमलं नाभिचक्रं समस्तम् ॥ ४२ ॥

---

१. ख. मण्डः; भो. sPen pa (शनिः)।

२. क. ० धर्मिणो।

तत्र **प्राण** ऊर्ध्वं वहति; **अपानो** नाभ्यधो वहति; **समानः** पूर्वदलेऽधिदेवो रोहिणीनाड्याम्; **उदान** आग्नेयदले हस्तिजिह्वानाड्याम्; **व्यानो** दक्षिणदले पिङ्गलानाड्याम्; **नागो** नैर्ऋत्यदले पूषानाड्याम्; **कूर्मो** वारुण्यदले जयानाड्याम्; **कृकरो** वायव्यदलेऽलम्बुषानाड्याम्; **देवदत्त** उत्तरदले इडानाड्याम्; **धनञ्जय** ईशदले कुहानाड्याम्; सुषुम्नायां प्राणः, दिक्संख्या सं(शं)खिनीया स्रवति बोधिचित्तं तस्यामपानोऽधिदेवता। **इत्येवं नाडि(डी)चक्रे दशविधपवनाः संस्थिताः कर्मभेदैः**। एषां प्राणादीनां सर्वेषां वा द्वासप्ततिनाडीसहस्रेषु व्याप्तिः, किन्त्वष्टस्थानेषु जन्माष्टानामिति। **सं(शं)खिन्यन्तं त्विडाद्यं स्वहृदयकमलं नाभिचक्रं समस्तम्**, जन्मस्थानं समानादीनामिति हृच्चक्रनियमः।

इदानीं प्राणादिकृत्यमुच्यते **प्राण** इत्यादिना—

प्राणः प्राणं करोत्यर्कशशिपथगतस्त्वन्नपानं समस्तम्
आपानो नेत्यधस्तात् सकलसमरसं नेति काये समानः [101b]।
काये स्पन्दत्युदानो मुखकरचरणैर्गीतनाट्यं करोति
व्यानो व्याधिं करोति प्रकृतिगुणवशाद् गात्रभङ्गं तथैव ॥ ४३ ॥

इह शरीरे **प्राणः प्राणं** बलं **करोति अर्कशशिपथगतः** सन्; **अर्कपथः** पिङ्गला, रसना वा; **शशिपथ** इडा, ललना वा; तस्याः पथगत इति। **तु** निपातनार्थम्। **अन्नपानं समस्तम्**, यत् रसं भक्षितमुदकादिपीतम्, तत् **सकलमपानवायुरधो नेती**त्यागमः। **नयति सकलं समरसं** तुल्यरसं यावत् **काये समानो** नाम वायुः, सप्तधातुषु समरसं करोतीत्यर्थः। **काये स्पन्दत्युदानो** नाम वायु**र्मुखकरचरणैर्गीतनाट्यं करोति**। अत्र शरीरे स एवोदानो मुखेन गीतादिकं हास्यालापादिकं करोति, करचरणैर्नाट्यं करोति, गमनादिकं चेति। **व्यानो व्याधिं करोति प्रकृतिगुणवशा**दिति उदकप्रकृतिवशाद् **गात्रभङ्गं तथैव** करोति यथा व्याधिम्।

नागोऽप्युद्गारमेव स्फुटकरचरणात् संकुचन् कूर्मवायुः
क्रोधं क्षोभं समस्तं स कृकरपवनो जृम्भिकां देवदत्तः।
कायं पञ्चत्वगन्तुं(गतं)त्यजति(न)नरपते वायुरेको धनञ्जः
एवं प्राणादिसर्वे प्रकृतिगतगुणान् वायवो न त्यजन्ति ॥ ४४ ॥

नागोऽप्युद्गारं करोत्येव **स्फुटकरचरणात् संकुचन् कूर्मवायुः**; **स** इति **क्रोधं क्षोभं समस्तं कृकरो** वायुः करोति; **जृम्भिकां देवदत्तः** करोति; **कायं पञ्चत्वं गतं धनञ्जयो वायुर्न** त्यजति। **नरपते** इत्यामन्त्रणम्। **वायुरेको धनञ्जय** इति। एवमुक्तक्रमेण वायवः **प्राणादयः सर्वे प्रकृतिगतगुणान् वायवो न त्यजन्ति**, [102a] आकाशादिप्रकृतिगुणानिति प्राणादिकृत्यनियमः।

इदानीं नाडीसंज्ञा तीर्थिकसंज्ञाभिरुच्यते पिङ्गेत्यादिना—

पिङ्गाः सूक्ष्मास्त्विडाद्यास्त्रिविधपथगता रोहिणी हस्तिजिह्वा
पूषा षष्ठी जयाऽगापि च वसु नवमेऽलम्बुषा श्रीकुहे च।
दिक्संख्या शङ्खिनी या स्रवति नरपते बोधिचित्तं सुखान्ते
एतत् श्रीनाडिचक्रं भवति बहुविधं सन्धिभेदैरनेकैः ॥ ४५ ॥ 5

पिङ्गाः सूक्ष्मास्त्विडाद्यास्तिस्रो नाड्य इडादयः। **त्रिविधपथगता** इति चन्द्रपथगता इडा, सूर्यपथगता पिङ्गला, राहुपथगता सुषुम्ना इति **रोहिणी** चतुर्थी, **हस्तिजिह्वा** पञ्चमी, **पूषा षष्ठी, जयाऽगेति** सप्तमी, **अपि वसु** अष्टमी, **अलम्बुषा नवमी, कुहा दिक्संख्या शङ्खिनी या** दशमी शङ्खिनी **बोधिचित्तं स्रवति सुखान्ते। एतत् श्रीनाडिचक्रं**[1] **भवति बहुविधं सन्धिभेदैरनेकैरिति।** अत्र शरीरे सन्धिभेदाः षष्ट्युत्तरत्रिशतसंख्यास्तैः 10 सन्धिभेदैः षष्ट्युत्तरत्रिशतनाडीचक्रभेदा भवन्तीति। प्राणादिवायुप्रकृत्यभेदा अप्येवं ज्ञेया इति नाडीचक्रनियमः।

इन्द्रेऽग्नौ याम्यदैत्ये सवरुणपवने यक्षरुद्रे च मध्ये
एषु स्थानेषु शक्तिर्भ्रमति दिननिशं तत्स्वरूपं भजन्ती।
तस्योर्ध्वं कण्ठचक्रे ग्रहगणसहितं संस्थितं चर्क्षचक्रं 15
ब्रह्माण्डे श्रीललाटे स्वरपरिकरितः (ं) श्वेतबिन्दुं स्रवन् वै ॥४६॥

इदानीं तस्मिन्नेव नाडीचक्रे इन्द्राद्यधिष्ठानमुच्यते इन्द्र इत्यादिना—

इह **इन्द्रदले** प्राणशक्तिरिन्द्रस्वभावं भजति प्रहरमेकं यावत्; **अग्निदले** अग्निस्वभावम्, **याम्यदले** यमस्वभावम्, **नैर्ऋत्यदले** नैर्ऋत्यस्वभावम्, **वारुण्यदले** वरुणस्वभावम्, **वायव्यदले** वायुस्वभावम्, **धनददले**[2] धनदस्वभावम्[3], **ईशदले** रुद्रस्वभावम्। 20 **एवमेष्वष्टदलेषु तत्स्वभावं भज**[102b]**न्ती भ्रमति** प्राणशक्तिरिति इन्द्रादिस्वभावनियमः।

इदानीं **कण्ठचक्रमुच्यते**—

इह **हृत्कमलस्योर्ध्वं** सार्द्धद्वादशाङ्गुलान्ते **कण्ठचक्रे ग्रहगणसहितं संस्थितं चर्क्षचक्रम्।** चत्वारि दण्डनक्षत्राणि, अष्टाविंशति प्रधाननक्षत्राणि; एभिर्द्वात्रिंशद्दलकम्। 25 चतुर्दण्डनक्षत्राणि त्यक्त्वा प्राणस्याष्टाविंशद्दलकेष्वहोरात्रेण[4] संक्रमणं षष्टिदण्डेभ्यो भागेन लब्धं प्रत्येकदले सञ्चार इति। **ब्रह्माण्डे श्रीललाटे स्वरपरिकरितं श्वेतबिन्दुं स्रवन् वै।** तस्यापि कण्ठकमलस्योर्ध्वं सार्द्धद्वादशाङ्गुलान्ते ललाटकमले षोडशदले दलद्वयं त्यक्त्वा चतुर्दशदलेषु प्राणस्याहोरात्रेण सञ्चारः; षष्टिदण्डेभ्यश्चतुर्दशभागलब्धेन प्रत्येकदलत्यागः।

---

१. ग. श्रीनाभिचक्रं। २-३. क. पुस्तके नास्ति। ४. ग. ० दलेषु०।

T 304 बिन्दुविसर्गौ कर्णिकायां वेदितव्यौ चन्द्रपदवाहेति। पुनर्नाभिचक्रे चतुःषष्टिनाड्यो भीमादिसंज्ञाभिः; हृदये अष्ट इडादिसंज्ञाभिः[1]; कण्ठेऽश्विन्यादिसंज्ञाचतुःसन्ध्यासंज्ञाभिः; ललाटनाड्यां प्रतिपदादिसंज्ञाभिः; उष्णीषे चतुःसन्ध्याभेदेन चतुःतत्त्वसंज्ञाभिः; इत्येषु कण्ठललाटकमलदलेष्वन्तर्भूतमष्टदलं चक्रं वेदितव्यम्। एवं नाभौ हृदये कण्ठे ललाटे अष्टार-
5 चक्रं पृथिव्यप्तेजोवायुस्वभावम्; उष्णीषे चतुर्दलं शून्यस्वभावम्; नाभौ चतुर्दलं ज्ञानस्वभावम्; गुह्ये द्वात्रिंशद्दलकम्; बाह्ये षोडशदलेषु स्वरनाड्यः; अन्तर्दशदलेषु स्कन्धधातुनाड्यः; ततोऽन्तर्दलेषु षट् शून्यनाड्य इति। एवं षट्चक्रसंख्या षट्पञ्चाशदधिकैकशतं षट्चक्रेषु वक्ष्यमाणेषु वक्तव्यमि[ति] षट्चक्रनियमः।

मूले पृथ्व्यम्बु वामे प्रवहति हुतभुक् दक्षिणे मूर्ध्नि वायु-
10 र्मध्ये व्योमद्वयोश्च प्रवहति विषुवं नासरन्ध्रक्रमेण।
भिन्दन्त्येतानि शक्तिर्व्रजति परपदं द्वादशान्तं कलान्तं
क्षेत्राद्या हस्तपादे करकमलपुटेऽङ्गुष्ठकान्ताः समस्ताः ॥ ४७ ॥

इदानीं नासापुटद्वये पञ्चमण्डलप्रवाह उच्यते **मूल** इत्यादिना—

इह **वाम**नासापुटे **दक्षिणे** च **मूले** अधो भागे **पृथिवी**मण्डलं **वहति, अम्बु वामे**
15 वहति **वामे** द[103a]क्षिणे च नासापुटे; नासापुटद्वय**मध्य**रेखाभिमुखं सर्वेषाञ्चोत्तरस्थो मेरुरिति ज्ञापकात्। **प्रवहति हुतभु**ङ्मण्डलं **दक्षिणे**, दक्षिणं च उभयोत्तरयोर्बाह्यं **नासारन्ध्र**भागमिति। **मूर्ध्नि वायु**मण्डलं वहति उभयोर्नासापुटयोः, **मध्ये व्योमद्वयो**र्नासापुटयोः पृथ्व्यप्तेजोवायुमण्डलमध्ये व्योममण्डलं वहति; वामलग्नसञ्चारे वामे, दक्षिणलग्नसञ्चारे दक्षिणे मण्डलप्रवाहः। द्वयोर्नासापुटयोः पुनर्यौगपद्येन[2] **विषुवं** ज्ञानमण्डलं
20 वहति प्राणशक्तिरिति। **भिन्दन्त्येतानि** नाभिहृत्कण्ठललाटोष्णीषनासापुटमण्डलानि **भिन्दन्ती** दण्डराशिप्रहरनक्षत्रतिथि[3]सन्ध्यामण्डलभेदैरिति। **शक्तिः** प्राणशक्ति**र्व्रजति परपदं** निरालम्बं **द्वादशान्तं** द्वादशाङ्गुलान्तमिति, **कलान्तं** षोडशकलान्तमिति। इह पृथिवीमण्डलप्रवाहवायुर्नासापुटात् द्वादशाङ्गुलं व्रजति, ततो निवर्तते; उदकमण्डलवायुस्त्रयोदशाङ्गुलं व्रजति, ततो निवर्तते; तेजोमण्डलवायुश्चतुर्दशाङ्गुलं व्रजति, ततो निवर्तते;
25 वायुमण्डलवायुः पञ्चदशाङ्गुलं व्रजति, ततो निवर्तते; शून्यमण्डलवायुः षोडशाङ्गुलं व्रजति, ततो निवर्तते; ज्ञानमण्डलवायुः पृथिवीमण्डलान्तेषु[4] मध्ये प्रविष्टा(ो) द्वादशाङ्गुलं वहति पुटद्वये, आकाशान्ते मध्यमा प्रविष्टा षोडशाङ्गुलं वहति। इह यदा बाह्ये वृद्धिं गच्छति, तदाऽध्यात्मनि ह्रस्वो भवति; यदा षोडशादौ बहिर्ह्रस्वो भवति वायुनाडीवशेन, तदा नाभौ वर्द्धन्ते चतुरङ्गुलानीति प्राणशक्तिप्रवाहनियमः।

30 इदानीं क्षेत्रादय उच्यन्ते **क्षेत्र** इत्यादिना—

इह शरीरे क्षेत्रद्वयं बाहुसन्धिद्वये, उपक्षेत्रमुरुसन्ध(न्धि)द्वये, छन्दोहद्वयं उपबाहु-

---

१. क. ख. इन्द्रादिसंज्ञाभिः। २. क. ख. पुनर्योगपदेन। ३. क. ख. पुस्तके 'तिथि' इति नास्ति। ४. क. ख. ० मण्डलान्ते सा।

सन्धिद्वये, उपच्छन्दोहं जानुसन्धिद्वये, मेलापकद्वयं करसन्धिद्वये, उपमेलापकं पादसन्धि-द्वये, श्मशानद्वयं करतलद्वये, उपश्मशानद्वयं पादतलद्वये, चतुर्महाश्मशानानि कराङ्गुलि-द्वये, उप(महा)श्मशानानि[१] चत्वारि पादाङ्गुलिद्वये इति क्षेत्रादिनि[103b]यमः ।

इति श्रीमूलतन्त्रानुसारिण्यां[२] लघुकालचक्रतन्त्रराजटीकायां[३]
द्वादशसाहस्रिकायां विमलप्रभायां
समुदयसत्यादिमहोद्देशो
द्वितीयः ॥ २ ॥

(३) चक्रवर्त्तिम्लेच्छयुद्ध-कालचक्रकुलतन्त्र-नाडीकुलोत्पत्ति-महोद्देशः

इदानीं चक्रवर्त्तिम्लेच्छयुद्धं स्वदेहे उच्यते **चक्री**त्यादिना—

चक्री वज्री स्वदेहे सुरवरपतयो द्वादशाङ्गा निरुद्धाः
सम्यग्ज्ञानं हि कल्की गजतुरगरथाः किङ्करार्य्यप्रमाणाः ।
प्रत्येकं रुद्रसंज्ञा प्रभवति हनूमान् श्रावकं प्राणिनां च
पापं म्लेच्छेन्द्रदुष्टस्त्वकुशलमपि(पथि) यत् क्रूरमतिर्दुःखदाता ॥४८॥

इह **स्वदेहे** मनुष्यदेहे यो बाह्ये **चक्री** प्रथमपटले उक्तः, स देहे **वज्री** चित्तवज्र इत्यर्थः । ये **सुरवरपतयो** द्वादश ईश्वरादयः, ते **द्वादशाङ्गा निरुद्धा** इति । यः **कल्की सम्यग्ज्ञानं** स्वदेहे **हि**[४] तस्माद्धेतोः । ये बाह्ये **गजतुरगरथाः किङ्करा आर्य-अप्रमाणा**[५]-श्चत्वारो देहे, ते[६] यो बाह्ये **रुद्रः** स देहे **प्रत्येक**ज्ञानसंज्ञी; यो बाह्ये **हनूमान्** स स्वदेहे **श्रावक**ज्ञानमिति स्वदेहे[७] महा[८]चक्री सपरिवारं कल्की च भवति । तथा यो बाह्ये **म्लेच्छेन्द्रदुष्टोऽसौ पाप**चित्तं शरीरे । यो बाह्ये **क्रूरमतिर्दुःखदाता अकुशलपथ** इति देहे ।

अश्वत्थामा त्वविद्या दनुबलसकलं मारपक्षश्चतुर्धा
संहारस्तस्य युद्धे भवभयनिधनं श्रीजयो मोक्षमार्गः ।
कैलाशे (से) धर्मदानं भवभयहरणं द्रव्यपूर्णा च पृथ्वी
पुत्रो ब्रह्मासुरेशस्त्रिदशनरगुरोः पृष्ठतश्चाग्रतो यः ॥ ४९ ॥

मञ्जुश्रीर्लोकनाथस्त्रिभुवनविजयी श्रीरजो बोधिचित्तं
पृष्ठे ब्रह्मादिवंशा विविधमहितलेऽनेकबुद्धा विशुद्धाः ।

---

१. भो. Ñe baḥi Dur Khrod Chen po (उपमहाश्मशानानि) ।
२. क. ख. मूल० । ३. क. ख. लघुतन्त्रराजकालचक्रटीकायां । ४. क. ख. ति ।
५. क. ख. प्रमाणा; भो. Tshad Med pa (अप्रमाणा) । ६. भोटे नास्ति ।
७-८. भोटे नास्ति ।

एवं म्लेच्छेन्द्रयुद्धं भवति हि नियतं देहिनां देहमध्ये
मायारूपं तु बाह्ये खलु मखविषये म्लेच्छयुद्धं न युद्धम् ॥ ५० ॥

यो बाह्ये **अश्वत्थामा** स देहे **अविद्याप्रवृत्तिरिति**; यद् बाह्ये **दनुबलं** हस्त्यश्वपादातिकं स देहे **मारपक्षश्चतुर्धा**। **संहारस्तस्य युद्धे**, यो बाह्ये म्लेच्छेषु तत् स्वदेहे 5 [104a] **भवभयस्य निधनम्**। **श्रीजयो** यो बाह्ये **महाचक्रिणः कल्किनश्च** स स्वदेहे **मोक्षमार्गलाभः**। यद् बाह्ये **कैलाशे**(से) **धर्मदानं** महाचक्रिणः तत् स्वदेहे **भवभयहरणम्**। या बाह्ये **द्रव्यपूर्णा धरित्री** सा शरीरे धातुसमूहो विशुद्धः। बाह्ये यौ चक्रिणः पुत्रौ ब्रह्मासुरेशावभूताम्, **पृष्ठतः** एकखण्डे धर्मदेशकः, **अग्रतोऽग्रखण्डे म्लेच्छधर्मक्षयार्थी**।

10 स **मञ्जुश्रीर्लोकनाथस्त्रिभुवनविजयी** तत् स्वदेहे **रजो बोधिचित्तं** सुखदमिति प्रणिधानचित्तं प्रस्थानचित्तं च। **पृष्ठे** खण्डे ये **ब्रह्मादिविविधवंशास्ते** स्वदेहे **अनेकबुद्धा विशुद्धाः** स्कन्धधात्वायतनस्वभावा इति **म्लेच्छेन्द्रयुद्धं भवति हि नियतं देहिनां देहमध्ये**। **मायारूपं तु बाह्ये** खलु **मखविषये म्लेच्छयुद्धं न युद्धमिति** अस्य विस्तरो वक्ष्यमाणे पञ्चमपटले परमाक्षरज्ञानसिद्धौ वक्तव्य इति।

15 इदानीं मध्यमा त्रिपक्षं त्रिवर्षभेदैस्त्रिकुलादितन्त्रभेदः समाजादिक उच्यते **कालाब्द** इत्यादिना—

कालाब्दे वह्निसंख्येऽब्ददिनगणहते षट्कुलं चायनाङ्कात्
षट्त्रिंशन्मासभेदाद् रसगुणितरसाद् योगिनीनां कुलानि।
वारच्छेदेन लब्धा प्रकटितनियता देवताः कालचक्रे
20 पक्षच्छेदेऽभिधानं भवति नरपते देवतादेवतीभिः ॥ ५१ ॥

इह **कालाब्दे** मध्यमा[1]नाडीवर्षे **वह्निसंख्ये** त्रिवर्षसंख्ये अ[104b]**ब्ददिनगणहते** षष्ट्युत्तरत्रिशतदिनैर्हते सति अशीत्युत्तरसहस्रो दिनगणो भवति। तदेव त्रिवर्षं त्रिकुलं कायवाक्चित्तकुलवर्षभेदेन सत्त्वरजस्तमः स्वभावमिति। ततो दिनगणा**दयन**भेदेन अशीत्युत्तरशतभागेन लब्धानि **षट्कुलानि** भवन्ति। पुन**र्मासभेदेन** ततो दिनगणात् T 305 25 त्रिंशद्भागेन लब्धानि **षट्त्रिंशत् कुलानि** भवन्ति। **रसगुणितरसादिति** षड्भिर्गुणिताः **षट्त्रिंशद्योगिनीनां कुलानि**। एवं योगिनीनामु[2]पायानामिति। ततोऽशीत्युत्तरसहस्रदिनगणात् **वारच्छेदेन लब्धा प्रकटितनियता देवता कालचक्रे** माण्डलेया इति। चतुःपञ्चाशदधिकशतं शेषं प्रज्ञोपाययुगलम्; एवं षट्पञ्चाशदधिकशतं **कालचक्रम्**; सप्तभागावशेषं कुलिकास्थानाधिदैवं देवतादेवीचक्रं कुलिकालक्षणमिति; पुनस्तस्मात् पूर्वदिन-

---

१. क, ख. ग. पुस्तकेषु 'मध्यमाया' इति दृश्यते; किन्तु 'मध्यमा' इत्येव सम्यक् प्रतीयते; भो. rTsa dBu Maḥi Lo (मध्यमानाडीवर्षे)।

२. भो. rnal ḥByor pa rNam Kyi ḥo (योगिनाम्)।

गणादशीत्युत्तरसहस्रात् **पक्षच्छेदेऽभिधानमिति** पञ्चदशभागेन लब्धाभि**र्देवतादेवतीभिर-भिधानं** भवति। कालचक्राधिपतिमिथुनेन सार्द्धं द्वासप्ततिदेवतादेवतीलक्षणमिति त्रिवर्षभेदै**र्योगिनीतन्त्र**नियमः; लोकसंवृत्या त्रिकुलषट्कुलषट्त्रिंशत्कुलानि **योगिनीतन्त्र** इति **योगिनीतन्त्र**नियमः।

मायाजालं दिनाङ्गास्त्रि(ङ्गात् त्रि)विधमपि भवेद्रन्ध्रवेदैश्च सम्यक् 5
भूतो भूतार्णवैः स्याच्छिखिजलनिधिभिः श्रीसमाजर्तुभेदः।
तत्त्वाख्यं षड्भिर्हीनं त्वपरमपि तयोरर्धभेदैर्विभिन्नो-
भूयो मिश्रो द्विभेदस्त्रिदशनवदिशाभिश्च रन्ध्रैः सतत्त्वैः ॥ ५२ ॥

इदानीं क्रियायोग-योगतन्त्राणि त्रिषट्प्रकारभेदेनोच्यते(न्ते) **मायाजालमि-त्यादिना**— 10

इह मध्यमात्रिपक्षदिनानि पञ्चचत्वारिंशद्दिनानि द्वादशगुणितानि तानि दिनाङ्गानि चत्वारिंशदधिकपञ्चशतसंख्यानि[1] भवन्ति प्रतिदिनद्वादशलग्नभेदादिति। तस्माद् **दिनाङ्गात्** चत्वारिंशदधिकपञ्चशताद्[2] व्यवकलितं **मायाजालं त्रिविध-मपि भवेत्**, एकं **रन्ध्रवेदैरे**कोनपञ्चाशद्भिर्देवतायुग्मैर्भवति, **भूतो** द्वितीयं **भूतार्णवैः स्यादि**ति पञ्चचत्वारिंशद्भिर्युग्मैर्देवतानां भवतीति। अपरं **शिखिजलनिधिभिः** त्रयश्च- 15 त्वारिंशद्भिर्देवतायुग्मैरिति। अतो **दिनाङ्गाद्**[3] व्यवकलितस्त्रिभे[105a]दैः सप्तत्रिंशद-धिकशतसंख्या भवन्ति, द्विगुणदेवतादेव्यः चतुःसप्तत्यधिकद्विशतसंख्या भवन्ति, इति **मायाजालनियमः**। अस्य प्रपञ्चार्थः पञ्चमपटले वक्तव्य इति **मायाजालक्रियायोगतन्त्र-नियमः**।

इदानीं षट्प्रकारः समाजभेद उच्यते— 20

तस्मात् व्यवकलितावशेषाद् दिनाङ्गात् **श्रीसमाजर्तुभेद** इति। **तत्त्वाख्यमिति** पञ्चविंशत्यात्मकम्, तस्माद् दिनाङ्गात् पञ्चविंशद्भिर्व्यवकलितैर्देवतायुग्मैर्भवति। अपर-मतः पञ्चविंशतिः **षड्भिर्हीनमे**कोनविंशत्यात्मकम्, एकोनविंशतिभिर्देवताभिर्व्यवक-लितैरिति। **अपरमपि तयोः** पञ्चविंशत्येकोनविंशत्यात्मकयो**रर्धभेदैर्विभिन्नो** भेदो भवति। पञ्चविंशत्यर्धः सार्द्धद्वादशैकोनविंशत्यर्द्धः सार्द्धनव, अतोऽर्द्धः सार्द्धं द्वादशे 25 प्रविशति। तत्र एकोनवात्मकः समाजः, अपरस्त्रयोदशात्मकः। **भूयोऽ**परो **मिश्रो द्विभेदो** भवति **समाजः**। **त्रिदश** इति त्रयोदश। **नवदिशा** एकोनविंशतिः। एभिस्त्रिदशनव-दिशाभिश्च द्वात्रिंशद्भिर्देवतायुग्मै **समाजो** भवति; **रन्ध्रैर्न**वभिः **सतत्त्वैः** पञ्चविंशद्भिः सहः द्वितीयः **समाजः** चतुस्त्रिंशद्भिर्देवतायुग्मैर्भवति। एवं **समाजः** षड्भेदभिन्नः।

---

[1]–[2]. क. पुस्तके '०'संख्यानि' इत्यारम्य ०'पञ्चशताद्' यावत् नास्ति।
[3]. क. दिनाङ्गा।

एषु षट्सु तन्त्रराजेषु द्वात्रिंशदधिकशतदेवतायुग्मैः संख्या द्विगुणिता देवता-देवतीसंख्या चतुःषष्ट्यधिकद्विशता इति। एवं समाजमायाजालेषु नवसु तन्त्रराजेष्वधिपतियुग्मेन सार्द्धं चत्वारिंशदधिकपञ्चशत[1] दिनाङ्गसंख्या देवतादेवत्यो भवन्ति। एषु तन्त्रेषु स्कन्धधात्वायतनचन्द्रसूर्यचरणनिष्पत्तिभेदेन भेदो गर्भे यथा तथा पञ्चमपटले
5 आसनभेदेन वक्तव्य इति **योगतन्त्रनियमः**।

इह गर्भे जातकस्य स्कन्धधातुनिष्पत्त्या नवात्मकः **समाजः**, तथा स्कन्धधातुसहजधर्मसम्भोगनिर्माणचक्रे निष्पत्त्या त्रयोदशात्मकः, तथा स्कन्धधातुचक्रविषयनिष्पत्त्या एकोऽनविंशत्यात्मकः, तथा स्कन्धधातुचक्रविषयषट्नेत्रादिनिष्पत्त्या पञ्चविंशत्यात्मक इति। तथा स्कन्धधातुचक्रविषयेन्द्रियकर्मेन्द्रियगुह्योष्णीषकमलनिष्पत्त्या द्वात्रिंशदा-
10 [105b]त्मक इति। तथा स्कन्धधातुषट्चक्रविषयेन्द्रियकर्मेन्द्रियदिव्येन्द्रियानन्दोपेत्या (आनन्दानुपेत्य) चतुस्त्रिंशदात्मकः **समाज** इति। गर्भाधानात् षोडशवर्षावधेर्यावत् षट्प्रकार उत्पादो बालानामिति **समाजनियमः** पञ्चमपटले विस्तरेण वक्तव्यः।

एवं **मायाजाले** स्कन्धधातवो नवलोमाद्यष्टधातवो द्वादशायतनानि चतुश्चक्रसहितानि वातपित्तश्लेष्मसन्निपातधातुसहितानि षट्कर्मेन्द्रियाणीति त्रयश्चत्वारिंश-
15 दात्मको **मायाजालः**। उष्णीषगुह्यकमलसहितं पञ्चचत्वारिंशदात्मकमिति रागद्वेषमोहमानेन सार्द्धमेकोनपञ्चाशदात्मकमिति **मायाजालनियमः** पञ्चमपटले विस्तरेण वक्तव्य इति **योगिनीयोगतन्त्रोत्पादनियमः**।

इदानीं बाह्याध्यात्ममुद्रोच्यते —

इह सर्वत्र हेतुना फलं मुद्रणीयम्, फलेन च हेतुर्मुद्रणीय इति। रजोधर्मित्वात्
20 सूर्यः प्रज्ञाहेतुः, शुक्रधर्मित्वाच्चन्द्रः फलमुपायः। परापेक्षिकया शुक्रधर्मित्वाच्चन्द्रः प्रज्ञाहेतुः, रजोधर्मित्वादुपायः सूर्यः फलम्। एवं सर्वत्र प्रज्ञा शून्यताहेतुः, उपायः करुणा फलमिति।

चन्द्रांशे षड् दिना ये(नि) खलु दिवसगणे वारभागेन लब्धाः
षण्मुद्रा वज्रिणस्तास्त्वपरदिनगणः कायवाक्चित्तमुद्राः।
25 प्रज्ञाकाये त्रिलग्ना प्रकटितनियता योगिनी योगतन्त्रे
शक्तिः क्रोधाः क्रमेण प्रभवति दशकं पञ्चकं बुद्धदेव्यः ॥५३॥

अत्र ये **चन्द्रांशे** पञ्चचत्वारिंशद्दिनगणास्तस्माद् **वारभागेन**[2] **लब्धाः षड् दिनानि षण्मुद्रा वज्रिणो** भवन्ति—चक्री कुण्डलं कण्ठिका रुचकं मेखला भस्मयज्ञोपवीतमिति, बाह्यमुद्रा कालचक्रस्य **अपरदिनगणम्**(:)। अवशेषं[3] त्रिसंख्यं **कायवाक्चित्तमुद्रा**
30 अध्यात्मनि वज्रिण इति बाह्याध्यात्मनि नव मुद्रा वेदितव्याः। **प्रज्ञाकाये** प्रज्ञातन्त्रे उपायकाये उपायतन्त्रे **त्रिलग्ना** सत्त्वरजस्तमात्मकाः कायवाक्चित्तलक्षणा[4] इति **योगिनी योगतन्त्रे प्रकटितो** मुद्रानियमः। [106a]

---

१. ग. पञ्चाशत। २–३. ख. पुस्तके नास्ति। ४. क. कायवाक्लक्षणा।

इदानीं कालचक्रदेवतादेवीसंख्या उच्यते **शक्तीत्यादिना**—

इह षट्चक्रनाडीविश्वस्वभावो देवतागणः। **शक्तिः क्रोधाः क्रमेण प्रभवति दशकमिति** दश शक्तयो दश पारमिताः; उष्णीषादयो दशक्रोधा इति प्रत्येकं दशकम्। **पञ्चकं बुद्धदेव्य** इति अक्षोभ्यादयः पञ्च बुद्धाः, वज्रधात्वीश्वर्यादयः पञ्च देव्यः इति प्रत्येकं पञ्चकम्। 5

रूपाद्यक्ष्यादिषट्कं पुनरपि नृपते देववृन्दं द्विषट्कं
योगिन्यो नागचण्डाष्टकमिति भुवने सर्वमेतद् द्विगुण्यम्।
एतत् श्रीकालचक्रं चतुरधिकशतं तस्य चार्द्धं त्रिधातौ
सूर्यांशे या च षष्टिः प्रतिदिनघटिका निर्गता मासमध्ये ॥५४॥

रूपाद्यक्ष्यादिषट्कमिति। रूपवज्रादयः षट् क्षितिगर्भादयः षट्, एवं प्रत्येकं 10 षट्कं पुन**र्देववृन्दं द्विषट्कमिति** इन्द्रादिकं द्वादशसंख्यम्, **योगिन्यो नागचण्डाष्टकमिति** T306 चर्चिकादीनामष्टकम्, अनन्तादीनामष्टकम्, श्वानास्यादीनामष्टकम्, एतत् समस्तं(ो) देवतागणम्(:) साधनापटले प्रत्येकं नामभेदैर्वक्तव्यमिति। **भुवन** इति बाह्येऽध्यात्मनि **सर्वमेतत्** पुनः प्रज्ञोपायभेदेन **द्विगुण्यम्; एतत् श्रीकालचक्रं चतुरधिकशतं तस्य चार्द्धं** द्वापञ्चाशद्देवतात्मकम्। एवं सूर्यचन्द्रभेदेन पुनस्तदेवैकत्वेन षट्पञ्चाशदधिकैक- 15 शतदेवात्मकं **कालचक्रं** वेदितव्यम् इति कमलकर्णिकास्थदेवतागणनियमः।

इदानीं **चर्चिकादिकमलपत्रदेव्य** उच्यन्ते—

सूर्यांशे द्वात्रिंशद्भागेन श्वासचक्रात् **प्रतिदिने घटिकाद्वयं** यल्लब्धं **मासस्य मध्ये** त्रिंशद्दिनैः **षष्टिनाड्यो** भवन्ति कुलिकारूपिण्यः।

योगिन्यस्ताः समस्तास्त्रिभुवननिलये लग्नमिश्रा द्विगुण्या 20
सूर्यांशेऽहः प्रभिन्नं द्विगुणितमपि यद् योगिनीवृन्दमत्र [106b]।
पिण्डीभूताः समस्तास्त्रिगुणरविदिनास्साभिधाना भवन्ति
चन्द्रे पक्षप्रभेदो भवति दिनकरे वर्गभेदः समस्तः ॥५५॥

ताश्च योगिन्यो लग्नमिश्रा लग्नचतुःसन्ध्याकुलिका विमिश्रा चतुःषष्टिर्भवन्ति। ताश्च प्रज्ञोपायभेदेन **द्विगुणिता** अष्टाविंशत्यधिकशतसंख्या भवन्तीति। पुनः **सूर्यांशेऽहः** 25 **प्रभिन्नं** षष्ट्युत्तरत्रिशतदिनप्रभिन्नं चैत्रादितिथिलक्षणं देवतागणम्। तदेव द्वादशलास्यादिभिः सहितं **द्विगुणितमपि** विंशत्यधिकसप्तशतसंख्यं देवतीवृन्दं भवतीति। **पिण्डीभूताः समस्ता** इति एता देव्यः **साभिधाना** द्वासप्ततिदेवताभिः सहिता मुद्राषट्केन सार्द्धं **त्रिगुणरविदिना** त्रिवर्षदिना अशीत्युत्तरसहस्रसंख्या इति त्रिवर्षदिनगणस्वभावा देवतादेव्यो वेदितव्या योगिनीतन्त्रेऽ[इत्य]भिप्रायः। एवं **सूर्यवर्षप्रभेदो भवति शशधरे पक्षभेदः** 30 **समस्तो** मायाजालसमाजयोर्नवधा चत्वारिंशदधिकपञ्चशतदेवतागणैरिति।

एवं तत्रादिबुद्धे स्वकरनृपतयोः देवतादेवतीनां
प्रज्ञोपायो निशाहो भवति हि समविभागोऽर्द्धरात्रे दिनार्द्धे ।
येन ज्ञातं स्वदेहे दिननिशिसमयैर्मासंक्रान्तिभेदैः
स श्रीमान् मञ्जुवज्रो भवभयमथनो जन्मनीहैव बुद्धः ॥५६॥

5 **एवं** सूर्यचन्द्रदेवतागणैरेकीभूतैश्चादिबुद्धं(द्धो) भवति । तस्मिन्नादिबुद्धे **स्वकरनृपतयो** विंशत्यधिकषोडशशतसंख्या इति, तेषां **देवतादेवतीनां प्रज्ञोपायं**(यो) **निशाह** इति । यथासंख्यं प्रज्ञा रात्रिभागः, उपायो दिवाभागः **समविभागो** मध्याह्ना-**दर्द्धरात्रे** अर्द्धरात्रान्मध्याह्ने सार्द्धत्रयोदशनक्षत्रैः दशाधिकाष्टशतदण्डै[107a]र्वा घटिका-भिर्वा निशाविभागः; एवं दिवाविभागः । **श्रीमान्न**(ति)क्षत्रमण्डले आदिबुद्धे देवतागणो
10 नक्षत्रनाडीसंख्यात्मको भगवतोक्त इति । यथा बाह्ये नक्षत्रघटिकाभोगः सर्वग्रहाणाम्, तथाध्यात्मनि कायवाक्चित्तज्ञाने षडिन्द्रियधर्माणामिति । **येन ज्ञातं स्वदेहे** । एवमुक्त-क्रमेण प्रज्ञोपायात्मकं **येना**दिबुद्धं (इति) **स्वदेहे** ज्ञातम् । **दिननिशिसमयैः** सन्ध्याप्रहरादि-भेदैः **माससंक्रान्तिभेदै**र्द्वादशभिः **स** योगी **श्रीमान् मञ्जुवज्रो भवभयमथनो जन्मनीहैव बुद्ध** इति लघुतन्त्रमूलतन्त्रदेवतोत्पादनियमः ।

15 त्रिंशद्भागेन तस्मात् त्रिगुणितनियता देवताः कालचक्रे
मुद्राषट्कं च बाह्यं पुनरपि नियताश्चक्रनाड्यस्तथैव ।
उष्णीषे द्विः हृदोऽष्टौ शिरसि नृपतयो दन्तसंख्या च कण्ठे
नाभौ चाष्टाष्टगुण्या द्विगुणनृपतयो गुह्यमध्ये प्रसिद्धाः ॥५७॥

इदानीमतः परमादिबुद्धाल्लघुतन्त्रोत्पाद उच्यते **त्रिंशदि**त्यादिना—

20 इह परमादिबुद्धात् विंशत्यधिकषोडशशतात् **त्रिंशद्भागेन** लब्धाः चतुपञ्चाशद्-देवता भवन्तीति । पुनः कायवाक्चित्तगुणितास्त्रिगुणा द्वाषष्ट्यधिकशतं भवति । एषु माण्डलेयाश्चतुःपञ्चाशदधिकशतसंख्या मण्डलेसं(शं) प्रज्ञोपाययुग्मं **बाह्ये मुद्राषट्क-मिति** । **कालचक्रं परमादिबुद्धा**न्निर्गतं दशभागेनेडादिसं(शं)खिन्यन्तनाडीभेदेनेति बाह्ये नेयार्थमिति लघुकालचक्रनियमः ।

25 इदानीं **कालचक्रनाड्य** उच्यन्ते **चक्रनाड्यस्तथैवे**त्यादिना—

इह शरीरे त्रिकुलनाड्यस्तिस्रः कायवाक्चित्तविन्दुधारिण्यः, **नाभौ** गुह्यवज्र-मणाविति तथा षट्कुलनाड्यो ललना-रसना-अवधूती-विण्मूत्र-शुक्रवाहिन्य इति । तथा षट्त्रिंशत् कुलनाड्यः **उष्णीषादि**षट्चक्रनाड्यः षट्, द्वे शब्दग्राहिण्यौ, द्वे स्पर्श-ग्राहि[107b]ण्यौ, द्वे रसग्राहिण्यौ, द्वे रूपग्राहिण्यौ, द्वे गन्धग्राहिण्यौ; एता दश-
30 नाड्यः । नाभिचक्रमध्येऽपरमण्डलेषु द्वादशसंक्रान्तिनाड्यः, अष्टप्रहरनाड्यः । एवं सर्वाः षट्त्रिंशत् कुलनायिका भवन्ति—षड् रसरूपिण्यः, षड् धातुरूपिण्यः, षडिन्द्रियरूपिण्यः, षडविषयरूपिण्य, षट् कर्मेन्द्रियरूपिण्यः, षट् कर्मेन्द्रियविषयरूपिण्यः, एवं षड् रूपप्रवर्तिन्यः

षट् वेदनाप्रवर्तिन्यः, षट् संज्ञाप्रवर्तिन्यः, षट् संस्कारप्रवर्तिन्यः, षड् विज्ञानप्रवर्तिन्यः, षड् ज्ञानप्रवर्तिन्य इति षट्त्रिंशत् कुलनाड्योऽप्याधाराधेयसम्बन्धेन द्वासप्ततिरिति ज्ञेयाः। तथाह—**कालचक्रनाड्यः उष्णीषेऽब्धिरिति** चतुर्दलरूपिण्यः, चतस्र[1]श्चतुःसन्ध्याप्रवर्तिन्यः। **हृदोऽष्टौ** नाड्यो रोहिण्यादयः समानादीनामाधारभूताः। प्रत्यहं प्रहरभेदेन वाराष्टकवाहिन्यः। अत्राध ऊर्ध्वं द्विनाड्योराधेयो वायुरिति। **शिरसि नृपतयः** षोडशतिथिप्रवर्तिन्यः। **दन्तसंख्या च कण्ठ** इति कण्ठचक्रे अष्टाविंशति नक्षत्राणि, चत्वारि दण्डनक्षत्रप्रवर्तिन्यो द्वात्रिंशदिति। **नाभौ** नाभिकमले राशिनाडिकावाह्ये घटीनाड्यः अष्टाभिरष्टगुणिताश्चतुःषष्टिनाड्यः षष्टिमण्डलवाहिन्यश्चतुःशून्यप्रवाहिन्यः चतुःषष्टिदण्ड[2]प्रवर्तिन्य इति। **द्विगुणनृपतय** इति। द्वात्रिंशद्गुह्यमध्ये **गुह्यकमलनाड्यः** शुक्रादिद्वात्रिंशद्धातुप्रवर्तिन्य इति।

षण्णाड्यश्चक्ररोधा दशविषयहराः सन्निपातस्वभावा
भूयो भूयो द्विगुण्याः पुनरपि गुणिताः श्लेष्मपित्तानिलांशाः।
एता वै मृत्युनाड्यो गुरुनियमवशादायुरारोग्यदाश्च
षट्चक्रे वायुनाड्यो मरणभयहरा योगिनां नात्र चित्रम् ॥५८॥

एषु **षट् नाड्यः षट् चक्ररोधा** भवन्ति; **दश विषयहारिण्यो** भवन्ति। ताः **सन्निपातस्वभावा** इति ताः **पुनर्द्विगुण्याः** श्लेष्मांशाः विंशतिः **भूयो द्विगुण्या** पित्तांशाः चत्वारिंशद् भवन्ति, पुनरपि अनिलांशास्ताऽशीतिर्भवन्ति, इति षट्पञ्चाशदधिकशतनाड्यः षट्चक्रेषु व्यवस्थिताः कालचक्रनाड्योऽवगन्तव्याः। **एता वै मृत्यु**[108a]**नाड्यो गुरुनियमवशादायुरारोग्यदाश्च**। **षट्चक्रे कालनाड्य उक्ता मरणभयहरा** गुरूपदेशेन भाविताः सत्यो **योगिनां नात्र चित्रमिति**।

उष्णीषेऽब्धिर्ललाटे जलधिहतयुगाः श्लेष्मधातुप्रकोपाः
कण्ठे दन्ता हृदब्जे नयनहतयुगाः पित्तधातुप्रकोपाः।
नाभौ गुह्येऽब्धिषष्टिर्नृपतिरपि तथा वायुधातुप्रकोपा
गुह्येऽन्यादिक्षट्कं प्रकटितनियताः सन्निपाता निरोधाः ॥५९॥

उष्णीषेऽब्धिश्चतस्रः जलधिहतयुगा इति षोडश **ललाटे**, एता विंशति नाड्यः **श्लेष्मधातुप्रकोपा** इति। **कण्ठे दन्ता** इति द्वात्रिंशन्नाड्यः। **हृदब्जे नयनहतयुगा** इति अष्ट नाड्यः, एताश्चत्वारिंशन्नाड्यः **पित्तधातुप्रकोपा** इति **नाभौ च गुह्ये** च यथासंख्यम् **अब्धिषष्टिरिति** चतुःषष्टिनाड्यः। **नृपतिरपि** गुह्यकमले बाह्ये परिमण्डले नाड्यः षोडश, एता अशीति नाड्यो **वायुधातुप्रकोपा** इति। **गुह्येऽन्यादिक्**[3] **चेति**[4] दश नाड्यो मध्यपरिमण्डले। अन्या **षट्** च गर्भपरिमण्डले यथासंख्यम्। **सन्निपाताः** सन्निपातप्रकोपा

T 307

१. क. ख. ततः ग्र। २. क. ख.० दल। ३–४. क.० दिश्चेति।

इति। **निरोधा** इति षट्चक्रनिरोधस्वभावाः। एवं षट्पञ्चाशदधिकशतकालचक्रनाड्यो देवतादेवतीस्वभावेनावस्थिता बालानां मृत्युदायिकाः, योगिनां सुखदायिकाः षड्कुल-नाडीभिः सार्द्धं भाविताः सत्यः; द्वाषष्ट्यधिकशतं कालचक्रं षट्चक्रनाड्यात्मकमिति। तासु पुनर्द्वाषष्ट्यधिकशतनाडीषु प्रत्येकनाडी दशवायुप्रचारेण स्कन्धधातुदशस्वभावेन
5 दशविधा भवन्ति। एवं सर्वा दशगुणिता विंशत्यधिकषोडशशतसंख्या भवन्ति सप्तविंशन्न-क्षत्रघटिकावाहिन्यः। एवं श्रीमान्नक्षत्रमण्डलपरमादिबुद्धे एतावत्यो देवत्यः प्रज्ञोपाये-नेति[1]। अतो विस्तरान्नक्षत्रमण्डलाल्लोकसंवृत्या श्लेष्मादिधातुवाहिन्यो [108b] देवता लौकिकसिद्धिसाधनाय च[2] शरीरसिद्धिसाधनाय वा मञ्जुश्रियोद्धृताः षट्चक्रनायिका इति कालचक्रनाडीसंक्र[3]नियमः।

10 इदानीं षट्कुलनाडीरक्षणमुच्यते **षडित्यादिना**—

षण्णाड्यश्चक्ररोधास्त्रिविधपथगताश्चन्द्रसूर्याग्निभेदै-
र्देहे ता रक्षणीयाः गुरुनियमवशान्मृत्युदाः प्राणिनां याः।
षट्सु प्राणप्रवेशो यदि भवति नृणां मृत्युहानिस्तदा वै
सूक्ष्मायां न प्रविष्टे ह्यमरणविषयश्छिद्यते योगिभिश्च ॥६०॥

15 इह शरीरे याः **षड् नाड्यश्चक्ररोधा** उक्तास्त्रिविधपथगताश्चन्द्रसूर्यराहुवाम-दक्षिणमध्यपथगताः, ऊर्ध्वमधोविण्मूत्रशुक्रपथगताश्**चन्द्रसूर्याग्निभेदेनेति**। **देहे ता रक्षणीया** योगिना; कुतः? **गुरुनियमवशादिति**। गुरुनियमः षडङ्गयोगः, तेन मरणाद् रक्षणीया **मृत्युदाः प्राणिनां याः** षण्णमासां प्राणप्रवेश इति। **षट्सु प्राणप्रवेशो यदि भवति नृणां** सर्वकालं **मृत्युहानिस्तदा वै** एकान्तमेषु षट्सु मध्ये सूक्ष्माऽवधूती मध्यमा,
20 तस्यां **सूक्ष्मायां** प्राणे **न प्रविष्टे** सति **ह्यमरणविषयः च्छिद्यते योगिभिश्च**; अपि तुन च्छिद्यते मरणविषय इति।

इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां
द्वादशसाहस्रिकायां विमलप्रभायाम्
अध्यात्मनि चक्रवर्त्तिम्लेच्छयुद्ध-कालचक्रकुलतन्त्र-नाडीकुलोत्पत्ति-महोद्देशः
तृतीयः ॥ ३ ॥

25

(४) अरिष्टमरणलक्षण-नाडीच्छेद-महोद्देशः

इदानीं देहिनामकालमरणलक्षणमुच्यते **प्राण** इत्यादिना—

प्राणो यद्येकनाड्यां वहति दिननिशं जीवितं कालवर्षम्
अव्युच्छिन्नैकपक्षं वहति यदि नृणां जीवितं सार्द्धवर्षम्।

---

१. क. प्रज्ञोपायेति। २. क. श्च। ३. क.० सम्वर।

अव्युच्छिन्नैकमासं वहति नरपते जीवितं च त्रिमासं
एवं योगी स्वेदेहे शशिगतिमरणं ज्ञायते कालचक्रे ॥६१॥ [109a]

इह शरीरे नाभिचक्रं द्वादशारं राशिचक्रं मेषादिविषमलग्नात्मकमेकान्तरितम्। एवं वृषभादिसमलग्नात्मकमेकान्तरितं दलम्। अतः प्राणसञ्चारो नासापुटे विषमलग्नेषु मेषादिसु षट्सु वामे भवति। वृषभादिसमलग्नेषु दक्षिणनासापुटे प्राणसञ्चारो भवति। 5 पञ्चपञ्चदण्डैर्द्वादशसंक्रान्तयः प्रत्यहं भवन्ति। एवमहोरात्रेण षष्टिदण्डैर्द्वादश संकान्तयः—षड् वामनासापुटे, षड् दक्षिणनासापुटे, मध्यमायां द्वादशप्रवेशेष्विति। धातुसमत्वं शरीरे रोगरहितानां रोगाभिभूतानां पुनर्वातपित्तश्लेष्मधातूनां वैषम्यम्। अतो वैषम्यात् प्राणस्य वैषम्यम्, तेन **अहोरात्रमेकराव्यां(नाड्यां)** वामायां यदि **वहति,** तदा **जीवितं कालवर्षम्;** मध्यमा वर्षशतपूर्णलक्षणं जीवितसंख्यं नराणां भवति। 10 **अव्युच्छिन्नैकपक्षं यदि वहति,** तदा **सार्द्धवर्षमायुर्भवति**[1]; ततो मरणं गच्छति। **अव्युच्छिन्नं** निरन्तरं यदि **मासमेकं** वामनाड्यां वहति, तदा **जीवितं मासत्रयं** भवति। **एवं स्वदेहे योगिना शशिगतिमरणं ज्ञायते कालचक्रे** इति।

अत्रारिष्टविषये **कालचक्रं** द्वादशारं राशिचक्रं तदेव भूम्यां लिखित्वा प्रथमदलेऽरिष्टदिनं षट्त्रिंशदायुर्मासाः स्थापनीयाः। ततो मासमेकं न वहति, अरिष्टदिनवृद्धिः 15 द्वितीयमासान्ते तृतीयमासप्रवेशे दिनद्वयं वहति वामनाडी तस्मिन्नेव पत्रे[2]। ततस्तृतीयमासं न वहति, चतुर्थमासान्ते पञ्चममासप्रवेशे दिनत्रयं वामनाडी(ड्यां)[3] प्राणो वहति। ततः पञ्चममासात् षष्ठे मासे न वहति। एवं षण्मासैररिष्टदिनास्त्रयः (दिनानि त्रीणि); मध्ये[4] दिनास्त्रयो (दिनानि त्रीणि); अन्ते सव्या वामारिष्टधर्मिणः। अरिष्टं नामाकालमरणम्; रिष्टं वर्षशतावधेर्मरणमिति। एवं षट्त्रिंशन्मासेभ्योऽरिष्टदिनसहितेभ्यो जीवितस्य 20 षड् मासा गताः। ततस्तस्मिन् पत्रे प्रा[ण]वायोरसञ्चारः। एकादशसंक्रान्तिभिरहोरात्रं व्रजति षट्शताधिकैकविंशत्सहस्रश्वासप्रश्वासैरिति। अत्र श्वासचक्रस्योनता [109b] नास्ति राशिपत्रपरित्यागेऽपीति। ततो द्वितीयपत्रे चतुर्दिनं पञ्चदिनं[5] षड्दिने(नं) सप्तमे मासे अष्टमे नवमे च यथासंख्यं वहति। ततस्त्रिंशन्मासराशेरपरमासत्रयं जीवितस्य गतम्। ततः सप्तविंशन्मासान् गृहीत्वा तृतीये पत्रे प्राणः सञ्चरति, पत्रद्वयं त्यजति। 25 दशसंक्रान्तिभिरहोरात्रं करोति, दशपत्रेषु संक्रमति प्राण इति। सप्तविंशतिमासेभ्यः प्रत्येकमासे पुनः सप्तदिनं वामनाडी वहति, अष्टदिनं नवदिनं वहति। ततो मासत्रयमपरमूनं भवति सप्तविंशतिमासेभ्यः। एवं पूर्वोक्तविधिना तृतीयं राशिपत्रं त्यजति। नवपत्रेषु संक्रमणं प्राणः करोति। एवं दशदिनमेकादशदिनं द्वादशदिनं वामनाड्यां वहति। ततश्चतुर्थं पत्रं त्यजति। तत[6]श्चतुर्विंशतिमासेभ्यो 30 मासत्रयमूनं भवति जीवितस्य। एवं त्रयोदशदिनं चतुर्दशदिनं पञ्चदशदिनम्;

---

१. ख.० वहति। २. क. ख. ग. यन्त्रे; भो. hDab ma La (पत्रे)। ३. भो. rTsar (नाड्यां)। ४. क. ख. सव्या०। ५. ग. पुस्तके नास्ति। ६. भोटानुवादे 'ततः' इति नास्ति।

ततः पञ्चमपत्रं त्यजति; सप्तपत्रेषु संक्रान्ति करोति; एकविंशतिमासेभ्यो मासत्रयमूनं भवति, तथा षोडशदिनं सप्तदशदिनमष्टादशदिनं प्रतिमासं वहति यथाक्रमम्। ततः षष्ठं पत्रं त्यजति; षट्पत्रेषु संक्रान्ति करोति; अष्टादशमासेभ्यो मासत्रयमूनं भवति जीवितस्येति। एवमेकोनविंशतिदिनं विंशतिदिनमेक[1]विंशतिदिनं वहति। ततः सप्तम-
5 राशिपत्रं त्यजति, प्राणः पञ्चराशिपत्रेषु संक्रमणं करोति अहोरात्रेणेति। ततः पञ्चदश-
T 308 मासेभ्यो मासत्रयमूनं भवति जीवितस्य। एवं द्वाविंशतिदिनं त्रयोविंशतिदिनं चतुर्विंशतिदिनं निरन्तरं यदा[2] वहति, तदा अष्टमपत्रं त्यजति, चतुर्षु संक्रान्ति करोति, द्वादशमासेभ्यो मासत्रयमूनं भवति जीवितस्य। एवं पञ्चविंशतिदिनं षड्विंशतिदिनं सप्तविंशतिदिनं यदा वहति, तदा नवमं पत्रं त्यजति, पत्रत्रये[3] संक्रमणं करोति, नव-
10 मासेभ्यो मासत्रयमूनं भवति जीवतस्येति। तथा अष्टाविंशतिदिनमेकोनत्रिंशद्दिनं त्रिंशद्दिनं यदा वहति, तदा दशमं पत्रं त्यजति, पत्रद्वये संक्रान्ति करोति, षण्मासेभ्यो मासत्रयमूनं भवति जीवितस्य। [110a] तथैकत्रिंशद्दिनं द्वात्रिंशद्दिनं त्रयस्त्रिंशद्दिनं यदा वहति, तदा एकादशमं पत्रं त्यजति, एकपत्रे संक्रान्तिं करोति, त्रिमासेभ्यो नवति-दिनानि ऊनानि भवन्ति जीवितस्येति। ततः पूर्वपत्रे अवाहितदिनत्रयं द्वादशमे पत्रे
15 दिन द्वयं वहति। ततो द्वादशमं पत्रं त्यजति, ततः कर्णिकायामेकदिनं वहति, यावत् प्राणचक्रश्वासविच्छेदो भवति। ततो वामनाड्यरिष्टेन मरणं यान्ति अयोगिनो ये नरा इति वामनाड्यां चन्द्रारिष्टनियमः।

सत्त्वरजस्तमोभेदेन प्रतिमासे[ऽ]रिष्टदिनवृद्धिरेकोत्तरेणेति। अत्र राशिचक्र-न्यासः—राशिचक्रं द्विपुटं कृत्वा प्रथमपुटे अरिष्टदिनानि, अपरपुटे अरिष्टदिन-
20 शेषा आयुर्मासा इति। अत्र प्रथमचक्रारे अरिष्टदिनानि त्रीणि, मासास्त्रिंशत्, द्वितीयपुटे अरिष्टदिनानि षट्, शेषा आयुर्मासाः सप्तविंशत्(तिः)। एवं तृतीये आरे अरिष्टदिनानि नव, तथा मासाश्चतुर्विंशतिः; चतुर्थे दिनानि द्वादश मासा एकविंशतिः; पञ्चमे दिनानि पञ्चदश, मासा अष्टादश; षष्ठे दिनानि अष्टादश, मासाः पञ्चदश; सप्तमे दिनान्येक-विंशतिः, मासा द्वादश; अष्टमे दिनानि चतुर्विंशतिः, मासाः नव; नवमे दिनानि सप्त-
25 विंशतिर्मासाः षट्; दशमे दिनानि त्रिंशत्, मासास्त्रयः; एकादशमे चक्रारे अरिष्टदिनानि त्रयस्त्रिंशत्; अवसाने त्रिमासक्षयः।[4] ततः पूर्वमनारूढं दिनत्रयं प्रथमराशौ चक्रारे पत्र-(यद्) दिनद्वयं द्वादशमे पत्रे दक्षिणनाड्यां वहति दक्षिणनाडीधातुक्षयार्थम्; दिनमेकं मध्यमायामवधूत्यां वहति श्वासचक्रक्षयार्थम्। ततः प्राणोत्क्रान्तिश्चन्द्रारिष्टे वामनाड्या-मिति चन्द्रारिष्टनियमः।

30 [110b] इदानीं सूर्यारिष्टं दक्षिणनाड्यामुच्यते **पञ्चभ्य** इत्यादिना—

पञ्चभ्यः पञ्चविंशद्दिवसगतिरुहारोहते पञ्चवृद्ध्या
तस्मादेकोत्तरेण त्रिगुणितदशकं त्र्युत्तरं यावदेव।

---

१. ख. विंशतिएक०। २. क. ख. पुस्तकयोर्नास्ति। ३. क. ख. पत्रद्वये। ४. क. ख. त्रिमासद्वयं।

काले पौष्णे समस्तास्त्रिनयनशशिनः षट् त्रियुग्मेन्दवो ये
मासास्तेऽह्वानिशेषास्तिथिदिगिषुगुणा द्वीन्दवो जीवितस्य ॥ ६२ ॥

इह शरीरे चन्द्रः सूर्यगुणान् सत्त्वरजस्तमो गृहीत्वारिष्टदिनानि दर्शयति; सूर्यश्चन्द्रगुणान् शब्दस्पर्शरूपरसगन्धान् गृहीत्वा ह(ह्य)रिष्टदिनानि दर्शयति। **पञ्चपञ्चोत्तरेण** पञ्चराशिं यावत्, ततो राशिद्वयमेकोत्तरेण, ततो मूलादारभ्य त्रयस्त्रिंशद्दिनानि आरोहति, पञ्चदशदिनैरष्टमराशिं त्यजति, दशभिर्नवराशिं त्यजति, पञ्चभिर्दशमराशिम्, त्रिभिरेकादशराशिम्। एवं त्रयस्त्रिंशद्दिनानि दक्षिणनाड्यां प्राण आरोहते। ततो द्वादशराशौ दिनद्वयं वामनाड्यां वामनाडीधातुक्षयार्थम्, दिनमेकं मध्यनाड्यां श्वासचक्रक्षयार्थम्, ततो मरणं गच्छतीति। तद्यथा **पञ्चभ्योऽवधि-दिनेभ्यः पञ्चविंशतिदिनानि यावद् दिवसगतिरुहारोहते पञ्चवृद्ध्या।** पञ्च दश पञ्चदश विंशति पञ्चविंशति जन्मनः पञ्चराशिषु। **तस्मादेकोत्तरेण** षट्विंशत्सप्तविंशद्दिनानि षष्ठे सप्तमे राशौ यथाक्रमं सत्त्व[र]जसोः क्षयार्थम्। ततः **काले पौष्णे** सति **त्रिगुणितदशकम्** अष्टमे नवमे दशमे राशौ **रोहते** प्राणः; ततः एकादशे **त्र्युत्तरं** मासं भवति **यावदेव**। समा **(समस्ता)** वर्षाऽरिष्टदिनावशेषा राशिचक्रे जन्मराश्यादिषु द्वादशराशिषु **त्रिनयनशशिनः** जन्मराशौ त्रिवर्षा। अरिष्टदिनावशेषा द्वितीये द्विवर्षम्, तृतीये वर्षमेकमिति समारिष्टदिनावशेषा जीवितस्य। ततः **षट्त्रियुग्मेन्दवो ये** इति चतुर्थराशौ षण्मासास्ते, पञ्चमे त्रयो मासाः, षष्ठे मासद्वयम्, सप्तमेऽरिष्टदिनावशेषमासमेकं जीवितस्य। ततो जन्मस्थानात् सप्तमस्थानं **पौष्णं** गर्भजानामाधानमासं(सो) मकरः। तस्मात् सप्तमं प्राणजन्ममासं कर्कटश्चन्द्रनाडीवृद्धिपरित्यागात् द्वादशराश्यन्ते पुनर्मकरो भवति, त्रयोदशमासो गर्भाधानादिति। अतः कर्कटः प्राणस्य जन्मस्थानं न सूर्यस्यैवेति। तत उदयति। तस्माज्जन्मनो मकरोदये सप्तमे राश्युदये सूर्यस्यास्तमनं नाम **पौष्णकालः**। [111a] तस्मात् कालात् प्राणोऽवैवर्तिको भवति, शरीरे स्थिरीकर्तुं न शक्यते देवासुरैर्मनुष्यैः। रात्रिभागे चन्द्रोदयकाल इति; चन्द्रोदयो नाम शुक्रधातौ मृत्युप्रवेश इति। मृत्युरुदयो[1] न शुक्रधातोरिति, अरिष्टवायुप्रवेशादिति। ततः पौष्णकालात् शुक्रक्षयार्थं त्रयस्त्रिंशद्दिनानि प्राणो रोहते दक्षिणनाड्याम्; ततो दिनद्वयं वामनाड्याम्, दिनमेकं मध्यमानाड्यामिति[2]। **अहानि शेषाः, तिथिः** पञ्चदश, **दिगिति** दश, **इषुः** पञ्च, **गुणा** इति त्रयः, **द्वि** इति द्वे, एकदिनं **जीवितस्येति** सूर्यारिष्टे एकव्याख्याननियमः।

इदानीं द्वितीयव्याख्यानमुच्यते **स्वस्थानादित्यादिना**—

स्वस्थानाद् राशिचक्रं त्यजति परकला हानिशेषैश्च तुल्यै-
र्वर्षैर्मासैर्दिनैश्च त्रिनयनशशिभिः षट्त्रियुग्मेन्दुभिश्च।
पौष्णाद् वै हानि तुल्यैस्तिथिदिशि(गि)षु गुणैः कर्णिकायां प्रविष्टैः
षट्त्रिंशद्भिर्दिनान्ते भवति दिनकरारिष्टयोगेन मृत्युः ॥ ६३ ॥

---

१. क. मृत्योरुदयो। २. ग. मध्यमानामनाड्यामिति।

इह शरीरे नाभिकमले द्वादशनाड्यात्मकं राशिचक्रम्। तत्र जन्मस्थानं प्रथमराशिनाडीगर्भोत्पादस्य बालकस्य यल्लग्नं तदेव वृषभादिकं समनाडीस्वभावम्; तस्मात् **स्वस्थानाद् राशिचक्रं** द्वादशारं नाडीचक्रं षष्टिमण्डलात्मकं **त्यजति परकला** प्राणशक्तिः। **हानिशेषैश्च तुल्यैरिति** हानिरारोहणदिवसाः पञ्च दश पञ्चदश पञ्चविंशतिः 5 षड्विंशतिः सप्तविंशतिरिति हानिः; **शेषास्त्रिवर्षा**, द्वौ वर्षौ एकवर्षं[1] षण्मासाः त्रिमास(साः) द्वौ मासौ मासमेकमिति हानिशेश(षा)स्तैर्हानिशेषैः प्रथमं पत्रादिकं[2] यावत् सप्तनाडीपत्रं तावत् क्रमो **वर्षैर्मासैरिति त्रिनयनशशिभिवर्षैर्नाडीत्रयं** त्यजति, **षट्त्रियुग्मेन्दुभिर्मासैः** सप्तनाडीं त्यजति। **दिनैश्च पौष्णात् वै हानितुल्यैः** पौष्णकालावधेर्जन्मस्थानात् सप्तमोऽर्कस्यास्तमनकालो रजस इति [111b], तस्मात् पौष्णात् तुल्यैरा- 10 रोहणायुर्दिनै राशिनाडीपरित्यागः प्राणशक्तेः **तिथिः** पञ्चदशदिनैः, **दिक्** दशदिनैरि**षुः** पञ्चदिनैर्गु**णैरिति** त्रिभिर्दिनैरेभिस्त्रयस्त्रिंशद्दिनैरष्टमीनाडीं नवमीनाडीं[3] दशमीनाडीमेकादशीञ्च राशिनाडीं पञ्चमण्डलवाहिनीं सूर्यप्रवाहेण त्यजति एकदक्षिणनाडीप्रवाहेण। द्वादशमी दिनद्वयेन वामनाड्यां मध्यमा[4]यामेकदिनेनेति **कर्णिकायां प्रविष्टः(ष्टैः)**। एवं पौष्णात् **षट्त्रिंशद्दिनैर्भवति दिनकरारिष्टयोगेन मृत्युर्नराणामिति** द्वितीय- 15 व्याख्याननियमः।

पूर्वे वाणाग्निलोकं त्यजति दिनगणं सूर्यवर्षत्रयस्य
तस्मात् सारोहणं वै शरयुगशिखिनं खाग्निचन्द्रं तृतीये।
नेत्राहिशैलवाणं वसुकरमपरं सप्तमे रोहणं च
तस्मात् तिथ्यादिसर्वं दिनगणमपि यत् कर्णिका यावदेव ॥६४॥

20 इदानी पत्रात्[5] पत्रे[6] त्रिवर्षाद् दिनत्याग उच्यते **पूर्वे** इत्यादिना—

इह राशिचक्रे जन्मलग्ननाडी **पूर्वं** इत्युच्यते; तस्मिन् जन्मलग्नपत्रे अशीत्युत्तरसहस्रदिनगणात् मध्ये **वाणाग्निलोकमिति** पञ्चत्रिंशदधिकत्रिंशद्**दिनगणं त्यजति** त्रिवर्षेभ्यः। ततस्तत्पत्रं शून्यीकृत्य द्वितीयपत्रे अवशेषदिनगणं गृहीत्वा प्राणशक्तिः प्रविशति, **तस्माद्** दिनगणात् **सारोहणं** पूर्वादपरपत्ररोहणदिनैर्दशभिः सार्द्धं **शरयुगशिखिनमिति** 25 पञ्चचत्वारिंशदधिकत्रिशतदिनगणं त्यजति द्वितीयपत्रे। ततोऽवशेषं गृहीत्वा तृतीयपत्रे प्रविशति, द्वितीयं शून्यं भवति। पुनस्तत्रैव पञ्चदशारोहणदिनैः सार्द्धं सप्तत्यधिकशतदिनं तृतीयपत्रे त्यजति; अवशेषं गृहीत्वा चतुर्थे प्रविशति, तृतीयं शून्यं भवति। ततो विंशत्यारोहणदिनैः सार्द्धं **नेत्राहिरिति** द्व्यशीतिदिनगणं त्यजति चतुर्थपत्रे; अवशेषं गृहीत्वा पञ्चमे [112a] प्रविशति, चतुर्थं शून्यं भवति। पुनः पञ्चविंशत्यारोहणदिनैः सार्द्धं

T 309

---

१. क, ख. एकवर्षा। २. क. ख. पुत्रादिकं। ३. ख. पुस्तके नास्ति। ४. क. ख. मध्यमो। ५–६. क. ख. पत्रास्यते; भो. ḥDab ma bCu gÑis La (द्वादशपत्रे)।

शेलवाणं सप्तपञ्चाशद्दिनगणं त्यजति पञ्चमे[१] पत्रे[२]; अवशेषं गृहीत्वा षष्ठे प्रविशति, पञ्चमं शून्यं भवति । पुनः षड्विंशत्यारोहणदिनैः सार्द्धं अष्टाविंशतिदिनगणं त्यजति षष्ठे[३] पत्रे[४] । ततः सप्तमे पत्रे प्रविशति, षष्ठं शून्यं भवति । ततः **सप्तमे रोहणं** सप्तविंशतिदिनगण त्यजति; अवशेषं षट्त्रिंशद्दिनगणं गृहीत्वा अष्टमे पत्रे प्रविशति, सप्तमं शून्यं भवति। ततोऽष्टमे पञ्चदशदिनं त्यजति; अवशेषमेकविंशद्दिनं गृहीतत्वा नवमे **प्रवि**शति, अष्टमं शून्यं भवति । ततो नवमे दशदिनं त्यजति; अवशेषमेकादशदिनं गृहीत्वा दशमे प्रविशति, नवमं शून्यं भवति । ततो दशमे पञ्चदिनं त्यजति; अवशेषं षड्दिनं गृहीत्वा एकादशे प्रविशति, दशमं शून्यं भवति । तत्र दिनत्रयं त्यजति; अवशेषं दिनत्रयं गृहीत्वा द्वादशमे प्रविशति, एकादशमं शून्यं भवति । तत्र दिनद्वयं त्यजति; अवशेषं दिनमेकं गृहीत्वा **कर्णिकायां** प्रविशति, द्वादशमं नाडीराशिपत्रं शून्यं भवति । एवमशीत्युत्तरसहस्रसंख्यैः सूर्यस्य मध्यमात्रिवर्षदिनैः प्राणशक्तिर्द्वादशारं राशिचक्रं त्यजति । ततः **कर्णिकायां** दिनमेकं मध्यमा(यां)[५] वहति । ततः श्वासचक्रं त्यक्त्वा विज्ञानं प्राणवायुना सार्द्धमन्यत्र षड्गतौ संक्रमणं करोति, इति सूर्यस्यारिष्टनियमः ।

अत्र न्यासः — पूर्वन्यासवत् द्विपुटे वर्षभेदेन दिनत्यागभेदेनेति पूर्वपुटे अरिष्टदिनन्यासोऽपरपुटेऽवशेषायुर्दिनन्यासः । द्वितीयचक्रे दिनत्यागन्यासः, पूर्वपत्रेषु क्रमेण शून्यन्यास इति सूर्यारिष्टदक्षिणनाड्यां समलग्ने जातानां विषमलग्ने जातानां चन्द्रारिष्टमल्पायूनाम्, इति सूर्यारिष्टनियमः ।

इदानीं मध्यमारिष्टं कालाब्दक्रमेण सूर्यस्य यद् बालजनैस्तीर्थिकैरुक्तसत्त्वानां व्यामोहजनकं वर्षशतावधेस्तस्य प्रतिषेध उच्यते—

इह तीर्थिकैः किलोच्यते—दक्षिणनाड्यां पञ्चनाडीप्रवाहेण व[112b]र्षशतमायुः, षष्ठनाडीप्रवाहेण नवतिवर्षाण्यायुः, सप्तनाडीप्रवाहेणाशीतिवर्षाण्यायुः, अष्टनाडीप्रवाहेण पञ्चाशद्वर्षाण्यायुः, नवनाडीप्रवाहेण त्रयस्त्रिंशद्[६]वर्षाण्यायुः, दशनाडीप्रवाहेण षड्विंशद्वर्षाण्यायुः, पञ्चदशनाडीप्रवाहेण चतुर्दशवर्षाण्यायुः, त्रिंशन्नाडीप्रवाहेण द्वादशवर्षाण्यायुः, अहोरात्रप्रवाहेण दशवर्षाण्यायुः, द्विदिनप्रवाहेणाष्टवर्षाण्यायुः, त्रिदिनप्रवाहेण षड्वर्षाण्यायुः, चतुर्दिनप्रवाहेण पञ्चवर्षाण्यायुरिति; ततः पञ्चदिनप्रवाहेण त्रिवर्षाण्यायुरिति तीर्थिकानां नाडीश्वासनियमः दक्षिणमार्गे ।

स एव न घटते युक्त्या विचार्यमाणः सर्वज्ञोक्त्या । इह नराणामरिष्टाभावे वामदक्षिणनाड्यां पञ्च समेषु विषमेषु लग्नेषु पञ्च दण्डानि प्राणवायुर्वहति । वर्षशतायुषः पुरुषस्य प्राणस्य वामे सव्ये सप्तवर्षाणि श्वासवृद्धिरयनभेदेन, ततः षष्टिवर्षाणि पाणीपलवृद्धिरयनवृद्धिभेदेन, ततस्त्रिंशद्वर्षाणि नाडीवृद्धिस्त्रिमासभेदेन, ततस्त्रिवर्षत्रिपक्षाणि दिनभेदेन वृद्धिरिति कालवृद्धिन्यायः । अतो न्यायात् यस्याकालमरणं भवति गर्भोत्पादा-

---

१-२. क. ख. भो. पुस्तकेषु नास्ति । ३-४. क. ख. भो. पुस्तकेषु नास्ति ।
५. भो. dBu mar (मध्यमायां) । ६. भो. Sum Cu (त्रिंशत्) ।

द्वालस्य त्रिवर्षैः पञ्चवर्षैर्वा द्वा[1]दशवर्षैर्वा विंशत्यादिभिर्वा मरणम्, तस्य पञ्चनाड्युपरि षट्सप्तादिनाडीप्रवाहक्रमो निरर्थकः, गर्भोत्पादत्रिवर्षमरणावधेरिति । अत्र यदि मासादूर्ध्वं जातकस्य मरणं भवति, तदा जन्मदिनादारभ्य प्राणावायुः पौष्णकालात् तिथिदिगिषुगुणाद्यमारूढः । एवं द्विमासान्ते मरणं त्रिमासान्ते चतुर्मासान्ते षड्मासान्ते एक-
5 वर्षान्ते द्विवर्षान्ते त्रिवर्षान्ते गर्भोत्पादात्त्रयस्त्रिंशद्दिनारोहणविलोमेन **यावत्** पञ्चदिनारोहणं दक्षिणनाड्यां शब्दादिपञ्चगुणक्षयभेदेन वामनाड्यां दिनमेकं सत्त्वादित्रिगुणक्षयभेदेनेति । एवं गर्भोत्पादात् प्रथमेऽपि मरणं ज्ञेयं कर्णिकायां प्राणप्रवेशादिति आहोरात्रतः, एवं तृतीये दिने मरणं द्वादशमे पत्रे प्राणोदयात्, एवं षष्ठे दिने एकादशे प[113a]त्रे प्राणोदयात्, एवमेकादशे दिने दशमे राशिपत्रे प्राणोदयात्, एवमेकविंशतिमे दिने नवमे
10 राशिपत्रे प्राणोदयात्, एवं षट्त्रिंशतिमे दिने अष्टमे राशिपत्रे क्रमेण प्राणोदयात् । एवं
T 310 द्विमासे सप्तमे राशिपत्रे प्राणोदयात्, एवं त्रिमासे षष्ठमे[ष्ठे] पत्रे प्राणोदयात्, एवं चतुर्मासे पञ्चमे प्राणोदयात्, एवं षण्मासे विंशतिदिनैः चतुर्थपत्रे प्राणोदयात्, एवं सपक्ष[2]वर्षैके तृतीये प्राणोदयात्, द्विवर्षे दशदिनैः द्वितीये प्राणोदयात्, तृतीये[3] वर्षे[4] प्रथमे प्राणोदयात्, चतुर्थे वर्षे (न)[5] दिनन्यायः[6] गर्भोत्पादाच्छतवर्षावधि यावदिति सूर्यारिष्ट-
15 नियमः ।

यथा सूर्यस्तथा सत्त्वादिगुणत्रयभेदेन गर्भोत्पादाच्चन्द्रारिष्टनियमः, तथा **कालोत्तरे**[7] ऊर्ध्वश्रोत्रे उक्तमीश्वरेण—

यथा वामा तथाऽवामा मध्यमा च तथैव च ।
त्रिवर्षान्ते मखादा ।

20 इति परसिद्धान्तेऽपि कुत्रचिन्नियमोऽस्तीतिचन्द्रसूर्यारिष्टनियमः ।

एवं त्रिवर्षान्तमेकदिनमारभ्य बालस्य यन्मरणं चन्द्रमार्गे वा सूर्यमार्गे वा तदशीत्युत्तरसहस्रभेदभिन्नं प्रत्येकदिनमरणभेदेन, नात्र नियमो गर्भजानां कर्मणः । किन्तु नाडिकाश्वासप्रवाहेणारिष्टदिनैः प्राणसंख्या ज्ञायते । अतो(ऽ)रिष्टचक्रं मरणचक्रं राशिचक्रनाडीभ्यः प्राणस्य पञ्चमण्डलप्रवाहपरित्यागोऽनुक्रमेणेति । ततः कर्णिकायां प्रवेश-
25 स्तद्दिने मरणमिति न्यायः । इदं त्रिवर्षकाललक्षणं शतवर्षावधेर्मध्यमाप्रवाहेण सूर्यस्य परिकल्पितेन सर्वसत्त्वानां मरणं किल भगवतोक्तम् । तदेव चन्द्रस्य त्रिपक्षधर्मेण चन्द्रस्यारिष्टमरणं न स्यादिति । इह येन चन्द्रस्य धर्मेणारिष्टमरणं न भवति तेन बालैरप्रबुद्धैः प्रकल्पितम् । यथा वामनाड्यामरिष्टमरणं नास्ति चन्द्रधर्मतः दक्षिणायां सूर्यप्रवाहतोऽरिष्टमरणमुक्तं सर्वज्ञेनेति अज्ञानिनां वाक्यम् । इह त्रिवर्षाधिदेवः सूर्यशब्देन
30 प्राणवायुश्चन्द्रशब्देनापानवायुस्त्रिपक्षाधिपतिः । अत्रेडापिङ्गलासुषुम्नामधि[113b]पतिः प्राणः सूर्यो नाभेरूर्ध्वं प्रवाहतः, अपानो विण्मूत्रचन्द्रनाडीनामधिपतिः नाभेरधः

---

१. ख. पुस्तके नास्ति । २. भो Phyogs Daṅ bCas par (सपक्षं) । ३-४. ग. त्रिवर्षे । ५-६. भो. Rigs pa Ma yin (न दिनन्यायः) । ७. भो. Phyi ma (उत्तरे) ।

प्रवाहतः। एवं चन्द्रस्याधो गुणत्रयम्, सूर्यस्योर्ध्वे पञ्चमण्डलविपर्ययगुणपञ्चकम्। तेन त्रिगुणभेदेन वामे चन्द्रारिष्टम्, दक्षिणे पञ्चगुणभेदेन सूर्यारिष्टः, अधोर्ध्वनाड्योरिति चन्द्रसूर्यारिष्टनियमः।

इदानीं मध्यमापरिपूर्णकालमरणलक्षणमुच्यते **कालाब्दमित्यादिना**—

कालाब्दं यावदेका दिवसगतिवशाद् रोहते संक्रमन्ती 5
चन्द्राख्ये सूर्यमार्गे विषमसमदिनैरेकवृद्धया क्रमेण।
भूयः संक्रान्तिभेदो विषमसमदिनैर्द्वादशारे करोति
सार्द्धं मासं हि यावत् त्रिगुणितदशकं जीवितं च त्रिरात्रम्॥ ६५॥

इह शरीरे नरनारीणां सत्त्वरजस्तमोभेदेन प्राणप्रवाहः। सार्द्धदशमासाधिक-षड्नवतिवर्षाणि यावद् वामदक्षिणे पञ्चमण्डलप्रवाहतः। त्रिवर्षत्रिपक्षाणि(न्) यावत् 10 मध्यमकालः वर्षशतायुषां नराणामिति नियमः। तत्र वामदक्षिणमध्यमास्तिस्रो नाड्यः सत्त्वरजस्तमःस्वभाविन्यः; आसु मृत्युस्तमोनाडीप्रवाहसंख्यां गृहीत्वा प्राणापानस्वभावेन। वामायां दक्षिणायां **विषमसमदिने रोहते कालाब्दं** त्रिवर्षत्रिपक्षं यावत्। **दिवसगति-वशात्** दिवसाः पञ्चविंशत्यधिकैकादशशताः, तेषां गतिवशाद्यावदायुःक्षयो भवति तावदारोहते **संक्रमन्निति(न्ती)चन्द्राख्ये** वाममार्गे **सूर्यमार्गे** दक्षिणे **विषमसमदिनैरेक-** 15 **वृद्धया क्रमेणे**ति एकदिनं वामनाड्यां रोहते यदि मेषादिविषमलग्ने जन्मोऽ(ा)भूत्; दक्षिणे दिनद्वयमारोहते यदि वृषभादिसमलग्ने जन्मोऽ(ा)भूत्। ततो भूयः संक्रान्तिभेदं विषमसमदिनैर्वामारोहणावसाने दक्षिणारोहणावसाने च **करोति**[114a]आरोहणदिनमा-नेनेति। **द्वादशारे** राशिचक्रे **क्रमेण** पञ्चमण्डलपरित्यागाय वामनाड्यामाकाशादि-मण्डलक्षयार्थं संक्रान्तिं करोति, दक्षिणनाड्यां पृथिव्यादिमण्डलक्षयार्थं करोति। अत्र 20 वामे पञ्चदिनारोहणेन संक्रान्तिदिनैर्मेषादिविषमलग्नेषु षट्सु शून्यमण्डलप्रवाहं प्राण-वायुः त्यजति; दक्षिणे षट्दिनारोहणेन षट्संक्रान्तिदिनैर्वृषभादिसमलग्नेषु षट्सु पृथिवीमण्डलप्रवाहं त्यजति प्राणः। एवं वामनाड्यामेकादशदिनैर्वायुमण्डलं त्यजति, दक्षिणदलेषु द्वादशदिनैरुदकमण्डलं त्यजति। एवं सप्तदशदिनैर्वामदलेषु तेजोमण्डलं त्यजति; दक्षिणदलेषु अष्टादशदिनैस्तेजोमण्डलं त्यजति। भूयो वामदलेषु त्रयोविंशति- 25 दिनैरुदकमण्डलं त्यजति; दक्षिणदलेषु चतुर्विंशतिदिनैर्वायुमण्डलं त्यजति। पुनरेकोन-त्रिंशद्दिनैर्वामदलेषु षट्सु पृथ्वीमण्डलं त्यजति। दक्षिणे त्रिंशद्दिनैराकाशमण्डलं त्यजति। एवं विषमसमदिनैर्वामदक्षिणारोहणेनेति[1] त्रिंशद्दिनानां त्रिंशत्संक्रान्तिदिनैर्द्वादशलग्न-नाडीदलेषु पञ्चमण्डलपरित्यागः। ततः एकत्रिंशद्दिनारोहणेन वामनाड्यां विषमदलेषु सत्त्वधातुक्षयः। एकत्रिंशत्संक्रान्तिदिनैरपि दक्षिणनाड्यां द्वात्रिंशद्दिनारोहणेन 30 रजोधातुक्षयः। द्वात्रिंशत्संक्रान्तिदिनैरपि। ततस्त्रयस्त्रिंशद्दिनारोहणेन विषम-दलेषु तमोधातुक्षयः, त्रयस्त्रिंशत्संक्रान्तिदिनैरिति। एवं श्लेष्मनाडीक्षयः

---

१. क. ०णारोहेणेति।

सत्त्वधातुः, पित्तनाड़ीक्षयो रजोधातुः, वातनाडीक्षयस्तमोधातुरित्युच्यते। त्रयस्त्रिशद्दिनारोहणेन[1] त्रयस्त्रिशत्संक्रान्तिदिनैरिति। उभया(य)राशिसंक्रान्तिसंकलितैर्दिनैर्द्वाविंशदधिकैकादशशतदिनानि भवन्ति त्रिवर्षत्रिपक्षदिनत्रयोनानामिति[2] पञ्चमण्डलसत्त्वरजस्तमोनाडी(डि)काच्छेदः। प्राणवायोः स्थानपरित्याग इति। एवं
5 **सार्द्धं मासं हि यावत्** त्रिवर्षदिनानि[3] प्राणारोहणेनेति। **ततस्त्रिदशकमपरं** गर्भाधानमासदि[114b]नगणं त्रिंशद्दिनात्मकं **जीवितस्य त्रिरात्रं** यावदिति दक्षिणानाड्यामारोहणं सर्वसंक्रान्त्यभावः, त्रयस्त्रिशद्दिनानि यावत् स्कन्धधातूनां विच्छेदः। अत्र रूपादयः पञ्च स्कन्धाः, पृथिव्यादयः पञ्च धातवः, कायेन्द्रियाणि
T 3:1 पञ्चेन्द्रियाणि, गन्धाद्याः पञ्च विषयाः, गुदाद्यानि पञ्च कर्मेन्द्रियाणि, आलापादयः
10 पञ्च कर्मेन्द्रियविषयाः, एतेषां त्रयस्त्रिशद्दिनैः च्छेदो भवति परस्परसंयोगाभावः, ततः एकदिनं मध्यमायां विशति[4] श्वासचक्रक्षयार्थम्[5]। षष्ठः स्कन्धः[6], षष्ठो धातुः, षष्ठमिन्द्रियम्, षष्ठो विषयः, षष्ठं कर्मेन्द्रियम्, षष्ठकर्मेन्द्रियविषयः, शुक्रच्युतिर्मरणान्ते भवतीति स्कन्धधात्वायतनविच्छेदनियमः।

इदानीं जातकानां मृत्युश्वासारोहणमुच्यते **श्वासानित्यादिना**—

15 **श्वासांल्लिप्तांश्च नाडी दिननिशिसमयान् रोहते संक्रमेण**
सप्ताब्दैश्चायनाङ्गादयनगतिवशात् षष्टिसंवत्सरैश्च ।
त्रिंशद्वर्षैस्त्रिमासान् दिवसगतिवशात् कालवर्षैश्च पक्षै-
र्द्वात्रिंशत् सार्द्धभक्तैर्भवति दिनगणे रोहणं कालचक्रात् ॥ ६६ ॥

इह शरीरे श्वासचक्रं **लिप्ताचक्रं** घटिकाचक्रं **दिनचक्रं** यथा बाह्ये तथा देहेऽपि।
20 तत्र[7] षट्श्वासात्मकं श्वासचक्रम्, षष्टिपाणीपलात्मकं पाणीपलचक्रम्, षष्टिघटिकात्मकं घटिकाचक्रम्; अशीत्युत्तरसहस्रदिनात्मकमरिष्टचक्रम्, षट्पञ्चा(श)दधिकैकादशशतदिनात्मकं कालमृत्युदिनचक्रमिति। एषु चक्रेषु मृत्युः श्वासरूपेण पाणीपलस्वभावेन घटिकास्वभावेन दिनस्वभावेनारोहति वामनाड्यां दक्षिणनाड्यां यथासंख्यमेकोत्तरेण। प्रथमं तावत् श्वासानारोहते। **सप्ताब्दैश्चायनांका(ङ्गा)**[8]दिति। इहोत्पन्नस्य यस्यारिष्टं
25 वर्षशतावधेर्नास्ति कालमरणं भविष्यति, तस्यायनद्वयं वाम[115a]नाड्यां दक्षिणनाड्यां पञ्चमण्डलवाहकः प्राणवायुर्वहति। ततस्तृतीयेऽयने वामनाड्यामाकाशमण्डले एकश्वासमारोहते, चतुर्थे न आरोहते, ततस्तृतीयवर्षे पञ्चमेऽयने दक्षिणनाड्यां पृथिवीमण्डले श्वासद्वयमारोहते, पुनः षष्ठेऽयने न आरोहते। ततः सप्तमेऽयने

---

१. ख. ०रोहणे। २. क. ख. त्रयोमानमिति। ३. क. ख. त्रिवर्षादिना; भो. Lo gSum Gyi Ñin Sag rNams (त्रिवर्षदिनानि)। ४. क. ख. विंशति। ५. क. ख. ०चक्रकुर्यार्थम्। ६. ग. स्कन्धार्थः। ७. क. त च। ८. भो. Yan Lag Las (अङ्गात्)।

वामनाड्यामाकाशमण्डले श्वासत्रयमारोहते, अष्टमे न। एवं नवमे न [द]क्षिणनाड्यां पृथिवीमण्डले श्वासचतुष्टयमारोहते, दशमे न। पुनरेकादशमे वामनाड्यां शून्यमण्डले पञ्च श्वासानारोहते, द्वादशमे न। ततस्त्रयोदशमेऽयने दक्षिणनाड्यां पृथिवीमण्डले षट् श्वासानारोहते, चतुर्दशमेऽयने न। एवं षट्श्वासैश्चक्रं तदेकं लिप्ता पाणीपलं वा भवति अत्र सार्द्धमासोनसप्तवर्षाणि। अतो[1]ऽवर्येलिप्ताचक्रोर्ध्वं श्वासारोहणं न भवति। लिप्ता- 5
स्वभावेन लिप्ता आरोहते **अयनगतिवशात् षष्टिसंवत्सरैश्चेति**। ततः सप्तवर्षादूर्ध्वम-परषष्टिवर्षाणि यावत् एकान्तरितायने नैकादिना विषमपाणीपलानि आरोहते।

एकोनषष्टिलिप्तान् यावद् वामनाड्यामाकाशमण्डले, दक्षिणनाड्यां पृथिवी-मण्डले द्वितीयादिना समानि षष्टिपाणीपलानि यावत् षट्सु षट्सु दलेषु विषमसमलग्न-स्वभावेष्विति। पाणीपलचक्रं षष्टिपाणीपलैः, तदेवैकघटिका भवति। अतः सप्तषष्टि- 10
वर्षावधे**र्नाडी** आरोहते, मृत्युनाडीस्वभावेनेति। **त्रिंशद्वर्षस्त्रिमासादिति** पुनरेकनाडी-मादि कृत्वा वामनाड्यां दक्षिणनाड्यां विषमसमनाडीमेकान्तरितेनारोहते, अयनार्द्धे त्रिमासैर्वामनाड्यामाकाशमण्डले एकनाडीमारोहते, अपरत्रिमासैर्न। पुनरपरायनार्द्धं त्रिमासैर्दक्षिणनाड्यां पृथिवीमण्डले नाडीद्वयमारोहते। एवं त्रिभिर्मासैः षष्टिनाडीश्च वामदक्षिण च षट्सु राशिदलेषु आकाशमण्डले पृथिवीमण्डले आरोहते, मृत्युर्नाडी- 15
स्वभावेनेति। अतः सार्द्धमासोनसप्तनवतिवर्षावधेर्नाडीचक्रमारोहते, तदेव दिनमेकं भवति[2]। ततो दिनस्वभावेन दिनचक्रं वामदक्षिणनाड्यां पूर्वोक्तेन क्र[115b]मेणा-रोहते, अतो **दिवसगतिवशात् कालवर्षैश्च पक्षैस्त्रिवर्षैः**। **चकारात्** त्रिपक्षैश्च, **त्रिंशद्भिर**-परदिनैश्चेत्यत्र मृत्युदिनारोहणसंख्या **द्वात्रिंशतः सार्द्धभक्तैः कालचक्रादिति**। पञ्चविंशत्य-धिकैकादशशताल्लब्धं दिनगणं कर्णिकापर्यन्तं वेदितव्यम्। अत्रारोहणदिनानि लब्धानि 20
सार्द्धद्वात्रिंशद्विभागेन चतुस्त्रिंशत्, घटिका षट्त्रिंशत्, पाणीपलानि पञ्चपञ्चाशत्, सार्द्धश्वासद्वयम्, एषु दिनमेकं कर्णिकायामवशेषं वामदक्षिणारिष्टो वेदितव्यः। प्रतिदिना-रोहणं घटिकाधिकं भवति, अन्तिमारोहणं दक्षिणनाड्यामिति कालमृत्युनियमः।

इदानीं नाभिचक्रादिनाडिकाच्छेद उच्यते **पक्ष** इत्यादिना—

पक्षे पक्षे च नाडी नवहतभुजगाश्छिद्यते नाभिचक्रे 25
सन्धावेकैकनाडीं त्यजति शिखिदिनैः कर्मचक्रे क्रियाख्ये।
कण्ठे नक्षत्रनाडीस्त्यजति दिनदिने मासमध्ये क्रमेण
बिन्दुस्थं पक्षमध्ये त्यजति शशिपदं वारनाडी हृदिस्थः॥ ६७॥

अत्र नाभौ द्वादश राशिनाड्यः षष्टिमण्डलवाहिन्यः षष्टिः, **नवहतभुजगाष्टौ** नवभिर्हता द्वासप्ततिर्भवन्ति। अतो नवहतभुजगे **नाभिचक्रे पक्षे पक्षे च नाडी** 30
च्छिद्यते। अत्र पक्षोऽष्टादशदिनैर्वेदितव्यः, तेन पक्षेण वामे शून्यादिमण्डलवाहिनी

---

१. ग. ततो। २. क. ख. वहति।

त्रिंशत् नाडीस्त्रिवर्षैस्त्यजति, दक्षिणे पृथिव्यादिमण्डलवाहिनी त्यजति त्रिंशदिति। एवं त्रिंशत्त्रिंशत्पक्षैः षष्टिः परित्यज्यन्ते(ज्यते) प्राणवायुनेति। सर्वत्र मण्डलनाडीषु त्यक्त्वा षष्ठांशम्, त्रिवर्षपक्षैः पञ्चमण्डलवाहिनीं त्यजति। **सन्धावेकैकनाडीं त्यजति शिखिदिनैः कर्मचक्रे क्रियाख्ये** चेति। इह शरीरे कर्मचक्रं हस्तयोः षट्सन्धिषु, पा[116a]दयोः षट्सन्धिषु, द्वादशभेदभिन्नं द्वादशचक्रात्मकं द्वादशमासभेदतः। प्रत्येकसन्धिचक्रे त्रिंशन्नाड्यः, द्वादशसन्धिषु षष्ट्युत्तरत्रिशतनाड्यः, तेषु दक्षिणस्कन्धबाहुसन्धौ मकरे त्रिंशन्नाड्यस्त्रिंशत्तिथिभेदतः; वामस्कन्धबाहुसन्धौ फाल्गुने त्रिंशन्नाड्यस्त्रिंशत्तिथिभेदतः। एवं दक्षिणोपबाहुसन्धौ चैत्रनाड्यः, वामोपबाहुसन्धौ वैशाखनाड्यः, दक्षिणकरोपबाहुसन्धौ ज्येष्ठनाड्यः, वामकरोपबाहुसन्धौ आषाढत्रिंशत्तिथिभेदेन त्रिंशन्नाड्य इति। हस्तयोः कर्मचक्रे षट्प्रकारेऽशीत्युत्तरशतनाड्यः षट्सन्धिषु। ततो दक्षिणोरुकटिसन्धौ श्रावणमासतिथिभेदेन त्रिंशन्नाड्यः, वामोरुकटिसन्धौ भाद्रपदत्रिंशन्नाड्यः। एवं दक्षिणोरुजानुसन्धौ अश्विनत्रिंशन्नाड्यः, वामोरुजानुसन्धौ कार्तिकत्रिंशन्नाड्यः, दक्षिणपादजानुसन्धौ मार्गशीर्षत्रिंशन्नाड्यः, वामपादजानुसन्धौ पुष्यमासत्रिंशत्तिथिस्वभावेन त्रिंशन्नाड्यः। एवं पादयोः षट्सन्धिषु कर्मचक्रे अशीत्युत्तरशतनाड्यः, कर्मचक्रं कर्मेन्द्रियक्रियाप्रवर्तनादिभूतमिति। एतासु नाडीषु शिखिदिनैः प्रत्येकं त्रिभिस्त्रिभिर्दिनैरारोहणात्। एभिस्त्रिवर्षदिनैरशीत्युत्तरसहस्रसंख्यैः षष्ट्युत्तरत्रिशतनाडीस्त्यजति प्राणवायुः। **क्रियाख्ये** इति आदानगमनादिक्रियां करोतीति क्रियाख्यं हस्तपादाङ्गुलीपर्वसन्धिषु षष्टिषु थद्ना-(षड्ना)ड्यात्मकं चक्रं पृथिव्यप्तेजोवायुशून्यज्ञाननाडीस्वभावात्मकं प्रत्येकसन्धौ स्थितं षड्नाड्यात्मकमिति। षष्टिपर्वसन्धिषु षष्ट्युत्तरत्रिशतनाड्यः; तासु प्रत्येकनाडी त्रिभिस्त्रिभिर्दिनैः परित्यजति यथा कर्मचक्रे। यदा दक्षिणकरोपबाहुसन्धौ त्रिंशन्नाडीं त्यजति, तदा दक्षिणकरे ऊर्ध्वपञ्चाङ्गुलीषु षट्षट्नाडीस्त्यजति। एवं त्रिंशन्नाडीं पञ्चाङ्गुलीषु त्यजति मासदिनैस्तिथिभिरिति। एवं वामे वेदितव्यम्। यदा दक्षिणबाहूपबाहुसन्धौ त्यजति, तदाङ्गुलीमध्यपर्वसन्धिषु त्रिंशन्नाडीं त्यजति। एवं वामेऽपि[1]। यदा दक्षि[116b]णस्कन्धबाहुसन्धौ त्यजति, तदाङ्गुल्यधःपर्वसन्धिषु त्रिंशन्नाडीस्त्रिंशद्दिनैस्त्यजति नवतिदिनैः। एवं वामेऽपि ज्ञातव्यम्। यदा दक्षिणपादजानुसन्धौ त्रिंशन्नाडीः त्यजति, तदा दक्षिणपादाङ्गुल्यूर्ध्वपर्वसन्धिषु त्रिंशन्नाडी त्रिंशद्दिनैस्त्यजति। एवं वामेऽपि। यदा दक्षिणजानुसन्धौ त्यजति, तदाङ्गुलीमध्यपर्वसु त्रिंशन्नाडीस्त्यजति। एवं वामपदेऽपि ज्ञेयः। यदा दक्षिणकट्युरुसन्धौ त्यजति, तदा पादाङ्गुल्यधःपर्वसन्धिषु त्रिंशन्नाडीः त्यजति। एवं वामेऽपि ज्ञेयः।

इदानीं नाडीनामधिदैवाक्षराण्युच्यन्ते—

अत्र कवर्गो विलोमेनाकाशादिह्रस्वस्वरभिन्नो वामस्कन्धबाहुसन्धाविति। एवं दक्षिणस्कन्धबाहुसन्धौ ज्ञानादिदीर्घमात्राभिन्नः कवर्गः; वामे आकाशादिह्रस्वमात्राभिन्नश्चवर्गो बाहूपबाहुसन्धौ, ज्ञानादिदीर्घषण्मात्राभिन्नो दक्षिणे। वामे आकाशादिषण्मात्राभिन्नः टवर्गः करोपबाहुसन्धौ, दक्षिणे ज्ञानादिमात्राभिन्नः[2]। एवं षण्मासा

---

१. ख. वामे। २. क. ख. ज्ञानमात्राभिन्नः।

उत्तरायणे इति। ततो दक्षिणकट्युरुसन्धौ ज्ञानादिदीर्घषण्मात्राभिन्नः[1] पवर्गो दक्षिणे, वामे आकाशादिह्रस्वमात्राभिन्नः। एवं जानूरुसन्धौ दक्षिणे ज्ञानादिषण्मात्राभिन्नतवर्गः, वामे ह्रस्वाकाशादिमात्राभिन्नः। एवं दक्षिणपादजानुसन्धौ ज्ञानादिदीर्घषण्मात्राभिन्नः सवर्गः, वामे ह्रस्वाकाशादिमात्राभिन्नो विलोमेनाकाशव्यञ्जनादिना। एवं प्रत्येकवर्गः त्रिंशदक्षरात्मा दीर्घह्रस्वभेदेन कर्मचक्रे द्वादशचक्रेषु त्रिंशदारेष्विति। ततः क्रियाचक्रेषु प्रत्येकं ककारादिव्यञ्जनं ज्ञानादिदीर्घ[2]षण्मात्राभिन्नम्; दक्षिणाङ्गुष्ठादिप्रत्येकसन्धिष्वङ्गुष्ठाधः पर्वसन्धौ षड्नाडिकात्मनि कव्यञ्जनं ज्ञानादिमात्राभिन्नम्; तर्जनीसन्धौ खकारः, मध्यमासन्धौ गकारः, अनामिकासन्धौ घकारः, कनिष्ठासन्धौ ङकारो ज्ञानादिदीर्घषण्मात्राभिन्न इति। वामकनिष्ठाधः पर्वसन्धौ ह्रस्वाकाशादिमात्राभिन्नो ङकारः, अनामिकासन्धौ घकारः, मध्यमासन्धौ गकारः, तर्जनीसन्धौ खकारः, अङ्गुष्ठसन्धौ ककारः ह्रस्वाकाशादिषण्मात्राभिन्न[3] इति। एवं दक्षिणे द्वितीयपर्वपंक्तौ अङ्गुष्ठादिके चवर्गः दीर्घस्वरभिन्नः, वामे ह्रस्वमात्राभिन्नः। एवं दक्षिणतृतीयपर्वपंक्तौ दीर्घस्वरभिन्नः टवर्गः[4], वामे ह्रस्वमात्राभिन्न इति। एवं दक्षि[117a]णपादाङ्गुलीपर्वेषु दीर्घमात्राभिन्नः पवर्गः, वामे ह्रस्वमात्राभिन्नः। दक्षिणमध्यपर्वेषु दीर्घमात्राभिन्नस्तवर्गः, वामे ह्रस्वाकाशादिमात्राभिन्नः। दक्षिण-ऊर्ध्वपर्वसन्धिषु दीर्घमात्राभिन्नः सवर्गः, विलोमेनाकाशादिषण्मात्राभिन्नो वामाङ्गुलीपर्वसन्धिष्विति प्रथमवर्षे, द्वितीये गुणवृद्ध्या भिन्नाः, तृतीये यणादेशादिभिर्भिन्नाः षड्वर्गा इति। अस्य विस्तारो वक्ष्यमाणे वक्तव्यमिति नेह प्रतन्यते।

कण्ठे नक्षत्रनाडीस्त्यजति दिनदिने मासमध्ये क्रमेणेति। कण्ठचक्रे अष्टाविंशन्नक्षत्राणां नाड्यस्तांस्त्यजन्ति अष्टाविंशतिदिनैः स्वरात्मकैः। **बिन्दुस्थं ललाटस्थं पक्षमध्ये त्यजति शशिपदं** चतुर्दशनाड्यात्मकं चतुर्दशदिनैश्चतुर्दशप्लुतस्वरैः। **वारनाडी** अष्टदिनैस्त्यजति विषयसत्त्वादिगुणैरिति गुह्यस्थस्त्रिंशद्व्यञ्जनात्मिका नाड्यस्त्यजति कालमरण इति नाडीच्छेदनियमः।

इदानीं कर्मचक्रेषु सूर्यस्वभावेन प्राणस्य क्रमोत्क्रमच्छेदो वर्गसंज्ञाभिर्नाडीनामुच्यते **वर्गेभ्य** इत्यादिना—

वर्गेभ्यः सस्वरेभ्यः क्रमति दिनकरश्चायनं राशिभेदैः
पश्चादेकोत्तरेणोत्क्रमति दिनदिने कालवर्षं हि यावत्।
छिन्नेऽब्दे पक्षमध्ये स्वरदिवसवशाद् रोहणं च क्ष(क्र)मश्च
निःश्वासोच्छ्वासहानिर्दिननिशिसमये जीवितस्यैकरात्रम्॥ ६८॥

---

१. क. ख. पुस्तकयोः 'षड्' इति नास्ति। २. ख. दीर्घः। ३. ग. पुस्तके 'षड्' इति नास्ति। ४. क. टकारः।

इह कर्मचक्रे द्वादशारे हस्तपादयोर्द्वादशसन्धिषु प्रत्येकं त्रिंशन्नाड्यात्मकं चक्रम्; तेषु द्वादशचक्रेषु माघमासादित्रिंशत्तिथ्यधिदैवेषु कादयः षड्वर्गाः विसर्गादिषट्दीर्घ-मात्राभिन्नाः संहारक्रमेण दक्षिणहस्तपादषट्सन्धिषु पृथिव्यादिव्यञ्जनधर्मेण, तथाकाशा-दिव्यञ्जनधर्मेण सृष्टिक्रमेण प्रत्याहारपाठेन ङादिना आकाशादिह्रस्वस्वरभेदभिन्ना
5 वामहस्तपादयोः षट्सन्धिचक्रेषु षड्वर्गाः। तेभ्यो **वर्गेभ्यः सस्वरेभ्यः क्रमति दिनकरः** प्राणवायुर्मृत्युना सार्द्धं **चायनं राशिभेदैरि**ति, अयनं प्रथमम्[117b]त्तरायणं मकरादिकमाघमासादिकमिति, तदेवायनं दक्षिणवामभुजयोः षट्सन्धिचक्रेषु भ्रमति। तथा क्रियाचक्रे हस्ताङ्गुलीत्रिंशत्पर्वसन्धिषु चक्रेषु षड्नाड्यात्मकेषु प्रत्येकैकाङ्गुली-पर्वचक्रे कादिव्यञ्जनं षड्दीर्घमात्राभिन्नं दक्षिणकराङ्गुलीपर्वसन्धिचक्रेषु चरति, संहार-
10 क्रमेण; वामे सृष्टिक्रमेणाकाशादिव्यञ्जनमाकाशादिस्वरभिन्नम्। एवं दक्षिण.यनं पादयोः षट्सन्धिचक्रेषु कर्माख्येष्विति अङ्गुलीपर्वेषु क्रियाख्येष्विति।

T 313 अत्र माघे मकरसंक्रान्तौ तिथिभेदेन चन्द्रः, संक्रान्तिवारभेदेन सूर्यारोहणं ज्ञेयम्। यत्र सूर्यो वर्धते, तत्र चन्द्रक्षयः; यत्र चन्द्रो वर्धते, तत्र सूर्यक्षय इति। एवं मकरादौ[1] सूर्यवृद्धिः, मकरे दक्षिणस्कन्धबाहुसन्धिचक्रे त्रिशन्नाडीषु त्रिशत् कादयो
15 दीर्घमात्राभिन्नाः। संज्ञाधर्मिणोऽधिदैवाः, प्राणधर्मिण इति प्रथमनाड्यां क्काः। एवं सर्वपर्वेषु त्रिषु त्रिषु यथाक्रमं वर्णाः; तद्यथा—क्काः क्क्लॄ क्कॄ क्कू क्की क्का इति प्रथमषड्नाडीषु; एवं दक्षिणाङ्गुष्ठपर्वाधःसन्धौ षड्नाडीषु क्रियाचक्रे। एवं[2] ख्खाः ख्ख्लॄ ख्खू ख्खॄ ख्खी ख्खा इति कर्मचक्रे द्वितीयषड्नाडीषु क्रियाचक्रे तर्जन्यधः-पर्वसन्धौ षड्नाडीषु। तथा ग्गाः ग्ग्लॄ ग्गू[3] ग्गॄ ग्गी ग्गा इति कर्मचक्रे
20 तृतीयषड्नाडीषु क्रियाचक्रे मध्यमाधःपर्वसन्धौ षड्नाडीषु। एवं घ्घाः घ्घ्लॄ घ्घू घ्घॄ घ्घी घ्घा इति कर्मचक्रे चतुर्थे षड्नाडीषु, क्रियाचक्रे ऽनामिकाधःपर्वसन्धौ षड्नाडीषु। एवं ङ्ङाः ङ्ङ्लॄ ङ्ङू ङ्ङॄ ङ्ङी ङ्ङा इति कर्मचक्रे पञ्चमे षड्नाडीषु, क्रियाचक्रे कनिष्ठाधःपर्वसन्धौ षड्नाडीषु। एवं षड्भिः षड्भिर्दिनैः पृथिव्यादिकं मण्डलं सूर्यस्त्यजति। त्रिंशद्दिनैः पञ्चमण्डलानि त्यजति, ततो वामनाड्यां कुम्भे
25 संक्रामति।

तत्राकाशादिक्रमः। कवर्गः कर्मचक्रे क्रियाख्ये चेति। अत्र फाल्गुने कुम्भसंक्रान्तौ वामस्कन्धबाहुसन्धौ कर्मचक्रे त्रिशन्नाडीषु ङकारादीनि व्यञ्जनानि ह्रस्वाकाशादिस्वर-भिन्नान्याकाशमण्डलादिना; तद्यथा—ङ ङि ङृ ङु ङ्ऌ ङं इति प्रथमषड्नाडीष्वाकाशा-दिषण्मण्डललक्षणेषु क्रियाचक्रे वामकनिष्ठाधःपर्वसन्धौ षड्नाडीषु। एवं घ घि घृ घु घ्ऌ
30 घं इति द्वितीयषड्नाडीषु वायुमण्डलस्वभावा स्वकर्मचक्रे क्रियाचक्रे अनामिकाधः-पर्वसन्धौ षड्नाडीषु। एवं[4] ग गि गृ गु ग्ऌ गं इति तृतीयाग्निमण्डलषड्नाडीषु

---

१. क. ख. मकराद्यैः। २. ग. पुस्तके नास्ति। ३. श. पुस्तके नास्ति। ४. श. एवं गति।

कर्मचक्रे क्रियाचक्रे मध्यमाधःपर्वसन्धौ षड्नाडीषु। एवं ख खि खृ ख्लृ खं इति चतुर्थमुदकमण्डलं षड्नाडीषु; कर्मचक्रे क्रियाचक्रे तर्जन्यधःपर्वसन्धौ षड्नाडीषु; तथा क कि कृ कु क्लृ कं[118a]इति पञ्चमे पृथिवीमण्डलषड्नाडीषु कर्मचक्रे षण्मात्रककारस्य क्रियाचक्रेऽङ्गुष्ठाधः प्रथमपर्वसन्धौ षड्नाडीषु। एवमेकऋतौ दक्षिणे वामे मकरकुम्भमासयोः षष्टिकादयो मात्राः संहारसृष्टिभेदेनेति। ततश्च वर्गात् समात्रान् मीनमेषभेदेन क्रमति दक्षिणबाहूपबाहुसन्धौ, कर्मचक्रे त्रिंशन्नाडीषु पृथिव्यादि-पञ्चमण्डलेषु षड्दिनभेदेन चवर्गान् सस्वरान् क्रमति। 5

संहारस्तद्यथा—च्चाः च्च्लृ च्चू च्चृ च्ची च्चा इत्यवनौ। छ्छा छ्छ्लृ छ्छू छ्छृ छ्छी छ्छा इति जले। ज्जाः ज्ज्लृ ज्जू ज्जृ ज्जी ज्जा इति अग्नौ। झ्झाः झ्झ्लृ झ्झू झ्झृ झ्झी झ्झा इति वायौ। ञ्ञाः ञ्ञ्लृ ञ्ञू ञ्ञृ ञ्ञी ञ्ञा इत्याकाशे। त्रिंश-न्मात्राः कर्मचक्रे क्रियाचक्रेऽपि दक्षिणाङ्गुष्ठमध्यपर्वात् कनिष्ठामध्यपर्वान्ते पञ्चसन्धिषु षट्षट्नाडीषु चादीनि त्रिंशदक्षराणि संहारक्रमेण ज्ञातव्यानि इति। एवं वामभुजोपभुज-सन्धौ कर्मचक्रे त्रिंशन्नाडीषु क्रियाचक्रेऽपि कनिष्ठाङ्गुलीमध्यपर्वात् अङ्गुष्ठमध्यपर्वान्ते पञ्चसन्धिषु षट्षट्नाडीषु ञादयो वर्णास्त्रिंशद् भवन्ति; तद्यथा—ञ ञि ञृ ञु ञ्लृ ञं इति आकाशमण्डले, झ झि झृ झु झ्लृ झं इति वायौ, ज जि जृ जु ज्लृ जं इति तेजसि, छ छि छृ छु छ्लृ छं इति तोये, च चि चृ चु च्लृ चं इति पृथिव्याम्। एवं वसन्तऋतौ क्रमति चवर्गः राशि[1]भेदेनेति। ततो दक्षिणकरोपबाहुसन्धौ कर्मचक्रे त्रिंशन्नाडीषु क्रियाचक्रे दक्षिणाङ्गुष्ठोर्ध्वपर्वादिपञ्चसन्धिषु षट्षड्नाडीषु संहारक्रमेण टवर्गान् क्रमति वृषभेदेनेति; तद्यथा—ट्टाः ट्ट्लृ ट्टू ट्टृ ट्टी ट्टा इति अवनौ, ठ्ठाः ठ्ठ्लृ ठ्ठू ठ्ठृ ठ्ठी ठ्ठा इत्युदके, ड्डाः ड्ड्लृ ड्डू ड्डृ ड्डी ड्डा इत्यग्नौ, ढ्ढाः ढ्ढ्लृ ढ्ढू ढ्ढृ ढ्ढी ढ्ढा इति वायौ, ण्णाः ण्ण्लृ ण्णू ण्णृ ण्णी ण्णा इत्याकाशे, एवं संहारेण। ततो वामकरोपबाहुसन्धौ सृष्टिक्रमेण कर्मचक्रे त्रिंशन्नाडीषु क्रियाचक्रे वामकरकनिष्ठोर्ध्वपर्वादङ्गुष्ठपर्वसन्धिषु षड्नाडीषु आकाशादिमण्डलक्रमेण णकारादीन्यक्षराणि; तद्यथा—ण णि णृ णु ण्लृ णं [118b] इत्याकाशे, ढ ढि ढृ ढु ढ्लृ ढं इति पवने, ड डि डृ डु ड्लृ डं इत्यग्नौ, ठ ठि ठृ ठु ठ्लृ ठं इत्युदके, ट टि टृ टु ट्लृ टं इति पृथिव्याम्, वृषमिथुनराशिभेदेन क्रमति ग्रीष्मऋतौ। एवमुत्तरायणे अशीत्युत्तरशताक्षराणि क्रमति दिनकरश्चायनं राशिभेदैरिति। 10 15 20 25

पश्चादेकोत्तरेणोत्क्रमति दिनदिने इति पश्चाद्दक्षिणायने चन्द्रापानवायौ मृत्युः क्रमति, सूर्यं[2] उत्क्रमति[3] हीनो[4] भवति[5]। चन्द्रस्य रात्रे[6]र्वृद्धिर्भवति, यस्य वृद्धिस्तस्य चरणेषु मृत्युः क्रमति इति न्यायात् सूर्यं उत्क्रमति हस्ताङ्गुली(लि)मूर्ध्निसन्धिभ्यो

१, क. ख. मात्रासि; ग. मात्राराशि; भो. Khyim Gyi dBye Bas Tsa sDe (राशि)। २-३. क. ख. सूर्यवत् क्रमति। ४-५. भो. dMan par Mi ḫGur (न हीनो भवतीति)। ६. ग. रात्रौ।

यावद् दक्षिणस्कन्धबाहुसन्धिप्रथमनाड्याः पर्यन्तमिति। अत्र दक्षिणायने चन्द्रः[1] क्रमति दक्षिणकट्युरुसन्धौ कर्मचक्रे त्रिंशन्नाडीषु। दक्षिणाङ्गुष्ठाधःपर्वात् कनिष्ठाधःपर्वान्तं यावत् संहारक्रमेण क्रियाचक्रे पञ्चाङ्गुलीपर्वसन्धिषु षट्षड्नाडीषु पवर्गाक्षराणि त्रिंशत् क्रमति, कर्कटभेदेन त्रिवर्षाधिपतिः; तद्यथा—प्पाः प्प्लॄ प्पू प्पृ प्पी प्पा इत्यवनौ, फ्फाः फ्फ्लॄ फ्फू फ्फृ फ्फी फ्फा इति जले, ब्बाः ब्ब्लॄ ब्बू ब्बृ ब्बी ब्बा इति तेजसि, भ्भाः भ्भ्लॄ भ्भू भ्भृ भ्भी भ्भा इत्यनिले, म्माः म्म्लॄ म्मू म्मृ म्मी म्मा इत्याकाशे, एवं कर्कटभेदेनेति। ततो वामकट्युरुसन्धौ सृष्टिक्रमेणाकाशादिमण्डलभेदेन त्रिंशदक्षराणि विलोमेनः; तद्यथा— म मि मृ मु म्लृ मं इत्याकाशे, भ भि भृ भु भ्लृ भं इति पवने, ब बि बृ बु ब्लृ बं इति तेजसि, फ फि फृ फु फ्लृ फं इत्युदके, प पि पृ पु प्लृ पं इति पृथिव्यां सिंहसंक्रान्तिभेदेन भाद्रपदं क्रमति। एवं वार्ष्यंऋतुं चन्द्रः क्रमति, सूर्यं उत्क्रमति। ततो दक्षिणोरुजानु-सन्धौ कर्मचक्रे क्रियाचक्रे पादाङ्गुष्ठमध्यपर्वात् कनिष्ठामध्यपर्वान्तं पञ्चसन्धिषु षड्नाडीषु तवर्गः क्रमति तेभ्यो राशिसंहारभेदेन त्रिंशदक्षराणि; तद्यथा – त्ताः त्त्लॄ त्तू त्तृ त्ती त्ता इत्यवनौ, थ्थाः थ्थ्लॄ थ्थू थ्थृ थ्थी थ्था इति जले, द्दाः द्द्लॄ द्दू द्दृ द्दी द्दा इति तेजसि, ध्धाः ध्ध्लॄ ध्धू ध्धृ ध्धी ध्धा इति वायौ, न्नाः न्न्लॄ न्नू न्नृ न्नी न्ना इत्याकाशे, एवं कन्या-भेदेन क्रमति चन्द्र इति। त[119a]तो वामोरुजानुसन्धौ कर्मचक्रे क्रियाचक्रे वामपादक-निष्ठामध्यपर्वाङ्गुष्ठपर्यन्तं पञ्चसन्धिषु षट्षड्नाडीषु; तद्यथा—न नि नृ नु (न्लृ) नं इत्याकाशे, तथा ध धि धृ धु ध्लृ धं इति वायौ, एवं द दि दृ दु द्ल दं इति तेजसि, थ थि थृ थु थ्लृ थं इति जले, त ति तृ तु त्लृ तं इति पृथिव्याम्; एवं तुलाभेदेन वामे सृष्टिक्रमेण चन्द्रः क्रमति, सूर्यं उत्क्रमति शरदृतौ इति। ततो दक्षिणपादजानुसन्धौ कर्मचक्रे त्रिंशन्नाडीषु क्रियाचक्रे दक्षिणाङ्गुष्ठोर्ध्वपर्वात् कनिष्ठोर्ध्वपर्व यावत् पञ्चसन्धिषु षट्षड्नाडीषु संहारक्रमेण वृश्चिकभेदेन सवर्गान् त्रिंशदक्षराणि समात्राणि क्रमति चन्द्रः; दक्षिणे सूर्यं उत्क्रमति; तद्यथा—स्साः स्स्लॄ स्सू स्सृ स्सी स्सा इत्यवनिमण्डले, य्याः य्य्लॄ य्यू य्यृ य्यी य्या इति जले, ष्षाः ष्ष्लॄ ष्षू ष्षृ ष्षी ष्षा इति तेजसि, श्शाः श्श्लॄ
: : : : : :
श्शू श्शृ श्शी श्शा इति वायौ, एवं काः क्क्लॄ कू कृ की का इत्याकाशे षड्नाडीषु त्रिंशदक्षराणि वृश्चिकभेदेनेति। ततो वामपादजानुसन्धौ कर्मचक्रे त्रिंशन्नाडीषु क्रियाचक्रे कनिष्ठाङ्गुल्यूर्ध्वपर्वादङ्गुष्ठोर्ध्वपर्वं यावत् पञ्चपर्वसन्धिषु षट्षड्नाडीषु सृष्टिक्रमेण त्रिंशदक्षराणि चन्द्रः क्रमति, सूर्यो वामभुजायां स्कन्धधातूत्क्रमति धनुराशिभेदेनेति;
: : : : : :
तद्यथा—क कि कृ कु क्लृ कं इत्याकाशे, तथा श शि शृ शु श्लृ [शं] इति वायौ, ष षि षृ षु ष्लृ षं इति तेजसि, य्य य्यि य्यृ य्यु य्य्लृ य्यं इत्युदके, एवं स सि सृ सु स्लृ सं इति पृथिव्याम्, एवं त्रिंशदक्षराणि धनुभेदेनेति। अतः शिशिरऋतोरारभ्य चन्द्रस्य क्रमणाभावः।

१, क, ख. चन्द्रं।

पुनर्मकरादौ सूर्यस्य वृद्धिरिति। प्रथमवर्षे सत्त्वगुणभेदेन कालः सूर्यचन्द्राभ्यां सह क्रमि(म)ति, ततो द्वितीये वर्षे रजोभेदेन गुणवृद्धिस्वरैः कादयो वर्णास्त्रिशत् त्रिशन्नाडीषु कर्मचक्रे क्रियाचक्रे पूर्ववद् वेदितव्या इति। मकरे संहारक्रमेण; तद्यथा—क्काः क्काल् क्को क्कार् क्के क्का इत्यवनौ, तथा ख्खाः ख्खाल् ख्खो ख्खार् ख्खे ख्खा इत्युदके, ग्गाः ग्गाल् ग्गो ग्गार् ग्गे ग्गा इति तेजसि, घ्घाः घ्घाल् घ्घो घ्घार् घ्घे घ्घा इति वायौ, ङ्ङाः ङ्ङाल् ङ्ङो ङ्ङार् ङ्ङे ङ्ङा इ[119b]त्याकाशमण्डले, दक्षिणबाहोः पूर्ववत् मकरभेदेन सूर्यः क्रमति, चन्द्रो दक्षिणपादे उत्क्रमति, तथा कुम्भभेदेन सृष्टिक्रमेण गुणसहितेभ्यः क्रमति, वामबाहुसन्धौ; तद्यथा—ङ ङे ङर् ङो ङल् ङं इत्याकाशे, घ घे घर् घो घल् घं इति वायौ, ग गे गर् गो गल् गं इति तेजसि, ख खे खर् खो खल खं इत्युदके, क के कर् को कल् कं इति पृथिव्याम्, कुम्भभेदेन वामे सृष्टिक्रमेण; एवं मीनमेषयोः यथासंख्यं चवर्गाक्षराणि त्रिशत्-त्रिशत्-संहारसृष्टिक्रमेणेति दक्षिणवामे सन्धिनाडीषु वसन्तऋतौ, तथा टवर्गाक्षराणि ग्रीष्मऋतौ। ततः सूर्य उत्क्रमति, चन्द्रः क्रमति। कर्कटके सिंघे(हे) पादसन्धौ त्रिशन्नाडीषु दक्षिणे वामे पूर्ववत् वृद्धिगुणसहितेभ्यस्त्रिशदक्षरेभ्यः क्रमति। वार्ष्यऋतौ पवर्गाक्षराणि वृद्धिगुणैर्युक्तानि क्रमति चन्द्रः, शरदि तवर्गाक्षराणि, शिशिरे सवर्गाक्षराणि संहारसृष्टिक्रमेणेति। एवं द्वितीयवर्षे षष्ठ्युत्तरत्रिशतमात्रान् चन्द्रसूर्यौ क्रमत इति; ततस्तृतीये वर्षे तमोभेदेन कालः सूर्येण सार्द्धं कादिवर्गेभ्यः सस्वरेभ्यश्चरति[1]।

अत्र यणादेशाः स्वरा उच्यन्ते—

तैः सार्द्धं त्रिशत्-त्रिशदक्षराणि तमोविषयकालश्चरति इति संहारसृष्टिभेदेन पूर्ववद्धस्तपादसन्धिषु कर्मचक्रे क्रियाचक्रेष्विति; तद्यथा—क्क्हाः क्क्ला क्क्वा क्क्रा क्क्या क्क्हा इत्यवनौ मकरभेदेनेति; [तथा[2]] ख्ख्हाः ख्ख्ला ख्ख्वा ख्ख्रा ख्ख्या ख्ख्हा इति जले; तथा ग्ग्हाः ग्ग्ला ग्ग्वा ग्ग्रा ग्ग्या ग्ग्हा इत्यनले; घ्घ्हाः घ्घ्ला घ्घ्वा घ्घ्रा घ्घ्या घ्घ्हा इति वायौ; ङ्ङ्हाः ङ्ङ्ला ङ्ङ्वा ङ्ङ्रा ङ्ङ्या ङ्ङ्हा इत्याकाशे। एवं सूर्यः क्रमति दक्षिणे, ततो वामे सृष्टिक्रमेणेति। ङ्ह ङ्य ङ्र ङ्व ङ्ल ङ्हं[3] इत्याकाशे। घ्ह घ्य घ्र घ्व घ्ल घ्हं[3] इति वायौ। ग्ह ग्य ग्र ग्व ग्ल ग्हं[3] इति तेजसि। ख्ह ख्य ख्र ख्व ख्ल ख्हं[3] इत्युदके। क्ह क्य क्र क्व क्ल क्हं[3] इत्यवनौ। एवं वामे सृष्टिक्रमेण त्रिशन्मात्रांश्चरति सूर्यः शिशिर[4]ऋतौ। एवं वसन्ते चवर्गः, ग्रीष्मे टवर्गः। ततः सूर्य उत्क्रमति षट्सन्धिभ्यः। चन्द्रः पादसन्धौ क्रमति। वार्ष्ये पूर्ववत् पवर्गः। शरदि तवर्गः। हेमन्ते सवर्गः, संहारभेदेन सृष्टिभेदेनेति।, एवं तृ[120a]तीये वर्षेऽपि षष्ठ्युत्तरत्रिशतमात्रान् क्रमति दिनकरः।

---

१. ग. स्वस्वरेभ्यः०। २. ग. तद्यथा; भो. De bSin Du (तथा)।
३. भोटे सर्वत्रान्ते सानुस्वारं दृश्यते, संस्कृतेऽपि तथैव। अत एव प्रथमाक्षरतोऽन्तिमाक्षरो भिन्नः; भोटे च ॅ सर्वत्रान्तिमे ज्ञेयः। ४. क. ख. एवं वसन्त०।

कालवर्षं हि यस्मात् तस्मादेवाशीत्युत्तरसहस्रदिन[1]क्षयस्तयोर्वेदितव्य इति त्रिवर्षनाडीच्छेदो व्यञ्जनानामिति नियमः।

ततः **छिन्नेऽब्दे** सति **पक्षमध्ये** पञ्चचत्वारिंशत् ह्रस्वदीर्घप्लुतस्वरधर्मेण **स्वरदिवसवशात्** पञ्चचत्वारिंशद्दिनवशाद् **रोहणं च** मृत्योः सूर्यभेदेन सूर्यस्य, चन्द्रभेदेन चन्द्रस्य। रोहणमिति कण्ठे अष्टाविंशद् दिनानि, ललाटे चतुर्दशदिनानि पूर्वोक्तानि, गुह्ये त्रिदशकमिति त्रिंशद् दिनानि, ततः कण्ठे दिनचतुष्टयम्, ललाटे दिनद्वयं जीवितस्य त्रिरात्रम्। अपरमत्र स्वरच्छेदे तिथिः षट्पञ्चाशद्दण्डात्मिका ग्राह्या।

एवं पञ्चचत्वारिंशत्तिथयः स्वरधर्मिण्यः, तिस्रः शून्यधर्मिण्य इति व्यञ्जनधर्मेऽप्येवं दिनद्वयम्। एतासु दिनाष्टकं हृदयकमले आरोहते, ततो दशवायूनां समाहारः। कर्णिकायां **निःश्वासोच्छ्वास**चक्रस्य यावद् **हानिर्दिननिशिसमये जीवितस्यैकरात्रं** भवतीति। ततः कर्मवशादन्यत्र विज्ञानसंक्रमणमिति नियमो मध्यमामरणे सति प्राणिनां शतायुषामिति नाडीच्छेदनियमः।

इदानीं निर्माणचक्रादिषु षट्दिनावधेर्मरणादवशेषनाडिका दशवायुवाहिन्य उच्यन्ते **नाभावित्यादिना**—

नाभौ कण्ठे ललाटे स्वहृदयकमले नाडिकाः सावशेषा-
स्तिष्ठत्यर्को रसोऽग्निः स्वहृदयकमले सार्द्धनाडी तथैव।
पाणेः पादस्य सन्धौ तिथिगुणितयुगाः षड्दिनं यावदेव
अन्ते सर्वत्र सूक्ष्मा प्रवहति दिवसं च त्यजन्ती हृदब्जम्॥ ६९॥

इह नाभिचक्रे बाह्यमण्डलवाहिनी नाडीक्षयपरित्यागात् त्रिवर्षोर्ध्वं[2] त्रिपक्षरोहणे व्यञ्जनारोहणे **षड्दिनं यावद्** द्वादशराशिनाड्यः शून्यमण्डलपृथिवीमण्डलात्मिकाः श्वासचारेणावतिष्ठन्ते(ते) **अर्क** इति। एवं कण्ठे षण्मुहू[120b]र्त्तवाहिन्यो **रस** इति। चन्द्रस्यार्द्धप्रहरवाहिन्यः तिस्रो[3]ऽग्निरिति। हृत्कमले प्रहरवाहिनी सार्द्धनाडी **स्वहृदयकमले सार्द्धनाडी तथैव सावशेषा** इति। **पाणेः पादस्य सन्धाविति** षष्ट्युत्तरत्रिशतनाडीमध्ये कर्मचक्रे क्रियाचक्रे सन्धिषु। **तिथिगुणितयुगा** इति षष्टिनाड्यो दशवायुवाहिन्य इति। द्वादशसन्धीनां प्रत्येकसन्धौ पञ्चपञ्चनाड्यो दशवायुवाहिन्य इति शेषाः। कालमृत्युर्वायुर्महातमो धर्मो[4] क्रियाचक्रे षष्टिसन्धिषु एकैकनाडी दशवायुवाहिनी पञ्चपञ्चकालमृत्युमहावायुवाहिन्य इति; एवं षड्दिनं यावत्। ततः षड्दिनैरिन्द्रियविषयनाडीक्षयं कृत्वाऽन्ते मरणदिने **सर्वत्र सूक्ष्मा** मध्यमावधूती **वहति** चन्द्रसूर्यविण्मूत्रवाहिनीं त्यक्त्वा महातमः कालवायुर्मरणान्तं वहति यावत् श्वासचक्रक्षयो भवतीति नियमः। **दिवसं च त्यजन्तीति हृदब्जमिति**। एवं सूर्यचन्द्रारोहणनाडी व्यञ्जनकर्मक्रियाचक्रावशेषनाडीश्वासच्छेदकालमरणनियमो भगवतोक्तः।

T 315

---

१. क. ख. ०दिनकर०। २. क. ख. अर्धं। ३. क. ख. त्रिशो। ४. क. ख. कर्म।

इदानीं चन्द्रसूर्यचारक्षयेण कालवृद्धिरुच्यते **षट्त्रिंशद्भिरित्यादिना**—

षट्त्रिंशद्भिः सहस्रै ध्रुशतदिनगणे रोहते कालनाडी
यां यां सूर्येन्दुशक्तिर्दिननिशिसमये पूरितं स्वस्वचारैः ।
सूर्याऽह्नः सूर्यचारे त्वृणमपि च भवेच्चन्द्रचारे तदर्द्धं
नक्षत्राहः प्रभेदै रविशशिचरणं शून्यमासे च मृत्योः ॥ ७० ॥ 5

इह वर्षशते दिनगणे कृते **षट्त्रिंशत्सहस्र**दिनानि भवन्ति । ध्रुरिति वर्षसंज्ञा, तैः **षट्त्रिंशद्भिः सहस्रै ध्रुशतदिनगणे रोहते कालनाडी**, मृत्युः नाडीषु वर्द्धते द्वासप्तति-सहस्रेषु मृत्युवायुः प्रविशति । पञ्चमण्डलवायुः क्रमतोऽपसरति षष्ठांशं[1] तत्र स्थापयि-त्वेति । कां रोहते कालनाडीवायुः ? **यां यां पूरितं सूर्येन्दोर्न शक्तिर्दिननिशिसमये स्वस्वचारैर्न**क्षत्रचारेण सूर्यस्याशक्तिरिति, तिथिचरणैश्चन्द्रस्याशक्तिरिति[121a] । 10
सूर्याऽह इति द्वादशदिनानि **सूर्यचारे त्वृणमपि भवेच्चन्द्रचारे तदर्द्धं**[2] षड्दिनानि । अत्र प्रतिमासे त्रिंशद्दिनैर्न्न राशिमेकं सूर्यश्चरति, न चन्द्रः षष्टिदण्डानिति द्वौ चरति । अतो **नक्षत्राहः प्रभेदै रविशशिचरणं शून्यमासे च मृत्योः**, तयोर्यत्राशक्तिः स शून्यमासो द्वात्रिंशन्मासान्ते, स च चतुःषष्टीनाड्यात्मक इति । तासु चतुःषष्टिनाडीषु शून्यवायुः प्ररोहते, नाभिकमले द्वासप्ततिसहस्राणां मध्ये प्रत्यहं नाडीद्वयं रोहते इति सामान्यश्छूल-(स्थूल)नियमः । 15

इदानीं प्रत्यहं श्वासभेदेनारोहणमुच्यते **प्राणा** इत्यादिना—

प्राणा देहेऽधिका ये प्रकटितविषुवे वेदपादोनषष्टिः
सर्वे संक्रान्तिभेदैः प्रतिदिनसमये नाडियुग्मं निहन्ति ।
भूयो भूयोऽब्दमध्ये रविशशिचरणात् शून्यनेत्राद्रिसंख्या 20
एवं कालः शताब्दैः क्रमति सुरनृणां स्वायुषं स्वस्वमानैः ॥ ७१ ॥

इह षट्शताधिकैकविंशत्सहस्राणां मध्ये **ये** ज्ञानमण्डलवाहिनो भवन्ति ते **देहे श्वासाधिका**[3] इत्युच्यन्ते । **प्रकटितविषुवे** उभयलग्नमध्ये **पादे वेदोनषष्टिः** सपादषट्-पञ्चाशदिति; ते **सर्वे**[4] द्वादश**संक्रान्तिभेदैः** पञ्चसप्तत्यधिकपुटशतं भूत्वा **प्रतिदिनसमये नाडीयुग्मं निहन्ती**त्यागमपाठः; घ्नन्तीति रूपम् । इदं नाडीयुग्मं वामे दक्षिणे द्वासप्तति- 25
नाडीसहस्राणां मध्ये नाडीयुग्मं घ्नन्ति पञ्चमण्डलवायुसञ्चारविनाशो भवतीति । शेषाः पञ्चचत्वारिंशच्छ्वासाः तिष्ठन्ति **भूयो भूयोऽब्दमध्ये**; एवं प्रतिदिनं नाडी युग्मं हन्यमाना ऽब्दमध्येऽब्ददिनैः षष्ठ्युत्तरत्रिशतादिनै **रविशशिचरणात्** दक्षि[ण]वाममण्डलसञ्चारात् ।

---

१. Drug Cuhi Cha Śas (षष्टचशं) । २. ख. तदुर्ध्वं । ३. क. श्वासादिका ।
४. ख. पूर्वे ।

शून्यनेत्राद्रिसंख्या इति विंशत्यधिकसप्तशतानीति। **एवं कालः शताब्दैः** षट्त्रिंशद्भिः सहस्रदिनैः **क्रमति**। **सुरनृणां वा(स्वा)युष[ो]** द्वासप्ततिनाडीसहस्रं पञ्च[121b]मण्डलवाहकम्, चन्द्रादित्यचरणमिति। **स्वस्वमानैः** पूर्वोक्तैः सूक्ष्मतनु[1][ज]भूतदेवादिदिनैरिति नाडीच्छेदनियमः।

इदानीं कालनाडीस्वभाव उच्यते **दष्टमित्यादिना**—

दष्टं व्याधिः प्रहारो यदि भवति नृणां कालनाड्यां कदाचित्
शीघ्रं तेनाश्रयेण प्रविशति सहसा मूलचक्रेषु कालः।
रुद्ध्वा चक्रेषु नाडी रविशशिगमनं छेदयित्वा समस्तं
मध्ये सूक्ष्माश्रितं यद् हरति नरपते जीवितं प्राणिनां च ॥ ७२ ॥

इह शरीरे **कालनाड्यां** मध्यमाप्रवाहकाले **यदि दष्टं भवति**, **व्याधिर्भवति**, **प्रहारो वा नृणां कदाचित्**; तदा **शीघ्रं तेनाश्रयेण प्रविशति सहसा मूलचक्रेषु** षट्सु **कालो** महातमो वायुः। स च प्रविष्टः सन् **षट्चक्रेषु** षट्पञ्चाशदम[धि]कनाडीशतम्, असौ **रुद्ध्वा रविशशिगमनं** सव्येतरनाड्यां **छेदयित्वा समस्तं मध्ये सूक्ष्माश्रितम्**, अवधूतीनाड्याश्रितं **यज्जीवितं** प्राणवायुः तद्[2] **हरति**[3] **नरपते जीवितं प्राणिनामिति** कालनाडीनियमः।

इदानीं धर्मचक्रादौ चन्द्रचरणा[4]न्युच्यन्ते **हृत्पद्म** इत्यादिना—

हृत्पद्मे श्रीललाटे चरति शशिपदं भूतदिग्वासराख्यं
सम्भोगे नाभिचक्रे नवदशसहितं रुद्रयुग्मं जिनाख्यम्।
तत्त्वाख्यं सप्तरात्रात्त्यजति पुनरसावुत्क्रमन् यः शशाङ्को
बिन्दौ पूर्णां प्रकृत्य प्रविशति हृदये शुक्लपक्षे क्रमेण ॥ ७३ ॥

इह चन्द्रस्य चरणभेदेन चतुर्दशभागेन समविषमगतेन तिथिषु वृद्धिर्हानिर्वा। सा सप्तमदिने सप्ततिथिषु[122a] पञ्चविषयगुणा बालकुमारादिभेदेन सप्तमे दिने वृद्धिर्हानिर्वा निवर्तते विंशत्यधिकशतचरणेषु पूर्णेषु।

अत्र विंशत्यधिकशतांशान्युच्यन्ते—

इह चतुर्दशभागावशेषे एकचरणे दृष्टे तद्दिनकलायाः षष्टिनाडिकांशानां मध्ये पञ्चनाडिकांशाः कलाया धनेऽधिका भवन्ति, कृष्णायाः शुक्लाया वा ऋणस्थाने हीना भवन्ति। द्वितीये दिने द्वितीयायाः पञ्चांशाः, प्रथमायाः कुमारभेदेन द्विगुणा ज्ञातव्या

१. क. ख. तत्र; भो. Lus sKyes (तनुज)। २-३. क. ख. तद्वति।
४. क. ख. ०वरणा।

इति । एवं तृतीयदिने तृतीयायाः पञ्चांशाः; एवं द्वितीयायाः दश, प्रथमाया वा[यु]भेदेन पञ्चदश । एवं बालप्रभेदेन चतुर्थ्याः पञ्चांशाः, तृतीयाया दश, द्वितीयायाः पञ्चदश, प्रथमाया युवाभेदेनैकोनविंशतिः । एवं पञ्चमे दिने पञ्चम्यां(:) पञ्चांशाः, चतुर्थ्या दश, तृतीयायाः पञ्चदश; द्वितीयाया एकोनविंशतिः, प्रथमाया वृद्धभेदेन द्वाविंशतिः । एवं षष्ठे दिने षष्ठ्याः पञ्चांशाः, पञ्चम्या दश, चतुर्थ्याः पञ्चदश, तृतीयाया एकोनविंशतिः, 5 द्वितीयाया द्वाविंशतिः; प्रथमाया अतिवृद्धि(द्ध)भेदेन चतुर्विंशतिः । एवं सप्तमे दिने सप्तम्याः पञ्चांशाः, षष्ठ्या दश, पञ्चम्या पञ्चदश, चतुर्थ्या एकोनविंशतिः, तृतीयाया द्वाविंशतिः, द्वितीयायाः चतुर्विंशतिः, प्रथमायाः पक्वावस्थाभेदेन सप्तमे दिने पञ्चविंशत्यंशाः धनं वा ऋणं वा चरणवशाद् भवन्ति । एवं बालादिक्रमेण सर्वेषां प्रमेयो ज्ञेयः । एवं सप्ततिथीनां चरणांशान् गृहीत्वा हृत्कमलादिषु विंशत्यधिकशतदलेषु **शशाङ्कः** 10 क्रमति, ततः पुन**रुत्क्रमति** । **शशिपदं** स्वकीयं पदमित्यर्थः । हृदयेऽष्टदलेष्वष्टांशाः, **ललाटे** षोडशदलेषु षोडशांशाः, **सम्भोगे** द्वात्रिंशद्दलेषु द्वात्रिंशदंशाः, **नाभिकमले** चतुःषष्टिदलेषु चतुःषष्ट्यंशाः । एवं विंशत्यधिकशतांशान् भुक्त्वा चन्द्रकलाया हानिर्वा वृद्धिर्वा निवर्तते । हृत्पद्मे ललाटे च **भूतदिग्वासराख्यं सम्भोगे नाभौ च नवदशसहितं रुद्रयुग्मं जिनाख्यम् । तत्त्वाख्यं सप्तरात्रात्त्यजति पुनरसौ उत्क्रमन् यः शशाङ्कः** । प्रथमकलायाः 15 T 316 पञ्चविंशत्यंशाः परिपक्वाया भवन्ति; सा चाष्टमे दिने ना[122b]भाव[ा]धिदेवता भवति । पुनः पूर्णमास्यां नाभिहृत्कण्ठललाटेषु पूर्णं करोति । बिन्दुस्थाने **बिन्दौ पूर्णां प्रकृत्य** इति, ततो नाभेः पुनरुत्क्रमन् चतुःषष्टिदलेषु चतुःषष्ट्यंशाः, हृदयेऽष्टांशाः, कण्ठे द्वात्रिंशदंशाः, ललाटे षोडशांशाः; एवं चतुर्दशदिनैः पदानां पूर्णं भवति । तस्मिन् पूर्णां प्रकृत्य **प्रविशति हृदये शुक्लपक्षे** धनपक्षे **क्रमेण** । 20

> भूयः कृष्णे च तद्वद् व्रजति पदपदान् नाभिपद्मे हि यावद-
> ष्टारे षोडशारे हृदि शिरसि तथा कृष्णशुक्ल(ा)ब्जसंज्ञे ।
> कण्ठे द्वात्रिंशदारं द्विगुणितमपरं रक्तपीतं च नाभौ
> द्व्यष्टम्यौ नाभिकण्ठे शिरसि च हृदये श्वेतकृष्णा च पूर्णा ॥ ७४ ॥

> आद्यास्त्रिंशत् स्वरा ये हयरवलयुता बिन्दुभिः श्रीविसर्गै- 25
> र्भिन्नाः षष्टिर्बभूवुर्युगनृपवसुदन्ताश्च ते केशराग्रे ।
> बिन्द्वाकारैर्विसर्गैर्वरकमलदले कादिवर्गा विभिन्नाः
> विंशत्येकं शतं च प्रहरगतिवशाद् रोहते क्षीयतेऽर्कः ॥ ७५ ॥

भूयः कृष्णे च तद्वद् ऋणपक्षे पूर्ववदुत्क्रमेण वायुपृथिवीतोयाग्निपद्मदलेषु संहारेण यावद् ऋणपूर्णा कृष्णपदानां हृदये भवतीति पदनियमः । 30

अत्र कमलान्यष्टारं **हृदये** कृष्णम्, **षोडशारं शिरसि शुक्लम्; कण्ठे द्वात्रिंशदारं रक्तम्, द्विगुणितं** तस्यापरं चतुःषष्ट्यारं **नाभौ पीतमिति** पद्मदलनियमः ।

इदानीं चतुःपर्वस्ना(स्था)नमुच्यते **द्व्यष्टम्यावित्यादिना**—

इह हृत्कमलादिषु वायुतेजउदकपृथ्वीधातुस्वभावेषु चन्द्रः स्वरभेदेन कर्णिका-केशराग्रेषु चरति ।

आद्यास्त्रिंशत् स्वरा ये हयरवलयुता बिन्दुभिः श्रीविसर्गैर्भिन्नाः षष्टिर्बभूवु-
5 रिति । इह पूर्वोक्ता ह्रस्वाः पञ्च, गुणरूपाः पञ्च, यणादेशाः पञ्च ह्रस्वाः; एते पञ्चदश **बिन्दु**[123a]**भिर्भिन्नास्त्रिंशद्** भवन्ति । दीर्घवृद्धिस्थानीया हादयः पञ्चदश, त्रिंशद् **विसर्गविभिन्नाः**; एवं **षष्टिर्बभूवुरिति** । ते **युगनृपवसुदन्ताश्च केशराग्रे** इति । अत्र हृत्क-मले चन्द्रोऽमां कृत्वा पूर्वापरार्द्धकलाभेदेन पञ्चदशतिथिभिस्त्रिंशत् स्वरांश्चरति । अत्र हृत्कमले केशराग्रे शुक्लप्रतिपत् पूर्वार्द्धे अ, अपरार्द्धे अं; द्वितीयायां पूर्वार्द्धे इ,
10 अपरार्द्धे ई इति हृदये युगचत्वारः कर्णिकां वर्जयित्वा । ततः कण्ठकमलकेशराग्रे तृतीयायां पूर्वापरार्द्धः ऋ ऋं; एवं चतुर्थ्यां उ उं, पञ्चम्यां ऌ ऌं, षष्ठ्यां अ अं, सप्तम्यां ए एं, अष्टम्यां पूर्वार्द्धे अर केशराग्रे, अपरार्द्धे अरं कर्णिकायामिति; नवम्यां ओ ओं, दशम्यां अल अलं इति कण्ठकमले केशराग्रे चरति । ततो ललाटकमलकेशराग्रे एकादश्यां पूर्वापरार्द्धं ह हं, द्वादश्यां पूर्वापरार्द्धे य यं, त्रयोदश्यां र
15 रं, चतुर्दश्यां व वं, पूर्णायां पूर्वार्द्धे ल इति केशराग्रे, अपरार्द्धे लं कर्णिकायामिति । शिरसि पूर्णा चन्द्रस्य सृष्टिक्रमेण वायु-तेज-उदक-कमलकर्णिकासु चरति; ततः पृथ्वी-कमलकर्णिकासु संहारक्रमेण कृष्णपक्षे दीर्घान् सविसर्गान् चरति; तद्यथा—कृष्णप्रतिपदि पूर्वार्द्धं लाः, अपरार्द्धं ला । एवं द्वितीयायां वाः वा, तृतीयायां राः रा, चतुर्थ्यां याः या, पञ्चम्यां हाः हा, षष्ठ्यां आलः आल, सप्तम्यां औः औ, अष्टम्यां आरः, कर्णिकायां आर,
20 नवम्यां ऐः ऐ, दशम्यां आः आ, एकादश्यां ॡः ॡ, द्वादश्यां ऊः ऊ, त्रयोदश्यां ॠः ॠ, चतुर्दश्यां ईः इ, पञ्चदश्यां आः आ । अत्र कर्णिकायां द्वयं शून्यकम्, एतयोः कर्णिकायां न[1] स्वरविसर्गौ[2] । पुनः हृत्कमले अमावस्यान्ते प्रतिपदाद्यं हृतकमलकेशराग्रे **श्वेत-कृष्णा च पूर्णा** नियमः । शुक्लाष्टमी **कण्ठकमलकेशराग्रे** कर्णिकायां च; कृष्णाष्टमी **नाभिकमले** केशराग्रे कर्णिकायाम्, पूर्णा कृष्णा हृदये, पूर्णान्तं शिरसि, हृदय इति
25 अमावस्यान्तप्रतिपत्प्रवेशकाल इति नियमः ।

इदानीं सूर्यव्यञ्जनभोगा उच्यन्ते **बिन्द्वित्यादिना**—

इह **कादयो वर्गा बिन्द्वाकारैर्विसर्गैश्चतुर्भि**[123b]**र्भिन्नाः** सन्तो विंशत्यधिका-क्षरशतं भवति, तदेव **वरकमलदले विंशत्यधिकैकशते प्रहरगतिवशाद् रोहते क्षीयतेऽर्कः** संहारसृष्टिभेदेनेति । अत्र प्रहरगतिः चतुःसन्ध्या, तासां गतिवशात् प्रहरगतिवगादिति ।
30 अत्र हृत्कमले अमावस्यान्तं प्रतिपदादौ चतुःषष्टिदलेषु चतुर्दलानि शून्यानीति; तेषु प्रतिपत् स्साः स्सा, याः या इति चतुर्दलेषु चतुःसन्ध्या प्रतिपदा स्सादींश्चरति अर्क इति ।
x x
एवं द्वितीयायां ष्षाः ष्षा, श्शाः श्शा इति । एवं ततीयायां क्काः क्का, त्ताः त्ता इति;

१-२. क. ख. सस्वरौ विसर्गः; ग. अस्वरौ विसर्गः; भो. dByaṅs Daṅ rNam par bCad pa Med Do (न स्वरविसर्गौ) ।

चतुर्थ्यां थ्थाः थ्था; द्दाः द्दा इति; पञ्चम्यां ध्धाः ध्धा, न्नाः न्ना इति; षष्ठयां प्पाः प्पा, फ्फाः फ्फा इति; सप्तम्यां ब्बाः ब्बा, भ्भाः भ्भा इति; अष्टम्यां म्माः म्मा, ट्टाः ट्टा इति; नवम्यां ठ्ठाः ठ्ठा, ड्डाः ड्डा इति; दशम्यां ढ्ढाः ढ्ढा, ण्णाः ण्णा इति; एकादश्यां च्चाः च्चा, छ्छाः छ्छा इति; द्वादश्यां ज्जाः ज्जा, झ्झाः झ्झा इति; त्रयोदश्यां ञ्ञाः ञ्ञा, क्काः क्का इति; चतुर्दश्यां ख्खाः ख्खा, ग्गाः ग्गा इति; शुक्लपौर्णमास्यां घ्घाः घ्घा, ङ्ङाः 5
ङ्ङा इति। नाभिकमलदलेषु सूर्यः सादिवर्गाक्षरं भुक्त्वा निवर्तते इति। शिरसि स्वचारेण चन्द्रः प्रविशति। ततः सूर्यभुक्तकमले चन्द्र आगच्छति, चन्द्रभुक्तकमलेषु सूर्यो गच्छति, सृष्टिक्रमेण कृष्णपक्षे[सूर्यः][1], चन्द्रः संहारक्रमेणेति। इह सर्वत्र यदा चन्द्रः सृष्टया चरति, तदा सूर्यः संहारेण; यदा सूर्यः सृष्टया, तदा चन्द्रः संहारेणेति नियमः।

इदानीं ललाटकमलादिदलेषु सूर्यः ङादिवर्गाक्षरं चरत्युत्क्रमेण, कृष्णप्रतिपदि ङ 10
ङं, घ घं ललाटे चतुर्दलेषु चरति; द्वितीयायां ग गं, ख खं; तृतीयायां क कं, ञ ञं; चतुर्थ्यां झ झं, ज जं। ततः कण्ठकमलदलेषु पञ्चम्यां छ छं, च चं; षष्ठयां ण णं, ढ ढं; सप्तम्यां ड डं, ठ ठं; अष्टम्यां ट टं, म मं; नवम्यां भ भं, ब बं; दशम्यां फ फं, प पं;

: :

एकादश्यां न नं, ध धं; द्वादश्यां द दं, थ थं; त्रयोदश्यां त तं, क कं हृदयकमलदलेषु; चतुर्दश्यां श शं, ष षं इति। ततो अमावस्यां यँ यँ, स सं कर्णिकाकेशराग्रे। हृदयममान्त- 15
मनाहतं बिन्दु[124a]शून्यं षडक्षरमिति। पञ्चाक्षरं महाशून्यमिति चन्द्रार्के[2] नियमः।

इदानीं चन्द्रसूर्ययो र्द्धं(ध)नमृणमुच्यते **चन्द्र** इत्यादिना—

पक्षे चन्द्रः स्वचारैरृणमपि कुरुते वासराख्यं पदं च
भूयो मासद्वयेन त्वपरमपि दिनं वर्द्धते वर्षयोगात्।
पूर्णेऽब्दे षड्दिनं स्यादपरमपि तथा वर्द्धते मृत्युसीम्नः 20
एवं सूर्यस्य राजन् द्विगुणमृणमिदं वर्द्धते वर्षवर्षात् ॥ ७६ ॥

इह तिथिध्रुवके प्रतिदिनं 'देया हेयाश्च देया' इति वचनात् वारस्थाने षष्टिघटिकात्मिका कला दीयते। तस्या ऋणहेतोर्घटिकास्थाने घटिका ऊना; अत एकघटिकोना कला प्रत्यहं स्थूलमानेन, सूक्ष्ममानेन सपादषट्पञ्चाशत्पाणिपलानि। कुतः? यतः चतुःषष्ट्या भागलब्धे[3]ऽहर्गणे ऋणं भवति; अतः प्रत्यहं सपादषट्पञ्चाशत्पाणीपलानि 25
चतुःषष्टिदिनैर्दिनमृणं कलाक्षयमित्यर्थः। सूर्यस्य दिनद्वयमिति। एवं **पक्षे चन्द्रः स्वचारैरृणमपि कुरुते वासराख्य पदं च**, पञ्चदशघटिकाख्यं पदमिति। तिथौ चतुर्थभागाख्य- T 317

१. भोटानुसारमत्र 'सूर्यः' इति अपेक्षितः प्रतीयते, किन्तु संस्कृतप्रतीषु अयं न लभ्यते भोटक्रमश्चेत्थम्—Nag Poḥi Phyog La Ńima Syed paḥi Rim pas Te Zla Ba sDud paḥi Rim pas So।

२. क. ख. पुस्तकयोः नास्ति। ३. क. ख. ० लब्धो।

मिति। **चकारात्** सपादषट्पञ्चाशत्पाणीपलोनमिति। **भूयः** पुनः प्रतिदिनहानिना(न्या) **मासद्वयेनापरमपि दिनं** चतुःषष्टिदिने ऋणं भवति, पुनर्**वर्द्धते वर्षयोगात्**। **पूर्णेऽब्दे षड्दिनं स्यात्**, पूर्वोक्तविधिनोनम्, **अपरमपि तथा वर्द्धते मृत्युसीम्नः**, मृत्युसीम्नो वर्षशतम्; ततो मृत्युसीम्नः सार्द्धद्वाषष्ट्यधिकशतपञ्चकं दिनगणं ऋणं वर्द्धते। **एवं सूर्यस्य राजन्**
5 **द्विगुणमृण**[1]**मिदं वर्द्धते वर्षशतान्(वर्षात्)** मृत्युसीम्नः पञ्चविंशत्यधिक-एकादशशतदिन-गणं वर्द्धते मृत्युसीम्न इति ऋणनियमः।

इदानीं श्वासादिभेदेन वर्षसंख्या उच्यते **षट्श्वासैरि**त्यादिना—

षट्श्वासैरेकलिप्ता प्रभवति घटिका षष्टिपाणीपलैश्च
षष्टीनाड्यो दिनं स्यात् त्रिगुणितदशभिर्वासरैर्मासमेकम्। [124b]
10 षण्मासैश्चायनं स्याद् द्विगुणितमयनं वर्षमेकं प्रसिद्धम्
आयुः पुंसां शताब्दादृणगतिषु गतं कालनाडीवशेन॥ ७७॥

इह शरीरे मनुष्याणां **श्वास**प्रश्वासैः **षड्भिरेकलिप्ता** भवति, सा च पाणीपल-मुच्यते। तैः **षष्टिभिः पाणीपलैरेकघटिका भवत्ये**कदण्डात्मिका[2]।* ताः **षष्टिनाड्यो दिनमहोरात्रं स्यादि**ति, तै**र्दशभिस्त्रिगुणितैर्**स्त्रिंशत्**मासमेकं वासरैरि**ति। तैः **षण्मासैर्म**-
15 करादिभि**रयनमेकं** भवति। तदेवायनं **द्विगुणितं वर्षमेकं प्रसिद्धम्**। अतः **शताब्दायुः पुंसामृणगतिषु गतं** तमोनाडीगतिषु **गतं कालो** मृत्युस्तस्य **नाडीवशेना**वधूतीसंख्या-धर्मेणेति कालनाडीनियमः।

इदानीमीश्वरादीनां कुशीदत्वमुच्यते **त्रैलोक्य** इत्यादिना—

त्रैलोक्ये नास्ति योगी सुरभुजगनृणां पूरितुं यः समर्थ-
20 श्चन्द्रादित्यौ स्वदेहे चरति दिनगणं नैव चन्द्रस्वचारैः।
सूर्यश्चर्क्षाणि सर्वाणि चरति भुवने वर्षमध्ये क्रमेण
वर्षे वर्षे त्वृणेन ग्रसति सभुवनं कालचक्रैकवीरः॥ ७८॥

इह **त्रैलोक्ये सुरभुजगनृणां** मध्ये **योगी नास्ति यः समर्थः पूरितुं चन्द्रादित्यौ स्वदेहे**। तत् कस्माद्धेतोः? यतः **स्वचारैश्चन्द्रः** षष्ट्युत्तरत्रिशत**दिनगणं न चरति** वर्षा-
25 वधेः **सूर्यश्चर्क्षाणि सर्वाणि** सप्तविंशत्न **चरति भुवने** शरीरे **वर्षमध्ये क्रमेण** पूर्वोक्त-विधिना; अतः प्रतिवर्षात् प्रतिवर्षे **ऋणेन ग्रसति सभुवनं** शरीरम्। **कालचक्रैकवीर** उत्पादक्षयहेतुभूतः [सं]सारिणां **कालचक्रैकवीरः**; अतः स साधनीयश्चन्द्रार्कौ

---

[1]. क. ख. भो. पुस्तकेषु 'ऋणं' इति नास्ति। [2]. क. दण्डात्मिना।

*. अत्र क. पुस्तके 'इह शरीरे मनुष्याणां श्वासप्रश्वासैः षड्भिरेकलिप्ता भवति का' इति पुनर्लिखितः।

पूरयित्वा[125a] बोधिचित्तरजो धर्मौ प्राणापानौ पूरयित्वा योगिनेति नियमो बुद्धस्य भगवतः ।

इदानीं मूत्रादिधातुविकारलक्षणमुच्यते अरिष्टवशात् छिन्नेत्यादिना—

छिन्ना यद्येकनाडी भवति नरपते मूत्रमम्बुत्व(अम्लत्व)मेति
तन्मात्रान् पञ्चरात्रांस्त्यजति परकला पिण्डविच्छेदकाले ।
शब्दं कर्णे रसञ्च त्यजति खलु मुखे तारकामक्षिमध्ये
गन्धं घ्राणे नराणां करचरणतनौ चोष्णभावं क्रमेण ॥ ७९ ॥

इह शरीरे **छिन्ना यद्येकनाडी** वामा दक्षिणा वा प्राणप्रवाहरहिता **भवति; नरपते** इत्यामन्त्रणम्; **मूत्रमम्बुत्व**(अम्लत्व)[1]**मेति** षण्मासावधेः। **तन्मात्रान् पञ्च-रात्रान् त्यजति परकला** प्राणशक्तिः षड्दिनावधेर्यथाक्रमम्, प्रतिदिने **पिण्डविच्छेदकाले** शब्दविषयं **कर्णात्** त्यजति, **कर्णे** इत्यागमपाठात् पञ्चम्यर्थे सप्तमीति; **रसं च त्यजति खलु मुखे** जिह्वाया इति पञ्चदिनावधेः; **तारकामक्षिमध्यात्** चतुर्दिनावधेः; **गन्धं घ्राणात्** त्रिदिनावधेः; **नराणां करचरणतनावुष्णत्वभावः** स्पर्शभावः द्विदिनावधेः; अन्तदिने धर्मधातुं शुक्रच्युतिं त्यजति श्वासचक्रं चेति ।

अपरषड्दिनाभ्यन्तरे मृत्युलक्षणमुच्यते—

नासाग्रं लम्बमानं शिरसि धृतभुजो दृश्यते तत्स्वरूपं
लाक्षारागप्रघृष्टोऽप्युभयकरतले नैव रागं करोति ।
आदित्यः कृष्णवर्णः परिणतशशभृद् दृश्यते पीतवर्णः
मूत्रं देहश्च शीतो भवति नरपते तद्दिने मृत्युरेव ॥ ८० ॥

इह शरीरे मरणे प्रविष्टे स्वकीयं **नासाग्रं लम्बमानं** हस्त[2]कराकारं दृश्यते; **शिरसि धृतभुजः** स्वकीयं **तत्स्वरूपं** दृ[125b]श्यते, न सूक्ष्मो दृश्यते[3]; तथा **लाक्षाराग-प्रघृष्टोऽप्युभयकरतले नैव रागं करोति** करतलचर्मणि; **आदित्यः कृष्णवर्णो दृश्यते, परिणतशशभृत्** पूर्णिमाचन्द्रो **दृश्यते** सम्पूर्णं[4] **पीत** इति षड्दिनावधेः; ततो यस्मिन् दिने **मूत्रं देहश्च शीतो भवति, तद्**दिने तस्मिन् दिने **मृत्युरेव । नरपते** इत्यामन्त्रणम् ।

अपरमपि षड्दिनाभ्यन्तरे मृत्युलक्षणमुच्यते—

जिह्वाधः कालसूत्रं प्रभवति नयने ब्रह्मरेखातिसूक्ष्मा
श्वासश्चन्द्रार्कमार्गे स्फुरति नरपते द्वे कपोले तथैव ।

---

१. ग. अमृतम्; भो sKur Ba Ñid (अम्लत्वम्), भोटानुसारं अम्बुत्वस्थाने अम्लत्वपाठः सम्यक् प्रतीयते । २. क. ख. हस्त । ३. ख. पुस्तके 'तेन सूक्ष्मो दृश्यते' इत्यधिकः पाठः । ४. क. ख. स पूर्वः ।

कक्षाविष्टं स्तनोर्ध्वं ग्रहगणसकलं दृश्यते सस्फुलिङ्गं
स्तब्धग्रीवा सगात्रा भ्रमणमपि तनौ लक्षणं चाष्टमृत्योः ॥ ८१ ॥

इहारिष्टमरणाक्रान्तस्य **जिह्वाधः कालसूत्रं** कृष्णरेखा भवति, तथा **नयने ब्रह्मरेखातिसूक्ष्मा** केशप्रमाणरेखा कृष्णरक्तमण्डलभेदिनी भवति, **श्वासः चन्द्रार्कमार्गे स्फुरति, द्वे कपोले** स्फुरतः। **तथैव कक्षाविष्टं स्तनोर्ध्वम्**, नाड्यौ कक्षाविष्टौ भवतः, **दृश्यते** न **ग्रहगणसकलं दृश्यते सस्फुलिङ्गम्, स्तब्धग्रीवा** तस्य **सगात्रा** हस्तपादसहिता निश्चेष्टा **भ्रमणमपि तनौ** भवति **लक्षणं चाष्ट**[1]**मृत्योरे**तदुक्तं भवति।

अपरमपि यत् किञ्चित् विपरीतं दृश्यते शरीरे बाह्ये वा छायापुरुषादिकं तत् सर्वं मरणलक्षणं योगिना वेदितव्यम्, तत् ज्ञात्वा दानादिकं कार्यम्। यदि पुण्यबलेन जीवति, तथापि शोभनम्; अथ मरणं गच्छति, तथापि यद् दत्तं तस्य फलमनुभुङ्क्ते। अतः उभयपक्षतो दानं देयं सौगतैः सुखार्थिभिरिति भगवतो नियमः।

इति श्रीमूलतन्त्रानुसारिण्यां[2] लघुकालचक्रतन्त्रराजटीकायां[3]
द्वादशसाहस्रिकायां विमलप्रभायाम्[4]
अरिष्टमरणलक्षण[5]-नाडीच्छेद-महोद्देशः
चतुर्थः ॥ ४ ॥

(५) क्षणलक्षण-कालचक्रनियममहोद्देशः

इदानीं लोकसंवृत्यां सृष्टिसंहारलक्षणः कर्तोच्यते **उत्पत्तिमित्यादिना**[126a]—

उत्पत्तिं यः करोति प्रसवनसमयं बालकौमाररूपं
संहारः सैव लोके पुनरपि कुरुते कालचक्री न सूर्यः।
चन्द्रादित्यादिदेवान् ग्रसति स भगवान् रात्रिभागे सभूतान्
भूयो मुञ्चन्त्यनन्तानपि दिनसमये सृष्टिहेतोः क्रमेण ॥ ८२ ॥

इह संसारे **यः** च्युतिक्षणः सत्त्वानामु**त्पत्तिं करोति** रजःशुक्रसंयुक्तम् आलयविज्ञानधर्मी गर्भे; ततो गर्भसि(शये) **प्रसवनसमयं** करोति, **बालकौमारादि**[6]**रूपं** करोति; शरीरस्य सृष्टिसंहारं(ः)स **एव्य**(व) च्युतिक्षणो[7] **लोके** स्वर्गमर्त्यपाताले **पुनरपि कुरुते कालचक्रो न सूर्यः**। सूर्यो रजः चन्द्रः शुक्रम् आलयविज्ञानेन विना **कालचक्रेण** [कालचक्रेण] विना न करोतीत्यर्थः। इह कस्मान्न करोति ? रजःशुक्रधर्मी सूर्यचन्द्र इति। इह सर्वत्राग्निसूर्यसोमात्मकं जगदिति प्रसिद्धं वाक्यमित्युच्यते। इह यतश्**चन्द्रादित्यादिदेवान् ग्रसति स भगवान् रात्रिभागे सभूतानिति** इह संसारे रात्रिभागश्चन्द्रः सृष्टिः, दिवाभागः सूर्यः संहारस्तान्। अत्र रात्रिभागे उत्पत्तिकाले स आलयविज्ञानलक्षणो[8]

---

१. ग. अरिष्ट; भो. ḥDod(इष्ट)। २. क.ख. मूलतन्त्रा०। ३. ग. पुस्तके नास्ति। ४. ग. विमलप्रभाटीकायां। ५. ग. लघुकालचक्रतन्त्रराजस्यारिष्ट०। ६. ख. बालकौमारी०। ७. क. ख. च्युतिकरणो। ८. ग. ० लक्षणे।

मातृगर्भे **चन्द्रः** शुक्रम् **आदित्यो** रजः; **आदि**शब्देन विण्मूत्रसम्भूतानि पृथिव्यप्तेजोवाय्वाकाशधातुसहितान्(नि) **ग्रसति** रजः शुक्राधारस्थितः कायवाक्चित्तनिष्पादनार्थम्, चन्द्रः शुक्रमीश्वरः, रजः सूर्यः सदाशिवः, मज्जा रुद्रः, मूत्रं विष्णुः, ब्रह्मा विडिति। चन्द्रादित्यादिदेवान् ग्रसति **रात्रिभागे** उत्पत्तिकाले। **भूयः** पुनः **मुञ्चन्त्यनन्तान्** शरीरे नानाभावैर्ग्रस्ते सति विकुर्वितान् खलु **दिवससमये** संहारकाले त्यजतीत्यर्थः। **सृष्टिहेतोः** पुनरपरोत्पादहेतोर्**मुञ्चति, क्रमेण** पृथिव्यादिधातुपरित्यागेन नाभिहृत्कण्ठललाटोष्णीषाधारे क्रमेणेति संवृतिकर्तानियमः [126b]।

T 318

इदानीं कर्मकरणादिकं लोकसंवृत्या उच्यते **शब्दाद्यमित्यादिना**—

शब्दाद्यं कर्मषट्कं भवति हि करणं त्विन्द्रियाणां च षट्कं
वर्षा मासाश्च पक्षा दिननिशितिथयश्चन्द्रसूर्यौ च कर्ता।
एषां संहारकर्ताऽपर इह भवेत् सृष्टिकर्ता न कर्ता
व्योमव्यापी खवज्री विषयविरहितो निर्गुणो निःस्वभावः॥ ८३॥

इह शरीरे निष्पन्ने सति **शब्दस्पर्शरूपरसगन्धधर्मधातुषट्कं कर्म** भवति, **करणमिन्द्रियाणां षट्कं** श्रोत्रकायचक्षुर्जिह्वाघ्राणमनःषट्कम्। **वर्षा मासाश्च** द्वादशराशिभेदेन चन्द्रकलाभेदेन[1], **पक्षाश्च**तुर्विंशतिः, **दिननिशि** अहोरात्रम्, **तिथयः** पञ्चदश, **चन्द्रसूर्यौ** च करणमेतत् समस्तम्। **कर्ता** आलयविज्ञानलक्षणः शुक्रच्युतिक्षणः सहजानन्दो लोकसंवृत्येति। **एषां** च्युतिक्षणादीनां कर्तृकरणकर्मणः **संहारकर्ताऽपर इह भवेत्**, यतः **सृष्टिकर्ता न कर्ता**। ततो **व्योमव्यापी खवज्री विषयविरहितो निर्गुणो निःस्वभावः** सहजकायो निःकलः सवर्गो[2]व्यापी[3] इति। अतः सृष्टिसंहारकर्ता निर्वाणलक्षणो नास्तीत्यर्थः, इति कर्ता(र्तृ)क्षयनियमः।

इदानीं समुदयादिकमुच्यते **गन्ध** इत्यादिना—

गन्धो वर्णो रसः स्पर्श इति च धरणी तोयवह्निश्च वायु
अष्टौ वै रूपिणः स्युः समुदितविषया एकमुख्याः समस्ताः।
एतत् त्रैलोक्यकृत्स्नं स्फरणनिधनतां याति कालप्रभावात्
शब्दः शून्यं ह्यरूपं भवति नरपते धर्मधातुर्मनश्च॥ ८४॥

इह संसारे समुदयादुत्पादो नैकधर्मादिति। अत्र समुदयो **गन्धो वर्णो रसः स्पर्श इति च धरणी तोयो वह्निश्च वायु**[127a]रित्येते **ऽष्टौ रूपिणः स्युः समुदितविषया एकमुख्याः समस्ताः**। एषामष्टरूपिणामेको गुणो मुख्यो भवति; शेषा गौणा भवन्तीति पूर्वोक्तम्। **शब्दः शून्यं ह्यरूपं भवति नरपते धर्मधातुर्मनश्चे**ति चत्वारोऽरूपिणः। अत्र शून्यशब्देन शुक्रधातुरुच्यते। **एतत् त्रैलोक्यकृत्स्नं स्फरणनिधनतां याति कालप्रभावा**च्च्युतिक्षणप्रभावादित्यर्थः, इति समुदयनियमः।

१. ग. पुस्तके नास्ति। २-३. ग. सर्वव्यापी।

इदानीं संसारबन्ध उच्यते **बध्नात्यात्मे**त्यादिना—

बध्नात्यात्मा विकल्पैः प्रकृतिगतगुणैः कोशकीटो यथैव
आत्मानं चात्मना वै पुनरपि मनसा मुञ्चते निर्विकल्पात् ।
तस्माद् राजन् स्वकर्म प्रकृतिगुणगतं दुःखसौख्यं करोति
5 कः कर्ता किं करोति प्रकृतिविरहितो मुह्यतेऽज्ञानलोकः ॥ ८५ ॥

इह शरीरे स्कन्धाहङ्कारमात्रः संसार **आत्मा**, स चात्मानं **बध्नाति विकल्पैः प्रकृतिगतगुणै**रिति । प्रकृतिः स्कन्धधात्वायतनसमूहः, तत्र गतगुणा उत्पादनिरोधलक्षणा गन्धादयः, संसारचित्तस्य भावाभावविकल्पलक्षणाः, तैः प्रकृतिगतगुणैर्विकल्पैर्बध्नात्यात्मानं **कोशकीटो यथैवा**त्मानं गुणैः स्वतनुनिर्गतैस्तन्तुभिर्बध्नाति । **आत्मानं चात्मना**
10 **वै पुनरपि मनसा मुञ्चते निर्विकल्पा**दिति पुनः स आत्मा प्रकृतिगतगुणैर्विकल्पैर्मुक्तो निर्विकल्पो भवति, तस्मान्निर्विकल्पमनसा मुञ्चत्यात्मानं संसारदुःखादिति । **तस्माद् राजन् स्वकर्म प्रकृतिगुणगतं दुःखसौख्यं करोति, कः कर्ता किं करोति प्रकृतिविरहितो**ऽष्टादशधातुरहितो न करोतीत्यर्थः, इति **मुह्यतेऽज्ञानलोको** मिथ्यात्मकर्तापरिकल्पनयेति कर्मबन्धनियमः ।

15 इदानीं पृथिव्यादि-अष्टविधा प्रकृतिरुच्यते **पृथ्वी**त्यादिना—

पृथ्वीतोयाग्निवाता गगनमपि मनो बुद्ध्यहङ्कारचित्तं
स्थूला सूक्ष्मा परा च त्रिविधगुणगता वर्णबिन्द्वादिभेदैः । [127b]
स्थूलास्थूलेन्द्रियेषु प्रकृतिरधिगता सूक्ष्मचित्ते च सूक्ष्मा
ज्ञाने च ज्ञानमूर्त्तिः प्रकृतिरविकृतिः जीवभूता न भूता ॥ ८६ ॥

20 इह शरीरे आदावष्टविधा प्रकृतिः, **पृथिव्यप्तेजोवाय्वाकाशमनोबुद्ध्यहङ्कारा**त्मिकाष्टविधेति संसार**चित्त**स्य । एषा पुनस्त्रिधा **स्थूला सूक्ष्मा परा च त्रिविधगुणगता** सत्त्वरजस्तमोगुणेषु गता गुणगता इति **वर्णबिन्द्वादिभेदैः स्थूलास्थूलेन्द्रियेषु** गता जाग्रदवस्थाधर्मिणी, स्थूला जाग्रद्भावग्रहणादिति स्थूलचित्तस्य जडवासनाग्राहकस्येति । **सूक्ष्मचित्तस्य सूक्ष्मा** स्वप्नावस्थाधर्मिणी, मनोमयेन्द्रियैर्मायोपमभावग्रहणादिति । **सूक्ष्मा**
25 **परा** च सर्वेन्द्रियनिरोधलक्षणा सुषुप्तावस्थाधर्मिणी, परा सर्वभावपरित्यागादिति, न पश्यतीत्याहुरेकीभूत इत्यादिलक्षणा । एवं त्रिविधा सत्त्वरजस्तमोभेदेन जाग्रत्-स्वप्न-सुषुप्त-धर्मिणी प्रकृतिः, **स्थूलादि** वा लक्षणा, **सूक्ष्मा** सन्ध्यालक्षणा, **परा** महानिशालक्षणा इति । **च**कारादपरा चतुर्थी प्रकृतिः **ज्ञानमूर्त्तिः**; सा **ज्ञान**चित्तस्य तुर्याचित्तस्य शुक्रच्युतिकाले तुर्यावस्थाधर्मिणी सत्त्वानामुत्पादनिरोधहेतुभूता[1] यतः, अतो ज्ञानमूर्त्तिः;
30 सा च **प्रकृतिरविकृतिर्जीवभूता** महाप्राणभूता धर्मधातुस्वभावेति । **न भूते**ति पृथिवीतोयतेजोऽनिलशुक्रभूता न भवतीत्यर्थः । एवं संसारचित्तस्य जाग्रदादिभेदेन चतुर्विधो नियमः प्रकृतेः ।

---

१. क. ख. सत्त्वानामनुत्पादनिरोध० ।

इदानीं तुर्यादीनां संज्ञाधर्मा उच्यन्ते आद्येत्यादिना—

आद्याः शून्यानि पञ्च प्रकृतिरविकृतिः श्रीकलाबिन्दुनादं
कालश्चित्तं च बुद्धिः प्रकृतिरपि तथान्ये स्वरा मारुताद्याः ।
स्थूला वर्गाक्षराणि त्रिगुणितदशकं षोडशान्ये विकारा-
स्तेषां मध्ये न वज्रो प्रकृतिरविकृतिर्व्यापको निःस्वभावः ॥८७॥ 5
[128a]

इह संसारे वेद्यवेदकयोः संज्ञाऽर्थप्रतिपादकी(दिका), सा च वाच्यवाचकलक्ष-णेनावस्थितेति । अत्र ज्ञानप्रकृतेराद्याः **शून्यानि पञ्च**, अनाहताद्याः, अनाहतमध्येऽकार-शून्यम्, पूर्वे इकारशून्यम्, दक्षिणे ऋकारशून्यम्, उत्तरे उकारशून्यम्, पश्चिमे ऌकार-शून्यम् इति आद्याः शून्यानि पञ्च **प्रकृतिरविकृतिः** । **श्रीकलाबिन्दुनादं कालश्चित्तं च** 10 **बुद्धि**रिति । कला सूर्यः, बिन्दुश्चन्द्रः, नादो राहुः, कालः कालाग्निः, चित्तं बुद्धिरिति । **प्रकृतिरपि** सुसु(षु)प्तावस्थाधर्मिणी । **अन्ये स्वरा मारुताद्याः**, आदिशब्देनाकाशाद्या इति अ[1] इ ऋ उ ऋ (ऌ),[2] अ[3] ए[4] अर् ओ अल् ह य र व लाः । एवं दीर्घा इति स्वप्नप्रकृतिः । **स्थूला वर्गाक्षराणि** द्वादशमात्रासहितानि षष्ट्युत्तरत्रिशतानि जाग्रत्-प्रकृतिरिति । **षोडशान्ये विकारा** स्थूला इति । प्रत्येकैकाक्षरस्य पञ्चदशस्वरग्रहणेन 15 व्यञ्जनेन सार्द्धं षोडशविकारा इति सर्वत्र पञ्चधातवः पञ्चेन्द्रियाणि[5] पञ्चविषया विकारा इति मनसा सार्द्धं षोडश । **एषां** पृथिव्यादीनां **मध्ये वज्री न प्रकृतिर्न्न-विकृतिर्व्यापको निःस्वभावः**, यतः संसारवासनामुक्तः चित्तधर्मी, अतोऽस्ति तच्चित्तं यच्चित्तमचित्तमिति (अ० सा० प्र० प्रा०, १) । संसारचित्तरहितं निर्वाणचित्तमपरमस्ति, T 319 वज्रीसंज्ञया भगवतोक्तमिति चतुर्विधप्रकृतिनियमः । 20

इदानीं सत्त्वानां स्वकर्मफलोपभोग उच्यते **संसार** इत्यादिना—

संसारे सौख्यदुःखं प्रकृतिगुणगतं चास्ति तत्कर्मजं च
स्थूलं सूक्ष्मं च शान्तं (परं च) त्रिविधमपि भवेत् कर्म चैतन्नराणाम् ।
कर्ता चाहं विकर्म त्वपरपशुपतिः चास्ति कर्तेति कर्म
नाहं कर्ता परो वा प्रकृतिविरहितो ज्ञायते तन्न कर्म ॥८८॥ 25

इह **संसारे** सत्त्वः **सौख्यं** वा **दुःखं** वा **सौख्यदुःखं प्रकृतिगुणगतं** पूर्वोक्तगुणगतं च स्वयंकृतमित्यर्थः [128b] । **अस्ति तत्कर्मजं च** स्वकृतकर्मणा जातं कर्मजं भुक्त इत्यर्थः । तदेवात्र कायवाक्चित्तवशात् त्रिविधं **स्थूलं सूक्ष्मं परं च** । **त्रिविधं विकर्म कर्म अकर्म** । तेषु यत् **कर्ताहमिति** चित्तमुत्पद्यते तद् **विकर्मसंज्ञम्** । **अपरः पशुपतिरन्यो**

१-२. ग. अ इ ऋ उ ऌ । ३-४. क. ख. अरे ।

५. भो. Las Kyi dBaṅ Po lÑa (पञ्च कर्मेन्द्रियाणि) ।

वा **कर्तास्ति** यच्चित्तमुत्पद्यते तत् **कर्मसंज्ञम्**। नाहं **कर्ता परो वा प्रकृतिविरहितः** स्कन्धादिसामग्रीरहितः यच्चित्तमुत्पद्यते **तदकर्मसंज्ञमिति**। एवं यत् ज्ञायते आत्मपर-कर्ता(तृ)ग्रहरहितं **तन्न कर्म** कर्त्रा कृतं[1] न कर्तृहेतुभूतमिति। कर्मणा उत्पाद(:) सामग्रीवशात्, यथा शालिबीजाच्छालिनिष्पत्तिस्तथा शुभकर्मणा शुभकर्मफलनिष्पत्तिः,
5 यथा कोद्रवबीजात् कोद्रवनिष्पत्तिस्तथाऽशुभकर्मणाऽशुभफलनिष्पत्तिः। 'न स्वतो नापि परत' इति (मा० का० १,२) वक्ष्यमाणे वक्तव्यमिति कर्मफलनियमः।

इदानीं कर्ता [रं] विना[2] सफलं[3] कर्म उच्यते **तस्मादित्यादिना**—

तस्मात् कर्ता न कश्चिद् दह(द)ति न हरति प्राणिनां सौख्यदुःखं
संसारे पूर्वकर्म प्रभवति फलदं यत्कृतं त्रिःप्रकारम्।
10 मूढानां बुद्धिरेषा दह(द)ति स हरते सृष्टिसंहारकर्ता
देहे छिद्रं न पश्यन्त्यपरिमितशुभं हार्यमाणं स्वकाक्षैः ॥८९॥

इह **संसारे प्राणिनां सौख्यदुःखं कश्चित् कर्ता न ददते**[4] इ(ति) **न हरते** (ति), यस्मात् **पूर्वकर्म** स्वयंकृतं **प्रभवति फलदं यत्कृतं त्रिःप्रकारम्**। तस्मात् कर्ता न कश्चिद् ददति[5] न हरतीत्यर्थः। **मूढानां बुद्धिरेषा ददति स हरते सृष्टिसंहारकर्ता** इति।
15 कस्माद्? यतः **स्वदेहे छिद्रं न पश्यन्ति अपरिमितशुभं हार्यमाणं स्वकाक्षैरिति**। स्वेन्द्रियैर्बाह्ये षड्विषयप्रवृत्तैरध्यात्मनि अनाश्र(स्र)वसुखरहितैः [इति] स्वकर्मफलोप-भोगनियमः।

इदानीमिच्छादीनां कर्तुः [129a] परस्परसंयोगभाव उच्यते **इच्छेत्यादिना**—

इच्छाशक्तिः क्रिया या स्वमनसि जगतो ज्ञानशक्तिस्तृतीया
20 भावालोकं प्रवेशं समरसकरणेऽर्थोपलब्धिं करोति।
भूयस्त्यागं चतुर्थी त्रिभुवननमिताऽद्वया वै क्रमेण
तासां मध्ये न किञ्चिद् ग्रसति नरपते मुञ्चते नैव वज्री ॥९०॥

इह **जगतः** सत्त्वानां **स्वमनसीच्छाशक्तिर्या भावानामालोकं करोति**, प्रवृत्तिं[6] मनसः करोतीत्यर्थः। **क्रिया** भावेषु **प्रवेशं** करोति; **ज्ञानशक्तिर्भावसमरसकरणेऽर्थो-**
25 **पलब्धिं करोति**, अर्थनिश्चयं ज्ञाननिश्चयमित्यर्थः। **भूयस्त्यागं** पूर्वज्ञानस्य त्यागं **चतुर्थी त्रिभुवननमिताऽद्वया वै क्रमेण करोति**, इति मनसः शक्तयश्चतस्रः; **तासां** चतसृणां **मध्ये न किञ्चिद् ग्रसति**। आलोकं प्रवेशं समरसकरणम्, अर्थोपलब्धिं ज्ञानत्यागं वा, **मुञ्चति नैव वज्री** विशुद्धचित्तात्मा य इति इच्छादिनियमः।

---

१. क. हृतं। २-३. क. ख. विनाशफलं।
४. क. ख. दहते; ग. ददते; भो. sByin (ददते)।
५. क. ख. दहति। ६. क. ग्रहतिर्मनसः।

इदानीं दुःखसौख्यप्रदातोच्यते **आत्मेत्यादिना**—

आत्मा कर्ता न तत्र प्रभवति नृपते दुःखसौख्यप्रदाता
बन्धो मोक्षो न कश्चिद्भवति नरपते चित्तशक्तिं विवर्ज्य ।
आकाशं कुम्भमध्ये व्रजति न च जलं नीयमाने च यद्वद्
व्योमव्यापी खवज्री विषयविरहितो देहमध्ये च तद्वत् ॥ ९१ ॥　5

संसारे **आत्मा कर्ता न तत्र प्रभवति नृपते दुःखसौख्योः(ख्य)प्रदाता**, दुःखसौख्यप्रदाता **न कश्चिदस्ति** त्रिभुवननिलये **चित्तशक्तिं विवर्ज्य** । चित्तशक्त्योऽत्र जाग्रत्स्वप्नसुसु(षु)प्ततुर्यालक्षणा इति, तासां प्रदाता तुर्या उत्पादनिरोधधर्मिण्यवस्था, तां चित्तशक्तिं विवर्ज्य नान्यः कश्चिदात्मा कर्ता वा सौख्यदुःखप्रदातेति । **बन्धो मोक्षो** वाऽपरः [न][1] **कश्चिदस्ति**[2] शुक्रच्युतिं विहाय सत्त्वानामिति संसारचित्तं विहायेत्यर्थः । निर्वाणचित्तं　10 पुनः संसारातीतं सर्वदेहे स्थितं न बध्यते न मुच्यते केनचित् । **आकाशं कुम्भमध्ये व्रजति न च जलं नीयमाने च यद्वद्**; **व्योमव्यापी खवज्रीति** शून्यतादिविमोक्षविशुद्धं चित्तं खवज्रीति; **विषयविरहि**[129b]**तो** निर्गुण इति तन्मात्रादिसत्त्वरजस्तमोरहितं जाग्रत्स्वप्नसुसु(षु)प्ततुर्यारहितमित्यर्थः; निःस्वभावो **देहमध्ये च तद्वत्**; सा(शा)श्वतो भाव उच्छेदोऽभावः, तौ न विद्येते यस्य स वज्री विशुद्धचित्तमित्यर्थं इति संसारनिर्वाणचित्तनियमः ।　15

इदानीं कर्मवाद उच्यते **एवमित्यादिना**—

एवं कर्मास्तिवादी भवति स भगवानेकशास्ता न कर्ता
सर्वज्ञश्चादिबुद्धस्त्रिभुवननमितः कालचक्री न चक्री ।
ब्रह्माविष्णुश्च रुद्रः शरणमधिगतो यस्य पादाब्जमूले　20
तं वन्दे कालचक्रं जिनवरजननं निर्गुणं निर्विकल्पम् ॥ ९२ ॥

एवमुक्तेन क्रमेण कर्मास्तिवादी कर्ता [इति] नास्तिवादी नैरात्म्यवादी भवति, स भगवान् विशुद्धचित्तात्मा। "न सन्नासन्न सदसन्न चाप्यनुभयात्मकं(:)[मा०का०५,२]", **एकशास्ता** त्रैधातुके **न कर्ता । सर्वज्ञश्चादिबुद्धः** सर्वज्ञता-सर्वाकारज्ञता-मार्गज्ञता-मार्गाकारज्ञता-प्राप्त**त्रिभुवननमितः कालचक्री** अनाश्र(स्र)वसुखसर्वाकारधर्मी । **न चक्री**　25 विष्णुः । कुतः ? यतो **ब्रह्माविष्णुश्च रुद्रः शरणमधिगतो यस्य पादाब्जमूले, तं वन्दे कालचक्र**मिति सोऽहं मञ्जुश्री**जिनवरजननं निर्गुणं निर्विकल्पं** पूर्वोक्तलक्षणमिति शून्यतावादिनियमः ।

[130a]इदानीं मरणान्ते भाववशादुत्पादमाह **शान्त इत्यादिना**—

शान्ते भावेऽमरत्वं भवति नरपते तामसे नारकत्वं　30
तिर्यक्त्वं राजसे च प्रवरभुवितले मानुषत्वं च मिश्रे ।

१-२. भो० Ma Yin (न कश्चिदस्ति) ।

भूतत्वं त्रिप्रकारं रजसि तमसि वै सात्त्विकोऽन्योऽन्यमिश्रै-
र्यद्भावं मृत्युकाले स्मरति च मनसा सम्भवस्तत्र जन्तोः ।। ९३ ।।

इह संसारे सत्त्वानां स्वकर्मवशात् सत्त्वगुणादिभावस्तद्भावादुत्पादमाह। अत्र मरणकाले शुभकर्मवशात् **शान्तो भावो** भवति सत्त्वगुणात्मकः, तस्मिन् भावे जाते सति 5 **मरणान्ते अमरत्वं भवति। नरपते** इति सुचन्द्रसम्बोधनम्। अशुभवशाद् रौद्रभावो[1] भवति तमोगुणात्मकः, तस्मिन् **तामसे भावे नारकत्वं** भवति। मध्यमाऽशुभवशाद् राजसो भावस्तस्मिन् **राजसे भावे** सति **तिर्यक्त्वं** भवति मरणान्ते। **प्रवरभुवितले मानुषत्वञ्च मिश्रे**, शुभाशुभसंवलिते मानुषत्वं भवति। **भूतलं(त्वं) त्रिप्रकारं रजसि तमसि वै सात्त्विकेऽन्योन्यमिश्रे।** अत्र सत्त्वाधिके उत्कृष्टाः प्रेताः, रजोऽधिके मध्यमाः, 10 तमोऽधिकेऽधमा[2] इति। असुरास्तु देवान्तर्वर्त्तिन एव; एवं मनुष्याः सत्त्वाधिके सुखिनः, रजोऽधिके दुःखिनः, तमोऽधिके सदादुःखिनः; एवं सर्वत्र स्वर्गादिकेऽपि। अनन्तकर्मफलविपाकः सत्त्वानां स्वकर्मवशाद्भवतीति; अतो **यद्भावं मृत्युकाले स्मरति च मनसा** T 320 **सम्भवस्तत्र जन्तोरि**ति भावोत्पादनियमः।

इदानीं देवादिभेद उच्यते **देवत्वमि**त्यादिना—

15 देवत्वं चाष्टभेदैः सुरवरनिलये मानुषत्वं यथैकं
तिर्यञ्चोऽब्धिप्रकाराः खलु नरकगतौ नारकत्वं तथैकम्।
एषु स्थानेषु जन्तुर्भ्रमति रसगतो कर्मपाशैर्निबद्धो
नामुक्तो याति मोक्षं परमसुखपदं जन्मलक्षैरनेकैः ।। ९४ ।।

इह **सुरवरनिलये** स्वर्गे **देवत्वं चाष्टभेदैर्**भवति; पृथ्वीकृत्स्नेनाप्कृत्स्नेन तेजःकृत्स्नेन 20 वायुःकृत्स्नेन शून्यकृत्स्नेन चन्द्रकृत्स्नेन सूर्यकृत्स्नेन राहुकृत्स्नेनेति भावितेन दानादिपुण्यबलेन दशाकुशलपरित्यागेनेति देवत्वं चाष्टभेदैर्भवति। **मानुषत्वं यथैकं** ष[130b]ड्धात्वात्मकम्। **तिर्यञ्चोऽब्धिप्रकाराः**[3] चतुःप्रकाराः। षड्धात्वात्मकम्, **नारकत्वं तथैकं नरकगतौ** षड्धातुवासनोद्भूतं स्वप्नतुल्यमिति। असुरत्वं देवान्तर्भूतम्, प्रेतत्वं नारकान्तर्भूतम्, दुःखोपभोगतः। **एषु चतुर्दशस्थानेषु** अष्टैक-चतुरेकजातिषु **जन्तु**रालय- 25 विज्ञानधर्मी[4] **भ्रमति रसगता**विति षड्गतौ **कर्मपाशैर्निबद्धः, नामुक्तः** कर्मपाशैर्न **याति मोक्षं परमसुखपदं जन्मलक्षैरनेकै**रिति देवादिभेदनियमः, सत्त्वाशयवशादिति।

इदानीं बन्धहेतुरुच्यते **स्कन्धैरि**त्यादिना—

स्कन्धैर्धात्विन्द्रियैश्च त्रिविधभवभयैः पञ्चकर्मेन्द्रियैश्च
तन्मात्रैः कर्मदोषैः सह गुणमनसा बुद्ध्यहङ्कारकाद्यैः।

---

१. क. ख. रौद्रो। २. क. ख. अधर्मा। ३. क. ख. द्विप्रकाराः।
४. ग. जन्तुरालयविज्ञानधर्माबद्धो।

एतैर्बद्धो हि जीवो भ्रमति रसगतौ सूक्ष्मभावेन भूयः
भावे त्यक्ते प्रयात्यक्षयपरमपदं यत्र जन्मी न भूयः ॥ ९५ ॥

इह षड्गतिसंसारे जीवः प्राणालयविज्ञानधर्मी बद्धो भ्रमति । कैः ? [इ]कन्धभूतैः षड्धातुभिरिन्द्रियैस्त्रिविधभवभयैः षड्विषयैस्तन्मात्रैः पञ्चकर्मेन्द्रियैश्च कर्मदोषैः शुभाशुभैः सह[1] गुण[2]मनसा बुद्धयहङ्कारकाद्यैराद्यशब्देन प्राणशक्तिर्मूलप्रकृतिरिति, 5 एतैर्बद्धो हि जीवो भ्रमति रसगतौ सूक्ष्मभावेन, भूयः पुनश्च्युत्यानन्देनेति बन्धः सूक्ष्म-स्थूलभावो जाग्रत्स्वप्नसुसु(षु)प्ततुर्यलक्षणः । एतस्मिश्च भावे त्यक्ते प्रयात्यक्षयपरमपदं यत्र गतो न भूयो जन्मी संसारी भवति, इति संसारवासना-अविद्यानियमः ।

इदानीमस्या विपक्षा विद्योच्यते [वेदः] साङ्ग इत्यादिना—

वेदः साङ्गो न विद्या स्मृतिमतसहितस्तर्कसिद्धान्तयुक्तः 10
शास्त्रञ्चान्यद्धि लोके कृतमपि कविभिर्व्यासवैश्वानराद्यैः[131a] ।
विद्येत्यध्यात्मविद्याऽक्षरमपि मुनिभिः प्रोक्तमेवात्र लोके
त्रैलोक्यं यत्र कृत्स्नं भवति नरपते लीयते यत्र भूयः ॥ ९६ ॥

इह संसारे लोकव्यवहारे विद्या या परमार्थतत्त्वविषयेऽविद्या सा । प्रथमं वेदः साङ्गः षड्भिरङ्गैः सह, अङ्गानि च सूत्रं गेयं व्याकरणं छन्दो निरुक्तिं ज्योतिश्चेति, 15 एभिः सहेत्यर्थः । स च स्मृतिमतसहितः स्मृतयो मन्वादयः, तैः सहितः संयुक्तः । तर्को लौकिकवस्तुप्रमाणशास्त्राणि; सिद्धान्ता लौकिकसिद्धिसाधका मण्डलचक्रादिविकल्प-भावनाधर्मास्तैर्युक्त इति विशेषणम् । एवं शास्त्रं चान्यद्धि लोके कृतमपि कविभिर्व्या-सवैश्वानराद्यैरिति व्यासकाव्यं भारतम्, वैश्वानरकाव्यं भावनाधर्मः, आदिशब्देन वाल्मीक(कि)काव्यं रामायणम्, मार्कण्डेयकाव्यं पुराणधर्मादयः संगृहीताः, कृतं कविभिरेभिर्न 20 विद्या । तर्हि विद्या केत्याह—विद्येति अविकल्पिताऽध्यात्मविद्या शून्यता सर्वाकारैरुपेता, अन्यच्चाक्षरमपि विद्याऽनालम्बिनी अनाश्र(स्र)वसुखात्मिका इति । विद्या हेतुफलात्मिका हेतुफलैककलोलीभूता ग्रः(अग्नि)प्रभा दहनैककलोलीभूतवदिति । मुनिभिरतीतवर्तमानैः प्रोक्तमेवात्र लोके धर्मचक्रस्थैः । किंरूपा सेत्याह—त्रैलोक्यं यत्र कृत्स्नमिति, यस्मात् सुखक्षणात्त्रैलोक्यं सकलं भवति उत्पादकाले, लीयते यत्र भूयः, मरणकाले यत्र क्षणे 25 लीयते । भावसमूहः क्षरक्षणे स एव क्षणोऽनाश्र(स्र)वसुखमक्षरमुच्यते । यस्माद् बुद्धा उत्पद्यन्ते धर्मचक्रप्रवर्त्तनाय, यस्मिन् महापरिनिर्वाणो(णं) हि नरपत इति विद्यानियमः ।

इदानीं पूर्वयोगाभ्यासबलमुच्यते योगीत्यादिना—

योगीन्द्रोऽप्राप्तयोगः प्रचलितमनसा याति मृत्युं कदाचित्
श्रीमान् मानुष्यलोके प्रवरमुनिकुले जायते योगयुक्तः । 30

१-२. भो. Yon_Tan_Dan bCas (सगुण) ।

पूर्वाभ्यासेन तेनाहरति पुनरपि ज्ञानयोगं विशालं
लब्धे ज्ञाने प्रयात्यक्षयपरमपदं यत्र जन्मी न भूयः ॥९७॥ [131b]

इह मर्त्ये यदि योगी विद्यायोगमभ्यस्यमानो **मरणमुपैति अप्राप्तयोगः कदाचित् प्रचलितमनसा श्रीमान् मानुष्यलोके प्रवरमुनिकुले** बुद्धबोधिसत्त्वकुले, **योगः** शून्यता-
5 करुणाभिन्नं विशुद्धतत्त्वं विशुद्धचित्तम् ; तेन युक्त इति **योगयुक्तः**, न योगपरिपूर्णः **पुनः पूर्वाभ्यासेन तेनाहरति** अवाप्तो हि **ज्ञानयोगं विशालमिति** न प्रादेशिकं सर्वाकार-मिति भावः। **लब्धे ज्ञाने** परिपूर्णे **प्रयाति अक्षयपरमपदमिति**; न विद्यते क्षयो यस्येत्यक्षयपरमपदमिति विग्रहः। किम्भूतं तदित्याह—**यत्र पुनर्जन्मो उत्पत्तिमात्र** भवति, तत् सर्वं बुद्धानां पदं परमपदमिति।

10 इदानीं **बौद्धानामसुराणां म्लेच्छानां** ज्ञानोत्पत्तिकाल उच्यते **ज्ञान** इत्यादिना—

ज्ञानोत्पत्तिर्जिनानां रविदिनसमये चार्द्धरात्रे निशान्ते
मध्याह्ने चासुराणां शशिनिशिसमये निर्गमे वासव(र)स्य।
सम्यग्ज्ञाने विभङ्गे प्रभवति वचनं संस्कृतं प्राकृतं च
शान्तं रौद्रं च कर्म त्रिभुवननिलये पौरुषं प्राकृतं च ॥९८॥

15 इह खलु त्रिविधो योगाभ्यासः बौद्ध आसुरो भौत(तिक)श्च। तत्र बौद्धो योगः शून्यताकरुणात्मकः, आसुरः कल्पनाधर्मः, भौतिको द्विप्रकारः, शाश्वतरूप उच्छेद-रूपश्च। एवं त्रिविधो योगी (गो) स एव विद्यते यस्य तद्योगाभ्यासरतत्वादिति। तेषु दिवाभागे बौद्धयोगिनां ज्ञानोत्पत्तिः, रात्रिभागे आसुरयोगिनाम्, चतुःसन्ध्यारहिते काले भौत(तिक)योगिनां ज्ञानोत्पत्तिरिति। अत्र कालविभागः **ज्ञानोत्पत्तिर्जिनानां रविदिन-**
20 **समये चार्द्धरात्रे निशान्ते, मध्याह्ने चासुराणां शशिनिशिसमये निर्गमे वासव(र)स्य।** भौतानामनुक्तत्वादपि सन्ध्यारहितकाले। अत्रार्द्धरात्रे पूर्वसन्ध्यायां वाग्ज्ञानाधिष्ठानं भवति बौद्धानाम् [132a], असुराणां मध्याह्नसन्ध्यायां अष्टङ्ग(स्तङ्ग)तसन्ध्यायां वाग्ज्ञानाधिष्ठानं भवति। भूतानामपरचतुःप्रहरसन्ध्यायां दिवाभागे शाश्वतज्ञानाधिष्ठानम्, रात्रिभागे उच्छेदज्ञानाधिष्ठानम्, अनयोर्बौद्धासुरयोर्यथासंख्यम्; सम्यग्ज्ञानं बौद्धानां
T 321 25 भवति, विभङ्गं तद्धर्मविरोधि भवति असुराणाम्। सम्यग्ज्ञानं दिवालोकवत् सर्वदर्शि, विभङ्गज्ञानं रात्र्यालोकवत् किञ्चित् सत्त्वानां जीवमरणदर्शीति। कथं ज्ञायत इत्यत आह—धर्मदेशनया इति, इह **सम्यग्ज्ञाने विभङ्गे प्रभवति वचनं संस्कृतं प्राकृतं चेति**। सम्यग्ज्ञानोत्पन्नानां संस्कृतवाक्यं सर्वरुतात्मकमिति, विभङ्गज्ञानोत्पन्नानां प्राकृतं वाक्यं भवति देशकानाम् एक[1]विषयभाषान्तरेणेति[2]। **शान्तकर्म**देशकं बौद्धानां ज्ञानं
30 सर्वसत्त्वकरुणात्मकम्, **रौद्रकर्म**देशकं असुराणां ज्ञानं तिर्यक्सत्त्वापकारिमांसभक्षणायेति।

१-२.[क. ख. आत्मविषय०; भो. Yul gCig Gi sKad gCig Gi Khyad Par Gyis (एकविषये एकभाषायां भाषान्तरेण)।

त्रिभुवननिलये पौरुषं कर्मं बौद्धानां ज्ञानं देशयति, क्षितौ **प्राकृतं कर्म** असुराणां ज्ञानं देशयति। भूतानां विमिश्रं कर्मं देशयति पृथिव्यामिति ज्ञानदेशनानियमः।

इदानीं बौद्धासुरयोर्भुक्तिकाल उच्यते **मध्याह्नादित्यादिना**—

मध्याह्नादर्द्धरात्रं दिननिशिसमये भुक्तिकालस्तयोश्च
अन्नं गोमांसभोज्यं बहुविधरसदं पानमण्डस्य शुक्रम्। 5
रक्तं श्वेतं च वस्त्रं रविशशिगतिवत् स्वर्गपातालवासः
धर्मोऽहिंसा च हिंसा गुरुनियमवशाद् वज्रदैत्यासनं च ॥९९॥

इह प्रतिदिने **मध्याह्नदारभ्यार्द्धरात्रं** यावद्दिनसमयम्(:)। अर्द्धरात्रादारभ्य मध्याह्नपर्यन्तं निशिसमयः। **तस्मिन् दिननिशिसमये** स्वस्वसमयस्य परार्द्धे **भुक्तिकालः तयो**र्बौद्धम्लेच्छयोर्यथासंख्यं तपस्विनाम्, न गृहस्थानामिति नियमः। बौद्धासुरयोः पुनः 10
खानपानं य[132b]थासंख्यम्। **अन्नं** विशिष्टतरं बौद्धानाम्, **गोमांस**सहितं म्लेच्छानाम्। **पानं** यथासंख्यं **बहुविधरसदं** मिष्टं बौद्धानाम्, कुक्कुटादीना**मण्डस्य शुक्र**पानं म्लेच्छानामिति। परिधानं यथासंख्यं **रक्तवस्त्रं** बौद्धानाम्, **श्वेतं** म्लेच्छानां तपस्विनाम्; गृहस्थानां न नियमः। तथा मरणान्ते आवासो यथासंख्यम्, **रविशशिगतिवदिति** रवेरूद्र्ध्वं गतिः, चन्द्रस्याधो गतिः, तयोर्गतिवत् **स्वर्ग**वासो रविगतिर्बौद्धानाम्, **पाताल**- 15
वासोऽसुराणां चन्द्रगतिवदिति। यथा मूलतन्त्रे सेकोद्देशे[1] भगवानाह—

"अधश्चन्द्रामृतं याति मरणे सर्वदेहिनाम्।
ऊद्र्ध्वे सूर्यं रजो राहु विज्ञानं भावलक्षणे" ॥

तथा धर्मो यथासंख्यम्। बौद्धानां **धर्मोऽहिंसा**, म्लेच्छानां **हिंसा**, **च**कारात् भूतानाम्। **गुरुनियमवशाद्** भावनाकाले इष्टदेवतास्तुतिकाले यथासंख्यं बौद्धानां **वज्रासनं** प्रशस्तम्, 20
म्लेच्छानां **दैत्यासनं** प्रशस्तम्, **च**कारादपरं सामान्यमिति तस्य न विधिर्न निषेध इति। अत्र दैत्यानां भूतले वामजानुप्रसारतः, वामजानूद्र्ध्वं दक्षिणपादः, दक्षिणजानूद्र्ध्वंप्रसारो वामपादोद्र्ध्वम्, दक्षिणपादश्चकारादधः दक्षिणपाद ऊद्र्ध्वम्, पादतलेऽपि **च**कारात् पृष्ठे कटिनिषण्ण इति वज्रासनादिवक्ष्यमाणे वक्तव्यमिति बौद्धासुरक्रियानियमः।

भूतानां मिश्रकर्म प्रभवति वचनं मिश्रपैशाचिकं च 25
धर्मोऽहिंसा च हिंसा खलु गुरुनियमाज्जीवघातादिदोषाः।
यागाद्यर्थं प्रवृत्तिर्भवति नरपते वा निवृत्तिः कदाचित्
खाद्यं पेयं च मिश्रं रविशशिगमनान्मिश्रमार्गः परत्र ॥१००॥

---

१. क. ख. शक्रोद्देशे।

भूतानां पुनः पूर्वोक्त**मिश्रकर्म**। तदत्र[1] वृत्ते न विस्पष्टं कथितम्; तद्यथा—**भूतं वा** (भूतानां) **मिश्रकर्म प्रभवति वचनं मिश्रपैशाचिकं च, धर्मोऽहिंसा च हिंसा खलु गुरु**[133a]**नियमाज्जीवघातादिदोषः। योगार्थं** (यागाद्यर्थं[2]) **प्रवृत्तिरिति यो** (या)-**गाद्यर्थमादिशब्दात्** संग्रामार्थं हिंसाप्रवृत्तिः, फलार्थं **निवृत्तिर**हिंसाप्रवृत्तिर्भवति। **नरपते**
5 **वा निवृत्तिः कदाचिदिति। खाद्यं पेयं च मिश्रं रविशशिगमनात् मिश्रमार्गः परत्र** इति व्यामिश्रमार्गो भूतानां सर्वो वेदितव्यः, इति भूतक्रियानियमः।

इदानीं मार्गं वक्तुकाम आह **ज्योतिरित्यादिना**—

ज्योतिः सूर्यार्चिरब्धौ(सूर्योऽर्चिरध्वो) सितदिनमयनं चोत्तरं चार्द्धवर्षं
चन्द्रो ज्योतिर्निशा चासितमयनमिदं दक्षिणे धूममार्गे।
10 अर्चिः स्वर्गे सुराणामपि भवति तनौ नागलोकेऽसुराणां
व्यामिश्रो मर्त्यलोके भवति नरपते प्रेततिर्यङ्नराणाम् ॥१०१॥

इह खलु त्रिविधो मार्गः—ज्योतिर्मार्गो धूममार्गो विमिश्रमार्गः। एषु **अर्चिरथे**-(ध्वो)[3] ज्योतिः सूर्यः। **शि(सि)तदिनमयनमुत्तरं** दिवावृद्धिलक्षणम् **अर्द्धवर्षं** बाह्ये, अध्यात्मनि मकरादिषड्लग्नात्मकमिति, उदयास्तमनमिति संज्ञितम्। धूममार्गो **ज्योति-**
15 **श्चन्द्रो निशा चा**[4]**शि(सि)तमयनमिदं दक्षिणे**[5]**धूममार्गे** कर्कटादिकं षण्मासदक्षिणायनम्, यत्र रात्रेर्वृद्धिस्तद् दक्षिणायनम्; अस्तमनादुदयं यावन्नियम इति। अत्रा**र्चिः स्वर्गे सुराणां** मार्गगमनाय। असितमयनं धूममार्गो **नागलोक**गमनाया**सुराणामिति**। **व्यामिश्रो** दिवा-रात्रिधर्मा **मर्त्यलोक**गमने **प्रेततिर्यङ्नराणा**[6]मुत्पत्तये प्रकटित इति मार्गनियमः, सत्त्वरजस्तमोगुणस्वभावेन पूर्वजन्मवासनाजनितेनेति।
20 इदानीं सत्त्वानां वासनाग्रहमुच्यते श्रावकबौद्धासुरभूतकर्मरतानां **यो यन्मध्य** इत्यादिना—

यो यन्मध्ये प्रविष्टो व्रतनियमरतः कर्मपाशैर्निबद्ध-
स्तन्मध्ये स्वस्वभावाद् भवति नरपते तत्कुले तद्ग्रहेण।
याव[133b]च्चित्तस्य भावस्त्रिविधभववशाद् वेदना सौख्यदुःखं
25 तावत् संसारघोरे भ्रमणमिह नृप स्वर्गमर्त्ये त्वधश्च ॥१०२॥

इह संसारे जन्म कर्मवासनाबलेन देवासुरभूतक्रियानुरक्तो **यो यन्मध्ये प्रविष्टो** भवति **व्रतनियमरतः कर्मपाशैर्निबद्धः**, तस्य धर्मस्य क्रियाभिर्बद्ध इति; **तन्मध्ये स्व-स्वभावाद् भवति; नरपते** इत्यामन्त्रणम्। **तत्कुले** देवासुरभूतकुले। **तद्ग्रहेणे**ति तद्भाव-ग्रहेण। तेन देवासुरभूतकुले जन्मी भवति, सत्त्वरजोतमोहङ्कारेण पूर्वोक्तविधिनेति **याव-**

---

१. ग तदनु। २. ग. यागादिष्वर्थं; भो. mChod sByin La Sogs Don Du (यागाद्यर्थम्)।

३. क. ख. ग. अर्चिरथे; भो. Lam (०अध्व)। ४. क. वा। ५. क. ख. दक्षिणां।

६. क. ख. सुराणां; भो. Mi rNams (नराणां)।

च्चित्तस्य भावस्त्रिविधभववशादिति । इह संसारचित्तस्य त्रिविधभववशादिति कामरूपा-रूपभववासनावशात् **वेदना सौख्यदुःखं** सांसारिकम्, **तावत् संसारे** दुःखलक्षणं **भ्रमणं** चित्तस्यापि, **नृप स्वर्गमर्त्येषु, अधश्च** देवमनुष्यनरकादिषड्गतिषु भ्रमणमालयविज्ञानस्येति वासनाग्रहनियमः । अतस्त्रिधा वासनातीतः—

"संसारपारकोटिस्थः कृत्यकृत्यस्थले स्थितः" (ना० स०. ६, १३) । 5
ज्ञानकायो भगवान् सम्यक्सम्बुद्धो देवासुरनागादिभिर्नमस्कृतचरणारविन्दः कालचक्र इति वासनापगमनियमः ।

इदानीं यथा गर्भे व्यञ्जनस्वरोत्पादोऽभूत्, तथा मृत्युलक्षणमुच्यते **काद्या-नित्यादिना**—

काद्यान् वर्गान् समात्रानपि गुणगुणितान् यान् त्रिपक्षस्वरांश्च 10
त्रिंशद् वै व्यञ्जनानि त्रिविधगतिवशाद् रोहते तानि मृत्युः ।
चारान् पञ्चग्रहाणां रविशशिचरणं राहुकेत्वोः पदं च
द्वात्रिंशद्वर्षपक्षानपि गुणगुणितांश्चन्द्रसूर्याग्निभिन्नान् ॥१०३॥

इहाधानकाले रजस्त्रिंशद्व्यञ्जनात्मकम्, शुक्रं त्रिंशत्स्वरात्मकम् । अनयोः संयो-[134a]गः, आलयविज्ञानाधिष्ठितयोः । अत्र गर्भोत्पादे प्रथमपक्षे **त्रिंशद्व्यञ्जनानि** 15
ककारादीनि ह्रस्वस्वराधिष्ठितानि, अपरपक्षे दीर्घस्वराधिष्ठितानि, इति व्यञ्जनपक्षद्वयं मरणे प्रकटितं भवति । एवं शुक्रस्याकाशधातुप्रवेशः; रजसि शुक्लपक्षे[1] कृष्णपक्षे पृथ्वी-धातुप्रवेशः । एवं रजसोऽभ्युद्भूतानुद्भूतयोः पृथिव्याकाशधात्वोः शुक्रधातौ प्रवेशः । एवं द्वितीयमास[2]प्रथमपक्षे इकाराधिष्ठितानि व्यञ्जनानि रजसि वायुधातुप्रवेशः, अपरपक्षे ऊकाराधिष्ठितानि उदकधातुप्रवेशः । तृतीयमासप्रथमपक्षे ऋकाराधिष्ठितानि तेजोधातु- 20 T 322
प्रवेशः, अपरपक्षे ॠकाराधिष्ठितानि तेजोधातुप्रवेशाय । चतुर्थमासप्रथमपक्षे उकाराधिष्ठितानि उदकधातुप्रवेशाय, अपरपक्षे ईकाराधिष्ठितानि वायुधातुप्रवेशाय । पञ्चममासप्रथमपक्षे ऌकाराधिष्ठितानि पृथिवीधातुप्रवेशाय, अपरपक्षे दीर्घाकारा-धिष्ठितानि आकाशधातुप्रवेशायेति । सृष्टिसंहारभेदेनाकाशादिपृथिव्यादिप्रवेशः शुक्र-रजसोः परस्परमिति । तत् इन्द्रिय-कर्मेन्द्रियाधिष्ठानार्थं गुणवृद्धिह्रादयो ह्रस्वदीर्घा 25
व्यञ्जनेषु प्रवेशं कुर्वन्ति । षष्ठमासस्य पूर्वपक्षार्द्धे अ, पूर्वपक्षापरार्द्धे ह, अपरपक्षार्द्धे आल, अपरपक्षार्द्धे ला, सप्तमस्यैवं ए य औ वा, अष्टमस्य अर र आर् रा, नवमस्य ओ वा ऐ या, दशद(म)स्य अल[3] ल आ[4] हा ला, इति त्रिंशद्व्यञ्जनेषु प्रवेशं दशमासैः स्कन्ध-धात्वायतनादीनां निष्पत्तिरिति गर्भमासादूर्ध्वमिति शुक्ररजःसंयोगः, स्कन्धधात्वायतना-दीनां स्फरणं सृष्टिसंहारक्रमेण । एवमेकादशे मासे बिन्दुना त्रिंशदधिष्ठितानि, द्वादशे मासे 30
विसर्गाधिष्ठितानि भवन्ति । अतश्चन्द्रधातुशुक्रधातूनां नाडीमज्जास्ती(स्थी)नामुत्पाद-परिच्छेदः । अर्को रजो वृद्धिं करोति द्वादशवर्षाणि प्रज्ञायाः, उपायस्य षोडशवर्षाणि, ततो

१. क. ख. शुक्रपक्षे । २. क. पुस्तके 'मास' इति नास्ति ।
३-४. क.ख. अल अल् आ ।

ज्ञानधातुपाकः। प्रज्ञाया रजः पाकः, उपायस्य शुक्रपाकः, ततः[1] प्रज्ञायाऽपरद्वादशवर्षाणि, उपास्यापरषोडशवर्षाणि पृथिवीधातुपाकः। अतो[2]ऽवधेः सत्त्वभागो मध्यमो भवति [134b]। प्रज्ञायाऽपराष्टादशवर्षतोयधातुपाकः, उपायस्य सार्द्धद्वाविंशतिदिनमासैकाधिकं षोडशवर्षं पूर्ववत् तोयधातुपाकः। पूर्ववत् प्रज्ञाया अग्निपाकः, उपायस्यापि पूर्ववत्। एवं
5 वायुधातुपाकः, आकाशधातुपाकः; षण्णवतिवर्षे सार्द्धदशमासैः सर्वधातूनां पाकः सत्त्वरजस्तमोभेदेन। ततो मध्यनाडी वर्षपक्षमानेन दिनमानेन त्रिंशद्व्यञ्जनमानेन पञ्चपञ्चाशदधिकैकादशशतदिनगणेन कालः प्ररोहति।

काद्यान् वर्गान् समात्रान् पूर्वोक्तानपि **गुणगुणितान**शीत्युत्तरदिनसहस्रभूतान् **यान् त्रिपक्षस्वरांश्च** ह्रस्वदीर्घप्लुतान् पञ्चचत्वारिंशत्त्रिंशद्व्यञ्जनानि। **त्रिविधगति-**
10 **वशादि**ति वामदक्षिणमध्यमागतिवशाद् **रोहते तान्**(नि) **मृत्यु**रिति। एवं **वारान् पञ्चग्रहाणां** मङ्गलादीनां चतुःत्रिंशदधिकैकादशशतान् पूर्वोक्तानिति। **रविशशिचरणं** रसयुगशशिनम् एकादशपदात्मकं **राहुकेत्वोः पदं** सार्द्धसप्तात्मकं मासपरिच्छिन्नात्मकं केतोरुदयपदं प्रतिदिनं द्विघटिकात्मकम्। एते पद[3]घटिकात्मकास्त्रिवर्षस्त्रिपक्षत्रिंशद्व्यञ्जनदिनसंख्यास्तानेवारोहते मृत्युरिति। एवं **द्वात्रिंशद्वर्षपक्षानपि गुणगुणितान् चन्द्रसूर्याग्निभिन्नान्**
15 सत्त्वरजस्तमोभिन्नानिति षण्णवतिवर्षेऽपरे सार्द्धदशमासपक्षानिति।

पक्षा वर्षत्रयाणामपि शशिनि गुणाः कालवह्निद्विपक्षाः
ऊनीभूताः शताब्दे समविषमगतौ शे[ष]पक्षा रवीन्द्वोः।
लोकाक्ष्यग्न्यक्षिसंख्या दिननिशिसमयान् भर्तृहीनान् समस्तान्
वर्गान् मात्रान् रवीन्द्वोर्ग्रसति गतिवशाद् व्यञ्जनादीनि मृत्युः॥१०४॥

20 वामदक्षिणनाडीपक्षा[4] वर्षशतपक्षाणां मध्ये **पक्षा वर्षत्रयाणां** द्वासप्ततिः, **शशिनः** अपि **गुणा**स्त्रिपक्षाः, **कालवह्निद्विपक्षाः**; एवं सप्तसप्ततिपक्षा **ऊनीभूताः शताब्दे** शता- [135a]ब्दपक्षराशौ चतुर्विंशतिशतसंख्ये, **शेषपक्षा रवीन्द्वोः** सव्यावसव्ययोरिति। **लोकाक्ष्यग्न्यक्षिसंख्या** इति त्रयोविंशत्यधिकत्रयोविंशतिशताश्चेति। एवं **दिननिशिसमयान् भर्तृहीनान् समस्तान्**, वर्षशतस्य षट्त्रिंशत्सहस्रांश्च, भर्तृहीनान् त्रिवर्षत्रिपक्षव्यञ्जनमास-
25 दिनहीनान् वामे दक्षिणे भक्षते मृत्युः। **वर्गान् मात्रान् रवीन्द्वोर्ग्रसति गतिवशाद् व्यञ्जनादीनि मृत्युः**, अरिष्टादारभ्य मध्यमाकाले भक्षते इति।

सार्द्धा वै चक्रनाडीः शशिपदरहिता वारनाडीविहीनाः
प्रज्ञोपायप्रभेदैर्दिननिशिसमयैर्भक्षते तांश्च मृत्युः।
एवं वर्गान् समात्रान् स्वरगणसहितान् व्यञ्जनान्येव वारान्
30 हीने वा मध्यमेष्टे शशिरविमरणे व्यञ्जने चाधिदैवे॥१०५॥

---

१. भो.पुस्तके 'प्रज्ञाया' इत्यतः पूर्वं 'sÑa Ma bSñ Du (पूर्ववत्)' इति अस्ति।
२. ग. वतो। ३. क. षारा; ग. वारा; भो. rKañ Pa (पद)। ४. ग. पुस्तके 'पक्षा' इति नास्ति।

एवं **सार्द्धा वै चक्रनाडी:** सार्द्धचक्रमष्टादशराशि संख्यां पञ्चविंशदधिकशतगुणिता घटिका त्रिंशदधिकचतुर्विंशतिशतसंख्या इति; शशिपदानि क्रमोऽक्रम[1]भेदेन भूताभूतेषु वेदादीनि शतसंख्यानि, तै रहिताः **शशिपदरहिता वारनाडी** सप्त, तैर्हीनाः समस्तास्त्रयोविंशत्यधिकत्रयोविंशतिशतसंख्याः, **प्रज्ञोपायप्रभेदैः** संहारसृष्टिभेदैर्दिननिशिसमयैर्भक्षते तांश्च मृत्युः। एवं **वर्गान् समात्रान् स्वरगणसहितान् व्यञ्जनान्येव वारान्, हीने वा** 5 **मध्यमेष्टे शशिरविमरणे व्यञ्जने चाधिदेवे** इति हीने चन्द्रारिष्टमरणे, मध्यमे सूर्यारिष्टमरणे, व्यञ्जने चाधिदेव इति मध्यमेष्टमरणे पूर्वोक्तनियमः।

द्वात्रिंशच्चैकरक्तं सशशिरविगतौ नाडिकाच्छेद एषः
भूयस्त्रिंशत्त्रिरात्रैस्त्यजति सकुलिशान् स्कन्धधात्विन्द्रियादीन्।[135b]
त्यक्त्वा चन्द्रार्कनाडीं प्रविशति शि(शं)खिनीं प्राणवायुर्दिनैकं 10
विच्छेदं यावदेव क्षितिजलहुतभुग्(ङ्)मारुताकाशधातोः ॥१०६॥

ततो **द्वात्रिंशच्चैकरक्तमिति** त्रयस्त्रिंशद्[2]दिनानि **शशिरविगतौ** वामगत्या सार्द्धं दक्षिणगतौ **नाडिकाच्छेद एष** (:) चन्द्रसूर्यारिष्टे साधारणः, कालमरणे **भूयः** पुनः **त्रिंशत्त्रिरात्रैः**[3], त्रयस्त्रिंशद्दिनैस्**त्यजति सकुलिशान्** कायवाक्चित्तसहितान् **स्कन्धधात्विन्द्रियादीन्**। ततस्**त्यक्त्वा चन्द्रार्कनाडीं** ललनारसनां **प्रविशति शि(शं)खिनीम**वधूतीं 15 **प्राणवायुर्दिनैकं विच्छेदं यावदेव क्षितिजलहुतभुग्(ङ्)मारुताकाशधातोः**। इह मध्यमायां मरणदिने प्राणप्रविष्टः कालवाताक्रान्तः सन् नाभौ पृथ्वीधातुं पञ्चगुणस्वभावं त्यजति, ततः पृथ्वीधातोर्विच्छेदो भवति; हृदये तोयधातुं चतुर्गुणस्वभावं त्यजति, तोयधातु(तो)र्विच्छेदो भवति; कण्ठे तेजोधातुं त्रिगुणस्वभावं त्यजति, ततस्तेजोधातोर्विच्छेदो भवति; ललाटे वायधातुं द्विगुणस्वभावं त्यजति, ततो वायुधातोर्विच्छेदो भवति; उष्णीषे 20 एकगुणस्वभावमाकाशधातुं त्यजति, ततः शून्यधातोर्विच्छेद इति। प्राणस्य धातोः परित्याग ऊर्ध्वम्। अधो नाभौ कायबिन्दुधर्ममपानं[4] त्यजति, ततो जाग्रदवस्थाक्षयो भवति; गुह्ये वाग्बिन्दुधर्मं त्यजति, ततः स्वप्नावस्थाच्छेदो भवति; मणौ चित्तबिन्दुधर्मं त्यजति, ततः सुसु(षु)प्तावस्थाच्छेदो भवति। ऊर्ध्वेऽप्येवं रजोधातुबिन्दून् प्राणांस्त्यजति, ततो हि कायवाक्चित्तविच्छेदो भवति। संक्रान्तिकाले ज्ञानधातुं षष्ठं त्यजति; सर्वाङ्गे 25 शुक्रमधस्त्यजति, रज ऊर्ध्वं त्यजति, तुर्यावस्थाविच्छेदो भवति। एवं गर्भजानां मरणकालनियमः।

इति श्रीमूलतन्त्रानुसारिण्यां[5]लघुकालचक्रतन्त्रराजटीकायां
द्वादशसाहस्रिकायां विमलप्रभायां
लोकसंवृत्योत्पादनिरोधहेतुभूत-क्षणलक्षण-कालचक्रनियममहोद्देशः 30
पञ्चमः ॥५॥

---

१. क. ख. क्रमोत्क्रम०। २-३. ख. पुस्तके नास्ति। ४. क. ख. धर्ममयानं।
५. क. ख. मूलतन्त्रा०।

(६) रसायनादिबालतन्त्रमहोद्देशः

T 323 इदानीं लौकिकलोकोत्तरसिद्धिहेतोस्तनुरक्षणमुपदिशन्नाह **आदावित्यादि**—

आदौ संरक्षणीया सकलजिनतनुर्मन्त्रिणा सिद्धिहेतोः
कायाभावे न सिद्धिर्न च परमसुखं प्राप्यते जन्मनीह।
तस्मात् [136a] कायार्थहेतोः प्रतिदिनसमये भावयेन्नाडियोगं
5 काये सिद्धेऽन्यसिद्धिस्त्रिभुवननिलये किङ्करत्वं प्रयाति ॥१०७॥

इह खलु संसारे सत्त्वानां प्राणोऽपानश्च संहारक्रमेण निर्गच्छति, सृष्टिक्रमेण प्रविशति शरीरे यथा तथा मूलतन्त्रे भगवान्नाह सेकोद्देशे—

"नाभ्यब्जे हृदये कण्ठे ललाटोष्णीषपङ्कजे।
भूतो याग्नि मरुच्छून्यं संहारेण प्रवाहिनी।
10 निर्गच्छन्ती विशन्ती सा सृष्टिना विशति क्षितौ" ॥

तथाऽपानशक्तिः

"नाभौ गुह्ये च मण्यब्जे कायवाक्चित्तवाहिनी।
निर्गच्छन्ती विशन्ती सा संहारसृष्टिरूपिणी" ॥

अतः कारणात् **आदौ संरक्षणीया सकलजिनतनुः** पञ्चस्कन्धादितनु**र्मन्त्रिणा सिद्धिहेतोः,**
15 **कायाभावे न सिद्धिर्न च परमसुखम्** अनास्रवं सुखं **प्राप्यते जन्मनीह, तस्मात् कायार्थहेतोः**, कायार्थं इति बोधिचित्तम्, तस्य रक्षणहेतोः **प्रतिदिनसमये भावयेन्नाडी(डि)योगम्,** ललनारसनयोर्योगान्नाडियोगं मध्यमायां भावयेत् प्राणवायुम्, अपानं सं(शं)खिन्यां विण्मूत्रनाडियोगमिति। दिननिशिसमये द्वादशलग्ने इह[1] नाडी(डि)योगं भावयेत्। अनेन भावितेन कायसिद्धिः, **काये सिद्धे** सति **अन्या सिद्धि** लौकिकी **किङ्करत्वं प्रयाती**ति
20 लौकिकसिद्धिसाधननियमः।

इदानीं लोकोत्तरसिद्धिसाधनमार्ग उच्यते **शून्य** इत्यादिना—

शून्ये धूमादिमार्गं गुरुनियमवशाद् भावयेद् विश्वसीम्नो
नाडीचक्रेषु तस्मात् स्थिरमपि कुरुते प्राणमापानवायुम्।
पश्चादिन्दो(न्द्वो)र्निरोधं ग्रह इव कुरुते बोधिचित्तस्य योगी
25 तस्माद् यत् किञ्चिदिष्टं कतिपयदिवसैः प्राप्यते जन्मनीह ॥ १०८ ॥

इह **शून्ये धूमादिमार्गं गुरुनियमवशात्** वक्ष्यमाणक्रमादिति। **भावयेद् विश्वसीम्नो** विश्वं सर्वाकारं वि[136b]श्वं तत्पर्यन्तं चित्तमिति। **नाडीचक्रेषु तस्मादवधेः स्थिरमपि कुरुते प्राणमापानवायुं** नाभिचक्रे योगी। **पश्चादिन्दो(न्द्वो)र्निरोधमिति**[2] **ग्रह इव** राहुरिव

---

१. क. इदं; भो. hDi (इयम्)। २. क. ख. पश्चान्निरोधमिति; भो. Phyis Nas zLa Ba Ñes Par hGog Pa (पश्चादिन्दोर्निरोधम्)।

कुरुते बोधिचित्तस्य योगी । प्राणापानयोः परस्परं संयोगो **योगः**, स यस्यास्ति(स्तीति) योगी; बोधिचित्तस्य च्युतिक्षणस्य निरोधमुपस(श)मं निष्यन्दादिकमक्षरं करोति। **तस्माद् यत् किञ्चिदिष्टमिति** तस्मान्निष्यन्दाद् विपाकपुरुषकारवैमल्यमिष्टं यत् किञ्चिद-वाच्यं तत् **कतिपयदिवसैः प्राप्यते जन्मनीह ।** कतिपयदिनानि त्रिवर्ष-त्रिपक्ष-कालचक्र-दिनानि, तैरिति महामुद्रासिद्धिः प्राप्यते एभिः स्कन्धैः शून्यादिविमोक्षशोधितैरिति 5 महामुद्रासिद्धिसाधनमार्गनियमः ।

इदानीमकालमरणवञ्चनोच्यते **मार्त्तण्ड** इत्यादिना—

मार्त्तण्डेन्द्वोर्निरोधः समविषमगतौ मध्यमेऽग्नौ प्रवेशः
प्राणापानद्वयोश्च प्रथमदिनगते वञ्चनाकालमृत्योः ।
प्राणेनापूरयित्वा सह करचरणैरङ्गुलिपर्वान्नखान्तान् 10
षट्चक्रे बुद्धदेव्योऽभयकरकमला योगिना भावनीयाः ॥ १०९ ॥

इह यदाऽकालमरणलक्षणं पश्यति योगी तदा **मार्त्तण्डेन्द्वोर्निरोधः** दक्षिणवामना-ड्योर्निरोधः । **समविषमगताविति** संहारसृष्टिगतौ **मध्यमे अग्नाविति** राहुकालाग्नौ मध्यनाड्यां प्रवेशः कर्तव्यः । **प्राणापानद्वयोश्च प्रथमदिनगते** मध्यमाप्रवाहैकदिनगते सति **वञ्चना** साऽ**कालमृत्योर्भवति** योगिनामिति । **प्राणेनापूरयित्वा** पञ्चमण्डलवाहिना 15 प्राणेन मध्यमायोगेन **सह करचरणैरङ्गुली(लि)पर्वान्नखान्तान्** पूरयित्वा **षट्चक्रे** उष्णीषादिके **बुद्धदेव्योऽभयकरकमला योगिना भावनीया** वक्ष्यमाणक्रमेण इत्यकालमरण-वञ्चनानियमः ।

इदानीं वातरोगादिशमनमुच्यते **अपानेत्यादिना**—

आपानाकुञ्चनेष्टं भवति वरतनौ वातरोगे समस्ते 20
प्राणायामः कफे स्यात् पुनरपि च तयोर्मुञ्चनं पित्तदोषे ।
ऊर्ध्वाधः[137a] सन्निरोधो भवति सुखकरः सन्निपाते ज्वरे च
नाभ्यूर्ध्वं प्राणवायुः सकलरुजहरो नाभिमूलेऽपरश्च ॥ ११० ॥

इह शरीरे पूर्वोक्ता[1]ऽशीति नाड्यो वातदोषकारिण्यः, नाभौ गुह्ये च तासां समधातुत्वकरणाय **अपानस्याकुञ्चनमिष्टं** सुखकरं **भवति वरतनौ** मन्त्रिणां **वातरोगे** 25 शूलादिके **समस्ते** इति । तथा ललाटे उष्णीषे विंशति नाड्यः श्लेष्मदोषकारिण्यः । तासां समधातुकरणाय **प्राणायाम** इष्टो भवति । **कफे स्यादिति** कफरोगे जाते सति प्राणनिरोधः कर्तव्यो योगिनेति । **पुनरपि च तयोर्मुञ्चनं पित्तदोषे** इति पित्तदोषे जाते सति तयोः प्राणापानयोर्बाह्ये मुञ्चनं कृत्वा वक्ष्यमाणक्रमेण बाह्यवातं शीत्कारेण गृहीत्वा लम्बिकायां जिह्वामारोप्य अमृतपानं स्तूकादिकं कर्तव्यम् । **पित्तरोगे समस्ते** 30

१. ख. पुस्तके नास्ति ।

नाड्यः कण्ठे हृदये चत्वारिंशत् पित्तदोषकारिण्यः। तासां धातुसमत्वकरणायासौ योगः कर्तव्य इति। **ऊर्ध्वाधः सन्निरोधो भवति सुखकरः सन्निपाते ज्वरे चेति**। इह गुह्ये दश नाड्यः सन्निपातकारिण्यः; तासां धातुसमत्वकरणायोर्ध्वाधः प्राणापानयोर्निरोध इष्ट इति ज्वरे चेष्टः। कस्माद्धेतोः? यतो **नाभ्यूर्ध्वं**[1] वहति **प्राणवायुः**, अतः **सकलरुजहरो नाभि-**
5 **मूले** अपानो वहति, नाभेरधः सकलरुजहरोऽ**परश्चेति** वातादिरोगोपशमनियमः।

इदानीं जठररोगोपशमनाय प्रतिविधानमुपदिशन्नाह **आकुञ्च्येत्यादिना**—

आकुञ्च्यापानवायुं त्रिविधपथगतं प्राणमेवोद्ध्वंतश्च
सङ्घट्टे यावदग्निः प्रभवति बलवान् व्याप्नुवन् सर्वकाये।
जग्री(यकृत्)प्लीहार्ष(र्शं)रोगानपि जठरगतान् मासयोगाच्च हन्ति
10 ऊद्ध्वंश्वासं च काशं(सं) त्रिविधमपि विषं नेत्ररोगादिकञ्च ॥१११॥

इह जठरे यदा **जग्र्यादिकं** भवति, तदा **आकुञ्च्यापानवायुम्** अध**स्त्रिविधपथगतमिति** विण्मूत्रशु[137b]क्रपथगतं **प्राणमेवोद्ध्वं(द्ध्र्वं)तश्चा**कुञ्चनीयं[2] चन्द्रसूर्याग्निपथगतम्; तयो **सङ्घट्टे यावदग्नि**र्जठराग्निः **प्रभवति बलवान् व्याप्नुवन् सर्वकाये**। असौऽग्नि**र्जग्री(यकृत्)प्लीहार्ष(र्शं)रोगानपि** जलोदरादीनि **मासयोगाच्च** **हन्ति; ऊद्ध्वं-**
T 324 15 **श्वासं च काशं(सं) च त्रिविधमपि विषं** स्थावरं जङ्गमं कृत्रिमञ्च **नेत्ररोगादिकं** शिरःशूलं हन्तीति जठररोगोपशमनियमः।

कक्षात् सव्यावसव्यात् स्तनमपि बलवत् पीडितं प्राणरोधात्
सव्याद् वामा न नाडी प्रवहति सहसा वामकक्षा च सव्या।
मासार्द्धेनाप्यरिष्टं हरति मरणदं योगयुक्तश्च योगी
20 पादौ वज्रासनस्थौ धृतकरकमलौ पृष्ठशूलस्य नाशम् ॥ ११२ ॥

इदानीमरिष्टवञ्चनाय नाडीबन्धकरणमुच्यते **कक्षादित्यादिना**—

इह यदा योगी मध्यमायामहोरात्रं प्राणं प्रवेष्णं(ष्टुं) न शक्नोति, तदा वामारिष्टे दक्षिणे सञ्चारं प्राणस्य करोति, दक्षिणारिष्टे च वामे सञ्चारं करोति, मासार्द्धं मासमेकं यावदिति। अनेनोक्तेन कारणेन **कक्षात् सव्यावसव्यात् स्तनमपि बलवत्**
25 **पीडितं प्राणरोधात्**। सव्ये स्तने पीडिते **न वामनाडी वहति, वामकक्षात्** पीडिते न **सव्या** नाडी वहति; एवं **मासार्द्धेनाप्यरिष्टं हरति मरणदं योगयुक्तश्च योगीति**, योगः पूरकरेचकयोरेकता कुम्भक इति, तेन युक्तो योगयुक्त इति; हरतीत्यपनयतीत्यकालमरणवञ्चनानियमः।

---

१. क. ख. नात्यूर्ध्वं; ग. नास्त्यूर्ध्वं; भो. lTe Bahi sTeṅ Du (नाभ्यूर्ध्वं)।

२. क. प्राणमेवोर्द्धतं चाकुञ्चनीयं।

इदानी पृष्ठशूलनाशकरणमुच्यते—

पादौ वज्रासनस्थ(स्थौ) इति वज्रासनं सव्योरुमूर्ध्नि वामपादं वामोरुमूर्ध्नि दक्षिणपादम्, तौ पादौ पृष्ठस्थबाहुवज्रबन्धेन वामकरेण दक्षिणपादो धृतो दक्षिणेन वामपादः, तौ **पादौ धृतकरकमलौ पृष्ठशूलस्य** नाशं कुरुत इति ।

उद्ध्वौं पादौ शिरोऽधो व्यपहरति तनौ श्लेष्मरोगं समस्तं
प्रस्रावः प्राणरोधात् कतिपयदिवसैर्मूत्रकृच्छ्रं निहन्ति ।
प्रत्यूषेऽनामिकाभ्यां जलविगतमुखे दन्तपंक्ति प्रघृष्य
नेत्राणामञ्जनं स्यान्नयनरुजहरं ताडनं वा जलेन ॥ ११३ ॥ [138a]

ऊद्ध्वौं पादौ शिरोऽधो व्यपहरति तनौ श्लेष्मरोगं समस्तमिति । **प्रस्रावः प्राणरोधात् कतिपयदिवसैर्मूत्रकृत्स्नं**(कृच्छ्रं) **निहन्ति** । **प्रत्यूषे अनामिकाभ्यां जलविगत-मुखे**ऽप्रक्षालिते **दन्तपंक्ति प्रघर्षण** (प्रघृष्य) घृष्ट्वा **नेत्राणामञ्जनं स्यान्नयनरुजहरं** भवति । **प्रत्यूषे ताडनं वा जलेन** नेत्रयो रुजहरं भवतीति ।

सुप्तो(प्ते)नोत्तार(न)नाभिद्धृ(भिधृ)तकरकमलाऽजीर्णशूलं निहन्ति
गण्डानामुद्भवे वै सह घृतलवणैः स्वेदनं वृद्धिनाशः ।
अर्कक्षीरप्रलेपस्त्वथ भवति कदाचिद् दन्तकीटः सशूलो
व्याघ्रीबीजस्य धूमो धृतमिह नलिकाद्यैश्च कीटादिनाशः ॥ ११४ ॥

सुप्तो(प्ते)नोत्तार(न)नाभिर्वामकरणे धृता या सा **धृतकरकमलाऽजीर्णशूलं निहन्ति** प्राणायामसहितेति । **गण्डानामुद्भव** इति गण्डपिटकादीनामुद्भवकाले **सह घृतलवणै**र्वस्त्रबद्धैः **स्वेदनं वृद्धिनाश** एव । **अर्कक्षीरप्रलेपस्त्वथ** गण्डादीनामुद्भव इति नियमः; **कदाचिद् दन्तकीटः सशूलो भवति**, तदा **व्याघ्रीबीजधूमो धृतो नलिकाद्यैः कीटादिनाश** एव । **व्याघ्री**ति कण्ठ(ट)कारीति सामान्यरोगोपशमननियमः ।

इदानीं कुष्ठरोगोपशमनाय प्रतिविधानमुच्यते **वर्षे**त्यादिना—

वर्षार्द्धे श्वेतकुष्ठं हरति वरतनौ मन्त्रिणां किं तदन्यत्
प्रज्ञासङ्गे सु(स्व)चित्तं सुलि(स्खलि)तमपि सदा प्राणवायोर्निरोधात् ।
सप्तत्यब्दां जरां वै सपलितां च द्विवर्षप्रपूर्णे
मुद्रासिद्धि(स)तदूर्ध्वं भवति कतिदिनैर्मार्गचित्तप्रसङ्गात् ॥ ११५ ॥

असौ महायोगः पूर्वधूमादिनिमित्तेन प्राणायात्मन(यामेन) साधितोऽक्षरसुखक्षणः, बोधिचित्तं मुद्रासङ्गेन स्खलु(ल)यित्वा तदेव बोधिचित्तं मुद्रायोगेन **स्खलितं** समु(सु)खं **प्राणापानयोर्निरोधात् वर्षार्द्धे श्वेतकुष्ठं हरति वरतनौ मन्त्रिणां किं तदन्यत्** । यदि कुष्ठं न हरति तदा षोडशाब्दिकां मुद्रां सेवयति योगी [138b] प्रत्यहं मांसभोजनमद्यपानम्,

तस्य षड्मासाभ्यन्तरेण योनिमन्थाने बोधिचित्तं स्खलितं विधृतं सत् कुष्ठरोगं हरति, कुम्भकयोगेन, अत्र नास्ति सन्देहस्तथागतवचने। न केवलं कुष्ठं हरति, अपि तु **सप्तत्यब्दां जरां वै सपलितां द्विवर्षप्रपूर्णे मुद्रासङ्गे** बोधिचित्तं स्खलितमिति। अनेनैव योगेन योगिनः **कतिपयदिवसैः कालचक्रत्रिवर्षत्रिपक्षदिनैस्तदूर्ध्वमि**ति जराविनाशोर्ध्वं **मुद्रासिद्धिर्भवति मार्गचित्तप्रसङ्गा**दिति कृष्ठोपशमननियमः।

यच्छब्दो हृत्प्रदेशे भवति वरनृणां श्रूयते श्रोत्ररन्ध्रै-
स्तस्मादूर्ध्वं हि मुष्टी(मूर्च्छा)र्व्र(व्र)जति समरसं त्याजितं चैकभूतम्।
यच्छब्दं जीवलोके भवति (वदति) च बलजं (भवजं) तत्तु देव(:)शृणोति
विज्ञानं चैव दूरा[त्]श्रवणमपि विभो यो(भोर्यो)गिनाभावनीयम्*॥११६॥

कृत्वा पर्यङ्कबन्धं विकसितवदनोऽन्योऽन्यदन्तं स्पृशेन्न
आकृष्टो बाह्यवातस्त्वमृतरससमो नाभिचक्रे प्रविष्टः।
सन्तापं क्षुत्पिपासां हरति वरतनौ सन्निरुद्धो विषं च
श्वेतो बिन्दुर्ललाटे सु(स्व)रपरिकरितो मुञ्चमानोऽमृतं वा॥ ११७॥

घ्राणे रन्ध्रद्वयेन त्वपि वि(पि)हितमुखे बाह्यवातः समस्तः
प्राणेनाकृष्य वेगात् तडिदनलनिभो घट्टितोऽपानवायुः।
काले नाभ्यां स योगाद् (काले नाड्या संयोगाद्) व्रजति समरसं
चन्द्रसूर्याग्निमध्ये
अन्नाद्यां क्षुत्पिपासां हरति वरतनौ (अन्नाद्यं क्षुत्पिपासामपहरति तनौ)
चामरत्वं ददाति॥ ११८॥

---

* ११६ तः १२१ पर्यन्तं षट्श्लोकानामनुवादो भोटानुवादे (कञ्जूरसंग्रहे) नोपलभ्यते; तेषामुपरि विमलप्रभाव्याख्या च संस्कृतप्रतीषु भोटानुवादेषु वा नोपलभ्यते। अथ चैतद्विषये आचार्य-खेस्-ड्रुब-जे तत्पूर्ववर्त्तिभिः बु-स्तोन्—मी-फम्-रिन्पोछे-आदि-आचार्यैरपि स्व-स्व-व्याख्यानेऽत्र शङ्का नोत्थापिता, अतस्तैः मौनमेवाचरितम्। सम्भावये तत्र हेतुः तथाविधसंस्कृतप्रतीनां भोटदेशे अप्राप्तिः यत्रैषां षण्णां सन्निवेशः स्यात्। अस्मिन् विषये प्राप्तसंस्कृतप्रतीनामपि द्विधा स्थितिः—कुत्रचिदुपलब्धिः षण्णां कुत्रचिन्नेति। प्रस्तुतसंस्करणस्याधारभूतायां प्रतौ यथा षट्श्लोका उपलब्धा दृश्यन्ते एतादृशा एव च अन्या अपि द्वि-त्रि-प्रतयः सन्त्येव डा० लोकेशचन्द्रसंरक्षित-प्राचीनग्रन्थसंग्रहालये। किन्तु बिहारराज्ये पटनास्थितकाशीप्रसादजायसवाल-अनुसन्धान-संस्थान-संरक्षितायां पुरातन्यां विभूतिचन्द्रलिखितायां प्रतौ श्लोका एते नैव प्राप्यन्ते, स्युस्तथाविधा अन्या अपि काश्चित् प्रतयः। एतस्यां स्थितौ अप्राप्तिवशादेव भोटानुवादो भोटविद्वद्भिर्न कृतः स्यात्।

स्वच्छायामातपस्थामपरमुखरवेः स्तब्धदृष्टयावलोक्य
पश्चाद् व्योमाभिवीक्ष्ये(क्षे)त् समरसपुरुषो(षा) दृश्यते धूम्रवर्णः ।
षण्मासाभ्यासयोगादवनिगतनिधिं दर्शये(द्)च्छिद्रभूमिं (भूमिछिद्रं)
वृक्षच्छायां प्रविश्यत्तथ(श्य त्वपि) गगनतले भाविता
बिन्दुमाला ॥११९॥ 5

या शक्तिर्नाभिमध्याद् व्रजति प(व)रपदं द्वादशान्तं कलान्तं
सा नाभौ सन्निरुद्धा[त्] तदिदननमिता (तडिदनलनिभा)
दण्डरूपोत्थिता वा (च) ।
चक्राच्चक्रान्तरं वै मृदुललितगतिन्धारिता(गतिश्चालिता) मध्यनाड्यां
यावच्चोष्णीषरन्ध्रं स्पृशति हठतया सूचिबद्धा ह्यचर्मं ॥१२०॥ [139a] 10

आपानं तत्र काले परमहठतया प्रेरयेदूद्र्ध्वमार्गे
उष्णीषं भेदयित्वा व्रजति प(व)रपुरं वायुयुग्मे निरुद्धे ।
एवं वज्रप्रबोधात् सतनु(मनसि) स विषया[त्] खेचरत्वं प्रयाति
पञ्चाभिज्ञास्वभावा भवति पुनरियं योगिनां विश्वमाता ॥ १२१ ॥

इदानीं प्राणायामनियम उच्यते— 15

प्राणायामं प्रकुर्याद् हृदि शिरसि तथा यावदग्निर्व्यथाऽभूत्
तस्मादूर्ध्वं हि मूर्च्छां व्रजति सुकमलेऽयन्त्रितो वा बलेन ।
उष्णीषं भेदयित्वा व्रजति परपुरं (हि मरणं) स्कन्धधातून् विहाय
मुद्रासङ्गप्रणष्टो न हि सुखफलदो जन्मनीहैव पुंसाम् ॥ १२२ ॥

इह शरीरे **प्राणायामं** कुम्भकं **कुर्यात् मन्त्री हृदि शिरसि तथा यावदग्निर्व्यथा-** 20
भूत् तावद् हृदयं दह्यते, शिरसि च व्यथा भवति। तत ऊर्ध्वं न कुर्यादिति नियमः, यदि करोति **तस्मादूर्ध्वं हि मूर्च्छां व्रजति सुकमले**, नाभिकमले प्राणो मूर्च्छां व्रजतीति। **अयन्त्रितो वा बलेनोष्णीषं भेदयित्वा व्रजति हि मरणं स्कन्धधातून् विहाय** [य]तः, अतो **मुद्रासङ्गप्रणष्टो न हि सुखफलदः** प्राणायामो **जन्मनीहैव पुंसामिति** प्राणायाम-
नियमः। 25

मुद्रोक्ता भावनार्थं दिननिशिसमये नैव रागक्षयार्थं
वाग्वज्रं तर्पणार्थं न खलु मदकरं मन्त्रिणामुक्तमेवम् ।

अतोऽत्यधिकमेतद् विचारणीयं यत् संस्कृतप्रतिषु तत्र सत्स्वपि षट्श्लोकेषु तेषां व्याख्या कथं न लभ्यत इति। अस्मिन् विषये अनेकाविधाः सम्भावनाः समुदिताः भवेयुः। एतत् सर्वं तथ्यजातमाधृत्य आलोचनीयं भूमिकायाम्, तदत्र विरम्यते। 30

सर्वाहारः सुखार्थं प्रतिदिनसमयेऽजीर्णहेतोर्न चोक्तः
श्रीचर्यासिद्धिहेतोर्भ्रमणमपि चित्तौ (तौ) कीलनार्थं न रात्रौ ॥१२३॥

[इदानीं* योगिनां मुद्रास्वादनाहारचारनियम उच्यते **मुद्रेति**—

इह भगवता **मुद्रोक्ता** योगमुद्रोक्ता **भावनार्थम्**, **नैवरागक्षयार्थं** हेतोः **दिननिशि-**
5 **समये** स्त्रीक्रीडाम्; तथा मद्यपानं किञ्चित् मुखतर्पणार्थम्, न कलशादिवत्। न हि मदः योगीन्द्राणां मोक्षदः भवति; तथा आहारकरणमत्र **सर्वाहारः सुखार्थम्**, यत् किञ्चिदाहारकरणं तत् सर्वं स्वल्पसुखाय भवति। तेन **प्रतिदिनसमयेऽजीर्णहेतोर्न** कर्त्तव्य इत्याहारनियमः। **श्रीचर्या** योगचर्या **सिद्धिहेतोरि**ति सिद्धेर्हेतोः। तेन श्मशानोपश्मशानादिषु **भ्रमणं रात्रौ न क्रीडार्थमि**त्यर्थः। योगचर्यानियमः।]**

---

*-**. मुद्रोक्ता भावनार्थमित्यादिश्लोकस्य व्याख्या संस्कृतप्रतिषु मया न दृष्टा; किन्तु भोटानुवादे सा लब्धा। अतो भोटानुवादात् पुनः संस्कृतेऽनूद्य सा मया उपरि कोष्ठके प्रस्तुता। भोटानुवादः तञ्जूरसंग्रहे एवं विद्यते—

"Da Ni Phyag rGya S̄es Pa La Sogs Pas rNal ḫByor Pa rNams Kyi Phyag rGya Daṅ Myaṅ Ba Daṅ Kha Zas Daṅ rGyu Baḫi Ṅes Pa gSuṅs Te. ḫDir bCom lDan ḫDas Kyis Phyag rGya gSuṅs Pa Ni bsGom Paḫi Don Du rNal ḫByor Gyi Phyag rGya gSuṅs Pa sTe. Chag Pa Zad Paḫi Don Te rGyur N̄in mTshan Du Bud Med Daṅ Rol Par gSuṅs Pa Ni Ma Yin No. De bS̄in Du chaṅ Gi bTuṅ Ba Ni Cuṅ Zad Kha Tshim Par Byed Pa sTe. Bum Pa La Sogs Pa bS̄in Du Ma Yin Te. Myon Byed Ni rNal ḫByor Gyi dBaṅ Po rNam La Thar Pa sTer Bar Byed Par Mi ḫGyur Ro. De bS̄in Du Kha Zas Byed Pa Ni ḫDir Kha Zas Tham Cad bDe Baḫi Don Te. Gaṅ Cuṅ Zad Kha Zas Byed Pa De Tham Cad Śin Tu Chuṅ Bar bDe Bar ḫGyur Te. Deḫi Phyir N̄in S̄ag So Soḫi Dus Su Ma S̄u Baḫi rGyur Mi Byaḫo S̄es Pa Ni Kha Zas Kyi N̄es Paḫo. dPal lDan sPyod Pa sTe rNal ḫByor sPyod Pa dṄos Grub rGyur S̄es Pa dṄos Grub Kyi rGyur Te. Deḫi Phyir mTshan Mo Dur Khrod gNas Daṅ N̄e Baḫi gNas La Sogs Par ḫKhyam Pa Dag rTsed Moḫi Don Du Ni Ma Yin No S̄es Paḫi Don Te. rNal ḫByor Gyi sPyod Paḫi Ṅes Paḫo" (T 324, 3-4).

अस्य श्लोकस्य व्याख्या संस्कृतप्रतिषु नोपलभ्यते, किन्तु भोटानुवादे सा लब्धा, अत्र को हेतुरिति विवेचयता आचार्य-खेस्-ड्रुब-जे महाभागैरुक्तं यत् व्याख्यायाः विशुद्ध-भारतीयसंस्कृतप्रतिषु 'इदानीं योगिनां मुद्रास्वादनाहारचारनियम उच्यते इति सुबोधम्' इति मात्रं लभ्यते एव। सोऽप्यंशो मया संस्कृतप्रतिषु न दृष्टः।

अत्र खेस्-ड्रुब-जे-महाभागानां स्वमतमुल्लेखनीयमस्ति। तेन उक्तं यद् अन्येऽपि

इदानीमवधूतयोगिभैषज्यमुच्यते—

अक्षोभ्यं किञ्चिदुष्णं मुखरुजशमनं दन्तशूलस्य चैव
प्रत्यूषेऽक्षोभ्यनस्यं शिरसि रुजहरं तोयनस्यं तथैव ।
कर्णे नेत्रं (त्रे) प्रविष्टं त्वु(ह्यु)भयरुजहरं मूत्रमुष्णं च शीतं
भूतार्त्तेऽक्षोभ्यनस्यं त्रिकटुकसहितं सौख्यदं चापि दष्टे ॥१२४॥ 5

इह यदा योगिनो मुखरोगो भवति, अक्षोभ्यं किञ्चिदुष्णं कृत्वा मुखे घृतं मुखर(रु)जस(श)मनं भवति । दन्तशूलस्य चैवेति चकारा[139b]द् दन्तकीटस्य च । यदा शिरसि रोगो भवति, तदा प्रत्यूषे अक्षोभ्यं नस्यं कृतं शिरसि रुजहरं भवति । तोयनस्यं तथैव योगिनामिति । यदा कर्णरोगो भवति, तदा मूत्रमुष्णं कृतं कर्णे प्रविष्टं नेत्ररोगे शीतं कृतं नेत्रे प्रविष्टं यथासंख्यमुभयरुजहरम्, मूत्रमुष्णं च शीतमिति । 10 भूतार्त्त इति भूतप्रेतादिग्रस्ते अक्षोभ्यनस्यं त्रिकटुकेन सहितं सौख्यदं चापि दष्टे, सर्पदष्टेऽपि सौख्यदं भवतीति मुखरोगाद्युपस(श)मननियमः ।

विण्मूत्रं शुक्ररक्तं नृपत(ल)लसहितं भक्षितं चायुदं स्यात्
सध्यानं पुष्पनस्यं हरति सपलितानङ्गजातान् जरांश्च ।
भुक्तं पञ्चप्रदीपं सकलरुजहरं मक्षिकाच्छर्दिमिश्रं 15
स्त्रीपुष्पं शुक्रमिश्रं त्वपहरति रुजं भक्षितं वर्षयोगात् ॥ १२५ ॥

इदानीं पञ्चामृतयोग आयुवृद्ध्यर्थमुच्यते विडित्यादिना—

इह 'यथा बाह्ये तथा देहे',(पृ०४७) इति वचनात् बाह्ये पञ्चद्रव्याणि, अध्यात्मनि पञ्चद्रव्याण्येकीकृत्य पञ्चामृतयोगः, ततः पञ्चामृतं भक्षितं योगिनामायुदं स्यादिति ।

भोटाचार्य-श्रीपङ्लो-प्रभृतिभिरपि स्वीक्रियते यत् भोटानुवादे उपलब्धोऽयं व्याख्यांशः मूलसंस्कृतस्य नास्ति, अपि तु केनचिद् भोटदेशीयेन विदुषा भोटानुवादे अयमंश आरोपितः । अस्मिन् विषये खेस्-ड्रुब-जे-महाभागानां यद् वक्तव्यं तदुद्ध्रियते—

"ḥDiḥi rGya dPe Dag Pa Tham Cad La Da Ni Phyag rGya S̄es Pa La Sogs Pas rNal ḥByor Pa rNam Kyi Phyag rGya Daṅ Myaṅ Ba Daṅ Kha Zas Daṅ rGyu Baḥi Ñes Pa gSuṅs Pa Ni Go sLaḥo S̄es ḥByuṅ Gi ḥGrel Paḥi Tshig gS̄an Med Kyaṅ ḥDir ḥByuṅ Ba Ni Bod Mi mKhas Pa S̄ig Gis bCug Par mṄon No S̄es dPaṅ Lo Daṅ Chos rJe Bu La Sogs Pa mKhas Pa Phal Che Ba gSuṅ La. Kha Cig mTshan Bu dKyus Su Śor Paḥo S̄es Zer Ro".

(ḥGrel Chen Dri Med Ḥod Kyi ḥGrel bŚad. The Collected Works of the Lord mKhas Grub rJe dGe Legs dPal bZaṅ Po. Vol. 3. New Delhi, 1980, "Ga", page 141 b).

बाह्ये **विट्शब्देन वैरोचनिर्वलिर्वलेर्वंशाद्** गन्धको विडुच्यते, अध्यात्मनि विडेव, अनयो-स्तुल्यभागः। **मूत्रं** बाह्ये **विष्णु नृपो** भि(भृ)ङ्गराजरसम्, अध्यात्मनि मूत्रमेव। **रक्तं** बाह्ये अभ्रकम्, अध्यात्मनि स्त्रीपुष्पम्, तुल्यभागमिति। **शुक्रं** बाह्ये पारदः, अध्यात्मनि शुक्रमेव, अनयोः समभागमिति। **नृमांसं** बाह्ये त्रिफला, अध्यात्मनि मज्जा, अनयोरपि समभागमिति। एवं विडेकभागः, मांसस्य पादोनभागः, रक्तार्द्धभागः, शुक्रस्य एकपादः, एतदेकीकृत्य मूत्रेण सप्तवारान् भावयेत्। आतपे भूयो भूयः शोषयित्वा, ततः प्रत्यहं कर्षमात्रं घृत-मधुभ्यां भक्षितं षण्मासावधेरायुदं भवति, शाकाम्लतैललवणवर्जनादिति पञ्चामृतनियमः।

T 325

इदानीं पुष्पनस्य उच्यते **सध्यानमित्यादिना**—

इह ध्यानं मध्यमायां प्राणप्रवेशः, तेन ध्यानेन सह **सध्यानमिति**। **पुष्पं** स्त्रीरजः, बाह्ये केशराजिका भृङ्गराजः, तस्य रसः स्त्रीपुष्पतु[140a]ल्यं **सध्यानं पुष्पनस्यं** सध्यानानां **हरति सपलितानङ्गजातान् जरांश्च**, षण्मासावधेरिति [नस्य][1] नियमः।

इदानीं पञ्चप्रदीपमुच्यते—

गोश्वदन्तीहयनराणां **मांसमक्षिकाच्छर्दिमिश्रं** मधुना मिश्रं भुक्तं **पञ्चप्रदीपं सकलरुजहरं** भवति; अपरं मक्षिकाच्छर्दिमाधवी, तया सार्द्धं सकलरुजहरं भवतीति नियमः। **स्त्रीपुष्पं शुक्रमिश्रं** पूर्वोक्तं बाह्याध्यात्मिकम्, **अपहरति जरां भक्षितं च वर्षमिति** पूर्वोक्तभोजननियमः।

इदानीं वाताद्युपस(श)म उच्यते—

वातघ्नं क्षारमम्बु प्रभवति मधुरं पित्तशत्रुः कषायः
श्लेष्मघ्नं सर्वतिक्तं कटुकमपि तथा चौषधिर्वा रसो वा।
श्लेष्मघ्नं छागदुग्धं त्रिकटुकसहितं माहिषं पित्तशत्रुः
वातघ्नं चोष्ण(चोष्ट्र)दुग्धं त्रिविधरुजहरं गोपयः सर्पिरेव ॥ १२६ ॥

वातघ्नं क्षारमम्बु प्रभवति मधुरं पित्तशत्रुः कषायद्रव्यं* **श्लेष्मघ्नं सर्वतिक्तं** त्रिकटुकसहितम्, **औषधिर्वा रसो वा** भक्षितं पीतमिति। **श्लेष्मघ्नं छागदुग्धं त्रिकटुकसहितम्, माहिषं** पित्तशत्रु†ः, शर्करासहितम्। **वातघ्नं वो(चो)ष्णदुग्धं**[2](ष्ट्रदुग्धं)[3] शै(सै)न्धवसहितं **त्रिविधरुजहरं गोपयो** यथासंख्यम्, सैन्धवादिसहितं वातपित्तश्लेष्मघ्नमिति। **सर्पिरेव** गोघृतं त्रिविधरुजशमनं ज्वररहितानामिति नियमः।

---

१. भो. rÑub Pa (नस्य)।

२. क. ख. वोष्णदुःखं; ग. वोष्णदुग्धम्। ३. भो. rÑa Mohi Ḥo Ma (उष्ट्रदुग्धम्)।

*-†. एतावानंशः क. पुस्तके नास्ति, ख. पुस्तकादयं गृहीतः।

इदानीं मुखादिरोगोपस(श)मनार्थं क्वाथतैलाद्युच्यते जातीत्यादिना—

जातीक्वाथाम्बु चोष्णं मुखरुजशमनं दन्तशूलस्य चैवं
तैलं वस्त्वम्बुपक्वं त्रिकटुकलवणैः कर्णरोगस्य नाशः ।
आज्यं क्षीराहिरक्तैः क्वथितमपि सदा घ्राणरोगस्य नाशः
कर्कोटी लाङ्गलीन्द्री हरति सहखरां गण्डमालां प्रलेपात् ॥ १२७ ॥ 5

इह सर्वद्रव्याष्टगुणं तोयं जातीपत्राष्टगुणं तोयं पादावशेषं **जातीक्वाथाम्बु**तोयं किञ्चिद**ुष्णं मुखरुजस(श)मनं** भवति । **दन्तशूलस्य चैवं तैलं** तिलतैलं **वस्त्वम्बु** छागमूत्रम्, तेन तुल्यं **पक्वं** तैलावशेषं **त्रिकटुकलवणैः** सपादांशैः पाकावशा(सा)ने प्रदत्तैः, तत्कर्णे प्रविष्टं **कर्णरोगस्य नाश** इति [140b] । एवमाज्यगोघृतक्षीरेणाष्टगुणेन क्वाथावसाने अहिर्नागकेशरं **रक्तं** [कुं]कुमं तैः पादांशेन दत्तैरनेन घृतेन नस्यं **घ्राणरोगस्य** 10 **नाश** एव । **कर्कोटी** वन्ध्यकर्कोटी **लाङ्गली इन्द्री** इन्द्रवारुणी तिक्ता **हरति सहखरां** गर्दतांलतैः (गर्दभाम्बुलिप्तैः[1]) सह **गण्डमालां प्रलेपा**दिति नियमः संक्षेपतः, विस्तरेण वैद्यशास्त्रे ज्ञेय इति ।

इदानीं वज्रकण्ठकोपस(श)मनमुच्यते **कुर्याद्धस्ता**वित्यादिना—

कुर्याद्धस्तौ प्रलम्बौ समपदकमले प्राणवायोर्निरोधं 15
यावद् भूम्यां प्रपातो न हि भवति तनोर्मुञ्चनं च ज्वरस्य ।
भूयो भूयः समाधौ मरणभयकरान् नाशयेत् कण्टकान् वै
हृत्पद्मे चन्द्रमूर्ध्नि त्वमलशशिनिभा भाविता विश्वमाता ॥ १२८ ॥

इह यदा पापरोगोपद्रवो भवति, तदा प्रथमं ज्वरो भवति, हस्तपादसन्धिषु व्यथा भवति, शिरश्च व्यथते। इदं लक्षणं ज्ञात्वा समाधिमवलम्बयेत् । तत्रायं विधिः–नि(नी)रन्ध्रे 20 गृहे प्रवेश्य ज्वरितः **कुर्याद्धस्तौ** द्वौ **प्रलम्बौ** ऊरुपर्यन्तं **समपदकमले** कुर्यात्, **प्राणवायोनिरोधं** कुम्भकं कुर्यात्, **यावत् प्रया(पा)तो भूम्यां न हि भवति तनोः** तावज्ज्वररोगेण भूम्यां प्रपातो भवति; अथाप्रपातो यावत् पुनः पुनः प्राणायामं कुर्यादिति नियमः । **मुञ्चनं च ज्वरस्य** यावन्न भवति तावत् कार्यम्, ज्वरे मुक्ते सति न कुर्यादिति नियमः । **भूयो भूयः समाधौ** स्थितो **मरणभयकरान् नाशयेत् कण्टकान् वै । हृत्पद्मे त्वमल-** 25 **शशिनिभा भाविता विश्वमाता**, प्राणायामेन पद्मवरदहस्ता वज्रपद्मासनस्था[2] चन्द्रमण्डले द्विभुजैकवक्त्रेति नियमः । इति पापरोगोपस(श)मः ।

---

१. भो. Boṅ Buḥi Chu Daṅ bCas Pa Byugs Pas (सह गर्दभाम्बुलिप्तैः) ।
२. क. ख. वज्रपद्मायनस्था ।

इदानीं पापरोगोपस(श)मनार्थं भैषज्यमुच्यते—

पिष्ट्वा शीताम्बुसूर्यो ज्वरविहि(ह)तनृणां कण्टकान् नाशयन्ति
घृष्टं त्वक्षोभ्यमिश्रं हरति भयकरान् वा कपालं ज्वरान्ते ।[141a]
मन्त्रश्चोँकारपूर्वो जलशिखिमरुतां वज्रपूर्वं च नाम
रक्षां तेनैव कुर्यात् शिरसि गलहृदोर्नाभिगुह्यादिकेषु ।। १२९ ।।

इह यदा पापरोगचिह्नं भवति ज्वरितहस्तपादसन्धिषु व्यथा तथा(दा) **पिष्ट्वा शीताम्बुना मसूर्यो ज्वरविहि(ह)त**[1]**नृणां** दत्ताः **कण्टकान् नाशयन्ति**; तथा **ज्वरान्ते** तृतीयदिने कण्टकोत्थानकाले पापरोगेण मृतस्य **कपालम्** अलाभे यथालब्धं पृ(घृ)ष्टम् **अक्षोभ्यमिश्रं** पीतं पुरुषकपालं पुरुषेण, स्त्रीकपालं स्त्रिया। अलाभे यथालब्धं पीतं **हरति भयकरान्** कण्टकान् **धा(वा)** इति यथालब्धं कपालं ज्वरान्ते इति नियमः। अत्र मसूर्यादीनामभिमन्त्रणाय मन्त्रो भवति। स च ओँकारपूर्वं इति **मन्त्रश्चोँकारपूर्वः। जलशिखिमरुतां** पूर्वम् ओँकारः, जलमिति पवर्गस्य द्वितीयाक्षरं तोयधातुः फ इति, शिखीत्यधो र इति, ऊर्ध्वे एकारः, एषां जलशिखिमरुताम् एकत्वं फ्रेँ, अनुस्वारम् आकाशं सर्वव्यापित्वादिति। **वज्रपूर्वं च** कण्टकानां नाम, **रि(र)क्षां तेनैव कुर्यात्**; यथा मसूर्यादिः सप्तवाराभिमन्त्रितं[2] तथैव रक्षां तेनैव **शिरसि गले हृदये नाभौ गुह्ये; आदिशब्दा**-दुष्णीषे; एषु षट्सु स्थानेषु त्रिसन्ध्यायां रक्षां कुर्यादिति नियमः।

अत्र मन्त्रः—ॐ फ्रेँ विश्वमात[:] वज्रकण्टकान् नाशय नाशय मम शान्ति कुरु कुरु[3] स्वाहा, पररक्षार्थं देवदत्तस्य शान्ति कुरु कुरु स्वाहा, इति नियमः। इदं भगवत्या विश्वमातुः सर्वेत्यु(षु उ)पद्रवेष्वात्मपररक्षायां स्मर्तव्यमिति भगवतो नियमः। अनेन मन्त्रेण सप्तवारानभिमन्त्र्य मसूरिकाः शीताम्बुना पिष्ट्वा पातु[तुं] देयाः, ज्वरनष्टस्य कपालम् अक्षोभ्येन पिष्ट्वा देयम्; भूतग्रस्तस्य त्रिकटुकेन सहितम् अक्षोभ्यं पिष्ट्वा देयमिति पापरोगोपस(श)मननियमः।

इदानीं सूर्यातपस(श)मननियमः क्रियते तुल्येत्यादिना—

तुल्यं धात्री च धान्यं त्वपरमपि तथा तिन्तिडीपत्रचूर्णं
तोये चन्द्रार्कजुष्टे खलु विगतमले क्वाथयेत् पादशेषम् ।
तत् [141b] क्वाथं खण्डमिश्रं पुनरपरदिनात् पीतमेतत् त्रिरात्रं
ग्रीष्मे सूर्यांशुदाहं हरति मरणदं सप्तधातौ गतं च ।।१३०।।

इह यदा ग्रीष्मे सूर्यांशुदाहो भवति अध्वनि, तदा **तुल्यं धात्रीति** आमलकीफल-[4] चूर्णम्, **धान्यमिति** कुस्तुम्बुरुः, तेन **तुल्यमपरमिति**; तथा तिन्तिरी(डी)पत्रचूर्णं बन्धु-

१. भो. rNam Par bsNun Pa (विहत)। २. ग. ०वाराभिमन्त्रणम्।
३. क. ख. पुस्तकयोर्नास्ति।
४. भो. ḫDab Ma (०पत्र)।

लीपत्रचूर्णमिति तुल्यम्; एवं सर्वेषां तुल्यभागं कृत्वा, **तोये चन्द्रार्कजुष्टे** इति चन्द्रार्ककिरणैः स्पृष्टे खलु **विगतमल** इति शैवालादिमलरहिते, **क्वाथयेत् पादशेषमिति** क्वाथस्य यावत् पादमेकं भवति, तावद् द्रव्यत्रयं क्वाथयेत्, द्रव्याष्टगुणं तोयं दत्त्वेति। अत्र तुलाया मानं न भवति, क्वाथविषये आढकेन मानं सर्वत्रेति नियमः। **तत्** T 326 **क्वाथपादात्** समात्रं **खण्डमिश्रं पुनरपरदिनात्** पीतम्, एवमनेन क्रमेण **त्रिरात्रं** 5 प्रत्यूषकाले **ग्रीष्मे सूर्यांशुदाहं हरति मरणदं सप्तधातौ गतं चेति** लोमचर्मादौ गतम्, **च**कारादपरमपीति नियमः।

इदानीमपररसायनमुच्यते **हेमेऽर्क**मित्यादिना—

हेमेऽ(म्न्य)र्कं कान्तलोकं(हं) पटलजमयसं वाहयेन्मक्षिकेन
बीजार्द्धेनापि पिष्टिर्मलविगतरसे वाहयेत्(कारयेत्) षट्पलैश्च। 10
गोतक्रं दारयित्वा खलु खरशिखिना ग्राह्यमेवाग्रम(वात्र) मस्तु
श्रीपिष्ट्या कल्किपात्रे[1] क्वथितमपि पुनर्यावदर्द्धप्रमाणम् ॥१३१॥

इह शरीरे यः कश्चिद् बाह्यरसायनार्थी सिद्धरसाभावे मध्यरसायनमिदं कुर्यात्, अस्य च विधिरुच्यते—**हेम्नीति** विशुद्धस्वर्णे, **अर्कमिति** ताम्रम्, **कान्तं** लोहम्, **पटलज**-**म**भ्रकलोहम्, **अयसं** तीक्ष्णम्, एषां प्रत्येकं समभागकृतानां भागं सुवर्णसमं **माक्षिकचूर्णं** 15 प्रतिवाये(पे)न प्रकटमू[142a]षायां तीव्रवातेन निर्वाहयेत्; यावद् हेमं तिष्ठति, तदेव बीजम्, तेन **बीजेनार्द्धेन** स्वर्णपलद्वयेन रसे चतुःपले **मलविगत** इति सप्तघातनाकृते **पिष्टं षट्पलं** कारयेदिति। ततो **गोत्रक**(**गोतक्र**[2])मपगतनवनीतं **खरशिखिनेति** तीव्राग्निना **विदारयित्वा**, तस्य विदारितस्य कर्पटेन गालयित्वा **स्वच्छं मस्तु** ग्राह्यम्, कल्कं त्यक्त्वा। तदेव मस्तु अयस्कान्तपात्रे **हेमपिष्ट्या** सार्द्धं **पुनः क्वाथयेत्, यावदर्द्ध**-**प्रमाणं** भवति। 20

उद्धृत्याशुद्धखण्डाष्टपलमथ नववत् क्षेपनी(णी)यं हि तत्र
तद्भोज्यं सर्वकालं ह्यस(श)नविरहितं चायनं यावदेव।
षण्मासैर्दिव्यदेहो वलिपलितगतो यात्यनेनामरत्वं
तस्माद् भोज्यं तदेव प्रतिदिनसमये किन्तु पिष्ट्या विहीनम् ॥१३२॥ 25

तत **उद्धृत्याशुद्धखण्डाष्टपलमिति** तम् अराजादिकानाम् आहारपरिणामवशेन[3] **नवादिकं** सप्तादिकं च। खण्डस्य चतुःषष्टिभागिकमरिचचूर्णमपि **तत्र क्षेपनी(णी)यमिति तदेव भोज्यं सर्वकालम् अस(श)नविरहितं चायनं यावदेव। षण्मासैर्दिव्यदेहो वलिपलित**-**गतो यात्यनेनामरत्वम्।** इह पाने ताम्बूलभक्षणं विहितम्, ताम्बूलकल्कं विहाय **तद्भोज्यं** सर्वकालमिति। **तदेव** मस्तु तेन विधिना **भोज्यं** भोजनीयम्। **हेमपिष्ट्या** 30

---

१. भो. Khab Len sNod (अयस्कान्तपात्रे)।
२. भो. Dar Ba (०तक्रं)। ३. ग. ०भेदेन।

विहीनम्, किन्तु यावत् पिष्टिकाऽस्ति तावत् तया सार्द्धम्। पश्चात् तया विना सर्वकाल-मिति रसायननियमः।

इदानीं भक्ताद्युपभोगाय हेमार्द्धिकमाह **पूर्वोक्तमित्यादिना**—

पूर्वोक्तं बीजराजं सममपि तु रसे जारितं चार्द्धमात्रं
क्षाराम्लैर्मर्दयित्वा बहु विविधविडैर्यावदेकत्वमेति।
पित्ताम्लैर्गन्धकायैः(द्यैः) दरदमपि शिलां मर्दयेत् सूततुल्यं
तल्लेपात् तारपत्रं व्रजति कनकतां पक्ष(क्व)मप्यर्द्धिकेन ॥ १३३ ॥

इह **पूर्वोक्तं बीजराजं सममपि तु रसे चा(जा)रितं चार्द्धमात्रम्, क्षाराम्लैर्मर्दयित्वा बहु विविधविडैर्वक्ष्य**[142b]**माणैर्यावदेकत्वमेति**। ततः **पित्ताम्लै**[1]**र्गन्धकाद्यैः**[2] **दरदमपि शिलामिति** इह रसक्रामणाय त्रीणि द्रव्याणि रसतुल्यानि रसेन सार्द्धं पित्ताम्लै**[1]**र्मर्दयेत्**। गोपित्तं मत्स्यपित्तं वा फलाम्लं वा यथालब्धं बीजपूरकाद्यम्, गन्धकम्, दरदम्, शिलाम्, तालकम्, शशकम्, काक्षी, काशीषं, तुत्थकम्, हेमगिरिकम्; एषां गन्धकादीनामुप-रसद्वयम्, महारसं एकम्, त्रीणि रसतुल्यानि। **तस्य लेपात् तारपत्रं** दिनत्रयं चुल्लिकाधः स्थापितं **व्रजति कनकतां पक्वं**[3] चुल्लिकाग्निना, **अर्द्धिकेन** हेम्ना। इति हेमार्द्धिक-नियमः।

इदानीं पुष्पक्रियोच्यते **तीक्ष्णमित्यादिना**—

तीक्ष्णं चाकाशजातं त्वललवणयवक्षारसर्जं क्रमेण
वृद्धं चार्के द्विगुण्ये समरसकरणाद् दाहयेदर्कशेषम्।
भूयः क्षारेण शुद्धं भवति मृदु तथा गोमयाद्ये निषिक्तं
तारे दत्तं त्रिभागं हृतमपि भरितं शुद्धपुष्पत्वमेति ॥ १३४ ॥

इह पुष्पशब्देन ड(द्र)म्मरूपक[4]द्रव्यमुच्यते। **तीक्ष्णं** तारेण ताडितं भरितं चेति, तस्येयं दलशुद्धिः। **तीक्ष्णमाकाशजातमित्यभ्रकसत्त्वम्। अलमिति** तालकं **लवणं** सैन्धवम्; **यवक्षारम्, सर्ज्जरसम्**; तीक्ष्णाद्यं **क्रमेण वृद्धमिति** एकद्वित्रिचतुःपञ्चषड्भागं यावत्। ततः सर्वमेकीकृत्य **अर्के** ताम्रे **द्विगुणे समरसकरणात्** प्रथममन्धमूषायां धमेत्; ततः प्रकटमूषायां **वा(दा)हयेद**[5]**र्कशेकं(शेषं)**[6] यावद् भवति। **भूयः क्षारेण** टङ्कणक्षारेण **शुद्धं भवति, मृदु तथा गोमयाद्ये निषिक्तमिति** गोमयं गोतक्रम्, **आदितः** अर्कमूलम्, वज्रीकनकमूलम्, एरण्डमूलम्, क्षीरकञ्चुकीमूलम्, पीषयित्वा सन्धानं कारयेत्, सप्ताहं यावत्; ततस्तस्मिन् तक्रनिषेकं दद्यात् यावन्मृदुर्भवति। तदेव **तारे दत्तं त्रिभागं हृतमपि भरितं** वा **शुद्धपुष्पत्वमेति**। इति पुष्पदलनियमः।

---

१. क. पित्ताद्यैः। २. ख. गन्धकायैः। ३. क. ख. पक्षं। ४. क. ०रूपक।
५. भो. bSreg Par Bya (दाहयेत्)। ६. भो. Lhag Ma (शेषम्)।

इदानीं बुद्धबोधिसत्त्वपूजार्थं गन्धधूपादिकक्षपुटमुच्यते **एलेत्यादिना**—

एला कर्पूरमाला वलघनफलिनी वायसम् अद्रिजं च
कर्कोलं सिहमूत्रोत्पलफलमृगजा रक्तदैत्यानि पूतिः ।
नागं शीतं रणं पत्रपलजललतान्यम्बरं चक्रमेतत्
पञ्चद्रव्यैस्तु गन्धं कुरु मृगशशिभिर्द्धूपपुष्पासवाद्यैः ॥ १३५ ॥ 5

इह शोधितद्रव्याणि गन्धसा(शा)स्त्रोक्तविधिना पञ्चविंशतिकोष्ठात्मके कक्षपुटे पातयेत् । प्रथमकाष्ठे **एला**, द्वितीये **कर्पूरम्**, तृतीये **मालेति** स्पृक(क्का)पुष्पम्, चतुर्थे **बलं** सिह्लकचूर्णम्, पञ्चमे **घनं** मुस्तकम्, षष्ठे **फलिनी** प्रियङ्गुपुष्पम्, सप्तमे **वायसं** कृष्णागुरुः, अष्टमेऽ**द्रिजं** शैलेयकम्, नवमे **कर्कोलकम्**, दशमे **सिहमूत्रम्**, एकादशमे **उत्पलं** कुष्ठम्, द्वादशे **फलं** जातिफलम्, त्रयोदशमे **मृगजा** कस्तूरिका, चतुर्दशमे **रक्तं** कुङ्कुमम्, पञ्च- 10 दशमे **दैत्यं** मुरा, षोडशमे **पूतिः** पुत्रकेशम्, सप्तदशमे **नागं** नागकेशरपुष्पम्, अष्टादशमे **शीतं** चन्दनम्, एकोनविंशतिमे **रणम्** उशीरकम, विंशतिमे **पत्रं** तमालपत्रम्, एकविंशतिमे **पलं** मांसी, द्वाविंशतिमे **जलं** वा(पा)लकम्[1], त्रयोविंशतिमे **लतेति**, लता कस्तूरिका, चतुर्विंशतिमेऽ**म्बरं** भेरुण्डविष्ठम्, पञ्चविंशतिमे **चक्रं** (वक्रं[2]) पिण्डोन(त)गरपुष्पम्, एवमेतद्द्रव्याणि । एभिः **पञ्चद्रव्यैर्यथारुचितैः** कक्षपुटोद्धृतैः[3] शोभनं **गन्धं** कुर्विति 15 नयमः । **मृगशशिभिरिति** कस्तूरिकाकर्पूरसहितैर्द्धूपैः पातयेत्[4], सुगन्धपुष्पैर्वासयेत्, **आसवाद्यैरिति** मद्यैः[5] सर्वैर्वक्ष्यमाणैः कर्पूरकस्तूरिकाजातीफलसहितैर्वेधयेदिति द्रव्यपात- नियमः ।

इदानीं कक्षपुटपतितानां द्रव्याणां भाग उच्यते **नेत्र** इत्यादिना—

नेत्रेन्द्वग्न्यब्धिबाणा गुणजलधिशरा हस्तचन्द्रेषु नेत्रा 20
चन्द्राग्न्यब्धीन्दुकाला युगशरनयनाब्धीषु नेत्रेन्दुलोकाः ।
एलाद्या भागसंख्याः क्रमपरिरचिताः पञ्चपञ्चप्रकोष्ठे-
द्रव्यैर्गन्धं भवेत् कक्षपुटपुरगतैः शुद्धभागैर्दिनाख्यैः ॥ १३६ ॥

इह प्रथमकोष्ठपतितद्रव्यस्य **नेत्रमिति** द्वौ भागौ, द्वितीये **इन्दुरिति** एको भागः, तृतीयेऽ**ग्निरिति**[143b]त्रयः, चतुर्थेऽ**ब्धि**[रिति] चत्वारः, पञ्चमे **बाणा** इति पञ्च, 25 षष्ठे **गुणा** इति त्रयः, सप्तमे **जलधिरिति** चत्वारः, अष्टमे **शरा** इति पञ्च, नवमे **हस्त** इति द्वौ, दशमे **इन्दुरित्येकः**, एकादशमे **इषुरिति** पञ्च, द्वादशे **नेत्रमिति** द्वौ, त्रयोदशे **चन्द्र** इत्येकः, चतुर्दशे **अग्निरिति** त्रयः, पञ्चदशे **अब्धिरिति** चत्वारः, षोडशे[6] **इन्दुरित्येकः**, सप्तदशे **काल** इति त्रयः, अष्टादशे **युग** इति चत्वारः, एकोनविंशतिमे **शर** इति पञ्च, विंशतिमे **नयन** इति द्वौ, एकविंशतिमे[7] **अब्धिरिति** चत्वारः, द्वाविंशतिमे 30 T 327

---

१. भो. Pā la Ka । २. भो. ḥKhjog Po (वक्रं) । ३. क. ख. ०दत्तैः । ४. भो. sMin Par.Bya (पाचयेत्) । ५. क. ख. महा; भो. Chaṅ (मद्य) । ६-७. ख. पुस्तके नास्ति ।

इषुरिति पञ्च, त्रयोविंशतिमे **नेत्र** इति द्वौ, चतुर्विंशतिमे **इन्दु**रित्येकः, पञ्चविंशतिमे **लोक** इति त्रयः। एवमुक्तक्रमेण **एलाद्या भागसंख्याः क्रमपरिरचिता पञ्चपञ्चप्रकोष्ठेषु; तैः पञ्चद्रव्यैर्गन्धं भवेत्।** **कक्षपुटपुरगतैः,** पुरमिति कोष्ठकं **शुद्धद्रव्यभागैर्दिनाख्यैरिति** पञ्चदशभागैः, एकद्वित्रिचतुःपञ्चभिरेकीभूतैरिति द्रव्यभागनियमो गन्धकक्षपुटे।

5 जात्याद्येलालतानां दलकलशपुरे पातनीयं क्रमेण
लाक्षासर्जं च दुग्धं पुरमपि च सितं धूपकार्येषु धूपम्।
कुर्यात् कर्पूरखण्डैः कुसुमरसयुतैर्वह्निभागैर्नखैश्च
पिष्टं तद् गन्धतोयैरपि मधुरहितां धूपवर्तिं प्रकुर्यात्॥ १३७॥

इदानीं धूपकक्षपुट उच्यते **जातीत्यादिना**—

10 इह पूर्वपातितानां कक्षपुटद्रव्याणां मध्ये जात्यादिपञ्चद्रव्याण्युद्धृत्य तेषां स्थाने यथाक्रमेणान्यानि पञ्च देयानि; तत्र **जातीति** जातीफलम् आदितः, द्वितीया **एला,** तृतीया **लता** कस्तूरिका, चतुर्थं **दलं** तमालपत्रम्, पञ्चमं **कलशं** कक्कोलम्; एषां **पुरे** कोष्ठे **पातनीयं क्रमेण**—जातीफलकोष्ठे **लाक्षा,** एलाकोष्ठे **सर्जरसम्,** लताकोष्ठे **दुःख-(दुग्ध)मिति** श्रीवासम्, दलकोष्ठे **पुरमिति** गुर्गु(ग्गु)लम्, कक्कोलकोष्ठे **सितमिति** कुन्दु-
15 रुकम्। एवं **धूपकार्येषु धूपम्,** पञ्चद्रव्यैः पूर्वोक्तभागैः **कुर्यादिति** नियमः। **कर्पूरखण्डैः** सह यत्र खण्डम्, तत्र मधु देयं खण्डेन सार्द्धं **वह्निभागैर्नखैश्च** सार्द्धम्। एवमष्टादश[1]भागैः षडङ्गो धूपो भवति, कर्पूरखण्डमधुकस्तूरिकासहितो दशाङ्ग इति धू[144a]पकक्षपुटे द्रव्यनियमः।

इदानीं धूपवर्तिरुच्यते **पिष्टं तदित्यादि**—

20 इह धूपकक्षपुटोक्तं **मधूकविरहितं** गन्धोदकेन किञ्चित् खण्डमिश्रेण पिष्ट्वा **धूपवर्तिं** तेन कुर्यान्नाराचाकाराम्, धूपनाय वस्त्रादिकं सद्धर्मप्रतिमार्थमिति नियमः।

नाभ्यादौ सिंहमूत्रे शशिगगनपुरे पातयेत् स्नानयोगे
ग्रन्थिं व्याघ्रं हरेणुं हतमपि च तथा शङ्खत्वक्त्रिविभागाः।
धान्यं मुर्वी शताह्वं दममपि मधुरी तद्वदुद्वर्तने च
25 पूर्वोक्ते चानिवृत्ते जलजमपि तनुर्ग्रन्थिपर्णं च तैले॥ १३८॥

इदानीं स्नानकक्षपुट उच्यते **नाभ्यादावित्यादिना**—

इह पूर्वकक्षपुटपातितद्रव्याणां मध्ये चत्वारि (पञ्च)[2] द्रव्याणि **नाभ्यादीन्युद्धृत्य** तेषां कोष्ठेषु यथासंख्यं स्नानकक्षपुटेऽन्यानि देयानीति। तत्र नाभिकोष्ठे **ग्रन्थिपर्णं** पातयेत्,

---

१. ग. ०ऽसादश। २. भो. INa (पञ्च)।

सिहमूत्र[1]कोष्ठे **व्याघ्रं** नखम्, **शशिपुरे हरेणुम्**, **गगनपुरे हतमिति**[2] **कचोरकम्** । **अपि च, तथा** यथा धूपकार्ये **संख(शङ्ख)मिति** नखं तस्य त्रिभागम्, एवं **त्वग्विभागास्त्रयो देयाः, स्नानयोगे** स्नानद्रव्याणां मध्ये । एवमष्टादशभागे षड्द्रव्यैः स्नानं भवति । स्नानकक्षपुटे द्रव्यनियमः ।

इदानीमुद्वर्तनकक्षपुटमुच्यते—　　5

इह स्नानकक्षपुटोक्तपञ्चद्रव्याणां मध्ये त्वग्वत्[3] त्रयो[4] भागाः पञ्चद्रव्याणां देयाः । **धान्यमिति** कस्तुम्बुरुम्, **मुर्वीति** मरुवकम्, **शताह्वेति** शतपुष्पा, **दमर्मिति** दमनकम्, **मधुरी** एषां पञ्चानां त्रयो भागाः—एवमष्टादशभागेनोद्वर्तनं भवति । उद्वर्तन-द्रव्यनियमः ।

इदानीं पक्वतैलार्थं तैलकक्षपुट उच्यते **पूर्वेत्यादि**—　　10

इह **पूर्वोक्तगन्धकक्षपुटद्रव्यगणेऽनिवृत्ते जलजमिति** नखम्, जलजमिव **तनुरिति** त्वक्, **ग्रन्थिपर्णं च**, तयोर्भागत्रयं दत्त्वा गन्धकक्षपुटपञ्चद्रव्यैः सार्द्धं सप्तद्रव्यैरष्टादशभागेन वक्ष्यमाणक्रमेण **तैलं** पचेत्, नानागन्धतैलं भवति । तैलकक्षपुटद्रव्यनियमः ।[144b]

एवं **चूर्णादिकम्**—

चूर्णे ग्रन्थि च तद्वद् भवति तनुहत पानवासे मुखे च　　15
त्वग्वोलं ग्रन्थिशङ्खं फलदलपुटपाके च हंसादिके च ।
एवं त्रिंशत्प्रभेदैः सुरचितविविधान् गन्धधूपादियोगान्
कुर्याद् द्रव्यैर्विशुद्धैः फलपुटपचितैर्वासितैर्वेधितैश्च ॥ १३९ ॥

चूर्णे चूर्णविषये **ग्रन्थि च तद्वदिति** नखवत्पञ्चद्रव्येषु देयं ग्रन्थिपर्णकम् । **तत्र(तनु)हतं पानवासे** देयं भवति, **मुखवासे च त्वग्वोलं ग्रन्थिशङ्खमिति** द्रव्यचतुष्टयस्य भागत्रयं　　20
फलपाके दलपुटपाके हंसपाके आदितो दोलाया(पा)के वक्ष्यमाणे देयमिति । **एवमुक्त**-क्रमेण **त्रिंशत्प्रभेदैस्त्रिंशद्गन्धादियोगान् सुरचितान् विविधान् गन्धधूपादियोगान्** स्नानोद्वर्तनादिकान् **कुर्याद** गन्धाद्यर्थी, **द्रव्यैः** किम्भूतैः? **विशुद्धैः फलपुटपचितैर्वासितैर्वेधितैरिति** द्रव्यसंग्रहनियमः ।

इदानीं गन्धस्य धूपपाक उच्यते **अष्टांशादावित्यादि**—　　25

अष्टांशादौ कषायो भवति दलवशात् तद्द्विगुण्योग्रधूपः
पश्चाद् द्रव्यप्रमाणो गुड इति च भवेद् वर्द्धते ग्रीष्मयोगात् ।
पादांशं शङ्खधूपं मधुकमपि सितां निर्दहेद् द्रव्यतुल्यां
पिण्डं शङ्खप्रमाणं मलयलघुचलं चन्द्रयुक्तं च तद्वत् ॥ १४० ॥

---

१. क. ख. सिंहसूत्र० । २. क. ख. हृतमिति; भो. Ha Ta (हत०) ।
३-४. क. ख. त्वग्वर्गयोः ।

इह गन्धयोगे त्रिविधं **दलम्**—अधममध्यमोत्तमम्। तत्राधमं मुस्तकम्, सै(शै)-लेयम्, उशीरकम्, वा(पा)लकम्,[1] कपित्थम्, विल्वम्, मुरा, मांसीति; एतानि दलान्य-[2]धमानि। एषां **वशाद् दलवशादादौ कषायो** गुडेन मोदितं हरीतकीचूर्णं धूपो भवति; तेन **दलमष्टांशेनादौ** धूपयेद् दिनमेकम्, ततः पुष्पवासं कृत्वा दिनद्वयम्, तृतीये दिने मध्यमदलं
5 मिश्रयेत्; **ततस्तद्द्विगुण्यो<उग्रधूप** इति। तस्य पूर्वापरस्य द्विगुण्य उग्रधूप इति। लाक्षाम्, सर्ज्जरसम्, श्रीवासम्,[3] गुग्गुलुः, कुन्दुरुकम्—एभिः पञ्चोग्रैर्गुडेन मोदितैरुग्रधूपो भवति; कषायस्य द्विगुण्यो देयः, दलस्य **पादांशमिति**।

अत्र मध्यमदलं पुष्पवर्गम्, चन्दनम्, अगुरुम्; फलवर्गम्, नखम्, त्वग्वर्गम्, निर्यास वर्गमिति। एवं दिनद्वयम् उग्रधूपेन धूपयेत्; एकान्तरितं दिनद्वयं पुष्पवासं कुर्यात्,
10 **पश्चाद् द्रव्यप्रमाणं गुडम्**, अपि च धूपेन सार्द्धं **निर्दहेत्** ग्रीष्मे; ततो **वर्द्धते ग्रीष्मयोगात्**, वार्षे द्रव्यद्विगुण्यः, हेमन्ते त्रिगुण्यो देयः, ततो गुडे दग्धे सति **शङ्खमिति** नखं गुडेन सार्द्धं **पादांशं निर्दहेद्** दिनद्वयं पूर्वविधिना। ततो **मधुकं सितां** स(श)र्करां **द्रव्यतुल्यां निर्दहेत्** पिण्डधूपेन सार्द्धम्। धूपग्रासस्याद्यावसाने केवलं निर्दहेत्। एवं गुडोऽपि प्रतिदिनं ग्रासत्रयं दग्ध्वा विश्रामयेत्, प्रतिदिनं द्रव्यस्याष्टांसं(शं) धूपं निर्दहेत्, अन्यथाऽनेनापक्वो भवति,
15 अधिकेन दग्धगन्धो भवति, अपक्वे अम्लो भवतीति नियमः।

पिण्डमिति पिण्डधूपम्, कक्षपुटोक्तं कर्पूरसहितम् उग्रद्रव्यवर्जितम्, पञ्चद्रव्यैर्मधुस(श)र्करामोदितैः पिण्डधूपम्; तदेव **संख(शङ्ख)प्रमाणमिति** द्रव्यपादांशं निर्दहेत्। तत्र पुत्रकेशं जातीफलं कर्पूरं नाभिः, अपरं कक्षपुटोक्तमुत्तमं दलं दत्त्वा, **मलयं** चन्दनम्, **लघुमित्यगुरुम्**, **चलमिति**[4] सिह्लकम्, **चन्द्रमिति** कर्पूरम्; तेन **युक्तं**
T382 20 द्रव्यत्रयम्। **तद्वदिति** पिण्डधूपद्रव्यसदृशं[5] निर्दहेद् मधुस(श)र्करासहितम्। अत्र गुडो वटिकागुडो ग्राह्यः, न द्रव्यपूर्वक इति नियमः।

पक्वं गन्धं सुपुष्पैः कतिपयदिवसं व्यासयेद् यावदिष्टं
पश्चाद् वेधं शतांशं त्रिफलशशिमदैः कारयेत् सासवैश्च।
सि(शि)ग्व्रम्बु छागमूत्रं कुसुमरससमं क्वाथयेत् पुष्पजान्तं
25 मासैकं धान्यपक्वं भवति मृगसममासवं नाभिविद्धम्॥ १४१॥

ततः **पक्वं गन्धं** ज्ञात्वा, अस्य पाकं मर्दितस्य गन्धेन करस्य तलं यदि रक्तं भवति, तदा परिपक्वम्; अथ न पक्वम्, अतो यावत् पाकं न भवति तावच्छीतधूपं न दाहयेदि[145b]ति। एतत् पक्वं गन्धं सुपुष्पैः चम्पकाद्यैः सुगन्धैः **कतिपयदिवसं** पक्षार्द्धं पक्षमेकं वा **यावद्** धूपदोषं त्यजति, तत **इष्टं** भवति। **पश्चाद् वेधं सतांसं (शतांशं)**

---

१. भो Pā La Ka (पालक)। २. भो. rZas (द्रव्याणि)।
३. क. ख. ग्रीवासं। ४. भो. Khu Ba (शुक्र); क. ख. निज्जास। ५. क. ख. बलमिति। ६. क. ख. पिण्डद्रव्यधूपसधृशं।

फल(त्रिफल)मिति जातीफलम्, **कक्कोलम्**; अथ वा[1] एला कक्कोलस्थाने, लता कस्तूरिका, **शशी**ति कर्पूरम्, **मद**मिति कस्तूरी, एषां समभागं कृत्वा शतांशेन गन्धस्य वेधं **कारयेत्** । **सासवै**रिति वक्ष्यमाणैर्मदासवैः सार्द्धं वेधं शतांशेन दद्यात् । वेधस्याष्टगुणा-सर्वमिति वेधनियमः ।

इदानीं गन्धानां मोदनार्थम् आसवमुच्यते **शिग्विति**त्यादिना—

इह गन्धशास्त्रोक्तविधिना[2] विस्तरो यत्र यादृश आसवादीनां पाकः स तत्रैव गन्धशास्त्रे ज्ञेयः । अत्र च संक्षेपत उक्तः **शिग्र्वम्बु** इति । शिग्रुरसम्, **छागमूत्रम्**, **कुसुमरस**मिति मधु, तेन **समं** तुल्यमानम् अग्निना **क्वाथयेत्**, **पुष्पजान्त**मिति मधु-पर्यन्तम्; तत उद्धृत्य नारिकेलादौ प्रक्षिप्य **धान्यराशिमध्ये मासमेकं पक्वं** भवति । **मृगसमम् आसवं नाभिविद्ध**मिति अग्निपाकावसाने नाभिरिति कस्तूरी, अनुक्तमपि कर्पूरम्, त्रिफलम्, तेन स(श)तांशं वेधं दत्वा, ततो धान्ये स्थापयेत्; ततस्तेन गन्धस्य वेधं पूर्वोक्तं कारयेदिति नियमः । सर्वस्मिन् गन्धशास्त्रे धूपपाकाय त्रिविधं धूपयन्त्रम्— समम्, डमरुकाकारम्, मूर्ध्नि सरावाकृतिः, मध्येऽङ्गुलद्वयं छिद्रं षडङ्गुलमधमं[3] कषा-योग्रधूपार्थम्; मध्यममष्टाङ्गुलोच्छ्रितम्, नखगुडपिण्डधूपार्थम्; उत्तमं[4] दशाङ्गुलं शीतधूपार्थम्, अस्य यन्त्रस्य तले वालुका[5]सहितं खर्परं चूल्लिका[6]मूर्ध्नि दत्वा द(त)प्त[7]वालि(लु)कायां धूपग्रासं[8] दत्वा, तदुपरि यन्त्रम्, यन्त्रोपरि गन्धकल्कप्रलिप्त-मङ्गुल्यर्द्धमुच्छ्रितं मृत्कपालं स्वल्पकल्के नारिकेलं[9] दत्वा धूपं निर्दहेत्, दण्डैकं दण्डार्द्धं धूपप्रमाणं ज्ञात्वा । तत उद्धृत्य कपालं फलकोपरि वस्त्रं दत्वाऽधोमुखं स्थापयेत्, येन धूपो[10] न गच्छति पाककालेऽपि कपालयन्त्रयोर्मध्ये आर्द्रवस्त्रेण वेष्टयेत् । इति धूपपाक-नियमः ।

फलपाके बीजपूरकस्य गर्भशस्य[11]मुद्धृत्य, त्वचं परिवर्त्य, मध्ये गन्धकल्कं प्रक्षिपेत्, बाह्ये वल्कलैर्वेष्टयित्वा मृदाङ्गुलैकोच्छ्रितं लेपयेत्; पश्चाद्[12] गो[13]कर्षाग्निना पुटप्रयोगेण पाचयेत्, यावत् तल्लेपोऽग्निवर्णो भवेत् । तत ऊर्ध्वं गन्धनाशो भवति, ततोऽग्नेरुद्धृत्य शीति(ती)भूतं गन्धं नाभ्यादिभिर्वेधयेत् पूर्वोक्तविधिनेति फलपाकनियमः ।

दलपुटपाकेऽपि केतकीपत्रैः [146a] पुटिकां कृत्वा मध्ये गन्धकल्कं क्षिपेत् । शेषं फलपाकवत् ।

हंसपाके स्वर्णकलशं रौप्यं वा गर्भे गन्धकल्केन लिप्तं अङ्गुलैकेनोच्छ्रितेन ताम्र-कटाहे गन्धोदकार्द्धपरिपूरिते प्लवमानं[14] कथनमनुभवन्[15] हंस इव प्लवमानो[16]हंसपाक

१. क. ख. ग. पुस्तकेषु नास्ति । २. क. ख. ०विविधा । ३. क. ख. ०गुलमध्यमं । ४. क. ख. डनुभं । ५. क. ख. ग. बालिका । ६. क. ख. चूर्णिका । ७. क. ख. दप्त । ८. भो. bDug Pa ḫDZin Pa (धूपग्राहम्) । ९. ग. नालिकेरं । १०. भो. Du Ba (धूमः) । ११. भो. ḫBras Bu (०फलम्) । १२-१३. क. ख. यश्चाङ्गो । १४. क. ख. पूर्वमानं । १५. क. ख. ०भवन्तु । १६. क. ख. पूर्वमानो ।

इति वेधादिकं पूर्ववदिति हंसपाकनियमः, हंसपाके चेति वचनात् ।

दोलापाकाद्युच्यते—

इह गन्धशास्त्रोक्तानां नवविधद्रव्याणां मध्ये अधमदलानाम् अष्टविधं कर्म शुद्धये— क्षालनम्, स्वेदनम्, उद्वर्तनम्,[1] भर्ज्जनम्, भावनम्, धूपनम्, वासनम्, बन्धनं चेति । 5 तत्र क्षालनं काञ्ज(ञ्जि)केन, स्वेदनं दोलापाकेन, उद्वर्तनं[2] गन्धोदकेन, मर्दितानां भर्जनं[3] गुडतोयादिना, भावनं शिशुछागमूत्रादिभिः, धूपनं कषायोऽग्नैः(ग्रैः), वासनं केतक्यादिपुष्पैः, वेधनं नाभ्यादिद्रव्यैरिति । अधमदलानां मुस्तकादीनां पुष्पगणे क्षालनं श्वे(स्वे)दनादिकं कुर्यात्, भर्ज्जनं वर्जयित्वा । एवं त्वग्गणे मध्यमदलानां मूलगणे काष्ठगणे पत्रगणे जीवगणे नखस्य भर्ज(र्ज)नं पुत्रकेशस्य पुटपाकः । शेषं पुष्पगणवत् ।

10 फलगणे निर्जा(र्या)सगणे द्रवद्रव्यगणे न किञ्चित् कर्म कार्यमिति । एषामुक्तद्रव्याणां चूर्णं कृत्वा भाण्डमुखे वस्त्रोपरि चूर्णं देयम्, भाण्डं गन्धोदकेनार्द्धपूर्णं चूर्णि(र्लि)कोपरि दत्वा बाष्पश्वे(स्वे)देन श्वे(स्वे)दयेत् यावच्चूर्णं स्तिमितं भवति; तत उद्धृत्योद्वमनादिकं[4] (द्वर्तनादिकं) कारयेत् । एवं पुत्रकेशस्यापि दोलाश्वे(स्वे)दः; नखस्य श्वे(स्वे)दस्थाने गोमयेन मृदा क्वाथनं भर्ज(र्ज)नम्, कषायोदके निषेचनम्; शेषं पूर्ववदिति पञ्चविधपाक-15 नियमः । शेषं गन्धशास्त्रे ज्ञातव्यं गन्धार्थिनेति ।

इदानीं गन्धादीनां गुह्यमुच्यते गुह्यमित्यादिना—

गुह्यं गन्धेषु पूतिं रसनखचपलं धूपयोगेषु गुह्यं
तद्वत् सी(शी)तं तुरुष्कं गुरुमपि शशिनं वासकार्येषु पुष्पम् ।
वेधे कर्पूरनाभि त्रिफलमदसुरा स्नानयोगे च सम्यक्
20 गुह्यं त्वग्ग्रन्थिपर्णं वनचरसहितं ग्रन्थिमुद्वर्तनं च ॥ १४२ ॥

इह गन्धादीनां शीतधूपपाककाले **गुह्यं गन्धेषु पूतिं** दद्यात् । **रसनखचपलमिति गुह्यम्** । इह धूपपाके अम्लो[146b]भूतानां गन्धानां धूपं दद्यात्, धूपयोगं कृत्वा । **धूपयोग** इति धूपपाकविषये गन्धरसं नखं सिह्लकं गुडेन मोद(शोध)यित्वा[5] दिनैकं दिनद्वयं वा यावदम्लत्वं त्यजति, ततः पिण्डादिकं दद्यादिति नियमः । अथ खरपाकेन 25 गन्धे दग्धे सति निशायां शशाङ्ककिरणैः स्पृशेद् गन्धम्; तदभावे जलतीरे स्थापयेद् यावद् दग्धदोषोपस(श)मो भवति ।

गन्धानां विनाशे कारणमुच्यते—

इह शुद्धाशुद्धद्रव्याणामेकत्वं विनाशे कारणम्, तथा तैलं शा(सा)र्द्रस्थानम्, पलालम्, क्षारद्रव्यम्, विण्मूत्रम्, मूषकसंस्पर्शः, वातम्, अत्युष्ण[6]स्थानमिति ।

१. क. ख. उद्वमनं । २. क. ख. उद्वमनं । ३. ख. भञ्जनं ।
४. क. ख. उद्वमनादिकं । ५. क. ख. मोदयित्वा । ६. क. ख. अम्युण् ।

तद्वच्छीतमिति चन्दनम्, **तुरुष्कम्**, **गुरुशशिनम्**, गुह्यम्, पुत्रकेशावसाने शीतादिधूपो देयमिति पाकान्ते नियमः। **वासकार्येषु पुष्पं** गुह्यं यावद् धूपदोषोपस(श)मो भवति। **वेध** इति वेधविषये कर्पूरम्, कस्तूरिका, **त्रिफलम्**, **मदमुरेति** कस्तूरिकासवो गुह्यं यावत् पुष्पवासदोषोपस(श)मो भवतीति गन्धयोगे नियमः। **स्नानयोगे च सम्यगिति** स्नानविषयेऽवश्यं गुह्यमिति देयं स्नानद्रव्यगण[1]मध्ये त्वग्ग्रन्थिपर्णम्। **वनचरसहितमिति** पुत्रकेशसहितम्, भागत्रयं पञ्चदशभागमध्ये दातव्यमिति नियमः। उद्वर्तनयोगे ग्रन्थिपर्णं देयम्; T 329 स्नाने यथाविभागमिति गन्धकक्षपुटविधिरुक्तः।

इदानीं नाभिभर्ता[2] गन्ध उच्यते **शुद्धाब्ज[मि]त्यादिना**—

शुद्धाब्जं द्रव्यहीनं मधुकविरहितं गन्धतोयेन पिष्टं
पक्वं धूपैः कषायोग्रसमधुकरजैर्ग्रासवृद्ध्या क्रमेण।
द्वौ ग्रासौ खण्डमिश्रौ मलयचपलयोर्लोहकर्पूरयोश्च
ग्रासस्याद्यावसाने मधुकमपि सितां निर्दहेदादिधूपात् ॥ १४३ ॥

इह यदा एकद्रव्येण गन्धराजं कर्तुमिच्छति, तदा **शुद्धाब्जमिति** नखम्, तदेव सामान्येन चतुर्विधम्—गजकर्णम्, अश्वखुरम्, उत्पलपत्रम्, वरद[3](वदर)[4]पत्रं चेति[5]। तेषु गन्धयोगजे गजकर्णाऽ[6]श्वखुरं देयम्, धूपयोगे व(ब)दरोत्पलपत्रं देयम्। अत्र वरर-(बदर)[7]पत्रं श्रेष्ठम्, तस्याभावे उ[147a]त्पलपत्रादिकं ग्राह्यम्, शुद्धं गन्धशास्त्रोक्तविधिना क्वथितं भर्जि(र्जि)तम्, गुडकषायोदकेन षि(सि)क्तं चूर्णितम्, त्रिफलादिभिः प्रलेपितं वासितमिति शुद्धम्। तदेवान्यद्रव्यैर्हीनं **मधुकमित्यासवम्**, तेन **विरहितम्**। **गन्धतोयेन पिष्टमिति** इह गन्धोदकार्थं स्वच्छतोयं गृहीत्वा एला-त्वग्-मांसी[8]-वालकं चन्दनं पोटलिकायां बद्ध्वा कर्षमेक[9]मष्टाढकतोये क्षिपेत्। ततः पादावशेषं क्वाथयेत् यावद् गन्धोदकं भवति। तेनापरमपि गन्धं पीषयेदिति नियमः। **पक्वं धूपैरिति** तदेव शुद्धनखं पिष्टं धूपपाकविधिना पक्वं धूपैः। **कषायोग्रसमधुकरजैर्ग्रासवृद्ध्या क्रमेणेति** मधुस(श)र्करया सहैकग्रासं कषायस्य प्रथमदिने **ग्रासस्याद्यावसाने मधुकमपि सितां निर्दहेदादिधूपादिति** नियमात्। प्रथमं मधुकस(श)र्कराग्रासो देयो मध्ये कषायधूपस्य पुन[10]र्ग्रासावसाने मधुस(श)र्करां निर्दहेत्, द्वितीये दिने पुष्पवासं कारयेत्, एवमेकान्तरितम् उग्रधूपस्य ग्रासद्वयं दिनद्वयेन निर्दहेत्, नखस्य ग्रासत्रयं त्रिभिर्दिनैः। ततो **द्वौ ग्रासौ खण्डमिश्राविति मलयस्य** द्वौ ग्रासौ दिनद्वये। **चपलस्यैकम्**। **लोहकर्पूरयोरपि ग्रासस्याद्यावसाने** मधुस(श)र्करापूर्ववदिति। एवमेकान्तरेण चतुर्विंशतिदिनैर्धूपैः पक्वं भवति।

---

१. ग. गुण। २. क ख. नाभिभर्ता। ३. क. ख. वरद। ४. भो. Ba Da Ra (बदर)। ५. ग. पुस्तके 'वरदपत्रं' इति नास्ति। ६. क. ०कर्णो। ७. भो. Ba Da Ra (बदर)। ८. भो. Pā La Ka। ९. भो. So gÑis (कर्षद्वयम्); क. ख. पुस्तकयोः 'कर्षमेकं कर्षद्वयं' वा नास्ति। १०. ग. पुस्तके 'पुनः' इति नास्ति।

वासं कृत्वा सुपुष्पैः कतिपयदिवसैर्गन्धतोयेन मिश्रं
अश्रा(स्रा)वे मृत्कपाले दृढपिहितमुखे वेष्टिते सिक्थवस्त्रैः ।
कृत्वा विस्तीर्णभाण्डे त्वथ धरणितले पूरिते वालुकाभिः
पक्वं षण्मासयोगाद्भवति जलगतो नाभिभर्ता सगन्धः ॥ १४४ ॥

5 ततो **वासं कृत्वा** दशदिनं **सुपुष्पैः** यावद्धूपदोषोपस(श)मो भवति । **गन्धतोयेन मिश्रमिति** पूर्वविधिना प्रत्यहं गन्धतोयं काथयेत्, शीतोदकं न दद्यात् । शीतोदकेनाम्लो भवति, तेन गन्धतोयेन मिश्रं गन्धं कृत्वा **अश्रा(स्रा)वे मृत्कपाले** बाह्यसिल्क(क्थ)**वस्त्रेण वेष्टिते दृढपिहितमुखे** तदेवापरे **विस्तीर्णे भाण्डे** जा[147b]तिकायामथ[1] **धरणितले**, अस्याभावे तस्मिन् भाण्डे प्रक्षिप्य उपरि वालि(लु)कां दद्याद् यावद्भाण्डं कण्ठपर्यन्तं
10 पूरितं भवति । तत्र **वालि(लु)काभिः पूरिते** भाण्डे सामान्यमुदकं सूर्यतप्तं देयम्, तदेव भाण्डं सूर्यतापे स्थापयेत् **षण्मासं** यावत् । एवं **पक्वं षण्मासोपयोगाद्भवति जलगतो नाभिभर्ता गन्ध** इति गन्धराजनियमः ।

इदानीं पुष्पतैलार्थं गन्धतैलाय च तिलशुद्धिरुज्य(च्य)ते कृत्वेत्यादि—

कृत्वा शुद्धिं तिलानां क्वथितदलजलैर्धूपलेपादिभिश्च
15 पश्चाज्जात्यादिपुष्पैः कतिपयदिवसं वासयेद् यावदिष्टम् ।
यन्त्रे तैलं गृहीत्वा नृप निपुणतया स्थापयेत् काचभाण्डे
स्नाने वाऽभ्यङ्गने वा भवति मदकरं पुष्पतैलं ह्यपक्वम् ॥ १४५ ॥

इह तिलान् परिपक्वान् नवान् संगृह्य **क्वथितदलजलैरिति** दलान्याम्रपत्राणि, एवं जम्बू-कपित्थ-मातुलुङ्ग-विल्वानां पञ्चवृक्षाणां पत्राणि, तैः क्वथितं जलं तैर्दलजलैर्मर्दयित्वा
20 तिलानां तुषा[2]पनयनं प्रथमशुद्धिः । ततो जालायन्त्रोपरि वस्त्रं दत्वा, तदुपरि तिलान-परभाण्डे पिहित्वा धूपयेत्, द्वितीया शुद्धिः । **लेपादिभिरिति** त्रिफलैर्लेपो देयो गन्धतोयेन पिष्टैः, आदितः सूर्यरश्मिभिः शोषयेत् । एवं **तिलानां शुद्धिं कृत्वा पञ्चा(श्चा)ज्जात्या-दिपुष्पैः कतिपयदिवसं** पक्षं वा दशदिनं वा निरन्तरं **वासयेद् यावन्**मर्दितानां[3] वासित-पुष्पगन्धमुद्वहति, तत **इष्टं** वासनं भवति । ततः कोलु(ल्हु)कयन्त्रेण **तैलं गृहीत्वा, नृप**
25 इत्यामन्त्रणम्, **निपुणतया काचभाण्डे स्थापयेत्** । तत् तैलं **स्नाने वाऽभ्यङ्गने वा भवति मदकरं पुष्पतैलं ह्यपक्वमिति** । अथ पक्वतैलं कर्तुकामः, तदा तदेव तैलं समतोयेन सुगन्धेन क्वाथयेद् यावत् तैलं फेनं मुञ्चति । ततोऽवतारणकाले अष्टांशेन गन्धद्रव्यं गन्धोदकेन पिष्ट्वा देयम्, पश्चादवतारयेद् यावत् शीतलं भवति । ततः कस्तूरिकाद्यैर्वेधं दत्वा काचभाण्डे स्थापयेत् । तदे[148a]व मदासवेन पादांशेन मिश्रितं लाक्षाभाण्डे

---

१. क. कायामध, ग. जाडिकायामथ । २. क. तुला ।
३. ग. यावतार्दितानां; भो. bsGos Pa rNams (०वासितानां) ।

सूर्यतापैः सप्ताहं तप्तं कस्तूरिकातैलं भवति। वेणुकनलिकायां पक्वं सूर्यपाकं भवति; एवं विलेपनाद्यं वेणुकनलिकायां पक्वं दिव्यविलेपनं भवति नाभ्यादिभिर्विद्धम्। एवं नानाविधं गन्धशास्त्रोक्तं गन्धादियोगं कारयेत्। अत्र संक्षेपत उक्तं भगवतेति गन्धयुक्तिनियमः।

इदानीं गुर्विणीनां प्रसवनार्थं सर्वतश्चतुस्त्रिंशतिकं यन्त्रमुच्यते भूभृदित्यादिना— 5

भूभृत्सूर्येन्दुमन्वक्षिमदनवसवो रुद्रराजाग्नयश्च
दिग्भूता रन्ध्रषट्कं तिथिजलनिधयः स्थापनीयाश्च कोष्ठे।
संख्याकोष्ठैश्चतुर्भिर्जलनिधिशिखिनो लेखयित्वा समस्तं
श्रीचक्रं मानपृष्ठे प्रसवनसमये दर्शयेद् गुर्विणीनाम् ॥ १४६ ॥

इह यदा गुर्विणीनां प्रसवनकाले गर्भस्तम्भनं भवति बाह्यदूतीदोषेण. तदा इदं 10
यन्त्रं **मानपृष्ठे** लिखेत्; मानमित्याढकम् ;तस्य पृष्ठे षोडशकोष्ठकान् कृत्वा प्रथमकोष्ठे **भूभृत्** सप्त, द्वितीये **सूर्यं** द्वादश, तृतीये **इन्दुरित्येकम्**, चतुर्थे **मनुश्चतुर्दश**, पञ्चमेऽक्षि द्वौ, षष्ठे **मदनेति** त्रयोदश, सप्तमे **वसवोऽष्टौ**, अष्टमे **रुद्र** एकादश, नवमे **राजानः** षोडश, दशमेऽ**ग्नय** इति त्रयः, एकादशे **दिगिति** दश, द्वादशे **भूता** इति पञ्च, त्रयोदशे **रन्ध्रा** इति नव, चतुर्दशे **षट्कमिति** षट्, पञ्चदशे **तिथिरिति** पञ्चदश, षोडशे **जलनिधय** 15
इति चत्वारः; **स्थापनीयाश्च**[2] **कोष्ठे** षोडशे। एषामङ्कानां चतुःकोष्ठे स्थितानां **संख्या** एकपिण्डितं **जलनिधिशिखिन** इति चतुस्त्रिंशत् सर्वत्र। एतद् यन्त्रं **लिखित्वा** समस्तं **श्रीचक्रं मानपृष्ठे प्रसवनसमये दर्शयेद् गुर्विणीनामिति** गर्भमोचननियमः।[148b]

इदानीं गर्भादिबालतन्त्रमुच्यते **योगिन्य** इत्यादि—

योगिन्योऽष्टाष्टका याः प्रकटमहितले मातरो याः प्रसिद्धा 20
गर्भाख्या वासराख्या त्रिगुणनवदशैकादशान्यास्त्रिपञ्च।
मासाख्या वत्सराख्या सकलभुवितले ताः प्रगृह्णन्ति बालं
गर्भे शूलं च पीडां प्रसवनसमयेऽप्येव कुर्वन्ति योनौ ॥ १४७ ॥

इह **महीतले याः** प्रकटाः चतुःषष्टियोगिन्यः, तास्ता (अ)ष्टाष्टका **मातरः प्रसिद्धाः**, तासां मध्ये **गर्भाख्यास्त्रिगुणनव** इति सप्तविंशतिः, **वासराख्या** दश, एकादश **मासाख्याः**, 25
अन्यास्त्रियं(प)ञ्चेति पञ्चदश **वत्सराख्यास्तास्त्रयःषष्टिः बालं गृह्णन्ति सकलभुवितले गर्भे शूलं च पीडां प्रसवनसमयेऽप्येव कुर्वन्ति योनाविति**। इह गर्भाख्यानां मध्ये　T 330
पञ्चदशाधानदिनमारभ्य पञ्चदशदिनानि यावद् गर्भशूलं **प्रकुर्वन्ति**, ततो नवमासं यावन्नव, प्रसवनकाले एका, स्तनक्षारीहारिण्यौ द्वे इति गर्भाख्यानां नियमः।

---

१. क. ख. मधु। २. क. ख. अष्ट।

जातानां बालतन्त्रं भवति दिनवशान्मासवर्षप्रभेदात्
पञ्च क्रूराः कुमाराः प्रकृतिगुणवशात् संस्थिताः पर्वसन्धौ ।
बाला(बालं) गृह्णन्ति ते वै स्वतिथिभयगतं नैव मुञ्चन्ति राजन्
तेषां शान्त्यर्थमस्मिन् प्रभवति विविधं मण्डले होमकाद्यम् ।। १४८ ।।

5 **जातानां** बालानां **बालतन्त्रं भवति दिनवशान्मासवर्षप्रभेदा**दिति ।

इह **बालतन्त्रमिति** बालचिकित्सा मातृपीडितानाम्; तत्र वासराख्यानां बलिं वक्ष्यमाणं दद्यात् । **जातानां** जन्मदिनमारभ्य दश[1] दिनं यावत् स्वस्वदिने बालानां पीडां कुर्वतीनां प्रत्येकमासवसा(शा)देकादशता, एकादशमासान् [149a] यावत् । ततः पञ्चदशानां पञ्चदशवर्षान् यावत्, तदुपरि बालकुमारत्वाभावः, षोडशमे(शे) वर्षे शुक्रच्यवना-
10 दिति नियमः ।

इदानीं **पञ्च क्रूरा** उच्यन्ते **क्रूरे**त्यादि—

इह भुवितले नन्दादितिथिभेदेन पञ्चतिथीनां सन्धिषु कौमारा आकाशादि-**प्रकृतिगुणवशात् संस्थिताः पर्वसन्धौ** । ते **स्वतिथौ भयगतं बालं गृह्णन्ति**, सर्वं सामान्य-बलिना **नैव मुञ्चन्ति** बालम् । **राजन्** इत्यामन्त्रणम् । **तेषां शान्त्यर्थमस्मिन् प्रभवति**
15 **विविधं मण्डले होमकाद्यं**[2] वक्ष्यमाणमिति क्रूरनियमः ।

इदानीं गर्भाख्याभिः पीडितानां गुर्विणोनां भैषज्यमुच्यते **कुष्ठे**त्यादि—

कुष्ठोशीरं कसेरुं तगरकुवलयं केशरं पङ्कजस्य
पिष्ट्वा शीताम्बुना मन्त्रितमपि कुलिशैर्गर्भशूलेषु देयम् ।
गर्भस्तम्भेऽष्टलोमानि ल(न)कुलशिखिनः पीषयित्वा प्रदेयं
20 दुग्धाज्यं पायसान्नं दधिगुडसहितं दीयते वासरीणाम् ।।१४९।।

इह यदा गुर्विणीनां गर्भशूलं भवति, तदा भैषज्यम्—**कुष्ठम्, उशीरम्, कसेरुम्, तगरमूलम्, उत्पलकन्दम्, पद्मकेशरम्**; एतानि द्रव्याणि **शीताम्बुना** पर्युषितेन **पिष्ट्वा अभिमन्त्रितमपि कुलिशै**रिति 'ॐ आः हूँ अमुकाया गर्भशूलं हर हर स्वाहा' इति मन्त्रः, अनेनाभिमन्त्र्य **गर्भशूलेषु देय**मिति नियमः । एवं गर्भस्तम्भे **अष्टरोमाणि**
25 **नकुलस्य, शिखिनो** मयूरस्य पिच्छं गृहीत्वा, **शीताम्बुना पिष्ट्वा,** पूर्ववद्देयान्यभिमन्त्र्य । क्षीरापहारिण्याः क्षीरवृक्षतले स्नापयेत् । सप्तमल्लिकैर्गोक्षीरपूर्णैः क्षीरभक्तेन बलिं दद्या-दिति गर्भाख्यानां नियमः ।

---

१. भो. Drug Cu (षष्टि) ।

२. भो. Khrus Dan sByin Sreg Gi Bya Ba (स्नानहोमकार्यम् ।

इदानीं वासरीणां विधिरुच्यते **दुग्धेत्यादिना**—

इह दशदिनाभ्यन्तरे गृहीतस्य बालकस्य शान्त्यर्थं **दुग्धम्, आज्यम्, पायसान्नं दधिगुडसहितं** पोलिका[1]मोदकांश्च गन्धं पुष्पं प्रदीपं[2] **बलौ दीयते वासरीणाम्,** स्नानं धूपं वक्ष्यमाणमिति वासरीणां त्रिरात्रबलिनियमः । [149b]

इदानीं मासाख्यानां विधिरुच्यते **पक्षे(पक्वे)त्यादिना**— 　　5

पक्वान्नं पञ्चभिन्नं दधिगुडसहितं पोलिकामोदकांश्च
गन्धं पुष्पं प्रदीपं स्नपनमपि दलैः पञ्चरात्रं प्रकुर्यात् ।
गोदन्तं मेषशृङ्गं मृगनखचिकुरं सर्पनिर्मोकधूपं
बालानां मासजानां कथितमपि बलिं पुष्टिहेतोः समस्तम् ॥१५०॥

इह दशदिनादूर्ध्वं मासः, तत एकादशमासान् यावत् **मासजातकानां शान्त्यर्थं** 　10
बलिं मातृणां दद्यात्, **पक्वान्नं पञ्चभिन्नमिति** घृतेन पक्वं पूरिका घृतपूरम्; सोमाली सेवाल[3]वटकानिति पञ्चभिन्नम् अपरमोदनं **दधिगुडसहितं पोलिकामोदकांश्च** । **गन्धमिति** चन्दनम्, सुगन्धपुष्पं तिलतैलेन[4] **प्रदीपं** घृतेन वा । **स्नपनमपि दलैरिति** पञ्चक्षीरवृक्षाणामश्वत्थादीनां पत्रैः किञ्चित् क्वथितोदकेन सोष्णेन बालं स्नापयेत्, **पञ्चरात्रं** यावत् समस्तं **कुर्यात्** । स्नानावसाने बालस्य धूपं दद्यात्, **गोदन्तम्, मेष-** 　15
शृङ्गम्, मानुष्यनखम्, **मृगरोमम्, चिकुरम्, सर्पनिर्मोचम्**(चकम्) । एतदेकीकृत्वा(त्य) तीव्राङ्गारेण धूपम्, देवताबलौ पूर्वोक्तगन्धधूपादिकं देयं चतुर्दिक्षु ग्राममध्ये चेति नियमो **बालानां मासजातानां कथितमपि पुष्टिहेतोः समस्तम्** ।

इदानीं संवत्सरीणां बलिरुच्यते **पञ्चान्नमित्यादिना**—

पञ्चान्नं पञ्चखाद्यं जलचरपिशितं गन्धपुष्पं प्रदीपं 　20
मद्यं पूर्वोक्तधूपं स्नपनमपि तथा दिग्बलिं दिग्विभागे ।
बालानां वर्षजानां प्रकटितमवनौ पुष्टिहेतोर्नरेन्द्र
गर्भाद् वर्षत्रिपञ्च प्रभवति नियतं योगिनीनां प्रपूजा ॥१५१॥

इह दशमासादूर्ध्वं मासद्वयं वर्षमिह गृह्यते; तस्मात् पञ्चदशवर्षाणि यावत् वर्षजातकानां मा[150a]तृपीडितानां शान्त्यर्थं संवत्सरीणां बलिं दद्यात् । **पञ्चान्न-** 　25
मिति भक्तं सितं पीतं रक्तं कृष्णं हरितं कृत्वा हरिद्रादिभिः, एतत् पञ्चान्नम् । **पञ्चखाद्यमिति** पक्वान्नं[5] पूर्वोक्तं **जलचरम्,** मत्स्यम्, मांसम्, पिशितमिति; **गन्धाद्यं**

१-२. ख. ग. भो. पुस्तकेषु नास्ति ।
३. ग. पुस्तके 'सेवालि' इति नास्ति । ४. ख. तिलेन ।
५. क. ख. पञ्चान्नं ।

पूर्वोक्तम् । **मद्यं पूर्वोक्तं धूपादिकम्;** सर्वं वंशचङ्गेडिकायां दत्वा त्रिवारान् निर्मञ्च-(ञ्छ)येत् सदीपबलिना । **दिगिति** दशदिनम् । **दशदिग्विभागे** इन्द्रादि-ईशानपर्यन्तम् अध ऊर्ध्वं बलिः ग्राममध्ये चतुःपथे दातव्येति । **बालानां वर्षजातानां प्रकटितमवनौ पुष्टिहेतोः, नरेन्द्र** इत्यामन्त्रणम् । इति संवत्सरीणां पूजानियमः ।

5 एवं **गर्भाद् वर्षत्रिपञ्चेति** पञ्चदशवर्षपर्यन्तं त्रयः(त्रि)षष्टियोगिनीनां नियतं पूजा कर्तव्या, अन्यथा बालानां शान्त्यादिकं न भवतीति योगिनीनां पूजानियमः ।

इदानीं मातृगृहीतानां दोषलक्षणमुच्यते **अङ्गेत्यादि**—

अङ्गात् क्षयोऽक्षिशूलं मुखकरचरणं पीततां याति सम्यक्
प्रश्रा(स्रा)वः पीतवर्णो ज्वर इति च भवेच्छर्दिशोषं च मूर्च्छा ।
10 ज्ञात्वा चिह्नानि तेषामपि नृप करणं मण्डले होमकार्यं
नोऽदत्ते मुञ्चयन्ति प्रकृतिगुणवशान्मातरो भूतजाश्च ॥१५२॥

इह यदा मातृभिर्गृहीतो बालको भवति, तदा तस्या**ङ्गात् क्षयो** भवति, **अक्षिशूलं** भवति, मुखकरौ चरणौ च **मुखकरचरणं पीततां याति, सम्यक् प्रश्रा(स्रा)वः पीतवर्णो** भवति, **ज्वरो** भवति, **छर्दि**र्भवतीति, **शोषं च मूर्च्छा** भवति; एतानि मातृदोष**चिह्नानि**
15 **ज्ञात्वा तेषां** बालकानाम्, **अपि**शब्दात् क्रूरग्रहगृहीतानां **मण्डले होमादिकं कार्यम्;** अन्यथा **नोऽदत्ते** बलौ **मुञ्चयन्ति प्रकृतिगुणवशात् भूतजा मातरः** पूर्वोक्ता इति चिकित्सालक्षणम् ।

इदानीं चतुःषष्टिमया कुलिकया गृहीतस्य मृत्युलक्षणमुच्यते **श्वेतेत्यादिना**—

श्वेताङ्गं यस्य सर्वं भवति नरपते स्फोटकाश्चातिसूक्ष्मा
20 वक्रग्रीवा सगात्रा स्रवति सरुधिरं वक्त्रगुह्ये गुदे च ।
त[150b]स्मिन् पूजां न कुर्याद्भवति हि लघुता मन्त्रिणां मोहितानां
मृत्युस्तस्यास्ति नूनं सुरनरभुजगै रक्षितुं शक्यते न ॥१५३॥

इह चतुःषष्टिमा कुलिका सर्वासां योगिनीनां प्रत्येकसन्धौ व्यापकरूपेणास्थिता गर्भदिनमासवर्षाणां सन्धौ । तया गृहीतस्य बालकस्य **श्वेताङ्गं सर्वं भवति; स्फोट-**
25 **काश्चातिसूक्ष्माः** सर्षपराजिकामात्रा भवन्ति; **वक्रा ग्रीवा** भवति; **सगात्रा श्र(स्र)वति रुधिरम् । वक्त्रे** वा, **गुह्ये** वा, **गुदे** वा । ईदृशं लक्षणं दृष्ट्वा **तस्मिन्** विषये **पूजां न कुर्यात्** । यदि करोति तदा **मोहितानां मन्त्रिणां** लोभाद् **लघुता** भवति । कुतः ? यतो **नूनं तस्यास्ति मृत्युः सुरनरभुजगै रक्षितुं शक्यते न** इति मृत्युचिह्ननियमः ।

इदानीं मण्डले पूजिताः सुखकरा उच्यन्ते **नागेत्यादि**—

नागा यक्षा ग्रहा येऽपि च दनुकुलजा राक्षसा वै पिशाचाः
शाकिन्यो दुष्टनागा नररुधिररता डाकिनीरूपिकाश्च ।
कुम्भा(कूष्मा)ण्डाः क्षेत्रपालास्त्वपि गणपतयः क्षेत्रवेतालसिद्धाः
सापस्माराः खगेन्द्राः परमसुखकराः पूजिता मण्डले स्युः ॥१५४॥ 5

इह **नागादिभिः** पीडितानां **नागादयः** पूजिता वक्ष्यमाणमण्डले **सुखकरा** भवन्ति। एषां लक्षणान्यनेकानि भूततन्त्रोक्तानि मुद्राबन्धेन ज्ञातव्यानि, अत्रैव वक्ष्यमाणे कियन्तीति ।

इदानीं क्रूरपूजार्थं मण्डलं मण्डलस्थानमुच्यते **क्रूराणामित्यादि**— T 331

क्रूराणां पूजनार्थं भवति नरपते मण्डलं ग्रामबाह्ये 10
वृक्षस्थाने श्मशाने सुरवरभुवने सङ्गमे वा नदीनाम् ।
हस्तं वा द्वौ चतुष्कं त्रिदशनवनृपैर्देवतानां प्रमाणै-
र्मध्ये त्वष्टारचक्रं भवति गुणवशान्मण्डलादर्द्धभागम् ॥१५५॥[151a]

इह **क्रूराणां पूजनार्थं मण्डलं ग्रामबाह्ये** भवति। तत्रैवैकवृक्षस्थाने, **श्मशाने, सुरवरभुवन** इति शून्यदेवालये, **सङ्गमे वा नदीनाम्, हस्तं वा द्वौ चतुष्कमिति**। इह 15 विभवानुरूपत एकहस्तं मण्डलम्, द्विहस्तम्, चतुर्हस्तं वेत्यारभ्य यावद् हस्तसहस्रं वा तावद् वर्तयेदाचार्यः। **त्रिदशनवनृपैरिति** इह नवदेवतानां **प्रमाणम्** एकहस्तं मण्डलम्, त्रयोदशानां द्विहस्तम्; **नृप** इति षोडशानां चतुर्हस्तम्, इत्यारभ्य यावद् विंशत्यधिकषोडशशतानां हस्तसहस्रपर्यन्तं वर्तयेत विभवतः। इह सर्वमण्डलानां **मध्ये अष्टारं चक्रं** वा पद्मं **भवति मण्डलादर्द्धभागिकम्**। 20

द्वारं चक्राष्टभागं भवति खलु तदर्द्धेन वेदी च हाराः
प्राकारा वेदिकार्द्धास्त्रिगुणमपि भवेत् तोरणं द्वारमानात् ।
वृत्तं कुण्डं त्रिभागं सितकमलमयं पूरितं श्वेतरङ्गैः
कुर्यात् श्रीपञ्चरङ्गैः स्वकुलदिशि गतं देवतानां स्वचिह्नम् ॥१५६॥

द्वारं मण्डलचक्राष्टभागम्, द्वारार्द्धे वेदिका हारभूमिश्च, पञ्चप्राकाररेखा 25 **वेदिकार्द्धेन** रत्नपट्टिकापि, **द्वारमानेन** निर्यूहं पक्षकं कपोलं चेति, **तोरणं त्रिगुणं द्वारात्** इति मण्डललक्षणनियमः ।

इदानीं शान्तिककुण्डमुच्यते **वृत्तमित्यादि**—

इह वक्ष्यमाणकुण्डानां मध्ये **वृत्तं** कुण्डग्राह्यं शान्त्यै, तदेव **त्रिभागमिति** वितस्तिद्वयं विष्कम्भम्, वितस्त्येकं गम्भीरम्; **शि(सि)तकमलमयमिति** गर्भमध्ये 30

श्वेतरजसा पद्मम्, वेदिकोपरि[1] पद्मावली,[2] बाह्येऽधः पद्मपत्राणि। **एवं पूरितं श्वेतरङ्गैः**। ततः श्वेतपद्मकर्णिकादलेषु **पञ्चरङ्गैर्देवतानां चिह्नं कारयेत्, स्वदिशि गतं** कुलवशात् पञ्चतथागतवशादिति।

वज्रं मध्येऽसि पूर्वे भवति कुलवशाद् दक्षिणे रक्तरत्नं
5 वामे श्वेतं च पद्मं शतदलसहितं पश्चिमे चक्रचिह्नम्।
आग्ने[151b]य्यां कर्तिका वै कमलदलगता दैत्यकोणेऽङ्कुशः स्याद्
वायव्ये वज्रपाशो भवति नरपते रुद्रपत्रे त्रिशूलम् ॥१५७॥

वज्रं मध्य इति इह वक्ष्यमाणे "वज्रं वा सर्वकर्मणि(सु)"(३.१२) इति वचनात् पद्मकर्णिकायां वज्रं नीलम्, विज्ञानस्कन्धः; **असिः पूर्वपत्रे** कृष्णः संस्कारः; **भवति**
10 **कुलवशात्, दक्षिणे रक्तरत्नं** वेदना; **वामे** उत्तरपत्रे **श्वेतपद्मं शतदलं** संज्ञा; **पश्चिमे चक्रचिह्नं** पीतं रूपस्कन्ध इति। आग्नेयपत्रे **कर्तिका** कृष्णा वायुरिति **कमलदलगता, दैत्यकोणे** नैर्ऋत्येऽङ्कुशो रक्तस्तेज इति, **वायव्ये वज्रपाशः**, पीतः पृथ्वीति। **रुद्रपत्रे** ईशाने **त्रिशूलं** शुक्लं तोयधातुरिति, **मध्ये वज्र**माकाशधातुर्विज्ञानेन सार्द्धमिति।

पूर्वद्वारे च खड्गं कृष्णघननिभं दक्षिणे वज्रदण्डो
15 वारुण्ये श्रीगदा च प्रभवति नियतं चोत्तरे मुद्गरश्च।
ज्ञात्वा चित्तानुसारं कुरु सुबहुविधं कालचक्रं हि यावत्
वन्ध्यानां पुत्रहेतोर्ग्रहनिहतनृणां शान्तिपुष्ट्यर्थमेतत् ॥१५८॥

पूर्वद्वारे च खड्गम्, कृष्णमीर्ष्यावज्रं क्रोधः; **दक्षिण**द्वारे **वज्रदण्डो** रक्तो रागवज्रः क्रोधः; **वारुण्ये** पश्चिमद्वारे **[श्री]गदा** पीता मोहवज्रः क्रोधः; **उत्तर**द्वारे
20 **मुद्गरः** शुक्लो मानवज्रः क्रोधः; मध्ये वज्रं द्वेषवज्रो नीलक्रोधराज इति। **ज्ञात्वा** इत्यादि **पुष्ट्यर्थमेत**दिति पर्यन्तं सुबोधम्।

इदानीं ग्रहपीडितानां स्नानविधिरुच्यते **कुम्भ** इत्यादिना—

कुम्भाष्टाभिः सरत्नैर्दलकमलमुखैः सप्तमल्लैरपक्वै-
स्तोयैः पञ्चामृताद्यैः स्नपनमपि च निर्मुञ्च(मञ्छ)नं सर्षपाद्यैः।
25 गन्धैर्धूपैः प्रदीपैर्विविधफलरसैः श्वेतपुष्पैश्च वस्त्रैः
कृत्वा पूजां विचित्रां पुनरपि च ततो होमयेच्छान्तिहव्यम् ॥१५९॥
[152a]

[1-2] ग. वेदिकापद्मावलि।

इह मण्डलदिक्षु **अष्टकलशा** वक्ष्यमाणलक्षणोपेताः **सरत्नाः** पञ्चरत्नसहिताः, वक्ष्यमाणौषध्यादियुक्ताः । **दल** इति क्षीरवृक्षपल्लवाः कमलमुखाः, तैरिति; तथा **सप्तमल्लैरिति** सप्तसरावैरपक्वैः, **तोयैः** पञ्चामृताद्यैः, तैः सहितैः, तोय-दुग्ध-दधि-घृत-मधु-इक्षुरसगन्धोदकैः; एभिः पूर्णैः सप्तमल्लैर्यथाक्रमेण **स्नपनं** **कुर्यात्** । ततोऽष्ट(ा)भिः कुम्भैर्जयविजयघटाभ्याम् **अपि**शब्दादिति । **निर्मञ्च(ञ्छ)नं सर्वपाद्यैरिति** प्रथमं पञ्चगोमयपिण्डकाभिः, ततो ज्वलत्तृणचूलि(ल्लि)काभिः सर्षपाद्यैः भक्त[1]पिण्डकादिभिरिति कुर्यादेभिर्निर्मञ्च(ञ्छ)नम् । ततो **गन्धाद्यैः पूजां कृत्वा,** मण्डलप्रतिष्ठां कृत्वा, प्रवेशयेद् मण्डले । तत्राभिषेकं दत्वा मण्डलकलशोदकेनाभिषेकं तोयादिकं कृत्वा, **ततो होमयेत् शान्तिहव्यमिति** ।

दुग्धं धान्यं तिलाद्यं(ज्यं) शरशतसमिधः पञ्चदुग्धाङ्घ्रिपानाम्
अर्घं चावाहनं चाचमनमपि तथैवार्चनं पूजनं च ।
कुर्याच्छान्त्यर्थमेतत् प्रवरभुवितले मातृभिः पीडितानां
षट्त्रिंशद्योगिनीनां भवति नरपते सर्वकालं हि पूजा ॥१६०॥

दुग्धमित्यादि सुबोधम् । अपरं यदनुक्तं तत् सर्वमभिषेकपटलोक्तविधिना कार्यमाचार्येणेति सर्वत्र नियमः ।

इति श्रीमूलतन्त्रानुसारिण्यां[2] लघुकालचक्रतन्त्रराजटीकायां
द्वादशसाहस्रिकायां[3] विमलप्रभायां[4]
रसायनादिबालतन्त्रमहोद्देशः
षष्ठः ॥६॥

(७) स्वपरदर्शनन्यायविचारमहोद्देशः

नैरात्म्यं कर्मपाकस्त्रिभवऋतुगतिर्द्वादशाङ्गप्रतीतेः
सम्भूतिर्वेदसत्यं द्विगुणितनवकाऽवेणिका बुद्धधर्माः ।
पञ्च[152b]स्कन्धास्त्रिकायाः सहज इति तथैवाजडा शून्यता च
यस्मिन्नेतद् वदन्ति प्रकटितनियता देशना वज्रिणः सा ॥१६१॥

प्रणिपत्य जगन्नाथं कालचक्रं महासुखम् ।
स्वपरे दर्शने किञ्चिद् मतमुक्तं वितन्यते ॥

---

१. क. भण्ड । २. क. ख. मूल० । ३-४. क. ख. विमलप्रभायां द्वादशसाहस्रिकायां ।

इदानीं परमादिबुद्धात् मञ्जुश्रियोदितं स्वपरदर्शनानुमतं टीकया वितन्यते **नैरात्म्येत्यादि**। इह लोकसंवृत्या विचार्यमाणः सर्वदर्शनसिद्धान्तः समानो लौकिकसिद्धये; तद्यथा—

येन येन हि भावेन मनः संयुज्यते नृणाम्।
5 तेन तन्मयतां याति विश्वरूपो मणिर्यथा॥

इति भावसंकल्पः समानः; तथा धात्विन्द्रियादिविचारोऽपि तुल्यः। व्यावहारिकं कर्तृकरणादिकं च तुल्यम्। बौद्धतीर्थिकयोर्विशेषो नास्ति[1]; शून्यतातत्त्वं प्रति विशेषः, स च नैरात्म्येत्यादि।[2]

इह **नैरात्म्यं द्विविधम्**—पुं(पुद्)गलनैरात्म्यम्, धर्मनैरात्म्यमिति। **कर्मविपाक-**
10 **स्त्रिविधः**—कायिकवाचिकमानसिकश्चेति। **त्रिभवः** कामरूपोऽरूपः। **ऋतुगतिरिति** नरकप्रेततिर्यक्मनुष्यासुरदेवानां गतिः षड्गतिः; **द्वादशाङ्गप्रतीतेः** साक्षात्[3] **सम्भूतिः** षड्गतिकानामिति। **वेदसत्यमिति** चतुरार्यसत्यम्, दुःख-समुदय-मार्ग-निरोधलक्षणं चेति। **द्विगुणितनवका** इत्यष्टादश **आवेणिका बुद्धधर्मा** वक्ष्यमाणे(णा) वक्तव्याः। **पञ्चस्कन्धा** इति रूपादयः। **त्रिकाया** इति धर्मकायादयः, **सहज**[काय][4]श्चतुर्थ इति। **तथैवाजडा**
15 **शून्यता** सर्वाकारवरोपेता प्रतिसेनोपमेति। **यस्मिन्निति** यानत्रये **एतन्नैरात्म्यादिकं देशका वदन्ति प्रकटितनियता देशना वज्रिणः सा**, बौद्धदृष्टिवसा(शा)त् सत्त्वाशयेनेति तथागतमतनियमः।

इदानीं **ब्रह्मविष्णो(ष्ण्वो)**र्मतमुच्यते **यस्मिन्नित्यादि**—

यस्मिन् वेदः स्वयम्भूर्मुखकरचरणादौ च योनिर्जनस्य
20 नान्यो धर्मोऽश्वमेधात् पर इति भवेद् देशना ब्रह्मणः सा।
कर्ताऽत्मा कर्मकालः प्रकृतिरपि गुणाः शून्यता नष्टधर्मा
कर्ता हेतुः फलस्य प्रकटितनियता देशना सात्र विष्णोः॥१६२॥

[153a]

इह **यस्मिन्** मते **वेदः स्वयम्भूर**कृतक आकाशवत्, **मुखकरचरणादौ च योनि-**
25 **र्जनस्येति**। इह ब्रह्ममुखं ब्राह्मणयोनिः, भुजौ क्षत्रिययोनिः, **आदि**शब्दादूरुद्वयं वैश्ययोनिः, पादौ शूद्रयोनिरिति। **नान्यो धर्मोऽश्वमेधादिति** इह स्वर्गसाधनेऽश्वमेधयज्ञात् **परो** नान्यो दानादिधर्मोऽस्ति इति **भवेद् देशना ब्रह्मणः सा** इत्यादि ब्रह्ममतनियमः।

---

१. ख. अस्ति। २. क. ख. नैरात्म्येति; भो. Ces Pa La Sogs Pa (इत्यादि)।
३. क. ख. ग. सकाशात्; भो. dNos (साक्षात्)। ४. भो. sKu (कायः)।

इह तदन्तर्भूते गीताधर्मे विष्णुमते, तद्यथा—कर्तास्ति, आत्मास्ति, शुभाशुभ- T 332
कर्मास्ति, कालोऽस्ति, पृथिव्यादिप्रकृतिरस्ति, सत्त्वादयो गुणाः सन्ति, शून्यता[1] नष्टधर्म-
तास्ति[2]*, न[3] पश्यती[4]त्याहुरेकीभूत इत्यादितः। कर्ता हेतुः फलस्य शुभाशुभकृतस्य
दायकोऽस्तीति। प्रकटितनियता देशना सात्र कालचक्रे विष्णोरिति वैष्णवमतनियमः।

इदानीमीश्वरमतमुच्यते षण्मार्गा इत्यादि— 5

षण्मार्गाः पञ्चतत्त्वं परपदमखिलं चापरं मन्त्रदेहं
विद्यात्मा सच्छिवत्वं त्रिविधपदगतेर्योजनं त्यागभावः।
बिन्दोर्भेदः(दं) शिवत्वं सकलतनुगतं द्वादशग्रन्थिभेदाः
एतत् सर्वं हि यत्र प्रभवति नियता देशना सा शिवस्य ॥१६३॥

इह पूर्वोक्तेन विष्णुमतेन सार्द्धं षण्मार्गादिकं कुतः? 10

'एकमूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः'।

१-२. ग. 'शून्यता नष्टधर्मता' इति नास्ति; भो. sToṅ Pa Ñid Ni mÑam Pa̤hi Chos Ñid De (शून्यता समधर्मताऽस्ति)। ३-४. क. ख. नय इयती।

* मूले टीकायां च 'शून्यता नष्टधर्मा' अथ वा 'शून्यता नष्टधर्मता अस्ति' इति पाठो लभ्यते। वैशेषिकपक्षे कथमिदं समञ्जसं स्यादिति विषये प्रयासभेदो दृश्यते; अत एव ग. पुस्तके 'शून्यता नष्टधर्मता अस्ती'ति स्थाने 'नास्ति' इत्येव पाठोऽङ्गीकृतः। टीकाया भोटानुवादे तु 'नष्टधर्मता' इति 'समधर्मता' इत्यनुवादो विहितः। किन्तु मूलं टीकां चाधृत्य स्वाभिप्रायमाविष्कुर्वता खेस्- ड्रुब- जे- महाभागेन यथास्थितं नष्टधर्मता-पाठमङ्गीकृत्यापि कथं वैशेषिकपक्षे 'शून्यता नष्टधर्मता' इत्येव वाक्यं समञ्जसमिति प्रतिपादितम्।

नित्यपरमाणुसंयोगैः सृष्टिमधिगच्छताऽपि तदुपादानकं भौतिकं जगद् अनित्यत्वाद् विनश्यत्येवात एतस्य सृष्टिजातस्य नष्टधर्मतात्वेन शून्यता समधिगता भवत्येवेति खेस् ड्रुब जे महाभागानां मतसांरांशः। भोटभाषया चायमित्थं विवृतो भवति—

"sToṅ Pa Ñid Ni dÑos Po Raṅ Grub Dus Las Yun Riṅ Du gNas Pa Yaṅ Ñams Pa̤am S̄ig Pa̤hi Chos Kyi Chod Pa Ñid yod De. dÑos Po Thams Cad rTsa Bar Thim Pa̤hi sGo Nas gCig Tu Gyur Ba La Sogs Pas. mThar S̄ig sTe Mi mThoṅ Ba̤hi Phyir Ro" (ḥGrel Chen Dri Med Ḥod Kyi ḥGrel bŚad—'Ga', page 161A).

उपरिलिखितभोटांशस्य संस्कृतानुवादः—

"स्वोत्पत्तितः दीर्घकालं यावत् स्थितानां वस्तूनां विनाशभङ्गधर्मोच्छेद्यत्वरूपा वा शून्यताऽस्त्येव, यतो हि स्वोपादाने विलीनीभूतानि एकीकरणादिभिः वस्तूनि विनश्यन्ति, अदृश्यतां च गच्छन्ति"।

इति वचनात् कर्ता आत्मा कर्म कालः प्रकृतिगुणाः शून्यता नष्टधर्मा निर्वाणं काष्ठावस्थातः[1]। एभिः सार्द्धं षण्मार्गादिकं वेदितव्यमिति नियमः*। इह शरीरे षण्मार्गाः षड्विषयेषु प्रवर्तका इति। **पञ्चतत्त्वमिति** आकाशादिधातुसमूहम्; **परपदमिति** षष्ठो ज्ञानधातुः; **अखिलमिति** सर्वधात्वेकलोलीभूतम्; **चकारादपरं मन्त्रदेहमित्यालिकाल्या-**
5 त्मकं मन्त्रतत्त्वमिति। **विद्येति** आनन्दादिकामतत्त्वम्; **आत्मेति** आत्मतत्त्वं नित्यम्; **सच्छिवत्वमिति** शिवतत्त्वं[2] सर्वव्यापि। तस्य रूपपरिवर्जितस्य त्रिविधा [153b] पदगतिः—पिण्डस्था, पदस्था, रूपस्था कायवाक्चित्तविकल्पधर्मिणो, **तस्यास्त्रिविधपदगतेर्योजनमिति**। एषां षण्मार्गादीनामुत्पादकाले योजनं मेलापक(नम्) इति, मृत्युकाले **त्यागभावः**, तेषां विघटनमित्यर्थः। **बिन्दोर्भेदं शिवत्वमिति** इह शुक्रबिन्दोर्भेदं
10 च्यवनसुखावस्थालक्षणम्, तदेव शिवत्वम्; **सकलतनुगतमिति** चराचरव्यापि। **द्वादशग्रन्थ(न्थि)भेदा** इति इह प्राणिनां तनुगता द्वादशराशयो ग्रन्थिशब्देनोच्यन्ते, तेषां द्वादशराशीनां भेदा वर्षायन[3]कालयुगऋतुमासपक्षदिनघटिकापाणीपलश्वासा इति। **एतत् सर्वं हि यत्र** सिद्धान्ते **प्रभवति नियता देशना सा शिवस्य**। [इति] शिवमतनियमः।

---

१. क. ख. कायावस्थातः।

२. क. ख. शिवत्वं; भो. Si Baḥi De Ñid (शिवतत्त्वं)। ३. ख. वर्षापन।

*. वैष्णवमतानुबन्धेन (शैव)मतस्य कथं समुत्थानमिति प्रश्नं समादधता 'एकमूर्तिस्त्रयो देवा' इत्याद्युक्तं टीकायाम्। तं स्फुटीकुर्वता खेस्-ड्रब-जे- महाभागेनोक्तं यत् गीतावैष्णवमते कर्ताऽस्तीत्यनेन परमाणुकर्तृवादः फलदायकत्वेन चेश्वरकर्तृवादोऽङ्गीकृतः, तदनुरोधेन शैवमतस्य समुत्थानं प्रसङ्गसङ्गतमेवेति। भोटे यत् तदित्यम्—

"ḥDir Deḥi Naṅ Du ḥDus Pa gLuḥi Chos sMra Ba Lha Khyab ḥJug Gi rJes Su ḥJug Paḥi Bye Brag Pa Daṅ Rigs Pa Can Pa Dag gi ḥDod Pa ḥDi lTa sTe. Byed Pa Po Yod Pa Daṅ Ses Pa Ni ḥJig rTen Thams Cad rTsom Pa Po rDul Phran rTag Pa Cha Med Yod Pa La bŚad dGos Kyi. Thams Cad Byed Pa Po Tshaṅ Paḥam Khyab ḥJug Yod Pa Daṅ Zer Ba Don Ma yin Te. Ḥog Tu ḥDi Dag ḥGog Paḥi sKabs rDul Phran Cha Med Byed Pa Po yin Pa La dGag Pa gSuṅs Kyi Khyab ḥJug Byed Pa Po Yin Pa La dGag Pa Ma gSuṅs Paḥi Phyir Ro." (ḥGrel Chen Dri Med Hoḍ hGrel bŚad—'Ga', page 161A).

उपरिलिखितभोटांशस्य संस्कृतानुवादः—

"अत्र अस्मिन् संगृहीतेषु गीताधर्मवादेषु वैष्णवेषु वैशेषिकनैयायिकयोर्यद् अभिमतम् तत् कर्ता अस्तीति सर्वलोकस्य रचयिता नित्यनिरवयवपरमाणुः अस्तीत्यर्थकम्, न तत्र सर्वकर्ता ब्रह्मा वा विष्णुर्वा अस्तीति अभिमतम्; अत एवाग्रे तयोः खण्डनावसरे निरवयवपरमाणोः कर्तृत्वमेव दूषितम्, नैव तत्प्रसङ्गे विष्णोः कर्तृत्वं खण्डितम्"।

नास्तीशः कर्मपाकोऽपि च गुणविषयान् भूतवृन्दं हि भुङ्क्ते
तस्याभावे फलं न स्फुटममरगुरोर्देशना वेदितव्या ।
कर्ता(र्त्री) सृष्टं समस्तं सचरमचरजं तायि(जि)नां भुक्तिहेतोः
स्वर्गस्तस्य प्रतोषाद् भवति खलु नृणां देशना रह्मणः सा ॥ १६४ ॥

इदानीं लोकायतमतमुच्यते **नास्तीत्यादि**— 5

इह देहिनां **नास्तीशः**, कर्ता नास्तीति; **कर्मपाकोऽपि च** नास्ति । **गुणविषयानिति** गुणाः सत्त्वादयः, विषया गन्धादयः; **भूतवृन्दमिति** पृथिव्यादिकम्, तान् **भुङ्क्ते; तस्य** भूतवृन्दस्या**भावे** मरणान्ते कर्मफले (**फलं**) **न** । हरीतकीगुडादिसंयोगान्मदिराशक्तिवत् भूतानां संयोगशक्तिः, **तस्याभावे न** कश्चित् परलोकं कायोऽस्तीति **स्फुटममरगुरोर्बृह-स्पतेर्देशना वेदितव्येति** लोकायतमतनियमः । 10

इदानीं म्लेच्छतायि(ज़ि)नां[1] मतमुच्यते **कर्ते**(**र्त्रे**)त्यादि—

इह **कर्ता**(**र्त्री**) रह्मणा[2] (रहमानेन) **सृष्टं समस्तं सचरं** जङ्गमम्, **अचरं** स्थावरं वस्तु । **तायि(जि)नामि**[3]ति म्लेच्छानां श्वेतवासिनां **भुक्तिहेतोः** । **स्वर्गस्तस्य** रह्मणः[4] **प्रतोषात्**, अप्रतोषान्नरको **भवति खलु नृणां रह्मणः**[5] । **सा** पूर्वोक्तक्रियेति तायि(जि)-[6] मतनियमः ।[154a] 15

इदानीं क्षपणकमतमुच्यते **त्रैकाल्यमित्यादिना**—

त्रैकाल्यं द्रव्यषट्कं नवपदविहितं जीवषट्कायलेशाः
पञ्चान्ये सन्ति काया व्रतसमितिगतिर्ज्ञानचारित्रभेदाः ।
जीवः कायप्रमाणो ह्यपरिमितभवैर्ब्रह्मचर्येण मोक्षो
यस्मिन् मोक्षप्रमाणं ह्युपरि निगदितं देशना सा जिनानाम् ॥१६५॥ 20

इह क्षपणकसिद्धान्ते **स्याद्वादे** द्रव्यपर्यायाभ्यां नित्यानित्यव्यवहारः । तत्र **त्रैकाल्य-मिति** अतीतमनागतं वर्तमानं चेति; **द्रव्यषट्कमिति** जीवः, पुद्गलः, कालः, आकाशम्, पुण्यम् (धर्मः), पापं (अधर्मः) चेति । एषां मध्ये जीवः काल आकाशवत् (आकाशं)[7] नित्यम्; **नवपदविहितमिति** जोवाजीवाश्र(स्र)वसंवरवर्जनम्, (निर्जर)बन्धमोक्षगत्यागतिश्चेति; **जोवषट्कायलेशा** इति पृथ्वीकायलेशाः(श्या), अप्कायलेशाः(श्या), तेजकायलेशाः-(श्या), वायुकायलेशाः(श्या), वनस्पतिकायलेशाः(श्या), त्रश(स)कायलेशाः(श्या) इति 25

१. भो. sTag gZig (ताज़िनां) । २. क. ख. ब्रह्मणा, ब्रह्मणः; भो. Rahma Ṇa (रह्मण) । ३. भो. sTag gZig (ताजिनां) । ४. क. रक्षणः; ख. ब्रह्मणः; भो. Rahma Ṇa (रह्मण) । ५. क. रक्षणः; ख. ब्रह्मणः; भो. Rahma Ṇa (रह्मण) । ६. भो. sTag gZig (ताजि) । ७. भो. Nam mKhaḥ (आकाशम्) ।

जीवानां षट्कायलेशाः(श्या)। **पञ्चान्ये सन्ति काया** इति आहारिकः कायः, ज्योतिः-कायः, ने(नै)सर्गिककायः, उपपादुककायः, चरमकायश्चेति जीवानाम्। **व्रतसमितिगति-ज्ञानचारित्रभेदा** इति क्षपणकानां व्रतानि पञ्च—अहिंसा प्रथमम्, द्वितीयं सत्यम्, तृतीयं दत्तादानम्, चतुर्थं ब्रह्मचर्यम्,पञ्चमं सर्वपरिग्रहपरित्याग इति; **समितयः** पञ्च—
5 ईर्यासमितिः, भाषासमितिः, पर्येषणासमितिः, आदाननिक्षेपणसमितिः[1], निकटप्रतिष्ठाप-नासमिति(उत्सर्गसमिति)रिति; **गतिभेदाः** पञ्च—नरक-तिर्यक्-मनुष्य-देव-मोक्षगति-श्चेति; **ज्ञानभेदाः** पञ्च—मतिः, श्रुतिः (श्रुतः), अवधिः, मनःपर्येषणम् (पर्यायः[2]), कैवल्यज्ञानं चेति। **चारित्रभेदास्त्रयोदश**—व्रतभेदाः पञ्च, समितिभेदाः पञ्च, कायगुप्तिः, वाग्गुप्तिः चित्तगुप्तिश्चेति। इत्येतन्मोक्षमार्गमर्हद्भिः प्रोक्तम्। **जीवः कायप्रमाणः।**
10 **अपरिमितभवैर्नित्यजीवे न मोक्षः। यस्मिन्** सिद्धान्ते **मोक्षप्रमाणं**[3] **ह्युपरि** त्रैलोकस्य निगदितं पञ्चचत्वारिंशद्योजनलक्षं छत्राकारम्, **सा देशना जिनानामिति** क्षपणकमत-नियमः। [154b]

इदानीं तीर्थिकानां मतस्य युक्तिविचारेण दूषणमुच्यते **वेद** इत्यादि—

वेदोऽसौ न स्वयम्भूस्त्रिभुवननिलये वेदशब्दोऽर्थवाची
15 ब्रह्मा वक्त्रैश्चतुर्भिः प्रकटयति पुरा वेदशब्देन चार्थम्।
शब्दस्यार्थोऽप्यभिन्नस्त्वथ दहति मुखं किन्न शब्दोऽग्निरुक्तः
तस्माद् वै देशकोऽप्यस्त्यविदितविषयेऽनागतार्थेऽप्यतीते ॥ १६६ ॥

इह युक्त्या विचार्यमाणो **वेदः स्वयम्भूर्न** भवति। कुतः? आह—वेदशब्दस्यार्थ-वाचकत्वात्। इह यः **शब्दोऽर्थवाची** स कण्ठताल्वादिप्रयत्नेन जनितो यस्मात्, तस्मान्न[4]
20 स्वयम्भूरिति सिद्धम्।

अथ नायं वेदशब्दः, अन्यो वेदः कर्णविवरान्तरे सर्वशब्दार्थैकलोलीभूतो नित्यः, तस्यायमभिव्यञ्जक इति सिद्धम्। अत आह—इह यदि सर्वशब्दार्थैकलोलीभूतत्वेनाव-स्थितो नित्यो वेदस्तदा घट[5] इत्युक्ते सति कर्णविवरान्तरे कोलाहलेन भवितव्यम्; न चैवम्; तस्मादियं प्रतिज्ञा वृथा—नित्यः शब्दोऽपरोऽस्ति व्यापको**ऽर्थस्याभिन्नः।** यदि
25 शब्दार्थयोरेकत्वम्, तदा **अग्निशब्द उक्तः स्वमुखे(खं) किं न दहति?** तस्मान्न वेदस्य नित्यत्वम्, नार्थेन सहैकत्वमिति सिद्धम्। किञ्चान्यत्; इह किल श्रूयते—यदा वेदाभावो भवति, म्लेच्छैर्वेदधर्मे उच्छादिते सति, तदा **ब्रह्मा वक्त्रैश्चतुर्भिः प्रकटयति पुरा वेद-शब्देन चार्थः(र्थम्),** 'इन्द्रः पशुरासीत्' इत्यादिपाठेनेति। अतोऽर्थोऽन्यो वेदोऽन्य इति

T 333

१. भो. bLaṅs Pa Mi ḥDor Ba (आदानानिक्षेपण); "ईर्याभाषैषणादान-निक्षेपोत्सर्गाः समितयः" (तत्त्वार्थसूत्र ९.५)। २. "मतिश्रुतावधिमनःपर्यायकेवलानि ज्ञानम्" (तत्त्वार्थसूत्र १.९)। ३. "तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात्" (तत्त्वार्थसूत्र १०.५)। ४. ख. पुस्तके 'तस्मात्' इति नास्ति। ५. क. ख. पट।

सिद्धम्। तस्माद् **देशको ब्रह्माऽस्ति, अविदितविषयेऽनागतार्थेऽ[प्य]तीत** इति देशकः सिद्धः। आसीत् पाठाद् मुखपाठात्[1] कृतकः सिद्धः।

वेदो नाकाशतुल्यः कृतक इह मुखोच्चारितः स्थानभेदात्
युक्त्या प्रादेशिकश्च द्विजमुखपठितः सर्वगोऽन्ये पठन्ति।
यस्मात् शूद्रादिजातिः पठति लिखति नासर्वगो वेद एष- 5
स्तस्माद् वेदः प्रमाणं न हि भवति नृणां ज्ञानिनां पण्डितानाम्॥१६७॥
[155a]

अतो **वेदो न आकाशतुल्यः कृतक इह मुखोच्चारितः स्थानभेदा**दिति नियमः। **युक्त्या प्रादेशिकश्च द्विजमुखपठितः सर्वगोऽन्ये पठन्ति। यस्माच्छूद्रादिजातिः पठति लिखति नासर्वगो वेद एषः; तस्माद् वेदः प्रमाणं न हि भवति नृणां ज्ञानिनां पण्डिता**- 10 **ना**मिति वेदः कृतकः सिद्धः संक्षेपतः। विस्तरेण प्रमाणशास्त्रे ज्ञेय इति मञ्जुश्रियो नियमः।

इदानीं पूर्वोक्तं ब्राह्मणादीनां योनिदूषणमुच्यते—

इह किल ब्रह्ममुखं ब्राह्मणानां योनिः, तदुत्पन्नत्वादिति। एवं भुजौ क्षत्रियाणां योनिः। आदिशब्दाद् ऊरुद्वयं वैश्यानां योनिः, पादद्वयं शूद्राणां योनिः; एवं चत्वारो 15 वर्णाः। एषां चतुर्णामन्तिमो वर्णः पञ्चमः चण्डालानाम्; तेषां का योनिर्न ज्ञायते ब्राह्मणै- स्तावदिति। किञ्चान्यत्। इह ब्रह्ममुखाद् ब्राह्मणा जाताः, किल सत्यम्? अतः पृच्छामि—किं ब्राह्मण्ये(ण्यो)ऽपि ततो[2] जाताः, यदि स्युस्तदा भगिन्यो भवन्ति, एकयोनि- समुत्पन्नत्वादिति। एवं क्षत्रियादीनामपि विवाहं(हो) भगिन्या सार्द्धं भवति? कथम्? अथ भवति, तदा म्लेच्छधर्मप्रवृत्तिर्भवति। म्लेच्छधर्मप्रवृत्तौ जातिक्षयः, जातिक्षयान्नरक- 20 मिति न्यायः।

अपरमपि विचार्यते—

इह यद्येकः स्रष्टा[3] प्रजानाम्, तदा कथं चतुर्वर्णा भवन्तीति? यथा एकस्य पितुश्चत्वारः पुत्रास्तेषां न पृथक् पृथग् जातिः, एवं वर्णानामपि। अथ ब्रह्मणो मुखादि- भेदेन भेदः, तदा स एव युक्त्या न घटते। कथम्? यथा उदुम्बरफलानां मूलमध्याग्र- 25 जातानां भेदो नास्ति, तथा प्रजानामपि। अपरोऽपि श्वेतरक्तपीतकृष्णवर्णभेदेन भेदो न दृश्यते; तथा धात्विन्द्रियसुखदुःखविद्यागमादिभिर्भेदो न दृश्यते यस्मात्, तस्माज्जाति- रनित्ये(रनियते)[4]ति सिद्धम्। एवमश्वमेधादियागफलं शुकेन[5] दूषितम्; तद्यथा—

१. क. ख. पुस्तकयोर्नास्ति।

२. ख. तनो। ३. क. ख. श्रेष्ठाः। ४. भो. Nes Pa Med Pa (अनियता)।

५. ग. शुक्रेन।

"यूपं छित्वा पशुं हत्वा कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गो नरकः केन गम्यते ॥"

इति [1]शुकवाक्यं प्रसिद्धम् । तस्मान्न वेदः स्वयम्भूः, न मुखादियोनिर्जनस्य, नाश्वमेधात् परतो धर्मोऽन्य इति; सर्वप्रलापं निरर्थकं विचार्यमाणमिति ब्रह्ममतं वैष्णवमतमीश्वरेण
5 सार्द्धं दूषणीयमिति ।

इदानीमीश्वरमतस्य दूषणमुच्यते अस्तीत्यादि—

अस्तीशः सर्वकर्ता यदि स च जगतः कर्मभोक्ता न चान्यः
नापीशः कर्मकर्ता यदि स च न भवेत् सर्वकर्ता समन्तात् ।[155b]
कर्ताऽन्यः प्रेरितः सन् यदि परमपराधीनता कर्तुरेषा
10 तस्मात् कर्ता न चेशोऽशुभशुभफलदः प्राणिनां कर्म मुक्त्वा ॥१६८॥

इहास्तीश्वरः **सर्वकर्ता यदि** भवति, तदा **कर्मभोक्ता न चान्य** इति । कथम् ? अन्यो वटकमश्नाति, अन्यः पिपासया म्रियते । न चैवम् । यः करोति स कर्ता, यत् क्रियते तत् कर्म; तस्य कृतस्य कर्मणः फलभोक्ता कर्मकर्ता । न च कर्मणा विना कर्ता सिद्धयति; यथा कुम्भं करोतीति कुम्भकारः । एवं यः कर्म करोति स कर्तेति न्यायः । आह—
15 **नापीशः कर्मकर्ता**, स्वतन्त्रः प्रयोजक इति । इह **यदि कर्मकर्ता न भवति**, तदा **सर्वकर्ता समन्तादि**ति निरर्थकम् । इह **कर्ता** यदि **प्रेरितः सन्** कर्म करोति, तदा **कर्तुः पराधीनता** । यस्य पराधीनता तस्य प्रयोजकः कथं विरुद्धकर्मणि कृते सति निग्रहं न करोति; स्वतन्त्रतया विना, स्वतन्त्रता ईश्वरेण व्याप्ता । एवं कर्मफलाभावः कर्तृवादिनां सिद्धः; न चैवम्; **तस्मात् कर्ता न** कश्चिद् **ईशोऽशुभशुभफलदः प्राणिनां**[2] **कर्म मुक्त्वे**ति स्वकर्म-
20 फलोपभोगः सिद्धः कर्ता[रं][3] विना[4] ।

इदानीं स्वतन्त्रस्य कर्तुः परापेक्षिकत्वमुच्यते पृथ्वीत्यादि—

पृथ्वीतोयाग्निवातार्णव इह यदि खे कर्तुरादौ न सन्ति
द्रव्याभावे न विश्वं विषयविरहितः सर्वकर्ता करोति ।
न प्रत्यक्षं परोक्षं विषयविरहितस्यास्य कर्तुः प्रमाणं
25 संयोगादेव सर्वं भवति नरपते नेच्छया कर्मरूपम् ॥ १६९ ॥

इह यदि खे आकाशे पृथिव्यादिपरमाणवो **न सन्ति कर्तुरादौ**, तदा **द्रव्याभावे न विश्वं करोति** । **विषयविरहितो** निष्कलः, **सर्वकर्ता** कथम् ? अस्य विषयविरहितस्य **कर्तुः** साधकं **न प्रत्यक्षं परोक्षं प्रमाणं** यस्मात्, तस्माद् द्रव्य**संयोगादेव सर्वं** विश्वं चराचरं **भवति, नेच्छया कर्तुः कर्मरूप**मिति न्यायः; इतीच्छाप्रतिषेधः कर्तुः ।

---

१. ग. शुक्र० ।
२. ख. प्रणिधान । ३-४. भो. Byed Pa Po Med Par (कर्तारं विना) ।

इदानीं प्रतीत्योत्पाद उच्यते **संयोगादित्यादि**—

संयोगादिन्दुकान्तेर्भवति च सलिलं दर्पणे वस्तुबिम्बं
जिह्वाश्रा(स्रा)वोऽम्लहेतोः स्वरवत इतरः शुद्धबीजाङ्कुरः स्यात् ।
कान्ताच्चायःशलाकाभ्रमणमपि भवेन्नेच्छया किञ्चिदेषां
वस्तूनां शक्तिरेषा त्रिभुवननिलये निर्मिता केनचिन्न ।। १७० ।। 5

इह सर्ववस्तूनां संयोगादुत्पादः—इदं प्राप्य इदमुत्पद्यते । **संयोगादिति** चन्द्रकिरण-संयोगाच्चन्द्रकान्तेर्भवति च सलिलम्, चकारात् सूर्यकान्तेरग्निर्भवति । **दर्पणे वस्तु**संयोगात् **वस्तु**प्रति**बिम्बो** भवति । अन्यस्याम्लभक्षणसंयोगादन्यस्य **जिह्वाश्रा(स्रा)वो** भवति, **अम्लहेतोः** सकाशादिति । कूपादौ स्वरवसंयोगात् प्रतिरवो भवति । **शुद्धबीजेऽङ्कुरः स्यात्**, पृथ्वीतोयादिसंयोगादिति । **कान्तादिति** कान्तपाषाणात् **अयःस(श)लाकाभ्रमणं** 10 **भवति**, संयोगादिति । **नेच्छया किञ्चिदेषां वस्तूनां** वस्तु भवति, किन्तु **वस्तूनां शक्तिरेषा । त्रिभुवननिलये निर्मिता केनचिन्न**ेति प्रतीत्योत्पादः सिद्धः ।

आह—इह कारणेन विना कार्यं न भवति यस्मात् तस्मात् कारणमस्तीति, अत ईश्वरादिकं सिद्धमिति ।

आह—इह कारणे कार्यं यद् भवति, तत् किं सत्कार्यम्, असद् वा? कारणे 15 सत्कार्यं न भवति, विद्यमानस्य घटस्य मृदादयः कारणभूता न भवन्ति, सत्त्वात्; असत्कार्यं न असत्त्वात्, कूर्मरोमवत्, तथा पटस्य [त]न्तु[तु]रीवेमादयः कारणभूता न भवन्ति । उभयात्मकं कार्यं न भवति, परस्य(परस्पर)विरोधात् । यत् सत् तदसन्न भवति, यदसत् तत् सन्न भवति, विरोधात् । अतो न सत्कार्यम्, नासत्कार्यम्, न सदसत्कार्यं[1] कारणे भवतीति सिद्धम् । 20

आह—इह कारणस्य प्रतिषेधेन कार्यस्यापि प्रतिषेधो भवतिः उभयप्रतिषेधात् सर्वाभाव इति सिद्धम् ।

आह—इह सर्वाभावो न, परापेक्षिकत्वादिति[2] । इह कारणे यत् कारणत्वं तत् कार्यमपेक्ष्य परिकल्प्यते, कार्यं च कारणमपेक्ष्य; एवं परापेक्षिकत्वादुभयोरपि कारणत्व-प्रसङ्गः । उभयस्य कारणत्वात् कार्याभावः, तदभावे कारणाभावः, कारणस्य[156b] 25 कार्यापेक्षिकत्वाद् अनियतत्वप्रसङ्गः[3] । तस्माद् अनियतत्वाद्[4] अकारणत्वप्रसङ्गः । एवं सर्वेषामीश्वरादीनां कारणानाम् अनियतत्वम्[5] अकारणत्वं सिद्धम् । T 334

आह—नापेक्षिका सिद्धिः कारणस्य च; यत् कारणं तत् कारणमेव, यत् कार्यं तत् कार्यमिति सिद्धम् ।

---

१. ग. पुस्तके नास्ति । २. ख. परोक्षिकत्वात् । ३. क. ख. ग. अनित्यत्वप्रसङ्गः; भो. Nes Pa Med Pa Nid (अनियतत्व) । ४. क. ख. ग. अनित्यत्वाद् । ५. क. ख. ग. अनित्यत्वम् ।

आह—इह तवेच्छातः सिद्धिर्न ममेति वैषमिकत्वम्। यदीच्छातः सिद्धं भवति, तदा ममापीच्छातः। यत् तव[1] सत्[2] तद् ममासत् सिद्धम्, युक्तिविर्वाजतत्वात्।

आह—आप्तागमादस्माकं समय एषः। समयोऽसिद्धः। समय इति वक्तुं न लभ्यते, उक्तं शास्त्रविद्भिरिति।

5 आह—कदाचिद् युक्तिरुच्यते। इह उपादानकारणात् सर्वसम्भवाभावात् शक्तस्य शक्यकरणात् सत्कार्यसिद्धिरिति।

आह—इह युष्माकं हेतुर्वृथा। कथम्? यदि तव पक्षस्य (पक्षः) साधकलक्षणप्राप्तः, तदा ममापि पक्षं साधयिष्यति। अथ दूषणलक्षणप्राप्तस्तव पक्षस्य (पक्षः), तदा ममापि पक्षं दूषयिष्यति, यथाग्निरुभयदाहको नासावेकस्येति।

10 इह यथा शब्दवादिनां प्रतिज्ञा—नित्यः शब्दः; को हेतुः? अमूर्तत्वादिति। को दृष्टान्तः? आकाशवत्; यथा आकाशममूर्तत्वान्नित्यम्, तथा शब्दोऽपि यस्मात् तस्मात् शब्दो नित्यः सिद्ध इति।

आह—नेयं प्रतिज्ञा, परोऽपि वक्ष्यति—अनित्यः शब्दः। को हेतुः? कृतकत्वादिति। को दृष्टान्तः? घटवत्; यथा घटो मृद्दण्डचक्रसूत्रपुरुषहस्तव्यायामात् कृतकः, 15 तथा शब्दोऽपि कण्ठताल्वादिभिः प्रयत्नतो जनितो यस्मात् तस्मादनित्यः शब्दः सिद्धः। अतो हेतुव्यपदेशमात्रतः कार्यसिद्धिर्न भवति। यस्तु याथातथ्यं ब्रूयात्, तत् प्रमाणं स्यान्न हेतुव्यपदेशत इति। एवं हेतुर्वृथा। अन्यच्च; साध्यानां प्रतिज्ञाविरोधेन हेतुः साधको न भवति। इह यस्मिन् काले प्रतिज्ञा तस्मिन् काले हेतुर्नास्ति; यस्मिन् काले हेतुस्तस्मिन् काले प्रतिज्ञा नास्ति। अथ कस्यासौ हेतुः प्रतिज्ञया विना अयुगपद्धर्मित्वात्। 20 यस्मिन् काले 'प्र'कारस्तस्मिन् काले न 'ति'कारो 'ज्ञा'कारश्च। एवं पकाररेफाकाराः, यथा 'प्र'कारस्याक्षराक्षरस्य। न ह्यजातेन मृतेन वा पुत्रेण पुत्रकार्यं कर्तुं शक्यते, एवं हेतुनापि। तस्मात् कारणोपलम्भात् कार्यं न भवति, अहेतुतः सिद्धत्वात्। अहेतुत इति हेतुः कारणमित्यनर्थान्तरम्। एवं न कारणे कार्यम्, नाप्यहेतुतः कार्यं भवति; अतः कार्यं स्वतो न भवति, परतो न भवति, उभयतो न भवति, अहेतु[157a]कं न भवतीति सिद्धं 25 कर्तृकारणनित्यदूषणमिति।

इदानीमात्मनो दूषणमुच्यते यद्यीत्यादि—

यद्यात्मा सर्वगः स्यादनुभवति कथं बन्धुविश्लेषदुःखं
नित्यश्चायं यदि स्यान्मदनशरहतोऽवस्थतां किं प्रयाति।
यद्यासीत् सक्रियश्च व्रजति कथमिमां मूढतां सुप्तकाले
एवं वै सर्वगः स्याद् विभुरपि च पुरा सक्रियोऽयं न चात्मा ॥१७१॥

१-२. ख. यत् तदसत्।

इह **यद्यात्मा सर्वगः स्यादनुभवति कथं बन्धुविश्लेषदुःखमिति**। इह य आत्मा सर्वगः स एको भवति, तस्य बन्धुविश्लेषदुःखं न भवतीति। एकसत्त्वस्य दुःखेन सर्वसत्त्वानां दुःखं भवति, आत्मनः सर्वगत्वादिति। अथानेकात्मानः, तदा अनेकात्मनां सर्वगत्वाभाव इति। **नित्यश्चायं यदि स्याद् [1]मदनशरहतोऽवस्थतां किं प्रयातीति**। इह यो नित्यस्तस्यावस्थान्तरं नास्ति, विकाररहितत्वादिति, तत् कथमिमां कामावस्थां दशविधां मदनशरहतो गच्छतीति; तस्मादात्मनाऽनित्येन भवितव्यम्, विकारसंयोगादिति। **यद्यासीत् सक्रियश्च व्रजति कथमिमां मूढतां सुप्तकाले** इति। इह यद्यासीत् काले [2]जाग्रदवस्थालक्षणो सक्रियः, चकारान्नित्यश्च, तदा सुप्तकाले मूढतां क्रियारहितः(ततां) कथं व्रजतीति। **एवं वै** एकान्तं विचार्यमाणः **सर्वगः स्यान्न विभुरपि च** स्वामी नित्यो न **सक्रियो यन्न** चात्मा इति सिद्धम्।

इदानीं बुद्धभगवतः प्रवचनमुच्यते **नास्त्यात्मे**त्यादि—

नास्त्यात्मा सम्भवो वास्त्यशुभशुभफलं चास्ति कर्त्रा विहीनं
गन्ता नास्त्यस्ति मोक्षाय गमनमखिलं चास्ति बन्धो न बध्यः।
भावोऽभावोऽपि चास्ति क्षणिकविरहितो निःस्वभावो भवोऽस्ति
एतन्मे सत्यवाक्यं सुरफणिवचनैः संग्रहैर्हन्यते न ॥१७२॥

इह प्रतीत्यसमुत्पन्नधर्माणां निरोधादुत्पाद उत्पादान्निरोधः। एवं निरोधधर्माणा**मात्मा नास्ति**, आत्मी[157b]याभावात्। उत्पादधर्माणां **सम्भवोऽस्ति**, पुनर्जन्मग्रहणात्। स्वाध्यायादिदृष्टान्तैरेषां सिद्धिरिति वक्ष्यमाणे वक्तव्या। **अशुभशुभफलं चास्तीति** उत्पादधर्माणां शुभाशुभफलमस्ति, निरोधधर्माणामभावेन। **कर्त्रा विहीनं** कर्त्रा विनेत्यर्थः। **गन्ता नास्ति** निरोधधर्मसमूहः, **मोक्षाय च गमनमस्ति**, "अन्येषामन्यत् तद्रूपम्" इत्यादिवचनात्; **अखिलं** समस्तम्। **अस्ति बन्धो न बध्य** इति, इहोत्पादधर्माणां बन्धोऽस्ति, बध्यो निरोधधर्मो(धर्माणां)[3] नास्ति। **भावोऽभावोऽपि चास्ति क्षणिकविरहितो निःस्वभावो भवोऽस्तीति**। इह भावाभावैकलोलीभूतो निःस्वभावो द्रव्यविकल्परहितः प्रतिसेनातुल्यः क्षणिकविरहित उत्पादव्ययरहितो भावो बुद्धानां धर्मचक्रप्रवर्तनायास्तीति। **एतन्मे** सर्वग्रहविनिर्मुक्तं **वचनं** यत् तत् **सुरफणिवचनैः संग्रहैर्हन्यते न**। इह यथा ग्रहग्रस्तो मल्लो ग्रहमुक्तमल्लं हन्तुं न शक्नोति, तथा विकल्पग्रहग्रस्तो(स्ता) विकल्पग्रहमुक्तं हन्तुं न शक्नुवन्तीति नैरात्म्यादिसिद्धिः संक्षेपेणात्रोक्ता, विस्तरो विस्तरागमेन ज्ञेय इति नियमः।

इदानीं वैभाषिक-सौत्रान्तिक-योगाचार-मतदूषणमुच्यते **यस्तत्त्वमित्यादि**—

यस्तत्त्वं पुद्गलाख्यं वदति तनुगतं तत्स्वभावात् स नष्टः
संवृत्या चार्थवादी त्वविदितपरमार्थो ह्यसन्मन्यमानः।

---

१. क. ख. मदनसर०। २. भो. Sad Pa (जाग्रत)
३. भो. ḥGog Paḥi Chos rNam La (निरोधधर्माणाम्)।

विज्ञानं मन्यमानस्त्रिभुवनसकलं चैव विज्ञानवादी
योऽनष्टो नष्टपक्षः स भवति करुणाशून्यताद्वैतवादी ॥१७३॥

इह तीर्थिकबौद्धानामेषां पक्षग्रहः, तेन स्वपक्षग्रहेण परपक्षस्यापि ग्रहणं भवति, तद्धर्मेण तद्वैधर्म्येण वा तेषां बालमतीनाम् । इह **वैभाषिको यस्तत्त्वं पुद्गलाख्यं वदति**
5 **तनुगतं तत्स्वभावात् स नष्ट** इति । इह यदि पुद्गलान्तर्वर्ती उपपत्त्यङ्गिकः पुद्गलोऽस्ति, तदा स्वभावो वाच्यः, किं ज्ञानस्वभावोऽज्ञानस्वभावो वा ? यदि ज्ञानस्वभावस्तदाऽनित्यः,
T 335 इह घटज्ञाने निरुद्धे पटज्ञानमुत्पद्यते, अतोऽनित्यः । अथ ज्ञानस्वभावस्तदाऽज्ञानस्य सुख-[158a]दुःखाभावः । अतस्तत्स्वभावाद् विचार्यमाणः स नष्टो वैभाषिक इति ।

इहास्ति पुद्गलो भारवाहो 'ण णिच्चं (च्चं) भणामि, णाणिच्चं (च्चं) भणामो'
10 ति । यद् भगवतो वचनं तद् ज्ञानपटले विस्तरेण वक्तव्यमिति । **संवृत्या चार्थवादी त्वविदितपरमार्थो ह्यसन्मन्यमान** इति । इह संवृत्या नीलाद्यर्थग्रहार्थवादी नष्टः । कथम् ? अविदितपरमार्थो ज्ञानकायो हि असन् वन्ध्यापुत्रवद् मन्यमानः; तथाह—

"आकाशं द्वौ निरोधौ च नित्यं त्रयमसंस्कृतम् ।
संस्कृतं क्षणिकं सर्वमात्मशून्यमकर्तृकम् ॥
15 अक्षजा धीरनाकारा साक्षाद् वेत्त्यणु[1]सञ्चयम् ।
स्यात् काश्मीरमताम्भोधिवैभाषिकमतं मतम् ॥ इति ।
स्वा(सा)कारज्ञानजनका दृश्या ते(ने)न्द्रियगोचराः ।
वन्ध्यासुतसमं व्योमनिरोधौ व्योमसन्निभौ ॥
संस्कारा न जडाः सन्ति त्रैकाल्यानुगमो न च ।
20 असदप्रतिघं रूपमिति सौत्रान्तिका विदुः ॥" इति ।
[ ]

अतोऽप्रतिघं रूपं त्रैकाल्यवेदकम् । यदि प्रदीपनिर्वाणसमम्, तदा अप्रतिघरूपे असति सर्वज्ञो न भवति; चतुर्भिः कायैर्विना प्रादेसि(शि)ककायेन बुद्धत्वं न भवति । इहाप्रतिघकायेन विना बुद्धस्य सर्वाकारर्द्धिदर्शनं न स्यात्, सर्वरुतवचनं न भवति,
25 परचित्तज्ञानं च न प्रवर्तते, दिव्यचक्षुरादिकं सर्वं निष्फलं भवतीति सौत्रान्तिकग्रहदोषः । इदानीं योगाचाराणां ग्रहदोष उच्यते—

विज्ञानं मन्यमानस्त्रिभुवनसकलं चैव विज्ञानवादीति; आह—

"न सन्नवयवी नाम न सन्तः परमाणवः ।
प्रतिभासो निरालम्बः स्वप्नानुभवसन्निभः ॥
30 ग्राह्यग्राहकवैधुर्यात् विज्ञानं परमार्थसत् ।
योगाचारमताम्भोधिपारगैरिति गीयते ॥"
[ ]

१. क. ख. साक्षाद्वेदाणु० ; भो. Phra Rab....Rig (०वेत्त्यणु०) ।

अतो विज्ञानविचारेणैकानेकस्वभावेन विज्ञानवादिनो नष्टा वियोगत इति। इह विज्ञानमात्रं त्रैधातुकम्। यदि ज्ञानादन्यद् बाह्यवस्तुरूपं[1] नास्ति, तदा चक्षुर्विज्ञानस्य ग्राहकस्य बाह्यरूपं कथं ग्राह्यस्वभावेन प्रतिभासत इति ?

आह—अविद्यावासनावसे(शे)नेति।

आह—किमियमविद्याऽपगमो[2] नास्ति विज्ञानस्य ? अविद्या[3] त्रैधातुकलक्षणा न भवति ? यद्यविद्या त्रैधातुकलक्षणा न भवति, तदा संसारातीतलक्षणा भवति, एवं प्रज्ञापारमितेयम्। न चैवम्; तस्मादियमविद्या संसारवासना, संसारोऽपि त्रिभुवनलक्षणः, त्रिभवं त्रैधातुकम्, त्रैधातुकं[4] च विज्ञानमात्रम्। एवमविद्या विज्ञानमात्रा, विज्ञानमात्रं तदात्मकत्वम्, तदातिम(त्म)कत्वादविद्याऽपगमो नास्ति, विज्ञानस्याविद्यामात्रतः। अथ विज्ञानमात्रं त्रैधातुकं न भवति,तदा प्रतिज्ञाहानिरिति त्रैधा[158b]तुकमात्रत्वमसिद्धम्।

इदानीं क्षणभङ्गोत्पाददोष उच्यते—

इह यो धर्माणामेकक्षणाद् भङ्गोत्पादो भवति, स किं स्थित्या विना ? यदि स्थित्या विना भङ्गोत्पादश्च भवति, तदा शशविषाणस्यापि भविष्यति। अथ उत्पादात् स्थितिः, स्थितेर्भङ्गो भङ्गादुत्पादः, एवं स्थितिभङ्गोत्पादानामेकत्वं नास्ति, भिन्नलक्षणेन भवितव्यम्। इह यस्मिन् काले स्थितिस्तस्मिन् काले नोत्पादभङ्गौ, यस्मिन् काले भङ्गस्तस्मिन् काले नोत्पादस्थिती, यस्मिन् काले उत्पादस्तस्मिन् काले न स्थितिर्न भङ्गः। काल इति क्षणः, सत्येककाले जातिजरामरणानामैक्यमिति।

किञ्चान्यत्। इह य एकक्षणे भङ्गोत्पादो धर्मस्य, स किं पूर्वधर्मनिरुद्धादपरधर्मोत्पादः, अथानिरुद्धधर्मात् ? यदि निरुद्धधर्मादुत्पादस्तदा निरुद्धप्रदीपादपरप्रदीपोत्पादः, अथानिरुद्धादुत्पादस्तदा अनिरुद्धात् प्रदीपात्[5] प्रदीपोत्पादवत् तस्मादपरोत्पादः; एवमुत्पादादुत्पादेन प्रदीपमाला इव विज्ञानमाला भवति। अतः पूर्वविज्ञानस्य निरोधादपरस्योत्पादो वक्तुं न शक्यतेऽनिरुद्धादपि, न मिश्रात्, परस्परविरोधेन [6]तयोरेकत्वाभाव इति। अतो माध्यमिक आह—

"नेष्टं तदपि धीराणां विज्ञानं परमार्थसत्।
एकानेकस्वभावेन वियोगाद् गगनाब्जवत्॥
[159a] न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः॥" इति।

योऽनष्टो नष्टपक्षः स भवति। कोऽसौ ? करुणाशून्यताद्वैतवादी यः। इह यस्य करुणा निरालम्बा विकल्परहिता शून्यता सर्वाकारवरोपेता त्र्यध्ववर्तिनी त्र्यध्वपरिज्ञानाय इति बौद्धसिद्धान्तनियमः।

---

१. क. ख. बाह्यरूपं।

२-३. क. ख. भो. पुस्तकेषु 'अपगमो''''अविद्या' इत्यंशो नास्ति। ४. क. ख. भो. पुस्तकेषु नास्ति। ५. ग. पुस्तके नास्ति। ६. क. ख. तत्पा।

इदानीं पूर्वकर्मोपभोगवर्तमानकर्मसञ्चयप्रतिषेध उच्यते **जन्तुरित्यादि—**

जन्तुः पूर्वाणि कर्माण्यनुभवति कृतान्यैहिकान्यन्यजात्या
यद्येवं कर्मनाशो न हि भवति नृणां जातिजात्यन्तरेण ।
संसारान्निर्गमः स्यादपरिमितभवैर्नैव मोक्षप्रवेश
5 एतद् वै तायिनां तु प्रभवति हि मतं चान्यजातिप्रहीणम् ।।१७४।।

इह येषां[1] मतं **जन्तुः पूर्वकृतानि कर्माणि भुङ्क्ते इह जन्मनि कृतान्यन्यजात्या**मिति; **यद्येवं** तदा **कर्मनाशो न हि भवति नृणां जातिजात्यन्तरेण,** कर्मफलोपभोगत[2] इति । एवं न[3] **संसारान्निर्गमः स्यादपरिमितभवैर्नैव मोक्षे प्रवेशो** भवतीति । **एतद् वै तायि(जि)**[4]**नां प्रभवति हि मतम्,** किन्तु **अन्यजातिप्रहीण**मिति तायि(जि)नां म्लेच्छानां
10 मतम् । मनुष्यो मृतः स्वर्गे वा नरके वा अनया मनुष्यमूर्त्या सुखं वा दुःखं वा भुङ्क्ते रह्मणो[5] नियमेनेति । अतोऽन्यजातिप्रहीणमिति नियमः ।

इदानीं चार्वाकमतदूषणमुच्यते **भूतैरित्यादि—**

भूतैर्यद्येकभूतैः प्रभवति मदिराशक्तिवत् साक्षिचित्तं
वृक्षाणां किन्न हि स्यात् क्षितिजलहुतभुग्मारुताकाशयोगात् ।
15 नास्त्येषां जन्तुशक्तिस्त्वथ परममृषा भूतसंयोगशक्ति-
रेतच्चार्वाकवाक्यं न हि सुखफलदं मार्गनष्टं नराणाम् ।।१७५।।

इह पूर्वोक्तैर्भूतैः पृथ्व्यादिभिरेकीभूतैर्यदि हरीतकीगुडधातकोसंयोगेन **मदिराशक्तिवत् सेन्द्रियं चित्तं** नराणामिति सिद्धम्, तदा **वृक्षाणां** पृथ्व्यादिभिरेकीभूतानां **किन्न भवति** सेन्द्रियं चित्तमिति भूतसंयोगात् । **अथैषां** स्थावराणां **जन्तुशक्तिर्नास्तीति,**
20 तदा **परममृषा भूतसंयोगशक्ति**रिति; तस्मादे**तच्चार्वाकवाक्यं न हि सुखफलदं मार्गनष्टं नराणा**मिति लोकायतमतदूषणनियमः ।

[159b] इदानीं क्षपणकमतदूषणमुच्यते **जीव** इत्यादि—

जीवः कायप्रमाणो यदि करचरणच्छेदनान्नस्य(श्य)ते किं
नित्यः कायप्रभावादणुरपि च भवेत् स्थूलतां किं प्रयाति ।
25 संसारात् कर्ममुक्तो व्रजति सुखपदं यत् स्थितं लोकमूर्ध्नि
त्रैलोक्यं चाणुभिर्यद् रचितमपि सदा शाश्वतं तन्न कालात् ।।१७६।।

---

१. क. ख. एषां । २. ख. ०भोग । ३. क. पुस्तके नास्ति । ४. भो. sTag gZig (तग् ज़िग्) । ५. क. रवनणो; भो. Rahma Ṇa (रह्मण) ।

इह क्षपणकसिद्धान्ते **जीवो** नित्यः, स च **कायप्रमाण** इति सिद्धम्, इति **चेत्**, तदा कायावयवे **करचरणादौ छिन्ने** सति किं **विनस्य(श्य)ते**, छिन्नावयवमूर्तेरभावादिति। **नित्यः कायप्रभावादणुरपि च भवेत्**, सूक्ष्मकायग्रहणात्, स्थूलकायग्रहणात्[1], **स्थूलतां किं प्रयातीति**? इह यो नित्यः सोऽविकारी, यो विकारी सोऽनित्यः सिद्ध इति। 5

आह—द्रव्यपर्यायाभ्यां नित्यानित्यमिति **स्याद्वादः**।

आह—इह यथा सुवर्णं कुण्डलाभ्यां नित्यानित्यम्, तथा द्रव्यपर्यायाभ्यां जीवद्रव्यं नित्यं विकारोऽनित्य इति, तथा च **स्याद्वादः**। T 336

"कथेइ जीवो होइ वलिओ कथेइ कम्माइ भोन्ति वलिआइ।
जीवस्य(स्स)अ कम्मस्य(स्स)अ पूर्वं(पुव्व)णिबद्धां(णिबद्धा)इ वै(वे)राइ॥ इति। 10

अस्या गाथाया अर्थमाह—कुत्रचिदिति[2]। मोक्षविषये जीवो बलवान्, कैवल्यज्ञानबलेन। कुत्रचिच्चतुर्गतिसंसारविषये कर्म बलवत्, अज्ञानबलेन; एवं जीवस्यापि कर्मणश्च पूर्वाऽनादिकालनिबद्धानि वैराणीति सिद्धम्। एवं द्रव्योत्पत्तिव्ययात्मा स्वगुणयुत इति नान्यथा सिद्धिरिति सिद्धान्तः।

आह—द्रव्यपर्याययोरेकत्वमन्यत्वं वा? इह यद्येकत्वम्, तदा द्रव्यपर्याययोर्भेदो नास्ति; अथान्यत्वम्, तदा द्रव्यैर्विना पर्यायो भवति, न चैवं दृश्यते सूत्रैर्विना पटः। एवं जातिव्यक्त्योरपि नित्यानित्यसंयोगदोष इति। नित्यानित्ययोरेकत्वं नास्ति, परस्परविरोधात्, असदृशसदृशयोर्यथा। अतो जीवजात्यादिद्रव्यमनित्यमिति सिद्धम्। 15

तथा **संसारात् कर्ममुक्तो व्रजति सुखपदं यत् स्थितं लोकमूर्ध्नीति**। इह **क्षपण**कसिद्धान्ते एकमेव त्रिभुवनम्, द्वितीयं नास्ति; तेनेदं त्रिभुवनम् अनादिनिधनमुत्पादव्ययरहितं सर्वं वज्रमयं न कदाचित् क्षयं यास्यतीति। यद्यस्य भुवनस्य क्षयो भवति, तदाऽन्यत्रिभुवनाभावात् सर्वे प्राणिनः कुत्र स्थास्यन्ति। तेन कारणेनेदं नित्यम्; जीवोऽपि नित्यः संसारात् कर्ममुक्तः सन् व्रजति मोक्षं पञ्चचत्वारिंशद्योजनलक्षं **सुखपदम्**, पुद्गलरहितमिति सिद्धम्। 20

आह—इह **त्रैलोक्यम् अणुभिर्जातम्**, नाणुभिर्विना, **चकारा**न्मोक्षोऽपि, तत् कथं नित्यं भवति, **यदणुभो रचितमपि शाश्वतमपि** नित्यं **सदा** सर्वकालं न भवति, संहारकालवशात् क्षयं यास्यतीति। तत्क्षयात् सिद्धान्तानामपि क्ष[160a]यो भविष्यतीति सिद्धमिति न्यायात्। 25

किञ्चान्यत्। इह पूर्वोक्तानां षड्जीवकायलेश्यानां[3] मध्ये वनस्पतीनां जीवः; स किं प्रत्येकवनस्पतिकाय एकः सुखं दुःखं वा कर्मवशेनानुभवति, अथानेक इत्याह—

---

१. क. ख. पुस्तकयोर्नास्ति। २. क. ख. क्षत्रविदित०।
३. क. ख. ०जीवकापरेशानां।

एको जीव एकं पुद्गलं गृह्णाति यस्य प्रभावेन वनस्पतीनां स(श)स्यादीनां जीवितसंज्ञा। यदि जीवो नास्ति, तदा पादप इति कथं सिद्धम्। न चाजीवाः काष्ठा उदकं पीत्वा पुष्पादि ऋतु प्रकुर्वन्तीति सिद्धम्।

आह—यदि इह प्रत्येकपुद्गले प्रत्येकम् एकैको जीवः, तदा इक्षुदण्डे खण्डे खण्डे 5 कृतेऽनेकखण्डानि भवन्ति; तेषां मध्ये एकस्मिन् खण्डे स जीवो नित्यः कर्मवशात् सङ्कुचन् प्रविष्टः। कानि तेन परित्यक्तानि न चैवं युक्त्या घटते। विचार्यमाणः कुतो यतस्तेषां पुनर्भूम्यामारोपितानामङ्कुरादिकं प्रत्येकखण्डे दृश्यते। तस्माद् वस्तुस्वभावो वनस्पतीनाम्[1] अङ्कुरादिशक्तिरिति सिद्धम्[2]। इति क्षपणकमतदूषणनियमः।

विस्तरोऽनेकोऽनेकप्रमाणशास्त्रेण मध्यमकेन निराकरणीयस्तीर्थिकानां सिद्धान्तः। 10 यः संवृत्या विवृत्या वा सम्बुद्धवचनसमः, स न दूषणीय इति कालचक्र आदिबुद्धभगवतो नियमः*। तद्यथा—

इत्यादिज्ञानहेतोः प्रकटयति महौ देशनां कालचक्रः
पुंसां चित्तानुसारां मृदुकठिनपरां वासनाया बलेन।
चित्तं वै भावरागैः स्फटिकवदुपधाद् रागतां याति यस्मात्
15 तस्माद् धर्मो न कश्चित् स्वपरकुलगतो योगिना दूषणीयः ॥१८७॥

१-२. क. वनस्पतीनाम् अङ्कुरादिकं प्रत्येकखण्डे दृश्यते, तस्माद् वस्तु स्वशक्तिरिति सिद्धम्।

* कालचक्रतन्त्रस्य तट्टीकाया विमलप्रभायाः किमभिप्रायकमिदं वचनद्वयम्, यथा 'यः संवृत्या विवृत्या वा सम्बुद्धवचनसमः, स न दूषणीय इति कालचक्र आदिबुद्धभगवतो नियमः' इति। 'तस्माद् धर्मो न कश्चित् स्वपरकुलगतो योगिना दूषणीयः' (मूले २.१६६) इति च।

वचनाभ्यामेताभ्याम् आपाततः परमतं नैव कालचक्रिणा दूषणीयमित्याभाति। एवं सति प्रवर्तमानेऽस्मिन् स्वपरविचारन्यायमहोद्देशे कथमिह परमतखण्डनं कृतं मूले टीकायां च, कथं चोक्तम् एतन्महोद्देशावसाने टीकायाम्—'मध्यमकेन निराकरणीयस्तीर्थिकानां सिद्धान्तः' इति। आपाततः प्रतीयमानस्यैतद्विरोधस्य निराकरणं भवति खेस् ड्रुब जे महाभागानां स्वाभिप्रायाविष्करणेन। तैरुक्तम्—

"Mu sTegs Pa dGag Pa rGya Chen Po rNam Pa Du Mar Tshad Maḥi bsTan bCos Du Ma Daṅ dBu Ma Pas gS̄uṅ Lugs Du Mar bsTan Pa Dag Gis Mu sTegs Pa rNams Kyi Grub Paḥi mThaḥ Sun dByuṅ Bar Bya sTe. Mu sTegs Las gS̄an Pa Gaṅ S̄ig Kun rdZob Bam Don Dam Pa Saṅs rGyas Kyi gSuṅ Daṅ mTshuṅ Pa sMra Ba De Ni Sun dByuṅ Bar Mi Byaḥo". (ḥGrel Chen Dri Med Hod ḥGrel bŚad, 'Ga', page 208B).

धर्मः सत्त्वोपकारो विषयविरहितश्चापकारोऽप्यधर्मः
हिंसा वेदप्रमाणा न हि सुखफलदा दुःखदा सर्वकालम् ।
सन्मैत्री मूर्खवाक्यात् परमसुखकरा सर्वसत्त्वानुरक्ता
तस्मात् सत्त्वार्थमेकं कुरु नृप मनसा भावनां निःस्वभाव(ा)म् ॥१७८॥

इन्द्रोऽहं स्वर्गलोके त्रिदशनरगुरुर्भूतले चक्रवर्ती 5
पा[160b] ताले नागराजः फणिकुलनमितः सर्वगश्चोत्तमोऽहम् ।
ज्ञानं बुद्धो मुनीन्द्रोऽक्षरपरमविभुर्योगिनां वज्रयोगो
वेदोऽङ्कारः पवित्रो व्रज मम शरणं सर्वभावेन राजन् ॥ १७९ ॥
इति शरणनियमः ।

इदानीं* सूर्यरथस्य नमस्कारः— 10
त्वं माता त्वं पिता त्वं जगति गुरुरपि त्वं च बन्धुः सुमित्रं
त्वं नाथस्त्वं विधाता हित(हि त्व)मघहरण त्वं पदं सम्पदां च ।
त्वं कैवल्यं पदं त्वं वरगुणनिलयो ध्वस्तदोषस्त्वमेव
त्वं दीनानाथ चिन्तामणिरपि शरणं त्वां गतोऽहं जिनेन्द्र* ॥१८०॥

इति श्रीमदादिबुद्धोद्धृते श्रीमहाकालचक्रे[१] 15
अध्यात्मनिर्णयो द्वितीयपटलः[२] ॥२॥

इति सूर्यरथो गुरुनमस्कारेण मञ्जुश्रियं भगवन्तं स्तुत्वा पादद्वयं शिरसि कृत्वा पुनः स्वकीयासने निषन्नः(ण्णः) ।

इति श्रीमूलतन्त्रानुसारिण्यां[१] लघुकालचक्रतन्त्रराजटीकायां
द्वादशसाहस्रिकायां विमलप्रभायां 20
स्वपरदर्शनन्यायविचारमहोद्देशः सप्तमः[२] ॥७॥

समाप्तेयं टीका अध्यात्मपटलस्येति ॥२॥

उपरिलिखितभोटांशस्य संस्कृतानुवादः—

"प्रमाणशास्त्रेषु माध्यमिकशास्त्रेषु वा निर्दिष्टैर्विस्तृतदूषणप्रकारैस्तैर्थिकाः दूषणीयाः । तैर्थिकेतरे ये संवृतिं वा परमार्थं वा अङ्गीकृत्य बुद्धवचनानुसारेणैव स्वपक्षं स्थापयन्ति, ते नैव दूषणीयाः" ।

१. क. श्रीमहाकालचक्रतन्त्रराजे । २. क. द्वितीयः पटलः ।

४. साधना नाम चतुर्थः पटलः

(१) स्थानरक्षापापदेशनादिमहोद्देशः

॥ [1]नमः श्रीकालचक्राय ॥

पुण्यज्ञानविनिर्मितं भगवतो दुर्दान्तसत्त्वाः सदा — T 336
रूपं भैरवभीषणं गतमदं पश्यन्ति सन्तो जनाः। — 5
भाषा सर्वरुता परश्रुतिगता सन्मार्गसंदेशिकी
सत्त्वानामधिमुक्तिचित्तवशतो यस्यैव तस्मै नमः॥

सर्वाकारवरोपेतः कायो नानाधिमुक्तितः।
दृश्यते स्वस्वभावेन सत्त्वैर्निर्माणलक्षणः॥

सर्वसत्त्वरुतैर्ऋद्धिमात्मनो यः प्रकाशते। — 10
सत्त्वाशयवशेनेष[2] कायः संभोगलक्षणः॥

[3]नानित्यो नापि नित्यो यो नैको नानेकलक्षणः।
न भावो नाप्यभावोऽसौ धर्मकायो निराश्रयः॥

शून्यताकरुणाऽभिन्नो रागारागविवर्जितः।
न प्रज्ञा नाप्युपायोऽसौ कायः स्वाभाविकोऽपरः॥ — 15

कालचक्रमिति ख्यातं चतुष्कायात्मकं शिवम्।
प्रणिपत्य सर्वभावेन मञ्जुश्रीचोदितेन च॥

साधनापटले टीका पुण्डरीकेण लिख्यते।
मया निर्मितकायेन लोकेशेनाब्जधारिणा॥

इह श्रीमति कलापग्रामदक्षिणमलयोद्याने श्रीकालचक्रमण्डलगृहपूर्वद्वारावसाने — 20
रत्नमण्डपे [4]रत्नसिंहासनस्थो मञ्जुश्रीर्भगवान् निर्मितकायो यशोनरेन्द्रः सूर्यरथाध्येषितः सन् परमादिबुद्धात् साधनापटले सुचन्द्राध्येषणं बुद्धभगवतः प्रतिवचनं प्रथमवृत्तेन महापर्षदः प्रकाशयति स्म— — T 337

लब्धः सप्ताभिषेको जिनजनक मया कुम्भगुह्याभिषेकः
प्रज्ञाज्ञानाभिषेको भवभयमथनो योगगम्यश्चतुर्थः। — 25
भूयः पृच्छामि सम्यग् जिनवरसहितं साधनं विश्वभर्तुः
श्रुत्वा सोचन्द्रवाक्यं गदति जिनपतिः साधनं वज्रिणश्च ॥१॥

---

१. च. नमः शाक्यमुनये, ग. नास्ति। २. ख. च. नैव। ३. च. न नित्यो नाप्यनित्यो यो। ४. भो. 'रत्न' नास्ति।

इह वृत्ते पदत्रयेण सुचन्द्राध्येषणं [1]साधनपटलदेशनाय। ततश्चतुर्थप[ा]दमारभ्य यावत् [2]पटलपरिसमाप्तिस्तावद्भगवतः प्रतिवचनमिति। इदानीं **श्रुत्वा सौचन्द्रवाक्यं गदति जिनपतिः** शाक्यमुनिर्भगवान् कालचक्रसमाधिसमापन्नः **साधनं वज्रिणः** श्रीकालचक्रभगवतः। चकाराच्चाक्षोभ्यादितथागतानां वज्रधात्वीश्वर्यादिदेवीनां
5 वज्रपाण्यादिबोधिस[251b]त्त्वानां शब्दवज्रादिविषयदेवीनामुष्णीषादि[3]महा[4]क्रोधराजानाम् अतिनीलादिक्रोधदेवीनां चर्चिकादिमातॄणां विष्ण्वादिदेवानां जयादिनागराजानां श्वानास्यादिप्रचण्डानां प्रत्येकं साधनमन्येषामपि गदति जिनपतिर्लौकिकसिद्धिसाधनायाकनिष्ठभुवनपर्यन्तं रूप[5]भावनयेति भगवतो नियमः॥ १॥

इदानीं कालविशुद्ध्या भगवतो रूपकल्पनोद्देश उच्यते—

10 चन्द्राङ्गं युग्मपादं शिखिगलमुदधिं श्रीमुखं विश्ववर्णं
षट्स्कन्धं सूर्यबाहुं जिनकरकमलं शून्यषड्वह्निपर्वम्।
पादाभ्यां माररुद्रं शशिरविहुतभुङ्मण्डले त्रास्यमानं
लीलाक्रान्तं तमेकं त्वभवभवसमं साधयेत् कालचक्रम्॥२॥

[6]चन्द्राङ्गमित्यादिना। **इहाबिबुद्धे** भगवानाह—

15 दिनं सूर्यो रजो वज्रं भावभेदैर्निशा शशी।
शुक्रं पद्मं तयोरैक्यं कालचक्रं [7]महासुखम्॥ इति।

तथा[8]ऽपरतन्त्रान्तरेऽपि भगवता सामान्येनोक्तम्—

दिनस्तु भगवान् वज्री नक्तं प्रज्ञा प्रकीर्तिता।
आदित्यो हि [9]यथा रुद्रस्तथा चन्द्र उमा मता(तः)॥

20 एवं सूर्यचन्द्रदिवानिशाभेदेनाहोरात्रं काल इत्युच्यते, तस्य चक्रं षट्शताधिकैकविंशतिसहस्रश्वासात्मकं द्वादशाङ्गं प्रतीत्यलक्षणं राशिचक्रं लौकिकसंवृत्योत्पादक्षयहेतुभूतं सर्वसत्त्वानाम्। तथा चाह—

कालः सृजति भूतानि कालः संहरते सदा।
कालो हि भगवान् वज्री अहोरात्रस्वरूपवान्॥ इति।

---

१. ग. नास्ति। २. क. ख. छ. 'पटल' नास्ति। ३. ग. महादेवीनाम्। ४. छ. क्रोढ। ५. भो. भावना। ६. क. चक्राङ्ग। ७. छ. 'महा' नास्ति। ८. ग. च. परत्र। ९. ख. महा।

एवमस्य कालचक्रस्य साधनमुत्पादक्षयविनाशार्थं योगिभिः कर्तव्यं वक्ष्यमाणक्रमेणेति रूप[1]कल्पनानियमः। **चन्द्राङ्ग**[2]**मित्यादि**। द्वादशलग्नात्मकम् अहोरात्रमेकाङ्गम्। तस्य षट् षड् लग्नात्मकं वामदक्षिणचरणम्। **युग्मपादमिति**। [3]ततश्चतुर्लग्नात्मकं वामदक्षिणमध्यकण्ठं **शिखिगलमिति** त्रिकण्ठम्। एवं [4]त्रित्रिलग्नात्मकं पूर्वदक्षिणपश्चिमो[5]त्तर[6]वक्त्रचतुष्कमु**दधिरिति**। चतुर्मुखं **विश्ववर्णं** वक्ष्यमाणमिति। एवं द्विद्विलग्नात्मकं वामे दक्षिणे च पूर्वापरं [7]मध्यस्कन्ध[8]**षट्स्कन्धमिति**। तथा प्रत्येकमासात्मका [9]द्वादशभुजास्तैर्भुजैः **सूर्यबाहुमि**[10][252a]ति। [11]एवं प्रत्येकार्धलग्नम्। पक्षभेदेन चतुर्विंशतिकरं **जिनकरकमलमिति**। एवं षष्टिषष्टिप्रत्येकश्वासात्मकेन दिनभेदेन षष्ट्युत्तरत्रिशताङ्गुलीपर्वं प्रत्येक[12]करे पञ्चाङ्गुलीत्रिपर्वभेदेन पञ्चदशपर्वाणि चतुर्विंशतिकरेषु षष्ट्युत्तरशतत्रयं भवति। एवं **शून्य**[13]**षड्वह्निपर्वम्। पादाभ्यां माररुद्रमिति**। स्कन्धक्लेशमृत्युदेवपुत्रमारम्, रागद्वेषमोहमानात्मकं रुद्रम्, **शशिरविहुतभुङ्मण्डले त्रास्यमानम्, लीलयाक्रान्तं** येन कालचक्रेण **तमेकमभवभवसमं** निर्वाणभवैकलोलीभूतं निरावरणतः। एवं **साधयेत् कालचक्रमिति** भगवतो नियमः ॥ २ ॥

इदानीमस्य साधनाय स्थानान्युच्यन्ते—

उद्याने पर्वते वा जिनवरभवने शून्यदेवालये च
सिद्धस्थाने श्मशाने सरसि सुनिलये गुप्तभूम्यां तथैव।
यस्मिंश्चित्तप्रतोषो भवति नरपते साधनं तत्र कुर्यात्
कृत्वा पूर्वोक्तरक्षां खलु मृदुशयने चासने चोपविश्य ॥३॥

उद्यान इत्यादिना। इह लौकिककर्मसाधनानुरूपेण स्थानं भवति। **उद्याने** वश्याकृष्ट्यर्थं **साधनं कुर्यान्**मन्त्री। **पर्वते** [14]**वा** स्तम्भनमोहनकीलनार्थम्। **जिनवरभवने** साधिष्ठाने महाचैत्येऽष्टमहासिद्ध्यर्थम्। **शून्यदेवतालये चो**च्चाटनविद्वेषणार्थम्, चकाराद् महोदधितटे वा। **सिद्धस्थाने** कर्ममुद्रासिद्ध्यर्थम्। **श्मशाने** मारणार्थम्। **सरसि सुनिलये** शान्तिपुष्ट्यर्थम्। **गुप्तभूम्यामिति** गुहावासे भूमिगृहे वा त्रैलोक्यराज्यसाधनार्थम्। एवं कर्मानुरूपेण **यस्मिन्** देशे **चित्तप्रतोषो भवति नरपते साधनं तत्र कुर्यात्**। तथा चाह—

धार्मिको यत्र भूपालः प्रजा यत्रैव सुस्थिता।
भूभृतोर्विग्रहो नास्ति तत्र योगं समारभेत् ॥ इति।

---

१. च. विकल्पना। २. च. मिति। ३. छ. चतुश्चतु। ४. ग. त्रिलग्ना। ५. ग. च. त्तरं। ६. छ. रक्त। ७. च. मध्ये षट्। ८. ख. ग. स्कन्धं ९. भो. 'द्वादश' नास्ति। १०. च. रिति। ११. भो. 'एवं' नास्ति। १२. च. 'करे' नास्ति, छ. कर। १३. च. सद्वह्नि। १४. च. 'वा' नास्ति।

कृत्वा पूर्वोक्तरक्षामित्यभिषेकपटलोक्तरक्षां कृत्वा । **खलु मृदुशयने** [1]**चासने चोपविश्येति** स्थाननियमः ॥ ३ ॥ [252b]

इदानीं वक्त्र[2]शुद्धयादि[3]रुच्यते—

आदौ हृच्चन्द्रमध्ये दशदिशि विविधान् भावयेत्तत्त्वरश्मीन्
5 **कृत्वा वक्त्रादिशुद्धिं पुनरपि गगने स्फारितानां जिनानाम् ।**
कृत्वा पूजां विचित्रां बहुविधकलुषं सञ्चितं देशयित्वा
कर्तव्यं साधकेन त्रिशरणगमनं कायवाक्चित्तशुद्धया ॥४॥

आदावित्यादिना । इह योगिना पूर्वोक्तरक्षा कर्तव्या [4]मारनिर्घा[5]टनं च । ततः साधनापटलोक्तविधिना देवतारूपमात्मानं [6]झटित्याकारेण कृत्वा स्वहृदये पंकारपरिणत-
10 मष्टदल[7]रक्त[8]पद्मम्, तदुपरि कर्णिकायाम् अँकारपरिणतं **चन्द्रमण्डलम्**, तस्य **मध्ये तत्त्वमि**ति संवृत्या हूँकारजं वज्रं पञ्चशूकम्[9], तस्य **रश्मीन् विविधान्** पञ्चवर्णान् भावये-द्योगी । पूर्वं **कृत्वा वक्त्रादिशुद्धिं** पञ्चामृत[10]गुलिकया मुखे प्रक्षिप्तया वक्त्रशुद्धिर्भवति । तथा पूर्वोक्तया दिव्यमुद्रया शिरसा[11]रभ्य यावत् पादान्तं तावदात्मानं[12]संस्पर्शयेत् । एवं कायशुद्धिः[13] । एवं कृत्वा वक्त्रादिशुद्धिं ततश्चन्द्रमण्डले वज्ररश्मिभि**र्गगन**तले
15 तथागतान् प्रतिबोध्य तेषां **स्फारितानां जिनानां** पूजार्थं तान् रश्मीन् पुनराकृष्य स्वहृदये चन्द्र[14]वज्रप्रविष्टान् विभाव्य ततश्चन्द्रमण्डले द्वादशपूजादेवीनां बीजाक्षराणि[15] ध्यायात् । क्ख्ग्घ्ङ क्ख्ग्घ्ङा च्छ्ज्झ्ञ च्छ्ज्झ्ञा ट्ठ्ड्ढ्ण ट्ठ्ड्ढ्णा प्फ्ब्भ्म प्फ्ब्भ्मा त्थ्द्ध्न त्थ्द्ध्ना स्ᅳप्ष्श्ᅳक स्ᅳप्ष्श्ᅳका इत्येभिर्बीजाक्षरैर्निष्पन्ना यथासंख्यं[16]नृत्या वाद्या गन्धा माला धूपा दीपा नैवेद्या अक्षता लास्या हास्या[17]गीता
T 338 20 कामा इत्यादिभिस्तथागतानां **पूजां कृत्वा**ऽभिषेकपटलोक्तविधिना ततो वक्ष्यमाणक्रमेण **बहुविधकलुषं सञ्चितं देशयित्वा आदौ**, ततः **कर्तव्यं साधकेन त्रिशरणगमनं काय-वाक्चित्त**[18]**शुद्धये**ति नियमः ॥ ४ ॥

इदानीं पापदेशनावसाने पुण्यमनुमोदयेत्—

संबुद्धैर्बोधिसत्त्वैर्बहुविधकुशलं यत्कृतं चार्यसंघै-
25 **रनुमोदे तत्समस्तं व्यपगतकलुषो बोधिचर्यानुरूढः ।**

---

१. ग. च. वासने । २. च. विशुद्धया । ३. च. दिकमु । ४. च.मारादि । ५. छ. तनं । ६. च. झटिता । ७. ग. च. दलं । ८. ग.रक्तवर्णं । ९. ग. शूचिकं । १०. च गुडि-कया । ११. ख. ग. छ. सादारभ्य । १२. च. 'सं' नास्ति । १३ च. विशुद्धिः । १४. ग. च. वज्रे । १५. भो० Goṅ Bu rNams (पिण्डानि) इत्यधिकम् । १६. ग.च. गीता, भो. वाद्या नृत्या । १७. ग. च. नृत्या । १८. क. ख. ग. छ. विशुद्धये ।

बुद्धं [253a] धर्मं च संघं भवभयहरणं बोधिसीम्नः प्रयामि
संबुद्धोऽहं भवामि प्रणिधिमिति करोम्यत्र सत्त्वार्थहेतोः ॥५॥

संबुद्धैर्बोधिसत्त्वैर्बहुविधकुशलं यत्कृतं चार्यसंघैरनुमोदे तत् समस्तं व्यपगत-कलुषो बोधिचर्यानुरूढो मन्त्री । ततस्त्रिशरणं गच्छति—**बुद्धं धर्मं च संघं भवभयहरणं बोधिसीम्नः प्रयामि** । [1]एवं त्रिशरणं गत्वा आत्मनिर्यातनं कृत्वा ततः सत्त्वार्थाय प्रणिधानं करोति—**संबुद्धोऽहं भवामि प्रणिधिमिति करोम्यत्र सत्त्वार्थहेतो**रिति । एवं वन्दना पूजना पापदेशना पुण्यानुमोदना तथागताना-मध्येषणा याचना पुण्यपरिणामनेति । एवं सप्तविधां पूजां कृत्वा तत्र त्रीणि मूलानि स्मरेत्, बोधिचित्तोत्पादः, आशयविशुद्धिः, अहंकारममकारपरित्यागः कर्तव्यः । ततो दश पारमिता[2]श्चिन्तयेत् । पुण्यज्ञानशीलसंभारार्थं दानपारमिता । एवं [3]शील[4]क्षान्तिवीर्यध्यानप्रज्ञा-उपायप्रणिधिबलज्ञानपारमिता विचिन्त्य ततो ब्रह्म-विहारान् स्मरेत् मैत्रीकरुणामुदितोपेक्षामिति । ततश्चत्वारि संग्रहवस्तूनि [5]चिन्तयेत्, दानं प्रियवाक्यमर्थचर्यां समानार्थतामिति । ततो दशाकुशलपरित्यागं विभावयेत् प्राणातिपातम् [6]अदत्तादानं कार्ममिथ्याचारं मृषावादं पारुष्यं पैशुन्यं संभिन्नप्रलापम् अभिध्यां व्यापादं कुदृष्टिं चेति । एवं कौकृत्यस्त्यानमिद्धौद्धत्यविचिकित्सेति पञ्चावरणानि परित्यजेदेवं रागद्वेषमोहमानक्लेशान् परित्यजति । एवं कामा[7]श्रवं भवाश्रवम् अविद्या-श्रवं दृष्ट्याश्रवं त्यक्त्वा ततश्चतुर्विमोक्षं[8] विभावयेत्, शून्यतामनिमित्तमप्रणिहित-मनभिसंस्कारमिति विभाव्य त्रैधातुकं सचराचरं विचारयेदनया गाथया—

अभावे भावनाभावो भावना नैव भावना ।
इति भावो न भावः स्याद्भावना नोपलभ्यते ॥ इति ।
(गु त. २.३)

अस्यार्थो वक्ष्यमाणे वक्तव्यः ॥ ५ ॥

इदानीं पुनर्भवग्रहणाय शून्यतालक्षणमुच्यते—

शून्यं भावाद् विहीनं सकलजगदिदं वस्तुरूपस्वभावं
तस्माद् बुद्धो न बोधिः परहितकरुणा चानिमित्तप्रतिज्ञा ।
एवं ज्ञात्वा[253b] समस्तं तदपि नरपते कायवाक्चित्तवज्रं
ध्यातव्यं बोधिसत्त्वैरपरिमितगुणं मण्डले मण्डलेशम् ॥६॥

---

१. क. ख. ग. च. छ. 'एवं' नास्ति । २. क. ख. मितां, च. छ. मितां विचि । ३. च. शीलज्ञान । ४. छ. 'क्षान्ति' नास्ति । ५. च. विचि । ६. ग. च. मृषा० अदत्ता० काम० अयं क्रमः । ७. भो. च. 'आस्रवं' सर्वत्र । ८. च. क्षान् ।

शून्यमित्यादिना। **शून्यं भावाद् विहीनं सकलजगदिदं वस्तुरूपस्वभावं** [1]यत्तस्मान्महाशून्याच्च **बुद्धो न बोधिः परहितकरुणा न**। एवं चानि[2]मित्तप्रतिज्ञा बुद्धो भवेयं जगतो हितायेति[3]। **एवं ज्ञात्वा समस्तं** बुद्धत्वाय। **तदपि नरपते कायवाक्चित्तवज्रं ध्यातव्यं बोधिसत्त्वैरपरिमितगुणं मण्डले मण्डलेशमिति**। कायवाक्चित्तमण्डले कायवाक्चित्तवज्रं ध्यातव्यं नायकं लौकिकफलसाधनाय[4] [5]सर्वसत्त्वसंदर्शनायेति भगवतो नियमः ॥ ६ ॥

इदानीं लोकोत्तरस्कन्धग्रहणाय सांसारिकस्कन्धपरित्यागाय समाधिरुच्यते—

तोयेनाग्नेर्विनाशं प्रथममिह यतिः कारयेद् देहमध्ये
पश्चात्तोयं धरित्री भवति लवणवत्तोयमध्ये प्रविष्टा।
अन्तर्धानं हि वायुर्व्रजति नभसि तच्छोषयित्वाम्बुराशिं
चित्तं वह्नौ तमोऽन्ते विषयविरहिते स्थापयेन्मध्यभूमौ ॥७॥

तोयेनेत्यादिना। इह मर्त्ये गर्भजानां मरणकाले तोयेनाग्नेर्विनाशः क्रियते। अतस्तेनैव समाधिना **तोयेनाग्नेर्विनाशं प्रथममिह यतिः कारयेद् देहमध्ये**। **पश्चादग्ने**[6]रभावाद् **धरित्री** कठिनतां त्यक्त्वा **लवणवद्** द्रवीभूता **तोयं भवति तोयमध्ये प्रविष्टा**। ततो **वायुस्तत्समस्तं** तोयं **शोषयित्वा नभस्यन्तर्धानं** प्रयाति। एवं धातुसमूहस्य विनाशं शीघ्रम्। ततश्चित्तं **वह्नौ तमोऽन्ते** आकाशधातौ सर्वाकारबिम्बे **विषयविरहिते स्थापयेद् मध्यभूमौ**, आलयविज्ञानमिति। तत इदं मन्त्रमुच्चारयेत्—ॐ शून्यताज्ञानवज्रस्वभावात्मकोऽहम्। ॐ अनिमित्तज्ञानवज्रस्वभा[254a]वात्मकोऽहम्। ॐ अप्रणिहितज्ञानवज्रस्वभावात्मकोऽहम्। ॐ अनभिसंस्कारज्ञानवज्रस्वभावात्मकोऽहम्, इत्युच्चार्य त्रैधातुकं परमाणुधर्मतातीतं [7]शून्यताबिम्बं [8]विभावयेदिति तथागतनियमः ॥ ७ ॥

इति [9]श्रीमूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां
[10]द्वादशसाहस्रिकायां विमलप्रभायां साधनापटले
स्थानरक्षापापदेशनादिमहोद्देशः
प्रथमः ॥ १ ॥

१. च. यतस्तस्मा। २. च. मित्ता। ३. ख. 'इति' नास्ति। ४. च. येति। ५. च. 'सर्व……येति' नास्ति। ६. ग. ह्वह्नेः। ७. च. शून्यं विभा। ८. ग. 'वि' नास्ति। ९. क. ख. च. छ. 'श्री' नास्ति। १०. च. 'द्वाद…कायां' नास्ति।

(२) उत्पत्तिक्रमेण कायनिष्पत्तिमहोद्देशः

इदानीं [1]पूर्वप्रणिधानपरिपूरणाय धर्मचक्रप्रवर्तनार्थं गर्भावक्रमणन्यायेन भगवत उत्पत्तिक्रमेण साधनमुच्यते—

शून्यं वाय्वग्नितोयान्यवनिसुरनगाब्जेन्दुसूर्याग्नयश्च
कूटागारं समन्तात् स्फुरदमलकरं वज्रजं पञ्जरं वा। 5
तन्मध्ये वज्रभूमौ मणिकरनिकरैर्मण्डलं विस्फुरन्तं
ॐकारं ज्ञानजातं जिनवरकमलं चन्द्रसूर्यासनानाम् ॥८॥

शून्यमित्यादिना। इह बाह्ये अध्यात्मनि उत्पत्तिनिमित्तमनन्ताकाशधातुः प्रज्ञाधर्मोदयं त्रिकोणम्। बाह्ये वर्तुलं [2]दशारवज्रमयं मर्त्ये मातृशरीरमध्यात्मनि तत्र बाह्ये **वायुमण्डलं** मध्ये धन्वाकारं तिर्यङ्मानेन चतुर्लक्षयोजनं यँकारबीजपरिणतं कृष्णमध 10 ऊर्ध्वं हूँकारपरिणतविश्ववज्रद्वयसहितं ध्वजाङ्कितम्। तदुपरि त्रिलक्षयोजनायामं रँकारपरिणतं त्रिकोणं **वह्निमण्डलमध** ऊर्ध्वं हूँकारपरिणतं विश्ववज्रद्वयसहितं रक्तं स्वस्तिकाङ्कितम्। तदुपरि **तोयमण्डलं** द्विलक्षयोजनं वँकारपरिणतं [3]शुक्लमध ऊर्ध्वं हूँकारपरिणतं विश्ववज्रद्वयसहितं पद्मलाञ्छितं वृत्तम्। तदुपरि लँकारपरिणतं **पृथ्वीमण्डलं** चतुरस्रं पीतवर्णमध ऊर्ध्वं हूँकारपरिणतविश्ववज्रद्वयसहितं वज्रलाञ्छितं 15 लक्षयोजनम्। तदुपरि मँकारपरिणतं वज्रमयं महामेरुमधो विस्तारेण षोडशसहस्रम् ऊर्ध्वं पञ्चाशत्सहस्रं तन्मध्ये विश्वा**ब्जं** मेरुप्रमाणार्धेन क्षँकारपरिणतम्। तस्य त्रिभागिका कर्णिका[4]तुल्यं [5]सार्धद्वादशसहस्रयोजना[6]यामात् क्षँकारपरिणता। तदुप-[254b]रि हँकारपरिणतं **चन्द्रमण्डलं** कर्णिकातुल्यम्। तदुपरि विसर्गपरिणतं **सूर्यमण्डलम्**। तदुपरि **अग्निरिति** राहुमण्डलं नीलवर्णं बिन्दुपरिणतम्। एवं समस्तमेक- 20 लोलीभूतं ह् क्ष् म् ल् व् र् यँ इति बीजाक्षरं विभाव्य ततो लोकधातुं निष्पन्नं [7]चिन्तयेदिति बाह्ये। अध्यात्मनि [8]मातृशरीरे ललाटे पूर्वोक्तविधिना वायुमण्डलं कण्ठे तेजोमण्डलं हृदये तोयमण्डलं नाभौ पृथ्वीमण्डलम्। नाभेर्गुह्यकमलपर्यन्तं T 339 महामेरुः। गुह्यकमलं [9]भगवतः कमलमिव। विण्मूत्रशुक्रवाहिन्यस्तिस्रो नाड्यश्चन्द्रसूर्यराहुमण्डलानि। गुह्यकमलकर्णिकायां समाहारस्तेषामिति। एवं तदुपरि **कूटागारं** 25 **समन्तात् स्फुरदमलकरं वज्रजं** हूँकारजं वज्र**पञ्जरं वा**, मातृयोनौ **सकुलिशकमलम्** (का. त. ५.१२०) इति ज्ञापकात्। तेनैव वज्रमयं पञ्जरं वा **तन्मध्ये वज्रभूमौ** भ्रुँकारपरिणतं ॐकारपरिणतं वा **मणिकरनिकरैर्मण्डलं विस्फुरन्तम् ॐकारं ज्ञानजातं जिनवरकमलं चन्द्रसूर्यासनानामिति** चित्तमण्डलं भूवलयान्तम् ॥ ८ ॥

---

१. च. भो. 'पूर्व' नास्ति। २. क. ख. च. छ. दशाकार। ३. ग. 'शुक्ल' नास्ति।
४. ग. च. भो. 'तुल्यं' नास्ति। ५. भो. 'सार्ध'''णता' नास्ति। ६. ग. याम।
७. च. विचि। ८. भो. Mihi Lus La (नृशरीरे)। ९. च. भगवत्।

बाह्ये वाङ्मण्डले वै वसुकमलमिदं चन्द्रसूर्यैर्विहीनं
बाह्ये दिक्कोणभागे दिनकरकमलं द्वारमध्ये रथाश्च ।
अर्कद्वारेषु राजन् मणिकनकमयैस्तोरणैश्च श्मशानै-
र्द्व्यष्टस्तम्भैश्च गर्भे कुलिशमयसुसम्भोगचक्रं जिनस्य ।।९।।

5 तद् **बाह्ये वाङ्मण्डले** समुद्रवलयान्ते [1]**वसुकमलमिदं** कमलाष्टकं **चन्द्रसूर्यैर्विहीनम्**, तस्यैव **बाह्ये** कायमण्डले वायुवलयान्ते **दिनकरकमलमिति** द्वादशकमलं चन्द्रसूर्यैर्विहीनम् । एवं **चतुर्द्वारे रथाश्च** । एवं कायमण्डलं चतुर्लक्षयोजनायामम्, वाङ्मण्डलं तदर्धम्, चित्तमण्डलं [2]तस्याप्यर्धम्, महासुखचक्रं तस्याप्यर्धं भगवतः [3]पद्मम् । पद्मत्रिभागिका कर्णिका चन्द्रादित्यराहुमण्डलानि । तथैवमध्यात्मनि गुह्य-
10 कमलाद् अध ऊर्ध्वं हृदयाद् गुह्यकमलं शिरो या[255a]वत् । अथवा हृदयाद् बाहूपबाहुनखान्तं यावद् मातृशरीरे विकल्पभावादिति नियमः । एवं प्रत्येकमण्डले चतुश्चतुर्द्वाराणि । एवं द्वादश द्वाराणि । **अर्कद्वारेषु राजन्निति** संबोधनम् । **मणिकनकमयैस्तोरणैश्च** कायमण्डलबाह्ये अष्टश्मशानैश्च । **गर्भे द्व्यष्टस्तम्भैः** षोडशकलाभेदेन षोडशस्तम्भैः । **कुलिशमयं** बोधिचित्तमयं **सुसम्भोगचक्रं जिनस्येति** । अस्य कायधातुभि-
15 र्विशुद्धिर्ज्ञानपटले वक्तव्या । अत्र **मूलतन्त्रानुसारेण** धर्मस्कन्धविशुद्धिरुच्यते । अत्र भगवानाह—

बुद्धधर्ममहासंघैश्चित्तवाक्कायमण्डलम् ।
चतुर्ब्रह्मविहारैश्च वज्रसूत्रचतुष्टयम् ।।

चतुर्भिः स्मृत्युपस्थानैश्चतुरस्रं समन्ततः ।
20 द्वादशाङ्गनिरोधेन द्वाराणि द्वादशानि च ।।

भूमिभिर्द्वादशैस्तद्वत् तोरणानि शुभानि च ।
आर्याष्टाङ्गिकमार्गैश्च श्मशानान्यष्टदिक्षु च ।।

शून्यता षोडश स्तम्भाः कूटागारं तु[4] धातुभिः ।
निर्यूहाष्टविमोक्षैश्च रूपिभिश्चाष्टभिर्गुणैः ।।

25 कपोला [5]पक्षकाश्चैव चित्तवाक्कायभेदतः ।
शीलादिपञ्चभिः स्कन्धैः पञ्चवर्णं विशोधितम् ।।

त्रि[6]प्राकारैस्त्रियानैश्च पञ्चश्रद्धेन्द्रियादिभिः ।
श्रद्धादिभिर्बलैः पञ्च चित्तवाक्कायमण्डले ।।

---

१. च. भो. वसुदल । २. ग. तस्यार्धं । ३. च. मण्डलम् । ४. च. रं च । ५. क. ख. पक्षक । ६. च. छ. प्राकारा ।

समाधिधारिणीभिश्च वेदिका मण्डलत्रये।
दशपारमितापूर्णैर्विचित्रा रत्नपट्टिका॥

हारार्धा वेणिकाक्षमैंरष्टादशभिरेव ते।
बकुली वशिताभिश्च कुशलैः [1]कवशीर्षकम्॥

शून्यतादिविमोक्षैश्च घण्टादिध्वनिपूरितम्।
ऋद्धिपादैर्ध्वजाकीर्णं प्रहाणैर्दर्पणोज्ज्वलम्॥

बोध्यङ्गैश्चामरो[2]द्धूतं नवाङ्गैः स्रग्दाममण्डितम्।
चतुर्भिः संग्रहैः कोणं विश्ववज्रैरलङ्कृतम्॥

खचितं सत्यच(सच्च)[3]तूरत्नैर्द्वारनिर्यूहसन्धिषु।
पञ्चाभिज्ञामहावलयैर्वेष्टितं पञ्चभिः सदा॥

सर्वाकारज्ञ[4]बोध्यङ्गवज्रावल्या सुवेष्टितम्।
सुखैकचक्र[5]वाडेन ज्ञानवज्रार्चिषा तथा॥

प्रज्ञोपायविभागेन चन्द्रसूर्यं सदोदितम्।
चित्तवाक्कायसंशुद्धं धर्मचक्रं महाघटम्॥

दुन्दुभिर्बोधिवृक्षश्च तच्चिन्तामणिकादिकम्।
एतच् छ्रीकालचक्रस्य मण्डलं धर्मधातुकम्॥

सर्वसम्पत्करं ध्यात्वा आदिकायं ततो न्यसेत्।

इति गर्भशोधनाविधिर्भगवतो गर्भा[255b]वक्रमणकाले॥९॥

इदानीं बाह्ये[6]देवतानिष्पत्तिरध्यात्मनि गर्भनिष्पत्तिरुच्यते—

आद्याः काद्येन्दुसूर्येऽपि कुलिशसहिताः पञ्चकादर्शकाद्ये-
र्मुञ्चन्तं पञ्चरश्मीन् स्फुरदमलकरं भावयेत् कालचक्रम्।
वज्रालङ्कारदेहं जिनवरकमलं सूर्यबाहुं युगास्यं
त्रिग्रीवं सूर्यनेत्रं विकसितवदनं चार्धदंष्ट्राकरालम्॥१०॥

आद्या इत्यादिना। इह मण्डलकर्णिकोपरि चन्द्रसूर्यराहुमण्डलोपरि चन्द्रमण्डले आद्या द्वात्रिंशल्लक्षणार्थं वामदक्षिणावर्तेन देया त्रिंशत् स्वरा बिन्दुर्विसर्गश्चेति। द्वात्रिंशत् तत्र अ इ ऋ उ ऌ इति प्रथमकलापञ्चकम्। ततो गुणभेदेन अ ए अर् ओ

---

१. भो. क्रम, ग. क्रव। २. क. ख. छ. द्धुतं। ३. छ. भूरत्नै। ४. च. ज्ञता।
५. च. वाटेन। ६. क. ख. ग. भो. बाह्य।

अलिति द्वितीयकलापञ्चकम्। ततो यणादेशेन हृ य र व लेति तृतीयकलापञ्चकम्। [1]पञ्चदशकलान्ते बिन्दुः। अं[2] इति षोडश वामावर्तेन। ततो दक्षिणावर्तेन कृष्णप्रतिपदादिकला देयाः। ला वा रा या हा आल् औ आर् ऐ आ लॄ ऊ ॠ ई आ इति पञ्चदश, अमान्ते विसर्गः अः इति षोडशस्वराः। एतानि द्वात्रिंशन्महापुरुषलक्षणानि [3]चन्द्रांशे गर्भाधाने शुक्रधाताविति नियमः। ततः काद्या अर्कमण्डले चत्वारिंशदेकव्यञ्जनात्मानः। चत्वारिंशत् [4]संयुक्ताः। तत्र हृ य र व लेन षड्वर्गाः। पञ्चत्रिंशद्भवन्ति। तथा द्विधोच्चारणवशाद् ल-व-य-ड-ढा[5] गृह्यन्ते[6] ल्ल व्व य्य ड्ड ढ्ढ ल्ल व्व र्र य्य ह्ह स्स ≍प्प श्श ≍क्क त्त थ्थ द्द ध्ध न्न प्प फ्फ ब्ब भ्भ म्म ट्ट ठ्ठ ड्ड ढ्ढ ण्ण च्च छ्छ ज्ज झ्झ ञ्ञ क्क ख्ख ग्ग घ्घ ङ्ङ इति चत्वारिंशद्दक्षिणावर्तेन पृथिव्यादिभेदेन संयुक्ताः। ततो वामावर्तेन ङ घ ग ख क। ञ झ ज छ च। ण ढ ड ठ ट। म भ ब फ प। न ध द थ त। ≍क श ष ≍प स। हृ य र वँ ल। ढ ड य व ल। इति चत्वारिंशदेकव्यञ्जनात्मानः। एवमशीतिव्यञ्जनानि सूर्ये गर्भाधाने [7]रजसीति नियमः। **एवमाद्याः काद्येन्दुसूर्येऽपि कुलिशसहितास्तयोः**। [8]सूर्यस्तले चन्द्रः सूर्योपरि चन्द्रमध्ये हूँकारं चन्द्रा[9]र्कवत्। एवं रजोपरि [11]शुक्रम्। शुक्रमध्ये आलयविज्ञानं गन्धर्वसत्त्वम्। ततः **पञ्चका[12]दर्शकाद्यैरिति**। ततश्चन्द्रः शुक्रं स्वरान्वितम्। आदर्शज्ञानं [13]रूपस्क[256a]न्धजनकं वैरोचनः सूर्यो रजो व्यञ्जनान्वितः। समताज्ञानं वेदनास्कन्धजनको रत्नसंभवः। प्रत्यवेक्षणा[14] गन्धर्वसत्त्वं हूँकारान्वितं संज्ञास्कन्धजनकोऽमिताभः। तेषामेकत्वं प्राणवायुः। ह्रो(ह्रीः)कारान्वितः। कृत्यानुष्ठानज्ञानं संस्कारस्कन्धजनकोऽमोघसिद्धिः। ततः सर्वाङ्गावयवपरिपूर्णं विज्ञानं हँकारान्वितं सुविशुद्धधर्मधातुज्ञानं विज्ञानस्कन्धजनकोऽक्षोभ्य इति पञ्चज्ञानात्मकं बाह्येऽध्यात्मनि च। एषामेकलोलीभूतं बीजं स्वराणां बिन्दुः, व्यञ्जनानां विसर्गः, विज्ञानस्यानाहतम्। प्राणस्य अकारः, इत्युक्तक्रमेण भगवन्तं **मुञ्चन्तं पञ्चरश्मीन् स्फुरदमलकरं भावयेत् कालचक्रमिति**। बाह्ये गर्भे च कायनिष्पत्तिनियमः।

इदानीं देवताविग्रहे कालविभागेन संस्थानमुच्यते—वज्रेत्यादि। इह देवतानामुत्पादकाले सर्वालङ्कारसहित उत्पादः, [15]तेन नानाशरीरावयवा नानावर्णा नानासंस्थाना एवोत्पद्यन्ते। [16]अतो **वज्रालङ्कारदेहं जिनकरकमलं** चतुर्विंशतिकरम्, सूर्यं इति **द्वादशबाहुम्। युगास्यं** चतुर्मुखं **त्रिग्रीवं** द्वादशनेत्रं **विकसितवदनं चार्धदंष्ट्रा-**

---

१. ग. 'ततः' इत्यधिकम्। २. ग. च. छ. भो. अं। ३. ग. च. भो. चन्द्राङ्के, छ. चद्रांशं। ४. क. ख. ग. भो. संयुताः, छ. संपुटाः। ५. क. ख. छ. ढ। ६. क. ख. मृज्यन्ते। ७. ग. लव। ८. ग. तेजसि। ९. ग. भ. सूर्यतले, च. स्ततो। १०. क. ख. च. छ. ङ्कवत्। ११. ग. शुक्रः। १२. भो. Me Loṅ La Sogs Pa lṅa (पञ्चादर्शाद्यैः)। १३. ग. स्वरूप। १४. भो. Ye Śes (०ज्ञानं)। १५. क. ख. च. छ. भो. स्ते च। १६. ग. अन्ये।

करालमिति कायनिष्पत्तौ काय[1]विज्ञानाधिपतेर्लक्षणम्। मध्ये मण्डलकमलकर्णिकायां [2]स्वशरीरान्तर्भूतो देवताविन्यासो मण्डलाकार उच्यते॥ १०॥

श्रीमत्योङ्कारजाते जिनपतिकमले चन्द्रसूर्याग्निमूर्ध्नि
रुद्रानङ्गद्वयोर्हृत्सुललितचरणालीढपादं जिनेन्द्रम्।
मारो रक्ते च सव्ये वरचरणतले शुक्लवामे च रुद्रो 5
मध्यं सव्यावसव्यं भ्रमररविनिभं चन्द्रवर्णं च कण्ठम् ॥११॥

श्रीमति ॐकारजाते जिनपतिकमले हृत्कमले **चन्द्रसूर्याग्निमूर्ध्नि** ललना-रसनाऽवधूतीमूर्ध्नि **रुद्रानङ्गयोर्द्वयोर्मा**रक्लेश[3]पक्षयोर्वामदक्षिणप्रवा[256b]हयोः, **हृदि सुललितचरणालीढपादं जिनेन्द्रमिति**। तत्र **मारः** कामदेवः पञ्चपुष्पबाणधनुर्हस्तः पाशाङ्कुशधरश्चतुर्भुज एकवक्त्रो **रक्तवर्णः सव्ये** पादतले रक्त[4]वर्णः। तथा रुद्रस्त्रिनेत्र 10
एकाननश्चतुर्भुजस्त्रिशूलडमरुकपालखट्वाङ्गधरो वामपादतले शुक्ले **शुक्ल** इति। एवं नीलाङ्गं तथा मध्यकण्ठं नीलं दक्षिणे[5] **रविनिभं** रक्तम्। **अवसव्यं** वामं **चन्द्रवर्णं** शुक्लमेवं त्रिकण्ठं पूर्वोक्तविधानात्। पूर्वमुखं कृष्णं द्रंष्ट्राकरालोग्रम्। दक्षिणं सरागं रक्तं वामं प्रशान्तं शुक्लम्। पश्चिमं समाधिस्थं पीतम्। जटामुकुटे विश्ववज्रम् अर्धचन्द्रं वज्रसत्वमुकुटं। वज्रमणिवज्रकुण्डलवज्रकण्ठिकावज्ररुचकवज्रमेखला- 15
वज्रनूपुरवज्रपट्टवज्रमालाव्याघ्रचर्माम्बरधरम्॥ ११॥

स्कन्धं नीलं च रक्तं शशधरधवलं दक्षिणे चोत्तरे च
द्वौ द्वौ सव्यावसव्येऽसितरविवपुषौ बाहवश्चन्द्रवर्णाः।
तद्वद् वै त्र्यष्टकेन प्रहरणसहिताः पाणयश्च क्रमेण
पञ्चाङ्गुल्यस्त्रिपर्वाः शशिकरकमले पञ्चवर्णाः स्फुरन्त्यः ॥१२॥ 20

तथा दक्षिण**स्कन्धं** प्रथमं **नीलं** द्वितीयं **रक्तं** तृतीयं शुक्लम्। एवमु**त्तरे च**। एवं **द्वौ** बाहू नीलौ **द्वौ** रक्तौ द्वौ शुक्लौ **दक्षिणे चोत्तरे च**। एवं कराश्चत्वारः कृष्णाः। चत्वारो रक्ताः। चत्वारः शुक्लाः। दक्षिणे चोत्तरे च। ते च वक्ष्यमाण**प्रहरणैः सहिताः**। एवं प्रत्येककरे **पञ्चाङ्गुल्यस्ताः**[6] प्रत्येका**स्त्रिपर्वाः**। अङ्गुष्ठः पीतः। तर्जनी शुक्ला। मध्यमा रक्ता। अनामिका कृष्णा। कनिष्ठा हरिता। हस्ततलात् सर्वाङ्गुलीनां [7]प्रथमा 25
पर्वपङ्क्तिः कृष्णा। द्वितीया रक्ता। तृतीया शुक्लेति। एवं **शशिकरकमले** प्रत्येकं[8] **पञ्च-वर्णास्ता** मुद्रिकाभिः [9]**स्फुरन्त्यः**। [10]इत्यविद्यासंस्कारविज्ञानानु[11]प्रवेशनियमो गर्भे तृतीय-मासः प्रथममात्रा॥ १२॥ [257a]

---

१. च. 'वि' नास्ति। २. क. ख. छ. 'स्व' नास्ति। ३. क. ख. च. भो. यक्ष। ४. च. वर्णे। ५. ग. च. क्षिणं। ६. भो. 'कनिष्ठा हरिता' इत्यनन्तरं 'ताः ...... पर्वाः' अयं पाठः। ७. क ख. च. छ. प्रथम। ८. ग. च. त्येके। ९. ग. स्फर। १०. भो. De lTar (एवं)। ११. भो. rNam Par Śes Pa rNams (विज्ञानानि)।

इदानीमस्त्रवृन्दमुच्यते—

कृष्णे रक्ते च शुक्ले प्रवरकरतले संस्थितं चास्त्रवृन्दं
वज्रं खड्गस्त्रिशूलं भुवनभयकरा कर्तिका वह्निबाणः ।
तस्माद् वज्राङ्कुशो वै सरवडमरुको मुद्गरश्चक्रमेव
5 कुन्तो दण्डः कुठारो रविकरकमले दक्षिणे वज्रिणश्च ॥१३॥

कृष्ण इत्यादिना । **कृष्णे** करतलचतुष्के प्रथमे **वज्रम्**, द्वितीये **खड्गः**, तृतीये **त्रिशूलम्**, चतुर्थे **कर्तिकेति** । तथा **रक्ते** करतलचतुष्के प्रथमेऽग्निबाणः, द्वितीये **वज्राङ्कुशः**, तृतीये [1]**रणड्डमरुकः**, चतुर्थे **मुद्गर** इति । तृतीये **शुक्ले** करतलचतुष्के प्रथमे करतले **चक्रम्**, द्वितीये **कुन्तः**, तृतीये **दण्डः** । चतुर्थे [2]पर्शुरिति **दक्षिणेऽस्त्र-
10 वृन्दम्**, रविकरकमले दक्षिणे **वज्रिणश्चेति** ॥ १३ ॥

इदानीं [3]वामकृष्णकर[4]तलचतुष्के चिह्नमुच्यते—

घण्टा खेटं च खट्वाङ्गविकसितमुखं रक्तपूर्णं कपालं
कोदण्डं पाशरत्ने कमलजलचरौ दर्पणः शृङ्खला च ।
वेदास्यं ब्रह्मणो यच्छिरकमलमलं वामहस्ते जिनस्य
15 कुर्वन्त्यौ दीनवक्त्रं धृतचरणतले माररुद्रस्वदेव्यौ ॥१४॥

प्रथमे **वज्रघण्टा**, द्वितीये **खेटम्**, तृतीये **खट्वाङ्गं विकसितमुखम्**, चतुर्थे **रक्तपूर्णं कपालमिति** । तथा रक्ते करतलचतुष्के प्रथमे **कोदण्डम्**, द्वितीये **पाशः**, तृतीये मणिरत्नम्, चतुर्थे श्वेत**कमलमिति** । तथा शुक्ले करतलचतुष्के, प्रथमकरतले **जलचर** इति शङ्खः, द्वितीये **दर्पणः**, तृतीये वज्र**शृङ्खला**, चतुर्थे **ब्रह्मशिर** इति ।
20 एवं **वेदास्यं ब्रह्मणो यच्छिरकमलमलं** [5]भूषणं **वामहस्ते जिनस्येति** । तत्र माररुद्र-संनिधाने **कुर्वन्त्यौ दीनवक्त्रं धृतचरणतले माररुद्रयोः स्वदेव्यौ** रतिर्मारस्य, उमा रुद्रस्येत्यक्षोभ्यप्रवेशः ॥ १४ ॥ [257b]

इदानीं विश्वमातालक्षणमुच्यते—

हेमाभा वेदवक्त्रा वसुकरकमलालिङ्गिता विश्वमाता
25 सव्ये कर्त्यङ्कुशो वै सरबडमरुकश्चाक्षसूत्रं क्रमेण ।
वामे शुक्तिश्च पाशः शतदलकमलं दिव्यरत्नं तथैव
प्रत्यालीढार्कनेत्रा जिनपतिमुकुटा मुद्रिता मुद्रिकाभिः ॥१५॥

---

१. ग. 'रणत्' नास्ति । २. ग. च. परशु । ३. च. वामे । ४. ख. छ. तले ।
५. च. 'भूषणं' नास्ति ।

हेमाभेत्यादिना । तत्रैकसमरसाच्चन्द्रशुक्रस्वभावेन भगवत उत्पादः, सूर्यरजःस्वभावेन देव्या उत्पादः । तत्र श्वेतकृष्ण[१]धर्मा चन्द्रः, रक्तपीत[२]धर्मा सूर्यः । तेन **हेमाभा वेदवक्त्रा** चतुर्मुखा **वसुकरकमला** अष्टभुजाग्रत **आलिङ्गिता विश्वमाता** । तस्याः प्रथमकरे दक्षिणे, **कर्तिका**, द्वितीयेऽङ्कुशः, तृतीये **सरवडमरुकः**, चतुर्थे **अक्षसूत्रमिति** । **वामे** प्रथमकरे **शुक्तिः**, द्वितीये **पाशः**, तृतीये **शतदलकमलं** धवलम्, चतुर्थे **दिव्यरत्नं तथैव च** । एवमालीढो भगवान् **प्रत्यालीढा** विश्वमाता । **अर्कनेत्रा** द्वादशनेत्रा **जिनपतिमुकुटा** वज्रसत्त्वमुकुटा । **मुद्रिता पञ्चमुद्राभिः** समापत्तिस्था ॥ १५ ॥

अष्टौ देव्योऽष्टपत्रे वसुकरकमला वेदवक्त्रार्कनेत्राः
कोणे तासां चतस्रस्त्वहिचमरधरा वक्त्रभेदैर्जिनस्य ।
ईशे नैर्ऋत्यकोणे शिखिनि च पवने धर्मशङ्खश्च गण्डी
एवं चिन्तामणिः स्याद् भवति खलु तथा कल्पवृक्षक्रमेण ॥१६॥

तस्या विश्वमातुर्ज्ञानपारमितायाा अन्तर्भाविता अपराः पारमिता[3] दानादयः पारमिता **अष्टपत्रे**[४]**ष्वष्टौ देव्यः** । ता **वसुकरकमला** अष्टभुजाः, **वेदवक्त्राश्चतुर्मुखाः**, **अर्कनेत्रा** द्वादशलोचनाः । **तासां** मध्ये **चतस्रोऽहिचमरधरा** अष्टभुजैरष्टचमरधराः । चतुःकोणे **वक्त्रभेदैर्जिनस्येति** । अग्नौ कृष्णा, नैर्ऋत्ये रक्ता, वायव्ये पीता, ईशाने शुक्ला । एवं तासां [५]पृष्ठत **ईशे धर्मशङ्खः** शुक्लः, **नैर्ऋत्ये धर्मगण्डी** रक्ता, **शिखिनि चिन्तामणिः** कृष्णः, **वायव्ये कल्पवृक्षः**[258a] पीत इति । एवं पूर्वपत्रे कृष्णा, दक्षिणे रक्ता, उत्तरे श्वेता, पश्चिमे पीतदीप्तेति । यथा भगवतो मुखभेदश्चतुर्दिक्षु भेदेन तथा देवीनां विश्वमातुः प्रथमं मुखं हेमाभम्, दक्षिणं[६] शुक्लम्, वामं[७] रक्तम्, पश्चिमं[८] नीलम् । एवं पीतानां देवीनाम् । शुक्लानां [९]शुक्लं पूर्वम्, दक्षिणं कृष्णम्, पश्चिमं रक्तम्, वामं पीतम् । रक्तानां प्रथमं रक्तम्, दक्षिणं पीतम्, वामं नीलम्, पश्चिमं शुक्लम् । कृष्णानां पूर्वं कृष्णम्, वामं शुक्लम्, पश्चिमं पीतमिति । गर्भपद्मदेवीनां यथा भगवत्या अलङ्काराः पञ्चमुद्रास्तथा ज्ञातव्या इति नियमः ॥ १६ ॥

इदानीं कृष्णदीप्तादीनां सव्यवाम[१०]हस्तेषु [११]चिह्नान्युच्यन्ते—　　T 341

कृष्णाया धूपपात्रं प्रथमकरतले शीतपात्रं द्वितीये
पिष्टं रक्तं तृतीये समदशशधरं सव्यहस्ते चतुर्थे ।

---

१. ग. च. भो. धर्मी । २. ग. धर्म, च. भो. धर्मी । ३. च. मितायाः, ग. दानादयोऽपरा पारमिता । ४. क. ख. ग. छ. पत्रेऽष्ट । ५ ग. च. भो. पृष्ठ । ६. ग. दक्षिणे । ७. ग. वामे । ८. क. ख. छ. पश्चिमे । ९. च. पूर्वं शुक्लम् । १०. क. ख. छ. हस्ते । ११. क. ख. ग. च. छ. चिह्नमु ।

वामे घण्टा च पद्मं सुरतरुकुसुमं पुष्पमाला क्रमेण
रक्ताया दीपहारौ समुकुटकटकं दक्षिणे वामहस्ते ॥१७॥

कृष्णेत्यादि। **कृष्णाया धूपपात्रं प्रथमकरतले, शीतपात्रं** चन्दनपात्रं **द्वितीये, पिष्टं रक्तं** कुङ्कुमपात्रं **तृतीये, समदशशधरं** कस्तूरिकासहितं कर्पूरपात्रं **चतुर्थे**। इति दक्षिणकरेषु। **वामे** प्रथमहस्ते **घण्टा**, द्वितीये **पद्मम्**, तृतीये **सुरतरुकुसुमम्**, चतुर्थे नानापुष्पमाला **क्रमेणेति** पूर्वपत्रे। **रक्त**दीप्तायाः प्रथमहस्ते सव्ये **प्रदीपः**, द्वितीये **हारः**, तृतीये [1]**मुकुटः**, चतुर्थे **कटकमिति** सव्ये ॥ १७ ॥

वस्त्रं वै मेखला च स्फुरदमलकरं कुण्डलं नूपुरं च
पीतायाः शङ्खवेणू समणिडमरुकः सव्यहस्ते क्रमेण।
वामे वीणा च ढक्का प्रगुणरणरणत्कंसिका काहला च
दुग्धाम्ब्वौषध्यपानं त्वमृतरसफलं भक्तपात्रं सितायाः ॥१८॥

[258b]

तथा वामहस्ते प्रथमे **वस्त्रम्**, द्वितीये **मेखला**, तृतीये रत्न**कुण्डलम्**, चतुर्थे **नूपुरमिति**। तथा **पीत**दीप्तायाः सव्ये प्रथमकरे **शङ्खः**, द्वितीये **वेणुः**, तृतीये **मणिः**, **डमरुकश्**चतुर्थ इति। **वामे** प्रथमे **वीणा**, **द्वितीये ढक्का**[2], तृतीये **रणत्कंसिका**[3], चतुर्थे **काहला च** क्रमेणेति। तथा श्वेतदीप्तायाः, [4]प्रथमे हस्ते **दुग्ध**पात्रम्, द्वितीये-ऽम्बुपात्रम्, तृतीये दिव्यौ**षधी**, चतुर्थे **मद्य**पात्रम्। वामे प्रथमहस्ते **अमृत**पात्रम्, द्वितीये सिद्धरसपात्रम्, तृतीयेऽमृत**फलम्**, चतुर्थे **भक्तपात्रं सितायाः**। इति वज्रसत्त्वनिष्पत्तिः स्वमुद्रासहिता ॥ १८ ॥

दिक्पद्मेष्वब्धिबुद्धाः खलु नवनयना वह्निवक्त्रर्तुहस्ताः
कोणे तारादिदेव्यः पुनरपि च तयोरष्टकक्षेऽष्टकुम्भाः।
कृष्णा रक्ता च पीता शशधरधवला देवता देवती च
कृष्णा श्वेतेन्दुमूर्ध्नि त्वथ विदिशि गते रक्तपीतेऽर्कमूर्ध्नि ॥१९॥

इदानीं नामरूपाद्युत्पादाय महारागवैनेयसप्तलोकमादिबुद्धदेशनायां भाजनमभिसंवीक्ष्य सुरतध्वनिना स्वकायेऽक्षोभ्यादिजिनसमूहं प्रवेश्याकाशादिधातुसमूहं

१. ग. मकुटः। २. भो. दुन्दुभिः, छ. 'ढक्का "दुग्धपात्रं द्वितीये' नास्ति। ३. ग. केसिका, च. कांचिका। ४. च. सव्ये।

पुरुषविद्याचक्षुरादिरूपादिविषयस्वभावेन देवतास्वरूपाविर्भूतं पुनरपि [1]तं स्वकायान्निश्चार्य विश्वमातरि यथावदन्तर्भावयेत्। ततस्तथैव निश्चार्य पुनरपि मण्डलचक्राकारान् तथागतान् सधातून् स्वकाये प्रवेश्य चन्द्रद्रवापन्नान् स्वकुलिशेनोत्सृज्य स्वविद्याकमलोदरे तत्परावृत्तं देवतादेवतीगणमण्डलमाधाराधेय-लक्षणमक्षोभ्याधिपतिं ध्यात्वा पूर्वं भगवतः काये प्रवेशयेत्। ततो **दिक्पद्मेष्व-ब्धिबुद्धाश्चत्वारः खलु नवनयना वह्निवक्त्रास्त्रिमुखा ऋतुहस्ताः षड्भुजाः** स्फारणीयाः। तत्र पूर्वपद्मे सूर्यमूर्ध्नि अमोघसिद्धिः कृष्णः दक्षिणावर्तेन कृष्णरक्त-सितवदनः, दक्षिणे रत्नसंभवो रक्तवर्णो दक्षिणावर्तेन रक्तसितकृष्णाननः, उत्तरे अमिताभः शुक्लो दक्षिणाव[259a]र्तेन सितकृष्णरक्ताननः, पश्चिमे वैरोचनः पीतो दक्षिणावर्तेन पीतसितकृष्णानन इति चत्वारः सूर्यमण्डले। **"दिनस्तु भगवान् वज्री"** (वि. प्र. पृ. 150) इति ज्ञापकात्। आग्नेय्यां **तारा** अमोघसिद्धिवत्, नैर्ऋत्ये पाण्डरा रत्नसंभववत्, ईशाने मामकी अमिताभवत्, वायव्ये लोचना वैरोचनवत्, इति चतस्रश्चन्द्रमण्डले। **"नक्तं प्रज्ञा प्रकीर्तिता"**(वि. प्र. पृ. 150)इति ज्ञापकात्। **पुनरपि च तयोर्देवता** देव्योर्मध्येऽष्ट**कक्षास्वष्टामृतकलशाः**। एवं **कृष्णा रक्ता च पीता शशधरधवला देवता देवती** चेति। पूर्वद्वारेऽतिबलः क्रोधो वर्णमुखभुजतोऽमोघसिद्धिवत् कृष्णः, दक्षिणद्वारे जम्भको रत्नसंभववद् वर्णमुखभुजतो रक्तः, पश्चिमद्वारे स्तम्भको वैरोचनवद् [3]वर्णमुखभुजतः पीतः, उत्तरे मानकोऽमिताभवद् वर्णमुखभुजतः शुक्लः, ऊर्ध्वे उष्णीषोऽक्षोभ्यवद् वर्णमुखभुजतः श्यामः। किन्त्वेते क्रोधा आलीढाः, क्रोधदेव्यः प्रत्यालीढा इति। चतुर्थे मासे नामरूपोत्पादकाले रूपं चतुर्महाभूतात्मकं वाय्व-ग्न्युदकपृथ्वीधात्वात्मकम्। तेन [4]स्कन्धधातुक्रोधानामुत्सर्गः॥ १९ ॥

ततः पञ्चमे मासे षडायतनोत्पादकाले खगर्भादीनुत्सृजेत्—

वैगर्भाद्याश्च भित्तौ दिशिविदिशिगताः स्पर्शवज्रादयश्च
पूर्वे सव्येऽत्रसव्ये परदिशिकमले विश्वभद्रस्तथैव।
श्रीमान् वै वज्रपाणिः खलु खकुलिशा धर्मधातुः क्रमेण
जम्भः स्तम्भश्च मानस्त्वतिबल इति यो द्वारपालः स पूर्वे ॥२०॥

[5]वैगर्भाद्याश्च [6]भित्ताविति। इह वायुजन्यो घ्राणो वेगर्भोऽमोघसिद्धिवत् संस्थानतः पूर्वद्वारस्य सव्ये प्राकारभित्तौ **दिशी**ति। **विदिशिगता**ऽऽग्नेयकोणे वायुजन्या **स्पर्शवज्रा** तारावत् संस्थानतः। एवं दक्षिणद्वारसव्ये तेजोजन्यं चक्षुः क्षितिगर्भो रत्नसंभववत् संस्थानतः। एवं तेजोधातुजन्या रसवज्रा पाण्डरावन्नैर्ऋत्यकोणे पश्चिमद्वारसव्ये। पृथिवीजन्यं [7]कायेन्द्रियं सर्वनीवरणविष्कम्भी वैरोचनवत्। एवं [8]पृ[259b]थ्वीजन्या

---

१. छ. तत्त्वकाया। २. च. भो. देवी। ३. क. ख. ग. छ. मुखवर्ण। ४. ग. च. भो. धातुकस्कन्ध। ५. भो. mKhaḥi sÑin (खगर्भ)। ६. भो. 'भित्तौ' नास्ति। ७. छ. "कायेन्द्रियः ""एवं पृथ्वी' नास्ति। ८. भो. Sa Khams Las (पृथ्वीधातु)।

गन्धवज्रा वायुकोणे लोचनावत्। उत्तरद्वारसव्ये उदकजन्या जिह्वा लोकेश्वरोऽमिताभवत्। ईशाने उदकजन्या रूपवज्रा मामकीवत्। अधो [1]ज्ञानधातुजन्यं मनः समन्तभद्रो नीलवर्णस्त्रिमुखः षड्भुजो वर्णतः कालचक्रवत् पूर्वद्वारस्य वामे प्राकारभित्तौ। एवं ज्ञानधातुजन्या शब्दवज्रा उत्तरद्वारवामे समन्तभद्रवत् [2]संस्थानतः। ऊर्ध्वे आकाशधातुजन्यं श्रोत्रं वज्रपाणिरक्षोभ्यवत् श्यामो दक्षिणद्वारवामे। एवमाकाशधातुजन्या धर्मधातुवज्रा पश्चिमद्वारस्य वामे वज्रपाणिवत् [2]संस्थानतः। एवं षडायतनं पञ्चमे मासे "**षष्ठे स्पर्शः**" इति ज्ञापकात् स्पर्शादयो विषयाः। एवं द्वादशायतनोत्सर्गो [3]द्वितीयमात्रा कायवज्रस्य। अत्र कृष्णा[:] श्वेता देवतादेव्यः पूर्वोत्तरा ऊर्ध्वस्थाश्चन्द्रमण्डले देयाः, शुक्रधर्मित्वात् खवायूदकधातूनाम्। अथ विदिशिगताः कोणदेव्यश्चन्द्रे "नक्तं प्रज्ञा प्रकीर्तिता" (वि. प्र. पृ. 150) इति वचनात्। एवं [4]रक्ता पीता दक्षिणपश्चिमा[5] देवतादेव्योऽधस्ताच्च, सूर्यमण्डले ज्ञानतेजःपृथ्वीधातूनां रजोधर्मित्वात्। अथ दिशिगता देवताः सूर्यः "**दिनस्तु भगवान् वज्री**" (वि. प्र. पृ. 150)इति वचनात्। एवं यो भगवतोऽभिमुखः स नायको दिक्षु, विदिक्षु देवी नायिका भगवतोऽभिमुखीति। पराङ्मुखोऽनुनायक इति ॥ २० ॥

प्रज्ञोत्सङ्गे ह्युपायः शशधरकमले देवतानां च देवी
अन्योन्यालिङ्गितौ द्वौ स्वकरसलिलजैः स्वस्वचिह्नाङ्कितैश्च।
यच्चिह्नं यस्य सव्ये प्रथमकरतले सास्य मुद्राब्जहीना
प्रज्ञोपायेन चक्रं परमसुखगतं पद्मवज्रासनाढ्यम् ॥२१॥

अतः **प्रज्ञोत्सङ्गे ह्युपायो**ऽनुनायकः **शशधरकमले** कोणभागे विदिक्षु। एवं **देवतानामु**पायानामुत्सङ्गे **देवी** अनुनायिका सूर्यमण्डले दिक्षु। **अन्योन्यालिङ्गितौ द्वौ स्वकरसलिलजैः स्वस्वचिह्नाङ्कितै**र्वक्ष्यमाणै**र्यच्चिह्नं यस्य सव्ये प्रथमकरतले सास्य मुद्राऽब्जहीना**। अब्जचिह्नं वामेऽपि दक्षिणेऽपि साधारणं रत्नं खड्गश्चेति। [260a] एवं पूर्वापरं वामदक्षिणं अध ऊर्ध्वं **प्रज्ञोपायेन चक्रं परमसुखगतं वज्रासनाढ्यम्** उपायनायकम्, **पद्मासनाढ्यं** देवीगण[6]नायकमिति नियमः ॥२१॥

इदानीं चिह्नान्युच्यन्ते—

कृष्णानां खड्गकर्त्यौ भुवनभयकरं सव्यहस्ते त्रिशूलं
वामे खेटं कपालं भवति करतले श्वेतखट्वाङ्गमेव।
बाणो वज्राङ्कुशो वै सरवडमरुकः सव्यहस्ते क्रमेण
वामे कोदण्डपाशौ स्फुरदमलमणिर्लोहितानां तथैव ॥२२॥

---

१. ग. धातुज्ञान। २-२. भो. 'संस्थानतः' नास्ति। ३. भो. gNas sKabs gÑis Pa (द्वितीयावस्था)। ४. च. रक्त। ५. ग. पश्चिम। ६. भो. ḥDren Ma (नायिकामि०)।

कृष्णानामित्यादिना। [1]षट्कुलस्कन्धविशुद्धया षट्चिह्नानि। तत्र **कृष्णानां** संस्कारकुलजानां प्रथमे दक्षिण[2]करे **खड्गः**, द्वितीये **कर्तिका**, तृतीये **त्रिशूलम्**। **वामे** प्रथमे **खेटम्**, द्वितीये **कपालम्**, तृतीये **करतले श्वेतखट्वाङ्गम्** अमोघसिद्धितारा-अतिवलखगर्भस्पर्शवज्राणामिति। **तथा लोहितानां** सव्ये प्रथम[3]हस्तेऽ**ग्निबाणः**, द्वितीये **वज्राङ्कुशः**, तृतीये **सरवडमरुकः**। **क्रमेणे**ति, **वामे** प्रथमे **चापम्**, द्वितीये **वज्रपाशः**, तृतीये **स्फुरदमलमणी** रत्नम्, नवशूकं वेदनाकुलजानां रत्नसंभवपाण्डराजम्भकक्षिति-गर्भरसवज्राणामिति ॥२२॥

पीतानां चक्रदण्डं भयकरकुलिशं सव्यहस्ते क्रमेण
श्रीशङ्खः शृङ्खला वै भवति च सरवा वज्रघण्टा च वामे।
सव्ये श्रीमुद्गरो वै शशधरधवलानां च कुन्तस्त्रिशूलं
वामे श्वेतं च पद्मं शतदलसहितं दर्पणं चाक्षसूत्रम् ॥२३॥

एवं रूपकुलजानां सव्ये प्रथमहस्ते **चक्रम्**, द्वितीये **दण्डः**, तृतीये **भयकर-कुलिशम्**। वामे प्रथमे **शङ्खः**, द्वितीये **वज्रशृङ्खला**, तृतीये **सरवा वज्रघण्टा**। एवं **पीता**[260b]**नां** वैरोचनलोचनास्तम्भकसर्वनीवरणविष्कम्भिगन्धवज्राणामिति। तथा संज्ञाकुलजानां **श्वेतानां सव्ये** प्रथमहस्ते **मुद्गरः**, द्वितीये **कुन्तः**, तृतीये **त्रिशूलम्**। **वामे** प्रथमे **श्वेतं शतदलपद्मम्**, द्वितीये **दर्पणम्**, तृतीये **अक्षसूत्रम्** अमि-ताभमामकीपद्मान्तकलोकेश्वररूपवज्राणामिति ॥२३॥

वज्रं कर्ती कुठारः प्रभवति हरितानां च सव्ये क्रमेण
वामे घण्टा कपालं सकलगुणनिधिर्ब्रह्मवक्त्रं तदेव।
नीलानां वेदितव्यं प्रकृतिगुणवशाद् देवतीनां च तद्वत्
कृष्णा रक्ता च शुक्ला द्रुतकनकनिभाः पूर्वभूम्यादिदेव्यः ॥२४॥

तथा विज्ञानकुलजानां **हरितानां** प्रथमे **सव्ये वज्रम्**, द्वितीये **कर्ती**, तृतीये **पर्शुः**। **वामे** प्रथमे **घण्टा**, द्वितीये **कपालम्**, तृतीये **ब्रह्मशिरः**, अक्षोभ्यवज्रधात्वी-श्वरी-उष्णीवज्रपाणिधर्मधातुवज्राणामिति। एवं **नीलानामपि** ज्ञानकुलजानां वज्रसत्त्व-विश्वमातासुम्भराजसमन्तभद्रशब्दवज्राणामिति चिह्ननियमः। अथवा तारायाः समन्तभद्रस्योत्पलं वा खट्वाङ्गस्थाने ब्रह्मशिरःस्थाने चेति ॥२४॥

अष्टौ धूमादिदेवीर्जिनपतिकमले वर्जयित्वा कदाचित्
श्रीचक्रं गर्भमध्ये भवति नरपते पञ्चविंशात्मकं च।

---

१. च. भो. इह षट्। २. च. दक्षिणे। ३. ग. च. छ. प्रथमे।

ज्ञात्वा शक्तिं स्वचित्ते त्वयमपि भगवान् योगिभिर्भावनीयः
सेकार्थं मण्डलं वा भवति कुलवशाद् बाह्यचक्रप्रहीणम् ॥२५॥

अष्टौ धूमादिदेवीर्वर्जयित्वा अष्टौ घटान् धर्मशङ्खादिकं च **जिनपतिकमले कदाचित् श्रीचक्रं** चित्तमण्डलं **गर्भमध्ये भवति नरपते पञ्चविंशात्मकं च।** उ[261a]पविष्टोऽपि तदा भगवान् भवति श्रीसमाजवत्। अत्र दोषो नास्ति निरन्वयत्वात्। एवं **ज्ञात्वा शक्तिं स्वचित्ते** साधकै**रयमपि भगवान् योगिभिर्भावनीयः। सेकार्थं मण्डलं वा भवति कुलवशाद्बाह्यचक्रप्रहीणम्।**

अत्र सहजसुखं वज्रसत्त्वं शुक्रं गर्भप्रविष्टं प्रथममासेऽविद्या, द्वितीये संस्कारः, तृतीये विज्ञानम्, चतुर्थे [1]रूपम्, [पञ्चमे] रूपसम्बन्धिषडायतनम्। स्पर्शादिकं षष्ठं मासं यावत्, कुलवशादिति भगवतो नियमः। एवं हृदये चित्तमण्डलं [2]च [3]पञ्चपञ्चधात्वात्मकम्। ततः सप्तमे मासे वेदनोत्पादकाले तृतीया मात्रा वाङ्मण्डले कालनाडीदेवीनामुत्सर्गः। तत्र वाङ्मण्डलं कण्ठनिर्माणचक्रपर्यन्तं चतुरस्रं ग्राह्यम्। तत्र निर्माणचक्रे चतुर्विधा नाड्यो गर्भे प्रथमपरिमण्डले चतस्रः, द्वितीयेऽष्टौ, तृतीये द्वादश चित्तवाक्कायस्वभावेन। ततश्चतुर्थपरिमण्डले त्रिवज्रसाधारणाश्चतुःषष्टिनाड्यः। तत्र षष्टिमण्डलवाहिन्यश्चतस्रः शून्याः। एवं कण्ठे मुहूर्तवाहिन्यः त्रिंशत्, द्वे शून्ये। एवं निर्माणचक्रे वाङ्नाड्योऽष्टप्रहरभेदवाहिन्यो द्वितीयपरिमण्डलस्थाश्चतुःषष्टिभिः सार्धमुत्सृजेदिति नियमः, आकण्ठात् ॥ २५ ॥

इदानीं वाङ्मण्डलदेवतोत्सर्ग उच्यते—

बाह्ये चाष्टाष्टकेनाष्टसु कमलदलेष्वष्टदिग्देवतीभि-
र्योगिन्यश्चर्चिकाद्याः शशिरविरहिता वेदहस्तास्त्रिनेत्राः।
पूर्वाब्जे चर्चिकाग्नौ खगपतिगमना शूकरी षण्मुखी च
याम्ये नैर्ऋत्यकोणे सवरुणपवने वज्रहस्ताब्धिवक्त्रा ॥२६॥

बाह्य इत्यादिना। इह चित्तमण्डल**बाह्ये** वाङ्मण्डले। तस्मिन् बाह्ये **चाष्टाष्टकेनाष्टसु कमलदलेष्वष्टदिग्योगिनीभिः** सार्धं **योगिन्यश्चर्चिकाद्याः** शशिरवि[4]रहिताः स्वस्ववाहनस्था **वेदहस्ता** चतुर्भुजा**स्त्रिनेत्रा** नानावक्त्रा इति। तत्र **पूर्वाब्जे चर्चिका।** एकवक्त्रा कृष्णा। **अग्नौ खगप[261b]तिगमना** वैष्णवी। **शूकरी षण्मुखी च** रक्तवर्णा **याम्ये नैर्ऋत्ये[5]।** [6]**वारुण्ये** ऐन्द्री पीता। **वायव्येऽब्धिवक्त्रा** ब्रह्माणी पीता ॥ २६ ॥

---

१. भो. Miṅ Daṅ gZugs (नामरूपम्)। २. ग. च. 'च' नास्ति। ३. ग. 'पञ्च' नास्ति। ४. क. ख. छ. सहिताः। ५. च. त्ये च। ६. च. वारुणे, ख. छ. वरुणे।

रौद्री लक्ष्म्युत्तरेशे प्रहरणसहितालिङ्गितोपायकाया
योगिन्योऽष्टाष्टकाद्याः कमलदलगता नायिकावर्णवर्णाः ।
पूर्वादौ कर्तिका च प्रथमकरतलाच्छूलचक्रं गदा च
दण्डः खड्गश्च शक्तिर्यमकरकमले दक्षिणे चाङ्कुशो वै ॥२७॥

उत्तरे रौद्री शुक्ला एकवक्त्रा। **ईशाने लक्ष्मीः** शुक्ला। एवं यथा नायिका कर्णिकास्था तथा वर्णसंस्थानतः। तासां पत्रस्था देव्यः। एवं **योगिन्योऽष्टाष्टकाद्याः कमलदलगता नायिकावर्णवर्णाः**। इदानीं चर्चिकादीनां यथाक्रमेण सव्यभुजद्वयेन चिह्नान्युच्यन्ते- पूर्वादावित्यादिना । इह **पूर्वे** चर्चिकायाः प्रथमहस्ते **कर्तिका,** द्वितीये **शूलम्**। वैष्णव्या **चक्रं गदा**। वाराह्या **दण्डः खड्गः**। कौमार्याः **शक्तिः अङ्कुशः** ॥२७॥ 5 10

वज्रं बाणश्च पद्मं तडिदनलनिभो ब्रह्मदण्डस्त्रिशूलं
नानारत्नैर्निबद्धः सरवडमरुकः पद्ममेवाक्षसूत्रम् ।
वामे शुक्तिश्च खट्वाङ्गमपि च कमलं कम्बुकः शृङ्खला च
खेटो वै रत्नपाशो प्रगुणरणरणद्वज्रघण्टा च चापम् ॥२८॥

ऐन्द्रया **वज्रं बाणः**। ब्रह्माण्याः **पद्मं ब्रह्मदण्डः**। रौद्रयास्त्रि**शूलं डमरुकः**। महालक्ष्म्याः **पद्मम् अक्षसूत्रं** चेति सव्यहस्तद्वये। एवं पत्रदेवीनामपि। ततो वामहस्तद्वये पूर्वादि यथाक्रमेण चर्चिकायाः प्रथमे वामकरे कपालम्, द्वितीये **खट्वाङ्गम्**। वैष्णव्याः **कमलं** शङ्खः। वाराह्याः **शृङ्खला** खेटः। कौमार्या **रत्नं पाशः**। ऐन्द्रया **घण्टा चापम्** ॥ २८ ॥ [262a] 15

कुण्डीपात्रं च खट्वाङ्गमहिरपि च ततस्तोयजं रत्नमेव 20
योगिन्योऽष्टाष्टका याः कमलवसुदले शस्त्रहस्ताश्च तद्वत् ।
भीमोग्रा कालदंष्ट्रा ज्वलदनलमुखा वायुवेगा प्रचण्डा
रौद्राक्षी स्थूलनासा कमलवसुदले चर्चिकायाः स्वदिक्षु ॥२९॥

ब्रह्माण्याः **कुण्डिकापात्रम्**। रौद्रयाः **खट्वाङ्गं सर्पश्च**। महालक्ष्म्याः **कमलं रत्नमेव** च। एवं **योगिन्योऽष्टाष्टका याः कमलवसुदले शस्त्रहस्ताश्च तद्वत्**। यथा नायिकास्तथेति नियमः। 25

इदानीं तासां नामानि भवन्ति। तत्र[1] चर्चिकादिकमलदलेषु पूर्वादिदक्षिणावर्तेन चर्चिकादीनां यत्र देव्यो वेदितव्याः, तत्र प्रथमपत्रे **भीमा**। एवं द्वितीयादौ **उग्रा, कालदंष्ट्रा, ज्वलदनलमुखा, वायुवेगा, प्रचण्डा, रौद्राक्षी, स्थूलनासा, कमलाष्टदलेषु चर्चिकायाः स्वदिक्षु** ॥२९॥

5 श्रीर्माया कीर्तिलक्ष्म्यौ सुपरमविजया श्रीजया श्रीजयन्ती
श्रीचक्री चाष्टमा वै कमलवसुदले वैष्णवी दिक्प्रदेशे।
कङ्काली कालरात्री प्रकुपितवदना कालजिह्वा कराली
काली घोरा विरूपा कमलवसुदले शूकरी पत्रदेवी ॥३०॥

वैष्णव्याः प्रथमपत्रादौ **श्रीः, माया, कीर्तिः, लक्ष्मीः, विजया, श्रीजया,**
10 **श्रीजयन्ती, श्रीचक्री चाष्टमा वै कमलवसुदले वैष्णवी दिग्प्रदेशे**ऽग्नौ। ततो वाराह्याः
T 343 प्रथमपत्रादौ **कङ्काली, कालरात्री, प्रकुपितवदना, कालजिह्वा, कराली, काली, घोरा, विरूपा** इति **कमलवसुदले शूकरी पत्रदेवी**[2] दक्षिणे ॥३०॥

पद्मानङ्गा कुमारी मृगपतिगमना रत्नमाला सुनेत्रा
क्लीना भद्राब्जपत्रे वरशिखिगमना नायिका यत्र राजन्।
15 वज्राभा[262b] वज्रगात्रा वरकनकवती चोर्वशी चित्रलेखा
रम्भाहल्या सुतारा कमलवसुदले वज्रहस्ताधिदैवे ॥३१॥

तथा कौमार्याः पूर्वपत्रादौ **पद्मा, अनङ्गा, कुमारी, मृगपतिगमना, रत्नमाला, सुनेत्रा, क्लीना, भद्रा। अब्जपत्रे वरशिखिगमना नायिका यत्र राजन्।** नैर्ऋत्ये तथा ऐन्द्रयाः पूर्वपत्रादौ **वज्राभा, वज्रगात्रा, कनकवती, उर्वशी, चित्र-**
20 **लेखा, रम्भा, अहल्या, सुतारा कमलवसुदले वज्रहस्ताधिदैवे** पश्चिमे ॥ ३१ ॥

सावित्री पद्मनेत्रा खलु जलजवती बुद्धिवागीश्वरी द्वे
गायत्री विद्युदेव स्मृतिरपि कमले वेदवक्त्राधिदैवे।
गौरी गङ्गा च नित्या सुपरमतुरिता तोतला लक्ष्मणा च
पिङ्गा कृष्णा तथाष्टौ कमलवसुदले नायिका यत्र रौद्री ॥३२॥

25 ततो ब्रह्माण्याः पूर्वपत्रादौ **सावित्री, पद्मनेत्रा, जलजवती, बुद्धिः, वागीश्वरी, गायत्री, विद्युत्, स्मृतिः, अपि कमले वेदवक्त्राधिदैवे**। वायव्ये ततो रौद्रयाः पूर्वपत्रादौ **गौरी, गङ्गा, नित्या, तुरिता, तोतला, लक्ष्मणा, पिङ्गला, कृष्णा, तथाष्टौ**[3] **कमलवसुदले नायिका यत्र रौद्री**त्युत्तरे ॥ ३२ ॥

---

१. च. 'तत्र' नास्ति। २. छ. 'देवी' नास्ति। ३. भो. 'अष्टौ' नास्ति।

श्रीश्वेता चन्द्रलेखा शशधरवदना हंसवर्णा धृतिश्च
पद्मेशा तारनेत्रा विमलशशधरा चेशपद्मे सचिह्नाः ।
तद्बाह्ये सूर्यपद्मे दनुकचलयमाः पावकः षण्मुखश्च
यक्षः शक्रोऽब्धिवक्त्रः पशुपतिरुदधिः श्रीगणेन्द्रश्च विष्णुः ॥३३॥

ततो लक्ष्म्याः पूर्वपत्रादौ **श्रीश्वेता, चन्द्रलेखा, शशधरवदना, हंसवर्णा, धृतिः, पद्मेशा, तारनेत्रा, विमलशशधरा ईशपद्मे सचिह्ना** इति चतुःषष्टियोगिन्यश्चर्चि-[263a]कादीनां पद्मदलेषु वाङ्मण्डले नायिका इति वेदनाङ्गे तृष्णाङ्गेऽपि सर्वकायवज्र-निष्पत्तिः। [1]ललाटाद् गुह्य[2]कमलान्तं कायनिष्पत्तौ वेदितव्यं [3]चतुरस्रम्। [4]तत्र यानि हस्तपादेषु द्वादश, [5]सन्धौ द्वादशकमलानि। कर्मचक्रे क्रियाचक्रे। अष्टाविंशद्दलानि नाडी देवतामूर्त्या उत्सर्जयेद् अष्टमे मासे। **तद्बाह्ये सूर्यपद्म** इति। तस्य बाह्ये काय-मण्डले द्वादशपद्मेषु पूर्वद्वारस्य सव्यभागादौ प्राकारभित्तौ खगर्भादिवद् नैर्ऋत्यादयो यथासंख्यमुच्यन्ते। **दनुक** इति नैर्ऋत्यः। पूर्वद्वारसव्ये [6]**चल** इति वायुराग्नेय्याम्। **यम** इति दक्षिणद्वारवामे। सव्ये **पावकः**। नैर्ऋत्ये **षण्मुखः**। पश्चिमद्वारवामे **यक्षः**। सव्ये **शक्रः**। वायव्ये **ब्रह्मा**। उत्तरद्वारवामे **रुद्रः**। दक्षिणे **समुद्रः**। ईशाने **गणपतिः**। पूर्वद्वारवामे **विष्णु**रिति सर्वे चतुर्भुजाः॥ ३३ ॥

खड्गः कर्त्री द्रुमेन्द्रः सुरतरुकुसुमं दण्डखड्गश्च शक्ति-
र्दण्डः शक्तिश्च कुन्तो मणिरपि च गदा वज्रमेवाग्निबाणः ।
सूची चाप्यक्षसूत्रं भवति करतले शूलबाणं च पाशो
रत्नं पर्शुश्च वज्रं भवति हरिकरे चक्रदण्डश्च सव्ये ॥३४॥

एषां द्वादशानां यथाक्रमेण सव्यहस्तद्वये चिह्नानि भवन्ति। नैर्ऋत्यस्य प्रथमे **खड्गः**, द्वितीये **कर्त्री**। वायोः प्रथमे **द्रुमेन्द्रः** कल्पवृक्षः, द्वितीये **पारिजातकपुष्पम्**। यमस्य प्रथमे **दण्डः**, द्वितीये **खड्गः**। वैश्वानरस्य प्रथमे **शक्तिः**, द्वितीये **दण्डः**। षण्मुखस्य प्रथमे **शक्तिः**, द्वितीये **कुन्तः**। धनदस्य प्रथमे **मणिरत्नम्**, द्वितीये **गदा**। इन्द्रस्य प्रथमे **वज्रम्**, द्वितीयेऽ**ग्निबाणः**। ब्रह्मणः प्रथमे **सूची**, द्वितीयेऽ**क्षसूत्रम्**। रुद्रस्य प्रथमे **त्रिशूलम्**, द्वितीये **बाणः**। वरुणस्य प्रथमे **पाशः**, द्वितीये **रत्नम्**। विनायकस्य प्रथमे **पर्शुः**, द्वितीये **वज्रम्**। विष्णोः प्रथमे **चक्रं**, द्वितीये **गदे**ति ॥३४॥ [263b]

वामे खेटं कपालं त्वसितमणिरपि ह्युत्पलं शृङ्खला च
पाशाऽब्जं कुण्डिका वै भवति नरपते वामहस्ते क्रमेण ।

---

१. ख. ललाटाङ्गुष्ठकमलान्तं। २. क. कलान्तं। ३. भो. 'चतुरस्रं' नास्ति। ४. क. ख. 'तत्र' नास्ति। ५. क. ख. च. स्कन्धौ। ६. क. ख. बल।

रत्नादर्शश्च तद्वत् सनकुलजलजं वज्रघण्टा च चापं
पद्मं वै कुण्डिकाहिर्धनुरपि च तथा नागपाशश्च रत्नम् ॥३५॥

ततो **वामे** नैर्ऋत्यस्य प्रथमे करे **खेटम्**, [1]द्वितीये **कपालम्**। वायोः प्रथमे इन्द्रनीलम्, द्वितीये **नीलोत्पलम्**। यमस्य प्रथमे **शृङ्खला**, द्वितीये **पाशः**। अग्नेः प्रथमे पद्मम्, द्वितीये कमण्डलुः। कार्तिकेयस्य प्रथमे **रत्नम्**, द्वितीये दर्पणम्। यक्षस्य प्रथमे **नकुलम्**, द्वितीये पद्मम्। इन्द्रस्य प्रथमे **घण्टा**, द्वितीये धनुः। ब्रह्मणः प्रथमे **पद्मम्**, द्वितीये **कुण्डिका**। रुद्रस्य प्रथमे खट्वाङ्गं सर्पसहितम्, द्वितीये **धनुः**। समुद्रस्य प्रथमे **नागपाशः**, द्वितीये चन्द्रकान्तमणिरत्नम् ॥३५॥

पाशो रत्नं च पद्मं भवति दनुरिपोः पाञ्चजन्यं च शङ्खः
चैत्राद्याः पद्मपत्रे वसुकरतिथयः कर्णिकायां द्विपूर्णाः।
सर्वाः शून्यर्तुलोकाः परमशशिकला वेदितव्याब्दयोगाद्
द्वारे देव्यो रथस्थास्त्वसिकुलिशधराः साङ्कुशा बाणहस्ताः ॥३६॥

विनायकस्य प्रथमे **पाशः**, द्वितीये **रत्नम्**। वासुदेवस्य प्रथमे **पद्मम्**, द्वितीये **पाञ्च[2]जन्यः शङ्ख** इति। वामहस्तद्वये सर्वेषां यथानुक्रमेण चिह्नानि। कमलकर्णिकास्थानां तेषां नैर्ऋत्यादीनां कमलदलेष्वष्टाविंशद्दलेषु दक्षिणावर्तेषु त्रिपरिमण्डलदलेषु प्रथमपरिमण्डले चत्वारि दलानि, द्वितीयेऽष्टौ, तृतीये षोडश। एवमष्टाविंशतिदलेषु चैत्रादिमासतिथयः। शुक्लकृष्णपक्षाणां पूर्णिमाऽमावासी कर्णिकायां नायकत्वेन स्थिताः। एवं चैत्रतिथयो नैर्ऋत्यस्य[3] कमलदले, वैशाखतिथयो वायोः, ज्येष्ठतिथयः पावकस्य, आषाढतिथयः षण्मुखस्य, श्रावणतिथयः समुद्रस्य, भाद्रतिथयो विनायकस्य, आश्वि[264a]नतिथय इन्द्रस्य, कार्तिकतिथयो ब्रह्मणः, मार्गतिथयो [4]हरस्य, पौषतिथयो यक्षस्य, माघतिथयो विष्णोः, फाल्गुनतिथयो यमस्य। तद्वद्वर्णायुधसंस्थानेन देव्यः। एवं **चैत्राद्याः पद्मपत्रे वसुकरतिथयः कर्णिकायां द्विपूर्णाः सर्वाः शून्यर्तुलोकाः** षष्ट्युत्तरत्रिशताः। **परमशशिकला वेदितव्यास्ता अब्दयोगा**दिति। आसां वक्ष्यमाणबीजेनादिभूतेन वज्रान्तं नाम भवतीति नियमः। इदानीं हस्तपादतलोष्णीषगुदनाडीस्फरणशुद्धया **द्वारे देव्यो रथस्था** मारीच्याद्या एकवक्त्राश्चतुर्भुजाः। आसां परस्थानगमनादनुनायिकात्वं [5]नीलदण्डादीनां नायकत्वं स्वस्थानतः। अत आसां पूर्वादिकुलं वज्रशृङ्खलादीनां गमनमभिमुखस्थाने। तेन कुलवशेन शृङ्खलायाः प्रथमे सव्ये भुजे असिः, द्वितीये **वज्रम्**, अमोघसिद्धिकुलवशादिति। एवं रत्नकुलवशादिति। भृकुट्याः [6]प्रथमे करे [7]**बाणः, साङ्कुशे**ति द्वितीयेऽङ्कुशः ॥३६॥

१. क. 'द्वितीये ... इन्द्रनीलं' नास्ति। २. क. ख. छ. जन्य। ३. ग. पृ. १६६, पं. तः 'खी च रक्तवर्णं ... नैर्ऋत्यस्य' नास्ति। ४. भो. Drag Po (रुद्रस्य)। ५. क. 'नीलदण्डादीनां नायकत्वं' नास्ति। ६. ग. प्रथम। ७. च. बाणं, भो. बाणः, द्वितीये साङ्कुशेति।

श्रीचक्रा दण्डहस्ता प्रकृतिगुणवशान्मुद्गरा कुन्तहस्ता
श्रीकर्ती वज्रहस्ता खलु परशुकरा शूलहस्ता तु सव्ये ।
वामे खेटाहिहस्ता प्रकृतिगुणवशात् पाशकोदण्डहस्ता
श्रीशङ्खा रत्नहस्ता कमलशशधरादर्शहस्ता च तद्वत् ॥३७॥

वैरोचनकुलवशाद् मारीच्याः [1]**सव्ये हस्ते चक्रम्**, द्वितीये **दण्डः**। **प्रकृतिगुणवशात्** पद्मकुलवशात् चुन्दायाः प्रथमकरे **मुद्गरः**, द्वितीये **कुन्तम्**। अतिनीलाया ज्ञानकुलवशात् प्रथमे **कर्ती**, द्वितीये **वज्रम्**। रौद्राक्ष्या आकाशकुलवशात् प्रथमे **पर्शुः**, द्वितीये **त्रिशूलमिति**। तथा **वामहस्ते** शृङ्खलायाः **खेटम् अहिश्चेति**। भृकुट्याः प्रथमे **कोदण्डः**, द्वितीये **पाशः**। मारीच्याः [2]**शङ्खो रत्नम्**। [3]चुन्दायाः **पद्म आदर्शः** ॥३७॥[264b]

श्रीघण्टा शुक्तिहस्ता खलु भुजगकराप्येव खट्वाङ्गहस्ता
मारीच्याद्येकवक्त्रा युगकरकमला वेदितव्याः क्रमेण ।
स्तम्भाधोऽप्यष्टनागा घटकुलिशकराः पद्ममाणिक्यहस्ता
वाय्वादौ मण्डले वै युगकरकमलाः पद्मकर्कोटकाद्याः ॥३८॥

अतिनीलायाः **कपालं घण्टा**, रौद्राक्ष्या **नागपाशः खट्वाङ्गमिति**। एवं नीलदण्डस्य टक्किराजस्य महाबलस्य अचलस्य पूर्वे दक्षिणे पश्चिमे उत्तरे [4]द्वारे स्थितस्येति नियमः। ततो नवमे मासे उपादाने क्रियाचक्रे विंशत्यङ्गुलिकानाडीविशुद्ध्या दश[5]नागदशप्रचण्डा उत्सर्जयेत्। बाह्ये कायमण्डले चतुस्तोरणेऽष्टस्तम्भतले **अष्टौ नागाः**, जयविजयावध ऊर्ध्वे। सर्वे चतुर्भुजाः। सव्येऽमृतघटः प्रथमे, द्वितीये वज्रम्। वामे प्रथमे पद्मम्, द्वितीये रत्नम्। अतो **घटकुलिशकराः पद्ममाणिक्यहस्ता वाय्वादौ मण्डले वै** [6]इति। **पद्मकर्कोटकौ** पूर्वे वायुमण्डलद्वये। दक्षिणे वह्निमण्डले वासुकिः शङ्खपालः। पश्चिमे पृथ्वीमण्डले तक्षको महापद्मः। उत्तरे तोयमण्डलेऽनन्तः कुलिक इति। आकाशे जयो ज्ञाने विजय इति दशपादाङ्गुलिकाः ॥३८॥

श्वानास्या शूकरास्या खलु चलवलये जम्बुकास्या च दिक्षु
व्याघ्रास्या चोत्तरस्था त्रितिभुवनगता कर्तिकाशुक्तिहस्ता ।
काकास्या गृध्रवक्त्रा खगपतिवदनोलूकवक्त्रा च कोणे
वज्राक्षी चातिनीलाधसि नभसि गते भूतयोनिश्चलान्ते ॥३९॥

---

१. भो. Dan Po Na (प्रथमे)। २. क. ख. छ. शङ्खं। ३. ग. बुद्धायाः।
४. क. ख. छ. द्वार। ५. क. ख. छ. नागा। ६. ग. नास्ति।

ततो हस्ताङ्गुलिकाविशुद्धया **श्वानास्या पूर्वे**। **शूकरास्या** दक्षिणे। **जम्बुकास्या पश्चिमे। उत्तरे व्याघ्रास्या**। वाय्वग्निवलयमध्ये महाश्मशाने द्विभुजा। **कर्तिकाशुक्तिहस्ता** एकवक्त्रा। [265a] एवं **काकास्याऽग्नौ, गृध्रास्या नैर्ऋत्ये, गरुडास्या** वायव्ये, **उलूकास्या** ईशाने, **वज्राक्षी** पाताले, **नीलाऽऽकाशे**। सर्वा एता कर्तिकपालहस्ता नग्नाः पञ्चमुद्राविभूषिता मुण्डमालावलम्बिता इति। एवं लोमकेशविशुद्धया सार्द्धत्रिकोटि**भूतयोनिश्चलान्ते** वायुवलयान्ते चर्मान्ते लोमानीति। उत्सर्जयेन्मन्त्री बाह्ये। एवं नवमासावधेः कायदेवतागणनिष्पत्तिः ॥३९॥

इदानीं चामुण्डादीनां कमलासनान्युच्यन्ते—

रक्तप्रेतं खगेन्द्रो महिषशिखिगजा हंसगोपञ्चवक्त्रा-
श्चामुण्डादेः क्रमेण प्रभवति कमलान्यासनं दिग्विदिक्षु।
दैत्यादीनां च तद्वद् धनपतिशिखिनोरब्धिवाय्वोर्गणस्य
मातङ्गेशश्च मेषो मकर इति मृगो मूषकश्च क्रमेण ॥४०॥

रक्तप्रेतमित्यादिना। इह पूर्वे **चामुण्डाया रक्तमहाप्रेतासनं** कमल[1]कर्णिकायाम्। अष्टदलेषु चामुण्डादिदेव्यः। एवं वैष्णव्या **गरुडः**, वाराह्या **महिषः**, कौमार्या **मयूरः**, ऐन्द्रया **गजः**[2], ब्रह्माण्या **हंसः**, रौद्रया **वृषभः**, महालक्ष्म्या **सिंह** इति **क्रमेणासनं कमलस्य दिग्विदिक्षु। दैत्यादीनां च**[3] तद्वदिति वचनाद् नैर्ऋत्यकमला[4]सनं रक्तप्रेतम्। विष्णोर्गरुडम्, यमस्य महिषः, कुमारस्य मयूरः, इन्द्रस्य गजः, ब्रह्मणो हंसः, रुद्रस्य वृषभ इति नैर्ऋत्यादीनां नियमः। तथा **धनपतिशिखिनो**[5]**रब्धिवाय्वोर्गणस्येति** पञ्चानां यथासंख्यम्। धनपतेर्**मातङ्गः**, अग्नेर्**मेषः** अब्धेर्**मकरः**, वायोर्**मृगः**, गणपतेर्**मूषक** इति ॥ ४० ॥

भेरुण्डः क्रुञ्चनीलेक्षणगुदवदनाः काकवक्त्रादिकोणे
खड्गी ऋक्षश्च सिंहः प्रभवति चमरी श्वानवक्त्रादिदिक्षु।
वज्राक्ष्या अष्टपादस्त्ववनितलगतो व्योम्नि नीलारथस्य
सक्रूरः पञ्चवर्णस्त्वनिल इति खगः स्फीतगात्रस्त्रिनेत्रः ॥४१॥

[265b]

तथा **काकास्यायाश्चक्रतले भेरुण्डः**, गृध्रास्यायाः **क्रुञ्चः**, गरुडास्याया **नीलाक्षः**, उलूकास्याया वाग्वलिरिति कोणे। तथा दिक्षु श्वानास्यायाश्चक्रतले **खड्गी**, शूकरास्याया **ऋक्षः**, जम्बुकास्यायाः **सिंहः**, व्याघ्रास्यायाश्**चमरीति श्वानवक्त्रादि-**

---

१. च. भो. कमलस्य। २. क. 'गजः ... रौद्रया' नास्ति। ३. क. ख. ग. छ. 'च' नास्ति। ४. च. लस्या। ५. क. ख. च. छ. नोब्धेर्वायो।

दिक्षु। **वज्राक्ष्या अष्टपादः** पातालरथगतः। **व्योम्नि नीलारथस्य। सक्रूरः पञ्चवर्णोऽनिल इति खगः स्फीतगात्रस्त्रिनेत्र** इति ॥ ४१ ॥

मारीच्याः शूकराः स्युर्हयगजहरयः सप्तसंख्या रथेषु
चुन्दायाः शृङ्खलायाः सुरयमवरुणे चोत्तरे वै भृकुटयाः।
गन्धा माला च पूर्वे यमवरुणगते धूपदीपे च लास्या
हास्या वाद्या च नृत्या धनदभुवितले चाम्बरे गीतकामा ॥४२॥

एवं **मारीच्या रथे सप्तशूकराः** पूर्वद्वारे। दक्षिणे सप्ताश्वाश्चुन्दारथे। पश्चिमे शृङ्खलारथे सप्त **गजाः**। उत्तरे भृकुटीरथे सप्त सिंहाः। एवं ततो हृदयदशनाडीस्वभावेन पूजादेवी[1]रुत्सर्जयेत्। चित्तमण्डले चतु[2]र्द्वारस्य [3]सव्यवामवेदिकायां **गन्धा माला**। [4]पूर्वदक्षिणे **धूपा दीपा**। पश्चिमे **लास्या हास्या**। उत्तरे **वाद्या नृत्या**। आकाशे **गीता कामा**। अधो विण्मूत्र[5]नाडीस्वभावेन नैवेद्या। अमृतफला इति ॥४२॥

गर्भेऽष्टौ वेदिकायां गगनतलगते तोरणाधो नियोज्यो
धारिण्यः पट्टिकायां फणिकुलसहिता वेदिकायां प्रतीच्छाः।
विद्वेषः स्तोभनेच्छा भवति नृप तथा पौष्टिकं स्तम्भनेच्छा
तारादेव्यादिशुद्धया त्रिभुवनजननो मारणोत्पादनेच्छा ॥४३॥

रजोमण्डले **गगन**[6]**तलगता** देव्यो याः काश्चित्ताः पूर्वापर**तोरणाधो** दर्शनीयाः। भावनायां पुनर्दिक्पालादयो यथोक्तस्थान एव। समन्तभद्रादयश्च[266a]त्वारो द्वारस्यावसव्य इति नियमः। एवं यथा पूजादेव्यस्तथानन्ता **धारिण्यः पट्टिकायां** वेदिकायामिति। एवं बाह्ये कायमण्डले **फणिकुलसहिता वेदिकायां प्रतीच्छाः**। अतो वाङ्मण्डले वेदिकायामिच्छाः। तत्र पूर्वे **विद्वेषेच्छा** ताराजन्या, **स्तोभनेच्छा** दक्षिणे पाण्डराजन्या, उत्तरे **पौष्टिकेच्छा** मामकीजन्या, पश्चिमे **स्तम्भनेच्छा** लोचनाजन्या इति **तारादेव्यादिशुद्धया त्रिभुवनजननी मारणेच्छा** वज्रधात्वीश्वरीजन्या। **उत्पादनेच्छा** विश्वमातृजन्या इति ॥४३॥

वाद्येच्छा भूषणेच्छा भवति नरपते भोजनेच्छा तृतीया
गन्धेच्छा चांशुकेच्छा प्रकटितनियता मैथुनेच्छा च षष्ठी।
काये कण्डूयनेच्छा वदनगतकफोत्सर्जनेऽङ्गे मलेच्छा
नृत्येच्छा चासनेच्छा पयसि च शयने प्लावने मज्जनेच्छा ॥४४॥

---

१. ग. च. रुत्सृजेत्। २. क. ख. ग. छ. द्वार। ३. च. वामदक्षिण। ४. ग. च. भो. पूर्वे। ५. ग. 'नाडी' नास्ति। ६. क. ख. छ. तले।

एवं शब्दजन्या **वाद्येच्छा**, **भूषणेच्छा** रूपजन्या, [1]**भोजनेच्छा** रसजन्या, **गन्धेच्छा** गन्धजन्या, **अंशुकेच्छा** स्पर्शजन्या, **मैथुनेच्छा** धर्मधातुजन्या इति पूर्वादिवेदिका[2]याम्। [3]स्वकुलभेदेन **काये कण्डूयनेच्छा** चामुण्डाजन्या। **वदनगत-कफोत्सर्जनेच्छा** वैष्णवीजन्या। **अङ्गे मलेच्छा** वाराहीजन्या। **नृत्येच्छा** कौमारीजन्या। **आसनेच्छा** रौद्रीजन्या। **पयसि प्लावनेच्छा** ब्रह्माणीजन्या। **शयने मज्जनेच्छा** ऐन्द्रीजन्या। **राज्येच्छा** लक्ष्मीजन्या इति ॥४४॥

चामुण्डाद्यष्टकृत्यान्यपि च भुवितले क्रोधजानां तथेच्छा
सन्तापे बन्धनेच्छा खलु मृदुवचने शोषणोच्चाटनेच्छा।
स्पर्शाकृष्टौ च बन्धे भवति नरपते कीलने धावनेच्छा
सर्वाङ्गक्षोदनेच्छा प्रकटितनियता मूत्रविट्स्रावणेच्छा ॥४५॥

[266b]

चामुण्डाद्यष्टकृत्यान्यपि च भुवितले क्रोधजानां तथेच्छा। अत्र **संतापेच्छा** अतिनीलाजन्या। **बन्धनेच्छा** [4]स्तम्भनीजन्या। **मृदुवचनेच्छा** मानिनीजन्या। **शोषणेच्छा** [5]जम्भनीजन्या। **उच्चाटनेच्छा** अतिबलाजन्या। तथा [6]**स्पर्शनेच्छा** वज्रशृङ्खलाजन्या। **आकृष्टीच्छा** भृकुटीजन्या। [7]**बन्धनेच्छा** चुन्दाजन्या। **कीलनेच्छा** मारीचीजन्या। **धावनेच्छा** रौद्राक्षीजन्येति। तथा दनुकुलजानामिच्छाः। **सर्वाङ्ग-**[8]**क्षोदनेच्छा** श्वानास्याजन्या। **मूत्रविट्स्रावणेच्छा** शूकरास्याजन्या ॥ ४५ ॥

सत्त्वानां वञ्चनेच्छा खलु बहुकलहे पञ्चमोच्छिष्टभक्ते
संग्रामेच्छाऽहिबन्धे भवति दनुकुले दारकाक्रोशनेच्छा।
सप्तत्रिंशत्प्रतीच्छाः पुनरपि च ततो मण्डले बाह्यपटयां
यत्किञ्चित् सत्त्वकृत्यं प्रतिदिनसमये योगिनीकृत्यमत्र ॥४६॥

सत्त्वानां वञ्चनेच्छा जम्बुकास्याजन्या। **बहुकलहेच्छा** व्याघ्रास्याजन्या। [9]**उच्छिष्टभ**[10]**क्तेच्छा** काकास्याजन्या। **संग्रामेच्छा** गृध्रास्याजन्या। अहिब[11]न्धनेच्छा गरुडास्याजन्या। **दारकाक्रोशनेच्छा** उलूकास्याजन्येति। सप्तत्रिंशदिच्छा वाङ्मण्डले स्वकुलभेदेन स्वस्वदिक्षु। एवं **सप्तत्रिंशत् प्रतीच्छाः**, इच्छानां निवर्तनं प्रतीच्छा

T345

---

१. क. 'भोजनेच्छा रसजन्या' नास्ति। २. ग. च. 'याम्' नास्ति। ३. ग. सु, भो. 'स्व' नास्ति। ४. ग. च. स्तम्भी। ५. ग. च. जम्भी। ६. ग. च. भो. स्पर्शेच्छा। ७. ग. बन्धेच्छा, भो. gÑen Pa ḥDod Ma (बान्धवेच्छा)। ८. भो. bsKyod Pa (क्षोभणे)। ९. क. ख. ग. छ. उत्सिष्ट। १०. ग. भुक्ते। ११. ग. बन्धेच्छा।

इत्युच्यते। ताः कायमण्डल[1]वेदिकायां स्वकुलवशात् स्वस्वदिक्ष्विति सर्वत्र नियमः। एवं ब्रह्ममण्डले बाह्य[2]पत्न्यामपरमपि **यत्किञ्चित् सत्वकृत्यमिच्छातः प्रतिदिनसमये** तत् सर्वं **योगिनीकृत्यमत्र,** धातुवशादिति नियमः ॥ ४६ ॥

इदानीं नित्यानित्यमुच्यते—

इत्येवं वज्रिणश्च त्रिभुवनसकलं मण्डलाकारमुक्तं 5
बाह्ये देहे परे च स्फरणनिधनते संस्थिते वस्तुजातेः।
तस्मिन्नित्यः खवज्रस्त्रिविधभवगतोऽनित्यतां न प्रयाति
नो नित्यं भूतवृन्दं भवति नरपते शक्रजालं यथैव ॥४७॥
[267a]

इत्येवमित्यादिना[3]। **इत्येवं** सप्तादिभिर्मार्सैर्जातकस्य बाह्ये **वज्रिणश्च त्रिभुवनसकलं** स्कन्धधात्वायतनादिकं **मण्डलाकारमुक्तं** बालजनानां चित्तस्थिरीकरणार्थम्। अत्र **बाह्ये** लोकधातौ **देहे**ऽध्यात्मनि **परे** [4]कल्पितमण्डले स्फरणं च निधनता च **स्फरणनिधनते संस्थिते वस्तुजातेः**। अत्र वस्तु परमाणुद्रव्यं पृथिव्यप्तेजोवायुरिति चत्वारो भूताः। आकाशधातुश्चन्द्रोऽनुस्वारः शुक्रं वा तथा रजो वा बिन्दुद्वयं सूर्यो वाकाशधातुः। राहुर्विज्ञानधातुः। एवं षड्धात्वात्मको महापुरुषपुङ्ग(द्ग)लो वस्तुजातिः। तस्य वस्तुजातेरुत्पादः स्फरणम्, विनाशो निधनता, ते[5] द्वे संस्थिते भूतजानामिति। एवं पृथिवीजातिस्तर्वादयः स्थावराः, उदकजातिः स्वेदजाः, तेजोजातिर्जरायुजाः, वायुजातिरण्डजाः, चन्द्रजातिर्नागासुराः, सूर्यजातिर्भूतदेवताः[6]। राहुजातिररूपाः, कालाग्निजातिर्नारकाः। एवमष्ट[7]धा जाति[8]र्वस्तुरूपिणी वस्तुजातिः। **तस्मिन्नित्यः खवज्र** इति। [9]इह ख[10] इति आकाशधातु[11]र्नवमः। परमाणुद्रव्यरहितोऽच्छेद्यः। अच्छेद्याभेद्यत्वात् खवज्र आकाशधातुर्नित्यो द्रव्याभावात्। स आकाशधातुः। सर्वगतत्वात्। **त्रिविध**[12]**भवगतोऽनित्यतां न प्रयाति। नो नित्यं भूतवृन्दं** पूर्वोक्तं **भवति नरपते शक्रजालं यथैव,** दृष्टनष्टमिति न्यायात् ॥ ४७ ॥

नित्यानित्यं च दृष्ट्वा तदपि जडधियां चित्तशुद्ध्यर्थहेतो-
र्वक्तव्यं साधनं वै न हि हृदयगतः साध्यते कश्चिदत्र। 25
यत्साध्यं साधकः स भ्रममिति सकलं साधनं वज्रिणो यत्
तस्माद् राजन् स्वचित्तं व्यपगतकलुषं मण्डलेशं प्रकुर्यात् ॥४८॥

---

१. च. मण्डले। २. क. वेद्या। ३. ख. ग. च. 'ना' नास्ति। ४ च. कल्पिते। ५. क. ख. छ. 'ते' नास्ति। ६. च. देवाः। ७. ग. च. भो. मष्टविधा। ८. क. 'वस्तु''''जातिः' नास्ति। ९. च. 'इह ख इति' नास्ति। १०. ग. खवज्र। ११. भो. 'धातु' नास्ति। १२. क. ख. छ. भगवतो।

एवं नित्यं महाशून्यं **दृष्ट्वा** विचार्य वाऽनित्यं परमाणुसमागमं च वियोगं च [1]तेषां दृष्ट्वोभयोः साधनं न स्याद् बुद्धत्वाय। **तदपि जडधियां** बालानामवतारणाय **चित्तशुद्ध्यर्थहेतोर्वक्तव्यं साधनं** त्वया हे नरपते सुचन्द्र! परमार्थतः पुनर्न हि **हृदयगतः साध्यते कश्चिदत्र** नित्यानित्यपदार्थः। अतो बुद्धत्वाय **यत् साध्यं साधकः स** एवे-
5 [267b]ति नियमः। इह यत्कल्पना साधनं तद् **भ्रममिति। सकलं साधनं वज्रिणो यत् तस्माद् राजन्! स्वचित्तं व्यपगतकलुषं** कल्पना[2]रहितं **मण्डलेशं कुर्यादिति** नियमः॥ ४८॥

इदानीमाधाराधेय उच्यते—

श्रीवज्री चित्तवज्रं भवति नरपते मण्डलं कायवज्रं
10 वाग्वज्रं देवतानामलिकलिकुलजं चन्द्रमिन्द्वर्कमूर्ध्नि।
कन्दं नालं त्वकारो दलमपि च तथा केशराण्यप्युकारो
मध्ये श्रीकर्णिका च द्विविधपथगतौ चन्द्रसूर्यौ मकारः॥४९॥

श्रीत्यादिना[3]। [4]कायवाक्चित्तमण्डले **श्रीवज्री** नायकश्चि**त्तवज्रं भवति। नरपते! मण्डलं कायवज्रं** कायवाक्चित्तलक्षणम्। **वाग्वज्रं देवताना**[5]**मलिकलिकुलजं**
15 **चक्रमिन्द्वर्कमूर्ध्नि**। एवं वाक्कायमण्डलेऽपि वाग्वज्रं देवतागणम्। एवं त्रिविधं चित्तं कायाकारेण [6]मण्डलाकारेण, कायस्त्रिविधो वागपि [7]त्रिविधा प्रत्याहारेणेति सर्वत्र नियमः। अत्र कमलानां **कन्दं नालं च अकारेणोद्भूतम्, दलानि केशराणि च उकारेण** संभूतानि। [8]**मध्ये कर्णिका चन्द्रासनं मकारेण सूर्यासनं** वा रकारेण[9]। एवं ॐकारः प्रणवः। हृदयमुच्यते कमलमिति। प्रथमदेवताकायसंस्थाननिष्पत्तिर्गर्भजानामिह
20 जन्मनीति नियमः। एवं पञ्चज्ञानात्मकं कालचक्रं भगवन्तं वज्रसत्त्वमुकुटिनं ध्यात्वा सुविशुद्धधर्मधात्वात्मकम्, ततः षड्गतिस्थान् सर्वसत्त्वानाकृष्य तस्मिन्नेव मण्डले प्रविष्टान् विभाव्य ततो वैरोचनादींस्तथागतान् स्वहृदये प्रवेश्य सधातून् [10]बोधिचित्त-द्रवापन्नान् स्वगुह्यकुलिशेनोत्सृज्य तेन बोधिचित्तेन तान् सर्वसत्त्वानभिषिक्तान् ध्यायात्। ततस्तान् बोधिचित्तरश्मिभिः स्पृष्टान् सर्वसत्त्वान् त्रिमुखान् [11]नानामुखान्
25 नाना[12]वर्णान् देवतास्वरूपान् प्रज्ञोपायात्मकान् परमानन्द[13]सुखपूर्णान् भावयेत्। ततस्तेषां [14]स्वकायान् मण्डलचक्रस्वभावीभूतान् झटिति पश्येत्। तत्र मन्त्रबीजानि नानाव्यञ्जनसंयुक्तानि स्वरसहितानि। अत्र सर्वव्यञ्जनसमूहः[15] क्षकारः। तेन ज्ञाप-[268a]केन यस्य यत् प्रथमं नाम तस्य व्यञ्जनं तेन तत्सर्वं कर्तव्यम्। अत्र क्ष क्षि

---

१. ग. भो. 'तेषां' नास्ति। २. क. 'रहितं' नास्ति। ३. च. 'ना' नास्ति। ४. च 'इह' इत्यधिकम्। ५. भो. आलिकालि। ६ ग. 'मण्डलाकारेण' नास्ति। ७. ग. त्रिधा। ८. क. ख. ग. छ. मध्य। ९. ग. गकारेण। १०. ग. 'बोधि ... पन्नान्' नास्ति। ११. ग. 'नानामुखान्' नास्ति। १२. ग. वस्त्रान्। १३. क. ख. च. छ. सुखापूर्णान्। १४. ख. स्वकी। १५. क. ख. छ. समूह।

क्षृ क्षु क्ष्ऌ इति विज्ञानादिपञ्चतथागताः। तथा क्षा क्षो क्षॄ क्षू क्ष्ॡ इति आकाशादिपञ्चधातवः। एवं क्ष क्षे क्षर् क्षो क्षल् क्षं इति श्रोत्रादयो बोधिसत्त्वाः षट्। तथा क्षा क्षै क्षार् क्षौ क्षाल् क्षाः इति षड् विषयाः। [1]क्ष्ॡ क्ष्य क्षू क्ष्व क्ष्ल[2] इति पञ्चकर्मेन्द्रियाणि। [3]अत्र क्रोधाः [4]क्ष्ॡ क्ष्या क्ष्ाा क्ष्वा क्ष्ला[5] इति पञ्चकर्मेन्द्रियविषयाः। एवं पञ्चस्कन्धाः, पञ्चधातवः, द्वादशायतनानि, पञ्चकर्मेन्द्रियाणि, पञ्चकर्मेन्द्रियविषयाः। एवं द्वात्रिंशन्महापुरुषलक्षणीभूतान् मण्डलचक्राकारान् सर्वसत्त्वान् भावयेद् झटिति।

अथ विस्तरतः प्रत्येकैक[6]बीजेन देवीगुह्ये प्रत्येकदेवतां[7] निष्पाद्य उत्सृजेत्—तेषामिति। तथा **मूलतन्त्रे** भगवानाह—

> बुद्धक्षेत्रेषु ये सत्त्वास्त्रिकायसमयामृतैः।
> जाता वज्रश्रिया स्पृष्टाः सर्वे तत्र तथागताः॥
>
> अभूवन्निह सम्बुद्धास्त्रिवज्रज्ञानलाभिनः।
> भावयित्वा ततस्तांश्च स्वस्वक्षेत्रे प्रवेशयेत्॥ इति।

अभिषेकदानं सत्त्वानां कृपार्थमिति नियमः।

इदानीं भवाङ्गे दशमे प्राणोत्सर्जनाय वाग्वज्रोत्पादनाय [8]प्रसूतिरुच्यते। बाह्येऽपि द्वितीयमात्रानिष्पत्तिः[9]। तत्र नाभौ होकार उष्णीषेऽपि, अनयोर्द्वयोर्मध्ये विदर्भितं ललाटे कायवज्रम् ॐ, कण्ठे वाग्वज्रम् आः, हृदये चित्तवज्रं हूँ इति त्र्यक्षरं कायवाक्चित्तलक्षणं त्रिनाडी[10]जनकाय नाभौ होकारं ज्ञानरश्मिभिर्द्रुतं समसुखकमले कायवाक्चित्तवज्रं प्रज्ञारागद्रुतं तत् शशिनमिव विभुं वज्रिणम्। चकारात् प्रज्ञया सार्धं वीक्ष्य, अध्यात्मनि पञ्चमण्डलवाहार्थं सर्वबाह्यविषयोपभोगार्थं बाह्ये देवतानिष्पत्तौ सकलजगदर्थकरणाय (T 346) मैत्रीकरुणामुदितोपेक्षास्वभाविन्यस्तारामामकीपाण्डरालोचनागीतं कुर्वन्ति देव्यः। त्वमपि भगवन् सर्वसत्त्वोपकारी अस्मान् रक्षाहि वज्रिन् त्रिदशनरगुरो कामकामार्थिनीश्चेति तारा मैत्रीरूपेण चित्तवज्रं [11]चोदयति, मामकी करुणारूपेण[12] कायवज्रम्, पाण्डरा मुदितामूर्त्या वाग्वज्रम्, लोचना उपेक्षामूर्त्या ज्ञानवज्रं चोदयति। एवं चित्तकायवाग्ज्ञानात्मको भगवान् तासां गीतं श्रुत्वा स वज्री त्रिभुवनसकलं [13]कामरूपाख्यलक्षणं दृष्ट्वा इन्द्रजालोपमं वै तत्र चन्द्रद्रवे हूँकारं नीलवर्णं दृष्ट्वा स्फुरदमलकरं तेन परिणतं वज्रं तेन स्फारितमिति निष्पन्नमात्मानं योगी भगवान् [14]वज्रालङ्कारयुक्तो जिनपतिमुकुटः प्रज्ञयालिङ्गितश्च पूर्ववत्। पुनः प्रज्ञोपायात्मकेन

---

१. च. 'तथा' इत्यधिकम्। २. क. ख. छ. क्षू। ३. ग. च. भो. तथा। ४. क. ख. च. छ. क्ष्ला। ५. क. छ. क्षा। ६. क ख. 'बीजेन'....'इन्द्रजालो' नास्ति। ७. भो. 'देवतां' नास्ति। ८. भो. bTsaḥ Ba (प्रसूति)। ९. भो. bsKyed Pa (उत्पत्तिः)। १०. ग. कनकायां, छ. कार्य। ११. भो. 'चोदयति' नास्ति। १२. च. मूर्त्या। १३. च. रूप्यारूप्य। १४. क. ख. सर्वालङ्कार।

चित्तकायवाग्धर्मेण मण्डलो[1]त्सर्जनं कुर्याज्जातस्य [2]बालकस्य [3]प्रबोधाक्रन्दनादिति। इह मन्त्रनये जरायुजोत्पत्तिक्रमेण नवमासैर्बालकस्य[4] कायनिष्पत्तिः। देवतानां पञ्चाकाराभिसंबोधिलक्षणा कायनिष्पत्तिः। सेवाङ्गं प्रथमम्। अत्र देवताहङ्काराय मन्त्रपदम् ॐ सुविशुद्धधर्मधा[5]त्वात्मकोऽहमित्युच्चार्य ततो [6]**वागुत्पादाय** द्वितीयं सेवाङ्गं भावयेद् योगी॥ ४९॥

इति [7]मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां
द्वादशसाहस्रिकायां विमलप्रभायां [8]साधनापटले
उत्पत्तिक्रमेण कायनिष्पत्तिमहोद्देशो द्वितीयः।

(३) प्राणदेवतोत्पादमहोद्देशः

होःकाराद्यन्तगर्भे समसुखफलदे कायवाक्चित्तवज्रं
प्रज्ञारागद्रुतं तच्छशिनमिव विभुं वज्रिणं [9]चेक्षयित्वा।
गीतं कुर्वन्ति देव्यस्त्वमपि हि भगवन् सर्वसत्त्वोपकारी
अस्मान् रक्षा हि वज्रिन् त्रिदशनरगुरो कामकामार्थिनीश्च ॥५०॥
[268b]

वाग्वज्रं दशमण्डलात्मकमिह प्राणस्य संचारतः
पञ्चस्थानगतं स्वरप्रकृतितः शून्यादिभेदात् सदा।
सत्त्वानामधिमुक्तितो भवभयात् सन्मार्गसंदेशकम्
उत्पादोऽस्य वितन्यते निगदितो मञ्जुश्रिया टीकया॥

होःकारेत्यादि। इह यथा मर्त्ये गर्भजानां प्राणवायूत्पादाय स्वमण्डलवाहिनः पृथिव्यादिधातवो विज्ञानं चोदयन्ति जाग्रदवस्थार्थं स्वप्नावस्थां प्रविष्टस्य, तथा लोचनादिदेव्यो वेदितव्याः सत्त्वार्थायेति। अत्र नाभाववधूतीमार्गे उष्णीषे च **होःकारमाद्यन्ते** देवतायां विन्यस्य ततो ललाटे कायवज्रं ॐ, कण्ठे वाग्वज्रम् आः, हृदये चित्तवज्रं हूँ—एवं **कायवाक्चित्त**[10]समुद्भूतं चन्द्रसूर्यराहुलक्षणं कालाग्निना अध ऊर्ध्वं प्रज्ञारश्मिभि[11]र्द्रुतं **प्रज्ञारागद्रुतमिति**, प्रज्ञा चण्डाली तया द्रुतम्। [12]अत्र द्विधा चोदना—एका प्राणनिष्पत्तये, द्वितीया षोडशवर्षावधेः सुखनिष्पत्तये। तेन **शशिनमिव द्रुतं वज्रिणं** [13]**चेक्षयित्वा** चकारात् प्रज्ञामपि, सप्रज्ञमवधूतीशङ्खिन्याश्रितं चित्तं ज्ञानवज्रं

---

१. च. लस्यो। २. ग. च. भो. बालस्य। ३. ग. प्रतिबो, च. बोधाश्चा। ४. ग. च. भो. लस्य। ५. भो. स्वाभावात्मको। ६. भो. gSuṅ rDo-rJe (वाग्वज्रमु)। ७. ग. श्रीमूल। ८. भो. 'साधनपटले' नास्ति। ९. मु. वीक्षयित्वा। १०. च. भो. संभूतं। ११. भो. Šu Ba सर्वत्र 'द्रुतम्' इत्यत्र 'द्रवम्' पाठः। १२. ग. तत्र। १३. छ. चक्षुयित्वा।

चेति। **गीतं कुर्वन्ति देव्यस्त्वमपि हि भगवन् सर्वसत्त्वोपकारी अस्मान्**[1] **रक्षा हि**[2] **वज्रिन् त्रिदशनरगुरो** [3]**कामकामार्थिनीश्चेति**। अत्र मैत्रीकरुणामुदितोपेक्षास्वभाविन्य-स्तारामामकीपाण्डरालोचनादेव्यश्चोदयन्ति [4]पञ्चमण्डलवाहार्थं बालानां भगवतो जगदर्थायेति देवीवज्रगीतिकाचोदनानियमः। तथा **मूलतन्त्रे**—

लोचनाऽहं जगन्माता निष्यन्दे योगिनां स्थिता। 5
मे मण्डलस्वभावेन कालचक्रोत्थ काम माम्॥

मामकी भगिनी चाहं विपाके योगिनां स्थिता।
मे मण्डलस्वभावेन कालचक्रोत्थ काम माम्॥

पाण्डरा दुहिता चाहं पुरुषे योगिनां स्थिता।
मे मण्डलस्वभावेन कालचक्रोत्थ काम माम्॥ 10

तारिणी भागिनेयाहं वैमल्ये योगिनां स्थिता।
मे मण्डलस्वभावेन कालचक्रोत्थ काम माम्॥

शून्यमण्डलमादाय कायवाक्चित्तमण्डलम्।
स्फारयस्व जगन्नाथ जगदुद्धरणाशय॥ इति।

एवं **समसुखफलदे** नाभिगुह्यादिकमले मूर्च्छागतं विज्ञानं प्रबोधयन्ति बालाना- 15
मिव देवता[5]कायस्थमिति नीतार्थः॥५०॥

इदानीं देवतोत्थानमुच्यते—

गीतं श्रुत्वा स वज्री त्रिभुवनसकलं त्विन्द्रजालोपमं वै
दृष्ट्वोत्पत्तिं करोति स्फुरदमलकरं स्फारयित्वा स्वचिह्नम्।
वज्रालङ्का[269a]रयुक्तो जिनपतिमुकुटः प्रज्ञयालिङ्गितश्च 20
प्रज्ञोपायेन राजन् पुनरपि सकलं मण्डलोत्सर्जनं च॥५१॥

गीतं श्रुत्वेत्यादिना[6]। अत्र शून्यतायां प्रविष्टो भगवान् गीतिकाभिः प्रबोधितः सन् मायोपमं सकलं जगद् **दृष्ट्वा** सत्त्वार्थाय भूय **उत्पत्तिं करोति स्फुरदमलकरं स्फारयित्वा स्वचिह्नं** पञ्चशूकवज्रं हूँकारपरिणतम्। तेन **वज्रालङ्कारयुक्तो जिनपतिमुकुटो**ऽक्षोभ्यमुकुटः **प्रज्ञालिङ्गितो** वै शून्यमण्डलवाहिन्या वज्रधात्वीश्वर्या विश्वमात्रा। 25
तद्हृदये बालानामिव **प्रज्ञोपायेन**। **राजन्निति** सम्बो[7]धनम्। प्रज्ञोपायसमापत्त्या गगनस्थान् स्कन्धधात्वायतनादिस्वभावेन समयमण्डलार्थं बुद्धान् पञ्चमण्डलस्वभावान्

१. ग. च. अस्माद्। २. ग. भिव। ३. ग. काय। ४. भो. 'पञ्च' नास्ति।
५. ग. ताकारकायस्थ। ६. ग. 'ना' नास्ति। ७. ग. धनार्थम्।

स्वकाये प्रवेश्य प्रज्ञापद्मे प्रत्येकाक्षर[1]मन्त्रस्वभावान् ततः पद्मादुत्सृजेत् पूर्ववत् वक्त्रभुज-
चिह्नसंस्थानलक्षणान् ज्ञानचित्तवाक्कायमण्डलेषु । एवं **मण्डलोत्सर्जनं च**। चकारात्
पूर्ववदिति । बालस्य [2]गर्भान्निर्गम[3]काले प्राणादिवायूनां दशानामुत्पादः। शिष्याणां
मण्डलप्रवेशकाले पुष्पक्षेपः। नग्नो जरायुचर्माम्बरधरो बाल इति विशुद्ध्या देवतायाः
5 [4]समयमण्डलनिष्पत्तिः। तत इन्द्रियप्रबोधो ज्ञानसत्त्वप्रवेशो बालस्य यथा तथा
देवतायां[5] भावनीया[6] योगिभिर्विंशत्याकारसंबोधिलक्षणा। एवं पञ्चाकाराभिसंबोधौ
[7]सेवाङ्गं कायनिष्पत्तौ, विंशत्याकारसंबोधावुपसाधनं वाङ्निष्पत्तौ, एवमुत्पत्तिक्रमो
द्विधा– एको जरायुजः, द्वितीयोऽण्डजः। योऽण्डजः स लोकधातूत्पादः। ब्रह्माण्डजमिति
भाषया। यो जरायुजः स मनुष्योत्पादः। यो झटितः स उपपादुकोत्पादः। [8]सत्त्वानां
10 स एकोत्पत्तिक्रमः। झटिताकारेण सत्त्वाशयेनोक्तो भगवता [9]उत्पन्नक्रमः पुनः कल्पना-
रहितः।

गगनोद्भवः स्वयंभूः प्रज्ञाज्ञानानलो महान्।
T 347 वैरोचनो महादीप्तिर्ज्ञानज्योतिर्विरोचनः॥ (ना० सं० ६. २०-२१)

इत्यादिपञ्चाकाराभिसम्बोधिनाऽवगन्तव्यः ॥ ५१ ॥

15 इदानीं ज्ञानचक्राकर्षणमुच्यते—

नीलाभं भीमकायं प्रहसितवदनं चार्धदंष्ट्राकरालं
गर्जन्तं सूर्यनेत्रं द्व्यधिकजिनकरं वेदवक्त्रं द्विपादम्।
प्रज्ञोपायो[269b]द्भवन्तं प्रहरणसहितं प्रेषयेद् वज्रवेगं
अष्टाङ्घ्रिस्यन्दनस्थं जिनरिपुमथनं ज्ञानचक्रस्य हेतोः ॥५२॥

20 नीलाभमित्यादिना। इह [10]जातबालस्य मध्यमाप्राणनिर्गमो नीलाभः, तस्य निर्गमे-
ने(णे)न्द्रियाणां प्रबोधो बाह्यविषयाणां षड्विज्ञानानां प्रवृत्तिरध्यात्मनि। अतो बाह्य-
देवतानिष्पत्तौ **नीलाभं** प्राणं मध्यमाविशुद्ध्या वज्रवेगं **भीमकायं प्रहसितवदनं चार्ध-
दंष्ट्राकरालं गर्जन्तं द्वादशनेत्रं द्व्यधिकजिनकरं** षड्विंशतिभुजं। चतुर्मुखं द्विचरणं
प्रज्ञोपायो[11]**द्भवन्तं** भर्तृवत् **प्रहरणसहितं** गजचर्माम्बरधरं पञ्चमुद्राविभूषितम् अक्षोभ्य-
25 मुकुटिनं कपालमुण्डमालाधारिणं सर्पाभरणं [12]हूँकारवज्रनिर्माणं तं **वज्रवेगं** [13]**प्रेषयेद्**

---

१. क. मण्ड। २. च. गर्भाद्विनि। ३. क. ख. ग. च. छ. कालः। ४. क. समल। ५. क. ख ग. छ. ताया। ६. च. नीयो। ७. क. शवाङ्गं, छ. सर्वाङ्गं। ८. भो. 'सत्त्वानां' नास्ति। ९. भो. rZogs Paḥi (निष्पन्न)। १०. क. ख. ग. छ. बाल-जातस्य। ११. ग. भो. द्भूतं, च. छ. भवं तं। १२. भो हूँ। १३. च. प्रैष, भो. bsKul Bar (प्रेर)।

आलयविज्ञानं[1] प्रवृत्तिविज्ञानमिति। **अष्टाङ्घ्रिस्यन्दनस्थमिति**। शब्दस्पर्शरसरूपगन्ध-सत्त्वरजस्तमोगुणस्थं **जिनरिपुमथनं** मारक्लेशमथनम्। **ज्ञानचक्रस्य हेतोः** पञ्चविषय-ज्ञाननिवृत्तय इति॥ ५२॥

नाभौ हत्वाङ्कुशेन स्फुरदमलकरं ज्ञानचक्रेश्वरं वै
हस्तेष्वेवं प्रबद्ध्वा सकुलिशफणिना भीषयित्वा स्वशस्त्रैः।
साध्यं कृत्वा समस्तं व्रजति पुनरसौ चालयित्वा सुचक्रं
वेशं बन्धं च तोषं समरसकरणं जम्भकादिः करोति॥५३॥

ततो नाभिकमलाद् [2]बाह्यनिर्गतः प्राणो बाह्यभावानाकृष्य पुनर्निवर्तते। [3]अतो विशुद्धया **हत्वा नाभौ** वज्राङ्कुशेन **स्फुरदमलकरं ज्ञानचक्रेश्वरं वै हस्तेषु** चतुर्विंशतिषु बन्धयित्वा **सकुलिश**नागपाशै**र्भीषयित्वा स्वशस्त्रैः**। एवं ज्ञानचक्रं **साध्यं कृत्वा व्रजति पुनः** स्वस्थानं **चालयित्वा समस्तं** भावलक्षणं विश्वचक्रमिति। ततो [4]**वेशं जम्भकः करोति** चक्षुरिन्द्रियजनितमालयविज्ञानम्। **बन्धं** कायेन्द्रियजनितं कायविज्ञानं स्तम्भकः करोति। [5]**तोषं** जिह्वेन्द्रियजनितं जिह्वाविज्ञानं मानकः करोति। **समरस-करणं** [270a] घ्राणेन्द्रियजनितं घ्राणविज्ञानमतिबलः करोति। एवं पञ्चप्रकारं जःकारेणाकृष्टम्, हूँकारेण प्रविष्टम्, वंकारेण बद्धम्, होःकारेण तोषितम्, हीःकारेण समरसीकृतम्। वज्राङ्कुशेन वज्रेण वज्रपाशेन वज्रघण्टया वज्रदण्डेनेति। एवं ज्ञानचक्रं सम्पूज्य पूर्ववत् समयचक्रं समरसीभूतं भावयेदिति नियमः॥ ५३॥

इदानीमुत्पत्तिक्रमेण प्रत्येकस्थाने ज्ञानदेवतानां समयदेवताभिः सार्धमेकत्व-मुच्यते—

चित्तं निष्पत्तियोगे भवति सगगनं गर्भपद्मेऽग्निमूर्ध्नि
पूर्वे श्रीकृष्णदीप्ता वरकमलदले दक्षिणे रक्तदीप्ता।
वामे श्रीश्वेतदीप्ता भवति कुलवशात् पश्चिमे पीतदीप्ता
धूमाग्नेय्यां मरीचिर्दनुजदिशि तथा द्योतकेशप्रदेशे॥५४॥

[6]चित्तमित्यादिना। इह [7]**निष्पत्तियोगे** उत्पत्तिक्रमे **भवति सगगनं** वज्रधात्वी-श्वर्या सार्धं विज्ञानं [8]**गर्भपद्मे** महासुखे **अग्निमूर्ध्नि** चन्द्रसूर्यराहुकालाग्निमण्डलोपरि

---

१. भो. rNam Par Śes Pa Las (विज्ञानात्)। २. ख. ग. च. छ. बाह्ये। ३. ग. ततो। ४. भो. gŚug Pa (प्रवेशं)। ५. ग. च. तोयं। ६. भो. sKyed Pa (उत्पत्ति)। ७. भो. sKyed Pa (उत्पत्ति)। ८. क. गर्भे।

समयसत्त्वेन ज्ञानसत्त्वस्य समरसत्वम् । एवं **पूर्वपत्रे कृष्णदीप्ता** समरसा । **वरकमलदले दक्षिणे रक्तदीप्ता,** उत्तरे **श्वेतदीप्ता, पश्चिमे पीतदीप्ता भवति कुलवशाद्** ज्ञान[1]चक्रवशात् । एवमाग्नेय्यां **धूमा** । नैर्ऋत्ये **मरीचिः** । **खद्योत ईशे** ॥ ५४ ॥

5 वायव्यां श्रीप्रदीपा मणिरपि च तरुर्धर्मगण्डी च शङ्खो
वह्नौ वायौ च दैत्ये हरदिशि च तथाभ्यन्तरे कोणभागे ।
पूर्वे संस्कारपृथ्वी खलु कमलगतौ दक्षिणे वेदनाम्भो
वामे संज्ञा च वह्निर्भवति स पवनं रूपमेवापरे च ॥५५॥

[2]**वायव्यां प्रदीपा** समरसा इति । एवमग्निकोणे **चिन्तामणिः,** नैर्ऋत्ये
10 **धर्मगण्डी,** ईशाने धर्मशङ्खः, वायव्ये कल्पवृक्ष इति । वज्रावलीपद्मदलयोः **कोणभा[270b]गेऽभ्यन्तरे** । एवं पूर्वकमलासने कर्णिकायां सूर्ये **संस्कारपृथिव्यौ** द्वौ समरसौ समयसत्त्वाभ्यां सह । **दक्षिणे वेदना** तोयधातुः, उत्तरे **संज्ञा** तेजोधातुः, पश्चिमे **सपवनं रूपं** समरसं [3]भवतीति । अत्रोपाया नायकाः ॥ ५५ ॥

आग्नेय्यां वायुरूपे भवति दनुपतौ वह्निसंज्ञा द्वयं च
15 ईशेऽम्भो वेदना वै मरुति च धरणी स्कन्धसंस्कारयुक्ता ।
देवी बुद्धान्तरालेष्वमृतरसघटाश्चाष्टकक्षप्रदेशे
घ्राणो गन्धश्च पूर्वे पुनरपरपुटे दक्षिणे नेत्ररूपे ॥५६॥

एवमाग्नेय्यां वायुरूपे समरसे भवतः, नैर्ऋत्ये तेजोधातुसंज्ञे, **ईशाने** तोयधातुवेदने, वायव्ये पृथिवीधातुसंस्कारौ समरसाविति कोणदेव्यो नायिकाः । एवं
20 **देवीबुद्धानामन्तरालेष्वमृतरसघटा अष्टकक्षप्रदेशे** समरसा भवन्तीति नियमः । तथागतपुटे ततो बोधिसत्त्वपुटे **घ्राणो गन्धश्च पूर्व**कमले समरसः । **दक्षिणे नेत्रं रूप**विषयः ॥५६॥

वामे जिह्वारसः स्याद् भवति हि वरुणे स्पर्शकायस्तथैव
पाताले शब्दकर्णौ भवति कुलवशाद् दक्षिणे द्वारवामे ।
25 चित्तं वै धर्मधातुर्भवति सगगनं सर्वतो द्वारवामे
आदौ चोपायषट्कं भवति जिनवशान्मण्डलस्याधिदेवम् ॥५७॥

---

१. ग. 'चक्र' नास्ति, भो. Sal (वक्त्र) । २. ग वायव्ये । ३. भो. 'इति' नास्ति ।

उत्तरे जिह्वारसः, वरुणे [1]स्पर्शकायेन्द्रियम्, पाताले शब्दकर्णौ, दक्षिणद्वार-पूर्वे वामे चित्तं वै धर्मधातुर्भवति सगगनं पूर्वद्वारस्य वामे। एवमादौ चोपायषट्कं भवति। तथागतकुलवशाद् मण्डलस्याधिदैवम् ॥५७॥

पश्चात् प्रज्ञादिषट्कं प्रकटमधिपतिः स्वस्वपद्मासने च
पूर्वद्वारे प्रचण्डस्त्वसिधृगतिबलः स्तम्भकी तस्य मुद्रा। 5
सव्ये जम्भश्च मानी भवति च धनदे मानको जम्भकी च
स्तम्भश्चानन्तवीर्या भवति च वरुणे द्वारमध्यस्थपद्मे ॥५८॥

पश्चात् प्रज्ञादिषट्कं धर्मधात्वादिकमिति। [2]अत्राग्नेय्यां स्पर्शवज्रा काये-न्द्रियम्, नैर्ऋत्ये रसवज्रा जिह्वा, ईशाने रूपवज्रा चक्षुः, वायव्ये गन्धवज्रा घ्राणः, पाताले[271a] शब्दवज्रा श्रोत्रम्। उत्तरद्वार[3]वामे धर्मधातुः, मनः पश्चिमद्वारवामे 10
इति द्वादशायतनानि। बोधिसत्त्वपुटे समरसीकरणं ज्ञानसत्त्वस्य [4]स्वस्वपद्मासने चन्द्र-मूर्धिन। इदानीं क्रोधराजानां समरसत्वमुच्यते—पूर्वद्वारे प्रचण्डस्त्वसिधृगतिबलः स्तम्भकी तस्य मुद्रा, सव्यद्वारे जम्भकश्च मानी मुद्रा, उत्तरद्वारे मानको [5]जम्भकी मुद्रा। पश्चिमद्वारे [6]स्तम्भोऽनन्तवीर्या तस्य मुद्रा भवति समरसा। द्वारमध्यस्थपद्म इति चित्तमण्डले सम[7]रसकरणम्। नाभिचक्रे हृत्कमले जातकस्येति नियमः ॥५८॥ 15

मारीची नीलदण्डोऽचल इति भृकुटी शृङ्खलाऽनन्तवीर्य-
ष्टक्किश्चुन्दारथस्था सुरधनदपरे दक्षिणे द्वारमध्ये।
सुम्भो रौद्रेक्षणाधो भवति नभसि चोष्णीष एवातिनीला
पूर्वद्वारा परोर्ध्वे भवति च नियतं स्यन्दनश्च द्वयोश्च ॥५९॥

एवं क्रोधप्रासङ्गिकेन मारीची नीलदण्डो बाह्यकायमण्डले द्वारपालः पूर्वे सम- 20
रसः, दक्षिणे टक्किश्चुन्दारथस्था, उत्तरेऽचलो भृकुटी, पश्चिमे शृङ्खलाऽनन्तवीर्यो महाबल इति समरसः। सुम्भराजो रौद्राक्षी पाताले। अतिनीला उष्णीष ऊर्ध्वे रजो-मण्डले पूर्वद्वारोपरि उष्णीषः। पश्चिमे सुम्भ इति स्यन्दनश्च द्वयोश्चेति नियमः। भावनायां पुनरध ऊर्ध्वेऽपि स्यन्दन इति गर्भमण्डले मुखेन्द्रियगुदोष्णीषद्वाराणि। इन्द्रिय-मिति मूत्रशुक्रद्वारम्। [8]बाह्ये कायमण्डले घ्राणचक्षुर्जिह्वाकायश्रोत्राणीति। बालकाये 25
यथा तथा मण्डले [9]इति नियमः ॥ ५९ ॥

---

१. च. स्पर्शः। २. ग. च. तत्रा। ३. ग. च. भो. वामे आकाशे। ४. ग. 'स्व' नास्ति। ५. क. ख. च. छ. जम्भी। ६. क. ख. ग. छ. स्तम्भको। ७. ग. रसी। ८. क. बाह्य। ९. क. ख. ग. छ. 'इति' नास्ति।

वाग्जाते मण्डले वै भवति वसुदिशास्त्रासनं भूतजानां
चामुण्डेन्द्रश्च पूर्वे भवति शिखिनि वै वैष्णवी वेदवक्त्रा ।
यामे रुद्रो वराही भवति दनुपतौ षण्मुखी विघ्ननाथः
[1]बाह्येन्द्रद्वारसव्ये भवति दनुपती पश्चिमे वायवीन्द्रौ ॥६०॥

5 [271b]

[2]वायौ ब्रह्मा च विद्युद् भवति हि धनदे सागरः शूकरी च
कौमारीशे गणेन्द्रः खलु धनदयमद्वारयोर्वामभागे ।
रुद्रः कालश्च विष्णुर्धनद इति सुरे चापरे द्वारवामे
तेषां मुद्रा प्रसिद्धा भवति गिरिसुता यामिनी श्रीर्धनेशा ॥६१॥

10 यक्षे रौद्री यमः स्याद् भवति पशुपतौ षण्मुखश्चैव लक्ष्मी-
र्बाह्येन्द्रद्वारसव्ये भवति दनुपती राक्षसी तस्य मुद्रा ।
वह्नौ वायुः प्रचण्डा हरिरपि वरुणा दक्षिणद्वारसव्ये
लक्ष्मीः श्रीषण्मुखो वै भवति दनुपतौ पश्चिमे वायवीन्द्रौ ॥६२॥

बाह्ये नागाः समस्ताः सुरयमधनदे पश्चिमे वेदिकायां
15 पद्मः कर्कोटको वै चलवलयगतौ वासुकिः शङ्खपालः ।
वह्निस्थो तोयमूर्ध्नि प्रभवति कुलिकोऽनन्तनागः प्रसिद्ध-
स्तद्वद् भूमण्डलस्थो भवति कुलवशात् तक्षको वै महाब्जः ॥६३॥

तेषां प्रज्ञाः प्रचण्डाश्चितिभुवनगताः श्वानवक्त्रादयश्च
तासां पद्माद्युपायास्त्वपरकुलवशात् सत्सुखार्थं भवन्ति ।
20 श्वानास्या पूर्वचक्रे चलवलयगता शूलभेदे श्मशाने
याम्ये वै शूकरास्या खलु शवदहने चोत्तरे व्याघ्रवक्त्रा ॥६४॥

सक्लिन्ने पूतिगन्धे भवति च वरुणे जम्बुकास्या तथैव
उच्छिष्टे घोरयुद्धे शिखिनि दनुपतौ काकवक्त्रा सगृध्रा ।

---

१. चतुर्थपङ्क्तिस्थाने मुद्रितपुस्तके—'ऐन्द्री दैत्योऽपरे स्यात् खलु युगवदना मारुते विष्णु-रेव' इति पाठः । २. मुद्रितपुस्तक एक षष्टितम-द्वाषष्टितमश्लोकयोः क्रमविपर्ययः ।

वायव्ये सर्पदष्टे खगपतिवदना चेश्वरे बालमृत्यो
चक्रस्थोलूकवक्त्रा महिवलयगतौ चन्द्रसूर्यौ च भाव्यौ ॥६५॥

प्रत्यालीढं हि मातुर्भवति समपदं यत्र देवीगणस्य
प्रत्यालीढं विशाखं दशवसुगणयोर्मण्डलं चासुरीणाम् ।
प्रत्यालीढे स्थितानां खलु भवति समापत्तिरालीढपादो
वैशाखाख्यं विशाखे भवति च नियतं मण्डलं मण्डले च ॥६६॥

[272a]

शेषा वज्रासनस्थाः प्रकटितनियता देवता मण्डले च
देव्यः पद्मासनस्थाः स्वकुलदिशिगताः स्वस्वपद्मेन्दुमूर्ध्नि ।
देवा वज्रासनस्थाः फणिकुलसहिताः स्वस्वदिग्वाहनस्थाः
पत्रे देव्यः सुराणां खलु ललितपदा भूतजानां तथैव ॥६७॥

सव्यैराकुञ्चितैश्च क्षितितलनिहितैः सारितैर्वामपादैः
प्रत्यालीढं पदं तद् भवति नरपते सार्धहस्तद्वयेन ।
आलीढं वामयोगाद् भवति समपदं पादयुग्मे समे च
वैशाखं मण्डलं यद् भवति गुणवशाज्जानुयुग्मप्रसारात् ॥६८॥

किञ्चिज्जान्वर्धवक्त्रे भवति हि ललितं शेषमेवं प्रसिद्धं
ज्ञातव्यं योगिना वै पुनरपि भरते वज्रनृत्यस्य हेतोः ।

एवं वाग्द्वाराणि पञ्च, पञ्चस्थानोच्चारणवशात् । एवमध ऊर्ध्वं शून्यद्वारत्रयम् । शुक्रद्वारं कायकण्ठस्थानलक्षणं वर्जयित्वा द्वादशद्वाराणि त्रिमण्डलेषु । एवं सूर्यलग्न-भेदेन द्वादशद्वाराणि, चन्द्रकलाभेदेन पञ्चदश, सर्वसत्त्वानां कायवाक्चित्तधर्मेणेति नियमः । अत्र वाङ्मण्डलादिसमरसत्वं सुबोधं प्रत्यालीढादिपदादिकं च । "वाग्जाते मण्डले वै" (४.६०) इत्यारभ्य "वज्रनृत्यस्य हेतोः" (४.६९) इतिपर्यन्तं सार्धनव-वृत्तानि सुबोधानीति ॥ ६०–६८½ ॥

इदानीं कुलमुद्रणं देवतानामुच्यते—

T 348

वज्रस्यान्योन्यवज्रो भवति हि मुकुटे पञ्चबुद्धाः कदाचिद्
रूपस्याक्षोभ्य ऊर्ध्वं स्फुटकमलधरस्यैव वैरोचनः स्यात् ॥६९॥

वज्रस्येत्यादिना। इह मण्डले परमादिबुद्धे **वज्रस्यान्योन्यवज्रो भवति हि मुकुटे।** तत्कस्य हेतोः? ज्ञान[1]विज्ञानपरस्परसंयोगादिति। अतो [2]ज्ञानेन विज्ञानं विज्ञानेन ज्ञानम्। उभयोश्चित्तवज्रश्चीवरोष्णीषधारी शिरसि वज्रपर्यङ्कस्थः भूस्पर्शमुद्रया। तथागतोयाश्वासतः पञ्चकुलैर्मुद्रणम्, स्वाभाविककुलस्य प्रतिषेधः, बुद्धानां जनकत्वा-
5 दिति। अथ ज्ञानविज्ञान[3]धर्मेण **पञ्चबुद्धात्ममुकुटः कदाचित्** क[272b]र्तव्य इति तथागतनियमः। **रूपस्याक्षोभ्य ऊर्ध्वम्**, "चित्तं कायाकारेण" (गु० त०, पृ० ११) इति वचनात्। **स्फुटकमलधरस्यैव वैरोचनः स्यात्**, "कायं वाक्प्रव्याहारेण" (गु० त०, पृ० ११) इति वचनात्॥ ६९॥

रत्नेशस्याब्जधारी प्रवरमणिकरोऽमोघसिद्धेश्च मौलौ
10 षण्णां मौलिर्जटाख्या भवति गुणवशाच्छेषचक्रस्य चान्यत्।
भूमौ चक्रप्रसूतिर्भवति हि कमलस्योदकेऽग्नौ मणेश्च
वायौ खड्गस्य शून्ये भवति हि कुलिशस्याक्षरे कर्तिकायाः॥७०॥

रत्नेशस्याब्जधारी, रजोधर्मित्वात्। **प्रवरमणिकरोऽमोघसिद्धे[4]श्च मौलौ**, रक्ततो मांससंभवादिति। **षण्णां मौलिर्जटाख्या भवति गुणवशादिति।** गुणास्तीर्थि-
15 कानामव[5]ताराय। ईश्वरवक्त्रविशुद्धया षड्वक्त्राणि, पञ्चवक्त्राणि वा [6]पञ्चब्रह्मलक्षणानि जटा[7]मुकुटधराणि। [8]अत्र सद्यो वैरोचनः, वामदेवोऽमिताभः, अघोरो रत्नसंभवः, तत्पुरुषोऽमोघसिद्धिः, ईशानोऽक्षोभ्यः, कालाग्निर्वज्रसत्त्व इति। पृथिव्यप्तेजोवाय्वाकाशज्ञानस्वभावाः प्राकृतस्कन्धाः शुद्धस्कन्धैरुष्णीषचीवरधारिभिर्मुद्रिता इति। एवं षण्णां मौलि[9]र्जटाख्या। **शेषचक्रस्य** देवता[10]देवतीनां मौलिर्नानारत्नमयी स्वस्वकुलमुद्रिता यो
20 येन जातस्तेन तस्य मुद्रणं वक्ष्यमाणे। इदानीं चक्रादीनां चिह्नानां प्रसूतिरुच्यते—**भूमा**वित्यादि। इह भूमिबीजेन[11]ऌकारेणं **चक्रस्य प्रसूतिः। कमलस्योदक**[12] उकारे। **अग्नौ मणेः** ऋकारे। **वायौ खड्गस्य** इकारे। **शून्ये कुलिशस्य** अकारे। अंकारे [13]ज्ञाने **कर्तिकाया** भवतीति क्रियासम्बन्धः॥ ७०॥

वस्त्रं पीयूषपात्रं प्रभवति हि तथादर्शमाला च वीणा
25 षष्ठो धर्मोदयो वै क्षितिजलहुतभुङ्मारुताकाशशान्तात्।
खेटं कु[273a]न्तं च बाणं परशुडमरुकौ पञ्च चिह्नानि तद्वद्
दण्डः पाशोऽङ्कुशो वै भवति खलु तथा मुद्गरं च त्रिशूलम्॥७१॥

---

१. क. ख. छ. 'विज्ञान' नास्ति। २. क. ख. छ. भो. ज्ञानं। ३. च. धर्मणः। ४. क. ख. छ. स्वमौलौ। ५. ख. ग. च. छ. तारणाय। ६. ग. 'पञ्च' नास्ति। ७. ग. मकुट। ८. क. ख. ग. च. अवसव्यो। ९. क. ख. छ. ली जटा। १०. च, देवी। ११. छ. ऋ। १२. छ. दरे। १३. क. ख, भो. ज्ञानकर्तिकाया।

एवं [1]लृकारे **वस्त्रं** भवति । **पीयूषपात्रमूकारे, आदर्शमृकारे,** गन्ध ईकारे, **वीणा** आकारे, **धर्मोदयो** [2]विसर्ग [3]आकार इति पृथिव्यादिगुणभेदेन चिह्नानि । एवं **खेटम्** अल्कारे, **कुन्तमोकारे, बाणोऽर्कारे,** परशुः एकारे, **डमरुकोऽकारे** । इति **पञ्च चिह्नानि** गुणभेदेन । तथा **दण्ड** आल्कारे, **पाश** औकारे, **अङ्कुश** आर्कारे, **मुद्गर** ऐकारे, **त्रिशूलमाकारे** इति पञ्चचिह्नानि स्वरवृद्धया ॥ ७१ ॥ 5

कोदण्डश्चोत्पलं वै पुनरपि च तथा वक्त्रखट्वाङ्गघण्टा
एवं वै शृङ्खलाद्यं जलचरचषकं द्वीपिचर्मेभचर्म ।
शेषाण्यत्रोपचिह्नान्यवनिजलहुताशानिलाकाशजानि
ज्ञातव्यान्येव तानि प्रकृतिगुणवशाद् देवतादेवतीनाम् ॥७२॥

[4]**कोदण्डो** लकारेण, उत्पलं वकारेण, [5]**वक्त्रं** रकारेण, **खट्वाङ्गं** यकारेण, 10
घण्टा हकारेण, **एवं वै शृङ्खला** लाकारेण, शङ्खो वाकारेण, कपालं राकारेण, **द्वीपिचर्म** याकारेण, दन्तिचर्मं हाकारेणेति, दीर्घैर्यणादेशैरिति द्वात्रिंशच्चिह्नानां स्वरनियमः । **शेषाण्यत्रोपचिह्नान्यवनिजलहुताशानिलाकाशजानि ज्ञातव्यान्येव**[6] **तानि प्रकृतिगुणवशाद् देवतादेवतीनामिति** । सर्वेषां चर्चिकादीनां वाय्वादिभेदेन चिह्नानि वेदितव्यानि ॥ ७२ ॥ 15

लाद्यास्त्रिंशत् स्वरा ये क्षितिजलहुतभुङ्मारुताकाशजाता-
श्चिह्नानां ते स्वमन्त्राः क्रमपरिरचिता ह्रस्वदीर्घप्रभेदैः ।
चक्रादीनां समस्ताः खलु कमलगताश्चन्द्रसूर्यासनस्थाः
षष्ठं यत्रैव चिह्नं भवति गुणवशात् तत्र चानाहतं स्यात् ॥७३॥

[273b] 20

अत्रोक्ता [7]**लाद्यास्त्रिंशत् स्वरा ये क्षितिजलहुतभुङ्मारुताकाशजाताः, चिह्नानां ते स्वमन्त्राः क्रमपरिरचिता** [8]**ह्रस्वदीर्घप्रभेदैः । चक्रादीनां समस्ताः खलु कमलगताश्चन्द्रसूर्यासनस्थाः । षष्ठं यत्रैव चिह्नं भवति गुणवशात् तत्र चानाहतं स्यात् ।** एवं बीजेन चिह्नोत्पादः, [9]चिह्नेन देवतोत्पादः [10]सर्वत्रावगन्तव्यो योगिनेति तन्त्रनियमः ॥ ७३ ॥ 25

---

१. क. 'लृ' नास्ति, छ. ऋ । २. ग. च. सर्गे । ३. भो. अः । ४. भो. De bSin Du (तथा) इत्यधिकः पाठः । ५. भो. mGo Boḥo (शिरं) । ६. क. ख. छ. व्यानि प्रकृति । ७. भो. Lṛ La Sogs Pa (लृ-आदयः) । ८. च. दीर्घह्रस्व । ९. क. ख. छ. 'चिह्नेन देवतोत्पादः' नास्ति । १०. च. सदेवाव ।

इदानीं वज्रसत्त्वादीनां जातिबीजाक्षराण्युच्यन्ते—

नादः श्रीवज्रसत्त्वो भवति नरपते चित्तवज्रस्त्वकारो
ह्रस्वेकारश्च खड्गी भवति पुन ऋकारश्च वै रत्नपाणिः।
ह्रस्वोकारोऽमिताभो भवति पुन लृकारोऽत्र वैरोचनश्च
5 दीर्घं भावप्रभेदैः सुरगणसकलं षड्जिनानां क्रमेण ॥७४॥

नाद इत्यादिना। **नादोऽनाहतः, श्रीवज्रसत्त्वो** ज्ञानस्कन्धः। एवं सर्वत्र संज्ञा-संज्ञिसम्बन्धः। एवं **अ अक्षोभ्यः। इ अमोघसिद्धिः। ऋ रत्नसंभवः। उ अमिताभः। लृ वैरोचनः।** ॡ लोचना। ऊ मामकी। ॠ पाण्डरा। ई तारा। आ वज्रधात्वीश्वरी ॥७४॥

श्रीमाताऽनाहताख्या भवति खलु तथाकारजाकाशधातुर्
10 ई ॠ ऊ ॡ क्रमस्था मरुदनलजलक्ष्मासु सर्वा भवन्ति।
अन्योऽन्यं कायभावौ परमजिनपतिर्विश्वमाता सुखार्थं
अक्षोभ्यः शून्यधातुस्त्वसिकरकमलौ लोचनाकायभावौ ॥७५॥

श्रीमाता प्रज्ञापारमिता **अनाहताख्या**। एवं कायभावभेदेन ह्रस्वदीर्घाणां स्वराणां जातिः। **एवमन्योन्यं कायभावौ। परमजिनपतिर्ज्ञानस्कन्धः। विश्वमाता**
15 ज्ञानधातुः। विज्ञानमाकाशधातुः। संस्कारः पृथ्वीधातुः। [1]वेदना तोयधातुः ॥७५॥
[274a]

रत्नेशो मामकी च त्वपि कमलधरः पाण्डराकायभावौ
तद्वच्चक्री च तारा प्रकृतिगुणवशाज्ह्रस्वदीर्घस्वरैश्च।
अंकारो विश्वभद्रो भवति तनुवशाद् वज्रपाणिस्त्वकारो
20 ह्रस्वैकारः खगर्भोऽरपि भवति तथा भूमिगर्भश्च सम्यक् ॥७६॥

संज्ञा तेजोधातुः। रूपं वायुधातुरिति। एवं **अंकारः** समन्तभद्रः। **अकारो वज्रपाणिः।** [2]**ए खगर्भः। अर् क्षितिगर्भः** ॥ ७६ ॥

ओकारो लोकनाथोऽलपि भवति तथा चात्र विष्कम्भिकाय
आकारो धर्मधातुर्भवति खलु तथाःकारजा शब्दवज्रा।
25 ऐकारः स्पर्शवज्रा खलु रसकुलिशार्कारजा कायभेदा-
दौकारो रूपवज्रा भवति नृप तथाल्कारजा गन्धवज्रा ॥७७॥

---

१. च. 'वेदना तोयधातुः' नास्ति। २. ग. ऐ।

[1]ओ लोकेश्वरः । अल् सर्व[2]नीवरणविष्कम्भी[3] । एवं आ धर्मधातुः । आः शब्दवज्रा । ऐ स्पर्शवज्रा । आर् रसवज्रा । औ रूपवज्रा । आल् गन्धवज्रा इति ॥ ७७ ॥

श्रीभद्रो धर्मधातुस्त्वपि खकुलिशा वज्रपाणिश्च युग्मं
वैगर्भो गन्धवज्रा वररसकुलिशा लोकनाथश्च युग्मम् ।　　5
भूगर्भो रूपवज्रा भवति हि युगलं स्पर्शविष्कम्भिनौ च
एवं वै षट्कुलानि प्रकृतिगुणवशाद् वेदितव्यानि सम्यक् ॥७८॥

समन्तभद्रो धर्मधातुः । परस्परं कायभावौ । शब्दवज्रा वज्रपाणिः । युग्मं कायभावौ । [4]वैगर्भो गन्धवज्रा । रसवज्रा लोकेश्वरः । क्षितिगर्भो रूपवज्रा । सर्वनीवरणविष्कम्भी स्पर्शवज्रेति । एवं षट्कुलानि प्रकृतिगुणवशाद् वेदितव्यानि　　10
सम्यग् योगिनेति नियमः ॥ ७८ ॥ [274b]

इदानीं क्रोधानां पञ्चकुलबीजान्युच्यन्ते—

हंकारोष्णीषचक्रो भवति तनुवशादत्र हश्चातिनीला
सुम्भो ह्रस्वो हकारो भवति खलु तथा दीर्घजा रौद्रनेत्रा ।
यं ला युग्मक्रमेण प्रकटमतिबलः स्तम्भकी चैव युग्मं　　15
रं वा जम्भश्च मानो वमपि र इति वै मानकी जम्भकी स्यात् ॥७९॥

हमित्यादिना । अत्र हंकार उष्णीषे[5] चक्री भवति तनुवशात् कायभेदादिति । एवमन्येऽपि । हश्चातिनीला । सुम्भो ह । रौद्राक्षी हा । यं अतिबलः[6] । लाः [7]स्तम्भकी । रं जम्भः[8] । वाः [9]मानकी । व मानकः । राः जम्भकी ॥ ७९ ॥

लं याः स्तम्भोऽतिवीर्या भवति य व र लं नीलदण्डोऽचलश्च　　20
टक्किश्चानन्तवीर्यो भवति तनुवशाद् देवतीनां च दीर्घाः ।
या वा रा लास्तथा स्युर्गजतुरगहरिस्यन्दने शूकरे च
मारीची नीलदण्डोऽचल इति भृकुटी शृङ्खलानन्तवीर्यः ॥८०॥

लं स्तम्भकः । [10]याः अतिवीर्या । एवं यथासंख्यं भवति । [11]य व र लं । नील-
दण्डः, अचलः, टक्किः, महाबलः । तनुवशाद् देवतीनां च दीर्घाः । [12]या गजरथे वज्र-　　25

---

१. ख. छ. औ, च. शः । २. क. ख. छ. णि. । ३. ग. च. कम्भीः । ४. भो. खगर्भो । ५. क. ख. उष्णीषं । ६. क. ख. ग. च. बल । ७. क. ह्रम्भीरं । ८. क. यम्बकः, च. जम्बुकः । ९. क. मामकी । १०. ग. या । ११. क. ख. ग. च. छ. य र व ल । १२. छ. या च जयरथे ।

शृङ्खला। वा तुरगस्यन्दने चुन्दा। रा हरिस्यन्दने भृकुटी। ला शूकरस्यन्दने मारीची। एवं [1]मारीची नीलदण्डो युग्मं कायभावौ परस्परम्। अचलो भृकुटी। वज्रशृङ्खला अतिबलः ॥ ८० ॥

टक्किरश्चुन्दा च युग्मं भवति नरपते मण्डले सत्सुखार्थ-
माकारावंविसर्गौ हमपि ह इति ह हाकारजाः शक्तयोऽष्टौ।
कुम्भेवेष्वं हकारो मरुदनलजलक्ष्मास्वरैर्भेदितः स्याद्
ॐ हूं होर् आश्च शङ्खस्त्वमलगुणमणिश्चाङ्घ्रिपो धर्मगण्डो ॥८१॥
[275a]

टक्किरश्चुन्दा च युग्मं मण्डले सत्सुखार्थमिति परकुलालिङ्गनेन। एवं शक्ति-बीजानि। शक्तयो धूमादयो निमित्तदैवत्यः। तत्राकारावंविसर्गौ इति। अ आ अं अः। यथाक्रमं कृष्णदीप्ता पीतदीप्ता [2]श्वेतदीप्ता रक्तदीप्ता। एवं हमपि ह[3] इति ह हा। हं खद्योता[4]। हः मरीचिः। ह धूमा। हा प्रदीपा। एवमष्टाक्षरजाः शक्तयोऽष्टौ। कुम्भेष्वेवं हकारो मरुदनलजलक्ष्मास्वरैर्भेदितः स्यादिति। पूर्वघटयोः हि ही, दक्षिणघटयोः हृ हॄ, उत्तरघटयोः हु हू, पश्चिमघटयोः [5]ह्ल ह्ॣ। इति वाय्वादिभेदः। [6]तथा ओङ्कारो धर्मशङ्खः, हूँ चिन्तामणिः, [7]होः कल्पवृक्षः, आः धर्मगण्डोति चित्तमण्डले देवताबीजाक्षराणि ॥ ८१ ॥

इदानीं वाङ्मण्डले चर्चिकादीनां बीजाक्षराण्युच्यन्ते—

चामुण्डा वै हकारो हमपि ह इति चापीश्वरी शूकरी च
हा क्ष क्षा क्षँ क्ष ऐन्द्री खगपतिगमना ब्रह्मिका श्रीः कुमारी।
ही हॄ हू ह्ॣ च पृष्ठे वरकमलदले ह्रस्वमात्राग्रतश्च
क्षी क्षॄ क्षू क्ष्ॣ तथैव प्रकटितनियता ह्रस्वमात्राश्च तद्वत् ॥८२॥

चामुण्डा वै हकारः। हं माहेश्वरी। हः वाराही। हा ऐन्द्री। क्ष वैष्णवी। क्षा ब्रह्माणी। क्षं महालक्ष्मीः। क्षः कौमारीति नायिकानां बीजानि। [8]तथा यत्र देवीनां यथाक्रममष्टसु दिक्षु पूर्वादिषु कमलपृष्ठदलेषु। ही हॄ हू ह्ॣ। क्षी क्षॄ क्षू क्ष्ॣ। ह्रस्वमात्राग्रतश्चेति अष्टदलेषु हि हृ हु ह्ल क्षि क्षृ क्षु क्ष्ल इति ॥ ८२ ॥

पूर्वे सव्येऽवसव्ये वरुणहविदनावीशवाय्वोश्च पद्मे
याद्याः षण्मात्रभिन्नाः क्रमपरिरचिताः षड्दले ह्रस्वदीर्घाः।

---

१. क. ख. मारीचि, च. मारेची। २. क. छ. 'श्वेतदीप्ता' नास्ति। ३. ग. हमिति, भो. हः इति। ४. क. ख. ग. च. छ. खद्योतः। ५. क. ख. ग. च. ॡ। ६. छ. 'तथा ओङ्कारो बीजाक्षराणि' नास्ति। ७. भो. ह। ८. छ. यथा। ९. क. ॡ।

हिक्ष्याद्यालोऽन्तसर्वा वसुफणिगुणिता देवतीनां दलेषु
चामुण्डादेरुपायो भवति कुलवशात् संमुखो मन्त्रभेदैः ॥८३॥
[275b]

पूर्वपद्मदलयोः। दक्षिणयोः। उत्तरयोः। पश्चिमयोः। आग्नेययोः। नैर्ऋत्ययोः। **ईशानयोः।** **वायव्ययोः।** शेषेषु षड्दलेषु **याद्याः षण्मात्रभिन्नाः क्रमपरिरचिताः षड्दलेषु ह्रस्वदीर्घा**[1] दिक्षु विदिक्षु पद्मदलेषु। तत्र चामुण्डा पद्मदले पूर्वे हिकारः पूर्वन्यस्तः। ततो दक्षिणावर्तेन द्वितीयपत्रे [2]य, तृतीये यि[3], चतुर्थे [4]यृ, पञ्चमे पूर्वन्यस्तो ह्री, षष्ठे यु, सप्तमे य्लृ, अष्टमे [5]यं, एवं वैष्णव्याः क्षि या यी [6]यॄ क्षी यू य्लॄ यः। एवं वाराह्याः पूर्वदले हृ, ततो र रि रृ [7] हॄ ॠ रु [8]र्लृ रं। कौमार्याः क्षृ रा री रॄ क्षॄ रू र्लॄ रः। रौद्रयाः हु व वि वृ हू वु व्लृ वं। तथा महालक्ष्म्याः क्षु वा वी वॄ क्षू[10] वू व्लॄ वः। ऐन्द्रयाः [11]हॢ ल लि लृ [12]हॣ [13]ल्लृ लं। ब्रह्माण्याः क्ष्लृ ला ली लॄ [14]क्ष्लॄ लू [15]ल्लॄ लः। एवं **हि**[16]**क्ष्याद्यालोऽन्तसर्वा वसुफणिगुणिता** अष्टावष्टभिर्गुणिता **देवतीनां दलेषु** भौमादीनां यथानु[17]क्रमेणेति नियमः। दिक्षु [18]ह्यादिक्ष्याद्याः पद्मादीनां विदिक्षु। इह **चामुण्डादेरुपायो भवति कुलवशात् संमुखो मन्त्रभेदैरिति।** अत्र चामुण्डा, वैष्णवी संस्कारकुलिनी। तस्या अभिमुखो रूपकुली उपायो मन्त्रभेदैः ऌकार[19]कुली। वाराही, कौमारी वेदनाकुलिनी। तस्याः संमुखः संज्ञाकुली उपाय उकारजन्मा। ऐन्द्री, ब्रह्माणी रूपकुलिनी। तस्याः संमुखः संस्कारकुली उपाय इकारजन्मा। रौद्री, महालक्ष्मीः संज्ञाकुलिनी। तस्याः संमुखो वेदनाकुली उपाय ऋकारजन्मा। एवं चतुःकुलव्यवस्था वाङ्मण्डले ॥ ८३ ॥

इदानीं कायमण्डले शक्रादीनां बीजान्युच्यन्ते—

तं नः शक्रोऽब्धिवक्त्रः पमिति म इति वै सागरः श्रीगणेन्द्रः
टं णो वह्निः कुमारो चमिति ञ इति वै राक्षसेन्द्रश्च वायुः।
कं ङो विष्णुश्च कालो हर इति धनदो वै समत्र ≍क एव
चाद्या वर्गाः समात्राः सुरकमलदले देवतीनां भवन्ति ॥८४॥

तं शक्रः। नः ब्रह्मा। पं समुद्रः। मः गणेन्द्रः। टं वह्निः। णः कुमारः। चं राक्षसेन्द्रः। ञः वायुः। कं विष्णुः। ङः यमः। [276a] **सं हरः**[20]**। ≍कः यक्षः।**

१. ग. दिषु, च. दिदिक्षु। २. छ 'य' नास्ति। ३. छ पि। ४. छ. पू। ५. क. ख. य। ६. क. य्लृ। ७. क. ख. हृवृ। ८. ग. च. र्लॄ। ९. भो हु। १०. क. 'क्षू' नास्ति। ११. क. ख. छ. लृ। १२. क. ख. छ. लॄ। १३. ग. लृ, भो. ल्लॄ। १४. क. ख. छ. क्ष्लृ। १५. क. ख ल्लृ। १६. क. ख. ग. च. क्ष्माद्या। १७. च. 'नु' नास्ति। १८. क. ख. ग. च. छ. 'ह्यादि' नास्ति। १९. ख. कुलो, ग. कुलत्वेना, च. कुलत्वे। २०. भो. Drag Po(रौद्रः)।

एवं चादीनां षड्वर्गाणां ह्रस्वदीर्घभेदैरमावास्याबीजं चैत्रादीनामिति चं ञः इत्यादिना ग्राह्यं चैत्रामावासीवैशाख्यामावासीतः । एवं **चाद्या वर्गाः समात्राः सुरकमलदले देवतीनां भवन्ति** ॥ ८४ ॥

चैत्रादीनां तिथीनामृतुनियमवशाच्छून्यषड्वह्निसंख्या
5 तत्त्वारूढो हकारो मरुदनलजलक्ष्मासु पूर्वाद्यहीनाम् ।
कूटस्थाः सप्तवर्गाः क्षयरवलयुताश्चासुरीणां श्मशाने
प्रज्ञोपायाङ्गभावैर्भवति कुलवशात् संमुखो योऽत्र मध्ये ॥८५॥

चैत्रादीनां तिथीनाम् ऋतुनियमवशात् शून्यषड्वह्निसंख्या षष्ट्युत्तरत्रिशतसंख्या वर्षतिथयः। अत्र चैत्रदेव्यः प्रथमपरिमण्डले चतुर्दशदलेषु। तत्र प्रथमदले ञवज्रा,
10 द्वितीय[1]दले ञिवज्रा, एवं ञृवज्रा, ञुवज्रा, ञ्लृवज्रा, ञंवज्रा। एवं झवज्रा, झिवज्रा, झृवज्रा, झुवज्रा, झ्लृवज्रा, झंवज्रा। जवज्रा, जिवज्रेति [2]चतुर्दशदेव्यो नैर्ऋत्यस्य कमलदलेषु । जृवज्रा संमुखस्य प्रज्ञा, पूर्णिमाधर्मित्वादिति। एवं द्वितीयपरिमण्डले कृष्णप्रतिपदादयः प्रथमे[3] दले जुवज्रा, एवं [4]ज्लृवज्रा, जंवज्रा, छवज्रा, छिवज्रा, छृवज्रा, छुवज्रा, छ्लृवज्रा, छंवज्रा। चवज्रा, चिवज्रा, चृवज्रा, चुवज्रा, च्लृवज्रा,
15 चंवज्रेति अमावासीबीजम् । अत्र च सृष्टि[5]क्रमतः। ञ इति विलोमतः सृष्टिक्रमेण। वायव्ये दले चावज्रा। एवं वज्रान्ताः सर्वे मन्त्राः। चा ची चॄ चू च्लॄ चः। छा छी छॄ छू छ्लॄ छः। जा जी जॄ इति पूर्णापदं पूर्ववत्। द्वितीयपरिमण्डले कृष्णप्रतिपदादि जू ज्लॄ जः। झा झी झॄ झू झ्लॄ झः। ञा ञी ञॄ ञू ञ्लॄ ञः इति। अमावासीबीजं कर्णिकायां वायोः, एवं टवर्गः ज्येष्ठाषाढयोः, पवर्गः श्रावणभाद्रयोः, तवर्गः
20 आश्विनकार्तिकयोः, सवर्गः मार्गशीर्षपुष्ययोः, कवर्गः माघफाल्गुनयोः। एवं वर्षतिथिदेवताबीजनियमः।

इदानीं [6]नागबीजान्युच्यन्ते—**तत्त्वारूढो हकार** इत्यादिना। इह तत्त्वानि [7]यरवलानि, तान्यारूढस्तत्त्वारूढः। ह्य ह्या कर्कोटकपद्मयोर्वा[276b]युमण्डले, ह्ल ह्ला तक्षकस्य महापद्मस्य यथासंख्यं पृथिवीमण्डले, ह्र ह्रा वासुकिशङ्खपालयोर्वह्निमण्डले,
25 ह्व ह्वा अनन्तकुलिकयोर्वारिमण्डले, एवं **मरुदनलजलक्ष्मासु** मण्डलेषु **पूर्वाद्यहीनामिति**।

इदानीं श्वानास्यादीनां बीजान्युच्यन्ते—कूट इति। कूटं पञ्चाक्षरात्मकं प्रत्येकाक्षरैः। ते च **कूटस्थाः सप्तवर्गाः क्षयरवलयुताश्चाष्टौ** इत्या**सुरीणाम्**। **श्मशानाष्टके**। तत्र दिक्श्मशाने पूर्वे क् ख् ग् घ् ङ, दक्षिणे ह् य् र् व् ल, पश्चिमे क् श् ष् प् स, उत्तरे ह् य् र् व् ल, कोणे अग्नेय्यां ञ् झ् ज् छ् च, नैर्ऋत्ये ण् ढ्

---

१. च. द्वितीये। २. ग. 'चतुर्दशदेव्यो' नास्ति। ३. ग. च. प्रथम। ४. क. ख. ग. च. जू। ५. म. क्रमरतः। ६. ग. च. छ. भो. नागराजबीजा। ७. छ. भो. लरव, यरलवानि।

ङ् ठ् ट, वायव्ये न् ध् द् थ् त, ईशाने म् भ् ब् फ् प इति। एवं सर्वत्र **प्रज्ञोपाया- ङ्गभावैर्भवति कुलवशात् संमुखो योऽत्र** मध्ये नायकोपनायकभेदेनावगन्तव्यो योगिनेति तन्त्रनियमः। ८५ ॥

श्रीवज्री विश्वभद्रो भवति कुलवशाद् वज्रधृग् वज्रपाणि-
र्वैगर्भोऽमोघसिद्धिर्विमलमणिकरो भूमिगर्भश्च सम्यक्। 5
विष्कम्भी वज्रपाणिर्भवति कुलवशाल्लोकनाथोऽमिताभः
श्रीमाता धर्मधातुस्त्वपि वरकुलिशा वज्रधात्वीश्वरी च ॥८६॥

श्रीतारा स्पर्शवज्रा खलु रसकुलिशा पाण्डरा जातिभेदाद्
रूपाख्या मामकी वै भवति कुलवशाल्लोचना गन्धवज्रा।
क्रोधेन्द्रो वज्रवेगो भवति जिनपतिर्विश्वभद्रः स एव 10
उष्णीषोऽक्षोभ्य एवात्र पुनरतिबलोऽमोघसिद्धिः प्रसिद्धः ॥८७॥

जम्भो वै रत्नपाणिर्भवति कुलवशान्मानकश्चामिताभः
स्तम्भो वैरोचनश्च प्रभवति बलवान् वज्रपाणिश्च सुम्भः।
वैगर्भो नीलदण्डः प्रकृतिगुणवशाद् भूमिगर्भश्च टक्कि-
र्विष्कम्भी चातिवीर्यो भवति कुलवशाल्लोकनाथोऽचलश्च ॥८८॥ 15

माता क्रोधेन्द्रमुद्रा भवति कुलवशाद् धर्मधातुस्तथैव
शून्याख्या चातिनीला मरुदनलजलक्ष्मादयोऽनन्तवीर्या।
जम्भी मानी क्रमेण प्रकटितनियता स्तम्भकी च प्रसिद्धा
रौद्राक्षी शब्दवज्रा भवति कुलवशाच्छृङ्खला स्पर्शवज्रा ॥८९॥
[277a] 20

मारीची गन्धवज्रा प्रभवति भृकुटी चैव चुन्दा प्रसिद्धा
ज्ञातव्या जातिभेदात् खलु रसकुलिशा रूपवज्रा नरेन्द्र।
स्तम्भः कालान्तकोऽत्रैव पुनरतिबलो विघ्नशत्रुः प्रसिद्धो
जम्भः प्रज्ञान्तको वै प्रभवति च तथा मानकः पद्मशत्रुः ॥९०॥

चामुण्डा शूकरीशा मरुदनलजलक्ष्मास्तथैन्द्री चतुर्थी 25
गन्धो रूपं रसः स्पर्श इति चलहरे दैत्यवह्नौ स्थिताश्च।
ब्रह्मा वैरोचनो वै भवति कुलवशात् सागरश्चामिताभो
वह्निः श्रीरत्नपाणिर्भवति हि पवनोऽमोघसिद्धिस्तथैव ॥९१॥

अक्षोभ्यो दैत्यशत्रुर्भवति जिनपतिः शङ्करश्च प्रसिद्धो
विष्कम्भी यः स शक्रो भवति गणपतिर्लोकनाथस्तथैव ।
भूगर्भः षण्मुखः स्याद् भवति दनुपतिः श्रीखगर्भः प्रसिद्धः
कालः श्रीवज्रपाणिर्भवति दनुपतिर्विश्वभद्रश्च षष्ठः ॥९२॥

5 षड् विद्याः षट् च वज्राः प्रकृतिगुणवशात् स्वस्वमुद्राश्च तेषां
मुद्रा विद्यादयोऽर्काः सुरवरपतयः श्वेतकृष्णाश्च पूर्णाः ।
तेषां याः पद्मपत्रे वसुकरतिथयो माघमासादयस्ताः
षण्मासे पूर्वषट्कं भवति कुलवशाच्चापरं देवतीनाम् ॥९३॥

ये नागाष्टौ घटास्ते विभुकमलदले शक्तयस्ताः प्रचण्डाः
10 श्रीधूमा काकवक्त्रा भवति कुलवशाद् गृध्रवक्त्रा मरीचिः ।
खद्योतोलूकवक्त्रा खगपतिवदना श्रीप्रदीपा प्रसिद्धा
श्वानास्या कृष्णदीप्ता सुविकृतवदना शूकरास्यातिदीप्ता ॥९४॥

व्याघ्रास्या श्वेतदीप्ता भवति कुलवशाज्जम्बुकी पीतदीप्ता
एवं लास्यादिसर्वाः प्रकटदशविधा विश्वमातावशेषाः ।

15 इदानीं जन्यजनकादिसम्बन्धः "श्रीवज्री विश्वभद्रः" (४.८६) इत्यादिसार्धनव-
वृत्तानि "विश्वमातावशेषाः" (४.९५) इति पर्यन्तं कुलकुलीनयोः सम्बन्धः ॥ ८६-९४½ ॥

इदानीं [1]चतुःकायपरिशुद्धिरुच्यते —
दिव्या बुद्धाश्च विद्याः सतरुसकलशाः शुद्धकायो जिनस्य
क्रोधेन्द्रा बोधिसत्त्वाः खलु रसकुलिशा धर्मकायः स एव ॥९५॥
20 [277b]

दिव्या इत्यादि । इह यथा जरायुजस्य बालस्याध्यात्मपटले गर्भे बाह्ये चतुर्विधा-
वस्थाभेदेन चतुर्विधः काय उक्तः, तथा देवताभावनायां विशोधनीयो योगिनेति । [2]तत्र
दिव्या[3] धूमा मरीचिः खद्योता प्रदीपा पीतदीप्ता श्वेतदीप्ता कृष्णदीप्ता । [4]शशिकला
बिन्दुरूपिणीति महासुखकमलदले[5] सुखचक्रे । द्वितीयपुटे **बुद्धाश्च विद्या** इति । अत्र
T 350 25 बुद्धा अमोघसिद्धि-रत्नसंभव-अमिताभ-वैरोचनाः । विद्यास्तारा-पाण्डरा-मामकी-लोचना

१. च. विशुद्धिरु, भो. rNam Pa Dag Pas Dag Pa (विशुद्धेः शुद्धिरु) । २. च. अत्र । ३. भो. Lha Mo Ni (देव्यः) । ४. भो. 'शशि' नास्ति । ५. च. भो. दलेषु महा ।

इति। **सतरुसकलशा** इति। तरुः कल्पवृक्ष [1]इति। एवं चिन्तामणिः, धर्मगण्डी, धर्मशङ्खः। कलशा रजःशुक्रयोः कायवाक्चित्तज्ञानबिन्दुभेदेन विण्मूत्ररक्तमज्जाघटा [2]अष्टाविति। **शुद्धकायो जिनस्य** मण्डलाधिपतेः। ततो बाह्यपुटे चित्तमण्डलद्वारेषु **क्रोधेन्द्रा** विघ्नान्तकः, प्रज्ञान्तकः, पद्मान्तकः, यमान्तकः, उष्णीषः। **बोधिसत्त्वा** वज्रपाणिः, खगर्भः, क्षितिगर्भः, लोकेश्वरः, विष्कम्भी, समन्तभद्रः। **खलु रसकुलिशा** इति। शब्दवज्रा, स्पर्शवज्रा, रूपवज्रा, रसवज्रा, गन्धवज्रा, धर्मधातुवज्रा। एता **धर्मकायः स एव** ॥ ९५ ॥

योगिन्यो भोगकायः प्रवररथगताः सूर्यदेवाः प्रसिद्धा
अष्टौ नागाः प्रचण्डाः परिजनसहिता बुद्धनिर्माणकायः।
एवं भूयो द्विभेदो भवति जिनतनुर्बाह्यतोऽभ्यन्तरे च
गर्भोत्पत्तिर्यथैव प्रभवति नियता मण्डले तद्वदेव ॥९६॥

ततो वाङ्मण्डले **योगिन्यो भोगकाय**श्चर्चिकाद्या दलदेवीभिः सार्धमिति। ततः कायमण्डले **प्रवररथगता** [3]मारीच्यादयः **सूर्यदेवाः प्रसिद्धाः**। नैर्ऋत्यादयो [278a] द्वादश। **अष्टौ नागाः** कर्कोटकादयः। **प्रचण्डाः** श्वानास्यादयः। एते देवादयः **परिजनसहिताः**। पद्मदले देवताभिः सह **बुद्धनिर्माणकायः**। **एवं भूयो द्विभेदो भवति जिनतनुर्बाह्यतोऽभ्यन्तरे च**। **गर्भोत्पत्तिर्यथैव प्रभवति नियता मण्डले तद्वदेवेति** ॥ ९६ ॥

शास्ता दिव्यादिकुम्भाः सहजजिनतनुर्मण्डले गर्भमध्ये
बुद्धाद्या धर्मकायः खलु रसकुलिशाद्याश्च संभोगकायः।
क्रोधा निर्माणकायो भवति कुलवशान्मण्डले गर्भसंस्था-
श्चामुण्डाद्यष्टदेव्यः परिजनसहिताः शुद्धकायो हि बाह्ये ॥९७॥

इह गर्भे यथा बालस्य विज्ञानं ज्ञानं शुक्ररजोगर्भे शुद्धकायः, तथा **शास्ता** भगवान्। **दिव्या** [4]धूमादयः, **आदि**शब्देन धर्मशङ्खादयोऽष्ट**कुम्भा** एते **मण्डलगर्भे सहज**काय इति। ततो यथा बालस्य स्कन्धधातूद्भवो धर्मकायस्तथा मण्डले **बुद्धाद्या** इति। ततो यथा बालस्यायतनोद्भवः **संभोगकाय**स्तथा मण्डलेऽपि। **खलु** शब्दवज्रादय इति। ततो यथा बालस्य हस्तपादादिकेशादिसंभवः प्रसवनसमयश्च **निर्माणकायः**, तथा यमान्तकादयश्चतुः**क्रोधा** इति **कुलवशान्मण्डले गर्भ**[5]**संस्था** इति चित्तमण्डले चित्तकुलवशादिति गर्भे चतुर्धा नियमः। इदानीं बाह्ये चतुर्धा उच्यते—चामुण्डेत्यादि। इह यथोत्पन्नस्य बालस्य [6]नाभिचक्रात् प्राणनिर्गमः सहजकायस्तथा बाह्ये वाङ्मण्डले **चामुण्डाद्यष्टदेव्यः परिजनसहिता**श्चतुःषष्टि-[7]योगिनीभिः सहिता इति ॥ ९७ ॥

१. च. 'इति' नास्ति। २. ग. अष्टाविंशतीति। ३. ग. च. मारे। ४. क. ख. ग. च. धूपा। ५. ग. संस्थाने। ६. भो. lTe Ba Nas (नाभितः)। ७. भो. Lha Mo (देवीभिः)।

देवाद्या धर्मकायः सकलफणिकुलं चात्र संभोगकाय-
श्चण्डा निर्माणकायो भवति नरपते सर्वसत्त्वार्थहेतोः ।
युग्मं स्यात् कायवज्रं सहजजिनतनुर्बिम्बनिष्पत्तिहेतो-
र्वाग्वज्रं धर्मकायो भवति च युगलं धर्मतादेशनार्थम् ॥९८॥
5 [278b]

इह यथा बालस्य हस्तपादादिसंकुचनमस्फुटवचनं धर्मकायस्तथा **देवा** द्वादश। **आदिशब्देन** रथस्थाः षड् देव्य इति। इह यथा बालस्य दन्तोत्थाने स्फुटवचने सति [1]**संभोगकायस्तथा** मण्डले **सकलफणिकुलमिति**। इह यथा बालस्य दन्तपातात् पुनरुत्थानादामरणावधौ निर्माणकायस्तथा मण्डले **चण्डा** श्वानास्यादयः परिजन-
10 सहिताः सार्धत्रिकोटिभूतैः सहिता **निर्माणकायो भवति, नरपते सर्वसत्त्वार्थहेतो**रिति [2]बाह्ये चतुःकायविशुद्धिनियमः। इदानीं चतुःकायचतुर्वज्राणां परस्परं योग उच्यते— **युग्ममित्यादि**। इह बालस्य **बिम्बनिष्पत्तिहेतोः** सहजकायश्चतुर्भूतात्मकं **कायवज्रं** युग्मं स्याद् यथा, तथा मण्डलेऽपि ॥ ९८ ॥

चित्तं संभोगकायो युगलमपि भवेत् सर्वसत्त्वार्थकर्ता
15 ज्ञानं निर्माणकायो भवति हि युगलं प्राणिनां मोक्षदं वै ।
प्रज्ञोपायाङ्गभावैः समविषमकुलैर्योगिना वेदितव्यं
चन्द्रादित्यादिकाद्यैस्त्रिविधभवगतैर्ज्ञानविज्ञानभेदैः ॥९९॥

एवं वाग्वज्रं धर्मकायो बालस्य **युगलमपि** जल्पनार्थं यथा तथा धर्मदेशनार्थं मण्डलेऽपि। [3]इह बालस्य बोधि**चित्तं संभोगकायः सर्वसत्त्वार्थ**[4]**कर्ता युगलम्,** [5]तथा
20 मण्डलेऽपि। इह यथा बालस्य च्यवनकाले **ज्ञान**मिति सुखं **निर्माणकाय** इति परिपूर्ण-धातुत्वं षोडशवर्षावधे**र्भवति हि युगलं प्राणिनां मोक्षदं वै**। मोक्षोऽत्र बोधिचित्तबिन्दूनां च्युतिक्षणः। तद् ददातीति मोक्षदं युगलं ज्ञानं निर्माणकायलक्षणं प्राणिनाम्। तथा [6]तद्वैधर्म्येण [7]मण्डले मोक्षदं द्वादशाङ्गहेतुफल[8]निरोधत इति बुद्धनियमः। पुनरेषां चतुःकायचतुर्वज्राणां **प्रज्ञोपायाङ्गभावैः समविषमकुलै**रिति। समकुलै रजउद्भवधातु-
25 कुलैः, विषमकुलैः शुक्रोद्भूतधातुकुलैः। **चन्द्रादित्यादिकाद्यैस्त्रिविधभवगतैर्ज्ञानभेदै**-रानन्दाद्यै**र्विज्ञानभेदै**र्द्वादशायतनभेदै**र्यो**[279a]**गिना वेदितव्यं** समस्तं यथा बालस्याध्यात्मपटले तथा देवतासाधने उत्पत्तिक्रम इति। एवं देवताबिम्बनिष्पत्तिः ॥ ९९ ॥

---

१. क. ख. ग. छ. भोग। २. ख. ग. बाह्य। ३. च. इह च। ४. ग. 'कर्ता' नास्ति। ५. क. ख. छ. 'तथा' नास्ति ६. च. भो 'तद्' नास्ति। ७. भो. 'मण्डले' नास्ति। ८. ग. च. निरोध।

इदानीं कायवाक्चित्ताधिष्ठानमुच्यते—

वज्रैः स्वाहानुयुक्तैः शिरसि गलहृदोर्नाभिगुह्ये च मूर्ध्नि
एतैश्चाधिष्ठिताङ्गं परमजिनपतिं स्नापयेद् देवतीभिः।
शून्ये वै धर्मधातौ त्रिकुलिशसमये ज्ञानपूजानुरागे
वक्तव्यं साधकेन त्रिशरणगमनात् तत्स्वभावात्मकोऽहम् ॥१००॥　　5

वज्रैरित्यादि। [1]यथोत्पन्नस्य बालस्य कायवाक्चित्ताधिष्ठानं जाग्रत्स्वप्नसुषुप्त-लक्षणं भवति, ललाटे कण्ठे हृदये नाभौ गुह्ये उष्णीषे ॐ आः [2]हूं हो स्वा हा। **एतैश्चाधिष्ठिताङ्गं** बालं यथा स्नापयन्ति मातरः, तथा **परमजिनपतिं स्नापयेद् देवतीभि**र्योगिनीभिः। अत्राधिष्ठाने ललाटे अकारपरिणतं चन्द्रमण्डलम्, तदुपरि ओङ्कार-परिणतमष्टारचक्रम्, तत्परिणतं कायवज्रं शुक्लवर्णं त्रिमुखं मूलं शुक्लं वामं रक्तं दक्षिणं　　10
कृष्णं षड्भुजं दक्षिणे चक्रवज्रपद्मधरं वामे खड्गघण्टामणिधरं, सप्रज्ञं निष्पाद्य ततो ललाटान्निश्चार्य तेनाकाशधातुं समन्तात् परिपूर्णं विभाव्य कायवज्रवैनेयानां सत्त्वानां धर्मदेशनां कृत्वा पुनरागत्यात्मनः पुरतः संस्थाप्याभिषेकमनुनाथयेत्। अभिषिञ्चन्तु मां कायवज्रधरा इति। ततोऽमृतकलशैः कायकुलदेव्योऽभिषिञ्चयन्ति[3]। ततोऽभिषेके सति अधिष्ठानं कारयेत्, [4]स्वललाटे चन्द्रमण्डले कायवज्रं प्रवेश्येदमुदीरयेत्—　　15

कायवज्रधरः श्रीमान् त्रिवज्राभेद्यभावितः।
अधिष्ठानपदं मेऽद्य करोतु कायवज्रिणः॥
दशदिक्संस्थिता बुद्धास्त्रिवज्राभेद्यभाविताः।
अधिष्ठानपदं मेऽद्य कुर्वन्तु कायवज्रिणः॥

इति कायाधिष्ठानम्। [279b]　　20

एवं कण्ठे रेफपरिणतं सूर्यमण्डलम्, तदुपरि आःकारपरिणतं रक्तपद्ममष्टदलं तत्परिणतं वाग्वज्रं सप्रज्ञं रक्तं रक्तसितकृष्णवदनं, दक्षिणे पद्मवज्रचक्रधरं, वामे　　T 351
मणिघण्टाखड्गधरं निश्चार्याकाशधातुं तेन परिपूर्णं विभाव्य वाग्वज्रवैनेयानां सत्त्वानां धर्मदेशनां कृत्वा पुनरात्मनोऽग्रतः संस्थाप्याऽभिषेकमनुनाथयेत्– अभिषिञ्चन्तु मां वाग्वज्रिणः। ततो वाक्कुल[5]देवीभिरमृतघटैरभि[6]षिञ्च्यमानमात्मानं विभाव्य ततो　　25
वागधिष्ठानं कुर्यात्, वाग्वज्रं सूर्यमण्डले विनिवेश्य इदमुदीरयेत्—

वाग्वज्रधरः श्रीमान् त्रिवज्राभेद्यभावितः।
अधिष्ठानपदं मेऽद्य करोतु वाग्वज्रिणः॥
दशदिक्संस्थिता बुद्धास्त्रिवज्राभेद्यभाविताः।
अधिष्ठानपदं मेऽद्य कुर्वन्तु वाग्वज्रिणः॥　　30

---

१. ख. ग. च. भो. इह यथो। २. भो. हुं। ३. भो. अतः परं bsGom Par Byaḥo (विभाव्य) इत्यधिकम्। ४. ख. ग. च. भो. छ. 'स्व' नास्ति। ५. च. देवती। ६. च. षिच्य।

इति वागधिष्ठानम् ।

चित्ताधिष्ठाने हृदये राहुमण्डलं नीलवर्णं विभाव्य बिन्दुपरिणतं तदुपरि हूँकार-परिणतं वज्रं पञ्चशूकं तत्परिणतं चित्तवज्रं सप्रज्ञं कृष्णं कृष्ण[1]सितरक्तवदनं, दक्षिणे वज्रचक्रपद्मधरं, वामे घण्टा[2]मणिखड्गधरं निश्चार्याकाशधातुं तेन परिपूर्णं विभाव्य चित्तवज्रवैनेयानां [3]सत्त्वानां धर्मदेशनां कृत्वा पुनरात्मनोऽग्रतः संस्थाप्याभिषेक-मनुनाथयेत् । अभिषिञ्चन्तु मां सर्वे चित्तवज्रिण [4]इति । ततश्चित्तवज्रकुलदेवीभिरभि-[5]षिञ्च्यमानमात्मानं विभाव्याधिष्ठानं कारयेत्, चित्तवज्रं राहुमण्डले निवेश्य इदमुदीरयेत्—

चित्तवज्रधरः श्रीमान् त्रिवज्राभेद्यभावितः ।
अधिष्ठानपदं मेऽद्य करोतु चित्तवज्रिणः ॥
दशदिक्संस्थिता बुद्धास्त्रिवज्राभेद्यभाविताः ।
अधिष्ठानपदं मेऽद्य कुर्वन्तु चित्तवज्रिणः ॥ इति ।

एवं चित्ताधिष्ठानं कृत्वा [6]तत एकत्वेन ॐ सर्वतथागतकायवाक्चित्तस्वभावा-त्मकोऽहमित्यहङ्कारमुद्वहेद् योगीति नियमः । एवं प्रज्ञाया नाभौ होकारेण, गुह्ये स्वाकारेण, उष्णीषस्थाने हाकारेण, त्रिकुल उपायः शुक्रधर्मतः । षट् कुला प्रज्ञारजः-शुक्रधर्मत इति । अपरमनुनाथन[7]मभिषेक[280a]पटलोक्तविधिना कर्तव्यम् । तत्रैव यदनुक्तं तदनेन विधिना सर्वं कर्तव्यमिति नियमः ।

इदानीं शून्याद्यहङ्कारस्थानान्युच्यन्ते—शून्य इत्यादिना । इह यथा सर्वसत्त्वानां मरणान्ते मारणान्तिकस्कन्धाः शून्या भवन्ति, तथा योगिनां[8] मनुष्यस्कन्धाहङ्कार-[9]स्थानान्युच्यन्ते, परित्यागार्थं देवतास्कन्धनिष्पादनार्थम् । ॐ शून्यताज्ञानवज्र-स्वभावात्मकोऽहमिति नियमः । [10]इदानीं यथोपपत्त्यं[11]शिकपञ्चस्कन्धैर्गर्भबालस्य काय-निष्पत्तिः, तथा मण्डल आदर्शादिपञ्चा[12]कारैर्देवतायाः कायनिष्पत्तिः । तत्राहङ्कारः ॐ [13]विशुद्धधर्मधातुस्वभावात्मकोऽहमिति नियमः । एवं **शून्ये वै धर्मधातुकाले** [14]**त्रिकुलिश-समये** । एवं वक्ष्यमाणे **ज्ञानपूजानुरागे** । इह यथा बालस्य कर्णवेधादिकम्, विवाहे पाणिग्रहणम्, षोडशवर्षाविधेर्ज्ञानपूजानुरागणम्, एवं तत्र काले तत्स्वभावात्मकोऽहमिति **वक्तव्यम**त्रोत्पत्तिक्रमे [इति] भगवतो नियमः ॥ १०० ॥

इदानीं देवताविशुद्ध्या सर्वचक्रनाडिका उच्यन्ते—

कुम्भैर्धूमादिभिश्च प्रभवति हृदये चाष्टभिर्धर्मचक्रं
विद्याभिश्चैव बुद्धैः शिरसि च सहजं षोडशारं प्रसिद्धम् ।

---

१. ग. च. छ. भो. रक्तसित । २. भो. खड्गमणि । ३. ग. च. 'सत्त्वानां' नास्ति । ४. च 'इति' नास्ति । ५. च. षिच्य । ६. च. तत्र । ७. ग. नाभिषेक । ८. ख. नामनुस्कन्धा । ९. ग. च. छ. भो. 'स्थानान्युच्यन्ते' नास्ति । १०. च. भो. इह । ११. ग. च. छ. त्यङ्गिक । १२. ग. क्षरै । १३. भो. सुविशुद्ध । १४. ग. कुलसमये ।

कण्ठे संभोगचक्रं द्विगुणनृपतिभिर्बोधिसत्त्वादिभिः स्या-
न्नाभौ निर्माणचक्रं वसुफणिगुणिताभिश्च भीमादिभिश्च ॥१०१॥

कुम्भैरित्यादि । इह **कुम्भैरष्टभिर्धूमादिभिः** [1]सार्धमष्टारं[2] हृच्चक्रं शुद्धं तदेव **धर्मचक्रम् ।** **विद्याभि**र्लोचनादिभिश्चतसृभि**र्बुद्धै**र्वैरोचनादिभिश्चतुर्भिरेभिरष्टभिः कायभावभेदेन षोडशैः **शिरसि षोडशारं** चक्रं शुद्धं तदेव **सहजं सिद्धमिति, अनुक्त**त्वात् । धर्मशङ्खचिन्तामणिधर्मगण्डीकल्पवृक्षैश्चतुर्भिरुष्णीषचक्रं शुद्धम् । **कण्ठे संभोगचक्रं** द्वात्रिंशदरं [3]**द्विगुणनृपतिभि**र्द्वात्रिंशद्भि**र्बोधिसत्त्वाद्यै**रिति । द्वादशायतनैश्चतुःक्रोधैः षोडशभिः प्रज्ञोपायभेदेन द्वात्रिंशद्भिः शुद्धम् । **नाभौ निर्माणचक्रं** चतुःषष्ट्यरं **वसुफणिगुणितै**श्चतुःषष्टिभि[280b]**र्भीमादिभिः** शुद्धमिति । तथा चामुण्डाद्यष्टभिः, [4]लास्याद्यष्टभिश्च गुह्यचक्रं शुद्धम् ॥ १०१ ॥

बाहोः पादस्य सन्धौ नवतियुगहतैः कर्मचक्रं सुरैश्च
चुन्दानागैः क्रियाख्यं भवति नृपतिभिश्चाङ्गुलीपर्वसन्धौ ।
श्रीवज्री कालशुद्ध्या भवति नरपते वर्षमासादिभेदै-
श्चित्ताकारो न चार्कः प्रतिदिवसवशाद् विश्वमाता विशुद्धा ॥१०२॥

बाहुपादसन्धिषु द्वादशसु **कर्मचक्रं सुरैः** षष्ट्युत्तरत्रिशतैः शुद्धम् । **नागै**[5]**श्चुन्दा**भिरेभिः षोडशभिः काय[6]भागभेदेनाङ्गुलीपर्व[7]**सन्धिषु क्रियाख्यं** चक्रं शुद्धमिति चक्रशुद्धिनियमः । इदानीं[8]नायकादीनामपरविशुद्धिरुच्यते—**श्रीवज्री**त्यादि । इह [9]कालो बाह्योऽध्यात्मनि द्वादशाङ्गात्मकं मकरादिराशिचक्रं [10]हेतुफलात्मकम् । तत्र पञ्च हेतुधर्माः, सप्त फलहेतुधर्माः क्लेश[11]धर्मात्मकाः । फलधर्मा दुःखात्मका लोकधातुपटलोक्ताः । तेषां हेतुफलधर्माणां शुद्ध्या **कालशुद्ध्या** हेतुफल[12]निरोधेन शुद्ध्या **वज्री** मण्डलेशः कालचक्रविशुद्धः । **वर्ष**[13]**मासादिभेदै**रिति वक्ष्यमाणे वक्तव्यम् । **चित्ताकारो** विशुद्धचित्तो **न चार्कः** संसारचित्तलक्षणः प्राणारूढो विज्ञानस्कन्ध इति । [14]**प्रतिदिवसवशाद् विश्वमाता**[15] **विशुद्धे**ति । इह यथा वर्षे द्वादशलग्नानि मासभेदेन तथा प्रतिदिने उदयभेदेन द्वादशलग्नानि । एवं प्रज्ञाऽपि द्वादशाङ्गनिरोधेन शुद्धा । [16]अत्र यानत्रयस्य[17] ये धर्मा मुद्रणं चतुरशीतिसहस्रधर्मस्कन्धानां देवतानां च बुद्धमुद्रणम् । चतुर्विधस्य संघस्य

---

१. ग. सोपध । २. ग. ष्टाक्षरं । ३. ग. त्रिगुण । ४. क. 'लास्याद्यष्टभिश्च' नास्ति । ५. ख. श्चन्दा, ग. च. भो. श्चण्डा । ६. ग. च. भो. भाव । ७. क. ख. छ. 'सन्धिषु ......चक्रं' नास्ति । ८. क. ख. छ. कायका । ९. क. ख. छ. काला १०. क. ख. छ. 'हेतु......सप्त फल' नास्ति । ११. च. भो. कर्मा । १२. क. ख. छ. 'निरोधेन...... चक्रवि' नास्ति । १३. ग. च. मासभेदैः । १४. क. ख. छ. 'प्रतिदिवस ... विशुद्धेति' नास्ति । १५. ग. भो. प्रज्ञा शुद्धेति, च. शुद्धा भवति । १६. क. ख. छ, अत्र या तत्र, ग. अतो यानत्रयं, च. अत्र यानत्रये । १७. क. ख. छ. 'स्य......स्कन्धानां' नास्ति ।

भिक्षुमुद्रणम्, एवं भिक्षुपूर्वंगमः संघः। ये धर्माः पूर्वंगमो धर्मः। बुद्धपूर्वंगमो[1] बोधिसत्त्व-[2]क्रोधदेवतागणः। एवं मण्डले नायको[3]ऽचिन्त्यचित्तवज्रः, नायकी शून्यताज्ञानधर्मिणी विश्वमाता[4] इति न्यायः॥ १०२॥ [281a]

इदानीं धूमादीनां विशुद्धिरुच्यते—

5 धूमाद्या वायुशुद्धाः स्वहृदयकमले नाभिचक्रे स्थिताश्च
रुद्रः क्लेशैः सभार्यो विभुचरणतले मारवृन्दैश्च मारः।
शङ्खो गण्डी मणिश्च द्रुम इति च तथा कायवज्रादिभिश्च
कुम्भाश्चाष्टामृताङ्गैर्जयविजयघटौ बोधिचित्तादिना च ॥१०३॥

धूमेत्यादि। इह **हृदयकमले** समानादिवायूनां आधारभूता अष्टनाड्यस्ताभिः 10 **धूमादि**दिव्याः [5]कृष्णदीप्तान्ताः शुद्धाः। अवधूतीशङ्खिनीभ्यां कलाबिन्दुरूपिण्यौ शुद्धे T 352 दशवायुनिरोधेनेति। **रुद्रो** वामपादतले [6]चतुःक्लेशक्षयेण शुद्धः। सव्यपादतले **मारो मारवृन्द**क्षयेण शुद्धः। **शङ्खः** कायावरणक्षयेण शुद्धः। **गण्डी** वागावरणक्षयेण शुद्धा। **मणि**श्चित्तावरणक्षयेण शुद्धः। **कल्पद्रुमो** ज्ञानावरणक्षयेण शुद्ध इति। **कायवज्रादिभिश्च** [7]**कुम्भाश्चाष्टामृताङ्गै**रिति। इह मज्जानिरोधेन कुम्भद्वयं वामदक्षिणभेदेन 15 विशुद्धम्। एवं सर्वत्र वामदक्षिणभेदेन वेदितव्यम्। तथा रक्तनिरोधेन कुम्भद्वयम्। एवं मूत्रास्रावेण कुम्भद्वयम्। [8]तथा विष्ठास्रावेण कुम्भद्वयम्। एवं **जयघटः** शुक्रास्रावेण। **विजयघटो** रजआस्रावेण। इत्यष्टौ घटाः शुद्धाः कपालानि वा ॥ १०३ ॥

इदानीं बुद्धानां शुद्धिरुच्यते—

संस्कारोऽमोघसिद्धिर्विमलमणिकरो वेदना चामिताभः
20 संज्ञा रूपं हि चक्री शशिबलरुधिरैर्मूत्रविड्भ्यां विशुद्धाः।
षड् देव्यो धातुभिर्वै विषयविषयिभिर्बोधिसत्त्वाः समुद्राः
पञ्च क्रोधा बलैर्वै खलु पुनरपराश्चेन्द्रियैः पञ्च चान्यैः ॥१०४॥

इह संवृतिधर्मे निरुद्धे सत्यन्ये ते संस्कारादयः। तेन विशुद्ध**संस्कारोऽमोघसिद्धिः**। संस्कारावरणक्षयेण **विमलमणिकरो** रत्नसंभवो **वेदना**। चकारः समुच्च-25 यार्थः। एव**ममिताभः संज्ञा रूप**स्कन्धः। **चक्री**ति वैरोचनः। एते पुनरक्षोभ्यादयः। **शशी**ति शुक्रम्, [9]**बले**ति मांसं **रुधिरं मूत्रं विड्** [10]त्येभिर्विशुद्धैर्निरावरणैः पञ्च स्कन्धा विज्ञानादयो विशुद्धा भवन्तीति। एवं **षड् देव्यो** विश्वमाता-वज्रधात्वीश्वरी-तारा-

---

१. क. ख. छ. 'मो ''' एवं' नास्ति। २. ग. च. क्रोधादि। ३. क. ख ग. च. छ. अचित्त। ४. क ख. छ. मात्रा। ५. क. कृष्णदीप्तान्धाः। ६. क. ख. चन्द्रः। ७. ग. च. 'च' नास्ति। ८. ग. 'तथा ''' द्वयम्' नास्ति। ९. क. ख. ग. च. छ. पललं। १०. च. त्येतै।

पाण्डरा-मामकी-लोचनेति । **धातुभिरिति** । ज्ञानाकाशवायुतेज-उदकपृथ्वीधातुभिर्निरुद्धैरन्ये धातवो विशुद्धा भवन्तीति। **विषयविषयिभिरिति**। रूपादिषड्विषयैश्चक्षुरादि[281b]भिर्विषयिभिर्विशुद्धैरन्ये ते रूपादयोऽन्ये ते चक्षुरादयो विशुद्धा रूपवज्रादिभिः सार्धं क्षितिगर्भादयो **बोधिसत्त्वाः** [1]**समुद्राः** शुद्धाः। **पञ्चक्रोधा बलैरिति** श्रद्धाबलं वीर्यबलं स्मृतिबलं समाधिबलं प्रज्ञाबलम् । अश्रद्धा-अवीर्य-अस्मृति-असमाधि-अप्रज्ञानामावरणक्षयेण श्रद्धादीनि बलानि भवन्ति, तैर्बलैर्विशुद्धाः। उष्णोप-विघ्नान्तक-[2]प्रज्ञान्तक-पद्मान्तक-यमान्तक-क्रोधराजानः शुद्धा इति। **खलु पुनरपराः** सुम्भराज-नीलदण्ड-टक्कि-अचल-महाबलाः । **पञ्चकर्मेन्द्रियैर्भग**वाक्पाणिपादपायुभिः कर्मेन्द्रियक्रियाभिः। रौद्राक्ष्यादिभिः सार्धं परिशुद्धा इति ॥ १०४ ॥

चामुण्डाद्यष्टयामैः कमलदलगताः सूर्यलग्नैर्घटीभि-
र्दैत्याद्याः सूर्यमासैः कमलदलगता नाडिकाश्वाससंख्यैः।
नागाश्चण्डाश्च गुह्ये द्विगुणनृपतिभिर्नाडिकाभिर्विशुद्धा
एवं चेच्छादयस्ताः प्रकृतिगुणवशात् कायकृत्यैर्विशुद्धाः ॥१०५॥

चामुण्डाद्या अष्टयामैः कमलदलगताः सूर्यलग्नैर्घटीभिः षष्टिभिर्भीमादयश्चतस्रः शून्यपत्रविशुद्धया निर्माणचक्रावरणक्षयेणान्यास्ताश्चर्चिकादयो भीमादयश्चेति शुद्धाः। **दैत्याद्या** इति । नैर्ऋत्यवाय्वग्निषण्मुखसमुद्रगणेन्द्रशक्रब्रह्मरुद्रयक्षविष्णुयमा इति द्वादश चैत्रवैशाखज्येष्ठाषाढश्रावण[3]भाद्राश्विनकार्तिकमार्गशिरपौषमाघफाल्गुन[4]नामावरण-क्षयेण शुद्धाः। तेषां **कमलदलगताः** षष्ट्युत्तरत्रिशतं लास्यादियुक्तं **नाडिकाश्वास-संख्यैर्दिनैः** षष्ट्युत्तरत्रिशतदिनावरणक्षयेण शुद्धाः। अन्ये ते देवा अन्यास्ताः पत्रदेव्य इति शुद्धाः। **नागाश्चण्डाश्च गुह्ये द्विगुणनृपतिभिर्नाडिकाभिर्विशुद्धाः**[5] प्रज्ञोपायभेदेन द्विगुणत्वम् । **एवं चेच्छादय** इति । इह—इच्छा षट्त्रिंशत्, प्रतीच्छा षट्त्रिंशत् पूर्वोक्ताः **प्रकृतिगुणवशात् कायकृत्यैर्विशुद्धाः**। कायकृत्यावरणक्षयेण [282a] इत्यन्यास्ता इच्छादयः शुद्धाः ॥ १०५ ॥

केशैः सिद्धाः समस्ताश्चित्रिभुवनगतं लोमभिर्भूतवृन्दं
तत्त्वैरस्त्राणि भर्तुः प्रकृतिगुणवशाद् धातुभिर्बाह्यमुद्राः।
वज्रैरध्यात्ममुद्राः पविधरहृदये संस्थिताश्चन्द्रमूर्ध्नि
श्रीवज्री विश्वमाता त्रिविधभवगता चाक्षरज्ञानयोगात् ॥१०६॥

---

१. क. सभार्या, ग. सविद्या । २. ग. 'प्रज्ञान्तकपद्मान्तक' नास्ति । ३. ग. च. भाद्रपदा । ४. ग. च. मासा । ५. भो. Ces Pa (इति) इत्यधिकम् ।

केशैः सिद्धाः समस्ता [1]निरावरणलोमभिः सार्धत्रिकोटिभिः श्मशाने **भूतवृन्दं** विशुद्धमेवमन्ये ते सिद्धाः। अन्ये भूता इति शुद्धाः। **तत्त्वैश्चतुर्विंशतिभिर्निरावरणैर्वज्रादीन्यस्त्राणि भर्तुः** शुद्धानि चतुर्विंशतिविधप्रकृते[2]रभावादिति। **प्रकृतिगुणवशादिति।** प्रकृतिः पृथिव्यादिधातुसमूहस्तेषां गुणाः षड् विषयास्तेषामावरणक्षयात्। अन्ये-

5 र्गन्धादिधातुभिः षड्भिः षड् [3]**बाह्यमुद्रा** विशुद्धा इति। **वज्रैरिति** कायवाक्चित्तज्ञानवज्रैर्जाग्रत्स्वप्नसुषुप्ततुर्यलक्षणैर्विशुद्धैर्निरावरणादध्यात्ममुद्राः शुद्धाः। अन्यास्ताः कायमुद्रादयश्चत[4]स्रो विशुद्धा इति। **पविधरहृदय** इति। मण्डलनायकहृदये **संस्थिता**-[5]**श्चन्द्रमूर्ध्नि।** **श्रीवज्री** सहजानन्दः परमाक्षरः। **विश्वमाता** सर्वाकारशून्यताज्ञानं त्र्यध्वदर्शनम्। च्यवनसुखकल्पनावरणक्षयादिति शुद्धम्। **त्रिविधभवगताः।** सर्वे

10 सर्वतः सर्वदा स्कन्धादयो विशुद्धाः सर्वावरणक्षयादिति भगवतो नियमः। एवं भवस्य परिज्ञानं निर्वाणमिति कथ्यते। इहातीतानागतवर्तमाने त्र्यध्वनि त्रिभवस्य यथाभूतदर्शनं परिज्ञानं तदेव त्रिभवावरणक्षयेण हेतुफलनिरोधेन संबुद्धानां यौगपद्येन भवति सर्वज्ञता-सर्वाकारज्ञता-मार्गज्ञता-मार्गाकारज्ञताबलेन। न श्रावकप्रत्येकबुद्धानां [6]बोधिसत्त्वानां च यौगपद्येन त्र्यध्वनि यथाभूतं त्रिभवस्य परिज्ञानं भवति सोपधि-

15 निर्वाणधातुत इति। [7]यथा बोधिसत्त्वानां लवमात्रावरणतः, एवं क्रोधेन्द्राणामपि सिद्धं दशभूमीश्वरत्वम् ॥ १०६ ॥

इदानीं शुद्धधर्मकायाद्युत्पत्तिरुच्यते—

श्रीशुद्धाद्धर्मकायो भवति खलु सुसंभोगकायो हि धर्माद्
भोगान्निर्माणकायो भवति जिनपतेः सर्वसत्त्वार्थकर्तुः। [282b]
20 तुर्यावस्था सुषुप्ता खलु पुनरपरा कायभेदात्तु जाग्रा
एवं कायप्रभेदैर्विहरति च मनः प्राणिनोऽङ्गे चतुर्धा ॥१०७॥

श्रीशुद्धादित्यादि। इह संवृतिसत्ये प्रतीत्योत्पन्नधर्माः क्षणिका उत्पादव्ययलक्षणाः, भवस्यापरिज्ञानात्। अविद्यावासनातस्तुर्यादयोऽवस्थाश्चतस्रः संसारिणां भवन्ति। तेषु कायप्रभेदैर्मनश्चतुर्धा विहरति[8]। **प्राणिनोऽङ्गे चतुर्धा।** इहाधानकाले

25 गर्भावक्रमणे शुक्रच्यवनावस्था तुर्या, सा च संवृत्या महासुखमित्युक्तम्। तदेव श्रीकारादद्वयं ज्ञानं संवृत्या शुद्धकायः, सहजकाय इत्यर्थः। तस्माद् **धर्मकायः** सुषुप्तावस्थालक्षणः। तस्मात् **संभोगकायः** स्वप्नलक्षणः। तस्मान्निर्माणकायो जाग्रल्लक्षणः। कायनिष्पत्तेः

T 353 प्राणनिर्गमकालाद्बाह्ये पुनरुक्तश्चतुर्धा। एवं मण्डले कायभेदो भवति। **जिनपतेः सर्वसत्त्वार्थकर्तुः** संवृत्यावरणक्षयादिति। त्रैधातुके परचित्तज्ञाने **मनो विहरति।**

30 [9]पूर्वनिवासानुस्मृतौ च भवपरिज्ञानत इति ॥ १०७ ॥

---

१. क. च. निवारण। २. ग. भाव, च. भावत। ३. ग. बाह्यविशुद्धा मुद्रा। ४. ग. च. स्रो मुद्रा, ग. 'विशुद्धा' नास्ति। ५. ग. च. श्चतुर्मू। ६. ग. भूतबोधि। ७. ग. च. भो. तथा। ८. च. विहरतीति। ९. ग. पूर्वंवासा।

इदानीं चतुष्कायकृत्यमुच्यते—

निर्माणे भोगकर्तृ प्रभवति हि मनः कायवागिन्द्रियैश्च
संभोगेऽदृष्टचिन्तां व्रजति गुणवशाद् धर्मकाये च निद्राम् ।
शुद्धे सौख्यं प्रयात्यत्र दिननिशिसमये बिन्दुमोक्षत्रयान्ते
तस्मात् तद्भावनीयं प्रतिदिनसमये योगिना चाक्षरार्थम् ॥१०८॥ 5

निर्माण इत्यादि । इह संसारिणां **निर्माणे** जाग्रदवस्थायां **भोगकर्तृ प्रभवति मनः कायवागिन्द्रियैः** करणभूतैर्विषयेषु । **संभोगे** स्वप्नावस्थायामदृष्टविषयेष्वजडेषु [1]**चिन्तां व्रजति गुणवशादिति** विषयवासनावशात् । **धर्मकाये** सुषुप्तावस्थायां **निद्रां च** [2]याति निरिन्द्रियं मनो भवतीत्यर्थः । **शुद्धे** तुर्यावस्थायां **सौख्यं प्रयाति । अत्र दिनसमये निशि समये** वा । समय इति कालः, तस्मिन् काले मैथुने कृते एकस्मिन् समये **बिन्दु-मोक्षत्रयान्ते** सहजक्षणे महासुखं प्रयातीति । [283a] संवृत्या तत्त्वं यस्मात् **तस्मात् तद्भावनीय**मर्हर्निशिकाले **योगिना चाक्षरार्थ**मित्यच्युतक्षणार्थं वक्ष्यमाणेन षडङ्गेनेति 10 नियमः । एवं सावरणधर्मे निरुद्धे निरावरणधर्मो भवत्युत्पादव्ययरहित इति न्यायः ॥ १०८ ॥

इदानीं प्रत्यालीढपदादिविशुद्धिरुच्यते — 15

वामे प्राणप्रचारः प्रभवति च तथाऽऽकुञ्चनं दक्षिणे यत्
प्रत्यालीढं पदं तत्समपदमपरालीढमग्न्यर्कचारात् ।
वैशाखं मण्डलं वै वरललितपदं पद्मवज्रासनं च
व्योमादौ च प्रचारः समविषमगतौ पञ्चधा प्राणवायोः ॥१०९॥

वामेत्यादि । इह संसारिणां [3]यदा वामनाड्यां प्राणस्य प्रचारो भवति, तदा 20 दक्षिणे [4]संकोचो भवति । प्राणोऽपि मन्त्रदेवता । तेन वामप्रसारेण दक्षिणसंकोचनेन **वामे प्राणसंचारो** [5]यत्तद् **भवति । तथाऽऽकुञ्चनं दक्षिणे यत् प्रत्यालीढं पदं** तदुच्यते मन्त्रदेवतायाः । **समपदमपरमालीढपदं** यथासंख्यमग्निचारादिति मध्यमाचारात् । यौगपद्येन नाडीद्वये समपदं [6]भवेत् । **अर्कचारादिति** दक्षिण[7]चाराद् वामसं[8]कोचना-**दालीढं** पदं भवति । एवं **वैशा**[9]**खपदं मण्डलं** च **ललितपदं** च **पद्मासनं** च [10]**वज्रासनं** 25 **च** यत्तद् यथाक्रमेण वामनाड्यां दक्षिणनाड्यां वा, **व्योमादौ** चेत्याकाशमण्डले

१. ग. चित्तं । २. च. प्रयाति । ३. क. यथा । ४. च. संकोचनं । ५. च. यद्भवति । ६. च. भवति । ७. च. प्रचारात् । ८. ग. च. कोचा । ९. ग. खपदं तन्मण्डलं । १०. ख. 'वज्रासनं च' नास्ति ।

प्राण[1]सञ्चारो वैशाखपदम्। वायुमण्डले प्रचारो मण्डलपदम्। अग्निमण्डले प्रचारो ललितपदम्। उदकमण्डले प्रचारः पद्मासनम्। पृथिवीमण्डले प्रचारो वज्रासनमिति। एवं **समविषमगतो पञ्चधा प्राणवायोः** प्रचारो यस्तेन विशुद्धेन देवतानां पदासनविशुद्धिः प्रकम्पाभावतो [2]भवतीति नियमः। एवं जातकस्य वाङ्निष्पत्ति-
5 द्वितीया॥ १०९॥

इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां
द्वादशसाहस्रिकायां विमलप्रभायां साधनापटले
प्राणदेवतोत्पादमहोद्देशस्तृतीयः॥

४. उत्पन्नक्रमसाधनमहोद्देशः

10 प्रणिपत्याच्युतं सौख्यं षोडशार्धार्धबिन्दुधृक्।
यत्तस्योपायः सम्यग् बिन्दुयोगः प्रकथ्यते॥

चण्डाली नाभिचक्रे नवहतभुजगे चर्चिकाद्याधिदैवे
ह्रोंकारज्ञानगर्भे तडिदनलनिभा ज्ञानतेजःप्रबुद्धा।
नाभौ वैरोचनादीन् दहति नरपते लोचना चक्षुरादीन्
15 सर्वान् दग्ध्वा सुचन्द्रात्स्रवति शिरसि यो बिन्दुरूपं स वज्री॥११०॥
[283b]

चण्डालीत्यादिना। इह सर्वोत्पत्तिक्रमे कायनिष्पत्तिर्मण्डलराजाग्री। वाङ्निष्पत्तिः कर्मराजाग्री, कर्मेन्द्रियक्रियाप्रवर्तनात्। बोधिचित्तबिन्दुनिष्पत्तिर्बिन्दुयोगः। शुक्रच्यवनात् सुखोपलब्धिः सूक्ष्मयोगः। स च नराणां षोडशवर्षान्ते भवति। तेन
20 तस्योप[3]भोगाय विवाहपाणिग्रहणादिकं कार्यम्। शिष्याय प्रज्ञासमर्पणं करोत्याचार्यः। तया तस्य सुखस्य साधनं कर्ममुद्रयोक्तं बालजनानाम्, ज्ञानमुद्रया मध्यमानाम्, महामुद्रयोत्तमयोगिनामिति। तेन **मूलतन्त्रे** भगवान् [4]आह—

षोडशाब्दां कुलीनां वा रूपयौवनमण्डिताम्।
आदौ सुशिक्षितां कृत्वा सिक्त्वा साधनमारभेत्॥
25 कायवाक्चित्तरागांश्च ललाटादिषु विन्यसेत्।
स्वाहा गुह्ये महोष्णीषे ततः पद्मं विशोधयेत्॥
आःकारेणाष्टदलं पद्मं हूँकारकुलिशान्वितम्।
एवं सकुलिशं कमलं प्रज्ञायाः स्पन्दहेतुतः॥

---

१. ग. च. प्रचारो। २. इतः परं ग-पुस्तके ३११ पत्राभावात् 'भवतीति ...... द्वादशराशिनाड्यात्मकं' इति यावत् पाठो नास्ति। ३. च. योगाय। ४. क. ख. ग. ङ. 'आह' नास्ति।

हूँकारेण स्वकं वज्रं पञ्चशूकं विभावयेत्।
तन्मध्येऽष्टदलं पद्मं आःकारेण प्रकल्पयेत्॥
एवं सकमलं कुलिशं कृत्वा पद्मे निवेशयेत्।
हूँ फट् कुर्वंस्ततो योगी गर्वं वज्रधरं वहन्॥
भगे लिङ्गं प्रतिष्ठाप्य बोधिचित्तं न चोत्सृजेत्। 5
भावयेद् बुद्धबिम्बं तु त्रैधातुकमशेषतः॥
चण्डाली ज्वलिता नाभौ दहति पञ्च तथागतान्।
लोचना चक्षुरादींश्च दग्धे हं स्रवते शशी॥
स्रवते बिन्दुरूपेण अमृतं शुक्ररूपिणम्।
बिन्दुयोग इति ख्यातः षोडशार्धार्धबिन्दुधृक्॥ 10
अकलः कलनातीतश्चतुर्थध्यानकोटिधृक्।
सूक्ष्मयोग इति ख्यातो [1]निःस्पन्दादिगतोर्ध्वतः॥
शङ्खिनीयं महामुद्रा चण्डाली सा प्रगीयते।
[2]नाभ्यूर्ध्वं डोम्बिनी या तु अवधूती नरनासिका॥
पञ्चरश्मिमयः प्राणः पञ्चमण्डलवाहकः। 15
नासाग्रे सर्षपः ख्यातः प्राणायामः स च स्मृतः॥
त्रि[284a]भवस्य परिज्ञानं त्रैधातुकमशेषतः।
प्राणे निबोधिते तच्च सर्षपे सचराचरम्॥
प्रत्याहारे महामुद्रा आकाशे शून्यलक्षणम्।
नासिका तत्प्रदेशे च यत्रैवारोपितं मनः॥ 20
निमित्तान्ते[3] तु या रेखा तस्यां [4]बिम्बं चराचरम्।
भावयेदखिलं तस्यां योगी ध्यानादिकं च तत्॥

इति **मूलतन्त्रे** नियमः। अस्मिन् पुनः संक्षेपत उक्तः। तेन मूलतन्त्रानुसारेणावगन्तव्य इति भगवतो मञ्जुश्रियो नियमः। **चण्डाली नाभिचक्रे नवहृतभुजग इति।** इह नाभौ नाडीचक्रं नवहृतभुजगं द्वासप्ततिनाडिकात्मकं द्वादशराशिनाड्यात्मकम्, 25 षष्टिमण्डलनाड्यात्मकम्। तस्मिन् नवहृतभुजगे **चर्चिकाद्याधिदेवे** [5]**होकारज्ञानगर्भे** ज्ञानवज्राधिष्ठिते **तडिद**[6]**नलनिभा** चण्डाली **ज्ञानतेजःप्रबुद्धेति।** संवृत्या ज्ञानं कामस्तस्य तेजः कामाग्निस्तेन कामाग्निना प्रबुद्धा सती **नाभौ** निर्माणचक्रे **दहति वैरोचनादीन्** पञ्चमण्डलगतान् [7]वामे, दक्षिणे **लोचना चक्षुरादीन्** दहति, चक्षुरादीन्द्रियाणि रूपादीन् विषयानपि, मनसो धर्मधातुग्रहणात् सर्वेषामप्रवृत्तिरिति दहनम्। 30

१. भो. rGyu mThun (निष्यन्द)। २. क. ख. नात्यूर्ध्वं। ३. च. त्तान्त्ये। ४. च. भो. विश्वं। ५. च. होः। ६. ग. च. भो. दमल। ७. क. ख. ग. ङ. वाम।

एवं **सर्वान् बध्वा सुचन्द्रादिति** जन्मबोधिबीजाच्छिरसि **स्रवति यो** हंकारो **बिन्दुरूपं** शुक्रमागन्तुकं **स वज्री** बोधिचित्तमित्यर्थः। शिरसः कण्ठे, कण्ठाद् हृदये, हृदयान्नाभौ, नाभेर्गुह्यकमले ॥ ११० ॥

प्रज्ञाधर्मोदयस्थं पुनरपि सकलं स्फारितं बिन्दुना वै
5 नानालङ्कारयुक्तादरशगतमिव ज्ञानचक्रं स्वयम्भूः।
कामं रूपं ह्यरूपं त्रिविधमपि भवं शोधयित्वा क्रमेण
पश्चाज्ज्ञानार्चिषा वै त्रिभुवनसकलं ह्येकदाकर्षणीयम् ॥१११॥

T 354 तदेव कमलं प्रज्ञाधर्मोदय उच्यते। एवं नाभिहृत्कण्ठललाटोष्णीषकमलानि प्रज्ञाधर्मोदय उच्यते। एवं [1]द्रुतः सन् गुह्ये कायबिन्दुः, नाभौ वाग्बिन्दुः, हृदये चित्त-
10 बिन्दुः, [2]कण्ठे ज्ञानबिन्दुः। एवं **प्रज्ञाधर्मोदयस्थं** बोधिचित्तं **पुनरपी**ति यथागतं तथागतं **स्फारित**मित्युच्यते। यथा ललाटादानन्दादिभेदेनागतं विचित्रादिभेदेन वा पञ्चदश-[284b]चन्द्रकलापरिपूर्णम्, तथा [3]निःस्पन्दादिभेदेनोर्ध्वं ललाटे गतं वैमल्यं स्फारितं भवति। तेन **बिन्दुना** वैमल्येन **नानालङ्कारयुक्तमादर्शगतमिव** प्रतिसेनासमं त्र्यध्वगतं **ज्ञानचक्रं स्वयम्भूरि**ति बिन्दुयोगात् सूक्ष्मयोगोऽभूत्। एवं **कामं रूपं ह्यरूपं त्रिविधमपि**
15 **भवं शोधयित्वा क्रमेणे**ति कायवाक्चित्तबिन्दूत्पत्तिक्रमेण। **पश्चाज्ज्ञानार्चिषा वै** इति। अच्युतसुखरश्मिभिः। **त्रिभुवनसकलमि**ति। त्रैधातुक**मेकदाकर्षणीयमि**ति यौगपद्येन त्रैकाल्यज्ञानम्। देवतायोगे [4]देवतामण्डलचक्राकारस्फरणम्, संसारिणां पुत्रदुहितृस्फरणं बोधिचित्तत इति। एवं षोडशवर्षात्त्रधेर्गर्भजानां कायवाक्चित्तज्ञान-निष्पत्तिः, देवतानां भावनाबलेन, बुद्धानां चतुर्विमोक्षबलेनेति संवृतिपरमार्थ-
20 सत्यतः ॥ १११ ॥

इदानीमध्यात्मनि मन्त्रजापादिकमुच्यते—

चन्द्रादित्यादिकाद्यैस्त्रिविधगतिगतः कायवज्रादिजापः
प्रत्याहारादिषड्भिः सुकनककमले कायवाक्चित्तयोगः।
आनन्दाद्यैस्तु वज्राब्जसमरसगतैर्भावनेयं त्रिवज्रा
25 प्रज्ञाब्जे चित्तबिन्दौ सहजसुखवशाद् भावनाऽनाहता स्यात् ॥११२॥

चन्द्रेत्यादिना। इह शरीरे **चन्द्र** इति वामनाडी, [5]**आदित्य** इति दक्षिणनाडी। **आदी**ति अकारादिस्वरसमूहो वामे प्राणसंचारः। **कादी**ति व्यञ्जनसमूहो दक्षिणे

१. भो. Su Ba (द्रवः)। २. क. ख. 'कण्ठे ज्ञानबिन्दुः' नास्ति। ३. भो. rGyu mThun Pa (निष्यन्द)। ४. भो. 'देवता' नास्ति। ५. ग. 'आदित्य'''नाडी' नास्ति।

प्राणसंचारः। **त्रिविधगतिगत** इति। [1]वामे गतिगतः प्राणः **कायवज्रजाप** इत्युच्यते। [2]दक्षिणे गतिगतः प्राणो वाग्जाप इत्युच्यते। मध्यमागतिगतः प्राणश्चित्तजाप इत्युच्यते। एषां निरोधाद् अनाहता सर्वज्ञभाषा भवति। तेनायं षडङ्गयोगो भावनीयः **प्रत्याहारादिषड्भिरिति**।

प्रत्याहारस्तथा ध्यानं प्राणायामश्च धारणा।
अनुस्मृतिः समाधिश्च षडङ्गो योग इष्यते॥ इति।
(गु० त० १८.१४०)

एभिरभ्यस्यमानैर्वक्ष्यमाणैः [3]**सुकनककमल** इति नाभिकमले **कायवाक्चित्तयोग** इति त्रिविधगतिगतस्य प्राणस्य निरोध इत्यर्थः। ततो निरोधादानन्दाद्यैरित्यानन्द-परमविरम[4]सह[285a]जैर्वज्राब्जैः **समरसगतैरच्युतत्वाद् भावनेयं त्रिवज्रा** शुक्रविण्मूत्र-निरोध इत्यर्थः। तथा **मूलतन्त्रे**—

मध्यमोत्तमश्वासेन गन्धोदक[5]युतेन च।
कुलिकां पूजयेन्नित्यं कालविशेषेण दूतिकाः॥

इति [6]नियमः। ततः **प्रज्ञाब्जे** गुह्यकमले **चित्तबिन्दौ** स्थिते सति **सहजसुख-वशादित्यक्षरसुखवशाद् भावनाऽनाहता स्याद्** ऊर्ध्व[7]रेतस इति॥ ११२॥

इदानीं सेवादिकमुच्यते—

सेवा पञ्चामृताद्यैर्जलनिधिकुलिशैर्मन्त्रजापादिभिश्च
प्रत्याहारादिभिः स्यात् कुलिशकमलजेनामृतेनोपसिद्धिः।
आनन्दाद्यैस्त्रिवज्राब्जसमरसगता भावना साधनं स्यात्
प्रज्ञासङ्गेऽच्युतं संभवति खलु महासाधनं सूक्ष्मयोगात्॥११३॥

सेवेत्यादि। इहादिकर्मिकेण प्रथमं सेवा कर्तव्या [8]साधनविधिना। **सेवा पञ्चा-मृताद्यैरिति**। बाह्ये पञ्चामृतं विडादिकम्। आदिशब्देन गोक्षुरादिकम्, तैर्भक्षितैः सेवा देवतातोषणार्थम्। अध्यात्मनि पञ्चामृतानि पञ्चस्कन्धाः। आदिशब्देन पञ्चेन्द्रि-याणि पञ्चप्रदीपाः। तेषां निरपेक्षता सेवा शरीरद्रव्यतृष्णापरित्यागः। तया सेवया देवता वरदा भवन्ति, न गूथादिभक्षितेनेति। **जलनिधिकुलिशैरिति** कायभोग-निरपेक्षता, वाग्भोगनिरपेक्षता, चित्तभोगनिरपेक्षता, च्यवन[9]सुखनिरपेक्षता [10]सेवा, कायवाक्चित्तब्रह्मचर्यसंयम इत्यर्थः। अनया देवता वरदा भवन्ति, न भवभोगस्पृहयेति।

---

१. ख. ग. च. वाम। २. ग. च. दक्षिण। ३. ग. स्वकनक। ४. ग. सहजवज्राब्जैः।
५. क. पुटेन। ६. भो. 'नियमः' नास्ति। ७. क. तेजसः। ८. क. ख. छ. साधना।
९. ग. 'सुख' नास्ति। १०. ग. भो. सेवा इति।

मन्त्रजापादिभिश्चेति। इह मन्त्रजापो नाम प्राणसंयमः। आदिशब्देन रेचक-पूरककुम्भकयोगः सदा सेवा, तया देवता वरदा भवन्ति, न प्राणेनायन्त्रितेन वाग्जल्पितेनेति नीतार्थः। नेयार्थेन पुनरक्षसूत्रादिना जापादिकं कर्तव्यं सामान्यसिद्ध्यर्थम्।

इदानीमुपसाधनमुच्यते—प्रत्येत्यादि। इह **प्रत्याहार** इति। इह संसारिणा-माहार[1]श्चक्षुरादीन्द्रिये रूपादिविषयग्रहणम्, [2]तत्परित्यागः प्रत्याहार इत्युच्यते। शू[285b]न्यताबिम्बेऽन्यैश्चक्षुरादिभिर्मासाद्यैरन्यरूपादिविषयग्रहणमुपसाधनम्। तथा ध्यानं प्राणायामश्च [3]धारणा। **कुलिशकमलजेनामृते**नाच्युतेनोपसाधनं नीतार्थेन, [4]बाह्ये देवतोत्सर्जनेन नेयार्थेनेत्युपसाधनसिद्धिः।

इदानीं साधनमुच्यते—**आनन्दे**त्यादि। [5]इहानन्दे **त्रिवज्राः** कायवाक्चित्तबिन्दवोऽब्जसमरसगता **भावना साधनं स्यात्**। हृन्नाभिगुह्ये बिन्दूनां स्थितिरित्यर्थः। एवं साधनम्। ततो महासाधनं **प्रज्ञासङ्गेऽच्युतं** सुखं [6]**सम्भवति** यदा, तदा **खलु महासाधनं सूक्ष्मयोगादिति**। सुषुम्नानाडि[7]कोर्ध्वं शुक्रसंयोगान्महासाधनमित्युच्यते नीतार्थेन। नेयार्थेन पुनः प्रज्ञाधर्मोदयनासिकाग्रे सर्षपादिकमिति नियमः। एवं महासाधनं भवति ॥ ११३ ॥

इदानीं [8]मृद्वादिमात्राभेदेन सेवादिकमुच्यते—

आदौ वै शून्यताबोधिरपि खलु ततः संग्रहश्चन्द्रबिन्दो-
र्बिम्बोत्पत्तिश्च तस्मात् प्रवररसकुलैरक्षरन्यास एव।
एषा सामान्यसेवा जलनिधिकुलिशैः साधनं मध्यमं च
अत्रोपायश्चतुर्धा भवति मृदुदृढः साधनाङ्गे तथैव ॥११४॥

आदावित्यादि। इहोत्पत्तिक्रमे प्रथमं **शून्यताबोधिरिति** प्राणिनां मरणान्ते स्कन्धपरित्यागादुपपत्त्यंशिकस्कन्धग्रहणाद्यदन्तरालं शून्यताक्षणमेकं त्रिभवदर्शनं शून्यमित्युच्यते। **खलु** निश्चितम्। [9]ततः क्षणात् पश्चात् **संग्रहश्चन्द्रबिन्दोरिति**। इहा[10]लयविज्ञानस्य मातृगर्भे शुक्रबिन्दूनां ग्रहणं नाम संग्रहः। ततः शुक्रादिग्रहणात् तस्माद् **बिम्बोत्पत्ति**र्नाम सप्तमासैर्गर्भनिष्पत्तिः, [11]कायनिष्पत्तिरित्यर्थः। ततः **प्रवररसकुलैरिति** षट्स्कन्धैश्चक्षुरादीनाम**क्षरन्यासो** रूपादिविषयप्रवृत्तिरिति। एवं देवतासाधनेऽपि कल्पनात्मकं भावयेदादिकर्मिकः। **एषा सामान्यसेवा जलनिधिकुलिशैरिति**। कायवाक्चित्तज्ञानवज्रनिष्पन्नैः **साधनं मध्यमं च** प्रा[236a]णनिष्पत्तिः। **अत्रोपाय-**

१. च. रश्च च। २. क. ख. छ. ततः। ३. ग. धारणया, च. धारणात्। ४. ग. बाह्य। ५. भो. ḥDir dGaḥ Ba La Sogs rNams Kyis (इहानन्दाद्यैः)। ६. ग. भवति। ७. च. कोर्ध्वे। ८. भो. मृद्वधिमात्र। ९. क. च. छ. तत्। १०. ग. लयन। ११. ग. 'कायनिष्पत्तिः' नास्ति।

श्चतुर्धा भवतीति सेवाङ्गे। उपसाधनाङ्गे [1]मृदुर्दृढः। **साधनाङ्गे तथैव षोडशवर्षा-** T 355
वधेरिति नियमः। अत्र मृदुर्जातबालः। दन्तोत्थानान्मध्यमबालः। दन्तपातात् कुमारः। पुनर्दन्तोत्थानात् षोडशवर्षोर्ध्वं प्रौढः, पुत्रदुहितृजनकत्वादिति। एवं सर्वदेवतानां चतुर्विधमङ्गं योगिना भावनीयमिति लौकिकसत्यनियमः।

इदानीं परमार्थसत्येन बुद्धबिम्बनिष्पत्तिरुच्यते—इह प्रथमं **शून्यताबोधिरिति**, 5
अन्धकारे न किञ्चिदपि चिन्तनीयम्। ततः **संग्रहश्चन्द्रबिन्दोरिति** बिन्दुपर्यन्तं धूमादि-निमित्तग्रहणम्। **बिम्बोत्पत्तिश्च तस्मादिति** तस्माद्बिन्दोर्विश्वदर्शनं बिम्बोत्पत्तिः। **प्रवररसकुलैरिति** निरावरणैः षट्स्कन्धैः। **अक्षरन्यास** इति प्रादेशिकस्कन्धधात्वायत-नादीनां निरोधः। अतो मृद्वादिभेदो भूमिलाभेन भवति, यावन्न द्वादशभूमीश्वरो भवति। तत :— 10

> द्वादशाकारसत्यार्थः षोडशाकारतत्त्ववित्।
> विंशत्याकारसंबोधिर्विबुद्धः सर्ववित् परः॥
> (ना. सं. ९.१५)

इति नियमः॥ ११४॥

इदानीं षडङ्गयोग उच्यते— 15

> प्रत्याहारो जिनेन्द्रो भवति दशविधो ध्यानमक्षोभ्य एव
> प्राणायामश्च खड्गी पुनरपि दशधा धारणा रत्नपाणिः।
> डोम्ब्यां चानुस्मृतिः स्यादपि कमलधरः श्रीसमाधिश्च चक्री
> एकैकः पञ्चभेदैः पुनरपि च यतो भिद्यते ह्यादिकाद्यैः॥११५॥

प्रत्याहार [2]इत्यादिना। इह **प्रत्याहार** आदिकर्मणि **जिनेन्द्र** इति ज्ञानस्कन्धः। 20
स च निमित्तभेदेन **दशविधो** धूममरीचिखद्योतदीपज्वालाचन्द्रादित्यराहुकलाबिन्दु-दर्शनभेदेनाकल्पितो ज्ञानस्कन्धः। **ध्यानमक्षोभ्य एव** [3]दशविधो विज्ञानस्कन्धो विषय-विषयिणां दशानामेकत्वं विश्वबिम्बे ध्यानमिति। **प्राणायामश्च** दशविधः। **खड्गीति** संस्कारस्कन्धः, वाम[4]दक्षिणदशमण्डलैकलोलीभूतत्वादिति। **पुनरपि दशधा धारणा** [286b]**रत्नपाणिरिति** वेदनास्कन्धः। प्राणस्य धारणा नाभिहृत्कण्ठललाटोष्णीषकमले 25
गतागतभेदेन दशविध इति। **डोम्ब्यां चानुस्मृतिः स्यादपि कमलधर** इति संज्ञास्कन्धो दशविधः। स चानुस्मृतिर्डोम्ब्यां मध्यनाड्यां दशकामावस्थाभेदत इति। **श्रीसमा-धिश्च चक्रीति** वैरोचनो दशविधः। समाधिर्दशवायूनां निरोधत इति। एवं भगवान-

---

१. क. छ. 'मृदुर्दृढः। साधनाङ्गे' नास्ति। २. ग. च. इत्यादि। ३. ग. दशदिशो।
४. ग. दक्षिणेन।

प्रतिष्ठितनिर्वाणोऽवाते वायुना नीयत इत्यर्थः। [1]**एकैकः पञ्चभेदैरिति**। अत्र एकैकयोगः पञ्चमण्डलवाहकः। **आदिकाद्यैरिति** स्वरव्यञ्जनैः वामदक्षिणप्राणसञ्चारनिरोधैः॥ ११५॥

इदानीं प्रत्याहारादिलक्षणमुच्यते—

प्रत्याहारो दशानां विषयविषयिणामप्रवृत्तिः शरीरे
प्रज्ञा तर्को विचारो रतिरचलसुखं ध्यानमप्येकचित्तम्।
प्राणायामो द्विमार्गः स्खलनमपि भवेन्मध्यमे प्राणवेशो
बिन्दौ प्राणप्रवेशो ह्युभयगतिहतो धारणा चैकचित्तम्॥११६॥

प्रत्येत्यादि। इह **प्रत्याहारो** नाम शरीरे **विषयविषयिणां दशानां** सम्बन्धेनाप्रवृत्तिर्विज्ञानस्य शून्यबिम्बे, विषयेषु प्रवृत्तिरन्यैश्चक्षुरादिभिः पञ्चविधैरिति। तथा तस्मिन्नेव बिम्बे **प्रज्ञे**त्यालोकनम्। **तर्क** इति भावग्रहणम्। **विचार** इति तस्य निश्चयार्थः। **रतिरिति** बिम्बासक्तिः। **अचलसुखमिति** बिम्बेन सह चित्तस्यैकीकरणम्। एवं ग्राह्यग्राहकभेदेन **ध्यानं** दशविधम्। इह **प्राणायामो** नाम **द्विमार्ग** इति वामदक्षिणमार्गः। **स्खलनम्** निरोधो **मध्यमे** मार्गे प्रवेशः, स च दशविधो दशमण्डलरोधतः। इह **बिन्दाविति** ललाटे **प्राणप्रवेशः**। **उभयगतिहत** इति गमनागमनरहितः। **धारणा** प्राणस्य ललाटे **एकचित्तं** नाम॥ ११६॥

चण्डाल्यालोकनं यद्भवति खलु तनौ चाम्बरेऽनुस्मृतिः स्यात्
प्रज्ञोपायात्मकेनाक्षरणसुखवशाज्ज्ञानबिम्बे समाधिः।
एतन्मुद्रादिभेदैस्त्रिविधमपि भवेत् साधनं विश्वभर्तु-
स्तिस्रो मुद्रास्त्रिमात्रास्त्रिविधगतिवशात् कर्मसङ्कल्पदिव्याः॥११७॥
[287a]

चण्डाल्यालोकनं यत् त्रिभवस्याम्बरे **साऽनुस्मृति**र्दशविधा [2]प्रोक्ता। **प्रज्ञोपायात्मकेनेति** ज्ञेयज्ञानैकलोलीभूतेन। **अक्षरणसुखवशाज्ज्ञानबिम्बे समाधिश्चेति**। सापि दशविधा प्राणादीनामभावत इति। एवं षडङ्गयोगसाधनम्। **एतन्मुद्रादिभेदैस्त्रिविधमपि भवेत् साधनं विश्वभर्तुः** कालचक्रस्य। **तिस्रो मुद्रास्त्रिमात्रा** इति। **त्रिविधगतिवशादिति**। इह बोधिचित्तस्य अक्षरगतिर्मृदुमात्रा, स्पन्दगतिर्मध्यमात्रा,

---

१. 'एकैकः''''निरोधैः' गृहीतोऽयं पाठो भोटानुसारी, संस्कृतहस्तलेखेषु नास्ति-Re Re dBye Ba lṄa rNams Kyis Te Śes Pa Ni ḥDir sByor Ba Re Re Ni dKyil ḥKhor lṄa ḥBab Paḥo. A Sogs Ka Sogs rNam Kyi Śes Pa Ni dByaṅs Daṅ gSal Byed gYon Daṅ gYas Kyi Srog Yaṅ Dag Par rGyu Ba ḥGog Pas So. २. च. भो. पूर्वोक्ता।

निःस्पन्दगतिरधिमात्रेति। [1]एवं कर्ममुद्राक्षरसुखदायिनी, ज्ञानमुद्रा स्पन्दसुखदायिनी, महामुद्रा निःस्पन्दसुखदायिनी। एवं त्रिमुद्राभावना षडङ्गयोगे भगवतोक्ता। इति षडङ्गयोगो भावनीयो योगिना बुद्धत्वायेति ॥११७॥

इदानीं प्रत्याहारादिफलमुच्यते—

प्रत्याहारेण योगी विषयविरहितोऽधिष्ठ्यते सर्वमन्त्रैः
पञ्चाभिज्ञानलाभी भवति नरपते ध्यानयोगेन शुद्धः।
प्राणायामेन शुद्धः शशिरविरहितः पूज्यते बोधिसत्त्वै-
र्मारक्लेशादिनाशं विशति दशबलं धारणाया बलेन ॥११८॥

प्रत्येत्यादि। इह **प्रत्याहारेण योगी**[2] यदा विशुद्धो भवति बिम्बेन स्थिरीभूतेन, तदा **सर्वमन्त्रैरधिष्ठ्यते**, वचसा वरदानादिकं ददाति। **पञ्चाभिज्ञानलाभी भवति नरपते ध्यानयोगेन शुद्ध** इति। इह यदाऽनि[3]मिषितचक्षुर्भवति तदा दिव्यचक्षुर्भवति। एवं दिव्यश्रोत्रो ध्यानेन शुद्धो भवति। **प्राणायामेन शुद्ध** इति। इह यदा **रविशशिमार्ग-रहितो** योगी भवति सदा मध्यमावाहकः, तदा प्राणायामेन शुद्धः सन् **पूज्यते बोधिसत्त्वैः**, प्रशंस्यत इत्यर्थः। **मारक्लेशादिनाशं विशति दशबलमिति** शून्यता-बिम्बम् [4]इह ग्राह्यग्राहकचित्तं विशति **धारणाया बलेनेति** प्राणस्य गतागतक्षयेण एकलोलीभवति ॥११८॥ [287b]

संशुद्धोऽनुस्मृतेः स्याद् विमलमपि प्रभामण्डलं ज्ञानबिम्बात्
तस्माच्छुद्धः समाधौ कतिपयदिवसैः सिद्ध्यते ज्ञानदेहः।
प्रत्याहारादिभिर्वै यदि भवति न सा मन्त्रिणामिष्टसिद्धि-
र्नादाभ्यासाद्धठेनाब्जगकुलिशमणौ साधयेद् बिन्दुरोधात् ॥११९॥

संशुद्धोऽनुस्मृतेरिति। इहानुस्मृतिर्बिम्बालिङ्गनं चित्तस्य सर्वविकल्परहितत्वम्, तस्माच्छुद्धो यदा तदा **विमलं प्रभामण्डलं** भवति। **अपि च** शब्दाद् रोमकूपात् स्फरन्ति पञ्चरश्मयो निश्चरन्ति **ज्ञानबिम्बा**च्छून्यबिम्बादिति। **तस्माच्छुद्धः समाधाविति**। इह ग्राह्यग्राहकचित्तयोरेकत्वेन यदक्षरसुखं भवति, तत्सुखं समाधि-रुच्यते। तस्मात् समाधिशुद्धो वैमल्यं गतः **कतिपयदिवसै**स्त्रिवर्षत्रिपक्ष[5]**दिवसैः सिद्ध्यते ज्ञानदेह** इति। दशवशितादिकं प्राप्तो बोधिसत्त्वो भवतीति प्रत्याहारादि-नियमः।

---

१. ख. ग. छ. भो. एषां। २. च. यदा योगी। ३. ग. च. भो. मिषच। ४. च. भो. 'इह' नास्ति। ५ छ. दिनैः।

इदानीं हठयोग उच्यते। इह यदा **प्रत्याहारादिभिर्बिम्बे** दृष्टे सत्यक्षरक्षणं[1] नोत्पद्यते, अयन्त्रितप्राणतया, तदा **नादाभ्यासाद्** वक्ष्यमाणाद् **हठेन** [2]प्राणं मध्यमायां वाहयित्वा **प्रज्ञाऽब्जगतकुलिशमणौ** बोधिचित्त**बिन्दु**[3]**निरोधादक्षरक्षणं साधयेन्निस्पन्दे-** नेति हठयोगः॥ ११९॥

T 356

इदानीं शून्यताबिम्बसाधनाय दृष्टिरुच्यते—

सेवायामादियोगो नभसि दशविधश्चक्रिणः क्रोधदृष्टया
दृष्टया विघ्नान्तकस्यामृतपथगतया चोपसाध्ये षडङ्गः।
प्रज्ञासृष्टेन्दुबिन्दोरपि कुलिशमणौ त्र्यक्षरः साधने स्यात्
सौख्याऽनष्टैकशान्तः सहज इह महासाधने ज्ञानयोगः॥१२०॥

[288a]

सेवेत्यादि। इह सेवेत्यादिधूमादिनिमित्तभावना, तस्यां **सेवायामादियोगो** धूमादि-निमित्तग्रहणं चित्तस्येति। स च **दशविधो** धूमादिना सार्धं प्रत्ययो भवति। तेन दशविधः। स च **चक्रिण** इत्युष्णीषस्य। **क्रोधदृष्ट्या** इति ऊर्ध्वदृष्ट्याऽनिमिषया निमित्तं भवति रात्रियोगेन चतुर्विधम्, दिवायोगेन षड्विधम्। ततो[4] बिम्बपर्यन्तं सेवाङ्गं भवति प्रत्याहारेण ध्यानेनेति। [5]दृष्ट्या विघ्नान्तकस्येति विघ्नान्तकोऽमृत-कुण्डली, तस्य दृष्टिरमृतस्थानगता ललाटगता, तया **दृष्ट्या विघ्नान्तकस्यामृतपथगतया चोपसाधने षडङ्गः**। चकारात् प्राणायामो धारणा कर्तव्या। प्राणस्य बिम्बे दृष्टे सति उपसाधनम्। **प्रज्ञासृष्टेन्दुबिन्दोरिति**। इह प्रज्ञारागेण सृष्टश्चासाविन्दुबिन्दुः सृष्टेन्दु-बिन्दुः, तस्य प्रज्ञासृष्टबोधिचित्तबिन्दोरपि **कुलिशमणौ** गतस्य **यस्त्र्यक्षरो** [6]योगो भवति गुह्ये नाभौ हृदये, स **साधने स्यादिति** साधनाङ्गं तृतीयं भवति। एवं साधनाङ्गं कर्तव्यम्। **सौख्याऽनष्टैकशान्त** इति। इह सौख्येनानष्टेन बोधिचित्तस्य य एकक्षणः, स शान्त इत्युच्यते। **सहज इह महासाधने ज्ञानयोग** इति चित्तस्याक्षरसुखेन सहैक-त्वमिति महासाधनाङ्गं चतुर्थम्। एवं ज्ञानसाधने[7] चतुरङ्गम्। देवतासाधन उत्पत्ति-क्रमेण पूर्वोक्तं लौकिकम्, लोकोत्तरतत्त्वसाधनमुत्पन्नक्रमेण। तथा[8] हि—

सत्यद्वयं समाश्रित्य बुद्धानां धर्मदेशना।
लोकसंवृतिसत्येन सत्येन परमार्थतः॥ (म. शा. २४.८)

इति भगवतो नियमः। [9]पुनः—

क्रमद्वयं समाश्रित्य देशना वज्रिणो मम।
उत्पत्तिक्रमेणैका उत्पन्नक्रमतोऽपरा॥ इति। (गु. त. १८.३३)

---

१. क. ख. ग. छ. क्षणो। २. भो. 'प्राणं' नास्ति। ३. ग. निरोधक्षणरक्षणं। ४. क. ख. ग. भो. इतः परं 'बिम्बमेवम्' इत्यधिकः पाठः। ५. ग. 'दृष्ट्या''''कस्येति' नास्ति। ६. भो. 'योगो' नास्ति। ७. च. नाङ्गं। ८. भो. De bŚin Du gSuṅs Pa (तथाह)। ९. ग. 'पुनः' नास्ति।

एवं देवतासाधने विकल्पभावना, तत्त्वसाधने विकल्परहितैश्चतुरङ्गैरिति न्यायः ॥ १२० ॥

इदानीं प्राणायामलक्षणमुच्यते—

प्राणायामः समन्तात् समसुखफलदो मस्तके यावदिष्टः
तस्मादूर्ध्वं ह्यनिष्टो मरणभयकरः स्कन्धनिर्नाशहेतुः । 5
उष्णीषं भेदयित्वा परमसुखपदे योजनीयो व्रजन् वै
स्कन्धाऽभावेऽपि योगी व्रजति समसुखं किन्तु लोकेऽप्रसिद्धिः ॥१२१॥

प्राणेत्यादि । इह शून्यताबिम्बे दृष्टे सति यः **प्राणायामो** योगिना कर्तव्यः, स **यावन्मस्तके** इति शिरोव्यथां न करोति । स च **स**[288b]**मसुखफलदो** भवति । **तस्मादूर्ध्वमि**ति शिरोव्यथान्ताद**निष्टो मरणभयकरो** भवति, **स्कन्धनिर्नाशहेतु**भूतो भवति । अथ योगबलेनो**ष्णीषं भेदयित्वा** प्राणो **व्रजन्** योगिना **परमसुखपदे** शून्यताबिम्बे **योजनीयो वै** एकान्तम् । एवं **स्कन्धाऽभावेऽपि योगी व्रजति समसुखं** बुद्धबिम्बमिति योगीति योगचित्तं व्रजति । **किन्तु लोकेऽप्रसिद्धि**रिति योगी मृतोऽयमिति प्राणायाम-नियमः ॥ १२१ ॥ 10

मध्ये प्राणप्रवेशो विषयविरहितालिङ्गनं विश्वमातुः 15
पद्माविष्टं स्ववज्रस्फरणमपि तथेन्द्वर्कमध्ये प्रवेशः ।
सौख्यं बीजाप्रपाते सुरतरतिगतं योगिनां योगमेत-
न्मुद्रासिद्धयर्थहेतोः परममपि विभोः श्रीरहस्याद् रहस्यम् ॥१२२॥

अपरं वृत्तं सुबोधम् ॥ १२२ ॥

इदानीं देवताविसर्जनमुच्यते— 20

उष्णीषे पञ्चशूकं भवति हि कुलिशं बाह्यशूकं द्विगुण्यं
वज्रं स्याद् धर्मचक्रे द्विगुणितमपरं तस्य चान्यद् द्विगुण्यम् ।
तस्याप्यन्यद् द्विगुण्यं भवति सहजसंभोगनिर्माणचक्रे
तद्गर्भेऽप्येकशूकं समसुखफलदं गुह्यपद्मोदरस्थम् ॥१२३॥

[1]उष्णीष इत्यादि । इह मण्डलराजाग्रीं कर्मराजाग्रीं बिन्दुयोगं सूक्ष्मयोगं भावयित्वा पूजां स्तुतिं कृत्वा "नमस्ते वरदवज्राग्र" (ना. सं. ११.१) इत्यादिना, 25

१. ग. 'उष्णीष इत्यादि' नास्ति ।

ततो मण्डलदेवतानां विसर्जनायोष्णीषे **पञ्चशूकं** वज्रं भावयेत् । तस्य वरटके महासुखचक्रं विसर्जयेत् । तस्य **बाह्यशूकं**[1] **द्विगुण्यमष्टशूकं** मध्यशूकेन साधं नवशूकं **वज्रं स्याद्धर्मचक्रे** हृदये । तस्य वरटके धूमादिकान् विसर्जयेत् । **द्विगुणितमपरं** षोडशशूकं मध्यशूकेन साधं सप्तदशशूकं **सहजे** ललाटे । तस्य वरटके स्कन्धधातुदेवता विसर्जयेत् । **तस्य चान्यद् द्विगुण्यमिति** द्वात्रिंशच्छूकं [2]मध्यशूकेन साधं त्रयस्त्रिंशच्छूकं **संभोगे** कण्ठे । तस्य वरटके द्वादशायतनचतुःक्रोधदेवता विसर्जयेत् । **तस्याप्यन्यद् द्विगुण्यमिति** चतुःषष्टिशूकं मध्यशूकेन साधं पञ्चषष्टिशूकं वज्रं **निर्माणे** नाभिचक्रे । तस्य वरटके चर्चिकादयो भीमादयश्चतुः[3]षष्टिमण्डलवाहिन्यश्चतस्रः शून्यकुलिकाः । एवं द्वासप्तति विसर्जयेत्ता इति । [289a]**तद्गर्भेऽप्येकशूकमिति** । तेषां गर्भे प्रागुक्तमेकशूकं **समसुखफलदं गुह्यपद्मोदरस्थम्** । तत्रापि द्वात्रिंशच्छूकं दलसंख्यम् । तस्य वरटके मारीच्यादयो यास्ता विसर्जयेत् । एवं द्वादशदेवाः सपरिवाराः कर्मचक्राणि वज्राणि[4] कृत्वा तेषां वरटकेषु विसर्जयेत् तानिति । नागाश्च श्वानास्यादयः क्रियाचक्रेषु । एवं विसर्जनं कृत्वा ततो वलिं दद्यात् त्रिसन्ध्यं प्रागुक्तविधिना । पञ्चामृतं पूर्वविधिना शोधयित्वा तेनात्मानं प्रीणयेत् । एवं साधनं कालचक्रस्योत्पत्तिक्रमेणोत्पन्नक्रमेणोक्तं भगवता मञ्जुश्रियेति ॥ १२३ ॥

इदानीं योगचर्योच्यते—

योगी प्राणातिपातं दिननिशि कुरुते प्राणनाशः स उक्तो
यः शब्दो वक्त्रहीनः प्रभवति हृदयेऽसौ मृषावाद एव ।
सर्वज्ञज्ञानभूमेर्ग्रहणमपि च यद् योगिनः स्तेयमुक्तं
सौख्यं बिन्दुप्रपाते भवति च परदारस्य सेवाऽविरागात् ॥१२४॥

योगीत्यादि । इह योगिनां योगचर्या द्विधा—एका बाह्या, द्वितीयाऽध्यात्मिकी । तत्र या बाह्या सा लौकिकफलहेतोः । या चाध्यात्मिकी सा लोकोत्तरफलहेतोर्योगिना कर्तव्येति । इह **योगी** यत् **प्राणातिपातं दिननिशि कुरुते** तत् स्वदेहे **प्राणनाश उक्तः** । सर्वज्ञपदलाभाय न[5] बाह्ये प्राणातिपातः । इह बाह्ये यः प्राणातिपात उक्तो दुर्दान्तदमनाय स तेषां प्राणो योगबलेनाकृष्टः पुनस्तस्मिन्नेव काये प्रवेशनीयो योगिनेति । एवं दुर्दान्तदमको भवति । न दुर्दान्तान्तको [6]भवतीति सिद्धः । **यः शब्दो वक्त्रहीन** इति । इह सर्वज्ञस्य[7] वचनं सर्वरुतं यत् सर्वसत्त्वानां **हृदये भवति** स्वस्वभाषान्तरेण, तदेवाप्रतिष्ठितं सर्वसत्त्वरुतत्वादप्रतिष्ठितत्वान्मृषावाद इत्युक्तः । बाह्ये पुनः सत्त्वार्थं प्रति "महामाया महारौद्रा भूतसंहारकारिणी (म. त १.५) इत्यादिवचनं सत्त्ववैनेयार्थम् । तथा—

---

१. ग. 'द्विगुण्यमष्टशूकं' नास्ति । २. क. 'मध्य .... त्रिंशत्शूकं' नास्ति । ३. भो. चतुः' नास्ति । ४. ग. 'कृत्वा' नास्ति । ५. ग. 'न' नास्ति । ६. च. योगीति । ७. ग. 'सर्वज्ञस्य' नास्ति ।

सुखं द्वीन्द्रियजं तत्त्वं बुद्धत्वफलदायकम्।
नरा वज्रधराकारा योषितो वज्रयोषितः॥

इत्यादिवचनं मृषावादः, न पुनः सत्त्वानां व[289b]ञ्चनाय विसंवादकं वचनं बौद्धयोगिनामिति सिद्धये। इह शरीरे निरावरणे जाते सति **सर्वज्ञस्य** द्वादश**भूमीनां** यद् **ग्रहणं योगिनस्तत् स्तेयग्रहणमुक्तम्**। बाह्ये पुनः सत्त्वोपकारतो निधानादिकमुत्पाटनीयं निधिरक्षकाणां दुर्गतिमोचनार्थमिति। **सौख्यं** यत् **शुक्रबिन्दोरप्रपाताद् भवति** सा **परदारस्य सेवा**। परदारा प्रज्ञापारमिता संसारपारं गता, परो वज्रसत्त्वः संसारपारं गतः, तस्य दारा परदारेति, तस्याः सेवाऽविरागतोऽक्षरसुखतो योगिनाम्। बाह्ये पुनः सेकादिकाले दात्रा स्वभार्यादिका दत्ता या, तस्याः सेवा परदारस्य सेवाऽ**विरागा**दिति। यथात्मसमयिनां विरागो न भवति समयभेद इत्यर्थः॥ १२४॥

T 357 5 10

प्राणायामानलेन द्रवमपि शशिनः पानकं मद्यपानं
उष्णीषेऽङ्गुष्ठपर्वाद् व्रजति तिथिवशात् पूर्णिमान्ते स्वचित्तम्।
उष्णीषादङ्गुलीषु व्रजति पुनरिदं कृष्णपक्षावसानं
सा चर्या योगिनो वै प्रतिदिनसमये त्विष्टसिद्धिप्रदा या॥१२५॥

प्राणायामानलेनेति। इह प्राणनिरोधेन या चण्डाली ज्वलिता, सा प्राणायामानल इत्युच्यते, तेन **प्राणायामानलेन द्रवमपि शशिन** इति बोधिचित्तस्य द्रुतस्य द्रवं बिन्दुरूपं पानकं कुलिशमुखेनोर्ध्वतो यत्तत् सहजानन्दजनकं **मद्यपानं** योगिनामुक्तमिति। बाह्ये पुनः [1]सेकादिकाले बाह्यदेवतानां बल्यर्थमुक्तमिति। **उष्णीषेऽङ्गुष्ठपर्वादिति**। इह कामशास्त्रे श्रूयते—इह शुक्लपक्षे वामपादाङ्गुष्ठात् प्रतिपदादिवृद्धया चन्द्रकलावृद्धया **पूर्णिमान्ते** उष्णीषे **स्वचित्तमिति** बोधिचित्तं **व्रजति तिथिवशादिति**। पुनरु**ष्णीषाद्**दक्षिणपादा**ङ्गुलीषु व्रजति पुनरिदं** कृष्णपक्षतिथिवशाद् यावत् **कृष्णपक्षावसानम्** अमान्तम्। एवं कृष्णपक्षावसाने बोधिचित्तं पादाङ्गुष्ठे वेदितव्यम्, पुनरपरमासे शुक्लपक्षे वामाङ्गुष्ठे पूर्ववदिति। [290a]तत्राह—प्रथमा तिथिः प्रथमाङ्गुलीपर्वे, द्वितीया द्वितीये, तृतीया तृतीये, चतुर्थी वामपादसन्धौ, पञ्चमी जानुसन्धौ, षष्ठी कट्यूरुसन्धौ, सप्तमी वामकराङ्गुलिप्रथमपर्वसन्धौ, अष्टमी मध्यम[2]सन्धौ, नवमी [3]तृतीयसन्धौ, दशमी करसन्धौ, एकादशी बाहुसन्धौ, द्वादशी स्कन्धबाहुसन्धौ, त्रयोदशी हृदये, चतुर्दशी कण्ठे, पूर्णा ललाटे, पूर्णान्तमुष्णीषे शुक्रस्य भवति। पुनः कृष्णप्रतिपल्ललाटे, द्वितीया कण्ठे, तृतीया हृदये, चतुर्थी दक्षिणस्कन्धबाहुसन्धौ। शेषं वामवद्विलोमेन दक्षिणपादाङ्गुलीनखान्तं यावदमान्तं बोधिचित्तस्य **सा चर्या योगिनो वै प्रतिदिनसमये इष्टसिद्धिप्रदा** येति। इह बोधिचित्तस्य वामदक्षिणनाडीप्रवाहवशेन वामदक्षिणेन गतस्य सर्वकालं मध्यमाप्रवाहेन षट्सु गुह्यादिकमलेष्वधोगमनादूर्ध्व-

15 20 25 30

---

१. ग. च. सेवा। २. ग. च. मध्यमा। ३. ग. च. तृतीया।

गमनं नाम चर्या, सा इष्टसिद्धिर्महामुद्रासिद्धिस्तस्याः प्रकर्षेण [1]दात्रीष्टप्रदेति सिद्धम्। बाह्ये पुनः पञ्चतथागतकुलनारीणां ग्रहणं नारीचर्या, तासु नारीचर्यासु [2]मन्थानं ब्रह्मचर्यम्। तथा[3]नेन योगिना कर्तव्यमिति। तथा [4]कोऽसौ बोधिचित्तस्य नाडीसंचार इत्यूर्ध्वरेतसो गमनं कर्तव्यमिति नियमो मूलतन्त्रे। इति [5]नारीचर्यानियमः ॥ १२५ ॥

5 चिन्ताकाङ्क्षा ज्वरोऽङ्गे वरमुखकमले शुष्कद्रव्याप्रवृत्तिः
कम्पोन्मादश्च घूर्मा प्रभवति मनसो विभ्रमस्तीव्रमूर्च्छा।
धूमाद्या वज्रिणस्ताः प्रकटदशविधाः प्राणिनोऽङ्गेष्ववस्था
लोके ता मन्मथस्य प्रकटितनियता को जिनः कः स कामः ॥१२६॥

या बिन्दोः श्वेतधारा पतति दिननिशं मामकी सा सुरा नो
10 गोक्वाद्यं चक्षुरादेः स्फुरणमनुदिनं नान्यमांसं कदाचित्।
सेवा पञ्चामृतानां स्वकुलभुविगतैर्देवतैः शुद्धिकाये
शून्ये चित्तप्रवेशात् समरसकरणं मैथुनं तन्न योनौ ॥१२७॥
[290b]

दानं त्यागो धनस्याच्युतिरपि मनसः स्त्रीप्रसङ्गाच्च शीलं
15 क्षान्तिः शब्दाद्यवेशो ह्युभयगतिविनाशोऽनिलस्यैव वीर्यम्।
ध्यानं प्रज्ञा च चित्तं सहजसुखगतं सर्वगा सर्वभाषा
तस्याः सत्त्वार्थमृद्धिर्भवनिधनमजप्राप्तिरन्याश्चतस्रः ॥१२८॥

एकाङ्गे शक्तियुक्ते नवपदसहिते पञ्चविंशात्मकाद्ये
ध्याते मुद्रादयो वै कतिपयदिवसैः सिद्धयः संभवन्ति।
20 स्तम्भं शान्तिं च वश्यं भुवननिधनतां वक्त्रभेदैः करोति
भूतानां मण्डलस्थो दनुभुजगकुलं साधयेद् भावितोऽसौ ॥१२९॥

इह पञ्चविंशत्यधिकशतवृत्तात् वृत्तचतुष्टयं सुबोधम्। [6]तेनात्र न विस्तारितमिति ॥ १२६–१२९ ॥

---

१. भो. 'इष्टप्रदेति सिद्धम्' नास्ति, ग. च. छ. सिद्धिप्रदेति। २. ग. स्वमास्थानं। ३. भो. Sal (आनन)। ४. ग. कासौ, क. ख. छ. कोशो। ५. भो. rTsa Bahi sPyod Pa (डनीचर्या)। ६. भो. 'तेनात्र… रितमिति' नास्ति।

इदानीं शान्त्याद्यर्थं देवताभावनोच्यते—

श्वेतः शान्तिं च पुष्टिं स्वमनसि कुरुते रक्त आकृष्टिवश्यं
पीतः स्तम्भं च मोहं कषणघननिभं मारणोच्चाटनं च ।
ध्यातं जप्तं तथैव स्वमनसि कुरुते कायवाक्चित्तवज्रं
भूतानां मण्डलस्थं त्रिभुवननिलये साधयेत् कर्मभेदैः ॥१३०॥ 5

श्वेत इत्यादि । इह कालचक्रो भगवानेकवीरो वा प्रज्ञोपायात्मको वा पञ्चा[1]त्म-
को वा वक्त्रादिभेदैः शान्त्यादिकं भवति । यदा शान्तिं करोति [2]योगी, तदा योगिना
कायवक्त्रनायकं [3]कृत्वा शुक्लवर्णो भावनीयश्चन्द्रमण्डले ललाटस्थः । **श्वेतः शान्तिं
पुष्टिं च** करोति । **रक्त आकृष्टिं वश्यं** च करोति **वाग्वज्र**[4]नायकः सूर्यमण्डले कण्ठस्थो
मनसि ध्यातः सन् । **पीतः स्तम्भनं** [5]**मोहनं च** करोति कालाग्निमण्डले नाभिस्थो 10
ध्यातो ज्ञानवज्रनायक इति । कृष्णो **मारणमुच्चाटनं** [6]**च** करोति [7]विद्वेषं च करोति
हृदये राहुमण्डले चित्तवज्रनायक इति । एवं भूतानां मण्डलस्थो दनुभुजगकुलं साधयेद्
भावितोऽसाविति । दैत्यभुजगानां कुलमष्टविधं तदेव कुलं साधयेद्वक्ष्यमाणं गारुडे नात्र
विस्तारितमिति । **ध्यातं जप्तं तथैव स्वमनसि कुरुत** इति । [291a]एकमुखद्विभुजदेवता
कायादिवर्णभेदेन भाविता वक्ष्यमाणक्रमेण शान्त्यादिकं करोति । एवं **भूतानां मण्डलस्थ-** 15
मिति तोयादिमण्डलस्थं वज्रचतुष्टयम्, [8]**साधयेत् त्रिभुवननिलये कर्मभेदै**रनेकैरिति
नानाविधानैरित्यर्थः ॥१३०॥

इदानीं दुर्दान्तदमनाय गजचर्मपटार्द्रधृग्भावनोच्यते—

पक्षाधिक्योद्भवाभ्यां मणिकनकनिभाभ्यां च सव्येतराभ्यां
स्कन्धारिष्टेभचर्मोद्धृतमपि सकलं पाटयित्वाङ्घ्रियुग्मात् । 20
दैत्येन्द्रासृक्कपालप्रवरकरतलो मृत्युमारास्यहस्तः
क्लेशारिष्टाङ्घ्रिपाती द्व्यधिकजिनकरो भावनीयः परार्थम् ॥१३१॥

पक्षेत्यादि । इह कालविशुद्धया वर्षस्य चतुर्विंशतिपक्षैश्चतुर्विंशतिकरो वज्र-
मालाधरः श्रीमानिति सिद्धः । अस्य पुनर्गजचर्मपटार्द्रधारिणोऽधिकमासेन सहितं यद्वर्षं
त्रयोदशमासात्मकम्, तस्य पक्षैः षड्विंशतिभिर्भुजविशुद्धिः । अतः **पक्षाधिक्योद्भवौ** 25
भुजद्वयौ, ताभ्यां भुजाभ्यां **मणिकनकनिभाभ्यामिति** [9]कृष्णपीताभ्यां [10]**सव्येतराभ्याम्** ।

---

१. क. ख. च. छ. त्मकाद्युक्तो वा । २. भो. 'योगी' नास्ति । ३. छ. 'कृत्वा……
वाग्वज्र' नास्ति । ४. क. छ. वज्र, ग. चक्र । ५. छ. मोहं च । ६. ग. घ. भो.
'च करोति' नास्ति । ७. च. विद्वेषणं च । ८. क. ख. ग. छ. भावयेत् । ९. ग. 'कृष्ण-
पीताभ्यां' नास्ति । १०. च. 'सव्येतराभ्याम्' नास्ति ।

स्कन्धारिष्टेभ इति । स्कन्धमार इव इभस्तस्य क्षयाल्लवमात्रता **चर्म**। तदेवोद्धृतं **सकलं पाटयित्वा** स्कन्धमारेभम् **अङ्घ्रियुग्माद्** धृतमङ्घ्रियुग्मं लम्बमानं गजचर्मपटमिति धृतम् । सव्येन शिरो वाम[1]भागे चरणम् । **दैत्येन्द्र** इति देवपुत्रमारस्तस्याविद्याप्रवृत्तिरिति । **असृगिति** । तस्य क्षयाल्लवमात्रं कपाले रुधिरं **तदसृक्कपालं** यस्य **प्रवरकरतले** स दैत्येन्द्रासृक्कपालप्रवरकरतल इति । **मृत्युमारास्यहस्त** इति । मृत्युमारक्षयाल्लवमात्रावरणमास्यं हस्ते यस्य स मृत्युमारास्यहस्तः । **क्लेशारिष्टाङ्घ्रिपातीति** क्लेशमारक्षयाल्लवमात्रं क्लेशावरणं न निर्दग्धं यत्तत् प्रेतम्, तस्याङ्घ्रितले पतितम्, तेन क्लेशारिष्टाङ्घ्रिपाती । एवं लवमात्रावरणैर्द्व्यधिकजिनकर इति षड्विंशति[2]करः । शेषभुजे कालचक्रवत् प्रह[291b]रणः, मुण्डकपालमालाधरः, व्याघ्रचर्मनिवसनः, अस्थिमुद्रानागेन्द्र[3]भूषणो भावनीयः । **परार्थमिति** दुर्दान्तवैनेयार्थमिति नियमः ॥ १३१ ॥

इदानीं तस्य प्रज्ञाया लक्षणमुच्यते—

मातुस्तत्रैकवक्त्रं यमकरकमले कर्तिका श्रीकपालं
सूर्यादिन्दुः स्वचारं चरति गतिवशाद् द्वादशाधिक्यमेकम् ।
तस्मात् कायप्रभेदैर्भवति जिनपतिर्विश्वमाता तथैव
प्रज्ञोपायाङ्गभावैः समसुखफलदैश्चन्द्रसूर्यप्रचारैः ॥ १३२ ॥

मातुरित्यादि । इह कायभेदेन सूर्यः प्रज्ञा, चन्द्र उपायः । स च चन्द्रः सूर्यचाराद् द्वादशाधिक्यमेकं चारं यावच्चरति मासं प्रतित्रयोदशराशींश्चरति । सूर्य एकराशिं चरति । तेन सूर्यचारवशेन **मातुस्तत्रैकवक्त्रं** मासशुद्ध्या । **यमकरकमलं** हस्तद्वयकमलम् । [4]तस्मिन् करकमले सव्येऽसव्ये **कर्तिका श्रीति** नरकपालम् । **तस्मात् कायप्रभेदैरिति** चन्द्रराशिपक्षभेदैः षड्[5]विंशतिभिः षड्[6]विंशतिभुजो **जिनपतिर्भवति** । **विश्वमाता तथैव** कायभेदैः सूर्यस्यैकराशिः । पक्षभेदैर्द्विभुजा विश्वमातेति । नग्ना मुक्तकेशा शेषा भगवानिवाभरण[7]भूषितेति । एवमुक्तैः **प्रज्ञोपायाङ्गभावैः** । **समसुखफलदैरक्षरसुखफलदैः**, **चन्द्रसूर्यप्रचारैः**[8] श्वासनिश्वास[9]रोधैर्भावनीय इति नियमः ॥ १३२ ॥

इदानीं विश्वरूपभावनोच्यते—

एकाद्यानन्तवक्त्रो बहुकरचरणोऽनेकवर्णस्तमोऽन्ते
प्रज्ञोपायात्मको वै ददति समसुखं नाडिकेन्द्वर्करोधात् ।

---

१. ग. थ. गेन चरणः । २. च. भुजः । ३. ग. च. भो. विभूषणो । ४. भो. 'तस्मिन्' नास्ति । ५.६. ग. त्रिश । ७. ख. ग. च. विभूषितेति । ८. च. रैरिति ९. च. निरोधैं ।

भूम्यादीनां समन्तादमलमणिनिभो भेदकः शून्य एको
नाद्यो नान्तो न मध्यस्त्वविषयविषयः साधितः कालचक्रः ॥१३३॥
[292a]

एकेत्यादि । **इहैकवक्त्रो वा आदिशब्दात्** [1]त्रिमुखो वा चतुःपञ्चाद्यनन्तमुखो वा **बहुकरचरणो**ऽनेककरचरणोऽनेकास्त्रधरः। **अनेकवर्णो**ऽनेकसंस्थानः "विश्वमायाधरो राजा बुद्धविद्याधरो महान्" (ना० सं० ८.३५) शून्यताक्षरधरो भगवान् **प्रज्ञोपायात्मकः**। **तमोऽन्ते** निशाकाले निशायोगेन दिवाकाले दिवायोगेन यः प्रज्ञापारमितायां योगं पश्यति, स आकाशे पश्यति निशायामभ्यवकाशे पश्यति दिवायाम् । एवं विभावितो बिम्बपर्यन्तम् । ततो **नाडिकेन्द्रकंरोधादिति** वामदक्षिणप्राण[2]रोधात्, **ददाति समसुखमिति** परमाक्षरसुखं ददाति[3] । **भूम्यादीनामिति** पृथिव्यादीनां धातूनाम् । **अमलमणिनिभो भेदक** इति । [4]इहामलमणिर्यथा स्पर्शमात्रेण पाषाणादिकं धातुकं रत्नं करोति न भेदको वेधक इति । तथा **शून्य एको** विमलो भूम्यादीनां शरीरधातूनां समन्ताद् वेधक इति । स शून्यतारूपी **नाद्यो नान्तो न मध्योऽविषयविषय** इति । विषयैर्विना विषय-प्रतिभासो मायास्वप्नप्रतिसेनोपमः । **साधितः कालचक्रः** समसुखं ददातीति नियम इति श्रीमदादिबुद्धसाधनमुत्पन्नक्रमेणोक्तम्, अस्य विस्तरो ज्ञानपटले वक्तव्य इति ॥ १३३ ॥

इति श्रीमूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां
द्वादशसाहस्रिकायां विमलप्रभायां
उत्पन्नक्रमसाधनमहोद्देशश्चतुर्थः ।

(५) नानासाधनमहोद्देशः

वज्रवेगं नमस्कृत्य विश्ववज्रधरं प्रभुम् ।
नायकं क्रोधराजानां नानासाधनमुच्यते ॥

क्रोधेन्द्रं वज्रवेगं द्व्यधिकजिनकरं वेदवक्त्रं द्विपादं
पिङ्गाक्षं पिङ्गकेशं जिनपतिमुकुटं तीक्ष्णदंष्ट्राकरालम् ।
सर्पालं व्याघ्रचर्मप्रवरनिवसनं भर्तृवच्छस्त्रहस्तं
मूर्ध्नो मालानिबद्धं सकलजिनकुलैः पञ्चवर्णैः कपालैः ॥१३४॥

क्रोधेन्द्रमित्यादिना । इह **क्रोधेन्द्रं वज्रवेगं** हूँकारवज्रनिष्पन्नं पूर्वोक्तसाधनविधि-[292b]ना । **द्व्यधिकजिनकरमिति** षड्विंशतिभुजं गजचर्मपटधारिणम् । **वेदवक्त्र**-मिति चतुर्मुखम् **द्विपादं पिङ्गाक्षं पिङ्गकेशं जिनपतिमुकुटमित्यक्षोभ्यमुकुटं तीक्ष्ण**-

---

१. भो. gÑis (द्वि) । २. च. निरोधात् । ३. ग. च. तीति । ४. भो. 'इह' नास्ति ।

दंष्ट्राकरालम् । **सर्पालमिति** सर्पभूषणम् । **व्याघ्रचर्मप्रवरनिवसनम्** । **भर्तृवच्छस्त्रहस्तं** कालचक्रवदिति । **मूर्ध्नो मालानिबद्धं सकलजिनकुलैर्विशुद्धैः** । **पञ्चवर्णैः कपालैः** ॥१३४॥

विश्वाब्जे सूर्यमूर्ध्नि स्फुरदमलकरं मण्डले विश्ववर्णे
पादाभ्यां भूतनाथाक्रमितमतिबलात् संस्थितालीढपादम् ।
भूतादींस्त्रासयन्तं ह्यसुरफणिसुरान् ज्ञानसत्त्वैकभूतं
ध्यायन्नेवैकमासं चितिभुवनगतं साधयेद् भूतवृन्दम् ॥१३५॥

इत्थंभूतं **विश्वाब्जे सूर्यमण्डलोपरि स्फुरदमलकरं** स्वच्छं **मण्डलगृहे विश्ववर्णे** एकवीरम्, मध्ये चतुर्द्वारेषु वज्राङ्कुश[1]वज्रवज्रपाश[2]वज्रवज्रघण्टा यथानुक्रमेण दत्त्वा **पादाभ्यां भूतनाथम**पराजितप्रेत[3]नाथ**माक्रमितमतिबलात्संस्थितालीढपादं भूतादींस्त्रासयन्तं** गजचर्मधृतं करतर्जनीभ्याम् **असुर[4]फणिसुरां**स्त्रासयन्तमिति । **ज्ञानसत्त्वैकभूतम्** । एभिर्मन्त्रपदैः, जः हूँ वँ हो **ध्यायन्** योगी, **एवैकमासं चितिभुवनगतं** श्मशानभूमिगतं **साधयेद् भूतवृन्दमि**ति भूतादीनां यो नायकः, स तया मूर्त्या पादतले पातितः सन् सपरिवारः सिद्धिं गच्छति । प्रेतो वा राक्षसादिक इति भूतादिसाधननियमः ॥१३५॥

इदानीं मेघवर्षणाय नागराजसाधनमुच्यते—

नागानब्जाष्टपत्रेष्वपि जयविजयौ पातयित्वाऽर्कमूर्ध्नि
पादाभ्यां स्तम्भयित्वा फणिपतिमिथुनं पद्मपत्रे स्थितानाम् ।
लाङ्गूलाग्रं च सर्वं घनकुलमुदरान् मुञ्चतो वै समन्ताद्
ध्यातः क्रोधेन्द्र एवं कतिपयदिवसैः साधयेन्मेघवृन्दम् ॥ १३६ ॥
[293a]

नागानित्यादि । इह स एव वज्रवेगः **क्रोधेन्द्रो ध्यातः** सन् **साधयेन्मेघवृन्दम्** । **कतिपयदिवसैरि**ति मासदिनैरेवमित्यनेन विधिना । **नागानब्जाष्टपत्रेष्वि**ति । अब्जपूर्वपत्रे कर्कोटः, अग्नौ पद्मः, दक्षिणे वासुकिः, नैर्ऋत्ये शङ्खपालः, उत्तरे अनन्तः, ईशाने कुलिकः, पश्चिमे तक्षकः, वायव्ये महापद्मः, पूर्वाग्नौ कृष्णौ, दक्षिणे(ण)नैर्ऋत्ये रक्तौ, उत्तरेशाने शुक्लौ, पश्चिमवायव्ये पीतौ, **अपि जयविजयौ** हरितनीलौ नागराजानौ **पातयित्वाऽर्कमूर्ध्नि** अर्कमण्डले वामदक्षिणपादतले [5]नाभ्यूर्ध्वं पुरुषाकारावधः सर्पाकारौ शिर उपरि सप्तफणचक्रवाहौ महामणिभिः स्फुरन्तावुत्तानकौ पातयित्वा, [6]अपरे(र)-नागराजान् पातयित्वा तेषां लाङ्गूलाग्रं प्रत्येकं जयोपरि पूर्वोत्तराणाम्, विजयोपरि दक्षिणपश्चिमानाम् । **लाङ्गूलाग्रं च सर्वम्** । एवं **पादाभ्यां स्तम्भयित्वा फणिपतिमिथुनं**

१. २. ख. ग. च. छ. 'वज्र' नास्ति । ३. ग. च. 'नाथ' नास्ति । ४. ग. फणां ।
५. क. नात्यूर्ध्वं । ६. क. यत्र ।

पद्मपत्रे स्थितानां लाङ्गूलाग्रं च सर्वमिति। एवमष्टौ नागराजाः पञ्च फणिनो घनकुलं मेघवृन्दमुदरान्मुञ्चतो वै समन्तात्। एवं क्रोधेन्द्रो ध्यातः श्मशानभूम्यां मासदिनैर्मेघवृन्दं साधयेत्। ततो यथाभिरुचितकाले वर्षापयति, विसर्जनेन [1]विधारयति। [2]इति नागराजसाधननियमः ॥१३६॥

इदानीं कर्मभेदैर्देवतासाधनमुच्यते— 5 T 359

इत्याद्यं देवतानां भवति नरपते साधनं दैवतीनां
प्रत्येकं मण्डलेऽस्मिन् स्वजिनकुलवशात् कर्मभेदैः समस्तैः।
स्तम्भे शान्तौ च वश्ये परधनहरणे मारणोच्चाटनाद्ये
षट्त्रिंशद्योगिनीनां भवति खलु पुनर्जापहोमं स्वबीजैः ॥१३७॥

इत्याद्यमित्यादि। इह मण्डले उक्ताद्यदपरं देवतादैवतीनां साधनं भवति नरपते 10
प्रत्येकं मण्डलेऽस्मिन् ए[293b]कवीरैः स्वजिनकुलवशाद् वैरोचनादिकुलवशात्, कर्मभेदैः समस्तैः साधनं भवति। [3]स्तम्भे शान्तौ वश्ये परधनहरणे मारणोच्चाटनाद्ये वक्ष्यमाणसाधनं षट्त्रिंशद्योगिनीनामन्यासां श्मशानपर्यन्तानां भवति खलु पुनर्जापहोमं[4] च स्व-स्व[5]मन्त्रबीजैर्भवति ॥१३७॥

इदानीं शान्त्यादिध्यानमुच्यते— 15

शान्तौ ध्यानं च शान्तं शशधरधवला देवता शान्तरूपा
रौद्रे ध्यानं च रौद्रं कषणघननिभा देवता रौद्ररूपा।
वश्ये ध्यानं सरागं दिनकरवपुषा देवता रागमूर्तिः
स्तम्भे ध्यानं समूढं वरकनकनिभा देवता स्तब्धरूपा ॥१३८॥

शान्तावित्यादि। इह शान्तौ ध्यानं च शान्तं शशधरधवला देवता शान्तरूपा 20
ध्यातव्येति। रौद्रे मारणाद्ये ध्यानं रौद्रं कृष्णवर्णा देवता रौद्रमूर्तिः। वश्ये ध्यानं सरागं देवता रक्तवर्णा रागमूर्तिः। स्तम्भने ध्यानं मूढं देवता पीतवर्णा स्तब्धरूपेति। यथा शान्तौ तथा पुष्टौ ज्वरोपशमने विषापहरणे च भवति। यथा मारणे तथोच्चाटने विद्वेषे ज्वरसंक्रामणे चेति। यथा वश्ये तथाकृष्टौ स्तोभने ज्वरोत्पादने च। यथा स्तम्भने [6]तथा मोहने कीलने चेति नियमः ॥१३८॥ 25

इदानीं गणकुलैः शान्त्यादिसिद्धिरुच्यते—

शान्तिः पुष्टिश्च राजन् ससुतजिनकुलैः सिद्धयते देवतीभि-
र्विद्वेषोच्चाटनं च प्रकृतिगुणवशात् सिद्धयते क्रोधजाभिः।

---

१. ग. विचार। २. क. ग. छ. भो. इह। ३. ग. च. स्तम्भने। ४. ग. होमश्च।
५. ग. 'मन्त्र' नास्ति। ६. ग. 'तथा ..... कीलने' नास्ति।

वश्याद्यं भूतजाभिः प्रकटदनुकुले कीलनं चासुरीभि-
र्मातृभ्यां सर्वकर्माण्युभयपविकुले मारणं जीवनं च ॥१३९॥

शान्तिरित्यादि। इह **शान्तिः पुष्टिश्च ससुतजिनकुलैरिति**। इह रूप-वेदना-संज्ञा-संस्कारा एतानि चत्वा[294 a]रि जिनकुलानि ससुतानीति। विष्कम्भि-क्षिति-गर्भ-लोकेश्वर-खगर्भ एतानि बोधिसत्त्वकुलानि। एवं लोचना-पाण्डरा-मामकी-तारा जिनकुलानि। गन्धवज्रा-रसवज्रा-रूपवज्रा-स्पर्शवज्रा बोधिसत्त्वकुलानि। एभिः कुलैः शुक्लवर्णैर्भावितैः प्रत्येकैकैश्चन्द्रमण्डले ललाटे पद्मासने उपायैः सितपद्मवरद-हस्तैः, प्रज्ञाभिः सितोत्पलाभयहस्ताभिः शान्तिः पुष्टिश्च सिद्ध्यते। **राजन्नित्यामन्त्रणम्**। चकारान्निर्विषत्वं ज्वरोपशमनं चेति। **विद्वेषोच्चाटनं** चकारान्मारणं विषसंक्रामणं च। **प्रकृतिगुणवशादिति** क्रोधप्रकृतिगुणवशात्, **सिद्ध्यते क्रोधजाभिरिति**। क्रोधजा हूँकारवज्रजा दश क्रोधाः, फ्रेंकारकर्तिजा दश क्रोधभार्याः, हृदये राहुमण्डले क्रोधैरालीढ-पादैर्वज्रपाशहस्तैर्मारणं सिद्ध्यति। खड्गशृङ्खलाहस्तैः सतर्जन्यैर्विद्वेषाद्यं[1] कृष्णवर्णैः क्रूरैरिति। देवीभिः कर्तिकपालहस्ताभिः प्रत्यालीढाभिः खड्गपाशहस्ताभिरिति [2]सिद्ध्यति। **वश्याद्यं भूतजाभिरिति**। इह चर्चिकादिभिरष्टदेवीभिः सूर्यमण्डले कण्ठे विशाखपदाभी रक्तवर्णाभिर्धनुर्बाणहस्ताभिर्वश्यं सिद्ध्यति। आकृष्टाद्यं पाशाङ्कुशहस्ताभिः सिद्ध्यतीति। **प्रकटदनुकुले कीलनं चासुरीभिरिति**। इह श्वानास्याद्यष्टदेवीभिः [3]पीतवर्णाभिः, नाभौ कालाग्निमण्डले पीते मण्डलपदाभिश्चक्रपर्वतहस्ताभिः स्तम्भनं सिद्ध्यति। मुद्गरकीलकहस्ताभिः कीलनं सिद्ध्यति। त्रिशूलनागहस्ताभिः मोहनं सिद्ध्यतीति। **मातृभ्यामिति** वज्रधात्वीश्वर्या प्रज्ञापारमितया वा गुह्यकमले **सर्वकर्माणि** सिद्ध्यन्ति। उदकादिमण्डलभेदेन सितादिवर्णेन पूर्वोक्तेन [4]प्रत्येकैकचिह्नेन पदेन [5]च **मारणं जीवनं च** सिद्ध्यति। वज्रासनेन बिन्दुमध्ये सानन्दा [6]देवता जीवनं [7]भवति, योगबलेन प्राणानाकृष्य च्युतेन बिन्दुना विरक्ता मारणं करोति, पुनः प्रत्युज्जीवनं नास्ति साध्यस्य। तेन तत्साधनं बौद्धयोगिना न कर्तव्यम्, यत्र साध्यस्य प्राणे आकृष्टे सति शुक्रनिर्गमो भवतीति नियमः सर्वकर्मसु [294b] ॥ १३९ ॥

इदानीं सर्वकर्मसाधनानामादिकारणमुच्यते—

आदौ श्रीकालचक्रस्त्रिभुवनजननी यत्नतः साधनीयौ
पश्चात् कर्माणि साध्यानि च भुविनिलये शान्तिकादीनि यानि।
मात्रा पित्रा विहीनो नहि भवति सुतः सर्वदा लोकसिद्ध-
स्तस्माद् द्वौ साधनीयौ समसुखफलदौ नान्यथा कर्मसिद्धिः ॥१४०॥

---

१. ग. च. भो. 'सिद्ध्यति' इत्यधिकम्। २. भो. 'सिद्ध्यति' नास्ति। ३. भो. 'पीतवर्णाभिः' नास्ति। ४. ग. च. प्रत्येक। ५. च. 'च' नास्ति। ६. भो. Lhamo (देवती) ७. ग. च. करोति।

आदावित्यादि। इहादौ योगिना यत्नत इति गुरूपदेशतः साधनीयः **श्रीकालचक्र** इति प्राणवायुर्मध्यमायां प्रवेशितव्यः सदा। **त्रिभुवनजननीति** शून्यताबिम्बम्। तौ द्वौ बिम्बप्राणौ **यत्नतः साधनीयौ**। **पश्चादुक्तानि** सर्व**कर्माणि साध्यानि** भवन्ति **भुवितल-निलये शान्तिकादीनि यानि**। अत्र दृष्टान्तः—**मात्रा पित्रा विहीनो नहि भवति सुतः सर्वदा लोकसिद्धः**। **तस्माद् द्वौ साधनीयौ** बिम्बप्राणौ **समसुखफलदौ नान्यथा कर्मसिद्धिरस्ति**, बिम्बेन प्राणेनासाधितेनेति नियमः॥ १४०॥

इदानीं शान्त्यादिसाधनाय आदिभावनोच्यते—

भर्तुर्हृत्पद्ममध्ये शशिरविशिखिनि स्थापयेन्मूर्ध्नि वज्रं
हूँकारं ज्ञानजातं प्रलयघननिभं पञ्चशूकं सरश्मि।
तन्मध्ये जोऽङ्कुशस्य त्रिभुवनसकलं रश्मिभिः पूरयित्वा
आकृष्य ज्ञानचक्रं त्रिविधभवगतं वज्रमार्गे प्रवेश्य॥१४१॥

सर्वं चन्द्रद्रवाभं स्वकुलिशवदनादुत्सृजेन्मातृपद्मे
तस्मिन् सूर्ये प्रविष्टं भवति समरसं चादिकादिप्रयुक्तम्।
तन्मध्ये ज्ञानबीजं भवति कुलवशात् कर्मणः शान्तिकादे-
स्तेनोत्पन्ना च देवी भवति हि फलदा योगिनो देवता वा॥१४२॥

भर्तुरित्यादि। इह यदा योगी बिम्बं विस्पष्टमवधूत्यां प्राणगतं पश्यति, तदा तद्बिम्बं यादृशं विकल्पयेत् तादृशं पश्यति, तद्बिम्बं **भर्तुरिति**। कालचक्रं पूर्वोक्तं निष्पाद्य ततस्तस्य **हृत्पद्ममध्ये** कर्णिकायां **शशिरविशिखिनीति** चन्द्रसूर्यराहुयोगग्रहमण्डले त्र्यात्मके, अध्यात्मनि ललनारसनाऽवधूत्येकलोलीभूते हृत्कमले। तत्र **स्थापयेद् मूर्ध्नि वज्रं हूँकारपरिणतं पञ्चशूकं प्रलयघननिभं** कृष्णवर्णमि[295a]ति **सरश्मि** पञ्चरश्मि स्फुरदिति। **तन्मध्य** इति तस्य वज्रस्य मध्यवराटके जःकारपरिणतं **वज्राङ्कुशं** भावयेत्। ततस्तस्याङ्कुशस्य **रश्मिभिर्वज्राङ्कुशाकारैस्त्रिभुवनमिति** त्रिधातुकं **सकलं पूरयित्वा** तैर्वज्राङ्कुशैस्त्रिभवाकारं स्वच्छं **ज्ञानचक्रमाकृष्य त्रिविधभवगतं** व्यापकत्वेन यत् तदवधूतीद्वारेणोष्णीषललाटकण्ठहृदयनाभिगुह्य**मार्गे प्रवेश्य**। **सर्वमिति** सर्वाकारं यत्त**च्चन्द्रद्रवाभमिति** बोधिचित्तलक्षणम्, **स्वकुलिशवदनादुत्सृजेन्मातृपद्म** इति स्ववज्र-मुखाद्यथा पुरुषः स्त्रीकमले बोधिचित्तमानन्दितं क्षिपेत्, तथा देवतायोगेन देव्याः पद्मे उत्सृजेत्। मात्रिति वक्ष्यमाणानां जननी यथा गर्भजानां तथैव। **तस्मिन् सूर्ये प्रविष्ट-मिति**। इह यथा स्त्रीयोनौ रक्ते प्रविष्टं बोधिचित्तं समरसं रक्तेन सह भवति, तथा सूर्यमध्ये प्रविष्टं चन्द्रं **समरसं** मातृपद्मे **भवति**। आदियुक्तं चन्द्रद्रवं **कादियुक्तं** सूर्यरजः, प्राणापानयुक्तम्। **तन्मध्ये** प्राणापानमध्ये **ज्ञानबीजमालयविज्ञानलक्षणं भवति**। **कुलवशादिति** पञ्चस्कन्धवासनावशात्। सत्त्वानां विज्ञानं भवति। एवं **कर्मणः शान्ति-कादेर्ज्ञानबीजं भवति**। **तेन** बीजेन **उत्पन्ना** यथा कुमारी वा कुमारो वा, **भवति हि**

T 360

फलदो द्वादशवर्षावधेः षोडशवर्षावधेः, तथा **देवी देवता** उपायो **वा** योगिना भावितेति नियमः। अतो द्वादशवर्षैर्देवी वरदा भवति भाविता, देवश्च षोडषवर्षैर्वरदो भवति। ततः सर्वकर्माणि सर्वसिद्धयः सर्वसौख्यानि **योगिनः** सिद्ध्यन्ति। अन्यथा क्लेशः केवल एवेति सर्वतन्त्रान्तरे कालनियमो वीर्यवतामहर्निशि भावितात्मनाम्, नान्येषां व[295b]र्षशतावधेरिति सिद्धिनियमः ॥१४१-१४२॥

इदानीं चिह्नोत्पादाय ज्ञानबीजान्युच्यन्ते—

जः हूँ वँ होः क्रमेणाङ्कुश इति कुलिशं वज्रपाशश्च घण्टा
ॐ आः हूँ होस्तथोक्तं शशिरविकुलिशं चाक्षरं तद्वदेव ।
ई ॠ ऊ ॡ तथैव प्रकटयरवला वायुवह्न्यम्बुपृथ्व्यो
हः हुं हं फ्रें तथोक्तं रविरपि कुलिशं चन्द्रमा कर्तिका च ॥ १४३ ॥

[1]ज इत्यादि। इह **जः हूँ वँ होः क्रमेणेति** जःकारेण **वज्राङ्कुशो** भवति, तेन परिणतेन वज्राङ्कुशहस्ता देवी वा देवो वा भवति। [2]एवं हूँकारेण **वज्रम्**, तेन वज्रहस्ता भवति। वँकारेण **पाशहस्तेन** पाशहस्ता भवति। होःकारेण **घण्टा**, तया घण्टाहस्ता भवति। **ॐ आः हूँ होः तथोक्तमिति**। तथेति क्रमेण पूर्ववत्। ॐकारेण चन्द्रमण्डलं **शशीति**। आःकारेण सूर्यमण्डलं **रवीति**। हूँकारेण राहुमण्डलं **कुलिशमिति**। होःकारेण कालाग्निमण्डलम**क्षरं तद्वदेवेति**। **ई ॠ ऊ ॡ तथैवेति**। यथाक्रमेण ईकारपरिणतः खड्गः, तेन परिनिष्पन्ना देवता खड्गहस्ता देवो वा। एवं ॠकारेण मणिर्बाणो वा, तेन तेजोदेवता मणिहस्ता बाणहस्ता वा [3]देवी। ऊकारेण पद्मम्, तेन तोयदेवता पद्महस्ता उत्पलहस्ता वा देवी[4]। ॡकारेण चक्रम्। चक्रेण पृथिवीदेवता चक्रहस्ता [5]देवी वा। एवं **यरवला** अपि यथाक्रमेण **वाय्वग्नितोयपृथिवी**देवता इति। तथा हः इति **रविमण्डलम्**। हुँ इति रविमूर्ध्नि वज्रं नायकस्य। हमिति **चन्द्रमण्डलम्**। फ्रें इति चन्द्रमण्डलोपरि **कर्तिका**। नायिकाचिह्ननियमः। [6]तथोक्तमिति ॥ १४३ ॥

इदानीं देवतायां [7]साधितायां सत्यां शान्त्यादिकर्मकरणाय देवतासमाधिरुच्यते—

ध्यात्वा चन्द्रार्कमध्ये त्वलिकलिसहिते तोयबीजात्मकाब्जं
तेनोत्पन्नैकवक्त्रां यमकरकमलां देवतीं चन्द्रवर्णाम् ।
आरूढां श्वेतनागं सितजलजकरां चाभयां श्वेतवस्त्रां
श्वेतालङ्कारयुक्तां प्रहसितवदनां प्रेषयेत् साध्यवेश्म ॥ १४४ ॥
[296a]

---

१. ख. 'ज इत्यादि' नास्ति। २. ग. इतः परं पत्र १२४ 'एवं हूँकारेण""च रक्तम्' नास्ति। ३. च. भो. 'देवी' नास्ति। ४. ५. भो. 'देवी' नास्ति। ६. च. 'तथोक्तमिति' नास्ति। ७. छ. 'साधितायां' नास्ति।

ध्यात्वेत्यादि। इह पूर्वोक्तमातृगुह्यपद्मे **चन्द्रार्कमध्ये आदिकादिसहिते तोयबीजात्मकाब्ज**[1]मिति वकारपरिणतं शुक्लं पद्मम्, **तेनोत्पन्नैकवक्त्रा द्विभुजा** [2]देवता **चन्द्रवर्णा। आरूढा श्वेतनागमिति** ऐरावतमारूढा। **सितजलजकरेति** श्वेतपद्महस्ता देवता देवी श्वेतोत्पलहस्ता। **अभया** दक्षिणेऽभयहस्ता। **श्वेतवस्त्रा श्वेतालङ्कारयुक्ता** मुक्ताफलाभरणा **प्रहसितवदना** भाव्या। तां च **प्रेषयेत् साध्य**[3]**वेश्मनि** ॥ १४४॥ 5

तस्मात् साध्यं गृहीत्वा पुनरपि च विभोर्मण्डले संप्रविष्टां
भर्तुश्चाज्ञां प्रलब्ध्वा पुनरमृतघटैर्लोचनाद्याः प्रहृष्टाः।
तं साध्यं स्नापयन्ति प्रवरदशविधाः शक्तयः पूजयन्ति
रूपाद्याः पोषयन्ति प्रकटदशभिर्लास्यादयस्तोषयन्ति ॥ १४५ ॥

भूताख्याश्चाभयन्ते प्रवरदशविधाः क्रोधजाः पालयन्ति 10
नागिन्यश्चुम्बयन्ति त्वमरयुवतयो द्वादशालिङ्गयन्ति।
चण्डाः कुर्वन्ति रक्षां सकलभुवितले शान्तिपुष्ट्यर्थहेतो-
रेवं साध्यस्य सर्वं परमसुखकरं योगिना भावनीयम् ॥ १४६ ॥

अपरवृत्तद्वयेनोक्तं सुबोधम्। **तस्मादित्यादिना, एवं साध्यस्य सर्वं परमसुखकरं योगिना भावनीयमिति** पर्यन्तम् ॥ १४५–१४६ ॥ 15

ह्रीं चन्द्रादित्यगर्भे कुवलयकलिकाबाणमेवेक्षुचापं
तेनोत्पन्नार्कभासोभयकरधनुषा पूरिताकर्णबाणा।
प्रत्यालीढं च रूढा कमलशशधरा प्रेषयेत् साध्यवेश्म
साध्यं हृन्नाभिगुह्ये शिरसि च वदने ताडयित्वा शरेण ॥ १४७ ॥
[296b] 20

कण्ठे पाशेन बद्ध्वा क्षुभितमपि तया मण्डले नीयमानं
चण्डाभिर्वस्त्रहीनं कृतमपि नियतं वेष्टितं नागिनीभिः।
देवीभिर्भर्त्स्यमानं सलगुडमुषलैस्ताडितं क्रोधजाभि-
र्भूताभिर्भीष्यमानं खरनखनिहितं चैव लास्यादिभिश्च ॥ १४८ ॥

वज्राभिर्नष्टबुद्धिं क्षितिजलहुतभुग्वातजाभिश्च बद्धं 25
भर्तुः पादे विवस्त्रं सकलमदहतं पातितं शक्तिभिश्च।

---

१. क. ज्ञमिति। २. भो. Lhamo (देवती)। ३. छ. वेश्मेति।

एवं कृत्वा तु वश्यं पुनरपि च विभुस्तोषयेत् तत्र साध्यं
तद्वत् पाशाङ्कुशाभ्यां भवति बहुविधाकृष्टिकर्म त्रिधातौ ।। १४९ ।।

तथा ह्रीं चन्द्रादित्यगर्भे इत्यादिना तद्वत् **पाशाङ्कुशाभ्यां भवति बहुविधाकृष्टिकर्म त्रिधातौ** इति पर्यन्तं वश्याकृष्टौ वृत्तत्रयं सुबोधम् ॥ १४७–१४९ ॥

5 ध्यात्वा सूर्येन्दुमध्ये कषणघननिभं दीर्घहूँकारजासिं
तेनोत्पन्ना विवर्णा त्वसिकरकमला तर्जनीपाशहस्ता ।
प्रत्यालीढोष्ट्रमूर्ध्नि प्रकुपितवदना प्रेरिता साध्यवेश्म
साध्यं पाशेन बद्ध्वा कुपितवदनया मण्डलद्वारनीतम् ।। १५० ।।

उष्ट्रे यःकारजाते वरपवनगतौ भर्तृवाक्येन साध्यं
10 तत्रारूढं प्रकृत्या शिखिचलवलयं प्रेरयेद् यावदेव ।
एवमुच्चाटनं वै भवति सुरपतेः किं पुनर्मानुषस्य
विद्वेषेऽप्युष्ट्रहीनौ बहुकृतकलहौ सव्यवामे च नेयौ ।। १५१ ।।

तथा विद्वेषोच्चाटने **ध्यात्वा सूर्येन्दुगर्भे कषणघननिभं दीर्घहूँकारजासिम्** इत्यादिना वृत्तद्वयं सुबोधम् ॥ १५०–१५१ ॥

15 ध्यात्वा सूर्येन्दुगर्भे ल इति परिणतं पीतवर्णं सुचक्रं
तेनोत्पन्नैकवक्त्रा वरकनकनिभा शृङ्खलाचक्रहस्ता ।
कूर्मे[297a] दैत्यासनस्था त्वतिमृदुगमना प्रेरिता साध्यवेश्म
साध्यं चक्रेण भेध्यं प्रपतितमवनौ शृङ्खलाबद्धपादम् ।।१५२।।

आनीतं मण्डले वै जिनपतिवचसा पातयित्वा धरण्यां
20 मेरुस्तन्मूर्ध्नि देयो वरकनकमयः स्तम्भने साध्यकाये ।
षट्सन्धौ कीलनार्थं त्वपि कुलिशमयैः कीलकैः कीलनीयः
सर्पैः सन्दंश्यमानः पतित इह महौ मोहने भावनीयः ।।१५३।।

ध्यात्वा सूर्येन्दुगर्भे ल इति परिणतं पीतवर्णं सुचक्रम् इत्यादि स्तम्भन-कीलन-मोहने वृत्तद्वयं सुबोधम् ॥ १५२–१५३ ॥

25 ध्यात्वा सूर्येन्दुगर्भे तडिदनलनिभां कर्तिकां फ्रेंस्वभावां
तेनोत्पन्ना प्रचण्डा प्रलयघननिभा कर्तिका शुक्तिहस्ता ।

प्रत्यालीढा विवस्त्रा ह्युपरि हरिरिपोः प्रेरिता साध्यवेश्म
साध्यं केशेषु शीघ्रं धृतमपि च तया मण्डले वस्त्रहीनम् ॥१५४॥

आनीतं श्रीश्मशाने जिनपतिवचसा गृध्रकाकैः शृगालैः
सर्वाङ्गात् पीतरक्तं पललमपि तथा भक्षितं सर्वधातुम् ।
साध्यस्यैवं समस्तं प्रवरभुवितले मारणे भावनीयं 5
ध्यानेनानेन शक्रो व्रजति यमपुरं किं पुनर्गर्भजातः ॥१५५॥

पुनर्ध्यात्वा सूर्येन्दुगर्भे तडिदनलनिभां **कर्तिका** क्रैस्वभावाम् इत्यादि मारणे वृत्तद्वयं सुबोधम् । एवं वश्यादिनववृत्तानि सुबोधानि तेन न लिखि(व्याख्या)तानीति ॥ १५४–१५५ ॥

इदानीं शान्तावपरं ध्यानमुच्यते— 10

शान्तौ पुष्टौ च शुक्लं भवति कुलवशाद् ध्यानमप्यम्बुबीजाद्
वश्याकृष्टौ च रक्तं त्वपि तनुदहनं वह्निबीजात्मकं च ।
विद्वेषोच्चाटने च प्रलयघननिभं वायुबीजस्वभावं
संस्तम्भे कीलनाद्ये वरकनकनिभं भूमिबीजात्मकं च ॥१५६॥
[297 b] 15

शान्तावित्यादि । इह प्रथमं तावदेकवीरमात्मानं कालचक्रं भावयेच्चतुर्विंशतिभुजं शान्त्यादिवश्यादिकर्मणि, मारणादिस्तम्भनादिकर्मणि षड्विंशतिभुजम् । ततो झटित्याकारेण **शान्तौ पुष्टाविति** । इह कालचक्रस्य हृदये तोयमण्डले तोयबीजेनोत्पन्ना देवता तोयात्मिका **शुक्ला** । **कुलवशादु**कारकुलवशात् । तस्या **ध्यानं** शुक्लध्यान**मप्यम्बुबीजात्** शान्तौ पुष्टौ च भवति । तथा **वश्याकृष्टौ च रक्तम्** । **अपि** 20 **तनुदहनं वह्निबीजात्मकं** कण्ठे वह्निमण्डले ऋकारकुलवशादिति । **विद्वेषोच्चाटने च** कृष्णं **वायुबीजस्वभावं** ललाटे वायुमण्डले प्राणस्य इकारकुलवशात् । **स्तम्भने कीलनाद्ये** पीतं **भूमिबीजात्मकं** नाभौ पृथिवीमण्डले लकारकुलवशादिति ॥ १५६ ॥

नीलाभं शून्यबीजाद् भवति हि हरितं मारणे जीवने च
पृथ्वीकृत्स्नं समन्ताज्जलनिधिगमने वायुकृत्स्नं च वृष्टेः । 25
नाशार्थं वह्निकृत्स्नं त्वपि महिवलयं द्रावणार्थं च वह्ने-
र्नाशार्थं तोयकृत्स्नं भवति खगमने शून्यकृत्स्नं त्वदृश्ये ॥१५७॥

[1]**नीलाभं शून्यबीजाद्** गुह्ये ज्ञानमण्डले अंकारकुलवशान्**मारणे**। उष्णीषे शून्यमण्डले **हरितमकारकुलवशाज्जीवने च**। एवं षट्स्थानेषु षट्कुलवशात् प्राण[2]संयमात् कर्मसिद्धिर्भगवतोक्ता। इदानीं पृथिव्यादिकृत्स्नभावनोच्यते पृथ्वीत्यादि। इह यदा योगिनां देवता सिद्धा भवति, तदा नाभौ पृथिवीमण्डलात् **पृथ्वीकृत्स्नं** समुद्रोपरि सेतुबन्धवन्निश्चार्य भावयेत्। **जलनिधिगमने** समुद्रोपरि गच्छति, यथा स्थले तथा जले पृथ्वीकृत्स्नध्यानेनेति। एवं **वायुकृत्स्नं** चाति**वृष्टेर्विनाशार्थमि**ति। ललाटे वायुमण्डलान्निश्चार्य वायुकृत्स्नं मेघोपरि भावयेत्तेन मेघवृष्टिं विनाशयति। अथ पञ्चधात्वात्मकं कूटागार[298a]मात्मन उपरि भावयेत्। तेन ध्यानेन योगी जलेन न स्पृश्यते कूटसोमापर्यन्तम्। न मेघवृष्टिः प्रविशति वर्षमाणापीति **मूलतन्त्रे** प्रोक्तम्। एवं वायुकृत्स्नं[3] निश्चार्याग्निर्मूर्ध्नि [4]वृष्टेर्विनाशार्थमिति **वह्निकृत्स्नमि**ति। इह कण्ठे वह्निमण्डला[5]दग्निबीजपरिणता[6] ज्वाला पृथिव्युपरि भावयेत्। निश्चार्य ताभिर्ज्वालाभि**र्महिवलयं** द्रवति द्रुतकनकवत्। एवं भूमि**द्रावणार्थं** वह्निकृत्स्नं भावनीयम्। एवं **वह्नेर्नाशार्थं तोयकृत्स्नमि**ति। इह देवताहृदये तोयमण्डलात् तोयबीजजनितं तोयकृत्स्नं निश्चार्याग्निमूर्ध्नि भावयेत्। तेनाग्निः शीतलो भवति, न दहनक्षम इति। **भवति खगमने शून्यकृत्स्नमि**ति। उष्णीषे आकाशमण्डले आकाशकृत्स्नं द्रव्यरहितं भावयेत्, तेनाकाशगमनं भवतीति। तथा चौराद्युपद्रवेऽ**दृश्यो** भवति तेनैव ध्यानेनेति नियमः ॥१५७॥

इदानीं तिर्यगुपद्रवशमनाय ध्यानमुच्यते—

> ध्यानं पञ्चाननं वै भवति गजपतेर्भङ्ग एवाग्निबीजात्
> तार्क्ष्यं नागेन्द्रभङ्गे भवति हि धवलं तोयबीजात्मकं च।
> अष्टाङ्घ्रि खड्गिसिंहे प्रलयघननिभं वायुबीजात्मकं स्यात्
> खड्गाख्यं वाजिशत्रोरवनिकुलवशात् क्रोधजं दैत्यभङ्गे ॥१५८॥

ध्यानमित्यादि। इह यदा गजपतेर्भयं भवति, तदा कण्ठे **अग्निबीजादि**ति रेफादुत्पन्नं पञ्चाननं भावयेत्। तत् **पञ्चाननध्यानं भवति गजपतेर्भङ्ग**विषये। एवं **तार्क्ष्यं नागेन्द्रभङ्गे** हृदये तोयमण्डले **तोयबीजात्मकं** तद्वद् **धवलं भवति**। **अष्टाङ्घ्रिमि**ति अष्टपदम्। **खड्गिभये सिंह**भये [7]कृत्स्नं ललाटे वायुमण्डले **वायुबीजात्मकं** चेति। **खड्गाख्यं वाजिशत्रोरि**ति महिषभये। **अवनिकुलवशादि**ति पीतं नाभौ पृथिवीमण्डले लकारबीजादिति। **क्रोधजं दैत्यभङ्गे** उष्णीषे शून्यमण्डले श्यामे। नीले गुह्ये ज्ञानमण्डले वा हूँकारबीजात्मकं [8]क्षुंकारबीजात्मकं दैत्यादीनां भङ्गविषये क्रोधजं सुखकरं योगिनां भवतीति ध्याननियमस्तिर्यग्भङ्गाय ॥ १५८ ॥ [298b]

---

१. च. शून्यं शून्यबीजाद्। २. च. संयमनात्। ३. क.ख.च.छ.भो. 'निश्चार्याग्निमूर्ध्नि' नास्ति। ४. ग. 'वृष्टेर्विनाशार्थमिति' नास्ति। ५. ग. च. द्वह्निबीज। ६. ग. तात्। ७. ग. च. भो. कृष्णं। ८. च. क्षः, छ. क्षूं।

इदानीं कर्मसाधनायादिनियम उच्यते—

श्रीमन्त्रं बुद्धबिम्बं प्रथममपि विभोर्योगिना साधनीयं
पश्चात् सिद्धचन्ति कर्माण्यपरिमितगुणान्यर्कभेदैः स्थितानि ।
मन्त्रे बिम्बे त्वसिद्धे त्रिभुवननिलये सिद्धचते नैव किञ्चित्
तस्माद् राजन् स्वचित्ते व्यपगतकलुषे साधयेन्मन्त्रबिम्बम् ॥१५९॥ 5

श्रीमन्त्रमित्यादि। इह योगिनां कर्मसिद्धये प्रथमं साधनीयं श्रीमन्त्रमिति। ॐ आः हूँ इति साधनीयं वक्ष्यमाणजापहोमविधिनाऽपरमन्त्रसिद्धये। एवं बुद्धबिम्बमिति शून्यताबिम्बं प्रत्यक्षं करणीयमपरध्यानसिद्धये। एवं **श्रीमन्त्रं बुद्धबिम्बं प्रथममपि विभोर्योगिना साधनीयं पश्चात् सिद्धचन्ति कर्माणि, अपरिमितगुणान्यर्कभेदैरिति** द्वादशभेदैः **स्थितानि। मन्त्रे बिम्बे त्वसिद्धे त्रिभुवननिलये सिद्धचते नैव किञ्चित्, तस्माद् राजन्** 10 **स्वचित्ते व्यपगतकलुषे साधयेन्मन्त्रबिम्बमादौ** विभोरिति नियमः ॥ १५९ ॥

इदानीं खड्गादिसिद्धचर्थमसुरेन्द्रसाधनमुच्यते—

शूरः संग्रामभूमौ पतित इति तथा लम्बितस्तस्करो वा
अष्टम्यां भूतरात्रौ नृप चितिभुवने स्नापयेदष्टकुम्भैः ।
गन्धैर्धूपैः प्रदीपैर्बहुविधचरुकै रक्तपुष्पैः प्रपूज्य 15
वज्रन्यासं प्रकृत्या शिरसि च हृदये मूर्ध्नि नाभौ च कण्ठे ॥१६०॥

शूर इत्यादिना। इह **संग्रामभूमौ शूरो** राजपुत्र एकनाराचप्रहारेण **पतितो**ऽन्यो वा योधः, तथा [1]वृक्षे **लम्बितस्तस्करो वा शूरः। अष्टम्यां वा भूतरात्रौ** चतुर्दश्यां वा कृष्णपक्षे। **नृपे**त्यामन्त्रणम्। **चितिभुवने** श्मशाने **स्नापयेत्** तं शवम्। **अष्टकुम्भै**र्वश्यकर्मण्युक्तैर्जयविजयाभ्यां च। ततो **गन्धैर्धूपैः प्रदीपैर्बहुविधचरुकै रक्तपुष्पैः प्रपूज्य** रक्त- 20 वस्त्रेण परिधानं कृत्वा। **वज्रन्यासं प्रकृत्या शिरसि च हृदये मूर्ध्नि** [2]**नाभौ च कण्ठे** [299a] इति। ललाटे [3]ॐ, हृदये हूँ, उष्णीषे हं, नाभौ [4]हां, कण्ठे आः, गुह्ये क्षः। एवं पूर्वोक्तं हृदयं शिरः शिखा कवचं नेत्रमस्त्रं चेति षडङ्गन्यासं कृत्वा शवस्यात्मशरीरस्यापि रक्षां कृत्वा देवतायोगेन ॥ १६० ॥

कृत्वा कुण्डे त्रिकोणे यदरुणरजसा गर्भपद्मं सचिह्नं 25
पत्रे चिह्नं जिनानां दिशि विदिशि तथा देवतीनां स्वचिह्नम् ।

---

१. क. ख. छ. वृक्षे वाऽवलम्बितः। २. क. ख. च.छ. नाभ्यादिके च। ३. छ. व।
४. च. भो. होः।

बाह्ये रेखात्रये वै दशदिशि वलये क्रोधचिह्नानि तद्वत्
प्रेतं तस्यावसव्ये त्वसिकरकमलं मण्डलात् सव्यपादम् ।।१६१।।

ततस्त्रिकोणे कुण्डे पूर्वोक्ते [1]यदरुणरजसा गर्भपद्मं रक्तं तत् सचिह्नमिति बाणचिह्नं कर्णिकायाम्, अथवा "सर्वकर्मणि वज्रम्" इति वचनात् रक्तवज्रम्। पत्रे चिह्नं जिनानामिति। [2]पूर्वे पत्रे खड्गः, दक्षिणे [3]रत्नम्, उत्तरे पद्मम्, पश्चिमे चक्रमिति। दिशि विदिशि तथेति। देवतीनां स्वचिह्नमिति। [4]पूर्वोक्ते मातृदोषे यथाग्नौ कर्तिका, दैत्यपत्रे वज्राङ्कुशः, वायव्ये वज्रपाशः, [5]ईशे त्रिशूलम्। बाह्ये रेखात्रये वै दशदिशि वलये क्रोधचिह्नानि तद्वदिति। यथा तथागतानां तथा दिक्षु, यथा देवीनां तथा विदिक्षु ऊर्ध्वे उष्णीषस्य वज्रम्, अधः सुम्भराजस्य पर्शुरिति, त्रिप्राकाराणां रक्षणायेति। एवं रजोमण्डले पूर्वोक्तविधिना चिह्नानि दत्त्वा श्मशानभूम्यां मण्डले कलशादिकं [6]संस्थाप्य प्रतिष्ठां कृत्वा गन्धादिभिरिष्टदेवतानां पूजां कृत्वा क्षेत्रपालादीनां बलिं दत्त्वा ततस्तं प्रेतं तस्यावसव्य इति कुण्डस्योत्तरे रजोमण्डलस्य दक्षिणद्वारस्य दक्षिणे। एवं मण्डलकुण्डयोर्मध्ये प्रेतं सव्यपादमिति दक्षिणपादमुत्तरशिरः। असिकरकमलमिति खड्गहस्तमुत्तानकं त्रिरेखापरिवेष्टितम् ॥ १६१ ॥[299b]

पूर्वोक्तान्मातृदोषाज्जिनपतिकुलिशैरात्मरक्षां प्रकृत्य
मन्त्री कुण्डस्य सव्ये सरुधिरपललैर्होममेवं प्रकुर्वन्।
ॐ ह्रीं फ्रें हूँ फडन्तं दशगुणितशतं होमयेत् तस्य मन्त्रं
बद्ध्वा वज्रासनं वै त्वमरगिरिरिवाकम्प एवार्धरात्रम् ।।१६२।।

एवं पूर्वोक्ताद् मातृदोषाद् मण्डले जिनपतिकुलिशैः पूर्वोक्तैरात्मरक्षां प्रकृत्य मन्त्री कुण्डस्य सव्ये सरुधिरपललैर्होममेवं प्रकुर्वन्निति। अत्र कुण्डे क्षत्रियगृहाग्निं खदिरकाष्ठैः प्रज्वाल्य ततः पूर्वोक्तविधिना पावकावाहनादिकं कृत्वा देवतायोगेनास्य मन्त्रेण महामांसं सरुधिरं दशशतगुणितमिति सहस्रमेकं होमयेत् तस्य मन्त्रमिति। ॐ ह्रीं फ्रें हूँ फट्, इत्ययं तस्य मन्त्रः। अनेनापि तस्य न्यासः कार्यः। ललाटे ॐ, कण्ठे ह्रीं, हृदये फ्रें, नाभौ हूँ, गुह्ये फडिति न्यासः। बद्ध्वा वज्रासनं वै अमरगिरिरिवाकम्प एवार्धरात्रं यावत् प्रहरमेकं होमयेदिति ॥ १६२ ॥

पूर्णे होमे ज्वलन् वै ललदसिरसनस्तीक्ष्णदंष्ट्रस्त्रिनेत्रो
गर्जन् विस्फोटयन् यः क्षितिमपि चरणैः साधकं भीषयन् सः।
स्थित्वा कुण्डान्तराले हसति कहकहं नृत्यते भीमकाय-
स्तं दृष्ट्वा भीतमन्त्री व्रजति यमपुरं नष्टचित्तः क्षणेन ।।१६३।।

---

१. च. 'यदरुण' नास्ति। २. ख. ग. च. छ. भो. पूर्व। ३. ग. रक्त। ४. ग. पूर्वोक्त। ५. ख. ईश, च. ईशाने। ६. क. ख. ग. छ. स्थाप्य।

ततः सहस्रे होमे पूर्णे सति ज्वलन् वै ललदसिरसनस्तीक्ष्णदंष्ट्रस्त्रिनेत्रो गर्जन् विस्फोटयन् यः क्षितिमपि चरणैः साधकं भीषयन्, सः प्रेतकाये प्रविष्टोऽसुरेन्द्र इत्थंभूतः स्थित्वा कुण्डान्तराले हसति कहकहं नृत्यते भीमकायः । तं दृष्ट्वा भीतमन्त्री व्रजति यमपुरं नष्टचित्तः क्षणेन ॥ १६३ ॥ T 362

भेतव्यं नासुरेन्द्रादपि चितिभुवने मन्त्रिणा सिद्धिहेतो-
र्दृष्ट्वा निष्कम्पचित्तं वदति पुनरिदं साधितो भूतनाथः ।
सिद्धोऽहं ते[300a] सुवीर वद सकलमहं साम्प्रतं किं करोमि
इत्युक्ते साधकेन स्वमनसि रुचितं प्रार्थनीयं परार्थम् ॥१६४॥ 5

स्पर्शं खड्गं रसेन्द्रामृतफलगुटिका रोचनं चाञ्जनं च
यल्लेपं पादुकां चाददतु मम भवान् लौकिकीमष्टसिद्धिम् । 10
विद्वेषोच्चाटनं वै भुवननिधनतां स्तम्भनाकृष्टिवश्यं
सर्वं मे यातु सिद्धिं स च वदति पुनः सर्वमेतत् करोमि ॥१६५॥

भूतेन्द्रं साधयित्वा व्रजति नरपते साधको यत्र तत्र
पाताले चान्तरीक्षे सुरवरभवने मेरुशृङ्गेऽब्धिपारे ।
तत्रारूढोऽसिहस्तः क्षितितलनिलये लोककार्यं करोति 15
तस्मात् सत्त्वार्थहेतोः परमकरुणया साधनीयोऽसुरेन्द्रः ॥१६६॥

अत ऊर्ध्वं वृत्तत्रयं सुबोधम्, भेतव्यं नासुरेन्द्राद् इत्यारभ्य साधनीयोऽसुरेन्द्र इति पर्यन्तम् । एवमसुरेन्द्रसाधननियमः ॥ १६४-१६६ ॥

इदानीं मन्त्रलक्षणमुच्यते—

नामाद्यं चित्तवज्रं भवति नरपते देवतादेवतीनां 20
वाग्वज्रं सर्वनामाक्षरमपि च ततश्चाधिकं कायवज्रम् ।
तस्मात् प्रत्यङ्गमन्त्रो भवति बहुविधः पाठसिद्धः कदाचिद्
भाव्यो याज्यश्च जाप्यः स्वजिनकुलवशाच्चित्तवाक्कायभेदैः ॥१६७॥

नामाद्यमित्यादि । इह त्रैधातुके स्थिरचलधर्माणां यद्यस्य नाम, तस्य नामस्याद्यक्षरं नामाद्यं तदेव चित्तवज्रं भवति नरपते देवतादेवतीनां वाग्वज्रं सर्वनामेति । इह यथा तारा पाण्डरा मामकी लोचना नाम, तदेव वाग्वज्रम् । एवं सर्वेषां भावानामिति । एवं सर्वनामाक्षरमपि ततश्चाधिकं कायवज्रमिति । इह यथा—ॐ तारे तुतारे तुरे स्वाहा, ॐ पाण्डरवासिनि वरदे स्वाहा, ॐ मामकि [300b] किरि किरि स्वाहा, ॐ 25

लोचने वसुदे स्वाहा—इत्यादीनि नामस्याधिकाक्षराणि चित्तवागक्षरसहितानि कायवज्राणि, **तस्मात्** कायवज्रात् परतो यो मालामन्त्रः स **प्रत्यङ्गमन्त्रमित्युच्यते**। यथा हस्तपादादयः कायावयवास्तथा नामावयवा मन्त्रनामस्येति। स च **बहुविधो भवति**। **पाठसिद्धः** [1]**कदाचित्**। इह यथाभिषेकपटले प्रत्यङ्गमन्त्रस्तद्यथा—ॐ आः हूँ [2]हो हं क्षः ह् क्ष् म् ल् व् र् य कालचक्र दुर्दान्तदमक १ जातिजरामरणान्तक २ त्रैलोक्यविजय ३ महावीरेश्वर ४ [3]वज्रकाय ५ वज्रगात्र ६ वज्रनेत्र ७ इत्यादि प्रत्यङ्गमन्त्रः कदाचित् पाठसिद्धः पूर्वजन्मसाधित इह जन्मनि पुनः साधितः सिद्धो भवति। ततः कर्म करोति। इह चित्तादिना मन्त्रो **भाव्यो** नामाद्यः, **याज्यो** नाममन्त्रः, **जाप्यो** नामाधिकः। **स्वजिनकुलवशादिति**। अक्षसूत्रादिभेदैः। **चित्तभेदेन** भाव्यः, **वाग्भेदेन** याज्यः, **कायभेदेन** जाप्य इति नियमः। अत्र नामाद्यम् ॐकारं विना देवताकारं ध्यायात्। सर्वनाम्नि ॐकारमादौ यजेत् कायवज्रेण। एवं प्रत्यङ्गम् आदिकायवज्र[4]मन्त्रे चित्तवज्रं हूँ फडिति दत्त्वा जपेत्। एवं सर्वसत्त्वानां कायवाक्चित्तभेदः॥ १६७॥

इदानीं सामान्यमन्त्रसाधने [5]जापसंख्योच्यते—

प्रत्येकं मन्त्रजातेः प्रभवति नियतः कोटिजापः प्रसिद्धो
होमस्तस्माद् दशांशः प्रकृतिगुणवशात् सिद्धयते यावदेव।
पश्चाच्छान्त्यादिकेषु प्रभवति फलदो नान्यथा सिद्धिमेति
सध्यानैर्जापहोमैर्व्रतनियमयुतैर्मन्त्रयोनिश्च साध्या ॥१६८॥

प्रत्येकमित्यादि। इह **प्रत्येकं मन्त्रजातेः** कायवज्रस्य **कोटिजापो भवति प्रसिद्धः**। **होमस्तस्मात्** कोटिजापाद् **दशांश** इति दशलक्षहोमो भवति। वाग्वज्रस्य **प्रकृतिगुणवशादि**त्यभिषेकपटलोक्तद्रव्यैः शान्त्यादिगुणवशात् कु[301a]ण्डासनादिविधिना **सिद्धयते यावदेव। पश्चाच्छान्त्यादिकेषु प्रभवति फलदो नान्यथा सिद्धिमेति**। एवमुक्तैः **सध्यानैर्जापहोमैर्व्रतनियमयुतैर्मन्त्रयोनिश्च साध्या** इति।

इह यासां देवतानां यो यः समयः, सा देवता तेन समयेन तेन [6]व्रतनियमेन साध्या भवति, अन्यथा न सिद्धयति। तथा नामाक्षरं साध्यस्य यदि साधकनामाद्यक्षरस्य शत्रुर्भवति, तदा साधकस्य मरणं भवति। [7]अथोदास्यं भवति, तदा क्लेशो भवति। अथ मित्रं भवति, तदा सिद्धो भवति देवता। स्वरेण शत्रुणा [8]मरणम्। व्यञ्जनशत्रुणा रोग इति। अपरे शत्रवः सर्वे वाय्वक्षरास्तोयाक्षराणाम् स्वराणां

---

१. च. क्वचित्। २. च. भो. होः। ३. भो. 'वज्रभैरव' इत्यधिकः। ४. भो. 'मन्त्रे' नास्ति। ५. च. जप। ६. च. व्रतेन तेन नियमेन। ७. ग. 'अथो ... भवति' नास्ति। ८. ग. 'मरणम् ... शत्रुणा' नास्ति।

स्वराः, व्यञ्जनानां व्यञ्जनानीति। एवं तोयाक्षराण्यग्न्यक्षराणाम्, अग्न्यक्षराणि भूम्यक्षराणाम्, भूम्यक्षराणि वाय्वक्षराणाम्, आकाशाक्षराणि सर्वेषां मित्राणि, सर्वेषामक्षराणि आकाशस्य मित्राणीति। तथा भूमेस्तोयं मित्रम्, वह्नेर्वायुर्मित्रम्, वायोर्वह्निः, तोयस्य भूमिः, एवं मित्रवर्गः। वायोस्तोयमुदास्यम्, वह्नेः पृथिव्युदास्या, तोयस्य अग्निरुदास्यः, पृथिव्या वायुरुदास्यः। एवं सर्वं ज्ञात्वा ततो मन्त्रदेवतां साधयेत्, इति मूलतन्त्रे नियमः। तथा मूलतन्त्रे भगवानाह—

अकुह॒कश्च ये कण्ठ्याः स्वरव्यञ्जनलक्षणाः।
शून्यं वाय्वादिधातूनां मित्रत्वेन सदा स्थिताः॥

इचुयशाश्च तालव्याः स्वरव्यञ्जनलक्षणाः।
वायुधातुसमुद्भूताः शत्रवस्तोयजन्मिनाम्॥

ऋटुरषाश्च मूर्द्धन्याः स्वरव्यञ्जनलक्षणाः।
तेजोधातुसमुद्भूताः शत्रवो भूमिजन्मिनाम्॥

उपुव॒पाश्च ये चौष्ट्याः स्वरव्यञ्जनलक्षणाः।
तोयधातुसमुद्भूताः शत्रवो वह्निजन्मिनाम्॥

लृतुलसाश्च ये दन्त्याः स्वरव्यञ्जनलक्षणाः।
पृथ्वीधातुसमुद्भूताः शत्रवो वायुजन्मिनाम्॥

[१]वायोर्मित्रं सदा शून्यम् उदास्यं वायुशक्तितः।
तोयस्य मेदिनी मित्रमुदास्योऽग्निरशक्तितः॥

पृथिव्या उदकं मित्रम् उदास्यो वायुरेव च।
प्रणवं वर्जयित्वा तु मन्त्रस्याद्यक्षरं कुलम्॥

चित्तं तदेव मन्त्राणां बिम्बनिष्पत्तिकारणम्।
अन्यव्यञ्जनसंयुक्तं मन्त्रस्याद्यक्षरं यदा॥

तदा पूर्वं तयोर्ग्राह्यं प्रथमोच्चारहेतुतः। [301b]
स्वरव्यञ्जनभेदेन तदेव द्विविधं भवेत्॥

प्राणस्य शत्रुर्मित्रं च कायस्यापि निगद्यते।
प्राणस्य शत्रवो मित्रा उदास्या वा स्वराः स्मृताः॥

कायस्य शत्रवो मित्रा उदास्या व्यञ्जनात्मकाः।
स्वरः शत्रुर्हरेत् प्राणं साधकस्य न संशयः॥

---

१. भो. rTag Tu rLuṅ Gi Grogs Po Me. Tha Mal Pa Chu Nus Med Phyir. Me Yi Grogs Po rLuṅ Yin Te. Tha Mal Pa Sa Nus Med Phyir.
(वायोर्मित्रं सदा वह्निरुदास्यं तोयमशक्तितः।
वह्नेर्मित्रं च वायुः स्याद् उदास्या पृथ्वी अशक्तितः॥).

रोगाद्यं कुरुते काये शत्रुर्व्यञ्जनलक्षणः ।
एकवर्गेऽपि ये पञ्च काद्या व्यञ्जनधर्मिणः ॥
पृथिव्यादिकुलं तेषां ज्ञातव्यं मन्त्रसाधने ।
ङञणमननित्येते मित्रा वाय्वादिजन्मिनाम् ॥
T 363. 5 घझढभधधित्येते शत्रवस्तोयजन्मिनाम् ।
गजडबददित्येते शत्रवो भूमिजन्मिनाम् ॥
खछठफथथित्येते शत्रवो वह्निजन्मिनाम् ।
कचटपततित्येते शत्रवो वायुजन्मिनाम् ॥
मन्त्रादौ संस्थितो वर्णः स्ववर्गेऽपि परेऽपि वा ।
10 साधकानां द्विधा वर्णो जन्मजो नामजो भवेत् ॥

इत्यादि **मूलतन्त्रे** भगवतो नियमः ।

पुनस्तत्रैव षड्विधं कर्म प्रथमाक्षरस्योक्तम् । तद्यथा—

मन्त्रादिव्यञ्जनानां वा स्वराणां साधनाय च ।
कर्मास्य षड्विधं प्रोक्तं सेवाजापं प्रकुर्वताम् ॥
15 प्रथमं ताडनं कुर्यादावेशं दाहनं ततः ।
आप्यायनं ततो मन्त्री पोषणं तोषणं ततः[1] ॥
सविसर्गेण शून्येनाक्रान्तो मन्त्रपूर्वकः ।
मूर्छावस्थामवाप्नोति अस्त्रराजेन ताडितः ॥
लक्षजापेन चित्तस्य मूर्च्छिता मन्त्रदेवता ।
20 अहङ्कारपरित्यक्ता साधकस्य [2]वशा भवेत् ॥
एवं सा वायुनाक्रान्ता आवेशं याति योगिनः ।
दह्यते वह्निनाक्रान्ता तोयेनाप्यायते तथा ॥
पृथ्वी मूर्ध्नि स्थिता पुष्टिं जप्ता [3]गच्छति देवता ।
मूर्ध्नि बिन्दुकलाक्रान्ता तोषिता वरदा भवेत् ॥
25 एवं षड्लक्षजापेन पूर्वसेवा निगद्यते ।
आदिबुद्धे महातन्त्रे सुगतेनेष्टसिद्धये ॥
फट्कार हूँ तथा वौषट् नमः स्वाहा वषट् तथा ।
षट्कर्माणि यथासंख्यं मन्त्रान्ते कारयेद् व्रती ॥
आदौ वैरोचनं दत्त्वा पुनर्जापं समारभेत् ।
30 कोटिजापं ततः कृत्वा होमं [4]कुर्याद्दशांशिकम् ॥

---

१. ग. 'ततः''''विसर्गेण' नास्ति । २. ग. च. भो. वशी । ३. ग. 'गच्छति''''क्रान्ता' नास्ति । ४. ग. कृत्वा दशां ।

तन्त्रोक्तविधिना सर्वं ततः सिद्धयति देवता।
वरं ददाति सा सिद्धा मन्त्रिणां प्रार्थितं च यत् ॥
अन्या जातिः क्रिया चान्या कालो मन्त्रः कुलं तथा।
अन्यस्थानं दिगाधारं निष्फलं सर्वकर्मसु ॥
पुस्तकात् पठितैर्मन्त्रैः [1]संप्रदायविवर्जितैः। 5
साधनं ये प्रकुर्वन्ति ते क्लिश्यन्ति नरा भुवि ॥
किंनाम संप्रदा[302a]यं तत् पुस्तकाद्यदि लभ्यते।
तथा लिखितपाठेन नेयार्थेन प्रकाशितम् ॥
आकाशं भोक्तुमिच्छन्ति मन्त्रसद्भाववर्जिताः।
पुस्तकात् पठितैर्मन्त्रैर्देवादीनां च साधकाः ॥ 10
स्वचित्तदृढवीर्येण मन्त्रजापेन वा भवेत्।
ईप्सिता लौकिकी सिद्धिः साधकानां परार्थिनाम् ॥
मन्त्रजापैस्तथा होमैश्चैत्यपूजाविधिक्रमैः।
[2]क्रियाहीना न सिद्धयन्ति यथाभूतमिदं वचः ॥
शास्तॄणां बोधिसत्त्वानां देवानां साधनं प्रति। 15
तस्मात् सर्वप्रयत्नेन तदेव गृह्यते बुधैः ॥

इत्येवं चित्ताक्षरं साधयेत् पूर्वसेवां कृत्वा। अत्र मन्त्रताडनादिकम्। तद्यथा—प्रथमं तावत् तारामन्त्रं प्रदर्श्यते। तेन विधिनाऽपरेऽपि ज्ञेयाः। ॐ ह्ताः फडिति ताडनमन्त्रस्य लक्षजापः, ओं य्ताः हूँ इत्यावेशनम्, र्ताः वौषडिति दहनम्, ॐ व्ताः नम आप्यायनम्, ॐ ल्ताः स्वाहा पोषणम्, ॐ तां वषट् तोषणम्, 20 षट्लक्षजापः। षडयुतं होमयित्वा ततः—ॐ तारे स्वाहेति वाग्वज्रस्य जापो दशलक्षाणि। दशांशहोमः। ततः ॐ तारे तुत्तारे तुरे स्वाहा। इति कायवज्रजापः। कोटिपर्यन्तं दशलक्षं होमयेदेवं मन्त्रदेवता वरदा भवति। नान्यथा योगिनामिति। चित्तवाक्कायभेदैर्भाव्यो याज्यो जाप्यश्च प्रत्येको मन्त्रः षट्लक्षं दशलक्षं शतलक्षमिति नियमो **मूलतन्त्रे** भगवतः ॥ १६८ ॥ 25

इदानीं गुलिका साधनमुच्यते—

सिद्धा बद्धा त्रिलोहैः खगपललगुटी खेचरत्वं ददाति
श्वाऽश्वादीनां प्रदीपैरपहरति तनौ क्षुत्पिपासादिरोगान्।
नेत्रैः पित्तैश्च तेषां भवति वरनृणामञ्जनं भूप्रभेदं
अन्तर्धाने च वश्ये युवतिमनहरं साधितं श्रीश्मशाने ॥१६९॥ 30

---

1. भो. Man Nag (उपदेश)। २. भो. brTse Ba (कृपा)।

सिद्धेत्यादि। इह प्रथमं गुलिकासाधनमन्त्रं पूर्वोक्तविधिना साधयित्वा ॐ कालचक्र आज्ञासिद्ध गुलिकां साधय स्वाहा। ततो देवताप्रत्यादेशो भवति गुलिकासाधनाय।

[1]तत्रायं विधिः—**सिद्धा** इत्यभिषेकपटलोक्तानां षट्त्रिंशत्खेचरीणां पञ्चषट्दशाष्टाष्टवर्गाः, तेषामेक[302b]वर्गस्य पललं साधयित्वा छायाशुष्कचूर्णं कृत्वा पञ्चामृतसहितम्, ततोऽक्षोभ्येण पीषयित्वा चणकप्रमाणां गुलिकां कृत्वा एवं सिद्धेति। **बद्धा त्रिलोहैरितीह** कायवाक्चित्तशुद्धया चन्द्रार्कराहुभेदेन तारं ताम्रं कान्तलोहं द्विलोहम्। प्रत्येकबद्धा त्रिलोहैर्बद्धेति। **खगपललगुटी खेचरत्वं ददाति** वक्ष्यमाणक्रमेण साधितेति। तथा **श्वाऽश्वादीनां** भूचरजलचराणाम् अङ्गस्य **पललैर्गुलिका सिद्धा बद्धा त्रिलोहैरपहरति तनौ क्षुत्पिपासादिरोगानिति** गुलिकासाधननियमः।

इदानीमञ्जनसाधनमुच्यते—**नेत्रैरित्यादि**। इहाञ्जनसाधनमन्त्रं पूर्ववत् साधयित्वा ततोऽञ्जनं साधयेदिति। ॐ कालचक्राज्ञासिद्धाञ्जनं साधय स्वाहा। ततः खगानां नेत्राणि गृहीत्वा सूक्ष्मचूर्णं कृत्वा बोधिचित्तेन भावयेत्। तदेवाञ्जनं निधानसिद्धये **भूप्रभेदं भवति। पित्तैश्चेति** श्वाऽश्वादीनां पित्तैरञ्जनं कृत्वा स्त्रीपुष्पेण भावयेत्। तदेवाञ्जनमन्तर्धानं करोति, **अन्तर्धानविषये वश्यविषये युवतिमनोहरं** भवति **साधितं श्रीश्मशाने** ॥ १६९ ॥

कृष्णाष्टम्यां निशायामथ मनुदिवसे मण्डलं वर्तयित्वा
रक्षां कृत्वा समन्ताच्च पललगुलिकां वाञ्जनं तस्य मध्ये।
कृत्वा संपूजयित्वा सुसुरभिकुसुमैर्मन्त्रजापं प्रकुर्याद्
रश्मीन् मुञ्चन्ति यावन्नभसि रविरिव ग्राह्यमुद्धृत्य तस्मात् ॥१७०॥

तत्रायं विधिः—**कृष्णाष्टम्यां निशायाम् अथ मनुदिवस** इति कृष्णचतुर्दश्यां रात्रौ **मण्डलं वर्तयित्वा** पूर्वोक्तदैत्येन्द्रसाधने यद् **रक्षां कृत्वा समन्तात्** पूर्वोक्तां **च**। ततो मण्डलकर्णिकायां **गुलिकां वाञ्जनं** वा कपालस्थम्, **तस्य मध्ये** स्थापयेदिति। एवं पललं गुलिकां वाञ्जनं तस्य मध्ये **कृत्वा संपूज्य सुसुरभिकुसुमैस्तथा** पूर्वोक्तं बल्यादिकं दत्वा ततो **मन्त्रजापं प्रकुर्यात्**। पूर्वोक्तमनेन विधिना कालचक्राज्ञया **रश्मीन् मुञ्चन्ति यावद्** गुलिकाम् अञ्जनानि वा तावन्मन्त्रं[303a] जपेत्। ततो **ग्राह्यमुद्धृत्य तस्माद्** अवधेः, यदि रश्मीन्न मुञ्चन्ति, तदा पुनर्मन्त्रसाधनं कुर्यात्, यावद्देवताप्रत्यादेशो भवति। ततो गुलिकासंख्यया नरान् गृहीत्वा गुलिकाविद्याधरो भवति। एवमञ्जनविद्याधरः। खड्गेन खड्गविद्याधरः। एवं रत्नादिनापि। तत्र मन्त्रः—ॐकालचक्र आज्ञासिद्ध खड्गं साधय स्वाहा। एवं रत्नादिष्वादौ कालचक्रमिति नियमः। तत्रायसं खड्गं कृत्वा देवतानियमेन साधयेत्। स्फाटिकं रत्नं कृत्वा रौप्यं कमलं सौवर्णं चक्रं

---

१. ग. 'तत्रायं... गारुडवृत्ता' नास्ति।

सर्वलोहमयं वज्रं घण्टाऽप्येवं कर्तिकाऽप्यायसेति चिह्नसाधननियमः। एवं त्रिशूल-पश्वादिकानि सर्वास्त्राणि साधयेत्। यद्यदस्त्रं साधयेत् स तेन चिह्नेन तत्तत् कुलविद्याधरो भवति कालचक्राज्ञयेति। अथ देवतानियमेन सिद्धरसवत् सप्तावर्तं मिलति, तदा साधनं विना खेचराः सिद्धयो भवन्ति, इति मूलतन्त्रे नियमः। इति गुलिकादिसाधनविधिः ॥ १७० ॥ 5

जीवे दूते सजीवे गगनदिशि गते मृत्युमाप्नोति दष्टो
दूतः प्रश्नोऽसमो यो बहुसुखफलदो मृत्युदोक्तः समो यः।
दूतः सर्पादिनाम प्रवदति हि ततो मृत्युमाप्नोति दष्टः
पृच्छा प्राणप्रवेशे यदि भवति शुभा निर्गमे साऽशुभा स्यात् ॥१७१॥

दूतो वामाग्रपादः कथयति युवतीं दक्षिणाग्रो नरं च 10
स्वाङ्गं हस्तेन यत्र स्पृशति स मनुजो दष्टमत्र प्रदेशे।
प्रोत्फुल्लं नेत्रवक्त्रं कथयति मरणं कर्णमूले च कृष्णः
शब्दो हृत्पुण्डरीके यदि भवति मनाक् संग्रहं तत्र कुर्यात् ॥१७२॥

आदौ रक्षाविधानं भवति सुखकरं दष्टकस्यात्मनश्च
पृथ्वीतोयाऽग्निवाता गगनमपि तथाऽङ्गुष्ठकादौ नियोज्य। 15
लाद्या हान्ताः क्रमेणोरुजठरहृदये वक्त्रमध्ये ललाटे
हूँक्षूँह्यह्यादिनागा दशविषमसमा ह्रस्वदीर्घप्रभेदैः ॥१७३॥
[303b]

वामाङ्गे ह्रस्वबीजं श्रवणगलगतं कक्षकुक्षोरुदेशे
सव्याङ्गे दीर्घमेव प्रभवति फणिनां सृष्टिसंहारयोगैः। 20
रक्षां कृत्वा जिनाख्यां गुळसुसमशरेणाहिबीजान्वितेन
हुंक्षूंयुक्तेन शीघ्रं सुनिहतहृदयः स्तोभमायाति दष्टः ॥१७४॥

पृथ्वीबीजे ललाटे चरणगतखजे स्तम्भमायाति शीघ्रं
तोये मूर्ध्नि प्रविष्टे शिखिनि च जठरे निर्विषत्वं प्रयाति।
वायोर्बीजे ललाटे शिखिनि च हृदये संक्रमो वै विषस्य 25
शून्ये मूर्ध्नि प्रविष्टे चरणगतमहो छेदनं वै विषस्य ॥१७५॥

श्वेतो बिन्दुर्ललाटे त्रिविधमपि विषं निर्विषं वै करोति
रक्तः स्तोभं प्रवेशं कषणघननिभः स्तम्भनं पीतवर्णः।

वर्ति प्राणप्रवाहे त्रिकटुकलुलितां योजयेन्निर्विषत्वे
अङ्गुल्या लम्बिकायां विकसितवदने टङ्कणं योजयेद् वा ॥१७६॥

वज्री जातिः कुमारी त्रिकटुकलवणं लाङ्गली देवदाली
ब्राह्मी क्षारोऽश्वगन्धा दिनकरसहिता वन्ध्यकर्कोटकी च ।
5 विण्मांसं शुक्ररक्तं सममपि गुलिका कारिताऽक्षोभ्यपिष्टा
भूतं भूतज्वरं वा स्थिरमुरगविषं घ्राणदत्ता निहन्ति ॥१७७॥

सूर्यादौ सप्तवारे दिननिशिसमये सप्तभागावसाने
शून्या मन्दार्कमध्ये प्रवहति कुलिका मृत्युरूपाऽर्धनाडी ।
नागक्रीडां न कुर्यात् त्रिविधमपि विषं भक्षणीयं न तत्र
10 तस्यामेवाहिदष्टो व्रजति यमपुरं भूतलब्धोऽस्त्रभिन्नः ॥१७८॥

मध्याह्ने चार्धरात्रे दिननिशिसमये नित्यवारप्रभेदात्
शून्याब्धौ सन्धिमध्ये प्रवहति कुलिका कालदष्टैकनाडी ।
प्रत्यूषेऽस्तङ्गतेऽर्के पुनरपि च तथा कालनाडी च मृत्यो-
रेतान्यास्यानि राहोः प्रतिदिनसमये वेदितव्यानि सम्यक् ॥१७९॥
15 [304a]

आदित्येऽनन्तभोगो दिननिशिसमये चादिभागे दिनस्य
पश्चाच्छेषोरगाणामुदय इह भवेत् सप्तवारप्रभेदात् ।
खर्तुः खच्छिद्रखेषुः खयुगखवसवः खाद्रिखाग्निश्च नाड्यो
भोगाः सूर्यादिवारादपि वसुफणिनां भुक्तिभेदाद् विषं स्यात् ॥१८०॥

20 विप्रोऽनन्तो हिमाभः कुलिक इति नृपो वासुकिः शङ्खपालो
रक्तो वैश्यो महाब्जो वरकनकनिभस्तक्षकस्तद्वदेव ।
शूद्रः कर्कोटकोऽब्जः कषणघननिभश्चान्त्यजो विश्ववर्णो
जन्मस्थानं च तेषां जलशिखिधरणीमारुताकाशधातुः ॥१८१॥

पादात् कट्यन्तपीतो गरुड इति तथा नाभिसीम्नो हिमाभ
25 आकण्ठाद् रक्तवर्णः कषणघननिभो भ्रूलतां यावदेव ।
तस्माद्वै विश्ववर्णः फणिकुलसहितो मुद्रितः पञ्चतत्त्वै-
र्ध्यातस्तन्मुद्रया वै हरति फणिविषं भूतरोगादिकं च ॥१८२॥

क्षेंकारं पक्षिनाथं स्वहृदयकमले भावयेत् सूर्यमूर्ध्नि
नागालङ्कारयुक्तं सकलकुलवशात् पञ्चवर्णं स्फुरन्तम् ।
पक्षिस्वाहान्तमादि प्रणवमपि ततः पक्षिनाथस्य मन्त्रं
जप्त्वा तं कोटिमेकं फणिकुलसहितं साधयेत् पक्षिनाथम् ॥१८३॥

ताक्ष्र्ये सिद्धे फणीन्द्राः फणिपतितनयाः किङ्करत्वं प्रयान्ति　5
भूता यक्षा ग्रहाश्च प्रवरभुवितले डाकिनीमातरश्च ।
मन्त्राकृष्टिं प्रयान्ति ग्रहगणसकलं जल्पते कालदष्टः
तस्मात् सत्त्वार्थहेतोः प्रथममपि नरैः साधनीयः खगेन्द्रः ॥१८४॥

तत एकसप्तत्यधिकशतवृत्ताद्[1] गारुडवृत्तानि सुबोधानि। तेनात्र न लिखि-
(व्याख्या)तानीति ॥ १७१-१८४ ॥　10

इदानीं शान्त्यादौ यन्त्राण्युच्यन्ते—

वेदेष्वष्टौ दलेष्वेव नृपतिषु रदेष्वब्धिषट्सु द्विजेषु
गर्भे साध्यः स्वदिक्षु प्रथममपि युगं यादयोऽष्टौ दलेषु ।
एयाद्याः षो[304b]डशेषु त्रिगुणितदशकाः कादिहक्षा द्विजेषु
सन्ध्यापत्रेषु साध्यस्तिथिगुणितयुगेष्वेव लान्ताः समात्राः ॥१८५॥　15

वेदेष्वित्यादि । इहाभिषेकपटलोक्तन्यग्रोधपत्रादिके श्रीखण्डादिना शीतादिलेखन्या यन्त्राणि लेख्यानि शान्त्यादीनि । तत्रायं क्रमः—प्रथमपरिमण्डले चतुर्दलानि, द्वितीयेऽष्टौ, तृतीये षोडश, चतुर्थे द्वात्रिंशत्, पञ्चमे चतुःषष्टिः, षष्ठे द्वात्रिंशदिति । यथा शरीरे उष्णीषे हृदये ललाटे कण्ठे नाभौ गुह्ये षट्चक्राणि, तथा यन्त्रलिखने षट् परिमण्ड-लानीति । तत्र चतुर्दलमध्ये साध्यनाम । **वेदेष्विति** चतुर्दलेषु दिक्षु प्रथमम् अ अं　20
युग्ममिति । अ पूर्वे अं उत्तरे । आ पश्चिमे । अः दक्षिणे । इति प्रथमपरिमण्डले । अष्टाब्ज-पत्रेष्विति **अष्टदलेषु यादयः** । इ ई पूर्वेऽग्नौ । ऋ ॠ याम्ये नैर्ऋत्ये । उ ऊ उत्तरेशाने । ऌ ॡ पश्चिमे वायव्ये । इति द्वितीयपरिमण्डले । एवं **नृपतिष्विति** तृतीयपरिमण्डले **षोडशदलेषु एयाद्या** इति पूर्वादिचतुर्दलेषु ए ऐ य या, दक्षिणदलेषु, अर् आर् र रा उत्तरदलेषु ओ औ व वा, पश्चिमदलेषु अल् आल् ल ला । इति तृतीये परिमण्डले ।　25
रदेष्विति द्वात्रिंशद्दलेषु **त्रिगुणितदशका** इति त्रिंशत् **कादयो हक्षा** इति, **द्विजेष्विति** । तत्र पूर्वादिपञ्चदलेषु च छ ज झ ञ, दक्षिणपञ्चदलेषु ट ठ ड ढ ण, उत्तरे प फ ब भ म, पश्चिमे त थ द ध न, एवमीशानमारभ्य पूर्वपत्रे मकाराक्षरमारभ्य पत्रत्रये क ख ग

---

१. भो. bCu bSi (चतुर्दश) इत्यधिकम् ।

इति । [1]आग्नेयादारभ्य दक्षिणे ञकारादारभ्य पत्रत्रये घ ङ छ इति । नैर्ऋत्यादारभ्य पश्चिमे णकारादारभ्य पत्रत्रये स⁀पष इति । वायव्यादारभ्य उत्तरे नकारादारभ्य पत्रत्रये श⁀कह इति । एवं द्वात्रिंशद्दलेष्विति चतुर्थपरिमण्डले । **अब्धिषट्ष्विति** चतुःषष्टिदलेष्विति **साध्यः** । पत्रेषु चतुर्षु पूर्वे दक्षिणे पश्चिमे उत्तरे साध्यनाम यथा, [2]तथा मध्ये । एवं पञ्चस्थानेषु साध्य नाम । **तिथिगुणितयुगेष्विति** षष्टिदलेषु यथासंख्यं **लान्ताः समात्रा** इति । हयरवलाः समात्रा द्वादशमात्रासहिताः [305a]षष्टिः षष्टिदलेषु ततः साध्यनाम पूर्वादौ दक्षिणावर्तेन य या यि यी यृ यॄ यु यू यॢ यॣ यं यः इति द्वादशदलेषु, ततो दक्षिणे साध्यनाम्नो र रा रि री रृ रॄ रु रू रॢ रॣ रं रः इति द्वादशदलेषु, उत्तरे साध्यनाम्नो व वा वि वी वृ वॄ वु वू वॢ वॣ वं वः इति द्वादशदलेषु, पश्चिमे साध्यनाम्नो ल ला लि ली लृ लॄ लु लू लॢ लॣ लं लः इति द्वादशदलेष्विति । ततः पूर्वे साध्यस्य अपरपत्रे ह, पश्चिमे हा, उत्तरे हं, दक्षिणे हः, एवं वामावर्तेन हि ही ईशानान्तम्, हृ हॄ अग्न्यन्तम्, हु हू वायव्यन्तम्, हॢ हॣ नैर्ऋत्यान्तमिति । साध्यस्य नामाद्यक्षरमिति कर्णिकायाम् द्वितीयं पूर्वे **सन्ध्यापत्रे**, तृतीयं दक्षिणे, चतुर्थमुत्तरे, पञ्चमं पश्चिमे । ते[3] हूँ आः ॐ हो इति चित्तवाक्कायज्ञानाक्षराणि नामाद्यक्षरसहितानि लेख्यानि ।। १८५ ।।

> **आद्येकैकस्वराभ्यां मकरघटवशाद् दीर्घह्रस्वाश्च पञ्च**
> **द्वात्रिंशद् बाह्यपत्रेष्वपि समहृदया वज्रतीक्ष्णादिवर्णाः ।**
> **बाह्ये शान्त्यादिकर्मण्यपि च वयरला मण्डलान्येव तेषां**
> **वर्णा गर्भोत्तमाङ्गाः शिखिचलचरणा वश्य आकर्षणे च ।।१८६।।**

अथाद्येकैकस्वराभ्यां मकरघटवशाद् दीर्घह्रस्वाश्च पञ्चेति । इह मकरादिलग्नेष्वधिदेवाः का खा गा घा ङा इत्यादयः । पूर्वे साध्यचित्ताक्षरस्य दक्षिणावर्तेन चा छा जा झा ञा मीने, तथा ञ झ ज छ चेति मेषे, एवं दशपत्रेषु । तथा दक्षिणे वाग्वज्रस्य टादयो दश, उत्तरे कायवज्रस्य यादयो दश, पश्चिमे ज्ञानवज्रस्य तादयो दश, शेषदलेषु विंशतिषु पश्चिमे पञ्चदलेषु कादयः पञ्च दीर्घाः, पूर्वे ङादय पञ्च ह्रस्वाः, दक्षिणे सादयः पञ्च दीर्घाः, उत्तरे⁀कादयः पञ्च ह्रस्वाः, एवं षष्टिवर्णाः पञ्चमे परिमण्डले । **द्वात्रिंशद् बाह्यपत्रेष्विति** । इह गुह्यकमले द्वात्रिंशद्दलविशुद्ध्या द्वात्रिंशत्पत्रे[305b]षु षष्ठे परिमण्डलेऽपि **समहृदया वज्रतीक्ष्णादिवर्णा** इति । तद्यथा 'वज्रतीक्ष्ण दुःखछेद' इति ईशानमारभ्याग्नेयपर्यन्तम्, ततो दक्षिणे 'प्रज्ञाज्ञानमूर्तये' इति, तथा पश्चिमे कायवागीश्वर अ इति । तथा उत्तरे 'अरपचनाय ते नमः' इति वज्रतीक्ष्णादिवर्णाः । एवं षट्चक्रात्मकं यन्त्रं लिखित्वा अभिषेकपटलोक्तविधिना **बाह्ये शान्त्यादिकर्मण्यपि च वयरला मण्डलान्येव तेषामिति** । इदं यन्त्रं शान्तिपुष्टौ ज्वरापहरणे निर्विषीकरणे ।

---

१. ग. अग्नौ दक्षिणे । २. च. भो. 'तथा' नास्ति । ३. अन्यत्र 'दे' गृहीतपाठस्तु भोटानुसारी ।

उदकमण्डलेन यन्त्रं वेष्टयेत्, वकारेण वा। ततश्चन्द्रमण्डलमध्ये क्षिपेत्, हस्तिमध्ये वा। एवं मारणाद्ये वायुमण्डलेन, वश्याद्ये तेजोमण्डलेन, स्तम्भनाद्ये पृथिवीमण्डलेन वेष्टयेत्। शेषमभिषेकपटलोक्तं कर्तव्यमिति। इह यन्त्रे **वर्णा गर्भोत्तमाङ्गा** इति गर्भशिरसो लेख्याः। **शिखिचलचरणा** इति दक्षिणचरणाः। सर्वेषां मेरुरुत्तरस्थः। गर्भकर्णिका इति **वश्ये आकर्षणे च** ॥ १८६ ॥ T 365

शान्त्यादौ गर्भपादाः शिखिचलशिरसो मन्त्रिणा लेखनीयाः
पूर्वोक्तैः शान्तिपुष्टि भुवननिधनतोच्चाटनाकृष्टिवश्यम्।
सस्तम्भं मोहनं च त्रिभुवननिलये चक्रमेतत् करोति
जापैर्होमैश्च साध्यः प्रथममिह महावज्रतीक्ष्णादिमन्त्रः ॥१८७॥

तथा **शान्त्यादौ गर्भपादा** इति उत्तरपादा मेवंभिमुखाः। **शिखिचलशिरस** इति दक्षिणशिरसः। एवं मारणाद्ये पूर्वचरणाः पश्चिमशिरसः, स्तम्भनाद्ये पूर्वशिरसः पश्चिमचरणा इति। प्रत्येक[1]पत्रे **लेखनीया मन्त्रिणा पूर्वोक्तै**रित्यादि सुबोध इति षट्चक्रयन्त्रनियमः ॥ १८७ ॥

इदानीं यमान्तकयन्त्रमुच्यते—

अष्टारे द्वादशारे दिशिविदिशिगतं षोडशारेऽन्तरे च
साध्यः कोणेषु मध्ये प्रभवति यमराजासदोमेरुणाद्यो।
तस्माद् गर्भारमध्याद् भवति दनिरयक्षेच्च तस्मान्निरन्ते
ॐ ह्रीः ष्ट्रीः तस्य बाह्ये भवति च विकृतादाननाद् हूँ द्विधा फट् ॥१८८॥
[306a]

अष्टार इत्यादि। इह न्यग्रोध[2]पत्रादौ यन्त्रं लेखनीयम्। प्रथमपरिमण्डल**मष्टारं** द्वितीयं **द्वादशारं** तृतीयं **षोडशार**मिति। तत्राष्टारेषु **दिशिविदिशिगत**मिति दिशि यमाद्यक्षरं गतम्, विदिशि पत्रे साध्यनामाक्षरं गतम्, षोडशारे चान्तरान्तर-दलेष्वष्टस्विति। एवं **साध्यः कोणेषु**। प्रथमपरिमण्डले **मध्ये** कर्णिकायां **प्रभवति य** पूर्वे, **म** द्वादशारे पूर्वे **रा**, द्वितीये **जा**, तृतीये **स**, चतुर्थे पत्रे **दो** प्रथमाष्टारे। दक्षिणे **मे**। पुनर्द्वादशारे। पञ्चमे पत्रे **रु** षष्ठे **ण**, सप्तमे **यो** पुनरष्टारे। पश्चिमपत्रे **द**। पुनर्द्वादशारे। अष्टमे **नि**, नवमे **र**, दशमे **य**। पुनरष्टारे उत्तरे **क्षे**। पुनर्द्वादशारे एकादशे **च्च**, द्वादशे **नि**। तथाह—

य म रा जा स दो मे य य मे दो रु ण यो द य।
य द यो नि र य क्षे य य क्षे य च्च नि रा म य ॥

---

१. भो. ḥKhrul ḥKhor (यन्त्रे)। २. क. ख. यन्त्रा।

इति **मूलतन्त्रे**। एकाधिपतिना षोडशाक्षराणि षोडशदलेषु। एवं **मध्ये प्रभवति यमराजासदोमेरुणाद्यो तस्माद् गर्भारमध्याद् भवति दनिरयक्षेच्च तस्मान्निरन्त** इति। अष्टारे द्वादशारे नियमः। ततः षोडशारे साध्यनामान्तरान्तरे पत्रे इदं मन्त्रं लिखेत्—ॐ ह्लीः ष्ट्रीः विकृतानन हुँ हुँ फट् इति ॥ १८८ ॥

एवं कक्षान्तराले भवति नरपते साध्यनामैष मन्त्रो
विद्वेषे मृत्युवश्ये प्रभवति य म रा क्षे द मे दो स चाद्याः।
स्तम्भाकृष्टौ च मोहेऽपि च बलकरणे शान्तिकोच्चाटने च
गर्भात् तस्मिन् यकारो व्रजति गुणवशात् पूर्ववद्वाह्यसर्वम् ॥१८९॥

एवं कक्षान्तराले भवति नरपते साध्यनामैष मन्त्रो विद्वेषे मृत्युवश्ये इति। इह मध्येऽधिदेवो विद्वेषे **य**, मृत्यौ **म**, वश्ये **रा प्रभवति**। तथा **क्षे द मे दो स चाद्या** इति। इह स्तम्भने क्षे, आकृष्टौ द, मोहने मे, बलकरणे दो, शान्तौ स, उच्चाटने च्च, ज्वरकरणे ण, स्तोभने रू, जये जा, सन्तापशमने यो, शत्रुनिवारणे नि इति। **गर्भात् तस्मिन् यकारो व्रजति गुणवशादिति**। इह कर्मणः स्वभावात् यो वर्णो गर्भेऽधिपतिर्भवति, तस्य स्थाने यकारो लिख्यते। **पूर्ववद्वाह्ये** [306b] **सर्वमिति** यमान्तकयन्त्रनियमः॥ १८९ ॥

इदानीं मञ्जुश्रीयन्त्रमुच्यते—

वर्णानामुत्तमाङ्गात् प्रभवति पुरतो मः स्वरालिङ्गितश्च
वर्णैर्वर्गान्तवर्णः कुलिशकुलवशात् पञ्चमोऽहं स उक्तः।
प्रज्ञा बिन्दुद्वयेन स्वरपरमपुटे स्यादियं मेऽप्युकारो
मं मुः हं हुश्च सं सुः कमलवसुदले मञ्जुरेवार्कपत्रे ॥१९०॥

वर्णानामित्यादि। इह **वर्णानामुत्तमाङ्गादिति** वर्णानां शिरसि बिन्दुः। तस्मादुत्तमाङ्गात् **प्रभवति पुरतो मः स्वरालिङ्गितश्चेति**। अकारस्वरेणालिङ्गितोऽनुस्वारो मकारो भवति। अन्यच्च **वर्णैः** ककाराद्यैरालिङ्गितो **वर्गान्त** इति ङ ञ ण म न नो भवन्ति। **कुलिशकुलवशात् पञ्चमो**[1]**ऽहं स उक्तः**। अतो बिन्दुरहम्। **प्रज्ञा बिन्दुद्वयेन** विसर्गेण **स्वरपरमपुटे**ऽकारद्वयमध्ये **स्यादियं मेऽप्युकारः**। एवं **मं** इत्युपायो **मुरिति** प्रज्ञा, एवं **हं हुः सं सुः मञ्जुरि**त्यष्टाक्षराणि दलेष्वष्टसु। द्वितीये द्वादशारे परिमण्डले **एवार्कपत्र** इति॥ १९० ॥

बाह्ये श्रीवज्रघोषः प्रभवति सयुतो मन्तभद्रोऽपि हूँ फट्
साध्योऽस्मिन् कर्णिकायां अमुकमपि कुरु चोदनं श्रीसमादेः।

---

१. भो. हँ सं

एवं पूर्वोक्तचक्रेष्वपि भवति सदा लेखनं साध्यनाम्नः
एतत्सर्वं नराणां जिनपतिवचसा सिद्धयते मे प्रसादात् ॥१९१॥

बाह्ये प्रथमदले **श्री**, द्वितीये **व**, एवं क्रमेण **ज्र घो ष स म न्त भ द्र हूँ फडिति** द्वादशाक्षराणि शेषं पूर्ववत्। सर्वमिति। **साध्योऽस्मिन् कर्णिकायामिति**। साध्यनामाद्यक्षरं कर्णिकायाम्। ततो जापकाले **चोदनं श्रीसमादेरिति**। ॐ श्रीवज्रघोष समन्तभद्र अमुकस्य शान्ति कुरु कुरु नमः। एवं पुष्ट्यादिके स्वाहा [1]हूँ फट् वौषट् फडिति अन्ते दातव्यम्, यन्त्रलिखनेऽप्यन्तिमे पत्रे। **एवं पूर्वोक्तचक्रेष्वपि भवति सदा लेखनं साध्य-** [307a] **नाम्नः। एतत्सर्वं नराणां जिनपतिवचसा सिद्धयते मे प्रसादादिति** यन्त्रलिखनविधिः ॥ १९१ ॥

यः शब्दो हृत्प्रदेशे भवति वरनृणां श्रूयते श्रोत्ररन्ध्रे-　　10
स्तस्मिश्चित्तं नरस्य व्रजति समरसं योजितं चैकभूतम्।
यं शब्दं जीवलोके वदति च भवजस्तत्तदेव श्रृणोति
विज्ञानं चैव दूराच्छ्रवणमपि विभोर्योगिना भावनीयम् ॥१९२॥

कृत्वा पर्यङ्कबन्धं विकसितवदनोऽन्योन्यदन्तं स्पृशेन्न
आकृष्टो बाह्यवातस्तदमृतसहितो नाभिमध्ये प्रविष्टः।　　15
सन्तापं क्षुत्पिपासां हरति वरतनौ सन्निरुद्धो विषं च
श्वेतो बिन्दुर्ललाटे स्वरपरिकरितो मुञ्चमानोऽमृतं वा ॥१९३॥

घ्राणे रन्ध्रद्वयेन त्वपि पिहितमुखे बाह्यवातः समस्तः
प्राणेनाकृष्य वेगात् तडिदनलनिभो घट्टितोऽपानवायुः।
कालेनाभ्यासयोगाद् व्रजति समरसं चन्द्रसूर्याग्निमध्ये　　20
अन्नाद्यं क्षुत्पिपासामपहरति तनौ चामरत्वं ददाति ॥१९४॥

स्वच्छायामातपस्थामपरमुखरवे स्तब्धदृष्ट्यावलोक्य
पश्चाद्वयोमाभिवीक्ष्येत् समरसपुरुषो दृश्यते धूम्रवर्णः।
षण्मासाभ्यासयोगादवनिगतनिधिं दर्शयेद् भूमिछिद्रं
वृक्षच्छायां प्रविश्य त्वथ गगनतले भाविता बिन्दुमाला ॥१९५॥　　25

या शक्तिर्नाभिमध्याद् व्रजति परपदं द्वादशान्तं कलान्तं
सा नाभौ सन्निरुद्धा तडिदनलनिभा दण्डरूपोत्थिता च।

---

१. च. 'हूँ···फडिति' नास्ति।

चक्राच्चक्रान्तरं वै मृदुललितगतिश्चालिता मध्यनाड्यां
यावच्चोष्णीषरन्ध्रं स्पृशति हठतया सूचिवद् बाह्यचर्म ॥१९६॥

आपानं तत्र काले परमहठतया प्रेरयेदूर्ध्वमार्गे
उष्णीषं भेदयित्वा व्रजति वरपुरं वायुयुग्मे निरुद्धे ।
5 एवं वज्रप्र[307b]भेदान्मनसि सविषयात् खेचरत्वं प्रयाति
पञ्चाभिज्ञास्वभावा भवति पुनरियं योगिनां विश्वमाता ॥१९७॥

मुद्रा मायानुरूपा मनसि च गगने रूपवद्दर्पणे च
त्रैलोक्यं भासयन्ती तडिदनलनिभाऽनेकरश्मीन् स्फुरन्ती ।
बाह्ये देहेष्वभिन्ना विषयविरहिता भासमानाऽम्बरस्था
10 चित्तं चेतो मयाऽऽलिङ्गयति च जगतोऽनेकरूपस्य सैका ॥१९८॥

त्यक्त्वेमां कर्ममुद्रां सकलुषहृदयां कल्पितां ज्ञानमुद्रां
सम्यक् संबोधिहेतोर्जिनवरजननीं भावयेद् दिव्यमुद्राम् ।
निर्लेपां निर्विकारां खसमहततमां व्यापिनीं योगिगम्यां
कूटस्थां ज्ञानतेजां भवकलुषहरां कालचक्रानुविद्धाम् ॥१९९॥

15 विज्ञानं नाणुरूपं त्रिभव इह तथा नास्ति विज्ञानमेव
बुद्धप्रज्ञा स्थिता न क्वचिदिति वचनं देशयिष्यन्ति बौद्धाः ।
शून्यं यास्यन्ति येनाक्षररहितनराः शून्यतां तां गृहीत्वा
भर्त्रा तेनाच्युतं यत्सहजतनुसुखं देशितं मन्त्रयाने ॥२००॥

गोखङ्गाश्वेभनाथान् व्रज तनुविषयानिन्द्रियं यज्ञकाले
20 यत्ते शुद्धासि चैतद्विषमविषयिणां ज्ञानयोगे निरोधः ।
यत्पानं दीक्षितानां भवति सरुधिरं गोऽजिने सोमवल्ल्या
मूर्ध्नः सोमामृतं तद् भगरजसि गतं सर्वगानन्दरूपम् ॥२०१॥

ब्रह्मा कायो हरो वाग् हरिरपि च मनः प्राणिनां ते त्रिवेदा(देवा)
ॐकारस्ते त्रिवर्णाः शशिरविहुतभुक् ते त्रिनाड्यो गुणाश्च ।
25 कौलः काये कुलान्यो विषयगुणगतोऽथर्वणो नादरूपी
तन्मध्येऽनाहतं यद्विषयविरहितं निर्गुणं चाक्षरं तत् ॥२०२॥

वेदान्ते गुह्यमेतत् कथितमपि पुरा ब्रह्मणा योगिनां वै
कालाज्ज्ञानप्रणष्टैर्मुनिभिरिह वधो देशितः प्राणिनां च ।
जाता[308a] तस्मिन् प्रवृत्तिः कुनरकफलदा स्वर्गहेतोर्नराणा-
मङ्गारो नेन्दुवर्णः क्वचिदिह हि भवेत् क्षीरधाराभिषिक्तः ॥२०३॥

निर्योगैर्वेदवाक्यैः समयविरहितैर्वञ्चिता ये नरास्ते　　5
रक्षां कृत्वा स्वनार्या दिननिशिसमये स्वात्मपुत्रार्जनार्थम् ।
दानं पुत्रेण दत्तं भवति किल पितुः प्रेतलोकं गतस्य
तेनेदं कामदानं श(स)मसुखफलदं गोपितं दुष्टविप्रैः ॥२०४॥

जात्यश्वे नान्यपुंसो यदि भवति महाघोटिकायां महाश्वो
लक्ष्मीश्चाश्वप्रभावात् पुनरपि च भवेत् स्वामिनः किन्न लाभः ।　　10
रक्षां कुर्वन्ति येन प्रतिदिनसमये रागिणः स्वस्वनार्याः
कस्त्वं का ते स्वनारी मरणमुपगतेऽहोऽशुभः कर्मबन्धः ॥२०५॥

गोदानं भूमिदानं ह्यपरमपि तथा भोगदं मर्त्यलोके
भैषज्याहारदानं सकलरुजहरं क्षुत्पिपासाहरं च ।
सर्वस्मिन् कामदानं श(स)मसुखफलदं किं पुनश्चक्रकाले　　15
इष्टा भार्या भगिन्यपि सुभगदुहिता गुह्यदाने प्रदेया ॥२०६॥

सद्देश्या कर्ममुद्रा भवति च समया गुप्तनारी परस्त्री
स्वच्छन्दा धर्ममुद्रा बहुविषयरता ज्ञानमुद्रा स्वभार्या ।
सद्देश्या द्वादशाब्दा परमसुखरता षोडशाब्दा कुलस्त्री
स्वच्छन्दा विंशदब्दा भवति स्वदुहिता त्रिंशदब्दा स्वभार्या ॥२०७॥　　20

पूर्वं बुद्धैर्धरित्री गजतुरगरथानेकसौवर्णभावा
दत्ता बुद्धत्वहेतोः पुनरपि च शिरो रक्तमांसं प्रदत्तम् ।
एभिर्बुद्धत्वमिष्टं नहि भवति ततः कामदानं प्रदत्तं
बुद्धत्वं तेन जातं जिनजनककुले गुह्यदानेन पुंसाम् ॥२०८॥

हेमं ताम्रेण तुल्यं सुरमुकुटमणिः काचखण्डेन तुल्यः　　25
सद्देश्या कामदानैरमलकुलवधूश्चर्मखण्डेन नाभिः ।

जात्यश्वो[308b] गर्दभेन प्रवरगजपतिर्लभ्यते यद्यजेन
भार्यादानेन देवो जिनजनककुले तत्र किं नैष लाभः ॥२०९॥

मैत्रीस्थाने न दानं श(स)मसुखफलदं तुल्यसत्त्वप्रभावात्
सूपेक्षास्थान एवं प्रवरजिनकुले मारसत्त्वप्रभावात् ।
हीनत्वादुत्तमत्वात् सकरुणमुदितास्थानयुग्मे प्रदत्तः(त्तौ)
संभारौ द्वौ प्रपूर्याक्षरसुखफलदं सौगतानां परार्थम् ॥२१०॥

वर्णो यस्य प्रमाणं भवति नरपते तस्य वेद[:] प्रमाणं
वेदो यस्य प्रमाणं खलु भुवि निलये तस्य यज्ञ[:] प्रमाणम् ।
यज्ञो यस्य प्रमाणं विविधपशुनृणां तस्य हिंसा प्रमाणं
हिंसा यस्य प्रमाणं नरकभयकरं तस्य पापं प्रमाणम् ॥२११॥

वासग्रासार्थमिष्टां कथयति भगवान् श्रीविहारप्रतिष्ठां
भैषज्याहारदानं किल रुजशमनं तत्र दाता ददाति ।
दानाभावे विहारः क्षितितलनिलये तिर्यगावास एष
ग्रासो यत्रैव संघो भवति नरपते तत्र बुद्धश्च धर्मः ॥२१२॥

बुद्धं धर्मं च संघं शरणमनुगता मानुषा मोक्षहेतो-
र्नायं बुद्धो विहारे स्थित इह लिखितः पुस्तको धर्म एव ।
संघः काषायधारी परमविभुसुखं जन्मलक्षैर्ददाति
आचार्यो बुद्ध एव प्रवरभुवितले देशना तस्य धर्मः ॥२१३॥

संघस्तस्मिन् स्थितो यः प्रमुदितहृदयः सर्वसत्त्वानुकम्पी
सोऽस्मिन्नुक्तश्चतुर्धा द्विविध इह पुनः श्रावकोऽनुत्तरश्च ।
भिक्षुण्यो भिक्षवश्चापि पुनरिह महोपासकोपासिकाश्च
योगिन्यो योगिनो वै सहजसुखरतोपासकोपासिकाश्च ॥२१४॥

पुण्यज्ञानार्थहेतोर्विविधमपि सदा दानमत्यर्थमिष्टं
भोज्याद्यं श्रावकेभ्यः परमसुखकरं योगिनामिष्टदानम् । [309a]
दातारो ये ददन्ति प्रमुदितहृदयाः सर्वदा रक्तचित्ता-
स्ते पुण्यज्ञानपूर्णाः परमसुखपदं जन्मनीह व्रजन्ति ॥२१५॥

आचार्यं निन्दयन्ति प्रकटमपि जिनं श्रावका येऽप्रबुद्धा-
स्तेऽवीचिं यान्ति शीघ्रं परमभयकरं मारिता विघ्ननाथैः ।
स्वाधिष्ठानं करोति प्रवरजिनपतिर्यस्य मन्त्रप्रभावैः
को भिक्षुस्तस्य तुल्यो व्रतनियमपदे ब्रह्मचारी नराणाम् ॥२१६॥

कष्टं कुर्वन्ति सर्वे परमसुखरता भिक्षुको वा परिव्राड् 5
नग्नो मौण्डी जटी च श्रुतपठनरतः पण्डितो मार्गनष्टः ।
कर्तुश्चात्मग्रहेण स्वपरमिह सदा पुत्रदारग्रहेण
भक्ष्याभक्ष्यग्रहेणाप्यकुलकुलरतापात्रपात्रग्रहेण ॥२१७॥

बुद्धक्षेत्रं समस्तं श(स)मसुखफलदं कायवाक्चित्तरागं
एतत्संहारयित्वा त्वपरमपि विभुं पापबुद्धिः समीक्षेत् । 10
क्षेत्रे तीर्थेऽन्यदेशे व्रतनियमशतैर्लङ्घनैः शैलपातैः
संग्रामे ग्रस्तसूर्ये विषयसुखरतोऽनेकशस्त्राग्निघातैः ॥२१८॥

मारैरेतत्समस्तं रचितमपि पुरा रक्तपानस्य हेतोः
स्वर्गैस्तीर्थोपवासैर्मरणमुपगतस्याहतस्यैव युद्धे ।
गोभानोर्मोचनार्थे गृहधनविषये विप्रकार्ये मृतस्य 15
तस्मादेषः स्वकायः समसुखनिलयो रक्षणीयः परस्य ॥२१९॥

श्रुत्वा यस्तन्त्रराजे जिनवरचरितं चाभिषेकं गृहीत्वा
ईर्ष्यां भूयः करोति प्रविशति नरकं सोऽष्टमं यावदेव ।
यस्मिन् सूच्यग्रभूमावशुभफलवशान्नारकाः संचरन्ति
तस्माद् ग्राह्योऽभिषेको नहि भवति नृणां यावदीर्ष्यास्ति चित्ते ॥२२०॥ 20

दानं शीलं प्रपूर्णं जिनजनककुले क्षान्तिवीर्यं च पूर्णं
ध्यानं प्रज्ञाऽभ्युपायः प्रणिधिरपि बलं ज्ञानपूर्णं ह्यनेन ।
भार्या[309b]दानेन शीघ्रं प्रमुदितमनसो योगिनो जन्मनीह
कृत्वाऽस्मिन् रागबन्धं नरकमुपगता मोहिता ये नरास्ते ॥२२१॥

पृथ्वीलक्ष्मीनिमित्तं सुचपलहृदयस्तीक्ष्णखड्गं गृहीत्वा 25
योधाकीर्णे समन्तात् प्रविशति हि रणे कातरश्चातुरङ्गे ।

दृष्ट्वा मातङ्गवृन्दं पतति करतलात् तस्य भीतस्य खड्ग-
स्तस्मिन् खड्गस्य दोषो नहि भवति यथा मन्त्रजातेस्तथैव ॥२२२॥

मन्त्रैर्वीरक्रमेणाप्यसुरफणिसुरान् साधयेद् रौद्रभूम्यां
स्वाधिष्ठानेन देवीः समयकुलगता ध्यानजापैः सहोमैः ।
5 सेकं शुद्धक्रमेण त्वनवरतमहानन्दचित्तेन मन्त्री
ज्ञानं चिन्तामणिर्यत् प्रभवति च ततश्चैष मार्गो जिनस्य ॥२२३॥

सूतस्याग्ने रिपुत्वं न शिखिविरहितः सूतबन्धः कदाचि-
न्नाबद्धो हेमकर्ता कनकविरहिता वादिनां नैव भोगाः ।
एवं स्त्रीसङ्गहीनो नहि भवति सदा योगिनां चित्तबन्धो
10 नाबद्धः कायवेधी सहजसुखमिहाविद्धकायो ददाति ॥२२४॥

उद्याने पर्वते वा जनमृगरहिते साधयेत् सौम्यमन्त्रान्
रौद्रान् रौद्रश्मशाने सुरवरभवने स्तम्भनं मोहनं च ।
वश्याकृष्टिश्च मन्त्री परमविभुसुखं सर्वमुद्राप्रसङ्गे
अन्यस्थानेऽन्ययोनौ नहि भवति नृणां जन्मलक्षैश्च सिद्धिः ॥२२५॥

15 वेश्मग्रामेऽक्षिसूत्रैर्दिननिशिसमये मन्त्रजापं हि कृत्वा
श्रान्तो मूढो विरक्तो वदति पुनरिदं मन्त्रसिद्धिश्च नास्ति ।
स्थानं शून्यं च कालं परमनिशिगतं नैव जानाति सम्यग्
रोगः पादाङ्गुलीषु प्रति शिरसि करोत्यौषधीभिः प्रलेपम् ॥२२६॥

न ध्यानं मन्त्रजापः करणमपि महामण्डलान्यासनानि
20 होमो मन्त्रप्रतिष्ठा रजसि जिनकुलावाहनं प्रेषणं च ।
मुद्रासि[310a]द्धिं ददाति प्रवरविभुसुखं सर्वमुद्राप्रसङ्गे
तस्मात् तद्भावनीयं प्रतिदिनसमये योगिना मोक्षहेतोः ॥२२७॥

मूर्च्छां निद्रां प्रविष्टं भवति नरपते निःस्वभावं स्वचित्तं
जाग्रायां सस्वभावं प्रकटयति न तत् प्राणिनां मोक्षमार्गम् ।
25 भावाभावैर्विभिन्नं नहि समसुखदं योगिनां चित्तवज्रं
स्वप्रज्ञालिङ्गितं यत् सहजसुखगतं मोक्षदं तत्स्वचित्तम् ॥२२८॥

ॐ आः हूँ होः क्रमस्थैः प्रथममिह सदा बोधयेच्छोधयित्वा
मद्यं प्रज्वालयित्वा द्रुतशशिनमिवाभावयित्वा क्रमेण ।
तत्पात्राद् बिन्दुना वै शशिकरकमलानामिकाग्रेण भूम्यां
कृत्वा बाह्ये त्रिकोणं दिनकरसदृशं वर्तुलं तस्य मध्ये ॥२२९॥

तन्मध्ये ज्ञानचक्रं त्रिभवमपि गतं भावयित्वा स मन्त्री 5
अङ्गुष्ठानामिकाभ्यां प्रतिदिनसमये तर्पणाद्यं करोति ।
देशग्रामाधिपानां प्रथममिह बलिं चादिमध्यान्तनाम्ना
हारीत्याः पिण्डके द्वे पुनरपि च बलिं क्रोधराजाय मन्त्री ॥२३०॥

दूतीनां ग्रासमग्रं क्षितितलनिलये भर्तृवज्रैर्ददाति
भूतानां भुक्तशेषं पठति पुनरिमां दानगाथां शुभार्थम् । 10
अङ्गन्यासं स्ववज्रैः शिरसि गलहृदोर्नाभिगुह्ये च मूर्ध्नि
निद्राकालेऽङ्गवक्त्रैरुभयकुलगतैरर्चने मैथुने च ॥२३१॥

अतो नवत्यधिकशतवृत्तादूर्ध्वं चत्वारिंशद् वृत्तानि सुबोधानि । "यः शब्दो हृत्प्रदेशे" (४.१९२) इत्यादिना "दूतीनां ग्रासमग्रम्" (४.२३१) इति पर्यन्तं कतिपयवृत्तानि सुबोधानि, कतिपयवृत्तान्यभिषेकपटलेऽध्याहारेणोक्तानि कार्यवशादिति ॥ १९२-२३१ ॥ 15

इदानीं लोकोत्तरलौकिकसिद्धये देवतालम्बनमुच्यते—

प्रत्यक्षं चानुमानं द्विविधमपि भवेद् देवतालम्बनं यत्
प्रत्यक्षं तत्त्वयोगादडुरिव गगनेऽनेकसम्भोगकायम् ।
अप्रत्य[310b]क्षेऽनुमानं मृतकतनुरिवातत्त्वतः कल्पनं य- 20
च्चित्रादौ दर्शनीयं ह्यपरिणतधियां योगिनां भावनार्थम् ॥२३२॥

प्रत्यक्षमित्यादि । इह सत्त्वानामाशयवशेन **योगिनां प्रत्यक्षं चानुमानं द्विविधमपि भवेद्देवतालम्बनं यत्** । तयोः प्रत्यक्षानुमानयोर्यत् **प्रत्यक्षं तत्त्वयोगाद् गगने उडुरिव** [1]भवेत् ताराचक्रमि**वानेकसंभोगकाय**मिति । मांसादिचक्षुर्ग्राह्यं मायास्वप्नसदृशं त्रिभवं त्र्यध्वनि । अत्र प्रथमं मांसचक्षुषा योगी आदिकर्मिको विश्वं पश्यत्यभिज्ञाभिर्विना । ततो दिव्यचक्षुषा पश्यत्यभिज्ञाविधिवशात् । ततो बुद्धचक्षुषा पश्यति वीतरागावधिवशतः । ततः प्रज्ञाचक्षुषा पश्यति बोधिसत्त्वावधिवशतः । ततो 25

१. च. भवति ।

ज्ञानचक्षुषा पश्यति सम्यक्संबोधावधिचित्तवशात् सर्वोपधिविनिर्मुक्त इति। एवं तथागतस्य पञ्चचक्षूंषि मांसादीनि शून्यतादर्शनं प्रति। अन्ये सत्त्वाः शून्यतादर्शनविषये जात्यन्धा इति। [1]एवं विस्तरो वक्ष्यमाणे परमाक्षरज्ञानसिद्धौ वक्तव्य इति तत्त्व-भावना नियमः। अतत्त्वसाधने पुनरप्रत्यक्षेऽनुमानं **मृतकतनुरिवातत्त्वतः कल्पनं यच्चित्रादौ दर्शनीयमिति**। [2]एवं प्रतिमा घटिता [3]चित्रिता बुद्धबोधिसत्त्वानां मण्डल-चक्रं वा लिखित्वा नियताकारं दर्शनीयं बालयोगिनां मन्दानां भावनार्थमिति विकल्पभावनानियमः॥ २३२॥

इदानीं विकल्पभावनाया उपाय उच्यते—

रूपं वा मण्डलं वा प्रथममपि पटेऽतत्त्वतो भावनीयं
आकाशे तत्त्वयोगात् सकलमविकलं दृश्यमानं स्वचित्तम्।
वर्षार्धं वर्षमेकं गुरुनियमवशाद् यावदेव स्थिरं स्या-
न्मुद्रासङ्गेन तस्मात् कतिपयदिवसैरक्षरत्वं प्रयाति॥२३३॥

रूपमित्यादि। इह बालयोगिनां स्वचित्तशक्त्या **रूपमि**त्येकदेवता पटे लिखिता भावनीया, **मण्डलं वा प्रथ[311a]ममपि पटेऽतत्त्वतो भावनीयम्। स्वचित्तमिति।** तत्त्वतः पुनराकाशे **तत्त्वयोगा**दिति शून्यताकरुणायोगात्। **सकलमविकलं दृश्यमानं स्वचित्तं** सर्वाकारं रूपमण्डलचक्रकल्पनाऽभावादिति। एवं रूपादिकं कल्पितं पटे लिखितं वा, शून्यताबिम्बम[4]विकल्पं वा, **वर्षार्धं वर्षमेकं** वा **गुरुनियमवशाद् यावदेव स्थिरं स्यात्** [5]स्वचित्तम्। **मुद्रासङ्गेन तस्मा**दिति। इह स्वचित्ते प्रत्याहारध्यान-प्राणायामधारणाबलेन स्थिरे जाते सति ततो मुद्रासङ्गेन **कतिपयदिवसै**रिति काल-चक्रदिनैः पञ्चविंशत्यधिकैकादशशतैरिति नियमः। एभिर्दिनैर्बोधिचित्त**मक्षरत्वं प्रयाति** वैमल्यं भवतीति सम्बन्धः। अत्र [6]पटपुस्तकप्रतिमालिखनाय उपस्थापको धर्मभाणकोऽन्वेषणीयः, तेन पटपुस्तकप्रतिमादिकं कर्तव्यं रौद्रसौम्यक्रियया। पूर्वोक्तमर्घा(र्घा)दिकं दत्त्वाऽऽचार्यस्य पूजा कार्या। संघभोज्यं गणचक्रं च दातव्यमर्घदानकाले। यथा प्रतिष्ठा-काले विधिः, तथार्घदानकालेऽपि यथाशक्तितः कार्यं इति नियमः॥ २३३॥

इदानीं वज्रपदनियम उच्यते—

सर्वस्मिंस्तन्त्रराजे खलु कुलिशपदं योगिनामेतदुक्तं
बालानां पाचनार्थं परमकरुणया गोपितं विश्वभर्त्रा।
तस्मात् तं भेदयित्वा प्रतिदिनसमये योगिना भावनीयं
मुद्रासिद्ध्यर्थहेतोर्जिनवरजनकाऽनाहतं कालचक्रम्॥२३४॥

॥ इति साधनापटलश्चतुर्थः॥

---

१. क. एवं वागुरो ग. एषां, च. तेषां। २. ख. ग. च. छ. चित्रं। ३. क. ख. ग. च. छ. निषिक्ता। ४. च. विकल्पितं। ५. ग. 'स्व' नास्ति। ६. च. पटप्रतिमापुस्तक।

सर्वस्मिन्नित्यादि। इह **सर्वस्मिंस्तन्त्रराजे समाजादिके** उपायतन्त्रे, **चक्रसंवरा**-दिके प्रज्ञातन्त्रे खलु **कुलिशपदं** पूर्वोक्तमक्षरसुखं **योगिनामिति**। तदुक्तं **भगवता**—

[1]तद्यथा भगवान् बुद्धः संबुद्धोऽकारसम्भवः।
अकारः सर्ववर्णाग्र्यो महार्थः परमाक्षरः॥
महाप्राणो ह्यनुत्पादो वागुदाहारवर्जितः। 5
सर्वाभिलापहेत्वग्र्यः सर्ववाक्सुप्रभास्वरः॥ (ना. सं. ५.१-२)

इत्यादि, "ज्ञानकाय नमो नमः" (ना० सं. ११.५) इति पर्यन्तं द्वाषष्ट्यधिकशतवृत्तेनोक्तो ज्ञानकायो **नामसंगीत्याम्**। स एव कुलिशपदमुच्यते। **सर्वस्मिन् तन्त्रराजे**। तदेव **बालानां पाचनार्थं परमकरुणया गोपितं विश्वभ**[311b]**र्त्रा** द्वीन्द्रियसुखं प्रतिपादितं बालानामिति। **तस्मात् तं** कुलिशपदं **भेदयित्वा प्रतिदिनसमयेऽ**- 10
हर्निशं **योगिनेति** तीक्ष्णेन्द्रियेण पूर्वोक्तचक्षुषा **भावनीयं मुद्रासिद्धि**[2]निमित्तमिति महामुद्रासिद्धये। किं तत्? **जिनवरजनकाऽनाहतं कालचक्रं** तदिति नियमो भगवतः सर्वतन्त्रान्तरे योगिभिरवगन्तव्यः संबुद्धपदलाभायेति।

इति [3]श्रीमूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां
विमलप्रभायां द्वादशसाहस्रिकायां 15
नानासाधनमहोद्देशः पञ्चमः॥

साधनापटलस्य टीका समाप्ता।

[[4]तन्मण्डलत्रितयबोधितशे(षे)करत्नराजप्रबोधितभुवः परमाद्भुतार्थाः।
उक्तस्तु साधयितुमिष्टतमः परार्थं नानार्थसाधनविधिः स षडङ्गयोगः॥
प्राप्तं मया कुशलमावुकदत्तकेन संलेख्य साधनविधेः पटलं हि तेन। 20
लोकोत्तराद्वयसुखाकररत्नमूर्ध्ना ज्ञानैकचक्षुरमलः सकलोऽस्तु लोकः॥]

१. अथ वज्रधरः श्रीमान् इत्याद्यारभ्य इति चेत्साधु? २. क. ख. छ. नियम इति। ३. क. ख. च. छ. 'श्री' नास्ति। ४. 'तन्मण्डल..... लोकः' भो. नास्ति। श्लोकद्वयं प्रतिलिपिकर्तुरस्ति न तु टीकाकारस्य।

५. ज्ञानपटलः पञ्चमः

(१) योगिनीतन्त्रादिस्फरणमहोद्देशः

[1][169a[3]]   ॥ [2]नमः श्रीकालचक्राय ॥

T 414

येनाकृष्य मनोभवः स्वकुलिशान्नीतो ललाटं स्वकं
प्रज्ञाज्ञानबलेन शाक्यमुनिना वज्रं महोष्णीषकम् ।
सालम्बाऽनणुशून्यता सुकरुणाऽनालम्बिनी यस्य वै
तस्मै देवनरासुराहिगुरवे विश्वैकशास्त्रे नमः ॥

कारणं लक्षणं नास्ति चलो नास्ति क्रमस्तथा ।
कालचक्राभिधानेन यस्य नत्वा तमद्वयम् ॥

निर्माणसम्भोगसुधर्मशुद्धं काद्यक्षरैः कायचतुष्कमुक्तम् ।
यस्यादिबुद्धस्य निरन्वयस्य [3]तथागतं तं प्रणिपत्य मूर्ध्ना ॥

श्रीज्ञानपटले टीका मञ्जुश्रीचोदितेन वै ।
लिख्यते पुण्डरीकेण सुगतव्याकृतेन च ॥

मया निर्मितकायेन लोकेशेनाब्जधारिणा ।
ऋषीणां सर्वसत्त्वानां पुण्यज्ञानफलाप्तये ॥

इह श्रीमति कलापग्रामदक्षिणमलयोद्याने श्रीकालचक्रमण्डलगृहपूर्वद्वारावसाने रत्नमण्डपे महामणिरत्नसिंहासनस्थो यशोनरेन्द्रो मञ्जुश्रीनिर्मितकायो ब्रह्मर्षिसूर्यरथाध्येषितः परमादिबुद्धाज्ज्ञानपटले सुचन्द्राध्येषणं तथागतप्रतिवचनं प्रथमवृत्तेनाह—

किञ्चिज्ज्ञातं हि भर्तुर्जिनवरसहितं साधनं यत्त्वयोक्तं
भूयोऽहं श्रोतुकामस्त्रिदशनरगुरो मण्डलं धातुभेदैः ।
बुद्धानां षट्कुलानि त्वलिकलिषु गतान्येव षड् योगिनीनां
श्रुत्वा सौचन्द्रवाक्यं गदति जिनपति[4]र्धातुभिर्मण्डलाद्यम्[5] ॥१॥

इह प्रथमवृत्तेनादिबुद्धात् सुचन्द्राध्येषणं तथागतप्रतिवचनमर्थशरणतया संगीतं मञ्जुश्रिया, तदेव टीकया वितन्यते—किञ्चिदित्यादि । इह [6]साधनपटले यद्भर्तुः साधनं

---

१. अतः परं च. मातृकायाः पत्रसंख्या दीयते । २. ग. च. 'नमः श्रीकालचक्राय' नास्ति । ३. ग. च. तथागतैस्तं । ४. भो. Khams Kyi dBye Bas (धातुभेदैः) । ५. ग. भो. इति । ६. च. साधना ।

तथागतसहितं कालचक्रस्य यत् त्वयोक्तं हे त्रिदशनरगुरो शाक्य[1]मुने ! तत्किञ्चित् मया **ज्ञातम्** । तस्माद् भूयोऽहं **श्रोतुकामः** कालचक्रमण्डलं शरीरे **धातुभेदैरिति**, अस्थ्यादि-धातुविशुद्धिभिरिति । अन्यच्च **बुद्धानां षट्कुलानि** श्रोतुकामः, या[2]न्यलिकलिषु **गतानीति**, अकारादि[169b]स्वरेषु गतानि, ककारादिव्यञ्जनेषु गतानीति वक्ष्य-
5 माणानि, एवं **षड् योगिनीनामिति** । यथा षट्स्कन्धानां षट् कुलानि तथा षड्धातूनामपि आदिकादिषु गतानीति । **श्रुत्वा सौचन्द्रवाक्यमिदं ततो गदति जिनपतिः** सहजादिचतुः-कायात्मनिरावरणस्कन्धा[दय]:, तेषां पतिर्जनकः संबुद्ध आदिबुद्ध इति । [3]**धातु-भिर्मण्डलाद्यमिति** षट्कुलादिकं वक्ष्यमाण[म्] । इति देशकाध्येषकसम्बन्धः । अस्मिन् वृत्ते पादत्रयेण सुचन्द्राध्येषणम्, चतुर्थपादमारभ्य यावत् पटलपरिसमाप्तिस्तावत् तथा-
10 गतप्रतिवचनम् । पुनरध्येषणा नास्ति [इति] अस्मिन् तन्त्रे नियमः ॥ १ ॥

इदानीं धातुविशुद्धया मण्डलविशुद्धिरुच्यते—

स्तम्भान् वज्रावलीं वै कुरु महिवलयं भित्तिमेवास्थिभिश्च
मांसासृक्तोयविड्भिः सुरयमधनदे चापरे रङ्गपातम् ।
पित्तेन श्लेष्मणार्कं शशिनमपि तथा स्नायुभिस्तोयजानि
15 पञ्चप्राकाररेखाः क्षितिजलहुतभुङ्मारुताकाशजाभिः ॥२॥

स्तम्भानित्यादि । इह शरीरास्थिभिः शरीरे कायमण्डले **स्तम्भान् कुरु** इति [4]कल्पनया । एवं **वज्रावलीं पृथ्वीवलयं भित्तिमपि, अस्थिभिः** कुर्विति वृत्तत्रये सम्बन्धः । अनया विशुद्धयाऽस्थिचूर्णादिकं प्रक्षिपेद् रजोमध्ये । **मांसासृक्तोयविड्भिरिति**, मांसविशुद्धया **सुरे** पूर्वे **रङ्गपातः**, रक्तविशुद्धया [5]**यमे** दक्षिणे रङ्गपातः, तोयविशुद्धया
20 उत्तरे **धनदे** रङ्गपातः, विड्विशुद्धयाऽ**परे** पश्चिमे रङ्गपात [6]इति । मध्ये शुक्रविशुद्धया रङ्गपातः । यत्र षष्ठो रजस्तत्र रजोविशुद्धया रङ्गपात इति । एवं तथागतमांसादिविशुद्धया यथाक्रमममोघो रत्नेशोऽमिताभो वैरोचनोऽक्षोभ्यो वज्रसत्त्वश्चेति षट् । **पित्तेनेति** पित्तधातुना अर्कासनानि[7], **श्लेष्म**धातुना चन्द्रासनानीति । **अर्कं शशिनमपि** । **स्नायुभिस्तोयजानि** चन्द्रादित्यासनतले । **पञ्चप्राकाररेखा** इति । प्रथमरेखा **क्षितिजया**
25 अङ्गुष्ठविशुद्धया, द्वितीया **तोयजया** तर्जनीविशुद्धया, तृतीया **वह्निजया** मध्यमा-विशुद्धया, चतुर्थी **वायुजया** अनामिकाविशुद्धया, पञ्चम्या**काशजया** कनिष्ठा-विशुद्धयेति । एवं पञ्चप्राकाररेखाः कुरु रजोमण्डले इति ॥ २ ॥

---

१. ग. मुनि । २. भो. आलिकालिषु । ३. भो. Khams Kyi dBye Bas (धातु-भेदैः) । ४. ग. 'कल्पनया' नास्ति । ५. ग. यामे । ६. भो. 'इति' नास्ति । ७. ग. नादिति ।

भर्त्रब्जं कालनाड्या चलशिखिवलयाद्यं च चर्मादिभिश्च
अर्कद्वाराणि रन्ध्रैर्मणिमयरचनां दन्तपङ्क्त्या तथैव ।
चक्राण्यष्टौ श्मशाने चलवलयगतान्यङ्गुलीनां नखैश्च
वज्रार्चिर्लोमभिर्वै दिशिविदिशिगतैर्मण्डलस्यावसाने ॥३॥

भर्त्रब्जं कालनाड्येति । अवधूत्या नायकस्य पद्मं विशुद्धम्, शेषाणि ललनादिभिरिति द्वासप्ततिसहस्रपर्यन्तैः स्नायुभिरिति नियमः । **चलशिखिवलयाद्यं चर्मादिभिश्चेति** । इह वायुवलयं चर्मभिः, अग्निवलयं [1]रक्तोष्णधातुना, उदकवलयं प्रस्वेदेन । **अर्कद्वाराणीति** द्वादशद्वाराणि द्वादशरन्ध्रैः । श्रोत्रे द्वे, घ्राणे द्वे, नेत्रे द्वे, मुखे एकम्, [2]मूत्रविट्-शुक्ररन्ध्राणि त्रीणि, स्तनद्वये द्वे—एवं द्वादश रन्ध्राणि रजोमण्डले कुरु द्वादशरन्ध्र-विशुद्धयेति । **मणिमयरचना** या मण्डले हारादिका या(तां) दन्तपङ्क्त्या कुरु । **चक्रा-ण्यष्टौ श्मशाने** यानि तान्यङ्गुलीनां **नखैश्चेति** हस्तपादनखविशुद्ध्या कुरु । **वज्रा-र्चिर्लोमभिर्वै** इति । बाह्यवज्रावलीं वज्रज्वालालोमभिः कुरु । **दिशिविदिशिगतैर्लोमभि-र्मण्डलस्यावसाने** वज्रार्चिः ॥ ३ ॥

एवं वै कायवज्रं वरविविधगुणं मण्डलाकारमुक्तं
वाग्वज्रं चादिकाद्यं सकलजिनकुलैर्देवताकारमेव ।
षट्शून्यैश्चित्तवज्रं त्रिविधभवगतं नायकाकारमेक-
मेवं वै ज्ञानवज्रं भवभयमथनं विश्वमातृस्वरूपम् ॥४॥

एवं वै कायवज्रं षड्धात्वात्मकम्, **वरविविधगुणं** पृथिव्यादिभेदैः, **मण्डलाकार-मुक्तमिति** मण्डलनियमः । इदानीं देवतागणविशुद्धिरुच्यते—वाग्वज्रमित्यादि । इहा-[170a]**दिकाद्यं** स्वरव्यञ्जनात्मकम्, **वाग्वज्रं** स्वरव्यञ्जनपरिणतं देवतागणम्, **सकल-जिनकुलैः** सार्धम् । तेन वाग्वज्रं **देवताकारमेवोक्तम्** । तदेव रजोमण्डले देवताकारं कुरु इति । **षट्शून्यैश्चित्तवज्रमिति** चक्षुर्विज्ञानं श्रोत्रविज्ञानं घ्राणविज्ञानं जिह्वाविज्ञानं कायविज्ञानं मनोविज्ञानं [3]विशुद्ध्या षड्विधम् । **षट्शून्यै** रूपादिविषयैर्निरावरणं **चित्तवज्रं** भवति । **त्रिविध[4]भवगतं** सर्वव्यापि **नायकाकारमेकं** कुरु । **एवं वै ज्ञानवज्रं** [5]ग्राह्यचित्तं त्रिविधभवगतं **विश्वमातृस्वरूपं** शून्यताबिम्बं **भवभयमथनं** सर्वकल्पना-विनिर्मुक्तम् । प्रज्ञां [6]कुरु मण्डले नायिकामिति । एवं शरीरे कायवाक्चित्तज्ञानधातवः, बाह्ये मण्डलं देवतागणो नायको नायिका चेति संवृत्या, विवृत्या निर्माणं सम्भोगं धर्मं सहजमिति सिद्धम् ॥ ४ ॥

१. ग. रक्तकृष्ण । २. च. गुद । ३. च. विशुद्धं । ४. ग. भगवता । ५. ग. ग्राह्यं । ६. ग. कुरु इति । एवं षट्शून्यैश्चित्तवज्रमिति ।

इदानीं षण्मन्त्रकुलान्युच्यन्ते—

वर्गाणां कादिषण्णां क्रमपरिरचितानां कुलानि क्रमेण
वज्रासी रत्नचक्रं जलजमपि तथा कर्तिका वै जिनानाम् ।
भूयश्चैकैकवर्गः सकलजिनवरैर्भिद्यते पञ्चभेदैः
प्रत्येकं वर्णभेदात् क्षितिजलहुतभुङ्मारुताकाशभावात् ।।५।।

वर्गाणामित्यादि। इह कादयः षड्वर्गाः क च ट त प [1]शा इति, तेषां **वर्गाणां कादिषण्णां क्रमपरिरचितानां कुलानि** षड् जिनानां वज्रादिचिह्नानीति। तत्र **वज्रं** कवर्गकुलम् **असि**श्चवर्गकुलं, **रत्नं** टवर्गकुलं **चक्रं** तवर्गकुलं **जलजमपि** पवर्गकुलं **तथा कर्तिका** [2]शवर्गकुलम्, **वै** एकान्तमिति वर्गकुलनियमः। **भूयश्चैकैकवर्गः सकलजिनवरैर्भिद्यते** [3]**पञ्चभेदै**रिति। इह यत्रैकं तत्र पञ्चकुलानि समुदयसत्येन भवन्ति। तेन तैर्व्यवहारो लौकिकसिद्धये। अतश्चैकैको वर्गः **प्रत्येकं वर्णभेदात् क्षिति**भावाज्जल-भावाद् **हुतभु**ग्भावान्**मारुत**भावादाकाशभावाद् भिद्यते पञ्चधा वर्गः। प्रत्येक[4]मिति क ख ग घ ङ इति ॥ ५ ॥

एवं चादयः संहारक्रमेण पठिताः प्रत्याहारपाठेन पुनर्ङादयः सृष्टिक्रमेणा-काशादिना पठिता इति [5]तेऽप्युच्यन्ते—

आदौ शून्यप्रभेदास्त्वपि ङ ञ ण म ना≍कस्तथादिस्वरश्च
वायोर्भेदस्त्विकारस्तु घ झ ढ भ ध शा वह्निभेदास्त्वगाद्याः ।
अम्भोभेदोऽप्युकारः≍प ख छ ठ फ थ वा भूमिभेदे लृकाद्या
एवं पञ्चप्रकारैः परमजिनकुलैः कादिवर्गा विभिन्नाः ।।६।।

आदावित्यादि। इहादौ तावच्छून्यस्त्वपि ङ ञ ण म नास्तथा≍कः। [6]**अपि चादिस्वरश्चे**त्यकारः। "तन्मध्यपतितस्तद्ग्रहणेन गृह्यते" इति परिभाषया हकारोऽप्याकाशभेद इति सिद्धः। एवं **वायोर्भेदस्त्विकारो घ झ ढ भ ध शा** यकारश्चेति। **वह्नेः** [7]ऋ ग ज ड ब द षा र इति, **तोयस्य** उ ख छ ठ फ थ ≍पा व इति, **भूमेः** ऌ क च ट प त सा ल इति। **एवं पञ्चप्रकारैः परमजिनकुलैः कादिवर्गा विभिन्ना** इति वज्रखड्गरत्नपद्मचक्रकुलैरुक्ताक्षराणि ङादीनि वेदितव्यानीति नियमः ॥ ६ ॥

इदानीमुष्णीषकुलान्युच्यन्ते—

उष्णीषं पञ्चशून्यं त्रिकुलमपि तथा कायवाक्चित्तवज्र-
माद्या मुद्राकुलं वै हयरवलयुताः कादिवर्गाः समस्ताः ।

---

१. भो. स । २. च. भो. स । ३. च. पञ्चभिरिति । ४. भो. lTar (इव) ।
५. च. तेनोच्यते । ६. भो. 'अपि' नास्ति । ७. च. 'ऋ' नास्ति ।

लोकालोकं समात्रा हयरवलयुता लोकलोकोत्तरं च
काद्या विद्याधरेन्द्रं भवति हि सकलं चाष्टकूटस्थवर्गाः ॥७॥

उष्णीषमित्यादि । इह **महोष्णीषकुलं महद्** यत्तत् **पञ्चशून्यं** लोकधातुपटले उक्तम् । **त्रिकुलं कायवाक्चित्तवज्रम्** ॐ आः हूमिति । **आद्या** इति अ इ ऋ उ ऌ । मुद्राकुलमक्षोभ्यादिकं देवतागणमुद्रणायेति । **लोकालोककुलं महदिति** ह् य र व ल-[1]युताः **कादिवर्गाः समस्ता** इति षट्त्रिंशद् व्यञ्जनानीति । ह य र व ल [2]युताः **समात्रा** वर्गाः हादयः समात्राः षष्टि [:] पूर्वोक्ताः कादयः समात्राः षष्ट्युत्तरत्रिशताः पुनः पुन-र्गुणवृद्धियणादेशभिन्ना अशीत्युत्तरसहस्राः, **लोकलोकोत्तरकुलं च भवति** । **काद्या विद्याधरेन्द्रं** संयुक्तं व्यञ्जनं **भवति** [3]**हि सकलं चाष्टकूटस्थवर्गा** इति । क् ख् ग् घ् ङ च् छ् ज् झ् ञ ट् ठ् ड् ढ् ण प् फ् ब् भ् म त् थ् द् ध् न [4]स् ⁀ प् ष् श् ⁀ क ल् व् र् य् ह [170b] ल् व् र्[5] य् क्ष इति ॥ ७ ॥

इदानीं प्रत्येकं[के] का[6]द्यक्षरे प्रत्येकैकतन्त्रमुच्यते—

त्रिंशद् वै कादिवर्णा हयरवलयुताः सक्ष षट्त्रिंशदेव
भिन्ना मात्राविकारै रसगुणितरसाश्चक्रनाथा भवन्ति ।
एकाङ्गश्चैकया वै द्विसपरिकरितः प्रज्ञयालिङ्गितोऽभूत्
पञ्चात्मा पञ्चभिः स्यान्नवपरिकरितश्चक्रनाथो नवात्मा ॥८॥

त्रिंशदित्यादि । इह **कादीनि त्रिंशद्** व्यञ्जनानि **हयरवलक्षसहितानि षट्त्रिंशदेव** तानि, **वर्णा** इति । ते वर्णा **भिन्ना मात्राविकारैरि**ति । मात्रा अकारा-दयो ह्रस्वदीर्घा द्वादश, गुणवृद्धिस्थानीया द्वादश, यणादेशा [7]द्वादश । एभिः षड्भिः षड्भिर्मात्राविकारैर्विभिन्नाः सन्तो **रस**[8]**गुणितरसाश्चे**ति षट्त्रिंशच्**चक्रनाथा भवन्ति** । प्रत्येको वर्णः षट्त्रिंशदङ्कैर्भिन्नो भवति । [9]एषां सर्वेषां षट्त्रिंशदिति षट्त्रिंश-त्तन्त्रेषु चक्रनाथा अपि भवन्ति षट्त्रिंशद्व्यञ्जनस्थानस्वरूपेणेति प्रथमं कव्यञ्जन-नायकेन कवज्रतन्त्रमुच्यते । तत्र मण्डले नायक **एकाङ्गश्चैकया** मात्रया भिन्नः कव्यञ्जनमकारेण सहितमेकवीरः । **द्विसपरिकरित** इति द्वाभ्यामकाराभ्यां युक्तः **प्रज्ञयाऽऽलिङ्गितो** नायको भवतीति का । **पञ्चात्मा पञ्चभिः स्यादि**ति का कि कृ कु क्ल इति । **नवपरिकरितश्चक्रनाथो नवात्मे**ति का कि की कृ कॄ कु कू क्लृ क्लॄ इति ॥ ८ ॥

---

१. भो. 'क्ष' इत्यधिकम् । २. भो. 'र' इत्यधिकम् । ३. ग. भो. 'हि' नास्ति । ४. च. श ष स⁀प स, ग. श ष स⁀प⁀क । ५. ग. च. 'र' नास्ति, गृहीतस्तु भोटानुसारी । ६. ग. काक्षरे । ७. भो. Thun Ṅu Daṅ Riṅ Po bCu gNis Te dByaṅ Kyi rNam Pa ḥGyur Pa (ह्रस्वदीर्घद्वादशमात्राभिन्ना) इत्यधिकम् । ८. ग. पत्रसंख्या ३३८-३३९ नास्ति । ९. भो. De lTar (एवं) ।

मात्रासंख्यात्मको वै त्रिदशनवदिशाभिश्च षट्त्रिंशदात्मा
याद्याभिर्द्वारपालाः सकलगणकुलं शेषमात्राभिरेव ।
षट्क्रोधा हादिभिः स्युः स्वकुलदिशिगता वायुमात्रादिभेदैः
प्रत्येकं वर्णभेदै रसगुणितरसं योगिनीयोगतन्त्रम् ॥९॥

5 **मात्रासंख्यात्मको वै त्रिदशनवदिशाभिश्चेति** । [1]तत्र त्रयोदशभिस्त्रयोदशात्मा पूर्वोक्तः क्य क्र क्व क्ल एभिर्यणादेशैर्युक्तस्त्रयोदशात्मा, द्वारपालैः सहाप्यसौ पुनर्गुणैर्भिन्न एकोनविंशदात्मा भवति क [2]के कर् को कल् कमित्येभिः सह । ततः पञ्चविंशदात्मा गुणवृद्धिभिः सह का कै कार् कौ काल् [3]कः इति । ततो द्वात्रिंशदात्मा क्हा क्या क्रा क्वा क्ला क्हाः इति गर्भप्रज्ञया सह । ततश्चतुस्त्रिंशदात्मा [4]कं कः सहितः । एवं षट्-
10 त्रिंशदात्मा [5]क्हं क्हः सहित इति सर्वत्र सप्तत्रिंशदात्मको मध्ये हूंकारो नायकः । षट्-त्रिंशन्माण्डलेयाः क का कि की कृ कॄ कु कू कॢ कॣ कं कः इति । ह्रस्वदीर्घस्वरभिन्नो वर्णः । तथा क का के कै कर् कार् को कौ कल् काल् कं कः इति गुणवृद्धिभिर्भिन्नो [6]वर्णः । क्ह क्हा क्य क्या क्र क्रा क्व क्वा क्ल क्ला क्हं क्हः इति ह्रस्वदीर्घयणादेश-भिन्नो वर्णः ककारः । खादयोऽपि प्रत्येकं षट्त्रिंशदिति । एवं खवज्रादिकं तन्त्रमुच्यते
15 [7][ए]कव्यञ्जनात्मकं षट्त्रिंशन्मात्राभिन्नमिति । एवं **षट्त्रिंशदात्मा** मण्डलेशः । **याद्याभि-र्द्वारपाला** इति यणादेशसहितैर्व्यञ्जनैर्द्वारपालाः [8]क्य क्र क्व क्ल इत्येभिः । **सकल-गणकुलं** स्कन्धधात्वायतनलक्षणम् । शेषैः स्वरैर्ह्रस्वदीर्घगुणवृद्धिस्थानीयैरिति । **शेष-मात्राभिरेव षट्क्रोधा हादिभिः स्युरिति** । यत्र दश क्रोधा दशदिक्षु भवन्ति, तत्रापरे षट्क्रोधास्ते हादिभिर्दीर्घैर्यणादेशैः स्युः क्ह क्हा क्रा क्वा क्ला इति । यत्र क्रोधेन्द्रस्तत्र
20 क्हं क्हः इति द्वादशक्रोधाः षट्कुलतन्त्रे, एककुलतन्त्रेऽपि षण्मात्राकुलभेदैरिति नियमः । [9]एवमाकाशधातुरूर्ध्वे **स्वकुलदिशिगतो** ज्ञानधातुरधोगतः । अपरे **वायुमात्रादिभेदैः** पूर्वे दक्षिणोत्तरे पश्चिमे गता देवता इति । एवं **प्रत्येकं** व्यञ्जनं ककारादिकं **वर्णभेदैः** स्वरभेदैः, **रसगुणितरसमिति** षट्त्रिंशद्भेदभिन्नम्, **योगिनीयोगतन्त्रमिति** [10]यत्र योगिनीनां सञ्चारो नायको निश्चलः संवृत्या तद्योगिनीतन्त्रम्, यत्रोपा[171a]यस्य सञ्चारः प्रज्ञा
T 416 25 निश्चला तदुपायतन्त्रम् । स्वरूपतः सर्वमेव प्रज्ञोपायात्मकं योगतन्त्रम् । तथाह **हेवज्रे—**

हेकारेण महाकरुणा वज्रं प्रज्ञेति भण्यते ।
प्रज्ञोपायात्मकं तन्त्रं तन्मे नि[11]गदितं शृणु ॥
(हे० त० १.१.७)

---

१. भो. De (तत्) । २. च. कि । ३. च. का । ४. च. क्कं क्कः । ५. च. कं कः । ६. च. वर्गः । ७. भो. gCig Gi bDag Ñid (एकात्मकं) । ८. भो. क्या क्रा क्वा क्ला । ९. भो. 'एवं' नास्ति । १०. च. तत्र । ११. ग. मातृका इतः परं पुनः प्रारभ्यते ।

इति वचनान्न हेवज्रं प्रज्ञातन्त्रं [1]भवति, प्रज्ञातन्त्रं शृण्विति वचनाभावात्। तथा समाजे—

प्रज्ञोपायसमापत्तिर्योग इत्यभिधीयते।
(गु० त० १८.३२)

समाजं मीलनं प्रोक्तं सर्वबुद्धाभिधानकम् ॥ 5
(गु० त० १८.२४)

इति वचनात्, नेदमुपायतन्त्रं भवति। तथादिबुद्धे—

योगो नोपायकाये न एकया प्रज्ञया भवेत्।
प्रज्ञोपायसमापत्तिर्योग उक्तस्तथागतैः ॥ इति ॥ ९ ॥

एवं प्रत्येकवर्णो रसगुणितरसे मण्डले मण्डलेशः 10
स्कन्धैर्भूतेन्द्रियाद्यैः सकलगणकुलं शोधयेन्मातृभेदैः।
शून्यैश्चानाहताद्यैः सकलजिनकुलैर्मुद्रणं देवताना-
मुष्णीषादम्बुजान्ते विषमसमकुले चक्रमध्यासने च ॥१०॥

एवं प्रत्येकवर्णो रसगुणितरस इति षट्त्रिंश[2]द्योगिनीयोगतन्त्रे **मण्डले मण्डलेश** इति सिद्धमेककुलतन्त्रं त्रिकुलं पञ्चकुलं यत्तत् तदेव सहस्रलक्षकोटिभेदभिन्नम्। 15 तन्त्राणां संख्या नास्ति, समाजादीनां हेवज्रादीनामनन्तसत्त्वाशयवशादिति तन्त्रनियमः।

इदानीं मन्त्रदेवतानामध्यात्मशुद्धिरुच्यते—स्कन्धैरित्यादि। इह पञ्च**स्कन्धैः** पञ्चात्मा शुद्धयति, स्कन्धपञ्च**भूतै**र्नवात्मा शुद्धयति, चतुःकर्मे**न्द्रियैः** सह त्रयोदशात्मा शुद्धयति, [3]षडिन्द्रियैः सह एकोनविंशदात्मा शुद्धयति, [4]षड्- 20 विषयैः सह पञ्चविंशदात्मा शुद्धयति, पञ्चकर्मेन्द्रियक्रियाभिः सह पञ्च-कर्मेन्द्रिये प्रविष्टे स्वाभप्रज्ञया सह द्वात्रिंश[5]दात्मा, षष्ठकर्मेन्द्रिय-[6]षष्ठक-र्मेन्द्रिक्रियायुक्तश्चतुस्त्रिंशदात्मा, [7]षट्स्कन्धधातुभ्यां युक्तः षट्त्रिंशदात्मा इति। एवं षट्स्कन्धाः षड्धातवः षडिन्द्रियाणि षड्विषयाः षट्कर्मेन्द्रियाणि षट्कर्मेन्द्रियक्रिया इति धातवो माण्डलेयाः,। एषां व्यापकं चित्तं ज्ञानं च नायकं 25 सर्वत्र। एवं **सकलगणकुलं शोधयेन्मातृभेदैरिति। शून्यैश्चानाहताद्यैरिति।** इह

१. ग. 'भवति, प्रज्ञातन्त्रं' नास्ति। २. च. योगानां। ३. ग. भो. षड्विषयैः। ४. ग. भो. षडिन्द्रियैः। ५. ग. 'आत्मा' नास्ति। ६. ग. 'षष्ठ' नास्ति। ७. च. षष्ठ।

षट्शून्यैर्ज्ञानाद्यैः **सकलजिनकुलैः** षट्स्कन्धैर्विशुद्धैर्मुद्रणं **देवतानाम्, उष्णीषादम्बुजान्ते विषमसमकुले चक्रमध्यासने** चेति। इह उष्णीषचक्रे [1]बिन्दावक्षोभ्य अ इति। एवं हृदये राहुमण्डले इ अमोघसिद्धिः, ललाटे चन्द्रमण्डले अमितभ उ इति विषमकुलम् विषमचक्रे। तथा नाभौ वैरोचनः ऌ कालाग्नौ, कण्ठे सूर्ये ऋ रत्नेशः, गुह्ये अं ज्ञानमण्डले वज्रसत्त्व इति मुद्रणं देवतानामिति नियमः कायमुद्रणे। प्राणमुद्रणे पुनः ऌ नाभौ, उ हृदये, ऋ कण्ठे, इ ललाटे, अ उष्णीषे पृथिव्यादिमण्डले देयः। तथा चित्तबिन्दुमुद्रणे ललाटे ॐ चन्द्रमण्डले, कण्ठे आः सूर्यमण्डले, हृदये हूँ राहुमण्डले, नाभौ [2]होः कालाग्निमण्डले। तथा ज्ञानमुद्रणं "अकारो मुखं सर्वधर्माणामाद्य[3]नुत्पन्नत्वात्" इति वज्रमणौ अ इति सिद्धं कायवाक्चित्तज्ञानानां मुद्रणम् ॥ १० ॥

इदानीं वक्त्रभेद उच्यते—

> वज्रैर्वक्त्रप्रभेदो भवति जिनपतेर्मातृभेदैर्भुजानां
> तत्त्वैर्मुद्राप्रभेदस्त्वपरमपि तथा कायवज्रादिभिश्च।
> षट्त्रिंशद् योगतन्त्रे त्वपरिमितगुणेऽनेकवर्णप्रभेदे
> प्रत्येके वर्णनामे समविषमकुले देवतादेवतीनाम् ॥ ११ ॥

वज्रैरित्यादि। इहैककुलं त्रिकुलं पञ्चकुलं षट्कुलं वज्रमुच्यते। तैर्वज्रैर्**वक्त्रभेदो भवति**। एककुलेन एकमुखम्, त्रिकुलैः शुद्धं त्रिमुखम्, पञ्चकुलैः शुद्धः पञ्चाननो भवति, षट्कुलैः शुद्धः षण्मुखो [171b] भवति भीम इति। एवमष्टमुखादीनां हलाहलः शताननो यावद्धातुभिः शुद्धो नायको भवतीति तन्त्रान्तरे नियमो **जिनपतेरिति**। एवं [4]**कालचक्रे** मण्डलाधिपतेरपि "एकाद्यानन्तवक्त्रो बहुकरचरणोऽनेकवर्णस्तमोऽन्ते" (का० त० ४.१३३) इत्यादि साधनपटले उक्तः। इह चतुर्विंशतिभुजस्य **मातृभेदैर्भुजानां** भेद इति। ह हा हि ही हृ हॄ हु हू इति कृष्णा अष्टौ तमोगुणतः। ह हा हे है हर् हार् हो हौ इत्यष्टौ रक्ता रजोगुणतः। [5]ह् ह ह् हा ह्य ह्या ह्र ह्रा [6]ह्व ह्वा इत्यष्टौ शुक्लाः सत्त्वगुणत इति कालचक्रस्य। तथा विश्वमातुः सर्वगुणतः हं हः हॢ हॣ हल् हाल् ह्ल ह्ला इत्यष्टौ पीता ज्ञानवक्त्रस्वभावत इति नियमः। **तत्त्वैर्मुद्राप्रभेद** इति आ ई ॠ ऊ ॣ अः आकाशवायुतेजउदकपृथ्वीज्ञानभेद इति सर्वदेवतागणस्य मुद्रणम्। **अपरमपि तथा कायमुद्रणं** ॐ, वाङ्मुद्रणं आः चित्तमुद्रणं हूं, [7]ज्ञानमुद्रणं होः, एककुलमुद्रणमनाहतोऽकार इति। एवं मुद्रणं षट्कुलैः पञ्चकुलैश्चतुःकुलैस्त्रिकुलैरेककुलेन **षट्त्रिंशद्योगतन्त्रेषु, अपरिमित**[8]**गुणेऽनेकवर्ण**-[9]**प्रभेदे** नानातन्त्रे **प्रत्येके** [10]**वर्णनाम** इति कवज्रे खवज्रे गवज्रे घवज्रे ङवज्रे।

---

१. ग. बिन्दोर। २. भो. हो। ३. च. द्यमुत्पन्न। ४. ग. कालचक्र। ५. च. ह हा, ग. ह्व ह्वा। ६. ग. ह्ल ह्ला। ७. ग. च. प्रज्ञा। ८. च. कुले। ९. च. भेदे। १०. ग. वर्णानामिति।

एवं चकारादो[1]नामपि षट्त्रिंशद्वर्णान् यावदिति। **समकुल** इति प्रज्ञातन्त्रे, **विषमकुल** उपायतन्त्रे, **देवतादेवतीनां** मुद्रणनियमः। बाह्ये रुचकादिकः, अध्यात्मनि [2]बुद्धात्मक इति ॥ ११ ॥

इदानीं मन्त्रदेवतानामुत्पत्तिक्रमेण[3] जातकशुद्धिरुच्यते—

बीजैकं चैकवीरो रजसि समरसः प्रज्ञयाऽऽलिङ्गितोऽभूत्
स्कन्धैः पञ्चात्मकोऽधिष्ठितमपि नवको भूमिधात्वादिभिश्च ।
पाय्वाद्यैश्चक्षुराद्यैः परिकरितमिदं पञ्चविंशात्मकश्च
एवं दन्तोद्भवे वै पुनरपि दशनैरीश्वरोऽनन्तचक्री ॥१२॥

बीजेत्यादि। इह यथा गर्भाधाने बोधिचित्ताधारसहितं मनोविज्ञानमेकं धर्मधातुविपर्ययेणैकलोलीभूत**मेकवीर** उच्यतेऽन्तर्भूता [4]स्वाभप्रज्ञा जातकस्य। एवं देवता ककारेणैकेन एकवीरा सिद्धा, पश्चात् तद् **बीजं रजसि समरसं प्रज्ञयाऽऽलिङ्गितं** भवति, तद्वासनातो विज्ञानस्कन्धः प्रज्ञयालिङ्गितो भवति का इति [5]तुर्ययोगत इति नियमः। एवं पञ्चस्कन्धनिष्पत्तौ **पञ्चात्मको** गर्भः, तथा देवताऽपि पञ्चात्मिका का कि कृ कु क्लृ इति। एवमस्थिद्रवोष्णचलधर्मोत्पत्तौ स्कन्धधात्वधिष्ठितो नवात्मको गर्भो यथा, तथा देवताऽपि का कि की कृ कॄ कु कू क्लृ क्लॄ इति सिद्धा। एवं वा[6]क्पाणिपायु-पादनिष्पत्तौ पूर्वस्कन्धधातुभिः सार्धं त्रयोदशात्मकः कर्मेन्द्रियनिष्पत्तौ यथा बालस्तथा देवताऽपि का कि की कृ कॄ कु कू क्लृ क्लॄ क्य क्र क्व क्ल इति। यथाऽ[7]ध्यात्मविषयो-त्पत्तौ गर्भे एकोनविंशत्यात्मकः पूर्वस्कन्धादिभिः सार्धं तथा देवताऽपि का कि की कृ कॄ कु कू क्लृ क्लॄ क्य क्र क्व क्ल का के कार् को काल् कः इति। ततश्चक्षुराद्युत्पत्तौ यथोत्पन्नो बालः पञ्चविंशत्यात्मकस्तथा देवताऽपि का कि की कृ कॄ कु कू क्लृ क्लॄ क्य क्र क्व क्ल का कै कार् कौ काल् [8]कः कं [9]के कर् को कल् कमिति। तत आलापादानगतिविण्मूत्रक्रियोत्पत्तौ पञ्चकर्मेन्द्रिययोगेन द्वात्रिंशदात्मको बालस्तथा देवताऽपि [10]क का कि की कृ कॄ कु कू क्लृ क्लॄ क्ह क्हा क्य क्या क्र क्रा क्व क्वा क्ल क्ला [172a] क का के कै कर् कार् को कौ कल् काल् कं कः इति द्वादशवर्षावधिनिष्पत्तिः। ततः षोडशवर्षावधिर्यथा बालस्य च्यवने शुक्रस्यावस्था तुर्या भवति चतुर्थी स एव चतुर्थः कायः षष्ठः स्कन्धः षष्ठो धातुः षष्ठमिन्द्रियं षष्ठो विषयः षष्ठं कर्मेन्द्रियं षष्ठी [11]कर्मेन्द्रियक्रिया भवति। एवं षट् स्कन्धाः षड्धातवो द्वादशायतनानि षट् कर्मेन्द्रियाणि षट् कर्मेन्द्रियक्रियाः। एवं षट्त्रिंशद् धातव आधेयभूताः सप्तत्रिंशतिमस्य ज्ञान-

T 417

१. भो. Min Can (नाम्नः)। २. ग. बुद्धात्म। ३. च. क्रमे। ४. ग. स्वाभा। ५. च. तुर्यात्मगत। ६. च. पाणिपादगुद। ७. ग. अध्यात्मनि। ८. भो. किः कि। ९. ग. च. के कर् को। १०. च. भो. 'क' नास्ति। ११. ग. 'कर्मेन्द्रियं नास्ति।

चित्तस्येति। [1]तथा देवतानिष्पत्तौ क का कि की कृ कॄ कु कू क्ल क्लॄ कं कः इति स्कन्धधातवो द्वादश। वह् वहा क्य क्या क्र क्रा क्व क्वा क्ल क्ला क्हं क्हः इति कर्मेन्द्रियकर्मेन्द्रियक्रिया द्वादश। तथा क का के कै कर् कार् को कौ कल् काल् कं कः इति द्वादशायतनानि सिद्धानि। एषां धातूनां नायकः पञ्चाक्षरो [2]महाशून्य उपायो बिन्दुशून्यः षडक्षरः प्रज्ञा वंकार एकार इत्येवंकारो नायको महासुखो मण्डलाधिपतिर्यथा कवज्रतन्त्रे तथा खवज्रादिके सिद्धः। एवं स्कन्धधातवो गर्भपुटे द्वादशायतनानि बाह्यपुटे द्वारपालाः कर्मेन्द्रियाणि सविषयाणीति। इह यथा कुमारः षोडशवर्षादूर्ध्वमीश्वरोऽनन्तचक्रीति पुत्रदुहितृस्कन्धानां जनकत्वात्, तथा पञ्चतथागतादिव्यूहस्फरणाद्देवतागणनायक ईश्वरोऽनन्तचक्री भवतीति[3] नियमः। इह यथा गर्भस्य कायनिष्पत्तिस्तथा देवतानिष्पत्तौ मण्डलराजाग्री सेवाङ्गम्, यथा वाङ्निष्पत्तिस्तथा कर्मराजाग्र्युपसाधनम्, यथा बोधिचित्तबिन्दु[4]निष्पत्तिस्तथा बिन्दुयोगः साधनम्, यथा शुक्रच्युतौ सुखोत्पत्तिस्तथा सूक्ष्मयोगो [5]महासाधनम्। एवं चतुरङ्गसाधनमध्यात्मपटले प्रागुक्ते शोधनीयं विस्तरत इति नियमः॥ १२॥

इदानीं षट्चक्रेषु षड्धातुभ्यः कुलदेवतास्फरणमुच्यते—

शुद्धे संशुद्धतोयाच्छशधरधवलः पद्मचिह्नोऽमिताभो
मानी लोकेश्वरो वै हयरथगमना मामकी रूपवज्रा।
रौद्री चाब्धिर्गणेन्द्रो द्विजफणिसहितो व्याघ्रवक्त्रा सलूका
एते श्रीवामवक्त्रात् परमकरुणया स्फारिता वज्रिणा च॥१३॥

शुद्ध इत्यादि। [6]इह षोडशवर्षादूर्ध्वं यथा मनुष्याणां षड्धातुस्वभावेन चित्तस्य नानास्फरणम्, तथा षड्धातुभेदेन नायकस्यापि। **शुद्ध** इति ललाटचक्रे **संशुद्धतोया**दिति निरावरणतोयधातोः संज्ञास्कन्धतोऽपि देवतागणः स्फुरति **शशधरधवलः पद्मचिह्नः** तद्यथा **अमिताभः**। [7]**मामकी** पद्मान्तकः अचलः **मानी** चुन्दा **लोकेश्वरः रूपवज्रा रौद्री** लक्ष्मी **समुद्रो गणेन्द्रः अनन्तो नागः कुलिको व्याघ्रवक्त्रा उलूकवक्त्रा** इत्येता देवताः **परमकरुणया स्फारिता वामवक्त्रा**दिति कायवक्त्राच्छुक्लात्। कालचक्रभगवतो नियमः। अत्रामिताभो विज्ञानमुद्रितो देवतागणोऽमिताभेन पद्मचिह्नः शान्तिपुष्टिकर्मसिद्धिद इति शुक्लतोयवर्णतः। एवममिताभकुलदेवतास्फरणं संहरणं च प्रत्यवेक्षणत इति॥ १३॥

इदानीममोघसिद्धिकुलस्फरणमुच्यते—

धर्मे संशुद्धवायोस्त्वसिकरकमलोऽमोघसिद्धिश्च तारा
वैगर्भः स्पर्शवज्रा त्वतिबलसहिता चर्चिका शृङ्खला च।

---

१. च. यथा। २. ग. 'महा' नास्ति। ३. ग. 'इति' नास्ति। ४. भो. sKyed Pa (उत्पत्तिः)। ५. ग. 'महा' नास्ति। ६. च. 'इह' नास्ति। ७. च. मामकीति।

नैर्ऋत्यः शूद्रनागाः पवन इति तथा श्वानवक्त्रा सकाका
मैत्रीचित्तेन चैते त्रिभुवनपतिना स्फारिता पूर्ववक्त्रात् ॥१४॥

धर्म इत्यादि। इह हृदये धर्मचक्रे संशुद्धवायुधातोः शुद्धसंस्कारात् खड्गचिह्नो देवतागणः कृष्णवर्णतः। तद्यथा अमोघसिद्धिस्तारा विघ्नान्तको नीलदण्डोऽतिबला वज्रशृङ्खला खगर्भः स्पर्शवज्रा चर्चिका वैष्णवी वायुर्नैर्ऋत्यः पद्मः कर्कोटकः काकास्या श्वानास्या एताः [172b] पूर्ववक्त्रादिति चित्तवक्त्रात्। मैत्रीचित्तेन स्फारितास्त्रिभुवनपतिनेति। अत्रामोघसिद्धिविज्ञानेन मुद्रितो देवतागणोऽमोघसिद्धिना खड्गचिह्न उच्चाटनविद्वेषकर्मसिद्धिदः [1]कृष्णो वायुवर्णतः। एवममोघसिद्धिकुलदेवतानां स्फरणं संहरणं च कृत्यानुष्ठानत इति ॥ १४ ॥

इदानीं रत्नसम्भवकुलस्फरणमुच्यते—

सम्भोगे शुद्धवह्नेरुदयरविनिभो रत्नधृक् पाण्डरा च
भूगर्भो जम्भको वै वररसकुलिशा शूकरी षण्मुखाग्निः।
राजानौ द्वौ फणीन्द्रौ प्रकटितभृकुटी शूकरास्या सगृध्रा
एते श्रीसव्यवक्त्रात् परममुदितया स्फारिता विश्वभर्त्री ॥१५॥

संभोगे शुद्धवह्नेरिति। इह कण्ठचक्रे शुद्धवेदनाया शुद्धवह्नेरुदयरविनिभ इति रक्तवर्णो रत्नधृगिति रत्नसम्भवः। एवं पाण्डरा। प्रज्ञान्तकः टक्किराजो जम्भी भृकुटी क्षितिगर्भो रसवज्रा वाराही कौमारी अग्निः कार्तिकेयः शूकरास्या गृध्रवक्त्रा वासुकिः शङ्खपाल एते श्रीसव्यवक्त्रात् परममुदितया स्फारिता विश्वभर्त्री इति। सर्वे रक्तवर्णा रत्नसंभवमुद्रिता वश्याकृष्टिसिद्धिदा वाक्चक्रस्वभावतः। एवं रत्नसंभवकुलदेवतानां स्फरणादिकं समताज्ञानत इति। अत्रापि रत्नसम्भवो विज्ञानमुद्रित इति ॥ १५ ॥

इदानीं वैरोचनकुलदेवतास्फरणमुच्यते—

नाभौ संशुद्धभूमेर्वरकनकनिभश्चक्रपाणिर्मुनिश्च
विष्कम्भी लोचना च प्रवरनरपते स्तम्भको गन्धवज्रा।
मारीच्यैन्द्री च शक्रो युगमुखसहितो वैश्यनागादि सर्वे
भर्त्रा चोपेक्षया वै सकलजनहिताः स्फारिताः पश्चिमास्यात् ॥१६॥

---

[1] च. कृष्ण।

नाभौ संशुद्धभूमेरित्यादि। इह नाभाविति निर्माणचक्रे शुद्धरूपस्कन्धात् शुद्ध-पृथ्वीधातोर्वरकनकनिभः पीतवर्णश्चक्रपाणिर्मुनिश्चेति वैरोचनः। एवं लोचना। यमान्तको महाबलः स्तम्भी मारीचो विष्कम्भी गन्धवज्रा ऐन्द्री ब्रह्माणी शक्रो ब्रह्मा तक्षको महापद्मो जम्बुकास्या गरुडास्या एता भर्त्रा चोपेक्षया वै सकलजनहिताः 5 स्फारिताः पश्चिमास्यादिति। ज्ञानवक्त्रात् पीतवर्णाश्चक्रचिह्नाः[1] स्तम्भनमोहनादि-कर्मसिद्धिदा वैरोचनमुद्रिताः। वैरोचनोऽपि विज्ञानमुद्रितः। एवं वैरोचनकुलस्फरणा-दिकमादर्शज्ञानत इति॥ १६॥

इदानीमक्षोभ्यकुलस्फरणमुच्यते—

उष्णीषे शुद्धशून्याद् वरकुलिशधरोऽक्षोभ्यधात्वीश्वरी द्वे
10 उष्णीषो धर्मधातुर्गगनगुणवशाद् वज्रपाण्यादयोऽन्ये।
गुह्ये शुद्धात् समस्ताः शमसुखनिधयः शब्दवज्रादयश्च
ऊर्ध्वाधः स्फारिता वै बहुगुणनिलयाः प्राणिनां मोक्षहेतोः॥१७॥

उष्णीषे शुद्धशून्यादिति। उष्णीषचक्रे शुद्धविज्ञानस्कन्धात् शुद्धाकाशधातोः, वरकुलिशधरोऽक्षोभ्यो [2]ज्ञानमुद्रितः श्यामवर्णः। एवं वज्रधात्वीश्वरी। उष्णीषो 15 वज्रहूंकारो रौद्राक्षी क्रोधराज्ञी वज्रपाणिर्धर्मधातुवज्रा विष्णुर्यमो जयो नाग एते ऊर्ध्व-वक्त्रात् शून्यात् स्फारिता बहुगुणनिलया इति सर्वकर्मसिद्धिदा वज्रचिह्ना अक्षोभ्य-मुद्रिताः श्यामाकाशवर्णत इति। एवमक्षोभ्यकुलदेवतास्फरणादिकं सुविशुद्ध-धर्मधातु[3]ज्ञानत इति।

इदानीं वज्रसत्त्वकुलस्फरणमुच्यते—गुह्ये शुद्धादित्यादि। इह गुह्यचक्रे 20 शुद्धज्ञानस्कन्धात् शुद्धज्ञानधातोर्नीलत्रिशूकवज्रचिह्नो वज्रसत्त्वो विज्ञानमुद्रितः। एवं ज्ञानधातुः। प्रज्ञा नीला सुम्भराजो वज्रवेगो अतिनीला क्रोधेश्वरी रुद्रो जम्भलः समन्तभद्रः शब्दवज्रा विजयनाग एते अधोवक्त्रात् ज्ञानधर्मात् स्फारिताः सकल-T 418 जनहिताः प्राणिनां मोक्षहेतोः सुविशुद्धधर्मधातुज्ञानतो नीलवर्णा नीलाक्षोभ्यमूर्त्या वज्रसत्त्वेन मुद्रिताः सर्वकर्मसाधका इति।

25 एवं षट्चक्रेषु षट्कुलदेवतानां स्फारणं जगदर्थकरणं षोडशवर्षादूर्ध्वं कालचक्रस्य जनकत्वेन सिद्धमिति नियमः। अत्राक्षोभ्यो नीलेनाक्षोभ्यरूपेण मुद्रितः श्यामो विज्ञान-स्कन्धः श्यामेनाक्षोभ्येण नीलो [4]ज्ञानस्कन्धः। अथ कायवाक्चित्तज्ञान[173a]चतुः-कुलभेदेन[5] यत्र मुद्रणम्, तत्र वैरोचनः शुक्लश्चन्द्रधर्मतः, अमिताभो रक्तः सूर्यधर्मतः, अक्षोभ्यः कृष्णो राहुधर्मतः, वज्रसत्त्वः पीतः कालाग्निधर्मत इति। अथ आधाराधेय-

---

१. भो. 'चक्रचिह्नाः' नास्ति। २. ग. 'ज्ञान' नास्ति। ३. ग. 'ज्ञान' नास्ति।
४. ग. विज्ञान। ५. ग. भेदे।

सम्बन्धेन मुद्रणं साधनापटलोक्तविधिना। तथा हि—अक्षोभ्यो वैरोचनस्य मुद्रणम्, वैरोचनो अमिताभस्य, अमिताभो रत्नसंभवस्य, रत्नसंभवोऽमोघसिद्धेरिति मुद्रणनियमः। एवं त्रैधातुकमहेश्वरोऽनन्तचक्री सर्वतन्त्रान्तरे वेदितव्यः, त्रिकुले पञ्चकुले चेति ॥१७॥

इदानीं प्रज्ञातन्त्रस्फरणमुच्यते—

दिक्पत्रे लोचनाद्या विदिशिदलगतं रक्तपूर्णं कपालं
प्रत्यालीढोऽर्कमूर्ध्नि प्रलयघननिभाक्रान्तसोमेश्वरो वै। 5
मालाबद्धः कपालैर्जलनिधिवदनो हेरुकः सूर्यबाहु-
र्मुद्राहिव्याघ्रचर्मा प्रलयगजपतेर्दार्यचर्मास्थिधारी ॥१८॥

दिक्पत्र इत्यादि। इह किल **चक्रसंवरे** वज्रडाकिन्यादयश्चतस्रो लोचनाद्याः पृथिव्यादिस्वभावाः शान्तिकादिसिद्धिदाः। ताश्च पुनश्चित्तवक्त्रादिकृष्णवर्णादिभिन्नाः सत्यो न पृथिव्यादिकर्मसिद्धिदाः स्युः। तथाह— 10

पीतेन स्तम्भनं कार्यं श्वेतेन शान्तिकं भुवि।
वश्याकृष्टी च रक्तेन कृष्णेनोच्चाटनादिकम् ॥ इति।

अतः कृष्णवर्णवशाद् वज्रडाकिनी वायुधातुः, रक्तवर्णतो लामा तेजोधातुः, पीतवर्णतः खण्डरोहा पृथ्वीधातुः, शुक्लमुखवर्णतः रूपिणी तोयधातुः। एवं [1]यथा चित्तवाग्ज्ञानकायमुखानां कृष्णरक्तपीतश्वेतवर्णा यथाक्रमम्, तथा तद्दिग्विभागे गतानां प्रचण्डादीनामपि नव नव देवीनां वर्णो वेदितव्यो **महालक्षाभिधाने**। इति भगवतो नियमः। तेनाल्पवीर्यवतां **मञ्जुश्रियाऽत्र कालचक्रे** लघूपदेशेन स एव प्रपञ्चः प्रकाशित इति। **दिक्पत्रे लोचनाद्या** इति पश्चिमदले लोचना वर्णतः, खण्डरोहा पीता [2]गुदनाडी-स्वभावतः, पृथ्वीवर्णतो ज्ञानवक्त्रं पश्चिमं पीतं कालचक्रस्य हेरुकस्य [3]चिह्नादिस्वभावत इति। उत्तरदले तोयवर्णतो रूपिणी शुक्ला उत्तरं कायवक्त्रं शुक्लं ललनास्वभावतः। दक्षिणे लामा रक्ता तेजोवर्णतो वाग्वक्त्रं[4] रक्तं रसनास्वभावतः। पूर्वदले वज्रडाकिनी कृष्णा वायुवर्णतः चित्तवक्त्रं[5] कृष्णं मूत्रनाडीस्वभावत इति। एवमवधूतीस्वभावेन वज्रवाराही श्यामा शङ्खिनीस्वभावतः। कालचक्रो हेरुको भगवान् नीलवर्ण इति। एवं चित्तवाक्कायचक्रारेषु पूर्वेऽग्नौ कृष्णा डाकिन्यः, दक्षिणे नैर्ऋत्ये रक्ताः, पश्चिमे वायव्ये पीताः, उत्तरेशाने शुक्लाः। एवमष्टश्मशानेषु देव्यो वेदितव्याः। आसां [6]विस्फरणेन कर्मप्रसरादिकं तन्त्रोक्तं **वज्रपाणिकृतटीकया षट्साहस्रिकया** बोद्धव्यं **लघुतन्त्रे**। तेनात्र न लिखितम्। **विदिशिदलगतमित्यादि** सुबोधम्। एवं **समाजो मायाजाल-**

15

20

25

---

१. च. भो. 'यथा' नास्ति। २. ग. च. 'गुदनाडीस्वभावतः' नास्ति, गृहीतस्तु भोटानुसारी। ३. भो. 'चिह्नादि' नास्ति। ४-५. ग. च. चक्रं। ६. ग. भो. विस्तरेण।

मपि प्रसिद्धं सुबोधम्, तेनात्र न लिखितम्। चित्तवाक्कायवज्रस्फरणमात्रत इति। अत्र मूलतन्त्रे सूत्रलक्षणम्—

द्वावेकश्च त्रयः सार्धा अर्धो ह्येको युगः शशी।
युग एको युगश्चैको भागो द्वात्रिंशदादिषु ॥ इति।

5 शेषं प्राकाराद्यं कालचक्रमण्डलवदिति ॥ १८ ॥

देवीभिः कृष्णरक्तामलशशितनुभिस्त्रीणि चक्राणि बाह्ये
षड्वज्राः क्रोधजाभिर्द्विभुजशशिमुखाभिस्तथा भूतजाभिः।
द्वारे चण्डाः शवस्था विदिशि च नियताः कर्तिकाशुक्तिहस्ता
वीराणां वेदहस्ते कुलिशडमरुकौ वज्रखट्वाङ्गघण्टे ॥१९॥

10 श्रीमेरोरष्टदिक्षु क्षितिजलवलये सर्वपीठोपपीठं
क्षेत्रं छन्दोहमेलापकचितिभुवने वह्निवाय्वोश्च मध्ये।
एवं देशे नगर्यां दिशिविदिशिगता देवता वेदितव्याः
प्रज्ञातन्त्राभिधानं त्रिभुवनगुरुणा स्फारितं पूर्ववक्त्रात् ॥२०॥

गर्भे चक्रं नवांशं शशिरविकमले मण्डलादर्धभागं
15 वज्रस्तम्भावलीभ्यां रचितमपि महास्कन्धधात्वाधिदैवम्।
बाह्ये प्राकारभित्तौ विषयविषयिणश्चन्द्रसूर्यासनस्थाः
सूर्यस्था द्वारपालास्त्वपरगणकुलं वेदिकायां समन्तात् ॥२१॥

इत्यादौ षट्प्रकारं गदितमपि तथा योगतन्त्रं समाजं
क्रोधाः कोणेषु पार्श्वे विषयविषयिणो जम्भलो धान्यहस्तः।
20 वाक्पादौ पाणिपायू भगरविशशिनः कालनाडीस्वभावाः
प्रज्ञोपायं समस्तं त्रिमुखरसभुजं स्फारितं सव्यवक्त्रात् ॥२२॥

चक्रं गर्भे त्रिकोणे भवति नरपते मण्डलाद् वै त्रिभागं
धातुस्कन्धाधिदेवं पुनरपरपुटे शब्दवज्रादयोऽष्टौ।
बाह्यस्थे मण्डले वै दशदिशि नियतं क्रोधवृन्दं रविस्थं
25 तस्मिन् प्राकारभित्तौ जलधिहतयुगा बोधिसत्त्वाः समस्ताः ॥२३॥

मायाजालं त्रिभेदं त्रिमुखरसभुजं देवताकायभेदात्
कल्पाद्यं यत्समस्तं जडहृदयवशात् स्फारितं वामवक्त्रात् ।
तन्त्रं योगानुविद्धं द्विगुणमिह महासंवरं डाकिनीनां
षट्चक्रैः षट्कुलैर्वै नृप चितिभुवनैः स्फारितं पश्चिमास्यात् ॥२४॥

इदानीं महासंवरमण्डलमुच्यते—　5

सूत्रैः षड्रन्ध्रभागैश्चलवलयगतैर्मण्डलं सूत्रयित्वा
गर्भात् षट्षड्विभागैरपि कमलदलं कर्णिकार्धेन युक्तम् ।
कर्तीचक्राब्जरत्नैरसिवरकुलिशैश्चावलीं द्विद्विभागै-
र्निर्यूहं द्वारमर्कैर्ऋतुभिरपि रसैर्वेदिकाहारभूमिम् ॥२५॥

पञ्चप्राकाररेखां त्रिभिरपि शिखिभिः पट्टिकां हारमूले　10
सूर्यैः पक्षं कपोलं त्रिगुणदिनकरैस्तोरणं स्तम्भमूर्ध्नि ।
अष्टद्वाराणि कुर्याद् दिशिविदिशि महामण्डलं वृत्तमेत-
न्मध्येऽब्जं विश्ववर्णं रविशशिपुटितं चासनं कर्णिकायाम् ॥२६॥

चक्रं नीलावलीं च क्षितिरपि हरिता क्ष्माऽसिता पीतचक्रं
रक्ता भूः श्वेतचक्रं क्षितिरपि धवला सावली रक्तचक्रम् ।　15
पीता नीला च भूमिस्त्वसितमपि भवेच्छ्यामवर्णं च चक्रं
षड्भागैरङ्गभूमिर्जनकसुखवशाद् द्वारचक्राणि तद्वत् ॥२७॥

बाह्ये द्व्यष्टश्मशानान्यपि च कुलवशाद् गर्भदेव्यस्तथाष्टौ
अष्टौ पत्रे कपालान्यमृतरसयुतान्यष्टपत्रेषु देव्यः ।
बाह्ये लास्यादिदेव्यो दिशिविदिशि महानागराजास्तथाष्टौ　20
तद्बाह्ये भूमितोयानलचलवलयान्येव वज्रावली च ॥२८॥

सूत्रैरित्यादि। इह पश्चिमास्यात् ज्ञानवक्त्रात् महाचक्रसंवरस्त्रिचक्रसंवरस्य द्विगुणो यतः पट्चक्रैः षोडशश्मशानैरिति। तेनास्य मण्डलं वृत्तमष्टद्वारविशोधनायेति, अतोऽस्य मण्डलस्य लक्ष[173b]णमुच्यते—सूत्रैः षड्रन्ध्रभागैरिति। [1]षण्णवतिविभागैः, **चलवलयगतैरिति** लोकधातौ चतुर्लक्षयोजनगतैर्वायुवलयान्तैः। शरीरे
5 चतुर्हस्तगतैरिति। **मण्डलं सूत्रयित्वा** षण्णवतिसूत्रैस्तेषु मध्ये **षट्षड्विभागैः** प्रत्येकं चक्रं कुर्यादेवं चक्रं षट्षड्विभागैरिति। **अपि कमलदलं कर्णिकार्धेन युक्तं** षड्विभागैरिति। एवं सप्तसु द्वाचत्वारिंशद्विभागाः पूर्वे, एवं पश्चिमे [2]दक्षिणे उत्तरेऽपि, सर्वेषामेकत्र चतुरशीतिभागा गताः। षण्णवतिषु शेषैर्द्वादशविभागेषु षड्विभागैः पूर्वभूमिः, पश्चिमाप्येवं [3]वामे दक्षिणेऽप्येवं सर्वदिक्षु सूत्राणि शुद्धानीति तत्र पूर्वोक्त-
10 षड्विभागमध्ये चतुर्भिः पद्मदलं द्वाभ्यां कर्णिकार्धम्। एवं चक्रस्याराश्चतुर्भिः, द्वाभ्यां चिह्नावली [4]कर्णिकादीनां मध्ये पद्मं षोडशदलं पद्मदलबाह्ये [5]कर्णिकावली नीला। तस्या भूमिस्तले श्यामा। [6]एवं चक्राराश्च नीला इति ज्ञानधातुचक्रे। ततः पृथ्वी[7]धातुचक्रे चक्रावली पीता चक्रारास्तथा, कृष्णा तले भूमिः। तोयधातुचक्रे पद्मावली शुक्ला चक्राराश्च, भूमिस्तले रक्ता। तेजोधातुचक्रे रत्नावली रक्ता चक्राराश्च, श्वेता तले
15 भूमिः। वायुधातुचक्रे कृष्णा खड्गावली चक्राराश्च, पीता तले भूमिः। आकाशधातुचक्रे श्यामा वज्रावली चक्राराश्च, तले भूमिर्नीला। ततः **षड्भागै रङ्गभूमिर्जनकमुखवशादिति।** पूर्वे कृष्णाग्नौ च दक्षिणे नैर्ऋत्ये रक्ता, पश्चिमे वायव्ये पीता, उत्तर ईशाने श्वेता, **द्वारचक्राणि** तद्वदित्यष्टमहाश्मशानचक्राणि। अष्टद्वारावसानेऽष्टश्मशानचक्राण्यष्ट[8]द्वारान्तरेषु। एवं षोडशश्मशानचक्राण्यष्टाराणि, [9]गर्भपद्माष्टदलेष्वष्टौ
20 देव्यः, अष्टदलेषु कपालान्यमृतपूर्णानि, अष्टदेव्यन्तरान्तरेषु षट्चक्राष्टारेषु पीठोपपीठादिदेव्योऽष्टचत्वारिंशत्। एवं वीराश्च वेदितव्याः। बाह्ये वेदिकायां **नागराजानोऽष्टौ, तोरणस्तम्भमूले,** लास्यादयो द्वारतोरणे, शेषं द्वारादिलक्षणं कालचक्रमण्डलवद् वेदितव्यमिति ॥ २५-२८ ॥

T 419

इदानीं षट्[10]चक्रारादिषु देवीबीजान्युच्यन्ते—

25 दीर्घैर्ह्रस्वैः स्वरैश्चापि स त प ट च क क्ष्मादिशून्यादिवर्णा
वाय्वाद्यारेषु दीर्घा रविचरणवशात् क्ष्मादिधातुस्वभावाः।
ऊर्ध्वाद्यारेषु ह्रस्वाः शशिचरणवशात् स्वस्वचक्रारमूर्ध्नि
द्वारे द्वारान्तराले गगनतलगता हक्षयुक्ताः सवर्गाः ॥२९॥

---

१. ग. 'षण्णवति' नास्ति। २. च. ग. मध्य। ३. भो. Byan (उत्तरे)। ४-५. भो. Gri Gug (कर्तिका)। ६. च. 'एवं' नास्ति। ७. ग. 'धातु' नास्ति। ८. ग. द्वारान्तरान्तरेषु। ९. ग. 'गर्भपद्म ·· द्वादशाङ्गप्रतीत्यः' नास्ति। १०. च. चक्रादिषु।

दीर्घैरित्यादि। **दीर्घैः पञ्चस्वरैः** ॡ ऊ ॠ ई आ इति। **ह्रस्वैश्च** अ इ ऋ उ ऌ इत्येभिर्भिन्नाः **स त प ट च कानां वर्गाणां षण्णां क्ष्मादिशून्यादिवर्णा वाय्वाद्यारेषु दीर्घा** इति। इह ज्ञानचक्रे सवर्गोऽधिदैवः, तस्य स्ॡ वायव्यारे, ≍पू ईशाने, षॄ नैर्ऋत्ये, शी आग्नेय्याम्, ≍का पाताले, वायव्यो[1]त्तरश्मशानचक्रमध्ये एताः पञ्च डाकिन्यो वृश्चिकलग्ने पञ्चमण्डलनायिकाः सर्वसत्त्वानां प्राणवाहत इति [2]संहारक्रमेण दक्षिण-नासापुटे। ततो धनुर्लग्ने ऊर्ध्वे ≍क वायव्य[3]पश्चिमश्मशानचक्रमध्ये ज्ञानचक्रपूर्वारे शि, दक्षिणे षृ, उत्तरे ≍पु, पश्चिमे स्ऌ इति वामनाडी[4]प्रवाहो धनुर्लग्ने। ततः पृथ्वीचक्रे तवर्गोऽधिदैवः। तस्य त्ॡ वायव्ये, थू ईशे, दॄ [5]नैर्ऋत्यारे, धी अग्नौ, ना पाताले वायव्य-द्वारे श्मशानचक्रमध्य इति कन्यालग्ने। तथा तुलायामूर्ध्वे न, पश्चिमद्वारे धि, [174a] पूर्वे दृ, दक्षिणे ङृ, थु उत्तरे, त्ऌ पश्चिमे इति। ततस्तोयधातुचक्रे पवर्गोऽधिदैवः। तस्य प्ॡ वायव्ये, फू ईशे, बॄ नैर्ऋत्ये, भी अग्नौ, मा पाताले ईशद्वारे। एवं कर्कटलग्नेऽधि-देवताः। तथा सिंहलग्ने आकाशे म, उत्तरद्वारे पूर्वारे भि, दक्षिणे बृ, उत्तरे फु, पश्चिमे प्ऌ इति। ततश्तेजश्चक्रे टवर्गोऽधिदैवः। तस्य ट्ॡ वायव्यारे, ईशे ठू, डॄ नैर्ऋत्ये, अग्नौ ढी, अधो णा नैर्ऋत्यद्वार इति वृषलग्ने। ततो मिथुने ण ऊर्ध्वे, दक्षिणद्वारश्मशाने पूर्वारे ढि, दक्षिणे डृ, उत्तरे ठु, पश्चिमे ट्ऌ इति। ततो वायुचक्रे चवर्गोऽधिदैवः। तस्य च्ॡ वायव्यारे, [6]ईशारे छू, नैर्ऋत्ये जॄ, अग्नौ झी, पाताले ञा अग्निद्वारे मीनलग्ने इति। ततो मेषलग्ने ऊर्ध्वे ञ, पूर्वद्वारश्मशानचक्रे पूर्वारे झि, दक्षिणे जृ, उत्तरे छु, पश्चिमे च्ऌ इति। तत आकाशधातुचक्रे कवर्गोऽधिदैवः। तस्य वायव्यारे क्ॡ, ईशे खू, नैर्ऋत्ये गॄ, अग्नौ घी, अधो ङा आग्नेय[7]दक्षिणद्वारमध्ये श्मशानचक्रोपरि इति मकरलग्ने। ततः कुम्भलग्ने ऊर्ध्वे ङ, आग्नेय[8]पूर्वद्वारमध्ये पूर्वारे घि, दक्षिणारे गृ, उत्तरारे खु, पश्चिमारे क्ऌ इति। **द्वारे द्वारान्तराले तलगगनगता ह्क्षयुक्ताः सवर्गा** इति। इह षड्वर्गाणां शून्यमण्डलवाहका द्वादशवर्णा दीर्घह्रस्व[9] ≍का ≍क ना न मा म णा ण ञा ञ ङा ङ इति द्वादशश्मशानदेवीनाम्। [10]अन्ये चतुःसन्ध्याभेदेन त्रित्रिलग्नान्ते चत्वारो वर्णा ह हा क्ष क्षा इति चतुर्षु वामेशानदक्षिणनैर्ऋत्यश्मशानेषु। एवं षोडशश्मशानेषु षोडश देव्यः, षट्चक्रेष्वष्टचत्वारिंशद्गर्भपद्मदलेष्वष्टदेव्यः। आसां बीजानि अ पूर्वदले, अः दक्षिणदले, अं उत्तरदले, आ पश्चिमदले, ह अग्निदले, हः नैर्ऋत्यदले, हं ईशानदले, हा वायव्यदल इति तासामन्तरान्तरेष्वष्टदलेष्वष्ट-कपालानि। मध्ये वज्रडाकिनीकालचक्रो हेरुको भगवान् नायको हूँ फ्रें आसां डाकिनीनां डाकानां च बीजान्ते वज्रम्, तेन सह नाम स्ॡवज्रा ≍ पूवज्रा इत्यादि क्ॡ[11]वज्रापर्यन्तम्। आसां डाका भावभेदेनाष्टचत्वारिंशत् [12]सिवज्रः षृवज्रः।

---

१. च. पश्चिम। २. च. संचार। ३. च. उत्तर। ४. भो. Srog Bab Paḥo (प्राणवाहो)। ५. भो. bDen Bral Du (नैर्ऋत्ये)। ६. भो. dBaṅ lDan Du (ईशे)। ७. च. पूर्व। ८. च. दक्षिण। ९. च. ≍ क ≍ का न ना म मा ण णा ञ ञा ङ ङा। १०. च. मध्ये। ११. च. वज्र। १२. भो. शि।

यत्र डाकिनीबीजं [1]दीर्घं तत्र डाकबीजं ह्रस्वम्, यत्र ह्रस्वं तत्र [2]दीर्घम्। स्लॄवज्रा[3]सिवज्र इति प्रज्ञोपायः। [4]ऌपूवज्रा पृवज्र इति। एवं सर्वत्र वक्ष्यमाणमिति। एवं मण्डले यजेत द्विगुणं डाकिनीजालसंवरमिति नियमः। इह वृश्चिकधनुरादिना यो विलोमेन न्यासः, स प्रपञ्चेनोक्तः। अत्र द्वादशाङ्गनिरोधेन विवृत्या परमार्थसत्यतो धनुर्वृश्चि-कादिविलोमेन पीठोपपीठादिन्यासः। संवृत्या मकरकुम्भादिक्रमेणोपपीलवादि-न्यासो द्वादशाङ्गप्रतोत्यतः। यथा त्रिचक्रसंवरे एकः प्रचण्डाचण्डाक्ष्यादिना विलोमेन पीठादिन्यासः, द्वितीयो महावीर्यादिना। [5]अनुक्रमेणोपश्मशानादिना। अत्र लोक-व्यवहारे या संवृतिः सा विवृतिरिति ज्ञेया। एवं वाय्वाद्यारेषु दीर्घा रविचरणवशाद् दक्षिणनाड्यां प्राणचरणवशादिति। ऊर्ध्वाद्यारेषु ह्रस्वाः [174b] शशिचरण-वशादिति वामनाड्यां प्राण[6]संचारवशादिति न्यास उक्तः। क्रमेण पुनः संवृत्या उपपीलवादिना मकरादिमण्डलेषु क च ट प त स वर्गाणां वर्णा दीर्घा ह्रस्वा देयाः। ककारादयो [7]ल्कारादिस्वरभिन्ना विवृत्या ऌकादयो ह्रस्वा अकारादिस्वरभिन्ना धनुर्वृश्चिकादिभेदेनेति। एवं पृथिव्यादयो वाय्वाद्यारेषु दक्षिणमण्डले वाहत ऊर्ध्वाद्यारेषु आकाशादयो वाममण्डलप्रवाहत इत्यध्यात्मनि नियमः ॥२९॥

डाकिन्यो ह्रस्वभावाः शशधरवदनाः कर्तिकाशुक्तिहस्ता
आलीढाः स्वस्वपात्रैर्दनुजरुधिरपा मुक्तकेशा विवस्त्राः।
पादे कट्यां ललाटे श्रवणगलकरे घुर्घुराद्यस्थिमुद्रा
माला खण्डैः कपालैः शिरसि कटितले पञ्चवर्णैर्जिनानाम् ॥३०॥

द्व्यास्या डाकाः करेषु सु॰विडमरुकौ वज्रखट्वाङ्गघण्टे
कण्ठे श्रीमुण्डमाला शिरसि च मुकुटो वज्रपट्टे मणिश्च।
श्रीकण्ठी नूपुरोऽङ्घ्रौ रुचकमपि करे मेखला कुण्डलानि
माला पूर्णैः कपालैः सकलतनुगता दंष्ट्रिणो भस्ममुद्रा ॥३१॥

भर्तुर्माला कपालैः शिरसि च गलके मुण्डमाला शतास्यै-
रर्धेन्दुर्वज्रमौलौ स्वकटिकरगतं द्वीपिचर्मेभचर्म।
मारेशौ पादमूले शशिरविहुतभुङ् मण्डलेऽङ्गे च भस्म
मुद्रा नागेन्द्रयुक्ता प्रलयशिखिनिभा डाकिनी चुम्बमाना ॥३२॥

दिक्पत्रे डाकिनीनामधिकडमरुको वज्रखट्वाङ्गमेव
विण्मूत्रासृङ्नृमांसैर्विदिशि दलगतं शुक्रपात्रं करे च।

१-२. च. दीर्घे। ३. भो. शि। ४. भो. ऌपु। ५. च. अत्र, भो. 'अनु' नास्ति।
६. ग. भो. संचरण। ७. भो. लॄ।

तद्वच्चाष्टौ च देव्योऽप्युभयसुखसमापत्तिचक्रं समन्तात्
पीता श्वेताऽरुणाभाऽसितहरितवपुर्नीलवर्णाः स्वदिक्षु ॥३३॥

वर्णाश्चिह्नानि भर्तुर्जिनजनककुले पूर्ववत् त्र्यक्षिजाल-
मन्योन्यालिङ्गनं च स्वपरकुलवशाद् वेदितव्यं समन्तात् ।
नानाद्यैः स्कन्धभूतैर्विषयविषयिभिश्चान्यपञ्चेन्द्रियाद्यै- 5
र्दिक्क्ष्माभिर्दिग्बलैः श्रीजिनसुतवसिताभिश्च देव्यो विशोध्याः॥३४॥

शेषाण्यत्र पञ्चवृत्तानि सुबोधानि ॥ ३०-३४ ॥

इदानीं देवीनां पीठादिस्थानमुच्यते—

मेरोर्दिक्ष्वष्टभेदैर्दिशिविदिशिगतं सर्वपीठोपपीठं
क्षेत्रं छन्दोहमेलापकचितिभुवनं वेश्मवाय्वर्धसीम्नः । 10
बुद्धस्यैतार्कभूम्यामणु तनुजनृणां भूतदेवासुराणां
शक्तेर्भर्तुर्दिनैकं विचरति कुलिका सूर्यचन्द्रप्रचारात् ॥३५॥

मेरोरित्यादि । इह मेरोरष्टदिक्षु ऊर्ध्वे योगिनीचक्रं वायुवलयान्तम्, अधोभूम्यां सत्त्वार्थाय सञ्चारः । एवं समुद्रवलयेऽग्निवलये वायुवलये आकाशान्त इति पञ्चलक्षयोजनं यावल्लोकधातुमण्डले सत्त्वानां शरीरे केशान्तं व्यापकत्वम्, भगवतो योगिनीसंचारत 15 इति । इह मेरुमूर्ध्नि पञ्चाशत्सहस्रयोजनं गर्भपद्मं षोडश[1]दलं भगवतः । तस्य त्रिभागा कर्णिका, कर्णिकोपरि सूर्यमण्डलम्, सूर्योपरि कालचक्रस्य दक्षिणपादतले मारः, वामपादतले क्लेशः, स च रुद्र इति । अष्टदलेषु धूमाद्या वज्रडाकिन्योऽष्टौ । तासामन्तरान्तरे दलेष्वष्टौ T 420 कपालान्यमृतपूर्णानि । एवं षोडशदलमानन्दचक्रं षोडशानन्दभेदेन देव्याः कपालानि च । भगवांश्चतुर्बिन्दुधरत्वाच्चतुर्मुखः, चतुर्विंशतिपक्षरोधतः चतुर्विंशतिकरः, अधिकमास- 20 पक्षयोर्निरोधतो द्व्यधिकजिनकरः, पूर्वोक्तो वज्रवेग इति । भगवत्या एकमुखं शून्यता, भुजद्वयमनिमित्ताप्रणिहिते, कर्तिकाकपालमुद्रादयोऽनभिसंस्कार इति । ततः पद्मबाह्ये मेरोरष्टदिक्षु दिग्विभागेन पञ्चविंशत्सहस्रयोजनं भूमिवलयमानेन ज्ञानधातुचक्रम्, तस्य त्रिभागभूम्यां कर्तिकावली, भागद्वयेनाष्टारम् । एवं समुद्रार्धे पृथ्वीचक्रम्, अपरार्धे तोय- चक्रम् । एवमग्निवलयार्धे वह्निचक्रम्, अपरार्धे वायुचक्रम् । एवं वायुवलयार्धे आकाशचक्रम्, 30 अपरार्धे रजोभूमिः । आकाशवलये षोडश श्मशानानीति नियमः । इह हि केशान्तं पद्महस्तं शरीरम्, तेनाकाशमण्डले बाह्यश्मशानानि, तद्विशुद्ध्या लोकधातुश्च पञ्च- लक्षयोजनानि महाचक्रसंवरे । एवं यथाक्रमेण मेरोरष्टदिक्षु ज्ञानधातुचक्रे पीठानि

---

१. ग. 'दलं भगवतः''''मकरे । ततः' नास्ति ।

दिगारेषु, धनुर्निरोधेन जरामरणनिरोधत उपपीठानि विदिगारेषु वृश्चिकनिरोधेन जातिनिरोधतः। एवं श्मशानद्वयम्। ततः पृथ्वीधातुचक्रे दिगारेषु चत्वारि क्षेत्राणि तुलानिरोधेन भवनिरोधतः। विदिगारेषूपक्षेत्राणि कन्यानिरोधेनोपादान-निरोधतः। एवं श्मशानद्वयम्। ततस्तोयधातुचक्रे दिगारेषु छन्दोहाश्चत्वारः सिंहनिरोधेन तृष्णानिरोधतः। विदिगारेषूपच्छन्दोहाः कर्कटनिरोधेन वेदनानिरोधतः। एवं श्मशानद्वयम्। ततस्तेजोधातुचक्रे दिगारेषु मेलापकाश्चत्वारो मिथुननिरोधेन स्पर्शनिरोधतः। विदिगारेषूपमेलाप[175a]का वृषनिरोधेन षडायतननिरोधतः। एवं श्मशानद्वयम्। ततो वायुधातुचक्रे दिगारेषु चत्वारि श्मशानानि मेषनिरोधेन नाम-रूपनिरोधत इति। विदिगारेषूपश्मशानानि मीननिरोधेन विज्ञाननिरोधतः। एवं श्मशानद्वयम्। तत आकाश[1]धातुचक्रे दिगारेषु चत्वारि पीलवानि वेश्मानि वा कुम्भ-निरोधेन संस्कारनिरोधतः। विदिगारेषूपपीलवानि मकरनिरोधेनाऽविद्यानिरोधतः। एवं श्मशानद्वयम्। लग्नचतुःसन्ध्यानिरोधेनापरश्मशानचतुष्टयम्। अथ षोडशचन्द्र-कलानिरोधेन षोडश श्मशानानि। एवम्—"द्वादशाकारसत्यार्थः षोडशाकारतत्त्वविद्" (ना० सं ९.१५) अष्टप्रहरनिरोधेनाष्टौ देव्यः। अथ वारनिरोधत इति विवृत्याधारे देव्यो निरावरणा आधेयस्वभावा इति। परमार्थसत्यतः लोकसंवृत्या पुनर्मन्त्रदेवतोत्पादः पीठादिके भगवता मूलतन्त्रे उक्तः। तद्यथा—

कामरूपं च जालाख्यं पीठं पूर्णगिरिस्तथा।
ओड्डियाणं चतुर्थं स्यात् शिपॄ⌒पुस्लृपु नायिकाः॥

गोदावरी च रामेशं देविकोट्टं च मालवम्।
उपपीठानि चत्वारि स्लॄ⌒पूषॄश्येसु नायिकाः॥

अर्बुदं मुन्मुनीक्षेत्रम् ओड्रं कार(रु)ण्यपाटकम्।
धिदृथुत्लृ इति देवीनामाधारो वसुधातले॥

त्रिशकुनीत्युपक्षेत्रं तथा कर्मारपाटकम्।
कोशलं लाडदेशं च त्लॄथूदॄध्येषु नायिकाः॥

कलिङ्गं हरिकेलं च छन्दोहं च चतुर्विधम्।
चन्द्रद्वीपं च लम्पाकं भिवृफुप्लृसु नायिकाः॥

काञ्ची कोङ्कणकं तथोपच्छन्दोहं च हिमालयम्।
[2]चतुर्थश्चैव नेपालं प्लॄफूव्रॄभ्येषु नायिकाः॥

मातृगृहं प्रयागं च कोल्लगिरिगृहदेवताः।
मेलापकं चतुर्धा स्याद् ढिड्ढॄठुठ्लृसु नायिकाः॥

---

१. च. 'धातु' नास्ति। २. च. चतुष्पथो वै।

सौराष्ट्रं चैव काश्मीरं सुवर्णद्वीपं सिंहलम् ।
उपमेलाकस्तेषु ट्लॄठूड्डॄढयेषु नायिकाः ॥

नगरं महेन्द्रशैलं च सिन्धुदेशं किरातकम् ।
चतुर्विधं श्मशानं स्याद् झिजॄछुच्लृसु नायिकाः ॥

मरुदेशं गह्वरं च कुलता [1]समलं तथा । 5
उपश्मशानमेवोक्तं च्लॄछूजॄझ्येषु नायिकाः ॥

[2]चरित्रं हरिकेलं चैव विन्ध्यं कौमारिकापुरी ।
चतुर्धा पीलवं ख्यातं घिगॄखुक्लृषु नायिका ॥

उपवेश्म विरजाः कोङ्कं त्रिपुरी श्रीहट्टकम् ।
चतुर्विधमिदमाख्यातं क्लॄखूगॄघ्येषु नायिकाः ॥ 10

द्वादश ᳵकादयो दूत्यः शून्यमण्डलनायिकाः ।
चतस्रो हादयो बाह्यश्मशानेषु च षोडश ॥

अ आ अं अः ह हा हं हः दूत्यः पद्मदलेषु ताः ।
अष्टस्वेव कपालानि कर्णिका खेट[3]नायिकाः ॥

द्वादशाङ्गनिरोधेन लग्नाधारप्रत्यूहतः । 15
भूमयो द्वादश ख्याताः पीठाद्याः परमार्थतः ॥

अविद्याद्यनुलोमेन संवृत्या मकरादिषु ।
धनुराद्या विलोमेन ता जरामरणादयः ॥

निरावरणधर्मेण डाकिन्यः कायधातवः ।
द्वासप्ततिविधाः प्रोक्ता धर्मशुद्धप्रभेदतः ॥ 20

संवृत्या मन्त्रसिद्धा यास्ता वेश्मादिषु नायिकाः ।
अथ [4]बीजाक्षरं तासां पीठादेरादि संभवेद् ॥ इति ।

तद्यथा—का जा पू ओ इति पी[175b]ठेषु । गो रा दे मा इति उपपीठेषु । अ मु [5]ओ का इति क्षेत्रेषु । त्रि क को ला इति उपक्षेत्रेषु । क हृ च ल इति छन्दोहेषु । कां कों हि ने इत्युपछन्दोहेषु । मा प्र को गृ इति मेलापकेषु । सौ [6]का सु सि इत्युपमेलापकेषु । न म सि कि इति श्मशानेषु । म ग कु स इत्युपश्मशानेषु । [7]च के विं को इति पीलवेषु । वि कों त्रि श्री इत्युपपीलवेषु । तथा षोडशश्मशानेषु वायव्यद्वारे वामदक्षिणयोः कं क ल ल कं एवं को ल हृ ल ल को । अथ ᳵकᳵका । एवं पूतिगन्धे 25 T 421

१. च. ममलम् । २. च. हरिद्रं । ३. भो. gTso Bo (नायकः) । ४. च. बीजाङ्कुरं ।
५. च. उ । ६. भो. क । ७. च. हृ ।

[1]पू सर्पदंशे स पश्चिमवायव्यद्वारे। अथ न ना क्लृ क्लॄ उत्तरद्वारे बालमृत्यौ बा [2]ईश्वरे। अथ म मा शवदहने शा घोरयुद्धे घ। अथ ण णा दक्षिणनैर्ऋत्यद्वारे शूलभेदे शू, उच्छिष्टे उ। अथ ञ ञा पूर्वाग्नेयद्वारे आग्नेयद्वारवामदक्षिणयोः, भीमे भी, भयंकरे भ। अथ ङ ङा ईशानद्वारवामदक्षिणयोः, हहाकारे ह, अट्टाट्टहासे आ। अथ ह हा नैर्ऋत्यद्वारवामदक्षिणयोः, रौद्रनादे रौ, फेत्कारे फे। अथ क्ष क्षा इति षोडशश्मशानदेवीबीजानि। एवं द्विगुणं डाकिनीजालसंवरं लौकिकदेशव्यवहारेण बालजनावतारणायोक्तम्। विचार्यमाणं कामरूपजालन्धरादिपीठादिकं मृषा, एकविषयेऽपि कोटिग्रामाधिदेवे पीठादीनामुक्तत्वात्। तथा भोटचीनमहाचीनादिषु षण्णवतिविषयेषु कोटिकोटिग्रामाधिदेवेष्वनुक्तत्वादव्यापकत्वं दूतीनाम्। तेन मूलतन्त्रे भगवतोक्तम्। तद्यथा—

पीठं पूर्वविदेहं स्याज्जम्बूद्वीपं च दक्षिणे।
पश्चिमेऽपरगोदानी उत्तरकुरुरुत्तरे॥
उपद्वीपं विदिक्षु स्यादुपपीठं पृथ्वीतले।
एवं क्षेत्रादिकं सर्वं समुद्रवलयादिषु॥ इति।

अतस्त्रिचक्रसंवरे हेवज्रे पूर्वापरवचनविरोधो भगवतो यः, स सत्त्वानां ग्रहमोचनाय तीक्ष्णेन्द्रियाणाम्। इह हि यानि पीठोपपीठादीनि चक्रसंवरे उक्तानि, तानि हेवज्रे क्षेत्रोपक्षेत्रादीन्यस्तव्यस्तानि प्रोक्तानि। यथा लौकिकसिद्धयोऽपि योगिनां बाह्यपीठादौ न संभवन्ति। अध्यात्मनि द्वादशलग्नानि द्वादशाविद्याद्यङ्गानि निरुद्धानि जरामरणादिनिरोधेन धनुरादिना पीठादीनि बोद्धव्यानि। तेषु पीठादिषु तथागतविशुद्धस्कन्धधात्वायतनादिधातूनां देवतारूपेणागमनं गमनं वाऽतीतकाले [3]भूतम्, वर्तमाने भवति, अनागते भविष्यत्यधिकारभोगलयभेदेन च। संवृत्या पुनस्त्रिचक्रसंवरे भोगलयाधिकाराधिपतित्वं सन्ध्याप्रहरलग्नार्धभेदेन चतुरष्टचतुर्विंशतिदेवीनामुक्तम्। अत्र षट्चक्रमहासंवरे लग्नमण्डलप्रवाहेणाधिकारो भोगो लयश्चेति। अत्राधिकारो नाम प्राणाधिष्ठानम्, स एव भोगोऽधिपतित्वं च, लय इति गम्यस्थानम्॥ ३५॥

देवीपृष्ठेऽधिकारो लय इह पुरतः पञ्चतत्त्वस्वभावै-
र्वाय्वीशे दैत्यवह्न्योरधसि च खसुरे याम्ययक्षापरेषु।
उष्णीषे हृत्प्रदेशे गलशिरसि गते नाभिगुह्ये तु चक्रे
चक्रेऽष्टारे तलोर्ध्वं प्रतिदिनमकराद् द्विद्विलग्नान्तराले॥ ३६॥

तेन **देवीपृष्ठेऽधिकारो लय इह पुरतः पञ्चतत्त्वस्वभावै**रित्यादि वितन्यते। इह मकरलग्ने पञ्चदण्डात्मके प्रथमदण्डे पृथ्वीमण्डलं दक्षिणनाड्यां नाभौ [176a] द्वादशदलेषु [4]मकरदलस्य पश्चिमदिग्विभागे प्राणप्रवाहोऽधिकारो वाय्वार इति कल्पना। इह

१. च. स्लृ। २. भो. dBaṅ lDan Du (ईशे)। ३. च. कृतं। ४. च. लग्ने मकर।

यदा प्राणशक्तेर्देव्याः पृथ्वीमण्डलेऽधिकारः स्थितिस्तदा [1]मध्यतोयमण्डले लयः। पुनर्जन्मग्रहणं पूर्वस्य निरोधोऽपरस्य उत्पादः स्वाध्यायदीपादिदृष्टान्तवदत्रापि मारणान्तिकौपपत्त्यङ्गिकधर्मणोरिति । तेन पृथ्वीमण्डलेऽधिकारस्तोयमण्डले लयः, तोयमण्डलेऽधिकारस्तेजोमण्डले लयः, तेजोमण्डलेऽधिकारो वायुमण्डले लयः, वायुमण्डलेऽधिकारः शून्यमण्डले लयः, शून्यमण्डलेऽधिकारो ज्ञानमण्डले लय इति मकरे। ततः कुम्भदले [2]मध्यमायां यः संचारः, स चक्रे ऊर्ध्वे उक्त इति। इह ज्ञानमण्डले यदा अवधूत्यामधिकारस्तदा वामनाड्यामाकाशमण्डले लयः, यदा [3]आकाशेऽधिकारस्तदा वायौ लयः, एवं वायावधिकारस्तेजसि लयः, तेजस्यधिकार उदके लयः, उदकेऽधिकारः पृथिव्यां लयः, पृथिव्यामधिकारो ज्ञानमण्डलेऽवधूत्यां लयः। एवं मीनमेषमण्डलेषु, तथा वृषमिथुनयोः, कर्कटसिंहयोः, कन्यातुलयोः, वृश्चिकधनुषोरिति षष्टिमण्डलेषु भोगलयाधिकारास्त्रिलग्नान्ते चत्वारो मध्यमायां वेदितव्याः। [4]एवं **वाय्वीशे दैत्यवह्न्योरधसि च खसुरे याम्ययक्षापरेषु** दशसु मण्डलेषु, चकारात् ज्ञानमण्डलेऽपि। मकरे कुम्भे, एवमन्ये[ष्व]पीति। इदानीं मकरादीनामाधारचक्रनाड्य उच्यन्ते-**उष्णीष** इत्यादि। इहोष्णीषचक्रप्रथमपरिमण्डले चतुर्नाड्यः, मध्ये एका। एवं हृदयादिचक्राणाम्। तेनोष्णीषचक्रे मकरकुम्भयोर्वायव्यारादिसंचारः, [5]पूर्वे चक्रस्याकाशशुद्धितो वज्रचिह्नम्। तेन मण्डले आकाशचक्रे [6]वज्रावली। एवं **हृदय**स्वभावतो वायुचक्रे खड्गावली मीनमेषयोः। एवं **गलगते** तेजःस्वभावतश्तेजश्चक्रे रत्नावली वृषमिथुनयोः। **शिरसि** गते तोयस्वभावतस्तोयचक्रे पद्मावली कर्कटसिंहयोः । **नाभिचक्रे** पृथ्वीस्वभावतः चक्रावली कन्यातुलयोः। **गुह्यचक्रे** ज्ञानस्वभावतः कर्तिकावली वृश्चिकधनुषोरिति। एषु **चक्रे**ष्वष्टाष्टारेषु **तलोर्ध्वं** च **प्रतिदिनं मकरलग्नादारभ्य** एष सञ्चारो योगिना प्राणस्य वेदितव्यः। इह यत्र यत्र प्राणोऽधिकारं करोति, तत्र [7]तत्र मण्डलनायिकाया नाम्ना सार्धं भगवतोऽष्टचत्वारिंशत्पदिकस्यैकपदं गृहीत्वा जपेत् प्राणप्रवाहेण, नाक्षसूत्रेणेति। एवं षोडश[8]पदिकस्यैकपदं गृहीत्वा श्मशानदेवीनामसहितं जपेद् अष्टपदिकं [9]कमलदलाष्टदेवीभिः सहेति वक्ष्यमाणम्। एवं मकरादिदूतीनां **द्विद्विलग्नान्तराले चक्रसंचारो** दश दश दण्डेषु। एवमहोरात्रेण षष्टिदण्डैः षष्टिमण्डलेषु संचारः प्राणस्येति । एव[10]मत्र दनुजनरभूतदेवासुरादीनां स्वस्वदिने स्वस्वमण्डलेषु योगिनीसंचार उत्पादप्रलयहेतुभूतः —

> महामाया महारौद्रा भूतसंहारकारिणी।
> यथा तथा स्वयं कर्ता हर्ता वज्रधरः स्मृतः ॥

---

१. च. मध्ये। २. च. मध्ये। ३. भो. mखhaḥi dKyil ḥKhor (आकाशमण्डले)। ४. भो. 'एवं' नास्ति। ५. भो. Daṅ Po La (प्रथमे)। ६. ग. 'वज्रावली···वायुचक्रे' नास्ति। ७. ग. 'तत्र' नास्ति। ८. ग. पदस्य, भो. rKaṅ Pa Re Re स्यैकैकपदं)। ९ ग. सकमलदले। १०. ग. मण्डलतु, भो. Lus Las sKyes Paḥi Phra Mo (एवमणुतनुज)।

प्रज्ञापारमिता कर्त्री कर्ता बुद्धो न देहिनाम् ।
हन्त्री हर्ता न बौद्धानां देशितो भूतवादिना ॥
कायवाङ्मानसं कर्म यः करोति शुभाशुभम् ।
सत्त्वस्तस्य फलं भुङ्क्ते कर्ता नान्योऽस्ति कस्यचित् ॥

इति भगवतो नियमः ॥ ३६ ॥

इदानीं नायकासनमुच्यते[176b]—

भर्त्रब्जं सर्ववज्रैः कुलिशमणिगतैश्चाक्षरैर्बिन्दुभिश्च
सर्वानन्दं समन्तात् समसुखनिलयं वज्रिणः सर्वकालम् ।
तस्मिन् चन्द्रद्रवे यो विशति गुरुमुखे कालचक्रः स एव
माराणां कालमुक्तं मरणभयकरं डाकिनीचक्रमेतत् ॥ ३७ ॥

[1]भर्त्रित्यादि । इहोष्णीषादिषट्चक्रेषु योगिनीसंचारः ककारादिवर्णैः, तेन **भर्त्रब्जं** [2]मध्यकमलं मण्डले यत्तत्, **सर्ववज्रैरिति** चतुर्बिन्दुभिरक्षरैरित्यच्युतैः, **कुलिशमणिगतैः** कुलिशमणिगतं कमलं **सर्वानन्दं समन्तात् समसुखनिलयमच्युतत्वाद् वज्रिणः सर्वकालं** योगिनीनामानन्दजनकम् । अतस्तस्मिंश्चन्द्रद्रवेऽच्युते सुखे **यो विशति गुरुमुखे** ज्ञानवक्त्रे **कालचक्रः स एव** योगी भवतीति नियमः । एवमेतच्चक्रं **कालमुक्तमित्यविद्यादि-** धर्ममुक्तम् । **माराणां** स्कन्धादीनां चतुर्णां **मरणभयकरं डाकिनीचक्रमेतदिति** सर्वावरणविनिर्मुक्तं नान्यदेवतागणं कल्पितमिति ॥ ३७ ॥

इदानीं लौकिकसिद्धिसाधनाय मन्त्रजाप उच्यते—

प्रज्ञोपायाक्षराभ्यामुभयकुलवशाद् डाकिनीडाकनाम
जाप्यं वज्रत्रयेणापरपदसहितेनादिमध्यान्तभिन्नम् ।
प्राणेनाधिष्ठितं यद् ह्युभयगतिवशात् स्वस्वकर्मानुरूपं
सिद्धिं गच्छन्ति शीघ्रं रसगतिषु गता डाकिनीवज्रडाकाः ॥ ३८ ॥

प्रज्ञोपायेत्यादि । इह कालचक्रे **प्रज्ञोपायाक्षराभ्यामिति** । इह यत्र [3]प्रज्ञाया ह्रस्वबीजं तदोपायस्याभिमुखकुलवशाद्दीर्घं भवति, यदा प्रज्ञाया दीर्घस्तदोपायस्य ह्रस्वम् । **एवमुभयकुलवशाद् डाकिनीडाकनामेति** शिवज्रा स्लृवज्र इत्यादि । एवं स्लृवज्रा शिवज्रः । पृथ्वीवायुः(यू) परस्परं प्रज्ञोपायभेदतः । एवं तोयतेजसोः षृ- वज्रा ~पू वज्र इति । तथा ~पूवज्रा षृवज्र इति सर्वडाकिनोडाकानां नाम **जाप्यमिदं वज्रत्रयेणापरपदसहितेनादिमध्यान्तभिन्नमिति** । आदावोङ्कारः, मध्ये मालामन्त्रस्या- दिमं पदादिकम्, ततो वज्रदूतीबीजं वज्रडाकसहितम्, ततो ह्रस्व[4]हुंकारं चित्तवज्रम्, दीर्घं वाग्वज्रम्, अन्ते फट्कारमिति । [5]ततो मालामन्त्रो द्वासप्ततिपदिकः । तेषु

---

१. ग. भर्तुरित्यादि । २. ग. मध्ये । ३. ग. प्रज्ञा । ४. च. हूंकार । ५. ग. तत्र ।

द्वासप्ततिपदेष्वष्टपदान्यादौ पद्मदलदेवीभिः सार्धम्, षोडशपदानि श्मशानदेवीभिः सार्धम्, अष्टचत्वारिंशत्पदानि षट्चक्रवीरवीरेश्वरीनामसहितानि जाप्यानीति। अत्राष्टपदानि चतुःश्मशानपदानि मध्यमायां द्वादशप्रवेशेषु जाप्यानि प्राणेनाधिष्ठितानि। मकरादौ संक्रान्तिकाले शेषाणि षष्टिपदानि पञ्चमण्डलाधिष्ठानेन **प्राणाधिष्ठितं** यन्मण्डलं तस्याधिदेवतासहितं मालामन्त्रं योगिनां सिद्धयति। वाहभेदे **सिद्धिं गच्छन्ति शीघ्रं रसगतिषु गताः** षड्गतिषु गता भगवतः [1]**सर्वडाकिनीवज्रडाका** इति नियमः। अत्र संवृत्योपपीलवादिन्यासो मकरादिना कवर्गादिना देवीमालामन्त्रे। तत्र द्वादशसंक्रान्तिपदानि। तद्यथा ॐ आः हुं होः हं क्षः हं क्ष्म्ल्व्र्य कालचक्र हा वज्रे हुं हूं फडिति मकरसंक्रान्तौ सपादषट्पञ्चाशत् श्वासजापः। एवं कुम्भसंक्रान्तौ ॐ दुर्दान्त[2]दमक जातिजरामरणान्तक [3]स्वा वज्रे हुं हूं फट्। ॐ त्रैलोक्यविजय [4]हः वज्रे हुं हूं फडिति मीने। ॐ महावीरेश्वर [5]अः वज्रे हुं हूं फट् मेषे। ॐ वज्रभैरव हः वज्रे हुं हूं फडिति वृषे। ॐ वज्रकाय अः वज्रे हुं हूं फडिति मिथुने। ॐ वज्रगात्र हं वज्रे हुं हूं फडिति कर्कटे। ॐ वज्रनेत्र अं वज्रे हुं हूं फडिति सिंहे। ॐ वज्रश्रोत्र हा वज्रे हुं हूं फडिति कन्यासंक्रान्तौ। ॐ वज्रघ्राण [6]ह वज्रे हुं हूं फडिति तुलायाम्। ॐ वज्रजिह्व क्षा वज्रे हुं हूं फडिति वृश्चिके। ॐ वज्रदन्त [7]क्ष वज्रे हुं हूं फडिति धनुःसंक्रान्तौ श्वासेन सार्धं जपेत्। [177a] इति द्वादशसंक्रान्तौ ज्ञानमण्डलजापः। ॐ वज्रनख क्लृ वज्रे घि वज्र हुं हूं फडिति मकरपृथ्वीमण्डले सपादैकादशोनषष्ट्युत्तरत्रिशतजापः। एवं सर्वत्र षष्टिमण्डलेषु। ॐ वज्रकेश खू वज्रे गृ वज्र हुं हूं फडित्युदके। ॐ वज्रलोम गॄ वज्रे खु वज्र हुं हूं फडिति तेजसि। ॐ वज्राभरण घी वज्रे क्लृ वज्र हुं हूं फडिति वायौ। ॐ वज्रहास [8]दा वज्रे हुं हूं फडिति आकाशमण्डले श्मशाने भगवानुपायस्तेन द्वितीयबीजाभावः। एवं सर्वत्राकाशमण्डले ज्ञेयः। ॐ वज्रगीत [9]द वज्रे हुं हूं फडिति कुम्भाकाशमण्डले श्वासजापः। ॐ वज्रनृत्य घि वज्रे क्लॄ वज्र हुं हूं फडिति वायौ। ॐ वज्रायुधक गृ वज्रे खू वज्र हुं हूं फडित्यग्नौ। ॐ वज्रक्रोधाधिपते खु वज्रे गॄ वज्र हुं हूं फडित्युदके। ॐ वज्रडाक क्लृ वज्रे घो वज्र हुं हूं फडिति पृथ्वीमण्डले श्वासजापः। एवं [10]कवर्गो गतः। ततो मीने ॐ वज्रडाकिनीजालपरिवृत च्लॄ वज्रे झि वज्र हुं हूं फडिति पृथ्वीमण्डले श्वासजापः। ॐ शीघ्रमागच्छागच्छ छू वज्रे जु वज्र हुं हूं फडिति तोये। ॐ वज्रसत्त्वाज्ञया सर्वमारविघ्नविनायककिन्नरकिम्पुरुषगरुडगन्धर्वयक्षराक्षसभूत[11]प्रेतकुम्भाण्डापस्मारक्षेत्रपालवेतालपूतनादुष्टनागग्रहादयो ये सर्वज्वरसर्वव्याधिभिः क्षुद्रोपद्रवकारिणः सर्वसत्त्वापकाररताः, तान् सर्वान् जः शीघ्रं वज्राङ्कुशेनाकृष्याकृष्य जॄ वज्रे छु वज्र हुं हूं फडित्यग्निमण्डले। ॐ ऊर्ध्वदिशि गता-

---

१. भो. rDo rJe mKhaḥ ḥGro Ma (वज्रडाकिनी)। २. भो. दमकः। ३. ग. भो. ह वज्रे। ४. ग. ह, भो. आ। ५. ग. भो. अ। ६. ग. आ। ७. ग. 'क्ष वज्रे ..... आकृष्य ढि' नास्ति। ८. च. हां। ९. च. हं। १०. भो. Ka sDe La gNas Pa rNam So (कवर्गगताः)। ११. भो. महाप्रेत।

नाकृष्याकृष्य झी वज्रे च्लृ वज्र हुं हूं फडिति वायौ। ॐ पूर्वदिशि गतानाकृष्याकृष्य ञा वज्रे हुं हूं फडिति आकाशमण्डले श्मशाने। ततो मेषे ॐ दक्षिणदिशि गताना-कृष्याकृष्य ञ वज्रे हुं हूं फडित्याकाशमण्डले श्मशाने। ॐ उत्तरदिशि गताना-कृष्याकृष्य झिवज्रे च्लॄ वज्र हुं हूं फडिति वायौ। ॐ पश्चिमदिशि गतानाकृष्या-कृष्य जृ वज्रे छू वज्र हुं हूं फडिति तेजसि। ॐ वायव्यदिशि गतानाकृष्याकृष्य छु वज्रे जॄ वज्र हुं हूं फडिति तोये। ॐ ईशदिशि गतानाकृष्याकृष्य च्लृ वज्रे झी वज्र हुं हूं फडिति पृथ्वीमण्डले श्वासजापः। ततो वृषलग्ने ॐ नैर्ऋत्यदिशि गताना-कृष्याकृष्य ट्लॄ वज्रे ढि वज्र हुं हूं फडिति पृथ्वीमण्डले श्वासजापः। ॐ आग्नेय-दिशि गतानाकृष्याकृष्य ठू वज्रे डृ वज्र हुं हूं फडिति तोये। ॐ अधोदिशि गताना-कृष्याकृष्य डॄ वज्रे ठु वज्र हुं हूं फडिति तेजसि। ॐ आकाशमण्डलगतानाकृष्याकृष्य ढो वज्रे ट्लृ वज्र हुं हूं फडिति वायौ। ॐ वायुमण्डलगतानाकृष्याकृष्य णा वज्रे हुं हूं फडिति आकाशमण्डले श्मशाने श्वासजापः। ततो मिथुने ॐ तेजोमण्डल-गतानाकृष्याकृष्य ण वज्रे हुं हूं फडिति आकाशमण्डले श्मशाने श्वासजापः। ॐ उदकमण्डलगतानाकृष्याकृष्य ढि वज्रे ट्लृ वज्र हुं हूं फडिति वायौ। ॐ पृथ्वी-मण्डलगतानाकृष्याकृष्य डृ वज्रे ठू वज्र हुं हूं फडिति [177b] तेजसि। ॐ काम-धातुगतानाकृष्याकृष्य ठु वज्रे डॄ वज्र हुं हूं फडित्युदके। ॐ रूपधातुगतानाकृष्याकृष्य ड्लृ वज्रे ढी वज्र हुं हूं फडिति पृथ्वीमण्डले श्वासजापः। ततः कर्कटलग्ने ॐ अरूपधातुगतानाकृष्याकृष्य प्लॄ वज्रे भि वज्र हुं हूं फडिति पृथ्वीमण्डले श्वासजापः। ॐ कायधातुगतानाकृष्याकृष्य फू वज्रे बृ वज्र हुं हूं फडिति तोये। ॐ वाग्धातुगताना-कृष्याकृष्य बॄ वज्रे फु वज्र हुं हूं फडिति तेजसि। ॐ चित्तधातुगतानाकृष्याकृष्य भी वज्रे प्लृ वज्र हुं हूं फडिति वायौ। ॐ पञ्चस्कन्धगतानाकृष्याकृष्य मा वज्रे हुं हूं फडिति आकाशमण्डले श्मशाने श्वासजापः। सिंहे ॐ पञ्चधातुगताना-कृष्याकृष्य म वज्रे हुं हूं फडिति आकाशमण्डले श्मशाने श्वासजापः। ॐ पञ्चे-न्द्रियगतानाकृष्याकृष्य भि वज्रे प्लॄ वज्र हुं हूं फडिति वायौ। ॐ पञ्चविषयगताना-कृष्याकृष्य बृ वज्रे फू वज्र हुं हूं फडिति तेजसि। ॐ पञ्चकर्मेन्द्रियगताना-कृष्याकृष्य फु वज्रे बॄ वज्र हुं हूं फडिति तोये। ॐ [1]पञ्चकर्मेन्द्रियविषयगताना-कृष्याकृष्य प्लृ वज्रे भी वज्र हुं हूं फडिति पृथ्वीमण्डले श्वासजापः। ततः कन्यालग्ने ॐ सर्वत्र यत्रकुत्रचिद्गतानाकृष्याकृष्य त्लॄ वज्रे धि वज्र हुं हूं फडिति पृथ्वीमण्डले श्वासजापः। ॐ महाश्मशाने वज्राग्निज्वलितभूम्यां निपातय [2]निपातय थू वज्रे दृ वज्र हुं हूं फडिति तोये। ॐ वज्रपाशेन सर्वभुजेषु बन्धय बन्धय दॄ वज्रे [3]थु वज्र हुं हूं फडित्यग्नौ। ॐ वज्रशृङ्खलया सर्वपादेषु निरोधय निरोधय धी वज्रे त्लृ वज्र हुं हूं फडिति वायौ। ॐ सर्वसत्त्वकायवाक्चित्तक्षुद्रोपद्रवकाररतान् महाक्रोध [4]वज्रेण चूर्णय चूर्णय ना वज्रे हुं हूं फडित्याकाशमण्डले श्मशाने। ततस्तुलालग्ने

---

१. च. ग. 'पञ्च' नास्ति। २. ग. 'निपातय' नास्ति। ३. ग. 'थु वज्र' नास्ति।
४. भो. वज्रिन्।

ॐ वज्रखड्गेन निकृन्तय निकृन्तय न वज्र हुं हूं फडित्याकाशमण्डले श्मशाने श्वासजापः। ॐ वज्रत्रिशूलेन भेदय भेदय धि वज्रे ॡ वज्र हुं हूं फडिति वायौ। ॐ वज्रकर्तिकया हन हन दृ वज्रे थू वज्र हुं हूं फडिति तेजसि। ॐ वज्रबाणेन बिन्ध बिन्ध थु वज्रे दॄ वज्र हुं हूं फडिति तोये। ॐ वज्रकीलकैः कीलय कीलय ल्ल वज्रे धी वज्र हुं हूं फडिति भूमिमण्डले श्वासजापः। ततो वृश्चिकलग्ने ॐ वज्रमुद्गरेणा-कोटयाकोटय स्लॄ वज्रे शि वज्र हुं हूं फडिति पृथ्वीमण्डले श्वासजापः। ॐ वज्रचक्रेण छेदय छेदय ≍ पू वज्रे पृ वज्र हुं हूं फडिति तोये। ॐ वज्रकुन्तेन भिन्ध भिन्ध पॄ वज्रे ≍ पु वज्र हुं हूं फडिति तेजसि। ॐ वज्रदण्डेन ताडय ताडय शी वज्रे स्ल वज्र हुं हूं फडिति वायौ। ॐ वज्रपर्शुना छिन्द छिन्द ≍ का वज्रे हुं हूं फडिति आकाशमण्डले श्मशाने श्वासजापः। ततो धनुर्लग्ने ॐ सार्धत्रिकोटिखण्डानि कृत्वा श्मशानभूम्यां सर्वभूतेभ्यो बलिं कुरु कुरु ≍ क वज्रे हुं हूं फडित्याकाशमण्डले श्मशाने श्वासजापः। ॐ वज्रडमरुकेण वज्रडाकिनीरावाहयावाहय शि वज्रे स्लॄ वज्र हुं [178a] हूं फडिति वायौ। ॐ वज्रडाकिनीभ्यो मारकायिकानां रुधिरं निवेदय निवेदय पृ वज्रे ≍ पू वज्र हुं हूं फडिति तेजसि। ॐ पञ्चामृतहारिणीभ्यः पञ्चामृतं निवेदय निवेदय ≍ पु वज्रे पॄ वज्र हुं हूं फडिति तोये। ॐ सर्ववज्रडाकिनीसहितः सर्वसत्त्वानां शान्तिकं पौष्टिकं रक्षावरणगुप्तिं कुरु कुरु स्ल वज्रे शी वज्र हुं हूं फडित्य-वनिमण्डले श्वासजापः। एवं मालामन्त्रं प्रतिदिनं [1]श्वासचक्रसंख्यं जपेत्। अत्र नाक्षसूत्रं न मन्त्रोच्चारः, श्वासोच्छ्वासाभ्यां सह मन्त्राक्षराणां प्रवेशो निर्गमः पुष्पमालावदनुलोमविलोमेन चन्द्रसूर्यस्वभावेन द्रष्टव्यः। एवं पञ्चदिनैरष्टसहस्राधिको लक्षजापोऽध्यात्मनि योगिना कर्तव्यः। पञ्चशतदिनैः कोटिजापोऽष्टलक्षाधिकः श्वासानाम्। ततः कायशुद्धिरेवं वाग्विशुद्धिस्तथा चित्तविशुद्धिः। एवं पञ्चशतदिनैः श्वासो निष्कम्पो भवति। कुम्भकावस्थां प्राणः प्राप्नोति। ततः पञ्चाभिज्ञा जायन्ते योगिनामिति वज्रजापक्रमो नपुंसकजापक्रमो [2]वा वामदक्षिणमध्यमाप्राणसंचारेण भवतीति भगवतो नियमः॥ ३८॥

इदानीमवधूतीश्वासैः कायवाक्चित्तज्ञानपञ्चचक्रैः सर्वबुद्धसंवरमुच्यते—

ये श्वासा मध्यमायां सपदरसशरा जन्मकाले बभूवु-
स्तैश्चक्राण्यष्टकैः स्युस्तलगगनवशाद् द्वारमध्यस्थदेव्यः।
पादेनैकेन जाता त्रिभुवनजननी कर्तिकाशुक्तिहस्ता
आलीढोऽर्केन्दुमूर्ध्नि त्वमृतसुखकलालिङ्गितः कालचक्रः॥३९॥

ये श्वासा इत्यादि। इह मध्यमायां ये [3]श्वासा जन्मकाले बालस्य सपादषट्-पञ्चाशत् श्वासाः सपदरसशरा बभूवुः, तैश्चक्राण्यष्टकैः स्युस्तलगगनवशाद् द्वारमध्य-

१. ग. श्वासजाप। २. च. 'वा' नास्ति। ३. ग. 'श्वासा' नास्ति।

स्थदेव्य इति । एषां श्वासानां मध्ये कायवाक्चित्तज्ञानधर्मिणोऽष्टश्वासाः प्रज्ञोपायभेदतः, ते गर्भपद्मदलेऽष्टौ देव्यः। अत्र कपालानि न भवन्ति वीराश्च अष्टौ रूपविशुद्धया पृथ्वीचक्रे, अष्टौ संज्ञाशुद्धया तोयचक्रे, अष्टौ वेदनाशुद्धया तेजश्चक्रे, अष्टौ संस्कार-विशुद्धया वायुचक्रे, अष्टौ विज्ञानविशुद्धयाऽऽकाशचक्रे, अष्टौ [1]ज्ञानशुद्धयाऽष्टश्मशा-
5 नेषु । एवं गुह्यनाभिहृदयकण्ठललाटोष्णीषचक्रेषु षट्सु अष्टचत्वारिंशत् । एवं घ्राण-रन्ध्रयोर्द्वौ, नेत्ररन्ध्रयोर्द्वौ, श्रोत्ररन्ध्रयोर्द्वौ, जिह्वामुखोष्णीषरन्ध्रयोर्द्वौ—इति देवीगणः। एवं षट्पञ्चाशत् । शेषपादेनैकेन **जाता त्रिभुवनजननी** विश्वमाता **कर्तिकाशुक्तिहस्ता**, तया प्रत्यालीढया **अमृतकलया आलीढोऽर्केन्दुमूर्ध्नि** मारक्लेशोपरि स्थित **आलिङ्गितः कालचक्रो** भगवान् परमाक्षरसुख इति। एषां श्वासानां बीजानि
10 वक्ष्यमाणेन [2]"लाद्या यास्त्वष्टमात्रा" (का० त० ५.१२८) इत्यादिना वक्तव्यानि, तेनात्र न लिखितानि। अत्र नीतार्थः—सर्वकालं योगिना मध्यमायां प्राणो भावयि-तव्यः, प्रवेशनिर्गमतया यावत् स्थिरीभवति कुम्भकावस्थां गच्छति सर्वकालम्, ततो योगी पञ्चाभिज्ञालाभी भवति प्राणजापत इति भगवतो नियमः। एवं "जपेन्मन्त्र-
T 424 मभिन्नाङ्गं प्राणयुक्तं मन" इति सर्वतन्त्रेषु वज्रपदं पूर्वोक्तम् । यद्यपि मन्त्रोच्चारणाक्ष-
15 [178b]सूत्ररहितः प्राणजापस्तथापि जाप इत्युच्यते, प्राणनिर्गमप्रवेशादिति ॥ ३९ ॥

इदानीं बाह्ये वाऽध्यात्मनि देवतासनशुद्धिरुच्यते—

पञ्चत्र्यर्चीन्दुसूर्या विषयगुणवशादासनान्यब्धिचारा
वाराः सप्तार्कपूर्णा दिनकरशशिनश्चापराण्यासनानि ।
कृष्णा श्वेतार्कपूर्णा दिनकरशशिनश्चापराण्यासनानि
20 वाराः सप्तार्कपूर्णाः समविषमपदे सूर्यचन्द्रासनानि ॥४०॥

पञ्चेत्यादि । इहैकवीरस्यासनं **चन्द्रः** [3]शुक्रं **सूर्यो** रज इति, पञ्चधातूनां प्रज्ञाधर्म-त्वात् चन्द्रगुणाः **पञ्चविषयास्ते**ऽत्र लोचनादीनां चन्द्रासनान्याकाशधातुपर्यन्तम् । **गुणत्रयवशाद्** रत्नसंभवामिताभामोघसिद्धीनां त्रीणि **सूर्यासनानि** । चतुर्भूतात्मकं महा-रूपमिति, चतुर्धातुधर्मित्वाद् वैरोचनस्य चन्द्रासनम्, ज्ञानार्चिधर्मित्वात् सूर्यासनं वेद-
25 नादीनाम् "अरूपित्वं तु शेषाणाम्" इति वचनात् । एवं पञ्च चन्द्रमण्डलानि, चत्वारि सूर्यमण्डलानीति सत्त्वरजस्तमःसमताभेदेन। एवं नवात्मकः समाजः स्कन्धधातूनां गुणविषयाधारतः, यथा गर्भे जातकविज्ञानादीनां तथा देवतायामपि पुनरपराणि चत्वारि क्रोधासनानि । **अब्धिचारा** इति सूर्यस्य रविकाधनऋणवृद्धिहानिवशात् क्रोधानां सूर्यासनानि । एवं क्रोधानां चारा इति त्रयोदशात्मकः समाजः, एवं **सप्तवाराः** सूर्या-
30 सनानि, द्वादशपूर्णाश्चन्द्रमण्डलानि, एकोनविंशदात्मकः समाजस्तृतीयः, **कृष्णपूर्णा**

---

१. ग. विज्ञान । २. भो. लृाद्या । ३. च. शुक्लं ।

अमावास्या प्रतिवर्षे द्वादश, श्वेतपूर्णा पौर्णमास्यो द्वादश, एवं चतुर्विंशतिः सूर्यचन्द्रासनानि नायकस्य कुलवशाच्चन्द्रो वा सूर्यो वा। एवं पञ्चविंशदात्मकः समाजो देवतानामाधारभेदत इति। पुनस्तेषु मध्येऽपरसप्तवारासनानि क्षिप्तानि द्वात्रिंशदासनानि भवन्ति। पञ्चस्कन्धचतुर्धातूनां द्वादशायतनानामेकादशक्रोधानामिति द्वात्रिंशदात्मकः समाजः। पुनः समविषमपदे प्राणस्य गतिः सूर्यासनमागतिश्चन्द्रासनम्, तेन चतुस्त्रिंशदात्मकः समाजः। एवं षट्प्रकारो यथा गर्भे बालस्य धातूनामाधाराधेयमेलापकस्तथा देवतानां मीलनमितिन्यायात् षट्प्रकारः समाजः॥ ४०॥

इदानीं त्रिचक्रसंवरे आसनशुद्धिरुच्यते—

आराश्चन्द्रार्कचाराः　कमलदलचतुर्द्वारकोणासनानि
भूयश्चारा द्विगुण्या दिनकरशशिनश्चासनान्येव तानि।
पूर्णा वारार्कचाराः समविषमपदे चासनान्यब्धिचाराः
सूर्ये वा पूर्णचन्द्रे भवति कुलवशान्नायकः संपुटे वा॥४१॥

आरा इत्यादि। इह त्रिचक्रे आराश्चतुस्त्रिंशतिः, ते च "भूता भूतेषुवेदा गुणकरशशिन" (का० त० १.३२) इति पूर्वोक्ताश्चन्द्रचाराः पञ्चविंशतिः, तेषां चतुर्विंशतिस्त्रिचक्रारा भवन्ति। एकः पद्मदलदेवतायाः पञ्चविंशतितमः, प्रेतासनमिति। अर्कचारा रसयुगशशिन इत्येकादश, तेषां गर्भपद्मदलेषु त्रयः, शेषा अष्टौ अष्टश्मशानेषु शवरूपेणावस्थिताः, आरा इत्याधारः। शवा इति शवानि देवीवाहनानि। एवं त्रिचक्रसंवरः। भूयः पूर्वापरभेदेन चारा द्विगुणा महासंवरे देवीनामासनानि द्वासप्ततिर्भवन्ति। एवं षट्चक्रसंवरः। मायाजाले पूर्णाश्चतुर्विंशतिः शुक्लकृष्णाश्चन्द्रसूर्यासनानि, तथा सप्त[1]वाराः सप्तसूर्यासनानि, अर्कचारा एकादश सूर्यासनानि। अथ भावभेदेन चन्द्रासनानि, एवं त्रयश्च(त्रिच)त्वारिंशदासनान्येके। समविष[179a]मपदेन पूर्ववच्चन्द्रसूर्यासनमिति पञ्चचत्वारिंशदासनानि द्वितीये। अब्धिचारा इति रविकाभेदेन चत्वारि सूर्यासनानि चन्द्रासनानि वा कायभावभेदेन भवन्ति। एवमेकोनपञ्चाशदासनानि तृतीये मायाजाले देवतानाम्। यथा गर्भे बालस्य प्राणस्याधारभूता धातवस्तथा बाह्येऽपि परेऽपि सिद्धाः। एवं समाजमायाजालत्रिचक्रषट्चक्रसंवरपरिशुद्धिनियमः। तेषु तन्त्रेषु नायकः सूर्ये(र्यो) वाऽरूपस्कन्धधर्मित्वात्, प्रज्ञाधर्मे चन्द्रे(न्द्रो)वा भवति रूपधर्मित्वात्, वैरोचनः करुणाधर्मे चन्द्रमण्डले भवति कुलवशात् प्रज्ञाकरुणावशाद् नायकः, संपुटे वा प्रज्ञाकरुणाद्वये कालचक्र इत्यादिबुद्धो निरन्वयत्वादिति सिद्धः॥ ४१॥

इदानीं वाय्वादिदेवतानां वक्त्रशुद्धिरुच्यते—

वायोः स्पर्शास्यमेकं त्वपरगुणवशान्मुद्रणास्यं द्वितीयं
रूपस्पर्शद्वयास्यं भवति च शिखिनो मुद्रणास्यं तृतीयम्।

१. च. वारा।

स्पर्शो रूपं रसास्यं मुखमपि पयसो मुद्रणास्यं चतुर्थं
गन्धाद्यं स्पर्शजान्तं गुणमुखमवनेः पञ्चमं मुद्रणास्यम् ॥४२॥

वायोरित्यादि। इह वाय्वादिदेवतानां द्विधा वक्त्राणि –एकानि विषयशुद्धया, द्वितीयानि गुणत्रयशुद्धया। तत्र वायुधातोः स्पर्शगुणात्मकमेकं वक्त्रं भवति, द्वितीयं शब्दगुणात्मकं मुद्रणम्, तेन संस्कारस्कन्धस्य विज्ञानस्कन्धो मुद्रणम्। एवं वायोः **स्पर्शास्यमेकं** त्वपरगुणवशान्मुद्रणास्यं द्वितीयं शिरसि, न मुखस्थाने। एवं [1]रूपस्पर्श-विषयधर्मेण **मुखद्वयं तेजसो** मुद्रणास्यं तृतीयम्। गुणेन तेन वेदनयाऽपि विज्ञानमुद्रणम्। तथा **स्पर्शरूपरसास्यं मुखत्रयं पयस** आकाशलक्षणः शब्दो **मुद्रणास्यं चतुर्थम्**, तेन संज्ञया विज्ञानमुद्रणम्। **गन्धाद्यमिति** गन्धरसरूपस्पर्शविषयधर्मेण वक्त्रचतुष्टयं **पृथिव्या** भवति। तेन रूपस्कन्धस्यापि विज्ञानस्कन्धो मुद्रणमिति सिद्धम् ॥ ४२ ॥

शून्यं पञ्चप्रकारं मुखमपि नभसो मुद्रणास्यं च षष्ठ,
मेवं वै ज्ञानधातोर्भवति गुणवशाच्छून्यषट्केन वक्त्रम्।
एकं मिश्रं चतुष्के समसुखफलदं पञ्चकं द्वित्रिमिश्रं
प्रज्ञोपायं दशास्यं त्रिविधगुणवशाद् द्वादशास्यं चतुर्धा ॥४३॥

शून्यं पञ्चप्रकारं "पञ्चाक्षरो महाशून्यः" (ना० सं० १०.२) इति वचनाद् मुखपञ्चकमाकाशधातोर्विज्ञानस्कन्धस्य **मुद्रणास्यं** षष्ठं ज्ञानस्कन्धम्। **एवं वै ज्ञान-धातोर्भवति गुणवशात् शून्यषट्केन वक्त्रं** षण्मुखस्य, तस्यापि विज्ञानधातुमुद्रणमिति मुद्रानियमो धातुविषयगुणवशाच्छुद्धम्। अथैकं **मिश्रं चतुष्केण समसुखफलदं पञ्चकं द्वित्रिमिश्रमिति**। इहैकस्पर्शगुणात्मको वायुधातुराकाशमुद्रितो गन्धादिचतुर्गुणात्मके पृथ्वीधातावाकाश[2]गुणमुद्रिते यदा मिश्रो भवति, तदा समसुखफलदः प्रज्ञोपायात्मको योगो भवति। एवं [3]स्पर्शरूपद्विगुणात्मकोऽग्निराकाशगुणमुद्रितः, तोयधातुस्त्रिगुणात्मक आकाशगुणमुद्रितः परस्परमिलितः पञ्चकं भवति। [4]एवं पृथ्वीवाय्वोः पञ्चकम्। एवं **प्रज्ञोपायं दशास्यं** पूर्वापरं वामदक्षिणं परस्परमिलितम्। अस्याध्यात्मपटले प्रपञ्च उक्तः—"प्रज्ञोपायोऽस्थिमांसं ससलिलरुधिरं पावको मूत्रमेव" (का० त० २.३०) इत्यादिनेति नियमः।

पुनरपरगुणत्रयभेद उच्यते—त्रिविधेत्यादिना। इह सर्वधातूनां सत्त्वरजस्तमोगुणाः सन्ति, तैः सर्वे धातवस्त्रिमुखाः। गन्धादिधर्मधात्वन्ताः षड्विषया धातूनाम्, तैः षड्भुजाः। एवं **त्रिविधगुणवशाद् द्वादशास्यं** [5]**चतुर्धा** प्रज्ञोपायं पूर्वापरं वाम[179b]-

T 425

१. भो. Ro Dañ Reg Byaḥi (रसस्पर्शस्य)। २. भो. 'गुण' नास्ति। ३. भो. Reg Bya Dañ Roḥi (स्पर्शरस)। ४. ग. 'एवं ...... कायचित्ते' त्रुटितः। ५. व. 'चतुर्धा' नास्ति।

दक्षिण ऊर्ध्वमिति नियमः। समाजे सर्वेषां चिह्नं शुक्रनाड्यस्थिविशुद्ध्या वज्रं पद्मं चक्रं दक्षिणे, रजो रक्तं मांसं वज्रघण्टा मणिः खड्गो वामेऽक्षोभ्यस्य। इह यस्या देवतायाः स्वचिह्नं दक्षिणे प्रथमकरतले गच्छति, तस्य स्थाने वज्रचिह्नं याति। एवं समाज-नियमः। यथा समाजे यो वुद्धो मध्ये विशति तस्य स्थानेऽक्षोभ्यो गच्छति, तथा चिह्नेऽपि नियमः। एवं पञ्चमुखषण्मुखयोरेकादशास्यं विज्ञानज्ञानधात्वोः पञ्चाननषण्मुखयोः पञ्चाक्षरमहाशून्यबिन्दुशून्यषडक्षरयोः। पुनस्तयोः परस्परापेक्ष-कत्वेन द्वात्रिंशदास्यः समाज इति नियमः ॥ ४३ ॥

इदानीं कालभेदेन वक्त्रादिशुद्धिरुच्यते—

सन्ध्याभेदाच्चतुर्धा त्रिविधमपि मुखं लग्नभेदात् त्रिवर्णं
लग्नार्धाद् बाहुभेदो विषममपि समालिङ्गनं कायचित्ते।
सन्ध्याङ्गे पूर्वपृष्ठे त्रिमुखरसभुजालिङ्गनं मध्यमाङ्गे
प्रज्ञासङ्गः समापत्तिरपि हि हसिताद्यानि यामाभिसन्धौ ॥४४॥

सन्ध्येत्यादि। इह "दिनस्तु भगवान् वज्री नक्तं प्रज्ञा प्रकीर्तिता" इति नियमात् [1]प्रहरप्रहरसन्ध्याभेदेन भगवांश्चतुर्मुखोऽष्टभुजोऽर्धप्रहरभेदेनार्धरात्रान्मध्याह्नं यावत्, एवं प्रज्ञाऽपि मध्याह्नादर्धरात्रं यावच्चतुर्मुखा अष्टभुजेति। **समालिङ्गनं** मध्याह्ने दिवारात्र्योः, **विषममपि** पूर्वसन्ध्या-अपरसन्ध्ययोर्दिवारात्र्योर्हीनाधिकवशतः, तत्र कुत्र-चिद् भगवान् पञ्चमुखो दशभुजो भगवती त्रिमुखा षड्भुजा दिवावृद्धितः। निशावृद्धितो भगवती पञ्चमुखा भगवांस्त्रिमुख इत्यादिसिद्धः, इत्येका कालचक्रविशुद्धिः। तथा द्वितीयो-च्यते—**त्रिविधेत्यादि**। इह द्वादशराशयो मकरादयः, तेषां मध्ये मकरकुम्भमीन-राशयश्चित्तवज्रस्य तमोरजःसत्त्वभेदेन कृष्णरक्तसितमुखानि **लग्नभेदात् त्रिवर्णा**नीति। एवं मेषवृषमिथुनमुखानि रजःसत्त्वतमोभेदेन रक्तसितकृष्णवर्णानि वाग्वज्रस्येति। कर्कटसिंहकन्यामुखानि सत्त्वतमोरजोभेदेन शुक्लकृष्णरक्तवदनानि कायवज्रस्येति। तुलावृश्चिकधनुर्लग्नमुखानि [2]तमोरजःसत्त्वभेदेन पीतरक्तसितवर्णानि ज्ञानवज्रस्येति। **लग्नार्धाद्बाहुभेदो** भवति त्रिवर्णः। षण्णां द्वयोर्द्वयोर्यथासंख्यं मूलवक्त्रादिना वामदक्षिणयोः। एवं द्वादशास्यश्चतुर्विंशतिकरो भगवानेकः कालचक्रः। अत्र पूर्वोक्तानां देवतानामेक-मुखचतुर्मुखादीनां यद्विषमसमालिङ्गनम्, तत्**सन्ध्याङ्गे पूर्वपृष्ठे** पूर्वसन्ध्याया अपरसन्ध्याया मेलापकः, त्रिमुखषड्भुजानां यत्परस्परमालिङ्गनं तन्**मध्यमाङ्गे** मध्याह्नसन्ध्याया [3]अर्धरात्रसन्ध्यायाः। एवं **कायचित्ते** इति पञ्चम्यर्थे सप्तमी कायभावभेदादिति। एवं पूर्वापरसन्ध्या योगिनीतन्त्रालिङ्गनं विषमसमापत्तित एकमुखचतुर्मुखयोरेकमुखाद्यष्ट-मुखाद्योर्वेति योगतन्त्रे सममुखभुजयोरालिङ्गनं तुल्यदिवानिशाकाले इति नियमः कालविशेषेण। एवम्—

---

१. भो. 'प्रहर' नास्ति। २. व. तमोऽन्तरजः। ३. च. 'अर्धरात्रसन्ध्यायाः' नास्ति।

शुभाशुभज्ञः कालज्ञः समयज्ञः समयी विभुः ।
सत्त्वेन्द्रियज्ञो वेलज्ञो विमुक्तित्रयकोविदः ॥
(ना० सं० ८.१३)

इति **नामसङ्गीत्यां** भगवतो नियमः ।

5 इदानीं क्रियातन्त्राण्युच्यन्ते—[180a] प्रज्ञेत्यादि । इह **प्रज्ञासङ्गो** योगिनीतन्त्रे, **समापत्तिरपि** योगतन्त्रे, पूर्वापरसन्ध्यायोगो मध्याह्नार्धरात्रसंयोग इति सिद्धस्तन्त्रद्वये, **हसिताद्यानि यामाभिसन्धाविति** । इह प्रथमप्रहराभिसन्धौ हसिततन्त्रम्, तृतीयप्रहराभिसन्धौ ईक्षणतन्त्रम्, पञ्चमप्रहरसन्धौ स्तनस्पर्शतन्त्रम्, सप्तमप्रहरसन्धौ पाणिग्रहणतन्त्रम्, एवं चतुर्धा तन्त्रम् । तत्कस्य हेतोः ? इह वायुकृत्स्नानां प्रज्ञाहसितमात्रेण
10 स्पन्दसुखं भवति । तेजःकृत्स्नानामीक्षणेन सुखं भवति । उदककृत्स्नानां स्तनस्पर्शन [सुखं भवति ।] पृथ्वीकृत्स्नानां पाणिग्रहणेन सुखं भवति । [1]एवं षोडश रूपावचराः । अकनिष्ठादिना ब्रह्मकायिकपर्यन्तमेषां विस्तारो वक्ष्यमाणे परमाक्षरज्ञानसिद्धौ वक्तव्य इति । कामावचराणां समापत्तिर्द्वन्द्वयोग इति सिद्धान्तः । सर्वत्रारूपे वीतरागाणां स्थितिः ॥ ४४ ॥

15 इदानीं कायभावप्रवेश उच्यते—

प्रज्ञाङ्गे रक्तपीते प्रविशति नियतः कालचक्रस्य भावः
प्रज्ञाभावः सिताङ्गे कषणघननिभे वज्रिणो वामपूर्वम् ।
प्रज्ञाभावेन भिन्नं भवति वरतनौ वामपूर्वाङ्गसौम्यं
रौद्रं सव्यापराङ्गं परमजिनपतेर्भावभिन्नं तथैव ॥४५॥

20 प्रज्ञाङ्ग इत्यादि । इह **प्रज्ञाङ्गे रक्ते** तेजोधातौ **पीते** पृथ्वीधातौ **प्रविशति नियतः कालचक्रस्य भावः** प्रज्ञोपायो ग्राह्यः, यतः समापत्तौ या प्रज्ञा सा उपायभावग्राहिका, यश्चोपायः स प्रज्ञाभावग्राहकः । तेन भावग्रहणेन सुखोत्पत्तिः, तेन कालचक्रस्य श्वेतं तोयधातु रक्ताङ्गेऽन्यङ्गे प्रविशति समरसो भवति । एवं कृष्णः पीताङ्गे पृथिव्यां समरसो वायुर्भवति । एवं दक्षिणे पश्चिमे देवतानामिति । एवं **प्रज्ञाभावः सिताङ्गे** तोय-
25 धातौ रक्तभावः प्रविशति । **वज्रिणो वामाङ्गे** देवतानां कृष्णवर्णवायुधातौ पृथ्वीभावः पीतः पूर्वे विशति । एवमूर्ध्वाधो हरितनीलयोः परस्परं संयोगः । एवं **प्रज्ञाभावेन भिन्नं भवति वरतनौ** सर्वसत्त्वानां **वामपूर्वं** च **सौम्यम्, रौद्रं सव्यापराङ्गं परमजिनपतेर्भावभिन्नं तथैवेति**, ऊर्ध्वं सौम्यमधो रौद्रं सिद्धम् ॥ ४५ ॥

प्रज्ञाभिन्नं जिनस्य प्रवरगणकुलं द्विस्वभावत्वमेति
30 प्रज्ञाया भर्तृभिन्नं विदिशि च नियतं योगिनीवृन्दमेव ।

---

१. च. एषां ।

युग्मं सव्यावसव्यं रविशशिवपुषाप्येव पूर्वापरं च
कृष्णं पीतं च नीलं हरितमपि तथाकाशपातालसंस्थम् ॥४६॥

एवं [1]**प्रज्ञाभिन्नं जिनस्य प्रवरगणकुलं** [2]शुक्रधातुभूतं तोयवाय्वाकाशलक्षणं कायभेदेन यत्तदेव भावभेदेन रजोधातुनिर्भिन्नं पृथ्वीतेजोज्ञानस्वभावं भवतीति द्विस्वभावं प्रवरगणकुलमिति देवतावृन्दं रक्तं शुक्लं च भवति, [3]वामदक्षिणं पीतं कृष्णं च भवति, पूर्वापरमूर्ध्वाधो नीलं श्यामं च भवति। एवं **प्रज्ञाया गणकुलं भर्तृभाव**[4]**भिन्नं विदिशि च नियतं द्विस्वभावत्वमेति** । नैर्ऋत्येशाने श्वेतं रक्तं च भवति, वायव्ये अग्नौ कृष्णं पीतं च भवति द्विस्वभावमिति नियमः। एवमुपायवृन्दं दिशिगतं विदिशिगतं **योगिनीवृन्दं** प्रज्ञावृन्दं लोचनादिकं तारादिकं चेति । एवं **युग्मं सव्यावसव्यं रविशशिवपुषाप्येव पूर्वापरं च कृष्णं पीतं च नीलं हरितमपि तथाऽऽकाशपातालसंस्थं** देवतागणमिति नियमः ॥ ४६ ॥

प्रज्ञा रक्ताः सितानां शशधरधवला लोहितानां तथैव
पीतानां कृष्णवर्णा वरकनकनिभाश्चासितानां कुलानाम् ।
नीलानां विश्ववर्णाः पुनरपि हरितानां च नीलास्तथोक्ता
एवं वै देवतीनां स्वकुलदिशिगता देवता वेदितव्याः ॥४७॥

अतः परकुलालिङ्गनतः **प्रज्ञा रक्ताः सितानामुपायानां** भवति(न्ति), **शशधरधव**(180b)**लाः** प्रज्ञा **लोहितानामुपायानाम्** । **तथैव पीतानामुपायानां कृष्णवर्णाः** प्रज्ञा **वरकनकनिभाः** पीताः प्रज्ञा**श्चासितानामिति** कृष्णानामुपायानां **कुलानां नीलानां विश्ववर्णा** इति हरिताः प्रज्ञाः। पुनरपि **हरितानामुपायानां नीलाः** प्रज्ञास्**तथोक्ता** इति न्यायः। परकुलालिङ्गनतः क्रियानिष्पत्तिः स्वकुलालिङ्गनेन क्रियासिद्धिर्नास्ति, स्वात्मनि क्रियाविरोधात् । न हि भगजातीयानां धातूनां भगचिन्तया सुखोत्पादः, एवं पुरुषलिङ्गजातीनां वा लिङ्गचिन्तया सुखोत्पादः । अतः **कालचक्रे** स्वाभाः प्रज्ञा न भवन्ति, स्वात्मनि क्रियाविरोधादिति। अथादर्शप्रतिबिम्बधर्मेण स्वाभग्रहणं चित्तस्य तदेव [5]विचार्यते । इहादर्शे पुरुषप्रतिबिम्बं न स्तनकेशवतीसदृशम्, नापि स्त्रीबिम्बं स्तनयोनिरहितम्, तेन [6]स्वाभता नास्ति । तथा अपरोऽपि विरोधः । इह यद्बिम्बस्य वामभुजेषु चिह्नानि तान्यादर्शप्रतिबिम्बस्य दक्षिणभुजेषु गतानि । एवं यद् वाममुखं तद्दक्षिणम्,

---

१. ग. च. प्रज्ञाभावभिन्नं । २. ग. 'शुक्रं' इत्यधिकम् । ३. ग. वामं, भो. Byaṅ (उत्तर) । ४. ग. इतः परं 'ग' मातृका नोपलभ्यते, कानिचन त्रुटितपत्राणि सन्ति तत्र । ५. च. विचार्यते । अत्रेदमवधातव्यं यदितः परं टिप्पण्यां यत्र च. पाठः स्यात्तत्र मूले भोटानुसारी पाठोऽवगन्तव्यः । ६. भो. Re Sig (केचित्) इत्यधिकम् ।

तद्वर्णतापि स्वाभेति न भवति, तेन मण्डलचक्रभावना परकुलालिङ्गनेन [1]कालचक्रन्यायतः। अपरतन्त्रान्तरे [2]पुनः—

येन येन हि भावेन मनः संयुज्यते नृणाम्।
तेन तन्मयतां याति विश्वरूपो मणिर्यथा॥
(यो० सं० ११.२)

तेनास्तव्यस्तकरं(रा) वाचो न विचार[3]क्षमा इति। परमार्थतः पुनः शून्यताबिम्बभावनायां रूपबिम्बकल्पना नास्ति, तेन स्वाभास्वाभ इति नास्ति। सर्वाकारतः सर्ववर्णतो ज्ञानज्ञेययोः परमाणुद्रव्यविकल्परहितयोः स्वभावो नास्ति। अतो निःस्वभावभवभावना घटपटशकटसेनादिकानां कार्या, न प्रादेशिकी सकललोकव्यवहाररहितेति सिद्धान्तो माध्यमिको मन्त्रनये तत्त्वपटले न्यायत इति ॥ ४७ ॥

प्रज्ञातन्त्रं हि पूर्वात् पुनरपरमुखादेव योगानुविद्धं
सव्यास्याद् योगतन्त्रं गदति जिनपतिर्वामवक्त्रात् क्रियाद्यम्।
योगाचारं हि पूर्वात् पुनरपरमुखान्मध्यगं वै समस्तं
सूत्रान्तं सव्यवक्त्राद् गदति सितमुखाच्छुद्धवैभाषिकं च ॥४८॥

ऋग्वेदं पश्चिमास्यादपि गदति यजुर्वामवक्त्राज्जिनेन्द्रः
सव्यास्यात् सामवेदं परमहरिकुलेऽथर्वणं पूर्ववक्त्रात्।
पूर्वास्यात् कौलतन्त्रं पुनरपरमुखाद् गारुडं भूततन्त्रं
सिद्धान्तं वामवक्त्रादुदयरविनिभाद् विष्णुधर्मं च सव्यात् ॥४९॥

पृष्ठात् सद्यो निवृत्तिः परमसितमुखाद् वामदेवः प्रतिष्ठा
सव्याद् विद्या त्वघोरः पुनरनिलमुखान्मारुतब्रह्मशान्त्यौ (न्ती?)।
शून्यास्यात् शून्य-ईशो त्रिभुवनपतिना स्फारिता लौकिकार्थं
कृत् त्रेता द्वापरं वै कलियुगमपरं पृष्ठवक्त्रादिभेदात् ॥५०॥

एवं वीरक्रमाद्यं रविगमनवशादेव सन्ध्याचतुष्कमाहारं सव्यवक्त्रात् परममपि भयं स्फारितं पृष्ठवक्त्रात्।
पूर्वास्यान्मैथुनं वै परमसितमुखात् स्वप्ननिद्रे च राजन्
पृष्ठाद् वैश्यो द्विजः स्यान्नृपतिरपि तथा शूद्रजातिः क्रमेण ॥५१॥

---

१. च. कालचक्रे। २. भो. 'पुनः' नास्ति। ३. च. क्रम।

पूर्वात् सर्वास्तिवादं गदति जिनपतिः साम्मितीयं च सव्यात्
पृष्ठास्यात् स्थावरीयं पुनरपि च महासांघिकं वामवक्त्रात् ।
मानुष्यं पूर्ववक्त्रात् पुनरपरमुखात् स्फारितास्तिर्यगा वै
सव्यास्याद् भूतदेवाः परमसितमुखान्नारकाश्चासुराश्च ॥५२॥

हृच्चक्रात् पूर्ववक्त्रात् स्फरणमपि भवेन्नाभिचक्रात् परास्यात्   5
संभोगात् सव्यवक्त्राद् भवति च सहजाद् वामवक्त्रात् समन्तात् ।
चक्राणां वक्त्रमध्यात् स्फरणनिधनता याति भावः शरीरे
त्रैलोक्यं चापि कृत्स्नं खलु जिनजनकस्यास्यभेदैश्च सम्यक् ॥५३॥

श्रीचन्द्राच्चन्द्रकान्ते स्रवति हि सलिलं निर्विकल्पस्वभावात्
तद्वत् सर्वज्ञधर्मः स्रवति जिनपतेः स्कन्धमाश्रित्य लोके ।   10
धर्मस्तोयं यथैव व्रजति समरसं बीजधात्वाश्रयेण
सत्त्वानां चित्तशुद्धया भवति बहुविधं पूर्वकर्मप्रभावात् ॥५४॥

चिन्ता सर्वार्थकर्तुस्त्रिभुवननिलये नास्ति चिन्तामणेश्च
चित्तस्थं तन्न पश्यन्त्यशुभफलवशात् कर्मणः पापसत्त्वाः ।
दोषश्चिन्तामणेर्न ह्यशुभशुभफलं सर्वसत्त्वः प्रभुङ्क्ते   15
शुद्धे सत्त्वे जिनेन्द्रः स च भवति नरः किं जिनेनापरेण ॥५५॥

जातो येनाङ्कुरोऽसौ व्रजति स जनको जातभावाद् विनाशं
जातो नष्टस्य तस्य प्रभवति जनको बीजराजस्य भूयः ।
यः पूर्वः सोऽन्यभावान्मृत इति वचनं न स्वरूपेण जातः
शून्याद् येनागतः क्ष्मां व्रजति दशबलस्तेन सौख्यक्षणेन ॥५६॥   20

सौख्यात् सौख्यानुरक्तः क्षण इह सहजो नान्यभावानुरक्तः
स्कन्धा ये तेन जाताः पुनरपि जनकास्तेऽस्य सौख्यक्षणस्य ।
शुद्धाद्धर्मस्ततोऽन्यः पुनरपि च ततोऽन्यश्च तस्माद्विशुद्धो
बीजान्मूलानि शाखाः कुसुमफलमिवारोपिताच्छुद्धभूम्याम् ॥५७॥

भूवार्यग्निश्च वायू रसपरमरसौ चाणवः षट् प्रकारा   25
गन्धाद्येकैकहीना विषयविरहिताश्चान्तिमा ज्ञानदृश्याः ।

कामा रूपास्त्वरूपा यमयमशशिनश्चान्तिमो धर्मधातुः
सर्वाकाराः सदा तेऽच्युतसुखसहजाधारभूताः समन्तात् ॥५८॥

अन्योन्यं स्कन्धभूता विषयविषयिणोऽन्योन्यमारास्त्वविद्याः
पञ्चान्योन्यानुरक्ता रसगतिषु गता दुःखसौख्यक्षणस्य ।
5 सर्वाकाराः समन्तान्न परगुणरताः संस्थिताऽभेदवज्रा
अन्योन्यं क्ष्मादिधातौ पुनरपि च गता मुख्यभावेऽन्यभावाः ॥५९॥

तैश्चर्धि कालचक्रः प्रकटयति महानेकनिर्माणकायै-
र्वज्रज्वालास्फुरद्भिस्त्वसुरसुरनृणां कामधातौ स्थितानाम् ।
संभोगै रूपिणां वै नभसि जिनसुताद्यर्हतां धर्मकायैः
10 शून्यांशैः शून्यकृत्स्नं त्रिभुवनसकलं वायुभिर्वायुकृत्स्नम् ॥६०॥

तेजोंऽशैर्वह्निकृत्स्नं ह्युदकमपि जगत्स्फारितैश्चोदकांशैः
पृथ्वीकृत्स्नं धरांशैः समुदितविषयैः सर्ववस्तुस्वभावम् ।
एकात्मानं समन्ताद् गगनसममिदं दर्शयेच्छुद्धभूम्या-
मेवं बुद्धस्य कायो भवति न म्रियतेऽप्येकसौख्यस्वभावात् ॥६१॥

15 पञ्चाकारात् तदेकात् सकलजिनवरैश्चाभिसम्बोधिरेषा
विंशत्याकाररूपा पुनरपि च ततोऽनेकमायास्वरूपा ।
तस्या एकक्षणा स्यात् समसुखफलदा नान्यकर्मस्वभावा
अत्रोपायोऽच्युतो यः क्षण इह सहजो धर्मधातुप्रवेशे ॥६२॥

बुद्धक्षेत्राण्यनन्तान्यपरिमितगुणा धातवश्चाम्बराद्याः
20 स्थित्युत्पत्ती विनाशस्त्रिविध इति भवः षड्गतौ सर्वसत्त्वाः ।
बुद्धाः क्रोधाः सुराद्याः सकरुणहृदया बोधिसत्त्वाः सभार्या
एतच्चक्रं जिनस्य त्रिभुवननमितस्यैकमेकस्य शम्भोः ॥६३॥

[1]अतोऽष्टचत्वारिंशद्वृत्तमारभ्य त्रयष्षष्टिमं वृत्तं यावत् षोडश वृत्तानि सुबोधानि ॥ ४८–६३ ॥

---

१. भो. ḥDir (अत्र) ।

इदानीं शरीरे दशाकारशुद्धिरुच्यते—

लोमत्वग्रक्तमांसं सरसमपि तथास्थीनि मज्जा च नाड्य-
स्तासु प्राणादिवाता रविशशिगमनं वायुमध्ये समन्तात् ।
विज्ञानं चन्द्रमध्ये विमलमणिरिवालिङ्गितं सर्वभावै-
र्भावाभावाद्वयत्वं परममृतपदं व्यापकानाहतं तत् ॥६४॥ 5

लोमेत्यादि । इह लोम केश आकाशधातुः, त्वग् मांसं वायुधातुः, रक्तं द्विधा तेजोधातुः, स्वेदं मूत्रं तोयधातुः, अस्थि मज्जा पृथ्वीधातुः, नाड्यः प्राणादयो ज्ञानधातुः । राहुपुच्छं ज्ञानवज्रम्, राहुश्चित्तवज्रम्, रविर्वाग्वज्रम्, चन्द्रः कायवज्रम् । एषां चतुर्णां प्राणमध्ये गमनं समन्तात् । विज्ञानं चन्द्रमध्ये शुक्रमध्ये, विमलमणिरिव स्फटिक इव, आलिङ्गितं सर्वभावैरुपधायोगतः । भावाभावयोरद्वयत्वं मायोपमं शून्यताविम्बमत्राक्षरसुखं परममृतपदं व्यापकानाहतं तदिति नियमः । शरीरे दशाकारशुद्धिः ॥ ६४ ॥ 10

इदानीं दशभूमिभिस्ते[1] धातवः शोध्यन्ते—

लोमाद्याश्चन्द्रमोऽन्ताः सकलतनुगता भूमयो या दशोक्ताः
षड्वर्गा लादयोऽन्याः समसुखफलदा योगिनां सर्वकालम् ।
तस्मादन्वेषणीया गुरुचरणगतैर्योगिभिर्मोक्षहेतो- 15
र्नान्यो बुद्धोऽस्ति कश्चित्त्वपि तनुविरहाद् व्यापको मोक्षदो यः ॥६५॥

लोमाद्या इति । इह लोम केशाः प्रमुदिता, चर्म मांसं विमला, रक्तं द्विधा प्रभाकरी, रससलिलमर्चिष्मती, अस्थि मज्जा सुदुर्जया, नाडी प्राणोऽभिमुखी, कालाग्नी रागधातुर्दूरङ्गमा, राहुरचला, रविः साधुमती, चन्द्रो धर्ममेघा, रागत(स्त)मोरजःसत्त्वधर्मेण संवृत्यावतारः । एवं लोमाद्याश्चन्द्रमोऽन्ताः सकलतनुगता निरावरणगताः । [181a] तेषां दशभूमयस्ता दशोक्ता या भूमयः, ताः पुनः षड्वर्गा लादयो न्यासमात्रिका उक्ताः । तत्र कवर्गः प्रमुदिता । एवं यथासंख्यं च ट प त स इति षड्वर्गाः, ल व र य ह अल् ओ अर् ए अ ऌ उ ऋ इ अ हः अमिति । एवं विलोमेनापि दीर्घादिवर्गाः प्रज्ञाभूमयः । अमी समसुखफलदा योगिनां सर्वकालम् । तस्मादन्वेषणीया गुरुचरणगतैरवधूतीचारगतैर्योगिभिर्मोक्षहेतोरिति भगवतो नियमः । नान्यो बुद्धोऽस्ति कश्चिदपि तनुविरहाद् व्यापको मोक्षदो य इति । इह शरीरधातवो निरावरणा बुद्धत्वदायका मोक्षदाश्चेति ॥ ६५ ॥ 20 25

सत्त्वा बुद्धा न बुद्धस्त्वपर इह महान् विद्यते लोकधातौ
तेषामाराधनेन त्वपरिमितभवश्छिद्यते निर्विकल्पात् ।

---

१. च. श्रैधातवः ।

द्रोहं कुर्वन् हि योगी व्रजति हि नरकं रौरवाद्यं महान्तं
तस्माच्चित्ते विशुद्धेऽप्यबुधबुधजनानां विरुद्धं न कुर्यात् ॥६६॥

लब्ध्वा सत्त्वप्रसङ्गं भवति नरपते शुद्धमैत्र्यादिचित्तं
यद्वा संसारिणां स्यादकुशलगुणिनां द्वेषरागादिचित्तम् ।
5 गच्छन्तं गन्तुकामं द्विविधमपि भवेत् सर्वदा बोधिचित्तं
मोक्षप्रस्थानहीनं प्रणिधिविरहितं सर्वदा मारचित्तम् ॥६७॥

माराः कुर्वन्त्यशान्ति त्रिभुवननिलये बोधिसत्त्वाश्च शान्ति
मारेन्द्रश्चर्द्धिहीनः परमभयकरश्चर्द्धिमानेकशास्ता ।
माराणां मारबुद्धिः परहृदयगता तायिनां सौख्यबुद्धि-
10 स्तस्माद् बुद्धानुभावैस्त्रिभुवनसकलं वर्ततेऽनन्तकालम् ॥६८॥

यन्मानं लोकधातोः कथितमपि जिनैस्तन्नृणां जानतां न
बुद्धानां नास्ति मानं सहजतनुवशादेकहस्तं ह्यनेकम् ।
मानं सत्त्वानुरूपं प्रकटयति सदा प्राणिनां कर्मभूमा-
विच्छामानं त्विदं मे यदि वदति सुरा नास्तिकोऽयं वदन्ति ॥६९॥

15 येनोत्पन्ना जिनेन्द्राः प्रतिदिवसवशान्निर्गता येन गर्भात्
सिद्धा येन क्षणेन क्षरणविरहिता स्पन्दनिःस्पन्दभूताः ।
त्यक्त्वा तद् बुद्धकृत्यं समसुखरहितं भावयेद् योऽन्यशून्यं
बुद्धत्वं तस्य दूरं सहजमपि सुखं कोटिकल्पैरनेकैः ॥७०॥

न द्राक्षा निम्बवृक्षादमृतमपि विषात् पङ्कजं ब्रह्मवृक्षात्
20 शून्यान्निर्वाणसौख्यं शुभमशुभवशात् सिद्धयः प्राणिघातात् ।
यज्ञात् स्वर्गः पशूनां परमशिवपदं नेन्द्रियाणां निरोधाद्
वेदात् सर्वज्ञभाषाऽक्षरसुखमचलं न क्षराशुद्धचित्तात् ॥७१॥

सत्त्वानां पापचित्तं भवति नरपतेऽधिष्ठितं मारकायैः
पुण्यज्ञानानुरक्तं सुखदमपि सदाधिष्ठितं बोधिसत्त्वैः ।
25 निर्वाणं यान्ति यस्मात् सुखसमयवशात् क्लेशमारान्निहत्य
तस्मात् कुर्वन्ति माराः प्रतिदिनसमयेऽनेकविघ्नानि तेषाम् ॥७२॥

सेव्याऽऽदौ कर्ममुद्रा जिनसहजसुखस्यास्य वृद्धयर्थहेतो-
स्तस्मादादित्यरूपा तनुमुखचरणोष्णीषसर्वाङ्गपूर्णा ।
विद्युद्दण्डानुरूपाऽच्युतसुखजननी लक्षणाङ्गप्रपूर्णा
वज्रैरुद्भासयन्ती त्रिभवगततनुर्धर्मधातुस्ततः स्यात् ॥७३॥

एता मुद्राश्चतस्रोऽक्षरसुखफलदा योगिना भावनीयाः
सर्वस्मिन् सर्वकालं सुरतरतिगतैर्लोकमार्गप्रयुक्तैः ।
ग्रामारण्यश्मशानेऽशुचिशुचिनिलये वेश्मदेवालये च
वर्णावर्णाभिचारैस्तनुबलसुखदैरन्नपानादिभोगैः ॥७४॥

अतः पञ्चषष्टिवृत्तादपराणि नव वृत्तानि सुबोधानि चतुःसप्तति-पर्यन्तमिति ॥ ६६-७४ ॥

इदानीं शून्यताबिम्बे दृष्टे सति प्राणनिरोधेन योगिनां क्षणलाभ उच्यते—

वातैः संघट्टमानैस्तडिदनलशिखा द्रावयेद् मूर्ध्नि चन्द्रं
यो यो बिन्दुर्द्रुतोऽस्माद् गलहृदयगतो नाभिगुह्ये निरुद्धः ।
बिन्दोः स्पन्दद्रवं यत् कुलिशमणिगतं सन्निरुद्धं ध्वजाग्रे
प्रज्ञाज्ञानक्षणं तद् यदि ददति सुखं बिन्दुमालाच्युतेन ॥७५॥

वातैरित्यादि । प्राणायामेन दशवातानां संघट्टनं भवति । प्राग्बिम्बे दृष्टे सति तैः प्राणापानादिभिर्दशभिः **संघट्टमानै**र्नाभिकर्णिकायां चण्डाली **तडिदनल**स्तस्य **शिखा** रश्मिः, सा शिखा **मूर्ध्नि** ललाटे **द्रावयेच्चन्द्र**मिति बोधिचित्तं जन्मस्थानीयम् । **यो यो** बोधिचित्त**बिन्दुर्द्रुतोऽस्माद्** ललाटाद् **गले हृदये नाभौ गुह्ये गतो निरुद्धो** भवति, प्राणापानबलेन कायबिन्दुर्गुह्ये निरुद्धः, एवं वाक्चित्तज्ञानबिन्दुर्नाभौ हृदये कण्ठे निरुद्धः, अस्माद् **बिन्दोः स्पन्दद्रवं यद्**इति । इह गुह्यगतस्य कायबिन्दोर्ह्यवरुद्धस्य यदपरं स्वच्छद्रवं स्पन्दद्रवं तदुच्यते । तत्र **कुलिशमणिगतं सन्निरुद्धं ध्वजाग्रे** लिङ्गमुखे । **प्रज्ञाज्ञानक्षणं** स्पन्दं **तद् यदि ददति** सुखं **बिन्दुमालाच्युतेन** हेतुना, तदा न कर्ममुद्राज्ञानम् । प्रज्ञाज्ञानमिति सिद्धम् ॥ ७५ ॥

तस्मान्निःस्पन्दसौख्यक्षणमिह सहजं धर्मधातुर्ददाति
प्राणेनाकृष्य सर्वान् रसगतिषु गतान् क्लेशमारान्निहत्य ।
ऋद्धिं सर्वज्ञभूमिं त्रिभुवनगुरुतां योगिनां जन्मनीह
मृत्युं मार्गप्रविष्टो व्रजति यदि तदा तद्ग्रहादन्यजात्या ॥७६॥

तस्मादच्युताद्धेतोर्यन्निष्पन्दसौख्यक्षणमिह धर्मधातुः प्रज्ञापारमिता **ददाति।** तेन महामुद्रासुखं परमाक्षरं कर्मज्ञानमुद्रासुखं स्पन्दमुपायसुखं क्षरं [1]स्पन्दं बालं [2]प्रौढं चेति। यथा रसो बालो युवा वृद्धो बद्धश्चेति, एवं शुक्रमपि बालं प्रौढं वृद्धं निरुद्धं सर्वावरणक्षयतः। आवरणं मल इति। तदेव बोधिचित्तमूर्ध्वं यदा याति ललाटे
5 तदा यथागतं तथागतं भवति। तच्चित्तं **प्राणेनाकृष्य सर्वान्** द्वययुतद्वयष्टशतान् **रसगतिषु गतान्** पृथिव्यादिषण्मण्डलगतान्। एवं **क्लेशमारान्निहत्य ऋद्धीः सर्वज्ञस्य** द्वादश भूमीर्वक्ष्यमाणाः, **त्रिभुवनगुरुतामिति** सर्वज्ञता-सर्वाकारज्ञता-मार्गज्ञता-मार्गाकारज्ञतादिविभूतीर्ददाति, **योगिनां जन्मनीह** वीर्यवताम्। अतः प्राप्तयोगो यदा
T 427 **मृत्युं याति मार्गप्रविष्टः** सन्, **तदा तद्ग्रहेण** वासनाबलेन पुनर्मनुष्यजात्या **अन्यथा** सर्वं
10 प्राप्नोति, सप्तजन्मपर्यन्तेनावीर्यवानपि सन् ज्ञानमभावयन्निति नियमः ॥ ७६ ॥

इदानीं बोधिसत्त्वाधिष्ठानोत्पाद उच्यते—

या नैर्गुण्याल्पभावा विषयविरहिता कायमुद्रा द्विधा सा
तस्या रागानुरक्ता गुणनिधिरपरा वाक्स्वरूपा द्विधा च।
कृष्णा श्वेताऽनुरक्ता विषयगुणरता चित्तमुद्रा द्विधा स्याद्
15 **अष्टौ द्वौ पञ्च पञ्च स्फुटमपि खयुगं शून्यवेदं च वर्षम् ॥७७॥**

या नैर्गुण्येत्यादि। इह **या** कुमारी **नैर्गुण्या** धर्मधातुगुणरहिताऽच्यवनात्, साऽल्पभावा कायधात्व[181b]पूर्णाऽपतितदन्ता एका अष्टवर्षावधिः। ततो द्वितीया पतितदन्ता दशवर्षावधिका। एवं **कायमुद्रा** अक्षतयोनिः। तदवधेरेकादशवर्षमारभ्य पञ्चदशवर्षं यावद् एका **रागानुरक्ता, गुणनिधिरपरा**ऽपरपञ्चवर्षाणि यावद् **वाङ्मुद्रा**
20 **द्विधा** स्यात्। **एवमष्टौ** वर्षाणि **द्वौ** संवत्सरौ, ततः **पञ्च पञ्च** वत्सराः। ततो विंशद्वर्षादूर्ध्वमपरं **खयुगमिति** चत्वारिंशद्वर्षाणि। एवं **चित्तमुद्रा** एका **कृष्णभावानुरक्ता।** एवं षष्टिवार्षिका स्त्री। पुनरपरा **शून्यवेदमिति** चत्वारिंशद्[3] वर्षं यावत् **श्वेतभावानुरक्ता** वृद्धा जरापलितवती वर्षशतपर्यन्तम्। एवं चित्तमुद्रापि **द्विधेति।** आसां तिसृणां मध्ये कायमुद्रातिबाला, [4]वाङ्मुद्रातिप्रौढा, चित्तमुद्रातिवृद्धा। एतास्तिस्रो वर्जयित्वा
25 एकादशवार्षिका सर्वलक्षणसंपूर्णा रक्षणीया राजगुरुणा राज्ञा वा अभिषिक्तेन, अन्यैर्वा ईश्वरैरभिषिक्तैः ॥ ७७ ॥

रत्नेशो यावद-स्याज्जिनवरजननी योगिभी रक्षणीया
रत्नेशोद्भूतकाले सकलगुणनिधिं मण्डलं वर्तयित्वा।

---

१. भो. 'स्पन्दं' नास्ति। २. भो. Laṅ Tshoḥo (युवा)। ३. च. षदन्तानि।
४. भो. 'वाङ्मुद्रा' नास्ति।

बुद्धाधिष्ठानमन्त्रैः सृजति समसुखं गुह्यपद्मे समन्त्रं
गुह्ये रक्षां प्रकृत्य कुलिशमणिगतं स्वादयेद् बोधिचित्तम् ॥७८॥

रत्नेशो यावद-स्यात् । अ-स्यादिति न भवति रजो यावद् **रक्षणीया** । **रत्नेशो-**द्भूतकाले **सकलगुणनिधिं मण्डलं वर्तयित्वा** कालचक्रम्, पूर्वं सुशिक्षितां कृत्वा तत्र तामभिषिच्य **बुद्धाधिष्ठानमन्त्रैः** षड्वज्रैर्मञ्जुश्रीसमाधिना तामपि प्रज्ञां निष्पाद्य **सृजति समसुखं** दक्षिणनाडीप्रवाहकाले बोधिचित्तम्, तस्या **गुह्यपद्मे समन्त्रं** कायवाक्चित्तज्ञानमन्त्रसहितं [1]स्फारयेत् । ततस्तस्या **गुह्ये रक्षां प्रकृत्य** षडङ्गैस्ततः स्व**कुलिशमणिगतं बोधिचित्तमास्वादयेत्** । तं योगी तस्या अपि ददाति । तस्याः पद्मग्राह्यं यत्तदनामिकाङ्गुष्ठाभ्यां गृहीत्वा आस्वादयेत् सर्वरक्षार्थमिति, अनेन विधिना ॥ ७८ ॥

तस्मिन् पुत्रो भवेद् यो जिनजनकसुतो मञ्जुवज्रः स एव
प्रज्ञाधिक्यात् कदाचित् प्रभवति दुहिता बुद्धमाता ध्रुवं स्यात् ।
तस्मादन्यैस्त्रिपुष्पैः सितकमलधरो जम्भलो वज्रपाणि-
रन्येऽष्टावष्टपुष्पैर्दिशिविदिशिगता महर्द्धिकाः क्रोधराजाः ॥७९॥

तस्मिन्नाधाने यः पुत्रो भवति मञ्जुवज्रः, स एव प्रज्ञाधिक्यादिति रज आधिक्याद् यदि **दुहिता भवति**, तदा विश्वमाताधिष्ठानं भवति । तेन **बुद्धमाता ध्रुवं** सेति मञ्जुश्रीविश्वमाताऽधिष्ठानविधिः । **तस्मादन्यैस्त्रिपुष्पैरिति** । इह यदि प्रथमरजसि गर्भो न जातः, तदा पुनः पुनः प्रत्येकरजोदर्शनेन मण्डलं वर्तयित्वाऽपरसमाधिभि-र्बोधिचित्तमुत्सृजेदिति । एवं द्वितीये **सितकमलधर** इति लोकेश्वरनिर्माणं भवति । तृतीये **जम्भल**निर्माणम्, चतुर्थे [2]वज्रपाणिः पुत्रविषये । दुहिताविषये पाण्डरावसुधारा-शब्दवज्राधिष्ठानं भवति । ततो**ऽन्ये[3]ऽष्टावष्टपुष्पैर्दिशिविदिशिगता महर्द्धिकाः क्रोधराजा** इति ।

इह पूर्वंजम्भलाधिष्ठाने उष्णीषसमाधिनोष्णीषाधिष्ठानं भवति । अतिनीलाया वाग्वज्रपाणिस्थाने शुम्भराजो वा रौद्राक्षी वा भवति । ततः पञ्चमे रजसि विघ्नान्त-कोऽनन्तवीर्या, षष्ठे प्रज्ञान्तको जम्भी, सप्तमे पद्मान्तको मानिनी, अष्टमे यमान्तकः स्तम्भीति । ततो नवमे महाबलो मारे(री)ची, दशमेऽचलश्चुन्दा, एकादशे टक्किर्भृकुटी, द्वादशे नीलदण्डो वज्रशृङ्खलेति विदिक्षु । एवं क्रोधसमाधिना क्रोधाधिष्ठानं भवति गर्भस्ये[182a]ति । ततस्त्रयोदशमो [4]रजः पुनः प्रथमो यथा अविद्या-द्यङ्गम् ॥ ७९ ॥

---

१. च. 'स्फारयेत्' नास्ति । २. च. वज्रयोगः । ३. भो. 'अष्टौ' नास्ति ।
४. च. सत्त्वः ।

तस्मिन् मासे रजो यत् प्रभवति हि पुनर्मञ्जुघोषोद्भवं तद्
विंशद्वर्षाणि यावत् प्रतिरजसि महासात्त्विको बोधिसत्त्वः ।
किञ्चित् सत्त्वांशहीनः प्रभवति च ततः शून्यवेदानि यावद्
विंशद्वर्षाणि यावत् पुनरपि च ततश्चान्यसत्त्वोऽल्पवीर्यः ॥८०॥

5 तेन तस्मिन् मासे रजो यत् प्रभवति हि पुनर्मञ्जुघोषोद्भवं तद्रजः । एवं तदुपरि यं समाधिमालम्बयित्वा योगी बोधिचित्तं विसर्जयेत्, तदधिष्ठानं गर्भस्य भवति विंशद्वर्षाणि यावत् प्रतिरजसि यदा बोधिसत्त्वो भवति, एको वा द्वौ वा इत्यादि, मातुर्महासात्त्विको भवति । किञ्चित् सत्त्वांशहीनो भवति चत्वारिंशद्वर्षाणि यावन्मातुर्विंशतिवर्षाणि यावत् । पुनरपि च ततश्चान्यसत्त्वोऽल्पवीर्यः । एवमशीतिवर्षाणि
10 मातुः सत्त्वरजस्तमोभेदेन गर्भस्याधिष्ठानम् ॥ ८० ॥

तस्माद् योनौ रजो न प्रतिहतविषयस्तद्विनाशान्न सेकः
किन्तु प्रज्ञाभिषेको जिनपतिवचनैर्नष्टबीजस्य देयः ।
तासां भूतोयतेजोऽनिलगगनगुणान्वेषणीया जिनाङ्गै-
रेषा सत्त्वार्थकर्त्री भवति बहुफला बोधिचित्तस्य सेवा ॥८१॥

15 तस्माद्योनौ रजो न प्रतिहतगर्भविषयः, तद्विनाशान्न सेकः प्रज्ञाया उपायस्य च बीजाभावे बीजमिति प्ररोहात् यत्किन्तु ऽज्ञाभिषेको जिनपतिवचनैर्नष्टबीजस्य वृद्धस्य देयो यथा भिक्षोः, तथा प्रज्ञायामपि यथा भिक्षुण्याः । एवं विंशद्वार्षिकाः शोभनाः सेकार्थमधिष्ठानार्थं भूधातुर्विंशतिर्विंशतिवर्षैस्तथैव तोयतेजोऽनिलगगनगुणा वर्षशतं यावज्जिनाङ्गैरन्वेषणीया इति । एषा सत्त्वार्थकर्त्री भवति बहुफला बोधिचित्तस्य सेवा
20 बोधिसत्त्वोत्पादनत इति ॥ ८१ ॥

इदानीममृतपानमुच्यते—

याऽसृक्पानं करोति प्रवरसुरनृणां मक्षिका साऽमृतैका
छर्दिर्गुह्यादिवक्त्रात् कुलिशमणिगतं नाब्जमध्ये प्रविष्टम् ।
विण्मूत्रं रक्तमांसं परमसमरसं छर्दिमध्ये प्रविष्ट-
25 मेतज्ज्ञानामृतं च त्रिभुवनपतिना देशितं सर्वतन्त्रे ॥८२॥

याऽसृक्पानमित्यादि । इह बाह्ये नेयार्थेन याऽसृक्पानं करोति मक्षिका, सा नीतार्थेनावधूती । या च्यवनकाले रजोधातुं पिबति प्रवरसुरनृणां सा मक्षिकाऽमृता, एकाऽवधूती, रुद्धेत्यर्थः । या बाह्ये भुक्तच्छर्दिः सा नीतार्थेन छर्दिर्बोधिचित्तम्, गुह्यादिवक्त्रात् कुलिशमणिगतं न बाह्ये प्रज्ञाब्जमध्ये प्रविष्टम् । एवमच्युतं विण्मूत्रं

रक्तमांसं परमसमरसम् अस्रावं छर्दिमध्ये **प्रविष्टं निरुद्धं** निरावरणं **भवति। एत-ज्ज्ञानामृतं** स्यादच्युतं पञ्चामृतं **त्रिभुवन**[1]**पतिना देशितं सर्वतन्त्रे, न बाह्ये** विष्ठादिकं सिद्धये देशितमित्यमृतनियमः ॥ ८२ ॥

इदानीं बाह्ये समयरक्षणभक्षणमुच्यते—

प्रज्ञाधर्मोदये यत् पतितमपि सुखं रक्षणीयं प्रयत्नाद्   5
यः कश्चित्तेन सत्त्वो भवति जिनकुले बोधिसत्त्वः स एव ।
तस्मात् तं भक्षयन्ति प्रतिदिनसमये राक्षसा मारभूताः
प्रज्ञापुष्पेण युक्तं शिवसुखफलदं भक्षितं देशयन्ति ॥८३॥

प्रज्ञेत्यादि। इह समापत्तौ भावनां कुर्वतो योगिनोऽयन्त्रितं बोधिचित्तं [2]यदि प्रज्ञाधर्मोदये पतति, तदा **प्रज्ञाधर्मोदये पतितमपि सुखं रक्षणीयं प्रयत्नात्**। तत्कस्य   10
हेतोः? **यः कश्चित्तेन** बोधिचित्तेन समाधिनोत्सृष्टेन **भवति, स जिनकुले बोधिसत्त्व एव** सुगतवंशप्रवर्धनो यस्मात् **तस्मात् तं** बोधिचित्तं सौगतानां रक्षारहितमसमाहितानां **प्रतिदिनसमये भक्षयन्ति** [3]**मारभूता राक्षसाः** शुक्राहारिणः, योगिव्यपदेशेन नरा अपि **प्रज्ञापुष्पेण युक्तं शिवसुखफलदं भक्षितं देशयन्ति**। अन्येषां बालजनानां नरक-   T 428
गमनायेति ॥ ८३ ॥   15

नाकट्यं वज्रमब्जात् परमसुखगतं संकुचं नैव यावद्
बुद्धाधिष्ठानमेवं प्रभवति हि यदा कामसिद्धिस्तदा वै ।
वज्राब्जाभ्यां प्रविश्य स्वकुलिशहृदये ज्ञानचक्रं प्रविष्टं
चक्राकारं करोति ह्युभयतनुमिमां रश्मिभिः पूरयित्वा ॥८४॥

ततो बौद्धमन्त्रिणा **नाकट्यं वज्रमब्जाद् यावन्न संकोचो भवति, बुद्धाधिष्ठानमेवं**   20
प्रभवति हि यदा कामसिद्धिस्तदा वै वज्रमार्गेण उपायहृदये प्रविश्य पद्ममार्गेण प्रज्ञाहृदये **प्रविश्य** [4]**स्वकुलिशहृदये** देवताचक्रं **प्रविष्टं चक्राकारं करोत्युभयतनुमिमां रश्मिभिः पूरयित्वेति** ॥८४॥

एषा सिद्धिर्यदि स्यान्नहि कुलिशमणौ संस्थितं भक्षणीयं
प्रज्ञाधर्मोदयस्थे सकलजिनकुलं स्थापयेद् रक्षणार्थम् ।   25

---

१. भो. bLa Ma Yis (गुरुणा) । २. च. 'यदि प्रज्ञाधर्मोदये पतति तदा' नास्ति, गृहीतस्तु भोटानुसारी । ३. भो. bDud Kyi Pho Ña (मारदूताः) । ४. भो. Raṅ Raṅ (स्वस्व) ।

प्रज्ञायुक्ते त्वर्थैके पुनरपि वचनं प्रोच्यते बुद्धकायो
यः कश्चिच्चास्य नाशं ह्यभिलषति शठो मार्यते वज्रिणा सः ॥८५॥

एषा सिद्धिर्नहि स्याद्यदि, तदा कुलिशमणौ संस्थितं बोधिचित्तमनामाङ्गुष्ठाभ्यां गृहीत्वा भक्षणीयम् । एवं प्रज्ञायाः[182b] पद्मबाह्ये आगतं तदेव द्वाभ्यामपि भक्षणीयम् । प्रज्ञाधर्मोदयस्थे पुनः सकलजिनकुलं स्थापयेद्रक्षणार्थं षड्वज्राणि ललाटादिषु हृदयादिषु षडङ्गमिति । प्रज्ञायुक्त इति रजोयुक्ते, अर्थैके बोधिचित्ते रक्षिते महत्पुण्यं भवति । पुनरपि वचनं प्रोच्यते बुद्धकाय इदं बोधिचित्तम् । यः कश्चिद् मारकायिकोऽस्य नाशमभिलषति शठो मार्यते वज्रिणा स हेरुकेणेति बोधिचित्तस्य समयरक्षणभक्षणनियमः ॥८५॥

ये प्रोक्ताऽनेकमन्त्रास्त्रिभुवनपतिना क्रूरकर्मस्वभावा-
स्ते सर्वे मारपक्षक्षयभयजनकाः प्राणिनां नो कदाचित् ।
कर्तारो ये स्मृतीनां रणविषयरता मारकान्येऽपि तीर्थ्या-
स्तेषां ते योजनीयाः परमजिनसुतैः प्राणिनां रक्षणार्थम् ॥८६॥

इह मन्त्रनये ये प्रोक्ता अनेकमन्त्रास्त्रिभुवनपतिना क्रूरकर्मस्वभावाः, ते सर्वे मारपक्षक्षयभयजनकाः प्राणिनां नो कदाचित् । अत्र माराः कर्तारो ये स्मृतीनां रणविषयरता मारका अन्येऽपि तीर्थिकाः, तेषां ते योजनीयाः परमजिनसुतैः प्राणिनां रक्षणार्थम् । तेषां पक्ष इति वेदधर्मादिकः, तस्य धर्मस्य क्षयभयहेतोः, न तेषां प्राणहानये ॥८६॥

डाकिन्यो वज्रपूर्वाः पशुजननिधनेऽध्येषणीया न विद्भिः
सत्त्वानां रक्षणार्थं त्रिभुवनपतिना स्फारिता लोकधातौ ।
तस्मात् ता रक्षयन्ति प्रतिदिनसमये साधकं द्वेषयन्ति
साध्यः कर्मप्रभावाद् व्रजति हि मरणं साधकस्यैष मारः ॥८७॥

इह योगिनीतन्त्रे या वज्रडाकिन्यस्ताः पशुजनानामज्ञानिनां मारणार्थं नाध्येषणीया बौद्धैर्विद्वद्भिः । कुतः ? यतस्ताः सत्त्वानां रक्षणार्थं त्रिभुवन[1]पतिना स्फारिता लोकधातौ । तस्मात् ता रक्षयन्ति लोकान् । परमकारुणिकाः साधकं द्वेषयन्ति लोकविसंवादकम्, अथ मारणादिकर्मणि कृते सति यदि साध्यः कर्मप्रभावाद् व्रजति हि मरणम्, तदा साधकस्यैष मारो मया हत इत्यहङ्कारतः साधको नरकं याति क्षुद्रकर्मणेति निर्ममो निरहङ्कारः क्षुद्रकर्म न करोति, यथा आत्मानं तथा पश्यति सत्त्वान् ॥८७॥

---

१. भो. bLa Mas (गुरुणा) ।

पुंसां चित्तं समन्तादशुभफलवशात् क्षुद्रविद्यानुरक्तं
विद्येयं मे करोति त्रिभुवनसकलं वश्यमेकक्षणेन ।
इत्याशालुब्धचित्तः प्रविशति नरकं ज्ञानदानं विहाय
पृष्ठे द्रव्यं स्वभार्या भवति परवशाऽहो कुधर्मप्रवृत्तिः ॥८८॥

इह संसारिणां पुंसां **चित्तं समन्तादशुभफलवशात् क्षुद्रविद्यानुरक्तम् । विद्येयं मे करोति त्रिभुवनसकलं वश्यमेकक्षणेनेत्याशालुब्धचित्तः प्रविशति नरकं ज्ञानदानं विहाय** मरणमुपगतः । पृष्ठे मरणमुपगते सति परवशं **द्रव्यम्, स्वभार्या परवशा भवति** अन्यासक्ता । **अहो** संसारिणां **कुधर्मप्रवृत्तिः** ॥ ८८ ॥

[1]इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां
द्वादशसाहस्रिकायां विमलप्रभायां
योगिनीतन्त्रादिस्फरणमहोद्देशः
प्रथमो ज्ञानपटले ॥

(२) चतुःकायाविशुद्धिनिर्णयमहोद्देशः

न सन्नासन्न सदसन्न चाप्यनुभयात्मकम् ।
चतुष्कोटिविनिर्मुक्तं नत्वा कायं महासुखम् ॥

उद्धृतं मञ्जुवज्रेण आदिबुद्धान्निरन्वयात् ।
लक्षणं बुद्धकायानां चतुर्णां तद्वितन्यते ॥

न प्रज्ञा नाप्युपायः सहजतनुरियं धर्मकायो बभूव
प्रज्ञोपायस्वरूपः खलु विगततमो ज्ञानविज्ञानभेदात् ।
सोऽयं संभोगकायः प्रतिरवक इवानेकसत्त्वार्थकर्ता
सत्त्वानां पाकहेतोर्भवति पुनरसौ बुद्धनिर्माणकायः ॥८९॥

न [2]प्रज्ञेत्यादि । इह प्रज्ञा पञ्चदशकलात्मकः शुक्लपक्षः, कृष्णपक्षश्चन्द्रकलाहानिरुपायः । एवं शुक्लो रात्रिः कृष्णो दिवा । अतः सहजकायो **न प्रज्ञा नाप्युपायः सहजतनुरियं** बुद्धानाम् । एवं न सच्छुक्लपक्षः, नासत्कलाभावः कृष्णः, न सदसद् अनयोः परस्परविरोधतो मेलापको नास्ति । न चाप्यनुभयात्मकमिति न चाभ्यां शुक्लकृष्णपक्षाभ्यां विना तत् सहजसुखम् । एवं चतुष्कोटिपरिशुद्धा षोडशी कला शून्यता-

---

१. भो॰ 'इति' नास्ति । २. च. प्रज्ञेत्यादिना ।

धर्मिणी सहजतनुरुच्यते, निःष्यन्दलक्षणात्तुर्याक्षयतो योगिनाम्। एवं नपुंसकमिति सिद्धम्। इह सहजतनुः स्वार्थसम्पत् परार्थसम्पदे **धर्मकायो** [183a] **बभूव** सुषुप्तक्षयतः। स च **प्रज्ञोपायस्वरूपः खलु विगततमो ज्ञानविज्ञानभेदा**दिति। इह ज्ञानं ग्राहकचित्तं योगिनः, विज्ञानं परचित्तज्ञानं ग्राह्यं ज्ञेयलक्षणम्। एवं ग्राहकचित्तं प्रज्ञा कल्पनारहितत्वात्,
5 योगिनामुपायो [1]ग्राह्यचित्तं [2]परिकल्पितं करुणालक्षणम्। तेन ग्राहकग्राह्यभेदेन प्रज्ञोपायस्वरूपः परार्थकर्ता धर्मकायः। स च सहजाद् बभूवेति। एवं निष्यन्दो नाभौ सहजः, धर्मचक्रे हृदये विपाकः, सोऽयं धर्मकायः **संभोगकायः** परार्थसम्पदे **प्रतिरवक इवानेकसत्त्वार्थकर्ता**। इह दिव्यचक्षुषा यदतीतानागतं रूपं दृष्टं प्रतिबिम्बाकारं स्वच्छम्, तस्मिन् शब्दो यो निश्चरति स प्रतिशब्दः सम्भोगकायः प्रज्ञोपायस्वरूपः। दिव्यश्रोत्रेण
10 [3]दिव्यविज्ञानं ग्राहकम्, प्रतिशब्दो ग्राह्यः। तेनातीतानागतकालसंख्यां जानाति—अमुककल्पेऽमुकयुगेऽमुकवर्षेऽमुकमासेऽमुकपक्षेऽमुकदिनादिकेऽमुको भूतः, अमुको भविष्यतीति। तेन सत्त्वा वैनेया इति स्वप्नावस्थाक्षयतः कण्ठे पुरुषकारः सम्भोगकाय ऊर्ध्वरेतसः। **सत्त्वानां पाकहेतोर्भवति पुनरसौ** सम्भोगकायो **निर्माणकायो** भवति प्रज्ञोपायात्मकः। एकोऽपि सत्त्वानां नानानिर्माणदर्शनतोऽनेकः। एवमेकानेकयोर्योगो
15 विवृत्या प्रज्ञोपायः, संवृत्या एकानेकविरोधः। स च जाग्रदवस्थाक्षयतो ललाटे वैमल्यो **निर्माणकायः** "अशेषरूपसन्दर्शी रत्नकेतुर्महामणिः" (ना० सं० ९.२४) इति। एवमेकः सहजः, स एव धर्मः सम्भोगो निर्माणश्चेति चतुर्धेति ॥८९॥

> एकोऽसौ वज्रसत्त्वः प्रलयघननिभो हेरुको वै बभूव
> रौद्राणां पाचनार्थं स च समयजिनो मोहितानां सुखार्थम्।
> 20 रत्नेशो दुःखितानां स च कमलधरो रागिणां रागहेतो-
> र्विघ्नानां ध्वंसनार्थं त्वसिकरकमलोऽमोघसिद्धिर्बभूव ॥९०॥

स एव पूर्वोक्त **एकोऽसौ वज्रसत्त्वः प्रलयघननिभः** कृष्णो **हेरुको वै बभूव**। अच्युतधर्मेणान्यत् तद्विज्ञानं हेरुकः। **स च रौद्राणां पाचनार्थं** वज्रसत्त्वस्फरणमिति। स च वज्रसत्त्वो **मोहितानां** पाचनार्थं **समयजिनो** वैरोचनो बभूव, अन्यत् तद्रूपम्। स च
T 429
25 **रत्नेशो दुःखितानां** दानार्थं रत्नसम्भवो बभूव, अच्युतधर्मेणान्या सा वेदना सर्वदुःखापहन्त्रीति। **स च कमलधरो रागिणां रागहेतो**रमिताभो बभूव, अच्युतधर्मेणान्या सा संज्ञा या अच्युतसुखदात्रीति। स च **विघ्नानां ध्वंसनार्थं त्वसिकरकमलोऽमोघसिद्धिर्बभूव**, अच्युतधर्मेणान्ये ते संस्काराः, ये निरावरणं चित्तं कुर्वन्ति, माराद्यावरणं विध्वंसयन्तीति पञ्चबुद्धविशुद्धा इति ॥ ९० ॥

---

१. च. 'ग्राह्य' नास्ति। २. भो. rTags Pa gSan To (परकल्पितं)।
३. भो. 'दिव्य' नास्ति।

इदानीं पञ्चधातव उच्यन्ते—

द्वेषाद् या विश्वमाता प्रलयशिखिनिभा डाकिनी सा बभूव
मोहात् सा लोचनाख्या परमकरुणया मामकी मानहेतोः ।
रागात् सा पाण्डराख्या सकलगुणनिधिस्तारिणी चेर्ष्यया सा
एतौ द्वौ विश्वरूपौ विषयविषयिणोऽन्ये च सर्वे बभूवुः ॥९१॥　　5

द्वेषादित्यादि । इह प्राकृतद्वेषक्षयान्महा**द्वेषाद् या** प्रज्ञापारमिता शून्यता सर्वाकारा **विश्वमाता**, सा वज्रधात्वीश्वरी वज्र**डाकिनी बभूव** । एवं मोहक्षयान्महा**मोहा**ल्लो**चना परमकरुणया मामकी** मानक्षयान्महा**मानहेतो**र्बभूव । रागक्षयान्महा**रागात् पाण्डरा सा सकलगुणनिधिस्तारिणी** सा **ई**र्ष्याक्षयान्महेर्ष्यातो बभूव । एवमन्य आकाशधातुः, अन्यः पृथ्वीधातुः, अन्यस्तोयधातुः, अन्य[183b)स्तेजोधातुः,　10 अन्यो वायुधातुरिति धातुलक्षणं निरावरणबिम्बतोऽच्युत[1]सुखत इति सिद्धम् । **एतौ द्वौ विश्वरूपौ** कालचक्रविश्वमातरौ प्रज्ञोपायौ एकलोलीभूतौ । **विषयविषयिणोऽन्ये सर्वे बभूवुः**, गन्धादयोऽन्ये ते विषयाः श्रोत्राद्याः, अन्ये ते विषयिणः, अन्ये वाक्पाण्यादयः, अन्ये कर्मेन्द्रियक्रियादयः । एवं—

सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।　15
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥
(भ० गी०. १३.१३)

वज्रसत्त्व इति । एवं—

आत्मवित् परवित् सर्वः सार्वीयो ह्यग्रपुद्गलः ।
लोकोपमामतिक्रान्तो ज्ञेयो ज्ञानाधिपः परः ॥ इति ।　20
(ना० सं० १०.१३)

तथा—

सिद्धार्थः सिद्धसंकल्पः सर्वसंकल्पवर्जितः ।
निर्विकल्पोऽक्षयो धातुर्धर्मधातुः परोऽव्ययः ॥
(ना० सं० ६.१५)　25

[इति] **नामसङ्गीत्यां** ज्ञानकायलक्षणनियमः ॥ ९१ ॥

---

१. भो. bDen Pa Las (सत्यतः) ।

इदानीं बुद्धानां सत्त्वाशयवशेन नानाविहरणमुच्यते—

पञ्चस्कन्धस्वभावैर्विहरति कृपया वज्रयोषिद्भगेषु
सत्त्वानां पाचनार्थं त्वविहितनियमानामपुण्यार्जितानाम् ।
शुद्धावासादिके यद्विहरति भगवान् श्रावकाणां निमित्त-
5 मेवंकारे स्थितिर्या परमनियमिनामुत्तरे स्थापनार्थम् ॥९२॥

पञ्चेत्यादि । इह यत् क्लेशाद्यावरणरहितानां गर्भावक्रमणं **पञ्चस्कन्धग्रहणं वज्रयोषिद्भगेषु** स्त्रीगर्भे सम्भवाय विहरणम्, तत् कृपया **अविहितनियमानां** प्राकृत-जनानामपुण्यार्जितानां **पाचनाय** । तथाह—

वज्रकायशरीराणां बुद्धानां यदनित्यता ।
10 कदलीगर्भतुल्येषु का चिन्ताऽन्येषु जन्तुषु ॥

इत्यादिनाऽनित्यवादिनां पाचनाय । पुनः **शुद्धावासादिके** यत्नुत्पादः, स **श्रावकाणां** देवत्वं गतानामहङ्कारविनाशाय । इदं देवत्वं च्यवनकाले महद् दुःखमिति देशनया तेषां पाचनम् । **एवंकारे स्थितिर्या** शून्यतायां सा **परमनियमिनां** सुभूत्यादीनां **मैत्रेयप्रभृतीनामुत्तरे** सम्यक्सम्बुद्धत्वे **स्थापनाय** चतुर्थकायदेशनयेति । शून्यस्वभावः
15 शून्यता, इहातीतानागतं ज्ञेयं शून्यम्, तस्य दर्शनं भावः शून्यता, गम्भीरोदारा अतीतानागताभावाद् गम्भीरा, अतीतानागतदर्शनादुदारा । तथाह—

शून्यतावादी वृषभो गम्भीरोदारगर्जनः ।
धर्मशङ्खो महाशब्दो धर्मगण्डी महारण. ॥
अप्रतिष्ठितनिर्वाणो दशदिग्धर्मदुन्दुभिः ।
20 अरूपो रूपवानग्र्यो नानारूपमनो[१]मयः ॥
सर्वरूपावभासश्रीरशेषप्रतिबिम्बधृक् ॥
(ना० सं० ८.२-३)

इति **नामसङ्गीत्यां** भगवतो नियमः ॥ ९२ ॥

सत्त्वानां पाकहेतोस्त्रिविधविहरणं कायवाक्चित्तभेदै-
25 र्बाह्याध्यात्मं परं च प्रभवति नियतं वज्रिणः सर्वकालम् ।
बाह्ये नानाप्रदेशे भवति वरतनौ प्राणवायोः प्रचारो
भूम्यादौ मण्डले यत् प्रभवति च विभोर्वज्रयोषिद्भगे तत् ॥९३॥

---

१. भो. sKyes (भवः) ।

शब्दादौ यच्च चित्तं व्रजति न विषये चापरं तद्वदेव
एवंकारे स्थितिर्या परमसुखपदे कायवाक्चित्तवेगः ।
एको वज्री त्रिभेदो विषयविषयिभिश्चावृतो धातुभिश्च
त्र्यध्वस्त्रिस्थानवासी त्रिभवमपि गतोऽनेकसत्त्वार्थहेतोः ॥९४॥

तन्त्रेष्वेवं मया यत् श्रुतमिति वचनं तन्मया ज्ञातमेवं　　5
वज्री चन्द्रद्रवाद्यः शिरसि गलहृदब्जे च नाभौ च गुह्ये ।
वज्रस्त्रीणां भगे तत् परकमलगतो बिन्दुमोक्षत्रयेण
बुद्धक्षेत्रे प्रविष्टस्तदिह स भगवान् योगिभिर्वेदितव्यः ॥९५॥

एकं पश्यन्त्यनेकं प्रणिधिगुणवशाच्छान्तरागादिभावै-
श्चक्रस्थं पूर्वजन्मस्वहृदयजनितैर्वासनाया बलेन ।　　10
एकार्थानन्तभाषा प्रविशति हृदये प्राणिनां स्वस्वभावै-
श्चक्रस्थः पिण्डपातं व्रजति विहरितुं स्था(ता)यिनां पुण्यहेतोः ॥९६॥

तिर्यक्प्रेतासुराणामुरगसुरनृणाम् आर्यभोटादिकानां
भूतेष्यद्वर्तमानं त्रिविधमपि सदा सत्यधर्मं ब्रुवन्ती ।
मार्गे संस्थापयन्ती त्रिभवमविकलं स्वस्वभाषान्तरेण　　15
एषा सर्वज्ञभाषा समसुखफलदा देवभाषा न च स्यात् ॥९७॥

बुद्धानामप्यगम्या त्वपरिमितगुणा बुद्धनिर्माणमाया
आत्मानं दर्शयन्ती त्रिभुवननिलये शक्रजालं यथैव ।
नानाभावैर्विभिन्ना सजिनसुरनृणां स्वस्वचित्ते प्रविष्टा
एषामुत्पन्नधर्मा पयसि नभ इव भ्रान्तिदोत्पत्तिरत्र ॥९८॥　　20

सर्वाकारं ह्यगम्यं विषयविषयिणां कायवज्रं जिनस्य
वाग्वज्रं सर्वसत्त्वस्वहृदयरुतकैर्धर्मसंपादकं च ।
सत्त्वानां चित्स्वभावं सकलभुविगतं वज्रिणश्चित्तवज्रं
भावानां ग्राहकं यद् विमलमणिरिव ज्ञानवज्रं तदेव ॥९९॥

दानाद्याः षट् चतस्रः समसुखफलदाः शक्तयस्ता दशोक्ता-　　25
स्तासां शुद्धा उपायाः परमदशविधाः पूर्णचित्ता घटान्ते ।

मारक्लेशक्षया वै मदन इति हरो वज्रवृन्द्रं द्रुमाद्याः
षण्मुद्राः शून्यषट्कं त्रिभुवनजनको ज्ञानविज्ञानमेकम् ॥१००॥

चक्रं स्वच्छं समन्तात् त्रिभव इति सुखं रत्नमस्येव रागः
पद्मं क्लेशक्षयोऽसिः कुलिशमपि महाज्ञानकायो ह्यभेद्यः ।
5　छेदोऽज्ञानस्य कर्त्री त्विह[1] षडपि कुलान्येभिरुत्पादिता ये
तेऽप्येवं वेदितव्याः खमिव समरसाः स्कन्धधात्विन्द्रियाद्याः ॥१०१॥

यस्मिन् वै जातिरूपं व्रजति निधनतां तन्महारूपमुक्तं
यस्यां संसारदुःखं व्रजति निधनतां सा महावेदनोक्ता ।
यस्यां संसारसंज्ञा व्रजति निधनतां सा महावज्रसंज्ञा
10　यस्मिन् संसारवृद्धिर्व्रजति निधनतां वज्रसंस्कार एव ॥१०२॥

यस्मिन् [2]जाग्राद्यवस्था व्रजति निधनतां तच्च विज्ञानमुक्तं
यस्मिन्नज्ञानभावो व्रजति निधनतां तन्मुनेर्ज्ञानमेव ।
एते वैरोचनाद्याः परमजिनवराः षड्विधाः षट्कुलानि
अन्ये षड्धातुभेदा अवनिशिखिपयोमारुताकाशशान्ताः ॥१०३॥

15　यस्यां मोहः समस्तो व्रजति निधनतां लोचना सा धरित्री
यस्यां मानः समस्तो व्रजति निधनतां मामकी साऽम्भ एव ।
यस्यां रागः समस्तो व्रजति निधनतां पाण्डरा सा हविः स्याद्
यस्यामीर्ष्या समस्ता व्रजति निधनतां तारिणी साऽनिलश्च ॥१०४॥

यस्यां द्वेषः समस्तो व्रजति निधनतां वज्रधात्वीश्वरी खं
20　यस्यां मात्सर्यसर्वं व्रजति निधनतां विश्वमाताक्षरं सा ।
दृष्टादृष्टं हि रूपं मनसि नभसि वै पश्यते यः स चक्षु-
र्दूराच्छब्दं शृणोति प्रकटमिव महाश्रोत्रमेतज्जिनस्य ॥१०५॥

सर्वं गृह्णाति गन्धं परमसुखकरं सा सुनासा विभोश्च
सा जिह्वा या स्वचन्द्रामृतमपि च सदा स्वादते सौख्यदं च ।

---

१. मु. त्वर । २. मु. भो. gNid (निद्रा) ।

वज्रस्पर्शं समन्तादपहरति सदा वज्रकायेन्द्रियं तत्
प्रज्ञोपायप्रसङ्गाद् विशति समसुखे यो मनः सोऽस्य धर्मः ॥१०६॥

एते षड्भेदभिन्ना विषयविषयिणो बोधिसत्त्वाः सभार्या
विश्वे रूपादयोऽमी जिनवरविषयाः षट्प्रकाराः समन्तात् ।
स्वच्छाऽजाता निरुद्धाः परमसुखकराऽनाविला ज्ञानगम्या	5
नान्यो ग्राह्यस्त्रिधातौ तु सकलजगतश्चेन्द्रियद्वारगम्याः ॥१०७॥

अतो द्वानवतिवृत्तादूर्ध्वं पञ्चदशवृत्तानि सुबोधानि ॥ ९३-१०७ ॥

ततो वृत्तैकं गूढम्, तदेव वितन्यते—

ज्ञानाकृष्टिं करोत्यत्र पुनरतिबलस्तत्प्रवेशं च जम्भः
स्तम्भस्तद्बन्धनं वै परमसुखवशान्मानकस्तोषणं च ।	10
चक्रस्य ज्ञानचक्रे समरसकरणं वज्रवेगः करोति
एवं वै वज्रदेव्यः प्रकटितनियता योगिनीतन्त्रकाये ॥१०८॥

ज्ञानेत्यादि । इह किल मण्डलचक्रभावनायां समयसत्त्वं निष्पाद्य ततो ज्ञानचक्रस्याकर्षणं प्रवेशनं बन्धनं तोषणं समरसं कर्तव्यं मन्त्रिणा । जः हूं वं होरिति वज्राङ्कुशेनाकर्षणं वज्रेण प्रवेशनं वज्रपाशेन बन्धनं घण्टया तोषणं पूर्वदक्षिणपश्चिमोत्तरद्वारेषु स्थितैः क्रोधराजैर्योगिनीतन्त्रे वज्रडाकिनीभिः सर्वत्र [1]कीर्तितम् । तदेवाध्यात्मन्युच्यते—**ज्ञानाकृष्टिं करोत्यत्र** शरीरे **पुनरतिबल** इति । युवतीप्रसङ्गे ज्ञानसत्त्वः शुक्रं सन्ध्याभाषान्तरेण तस्याकर्षणं प्राणादिवायुवृन्द[2]भेदं करोत्यूर्ध्वे शिरसि परिपूर्णं करोति बोधिचित्तमित्यर्थः । **तत्प्रवेशं च जम्भ** इति तेजस्तद्द्रावयित्वा द्रवस्य बिन्दुरूपस्य कण्ठे हृदये नाभौ गुह्यकमले प्रवे[184a]शं करोतीति । **स्तम्भ** इति पृथ्वीधातुस्तस्य बिन्दुरूपस्य बन्धनं करोत्यागतस्यातिवेगेन गन्तुं न ददाति **परमसुखवशा**दिति । **मानकस्तो**यधातुबिन्दोः स्वच्छद्रवं गुह्यकमले वज्रमणौ गतं स्पन्दमित्युच्यते, तस्याच्युतसुखवशात्तोयधातुस्**तोषणं** शरीरे शैत्यं करोतीत्यर्थः । पुनस्तत्स्थानादूर्ध्वगमनार्थं तदेव [3]निःष्यन्दसुखं लोचनादयः प्रबोधयन्ति वज्रगीतिकाभिः पूर्वोक्ताभिः । ततो नाभौ [4]निष्यन्दनार्थं लोचना चोदयति, हृदये मामकी विपाकार्थम्, कण्ठे पाण्डरा पुरुषकारार्थम्, शिरसि तारा वैमल्यार्थम् । एवमादिभिरुत्थापितो महासुखो वैमल्यं गतः सर्वस्कन्धधात्वायतनादिकं निरावरणं करोति । ततः सर्वज्ञपदं योगिनां भवति, न कल्पितमण्डले योगिनीगीतेनोत्थापित इति नीतार्थः सर्वतन्त्रेषु संवृत्या विवृत्या चेति ॥ १०८ ॥

१. च. 'कीर्तितम्' नास्ति । २. च. 'भेदं' नास्ति । ३.४. च. निःस्पन्द ।

माराणां ताडनं वै त्रिभुवननिलये नीलदण्डः करोति
बन्धं क्रोधोऽचलश्च प्रलयरविनिभः कीलनं चातिवीर्यः ।
टक्किस्तद्वीर्यनाशं त्ववनितलगतं स्तम्भनं स्तम्भ एव
उष्णीषश्चर्द्धिनाशं प्रकटितनियताः पूर्ववत् क्रोधदेव्यः ॥१०९॥

5 प्रेतानां पाचनार्थं स्फुरणमपि ततश्चर्चिकादेर्बभूव
इन्द्रादीनां सुराणां दिशि विदिशि तथा रक्षणार्थं जनानाम् ।
नागानां पाचनार्थं फणिकुलसकलं स्फारितं वज्रिणा च
दैत्यानां पाचनार्थं स्फुरणमपि महाश्वानवक्त्रादिकानाम् ॥११०॥

ततो **नीलदण्डादयः** कर्मेन्द्रियक्रियामाकाशे गमनागमनादिकं कुर्वन्ति **मारा-**
10 **दिकानां ताडनादिकं** कृत्वेति सर्वमारकायिकान् चतुर्वैशारद्यबलेन निर्जित्य धर्मचक्रं प्रवर्तयति तथागत इति पूर्वोक्तलक्षण इति नियमः ॥ १०९-११० ॥

अन्यद् यत्किञ्चिदस्ति स्फरणमपि विभोर्मण्डले भूतजान्तं
सर्वं सत्त्वार्थहेतोर्वरविविधगुणं वेदितव्यं स्वकाये ।
एवं तन्त्राणि मन्त्रा विविधकुलगता योगिनीयोगभेदात्
15 सेकोऽस्मिन् द्विप्रकारोऽपि शिशुगुणवशाल्लोकलोकोत्तरश्च ॥१११॥

एवं निरावरणसुखादन्य**द्यत्किञ्चिदस्ति स्फरणमपि विभोर्मण्डले भूतजान्तं** सार्धत्रिकोटिपर्यन्तमध्यात्मनि लोमपर्यन्तं निरावरणं धातुसमूहं **सर्वसत्त्वार्थमेतद्**
T 430 **वरविविधगुणं वेदितव्यं स्वकाये । एवं तन्त्राणि मन्त्रा विविधकुलगताः, योगिनीयोग-भेदा**ल्लौकिकसिद्धय इति । **सेकोऽस्मिन्** कालचक्रे **द्विधाऽपि शिशुगुणवशाद् लौकिकः,**
20 **अनुत्तरो**ऽनुत्तरमार्गकाङ्क्षिणां गुणवशादिति नियमः ॥ १११ ॥

इदानीं लौकिकलोकोत्तराभिषेकार्थमुच्यते—

प्रज्ञाया या स्तनस्पृष्टिरपरममृतास्वादनालिङ्गनं यत्
प्रज्ञासङ्गे चतुर्थक्षणममृतगतं बोधिचित्तद्रुते यत् ।
तत् सर्वं लौकिकं वै परमकरुणया दर्शितं मार्गहेतोः
25 सेको लोकोत्तरो यः परमजिनपतेर्दिव्यमुद्रानुषङ्गः ॥११२॥

प्रज्ञेत्यादिना । इह यद्धसितेक्षणपाण्यासिद्वन्द्व इति चतुर्विधोऽभिषेक आचार्य-गुह्य-प्रज्ञा-ज्ञानम्, "चतुर्थं [तत्] पुनस्तथा" (गु० स० १८.११२)[इति]शब्देनोक्तः **समाजादौ**

कलशादिकः, स सेकः संकेतमात्रं संवृत्याचार्यकरणाय, न तत्त्वम्, "सिक्त्वा तत्त्वं प्रकाशयेत्" इति वचनाच्चतुर्विधः सेकस्तत्त्वं न भवति हसितेक्षणपाण्यासिद्वन्द्वयोग इति । इह तत्त्वं निर्द्वन्द्वं कर्ममुद्राहेतुनोत्पन्नमद्वयज्ञानं न भवति विचार्यमाणम् । इह यदि प्रज्ञाया हेतुनोत्पन्नं सुखमुपायस्य प्रज्ञाज्ञानम्, तदा उपायहेतुनोत्पन्नं प्रज्ञाया उपायज्ञानं भवति सिद्धये । एवं चेद् द्वे ज्ञाने भवतः, उभयज्ञानभेदात् । अतोऽद्वयं न भवति । 5
अद्वयाभावाद् बुद्धत्वाभाव इति । अथ प्रज्ञाया ज्ञानं [1]प्रज्ञाज्ञानम्, तथापि दोषः, उपायस्य ज्ञानमुपायज्ञानमिति सिद्धम् । तस्मादुपायस्य सुखं क्षरं द्विधा बालं प्रौढम्, प्रज्ञायाः स्पन्दसुखं वृद्धम्, तयोर्द्वयोर्यदा निःस्पन्दं भवति महामुद्राद्वारेण [2]तद् द्वीन्द्रियरहितमद्वयम् । अतः प्रज्ञायाः स्तनस्पर्शनादिकं लौकिकं दर्शितं मार्गावतारणार्थम् । सेको लोकोत्तरो यः परमजिनपतेर्दिव्यमुद्रानुषङ्गः स एवोच्यते ॥ ११२ ॥ 10

चित्तस्याभासमात्रा स्वमनसि जनिताऽऽदर्शबिम्बोपमा वै
योगीन्द्रैः सेवनीया सकलजिनसुतैः सेविता या च बुद्धैः ।
सा ज्ञानार्चिः प्रवृद्धा दहति सविषयं मारवृन्दं समस्तं
रागादींश्चापि काये ददति समसुखं योगिनां वर्षयोगात् ॥११३॥

चित्तस्याभासमात्रेत्यादि वृत्तं सुबोधम् ॥ ११३ ॥ 15

प्रज्ञा ज्ञानं च चित्तं भवति दशविधस्तस्य चाभास एव
सेकोऽस्मिन् मज्जनं यद्विमलशशिनिभादर्शबिम्बोपमा(मं) वै ।
तस्मान्निर्वाणसौख्याच्युतमपि सहजं चाक्षरं वै चतुर्थं
यस्यैतद् बुद्धवक्त्रं हृदयमुखगतं वर्तते श्रीगुरुः सः ॥११४॥

प्रज्ञा ज्ञानमित्यादि वितन्यते[184b]। इह **प्रज्ञा च ज्ञानं च** यथासंख्यं ग्राहकचित्तम्, तस्य च ग्राहकचित्तस्य यो **दशविधो** धूमादिको ग्राह्य **आदर्शाभासः** प्रतिसेनावत्, स एव ज्ञानं ग्राह्यचित्तमित्यर्थः । एवमादर्शे स्वचक्षुःप्रतिबिम्बमिव स्वचक्षुर्ग्राह्यमिति प्रज्ञा च ज्ञानं च । **सेकोऽस्मिन् मज्जनं यदि**ति । इह ग्राह्यचित्ते ग्राहकचित्तस्य यस्तस्मिन् प्रवेशो बाह्यविषयेष्वप्रवृत्तिः, प्रत्याहारो ध्यानं प्राणायामो धारणा मज्जनमित्युच्यते । षडङ्गैस्तस्मान्मज्जनान्**निर्वाणसौख्याच्युतमपि सहजं चाक्षरं वै चतुर्थं** सुखं बालप्रौढस्पन्दानां परं लोकोपमामतिक्रान्तं त्रैलोक्याचारमुक्तमित्यर्थः । हसितेक्षणस्पर्शालिङ्गनपाण्यासिद्वन्द्वरहितं कर्ममुद्राज्ञानमुद्राहेतुरहितं शून्यतासर्वाकारप्रतिभासलक्षणमिति । इदं **बुद्धवक्त्रं** [3]ज्ञानवक्त्रं **यस्या**चार्यस्य **हृदयगतं** भावितं स्वानुभवं(भूतं) **मुखगतं** शिष्येभ्यः प्रतिपादनाय **वर्तते** सर्वकालम्, स **श्रीगुरु**र्वज्रधर इत्यर्थः । नान्ये द्वीन्द्रियसुखावबोद्धार इति ॥ ११४ ॥ 20 25 30

१. च. 'प्रज्ञाज्ञानम्' नास्ति । २. भो. Dehi Tshe (तदा) । ३. च. 'ज्ञानवक्त्रं' नास्ति ।

इदानीमस्य स्वचित्तस्याभासे प्रवेश उच्यते—

आकाशासक्तचित्तैरनिमिषनयनैर्वज्रमार्गं प्रविष्टैः
शून्याद् धूमो मरीचिः प्रकटविमलखद्योत एव प्रदीपः ।
ज्वाला चन्द्रार्कवज्राण्यपि परमकला दृश्यते बिन्दुकश्च
5 तन्मध्ये बुद्धबिम्बं विषयविरहितानेकसंभोगकायम् ॥११५॥

आकाशेत्यादिना । इह मन्त्रयाने पारमितायाने द्विधा योगाभ्यासः—आकाशे योगाभ्यासः, अभ्यवकाशे च । य आकाशे योगमाप्स्यते स रात्रौ निश्छिद्रगृहेऽन्धकारे **आकाशासक्तचित्तो** धूमादिकं निमित्तं पश्यत्यनिमिषनयनो वज्रमार्गं प्रविष्ट इति । इह मध्यमाप्राणप्रविष्टः शून्यादेवाकाशासक्तचित्तैरनिमिषनयनैर्वज्रमार्गं प्रविष्टैः
10 **शून्याद्धूमो मरीचिः प्रकटविमलखद्योत एव प्रदीप** इति निशायोगेन पश्यति । ततो निरभ्रं गगनं पश्यति । ततो गगनात् पुनर्दिवायोगे—"गगनोद्भवः स्वयम्भूः प्रज्ञाज्ञानानलो महान्" (ना० सं० ६.२०) इति ज्वाला दृश्यते निरभ्रे गगने । एवम्—"वैरोचनो महादीप्तिर्ज्ञानज्योतिर्विरोचनः" (ना० सं० ६.२१) चन्द्राभासः, जगत्प्रदीपः सूर्यः, ज्ञानोल्को वज्रराहुः, महातेजाः प्रभास्वरो
15 विद्युत्परकलेति, विद्याराजोऽग्रमन्त्रेशो बिन्दुक इति । [1]एवं दशधा निमित्तं समाजादौ रात्रियोगेन, नामसङ्गीत्यां दिवायोगेन भगवतोक्तम् । ततो "मन्त्रराजो महार्थकृत्" (ना० सं० ६.२२) इति सर्वाकारं पटघटादिकं बिम्बदर्शनमिति । **तन्मध्ये** बिन्दुमध्ये **बुद्धबिम्बं विषय**[2]**विरहितं** द्रव्याभावात् कल्पनाभावादनेकसम्भोगकायम् । ततो बिम्बयोगेनानाहतध्वनिर्यः, स एव श्रूयते । एवं निर्माणकायो रूपावभासतः,
20 शब्दावभासतः सम्भोग इत्यर्थः ॥११५॥

आकाशं स्तब्धदृष्ट्या जलधररहितं योगिनाऽऽलोकनीयं
यावद्बे कृष्णरेखा स्फुरदमलकरा दृश्यते कालनाड्याम् ।
तस्यां सर्वज्ञबिम्बं पयसि रविरिवानाविलं विश्ववर्णं
सर्वाकारं स्वचित्तं विषयविरहितं नापरं चित्तमेव ॥११६॥

25 अत्र दिवायोग **आकाशं स्तब्धदृष्ट्या जलधररहितं योगिनाऽऽलोकनीयं** पूर्वाह्णे अपराह्णे रवेः पृष्ठं दत्त्वा । अन्यथा रविरश्मिभिस्तिमिरं भवति, तेन तद्बाधात् । प्रतिदिनमवलोकनीयं **यावद्** बिन्दुमध्ये **कृष्णरेखा** बालप्रमाणा **स्फुरदमलकरा दृश्यते । कालनाड्या**मवधूत्यामन्तर्भूतं **सर्वज्ञबिम्बं** त्रैधातुकमशेषं **पयसि रविरिवानाविलं विश्ववर्णं सर्वाकारं स्वचित्तं विषयविरहितं नापरं चित्तमे**[185a]**व** परचित्तं न भवति,

---

१. ख. 'एवं' नास्ति । २. च. रहितं ।

परचित्तज्ञानाभावात्। इह प्रथमं स्वचित्ताभासो मांसचक्षुषा, तथागतस्य दृश्यते, दिव्यादि-चक्षुषा परचित्तज्ञानं दृश्यते, तेन **धर्मसंग्रहे** उक्तानि पञ्चचक्षूंषि भगवत इति। एवं क्रमान्मांसचक्षुर्दिव्यचक्षुर्बुद्धचक्षुःप्रज्ञाचक्षुर्ज्ञानचक्षुर्भावनाबलेन भविष्यति। ततोऽदृष्टं न किञ्चिदस्ति सर्वज्ञस्येति ॥११६॥

दृष्टे बिम्बे प्रकुर्यात् प्रतिदिनसमये प्राणवायोर्निरोधं 5
यावद्वै भ्राम्यमाणं स्वतनुपरिवृतं दृश्यते रश्मिचक्रम्।
षण्मासैः स्पर्शहीनं व्रजति समसुखं मार्गचित्तं यतीनां
रागारागान्तगाद्यं क्षणमपि च विभोर्वर्धते श्वाससंख्यम् ॥११७॥

ततो **दृष्टे बिम्बे प्रकुर्यात् प्रतिदिनसमये प्राणवायोर्निरोधमिति** कुम्भकम्, **यावद्वै भ्राम्यमाणं स्वतनुपरिवृतं दृश्यते रश्मिचक्रं** पूर्वोक्तबिम्बादध्यात्मनि। ततः **षण्मासैः** 10 **स्पर्शहीनं** द्वीन्द्रियद्वन्द्वरहितं **व्रजति समसुखम**क्षरसुखं **मार्गचित्तं** शून्यताबिम्बचित्तं **यतीना**मादिकर्मिकब्रह्मचारिणाम्। तत एकक्षणाभिसम्बोधिलक्षणं **रागारागान्तगाद्यं** T 431 क्षणमिति। राग इति शुक्लपक्षस्तस्यान्तगं षोडशीकलालक्षणम्। अरागः कृष्णस्तस्यादिगं कृष्णपक्षेन प्रविष्टमभिसम्बोधिकाललक्षणम्, तदेव **क्षणमपि वर्धते श्वाससंख्यं** द्वययुतद्वयष्टशतसंख्यमिति। गुह्ये वज्रमण्यग्राद्वर्धते षट्त्रिंशच्छतैः क्षणैः प्राणांस्तत्संख्या- 15 न्मारयित्वा गुह्यपद्मं प्राप्नोति, तेन भूमिद्वयं भवति। एवं नाभौ हृदये कण्ठे ललाटे चतस्रः षडष्टदशभूमयो भवन्ति। उष्णीषे द्वादश सर्वप्राणानां क्षयेणेति ॥११७॥

ओड्रा ज्वालान्तराले विरमसहजयोर्ज्ञानविज्ञानमध्ये
निद्रा घूर्माभिसन्धौ कुलिशकमलयोर्यत्सुखं द्वन्द्वयोगे।
वृद्धिं तस्य प्रकुर्याद् गुरुनियमवशाद् वर्धते नात्र चित्रं 20
हत्वा क्लेशांश्च मारान् विशति जिनपतिं वर्षयोगात् सुयोगी ॥११८॥

अत **ओड्रा ज्वालान्तराले** आगतं गुह्ये, **विरमसहजयोर्मध्ये** नाभौ, **निद्राघूर्माभिसन्धौ** हृदये, **ज्ञानविज्ञानमध्ये** कण्ठे, कायवाक्चित्तज्ञानबिन्दुरूपेण यल्ललाटादागतं **द्वन्द्वयोगे सुखम्, वृद्धिं तस्य** सुखस्य शुक्रस्य **प्रकुर्याद**ूर्ध्वगमनम्। **गुरुनियमवशात्** पूर्वोक्तात् प्राणनिरोधाद्**वर्धते नात्र चित्रं** ललाटं यावत्। एवं **हत्वा क्लेशांश्च मारान्** 25 **विशति जिनपतिं** वामदक्षिणगतान् प्राणान् मारयित्वा विशति जिनपतिं शून्यताबिम्बम्। **वर्षयोगात् सुयोगी** अवधूत्यां स्थितः। ततः कुम्भकेन महासुखक्षणमुत्पाद्य विवर्धयेत् सुखमिति नियमः ॥११८॥

इदानीं बिम्बलक्षणमुच्यते—

भूम्याकारो दृढो न द्रुतसलिलवपुर्न द्रवस्त्वद्रवत्वाद् 30
वह्न्याकारो न वह्निश्चलपवनतनुर्निश्चलो योऽनिलो न।

शून्याकारोऽपि दृश्यः सितहरितमहाविश्ववर्णो न वर्णः
सर्वाकारोऽप्यदृश्यः स्वहृदयकलुषक्लेशमारप्रभावात् ॥११९॥

भूम्येत्यादिना। इह शून्यप्रतिभासो[1]ऽद्रव्यो भूम्याकारो दृश्यते न दृढः, द्रुताकारो मरीचिको जलवन्न च जलमद्रवत्वात्। एवं वह्न्याकारो न वह्निः। चलपवनतनुरद्रवत्वान्निश्चलो यः सोऽनिलो न। अद्रव्याच्छून्याकारः, तदपि दृश्यते मायानगर इव सितादिवर्णयुक्तोऽप्यद्रव्यत्वान्न च वर्णः। सर्वाकारोऽपि स सर्वदा बालानामदृश्यः। तत् कस्य हेतोः? क्लेशमारप्रभावाद् वामदक्षिणनाडीप्राणप्रचारादिति नियमः॥ ११९॥

इदानीं स्थानं नाडीगमनायोच्यते—

नादो बिन्दुः कला ज्ञानममृतपदगाः शृङ्खलाबद्धनाड्यः
प्राणापानत्रिमार्गाः सकुलिशकमलं वज्रमेवाब्जयुक्तम्।
वाय्वोः संघट्टमध्ये विषय विषयिणां निर्गमश्च प्रवेशो
धूमादीनां निमित्तग्रहणमपि च यत् सर्वमेतद् रहस्यम् ॥१२०॥

नाद इत्यादिना। इह नादो हृदये चित्तबिन्दुः सुषुप्तावस्थाजनकः। बिन्दुरिति ललाटे कायबिन्दुर्जाग्रदवस्थाजनक इति। कलेति कण्ठे वाग्बिन्दुः स्वप्नजनकः। ज्ञानमिति नाभौ ज्ञानबिन्दुस्तुर्याजनक इति। अमृतपदगाः शृङ्खलाबद्धनाड्य इति। अमृतपदं ललाटम्, तत्र गता अमृतपदगता ललनारस[185b]नाऽवधूत्यः, ताश्च(तासु) शृङ्खलाबद्धे(न्धे)न नाभिहृदयमध्ये त्रिपथं कृत्वा पुनरवधूतीमध्ये हृत्कर्णिकां भेदयित्वा व्रजति ललना रसनासव्यवामदलप्रचारेण, ततो हृदयकण्ठमध्ये त्रिपथं कृत्वा पुनर्व्रजति, एवं ललाटकण्ठयोर्मध्ये त्रिपथमुष्णीषललाटयोर्मध्ये त्रिपथम्, एवं चतुस्त्रिपथान् कृत्वा ललना वामनासारन्ध्रेण "व्रजति परपदं द्वादशान्तं कलान्तम्" (का० तं० २.४७) अध्यात्मपटलोक्तम्। रसना दक्षिणेन अवधूती यौगपद्येन रन्ध्रद्वयेन व्रजति। एवमधो नाभिगुह्यमध्ये त्रिपथं कृत्वा विण्मूत्रनाडी वामदक्षिणेन गत्वा शङ्खिनी[2]मध्ये गुह्यकमले गुह्यकम[3]लाधो विण्नाडीमध्यगता वामेन लिङ्गे भगे वा मूत्रनाडीगता दक्षिणे शुक्रनाडीगतेति नाडिकासंचारः पूर्वोक्ताध्यात्मपटले। एवं प्राणापानत्रिमार्गा इति ऊर्ध्वं वामदक्षिणमध्यमार्गाः प्राणस्य, अधो विण्मूत्र[4]शुक्रमार्गा अपानस्य। सकुलिशकमलं स्त्रीणां योनिः स्पन्दत्वात्। समणिवज्रं क्षरत्वादेवाब्जयुक्तं विकाशत इति। वाय्वोः संघट्टमध्ये नाभौ प्राणापानयोः संघट्टमध्ये। विषय इत्यविभक्तिकं पदम्। विषयेषु विषयिणां चक्षुरादीनां [5]नाडीनां निर्गमः प्रवेशश्च नाभौ। स एव पूर्वोक्तः। धूमादीनां

१. च. अदृश्यो। २. च. अन्ये। ३. च. लोर्ध्वं। ४. च. गुह्य। ५. भो. 'नाडीनां' नास्ति।

निमित्तग्रहणमवधूतीद्वारेण, अपिशब्दात् तदेव नाभौ। **सर्वमेतद्रहस्यं** गोपनीयं बालजनानामिति नियमः ॥ १२० ॥

इदानीं योगोपसंहार उच्यते—

मध्ये प्राणप्रवेशः सरविशशिगतेर्बन्धनं सव्यवामे
चित्तं मुद्राप्रसङ्गे परमसुखगतं वज्रसम्बोधनं च । 5
पद्मे वज्रध्वनिर्वा स्वकरसलिलजोल्लालनं सौख्यहेतो-
र्बीजात्यागः ससौख्यो मरणभयहरः श्रीगुरोर्वक्त्रमेतत् ॥१२१॥

मध्ये प्राणेत्यादिना। इह प्रथमं योगिना **मध्ये प्राणप्रवेशः** कर्तव्योऽवधूत्याम्, येन निमित्तं पश्यति, [1]इत्येकं **श्रीगुरो**र्वृद्धस्य कायवज्रं **वक्त्र**मुच्यते। तस्मात् **सरविणा** दक्षिणगतिना सार्धं **शशिगतेर्वाम**नाडीगतेः, **बन्धनं** प्राणस्येति नियमः, प्राणायामो 10 द्वितीयं वाग्वज्रम्। **चित्तं मुद्राप्रसङ्गे** बिम्बेऽनुरक्तं बोधिचित्तं द्रुतं तृतीयं चित्तवज्रं **परमसुखगतं वज्रसम्बोधनं च**। अथ बिम्बद्वारेणानन्दं न भवति, तदा **पद्मे वज्रध्वनिर्वा** शनकैः कर्तव्यः। अथ स्त्री न लभ्यते, तदा **स्वकरमलेनोल्लालनं** कर्तव्यं **सौख्यवृद्धिहेतोः**, न क्षरणहेतोः। एवं **बीजात्यागः ससौख्यो** भवति **मरणभयहरः** श्रीगुरोर्वक्त्रं चतुर्थं ज्ञानवज्र**मेतद्**दिति योगाभ्यास इति नियमः ॥१२१॥ 15

इदानीं [2]पञ्चमण्डलक्षय उच्यते—

पृथ्वी तोयं प्रयाति ज्वलनमपि जलं पावको मारुतं च
वायुः शून्यं च शून्यं व्रजति दशविधं वै निमित्तं निमित्तम् ।
सर्वाकारं प्रयात्यक्षरपरमसुखानाहतं ज्ञानकायं
ज्ञानादृद्धिश्च सिद्धिर्भवति नरपते जन्मनीहैव पुंसाम् ॥१२२॥ 20

[3]पृथ्वीत्यादिना। इह यदा योगी अनिमिषनयनो भवति क्रोधदृष्ट्या शून्ये आरोपितचित्तः, तदा वामे वा दक्षिणे वा **पृथ्वी**त्युपलक्षणम्, यदा दक्षिणे पृथ्वीप्रवाहकाले योगी भावनां करोति, तदायं विधिर्न पुनर्वामनाडीप्रवाहकाले आकाशमण्डलादिक्रमतः। तेन वामे वा दक्षिणे वा यन्मण्डलं वहति प्राणस्तद्धर्मित्वात्तदेव 25 मण्डलमुच्यते। तेन दक्षिणनाड्यां पृथ्वीमण्डले प्राणोऽम्मण्डलं **याति**। एवं ज्ञानमण्डलं यावद् वामनाड्यामाकाशादिना याति। एवं **शून्यं व्रजति दशविधं निमित्तं** धूमादि[186a]कं **निमित्तं सर्वाकारं** बिम्बं व्रजति, बिम्बादक्षरसुखं **व्रजति**, तदेव

१. भो. ḥDi Ni (इदं)। २. भो. 'पञ्च' नास्ति। ३. च. भूमिरित्या।

ज्ञानं प्रज्ञापारमितायाः। **ज्ञानादृद्धिश्चाकाशगमनादिका, सिद्धिश्च त्रैधातुकेश्वरत्वं**[1] **भवति नरपते जन्मनीहैव पुंसामिति** मार्गप्रवेशनियमः॥ १२२॥

इदानीं चतुष्कायानां षोडशप्रभेदा उच्यन्ते—

कामा निर्माणकायः प्रभवति नियतस्तस्य वागेव पूर्णा
ज्वाला निर्माणचित्तं परमसुखकरं ज्ञानमेवास्य चोड्रा।
आनन्दो भोगकायः स परमविरमानन्दमस्य क्रमेण
वाक्चित्तं ज्ञानवज्रं भवति हि सहजानन्दमेवास्य शम्भोः॥१२३॥

T 432 कामेत्यादि। इह समुदयसत्याद् यत्रैकः कायस्तत्रान्येऽपि वाक्चित्तादय इति। **कामा** इति कायानन्दस्य निरोधा**न्निर्माणकायो** बुद्धस्य **भवति नियत** इति। **तस्य** निर्माण[2]कायस्य यो वागानन्दक्षयः, **वागेव सा पूर्णा। ज्वाला निर्माणचित्तं** ज्वाला इति चित्तानन्दनिरोधः। **परमसुखकरं ज्ञानवज्रं** निर्माणस्य। **ओड्रा** ज्ञानानन्दनिरोधः। एवं निर्माणचतुष्टयं तथा सम्भोगचतुष्टयम्। **आनन्दो भोगकायः** कायपरमानन्दनिरोधः, **स परमविरमानन्दमस्य क्रमेणे**ति। परमानन्दः संभोगवाक् वाक्परमानन्दक्षयतः। विरमानन्दः संभोगचित्तं चित्तपरमानन्दनिरोधः। एवं **वाक्चित्तं ज्ञानवज्रं सहजानन्दः** सम्भोगस्य(**शम्भोरस्य**) ज्ञानपरमानन्दनिरोध इति सम्भोगस्ततो धर्मचतुष्टयम्॥ १२३॥

कम्पा वै धर्मकायस्त्रिभुवननमितस्तस्य वागुद्भवः स्याद्
घूर्मा वै धर्मचित्तं भवभयमथनं ज्ञानमस्यैव निद्रा।
वर्णो वै शुद्धकायः स्वररहितकलाबिन्दुनादाः क्रमेण
वाक्चित्तं ज्ञानवज्रं त्रिविधभवगतं शुद्धकायस्य शम्भोः॥१२४॥

कम्पा वै कायविरमानन्दः, तस्य निरोधो **धर्मकायस्त्रिभुवननमितस्तस्य** धर्मस्य **वागुद्भवः स्यादि**ति वाग्विरमानन्दनिरोधः। **घूर्मा वै** चित्तविरमानन्दनिरोधः, **धर्मचित्तं भवभयमथनं** धर्म**ज्ञानमस्य निद्रा** ज्ञानविरमानन्दस्य निरोध इति। **वर्णो वै** इति कायसहजानन्दः, तस्य निरोधः **शुद्धकायः। स्वररहितकलाबिन्दुनादाः क्रमेणे**ति। कलेति वाक्सहजानन्दनिरोधः शुद्धवाक्। विन्दुरिति चित्तसहजानन्दनिरोधः शुद्धचित्तम्। नाद इति ज्ञानसहजानन्दनिरोधः शुद्धज्ञानम्। एवं **ज्ञानवज्रं त्रिविधभवगतं शुद्धकायस्य शम्भोः** वज्रसत्त्वस्य षोडशानन्दभेदभिन्नम्, "षोडशाकारतत्त्ववित्" (ना० सं० ९.१५) इति वचनात्। षोडशाकारं तत्त्वं महाक्षरसुखं विवृत्या, संवृत्या द्वादशाकारं बुद्धानां संसारिणां च। तेन द्वादशाङ्गनिरोधेन प्राणक्षयेण "वज्रसूर्यो महालोकः" (ना० सं० ८.३३), "द्वादशाकारसत्यार्थः" (ना० सं० ९.१५) रजोनिरो-

---

१. भो. Sans rGyas Nid Du (बुद्धत्वं) इत्यधिकम्। २. भो. 'काय' नास्ति।

धतः। षोडशकलाशुक्रनिरोधेन "वज्रेन्दुविमलप्रभः" (ना० सं० ८.३३), "षोडशाकारतत्त्ववित्" (ना० सं० ९.१५) इति भगवान् कालचक्रः सिद्धः ॥ १२४ ॥

इदानीं जाग्रदादिनिरोध उच्यते—

जाग्रत्स्वप्नस्वरूपं पुनरपरमिदं सुप्ततुर्यस्वभावं
कायस्थं श्वासलीनं विचरति विषयान् निश्चलं चित्तलीनम् । 5
ज्ञानस्थं स्त्रीप्रसङ्गात् क्षणमपि च भवेद् बोधिचित्ते द्रुते च
निर्माणादेः क्रमेण प्रभवति नियतं चित्तवज्रं चतुर्धा ॥१२५॥

जाग्रदित्यादि। इह संसारिणां **कायस्थम्** इति शिरसि स्थितं बोधिचित्तं जाग्रल्लक्षणं भवति, **श्वासलीनमिति** कण्ठे गतं **स्वप्नस्वरूपं** भवति, उभयावस्थायां [1]**विचरति विषयान्। निश्चलं चित्तलीनं** हृदयगतं **पुनरपरमिदं** तृतीयं चित्तं सुषुप्तस्वभावम्। **ज्ञानस्थमिति** नाभिस्थं **तुर्यस्वभावं स्त्रीप्रसङ्गाच्च्युतक्षणलक्षणम्। बोधिचित्ते द्रुते** सति तदेव चित्तं चतुर्विधं निरुद्धं निर्माणसम्भोगधर्मसहजकायलक्षणं बुद्धानां भवति। तेन **निर्माणादेः क्रमेण प्रभवति नियतं चित्तवज्रं चतुर्धेति** ॥१२५॥

एवं चित्तं चतुर्धा त्रिविधभवगतं प्राणिनां बिन्दुमध्ये
योगीन्द्रै रक्षणीयं समसुखफलदं व्यापकं मोक्षहेतोः। 15
बिन्दोर्मोक्षे क्व मोक्षो गतपरमसुखे योगिनां जन्मबीजे
तस्मात् संसारसौख्यक्षण इह यतिभिः सर्वदा वर्जनीयः ॥१२६॥

एवं जाग्रदादिलक्षणं **चित्तं** संसारिणां **चतुर्धा त्रिविधभवगतानां बिन्दुमध्ये** बोधिचित्ताधारे बोधिचित्तम्, [186b] तदेव [2]**योगीन्द्रै रक्षणीयं समसुखफलदमक्षरसुखफलदं व्यापकं मोक्षहेतोः। बिन्दुमोक्षे** सत्याधारे पतिते **क्व मोक्ष** आधेयस्य बोधिचित्तस्य **गतपरमसुखे** आधारे **योगिनां जन्मबीजे। तस्मात् संसारसौख्यक्षण इह यतिभिः सर्वदा वर्जनीयः**। इह क्षरः (क्षणः ?) क्षरः स्पन्द इति वर्जनीय इति भगवतो नियमः। ऊर्ध्वे कर्तव्यं योगिना निःष्यन्दादिना यावद् वैमल्यं भवति। यथा आगतं तथा गतमित्यक्षरसुखोत्पादनियमोऽपरश्लोके एकत्वमित्यादिना परमाक्षरज्ञानसिद्धौ विस्तरेण वक्तव्यं(व्यः)। तेनात्र परिच्छेदः ॥ १२६ ॥ 25

इति मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां
द्वादशसाहस्रिकायां विमलप्रभायां
चतुःकायादिशुद्धिनिर्णयमहोद्देशो
ज्ञानपटले द्वितीयः ॥

---

१. भो. rNam Par dPyod Do (विचारयति)। २. च. योगीन्द्रैः।

३. परमाक्षरज्ञानसिद्धिर्नाम महोद्देशः

नमः श्रीवज्रसत्त्वाय। नमो महामुद्रायै परमाक्षरसुखाय। नमो गुरुबुद्धबोधिसत्त्वेभ्यः। नमः क्रोधराजवज्रडाकवज्रडाकिनीभ्यः।

इदानीमक्षरोद्भवसहजकायस्यालिकालिपद्मचन्द्रादित्यासनहूंकारपरिणतचिह्नोत्पादरूपवर्णभुजसंस्थानपरिकल्पनाधर्मप्रतिवेधो हि यस्मात्तस्माद्भगवतः परमाक्षरज्ञानसिद्धिरुच्यते—

एकत्वं ह्यादिकाद्योः शशिदिनकरयोरासनं वज्रिणो न
हूंकारेणैव चिह्नं परिणतमपरं नेष्यते वर्णरूपम्।
उत्पन्नस्याक्षरेण क्षरनिधनगतस्यास्य दिव्येन्द्रियस्य
सर्वाकारस्य बिन्दोः परमजिनपतेर्विश्वमायाधरस्य ॥१२७॥

एकत्वमित्यादिना। **एकत्वं ह्यादिकाद्योरि**ति। [1]आदिरकारादिस्वरसमूहो हकारश्चन्द्रः, प्रत्येकं स्वरश्च। ककारादिर्व्यञ्जनसमूहः, क्षकारः सूर्यः प्रत्येकं व्यञ्जनं च। तयोरादिकाद्योः **शशिदिनकरयो**र्हकारक्षकारयोर्वा। अकार[2]पकारयोरेकत्वमेकीकरण**मासनमा**धारः। [3]पकारव्यञ्जनात्मकं पद्मम्। अकारात्मकं चन्द्रमण्डलं हकारात्मकं वा, रेफात्मकं सूर्यमण्डलं क्षकारात्मकं वा। आधेयस्य **वज्रिणः**, वज्रमभेद्यस्य परमाक्षरसुख[स्य] ज्ञानमच्युतं तदस्मिन्नस्तीति वज्री, तस्य वज्रिण आधेयस्य। **नेति** निरस्तमासनमाधार इति। तथा **हूंकारपरिणतं** वज्रचिह्नम्, [4]वज्रचिह्नपरिणतो देवताकाय(यो) वर्णभुजसंस्थानपरिकल्पनाधर्म आधेयलक्षणो **नेष्यते**। कस्मात्? अभिनिवेशलक्षणात् क्षरस्वभावात्। इहाकारादयः स्वराः ककारादीनि व्यञ्जनानि क्षरभूतानि च प्रतीत्यसमुत्पन्नानि शास्त्रविद्भिरक्षराण्युक्तानि। तथा चाह—

"न क्षरति न चलत्यपरस्थानं गच्छतीत्यक्षरशब्देन स्वर इत्युच्यते"। तेन कुमन्त्री भ्रान्तोऽक्षरत्वेन स्वरसमूहं गृह्णाति व्यञ्जनसमूहं वा। परमार्थतः स्वरव्यञ्जनसमूहोऽक्षरो न भवति। अक्षरशब्देन परमाक्षरसुखं ज्ञानं वज्रसत्त्व इति। तथा मनस्त्राणभूतत्वान्मन्त्रोऽपि परमाक्षरज्ञानमुच्यते। तथाऽपराध्यात्मिकी विद्या प्रज्ञापा[187a]-रमिता प्रकृतिप्रभास्वरा महामुद्रा सहजानन्दरूपिणी धर्मधातुनिःस्पन्दपूर्णावस्था सहजतनुरित्युच्यते जिनैः। तौ प्रतीत्यसमुत्पन्नानामिन्द्रियाणामगोचरौ दिव्येन्द्रियगोचरौ वज्रसत्त्वबुद्धमातरौ परमाक्षरसुखस्वभावौ परमाणुधर्मतातीतौ आदर्शप्रतिसेनास्वप्नतुल्यौ परमाक्षरस्वरूपाविति। अत्राक्षराणीति रूपवेदनासंज्ञासंस्कारविज्ञानानि निरावरणानि पञ्चाक्षराणि महाशून्यान्युक्तानि। तथा पृथिव्यप्तेजोवाय्वाकाशधातवो निरावरणाः

T 433

---

१. भो. 'आदिः' नास्ति। २. च. यकार। ३. च. यकार। ४. च. रज।

पञ्चाक्षराण्युक्तानीति। षडक्षराणि चक्षुःश्रोत्रघ्राणजिह्वाकायमनांसि निरावरणानि प्रत्येकस्वस्वविषयग्रहणवर्जितानि। तथा रूपशब्दगन्धरसस्पर्शधर्मधातवो निरावरणाश्च षडक्षराण्युक्तानीति। एतानि स्कन्धधात्वायतनान्येकसमरसीभूतानि बिन्दुशून्यो भवति। स च बिन्दुरच्युतः सन् परमाक्षर उच्यते। परमाक्षरोऽप्यकारोऽकारसंभवः सम्यक्संबुद्धः प्रज्ञोपायात्मको वज्रसत्त्वो नपुंसकपदं सहजकाय उच्यते ज्ञानज्ञेयात्मकः, हेतुफलयोरभेद्यत्वात्। स च कालचक्रो भगवान् परमाक्षरसुखपदमित्युक्तं भगवता नामसंगीत्यां वज्रधातुमहामण्डलस्तवे प्रथमश्लोकेन—

तद्यथा भगवान् बुद्धः संबुद्धोऽकारसंभवः।
अकारः सर्ववर्णाग्र्यो महार्थः परमाक्षरः॥ इति।

(ना० सं० ५.१)

तथा कृत्यानुष्ठानज्ञानस्तवे द्वितीयश्लोकेनोक्तम्, तद्यथा—

सर्वमन्त्रार्थजनको महाबिन्दुरनक्षरः।
पञ्चाक्षरो महाशून्यो बिन्दुशून्यः षडक्षरः॥ इति।

(ना० सं० १०.२)

तथा मूलतन्त्रेऽप्युक्तम्, तद्यथा—

आदिकादिसमायोगो वज्रसत्त्वस्य विष्टरः।
अक्षरोद्भवकायस्य हुंकाराद्यं न चेष्यते॥ इति।

अनेनाक्षरोत्पन्नस्य क्षरनिधनगतस्यास्य दिव्येन्द्रियस्येति क्षर उत्पादनिरोधावस्थालक्षणश्च्युतिक्षणः, स यस्य निधनं गतः, स परमाक्षरोऽच्युतक्षणः काल इत्यभिधीयते। तदेव वज्रज्ञानमिति। [1]तस्य कालस्य निरावरणं स्कन्धधात्वायतनं चक्रं त्रिभवस्यैकत्वं निरावरणं ज्ञेयमिति। तदेव वज्रधातुमहामण्डलमित्युच्यते सर्वाकारं सर्वेन्द्रियं बिन्दुरूपं विश्वमायाधरं भगवतः शरीरं प्रज्ञोपायात्मकमित्युक्तं भगवता तन्त्रराजे पञ्चमपटले पञ्चाकारस्तवे द्वितीयवृत्तेन। तद्यथा—

कालं विश्वादि वज्रं पुरुषमनुपमं सर्वगं निष्प्रपञ्चं
कूटस्थं कर्णनासामुखनयनशिरः सर्वतः पाणिपादम्।
भूतान्तं भूतनाथं त्रिभुवनवरधृक् कारणं कारणानां
विद्याद्यं योगगम्यं परमसुखपदं कालचक्रं नमस्ये॥ इति।

(का० त० ५.२४५)

---

१. च. तुल्य।

तथापराध्यात्मविद्याप्युक्ता भगवताऽध्यात्मपटले [1]षण्णवतिमेन वृत्तेन—

साङ्गो वेदो न विद्या स्मृतिमतसहितस्तर्कसिद्धान्तयुक्तः
शास्त्रं चान्यद्धि लोके कृतमपि कविभिर्व्यासवैश्वानराद्यैः।
विद्येत्यध्यात्मविद्याक्षरमपि मुनिभिः प्रोक्तमेवात्र लोके
5 त्रैलोक्यं यत्र कृत्स्नं भवति नरपते लीयते यत्र भूयः॥ [187b]इति।
(का० त० २.९६)

पुनः स एव कालचक्रो भगवान् प्रज्ञोपायात्मको ज्ञेयज्ञानसम्बन्धेनोक्तः। अत्र परमाक्षरज्ञानं सर्वावरणक्षयहेतुभूतं काल इत्युक्त उपायः। ज्ञेयं त्रैधातुकमनन्तभावलक्षणं चक्रम्, तदेव प्रज्ञा। ज्ञानज्ञेययोरेकत्वं कालचक्रमिति। उक्तं भगवता तन्त्रराजे पञ्चमपटले
10 त्रिषष्टितमेन वृत्तेन कालचक्रस्य चक्रम्। तद्यथा—

बुद्धक्षेत्राण्यनन्तान्यपरिमितगुणा धातवश्चाम्बराद्याः
स्थित्युत्पत्ती विनाशस्त्रिविध इति भवः षड्गती सर्वसत्त्वाः।
बुद्धाः क्रोधाः सुराद्याः सकरुणहृदया बोधिसत्त्वाः सभार्या
एतच्चक्रं जिनस्य त्रिभुवननमितस्यैकमेकस्य शम्भोः॥ इति।
15 (का० त० ५.६३)

कालस्य ज्ञानरूपस्य ज्ञेयलक्षणं चक्रम्, अनयोर्ज्ञानज्ञेययोरेकत्वं कालचक्रमिति। अनेनोक्तक्रमेण स एव कालचक्रो भगवानेवंकारो वज्रसत्त्वः सर्वतन्त्रेषु संगीतो जिनैः। उक्तं भगवता मूलतन्त्रे पञ्चमे पटले—

अभेद्यं सर्वतो ज्ञानं वज्रमित्यभिधीयते।
20 त्रिभवस्यैकता सत्त्वो वज्रसत्त्व इति स्मृतः॥

तस्मादस्याक्षरोत्पन्नस्य सर्वाकारस्य बिन्दोः सहजकायस्य सकलजिनपतेर्विश्वमायाधरस्याधाराधेयसम्बन्धो नेष्यते महामुद्रासिद्धयर्थम्। यथा लौकिकसिद्धिसाधनार्थमाधाराधेयसम्बन्ध इष्यते, तथा परमाक्षरसुखसाधनाभिरतेन योगिना, सद्गुरूपदेशलब्धेन, दुष्टसङ्गपरिवर्जितेन, धूमादिनिमित्तभावितेनादिकर्मिकेण, मध्यमाविशोधितेन,
25 सकलसत्त्वैकपुत्रवत् परमस्नेहानुबद्धचित्तेन, लौकिकलोकोत्तरसत्याश्रितेन, पुत्रकलत्रादिस्वशरीरनिरपेक्षकेण, मठविहारगुरुद्रव्योपभोगबाह्यभूतेन, बुद्धबोधिसत्त्वमार्गाश्रितेन, मैत्रीकरुणामुदितोपेक्षाचतुर्ब्रह्मविहारविहारिणा, शान्तिकर्मादिलौकिकसिद्धिसाधनाभिलाषवर्जितेन, सर्वज्ञपदवीमारोढुकामेन, मण्डलचक्रादिविकल्पभावनापरित्यक्तेन, आकाशगतौ सर्वाकारशून्यता-आदर्शप्रतिसेनावदनुत्पन्नधर्मावलोकितेन,

---

१. च. पञ्च। (इदमत्रावधेयम्—टीकायामुद्धृता श्लोकसंख्या मुद्रितग्रन्थानुसारिणी भोटानुसारिणी चात्र दीयते, च. मातृकायां प्रदत्ता संख्या टिप्पण्यां धृतास्ति। एवं सर्वत्राग्रेऽपि।)

स्वचित्तस्फरणप्रतिभासस्वप्नसदृशार्थचित्तेन, परमाणुसन्दोहात्मकधर्मविचारशून्येन, उच्छेदशून्यतादूरीकृतेन, अध्यात्मसुखस्वसंवेद्यधर्मानुरक्तेन, बाह्येन्द्रियस्वसंवेद्यसुखधर्मपरित्यक्तेन, प्रज्ञोपायात्मकेन, बोधिचित्तस्थिरीकरणैकदक्षेण, परमाक्षरमहासुखप्रज्ञाज्ञानमार्गोपदेशलब्धेन आधाराधेयचिह्नवर्णभुजसंस्थानमण्डलदेवतापरिकल्पनाधर्मो नेष्यत इति।   T 434   5

अथ विकल्पचित्तान्मण्डलचक्रस्य स्थितिर्नास्ति। कस्मात् ? उत्पादनिरोधधर्मित्वात्। इहोपस्थितक्षणे नायकं भावयेद् योगी। तस्मिन् क्षणे पूर्वादीनां देवतानामभावः। यस्मिन् क्षणे पूर्वदेवतां भावयेत्, तस्मिन् क्षणे नायकादीनामभावः। एवं क्रमेण सर्वासां देवतानामभावः। [188a] यदा नीलमुखं भावयेत् तदा रक्तादीनां मुखानामभावः। यदा रक्तमुखं भावयेत् तदा नीलादीनामभावः। एवं क्रमेण सर्वेषां मुखानामभावः। यस्मिन् क्षणे वज्रचिह्नं भावयेत् तस्मिन् क्षणे खड्गादीनां चिह्नानामभावः। यस्मिन् काले खड्गचिह्नं भावयेत् तस्मिन् काले वज्रादीनां चिह्नानामभावः। एवं क्रमेण सर्वेषां चिह्नानामभावो भवति। कथम् ? यथा घटज्ञाने निरुद्धे सति पटज्ञानमुत्पद्यते, तथा मण्डलनायकज्ञाने निरुद्धे सति पूर्वदेवताज्ञानमुत्पद्यते। एवमुत्पादितानामुत्पादनिरोधादभावः, अनुत्पादितानामनुत्पादादभावः, उत्पादानुत्पादयोरभावात् सर्वाभाव इति। तस्माद्योगिना महामुद्रासिद्ध्यर्थं विकल्पभावना न कर्तव्येति। उक्तं च भगवता **नामसंगीत्यां सुविशुद्धधर्मधातुज्ञानस्तवे पञ्चदशमेन श्लोकेन।** तद्यथा—   10   15

> सिद्धार्थः सिद्धसङ्कल्पः सर्वसङ्कल्पवर्जितः।
> निर्विकल्पोऽक्षयो धातुर्धर्मधातुः परोऽव्ययः॥ इति।
> (ना० सं० ६.१५)   20

वज्रसत्त्वाहङ्कारोऽपि न कर्तव्यः। तत्रैव स्तवे [1]द्वादशमेन श्लोकेनोक्तं भगवता—

> विद्याचरणसम्पन्नः सुगतो लोकवित् परः।
> निर्ममो निरहङ्कारः सत्यद्वयनये स्थितः॥
> (ना० सं० ६.१२)   25

अतस्तथागतवचनाद् विकल्पभावना वज्रसत्त्वाहङ्कारोऽपि परमार्थसत्याश्रितेन योगिना न कर्तव्य इति।

ननु तत्त्वविदा भगवता तथागतेनोक्तं **सर्वतन्त्रराजेषु**—प्रथमं तावद्रक्षाचक्रं [2]भावयेत्। ततः स्वहृदयचन्द्रमण्डले देवताबीजाक्षरं ध्यात्वा विमोक्षमुखादिशुद्धिं कृत्वा गगनतले ज्ञानबीजरश्मिभिस्तथागतान् बोधयित्वा तेषां पूजां कृत्वा पापदेशनां पुण्यानुमोदनां त्रिशरणगमनमात्मभावनिर्यातनं बोधिचित्तोत्पादनं मार्गाश्रयणं शून्यतालम्बनं करोति मन्त्री। ततो धर्मोदयमाकाशधातुस्वभावं भावयेत्, तन्मध्ये [3]हूंकारपरिणतां   30

---

१. च. भो. त्रयोद । २. च. 'भावयेत्' नास्ति । ३. च. हं ।

वज्रभूमिम्। अथ प्रज्ञातन्त्राभिप्रायेण वाय्वादिमण्डलानि सुमेरुपृष्ठे कूटागारं वज्रपञ्जरं वा। ततः कायवज्रपरिणतं मण्डलं सर्वलक्षणसंपूर्णं चन्द्रादित्यासनैर्युक्तम्। अथ मध्ये [1]पंकारपरिणतं पद्ममकारपरिणतं चन्द्रमण्डलं रेफपरिणतं सूर्यमण्डलं वा। तदुपरि चन्द्रादित्यालिकालिज्ञानबीजाक्षरैरादर्शसमताप्रत्यवेक्षणाकृत्यानुष्ठानसुविशुद्धधर्मधातुपञ्च- ज्ञानात्मकं देवताबिम्वं भावयेत्। ततः प्रज्ञारागद्रुतं कायवाक्चित्तवज्रं देवीभि- र्वज्रगीतिकाभिः प्रबोधितं पुनः कायवाक्चित्ताधिष्ठितं स्वचिह्ननिष्पन्नम्। ततो मण्डले देवतागणोत्सर्जनं ज्ञानचक्राकर्षणं प्रवेशनं वन्धनं तोषणं समयमण्डलेन समरसी- करणं सर्वतथागतदेवीभिरभिषिञ्चनं वज्रमुकुटालङ्कारयुक्तं वज्रसत्त्वाहङ्काररूपमात्मानं भावयेन्मन्त्रीति।

इह कथं मण्डलचक्रभावना विकल्पभावनेति प्रतिषेधस्तथागतवचनस्यो[188b]- क्त इति, इह केषाञ्चिदभिप्रायो भविष्यति, तस्मादुच्यते—इह हि सत्यमेतत् तत्त्व- विदा भगवता लोकसंवृतिसत्यमाश्रित्य सत्त्वाशयवशाद्बालमतीनां हीनवीर्याणां पारमार्थिक- तत्त्वापरीक्षकाणां गम्भीरोदारज्ञानत्रस्तचित्तानां शान्तिकादिकर्मसाधनाभिरताना- मिन्द्रियविषयोपभोगासक्तानां खड्गगुटिकाऽञ्जनरसरसायनलौकिकसिद्धिसाधना- भिलाषिणां प्रतीत्यसमुत्पन्नं ज्ञानं प्रतीत्यसमुत्पन्नेन्द्रियगोचरं प्रादेशिकं प्रादेशिकार्थ- क्रियासमर्थमुक्तमिति। तस्मात् प्रादेशिकार्थक्रियासमर्थत्वात् परमार्थसत्याश्रितम्, तेनेदं तथागतवचनमिति। किन्तु यथा तथागतेनोक्तं प्रादेशिकार्थक्रियासमर्थानां विकल्प- ध्यानमन्त्रमणिपाषाणखड्गगुटिकारसरसायनादिद्रव्याणां प्रादेशिकानामप्यतर्क्यः प्रभावः। तथा च दृश्यते स इह शुक्लध्यानं शान्तरूपं शान्तिकर्म करोति न मारणादिकं कर्म करोति, एवं कृष्णध्यानं रौद्ररूपं मारणं करोति न वश्यादिकं करोति। तथा रक्तध्यानं रागरूपं वश्यं करोति न स्तम्भनादिकं करोति। तथा पीतध्यानं स्तब्धरूपं स्तम्भनं करोति न शान्तिकादिकं करोति। एवं विषस्यापि ज्ञातव्यम्। शुक्लध्यानं ललाटे विन्दुरूपं [2]विषं निर्विषं करोति, रक्तध्यानं विपक्षोभणं करोति, कृष्णध्यानं विषसंक्रामणं करोति, पीतध्यानं विषस्तम्भनं करोतीति प्रादेशिकविकल्पध्यानं प्रादेशिकार्थक्रियां करोति, एवं मणिमन्त्रौषध्योऽपि वेदितव्याः।

इह मन्त्रोऽपि साधितः सन् यः शान्तिं करोति स मारणादिकर्म न करोति। यो मारणं करोति स वश्यादिकं न करोति। यो वश्यं करोति [स] स्तम्भनादिकं न करोति। यः स्तम्भनं करोति स शान्तिकादिकं न करोति। अतो लौकिकं ज्ञानं लोकोत्तरसर्वज्ञार्थक्रियासमर्थं न भवतीति। एवं खड्गादिकं सिद्धमपि सन्न भगवतोक्तम्। एकोऽपि मन्त्रः साधितः सर्वकर्माणि करोति, कथं प्रादेशिको भवतीति? इह कस्यचि- दभिप्रायो भविष्यति। तस्मादुच्यते—इह एकोऽपि मन्त्रः साधितः सर्वकर्माणि करोति नैतदेव प्रमाणम्। कस्मात्? क्रियाभेदात्। इहैकस्यापि मन्त्रस्य क्रियाभेदेन भेदोऽस्ति, स च तथागतेनोक्तः। तथाहि—शान्तिके नमोऽन्तो मन्त्रजापः, पौष्टिके स्वाहान्तः, आकृष्टौ

---

१. च. वंकार। २. भो. 'विषं' नास्ति।

वौषडन्तः, विद्वेषे हूंकारान्तः, वश्ये वषडन्तः, मारणे फडन्तः। एवं होमकार्येऽपि कुण्ड- T 435
भेदेन भेद उक्तः। इह वृत्ते कुण्डे उदुम्बरादिक्षीरवृक्षसमिद्भिर्दूर्वादुग्धैर्हुतो मन्त्रः शान्ति
करोति, न पौष्ट्यादिकं कर्म करोति। चतुरस्रकुण्डे पूर्वोक्तसमिद्भिः सस्याज्यैर्हुतः
पौष्टिकं करोति, न मारणादिकं करोति। चापाकारे कुण्डेऽस्थिसमिद्भिर्नरमांसविषरक्तैर्हुतो
मारणं करोति, नोच्चाटनादिकं करोति। पञ्चकोणे कुण्डे काकपिच्छैर्नरवसाराजिकाभि- 5
[189a]र्हुत उच्चाटनं करोति, न वश्यादिकं करोति। सप्तकोणे कुण्डे किंशुकसमिद्भी
रक्तपुष्पैर्वज्रोदकेन हुत आकृष्टिं करोति, न वश्यादिकं करोति। त्रिकोणे कुण्डे खदिर-
समिद्भिः स्वेदविल्वपुष्पैर्हुतो वश्यं करोति, न स्तम्भनादिकं करोति। [1]षट्कोणे कुण्डे
विल्वसमिद्भिर्नैर्माल्यश्मेष्मभिर्हुतः स्तम्भनं करोति, न मोहनादिकं करोति। [2]अष्ट-
कोणे कुण्डेऽर्कसमिद्भिः कनककुसुममद्यैर्हुतो मोहनं करोति, न शान्तिकादिकं करोतीति। 10
एवं रजोभेदेन भेद उक्तः। शान्तिके पौष्टिके श्वेतरजः, मारणोच्चाटने कृष्णरजः, वश्या-
कर्षणे रक्तरजः, स्तम्भने मोहने पीतरजः, प्रत्युज्जीवने हरितरजः। तथाऽक्षसूत्रभेदेन
भेद उक्तः। शान्तिके स्फाटिकाक्षसूत्रेण मन्त्रजापः, पौष्टिके मुक्ताफलाक्षसूत्रेण, मारणे
नरदन्ताक्षसूत्रेण, उच्चाटने उष्ट्रदन्ताक्षसूत्रेण खरदन्ताक्षसूत्रेण वा, वश्ये पुत्रजीवाक्षसूत्रेण,
आकृष्टौ पद्मबीजाक्षसूत्रेण रक्तचन्दनाक्षसूत्रेण वा, स्तम्भने रुद्राक्षसूत्रेण, मोहनेऽरिष्टाक्ष- 15
सूत्रेण, प्रत्युज्जीवने मरकताक्षसूत्रेण मन्त्रजाप इति। एवं साधितानामपि मन्त्रौषधि-
मणिखड्गरसरसायनादिसिद्धद्रव्याणां प्रादेशिको गुणोऽस्ति, न परमाक्षरज्ञानगुणोऽस्ति।
इह त्रिसाहस्रमहासाहस्रलोकधातुषु बुद्धक्षेत्रे यथा भगवाननेकनिर्माणकायैर्नानारुतैर्युग-
पत् सत्त्वार्थं करोति, तथैभिः प्रादेशिकैः साधितैरपि योगी सर्वसत्त्वार्थं कर्तुं न शक्नोति,
प्रादेशिकत्वात्। उक्तं भगवता **नामसंगीत्यां** प्रत्यवेक्षणाज्ञानस्तवे प्रथमश्लोकत्रयेण। 20
तद्यथा—

तथता भूतनैरात्म्ये भूतकोटिरनक्षरः।
शून्यतावादी वृषभो गम्भीरोदारगर्जनः॥

धर्मशङ्खो महाशब्दो धर्मगण्डी महारणः।
अप्रतिष्ठितनिर्वाणो दशदिग्धर्मदुन्दुभिः॥ 25

अरूपो रूपवानग्र्यो नानारूपमनोमयः।
सर्वरूपावभासश्रीरशेषप्रतिबिम्बधृक् ॥ इति।
(ना० सं० ८.१–३)

तथा **तन्त्रराजे**ऽपि पञ्चमे ज्ञानपटले सप्तनवतिमेन वृत्तेन सर्वज्ञभाषा भगवतोक्ता।
तद्यथा— 30

तिर्यक्प्रेतासुराणामुरगसुरनृणामार्यभोटादिकानां
भूतेष्यद्वर्तमानं त्रिविधमपि सदा सत्यधर्मं ब्रुवन्ती।

१. भो. Zur brGyad Paḥi (अष्टकोणे)। २. भो. Zur Drug Paḥi (षट्कोणे)।

मार्गे संस्थापयन्ती त्रिभवमविकलं स्वस्वभापान्तरेण
एषा सर्वज्ञभाषा समसुखफलदा देवभाषा न च स्यात् ॥ इति ।
(का० त० ५ ९७)

पुनस्तत्रैव पटले तस्य पृष्ठवृत्तेन सर्वज्ञकायवाक्कृत्यमुक्तम् । तद्यथा—

5 एकं पश्यन्त्यनेकं प्रणिधिगुणवशात् शान्तरागादिभावै-
श्चक्रस्थं पूर्वजन्मस्वहृदयजनितैर्वासनाया बलेन ।
एकार्थानेकभाषा प्रविशति हृदयं प्राणिनां स्वस्वभावै-
श्चक्रस्थः पिण्डपातं व्रजति विहरितुं स्था(ता)यिनां पुण्यहेतोः ॥ इति ।
(का० त० ५.९६)

10 इह यथा सर्वाकारं सर्वज्ञकायवाक्चित्तज्ञानं निर्विकल्पं सर्वार्थक्रियासमर्थं भवति, तथा विकल्पध्यानमन्त्रादिकं साधितमपि सर्वज्ञार्थक्रियासमर्थं योगिनां न भवतीति । एवं पृथिव्यादिकृत्स्नमपि साक्षात्कृतं वीतरागैः प्रादेशिकं भवति । कस्मात् ? प्रादेशिकर्द्धिस्फ[189b]रणात् । इह यो वीतरागः पृथ्वीकृत्स्नं साक्षात्करोति, स पृथ्वीकृत्स्नं स्फारयेत्, न तोयादिकृत्स्नं स्फारयितुं समर्थः । एवं प्रत्येककृत्स्नमपि वेदितव्यम्, शून्य- 15 कृत्स्नं यावदेव । इह मण्डले[1]वज्री यः समाजमण्डलं स्फारयेत्, स चक्रसंवरादिकं स्फारयितुं न शक्नोति । यश्चक्रसंवरं स्फारयेत्, स समाजादिकं स्फारयितुं न शक्नोति, प्रादेशिकत्वादिति । अथ कस्यचिदभिप्रायो भविष्यति—इहैकस्मिन् मण्डलचक्रे साक्षात्कृते सति सर्वमण्डलचक्राणि त्रैधातुकमपि साक्षात्कृतं भवति, नान्यत् त्रैधातुकं स्कन्धधात्वायतनमण्डलचक्रबाह्यमस्तीति । तस्मादुच्यते—इह हि यद्येके साक्षात्कृते सति 20 धातुकृत्स्ने मण्डलचक्रे वा त्रैधातुकं साक्षात्कृतं भवति, सर्वज्ञतादिकं च भवति, तदा सर्वज्ञपदप्राप्तये सर्वज्ञता-सर्वाकारज्ञता-मार्गज्ञता-मार्गाकारज्ञता-साक्षात्करणं नाम न स्यात्, एकेऽपि पृथिव्यादिकृत्स्ने साक्षात्कृते सति मण्डलचक्रे वा साक्षात्कृते सम्यक्संबुद्धत्वं भवति, श्रावकप्रत्येकबुद्धत्वसिद्धत्वं नाम न स्यात् । इह यथा यानत्रये भगवतो वाक्यं श्रूयते–अमुकबुद्धक्षेत्रेऽमुकलोकधातावमुकस्य पुत्रोऽमुककुलेऽमुककल्पे द्वात्रिंशन्महापुरुषलक्षणोऽशीत्यनु- 25 व्यञ्जनालङ्कृतः षडभिज्ञस्तथागतोऽभूत् । अमुकस्थानेऽभिसंबुद्धोऽमुकस्थाने विहरति, धर्मचक्रप्रवर्तनं करोति, नानाधिमुक्तिकानां सत्त्वानां नानारुतैरमुकधर्मं देशयति, अमुकस्थाने महाधातुसंदर्शनं कृत्वा परिनिर्वृतः । एषां धातूनां महातिशयप्रातिहार्यं T 436 दृष्ट्वा देवासुरमनुष्यैस्ते धातवः [2]पूज्यन्ते, न तथाऽमुकबुद्धक्षेत्रेऽमुकलोकधातावमुककल्पे द्वात्रिंशन्महापुरुषलक्षणोऽशीत्यनुव्यञ्जनः षडभिज्ञो योगी जातोऽमुकस्थानेऽभिसम्बुद्धोऽ- 30 मुकदेशे विहरति, अमुकस्थाने धर्मचक्रप्रवर्तनं करोति, नानाधिमुक्तिकानां सत्त्वानां नानारुतैरमुकधर्मं देशयति, त्रिसाहस्रमहासाहस्रलोकधातुषु युगपत् काय-ऋद्धि दर्शयति, अमुकस्थाने महाधातुसंदर्शनं कृत्वा परिनिर्वृतः । तेषां धातूनां महातिशयस्फरणं

१. भो. ḥKhor Lo Can (चक्री) । २. च. पूर्यन्ते ।

दृष्ट्वा देवासुरमनुष्यैर्धातवः [1]पूज्यन्ते। तस्माद्योगी संबुद्धो न भवत्येकस्मिन् मण्डलचक्रे साक्षात्कृते। कस्मात्? धर्मचक्रप्रवर्तनाभावात्, तथागताव्याकरणात्। इह यथा मैत्रेयनाथस्तथागतेन व्याकृतस्तथागतत्वेन ऐष्यत्काले भविष्यत्यन्ये भस्मेश्वरादयो व्याकृतास्तथागतेन सम्यक्संबुद्धा भविष्यन्ति; न तथा कश्चिद्योगी एकमण्डलचक्रे साक्षात्कृते सम्यक्सम्बुद्धो भविष्यतीति भगवान् व्याकरोति। किन्तु सत्त्वाशयवशाद् मण्डलचक्रभावना भगवतोक्ता खड्गगुलिकाञ्जनरसरसायनादिलौकिकसिद्धिसाधनार्थम्। तस्मान्मण्डलचक्रदेवतासाक्षात्करणात् खड्गादयः सिद्धयः सिद्धयन्ते साधकस्य, न सर्वज्ञता सिद्धयति। यदि [2]सर्वज्ञता सिद्धयते मण्डलचक्रभावनाबलेन तदा किमर्थं सिद्धा इह भगवतो वाक्यं स्वग्रन्थे प्रतिपादयन्ति। अतो लौकिकसि[190a]द्धयः सर्वज्ञगुणदायिका न भवन्ति, प्रादेशिक[3]वचनात्, सर्वज्ञभाषाभावात्, सावरणकायऋद्धिसंदर्शनात्। सावरणे धर्मे साक्षात्कृते योगी सर्वज्ञो न भवति, तस्मान्निरावरणे धर्मे साक्षात्कृते सति योगी सर्वज्ञो भवति, निरावरणधर्मलक्षणात्। सर्वज्ञस्य दिव्यं चक्षुर्दिव्यं श्रोत्रं परचित्तज्ञानं पूर्वनिवासानुस्मृतिः सर्वर्द्धिः सर्वास्रवक्षयः स्थानास्थानज्ञानबलं कर्मविपाकज्ञानबलम् एकानेक[4]धातुज्ञानबलम् इन्द्रियपरापरज्ञानबलं नानाधिमुक्तिज्ञानबलं दुःखनिरोध[5]धर्मगामिनीप्रतिपज्ज्ञानबलं संक्लेशव्यवदानज्ञानबलम् अनेकजन्मावदानज्ञानबलं सर्वाभिज्ञाज्ञानबलम् आस्रवक्षयज्ञानबलं भवतीति। तथा समन्तप्रभा महासूर्यमण्डलवर्चसा भूमिः, अमृतप्रभा महाचन्द्रप्रभास्वरा भूमिः, गगनप्रभा गगनवत्सुप्रतिष्ठिता भूमिः, वज्रप्रभा मनोरमा भूमिः, रत्नप्रभा अभिषेकप्रतिष्ठिता भूमिः, पद्मप्रभा स्वभावशुद्धधर्मनिर्मला निष्परिग्रहा भूमिः, बुद्धकर्मकरी भूमिः, अनुपमा भूमिः, उपमा सर्वोपमा प्रतिवेधतो(धिता) भूमिः, प्रज्ञाप्रभाऽनुत्तरा भूमिः, सर्वज्ञता महाप्रभास्वरा भूमिः, प्रत्यात्मवेद्या योगिज्ञानप्रपूरिका भूमिरिति। [6]तथागतस्य नास्ति स्खलितम्, नास्ति नदितम्, नास्ति मुषिता स्मृतिः, नास्त्यसमाहितं चित्तम्, नास्ति नानात्वसंज्ञा, नास्त्यप्रतिसंख्योपेक्षा, नास्ति छन्दस्य परिहाणिः, नास्ति वीर्यस्य परिहाणिः, नास्ति स्मृतेः परिहाणिः, नास्ति समाधेः परिहाणिः, नास्ति प्रज्ञायाः परिहाणिः, नास्ति मुक्तिज्ञानदर्शनस्य परिहाणिः। अतीतेऽध्वन्यप्रतिहतमसङ्गमप्रणिहितं ज्ञानं दर्शनं च प्रवर्तते, अनागतेऽध्वन्यप्रतिहतमसङ्गमप्रणिहितं ज्ञानं दर्शनं प्रवर्तते, प्रत्युत्पन्नेऽध्वन्यप्रतिहतमसङ्गमप्रणिहितं ज्ञानं दर्शनं प्रवर्तते। सर्वं कायकर्म ज्ञानपूर्वङ्गमं ज्ञानानुपरिवर्ति, सर्वं वाक्कर्म ज्ञानपूर्वङ्गमं ज्ञानानुपरिवर्ति, सर्वं मनस्कर्म ज्ञानपूर्वङ्गमं ज्ञानानुपरिवर्तीति। अतः सर्वत्र सर्वकालं समतायां सुप्रतिष्ठितः शून्यतायां समनुगतत्वात् प्रज्ञापरिशुद्धस्तथागतो भवति, निरावरणलक्षणात्। न पुनः सावरणः प्रज्ञापरिशुद्धः कश्चिदेको मण्डलचक्र[7]रूपदेवतासंख्यावर्णभुजसंस्थानविकल्प[8]परिशुद्धिस्फरणाद् वज्रसत्त्वो दशबलो भवतीति, किन्तु

१. च. पूर्यन्ते। २. भो. sGrub Pa Po (साधकस्य) इत्यधिकम्। ३. भो. 'वचन' नास्ति। ४. भो. 'धातु' नास्ति। ५. भो. 'धर्म' नास्ति। ६. भो. De bSin Du (तथा) इत्यधिकम्। ७. च. 'रूप' नास्ति। ८. भो. dZu ḥPhrul (ऋद्धि)।

सर्वज्ञमार्गनष्टो मिथ्याहङ्कारामिभूतः सन्नहमपि वज्रसत्त्वो दशबल इत्येवं मन्यते। नायं दशबलो दशबलान्यप्रतिबलः प्रादेशिको महामूर्खः। अस्यापूर्वमिह बुद्धत्वं महाऽत्यद्भुतं योगिनः सर्वावरणतः। उक्तं भगवता प्रत्यवेक्षणाज्ञानस्तवे नवमश्लोकेन **नामसंगीत्याम्**—

5 त्रिदुःखदुःखशमनस्त्र्यन्तोऽनन्तस्त्रिमुक्तिगः।
सर्वावरणनिर्मुक्त आकाशसमतां गतः॥ इति।

(ना० सं० ८.९)

अतो भगवतो वचनाद् [190b] विकल्परूपभावनाबलेन योगी सर्वज्ञो न भवतीति।

10 ननु तथागतेनोक्तं सर्वतन्त्रराजेषु [1]पञ्चस्कन्धा वैरोचनादयो बुद्धाः, धातवो देव्यः, लोचनादयो षडिन्द्रियाणि, क्षितिगर्भादयो बोधिसत्त्वा विषयाः, रूपवज्रादयो देव्यः, मोहवज्रादयो यमान्तकादयः क्रोधराजानः। तस्मात् सत्त्वानां कायो बुद्धनिर्माणकाय इति केषाञ्चिदभिप्रायो भविष्यति। तस्मादुच्यते—इह हि यद्वक्तव्यं मूर्खैः सत्त्वानां कायो बुद्धनिर्माणकाय इति। नैतद्वचनं तथागतस्य, यत् परीक्षमाणं विघटयति। परमार्थसत्ये 15 यदि सत्त्वानां कायो बुद्धनिर्माणकाय इति चेत्, त्रैधातुकस्थाः सर्वे सत्त्वाः सम्यक्सम्बुद्धाः प्रागभूवुः। बुद्धत्वाय श्रुतचिन्ताभावनादानादिक्रिया वृथा स्यात्, प्राक् सम्यक्सम्बुद्धत्वात्। सर्वसत्त्वानामुत्पादनिरोधो न स्यात्। संसारे [2]सुखदुःखक्षुत्पिपासादयो बाधा न स्युः। T 437 षडभिज्ञादयो बुद्धगुणविभूतयश्च भवेयुः। न चैतद् दृष्टं श्रुतमनुमितं तथागतव्याकृतम्, तस्माद् बुद्धगुणाभावात् सत्त्वा बुद्धा न भवन्ति, संसारे सुव्यवस्थितत्वादिति। उक्तं 20 भगवता **नामसंगीत्यां** सुविशुद्धधर्मधातुस्तवे त्रयोदशमेन श्लोकेन। तद्यथा—

संसारपारकोटिस्थः कृतकृत्यस्थले स्थितः।
कैवल्यज्ञाननिष्ठ्यूतः प्रज्ञाशस्त्रो विदारणः॥ इति।

(ना० सं० ६.१३)

अतस्तथागतवचनात् सत्त्वानां कायो बुद्धनिर्माणकायो न भवति।

25 ननु तथागतेनोक्तं भावनाभ्यासवशात् स्कन्धधात्वायतनादिकं मण्डलचक्राकारं भविष्यति, तेनैव बुद्धत्वं चेति कस्यचिदभिप्रायो भविष्यति ? तस्मादुच्यते—इह हि यद्वक्तव्यं बालजनैरभ्यासवशात् स्कन्धधात्वायतनादिकं मण्डलचक्राकारं भविष्यति, तेनैव बुद्धत्वं च तथागतेनोक्तम्। तन्न, [3]पुण्यज्ञानसंभाराभावात्। इह हि यदि योगिनां पुण्यज्ञानसंभारं विना भावनाभ्यासबलेन स्कन्धधात्वायतनादिकं मण्डलचक्राकारं 30 भविष्यति, विकल्पभावनाभ्यासबलेन [4]सम्बुद्धत्वं च भवति, तदाऽन्योऽपि [5]द्रव्यहीनो

---

१. भो. 'पञ्च' नास्ति। २. च. 'सुख' नास्ति। ३. भो. Gaṅ Gi Phyir (यतः) इत्यधिकम्। ४. भो. बुद्धत्वं। ५. भो. bSod Nams dMan Pa (पुण्यहीनो)।

राजाऽहमिति चिन्तयेत्, सोऽप्यभ्यासवशाद् राजा भविष्यति। पुण्यसम्भारं विना न चैतद् दृष्टम्, यथा मिथ्याविकल्पेन पुण्यसम्भारहीनोऽनेककल्पैरभ्यासवशाद् राजा न भविष्यति, ततो पुण्यज्ञानहीनो विकल्पाभ्यासवशादनेककल्पैर्योगी सम्यक्सम्बुद्धो न भवति, पुण्यज्ञानाभावादिति। उक्तं भगवता सुविशुद्धधर्मधातुस्तवे [1]षोडशमेन श्लोकेन। [2]तद्यथा—

पुण्यवान् पुण्यसंभारो ज्ञानं ज्ञानाकरं महत्।
ज्ञानवान् सदसज्ज्ञानी संभारद्वयसंभृतः॥ इति।
(ना० सं० ६.१६)

अतो भगवतो वचनात् पुण्यज्ञानहीनो विकल्परूपभावनाभ्यासवशाद् बुद्धो न भवतीति।

ननु यदि रूपभावना विकल्पः, विकल्पाद्योगी बुद्धो न भविष्यतीति तदा किमर्थमिदं शरीरं मण्डलचक्रदेवतागणैर्विशोधनीयमिति तथागतवचनमिति कस्यचिदभिप्रायो भविष्यति ? तस्मादुच्यते—इह सत्यमेतत्, समयभाषया तथागतेन प्रत्येकं वैरोचनादिकं तदुद्दिष्टम्, न पुनर्घटपटशब्दवद् वाच्यवाचकभा[191a]वेन स्वरूपतः। स्त्रीन्द्रियं पद्मम्, पुरुषेन्द्रियं वज्रम्, गूथो वैरोचनः, मूत्रमक्षोभ्यः, रक्तं रत्नसम्भवः, शुक्रममिताभः, मांसममोघसिद्धिः, किन्तु पञ्चतथागतानां नामभिः पञ्चामृतानां संज्ञा उक्ताः, न पुनः परमार्थयुक्तितो देवताः। तस्माद् देवताकायो वक्तुं न शक्यते पूतिशरीरमिदम्, असारत्वादिति। उक्तं भगवता **नामसंगीत्यां** सुविशुद्धधर्मधातु[3]ज्ञानस्तवे विंशतिमादिश्लोकत्रयेण। तद्यथा—

घनैकसारो वज्रात्मा सद्योजातो जगत्पतिः।
गगनोद्भवः स्वयम्भूः प्रज्ञाज्ञानानलो महान्॥

वैरोचनो महादीप्तिर्ज्ञानज्योतिर्विरोचनः।
जगत्प्रदीपो ज्ञानोल्का महातेजा प्रभास्वरः॥

विद्याराजोऽग्रमन्त्रेशो मन्त्रराजमहार्थकृत्।
महोष्णीषोऽद्भुतोष्णीषो विश्वदर्शी वियत्पतिः॥ इति।
(ना० सं० ६.२०-२२)

अतो भगवतो वचनात् प्रादेशिककायो बुद्धकायो न भवतीति।

ननु तथागतो यदि रूपी न भवति, तदा गर्भावक्रमणं कुमारक्रीडा सर्वशिल्पसंदर्शनमन्तःपुराभिनिष्क्रमणं बोधिमण्डनिषीदनं मारमण्डलविध्वंसनं देवतावतारणं धर्मचक्रप्रवर्तनं द्वात्रिंशन्महापुरुषलक्षणान्यशीत्यनुव्यञ्जनानि धनुःप्रभामण्डलानि

---

१. च. दशमेन। २. च. 'तद्यथा' नास्ति। ३. च. 'ज्ञान' नास्ति।

चतुरीर्यापथादयो व्यापारा आकाशगमनागमनं सत्त्वार्थक्रियास्तस्य न भवन्ति। तथा भगवतो निष्पादितश्रावकसंघोऽपि न स्यात्, महापरिनिर्वाणं महातिशयप्रातिहार्यं [1]धातुसंदर्शनं न स्यात्। त्रिभुवननिवासिभिः पूज्यमानं केशदन्तमांसास्थ्यादिकं धातुस्फरणं न स्यात्। अपरमपि तथागतविकुर्वितमत्यद्भुतं रूपवतो भगवतो भवति, नारूपवतः। तस्माद् भगवतो रूपकायसाधनं मिथ्या न भवतीतीह केषाञ्चिदभिप्रायो भविष्यति। तस्मादुच्यते—इह यद्वक्तव्यं बालजनैर्भगवतो रूपकायसाधनं मिथ्या न भवति, नैतदेव सत्यम्। कस्मात्? उत्पादविनाशधर्मित्वात्। इह हि भगवतो यदि परमार्थतोऽयं गर्भोत्पादः सर्वसत्त्वार्थाय गमनागमनव्यापारो महापरिनिर्वाणधातुसंदर्शनमस्ति चेत्, तदा तथागतस्य साधनं निष्फलं भवति। कस्मात्? कायधातुसंदर्शनान्महापरिनिर्वाणाद् भगवतो रूपकायः साधितोऽप्यसाधित एव। य उत्पन्नकायो विनष्टः साधितः कथं साधकस्याक्षयं कायं करिष्यति, एवद्विपरीतं स्वयमसिद्धः परं साधयिष्यति। अथ धातुसंदर्शनं महातिशयलक्षणमस्ति, इह धातुसंदर्शने सत्यधुना द्वात्रिंशन्महापुरुषलक्षणान्यशीत्यनुव्यञ्जनानि धनुःप्रभामण्डलानि धातुपुञ्जीभूतस्य कायस्य विनष्टानि। पूर्वकायाभावाद् धातुपुञ्जे वज्रसत्त्वकायो न भवति। कायाभावेऽन्यस्य वज्रसत्त्वस्य साधनं नास्ति, इह परस्परविरोधात्। अतस्त्विनो नष्टाः, उत्पादनिरोधधर्मित्वात्। उत्पादविनाशधर्मिणो वज्रसत्त्वस्य साधनाय प्रज्ञापारमिताशून्यता-स्मृत्युपस्थान-सम्यक्प्रहाण-ऋद्धिपादेन्द्रियबल-बोध्यङ्गमार्गसत्यध्यानाप्रमाणारूप्यसमापत्तिविमोक्षमुखाभि[191b]ज्ञासमाधिधारणीबलवैशारद्यप्रतिसंविदावेणिका बुद्धधर्मा वृथा स्युः। त्रिशरणगमनं पापदेशना पुण्यानुमोदना बोधिचित्तोत्पादः पुण्यज्ञानसम्भारानेक[2]बोधिचर्या मुधा स्युः। श्रुतचिन्तामयी(य)प्रज्ञा[3]ज्ञानविशेषा निर्विशेषाः स्युः। प्रज्ञोपायमया विधयो दुर्विधयो भवेयुः। परमार्थसत्ये गम्भीरोदारधर्मप्रतीतिरप्रतीतिः स्यात्। लोकसंवृतिसत्ये लौकिकसिद्धिसाधनाय वज्रकील[4]कवचवज्रप्राकारवज्रपञ्जररक्षाचक्रादिभिरावृतं स्कन्धधात्वायतनकायवाक्चित्ताधिष्ठानमुक्तं द्वारपालन्यासं ज्ञानसत्त्वप्रवेशाभिषेकादिभिर्विहितं पञ्चप्राकारप्रभानिकरमण्डलनिर्माणलोकधातुषु तद्वैनेयानां सत्त्वानां सत्त्वार्थसंभारं सर्वपूजाप्रसरसंचयं सर्वं सर्वदा वृथा स्यात्। न चैवम्। तस्माद् उत्पादविनाशधर्मिणो वज्रसत्त्वस्य दशबलवैशारद्यादयो गुणा न च सम्भवन्तीति। किञ्चान्यत्, यदीह रूपी भगवान्, तदा एकप्रदेशस्थो गङ्गानदीवालुकोपमेषु लोकधातुष्वनेककुलपर्वतरजःसमानां सत्त्वानामर्थक्रियां कर्तुं समर्थो न भवति, रूपकायत्वात्। अथ बालमतीनां वचनं रूपकायेनाप्येकस्मिन् लोकधातौ गत्वा तत्रस्थानां सत्त्वानामर्थक्रियां कृत्वा ततोऽन्यस्मिन् लोकधातौ गच्छति, ततोऽप्यन्यत्र गमनं करोति। तदेव युक्तितो न घटयति। कस्मात्? एकस्मिन्नेव दिग्विभागे लोकधातूनां प्रमाणरहितत्वात्, किं पुनर्दशदिग्विभागे संस्थितानां लोकधातूनामनन्तानन्तसत्त्वानां रूपकायेन गत्वा [5]गत्वा सत्त्वार्थमनेककल्पैः कर्तुं न शक्यते।

---

१. भो. 'धातु' नास्ति। २. भो. Byaṅ Chub Sems dPaḥi sPyod Pa (बोधिसत्त्वचर्या)। ३. भो. 'ज्ञान' नास्ति। ४. भो. 'कवच' नास्ति। ५. भो. 'गत्वा' नास्ति।

अथ ध्यानमन्त्रबलेन नैकबुद्धक्षेत्रलोकधातुस्थान् सत्त्वानाकृष्य पुरतः स्थापयित्वा तेषां धर्मदेशनां करोति। तान् मार्गे स्थापयित्वा स्वस्वलोकधातौ विसर्जयेत्। तदेवातिशयेन विपरीतम्, सर्वाम्बरकुहरेष्वनेकलोकधातुस्थानामसंख्येयानां सत्त्वानां रूपिणां परमाणुरूपेणापि पुरतोऽवस्थानं कर्तुं न शक्यते। अथ बालमतीनां वचनमनेनापि रूपकायेनैकस्मिन् बुद्धक्षेत्रे त्रिसाहस्रमहासाहस्रलोकधातुषु स्थितानां सत्त्वानामर्थक्रियां करोति, एतद्वचनं पारमार्थिक्या युक्त्या विचार्यमाणं निरर्थकम्, यथेश्वरवचनमाज्ञासिद्धं युक्तिप्रमाणरहितम्। आप्तागमादित ईश्वरो निष्कलः सर्वकर्ता। स च कार्यनिरपेक्ष इच्छया क्रीडार्थं विश्वं करोति संहारयति वा। एवं तद्वैधर्म्याद् रूपकायो भगवान् सर्वसत्त्वार्थकर्ता आज्ञासिद्ध इति। एवं बौद्धानां तीर्थिकानां प्रज्ञाहीनत्वाद् विशेषो नास्ति पण्डितानामपि। तस्मादिदं वचनं परीक्षारहितं भगवतो न भवति। भगवतो वचनमादौ कल्याणं मध्ये कल्याणं पर्यवसाने कल्याणमिति।

तथा भगवानाह—

तापाच्छेदाच्च निकषात् सुवर्णमिव पण्डितैः।
परीक्ष्य भिक्षवो ग्राह्यं मद्वचो न तु गौरवात्॥ इति।

अतो भगवतो वचनाद् **नामसंगीत्यां** परीक्ष्यमाणो बुद्धो रूपकायो न भवति। कस्मात्? ग[192a]गनोद्भवत्वात्, स्वयंभूत्वात्, सर्वाकारनिराकारत्वात्, चतुर्बिन्दुधरत्वात्, अकलकलनातीतत्वात्, चतुर्थानन्दकोटिधरत्वात्, विरागादिमहारागत्वात्, निर्ममत्वात्, निरहङ्कारत्वात्, सर्वाक्षयधातुत्वात्, सर्वमन्त्रार्थजनकत्वात्, महाबिन्दुरनक्षरत्वात्, पञ्चाक्षरमहाशून्यत्वात्, बिन्दुशून्यषडक्षरत्वात्, आकाशसमतागतत्वादित्यादि **नामसंगीत्याम्**—"अथ वज्रधरः श्रीमान्" इत्यादिना, "ज्ञानकाय नमोऽस्तु ते" इति पर्यन्तं द्वाषष्ट्यधिकशतश्लोकेन बुद्धेन भगवता वज्रधरकायो वज्रपाणेः प्रकाशित उभयसत्याभ्यामित्यादि। **तन्त्रराजे**ऽपि भगवतोक्ता बुद्धोत्पादनिर्माणमाया पञ्चमपटलेऽष्टानवतिमेन वृत्तेन—

बुद्धानामप्यगम्या ह्यपरिमितगुणा बुद्धनिर्माणमाया
आत्मानं दर्शयन्तो त्रिभुवननिलये शक्रजालं यथैव।
नानाभावैर्विभिन्ना सजिनसुरनृणां स्वस्वचित्ते प्रविष्टा
एषाऽनुत्पन्नधर्मा पयसि नभ इव भ्रान्तिदोत्पत्तिरत्र॥
(का० त० ५.९८)

अतो भगवतो वचनाद् रूपकायो भगवान्न भवति, सर्वबुद्धानां समाजित्वात्। यदि रूपकाया बुद्धाः, तदा परमाणुरूपेणापि मीलनं न स्यादिति। एवमुक्तक्रमेण भगवतो वाक्यं श्रुत्वा तथापि सत्त्वा भगवतोक्तं गम्भीरोदारधर्मं परीक्षयित्वा न गृह्णन्ति, बुद्धत्वाय गुरुं च परीक्षयित्वा नाराधयन्ति, महामूर्खा लोभाभिभूताः सन्त इहैव जन्मन्यस्माकं

पूतिशरीरं बुद्धशरीरं भविष्यतीत्याशालुब्धा अकल्याणमित्रसंसर्गाद् असद्गुरूपदेशाद् इह वैरोचनादीनि पञ्चामृतानि गोकुदहनादिपलानि भक्ष्याणि स्वभावशुद्धानि तथागते-
T 439 नोक्तानि, एभिर्भक्षितैः शरीरमजरामरं भविष्यति, वज्रसत्त्वोऽपि वरदो भविष्यतीति। अन्यत्र वज्रकुले क्रोधराजसमाधिना प्राणिनो घात्याः, खड्गकुलेऽमोघसिद्धिसमाधिना-
5 ऽसत्यं वक्तव्यम्, रत्नकुले रत्नसम्भवसमाधिना परस्वं हार्यम्, पद्मकुलेऽमिताभ-समाधिना परस्त्री ग्राह्या, चक्रकुले वैरोचनसमाधिना पञ्चामृतपलानि भक्षणीयानीति, अपरेऽपि दशाकुशलकर्मपथा देवतायोगेन योगिना कर्तव्या इति, एवं दुष्टाचार्यवचनं प्रमाणीकृत्य दशाकुशलान् कर्मपथान् कुर्वन्ति, अशोधितान्यबोधितान्यप्रदीपितान्यन-मृतीकृतानि[1] भक्षयन्ति। तानि च भक्षितानि पञ्चामृतानि न तेषां भक्षकाणां बुद्धत्व-
10 गुणदायकानि भवन्तीति, [2]तथागतवचनाप्रबोधत्वादिति।

ननु सर्वतन्त्रराजेषु तथागतेनोक्तानि पञ्चामृतानि योगिना भक्षणीयानि, इह कथमेषां प्रतिषेधः ? [इति] कस्यचिदभिप्रायो भविष्यति। तस्मादुच्यते—इह यद्वक्तव्यं बालजनैः पञ्चामृतादीनि भक्ष्याणि तथागतेनोक्तानि सर्वतन्त्रराजेषु, तत्सत्यम्, किन्तु योगिनां न प्राकृतसत्त्वानाम्। येषां मन्त्रबलेन ध्यानबलेन वा शोधितानि बोधितानि
15 प्रदीपितान्यमृतीकृतानि विषाणि निर्विषाणि भवन्ति, मद्यानि क्षीराणि भवन्ति, विषोद-कादीनि दुष्टानि सत्त्वानां मरण[192b]दायकानि रसायनानि भवति, अस्थीनि पुष्पाणि भवन्ति, दन्ता मुक्ताफलानि भवन्ति, कपालं पद्मं भवन्ति, मांसं पुत्रकेशो भवति, रक्तं सिह्लकं भवति, मूत्रं कस्तूरिका भवति, शुक्रं कर्पूरं भवति, गूथं चतुःसमं भवति, लोमानि कुङ्कुमकेशराणि भवन्ति। एवमनेकदुष्टद्रव्याणि दुष्टस्वभावपरित्यागात् शोधितानि
20 बोधितानि प्रदीपितान्यमृतीकृतानि स्वभावशुद्धानि तथागतेनोक्तानि[3], न दुष्टस्वभावा-परित्यागात्। तानि च विषादीनि स्वभावशुद्धान्यमृतीकृतानि योगिभिर्भक्षितानि शरीरे महाबलपुष्टिकराणि भवन्ति। गूथादीनि स्वभावशुद्धानि शरीरे विलेपितानि दिव्यगन्ध-मुद्वहन्ति। अतो योगिनां तथागतेनोक्तानि, नान्येषां देवतामन्त्रासाधितानां पर्वन्मूर्खाणां पण्डिताभिमानिनां बकमायाधराणां मठविहारद्रव्याभिलाषिणां प्रेतनरकजातौ जन्मो-
25 त्पादनिबद्धानां स्वार्थपरार्थभ्रष्टानां तन्त्रोक्तार्थविपरीतार्थसंदेशकानामपरीक्षजनस्य महा-मारकायिकानां भक्ष्याणि भगवतोक्तानीति। तैर्दुष्टचित्तैस्तानि विषादीनि दुष्टद्रव्याणि पञ्चामृतानि शोधितानि बोधितानि प्रदीपितान्यमृतीकृतान्यप्यनेककल्पैर्दुष्टस्वभावानि न परित्यजन्ति, दुष्टस्वभावापरित्यागात् स्वभावशुद्धानि न भवन्तीति। तस्मात्तेषां दुष्ट-द्रव्याणि(णां) ध्यानबलेन वा मन्त्रबलेन वा यावद् दुष्टस्वभावं हर्तुं न शक्नोति कुलपुत्रो
30 वा कुलदुहिता वा भिक्षुर्वा भिक्षुणी वा उपासक उपासिका वा आदिकर्मिको वा वज्र-यानरतः, तस्य वज्राचार्येण [4]गुरुणा आदिकर्मिकेण वा मन्त्रसामर्थ्ययुक्तेन वा

---

१. भो. rNam Par sNaṅ mDzad La Sogs Pa (वैरोचनादीनि) इत्यधिकम्।
२. भो. Saṅs rGyas Kyi gSuṅ (बुद्धवचन)। ३. भो. rGyud Kyi rGyal Po Tham Cad Las gSuṅ Pa, De Ni bDen No (सर्वतन्त्रराजे, तत्सत्यम्) इत्यधिकम्। ४. भो. bLa Ma Dam Pa Las (सद्गुरुणा)।

विषादिपञ्चामृतादिभक्षणविलेपने नियमो न दातव्यः, अशुद्धविषादिभक्षणान्मरणं भवति, अशुद्धसमयविलेपनाल्लोकावध्यानं भवति, स्वाघातमरणाल्लोकावध्यानान्नरको भवति, कुमन्त्रिणां सत्त्वाशयपरित्यागादित्युक्तं **नामसंगीत्यामध्येषणायां** पञ्चदशमश्लोकेन—

प्रकाशयिष्ये सत्त्वानां यथाशयविशेषतः।
अशेषक्लेशनाशाय अशेषाज्ञानहानये ॥ इति। 5
(ना० सं० १.१५)

अतो भगवतो वचनात् सकलसत्त्वाशयवशेन शिष्याणां वज्राचार्येण नियमो दातव्यः, यथा स्वाघातमरणं लोकावध्यानं न भवत्यादिकर्मिकाणामिति। ननु यदीह लोकावध्याने नरको भवति, तदा सर्वदर्शनानि परस्परावध्यानं कुर्वन्ति, परस्परावध्यानात् सर्वदर्शनानि नरकं यास्यन्ति। एवं चेत् प्रमाणशास्त्राणि विरुद्धानि, सर्वसिद्धान्तान्यपि, व्रतशीलादिकं सर्वं निरर्थकं भवतीतीह कस्यचिदभिप्रायो भविष्यति। तस्मादुच्यते—इह यद्वक्तव्यं बालजनैः प्रमाणशास्त्रादिकं सर्वं विरुद्धम्, तन्न, कस्मात्? तत्त्वपरीक्षाचित्तान्न तेषां दर्शनानां परस्परवादिनां दोषोऽस्ति, परमार्थपरीक्षाश्रितचितात् सर्वसत्त्वापकारचित्ताभावात् सर्वसत्त्वोपकारचित्तात्। अत्र पुनर्विषादिपञ्चामृतादिभक्षणविलेपने लोकव्यवहारो न परमार्थपरीक्षा। विषादिपञ्चामृतादिकं च तत्त्वं न भवति, यस्य परीक्षमाणा दोषा न भविष्यन्ति लोकावध्यानतोऽपि। तस्मात् [193a] सत्त्वाशयवशाद् धर्मदेशना बौद्धानां न सत्त्वाशयविरहितेति। आशयोऽपि सत्त्वानां देशकुलव्यवहारेण भवति, तस्मात्तेषां देशकुलव्यवहारेण लौकिकसंवृतिसत्येन लौकिकधर्मो देशनीयो वज्राचार्येण। लोकोत्तरं ज्ञानं पुनरुभयसत्यसाधारणं तदेव। न च भक्ष्याभक्ष्यग्रहणं भवति। भक्ष्याभक्ष्यं ह्युदरपरिपूरणमात्रम्, न शून्यतानिमित्ताप्रणिहितानभिसंस्कारचतुर्विमोक्षमुखविशुद्धिः। तस्मादादिकर्मिकेण [1]स्वदेशव्यवहारेण भक्ष्याभक्ष्यं कर्तव्यं कुलाकुलाभिगमनं च। कुत्रचिद्देशे कापालिककपालोदकेन शुद्धिर्भवति, कुत्रचिद्देशे गोमांसं भक्षणीयम्, कुत्रचिद्देशेऽश्वमांसम्, कुत्रचिद्देशे शुनो मांसम्, कुत्रचिद्देशे हस्तिमांसम्, कुत्रचिद्देशे नरमांसं भक्षणीयम्। एवमन्यदपि मांसं देशव्यवहारेण सर्ववर्णावर्णानां भक्षणीयं सर्वथा। कुत्रचिद्देशे ब्राह्मणानां मद्यपानं विहितम्, कुत्रचिद्देशे शूद्राणां विहितम्, कुत्रचिद्देशे कुलीनाकुलीनानां विहितम्। कुत्रचिद्देशे श्वोच्छिष्टं भक्षणीयम्, कुत्रचिद्देशे भोजने कृते नाचमनम्, कुत्रचिद्देशे शूकरमांसं भक्षणीयम्, कुत्रचिद्देशे महिषमांसम्, कुत्रचिद्देशे छागलमांसम्। एवमन्यदपि मांसं देशव्यवहारेण वर्णावर्णेन भक्षणीयम्। कुत्रचिच्चण्डालाः श्रावकाः, कुत्रचिद्देशे चतुर्वर्णप्रवृत्तिः, कुत्रचिद्देशे सर्वैकवर्णप्रवृत्तिः। कुत्रचिद्देशे भर्तरि मृते सति पुत्रस्य माता भार्या भवति, कुत्रचिद्देशे भ्रातृभगिन्योर्विवाहः, कुत्रचिद्देशे मातुलकसम्बन्धः, कुत्रचिद्देशे कुलाकुलानां परस्पराभिगमनम्, कुत्रचिद्देशे ब्राह्मण्यो वेश्याव्यवहारं

10 15 20 25 T 440 30

१. भो. 'स्व' नास्ति।

कुर्वन्ति। एवमनेकदेशव्यवहारेण भक्ष्याभक्ष्यकुलाकुलाभिगमनं योगिना कर्तव्यमिति। तथा कुलदेवता—कस्यचित् कुले नागो देवता, कस्यचित् कुले छागलः, कस्यचित् कुले शूकरः, कस्यचिन्महिषः, कस्यचिद् घूकः। एवमन्येऽपि तिर्यञ्चोऽन्येषां कुलदेवता न मारणीया न भक्षणीयाश्च। तथा कस्यचित् कुलदेवता पलाशः, कस्यचिदर्कः, कस्यचिदश्वत्थः, एवमन्येऽपि वृक्षाः। अन्येषां कुलदेवता न छेदनीया न भेदनीयाः। अत्र लौकिकोऽपि प्रत्ययो दृश्यते। कस्मात्? स्वकुलोपद्रवात् स्वकुलोपकारात्। इह यस्य या देवता आराधिता उपकारं करोति, विरोधिता महोपद्रवं करोति, तस्मात्तेषां देशकुलव्यवहारेणादिकर्मिको व्यवहरति मन्त्रध्यानसाधनाभिरतः, यावन्मन्त्रसिद्धिर्भवति ज्ञानसिद्धिर्वा। ततः स्वेच्छया भक्ष्याभक्ष्यं गम्यागम्यं पेयापेयं करोति, न तस्य कोऽपि बाधां कर्तुं समर्थ इति। एवमादिकर्मिको मन्त्रे सिद्धे सति योगी भवति। मण्डलचक्र-स्फारिताकाशगमनात् सिद्धः, मारक्लेशापत्तिज्ञेयावरणक्षयात् सर्वाकार-ऋद्धिस्फरण-सिद्धिदर्शनाद् [193b] धर्मचक्रप्रवर्तनात् सर्वज्ञभाषया सकलधर्मस्कन्धसमूहदेशनावशात् सर्वज्ञो भवतीति। उक्तं भगवता प्रत्यवेक्षणाज्ञानस्तवे नामसंगीत्यां चत्वारिंशतिमादि-श्लोकत्रयेण [1]प्रज्ञाज्ञानयोगः। तद्यथा—

मायाजालमहोद्योगः सर्वतन्त्राधिपः परः।
अशेषवज्रपर्यङ्को निःशेषज्ञानकायधृक्॥

समन्तभद्रः सुमतिः क्षितिगर्भो जगद्धृतिः।
सर्वबुद्धमहारागो विश्वनिर्माणचक्रधृक्॥

सर्वभावस्वभावाग्रः सर्वभावस्वभावधृक्।
अनुत्पादधर्मा विश्वार्थः सर्वधर्मस्वभावधृक्॥ इति।

(ना० सं० ८.३८-४०)

तथा तन्त्रराजेऽप्युक्तं पञ्चमपटले [2]षष्टितमादिवृत्तद्वयेन—

तैश्चाद्धि कालचक्रः प्रकटयति महानेकनिर्माणकायै-
र्वज्रज्वालास्फुरद्भिरसुर[3]सुरनृणां कामधातौ स्थितानाम्।
सम्भोगे रूपिणां वै नभसि जिनसुताद्यर्हतां धर्मकायैः
शून्यां[4]शैः शून्यकृत्स्नं त्रिभुवनसकलं वायुभिर्वायुकृत्स्नम्॥
तेजोंऽशैर्वह्निकृत्स्नं ह्युदकमपि जगत्स्फारितैश्चोदकांशैः
पृथ्वीकृत्स्नं धरांशैः समुदितविषयैः सर्ववस्तुस्वभावम्।
एकात्मानं समन्ताद् गगनसममिदं दर्शयेच्छुद्धभूम्या-
मेवं बुद्धस्य कायो भवति न म्रियतेऽप्येकसौख्यस्वभावात्॥ इति।

(का० त० ५.६०-६१)

---

१. भो. gÑis Su Med Paḥi Ye Śes Kyi rNal ḥByor (अद्वयज्ञानयोगः)।
२. च. एकोनषष्टि। ३. भो. 'सुर' नास्ति। ४. च. श्लोकेऽस्मिन् सर्वत्र 'अंशैः' इत्यस्य स्थाने 'अङ्गैः'।

अतो भगवतो वचनात् पञ्चामृतभक्षणाद् मन्त्रजापमण्डलचक्रविकल्पभावना-बलाद् योगी सम्यक्सम्बुद्धो न भवतीति।

ननु भगवतोक्तं मण्डलचक्रे साक्षात्कृते सति योगिनां महामुद्रासिद्धिर्भवति, तदिह कथं मण्डलचक्रेऽपि साक्षात्कृते योगी सर्वज्ञो न भवतीतीह केषाञ्चिदभिप्रायो भविष्यति। तस्मादुच्यते—इह पूर्वमेवोक्तं मण्डलचक्रं विकल्पजालं प्रादेशिकं प्रादेशिकसिद्धिफलदम्। अथ मूर्खाणां भ्रान्तिरियममुकसिद्धिः कर्ममुद्रां गृहीत्वा, इह गुटिकाबलेन मन्त्रबलेन सप्तावर्तबलेन खड्गादिबलेन ध्यानबलेन वा मण्डलचक्र-साधनबलेन वाऽदृश्यो भवति, न सर्वावरणविनिर्मुक्तः सर्वज्ञो भगवान् वज्रसत्त्वो भवतीति। उक्तं भगवता **नामसंगीत्यां** वज्रधातुमहामण्डलस्तवे महामुद्राधृक्। तद्यथा—

महाध्यानसमाधिस्थो महाप्रज्ञाशरीरधृक्।
महाबलो महोपायः प्रणिधिज्ञानसागरः॥ इति।
(ना० सं० ५.१०)

अतो भगवतो वचनान्नेयं महामुद्रासिद्धिः। महामुद्रा सर्वधर्मनिःस्वभावलक्षणा सर्वाकारवरोपेता प्रज्ञापारमिता बुद्धजननी, धर्मोदयशब्देनापि सा उच्यते। तस्माद्धर्मो-दयात् सर्वधर्माणां निःस्वभावेन उदयो भवति। निःस्वभावा धर्मा दशबलवैशारद्या-दयश्चतुरशीतिसहस्रधर्मस्कन्धाः, तेषामुदयभूतो धर्मोदयो बुद्धक्षेत्रं बुद्धबोधिसत्त्वानां निवासो रतिस्थानं जन्मस्थानं च, न पुनर्यस्माद् रक्तमूत्रशुक्राणामुदयः स धर्मोदय इति। इह संसारिणां रागविरागक्षेत्रं न तथागतानामिति। तस्माद्धर्मोदयो(या) धर्मधातुस्वरूपिणी विश्वमाता कालचक्रे भगवताऽऽलिङ्गिता सर्वदा सर्वावरणरहिता। इह राग उत्पादकालः, च्युतिर्निरोधकालः, [194a] तयोः समापत्तिरक्षरकालः। तस्य चक्रं वज्रधातुमहामण्डलमिति स्कन्धधात्वायतनं निरावरणं वज्रधातुमहामण्डलमित्युच्यते। अनेनाक्षरोत्पन्नेन सा अनुत्पन्ना महामुद्रालिङ्गिता इति। इमां महामुद्रां यः कश्चिद् जन्मान्तरपुण्यवासनावशात् सद्गुरूपदेशादनेककालं रात्रिन्दिवं सर्वधर्मकल्पनारहितां स्वचित्तप्रतिभासमात्रां सर्वाकारवरोपेतां महाशून्यतां सहजानन्दजननीं साक्षा-त्कृत्वाऽऽलिङ्गयति, [1]स महामुद्रासिद्धिं प्राप्तः सर्वज्ञो भगवानित्युच्यते। तस्मादादि-कर्मिकेण योगिकृत्यं न कर्तव्यम्, योगिना सिद्धकृत्यं न कर्तव्यम्, सिद्धेन सर्वज्ञकृत्यं न कर्तव्यम्। एवमादिकर्मिकेण प्रागुक्तविधिना भक्ष्याभक्ष्यादिकं कर्तव्यमिति। अथ पापमतीनां [2]भक्त्या दैत्यानामसद्गुरूपदेशधर्माणां वचनमिह तथागतेनोक्तं **तन्त्रराजेषु** सर्वसमया निर्विकल्पचित्तेन भक्षणीयाः। तस्मात् प्रथमं तावत् पञ्चामृतादि भक्षयामः, पश्चात्तदभ्यासवशात् समयसिद्धिर्भविष्यति, समयसिद्धिवशाद् विषादीन्यभक्ष्याणि भक्ष्याणि भविष्यन्ति, गूथादीनि दुर्गन्धानि [3]सुगन्धानि भविष्यन्तीति। इह वचनात्

१. च. समयमुद्रा। २. भो. bZaḥ Bar Bya Ba (भक्ष्या)। ३. च. 'सुगन्धानि' नास्ति।

परमविरोधः। कथं प्रथमं तावदग्निप्रवेशः कर्तव्यः, पश्चादभ्यासवशादग्निस्तम्भनं भविष्यति। न चैवम्, इह महादुष्टानां परवञ्चकानां सर्वज्ञशासनविडम्बकानां महासमयभेदिनामवीचीनरकगामिनामशुद्धचित्तानां यदि विशुद्धं चित्तम्, [1]तदा योगिकृत्यं किं ते न कुर्वन्तीति। इह विशुद्धचित्ताद् योगी वह्निं प्रविशति न च वह्निना [2]दह्यते, मत्तगजेन्द्रं स्तम्भयेन्न मत्तगजेन्द्रेण मार्यते, सिंहव्याघ्रादिकमारोहते न सिंहव्याघ्रादिकेन विदार्यते, काकपेयां नदीं प्रविशति नदीप्रवाहेन [3]न नीयते, विषं भक्षयति न विषेण मूर्च्छितो भवति, खड्गादिशस्त्राणि भक्षयति न शस्त्रैर्मुखे च्छिद्यते। तथा भक्ष्याभक्ष्यं करोति, स्वपररूपपरिवर्तनं करोति। एवमनेकाकाराणि योगिकृत्यानि न चादिकर्मिकः करोति। उक्तं भगवता योगिनां दशधा व्यवस्थानम्—प्रथमं चित्तोत्पादादिको योगी पश्चाद्बालभूतः कुमारभूत आदिकर्मिको योगाचारजन्मजः प्रयोगसम्पन्न आशयसम्पन्नोऽवैवर्तिकोऽभिषेकप्राप्त एकजातिप्रतिबद्धश्चेति। ततो बोधिसत्त्ववशिता दश भवन्ति—आयुर्वशिता, कर्मवशिता, परिष्कारवशिता, अधिमुक्तिवशिता, प्रणिधानवशिता, ऋद्धिवशिता, उपपत्तिवशिता, धर्मवशिता, चित्तवशिता, ज्ञानवशिता चेति। दश भूमयः—प्रमुदिता, विमला, प्रभाकरी, अर्चिष्मती, सुदुर्जया, अभिमुखी, दूरङ्गमा, अचला, साधुमती, धर्ममेघा चेति। तथा दश पारमिता परिपूर्णा भवन्ति—दान-शील-क्षान्ति-वीर्य-ध्यान-प्रज्ञा-उपाय-प्रणिधि-बल-ज्ञानपारमिताश्चेति। एवं योगी बोधिसत्त्वो भवति। उक्तं भगवता नामसंगीत्यां सुविशुद्धधर्मधातुस्तवे तृतीय-चतुर्थश्लोकाभ्याम्[4]—

दशपारमिताप्राप्तो दशपारमिताश्रयः।
दशपारमिताशुद्धिर्दशपारमितानयः॥

दशभूमीश्वरो नाथो दशभूमिप्रतिष्ठितः।
दशज्ञानविशुद्धात्मा दशज्ञानविशुद्धिधृक्॥ इति।
(ना० सं० ६.२-३)

अतो योगी विशुद्धचित्तो बोधिसत्त्वो भगवता[194b] उक्त इति। इह मन्त्रयाने केचिद् वीरक्रमेण स्वाधिष्ठानक्रमेण वा महानिशायां श्मशानभूम्यां प्रविश्य एकवर्षं द्विवर्षं वा द्वादशवर्षपर्यन्तं वा [5]मरणपर्यन्तं वा मन्त्रजापहोमध्यानबलेन हेरुकं भगवन्तं साक्षात्कर्तुमसमर्थाः, तथा पर्वतोद्यानसरित्समुद्रतटादिकेषु विजनस्थानेषु समन्तभद्रादिदेवतां च। स्वपरार्थनिमित्तं हीनवीर्याः सन्तः कर्मसाधनविषये स्वगृहे मन्त्रजापहोम[6]बलिध्यानमण्डलचक्रादिभावनां कृत्वाऽस्थानाकालवशादसिद्धमन्त्रदेवताविरक्तचित्ताः, तथाविशुद्धक्रमेण महामुद्राभावनामार्गभ्रष्टाः सद्गुरूपदेशरहिता महोच्छेदे पतिताः सन्तो दुष्टगुरवो बालमतीनां गम्भीरोदारधर्मापरीक्षकाणां प्रज्ञापारमितां देशयिष्यन्ति।

---

१. च. तथा। २. च. रक्ष्यते। ३. च. 'न' नास्ति। ४. भो० ḥDi lTa sTe (तद्यथा) इत्यधिकम्। ५. भो. 'मरणपर्यन्तं वा' नास्ति। ६. च. 'बलि' नास्ति।

तद्यथोक्तं भगवता तथागतेन **प्रज्ञापारमितायाम्**—"निर्विकल्पाः सर्वधर्माः शून्याः सर्वधर्मा अनिमित्ताः सर्वधर्मा अप्रणिहिताः सर्वधर्माः संस्काररहिताः सर्वधर्मा उत्पादरहिताः सर्वधर्मा अनक्षराः सर्वधर्मा हेतुशून्याः सर्वधर्मा अचिन्त्याः सर्वधर्माः" इति ।

तस्मात् सर्वज्ञफलावाप्तये बोधिसत्त्वेन महासत्त्वेन सर्वधर्मनिरपेक्षकेण भवितव्यम्, न रूपस्कन्धे स्थातव्यम्, न वेदनायां न संज्ञायां न संस्कारे न विज्ञाने न पृथ्वीधातौ स्थातव्यम्, नाऽधातौ स्थातव्यम्, न तेजोधातौ न वायुधातौ न शून्यधातौ न चक्षुर्धातौ स्थातव्यम्, न रूपधातौ न चक्षुर्विज्ञानधातौ न श्रोत्रधातौ न शब्दधातौ न श्रोत्रविज्ञानधातौ न घ्राणधातौ न गन्धधातौ न घ्राणविज्ञानधातौ न जिह्वाधातौ न रसधातौ न जिह्वाविज्ञानधातौ न कायधातौ न स्पर्शधातौ न कायविज्ञानधातौ, न मनोधातौ न धर्मधातौ न मनोविज्ञानधातौ स्थातव्यमिति । 5 10

एवं प्रज्ञापारमिताऽचिन्त्यतथागतज्ञानं सम्यक्सम्बुद्धत्वलाभाय भगवतोक्तम् । अचिन्त्यं कस्माद् ? रागविरागस्वभावात् । इह हि सत्त्वानां यदा चिन्तनं प्रवर्तते तदा परमेष्टवस्तुषु रागो भवति, अनिष्टवस्तुषु विरागः, तौ रागविरागौ संसारकारणौ भवतः । यदा पुनस्तथागतज्ञानं निश्चिन्तनं वर्तते तदा नेष्टवस्तुषु रागो नानिष्टवस्तुषु विरागो भवति, तयोरभावादेव संसाराभावस्तदभावात् सम्यक्संबुद्धत्वं भवति । अतो बुद्ध[त्व]-साधनं निश्चिन्तनं ताथागतं ज्ञानम्, नान्यो विकल्पः समाधिः । एवमप्रबुद्धा निश्चिन्तनं ज्ञानमिच्छन्तो वदिष्यन्ति महोच्छेदे पतिताः केचित् । तस्मादुच्यते—इह हि यदि निश्चिन्तनं ज्ञानं बुद्धत्वदायकं तदा सर्वे सत्त्वाः किन्न बुद्धा बभूवुः, एषामपि गाढनिद्रायां निश्चिन्तनं ज्ञानं प्रवर्तते, नेष्टवस्तुषु रागो नानिष्टवस्तुषु विरागः । तस्मात् तस्यां सुषुप्तावस्थायां रागविरागौ न स्याताम्, न च तेन निश्चिन्तनज्ञानेन सर्वे सत्त्वाः सम्यक्सम्बुद्धा बभूवुः, तस्मान्निश्चिन्तनं ज्ञानं ताथागतं न भवति, यस्मात् समाधिपटले **प्रज्ञापारमितायां** समाधयो भगवतोक्तास्तत्र रत्नप्रदीपो नाम समाधिः । 15 T 442 20

इह य[195a]दि रत्नप्रदीपचिन्तनं नास्ति प्रतिभासो वा, तदा रत्नप्रदीपो नाम समाधिः कथं स्यात् । एवमन्येऽपि समाधयो निश्चिन्तना न भवन्ति, स्वसंवेद्यलक्षणात्, जडशून्यताभावात् । अथ बालानां वाक्यमिदं ताथागतं ज्ञानं यदि स्वसंवेद्यं तदा सर्वधर्मा निःस्वभावाः कथं तथागतेनोक्ता इति ? अत्रोच्यते—इह ताथागतं ज्ञानं सर्वधर्माणां निःस्वभावतावबोधनं नाम, न सर्वाभावलक्षणं सुषुप्तचित्तम् । उक्तं **प्रज्ञापारमितायाम्**—"अस्ति तच्चित्तं यच्चित्तमचित्तम्" (अ० स०, पृ० ३) इति । प्रकृतिप्रभास्वरं नाम यदि स्वसंवेद्यं ताथागतं ज्ञानं न भवति, तदा सत्त्वाशयवशात् तथागतस्य धर्मदेशना न स्यात् । सर्वधर्मा अप्रबोधाः, असंवेद्यत्वात् । अथेन्द्रियद्वारिकं स्वसंवेद्यम्, तदा निष्कलं सर्वगं सर्वव्यापि न भवति, सर्वावरणात् । तस्मात्ताथागतं ज्ञानं स्वसंवेद्यं सर्वधर्मस्वभावज्ञं निर्विकल्पमनिन्द्रियमिति । उक्तं भगवता **नामसंगीत्यां** प्रत्यवेक्षणाज्ञानस्तवे विंशतिमादिश्लोकत्रयेण[१]— 25 30

१. भो. ḥDi lTa sTe (तद्यथा) इत्यधिकम् ।

निर्वाणं निर्वृतिः शान्तिः श्रेयो निर्याणमन्तगः।
सुखदुःखान्तकृन्निष्ठा वैराग्यमुपधिक्षयः॥
अजयोऽनुपमोऽव्यक्तो निराभासो निरञ्जनः।
निष्कलः सर्वगो व्यापी सूक्ष्मो बीजमनास्रवः॥
अरजो विरजो विमलो वान्तदोषो निरामयः।
सुप्रबुद्धो विबुद्धात्मा सर्वज्ञः सर्ववित् परः॥ इति।
(ना० सं० ८.२०-२२)

तथा कृत्यानुष्ठानस्तवे [1]त्रयोदशमेन श्लोकेन। तद्यथा—

आत्मवित् परवित् सर्वः सर्वीयो ह्यग्रपुद्गलः।
सर्वोपमामतिक्रान्तो ज्ञेयो ज्ञानाधिपः परः॥ इति।
(ना० सं० १०.१३)

तन्त्रराजेऽप्युक्तं पञ्चमपटले नवनवतिमेन वृत्तेन[2]—

सर्वाकारं ह्यगम्यं विषयविषयिणां कायवज्रं जिनस्य
वाग्वज्रं सर्वसत्त्वस्वहृदयरुतकैर्धर्मसम्पादकं यत्।
सत्त्वानां चित्स्वभावं सकलभुवि गतं वज्रिणश्चित्तवज्रं
भावानां ग्राहकं यद् विमलमणिरिव ज्ञानवज्रं तदेव॥
(का० त० ५.९९)

अतो निरिन्द्रियं स्वसंवेद्यं ताथागतं ज्ञानमिति।

ननु यदि स्वसंवेद्यं ताथागतं ज्ञानं तदा स्कन्धधात्वायतनाभावान्न संभवति, उक्तं भगवता **तन्त्रराजेषु**—

"स्कन्धाभावे प्रज्ञाज्ञानं नोपलभ्यते, द्वीन्द्रियसंयोगात्। बोधिचित्तनिर्गमकाले सहजविरमयोर्मध्ये बिन्दुत्रयावसानिकमेकक्षणमात्रं समन्तभद्रं महासुखज्ञानम्, एतदेव स्वसंवेद्यमुक्तम्" इति।

इह कथं बोधिचित्तबिन्दुनिर्वाणरहितं निरिन्द्रियं समन्तभद्रं महासुखज्ञानं भवति, खपुष्पं वन्ध्यापुत्रेणाघ्रातमिव विचार्यमाणं निरर्थकम्[इति] इह केषाञ्चिदभिप्रायो भविष्यति। तस्मादुच्यते—नैतदेवं तथागतेनोक्तं बोधिचित्तबिन्दुः क्षरसुखं समन्तभद्रं महासुखं प्रज्ञाज्ञानम्, यस्मात् "चतुर्थं तत्पुनस्तथा" (गु० त० १८.११२) इति प्रतिषेधवचनात्। इह यदि तृतीयं क्षरसुखं प्रज्ञाज्ञानं समन्तभद्रं महासुखं चतुर्थं भवति, तदभिहितस्याभिधानं भवति। न चैवं युक्तम्, कस्मात्? पुनरुक्तदोषप्रसङ्गात्। यथा

१. च. षोडशमेन। २. भो. ḥDi lTa sTe (तद्यथा) इत्यधिकम्।

हस्त इत्युक्ते सति पुनर्हस्त इति, एवं पुनर्दधि। इह बालोन्मत्तवचनं न पण्डितानाम्। तस्माच्चतुर्थमिति वचनात् तृतीयं न भवति, "तत्पुनस्त[195b]था" इति वचनात् प्रज्ञाज्ञानं तदेव। अतो भगवतो वचनाद् अप्रबोद्धारो नष्टा वदिष्यन्तीह—"चतुर्थं तत्पुनस्तथा" इति शब्देन भगवता तृतीयमुक्तं चतुर्थं नाम न स्यात्। इहाधर्मप्रवृत्तिर्बालानां द्वीन्द्रियोत्पन्नक्षरसुखाभिलाषिणां महाक्षरसुखज्ञानभ्रष्टानामिति। तस्माद् बोधिचित्तच्युतिसुखं समन्तभद्रं महासुखज्ञानं चतुर्थं न भवति। उक्तं भगवता **नामसंगीत्यां** कृत्यानुष्ठानज्ञानस्तवे तृतीयश्लोकेन— 5

सर्वाकारो निराकारः षोडशार्धार्धबिन्दुधृक्।
अकलः कलनातीतश्चतुर्थध्यानकोटिधृक्॥ इति।
(ना॰ सं॰ १०३) 10

तन्त्रराजेऽप्युक्तं पञ्चमपटले [1]षड्विंशत्यधिकशततमेन वृत्तेन। तद्यथा—

एवं चित्तं चतुर्धा त्रिविधभवगतं प्राणिनां बिन्दुमध्ये
योगीन्द्रै रक्षणीयं समसुखफलदं व्यापकं मोक्षहेतोः।
बिन्दोर्मोक्षे क्व मोक्षः परमसुखगते योगिनां जन्मबीजे T 443
तस्मात् संसारसौख्यक्षण इह यतिभिः सर्वदा वर्जनीयः॥ इति। 15
(का॰ त॰ ५.१२६)

अतश्चतुर्थं तृतीयं न भवति। इह यदि बिन्दुस्तत्तृतीयं प्रज्ञाज्ञानं चतुर्थं तदेव तदा षोडशार्धार्धबिन्दुधृग् भगवान्न भवति, यदि चतुर्थो विरामस्तदा आनन्द-परम-विरम-सहज-चतुर्थध्यानकोटिधृग् न भवति। अतो निरिन्द्रियं स्वसंवेद्यं ताथागतं ज्ञानमिति। तस्माद् योगिना बोधिचित्तं सुदृढं रक्षणीयम्, न मोक्षणीयम्। न चान्ये बिन्दवः 20 शरीरे बाह्ये वा सन्ति बोधिचित्तबिन्दुरहिता मूत्रतोयादयः, ये बुद्धत्वफलदायका भविष्यन्तीति, तन्न, यदि चतुर्थं प्रज्ञाज्ञानं तृतीयं न भवति, भगवांश्च बिन्दुधृक्, तदा "तत्पुनस्तथा" इति वचनात् प्रज्ञाज्ञानं किं भविष्यतीति केचिदत्र वदिष्यन्ति, तस्मादुच्यते—

इह वज्रयाने लौकिकलोकोत्तरसत्यमाश्रित्य भगवता त्रिधा प्रज्ञा प्रोक्ता— 25 कर्ममुद्रा, ज्ञानमुद्रा, महामुद्रा इति, एकाभिधानतः। तासु कर्ममुद्राज्ञानमुद्रासुखं स्पन्दलक्षणं महामुद्रासुखं निःस्पन्दलक्षणं योगिनो भवति। इह यदि प्रज्ञाया ज्ञानं प्रज्ञाज्ञानं च्युतिलक्षणं प्रज्ञाहेतुनोत्पन्नं फलमुपायस्य प्रज्ञाज्ञानं तदोपायहेतुनोत्पन्नं फलं प्रज्ञाया उपायज्ञानं भवति महामुद्रासिद्ध्यर्थम्। एवं परस्परापेक्षिकत्वाद् द्वे ज्ञाने भवतः। एवमुभयोः प्रत्येकज्ञाने सत्यद्वयज्ञानाभावः, अद्वयज्ञानाभावाद् बुद्धत्वस्याप्यभावो 30 भवति, विशुद्धपरमाक्षरज्ञानरहितत्वादिति। अथ प्रज्ञाया ज्ञानं प्रज्ञाज्ञानं यदि, तदा

---

१. च. पञ्चविंशत्यधिक।

उपायस्य ज्ञानं उपायज्ञानमिति, एवं पूर्ववद्दोष इति। उक्तं भगवता नामसंगीत्यां प्रत्यवेक्षणाज्ञानस्तवे षट्त्रिंशतिमादिश्लोक[1]द्वयेन विशुद्धं परमाक्षरज्ञानम्। तद्यथा—

संबुद्धवज्रपर्यङ्को　बुद्धसङ्गीतिधर्मधृक्।
बुद्धपद्मोद्भवः श्रीमान् सर्वज्ञज्ञानकोषधृक्॥

विश्वमायाधरो राजा बुद्धविद्याधरो महान्।
वज्रतीक्ष्णो महाखड्गो विशुद्धः परमाक्षरः॥ इति।
(ना० सं० ८.३४-३५)

तन्त्रराजेऽप्युक्तं साधनापटले एकोनद्विशतादिवृत्ताभ्यां महामुद्रालक्षणम्—

त्यक्त्वेमां कर्ममुद्रां सकलुषहृदयां कल्पितां ज्ञानमुद्रां
सम्यक्सम्बोधिहेतोर्जिनवरजननीं भाव[196a]येद् दिव्यमुद्राम्।
निर्लेपां निर्विकारां खसमहततमां व्यापिनीं योगगम्यां
कूटस्थां ज्ञानतेजां भवकलुषहरां कालचक्रानुविद्धाम्॥
(का० त० ४.१९९)

मुद्रा मायानुरूपा नभसि मनसि वै रूपवद्दर्पणे च
त्रैलोक्यं भासयन्ती तडिदनलनिभानेकरश्मीन् स्फुरन्ती।
वाह्ये देहेष्वभिन्ना विषयविरहिताऽऽभासमात्राऽम्बरस्था
चित्तं चेतोमयालिङ्गयति च जगतोऽनेकरूपस्य सैका॥ इति।
(का० त० ४.१९८)

मूलतन्त्रेऽप्युक्तम्—

कर्ममुद्रां परित्यज्य ज्ञानमुद्रां विकल्पिताम्।
परमाक्षरयोगेन　महामुद्रां　विभावयेत्॥ इति।

अतो भगवतो नियमात् कर्ममुद्रासुखं समन्तभद्रपरमाक्षरसुखं न भवति, तथा मण्डलचक्रभावनाविकल्पितप्रज्ञासुखं समन्तभद्रं परमाक्षरसुखं न भवति, विकल्पापरित्यागात्। अधुनाऽसद्गुरूपदेशाद् महामुद्राज्ञानभ्रष्टाः पशुत्वं कुर्वन्ति बुद्धत्वं नास्ति, महामुद्राज्ञानाभावात्। महामुद्राज्ञानमप्रतिष्ठितं योगिनामसद्गुरुर्मार्गरहितः प्रतिपादयितुं न शक्नोति। मार्गोऽपि—"चतुर्थं तत्पुनस्तथा" (गु० त० १८.११२) इति। एवं चतुर्थाभिषेकाप्रबोधात् सर्वेऽभिषेका निरर्थकाः स्युरिति।

ननु यदि समन्तभद्रं परमाक्षरसुखम्, तदेव चतुर्थं महामुद्राज्ञानं महामुद्रारहितं न भवति। तदियं किमर्थं द्वीन्द्रियसमापत्त्या महासुखभावना भगवतोक्ता? अनया भावनया इह जन्मनि बुद्धत्वं वज्रधरत्वं चोक्तमितीह कस्यचिदभिप्रायो भविष्यति,

---

१. ब. त्रयेण।

तस्मादुच्यते—इह यदुक्तं भगवता द्वीन्द्रियसमापत्त्या महासुखसाधनं तत्सत्यम्, उक्तं भगवता तन्त्रराजे पञ्चमपटले [1]एकोनद्विशततमेन वृत्तेन—

सत्त्वा रागेण येन प्रलयमुपगतास्तायिनस्तेन मुक्ताः
सत्त्वा यद्रक्षयन्ति प्रतिदिनसमये तायिनस्तद्दन्ति।
सत्त्वा यन्मोचयन्ति स्वहृदिगतसुखं तज्जिना रक्षयन्ति　　5
तेनेदं दुष्करं स्याज्जिनवरचरितं देवनागासुराणाम् ॥ इति।
(का० त० ५.१९९)

इह सत्त्वा येन रागेण च्युतेन प्रलयं मरणमुपगताः, तेनैवाच्युतेन परमाक्षरभूतेन तायिनो बुद्धा मुक्ता भवन्ति। सत्त्वा यद्रक्षयन्ति पुत्रदारादिकं तायिनस्तं ददन्ति। सत्त्वा यन्मोचयन्ति महासुखं तद् बुद्धा रक्षयन्ति। तेन कारणेन देवासुरमनुष्यनागानां दुष्करं　　10 चरितं तथागतानां विकुर्वितं यदेव तदेव योगिना बोधिचित्तमच्युतं कर्तव्यं यथानुक्रमेण परमाक्षरसाधनार्थम्। तेन द्वीन्द्रियसमापत्त्या सुखभावनोक्ता न बोधिचित्तच्यवनावस्था। इयं च्युतिवासना सत्त्वानामनादिकालेनागन्तुकमलस्वभावा, तया संसारः। सा येन मुद्रासङ्गेन च्युतिवासना भवति, तेनैव सङ्गेनाच्युतिवासना भविष्यति, सूतकाग्निवत्। उक्तं भगवता **तन्त्रराजे** साधनापटले [2]चतुर्विंशत्यधिकद्विशततमेन　　15 वृत्तेन—

सूतस्याग्ने रिपुत्वं न शिखिविरहितः सूतबन्धः कदाचिद्
नाबद्धो हेमकर्ता कनकविरहिता वादिनां नैव भोगाः।
एवं स्त्रीसङ्गहीनो नहि भवति [3]नृणां सर्वदा चित्तबन्धो
नाबद्धः कायवेधी परमसुखमिहाविद्धकायो ददाति ॥ इति।　　2. T 444
(का० त० ४.२२४)

इह यथाग्निस्पर्शात् सूतकः प्रपलायति, [196b] सोपायेन तेनैवाग्निना बध्यते, तथा धर्मोदयस्पर्शाद्बोधिचित्तं प्रपलायति, सोपायेन तेनैव बध्यते। यथाग्निना रसो बद्धः सर्वलोहानि हेमं करोति, एवं धर्मोदयसङ्गेन बोधिचित्तं बद्धं स्कन्धधात्वायतनादिकं निरावरणं करोति। अतो रसबोधिचित्तयोरतर्क्यः प्रभावो मूर्खैर्विचारयितुं न शक्यते।　　25 तस्मात् कर्ममुद्राप्रसङ्गेऽपि देवतालम्बनं प्रोक्तं बोधिचित्तस्य स्थिरीकरणार्थम्, रसस्य स्वेदनजारणादिकमिव। न पशुकर्मकमलप्रविष्टस्य बोधिचित्तस्य भक्षणं तथागतेनोक्तमिति। उक्तं भगवता **तन्त्रराजे** पञ्चमपटले [4]त्रिसप्ततितमेन वृत्तेन कर्ममुद्रादिसाधनम्। तद्यथा—

---

१. च. द्व्यशीत्यधिक। २. च. द्वात्रिंशत्य। ३. मु. भो. योगिनां। ४. च. द्वात्रिंशतिमेन।

सेव्यादौ कर्ममुद्रा जिनसहजसुखस्यास्य वृद्ध्यर्थहेतो-
स्तस्मादादित्यरूपा मुखकरचरणोष्णीषसर्वाङ्गपूर्णा।
विद्युद्दण्डानुरूपाऽच्युतसुखजननी लक्षणाङ्गप्रपूर्णा
वज्रेऽद्भासयन्ती त्रिभवगततनुर्धर्मधातुस्ततः स्यात् ॥ इति।
(का० त० ५.७३)

पुनस्तत्रैव पटले [1]त्रयोदशाधिकशततमेन वृत्तेनोक्तम्—

चित्तस्याभासमात्रा स्वमनसि जनिताऽऽदर्शबिम्बोपमा वै
योगीन्द्रैः सेवनीया सकलजिनसुतैः सेविता या च बुद्धैः।
सा ज्ञानार्चिः प्रबुद्धा दहति सविषयं मारवृन्दं समस्तं
रागादींश्चापि काये ददति समसुखं योगिनां वर्षयोगात् ॥ इति।
(का० त० ५.११३)

अतो भगवतो नियमाद् द्वीन्द्रियसमापत्त्याऽपीयं महामुद्रा स्वचित्तप्रतिभासमात्रा योगिना भावनीयाऽऽबोधिपर्यन्तं बाह्येन्द्रियजनितं क्षरसुखं विहायेति।

ननु तथागतेनोक्तं स्कन्धधात्वायतनाभावे द्वीन्द्रियसंयोगरहितं प्रज्ञाज्ञानं स्वसंवेद्यं न भवति, अच्युतत्वात्। कथं योगी स्वचित्तप्रतिभासे स्वचित्तेनानुषङ्गं कृत्वा स्वचित्तं निरावरणं करोति, महाक्षरसुखज्ञानं चोपभुङ्क्ते, परमाणुसंदोहशरीराभावात्। एतदेव विपरीतम्; देवदत्त आत्मनः स्कन्धमारुह्य ग्रामं गच्छतीति, इह कस्यचिदभिप्रायो भविष्यति, तस्मादुच्यते—इह हि यद्वक्तव्यं मूर्खैः परमाणुसन्दोहात्मकैः स्कन्धधात्वायतनैर्विना चित्तमात्रेण प्रज्ञाज्ञानं स्वसंवेद्यं न भवति, तन्न, कस्मात्? आगन्तुकचित्तवासनावशात्। इह स्कन्धधात्वायतनं नाम आगन्तुकचित्तवासना, तस्याः प्रसादेन चित्ते सुखदुःखवेदना प्रविशति, परमार्थतो विचार्यमाणे नास्य शरीरस्य क्षुद्रोपद्रवेणेति। इह परमाणुसंदोहात्मकं शरीरं स्वप्नावस्थायां प्रपतितं तिष्ठति, नास्य क्षुद्रोपद्रवः कश्चिदस्ति, येन चित्ते दुःखं प्रविशति। इह सर्वलोकेषु प्रसिद्धम्, तस्यामेवावस्थायामन्यच्चित्तवासनात्मकं शरीरं परमाणुसन्दोहरहितं देशान्तरं व्रजन् प्रतिभासते, तस्य देशान्तरं व्रजतः शरीरस्य चौरादिभिरुपद्रवे कृते सति तेनोपद्रवेण चित्ते दुःखं प्रविशति, तेन दुःखेनाक्रन्दति। तदिदं महात्यद्भुतम्। शरीरं विना चौरादिभिर्विना स्वसंवेद्यं [197a] दुःखज्ञानं प्रवर्तते चित्तस्य। एवं स्वप्ने महाकामोपभोगैश्चित्ते सुखं प्रविशति तदेवाश्चर्यम्, शरीरेण विना [2]कामोपभोगैर्विना स्वसंवेद्यं सुखज्ञानं चित्तस्य प्रवर्तते सत्त्वानामिति। एतदेव पण्डितैर्विचारयितुं न शक्यते प्रादेशिकज्ञानमपि, किं पुनः संसारवासनातिक्रान्तं निर्वाणवासनोद्भूतं योगिस्वसंवेद्यं समन्तभद्रं महाक्षरसुखज्ञानं वितर्कयितुं न शक्यते मूर्खैरिति।

१. च. एकादशा। २. भो. ḥDod Pa Chen Po (महाकामो)।

अथ पापमतीनां तीर्थिकानां प्राणवायुतत्त्वरतानां वचनमिदम्—इह स्वप्नावस्थायां परमाणुसन्दोहात्मकशरीरे निश्वास-उच्छ्वासोऽस्ति(सौ स्तः), तयोर्निश्वास-उच्छ्वासयोः प्रभावादवस्थात्रयं भवति, न निश्वासोच्छ्वासाभावादिति। एतदेव विचार्यते—इह हि यदि निश्वासोच्छ्वासाभ्यां विना चित्ते स्वप्नावस्था नास्ति, तदा कथं मृत्युमूर्च्छावस्थायां निश्वासोच्छ्वासाभ्यां विना प्रहरमेकं यावच्चित्तप्रतिभासो भवति, यमदूतैर्नीयमानं शरीरं यमराजाज्ञया यमपुरं प्रतिभासते। अत्र यमपुरे यमराजोऽपि प्रतिभासते। स यमस्तस्य नीतशरीरस्य पुण्यपापविचारं करोति। विचार्यात्र वदति—यथाऽस्याद्याऽऽयुःक्षयो न भवति, तस्मादिमं सत्त्वं शीघ्रं मर्त्यलोके नयत यावदस्य शरीरं न विनश्यति। यमदूतानां नियमो भवति। तेन नियमेन ते यमदूतास्तच्छरीरं मर्त्यलोके क्षिपन्ति। तत्र क्षिप्ते सति चित्तवासनावशेन पुनस्तस्य मृतशरीरस्य निश्वासोच्छ्वासौ भवतः। तदाऽपरवासनावशेन जाग्रदवस्था भवति। तस्यामवस्थायां चित्तप्रबोधाद् बन्धुवर्गस्य यमराजाख्यानं कथयति। तस्मात् शरीरं विना निःश्वासोच्छ्वासाभ्यां विनाऽप्यनादिचित्तवासनाऽऽगन्तुका [1]पुनर्जातिवशाद् भवति सत्त्वानाम्, न स्वाभाविकी। यदीयं संसारवासना स्वाभाविकी भवति, तदा सत्त्वानां बुद्धत्वं नाम न स्यात्। येन कारणेनागन्तुका तेन कारणेनास्याः क्षयो भवति, तत्क्षयाद् बुद्धत्वं तथागतेनोक्तम्। एवमनेकप्रकारैर्विचार्यमाणः स्वचित्तवासनामात्रोऽयं संसारः, नान्यः कश्चित्। संसारवासनापि च्युतिलक्षणः क्षणो नाक्षरः। निर्वाणवासनाऽच्युतिलक्षणः क्षणो न क्षर इति। उक्तं च भगवता तन्त्रराजेऽध्यात्मपटले द्व्यधिकशततमेन वृत्तेन। तद्यथा—

> यो यन्मध्ये प्रविष्टो व्रतनियमरतः कर्मपाशैर्निबद्ध-
> स्तन्मध्ये स्वस्वभावाद् भवति नरपते तत्कुले तद्ग्रहेण।
> यावज्जीवस्य भावस्त्रिविधभववशाद् वेदना सौख्यदुःखं
> तावत् संसारघोरे भ्रमणमिह नृप स्वर्गमर्त्ये त्वधश्च॥
> (का० त० २.१०२)

पुनस्तत्रैव पटले सप्ताधिकनवतितमेन वृत्तेन योगवासना उक्ता— T 445

> योगीन्द्रोऽप्राप्तयोगः प्रचलितमनसा याति मृत्युं कदाचित्
> श्रीमान् मानुष्यलोके प्रवरमुनिकुले जायते योगयुक्तः।
> पूर्वाभ्यासेन तेनाहरति पुनरपि [197b] ज्ञानयोगं विशालं
> लब्धे ज्ञाने प्रयात्यक्षयपरमपदं यत्र जन्मी न भूयः॥ इति।
> (का० त० २.९७)

अतश्चित्तवासनावशात् स्वसंवेद्यं प्रज्ञाज्ञानं भवति, न परमाणुशरीरोपभोगादिति।

१. भो. Yaṅ Daṅ Yaṅ Du (पुनः पुनः)।

ननु स्वप्नावस्थायां मैथुने कृते सति सूक्ष्मकाये च्युतिर्भवति, न स्वप्ने(प्न)-चित्तवासनाकायात्। तस्मादस्य कायस्य प्रभावान्महासुखं स्वसंवेद्यं भवति, न चित्त-वासनाकायादिति केषाञ्चिद् द्वीन्द्रियसुखाभिलाषिणां वाक्यं भविष्यति। तस्मादुच्यते— इह हि यद्वक्तव्यं मूर्खैः परमाणुसन्दोहात्मकशरीराच्च्युतिर्भवति, न चित्तवासनाकाय-वशात्। नैतदेवं प्रमाणम्, कस्मात्? अरूपभवच्यवनात्। इह हि यदि परमाणुसन्दो-हात्मककायेन विना च्युतिर्न भवति, च्युत्या विना संसारो न भवति, संसारेण विना महासुखोपलम्भश्च न भवति, तदाऽरूपकायिकानां च्युत्या विना कथं बुद्धत्वाय पुनरुत्पादो भविष्यति, परमाणुसन्दोहात्मकशरीराभावात्। अरूपिणां नाहारिकं शरीरम्, परमाणु-सन्दोहात्मकशरीराभावात् शुक्रच्युतिर्नास्ति, शुक्रच्युतेरभावान्न सुखं न संसारस्तेषा-मिति। न चैवम्, उक्तं च भगवता द्वितीयेऽध्यात्मपटले तृतीयेन वृत्तेन परमाणुसन्दोहा-त्मकशरीरमक्षरज्ञानं च। तद्यथा—

देहेऽस्मिन् धातुवृन्दं भवति च सकलं षड्रसाहारपानाद्
भूतेभ्यः षड्रसाश्च प्रकटितनियतं भूतवृन्दं खधातोः।
शून्ये ज्ञानं विमिश्रं भवति समरसं चाक्षरं शाश्वतं च
एवं भूतस्थशान्तं त्रिविधभवगतं वेदितव्यं स्वकाये॥ इति।
(का० त० २.३)

देहेस्मिन्निति। तिर्यङ्मानुष्यदेहस्य यस्य षड्रसाहारपानमस्ति, असौ देहः षड्रसाहारपानी। अस्मिन् धातुवृन्दं लोमत्वग्रक्तमांसास्थिमज्जाशुक्रधातूनां मेलापको [1]धातुवृन्दं भवति। कुतः? षड्रसाहारपानात्, षट् च ते रसाः षड्रसास्तिक्ताम्ल-लवणकटुकमधुरकषाया लोमादिधातुस्वरूपं गच्छन्तीत्यभिप्रायः। भूतेभ्यः षड् रसाश्चेति। भूताः पृथिव्यप्तेजोवाय्वाकाशधातवः कठिनद्रवोष्णस्पन्दनरसपरमाणुरूपाः, तेभ्य-स्तद्वोजसंयुक्तेभ्यस्तिक्तादयः षड्रसा भवन्ति। धातवो रसस्वभावं गच्छन्तीत्य-भिप्रायः। भूतेभ्यो भवन्तीति सत्त्वाशयवशाद्वाच्यम्, परमार्थविचारतः पुनर्धातवोऽपि रसा भवन्तीति, न जन्यजनकसम्बन्धादिति। भूतवृन्दं खधातोरिति खधातोः शून्यधर्माद् भूतवृन्दं भवति, बीजाङ्कुरवत्। यथाङ्कुरो नानष्टबीजाद् भवति, न नष्टबीजाद् भवति, तथा न स्वरूपापरित्यागात्, न जडधातुतः, नोच्छेदशून्यादिति। [2]एवं शून्यात् सर्वधर्मा भवन्तीति शून्ये ज्ञानं विमिश्रमिति शून्यधर्माणामुत्पाद-निरोधाभावः स्वचित्तप्रतिभासः। ज्ञानं तत्प्रतिबोधोऽक्षरसुखम्, तस्मिन् [3]स्वचित्ता-भासे उत्पादविनाशाभावे ज्ञानं विमिश्रम्, स्वचित्तप्रतिभासे समरसमेकोभवति, न ज्ञानज्ञेयसम्बन्धेन। एतदेवाक्षर[4]शाश्वतम्, परमाक्षरमित्यर्थः। एवं भूतस्थ-शान्तमिति। एवमनेन क्रमेण शरीरधातुस्थमक्षरं त्रिविधभवगतं कामरूपारूपभवगतं वेदितव्यं ज्ञातव्यं [198a] स्वदेहे योगिनेति। तेन तिर्यङ्मनुष्याणां शुक्रबीजं [5]शरीरो-

१ च. 'धातु' नास्ति। २. च. 'एवं' नास्ति। ३. च. 'स्व' नास्ति। ४. च. शान्तं। ५. भो. ḥKhor Ba (संसारो)।

त्पत्तिकारणम्, तदेव षड्रसानां शरीरे धातुत्वं गतानां पृथिव्यप्तेजोवाय्वाकाश-परमाणुसन्दोहात्मको गन्धरूपरसस्पर्शशब्दात्मकः सत्त्वधातुः, एतद्बीजस्वभावात् कर्मजं शरीरमुत्पद्यते, निरुध्यते च मृत्युकाले तदेव पञ्चात्मकं बीजं निःसरति। पुनः स्वप्न-शरीरवद् वासनाशरीरं शून्यं परमाणुसन्दोहवर्जितमनिरुद्धम्, तेनैवानिरुद्धवासनाशरीरेण कर्मवासनोद्भूतेन पुनः परमाणुसन्दोहात्मकं शरीरं गृह्णाति। पुनः परमाणुसन्दोहात्मक-शरीरग्रहणात् प्राक्शरीरवासनां परित्यज्य वर्तमानशरीरवासनोत्पद्यते चित्ते। तेन कारणेन शून्येभ्यश्चित्तवासनास्कन्धेभ्य आगन्तुकस्कन्धधर्मा भवन्ति, आगन्तुकस्कन्ध-धर्मेभ्यः शून्याश्चित्तवासनास्कन्धा भवन्तीति परलोके परमाणुमात्रोऽपि न गच्छति। कस्मात्? [1]प्राक्स्कन्धपरित्यागेऽप्यपरस्कन्धग्रहणात्। एवमुक्तक्रमेण षड्रसाहारिणो देहस्य पञ्चभूतात्मकस्य च्युतिकाले पञ्चभूतात्मकं कर्मजं बीजं निःसरति, चित्तवासनापि पञ्चभूतात्मिका भवति षड्रसाहारिणामिति। देवानां पुनः षड्रसाहारी पञ्चभूतात्मकः कायो न भवति, षड्रसाहाराभावात्। चन्द्रादित्यादिषट्कामावचराणां तेषां पुनस्तोय-तेजोवाय्वाकाशसन्दोहात्मकं शरीरं रूपरसस्पर्शशब्दचतुर्गुणात्मकं पृथ्वीगन्धगुणरहितम्, लघुत्वात्। शुक्रमपि तत्स्वभावात्मकम्, चित्तवासनापि च्यवनकाले तदात्मिकेति। रूपकायिकानां तेजोवायुरसपरमाणुसंदोहात्मकं शरीरं रसस्पर्शशब्दत्रिगुणात्मकं पृथ्वी-तोयगन्ध[2]रसगुणरहितम्, शुक्रमपि त्रिगुणात्मकम्, चित्तवासनापि च्यवनकाले तदा-त्मिका। षोडशानामित्यरूपकायिकानां शून्यधात्वात्मकं शरीरं चित्तवासनामात्रं शब्द-गुणात्मकम्, शुक्रमपि पृथ्वीतोयतेजोवायुगन्धरसरूपस्पर्शगुणवर्जितम्। एषां पृथिव्यादीनां मुख्यगुणेऽस्मिन् गौणमात्रो गुणोऽस्ति, अन्यथा समुदितगुणैर्विना नैकगुणात् संसारवासना भवति चतुर्णामित्येषु त्रिभवेषु नरकप्रेततिर्यङ्मनुष्यासुरचातुर्महाराजकायिकास्त्राय-स्त्रिंशद्यामतुषितनिर्माणरतिपरनिर्मितवशवर्तिनश्चैकादश कामाः। ब्रह्मकायिका ब्रह्मपुरोहिता महाब्रह्माणः परीत्ताभा अप्रमाणाभा आभास्वराः परीत्तशुभा अप्रमाणशुभाः शुभकृत्स्ना अनभ्रकाः पुण्यप्रसवा बृहत्फला अबृहा अतपा सुदर्शना अकनिष्ठा षोडश-रूपाः। आकाशानन्त्यायतना विज्ञानानन्त्यायतना आकिञ्चन्यानन्त्यायतना नसंज्ञानासं-ज्ञानन्त्यायतनाश्चत्वारः। एवं कामरूपारूपाणां चतुर्णां च्यवनकाले शुक्रं यथानुक्रमेण पञ्चचतुस्त्र्येकगुणात्मकं निस्सरति, चित्तवासनावशेन। नान्यथा संसारभ्रमणं भवति। अतः कारणाद् [198b] उक्तं भगवता तन्त्रराजे पञ्चमपटले[3]ऽष्टपञ्चाशत्तमेन वृत्तेन। तद्यथा—

भूवार्यग्निश्च वायू रसपरमरसौ चाणवः षट्प्रकारा
गन्धाद्येकैकहीना विषयविरहिताश्चान्तिमा ज्ञानदृश्याः।
कामा रूपास्त्वरूपा युमयमशशिनश्चान्तिमो धर्मधातुः
सर्वाकाराः सदा तेऽच्युतसुखसहजाधारभूताः समन्तात्॥

(का० त० ५.५८)

१. च. 'प्राक्' नास्ति। २. भो. gZugs (रूप)। ३. च. सम।

तेन कारणेन सत्त्वाशयवशात् तथागतेन धर्मो देशितः—वैभाषिकः सौत्रान्तिको योगाचारो मध्यमकश्चेति। तेषु वैभाषिकमुपपत्त्यङ्गिकसत्त्वप्रकाशकं शास्त्रम्, सूत्रान्तमर्थप्रकाशकं शास्त्रम्, योगाचारं विज्ञानमात्रप्रकाशकं शास्त्रम्, मध्यमकं पारमार्थिकतत्त्वप्रकाशकं शास्त्रं सत्त्वाशयवशादुक्तं भगवता दूरा(र)भव्यासन्नभव्य-
5 चित्तात्। इह सत्त्वा अनादिकाले तीर्थिका देवभूतासुरधर्मरताः सर्वज्ञमार्गनष्टाश्चतुर्वर्णैकवर्णाश्रिताः स्वर्गफलोपभोगाभिलाषिणः कर्त्रात्मवादिनः। तेषां शब्दवादिनो देवप्रेतधर्माश्रिता ईश्वरवादिनश्चात्मवादिनश्च जातिवादिनश्चेति। म्लेच्छाऽसुरधर्माश्रिताः कर्तृवादिनो जीववादिनो जातिवादरहिताः। एषां म्लेच्छानामुभयग्रहः—परमाणुसन्दोहग्रहः, उपपत्त्यङ्गिकपुद्गलग्रहश्चेति। एषामभिप्रायः—यदि परमाणुसंदोहात्मके
10 शरीरेऽन्तर्वर्त्युपपत्त्यङ्गिकपुद्गलो नास्ति, परमाणुसन्दोहात्मके काये विनष्टे सत्यपरकायग्रहणं कः करिष्यति? तस्मादुपपादुकपुद्गलोऽस्ति, तेन साधितेन स्वर्गफलं निर्वाणफलं च भवति। स्वर्गफलादपरं निर्वाणं नाम न स्यादिति तत्त्वपृच्छाकाले तेषां स्वचित्ताभिप्रायमभिज्ञाय तत्त्वविदा भगवतोक्तम्—"अत्थि पुग्गलो भारवाहो ण णिच्चं भणामि णाणिच्चं भणामि" इति। एतदेव सत्यं भगवतो वचनात्। स्वप्नावस्थायां
15 चित्तवासनापुद्गलो नानित्यो न नित्यो वक्तुं शक्यते। अनेन तथागतवचनेन म्लेच्छधर्मं त्यक्त्वा बौद्धा वैभाषिका जाताः। पुनर्लोकोत्तरधर्मं देश्यमानं श्रुत्वा बोधिसत्त्वानामिह पुद्गलग्रहं परित्यज्य केचित् सम्यक्संबुद्धमार्गमाश्रिता इति।

सौत्रान्तिकानां पुनः परमाणुसन्दोहात्मकग्रहोऽस्ति। एषामर्थवादिनामभिप्रायः—यद्याकाशकुहरान्तर्वर्ति सचराचरं वस्तु नास्ति तदा त्रैलोक्यं नाम न स्यात्, संसारा-
20 भावे सुगतिर्दुर्गतिर्न स्यात्, एवं बुद्धबोधिसत्त्वाश्च न स्युः, परमनिर्वाणमपि न स्यात्, भगवतोऽपि धातुसंदर्शनं न स्यात्, द्रव्यान्तर्वर्तिनोऽर्थाभावादिति। एवं तत्त्वपृच्छाकाले तेषां चित्ताभिप्रायं ज्ञात्वा भगवतोक्तम्—अस्ति परमाणुसन्दोहात्मकं चरमशरीरं द्वात्रिंशन्महापुरुषलक्षणैर्युक्तम्, यस्य प्रसादेन सम्यक्सम्बुद्धत्वं महापरिनिर्वाणं भवति, तदेव सत्यम्, भगवतो धातुसंदर्शनात्। एवं परमाणुसन्दोहात्मकशरीरस्य प्रभावं श्रुत्वा
25 जातिवादं शब्दवादमीश्वरवादं कर्तृवादं त्यक्त्वा सौत्रान्तिका बौद्धा बभूवुः [199a], पुनर्बोधिसत्त्वानां लोकोत्तरधर्मदेशनां श्रुत्वा तदेवार्थग्रहं त्यक्त्वा सम्यक्सम्बुद्धमार्गमाश्रिताः केचिद् बभूवुरिति।

योगाचारिणां पुनर्विज्ञानग्रहोऽस्ति, तेषां विज्ञानवादिनामभिप्रायः—विज्ञानमात्रं त्रैधातुकं समस्तम्। षडङ्गाङ्गिकभागतः परमाणुर्नाम न स्यात्। यथा स्वप्नावस्थायां
30 चित्तप्रतिभासमात्रेणार्थेनार्थक्रिया प्रवर्तते परमाणुद्रव्याभावेऽपि, तथा जाग्रदवस्थायामसदर्थेनार्थः प्रतिभासते, तिमिरिकामलोपहतचक्षुषः केशोण्ड्रककनकशङ्खवत्। एवं तेषां
T 447 तत्त्वपृच्छाकाले चित्ताभिप्रायं ज्ञात्वा भगवतोक्तम्—विज्ञानमात्रं त्रैधातुकम्, विज्ञानादन्यो न संसारः, लौकिकविज्ञाननिरोधाद् भवबीजस्यैव निरोधः, ततश्च निर्वाणमिति। एतदेव
35 सत्यम्। अजडात् सुखदुःखप्रादुर्भावो भवति, न जडतः। सुखदुःखं नाम संसारः, तदभावो नाम निर्वाणमिति। एवं भगवतो वचनं श्रुत्वा कर्त्रात्मवादं परित्यज्य योगाचारिणो बौद्धा बभूवुः।

पुनर्बोधिसत्त्वानां लोकोत्तरधर्मदेशनां श्रुत्वा विज्ञानवादं परित्यज्य सम्यक्-सम्बुद्धमार्गमाश्रिताः केचिद्बभूवुः। तथा योगिनीतन्त्रेषु—"महामाया महारौद्रा भूतसंहार-कारिणी" इति। एवं सत्त्वाशयवशाद्भगवतो धर्मदेशना। न सा भगवतः कण्ठतालुक-मूर्धदन्त्यौष्ठजनिता प्रादेशिकशब्देन, कस्मात्? अनन्तानन्तसत्त्वरुतत्वात्। इह प्रादेशिक-वाक्येन युगपदनन्तानन्तसत्त्वानां स्वस्वभाषान्तरेण धर्मदेशना कर्तुं न शक्यतेऽनन्त-कल्पैरपि। तस्मात् सत्त्वाशयाभि[1]प्रायेण भगवतो वाक्यं न भवति। सत्त्वाशयवशाद् भगवानपि सग्रहो भवति, ग्रहग्रहणात् संसारी भवति। तस्मात् सत्त्वानां जन्मान्तर-वासनाबलेन स्वप्नेऽनुत्पन्नशरीरवद् भगवतः शरीरप्रतिभासो वचनप्रतिभासश्च भवति। यथा स्वप्ने शिष्या उपाध्यायं दृष्ट्वा सन्देहार्थं पृच्छन्ति, उपाध्यायोऽपि शिष्याणां सन्देहार्थं निःसन्देहं करोति, तत्र नोपाध्यायः शिष्याणां चित्तवासनाप्रतिभासः। एवं पुण्यवतां सत्त्वानां स्वचित्तप्रतिभासो न भगवानुत्पन्नो न निरुद्ध इति। अनेन कारणेन चतुर्णां बौद्धानां [2]चित्तवासनाबलेन भगवता पुद्गलवादिनामनित्यपुद्गलभावनोक्ता, अर्थवादिनां पृथिव्यादिकृत्स्नभावना, विज्ञानवादिनां विज्ञप्तिमात्रसमाधिः, माध्यमिकानां स्वप्नोपमाक्षराद्वयज्ञानभावना। एवं पुद्गलनैरात्म्यं धर्मनैरात्म्यमिति। वैभाषिक-सौत्रान्तिकयोगाचारिणां सोपधिनिर्वाणम्, माध्यमिकानामुपधिरहितमप्रतिष्ठित-निर्वाणम्, हेतुफलनिरोधात्, सुषुप्तजाग्रदवस्थारहितं स्वप्नतुर्योपममिति। उक्तं भगवता [3]प्रत्यवेक्षणाज्ञानस्तवे [एका]दशमश्लोकेन। तद्यथा—

सर्वोपधिविनिर्मुक्तो व्योमवर्त्मनि सुस्थितः।
महाचिन्तामणिधरः सर्वरत्नोत्तमो विभुः॥ इति।

(ना० सं० ८.११)

अतः पक्षग्रहरहितं निरुपधिशेषनिर्वाणं [199b] सम्यक्सम्बुद्धस्येति।

ननु स्वप्नावस्थायां जडधर्मैर्विनाऽजडप्रतिभासो दृश्यते, चित्तवासनावशेन जाग्रदवस्थायां पुनर्जडधर्मैर्विनाऽजडप्रतिभासो न दृश्यते, दर्पणे प्रतिबिम्बवत्। तस्या-मवस्थायां योगिनो भावनाप्रतिभासोऽपि द्विधा प्रतिभासते—जलचन्द्रवत् सति धर्मिणि धर्माः। तस्यामवस्थायां योगी जडधर्मैर्विना स्वप्नतुल्यानजडधर्माननकल्पितानन्नुत्पन्ना-नशून्यानचित्तानाकाशे पश्यति, एतदेवाप्रसिद्धम्। कस्मात्? सति धर्मिणि धर्मविचारात्। मायोपमास्तथागतेनोक्ताः। न जडधर्मैर्विनाऽजडप्रतिभासः समाधिना दृश्यते, इह केषाञ्चिदभिप्रायो भविष्यति। तस्मादुच्यते—इह हि यद्वक्तव्यं जडचित्तवासनाभि-रतैर्जाग्रदवस्थायां जडधर्मैर्विनाऽजडप्रतिभासो न दृश्यते, तन्न, कस्मात्? प्रतिसेनादर्शे जडधर्मैर्विनाऽजडप्रतिभासदर्शनात्। यथा कुमारी प्रतिसेनादर्शे मन्त्रदेवताऽधिष्ठान-बलेनातीतानागतप्रत्युत्पन्नधर्माणामजडप्रतिभासं पश्यति, न च तेऽतीतवर्तमानानागत-

---

१. भो. bSam Paḥi dBaṅ Gis (अभिप्रायवशेन)। २. भो. 'चित्त'नास्ति।
३. च. कृत्यानुष्ठान।

जडधर्मा आदर्शाभिमुखाः सन्ति, न च ते जडधर्मैर्विनाऽऽदर्शेऽजडप्रतिभासाभावाः, न च ते धर्माः कुमारिकया चिन्तिताः। एवं योगी स्वचित्ताधिष्ठानबलेनाकाशधातौ जडत्रैधातुकं विनाऽजडप्रतिभासं पश्यतीति। उक्तं भगवता साधनापटले[1]ऽष्टनवत्युत्तरशततमेन वृत्तेन—

5 मुद्रा मायानुरूपा मनसि च गगने रूपवद्दर्पणे च
त्रैलोक्यं भासयन्ती तडिद[2]नलनिभानेकरश्मीन् स्फुरन्ती।
बाह्ये देहेष्वभिन्ना विषयविरहिताऽऽभासमात्राऽम्बरस्था
चित्तं चेतोमयाऽऽलिङ्गयति च जगतोऽनेकरूपस्य सैका॥ इति।
(का० त० ४.१९८)

10 अतो भगवतो वचनाज्जडधर्मैर्विनाऽजडधर्मप्रतिभासं योगी पश्यतीति।

ननु कुमारिका प्रतिसेनादर्शे यत्प्रतिभासं पश्यति तदाचार्यप्रसादः, कस्मात्? कुमारिकायामाचार्येण मन्त्रदेवताऽधिष्ठानस्य कृतत्वात्। इह कुमारिकायामाचार्येण मन्त्रदेवताधिष्ठानं कृतम्, तेनाधिष्ठानवशेन कुमारिका प्रतिसेनादर्शे प्रतिभासं पश्यति, न मन्त्रदेवताधिष्ठानरहिता। तस्माद् गुरोराज्ञाप्रसादेन योगी त्रैधातुकं प्रतिभासमात्र-
15 माकाशधातौ पश्यति, इह कस्यचिदाज्ञा[3]बद्धस्याभिप्रायो भविष्यति, तस्मादुच्यते—इह हि यद्वक्तव्यं मूर्खैर्गुरोराज्ञाप्रसादेन कुमारिकायां मन्त्रदेवताधिष्ठानं भवति, तन्न, कस्मात्? आचार्यस्य प्रतिसेनादर्शे प्रतिभासाभावात्। इह यद्याचार्याज्ञाप्रसादेन मन्त्रदेवताधिष्ठानं कुमारिकायां भवति, तदाऽऽचार्यस्यापि तदेवाधिष्ठानं किन्न भवति, येन कुमारिकायामधिष्ठानं कृत्वाऽतीतानागतवर्तमानपरोक्षज्ञानं पृच्छेत्। यदि
T448 20 तस्यैवाधिष्ठानमस्ति तदा प्रतिसेनादर्शे तत्र प्रतिभासं दृष्ट्वा स्वयमेव कथयति, न चैवम्। तस्मादाचार्यप्रसादेन कुमारिकायां मन्त्रदेवताधिष्ठानं वक्तुं न शक्यते, एवं योगिनोऽपीति। [200a] किन्तु कुमारिकायां मन्त्रदेवताधिष्ठानं भवति, तत्कारणमस्ति, येन कारणेन कुमारिकायां द्वीन्द्रियसंघर्षणाच्च्युतिसुखोपलब्धिर्नास्ति तेन कारणेनाधिष्ठानं भवति। लोकेऽपि प्रसिद्धं "कुमारीसुरतं यथा"। तेन कारणेन कुमारी
25 मन्त्रदेवताधिष्ठानबलेन प्रतिसेनादर्शे प्रतिभासं पश्यति, नान्या युवती द्वीन्द्रियसुखोपलब्धेति। कुमारदेवताधिष्ठाने युवा देवताधिष्ठानं युवती युवापि पश्यतीति। एवं योगिनोऽपि परमाक्षरसुखाभ्यासवशाद् बाह्यच्युतिसुखपरित्यागात् कुमारिकावस्थान्तरगता अतीतानागतवर्तमानं पश्यन्ति, स्वचित्ताधिष्ठानबलेन, न गुरोराज्ञाप्रसादेनेति।

30 ननु परमाक्षरसुखाभ्यासं विनाऽब्रह्मचारिणोऽप्यनेके कैवल्यं [4]देशयन्ति, तस्माद् ब्रह्मचर्यं विना मन्त्रदेवताधिष्ठानं भवति। अन्यथा कथं ते कैवल्यं [5]देशयन्ति[इति]

---

१. च. द्विशततमेन। २. भो. Dri Med (अमल)। ३. भो. Chags Pa (आसक्तस्य)। ४-५. च. कथयन्ति।

कस्यचिदभिप्रायो भविष्यति, तस्मादुच्यते—इह हि यदुच्यते बालैरब्रह्मचारिणां मन्त्र-देवताधिष्ठानं भवति, तन्न, कस्मात् ? ज्योतिषाभ्यासवशेनार्थसंदर्शनात्। इह हि यत् कैवल्यं ज्ञानं तदेव ज्योतिषाङ्गं सर्वसत्त्वसाधारणमुपदेशवशाद् गणितवशाज्ज्ञायते नष्टजातकादिकम्, यथाऽन्यैः कर्णपिशाचिका साधिता सा कथयति, अन्यैः क्षेत्रपालाः साधितास्ते कथयन्ति, यत्किञ्चिच्चित्ते स्फुरति तेषाम्। अन्यैर्मातरः साधिता आवेशिताः 5 परकाये प्रविश्य कथयन्ति, अन्यैर्नागराजाः साधितास्ते कालदष्टाः काये प्रविश्य कथयन्ति, अन्यैश्चेटकाः साधितास्ते साधकानां वाक्येन सत्त्वकाये प्रविश्य सत्त्वकायं विडम्बयन्ति, अन्यैर्डाकिनीराक्षसादयः साधितास्ते सत्त्वानां रक्तं पिबन्ति, अन्यैर्भूताः साधितास्ते सत्त्वानां काये प्रविश्य ध्वननकम्पनादिकं कृत्वा गच्छन्ति, अन्यैर्विघ्न-विनायकाः साधितास्ते सत्त्वानां विघ्नानि कुर्वन्ति, अन्यैः सौम्यदेवताः साधितास्ते 10 सत्त्वानां रक्षां कुर्वन्ति, अन्यैः कामदेवताः साधितास्ते सत्त्वानां कामोन्मादं शुक्रच्युतिं कुर्वन्ति, अन्यैरन्या दुष्टदेवताः साधिताः केचित् स्तम्भनं कुर्वन्ति केचिन्मोहनं केचि-दुच्चाटनं केचिद्विद्वेषणं केचिन्मारणं केचिद् वृक्षलिङ्गोत्पाटनं च कुर्वन्ति, एव-मादीन्यनेकानि क्षुद्रोपद्रवकर्माण्यदृष्टरूपेण कुर्वन्ति। यैरमी दुष्टदेवता मारकायिकाः साधितास्ते चैभिः क्षुद्रपरिज्ञानैः सद्यःप्रत्ययकारकैर्मूर्खाणां गुरवो भवन्ति, धर्मदेशनां 15 कुर्वन्ति। ज्ञानं प्रत्ययसारं कामविषनिरञ्जनानाम्, यस्य कामाज्ञा नास्ति निरञ्जन-विपाज्ञा नास्ति निरञ्जन-आणवशाम्भवशाक्तेयप्रत्यक्षपरोक्षवेधाज्ञा नास्ति, स पण्डितोऽपि पशुः। सर्वसत्त्वोपकाररतो भिक्षां भ्रमति, एकाकी विहरत्यसहायः स्वार्थभ्रष्टः। लोकेऽपि प्रसिद्धम्—"स्वार्थभ्रंशो हि मूर्खता"। तस्मादियं पारमैश्वर्याज्ञा भुक्तिमुक्तिफलप्रदा पारम्पर्यक्रमेणागता गुरोः [200b] प्रसादेन लभ्यत इति। उक्तं 20 परमेश्वरेण सर्वज्ञेन वा—

न गुरुः(रोः) सदृशी माता न गुरुः(रोः) सदृशः पिता।
यस्तारयति महाघोरं संसारोदधिदुस्तरम्॥ इति।
यो ददाति गुरुर्दीक्षां शिष्याय शतयोजनैः।
भुक्तिमुक्तिप्रदात्री या सा दीक्षा मोक्षदायिका॥ इति। 25

एवमनेकप्रकारैस्तान्महामूर्खान् महालोभाभिभूतान् क्षुद्रपरिज्ञानेन बोधयित्वा तेषामनुग्रहं करोति, तां चाज्ञां समर्पयेत्, तेऽपि महासन्तुष्टा भवन्ति वयं गुरुप्रसादेन मुक्ताः। इदानीं सर्वं कुर्मः, अशुचि भक्षयामः, अवर्णाभिगमनं कुर्मः, प्राणातिपातं मृषावादमदत्तादानं सुरापानादिकं कुर्मः। एवमनेकप्रकाराणि मारकर्माणीह सिद्ध्यर्थं कुर्वन्ति। न च तेषां पारमैश्वर्याज्ञाप्रसादेन शरीरसिद्धिर्भवति, न चातीतानागतवर्तमानं 30 विदन्ति, अन्ते मरणं गच्छन्ति, शरीरं वह्निना दह्यते, श्वखगादिभिर्वा भुज्यते। न जीवः शिवीभवति, विज्ञानं वज्री वा। एवं सर्वे क्षुद्रमन्त्रदेवताऽधिष्ठानक्रमा माराणां परमाक्षरज्ञानाभिरतैर्योगिभिर्विचारणीयाः। एभिः क्षुद्रमन्त्राधिष्ठानैर्वज्रावेशो न भवति। उक्तं च भगवता **नामसंगीत्यामादर्शज्ञानस्तवे** सप्तमश्लोकेन। तद्यथा—

वज्रज्वालाकरालाक्षो वज्रज्वालाशिरोरुहः ।
वज्रावेशो महावेशः शताक्षो वज्रलोचनः ॥ इति ।
(ना० सं० ७.७)

तथा तन्त्रराजेऽप्यभिषेकपटले [1]एकोननवतितमेन वृत्तेनोक्तं कायावेशादिकम्, तद्यथा—

कायावेशेन योगी [2]प्रकृतिगुणवशात् कायकृत्यं करोति
वागावेशेन वादी त्रिभुवनविजयी देवनागासुराणाम् ।
चित्तावेशेन सर्वं परहृदयगतं ज्ञायते भूतभव्यं
[3]ज्ञानावेशेन बुद्धो [4]भवति गुरुगुरुश्चर्द्धिमानेकशास्ता ॥ इति ।
(का० त० ३.८९)

अतो वज्रावेशाभावात् क्षुद्रदेवतावेशा बुद्धत्वफलदायका न भवन्तीति ।

तिष्ठतु तावद् बुद्धत्वं त्रैलोक्याधिपतित्वं नाम, एभिः प्रादेशिकावेशैः खड्गरस-रसायनादयोऽपि न सिद्धयन्ति, कस्मात् ? पारमैश्वर्याज्ञादायकस्य गुरोः परद्रव्यलुण्ठकत्वात् । इह हि यदि गुरोराज्ञाप्रसादेन महामूर्खाणां त्रैलोक्यराज्यं सर्वज्ञपदं भवतीह जन्मनि, तदा किमर्थं गुरोर्दारिद्र्यदुःखमस्ति, रससिद्धपदमपि नास्ति । एवमनेकप्रकारैर्विचार्यमाणं जन्मान्तरपुण्यज्ञानसंभारद्वयरहितं सर्वज्ञपदं नास्ति, तस्मात् पुण्यज्ञानसंभारार्थं सत्त्वोपकारः कर्तव्यः । उक्तं भगवता पञ्चमपटले [5]षट्षष्टितमेन वृत्तेन—

सत्त्वा बुद्धा न बुद्धस्त्वपर इह महान् विद्यते लोकधातौ
तेषामाराधनेन त्वपरिमितभवश्छिद्यते निर्विकल्पात्
द्रोहं कुर्वन् हि योगी व्रजति हि नरकं रौरवाद्यं महान्तं
तस्माच्चित्ते विशुद्धेऽप्यबुधबुधजनानां विरुद्धं न कुर्यात् ॥ इति ।
(का० त० ५.६६)

अतः सत्त्वोपकारः पुण्यसंभारार्थं कर्तव्यः, ज्ञानसम्भारार्थं परमाक्षरज्ञान[201a]-भावना कर्तव्या । सत्त्वार्थं विना पुण्यसम्भारो न भवति, परमाक्षरज्ञानभावनया विना ज्ञानसम्भारश्चेति तथागतहृदयम् । उक्तं भगवता तन्त्रराजे पञ्चमपटले द्वासप्ततितमेन वृत्तेन । तद्यथा—

सत्त्वानां पापचित्तं भवति नरपतेऽधिष्ठितं मारकायैः
पुण्यज्ञानानुरक्तं सुखद[6]मपि सदाधिष्ठितं बोधिसत्त्वैः ।

---

१. च. अष्टाशीति । २. च. त्रिभुवननिलये । ३. च. वज्रा । ४. च. त्रिदशनर । ५. च. षष्टि । ६. च. मिति ।

निर्वाणं यान्ति यस्मात् सुख[1]समयवशात् क्लेशमारान्निहत्य
तस्मात् कुर्वन्ति माराः प्रतिदिनसमये नैकविघ्नानि तेषाम् ॥ इति ।
(का० त० ५.७२)

अतो भगवतो वचनाद् योगिना परमाक्षरमहामुद्रायोगेन स्वचित्तसाधनं कर्तव्यं मोक्षार्थम्, अन्यथा गुर्वाज्ञया मोक्षो न भवति । कस्मात् ? भगवतो मार्गोपदेशकत्वात् । 5

[2]आज्ञासंचारिणो धर्माः प्राणिनां मोक्षदाः क्वचित् ।
मार्गोपदेशको येन [3]आज्ञया मोक्षदो जिनः ।
गुरोराज्ञाप्रसादेन मुक्तिः स्याद्यदि देहिनाम् ।
तदा कारुणिको मोक्षं देशयेन्न समाधिना ॥

तस्मान्मोक्षार्थं बाह्यदेवतामन्त्रसाधनं न लौकिकसिद्धिसाधनार्थं योगिना कर्तव्यम् । 10
इह बाह्यदेवताः क्षुद्रोपद्रवकारिणः साधिता अपि साधकस्य छिद्रान्वेषिणः, तेषां बलेन साधकोऽन्येषां प्रचण्डदेवतानां क्षुद्रोपद्रवं करोति, तैर्गृहीतस्य साधकस्य ते साधिता दुष्ट-देवताः शत्रवो भवन्ति, मृत्युकाले न किञ्चित् कथयन्ति । साधकोऽप्यसमाधिना मृतो नरकं याति । अथ ते साधिताः किं दास्यन्ति दरिद्रनरा इव । साधिता ब्रुवन्ति—हे साधक ! तव नियमं सर्वं कुर्मः । यदि साधको ब्रूते युष्माभी राजा बन्धयित्वाऽत्रानीय- 15
ताम्, तदा परिहारं कुर्वन्ति—अत्र विषये वयं न शक्ताः । एवं क्षुद्रदेवताः साधिताः सन्तः सर्वज्ञविषये परिहारं कुर्वन्ति । तस्मात् सर्वज्ञपदाभिलाषिणां दुष्टदेवतासाधनेन किं प्रयोजनम्, गुर्वाज्ञया च [4]संसारधर्मस्वरूपिण्या । उक्तं भगवता मूलतन्त्रे—

शिवतत्त्वं कामतत्त्वं विषतत्त्वं यथाऽऽज्ञया
सञ्चारि(र)णं भवेत् पुंसां बुद्धतत्त्वं तथा न च ॥ 20

रागादिमलिनं चित्तं क्षरं संसारकारणम् ।
विशुद्धं तद्वियोगेन शुद्धं प्रकृतिनिर्मलम् ॥

नापनेयमतः किञ्चित् क्षेप्तव्यं किञ्चिदाज्ञया ।
न दातव्यं न हर्तव्यं शुद्धतत्त्वं महाक्षरम् ॥

दाता हर्ता गुरुर्नास्ति शुद्धतत्त्वस्य सर्वतः । 25
पुण्यसम्भारहीनानां सर्वज्ञोऽपि प्रभुः स्वयम् ॥

परोपकारतः पुंसां पुण्यसम्भार उत्तमः ।
उत्तमाज्ज्ञानसंभारस्ताभ्यां बुद्धत्वमुत्तमम् ॥

शिवतत्त्वे कामतत्त्वे विषतत्त्वे त्रिधा भवेत् ।
वेधो गुर्वाज्ञया पुंसां परमाक्षरसुखं न च ॥ 30

१. च. परमसुखवशात् । २. च. राज्ञा । ३. च. राज्ञया । ४. च. सञ्चार ।

आणवः शाम्भवो वेधः शाक्तेयश्चाज्ञया भवेत् ।
चित्तवाक्कायवेधेन निद्रास्वप्नजाग्रतः ॥

शिवतत्त्वमिति ख्यातं मूर्खाणामाज्ञया गुरोः ।
चित्तवाक्कायसंक्षोभश्च्युतिः शुक्रस्य देहिनाम् ॥

5 गुरोराज्ञाप्रसादेन कामतत्त्वमिति स्मृतम् ।
विषं निर्विषमित्याहुर्न विषं विषमेव च ॥

स्थावरं जङ्गमं कृत्यं गुरोराज्ञाप्रसादतः ।
विषतत्त्वमिति ख्या[201b]तं सद्यःप्रत्ययकारकम् ॥

त्रितत्त्वं नाक्षरं सौख्यं संभवेत् सर्वदेहिनाम् ।
10 गुरोराज्ञाप्रसादेन तस्मात् तद्भावयेद् व्रती ॥

अतो भगवतो वचनात् परमाक्षरज्ञानमहामुद्राभावना कर्तव्या मोक्षार्थिनेति ।

ननु यद्यच्युतशीलेन विना पञ्चाभिज्ञा न भवन्ति, तदा धर्मोद्गतादिबोधिसत्त्वानां वशिष्ठादिमहर्षीणां कथं पञ्चाभिज्ञा स्युरिति केषाञ्चिदभिप्रायो भविष्यति, तस्मादुच्यते— इह हि यद्वक्तव्यं बालजनैर्बोधिसत्त्वानां[१] ब्रह्मचर्यं नास्ति, तन्न, कस्मात्? द्विधा
15 बोधिचित्तच्यवनात् । इह सत्त्वानां बोधिचित्तच्यवनं द्विधा—एकं शुभाशुभकर्मवशात्, द्वितीयं चित्तवशितावशात् । तत्र यत् कर्मवशाच्च्यवनं तत् संसारभ्रमणार्थम्, यच्चित्तवशिता[वशा]च्च्यवनं तत्संसारचक्रे कर्मभ्रामितानां मार्गदर्शनार्थम् । यथा विन्ध्याटव्यां प्रपतितानां नष्टमार्गाणां मार्गदर्शकेन विना मार्गदर्श(गम)नं न स्यात्, तथा संसारे प्रपतितानां मार्गदर्शकेन विना मार्गगमनं न स्यात् । यदि मार्गदर्शकेन सह [२]दर्शनं नास्ति
20 तथापि मार्गाभावः । अथ मार्गदर्शकः प्राग्विशुद्धमार्गेण नागतस्तथापि मार्गाभावः । अथ मार्गनष्टानां भाषां न जानाति तथापि मार्गाभावः । एषां नष्टमार्गाणां सन्त्रासं दृष्ट्वा नानष्टमार्गस्य सन्त्रासो भवति । एवं बोधिसत्त्वानां सत्त्वोपकारार्थं संसारे प्रवेशः, न कर्मविपाकतः । यदि बोधिसत्त्वानां दशभूमीश्वराणां दशपारमितानिर्यातानां दशवशिताप्राप्तानां कर्मविपाकेन संसारभ्रमणं तदा सत्त्वानां मोक्षो नास्ति । नाज्ञातमार्गेणा-
25 ज्ञातमार्गाणां मार्गोपदेशः कथ्यते, यथान्धेनान्धस्य । तस्माद्बोधिसत्त्वानां जन्मग्रहणं
T 450 सत्त्वार्थम् । उक्तं [३]यामकायिकैर्मम लोकनाथस्य सत्त्वार्थं प्रति नरकप्रवेशकाले—

ये मुक्ता भवबन्धनैरपि भवं गृह्णन्ति सत्त्वार्थिनः
कालात् कर्मफलं त्यजन्ति नहि तच्छून्यार्थसंदेशकाः ।
संज्ञानानलदग्धचित्तकलुषाः सम्यक् कृपार्द्राः सदा
30 तान् सत्त्वार्थरतानतर्क्यचरितान् बुद्धान् नमामो वयम् ॥ इति ।

---

१. भो. Sems Pa Chen Po rNams (महासत्त्वानां) इत्यधिकम् । २. भो. Yaṅ Dag Par mThoṅ Ba (संदर्शनं) । ३. भो. bDud Kyi Ris (मारकायिकैः) ।

एवमनेकगुणवतां दग्धक्लेशावरणानां सत्त्वार्थक्रियात्मकं लवमात्रं क्लेशावरणं जन्मग्रहणार्थम्, अन्यथा सत्त्वानां मार्गदेशना न स्यात्। मार्गेण विनाऽनादिसंसारात् सत्त्वानां निर्गमो न भवति, बोधिसत्त्वसंसर्गाभावादिति। इह बोधिसत्त्वैः प्राग्बोधिचित्तं सुदृढीकृतम्। अस्य बोधिचित्तस्य द्विधा बन्धः—प्रज्ञाविरागेण, प्रज्ञारागेण च। यथा सूतकबन्ध एकः स्वेदसंन्यासयोगेन, द्वितीयो लोहादिजारणाग्निविडसंयोगेन। तयोर्यः स्वेदसंन्याश(स)योगेन बद्धः सूतः, स तीव्राग्निना ध्मातः किञ्चित्तिष्ठति, [1]किञ्चित् प्रपलायति। यः सर्वलोहरत्नजारणात्तीव्राग्निना बद्धः, स कदाचित्तीव्राग्निना ध्मातः सन्न प्रपला[य]ति, तस्यैव ग्रासजारणान्तरवशेना[202a]वस्थान्तरं भवति। तद्यथा—

धूमश्चिटिचिटिश्चैव मण्डूकप्लुतिरेव च।
कम्पो निष्कम्पता चैव पञ्चावस्था रसस्य तु॥

तथा भावनाभ्यासवशेन बोधिचित्तस्यावस्थान्तरं भवति, मृदुमध्याधिमात्राधिमात्राधिमात्रप्रभेदतः। यः स्वेदसंन्यासयोगेन बन्धः स बोधिचित्तस्य बन्धः, तदनित्यपुद्गलभावनाबलेन पृथिव्यादिकृत्स्नसाक्षात्करणेन प्रज्ञाविरागेणेति। यथा स्वेदसंन्यासयोगेऽपि रसस्य लोहग्रासभक्षणं कालान्तरवशादस्ति, ग्रासभक्षणेनावस्थान्तरं भवति, तथाऽनित्यपुद्गलभावनया पृथिव्यादिकृत्स्नभावनया जडस्कन्धधात्वायतनक्षयादवस्थान्तरं भवति। अवस्थान्तरं नाम भूमिलाभः। अत्र द्विधा भूमिः—वीतरागभूमिः, सम्यक्सम्बुद्धभूमिरिति। भूमिवशाद् ऋद्धिरेकाकारऋद्धिः सर्वाकारऋद्धिश्च[2]। एवं पञ्चाभिज्ञाः षडभिज्ञाश्च। तथा अर्थसंख्यादर्शनं सर्वार्थसंख्यादर्शनं [3]च। तथा भाषा सत्त्वसंख्यात्मिका सर्वसत्त्वसंख्यात्मिका च[4]। तथा धर्मदेशना सत्त्वसंख्यालक्षणा सर्वसत्त्वसंख्यारुतलक्षणा [5]च। तथा निर्वाणं सोपधिशेषं निरुपधिशेषमिति। तथा पुद्गलनैरात्म्यं धर्मनैरात्म्यम्। तथा चतुरार्यसत्यभावना सर्वधर्माभावस्वभावशून्यतासमाधिरिति। एवं भूमिविशेषाद् द्विधा सत्त्वार्थक्रिया भवति। इह प्रथमभूमिलाभादेकलोकधातुपर्यन्तमदृष्टार्थसंदर्शनम्, द्वितीयभूमिलाभाद् दशदिग्द्वितीयलोकधातुपर्यन्तम्, तृतीयभूमिलाभाद् दशदिक्चतुर्थलोकधातुपर्यन्तम्, चतुर्थभूमिलाभाद्दशदिगष्टलोकधातुर्यन्तम्, पञ्चमीभूमिलाभाद्दशदिक्षोडशलोकधातुपर्यन्तम्, षष्ठीभूमिलाभाद् दशदिग्द्वात्रिंशल्लोकधातुपर्यन्तम्, सप्तमीभूमिलाभाद्दशदिक्चतुःषष्टिलोकधातुपर्यन्तम्, अष्टमीभूमिलाभाद्दशदिगष्टाविंशदधिकशतलोकधातुपर्यन्तम्, नवमीभूमिलाभाद्दशदिक्षट्पञ्चाशदधिकशतद्वयलोकधातुपर्यन्तम्, दशमीभूमिलाभाद्दशदिग्द्वादशाधिकपञ्चशतलोकधातुपर्यन्तम्, एकादशभूमिलाभाद्दशदिक्चतुर्विंशत्यधिकसहस्रलोकधातुपर्यन्तं परोक्षार्थसंदर्शनमिति। एवं द्विसाहस्रत्रिसाहस्रलोकधातवः संख्यालक्षणाः। एकसाहस्रं नाम सहालोकधातुर्मध्यत ऊर्ध्वाध एकैकं सहस्रम्, अध ऊर्ध्वे पूर्वापरं वामदक्षिणं नैर्ऋत्येशानं वायव्याग्नेयमिति। एवं द्वित्रिसाहस्रमिति। ततो महासाहस्रं नाम महासंख्येयलोक-

१. भो. 'किञ्चित्' नास्ति। २. ३. ४. ५. च. 'च' नास्ति।

धातवः। तेष्वदृष्टार्थसंदर्शनं द्वादशभूमिलाभात् सम्यक्संबुद्धस्य भवति, न वीतरागाणाम्। एषां तथागतभूमीनां लाभो महाक्षरसुखक्षणैः प्रज्ञारागोद्भवैः। प्रथमो भूमिलाभोऽष्टादशशतैरच्युतलक्षणैर्लब्धः। अनया संख्यया द्वादशभूमिपर्यन्तं षट्शताधिकैकविंश[202b]त्सहस्रैरक्षरक्षणैर्द्वादशभूमिलाभः, द्वादशाङ्गनिरोधं यावत्। द्वादशलग्ननिरोधाद् द्वादशराशिनिरोधः, द्वादशमासनिरोधात् षष्ट्युत्तरशतत्रयदिनानां निरोधः, षष्ट्युत्तरशतत्रयदिननिरोधात् षट्शताधिकैकविंशत्सहस्रघटिकानिरोधः। एवं यथा बाह्ये तथा शरीरे घटिकासंख्याश्वासानां निरोधः, श्वासनिरोधात् कायनिरोधो बोधिचित्ताक्षरक्षणैरिति। यथा सूतको जारितो लोहरत्नानि भक्षयित्वा तेषां महारागं गृहीत्वा तिष्ठति, न जडधातुत्वम्। तेन महारागेण येषु लोहेषु स्पर्शं करोति तानि लोहानि कालिकारहितानि भवन्ति, पाषाणा रत्नानि भवन्ति, तथा बोधिचित्तं भावितं स्कन्धधात्वायतनानि सप्राणानि भक्षयित्वा तेषां महारागं गृहीत्वा तिष्ठति, न जडत्वम्। तेन रागेण पुण्यवशाद् येषु सत्त्वेष्वधिष्ठानं करोति तेष्वभिज्ञा भवति, न सम्यक्संबुद्धत्वम्, यथा रसविद्धानां लोहानां कालिकाभावो न जडधातुत्वाभावः। जडधातुत्वाभावस्तदा भविष्यति यदा जारितानां लोहानां रसेन सहैकत्वं भविष्यति। अतः परस्परसंयोगाद् धातूनां धातुत्वं नास्ति, सूतकस्य सूतत्वं नास्ति, पूर्वस्वभावपरित्यागात्। एवं कायधातूनां चित्तेन सहैकीभूतानां धातुत्वं नास्ति, चित्तस्य चित्तत्वं नास्ति, प्राक्संसारवासनाभावात्। अत उक्तं भगवता—"अस्ति तच्चित्तं यच्चित्तमचित्तम्" (अ॰ स॰, पृ॰ ३) इति। एवमनेनोक्तक्रमेणाष्टभूमीश्वराणामीश्वरादिदेवानां पञ्चाभिज्ञा वेदितव्या बोधिसत्त्वानामपि। ऋषीणां वशिष्ठादीनां पुनः पञ्चाभिज्ञा नास्ति, कस्मात्? रामायणभारतप्रामाण्यात्। इह रामायणे श्रूयते वाल्मीकवाक्ये वशिष्ठदत्ते लग्ने रामदेवेन सीतापाणिग्रहणं कृतम्। तेन वशिष्ठदत्तलग्नप्रसादेन रामो राज्यभ्रष्टो वनं प्रविष्टः, सीतापि सदा दुःखवती। तथाऽप्युक्तम्—

पूर्वकर्मफलं भोग्यं ग्रहनक्षत्रे निरर्थके।
वशिष्ठदत्तलग्नेन जानकी दुःखभाजनम्॥ इति।

तथा भारते व्यासवाक्ये श्रूयते कौरवपाण्डवानां येऽमावस्यायां कुरुक्षेत्रे प्रवेशं करिष्यन्ति ते विजयिनो भविष्यन्ति, एतद्वचनं श्रुत्वा पाण्डवास्त्रयोदश्यां प्रविष्टाः, कौरवा अमावस्यायां प्रविष्टाः। तेषु ये त्रयोदश्यां प्रविष्टास्ते विजयिनो जाताः, येऽमावस्यायां प्रविष्टास्ते मरणमुपगताः। अथ दुष्टर्षीणां वाक्यमिह ब्राह्मणवाक्येन त्रयोदश्याममावासी जाता, चन्द्रसूर्यैकयोगादिति। तदेव न घटयति, कस्मात्? चन्द्रस्य पञ्चदशकलाक्षयाभावात्। इह त्रयोदश्यां चन्द्रस्य पञ्चदशकलाक्षयो न भवति। येन वारेण येन नक्षत्रेण त्रयोदशी जाता, तेन वारेण तेन नक्षत्रेण नामावासी कुत्रचिद् भवेदिति। अतः कारणात् तेषां ज्योतिषाभिमतं न पञ्चाभिज्ञाभिरर्थसंदर्शनम्। तथा पुराणधर्मा मिथ्यापापमतीनाम्। तद्यथोक्तम्—

"क्षीर[203a]समुद्रमथने वलिराजकाले, उच्चैःश्रवैरावण(त)कौस्तुभपारिजातकाप्सरोलक्ष्मीचन्द्रामृतकालकूटानि विनिर्गतानि" इति किल पुराणधर्म-

वाक्यम् । यद्येवं तदा अन्धकस्यैव राज्ये तिथिर्वारो मासं नक्षत्रमृतुर्न स्यात्, चन्द्रादित्योदयास्तमनाभावात् । समुद्रे स्थितस्य चन्द्रस्य नक्षत्रभोगाभावात् प्रतिपदादिकलाग्रहणं न स्यात्, आदित्यस्याप्युदयास्तङ्गमनं मङ्गलादिग्रहाणां सप्तवारपरिभोगश्च न स्यात् । एवं हि हिरण्यकश्यपस्य राज्ये वाराद्यभावः । तत्र कुले कालवशाद् बलिर्जातः । ततः समुद्रो मथितो देवासुरैरिति । अथ नायं चन्द्रः, स ईश्वरमौलिचन्द्रः, तदेव वचनं न घटयति, तस्यैवेन्दोरभिलाषादन्धको मरणमुपगतः । कालकूटं विनिर्गतं तदेवासत्यम्, प्रागीश्वरो नीलकण्ठो न, बलिराजकाले कालकूटविष-भक्षणात् । तथा ऐरावणो(तो)च्चैःश्रवालक्ष्मीकौस्तुभामृतानि विनिर्गतानि, तदेवासत्यम्, येनान्धकयुद्धे सर्वे देवाः स्वस्वचिह्नाः स्वस्ववाहनस्था इति । अथ दुष्टर्षीणां वाक्यं दुर्वाससः शापेनेन्द्रस्यर्द्धिः समुद्रं प्रविष्टा, तदेवासत्यम्, नेन्द्रस्य शापेनान्यदेवानामृद्धि-हानिरिति । एवमुक्तक्रमेण पुराणधर्माः सर्वे वृथाः स्युः । उक्तं भगवता पञ्चमपटले द्व्यशीत्यधिकशततमेन वृत्तेन पुराणधर्मा वृथा इति । तद्यथा—

> लक्ष्मीरुच्चैःश्रवाश्वः सुरतरुगजपत्यप्सरःकौस्तुभेन्दु-
> पीयूषाण्यब्धिमथने यदि दिवि गगने स्युर्बले राज्यकाले ।
> चन्द्राभावे न वारस्तिथय ऋतुगणश्चान्धकस्यैव राज्ये
> सोऽपीशार्धेन्दुलोभान्मरणमुपगतस्तस्य पश्चाद्बलिः सः ॥

इत्यनया युक्त्या विचार्यमाणानि लोकपुराणान्यनृतानीति ।

अथ ब्रह्मर्षीणां दुष्टवचनम्—इह प्राग्वेदधर्मः सहजः, पश्चात् सर्वज्ञदेशितो धर्मः कृतकः । तस्माद् वेदधर्मो ज्येष्ठ इति । तदेवोच्यते—भवतु वेदधर्मो ज्येष्ठः, पश्चात् सर्वज्ञधर्मः । अत्र को विरोधः ? प्राङ्महान्धकारः सहजः [1]सर्वज्ञमार्गाप्रकाशकः, पश्चात् तस्य विध्वंसनार्थं सहस्रकिरणालोकः सर्वमार्गप्रकाशकोऽभूत् । अनयोर्महान्धकारा-लोकयोर्नान्धकारः सहजो ज्येष्ठः, सचक्षुषां न[2] प्रियः । एवं प्राग्वेदधर्मः सहजो ज्येष्ठो निर्वाणमार्गाप्रकाशकः, पश्चात् तस्य विध्वंसनार्थं सर्वज्ञधर्मः कनिष्ठो निर्वाणमार्गप्रकाशकोऽभूत् । अनयोर्वेदधर्मसर्वज्ञधर्मयोर्न वेदधर्मः सहजो ज्येष्ठो ज्ञानिनां प्रियः, सचक्षुषां महान्धकारवत् । अतो ज्येष्ठकनिष्ठयोः कनिष्ठः श्रेय इति । तस्मात् परमाक्षरज्ञानसाधनेन निर्वाणं भवति, न च्युतिवासना वेदधर्मैरिति ।

एवं मत्स्यादिपुराणमपि कल्किपर्यन्तं विचार्यमाणं निरर्थकम् । अयं बुद्धो भगवान् वासुदेवो नवमोऽवतारः, कल्की दशमश्चेति । [203b] बुद्धः कलियुगे महा-मायाच्छलेन यज्ञधर्मं दूषयिष्यति, संग्रामधर्मं पितृकार्यं जातिवादं प्राणातिपातं मृषा-वादमदत्तादानं काममिथ्याचारं पारुष्यं पैशुन्यं संभिन्नप्रलापमभिध्यां व्यापादं मिथ्यादृष्टिं सर्वसत्त्वापकारं स्वगोत्रक्षयं क्षत्रधर्मं स्वर्गफलदायकं व्यासमहर्षिवचनं भारतं गीतावचनं वेदवचनं दूषयिष्यति । ततस्तान् दूषयित्वा शूद्रादीनां विपरीतधर्मं देशयि-

१. भो. Lam Thams Cad (सर्वमार्ग) । २. च. 'न' नास्ति ।

ष्यति । तद्यथा—दानपारमिता शीलपारमिता क्षान्तिपारमिता वीर्यपारमिता ध्यानपारमिता प्रज्ञापारमिता उपायपारमिता प्रणिधिपारमिता बलपारमिता ज्ञानपारमिता एता दशपारमिता बोधिसत्त्वैः परिपूरणीयाः । सर्वसत्त्वेषु मैत्रीचित्तं कर्तव्यम्, करुणाचित्तं कर्तव्यम्, सर्वसत्त्वोपकारः कर्तव्यः, प्राणातिपात-मृषावाद-अदत्तादानकाममिथ्याचार-रूक्षपैशुन्यसंभिन्नप्रलापाभिध्याव्यापादमिथ्यादृष्टिदशाकुशलाः कर्मपथा न कर्तव्याः, एभिर्विपरीतधर्मपर्यायैः शूद्रादीन् बोधयित्वा मुण्डयित्वा काषायधारिणो भिक्षून् करिष्यति । ये प्राग्दानवपक्षे व्यवस्थिता वासुदेवेन संग्रामे न हताः, येन ब्राह्मणानां दूषणं कृत्वा नरकं गच्छन्ति, तेनेयं बुद्धमाया विष्णुना कृता, शूद्रादीनां प्राग्दानवपक्षे स्थितानां नरकगमनार्थम् । एवं बुद्धावतार इति । T 452

कल्की पुनः संभलविषये यशोब्राह्मणस्य पुत्रो भूत्वा वासुदेवः शैलाश्वमारुह्य दर्भमयैः शल्लैः सर्वम्लेच्छान्मारयित्वा बहुसुवर्णमेधयागं कृत्वा पुनर्ब्राह्मणमयीं पृथ्वीं करिष्यति । एवमनेकवाक्यान्यघटितानि दुष्टविप्रैर्बुद्धोत्पादकाले रचितानि, प्राग्वेदपाठे न सन्ति । इहादिबुद्धदेशनाकाले तथागतेनोक्तं लोकधातुपटले (१.२६) ज्योतिषप्रस्तावे म्लेच्छधर्मे जाते सति सिद्धा[न्ता]नां विनाशो भविष्यति, पृथिव्यां लघुकरणानि भविष्यन्ति, मञ्जुघोषोऽपि मयि निर्वृते षड्वर्षशतैः संभलविषये शाक्यकुले सुरेशानस्य पुत्रो [1]विजयादेवीगर्भे यशोनाम कल्की भविष्यति । तद्यथा—

आद्याब्दात् षट्शताब्दैः प्रकटयशनृपः सम्भलाख्ये भविष्यत्
तस्मान्नागैः शताब्दैः खलु मखविषये म्लेच्छधर्मप्रवृत्तिः ।
तस्मिन् काले धरण्यां स्फुटलघुकरणं मानवैर्वेदितव्यं
सिद्धान्तानां विनाशः सकलभुवितले कालयोगाद् भविष्यत् ॥ इति ।

(का० त० १.२६)

मञ्जुघोषो व्याकृतस्तथागतेन । स च सार्धं त्रिकोटीनां ब्रह्मर्षीणां सूर्यरथप्रमुखानां वज्रयानाभिप्रायेणैकवर्णं करिष्यति । तेन कल्की नाम मञ्जुघोषस्य भविष्यति, न ब्रह्मजातिस्थापनेन । यदि यशोब्राह्मणस्य पुत्रः कल्की तदा केनात्रासौ कल्की, धनेन विना धनी । कल्को नाम वर्णावर्णानामेकीकरणम्, स कल्कोऽ[2]स्यास्तीति कल्की, न कल्केन विना, स एव कल्की । पुन[3]र्युगावसाने म्लेच्छानामत्यन्ताधर्मं दृष्ट्वा शैलवन्निष्कम्पो भूत्वा परमाश्वसमाधिनाऽनन्तान् परमाश्वान् स्फारयित्वा तैर्म्लेच्छानां चित्तानि द्रावयित्वा स्वधर्मे स्थापयिष्यति । तेषां धर्मोत्पाटनं करिष्यति, न प्राणत्यागम् । उक्तं भगवताऽध्यात्मपटलेऽष्टचत्वारिंश[204a]त्तमेन वृत्तेन—

१. भो. Lha Mo sNa Tshogs Yum Gyi mÑal Nas (माता विश्वदेवीगर्भे) ।
२. भो. Gaṅ La Yod Pa (यस्यास्ति) । ३. भो. Dus bŜi (चतुर्युगा) ।

चक्री वज्री स्वदेहे सुरवरपतयो द्वादशाङ्गा निरुद्धाः
सम्यग्ज्ञानं हि कल्की गजतुरगरथा किङ्करार्याप्रमाणाः।
प्रत्येकं रुद्रसंज्ञां प्रभवति हनुमान् श्रावकं प्राणिनां च
पापं म्लेच्छेन्द्रदुष्टं स्वकुशलपथि यत् कृन्मतिर्दुःखदाता ॥
(का० त० २.४८) 5

इत्यादि म्लेच्छयुद्धं तथागतेन व्याकृतम्, यत् प्रथमपटले (१.१६१) उक्तम्—शैलाश्वैः कल्की म्लेच्छान् हरिष्यति, तत्तेषां दुष्टर्षीणां चित्तापकर्षणार्थम्, अन्यथा प्रथमं संदेहचित्ते जाते सति बोधयितुं न शक्यन्ते। तस्मादुक्तं भगवता बोधिसत्त्वेनोपायकौशलेन भवितव्यमिति। अतः पुराणधर्मा निरर्थका विचार्यमाणा इति। अथ दुष्टर्षीणां वाक्यम्— 10

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सया(कम्)।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥
मानवं व्यासवाशिष्ठं वचनं वेदसंयुतम्।
अप्रमाणं हि यो ब्रूयात् स भवेद् ब्रह्मघातकः ॥ इति।

एतदेव बालानां व्यामोहजनकं दुष्टर्षीणां मिथ्यावाक्यं विचारशून्यं स्वजातिप्रतिष्ठापनार्थमिति । 15

ननु यदि सत्त्वानां रागच्युतिवासनाऽनादिस्तस्याः प्रभावेण संसारः, तदा किमर्थं भगवता द्वादशाङ्गप्रतीत्यसमुत्पादो देशितः, क्लेशकर्मदुःखेषु यथाक्रमेणाविद्यादीन्यङ्गानि त्रिपु संगृहीतानि। ततः क्लेशात् कर्म भवति, कर्मणो दुःखं भवति, दुःखात् पुनः क्लेशो भवति। एतदेव भवचक्रं हेतुः फलं च सर्वं जगत्। अन्यो नास्ति कश्चित् सत्त्वः। शून्येभ्यो धर्मा भवन्ति, धर्मेभ्यः शून्याश्च भवन्ति। स्वाध्यायादिभिर्दृष्टान्तैस्ते ज्ञातव्याः। तस्माच्च्युतिवासनेयं संसारचक्रं न भवति, इह कस्यचिदभिप्रायो भविष्यति, तस्मादुच्यते—इह हि यदुच्यते बालैरविद्यादिद्वादशाङ्गं प्रतीत्यसमुत्पादः क्लेशकर्मदुःखात्मकः, तदेव संसारचक्रम्, तन्न, कस्मात्? भगवतः परमाक्षरविद्याधरत्वात्। इह हि भगवान् वज्रसत्त्वः परमाक्षर[1]महाविद्याधरः संसारवासनातिक्रान्तः, तद्वैधर्म्येण संसारिणः क्षरविद्याधराः संसारवासनाग्रस्ताः। तस्मात् परमाक्षरो महारागो विद्या, अविद्या इहानादिरागवासनासत्त्वानाम्, तया रागप्रवृत्तिः, रागोऽपि क्षरः, क्षराद्विरागः। विरागो नाम द्वेषः, द्वेषात्मिका मूर्च्छा, मूर्च्छा नाम मोहः। एवं रागद्वेषमोहात्मिका अविद्या नाकाशपुष्पमाला। अविद्यानाम क्लेशः अविद्यायाः संस्कारः कर्म, संस्काराद्विज्ञानं दुःखमिति प्रथममृदुमात्रा कायवाक्चित्तमिति। ततो विज्ञानान्नामरूपं क्लेशः, नामरूपात् षडायतनं कर्म, षडायतनात् स्पर्शो दुःखमिति द्वितीया मध्यमात्रा कायवाक्चित्तम्। ततः [2]स्पर्शाद् वेदना क्लेशः, वेदनायास्तृष्णा

20

25

30

१. भो. 'महा' नास्ति। २. च. 'स्पर्शात्' नास्ति।

कर्म, तृष्णाया उपादानं दुःखमिति तृतीयाधिमात्रा कायवाक्चित्तम्। तत उपादानाद्भवः क्लेशः, भवाज्जातिः कर्म, जातेर्जरामरणं दुःखमिति चतुर्थी अधिमात्राधिमात्रा कायवाक्चित्तम्। एवं कायवाक्चित्तज्ञानात्मिकाश्चतस्रो मात्रा मकरादिषु त्रिषु त्रिषु लग्नेषु गर्भद्वारबाह्यभेदेषु। तत्र नराणां गर्भाधान[204b]मासो मकरोऽविद्यागर्भः, 5 द्वितीयो मासः कुम्भः संस्कारो द्वारम्, तृतीयो मासो मीनो विज्ञानं बाह्य इति त्रिमासात्मिका मृदुमात्रागर्भजानाम्। ततश्चतुर्थो मेषो नामरूपं गर्भः, पञ्चमो वृषभः षडायतनं द्वारम्, षष्ठो मिथुनः स्पर्शो बाह्य इति त्रिमासात्मिका मध्यमात्रा। ततः सप्तमो मासः कर्कटको वेदनागर्भः, अष्टमः सिंहस्तृष्णाद्वारः, नवमः कन्या उपादानं T 453 बाह्य इति त्रिमासात्मिका तृतीयाधिमात्रा। ततो दशमो मासस्तुलाभवो गर्भः, 10 एकादशमो वृश्चिको जातिर्द्वारम्, द्वादशमो धनुर्जरामरणं बाह्य इति त्रिमासात्मिका अधिमात्राधिमात्रा। एवं कायवाक्चित्तज्ञानभेदेन ज्ञानस्य प्रथममृदुमात्रा कायस्य सा चतुर्थी वेदितव्या। उक्तं भगवता तन्त्रराजे ज्ञानपटले पञ्चमे सप्तत्यधिकशततमेन वृत्तेन[1]—

> कर्मक्लेशाच्च दुःखं प्रभवति च ततः क्लेश एव स्वदुःखा-
> 15 देतत्संसारचक्रं भ्रमति फलसमो हेतुरन्यो न सत्त्वः।
> शून्येभ्यः स्कन्धधर्माः पुनरिह मरणान्ते च तेभ्यश्च शून्या
> ज्ञेयाः स्वाध्यायदीपोदककुसुमरवैः सूर्यकान्ताम्लबीजैः॥ इति।

एभिः स्वाध्यायादिभिर्दृष्टान्तैः स्कन्धानामुत्पादनिरोधो वेदितव्यः। यथा स्वाध्यायेनोपाध्यायस्य विद्याक्षयः, नाप्राप्तिः शिष्यस्य। एवं प्रदीपात् प्रदीपनिर्गमः। 20 उदकेऽपि च चन्द्राच्चन्द्रः। पुष्पाद् वस्त्रे गन्धः। सूर्यात् सूर्यकान्तेऽग्निः, रवात् प्रतिरवः। अम्लाज्जिह्वास्रावः। बीजादङ्कुरः। तथा स्कन्धानामभिसन्धिः क्षररागवासनावशात्। अतो भगवतो वचनात् संसारचक्रं क्षररागोऽविद्येति। इह यदा क्षररागो नष्टस्तदा परमाक्षरो भवति। परमाक्षरो महारागः। महारागाद्विरागो नष्टः। विरागो नाम द्वेषः। द्वेषक्षयान्महाद्वेषो भवति। महाद्वेषाद् मूर्च्छानाम मोहो नष्टः। 25 मोहक्षयान्महामोहो भवति। महाराग-महाद्वेष-महामोहाद्रागद्वेषमोहमानात्मिकाऽविद्या नष्टा। अविद्याक्षयाद् महाऽविद्या भवति। एवमविद्यानिरोधात् संस्कारनिरोधः, संस्कारनिरोधाद् विज्ञाननिरोधः, विज्ञाननिरोधान्नामरूपनिरोधः, नामरूपनिरोधात् षडायतननिरोधः, षडायतननिरोधात् स्पर्शनिरोधः, स्पर्शनिरोधाद् वेदनानिरोधः, वेदनानिरोधात् तृष्णानिरोधः, तृष्णानिरोधादुपादाननिरोधः, उपादाननिरोधाद् भव- 30 निरोधः, भवनिरोधाज्जातिनिरोधः, जातिनिरोधाज्जरामरणनिरोध इति। एवं द्वादशाङ्गनिरोधः। वैधर्म्येण भगवतोऽङ्गानि निरावरणानि वेदितव्यानीति।

ननु यदि क्षररागेण ध्वस्तेन योगिनां बुद्धत्वं भवति, तदा मृत्युस्कन्धक्लेशदेवपुत्राणां चतुर्णां विध्वंसनं किमर्थं तथागतेन कृतम्? तस्मात् क्षररागविध्वंसनेन बुद्धत्वं

---

१. भो. hDi lTa sTe (तद्यथा) इत्यधिकम्।

न भवति, इह कस्यचिदभिप्रायो भविष्यति । तस्मादुच्यते—इह [205a] हि यदुच्यते मूर्खैर्बाह्यमारास्तथागतेन विध्वंसिताः, तन्न, कस्मात्? पूर्वापरविरोधात्। इह यदि प्राग्बुद्धत्वं पश्चान्मारभङ्गस्तदा बुद्धस्य निरावरणता नास्ति, मारोपद्रवात्। अथ प्राग्मारभङ्गः पश्चाद् बुद्धत्वम्, तदाऽन्येऽपि संसारिणो मारभङ्गं किं न कुर्वन्ति बुद्धत्वं विना। अथ युगपच्च मारभङ्गो भवति, तथा युगपच्च मारभङ्गो न कृतः, यस्मिन् क्षणे मारस्तस्मिन् क्षणे बुद्धत्वं न स्यात्, सावरणचित्तात्। यस्मिन् क्षणे बुद्धत्वं तस्मिन् क्षणे मारो नास्ति, सर्वावरणक्षयात्। तस्मात् सत्त्वानां कायवाक्चित्ताविद्यावासनात्मकाश्चतुर्माराः। तेषु कायावरणं स्कन्धमारः, वागावरणं क्लेशमारः, चित्तावरणं मृत्युमारः, बाह्याविद्याप्रवृत्तिर्देवपुत्रमारः। इयं बाह्याविद्याप्रवृत्तिः शुभाशुभकर्मफलोपभोगपरीक्षकाणां बालमतीनां संसारभोगाभिलाषिणां देवपुत्रमारवाक्येन भवति। अत्र देवपुत्रमाराणां वचनं चन्द्रबलेन सत्त्वानां शुभाशुभं भवति, सूर्यबलेन मङ्गलबलेन बुधबलेन बृहस्पतिबलेन शुक्रबलेन शनिश्चरबलेन राहुबलेन केतुबलेन वारबलेन तिथिबलेन नक्षत्रबलेन योगबलेन करणबलेन लग्नबलेन शुभाशुभं भवति। तथाऽन्येषां स्वरोदयबलाभिरतानां वचनम्—संग्रामे स्वरोदयबलेन विजयो भवति, योगिनीबलेन ताराबलेन राहुबलेन [1]भद्रबलादिना संग्रामभूम्यां विजयो भवति। एवं श्रावकबौद्धानामपि बाह्याविद्याप्रवृत्तिः। प्रतीत्यसमुत्पादाभिप्रायेण सत्त्वानां शुभाशुभं भवति। तथाऽन्येषां देवपुत्राणां वचनम्—देवताप्रसादेन सर्वं शुभं भवति, इत्येवमाद्यविद्याप्रवृत्तिः सत्त्वानां देवपुत्रमारवाक्येन। इह हि यदि जन्मान्तरपुण्यपापाभ्यां विना देवपुत्रमारवचनैः सत्त्वानां शुभाशुभं भवति, तदा पूर्वार्जितं शुभाशुभं सर्वं निरर्थकं स्यात्, ग्रहादिबलाबलोपभोगात्। न चैवम्, तथा च दृश्यते व्यभिचारः—

न लग्नात् सुखवती सीता विजयी दुर्योधनो न च।
अमावास्याप्रसादेन भीमसेनेन चूर्णितः॥
अर्जुनं हन्तुकामा ये योधा भूमिबले स्थिताः।
तेऽर्जुनस्य शरैर्भिन्नाः सर्वदिक्षु क्षयं गताः॥

अतः प्राक् शुभाशुभकर्मफलं भोक्तव्यं सत्त्वैरिति। तथा चोक्तं भगवता—

कायवाङ्मानसं कर्म यत्करोति शुभाशुभम्।
सत्त्वस्तस्य फलं भुङ्क्ते फलदा नान्यदेवता॥ इति।

अथ देवताप्रसादोऽपि यो दृश्यते, स प्राक्पुण्यबलेन सत्त्वानां न पापबलेनेति। पुण्यमपि सत्त्वोपकाराद्भवति न देवतापितृकार्ये प्राणातिपातादिति। उक्तं भगवताऽध्यात्मपटले एकोननवतितमेन वृत्तेन कर्मफलम्। तद्यथा—

१. भो. Drag Po (रुद्र)।

तस्मात् कर्ता न कश्चिद् ददति न हरति प्राणिनां सौख्यदुःखं
संसारे पूर्वकर्म प्रभवति फलदं यत्कृतं त्रिप्रकारम्।
मूढानां [205b] बुद्धिरेषा ददति स हरते सृष्टिसंहारकर्ता
देहे च्छिद्रं न पश्यन्त्यपरिमितशुभं हार्यमाणं स्वकाक्षैः॥

(का० त० २.८९)

5

तथा देवपुत्रमारोऽप्युक्तः [1]पञ्चमपटले षडशीतितमेन वृत्तेन—

ये प्रोक्तानेकमन्त्रास्त्रिभुवनपतिना क्रूरकर्मस्वभावा-
स्ते सर्वे मारपक्षक्षयभयजनकाः प्राणिनां नो कदाचित्।
कर्तारो ये स्मृतीनां रणविषयरता मारकान्येऽपि तीर्था-
स्तेषां ते योजनीयाः परमजिनसुतैः प्राणिनां रक्षणार्थम्॥ इति।

T 454

10

(का० त० ५.८६)

अतो भगवतो वचनादविद्याप्रवृत्तिर्मारवचनैर्योगिना [2]न कर्तव्येति। एवं सत्त्वानां स्वचित्तवासनाप्रतिभासो भगवान् वज्रसत्त्वः। एवं सत्त्वानां प्रतिभासो भगवान् पुण्यराशिः पापराशिरिति। उक्तं भगवता ज्ञानपटले पञ्चाकारस्तवे चतुर्थवृत्तेन। तद्यथा—

15

चिन्मात्रं मन्त्ररूपं त्रिदशपरिवृतं दुःखसौख्यस्वभावं
साधूनां शान्तरूपं स्वकृतमनुभवं दारुणं दारुणानाम्।
यो यत् कर्मविकुर्यात् स्वमनसि विधिवत्तत्फलं तस्य जातं
लोकेशं विश्वरूपं त्रिभुवनजननं वज्रसत्त्वं नमामि॥ इति।

(का० त० ५.२४७)

20

अतः सत्त्वानां स्वचित्तवासनाप्रतिभासो वज्रसत्त्वश्च मारश्च, न भगवतो मार इति। [3]एषामुक्तानां कायवाक्चित्ताविद्यामाराणां जनकः क्षरः क्षणः कामदेवोऽभिधीयते। स तथागतेन विध्वस्तः परमाक्षरक्षणेन, तस्य भङ्गो मारबलभङ्गो रागद्वेषमोहक्रोधानामविद्यारूपाणां क्षयः। इह क्षरवासनानिरोधाद् रागद्वेषमोहक्रोधनिरोधः, एषां निरोधादविद्यानिरोधः। एवं क्रमशो द्वादशाङ्गानां निरोधः, द्वादशाङ्गनिरोधाद् भवचक्रस्य निरोधः, भवचक्रनिरोधाद् बुद्धत्वं निरावरणं भवतीति। एषु श्रावकपारमितामन्त्रनयेषु परमाक्षरहृदयं वज्रधरभगवतो **नामसंगीत्यां** तथागतेन देशितम्। अस्यार्थमजानन्तोऽसद्गुरवो नष्टाः परमाक्षरज्ञानभ्रष्टा अनागतेऽध्वनि भविष्यन्ति। तैर्विनष्टैः सत्त्वा विनाशयितव्याः। तेन **मूलतन्त्रे** पञ्चाकारज्ञानस्तवे पञ्चश्लोकैः पञ्चाकारभावना भगवतोक्ता। तद्यथा—

25

---

१. च. 'पञ्चमपटले' नास्ति। २. च. 'न' नास्ति। ३. भो. sÑar brJod Pa ḥDi rNams (एषां पूर्वोक्तानां)।

शून्ये भावसमूहोऽयं कल्पनारूपवर्जितः।
दृश्यते प्रतिसेनेव कुमार्या दर्पणे यथा॥

इति लोकोत्तरसत्ये रूपस्कन्धादर्शज्ञानम्,

सर्वभावसमो भूत्वा एको भावोऽक्षरः स्थितः।
अक्षरज्ञानसंभूतो नोच्छेदो न च शाश्वतः॥ 5

इति वेदनास्कन्धः समताज्ञानम्,

सर्वसंज्ञात्मका वर्णा अकारकुलसम्भवाः।
महाक्षरपदप्राप्ता न संज्ञा न च संज्ञिनः॥

इति संज्ञास्कन्धः प्रत्यवेक्षणाज्ञानम्,

अनुत्पन्नेषु धर्मेषु संस्काररहितेषु च। 10
न बोधिर्नैव बुद्धत्वं न सत्त्वो नैव जीवितम्॥

इति संस्कारस्कन्धः कृत्यानुष्ठानज्ञानम्,

विज्ञानधर्मतातीता ज्ञानशुद्धा ह्यनाविलाः।
प्रकृतिप्रभास्वरा धर्मा धर्मधातुगतिं गताः॥

इति विज्ञानस्कन्धः सुविशुद्धधर्मधातुज्ञानम्। 15

तथा लघुतन्त्रेऽप्युक्तमेकोत्तर[206a]शतादिवृत्तत्रयेण चक्रचिह्नादितथागतस्कन्धलक्षणम्। तद्यथा—

चक्रं स्वच्छं समन्तात् त्रिभव इति सुखं रत्नमस्यैव रागः
पद्मं क्लेशक्षयोऽसिः कुलिशमपि महाज्ञानकायो ह्यवेद्यः।
छेदोऽज्ञानस्य कर्त्री त्विह षडपि च कुलान्येभिरुत्पादिता ये
तेऽप्येवं वेदितव्याः खमिव समरसाः स्कन्धधात्विन्द्रियाद्याः॥ 20

यस्मिन् वै जातिरूपं व्रजति निधनतां तन्महारूपमुक्तं
यस्यां संसारदुःखं व्रजति निधनतां सा महावेदनोक्ता।
यस्यां संसारसंज्ञा व्रजति निधनतां सा महावज्रसंज्ञा
यस्मिन् संसारवृद्धिर्व्रजति निधनतां वज्रसंस्कार एव॥ 25

यस्मिन् जाग्राद्यवस्था व्रजति निधनतां तच्च विज्ञानमुक्तं
यस्मिन्नज्ञानभावो व्रजति निधनतां तन्मुनेर्ज्ञानमेव।
एते वैरोचनाद्याः परमजिनवराः षड्विधाः षट्कुलानि
अन्ये षड्धातुभेदा अवनिशिखिपयोमारुताकाशशान्ताः॥
(का० त० ५.१०१–१०३) 30

तथा नामसंगीत्यां वज्रधरभगवतः परमाक्षरज्ञानं बुद्धबोधिसत्त्वानां हृदयभूतं तथागतेन प्रकाशितं द्वाषष्ट्यधिकशतैः श्लोकैः साध्येषणैः। तत्र "अथ वज्रधरः श्रीमान्" इत्यादिना "प्रह्वकायस्थितोऽग्रतः" इति पर्यन्तमध्येषणाश्लोकाः षोडश, "अथ शाक्यमुनिर्भगवान्" इत्यादिना "तत्साधु भगवन्" इति पर्यन्तं प्रतिवचनश्लोकाः षट्, पुनः "अथ" आदिनामतः "उष्णीषकुलं महत्" इति पर्यन्तं षट्कुलावलोकश्लोकद्वयम्, "इमं षण्मन्त्रराजानम्" इत्यादिना "अरपचनाय ते नमः" इति पर्यन्तं मायाजालसम्बोधिक्रमे श्लोकत्रयम्, "तद्यथा भगवान् बुद्धः" इत्यादिना "महायाननयोत्तमः" इति पर्यन्तं वज्रधातुमहामण्डलस्तवश्लोकाश्चतुर्दश, "महावैरोचनो बुद्धः" इत्यादिना "वज्राङ्कुशो महापाशः" इति पर्यन्तं सुविशुद्धधर्मधातुज्ञानस्तवश्लोकाः पादोनपञ्चविंशत्, "वज्रभैरवभीकरः" इत्यादिना "घोषो घोषवतांवरः" इति पर्यन्तमादर्शज्ञानश्लोकाः पादाधिकदश, "तथता भूतनैरात्म्ये" इत्यादिना "ज्ञानार्चिः सुप्रभास्वरः" इति पर्यन्तं प्रत्यवेक्षणाज्ञानस्तवश्लोका द्वाचत्वारिंशत्, "इष्टार्थसाधकः" इत्यादिना "रत्नकेतुर्महामणिः" इति पर्यन्तं समताज्ञानस्तवश्लोकाश्चतुर्विंशतिः, "सर्वसम्बुद्धबोद्धव्यः" इत्यादिना "मञ्जुश्रीः श्रीमतांवरः" इति पर्यन्तं कृत्यानुष्ठानज्ञानस्तवश्लोकाः पञ्चदश, "नमस्ते वरदवज्राग्र्य" इत्यादिना "ज्ञानकाय नमोऽस्तु ते" इति पर्यन्तं पञ्चतथागतज्ञानस्तुतिश्लोकाः पञ्च। एभिर्द्वाषष्ट्यधिकशतश्लोकैः सर्वयानेभ्यूद्धृत्य संगृहीतं वज्रधरभगवतो हृदयं समन्तभद्रं परमाक्षरमहासुखमाकाशधातुपर्यन्तं समन्तादवभासमानं विशुद्धज्ञानसम्भारसम्भूतं गम्भीरोदाररूपधरं प्रकृतिप्रभास्वरमनादिनिधनमात्मात्मीयग्राह्यग्राहकादिविकल्पमलरहितं सर्वकालमसंक्लिष्टं सर्वधर्मस्व[206b]भावज्ञं संसारवासनाविनिर्मुक्तं गतागतविरहितं निष्प्रपञ्चरूपं स्वरसप्रवृत्तिजृम्भितविविधसमाधिधारणीनामाधारं भद्रघटकल्पपादपचिन्तामणिवत् सर्वसत्त्वाशापरिपूरकं महामुनीनामप्यगोचरं महतः सत्त्वराशेः परमशान्तिकरं मायोपमं स्वप्नोपमं प्रतिबिम्बोपमं प्रतिश्रुत्कोपमम्। एतदेव त्रिभुवनमहनीयं योगिज्ञानं स्वसंवेद्यं परमाक्षरसुखं योगिना न त्यक्तव्यमिति तथागतनियमः। अस्य भावना मूलतन्त्रराजे ज्ञानपटले तथागतेनोक्ता। तद्यथा—

धूमादीन् भावयित्वा तु चित्तं कृत्वा तु निश्चलम्।
मध्यमायां शोधयित्वा भावयेत् परमाक्षरम्॥

पद्मे वज्रं प्रतिष्ठाप्य प्राणं बिन्दौ निवेशयेत्।
बिन्दूंश्चक्रेषु बिन्दूनां स्पन्दं वज्रे निरोधयेत्॥

स्तब्धलिङ्गः सदा योगी ऊर्ध्वरेताः सदा भवेत्।
महामुद्राप्रसङ्गेन वज्रावेशैरधिष्ठितः॥

एकविंशत्सहस्रैश्च षट्शतैः परमाक्षरैः।
क्षणैः पूर्णैर्महाराज वज्रसत्त्वः स्वयं भवेत्॥

उक्तं भगवता तन्त्रराजे ज्ञानपटले पञ्चाकारस्तवे आदिवृत्तेन निर्वाणं निर्निमित्तमिति । तद्यथा—

यस्यान्तं नादिमध्यं स्थितिमरणभवं शब्दगन्धौ रसश्च
स्पर्शो रूपं न चित्तं प्रकृतिरपुरुषो बन्धमोक्षौ न कर्ता ।
बीजं न व्यक्तकालं न सकलभुवने दुःखसौख्यस्वभावं   5
निर्वाणं निर्निमित्तं व्यपगतकरणं निर्गुणं तं नमस्ये ॥ इति ।
(का० त० ५.२४४)

वज्रमुपायः । अत्रैव पञ्चमेन वृत्तेन प्रज्ञा उक्ता निर्निमित्ता—

एको नैकोऽपि चैकः समविषमसमः सव्यवामाग्रपृष्ठ
ऊर्ध्वाधो वै समन्तात् सितहरितमहाविश्ववर्णैकरूपः ।   10
ह्रस्वो दीर्घः प्लुतश्चागुण इति सगुणः स्त्री नरश्चानरस्त्रो-
र्यः सर्वाधार एकः सुभगवरभगस्ते नमस्ते नमस्ते ॥ इति ।
(का० त० ५.२४८)

सत्त्वं पद्मं प्रज्ञा, एवं वज्रसत्त्वः । उक्तं भगवता तन्त्रराजे ज्ञानपटले—

प्रज्ञोपायाम्बुजं वज्रं साधाराधेयमुच्यते ।   15
तयोर्द्वन्द्वं समापत्तिर्वज्रयोगोऽद्वयोऽक्षरः ॥
चतुर्धा वज्रयोगं तं कालचक्रं नमाम्यहम् ।
कलापे निर्गतो राजा पौण्डरीकोऽब्जधृक् स्वयम् ॥ इति ॥ १२७ ॥

इति श्रीलघुकालचक्रतन्त्रराजे द्वादशसाहस्रिकायां
विमलप्रभाटीकायां परमाक्षरज्ञानसिद्धिर्नाम   20
महोद्देशस्तृतीयः ॥

(४) नानोपायविनेयमहोद्देशः

पञ्चाक्षरं महाशून्यं बिन्दुशून्यं षडक्षरम् ।
प्रणिपत्यादिकादीनां श्वाससंख्या वितन्यते ॥

ऌाद्या यास्त्वष्टमात्रा विषयगुणगताश्चार्धमात्राविहीना   30
अन्योन्यं भेदभिन्नाः सपदरसशरा मध्यमाश्वासवाहाः ।
दीर्घा लग्ने द्वितीये विषयगुणवशाद् भेदिताऽन्योन्यभेदै-
र्भूयः सन्धौ तृतीये प्लुतविषयगुणा मध्यमाश्वासवाहाः ॥ १२८ ॥

ऌाद्येत्यादि। इह ऌकारादयो याऽष्टमात्रा अर्धमात्राविहीना विषयगुणगता इति ऌ गन्धगुणगता, उ रूपगुणगता, ऋ रसगुणगता, इ स्पर्शगुणगता, अ शब्दगुणगता, अं सत्त्वगुणगता, अः रजोगुणगता, आँ तमोगुणगता प्लुता। अनाहतोऽर्धमात्रो ह इति। अनेनोनाः सार्धसप्त, एवमष्टमात्रा अर्धमात्राविहीनास्ता अन्योन्यं भेदभिन्ना इति प्रत्येका सार्धसप्तभेदभिन्ना समुदयसत्येन सर्वास्ता गुणिताः [207a] सपादषट्पञ्चाशद् भवन्ति सपदरसशरा इति। ताश्च उत्पन्नस्य बालस्य मेषादिलग्ने ह्रस्वा मध्यमाश्वासवाहा भवन्ति। ततो वामनाड्यां मण्डले सञ्चारः प्रथमोत्पन्नस्य बालस्य। दीर्घाऽप्येवं द्वितीये लग्ने वृषभादिके समे मध्यमाश्वासवाहा इति। इह यद्यपि ऌ आद्या उक्ताः, तथापि वामनासापुटे आकाशादिमण्डले प्राणस्य गमनम्। अत्र पुनर्नाभ्यादिपञ्चगुणादिनियमेन प्राण आकाशादिपृथिव्यादिसाधर्म्येण गृह्यते, ह्रस्वदीर्घभेदेन विषमसमलग्नयोरिति। भूयः सन्धौ तृतीये प्लुतविषयगुणा मध्यमाश्वासवाहा इति। इह यदि बालः संक्रान्तिकाले [1]भवति, तदा प्राणो मध्यमायां प्लुतो भूत्वा वामदक्षिणे संचरति। एभिः पूर्वोक्तैः सर्ववर्णसञ्चारो वेदितव्य इति। अत्र ऌकारभेदः। तद्यथा—ऌ लु लृ लि ल लं लः लां ल्, इति, एवं उ व्ऌ वु वृ वि व वं वः वां व् इति, तथा ऋ र्ऌ रु रि र रं रः रां र् इति, तथा इ य्ऌ यु यृ य यं यः यां य् इति, तथा अ अल् ओ अर् ए अं अः आं ह् इति, तथा अं म्ऌ मु मृ मि मं मः मां म् इति तथा अ र्ऌ रु र्ऋ रि र रं रः रां र् इति, तथा ह ह्ऌ हु हृ हि ह हं हः हां ह् इति सपादषट्पञ्चाशत्। एवं दीर्घाः प्लुताश्च वेदितव्या अन्योन्यभेदैरिति ॥ १२८॥

इदानीमहर्निशश्वासमात्रा उच्यन्ते—

एवं सन्ध्याचतुष्के सशरगिरिरसा मध्यमाश्वासमात्रा-
स्त्रिंशत् काद्यक्षराणि प्रकटनवशतान्येव त्रिंशद्धतानि।
षण्मात्राभेदभिन्नानि खखयुगशराणि त्रिलग्नत्रिनाड्या-
मेवं दीर्घप्रभिन्नान्यपरदिनगतानि त्रिलग्नत्रिनाड्याम् ॥१२९॥

त्रिंशत् काद्यक्षराणीति। क च ट प त शानां षण्णां ककारादीनि त्रिंशदक्षराणि प्रकटनवशतान्येव भवन्ति, त्रिंशत्प्रभेदादेकैकाक्षरस्य परस्परसंयोगात् त्रिंशद्भेदा भवन्ति। तद्यथा—क्क क्ख क्ग क्घ क्ङ क्च क्छ क्ज क्झ क्ञ क्ट क्ठ क्ड क्ढ क्ण क्प क्फ क्ब क्भ क्म क्त क्थ क्द क्ध क्न क्श क्ष्प क्ष क्स क्ष्क। एवं खादयो वेदितव्याः। प्रकटनवशतान्येवं भवन्ति ॥ १२९ ॥

भूयः षण्मात्रभिन्नान्यपि निशिसमये च त्रिलग्नत्रिनाड्या-
मेवं दीर्घप्रभिन्नान्यपरनिशिगते च त्रिलग्नत्रिनाड्याम्।

---

१. मो. sKyes Par (उद्भवति)।

श्वासोच्छ्वासान् वहन्ति प्रतिदिनसमये खखषट्चन्द्रनेत्रान्
पूर्वा आहृत्य शून्याः समविषमगतेर्योजयेन्मध्यमायाम् ॥१३०॥

पुनस्तानि नवशतानि **षण्मात्रभेदभिन्नानीति** । अ इ ऋ उ ऌ अं इत्येभिर्भिन्नानि खखयुगशराणीति चतुष्पञ्चाशतशतानि भवन्ति । **त्रिलग्नत्रिनाड्यामर्धरात्रादुदयं** यावदिति । ततो **दीर्घषण्मात्राभिन्नान्युदयान्मध्याह्नं यावदपरत्रिलग्नत्रिनाड्यां** श्वासमात्रा भवन्ति पूर्वसंख्या इति । भूयो ह्रस्वषण्मात्राभिन्नं मध्याह्नान्निशिसमयस्तस्मिन्नस्तङ्गतपर्यन्तं त्रिलग्नत्रिनाड्यां पूर्ववत् संख्या इति । एवं निशाया अपरभागेऽर्धरात्रं यावत् त्रिलग्नत्रिनाड्यां पूर्वसंख्या समात्रा । एवं **श्वासोच्छ्वासान् वहन्ति प्रतिदिनसमये खखषट्चन्द्रनेत्रानिति** षट्शताधिकैकविंशत्सहस्राणि । एभिः श्वासमध्ये **पूर्वा आहृत्य शून्याः समविषमगतेर्योजयेन्मध्यमायामिति** । इह पूर्वोक्ताः प्रत्येकमण्डले सपादैकादश, ते च मकरादिलग्नो[1]दयभेदेन प्रत्येकमण्डलान्ता [2]दकारादिभेदेन मध्यमायां योजयेदिति । असौ महाप्रपञ्चो बहुत्वान्न लिखितः, [3]**परमादिबुद्धे** षष्टिसाहस्रिकायां टीकायां ज्ञातव्य इति । न चानेन लोको[207b]त्तरकारणं किञ्चिदस्ति, येन प्रयत्नः कर्तव्य इति । अस्यादिकादेर्लोमकेशसंख्यं यावन्निर्गम इति ॥ १३० ॥

इदानीमष्टमार्धा या सार्धसप्तानां परा, सा उच्यते—

बाह्ये या चाष्टमार्धा प्रभवति घटिका राहुभोगात् परस्था
श्वासार्धं सा स्वदेहे खलु विगततमा सर्वलोकावभासा ।
पूर्वार्धा सान्धकारं त्रिभुवनसकलं लीयते यत्र शून्ये
तस्मात्तां भेदयित्वा विशति गततमां कालचक्रैकयोगी ॥१३१॥

[4]बाह्य इत्यादि । इह **बाह्ये** लोकधातौ **या चाष्टमार्धा** मात्रा **प्रभवति घटिका राहुभोगात् परस्थेति** । इह प्रत्येकर्तौ मास[5]द्वयेन राहुः पञ्चविषयलक्षणाः पञ्चनाड्यः, तथा सत्त्वरजस्तमोलक्षणास्तिस्रस्ता भुङ्क्ते, राशिचक्रमध्ये तासु सार्धसप्त भुङ्क्ते । अर्धनाडीं भोक्तुं न क्षमः । सा राहुभोगात् परस्था **श्वासार्धं सा स्वदेहे**ऽनुत्पन्नस्य बालस्य दण्डाकारं[6] नाभिललाटयोर्मध्ये बाह्ये निर्गमाभावादर्धश्वास उच्यते । मन्त्रभेदेनार्धमात्रा । सा **खलु विगततमा सर्वलोकावभासा** षाण्मासिकगर्भस्य पञ्चाभिज्ञातः । **पूर्वार्धा सान्धकारं त्रिभुवनसकलं लीयते यत्र शून्ये** मरणान्ते तुर्यां त्यक्त्वा सा सुषुप्तायां विशति, षण्मासं यावत् । ततः स्वप्नावस्थां प्राप्तो गर्भोऽपरार्धमात्रां विशति । **तस्मात्तां** तमोऽ-

१. भो. 'उदय' नास्ति । २. च. ह । ३. भो. Zla Ba bZaṅ Pos mdZad Paḥi (सुचन्द्रकृतं) इत्यधिकम् । ४. च. 'बाह्य इत्यादि । इह' नास्ति । ५. भो. 'द्वयेन' नास्ति । ६. च. 'प्राण' इत्यधिकम् ।

वस्थां भेदयित्वा हृदये प्रविशति गततमां नाभिचक्रे स्थितां कालचक्रैकयोगी प्राणवाहनिरुद्ध इति गर्भावस्थां गत इति योगिनां योगनिष्पत्तिः ॥ १३१ ॥

इदानीमुत्पन्नानां वालानां कलाहान्यादिरुच्यते—

चन्द्रोना याऽधिकार्के विभुपरमकला साऽत्र सन्ध्याचतुष्के
यामे यामे व्रजन्ती निशिदिवसवशादर्धलग्नप्रभेदैः ।
षट्त्रिंशत् कालदूत्यो द्विगुणनृपतयोऽन्यास्तिथौ द्वयष्टभेदे
वाराणां चाष्टभेदे खलु पुनरपरे नैकसन्धिप्रदेशे ।।१३२।।

चन्द्रोनेत्यादि । इह यथा बाह्ये तथाऽध्यात्मनि चन्द्रस्य प्रतिदिनं षष्टिघटिका तिथिर्न भवति, एकघटिकोना सा चाध्यात्मनि शुक्रस्येति । याऽधिकाऽर्क इति सूर्यभोगे पूर्वोक्ताऽध्यात्मपटले द्वे नाडिके । विभुरिति बोधिचित्तम्, तस्य परमकला ज्ञानधर्मिणी चन्द्रकलाहानिः, विज्ञानधर्मिणी सूर्यभोगहानिरिति । साऽत्र सन्ध्याचतुष्के यामे यामे व्रजन्ती निशिदिवसवशादर्धलग्नप्रभेदैः षट्त्रिंशत् कालदूत्य इति त्रिचक्रसंवरे डाकिन्यः। तासां कुलिकायोगे सञ्चारः । सन्ध्याभेदेन प्रहरलग्नार्धभेदेन । यथा बाह्ये भोगो लयोऽधिकार आधिपत्यम्, तथाऽध्यात्मन्यादित्योदयभेदेन प्राणोदयभेदेनेति । इह बाह्ये चतुर्द्वीपेषु यत्रादित्योदयस्तत्र भोगः, यत्रार्धरात्रं तत्र लयः, यत्र मध्याह्नं तत्राधिकारः, यत्रास्तमनं तत्राधिपत्यम् । कुलिकाया निशाप्रवेशतो [1]योगिनीभुक्तयेऽर्धरात्रं यावदिति उदयान्मध्याह्नं यावद् भिक्षूणां भोगो दिवाकाले, तेन "दिनस्तु भगवान् वज्री प्रज्ञा नक्तं प्रभुक्तये" इति नियमः । तेन उदयान्मध्याह्नं यावद् भिक्षुभिर्भुक्तं निरामिषं भोक्तव्यम् । अस्तङ्गमनादर्धरात्रं यावद्योगियोगिनीभिः समयकार्यं कर्तव्यम् । तदूर्ध्वं संवरभङ्गः श्रावकमन्त्रिणोः, तद्भङ्गाद्वृद्धिसिद्धिहानिरिति । एवं यथा सन्ध्याभेदेन चतुर्योगिनीनां भोगलयादिकं तथा श्मशानयोगिनीनामष्टानां प्रहरभेदेनार्धरात्रान्मध्याह्नं यावदनुलोमेन [208a] पूर्वदक्षिणपश्चिमोत्तरेषु सञ्चारः, चतुःप्रहरेषु मध्याह्नादर्धरात्रपर्यन्तं विलोमेन ईशानवायव्यनैर्ऋत्याग्नेयदिक्षु तथा लग्नार्धभेदेन वृश्चिकधनुर्लग्नार्धभेदेन चित्तचक्रे दक्षिणावर्तेन सञ्चारः । चतसृणां मकरकुम्भे वामावर्तेन । एवं वाक्चक्रे मीनमेषवृषमिथुनार्धभेदेन तथा कायचक्रे कर्कटसिंहकन्यातुलाभेदेन सञ्चार इति षट्त्रिंशद्दूतीनां सञ्चारः प्राणभेदतः । ताश्च कालदूत्यः, तथाह चक्रसंवरे—

मध्यमोत्तमश्वासेन गन्धोदकयुतेन च ।
कुलिकां पूजयेन्नित्यं कालविशेषेण दूतिकाः ॥ इति ।

अत्र परमाक्षरसुखेन विण्मूत्रचन्द्रसूर्यनाडीनिरोधेन कुलिकां वज्रवाराहीं पूजयेत् । उक्तकालविशेषेण दूतिकाः षट्त्रिंशत् पूजयेत्, प्राणसञ्चारेण बाह्येऽध्यात्मनि च । इह

१. भो. rNal ḥByor Pa (योगी) ।

नाभिचक्रे प्रथमपरिमण्डले चतुर्दलानि। तेषु पूर्वदलमात्मपीठं दक्षिणं परपीठं पश्चिमं मन्त्रपीठमुत्तरं तत्त्वपीठमिति। तथा मुखद्वारं शूलभेदश्मशानं पूर्वं दक्षिणे नासारन्ध्रं दक्षिणं शवदहनमपानद्वारं पश्चिमं पूतिगन्धं वामनासारन्ध्रमुत्तरं क्लिन्नम्। एवं वामकर्णमीशाने बालमृत्युः, नैर्ऋत्ये दक्षिणकर्णं घोरयुद्धम्, वायव्ये सर्पदष्टं दक्षिणनेत्रम्, अग्नौ वामनेत्रमुच्छिष्टमिति। एवं हृदयचक्रेऽष्टनाडीनां संज्ञा रोहिणी पूर्णगिरिः पूर्वनाडी पिङ्गला, जालन्धरं दक्षिणनाडी जया, ओड्डियाणं पश्चिमनाडी इडा, अर्बुदमुत्तरनाडीति दिक्षु। तथा विदिक्षु—ईशाने कुहा गोदावरी, वायव्येऽलम्बुषा रामेश्वरी, नैर्ऋत्ये पूषा देवीकोटम्, आग्नेय्यां हस्तिजिह्वा मालवकम्। एवं कण्ठचक्रे प्रथमपरिमण्डलेऽष्टनाड्यः क्षेत्रोपक्षेत्रच्छन्दोहोपच्छन्दोहसंज्ञाभिर्ज्ञेयाः। एवं ललाटेऽपि प्रथमपरिमण्डलेऽष्टनाड्यो मेलापकोपमेलापक[1]श्मशानोपश्मशाननामभिर्वेदितव्या इति चक्रसंवरे नियमः। आसां बीजान्यन्तस्था य र ल वाः कायचक्रे पूर्वादिदिक्षु, तथा ईशानादिविदिक्षु वा ला रा या इति। ह हा हं हः अग्नि-वायु-ईशान-नैर्ऋत्यश्मशानेषु। एवं ए अर् अल् ओ वाक्चक्रे दिक्षु, विदिक्षु औ आल् आर् ऐ। अ आ अं अः पूर्वापरवामदक्षिणश्मशानेषु। चित्तचक्रे इ ऋ ऌ उ दिक्षु, विदिक्षु ऊ ॡ ॠ ई इति। गर्भपद्मदले अ आ पूर्वापरे, अं अः वामदक्षिणे द्वादशभुजस्येति। तथा मूलतन्त्रे भगवानाह—

नाभिमध्ये स्थितं चित्तं ज्ञानविज्ञानयोगतः।
प्राणस्याष्टगुणैर्बद्धं कोशकीटैरिवात्मजैः॥

जाग्रत्स्वप्नसुषुप्तावस्था त्रिज्ञानभेदतः।
प्राणिनां त्रिमुखं चित्तं तुर्याकालाच्चतुर्मुखम्॥

एवं विज्ञानयोगेन पञ्चषड्विषयात्मकम्। 20 T457
पञ्चास्यं षण्मुखं चित्तमचित्तं चित्तमन्यत्(माप्यते)॥

नाभिमध्ये स्थितो बिन्दुर्विसर्गः संपुटे[208b]स्तयोः।
ज्ञानविज्ञानयोगेन बोधिचित्तं व्यवस्थितम्॥

सन्ध्यायामर्धलग्नेषु प्राणसञ्चारभेदतः।
षट्त्रिंशद् दूतिकाऽत्रोक्ता बालानामवतारणे॥ इति।

एतास्तावत् षट्त्रिंशन्नाडिकाः प्राणप्रवाहतः कालदूत्यः शरीरक्षयकारिण्यः। तस्मात्तासु गतः प्राणो निरोधनीय इति नीतार्थः। इदानीं गुह्यनाड्यो बोधिचित्तवाहिन्यो द्वात्रिंशदुच्यन्ते—**द्विगुणनृपतय** इत्यादि। इह द्विगुणनृपतय इति द्वात्रिंशद् गुह्यचक्रे ज्ञानभेदेनावस्थिताः, तासां षोडशरागपक्षे शुक्ले कलाभेदेन स्थिताः, षोडशविरागभेदेन कृष्णपक्षे चन्द्रकलाक्षयभेदेन पूर्वोक्ताः। तथा हेवज्रे—

"अभेद्या सूक्ष्मरूपा च दिव्या वामा तु वामनी" इत्यादि।
(हे० त० १.१.१६)

---

१. च. 'श्मशानोपश्मशान' नास्ति।

द्वात्रिंशन्नाड्य आधारभूता एतावत्यो डाकिन्य आधेयधर्मिण्योऽपानवायुसंयोगादिति। एताभिस्त्रयस्त्रिंशदात्मको हेरुकः समाजो वा भवति, गुह्यतन्त्रत्वादिति। तस्य द्विगुणं निर्माणचक्रे चतुःषष्टियोगिन्यात्मकं चक्रं पञ्चमण्डलप्रवाहकमिति। **वाराणां चाष्टभेदे** पुनर्वारनाड्यो हृत्कमले गौर्याद्यष्टौ, ललाटे षोडश नैरात्म्याद्या इति। **एवमनेकसन्धिप्रदेशे** षष्ठ्युत्तरत्रिशतसन्धिप्रदेशे नाड्यो वर्षदिनसंख्यास्तासामाधेयभूता योगिन्यः। एवं द्वासप्ततिसहस्रयोगिनीनामाधाराधेयभेदेनेति। यावत्यो नाड्यस्तावत्यो डाकिन्यः प्राणापानचारत इति निष्प्रपञ्चवचो भगवतः॥ १३२॥

इदानीं भगवतो मुद्रोच्यते—

वेदर्तुश्वासशेषा त्रिभुवनजननी डाकिनी विश्वरूपा
या हीना चन्द्रमध्ये परमजिनपतेः सा स्वमुद्रा द्विधा स्यात्।
याऽर्कस्था साष्टभेदा दिशिविदिशिदले यामभोगावसाना
शेषाऽन्याश्चक्रदेव्यः परमभयकरा बाह्यदेहे समस्ताः॥१३३॥

वेदर्त्वित्यादि। इह **वेदर्तुरिति** चतुःषष्टिस्तदन्ते या नष्टचन्द्रकला संसारिणाम्, तद्वैधर्म्येणानष्टचन्द्रकला **श्वासशेषा** चतुःषष्टिश्वासानामन्तिमा श्वासधर्मिणी **त्रिभुवनजननी डाकिनी विश्वरूपा। या हीना चन्द्रमध्ये परमजिनपतेः** बोधिचित्तस्य, **सा स्वमुद्रा द्विधा स्यात्।** एका संवृतिधर्मिणी महामाया महारौद्रा भूतसंहारकारिणी, द्वितीया महाप्रज्ञा बोधिचित्तस्य बुद्धानां प्रज्ञापारमिता उत्पादव्ययरहिता बुद्धमाया महासौम्या सृष्टिसंहारनाशिनी। सा अनाश्रवभेदादपानस्था। **याऽर्कस्था साष्टभेदा** इति प्राणस्था रजोधर्मिणी, साऽष्टभेदा जाग्रत्स्वप्नसुषुप्तगुणत्रयपञ्चविषयभेदेनाष्टगुणात्मिकेति। सा च मण्डले पद्माष्टदलेषु स्थिता इति कल्पना। **शेषा अन्याः** पूर्वोक्ताश्**चक्रदेव्यः** परिकल्पिताः। ताः **परमभयकरा बाह्यदेहे समस्ता** इति नाडीसञ्चारनियमः॥ १३३॥

इदानीं ग्रहचारभोगडाकिन्य उच्यन्ते—

मन्दे रन्ध्रा दिनाख्या तमिनि सुरगुरोः सार्धनेत्राक्षिसंख्याः
सार्धाः षड् वेदजाताः परमजिनपतेश्चित्तवज्रोद्भवास्ताः।
भौमे शून्याहिचन्द्रा रविबुधभृगुकेतोश्च शून्याहिखैका
खाक्ष्यक्ष्येकाश्च जाताः खलु परमविभोः शुद्धवागुद्भवास्ताः॥१३४॥

मन्द इत्यादि। इह बाह्ये सूर्यप्रचारेण मासद्वयेन ऋतुः सूर्यस्य, अध्यात्मनि लग्नद्वयेन प्राणस्य ऋतुः। स च वामदक्षिणदशमण्डलप्रवाहेण भवति सृष्टिसंहारभेदेन। तेन ऋतौ **मन्दे** मन्दभोगे **रन्ध्रा** इति नवघटिकाभोगो राशिचक्रे, ताश्च डाकिन्यः।

एवं **दिनाख्या** इति [209a] पञ्चदशेति [1]रात्रौ भोगे **सुरगुरोः सार्धनेत्राक्षिसंख्या** इति सार्धद्वाविंशदिति, एकीभूताः **सार्धाः षड् वेदजाता** इति सार्धषट्चत्वारिंशदिति। **परमजिनपतेश्चित्तवज्रोद्भवास्ता** इति चित्तबिन्दुजनिता इत्यर्थः। **भौमे शून्याहिचन्द्रा** इति प्रपञ्चः। तस्य मण्डलेन यल्लभ्यते षष्टिभागेन तावत्यो नाड्य इति नियमः, सामान्येनाशीत्युत्तरशतम्। इह यत्र मङ्गलस्य ऊनो भागस्तत्र रविकाभोगो न हर्तव्यः, चन्द्रभोगो मासैकः क्षेपणीयः। इह मङ्गलस्य त्रयोविंशतिमासैः स्वदिनं लोकरूढ्या अष्टादशमासैः, तन्न घटते, तेनात्र यथाभूतं वर्षशतं ग्रहाणां मण्डलदिनैर्भवति, अष्टमासैक-विंशतिदिनाधिकमिति नियमः। एवं भौमे शून्याहिचन्द्राः। **रविबुधभृगुकेतोश्च शून्याहिखैका** इत्यष्टाशीत्युत्तरसहस्रम्। एषां पञ्चग्रहाणामेकत्र भोगात् **खाक्ष्यक्ष्ये-काश्च जाता** इति विंशत्यधिकद्विशताधिकैकसहस्रम्। **खलु परमविभोः शुद्धवागुद्भ-वास्ता** इति वाग्बिन्दुजनिता इत्यर्थः ॥ १३४ ॥

या चन्द्रस्यर्तुभुक्तिः खखरसशिखिनः कायवज्रोद्भवास्ता
एकीभूताः समस्ता रसषडहियुगाश्चार्धनाडीस्तथैव।
डाकिन्यः कालरूपाः सकलतनुगताः प्राणिनां प्राणहन्त्य-
स्तस्मात्ताः साधनीयाः प्रतिदिनसमये रोधयित्वा स्वमार्गम् ॥१३५॥

या चन्द्रस्यर्तुभुक्तिः खखरसशिखिन इति षट्शताधिकसहस्रत्रयं घटिकाभोगः, **कायवज्रोद्भवास्ता** इति कायबिन्दूद्भवा इति। **एकीभूताः समस्ता** नवानां **रसषडहि-युगा** इति षट्षष्टयधिकाष्टशताधिकसहस्रचतुष्कम्, **अर्धनाडी तथैवेति** संख्या डाकिनीनामेकर्तौ। ता **डाकिन्यः कालरूपाः सकलतनुगता** देवादीनां **प्राणिनां प्राणहन्त्य** एकर्तौ। षड्तुषु पुनरयुतद्वयं नवसहस्रशतमेकं षण्णवत्यधिकमिति डाकिनीसंख्या सत्त्वानां ग्रहचरणान्तर्भूता इति नियमः। **तस्मात्ताः साधनीयाः प्रति-दिनसमये रोधयित्वा स्वमार्गं** तासां प्राणापाननिरोधेन चतुर्बिन्दुनिरोधेनेति नियमः ॥ १३५ ॥

यावद्भुक्तिर्ग्रहाणां स्वपरगतिगता श्वासनिःश्वासचारात्
तावत् किं कालदूती प्रभवति वरदा व्यापिनी या त्रिधातौ।
दूतोसूक्ष्मप्रचारो गुरुवचनगतो बोधिचित्तेऽक्षरे च
ज्ञातव्यो योगयुक्तैर्व्यपगतकलुषैर्नान्यथा रागचित्तैः ॥१३६॥

द्वितीयवृत्तेनोक्ता यावदित्यादिना सुबोधमिति ॥ १३६ ॥

---

१. भो. sGra gCan Gyi (राहौ)।

इदानीं चन्द्रचरणे राहुप्रवेश उच्यते—

मार्तण्डेन्द्वोः पदान्यप्युभयगतिवशात् तृष्णया ताडितानि
अङ्गैर्भागावशेषं ग्रसति स चरणं राहुवेशे च केतुः ।
सर्वाः सन्ध्याष्टयामाः प्रतिदिनसमये प्राणिनां द्वादशाङ्गाः
5 श्वासाश्चैकैकलग्ने द्विगुणनवशतप्राणवाहाङ्गमुक्तम् ॥१३७॥

मार्तण्डेत्यादि। इह मार्तण्डपदान्येकादश "रसयुगशशिनः" इति पूर्वोक्तानि, इन्दुपदानि पञ्चविंशद् "भूता भूतेषु" इत्यादिना, अनयोरेकत्र मिलितानि षट्त्रिंशद् भवन्ति । तान्यष्टगुणैर्गुणितान्यष्टाशीत्युत्तरशतद्वयं भवन्ति। एवं तृष्णया ताडितान्यष्टभिरिति । अङ्गैरिति द्वादशलग्नैर्भागलब्धानि चतुर्विंशतिचन्द्रपदानि भवन्ति। 10 अवशेषं पञ्चविंशतिमं चरणं ग्रसति राहुप्रवेशे केतुरिति । अध्यात्मनि मन इन्द्रियं शुक्रधातुचरणं शून्याङ्गं यदिति। सर्वाः सन्ध्याश्चतस्रोऽष्टप्रहराः प्रतिदिनसमये प्राणिनां द्वादशाङ्गास्ते द्वादशलग्नानीत्यर्थः। श्वासाश्चैकैकलग्ने द्विगुणनवशतानीत्यष्टादशशतानि प्राणवाहाः, ते एकाङ्गमुक्ता[1] इति। एवं बाह्ये मासैकेनैकाङ्गमष्टादशशतदण्डैः, मासद्वयेन ऋतुः षट्त्रिंशद्[209b]भिः शतैः। एवं द्विद्वि-अङ्गैः षड्तवः। T 458 15 ऋतुत्रयेण ग्रहणं चन्द्रार्कराहुभोगवशादिति ॥ १३७ ॥

द्विद्वयङ्गेष्वाद्यविद्या प्रथमदिनवशाद् द्वादशाङ्गानि यावत्
तस्मादृत्वादिनाङ्गानि च परनवमी पूर्ववद् यानि तानि ।
एवं पञ्चप्रकारैर्ऋतुरपि च भवेत् सर्वतो द्विद्विमासाद्
यस्मिन्निदोः कलैका व्रजति निधनतामादिमासः स एव ॥१३८॥

20 [2]द्विद्वयङ्गेष्वादिदिनेऽविद्या, द्वितीये दिने संस्कारः, एवं क्रमेण जरामरणम्। पुनस्त्रयोदशमे दिनेऽविद्या, चतुर्दशमे संस्कारः, एवं कृष्णनवम्यां जरामरणम्। पुनर्दशम्यामविद्या, एकादश्यां संस्कारः, एवं क्रमेण शुक्लषष्ठ्यां जरामरणम्। पुनः सप्तम्यामविद्या, अष्टम्यां संस्कारः, कृष्णतृतीयायां जरामरणम्। पुनश्चतुर्थ्यामविद्या, पञ्चम्यां संस्कारः, एवं क्रमेणामावास्यां(स्यायां) जरामरणमिति पृथिव्यप्तेजोवाय्वा- 25 काशस्वभावेन ऋतौ पञ्च परिवर्ता मता इति। एवमेकपक्षो ह्रस्वः, मासो दीर्घः, ऋतुः प्लुतः। पक्षः सत्त्वधर्मी, मासो रजोधर्मी, ऋतुस्तमोधर्मीति। एवं पञ्चप्रकारैः ऋतुरपि च भवेत्। सर्वतो द्विद्विमासात्। यस्मिन् मासे इन्दोः कलैका व्रजति निधनतां द्वयोर्मासयोरादिमासः स एव तृतीय इति चतुःषष्टिदिनैः कलाक्षयतः ॥१३८॥

---

१. च. युक्ता । २. भो. De Tar (एवं) इत्यधिकम् ।

षण्मासर्तुत्रयेण ग्रहणमपि भवेद् द्वादशाङ्गप्रतीत्या
षष्ठोऽर्कस्यर्तुभेदश्चरणगतिवशाच्चन्द्रमध्ये प्रविष्टः ।
तस्मिन् स्पर्शाङ्गमध्ये ग्रसति सचरणं राहुरिन्द्वर्कयोश्च
ओषध्यः सिद्धिदास्ता दिननिशिसमये राहुणाऽऽलोकिता ये ॥१३९॥

षण्मासर्तुत्रयेण ग्रहणमपि भवेद् द्वादशाङ्गप्रतीत्येति । इह प्रथम ऋतुः सत्त्वधर्मी, द्वितीयो रजोधर्मी, तृतीयस्तमोधर्मी, तेन तमःप्रवेशः । मासोऽप्येवं षड्धातुभेदेन ज्ञान-धातुपर्यन्तं षष्ठो मासः । एवम**र्कस्यर्तुभेदश्चरणगतिवशाच्चन्द्रमध्ये प्रविष्टो**ऽमावास्या-याम् । **तस्मिन् स्पर्शाङ्गमध्ये ग्रसति सचरणं राहुरिन्द्वर्कयोश्च । ओषध्यः सिद्धिदास्ता दिननिशिसमय** इति । सूर्यग्रहणे दिनसमये चन्द्रग्रहणे निशिसमये वक्ष्यमाणा इति । **राहुणाऽऽलोकिता ये** ग्रहणकाले वृक्षादयः शस्त्रहताः फलन्ति । अत्रोपदेशः—प्रतिमासे सूर्यभोगे नक्षत्रद्वयं घटिकैकादश दत्त्वा षण्मासैर्द्वादश नक्षत्राणि भवन्ति षट्षष्टिघटिकाः । चन्द्रकलां त्रिदिनघटिकोनां कृत्वा त्रयोदश शेषास्त्रयः पञ्चाशदिति ग्रहणेऽमावस्या भोगे देया, रविका हेया वा । ततो राहुभोगे पञ्चचत्वारिंशद् घटिका ऊनीकृत्य शेषनक्षत्र-भोगं शोधयेत् । यदा पूर्वमुखेन ग्रासः सूर्यस्य तदा परे पुच्छभोगेन भवति । एवं चन्द्रस्यापि पौर्णमास्यामिति सिद्धं ग्रहणलक्षणम् । यथा बाह्ये तथाऽध्यात्मनि प्रतिदिनं षष्ठे लग्ने वेदितव्यं योगिभिः । इदं बालानामगम्यं वक्तुं न शक्यते शास्त्रद्वारेणेति ॥ १३९ ॥

इदानीं मङ्गलादीनां क्षेत्राण्युच्यन्ते—

भौमः शुक्रो बुधेन्दू रविबुधभृगवो भौममन्त्र्यार्किमन्दा
मन्त्री मेषादिराशौ प्रतिदिनसमये क्षेत्रिणः सर्वकालम् ।
शान्ताविन्द्वर्कराशी बुधभृगुकुजमन्त्र्यार्किराशिश्च पुष्टौ
वश्याकृष्टौ वियोगे प्रभवति मरणे क्षेत्रिणोऽस्मिन् यदि स्यात् ॥१४०॥

भौम इत्यादि । इह भौमादयो ग्रहा मेषादिराशौ क्षेत्रिणः । मेषे **भौमः**, **शुक्रो** वृषे, **बुधो** मिथुने, **इन्दुः** कर्कटे, **रविः** सिंहे, **बुधः** पुनः कन्यायाम्, भृगुस्तुलायाम्, **भौमो** वृश्चिके, **मन्त्री**ति बृहस्पतिर्धनुषि, **आर्कि**रिति शनिर्मकरे, **मन्द** इति पुनः शनिः कुम्भेऽपि, **मन्त्री** मीन इति । **प्रतिदिनसमये** द्वादशलग्नोदये **क्षेत्रिणः सर्वकालं** भोक्तार इत्यर्थः । इह **शान्तौ** कर्मणि, **इन्द्वर्कराशी**ति कर्कटसिंहे द्वे राशी, **बुध**राशी द्वे मिथुनकन्ये **पुष्टौ**, **शुक्र**राशी [210a] द्वे [1]**वश्ये** वृषतुले, [2]**आकृष्टौ कुज**राशी द्वे मेषवृश्चिके, **मन्त्रि**राशी द्वे उच्चाटने धनुर्मीने, **शनि**राशी द्वे **मारणे** मकरकुम्भे इति । यदि **क्षेत्रिणो** नक्षत्र-भोगवशेना**स्मिन्** स्वक्षेत्रे **यदि स्या**त्तदा नान्यस्मिन् कालेऽन्यग्रहेणाधिष्ठितो राशि-स्तत्फलदायको भवति पूर्वोक्तकर्मस्विति नियमः ॥ १४० ॥

---

१. च. आकृष्टौ । २. च. वश्ये ।

इदानीं भगवतो वक्त्रभेदेन शान्त्यादिकमुच्यते—

शान्तावादौ सितास्यं सितकनकनिभं पौष्टिके हस्तयामे
पीतं स्तम्भेऽग्नियामे कनकरविनिभं मोहनेऽब्धौ च रक्तम् ।
आकृष्टौ पञ्चमे स्याद् रविजलदनिभं षष्ठयामे च वश्ये
कृष्णास्यं मारणेऽद्रौ कषणसितमिहोच्चाटनेऽह्नौ निशान्ते ।।१४१।।

शान्तावित्यादि । इह **शान्तावादौ** प्रथमप्रहरे उदयाद् भगवतः सन्ध्यासञ्चारवशेन शुक्लमुखं पूर्वे नायको भवति, तेन शान्तौ शान्तिविषये पूर्वसाधितमन्त्रध्यानैः प्रहरैकेण फलं साधयेत् । **सितकनकनिभं हस्तयाम** इति द्वितीयप्रहरे भ्रमणवशात् पश्चिममुत्तरमर्धार्धं पूर्वे नायको भवति, तेन मिश्रेण **पौष्टिकं** साधयेत् । **पीतं** पश्चिमवक्त्रं मध्याह्नात् प्रहरमेकं नायकम्, तेना**ग्नियामे** तृतीयप्रहरे **स्तम्भ**विषये सिद्धिदम् । चतुर्थप्रहरे **कनकरविनिभं** पीतरक्तं विमिश्रं नायकम्, तेन **मोहनं** कुर्यात् । एवं पञ्चमे प्रहरे **रक्त**मुखं नायको भविष्यत्या**कृष्टौ** । **षष्ठे** रक्तकृष्णं मिश्रं नायकस्तेन **वश्यं** साधयेत् । एवं **कृष्णास्यं मारणेऽद्रा**विति सप्तमे प्रहरेऽर्धरात्राविति । **कषणसितमिहोच्चाटनेऽह्ना**वित्यन्तिमे प्रहरे **निशान्ता**दुदयपर्यन्तमिति । एवं प्रहरभ्रमणभेदेनाष्टास्यः कालचक्रो भगवान् यदा, तदा चतुःसन्ध्याभेदेन चतुश्चरणो भवति, अर्धप्रहरभेदेन षोडशभुज इति सिद्धः । एवं भुजभेदेनाष्टौ कर्माणि दिवायामर्धप्रहरभेदेन रात्रौ चेति नियमः । चतुःसन्ध्याभेदेन चत्वारि कर्माणि—पूर्वसन्ध्यायां शान्तिकम्, मध्याह्ने स्तम्भनम्, अस्तङ्गते आकृष्टिः, अर्धरात्रौ मारणमिति । अत्राप्यष्टाननस्य प्रज्ञा द्विभुजेति पूर्वापरसन्ध्याचरणद्वयम्, मध्याह्नादर्धरात्रं भुजद्वयी, समस्तमहोरात्रं मुखमिति भावनानियमः कर्मसाधने ।।१४१।।

अस्माद् वृत्ताद्यद् द्वितीयं तत्सुबोधमिति ।

पृथ्वीतोयाग्निवाता न शशिरविसुरा जीवभोक्तार एते
एषां जीवश्च भोक्ताऽप्यशुभफलवशाद् मन्यतेऽहं च भुक्तिः ।
दृष्ट्वा दुःखानुरक्तो ग्रहभुजगसुरान् प्रार्थयेद् भूतवृन्दं
मोक्षे यस्य प्रसादात् प्रभवति मनसस्तं न शान्तिं करोति ।।१४२।।

इदानीं जातबालस्य श्वासलक्षणमुच्यते—

आदिश्वासोऽगुणात्मा त्रिविधगुणवशात् सोऽपि याति त्रिसंख्यं
तिथ्याख्यास्तेऽपि जाता विषयगुणवशात्तेऽपि भूयस्त्रिगुण्याः ।
जाता भूताब्धिसंख्या पुनरपि च चतुश्चारभेदैर्हतास्ते
नाड्यर्धश्वाससंख्या पुनरपि घटिका श्वाससंख्या द्विगुण्याः ।।१४३।।

आदीत्यादि । इहोत्पन्नस्य बालस्य य **आदिश्वासः** प्रथमोऽसौ, **अगुणात्मा** सत्त्वादिगन्धादिगुणरहितस्तद्धर्मा प्रवृत्तितः । ततस्**त्रिविधगुणवशात्** सत्त्ववशाद्

द्वितीयः श्वासो निर्गतः, रजोवशात् तृतीयः, तमोवशाच्चतुर्थः। तेषु पूर्वोऽगुणो न गृह्यते। तेन सह **त्रिसंख्यं** गण्यते व्यापकत्वात्। पुनस्ते सत्त्वरजस्तमःस्वभावाः प्रत्येकं पञ्चविषयगुणभेदेन एकैकः पञ्चविधो भवति, तेन **तिथ्याख्या** इति पञ्चदश, तेऽपि भूयस्त्रिगुण्याः कायवाक्चित्तभेदेन **जाता भूताब्धिसंख्या** इति पञ्चचत्वारिंशत्। पुनरपि च ततः **चारभेदैर्हतास्ते** इति चन्द्रादित्ययोश्चारा चतुर्धा शीघ्रमन्दवक्र- 5 निर्गमपदानां धनवृद्धिक्षय-ऋणवृद्धिक्षयभेदेनेति। तैश्चतुर्भिर्हता **नाड्यर्धश्वाससंख्या** T 459 इति अशीत्युत्तरशतसंख्या, **पुनरपि द्विगुण्याः श्वाससंख्या** घटिकाश्वाससंख्या भवति षष्ट्युत्तरत्रिशतसंख्या [210b] प्रज्ञोपायस्वभावत इति। सा एकनाडी एकमण्डल- वाहिनी बालस्य वामे दक्षिणे वा। ततो द्वितीया तृतीया ॥१४३॥

द्वित्र्यब्धीष्वृत्वगाष्टग्रहदशभिरियं वर्धिता कालनाडी 10
तस्माद् वर्गप्रभेदैर्द्विविधपथि गता कालनाडी समन्तात्।
त्रैलोक्यं पूरयन्ती समसुखफलदा चन्द्रसूर्यप्रचाराद्
यावद् वेदाह्विवह्निः प्रभवति नियता कर्तिका शुक्तिहस्ता ॥१४४॥

द्वित्र्यब्धीष्वित्यादिना दशभिरियं वर्धिता कालनाडी मध्यमा दशमण्डल- वाहिनी वामे दक्षिणे वर्धिता, अहोरात्रेण षष्टिमण्डलानि यावदिति। **तस्मादवधे-** 15 **र्वर्गप्रभेदैः** पूर्वोक्तैः ककारादिवर्गैर्मकरादिलग्नैरिति। **द्विविधपथि गता कालनाडी समन्तात्**। **त्रैलोक्यमिति** शरीरं **पूरयन्ती** द्वासप्ततिसहस्रनाडीः पूरयन्ती। **समसुख- फलदा** सा **चन्द्रसूर्यप्रचारादिति** ललनारसनाप्रचारात्, पञ्चमण्डलवाहत इति श्वासनिर्गमात् कालनाडीभेदः। द्वितीयो भेद आधाने गर्भस्य कालनाडीवर्गभेदेन उत्पादाय वर्धते। तत्र वर्गस्यैकस्य एकः, षट्चक्रेषु मध्यमाऽवधूती। द्वयोर्वर्गश्चतस्र 20 उष्णीषकमलनाड्यो नाभौ प्रथमपरिमण्डलम्। त्रयाणां वर्गो नव, ता हृदयनाड्योऽष्ट नाभौ द्वितीयपरिमण्डलम्, नवमी चन्द्रजन्मस्थानम्। चतुर्णां वर्गः षोडश, ता ललाटे नाभिचक्रराशिपरिमण्डलवाह्ये। पञ्चानां वर्गः पञ्चविंशतिस्तानि ललाटे चन्द्र- पदानि। षण्णां वर्गः षट्त्रिंशत्तेषां मध्ये कण्ठे द्वात्रिंशच्चत्वारो मङ्गलबुधबृहस्पति- शुक्राणां जन्मस्थानं नाभौ चन्द्रपदपरिमण्डलबाह्ये। सप्तानां वर्ग एकोनपञ्चाशत् 25 कण्ठे द्वितीयपरिमण्डले राशिपदान्यष्टचत्वारिंशत्, एका सूर्यस्य जन्मस्थानं नाभौ च। अष्टानां वर्गश्चतुःषष्टिर्नाभिचक्रे षष्टिमण्डलवाहिन्यः षष्टिश्चतस्रः शून्यनाड्यः। नवानां वर्ग एकाशीतिः, दशानां शतम्। एतद[1]शीत्युत्तरशतं बाह्यभेदेन रजोधर्मि- त्वाद् द्विगुणं षष्ट्युत्तरत्रिशतसन्धिप्रदेशेषु ज्ञातव्यम्। एवं यथा कण्ठे तथा गुह्यचक्रे, यथा ललाटे तथा वज्रे, यथा उष्णीषे तथा वज्रमण्यग्रे चत्वार इति शरीरव्याप्तिः। 30 **यावद्वेदाह्विवह्निरिति** चतुर्विंशतिपक्षाः षष्ट्युत्तरत्रिशतदिनानीति। एवं कालचक्र- वर्षायनकाल-ऋतुलग्न-पक्ष-दिनभेदेन नाडीभेदः सिद्धः, द्वितीयसन्ध्याप्रहरार्धप्रहर-

१. भो. Dal Baḥi sKye gNas So (गर्भजानां जन्मस्थानम्) इत्यधिकम्।

भेदेनेति नियमः। एवं भगवती तद्योगात् प्रभवति नियता कर्तिका शुक्तिहस्ता।
इह भगवान् वर्षशुद्ध्या, भगवती प्रतिदिनशुद्ध्या। दिवा कर्तिका, रात्रिः कपाल-
मित्यर्थः ॥१४४॥

इदानीं कवर्गचक्राण्युच्यन्ते —

5 चक्राणीष्वब्धिसंख्या विषयगुणवशात् कायवाक्चित्तभेदे
रक्षां कुर्वन्ति भर्तुः समसुखफलदान्यष्टधूमादिदेव्यः।
एवं सूर्यस्य भर्ता परमशशिकलालिङ्गितो विश्वरूपः
देवी बुद्धामराणां विषयविषयिणां राहुचन्द्रार्कवन्द्यः ॥१४५॥

चक्राणीत्यादि। इह ककारादीनि व्यञ्जनानि त्रिशत्, अकारादयः स्वराः पञ्च-
10 दश, एते पञ्चचत्वारिंशत्। विषयाः पञ्च गुणास्त्रयस्तद्वशादिति पञ्चस्वरह्रस्वदीर्घ-
युक्ता ङादय आत्मबिन्दुविसर्गयुक्ताः पञ्चदश। एवं दशाराणि चक्राणि त्रिशत्, सकार-
पर्यन्तमन्योन्यानुवर्तीनि। लाद्यानि षडाराण्यकारपर्यन्तानीति **चक्राणीष्वब्धिसंख्या
विषयगुणवशात् कायवाक्चित्त**[1]**भेदे रक्षां कुर्वन्ति भर्तुः** कालचक्रस्य महासुखस्य।
समसुखफलदान्यष्टधूमादिदेव्य इति। अत्र ङकारचक्रमुच्यते सर्वचक्राणां बाह्येऽ-
15 ध्यात्मनि लोमाग्रे ङ ऊर्ध्वे [211a] ङि पूर्वे ङृ दक्षिणे ङु उत्तरे ङॢ पश्चिमारे ङॣ
वायव्ये ङू ईशे ङॄ नैर्ऋत्ये ङी अग्नौ ङा पाताले। एवं घगखकलोमधातौ, चर्ममांसे
चवर्गः, रक्ते टवर्गः, [2]रसे पवर्गः, अस्थिषु तवर्गः, मज्जसु शवर्गो विलोमेन। एवं
त्रिशच्चक्राणि दशाराणि मज्जान्तानि। ततः षडाराणि पूर्वारे ल, दक्षिणे लः, उत्तरे लं,
पश्चिमे ला, अधो लाः, ऊर्ध्वे लां नाडीषु प्राणादिषु। एवं व र य ह इति। तथा रजसि
20 अल् पूर्वे, अलः दक्षिणे, अलं उत्तरे, आल् पश्चिमे, आलः अधसि, आलं मूर्ध्नि। एवं
ओ अर् ए अ इति। शुक्रधातौ रक्षा ॡ पूर्वे, ॡः दक्षिणे, ॡं उत्तरे, [3]ॡ पश्चिमे, ॡः
अधसि, ॡं ऊर्ध्वे। एवं उ ऋ इ अ इति लोमादिशुक्रपर्यन्तं नव धातवः। ततो विज्ञान-
धातुश्चन्द्रमध्ये धूमादिभिः शून्यैर्वेष्टित इत्यर्थः। तत्र पञ्चविषयशून्यं त्रिगुणशून्यं धूमा-
दिकम्, ततः कलाबिन्दुदर्शनम्, ततो बिम्बदर्शनमित्यर्थः। **एवं सूर्यस्य भर्ता परमशशि-
25 कला** षोडशी, तयालिङ्गितः सन् सर्वकालं **विश्वरूपः** सर्वाकारत्वात्। **देवी**ति धातवः,
बुद्धा इति स्कन्धाः। तेषां किंविशिष्टानाम्? **अमराणां** जातिजरामरणरहितानाम्, **विषय-
विषयिणां च राहुचन्द्रार्काणामपि वन्द्यो** महाक्षरसुखः कालचक्रो भगवानिति ॥ १४५ ॥

अत ऊर्ध्वं चत्वारि वृत्तानि सुबोधानि।

या भर्तुः सूक्ष्मरूपा वरगुणविषयाभ्यन्तरा बाह्यमुद्रा
30 डाकिन्यस्तास्त्रिधातौ परमभयकराः क्रोधचित्तप्रसूताः।

---

१. भो. Rab Tu dBye Ba (प्रभेदे)। २. भो. Chu Ser (पित्ते)।
३. भो. ळ।

भर्तुर्यानीन्द्रियाणि त्रिविधभवगतं कायवाक्चित्तवज्रं
तान्येते वज्रडाकाः स्वस्वविषयगुणालिङ्गिता मङ्गलाद्याः ॥१४६॥

रूपं शब्दं रसो गन्धमपरमपि तत् स्पर्शधूमो रजश्च
सत्त्वं चित्तं क्रमेण प्रकटमपि तथालिङ्गितं राहुणा च ।
तेषां षण्मन्दचाराद् विविधगतिरियं शीघ्रवक्रादिचारा- 5
दष्टानां षट्पदेऽष्टौ खलु विषयगुणा संस्थिताश्चक्ररूपाः ॥१४७॥

आदिश्वासोऽष्टभेदो विषमगुणगतश्चावृतो डाकिनीभि-
र्धूमाद्याभिः समन्तात् त्रिविधगतिवशाद् भ्राम्यते षड्गतिस्थः ।
तन्मध्ये कालचक्रः स्फुरदमृतकलालिङ्गितः शुद्धकायो
यः श्वासं छेदयित्वा विशति जिनतनुं कालचक्रः स एव ॥१४८॥ 10

श्वासच्छेदावसाने त्रिविधगतिरियं षट्प्रकारा न चास्ति
बिन्दौ रोधे समन्तात् परमविभुसुखं वर्ततेऽनन्तकालम् ।
त्यक्त्वा संसारसौख्यं परमगुरुसुखं योगिना भावनीयं
चर्यां शृङ्गाररूपां परमभयकरां योगिनीनामतुष्टिम् ॥१४९॥

इदानीं वज्रश्वासे ग्रहचरणप्रवेश उच्यते— 15

भर्तुः श्वासे समस्तं ग्रहगणचरणं नीयते कालयोगात्
श्वासे खं खं ख खाक्ष्यग्निजलनिधिगते चोदिते सर्वशून्ये ।
एतैर्वर्षैश्च बाह्ये परमविभुपदे सृष्टिसंहाररूपे
ज्ञातव्यं स्वस्वमानैर्जिनपतिचरणं श्वासमध्ये गतिस्थम् ॥१५०॥

भर्तुरित्यादि । इह यथा बाह्ये तथाऽध्यात्मनीति न्यायाद्बाह्ये शक्तिश्वासो वर्ष- 20
धर्मः, तैर्वर्षैर्यदा युगान्तं भवति खं खं ख खाक्ष्यग्निजलनिधिरिति द्वययुताधिकत्रय-
श्चत्वारिंशल्लक्षाणि वर्षाणां श्वासानां शक्तेः । एवं सर्वेषां सत्त्वानाम् । एषां श्वासाना-
मन्ते श्वासमेकं वर्षम्, बाह्ये लोकधातौ मध्यमायां श्वासमेकं यस्मिन् वर्षे कलेर्निर्गमः
कृतयुगप्रवेशः। । एवं चतुर्युगैर्दशमण्डलनाडीप्रवाहः शक्तेः । एकैकमण्डलं द्वात्रिंश-
त्सहस्राधिकं चतुर्वर्षलक्षमिति । एवं कृते चत्वारि मण्डलानि वामनाड्यामाकाशवायुतेज-
उदकानीति । तत्रैव त्रेतायामेकमण्डलं वामनाड्यां पृथ्वीलक्षणम्, ततो मध्यमाप्रवेशः 25
पञ्चत्रिंशत्सहस्राधिकं लक्षमेकं पञ्चमण्डलानां गृहीत्वा मध्यमाकालः । ततो दक्षिणे
संचारः पृथिवीमण्डलमब्मण्डलं त्रेतायाम् । ततो द्वापरे तेजोवायुमण्डलम्, कलौ

आकाशमण्डलम् । तत ऋतुः पूर्णो भवति । ततो मध्यमाश्वासानामन्ते एकः श्वासोऽधिकः सर्वालोकं करोति । यदि तेन श्वासमात्रेण जाग्रदवस्थायां तिष्ठति स श्वासः सर्वसत्त्वानां निद्रावस्थायां भवति । एवं द्वययुताधिकत्रयश्चत्वारिंशल्लक्षश्वासेनाध्यात्मनि ग्रहाणामेक ऋतुर्भवति । मध्यमायां शून्यमण्डलान्ते ज्ञानमण्डले प्रवेशो भवति, तेन स
T 460 5 ग्राह्य इति । एवं ज्ञातव्यं स्वस्वमानैर्जिनपतिचरणं श्वासमध्ये गतिस्थमिति नियमः ॥ १५० ॥

अत ऊर्ध्वं चतुर्दशवृत्तानि सुबोधानीति [211b]।

शून्ये मन्दप्रवेशः स्वदिनगतिवशाज्जायते वै युगान्ते
शून्याकाशाम्बराब्ध्यब्धिशशधरदिनै रेवतीभोगशेषैः ।
10 खं खं खं खाब्धिनेत्रैः स्वगतिगतदिनैस्तत्र राहुप्रवेशः
खं खं खं खर्तुकालैः स्वगतिगतदिनैर्देवमन्त्रिप्रवेशः ॥१५१॥

खं खं शून्याम्बराष्टाहिनयनदिवसैर्मङ्गलस्य प्रवेशः
सूर्यादीनां प्रवेशः ख ख ख ख नयनाग्न्यब्धिसंख्यैर्दिनैश्च ।
खं खं खं खाब्धिनागैकशरगतदिनैस्तत्र चन्द्रप्रवेश-
15 स्तस्मिन् काले विनाशः प्रभवति जगतः स्वस्वमानेन राजन् ॥१५२॥

नाडीसंचार एष प्रभवति च ततश्चन्द्रसूर्योदिते च
एकद्वित्र्यब्धिबाणा रसगिरिवसवो वर्धिता गुह्यनाडी ।
रन्ध्राख्या वारनाड्यो भवति च दशमी सूक्ष्मनाड्यूर्ध्वमार्गे
भूयः सा वर्गभिन्ना सगुणसविषयाश्चक्रनाड्यो भवन्ति ॥१५३॥

20 उष्णीषे हृत्प्रदेशे शिरसि शशिपदे कण्ठदेशेऽर्कचारे
नाभौ वै चक्रनाड्यो युगभुजगनृपाश्चन्द्रचारैरभिन्नाः ।
द्वात्रिंशत्तद्द्विगुण्याः सकलरविपदैर्मिश्रितैरप्यभिन्ना
एकाशीतिः शतं यत् करचरणगताः सन्धिनाड्यो द्विभेदाः ॥१५४॥

उष्णीषे हृत्प्रदेशे शशिरविचरणे कण्ठचक्रेऽवशेषा
25 एकाशीत्यन्तिमा या प्रकटदशविधास्ते ग्रहाः सौम्यरौद्राः ।
तेषामाद्यन्तभागं विभुचरणगतं भुज्यते कालनाड्या
वारान्तं चापि भुङ्क्ते त्रिभुवनजननी डाकिनी वज्रदेहा ॥१५५॥

आदौ या शून्यरूपा विषयगुणगता तत्स्वभावा बभूव
धातुस्कन्धान् प्रविष्टा पुनरपि च समा चक्षुरादीन्द्रियेषु ।
जाग्रत्स्वप्नादिविद्या परमसुखसमानाहते संप्रविष्टा
सा विद्या बुद्धमाता कुलिशपदगता योगिनाऽन्वेषणीया ॥१५६॥

भर्तुः कायप्रभावाद् भवति वरतनौ योगिनां दिव्यचक्षुः
श्रोत्रं तद् वाक्प्रभावात् परहृदयगतं ज्ञायते तस्य चित्तात् ।
प्रज्ञाकायप्रभावात् त्रिविधभवगता पूर्वजानुस्मृतिः स्यात्
प्रज्ञाया वाक्प्रभावात् प्रभवति खसमा सर्वदा सर्वगर्द्धिः ॥१५७॥

प्रज्ञाज्ञानस्वभावाद् भवति समसुखं सर्वदाऽनाहतं यद्
अक्ष्णाऽदृश्यं त्रिविधमपि भवं दिव्यचक्षुःप्रभावात् ।
दिव्यश्रोत्रप्रभावाद् हृदयसुखरवः श्रूयते प्राणिनोक्त
एवं स्पर्शादि सर्वं भवति नरपते कायवाक्चित्तयोगात् ॥१५८॥

या नाड्योऽपानमध्ये त्रिविधपथगता मूत्रविट्शुक्रवाहाः
प्राणात्तासां प्रचारो भवति नवविधश्चान्तिमो बुद्धवक्त्रम् ।
श्रोत्रे घ्राणे च नेत्रे द्विविध इति भवेल्लम्बिकायां सजिह्वे
बिन्दावुष्णीषरन्ध्रे भवति च दशमो मुद्रितोऽज्ञानिनां यः ॥१५९॥

प्राणापाने निरुद्धे क्षुभितशशधरः सूर्यबिम्बं प्रयाति
अब्जे वज्रप्रबुद्धे द्रवति पुनरसौ सूर्यबिम्बार्चिषा वै ।
विज्ञानं ज्ञानमेकीभवति च मरुता चन्द्रसूर्ये निरुद्धे
एवं चैवं तथैवं त्रिविधमपि भवेन्नापरं किञ्चिदस्ति ॥१६०॥

ग्रस्ते चन्द्रार्कबिम्बे नभसि न च दिवा नैव रात्रिः कदाचित्
सा सन्ध्या देहमध्येऽप्यमृतपदगता योगिनां सर्वकालम् ।
पक्षक्षीणो यथेन्दुर्व्रजति समरसं सूर्यबिम्बेऽम्बरस्थः
प्राणापानक्षये वै स्फुटमपि च तनौ सिद्धिकाले सरोधः ॥१६१॥

नष्टे चन्द्रार्कबिम्बेऽप्युभयपथि सदा प्राणवाते निरुद्धे
अब्जे वज्रप्रबुद्धे द्रुतशशिनि महासूर्यबिम्बे प्रविष्टे ।

भावाभावैकभूते त्रिविधभवगतेऽनाहते संप्रबुद्धे
तस्मिन् काले स योगी व्रजति परपदं न द्वयं यस्य किञ्चित् ॥१६२॥

क्रोधा बुद्धाः सदेव्यः खलु रसकुलिशा भूमिगर्भादयश्च
प्रत्यक्षाः खे भवन्ति प्रमुदितहृदया योगिनः सिद्धिकाले ।
5 प्रत्यूषे चार्धरात्रे भवति शशिदिने चेष्टसिद्धिश्च तस्य
रत्नैर्वा पुष्पवृष्टिर्भवति भुवितले कालयोगात् प्रकृष्टा ॥१६३॥

स्वच्छः कायोऽणुनष्टः प्रभवति खसमो लक्षणाद्यैः प्रपूर्णः
स्वच्छं त्रैलोक्यमेवारणविरहितं स्वप्नवद् भाति विश्वम् ।
भाषाऽच्छिन्ना समन्तात् परहृदयगताऽनेकभाषान्तरेण
10 चित्तं सत्सौख्यपूर्णं न चलति सहजालिङ्गितं सर्वकालम् ॥१६४॥

इदानीं लोकधातूपसंहार उच्यते—

भूमेराकृष्य चाणून् जलशिखिपवनं प्रेषयेत् तोयधातौ
तोयाद् भूवह्निवायुं शिखिनि च शिखिनो भूमितोयानिलाणुम् ।
वायौ चाकृष्य वायोः क्षितिजलशिखिनं कर्मवातश्च शून्ये
15 अन्यं क्षेत्रं गताऽन्ये त्रिविधभववशात् कर्मवाताहता ये ॥१६५॥

भूमेरित्यादि। इह बुद्धस्य भगवतो धर्मदेशना द्विधा—एका लोकसंवृत्या, द्वितीया परमार्थतः। तत्र लोकसंवृतिमाह—

अक्षजा धीरनाकारा साक्षाद्वेदाणुसंचयम् ।
सत्काश्मीरमताम्भोधिवैभाषिकमतं मतम् ॥ इति ।

20 एवं तीर्थिकाः सर्वे परमाणुसंचयग्राहका इति। तेन बाह्ये बुद्धक्षेत्राणां लोकधातूनामप्युत्पादक्षयो वेदितव्यः। स च सत्त्वानां शुभाशुभफलभोगहेतोर्भवति, यावत् सत्त्वराशिस्तावदिति नियमः। तेन लोकधातूपसंहारकाले कर्मवातोऽयं लोकधातुर्येनोत्पादितः पूर्वं बुद्धक्षेत्रं च, तस्य द्विधा स्वभावः—एको निश्चल आकाशेषु नक्षत्रवल्लोकधातोर्बुद्धक्षेत्रस्य न कुत्रचिद्दिशि गमनम्, द्वितीयो भ्रमणस्वभावो राशिचक्रवदाकाशे। 25 एवं लोकधात्वन्तर्गतानां स्थावराणां निश्चलस्वभावः, प्राणिनां चलस्वभावः। कर्मवात इति विज्ञानधर्मतः। एवं परमाणुघटितानां शरीराणामुपसंहारः, तेन लोकधातूपसंहारबुद्धक्षेत्रोपसंहारकाले आवर्तविवर्तलक्षणे उत्पादव्ययधर्मिणि। तत्र लोकधातुक्षयकाले भूमेरिति भूमेर्ये परमाणव उदकादिधातूनां संयोगेनावस्थिताः, तेन भूमिपरमाणुराशेराकृष्य

भूमिपरमाणून् पृथक् पृथक् कृत्वा **तोयधातौ** अप्परमाणुराशौ क्षिपति। एवं **तोयधातो**-राकृष्य वह्नौ क्षिपति, **वह्नेराकृष्य** वायौ क्षिपति, **वायोराकृष्याकाशे** पृथक् पृथक् संचरति। एवं लोकधातूपसंहारः। स पुनः कश्चित् पाताले कालाग्निर्नाम देवता, सा लोकधातुं दहति भस्मं करोतीति यः कालाग्निः, स एव परमाणुसंचयः। अपरधर्म-भक्षणतो यः परमाणुरहितः, स न किञ्चिद्दहति न च भक्षयतीति। एवं स्थावराणां विनाशे जाते सति ये विज्ञानधर्मिणः प्राणास्तेऽन्यं क्षेत्रं लोकधातुं **गताः**, यत् कर्मवातेन जनितं तेषामुपभोगाय। एवमनन्ताः **कर्मवाता** लोकधातुजनका बुद्धक्षेत्रजनकाः, यथा प्राणिनां प्राणाः पृथक् पृथक् शरीरजनका इति स्थावराणां वृद्धिजनका इति सिद्धान्तः संवृतौ ॥ १६५ ॥

इदानीं कर्मवातयुक्तानां विहरणमुच्यते—

बुद्धक्षेत्रं समस्तं त्रिभुवनजनकोऽकर्मकं वीक्षयित्वा
शुद्धाणौ सर्वबुद्धा उभयसमरसे वेष्टिते बोधिसत्त्वाः।
प्रत्येकैकं रसाणावुभयकुलवशाद् वेष्टिते वज्रपुत्राः
भूम्याद्याश्चाम्बरान्ताः सकलकुलगताश्चाचलाद्यां प्रविष्टा ॥१६६॥

बुद्धक्षेत्रमित्यादि। इह **भद्रचरीपाठे** भगवतोक्तं तद्यथा—"एक रजाग्रि रजोपम-बुद्धा बुद्धसुताश्च निषण्णकु मध्ये" (ग० सू० ५६.३) इति वचनात् संवृत्या विहरणं बुद्धानां यत्तदाधारवर्जितं निराधारं न भवति, निरावरणधर्मेण पुनः परमार्थतो विहरणं नास्ति। उक्तं **प्रज्ञापारमितायां** धर्मोद्गतपरिवर्ते—"बुद्धानां कुत्रचिद् गमनं वाऽऽगमनं वा न भूतं न च भविष्यति न भवति" इति। तेन एकरसाग्रे शुद्धपरमाणौ सिद्धरसे सर्व-धातुवेधके आधारे सर्वबुद्धाः समस्ता ये शून्यलक्षणा निरावरणा इति। एवं *[212a] **बुद्धक्षेत्रं समस्तमकर्मकं** कर्मवातरहितम्, **त्रिभुवनजनको** ज्ञानकायेन **वीक्षयित्वा शुद्धाणौ सर्वबुद्धास्ते** सार्धं विहरन्ति, **उभयसमरसे** शुद्धाणाविति। प्राकृतरसं सिद्धरसं कृत्वा संसारिणं बोधिचित्तमक्षरं कृतमित्यर्थः। **बोधिसत्त्वा वेष्टित** इति प्रणिधिचित्तेने-षन्मात्रावरणैर्युक्ता **वज्रपुत्रा** इति। **प्रत्येकैकं रसाणाविति** प्रज्ञोपायोभयधर्मे स्थिताः, अचलादिषु स्थिता इत्यर्थः। एवं **भूम्याद्यणौ** रागरहितादिकृत्स्नानि साक्षात्कृता-न्यनन्तान्यचलाद्यां प्रविष्टानीत्यर्थः। इहाणुशब्देनाचलादयो भूमय उक्ताः, न परमा-णवः। शुद्धाणुशब्देन आधारभूता द्वादशभूमयः, सर्वावरणक्षयत इत्यर्थः॥ १६६ ॥

तैः सार्धं वज्रसत्त्वो विहरति गगने वर्तकालं हि यावद्
धत्ते सन्धारणोऽणुं क्षितिजलहुतभुग्वायुशून्यस्वभावम्।

* पत्र सं० २१२ (a+b) नोपलभ्यते। अतः भोटपाठग्राह्यत्वेन पुनरुद्धृत्य पाठोऽत्र उट्टङ्कयते।

मन्थानो मन्थयन् हि पृथगणुसकलं यावदेकत्वमेति
तेषामन्योन्ययोगः पुनरपि च भवेद् मुख्यभावेऽल्पभावः ॥१६७॥

तैः सार्धं वज्रसत्त्वो विहरति गगने वर्तकालं हि यावदिति। इह यावत् सत्त्वानां पुण्यज्ञानसंभारौ न भवतः, तावत् तैर्बुद्धोत्पादो न दृश्यते, अतो विहरति गगने धर्मकायगत इत्यर्थः। इदानीं लोकधातूद्भव उच्यते—संवर्तकालमिति। "संवर्तो भङ्ग आख्यातः"। अत्रेदं पदं नास्ति। संशुद्धाकारेण धर्माधर्मयोः प्रवृत्तत्वाद् वर्तः, तस्माद्धेतोः कर्मवातः त्रिविधो भवति—सन्धारणः, मन्थानः, संस्थानश्च। तेषां **संधारणः क्षित्यादिपरमाणुसन्दोहं धत्ते**, यथा वृष्टिवात उदकपरमाणुसंदोहं धत्ते। ततो **मन्थानः** क्षित्यादिरसान्तं परमाणुसन्दोहं **मथ्नाति, यावद्** धातवो लवणमिव कठिनतां व्रजन्ति। एवं **तेषामन्योन्ययोगो भवेत्, मुख्यभावेऽल्पभावः**। अतः कठिनधर्मे भूमिपरमाणुर्मुख्यः, शेषा अल्पाः। एवं जले जलम्, अग्नावग्निः, स्पन्दात्मके वायुः, रसे सकलं समानम्, स्वस्वगुणरहितम् ॥ १६७ ॥

बुद्धक्षेत्रं समस्तं विरचयति महासर्वसंस्थानवायुः
प्रत्येके लोकधातौ पुनरपि च महाचक्रवालं समन्तात् ।
तन्मध्ये लोकधातुः प्रभवति च महाकर्मभूमिस्वभावः
शेषा भोगस्वभावा विषयसुखकराः सर्वरत्नप्रपूर्णाः ॥१६८॥

ततो **बुद्धक्षेत्रं समस्तं विरचयति महासर्वसंस्थानवायुरिति**। प्राणापानादिभिर्दशभिरित्यर्थः। यथा बाह्य आश्रितानां क्षयवृद्धिकारणानि, तथा देहेऽपि प्राणादीनाम्। **प्रत्येके लोकधातौ पुनरपि च महाचक्रवालं समन्ताद्** इति। यथा सत्त्वानां प्रत्येकदेहे लोम चर्म, तस्य बुद्धक्षेत्रस्य मध्ये कर्मस्वभावो लोकधातुरेको भवति, यथाऽवधूत्येका सर्वनाडीनाम्। लोकधातु**शेषा भोगस्वभावा** अन्या नाड्य इव। ते लोकधातवो **विषयसुखकरा** देहनाड्य इव। **सर्वरत्नप्रपूर्णा** इति यथा रुधिरपूर्णा नाड्यः। बुद्धक्षेत्रं लोकधातुसहितं भवति, यथा द्वासप्ततिसहस्रनाडीसहिता कायोत्पत्तिः ॥ १६८ ॥

इदानीं लोकधातौ मेर्वादीनां लक्षणमुच्यते—

पूर्वे शुद्धेन्द्रनीलः सकलगिरिपतिर्दक्षिणे पद्मरागः
पृष्ठे कर्केतपीतः शशधरधवलश्चोत्तरे चन्द्रकान्तः ।
मध्ये श्यामस्तदन्तर्निहितमिह महामण्डलं तस्य गर्भे
आदौ चित्तस्वभावं द्विगुणमपि ततो मध्यतो वाक्स्वभावम् ॥१६९॥

पूर्वे इत्यादि। इह **पूर्वे** इति पूर्वविदेहाभिमुखः, **शुद्धेन्द्रनीलः**, वायुधर्मात्मकत्वात् **सकलगिरिपतिरित्यर्थः**। अन्तःस्था य र ल वाः। पूर्वे य। **दक्षिणे पद्मरागो** रकार-

धर्मात्मकत्वात्। **पश्चिमे कर्केतपीतः**, लकारधर्मात्मकत्वात्। **शशधरधवलश्चोत्तरे चन्द्रकान्तः**, वकारधर्मात्मकत्वात्। एवं य र ल वा चतुर्द्वीपेषु ज्ञातव्याः। **मध्ये श्यामः**, शून्यहकारधर्मात्मकत्वात् **तदन्तर्निहितमिह महामण्डलं तस्य गर्भ** इति, पूर्वमुक्तम्। आदाविति चित्तमण्डलं चित्तस्वभावम्। **मध्ये तद् द्विगुणं वाक्कायमण्डलम्** ॥ १६९॥

तस्मादन्यद् द्विगुण्यं शरदशगुणितं योजनानां सहस्रं　　5
तद्बाह्ये चक्ररूपं त्वृतुभिरपि ततो लोकधातुस्वभावम्।
षट्चक्रैः षट्कुलैश्चानिलवलयगतं मण्डलं वेदलक्षै-
र्द्व्यष्टस्तम्भैश्च कूटं नृपतिशशिकलाभिर्वृतं योनिरूपम् ॥१७०॥

मेरोः कर्णिकास्थाने ज्ञानचक्रम्, हृदयस्थाने चित्तमण्डलम्, कण्ठस्थाने वाङ्मण्डलम्, ललाटे कायमण्डलम्। **तद्बाह्ये** सर्वमण्डलानि लोकधातुस्वभावेनावस्थितानि।　　10
शरदशगुणितं योजनानां सहस्रमिति मेरोरूर्ध्वे पञ्चाशत्सहस्रयोजनं कायवाक्चित्त-मण्डलम्। हृदये कालचक्रं मुद्रालक्षणं च। तद्बाह्ये पञ्चाशत्सहस्रात् **षट्चक्ररूपम्**। ऋतुभिरिति षडृतूनां विशुद्ध्या **लोकधातुस्वभावं** षडृतुस्वभावम्। **षट्चक्रैः षट्कुलैश्चेति**, उक्तपूर्वम्। योजनै**र्वेदलक्षैः, अनिलवलयगतमिति** वायुमण्डलान्तं **मण्डलम्**। गर्भे **द्व्यष्टस्तम्भैश्च कूटं** षोडशकलाभिः शुद्धम्, तैः स्तम्भैः, गर्भे परि**वृतं** ज्ञानचक्रम्,　　15
योनिरूपं सर्वसिद्धिजनकमिति मेरुनिष्पत्तिः ॥१७०॥

इदानीं भगवतः कायमानेन बाह्यमण्डललक्षणमुच्यते—

उष्णीषादूर्णमध्यं भवति जिनपतेः सार्धसूर्याङ्गुलं तु
तस्मात् कण्ठाब्जमेवं हृदयमपि ततो नाभिगुह्याब्जमेवम्।
पादोऽधो जानूरूकस्फिकमपि मनुभिस्तत्त्वतत्त्वैश्च वेदै-　　20
रर्घोरः सार्धसूर्यैः स्वभुजभुजकराः खाक्षिराजार्कमात्रैः ॥१७१॥

विंशत्येकाधिकं यच्छतमृतुनवभिर्लोकमानं नराणां
वेदैः सार्धैश्चतुर्भिर्जलधिजलधिभिः सार्धवेदैश्च वेदैः।
उष्णीषं मस्तकाधो भवति जिनपतेः श्रीललाटं च नासा
चिब्वन्तं नासिकाधो गलकमपि ततः कण्ठमूलाब्जमध्यात् ॥१७२॥　　25

तस्माद्धृन्नाभिगुह्यं भवति नरपते सार्धसूर्यैः क्रमेण
गुह्याब्जं नाभिमूले कुलिशमपि मुनेरूर्ध्वं उष्णीष एव।
ऊर्णा गुह्याब्जमध्येऽक्षरसुखजननी शुक्रबिन्दोः स्थितिर्या
एषा श्रीवज्रभूमिर्हृभयकुलवशात् कायवाक्चित्तचक्रे ॥१७३॥

उष्णीषादिति। इह भगवतो **जिनपतेः, उष्णीषादूर्ध्वम् ऊर्णमध्यमिति** भ्रूमध्ये **सार्धसूर्याङ्गुलं भवति** सार्धद्वादशाङ्गुलिमानम्। **तस्मात् कण्ठाब्जमेवं** सार्धद्वादशाङ्गुलिमानम्। **हृदयमपि** सार्धद्वादशाङ्गुलि। ततो **नाभिगुह्याब्जमेवमिति** नाभिकमलं सार्धद्वादशाङ्गुलि। एवं गुह्याब्जं सार्धद्वादशाङ्गुलि। तत उष्णीषाद् गुह्यपद्मान्तं सार्धद्वाषष्ट्यङ्गुलिकायमानम्। **पादोऽधो मनुभिरिति** चतुर्दशाङ्गुलिभिः। **जानु तत्त्वमिति** पञ्चविंशतिः, **ऊरू** अप्येवम्। पादोच्छ्रयो **वेदैरिति** सार्धचतुरङ्गुलिभिः। एवं जानुसन्धिः **स्फिकमपि** चतुरङ्गुलिभिः। एवं सार्धद्वाषष्ट्यङ्गुलिभिः स्फिकात् पादाधोऽन्तम्। तथा पञ्चविंशत्यधिकशतं बुद्धकायः। **अर्धोरः सार्धसूर्यैरिति** सार्धद्वादशमानैः। **स्वभुजभुजकराः खाक्षिराजार्कमात्रैरिति** विंशतिभिर्बाहुः, षोडशभिरुपबाहुः, द्वादशभिः करो मध्यमाङ्गुल्यन्तम्। एकेन करोपबाहुसन्धिः, बाहूपबाहुसन्धिः। एवं सार्धद्वाषष्ट्यङ्गुलयः। यथा वामे तथा दक्षिणेऽपि। सर्वत्र **पञ्चविंशत्यधिकशतं** कायमानं चतुरस्रम्। तदेव सत्त्वानां चतुर्हस्तं **नराणां** षण्णवत्यङ्गुलि ऊर्ध्वाधो चतुरशीतिः, तथा नरा न लक्षणयुक्ता इति सिद्धम्। **वेदैरिति** चतुर्भिरुष्णीषमानम्। **सार्धचतुर्भिः** शिरउच्छ्रयः, चतुर्भि**र्ललाटम्, चकारात्** चतुर्भिर्नासिका, सार्धचतुर्भिर्नासिकाधश्चिबुकान्तम्, चतुर्भिः **कण्ठः**। **तस्माद् हृन्नाभिगुह्यं भवति नरपते सार्धसूर्यैः क्रमेण। गुह्याब्जं नाभिमूले कुलिशमपि मुनेरूर्ध्वं उष्णीष एव। ऊर्णा** गुह्याब्जमध्येऽक्षरसुखजननी **शुक्रबिन्दोः स्थितिर्या। एषा** श्रीवज्रभूमिहर्युभयकुलवशात् **कायचक्रं** ललाटनाभि, **वाक्चक्रं** कण्ठहृदयम्, **चित्तचक्रं** गुह्योष्णीषम्। ॥१७१-१७३॥

इदानीं कायमण्डलशुद्धिरुच्यते—

> सार्धार्कं पञ्चविंशद् द्विगुणमपि ततश्चित्तवाक्कायचक्रं
> चित्तार्धं षट्सपादं हृदिगतसहजं चाङ्गुलं ज्ञानचक्रम्।
> त्रिभ्यो द्वाराणि कुर्यान्मणिमयरचनां मण्डलेभ्योऽष्टमांशाद्
> गत्यागत्याप्यधोर्ध्वं द्विगुणमपि भवेत् कायवाक्चित्तचक्रम्॥१७४॥

सार्धार्कमित्यादि। इह काये गुह्योर्णमध्ये [213a] हृदयम्, तदेव **चित्तचक्रम्**, नाभिकण्ठमध्यतः **सार्धद्वादशाङ्गुलम्**, नाभिकण्ठसीम्नः **पञ्चविंशत्यङ्गुलं वाक्चक्रम्**, तथा गुह्यकमलोर्णान्तं पञ्चाशदङ्गुलं **कायचक्रं** वज्रभूम्याम्। **चित्तार्धमिति** चित्तचक्रस्यान्तर्गतं **षट्सपादैरङ्गुलैर्ज्ञानचक्रं** शोधनीयम्। **त्रिभ्य** इति सप्तम्यर्थे पञ्चमी। त्रिषु मण्डलेषु **द्वाराणि कुर्यादिति** चित्तद्वाराणि जाग्रदाद्यवस्थाचतुष्कम्, वाग्द्वाराणि मुखगुदनासारन्ध्राणि, कायद्वाराणि चक्षुःश्रोत्ररन्ध्राणीति द्वादशद्वाराणि। शेषं पूर्वोक्तवत्। एवं बोधिचित्तस्य **गतागतभेदेनाध ऊर्ध्वं द्विगुणमपि भवेत् कायवाक्चित्त**[1]**चक्रं** शताङ्गुलमित्यर्थः॥१७४॥

१- ख. वज्रं।

मेरुस्थेऽप्यङ्गुलार्धं भवति जिनपतेर्योजनानां सहस्र-
मेवं कायप्रमाणो भवति सुरगिरिर्विस्तरेणार्धमात्रः ।
तस्योर्ध्वे तस्य चार्धं भवति हि कुलिशाकारकूटं त्रिभाग-
मेवं चाधो धरापो हविरपि पवनः सार्चिषा वज्रमाला ।।१७५।।

एवं मेरुस्थेऽपि मण्डले जिनपतेर्यदर्धाङ्गुलं तन्मर्त्ये योजनानां सहस्रम् । एवं वायुवलयान्तं चतुर्लक्षयोजनं भवति चतुर्हस्तेषु । एवं कायप्रमाणो भवति सुरगिरि-विस्तरेणार्धमात्रः पूर्वोक्त इति । तस्योर्ध्वे तस्य चार्धं भवति हि कुलिशाकारकूटं त्रिभागं मेरोर्बाह्ये धरावलयमब्वलयं तेजोवलयं वायुवलयम्, अधोभागे सार्चिषा वज्र-माला वज्रवलयबाह्ये ।।१७५।। 5

हृच्चक्रं सार्धसूर्यैर्भवति जिनपतेर्नाभिकण्ठाब्जमध्ये 10
वाक्चक्रं कायचक्रं कुलिशमणिगताद्ध्र्वमूर्णार्धसीम्नः ।
निर्यूहां(हं) श्रीकपोलं भवति नृप ललाटोर्ध्व उष्णीषसीम्नः
सार्धार्कैर्भूमितोयानलचलवलयं सार्चिषा वज्रमाला ।।१७६।।

[1]सार्धमित्यादि (हृच्चक्रमित्यादि) वृत्तमेकं सुबोधम् ।। १७६ ।।

ऊर्ध्वाधो बुद्धकायो भवति सममिदं कायवाक्चित्तचक्रं 15
तिर्यङ्मानैःसमन्तात् पवनगतिवशाद्वा त्रिभिः षड्भिरेवम् ।
चक्रं चाष्टारचक्रैर्भवति जिनपतेरङ्गुलैः षट्सपादै-
रष्टद्वारैश्च वृत्तं स्वकरतलनखैः कल्पयेच्छ्रीश्मशानम् ।।१७७।।

ऊर्ध्वाधो बुद्धकायो भवति समं चतुरस्रं कायवाक्चित्तचक्रं चतु[2]रस्रम् । तिर्य-ङ्मानैः समन्तात् पवनगतिवशाद् बाह्ये वायुवलयगतिवशादध्यात्मनि वामहस्तनखान्तं दक्षिणहस्तनखान्तं वायुगमनं समानादीनाम् । तेन शरीरमण्डलं चतुर्हस्तं[3] चतुरस्रमिति नियमः । वा अथवा, त्रिभिश्चक्रैः संवरं वा, षड्भिश्चक्रैः संवरमण्डलं वृत्तमष्टद्वारिकं प्रत्येकचक्रमानैः षट्सपादैः षड्भिरङ्गुलैर्भवति, जिनपतेरष्टद्वारैश्च वृत्तं पूर्वोक्तम्, स्वकरतलनखैः कल्पयेत् श्रीश्मशानम्, तत्र तिर्यङ्मण्डले अध ऊर्ध्वे पुनर्मुखाद्यष्टद्वाराणि श्मशानानीति नियमः ।। १७७ ।। 20 25

इदानीं भगवतीकायशुद्धिमण्डलमुच्यते—

ऊर्ध्वाधो वक्त्रगुह्याद् भवति भगवतीमण्डलं द्वयब्धिमानैः
पद्मार्धं गर्भमध्यात् त्रिभिरपि च ततः सावली चक्रषट्कम् ।

---

१. च. 'सार्ध सुबोधम्' नास्ति । २. च. र्हस्तं । ३. भो. रस्रं ।

द्वाराद्यं सर्वचक्रात् प्रभवति नियतं पञ्चमांशैः कपोलं
न प्रज्ञा नाप्युपायः सहजतनुरियं स्तूपरूपं समन्तात् ॥१७८॥

ऊर्ध्वाधो वक्त्रगुह्याद् भवति भगवतीमण्डलं द्वयब्धिमानैरिति द्वाचत्वारिंश-
दङ्गुलैर्भवति, ऊर्णागुह्यकमलाभ्यां त्यक्त्वा [1]द्वाचत्वारिंशद्भिरङ्गुलै रजोधातुः। तेन
5 भगवतीमण्डलं भवति। पद्मार्धं षट्चक्रं तुल्यभागैरिति। अत्र द्वारं विसदृशं चक्रात्
T 462 पञ्चमांशम्, चक्रात् पञ्चमांशेन यच्चतुष्पीठादौ तत् कस्य हेतोरिति ? [2]अत्र प्रसूतिकाले
मातुर्योनिर्द्वादशाङ्गुलं भवति षण्णवतिविभागेनाष्टमो विभागः। तेन चतुर्द्वीपेषु योनयः
स्त्रीणां चतुर्द्वाराणि, गर्भाधानमण्डलगृहं बालशरीरं देवतागणमिति प्रपञ्चो बालानां
देवताकारेणोत्पत्तिर्दर्शिता भगवतेति। किन्तु गुह्यादुष्णीषविभागेन पञ्चमांशं द्वारमिति
10 न्यायात्। एवं सत्त्वानां शरीरं मण्डललक्षण[3]रूपम्, स्तूपं पुनर्न प्रज्ञा नाप्युपायो नपुं-
सकमिति नियमः॥ १७८ ॥

बाह्ये मेरोरधो वै क्षितितलनिलये संस्थिताः सिद्धयोऽष्टौ
पूर्वे खड्गो रसेन्द्रोऽमृतफलगुलिकाश्चाञ्जनं रोचनं स्यात्।
सव्ये श्रीपादुका चाक्षयसकलनिधिर्मण्डलस्याग्निकोणे
15 मध्ये यज्ञोपवीतं त्रिदशनरगुरोर्ब्रह्मघोषस्तदेव ॥१७९॥

बाह्ये मेरोरधो वै क्षितितलनिलये संस्थिताः सिद्धयोऽष्टौ, पूर्वे खड्गो रसेन्द्रो
रुद्रकोणे, अमृत[213b]फलमुत्तरे, गुलिका वायव्ये, अञ्जनं पश्चिमे, नैर्ऋत्ये रोचनम्,
सव्ये पादुका, अक्षयनिधिरस्याग्निकोण इति। मध्ये मण्डलस्य यज्ञोपवीतमिति,
त्रिदशनरगुरोः कालचक्रस्य। ब्रह्मघोषस्तदेवेत्यनाहतध्वनिर्देवादीनां प्रबोधक इति
20 नियमः ॥१७९॥

इदानीं वज्रविशुद्धिलक्षणमुच्यते —

मण्युष्णीषे ललाटे गलहृदयगते नाभिगुह्ये च वज्र-
मेकद्व्यब्धीष्वहीन्द्रैः सनवदिनकरैरङ्गुलैश्च क्रमेण।
मध्योर्ध्वाधस्त्रिभागं मुकुलितविकरालं च शान्तौ च रौद्रे
25 घण्टाऽप्येवं त्रिभागोपरि कुलिशसमा गोमुखाः पद्मरूपाः ॥१८०॥

मणीत्यादि। इह वज्रमणिविशुद्ध्या एकाङ्गुलं वज्रं भवति, उष्णीषचक्रविशुद्ध्या
द्व्यङ्गुलम्, ललाटविशुद्ध्या चतुरङ्गुलम्, कण्ठविशुद्ध्या पञ्चाङ्गुलम्, हृदयविशुद्ध्या

---

१. भो. gSor brGyad (अष्टाङ्गुलं) इत्यधिकम्। २. च. 'अत्र' नास्ति।
३. भो. Ran bSin (स्वरूपं)।

अष्टाङ्गुलम्, **नाभिविशुद्धया नवाङ्गुलम्**, **गुह्यविशुद्धया द्वादशाङ्गुलम्**। **वायुतेजोदकपृथ्वी-कृत्स्नानां** कामावचरा [1]सुरनराणां यथासंख्यम्। तेन कर्णमुद्राणामेकाङ्गुलम्, अङ्गुष्ठवज्रं द्वयङ्गुलम्, ललाटे वज्रमालार्थं चतुरङ्गुलम्, कण्ठे चापि पञ्चाङ्गुलम्, स्कन्धे वज्रमालार्थमष्टाङ्गुलम्, हृदयोत्कर्पवज्रं नवाङ्गुलम्, उल्लालवज्रं द्वादशाङ्गुलं योगिना कर्तव्यं वज्राभरणाय। तेषां लक्षण**मूर्ध्वे मध्येऽधः** समभाग**स्त्रिभाग** इति तदेवोल्लालवज्रं **मुकुलितं** **शान्तौ** शान्तिकर्मणि, **विकरालं** विकसितशूकं **रौद्र** इति रौद्रकर्मणि। घण्टाऽप्येवं त्रिभागा मध्ये ऊर्ध्वे वज्रं मुखं च तुल्यम्। **गोमुखाः शान्तौ**। **पद्म-विकासमुखा** रौद्रे करालवज्रेण सह॥ १८०॥

विस्तारस्तत्त्रिभागं समुखवरटकं तत्त्रिभागाद् दलं च
शूकं विस्तारतुल्यं दिशि विदिशि चतुर्भागिकं शूकवृत्तम्।
बाह्ये शूकं त्रिभागोऽध उपरि बदरीकण्टकाकारयोगो
घण्टावक्त्राणि तद्वद् दलमपि कुलिशं गोमुखाद्यं तथैव॥१८१॥

इह वज्रमानाद् वज्रशूकानां **विस्तारस्त्रिभागिको** वज्रस्य मध्ये **वरटकं** चतुर्मुखम् तस्य त्रिभागस्य **त्रिभागम्**, एवमध ऊर्ध्वे वरटकस्याष्ट**दलानि** वरटकमानेनेति, **शूकं** वज्रस्य **विस्तारतुल्यमिति** त्रिभागम्। **दिशि** मध्ये **विदिशि** चतुर्दिक्षु विदिक्षु वा। **शूकवृत्तं** वज्रत्रिभागस्य **चतुर्विभागिकम्**। **बाह्ये शूकानां त्रिभागोऽधः**, भागद्वयमूर्ध्वं **बदरीकण्टक**वन्मूर्ध्नि, **योगो** मध्ये मिश्रेणेति मुकुलितं विकराले (विकीर्णे) विकाशो मूर्ध्नि कर्तव्य इति। **घण्टायां वक्त्राणि तद्वदिति** यथा वज्रे चतुर्वक्त्राणि कायवाक्चित्तज्ञान-[2]बिन्दुविशुद्धया मैत्र्यादिविहारतः, तथा प्रज्ञाया रजोधर्मेण शून्यतादिधर्मेण चतुर्विमोक्ष-मुखविशुद्धया चतुर्मुखानि कर्तव्यानीति न्यायादेकः। द्वितीयो "दिनस्तु भगवान् वज्री" इति कालिर्व्यञ्जनधर्मोऽनुच्चार्यः, स्वराभावात्। तेन वज्रवरटके मुखाभावः। "नक्तं प्रज्ञा प्रकीर्तिता" इत्यालिः स्वरधर्मः, तेनोच्चारणस्वभावादेकमुखं भगवत्या इति वज्रघण्टायाः सिद्धम्॥ १८१॥

इदानीं चैत्यलक्षणमुच्यते—

गुह्याब्जोर्णान्तभागैः परमजिनपतेरूर्ध्वतश्चैत्यमानं
पीठायामस्तदर्धैः क्षितिरिव सुसमं तत्त्रिभागैर्दिशांशाः।
सार्धान्तो निर्गमोऽब्जं हृदिगतवलयं पीठमानेन वृत्तं
पद्मान्ताद् भागहीनं तलसममुरसस्तद्दिशांशैश्च कण्ठम्॥१८२॥

---

१. भो. Lha Min (असुर) इत्यधिकम्। २. च. 'बिन्दु' नास्ति।

गुह्येत्यादि । **गुह्याब्जोर्णान्तभागैरिति** पञ्चाशदङ्गुलैः, **परमजिनपतेरूर्ध्वतश्चैत्यमानम्** । **पीठायामस्तदर्धैरिति** पञ्चविंशतिभिः, **क्षितिरिव** चतुरस्रः, **सुसमस्तिर्यग्विभागेन** । **तस्य त्रिभागैर्दिशांशा** इति । अङ्गुलत्रिभागेन सहितान्यष्टाङ्गुलानि, सार्धाङ्गुलनिर्गमः । तस्य पीठोपरि पद्मस्य निर्गमः, तेनैव मानेन हृदिगतवलयस्यापि निर्गमः । एवं **हृदिगतवलयं** भवति **पीठमानेन वृत्तं** [214a] **पद्मं च** । **पद्मान्तात् त्रिभागहीनं तलसममुरसो** वृत्तं सार्धाङ्गुलहीनमिति । तस्य **दिशांशैश्च कण्ठमिति**, अष्टाङ्गुलं त्रिभागिकं तिर्यङ्मानेन, ऊर्ध्वमानेन चतुरङ्गुलम् ॥१८२॥

वक्त्रं पीठार्धभागैः क्षितिरिव सुसमं तत् त्रिभागाद्दिशांशा
गुह्याब्जात् सार्धसूर्यैः सुसममपि भवेदूर्ध्वतः पीठमानम् ।
पीठादब्जादिसीम्नो हृदिगतवलयान्तं ततः कण्ठमूलं
तस्माद् वक्त्रान्तमेवं जलधिरपि युगैः सार्धवेदैस्त्रिखण्डम् ॥१८३॥

वक्त्रं पीठार्धभागैरिति । सार्धद्वादशभिः, तिर्यग्विभागेन तदेव चतुरस्रं यथा **कण्ठम्, क्षितिरिव सुसममिति** तस्य वक्त्रस्य कण्ठस्य त्रिभागिका चतुर्दिशांशा कण्ठस्यार्धाङ्गुलनिर्गमो दिगंशानां वक्त्रस्य पादोनाङ्गुलनिर्गम इति । **गुह्याब्जात् सार्धसूर्यैः** सार्धद्वादशाङ्गुलैरूर्ध्वतः **पीठमानं** चतुरस्रं **सुसममपि भवेदिति** पीठतलात् । **पीठादब्जादिसीम्न** इति नाभिकमलपर्यन्तमवधूतीस्थानं यावदिति सार्धद्वादशमाना । ततो **हृदिगतवलयान्तं** च सार्धद्वादशमाना, ततः **कण्ठमूलं** [1]सार्धद्वादशमानम्, **तस्मात्** सम्भोगचक्रस्थानाद् **वक्त्रान्तमेवं** छत्रावली स्थानपर्यन्तं चतुरङ्गुलं कण्ठम्, चिबुकान्मुखस्थानपर्यन्तं सार्धचतुरङ्गुलम् । एवं सुनासिकास्थानं तथा चतुरङ्गुलम्, [2]एवं शिरःस्थाने छत्रावलीति । एवं **जलधिरपि युगैः सार्धवेदैस्त्रिखण्डं** कण्ठादिवक्त्रमिति ॥ १८३ ॥

पीठाद् वेदैश्च पद्मं हृदिगतवलयं कण्ठमानं च तद्वत्
सार्धाष्टैर्वक्त्रमानं भवति तदुपरि च्छत्रमाला नरेन्द्र ।
ऊर्णासीम्नो ललाटे शिरसि तत इहोष्णीषपर्यन्तमेषा
एवं वै लोकधातुः सकलजिनतनुश्चक्रचैत्यस्वरूपः ॥१८४॥

पीठादिति । पीठोर्ध्वतः पद्मासनस्योच्छ्रयो **वेदैरिति** चतुरङ्गुलैः **पद्मम्**, एवं **हृदिगतवलयं** चतुरङ्गुलम्, **कण्ठमानं च तद्वच्चतुर्भिः** [3]**सार्धाष्टैः, वक्त्रमानमिति** चिबुकान्मुखान्तं सार्धचतुर्भिः, नासिकान्तं चतुर्भिः, तत ऊर्णास्थानं भ्रुवोर्मध्ये । तदूर्ध्वं ललाटादारभ्य **भवति तदुपरि च्छत्रमाला नरेन्द्र ! ऊर्णासीम्नश्छत्रावली ललाटे शिरसि**

---

१. च. 'सार्धद्वादशमानम्' नास्ति । २. च. 'एवं' नास्ति । ३. च. सार्धाष्टभिः ।

इह्योष्णीषपर्यन्तमेषा सार्धद्वादशाङ्गुला इति नियमः। **एवं सुमेरुलोकधातुः सकल-जिनतनुः** स्तूपभावो मेरुः, रूपस्वभावा बुद्धप्रतिमा, निर्मितकायो द्वात्रिंशन्महापुरुषलक्षण-मिति। अत्र महापुरुषलक्षणानि, तद्यथा—तथागतस्य चक्राङ्कितपाणिपादतलौ, चक्रे सहस्रारे परिपूर्णे सनाभिके सुप्रतिष्ठितपादतलौ, सर्वपादतलेन पृथ्वीं स्पृशति, साऽप्यु-न्नमिते पादतले उन्नमति नमिते नमति, जालावनद्धे पाणिपादतले राजहंसस्येव जालिनो- 5 युतौ हस्तौ, पादौ जातबालस्येवातिमृदुतरौ, सप्तोत्सद इति द्वयोः पादयोर्हस्तयोः स्कन्धयोः कण्ठेऽपि उत्सद इति। करपादयोर्दीर्घाङ्गुल्यो वृत्ता आयता सुपर्वाङ्गुष्ठकाद्या इति। आयतपादपार्ष्णिः, बृहदृजुगात्रः, उच्चैर्जान्विङ्गुल्यग्रा, ऊर्ध्वाग्राणि लोमानि दक्षिणावर्तानि, ऐणेयजङ्घः, कोशावगतबस्तिगुह्यः, हस्तिन इव कोशेन प्रच्छादितं बस्तिगुह्यम्, सुवर्णादिस्निग्धवर्णः, सुवर्णवच्छविः, मलरजोऽग्राहिणो रोमकूपे एकैकरोम- 10 भ्रुवोर्मध्ये, ऊर्णोपरि मण्डलं कर्पासांशुशुक्लातिसूक्ष्मशुक्लद्वात्रिंशदात्मकं दक्षिणकुण्डला-वृतम्। सिंहपूर्वार्धकाय उपरिविशालः सुवृहत्स्कन्धः परिमण्डलग्रीवा, अङ्गप्रत्यङ्गेषु T 463 रसरसाग्राः, रसं रसमस्तीति रसरसाग्राः, [214b] ताः पुनः शिरा आहारिण्योऽग्रत इति वातपित्तश्लेष्मभिरलिप्तत्वात्। न्यग्रोधपरिमण्डलो महापुरुष इति, आयाम-व्यायामयोः समन्तादेव उष्णीषावर्तशिरः, उष्णीषं छत्र इव परिगतमुन्नतम्, आकेश- 15 श्रोतसी जिह्वाऽग्रेण स्पृशति, केशपर्यन्तं ललाटं च जिह्वयाऽऽच्छादयति। ब्रह्मस्वरोऽनन्त-पर्षदा यथा बाह्ये तथाभ्यन्तरे श्रूयते सर्वसत्त्वैरपि। सिंहस्येव वृत्तहनुः, समा दन्ता-श्चत्वारिंशच्छुक्लाः सर्वदोषरहिताः। [1]अभिनीलाद्यं नेत्रम्, नेत्रयोर्यन्नीलं तदभिनीलम्, यत्र रक्तं तदभिरक्तम्, यच्छुक्लं तदभिशुक्लम्। गोपक्ष्माणि वृषभस्येवाक्षिपत्राणि, अध ऊर्ध्वायतनानीति। विश्ववर्णकायः सत्त्वानां नानावर्णविलोकनतः। एवं पादतला- 20 दारभ्य उष्णीषान्तानि द्वात्रिंशन्महापुरुषलक्षणानि **धर्मसंग्रहे** (म. सू. सं., पृ. ३३४) उक्तानि, तेन वृत्तैर्न सूचितानीति। **एवं लोकधातु(तो)रुत्पत्तिः। एवं बुद्धनिर्माणकाय-तुल्यः।** एवं रजोमण्डलं सत्त्वानां पुण्यलाभाय। यथा मेरुस्तथा चैत्यः। सूर्यादीनां दक्षिणावर्तभ्रमणाय चैत्यवन्दनाय मर्त्ये दर्शितः। यथा बुद्धस्तथा बुद्धप्रतिमा कार्या, पूजादिकरणाय। एवं संवृतिसत्यं पुण्यलाभाय दर्शितम्। अत्राशीतिव्यञ्जनानि ग्रन्थ- 25 बाहुल्यभयान्नोक्तानि सर्वत्रोक्तायेने(न्येवे)ति ॥ १८४ ॥

इदानीं लोकधातौ नानाधातुस्वभाव उच्यते—

पृथ्वी स्याद्धेमधातुर्जलमपि रजतं वह्निधातुश्च ताम्रं
वायुश्चायश्च शून्यं त्रपु भुजगमिदं मिश्रधातुस्वभावम्।
पृथ्वी स्यात् पीतरत्नं सितमपि च जलं रक्तरत्नं च वह्निः 30
कृष्णं वायुश्च नीलं हरितमपि तथा मिश्रधातूद्भवं तत् ॥१८५॥

---

१. भो. 'अभि' इत्यस्य स्थाने सर्वत्र Śin Tu (अति)।

पृथ्वीत्यादि। इह पृथ्वी स्याद्धेमधातुरिति हेम पृथ्वीस्वभावं पीतम्, रजतं तोय-स्वभावं धवलम्, ताम्रं वह्निस्वभावं रक्तम्, अयो वायुस्वभावं कृष्णम्, त्रपु नागं च मिश्रमिति। रसलोहमाकाशलक्षणं ज्ञानधातुलक्षणमिति। एवं स्वर्णादिलोहषट्-[कम्।] तथा मणिरत्नानीति। पीतरत्नं पृथ्वीस्वभावम्, श्वेतं जलस्वभावम्, रक्तं वह्निस्वभावम्, कृष्णं वायुस्वभावम्, श्याममाकाशस्वभावम्, नीलं ज्ञानधातुस्वभावम्, तद्धातूद्भवत्वादिति ॥१८५॥

भूमिः क्षाराऽम्बु मिष्टं प्रभवति कटुकोऽग्निश्च तिक्तोऽनिलश्च
मिश्रश्चाम्लः कषायो रस इति च पुनः क्षेत्रपाषाणयोनिः।
ओषध्यः षट्प्रकारा रसपरमरसा धातवोऽन्ये मणीन्द्रा
नानास्पर्शाश्च भूम्यां सकलरुजहराण्येव तोयानि सम्यक् ॥१८६॥

तथा षड् रसाः–भूमिस्वभावः क्षाररसः, मधुरस्तोयस्वभावः, कटुकोऽग्निस्वभावः, तिक्तो वायुस्वभावः, आकाशस्वभावः कषायः, ज्ञानस्वभावोऽम्ल इति। एवं क्षेत्र-पाषाणानां योनिः पृथिव्यादिः। एवमोषध्यः षट्प्रकाराः। रसाः परमरसा इति सिद्ध-रसाः। धातवोऽन्ये मणीन्द्रा इति षट्। एवं नानास्पर्शाश्च भूम्यां सकलरुजहराः, एवं तोयानि शैलोदकानीति षट्प्रकाराणीति सम्यक् ॥१८६॥

इदानीं मणिरत्नगुणा उच्यन्ते—

पृथ्वी शूलापहारी विषमपि च हरेत् तोयधातुश्च वह्नि-
र्भूतं स्तोभं च वायुर्गगनमपि हरेत् क्षुद्रदृष्टिप्रपातम्।
ज्ञानं सर्वापहारी मणिरपि च तथा संस्थितोऽङ्गे नृपाणां
सर्वेऽचिन्त्यस्वभावाः सलिलरसमणिस्पर्शमन्त्रौषधीनाम् ॥१८७॥

पृथ्वीत्यादि। इह पृथ्वीजातिर्मणिर्वा रत्नं वा शूलापहारी भवति, तोयजाति-र्विषापहारी भवति, भूतावेशापहारी अग्निजातिः, स्तम्भनापहारी वायुजातिः, क्षुद्र-दृष्टिप्रपातापहारी शून्यजातिः, ज्ञानजातिः सर्वदोषापहारी। यथा रत्नं मणिस्तथा सामान्योऽपि दर्दुरादीनां शिरसि जातो दोषापहारी मणिः संस्थितोऽङ्गे नृपाणामिति। एवमुक्ता ये सर्वेऽचिन्त्यस्वभावाः पृथिव्यादिधर्मिणः। एवं बुद्ध[215a]क्षेत्र-निष्पत्तिः ॥१८७॥

बुद्धक्षेत्रं समन्तात् प्रविशति भगवान् ज्ञानचक्रस्वरूपी
भूयः सत्त्वप्रवृत्तिर्भवति फलवशात् सर्वसामग्रियोगात्।
मासास्तैर्द्वादशाङ्गैः स्वदिनगतिवशान्मेरुनिष्पत्तिरत्र
स्तूपाकारोर्ध्वकूटं नृपकुलिशमयं मण्डलं तस्य गर्भे ॥१८८॥

बाह्ये ज्योतिष्कचक्राण्यवनितलगताः कर्मभूम्यां मनुष्याः
षड्द्वीपाभोगभूम्याममृतफलरसाहारिणोऽन्ये सुराद्याः ।
अष्टौ शृङ्गानुरूढाः सुरपतिरनलः कालदैत्याब्धिवाता
यक्षो रुद्रोऽथ ऊर्ध्वे परिजनसहितो विष्णुरेवाब्धिवक्त्रः ॥१८९॥

अतो वृत्ताद् वृत्तद्वयं सुबोधम् ॥१८८-१८९॥ 5

इदानीं मकरादिराशीनां स्वभाव उच्यते—

विज्ञानं शून्यधातुर्मकर इह घटश्चैव संस्कारवायु-
र्मीनो मेषो वृषश्च प्रभवति मिथुनो वेदनाग्निश्च संज्ञाः ।
तोयं रूपं क्षितिश्चाक्षरमपि सहजा राशयः कर्कटाद्या
एषां वज्रादिचिह्नानि क च ट प त शा दीर्घह्रस्वाधिदेवाः ॥१९०॥ 10

विज्ञानमित्यादि । इह **मकरो विज्ञानशून्यधातुस्वभावः, कुम्भः संस्कारवायु-धातुस्वभावः, मीनो वेदनाग्निस्वभावः, मेषः** संज्ञातोयस्वभावः, **वृषो रूपपृथ्वी**[1]-स्वभावः, **मिथुनो** ज्ञानस्कन्धज्ञानधातुस्वभावः । एवं **सहजाद्यन्तस्वभावाः कर्कटादयो** राशय इति विलोमेन । **एषां** मकरादीनां **वज्रादिचिह्नानि** वज्रखड्गरत्नपद्मचक्रकर्तिका इह कर्कटादीनां सृष्टिक्रमेण विलोमानीति । कवर्गादयः **क च ट प त शा** मकरादीनाम्, 15 ङ ञ ण न म क्ष ङादीनि कर्कटादीनाम् । लोकधातुपटलोक्तानीति **दीर्घह्रस्वाधि-देवानि** दीर्घस्वरभिन्नानि ककारादीन्यशीत्युत्तरशतानि व्यञ्जनानि । एवं ह्रस्वस्वर-भिन्नानीति ॥१९०॥

इदानीं ग्रहाणां जन्मराशय उच्यन्ते—

मेषे युग्मे कुलीरे शशिसितरवयः सिंहकन्यातुलासु 20
भौमो मन्त्री च राहुर्बुधशनिफणिनो वृश्चिकाद्यन्तचापे ।
एवं भूम्यादिधातोर्भवति नरपते सर्वतोऽन्योन्ययोगः
सत्त्वानां कर्मरूपं भवति जगदिदं सर्वरत्नप्रपूर्णम् ॥१९१॥

मेष इत्यादि । इह यथासंख्यं **मेषे युग्मे कुलीरे शशी शुक्रो रविर्बभूव । सिंहे भौमः, कन्यायां बृहस्पतिः, तुलायां राहुः, वृश्चिके बुधः, धनुषि** आदौ शनिः, तस्यान्ते 25 केतुः । एवं कुम्भे आगस्तिः, वृषे ध्रु(व इ)ति । **एवं** पूर्वोक्तक्रमेण **भूम्यादिधातोरिति**

---

१. भो. Khams (धातु) इत्यधिकम् ।

परमाणुसमूहस्य सर्वतोऽन्योन्ययोगो मुख्यभावेऽल्पभावः समुदयधर्मादिति। सत्त्वानां कर्मरूपं भवति जगदिदं सर्वरत्नप्रपूर्णं यद् बुद्धबोधिसत्त्वानामिति ॥१९१॥

इदानीं सत्त्वानां कर्मप्रभाव [1]उच्यते, तद्यथा—

ये भूम्यां कल्पवृक्षा रसपरमरसाश्चाणुभिर्वै बभूवु-
रोषध्योऽन्ये रसेन्द्राः सकलरुजहरास्तान् न पश्यन्ति सत्त्वाः।
पश्यन्ति प्राकृतं यत् तृणतरुसलिलं पांशुपाषाणलोहं
प्रेतास्तोयं महाग्निं नरकगतनराश्छेदभेदं समन्तात् ॥१९२॥

ये भूम्यां कल्पवृक्षा रसपरमरसाश्चाणुभिर्वै बभूवुरोषध्योऽन्ये दिव्याः, रसेन्द्राः सकलरुजहरास्तान् न पश्यन्ति सत्त्वा अपुण्यवशेन। पश्यन्ति प्राकृतं यत् तृणतरुसलिलं पांशुपाषाणलोहम्। प्रेतास्तोयं नद्यादिषु ज्वलदग्निरूपं पश्यन्ति। नरकगतनराः पापवशेन छेदभेदं शूलादिकं पश्यन्ति ॥१९२॥

इदानीं बुद्धनिर्माणमुच्यते—

एतेषां मुक्तिहेतोः ससुतजिनपतिः कर्मभूम्यां प्रविश्य
गर्भाधानं हि कृत्वा परमकरुणया बोधिमुत्पादयित्वा।
मारक्लेशान् निपात्य क्षितितलनिलये धर्मचक्रं प्रवर्त्यं
कृत्वा निर्माणमायां पुनरपि भगवान् शुद्धकायः स एव ॥१९३॥

एतेषामिति। एषां सत्त्वानां मुक्तिहेतोः पुण्योदयकाले ससुतजिनपतिरिति बोधिसत्त्वैः सह बुद्धो भगवान् कर्मभूम्यां प्रविश्य सत्त्ववैनेयाय गर्भाधानं कृत्वा, परमकरुणया बोधिमुत्पादयित्वा मारक्लेशान्निपात्य क्षितितलनिलये धर्मचक्रं प्रवर्त्य, कृत्वा निर्माणमायां पुनरपि भगवान् शुद्धकायः स एव यथाऽऽगतस्तथा गतः। एवं बुद्धनिर्माणमाया निर्वाणरूपा सत्त्वानां प्रतिभासते पुण्यवशादपुण्यवशादिति नियमः ॥१९३॥

तस्माज्जातो न नष्टस्त्रिभवमपि गतः शुद्धकायो जिनस्य
सत्त्वार्थं सर्वदा न त्यजति जिनपतिः कर्मणा बाध्यते न।
एवं लोकेश्वरोऽहं त्रिभुवननिलये कर्मभूम्यां स्थितोऽर्कं
सत्त्वानां मार्गदाता नरकभयहरो नान्यदेवः कदाचित् ॥१९४॥

येषां धर्मेऽभिघातं स्वतनुपरतनोश्चानुबन्धः स्वनार्याः
पुत्रात् स्वर्गोऽग्निहोत्रान्मरणमुपगते बान्धवे पिण्डपातात्।

---

१. च. 'उच्यते' नास्ति।

यज्ञे हिंसा पशूनां रणमरणगते स्वर्गलोके प्रवेशः
तीर्थे कायप्रपातात् परपदगमनं सौख्यदास्ते न धर्माः ॥१९५॥

का माता कः पिता ते वरसुतदुहिता भ्रातृभार्याभगिन्यः
कः स्वामी मित्रवर्गो मरणभयहरस्तत्त्वमार्गं विहाय ।
तेनार्क त्वं मुनीनां कुरु मम वचनादेकवर्णप्रवृत्ति 5
येनामी यान्ति मोक्षं त्वृषय इह मयाधिष्ठिताश्चक्रमध्ये ॥१९६॥

दुःखं दण्डप्रहाराद् यदि भवति तनौ तत्र दण्डोऽपराधी
नायं दण्डः करेण प्रहित इह करस्यापराधः समस्तः ।
नायं चित्तेन चित्तं प्रहितमिह महादुष्टकोपानलेन
तस्मात् कोपानलोऽयं रिपुरिव(ह)जगतो मारितो बोधिसत्त्वैः ॥१९७॥ 10

रागाद् द्वेषादिदोषः प्रवरसुरनृणां स्वेष्टभार्यान्यसङ्गात्
सा तस्योन्मूलनार्थं सकलजिनसुतैः कामदाने प्रदत्ता ।
तस्माद् दानानुरागः समसुखफलदः पुण्यसम्भार एष
जातस्त्रैलोक्यबन्धुर्नरकभयहरः सर्वकालं जनानाम् ॥१९८॥

सत्त्वा रागेण येन प्रलयमुपगतास्तायिनस्तेन मुक्ताः 15
सत्त्वा यद्रक्षयन्ति प्रतिदिनसमये तायिनस्तद् ददन्ति ।
सत्त्वा यन्मोचयन्ति स्वहृदिगतसुखं तज्जिना रक्षयन्ति
तेनेदं दुष्करं स्याज्जिनवरचरितं देवनागासुराणाम् ॥१९९॥

पृथ्वी तोयाग्निवाता गगनगुणमनोबुद्धचहङ्कारजीवा
रूपाद्याश्चक्षुराद्या विषयविषयिणः पञ्च कर्मेन्द्रियाणि । 20
एषां को वर्णज्येष्ठः सपशुनरतनोर्व्यापकानां कनिष्ठो
येन त्वं वर्णज्येष्ठः सनृपनरगुरुर्जातिगर्वाभिमानी ॥२००॥

इतो वृत्तादपरसप्तवृत्तानि सुबोधानि ॥१९४-२०० ॥

इदानीं महारसादिलक्षणमुच्यते—

ताप्यं भूमिश्च तोयं प्रभवति विमला तुत्थकं वह्निरेव 25
वायुर्व्योमिश्रधातुः सचपलशशकं हिङ्गुलं सप्तमं च ।

काक्षीकासीसगन्धं समगगनचलं वह्नितोयं शिलालं
गौरी पृथ्वी गतं यल्लवणमुदधिजं सैन्धवं कृष्णचौल्लम् ॥२०१॥

ताप्यमित्यादि। इह माक्षिकं महारसं भूमिस्वभावम्, चकारान्महारसम्। विमला तोयस्वभावा, तुत्थकं वह्निस्वभावम्, चपलो वायुस्वभावः, रसकः शून्यस्वभावः,
5 शशको हिङ्गुल[श्च] ज्ञान[1]धातुस्वभाव इति महारसाः सप्त। तत उपरसाः काक्षिकमिति ज्ञानधातुस्वभावम्, कासीसमाकाशस्वभावम्, [215b] गन्धकं वायु[2]धातुस्वभावम्, मनःशिला वह्निस्वभावा, तालकं तोयस्वभावम्, गैरिका भूमिस्वभावेति षडुपरसाः।
T 464 ततः पञ्च लवणानि—गतम्, सामुद्रम्, सैन्धवम्, कृष्णलवणम्, चुल्लिकालवणं पृथिव्यादिस्वभावं यथाक्रमेण ॥२०१॥

10 एतानि क्ष्मादियोनौ पुनरपि नवसारं यवक्षारसञ्ज्ं
सौभाग्यं काचजातं खचलशिखिजलक्ष्मास्वरूपाणि तानि।
पृथ्वी शैलोदकं स्यात् शशिजलमुदकं वह्नितोयं च वह्नि-
र्वायुः शून्यस्वरूपा विषजलमपरा कर्तरी त्रिस्वभावा ॥२०२॥

ततः पञ्च क्षाराणि—नवसारम्, यवक्षारम्, सर्जिकाक्षारम्, टङ्कणक्षारम्,
15 काचलवणक्षारं यथासंख्यमाकाशादिस्वभावम्। ततः पञ्च तोयानि—शैलोदकं पृथ्वी-स्वभावम्, चन्द्रोदकं तोयस्वभावम्, उष्णोदकं वह्निस्वभावम्, विषोदकं वायुस्वभावम्, कर्तर्युदकमाकाशस्वभावम्। सा च कर्तरी त्रिविधा—स्पर्शकर्तरी, छायाकर्तरी, शब्द-कर्तरी, साधकच्छेदनादिति ॥२०२॥

भूधातुः पीतमुस्तं जलशिखिमरुतः शक्तुकं शृङ्गिकृष्णं
20 शून्याख्यं कालकूटं ह्युपविषमपरं पञ्चधा वेदितव्यम्।
पाषाणा जीवरूपा विविधफलसमा मुण्डशङ्खादिरूपा-
स्तेषां लोहानि षड् वा घनजमपि तथा देवकान्तं चतुर्धा ॥२०३॥

ततः पञ्च विषाणि—पीतमुस्तं भूधातुस्वभावम्, शक्तुकं तोयधातुस्वभावम्, शृङ्गी वह्निस्वभावम्, कृष्णविषं वायुस्वभावम्, कालकूटं शून्यस्वभावम्। उपविषमपरं
25 पञ्चधा वेदितव्यमिति। [3]वज्री भूमिस्वभावम्, अर्कस्तोयस्वभावः, धुत्तूरकमग्निस्वभावम्, लाङ्गली वायुस्वभावा, करवीरः शून्यस्वभाव इति। इह पृथिव्यां क्षेत्रपाषाणा नानाजीव-रूपा नानाफलाकृतयः शङ्खादिनानारूपाः, ते च षड्विधाः। येन तेभ्यो धातुभ्यो

१. च. 'धातु' नास्ति। २. च. 'धातु' नास्ति। ३. च. वज्रां।

लोहानि षड्विधानि भवन्ति। [1]तेभ्यः सुवर्णं भवति। एवमन्येभ्यो रूप्याद्यं भवति। घनजमपि चतुर्धा इति। पीताभ्रकलोहं पृथ्वीस्वभावम्, श्वेतस्य तोय[2]स्वभावम्, रक्तस्य वह्निस्वभावम्, कृष्णस्य वायुस्वभावमिति। एवं देवलोहमिति। एवमयस्कान्तलोहम्। एवं भ्रामकस्य वायुस्वभावम्, चुम्बकस्य पृथ्वीस्वभावम्, [3]कटुकस्याग्निस्वभावम्, द्रावकस्य तोयस्वभावमिति। तेषां द्रावकाणां नाना स्वभावाः। केचिद्वज्रवैक्रान्तका इति वज्रद्रावका अभ्रद्रावकाः। एवं केचिद्धेमद्रावकाः, एवं रौप्यताम्रलोहानां द्रावकाः। ते विडोपभोगास्तेभ्यो लोहं न पातयेदिति ॥२०३॥ 5

सिद्धोऽसिद्धो रसश्च द्विविध इह भवेद् वेधकोऽवेधकश्च
सिद्धो लोहस्य वेधी पुनरपि स तनोर्वेधको भक्षितश्च।
योऽवेधी सूतकः स प्रभवति सरसो जारितः सारितश्च 10
लोहे वेधानुवेधी सकलरुजहरः पूतिलोहं विहाय ॥२०४॥

तत्र रसो द्विधा—सिद्धोऽसिद्धश्च भवति। लोहादीनां वेधकः सिद्धः, पातालादिषु कूपेषु स्थितः। अवेधको यः स पारदः स सूतकः प्रभवति रसो लोहादीनि जारितो बीजेन सारितः सन्निति प्रतिसारितोऽनुसारितो लोहे वेधानुवेधी भवति। भक्षितः सकलरुजहरो भवति। पूतिलोहं विहायेति नागवङ्गाभ्यां विना हेमादि जीर्णः सन्निति। इति रसो- 15 परसादिनियमः। एषां माक्षिकादीनां रसवादग्रन्थोक्तविधिना सर्वेषां शोधनं कृत्वा तत उक्तकर्मणि देयाः, अन्यथा अशुद्धा द्रव्यक्षयं कुर्वन्ति रसोपरसाः। एवं हेमतार- शत्रवोऽपि न देया हेमतारमध्ये, हेमतारकार्ये मित्रं देयम्। लोहमारणे शत्रवो देया इति शास्त्रोक्तविधिना। एवं ताम्रं तीक्ष्णमप्यशुद्धं हेमतारे न देयम्। नागवङ्गं न मृतं देयं यत्र कुत्रचित्। मृतं लोहनिर्वाहणे निरुत्थानं लोहं मारयेत्। ताम्रादिकं सजीव- 20 निर्वाहणे महारसोपरसं शत्रुं दत्त्वा निर्वाहयेत्। तारहेमयोर्मित्रमिति बीजकार्ये ॥२०४॥

इदानीं रसस्वभाव उच्यते—

पूर्वं धूमस्वभावैर्व्रजति शिखिगतो जारितः स क्रमेण
शब्देनैवोत्प्लुतेन प्रभवति स पुनः कम्पनिष्कम्प एव।
वेधी शब्दी प्लुती न प्रभवति स पुनः सूत्रवेधी सकम्पो 25
निष्कम्पः कुन्तवेधी त्रिविध इह पुनः सारितः सारणाभिः ॥२०५॥

---

१. भो. ḥGaḥ Sig Las (केभ्यश्चिद्)। २. च. 'स्वभावम्' नास्ति।
३. भो. ḥDren Byed (कर्षकस्य)।

पूर्वमित्यादि। इह पूर्वं धूमस्वभावैर्व्रजति शिखिगतो यः स जारि[216a]तः क्रमेण शब्दं कृत्वा व्रजति बालः, प्लुतेन व्रजति कुमारभूतः, प्रकम्पेन व्रजति प्रौढः, वृद्धो निष्कम्पो वेधानुवेधी यदा-भवति। अत्र वेधी लोहस्य शब्दी बालो न भवति, प्लुती च न भवति, किन्तु पत्रलेपेन मृद्वग्निना किञ्चित् क्रामयेदिति कुमारः। एवम्—

बालः[श्च] पत्रलेपेन कुमारोऽप्यन्धमूषया।
युवानः कुन्तवेधेन वृद्धो वेधी यथेच्छया॥

एवं वेधी शब्दी प्लुती च प्रभवति स पुनः पूर्वं यो धूमगामी पत्रवेधी, सकम्पः कुन्तवेधी। सः पुनस्त्रिविधसारणाभिर्वक्ष्यमाणाभिः सारितो वृद्धो भवति, स यथेप्सितेन लोहं विद्धयति। इति रसगुणनियमः॥ २०५॥

इदानीमोषधीगुणमुच्यते—

दिव्यौषध्या बलेन प्रभवति बलवान् जारितः सर्वलोहान्
कोऽसौ तासामभावे क्षितितलनिलये यः करोत्यस्य बन्धम्।
बद्धे स्यात् खेचरत्वं मरणमपि तथा भक्षिते नाशमेति
ज्ञानाभावे रसेन्द्रः क्षितिपतिभिरयं साधनीयः प्रयत्नात्॥२०६॥

दिव्येत्यादि। इह सर्वत्र रसशास्त्रे वज्रवैक्रान्तकस्पर्शाद् दिव्यौषधीसंयोगाद् रसोऽभ्रकं निर्मुखं जरतीति तेन वज्राभ्रकद्रावकाः पाषाणाः, तेषां स्पर्शेन विडेनेति दिव्यौषध्यो रसौषध्यो वक्ष्यमाणाः, तासां बलेन प्रभवति बलवान् जारितः सर्वलोहान् अभ्रकादीन्। कोऽसाविति। तासां दिव्यौषधीनामभावे क्षितितलनिलये योऽस्य सूतकस्य बन्धं करोति। दारिद्र्यरागापहरणं बद्धे स्यात्। खेचरत्वं नृणाम्, मरणमपि तथा भक्षिते नाशमेति यस्य प्रभावतः। तस्माद् ज्ञानाभावे रसेन्द्रो रोगापहरणार्थं क्षितिपतिभिरयं साधनीयो रसेन्द्र इति नियमः॥ २०६॥

द्रव्यं तेषामनेकं व्ययमपि च भवेद् गीतवाद्याभियोगे-
स्तन्नष्टं यन्न दग्धं नृपरसविषये धर्मकार्ये न दत्तम्।
यो द्रव्यं पापहेतोर्व्ययमपि कुरुते तेन तत् पापबन्ध-
स्तस्मात् सत्त्वार्थहेतोर्व्ययमपि सकलं बोधिसत्त्वः करोति॥२०७॥

अपरवृत्तेनापि सुबोधेनेति॥ २०७॥

इदानीं दिव्यौषधीलक्षणमुच्यते—

या लेपात् ताम्रपत्रस्य हरति सहसा कालिकामौषधीं तां
धन्याः पश्यन्ति भूम्यां सकलरुजहरां जारणीं लोहजातेः ।
अन्याभिर्योऽस्य बन्धः प्रभवति नियतो वर्षकालान्तरैः स
स्वेदैः संन्यासयोगैरधिकरस भवेदेकसाहस्रवेधात् ॥२०८॥　5

या लेपादित्यादि । इह ताम्रपत्रस्य या लेपमात्रादग्निक्षिप्तस्य कालिकां सहसा तत्क्षणाद् हरति, ओषधीं तां दिव्यां महारसतुल्यां धन्याः पश्यन्ति भूम्यां सकलरुजहरां भक्षितां जारणीं लोहजाते रसबन्धनाय । अन्याभिरोषधीभिर्योऽस्य सूतकस्य बन्धः प्रभवति नियतो वर्षकालान्तरैरिति द्वादशवर्षैः, सः स्वेदैः संन्यासयोगैरधिकरसो भवेद् बन्धः । एकसाहस्रवेधादूर्ध्वं वेधो न भवतीति नियमः ॥ २०८ ॥　10

सर्वासामोषधीनामतिकटुकरसैः क्षारवर्गाम्लवर्गैः
सन्धानं काञ्जिकेन प्रभवति हि सदा मर्दनस्वेदनार्थम् ।
श्वेतानां तारकार्ये पुनरपि कुसुमैर्वापितैर्बीजशुद्धि-
र्द्वन्द्वं सौभाग्यकाचाखुहयखरविषैः स्नेहसेको मृदुत्वे ॥२०९॥

रम्भाचित्रादिभस्माश्वगजनरजलैः सप्तधा शोधितैश्च　15
सर्वक्षारान् कटूंश्चापि पुना रूपरसान् शोधितान् भावयेत्तान् ।
भूयो भूयोऽग्नितापैः पुनरपि शतधा भावयेच्छोषयेच्च
एवं शङ्खस्य चूर्णं शतपुटितमिदं गन्धकं भावितं च ॥२१०॥

लोहानां द्रावणार्थं भवति विडमिदं सूतकस्याष्टमांशं
दोलास्वेदोऽष्टरात्रं रसहृदयगतं द्रावयेद् यावदेव ।　20
क्वाथात् तीव्रो मलश्च प्रभवति बलवान् मर्दितो जारितोऽसौ
एके लोहे द्रुते स्याद्रविशशिवपुषा रञ्जयेत् सर्वलोहान् ॥२११॥

स व्यापी सारितश्च क्रमति समहतैर्नागरङ्गैः ससिक्थैः
एवं यः सूतकस्य प्रतिदिनं कुरुते कर्मभिर्वक्ष्यमाणैः ।
बन्धं कालान्तरेण स्फुटगुरुघनतां सर्वदोषप्रमुक्तं　25
तस्य व्याधिं समृत्युं हरति वरतनो सर्वदारिद्रचदुःखम् ॥२१२॥

अस्माद् वृत्तादपरवृत्तचतुष्टयं सुबोधम् ॥ २०९–२१२ ॥

इदानीं रसरक्षणार्थं जम्भलपूजोच्यते—

हस्तार्धे हेमपद्मे वसुदलसहिते कर्णिकागर्भमध्ये
वज्रं शुद्धेन्द्रनीलं सुरयमधनदे पद्मरागेन्द्रकान्तः ।
पृष्ठे कर्केतरत्नं शिखिदनुकहरे त्वायसं ताम्रतारं
हेमं वायव्यपत्रे कनकपटलजा कर्णिकायां च पिष्टी ॥२१३॥

5

हस्तार्ध इत्यादि । इह हस्तार्धे वितस्तिमात्रे हेमपद्मेऽष्टदले कर्णिकायां गर्भमध्ये **वज्रं शुद्धहेम्ना** बन्धयेत् । पूर्वपत्रे इन्द्रनीलम्, दक्षिणपत्रे पद्मरागम्, पश्चिमे कर्केतरत्नं पीतम्, उत्तरे चन्द्रकान्तरत्नम् । अथ आग्नेय्यां तीक्ष्णं बन्धयेत्, नैर्ऋत्ये ताम्रम्, वायव्ये **स्वर्णम्**, ईशाने रौप्यमिति । हेमाभ्रकपिष्टी कर्णिकायां वज्रोपरि स्थापयेत् ॥ २१३ ॥

10

तस्या मूर्ध्नि द्विहस्तं सनकुलवरदं जम्भलं हेमजं च
गर्भे पत्रेऽष्टदेव्योऽम्बुजवरदकरा हेमजास्तारजा वा ।
मौलौ रत्नेशबुद्धो मणिवरदकरो यक्षिणीनां तथैव
हंहाद्या ह्रस्वदीर्घा दिशिविदिशिदलेष्वष्टवर्णाः क्रमेण ॥२१४॥

तस्याः पिष्ट्या उपरि **द्विभुजं** जम्भलं सुवर्णेन कृतं वामे नकुलहस्तम्, दक्षिणे

15

वरदहस्तम्, चतुरङ्गुलमुष्णीषमानेन । एवं **पत्रेष्वष्टयक्षिण्यः कमलवरदहस्ता हेमजा-**

T 465

स्तारजा वा । इह यदि जम्भलस्तारजस्तदा यक्षिण्यो हेमजाः, यदा जम्भलो हेमज-स्तदा यक्षिण्यस्तारजाः । एवं यदा स्वर्णकमलं तदा तारकुण्डम्, यदा तारकमलं गर्भे तदा हेमकुण्डं जलदानाय भवति । **मौलौ रत्नेशबुद्धो मणिवरदकरो यक्षिणीनां**[216b] **तथैव** । एवं सप्रज्ञो जम्भलो वसुधारासहितो हलाहलवत् । तयोर्बीजं कर्णिकायां हं [1]हा

20

जम्भलवसुधारयोः । एवं पूर्वदेव्यां [2]ह्रीं, अग्नौ ह्रीः, दक्षिणे [3]ह्लं, नैर्ऋत्ये [4]ह्लीः, उत्तरे [5]हु, ईशे हूः, पश्चिमे [6]ह्लृ वायव्ये [7]ह्लॄ । तारा स्पर्शवज्रा, पाण्डरा रसवज्रा, मामकी रूपवज्रा, लोचना गन्धवज्रा, वज्रधात्वीश्वरी वसुधारा इति । द्रव्यार्थं सर्वधातवो महारत्नमुद्रिताः सनायकाः कर्तव्या इति नियमः ॥ २१४ ॥

गन्धैः पुष्पैस्त्रिसन्ध्यं प्रतिदिनसमये पूजयित्वेन्दुकुण्डे

25

ॐ स्वाहान्ताद्य मध्ये जमिति भल जलेन्द्राय तोयं प्रदेयम् ।
मन्त्रेणानेन राजन् प्रमुदितमनसा वादिना रक्षणार्थ-
मेवं रक्षाविधानान्नहि हरति रसं भूतनाथोऽहिनाथः ॥२१५॥

१. भो. हाः । २. च. हिं । ३. च. हूं । ४. च. हॄ । ५. च. हुँ । ६. च. ह्लः ।
७. च. ह्लॄ ।

ततो गन्धैर्धूपैः पुष्पादिभिः पूजयेत् प्रतिदिनं त्रिसन्ध्यायां रौप्यकुण्डे। ततोऽष्टोत्तरशतं चुल्लकेन तोयं देयमनेन मन्त्रेण—ॐ जम्भलजलेन्द्राय स्वाहा इति। प्रमुदितमनसा वादिना रसरक्षणार्थं जलं देयम्। अनेन रक्षाविधानेन न हि हरति रसं भूतनाथोऽहिनाथो नागराजः। एवमन्येऽपि ये रसापहारिणो दैत्या न हरन्ति रसं वज्रधराज्ञया जम्भलरक्षणेनेति ॥ २१५ ॥ 5

इदानीं रसजारणमुच्यते—

इष्टा क्षाराम्लवर्गैर्दशदिवसरसं मर्दयेत् स्वेदयेच्च
कल्कस्थं पातयित्वा पुनरपि च ततः क्षेपयेत् सर्वकालम् ।
भूयस्तत्पातकल्के यदि म्रियति रसो जारयेत् सोऽपि तत्र
सूतो भुक्तः स्वयोनिं स च पुनरपरां सर्वयोनिं प्रभुङ्क्ते ॥२१६॥ 10

इष्टेत्यादि। इह प्रथमं इष्टचूर्णं लवणं दत्त्वा वीजपूरकाद्यम्लेन रसं मर्दयेद् दशदिनं यावत् स्वेदयेच्च। ततो मुख्यान्यरसं गृहीत्वा शेषोदकं शोषयित्वा कल्कस्थं रसं पातयित्वा पुनरपि तस्मिन्नेव रसे क्षेपयेत् सर्वकालमिति। मर्दितस्य सूतस्य यत् कल्कं भवति, तत्सकलं पातनीयं रसग्रहणाय। भूय इति पातिते रसे यदि रसो न पतति, तदा तस्मिन्नेव कल्के रसो मृतः संध्मातः ग्राह्यापरलोहेन सार्धं सोऽपि जारयेत्, तत्र शोधितः सूतः स्वयोनिं भुक्तः सन् स पुनरपरां सर्वलोहानां योनिं भुङ्क्त इति ॥२१६॥ 15

इदानीं सर्वलोहसंकरजारणोच्यते—

नागं तीक्ष्णारताम्रं पटलजमपरं क्षेत्रजं वा विशुद्धं
तुल्यं ह्येकत्र ध्मातं सितघनजसमं तारकार्ये च वङ्गम् ।
षष्ट्यंशं ग्रासमादौ द्रुतमपि च ततो वर्धयेदेकवृद्ध्या 20
पादांशं यावदेव प्रभवति हि ततश्चाधिकं न प्रदेयम् ॥२१७॥

नागमित्यादि। इह लोहान्येवं परस्परं जारयन्ति तेन संकरं कारयेत्। नागं तीक्ष्णम्, आरं ताम्रं पटलजमभ्रकलोहं क्षेत्रजं वा नानापाषाणलोहं तीक्ष्णादिस्थाने विशुद्धम्। एतल्लोहपञ्चकं समभागिकमेकत्र ध्मातं संकरलोहं भवति हेमकार्ये। रसायनकार्ये नागं न देयम्, चतुर्लोहसंकरं कुर्यात्। तारकार्ये श्वेताभ्रकलोहं वङ्गं द्वाभ्यां सह 25 तारं जारयेत् तारकार्ये। एवं संकरं कृत्वा रसं संशोध्य नानाजारणीययन्त्रेषु नौकायन्त्रं श्रेष्ठम्, तेन नौकायन्त्रे रसं क्षेपयेत्। ततो रसात् त्रिंशदंशं गृहीत्वा खरलशिलायां संकरपिष्टिं कारयेत्। मूलरसस्य षष्ट्यंशं लोहेन। एवं षष्ट्यंशं ग्रासमादौ दत्त्वा नौकायन्त्रे मृण्मये ततो रसोपरि नेत्रकर्पटं दत्त्वा उपरि पूर्वोक्तं सन्धाय काञ्जिकं दत्त्वा नौकां तुषगोकर्षचूर्णिताग्नौ स्थापयेत्। काञ्जिके शोधिते पुनः काञ्जिकं देयं निरन्तरम्। एवमेकदिनेन 30 द्वाभ्यां वा ग्रासं जरति। ततो जीर्णे सत्यपरं द्विगुणं तेनैव क्रमेण देयम्, पुनर्जीर्णे

ज्ञात्वा कर्पटे गालितस्य यदि पिष्टिर्न कर्पटे दृश्यते तदा जारित उच्यते। एवं ग्रासं **वर्धयेद् यावत् पादांशं** ग्रासं भक्षयति, तदुपरि न वर्धयेदधिकं न प्रदेयमिति प्रतिषेधः। तदूर्ध्वं पूर्वोक्तं बीजमनेन विधिना ॥ २१७ ॥

पक्षैकेन द्विगुण्यं जरति पुनरसौ बीजमेवं विशुद्ध-
मेवं द्वित्र्यष्टगुण्यं जरति पुनरसौ जारितः सद्विडैश्च।
चक्रस्वेदोऽप्यजीर्णे प्रभवति हि रसस्याष्टरात्रं हि यावत्
स्पर्शैर्दिव्यौषधीभिर्जरति शिखिगतो निर्मुखं ह्यत्र लोहम् ॥२१८॥

पक्षैकेन द्विगुणं जरति पु[217a]**नरसौ** रसो **बीजमेवं विशुद्धम्**, **एवं** बीजं **द्वित्र्यष्टगुण्यं जरति पुनरसौ जारितः सद्विडैश्च** पूर्वोक्तैरिति। अथाजीर्णं भवति तदाऽ**जीर्णे चक्रस्वेदः** कर्तव्यः, गोस्तनाकारमूषायां रसं कृत्वा भूम्यां निधापयेत्, अङ्गुलत्रयं यावन्न दृश्यते। ततो बाह्ये चक्राकारं खानि कृत्वा [1]तद् गोकर्षचूर्णैः पूरयित्वाऽग्निर्देयः। तेन **चक्रस्वेदेनाष्टदिनैः** सविडो रसो मूषायामजीर्णदोषं त्यजति, ततः पुनर्नौकायन्त्रे क्षेपणीयः। एवं वर्षमेकमादिं कृत्वा द्वादशवर्षपर्यन्तं वेधानुवेधीकरणाय जारयेत् सर्वलोहादीनि। अथ पुण्यवशात् **स्पर्शै**र्मिलन्ति, दिव्यौषध्यश्च द्रावका जारकाश्च, तदा स्पर्शद्रावकचूर्णविडै**र्दिव्यौषधीभिः** पूर्वोक्ताभिरग्निस्थोऽप्यभ्रकलोहं **निर्मुखं जरति**, तेनातिबलो रसो भवति ॥ २१८ ॥

अभ्राल्लोहेऽष्टगुण्यं बलमपि च भवेत् तद् द्रुतौ चाष्टगुण्यं
तस्माद् बीजेऽष्टगुण्यं पुनरपि च ततो वज्ररत्नेऽष्टगुण्यम्।
एवं लोहानि रत्नान्युरसकरसाञ् जारयेद् वह्निमध्ये
आवर्तं यावदेति प्रभवति स ततोऽनेकलक्षप्रवेधी ॥२१९॥

अभ्रकादभ्रकलोहे जीर्णेऽष्टगुण्यं बलं भवति। तस्य द्रुतौ ग्रस्ते सति तस्याप्यष्टगुण्यं बलम्, **तस्माद्** द्रुतेरष्टगुण्यं **बीजे** जीर्णे भवति। तस्याष्टगुण्यं **पुनरपि** बलं **वज्ररत्ने** च जीर्णे इन्द्रनीलादिके, इति बलनियमः। **एवं लोहादीन्यग्निमध्ये जारयेद् यावदावर्तमेति प्रभवति स ततोऽनेकलक्षप्रवेधी**। तस्य [2]मारणाद्यं न कर्तव्यम् ॥ २१९ ॥

स्पर्शौषध्योरभावे जरति वरविडैर्मर्दनैः स्वेदनैश्च
निष्कम्पो यावदेव प्रभवति हि ततः सारणा हेमतुल्या।
भूयोऽन्या द्वित्रिगुण्या द्रुतकनकरसैः क्षेपितैस्तैलसूते
द्रव्यार्थेऽष्टाङ्गनागं द्रुतकनकरसे क्षेपणीयं प्रयत्नात् ॥२२०॥

---

१. भो. 'तद्' नास्ति। २. भो. sGyur Bar Byed (परिवर्तनं)।

स्पर्शौषध्योरभावे जरति वरविडैः पूर्वोक्तैः, मर्दनैः स्वेदनैश्च निष्कम्पो यावदेव प्रभवति हि ततः सारणा हेमतुल्येति। इह जारितो रसो ज्वलदङ्गारे दत्तो यदि न कम्पं कृत्वा गच्छति, तदा निष्कम्पो यः स गोस्तनाकारमूषायां प्रक्षिप्य एरण्डतैलमुपरि दापयेद् यावद्रसो निमज्जति। ततो हेमरसतुल्यं द्रावयित्वा द्रव्यार्थेऽष्टांशं नागं दत्त्वा रसोपरि क्षिपेत्, तेन सारितो भवति। पुनरप्यनेनैव क्रमेण द्विगुणस्वर्णेन प्रतिसारितो भवति, त्रिगुणेनानुसारितो भवति। एवं त्रिधा सारितो वेधीभवति लोहबलानुरूपेण सहस्रपर्यन्तमिति। ततस्ताम्रं द्रावयित्वा रसं चूर्णयित्वा सिक्थकेन संवेष्ट्य मृतनाग-वङ्गाभ्यां सह तत्र क्षिपेत्, तेन क्रामति वेधी च भवति, तारे वा हेम्नि वेति जारणा-नियमः ॥ २२० ॥

इदानीं संन्यासबन्ध उच्यते—

हेमं तीक्ष्णाहि ताम्रं फणिदरदशिलागन्धकैर्मारयित्वा
रङ्गेन्दुं तालताप्यैर्घनजमपि तथा हेमतारस्य कार्ये।
तुल्यं क्षारा विषं(डं) वै लवणमुपरसा लोहतुल्यश्च सूतः
पित्ताम्लैर्मर्दयित्वा दशदिनमपि तत् क्षेप्य पाषाणमध्ये ॥२२१॥

षण्मासं भूमिगर्भे ह्युपरि सशिखिना स्वेदितः सर्वकालं
घोषाकृष्टस्य वेधी प्रभवति स रसः षोडशांशेन भूयः।
ताम्रेन्दुं हेमतुल्यं शुभकनकमिदं वादिनां दुःखनाशं
शुद्धं ताम्रं हि विद्धं रजतमपि भवेद् दत्ततारेऽष्टमांशैः ॥२२२॥

हेममित्यादि। इह हेमं नागेन मारयेत् प्रतिवापेन तीक्ष्णं दरदेन पुटयोगेन, अहि-र्नागं मनःशिलायां मारयेत्। ताम्रं गन्धकेन मारयेद् हेमकार्ये। तारकार्ये श्वेतमाक्षिकेन तारं मारयेत्, तालकेन वङ्गं मारयेत्, घनजमपि श्वेताभ्रकलोहं माक्षिकेन मारयेत्। ततोऽमृतलोहतुल्यानि चत्वारि क्षाराणि, एषां समग्राणामभावे त्रयो द्वौ वा विडं च तुल्यम्, लवणानि तुल्यानि, उपरसान् शत्रुधर्मिणः, लोहतुल्यः सूतकः, सर्वमेकीकृत्य पित्तैर्मत्स्यादीनामम्लैर्बीजपूरकादीनां दशदिनं मर्दयित्वा तत्सर्वपाषाणखण्डान् संपुटे प्रक्षिप्य ततो भूम्यां निधाप्य उपरि अग्निना स्वेदितः सर्वकालं षण्मासं यावदिति। ततो बद्धो भवति। ततः षण्मासात् [217b] तस्य ताम्रस्य वेधो भवति। षोडशांशेन पुनस्तदेव विद्धं ताम्रं रौप्यं हेमतुल्यभागं कृत्वा पुटेनोद्घाटयेत्। शुभकनकमिदं भवति वादिनां दुःखनाशमिति। अथ तारादिसंन्यासेन बन्धः, तदा शुद्धं ताम्रं विद्धं तारं भवति, अष्टांशेन तारे दत्ते सतीति संन्यासबन्धनियमः।

अथादिबुद्धोक्तो गोलकबन्ध उच्यते—इह हेमकार्ये पीताभ्रकादिकमभ्रकं किञ्चि-ज्जारयेत्, [1]सकलं वा अर्धं वा। तारकार्ये श्वेताभ्रकम्। ततो हेमकार्ये नागेन पिष्टं

---

१. भो. mÑam Pa (समं)।

कारयेत्, तारे वङ्गेन । ततो हेमपत्रेण तं वेष्टयेत् । तारपत्रेण तारकार्ये । तथा हेमपत्रोपरि मनःशिलां पिष्ट्वा गोमूत्रेण तया प्रलेपो देयः । ततो बाह्ये दरदेन । ततः कुम्भकारमृत्तिकया वेष्टयेत्, ततः शुष्के पुनर्गोमयेन वेष्टयेत्, पुनस्तीव्रातपेन शुष्कं कृत्वा गोकर्षाग्निना मृदुपुटं देयम् । ततो भस्मनोऽपकृत्य मृद्गोलकं कोष्ठिकायां तीव्राङ्गारैर्धमेत्, यावन्महारसोपरसहेमनागपिष्टीः समरसीभवन्ति । ततः शीतीभूतं गोलकं भेदयित्वा मध्ये यत्सुवर्णेन सह पिष्टिकया यद्योगेन गोलकबन्धः, तदेव ताम्रे चतुष्षष्ट्यंशेन क्षिप्तं पूर्ववद् हेम तारं वा भवतीति गोलकबन्धो मूलतन्त्रे ॥ २२१-२२२ ॥

इदानीं क्षेत्रलोहैर्बन्ध उच्यते—

पाषाणा ये धरण्यां फलतनुसदृशाः शङ्खमुण्डादिरूपा-
स्तद्योनिं तेषु दत्त्वा घृतमधुसहिता धामयेत् तीव्रवातैः ।
शुद्धिं कृत्वा निषेकैः पुनरपि च पुनष्टङ्कणक्षारवर्गै-
र्ज्ञात्वा तल्लोहयोनिं द्विगुणमपि रसे वादिना जारणीयम् ॥२२३॥

पाषाणेत्यादि । इह **पृथिव्यां ये पाषाणा** नानाजीवाकारा नानाफलाद्याकाराः, **तदेव योनिस्तेषां दत्त्वा** जीवानां जीवमांसं फलानां फलचूर्णं शङ्खाकारादीनां शङ्खादिचूर्णं दत्त्वा तेषां चूर्णं तेन चूर्णेन सार्धं **घृतमधु**टङ्कणसहितवटकान् कृत्वा लोहपातनवस्त्रेण **तीव्रं धामयेत्,** यावल्लोहं पतति । पुनर्निषेकोद्धृते पुनष्टङ्कणं दत्त्वा शोधयेद् यावद्विशुद्धं भवति । एवं **शुद्धिं कृत्वा तद्योनिं ज्ञात्वा** तीक्ष्णं ताम्रं वा हेमेन सह द्वन्द्वं कृत्वा तदेव **वादिना द्विगुणं जारणीयम्** ।

पूर्वमभ्रकं जारयित्वा संमुखं वा निर्मुखं वा, ततोऽन्यानि लोहादीनि जारणीयानि । एवं माक्षिकं ताम्रं स्वर्णं जारयेत्, तुत्थकं ताम्रं स्वर्णं वा, राजावर्तकताम्रं स्वर्णं वा, शशकताम्रं स्वर्णं वा । इह यथा क्षेत्रपाषाणानां लोहं पातयेत्, तथा माक्षिकादीनां विमलादीनां शोधयेत् । ततः पूर्वकर्मकराणि भवन्ति, अन्यथा द्रव्यं विनाशयन्ति ।

अथादौ वादिनां जीवनोपायः कथ्यते, येन भुक्तमात्रमक्लेशेन [जीर्णं] भवति । इह जारितरसेन पत्रलेपेन हेमर्द्धिका भवति, असारितेन कुमारेण बालेन वा । अत्र पुनस्त्रिभागिकादलैकं हेमद्वयेनोच्यते । अत्र प्रथमं ताम्रं लवणकाञ्जिकेन पत्रं कृत्वा निषेकयेद् यावच्चूर्णं भवति । ततस्तोयं दत्त्वा लवणदोषमपहृत्य ततः शोषयेत् । ततः सैन्धवं षोडशांशेन दत्त्वा बीजपूरकाद्यम्लेन मर्दयित्वा पुटे पाचयेत् । एवं पुनः पुनः सैन्धवं दत्त्वा पुटे पाचयेत् सप्ताष्टवारम्; [218a] यावद् इष्टकाधूलिसदृशं किञ्चित् श्यामं भवति । ततो मधुघृतटङ्कणेन वटिकां कृत्वा पूर्ववल्लोहं पातयेत् । ततो मलरहितमर्धमात्रं लभेत । पुनस्तदेव पत्रं कृत्वा गन्धकेन पादांशं दरदं दत्त्वा पुटैर्मारयेत् । तच्चूर्णं पुना रसेनाष्टांशेन सह रसद्विगुणं गन्धकं रसार्धेन दरदं दत्त्वा मर्दयेदम्लेन, पुनः स्वेदयेत् । खर्परे पुनर्मर्दयेत् सप्ताहम् । तदेव संकीर्णमुखवृत्तभाण्डे कुम्भकारघटिते प्रक्षिपेत् । ततो

भाण्डमुखं कुम्भकारमृत्तिकया मुद्रयेत्। भाण्डस्यापि बाह्यलेपो देयोऽङ्गुलैकोच्छ्रितो नालिकेरप्रमाणः, विस्तारेऽधिको न देयः। तत आतपे शोषयेत्। पुनरुपरि गोमयेन लेपयेत्, पुनः शोषयेद् यावद् गोमयं शुष्कं भवति। ततः पुटेन पाचयेत्। एवं ताम्रचूर्णमालिङ्गय रसो म्रियते, ताम्रं च निर्दोषं भवति, परस्परयोगादिति। ततस्तारस्य पादांशं स्वर्णं दत्त्वा स्वर्णद्विगुणं ताम्रं दत्त्वाऽभ्रमूषायां धमेद्यावत् सर्वं समरसं भवति। 5
ततः शीतीभूते कपालिकामपहृत्य पुनः पादांशं स्वर्णं दत्त्वा स्वर्णद्विगुणं ताम्रं पूर्ववद्धामयेत्, ततः शीतीभूते कपालिकामपहृत्य हेमार्धेन हेमं भवति पुटद्वयेन विशुद्धमिति।

अथापरः प्रयोग उच्यते—एतच्चूर्णं हेम्नि द्विगुणं वा त्रिगुणं वा निर्वाहयेत्। तेन पादांशेन रसे पिष्टिकां कृत्वा इष्टकगर्भायां प्रक्षिप्य उपरि गन्धकचूर्णं दत्त्वा, तदुपरि पिधानं दत्त्वा, तदुपर्यङ्गारान् धमेत् क्षणमात्रम्। ततः शीतीभूते पुनः पुनः पिष्टिसु(?) तुल्यं गन्धकं दत्त्वा निर्दहेदष्टवारान्। ततो रसो हेमालिङ्गयति, न मुञ्चति। 10
ततस्तारस्य पादांशं बीजं दत्त्वा तदेव ताम्रं तारसमं दत्त्वाऽभ्रमूषायां धमेत्। ततः शीतीभूते कपालिकामपहृत्य तद्दलं पत्रं कारयेत्। तथा पिष्ट्या पत्रलेपं कारयेत्। ताम्बूलपत्ररसेन क्रामणार्थमुपरि लेपयेत्। ततश्चुल्लितले निधापयेत्। अङ्गुलोपरि मृत्तिकां दत्त्वा, उपरि वह्निना गृहपाकादिकं कर्तव्यं दिनत्रयं यावत्। तत उद्धृत्य 15
पुनः पादांशं बीजं दत्त्वा उद्धरेत्। तत्पत्रं तदा दलं भवति, सार्धकेन विशिष्टं स्वर्णं भवतीत्यादिबुद्धभगवतोक्तम्, अपरं विस्तरं न लिखितम् ॥ २२३ ॥ T 467

इदानीं शरीरार्थिनां रसायनमुच्यते—

सप्ताहं कोष्ठशुद्धिस्त्रिफलसमरसं क्वाथितेनोदकेन
औषध्या मारितैर्वै घृतमधुसहितैर्लोहचूर्णैः ससूतैः। 20
गोदुग्धैः शालिभक्तैर्भवति नवचिरैः पक्षमध्ये नराणां
भुक्तैः शाकाम्लहीनैर्लवणविरहितैर्मत्स्यतैलाग्निमुक्तैः ॥२२४॥

सप्ताहमित्यादि। इह यः कश्चिद् बद्धरसं भक्षयति, तदा तेन प्रथमं **कोष्ठशुद्धिः** कर्तव्या। सा च **त्रिफलासमभागक्वथितेनोदकेन** विरेचनं कर्तव्यम्। लवणाम्लरहितं शालिभक्तं दुग्धेन पथ्यं कर्तव्यम्। तत **औषध्या मारितैर्लोहचूर्णैरि**ति निर्गुण्ड्या 25
मारितैस्तीक्ष्णचूर्णैः, **घृतमधुसहितैः ससूतैः** सुमृतसूतकतुल्यैः, तदेवाक्षमात्रं प्रतिदिनं भक्षणीयं पथ्यं **गोदुग्धैर्नवचिरैरि**ति प्रथमगोप्रसूतैः, **भुक्तैः** पुरातनैश्चिरैरिति। एवं **पक्षमध्ये** कोष्ठशुद्धिर्भवति, **शाल्यादिभिर्भक्तैः शाकाम्लहीनैर्लवणविरहितैर्मत्स्यतैलाग्निमुक्तैः**। ततो रसं भक्षयेत् ॥ २२४ ॥

ज्ञात्वा साहस्रवेधी शतगुणितशतं कोटिवेधी च यावद् 30
भोक्तव्यः सर्षपांशात् प्रतिदिनसमये चान्तिमो राजिकांशः।

प्रासादं भूमिवेश्म प्रभवति रहितं शीतवातातपैश्च
षण्मासैर्दिव्यदेहं वलिपलितगतं मध्यमोऽयं करोति ।।२२५।।

*[218b]ज्ञात्वा साहस्रवेधी शतगुणितशतमिति लक्षवेधी, कोटिवेधी च यावद् भोक्तव्य इति। सहस्रवेधी प्रतिदिनं यवमात्रं भोक्तव्यः। लक्षवेधी सर्षपमात्रम्, कोटिवेधी राजिकामात्रम्। एवं चान्तिमो राजिकांशः। इह रसभक्षणाय प्रासादं धरण्यन्तःप्रासादं वा शीतवातातपैश्च रहितं ज्ञेयम्। एवं मध्यमो रसः सहस्रवेधी षण्मासैर्दिव्यदेहं वलिपलितरहितं करोति। अन्यत् प्रतिदिनमेकेन गृह्यमाणेन सिद्धरसः करोति ॥ २२५ ॥

इदानीं रसाजीर्णभैषज्यमुच्यते—

कर्कोटी देवदाली त्रिकटुकबृहती निम्बकिराततिक्तं
क्वाथं पानं ह्यजीर्णे त्रिदिनमपि पुनर्लङ्घनं च प्रकुर्यात् ।
एवं चन्द्रोदकाद्ये शिखिनि विषजले शैलभल्लाततोये
दुर्गन्धाभूमिशैलेऽपि च विषपललेष्वन्यकल्पेषु मन्त्री ।।२२६।।

कर्कोटीत्यादि। इह यदा रसाजीर्णं भवति, तदा बन्धकर्कोटी देवदाली त्रिकटुकबृहती निम्बपत्रं किराततिक्तम्, एभिरष्टावशेषं तोयं क्वाथं क्वथनमित्युच्यते। तदेव पानं ह्यजीर्णे। दिनत्रयं लङ्घनं यावदत्यन्तक्षुधा भवति। ततः पथ्यं कर्तव्यम्। एवं चन्द्रोदके पीते त्रिदिनलङ्घनम्, ततः पथ्यम्। अग्न्युदके तेनैव प्रतिदिनं स्नानम्, तेनैव भुक्तं गदितम्। तदेव पानं षण्मासं वर्षमेकं यावद् दुग्धभक्तं भोक्तव्यम्। विषजलेऽप्येवं पथ्यम्, शैलोदकेऽपि, भल्लाततोयेऽपि। एषामक्षमात्रं पानं कर्तव्यम्। अधिकं मृत्युकारीति। एवं दुर्गन्धाभक्षणे, भूमिशैलभक्षणे विषपललेषु मांसे, अपरच्छल्लपल्लवादिककल्पेष्वयं विधिः पथ्यादिकः ॥ २२६ ॥

इदानीं रसायनौषधीनां लक्षणमुच्यते—

या भुक्ता तीव्रमूर्च्छां ददति विषसमामौषधीं तां समस्तां
कृत्वा चूर्णं तदल्पं घृतमधुसहितं भक्षयेत् तद्वदेव ।
सत्त्वा यां भक्षयन्ति स्फुटनरपशवः सौषधी सिद्धिदा न
तेषां या मृत्युदात्री परमभयकरा योगिनां साऽमृतं स्यात् ।।२२७।।

---

* मातृकाया 218b पत्रस्यात्यन्तमस्पष्टत्वात् यत्र तत्र भोटपाठसाहाय्येन पुनरुद्ध्रियते ।

या भुक्तेत्यादि। इह छल्लपल्लवादीनां लतादीनां **या भुक्ता सा तीव्रमूर्च्छां ददाति** विषतुल्यम्, तस्या औषध्याः पञ्चाङ्गं गृहीत्वा सूक्ष्मचूर्णं कारयेत्। तदेव चूर्णमल्पमात्रं प्रत्यहं घृतमधुना **सहितं भक्षयेत्, तद्वदेवेति** शेषः पूर्वविधिः। इह **सत्त्वा यां भक्षयन्ति** मूर्च्छां न ददाति, सा औषधी सिद्धिदा न, **तेषां** सत्त्वानाम्। **या मृत्युदात्री परमभयकरा योगिनां** सिद्धिदा सा, **मन्त्रध्यानबलेनेति** ॥ २२७॥　5

इदानीमपररसायनमुच्यते—

तुल्यं दण्डोत्पलस्य स्वतनुदलरसैः शालिपर्ण्यब्जसार्योः
कान्ते पात्रेऽयसा च त्रिदिनमपि रसं गन्धकं मर्दयित्वा।
षण्मासं भक्षयेद् यः प्रतिदिनसमये टङ्कपादप्रमाणं
मुक्तः कुष्ठादिरोगैर्वलिपलितगतो द्व्यष्टवर्षाकृतिः सः ॥२२८॥　10

तुल्यमित्यादि। इह **तुल्यं गन्धकं दण्डोत्पलस्य रसं च शालिपर्णीरसेन, उत्पलसारीरसेन** वा, **अयस्कान्तपात्रे अयोगुडिकया** मर्दयेत् **त्रिदिनम्।** एवं **मर्दयित्वा प्रतिदिनं भक्षयेत्। टङ्कपादप्रमाणमिति** माषमेकं भक्षयेत्। स **मुक्तः कुष्ठादिरोगैर्वलिपलितरहितः, षोडशः** षोडशवार्षिकोऽत्र भवतीति ॥ २२८॥

इदानीं रसमारणे सिद्धौषध्युच्यते—　15

वोक्काणाकाशशक्तुः प्रचलमपि रसं मारयेत् कीरचञ्चु
अन्यौषध्या मृतस्यारुणमपि फलजं हेम कान्तं च तुल्यम्।
एकीकृत्वा सजीवे मलविगतरसे गोलकः षट्पलैश्च
पूर्वोक्तात् कान्तपात्राद् वलिपलितहरः क्वाथितो मस्तकेन ॥२२९॥

वोक्काणेत्यादि। इह यः संकोचं मारणं च इच्छति रसस्य, तेनेमा औषध्यो गवेषणीयाः—**वोक्काण** इति। हिङ्गु, येन नीलसूत्रे लिप्ते श्वेतं भवति। तेन मूषायां लिप्ते रसो म्रियते। **आकाश** इत्यम्बरः, भेरुण्डविष्ठा, स च द्विधा—छत्राम्बरः शिखाम्बरश्च। अग्निमध्ये क्षिप्तस्य मूर्ध्नि प्रसारितवस्त्रं यदि शिखाकारेण वस्त्रं भेदयित्वा धूमो निश्चरति, स उत्तमः। न(यः) छत्राकारेण धूमस्थो वसति स मध्यमः, तेनापि संकोचबन्धः। एवं **शाक्तुकविषम्।** एवं **कीरचञ्चु** इति शुकतुण्डकं[1] रक्तस्रावी, लोके रक्तनिष्कर्षकत्वेन प्रसिद्धम्।　20　25

---

१. हिङ्गुलस्यैकं भेदान्तरम्।

*[219a] एवं कंपद्मवान्(?)यस्योपरि पादं स्थापयेत्, दिवाऽऽकाशे नक्षत्राणि पश्येत्। एतानि न चेत्, अन्यौषध्या व्याजेन मारितरसस्य, अरुणं ताम्रम्, फलजम् इत्यभ्रकलोहम्, हेम अयस्कान्तलोहं च तुल्यं कृत्वा जारयेत्। चतुष्पले रसे तदर्धेन द्विपलेन युक्तः षट्पलः कार्यः। शेषोऽध्यात्मपटलोक्तविधिः ॥ २२९ ॥

इदानीं सहस्रवेध्यादिरसानां स्वभाव उच्यते—

षण्मासैर्द्व्येकमासैः सनृपदशदिनैः सप्तरात्रत्रिरात्रै
रात्रेणैकक्षणेन प्रभवति च तनौ सिद्धिरस्य प्रभावात्।
सामान्या मध्यमा च प्रलयविरहिता चोत्तमा ज्ञानसिद्धिः
पुंसां हीनोत्तमानां स्वकृतशुभवशान्नैकजन्मानुवेधात् ॥२३०॥

षण्मासैरित्यादि। इह पूर्वोक्तविधिना भक्षितश्चेत् सहस्रवेधी षण्मासैः कायं परमं करोति। ततः षण्मासैरस्य प्रभावात् तनौ सिद्धिर्भवति। मासद्वयेन दशसहस्रवेधिप्रभावात्, एकमासेन लक्षवेधिप्रभावात्, [सनृपदशदिनैः] षोडशदिनैश्चतुस्त्रिंशल्लक्षवेधिप्रभावात्, सप्तदिनैः षष्टिलक्षवेधिप्रभावात्, त्रिदिनैरशीतिलक्षवेधिप्रभावात्, एकदिनेन कोटिवेधिप्रभावात्, एकक्षणेनेति झटिति सिद्धिः। इयं रसादिसिद्धिः सामान्या खङ्गादिसिद्धिर्विद्याधरसिद्धिश्च। कर्ममुद्रासिद्धिर्ज्ञानमुद्रासिद्धिश्च मध्यमा। एतयोरुत्तमा स्वपरहिता परमज्ञानसिद्धिः प्रज्ञाबिम्बभावनया। साऽपि येन या सिद्धिर्भवति पुंसां स्वकृतशुभवशात् तत्र वासना भवति नैकजन्मानुवेधात् ॥ २३० ॥

इदानीं द्रव्यार्थिनां निधिपरीक्षोच्यते—

खङ्गान्नृस्नेहदीपः प्रकटयति निधिं पद्मसूत्रस्य वर्त्या
वल्लीवृक्षान्यभावः प्रतिदिनसमये यत्र तिर्यग्विरोधः।
तस्मिन् भूताधिपस्य प्रतिदिनसमये मन्त्रजापं प्रकुर्याद्
यावत् खन्ये निमित्तं प्रभवति हि ततो मन्त्रिणां द्रव्यसिद्धिः ॥२३१॥

खङ्गादित्यादिना। इह भूम्यां या वल्लयो वृक्षाश्च अन्यभावा आभासन्ते, तत्र द्रव्यं भवति। अपरं च यत्र सदा तिर्यग्विरोध आभासते स्वस्थानार्थं कलहः, तत्र द्रव्यं विद्यते, तत्र सुलोहखङ्गस्योर्ध्वं छुरिकोर्ध्वं वा रक्तपद्मसूत्रस्य वर्ति कृत्वा नृस्नेहेन दीपयित्वा भूताधिपतिमन्त्रसाधनपटलोक्तेनाभिमन्त्र्य भूमिं पश्येत्। यद्यग्निजिह्वा अधः पतेत् तदा द्रव्यमस्ति, यदि न पतति तदा नास्ति। एवं यदि पतेत् तदा तस्मिन् स्थाने त्रिसन्ध्यं भूताधिपतिमन्त्रजापं कुर्यादाभासं यावत्। ततो मन्त्रिणां खन्यसिद्धिः। अन्यथा क्लेशो भवति। असुरै रक्षितं द्रव्यं केनाऽप्युद्धर्तुं न शक्यते ॥ २३१ ॥

---

* इतः परं मातृकायाः २१९ पत्रस्याभावात् २३७ श्लोकटीकायां 'शक्तित्रयं वा कुल तत्' इति यावत् पाठो भोटपाठादुद्धृत्य संस्कृते उट्टङ्क्यते।

आदौ षड्योनिमन्त्रा जिनपतिकुलिशाधिष्ठिताः साधनीया
यक्षिण्यः साधयित्वा पुनरवनितले क्षेत्रवादाश्च साध्याः ।
नागिन्यः साधयित्वा त्वमृतफलरसा ओषधीः साधनीया
डाकिन्यः साधयित्वा परमभयकराश्चासुराः साधनीयाः ॥२३२॥

नागाद्यान् साधयित्वा प्रवरसुरनरा योगिना साधनीया 5
धूमाद्यान् साधयित्वा मरणभयकरा मध्यमा साधनीयाः ।
प्राणाद्यान् साधयित्वा द्रवितशशधराद्बिन्दवः साधनीयाः
सत्सौख्यं साधयित्वा सहजजिनतनुः सर्वगा साधनीया ॥२३३॥

सत्त्वानां मृत्युदं यत् तदमृतमखिलाधिष्ठितं सिद्धमन्त्रै-
र्या गम्या सिद्धिरिष्टा त्रिभुवननिलये ध्यानगम्या च सा तु । 10
यज्ज्ञानं दुर्लभं वै सुलभमपि सुखाधिष्ठितं वज्रपद्मे
एवं ह्येवं स वज्री ददतु समसुखं प्राणिनां सर्वकालम् ॥२३४॥

अतो वृत्ताद् वृत्तत्रयं सुबोधम् ॥ २३२-२३४ ॥

इदानीं **कुलागमोक्तः** कुलभेद उच्यते—

राह्वग्नी चन्द्रसूर्यौ क्षितिजलहुतभुग् वायुशून्यं चतुष्कं 15
भुक्तं यत् पञ्चकं वै ग्रहगण इतरः षट्कमस्माच्चतुष्कम् ।
मेरोर्द्वीपानि दिक्षु प्रभवति विषयाः पञ्चकं बाह्य उक्तं
सत्त्वादीनां गुणानां त्रिकमपरमिदं देहमध्ये तथैव ॥२३५॥

राह्वित्यादिना । इह **कुलागमः**—पश्चिमगृहात् चतुष्कं पञ्चकं षट्कं चतुष्कं पञ्चकं त्रिकमिति **बाह्ये** देहे च विशोध्य ततो देवानां पूजा इति । अथ बाह्ये **राहुः** 20 **कालाग्निश्चन्द्रः सूर्यश्च** । एषां योगश्**चतुष्कम्**, चतुष्पीठमित्यर्थः । ततो लोकधातु-पूरणार्थं **पञ्चकं क्षित्यादि** रसपर्यन्तम् । ततो **ग्रहगण इतर** इति **चतुष्कं** वर्जयित्वा भौमः, बुधः, बृहस्पतिः, शुक्रः, शनैश्चरः, केतुश्चेति । एषां गणः **षट्कम्** । ततो **मेरो**-श्चतसृषु **दिक्षु** चत्वारि **द्वीपानि** चतुष्कम् । गन्धादिपञ्च**विषयाः पञ्चकम्** । सत्त्वादयः त्रयो गुणास्त्रिकम् । एवं यथा बाह्ये **सत्त्वादयो गुणास्त्रिकं** पीठादि, **तथा देहमध्ये**ऽपि 25 वेदितव्यम् ॥ २३५ ॥

विज्ञानानन्दरक्तामृतमिति कमलादौ चतुष्कं च पञ्च
तस्मादस्थ्यादिकं यत् सकलमपि ततश्चक्षुराद्यं हि षट्कम् ।

हस्तौ पादौ चतुष्कं करचरणगतं पञ्चकं चाङ्गुलीनां
तासां सर्वत्रिकं यत् क्रम इह सकलो वेदितव्यः कुलेऽस्मिन् ॥२३६॥

इह कायोत्पत्त्यर्थं मातृपद्मे आलयविज्ञानमिति राहुः, आनन्दः कालाग्निः, रक्तमित्यग्निरजः सूर्यः, अमृतमिति शुक्रं चन्द्रः, एते आदौ कायकुलोत्पत्तिहेतुचतुष्कम् । चतुष्कात्तस्माद् अस्थ्यादि पञ्चकम् । अस्थि पृथिवी, पित्तं जलम्, रक्तं तेजः, मांसचर्म वायुः, मज्जाऽऽकाशम्, सकलमपि पञ्चकम् । ततश्चक्षुराद्यं हि षट्कमिति । [चक्षुः] भौमः, श्रोत्रं बुधः, जिह्वा बृहस्पतिः, नासा शुक्रः, कर्मेन्द्रियं शनैश्चरः, मनइन्द्रियं केतुरिति षट्कम् । तथैव हस्तौ पादौ चतुष्कमिति वामहस्तः पूर्वद्वीपम्, दक्षिणहस्तो दक्षिणद्वीपम्, दक्षिणपादः पश्चिमद्वीपम्, वामपाद उत्तरद्वीपमिति चतुष्कम् । करचरणगतं पञ्चकं चाङ्गुलीनामिति । अत्राङ्गुष्ठः गन्धः, तर्जनी रसः, मध्यमा रूपम्, अनामिका स्पर्शः, कनिष्ठिका शब्दः पृथिव्यादिगुणद्वारेण । तासां पञ्चाङ्गुलीनां पर्वत्रिकं त्रिकमुच्यते—प्रथमं पर्व सत्त्वगुणः, मध्यमं पर्व रजोगुणः, अन्तिमं पर्व तमोगुणः । तमोऽन्ते नखपर्व प्रधानम्, क्रम इह सकलो वेदितव्यः कुलेऽस्मिन् इति युज्यते ॥ २३६ ॥

इदानीं पीठादीनां भेद उच्यते—

भूभृत् तत्त्वप्रभेदा रसगुणितरसा भानवो विंशतीति
भेदाः षष्टिर्नराणां सकलतनुगता रन्ध्रषट्चन्द्रसंख्याः ।
सर्वे ते पिण्डिताः स्युस्त्रिगुणनवचतुःपञ्चशः प्राणचाराः
सञ्चारो यो ग्रहाणां स च पुनरितरैर्योगिनीचार उक्तः ॥२३७॥

भूभृदित्यादि । इह चतुष्पादवशाच्चत्वारो भेदाः । एवं पीठभेदाः । भूभृद् इति षोडश । तत्त्वप्रभेदाः पञ्चविंशतिः समुदयतः, यत्र एकोऽस्ति तत्र पञ्च । रसगुणितरसा इति षड् गुणिताः षट् षट्त्रिंशद् भवन्ति, षट्चरणवशाद् भौमादीनां भेदाः, चतुर्थे भानवो द्वादशभेदाः, हस्तपादसन्धिभेदा द्वादश, बाह्ये चन्द्रो द्वादशराशिभेदात् । पञ्चमे विंशतिरित्यङ्गुलीसंख्याः । तथैवाङ्गुलिपर्वणां षष्टिः भेदाः । एते भेदा नराणां देवानां च सकलतनुगता न विमलतनुगता इत्यर्थः । सर्वे ते पिण्डिता रन्ध्रषट्चन्द्रसंख्या इत्येकोनसप्तत्युत्तरशतं भवन्ति । सर्वे ते पिण्डिता इति, तैः पिण्डितैः स्युस्त्रिगुणनव इति सप्तविंशतिः । पुनरपि शिवशक्त्योर्भेदा आधाराधेयधर्मेण चतुःपञ्चाशदिति वेदितव्यम् । अस्मिन् कुले यो प्राणनाड्यां सञ्चारो ग्रहाणां नक्षत्रसञ्चारः, एषां यः सञ्चारः स च इतरैर्बाह्यवचनरतैः, योगिनीसंचार उक्तः । तथोक्तं मूलसूत्रे—

[1]या शक्तिः सा भगेति त्रिविधगतियुता त्र्यक्षरा त्रिस्वभावा
तत्र श्रीओड्डियानो वरकलसहितो मध्यसंस्थोऽतिदीप्तः ।
तत्सव्ये कोण एव प्रकटितनिलये पीठजालन्धरश्री-
र्वामे श्रीपूर्णपीठं पशुजनभयदं कामरूपं तदग्रे ॥
[2]एवं संव्यापि पीठं भयकरजननी व्यापिनी रुद्रशक्ति- 5
स्तन्मध्ये लिङ्गमेवं परमसुखकरं बिन्दुरन्तःस्थनादम् ।
नित्यानन्दातिशान्तं भवति [च] विचितं मन्थनैः षड्विधैस्तां
धत्ते यैतान् त्रिकामान् वरतनुचपलां कुब्जिकाख्यां नमामि ॥

इति युज्यते सर्वसत्त्वानां सहजवाहिनी [शक्तिः] भग इति । इति [भग]स्वरूपम् ।
अथ कुलसूत्रदेहनिष्पत्तिकारणम्, तद्यथा— 10

[3]कूकारः कामरूपे पुलिगतपुलिका जालपीठेऽग्निजिह्वा
ओड्रः श्रीमध्यपीठे त्रिविधपथगता देवशृङ्गाष्टकाराः ।
पञ्च स्युः सिद्धयोऽपि डरलकसहिता पञ्च देव्यश्चतस्र-
स्तस्मात् शक्तित्रयं वा कुलतरु[220a]जननीं कुब्जिकाख्यां नमामि ॥

---

1. Gaṅ Šig Nus Ma Bhaga Šes Bya De Ni rNam gSum bGrod lDan Yi Ge gSum Daṅ Raṅ bŠin gSum.
De La dPal lDan Oḍiyāna mChog Gi Cha Daṅ bCas Pa dBus Su gNas Śiṅ Śin Tu ḥBar.
De yi gYas Zur Ñid Du Rab Tu gSal Byas gNas La dPal lDan Jalīdhara Šes Bya sTe.
gYon Du dPal lDan Gaṅ Baḥi gNas Te Phyugs Kyi sKye Bo ḥJigs Byed Kāmarūpa De Yi rTser.

2 De lTar Kun Nas Khyab Byed gNas Daṅ ḥJigs Daṅ sKyed Ma Khyab Byed Ma Ni Drag Poḥi Nus Ma sTe.
De Yi dBus Na rTags Ni mChog Gi bDe Byed Thig Le Nāda Khoṅ Na gNas Śin rTag Tu dGaḥ.
Śin Tu Ši Ba Yod De De Yi sTeṅ Na Srub Ma rNam Pa Drug Gis rNam Par Phye Baḥo.
ḥDod Pa gSum Po ḥDi rNams Byed Ciṅ mChog Gi Lus bsKyod Kubjikā Šes Pa La Phyag ḥTshal.

3, Kāmarūpar Kū Yig Pu Li La gNas Pu Li Ka rNams Jālaḥi gNas Su Me lCe Ñid.
dPal lDan dBus Kyi gNas Su Oḍḍā rNam Pa gSum Gyi Lam bGrod Lha Yi Rwa Co Ṭa Yig rNams.
De Yi Grub Pa rNam Kyaṅ lÑa sTe Ḍa Ra La Ka Daṅ bCas De rNams Lha Mo bŠi Daṅ lÑa.
De Phyir Nus Ma gSum Mam Rigs Kyi lJon Śiṅ sKyed Ma sGur ḥKhyog Ma Šes Bya Ba La Phyag ḥTshal.

इति परमरहस्यं न ज्ञातं भक्ष्या(क्ष्य)दैत्यैर्मारकायिकैः कौलैरिति कुलसूत्र नियमः ॥ २३७ ॥

इदानीं बुद्धानां धर्मसंग्रह उच्यते—

ज्ञानाकाशद्वयं वै पुनरपरमिदं यानरत्नत्रयं च
क्लेशा मारा विहाराः पुनरपि नियताश्चर्द्धिपादास्रवाश्च ।
वैशारद्यानि सत्यानि पुनरपि ततः स्मृत्युपस्थानसम्यक्
चत्वारः संग्रहान्ता जिनपतिकुलिशैर्योगिभिर्भावनीयाः ॥२३८॥

ज्ञानेत्यादि। इह कालचक्रे योगिना धर्मसंग्रहं ज्ञात्वा ततस्तन्त्रदेशना कर्तव्या। अन्यथा धर्मसंग्रहं विना कुमार्गदेशना भवति, तेन धर्मसंग्रहो लिख्यते—इह **ज्ञानाकाशद्वयमिति** ज्ञानं ग्राहकं चित्तम्, ग्राह्यं शून्यबिम्बमिति द्वयं प्रज्ञोपायो न भगलिङ्गसंयोगः। अनेन सत्त्वार्थकृतेन यानत्रयदेशको भवति, धर्मसंग्रहवेत्ता भवति। अत्र **यानत्रयं** श्रावकयानम्, प्रत्येक[1]बुद्धयानम्, सम्यक्सम्बुद्धयानम्। गम्यतेऽनेनेति यानम्। **रत्नत्रयं वै** बुद्धरत्नम्, धर्मरत्नम्, संघरत्नम्। देशको देशनाऽध्येषक इति त्रीणि मूलानि, तद्यथा—बोधिचित्तोत्पादः, आशयविशुद्धिः, अहङ्कारममकार[2]त्यागः। तथा बुद्धशर[णं धर्म]शरणं संघशरणमेवं त्रिशरणगमनमिति। **क्लेशाः** सत्त्वानां चत्वारो रागद्वेषमोहमानाश्चेति। **माराश्चत्वारः** स्कन्धक्लेशमृत्युदेवपुत्रा इति। एषां विनाशका बुद्धानां चतुर्ब्रह्मविहारा मैत्रीकरुणामुदितोपेक्षा इति। एवं चतुर्विमोक्षाः शून्यताऽनिमित्ताऽप्रणिहिताऽनभिसंस्कारा इति। चत्वार **ऋद्धिपादाः**—छन्दो वीर्यं चित्तं मीमांसेति। सत्त्वानां चत्वार **आस्रवाः**, तद्यथा—कामास्रवो भवास्रवोऽविद्यास्रवो [3]दृष्ट्यास्रव इति। बुद्धानां **वैशारद्याश्चत्वारः**, तद्यथा—सर्वधर्मारोहणवैशारद्यम्, सर्वधर्मदेशनावैशारद्यम्, निरावरण(नैर्वाणिक)मार्गावतारणवैशारद्यम्, आस्रवक्षयज्ञान-[4]प्रहाणवैशारद्यम्। चत्वारि **सत्यानि**, तद्यथा—दुःखसत्यं समुदयसत्यं मार्गसत्यं निरोधसत्यं चेति। चत्वारि प्रतिशरणानि, तद्यथा—अर्थप्रतिशरणता न व्यञ्जनप्रतिशरणता, ज्ञानप्रतिशरणता न विज्ञानप्रतिशरणता, नीतार्थप्रतिशरणता न नेयार्थप्रतिशरणता, धर्मकायप्रतिशरणता न पुद्गलप्रतिशरणता इति। चत्वारि **स्मृत्युपस्थानानि** कायानुस्मृतिः, वेदनानुस्मृतिः, चित्तानुस्मृतिः, धर्मानुस्मृतिश्चेति। चत्वारि **संग्रहवस्तूनि**—दानम्, प्रियवाक्यम्, अर्थचर्या, समानार्थतेति। अत्रार्थशब्देन महार्थः परमाक्षरस्तस्य [5]चर्या समानार्थता चेति। धर्मदानतो दानम्, चत्वारि धर्मदानानि—अनित्याः सर्वसंस्काराः, दुःखाः सर्वसंस्काराः, निरात्मानः सर्वधर्माः, शान्तं निर्वाणमिति। चत्वारि सम्यक्प्रहाणानि—अनुत्पन्नदोषानामनुत्पादाय प्रहाणं छन्दोत्पादः, उत्पन्न-

१. च. 'बुद्ध' नास्ति। २. भो. Yoṅs Su sPaṅs Paho (परित्यागः)। ३. च. तृष्णा। ४. भो. gNas (स्थान)। ५. भो. Don (अर्थ) इत्यधिकम्।

पापानां कुशलमूलं प्रतिपक्षः [उत्पादः], अनुत्पन्नकुशलानां समुत्पादनम्, उत्पन्नकुशलमूलानां बुद्धत्वे परिणामना चेति चत्वारि। एतानि चतुर्विधानि **जिनवरकुलिशैरिति** कायवाक्चित्तज्ञानविशुद्ध्या निर्माणधर्मसम्भोगस्वाभाविककायविशुद्ध्या **भावनीयानि** लौकिकसिद्धये देवताकाराणीति ॥२३८॥

पञ्चाभिज्ञाबलानि प्रवरजिनपतेर्दृष्टयः पञ्चचक्षु-
रेवं स्कन्धेन्द्रियाणि स्मृतय इति च षट् सप्त बोध्यङ्गपूजा ।
सप्ताप्यष्टाङ्गमार्गाः(र्गान्) प्रति सुशरणता रूपिणोऽष्टौ विमोक्षा
रन्ध्राख्यं वै नवाङ्गं प्रवचनमपरं भूमयो दिक्प्रमाणाः ॥२३९॥

एवं **पञ्चाभिज्ञा** बोधिसत्त्वानां दिव्यं चक्षुः, दिव्यं [220b]श्रोत्रम्, परचित्तज्ञानम्, पूर्वनिवासानुस्मृतिः, आकाशऋद्धिश्चेति । **पञ्च बलानि** – श्रद्धाबलं वीर्यबलं स्मृतिबलं समाधिबलं प्रज्ञाबलं चेति । एवं **पञ्चेन्द्रियाणि** । सत्त्वानां **पञ्चदृष्टयः**—सत्कायदृष्टिः, अन्तग्राहदृष्टिः, मिथ्यादृष्टिः, दृष्टिपरामर्शदृष्टिः, शीलव्रतपरामर्षदृष्टिश्चेति । बुद्धानां **पञ्चचक्षूंषि**— मांसचक्षुर्दिव्यचक्षुर्बुद्धचक्षुः प्रज्ञाचक्षुर्ज्ञानचक्षुश्चेति । **पञ्चस्कन्धा** लोकोत्तराणां बुद्धानाम्—शीलस्कन्धः, समाधिस्कन्धः, प्रज्ञास्कन्धः, विमुक्तिस्कन्धः, विमुक्तिज्ञानदर्शनस्कन्ध इति । लौकिका रूपादयो धातवः पृथिव्यादयः, इन्द्रियाणि चक्षुरादीनि, विषया गन्धादयः, पाय्वादीनि कर्मेन्द्रियाणि, आलापादयः कर्मेन्द्रियक्रिया इति पञ्चकं धर्मधातुना सार्धं सर्वं षट्कमिति । **षडनुस्मृतयः**—बुद्धानुस्मृतिः, धर्मानुस्मृतिः, संघानुस्मृतिः, त्यागानुस्मृतिः, शीलानुस्मृतिः, देवतानुस्मृतिश्चेति । **सप्त बोध्यङ्गानि**—स्मृतिसम्बोध्यङ्गम्, धर्मप्रविचयसम्बोध्यङ्गम्, वीर्यसम्बोध्यङ्गम्, प्रीतिसम्बोध्यङ्गम्, प्रश्रब्धिसम्बोध्यङ्गम्, समाधिसम्बोध्यङ्गम्, उपेक्षासम्बोध्यङ्गम् । **सप्तविधा पूजा**—वन्दना, पूजना, देशना, अनुमोदना, अध्येषणा, याचना, परिणामना चेति । **अष्टाङ्गिको मार्गः**—सम्यक्दृष्टिः, सम्यक्संकल्पः, सम्यग्वाक्, सम्यक्कर्मान्तः, समयगाजीवः, सम्यग्व्यायामः, सम्यक्समाधिश्चेति । **अष्टौ ध्यानविमोक्षाः**—रूपं पश्यति शून्यम्, अध्यात्मरूपं बहिर्धारूपं पश्यति शून्यम्, शून्यमिति बिम्बं सर्वाकारम्, शुभाशुभदृष्टिकृतं पश्यति शून्यम्, आकाशानन्त्यायतनं पश्यति शून्यम्, विज्ञानानन्त्यायतनं पश्यति शून्यं, बिम्बे सर्वाकारे, आकिञ्चिन्यायतनं पश्यति शून्यम्, नैव संज्ञा नासंज्ञायतनं पश्यति शून्यम्, संज्ञावेदितनिरोधं पश्यति शून्यम्, शून्यताभावनायाम् । **अष्टौ रूपिणश्चतुर्महाभूतानि** रूपगन्धरसस्पर्शाश्चेति । **नवाङ्गप्रवचनं** संगीतिकाराणाम्—सूत्रं गेयं व्याकरणं गाथोदानं निदानं वृत्तं जातकं वैपुल्याद्भुतं धर्मसंग्रहाय ॥२३९॥

बुद्धानां दिग्बलानि स्फुटदशवशिता द्वादशाङ्गप्रतीते
रूपादौ वै निरोधो द्विगुणनव तथाऽऽवेणिका बुद्धधर्माः ।

द्वात्रिंशल्लक्षणानि प्रवरजिनपतेर्व्यञ्जनानि त्वशीति-
रेतद् देहे समस्तं विभुपरमपदं मन्त्रिणा भावनीयम् ॥२४०॥

दशपारमितादिदशकानि परमाक्षरज्ञानसिद्धावुक्तानि, अष्टादशाऽऽवेणिका बुद्धधर्मा उक्ताः। अत्र भिक्षूणां द्वादशधूतगुणाः—पैण्डपातिक-त्रैचीवरिक-पश्चात्खलुभक्तिक-नैषद्यिक - यथासंस्तरिक - एकासनिक-अभ्यवकाशिक-वृक्षमूलिक-आरण्यवासिक-श्मशानिक - पांशुकुलिक - नामन्तिकाश्चेति। एवमादौ सर्वधर्मसंग्रहं ज्ञात्वा ततो निजदेहे विभोः परमपदं नपुंसकं मन्त्रिणा भावनीयं साचार्येणेत्यर्थः ॥२४०॥

एकश्चन्द्रस्वरूपं यमकरनयनं युग्मपक्षायने द्वे
लोकाः काला गुणाग्निस्त्रिकमुदधियुगं वेद उक्तश्चतुष्कम्।
बाणा भूतेन्द्रियाणि प्रभवति नियतं पञ्चकं षड्रसर्तु-
र्वाराद्री सप्तसंख्या मुनय इति तथा चाष्टनागा वसुश्च ॥२४१॥

नाडीरन्ध्रा ग्रहा वै निधिरपि नवकं दिग्दशैकादशेशाः
सूर्योऽनङ्गो मनुर्या भुवनतिथिनृपा द्वादशा ह्येकवृद्ध्या।
दोषाश्चाष्टादशैते सकलजिनवरास्ते चतुर्विंशतिश्च
तत्त्वाङ्गं पञ्चविंशद् द्विजक इति भवेद् द्व्युत्तरं त्रिंशदेव ॥२४२॥

अत उपरि गणितसंख्या एकादिचन्द्रादिकासंज्ञाप्रकाशकं वृत्तद्वयं सुबोधम् ॥२४१-२४२॥

इदानीं तन्त्रगुण उच्यते—

सर्वस्मिंस्तन्त्रराजे खलु कुलिशपदं गोपितं वज्रिणा वै
प्रत्यक्षं चादिबुद्धे निगदितमखिलं प्राणिनां मोक्षहेतोः।
तस्मात् तन्त्रोत्तरं वै सकलमविकलं लोकलोकोत्तराभ्यां
श्रीमत्तन्त्रादिबुद्धं परमजिनपतेश्चाभिधानं सुचन्द्र ॥२४३॥

सर्वस्मिन्नित्यादि। इह **सर्वस्मिन्** योगिनीयोग**तन्त्रराजे खलु कुलिशपदं** परमाक्षरसुखं **गोपितं वज्रिणा वै** शाक्यमुनिना। वज्रमित्यभेद्यज्ञानमचिन्त्यं चित्तवज्रम्, [221a] तद् यस्मिन्नस्तीति स वज्री, तेन वज्रिणा। तत्कस्य हेतोः? आर्यविषये बौद्धानां पण्डिताभिमानाद् ये गुरुशुश्रूषया विना पुस्तकं दृष्ट्वा अस्माभिर्वज्रपदं ज्ञातमिति वदिष्यन्ति बौद्धाः पण्डिताः, तेनाहङ्कारेण नरकगमनम्, सेकसंप्रदायाभावात्। तेन [इदं] गोपितम्। तदेव **प्रत्यक्षं चादिबुद्धे निगदितमखिलं प्राणिनां** संभलविषये जन्मिनां

निरहङ्कारचित्तानां **मोक्षहेतोः**। **तन्त्रोत्तरं वै सकलमविकलं** तन्त्रराजं **लोकतन्त्रात्** क्रियातन्त्रात्, **लोकोत्तराद्** योगतन्त्रात्, ताभ्यामुत्तरं लोकोत्तरम्। **श्रीमत्तन्त्रादिबुद्धं परमजिनपतेर्ज्ञानकायस्य सहजस्याभिधानं वाचकम्** ॥२४३॥

इदानीं गुणवतः पञ्चाकारस्तव उच्यते—

यस्यान्तं नादिमध्यं स्थितिमरणभवं शब्दगन्धो रसश्च
स्पर्शो रूपं न चित्तं प्रकृति न पुरुषो बन्धमोक्षो न कर्ता।
बीजं न व्यक्तकालं न सकलभुवने दुःखसौख्यस्वभावं
निर्वाणं निर्निमित्तं व्यपगतकरणं निर्गुणं तं नमस्ये ॥२४४॥

कालं विश्वादिवज्रं पुरुषमनुपमं सर्वगं निष्प्रपञ्चं
कूटस्थं कर्णनासामुखनयनशिरः सर्वतः पाणिपादम्।
भूतान्तं भूतनाथं त्रिभुवनवरधृक् कारणं कारणानां
विद्याद्यं योगगम्यं परमसुखपदं कालचक्रं नमस्ये ॥२४५॥

यस्येत्यादि। इह पञ्चाकारो महाशून्यो वज्रम्, तस्य विज्ञाननिरोधः प्रथमशून्यम्, **यस्यान्तं नादिमध्यं** इत्यादिना **निर्गुणं तं नमस्ये** इति पर्यन्तं "विज्ञानधर्मतातीतो ज्ञानमद्वयरूपधृग्" (ना० सं० ८.२३) इति विज्ञानधर्मतातीतत्वात्, तत्कुले जातानामप्यतीता आकाशादिधात्विन्द्रियादीनाम्। ततः संस्कारनिरोधे द्वितीयं शून्यम्। **कालं विश्वादिवज्रमित्यादि कालचक्रं नमस्य** इति पर्यन्तं सुबोधम् ॥ २४४-२४५ ॥

स्रष्टारं शक्तिरूपं तडिदनलनिभं द्वादशादित्यतेजं
ज्ञानं वज्रावभासं परपदगमनं तं विसर्गं नमामि।
शुक्लं त्रैलोक्यनाथं स्रवति शशधरात् संस्थितं लोकमूर्ध्नि
पीयूषं मृत्युनाशं भवभयमथनं बिन्दुरूपं नमामि ॥२४६॥

चिन्मात्रं मन्त्ररूपं त्रिदशपरिवृतं दुःखसौख्यस्वभावं
साधूनां शान्तरूपं सुकृतमनुभवं दारुणं दारुणानाम्।
यो यत्कर्मविकुर्यात् स्वमनसि विधिवत् तत्फलं तस्य जातं
लोकेशं विश्वरूपं त्रिभुवनजननं वज्रसत्त्वं नमामि ॥२४७॥

एको नैकोऽपि चैकः समविषमसमः सव्यवामाग्रपृष्ठ
ऊर्ध्वाधो वै समन्तात् सित-हरित-महाविश्ववर्णैकरूपः।

ह्रस्वो दीर्घः प्लुतश्चागुण इति सगुणः स्त्री नरश्चानरस्त्री
य: सर्वाधार एक: सुभगवरभगस्ते नमस्ते नमस्ते ॥२४८॥

एवम् "अन्ये ते संस्कारा" इतिवचनाद् वाय्वादीनां धात्विन्द्रियाणां निरावरणता वेदितव्या द्वितीयशून्येन। ततस्तृतीयं शून्यं वेदनानिरोधः स्रष्टारम् इत्यादिना 5 **तं विसर्गं नमामि** इति पर्यन्तम्, "अन्या सा वेदना" इतिवचनात्तेजो धात्विन्द्रियादीनां निरावरणतेति तृतीयं शून्यम्, ततश्चतुर्थं शून्यं संज्ञानिरोधः शुक्लम् इत्यादिना **बिन्दुरूपं नमामि** इति पर्यन्तम्, "अन्या सा संज्ञा" इतिवचनात् तोयादिधात्विन्द्रियादीनां निरावरणतेति चतुर्थं शून्यम्। ततः पञ्चमं शून्यं रूपनिरोधः चिन्मात्रम् इत्यादिना **वज्रसत्त्वं नमामि** इति पर्यन्तम्, "अन्यत्तद्रूपम्" इतिवचनात् पृथिव्यादिधात्विन्द्रियाणां 10 तत्कुलीनानां निरावरणतेति। अस्य विस्तरः प्रथमलोकधातुपटले उक्तः, तेनात्र न वितन्यत इति। "पञ्चाक्षरो महाशून्यः" (ना० सं० १०.२) ततो "बिन्दुशून्यः षडक्षरः" (ना० सं० १०.२) इति धर्मस्यास्याधारभूतो बुद्धबिम्बलक्षणः सर्वत्रैधातुकत्र्यध्ववर्तीति। अस्य निरोधः षट्स्कन्धादयः षट्त्रिंशद्धातवः क्षरज्ञानं सप्तत्रिंशदिति। एषां निरावरणता धर्मकायो धर्मोदय उच्यते। चतुर्थो वज्रः पञ्चाक्षरः। अनयोर्निर्माणं 15 निर्माणकायः। नाना ऋद्धिदर्शको धर्मदेशको ध्वनिः सम्भोग इति। अत्र **एको नैकोऽपि चैकः समविषम** इत्यादिना मध्यमकसिद्धान्तः। **यः सर्वाधार एक** इति सर्वो महाक्षरसुखः, तस्याधार एक आकाशलक्षणः। **सुभग** इत्यैश्वर्यादिगुणात्मकः। **वरभग** इति त्रैधातुकोत्तमः। तेन कारणेन **नमस्ते** शिरसा नम्र इति नमस्कारो भवतु, ते इति तव मञ्जुश्रियः॥ २४६–२४८॥

20 सोऽहं यो मर्त्यलोके व्यपगतकलुषः श्रीगुरुर्वज्रधारी
नूनं तस्यापराधाद् भवति हि नरकं प्राणिनां नात्र चित्रम्।
तुष्टोऽहं तस्य तुष्ट्या कुपित इति महांस्तस्य कोपानलेन
सत्त्वानां सैव मोक्षः समसुखफलदो वन्द्यपूज्यः सुतानाम् ॥२४९॥

कः पापी श्रीगुरोर्यः सुचरणकमलं वन्दते न त्रिकालं
25 कोऽज्ञानी यस्त्रिकालं बहुविधकुसुमैर्मण्डलं नो करोति।
कोऽवीचिं याति शीघ्रं समसुखदगुरोः खेदमुत्पादको यः
कः प्रज्ञाज्ञानलाभी वरगुरुचरणं यो न मुञ्चत्यनष्टः ॥२५०॥

को नष्टो यस्त्रिनाड्यामपि गतमरुता मार्यतेऽनन्तकालं
कः शूरो मारयेद् यः समविषमपथि प्राणमापानवायुम्।
30 को दाता श्रीगुरोर्यो ददति निजतनुं पुत्रदारादि सर्वं
को नीचो वञ्चको यः स्वहृदयकलुषाकृष्टचित्तः शठश्च ॥२५१॥

श्रीमान् श्रीधर्मचक्रे सुरवरनमिते विष्टरे विश्ववर्णे
तस्मिन् बुद्धोपविष्टो गदति नरपते तन्त्रराजादिबुद्धम् ।
चन्द्रप्रश्नावबोधे त्रिदशनरगुरुर्यच्च सत्त्वार्थहेतो-
स्तच्चेदानीं मया ते गदितमपि कलापेऽल्पतन्त्रं हि सूर्य ॥२५२॥

बुद्धोक्तात् कालचक्रं गदितमपि मया स्रग्धरावृत्तबन्धै-
रस्य त्वं देशनां वै कुरु कुलिशधरीं मन्त्रिणां पुण्डरीक ।
प्रज्ञाज्ञानस्य लाभी सरविमुनिकुलं वै यथास्मद्बभूव
एवं सत्त्वा भवन्तु त्रिविधभवगताः कालचक्रप्रसादात् ॥२५३॥

सूर्य त्वं वा नरेन्द्र त्वपरगतभवे कालचक्रैकयोगा-
ज्जातोऽस्मिन् ब्रह्मवंशे यशनृपतिरहं मञ्जुघोषः प्रिया मे ।
श्रीतारा पौण्डरीकः सकलगुणनिधिर्लोकनाथोऽब्जचिह्नो
नालेनेन्दीवरस्य स्वपरगतभवं पश्य सर्वं यथार्थम् ॥२५४॥

नालेनेन्दीवरस्य स्वपरगतभवं वीक्ष्य सर्वं यथार्थं
सूर्यः सार्धं मुनीन्द्रैः समुकुटशिरसा कल्किनः पादपद्मम् ।
हस्ताभ्यां वन्दयित्वा वदति मुनिकुलं रौद्रसंसारदुःखा-
दुद्धृत्य ज्ञानमार्गे परमकरुणया स्थापयेत् त्वेकशास्ता ॥२५५॥

वृद्धोऽपि त्वं कुमारः सकलजिनसुतोऽप्यादिबुद्धस्त्वमादौ
स्त्रीसङ्गी ब्रह्मचारी परमकरुणया लोकबन्धुर्यमारिः ।
सौम्योऽपि त्वं सुवज्री मरणभयहरस्त्वं सदा मारमारो
मुक्तोऽपि त्वं भवेऽस्मिन् प्रविशसि जगतः पाचनार्थं यशस्त्वम् ॥२५६॥

सूर्योऽहं ब्रह्मवंशे मुनिकुलनमितः पातितः पादमूले
सत्त्वानां मोक्षहेतोः प्रकटितमवनौ कालचक्रं समस्तम् ।
कल्कीगोत्रे त्वमर्कः क्षितिपतिनमितः श्रीयशः श्रीकलापे
युष्मत्पादारविन्दं शरणमधिगतो रौद्रसंसारभीतः ॥२५७॥

वैशाख्यां पौर्णिमायां निशिसमयगते वासरे चाप्रविष्टे
मुद्रासिद्धिं गतोऽर्को मुनिजनसहितोऽधिष्ठितो विश्वभर्त्रा ।

सत्त्वानां मोक्षहेतोः सकलभुविगतं चित्तवज्रं यथा मे
सत्त्वानामेव यातु त्रिविधभवगतं कालचक्रप्रभावात् ॥२५८॥

तन्त्रार्थं देशयित्वा परमकरुणया सर्वसत्त्वार्थकर्ता
पुत्रस्याज्ञां ददाति प्रवरगुणनिधिः पुण्डरीकस्य नूनम् ।
5 कर्तव्यं पुस्तकस्थं सकलमविकलं तन्त्रराजं त्वयादौ
टीकां कृत्वा ततो वै परपदगमनं स्वेच्छया लोकबन्धोः ॥२५९॥

ऊर्ध्वं ये बोधिसत्त्वाः परमभयकरा मारपक्षे स्थितानां
दैत्यानां मर्त्यलोके दिशिविदिशिगताः क्रोधराजाः सभार्याः ।
पाताले ये फणीन्द्रा ग्रहपदमशुभं सर्वदा बन्धयन्ति
10 ते सर्वे पालयन्तु प्रतिदिनसमयेऽज्ञानलोकं समन्तात् ॥२६०॥

सत्त्वानां मोक्षहेतोर्जिनपतिगदितं देशितं यन्मया च
तन्त्रं श्रीकालचक्रं लघुतरमखिलं वज्रसत्त्वाधिदैवम् ।
प्रज्ञोपायैकयोगं जिनपतिकुलिशैः षोडशाकारतत्त्वं
सत्त्वाः पुण्येन तेनाक्षरपरमसुखं यान्तु तस्मै नमोऽस्तु ॥२६१॥

15 इदानीं कालचक्रदेशकगुणादिकं सोऽहमित्यादि सर्वं सुबोधम् ॥२४९–२६१॥

[221b] [इति] मूलतन्त्रानुसारिण्यां लघुकालचक्रतन्त्रराजटीकायां
द्वादशसाहस्रिकायां विमलप्रभायां
नानोपायविनेयमहोद्देश-
श्चतुर्थः समाप्तः ।

20 संबुद्धव्याकृतेन प्रवरमुनिगणं स्थापितं बुद्धमार्गे
दत्त्वा प्रज्ञाऽभिषेकं परमकरुणया देशितं कालचक्रम् ।
येनोद्धृत्यादिबुद्धादिदमिषुपटलं मञ्जुवज्रेण तन्त्रं
राज्ञा श्रीकल्किनाऽहं सुत इह यशसः श्रीकलापे नृपोऽस्य ॥

संबुद्धव्याकृतेन प्रमुदितमनसा श्रीयशश्चोदितेन
टीकां श्रीमूलतन्त्रस्फुटकुलिशपदान्वेषिकां तन्त्रराजे ।
कृत्वा पुण्यं यदाप्तं विपुलमतिसितं पुण्डरीकेण दानात्
सम्बुद्धस्तेन लोकः प्रभवतु सकलो वज्रिणो लब्धमार्गः ॥*

। समाप्तेयं टीका ज्ञानपटलस्य ।

॥ समाप्ता विमलप्रभा टीका ॥

---

* च.

ये धर्मा हेतुप्रभवा हेतुस्तेषां तथागतो ह्यवदत् ।
तेषां च यो निरोध एवंवादी महाश्रमणः ॥

देयधर्मोऽयं प्रवरमहायानयायिनः स्थविरम‥‥ स्य यदत्र पुण्यं तद्भवत्वाचार्योपाध्याय-मातापितृपूर्वंगमं कृत्वा सकलसत्त्वराशेरनुत्तरज्ञानफलाप्तय इति ।

महाराजाधिराजश्रीमद्धरिवर्मदेवपादीयसंवत् ३९ सूर्यगत्या आषाढदिने २९

एकोनत्रिंशतिमिते वत्सरे हरिवर्मणः ।
माघस्य कृष्णसप्तम्यामेकादशदिने गते ॥
मृतपातुञ्च‥‥‥शोध्य‥‥ दृष्टतया ।
कनिष्ठाङ्गुलिमादाय पृष्टयेदमुदीरितम् ॥
पूर्वोत्तरे दिशो भागे वेगनद्यास्तु वारिणि ।
पञ्चत्वं भावि भवतः सप्तसंवत्सरैरिति ॥